॥ श्रीरस्तु ॥

श्रीमद्वेदान्तदेशिकग्रन्थमालाया

[व्याख्यानविभागे ~~अष्टमग्रन्थपुटम्~~]

ईशावास्योपनिषद्भाष्यम्, चतुःश्लोकीभाष्यम्, स्तोत्रभाष्यम्, गद्यभाष्यं च ।

पर्यवेक्षकः परिष्कारकश्च

॥ श्रीकाञ्ची प्रतिवादिभयङ्करः अण्णंगराचार्यः ॥

प्रकाशनादि सर्वाधिकारी

विद्वान् अ. संपत्कुमाराचार्यः, M A.

३९, सन्निधिवीथी, कञ्जीवरम् ।

[इदमेव पुस्तकप्राप्तिस्थानम्]

1940

Price ~~0-8-0~~] ॥ एतन्मूल्यं ~~[illegible]~~ ॥ [Postage Extra

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

[व्याख्यानविभागे प्रथमसम्पुटम्]

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्र श्रीमद्वेदान्ताचार्यविरचितम्

॥ ईशावास्योपनिषद्भाष्यम् ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

येनावास्यमिदं सर्वं चेतनाचेतनात्मकम् । विशुद्धसद्गुणौघं तं वासुदेवमुपास्महे ॥ १ ॥

सर्वेशानस्सहजमहिमा सर्वभूतान्तरात्मा सर्वान् दोषान् स्वयमतिपतन् सर्वविद्यैकवेद्यः ।
कर्माध्यक्षः कलुषशमनः कोऽपि मुक्तोपभोग्यस्सिद्धोपायः स्फुरति पुरुषो वाजिनां संहितान्ते ॥ २ ॥

ईशावास्यमिदं सर्वमित्यादि यदनूद्यते । शिष्यं प्रति गुरोरेतद्ब्रह्मविद्यानुशासनम् ॥ ३ ॥
संभूतेर्दाहृतं सर्वं विनियोगपृथक्त्वतः । विद्यार्थं स्यादिति व्यक्तं निबन्धोऽस्य तदन्ततः ॥ ४ ॥

ईशावास्यमिदँ सर्वं यत्किंच जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ १

तत्र प्रथममचिद्विकाराधिष्ठितस्य स्वतन्त्रात्मभ्रमादिपरिजिहीर्षया सर्वस्य परमपुरुषायत्तस्वरूपस्थितिप्रवृत्तिमभिप्रेत्याह—*ईशा **वास्यमिदं सर्वं यत्किञ्च जगत्यां जगदिति** । **इदं**—तत्तत्प्रमाणसिद्धमीश्वरव्यतिरिक्तं चिदचिदात्मकम्, **ईशा**—*ज्ञाज्ञौ द्वावजावीशनीशौ इत्यादिषु जीवादत्यन्तविलक्षणतया प्रख्यातेन **सर्वनियन्त्रा पुरुषोत्तमेन, वास्यं**—व्याप्यमित्यर्थः । सर्वाधारे स्वस्मिन् स्वेन वसनीयं वा । स्मर्यते हि—

* सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततस्स वासुदेवेति विद्वद्भिः परिपठ्यते ॥ इति ।

जगत्यामिति लोकान्तराणामुपलक्षणम् । **जगत्**—स्वरूपतो धर्मतो वा अन्यथात्वं गच्छत् भोग्यभोक्तृरूपं वस्तुजातम् । अतदात्मकं किञ्चिदपि नास्तीति द्रढयितुं—**यत्किञ्चेति** विशेष्यते ।

*इन्द्रियाणि मनो बुद्धिस्सत्त्वं तेजो बलं धृतिः । वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च ॥ इत्युपबृंहितम् । ननु * रूढिर्योगमपहरतीति न्यायादीशोऽत्र रुद्रस्स्यात्, सर्वाद्युपपदाभावाच्च । मैवं, कारणविषयाकाशप्राणादिशब्दवद्रूढेरिह बाधितत्वात्, *एको ह वै नारायण आसीन्न ब्रह्मा नेशानः, * अनपहतपाप्माऽहमस्मि नामानि मे धेहि इत्यादिभिः असर्वकारणत्वेन कर्मवश्यत्वेन च संप्रतिपन्ने रुद्रे सर्वावास्यत्वसर्वाधारत्वादेरसंभवात् । तद्वत्तया प्रसिद्धे अनवच्छिन्नैश्वर्ये सर्वेश्वरे यौगिकोऽयं शब्दः प्रत्येतव्यः । यद्यपि प्रसिद्धवन्निर्देशाभावादाकाशादिवाक्यवैषम्यम्, तथाप्यैन्द्रीन्यायाद्विरुद्धार्थविषयतयैव रूढिभङ्गोपपत्तिः । नचात्र *सर्वत्वमाधिकारिकमिति न्यायः, सङ्कोचादृष्टेः । प्रवाहेश्वरानेकेश्वरपक्षौ तु त्रैकालिकसर्वनिर्वाहकेश्वरप्रतिष्ठापकैः प्रमाणगणैः प्रत्यूढौ । अतः * पतिं विश्वस्यात्मेश्वरमित्यादिप्रसिद्धानन्याधीनैश्वर्यम् * योऽसावसौ पुरुषः इत्यनुवदिष्यमाणं ब्रह्मेशानजनकतया अनन्यथासिद्धवाक्यनिर्धारितम् * एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः इत्यादिषु सर्वान्तर्यामित्वेन प्रख्यातम् तत एव * स ब्रह्मा स शिवः इत्यादिविभूतिभूतानां ब्रह्मशिवेन्द्रादीनां * विश्वमेवेदं पुरुषः इत्यत्र विश्वस्यैव विशेष्यतयोक्तं नारायणमेव सर्वस्य वास्यमीशं वक्तुमुचितमेतद्वाक्यमित्यलमन्यरूढिप्रसङ्गरहितासमस्तपदाध्ययनानभिज्ञाश्रोत्रियचोद्योपालम्भेन । एवं मुमुक्षोरीश्वरपारतन्त्र्यबोधमुत्पाद्य वैराग्यभूषितां वृत्तिमुपदिशति—***तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनमिति** । **तेन**-जगता भोग्यताश्रमविषयेण, **त्यक्तेन**—दोषभूयस्त्वदर्शनात्परित्यक्तेन, उपलक्षितस्सन् **भुञ्जीथाः** । अप्रतिषिद्धयागधर्मोपयुक्तदेहधारणमात्रोपयिकं भोग्यवर्गमित्यर्थप्रकरणाभ्यां सिध्यति । यद्वा, सर्वावास्यत्वेन प्रकृतं निरतिशयभोग्यं वक्ष्यमाणोपायमुखेन भुञ्जीथाः इति याज्यम् । कस्यापि बन्धोरबन्धोर्वा धनं, **मा गृधः** - माऽभिकाङ्क्षः । आह च यमः किङ्करं प्रति * परममुहृदि इत्यारभ्य * शठमतिरुपयाति योऽर्थतृष्णां पुरुषपशुर्न स वासुदेवभक्तः इति । इदं च धनाशाप्रहाणं परमात्मेतरकृत्स्नविषयवैराग्योपलक्षणम् । स्मर्यते हि * परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि इति ॥ १

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २

एवं विदुषः फलसङ्गकर्तृत्वादित्यागयुक्तं नित्यनैमित्तिकरूपं विद्याङ्गभूतं कर्म यावज्जीवमनुष्ठेयमित्याह—***कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः** इति । ब्रह्मविदोऽपि यावद्विद्यापूर्ति जीवनमिष्टं भवतीति ज्ञापनाय सन् योगः । शतमिति च प्रायिकविषयम् । शतं समाः जीवन् अधिकारानुगुणानि कर्माणि कुर्वांस्तेव । न कदाचिदपि विद्याङ्गं कर्म परित्यजेदित्यर्थः । अस्य वाक्यस्य फलसाधनभूतस्वतन्त्रकर्मविषयत्वे विशेषहेत्वभावस्सूत्रितः—*नाविशेषात् इति । अर्थान्तरं च प्रकरणाविरुद्धम् अनन्तरसूत्रोक्तम् * स्तुतयेऽनुमतिर्वा इति । **भाष्यं**—*वाशब्दोऽवधारणार्थः । * ईशावास्यमिदं सर्वमिति विद्याप्रकरणाद्विद्यास्तुतये सर्वदा कर्मानुष्ठानानुमतिरियम् । विद्यामाहात्म्यात्सर्वदा कर्म कुर्वन्नपि न लिप्यते कर्मभिरिति हि विद्या स्तुता भवति । वाक्यशेषश्चैतदेव दर्शयति—*** एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे** इति । त्वयि ब्रह्मविद्याधिकारिणि एवमेवानुष्ठेयार्थः, इतोऽन्यथा नास्तीति व्यतिरेकेणोक्तं दृढीकरणार्थम् । ननु ब्रह्मविदोऽपि कर्मानुष्ठानभावाद्बन्धस्स्यादित्यत्राह— **न कर्म लिप्यते नरे** इति । प्रस्तुते ब्रह्मविदि नरे । *** अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् इति विनियोगपृथक्त्वन्यायेन कर्म न स्वर्गादिफलहेतुर्भवति । विद्यानुपकारकाणां निषिद्धानां च विरक्तेन विवेकिना न बुद्धिपूर्वोपादानसंभवः । संभावितानामपि केषांचित् * नाविरतो**

दुश्चरितात् इत्यादिबलात् स्वानुगुणा निष्कृतिस्स्यात् । तदधिगमाधिकरणे तु प्रामादिकानामेवाश्लेषः परविद्यावतामपि स्थापितः । ज्ञानाग्निदग्धाधिकारो विधिनिषेधानधिकारीति पक्षस्तु न वेदविस्संमतः ॥ २

असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः ॥ ३

वक्ष्यमाणविद्यायां शीघ्रं प्रवृत्त्यर्थमुक्तप्रकारब्रह्मवेदनविधुरतया वित्तैषणायोगाच्च अन्यथाभवद्भिर्ज्ञानानुष्ठानैरात्मघातिनां निरयपातोऽवश्यम्भावीत्याह—*असुर्या...जनाः—इति । **असुर्या** - *असुरस्य स्वम् इति यत्; आसुरप्रकृतीनामनुभाव्या इत्यर्थः । **नामेति** प्रसिद्धौ । ते - नरकसंज्ञिताः भीषणतमाः लोकास्सन्ति । पुनस्तान्विशिनष्टि—**अन्धेन तमसावृताः**—गाढेनान्धकारेण व्याप्ताः । **तान्** - आलोकप्रसङ्गरहितान्, **ते** - स्वात्मघातिनः । **प्रेत्य** - तदानतनदेहादुत्क्रम्य । **अभिगच्छन्ति** - कात्स्न्र्येन निरन्तरं प्राप्नुवन्ति । **येकेच** - देवजातीया मनुष्यजातीया वा, तथा ब्राह्मणक्षत्रियादयो वा । **आत्महनः** - *असन्नेव स भवति, असद्ब्रह्मेति वेद चेत् इत्याज्ञातामसत्कल्पतां स्वात्मानं नयन्तः ; देहपातमुखेन पातकवर्गोपलक्षणमिदम् । **जनाः** - जनिमन्तः ; संसरन्त इत्यर्थः ॥ ३

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४

सर्वाधारत्वेन प्रस्तुतमीश्वरतत्त्वं विरुद्धवदभिलापव्यङ्गितेन विचित्रशक्तियोगेन विशदयति—**अनेजदेकं मनसो जवीय** इति । **अनेजत्** - अकम्पमानम् । **एकं** - प्रधानभूतम्, स्वानधीनस्वसमानद्वितीयरहितं वा, **मनसो जवीयः** - वेगवत्तरमनसोऽप्यतिशयितजवम् । नन्विदं न जाघटीति निष्कम्पत्वं वेगवत्तरत्वं चेति ; मैवं, तात्पर्यवृत्त्या सुघटितत्वात्, सर्वस्य स्वेन नित्यव्याप्तत्वादनेजत्, सर्वदा मनसो गोचरदेशमतिक्रम्य वृत्तेः मनसो जवीय उपचर्यते । एवमुत्तरेष्वपि वाक्येषु भाव्यम् । **नैनद्देवा आप्नुवन् पूर्वमर्षत्**—प्रागेव सर्वान् प्राप्नुवत् देवा हिरण्यगर्भादयो नाप्नुवन् ; एतावन्तं कालं न लेभिरे । विभुत्वेन नित्यप्राप्तमपि कर्मप्रतिबद्धज्ञानाः क्षेत्रज्ञाः विद्याधिगमात्पूर्वं स्वबुद्ध्या न प्राप्नुवन्तीति न विरोधः । यथोक्तं छान्दोग्ये * तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमास्सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः इति । **तद्धावतोऽन्यानत्येति तिष्ठत्** - * यः पृथिव्यां तिष्ठन् * य आत्मनि तिष्ठन् इत्यादिक्रमेण तत्सर्वत्र तिष्ठदेव धावतो गरुडादीनप्यत्येति, यावद्यावद्धावन्ति जविनस्तावतः परस्तादपि वर्तत इत्यर्थः । यथोच्यते—

* वर्षायुतशतेनापि पक्षिराडिव संपतन् । नैवान्तं कारणस्येयाद्यद्यपि स्यान्मनोजवः ॥ इति ।

अन्येषां क्वचित्तिष्ठतां धावदतिक्रमणं नास्तीति वैचित्री । अन्यदपि किञ्चिदाश्चर्यमित्याह—**तस्मिन्नपो मातरिश्वा दधातीति** । तस्मिन्नवस्थितः अप्रतिबन्धानुगुणकाठिन्यादिरहितोऽपि वायुः अपो बिभर्ति । सर्वाधारभूतेन सर्वेश्वरेण विधृतस्य मातरिश्वा तच्छक्त्यैव पाथःपयोधरनक्षत्रग्रहतारकादिकं बिभर्तीत्युक्तं भवति । स्मर्यते हि—

* द्यौस्सचन्द्रार्कनक्षत्रं खं दिशो भूर्महोदधिः । वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ इति ॥ ४

तदेजति तद्दु नैजति तद्दूरे तद्वन्तिके । तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५

* अनेजदेकं मनसो जवीयः इत्युक्तमर्थमादरान्मुखान्तरेणानुशास्ति - * **तदेजति तदु नैजतीति** । तत् - व्याप्तं तत्त्वं पूर्वोक्तप्रकारेण जवीयस्त्वादिना एजति - कम्पते । कम्पत इवेत्यर्थः । **तदु नैजति** तदेव वस्तुवृत्त्या न कम्पते । **तद्दूरे तद्वन्तिके**-तद्दूरेऽन्तिके च वर्तते । मूढप्रतिबुद्धपुरुषभेदापेक्षया विभोरेव दूरान्तिकवर्तित्वव्यपदेशः । यथाह शौनकः—

* पराङ्मुखानां गोविन्दे विषयासक्तचेतसाम् । तेषां तत्परमं ब्रह्म दूराद्दूरतरे स्थितम् ॥

तन्मयत्वेन गोविन्दे ये नरा न्यस्तचेतसः । विषयत्यागिनस्तेषां विज्ञेयं च तदन्तिके ॥ इति ।

केचित्पदार्थाः कस्यचिदन्तर्भवन्ति न बहिः । केचिद्बहिर्भवन्ति, नान्तः । तदुभयव्यावृत्तिमाह—**तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत** इति । तत् सर्वव्याप्तमुक्तं परं ब्रह्म । अस्य-विचित्रचिदचिद्रूपेण प्रमाणसिद्धस्य सर्वस्य वस्तुनः **अन्तर्भवति** - अप्रतिघातादविभक्तदेशं वर्तत इत्यर्थः । तदेव सर्वस्यास्य बहिरपि भवति, परिमितानां पदार्थानां भावदेश इवाभावदेशेऽपि वर्तत इति यावत् । तदेतदुक्तमुक्तं तैत्तिरीये सर्वपरविद्योपाम्यविशेषनिर्धारणार्थे* सहस्रशीर्षम् इत्यानुवाके—

*यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ इति ॥ ५

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६

एवं सर्वस्य ब्रह्मात्मकत्वमुक्तम् । अथ तद्विदस्सांप्रतिकं प्रयोजनमाह—***यस्तु....जुगुप्सत** इति । ब्रह्मविन्माहात्म्ये विशेषद्योतनाय तुशब्दः । **सर्वाणि भूतानि** - ब्रह्मादिस्थावरान्तानि । अत्रात्मशब्दस्सङ्कोचकाभावात्प्रकरणादर्थस्वभावाच्च सर्वान्तरात्मविषयः । पृथिव्यादिभिर्ध्रियमाणमपि तन्मुखेन परमात्मन्यवस्थितमित्येवकाराभिप्रायः । **अनुपश्यति**—अनुस्यूतं विशदं निध्यायति । **सर्वभूतेषु चात्मानमिति** व्याप्तिमात्रपरम्, तस्य तैर्धार्यत्वाभावात् । स इति प्रतिनिर्देशोऽध्याहार्यः । **ततो न विजुगुप्सते**—ब्रह्मात्मकत्वेनानुदृष्टेषु सर्वेषु स्वात्मविभूतिन्यायात्कुतश्चिदपि न विजुगुप्सते । क्वचिदपि निन्दां न करोतीत्यर्थः ॥ ६

यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः । तत्र को मोहः कश्शोक एकत्वमनुपश्यतः ॥ ७

पुनरपि सर्वस्य ब्रह्मात्मकत्वं सामानाधिकरण्येन द्रढय(न्)ति तथानुदर्शनस्य सद्यश्शोकनिवर्तकत्वमाह—* **यस्मिन्...पश्यत** इति । **यस्मिन्** प्रणिधानसमये । **विजानतः** स्वतन्त्रपरतन्त्रवस्तुभेदं सम्यगुपदिष्टेन मार्गेण शास्त्रेण विविच्य जानतः । **आत्मैव सर्वाणि भूतानि अभूत्** - परमात्मैव सर्वविशिष्टः प्रतीत इत्यर्थः । देवोऽहम् इत्यादिवल्लोकवेदमर्यादया शरीरात्मभावेन जगद्ब्रह्मसामानाधिकरण्ये संभवति बाधोपचारस्वरूपैक्यादिपक्षा बहिष्कार्याः । **तत्र** तदा, **को मोहः** - स्वनन्त्रात्मभ्रमादिलक्षणो मोहो न संभवतीत्यर्थः । **कश्शोकः**—परविभूतिभूते सर्वस्मिन्निर्ममत्वसिद्धया पुत्रमरणराज्यहरणादावपि न कश्चिच्छोकस्स्यादित्यर्थः । यथाह—

* अनन्तं बत मे वित्तं यस्य मे नास्ति किञ्चन । मिथिलायां प्रदीप्तायां न मे किञ्चित्प्रदह्यते ॥ इति ।

एकत्वमनुपश्यतः—सर्वविशिष्टैक्यमनुपश्यतः । न ह्ययमेकशब्दः एकव्यतिरिक्ताभावपरः, * ईशावास्यमिदं **सर्वम्** इति ईश्वरव्याप्तत्वेन प्रक्रान्तस्य कस्यचित्केनचिदपि बाधाभावात्, सर्वभेदमिथ्यात्ववेदनावेदनयोः कथञ्चिदपि तादृशैक्योपदेशादिप्रवृत्त्ययोगाच्च । न चासौ परस्परविरुद्धानां स्वरूपैक्यप्रतिपादकः, सर्वव्याघातोत्सादने स्वपरमतविवेकादिविप्लव-

प्रसङ्गात् । विशिष्टैकत्वविवक्षा तु सर्वप्रमाणानुगुण्याद्भाव्यते । ततोऽपि वरमत्र प्रकृतसामानाधिकरण्यनिर्वाहानुगुणसंबन्धविवक्षा । प्रयुज्यते हि संबन्धविशेषविवक्षया *रामसुग्रीवयोरैक्यम् इत्यादिष्वेकशब्दः । एतौ च श्लोकौ यद्यपि मुक्तविषयतया नेतुं शक्यौ, तथापि पूर्वानुगुण्यान्मुमुक्षुप्रशंसार्थत्वमुचितम् । ततश्च वैशद्यातिशयविवक्षया शास्त्रजन्यज्ञानेन तन्मूलोपासनात्मकज्ञानेन दर्शनवाचोयुक्तिः । समाधिविशेषफलभूतस्वयतनसाक्षात्कार उपायत्वेनाभिहितत्वान्नात्र संशयनीयः । मोक्षोपायोपदेशपरेषु सर्वेषु वाक्येषु दर्शनशब्द उपासनविषय इति **शारीरकभाष्ये** प्रत्यगादि ॥ ७

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरँ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूस्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यस्समाभ्यः ॥ ८

पुनरप्येनम् ईशेशितव्यतत्त्ववेदिनं वेदितव्यविशेषबोधनेन च विशिनष्टि-***स पर्यगात्....समाभ्यः** इति । **सः** - सर्वभूतान्तरात्मभूतब्रह्मदर्शी, **पर्यगात्** - प्राप्नुयादित्यर्थः । * ब्रह्मविदाप्नोति परम् इति न्यायात्समाधिलब्धेनानुभवेन प्राप्तवानिति सिद्धानुवादो वा, * अत्र ब्रह्म समश्नुते इतिवत् । **शुक्रम्** अवदातम्, स्वप्रकाशरूपम् । **अकायं** सर्वशरीरकमपि कर्मशरीररहितम् । अत एव **अव्रणम्, अस्नाविरञ्च** । **शुद्धम्**—अनाघ्रताज्ञानादिदोषम् । **अपापविद्धम्** - अज्ञानादिकार्यकारणभूतपुण्यापुण्यरूपकर्मानार्लोढमित्यर्थः । * न सुकृतं न दुष्कृतम् इत्यारभ्य * सर्वे पाप्मानोऽतो निवर्तन्ते इति हि निगम्यते । एवमशेषहेयप्रत्यनीकः परमात्मा मुमुक्षोः प्राप्यः प्रापकः उपास्यश्च स्यात् । * सः इत्युक्तं ब्रह्मविदं सर्वार्थदर्शित्वेन विशिनष्टि—**कविः**—क्रान्तदर्शी । व्यासादिवत्परतत्त्वतद्गुणबाधनानुगुणप्रबन्धनिर्मातेति वाऽर्थः । मनस ईशित्री बुद्धिः मनीषा, तद्वान् - **मनीषी** । अभ्यासवैराग्याभ्यां निगृहीतान्तःकरण इत्यर्थः । परितो भवतीति **परिभूः**—परितो भवतीति परिभूः, विद्यान्तरवतः सर्वानतिक्रम्य वर्तते । कामक्रोधलोभादीन् दुर्जयानरातीन् अभिभवतीति वा । स्वयंभूः—अन्यनिरपेक्षसत्ताकः, नित्यात्मस्वरूपदर्शीति यावत् । **याथातथ्यतोऽर्थान् व्यदधात्**—परमपुरुषार्थतदुपायद्विरोधिप्रभृतीन् सर्वान् पदार्थान् यथावद्विविच्य हृदयेन धृतवान् । **शाश्वतीभ्यस्समाभ्यः**—यावद्ब्रह्मप्राप्ति सर्वप्रत्यूहशमनार्थमिति भावः । यद्वा प्रथमान्तं च द्वितीयान्तं च पदजातं क्रमात्परावरात्मविषयतया व्याख्येयम् । तदा * शुक्रम् इत्यादिकं सर्वोपाधिविनिर्मुक्तपरिशुद्धजीवपरम् । तमपि च, **सः**-परमात्मा, **पर्यगात्** परितो व्याप्य स्थितः । कविः इत्यादिकं सुगमम् । **याथातथ्यत** इत्यादि । अर्थान् - कार्यपदार्थान्, शाश्वतीभ्यस्समाभ्यः यावद्विलयमवस्थातुं, याथातथ्यतो व्यदधात्, न पुनरैन्द्रजालिकवत्केवलं प्रकाशितवान् ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय इव ते तमो य उ विद्यायाँ रताः ॥ ९

एवं विचित्रशक्तिपरमात्मविषयां कर्माङ्गिकां विद्यामुपदिश्यानन्तरं केवलकर्मावलम्बिनः केवलविद्यावलम्बिनश्च निन्दन् वर्णाश्रमधर्मानुगृहीतया विद्ययैव निश्श्रेयसावाप्तिमाह—***अन्धं तमः प्रविशन्ति येऽविद्यामुपासत** इत्यादिना । **ये**—भोगैश्वर्यप्रसक्ताः, **अविद्यां**—कर्म, ज्ञानविधुरकर्ममात्रम् । * अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते इति हि स्मर्यते । **उपासते**—एकान्तमनसोऽनुतिष्ठन्तीत्यर्थः । **अन्धम्** - अतिगाढम् । **तमः** अज्ञानं, त्रिवर्गाभिषङ्गाज्ज्ञानान्तरीयकं नारकं तमो वा । केवलकर्मनिरतानां दुःखानुवृत्तिमधीयते चाथर्वणिकाः ॥

* प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढाः जरामृत्यू ते पुनरेवापि यन्ति ॥

इति । **ततो भूय इव ते तमो य उ विद्यायाँ रताः**—कर्ममात्रनिष्प्राप्यादन्धतमसादधिकं तमः स्वाधिकारोचितकर्मपरित्यागेन विद्यामात्रे रताः प्रविशन्ति । इवशब्दस्तमस इयत्तायां दुर्महत्त्वं द्योतयति । उकार उत्तरत्रपदेनान्वेतव्यः - विद्यायामेव रताः इति ॥ ९

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया । इति शुश्रुम धीराणां ये नस्तद्व्याचचक्षिरे ॥ १०

किं तर्हि मोक्षसाधनमित्यत्राह—***अन्यदेवाहुर्विद्यया अन्यदाहुरविद्ययेति** । अत्र व्यत्ययानुशासनात्पञ्चम्यर्थे तृतीया ; अन्यशब्दानन्वयात्, * अन्यदेवाहुस्संभवात् इति वक्ष्यमाणसारूप्याच्च । केवलकर्मणः कर्मनिरपेक्षविद्यातश्चान्यन्मोक्षसाधनमित्युक्तं भवति । **आहुः**—पूर्वाचार्या इति शेषः । औचित्यादुपनिषद इति वा । पूर्वपूर्वसम्प्रदायसिद्धोऽस्माकमयमर्थ इत्याह—**इति शुश्रुम धीराणां ये नस्तद्व्याचचक्षिरे**-ये - पूर्वाचार्याः, **नः** - प्रणिपातादिभिस्सम्यगुपसन्नानामस्माकम्, **तत्** - मोक्षसाधनम्, **व्याचचक्षिरे** विविच्योपादिक्षन् । तेषां, **धीराणां**-परमात्मध्यानपराणां ; **वचनमित्यध्याहार्यम्** । * नटस्य शृणोतीतिवद्वा कथञ्चित्पञ्चम्यर्थे षष्ठी । **इति शुश्रुम**-एवंप्रकारमश्रौष्म । ब्रह्मविद्याया दुरवगाहत्वेन निश्शेषग्रहणाशक्यत्वाभिप्रायोऽत्र लिङुत्तमः ॥ १०

विद्यां चाविद्यां च यस्तद्वेदोभयँ सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११

* अन्यदिति संग्रहेणोक्तं विवृणोति—**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयँ सहेति । यः** यथावस्थितोपदेशवान् । **विद्यां** परमात्मोपासनरूपाम् । **अविद्यां** - तदङ्गभूतकर्मात्मिकां च । एतदुभयं परस्परविरोधप्रसङ्गरहितम् । **सह वेद** - अङ्गाङ्गिनोरनुष्ठेयत्वसाम्यादुभयं सह वेदेति अविशेषेण वेदनीयतोक्तिः, न पुनर्हेयोपादेययोः ज्ञातव्यत्वसाम्यात् । पूर्वमविद्याया निन्दनात्तदौचित्यमिति चेत् तर्हि विद्याया अपि निन्दिताया हेयद्वयसमुच्चयोक्तिप्रसङ्गः । तथा सत्युत्तरवाक्यमपि विघटते । **अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते** इति । अयमर्थः—विद्याङ्गतया चोदितकर्मणा मृत्युं - ज्ञानसङ्कोचरूपं मृत्युहेतुं प्राक्तनकर्म । **तीर्त्वा** - निरवशेषमुल्लङ्घ्य । **विद्यया** - पूर्वोक्तपरमात्मानुदर्शनरूपया । **अमृतमश्नुते**—* एतदमृतमभयमेतद्ब्रह्म इत्यादिषु सर्वदोषरहितत्वेन प्रतीतं परमात्मानं प्राप्नोतीत्यर्थः । अत्रामृतशब्दस्य मोक्षपरत्वेऽपि न पुनरुक्तिः, *मृत्युं तीर्त्वेत्यस्य उपायविरोधितरणपरत्वात्, *अमृतमश्नुते इति प्राप्तिविरोधिनिवृत्तिलाभोक्तेः । अत्र * अविद्यया मृत्युं प्राप्य स्थिताः इति व्याचक्षाणाः निर्बाधं पदवाक्यस्वारस्यमुपबृंहणं च प्रस्मृत्य स्वाविद्यया स्वयमेव मृत्युं प्राप्य स्थिताः । एतदेव वाक्यमनुसंहितं वैष्णवे पुराणे ।

* इयाज सोऽपि सुबहून्यज्ञान् ज्ञानव्यपाश्रयः । ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ॥ इति ।

इह त्वविद्याशब्दः प्रकरणादौचित्याच्च विद्याङ्गकर्मविषय इत्यभाषि **भाष्यकारैः** * अत्राविद्याशब्दाभिहितं **वर्णाश्रमविहितं कर्मेति, मृत्युतरणोपायतया प्रतीताऽविद्या विद्येतरद्विहितं कर्मैव** * इति च । विद्यां पर्युदस्यन्नयमविद्याशब्दः क्षत्रियादिविषयाब्राह्मणशब्दादिवदासन्नतदनन्तरवृत्तिरङ्गकर्मविषय इति भावः ।

एवं * तपो विद्या च विप्रस्य निःश्रेयसकरावुभौ । तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते ॥

इत्याद्युपबृंहणान्यपि सुसंगतानि भवेयुः । ये पुनरिह विद्याकर्माख्यसाधनद्वयसमुच्चयं मृत्युतरणामृतत्वप्राप्तिरूपसाध्यद्वित्वं च वर्णयन्ति, तेषां कर्मज्ञानयोरङ्गाङ्गिभावं विद्ययैव मृत्युतरणं च व्यक्तं प्रतिपादयद्भिः श्रुतिस्मृतिसूत्रगणैर्यथाभाष्यमुत्तरं देयम् । विषमसमुच्चयवादेऽपि यथाभागं सन्निपत्योपकारकत्वसंभवे गत्यन्तरगमनिका नीतिविद्भिर्न संमन्यते ॥

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते । ततो भूय इव ते तमो य उ संभूत्यां रताः ॥ १२

तदेवमुपास्यं परमात्मतत्त्वं साङ्गतदुपासनरूपं च परमहितं परमपुरुषार्थपर्यन्तमुपदिश्यानन्तरं त्रिभिश्लोकैः प्रतिबन्धनिवृत्तिपरब्रह्मानुभवरूपयोः फलपर्वणोस्समुच्चित्यानुसन्धानं विद्याङ्गत्वेनोपादेयमित्युच्यते । तत्र प्रथममेकैकमात्रानुसन्धानं निन्दति—* **अन्धं तमः—रता** इति । * एतस्मिनः प्रेत्याभिसंभविताऽस्मि. * धृत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि इत्यादिषु ब्रह्मप्राप्तिरूपा संभूतिरुक्ता । तां पर्युदस्यन्नयमसंभूतिशब्दः तदासन्नप्रतिबन्धविनाशमभिधत्ते । * संभूतिं च विनाशं च इत्यपि हि अनन्तरमुच्यते । तेन चात्रासंभूतिशब्देन संभूतेरनुत्पत्तिः विनाशो वा प्रतिपाद्यः । अमृतप्राप्तिहेतुतयोक्तायास्संभूतेः प्रागभावस्य प्रध्वंसस्य वा मृत्युतरणहेतुत्वेन वक्तुमयुक्तत्वात् । अत्रापि तरतेः प्राप्तिवचनत्वं पूर्ववत्प्रतिक्षेप्यम् ॥ १२

अन्यदेवाहुस्संभवादन्यदाहुरसंभवात् । इति शुश्रुम धीराणां ये नस्तद्व्याचचक्षिरे ॥ १३

अन्यदे....स्तद्व्याचचक्षिरे इति । अत्र तच्छब्दस्समुच्चित्यानुसन्धेयतया वक्ष्यमाणद्वितयं वक्ति ॥ १३

संभूतिं च विनाशं च यस्तद्वेदोभयं सह । विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥ १४

अत्रापि * अन्यत् इत्युक्तं विवृण्वन्विद्याङ्गमुभयानुसन्धानमाह—**संभूतिं....सहेति** । तस्यैव फलप्रदर्शनेनावश्यकर्तव्यतां स्थापयति—**विनाशेन....मश्नुते** इति । अनुसन्धीयमानेन **विनाशेन** प्रतिबन्धमपास्य, **संभूत्या** अनुसन्धीयमानया ब्रह्म प्राप्नोति । संभूतिविनाशानुसन्धानरूपेऽङ्गे स्तुत्यर्थम् । यथोचितमङ्गिफलनिर्देशः । यद्वा * विनाशेन मृत्युं तीर्त्वा इति पूर्वोक्तस्वरूपशब्दे विरूपार्थपरिहाराय विनाशशब्देन मानदम्भादीनां हिंसास्तेयादीनां बहिर्मुखेन्द्रियवृत्तीनां च विनाशो विवक्षितः । अतो विरुद्धनिवृत्तिरूपाङ्गसेवनेन समाधिविरोधिपापमपाकृत्य समाधिनिष्पत्तिरूपब्रह्मसंभूत्या तदेवाश्नुते । अत्र संभूतिविनाशशब्दाभ्यां सृष्टिप्रलयादिविवक्षया मृत्युतरणामृतप्राप्तिरूपफलविभागवचनस्यौचित्यलवोऽपि नोपलभ्यते ॥ १४

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५

अथैवं फलपर्यन्तसाङ्गब्रह्मनिष्ठस्यानुसन्धेया मन्त्रा उपदिश्यन्ते । तेषु च पूषादिशब्दास्सर्ववाच्यं परमात्मानमनुसन्दधतां तद्देवताप्रणाडद्या साक्षाद्वा तत्पर्यन्ताः । अत्र हि यमसूर्यादिशब्दानामेकविषयत्वं स्वरसावगतं तथा सत्येवोपपद्यते । तत्र प्रथमेन मन्त्रेण पूषन्शब्दविवक्षितं भगवन्तं प्रति प्रस्तुतां समाधिप्रतिबन्धनिवृत्तिं प्रार्थयते—**हिरण्मयेन....दृष्टये** इति । सत्यशब्दोऽत्र जीवपरः. * सत्यं चानृतं च सत्यमभवत्, *अथ नामधेयं सत्यस्य सत्यं प्राणा वै सत्यं तेषामेषसत्यमित्यादिषु जीवेऽपि तत्प्रयोगात् । तस्य **मुखम्** - अनेकेन्द्रियावष्टम्भतया मुखवदवस्थितं मनः, **हिरण्मयेन पात्रेण अपिहितं** - रागात्मकतया हिरण्मयसदृशेन रजोमयेन पात्रेण परमात्मविषयवृत्तिप्रतिरोधकेन च्छादितम् । हृदि निहिते परमात्मविषये निरुद्धवृत्तिकमित्यर्थः । रजःकथनं तमसोऽप्युपलक्षणम् । हिर

कर्माधीनभोग्यवर्गप्रदर्शनम् । **तत्** जीवस्य मुखस्थानीयं मनः, **पूषन्** - आश्रितपोषणस्वभाव, **अपावृणु** - निरस्तपिधानं कुरु । कस्य हेतोः ? **सत्यधर्माय दृष्टये** - सत्यस्य जीवस्य धर्मभूताय पूर्वोक्तब्रह्मानुभवदर्शनायेत्यर्थः ॥ १५

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजः ।
यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषस्सोऽहमस्मि ॥ १६

पुनरपि तया दृष्ट्या द्रष्टव्यं विशिषन् दृष्ट्या गुणमभ्यर्थयते—**पूषन्नेकर्षे....पश्यामि** इति । **एकर्षे**—अद्वितीयातीन्द्रियद्रष्टः, **यम** सर्वान्तर्यामिन्, **सूर्य** स्वभक्तबुद्धीनां सुष्ठु प्रेरक, **प्राजापात्य** - प्रजापतिप्रसूतस्य सर्वस्यान्तर्यामिन्, अविवक्षितप्रत्ययार्थो वा प्राजापात्यशब्दः, प्रजानां पते इत्यर्थः । **व्यूह रश्मीन् समूह तेजः** - स्वस्वरूपप्रकाशनोपयिकान् स्वोग्ररश्मीन् व्यपोह, प्रभात्मकं च तेजस्समूहीकुरु । **यत्** *आदित्यवर्णम् इत्यादिप्रसिद्धं सर्वेभ्यः कल्याणेभ्योऽतिशयितकल्याणं शुभाश्रयभूतं ते दिव्यं रूपं, तत् पश्यामि । अत्र वर्तमानव्यपदेशः उत्तरवाक्यवर्तात्कालिकानुसन्धानानुवादः । प्रार्थनाप्रकरणानुरोधे तु व्यत्ययेन पश्येयमिति लिङर्थोऽत्र ग्राह्य इत्यपुनरुक्तिः । तदा साधारण्यज्ञापनार्थं सदा पश्यामीति वा निरुपाधिकशेषत्वानुगुणोक्तिः ।

अथान्तरात्मनोऽहंग्रहणेनानुसन्धानमाह—**योऽसावसौ पुरुषस्सोऽहमस्मि** इति । वाप्सा अत्यादरव्यञ्जनार्था ।

यद्वा * योऽसावतीन्द्रियग्राह्यसूक्ष्मोऽव्यक्तस्सनातनः । सर्वभूतमयोऽचिन्त्यस्स एष स्वयमुद्बभौ ॥

इत्यादिवाक्यच्छायया यत्तच्छब्दाभ्यामदश्शब्दौ विभज्यान्वेतव्यौ ; सर्वातीन्द्रियप्रमाणसिद्धत्वद्योतनार्थौ वा । **पुरुषः** - पूर्णत्वपूर्वसत्त्वादिगुणकः आदित्यवर्णविग्रहविशिष्टः सर्ववेदपठितानन्यपरपुरुषसूक्तादिप्रसिद्धो महापुरुषः । **सोऽहमस्मि**—अहंशब्दोऽत्र जीवद्वारा तदन्तरात्मपर्यन्तः । अत एवास्मीत्यपि प्रत्यग्वस्तुविशिष्टे परमात्मनि विश्राम्यति । - अस्मद्युत्तमः इत्येतावदेव ह्यनुशिष्टम् । न पुनरस्मच्छब्दस्य प्रत्यगात्मद्वारा परमात्मपर्यन्ततायामुत्तमनिवृत्तिः । एवं * तत्त्वमसि इत्यादिषु असिशब्दो निर्वाह्यः । तत्रापि * युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इत्येतावदेव हि स्मर्यते । न तु युष्मच्छब्दस्य स्वाभिमुखचेतनद्वारा तदन्तर्यामिपर्यन्तत्वे मध्यमनिवृत्तिः । लोके तु अहं त्वमसि, त्वमहमसि इत्याद्युपचारपूर्वेष्यानुसारेण मध्यमात्तमयोर्व्यवस्था । तद्वदत्रापि व्यवस्थोपपद्यते, उद्देश्यविपययोरेवात्र युष्मदस्मच्छब्दयोरुपपदत्वेन सूत्रपदाभिप्रेतत्वात् । **भाष्ये** तु तत्त्वमसिनिरूपणावसरे * नात्र किञ्चिदुद्दिश्य किमपि विधीयते इत्युक्तिरप्रातांशनिषेधाभिप्राया व्यक्ता, उपसंहारत्वापपादनात् । ये पुनः * तत्त्वमसि *सोऽहमस्मि इत्यादिषु कार्यकारणोपाध्याकारविधूननेन निर्विशेषस्वरूपैक्यं वाक्यवेद्यमाहुः, तेषाम् असिवदस्मिरपि खण्डकः । श्रोतर्यनुसन्धातरि च युष्मदस्मदौ हि परित्यक्ते न ह्यसिना कश्चित्प्रतिबोधनीयः, न च कश्चिदस्मिना विशिष्यानुसन्धेयः । विधूननीयोपाधिविषयव्युत्पत्तिमच्छब्दसन्निधिमात्रोपजीवनेन क्वचिन्मध्यमोत्तमसंपत्तिरिति चेत् ततो वरमपरित्यक्तप्रवृत्तिनिमित्तमस्माकं निर्वहणमनुसर्तुम् । सन्मात्रस्यांशिनोऽशद्वयविशिष्टताप्रतिपादनं वदतामपि सन्मात्रविवक्षायामत्र वाक्ये त्वमहंभावायोगात्, त्वंताहंताविशिष्टं सदिति विशिष्टविवक्षायामपि प्रथमपुरुषोपनिपातप्रसङ्गात् । दृश्ययोश्च युष्मदस्मदर्थयोर्मृत्पिण्डांशे मणिक इव घटशरावाकारयोस्सदंशभूतेश्वराकारेऽपि समन्वययोगात् त्वमहमर्थयोस्सत्ताधाकारस्य नित्यप्रतिपन्नतया विशेषतोऽनिर्देश्यत्वादननुसन्धेयत्वाच्च न कथञ्चिदपि * तत्त्वमसि * सोऽहमस्मि इत्यादेर्निर्वाहदशक्यः । दृष्टिविधिस्तु मोक्षार्थविधासु वेदान्तवादिना नाङ्गीक्रियते । यद्यप्यत्र त्वं

राजासि अहं राजास्मि इत्यादिवत्तादर्थी-याद्युपचारविवक्षया मध्यमोत्तमयोस्सामञ्जस्यं, तथापि लोकवेदयोश्चेतनपर्यन्तदेवमनुष्यादिव्यवहारन्यायेन जातिगुणशब्दगतिलाभात्तदुपेक्षा । नन्वेवं पुरुषास्यैतरात्मसामानाधिकरण्यक्लेशं परित्यज्य * योऽसावसौ पुरुषस्सोऽहमस्मि इति परिशुद्धस्वरूपमात्रानुसन्धानपरमिदं वाक्यमस्तु ; मैवं, * तत्त्वमसि * त्वं वा अहमस्मि इत्यादिषु तदनुपपत्तेः ; अत्रापि तत्समानन्यायतया तथैवानुसन्धानस्यौचित्यात् । ब्रह्मात्मकोऽहमस्मि इति परविद्याङ्गभूतस्वात्मानुसन्धानपरत्वेऽपि तच्छब्देन तादर्थ्यादिकं लक्षणीयं स्यात् ॥ १६

वायुरनिलममृतमथेदं भस्मान्तँ शरीरम् । ओं क्रतो स्मर कृतँ स्मर क्रतो स्मर कृतँ स्मर ॥ १७

अनन्तरं तु परिशुद्धात्मस्वरूपमुच्यते—**वायुरनिलममृतम्** —इति । विद्याकर्मानुसारेण तत्रतत्र गन्तृत्वाद्वायुः । निलयनरहितत्वात् क्वचिदपि व्यवस्थितत्वाभावाच्च **अनिलम्** । **अमृतं**—म्रियमाणेऽपि देहसन्ताने स्वयममृतम् । इदं विजरत्वादीनामप्युपलक्षणम्, परिशुद्धजीवविषये प्रजापतिवाक्ये * विजरो विमृत्युर्विशोकः इत्यादिसहपाठात् । अत्र * वायुश्चान्तरिक्षं चैतदमृतम् इत्यादिसामर्शाद्वाय्वादिशब्दानां भूतद्वितीयविषयत्वं न शङ्कनीयम्, पूर्वापराभ्यामसङ्गतेः । यद्यप्यसाधां परमात्मविषयत्वं विशिष्टवृत्त्या योगता वा युज्यते, तथापि वरमिह नश्वरस्य देहस्यानन्तरं वचनात्तद्व्यावृत्तपत्यगात्मपरत्वम् ; प्राणविषयत्वेऽप्यत्र मन्दं प्रयाजनम् । श्वेताश्वतरीयाश्च भाग्यभोक्तृनियन्तृणां विवेचने भोक्तृशब्दविवक्षितप्रत्यगात्मानममृतशब्देनामनन्ति * क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः इति, *क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः इति च । एवं प्रत्यगात्मस्वरूपस्य * न जायते म्रियते वा विपश्चित् इत्यादिप्रसिद्धममृतत्वमभिधाय क्षेत्रज्ञशरीरस्य मृतत्वमवश्यं भावीत्याह—**अथेदं भस्मान्तं शरीरम्**इति । प्रकृतादर्थादर्थान्तरविवक्षयाऽत्राथशब्दः । आत्मोत्क्रमणानन्तर्यार्थो वा । कर्मवश्यकान्तर्यपरो वा । तथा च स्मर्यते * गङ्गायां सिकता धारा यथा वर्षति वासवे । शक्या गणयितुं लोके न त्वनन्ता: पितामहाः ॥ इति, * ब्रह्मादिषु प्रलीनेषु इत्यादि च । **इदम्**इति विशेषणम् ईश्वरशरीरत्वेन नित्यत्वेन च प्रमाणसिद्धानां व्यवच्छेदार्थम् । **भस्मान्तम्**इति संस्कारमात्रव्यङ्ग्यकम् ; कीटान्तत्वादेरन्यत्र प्रसिद्धस्योपलक्षणं वा । शरीरशब्दे व्युत्पत्तिनिमित्तानुसारे विशरणस्वभावत्वं गम्यते । एवं * भोक्ता भोग्यं प्रेरितारं च मत्वा इति क्रमेण चिदचिद्विवेकमुक्त्वा प्रेरितारं प्रकृतं महापुरुषं प्रणवेनोपादत्ते—**ओम्**इति । यथाऽऽमनन्त्यार्थवर्णाः * यः पुनरेतं त्रिमात्रेण ओमित्येतेनैवाक्षरेण परमपुरुषमभिध्यायीत इति । उक्तं च योगानुशासने * क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः * स पूर्वेषामपि गुरुः कालेनानवच्छेदात् * तस्य वाचकः प्रणवः इति । आह च सर्वज्ञः—* ओमित्येवं सदा विप्राः पठध्वं ध्यात केशवम् इति । स्वयंचागायत् * ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् इति । एवं सर्वत्र द्रष्टव्यम् । अथ क्रतुरूपिणं भगवन्तं ज्ञानयज्ञगोचरमभिमुखीकुर्वंस्तदनुग्रहं याचते—**क्रतो स्मर कृतं स्मरेति** । **क्रतो** - कर्त्वात्मक । यथाह * अहं क्रतुरहं यज्ञः इति । * यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति * स क्रतुं कुर्वीत * एवं क्रतुर्हे इत्यादिष्विवात्रापि प्रकरणादेव क्रतुशब्द उपासनपरो वा । तद्गोचरे तु भगवति तच्छब्द उपचारात् । **स्मर** - सानुग्रहया बुद्ध्या विषयीकुरु, * स्नेहपूर्णेन मनसा यन्नः स्मरसि केशव इतिवत् । उक्तञ्च भगवता * स्थिते मनसि इत्यारभ्य * ततस्तं म्रियमाणं तु काष्ठपाषाणसन्निभम् । अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥ इति । सर्वदा सर्वं साक्षात्कुर्वतः स्मर्तृत्ववचनमिह पूर्वकृतप्रत्यवेक्षणाभि-

प्रायम् । कृतं स्मरेत्यत्रापि तथैव विवक्षा । मत्कृतं यत्किञ्चिदनुकूलमनुसन्धाय कृतज्ञस्त्वं मां रक्षेति भावः । एतावदन्तं त्वत्कृतमानुकूल्यं प्रतिसन्धाय त्वमेव शेषपूरणं कुर्विति वा । स्मरन्ति हि * जायमानं हि पुरुषम् इत्यादि । स्वयमप्याह * तेषां सततयुक्तानामित्यादि । कृतो स्मर कृतं स्मर इत्यावृत्तिरुक्तार्थे त्वरातिशयात् ॥ १७

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ १८

पुनरप्यग्निशब्दवाच्यं भगवन्तं स्वापेक्षितं प्रापयेत्याह-**अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥** इति ॥ **अग्ने** - अग्निशरीरक, * यस्याग्निश्शरीरम् इत्यन्तर्यामिब्राह्मणम् । * साक्षादप्यविरोधं जैमिनिः इति न्यायात् अग्रनयनादिगुणयुक्तेति वा । **नय**—प्रवर्तयेत्यर्थः । **सुपथा**—शोभनेन मार्गेण । प्रतिषेधस्वशरहितेनोपायेनेति यावत् । **राये**—विद्यार्थिशरीरसंरक्षणत्वदर्चनाद्यनुगुणाय धनाय । विद्यार्थप्रकरणानुगुण्यात् * अतस्करकरग्राह्यमराजकवशंवदम् । अदायादविभाज्यं धनमार्जय सुस्थिरम् ॥ * अनन्तं वत मे वित्तम् इत्यादिषूक्तमलौकिकं धनमिह विवक्षितम् । एक एव मन्त्रः प्रकरणादिभिर्विशेषितस्तत्तदनुगुणमर्थं विवक्षतीति सम्यङ्न्यायविदः । **अस्मान्**—त्वदनन्यभावान् अनन्यगतींश्च । **विश्वानि देव वयुनानि विद्वान्—देव** - अस्मदपेक्षितप्रदानानुरूपविचित्रक्रीडायुक्त । * माया वयुनं ज्ञानम् इति नैघण्टुकाः । अतो ज्ञानमुखेन उपायविशेषा इह वयुनशब्देन विवक्षिताः । सर्वान्—तत्तदधिकारानुगुणान् चतुर्विधपुरुषार्थोपायान् यथावत् विद्वान् त्वमविदुषोऽस्मान् नेतुमर्हसीति भावः । **युयोध्यस्मज्जुहुराणं**—बन्धनात्मकतया अचिन्त्यप्रकारकौटिल्यवत्तया वा बाधमानमित्यर्थः । **एनः**—अकृत्यकरणकृत्याकरणादिरूपं त्वदनुभवादिप्रतिबन्धकम्, अस्मतो **युयोधि**—पृथक्कुरु, विनाशयेत्यर्थः । **भूयिष्ठां ते नम उक्तिं विधेम** - * अनन्यगतिः इत्यादिगुणैरावृत्तिश्च भूयसी नम उक्तिं ते विदधमहे । व्यत्ययो हि बहुलमनुशिष्टः । नम उक्तेरनुवृत्तिं वा नाथं प्रति नाथते । * नम इत्येव वादिनः इति हि मुक्तलक्षणा अपि पुरुषाः मोक्षधर्मे प्रतिपादिताः । मानसकायिकयोर्नमसोरभावेऽपि नम इशब्दमात्रेण प्रसत्तुमर्हतीत्युक्तिशब्दाभिप्रायः । एवं परतत्त्वतद्विभूतियोगतदुपासनतद्विशेषान् संगृह्य संहितेयं समपूर्यत ॥

व्यक्ताव्यक्ते वाजिनां संहितान्ते व्याख्यामित्थं वाजिवक्त्रप्रसादात् ।
वैश्वामित्रो विश्वमित्रं व्यतानीद्विद्वच्छात्रप्रीतये वेङ्कटेशः ॥

अभेदं भोक्तृणामथ च भविनामेव परमां तथा भेदाभेदं जिनसुगतनीतिं च जगति ।
असंपाद्यां मुक्तिं भवभयमलीकं च पठतामसावीशेत्यादिर्न कथमनुवाकः प्रतिभटः ॥

हरिः ओम्

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु ईशावास्योपनिषद्भाष्यं समाप्तम्.

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

॥ चतुश्श्लोकीभाष्यम् ॥

श्रीमान्वेङ्कटनाथार्यः कविनार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

स्वशेषाशेषार्थो निरवधिकनिर्बाधमहिमा फलानां दाता यः फलमपि च शारीरकमितः ।
श्रियं तत्सध्रीचीं तदुपसदनत्रासशमनीमभिष्टौति स्तुत्यामवितथमनिर्यामुनमुनिः ॥

अत्र समन्वयाविरोधसाधनफलविषयशारीरकचतुरध्यायासमधिगतस्य भगवत्सर्वप्रकाराभिमतानुरूपसह-(धर्मचारिणा)धर्मिणाविशिष्टतयाऽपि सर्वाधिकत्वं * कश्श्रीश्श्रय इत्युक्तकैमुतिकन्यायकाकुगर्भया चतुश्श्लोक्या प्रकाशयन् प्रथमं श्रियः प्रतिपिपादयिषितानां विभूतिद्वयशेषित्वादीनां स्थापकमाह—

कान्तस्ते पुरुषोत्तमः फणिपतिश्शय्याऽऽसनं वाहनं वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी ।
ब्रह्मेशादिसुरव्रजस्सदयितस्त्वद्दासदासीगणः श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम्॥ १ ॥

कान्तस्त इति । कान्तः प्रियः, अनुरूपपतिरित्यर्थः । ते-सर्वमङ्गलास्पदत्वेन प्रमाणसिद्धायाः । एतत्पद-द्वयाभिप्रेतं व्यञ्जितं गद्ये * देवदेवदिव्यमहिषीमिति । * द्वाविमौ पुरुषौ लोके इत्यादिभिस्स्वेनैव निरुक्तेन परत्वव्यञ्जकेन समाख्याविशेषेण लक्ष्मीकान्तं विशिनष्टि—**पुरुषोत्तम** इति । अत्र पञ्चम्यादिविभक्तित्रयेऽपि समासश्शब्दवित्संमतः । अनेन हिरण्यगर्भादीनामपि भगवदपेक्षयाऽधमत्वव्यञ्जनात्तत्पत्नीभ्यः पुरुषोत्तमपत्न्या उत्तमत्वं सूचितम् । अवतारेऽपि ह्यसौ*नारीणामुत्तमेत्युच्यते । एवमस्याः पतिसंबन्धेन प्रकर्ष उक्तः । अथ पत्युरिव विभूतिसंबन्धेनापि प्रकर्षं वदन्नित्यसूरि-परिबृढानामपि एतदुपकरणत्वमुदाहरति—**फणिपतिश्शय्येति** । अत्र फणिपतिशब्देन सुरभिसुकुमारशीतल-विशालोन्नतत्वादिरूपाः पर्यङ्कगुणा व्यज्यन्ते । तत्प्रभावश्च, * कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः । सङ्कर्ष-णात्मको रुद्रो निष्कम्यात्ति जगत्त्रयम् ॥ स बिभ्रच्छेखरीभूतमशेषं क्षितिमण्डलम् ॥ आस्ते पातालमूलस्थश्शेषोऽशेष-सुरार्चितः ॥ तस्य वीर्यं प्रभावं च स्वरूपं रूपमेव च । न हि वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि ॥ इत्यादिषु प्रसिद्धः । स्तोत्रे च * तया सहासीनमनन्तभोगिनीत्यादौ । आसनशब्द इह काकाक्षिन्यायादुभयतो योज्यः । उक्तं ह्याचे

पुराणे तन्नामसहस्रे, * भोगप्रिया भोगवती भोगीन्द्रशयनासनेति, * अजिताकर्षणी नीतिर्गरुडा गरुडासनेति च । * वहेयं यज्ञं प्रविशेयं वेदान् इति सौपर्णश्रुतिविवक्षितं वेदाभिमानिदेवताधिष्ठातृत्वमभिप्रेत्याह—**वेदात्मा विहगेश्वर** इति । वेदाधिष्ठातृतया वेदानामात्मा; यद्वा. तद्विशिष्टत्वेन तत्समानाधिकरणतया वेद आत्मा यस्येति विग्रहः । * सुपर्णोऽसि गरुत्मानित्यादिष्वप्यस्य वेदात्मत्वं ग्राह्यम् । एवं सर्ववेदाभिमानितया सर्वज्ञत्वमप्यस्य सूच्यते । बलादिगुणत्वमपि अमृतापहरणादिषु प्रसिद्धम् । यद्यपि विहगेश्वरशब्दः * सत्यस्सुपर्णो गरुडस्तार्क्ष्यस्तु विहगेश्वरः इति **श्रीसात्वतादिषु** प्राणादिपञ्चकाधिपतित्वेनावस्थितस्य गरुडस्य व्यूहविशेषमभिधत्ते, तथाप्यत्र विशेषकाभावाद्गरुत्मन्मात्रविषयः । फणिपतिविहगेश्वरयोरुपादानमिह मिथो विरुद्धजातीयैरप्यविरोधेन युगपत्सेव्यत्वं सूचयति । कैमुत्यादन्येषां नित्यानां मुक्तानामप्येतत्परिजनपरिच्छदभावेनावस्थानं ख्याप्यते, तेषामप्येतदाज्ञाकरत्वमुक्तं **श्रीवैकुण्ठगद्ये** *शेषशेषाशनादिसर्वपरिजनमित्यादिना । एवं सर्वस्या अपि नित्यविभूतेस्तच्छेषत्वं तात्पर्यतः प्रदर्शितम् । अथ लीलाविभूतौ अचिदंशस्य प्रथमं तच्छेषतामाह **यवनिका माया जगन्मोहिनीति** । अत्र यवनिकाशब्दाभिप्रेतं **गद्ये** *भगवत्स्वरूपतिरोधानकरीमिति विवृतम् । एतद्ग्रन्थद्वयतात्पर्येण दिव्यदम्पत्योरनाश्रितापेक्षया त्रिगुणतिरस्करिण्या तिरोधेयत्वं फलितम् । मायाशब्दोऽयम् * मायान्तु प्रकृतिं विद्यात् इति प्रकृतिविषयतया **श्वेताश्वतरैः** स्मृतः । स च विचित्रसृष्ट्युपकरणतया प्रकृतेराश्चर्यमयत्वं व्यञ्जयति । जगन्मोहिनीत्यनेन जीवपरमात्मादिषु विपरीतधीहेतुत्वं शब्दादिगुणपरिणतिशबलितस्वविषयभोग्यताबुद्धिजनकत्वं च विवक्षितम् । ईदृशप्रकृतिमोहितानां कर्मवश्यानां सर्वेषामपि विष्णुपत्नीशेषत्वमुत्कृष्टमुखेन कैमुत्यन्यायादुपलक्षयति- **ब्रह्मेशादिसुरव्रजम्सदयितम्त्वद्दासदासीगण** इति। प्रकर्षनिदर्शनादीश्वरत्वशङ्कास्पदयोः * एतौ द्वौ विबुधश्रेष्ठौ इत्याद्युक्तयोर्ब्रह्मेशयोरप्यग्रीन्द्रादिभिरंकराद्यसूचनाय व्रजगणशब्दौ । सदयित इत्युपादानेऽप्यौचित्याद्दासीशब्दस्तत्पत्न्यंशेऽन्वेतव्यः । उक्तार्थे श्रुत्यादीनि प्रमाणानि तिष्ठन्तु, असाधारणसमास्त्र्यंबालमिति ख्यापयति - **श्रीरित्येव च नाम त** इति । *श्रयन्तीं श्रीयमाणां च शृण्वतीं शृण्वतीमपि * शृणाति निखिलं दोषं शृणाति च गुणैर्जगत् । श्रीयते चाखिलैर्नित्यं श्रयते च परं पदम् ॥ इत्यादिनिरुक्तिरिहाभिप्रेता । * निस्सङ्कल्पा निराश्रयेति नाम तु * श्रयते च परं पदमित्याद्यविरोधेन नेयम् * अकलङ्काऽमृताधारा इति पूर्वोक्तानुसाराच्च । अमृतो हि परमात्मा, तदाधारा चेयम् । अत एव हि सोऽपि श्रीनिवासःश्रीधर इति च समाख्यायते । उक्तं च **श्रीसात्वते**—* यतोऽहमाश्रयश्चास्या मूर्तिर्मम तदात्मिका इति । यन्नित्येशात् सर्वत्र प्राशस्त्यधीस्त्रैव हि ते समाख्येत्येवकाराभिप्रायः । निर्दोषमङ्गलगुणाकरत्वज्ञापनाय भगवतीत्युक्तिः । ईदृशातिशयशालिन्याश्रियो यथावत् स्तोतुमशक्यतामाह—**ब्रूमः कथं त्वामिति** ॥ त्वाम् उक्तप्रक्रियया विष्णुपत्नीत्वेन तदितरसर्वशेषित्वेन तदुचितनामधेयादियोगेन च प्रसिद्धाम् *न ते वर्णयितुं शक्ता गुणान् जिह्वाऽपि वेधस इति चतुर्मुखेनापि स्तोतुमशक्यतयोक्तां चेति भावः । **वयं** परिमितज्ञानशक्तयः । * ब्रह्माद्यास्सकला देवा मुनयश्च तपोधनाः । त्वां स्तोतुमपि नेशानास्त्वत्प्रसादलवं विना ॥ इति वचनानुसारेण ब्रह्मादीनां स्वस्य चात्राविशेषव्यञ्जनाय बहुवचनम् । **कथं ब्रूमः** - कात्स्न्र्येन त्वद्वर्णनमशक्यं, परिच्छिद्य वर्णनं त्वनुचितमिति भावः ।

ये पुनराहुः श्रीर्नाम भगवतस्सर्वकर्तुरधिष्ठेया प्रकृतिरिति । ये च तस्य सत्ताहन्ताप्रभाशक्तिविद्येच्छाभोक्तृतादिरूपेयम्, शास्त्रेषु तथातथा व्यपदेशदर्शनादित्याहुः । तेषां तत्रतत्रैव शास्त्रे निर्बाधेन चेतनत्वव्यपदेशेन निरासः ।

अत्राप्ययमर्थः ते त्वामिति युष्मच्छब्देन संबोधनेन च श्रियश्चेतनत्वमुपस्थापयता सूचितः । सत्तादिशब्दास्त्वस्यां भगवदन्तरङ्गविशेषणत्वाद्यभिप्रायाः । प्रकृतेरन्यत्वं तु ते यवनिकेत्यनेनापि दर्शितम् । न चास्याः प्रकृतिशब्दोपात्ततामात्रेण त्रिगुणद्रव्यतादात्म्यम्, *वासुदेवः परा प्रकृतिः * प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादित्युक्ते भगवत्यपि प्रसङ्गात् । * जगदुत्पादिका शक्तिस्तव प्रकृतिरिष्यते । सैव नामसहस्रैस्तु लक्ष्मीः श्रीरिति कीर्त्यते ॥ *मूलप्रकृतिरीशानी *प्रकृतेः पुरुषाच्चान्यस्तृतीयो नैव विद्यते इत्यादीनि ब्रह्मवचनान्यपि लक्ष्मीनारायणयोः प्रकृतिपुरुषरूपविभक्तविभूतिविशेषाभिमानित्वाभिप्रायाणि । रहस्याम्नाये तु प्रकृतौ लक्ष्म्यां च विद्याशब्दः प्रयुक्त इत्येतावताऽपि न तयोस्स्वरूपैक्यम् । तत्र हि सत्त्वोन्मेषमुखेन विद्याहेतुतया प्रकृतौ विद्याशब्दः, लक्ष्म्यां तु विद्याप्रवर्तकत्वादिति विशेषः । ये तु सत्तादिविशिष्टो भगवानेव श्रीरिति वा, श्रीरूपनित्यविग्रहान्तरविशिष्टस्स एवेयमिति वा, दैत्यमोहनभूमिकापरिग्रहन्यायेन स्वयमेव भोगार्थं परिगृहीतकादाचित्ककान्ताविग्रहस्स एव श्रीरिति वा वदन्ति ; तेऽपि तद्विषयनिर्बाधनित्यभिन्नचेतनत्वव्यपदेशकैस्तैस्तैरेव शास्त्रैर्निराकृताः । *ह्रीश्च ते लक्ष्मीश्च पत्न्यौ इति श्रुतिश्च पत्युः पत्न्याश्च स्वरूपभेदं स्वरसतो दर्शयति । न चात्रानन्यथासिद्धं बाधकमस्ति । इदमप्यत्र कान्तस्त इति व्यधिकरणनिर्देशेन व्यञ्जितम् । ये च मन्यन्ते - भगवत एव स्वरूपैकदेशः पृथगहन्तया परस्परभोक्तृत्वाय सर्वदा परिगृहीतस्त्रीरूपश्श्रीशब्दार्थः । तेन भेदाभेदव्यपदेशयोश्चेतनत्वस्य चाविरोध इति; तेऽपि ब्रह्मणस्स्वरूपतो निरवयवत्वं प्रतिपादयद्भिः प्रमाणैर्निरस्ताः । *नरनारीमया हरिः इति ब्राह्मपुराणवचनेन तु हरेर्नारीमयत्वव्यपदेशो *ज्योत्स्नेव हिमदीधितेरिति तत्रत्यदृष्टान्तानुसारेण प्रभाश्रयस्य प्रभामयत्वव्यपदेशवत्स्वरूपभेदाविरोधेन निर्वाह्यः । एतेन बीजादेरङ्कुरोपादानांशवद्विश्वोपादानस्य ब्रह्मणः कार्योपयुक्तस्वरूपैकदेश एव स्वभावतो वा परिणतिशक्त्या वा उपाधिभेदेन वा भिन्नाहन्ताश्रयश्श्रीरिति व्यपदिश्यत इति पक्षोऽपि प्रतिक्षिप्तः, ब्रह्मणस्स्वरूपपरिणामादेश्च शारीरके निरस्तत्वात् । उपहितांशभेदपक्षस्तु विग्रहाद्युपाधौ सञ्चरति निरवयवे ब्रह्मस्वरूपे सरिज्जलादौ घटादिनेवोपाधिना कस्यचिद्देशस्यान्यत्राकर्षणायोगात्, घटाकाशन्यायेन पूर्वपूर्वोपहितांशपरित्यागे तु तत्तद्देशरूपस्य भोक्तुरभावादुत्तरोत्तरोपहितांशानां पूर्वपूर्वांशानुभूतभोगप्रतिसन्धानानुपपत्तेः, भोक्तृसन्तत्येकतामात्रेण प्रतिसन्धाने सौगतमतोन्मज्जनेन स्थिरात्मपरित्यागप्रसङ्गाच्चात्यन्तानुपपन्नः । अवतारपरिणामोपाधिभिन्नांशवादिनो लक्ष्म्यादेर्नित्यदेहादिप्रमाणैश्च निरासिरे । एतदपि सर्वमत्र व्यधिकरणप्रयोगेनैव सूचितम् । *कीर्तिश्श्रीर्वाक्च नारीणामित्यादिसमानाधिकरणप्रयोगश्च पूर्वापरवत्स्वरूपभेदेऽपि संबन्धविशेषनिबन्धनः । *विष्णोश्श्रीरनपायिनीत्यादिभिर्व्यधिकरणप्रयोगैश्च भेदसिद्धः । तर्हीन्द्रप्रायन्यायात् सहपठितनार्यन्तरवत् कर्मवश्यत्वं स्यात्, न स्यात्, वचनविरोधे न्यायस्यानवकाशात् । न चेदेवम् *आदित्यानामहं विष्णुः, * वृष्णीनां वासुदेवोऽस्मि, * अनन्तश्चास्मि नागानां वैनतेयश्च पक्षिणामित्यत्र कुतस्तथात्वनिस्तारः ? निर्धारणादिति चेन्न । साजात्येऽपि वैषम्यमात्रेण तदुपपत्तेः । ईश्वरत्वानीश्वरत्वकर्मवश्यत्वाकर्मवश्यत्वादौ तु प्रमाणान्तरमेव शरणमिति । इदं चास्याः कर्मवश्यवैजात्यमिह ब्रह्मादिभ्योऽप्यधिकत्वोक्त्या प्रकाशितम् । नन्वर्धलक्ष्मीकविग्रहयोगः श्रीपतेः श्रियश्च विग्रहैक्यं स्वरूपैक्यं भेदाभेदं वा सूचयति । उक्तञ्च श्रीविष्णुवैभवाधिकारैः—*त्वं यादृशोऽसि कमलामपि तादृशीं ते दारान् वदन्ति युवयोर्न तु भेदगन्धः । मायाविभक्तयुवतीतनुमेकमेव त्वां मातरं च पितरं च युवानमाहुः ॥ इति । तन्न, उभयेच्छया विग्रहमात्रस्यैकीकरणसंभवेनान्यथाप्युपपन्नतया विग्रहैक्यस्य श्रुत्यादिविरुद्धस्वरूपै-

क्यादिकल्पकत्वायोगात् । तथाप्येकेनैव परमात्मना यथाकथञ्चित्सर्वनिर्वाहे किमत्रात्मभेदस्वीकारेणेतिचेन्न, कल्पनौ वक्तव्यस्य श्रुतौ वक्तुमयुक्तत्वात् । उक्ता च श्रुतिः प्रागेव । तदनुगुणं च **श्रीविष्णुस्मृतौ** भूमिवाक्यम् *आक्रम्य सर्वां तु यथा त्रिलोकीं तिष्ठत्ययं देववरोऽमिताक्षि । तथा स्थिता त्वं वरदे तथापीत्यादिकम् । *तानयोर्विद्यते परमित्यादिभिः पुराणवचनैः, * एकतत्त्वमिवोदितौ इत्यादिभगवच्छास्त्रवचनैश्च स्वरूपैक्यमनयोरपास्तम् । लाघवतन्मात्रावलम्बने तु सर्वेषामप्यात्मनामैक्य प्रसजेत् ।

आत्मभेदमनिच्छन्तो भाष्यादिषु निराकृताः । दिव्ययोस्त्विह दम्पत्योः मिथो भेदः प्रसाधितः ॥
सर्वेषामात्मनां यैस्तु भिन्नाभिन्नत्वमिष्यते । लक्ष्मीनारायणैक्योक्तिः तेषां सद्भिरुपेक्ष्यते ॥
यत्र क्वचिदभेदोक्तिर्यद्यात्मवचने भवेत् । रामसुग्रीवयोरैक्यमित्यादिवदिहास्तु सा ॥

अत्र निर्विशेषचिन्मात्रब्रह्मस्वरूपतिरोधानकरी मिथ्याभूता मायैव कल्पितरूपविशेषोपश्लिष्टब्रह्मप्रतिच्छन्दवती लक्ष्मीरित्युच्यते इति पक्षोऽपि तादृशब्रह्मतत्तिरोधानादिनिरासादेव निर्धूत । इदमप्यत्र मायायाः प्रस्तुतदम्पतिव्यतिरिक्तजगन्मोहनत्वोक्त्या प्रत्यापितम् । ननु यवनिका बहिरन्तस्स्थितयोः दृष्टिप्रसरनिरोधेन मिथोऽवलोकनविरोधिनी लोके दृष्टा । अतः श्रियोऽपि यवनिका तथा स्यात् । मैवम्, तदधीनसर्वव्यापारया मायया तस्यास्सर्वविषयसहजदृष्टिनिरोधायोगात् । क्षेत्रज्ञानामपि भगवन्मायया धीसङ्कोचस्य दुष्कृतोपाधिकत्वात् अकर्मवश्येषु नित्यमुक्तेष्वेषु तत्प्रसङ्गाभावादिति । अस्तु तर्हि कर्मवश्यतादात्म्यात्कर्मफलान्वयः, ब्रह्मादीनां कर्मवश्यत्वं तावत् * युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः । पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम ॥ इत्यादिभिः प्रसिद्धम् । किंपुनस्तत्पत्नीनाम् । ताभिश्च तादात्म्यमस्यास्तत्रतत्र विशेषतस्तत्तत्सामानाधिकरण्येन व्यज्यते । गायत्रीकल्पेषु च सन्ध्यात्रये वर्णवाहनादिविशेषितं रूपत्रयमेकस्या एव देवतायाः प्रतिपाद्यते । उक्तं च कैश्चिल्**लक्ष्मीस्तोत्रे**—*गौर्देवेति गरुडध्वजवल्लभेति इत्यादिभिः । अतः कर्मवश्यतादात्म्याद्यवनिकारूपितमायातिरोहितज्ञानत्वमस्या उपपद्यत इति । तदसत् । विशेषतस्सामानाधिकरण्यस्य * यद्यद्विभूतिमत्सत्त्वमित्युक्तेन विभूत्यध्यायन्यायेन निर्वाहात् । **तापनीयोपनिषदि घृतसूक्ते** च लक्ष्म्यास्तेते शब्दा अपि निरुक्तिविशेषैस्तत्तद्विभूतियोगेन वा नेतव्याः । गायत्रीकल्पानां तु **लक्ष्मीविभूति**भूताया एव गायत्र्याख्याया देवतायास्सन्ध्याभेदेन वैष्णव्यादिसमाख्यानुगुणवाहनरूपादिपरिग्रहशक्त्या माहात्म्यवर्णने तात्पर्यं तत्र तत्र व्यक्तम् । तादृशाश्च वाहनादयोऽन्ये स्युः । न हि सारूप्यमात्रेण त एवैत इति निश्चयः, अनेकेषामेकजातीयवाहनादिदर्शनात् ।

द्रुहिणादिषु केषांचिदीश्वरव्यक्तिनाम्नमात् । तत्पत्नीष्वपि लक्ष्म्यंशवादः श्रुत्यादिबाधितः ॥

एतदभिप्रायेण ह्यत्रोक्तम्—**सदयितस्त्वदासदासीगण** इति । * अस्त्वेवं, तथापि स्वयंशमात्रापेक्षयैव श्रियो विभूतिमत्त्वमस्तु, **ब्राह्मवैष्णवादिपुराणेषु** तथा दर्शनात् । अतः श्रीमत एव सर्वविभूतिशेषित्वमिति । अत्र ब्रूमः—* दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः इत्यादिभिस्सर्वेषामात्मनां परमात्मदासत्वसिद्धेः * जायापत्योर्न विभागः इति न्यायात्पतिदासानां पत्नीदासत्वमवर्जनीयम् । नन्वेवं पत्न्या अपि पतिदासत्वे सति तां प्रति दासानां दासत्वमयुक्तं स्यात् । तन्न, लोके वेदे वा क्वचिदपि पत्न्याः पतिं प्रति दासत्वाभावात् । अत एव हि *यदा यदा हि कौसल्या दासीवच्च सखीव चेति दृष्टान्ततयोच्यते । * अहं शिष्या च दासी च भक्ता च तव माधवेति भूमि-

वचनमप्युपचारतो नेयम् । यद्यपि पत्नीनां पतिदासत्वं, तथाऽपि पतिदासान्तराणां तद्दासत्वमपि यथालोकं युज्यते । अस्ति च सर्वेषां भगवद्दासत्वेऽपि तत्तदुपाधिभिः मिथो दासत्वम् । इह त्वेकयैवेच्छया विभूतिद्वयस्य नित्यमुभयार्थतया पात्तत्वाद्देवताद्वन्द्वहविर्न्यायेन ब्रह्मादीनामुभयशेषत्वं युक्तमेव । **गद्यादिषु** विभूतिमध्ये तस्याः पाठोऽपि पत्यपेक्षया पारार्थ्यमात्रसाम्यादुपपन्नः ।

आत्मान्तराणां सर्वेषां लक्ष्मीतत्पतिदासताम् । मकारस्तु तयोर्दास इति केचिदधीयते ॥

एवं सति भगवत्परत्वान्तरापेक्षया ब्रह्मादीनां दासत्वं भवतु वा मा वा. उक्तं तावदुपपन्नम् । अतः * पुन्नामा भगवान् हरिः, * स्त्रीनाम्ना लक्ष्मीर्मैत्रेय * योयो जगति पुम्भावस्स विष्णुरिति निश्चयः । योयन्तु नारीभावस्स्यात् तत्र लक्ष्मीर्व्यवस्थिता ॥ इत्याद्युक्तो विभूतिविभागस्तु लौकिकदम्पत्योर्यथोचितविनियोगानुगुणभूषणादिविभागवत्नित्येच्छानियमितविशेषाभिमानार्थ इत्यभिप्रायेण फणिपत्न्यादीनामप्यत्र लक्ष्मीशेषत्वोक्तिरिति । केचित्तु नानाविधवादिविप्रतिपत्तिमोहितास्सर्वथा दुर्निरूपं लक्ष्मीतत्त्वमिति मन्यन्ते । तेऽप्येवमिह निरूपणेन निर्धूताः । किञ्च सदसदनिर्वचनीयत्वादिरूपदुर्निरूपत्वं तत्तन्मतनिरासादेव निरस्तम् । येनकेनचिदाकारेण दुर्निरूपत्वं तु सर्वत्रापि संभवति, उपयुक्तांशनिरूपणस्यापि संप्रतिपन्नसाम्यान्नात्र विशेष इति ॥ १ ॥

यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभु-
र्नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः ।
तां त्वां दास इति प्रपन्न इति च स्तोष्याम्यहं निर्भयो
लोकैकेश्वरि लोकनाथदयिते दान्ते दयां ते विदन् ॥ २

अथ * कथं ब्रूम इति स्तुत्यारम्भाक्षेपहेतुतयोदाहृतं स्तोतव्यगतमुत्कर्षं मुखान्तरेण दृढीकुर्वन्नेव तदुपश्लिष्टं सौलभ्यविशेष(गुण)मनुसन्धाय स्तोतृगतदयनीयदशानिरूपणेन हेतुना स्तुत्यारम्भं समाधत्ते - **यस्या** इति ॥ यस्या इत्येतावता पर्याप्तेऽप्यत्र त इत्यधिकोपादानं धर्मिग्राहकमानसिद्धासाधारणविशेषद्योतनार्थम् । महिमानं विभूतिद्वयशेषित्वरूपं निरतिशयानुकूलगुणयोगरूपं च । आत्मन इव-स्वस्येव । त्वद्वल्लभः - त्वत्प्रियतमः । प्रभुः-सर्वविषयज्ञानशक्त्यादिमान् । प्रभुरपीत्यन्वयः । अपिरनुक्तसमुच्चयार्थो वा. त्वं च त्वद्वल्लभश्चेत्यर्थः ॥ नालं मातुमियत्तया-परिच्छेद्यानुसंधातुमसमर्थः । सर्वशक्तेः क्वचित्कथमसामर्थ्यमित्यत्राह-**निरवधिमिति** । विषयस्यापरिच्छिन्नत्वात् तत्र सर्वज्ञस्य सर्वशक्तेरपि परिच्छिन्नत्वज्ञानाभावो न दोष इति भावः । यथोक्तं **श्रीवत्साङ्कमिश्रैः**—*देवि त्वन्महिमावधिर्न हरिणा नापि त्वया ज्ञायते यद्यप्येवमथापि नैव युवयोस्सर्वज्ञता हीयते इति । ईदृशश्च महिमा **वेदार्थसङ्ग्रहेऽप्युक्तः**—* अनवधिकमहिमा महिषीति । विवृतश्च **गद्यारम्भे** * भगवन्नारायणेत्यादिना । श्रद्धासूक्तमेधासूक्तादितिसूक्तवाक्सूक्तादिष्वेतद्विभूतिविशेषप्रतिपादकेषु विशेषतः श्रीसूक्ते च विचित्रा एतन्महिमानस्तत्तद्भाष्यकारैः प्रपञ्चिताः प्रतिपत्तव्याः । अस्या महिम्नः प्राप्यान्तर्भावज्ञापनाय नित्यनिरुपाधिकानुकूलत्वमाह— **नित्यानुकूलं स्वत** इति । तां-सर्वज्ञसाक्षिकतादृशमहिमानम् । त्वां महत्त्वसङ्गतसौलभ्यगुणयोगात् मदीयस्तोत्रश्रवणकौतुकेनाभिमुखीभूताम् । दास इति प्रपन्न इति च पतिबुद्धदासभावत्वात्, प्रपन्नत्वाच्चेति (अर्थः) भावः । उभयमिदं सम्भूय * प्रेष्यस्य क्षमितव्यं म इत्यादिन्यायेन निर्भयत्वे हेतुः ।

पृथुगद्यमुखेऽस्माभिः श्रीप्रपत्तिरियं सताम् । श्रीपतौ स्थितमैकान्त्यं न विहन्तीति साधितम् ॥

स्तोष्याम्यहं निर्भयः—अनाद्युपचितापराधस्त्वन्महिमस्तोत्रानुगुणज्ञानशक्तिरहितश्चाहं नित्यसूरिभिः निगमैश्च कार्त्स्न्येन स्तोतुमशक्यां त्वां प्रतिबुद्धदास्यप्रपन्नत्वव्याजेन निर्भयस्तोष्यामीत्युक्तं भवति । एवं स्तोत्राक्षेप-तत्समाधानव्याजेन प्रवृत्तमपि श्लोकद्वयमिदं प्रकृष्टस्तुतिरूपमेव । त्वत्प्रपन्नस्य मे न कुतश्चिदप्यनीश्वराद्भयमित्यभिप्रायेणाह—**लोकैकेश्वरीति** । लोकैकेश्वरः प्रमाणसिद्धानां सर्वेषामद्वितीय ईश्वरः । ईश्वरशब्दश्चात्रान्तर्नीतशेषित्वं नियन्तृत्वमभिप्रैति । * पतिं विश्वस्येति विश्वशेषित्वेन निर्दिष्टस्य शेष्यन्तरनिवृत्तिविवक्षायामात्मेश्वरमिति निर्देशात् । * यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इत्यस्यार्थश्चैवं संगृहीतः - * व्यापनाद्भरणात्स्वाम्यादन्यः पञ्चदशोदित इति । तत्र च भाष्यम्—* व्यापनभरणस्वाम्यैरर्थान्तरतयेति । ईदृशेश्वरपदप्रवृत्तेरिह लोकैकेश्वरीत्युक्तम् । एतेन * पुंस्प्रधानेश्वरेश्वरीति समाख्याऽपि गतार्था । त्वत्प्रसादे सति सर्वेश्वरादपि मे भयं नास्तीत्याह—**लोकनाथदयित** इति । दयितशब्द इह वल्लभत्वाभिप्रायः । सर्वभयाभयहेतुभूतस्यर्वेश्वरोऽपि त्वदभिमतं नातिक्रामतीति भावः । अनेन संबुद्धिद्वयेन स्तुतिविषयत्वौचित्यातिशयोऽपि सूचितः । ईदृशीं त्वामाश्रितस्य मे त्वत्तोऽपि भयं नास्तीत्याह—**दान्ते दयां ते विदन्निति** । प्रतिबुद्धदास्यः कृपोत्पादकदीनावस्थापन्नः आज्ञातिलङ्घनाद्विरताभिसन्धिः प्रपन्न इह दान्तशब्दाभिप्रेतः । मातृत्वप्रयुक्तवात्सल्यातिशयवत्यामत्ते दान्ते पुरुषे भगवत्कारुण्यादप्यतिशयितां दयां जानन्नहमेवं प्रपन्नत्वान्निर्भय इत्यन्वयार्थः । प्रश्रितमात्रपरो वाऽत्र दान्तशब्दः । तावन्मात्रेऽपि हि तस्या विशेषाभिमानः तयैवोक्तः * धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि । प्रश्रिते दानशीले च सदैव निवसाम्यहम् ॥ इति । एवंविधश्च दयाविशेषः * करुणाप्रानतमुखीत्यस्याः समाख्ययैव ख्यापितः । अष्टोत्तरसहस्रनामसु च पठ्यते—* करुणां वेदमातरमिति । करुणाप्रचुरतयाऽसौ करुणात्वोक्तिः ।

पारम्यापह्नवः पत्यौ बाह्यानां मानबाधितः । इति ख्यापयितुं श्रीशं श्रीरुपान्तमिहाब्रवीत् ॥

अथ स्यात् * आनीदवातं स्वधया तदेकमिति प्रलयदशायां स्वधाशब्दवाच्यया कयाचित्परस्य ब्रह्मणोऽनने श्रूयते । सा चात्र * स्वधा त्वं लोकपावनीति पुराणोक्तेः, **महाभारते** च श्रीवासवसंवादे * अहं स्वाहा स्वधा चैवेति स्वयमेवोक्तत्वादौचित्याच्च लक्ष्मीरेव । अनस्तदधीनप्राणनत्वं ब्रह्मण इति । तन्न, स्वाधीनसर्वसत्ताकस्य तस्यान्याधीनप्राणनत्वासंभवात् । स्वधाशब्दस्य चात्र प्रयोगदर्शनमात्रेण लक्ष्मीविषयत्वकल्पनादपि स्वस्मिन् धीयत इति व्युत्पत्त्या स्वसत्ताविषयत्वस्य कल्पयितुं युक्तत्वात् । स्वकीयं विश्वधारणसामर्थ्यमेव वा स्वधा । तथा * श्रेष्ठश्चेत्यधिकरणे **भाष्यम्**—* आनीदवातमिति तु न जैवं श्रेष्ठं प्राणनमभिप्रेत्योच्यते । अपि तु परस्य ब्रह्मण एकस्यैव विद्यमानत्वमुच्यत इति । अत्रानन्याधीनसत्ताकत्वमेव ह्यभिप्रेतम् । अस्तु वा स्वधयेति पदं लक्ष्मीविषयम् । तथाऽपि सहयोगविवक्षैवात्र युक्ता । यथा **महाभारते**—*कृत्वा मत्स्थानि भूतानि चराणि स्थावराणि च । एकाकी विद्यया सार्धं विहरिष्ये द्विजोत्तम ॥ इति । ननु * ततो भूयो जगत्सृष्टिं करिष्यामीह विद्ययेति वाक्यशेषेणौचित्यात्तत्र विद्याशब्दः प्रकृतिविषयस्स्यात् । भवत्वेवम् । तथाऽपि प्रस्तुतमहोक्तिमात्रसंभवोदाहरणमिदं युज्यत एव । यद्वा * तेनेयं सच धर्मात्मा मुहूर्तमपि जीवति इतिवत् स्वधया आनीदिति प्रेमपारतन्त्र्ये तात्पर्यम् । अथ स्यात् * मेधा श्रद्धा सरस्वती * अहं श्रद्धा च मेधा च इति स्मृत्युपबृंहितया * श्रद्धया देवो देवत्वमश्नुते, इति श्रुत्या पत्न्यधीनोत्कर्षत्वं परस्य

देवस्य प्रतीयते इति । तदपि न चोद्यम् । स्वतस्सिद्धातिशयस्य भास्करस्य प्रभान्वयेनेव * श्रियः श्रीश्च भवेदित्युक्तस्य भगवतस्स्वपत्न्याऽप्यतिशयान्तरे दोषाभावात् । अभिरूप एवाभरणेनापि द्योतमानत्वमश्नुत इत्यादिष्विवायोगव्यवच्छेदमात्रेणाप्यर्थोपपत्तौ बहुप्रमाणविरुद्धस्यान्ययोगव्यवच्छेदस्य कल्पयितुमयुक्तत्वात् । देवत्वं च निष्कृष्यमाणं देवन संबन्ध एव, * कृत्तद्धितसमासेषु संबन्धाभिधानं त्वतलाविति शाब्दोक्तेः । तच्च देवनं विहरणादिरूपं स्वबलभासहितस्यैव परस्य देवस्य भवतीति सुस्थोऽयं पन्थाः । आहुश्च * यस्या वीक्ष्य मुखम् * अङ्गीकारिभिरालोकैः * क्रीडसि श्रीसमक्षमित्यादि । एवमासप्रणीतान्यन्यान्यपि कानिचित् स्तुतिवाक्यानि प्रमाणानां स्ववाक्यान्तराणां चाविरोधेन स्थाप्यानि । यानि च ब्राह्मे पुराणे * सर्वातिशायिनी प्रीतिः * सर्वोत्कृष्टा सर्वमयी, * अनौपम्या निर्विकल्पा इत्यादीनि लक्ष्मीनामानि तान्यपि * न तत्समश्चाभ्यधिकश्च दृश्यते * यस्मात्परं नापरमस्ति किञ्चित्, * तमीश्वराणां परमं महेश्वरम्, * क्षरात्मानावीशते देव एकः, * एक इद्राजा जगतो बभूव, * शास्ता चराचरस्यैकः, * एकः शास्ता न द्वितीयोऽस्ति शास्ता, * शास्ता विष्णुरशेषस्य, इत्यादिप्रमाणगणानुसारेण भगवद्व्यतिरिक्तसर्वापेक्षया तन्महिष्याः प्रकर्षं विवक्षन्ति । तथा सति * शक्तिश्च कस्य नाधिकेति तत्रत्याक्तिरपि संगच्छते । शक्तिशब्दोऽपि ह्यत्र विहाराख्यकार्योपयुक्तविशेषणत्वाभिप्रायः पत्नीविषय एव ।

अत्यन्तसाम्यमप्यस्यां दृष्टान्तस्वरसागतम् । स्याप्यं नियतनिर्बाधपत्नीत्वाद्यविरोधतः ॥

अत्र * तस्य शक्तिद्वयं तादृगमिश्रं भिन्नलक्षणमिति **सात्वतोक्तं** देव्यास्तादृक्त्वमपि श्रुतिस्मृतिपूर्वापरादिप्रसिद्धपत्नीत्वाद्यनुगुणं योज्यम् । किञ्च यथा मुक्तस्य भगवता परमसाम्ये श्रुतिस्मृत्यादिसिद्धेऽपि * जगद्व्यापारवर्जमिति लक्षणभूतैराकारैर्वैषम्ये स्थाप्यते, तथेहापि भवति । * भिन्नलक्षणमिति च तत्रैवोक्तम् । आहुश्च * पितेव त्वत्प्रेयानित्यारभ्य * माता तदसि न इति । एवमनभ्युपगमे तां पुरस्कृत्य भगवदभिगमनमपि तत्रतत्रोक्तं दुश्शकं स्यात् ।

अस्ति कर्माईफलदे पत्यौ कृत्यद्वयं श्रियः । निग्रहाद्वारणं काले सन्धुक्षणमनुग्रहे ॥

उक्तं च **श्रीविष्णुचित्तैः** गजव्याख्यानारम्भे * मातृत्वैकरूपां श्रियं प्रपद्यते । माता हि हितादपि पुत्रस्य प्रियमेव पश्यति, पिता तूभयं पश्यति ; अतो दण्डधरत्वहीनतैवावलम्बनमस्यां दशायामासीदिति । अत्र वरदगुरूपदेशानुसारिभिः **व्यासार्यैश्चोक्तम्** * प्रतापोष्मलपितृत्वदुरासदभगवत्समाश्रयणसिद्धये पुरुषकारानुविष्टवात्सल्यनिर्भरलक्ष्मीसमाश्रयणं श्रीमच्छब्दविवरणमुखेनाभिधीयत इति । नन्वस्या दण्डधरत्वाभावे * दैत्यदानवमर्दिनीत्यादिनामानि न घटेरन् । मैवम् ; * सीतायास्तेजसा दग्धां रामकोपप्रपीडितामित्यादिष्विव कोपस्य पतिसंश्रयत्वेऽप्यस्यास्तदनुमतिमहिम्नाऽपि दैत्यनिरासादिसिद्धेः । स्वासाधारणविभूतिविशेषद्वारा वा तदुपपत्तिः । तदभिप्रायेण हि पुराणेषु * सौम्यासौम्यैर्जगद्रूपैरित्याद्युच्यते ।

यत्किञ्चिदपि वैषम्यं यदि नामात्र नेष्यते । तयोर्देहव्यवस्थाऽपि न सिध्येत्सर्वसंमता ॥
अव्यवस्थितिपक्षस्तु हेतुपक्षोऽयमित्यपि । अश्रुतत्वादिहानुक्तेर्दूषणं वाऽपि नार्हति ॥
न हि सिद्धे विकल्पस्स्याच्च संदेहोऽत्र निश्चयात् । न कालाद्यैर्विपर्यासस्तन्नित्यत्वादिसाधनात् ॥ २ ॥

ईषत्त्वत्करुणानिरीक्षणसुधासन्धुक्षणाद्दृश्यते
नष्टं प्राक्तदलाभतस्त्रिभुवनं संप्रत्यनन्तोदयम् ।
श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते
संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् ॥ ३

एवं स्तुत्याक्षेपसमाधानव्याजेन स्वामित्वसौलभ्यादिकं प्रतिपाद्य स्तोतुमुपक्रान्तस्सर्वाश्रयणीयत्वाय सकलपुरुषार्थहेतुत्वमुदाहरणविशेषार्थान्तरन्यासाभ्यामुपपादयति - **ईषदिति** ॥ एतदनुग्रहैकदेशोऽपि अनन्तानिष्टनिवृत्तेरनन्ताभ्युदयसिद्धेश्च निदानमिति व्यञ्जयितुमीषच्छब्दः । त्वच्छब्देन * प्रणिपातप्रसन्ना हि * श्रियप्रसादिनीं देवीमित्यादिषूक्तस्स्वभावस्सूच्यते । सामान्यतश्च तदनुग्रहस्य सदातनत्वमुक्तं **मङ्कणसंहितायाम्** * पद्मे स्थिता पद्मवर्णा पद्मनाभप्रिया शुभा । सदाऽनुग्रहसंपन्ना सा मे देवी प्रसीदतु ॥ इति । अष्टोत्तरनामस्तोत्रे च * नमामि कमलां क्षान्तिं क्षमां क्षारोदसंभवाम् । अनुग्रहपरामृद्धिमनघां हरिवल्लभाम् ॥ इति । अनिष्टनिवर्तनेष्टप्रापणानुगुणकरुणाहेतुकं निरीक्षणं करुणानिरीक्षणम् । करुणया विषयीकरणं वा निरीक्षणशब्देनोपचर्यते । तदिदमुक्तं तत्संहितायाम् * सामर्थ्यजुर्मयी देवी वेदगर्भा मनस्विनाम् । लोकेशविभूतीनां कारणं यन्निरीक्षणम् ॥ इति । तस्य विश्वसञ्जीवनतया सुधात्वरूपणम् । तया सन्धुक्षणं - सम्यगुल्लासनम् । अत्र पक्षद्वयमुक्तं हेतुत्वं तु उदयापेक्षया रक्षणापेक्षया च योज्यम् । रक्ष्यते - निरुपद्रवमवस्थाप्यते । प्राक् - त्वदुपेक्षाकाले, तदलाभतः त्वन्निरीक्षणालाभतः, न तु त्वत्कोपतः, * कः कुप्येद्वानरोत्तमेत्यादि वदन्त्यास्तव कोपासंभवात् । त्रिभुवनशब्देन त्रैलोक्यान्तर्वर्तिनः क्षेत्रज्ञा लक्ष्यन्ते । संप्रति * ततोऽवलोकिता देवा इत्यादियुक्तायां त्वन्निरीक्षणदशायाम् । अनन्तोदयं पूर्वकालादप्यतिशयिताभ्युदयमित्यर्थः । उक्तं ह्येतत्सर्वमिन्द्रेण * त्वया देवि परित्यक्तं सकलं भुवनत्रयम् । विनष्टप्रायमधुना त्वत्कृतेदानीं समेधितम् ॥ इति । अत्र प्रलयादिकं विवक्षितमिति केचित् । एवमन्वयव्यतिरेकाभ्यामेतत्कटाक्षाधीनं देवादीनामैश्वर्यमिति दर्शितम् । यथाऽऽह **काश्यपः** * ब्रह्माद्याश्च सुरास्सर्वे मुनयश्च तपोधनाः । एधन्ते त्वत्पदच्छायामाश्रित्य कमलेश्वरि ॥ इति । **मङ्कणसंहितायाञ्चाष्टानामपि** लोकपालानां तत्पूजानिरतत्वं तदधीनवैभवत्वं च प्रपञ्चितं द्रष्टव्यम् । उक्तसमर्थनव्याजेन सर्वपुरुषार्थानां तत्प्रसादाधीनत्वमाह - **श्रेय** इति । अत्र त्वत्प्रसादादिति वक्तव्ये अरविन्दलोचनमनःकान्ताप्रसादादिति कथनं तथाविधप्रसिद्धिप्रकर्षद्योतनार्थम् । अरविन्दलोचनशब्देन * यं पश्येन्मधुसूदन इत्याद्यभिप्रेतं श्रीपतेरप्यनुग्रहशीलत्वं सूच्यते । तन्मनःकान्तात्वोक्तिः सर्वापेक्षितदाने तयोस्समानाभिप्रायत्वं व्यनक्ति । अत्र मनश्शब्दो बुद्ध्युपचरितः, भगवतः करणायत्तज्ञानत्वाभावात् । मनःकान्ता-अभिमतेत्यर्थः । पूर्वं कान्तस्त इत्युक्तम्, अत्र तु इयं भगवतः कान्तेति । एतेन परस्परानुकूलतया सर्वत्र व्यापारे सामरस्यं व्यज्यते । प्रसादात् - कृपाविशेषादिति यावत्, अस्याः क्वचिदपि निग्रहासंभवेन तन्निवृत्तिरूपप्रसादायोगात् । संसृतिशब्द इह पुरुषार्थसमभिव्याहारात्पारिशेष्याच्चैश्वर्यपरः । तेन त्रिवर्गान्तर्भूतं सर्वमभिमतमपि विवक्षितम् । अक्षरशब्दस्तु प्रत्यगात्मानुभवपरः । वैष्णवाध्वशब्देन गतिविशेषद्वारा भगवत्प्राप्तिर्लक्ष्यते । एतेषु **श्रेयः**—श्रेष्ठं सुखं तत्साधनं वा । * पुण्यश्रेयसी सुकृतं वृष इति हि पठन्ति । **नृणामिति** सर्वक्षेत्रज्ञोपलक्षणम् । हिरण्यगर्भस्यापि **ब्राह्मे पुराणे** तदधीनैश्वर्यत्वमुक्तम्-* पद्मयोनिरिदं प्राप्य पठन् स्तोत्रं ततः क्रमात् । दिव्यं चाष्टगुणैश्वर्यं तत्प्रसादाच्च लब्धवान् ॥ इति ॥

ब्रह्मादीनां यदायत्तं वैभवं यस्य सा स्वयम्। तस्य कैमुत्यनिर्वार्यमीश्वरत्वं श्रियःपतेः॥

एतत्प्रसादादृते नृणां श्रेयो हि न संभाव्यत इति व्यतिरेकोक्त्याऽग्रीन्द्रादिप्रयुक्तमपि नृणां श्रेयः एतदधीनमिति व्यज्यते। **हि**शब्देन श्रीसूक्तश्रीस्तुत्यादिषु सर्वशास्त्रेषु च प्रसिद्धिर्द्योत्यते। **न संभाव्यते**-न सिध्यतीत्यर्थः। ईदृशस्यास्याः प्रसादस्येन्द्रादीनामिव कालभेदभेद्यत्वं च नास्तीति व्यञ्जनाय कर्हिचिदित्युक्तम्। ननु मोक्षप्रदत्वं भगवत एवेति सर्वत्र स्थापितम्। **श्रीसान्वते** च स्वस्य मोक्षप्रदत्वं देवानामैश्वर्यप्रदत्वं च विभज्योक्तम्। तदत्र संसृत्यभ्रर वैष्णवाध्वस्विति अविशेषवचनं प्रशंसामात्रपरं स्यात। मैवम्। **श्रीसान्वत** एव * यामालम्ब्य सुखेनेमं दुस्तरं हि गुणोदधिम्। निस्तरन्त्यचिरेणैव व्यक्तध्यानपरायणाः॥ इति बन्धहेतुभूतगुणोदधिनिस्तरणकारणत्वेन लक्ष्मीसमाश्रयणस्य प्रतिपादनात्। उक्तं च स्वयंभुवा * सर्वकामप्रदां रम्यां संसारार्णवतारिणीम्। क्षिप्रप्रसादिनीं लक्ष्मीं शरण्यामनुचिन्तयेत्॥ इति। **ब्राह्मे च पुराणे** तन्नामान्येव पठ्यन्ते * सकृद्विभाता सर्वार्तिसमुद्रपरिशोषिणी, * भवभङ्गापहारिणी, * परनिर्वाणदायिनी, * ज्योतिष्मत्यमृतावहेत्यादीनि। **वैष्णवे** च * आत्मविद्या च देवि त्वं विमुक्तिफलदायिनीति। अत्र विमुक्तिफलदायित्वस्यात्मविद्याविशेषणत्वेऽपि तादृशविद्यायास्तदधीनत्वाक्त्या प्रकृतसिद्धिः। मोक्षहेतुभूतात्मगुणसिद्धिश्च तदधीनेति तत्रतत्रोक्तम्। एवं स्थिते गवारम्भोक्तन्यायेन मोक्षोपायतदधिकारयोस्तावदेतन्मूलत्वं दुरपह्नवम्। मोक्षप्रदे भगवति मुमुक्षूणां घटकतयैषा तिष्ठतीति च सर्वसम्मतम्। परिपूर्णानुभवपदानसङ्कल्पस्तु भगवतस्स्वस्यैव वा सपत्नीकस्य वेति यथाप्रमाणं भवतु। सर्वथा वैष्णवाध्वश्रेयःप्रदत्वमस्या इहोच्यमानं न विरुद्धमिति॥ ३॥

शान्तानन्तमहाविभूति परमं यद्ब्रह्म रूपं हरे-
र्मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतम्।
यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि ता-
न्याहुस्स्वैरनुरूपरूपविभवैर्गाढोपगूढानि ते॥ ४

एवं श्लोकत्रयोक्तायास्सहधर्मचारिण्या भगवतस्स्वरूपविग्रहावतारेष्वयोगव्यवच्छेदं वदन्नस्या अपि तद्वत्प्रधान प्राप्यत्वं सूचयति **शान्तेति॥ शान्तम्** - अशनायाद्यूर्मिभिरपक्षयादिविकारैश्च नित्यानन्वितमिति भावः। **अनन्तम्** - त्रिविधपरिच्छेदरहितम्। महत्यौ शुद्धाशुद्धे विभूती यस्य तन्महाविभूति। परमं - सर्वोत्कृष्टम्। यच्छब्दः सर्वोपनिषत्प्रसिद्धिं सूचयति। **ब्रह्म** - निरतिशयबृहत्त्वबृंहणत्वयुक्तं रूपं, स्वरूपमित्यर्थः। अत एव व्यतिरेकविभक्तिश्चात्र घटते। **हरेः** - आश्रितदोषहारिणस्सर्वेश्वरस्य. यद्वा सर्वसंहर्तुः, यथोक्तं पुराणे * ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च। निगृह्य हरते यस्मात्तस्माद्धरिरितीर्यते॥ इति। एतच्चतुर्विधप्रलयकर्तृत्वोपलक्षणम्। उक्तस्वरूपानुरूपं * मूर्तं ब्रह्म महाभागेत्यादिप्रसिद्धं सालम्बनयोगविषयभूतं दिव्यविग्रहमाह - **मूर्त**मिति। मूर्तं - स्पर्शरूपादियुक्तं परमपदपर्यङ्कादिदेशपरिच्छिन्नं चेत्यर्थः। अत्र ब्रह्मशब्देन दिव्यविग्रहस्यातिमहत्त्वं स्वसंश्रितानां धीविकासहेतुत्वं च विवक्षितम्। ततोऽपि * आनन्दो ब्रह्म इत्याद्यामातास्वरूपादपि तत्प्रियतरं तस्य निरतिशयानन्दस्य भगवतस्स्वरूपादपि सौन्दर्यादिगुणयोगादतिशयेन प्रीतिविषयभूतम्। तदिति व्यस्तं वा, प्रसिद्ध्यतिशययोतनार्थं यत्तदित्यन्वेतव्यम्। **रूप**शब्द इह दिव्यविग्रहपरः। यच्छब्देन श्रुतिषु भगवच्छास्त्रादिषु च नित्यत्वादिविशिष्टतया प्रसिद्धिस्सूच्यते। **अत्यद्भुतं** - सन्निवेशगुणविहारप्रभावादिभिरतिविस्मयावहम्। एवमादिमं रूपमुक्तम्। अथ तद्विजृम्भितानि व्यूहव्यूहान्तरविभव-

विभवान्तरादीन्याह - **यान्यन्यानीति** । यच्छब्द इहावताररहस्यप्रकरणादिप्रसिद्धिपरः । बहुवचनेन * पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः इत्याद्युक्तं भूयस्त्वं विवक्षितम् । अन्यानि - पररूपात्तदंशतया सन्निवेशैर्वर्णादिभिश्च विलक्षणानि । यथायुधं मनुष्यादिसजातीयावतारदशायामप्यस्य स्वाभाविकसुखादिनिवृत्तिर्दुःखं वा नास्तीति भावः । विहरत इत्यनेनावताररूपाणां स्वेच्छामात्रहेतुकत्वं क्रीडार्थत्वं च गम्यते । तेन कर्महेतुकत्वादिशङ्का निरस्ता । एतेषु स्वरूपादिषु किञ्चिदपि श्रियाऽनन्वितं नास्तीति द्योतनाय सर्वाणि तानीत्युक्तम् । **आहुः**—श्रुतिस्मृत्यादीनि, तद्विदो वा स्वयम्भूवसिष्ठपराशरपाराशर्यात्रिकाश्यपशौनकमङ्कणशतमुखधनदादयस्तत्तत्संहिताप्रणेतारः । स्वैः - तवासाधारणैः, अनुरूपरूपविभवैः - अनुरूपाणां रूपाणां सम्पद्भिः । रूपाण्येव वा विभवः, प्रभूतानुकूल्यैरनुरूपरूपैरिति यावत् । रूपशब्द इहापि पूर्ववत्स्वरूपादित्रिकविषयः । भगवत्स्वरूपादीनामेतत्स्वरूपादीनि यथाक्रममनुरूपाणि । अनुरूपत्वं च संबन्धे सति प्रकृष्टं सादृश्यम् । रत्नकाञ्चनादिन्यायेन स्वसम्बन्धिनि शोभातिशयहेतुत्वं वा । त्रयाणामानुरूप्यं * मद्धर्मधर्मिणी नित्यम् * नित्येयैषा जगन्माता * देवत्वे देवदेहेयमित्यादिभिरभिहितम् । भगवच्छास्त्रे त्वस्य विस्तरः । गाढोपगूढानि-दृढसंबद्धानि वियोगानर्हाणीत्यर्थः । एतेन सन्नियोगशिष्टन्यायस्सूचितः । अपराधभीतानां भगवत्सर्वदा शरण्यत्वार्थं प्राप्तिदशायां शर्करान्वितधुग्धन्यायेन निरतिशयभोग्यत्वार्थं च सर्वप्रकारेण श्रिया गाढोपगूढत्वोक्तिः । निरतिशयभोग्यस्यापि तादृशभोग्यान्तरोपश्लेषणापि भोग्यत्वमविरुद्धम् । ते भगवदभिमतस्वरूपरूपादिसंपद इति भावः । अस्त्वेवं भगवत्स्वरूपरूपादिषु तत्तदनुरूपाकारैरस्यास्संबन्धः, क्वचित् * सर्वभूतस्थिता द्विज * यथा सर्वगतो विष्णुरित्यादिकं वचनमन्यत्र प्रशस्तपदार्थमात्रवासित्ववचनं च कथं घटेतामिति चेदत्र ब्रूमः—

शुभैकवासवचसां सर्वगत्वगिरामपि । अभिमानविशेषाद्यैर्विषयस्याद्यवस्थितः ॥
व्यापिनी सर्वगत्याद्यास्सुसूक्ष्मेत्यादयस्तथा । श्रीसमाख्या मिथो वैरं जह्युस्तात्पर्यभेदतः ॥
शक्तिकालवशादस्या विभुत्वाद्युपपादकाः । प्रच्छन्नस्पष्टजैनाध्वनिरोधादगतीकृताः ॥

एवं किल ते वदन्ति-यथा विभुस्वभावस्येश्वरस्याघटितघटनासामर्थ्यादणुत्वम्, तथाऽणुस्वभावाया एव तस्या विभुत्वमिति । तत्र दृष्टान्तस्तावदयुक्तः । उपाध्यवच्छेदमात्रेण ह्यणुत्वमीश्वरेऽङ्गीक्रियते न तु स्वरूपतः । यदि चाघटितघटनाशक्त्याऽत्र विरुद्धद्वयसंभवः, तदा सर्वाद्वैतभेदाभेदपक्षाभ्यां किमपराद्धम् ? अथोच्यते - अणुस्वभावत्वेऽपि विकासकशक्त्याऽस्याः कदाचिद्विभुत्वमविरुद्धमिति, तथा सति समानन्यायतया सर्वेषामात्मनां स्वरूपविकासस्वीकारे विरोधो न स्यात् * न च पर्यायादप्यविरोधो विकारादिश्य इति जैनप्रतिक्षेपसूत्रमप्यपार्थकं स्यात् । ननु च * का चाऽन्या त्वामृते देवि इत्यादिन्यायेन भगवद्विग्रहनिवासित्वमनन्तगरुडादिवन्नित्यभगवदिच्छानियमिताधिकारविशेषसिद्धतया श्रियस्स्तुतये भवतु, भगवत्स्वरूपे तु गाढसंबन्ध उच्यमानस्सर्वसाधारणत्वान्नैतस्यास्स्तुत्यै स्यात् । तत्र यद्यनुरूपत्वोक्त्या स्तुतिसिद्धिरभिप्रेता, तदा किं तदनुरूपत्वम् ? अणुत्वेन वैषम्येऽपि स्वतन्त्रशेषिणं प्रति पारतन्त्र्यशेषत्वाभ्यां विभूतित्वेनातिशयावहत्वमिति चेत्तदपि सर्वचिदचित्समानम् । न चानादिसर्वज्ञत्वादिसाम्यमिहानुरूप्यं, तस्यापि नित्यसूरिसाधारणतया तान्प्रति शेषित्वेनोक्तायास्तस्यास्तेन स्तुत्यनुपपत्तेः । अन्यथा द्रव्यत्वचेतनत्वादिभिरपि स्तोतव्यत्वप्रसङ्गात् । अथ * त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरमित्यादिवचनसारस्यावगताद्विभुत्वादनुरूपत्वं विवक्ष्यते, तदप्ययुक्तम्, जीवेश्वरकोटिविकल्पानुपपत्तेः । जीवत्वं ह्यणुत्वव्याप्तम्, क्वचिज्जीवे तन्निवृत्तावतिप्रसङ्गः ।

* यथा सर्वगतो विष्णुः इत्यादिव्याप्तिवचनं * सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देवि ! पूरितमित्युक्तासङ्घातविग्रहसंबन्धाभिप्रायं स्यात् । ईश्वरत्वे तु भगवतोऽन्यत्वे तस्य समाधिकदरिद्रत्वश्रुतिविरोधः । तदनन्यत्वे दम्पतित्वाद्यनुपपत्तिः । आनुरूप्यवचनं चानर्थकं स्यात् । इमौ चात्यन्तसाम्यस्वरूपैक्यपक्षौ पूर्वमपि निरस्तौ । अत्र भेदाभेदकाल्पनिकभेदाभेदपक्षौ च प्रामाणिकैः प्रतिक्षिप्ताविति । अत्रोच्यते —यत्तावदुक्तमितरसाधारणैराकारैस्तुल्यानुपपत्तिरिति, तदसत्, व्यावर्त्यान्तरवत्त्वे प्रयोजनविशेषवत्त्वे च सत्यनेकसाधारणैरपि कैश्चित् स्तुत्युपपत्तेः । स्तूयते हि सर्वेश्वरोऽपि नित्यमुक्तसाधारणैराकारैस्सर्वज्ञत्वादिभिः । यत्तु विभुत्वे जीवेश्वरकोटिविकल्पानुपपत्तिरिति, तत्र केचिदेवं परिहरन्ति - जीवत्वेऽप्यस्या विभुत्वं न विरुध्यते. जीवविषयाणुत्वश्रुतिर्हि न सर्वजीवव्यापिनी, तत्तत्प्रकरणसन्निहितेषु बद्धेष्वेव तत्प्रवृत्तेः, * बालाग्रेत्यादौ तु * स चानन्त्याय कल्पत इति मुक्तविषयो वाक्यशेषः आत्मनां निर्विकारत्वस्थापनाद्धर्मभूतज्ञानद्वारा व्याप्तिमभिसन्धत्ते । एवम् * सर्वमेवाविशन्नित्यादीनि वाक्यान्तराण्यपि । एतच्च * प्रदीपवदावेशः इत्यादिसूत्रे प्रदर्शितम् । नित्येषु च संपतिपन्नजीवसाजात्यागतस्याणुत्वस्य बाधकश्रुत्यभावादनुग्राहकसद्भावाच्च स्वीकारः । लक्ष्म्यास्तु तथैव प्राप्तस्याणुत्वस्यानन्यथासिद्धव्यापित्ववचनं बाधकम् । न च सर्वगतादिशब्दानां सार्वत्रिकावतारसर्वशेषित्वादिप्रतिपादकत्वं कल्प्यम्; यथाश्रुतस्वीकारे विरोधाभावात् । नापि मुक्तवद्धर्मभूतज्ञानद्वारा व्याप्तिकल्पनं युक्तम्; तद्वत् बाधकश्रुत्याद्यभावात् । विभुद्रव्यासंभव इह बाधक इति चेन्न, कालतत्त्वे नित्यमुक्तेश्वराणां धर्मभूतज्ञाने च विभुत्वस्वीकारात् । जीवलक्षणमपि परतन्त्रचेतनत्वमात्रम्, अणुचेतनत्वं त्वेतद्व्यतिरिक्तजीवविषयम् । अथवा जीवलक्षणेऽणुशब्दः परिच्छिन्नमात्रपरस्सन् अमुष्यां भगवत्पराधीनायां स्वातन्त्र्यगुणपरिच्छेदेन वर्तताम् । एवं च जन्माद्यधिकरणे **भाष्यम्***अनन्तपदं देशकालवस्तुपरिच्छेदरहितस्वरूपमाह । सगुणत्वात्स्वरूपस्य स्वरूपेण गुणैश्चानन्त्यम् । तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणास्सातिशयस्वरूपस्वगुणा नित्या व्यावृत्ता इति । अत्र ह्यन्येषां नित्यानां स्वरूपतो गुणतश्च सातिशयत्वेन व्यावृत्तत्वं, लक्ष्म्यास्तु स्वरूपतो निरतिशयत्वेऽपि पारतन्त्र्यादियोगात् गुणतस्सातिशयतया व्यावृत्तता युज्यते । तथा च जगत्कारणत्वलक्षणेऽपि व्यापारतस्सातिशयत्वाद्व्यावृत्तत्वम् । अतो जीवत्वेऽप्यस्यास्स्वरूपविभुत्वेन पतिस्वरूपानुरूप्यमिति । अपरे त्वस्याश्चेतनत्वात् अचिदन्यत्वं विभुत्वाज्जीवान्यत्वं पारतन्त्र्यादीश्वरान्यत्वं च । न हि सदसद्विलक्षणादिष्विवात्र विरोधः. जीवेश्वररूपेण विविधात्मविभागवचनेषु त्वस्या अनुक्तिरविवक्षामात्रात् । वस्तुतस्तु पतिपुत्रव्यावृत्तपत्नीन्यायेन लक्ष्म्याः कोट्यन्तरत्वम्, तत्र लक्ष्म्या अपि सत्ता भगवदधीना, भगवतस्तु वैभवं रत्नप्रभापुष्पपरिमलन्यायेन लक्ष्म्यायत्तम् । अतोऽत्रापि पतिस्वरूपानुरूप्यं पत्नीस्वरूपस्य सुगममिति । अन्ये तु स्वरूपस्थितिरेवमस्तु, तथापि सेयमीश्वरकोटिः, विभूतिद्वयशेषित्वादिमात्रेण तल्लक्षणसिद्धेः । तत्र सर्वशेषित्वादिकं भगवतः । अस्यास्तु तदितरसर्वशेषित्वादिकमिति विभागः । अनुरूपत्वं तु पूर्ववदेव, जगत्कारणत्वादिब्रह्मलक्षणं तु पतिमात्रगोचरम् । अत एव तस्य सर्वेश्वरत्वं समाधिकदरिद्रत्वं चेति । तदिदं पक्षत्रयमन्योन्यमनतिविप्रकृष्टम् । जीवादिसमाख्यानिवेशे तु मिथो विवादः ॥

प्रागुक्तेन सहैतेषु पक्षेष्वत्र चतुर्ष्वपि । स्वतन्त्रपतिनित्येच्छासिद्धं सर्वमिदं श्रियः ॥
अपि चैवं न तस्येशे कश्चनेत्यादिदर्शनात् । अतश्चतुर्भिरप्येतैः पत्यावैश्वर्यविश्रमः ।

अत एव नरसम्बधिनो नारा इति नरशब्दार्थत्वेऽप्यस्याः पतिवत्तदिच्छायत्तं प्रधानप्राप्यत्वादिकमविरुद्धम् । आकारसाम्येऽपि क्वचिद्व्यापारो भिद्यते । सर्वकर्तुर्वल्लभाप्रीत्युद्देशेन तत्तल्लीलाप्रवृत्तेस्तस्या अपि उदन्वयोक्तिरविरुद्धा । सहारब्धेऽपि कार्ये लौकिकपतिन्यायेन पतिप्राधान्यव्यपदेशः पतिकर्तृकत्वमात्रव्यपदेशश्चोपपन्नः । पतिबुद्ध्यधीनस्यापि पत्न्या गुणभावस्योभयेच्छासिद्धत्वव्यपदेशस्तस्या अपि तथैवेष्टत्वाविशेषादुपपद्यत इति गमनिकेति । अत्र सर्वभूतेश्वरत्वादिवचनसाम्यादस्या गुणभाव उभयेच्छाप्रयुक्त इति केचिदाहुः ॥

अन्योन्येच्छाविघातादिनिवृत्तौ तत्परत्वतः । ऐककण्ठ्यमशेषाणामागमानां भवत्विति ॥
पञ्चस्वेतेषु पक्षेषु कश्चिदेकः प्रमाणवान् । सलक्ष्मीकस्य साम्राज्यं सर्वथा सुप्रतिष्ठितम् ॥
इहैवं क्वचिदंशे तु संशयेऽपि विपश्चिताम् । उपयुक्तांशवैशद्यादुपायफलसंभवः ॥
अत्र स्वामित्वसौलभ्यफलदत्वफलत्वतः । आनुरूप्येण संबन्धः श्रीपतौ दर्शितश्रियः ॥

अपि चात्र द्वयार्थमनुसन्धित्सता श्रीशब्दनिरुक्तयश्च तत्रतत्र सूचिताः । मत्वर्थस्तु नित्ययोगस्वरूपरूपादिसर्वविषयतया चतुर्थश्लोके व्यञ्जितः । नारायणशब्दार्थोऽपि * कान्तस्ते पुरुषोत्तम., * शान्तानन्तमहाविभूता त्यादिभिस्संग्रहेणोक्तः । चरणशब्दोपलक्षितविग्रहयोगोऽपि * मूर्तं ब्रह्मेत्यादिना प्रदर्शितः ॥

एवं सङ्क्षिप्तसिद्धांशविशदीकारपूर्वकम् । साध्यं प्राप्यमुपायं च स्तोत्रे संदर्शयिष्यति ॥
कविकथकसिंह इत्थं त्रय्यन्ताचार्य इत्यभिख्यातः । व्यवृणुत यामुनविहितां रमास्तुतिं वेङ्कटेशकविः ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु रहस्यरक्षायां चतुश्श्लोक्यधिकारः ॥
श्रीचतुश्श्लोकीभाष्यं समाप्तम्

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

श्रीमद्वेदान्तदेशिकग्रन्थमाला

—:o:—

रहस्यरक्षायां द्वितीयोऽधिकारः

॥ स्तोत्ररत्नभाष्यम् ॥

※

स्वादयन्निह सर्वेषां श्रवणान्तार्थं सुदुर्ग्रहम् । स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥

नमो नमो यामुनाय यामुनाय नमो नमः । नमो नमो यामुनाय यामुनाय नमो नमः ॥

※

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीमद्यामुनमुनिना नाथसहायेन नाथवानस्मि । यद्वदनचन्द्रजनिता स्तोत्रसुधा भवति सुमनसां भोग्या ॥

प्राप्यप्रापकभूते भगवति यामुनमुनेरयं प्रसूतः । दुरितानि हरति जगतां द्वयानुसन्धानसिन्धुपरिवाहः ॥

विमलमसृणोल्बणरसं विगाह्य निर्विशति वेङ्कटेशकविः । यदुपतिचरणार्हमिदं यमुनातीर्थमिव यामुनं स्तोत्रम् ॥

यद्यप्यत्र न संदृष्टं परार्थप्रतिपादनम् । तथाऽपि तादृग्रूपत्वं परसङ्कल्पतः स्थितम् ॥

स्तोत्ररत्नमिदं न्यस्तमाचार्यस्तुतिसम्पुटे । निधानमिव निस्सीमं निर्विशन्ति विपश्चितः ॥

मङ्गलाचरणत्वेन ख्याता गुरुनमस्कृतिः । स्मृत्याचारानुसारेण स्तोत्रारम्भे विधीयते ॥

नमस्कारोऽत्र विज्ञेयः प्रणिपातपुरस्सरः । आचार्यादन्यतो ज्ञेया या केवलनमस्क्रिया ॥

प्रमाणमिह विज्ञेयं मैत्रेयाचरणं सताम् । * मैत्रेयः पारिपप्रच्छ प्रणिपत्यामितद्युतिम् ॥ इति ।

प्रणिपातश्च साष्टाङ्गप्रणामः । प्रणामलक्षणं च भाष्यकारैरेव नित्यानुष्ठानलक्षणसंग्रहे प्रदर्शितम् * मनो-बुद्ध्यभिमानेन सह न्यस्य धरातले । कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥ इति । नित्यानुष्ठानाधिकारिणः परमैकान्तिनो भगवत्कैङ्कर्यैकरतित्वात्प्रपन्नाधिकारिण एव, उपासकानामुपायभक्तावप्येतदनुष्ठानमुपयुज्यत इति विभागः ॥

तत्रेदमागतं स्वस्य सदाचार्यैश्च वन्दनादिकम् । यत्संबन्धाद्मुं नाथमुनिं प्रणमति विमिः ॥

उक्तं च * आचार्यप्राचार्यसन्निपाते प्राचार्यायोपसंगृह्योपसञ्जिघृक्षेदाचार्यम् । प्रतिषेधेदितरो लुप्यते पूजा चास्य सकाशे इति प्राचार्यवन्दनप्राधान्यम् । अत्र पुनः स्वाचार्यवन्दनप्रसङ्गे तत्सन्निधौ स्वाचार्यनिषेधादेव स्वाचार्य-वन्दनश्लोकनिर्माणाभाव इति सुसङ्गतमेतत् ॥

भगवद्भक्तितत्स्नेहौ लोकानुग्रह इत्यमी । प्राधान्येन प्रकाश्यन्ते तत्स्वभावास्त्रिषु क्रमात् ॥
वैराग्यपरभक्त्यादेस्तत्त्वज्ञानं प्रसाधकम् । इति ज्ञापयितुं तस्य त्रिषु पद्येषु संग्रहः ॥
तत्रापि पर्वभेदेन ज्ञानभक्त्योः परस्परम् । हेतुकार्यत्वयोर्ज्ञप्त्यै द्विधाऽत्र स्थापितः क्रमः ॥
गुरोर्ज्ञानादिसंपत्तिस्तस्यास्सर्वातिशायिता । लोकोपकारिताऽप्युक्तेत्यतो न पुनरुक्तता ॥
करणत्रयसंबन्धप्रतिबन्धप्रशान्तये । त्रिवारं मङ्गलाचार इति केचित्प्रचक्षते ॥
अन्ये मङ्गलभूयस्त्वसिद्ध्यै मङ्गलकर्मणाम् । क्रियासमभिहारोऽयमिति साफल्यमभ्यधुः ॥
इत्थमेवं त्रिभाव्यं तदुभयं भव्यसिद्धये । पराशरनमस्कारो वकुलाभरणानतिः ॥

सर्वाण्येतानि भागवतवन्दनानि भगवद्वन्दननान्तरीयकतयाऽनुष्ठीयन्ते । कृत्स्नस्यापि प्रबन्धनिर्माणस्य भगवदभिवन्दनरूपत्वादिति ॥

भगवद्वन्दनं स्वाद्यं गुरुवन्दनपूर्वकम् । क्षीरं शर्करया युक्तं स्वदते हि विशेषतः ॥

॥ श्रीभगवद्यामुनमुनिभिरनुगृहीतं स्तोत्ररत्नम् ॥

नमोऽचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ॥ १

इह तावत् * आचार्यदेवो भव इति तैत्तिरीयाः । * आचार्यवान् पुरुषो वेद इति छन्दोगाः । * यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति कठाः । रहस्याम्नाये तु * यथा भगवत्येवं वक्तरि भक्तिः इति । अमानित्वादीन् सम्यग्ज्ञानहेतून् प्रक्रम्य गीयते च * आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः इति । आचार्यप्रसादस्य च सर्वसिद्धिहेतुत्वं बोधायनीये पुराणसारसमुच्चये प्रोक्तम् * देवताया गुरोश्चापि मन्त्रस्यापि प्रकीर्तनात् । ऐहिकामुष्मिकी सिद्धिर्द्विजस्यास्ते न संशयः ॥ इति । सिद्धिरिह ज्ञानादिसमस्तापेक्षितलाभः । उक्तं हि जयाख्यसंहितायाम् * यस्मादेवो जगन्नाथः कृत्वा मर्त्यमयीं तनुम् । मग्नानुद्धरते लोकान्कारुण्याच्छास्त्रपाणिना ॥ तस्माद्भक्तिर्गुरौ कार्या संसारभयभारुणा ॥ इति । एवं * देवमिवाचार्यमुपासीत नम आचार्येभ्य इति ॥ * आचार्यः प्लाविता तस्य ज्ञानं प्लव इहाच्यते * मन्त्रे तद्देवतायां च तथा मन्त्रप्रदे गुरौ । त्रिषु भक्तिस्सदा कार्या सा हि प्रथमसाधनम् ॥ * मन्त्रनाथं गुरुं मन्त्रं समत्वेनाभिपूजयेत् * चक्षुर्गम्यं गुरुं त्यक्त्वा शास्त्रगम्यं तु यस्सेवेत् । करस्थमुदकं त्यक्त्वा घनस्थमभिवाञ्छति ॥ * सुलभं तु गुरुं त्यक्त्वा दुर्लभं य उपासते । बद्धं त्यक्त्वा धनं मूढो गुप्तमन्वेषते क्षितौ * इत्यादि वचनशतमिह द्रष्टव्यम् । * स चाऽऽचार्यवंशो ज्ञेयो भवत्याचार्याणामसावसावित्यामगवतः इत्याम्नानात् प्राचार्यभजनमपि कर्तव्यम् . तत्त्वाचार्यस्याप्यधिकं प्रीणनम् , अतोऽत्र गुरोरपि गुरुं नाथमुनिं प्रणमति **नमोऽचिन्त्ये**ति ॥ यद्यप्यत्र गुरुपङ्क्तिः स्वयमभिवन्द्यते. तथाऽपि परप्रतिबोधनार्थं प्रबन्धमुखेनोपकर्तृणामेवात्र ग्रन्थे निवेशः । अत्र नमश्शब्दः प्रह्वीभावपरः आत्मनिवेदनपरो वा, स तु प्रणिपतनपूर्वक इत्युक्तम् . * दण्डवत्प्रणमेद्भूमौ निर्लज्जो गुरुसन्निधौ । शरीरमर्थं प्राणं च सद्गुरुभ्यो निवेदयेत् ॥ इति विधानात् । नमसाश्चात्म निवेदनपरत्वमीश्वरसंहितायां मन्त्रराजपदस्तोत्रे प्रोक्तम् * नमस्कारात्मकं यस्मै विधायात्मनिवेदनम् । मुक्तदुःखोऽखिलान्कामानश्नुते तं नमाम्यहम् ॥ इति । * गुणैर्दास्यमुपागत इति चाभिप्रायेणात्र गुरोर्ज्ञानादिगुणगणोक्तिः ।

ज्ञानमिह * सा विद्या या विमुक्तये * संज्ञायते येन तदस्तदोषम् इत्यादिपूक्तमपवर्गोपयुक्तं परस्वरूपरूपादि-ज्ञानम् । ईदृशज्ञानवानेव गुरुराश्रयणीयः * भिन्ननावाश्रितस्तब्धो यथा पारं न गच्छति । ज्ञानहीनं गुरुं प्राप्य कुतो मोक्षमवाप्नुयात् ॥ इति व्यतिरेकनिन्दनात् । **वैराग्यम्**-अल्पास्थिरत्वादिदोषविदूषितेषु स्वर्गस्वाराज्यादिषु स्वात्मानुभवमात्रे च निस्स्पृहत्वम् । अचिन्त्यत्वादित्रिकं च द्वन्द्वात्पूर्वत्वात् प्रत्येकमन्वेति । अस्मदादिभिः स्वरूपतः कारणतो विशेषतो विषयतश्च परिच्छेत्तुमशक्यत्वमिहाचिन्त्यत्वम्; कुतर्कैरपह्नोतुमशक्यत्वं वा । अद्भुतत्वमवगतांशस्यापि लोकोत्तरतया आश्चर्य-युक्तत्वम् । अक्लिष्टत्वं * स्वयमागतविज्ञाना निवृत्ति धर्ममास्थिताः इतिवत् प्राचीनसुकृतविशेषजनितेन परावर-गुरुप्रसादेनायत्नलब्धत्वम्; विरुद्धधर्मसंमर्दरहितत्वं वा । ज्ञानादेरक्षयत्वव्ययत्वनाथेमिह तदाश्रये राशिशब्दः । अचिन्त्यत्वादि-विशिष्टौ ज्ञानवैराग्यराशी यस्येति बहुव्रीहिर्वा । तदा तु ज्ञानवैराग्ययोः प्रत्येकं विषयानन्त्येन भेदमनुसन्धाय राशित्व-कृतिः । नाथशब्देन * नामोक्तावर्थोक्तिरपि पूर्णोक्तिकार्यकरीति न्यायेन श्रीरङ्गनाथ इति नामधेयं स्वापेक्षित-सिद्धये याचनीयत्वं स्वामित्वं च विवक्षितम् । स्वाभाविकं भगवदनन्यार्हशेषत्वं तदिष्टविनियोगसिद्धस्याऽचार्यशेषत्वस्य न विरुद्धम् । पापकृतमेवान्यशेषत्वं परिहार्यम् । नाथाय नाथमुनय इति वक्ष्यमाणेऽप्येवं विवक्षा ग्राह्या । **मुनये** भक्ति-प्रेरितत्तया प्रकृष्टमननशीलाय । उभयलिङ्गत्ववाचिना भगवच्छब्देन सर्वशेषिणः परभक्तियोग्यत्वं व्यज्यते । महनीयविषये प्रीतिर्भक्तिः । एतद्भक्तिस्मनकादिभिरप्यनुष्ठिता । अशक्यनलस्पर्शत्वमगाधत्वं क्षोभणार्थिभिरक्षोभ्यत्वं च । भक्तेरपारत्वा-शोष्यत्वादिख्यापनाय तदाश्रये सिन्धुत्वोक्तिः । भक्तिं वा सिन्धुत्वेन रूपयित्वा बहुव्रीहिः । अत्र मुमुक्षूणां चित्त-परिष्कारभूतेषु बहुषु गुणेषु प्राधान्यनियम उपात्तः, तत्रापि प्रधानतमत्वव्यक्त्यै भक्तेः पृथगुक्तिः ॥ १ ॥

तस्मै नमो मधुजिदङ्घ्रिसरोजतत्त्वज्ञानानुरागमहिमातिशयान्तसीम्ने ।
नाथाय नाथमुनयेऽत्र परत्र चापि नित्यं यदीयचरणौ शरणं मदीयम् ॥ २

एवं भगवत्परत्वानुभवजनितभक्तिपारिपूर्णं प्रणम्य नमेवावतारहेतुभूतसौलभ्यगुणविशेषानुभवजनितस्नेहपूर्णं * नमस्तस्मै नमस्तस्मै * नमो नमस्तेऽस्तु सहस्रकृत्वः इतिवदादरातिशयात्पुनर्नमस्यति - **तस्मै नम** इति ॥ **तस्मै** - * स्वयोगमहिमप्रत्यक्षतत्त्वत्रय इति सुप्रासिद्धाय । मधुजिच्छब्दः प्रादुर्भावविशेषकृतदुष्कृद्विनाशनं, हिरण्य-गर्भादिसाधुपरित्राणं, तद्वदस्मदादिष्वपि रजस्तमःप्रभृतिसर्वदोषनिरासार्हत्वं, वेदाहरणवृत्तान्तेन धर्मसंस्थापनं च सूचयति । अङ्घ्रिशब्देन शुभाश्रयविग्रहद्वाराऽनुरागातिशयहेतुत्वं तत्रापि शेषभूतस्योद्देश्यतमांशश्च प्रदर्श्यते । सरोजत्वरूपणेन मङ्गलत्वं भाग्यत्वं च व्यञ्जितम् । भगवदङ्घ्रिबलेन मधुर्जितः, अयं तु तद्भोग्यतातिशयेन जित इति भावः । तद्विषयं तत्त्वज्ञानं तत्पदद्वयमेव मुमुक्षूणां सिद्धोपायः प्राप्यं चेति याथार्थ्यबुद्धिः । * अजायमानो बहुधा विजायते तस्य धीराः परिजानन्ति योनिम् * अजोऽपि सन्नव्ययात्मा * जन्म कर्म च मे दिव्यम् - इत्यादिषूक्तमवतारहस्यज्ञानं वा । अनुराग इह अवतारप्रकाशितगुणविशेषकृतः सुहृन्मित्रादिष्विव स्नेहः । सेवकस्य स्नेहो भक्तिश्च * स्नेहो मे परमो राजन् त्वयि नित्यं प्रतिष्ठितः । भक्तिश्च नियता वीर! भावो नान्यत्र गच्छति ॥ इत्यत्र संबुद्धिद्वयसूचित-सेव्यगुणभेदनिबन्धनतया विभज्योच्येते । ज्ञानानुरागयोर्महिमा महत्त्वं, तस्यातिशयः प्रकर्षः, तस्यान्तसीम्ने - परमावधि-भूताय । अन्ये योगिनः एतदपेक्षयाऽर्वाचीनाः, तेषां ज्ञानादिकं हि समुद्रे गोष्पदमस्तीतिवदेतस्य ज्ञानादावन्तर्गतं भवतीति भावः । भगवदनुरागातिशयोक्त्या तदितरविषयवैराग्यातिशयोऽप्यर्थसिद्धः । अत्र मुक्तेः पूर्वावस्थायां ज्ञान-

भक्त्याद्युत्पादनमुखेन शरणत्वम्, परत्र तु मुक्तिदशायां सूरिवच्छेषित्वेन विशिष्टप्राप्यान्तर्भावात् तत्रापि प्राचीनमहोपकारसाक्षात्कारेण विशेषप्रतिपत्तिविषयतयैवेत्याशयः। अपिचेतिवत् चापीत्यव्ययमनतिरिक्तार्थम्। यद्वा परत्र शरणत्वासंभवप्रतिक्षेपार्थोऽयमपिशब्दः। **नित्यं** - यावदात्मभावि। **यदीयचरणौ** - यस्य चरणावित्यर्थः। शरणमिति यथासंभवमुपायत्वप्राप्यत्वरक्षितृत्वादीनां तन्त्रेणोपादानम्। अत्र परत्र चेत्युभाभ्यामन्वयात्। उक्तं च गुरोरपि प्राप्यप्रापकभावेन संश्रयणीयत्वं सात्त्वततन्त्रे * गुरुरेव परं ब्रह्म गुरुरेव परा गतिः। गुरुरेव परा विद्या गुरुरेव परायणम्॥ गुरुरेव परः कामो गुरुरेव परं धनम्। यस्मात्सदुपदेष्टाऽसौ तस्माद्गुरुतरो गुरुः॥ इति। अन्यत्र गुरुं प्रस्तुत्य * अर्चनीयश्च वन्द्यश्च कीर्तनीयश्च सर्वदा। ध्यायेज्जपेन्नमेद्भक्त्या भजेदभ्यर्चयेन्मुदा॥ उपायोपेयभावेन तमेव शरणं व्रजेत्॥ इति॥

भूयो नमोऽपरिमिताच्युतभक्तितत्त्वज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः।
लोकेऽवतीर्णपरमार्थसमग्रभक्तियोगाय नाथमुनये यमिनां वराय॥ ३

पुनरपि तमेव स्वनिष्ठाप्रधानलक्षणपरमौदार्यविशिष्टं भावयन् * पुनश्च भूयोऽपि नमो नमस्ते इति न्यायेन प्रणमति - **भूय** इति॥ स्तवप्रियस्य भगवतः स्वविषयस्तुतौ योजयितुमिच्छतः स्तोत्रं तावदास्ताम्, ततोऽप्यसाधारण्येनोपकारकतमो नाथमुनिरेव मे नन्तव्य इति भावः। आश्रितसंरक्षणव्रतान्न च्युत इत्यच्युतः; तदभिप्रायेण हि स्वयमुक्तं भगवता-* सत्त्वान्न च्युतपूर्वोऽहं सत्त्वं वै विद्धि मत्कृतम् - इति। सत्त्वमिह व्यवसायः * द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु इति नानार्थपाठात्। * न कर्मणा वर्धते नो कनीयान् * स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान् इत्यादिषूक्तं ज्ञानबलैश्वर्यादेरप्रच्युतत्वं वा विवक्षितम्। * यस्मात्प्राणा न च्यवन्ते सोऽच्युत इत्यपि निरुच्यते। अत्र च्युतो यस्मान्नास्ति सोऽच्युत इति बहुव्रीहिः। भक्तिश्च तत्त्वज्ञानं चेति द्वन्द्वः। तत्त्वज्ञानमनारोपिताकारेण बुद्धिः। भक्त्यादियोगादस्य वचसां विस्रम्भणीयत्वं सूचितम्। अपरिमितत्वमिह भक्तिज्ञानयोर्विशेषणम्। तयोरमृताब्धित्वनिरूपणं सञ्जीवनत्वस्वयंप्रयोजनत्वाक्षयत्वादिव्यञ्जनार्थम्। परिवाहः तटाकादिरक्षणार्थमधिकजलापगमनप्रवाहः तद्वच्छुभैः; प्रसन्नमधुरशीतलत्वादिस्वभावैरित्यर्थः। अत्रानुक्त्वा स्थातुमशक्यत्वं प्रेरकान्तरप्रयोजनान्तरनैरपेक्ष्यं च दृष्टान्तेन व्यज्यते। वचोभिः परतत्त्वपरमहितपरमपुरुषार्थविषयैर्न्यायतत्त्वादिप्रबन्धनिवेशितैरन्यैश्च वाक्यैः। * संस्मरास्मस्य वाक्यानि * संस्कारक्रमसंपन्नाम् - इत्यादिप्रकारोऽत्रानुसन्धेयः। लोके - सात्त्विके जने; यद्वा, भगवद्विमुखाधिष्ठिते भुवने; अत्यद्भुतं ह्येतदिति भावः। यथा परमपदनिलयो भगवानत्रावतरति तथा नाथमुनौ स्थितो भक्तियोगस्तदाश्रितेषु मत्पर्यन्तेष्वित्यभिप्रायेणावतीर्णत्वोक्तिः। पूर्वं दुरारोहसीमावस्थितत्वं च सूचितम्। परमार्थशब्दः स्वयंप्रयोजनत्वमकैतवत्वं वा वक्ति। फलं प्रत्यव्यवहितसाधनत्वज्ञापनाय समग्रत्वोक्तिः। भक्तिश्चासौ योगश्चेति भक्तियोगः, प्रीतिरूपापन्नध्यानमुपायो वा * योगस्सन्नहनोपायध्यानसङ्गतियुक्तिषु इति नैघण्टुकाः। भक्तिशब्द इह वचःपरिवाहमूलतया सहोक्तं तत्त्वज्ञानमुपलक्षयति; भक्तियोगस्यापि तत्त्वज्ञानात्मकत्वसूचनार्थं वा पृथगनुक्तिः। नाथमुनिशब्दस्य प्रतिश्लोकं निबन्धनात् * गुरुपादाम्बुजं ध्यायेद्गुरुनाम जपेत्सदा। गुरोर्वार्तां कथां चैव गुरोरन्यं न भावयेत्॥ इत्यादिकमनुसन्धेयम्। यमिनां भगवदेकनियतकरणत्रयवृत्तीनां वराय - वरणीयाय श्रेष्ठाय वा। एतत्तु भगवद्विषययोगाद्यथार्थतया प्राप्तम्, यद्वीयते * योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥ इति॥ ३॥

तुष्टूषन्नपि लक्ष्मीशमाचार्यगुणयन्त्रितः । क्रमात्स्वस्य स्तुतौ योक्तुं प्रभुणाऽन्यत्र कृष्यते ॥

तत्त्वेन यश्चिदचिदीश्वरतत्स्वभावभोगापवर्गतदुपायगतीरुदारः ।
संदर्शयन्निरमिमीत पुराणरत्नं तस्मै नमो मुनिवराय पराशराय ॥ ४

अत्र हि प्रबन्धनिर्माणद्वारा परम्परयोपकारकान् नमश्चिकीर्षुस्तेष्वपि धर्मशास्त्रकृतां प्राचुर्येण धर्ममार्गोपबृंहणप्रधानत्वाद्भारतादिकृतां मनुष्यत्वकञ्चुकितमहापुरुषानुगुणकाव्यत्वकवचितातिगहनगभीरवितत्यग्रन्थनिर्मातृतया तत्त्वत्रयादिविवेकस्य तत्प्रबन्धेषु कृच्छ्रसाध्यत्वाच्चानन्यपराव्यामिश्रव्यक्ततात्पर्यसंक्षिप्तसात्त्विकोपबृंहणप्रधानतमपुराणनिर्माणेनात्यन्तोपकारकं पराशरं प्रणमति - **तत्त्वेनेति** ॥ तत्त्वमिहाऽऽरोपितं रूपम् ; यथाऽवस्थिताकारेणेत्यर्थः । यच्छब्देन प्रजापतिनसा वसिष्ठपुत्रः * सहोवाच व्यासः पाराशर्य इति व्यासस्याप्तत्वाय तत्पितृत्वेन श्रुत्युपात्तः पुलस्त्यवसिष्ठवरप्रदानलब्धपरदेवतापारमार्थ्यज्ञानवत्तया प्रसिद्ध इति व्यज्यते । अत्र **चिदचिच्छब्दौ** गोबुर्लावर्दन्यायात् चेतनाचेतनविशेषपरौ, चेतनविशेषाः बद्धमुक्तादयः, अचेतनविशेषास्त्रिगुणकालादयः । **ईश्वर** इह स्वेतरसर्वनियन्ता स्वयमन्यैरस्वसङ्कल्पमन्तरेणानियाम्यः, पुरुषोत्तमः । अत्र स्वस्वरूपावगतिपूर्वकत्याज्योपादेयविभागार्थं प्रकृत्यात्मभ्रमस्वतन्त्रात्मभ्रमनिवृत्त्यर्थं च त्रय्यन्तोक्तभोक्तृभोग्यनियन्तृक्रमो निबद्धः । **तत्स्वभावाः**-तेषां त्रयाणां साधर्म्यवैधर्म्यरूपा धर्माः । तत्र कारणत्वादयस्साधर्म्यरूपाः, परतन्त्रत्वभोक्तृत्वपरात्वस्वशरीरत्वादयो वैधर्म्यरूपाः, **भोग** इह स्वर्गस्वाराज्यादिसुखानुभवः स्वात्मानन्दानुभवश्च । तस्मिन् मुक्तिशब्दं केचिदुपचरन्ति । नहि नित्यं किञ्चित् स्वात्मानन्दमात्रानुभवरूपं कैवल्यमस्ति * चतुर्विधा मम जना भक्ता एव हि ते श्रुताः । तेषामेकान्तिनः श्रेष्ठाः ते चैवानन्यदेवताः ॥ अहमेव गतिस्तेषां निराशीः कर्मकारिणाम् । ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ॥ सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥ इति विशेषणात् ।

सर्वकर्मविनिर्मोक्षे मुक्तिभेदः कथं भवेत् । कर्मैकदेशयोगे तु न मुक्तिर्भुक्तिभेदवत् ॥
न च कैवल्यवाक्यात्रात् मुक्तिरेषेति युज्यते । स्वमात्रभुक्तितात्पर्यात्तत्र तस्य प्रयोगतः ॥

आत्ममात्रानुभवसक्तस्य तदुपायानुष्ठायिनः का गतिरिति चेत्, ब्रह्मविद्यानुप्रवेशानामपवर्गविश्रान्तौ तदभावे च तत्तदनुगुणेति भाष्यादिषु द्रष्टव्यम् । ऐश्वर्यार्थिनां तत्तत्प्रदर्शनमप्यौदार्यकृत्यमेव, अपवर्गस्सर्वकर्मात्यन्तोच्छेदेन निश्शेषाविद्यानिवृत्तिलक्षणपरिपूर्णब्रह्मानुभवः, स चाकर्माधीनस्वाम्यभिमतस्वच्छन्दशेषवृत्तिपर्यन्तः । ईदृशानुभवे * यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः । दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥ यथोदपानकरणात्क्रियते न जलाम्बरम् । सदेव नीयते व्यक्तिमसतः संभवः कुतः ॥ तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥ इत्यादिकमनुसन्धेयम् । **तदुपायाः**-तत्तदधिकारिसाध्याः * प्रवृत्तिलक्षणं धर्मं प्रजापतिरथाब्रवीत् । निवृत्तिलक्षणं धर्ममृषिर्नारायणोऽब्रवीत् ॥ इति विभज्योक्ताः । सिद्धिरूपाश्च देवतादयस्सर्वसाधारणाः; प्रधानतमस्सिद्धोपायस्तु यथार्हं तथाविधधर्मद्वयवशीकरणीयतया नित्यसिद्धः पुरुषोत्तम एव । गतावपि तच्छब्दोऽन्वेति, तत्संबन्धिनी गतिरर्चिरादिका धूमादिका च । यद्वा सात्त्विकराजसतामसादिभिन्ना । तथा च गीयते * ऊर्ध्वं गच्छन्ति सत्त्वस्थाः इत्यादि । गतिपर्यन्तानामष्टानामिह द्वन्द्व उचितः, गतयस्सप्तानां प्रकारा इति केचित् । उक्तैरेवानुक्तं विरोध्यादिकमप्यत्रोपलक्ष्यते । **उदारः**-मैत्रेयादीनामस्मदादीनां च प्रत्युपकारमनपेक्ष्य तत्त्वज्ञानमहानिधिप्रदाता । येन चैवमाशास्यते

पुराणान्ते * प्रदिशतु भगवानशेषपुंसां हरिरपजन्मजरादिकां समृद्धिमिति । अत्र * अज्ञानाय तु यो ज्ञानं दद्याद्धर्मोपदेशनम् । कृत्स्नां वा पृथिवीं दद्यात्तेन तुल्यं न तत्फलम् ॥ * ब्रह्मविद्याप्रदानस्य देवैरपि न शक्यते । प्रतिप्रदानमथवा दद्याच्छक्तित आदरात् ॥ * विद्यादानं ततोऽधिकम्. इत्यादिकमनुसन्धेयम् । संदर्शयन् - सम्यग्दर्शयन् । कण्ठोक्तयाऽर्थसिद्धया च विशदं प्रकाशयितुमित्यर्थः । * लक्षणहेत्वोः क्रियाया इति शतृप्रत्ययः । * चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितमितिन्यायाद्दर्शनशब्द औपचारिकः । तदभिप्रायेण हि श्रूयते * तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः इति । तत्त्वेन संदर्शयन्नित्यनेन * प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति श्रुत्युक्तं सूच्यते । एवं सर्ववेदसारभूतश्रुतसकलार्थोपबृंहणपरत्वं ख्यापितम् । अत्र जीवस्वरूपस्वभावतदवान्तरभेदाः * पिण्डः पृथग्यतः पुंसः * पुमान् न देवो न नरः * निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः * आत्मा शुद्धोऽक्षरश्चान्तो निर्गुणः प्रकृतेः परः * अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः * यद्वै पश्यन्ति सूरयः इत्यादिभिरुक्ताः । अचित्स्वरूपस्वभावतद्भेदास्तु * त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् । व्यक्ताव्यक्ते तथैवान्ये रूपे कालास्तथा परः ॥ * कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः इत्यादिभिर्दर्शिताः । ईश्वरस्वरूपादिकं तु * अविकाराय शुद्धाय * परः पराणां परमः * शास्ता विष्णुरशेषस्य * समस्तकल्याणगुणात्मकोऽसौ * आत्मभावं नयत्येनं तद्भक्तं ध्यायिनं मुने । विकार्यमात्मनश्शक्त्या लोहमाकर्षको यथा ॥ इत्यादिषु स्पष्टम् । भोगतत्स्थानभोग्यभोगोपकरणादिकं भुवनकोशादिषु प्रपञ्चितम् । * योगिनाममृतं स्थानं स्वात्मसन्तोषकारिणामित्यनेन स्वात्मानुभवपराणां स्थानमप्युक्तम् । सनकादियोगिनाममृतं स्थानं स्वात्मसन्तोषकारिणामपि स्थानं भवतीत्यर्थः । अत्र पूर्वपरवाक्यप्रवृत्तिप्रकारः परामर्शनीयः । स्वधर्ममनुवर्तिनामिति केषां चित्पाठेऽपि योगिन एनेऽर्वाचीनाः, तत्स्थानमपि तथैव * एकान्तिनस्सदा ब्रह्मध्यायिनो योगिनो हि ये । तेषां तत्परमं स्थानम्.... ॥ इति तदधिकस्य स्थानस्यानन्तरोक्तेः, अपवर्गस्वरूपं * निरस्तातिशयाह्लादसुखभावैकलक्षणा । भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥ * तद्भावभावमापन्नः । इत्यादिभिरुक्तम्, अत्र कर्मकृतवैधर्म्यस्यात्यन्तनिवृत्तिर्विवक्षिता । भोगोपायास्तु ध्रुवादिवृत्तान्तैरुदाहृताः । अपवर्गोपायश्च भक्तियोगसंज्ञः * तद्रूपप्रत्ययै चैका सन्ततिश्चान्यनिस्पृहा । तद्ध्यानं प्रथमैरेष षड्भिरङ्गैर्निष्पाद्यते नृप ॥ इत्यादिषु सुव्यक्तः । प्रपत्तिस्वरूपं च * तावदार्तिमतां वाञ्छा तावन्मोहस्तथाऽसुखम् । यावन्न याति शरणं त्वामशेषाघनाशनम् ॥ इत्यादिषूक्तम् । भोगापवर्गार्थिगतिश्च तत्तदुपायफलमध्ये यथाश्रुति प्रतिपत्तव्या । * पुराणसंहिताकर्ता भवान् वत्स भविष्यतीति वैष्णवलैङ्गयोरुक्तमाह - **निरमिमीत पुराणरत्नमिति** । न केवलं पूर्वसिद्धप्रबन्धप्रवर्तनमात्रमिति भावः । पुरैव विद्यमानत्वेऽपि संप्रति नवत्वात् पुराणत्वम्; चिरानुभूतत्वेऽपि अपूर्ववन्नित्यानुभाव्यमित्यर्थः । अनादिवैदिकार्थविषयतया विद्यान्तरेभ्यः पुरातनत्वाद्वा पुराणत्वम् । यथोक्तं वायव्ये * प्रथमं सर्वशास्त्राणां पुराणं ब्रह्मणोदितम् । अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिस्सृताः ॥ इति । नन्वेवं सति पराशरः पुराणरत्नं निरमिमीतेति कथं स्यात्, शैवपुराणे च * ब्रह्मा चैव तु वेदानां पुराणानां प्रदर्शकः इत्युक्तम् । सत्यम्, तथाऽपि तत्रैव प्रत्येकं पुराणसंहिताविशेषप्रणेतारः प्रतिपाद्यन्ते * ब्राह्मं तु ब्रह्मणा प्रोक्तं पाद्मं तेनैव शोभनम् । पराशरेण कथितं वैष्णवं मुनिपुङ्गवाः ॥ शैवं शैलालिना प्रोक्तम्.... ॥ इत्यादि । तथा आग्नेयपुराणे * यद्ब्रह्मकल्पवृत्तान्तमधिकृत्य प्रजापतिः । ब्रह्मकल्पयत्पुराणं तद्ब्राह्ममित्यभिधीयते ॥ इत्यादि । मात्स्येऽपि * वराहकल्पवृत्तान्तमधिकृत्य पराशरः । यत्प्राह धर्मा-

नखिलान्विष्णोस्तद्वैभवं विदुः ॥ यत्तदीशानकल्पस्य वृत्तान्तमधिकृत्य च । कल्पितं लैङ्गमित्युक्तं पुराणं ब्रह्मणा स्वयम् ॥ इत्यादि, * अष्टादशपुराणानां कर्ता सत्यवतीसुतः इत्येतदपि प्राक्सिद्धसर्वपुराणप्रवर्तनविशेषाद्वा सर्वपुराणसारोद्धारेण * यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिदित्युक्तमहाभारतकरणाद्वा निर्वाह्यम् । अत एव उच्यते * अष्टादश पुराणानि अष्टौ व्याकरणानि च । ज्ञात्वा सत्यवतीसूनुश्चक्रे । भारतसंहिताम् ॥ इति । एतेन * अष्टादश पुराणानि कृत्वा सत्यवतीसुतः । भारताख्यानमखिलं चक्रे तदुपबृंहणम् ॥ लक्षैकेन यत्प्रोक्तं वेदार्थपरिबृंहणम् ॥ इति भविष्यन्मात्स्यपुराणयोरुक्तमपि नेतव्यम् । इदं तु पुराणं * सर्गश्च प्रतिसर्गश्चेत्यादिना पञ्चलक्षणयुक्तम् । तस्य रत्नत्वरूपणेन त्रासरहितत्वस्थिरत्वभोग्यत्वप्रकाशत्वमङ्गलत्वमहार्घत्वमान्यत्वमाननहेतुत्वादि व्यज्यते ॥

अत्रासं मानदं रत्नं स्थिरं भोग्यं प्रकाशकम् । महार्घं मङ्गलं मान्यं सुरक्षं सुग्रहं नृणाम् ॥

एतस्य च परिग्रहातिशयस्सर्वसंमतः । **तस्मै** - उक्तप्रकारपरमौदार्यविशिष्टाय * इतिहासपुराणाभ्यामित्यादिना मनुप्रतिपादितवेदभयप्रशमनाय । **मुनिवराय**-परब्रह्ममननशीलेषु श्रेष्ठाय तैर्वरणीयायेति वा, मुनिभिर्दत्तवरोऽसौ तेषामपि प्रत्युपकर्तेति भावः । * पराशरं मुनिवरमिति पुराणारम्भोक्तिसूचकाभ्यां मुनिवरपराशरशब्दाभ्यां स्वपक्षस्थापकत्वं परपक्षप्रतिक्षेपकत्वं च प्रकाश्यते, परान् बाह्यकुदृष्टीन् प्रमाणतर्कशरैराशृणातीति पराशरः ॥ ४ ॥

माता पिता युवतयस्तनया विभूतिः सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥ ५

अथ पराशरप्रबन्धादपि वेदान्तरहस्यवैशद्यातिशयहेतुभूतैस्सद्यः परमात्मनि चित्तरञ्जकतमैः सर्वोपजीव्यैः उपबृंहणैर्मधुरकविप्रभृतिसंप्रदायपरम्परया नाथमुनेरप्युपकर्तारं कालविप्रकर्षेऽपि परमपुरुषसङ्कल्पात् कदाचित्प्रादुर्भूय साक्षादपि सर्वोपनिषत्सारोपदेष्टारं पराङ्कुशमुनिं * माता पिता भ्रातेत्यायुपनिषत्प्रसिद्धभगवत्स्वभावदृष्ट्या प्रणमति - **मातेति** ॥ उपजीव्यप्रबन्धनिर्माणक्रमादत्र पराशरपराङ्कुशनमस्कारक्रमः । * माता पुत्रस्य भूयांसि कर्माण्यारभते यतः । तस्यां तु शुश्रूषा नित्या पतिनायामपि * आचार्यश्शतश्रेष्ठो गुरूणां मातेत्येके, * पितुश्शतगुणं माता गौरवेणातिरिच्यते इत्यादिषु मातुर्गौरवं प्रतिपादितम् । एवं * माता भस्त्रा पितुः पुत्रो यस्माज्जातस्स एव सः इति पिताऽपि प्रसिद्धगौरवः । **युवतयश्च** * यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते इति धर्मार्थकामहेतुतयोक्ताः । **तनयाः** - सन्दर्शनादिभिराह्लादहेतवः, असमर्थावस्थायां संरक्षकाः, पुन्नाम्नो नरकात्त्रातारः । * अपि स्यात्स कुलेऽस्माकं सर्वभावेन यो हरिम् । प्रपद्याच्चरणं विष्णुं देवेशं मधुसूदनम् ॥ आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः । वैष्णवो नः कुले जातः स नस्सन्तारयिष्यति ॥ इत्यादिभिस्स्वगुणेन पितृपङ्क्तेरपि निस्तारकाः प्रसिद्धाः । एकस्मिन्नेवास्मिन् बहुभिस्साध्य उपकारस्समुदित इत्यभिप्रायेण बहुवचनम् । **विभूतिः** - दासभृत्यधनरत्नादिरूपशेषभूतो नियन्तव्यवर्गः । धारकपोषकादिविभूत्यभावे पूर्वोक्तमखिलं सदप्यसत्समं स्यात् । **सर्वम्** - अन्यदैहिकामुष्मिकपुरुषार्थतत्साधनादि यत् प्रसिद्धं सात्त्विकसमाजेष्विति भावः । यदेकमेव दृष्टादृष्टरूपं सर्वमुपजीव्यमासीत्, एवंविधमन्यदपेक्षणीयं नास्तीत्यवधारणाभिप्रायः । मातापित्रादिशब्दविवक्षिताः प्रियप्रवर्तकत्वहितप्रवर्तकत्वादयस्तत्स्वभावाः तदङ्गावुपचर्यन्ते । **नियमेन** - सर्वदा, मुक्तावपीत्यर्थः । यद्वा अवधारणनियमाभ्यामाचार्यस्य सर्वेश्वरादपि तत्प्रसादार्थमतिशयेन सर्वदा बहुमन्तव्यत्वमत्र सूच्यते ।

अरविन्दवत् सौम्यं विलोचनं यस्य स तथोक्तः । मम योगिनां महति कुले जन्म सदाचार्यस्वीकरणमुपकारकेषु प्रावण्यं तदभिमतचिकीर्षया * वीचीतरङ्गवृत्तिक्रमेण प्रारिप्सितपरमात्मस्तुतौ सङ्कल्पश्च भगवत्कटाक्षविशेषस्य फलमिति भावः । उक्तं च मोक्षधर्मे * जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकस्स तु विज्ञेयः स वै मोक्षार्थचिन्तक इति । तदन्यदृष्टिगोचरत्वे च दोष उक्तः * पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः । रजसा तमसा चास्य मानसं समभिप्लुतमिति । किञ्च स्वप्रेरिते मयि तुष्टषमाणे तज्जनितप्रीत्यतिशयेन शेषपूरणं कर्तुमरविन्दवच्छैत्यविकासशोभादिमता लोचनेन भूयोऽपि मां कटाक्षयत इति धन्यतामात्मनोऽनुसन्धत्ते । उक्तं हि **श्रीविष्णुधर्मोत्तरे** रुद्रगीतायां * नाधन्यः केशवं स्तौति नाधन्योऽर्चयति प्रभुम् । नमत्यधन्यो न हरिं नाधन्यो वेत्ति माधवमिति ॥ ६ ॥

तत्त्वेन यस्य महिमार्णवशीकराणुश्शक्यो न मातुमपि शर्वपितामहाद्यैः ।
कर्तुं तदीयमहिमस्तुतिमुद्यताय मह्यं नमोऽस्तु कवये निरपत्रपाय ॥ ७

अथ स्तोत्राभ्युपगमप्रीतेन तच्छ्रवणकौतुकिना भगवता स्तुतिसादुण्याय स्तोतव्यस्य स्वस्य स्वरूपरूपगुणविभूतिषु कात्स्न्र्येन प्रकाशितासु सर्वैरपि विषयानुरूपस्तुतेरशक्यतां बुद्ध्वा निवृत्तोद्योगः तत्प्रवृत्तमात्मानमुपालभते—**तत्त्वेनेति** ॥ यथावत् स्थिताकारेणेत्यर्थः, कात्स्न्र्येनेति वाऽभिप्रायः । **यस्य**—त्रिविधपरिच्छेदरहिततया निरवधिकगुणविभूतित्वेन श्रुत्यादिप्रसिद्धस्य । **महिमा**—अत्र निरुपाधिकसार्वज्ञ्यसर्वनियमनशक्त्यादिरूपः । तस्य दुरवगाहत्वादिनाऽर्णवत्वोक्तिः । तादृशस्य महिम्नोऽतिक्षुद्रविषयाधिष्ठानांशश्शीकराणुत्वेन कल्प्यते । अनन्तेषु गुणेष्वेकैकमात्रं वा । **शक्यो न मातुं**—वाचा मनसा च परिच्छेत्तुमशक्य इत्यर्थः । श्रूयते हि—* यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, * यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्, * त्वमेव त्वां वेत्थ योऽसि सोऽसि, * यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेदेति । एवं विभूतिद्वयैकदेशोऽपि मातुं न शक्य इत्यवगन्तव्यम् । ननु * ईशानस्सर्वविद्यानाम्, * ईश्वराज्ज्ञानमन्विच्छेत् इत्यादिप्रसिद्धवैभवस्सर्वज्ञनामा च शर्वः, तस्याप्युपदेष्टा सर्ववेदप्रवर्तनाधिकृतश्च पितामहः, सनन्दनादयोऽपि ब्रह्मभावनान्विता इत्युच्यन्ते ; वेदाश्च स्वयं सर्वोपदेष्टारः ; तत्कथमेतैर्मातुमशक्यत्वमित्यत्राह—**अपि शर्वपितामहाद्यैरिति** । लोकोत्तरज्ञानैरपीत्यपिशब्दाभिप्रायः । अत्र कालत्रयवर्तिभिरपीति भाव्यम् ; तथा चामनन्ति **बह्वृचाः**—* न ते विष्णो ! जायमानो न जातो देव ! महिम्नः परमन्तमापेति । उक्तं **चोत्तररामायणे ब्रह्मणा**—* त्वं हि लोकगतिर्देव ! न त्वां केचन जानते । ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहामिति । **मोक्षधर्मे** च भृगुभरद्वाजसंवादे—* प्रजापतिं च रुद्रं चाप्यहमेव सृजामि वै । तौ च मां न विजानीतो मम मायाप्रमोहितावितिं । **ब्रह्मरुद्रसंवादे** च—*न स शक्यस्त्वया द्रष्टुं मयाऽन्यैर्वाऽपि सत्तम ! । सगुणो निर्गुणो विश्वो ज्ञानदृश्यो ह्यसौ स्मृतः ॥ तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः । सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित्कचिदिति । **श्रीविष्णुधर्मे** * न यस्य रूपं न बलप्रभावौ न च स्वभावः परमस्य पुंसः । विज्ञायते शर्वपितामहाद्यैस्तं वासुदेवं प्रणमाम्यचिन्त्यमिति । **वैष्णवे** च पुराणे—* यन्नायं भगवान् ब्रह्मा जानाति परमं पदम् । तन्नतास्म जगद्धाम तव सर्वगताच्युत ! ॥ यं न देवा न मुनयो न चाहं न च शङ्करः । जानन्ति परमेशस्य तद्विष्णोः परमं पदमिति । **श्रीवाराहे** स्वयं चाह—* यदेतत्परमं ब्रह्म वेदवादेषु पठ्यते । स देवः पुण्डरीकाक्षः स्वयं नारायणः परः ॥ अद्यापि मां न जानन्ति रुद्रेन्द्रास्सपितामहा इति । **भगवद्गीतासु** च * नाहं प्रकाशस्सर्वस्य योगमायासमावृतः । मूढोऽयं नाभिजानाति लोको मामज-

मव्ययमिति । * मां तु वेद न कश्चनेति च । अत्र महिमार्णवशीकराणुर्मातुं न शक्यत इत्युक्त्वा महिमस्तुतिमिति-वचनात् स्वस्य चापलभूम्ना कात्स्न्येंन महिमस्तुतावुद्योगस्सूच्यते । **तदीयमहिमस्तुतिं**—तदसाधारणस्य महिम्नः प्रकर्ष-कथनमित्यर्थः । तदीयस्य स्तोतव्यतया प्रस्तुतस्य पादारविन्दस्य माहात्म्यवर्णनमिति वा । **उद्यताय**—उद्युक्ताय । **मह्यं**—महायोगिभिस्सर्वैरप्यशक्ये प्रवृत्ताय स्वस्मै । **नम** इति पूजालिङ्गमेवात्र छेकोक्त्या निन्दार्थम् । साहसिकाः प्रायो नन्तव्या इति चोपालम्भः । नमोऽस्विति सामान्योक्त्या सर्वैः क्रियमाणं नमो मह्यमेवास्तु किमन्येन * नन्तव्यः परम-श्शेषीत्युक्तेन सर्वेश्वरेणेति व्यज्यते । **कवये**—क्रान्तदर्शिने, अपरिच्छेद्येऽपि परिच्छेदं पश्यते, अंशतोऽपि स्तोतुमशक्ये सर्वप्रकारवर्णनकौतुकिने सर्वेषां विडम्बनरसावहायेति भावः । अनन्ते भगवति स्ववाचा परिमितत्वावद्यमुद्घाटयन्नहं सर्वै-रात्मनः परिहसनीयतां न जानामी त्यभिप्रायेणाह—**निरपत्रपायेति** ॥ ७ ॥

यद्वा श्रमावधि यथामति वाऽप्यशक्तस्तौम्येवमेव खलु तेऽपि सदा स्तुवन्तः ।
वेदाश्चतुर्मुखमुखाश्च महार्णवान्तः को मज्जतोरणुकुलाचलयोर्विशेषः ॥ ८

अथ पार्थनयाद्भूयः प्रभुणा प्रतिबोधितः । प्रारिप्सितपरित्यागान्निवृत्तः स्तोतुमीहते ॥

अत्र हि भगवता गुणोत्तरेषु गुरुष्वेव विश्रमे कथंचिन्निवारितेऽपि विषयानुरूपस्तोत्राशक्तिजनितं वैमुख्यं परि-हर्तुं वेदप्रभृतीनामपि वृत्तान्तमात्मनश्च दीनानुकम्पित्वादिगुणगणं प्रकाश्य प्रतिसमाहितः स्तोत्रे * यावानर्थ इति न्याया-त्स्वस्योचितप्रवृत्तितया स्वोपालम्भनिवृत्तिं सिद्धान्तयति—**यद्वेति** ॥ अशक्तोऽपि स्तौमीत्यन्वयः । अज्ञत्वमप्यत्रान्तर्नीतम् । यथावद्वक्तुं ज्ञातुं चाशक्त इति चोपस्कार्यम्, श्रमावधि यथामतीत्युभयोपादानात् । श्रमोक्तिरसामर्थ्यसूचनार्था, तेन चानुकम्पनीयोऽहमिति व्यज्यते । यथाऽऽह कालियः—* सोऽहं ते देवदेवेश ! नार्चनादौ स्तुतौ न च । सामर्थ्यवान् कृपामात्रमनोवृत्तिः प्रसीद म इति । यथामतीति मतिक्षयसूचनाय । यथोच्यते—* इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् । मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयादिति । यथामतिवचनं च महाभारते प्रोक्तम्—* यथाज्ञानं तु वक्ष्यामि पुरुषं तं सनातनम् । तस्यैकस्य महत्त्वं हि स चैकः पुरुषस्स्मृतः ॥ महापुरुषशब्दं स बिभर्त्येकस्सनातन इति । **वाशब्दः** प्रति-पन्ने स्तुतिशक्तिक्षयात् स्तुतिशक्तावपि स्तोतव्यविषयज्ञानमान्द्याद्वा निवृत्तिसंभवं व्यनक्ति । अत्र स्तौमीति वर्तमाननिर्देशः स्तुतेर्वर्तमानसामीप्यपरः । अस्यापि वाक्यस्य स्तुत्यात्मकत्वं वा सूचयति । **एवमेव**—श्रमावधीत्याद्युक्तप्रकारेणेत्यर्थः । एवकारेण निश्शेषस्तुतेरसंभवस्थिरीक्रियते । अन्यथा परमात्मनः स्तुतिरेव न स्यात्, ततस्तद्विधानम्, * स्तव्यः स्तव-प्रियः स्तोत्रं स्तुतिरिति तन्नामानि च निरर्थकानि भवेयुरिति भावः । खलुशब्दः श्रुत्यादिप्रसिद्धिं द्योतयति । **तेऽपि**—लोकोत्तरज्ञानशक्तिमन्तोऽपीत्यर्थः । **सदा स्तुवन्तः**—स्वरूपनित्यतया वेदानां सदा स्तोतृत्वं युक्तम्, तथा * तद्विप्रासो विपन्यव इत्याद्यामातानां नित्यसूरीणां च स्यात्, चतुर्मुखादीनां तु प्रवाहनित्यतया यावदधिकारं यथाकालमविच्छिन्नं स्तोतृत्वम् । एवं सर्वेषु कल्पेष्विति विवक्षितम् । वेदशब्देनास्मदाद्यतीन्द्रियपुरुषार्थतदुपायवेदकत्वं व्यज्यते । **चतुर्मुख-मुखाः**—चतुर्मुखप्रधाना विबुधश्रेष्ठाः । स्वमुखैः वेदचतुष्टयप्रवर्तकत्वख्यापनाय चतुर्मुखशब्दः । सर्वैरपि यथावत् स्तोतु-मशक्यत्वं च भारतोक्तं—* वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वदेवैः । महात्मनश्शङ्खचक्रासिपाणेर्जिष्णो-र्विष्णोर्वसुदेवात्मजस्येति । **श्रीविष्णुधर्मे** च * सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः । न हि तस्य गुणास्सर्वे सर्वैर्मुनिगणैरपि ॥ वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैरिति । **श्रीवैष्णवे** च पुराणे कालियदाराः * न समर्थास्सुराः

स्तोतुं यमनन्तमजं विभुम् । स्वरूपवर्णनं तस्य कथं योषित्करिष्यति ॥ स्त्रियोऽनुकम्प्यास्साधूनां मूढा दीनाश्च जन्तवः । यतस्ततोऽस्य दीनस्य क्षम्यतां वदतां वरेति । **वाराहे च रुद्रगीतासु** सप्तमाध्याये * चतुर्मुखायुर्यदि कोटिवक्त्रो भवेन्नरः क्वापि विशुद्धचेताः । स ते गुणानामयुतैकमंशं वदेन्न वा देववर ! प्रसीदेति । नन्वस्य विषयस्य यथावद्वक्तुमशक्यत्वेऽपि चतुर्मुखादीनां च तव च तारतम्यमस्तीत्यत्र स्वाभिप्रेतमर्थमर्थान्तरन्यासेन द्रढयति **महार्णवान्तरिति** । अत्यगाधेऽस्मिन् कुलाचलस्याप्यमग्नांशो न स्यादिति भावः । **अणुकुलाचलयोश्च** मिथः परिमाणगुरुत्ववैषम्येऽपि मज्जनेनादृश्यत्वमविशिष्टमित्यभिप्रायेण **को मज्जतोर्विशेष** इत्युक्तम् ॥ ८ ॥

किं चैष शक्त्यतिशयेन न तेऽनुकम्प्यः स्तोताऽपि तु स्तुतिकृतेन परिश्रमेण ।
तत्र श्रमस्तु सुलभो मम मन्दबुद्धेरित्युद्यमोऽयमुचितो मम चाब्जनेत्र ॥ ९

न केवलमविशेषः स्तोतृषु, दैन्यातिशयेन शीघ्रं त्वदनुकम्पाफललाभान्ममैवाधिकारः प्रकृष्यत इत्यभिप्रायेणाह—**किं चेति** ॥ अत्राधिकारसद्भावेन सह तत्प्रकर्षस्समुच्चीयते । एष स्तोतेति भगवतस्स्तुतिवैमुख्यनिवृत्तिसाम्यात् प्रभूताल्पशक्त्योरेकराशित्वेनोपादानम् । स्तोतुस्सामर्थ्यातिशयः प्रायस्त्वत्कृपामान्द्यकारणमिति सूचयन्नाह—**शक्त्यतिशयेन न तेऽनुकम्प्य** इति । ते सर्वविद्भिर्वेदैस्सूरिभिश्च नित्यं स्तूयमानतया स्तुत्यन्तरनिरपेक्षस्य दीनानुकम्पनस्वभावस्य यथाधिकारं रक्षणोपयुक्तयत्किंचिद्व्याजमात्रापेक्षिणश्चेति भावः । केन तर्ह्यनुकम्पनीय इति शङ्कायां शक्त्यतिशयवैपरीत्यस्यैवानुकम्पातिशयहेतुत्वरूपं विशेषं सूचयति—**अपि त्विति** । **परिश्रमेण**—परितः श्रमेण, अशक्त्या भक्त्या च स्तोतुं हातुं चानर्हतया सर्वप्रकारव्याकुलत्वेनेति भावः । **तत्र**—तथा सतीत्यर्थः ; स्तुताविति वा । मम तु श्रमस्सुलभ इत्यन्वयः । **श्रमस्तु सुलभः** न तु शक्त्यतिशयप्रसङ्गः इति वाऽभिप्रेतम् । **मन्दबुद्धेः**—अल्पज्ञत्वादित्यर्थः । इतिशब्दो हेत्वर्थः उद्यमप्रकारपरो वा । **अयमुद्यमः** *स्तोष्यामि *स्तौमीति श्लोकद्वयोक्तस्तोत्रोपक्रमः । **मम च**—ममैवेत्यर्थः । अविरुद्धोऽप्यत्र समुच्चयार्थो मन्दः । ममेति कथितपदावृत्तिर्न हिरण्यगर्भादेरित्यतिशयितविधेयनात्पर्यादलङ्कार एव । त्वत्कटाक्षात्स्वहं तुष्टूषुदशां तत्राधिकारातिशयं च प्राप्तः, एवमनुग्रहातिशयव्यञ्जकेनावलोकनदानेन भूयोऽपि मां पालय ; येन स्तुतिरियमविघ्ना निष्पद्येतेत्यभिप्रायेणाह—**अब्जनेत्रेति** ॥ ९ ॥

नावेक्षसे यदि ततो भुवनान्यमूनि नालं प्रभो ! भवितुमेव कुतः प्रवृत्तिः ।
एवं निसर्गसुहृदि त्वयि सर्वजन्तोः स्वामिन्न चित्रमिदमाश्रितवत्सलत्वम् ॥ १०

अथैवं यथामनोरथं तव सर्वसमीहितसिद्धिर्भवत्विति कटाक्षयन्तं भगवन्तं प्रति प्राचीनप्रभूतोपकारप्रख्यापनेनाद्यतनानुग्रहस्यानाश्चर्यतामाह—**नावेक्षस** इति ॥ अथवा अल्पशक्तेः स्वस्य स्तुत्योचित्यातिशयवचनेन व्यञ्जितं भगवत आश्रितवात्सल्यं केनचित् कैमुत्येन स्थापयन्नेव सर्वशरण्यत्वोपयोगितया प्रपञ्चयिष्यमाणं सर्वस्मात् परत्वं कारणलक्षणेनोपक्षिपन् तद्वत् काष्ठाप्राप्तं सौलभ्यं चाह । अयमेव शारीरकशास्त्रारम्भघटितस्तोत्रारम्भः ॥

कारणत्वं नियन्तृत्वं सुहृत्त्वं स्वामिता हरेः । वात्सल्यमिति पञ्चैते कण्ठोक्ता इह सद्गुणाः ॥

अवेक्षणमिह *तदैक्षत * सोऽकामयतेत्यादिभूक्तः, * ईक्षतेर्नाशब्दम् *गौणश्चेन्नाऽत्मशब्दादित्यादिसूत्रस्थापितस्सानुग्रहस्सङ्कल्पः । **ततः**—त्वदवेक्षणरूपहेत्वभावादित्यर्थः । **भुवनानी**ति कृत्स्नकार्यपरम् । **अमूनी**ति तत्तत्प्रमाण-

सिद्धभोक्तृभोग्यरूपकार्यजातानामन्याशक्यकरणवैचित्र्याभिप्रायम्; * यतो वा इमानि भूतानि, * जन्माद्यस्य यत इति श्रुतिसूत्रयोरिदंशब्दवत्। **नालं**—न समर्थानि, कारणाभावे कथं कार्यं स्यादिति भावः। **प्रभो**—स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेद!। **भवितुम्**—उत्पत्तुं सत्तायोगितया स्यातुं च। एवकारो भवनस्य परसङ्कल्पनैरपेक्ष्यशङ्कां वारयन् प्रवृत्त्यनर्हत्वे कैमुत्यमुद्घाटयति। एवमलब्धसत्ताकानां सत्तापूर्विका प्रवृत्तिश्च त्वदीक्षणमन्तरेण न स्यादित्याह—**कुतः प्रवृत्तिरिति**। श्रूयते हि, * को ह्येवान्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यादिति। अन्तर्यामिब्राह्मणादिकं सर्वमिहानुसन्धेयम्। उक्तं च स्वयमेव **मोक्षधर्मे** * यत्किंचिद्वर्तते लोके सर्वं तन्मद्विचेष्टितम्। अन्यो ह्यन्यच्चिन्तयति स्वच्छन्दं विदधाम्यहमिति। अत्र च परमकारणविषये विकल्पसमुच्चयान्यतरबाधाद्यसंभवात् गतिसामान्यन्यायेन कारणवाक्यानि सर्वाणि त्वय्येककण्ठानीति व्यतिरेकोक्त्या सूच्यते। कारणत्वोक्त्यैव * यो ब्रह्माणमित्यादिश्वेताश्वतरमन्त्रोक्तं शरण्यत्वमप्याकृष्टम्। **एवं**—भोगमोक्षार्थप्रवृत्त्यौपयिककरणकलेवरदानादिप्रकारेणेत्यर्थः। * स एकाकी न रमेतेत्यनेनाभिप्रेतं विश्वसृष्ट्युपयुक्तं दयमानमनस्त्वं सूचयति—**निसर्गसुहृदीति**। सर्वसामान्यतः पूर्वोपकारप्रत्युपकारनिरपेक्षहितैषिणीत्यर्थः। सुहृत्त्वस्य नैसर्गिकत्वं * स्वाभाविकी ज्ञानबलक्रिया चेत्यत्र रक्षणक्रियाया अपि स्वाभाविकत्वोक्त्याऽर्थसिद्धम्। अत्र प्रभुशब्देन सुहृच्छब्देन च *सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृदिति श्वेताश्वतरवाक्यं सूचितम्। **त्वयि**—न हि त्वदन्यः कश्चिदेवं प्रमाणसिद्ध इति भावः। सर्वजन्तोरित्येतत् काकाक्षिन्यायात्परत्राप्यन्वेति। * पतिं विश्वस्यात्मेश्वरम् * स कारणं करणाधिपाधिपः, * प्रधानक्षेत्रज्ञपतिर्गुणेशः, * पतिं पतीनां परमं परस्तात् * एष भूतपतिरेष भूतपाल इत्यादिषु प्रसिद्धं हि सर्वस्वामित्वम्। एतच्च सर्वेषां स्वार्थोपकारकत्वे सर्वस्य च तदिष्टविनियोगार्हत्वे हेतुः। **न चित्रं**—नाद्भुतम्। **इदं** स्तुतिवैगुण्यानादरेण स्तोतरि मयि प्रीतिरूपमित्यर्थः। स एष वात्सल्याख्यो गुणः सर्वाविशेषेण **कठवल्ल्यामुक्तः** *अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सत इति। उपबृंहितं च * रिपूणामपि वत्सल इति। **इदमाश्रितवत्सलत्वं न चित्रम्**—संप्रतीह स्तोत्रे प्रेरयतस्तव मन्मुखोदितस्तुतिश्रवणेन जगद्व्यापारविहारस्सफलस्संपद्यत इति भावः। अत्र स्तुतिवैमुख्यनिवर्तनादिलब्धविजयसन्तोषभगवदुक्तिप्रत्युक्तिरूपताऽप्याचार्योक्ता। तथा हि वेत्थ यथा मम त्वयि वात्सल्यं यथा च मुग्धभाषिते पित्रोरिव मे भवन्मुखागतस्तुतिवचनश्रवणकौतूहलमिति वदन्तं प्रत्याह—**नावेक्षस** इति॥ १०॥

स्वाभाविकानवधिकातिशयेशितृत्वं नारायण! त्वयि न मृष्यति वैदिकः कः।
ब्रह्मा शिवश्शतमखः परमस्वराडित्येतेऽपि यस्य महिमार्णवविप्रुषस्ते॥ ११॥

ननु *हिरण्यगर्भस्समवर्तताग्रे * न सन्न चासच्छिव एव केवलः * इन्द्रो मायाभिः पुरुरूप ईयते इति ब्रह्मादीनाम्, मुक्तस्य च * यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठतीति सर्वजगत्कारणत्वं प्रतीयते। तदेतत् कथं परब्रह्मलक्षणम्? कथंच तद्योगात्परमपुरुषस्य सर्वस्वामित्वादि? तत्राह—**स्वाभाविकेति**॥ स्वाभाविकत्वमिहानन्याधीनत्वम्, तेन कर्मोपाधिकदुःखमिश्रानित्यचतुर्मुखाद्यैश्वर्यव्यावृत्तिः। अनवधिकातिशयत्वमुत्कृष्टावधिरहितोत्कर्षवत्त्वम्, * पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यत्र परत्वस्वाभाविकत्वे शक्त्यादिषु सर्वेष्वन्विते इति भावः। एताभ्यामेव परिमितं पराधीनं च मुक्तनित्यैश्वर्यमपि व्यवच्छिद्यते। ईदृशमीशितृत्वं हि तवैव। विश्वपतित्वात्मेश्वरत्वादिश्रुतेः, * प्रशासितारं सर्वेषाम् * शास्ता विष्णुरशेषस्येत्यादिस्मृतिशतैश्च। स्वयं च गीतं * मत्तः परतरं नान्यदिति।

*एष धाता विधाता च सर्वेषां प्राणिनां प्रभुः । परं हि पुण्डरीकाक्षान्नभूतं न भविष्यतीत्यादि च द्रष्टव्यम् । अत्र नारायणेत्यनेन कारणवाक्येष्वन्यार्थशङ्कागोचराणां सदसदव्याकृतब्रह्मात्महिरण्यगर्भशिवाकाशप्राणादिशब्दानां कयाचिद्वृत्त्या ऽनन्यपराबाधितार्थसात्त्विकोपबृंहणानुगुणमहोपनिषन्मैत्रायणीयसुबालोपनिषदादिपठितनारायणशब्दोदितमहापुरुषविषयत्वं केवलतत्त्वनिर्णयप्रवृत्तनारायणानुवाकतात्पर्येण भगवत एव सर्वपरविद्यावेद्यत्वं तत्रत्यतत्तच्छब्दवाच्यत्वं च प्रकाश्यते । अस्य च नाम्नो निरुक्तिभेदैश्शारीरकाध्यायचतुष्टयविवक्षितकारणत्वनिर्बाधत्वोपायत्वप्राप्यत्वानि भाव्यानि । एवमाप्ततमानेकस्मृतिवचनानि चानेन प्रत्यभिज्ञाप्यन्ते । तत्र तावन्मनुः * आसीदिदं तमोभूतमित्यारभ्य, * आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् । तद्विसृष्टस्स पुरुषो लोके ब्रह्मेति कीर्त्यत इति । **बृहस्पतिः**—*नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवम् । अण्डाद्ब्रह्मा समभवत्तेन सृष्टमिदं जगदिति । **दक्षः**—* ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु । ब्रह्मलोकमवाप्नोति न चेहाजायते पुनरिति । **व्यासः**—* आलोड्य सर्वशास्त्राणि विचार्य च पुनःपुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदेति । * नमो भगवते तस्मै व्यासायामिततेजसे । यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमामिति च **वैशम्पायन**वाक्यम् । ईदृशानि वचनशतानि विस्तरभयान्न लिख्यन्ते ।

त्वयि * सर्वे वेदा यत्पदमामनन्ति, * सर्वे वेदा यत्रैकं भवन्ति, * नतास्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती, * वेदैश्च सर्वैरहमेव वेद्यः, * वेदे रामायणे चैव भारते भरतर्षभ ! । आदौ मध्ये तथा चान्ते विष्णुस्सर्वत्र गीयते, * नारायणपरा वेदा इत्यादिभिस्सर्ववेदवेद्यतया प्रसिद्धे पूर्वोक्तसर्वकारणत्वसर्वस्वामित्वादिलक्षणे । **न मृष्यति**—न सहते । **वैदिकः**—वेदप्रमाणक इत्यर्थः । * वेदैः पश्यन्ति ब्राह्मणाः, * पितृदेवमनुष्याणां वेदश्चक्षुस्सनातनम् । श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते इति हि स्मर्यते । वैदिकशब्देन * सर्वे वेदास्सपितरो ब्रह्माद्याश्चाण्डमध्यगाः । विष्णोस्सकाशादुत्पन्ना इतीयं वैदिकी श्रुतिरिति **वाराह**वचनम् , * वेदवेद्यो हि भगवान् वासुदेवस्सनातनः । गीयते स परो वेदैर्यो वेदैनं स वेदविदिति **कौर्म**वचनं च सूच्यते । अत्र चोत्तरेषु वाक्येषु च किंशब्दः क्षेपार्थः । वैदिकः को न मृष्यतीत्यनेन भगवत्पारम्यमसहमानस्य वेदबाह्यतया पापिष्ठत्वं व्यज्यते । यथोक्तं **प्राजापत्यस्मृतौ**—* नारायणं परित्यज्य हृदिस्थं प्रभुमीश्वरम् । योऽन्यमर्चयते देवं परबुद्ध्या स पापभागिति । **महाभारते** तीर्थरक्षकपिशाचवाक्यं—* ये द्विषन्ति महात्मानं न स्मरन्ति च केशवम् । न तेषां पुण्यतीर्थेषु गतिस्संसर्गिणामपीति । **सप्तर्षिसंवादे** * विष्णुं ब्रह्मण्यदेवेशं देवदेवं जनार्दनम् । त्रैलोक्यस्थितिसंहारसृष्टिहेतुं निरञ्जनम् ॥ आधातारं विधातारं सन्धातारं जगद्गुरुम् । विहाय स भजत्यन्यं बिसस्तैन्यं करोति य इति । **भगवद्गीता**स्वासुरान् प्रक्रम्य * अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिष्विति । **ब्रह्माण्डकौर्मयोश्च** * येऽन्यं देवं परत्वेन वदन्त्यज्ञानमोहिताः । नारायणाज्जगन्नाथात्ते वै पाषण्डिनः स्मृता इति । **श्रीभागवते** भगवन्तं प्रस्तुत्य *अस्मादन्यं परत्वेन चेतयानो ह्यचेतनः । स पाषण्डीति विज्ञेयः सर्वकर्मबहिष्कृत इति, * यस्तु नारायणं देवं समत्वेनाभिमन्यते । स तु तेनावमानेन नरकान्नातिवर्तत इति च । *ये तु सामान्यभावेन मन्यन्ते पुरुषोत्तमम् । ते वै पाषण्डिनो ज्ञेया नरकार्हा नराधमाः, * यः पुत्रः पितरं द्वेष्टि तं विन्द्यादन्यरेतसम् । यो विष्णुं सन्ततं द्वेष्टि तं विन्द्यादन्यरेतसम् , * विष्णुभक्तिविहीनो यस्सर्वशास्त्रार्थवेद्यपि । ब्राह्मण्यं तस्य न भवेत्तस्योत्पत्तिर्निरूप्यताम् , * चतुर्वेद्यपि यो विप्रो वासुदेवं न विन्दति । वेदभार-

भराक्रान्तस्स वै ब्राह्मणगर्दभ इत्यादीनि द्रष्टव्यानि। अस्मिन्नारायणानुवाके * विश्वमेवेदं पुरुष इति पूर्वोक्तसमानन्यायतया * स ब्रह्मा स शिवस्सेन्द्र इत्यादिसामानाधिकरण्येन ब्रह्मादीनां विभूतित्वश्रवणात् त्रिमूर्त्यैक्यसाम्योत्तीर्णव्यक्त्यन्तरपक्षाणां प्रतिक्षेपस्सिद्ध इत्यभिप्रायेणाह—**ब्रह्मा शिव** इति। अनीश्वरतया सर्वसम्प्रतिपन्नेन्द्रादिसमभिव्याहारादबाधाच्च ब्रह्मशिवयोरनीश्वरत्वं सूच्यते। शतमखशब्दः कर्मवश्यत्वप्रसिद्धिरूप्यापनार्थः। अत्र चानुवाके तत्तत्कारणोपासनपरवाक्यपठिताशिवशम्भ्वादिशब्दाः नारायणविषया इति ज्ञापयितुं * नारायणपरं ब्रह्मेत्यादिभिस्तत्तदनुवादेन नारायणत्वविधानभूयस्त्वं सूचितम्। सूत्रितं च * लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपीति। * हिरण्यगर्भस्समवर्तताग्र इति वाक्यं तु * अद्वयस्संभूतो हिरण्यगर्भ इत्यष्टाविति श्रुत्यैवानुवाकान्तरसंयोजनात् पुरुषसूक्तैकार्थोत्तरानुवाकप्रतिपाद्यमहापुरुषविषयम्। अत एव ऐन्द्रीन्यायादत्र हिरण्यगर्भशब्दः कयाचिदवयवशक्त्या भगवति वर्तते। * शिव एव केवल इत्यत्र शिवशब्दोऽपि * यदा तमस्तन्न दिवा न रात्रिरित्यनुवादान्वयात् सुबालोपनिषदुपदिष्टतमोमृत्युशब्दवाच्यप्रकृत्यधिष्ठातृभूतनारायणविषयः, शुद्धिमाङ्गल्यादावपि रूढश्चासौ, प्रयुक्तश्च भगवति * शाश्वतं शिवमच्युतमिति। * एक एव रुद्र इत्यादेस्तु प्राकरणिकहविरुद्देश्यत्वाकारपरतया न पारम्योपपादकत्वम्। * इन्द्रो मायाभिरित्यत्रेन्द्रशब्दश्च * तमिन्द्रं सन्तम् इन्द्र इत्याचक्षते परोक्षेणेति ब्राह्मणोक्त्या सर्वदर्शिपरमात्मविषयः। प्रसिद्धेन्द्रपरत्वेऽपि नात्र सर्वकारणत्वकण्ठोक्तिः; नच तत्क्लृप्तिः, पुरुरूपत्वादेरन्यथाऽप्युपपत्तेः। * न किरिन्द्र! त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्नित्यत्र तु प्राकरणिककर्मविशेषौपयिकप्रशंसापरत्वाद्वस्वादिषु त्वदुत्तरो नास्तीति विवक्षितम्। स्वराट्छब्द इह * स स्वराड्भवतीत्याप्तातमुक्तविषयः; स च स्वातन्त्र्यवाचकोऽप्यत्राकर्मवश्यत्वपरः, ईश्वरशरीरभूतानामात्मनां तत्पारतन्त्र्यस्य यावत्स्वरूपभावित्वात्, परतन्त्रस्यापि सत्यसङ्कल्पत्वमिच्छाविफलत्वाभावादुपपद्यते। तेन * सङ्कल्पादेव तच्छ्रुतेः, *अत एव चानन्याधिपतिरिति सूत्रद्वयमप्यविरुद्धम्। मुक्तस्यैश्वर्यं * जगद्व्यापारवर्जमिति शारीरकान्ते स्थापितम्। परमत्वमिह ब्रह्माद्यपेक्षया; तच्चाकर्मवश्यस्य ज्ञानसङ्कोचादिरूपक्षरणविरहादित्यक्षरशब्देन दर्शितम्। * ब्रह्म वेद ब्रह्मैव भवतीत्यादिकमपि * परमं साम्यमुपैति, * मम साधर्म्यमागता इत्यादिश्रुतिस्मृत्यनुसारात् * वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभिजयतीत्यादिवत्तत्साम्याभिप्रायमेव। तस्य च सङ्कल्पात्त्वाभिमतसृष्टिः परेच्छानुगुण्येन परिमितविषया। सर्वलोकानुसञ्चरणश्रुतिश्च न जगद्व्यापारार्था। **इति**शब्द इह * स ब्रह्मा स शिव इत्यादिवाक्योपात्तप्रकारसूचनार्थः। **एते**—प्रजापतिपशुपतिसुरपतिप्रसिद्धिमन्तः। ततोऽप्यधिको मुक्तश्च। **अपि**शब्दस्तेषां तत्तत्प्रमाणसिद्धमहत्त्वे सत्यपीति द्योतयन् ततोऽर्वाचीनेषु कैमुत्यं व्यनक्ति। **यस्य ते**—* तं दुर्दर्शं गूढमनुप्रविष्टं, *यत्तदद्रेश्यमग्राह्यमित्यादिष्वदृश्यत्वादिगुणकतया प्रसिद्धमपि स्वात्मानं धनञ्जयधृतराष्ट्रादेरिव कृपया मे प्रकाशयत इति भावः। महिम्नोऽर्णवत्वरूपणमक्षयत्वापारत्वादिसूचनार्थम्। **महिमार्णवविप्रुषः**—अर्णवस्थानीयत्वन्महिमापेक्षया पृषतस्थानीयमहिमान इत्यर्थः; यद्वा अनन्तविभूतेस्तव विभूतिरूपमहिमसमुद्रबिन्दव इति। तदेतदुक्तमद्वितीयश्रुतिव्याख्यानमुखेन **संविदित्सिद्धौ**—* यथा चोलन्नृपस्सम्राडद्वितीयोऽस्ति भूतले। इति तत्तुल्यनृपतिनिवारणपरं वचः॥ न तु तद्भृत्यतत्पुत्रकलत्रादिनिवारणम्। तथा सुरासुरनरब्रह्माण्डायुतकोटयः॥ क्लेशकर्मविपाकाद्यैरस्पृष्टस्याखिलेशितुः। ज्ञानादिषाड्गुण्यनिधेरचिन्त्यविभवस्य ताः। विष्णोर्विभूतिमहिमसमुद्रद्रप्सविप्रुष इति। ब्रह्मादीनां च सृष्ट्याद्युपयुक्तविभूतित्वं वक्ष्यति। तदिह * स ब्रह्मेत्यादिसामानाधिकरण्यमपि न स्वरूपैक्यादिप्रयुक्तम्, किंतु शरीरशरीरिभावनिबन्धनमिति सूचितं भवति। किं च *अग्निर्वै

देवानामवमो विष्णुः परम इति होतारोऽधीयते । * अग्निरवमो देवतानां विष्णुः परम इत्यध्वर्यवः । तथा * तद्ब्रह्म स आत्मा अङ्गान्यन्या देवता इति च । एतच्चोपबृंहितं * श्रूयतां परमं दैवं दुर्विज्ञेयं मयाऽपि च । नारायणस्तु पुरुषो विश्वरूपो महाद्युतिः ॥ नारायणस्य चाङ्गानि सर्वदैवानि चाभवन् । अन्यानि सर्वदैवानि तस्याङ्गानि महात्मन इति । अतश्च ब्रह्मादीनां भगवद्विभूतिसागरशीकरत्वं सिद्धमिति ॥ ११ ॥

कश्श्रीः श्रियः परमसत्त्वसमाश्रयः कः कः पुण्डरीकनयनः पुरुषोत्तमः कः ।
कस्यायुतायुतशतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभागवृत्तम् ॥　　१२

अथ स्यात्—* हिरण्यगर्भस्समवर्ततेत्यादेः * अद्भ्यस्संभृत इत्यादिनैकार्थ्येऽपि तत्रैव चतुर्मुखासाधारणप्रजापतिशब्ददर्शनात्पुरुषशब्दस्य तु साधारण्येन चतुर्मुखेऽपि संभवात् * अम्भस्यपार इत्यत्रापि * प्रजापतिश्चरति गर्भे अन्तः, * स नो बन्धुर्जनिता स विधाता, * सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति प्रजापत्यादिशब्ददर्शनात्त्रितयमप्येतच्चतुर्मुखविषयमिति । अत्र तावत् * न ब्रह्मा नेशान इत्यादिव्यक्त्यन्तरनिषेधसहितविशेषश्रुत्या बाधप्रदर्शनान्न वक्तव्यशेषमस्ति । अथापि ब्रूमः—* अम्भस्यपार इत्यत्र तावत् * यमन्तस्समुद्रे कवयो वयन्तीति समुद्रशायित्वं, * यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तादिति तमसः पारवर्तित्वं, * सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधीति विद्युद्वर्णपुरुषत्वं, * स आपः प्रदुघे उभे इमे इत्यादिभिर्विचित्रजगत्कारणत्वं, * य एनं विदुरमृतास्ते भवन्तीति मोक्षप्राप्तिहेतुत्वं, * विश्वतश्चक्षुरुत विश्वतोमुख इत्यादिना सहस्रशीर्षत्वादिकं च प्रत्यभिज्ञायमानमस्यानुवाकस्य पुरुषसूक्तोदितमहापुरुषगोचरतां गमयति । प्रसिद्धप्रजापतेः परमपुरुषकार्यत्वतन्नियाम्यत्वकर्मवश्यत्वादिकं च प्रसिद्धम् । अतोऽत्र प्रजापत्यादिशब्दाः परमकारणभूतं नारायणमेव प्रतिपादयन्ति । एवम् * अद्भ्यस्संभृत इत्यनुवाकस्यापि पुरुषसूक्तप्रकरणाविच्छेदात् * वेदाहमेतं पुरुषं महान्तमित्यादिवाक्यार्थप्रत्यभिज्ञानाच्च महापुरुषविषयत्वं सुगमम् । तमिममर्थमनन्यथासिद्धेन लक्ष्मीपतित्वलिङ्गेन द्रढयति—**कश्श्रीः श्रिय** इति ॥ अत्र त्वदन्य इति वक्ष्यमाणमनुसन्धेयम् । *श्रियः श्रीश्च भवेदग्र्या कीर्त्याः कीर्तिः क्षमाक्षमेत्युक्तमिहाभिप्रेतम् । श्रीरेव ह्यन्येषामतिशयं विधत्ते, तस्या अपि * भर्ता नाम परं नार्या भूषणं भूषणादपीतिन्यायेनातिशयहेतुरयमिति भावः । **नागयणमुनि**भिस्त्वेवमिह व्याख्यातम्—*स्वेतरसमस्तैः स्वरूपस्थितिप्रवृत्त्यर्थं या श्रीयते सा श्रीः, तस्या अपि तथा श्रयणीय इति । श्रीशब्दनिरुक्तयश्च—* शृणाति निखिलान् दोषान् श्रीणाति च गुणैर्जगत् । श्रीयते चाखिलैर्नित्यं श्रयते च परं पदम् ॥ श्रयन्तीं श्रीयमाणां च शृण्वतीं शृणतीमपीत्यादिषु द्रष्टव्याः । श्रिय इत्यनेन * ह्रीश्च ते लक्ष्मीश्च पत्न्यावित्यान्नातलक्ष्मीशब्दपर्यायोपादानम् । अत्र ह्रीरिति भूमिर्विवक्षिता ; * श्रीभूमिसहितं हरिमित्यादिप्रसिद्धेः । **वाजसनेयके** तु ह्रीशब्दस्थाने श्रीशब्दपठनेऽपि यथोचितमर्थो ग्राह्यः ; तदिह पुरुषसूक्तप्रकरणोदितश्रियःपतित्वलिङ्गसहकृतमहापुरुषप्रत्यभिज्ञानबाधितरूढिः प्रजापतिशब्दः * पतिं विश्वस्येत्युक्तपुष्कलावयवार्थं नारायणमेवाभिधत्त इति भावः । प्रयुक्तश्चासौ तद्विषयतया **महाभारते**—* राजाधिराजस्सर्वेषां विष्णुर्ब्रह्ममयो महान् । ईश्वरं तं विजानीमस्स पिता स प्रजापतिरिति । * सप्तदश प्राजापत्यान् पशूनित्यादौ च । * श्यामा एकरूपा भवन्ति एवमिव हि प्रजापतिरिति प्रजापतेः श्यामत्वैकरूपत्वोक्त्या प्रजापतिशब्दस्य विष्णुविषयत्वं गम्यते । * आश्रावयेति चतुरक्षरमित्यारभ्य * एष वै सप्तदशः प्रजापतिरित्येतस्य च विष्णुविषयत्वं, * चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदत्विति **महाभारत**वचनेन व्यक्तितम्। ननु पुरुषसूक्तस्य कथं भगवत्परत्वम्?

पुरुषशब्दो हि * स वा एष पुरुषोऽन्नरसमयः, * प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीत्यादिषु तदतिरिक्तेऽपि प्रयुज्यते। सत्यम्, विस्मिलजगत्कारणविषयस्त्वयं पुरुषशब्दः परमपुरुषमेवाह। * पुरुषस्य हरेस्सूक्तं स्वर्ग्यं धन्यं यशस्करमिति च स्मर्यते। **मोक्षधर्मे** च परमपुरुषविषयतयैव पुरुषसूक्तं योजितम्—* इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते। ऋतं सत्यं च विख्यातमृषिसिंहेन चिन्तितमित्यादिना। **व्यासस्मृतौ** चेदं भगवदर्चने विनियुक्तम्—* न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम्। तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम्॥ तद्विष्णोरितिमन्त्रेण सूक्तेन पुरुषेण तु। नैवाभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि॥ निवेदयीत स्वात्मानं विष्णावमलतेजसि। तदात्मा तन्मनाश्शान्तस्तद्विष्णोरिति मन्त्रतः॥ इति। **शौनकीये** कल्पे च * शौनकोऽहं प्रवक्ष्यामि नित्यं विष्ण्वर्चनं परम्। प्र वः पातन्तमन्धस इत्यर्धर्चस्य विधानतः॥ इति प्रक्रम्य * आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तममित्यादिना प्रत्यृचमुपचारभेदेषु विनियोगः कृतः। एवं भगवच्छास्त्रादिष्वपि द्रष्टव्यम्। किंच **आथर्वणे** अष्टादशमहाशान्तिप्रकरणे तत्तद्देवताविषयमहाशान्तिषु * वैष्णव्यां पुरुषसूक्तमिति विनियोगो दृष्टः। एवं * सहस्रशीर्षा पुरुष इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते * सहस्रशीर्षा पुरुष इति पुरुषेण नारायणेन पराञ्चोऽनुशंसन्तीति कल्पसूत्रकारवाक्याच्च नारायणविषयत्वमस्य सिद्धम्। तत्रतत्र परमपुरुषसन्निधानबुद्ध्या तेन तत्तदुपस्थानं युज्यते। अत्र नारायणस्य ऋषित्वेन पुरुषस्य च देवतात्वेन संबन्धस्तावत्सर्वसंमतः। तत्र नारायणपुरुषशब्दयोरेकविषयत्वं * सहस्रशीर्षं देवमित्यारभ्य * विश्वमेवेदं पुरुष इति नारायणानुवाकोक्त्या सिद्धम्। तथा **सुबालोपनिषदि** * चक्षुश्च द्रष्टव्यं च नारायण इत्यादिभिर्नारायणस्य सर्वात्मकत्वं प्रतिपाद्य * पुरुष एवेदँ सर्वमिति पुरुषसूक्तवाक्येन निगमनान्नारायण एव पुरुषसूक्तप्रतिपाद्य इति निश्चीयते। तदिह पुरुषशब्दः पुरुषोत्तमविषयः। तथा च पौराणिकं वचः—* भगवानितिशब्दोऽयं तथा पुरुष इत्यपि। निरुपाधी च वर्तेते वासुदेवे सनातने॥ इति। एवं * ब्रह्मा कमलगर्भाभो रुद्रः कालाग्निसन्निभः। पुरुषः पुण्डरीकाभो रूपं तत्परमात्मनः॥ इति त्रयाणां रूपभेदवचनेन प्रत्येकनामोक्तौ ब्रह्मरुद्रव्यावृत्ते परमात्मशब्दोदिते भगवति पुरुषशब्दस्समाख्यारूपेण प्रयुक्तः। * पुरुषः पुण्डरीकाक्ष इति पाठेऽपि न प्रस्तुतविरोधः। अधीयते च **तैत्तिरीयाः** प्रजापतिजनककूर्मविषये * पूर्वमेवाहमिहाऽसमिति तत्पुरुषस्य पुरुषत्वमिति। अनन्तरं * सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपाद्भूत्वोदतिष्ठदिति पुरुषसूक्तारम्भस्तत्र प्रत्यभिज्ञायते। अस्त्वेवम्; तथाऽपि महेश्वरशिवादिशब्दलिङ्गशालिन्यां **श्वेताश्वतरोपनिषदि** * वेदाहमेतमित्यादिवाक्यदर्शनाद्रुद्रेऽपि पुरुषशब्दाम्नानाच्च पुरुषसूक्तस्यापि तद्विषयत्वं स्यादित्यत्राऽह—**परमसत्त्वसमाश्रयः क** इति॥ परमस्य मोक्षोपयुक्तप्रकर्षवतः सत्त्वस्य प्रकाशसुखहेतुभूतगुणविशेषस्य समाश्रयः सम्यक् प्रवर्तकः त्वदन्यः क इत्यर्थः। एतेन सांसारिकज्ञानसुखहेतुभूतपरिमितसत्त्वव्यवच्छेदः। अयं भावः—पुरुषसूक्तं तावत्परमपुरुषविषयतया स्थापितम्। तत्रत्यवाक्यप्रत्यभिज्ञानादेव श्वेताश्वतरोपनिषदि शिवमहेश्वरादिशब्दानामपि महापुरुषपरत्वमेव युक्तम्। अनन्यथासिद्धं च लिङ्गं तत्रतत्र दृश्यते। * महान्प्रभुर्वै पुरुषस्सत्त्वस्यैष प्रवर्तक इति नारायणस्यैव सत्त्वप्रवर्तकत्वं ब्रह्मरुद्रयोश्च रजस्तमःप्रवर्तकत्वं श्रुत्यादिप्रसिद्धम्। यथा **मैत्रायणीयोपनिषदि** * अथ यो ह खलु वा अस्य राजसोंऽशस्सोऽसौ ब्रह्मचारिणो योऽयं ब्रह्मा अथ यो ह खलु वा अस्य सात्त्विकोंऽशस्सोऽसौ ब्रह्मचारिणो योऽयं विष्णुः अथ यो ह खलु वा अस्य तामसोंऽशस्सोऽसौ ब्रह्मचारिणो योऽयं रुद्र इति। पुराणे च **वाराहे** अगस्त्यरुद्रसंवादे रुद्रः—* यत्सत्त्वं स हरिर्देवो यो हरिस्तत्परं पदम्। सत्त्वं रजस्तमश्चेति त्रितयं चैतदु-

च्यते ॥ सत्त्वेन मुच्यते जन्तुस्सत्त्वं नारायणात्मकम् । रजसा सत्त्वयुक्तेन भवेच्छ्रीमान्यशोधिकः ॥ तच्च पैतामहं वृत्तं सर्वशास्त्रेषु पठ्यते । यद्वेदबाह्यं कर्म स्यात् मामुद्दियोपसेव्यते ॥ तद्रौद्रमिति विख्यातं कनिष्ठगतिदं नृणाम् । यद्धीनतपसा युक्तं केवलं तामसं तु यत् ॥ तद्दुर्गतिप्रदं नृणामिह लोके परत्र चेति । **लैङ्गे** चतुर्दशाध्याये—* हिरण्यगर्भो रजसा तमसा शङ्करस्त्वयम् । सत्त्वेन सर्वगो विष्णुस्सर्वात्मा सदसन्मयः ॥ इति । तत्रैव चतुर्विंशे क्षुपास्यतपसि—* त्वत्कोपसंभवो रुद्रस्तमसा च समावृतः । त्वत्प्रसादाज्जगद्धाता रजसा च पितामहः ॥ त्वत्स्वरूपात्स्वयं विष्णुस्सत्त्वेन पुरुषोत्तमः ॥ इति । तदनन्तरे चाध्याये नन्दिकेश्वरवचनम्—* परमात्मानमीशानं तमसा रुद्ररूपिणम् । रजसा सर्वलोकानां सर्गलीलाप्रवर्तकम् ॥ सत्त्वेन सर्वभूतानां स्थापकं परमेश्वरम् । सर्वात्मानं महात्मानं परमात्मानमीश्वरम् ॥ तं दृष्ट्वा प्राह वै ब्रह्मा भगवन्तं जनार्दनमिति । एवं पुराणान्तरेषु । **भगवच्छास्त्रादिष्वपि** *सात्त्विकैस्सेव्यते विष्णुस्तामसैरेव शङ्करः । राजसैस्सेव्यते ब्रह्मा सङ्कीर्णैस्तु सरस्वतीत्यादीनि द्रष्टव्यानि । साधारणे च **शिल्पशास्त्रे** विमानत्रयलक्षणे पठ्यते । * स्यान्नागरद्राविडवेसरं च क्रमेण वै सत्त्वरजस्तमांसि । महीसुरोर्वीपतिवैश्यकास्ते हरिर्विधाता हर आदिदेव इति । अथवाऽत्र परमसत्त्वमिति *स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणमित्युक्तं शुद्धसत्त्वमयमप्राकृतं द्रव्यमिति विवक्षितम् । तेन ब्रह्मरुद्राद्यगोचररहस्याम्नायभगवच्छास्त्रादिप्रसिद्धकल्याणतमविग्रहादियोगात्तेभ्यः परत्वं सूच्यते । नित्येऽप्युक्तं *परमसत्त्वं पञ्चशक्तिमयविग्रहमिति । उभयथाऽपि सत्त्वप्रवर्तकत्वोक्तिः श्वेताश्वतरोपनिषदः पुरुषसूक्तोदितपरमपुरुषविषयत्वमवगमयति । वक्तव्यान्तरं चात्र **वेदार्थसंग्रहादिषु** द्रष्टव्यम् । ननु च पुरुषसूक्तोदितमादित्यवर्णं पुरुषमेवादित्यमण्डले तादृशवर्णयुक्ततया **छन्दोगा** अधीयते *य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादिना । स च स्थानविशेषसन्निधिसामर्थ्यादादित्य एव । स एव च रुक्मवर्णः पुरुषो **मनुना** स्मर्यते । *प्रशासितारं सर्वेषामणीयांसमणीयसाम् । रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परमिति । * असावादित्यो ब्रह्मेति चाध्वर्यवः । अस्ति च तत्परं पुराणम्, अतः पुरुषसूक्तमादित्यपरम् । स एव च ब्रह्मेत्यत्रानन्यपरकारणश्रुतिभिः श्रियःपतित्वलिङ्गेन पुरुषशब्दादिभिरुपबृंहणैश्च दत्तोत्तरत्वेऽपि युक्तिभूयस्त्वख्यापनायानूक्तं छान्दोग्यस्थं सुप्रसिद्धं लिङ्गमाह—**कः पुण्डरीकनयन** इति । अयमभिप्रायः—* तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी इति तत्रैव पुण्डरीकनयनत्वोक्तेः पुरुषोत्तमस्यैव च तत्प्रसिद्धेर्न तत्रादित्यो वाऽन्यो वा तादृशश्शङ्कनीयः । यद्यपि **द्रमिडभाष्ये** *तस्य यथा कप्यासमित्यादेष्षडर्थाः प्रोक्ताः; तथाऽप्यौचित्यात्त्रय एव स्वीकर्तव्याः । तथा चोक्तं **वेदार्थसंग्रहे**—* गम्भीराम्भस्समुद्भूतसुमृष्टनालरविकरविकसितपुण्डरीकदलामलायतेक्षण इति । एतेन परिपूर्णत्वमनुग्रहशीलत्वं चास्य व्यज्यते । **उपरिचराख्याने** च * अरोषणो ह्यसौ देव इत्युक्तम् । अन्येषां तु चतुर्मुखादित्यरुद्रादीनामपूर्णतया साधकावस्थत्वात् कामक्रोधाक्रान्तत्वाच्चाक्षीणि विरूपाणि भवन्ति । सन्निधिविशेषश्चादित्यमण्डले भगवतस्सावित्रीकल्पेषु पुराणादिषु च प्रसिद्धः । आदित्यस्य च, * चक्षोस्सूर्यो अजायत *सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्, *अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ, *यस्यादित्यो भामुपयुज्य भाति, * येन सूर्यस्तपति तेजसेद्धः, * न तत्र सूर्यो भाति न चन्द्रतारकम्, * यस्यादित्यश्शरीरमित्यादिभिरनीश्वरत्वं सिद्धम् । तद्वैभवप्रतिपादनपरं तु पुराणमसात्त्विकत्वात् विरुद्धांशे त्याज्यम् । क्वचिद्ब्रह्मदृष्ट्या तत्पर्यन्ततत्त्वविवक्षया वा निर्वाहः । एवं परमकारणविषयश्रुतिविशेषैः श्रियःपतित्वादिलिङ्गैश्च नारायण एव स्वतस्सिद्धैश्वर्यस्सर्वस्मात्पर इति निश्चितेऽपि केचिदनधिगतपदवाक्यप्रमाणवृत्तान्ताः पुरुषसमाख्यामीश्वरसमाख्यां च निर्विशे-

षणां महत्परमविशेषणविशिष्टां च परामृश्य ब्रह्मणः पितुः ब्रह्मणः पुत्रस्य च निकर्षोत्कर्षौ मन्यन्ते । तानुपालभते—**पुरुषोत्तमः क** इति । इह च * द्वाविमौ पुरुषौ लोक इत्यादयः श्लोकाः प्रतिसन्धेयाः । तेषु * परमात्मेऽत्युद्दाहृत इत्यनेन * तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित इति श्रुतिस्स्मार्यते । * यो लोकत्रयमाविश्येत्यनेन * यच्च किंचिदित्यादिकं व्याख्यातम् । बिभर्तीत्याधारत्वोक्त्या * यत्र विश्वं भवत्येकनीलम्, * तत्सवितुर्वरेण्यम्, * ध्रुवमचलममृतं विष्णुसंज्ञं सर्वाधारं धाम, * एष सेतुर्विधरण एषां लोकानामसंभेदायेत्यादेरर्थ उक्तः । अव्ययशब्दोक्त्या * शाश्वतँ शिवमच्युतमित्याद्युक्तसंग्रहः । ईश्वरशब्द इह * व्याप्य नारायण स्थित इत्युक्तव्याप्तेः * अन्तः प्रविष्टश्शास्तेत्याद्यनुसारात् समस्तनियमनविशिष्टत्वम् * आत्मेश्वरमित्युक्तानन्यनियाम्यत्वं चाभिप्रैति । * न चापि वेदेषु समाननामेत्यल्पश्रुतोक्तिः * लोके वेदे च प्रथित इति व्यासोपात्तभगवदुक्त्या परिहसनीया । अत्र च **भगवद्गीताभाष्यम्**—* वेदार्थावलोकनात् लोक इति स्मृतिरिहोच्यते; श्रुतौ स्मृतौ चेत्यर्थः; श्रुतौ तावत् * परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, * स उत्तमः पुरुष इत्यादौ; स्मृतावपि * अंशावतारं पुरुषोत्तमस्य ह्यनादिमध्यान्तमजस्य विष्णोरित्यादौ—इति । * स उत्तमः पुरुष इति श्रुतौ पुरुषोत्तमत्वं फलितमिति भावः । तदयमिह त्वदन्यः कः पुरुषोत्तम इति वदतोऽभिप्रायः—यदि वयं पुरुषोत्तमसमाख्यामात्रेण भगवत ईश्वरत्वं साधयामः, तदा ईश्वरादिसमाख्यावलेन प्रत्यवस्थातव्यम् ; अस्माभिस्तु प्रबलैः श्रुतिलिङ्गादिभिरेव ह्ययमर्थस्साधितः ; तथा सति जीवलक्षणपुरुषराशिबहिर्भूत एवायं महापुरुषस्सर्वत्र प्रसिद्धः; ततः प्रबलप्रमाणबाधितेयमीश्वरादिसमाख्या रुद्रस्य सर्वेश्वरत्वं साधयितुं न शक्नोति ; अन्यथा इन्द्रसमाख्यैव निर्विशेषणा शतमखस्य परमेश्वरत्वं साधयेत्, * इदि परमैश्वर्य इति धात्वर्थपाठात् । महत्त्वविशेषिता तु किं पुनः ? ततश्च—महावृक्षसमाख्येव बलवन्मानबाधिता । महेश्वरमहेन्द्रादिसमाख्याऽप्यत्र निष्फला ॥

पुरुषोत्तमसमाख्या त्वनधिगतशब्दानुशासनादिवृत्तान्तैः कैश्चित्केवलरूढेत्युक्तम्—* रूढ्या तु कामं पुरुषोत्तमोऽस्विति । तत्र यद्यपि कर्मधारयवृत्तौ * सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैरित्युत्तमशब्दस्य पूर्वनिपातः ; न च निर्धारणे षष्ठ्यास्समासः ; तथाऽपि * सप्तमी शौण्डैरित्यत्र योगविभागग्रहणादत्र निर्धारणेऽपि सप्तमीसमासस्स्यात् ; शैषिकषष्ठी वा नीचोत्तमभावसंबन्धावलम्बिनी द्विपदविग्रहवत्स्वपदविग्रहदर्शितार्था समस्येत । नागोत्तमादिशब्दाश्च शब्दविद्भिरेवं निरूढाः । *यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तम इति **गीता**नुसारे तु पञ्चमीसमासः प्रस्पष्टः । अत्र पञ्चमीषष्ठीसमासयोः पुरुषशब्दो बद्धमुक्तावस्थजीवमात्रपरः । * द्वाविमौ पुरुषौ लोके इत्यादिभिश्चैतत्सुगमम् । अतः श्रुतिलिङ्गाद्यबाधितया तदनुगृहीतया गीतानिरुक्तया पुरुषोत्तमसमाख्ययाऽपि पुरुषसूक्तोदितसर्वकारणपुरुषस्य परमात्मत्वसर्वव्यापनभरणनियमनस्वाम्यादिकं तदन्येषामधमत्वं च सिध्यति । इदं च * क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् । आवां तवाङ्गे संभूतौ तस्मात् केशवनामवान्, * सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततस्स वासुदेवेति विद्वद्भिः परिपठ्यते, * नराज्जातानि तत्त्वानि नाराणीति ततो विदुः । तान्येव चायनं तस्य तेन नारायणस्स्मृतः ॥ इत्यादिभिर्निरुक्तानां समाख्यान्तराणां प्रदर्शनम् । * अजस्सर्वेश्वरस्सिद्ध इति **व्यास**पठिता सर्वेश्वरसमाख्या च महेश्वरादिसमाख्यामधःकरोति । ननु तिष्ठतु समाख्या ; लिङ्गं तु पुरुषसूक्तप्रतिपाद्यस्य चतुष्पात्त्वरूपं परिच्छिन्नत्वमपरिच्छिन्नतयाऽऽत्मातात् परतत्त्वादवरतां गमयेदिति व्योमातीतवादिन आहुः । तन्निरासाय ब्रह्मरुद्रादीनामन्येषां च सर्वव्यापकपरमपुरुषैकदेशवर्तित्वं स्थापयति—**कस्यायुते**ति । त्वदन्यस्य कस्येति योज्यम्; *यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता । मेरोरिवाणुर्यस्यैतद्ब्रह्माण्ड-

मखिलं मुने, * मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव । इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्, * पश्यामि देवांस्तव देव ! देहे सर्वांस्तथा भूतविशेषसङ्घान् । ब्रह्माणमीशं कमलासनस्थमित्यादिभिर्भगवत्स्वरूपैकदेशे विग्रहैकदेशे च विश्वस्थितिरुच्यते । अतो विष्णोरेव सर्वव्यापित्वं रुद्रादेश्च तदेकदेशवर्तित्वं सिद्धम् ॥

तपसा तोषितेनैव विश्वरूपेण विष्णुना । स्वपार्श्वे दक्षिणे शम्भोः निवासः परिकल्पितः ॥
एवं स्वविग्रहांशेषु तदन्या अपि देवताः । निरङ्कुशस्वतन्त्रेण श्रीधरेण निवेशिताः ॥

पुरुषसूक्तेऽपि * पुरुष एवेदँ सर्वमित्यादिभिरपरिच्छिन्नत्वं सिद्धम् । तत्रतत्र परिच्छिन्नत्वोक्तीनां तु * अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च, * अभिव्यक्तेरित्याश्मरथ्यः, * अल्पश्रुतेरिति चेत्तदुक्तम्, * हृद्यपेक्षया तु मनुष्याधिकारत्वात्, *बुद्ध्यर्थः पादवत्, *अनेन सर्वगतत्वमायामशब्दादिभ्य इत्यादिभिस्सूत्रैस्तदुपाध्यवच्छेदनिबन्धनत्वं महापुरुषस्यैव सर्वव्यापित्वं च स्थापितम् । अत्रायुतायुतेत्याद्यंशकल्पसिरसंख्यातब्रह्माण्डतदावरणादिमहत्तरविभूत्याश्रयप्रदेशातिरिक्तविभूत्यन्तराश्रयापरिमितस्वरूपवैभवसूचनार्था । एतेन प्रतिब्रह्माण्डं ब्रह्मरुद्रादीनामितरेतरानभिज्ञत्वादिकमपि सूच्यते । **कस्येत्यादिना** महिमैकदेशाधिष्ठेयत्वं वा विवक्षितम् । * विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्यत्राभाप्यत–* मम महिम्नोऽयुतायुतांशेन विष्टभ्याहमवस्थित इति । तत्रैव *यस्यायुतायुतांशांश इत्यादिकमुदाहृतम् । **विश्वं**–कृत्स्नं कार्यजातम् । चिदचित्प्रविभागः चेतनाचेतनयोः प्रकृष्टं वैषम्यम् । तस्य विचित्रत्वमाश्चर्यत्वमवान्तरविशेषो वा । देवमनुष्यादिरूपभेदेन तत्तदनुगुणज्ञानसुखादिभेदैश्च चेतनप्रविभागः । अचेतनप्रविभागस्तु भूतेन्द्रियादिरूपेण भोग्यभोगोपकरणादिरूपेण च । स च निर्बाधैः प्रत्यक्षानुमानागमैर्यथासंभवं प्रत्येतव्यः । एवं प्रविभागेन वृत्तं व्यवस्थितस्वरूपस्थितिव्यापारवत्तया निष्पन्नमित्यर्थः ॥ १२ ॥

वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रदानैः ।
कोऽन्यः प्रजापशुपती परिपाति कस्य पादोदकेन स शिवस्त्वशिरोधृतेन ॥ १३

अथ स्यात् यद्यपि प्रत्यक्षस्तुतिभिः तत्रत्यलिङ्गैरबाधितसमाख्याविशेषैश्च भगवत्परत्वं प्रतीयते, तथाऽपि * इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति स्मरणाद्विरोधाधिकरणस्य च स्पष्टार्थश्रुतिविषयत्वात्प्रजापतिपशुपतिपारम्यतत्परबहूपबृंहणदर्शनाच्च पुरुषोत्तम एव पर इति निश्चेतुं न शक्यमित्यत्र प्रबलतमोपबृंहणप्रसिद्धैः परावरविवेकलिङ्गभूतैरुदन्तैरुत्तरमाह–**वेदापहारेति** ॥ अयं भावः–सुपरिगृहीताविरुद्धार्थसात्त्विकपुराणाद्युपबृंहिताभिः प्रत्यक्षश्रुतिभिः अर्थनिर्णये सिद्धे विरुद्धार्थानां राजसतामसपुराणादीनां शारीरकस्मृत्यधिकरणनिश्चलीकृतविरोधाधिकरणनयेन विधूननं युक्तम् । तद्विपरीतवृत्तान्तास्तु तामसादिपुराणोक्तत्वाद्भ्रमविप्रलम्भसंभवा मन्तव्याः । मन्वादिस्मृतिषु भगवत्पारम्यं सुव्यक्तम् । * यद्वै किंच मनुरवदत्तद्भेषजमिति च श्रूयते । * मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यत इति स्मर्यते च । अतस्सात्त्विकेतिहासपुराणादिप्रोक्ता वेदापहारादिवृत्तान्ताः परावरविवेके सम्यङ्लिङ्गानि भवन्ति । तदिह निखिलजगदेकहेतुभूतस्स भगवान् * आनीदवातँ स्वधया तदेकम्, * तस्माद्धान्यं न परः किञ्चनासेत्यादिप्रसिद्धायां पूर्वापरहिरण्यगर्भादिप्रलयप्रागभावदशायां महदादिसृष्टिक्रमेण ब्रह्माणं पूर्वं विधाय प्रलयतिरोहितान्वेदांश्च पूर्वानुपूर्वीविशिष्टानाविष्कृत्य ब्रह्मणे प्राहिणोत् । अत्र *विदधाति प्रहिणोतीति च वर्तमाननिर्देशः प्रतिकल्पमेवमेवेति ज्ञापनार्थः । ततश्च वेदचक्षुःप्रदर्शितां विश्वसृष्टिं कर्तुकामे ब्रह्मणि प्राचीनदुष्कृतफलदानाय परमपुरुषेणैव सृष्टौ मूर्तेरजस्तमस्त्वेन भगवच्छास्त्रप्रति-

पादितौ महाबलौ मधुकैटभौ—* ददृशातेऽरविन्दस्थं ब्रह्माणममितप्रभम् । सृजन्तं प्रथमं वेदांश्चतुरश्चारुविक्रमौ ॥ ततो विग्रहिणस्तांस्तु दृष्ट्वा तावसुरोत्तमौ । वेदाञ्जगृहतू राजन् ! ब्रह्मणः पश्यतस्तदा ॥ अथ तौ दानवश्रेष्ठौ गृहीत्वा तान् सनातनान् । रसां विविशतुस्तूर्णमुदपूर्णे महोदधौ ॥ ततो हृतेषु वेदेषु ब्रह्मा कश्मलमाविशत् । ततो वचनमीशानं प्राह वेदैर्विनाकृतः ॥ ब्रह्मा—वेदा मे परमं चक्षुः वेदा मे परमं धनम् । वेदा मे परमं धाम वेदा मे ब्रह्म चोत्तमम् ॥ मम वेदा हृतास्सर्वे दानवाभ्यां बलादितः । अन्धकारा इमे लोका जाता वेदैर्विवर्जिताः ॥ वेदे हृतेऽहं किं कुर्यां लोकान्वै स्रष्टुमुद्यतः । अहो बत महद्दुःखं वेदनाशनजं मम ॥ प्राप्तं दुनोति हृदयं तीव्रशोकामयस्त्वयम् । को हि शोकार्णवे मग्नं मामिहाद्य समुद्धरेत् । इत्येवं भाषमाणस्य ब्रह्मणो नृपसत्तम ! । हरिस्रोत्रार्थमुद्भूता बुद्धिर्बुद्धिमतां वर ! ॥ ततो जगौ परं जप्यं प्राञ्जलिः प्रग्रहं प्रभुरित्यादि । * एतस्मिन्नन्तरे राजन् ! देवो हयशिरोधरः । जग्राह वेदानखिलान् रसातलगतान् हरिः ॥ प्रादाच्च ब्रह्मणे राजन् ! ततस्त्वां प्रकृतिं ययौ । ततस्तयोर्वधेनाशु वेदोपहरणेन च ॥ शोकापनयनं चक्रे ब्रह्मणः पुरुषोत्तम इति । पशुपतेरेव गुरुघातकाद्विमोचनम् । गुरुविषयं पातकं गुरुघातकं गुरुत्वेन पातकं वा विशेष्यते । न हि ब्राह्मणोत्तमपितृभूतब्रह्मशिरश्छेदादधिकं पातकं संभाव्यते ? विदुषोऽतिक्रमे दण्डभूयस्त्वं च स्मर्यते । न च सर्वज्ञनामाऽसौ न जानाति तदिदं स्वपातकम् । रुद्रेण स्वयमेवोक्तं **मात्स्ये**—* ततः क्रोधपरीतेन संरक्तनयनेन च । वामाङ्गुष्ठनखाग्रेण छिन्नं तस्य शिरो मया ॥ ब्रह्मा—यस्मादनपराधस्य शिरश्छिन्नं त्वया मम । तस्माच्छापसमायुक्तः कपाली त्वं भविष्यसि ॥ रुद्रः—ब्रह्महाऽऽकुलितो भूत्वा चरंस्तीर्थानि भूतले । ततोऽहं गतवान् देवि ! हिमवन्तं शिलोच्चयम् ॥ तत्र नारायणः श्रीमान् मया भिक्षां प्रयाचितः । ततस्तेन स्वकं पार्श्वं नखाग्रेण विदारितम् ॥ महती स्रवती धारा तस्य रक्तस्य निस्सृता । विष्णुप्रसादात्सुश्रोणि ! कपालं तत्सहस्रधा ॥ स्फुटितं बहुधा यातं स्वप्नलब्धं धनं यथेति । एवं स्वेदजलपूरणेन कपालमोचनं चान्यत्रोक्तं कल्पभेदेन रुद्रसृष्ट्यन्तरे योज्यम् । अप्राकृते भगवद्विग्रहे युद्धादिष्वत्र च रुधिरस्वेदादिकं मायासृष्टं मन्तव्यम् । रुद्रस्य दैत्यपीडाद्यापद्विमोचनमन्धकासुरसंग्रामे प्रसिद्धम् । तदुक्तं **मात्स्ये** महेश्वरप्रयुक्तशस्त्रक्षतप्रथमान्धकरुधिरबिन्दुभिरन्धकयूथे सञ्जाते—* ततस्स शङ्करो देवस्त्वन्धकैराकुलीकृतः । जगाम शरणं देवो वासुदेवमजं विभुम् ॥ ततस्स भगवान् विष्णुस्सृष्टवाञ्छुष्करेवतीम् । सा पपौ सकलं तेषामन्धकानामसृक् क्षणादिति । एवं रुद्रस्य स्वदत्तवरसामर्थ्यपरीक्षोद्यतवृकासुरदौरात्म्यजनितभयविमोचनं च द्रष्टव्यम् । अत्रेन्द्रादीनामपि हिरण्यरावणदुर्वासःप्रभृतिजनितापद्विमोचनमुपलक्ष्यम् । **सभापर्वणि** चैतत्सामान्यत उक्तम्—* एवमेषोऽसुराणां च सुराणामपि सर्वशः । भयाभयकरः कृष्णस्सर्वलोकेश्वरेश्वर इति । आदिशब्देन दुर्जयत्रिपुरविजिगीषाद्यापत्संग्रहः । उक्तं हि **महाभारते**—* विष्णुरात्मा भगवतो भवस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वर इति । **श्रीविष्णुधर्मे** च—* त्रिपुरं जघ्नुषः पूर्वं ब्रह्मणा विष्णुपञ्जरम् । शङ्करस्य कुरुश्रेष्ठ रक्षणाय निरूपितम् ॥ वागीशेन तु शक्रस्य बलं हन्तुं प्रयास्यत इति । **नामत्रयविधाने** च तेनैव रुद्रस्य कालकूटापन्निस्तारणं च दर्शितम्—* अच्युतानन्तगोविन्दमन्त्रमानुष्टुभं परम् । ओन्नमस्सम्पुटीकृत्य जपन्विषधरो हर इति । बाणयुद्धे भगवता वासुदेवेन योद्धुं प्रवृत्तस्यापि रुद्रस्य प्रशमनास्त्रेण युद्धापन्निस्तारणं कृतम् । यथोक्तं **वैष्णवपुराणे**—* जृम्भणास्त्रेण गोविन्दो जृम्भयामास शङ्करम् । ततः प्रणेदुर्दैतेयाः प्रमथाश्च समन्ततः ॥ जृम्भाभिभूतस्तु हरो रथोपस्थ उपाविशत् । न शशाक तदा योद्धुं कृष्णेनाक्लिष्टकर्मणेति । **श्रीमद्रामायणे** च श्रीपरशुराम आह—* हुङ्कारेण महाबाहुः स्तम्भितोऽथ त्रिलोचनः । जृम्भितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ॥ अधिकं मेनिरे विष्णुं देवास्सर्षिगणास्तदेति ॥

श्रीबदरिकाश्रमे च युद्धप्रवृत्तस्तापसवेषेण धर्मसूनुना नरसखेन नारायणेन सञ्जिहीर्षितो रुद्रः पितुः पुत्रस्य च मध्यं प्रविष्टेन चतुर्मुखेन प्रबोधितश्शरणमुपागतस्सर्वलोकशरण्येन संरक्षित इति **महाभारते** प्रोक्तं—* प्रसादयामास भवो देवं नारायणं प्रभुम् । शरणं च जगामाद्यं वरेण्यं वरदं हरिमित्यादिना । तयोर्महिष्ठफलप्रदानं च तत्रैवोक्तम् । तथा हि; **कुण्डधरोपाख्याने**—* युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः । पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुमः इति । उपाख्यानान्तरे च—* मया सृष्टः पुरा ब्रह्मा मद्यज्ञमयजत्स्वयम् । ततस्तस्मै वरान्प्रीतो ददाम्यहमनुत्तमान् ॥ मत्पुत्रत्वं च कल्पादौ लोकाध्यक्षत्वमेव चेति । युधिष्ठिरशोकापनोदे च—* विश्वरूपो महादेवः सर्वमेधे महाक्रतौ । जुहाव सर्वभूतानि स्वयमात्मानमात्मनेति । तथा * महादेवस्सर्वमेधे महात्मा हुत्वाऽऽत्मानं देवदेवो बभूव । विश्वान् लोकान् व्याप्य विष्टभ्य कीर्त्या विराजते द्युतिमान् कृत्तिवासा इति ॥ आमनन्ति चैतदेव बह्वृचाः * अस्य देवस्य मीढुषो वयाविष्णोरेष प्रवृधे हविर्भिः विदेहि रुद्रो रुद्रियं महत्त्वमिति । पशुपतित्वं च रुद्रस्य वरापेक्षापूर्वकमाम्नातं—* सोऽब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिरिति । **श्रीनारायणीये** च सर्वदेवानां भगवदाराधकत्वं तदधीनगतित्वं चोक्तम्—* तं देवा ऋषयश्चैव नानातनुसमाश्रिताः । भक्त्या संपूजयन्त्येनं गतिं चैषां ददाति सः ॥ इति । यज्ञाग्रहराध्याये च भगवत एव सर्वकर्मसमाराध्यत्वं ब्रह्मादीनां सर्वेषां तत्प्रसादलब्धयज्ञभागत्वं च प्रतिपादितं—* ततस्ते विबुधास्सर्वे ब्रह्मा ते च महर्षयः । वेददृष्टेन विधिना वैष्णवं क्रतुमारभन् ॥ तस्मिन् सत्रे तदा ब्रह्मा स्वयं भागमकल्पयत् । देवा महर्षयश्चैव सर्वे भागानकल्पयन् ॥ ते कार्तयुगधर्माणो भागाः प्रथमसत्कृताः । प्रापुरादित्यवर्णं तं पुरुषं तमसः परमिति । ततश्चैवं **भगवद्वचः**—* येन यः कल्पितो भागः स तथा समुपागतः । प्रीतोऽहं प्रदिशाम्यद्य फलमावृत्तिलक्षणमिति । तथा—* यज्ञैर्ये चापि यक्ष्यन्ते सर्वलोकेषु वै सुराः । कल्पयिष्यन्ति वो भागांस्ते नरा वेदकल्पितान् ॥ यो मे यथा कल्पितवान् भागमस्मिन् महाक्रतौ । स तथा यज्ञभागार्हो वेदसूत्रे मया कृत इति । **कर्मकाण्डे** च प्रथमाध्याये—*नित्यमर्चयसे देव कं देवमधिकं तव । यस्मान्मानसमव्यग्रं कृत्वा त्रिभुवनेश्वर ॥ जपहोमनमस्कारैस्तं वदस्व तथा मयेत्युमया पृष्टो महेश्वर उवाच—* शृणुष्व त्वं महाभागे यथा नित्यं नमाम्यहम् । ब्रह्माद्या मुनयश्चैव तपोधैर्यसमाधिभिः ॥ अर्चयन्ति सदा यं वै सदा पश्यन्ति सूरयः । तं वै यथातथं वक्ष्ये तस्मिन् धर्मस्य निर्णयम् ॥ अज्ञानार्णवमग्नानां सर्वेषामात्मनामयम् । विष्णुर्धर्मोडुपः श्रीमानुत्तारार्थ उदाहृत इति । **श्रीनारसिंहपुराणे** चैतत्संग्रहेणोक्तं—* ब्रह्मादयस्सुरास्सर्वे विष्णुमाराध्य ते पुरा । स्वंस्वं पदमनुप्राप्ताः केशवस्य प्रसादत इति । अथ रुद्रस्यानीश्वरत्वे हेत्वन्तरमाह—**कस्य पादोदकेन स शिव इति** । अत्र द्वन्द्वसमासस्थस्यापि पशुपतिमात्रस्य गङ्गाधारणसामर्थ्यात् बुद्ध्या निष्कृष्य स इति परामर्शः । यद्वा स इति शिवसमान्याप्रसिद्धिपरम् । तथा चोक्तं **श्रीभागवते**—* सञ्चिन्तयेद्भगवतश्चरणारविन्दमिति प्रक्रम्य, * यच्छौचनिस्सृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्नि विधृतेन शिवश्शिवोऽभूदिति । **उद्योग**पर्वणि चैतदभिप्रायेण प्रोक्तम्—* अत्र गङ्गां महादेवः पतन्तीं गगनाच्च्युताम् । प्रगृह्य प्रददौ लोके मानुषे ब्रह्मवित्तम इति । स्पष्टं चैतदीश्वरसंहितायामाराधकेन ब्रह्मणैवोक्तं * द्रवीभूतस्तदा धर्मो हरिभक्त्या महामुने । गृहीत्वा धर्मपानीयं पदं नाथस्य तुष्टये ॥ क्षालितं परया भक्त्या पाद्यार्घ्यादिभिरर्चितम् । तदम्बु परया भक्त्या दधार शिरसा हरः ॥ **पावनार्थं** जटामध्ये योम्योऽस्मीत्यवधारणात् । वर्षायुतान्यथ बहून्न मुमोच तथा हरः ॥ इति । यद्येवं गङ्गा पशुपतेरपि पावनी, तर्हि * भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुरित्येतत्कथम्? **इत्थम्**; अत्र हि स्वतः पवित्रत्वस्य

स्पष्टव्यताहेतुत्वमुच्यते, अश्रुतमनाकाङ्क्षितं चान्यसंसर्गस्य तत्पवित्रताहेनुत्वं कल्पयितुमयुक्तम् ; कल्प्यमानेऽपि ज्ञापकहेतुत्वमात्रं कामं कल्प्यताम् । भवेन शिरसा धृतत्वात्पवित्रमिति ज्ञात्वा पस्पृशुरित्यर्थः । सामान्योक्त्या च भवस्यान्येषां च पवित्रत्वमभिप्रेतम् । अत एव * हरस्य गात्रसंस्पर्शात्पवित्रत्वमुपागतेत्यत्रापि हरस्य शुद्धिप्रदत्वमुपागतेति बोद्धव्यम् ॥१३॥

कस्योदरे हरविरिञ्चमुखः प्रपञ्चः को रक्षतीममजनिष्ट च कस्य नाभेः ।
क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः कः ? केन वैष परवानिति शक्यशङ्कः ॥ १४

एवं तत्तद्भक्तैः परत्वेन कल्पितयोः प्रजापतिपशुपत्योर्वृत्तान्तैस्तयोरनीश्वरत्वकर्मवश्यत्वादिकं भगवत एव सर्वेश्वरत्वं च दृढीकृतम् । अथ तयोस्तदन्येषां चानीश्वरतया संमतानामविशेषेण पारतन्त्र्यसृज्यत्वसंहार्यत्वादिप्रदर्शकैस्तामसादिपुराणेष्वपि प्रसिद्धतया सर्वलौकिकपरीक्षकसंमतैरशक्यापह्नवैराश्चर्यचेष्टितैः परावरतत्त्वविवेकं प्रतिष्ठापयति—**कस्योदर** इति ॥ प्राकृतप्रलयदशायां हरविरिञ्चादिरूपेण लक्ष्यमाणश्चिदचिदात्मकः प्रपञ्चः कस्योदरे त्वदन्यस्य कस्यान्तस्सूक्ष्मतयाऽवस्थित इत्यर्थः । * यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इत्यत्रौदनोपसेचनशब्दवत्, * ग्रसेत्संहारसमये जगत् स्थावरजङ्गमम् । लीलया यस्तु भगवान् तं गच्छ शरणं हरिमित्यत्र ग्रसनशब्दवच्चात्रोदरशब्द औपचारिकः । उक्तं च विश्वप्रलयवेलायां भगवत एवावस्थानं **सुबालोपनिषदि**—*किं तदासीन्नैवेह किं चनाग्र आसीदमूलमनाधारमिमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायण इत्यादिभिः । **महाभारते** * ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे । आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान् ॥ एकस्तिष्ठति विश्वात्मा स तु नारायणः प्रभुरिति । * कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्यय इति च । **श्रीवैष्णवे** च पुराणे * प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥ परमात्मा च सर्वेषामाधारः परमेश्वरः । विष्णुनामा स वेदेषु वेदान्तेषु च गीयत इति । **श्रीविष्णुधर्मोत्तरे** च * ब्रह्मा शंभुस्तथैवार्कः चन्द्रमाश्च शतक्रतुः । एतदाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा ॥ जगत्कार्यावसानेषु वियुज्यन्ते च तेजसा । वितेजसश्च ते सर्वे पञ्चत्वमुपयान्ति चेति । अत्र * नारायणे प्रलीयन्त इति श्रुत्यादिप्रसिद्धेऽर्थे तात्पर्यम् । यद्वा महाप्रलयानन्तरं महदादिपूपसृष्टेषु लक्ष्यमाणहरविरिञ्चादीन् भगवता स्वविग्रहविशेषेऽन्तर्निधाय रक्षित्वा ततस्तेषां सृष्टिरत्रोच्यते । सृष्टेः पुरुषार्थशेषतया धर्मादिपुरुषार्थस्य च स्थितिकालभावित्वात्तत्प्राधान्यविवक्षया क्रममुल्लङ्घ्याह—**को रक्षतीम**मिति । उक्तमिदं वैष्णवपुराणे—* न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिम् । स्थितौ स्थितं महाप्राज्ञ! भवत्यन्यस्य कस्य चित् ॥ सृजत्येष जगत्सृष्टौ स्थितौ पाति सनातनः । हन्ति चैवान्तकत्वे च रजस्सत्त्वादिसंश्रय इति । **उत्तरश्रीरामायणे** च ब्रह्मणोक्तं—* ततस्त्वमपि दुर्धर्षस्तस्माद्भावात्सनातनात् । रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवानिति । * सोऽहं संन्यस्तभारो हि त्वामुपासे जगत्पतिम् । रक्षां विधत्स्व भूतेषु मम तेजस्करो भवानिति च । एवं * न संपदां समाहारे विपदां विनिवर्तने । समर्थो दृश्यते कश्चित्तं विना पुरुषोत्तममित्यादीनि च द्रष्टव्यानि । अथ * बहु स्यां प्रजायेयेतीत्युक्तक्रमेण जनिहेतुत्वमाह—**अजनिष्ट च कस्य नाभेरि**ति । श्रूयते हि **महोपनिषदि**—* सर्वस्यायनं हरिमित्यारभ्य * यन्नाभिपद्मादभवन्महात्मा प्रजापतिर्विश्वसृड्विश्वरूपः । तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति । **आथर्वणे च** * ब्रह्म वा इदमग्र आसीदित्युपक्रम्य * ब्रह्म वै ब्रह्माणं पुष्करेऽसृजदिति । एवम् * अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधिश्रितम् विश्वकर्मा ह्यजनिष्ट देवः, * स प्रजापतिरेकः पुष्करपर्णे समभवदित्यादिष्वपि भगवन्नाभेरेव प्रजा-

पतिसंभवोऽभिप्रेतः । उपबृंहणसिद्धं चैतत्--* अजस्य नाभावध्येकं यस्मिन् विश्वं प्रतिष्ठितम् । पुष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नम इति । भृगुभरद्वाजसंवादे च--* ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयम्भुवा । तस्मात्पद्मात्समभवद्ब्रह्मा वेदमयो विधिरिति । स्थलान्तरे च--* नारायणो महायोगी शुभाशुभविवर्जितः । ससर्ज नाभिजं पुत्रं ब्रह्माणममितप्रभम् ॥ ततस्स प्रादुरभवदथैनं वाक्यमब्रवीत् । मम त्वं नाभितो जातः प्रजासर्गकरः प्रभुः ॥ सृज प्रजास्त्वं विविधा ब्रह्मन्! सजडपण्डिता इति । **सभापर्वणि** च--* अव्यक्तो व्यक्तलिङ्गस्थो य एष भगवान् प्रभुः । पुरा नारायणो देवस्स्वयम्भूः प्रपितामह इत्यारभ्य, * ततस्स भगवांस्तोये ब्रह्माणमसृजत्स्वयमिति । अत्रापि प्रलयार्णवमध्ये नाभेर्ब्रह्माणमसृजदिति मन्तव्यम् । सुपर्णवैकुण्ठसंवादे च * यत्तत्पद्ममभूत्पूर्वं तत्र ब्रह्मा व्यजायत । ब्रह्मणश्चापि सम्भूतः शिव इत्यवधार्यताम् ॥ शिवात्स्कन्दस्समभवदेतत्सृष्टिचतुष्टयमिति । **मार्कण्डेयश्च**--* स्वपतस्तस्य वै पद्मं कोटिसूर्यसमप्रभम् । नाभेर्विनिस्सृतं तस्य तत्रोत्पन्नः पितामह इति । **उत्तरश्रीरामायणे** च--* सङ्क्षिप्य च पुरा लोकान् मायया स्वयमेव हि । महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥ पद्मे दिव्येऽर्कसङ्काशे नाभ्यामुत्पाद्य मामपि । प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितमिति । **श्रीवैष्णवे** च पुराणे--* रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः । यस्य नाभिसमुद्भूतपङ्कजादभवज्जगदिति । **श्रीवाराहे** चागस्त्यं प्रति रुद्रः--* नारायणः परो देवः सत्त्वरूपी जनार्दनः । त्रिधाऽऽत्मानं स भगवान् ससर्ज परमेश्वरः ॥ रजस्तमोभ्यां युक्तोऽभूत् रजस्सत्त्वाधिकं विभुम् । ससर्ज नाभीकमले ब्रह्माणं कमलासनम् ॥ रजसा तमसा युक्तं सोऽपि मामसृजत्प्रभुरिति । अत्र त्रिधाऽऽत्मानमित्येतत् स्वेन रूपेण क्षेत्रज्ञद्वयविशिष्टवेषेण चेति बहुप्रमाणानुसारेण मन्तव्यम् । रजस्तमोयोगश्च तद्गुणकद्रव्याधिष्ठातृत्वेन भवति । **श्रीनारसिंहपुराणे** * तत्र सुप्तस्य देवस्य नाभौ पद्ममभून्महत् । तस्मिन् पद्मे महाभाग! वेदवेदाङ्गपारगः ॥ ब्रह्मोत्पन्नस्स तेनोक्तः प्रजास्सृज महामते!। एवमुक्त्वा तिरोभावं गतो नारायणः प्रभुः ॥ तथेत्युक्त्वा स तं देवं विष्णुं ब्रह्माऽथ चिन्तयन् । आस्ते किञ्चिज्जगद्धेतोर्नाध्यगच्छत किंचन ॥ तावत्तस्य महारोषो ब्रह्मणोऽभून्महात्मनः । ततो बालस्समुत्पन्नस्तस्याङ्के रोषसंभवः ॥ स रुदन्वारितस्तेन ब्रह्मणा व्यक्तमूर्तिना । नाम देहीति चेत्युक्तस्तस्य रुद्रेत्यसौ ददाविति । एवं * सृष्ट्वा नारं तोयमन्तस्थितोऽहं येन स्यान्मे नाम नारायणेति । कल्पेकल्पे तत्र शयामि भूयः सुप्तस्य मे नाभिजं स्याद्यथाऽब्जम् ॥ * तत्र सुप्तस्य मे देवि! नाभौ पद्ममजायते त्यादीनि वचनानि द्रष्टव्यानि। नाभिरित्येतदुपलक्षणम्। मनःप्रभृतिभ्यो हि ब्रह्मणो जन्मषट्कं पूर्वं प्रोच्यते। यथा हयशिरउपाख्याने * अहं प्रसादजस्तुष्यन् लोकधात्रे स्वयम्भुवे । त्वत्तो मे मानसं जन्म प्रथमं द्विजपूजितम् ॥ चाक्षुषं मे द्वितीयं वै आसीज्जन्म पुरातनम् । त्वत्प्रसादाच्च मे जन्म तृतीयं वाचिकं महत् ॥ त्वत्तो मे श्रावणं चापि चतुर्थं जन्म वै विभो! । नासिक्यं चैव मे जन्म त्वत्तः पञ्चममुच्यते ॥ अण्डजं चापि मे जन्म त्वत्तष्षष्ठं विनिर्मितम् । इदं च सप्तमं जन्म पद्मजं मेऽमितप्रभ! ॥ सर्गेसर्गेऽप्यहं पुत्रस्तव त्रिगुणवर्जितेति । अत्रैवमण्डजसृष्टिः **महोपनिषदि** श्रूयते * एको ह वै नारायण आसीत् न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमेत तस्य ध्यानान्तस्स्थस्यैका कन्या दशेन्द्रियाणि इत्यारभ्य * **अथ पुनरेव** नारायणस्सोऽन्यं कामं मनसाऽध्यायत तस्य ध्यानान्तस्थस्य ललाटात्स्वेदोऽपतत् ता इमा आपस्तद्धिरण्मयमण्डमभवत् तत्र ब्रह्मा चतुर्मुखोऽजायतेति । अनन्तरं रुद्रोत्पत्तिश्चैवमभिधीयते--* **अथ पुनरेव नारायणस्सोऽन्यं कामं मनसाऽध्यायत तस्य ध्यानान्तस्थस्य ललाटात्स्वेदोऽपतत् स्वेदाद्बुद्बुदमभवत् बुद्बुदात् व्यक्ष-**

श्शूलपाणिः पुरुषोऽजायतेति । **मोक्षधर्मे** चोक्तम् * एष लोकगुरुर्ब्रह्मा जगदादिकरः प्रभुः । एष माता पिता चैव युष्माकं च पितामहः ॥ मयाऽनुशिष्टो भविता सर्वभूतवरप्रदः । अस्य चैवानुजो रुद्रो ललाटाद्यस्समुत्थितः ॥ ब्रह्मानुशिष्टो भविता सोऽपि सर्ववरप्रद इति, * अथ तत्र सतस्तस्य चतुर्वक्त्रस्य धीमतः । ललाटप्रभवः पुत्रः शिव आगाद्यदृच्छयेति । छन्दोगास्त्वामनन्ति—* विरूपाक्षाय दन्ताज्ञये तुथाय विश्ववेदसे सहस्राक्षाय ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठाय नमो घण्टाय कर्माधिपतये नम इति । **शतपथे चाष्टमूर्तिब्राह्मणे** प्रथमांशे—* संवत्सरे कुमारोऽजायत सोऽरोदीत् तं प्रजापतिरब्रवीत् कुमार! किं रोदिषि यच्च मम तपसोऽधिजातोऽसीति सोऽब्रवीत् अनपहतपाप्मा वा अहमस्मि हन्त नामानि मे देहीति तस्मात्पुत्रस्य जातस्य नाम कुर्यात् पाप्मानमेवास्य तदपहन्ति अपि द्वितीयम् अपि तृतीयम् अपि पूर्वमेवास्य तत्पाप्मानमपहन्ति तमब्रवीत् रुद्रोऽसीति तस्य तन्नामाकरोत् अग्निस्तद्रूपमभवत् अग्निर्वै रुद्रः यदरोदीत्तस्माद्रुद्र इत्यादि । सेयं श्रुतिर्भगवता **पराशरेणोपबृंहिता**—* कथितस्तामसस्सर्गो ब्रह्मणस्ते महामुने! । रुद्रसर्गं प्रवक्ष्यामि तं मे निगदतः शृणु ॥ कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः । प्रादुरासीत्प्रभोरङ्के कुमारो नीललोहितः ॥ रुरोद सुस्वरं सोऽथ द्रवंश्च मुनिसत्तम! । किं रोदिषीति तं ब्रह्मा रुदन्तं प्रत्युवाच ह ॥ नाम देहीति तं सोऽथ प्रत्युवाच प्रजापतिः । रुद्रस्त्वं देवनाम्नाऽसि मा रोदीस्स्थैर्यमावह ॥ एवमुक्तः पुनस्सोऽथ प्रत्युवाच महातपाः । ततोऽन्यानि ददौ तस्मै सप्त नामानि स प्रभुः ॥ स्थानानि चैषामष्टानां पत्नीः पुत्रांश्च वै विभुरित्यादिना । **मोक्षधर्मे च ब्रह्मरुद्रसंवादे**—* अहं ब्रह्मा चाद्य ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूतः । मत्तो जगज्जङ्गमस्थावरं च सर्वं वेदास्सरहस्याश्च पुत्रेति; **निष्ठानिर्णयाध्याये** च—* उमापतिः पशुपतिः श्रीकण्ठो ब्रह्मणस्सुत इति । **श्रीवाराहे** च * नारायणः परो देवस्तस्माज्जातश्चतुर्मुखः । तस्माद्रुद्रोऽभवद्देवि! स च सर्वज्ञतां गत इति । एवं रुद्रस्य ब्रह्मानुजत्वब्रह्मपुत्रत्वे अपि कल्पभेदादुपपद्येते ॥

आप्तवाचोर्विरोधे स्यात्सृष्टिभेदादियं गतिः । अनिश्चिताप्तभावानां निश्चितैस्स्यादनादरः ॥

अथैवमेव परावरत्वविभाजकत्रिविक्रमव्यापारमाह—**क्रान्त्वेति** । अनेन * यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वेत्यादिप्रतिपादितं विग्रहमहत्त्वादिकं चतुर्मुखस्य तत्पदाराधकत्वं च सूच्यते । तदा ब्रह्मादिसर्वदेवतानां मनुष्यादिवत् स्तोतृत्वं चोक्तं—* सङ्घैस्सुराणां दिवि भूतलस्थैरित्यादिना । अथवा क्रान्त्वेत्यनेन सर्वेषामन्तर्बहिश्चावस्थाय यथार्हं तत्तत्कार्यार्थमाक्रमणं विवक्षितम् । **अन्तर्यामिब्राह्मणे** हि—* यः पृथिवीमन्तरो यमयति, * य आत्मानमन्तरो यमयतीत्यादिभिस्सर्वतत्त्वाधिष्ठातृत्वमुक्तम् । **सुबालोपनिषदि** च—* यः पृथिवीमन्तरे सञ्चरन्नित्यादिभिस्स एवार्थ उक्तः; अन्ते च विशेषितं * एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण इति । अन्यमपि निगरणादिकर्मीभूतब्रह्मरुद्राद्यशक्यमाश्चर्यव्यापारमाह—**निगीर्य पुनरुद्गिरति त्वदन्यः क** इति । यथोक्तं **श्रीसात्त्वते**—* त्यजन्तमाहरन्तं च श्वासोच्छ्वासद्वयेन च । आब्रह्मभवनं सर्वं कर्मप्राधानिकं हि यदिति । उद्गिरतीति वर्तमाननिर्देशः क्वचित्क्वचित्कल्पे तथा प्रवृत्तिप्रवाहज्ञापनार्थः । तस्य यथापूर्वत्वद्योतनाय पुनश्शब्दः । एवं संहार्यत्वसंहर्तृत्वरक्ष्यत्वरक्षकत्वजन्यत्वजनकत्वाधिष्ठेयत्वाधिष्ठातृत्वादिवैधर्म्यवर्गैरुक्तैश्च **पुरुषनिर्णयादिषु** प्रपञ्चितैर्हेतुभिः त्वदन्येषु क्वचिदपि स्वातन्त्र्यशङ्का च न स्यादिति निगमनाभिप्रायेणाह—**केन वेति** । त्वदन्येनेति विशेषणीयम् । **वा**शब्दश्चकारार्थः; अन्यस्य सर्वस्मात्परस्यात्यन्तासंभावितत्वद्योतनार्थो वा । मुक्तेषु नित्येषु च शक्तिभूयस्त्वेऽपि सर्वशरीरत्वादि-

लक्षणं स्वातन्त्र्यं नास्ति । किमुत क्षेत्रज्ञेषु हरविरिञ्चादिष्वित्यभिप्रायेण निर्दिशति—**एष** इति । अत्र सर्वेषामाधारतया नियन्तृतया शेषितया चाधिकः परः । तद्वान् **परवान्** । प्रामाणिकानां दृढतरबहुप्रमाणसिद्धेऽर्थे तद्विपरीतशङ्काऽपि नोत्पद्यत इत्यभिप्रायेणात्र शङ्काप्रतिक्षेपः । अथवा मन्दमतीनां श्रुत्यन्तरेषु परान्तरसद्भावशङ्कासंभवेऽपि पूर्वोक्तैरेव न्यायैस्तन्निरासमभिप्रेत्य केनेत्यादिकमुच्यते । उपबृंहणैश्चैतत्सिद्धम्; यथाऽऽश्वमेधिके **श्रीवैष्णवधर्मशास्त्रे**—*अनाश्रित्योच्छ्रयो नास्ति मुख्यमाश्रयमाश्रयेत् । रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः ॥ ब्रह्मा मामाश्रितो राजन्! नाहं कञ्चिदुपाश्रितः । ममाश्रयो न कश्चित्तु सर्वेषामाश्रयो ह्यहम् ॥ इदं रहस्यं कौन्तेय! प्रोक्तवानहमव्ययमिति । **श्रीहरिवंशे** च देवान् प्रति रुद्रः—*एतदेव परं वस्तु नैतस्मात्परमस्ति वः । एवमेव विजानीध्वमेतद्वः परमं तप इति, *ओमित्येवं सदा विप्राः! पठध्वं ध्यात केशवमिति, *उपास्योऽयं सदा विप्रा! उपायोऽस्मि हरेस्स्मृताविति च । **श्रीवाराहे** *रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च । सर्वे भवन्तं शरणं गतास्मः कुरुष्व पूज्यानिह विश्वमूर्ते ॥ इति । तत्रैव—*नारायणात्परो देवो न भूतो न भविष्यति । एतद्रहस्यं वेदानां पुराणानां च सत्तमम् ॥ इति । **ब्राह्मे**—*सर्वे विष्णुमया देवाः सर्वे विष्णुमया गणाः । न हि विष्णुसमा काचिद्गतिरन्या विधीयते ॥ इत्येवं सततं वेदा गायन्ते नात्र संशयः इति । **आदित्यपुराणे ब्रह्मा**—*अहं विष्णोस्तु संभूतः स च सर्वमयो हरिः । न तस्य परतो भूतं विद्यते यत्तदुत्तमम् ॥ पुराणेषु द्विजश्रेष्ठाः! दशस्वष्टासु नान्यथेति । तत्रैव कालनेमिवधे रुद्रः—*योऽसौ साक्षाद्वेदमूर्तिर्यत्र वेदाः प्रतिष्ठिताः । तं याम शरणं विष्णुं सर्वे सेन्द्रा दिवौकस इति ॥ १४ ॥

त्वां शीलरूपचरितैः परमप्रकृष्टसत्त्वेन सात्त्विकतया प्रवलैश्च शास्त्रैः ।
प्रख्यातदैवपरमार्थविदां मतैश्च नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम् ॥ १५

एवं चतुर्भिः पञ्चभिर्वा श्लोकैः प्रदर्शितं भगवत्परत्वं यदि प्रामाणिकम्, तर्हि श्रुतशास्त्रास्सर्वेऽपि किं तथा नाध्यवस्यन्ति? कथं च लोके निरीश्वरवादस्त्रिमूर्तिसाम्यैक्यादिपक्षाश्च प्रादुःष्युः? इत्यत्र परेषां भगवत्प्रतिपत्त्यभावे हेतुमाह—**त्वां शीलेति** ॥ एतेन मूढान् प्रति शोचति, तन्मध्ये स्वस्य भगवदनुभवलाभात् प्रीयते च । **त्वां**—महद्भ्योऽपि महीयस्त्वेन पूर्वोक्तम् । **शीलमिह** महत्तरस्यापि मन्दतरैस्सह नीरन्ध्रसंश्लेषः । रामकृष्णाद्यवतारेषु शबरीगोपालादिवृत्तान्तैस्तत्सिद्धिः । तैरेव तत्रतत्र महत्त्वमपि सूच्यते । **रूपम्** *आदित्यवर्णं तमसः परस्तात्, *तस्य ह्येतस्य पुरुषस्य रूपं यथा माहारजनं वास इत्यादिष्वस्त्रभूषणाध्यायादिषु चाप्राकृतत्वेनार्कमहेतुत्वेन विश्वाधारतया शुभाश्रयत्वेन च प्रसिद्धम् । अत्र केषांचिद्भगवत्स्वरूपमेव वा तद्गुणभूतज्ञानबलादि वा परव्यूहादिरूपतया प्रकाशत इति पक्षस्तु तत्रतत्र पृथङ्निर्देशस्य बाधकाभावात् निर्विकारत्वनिरवयवत्वादिश्रुतिविरोधात् *पञ्चोपनिषन्मन्त्रविग्रहम्, *षाड्गुण्यविग्रहं देवमित्यादेरन्वयानर्हपदसमभिव्याहारस्य परस्परविरुद्धस्यान्यथैवोपपत्तेश्च निरस्तः । **चरितानि** क्रान्त्वेत्यादिना पूर्वोक्तान्यनुक्तानि च महार्णवनिमग्नवसुन्धरोद्धरणामृतमथनप्रमुखान्यतिमानुषदैवतानि चेष्टितशतानि । **परमप्रकृष्टसत्त्वेन**—अधिकोत्कृष्टसत्त्वगुणेनेत्यर्थः । ननु ब्रह्मादिष्वेव सत्त्वरजस्तमसां प्रत्येकमुत्तममध्यमाधमभेदेन नवधा गतिर्मनुनोक्ता । भगवतस्तु—*सत्त्वादयो न सन्तीशे यत्र हि प्राकृता गुणा इति सत्त्वगुणोऽपि प्रतिषिद्ध्यते । तत्कथमिह तदुक्तिः? इत्थम्; क्षेत्रज्ञानां हि प्रकृष्टसत्त्वगुणसम्पत्तिः भगवत्कटाक्षाधीनेति प्रागेव प्रतिपादितम् । तदिह स्वप्रवर्त्येन मोक्षोपयुक्तसत्त्वेनेत्यर्थः । अप्राकृतशुद्धसत्त्वसमाश्रयत्वं वा विवक्षितम् । तामसपुराणादीनां तत्त्वबोधकत्वं नास्तीत्यभिप्रायेणाह—**सात्त्विक**

तयेति । पौरुषेयशास्त्राणां स्वमूलभूतपुरुषगुणभेदेन सात्त्विकत्वादिव्यपदेशः । सत्त्वादीनां कार्यभेदश्च भगवतैव गीतः—* सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव चेति । सात्त्विकराजसतामस-बुद्धिभेदश्च—* प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिस्सा पार्थ सात्त्विकी ॥ यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत्प्रजानाति बुद्धिस्सा पार्थ राजसी ॥ अधर्मं धर्ममिति या मन्यते तमसा वृता । सर्वार्थान् विपरीतांश्च बुद्धिस्सा पार्थ तामसीति श्लोकत्रयेणोक्तः । **मनुश्च**—* या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि तास्स्मृता इति । पुराणेषु च सात्त्विकादिविभागो **मात्स्ये** प्रोक्तः—* सङ्कीर्णास्तामसाश्चैव राजसास्सात्त्विकास्तथा । कल्पाश्चतुर्विधाः प्रोक्ता ब्रह्मणो दिवसात्यये ॥ यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा । तस्यतस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ॥ अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते । राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥ सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते । सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ॥ तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिमिति । तस्मिन्नेव प्रदेशान्तरेऽपि—* सङ्कीर्णास्तामसाश्चैव राजसा-स्सात्त्विकास्तथा । कल्पाश्चतुर्विधाः प्रोक्ताः, * रजस्तमोमयास्तद्वत् त्रयस्त्रय उदाहृताः । सङ्कीर्णेषु सरस्वत्याः पितॄणां पुष्टिरुच्यते ॥ अग्नेश्शिवस्य माहात्म्यं तामसेषु दिवाकृतः । राजसेषु च माहात्म्यमधिकं ब्रह्मणः स्मृतम् ॥ सात्त्विके-ष्वधिकं तद्वद्विष्णोर्माहात्म्यमुच्यते । तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिमिति । **कौर्मे** च—* असङ्ख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः । कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः ॥ सात्त्विकेषु च कल्पेषु माहात्म्य-मधिकं हरेः । तामसेषु शिवस्योक्तं राजसेषु प्रजापतेरिति । तदिह सात्त्विकानि पुराणानि सत्त्वैकमूलतया कात्स्न्र्येनावि-प्लुतज्ञानानीति तेषां प्राबल्यम् । वेदविरुद्धैस्तामसतन्त्रैः परत्वापह्नवः परावरतत्त्वविपर्यासादिकल्पनं च **तर्कपादे** निरस्तम् ।

यच्चेदं सात्त्विकपुराणादिविभागप्रकरणं, तत्सात्त्विकमेव मन्तव्यम्; बाधकाभावात् गुणस्वभाववैचित्र्यात् परस्पर-विरुद्धार्थपुराणबलाबलविवेकापेक्षायां तव्यवस्थापकतयैव प्रवृत्तत्वाच्च । एवं तामसेतिहासेऽपि तामसपुराणन्यायस्सञ्चारणीय इति । अत्र प्रबलैश्च शास्त्रैरिति प्राबल्योक्त्या बहुवचनेन चानन्यपरश्रुतिस्मृतीनां भारतरामायणादीतिहासानां च तदनु-गुणानां पाद्मवैष्णवभागवतनारदीयमार्कण्डेयवाराहवामनमात्स्यगारुडब्रह्माण्डनारसिंहादिपुराणानामन्योन्यसामरस्यमपि व्य-ज्यते । * अष्टाभिः कथ्यते विष्णुः दशभिः कथ्यते शिव इति वचनं त्वनार्षं, दृश्यमानविरोधात् हिरण्यगर्भादि-प्रतिपादकपुराणविभागवचनैर्बाधाच्च । आस्तामेतत्सर्वं; * महाजनो येन गतस्स पन्था इत्युक्तमयत्ननिश्चयसाधनम् । तद्भगवत्पारम्यपक्षे सिद्धमित्याह—**प्रख्यातेति** । प्रबलैश्च शास्त्रैरित्यनेनैव गतार्थत्वेऽपि तदन्तर्गतसाभिसन्धिककतिपय-वाक्यविशेषमात्रेणापि परतत्त्वनिर्णयस्सुलभ इत्यभिप्रायेण महर्षिमतानां पृथगुपादानम् । प्रख्याताश्च ते दैवपरमार्थविद-श्चेति कर्मधारयः, प्रख्यातशब्देन वेदवैदिकपरिग्रहप्रकर्षादाप्ततमत्वं सूच्यते । दैवशब्द इह देवतार्थः, * न दैवं केशवात्परमितिवत् । परमार्थशब्दोऽत्र याथार्थ्यपरः, * देवतापारमार्थ्यं चेत्यादिप्रमाणसूचनार्थत्वात् । वक्तॄणां तन्मतानां च भूयस्त्वव्यञ्जनार्थमुभयत्र बहुवचनम् । तत्र तावत् पृथिवीश्रोत्रजन्मा पितामहदत्तवरो भगवान् **वाल्मीकिराह**—* स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः । अर्थितो मानुषे लोके जज्ञे विष्णुस्सनातनः, * अधिकं मेनिरे विष्णुम्, * व्यक्तमेष महायोगी परमात्मा सनातन इत्यादि । * येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामित्यादिपूर्वं परं ब्रह्म त्वमेवेति रामावस्थं भगवन्तं प्रत्युच्यते * अक्षरं ब्रह्म सत्यं चेत्यादि । ब्रह्मलक्षणं

चाभिप्रेत्योक्तं—* त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुरिति । * जगत्सर्वं शरीरं त इत्यनेन घटकश्रुतीनामर्थो दर्शितः । * अहं ते हृदयं रामेति ब्रह्मणो वाक्यं * पुत्रो हि हृदयमिति श्रुतिप्रसिद्ध्या तस्य भगवत्पुत्रत्वं व्यनक्ति । **उत्तरश्रीरामायणे** च भगवतः परमकारणत्वं पितामहोत्पादकत्वं च प्रागेवोदाहृतम् । * कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् । को ह्यन्यो भुवि मैत्रेय! महाभारतकृद्भवेदिति स्वपित्रा पराशरेणापि स्तुतः पञ्चमवेदप्रणेता शारीरकसूत्रकारोऽप्याह—* कालस्य च हि मृत्योश्च जङ्गमस्थावरस्य च । ईशते भगवानेकस्सत्यमेतद्ब्रवीमि ते, * कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः । कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम्, * ज्योतींषि शुक्लानि च यानि लोके त्रयो लोका लोकपालास्त्रयी च । त्रयोऽग्नयश्चाहुतयश्च पञ्च सर्वे देवा देवकीपुत्र एव, * तत्त्वं जिज्ञासमानानां हेतुभिस्सर्वतोमुखैः । तत्त्वमेको महायोगी हरिर्नारायणः परः, * सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते । वेदाच्छास्त्रं परं नास्ति न देवं केशवात्परम्, * आलोड्य सर्वशास्त्राणि विचार्य च पुनःपुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदेति । भगवद्गीतानुगीतादिभि**र्मोक्षधर्मे** च तैस्तैस्संवादैरैदम्पर्येण भगवत एव परत्वं प्रपञ्चितम् । **आश्वलायनेन** सूत्रकृता * नमश्शौनकायेत्याचार्यत्वेनाभिवन्दितः **श्रीशौनको**ऽपि **श्रीविष्णुधर्मे** सर्वत्र भगवत्पारम्यं प्राचिख्यपत् । मोक्षोपायविधाने चैवं त्याज्यमुपादेयं च व्यभजत्—* आब्रह्मस्तम्बपर्यन्तजगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥ यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः । अविद्यान्तर्गतास्सर्वे ते हि संसारगोचराः ॥ पश्चादुद्भूतबोधाश्च ध्यानेनैवोपकारकाः । नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः ॥ तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत् । ध्येयं ध्यानविदां सम्यक् तद्विष्णोः परमं पदमिति । तथा * श्रूयतां तु नरव्याघ्र! वेदवेदान्तनिश्चयः । यज्ञेशो यज्ञपुरुषः पुण्डरीकाक्षसंज्ञितः ॥ स विष्णुः परमं ब्रह्म यतो नावर्तते पुनरिति । भगवदर्चावतारमाहात्म्येऽप्येवमाह—* यादृशे तु मनःस्थैर्यं रूपे बध्नाति चक्रिणः । नृसिंहवामनादीनां तादृशं कारयेद्बुधः ॥ सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम् । कृत्वाऽऽत्मनः प्रीतिकरीं सुवर्णरजतादिभिः ॥ तस्यां ब्रह्म समारोप्य मनसा तन्मयो भवेत् । तामर्चयेत्तां प्रणमेत्तां यजेत्तां विचिन्तयेत् ॥ विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीमिति । अत्र प्रतिष्ठादिवशान्मुख्यावताररूपत्वं विवक्षितम् । उक्तं हि **भगवच्छास्त्रे**—* सर्वातिशायिषाड्गुण्यं संस्थितं मन्त्रविग्रयोः । तेनार्च्यो भगवान् साक्षात् नोपचारधिया क्वचिदिति । **जितन्ते**स्तोत्रे च भगवत एव जगत्कारणत्वमोक्षप्रदत्वादिकं प्रादर्शयत् । * देवतापारमार्थ्यं च यथावद्वेत्स्यते भवानिति । **श्रीवैष्णवपुराणे पुलस्त्यवसिष्ठाभ्यां लैङ्गे** च ब्रह्मणा दत्तवर इति प्रसिद्धः **पराशरश्च**—* विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम् । स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च स इति प्रधानप्रतिपाद्यं संगृह्य तदेव बहुधा स्थापयामास । * यद्वै किं च मनुरवदत्तदित्यादिप्रख्यातमनुबृहस्पतिदक्षादिवाक्यानि च पूर्वमेवोपात्तानि । एतेषु मतेष्वेकैकमेव तत्त्वनिर्णयाय पर्याप्तम्; किंपुनः पूर्वोक्तैरशीलरूपादिभिः परस्परं च समुच्चितमित्यभिप्रायेण मतैश्चैत्युक्तम् । **आसुरी**—तामसी प्रकृतिर्येषां ते आसुरप्रकृतयः, तामसप्रकृतित्वाद्बोद्धुं न शक्नुवन्तीत्यर्थः । आसुरपदोपादानं * **राक्षसीमासुरीं** चेति सहोक्तोपलक्षणम् । दर्शितश्च दैवासुरसर्गविभागो भगवता—* द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव चेत्यादिना । उक्तं च **शौनकेन**—* द्विविधो भूतसर्गोऽयं दैव आसुर एव च । विष्णुभक्तिपरो दैवो विपरीतस्तथाऽऽसुर इति । **आदित्यपुराणे** च—* देवानां च परो धर्मस्सदा यज्ञरताः क्रियाः । स्वाध्यायस्तत्त्ववेदित्वं विष्णुपूजारतिस्तथा ॥ दैत्यानां बहुमानित्वं मात्सर्यं सत्त्वसत्क्रिया । निन्दनं वेदशास्त्राणां हरभक्ति-

रनुत्तमेति । तथा * तस्मिन्नपि हरौ विप्र! स्वबुद्ध्या ये न मोहिताः । कीर्तयिष्यन्ति ते देवा मन्तव्यास्त्वितरेऽसुराः । इति। बोद्धुमित्यत्र सर्वपरिबृढत्वेनेत्युपस्कार्यम्। न प्रभवन्तीत्यनेन तामसप्रकृतिपरवशत्वं व्यज्यते। अवधारणेन कालान्तरेऽप्येतद्दृढीक्रियते । उक्तं हि **मनुना** * यं तु कर्मणि यस्मिन् स न्ययुङ्क्त प्रथमं विभुः । तदेव स पुनर्भेजे सृज्यमानः पुनःपुनःरिति । महाभारते च * न गाथा गायिनं शास्ति बहु चेदपि गायति । प्रकृतिं यान्ति भूतानि कुलिङ्गशकुनिर्यथेति, * जन्मान्तरसहस्रेषु या बुद्धिर्भाविता पुरा । तामेव भजते जन्तुरुपदेशो निरर्थक इति च । न हि शास्त्रे सद्भिर्बहुल उपदिष्टे पठितेऽपि सत्त्वोत्कर्षनिमित्तभगवद्भक्तिरहितानां रावणदुर्योधनप्रभृतीनां तत्त्वाध्यवसायस्सम्पद्यते। यथाऽऽह **सञ्जयः** * विद्या राजन्न ते विद्या मम विद्या न हीयते । विद्याहीनस्तमोध्वस्तो नाभिजानासि केशवम् ॥ मायां न सेवे भद्रं ते न वृथा धर्ममाचरे । शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनमिति । न च जगत्यबोद्धारस्सन्तीत्येतावता प्रमाणसिद्धार्थो न स्यात्, अन्यथा वा स्यादिति भावः ॥ १५ ॥

उल्लङ्घितत्रिविधसीमसमातिशायिसंभावनं तव परिब्रढिमस्वभावम् ।
मायाबलेन भवताऽपि निगुह्यमानं पश्यन्ति केचिदनिशं त्वदनन्यभावाः ॥ १६

अथ सर्वप्रतिपत्तृभावनिबन्धनं चोद्यं तत्सद्भावेन परिहरन् परसमृद्धिप्रयोजनतया सत्त्वस्थानां भगवदनुभवलाभेन सन्तुष्यति—**उल्लङ्घिते**ति ॥ यद्वा * त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययमिति सर्वैरवेद्यतया स्वेनैवोक्तं भगवन्तं कथं केचिज्जानीयुरिति शङ्कायां तत्प्रबोधहेतुरिहोच्यते । पूर्वश्लोके परिजिहीर्षितं भगवत्तत्त्वानवगमहेतुरुक्तः । अत्र तृपादित्सार्थं तज्ज्ञानकारणोक्तिः । सीमा—परिच्छित्तिः । सा चात्र देशतः कालतो विषयतश्च त्रिविधा । समश्चातिशायी च समातिशायिनौ । त्रिविधसीम्नस्समातिशायिनोश्च संभावनोल्लङ्घिता येन तथोक्तः । अन्येषां हि प्रभुत्वं देशादिभिः परिच्छिन्नम् । अत एव समाधिकसंभावनायुक्तम् । **तव**—* सत्यं ज्ञानमनन्तं ब्रह्म, * न समोऽनेन कश्चन, *न तत्समश्चाभ्यधिकश्च दृश्यते, * न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः, *नास्ति नारायणसमः इत्यादिप्रसिद्धस्य । **परिब्रढिमस्वभावं** प्रभुत्वरूपं यावत्स्वरूपभाविनं धर्मम् । * प्रभौ परिबृढ इति निपात्यते । **मायाबलेन** गुणमयप्रकृतिसामर्थ्येन । श्रूयते हि * असान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः, * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति । स्वयं चाह—*दैवी ह्येषा गुणमयी मम माया दुरत्ययेति । **जितं ते**—स्तोत्रेऽप्युक्तम् * अध्यक्षश्चानुमन्ता च गुणमायासमावृत इति । उक्तं च **चतुःश्लोक्यां** * यवनिका माया जगन्मोहिनीति । यद्वाऽत्र मायाबलशब्देन स्वसाधारणाप्राकृतविग्रहे कर्मवश्यमत्स्यकूर्मादिसाजात्यश्रमजनकशक्तिप्रकर्षं उच्यते । यथोक्तम् । अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ईशत्नपि महायोगी सर्वस्य जगतः प्रभुः । कर्माण्यारभते कर्तुं कीनाश इव दुर्बलः ॥ तेन वञ्चयते लोकान् मायायोगेन केशवः ॥ इति । **भगवताऽपि** * आत्मानं मानुषं मन्ये रामं दशरथात्मजम्, * अहं वो बान्धवो जात इति स्ववाक्येनापि मोहयता सर्वज्ञेन सर्वशक्तिनाऽपीति भावः ।

भवताऽपि बलेनेति त्वद्बलमेव स्वबलमुपादाय त्वत्सेवायां प्रवृत्तास्त्वामपि स्ववशीकृत्य त्वत्तोऽपि बलीयांसो भवन्तीति भक्तानां प्रभावातिशयव्यञ्जनार्थोऽपिशब्दः । **निगुह्यमानं** नितरां प्रच्छाद्यमानम् । **पश्यन्ति** शास्त्रतः प्रथमं विशदमवगच्छन्ति, पश्चाद्योगबलेन साक्षात्कुर्वन्ति च; यथाऽऽह **सनत्सुजातः**—* योगिनस्तं प्रपश्यन्ति भगवन्तं सना-

तनमिति । **केचिदिति** दुर्लभत्वसूचनार्थम् । गीयते हि * स महात्मा सुदुर्लभ इति । **श्रीपौष्करे** च * दुर्लभा भगवद्योगभाविनो भुवि मानवाः । तद्दर्शनात्तदालापात् सुलभं शाश्वतं पदमिति । **अनिशं** सर्वजनमोहने कलियुगेऽपीति भावः । उक्तं हि भगवता **शौनकेन** * कलौ कृतयुगं तस्य कलिस्तस्य कृते युगे । यस्य चेतसि गोविन्दो हृदये यस्य नाच्युत इति । **त्वदनन्यभावाः** त्वदेकविषयचित्तवृत्तयः, प्रयोजनान्तरशरण्यान्तरत्यागिन इति भावः । श्रूयते * यत्तदद्रेश्यमग्राह्यमित्यारभ्य * यद्भूतयोनिं परिपश्यन्ति धीराः, * ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः * नायमात्मा प्रवचनेन लभ्य इत्यारभ्य * तस्यैष आत्मा विवृणुते तनूं स्वां * तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति । * एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते । दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः—* स्वाध्यायश्चक्षुरुत एकमस्य योगो द्वितीयमभिवीक्षणाय । अध्ययनमननयनोऽस्य द्रष्टा न मांसचक्षुरभिवीक्षते तमिति । स्मर्यते च—* ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवाः । * भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन ! । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपेति ॥ १६ ॥

यदण्डमण्डान्तरगोचरं च यदशोत्तराण्यावरणानि यानि च ।
गुणाः प्रधानं पुरुषः परं पदं परात्परं ब्रह्म च ते विभूतयः ॥ १७

उक्तप्रकारं परिवृढत्वमनितरसाधारणविभूतिमहिम्ना स्थिरीकरोति **यदण्डमिति** ॥ **यत्** पितामहोत्पत्तिस्थानतया प्रसिद्धं चतुर्दशभुवनावरणहेमकटाहरूपमण्डम् । एकवचनमिह समुदायाभिप्रायम् । * अण्डानां तु सहस्राणां सहस्राण्ययुतानि च । ईदृशानां तथा तत्र कोटिकोट्ययुतानि चेति पुराणोक्तेः । अण्डान्तरमेव गोचरो यस्य तदण्डान्तरगोचरम् उदुम्बरमशकवत् अदृष्टबाह्यप्रदेशम् । अण्डाधिपतिप्रभृति चतुर्विधजन्तुजातं तद्भोग्यभोगोपकरणभोगस्थानादिकं च । **दशोत्तराण्यावरणानि** तोयप्रभृतीनि । उक्तं हि * दशोत्तरेण पयसा मैत्रेयाण्डं च तद्धृतम् । सर्वोऽम्बुपरिधानोऽसौ वह्निना वेष्टितो बहिः ॥ वह्निश्च वायुना वायुर्मैत्रेय नभसा वृतः । भूतादिना नभस्सोऽपि महता परिवेष्टितः ॥ दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै । महान्तं हि समावृत्य प्रधानं समुपस्थितम् ॥ अनन्तस्य न तस्यान्तस्सङ्ख्यानं चापि विद्यते । तदनन्तमसङ्ख्यातप्रमाणं चेति वै यतः ॥ हेतुभूतमशेषस्य प्रकृतिस्सा परा मुने ॥ इति । यच्छब्दानामिह प्रतिनिर्देशो यथार्हमध्याहर्तव्यः । **गुणाः** बन्धकारणत्वेन चतुर्दशाध्याये गीताः सत्त्वादयः प्रकृतिधर्माः । अत्र गुणानां पृथगुक्त्या साम्यावस्थं गुणत्रयमेव प्रकृतिरिति साङ्ख्यमतं निरस्तम् । **प्रधानं** महदादिविकाररहितस्त्रिगुणद्रव्यभागः । अण्डान्तरगोचरमिति क्षेत्रज्ञव्यष्टीनामप्युक्ततया **पुरुष**शब्द इह * दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि । प्रधानेऽवस्थितो व्यापीत्यादिभिः प्रकृतिव्याप्तत्वेन प्रतिपादितं क्षेत्रज्ञसमुदायमाह । **परं पदं** पद्यत इति—पदं प्राप्यं स्थानान्तरेभ्यः परं पुनरावृत्तिरहितमप्राकृतं मुक्तिस्थानमित्यर्थः । श्रूयते हि—* यो अस्याध्यक्षः परमे व्योमन्, * हिरण्मये परे लोके विरजं ब्रह्म निष्कलम्, * पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि, * ते ह नाकं महिमानस्सचन्ते यत्र पूर्वे साध्यास्सन्ति देवाः, * यथा पादोदरस्त्वचा विनिर्मुच्यते एवमेवैव स पाप्मना विनिर्मुक्तस्स सामभिरुन्नीयते ब्रह्मलोकम्, * विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्, * स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते इत्यादि । **महाभारते** च- * रम्याणि कामचारीणि विमानानि सभास्तथा । आक्रीडा विविधा राजन् पद्मिन्यश्चामलोदकाः ॥ एते वै निरयास्तात स्थानस्य परमात्मन इति । अपुनरा-

वृत्तिस्थानत्वं चोक्तं—* ज्ञानविज्ञानिनः केचित् परं पारं तितीर्षवः । अतीव तत्सदः पुण्यं पुण्याभिजनसेवितम् ॥ तत्र गत्वा न शोचन्ति न च्यवन्ति व्यथन्ति च ॥ इति । *ते तु तद्ब्रह्मणः स्थानं प्राप्नुवन्तीह सात्त्विकाः । नैव ते स्वर्गमिच्छन्ति न यजन्ति यशोधनाः ॥ सतां वर्त्मानुवर्तन्ते यथाबलमहिंसया ॥ इति च । भगवन्तं प्रति च देवा ऊचुः *दिव्यं स्थानमजरं चाप्रमेयं दुर्विज्ञेयं चागमैर्गम्यमाद्यम् । गच्छ प्रभो रक्ष चास्मान् प्रपन्नान् कल्पेकल्पे जायमानस्त्वमूर्त्येति । **आरण्यपर्वणि** च धर्मसुतं प्रति आर्ष्टिषेण आह—* यमाहुस्सर्वभूतानां प्रकृतेः प्रकृतिं ध्रुवाम् । अनादिनिधनं देवं प्रभुं नारायणं हरिम् ॥ ब्रह्मणस्सदनात्तस्य परस्थानं प्रकाश्यते । देवा हि यन्न पश्यन्ति दिव्यं तेजोमयं पदम् ॥ अत्यर्कानलदीप्तं तत् स्थानं विष्णोर्महात्मनः । स्वयैव प्रभया राजन् दुष्प्रेक्षं देवदानवैः ॥ यतयस्तत्र गच्छन्ति देवं नारायणं हरिम् । परेण तपसा युक्ता भाविताः कर्मभिश्शुभैः ॥ योगसिद्धा महात्मानः तमोमोहविवर्जिताः ॥ तत्र गत्वा पुनर्नेमं लोकमायान्ति भारत ॥ स्थानमेतन्महाराज ध्रुवमक्षरमव्ययम् । ईश्वरस्य सदा ह्येतत्प्राणमात्रं युधिष्ठिरेति । एतत् कार्थिभगवल्लोकविषयमिति केचित् । अपुनरावृत्तिस्थानत्वाक्षय्यत्वादिव्यपदेशात् परमेव पदमित्यन्ये । युधिष्ठिरादिभ्यस्तत्प्रकाशनं तु * व्यासप्रसादाच्छुतवानितिवदपिप्रभावादुपपद्यते । शेषमप्यविरुद्धं नेयम् । **याज्ञवल्क्यस्मृतौ** चोक्तम् * ओङ्काररथमारुह्य मनः कृत्वा तु सारथिम् । ब्रह्मलोकपदान्वेषी याति विष्णोः परं पदमिति । अत्र स्थानवाचिनां शब्दानां परमात्मस्वरूपपरत्वप्रतिक्षेपायोक्तं **षडर्थमङ्गेषे** *व्यतिरेकाधिकरणनिवासशब्दैरिति । अस्य च स्थानस्याप्राकृतत्वं * क्षयन्तमस्य रजसः पराके, * आदित्यवर्णं तमसः परस्तादिति रजस्तमोमयप्रकृतिसीमातिक्रान्तत्वश्रुत्या भगवच्छास्त्रैश्च सिद्धम् । प्रकृतेरेवाक्षराख्यः परिणतिविशेषः ईश्वरस्य मुक्तानां नित्यानां च भोगस्थानमिति केचिद्वदन्ति । तन्निरासार्थमिह प्रधानपुरुषाभ्यां पश्चात् परमपदस्य पृथगुपादानम् । अयं च पक्षः * कालं स पचेत तत्र न कालस्तत्र वै प्रभुरित्यादिभिश्च निरस्तः ।

यच्चान्ये भगवत्स्वरूपमेव वा तस्य पाङ्गुण्यं वा विचित्रशक्तित्वशाद्दिव्यलोकत्वेनावस्थितमित्याहुः, तदपि श्रुत्यादिषु पृथगुक्तेर्बोधकाभावात् अन्यथा निर्विकारत्वश्रुतिविरोधप्रसङ्गाच्च निरस्तमित्यभिप्रायेण **ते विभूतय** इति प्रधानादिसाधारण्येन व्यतिरेकनिर्देशः । क्वचिद्विरुद्धनिर्देशास्तु यथार्हमुपचारेण नेतव्या इति । **परात्पर**मित्यत्र पञ्चम्यन्तः परशब्दः प्रधानात्परतः क्षेत्रज्ञवर्गात्परभूतं मुक्तमाह । प्रथमान्तस्त्वनादिमुक्तजीवजातम् । यद्वा प्रकृतेः परात् क्षेत्रज्ञात्परमिति बद्धमुक्तनित्यजीवजातस्य सामान्येनोपादानम् । अत्र ब्रह्मशब्देन शुभाश्रयनित्यविग्रह उपचर्यते ; स्वरूपपरत्वोक्तेरनौचित्यात् । इह तु * सालम्बनो महायोगः सबीजो यत्र संस्थिते । मनस्यव्याहते सम्यग्युञ्जतां जायते मुने ॥ स परस्सर्वशक्तीनां ब्रह्मणस्समनन्तरम् । मूर्तं ब्रह्म महाभाग सर्वब्रह्ममयो हरिरिति **वैष्णवपुराणे** प्रोक्तम् । **चतुःश्लोक्यां** च—*मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतमिति । अत्र ब्रह्मशब्दोपचारनिमित्तं लोकोत्तरबृहत्त्वबृंहणत्वे । चकारेण दिव्यभूषणायुधादेरपि संग्रहः । **ते** सर्वान्तरात्मत्वेन विश्वपतित्वेन च श्रुतस्य । **विभूतयः** नियन्तव्याश्शेषभूताश्च । एतेषु द्रव्याणां * न तदस्ति विना यत्स्यान्मया भूतं चराचरमित्युक्तापृथक्सिद्धिमत्तया शरीरत्वेन विभूतित्वम्, अद्रव्याणां तु व्यवहितप्रकारतया । हिरण्यगर्भादीनां तु विशेषतः । सृष्ट्यादित्रयोपयुक्तविभूतित्वं विभज्योक्तं **वैष्णवपुराणे**—* ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः । विभूतयो हरेरेता जगतस्सृष्टिहेतवः ॥ विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज । स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥ रुद्रः कालान्तकाद्याश्च समस्ताश्चैव जन्तवः । चतुर्धा

प्रलयायैता जनार्दनविभूतयः ॥ इति । अत्र विष्णोरेव विष्णुविभूतित्वोक्तिर्विभूतिसजातीयस्वावताराभिप्राया । ते विभूतय इत्यनेन त्वद्विभूतित्वं स्वाभाविकं त्वदितरविभूतित्वं त्वदिच्छायत्तम् ; तथा तद्वाराऽपि त्वद्विभूतित्वं सिद्धमेवेति व्यज्यते ॥ १७ ॥

वशी वदान्यो गुणवानृजुश्शुचिर्मृदुर्दयालुर्मधुरः स्थिरस्समः ।
कृती कृतज्ञस्त्वमसि स्वभावतस्समस्तकल्याणगुणामृतोदधिः ॥ १८

एवं भगवतः परत्वं प्रपञ्चितम् । अनन्तरमाभिगामिकगुणमुखेन सौलभ्यमुच्यते–**वशी**ति ॥ यद्वा विभूत्यानन्त्यमुक्तम् । अथात्र गुणानन्त्योक्तिः । वशः प्रभुत्वमायत्तत्वं वा, तद्वान् वशी; तथा च नैघण्टुकाः * वशो जनस्पृहायत्तेष्वायत्तत्वप्रभुत्वयोरिति । तत्र प्रभुत्वार्थः * सर्वस्य वशी सर्वस्येशानः, * जगद्वशे वर्ततेदं कृष्णस्य सचराचरमित्यादिषु प्रसिद्धः । तथा पूर्वश्लोके प्रोक्तं परिवृढत्वं गुणान्तरविधानार्थमनूद्यते । तस्मिन् सति हि वक्ष्यमाणगुणा भृशं शोभन्ते ? आयत्तत्वार्थे तु संश्रिताधीनतया सौलभ्यातिशयः कथ्यते । यथाऽऽह स्वयमेव * ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहमिति, * इमौ स्म मुनिशार्दूल ! किङ्करौ समुपस्थितौ इति च । पाण्डवदूतत्वपार्थसारथित्वादिवृत्तान्ताः प्रसिद्धाः ।

वदान्यः * प्रियवाग्दानशीलश्च वदान्यः परिकीर्तितः, * अर्थिषु प्रियवादित्वम्, * उदारास्सर्व एवैते, * स सर्वानर्थिनो दृष्ट्वा समेत्य प्रतिनन्द्य चेत्यादिषु दृष्टम् । स्वात्मपर्यन्तसर्वस्वदानशीलत्वं च * य आत्मदा बलदाः, *एको बहूनां यो विदधाति कामान्, * एतद्धयेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तदित्यादिपूक्तम् । **नारदश्च** पुण्डरीकं प्रत्याह–* तस्मात्त्वमपि विप्रेन्द्र ! नारायणपरो भव । तदन्यः को महोदारः प्रार्थितं दातुमीश्वरः इति । उक्तं च **श्रीविष्णुधर्मे**–*सकलफलप्रदो हि विष्णुरिति, *रत्नपर्वतमारुह्य यथा रत्नं नरो मुने ! । सत्त्वानुरूपमादत्ते तथा कृष्णान्मनोरथानिति च । **इतिहासोत्तमे** च *यथा कल्पद्रुमात्सर्वं प्राप्यते मानसेप्सितम् । तथा संप्राप्यते विष्णोरपि स्याद्दुर्लभं द्विजेति । स्वयमप्याह–* अश्वमेधसहस्राणां सहस्रं यस्समाचरेत् । नासौ पदमवाप्नोति मद्भक्तैर्यदवाप्यते ॥ इति ।

गुणवान्–गुणशब्दोऽत्र न गुणसामान्यपरः, गुणविशेषमध्यपठितत्वात्; **समस्तकल्याणगुणामृतोदधिरिति** निगमनेन चरितार्थत्वाच्च । अप्रधानविषयत्वं पारिभाषिकगुणपरत्वं सत्त्वादिगुणविशेषार्थत्वं चात्रासङ्गतमयुक्तं च । अत उचितः कश्चिद्गुणविशेषोऽत्र विवक्षितः । गुण्यत इति गुणः अभ्यसनीयः अनुकूलतमत्वेन शीलनीय इत्यर्थः । ईदृशत्वं च सौशील्यस्य गुणान्तरेभ्यस्समधिकम् । इदं च महतो मन्दैस्सह नीरन्ध्रसंश्लेषस्वभावत्वम् । तदेतद्गुहशबरीगोपालादिवृत्तान्तेषु प्रसिद्धम् ।

ऋजुः–आश्रितेषु मनोवाक्कायवृत्तीनामेकरूपतया कौटिल्यरहितः । एतेन विश्वसनीयत्वं व्यज्यते । यथा चाह–* अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् । न तु प्रतिज्ञां संश्रित्य ब्राह्मणेभ्यो विशेषतः, * द्यौः पतेत्पृथिवी शीर्येत् हिमवान् शकलीभवेत् । शुष्येत्तोयनिधिः कृष्णे ! न मे मोघं वचो भवेत् इति । आश्रितच्छन्दानुगुणावस्थानत्वं वा ऋजुत्वम् ।

शुचिः–अपहतपाप्मत्वादिगुणकः । भावशुद्धिर्वा विवक्षिता । सा चाश्रितरक्षणे प्रत्युपकारादिनिरपेक्षता, द्रव्यतारतम्यानादरेण भक्तिमात्रप्रसाद्यत्वं वा । यथोच्यते–*भक्तैरप्यप्युपानीतं प्रेम्णा भूर्येव मे भवेत् । भूर्यप्यभक्तोपहृतं

न मे तोषाय कल्पते ॥, * पृथिवीं रत्नसंपूर्णां यः कृष्णाय प्रयच्छति । तस्याप्यन्यमनस्कस्य सुलभो न जनार्दनः ॥ * अन्यत्पूर्णादपां कुम्भादन्यत्पादावनेजनात् । अन्यत्कुशलसंप्रश्नान्न चेच्छति जनार्दनः ॥ इति । पावनत्वं वा शुचित्वम् । यथा * पावनस्सर्वभूतानां त्वमेव रघुनन्दनः !, * पवित्राणां हि गोविन्दः पवित्रं परमुच्यते ; * पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्, * शुचिर्भवति संस्मृत्य स्नातो भवति दर्शनात् । प्रणिपातेन पूतात्मा त्रयः कृष्णे महागुणाः, * स्नातो वा यदि वाऽस्नातः शुचिर्वा यदिवाऽशुचिः । यस्स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरश्शुचिरिति ।

मृदुः—सापराधैरपि सहसाऽऽश्रयितुं शक्यः । यथोक्तं—* विदितस्स हि धर्मज्ञः शरणागतवत्सलः । तेन मैत्री भवतु ते यदि जीवितुमिच्छसि, * अराक्षसमिमं लोकं कर्तास्मि निशितैश्शरैः । न चेच्छरणमभ्येषि मामुपादाय मैथिली-मिति । आश्रितविश्लेषासहत्वं वा मृदुत्वम् । तच्च वक्ष्यति—* क्षणेऽपि ते यद्विरहोऽतिदुस्सह इति । शासनप्रवृत्तस्यापि * सामोपहितया वाचेति क्रमेण सामप्रधानत्वं वा ।

दयालुः—स्वप्रयोजनान्तरमनपेक्ष्य परदुःखनिराकरणेच्छावान् । तदप्युच्यते * आनृशंस्यमनुक्रोशः श्रुतं शीलं दमश्शमः । राघवं शोभयन्त्येते षड्गुणाः पुरुषोत्तममित्यादिभिः । न चातिदुःखमयविषमसृष्ट्या नैर्घृण्यादिदोषः—* वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयतीति सूत्रकारैस्तत्प्रतिक्षेपात् । अत एव मोक्षोऽपि कस्यचित्कदाचिदुपपद्यते ।

मधुरः—* रसो वै सः, * आनन्दो ब्रह्म, * कं ब्रह्म खं ब्रह्मेत्यादिप्रसिद्धनिरतिशयानन्दस्वरूपः । अत एवो-पायदशायामपि माधुर्यमुच्यते—* प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः, * कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च, * क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् । क्व जपो वासुदेवेति मुक्तिबीजमनुत्तममिति । वाचिकं कायिकं च वा माधुर्यं, *प्रियवादी च भूतानां सत्यवादी च राघवः, *सोमवत्प्रियदर्शनः, *रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम्, * साक्षान्मन्मथमन्मथः इत्यादिषु प्रसिद्धम् । अत एव जिघांसावस्थायामपि हृद्यत्वं रक्तरुष्टयोर्भीष्मचैद्ययोः प्रसिद्धम् ।

स्थिरः—आश्रितापराधैस्तत्प्रदर्शकैरप्यक्षोभ्यः । यथाऽऽह सुग्रीवादीन् प्रति * मित्रभावेन संप्राप्तं न त्यजेयं कथंचन । दोषो यद्यपि तस्य स्यादिति ।

समः—जातिगुणवृत्तादिवैषम्यवतामपि शरण्यत्वे विशेषरहितः । श्रूयते हि * सर्वस्य शरणं सुहृदिति । स्मर्यते च * सर्वलोकशरण्याय, * सुहृदं सर्वभूतानाम्, * समोऽहं सर्वभूतेष्विति ।

कृती—स्वार्थकर्तव्यविशेषरहितः । तदाह—* न मे पार्थास्ति कर्तव्यमिति । यद्वा आश्रितरक्षणेन कृतकृत्यः । तदप्युक्तम्—* अभिषिञ्चेत्यारभ्य * कृतकृत्यस्तदेति । अथवा कृतमुपकारः, कृतज्ञ इत्यत्र तथा दृष्टेः ; तद्वान् कृती । धर्मप्रवर्तनार्थानुष्ठानवान् वा । द्वेधाऽपि विश्वोपकारकव्यापारवानित्यर्थः । आश्रितेषु विशेषतश्च गीयते * योगक्षेमं वहाम्यहम्, * ददामि बुद्धियोगं तमित्यादि ।

परैरुपकृतं जानातीति कृतज्ञः । उपकारलेशमपि बहुमन्यत इति तात्पर्यम् । तदुच्यते—* न स्मरत्यपकाराणां शतमप्यात्मवत्तया । कथंचिदुपकारेण कृतेनैकेन तुष्यतीति । स्वयं चाह—* गोविन्देति यदाक्रन्दत्कृष्णा मां दूर-वासिनम् । ऋणं प्रवृद्धमिव मे हृदयान्नापसर्पतीति । यद्वा कदाचित्स्वकृतमाश्रितप्रार्थनाभङ्गं प्रस्तावसरे तदपेक्षित-पूरणाय सानुशयो जानातीति **कृतज्ञः** । तदाह—* शिरसा याचतस्तस्य न कृतं वचनं मयेति । अत्र अस्मीति मध्यम-पुरुषेणार्थसिद्धावप्यधिकेन त्वंशब्देन हेमारविन्दपरिमलन्यायात् गुणानां गुण्यधीनोत्कर्षस्सूच्यते । तदुक्तमभियुक्तैः

*गुणायत्तमित्यारभ्य *गुणास्सत्यज्ञानप्रभृतय उत त्वद्वततया शुभीभूयं याता इति हि निरणैष्म श्रुतिवशादिति। असीति वर्तमानव्यपदेशः कालभेदेन स्वभावभेदशङ्कानिरासार्थः। **स्वभावतः** न तु पुण्यशेषविवर्तपरिणामैरित्याशयः। नित्यानां मुक्तानां च गुणास्त्वदधीनाः, तव तु न पराधीना इति भावः। श्रूयते हि *स्वाभाविकी ज्ञानबलक्रिया चेति। त्वय्यविद्यमानः कश्चित्कल्याणगुणो नास्तीत्यभिप्रायेण सामान्यतस्संगृह्योपसंहरति—**समस्तकल्याणगुणामृतोदधिरिति**। *समस्तकल्याणगुणात्मकोऽसौ तेजोवलैश्वर्यमहाबोध इत्यादिकमिहानुसन्धेयम्। अत्र कल्याणगुणशब्देन निर्गुणश्रुतीनामुत्सर्गापवादनीत्या हेयगुणविषयत्वसूचनात् कल्याणगुणकात्स्न्यवचनाच्च निर्गुणवादः परिमितगुणवादश्च निरस्तः। *यथा रत्नानि जलधेरसंख्येयानि पुत्रक!। तथा गुणा ह्यनन्तस्याप्यसंख्येया महात्मनः॥ इत्यादिकं सूचयता गुणामृतोदधिरित्यनेन गुणानामपरिच्छेद्यत्वं कात्स्न्र्येन भोग्यत्वं च व्यज्यते। ब्रह्मस्वरूपवत्तद्गुणानामपि भोग्यत्वं श्रूयते—*सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति। *य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामानिति दहरविद्योक्तन्यायात्कामशब्द इह कल्याणगुणपरः॥ १८॥

उपर्युपर्यब्जभुवोऽपि पूरुषान्प्रकल्प्य ते ये शतमित्यनुक्रमात्।
गिरस्त्वदेकैकगुणावधीप्सया सदा स्थिता नोद्यमतोऽतिशेरते॥ १९

उक्तानामसंख्यातानां गुणानां प्रत्येकमनवधिकातिशयत्वमभिप्रेत्याह—**उपर्युपरी**ति॥ *उपर्यध्यधसस्सामीप्ये, *उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यत इत्यनुशासनात् अत्राब्जभुव इति द्वितीया। पञ्चमी त्वतसर्थप्रत्ययान्तोपरिशब्दयोगादत्रायुक्ता। षष्ठी चाम्राडितोपरिशब्दयुक्ते विशेषतो द्वितीयाविधानादिह न ग्राह्या। **अब्जभुवः पूरुषा**निति प्रकल्पसिकर्मत्वेन सामानाधिकरण्यं वा। अब्जभूशब्देन *पृष्टः प्रोवाच भगवानब्जयोनिः पितामह इत्यादिप्रसिद्धमौत्पत्तिकवैभवं सूच्यते। एतेनानन्दवल्ल्यां प्रजापतिशब्दविवक्षितं व्याख्यातम्। **अपि**शब्दोऽसंभावितकल्पसिद्योतकः। हिरण्यगर्भं सार्वभौममनुष्यस्थाने निवेश्य तत्प्रभृतींश्चतुर्मुखपर्यन्तानविद्यमानानपि पुरुषान् पूर्वपूर्वापेक्षया प्रकर्षेण कल्पयित्वेत्यर्थः। **ते ये शतमित्यनुक्रमात्** प्रत्यक्षश्रुतिपठितानुक्रमेणाविद्यमानासंख्यातपाठपर्यायाभ्यूहं कृत्वेति भावः। **गिर** इत्यनेन यथावदर्थाभिधानसामर्थ्यं सूच्यते। *ते ये शतमित्यादिसमभिव्याहाराद्वेदगिर इति विशेषसिध्यति। यद्यप्यानन्दवल्ल्यां *सैषाऽऽनन्दस्य मीमांसेत्यारभ्यानन्दाख्य एक एव गुणः परिच्छेत्तुमशक्य इत्युक्तम्; तथाऽपि *युवा स्यादित्यादिना गुणविभूतिप्रकर्षनिबन्धनस्यानन्दप्रकर्षस्योपक्रान्ततया परस्मिन्नपि ब्रह्मणि अनन्तगुणविभूतिनिबन्धनस्य तस्य विवक्षितत्वात्, तन्नान्तरीयकतया सर्वगुणानां निरवधिकत्वं सिध्यतीत्यभिप्रायेणाह—**त्वदेकैकगुणावधीप्सये**ति। अत्र गुणगुणिभेदव्यपदेशात् भगवत्स्वरूपेण भगवद्गुणानामभेदं वदन्तः प्रत्युक्ताः। सामानाधिकरण्यं तु धर्मधर्मिभावादेवोपपद्यते। अन्यथा तन्मतेऽपि स्वयं निराचिकीर्षितनिर्गुणवादपरिशेषस्स्यात्। अपिशब्दस्सदा स्थिता इत्यत्र वाऽन्वेति। सर्वदोद्युक्ता अपीत्यर्थः। यद्वा **सदा स्थिता गिर** इति नित्यतया वक्तृदोषोज्झितत्वं व्यज्यते। तदा **प्रकल्प्यापि नोद्यमतोऽतिशेरत** इत्यन्वयः। पुनःपुनरुपक्रमावश्यैव परिशिष्यत इति भावः। अत्र *तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यादित्यसंभावितकल्पनयैवोपक्रमः। अतस्समानन्यायतया तादृशकल्पनाप्रवाहेऽपि श्रुतेस्तात्पर्यमुन्नीतम्। पूर्वं नारायणशब्देन संबोधित एवानन्दवल्लीस्थब्रह्मशब्दार्थतयाऽत्र त्वच्छब्देन निर्दिश्यते। *स यश्चायं पुरुषे यश्चासावादित्ये स एकः इति पुरुषवर्तिनस्सर्वान्तर्यामिणस्सवितृमण्डलमध्यवर्तिपुण्डरीकाक्षपुरुषेणैक्योपदेशश्चात्र विज्ञानमयादप्यर्थान्तरमानन्दमयं विश्वात्मानं नारायणमेव व्यनक्ति॥ १९॥

त्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसारविमोचनादयः ।
भवन्ति लीला विधयश्च वैदिकास्त्वदीयगम्भीरमनोनुसारिणः ॥ २०

नन्वेवंविधनिरतिशयानन्दस्य भगवतो न तावत्स्वार्थे जगद्व्यापारः, अपूर्णत्वप्रसङ्गात् । नापि परार्थः ; संसारस्य दुःखमयत्वादित्यत्र केनचिदाकारेणोभयार्थत्वं विश्वोपकारव्यापारानन्त्यं च वदन् पूर्वोक्तगुणप्रकर्षमेव स्थिरीकरोति—**त्वदाश्रितानामिति ॥** त्वामाश्रितानां कृते तदभीष्टसिद्ध्यर्थं तद्बोध्यत्वार्थं चेति भावः । एतेन पूर्वोक्तापरिमितगुणविभूतिवैभवस्य भोक्तृणामभावात् अरण्यचन्द्रिकात्वप्रसङ्गोऽपि निरस्तः । जगत्स्रष्टेः भगवद्वक्तार्थत्वं च * सर्वेऽस्मै देवा बलिमावहन्ति, * सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश इत्यादिश्रुतिभिरभिव्यज्यते । जगदुद्भवस्थितिप्रणाशशब्दाः णिजर्थमन्तर्भाव्य प्रयोजकव्यापारपराः । विश्वोपादानभूतस्य सर्वान्तर्यामिणो जगच्छरीरकत्वाकारेणोत्पत्त्यादिकमेव वा विवक्षितम् । अत एव गात्रविक्षेपरूपनृत्तवल्लीलात्वमपि घटते । तेन स्वार्थत्वमपि सिद्धम् । आदिशब्देनानुग्रवेशनियमनादिकमवतरणादिकं च गृह्यते । भवन्तीत्यनेन तादृशलीलाया उपपन्नत्वं प्रतिकल्पानुवृत्तत्वं च व्यञ्जितम् । अत्र तवेत्यध्याहर्तव्यम् । त्वदिति पदच्छेदेन त्वत्तो निमित्तोपादानभूताद्भवन्तीति वा योज्यम् । **वैदिकाः विधयः** वेदसंबन्धिनो विधिभागाः ।

त्वदीयगम्भीरमनोनुसारिणः—तवैव स्वेतरदुरवगाहाक्षोभ्यसङ्कल्पानुविधायिन इत्यर्थः । यथाऽऽह—* श्रुतिस्स्मृतिर्ममैवाज्ञेति । एते च त्वदाश्रिनार्थाः । एवं वा योजना ; त्वदाश्रितानां चतुर्मुखमुख्याश्चेति पूर्वोक्तानां ब्रह्मरुद्रादीनामित्यर्थः । जगच्छब्द इह यथार्हमण्डान्तर्वर्तितत्तत्कार्यविशेषविषयः । एषां संसारविमोचकत्वं * शङ्करस्य तु यो भक्तः सप्तजन्मान्तरं नरः । तस्यैव तु प्रसादेन विष्णुभक्तः प्रजायते ॥ त्रिभिः प्रजापतेर्भक्तः सप्तभिश्शङ्करस्य तु । विंशत्याऽग्नीन्द्रसूर्यादेः विष्णुभक्तः प्रजायते । इत्यादिन्यायादनुग्रहोपदेशधर्मप्रवर्तनादिद्वारा स्यात् । लीलात्वोक्तिरिह तेषां भगवदनुग्रहेण सृष्ट्यादेः प्रियत्वसुकरत्वसूचनार्था । त्वदाश्रितानामप्येवं, तव तु किं पुनरिति चाभिप्रेतम् । वैदिकविधीनां भगवदाश्रितमनोनुसारित्वं च * अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणास्सम्मर्शिनः युक्ता आयुक्ताः अलूक्षा धर्मकामास्स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः अथाभ्याख्यातेषु ये तत्र ब्राह्मणास्सम्मर्शिनः युक्ता आयुक्ताः अलूक्षा धर्मकामास्स्युः यथा ते तेषु वर्तेरन् तथा तेषु वर्तेथाः एष आदेशः एष उपदेशः इत्यादिश्रुतिसिद्धम् । स्मर्यते च * श्रुतिस्स्मृतिस्सदाचारः, * वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदामिति विधिशब्द इह वैदिकानुष्ठानपरो वा । पूर्वयोजनायां च भगवता धर्मसंस्थापनार्थं क्रियमाणानि वैदिकधर्मानुष्ठानानि ग्राह्याणि ।

नन्विह भगवता परमसाम्यमापन्नानां मुक्तानां जगद्व्यापारादेरुक्तिः किं न गृह्यते ? उक्तं हि परमसंहितायां * केन रूपेण भिद्यन्ते मुक्तास्तव शरीरिणः । एतदाचक्ष्व मे देव ! गुह्याद्गुह्यतरं परमिति ब्रह्मणा पृष्टे प्रत्युक्तम्—* अहमेव भवन्त्येते न भेदस्तत्र कश्चन । यथाऽहं विहराम्येवं तथा मुक्ताश्च देहिनः इतीति । अतो मुक्तस्य भगवदैक्यात् जगद्व्यापारादि स्यादिति । मैवम् ; तत्रापि * तव शरीरिण इत्यनूदितसर्वशरीरित्वानुगुणमैक्यव्यपदेशस्य श्रुतिस्मृतिसिद्धपरमसाम्यविवक्षया नेतव्यत्वात् । * रामसुग्रीवयोरैक्यमित्यादिन्यायाच्च । अन्यथा * यथाऽहं विहरामीत्यादिना दृष्टान्तदार्ष्टान्तिकभावेन भेदव्यपदेशो न घटते । तदिह मुक्तानां विहारसाम्यवचनं * जक्षत् क्रीडन् रममाणः * सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्तीत्युपनिषदुक्तपरिच्छिन्नव्यापारविषयम् । तदेव हि तत्रान्तिमे पटले दर्शितं—*सायुज्यं

प्रतिपन्ना ये तीव्रभक्तास्तपस्विनः । किङ्करा मम ते नित्यं भवन्ति निरुपद्रवाः इति । एवं मुक्तानां जगद्व्यापारे शक्तिरस्ति तत्प्राप्तिर्नास्तीति पक्षोऽपि न विचारार्हः । न हि मुक्तानां सर्वशरीरित्वम्, अश्रुतत्वादनुपपत्तेश्च ; तदभावे कथं *बहु स्यामिति सङ्कल्पशक्तिः ; तथाविधशक्तिशालिनः तदप्राप्तिश्चात्र दुर्वचा । तथैव नित्यानामपि । उक्तं हि **भाष्ये**ऽनन्तपदव्याख्याने *'सातिशयस्वरूपा नित्या व्यावृत्ताः इति । अतो यथोक्त एवार्थः ॥ २० ॥

नमो नमो वाङ्मनसातिभूमये नमो नमो वाङ्मनसैकभूमये ।
नमो नमोऽनन्तमहाविभूतये नमो नमोऽनन्तदयैकसिन्धवे ॥　　२१

एवं प्रतिपादितप्रकारेण निरुपाधिकस्वामिनि निरपेक्षस्वतन्त्रे निरवधिकसौलभ्ये भगवति स्वात्मनस्स्वरूपनिबन्धनं गुणकृतं च दासत्वमनुभवंस्तदुचितां वृत्तिमप्याचरति—**नमोनम** इति ॥ नमस्कारप्रकरणे च नमश्शब्द एवं निरुच्यते—*याः काश्चन कृतयो मम भगवति । न मम ममताऽस्ति तासु । भगवत एव ताः । अममोऽहं भगवति । अहमपि न मम । भगवत एवाहमस्मीत्येवममतां योजयत्यतो नमः—इति । इममेवार्थमभिप्रेत्योक्तं **महाभारते** *व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्मणः पदम् । ममेति व्यक्षरो मृत्युः न ममेति च शाश्वतमिति । नमस्कारप्रभावश्च **श्रीविष्णुधर्मादिषु** प्रसिद्धः । यथा—*प्रणम्य कृष्णं सहसा पांसुक्षिप्ते महीतले । निष्कल्मषो भवेत्सद्यो ललाटे पांसुमण्डनात् ॥ दुर्गसंसारकान्तारमपारमभिधावताम् । एकः कृष्णनमस्कारो मुक्तितीरस्य देशिकः ॥ *एकोऽपि कृष्णे सुकृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामो न पुनर्भवाय ॥ *अतसीगुच्छसङ्काशं पीतवाससमच्युतम् । ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥ *नमस्कारः कृतो यज्ञः सर्वयज्ञोत्तमो मतः । नमस्कृत्य महायज्ञमश्वमेधफलं लभेत् ॥ *प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत् । स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥ *नम इत्येव यो ब्रूयान्मद्भक्तश्श्रद्धयाऽन्वितः । तस्याक्षयो भवेल्लोकः श्वपाकस्यापि नारद !, *हरिममरगणार्चिताङ्घ्रिपद्मं प्रणमति यः परमार्थतो मनुष्यः । तमपगतसमस्तपापबन्धं व्रज परिहृत्य यथाऽग्निमाज्यसिक्तम्, *एका बहूनि दुरितानि सुदुस्तराणि भक्त्या प्रयुक्त इव चक्रधरे प्रणाम इत्यादिभिः । अत्र नमश्शब्दस्य वीप्सा पुनःपुनरावृत्तिश्च *नित्याञ्जलिपुटा हृष्टा नम इत्येव वादिनः इतिवत् परत्वसौलभ्यानुबन्धिविभूतिगुणानन्त्यानुभवजनितभक्तिप्रकर्षं व्यनक्ति । श्रुत्यादिषु चैवं वीप्सादिकं दृश्यते । आहुश्च *प्रशंसायां प्रतिज्ञायां प्रलापे तर्जनेऽपि च । भये च विजये चैव पौनःपुन्यमलंकृतिः इति । **वाङ्मनसातिभूमय** इत्यादिषु चतुर्ष्वपि पूर्वापरसंबुद्ध्यादिसामर्थ्यात्तुभ्यमिति लभ्यते । **अतिभूमये** अतिक्रान्तभूमय इत्यर्थः । *यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, *यद्वाचाऽनभ्युदितमित्यादिष्वभिप्रेतं परमयोगिनामपि वाङ्मनसाभ्यामपरिच्छेद्यत्वमिह विवक्षितम् । कुदृष्टिसंमतात्यन्तागोचरत्वविवक्षायां श्रुत्यन्तरस्ववचनादिविरोधमभिप्रेत्याह—**वाङ्मनसैकभूमय** इति । श्रूयते हि *सर्वे वेदा यत्पदमामनन्ति, *सर्वे वेदा यत्रैकं भवन्तीति । स्मर्यते च *वेदैश्च सर्वैरहमेव वेद्य इति *नतास्म सर्ववचसां प्रतिष्ठा यत्र शाश्वतीति च । यद्वा स्वप्रसादभाजां गोपगोपिकादीनामपि वाङ्मनसयोरेकविषयभूतायेत्यर्थः । विषयान्तरवैमुख्यव्यञ्जनार्थमेकपदम् । उक्तं वाङ्मनसातिभूमित्वं स्थापयति—**अनन्तमहाविभूतय** इति । अनन्ता अनवधिका अत एव ब्रह्मादिविभूतिभ्योऽपि महती विभूतिर्यस्य स तथोक्तः । *नेति नेति इत्यादिनिषेधस्तु *प्रकृतैतावत्त्वं हि प्रतिषेधतीति सूत्रितम् । विभूतिप्रकर्षवचनं पूर्वोक्तगुणप्रकर्षस्योपलक्षणम् । अनन्तदयैकसिन्धव इत्यनेन वा सर्वगुणप्रकर्षोपलक्षणम् । दयानन्त्यमाश्रितानां वाङ्मनसैकभूमित्वे हेतुः ।

अक्षोभ्यत्वादिविवक्षया सिन्धुशब्दः । स्वभावतस्तावत् दयाया एवासावाश्रयः । एतस्य दैत्यादिनिग्रहीतृत्वमप्याश्रितेषु दयातिशयात् तद्रक्षणविश्रान्तमिति भावः । तदेवमत्र चतुर्थ्यन्तैः प्रागुक्तपरत्वसौलभ्यनिगमनं प्राप्यत्वशरण्यत्वसंग्रहश्च । अत्र नमश्शब्देन वक्ष्यमाणानन्यप्रयोजनप्रपत्त्यधिकारिणः [प्राप्य]प्राप्तुः परशेषतैकरसस्य तदधीनस्वरूपादिशोधनमपि सिध्यति ॥

अधिकारे प्रपित्सूनामुपायोत्तरकृत्ययोः । फले च पारतन्त्र्यादि बोध्यमत्र नमोष्टके ॥

किंच सर्वत्र निवृत्तिधर्मसाधारणापेक्षितं तत्त्वज्ञानं निर्ममत्वं च चतुर्थ्यन्तैर्नमोभिश्च स्थिरीक्रियते । अनुकूलाभिसन्धिः प्रतिकूलनिवृत्तिश्चात्र दृश्यत इति तन्मुखेन तदङ्गिका शरणागतिरप्युपक्षिप्ता भवति । अथवा भरन्यासरूपा प्रपत्तिरेवात्र नम इति संग्रहेण प्रस्तूयते । आवृत्तिरिह * सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते इत्यादिवदुक्तस्थिरीकरणार्था । नमश्शब्दस्य शरणागतिविषयत्वं **दमयन्तीवृत्तान्ते** व्यक्तं—*शरणं प्रति देवानां प्राप्तकालममन्यतेत्युक्तेऽर्थे * वाचा च मनसा चैव नमस्कारं प्रयुज्य सेत्यभिधानात् । तथा * सर्वेषामेव लोकानां पिता माता च माधवः । गच्छध्वमेनं शरणं शरण्यं पुरुषर्षभाः ! इति **मार्कण्डेयोक्त**शरणागतिविषयश्च नमश्शब्दः प्रयुज्यते—* एवमुक्त्वाञ्जयः पार्थो यमौ च भरतर्षभाः । द्रौपद्या सहितास्सर्वे नमश्चक्रुर्जनार्दनमिति । एतत्प्राशस्त्यं च बह्वृचा आमनन्ति * यस्समिधो य आहुतयो वेदेन ददाश मर्त्यो अग्नये या नमसा स स्वध्वर इति । उपबृंहितं चैतद्**हिरण्येन** * समित्साधनकादीनां यज्ञानां न्यासमात्मनः । नमसा याऽकरोद्देवे स स्वध्वर इरीरित इति । यद्वा स्वाधीनस्वार्थकर्तृत्वभोक्तृत्वभ्रमरहिततया प्रार्थयिष्यमाणपरमफलेपक्षेपार्थोऽयं नमश्शब्दः । अत्र भवत्वित्यध्याहार्यम् । उपायप्रयोगात्पूर्वमेव हि फलार्थित्वम् ! एतदुपजीवनेनानन्तरश्लोके फलं न कण्ठोक्तम् । अत्र त्वावृत्तिर्मैत्रभक्त्या त्वरातिशयं नित्यानुवृत्तिं च व्यनक्ति ॥ २१ ॥

न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविन्दे ।
अकिञ्चनोऽनन्यगतिश्शरण्य त्वत्पादमूलं शरणं प्रपद्ये ॥ २२

एवं प्राप्यस्य शरण्यस्य प्राप्तुश्च शरणार्थिनः स्वरूपादिषु भगवता प्रकाशितेषु तद्विश्लेषमसहमानस्तस्मिन्नेव स्वरूपानुरूपपुरुषार्थविरोधिनिवृत्त्यर्थं स्वाधिकारोचितां प्रपत्तिं विशदं प्रयुङ्क्ते—**न धर्मेति** ॥ धर्मे निष्ठा स्थितिर्यस्य स धर्मनिष्ठः ; धर्मरूपा निष्ठा यस्येति वा धर्मे निष्ठतीति वा । अहं **धर्मनिष्ठो नास्मि** यथावस्थितकर्मयोगतत्परिकरानर्ह इत्यर्थः । अत एव **न चात्मवेदी** न परिशुद्धात्मवेदनशीलः । ज्ञानयोगरूपं तदपेक्षितं वा पुष्कलं ज्ञानं मे नास्तीत्यर्थः । तदुभयाभावादेव **न भक्तिमान्** * भक्त्या त्वनन्यया शक्य इत्यादिपूक्ता भक्तिर्मे न विद्यते । अत्र * शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः । तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदमिति ब्राह्मवचनमनुसन्धेयम् । **त्वच्चरणारविन्द** इत्यनेन पवित्रत्वभोग्यत्वे व्यज्येते । अत्रायं क्रमः—शास्त्रार्थतत्त्वज्ञानतः कर्मयोगः, तेन जितस्वान्तस्य परिशुद्धात्मभावनारूपो ज्ञानयोगः । तद्द्वारा वा साक्षात्कर्मयोगेनैव वा आत्मावलोकनम् ; तेन लब्धाधिकारस्य भक्तियोगः ; ततस्तत्प्राप्तिरिति ।

अस्मिन् जन्मनि कर्मयोगाभावेऽपि पूर्वजन्मकृतेन ज्ञानयोगस्स्यात् । इदानीं तदुभयाभावेऽपि * जन्मान्तरसहस्रेष्वित्यादिप्रतिपादितक्रमेण भक्तियोगस्स्यादित्युत्तरोत्तरनिषेध इत्यपि गमनिका । एवमनन्यसाधनोऽहमित्यभिप्रायेणाह—**अकिञ्चन** इति । यद्वा कर्मयोगादिहेतुभूतगुणक्रियादिसंपादनदौष्कर्याभिप्रायेणाकिञ्चनत्वोक्तिः । ईदृशस्य

ते किं मया? शरण्यान्तरं प्रयोजनान्तरं वा परिगृह्यतामित्यत आह–**अनन्यगतिरिति** । शरण्यान्तरप्राप्यान्तररहित इत्यर्थः । उभयत्र हेतुमभिप्रेत्याह–**शरण्य त्वत्पादमूलमिति** । शरण्येति संबुद्ध्या * मामेकं शरणं व्रज, * मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यास्यसि ह्यकुतोभयमिति स्ववाक्यानि सूच्यन्ते । तथा * सर्वलोकशरण्याय, * शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः इत्याद्यपि । तथा **लैङ्गेऽपि** * य एकः पुरुषश्रेष्ठः परमात्मा सनातनः । यस्माद्ब्रह्मा ततस्सर्वं तमाश्रित्यैव मुच्यत इति । **पुराणसारसमुच्चये** च * नान्यं देवमुपासीत विष्णोः परमकारणात् । मायामुत्तर्तुकामो वै मायी यो देवतागणः ॥ न चान्यज्ज्ञानकर्मभ्यां नान्यभक्त्या परं पदम् । प्राप्नोति पुरुषस्तस्मात् तमेव शरणं व्रजेदिति । **सङ्कर्षणसंहितायां** च * सर्वधर्मान् परित्यज्य तमेव शरणं व्रजेत् । भगवन्तं वासुदेवं परानन्दविभूतिदमिति । **जयाख्यसंहितायां** च * तमेव सर्वभावेन प्रयाहि त्वं महामुने!, * अन्यत्सर्वं परित्यज्य तमेवं शरणं व्रजेदिति । **विष्वक्सेनसंहितायां** च * सर्वधर्मान् सर्वकामानैहिकामुष्मिकानपि । सन्त्यज्य विधिना नित्यं षड्विधां शरणागतिम् । आचार्यानुज्ञया कुर्याच्छास्त्रदृष्टेन वर्त्मनेति । *कालेष्वपि च सर्वेष्वित्यादि प्रसिद्धम् । ततोऽन्यत्र सर्वत्र भयातिशयं व्यञ्जयितुं **त्वत्पादमूलमित्युक्तम्** । परमप्राप्यस्य तवैव पादमूलं प्रविष्टानामेवापुनरावृत्तिः । अतस्तद्धारणं मे फलमित्यपि सूच्यते । अनन्यगतिरित्येतत्सामर्थ्याच्च तत्सिद्धिः । *मुमुक्षुर्वै शरणमहं प्रपद्य इतिश्रुत्युक्तमाह–**शरणं प्रपद्य** इति । एतावता स्वनिष्ठावचनेन मन्त्रे पूर्वखण्डदृश्शब्दतोऽर्थतश्च दर्शितः । प्रपत्तिप्रकरणे शरणशब्द उपायपर इत्यहिर्बुध्न्यसंहितायामुक्तम्–* उपाये गृहरक्षित्रोश्शब्दश्शरणमित्ययम् । वर्तते सांप्रतन्त्वेष उपायार्थैकवाचक इति ।

प्रपत्तिप्रयोगश्चैवं प्रदर्शितः–* अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिः । त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः । शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यतामिति । तन्माहात्म्यं चैवं प्रकाशितम्–* अनेनैवं प्रपन्नस्य भगवन्तं सनातनम् । तस्यानुबन्धाः पाप्मानः सर्वे नश्यन्ति तत्क्षणात् ॥ कृतान्यनेन सर्वाणि तपांसि तपतां वर! । सर्वतीर्थास्सर्वयज्ञास्सर्वदानानि तत्क्षणात् ॥ कृतान्यनेन मोक्षश्च तस्य हस्ते न संशय इति । सकलफलसाधनत्वं चोक्तं–* यद्येन कामकामेन न साध्यं साधनान्तरैः । मुमुक्षुणा यत्साङ्ख्येन योगेन न च भक्तितः ॥ प्राप्यते परमं धाम यतो नावर्तते यतिः । तेनतेनाप्यते तत्तन्न्यासेनैव महामुने! ॥ परमात्मा च तेनैव साध्यते पुरुषोत्तम इति । अत्र * अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् । तदेकोपायता याच्ञा प्रपत्तिश्शरणागतिरिति भरतमुनिप्रणीतं लक्षणमपि सुसङ्गतम् । इह चानन्यसाध्य इति प्रपत्तव्यव्यतिरिक्तेन स्वेनान्येन चासाध्यत्वं प्रपत्तव्यस्य साध्यत्वं च विवक्षितम् । स्वाभीष्ट इति सुखस्य दुःखनिवृत्तेः तत्साधनानां च संग्रहः । तत्र प्रमाणविरुद्धं न फलम् । शरण्यविरुद्धं चानुकूल्यसङ्कल्पादिना न सङ्गच्छते । स्वाधिकारविरुद्धं तु निपुणस्य स्वाभीष्ट इत्यनेन निरस्तम् । उपायलाघवादिभिरकम्पनीयो विश्वासो महाविश्वासः । तदेकोपायताशब्देन पश्चात् स्वयत्नैरपेक्ष्यं च व्यज्यते, प्रपत्तिश्शरणागतिरिति पर्यायपाठः । * आनुकूल्यस्य सङ्कल्प इत्यादौ तु षाड्विध्योक्तिरङ्गाङ्गिसमुच्चयाभिप्राया । * षडङ्गं तमुपायं चेत्यत्र षडङ्गत्वोक्तिरष्टाङ्गयोगन्यपदेशवत् । अन्यथा * निक्षेपापरपर्यायो न्यासः पञ्चाङ्गसंयुतः । प्रपत्तिं तां प्रयुञ्जीत स्वाङ्गैः पञ्चभिरावृतामित्यादिभिर्विरोधप्रसङ्गात् । * शाश्वती मम संसिद्धिरियं प्रह्वीभवामि यत् । पुरुषं परमुद्दिश्य न मे सिद्धिरितोऽन्यथा ॥ इत्यङ्गमुदितं श्रेष्ठं फलेप्सा तद्विरोधिनीत्यहिर्बुध्न्योक्तमङ्गान्तरं तु निश्रेयसार्थप्रपत्तिनियतम् । अङ्गिनश्चात्र भरन्यासरूपत्वम् * आत्मात्मीयभरन्यासो ह्यात्मनिक्षेप उच्यत इति निर्धारितम् । तदिह पूर्वश्लोकस्थनमः-प्रयोगेणानुकूल्यसङ्कल्पप्रातिकूल्यवर्जने दर्शिते । न धर्मनिष्ठ इत्यादिभिरकिञ्चनाधिकारत्वं कार्पण्यरूपमङ्गं च । रक्षि-

ष्यतीति विश्वासस्तु शरण्येति संबुद्ध्या व्यज्यते । रक्षणसमर्थः कारुणिकश्च शरण्यः । स च प्रपन्नं मां रक्षिष्यतीति विस्रम्भणीयः । सोपसर्गधातुविशेषश्चात्राध्यवसायवैशिष्ट्यं व्यनक्ति । त्वत्पादमूलं शरणं प्रपद्य इत्यनेनैव गोप्तृत्ववरणात्मनिक्षेपौ सिद्धौ । प्रार्थनान्वितो हि भरन्यासः प्रपत्तिः, [र]भिक्षादिमात्रप्रार्थनायामाज्ञादिपूर्वकभरन्यासे च प्रपत्तिशब्दप्रयोगदर्शनात् । न चात्र गुरुलघुविकल्पानुपपत्त्या प्रपत्तेर्भक्त्यङ्गत्वं शङ्कनीयम् । स्नानादिविकल्पवदधिका[रि]भेदेन व्यवस्थापनात् ॥

प्रणवादिनयादत्र प्रपत्तेस्तत्त्ववेदिभिः । यथाधिकारमङ्गत्वं स्वतन्त्रत्वं च दर्शितम् ॥

अत्र प्रपद्य इति वर्तमानव्यपदेशश्च * बर्हिर्देवसदनं दामीत्यादिवदनुष्ठानकालाभिप्रायः ॥ २२ ॥

न निन्दितं कर्म तदस्ति लोके सहस्रशो यन्न मया व्यधायि ।
सोऽहं विपाकावसरे मुकुन्द! क्रन्दामि सम्प्रत्यगतिस्तवाग्रे ॥ २३

अथ सप्त श्लोकाः प्रस्तुतोपायप्रयोगस्थिरीकरणार्थाः । तेषु क्रमात्परस्य सर्वविरोधिनिवर्तनोचितगुणविशेष[वत्त्वं]त्वं रक्ष्यरक्षकयोरितरेतरलाभः स्वपरित्यागे परस्यानिष्टप्रसङ्गः स्वस्यानन्यगतित्वेन तत्प्रहाणानर्हत्वं शरण्यस्य भोग्यतमत्वेन प्रयोजनान्तरवैमुख्यम् उपायस्य सौकर्यं स्वादुतमत्वं च तात्पर्यतः स्थाप्यते । तत्रादिमे यद्यप्येवमुपायपरम्परा नास्ति, तथाऽप्यपाया न सन्ति चेत् तदवलम्बनेन क्रमात्कर्मयोगादीनुत्याद्य मोक्षफलं लभस्व । किं तदर्थं प्रपत्त्येत्यत्र स्वस्याकिञ्चनत्वमेव स्थिरीकरोति—**न निन्दितमित्यर्धेन** ॥ **निन्दितं** गर्हितम् । * यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः, यद्गर्हन्ते सोऽधर्म इत्यापस्तम्बः । अत्र निन्दितशब्देन काम्यकर्मापि संगृह्यते; मुमुक्षवपेक्षया तस्यापि निन्दितत्वात् । **लोके**—सर्वस्मिन् संसारिजने । अथवा लोक्यते अनेनेति लोकः प्रमाणं तस्मिन्, नास्ति अप्रामाणिकमित्यर्थः । अत्र शास्त्ररूपप्रमाणविशेषविवक्षा । **सहस्रश** इत्यसङ्ख्यातावृत्तिपरम् । * शतं सहस्रमयुतं सर्वमानन्त्यवाचकमिति पठन्ति । यत् शरणागतपरित्यागाद्यपि; तदपि वेदनिन्दितम् । यथाऽऽह **मनुः**—* शरणात्तं परित्यज्य वेदं विप्लाव्य च द्विजः । संवत्सरं यवाहारस्तत्पापमवसीदतीति । * बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः । शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेदिति । **रघुश्च** राक्षसं प्रत्याह—* शक्तोऽपि रक्षणे लोभात् भयाद्वा शरणागतम् । यस्त्यजेत्पुरुषो लोके ब्रह्महत्यां स विन्दति ॥ प्रायश्चित्तेन शुद्ध्यन्ति महापातकिनो हि ये । शरणागतहन्तॄणां शुद्धिः क्वापि न विद्यते ॥ पूयन्ते हयमेधेन महापातकिनोऽपि हि । शरणागतहन्तारो न त्वेव रजनीचर! इति । * अपि चेत्सुदुराचारः केनापि नरकात्पुमान् । मुच्यते न तु पापात्मा शरणागतहिंसक इत्यादि । **ब्रह्मणा** च गीतम् । **बृहस्पतिरुवाच**—* न चास्य बीजं रोहति रोहकाले न चास्य वर्षं वर्षति वर्षकाले । भीतं प्रपन्नं प्रददाति शत्रवे न सोऽन्तरं लभते त्राणमिच्छन्, * मोघमन्नं विन्दते अप्रचेताः स्वर्गाल्लोकान्नश्यति भ्रष्टचेष्टः । भीतं प्रपन्नं प्रददाति शत्रवे सेन्द्रा देवाः प्रहरन्त्यस्य वज्रमिति । एवं * शास्त्रेषु निष्कृतिर्दृष्टा महापातकिनामपि । शरणागतहन्तुस्तु न दृष्टा निष्कृतिः क्वचित् ॥ लोभाद्वेषाद्भयाद्वाऽपि यस्त्यजेच्छरणागतम् । ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिण इत्यादि द्रष्टव्यम् । आह च **रघुपतिरभयप्रदानप्रकरणे**—*ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा । शृणु गाथां पुरा गीतां धर्मिष्ठां सत्यवादिना ॥ बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् । न हन्याच्चानृशंस्यार्थमपि शत्रुं परन्तप ॥ आर्तो वा यदि वा दृप्तः परेषां शरणागतः । अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥ स चेद्भयाद्वा लोभाद्वा कामाद्वाऽपि न रक्षति । स्वया शक्त्या

यथासत्यं तत्पापं लोकगर्हितम् ॥ विनष्टः पश्यतस्तस्य रक्षिणश्शरणागतः । आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः ॥ **अस्वर्ग्यं** चायशस्यं च बलवीर्यविनाशनमिति । एवंविधशरणागतपरित्यागाद्यपि यन्मया न कृतं तन्नास्ति । **मया**—रागादिदूषितचित्तेन भोगमरुकान्तारपान्थेनेति भावः ।

एवमनन्तप्रतिबन्धकाक्रान्तस्वावस्थामनुवदन् भगवतोऽशरण्यशरणत्वं च स्वाध्यवसितमुत्तरार्धेन व्यनक्ति—**सो-ऽहमिति** । अद्यापि तादृशस्वभावः प्रायश्चित्तावसरे त्वच्चोदितेषु तत्तत्प्रायश्चित्तेष्वप्रवृत्तस्तदिच्छाधिकारशकनानुशयानभिज्ञ-श्चेति भावः । **संप्रति विपाकावसर** इत्यन्वयः । प्रायश्चित्तकालातिक्रान्तौ दुर्निवारोद्गमानां फलानां भोगादन्येन क्षपयितुमशक्यावस्थायामित्यर्थः । **मुकुन्द !**—प्रपन्नानामनादिप्रवृत्तमपराधजातमनादृत्य मुक्तिभूमिप्रद । यथोक्तं **श्री सात्त्वते**—*दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा । समाश्रयेदादिदेवं श्रद्धया शरणं यदि ॥ निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मन इति । **श्रीपुण्डरीकोपाख्याने** च * अश्वमेधशतैरिष्ट्वा वाजपेयशतेन च । न प्राप्नुवन्ति सुगतिं नारायणपराङ्मुखाः ॥ ये नृशंसा दुरात्मानः पापाचाररतास्तथा । तेऽपि यान्ति परं धाम नरा नारायणाश्रया इति । **क्रन्दामि**—आक्रोशामि । अनेन * गोविन्देति यदाक्रन्दन् कृष्णा मां दूरवासिनम् । ऋणं प्रवृद्धमिव ते हृदया-न्नापसर्पतीति शरण्यवाक्यं सूच्यते । **अगतिः**—पुण्यविपाकादपि भृशं भीततया पूर्वोक्तानन्यगतिः । * तस्मादपि वध्यं प्रपन्नं न प्रतिपद्यच्छन्तीति सर्वेषां शरण्यानां सामान्यतः प्राप्तम्, किं पुनः * विभीषणो वा सुग्रीव ! यदि वा रावणः स्वयमित्यादिवादिनो भवत इत्यभिप्रायेणाऽह—**तवेति । अग्रे** विश्वसाक्षात्कारिणस्तव सार्वत्रिकसन्निधावित्यर्थः । सविग्रहस्य वा शरण्यस्याभिमुख्यमिहाभिप्रेतम् ॥ न ह्यसमर्थानामकारुणिकानां च सन्निधौ विपन्नैराक्रोष्टव्यमिति भावः । यद्वा संसार-तन्त्रवाहितया पुण्यपापफलप्रदातुस्त्वत्त एव भीतस्त्वदग्रे **क्रन्दामि** । रागानुवृत्तिहेतुभूतपुण्यफलाद्भीतिरधिकमाक्रोश-कारणम् । अथवा भक्तियोगमनुष्ठाय तत्फलमलब्धवानिव युक्तदण्डस्य तवाग्रे आक्रोशनेनाप्यपराध्यामीति भावः ।

एवं पूर्वश्लोके सपरिकरोपायान्तराभाव उक्तः । अत्र तु तन्निदानमपायबाहुल्यमनुसंहितम् । शारण्येत्युक्तं मुकुन्देत्यनेन स्थापितम् । तदिह दुर्विषहसंसारनिवर्तनोपायनैराश्यजनितशोकाविष्टश्शरण्यगुणाध्यवसायवानपवर्गार्थिप्रप-त्त्यधिकारीति दर्शितं भवति । तथा चोक्तम्—* अहं भीतोऽस्मि देवेश ! संसारेऽस्मिन् भयावहे । त्राहि मां पुण्डरीकाक्ष ! न जाने शरणं परम्, * वृथैव भवतो याता भूयसी जन्मसन्ततिः । तस्यामन्यतमं जन्म संचिन्त्य शरणं व्रज ॥ अथ पातकभीतस्त्वं सर्वभावेन भारत ! । विमुक्तान्यसमारम्भो नारायणपरो भव ॥ सर्वयोग्यमनायासमप्रमादम[नौ]नूपमम् । प्रणतार्तिहरं विष्णुं शरणं गन्तुमर्हसीत्यादि ॥ २३ ॥

निमज्जतोऽनन्त भवार्णवान्तश्चिराय मे कूलमिवासि लब्धः ।
त्वयाऽपि लब्धं भगवन्निदानीमनुत्तमं पात्रमिदं दयायाः ॥ २४

नन्वनादौ संसारे संप्रति केन विशेषेणाक्रन्दत इत्यत्रानन्यगतिश्शरण्येत्युभाभ्यां सूचितं रक्ष्यरक्षकयोरितरेतर-लाभप्रतिबोधस्याद्यतनत्वमाह—**निमज्जत** इति ॥ अनादिप्रवृत्तनिमज्जनमिदानीमप्यनुपरतमित्यभिप्रायेण वर्तमाननिर्देशः । **अनन्त !**—स्वरूपरूपगुणविभूतिभिरपरिच्छेद्य । सर्वत्र सर्वदा सन्निहिते हि त्वयि, *एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीत-मिव ह्रदम् । शाम्यामि परिनिर्वामि सुखमासे च सर्वदेत्युक्तं निमज्जनं सर्वेषामनन्यशरणानां प्राप्तम् । अहं तु भवार्णवे निमज्जामि । यद्वा अनन्तत्वं भवार्णवविशेषणम् । निवर्तकस्य तव माहात्म्यमिव निवर्तनीयस्संसारोऽपि मे निरवधिरिति

भावः । भवस्यार्णवत्वरूपणेन * संसारार्णवमग्नानां विषयाक्रान्तचेतसाम् । विष्णुपोतं विना नान्यत्किञ्चिदस्ति परायणम्, * संसारसागरं घोरमित्यादिप्रमाणानि सूच्यन्ते । सनकादिवन्न तीरासन्नप्रदेशस्थोऽहमित्यभिप्रायेणान्तश्शब्दः । इतःपूर्वमनादौ काले न लब्ध इति निर्वेदाभिप्रायेणाद्यतनलाभसन्तोषाभिप्रायेण वा चिरायेत्युक्तम् । **मे**—कर्मणः प्रवाहैरितः पूर्वमुत्तारोपायानभिज्ञस्य मम । * मामेकं शरणं व्रजेतिवादिनं त्वामुपेक्षिनवतः इदानीमपि मज्जनहेतूनार्जयतः **त्वय्येव** त्वदाश्रयणाय सङ्कल्पितस्येति भावः । अत्र **मे लब्ध** इति संबन्धसामान्ये षष्ठी । मे कूलमिवेति वाऽन्वयः । अर्णवान्तर्मज्जतः कूलमिवेत्याश्चर्यपरम् । अनन्तत्वात्तत्राप्यसौ सन्निहित इति शरण्यसौलभ्यव्यञ्जनं च । **लब्धोऽसि**—उपायतया लब्धव्यशेषं नास्ति, न च लब्धस्य प्रच्युतिरिति भावः । न केवलं ममैव लाभः; किंतु त्वयाऽपि लब्धं सर्वममत्वसंरक्षणाय सदाचार्यवीक्षणादिव्याजविशेषापेक्षिणा तत्संपत्तिसन्तुष्टेनेति तात्पर्यम् । अत्र भगवन्निति संबुद्ध्या तस्यैकस्यैव सर्वहितवेदित्वं तन्निष्पादनशक्त्यादिकं च व्यज्यते । ज्ञानबलादिपूर्णस्य तव पुनरयं महोदयलाभः । ततश्च त्वमेव वेत्सि त्वयाऽपि दुरपह्नवमिति च । इदानीं- **नाथमुनि**प्रभृतिसद्गुरुसमीक्षणदशायामित्यर्थः । अयं चार्पयनुयोज्यानादिसामग्रीप्रवाहानुगुण्येन त्वय्येव सङ्कल्पितः काल इत्याकूतम् । एकवचनान्तानुत्तमादिशब्दैर्दयापात्रस्य निस्समाभ्यधिकत्वं सूच्यते । समसद्भावेऽप्यधिकनिषेधमात्रं वा विवक्षितम् । **पात्रं** विषयः । वाङ्मनसापरिच्छेद्यानन्तापराधिनमात्मानमिदमिति साभिनयं निर्दिशति । एतत्परित्यागे कस्मिन् विषये तव दयादिगुणजातं चरितार्थं स्यात्, न ह्यतोऽधिकः कृपाविषयोऽस्ति । * अपि कश्चिन्मुमुक्षुस्त्यादिति हि त्वत्कृपा जगज्जनयति । अतस्त्वत्प्राप्तेरन्यन्न मे कर्तव्यमस्ति । आक्रन्दनमप्येतत् अरतिमात्रकृतम् । तव तु स्वीकृतभरस्य * मोक्षयिष्यामीति स्वेनैवोक्तं कर्तव्यमवशिष्यत इति भावः ॥ २४ ॥

अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखम् ।
किं तु त्वदग्रे शरणागतानां पराभवो नाथ ! न तेऽनुरूपः ॥ २५

अथ स्यात्परतन्त्रस्य शेषभूतस्य स्वतन्त्रस्वाम्यभीष्टविनियोगस्सोढव्यः । अन्यथाऽपि दुर्निवारश्च । किंच * हरिर्दुःखानि भक्तेभ्यो हितबुद्ध्या करोति हि । शस्त्रक्षाराग्निकर्माणि स्वपुत्राय यथा पिता ॥ *परीक्षां च जगन्नाथः करोत्यदृढचेतसाम्, * यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहम् । बान्धवैश्च वियोगेन सदा भवति दुःखितः । तेन दुःखेन सन्तप्तो यदि मां न परित्यजेत् ॥ तं प्रसादं करिष्यामि यस्मुरैरपि दुर्लभ इत्यपि स्मर्यते । अतस्स्वकर्मविपाकः क्षन्तव्यः, किं क्रन्दितेनेत्यत आह—**अभूतपूर्वमिति** ॥ इतः पूर्वं सञ्जातेभ्यो विलक्षणमित्यर्थः । **मम** * अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वेत्युक्तस्वभावस्य गर्भजन्मजरामरणनरकादिदुःखचक्रमध्यवर्तिनः । **भावि**—भविष्यत् । **किं**शब्दः क्षेपार्थः । **वा**कारः स्वानभ्युपगतसोढव्यत्वपक्षान्वारोहार्थः । तेनासह्यत्वाभिप्रायमन्तर्धायाह—**सर्वं सह** इति । कर्मपरतन्त्रतया यथापूर्वमनुभूतजातीयं सर्वं दुःखमनुभविष्यामि । **मे सहजं हि दुःखम्** अनर्थपर्यन्तापुरुषार्थसक्तस्य मम कर्मप्रवाहैरात्मस्वरूपानुबन्धिवदपरिहार्यमित्यर्थः । तथाऽप्यन्यदसह्यमापतिष्यतीत्यभिप्रायेणाह—**किंत्विति** ।

त्वदग्रे अपारकारुण्यस्य सर्वत्र सन्निहितस्य सर्वस्वामिनस्सर्वशक्तेस्तव सन्निधौ । **शरणागतानां**मिति बहुवचनमन्येष्वपि प्रपन्नेष्वयमेव न्याय इति द्योतनार्थम् । मत्परिभवस्त्वदेकान्तिनां सर्वेषां चित्तक्षोभहेतुरिति वाऽभिप्रेतम् । **पराभवः** कर्मभिः कामक्रोधादिभिरिन्द्रियैर्विषयैश्च घोरैः त्वद्विमुखीकरणम् । **नाथेति** संबुद्ध्या भगवतो भरस्वीकार-

योग्यत्वं स्वस्य सनाथत्वेन निर्भरत्वं च व्यनक्ति । उक्तं हि युधिष्ठिरकार्यार्थं बलभद्रं प्रति **सात्यकिना**—* ये नाथवन्तो हि भवन्ति लोके ते नात्मकर्माणि समारभन्ते । कार्येषु तेषां प्रभवन्ति नाथाश्शैब्यादयो राम ! यथा ययातेरिति । भगवच्छास्त्रे च * प्रपन्नश्चातको यद्वत्प्रपत्तव्यः कपोतवत् । रक्ष्यरक्षकयोरेतल्लक्ष्यं लक्षणमेतयोरिति । स्वतन्त्रस्याकर्मवश्यस्य मे शरणागतपरित्यागेऽपि को दोष इत्यत्राह—**न तेऽनुरूप** इति । ते * स्थिते मनसि, * सकृदेव, * सर्वधर्मानित्यादिवादिनः । **नानुरूपः** न च तदुक्तम् । * रामो द्विर्नाभिभाषते, * अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचनेत्यादिस्ववचनविरोधप्रसङ्गात् । ततश्च *तस्य नाम महद्यश इति श्रुतिसिद्धवैपरीत्यं स्यात् । अतो मया सहजदुःखभाजनेन सर्वमपि दुःखं सोढुं शक्यम् । त्वया तु नित्यनिरवद्येन दोषप्रसङ्गो न सोढव्य इत्यनिष्टलाभस्ते मत्तोऽप्यतिरिच्यते । मम च स्वाम्यवद्यप्रसङ्गोऽनिष्टतमः । तस्मान्मद्रक्षणेन द्वयोरनिष्टपरिहारस्त्वयैव कार्य इति भावः । तदिदं व्याजमात्रेण स्वार्थं रक्षिष्यतीति विश्वासदार्ढ्यव्यञ्जनपरम् । शेषभूतस्य स्वलाभकथनं स्वार्थप्रार्थनं चायुक्तमिति शङ्का च प्रधानभूतपरलाभोक्त्या परावद्यप्रसङ्गपरिहारप्राधान्येन च निरस्ता ॥ २५ ॥

निरासकस्यापि न तावदुत्सहे महेश ! हातुं तव पादपङ्कजम् ।
रुषा निरस्तोऽपि शिशुः स्तनन्धयो न जातु मातुश्चरणौ जिहासति ॥ २६

अस्त्वेवं प्रतिबुद्धस्य तव मदवलम्बनम्, तथाऽपि मदनुगृहीतेन त्वया सर्वेषां पापानां क्रमात्प्रतिपदोक्तानि प्रायश्चित्तानि क्रियन्ताम् । पुण्यक्षयार्थं भोगाश्च भुज्यन्ताम् । मत्स्वभावश्चैवं प्रसिद्धः * शरीरारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान् । ददाति ध्यायतां नित्यमपवर्गप्रदो हरिरिति । अतः * भुक्त्वा च भोगान्विपुलानित्यादिक्रमेण मुक्तिं प्राप्स्यसीति भगवतोऽभिप्रायमाशङ्क्य पूर्वोक्तमनन्योपायत्वमनन्यप्रयोजनत्वं चानन्तरश्लोकद्वयेन प्रपञ्चयिष्यन् स्वस्य भगवत्पदप्राप्तौ विलम्बाक्षमत्वं विज्ञापयति—**निरासकस्ये**ति ॥ पूर्वं दुःखस्य स्वतः प्रतिकूलतया दुस्सहत्वेन हेयत्वमुक्तम् । अनयोस्तु परमपुरुषार्थप्रतिकूलतया सुखस्यापि हेयत्वमुच्यत इति विशेषः । **निरासकस्य** निरङ्कुशस्वातन्त्र्यात्स्ववद्यं सोढाऽपि क्षुद्रैरुपच्छन्दनैर्मां प्रतार्य मदभिमतमप्रदायान्यत्र प्रेरयितुमिच्छत इति भावः । **अपि**शब्देन दयापरवशस्त्वं दीनस्य मम निरासे कथं क्षम इति व्यज्यते । **तावच्छ**ब्दोऽवधारणार्थः । **नोत्सहे**—न शक्नोमीत्यर्थः । **महेश !** संभावितस्वपदभ्रंशानामपूर्णानां त्वदन्येषां हि स्वाश्रितेष्वसूयोपेक्षादिस्स्यात् यथेन्द्रादीनां ययातिप्रभृतिषु । भवतस्तु निरुपाधिकस्वामित्वस्वातन्त्र्यवतः निरवधिकदयाम्बुधेर्मामीदृशीमवस्थां प्रापयतो मन्निरसने हेतुर्नास्ति । मम च त्वामेकमेव सर्वेश्वरमधिगच्छतो न हि त्वत्परित्यागे कारणमस्तीति भावः । **मातु**रिति वक्ष्यमाणपदस्थाने महेशशब्दः । तेन *माता पिता भ्रातेत्यादिश्रुतिप्रसिद्धस्वभावसूचनम् ।

हातुमित्यत्र उपायतया फलतयेति योज्यम् । तदुभयं **तव पादपङ्कज**मित्युभाभ्यां सूच्यते । सर्वभूतसुहृदस्संसारनिवृत्त्युपायभूतस्य भवतो देवदानवसामान्यदैवतं निरवधिकभोग्यं पादपद्ममिति भावः । उक्तमर्थं सर्वलोकसंमतार्थान्तरनिदर्शनेन स्थापयति—**रुषे**ति । अपिशब्द इह स्वतो निरासानर्हत्वं स्तनदंशनादिजनितक्रोधलेशवशात्कदाचित्तत्संभवं च द्योतयति । **शिशुः स्तनन्धय** इति पदाभ्यां स्वरक्षणे स्वयमसमर्थस्य बालस्य तदेकरक्ष्यत्वं तदेकाधीनजीवनत्वं च सूच्यते । **जातु** क्रोधदशायां प्रसाददशायां चेति भावः । **मातु**रित्यनेन सर्वदोषप्रसहनानुगुणवात्सल्यं व्यज्यते । **चरणौ**क्त्यित्र निरासाय विनियुक्तावपीति काका ग्राह्यम् । हातुमिच्छाऽपि न संभवति किमुत हानमित्यभिप्रायेण सन्प्रयोगः ॥

तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति ।
स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते ॥ २७

ननु नासौ निरासः यत्प्रजापतिप्रभृतिभोगेभ्योऽतिशयितभोगप्रदानम् ; मामुद्धा केवलभोगपरता ; इदानीं मद्-त्तभोगान् भुङ्क्ष्व ; पश्चान्मोक्षमपि दास्यामीति भगवतोऽभिप्रायमुत्प्रेक्ष्य विलम्बाक्षमः प्राप्यतया हातुमशक्यत्वं विवृ-णोति—**तवामृतेति ॥ तव** * रसो वै सः, * सर्वगन्धस्सर्वरस इत्यादिषु सर्वप्रकारनिरतिशयभोग्यतया प्रसिद्धस्य सर्व-स्वामिनः । **अमृतस्यान्दिनि** मोक्षप्रदे भोग्यतमतया च श्रुतिस्मृतिप्रसिद्धे । **निवेशितात्मा** रक्षणोन्मुखेन * ददामि बुद्धियोगं तमित्यादिवादिना त्वयैव दृढावस्थापितबुद्धिरित्यर्थः । तस्मादितः परं पुरुषार्थान्तरे मनो निवेशयितुं न शक्यमिति भावः । अत्र सामान्यनिर्देशस्त्वत्प्रसादविषयभूतानां मादृशानां सर्वेषां साधारणोऽयं स्वभाव इति ज्ञापनार्थः । त्वत्पादपद्मे मनो निवेशयन् त्वमेवात्र परिचोदनीय इत्यभिप्रायेण **कथं**शब्दः । **अन्यत्** अल्पमस्थिरमनर्थमिच्छतोऽतीच्छानिवृत्तिवच-नात्तदर्थप्रवृत्तिरप्यत्र निरस्ता भवति । उक्तमर्थं निदर्शनेन द्रढयति—**स्थितेऽरविन्द** इति । भोक्तृणामक्लेशेन भोग्यतमतयोप-स्थितवतीत्यभिप्रेतम् । अरविन्दशब्द इह सुरभित्वसुखस्पर्शत्वादिव्यञ्जकः । प्रथमविकसितावस्थामभिप्रेत्याह—**मकरन्दनि-र्भर** इति । मधुव्रतशब्देन तदेकजीवनत्वं तत्रापि सारतमग्राहित्वं च व्यज्यते । स्वाभिमतविपरीतैरुपच्छन्दनोपदेशत-र्जनादिभिर्दुर्निवारत्वं सूचयितुं तिर्यग्दृष्टान्त उक्तः । **इक्षुरकं** कण्टकावृतमस्थिरात्यल्परसं भ्रमरस्पर्शमात्रेऽपि म्लानता-मश्नुवानं देवार्चनाद्यनर्हं निर्गन्धं किमपि क्षुद्रपुष्पम् । तत्र **वीक्षते** अत्यासन्नमपि मकरन्दलिप्सया नाद्रियते । तदुपस-दनं तु दूरतो निरस्तमिति भावः ॥ २७ ॥

त्वदङ्घ्रिमुद्दिश्य कदाऽपि केनचिद्यथा तथा वाऽपि सकृत्कृतोऽञ्जलिः ।
तदैव मुष्णात्यशुभान्यशेषतश्शुभानि पुष्णाति न जातु हीयते ॥ २८

अथ गुरुतरोपायसाध्यं पुरुषार्थं लघुतरेणोपायेन कथं लप्स्यस इत्यत्र ततोऽपि लघुतरस्य निवृत्तिधर्मकोटिनिवि-ष्टस्याञ्जल्यादेः प्रभावं त्वदङ्घ्रिमित्यादिश्लोकद्वयेन निदर्शयन्नाश्रयणसौकर्यादपि हातुमशक्यत्वमेव स्थापयति । तत्र प्रथमेन लघुतरकायिकव्यापारविशेषप्रभाव उच्यते—**त्वदङ्घ्रिमिति ॥** त्वदङ्घ्रिं सर्वलोकशरण्यस्य तव पादपङ्कजम् । न तु साक्षान्मोक्षप्रदानानधिकृतस्य हिरण्यगर्भादेरिति भावः । तदुक्तं **मोक्षधर्मे**—* ब्रह्माणं शितिकण्ठं च याश्चान्या देवतास्स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलमिति । अत्र भगवत्स्वरूपस्य शुभत्वेऽप्यनिष्पन्नसमाधीनां प्रथमं भावयितुमशक्यतया तद्विग्रहस्यैव शुभाश्रयत्वम् । तत्रापि * अनतिक्रमणीयं हि चरणग्रहणमिति न्यायात्, * स भ्रातु-श्चरणौ गाढमित्यादि दर्शनाच्चाङ्घ्रिरुद्देश्यत्वमुच्यते । **उद्दिश्य**—उपायतया कैङ्कर्यलक्ष्यतया चाभिसन्धायेत्यर्थः । एवमन-न्यदेवताकत्वमनन्यप्रयोजनत्वं चोक्तं भवति । ईदृशस्याधिकारिणोऽञ्जलिबन्धरूपे सुकरे प्रसादने दर्शपूर्णमासादिवत्तिथि-नक्षत्रपक्षमासर्त्वयनहायनादिकालनियमो नास्तीत्याह—**कदाऽपीति** । विधेयहस्तस्य शास्त्रीयव्यापारान्तररहितदशायां सर्वदेत्यर्थः । एतेन कालविशेषप्रतीक्षणविलम्बाभावाद्यदेच्छति तदैव सहसा कर्तुं शक्यतयाऽपि सौकर्यं सूचितम् । उक्तः कालनियमाभावः * जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्याद्युक्तकृष्णकेशत्वाद्यवस्थानियमाभावस्य देशनियमाभावस्य चोपलक्षणम् । एवं वर्णाश्रमवेदवेदाङ्गयुक्तत्वादिनियमाभावेन सामान्यधर्मतया सत्यवचनादिवत्सर्वाधिकारत्वमाह—**केन-चिदिति** । आस्त्रीबालपण्डितमात्रब्रह्मध्वपाकं च सुकरत्वं शास्त्रीयत्वं चात्र विवक्षितम् । कर्मान्तरवद्दुष्करपरिकारविशेषव्यव-

स्थाऽप्यत्र नास्तीत्याह—**यथा तथा वाऽपीति**। अत्र विकल्पसमुच्चयविषयाव्ययद्वयस्यैवमभिप्रायः—परावरतत्त्वहितपुरुषार्थेषु विशदा बुद्धिर्भवतु वा मा वा, मस्तिष्कसम्पुटादिषु यथेष्टप्रकारश्च भवतु, विधेयहस्तरहितस्य वाचा मनसा वा स्यात्, अस्तु वाऽञ्जलिरचनायां किंचिदचातुर्यम्; सर्वथा सफल एवायमिति। न पुनः *एकेन पाणिना यस्तु प्रणमेत्पुरुषोत्तमम्। न्याय्यस्तस्य करच्छेद इति वेदविदो विदुः॥ एकहस्तप्रणामश्च एकं चापि प्रदक्षिणमिति शक्तं प्रत्युक्त एकहस्तप्रणामनिषेध इह प्रतिषिध्यते। *तौ युतावञ्जलिः पुमानिति च **नैघण्टुकाः**। गत्यभावे तु सर्वत्र यथाशक्तिकरणमनुज्ञातम्; *सकृत्कृतश्शास्त्रार्थ इति सामान्यप्राप्तस्यात्र निरपवादत्वात्। *वसन्ते वसन्ते ज्योतिषा यजेतेत्यादिवदावृत्त्यपेक्षाऽपि नेत्याह—**सकृत्कृत** इति। यद्यपि प्रीत्यादिप्रकर्षादस्यावृत्तिर्भवति, तथाऽप्यत्र सकृत्कृतस्य फलाविनाभावेन प्रभावातिशयप्रतिपादने तात्पर्यम्। *सकृत्स्मृतोऽपि गोविन्दो नृणां जन्मशतैश्चितम्। पापराशिं दहत्याशु तूलराशिमिवानलः, *सकृदुच्चारितं येन हरिरित्यक्षरद्वयम्। बद्धः परिकरस्तेन मोक्षाय गमनं प्रति, *ऋचो यजूंषि सामानि योऽधीते सकृदञ्जसा। सकृदष्टाक्षरं जप्त्वा फलं तस्य समश्नुते॥ विष्णोरायतनं नित्यं सायं प्रातर्दिनेदिने। प्रदक्षिणद्वयं कुर्यादश्वमेधफलं लभेत्॥ उत्सवे बलिदाने च तथा कुर्वन् प्रदक्षिणम्। पदे पदेऽश्वमेधस्य फलं दशगुणं भवेत्॥ यानि यानि च पापानि जन्मान्तरकृतानि च। तानि तानि प्रणश्यन्ति प्रदक्षिणपदे पदे॥ इत्यादिपूक्तस्य सकृत्स्मरणसङ्कीर्तनादिप्रभावस्य प्रदर्शनमिदम्। *सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधिः। रक्षते भगवान्विष्णुर्भक्तानात्मशरीरवदिति सर्वाधिकत्वेन कथितेभ्यस्सम्मार्जनोपलेपनमालाकरणदीपारोपणादिप्रसा[धि]दनान्तरेभ्यस्समधिकं बहुवित्तव्ययायासनिरपेक्षं विवक्षितस्य सुकरं स्वरूपमाह—**अञ्जलिरिति**। *अञ्जलिः परमा मुद्रेति ह्युच्यते। **श्रीमद्रामायणे** च *कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम्। अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनादिति। नारायणास्त्रवृत्तान्तोऽप्यत्रानुसन्धेयः। *क्षिप्रं देवप्रसादिनीत्युक्तमाह—**तदिति**। अवधारणेन शरीरान्तरकालान्तरभाविफलसाधनेभ्यः कर्मभ्यो व्यावृत्तिः। यद्यप्यनादिवासनावशात्सांसारिकपुण्यरूपनिगलभङ्गः पुरुषस्यानिष्टस्यात्। तथाऽप्यर्भकाप्थ्यपरिहारन्यायेन तान्यपि चोरयतीत्यभिप्रायेण मुष्णातीत्युक्तम्। **अशुभानि** शुभप्रतिभटानि। यथार्हमपवर्गतदुपायविरोधीनीत्यर्थः। **अशेषतः** कात्स्न्येन। एतेन कृच्छ्रचान्द्रायणादिवत्प्रतिनियताशुभमात्रनिवर्तकत्वं व्युदस्यते। न केवलमनिष्टनिवर्तकत्वमात्रम्, *तस्मिन् प्रसन्ने किमिहास्त्यलभ्यमिति न्यायेनात्रत्यानुभवप्रभृतिपरिपूर्णकैङ्कर्यपर्यन्तसर्वापेक्षितसाधकत्वं चार्थात्याह—**शुभानि पुष्णातीति**। कर्तव्यैकस्मिन्नुपकृतमपर्याप्तं मन्यमानस्य भगवतः प्रसादात्तदनुबन्धिनामपि तद्वदुपकाराय भवतीत्यभिप्रायेणाह—**न जातु हीयत इति**। *यज्ञोऽनृतेन क्षरतीत्यादिवदस्य न केनापि हानिरिति भावः।

यद्वा स्वर्गादिवदेव तत्साध्यस्य परमफलस्य न कदाचिदपि विनाश इत्यभिप्रायः। अथवा फलभूताञ्जलिरूपेण स्वयं सन्तन्यत इति विवक्षितम्। दृश्यते हि *नित्याञ्जलिपुटा हृष्टा इत्युक्त्वा, *ये तु मुक्ता भवन्तीह नरा भरतसत्तम। तेषां लक्षणमेतद्धि यच्छ्रुतद्वीपवासिनामिति। ननु च यथाधिकारं न्यासोपासनरूपौ द्वौ मोक्षोपायौ शास्त्रेषु निर्णीतौ; तत्कथमञ्जलिमात्रस्य तत्साधनत्वोक्तिः? इत्थम्; यद्यसावाकिञ्चन्यादिलाभात्प्रपत्त्यधिकारिणः पुरुषस्य स्वरक्षणार्थस्वव्यापारान्तरनिवृत्तिव्यञ्जकमुद्रात्मनाऽवतिष्ठते, तदा तदुपलक्षितायाः प्रपत्तेः प्रागुक्तसकलफलसाधनत्वस्वरूपप्रभावप्रतिपादने तात्पर्यान्न विरोधः। यदा तु प्रदक्षिणप्रणामादिवदयमपि भक्त्यङ्गकर्मविशेषः, तदा *नेहाभिक्रमनाशोऽस्ति इत्यादिन्यायात्कल्मषनिबर्हणसत्त्वोन्मेषसम्यग्ज्ञानभक्त्यादिपरम्परया मोक्षसाधनत्वमिति निष्कण्टकोऽयं घण्टापथः।

अतिवादपक्षस्त्वत्र संभवन्त्यां गतौ न युज्यते । अधिकारिविशेषमाश्रित्याञ्जलिरूपलघुतरक्रियामात्रस्य साक्षान्मोक्षसाधनत्वकथने कर्मान्तराणामपि तथात्वप्रसङ्गः । तदभ्युपगमस्तु सर्वप्रमाणाननुगुणा भाष्यादिविरुद्धः ; वक्तुर्यामुनमुनेः प्रागनुष्ठितगुरुतरविश्वासादिगर्भप्रपत्तिवैयर्थ्यं च स्यात् । ननु *ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥ कलेर्दोषनिधे राजन्! अस्ति ह्येको महान् गुणः । कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेदिति कालविशेषव्यवस्थया सङ्कीर्तनमात्रस्यैव साक्षान्मोक्षसाधनत्वमुच्यते । सत्यम् ; तथाऽपि तस्मिन् काले धर्मान्तरमनपेक्ष्य सङ्कीर्तनमात्रस्यैवाव्यवहितमोक्षोपायनिष्पादकत्वे तात्पर्यं ग्राह्यम् ; अन्यथा चरमयुगे प्रपत्तिरप्यनपेक्षिता स्यात् ; तदयमञ्जलिर्भक्तिवत्प्रपत्तिवच्च प्रयोजनान्तरपराणां यथार्हं तत्तदभिमतसाधनं स्यात् । अनन्यप्रयोजनानां तूक्तेनैव प्रकारेणापवर्गपर्यवसायीति ॥ २८ ॥

उदीर्णसंसारदवाशुशुक्षणिं क्षणेन निर्वाप्य परां च निर्वृतिम् ।
प्रयच्छति त्वच्चरणारुणाम्बुजद्वयानुरागामृतसिन्धुशीकरः ॥ २९

अथाञ्जलिमात्रानर्हाणामपि *विषये ते महाराज! रामव्यसनकर्शिताः । अपि वृक्षाः परिम्लानास्सपुष्पाङ्कुरकोरका इत्युक्तकोसलजनपदपादपन्यायेनानुरागलेशमात्रेणापि शरण्यचित्तरञ्जनेन प्राप्तकाले परमपुरुषार्थसिद्धिस्स्यादित्याह—**उदीर्णेति ॥ उदीर्णः** नित्यमप्यात्मानमसत्कल्पं कर्तुमनुपरमेण जाज्वल्यमान इत्यर्थः । **संसारः** कर्मणः पुरुषस्य पूर्वपूर्वदेहप्रहाणेनोत्तरोत्तरदेहैरेकीकृत्याविच्छिन्नसंसरणरूपावस्थाप्रवाहः । दवाग्नित्वरूपणेन तापत्रयप्रचुरतया दुस्सहतमत्वमन्यैरनुपशमनीयत्वं च व्यज्यते । आर्तिपौष्कल्यवतां प्रपन्नानामविलम्बेन सर्वानिष्टप्रशमनमभिप्रेत्याह—**क्षणेन निर्वाप्येति** । न केवलमनिष्टप्रशमनमात्रमित्याह—**परां च निर्वृतिं प्रयच्छतीति** । निर्वृतिस्सुखम् । अत्र संभवन्त्या निर्वृतेः मुक्तानुभवसाम्यं मुक्तिदशायां परिपूर्णानुभवरूपत्वं चाभिप्रेत्य परामिति विशेषितम् । त्वच्छब्देन *एष ह्येवानन्दयाति, *रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति इत्यात्मानमाकारद्वयमभिप्रैति । सूत्रितं च *तद्धेतुव्यपदेशाच्च, *अस्मिन्नस्य च तद्योगं शास्तीति । चरणस्यारुणाम्बुजत्वरूपणेन विग्रहस्य श्यामतया परभागशोभा व्यज्यते । अन्योन्यसन्निकर्षजनितशोभयाऽप्यनुरागातिशयहेतुत्वमभिप्रेत्य द्वयोपादानम् । **अनुरागः** *नाथ! योनिसहस्रेषु या प्रीतिरविवेकिनामित्यादिनिदर्शिता विषयस्वभावनिबन्धना निरतिशयप्रीतिः । अमृतसिन्धुत्वरूपणेन सञ्जीवनत्वं स्वयं प्रयोजनत्वमक्ष[य]त्वं च व्यज्यते । भाग्यविशेषवशात् भगवति निरुपाधिकभोग्यताविर्भावेन स्वयंप्रयोजनभक्तिलेशोऽपि परमभक्तिदशां प्राप्य नित्यकैङ्कर्यपर्यन्तस्स्यादित्यभिप्रायेण शीकरशब्दः ॥ २९ ॥

विलासविक्रान्तपरावरालयं नमस्यदार्तिक्षपणे कृतक्षणम् ।
धनं मदीयं तव पादपङ्कजं कदा नु साक्षात्करवाणि चक्षुषा ॥ ३०

तदेवमिह तत्त्वज्ञानादिपूर्वकं मोक्षार्थतया प्रवृत्तस्य प्रपत्तिशास्त्रार्थस्याधिकारेण *न निन्दितमित्यादिभिस्सप्तभिस्सामर्थ्यभागस्समर्थितः । अथ *विलासेत्यादिभिः सप्तदशभिः उत्तरखण्डार्थप्रदर्शकैः प्राप्यवैलक्षण्यप्रपञ्चनपूर्वकमर्थित्वभागः स्पष्टीक्रियते । तत्र प्रथमेन स्वविषयभक्तिप्रभावप्रतिपादनप्रीतेन भगवता यथामनोरथं सर्वं करिष्यामीत्युक्ते तद्दत्तीव्रभक्तेः स्वस्य तत्पादारविन्दसन्दर्शने कालक्षेपाक्षमत्वं व्यनक्ति—**विलासेति ॥** परावरशब्दाभ्यां हिरण्यगर्भादयो मनुष्यादयश्च गृह्यन्ते । तेषामालयाः पृथिव्यादयस्सत्यान्ता लोकाः ते विलासेन विक्रान्ता येन तद्विलासविक्रान्तपरावरालयम् । *यस्यो-

रुषु त्रिषु विक्रमणेषु अधिक्षियन्ति भुवनानि विश्वा, * क्रान्त्वा धरित्रीं गगनं तथा दिवमित्यादिप्रमाणप्रसिद्धमिदम् । विक्रमस्यानायासलीलारूपत्वव्यञ्जनाय विलासशब्दः । अत्र सर्वसुलभत्वं च सूच्यते । एवं सुलभस्यायत्नसेव्यत्वमनिष्टनिवर्तकत्वं चाह—**नमस्यदार्तिक्षपणे कृतक्षणमिति** । नमस्यतां प्रह्वीभवतां तदैवाशेषार्तिविनाशने **कृतक्षणं** दत्तावसरं निवृत्तव्यापारान्तरं वा । * क्षणो व्यापारवैकल्ये कालभेदाल्पकालयोरिति **नैघण्टुकाः** । **धनं मदीयम्**—अनन्योपायस्य ममाभिमतसाधनं पुरुषार्थभूतं च । **तव पादपङ्कजं** स्वरूपादिभिर्निरतिशयभोग्यस्याश्रितवत्सलस्य मुमुक्षुध्येयं मुक्तभोग्यं च पादारविन्दम् । **कदेत्यादि** ॥ *न चक्षुषा पश्यति कश्चनैनम्, *स्वाध्यायश्चक्षुरुत एकमस्य योगो द्वितीयमभिवीक्षणाय अध्ययनमननयनोऽस्य द्रष्टा * न मांसचक्षुरभिवीक्षते तम्, *न मांसचक्षुषा द्रष्टुं ब्रह्मभूतस्स शक्यते, *प्रत्यक्षोऽसि न कस्यचित् इत्यादिषु मादृशैर्दुर्दर्शतया प्रसिद्धं त्वामद्यैवानेनैव चक्षुषा साक्षात्कर्तुमिच्छामीत्यभिप्रायः । एतेन * तासामाविरभूच्छौरिरितिन्यायेन धनञ्जयादिषु दिव्यचक्षुःप्रदानन्यायेन च दिदृक्षूणां यथामनोरथं सहसैव दृश्यो भवतीति प्रकाश्यते । अत्र मुक्तिदशाविवक्षायां *स वा एष दिव्येन चक्षुषा मनसेतिवत्स्वाभाविकज्ञानरूपेण चक्षुषेति योज्यम् ॥

कदा पुनश्शङ्खरथाङ्गकल्पकध्वजारविन्दाङ्कुशवज्रलाञ्छनम् ।
त्रिविक्रम त्वच्चरणाम्बुजद्वयं मदीयमूर्धानमलङ्करिष्यति ॥ ३१

अथ * दिव्यं ददामि ते चक्षुरितिवदपेक्षितं साक्षात्कारं दास्यामीति भगवतोक्ते दूरस्थस्य कालान्तरेऽपि तत्संभवमाशङ्क्य शीघ्रं स्वोचितं तत्संश्लेषविशेषमपेक्षते—**कदा पुनरिति** ॥ पुनश्शब्दस्साशङ्कत्वद्योतकः । साक्षात्कारमात्राद्विशेषद्योतको वा । * शङ्खचक्रगदापद्मैरङ्कितं पादपङ्कजम् । शरच्चन्द्रप्रतीकाशनखराजिविराजितम् ॥ सुरासुरैरभ्यर्च्यमानमृषिभिश्चिन्तितं सदा । मूर्धानं मामकं देव! तावकं मण्डयिष्यति, * सञ्चिन्तयेद्भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यमित्यादिप्रसिद्धमाकारमनुसन्धत्ते—**शङ्खरथाङ्केत्यादिना** । * एष ब्रह्मलोकस्सम्राडिति होवाच, * राजाधिराजस्सर्वेषामिति श्रुतिस्मृतिप्रसिद्धसाम्राज्यचिह्नत्वाभिप्रायेण लाञ्छनशब्दः । तथा चोक्तं **नारदीये** * भृङ्गारासनवाजिकुञ्जररथश्रीवत्सचापेषुभिर्मालाकुण्डलचामराङ्कुशयवैरश्वैलध्वजैस्तोमरैः । मत्स्यस्वस्तिकवेदिकाव्यजनकैश्शङ्खातपत्राम्बुजैः पादे पाणितले नरा नृपतितां यान्ति स्त्रियो राज्ञितामिति । **त्रिविक्रमेति** सम्बुद्ध्या निर्ज्ञातविभागानादरेण सर्वेषां शिरसि कृतपदन्यासत्वं स्वस्य तदलाभेन निर्वेदश्च सूच्यते । **त्वच्चरणाम्बुजद्वयम्** * अप्राप्यः केशवो राजन्! इन्द्रियैरजितैर्नरैरित्यादिष्वजितेन्द्रियैर्दुर्लभतया प्रसिद्धस्य तव लक्ष्मीभूमिलीलाकमलं शङ्खादिरेखालंकृताभरणस्थानीयं चरणयुगलम् । **मदीयमूर्धानम्** अत्यन्तनिर्हीनस्य त्वत्पादस्पर्शानर्हस्य दुष्टमतया कालियवत्पादपद्मदमनीयस्य मे चिरकालं * न नमेयमिति त्वत्प्रणामविरहेण दूषितमुत्तमाङ्गम् । **अलङ्करिष्यति** पश्यतां सत्त्वस्थानां प्रेक्षणीयं करिष्यतीति भावः । एतेन कलिदोषनिवृत्तिरप्यर्थिता भवति । उक्तं हि **महाभारते** * यावत्सपादपद्माभ्यां पस्पर्शेमां वसुन्धराम् । तावत्पृथ्वीपरिष्वङ्गे समर्थो नाभवत्कलिरिति । संसाराग्निदग्धोऽहं त्वत्पादस्पर्शेन परीक्षिदिव यथार्हं सञ्जीविष्यामीति भावः । अत्र * यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ । शिरसा धारयिष्यामि न मे शान्तिर्भविष्यतीति **भरतवाक्यम्**, * तत्य ताम्रतलौ तात चरणौ सुप्रतिष्ठितौ । सुजातमृदुरक्ताभिरङ्गुलीभिरलंकृतौ ॥ प्रयत्नेन मया मूर्ध्ना गृहीत्वा सभिवन्दिताविति **मार्कण्डेयवचनं** च दर्शनीयम् । यद्वा मुक्तिदशायां परिगृहीताप्राकृतशरीरस्य स्वस्य परमपदपर्यङ्कनिलयभगवत्पादमूलप्रवेशे त्वरातिशय इह प्रकाश्यते ॥ ३१ ॥

विराजमानोज्ज्वलपीतवाससं स्मितातसीसूनसमामलच्छविम् ।
निमग्ननाभिं तनुमध्यमुन्नतं विशालवक्षस्स्थलशोभिलक्षणम् ॥ ३२

उक्तप्रकारसन्दर्शनसंश्लेषसमनन्तरभाविसर्वविधकैङ्कर्योद्देश्यं भगवन्तं समस्तकल्याणगुणदिव्यमङ्गलविग्रहादिविशिष्टतया प्राप्यं चतुर्दशभिर्विशदमनुसन्धत्ते । तत्र प्रथमश्लोकस्य पूर्वार्धेन पीताम्बरपरभागविचित्रिताम् * अतसीपुष्पसङ्काशः पीतवासा जनार्दनः । व्यभ्राजत सभामध्ये हेम्नीवोपहितो मणिरिति महाभारतोक्तां दिव्यस्वरूपस्य समुदायशोभामनुभवति—**विराजमानोज्ज्वलपीतवाससम्**मिति ॥ पीताम्बरस्य श्यामवर्णविग्रहयोगात्स्वतश्च विराजमानत्वमुज्ज्वलत्वं भास्वरत्वं च । स्मितशब्दोऽत्र विकासार्थः । अतसीसूनम् अतसीप्रसूनम् । श्यामलरमणीयतया विग्रहस्य तत्समत्वम् । अमलच्छविम् उज्ज्वलकान्तिम् । ध्यायतां दोषप्रतिभटद्युतिमिति वा । अवयवेषु * प्रथममजनिष्ट च कस्य नाभेरिति प्रागुक्तपारम्यव्यञ्जकं पितामहोत्पत्तिस्थानं निर्दिशति—**निमग्ननाभिमिति** । निम्ननाभिमित्यर्थः । उदरस्याशेषभुवनगर्भत्वेऽपि कृशत्वेनाद्भुतत्वमभिप्रेत्याऽह—**तनुमध्यमिति** । तथा चाहुः **श्रीवत्साङ्कमिश्राः**—* अण्डानां त्वदुदरमामनन्ति सन्तः स्थानं तद्वरद कथं नु कार्श्यमस्य । माहात्म्यं स्वत इह येषु नूनमेषामृद्धिस्स्यान्महिमकरी न हीतरेषामिति । **उन्नतम्**—अतिह्रस्वत्वादिदोषरहितसर्वाधिकत्वव्यञ्जकदिव्यविग्रहमित्यर्थः । **विशालेत्यादि** । अतिविशालभुजान्तरशोभमानप्रकृतितत्त्वनिरूपकलक्ष्मीनिवासश्रीवत्सलक्षणम् । अत्र द्वितीयान्तानां सर्वेषां * भवन्तमिति वक्ष्यमाणेनान्वयः ॥ ३२ ॥

चकासतं ज्याकिणकर्कशैश्शुभैश्चतुर्भिराजानुविलम्बिभिर्भुजैः ।
प्रियावतंसोत्पलकर्णभूषणश्रियालकाबन्धविमर्दशंसिभिः ॥ ३३

भुजमध्यशोभाऽनुसंहिता । अथ वीरशृङ्गारचित्रितां भुजशोभामनुसन्धत्ते—**चकासतमिति** ॥ अवतारदशायां विरोधिनिराकरणार्थव्यापारव्यञ्जकैर्ज्याकिणैरङ्कितत्वं परविग्रहभुजेष्वपि तदभेदानुसन्धानेन निर्दिशति—**ज्याकिणकर्कशैरिति** । **शुभैः** औदार्यवीर्यसौन्दर्यादिशालिभिः । पररूपेऽपि चतुर्भुजत्वं प्रमाणसिद्धमिति प्रकाशयितुमाह—**चतुर्भिरिति** । यथोक्तं **विष्वक्सेनसंहितायां** * वैकुण्ठे तु परे लोके श्रीसहायो जनार्दनः । उभाभ्यां भूमिनीलाभ्यां सेवितः परमेश्वरः ॥ महायोगी जगद्धाता दिव्यसिंहासनोपरि । दिव्यसंस्तरणोपेते शेषाहिफणमण्डिते ॥ पञ्चोपनिषदाम्नातदिव्यमङ्गलविग्रहः ॥ अप्राकृततनुर्देवो नित्याकृतिधरो युवा ॥ नित्यातीतो जगद्धाता नित्यैर्मुक्तैश्च सेवितः । बद्धाञ्जलिपुटैर्हृष्टैर्निर्ममैर्निरुपद्रवैः ॥ चतुर्भुजश्श्यामलाङ्गः श्रीभूभ्यां सह नीलया । विमलैर्भूषणैर्नित्यैर्भूषितो नित्यविग्रहः ॥ पञ्चायुधैस्सेव्यमानश्शङ्खचक्रधरो हरिः । सहस्रस्थूणसंयुक्ते मण्डपे परमेश्वरः ॥ विन्यस्य वामकं बाहुमासने वामपार्श्वके । दक्षिणं जानुके न्यस्तं लम्बयन् जगतां पतिरिति । एवमेव ध्यानं **भाष्यकारैर्नित्ये** प्रोक्तम् । **बलपौष्करे** तु * देवो वैकुण्ठनाथस्तु अनन्तासनसंस्थितः । सेव्यः श्रीभूमिनीलाभिः प्रादुर्भावैस्तु चाखिलैः ॥ शङ्खचक्रधरो नित्यं जानुन्यस्तैकहस्तवान् । अभयप्रदहस्तश्च नीलजीमूतसन्निभः ॥ ध्यातव्यो नित्यलोकस्थो भुक्तिमुक्तिफलप्रद इति । अत्र अभयप्रदहस्तत्वादिवैषम्यमवस्थाभेदादुपपद्यते । यत्तु कैश्चिदुक्तं—* मुखं किमस्य कौ बाहू * बाहू राजन्यः कृत इति **पुरुषसूक्त**वाक्याभ्यां * दशहस्त्या अङ्गुल्यो दश पद्या द्वावूरू द्वौ बाहू आत्मैव पञ्चविंश इत्यैतरेयोक्त्या, * पाणिभ्यां त्रयीं संभरतीत्यादिरहस्याम्नायोक्त्या च परस्य द्विभुजत्वं सिध्यतीति, तदयुक्तम्; तेषां वाक्यानां प्रकरणादिभिरन्यपरत्वेन परस्य चतुर्भुजत्वप्रतिषेधादर्शनात् । यच्चोक्तं **श्रीसात्त्वते** * नादावसानगगने देवोऽनन्तस्सनातनः । शान्त-

स्संवित्स्वरूपस्तु भक्तानुग्रहकाम्यया ॥ **अनौपम्येन वपुषा** स्वमूर्तौ मूर्तितां गतः । **विश्वमाप्याययन् कान्त्या पूर्णेन्द्वयुतसुन्दरया** । वरदाभयदेनैव शङ्खचक्राङ्कितेन च । त्रैलोक्योद्धृतिदक्षेण युक्तः पाणिद्वयेन सः इति, तदिदं तत्रत्यहृद्यागविशेषविधिपरम् । **श्रीपौष्करे** * द्विभुजं पुरुषाकारं युक्तमादित्यसन्निभैः । ध्वजैराभरणैश्चिह्नैश्शङ्खचक्रादिसंज्ञितैरिति । **सौमन्तवे** च * निरस्ता द्विभुजा सौम्या शङ्खचक्रकराङ्किता । महापुरुषरूपा च सुप्रसन्ना विलक्षणेति । **भारद्वाजे** च * द्विबाह्वोश्चक्रधृत्पाणिर्दक्षिणश्शङ्खधृत्परः । उपविष्टं तु मोक्षार्थी उत्थितं विश्वसिद्धय इति । **साङ्कर्षणे** च * पुरुषोत्तमस्य देवस्य शुद्धस्य स्फटिकत्विषः । समपादस्य पद्मोर्ध्वे ह्येकवक्त्रस्य संस्थितिः ॥ वरदाभयहस्तौ द्वावप्रवृत्ताख्यकर्मण इति । एतान्यन्यानि चैवंविधानि वाक्यानि तत्तद्रूपसद्भावमात्रपराणि । यत्पुनः**रानन्दाख्यसंहितायामुक्तं** * स्थूलमष्टभुजं प्रोक्तं तस्मादेतत्त्रयं यजेदिति । एतदपि पररूपमधिकृत्यैव बह्वीषु संहितासु चतुर्भुजत्वप्रतिपादनात्, इच्छागृहीताभिमतोरुदेहस्य देवस्य वैकल्पिकध्यानपरतया सुसङ्गतम् । दृश्यते च नृसिंहकृष्णाद्येकैकरूपेष्वेव द्विभुजत्वचतुर्भुजत्ववर्णभेदाद्यवान्तरवैषम्यम् । परस्मिंश्च नित्योदितशान्तोदितादिविभागस्सम्प्रतिपन्न इति सर्वं सुस्थम् । अत्र श्लोके ज्याकिणेत्यादिना स्वभक्तसंरक्षणार्थं महावीरत्वं प्रियावतंसेत्यादिना स्वानुरूपवीरपत्नीसंबन्धस्तत्पुरस्कारेण सर्वैरभिगमनीयत्वं च सूच्यते ॥ ३३ ॥

उदग्रपीनांसविलम्बिकुण्डलालकावलीबन्धुरकम्बुकन्धरम् ।
मुखश्रिया न्यक्कृतपूर्णनिर्मलामृतांशुबिम्बाम्बुरुहोज्ज्वलश्रियम् ॥ ३४

एवं पीताम्बरप्रभृत्यारोहणक्रमेण भुजानुभवानन्तरं दिव्यकण्ठशोभां मुखशोभां चानुसन्धत्ते—**उदग्रेति** ॥ उदग्रमुन्नतं पीनमकृशमुदग्रपीनांसविलम्बिभ्यां कुण्डलालकावलिभ्यां बन्धुरा सुन्दरा कम्बुवदभिरामा त्रिरेखालंकृता कन्धरा यस्य तथोक्तः । * रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते । कुण्डलालकसमभिव्याहारः परभागकान्तिव्यञ्जनार्थः । * पापं हरति यत्पुंसां स्मृतं सङ्कल्पनामयम् । तत्पुण्डरीकनयनं विष्णोर्द्रक्ष्याम्यहं मुखमित्यादिप्रसिद्धां पावनमनोहरां मुखशोभामनुभवति—**मुखश्रियेति** । मुखकान्त्येत्यर्थः । **न्यक्कृतेत्यादि** । यस्य मुखश्रिया न्यक्कृतं पूर्णनिर्मलामृतांशुबिम्बमम्बुरुहोज्ज्वलश्रीश्च स एवमुदीरितः । अम्बुरुहश्रिय उज्ज्वलत्वं नूतनविकासकान्तिसौकुमार्यादिभिः । अमृतांशुबिम्बाम्बुरुहयोर्वा द्वन्द्वः । तयोरुज्ज्वलश्रीरिति तत्पुरुषः ॥ ३४ ॥

प्रबुद्धमुग्धाम्बुजचारुलोचनं सविभ्रमभ्रूलतमुज्ज्वलाधरम् ।
शुचिस्मितं कोमलगण्डमुन्नसं ललाटपर्यन्तविलम्बितालकम् ॥ ३५

उक्तप्रकारां मुखशोभां प्रत्येकावयवभावनया पुनरपि निर्विशति—**प्रबुद्धेति** ॥ प्रबुद्धं विकसितं मुग्धं नूतनं सौम्यं वा । तथा च **नैघण्टुकाः** * मुग्धं सौम्ये नवे मूढ इति । अम्बुजवल्लोचनयोश्चारुत्वमाश्रितदर्शनप्रीतिविकसितत्वेन, तदनुग्रहयोगसौम्यतया कान्त्यतिशयाच्च । **सविभ्रमभ्रूलतमित्यनेनापि** स्वभक्तसम्प्राप्तिजनितोल्लासातिशयस्सूच्यते । **उज्ज्वलाधरं** प्रवालादिभ्योऽप्यधिकप्रकाशमानाधरम् । विद्रुममौक्तिकन्यायेनाधरशोभया विशेषितां स्मितशोभामाह—**शुचिस्मितमिति** । अवदातस्मितमित्यर्थः । अथवा * स्मयन्निव नृपो हन्तातिवद्विरुद्धाभिसन्धि परिहर्तुमिह शुचित्वोक्तिः । एवं चोक्तं **श्रीपौष्करे** * पूर्वकर्मानलार्तानां ध्यायतां खेदशान्तये । स्वदन्तेन्दुचयोत्थेन ह्लादयन् गोगणेन त्विति । **कोमलगण्डं** सुकुमारकपोलम् । **उन्नसम्** उन्नतनासावंशम् । अलकानां पश्चादंसलम्बित्वं प्रागुक्तम् । अत्र तु पुरस्ताल्ललाटोर्ध्वभागलम्बित्वमाह—**ललाटपर्यन्तविलम्बितालकमिति** ॥ ३५ ॥

स्फुरत्किरीटाङ्गदहारकण्ठिकामणीन्द्रकाञ्चीगुणनूपुरादिभिः ।
रथाङ्गशङ्खासिगदाधनुर्वरैर्लसत्तुलस्या वनमालयोज्ज्वलम् ॥ ३६

ईश्वरत्वेन शङ्कनीययोः ब्रह्मरुद्रयोरादिमं रूपं तापसवेषेण कर्मवश्यत्वव्यञ्जकम् । भगवतस्तु किरीटादियोगात् सर्वेश्वरत्वख्यापकमित्यभिप्रायेणाऽह—**स्फुरत्किरीटेति** ॥ **कण्ठिका** कण्ठभूषणं **मणीन्द्रः** कौस्तुभः, स च जीवतत्त्वाभिमानी । आदिशब्देनापरिमितानि दिव्याभरणान्तराणि संगृह्यन्ते । **रथाङ्गादयः** पञ्च मनस्तत्त्वतामसाहङ्कारसम्यग्ज्ञानबुद्धितत्त्वसात्विकाहङ्काराभिमानित्वेन प्रसिद्धाः । स्पर्शरूपगन्धविशेषैर्लसन्ती तुलसी लसत्तुलसी तया ; यद्वा लसन्ती तुलसी यस्यास्सा तयेति वनमाला विशेष्यते । स्फुरदुज्ज्वलमिति पदाभ्यामाभरणादेर्विग्रहस्य चान्योन्ययोगादपि शोभमानत्वं ख्याप्यते । अत्र * स्रग्वस्त्राभरणैर्युक्तं स्वानुरूपैरनूपमैः । चिन्मयैस्स्वप्रकाशैश्च अन्योन्यरुचिरञ्जितैरित्यादिकं द्रष्टव्यम् । चिन्मयैः अस्पृष्टसंसारतत्तद्देवतात्मकैरित्यर्थः ॥ ३६ ॥

चकर्थ यस्या भवनं भुजान्तरं तव प्रियं धाम यदीयजन्मभूः ।
जगत्समस्तं यदपाङ्गसंश्रयं यदर्थमम्भोधिरमन्थ्यबन्धि च ॥ ३७

ईदृशकिरीटादिभिस्सर्वेश्वरत्वेन व्यञ्जितस्य भगवतस्साम्राज्यं सलक्ष्मीकस्येति त्रिभिः श्लोकैः सहेतुकमनुसन्धत्ते । तत्र * ततोऽवलोकिता देवा हरिवक्षःस्थलस्थया * श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षस्स्थले स्थिताम्, * का चान्या त्वामृते देवि! सर्वयज्ञमयं वपुः । अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृत इत्यादिपूक्तमाह—**चकर्थ यस्या भवनं भुजान्तरमिति** ॥ * एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः । नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीमित्यादिप्रसिद्धमाह—**तव प्रियं धाम यदीयजन्मभूरिति** । ब्रह्मादीनां सर्वेषां तत्कटाक्षाधीनवैभवत्वमाह—**जगत्समस्तं यदपाङ्गसंश्रयमिति** । यथोच्यते * त्वया देवि! परित्यक्तं सकलं भुवनत्रयम् । विनष्टप्रायमभवत्त्वयेदानीं समेधितम् ॥ त्वयाऽवलोकितास्सद्यश्शीलाद्यैस्सकलैर्गुणैः । धनैश्चर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥ स श्लाघ्यस्स गुणी धन्यः स कुलीनस्स बुद्धिमान् । स शूरस्स च विक्रान्तो यं त्वं देवि निरीक्षसे ॥ इत्यादि । **श्रीमहाभारते** च श्रीवासवसंवादे स्वयमेव देवदेव्या स्ववैभवं प्रदर्शितं—* पुण्येषु त्रिषु लोकेषु सर्वे स्थावरजङ्गमाः । ममात्मभावमिच्छन्तो यतन्ते परमात्मना ॥ साऽहं वै पङ्कजे जाता सूर्यरश्मिप्रबोधिते । भूत्यर्थं सर्वभूतानां पद्मा श्रीः पद्ममालिनी ॥ अहं लक्ष्मीरहं भूमिः श्रीश्चाहं बलसूदन! । अहं श्रद्धा च मेधा च सन्नतिर्विजितिस्स्मृतिः ॥ अहं धृतिरहं सिद्धिरहं त्वद्भूतिरेव च । अहं स्वाहा स्वधा चैव सन्नतिर्नियतिः कृतिः ॥ राज्ञां विजयमानानां सेनाग्रेषु ध्वजेषु च । निवासे धर्मशीलानां विषयेषु पुरेषु च ॥ जितकाशिनि शूरे च संग्रामेष्वनिवर्तिनि । निवसामि मनुष्येषु सदैव बलसूदन! ॥ धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि । प्रश्रिते दानशीले च सदैव निवसाम्यहम् ॥ यत्राहं तत्र मत्कान्ता मद्विशिष्टा मदर्पणाः । सप्त देव्यो मदष्टम्यो वासं चैष्यन्ति चाष्टधा ॥ आशा श्रद्धा धृतिः क्षान्तिर्विभूतिस्सन्नतिः क्षमा ॥ अष्टमां विद्धि मां तासां पुरोगां पाकशासनेति । **श्रीविष्णुस्मृतेरन्ते ब्रह्मपुराणे** च **सहस्रनामस्तोत्रे** भगवच्छास्त्रे च **हिरण्यगर्भकाश्यपमङ्कणधनदादिसंहितासु** ब्रह्मरुद्रेन्द्रादीनां तदधीनवैभवत्वं विस्तरेण द्रष्टव्यम् । **यदर्थं** यत्प्राप्त्यर्थमिति यावत् । परस्परविश्लेषप्रसङ्गरहितयोरेव लक्ष्मीतद्वल्लभयोः विश्लेषाभिनयेन पुनः प्राप्तिरुच्यते । **स्वसङ्कल्पनियता च स्वतन्त्रलीला**

न पर्यनुयोगमर्हति । **अमन्थि** विष्ण्ववतारे । **अबन्धि** रामावतारे । यथोक्तं * ततः स्फुरत्कान्तिमती विकासिकमले स्थिता । श्रीर्देवी पयसस्तस्मात् उत्थिता धृतपङ्कजेत्यारभ्य * दिव्यमाल्याम्बरधरा स्नाता भूषणभूषिता । पश्यतां सर्वदेवानां ययौ वक्षःस्थलं हरेरिति, * एष सेतुर्मया बद्धस्सागरे मकरालये । तव हेतोर्विशालाक्षि! नलसेतुस्समुद्गुष्कर इति च । अत्र जगत्समस्तमिति पादेनानुरूपत्वं पादान्तरैरभिमतत्वं च प्रख्यापितम् ॥ ३७ ॥

स्ववैश्वरूप्येण सदाऽनुभूतयाऽप्यपूर्ववद्विस्मयमादधानया ।
गुणेन रूपेण विलासचेष्टितैः सदा तवैवोचितया तव श्रिया ॥ ३८

उक्तमेवाभिमतानुरूपत्वमनन्तरश्लोकेन प्रपञ्चयति—**स्ववैश्वरूप्येणेति** ॥ स्वस्य विश्वशरीरकत्वेनेत्यर्थः । **सदाऽनुभूतया** * यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वत इतीदृशेन सहजप्रत्यक्षेण सदा साक्षात्कृतयेत्यर्थः । एतदभिप्रायेण तदविनाभूतवैश्वरूप्यस्य हेतुत्वोक्तिः । यद्वा स्वरूपादिसर्वाकारेण *शान्तानन्तेत्यादिप्रक्रियया सर्वदा गाढोपगूढत्वेनानुभवो विवक्षितः । **अपूर्ववत्** अदृष्टपूर्ववत् । यद्वा इतःपूर्वमनालोचितवत इवेत्यर्थः । **विस्मयम्** अद्भुतरसहेतुभूतं भावम्, अनवधिकं प्रीतिविशेषमित्यर्थः । आदधानयेत्यत्रापि सदेत्यभिप्रेतम् । एतेन स्वभावसिद्धमभिमतत्वं प्रपञ्चितम् । **गुणेने**त्यादिना तु सर्वप्रकारानुरूपत्वमुच्यते । गुणशब्द इह ज्ञानकारुण्यादिविषयः । रूपेणाप्राकृतेनाखिलजगन्मातृत्वाभिव्यञ्जकेन दिव्यविग्रहेण । **विलासैः** भगवदभिमतैर्लीलाविशेषैः । **चेष्टितैः** आश्रितरक्षणावतारादिभिः । **तवैवोचितये**त्यनेन * तुल्यशीलवयोवृत्ताम्, * देवत्वे देवदेहेयम् * देवतिर्यङ्मनुष्येष्वित्यादिपूक्तमनुरूपत्वं प्रतिपाद्यते । **तव श्रिये**त्यनेन * विष्णोः श्रीरनपायिनीत्यादिप्रसिद्धं नित्यव्यवस्थितपतिपारार्थ्यं प्रतिष्ठापितम् । तृतीयान्तानां तयेत्युत्तरश्लोकस्थपदेनान्वयः ॥ ३८ ॥

तया सहासीनमनन्तभोगिनि प्रकृष्टविज्ञानबलैकधामनि ।
फणामणिव्रातमयूखमण्डलप्रकाशमानोदरदिव्यधामनि ॥ ३९

* वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः । आस्ते विष्णुरचिन्त्यात्मा इति पुराणप्रसिद्धमाह—**तया सहे**ति ॥ भूम्यादिपत्न्यन्तरवतोऽपि श्रियः प्राधान्यादिह तदुक्तिः; तदपेक्षयाऽपि भगवतः प्राधान्यव्यञ्जनाय सहशब्दः । **आसीन**मित्यनेन * सहस्रस्थूणे विनिर्मिते दृढ उग्रे यत्र देवानामधिदेव आस्ते इति तवल्कारश्रुतिः स्मार्यते । उपात्ता चेयमभियुक्तैः—* सर्वात्मसाधारणनाथगोष्ठीपूरेऽपि दुष्पूरमहावकाशम् । आस्थानमानन्दमयं सहस्रस्थूणादिनाऽऽज्ञातमवाप्तवानीति । **अनन्तभोगिनि** * गन्धर्वाप्सरसस्सिद्धास्सकिन्नरमहोरगाः । नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमुच्यते इति सुप्रसिद्धानन्तनाम्नि विश्वंभराधारणविनियुक्ते महाभोगिनि । **प्रकृष्टविज्ञानबलैकधामनि** प्रकृष्टयोर्विज्ञानबलयोरेकाश्रये । अस्य सङ्कर्षणास्त्यव्यूहाभिमानविशेषयोगात्तदनुगुणौ गुणाविह निर्दिश्येते । पञ्चविधज्योतिस्सिद्धान्तप्रवर्तकत्वेन ज्ञानप्रकर्षोऽस्य प्रसिद्धः । सर्वाधारभूतभगवद्विग्रहधारणेन बलप्रकर्षोऽस्य व्यक्तः । * तेनेयं नागवर्येण शिरसा विधृता मही । बिभर्ति मालां लोकानां सदेवासुरमानुषामित्यादिभिश्च । यस्य **फणामणिव्रातमयूखमण्डलैः प्रकाशमानोदरं** दिव्यधाम स एवमाश्चर्याकारतयोत्तरार्धेनोक्तः । दिव्यधामशब्दोऽत्र वैकुण्ठाख्यमप्राकृतं नित्यं दिव्यं भगवद्विमानं वदति ॥ ३९ ॥

निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः ।
शरीरभेदैस्तव शेषतां गतैर्यथोचितं शेष इतीरिते जनैः ॥ ४०

उक्तप्रभावं पर्यङ्कभोगिनं वृत्तिविशेषानुगुणसमाख्यान्तरेणापि विशिनष्टि—**निवासेति** ॥ निवासो दिव्यायतनम् । शय्यात्वं योगनिद्रावस्थायाम् । आसनं पर्यङ्कविद्यादिष्वाम्नातं दिव्यसिंहासनम् । पादुके *अधिरोहार्ये! पादाभ्यां पादुके हेमभूषिते । एते हि सर्वलोकस्य योगक्षेमं विधास्यत इत्यवतारदशायां प्रसिद्धवैभवे । **अंशुकं** पीताम्बरादि । उपधानमुत्तमाङ्गधारकं पादधारकं च । वारणशब्दस्य द्वन्द्वात्परत्वाद्वर्षवारणमातपवारणं चेति योज्यम् । आदिशब्देन पादपीठादिसंग्रहः । **शरीरभेदैरित्यनेन** *अपरिमितधा भवतीतिन्यायोऽभिप्रेतः । **तव** कैङ्कर्योद्देश्यदिव्यमङ्गलविग्रह-विशिष्टस्य । **शेषतां** स्वोपकारताप्राधान्यानादरेण परोपकारार्हताम् । *शेषः परार्थत्वादिति सूत्राभिप्रेतं **वेदार्थसंग्रहे** विवृतं *परगतातिशयाधानेच्छयोपादेयत्वमेव यस्य स्वरूपं स शेष इति । **यथोचितम्** उक्तप्रवृत्तिनिमित्तानुगुणमित्यर्थः । **जनैरित्येतत्सामरपरीक्षकसर्वलोकप्रसिद्धिज्ञापनार्थम्** ॥ ४० ॥

दासस्सखा वाहनमासनं ध्वजो यस्ते वितानं व्यजनं त्रयीमयः ।
उपस्थितं तेन पुरो गरुत्मता त्वदङ्घ्रिसंमर्दकिणाङ्कशोभिना ॥ ४१

एवमनन्तवत्तत्तदवसरोचितसेवार्थनानाविधरूपभेदैः किंकुर्वाणेन गरुत्मता सेवितत्वमाह—**दास इति** ॥ पूर्वश्लोके शेषत्वमुक्तम् । अत्र तु दासशब्देन तदेव विशेष्यते । शेषत्वं हि अचेतनत्वं प्रत्यचेतनस्यापि भवति । दासत्वं तु चेतनं प्रत्येव चेतनस्यैव स्यात्, तथैव लोकव्यवहारात् । अत्र प्रथमं दास इत्युक्तिस्सखित्वाद्यवस्थायामपि स्वाभाविकस्य दासत्वस्यानपगमद्योतनार्था । उच्यते हि *लोकनाथस्य रामस्य सखा दासोऽस्मि रावणेति । गरुत्मतस्तु सखित्वं कदाचिदभिनयप्रयुक्तम् । यद्वा *समानचित्तवृत्तित्वं सखित्वमिति दर्शितमित्याद्युक्तचित्तवृत्तिसाम्यमिह विवक्षितम् । वाहनत्वादिकं तु गमनाद्यवस्थासु यथार्हं भाव्यम् । **त्रयीमयः** सर्ववेदमयविग्रह इत्यर्थः । श्रूयते हि *सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुरित्यादि । तथा *तस्य गायत्री जगती च पक्षावभवताम्, उष्णिक् च त्रिष्टुप् च पृष्ठयौ अनुष्टुप् च पङ्क्तिश्च धुर्यौ, बृहत्येवोक्तिरभवत्, स एतं छन्दोरथमास्थाय, एतमध्वानमनुसमचरदिति । **पुरः उपस्थितं** पुरस्तादाभिमुख्येन सेवितमित्यर्थः । त्वदङ्घ्रिसम्मर्दकिणाङ्कशोभिनेत्येतत्पूर्वोक्तज्याकिणन्यायेन कर्मवश्यत्वाभिनयदशायां भाव्यम् ॥ ४१ ॥

त्वदीयभुक्तोज्झितशेषभोजिना त्वया निसृष्टात्मभरेण यद्यथा ।
प्रियेण सेनापतिना न्यवेदि तत्तथाऽनुजानन्तमुदारवीक्षणैः ॥ ४२

अथ भगवतस्स्ववैभवानुरूपं स्वसङ्कल्पकल्पितनित्याधिकारसेनापतिसेवाप्रकारमभिदधानः *श्रीशभुक्तोज्झितशेष-जीवन इति तन्मन्त्रोक्तमाह—**त्वदीयभुक्तोज्झितशेषभोजिनेति** ॥ त्वदीयभुक्तं त्वद्भुक्तमित्यर्थः । यद्भोक्तव्यतया भोजनपात्रनिहिते किंचिदभुक्तं स्यात् तद्भुक्तोज्झितमित्युदीर्यते । तदेवात्र भुक्तशिष्टतया शेषशब्दार्थः । यद्वा भुक्तोज्झितैकदेशविषयोऽयं शेषशब्दः, अंशान्तरस्यान्यार्थतया विभजनीयत्वोक्तेः । **त्वया निसृष्टात्मभरेण** स्वच्छन्दवृत्तिना त्वया समर्पितात्मभरेणेत्यर्थः । असुरनिराकरणादिषु सेनानिर्वहणादिभारस्सेनापतित्वेन कल्पिते ह्यस्मिन् विन्यस्यते ।

अतस्तन्नियोगपूर्वकमन्ये प्रवर्तन्ते। जगत्सृष्ट्यादिभारोऽस्मिन् समर्पित इति केषांचिद्व्याख्यानं तु भगवदधीनतत्प्रभावातिशय-प्रशंसार्थम्। एकस्यैव हि सर्वशरीरिणो *बहु स्यामिति सङ्कल्पक्षमत्वमिति प्रागेव स्थापितम्। अत एव *श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यमिति श्रीवैकुण्ठगद्योक्तिरपि भक्तानां स्वामिसेवाविघ्नप्रशमने परिजननियोगादौ च योजनीया। विष्वक्सेनमन्त्रे तु *विश्वसृज इति पदं मुक्तवत्प्रभूतसृष्टिमात्रपरम्। विशेष्यभूतपरमात्मपर्यन्तं वा नेतव्यम्। नित्यानां ज्ञानभोगयोः ईश्वरेण मिथश्चात्यन्तसाम्येऽपि विग्रहाधिकारयोर्वैषम्यं भगवन्नित्येच्छासिद्धम्। प्रियेणेत्येतदनन्तगरुडादिष्वपि समानम्। अत्र तु विज्ञापनाधिकारिणि वाक्यानतिलङ्घनार्थं विशेषत उक्तम्। निवेदितमिति पाठे यदित्यस्य तदिति प्रतिनिर्देशोऽध्याहर्तव्यः। न्यवेदि तदिति पाठस्समीचीनः। यद्वृत्ते पूर्वं प्रयुक्ते तद्वृत्तमनन्तरं प्रयोक्तव्यमेवेति ह्याहुः। सेनापतिनिवेदितस्य भगवदभिमतत्वमाह—**तत्तथाऽनुजानन्तमुदारवीक्षणैरिति**। भगवति तत्परिजने च सर्वज्ञेऽप्येवं निवेदनप्रेक्षणादिव्यापारास्स्वच्छन्दलीलाप्रवृत्ताः। यद्यथा तत्तथेति स्वरूपप्रकारयोरविसंवादार्थम्। वीक्षणानामुदारत्वमैश्वर्यव्यञ्जकतया सौन्दर्यादिगुणातिशयात्तदाज्ञाभिप्रायगर्भतयाऽऽनन्दप्रदत्वाच्च ॥ ४२ ॥

हताखिलक्लेशमलैः स्वभावतस्त्वदानुकूल्यैकरसैस्तवोचितैः।
गृहीततत्तत्परिचारसाधनैर्निषेव्यमाणं सचिवैर्यथोचितम् ॥ ४३

त एते नित्यसूरिषु प्रधानतमाश्रय उक्ताः। अथ तद्वदसङ्ख्यातनित्यसूरिसेवाप्रकारमात्मनः प्राप्यत्वेनाभिसन्धायाह—**हताखिलेति** ॥ अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः त एव मलत्वेनोच्यन्ते। तदविनाभूतत्रिगुणात्मकप्रकृतिसंबन्धो वा। अप्रतिबुद्धास्सर्वक्लेशाक्रान्ताः, प्रतिबुद्धास्तु कतिपयक्लेशरहिताः, उपायतो निवृत्तनिखिलक्लेशास्तु मुक्ताः, नित्यास्त्वनादिनिर्धूतनिखिलक्लेशा इत्यभिप्रायेण स्वभावत इत्युक्तम्। श्रूयते हि *तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इति। न ह्येतन्मुक्तप्रभावविषयं, सदा दर्शनकर्तृणां बहूनामभिधानात्। नित्यसर्वज्ञत्वादेव क्लेशादेरनवकाशः। एतेषां *तद्विप्रासो विपन्यवो जागृवांसस्समिन्धत इत्युक्तमनुभवप्रकारमभिप्रेत्याह—**त्वदानुकूल्यैकरसैरिति**। त्वच्छेषत्वानुरूपपारतन्त्र्यानुगुणकैङ्कर्यैकरुचिभिरित्यर्थः। सदानुकूल्येति पाठेऽप्ययमेवार्थः। **तवोचितैः** अनादिसर्वज्ञत्वाप्राकृतविग्रहत्वादिभिस्त्वदनुरूपैरित्यर्थः। एतद्विशेषणत्रयमेतेषां भगवदायत्तम्। इदं चानन्तगरुडादीनामपि समानम्। परिचारसाधनानि छत्रचामरादिसेवोपकरणानि। **सचिवैः**—आसन्नसेवायां तत्तद्विभूतिशेषनिर्वहणे च नियुक्तैस्सूरिभिः। **यथोचितं** तत्तदधिकारनियोगस्य सेव्याभिप्रायस्य स्वाभाविकदासत्वस्य चानुगुणमित्यर्थः ॥ ४३ ॥

अपूर्वनानारसभावनिर्भरप्रबद्धया मुग्धविदग्धलीलया।
क्षणाणुवत्क्षिप्तपरादिकालया प्रहर्षयन्तं महिषीं महाभुजम् ॥ ४४

ईदृशस्य भगवत्तस्सर्वेषु व्यापारेषु लक्ष्मीसामरस्यमभिप्रेत्याह—**अपूर्वेति** ॥ उक्तं च **श्रीवत्साङ्कमिश्रैः**—*क्रीडेयं खलु नान्यथाऽस्य रसदा स्यादैकरस्यात्तयेति। अपूर्वशब्देन रसभावपरंपरायामुत्तरोत्तरस्य विलक्षणत्वमननुभूतजातीयवदाश्चर्यत्वं वा विवक्षितम्। रसभावाः गान्धर्ववेदप्रदर्शिताः वीरशृङ्गारादय उत्साहादयश्च। तैर्निर्भरप्रबद्धया—प्रभूतसन्ततया। मौग्ध्यवैदग्ध्यसम्भेददद्भुतत्वमभिप्रेत्याह—**मुग्धविदग्धलीलयेति**। लीलाया नित्यनिरतिशयत्वं व्यनक्ति—**क्षणाणुवत्क्षिप्तपरादिकालयेति**। क्षणमेव पर्वतस्थानीयं कृत्वा तस्याणुस्सूक्ष्मतम एकदेश इति कल्पितोऽयं दृष्टान्तः,

तद्वत्परादिकालः क्षिप्त इत्यतिशयोक्तिः । चतुर्मुखस्यायुः परो नाम कालः । आदिशब्देनासङ्ख्यातचतुर्मुखातिक्रान्तिकालव्यञ्जनम् । स्मर्यते हि * गङ्गायास्सिकताधारा यथा वर्षति वासवे । शक्या गणयितुं लोके न व्यतीताः पितामहा इति । **महिषीं** प्रधानपत्नीं श्रियमित्यर्थः । उक्तं च तस्याः प्रधानतमत्ववैषम्यं **श्रीवैकुण्ठगद्ये**—* शेषशेषाशनादिसर्वपरिजनं भगवतस्तत्तदवस्थोचितपरिचर्यायामाज्ञापयन्त्येति । **प्रहर्षयन्तमिति** वर्तमाननिर्देशस्सदातनत्वाभिप्रायः । एवं प्रहृष्टायाः प्रियायाः * बभूव हृष्टा वैदेही भर्तारं परिषस्वज इत्युक्तप्रकारेण सर्वस्वभूतपरिष्वङ्गप्रदानानुगुणं प्रियस्य भुजवैभवमाह—**महाभुजमिति** । उक्तं ह्यवतारे तद्भुजमहत्त्वं * बाहुच्छायामवष्टब्धो यस्य लोको महात्मन इति ॥ ४४ ॥

अचिन्त्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतोदधिम् ।
श्रियः श्रियं भक्तजनैकजीवितं समर्थमापत्सखमर्थिकल्पकम् ॥ ४५

अथ प्रथमप्रस्तुतां यौवनविशेषितां सर्वचित्ताकर्षकसमुदायशोभामाश्रयणीयत्वभोग्यत्वौपयिकगुणविशेषांश्च सङ्कलय्यानुभवति—**अचिन्त्येति** ॥ अचिन्त्यं परमयोगिभिरप्यपरिच्छेद्यं कुतर्कैरसंभावितमिति प्रतिक्षेप्तुमशक्यं च । दिव्यमप्राकृतम् । अद्भुतं सदाऽनुभूतत्वेऽप्यदृष्टपूर्ववदाश्चर्यावहम् । नित्यं कौमारवार्धकावस्थापरिच्छेदरहितम् । यौवनं लोके बाल्यानन्तर्येणोपलक्षणीयः कश्चिद्रमणीयसंस्थानविशेषः । स एव स्वभावः स्वासाधारणधर्मो यस्य स इत्यमृतोदधिर्विशेष्यते, स च लावण्यमयः लावण्यप्रचुरः । लावण्यं समुदायशोभा । तदेतल्लक्षयन्ति * भूयिष्ठं तेज एवाद्भिर्बहुलाभिर्मृदङ्कृतम् । चक्षुरानन्दजननं लावण्यमिति कथ्यत इति । निरतिशयभोग्यमहत्तराकारत्वमभिप्रेत्यामृतोदधित्वोपचारः । अप्राकृतामृतद्रव्यात्मकत्वं वा विवक्षितम् । पूर्वं * कः श्रीः श्रिय इति परत्वस्थापनायोक्तम् । अत्र तु कैङ्कर्योद्देश्यं निरतिशयभोग्यं रूपं सपत्नीकमिति ज्ञापयितुमाह—**श्रियःश्रियमिति** । **भक्तजनैकजीवितं** भक्तजनानां प्रधानजीवितम् । * मच्चित्ता मद्गतप्राणा इत्यादिकमिह भाव्यम् । यद्वा भक्तजना एव जीवितं यस्य स तथोक्तः । तथाविधप्रीत्यतिशयादेव हि स्वयमेवाह—* ज्ञानी त्वात्मैव मे मतमिति, * मम प्राणा हि पाण्डवा इति च । **समर्थं** जगत्सृष्ट्यादाविवाश्रितानां सात्म्यभोगप्रदाने तद्विरोधिनिरसने च प्रतिबन्धकैः प्रतिहन्तुमशक्यमिति भावः । तथा च गीयते—* परित्राणाय साधूनामित्यादि । **आपत्सखम्** आश्रितानामापदि प्रियसखन्यायेन समानार्थतयाऽवस्थितमित्यर्थः । **अर्थिकल्पकमित्यत्र** स्वार्थे कः । अर्थिनां कल्पद्रुमवत् सर्वापेक्षितप्रदमिति यावत् । तथा च सूत्रितम्—*फलमत उपपत्तेरिति । यद्वा अर्थिनः कल्पद्रुमभूता यस्य सोऽर्थिकल्पकः; तदाह—* उदारास्सर्व एवैत इति । अथवा स्वयमर्थिनः कल्पयतीत्यर्थः । क्षेत्रज्ञानां तत्तत्पुरुषार्थाधिकारदशाऽपि हि परमपुरुषकल्पिता ॥ ४५ ॥

भवन्तमेवानुचरन्निरन्तरं प्रशान्तनिश्शेषमनोरथान्तरः ।
कदाऽहमैकान्तिकनित्यकिंकरः प्रहर्षयिष्यामि सनाथजीवितः ॥ ४६

एवं प्राप्यं भगवन्तं यथावस्थितमनुसन्धाय तज्जनितहर्षप्रकर्षेण परमपुरुषार्थकाष्ठाभूतं निरुपाधिककैङ्कर्यमभ्यर्थयते—**भवन्तमिति** ॥ प्राप्यप्रापकत्वानुगुणप्रागुक्तसर्वाकारपरिपूर्णमित्यर्थः । कर्माधीनसेव्यान्तरनिवृत्तिव्यञ्जनार्थ एवकारः । एतेन * गीतिज्ञो यदि योगेन नाप्नोति परमं पदम् । रुद्रस्यानुचरो भूत्वा तेनैव सह मोदत इत्यादिधृक्तं रुद्राद्यनुचरणं च व्यवच्छिन्नं भवति । यद्वा मुक्तस्य स्वेच्छया भगवत्परिजनसेवाऽपि तच्छेषिपर्यन्तत्वबुद्धिपूर्विकेत्यभिप्रायः । **अनुचरन्**

तत्तदवस्थोचितवृत्त्या सेवमान इत्यर्थः । अत्र त्ववान्तरसेवाव्यावृत्त्यर्थं **निरन्तर**मित्युक्तम् । उत्तरावधिराहित्यमभिप्रेत्य वर्तमानव्यपदेशः । * एतमानन्दमयमात्मानमुपसंक्रम्य इमाँल्लोकान् कामान्नी कामरूप्यनुसञ्चरन्निति श्रुतिश्चानेन सूच्यते । अत्र * कुरुष्व मामनुचरम्, * भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते । अहं सर्वं करिष्यामि जाग्रतस्स्वपतश्च ते, * तवानुभूतिसंभूतप्रीतिकारितदासताम् । देहि मे कृपया देव न जाने गतिमन्यथा ॥ सर्वावस्थोचिताशेषशेषतैकरतिस्तव । भवेयं पुण्डरीकाक्ष त्वमेवैवं कुरुष्व मामित्यादिकमनुसन्धेयम् । एवंविधकैङ्कर्यसिद्ध्यर्थं प्रयोजनान्तरेच्छा त्वयैव प्रशमनीयेत्यभिप्रायेणाह—**प्रशान्तनिश्शेषमनोरथान्तर** इति । ऐकान्तिकः एकस्मिन्नेव नियतः । यद्यपि ब्रह्मरुद्रप्राप्तौ क्वचिदपुनरावृत्तिरुच्यते, तथाऽपि * ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमित्युक्तन्यायात् क्रमेण मुक्तिपर्यन्तत्वं तत्राभिप्रेतम् । अतोऽत्र नित्यशब्देन देवतान्तरकिङ्करत्वव्यवच्छेदः । तदेतत् * काहमत्यन्तदुर्बुद्धिरित्यादिवादिनं पुण्डरीकं प्रति भगवतोक्तम्—* आगच्छ वत्स भद्रं ते पुण्डरीक महामते । मद्रूपधारी नित्यात्मा मम पादपरिग्रह इति । **प्रहर्षयिष्यामि** त्वद्दासभूतस्य मे त्वत्प्रहर्ष एव प्रधानं प्रयोजनमिति भावः । एवं स्वाधीनस्वार्थकर्तृत्वभोक्तृत्वभ्रमरहितकैङ्कर्यप्रार्थना कृता भवति । इतः पूर्वं त्वदुपेक्षया त्वत्सनाथोऽपि नाथहीन इवाहमासम् । ईदृशं दैन्यं त्वत्सङ्कल्पादेव हि मे निवर्तिष्यत इत्यभिप्रायेणाह—सनाथजीवित इति ॥ ४६ ॥

धिगशुचिमविनीतं नि[र्भ]र्दयं मामलज्जं परमपुरुष योऽहं योगिवर्याग्रगण्यैः ।
विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं तव परिजनभावं कामये कामवृत्तः ॥ ४७

नन्वेवं मुमुक्षुदशां मया त्वं प्रापितोऽसि; इयं च मद्रुणास्वादगर्भतया मुक्त्यवस्थासमाना त्वया सनकादिभिरिव कञ्चित्कालमनुभूयतामिति भगवदभिप्रायमाशङ्क्य स्वस्य कार्पण्यस्थैर्येण विलम्बाक्षमतया त्वरातिशयव्यञ्जनाय च दुर्लभप्रार्थिनं स्वात्मानं निन्दति—**धिगशुचिमिति** ॥ धिक्शब्दयोगात् द्वितीया । ननु * आत्मनिन्दाऽऽत्मपूजा चेति स्वनिन्दाऽपि निषिद्धा । सत्यम्; न तु सर्वत्र । यथा खल्वाञ्जनेयादेः स्वप्रशंसा क्वचिद्गुणः तथाऽऽत्मनिन्दाऽप्येतस्य स्वदैन्यख्यापनस्थल इति । अशुचिं त्वत्कैङ्कर्यविरुद्धप्रकृतिसंस्पृष्टं तदनुबन्धिक्लेशकर्मादिदूषितं भावशुद्धिरहितत्वेऽपि तद्वत्तां भावयन्तं च । नित्यशुद्धास्सूरयश्शान्तदोषा मुक्तश्च त्वत्कैङ्कर्ययोग्याः । तत्र कोऽहमिति भावः । नन्वाचार्यवन्तमात्मानं किमर्थं निन्दसीत्याह—**अविनीतमिति** । यद्वा आचार्यनियोगे ममावस्थानं स्यात्तदा क्षत्रबन्धुवत् क्रमेण मुक्तस्स्याम्, मम त्वाचार्यवत्ताऽपि विनयाभावात्सात्त्विकविडम्बनार्थैव संवृत्तेति भावः । अयोग्यस्य दुर्लभाभिलाषः * परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् । वितथाभिनिवेशश्च त्रिविधं मानसं स्मृतमिति स्मरणादपचारस्स्यात् । अतः पुरोडाशार्थिनश्शुन इव मे दण्डघातस्स्यादिति भयरहितोऽहमित्याह—**निर्भयमिति** । निर्दयमिति केषांचित्पाठे तु परमभागवतभोग्ये परमामृते विषं सञ्जनयन्तमिति व्याचख्युः । अत्र च मदपराधेन मदनुबन्धिनामपि प्रत्यवायो भवेदिति ज्ञात्वाऽपि प्रवृत्ततया **तेषु दया**रहितोऽहमिति व्याख्यातुं युक्तम् । **माम्**—अहङ्कारादिग्रस्तमित्यभिप्रायः । घटदास्यास्सार्वभौमपरिष्वङ्गाभिलाषवत् अनुचितविषयोऽस्य मनोरथ इति सद्भिः परिहास्यतामनुसन्धायाह—**अलज्जामिति** । सूरिसेव्यस्य भगवतस्त्वसंबन्धानर्हं तुङ्गत्वं व्यनक्ति—**परमपुरुषेति** । स्वस्य निहीनतमत्वप्रसिद्धिमिदानीमपि दोषानुवृत्तिं चाभिप्रेत्याह—**योऽहमिति** । योगिषु वर्याः योगिवर्याः भगवद्भक्ताः । तथा च गीयते—* योगिनामपि सर्वेषामित्यादि । तेष्वग्रगण्याः प्रथमपरिगणनीयाः । **विधिशिवसनकाद्यैरित्युभयभावनानां ब्रह्मभावनानां च सर्वेषां संग्रहः । ध्यातुमत्यन्त-**

दूरमित्यनेन किंपुनः प्राप्तुमिति व्यज्यते । **तव परिजनभावं** स्वानुरूपानन्तगरुडाद्यपरिमितपरिजनवत्तया निरपेक्षं त्वां प्रति किङ्करत्वम् । यद्वा परिजनक्रियां सेवामित्यर्थः । **कामये** न मे केवलं सङ्गमात्रं किंतु विलम्बाक्षमतीव्रतमश्रद्धावानस्मीत्याशयः । कामतो वृत्तं यस्य सः कामवृत्तः । लोकशास्त्रानादरेणापरीक्षितयथेष्टकारीत्यर्थः । *लोकयात्रा भयं लज्जा दाक्षिण्यं धर्मशीलता । पञ्च यत्र न विद्यन्ते न कुर्यात्तेन सङ्गतिमिति सर्वपरित्याज्योऽहं कथं त्वत्प्राप्त्यर्हः इति भावः ॥ ४७ ॥

अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥ ४८

यद्येवं स्वेनापि निन्दनीयस्त्वमिदानीमप्यपराध्यसि, तर्हि कथं ते शीघ्रं मत्प्राप्तिं दास्यामीत्यत्रानर्हस्यापि ममात्यन्तदयनीयतया त्वत्प्राप्त्यर्हतापादनमात्मसात्करणं च कृपया स्वयमेव कुर्वित्याह—**अपराधेति** ॥ *न निन्दितमिति पूर्वोक्तमत्रापराधसहस्रभाजनमित्यनूदितम् । तच्च क्षमादिगुणैकभाजनेन त्वया सर्वं क्षन्तव्यमिति सूचनार्थम् । *निमज्जत इति प्रागुक्तं पतितमित्यादिना पुनर्गृहीतम् । ज्ञानिनां पुण्यफलांशोऽपि रागानुवृत्तिहेतुतयाऽत्यन्तभयावह इत्यभिप्रायेण भीमशब्दः । एवं संसारस्यातिघोरत्वोक्त्याऽपि स्वस्य परप्राप्तौ विलम्बाक्षमत्वं प्रतिष्ठाप्यते । **अगतिमित्यनेन** प्रागुक्तानन्यगतित्वं स्थूणानिखननन्यायेन स्थिरीक्रियते । **शरणागतमिति** च पूर्वप्रयुक्तरक्षणव्याजानुवादः । तेन च *शरणं च प्रपन्नानां तवास्मीति च याचनम् । प्रसादं पितृहन्तॄणामपि कुर्वन्ति साधव इति सामान्यप्राप्तं त्वयि कैमुत्यसिद्धमिति व्यज्यते । शरण्येत्युक्तं हरिशब्देन स्थापितम् । समर्थः कारुणिको हि शरण्यः; तत्रानितरसाधारणं भगवतस्सामर्थ्यम् । *ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च । प्रसह्य हरते यस्मात्तस्माद्धरिरितीर्यते इति पुराणोक्तम् । तथा कारुणिकत्वं चाश्रितानामनिष्टानि हरतीति विवक्षया व्यञ्जितम् । स्मर्यते हि *हरिर्हरति पापानि, *देव प्रपन्नार्तिहरेत्यादि । उक्तं च **परमसंहितायां**—*यस्माद्यातं जगत्तेन तस्माद्विष्णुरिति स्मृतः । हरणाद्देव दुःखानां हरिरित्यभिधीयत इति । *ज्ञातं मया वसिष्ठेन पुरा गीतं महात्मना । महतीमापदं प्राप्य स्मर्तव्यो भगवान् हरिः, *परमापदमापन्नो मनसा चिन्तयेद्धरिमित्यादिकमप्येतदभिप्रायम् । **कृपया** लब्धावसरयेत्यभिप्रेतम् । केवलमितः परं मद्व्यापारनिरपेक्षमिति भावः । एतेन साधनानन्तरनिष्पादनद्वारकं रक्षणं व्यवच्छिद्यते । **आत्मसात्कुरु**—दासभूतं मामुपायोपेयान्तरवैमुख्यकरणेन स्वकैङ्कर्यैकरसं कुरुष्वेत्याशयः । *धिगशुचिमिति पूर्वोक्तस्वात्मतिरस्कारानुवृत्त्याऽऽत्मन्यनादरद्योतनायात्र मामित्यनुक्तिः ॥

अविवेकघनान्धदिङ्मुखे बहुधा सन्ततदुःखवर्षिणि ।
भगवन् भवदुर्दिने पथः स्खलितं मामवलोकयाच्युत ॥ ४९

*न धर्मनिष्ठोऽस्मीत्यारभ्य अकिञ्चन इत्यन्तेनोक्तं प्रपञ्चयति—**अविवेकेति** ॥ अविवेकरूपैर्घनैरन्धानि प्रकाशरहितानि दिङ्मुखानि यस्य तत्तथोक्तम् । **बहुधा**—तापत्रयरूपेण शारीरमानसादितदवान्तरभेदैश्च । **संततदुःखवर्षिणि** अविच्छेदेन प्रतिकूलवर्गं सर्वत्र विदधाने । **भगवन्**—हेयप्रतिभटकल्याणैकतान, त्वयैव मां मोचयितुमर्हसीति भावः । **प्रकाशगतिविरोधितया** भवस्य दुर्दिनत्वरूपणम् । **पथः**—कर्मयोगादिनिवृत्तिधर्मरूपमुक्तिमार्गात्; **स्खलितं**—प्रभ्रष्टमित्यर्थः । **मां** *त्वत्पादमूलं शरणं प्रपद्ये इतिवादिनमिति भावः । **अवलोकय**—अनुगृह्णीष्वेत्यर्थः । **अच्युत**—*नत्यजेयं **कथंचनेत्यादिवादिनं** त्वामाश्रितः च्युतो न भवतीत्यभिप्रायः । *मूढोऽयमल्पमतिरल्पविचेष्टितोऽयं क्लिष्टं मनोऽस्य विषयै-

र्न मयि प्रसन्नी । इत्थं कृपां कुरु मयि प्रणतेऽखिलेश त्वां स्तोतुमम्बुजभवोऽपि हि देव नेश इति क्षत्रबन्धुक्तं, * सोऽहं ते देवदेवेशेत्यादि कालियवाक्यं चानुसन्धेयम् ॥ ४९ ॥

न मृषा परमार्थमेव मे शृणु विज्ञापनमेकमग्रतः ।
यदि मे न दयिष्यसे ततो दयनीयस्तव नाथ दुर्लभः ॥ ५०

अथ संसारिणामानन्त्येन त्वदधिकदयनीयलाभात् तत्रैव मे त्वरा युक्ता किं त्वदवलोकनेनेत्यत्र त्वयाऽपि लब्धमभूतपूर्वमित्याद्युक्तं मुखान्तरेण शरण्यस्याप्यनिष्टप्रसङ्गं सूचयन् द्रढयति—**न मृषेति** ॥ स्ववाक्यसत्यत्वाभिसन्धिद्योतनायात्र व्यतिरेकतोऽन्वयतश्च निर्देशः । परमार्थमेव विज्ञापनं शृण्वित्यत्र नेदं स्वरक्षणप्रोत्साहनमात्रेण प्रयुक्तमित्यवधारणाभिप्रायः । **विज्ञापनं** सर्वज्ञेऽपि स्वामिनि दासोचितं स्वकार्यार्थवाक्यमित्यर्थः । शृण्वितिचानादरपरिहारपरम् । **एकं** रक्ष्यरक्षकयोर्द्वयोरपि लाभार्थतया प्रधानभूतम् । अथवा इदमेकमेव विज्ञापनम् । वक्ष्यमाणं सर्वमेतत्परिकरबन्ध इति भावः । **अग्रतः** न हि त्वं दूरस्थस्सन् पुरुषान्तरमुखेन विज्ञाप्यस इति भावः । **मे** कर्मयोगादिसुकृतलेशरहितस्यापराधसहस्रभाजनतया सर्वाधिकदुःखभागिनः । अत्र * अधीगर्थदयेशां कर्मणीति षष्ठी । **तव** दयाविषयान्वेषिण इति भावः । **तव दयनीय** इत्यन्वयः । **दुर्लभ** इत्यनेनान्वये तु संबन्धसामान्ये षष्ठी नेतव्या । मम च शरण्यान्तरं दुर्लभमित्यभिप्रायेण **नाथेति** संबुद्धिः । उक्तं हि पूर्वं * चिराय मे कूलमिवासि लब्ध इति । * पराभवो नाथ न तेऽनुरूप इति प्रागुक्तं चात्र प्रतिसन्धेयम् ॥ ५० ॥

तदहं त्वदृते न नाथवान्मदृते त्वं दयनीयवान्न च ।
विधिनिर्मितमेत[द]मन्वयं भगवन् पालय मा स्म जीहपः ॥ ५१

अस्त्वेवं दुर्लभस्ततः किं कर्तव्यमित्यत्र ममैव लाभेऽपि त्वया त्वरितव्यम्; किं पुनस्तवापि लाभे सति; तस्मादावयोरिष्टभङ्गानिष्टप्रसङ्गपरिहारार्थं त्वन्मूलत्वत्प्रवृत्तिसिद्धं रक्ष्यरक्षकत्वरूपं संबन्धं निवारकरहितनिरङ्कुशस्वातन्त्र्यान्निष्फलीकर्तुं नार्हसीत्यभिप्रायेणाह—**तदहमिति** ॥ **तत्** उक्तस्यार्थस्य सत्यत्वादित्यर्थः । **अहं** मुमुक्षुस्सन्नाकिञ्चन्यधनः । **त्वदृते न नाथवान्** सर्वशक्तेः परमकारुणिकात्त्वत्तोऽन्येन शरण्यवान्न भवामीत्यर्थः । **मदृते** त्वमित्यादि । अपरिच्छेद्यापराधफलभूतानन्तदुःखाकरान्मत्तोऽन्येन त्वं दयाविषयवान्न भवसि । मत्परित्यागे मादृशास्सर्वेऽपि तव परित्याज्यास्स्युः । एवं सति विषयालाभात् दयागुणस्ते हीयेतेति भावः । सर्वस्मात्संसारिवर्गात् स्वकार्यसिद्ध्यर्थं स्वदोषाधिक्यमारोप्य वा **मदृत** इत्युक्तम् । **विधिनिर्मितम्** अनतिक्रमणीयतया दिष्ट्या निर्मितम् । अज्ञातसुकृतविशेषरूपव्याजावलम्बिन्या त्वत्कृपयैवावसरे कल्प्तमिति यावत् । **एतमन्वयं** दयावत्त्वदयनीयत्वरूपं संबन्धम् । एतदन्वयमिति केचित्पठन्ति । तत्रापि स एवार्थः । एतयोरावयोस्संबन्धमिति वा । **भगवन्नित्यनेन** मोक्षप्रदत्वमुक्तप्राप्यत्वानुगुणमुभयलिङ्गत्वमुद्धाट्यते । **पालय** सफलीकुरुष्वेति भावः । **मा स्म जीहपः** यद्यप्यहमपर्यनुयोज्यदुष्कर्मवशादिमं संबन्धं हातुमिच्छामि, तथाऽपि त्वया न तथा प्रवर्तनीयोऽहमिति भावः ॥ ५१ ॥

वपुरादिषु योऽपि कोऽपि वा गुणतोऽसानि यथातथाविधः ।
तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः ॥ ५२

अस्त्वेवं त्वदुक्तं सर्वं सत्यमुचितं च; तथाऽपि *ज्ञानानन्दमयस्त्वात्मा शेषो हि परमात्मन इत्याद्युक्तस्वरूपज्ञानमन्तरेण स्वरूपानुरूपपुरुषार्थापेक्षापूर्वकतदुपायः कथं ते निष्पन्नः? त्वयि च सहजसंबन्धपरित्यागिनि ममापि रक्ष्यरक्षकत्वसंबन्धपरित्यागे को दोषः? *त्वं मेऽहं म इति चावयोरनादिर्विवाद इदानीमपि न शान्त इत्यत्र *स्वामिन्नित्यादिभिः प्रागपि संक्षिप्तं, *तद्वा एतदनुज्ञाक्षरं यद्ध किंचानुजानात्योमित्येव तदाहेति च्छान्दोग्याधीतानुज्ञाक्षरप्रदर्शितशेषत्वाभ्युपगमेनोत्तरमाह—**वपुरादिष्विति** ॥ आदिशब्द इन्द्रियादिसंग्रहार्थः । यथोक्तमात्मसिद्धौ—*देहेन्द्रियमनःप्राण-[ादि]धीभ्योऽन्योऽनन्यसाधनः । नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नस्त्वतस्मुखीति । **योऽपि कोऽपि वा**—अहं वपुरादिषु यः कश्चित् स्याम् । प्रमाणसिद्धस्याहमर्थस्य सारभूते त्वच्छेषत्वे मम निर्बन्धः । सामान्यतश्च स्वानुगुणसारग्रहणमुच्यते *यावानर्थ उदपाने, *बहुभ्यश्च महद्भ्यश्च शास्त्रेभ्यो मतिमान्नरः । सर्वतस्सारमादद्यात् पुष्पेभ्य इव षट्पद इत्यादिभिः । अत्र देहात्मभ्रमाद्यनुवृत्तिर्भवतु वा मा वा, *योऽहमस्मि स सन् यज इति न्यायमिहाश्रयामीति भावः । तथाऽपि ज्ञातृत्वकर्तृत्वभोक्तृत्वादिविवेकमन्तरेण कथमुपायानुष्ठानं फलिष्यं वा स्यादित्यत्राह—**गुणतोऽसानि यथातथाविध** इति । अणुत्वविभुत्वमध्यपरिमाणत्वजडत्वाजडत्वनित्यज्ञानत्वकरणाधीनज्ञानत्वादिविवेकोऽत्र नातीवापेक्षितः । अपेक्षितत्वेऽप्यात्मस्वरूपप्रकारयोरत्यन्तपरिज्ञाने मम शक्तिर्नास्ति । स्वतस्सर्वज्ञस्त्वमेव योऽसौ यत्प्रकारश्चेति मन्यसे स तथाऽहमिति सामान्यतः प्रबुद्धोऽहमिति भावः । **तत्**—एतावताऽपि प्रस्तुतशास्त्रार्थविरोधाभावादिति यावत् । **अयमहं**—त्वदनुसंहितयथावस्थिताकारशरणवरणानुगुणार्थित्वसामर्थ्यवानहमित्यर्थः । आत्मस्वरूपनिरूपणदशायामहंशब्दप्रयोगादहमर्थ एवात्मेति स्थापितं भवति । **तव पदपद्मयोस्समर्पितः**—*यस्यास्मि न तमन्तरेमीति न्यायात्त्वच्छेषत्वेन न्यस्त इत्यर्थः । **मया**—त्वद्दत्तकरणकलेबरबुद्धिश्रद्धाकार्पण्यादिशालिना । स्मर्यते हि *विचित्रा देहसंपत्तिरीश्वराय निवेदितुम् । पूर्वमेव कृता ब्रह्मन्! हस्तपादादिसंयुतेति । इतः परं त्वया सह विवादो मे न भविष्यतीत्यभिप्रायेणाह—**अद्यैवेति** । अत्र यदि क्षणिकमेव मम स्वरूपम्, तथाऽपि तस्मिन्नेव क्षणे निक्षिप्त इति केषांचिद्व्याख्यानं त्वतिवादमात्रम् । एवं मुमुक्षूणामात्मात्मीयं सर्वं भगवच्छेषत्वेनानुसन्धेयमिति निवृत्तिधर्मसारो निष्कृष्टः । उक्तं चैतदु**परिचराख्याने** *आत्मा राज्यं धनं मित्रं कलत्रं वाहनानि च । एतद्भगवते सर्वमिति तत्प्रेक्षितं सदेति । **श्रीविष्णुतत्त्वे** च—*स्वत्वमात्मनि संजातं स्वामित्वं ब्रह्मणि स्थितम् । उभयोरेष संबन्धो न परोऽभिमतो मम ॥ स्वोज्जीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि । आत्मदास्यं हरेस्स्वाम्यं स्वभावं च सदा स्मरेति । सर्वसंशयनिर्मोक्ता **नारदश्च पुण्डरीकसंवादे** प्राह—*दासोऽहं वासुदेवस्य देवदेवस्य शार्ङ्गिणः । शङ्खचक्रगदापाणेस्त्रैलोक्यस्यैकचक्षुष इति । **ईश्वरसंहितायां महादेवश्चाह** *दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः । अतोऽहमपि ते दास इति मत्वा नमाम्यहमिति ॥ ५२ ॥

मम नाथ यदस्ति योऽस्म्यहं सकलं तद्धि तवैव माधव ।
नियतस्वमिति प्रबुद्धधीरथवा किं नु समर्पयामि ते ॥ ५३

ननु मया समर्पित इत्यत्र स्वशेषत्वानुसन्धानपूर्वकं स्वाधीनकर्तृत्वबुद्ध्या समर्पयसि चेत् *योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणेत्युक्तात्मापहारादिदोषः परिहृतो न स्यादित्यत्र स्वोक्ताभिप्रेतं विवृणोति—**मम नाथेति** ॥ अत्र जीवपरमात्मयाथात्म्यविषयः प्रमाणगणः पदद्वये प्रतिसन्धेयः । **यदस्तीति** स्वानुबन्धितया प्रमाणसिद्धगुणविग्रहादिसर्वसंग्रहः । **ममेति** व्यतिरेकोक्त्या देहात्मभ्रमादिः परिहृतः । **त्र्यक्षरब्रह्मणि**

तृतीयाक्षरविवक्षितं विविक्तात्मस्वरूपमाह—**योऽस्म्यहमिति । सकलं तत्**—आत्मात्मीयं तत्सर्वम् । **हि**शब्देन प्रमाणप्रसिद्धिर्द्योत्यते । **तव**—सर्वकारणतया सर्वरक्षकतया च प्रथमाक्षरप्रकृत्युक्तस्य । एवकारेण मध्यमाक्षरसिद्धमनन्यार्हत्वं प्रकाश्यते । **माधव**—श्रियः पते । एतेन निरुपाधिकसर्वशेषित्वं सूच्यते । चतुर्थीविवक्षितमाह—**नियतस्वमिति । नित्य**शेषभूतमित्यर्थः । **इति प्रबुद्धधीः**—एवं त्वत्प्रसादसन्धुक्षितैश्शास्त्रैः विकसितबुद्धिरिति भावः । शङ्कितदोषव्यवच्छेदाभिप्रायेणाह—**अथवेति । किंनु समर्पयामि ते!** सर्वस्वामिनः सर्वेश्वरस्य तव पूर्वमशेषभूतं मयेदानीं स्वातन्त्र्यस्वामित्वाभिमानपूर्वकं शेषीकर्तव्यं न किंचिदस्ति । अतः पूर्वश्लोककृतं समर्पणं त्वच्छेषत्वप्रतिपत्तिमात्ररूपम् ; न तु मदीयस्य त्वच्छेषत्वापादनरूपमिति भावः । अत्र पूर्वकृतस्वरूपसमर्पणानुशयेन तदेव प्रतिक्षिप्यत इति पक्षस्त्वप्रतिबुद्धानामात्मसमर्पणमभिप्रेत्योक्तिः । अस्य तु यामुनाचार्यस्य प्रागेव प्रतिबुद्धत्वादस्मदुक्तैव गमनिका । न खल्वद्यैव मया समर्पित इत्युक्तेरनन्तरमस्य तत्त्वप्रतिबोधः । एवं भरसमर्पणरूपप्रपत्तिपरः पूर्वश्लोकः । अयं तु तत्त्वविदां तस्यैवाकर्तव्यत्वस्थापनार्थ इति पक्षोऽपि * नियतस्वमिति प्रबुद्धधीः, * अवबोधितवानिमां यथेत्यादिभिर्न सङ्गच्छते । भरन्यासविधायकशास्त्रैश्च विरुध्येत । संबन्धज्ञानमात्रमेव प्रपत्तिरिति वादश्चात एव निरस्तो लोकविरुद्धश्च ॥

अप्रपन्नेऽपि संबन्धबुद्धिर्दासे हि दृश्यते । अमित्रे गत्यभावेन प्रपन्नेऽपि न दास्यधीः ॥

अन्यथा * तां त्वां दास इति प्रपन्न इति चेत्यादिभिरपि विरुध्येत । अतो मुमुक्षूणां भरसमर्पणरूपप्रपत्तौ संबन्धज्ञानमधिकारकोटौ स्थित्वाऽनुष्ठानकालेऽपि फलसङ्गकर्तृत्वादित्यागवत्तिष्ठतीति मन्तव्यम् ॥

महतामपि केषांचिदतिवादाः पृथग्विधाः । तत्तदर्थप्रशंसादितत्परत्वादबाधिताः ॥ ५३ ॥

अवबोधितवानिमां यथा मयि नित्यां भवदीयतां स्वयम् ।
कृपयैवमनन्यभोग्यतां भगवन्! भक्तिमपि प्रयच्छ मे ॥ ५४

यद्येवं मच्छेषत्वप्रतिबोधस्ते संजातः, तेन लब्धाधिकार उपायनिष्पत्त्या मुक्तो भविष्यसि; अद्य पुनरादेहपातात्किमपेक्षितमित्यत्र त्वत्प्राप्तित्वराजननीं त्वदेकभोग्यत्वानुगुणभक्तिं देहीत्याह—**अवबोधितवानिति** ॥ त्वमेव ह्यनभिज्ञं मां ज्ञानिनं कृतवानिति कृतज्ञताप्रकाशनमिदम् । **इमां**—दृढप्रमाणप्रमितामदृष्टपूर्वतयाऽद्भुतत्वेन स्वादुतयाऽनुभूयमानां निरपेक्षकर्तृत्वादिदूरोज्झितां चेति भावः । **मयि नित्यां भवदीयतां**—त्वच्छरीरभूते मयि कालपरिच्छेदरहितां त्वच्छेषतामित्यर्थः । **स्वयं**—कृपानिविष्टस्त्वमेवेति यावत् । कृपयैवमितिपाठस्समीचीनः, यथाशब्दप्रतिनिर्देशस्य अपेक्षितत्वात् । **अनन्यभोग्यतां**—भगवद्व्यतिरिक्तं भोग्यं यस्य सोऽन्यभोग्यः, तद्व्यतिरिक्तोऽनन्यभोग्यः, तादृशताम् । परमभक्तिगोचरत्वं तत्प्रदातृत्वं च तव युक्तमित्यभिप्रायेण संबोधयति—**भगवन्निति** । **भक्तिमपि**—त्वयि प्रकृष्टां प्रीतिं च । तदिदमुच्यते * परमात्मनि यो रक्तो विरक्तोऽपरमात्मनीति । कृपयैतदिति पाठे त्वेनदिति वाक्यभेदः । एतदनन्यभोग्यतामिति समस्तं वा भक्तिविशेषणम् । स्वव्यतिरिक्तभोग्यतारहितमित्यर्थः । **भक्तिमपि प्रयच्छ मे**—अत्र * या प्रीतिरविवेकानामित्यादिश्लोकद्वयं भाव्यम् । ननु परमैकान्तिनां भगवति याच्ञा निषिध्यते । * निराशीःकर्मसंयुक्तं सात्त्वतं चाप्यकल्पथमिति चोक्तम् । सत्यम्; अहितं न याच्यो भगवानिति हि तत्र तात्पर्यम् । तदभिप्रायेण ह्युच्यते * अन्नं पानं धनं वस्त्रमायुरारोग्यमास्पदम् । आपद्यपि न याचेत पूजकः पुरुषोत्तमम् ॥ नाप्रपन्ने ददाम्येतद्याचितोऽपि दिनेदिने । अयाचतोऽपि तत्सर्वं प्रपन्ने विदधाम्यहमिति । तथा * याचितोऽपि सदा भक्तैर्नाहितं कारयेद्धरिः । बालमौ पतन्तं

तु माता किल निवारयेदिति च । संहितान्तरे च *तत्पादभक्तिज्ञानाभ्यां फलमन्यत् कदाचन । न याचेत्प्रणतो विष्णुं याचनान्नश्यति ध्रुवमिति । अत्र भक्तिज्ञानवचनं वक्ष्यमाणभागवतकटाक्षादेरप्युपलक्षणम् । अवश्यापेक्षितविषये तु भगवन्तमेव याचेतेत्यपि नियम्यते ॥ ५४ ॥

तव दास्यसुखैकसङ्गिनां भवनेष्वस्त्वपि कीटजन्म मे ।
इतरावसथेषु मा स्म भूदपि मे जन्म चतुर्मुखात्मना ॥ ५५

न केवलं त्वद्भक्तिरेव मे प्रार्थनीया । तद्विवृद्धये तत्फलत्वेन च त्वदीयेषु भक्तिस्तत्सन्निकर्षश्च मे स्यादित्यभिप्रायेणाह—**तव दास्येति** ॥ उक्तं हि तत्सङ्गनिफलं **च्यवननहुषसंवादे**—*संभाषा दर्शनं स्पर्शः कीर्तनं स्मरणं नतिः । पावनानि किलैतानि साधूनामिति शुश्रुम ॥ सेव्याः श्रियोऽर्थिभिस्सन्तः पुण्यतीर्थफलोपमाः । क्षणोपासनयोगोऽपि न तेषां निष्फलो भवेत् ॥ साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः । कालेन फलदं तीर्थं सद्यस्साधुसमागम इति । एवं *सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गमम् । सद्भिर्विवादं मैत्रीं च नासद्भिः किंचिदाचरेत् ॥ अहन्यहनि धर्मस्य योनिस्साधुसमागमः । मोहजालस्य योनिर्हि मूढैरेव समागमः ॥ वासो यथा रागवशं प्रयाति तथा स तेषां वशमभ्युपैति । तत्सन्निकर्षे परिवर्तितव्यं विद्याधिकाश्चापि निषेवणीयाः ॥ सुवर्णतां गच्छति सन्निकर्षात् नीलः खगो मेरुमिवाश्रयन् वै इत्यादि वचनानि द्रष्टव्यानि । **तव दास्यसुखैकसङ्गिनां**—त्वत्कैङ्कर्यप्रीतिमात्रासक्तानामित्यर्थः । एतेन *एकान्तशीलस्य दृढव्रतस्य पञ्चेन्द्रियप्रीतिनिवर्तकस्य । अध्यात्मविद्यागतमानसस्य मोक्षो ध्रुवो नित्यमहिंसकस्येत्यादिप्रसिद्धं वैषयिकसुखवैमुख्यं व्यज्यते । ईदृशानां स्वेनान्यैश्च बहुमन्तव्यत्वं **भगवतोक्तं**—*मद्भक्तजनवात्सल्यं पूजायां चानुमोदनम् । स्वयमभ्यर्चनं चैव ममार्थे उम्भवर्जनम् ॥ मत्कथाश्रवणे भक्तिस्त्वरनेत्राङ्गविक्रिया । ममानुस्मरणं नित्यं यच्च मां नोपजीवति ॥ भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते । स विप्रेन्द्रो मुनिः श्रीमान् स यतिस्स च पण्डितः ॥ तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहमिति । **मोक्षधर्मे** च ब्रह्मादिभिरपि, *यत्प्रयुज्यते तत्सर्वं देवदेवस्य चरणावुपतिष्ठत इत्युक्त्वाऽनन्तरमुच्यते—*याः क्रियास्संप्रयुक्तास्स्युरेकान्तगतबुद्धिभिः । तास्सर्वाश्शिरसा देवः प्रतिगृह्णाति वै स्वयम् ॥ अहो ह्येकान्तिनस्सर्वान्प्रीणाति भगवान् हरिः । विधिप्रयुक्तां पूजां च गृह्णाति शिरसा स्वयमिति । ईदृशभागवताभिमानगोचरत्वाय स्थानान्तरगमनानर्हानन्यगतित्वविवक्षया **कीटजन्मापी**त्युक्तम् । *शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत इत्युक्तमुत्कृष्टजन्म तिष्ठतु । *पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदमित्यादिपूक्तमपकृष्टजन्मापि त्वदिष्टविनियोगसिद्धत्वाच्छेषत्वकाष्ठावेदिनो ममालम् । भागवताभिमानविषयभूतदेशवासित्वं तत्कैङ्कर्यं च ममापेक्षितमिति तात्पर्यम् । अपिशब्दस्तत्र गाढाभिसन्धिं द्योतयति । यथोक्तं—*मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका भवेत् । तस्मान्मद्भक्तभक्ताश्च पूजनीया विशेषत इति । इतिहाससमुच्चये च *तस्माद्विष्णुप्रसादाय वैष्णवान्परितोषयेत् । प्रसादसुमुखो विष्णुस्तेनैव स्यान्न संशय इति ।

शाण्डिल्यस्मृतौ च *सिद्धिर्भवति वा नेति संशयोऽच्युतसेविनाम् । न संशयोऽत्र तद्भक्तपरिचर्यारतात्मनाम् ॥ केवलं भगवत्पादसेवया विमलं मनः । न जायते यथा नित्यं तद्भक्तचरणार्चनादिति । **श्रीपोष्करे** च *दुर्लभा भगवद्योगभाविनो भुवि मानवाः । तद्दर्शनात्तदालापात्सुलभं शाश्वतं पदमिति । एवम् *आराधनानां सर्वेषां विष्णोराराधनं परम् । तस्मात्परतरं प्रोक्तं तदीयाराधनं परम् ॥ तस्य यज्ञवराहस्य विष्णोरमिततेजसः । प्रणामं येऽपि कुर्वन्ति

तेषामपि नमोनम इत्यादि द्रष्टव्यम् । **इतरावसथेषु** अभागवतनिवासेषु । **चतुर्मुखात्मनाऽपि जन्म मा स्म भूत्**—किं पुनर्मनुष्याद्यात्मनेति तात्पर्यम् । त्वन्नाभिपद्मे चतुर्मुखात्मनाऽपि जन्म मदभिसन्धिविरुद्धमित्यभिप्रायेण पुनरपि **मे** इत्युक्तम् । एतेन भागवतानामभागवतसंसर्गः परिहार्य इत्युक्तं भवति । तथा च बह्वृचा आमनन्ति * नेदंविदनिदंविदा समुद्दिशेन्न सह भुञ्जीत न वसथमाविश्यादिति । स्मर्यते च * शैवान्पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान् । विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेदिति । * असतां दर्शनात् स्पर्शात् सम्पर्काच्च सहासनात् । धर्माचाराः प्रणश्यन्ति यथा सैकतमम्भसेति च । **शाण्डिल्यस्मृतौ** च * मूढैः पापरतैः क्रूरैस्सदागमपराङ्मुखैः । संबन्धं नाचरेद्भक्तिर्नश्यत्येतैस्तु सङ्गमादिति । **वैष्णवे** च पुराणे * पुंसां जटाभरणमौण्ड्यवतां वृथैव मोघाशिनामखिलशौचबहिष्कृतानाम् । तोयप्रदानपितृपिण्डविनाकृतानां संभाषणादपि नरा नरकं प्रयान्तीति । अन्यत्र च * वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसमिति । तथा * अद्यप्रभृति हे लोकाः ! यूयं यूयं वयं वयम् । अर्थकामपरा यूयं नारायणपरा वयम् ॥ नास्ति सङ्गतिरस्माकं युष्माकं च परस्परम् । वयं तु किङ्करा विष्णोर्यूयमिन्द्रियकिङ्करा इति । पितृभिश्चैवमुक्तं * मा जनिष्ट स नो वंशे जातो वा द्राग्विपद्यताम् । आजन्ममरणं यस्य वासुदेवो न दैवतमिति । * अवैद्यः प्राकृतः प्रोक्तो वैद्यो वैष्णव उच्यते । अवैद्येन न केनापि वैद्यः किञ्चित्समाचरेदिति ॥ ५५ ॥

सकृत्त्वदाकारविलोकनाशया तृणीकृतानुत्तमभुक्तिमुक्तिभिः ।
महात्मभिर्मामवलोक्यतां नय क्षणेऽपि ते यद्विरहोऽतिदुस्सहः ॥ ५६

एवमभागवतसंसर्गपरिहारेण भागवतैस्सन्निकर्षस्तव भवतु, तैस्ते किं साध्यमित्यत्राह—**सकृदिति** ॥ सदा दर्शनस्यापेक्षितत्वेऽपि सकृद्विलोकनोक्तिस्तस्य पुरुषार्थभूयस्त्वव्यञ्जनार्था । तथा चायोध्यावासिनां वाक्यम्—* अलमद्य हि भुक्तेन परमार्थैरलं च नः । यथा पश्याम निर्यान्तं रामं राज्ये प्रतिष्ठितम् ॥ *इच्छामो हि महाबाहुं रघुवीरं महाबलम् । गजेन महता यान्तं रामं छत्त्रावृताननमिति । तथा * मेघश्यामं महाबाहुं स्थिरसत्त्वं दृढव्रतम् । कदा द्रक्ष्यामहे रामं जगतश्शोकनाशनम् ॥ दृष्ट एव हि नश्शोकमपनेष्यति राघवः । तमस्सर्वस्य लोकस्य समुद्यन्निव भास्करः इति । * यश्च रामं न पश्येत्तु यं च रामो न पश्यति । निन्दितस्स भवेल्लोके स्वात्माऽप्येनं विगर्हतीति चोक्तम् । **अनुत्तमभुक्तिः**—ब्रह्मादीनां भुक्तिः । सा च मुक्तिश्च यैस्तृणीकृते अनादृते तैस्तृणीकृतानुत्तमभुक्तिमुक्तिभिः । अनुत्तमशब्दस्य मुक्तावन्वयेऽपि न मुक्त्यन्तरं व्यवच्छेद्यं, मुक्तितारतम्यस्य प्रागेव निरस्तत्वात् । भगवन्तमनुभवनां तदन्यतृणीकारः श्रूयते * किं प्रजया करिष्यामो येषां नायमात्मेत्यादि । पुराणे चोक्तं * पत्युः प्रजानामैश्वर्यं पशूनां वा न कामये । अहं कदम्बो भूयासं कुन्दो वा यमुनातट इति । निदर्शनविवक्षया चोच्यते * तृणं नारी विरक्तस्य तृणं शूरस्य जीवितम् । तृणं ब्रह्मविदो विश्वं निस्पृहस्य नृपस्तृणमिति । * महात्मानस्तु मां पार्थ, * स महात्मा सुदुर्लभ इति भगवदुक्तं सूचयन्नाह—**महात्मभिरिति** । उज्जीवनत्वे पुरुषार्थत्वे च भूयस्त्वापेक्षया बहुवचनम् । **मां**—त्वत्कटाक्षेक्षणात्पूर्वं राजसतामसदृष्टिगोचरतया दूषितमिदानीं त्वदवेक्षणेन प्रतिबुद्धमिति भावः । **अवलोक्यताम्**—अवलोकनयोग्यताम् । तिष्ठतु तद्भवनेषु जन्म; तत्कटाक्षविषयत्वमात्रमपि मे पुरुषार्थ इति चाभिप्रेतम् । प्रख्यातो हि भागवतावलोकनप्रभावः * यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रतिष्ठिता । तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैरिति । **नय**—एतावदुपकर्ता त्वमेव शेषं पूरयेति भावः । **यथा त्वया तद्विश्लेषो दुस्सहः, तथा मया तदवलोकनविरहोऽतिदुस्सह इत्यभिप्रायेणाह—क्षणेऽपि ते यद्विरहोऽति-**

दुस्सह इति । तदिदमामनन्ति **तैत्तिरीयाः**—*सन्धां च यौं सन्दधे ब्रह्मणैषः । रमते तस्मिन्नुत जीर्णे शयाने । नैनं जहात्यहस्सु पूर्व्येष्विति । स्वयमप्याह—*न त्यजेयं कथंचन, *ज्ञानी त्वात्मैव मे मतमिति । आहुश्च महर्षयः—*पराङ्मुखानां गोविन्दे विषयासक्तचेतसाम् । तेषां तत्परमं ब्रह्म दूराद्दूरतरे स्थितम् ॥ तन्मयत्वेन गोविन्दे ये नरा न्यस्तचेतसः । विषयत्यागिनस्तेषां विज्ञेयं च तदन्तिके इति । तथा *नारायणेति यस्यास्ये वर्तते नाम मङ्गलम् । नारायणस्तमन्वास्ते वत्सं गौरिव वत्सलेति । *वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरिरिति च । अत्र विरहशब्देन सर्वव्यापिनस्सर्वज्ञस्य भक्तानां स्वविग्रहाद्यनुभवविच्छेदो विवक्षितः । ननु तद्विरहो विश्लेषः । दुस्सहशब्देन खेदो न विवक्षितः, सर्वशक्तेर्हेयप्रत्यनीकस्य तदयोगात् । अतस्तादृशावस्थावतां स्वविश्लेषं नोत्पादयतीत्येव तात्पर्यम् । यत्कर्तृक-वियोगस्ते निराकर्तुमिष्टतम इति वा विवक्षितम् । *अवबोधितवानित्यादिश्लोकत्रयेण स्वयंप्रयोजनोत्तरकृत्ये काम्य-निषिद्धसंभेदप्रसङ्गोऽपि निरस्तः ॥ ५६ ॥

न देहं न प्राणान्न च सुखमशेषाभिलषितं न चात्मानं नान्यत्किमपि तव शेषत्वविभवात् ।
बहिर्भूतं नाथ! क्षणमपि सहे यातु शतधा विनाशं तत्सत्यं मधुमथन! विज्ञापनमिदम् ॥ ५७

एवमिष्टं सर्वं दास्यामि ; अनिष्टं त्विह किं ते निवर्तनीयमित्यत्राह—**न देहमिति** ॥ यद्वा भागवतकटाक्षलब्धरुचि-विशेषात् सपदि सर्वं विरोधिवर्गं संग्रहेण निर्दिश्य तन्निवृत्तिमभ्यर्थयते । **अशेषाभिलषितमित्येतत्** देहादिषु सर्वेष्व-न्वेति ; अन्येषां सुखार्थत्वात् प्रधानभूते सुखमात्रे वा । **आत्मानं**—स्वस्वरूपमित्यर्थः । पुत्रमित्रगृहक्षेत्रादिकं दूरतो निरस्तमित्यभिप्रायेणाह—**नान्यत्किमपीति । तव शेषत्वविभवाद्बहिर्भूतं**—त्वच्छेषत्वफलभूतकैङ्कर्याख्यसमृद्धेरनुपयुक्त-मित्यर्थः । न हि विश्वपतेरशेषभूतं किंचित् कदाचित् संभवति । **नाथ**शब्देन सर्वशेषित्वमिह विवक्षितम् । **क्षणमपि सहे** इत्येतत् न देहमित्यादौ सर्वत्र योज्यम् । आत्माभिमानार्हतया दुस्त्यजपरिग्रहस्य देहादेर्ब्रह्मादिस्थावरान्तसर्वापे-क्षितस्य प्रभूतस्याल्पस्य वा सुखस्य तद्भोक्तुः *आत्मार्थे पृथिवीं त्यजेदिति स्वेतरसकलपरित्यागेनापि परिग्राह्यस्यात्मनः तदनुबन्ध्यैश्वर्यादेरपि प्रत्येकमसह्यत्वद्योतनाय नञ्प्रयोगावृत्तिः । अत्र *यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना, *न देवलोकाक्रमणं नामरत्वमहं वृणे । ऐश्वर्यं वाऽपि लोकानां कामये न त्वया विना, *न च सीता त्वया हीना न चाहमपि राघव । मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ ॥ *नहि मे जीवितेनार्थो नैवार्थैर्न च भूषणैः । वसन्त्या राक्षसीमध्ये विना रामं महारथमित्यादिपूक्तः प्रकारोऽनुसन्धेयः । एवमसह्यत्वादेव तेषामत्यन्तनिवृत्तिः कार्येत्यभिप्राये-णाह—**या तु शतधा विनाशमिति** । निरवयवस्य नित्यस्यात्मनश्शतधा विनाशप्राप्तययोगात् कैङ्कर्यविरुद्धावस्थानिवर्तन-मेवात्र विवक्षितम् । ननु सर्वेष्वसंभावितार्थत्वादहृदयमेतद्वाक्यमित्यत्राह—**तत्सत्यमिति** । न हि त्वदन्य ईदृशप्रबल-विरोधिनिवर्तनक्षम इति सूचयति—**मधुमथनेति** । पूर्वं *शृणु विज्ञापनमेकमित्युक्तम् ; तद्वदिदमपि दयनीयत्वानुबन्धि-विज्ञापनमित्याह—**विज्ञापनमिदमिति** । तदिदं विज्ञापनं सत्यमिति समानाधिकरणं वा । विज्ञापितमिति केचित्पठन्ति । मुमुक्षुणा भगवत्कैङ्कर्यानुपयुक्तपरिग्रहस्त्याज्य इत्युक्तं भवति ॥ ५७ ॥

दुरन्तस्यानादेरपरिहरणीयस्य महतो निर्हीनाचारोऽहं नृपशुरशुभस्यास्पदमपि ।
दयासिन्धो बन्धो निरवधिकवात्सल्यजलधे तव स्मारंस्मारं गुणगणमितीच्छामि गतभीः ॥ ५८

यमो वैतान् यातयतीति न भो इत्याह न खलु भागवता यमविषयं गच्छन्ति किं तर्हीं हैवेषां केचिदुपक्लेशा भवन्ति काणा भवन्तीत्यारभ्य *तानुपक्लेशान्सहेरन् इति । **वैष्णवे** च पुराणे *स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले । परिहर मधुसूदनप्रपन्नान्प्रभुरहमन्यनृणां न वैष्णवानामिति । **वामने** च *देवं शार्ङ्गधरं विष्णुं ये प्रपन्नाः परायणम् । न तेषां यमसालोक्यं न च ते नरकौकस इति । **श्रीनारसिंहे** *पुण्डरीकाक्ष देवेश नरसिंह त्रिविक्रम । त्वामहं शरणं प्राप्त इति यस्तं समुद्धरेति । तथाऽन्यत्र *यस्मिन् कस्मिन् कुले जाता यत्र कुत्र निवासिनः । वासुदेवरता नित्यं यमलोकं न यान्ति त इति । **एवं सति**—त्वयि भरस्वीकारार्हे मयि च भरन्यासवाक्यप्रयोक्तरि स्थिते सतीत्याशयः । अहमपीत्यनेन पूर्वोक्तसर्वदोषाकरोऽपि छद्मस्तुतिकर्ताऽपीति सूच्यते । यद्वा यथा प्राचीनाः पूर्णप्रपत्तिनिष्ठाः त्वया भरत्वेन स्वीकृताः तथाऽहमपीति भावः । **तव**—प्रस्तुतप्रभूतभरस्वीकारे प्रातस्य समर्थस्य च । न ह्येतादृशं भरं सोढुमहं वाऽन्यो वा त्वद्व्यतिरिक्तः कश्चित्समर्थ इत्यवधारणाभिप्रायः । **हि**शब्देन *मनीषिणो हि ये केचिद्यतयो मोक्षकाङ्क्षिणः । तेषां वै छिन्नतृष्णानां योगक्षेमवहो हरिः ॥ *स्थिते मनसीत्यादिप्रमाणप्रसिद्धिर्ह्योत्यते ; स्वाङ्गीकारस्य सिद्धवत्कारं वा व्यनक्ति । **भरः**—*रक्षितव्यास्त्वया राजन् गर्भभूतास्तपोधना इति महर्षिवाक्यप्रकारेण मद्व्यापारनिरपेक्षं रक्षणीय इति भावः ॥ ६० ॥

जनित्वाऽहं वंशे महति जगति ख्यातयशसां शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिविदाम् ।
निसर्गादेव त्वच्चरणकमलैकान्तमनसामधोऽधः पापात्मा शरणद निमज्जामि तमसि ॥ ६१ ॥

*अहमपि तवैवास्मि हि भर इत्युक्ते महायोगिकुलप्रसूतत्वमपि हेतुरस्तीत्यभिप्रायेणाह—**जनित्वेति** ॥ यद्वा योगिवंशप्रसूतेन त्वया कथमत्यन्ताकिञ्चनत्वं पुरस्कृत्य मय्येव भरन्यासः क्रियत इत्यत्र प्रागुक्तमकिञ्चनत्वमेवासमञ्जवदभिजनविरुद्धस्वभावनयाऽपि स्थापयति ॥ **जनित्वा**—*एतद्धि दुर्लभतरं लोके जन्म यदीदृशमित्युक्तदुर्लभतरं जन्म लब्ध्वाऽपीति भावः । **अहमित्यनेनास्मिन्वंशेऽहमेक एव विपरीतवृत्त इति व्यज्यते । **वंशे महति**—अमानित्वाद्यात्मगुणसम्यग्वृत्तविद्यादिभूयिष्ठे महाभागवतकुले । *भूतले श्लाघ्यमेतद्धि कुलं विष्णुपरिग्रहमिति च स्मर्यते । ईदृशवंशजन्मनः कृच्छ्रलभ्यत्वं **वाराहे** प्रोक्तं *वर्णाश्रमाचारपरस्सप्तजन्मानि यो द्विजः । एकान्तसूर्यभक्तस्स्यात्स विप्रस्सप्तजन्मसु ॥ ततस्तत्पुण्यमाहात्म्याद्रुद्रभक्तो भविष्यति । तथैव सप्त जन्मानि शिवभक्तिपरायणः ॥ महता तेन पुण्येन वैष्णवत्वं लभेत सः । विष्णुभक्तिपरस्तद्वत्सप्तजन्मानि मानवः ॥ एकान्तभगवद्याजी विप्रो भागवतान्वये । ततस्स लभते जन्म देवैरत्यन्तदुर्लभमिति । **जगति ख्यातयशसां**—*यद्वंशोऽधीत्य वेदानित्याद्युक्तप्रकारेणानुकूलप्रतिकूलरूपसर्वजनप्रसिद्धकीर्तिनाम् । **शुचीनां**—*योऽर्थे शुचिस्स हि शुचिर्न मृद्वारिशुचिश्शुचिः, *क्षेत्रज्ञस्येश्वरज्ञानात् विशुद्धिः परमा मतेत्यादिप्रसिद्धसर्वप्रकारशुद्धिमताम् । एतेन प्रयोजनान्तरमज्ञरूपाशुद्धिराहित्यं चाभिप्रेतम् । **युक्तानाम्**—आत्मावलोकनक्षमाणाम्, यद्वा त्वया सह नित्ययोगमाशंसमानानाम्, त्वदनुभवविश्लेषरहितानामिति वा । **गुणपुरुषतत्त्वस्थितिविदां**—त्रिगुणात्मकप्रकृतेः पुरुषस्य च तत्त्वस्थितिं याथात्म्यप्रतिष्ठां विजानताम् । यद्वा प्रकृतिपुरुषतत्त्वयोः स्वरूपस्वभावादिव्यवस्थितिवेदिनामित्यर्थः । **निसर्गा**दित्यादि जन्मप्रभृतित्वच्चरणारविन्दनियतभक्तीनामित्यर्थः । ईदृशव्यतिरिक्तो हि निन्दितः पितृभिः *मा जनिष्टेत्यादिना । अत्र युक्तानामित्यादिपदत्रयं स्वपूर्वेषु यथार्हं कर्मयोगज्ञानयोगभक्तियोगान्वयं वा विवक्षति । पापेष्वात्मा बुद्धिर्यस्य स **पापात्मा** ; यद्वा पापमेव स्वरूपं स्वभावो यस्य सोऽहं पापात्मेति स्वनिन्दाप्रकर्षार्थ

औपचारिकः प्रयोगः । स्मर्यते हि *मानुष्यं प्राप्य लोकेऽस्मिन् मूको वा बधिरोऽपि वा । नापक्रामति संसारात्स खलु ब्रह्महा भवेदिति । **वाराहे** च *लब्ध्वा तु मानुषं देहं पञ्चभूतसमन्वितम् । मामेव न प्रपद्यन्ते ततो दुःखतरं नु किमिति । **नारसिंहे** च *शुभमिदमुपलभ्य मानुषत्वं सुकृतशतेन वृथेन्द्रियार्थहेतोः । रचयति कुरुते न मोक्षमार्गं स दहति चन्दनमाशु भस्महेतोरिति । अधिकारानुरूपमुपायं त्वमेव प्रयच्छेत्यभिप्रायेण संबोधयति—**शरणदेति** । यद्वा मत्स्वभावादसत्कल्पमपि महायोगिवंशजननं त्वत्स्वभावात्त्वमेव प्रस्तुतविषयमच्छिक्षणव्याजतया स्वीकृत्योपायपूर्तिं कुरुष्वेति भावः । **तमस्यधोऽधो निमज्जामी**त्यन्वयः । तमश्शब्द इह सम्यक्प्रकाशविरुद्धमज्ञानं चाभिसन्धत्ते । तमोगुणमयी प्रकृतिर्वा । तमसस्समुद्रस्थानीयत्वमभिप्रेत्य मज्जनशब्दः । एतेन स्वपरप्रकाशराहित्यं च सूच्यते । मद्वंश्यास्त्वदनुभवरसे निमज्जन्ति, अहं तु तमसि निमज्जामीति निर्वेदविशेषश्च । *महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया । प्राप्तुं दुःखोदधेः पारं त्वर यावन्न भिद्यत इति संसारतरणहेतुतया त्वद्दत्तेन शरीरेणैव संसारे निमज्जामीत्युक्तं भवति । अधोऽध इत्यनेन स्वेनान्यैश्च स्वस्याशक्योद्धरणत्वमभिप्रेतम् । निमज्जामीति वर्तमानव्यपदेशः पापवशात्तादृशस्य तमसोऽद्याप्यनुवृत्तिं द्योतयति । एतेन स्वयमुपायान्तरानर्हस्य मे त्वत्प्राप्त्यर्थं सर्वंसहे त्वयि भरन्यासश्छद्मस्तुतिनिबन्धोऽपि त्वयैव यथावस्थितः कार्य इति विज्ञापितं भवति ॥ ६१ ॥

अमर्यादः क्षुद्रश्चलमतिरसूयाप्रसवभूः कृतघ्नो दुर्मानी स्मरपरवशो वञ्चनपरः ।
नृशंसः पापिष्ठः कथमहमितो दुःखजलधेरपारादुत्तीर्णस्तव परिचरेयं चरणयोः ॥ ६२

यदि सर्वशक्तिः परमकारुणिकस्त्वमकिञ्चनस्य प्रपत्तिवाक्यमुखरमुखस्य मम शिक्षणे च न प्रवर्तसे, तदा महत्तरविपरीतगुणगणभराक्रान्तोऽहं कथं संसारजलधिमुत्तीर्य त्वत्पादपरिचर्यां प्राप्नुयामिति प्रागुक्तकार्पण्यस्थेन स्वदोषाद्धीतस्य शरण्यगुणैराश्वसनीयत्वं द्रढयितुं च *पापात्मेति संगृहीतमेव विस्तृणीते—**अमर्याद इति** ॥ *वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च । वेषवाग्वृत्तिसारूप्यमाचरन्विचरेदिहेत्यादिसूक्तां श्रुतिस्मृतिमर्यादामतिक्रान्तोऽहम् । **क्षुद्रः**—उपायदारिद्र्यहेयपुरुषार्थकार्पण्यादियुक्तः । *क्षुद्रो दरिद्रे कृपणे नृशंसेऽल्पनिकृष्टयोरिति निघण्टूक्तेषु नृशंसत्वस्य पृथगुक्तत्वाच्छेषं यथोचितं ग्राह्यम् । *पण्डितैरर्थकार्पण्यात्पण्यस्त्रीभिरिव स्वयम् । आत्मा संस्कृत्यसंस्कृत्य परोपकरणीकृतः ॥ **चलमतिः**—बहुभ्यो बहुशश्च सम्यक्छ्रुतेष्वपि शास्त्रेष्वप्रतिष्ठितबुद्धिः । असदर्थेषु तु *दृढपूर्वश्रुतो मूर्खो धर्माणामविशारदः । वृद्धानपृच्छन्संदेहानन्धः श्वभ्रमिवर्च्छतीत्यादिपूक्तं स्थिरमतित्वमपि हि दोषः । *व्यवस्थितः प्रशान्तात्मा कुपितोऽप्यभयङ्करः । अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्कर इत्यादिपि ग्राह्यम् । **असूयाप्रसवभूः**—गुणेषु दोषाविष्करणमसूया । तद्वतः प्रकारं *राजन्! सर्षपमात्राणि परच्छिद्राणि पश्यसि । आत्मनो मेरुमात्राणि पश्यन्नपि न पश्यसीत्यादिभिराहुः । तस्याः प्रथमप्रादुर्भावस्थानम् । *असूयकायानृजवे जनाय न मां ब्रूयाः, *असूयकाय मां मा दाः *न च मां योऽभ्यसूयतीत्यादिष्वसूयावान् विद्याप्रदानादिषु परिहरणीय उच्यते । **कृतघ्नः**—त्वदन्यैस्त्वया च परमोपकारकेण कृतमनन्तमुपकारमपह्नुत्यापकारेष्वपि प्रवृत्त इति भावः । स चासौ सर्वेभ्यः पापकृद्भ्यस्समधिकस्स्मर्यते—*गोघ्ने चैव सुरापे च चोरे भग्नव्रते तथा । निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ सत्कृताश्च कृतार्थाश्च मित्राणि न भवन्ति ये । तान्मृतानपि क्रव्यादाः कृतघ्नं नोपभुञ्जत इति । एतस्य कल्मषनिबर्हणार्थप्रायश्चित्तसंभवेऽपि संसर्गानर्हताऽपि स्मर्यते—*शरणागतबालस्त्रीहिंसकान्त्संवसेन्न तु । चीर्णव्रतानपि सतः कृतघ्नसहितानिमानिति । **दुर्मानी**—निकृष्टमप्यात्मानम्

*ईश्वरोऽहमहं भोगीत्यादिप्रकारेणात्युत्कृष्टं मन्यमानः; तेन ह्युत्कृष्टजनावमानादौ शिशुपालादिवत्प्रवर्तते। **यथाऽऽह शाण्डिल्यः**—*मूर्खाश्च पण्डितंमन्याः अधर्मा धार्मिका इव। धर्मयुक्तान्प्रबाधन्ते साधूनां लिङ्गमास्थिता इति। **आह च विदुरः**—*अतिमानोऽतिवादश्च तथाऽत्याशा नराधिप!। क्रोधश्चातिविविक्तसा च मित्रद्रोहश्च तानि षट्॥ एत एवासयस्तीक्ष्णाः कृन्तन्त्यायूंषि देहिनाम्। एतानि मानवान् घ्नन्ति न मृत्युर्भद्रमस्तु त इति।

स्मरपरवशः—धर्मविरुद्धकामोपभोगश्रद्धाविह्वलः। अत एव ह्यस्वतन्त्रस्य स्वातन्त्र्याभिमानोऽपि जडकृत्यम्। *अङ्गारसदृशी नारी घृतकुम्भसमः पुमान्। तस्मान्नारीषु संसर्गं दूरतः परिवर्जयेत्, *रागाद्यपेतं हृदयं वागदुष्टाऽनृतादिना। हिंसादिरहितः कायः केशवाराधनं त्रयम्, *परस्त्रीषु जात्यन्धाः परदारेष्वपुंसकाः। परीवादेषु ये मूकाः तेऽतीव दयिता ममेत्यादिकमत्र भाव्यम्। **वञ्चनपरः**—परद्रव्यापहाराद्यर्थं दम्भवृत्त्या स्वदोषापह्नवेन त्वदितरानिव स्वतस्सर्वज्ञं त्वामपि विप्रलब्धुकामः। ईदृशानां सर्वेषु कृत्येषु बहिष्कारस्स्मर्यते—*पाषण्डिनो विकर्मस्थान्बैडालव्रतिकान् शठान्। हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्, *धर्मध्वजस्सदा लुब्धश्छाद्मिको लोकडाम्भिकः। बैडालव्रतिको ज्ञेयो हिंस्रस्सर्वाभिसन्धकः, *अधोदृष्टिर्नैकृतिकस्स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च बकव्रतचरो द्विज इति। **नृशंसः**—आसन्नेषु व्याघ्रादिवत् क्रूरकर्मा। *आनृशंस्यं परो धर्म इति त्वदुक्तविपरीतस्वभावः। एवंप्रकारतया मम *पापात्मेति पूर्वोक्तमुपपन्नमित्यभिप्रायेणाह—**पापिष्ठ इति**। यद्वा प्रदर्शनार्थं किञ्चिदुक्तम्। *अनृतं च समुत्कर्षे राजगामि च पैशुनम्। गुरोश्चालीकनिर्बन्धस्समानि ब्रह्महत्यया, *पिशुनो यश्च विप्राणां रन्ध्रान्वेषणतत्परः। दद्यान्मर्मान्तिकं शोकं सोऽक्षयं नरकं व्रजेत्, *दह्यमानास्सुतीव्रेण नीचाः परयशोग्निना। अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते, *यो राज्ञः प्रतिगृह्यैव शोचितव्ये प्रहृष्यति। स न जानाति मूढात्मा नरकानेकविंशतिम्, *कृष्णाजिनप्रतिग्राही रेतसश्चैव विक्रयी। गजच्छायासु भोक्ता च न भूयः पुरुषो भवेत्, *वादेन ब्राह्मणं जित्वा हृष्टो भवति यो द्विजः। श्मशाने पादपस्य स्याद्ध्वाङ्क्षनिषेवितः, *गुरुं त्वङ्कृत्य हुंकृत्य विप्रं निर्जित्य वादतः। अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः, *यो मोहादथवाऽऽलस्यादकृत्वा देवतार्चनम्। भुङ्क्ते स याति नरकान् सूकरेष्वपि जायते, *पितरं मातरं वाऽपि तथा दत्ताभयं सुतम्। त्यजेच्च तरुणीं भार्यां तं विद्याद्ब्रह्मघातुकम्, *राक्षसाः कलिमाश्रित्य जायन्ते ब्रह्मयोनिषु। ब्राह्मणानेव बाधन्ते विष्णुभक्तान्विशेषतः, *विद्याचोरो गुरुद्रोही वेदेश्वरविदूषकः। त एते बहुपाप्मानः सद्यो दण्ड्या इति श्रुतिः, *परद्रोहेष्वभिध्यानं मनसाऽनिष्टचिन्तनम्। वितथाभिनिवेशश्च त्रिविधं मानसं स्मृतम्॥ पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः। अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥ अदत्तानामुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च शारीरं त्रिविधं स्मृतमित्यादिपूक्तान्यतिघोराण्यनन्तानि मे पापानि सन्तीत्यभिप्रायः। **अहं** प्रागुक्तप्रकारेण त्वत्परिचर्यामिच्छन्निव भावयन्। अथवा उक्तानुक्तदोषसहस्रसंपूर्णतया *दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेत्यादिप्रतिपादितविपरीताकार इति भावः।

कथं—न कथंचिदित्यापाततोऽर्थः। ईदृशोऽपि शरणागतवत्सलं त्वामाश्रितः क्षत्रबन्धुवृत्रादिनयान्न विनश्यतीति गूढोऽभिप्रायः। तथा हि शरण्यस्त्वयमाह—*अपि चेत्सुदुराचार इत्यारभ्य *न मे भक्तः प्रणश्यतीति। **श्रीवैष्णवधर्मशास्त्रे** च—*अपि पापेष्वभिरता मद्भक्ताः पाण्डुनन्दन। मुच्यन्ते पातकैस्सर्वैः पद्मपत्रमिवाम्भसेति। **श्रीपुण्डरीकनारदसंवादे** च *अश्वमेधशतैरिष्ट्वा वाजपेयशतेन च। न प्राप्नुवन्ति सुगतिं नारायणपराङ्मुखाः॥

ये नृशंसा दुरात्मनः पापाचाररतास्तथा । तेऽपि यान्ति परं धाम नरा नारायणाश्रया इति । **श्रीनारसिंहपुराणे** च भगवति च हरावनन्यचेता भृशमलिनोऽपि विराजते मनुष्यः । न हि शशकलुषच्छविः कदाचित्तिमिरपराभवितामुपैति चन्द्र इति । **श्रीसात्त्वते** च * दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा । समाश्रयेदादिदेवं श्रद्धया शरणं यदि ॥ निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मन इति । एवं * मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणः । केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति, * सकृत्स्मृतोऽपि गोविन्दो नृणां जन्मशतैश्चितम् । पापराशिं दहत्याशु तूलराशिमिवानल इत्यादिवचनानि भाव्यानि । एवमभिप्रायानभ्युपगमे शास्त्रविरोधः पूर्वापरविरोधश्च स्यात् । **इतः**—ऊर्मिषट्कबहुलत्वेनातिदुस्सहतयोपलभ्यमानादित्यर्थः । अत्र दुःखशब्देन विषसंपृक्तमधुन्यायात्सांसारिकं सुखमपि संगृह्यते । दुःखस्य जलधित्वरूपणमानन्त्यव्यञ्जनार्थम् । दुस्तरत्वाभिप्रायेणापारत्वोक्तिः । **उत्तीर्णशब्द** इहौपाधिकसमस्ताकारात्यन्तिकनिवृत्तिपरः । अनिष्टनिवृत्तेरिष्टप्राप्तिपर्यन्तत्वं **तवेत्यादिनोच्यते** । परिशुद्धप्राप्यस्य तव चरणयोरीदृशोऽहं त्वत्कृपामन्तरेण कथं परिचरेयमित्युक्तं भवति । अत्र परिचरणोक्त्या * येनयेन धाता गच्छति तेनतेन सह गच्छति तद्यथा तरुणवत्सा वत्सं वत्सो वा मातरं छाया वा सत्त्वमनुगच्छेत् तथाप्रकारम्, * एतमानन्दमयमात्मानमुपसंक्रम्य इमाँल्लोकान्कामान्नी कामरूप्यनुसञ्चरन्, * स तत्र पर्येतीत्यादिमुक्तविषयश्रुत्युक्तास्सर्वे व्यापारास्स्वाम्यभिमतकैङ्कर्यरूपास्सूच्यन्ते ॥ ६२ ॥

रघुवर ! यदभूस्त्वं तादृशो वायसस्य प्रणत इति दयालुर्यच्च चैद्यस्य कृष्णः ।
प्रतिभवमपराद्धुर्मुग्ध सायुज्यदोऽभूर्वद किमपदमागस्तस्य तेऽस्ति क्षमायाः ॥ ६३

एवंविधस्यापि स्वस्य यत्किंचिद्व्याजमात्रेण सर्वेषामपराधानां क्षन्तव्यत्वे प्राङ्न्यायमपि दर्शयति—**रघुवरेति** ॥ यद्वा स्वदोषाद्भीतश्शरण्येन स्वगुणानाविष्कृत्य प्रत्याश्वासितस्स्वदोषाणामपि काकादिदोषन्यायात् क्षन्तव्यत्वे किमाश्चर्यमित्याह । अत्र संबुद्ध्या शरणागतरक्षणादिधर्मप्रवर्तनाय तदुचितवंशेऽवतीर्णत्वं तादृशेषु शरण्येषु च मुख्यत्वं व्यज्यते । आह च **विभीषणः**—*सर्वलोकशरण्याय राघवाय महात्मन इति । दृष्टं चैतत्स्वविषयवासिजन्तुजातस्य समरलीलासहायीकृतानां वानराणां च जातिगुणवृत्तादिवैषम्यानादरेण यत्किञ्चिदानुकूल्यमात्रेण संरक्षणे । **त्वं**—* ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा । इन्द्रो महेन्द्रस्सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम्, * सदेवगन्धर्वमनुष्यपन्नगाम्, * पिशाचान् दानवान् यक्षान्, *चापमानय सौमित्रे इत्यादिषु प्रसिद्धप्रभावस्त्वम् । न ह्यशक्तः क्षाम्यतीति भावः । **तादृशः**—देवीविषयासह्यापचारकर्तुः । **वायसस्येत्यनेन** *पुत्रः किल स शक्रस्य वायसः पततां वरः । धरान्तरचरश्शीघ्रं पवनस्य गतौ सम इत्युक्तं सूच्यते । नात्र जयन्तः कामुकतया समागत इति श्रीरामायणोक्तं, * न चाप्युपारमन्मांसाद्भक्षार्थी बलिभोजनः, *भक्षगृध्नेन काकेन दारितं तु स्तनान्तरमित्यादिमात्रवचनात् । अतो वालिवदसाविन्द्रजन्मा प्रबलः कश्चिद्वायसः । * मत्कृते काकमात्रे तु ब्रह्मास्त्रं समुदीरितमिति चोक्तम् । **प्रणत** इति । त्रींल्लोकान्संपरिक्रम्य गत्वा भूमौ निपतितं दयार्द्रबुद्ध्या प्रणतत्वेन परिगृह्णात्यर्थः । यद्वा सकृत्प्रणत इत्येतावन्मात्रेणेति । तदा तु प्रणतशब्दः प्रकृष्टप्रह्वीभावरूपप्रपत्तिपरः, * स तं निपतितं भूमौ शरण्यश्शरणागतमिति वचनात् । उक्तं चाभियुक्तैः—* काकं तं च विभीषणं शरणमित्युक्तिक्षमौ रक्षत इति । * वधार्हमपि काकुत्स्थः कृपया पर्यपालयदित्युक्तमाह—**दयालुरभूरिति** ॥ ननु दक्षिणाक्षिहिंसनेन दण्डयतः कथं दयालुत्वम् ? * राजभिर्धृतदण्डास्त्विति न्यायाद्दण्डोऽपि दयामूल इति चेत्तर्हि प्रणत इति हेतूक्तिर्न घटते । मैवम् ; प्राणार्थिनः काकस्य प्राणरक्षणेन प्रपत्तिफलस्य संपूर्णत्वात्, अमोघस्य ब्रह्मास्त्रस्य लक्ष्या

नुबन्धिर्यत्किंचिन्निरसनीयत्वक्लृप्तेरवश्यापेक्षितत्वात्, तदर्थमेकाक्षिहरणेऽपि सव्यदक्षिणभागसंचारितारकाव्यापारकल्पनेन दृष्टिद्वयफलसिद्धेः । दुष्प्रकृतेः काकस्य भूयोऽपराधभयानुवृत्त्यर्थं स्वल्पावयवखण्डनस्यापि शिक्षारूपत्वात्, तस्य काकजात्यनुबन्धत्वक्लृप्तेस्सर्वत्र सर्वेषां प्रस्तुतवृत्तान्तप्रख्यापनार्थत्वाच्चेति भावः ।

एवं दयाक्षमयोरुदाहरणान्तरमाह—**यच्चेति** ॥ अत्र कृष्णशब्देन सर्वलोककर्षणार्थमवतीर्णत्वं * कृषिर्भूवाचकश्शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं प्रकुर्वीत कृष्ण इत्यभिधीयत इति निरुक्तिश्च सूच्यते । **प्रतिभवमपराद्धुरित्यनेन** काकादप्याधिक्योक्तिः । जन्मत्रये सर्वदाऽपराधशीलस्येत्यर्थः । *अविज्ञातेतिवदपराधक्षमाभिप्रायेणाह—**मुग्धेति** । मुग्धो ह्यपराधमनपराधं च विवेक्तुं न शक्नोति । अयं तु विविक्तं पश्यन्नपि * क्षमया पृथिवीसम इत्युक्तगुणविशेषेणापश्यन्निव भवतीति मुग्धत्वोपचारः । तस्मिन्नेव लयमुपययाविति **पराशर**वाक्याभिप्रेतमाह—**सायुज्यदोऽभूरिति** । नात्र लयशब्देन जीवप्रध्वंसो विवक्षितः ; श्रुतिस्मृतिसूत्रैर्जीवनित्यत्वस्थापनात् । न चैक्यापत्तिः * परमात्मात्मनोर्योगः परमार्थ इतीष्यते । मिथ्यैतदन्यद्वृव्यं हि नैति तद्वृव्यतां यत इति तत्प्रतिषेधात् । * ब्रह्म वेद ब्रह्मैव भवतीत्यादिकं तु परमसाम्यापत्तिपरम्, *निरञ्जनः परमं साम्यमुपैति, *यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम, * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता इत्यादिश्रुतिस्मृत्यनुसारात् । सूत्रितं च * भोगमात्रसाम्यलिङ्गाच्चेति । अतस्सालोक्यसारूप्यादिशब्दवत्सायुज्यशब्दोऽपि युक्तसाम्यपरः । सर्वं हि भगवता मुक्तेन च भोग्यत्वेन युक्तं * ते सर्वं सर्वतः प्राप्य धीरा युक्तात्मानस्सर्वमेवाविशन्ति, * सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश इत्यादिश्रुतेः, * ब्रह्मविदाप्नोति परमित्यादिकर्मकर्तृव्यपदेशाच्च । अत्र पदवाक्यप्रमाणानभिज्ञैस्सायुज्यमैक्यमिति परिकल्पितम् * एतासामेव देवतानाँ सायुज्यं सार्ष्टिताँ समानलोकतामाप्नोति इत्यत्र युगपत्क्रमेण वाऽनेकदेवतासायुज्ये तत्तदैक्यापत्तेरघटितत्वात् । * सायुज्यं प्रतिपन्ना ये तीव्रभक्तास्तपस्विनः । किङ्करा मम ते नित्यं भवन्ति निरुपद्रवा इति **परमसंहितायामुक्तम्** । **शाण्डिल्यस्मृतौ** च *यादृग्रूपस्तु भगवान् यत्रयत्रावतिष्ठते । मुक्तश्च पञ्चकालज्ञः तादृशस्सह मोदत इति । सायुज्यशब्देन * शरवत्तन्मयो भवेदित्यादिपूक्तसंयोगविशेषो विवक्षित इति वदन्तस्त्वर्थविरोधाभावान्मर्षणीयाः । **आगस्**शब्दोऽपराधवाची । **तस्य ते क्षमायाः किमपदमागः**? न किंचिदस्ति । सर्वदर्शिना त्वया दृष्टमस्ति चेद्वद । त्वयाऽपि द्रष्टुं वक्तुं च न शक्यमिति भावः । दयाक्षमयोरिहाविनाभावात् अन्यतरोक्तावितरदन्तर्गतम् । ननु देहपातावधिनिरन्तरापराधस्य शिशुपालस्य केन व्याजेन मुक्तिः प्राप्तेति चेत् ; इह तावत्प्रागेव भगवल्लोकविशेषवासिनश्शापाक्रान्तस्य प्रतिकूलजन्मत्रयान्ते मुक्तिर्भविष्यतीति प्रतिविधाननियतिः परमं निदानम् । अत एव ह्युपात्तचक्रे वधोद्यते भगवति शिशुपालस्य प्रद्वेषसंस्कारभूयस्तयाऽपि निरन्तरस्मृतिमतः प्रकाशितपारम्यं भगवद्रूपं पश्यतोऽनुकूलावस्थाप्राप्तिरुच्यते । अपगतद्वेषानुबन्धो भगवन्तमद्राक्षीत्, तावच्च भगवच्चक्रेणाशु व्यापादितः, तत्स्मरणदग्धाखिलाघसञ्चयो भगवताऽन्तमुपानीतस्तस्मिन्नेव लयमुपययाविति ॥ ६३ ॥

ननु प्रपन्नस्सकृदेव नाथ ! तवाहमस्मीति च याचमानः ।
तवानुकम्प्यस्स्मरतः प्रतिज्ञां मदेकवर्जं किमिदं व्रतं ते ॥ ६४

एवं त्वत्क्षमाविशेषदर्शनान्निर्भयोऽस्मि, तथा त्वद्व्रतविशेषानुसन्धानान्निर्भरश्चास्मीत्यभिप्रायेण * सकृदेव प्रपन्नायेति श्लोकोक्तं ममापि साधारणमित्याह—**नन्विति** ॥ * सकृत्कृतश्शास्त्रार्थ इति स्वतःप्राप्तस्य विद्यान्तरनयादत्रापवादशङ्कायां

तन्निरासार्थ एवकारः । सकृदेवेत्यस्य सहसैव सर्वागसां निष्कृतिमकृत्वेति कैश्चिद्व्याख्यातम् । आवृत्तिव्यवच्छेदे तु प्रसिद्धिप्रकर्षः प्रयोजनभूयस्त्वं *सकृदेव हि शास्त्रार्थः, *मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्यतीत्यादिप्रमाणानुगुण्यं च विद्यते । अत एव *सकृदेव ददामीति व्यवहितान्वयश्चात्र न युक्तः ॥

प्रचयापचयध्वंसप्रत्यूहरहिता प्रभौ । प्रपत्तिः फलपक्वे तु फलतीत्यपि सूच्यते ॥

अत्र नाथशब्देन *लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति, *सर्वलोकशरण्यायेत्यादिकं ख्याप्यते । शरण्यत्वं कैङ्कर्यो देश्यत्वं च तवैव प्राप्तमिति भावः । **तवाहमस्मीति च याचमानः**—तव दासभूतोऽहमित्येवंविधानुसन्धानपूर्वकं शेषवृत्तिं प्रपत्तिफलत्वेन प्रार्थयमान इत्यर्थः । **अस्मीत्यस्य** स्यामिति वाऽभिप्रेतम् । तदाऽपि तवाहं किङ्करः स्यामिति फलप्रार्थना । अत्र गोप्तृत्ववरणमात्मनिक्षेपश्च यथार्हं पृथङ्निर्दिश्यत इति केचित्; मानसी वाचिकी चेत्येके; प्रयोजनान्तरार्थप्रपत्तिरनन्यप्रयोजनप्रपत्तिश्चेत्यन्ये; प्रपत्तिर्भक्तिश्चेत्यपरे । **तकानुकम्प्य** इत्यादिना लोकरक्षार्थमवतीर्णस्य दक्षिणसागरवेलायां महापरिषदि दुरपह्नवप्रतिज्ञाकर्तृत्वं सूच्यते । **प्रतिज्ञाम्**—*अभयं सर्वभूतेभ्यो ददामीत्येवंरूपाम् । अत्र नित्यसिद्धसर्वसाक्षात्कारस्य भगवतः **स्मरत** इत्युक्तिर्लौकिकबुद्ध्यनुसारादौपचारिकी । **अनुकम्प्यः**—स्वप्रतिज्ञाभङ्गपरिहारार्थं त्वयैवानुकम्पा कर्तव्येति भावः । ननु यदर्थं मया प्रतिज्ञातं तेषु विभीषणादिषु प्रतिज्ञा सफला, किं त्वयेत्यत्राह—**मदेकवर्जं किमिदं व्रतं ते** इति । प्रपन्नाय याचत इति हि सामान्यतस्त्वया प्रतिज्ञातम्; *विभीषणो वा सुग्रीव यदि वा रावणस्त्वयम् । आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मयेति चोक्तम् । न च त्वया तदानीं मद्व्यतिरिक्तायाभयं ददामीति व्रतमुपात्तम्; अतोऽहमपि त्वद्व्रतविषयभूत इति व्यज्यते । सर्वसाधारणस्वामित्वशरण्यत्वयोगं *रामो द्विर्नाभिभाषत इत्यादिवैधर्म्यात्स्ववाक्यस्य व्यावृत्तिविशेषणात्स्वपक्षेपानर्हत्वं च सूचयितुं पुनरपि त इत्युक्तम् ॥ ६४ ॥

अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधिमात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिन्तयित्वा ॥ ६५

ननु काकस्य *स पित्रा च परित्यक्तस्सुरैश्च समहर्षिभिः । त्रींल्लोकान्संपरिक्रम्य ततैव शरणं गतः ॥ स तं निपतितं भूमौ शरण्यश्शरणागतम् । परिद्यूनं विषण्णं च.... इत्युक्तावस्याविशेषोऽस्ति; चैद्यस्य च प्राचीननियतिर्मातुर्वरविशेषश्च विद्यते; तव पुनस्त्वोक्तानाममर्यादत्वादीनामाकरस्योपायानुष्ठाने फलप्रार्थनायां च छद्मस्तुतिमात्रवादिनोऽनन्यथासिद्धेन केन हेतुना क्षन्तव्यत्वं शिक्षणीयत्वं रक्षणीयत्वं चेत्यत्र *पिता त्वं माता त्वम्, *दयासिन्धो बन्धो, *रघुवर, *ननु प्रपन्न इत्यादिभिश्शरण्यगतास्त्वरक्षणौपयिकगुणविशेषा ये प्रतिपादिताः; ये च *अकिञ्चनोऽनन्यगतिः, *दयनीयस्तव नाथ, *त्वदीयस्त्वद्भृत्य इत्यादिभिस्त्वगतगुणाः प्रदर्शितास्तेभ्यस्सर्वेभ्यस्समधिकं निरङ्कुशस्वातन्त्र्येण सर्वेश्वरेणाप्यनतिलङ्घनीयस्वासाधारणस्वाङ्गीकारहेतुमाह—**अकृत्रिमेति** ॥ क्रियया निर्वृत्तः कृत्रिमस्तदन्योऽकृत्रिमः, भगवत्कटाक्षविशेषाधीनमहावंशसंभवादेतस्मिन् जन्मनि प्रभूतयत्ननिरपेक्ष इत्यर्थः । अकृत्रिमत्वमिह प्रेमविशेषणम् । त्वच्छब्देन प्राप्यत्वप्रापकत्वौपयिकसर्वाकारवैशिष्ट्यं सूच्यते । चरणारविन्दशब्देन तु दासभूतस्य स्वतःप्राप्तसेव्यत्वं पावनतमत्वं निरतिशयभोग्यतमतया परमप्रेमार्हत्वं च प्रकाश्यते । *अनुरागमहिमातिशयान्तसीम्न इति प्रागुक्तमेव विधेयान्तरार्थमनुवदति—**प्रेमप्रकर्षावधिमिति** । लोके च राजादयस्स्वभक्तानुबन्धिनामपि रक्षणं कुर्वन्तीति भावः । **आत्म-**

वन्तं—जितमनस्कमित्यर्थः । तेन प्रयोजनान्तरवैमुख्यं व्यञ्जितम् । तदपि प्राप्तविषये प्रेमप्रकर्षहेतुः । तादृशप्रेम्णा सपरिकरभक्तियोगसामर्थ्येऽपि विलम्बाक्षमतया प्रपत्तिनिष्ठत्वं सूच्यते । यद्वा यथावस्थितभगवत्प्रेमजनिततद्ध्यानादिभिर्लब्धात्मेति पदद्वयाभिप्रायः । अयं च स्वभावो **गीतार्थसंग्रहे**ऽपि * ज्ञानी तु परमैकान्तीत्यारभ्य, * भगवद्ध्यानयोगोक्तिवन्दनस्तुतिकीर्तनैः । लब्धात्मा तद्गतप्राणमनोबुद्धीन्द्रियक्रिय इत्युक्तः । * आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः । मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयश्शुचिः । गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः । एवं लक्षणसम्पन्नो गुरुरित्यभिधीयत इत्यादिषूक्तानामाचार्यगुणानां सर्वेषां सार इह संगृहीतः । तस्यैवं गुणवत्त्वे तव किमायातमित्यत्राह—**पितामह**मिति । अत्र विद्यया जन्मना चेति भाव्यम् । एतेन * नास्यावरपुरुषाः क्षीयन्ते नास्याब्रह्मवित्कुले भवतीति श्रुत्यर्थस्सूच्यते । **नाथमुनिं**—श्रीरङ्गनाथ इति त्वन्नामधारिणं त्वदेकमननशीलं चेति भावः । **विलोकय**—* पशुर्मनुष्यः पक्षी वेत्यादिन्यायादनुबन्धिपर्यन्तमनुग्राह्यत्वेन मत्वेत्यर्थः । * आचार्यस्य प्रसादेन मम सर्वमभीप्सितम् । प्राप्नुयामिति यस्यास्ति विश्वासस्स सुखी भवेदित्युक्ताचार्यप्रसादोऽपि भगवत्प्रसादहेतुरित्यभिप्रायेणाह—**प्रसीदेति** । अनाद्यनन्तमदपराधजनितकालुष्यं विहाय मामैकान्तिकात्यन्तिककैङ्कर्यसाम्राज्यधन्यं कुरुष्वेत्यभिप्रायः । **मद्वृत्तमचिन्तयित्वा**—मदीयममर्यादत्वादिप्रतिकूलवृत्तमुपायोपेयविषयच्छन्नस्तुतिवचनाद्यनुकूलवृत्ताभासं चातन्त्रीकृत्येत्यर्थः । स्मर्यते हि—* पापिष्ठः क्षत्रबन्धुश्च पुण्डरीकश्च पुण्यकृत् । आचार्यवत्तया मुक्तौ तस्मादाचार्यवान्भवेदिति । अत्र पूर्वकृतप्रपत्त्यादिकमपराधकोटौ निवेश्य प्रपदनान्तरमुच्यत इति वादोऽप्याचार्यसंबन्धप्राधान्यपरः ; अन्यथा सर्वशास्त्राणां, संप्रदायस्य, *त्वदङ्घ्रिमुद्दिश्येत्यादिस्ववचनानां च विरोधस्स्यात् । स्वकृतप्रपत्तेर्वैकल्यमाशङ्क्य पूर्णप्रपत्तिनिष्ठमाचार्यं स्वरक्षणाय पुरस्करोतीति पक्षेऽपि मत्प्रपत्तिर्विकला चेदविकलां कुरुष्वेति तात्पर्यं ग्राह्यम् । अत्र वृत्तशब्देन प्रतिकूलवृत्तमात्रविवक्षायां तु न किञ्चिच्चोद्यम् ॥

तदिह यामुनाचार्यस्वान्यन्तरहस्यभूतं द्वयार्थगर्भं स्तोत्रं चिकीर्षुरादौ पञ्चभिश्श्लोकैः कृतज्ञताप्रकाशनपूर्वकं प्रकृतौपयिकसम्यग्ज्ञानप्रदातॄन् प्रणनाम । षष्ठेन प्राप्यप्रापकसंग्रहपूर्वकं स्तोत्रारम्भं समकल्पयत् । सप्तमेन स्तोत्रारम्भाक्षेपमुखेन भगवतः परत्वं समगृह्णात् । अष्टमनवमाभ्यां तत्समाधानमुखेन सौलभ्यं प्राचीकशत् । * नावेक्षस इत्यादिभिर्द्वादशभिर्नारायणशब्दवाच्यस्यैव सर्वस्मात्परत्वं सौलभ्यं च प्रपञ्च्य प्रह्वीबभूव । एवं सर्वशरण्यत्वे निरूपिते *न धर्मनिष्ठोऽस्मीत्यनेन तद्विषयां साधिकारां सपरिकरां चानन्यप्रयोजनशरणागतिं प्रायुङ्क्त । एतावता शब्दतोऽर्थतश्च पूर्वखण्डोऽपि प्रत्यभिज्ञापितः । * न निन्दितमित्यादिभिः पञ्चभिः * अकिञ्चनोऽनन्यगतिश्शरण्येत्युक्तमेव व्यवृणुत । * त्वदङ्घ्रिमुद्दिश्येत्यादिद्वाभ्यां फलगौरवोपायलाघवनिमित्तशङ्काव्युदासाय लघुतरभगवद्धर्मप्रभावमुदाजहार ॥ * विलासेत्यादिभिस्सप्तदशभिश्चतुर्थ्यन्तपदद्वयाभिप्रेतं व्यस्तृणीत ॥ तत्र * प्रहर्षयिष्यामीति सर्वदेशसर्वकालोचितनिरुपाधिकनिरवधिकसर्वविधकैङ्कर्यस्य परमप्रयोजनतया नमश्शब्दतात्पर्यमप्यसूचयत् ॥ * धिगशुचिमिति श्लोकेन स्वनिन्दाव्याजेन स्वापेक्षितपरमपुरुषार्थस्य सर्वातिशायित्वं स्वस्य त्वरां च व्यञ्जयामास ॥ * अपराधेत्यादिभिश्चतुर्भिश्शरण्यगुणविशेषेण प्रपत्त्यैव सर्वविरोधिनिवृत्तिं प्रादर्शयत् ॥ *वपुरादिषु, *मम नाथेति द्वाभ्यां शेषवृत्तेः पुरुषार्थत्वाय स्वस्य नित्यनिरुपाधिकानन्यार्हशेषत्वाध्यवसायमाचष्ट ॥ * अवबोधितवानिमामित्यादिभिश्चतुर्भिरनन्यप्रयोजनस्य स्वस्यात्रत्यामिष्टप्राप्तिमनिष्टनिवृत्तिं च प्रार्थयामास ॥ *दुरन्तस्येति श्लोकेन स्वनिन्दाव्याजेन स्वापेक्षितपुरुषार्थस्य सर्वातिशायित्वं स्वस्य त्वरां च सूचयन् शरणागतस्य प्रपत्तव्यगुणविशेषैरेव प्रार्थितं सर्वं सिध्यतीति प्रागुक्तमेव स्थूणानिखनन्यायेन स्थिरोचकार ॥ * अनिच्छन्निति

श्लोकेनानन्यप्रयोजनस्य रक्षणोद्यतो भगवान् * नेहाभिक्रमनाशोऽस्तीति न्यायात्स्वयमेव शेषं पूरयतीत्यभाषत ॥ तत्र * त्वमेवेत्यादिनाऽभिप्रेतं * पिता त्वमित्यादिना विवृण्वन् परगतैः स्वगतैश्च हेतुभिश्शरण्यस्य स्वाभिमतभरस्वीकारेण स्वस्य निर्भरत्वं निरणैषीत् ॥ * जनित्वाऽहम् * अमर्याद इति द्वाभ्यां स्वस्योपायान्तरेण परमपुरुषार्थप्राप्तिर्न संभवतीति पूर्वोक्तमेव पुनः प्रतिसमाधत्त ॥ *रघुवरेति श्लोकेन शरण्यस्य प्राक्तनानुष्ठानन्यायात्स्वस्मिन्नपि सर्वापराधक्षमा प्राप्तेत्याह ॥ * ननु प्रपन्न इति श्लोकेन शरण्यव्रतविशेषस्वभावादपि तदेव प्रथयामास ॥ अथान्तिमेन स्वपरगतेषु स्वरक्षणहेतुषु भगवत्कटाक्षविशेषजनितसदाचार्यसंबन्ध एव प्रधानतम इतिनिर्धार्य तदधीनभगवत्प्रसादेन निर्भयः प्रहृष्टश्चासीत् ॥

इति किल निगमान्तभागधेयस्तुतिपरिवाहसमीक्षया प्रपत्त्या । अलभत परमं पदं मुरारेरनघमनोरथ एष यामुनेयः ॥
कथिताकथिते विभाव्य सद्भिस्सदसद्भेदिभिरत्र सावधानैः । बलवत्प्रथितप्रमाणदृष्ट्या बहुमन्तव्यमिदं यदस्मदुक्तम् ॥

उपनिषदुपधेयस्तोत्रतात्पर्यमेतद्यतिपतिरवधत्ते यामुनार्यस्स्वयं वा ।
अहमिह तु नियुक्तस्सद्भिराचार्यनिष्ठैरधिगतशुकवृत्तिर्व्याकियामन्वभूवम् ॥

स्वकमिति हरिदत्तं यामुनस्तोत्रवृत्त्या व्यवृणुत निगमान्ताचार्यकं वेङ्कटेशः ।
अगणि सदसि सद्भिर्यस्समस्यासहस्री कविकथकमृगेन्द्रस्सर्वतन्त्रस्वतन्त्रः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु रहस्यरक्षायां
॥ स्तोत्ररत्नभाष्यं समाप्तम् ॥

॥ चतुश्श्लोकीस्तोत्ररत्नयोः अकारादिक्रमेण श्लोकाः ॥

श्लोकारम्भः	पुटसंख्या
अ	
अकृत्रिमत्वच्चरण-	९३
अचिन्त्यदिव्याद्भुत-	७७
अनिच्छन्नप्येवं	८६
अपराधसहस्र-	७९
अपूर्वनानारस-	७६
अभूतपूर्वं मम	६५
अमर्यादः क्षुद्रः	८९
अवबोधितवान्	८२
अविवेकघनान्ध-	७९
ई	
ईषत्त्वत्करुणा- (चतुश्श्लोकी)	२०
उ	
उदग्रपीनांस-	७२
उदीर्णसंसार-	६९
उपर्युपर्यब्ज-	५८
उल्लंघितत्रिविध-	५३
क	
कदा पुनश्शङ्ख-	७०
कश्श्रीः श्रियः	४०
कस्योदरे हर-	४७
कान्तस्ते (चतुश्श्लोकी)	१३
किं चैष	३६
च	
चकर्थ यस्या भवनं	७३
चकासतं	७१
ज	
जनित्वाऽहं वंशे	८८
त	
तत्त्वेन यश्चिदचित्	२९
तत्त्वेन यस्य	३४
तदहं त्वदृते	८०
तया सहासीनम्	७४
तव दास्यसुखैक-	८३
तवामृतस्यन्दिनि	६७
तस्मै नमो मधुजित्	२७
त्व	
त्वदंघ्रिमुद्दिश्य	६७
त्वदाश्रितानां जगत्	५९
त्वदीयभुक्तोज्झित-	७५
त्वां शीलरूपचरितैः	५०
द	
दासस्सखा वाहनम्	७५
दुरन्तस्यानादेः	८५
ध	
धिगशुचिमविनीतं	७८
न	
न देहं न प्राणान्	८५
न धर्मनिष्ठोऽस्मि	६१
न निन्दितं कर्म तदस्ति	६३
ननु प्रपन्नस्सकृदेव	९२
न मृषा परमार्थमेव	८०
नमोऽचिन्त्याद्भुता-	२६
नमो नमो वाङ्मन-	६०
नावेक्षसे यदि ततो	३६
निमज्जतोऽनन्त-	६४
निरासकस्यापि न	६६
निवासशय्यासन-	७५
प	
पिता त्वं माता त्वं	८७
प्रबुद्धमुग्धाम्बुज-	७२
भ	
भवन्तमेवानुचरन्	७७
भूयो नमोऽपरिमित-	२८
म	
मम नाथ यदस्ति	८१
माता पिता युवतयः	३१
य	
यदण्डमण्डान्तर-	५४
यद्वा श्रमावधि	३५
यन्मूर्ध्नि मे	३२
यस्यास्ते महिमानं (चतुश्श्लोकी)	१७
र	
रघुवर यदभूस्त्वं	९१
व	
वपुरादिषु योऽपि	८०
वशी वदान्यो	५६
विराजमानोज्ज्वल-	७१
विलासविक्रान्त-	६९
वेदापहारगुरुपातक-	४४
श	
शान्तानन्तमहा- (चतुश्श्लोकी)	२१
स	
सकृत्त्वदाकार-	८४
स्फुरत्किरीटाङ्गद-	७३
स्ववैश्वरूप्येण	७४
स्वाभाविकानवधिका-	३७
ह	
हताखिलक्लेश-	७६

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः। श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

श्रीभगवद्रामानुजमुनिभिरनुगृहीतं

॥ गद्यत्रयम् ॥

॥ शरणागतिगद्यम् ॥

भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याण-गुणगणां पद्मवनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं निरवद्यां देवदेवदिव्यमहिषीम् अखिलजगन्मातरम् अस्मन्मातरम् अशरण्यशरण्याम् अनन्यशरणः शरणमहं प्रपद्ये ॥ १ ॥

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्तदेशिकविरचितं

॥ गद्यत्रयभाष्यम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी। वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

॥ रहस्यरक्षायां पृथुगद्याधिकारः ॥

प्रख्यातश्रुतविभवान्गुरूनशेषान्प्रश्रित्य प्रणयति वेङ्कटेशसूरिः ।
लक्ष्मीशप्रपदनवैभवप्रतिष्ठां रागान्ध्यप्रशमकरीं रहस्यरक्षाम् ॥ १ ॥
लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नोर्योऽसौ पुरा समजनिष्ट जगद्धितार्थम् ।
प्राच्यं प्रकाशयतु वः परमं रहस्यं संवाद एष शरणागतिमन्त्रसारः ॥ २ ॥

अत्र भगवान्भाष्यकारः सदाचार्यसंप्रदायागतद्वयवचनेन स्वयमनुष्ठितं न्यासाख्यविद्याविशेषं स्वानुबन्धिसंजिजीवयिषया यथावत्प्रकाशयन्, *सीतामुवाचातियशा राघवं च महाव्रतम्, *सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीदित्यादि-प्रकारेण श्रीप्रपत्तितदनुग्रहपूर्वकं स्वस्य भगवता संजातं स्वयंप्रयोजनसंवादविशेषं निबध्नाति । प्रतिवचनांशस्तु शरणागति-वशीकृतशरण्याभिप्रायविशेषोन्नयनेन निबध्यत इत्येके । इह *संपत्स्यते इत्यन्तं श्रीमच्छब्दाभिप्रेतप्रदर्शनम् । *अस्मिले-

त्यादिकम् *अशरण्यशरण्य इत्यन्तं नारायणशब्दार्थविवरणम् । तन्मध्ये श्रीमन्नारायण इति द्विःपठनमुपायोपेयवाक्ययोः सिद्धरूपप्रधानांशव्यञ्जनम् । * अनन्यशरणोऽहमित्युत्तमपुरुषाभिप्रेताधिकारिविशेषोक्तिः । * त्वत्पादारविन्दयुगलम् इत्यादिकमप्यर्थतः स्वरूपतश्च मान्त्रवर्णिकपदत्रयज्ञापकम् । एवं प्रधानतमेन सिद्धोपायेन सिद्धप्राप्येन च सह महावाक्यार्थपर्यवसानभूमितया शाब्दप्राधान्यवान्साध्योपायांशो दर्शितः । साध्यप्राप्यमपि * पारमार्थिक इत्यादिना संक्षिप्तमिति ज्ञापयितुं मध्ये * द्वयम् इति व्यारूयेयसमाख्यानिर्देशः । * पितरमित्यादिभिर्जितंताविशेषभगवद्गीतादिपठितैरुक्तसंवादकैरुपबृंहणग्रन्थैः, प्रस्तुतोपायविशेषपरिग्रहं शरण्यस्वभावानुसंधानपूर्वकं प्राप्यविरोधिनिवृत्तिप्रार्थनांशं च प्रपञ्चयिष्यमाणद्वयार्थतया संग्रहेण संकलय्याह । * मनोवाक्कायैः इत्यादिभिरर्थक्रमेण नमःशब्दार्थविवरणपूर्वकं चतुर्थ्यभिप्रेतपरमपुरुषार्थप्रार्थना प्रकाश्यते । प्रतिवचनवाक्यैस्तु, प्रकृताधिकारिनिर्भरत्वाय स्वीकृतभरस्य शरण्यस्य स्वाभाविकदयार्द्रमुत्तरखण्डोक्तपरमफलाङ्कुरकल्पमभिप्रायं व्यवृणुत । अतः कृत्स्नमिदं गद्यं द्वयविचरणमिति साधीयान्संप्रदायः । इह च भगवत्प्रपदने समुद्यतस्य सम्यग्ज्ञानसंपादनपुरुषकारपुरस्कारादिकं पूर्वकृत्यम् । साङ्गस्वरक्षाभरसमर्पणं तत्कालकृत्यम् । स्वनिष्ठानुसन्धानपूर्वकं स्वाधिकारोचितकैंकर्यादिकमुत्तरकृत्यम् । शरण्यस्य तु पूर्वकृत्यं पुरुषकारप्ररोचनादिकम् । तत्कालकृत्यं समर्पितसर्वभरस्वीकरणम् । उत्तरकृत्यं तु स्वयंप्रयोजनभक्त्यादिप्रदानान्तिमदशाप्रबोधनप्रभृति परिपूर्णकैंकर्यरूपमुक्तिप्रदानपर्यन्तम् । एतदखिलमिह शब्दतोऽर्थतश्च यथास्थानमनुसंधेयम् । किंच—

संबोधनैः परं तत्त्वं न्यासोक्त्या परमं हितम् । प्रार्थनाभिश्च परमः पुमर्थ इह दर्शितः ॥

नन्वेवं सकलफलप्रदो भगवानेव तत्प्रपत्तिसिद्ध्यर्थमप्याश्रीयताम्; किमिह लक्ष्मीप्रपदनेन? मैवम्; यदि भगवत्प्रपदनमिदानीं शक्यमिति निश्चिनुयात्, तदा मोक्षार्थमेव तदुपाददीत; न पुनस्तदर्थं तत्प्रयुञ्जीत; अनिश्चिते तु शक्यत्वे नतराम् । ननु विदितश्चेत्प्रपत्तिशास्त्रार्थः, स च सुकरः; तदा स्वयमेव मोक्षार्थमनुष्ठीयताम्? मैवम्; दुष्करकर्माद्यङ्गविरहात्, सौकर्येऽपि महाविश्वासाद्यङ्गकप्रपत्तिस्वरूपे * श्रूयते किल गोविन्दे * सत्यं शतेन विघ्नानामिति न्यायेन संभक्त्प्रतिबन्धे मात्रया दौष्कर्यात् । उक्तं च—*उपायः सुकरः सोऽयं दुष्करश्च मतो ममेति । अतः *स्थिते मनसि इत्यादिप्रक्रियया विषयतः स्वरूपतश्च विशिष्टाकारप्रपत्त्यनुष्ठाने प्राप्याभिलाषप्रापकाध्यवसायप्रापकान्तरानन्वयानुवृत्त्यनुगुणमनस्समाधानाद्यर्थमिह तत्प्रार्थनं युक्तम् । एवमपि सुकृतविशेषैरेव लक्ष्मीप्रपत्तिवत् भगवत्प्रपत्तिरप्यस्तु; मैवम्; तदर्थ एव ह्ययं सुकृतविशेषः । न चात्रापि पूर्ववदशक्यत्वचोदना, स्वतन्त्रबुद्ध्यैव पूर्वं तावन्मात्रशक्तिप्रदानात् । तदभिप्रायेण ह्युक्तं भगवता **शौनकेन**—* वाचः परं प्रार्थयिता प्रपद्येन्नियतः श्रियमिति । **श्रीसात्त्वते** च—* यामालम्ब्य सुखेनेमं दुस्तरं हि गुणोदधिम् । निस्तरन्त्यचिरेणैव व्यक्तध्यानपरायणाः इति । सा चैवं स्वयमाह—* प्रायश्चित्तप्रसङ्गे तु सर्वपापसमुद्भवे । मामेकां देवदेवस्य महिषीं शरणं श्रयेत् इति । न चैवं तदर्थं प्रपत्त्यन्तरापेक्षयाऽनवस्थाप्रसङ्गः, स्वतन्त्रसंकल्पेन व्यवस्थितत्वात्सामग्रीविशेषाणाम् । सामग्रीप्रवाहानवस्था तु सर्वस्मिन्नपि कार्ये सर्वैः सिद्धान्तिभिः स्वीकर्तव्यता स्वीकृता चेति नासौ दोषः ॥

(भगवदित्यादि ॥) अतोऽपवर्गार्थभगवत्प्रपत्तिसिद्धये *यज्ञविद्या महाविद्या गुह्यविद्या च शोभने । आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥ * विद्यासहायवन्तं मामादित्यस्थं सनातनमित्यादिभिः सर्वविद्याप्रवर्तकतया तत्तद्विद्यात्वेन निर्दिष्टां सम्यग्ज्ञानव्यवसायोपायादिप्रदाने विशेषाधिकारवतीमनुग्रहैकस्वभावां श्रियमादौ प्रपद्यते—**भगवदिति** ॥ अत्र

*अशरण्यशरण्याम् इति वक्ष्यमाणस्योपयुक्ता विशेषा नवभिः पदैः ख्याप्यन्ते । ननु *विष्णुपत्नी विष्णुवल्लभेत्यादिषु भास्करेण प्रभेव पत्याऽसौ निरूप्यताम् । यथोक्तं ताभ्यामेव—*अनन्या हि मया सीता, *अनन्या राघवेणाऽहम् इति । इह तु तया तन्निरूपणे व्याख्येयस्थे किमिति भगवताऽसौ निरूप्यते ? प्रस्तुतोपयोगार्थमिति ब्रूमः । भगवदभिमतानुरूपत्वे हि, तस्यास्तेनेच्छाविघाताभावात् तद्विरुद्धेच्छाविरहाच्च ततोऽस्मदिष्टं सिध्येत् । 'प्रभया प्रभावत इव व्याख्येयगतं तया तस्य निरूपणमपि श्रीवल्लभादिव्यपदेशेन दर्शयिष्यति । इदं च परस्परनिरूप्यत्वमन्यत्राप्युक्तम्—*तदेतत्सूक्ष्ममिथुनं परस्परविचिह्नितम् । आदावन्योन्यमिश्रत्वादन्योन्यप्रतिपादकमिति । आदावन्योन्यमिश्रत्वात्—*शान्तानन्तेति प्रकारेण नित्यमन्योन्यसंबद्धत्वादित्यर्थः । न च परस्परनिरूप्यत्वेऽन्योन्याश्रयदोषः, प्रभाप्रभावतोरिव प्रमाणतः प्रकारान्तरेणापि तयोर्निरूपणात् । अत्र द्विषट्काष्टाक्षरगताभ्यां भगवन्नारायणशब्दाभ्यां *शुद्धे महाविभूत्याख्ये, *नरसंबन्धिनो नाराः इत्यादिभिर्निरुक्ताभ्यामुभयलिङ्गत्वमुभयविभूतिमत्त्वं च ख्याप्यते । भगवच्छब्दस्य *उत्पत्तिं प्रलयं चैवेत्यादिप्रदर्शितक्रमेण *अन्यत्र ह्युपचारतः इत्यौपचारिकप्रयोगप्राचुर्यमस्ति । नारायणशब्दस्य तु तन्नास्ति कारणवाक्यानन्यथासिद्धनिःसंदेहविशेषनिर्धारणोपयुक्तश्चायम्, *एको ह वै नारायण आसीत् न ब्रह्मा नेशानः इत्यादिश्रुतेः । *सहस्रशीर्षमित्यनुवाके च तेनैव सर्वपरविद्यावेद्यनिर्धारणम् । अतस्तेनात्र विशेष्यस्य निर्देशः । ततश्च तद्विशेषणतया भगवच्छब्दोऽनादृतरूढिरुभयलिङ्गत्वव्यक्त्यर्थमेव ॥

(**अभिमतेत्यादि** ॥) उक्तप्रकारं भगवतः स्वरूपं निरतिशयानन्दतया मुक्तानां नित्यानामिव च स्वस्याप्यभिमतम्; ततोऽपि स्ववल्लभायास्स्वरूपादिकमित्यभिप्रायेण **अभिमते**त्युक्तम् । श्रूयते हि—*श्रियं लोके देवजुष्टामुदारामिति । निरवधिकक्रीडादिमता[1] निरुपाधिकदेवेन भगवता प्रीतिविषयीकृतामित्यर्थः । सापेक्षनिरपेक्षयोर्निरपेक्षसंप्रतिपत्तेः, बाधकस्य चाभावात्, औचित्यातिशयात्, तथैव वेदवि[द्या]ख्यातत्वाच्च देवशब्दोऽत्र वासुदेवपरः । देवैर्जुष्टामिति तु मन्दम् । स्मर्यते च—*प्राणेभ्योऽपि गरीयसीमिति, *अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् । तेनेयं स च धर्मात्मा मुहूर्तमपि जीवतीति च । अभिमतत्वेऽप्यननुरूपत्वम्, अनुरूपत्वेऽप्यनभिमतत्वं च लोके दृष्टमिति तद्व्यवच्छेदार्थमुभयोक्तिः; यथा *चकर्थ यस्या भवनमित्यादि श्लोकयोः । लोके केनचिदाकारेणाभिमतानुरूपत्वम्, आकारान्तरेण तदभावश्च क्वचिद्दृश्यते; तद्व्युदासाय **स्वरूपरूपा**दिसर्वोक्तिः ॥

तत्र स्वरूपस्य गुणत्वायोगात्, स्वरूपं रूपं गुणः विभवः ऐश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणश्चेति द्वन्द्वः । अनुरूपत्वमिह संबन्धे सति प्रकृष्टं सादृश्यम्; यथा—*परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैरिति । रत्नकाञ्चनमुक्ताप्रवालादेरिव स्वसंबन्धेन शोभातिशयहेतुत्वरूपमौचित्यं वा; यथा—*अतीव रामः शुशुभेऽतिकामया विभुः श्रिया विष्णुरिवामरेश्वरः इति, *तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम् । राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणेति च । अत्र वयोलक्षणयोस्तुल्यशब्द औचित्यपरः, दम्पत्योर्न्यूनाधिकवयस्कत्वात्, स्त्रीपुंसलक्षणानां च भिन्नप्रकारत्वात्, तत्सहोक्त्या शीलादिष्वपि औचित्यपर एव, तुल्यशब्दोक्तार्थस्य *अर्हतीति समुदायनिर्देशाच्च । यद्वा, अर्हत्वस्य साधकतया तुल्यशब्देन सदृशत्वमुच्यते । वयसः सदृशत्वम् *घनकनकद्युती युवदशामपि मुग्धदशामित्युक्तमासन्नतरत्वम् । लक्षणस्य सदृशत्वं पतिलक्षणवत्सर्वोत्कर्षव्यञ्जकत्वम्; येन स पुरुषोत्तमः, सा च *सर्वलक्षणसंपन्ना नारीणामुत्तमेत्युच्यते । *सदा तवैवोचितया तव श्रिया, *आहुः स्वैरनुरूपरूपविभवैरित्यादिकमत्रानुसंधेयम् ॥

भगवत्स्वरूपादेरेतत्स्वरूपादीनां यथाक्रममानुरूप्यमूह्यम् । तत्र स्वरूपं स्वासाधारणधर्मनिरूप्यं धर्मि ; तस्यानुरूप्यं * नानयोर्विद्यते परमित्यादिषु ग्राह्यम् । रूपं * हिरण्यवर्णामित्याद्याम्नातम् ; तस्यानुरूपत्वं हि अतिरमणीयत्वनित्यत्वाप्राकृतत्वादिविशिष्टमद्भुततमत्वम् । *नित्यैव इत्युपक्रम्य *विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुमिति च निगमितम् । अत्र रूपादनन्तरो गुणशब्दः सौन्दर्यादिदिव्यविग्रहगुणपरः, * गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो व्यवर्धत इतिवत् । विग्रहगुणानां स्वरूपगुणानां च पृथङ्निर्देशः प्रीत्यतिशयद्योतनार्थः । विभवः * फणिपतिः शय्यासनं वाहनमित्यादिभिरुक्तं विभूतिद्वयम् ; यथोक्तम्—* अस्या मम च शेषं हि विभूतिरुभयात्मिका इति । उक्तं च **श्रीराममिश्रैः**—* उभयाधिष्ठानं चैकं शेषित्वम् इति । एवं द्वयोर्विभवस्यैकत्वेऽपि तदानुरूप्यवचनम् अन्यूनानतिरिक्तविभूतिमत्त्वपरम् । यद्वा, * अर्थो विष्णुरियं वाणी इत्यादिभिर्लौकिकदम्पतिन्यायेन विभज्य निर्दिष्टो विभूत्यंशः । स्वासाधारणविभूषादिकं च विभवः । * निधिः पद्मो निधिः शङ्खश्चतुर्दन्ती गजस्तथा । कल्याणसर्पः पञ्चास्यः [चिक्लीतो] शिक्षितो गृहरक्षकः इत्यादि च पुराणप्रसिद्धमानुरूप्यमिह यथार्हं ग्राह्यम् । ऐश्वर्ये शीले च अन्वितेनादिशब्देन परत्वसौलभ्यौपयिकगुणवर्गद्वयसंग्रहः ; *सर्वैश्वर्यगुणोपेता नित्यं तद्धर्मधर्मिणी इत्यादिभिरेतत्सिद्धिः । अत्र परस्परेच्छाविघाताभावादैश्वर्यमनुरूपम् । शीलं च गुहादिषु रामस्येव, व्रिजटादिषु तस्याः प्रसिद्धम् । एवं पतिपारार्थ्ययुक्ततदितरसर्वशेषित्वान्वितानामन्येषामपि गुणानामानुरूप्यं सुगमम् ॥

(अनवधिकेत्यादि ॥) * ब्रह्मेशादिसुरव्रजः सदयितस्त्वद्दासदासीगणः इत्युक्तेभ्यः सातिशयसंख्यातगुणेभ्यो व्यावृत्त्यर्थमाह—**अनवधिकातिशयासंख्येयेति ॥** अनवधिकत्वमिह स्वापेक्षयोत्कर्षावधिराहित्यम् । ननु भगवत एवैश्वर्यमनवधिकातिशयम्, * तमीश्वराणां परमं महेश्वरम्, * सर्वेश्वरेश्वरः कृष्णः, * न तत्समश्चाभ्यधिकश्च दृश्यते, * न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः इत्यादिभिस्तथोक्तेः । * पुंप्रधानेश्वरेश्वरौ इति नाम तु स्त्रीप्रत्ययानुपपत्तेः श्रुत्यादिविरोधाच्चान्यथा नेयम्—पुंप्रधानयोः गोबलीवर्दन्यायेन विशेषत उक्तानां ब्रह्मादीश्वराणां च भगवान् ईश्वरः, तत्पत्नीयम्—इति । * पुंयोगादाख्यायामिति स्त्रीप्रत्ययोपपत्तिः । पुंप्रधाने स्वशक्त्यैव नियच्छति, ईश्वरं च वात्सल्येनेति निर्वाहो विरूपः क्लिष्टश्च । * ईश्वरीꣳ सर्वभूतानाम् इत्येतदप्येतेन गतार्थमिति । अत्रोच्यते ; यद्यपि नाम्नि तथा निर्वाहः ; तथाऽपि श्रुतौ न तथा स्यात्, * सर्वभूतानामिति षष्ठ्यन्वयवैघट्यप्रसङ्गात् । स्त्रीप्रत्ययस्तु बाहुलकेन नेयः । * अस्येशाना जगतो विष्णुपत्नी इति च मन्त्रान्तरेणोक्तम् ; तदपि हि तद्विभूतिभूतभूमिविषयत्वात् तत्पर्यवसाय्येव । **श्रीवैकुण्ठगद्ये** च शेषादीनामपि तदाज्ञानुविधायित्वमुक्तम्—* शेषशेषाशनादिसर्वं परिजनं भगवतस्तत्तदवस्थोचितपरिचर्यायामाज्ञापयन्त्या इति । आहुश्च **भगवद्यामुनाचार्याः**—* यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभुर्नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः इति । **वेदार्थसंग्रहे** चोक्तम्—* स्वाभिमतस्वानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकमहिममहिषी इति । उक्तं च **श्रीवत्साङ्कमिश्रैः**—* देवि त्वन्महिमावधिर्न हरिणा नापि त्वया ज्ञायते इति । तदात्मजैश्च—* प्रशकनवलेत्यारभ्य * तव भगवतश्चैते साधारणा गुणराशयः इति । न चैतावता भगवतो निःसमाभ्यधिकत्वविरोधः ; प्रत्युत तत्प्रतिष्ठापनमेव, * ह्रीश्च ते लक्ष्मीश्च पत्न्याविति श्रुतेः । न ह्येवंविधपत्नीविशिष्टत्वं कस्यचित्तदन्यस्यास्ति, येन तत्साम्यादिशङ्का स्यात् । उपबृंहितं च—* अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा इति । एवमस्याः शीलादीनामनवधिकातिशयत्वेऽप्यविरोधः ।

यथा प्रभागुणोत्कर्षे भास्करो निःसमाधिकः । श्रीमानपि तथैव स्यात्पतिः पत्नीगुणोन्नतौ ॥
ज्ञानभोगसमानत्वे नित्यमुक्तेश्वरेषु च । यथा वैषम्यनियतिस्तथैवात्रेत्यनाविलम् ॥

शास्त्रेषु बहुधा भगवद्गुणत्वादिरूपेण निर्दिष्टायास्तस्याः कैश्चिन्निर्गुणत्वादिकं शङ्क्यते इति तद्व्युदासाय **कल्याणगुणोक्तिः** । गुणत्वादिनिर्देशास्तु अस्या द्रव्यत्वाद्यविरोधेन अन्यपरा इति तत्र तत्र द्रष्टव्यम् । * ततोऽवलोकिता देवाः, * त्वयाऽवलोकितः सद्यः, * स श्लाघ्यः स गुणी इत्यादिभिरेतदवलोकनात्क्षुद्राणामपि गुणसिद्धौ सर्वकल्याणगुणशालित्वमस्याः कैमुत्यसिद्धम् । कल्याणत्वं मोक्षपर्यवसायितत्त्वज्ञानादिमङ्गलावहत्वं स्वयं नित्यानुकूलत्वं च । * न ते वर्णयितुं शक्ता गुणान् जिह्वाऽपि वेधसः इत्याद्यभिप्रेतसर्वापरिच्छेद्यगुणानन्त्यातिशयसूचनाय गणशब्दः ; ऐश्वर्यादेरनेकावान्तरगुणसमुदायात्मकत्वाद्वा, * प्रकृष्टं विज्ञानमित्यादिन्यायात् ॥

(**पद्मवनेत्यादि** ॥) अथ विभूतितोऽपि मङ्गलनिर्वाहकत्वं प्रदर्शयति—**पद्मवनालयामिति** ॥ एतेन *पद्मे स्थितां पद्मवर्णाम्, * गन्धद्वारामित्याद्यान्नातसौवर्ण्यसौगन्ध्यातिशयोऽपि सूचितः । तच्छरणवरणमन्त्रे चोक्तम्—* तां पद्मनेमीं शरणमहं प्रपद्ये इति । नाभिस्थानीयकर्णिकावस्थानात्, पद्ममस्या नेमिवद्भवति । पद्ममेव नेमिः नयनसाधनं यस्याः सा पद्मनेमीति केचित् । * मातरं पद्ममालिनीम्, *आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्, *श्रीनिलयमालाधारिणी, * प्रियाणि तस्याः पुष्पाणि कमलानि विदुर्बुधाः, * विकासिकमलस्थिता इत्यादिष्वप्यस्या विशेषतः पद्माङ्गीकारश्रुतेः, **श्रीविष्णुस्मृत्यादिषु** विस्तरेणोक्तानां मङ्गल्यविभूतिभेदानामियं विशेषतो देवतेति ज्ञापयितुमिह सुप्रसिद्धमुख्यमङ्गलभूतपद्मवनोदाहरणम् । *यत्र पद्मवनानि चेति भगवतो विशेषसंनिधिस्थाने पद्मवने तद्विग्रह इवासौ विशेषेण संनिधत्ते । एतेन * साऽहं वै पङ्कजे जाता सूर्यरश्मिप्रबोधिते । भूत्यर्थं सर्वभूतानां पद्मा श्रीः पद्ममालिनी इति श्रीवासवसंवादोक्तं सर्वभूतोज्जीवनार्थावतारसौलभ्यमपि प्रदर्शितं भवति । एवं मङ्गलगुणविभूतियोगेन निर्दोषत्वमपि संकलय्याह—**भगवतीमिति** ॥ * ज्ञानशक्तिबलेत्यारभ्य * विना हेयैर्गुणादिभिरिति हि स्मर्यते । अथ उक्तवक्ष्यमाणसर्वातिशयस्थापिकया सुप्रसिद्धस्वासाधारणसमास्यया सर्वसमाश्रयणीयत्वादिकमाह—**श्रियमिति** ॥ एवं हि श्रीशब्दो निरुच्यते—* शृणाति निखिलान्दोषान् श्रीणाति च गुणैर्जगत् । श्रीयते चाखिलैर्नित्यं श्रयते च परं पदम् ॥ इति, * श्रयन्तीं श्रीयमाणां च शृण्वन्तीं शृण्वतीमपि । इति च । अस्य च नाम्नः सर्वप्रकारोत्कर्षज्ञापकत्वमाहुः—* श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम् इति, * श्रीरसि यतः इति च । भगवन्नारायणपदोक्तस्यानुरूप्यं च * भगवतीम्, * श्रियम् इति पदाभ्यां दर्शितम् । श्रीपदनिरुक्तिभिः संश्रितदोषनिराकरणम्, प्राप्यरुचिप्रापकाध्यवसायादिप्रदानम्, उपायस्वरूपनिर्वर्तकत्वम्, * पितेव त्वत्प्रेयान् इत्युक्तं पतिप्रसादजनकत्वं च सिद्धम् । एवमाश्रितार्थव्यापारास्तदनुगुणावतारादयश्च न कर्मकृता इत्याह—**देवीमिति** ॥ भर्तुर्लीलायामैकरस्यात्तदनुगुणव्यापारोपपत्तिरिति भावः । * भगवतीमित्यादिपदत्रयेण द्विषट्कार्णस्थभगवद्वासुदेवपदार्थानुरूप्यं च ज्ञाप्यते । श्रियं देवीमिति समभिव्याहारेण, * श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्, * श्रीर्देवी पयसस्तस्मादुत्थिता घृतपङ्कजेत्यादिश्रुतिस्मृतयः सूच्यन्ते । * श्रियः श्रीश्च भवेदग्र्येत्युक्तं पतिसंबन्धेन द्योतमानत्वादिकमपि देवीमित्यनेन गम्यते ॥

(**नित्यानपायिनीम्** ॥) एवम् * क्रीडार्थमवतीर्णस्य तस्येत्याद्युक्तलोकानुकम्पाहेतुकावतारायाः अपि तस्याः * पश्यतां सर्वदेवानां ययौ वक्षःस्थलं हरेः, * मया विना शुष्यति शोकदीनमित्यादिभिरागन्तुकसंश्लेषविश्लेषादिव्यप-

देशात्कथमपराधभीतानां तत्तदवस्थासु तत्पुरस्कारेण भगवदाश्रयणं स्यादित्यत्राह—**नित्यानपायिनीमिति** । * श्रीवत्सवक्षा नित्यश्रीः, * नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी, * अन्येषु चावतारेषु विष्णोरेषाऽनपायिनी, * भगवद्वासुदेवस्य नित्यैवैषाऽनपायिनी, * महाविभूतेः संपूर्णषाड्गुण्यवपुषः प्रभोः । मम सर्वात्मभूतस्य नित्यैवैषाऽनपायिनी ॥ इत्यादिभिरनयोर्न कदाचिदपि विश्लेषः । अवतारेष्वपि कदाचिद्विश्लेषशोकादेरभिनयमात्रमेव; इदं च **श्रीमद्रामायणान्ते** सूचितम्—* रामस्य सव्यपार्श्वे तु पद्मा श्रीः समवस्थिता । दक्षिणे ह्रीर्विशालाक्षी व्यवसायस्तथाऽग्रतः इति । एवं देवीमित्यन्तेन व्याख्येयस्थश्रीशब्दार्थो दर्शितः । तन्मुखेन नित्यं भगवतः सुखप्रसादनीयत्वं व्यञ्जयितुं नित्यानपायिनीमित्यन्तेन तत्रत्यमतुबर्थश्चोक्तो भवति ॥

(**निरवद्याम्** ॥) ननु भगवतीमित्यादिभिः स्वतो निर्दोषत्वादौ नित्यसंबन्धे च सिद्धेऽपि, स्त्रीत्वोपाधिवशात् कदाचित्पतिपारार्थ्यवैमुख्यं, पतिप्रतिकूलाभिप्रायत्वम्, अविमृश्यकारित्वम्, नृशंसत्वम्, निग्रहरुचित्वं च, * शतह्रदानां लोलत्वं मत्स्यानां प्रतिकूलताम् । गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ * विद्यते स्त्रीषु चापल्यं किं न कुर्वन्ति योषितः । इत्यादिभिः प्रसिद्धं यदि स्यात्; तदा कथं नित्यमशरण्यशरण्यत्वं स्यादित्यत्राह—**निरवद्यामिति** ॥ सामान्यतः स्त्रीत्वनिबन्धनदोषवचनं क्षेत्रज्ञेष्वेव कर्मोपाधिविशेषनियतं प्रायिकं चेति नास्यास्तत्प्रसङ्गः । उक्तं च तथैव—* अनवद्याऽनवद्याङ्गी नित्यं तद्धर्मधर्मिणी इति । **श्रीमद्रामायणे** च—* इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता इति । किं च, * आनृशस्यं परो धर्मस्त्वत्त एव मया श्रुतः इति स्मारयन्त्या नृशंसत्वप्रसङ्ग एव नास्ति । निग्रहरुचिश्च समर्थाया एवास्या अत्यन्तापकारिण्यपि न संभवतीति स्ववाक्यसिद्धम्, * असंदेशात्तु रामस्य तपसश्चानुपालनात् । न त्वां कुर्मि दशग्रीव भस्म भस्मार्हं तेजसेति । एतद्विभूतिभूतदेवतादिषु कर्मवशादीदृशदोषसंभवेऽपि नास्यास्तन्मूलभूतः संकल्पः । * त्वया देवि परित्यक्तं सकलं भुवनत्रयम् । विनष्टप्रायमभवत् त्वयेदानीं समेधितम् ॥ * संत्यक्ता ये त्वयाऽमले इत्यादिषूक्तसंत्यागोऽप्युपेक्षामात्रम्, तच्च प्रीतिकोपविरहेणावस्थानम् ॥

(**देवदेवेत्यादि** ॥) नन्वेवं भगवदभिमतत्वादिकं शरण्यत्वौपयिकं सर्वं तत्पत्न्यन्तरेऽपि स्यात्, * विष्टम्भो दिवो धरुणः पृथिव्याः इत्यादिभिस्तन्माहात्म्यप्रसिद्धेः; तारतम्यं तु दुरूहम्; अतः कथम् * अशरण्यशरण्यामनन्यशरणः इत्युच्यते? तत्राह—**देवदेवदिव्यमहिषीमिति** ॥ यथा मनुष्यादिभ्योऽधिकानां ब्रह्मादिदेवतानां मनुष्यस्थानीयानां सर्वप्रकारसमधिकतया भगवान् देवः, तथा ब्रह्मादिदेवपत्नीभ्यः समधिकानां भगवत्पत्नीनामप्यसौ प्रधानतमेत्यभिप्रायेणात्र दिव्यशब्दः । इयं ह्युभयाधिष्ठानैकशेषित्वसाम्राज्येन सर्वमङ्गलप्रदायित्वादिभिश्च प्रकृष्यत इति भगवच्छास्त्रे उक्तम् । तथा **ब्राह्मे** पुराणेऽपि—* अनन्तनामधेया च शक्तिचक्रस्य नायिकेति । पत्न्यादिषु शक्तिशब्दस्तद्विहारादिकार्योपयुक्तविशेषणत्वाभिप्रायः । तदिदं प्राधान्यम्, * कृताभिषेका महिषी इति विशेषणात् महिषीशब्देनैव वा विवक्षितम्; तदा दिव्यशब्दः तद्विग्रहस्य भगवद्विग्रहस्येवाप्राकृतत्वादिकं न्यनक्ति ॥

(**अखिलेत्यादि** ॥) एवं चिकीर्षितभङ्गपरिहाराय प्रत्याख्यानानर्हत्वाय च पतिवाल्लभ्यातिशय उक्तः । अथ तथाविधोत्कर्षस्वनिकर्षस्वापराधदर्शनजनितसाध्वसपरिहाराय प्रजावात्सल्यातिशयमाह—**अखिलजगन्मातरमिति** ॥ जगच्छब्द इह चेतनपरः । * नमामि सर्वलोकानां जननीमब्धिसंभवाम्, * त्वं माता सर्वलोकानाम् इत्यादिभिरस्याश्चतुर्मुखादीन्सर्वान् जन्तून्प्रति मातृत्वात् लोकमातेति नाम पठ्यते । एवमुपबृंहणबलात् * निचदेवीं मातरमित्यादिषूक्तमस्या मातृत्वं भगवतः

पितृत्वेन समानविषयम् । न हि मदेकवर्जमिदमस्या मातृत्वमित्यभिप्रायेण अखिलशब्दः । तदिदं विश्वमातृत्वप्रदर्शितं निरुपाधिकवात्सल्यं रिपूणामपि वत्सलस्य पत्युरनुरूपतमम् । तच्च हितचिन्तारहितेषु अहितचिन्तकेष्वपि कयाचिन्नियत्या कदाचित्फलति ; किं पुनरिदानीं हितचिन्तोन्मुखे मयीति भावः । दुःसहनिरन्तरापराधे दोषैकनिधौ रावणेऽपि हि सोन्मादपुत्र इव जननीत्वेनैव जातवात्सल्या * मित्रमौपयिकं कर्तुम्, * विदितः स हि धर्मज्ञः, * प्रसादयस्व त्वं चैनमित्यादिभिः सर्वाधिकं रहस्यमुपदिश्य, तद्भ्रमप्रशमने प्रयतते स्म । एवमखिलजगन्मातरमित्यन्तैः पदैश्चिकीर्षितायास्तत्प्रपत्तेरतिशयितामोघधर्मत्वं सूचितम् ; यथोक्तं काश्यपीये—* नारायणात्मिकां देवीं श्रियं त्रैलोक्यमातरम् । भजमानो महाभाग परमो धर्म उच्यते ॥ इति । अयं च तदात्मकत्वव्यपदेशस्तत्पत्नीत्वाभिप्रायेण । अत्र *अस्मत्स्वामिन्नितिवत् * अस्मन्मातरमित्यपि **श्रीविष्णुचित्तादयः** पठन्ति ; व्याचक्षते च * यामुनमुनिवंशजननेन पुनश्च विशेषेण अस्मन्मातरमितीति ॥

(**अशरण्यशरण्याम् ॥**) उक्तैः स्वभावैः सिद्धमपेक्षितानुगुणमाकारमाह—**अशरण्यशरण्या**मिति । येषां मोक्षोपायनिष्पत्तिकामानां सर्वलोकशरण्योऽपि न भवेच्छरण्यः, तेषामप्यसौ शरण्या ; यथोक्तं **त्रिजटया**—* भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया । राघवाद्धि भयं घोरं राक्षसानामुपस्थितम् ॥ * प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा । अलमेषा परित्रातुं राक्षस्यो महतो भयादिति । वानरपरिषदि चैतदनुवदन्वायुसूनुराह—* अलमेषा परित्रातुं राघवाद्राक्षसीगणम्, * ततस्सा ह्रीमती बाला भर्तुर्विजयहर्षिता । अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः ॥ इति । * पापानां वा शुभानां वेत्यादीनि च प्रभञ्जनसुतं प्रति तद्वाक्यानि । कुपितनरसिंहसमीपागतिभीताश्च प्रजापतिप्रभृतयस्तामेव विश्वमातरमाश्रित्य तत्पुरस्कारेण तमुपसेदुरिति पुराणप्रसिद्धम् । आहुश्च—* मातर्मैथिलि राक्षसीस्त्वयि तथैवार्द्रापराधास्त्वया रक्षन्त्येत्यादि ।

(**अनन्येत्यादि ॥**) भवत्वेवमशरण्यशरण्यत्वं तस्याः ; भवतस्तेन किमायातमित्यत्र तदेकप्रपत्तियोग्यां स्वावस्थां दर्शयति—**अनन्यशरण** इति । अन्यत् शरणं यस्य नास्ति सोऽनन्यशरणः । शरणमुपायः * उपाये गृहरक्षित्रोः शब्दः शरणमित्ययम् । वर्तते सांप्रतं त्वेष उपायार्थैकवाचकः ॥ इति [व्यव]स्थापनात् । एवमुत्तरत्रापि द्रष्टव्यम् । उत्तमपुरुषेणैव स्वान्वये सिद्धे अहम् इत्यधिकोक्त्या स्वस्य दुष्करोपायान्तराशक्तिः सूच्यते । प्रपद्य इत्यत्र यद्यपि गत्यर्थेन धातुना बुद्ध्यर्थेन सता अध्यवसायमात्रमुपस्थाप्यते, तथाऽपि प्रमाणानुसारात् शरणशब्दतात्पर्या[नुसारा]च्च प्रार्थनाद्यन्वितभरन्यासं करोमीत्युक्तं भवति । प्रार्थ्यते चानन्तरं फलविशेषः । यस्तु परस्परोपकारेण दक्षिणादानेन प्रशासनेन वा भरन्यासः, नासौ प्रपत्तिः । नन्विदं मुमुक्षोरेव भगवद्व्यवच्छेदेन तदन्यप्रपदने तदैकान्त्यं विहन्यात् ; मैवम् ; यथा कर्मयोगादिकमनन्योपासनार्थतयोपादीयते, तथाऽनन्यप्रपदनार्थतयोपादीयमानमिदं तद्वदैकान्त्यमेव स्थापयति । यथा स्वाधिकारोचितपरिकरार्चनेऽनन्यत्वाविरोधः, तथेहापि । * आत्तो विष्णोरनात्तश्च द्विधा परिकरः स्मृतः । नित्यो वन्द्यो न चानित्यः कर्मवश्यो मुमुक्षुभिरिति चोक्तम् । एवं घटकतया वरणेऽपि न विरोधः ; अन्यथा गुरुभजनतत्पुरस्कारादिकमपि विरुध्येत । अथ * तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् * आचार्यमुपासीतेत्यादिभिस्तादर्थ्यात् तत् संगृह्यते ? इदमपि पूर्वोक्तैस्तथैव, अविशेषात् । किंच, श्रियः प्रपत्तिम् * चन्द्रां प्रभासामिति मन्त्रेण अलक्ष्मीनाशनार्थमामनन्ति ; तथा * ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामिति । या मुमुक्षूणां मोक्षहेतुर्विद्यैव लक्ष्मीः, तदभावनाशोऽनया

क्रियत इति तदर्थं शरण्याभिप्रायसंवादिनी तन्महिषीप्रपत्तिर्युक्तैवेति सिद्धम् । एवं सेयं साक्षात् परंपरया वा सर्वफलसाधिका । * उदारामिति श्रौतं पदं ह्यनवच्छिन्नविषयम् । तच्च * सर्वकामप्रदां रम्यां संसारार्णवतारिणीम् । क्षिप्रप्रसादिनीं लक्ष्मीं शरण्यामनुचिन्तयेदित्यादिस्वायंभुवादिवचनैरुपबृंहितम् । व्याचख्युश्च—* ऐश्वर्यमक्षरगतिं परमं पदं वा इत्यारभ्य * कथय कोऽयमुदारभावः इति । व्यतिरेकमुखेन चैतत्स्थिरीकृतं चतुःश्लोक्याम्—*श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् इति ॥ १ ॥

पारमार्थिकभगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैंकर्यप्राप्त्यपेक्षया पारमार्थिकी भगवच्चरणारविन्दशरणागतिर्यथावस्थिता अविरताऽस्तु मे ॥ २ ॥ अस्तु ते ॥ ३ ॥ तयैव सर्वं संपत्स्यते ॥ ४ ॥

तत्किमत्रापेक्षितमित्यत्राह—**पारमार्थिकेति** । पारमार्थिकशब्दस्य चरणारविन्दविशेषणत्वे अर्थशब्दः प्रयोजनवाची । पारमार्थिकं परमार्थ इत्यर्थः । यद्वा, परमप्रयोजनभूतानुभवग्राह्यं परमभोग्यमित्यर्थः । एतेन परभक्त्यादिजननार्हत्वं व्यज्यते । निर्दोषगुणवत्स्वामिचरणयोः सेवकस्य भक्त्यतिशयः स्यादित्यभिप्रायेण भगवच्चरणशब्दः । अरविन्दत्वरूपणं चोपायदशायामपि स्वादुत्वसूचकम् । * स भ्रातुश्चरणौ गाढम्, * यावन्न चरणौ भ्रातुः, * तस्य ताम्रतलौ तात चरणौ सुप्रतिष्ठितौ । सुजातमृदुरक्ताभिरङ्गुलीभिरलंकृतौ ॥ प्रयतेन मया मूर्ध्ना गृहीत्वा ह्यभिवन्दितावित्यादिष्विवान्योन्ययोगादपि शोभमानत्वद्योतनाय युगलशब्दः । पारमार्थिकशब्दस्य परभक्त्यादिविशेषणत्वे अनुभवविशेषणत्वेऽपि परमप्रयोजनत्वं भ्रमकैतवराहित्यं वा विवक्षितम् । ऐकान्तिकत्वं प्रयोजनान्तरानन्वयेन तदेकनियतत्वम् ; तत एव नित्यानुवृत्तत्वमात्यन्तिकत्वम्, अन्यार्थत्वे हि तत्सिद्धौ निवर्तेत । निरतिशयत्वमात्यन्तिकत्वमिति चाहुः । अत्र परभक्तिः उत्तरोत्तरसाक्षात्कारेच्छात्मिका धीः ; सा च * या प्रीतिः इत्यादिष्विव विषयस्वभावजा, न त्विष्टसाधनत्वबुद्धिजा । परज्ञानम् उत्तरोत्तरसाक्षात्कारः । साक्षात्कृते निरन्तरानुबुभूषा परमभक्तिः । अनुभवस्त्विहानुकूलत्वेन साक्षात्कार एव । नित्यानां मुक्तानां च नित्यानुवृत्तैकरूपानुभवः क्षणभेदेन परभक्तित्वाद्याकारभेदैश्च विकल्प्यते । पूर्वपूर्वक्षणेभ्यूत्तरोत्तरक्षणावच्छिन्नस्वरूपस्येष्टतमत्वमभिप्रेत्य कृतत्वव्यपदेशः ; तस्य मुख्यत्वं तु योगविशेषजन्यानुभवे । नन्विहोपायभूतपरभक्त्यादिभिर्मुक्तदशानुभवस्य कृतत्वं मुख्यमेवास्तु ; तथासत्युपरि श्लोकत्रयोदितज्ञानस्य स्थानत्रयोदितपरभक्तेश्च प्रार्थनमुपपद्येत । तदर्थं च यथाभाष्यं संप्रतिपन्नाञ्जलिप्रपत्तिरिह प्रार्थिता स्यात् ? मैवम् ; * प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य तदानीमेव मत्प्रसादलब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानेत्यादिवक्ष्यमाणसरूपतया तदनुगुणमिह व्याख्यातुमुचितत्वात् ।

न च भगवत्प्रपत्तेः स्वतन्त्रतया मोक्षसाधनत्वं नास्तीति वाच्यम् ; श्रुतिस्मृतिभगवच्छास्त्रेषु तत्स्वातन्त्र्यदृष्टेः । * यो ब्रह्माणम् इत्यादिके हि श्वेताश्वतरमन्त्रे हिरण्यगर्भादिकारणभूतपरमपुरुषशरणागतिर्मुमुक्षुणाऽनुष्ठेयेति प्रतीयते । न च कचिदङ्गत्वदर्शनात् गुरुलघुविकल्पानुपपत्तेश्चात्र व्यवहितसाधनत्वं कल्प्यम् ; अधिकारिभेदेन व्यवस्थापनात् । तथा चोपबृंहितं ब्राह्मे पुराणे—* शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः । तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदमिति । अहिर्बुध्न्येन च सुस्पष्टमुक्तम्—* यद्येन कामकामेन न साध्यं साधनान्तरैः । मुमुक्षुणा यत्सांख्येन योगेन

न च भक्तितः ॥ प्राप्यते परमं धाम यतो नावर्तते यतिः । तेन तेनाप्यते तत्तन्न्यासेनैव महामुने ॥ परमात्मा च तेनैव प्राप्यते पुरुषोत्तमः । इति । प्रपत्तिप्रयोगश्चाविलम्बितफलप्रद एवमुदाहृतः—* अहमस्म्यपराधानामालयोऽकिंचनोऽगतिः । त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः ॥ शरणागतिरित्युक्ता सा देवेऽस्मिन्प्रयुज्यताम् । तस्यानुबन्धाः पाप्मानः सर्वे नश्यन्ति तत्क्षणादिति । अत्रापि * त्वमेवोपायभूतो मे भव इत्यादिभिर्न्यासात्मकत्वं सूच्यते । * तेषां तु तपसां न्यासमतिरिक्तं तपः श्रुतमिति चाह । न्यासशब्दस्य चात्र शरणागतिविषयत्वं दर्शितम्—* निक्षेपापरपर्यायो न्यासः पञ्चाङ्गसंयुतः । संन्यासस्त्याग इत्युक्तः शरणागतिरित्यपीति । * न्यास इत्याहुर्मनोषिणो ब्रह्मणम् इत्यत्र न्यासशब्दसामानाधिकरण्यं त्वन्यपरम् । एवं स्वतन्त्रप्रपत्तिसिद्धौ * भक्त्या परमया वाऽपि प्रपत्त्या वा महामते । प्राप्योऽहं नान्यथा प्राप्यो मम कैंकर्यलिप्सुभिः ॥ इति विकल्पोऽपि व्यवस्थितविषय उपपद्यते । श्लोकत्रयोदितज्ञानादिकमप्यत्र स्वयंप्रयोजनतया प्रार्थ्यत इति न विरोधः । न च प्रपत्तिस्वातन्त्र्ये **भाष्य**विरोधः ; तथा हि—* चतुर्विधा भजन्ते मामित्यादिना उपासनस्येव प्रपदनस्यापि *तावदार्तिस्तथा वाञ्छा तावन्मोहस्तथाऽसुखम् । यावन्न याति शरणं त्वामशेषाघनाशनम् ॥ *प्रपत्तेः क्वचिदप्येवं परापेक्षा न विद्यते । सा हि सर्वत्र सर्वेषां सर्वकामफलप्रदेत्यादिभिः सर्वाभिमतसाधनत्वावगतेः, सर्वफलसाधारणमपि तत्र चरमश्लोकविधेयं प्रकृतोपायविरोधिपापनिवर्तनरूपोदाहरणविशेषे प्रदर्शयामास । इह तु साध्यान्तरसाधनान्तररहितमन्त्रविवरणप्रवृत्तत्वात् प्राप्तिविरोधिनिरसनार्थतयोदाहरति । तस्मान्नोपायभक्त्यादिकमिहोच्यत इति सिद्धम् । परभक्त्यादिभिः साध्यमनुभवादिकं तदभावेऽपि मे प्रपत्तिमात्रेण भवत्विति विवक्षायां प्रस्तुतविरोधाभावेऽपि, वक्ष्यमाणानुसारेण विवक्षान्तरं दर्शितम् ।

आर्तोपच्छन्दनं गद्यं भाष्यं तु पररञ्जनम् । इत्याविलधियोऽप्येवं प्रसीदेयुः प्रमाणतः ॥

पुनश्च मुक्तानुभवं **परिपूर्णे**त्यादिभिः षड्भिर्विशिनष्टि । अत्र हि मुमुक्षूणां भगवदनुभवविशेषेषु यथासंभवं सुकृततारतम्येन परिमिताकारगोचरत्वम्, खद्योतस्फुरणवत्सान्तरत्वम्, कंचित्कालं निरन्तरत्वेऽपि सारस्वतस्रोतोन्यायेन विच्छिन्नप्रवाहत्वम्, सामान्यतः सर्वविषयत्वेऽपि परोक्षरूपत्वम्, स्वयंप्रियत्वेऽपि मधुरभेषजनयेन मुक्तिरूपस्वप्रयोजनसाधनत्वबुद्ध्या उपादेयत्वम्, अत एव सावधिकरसत्वं च स्यात् ; निःशेषनिवृत्तप्रतिबन्धस्य तु न तथेति भावः । अत्र प्रीतिहेतुत्वाभिधानेऽपि तदर्थबुद्ध्या उपादेयत्वाभावादनन्यप्रयोजनत्वमविरुद्धम् । तत्र हेतुरनवधिकातिशयप्रियत्वम् । * भगवदनुभवेत्यनेन मुक्तौ पाषाणकल्पत्वपक्षः, स्वात्ममात्रानुभवनिर्गुणप्राप्त्यादिवादश्च व्युदस्यते ; सर्वविशिष्टब्रह्मानुभवे प्रधानानुभाव्यं च व्यञ्जितम् ॥

अत्रानुभवजनितप्रीतिर्नाम * निरतिशयानुकूलोऽयं विषयो मयाऽनुभूयते इति स्वयमपि निरतिशयानुकूल्यवती कृतार्थताबुद्धिः, * कृतार्थोऽस्मीत्यमन्यत इतिवत् ; सा च सामग्र्यनुवृत्त्या प्रतिक्षणभाविनी प्रवाहविच्छेदरहिता चेत्येके । अन्ये तु—प्रीतेः स्वरूपतोऽनुवृत्तत्वेऽपि पूर्ववदनुभवस्यैव प्रयोज्यप्रयोजकाकारविभागेन जन्यजनकवाचोयुक्तिः—इति । अस्याश्च प्रीतेरनवधिकातिशयत्वं प्रीत्यन्तरापेक्षया निकृष्टत्वविरहात् ; ईश्वरस्य नित्यानामपि हि न मुक्तेभ्योऽतिशयिता प्रीतिः, *श्रोत्रियस्य चाकामहतस्य *भोगमात्रसाम्यलिङ्गाच्चेति समानभोगव्यवस्थापनात्, ईश्वरनित्यमुक्तभोगानामुपचयापचयतारतम्यवादयोरपन्यायमूलत्वाच्च । कैंकर्यस्य भगवदिच्छाकारितत्वेऽपि, * प्रहर्षयिष्यामि इति तत्प्रीत्युद्देशेन प्रवृत्तत्वेऽपि, * प्रीतिकारितेत्यादिना * यथार्हं केशवे वृत्तिमिति न्यायात् प्रीतेः प्रेरकत्वातिशयेन स्वरसप्रवृत्तिः, नियोगनैरपेक्ष्यं

च द्योत्यते । एवं प्रीत्या प्रवृत्तस्यापि कैंकर्यविशेषेषु स्वाभ्यभिमतिविशेषास्त्वनुरोधनीयाः । तादृशमेव च कैंकर्यम् * एतत्साम गायन्नास्ते * जक्षत्क्रीडन् रममाणः * स यदि पितृलोककामो भवतीत्यादिष्वप्युक्तम् । अशेषावस्थाशब्देन परव्यूहादयः स्थानासनशयनादयो जगत्सृष्ट्यादयश्च भगवतोऽवस्थाः, स्वस्य च सशरीरत्वाशरीरत्वानेकशरीरत्वरूपा गृह्यन्ते । कैंकर्यस्य तत्तदवस्थोचितत्वम्, यथालोकं यथागमं च चामरग्रहणादिना भोक्तृतया भोग्यतया च संनिधाय कृतत्वात् । अशेषशेषता आत्मनः आत्मीयस्य च सर्वस्य परशेषभावः । यद्वा, सर्वप्रकारशेषवृत्तिः । अनन्तगरुडादि-प्रतिनियताधिकारकृत्येषु मुक्तस्येच्छाविरहात्, इष्यमाणेष्वपि सर्वेषु * एकधा भवति * तावन्ति चक्रे रूपाणि भगवान् देवकीसुतः इति प्रकारेण शेषशेषिणोर्यथाभिमतरूपपरिग्रहेण मुक्तस्य स्वाभिमतसर्वशेषवृत्तिः स्यादेव; तस्याम् एक-शब्देन स्वप्रयोजनप्राधान्यव्युदासः । अथ वा, नित्यानां मुक्तानां च भगवत्प्रीतिफलासु सर्वासु शेषवृत्तिषु परकृतासु स्व-कृतासु च प्रीत्यविशेषो विवक्षितः, * नित्याभिवाञ्छितपरस्परनीचभावैः * याभिस्त्वं स्तनबाहुदृष्टिभिरिवेत्यादिन्यायाच्च । एकरूपा वा रतिः एकरतिः, कालभेदेन संकोचाद्यभावात् । रतिरिह प्रीतिरिच्छा वा; तया हेतुभूतया कैंकर्यं निरूप्यत इत्यभिप्रायेण रूपशब्दः । * शेषतैकरतिरित्येतत् श्रीवैकुण्ठगद्ये * परिचर्यैकमनोरथः इत्यनेन विवृतम् । अत्रानुभव-रतिकैङ्कर्यशब्देषु ज्ञानचिकीर्षाप्रयत्नक्रमश्च प्रकाशितः । यद्वा, शेषतैकरतिरेव कैङ्कर्यस्य प्रधानं स्वरूपम्; तत्परिवाहतया तु व्यापारान्तराणि भवन्तीत्यभिप्रायः । प्राकृतप्रलयादिष्वप्यविच्छिन्नप्रवाहतया अत्रत्यकैङ्कर्याद्यावृत्त्यर्थं नित्यत्वोक्तिः; * प्रलये न व्यथन्ति चेति हि गीतम् । स्वामिसमादेशापेक्षी तच्चोदितकारी किंकरः, तस्य वृत्तिः कैङ्कर्यम्; तस्यान्यै-र्दुष्प्रापत्वेनालभ्यलाभत्वसूचनार्थम्, इतः पूर्वं प्राप्तेरभावात् अप्राप्तप्राप्तिपक्षव्युदासेनापेक्षार्हत्वज्ञापनार्थं चाधिकः प्राप्ति-शब्दः । * संपद्याविर्भावः इत्यादिकं हि नित्यसिद्धेष्वेवाकारेषु मुख्यम्, न तु साध्ये निरङ्कुशविकासे तत्पूर्वक-व्यापारे च । तत्र तु निवृत्तप्रतिबन्धस्वरूपोपाधिकत्वसूचनार्थम् * आविः स्युर्मम सहजकैङ्कर्यविषयः इत्यभियुक्तैरुक्तम् ।

आत्माभिमानानुगुणपुरुषार्थव्यवस्थया । भगवत्पारतन्त्र्यादि प्रबुद्धस्य सुखायते ॥
परेच्छायत्तभूम्नोऽपि स्वेच्छाया अविघाततः । सर्वं परवशं दुःखमित्याद्यं नात्र बाधकम् ॥
स्वतः शेषत्वकैङ्कर्ये न कुत्राप्यसुखावहे । कर्मजत्वात्तथात्वस्य लोके च व्यभिचारतः ॥
महानन्दमहिम्ना च प्राग्दुःखावेक्षणादपि । मोहदुःखे तदा स्यातामिति मूढस्य जल्पितम् ॥
सुखस्य मोहनत्वं च तामसत्वाद्युपाधिभिः । सुखाय च भवेत्कापि पूर्वदुःखावमर्शनम् ॥

एवमिह * अपेक्षयेत्यन्तं व्याख्येये सोपबृंहणचतुर्थ्यभिप्रेतस्य प्रपञ्चनम् । भगवत एव शरणत्वे वक्तव्येऽपि, दिव्यविग्रहस्य शरण्यगुणादिव्यञ्जकत्वम्, चरणग्रहणस्य कृपोत्तम्भकत्वातिशयेनानतिक्रमणहेतुत्वं चाभिप्रेत्य चरणशब्दः । अरविन्दशब्द उपायदशायामपि भोग्यत्वं सूचयति । अत्र भगवच्छब्दो निरपेक्षरक्षणौपयिकाकारपौष्कल्यप्रदर्शकः । कृत्स्नविदपि भाष्यकारः प्रश्रयप्रकाशनाय * पारमार्थिकी * यथावस्थितेति सामान्यतो निर्दिशति, * त्वमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे, * यद्धितं मम देवेश तदाज्ञापय माधव इतिवत् । एतेन भगवत्प्रपत्तेर्मोक्ष-साधनत्वमित्येतावन्मया निर्णीतम्; सा यत्स्वरूपा, यत्प्रकारेति च न जाने; अतस्त्वयैव वत्सलतया मोक्षार्थभगवत्प्रपत्तेः स्वरूपादिकं यथाप्रमाणं ज्ञापयित्वा अनुष्ठापनीयोऽहमिति विशेषनिष्कर्षरहितानामपि विज्ञापनप्रकारः शिक्षितो भवति । एवं सामान्यत उक्तेऽपि सर्वज्ञा सर्वहितैषिणी देवी स्वयमेव सर्वं विधास्यतीति तात्पर्यम् । * देवानां गुह्यम् इत्याद्युक्तं गोपनीयतमत्वम्, तत एव तत्रतत्र तदनुगुणनिर्देशैः प्रपत्तिस्वरूपादेर्दुरवगाहत्वं च सामान्यनिर्देशेन द्योत्यते । ननु

सर्वलोकसर्वागमप्रसिद्धायाः प्रपत्तेः कथं दुरवगाहत्वम्? इत्थम्—केचित् भक्तिप्रपत्त्योर्व्यतिकरितप्रयोगादैक्यमिच्छन्ति। लक्षणभेदात् भेदमिच्छन्तोऽपि केचित्स्वातन्त्र्येण मुक्तिसाधनत्वं नानुमन्यन्ते। अन्ये तु स्वातान्त्र्याभ्युपगमेऽपि *षड्विधा शरणागतिः इति वचनानुरोधात् आग्नेयादिषट्कवत् संभूय साधकत्वमाहुः। तत्रैव षण्णां प्रत्येकं साधनत्वमपरे। तेष्वेव यथेष्टं केचित्कतिपयोपेक्षया कतिपयपरिग्राहिणः। नियतैकसंग्रहेऽपि स्वरूपन्यासमात्रत्वम्, प्रार्थनाभरन्यासयोरन्यतरमात्रत्वम्, तयोरेव यथेष्टमङ्गाङ्गित्वम्, विकल्पं वा, केचिदाहुः। इतरे च प्रपत्तेरविधेयज्ञानरूपत्वम्, अनिवारणादिरूपत्वम्, दक्षिणाज्ञादिहेतुकभरन्यासाविशिष्टत्वम्, अनङ्गत्वम्, द्वित्राद्यङ्गत्वम्, सर्वधर्मस्वरूपत्यागाद्यङ्गकत्वम्, भक्तियोगवत् आप्रयाणादनुवर्तनीयत्वम्, भक्तियोगाद्यङ्गकत्वम्, आरब्धकार्यपुण्यपापनिवर्तनाक्षमत्वम्, किं बहुना—गृहागमनाञ्जलिप्रणामादिमात्रतां च, प्रतिपादयन्ति। एवं विप्रतिपत्तियोग्यतया दुष्करः प्रपत्तेर्निष्कर्षः; स तर्हि कथं स्यात्? उच्यते; तत्र तावत् भक्त्यैक्यादिपक्षान्निक्षेपरक्षादिषु निराकार्यम्। षाड्विध्योक्तिरपि *न्यासः पञ्चाङ्गसंयुतः इति वचनबलात् अष्टाङ्गयोगोक्तिवत् अङ्गाङ्गिसमुच्चयेन स्थापिता। अत एव हि *षडङ्गं तमुपायं चेत्यादिकमपि संगच्छते। स्वरूपन्यासस्यात्रापेक्षितत्वेऽपि *आत्मात्मीयभरन्यासः, *त्वयि निहितभरोऽस्मि सोऽहं यतः, *तव भरोऽहमकारिषि धार्मिकैः इत्यादिप्रमाणसंप्रदायैर्भरन्यासप्राधान्यं सिद्धम्। यदप्युक्तं **भरतमुनिना**—*अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्। तदेकोपायतायाच्चा प्रपत्तिः शरणागतिः॥ इति; यदपि च **अहिर्बुध्न्येन**—*प्रार्थनामतिः शरणागतिः इति; तत्रापि पूर्वोक्तप्रमाणानुसारात्, अनन्यसाध्यत्वतदेकोपायत्वोक्तितात्पर्याच्च, प्रार्थनापूर्वकभरन्यासात्मकत्वसिद्धिरित्येषा दिक्। अतो दुरवगाहत्वद्योतनाय *पारमार्थिकी इत्यादिसामान्यनिर्देश उपपन्न इति॥

एवमीदृशभरन्यासात्मकतया शरण्यत्वोपयुक्ताकारविशिष्टपरतत्त्वविषयतया च निरूप्यायामस्यां प्रपत्तौ स्वरूपतो विषयतश्च तमःकार्यवैपरीत्यविरहः पारमार्थिकत्वम्। प्रकारतोऽङ्गतश्च रजःकार्यप्रकारान्यथाभावराहित्यं यथाप्रमाणं फलसङ्कर्तृत्वादित्यागश्चात्र यथावस्थितत्वम्। राजसतामसबुद्धिप्रकारश्च *यया धर्ममधर्मं च, *अधर्मं धर्ममिति या इति श्लोकाभ्यां गीतः। एतेन अनाप्तागमसिद्धत्वम्, नित्यागमसिद्धत्वेऽपि पुरुषबुद्ध्या अन्यथाकल्पितत्वं च निरस्तं भवति॥

एवं तु व्याख्यातं **व्यासार्यैः**—*पारमार्थिकीति तमःकार्यव्युदासः। आनुकूल्यादिशरीरवती च सा। तद्धि तस्या उपायान्तरेभ्यो व्यावृत्तं स्वरूपम्। यथावस्थितेति रजःकार्यव्युदासः। प्रपत्तव्यविषयसंबन्धरूपः प्रकारः, तत्साहित्यमभिप्रेतम्। शरणवरणानर्हं शरण्यत्वधीर्ह्ययथावस्थिता स्यादिति। **अविरता**—आमोक्षदानादविश्रान्तव्यापारेत्यर्थः। व्यापारश्चात्र शरण्यप्रसादविशेष एव। *सकृदेव हि शास्त्रार्थः, *सकृदेव प्रपन्नाय, *ननु प्रपन्नः सकृदेव नाथेत्यादिबलादङ्गतः स्वरूपतो वा अनुवृत्तिरिह न विवक्षिता। व्याख्येये *प्रपद्ये इति वर्तमाननिर्देशस्त्वनुष्ठानकालाभिप्रायः। व्यापारानुवृत्तिकथनात्तु भाष्योदाहृतभक्त्यङ्गप्रपत्तिव्यवच्छेदः; सा हि मध्ये साधनरूपं साध्यान्तरमुत्पाद्य विरतव्यापारा भवति; तदेव तु मुक्तिं साधयति। *अस्त्वित्याशासनेन भगवत्प्रपत्तेः स्वरूपतोऽपि स्वादुतमत्वं सूच्यते। **मे**—**अकिंचनतमस्यानन्यशरणस्य**॥ २॥

एवं विज्ञापिताया विष्णुपत्न्याः प्रतिवचनं निबध्नाति—**अस्तु ते इति**॥ रावणेऽपि *तेन मैत्री भवतु ते इति वादिन्याः शरणागतविषये कैमुत्यसिद्धमिदं वरप्रदानवाक्यमित्युत्प्रेक्ष्य प्रोक्तम्। **ते**—मयि न्यस्तभरस्य मया स्वीकृतभरस्य च।

उपायदानमेतस्यास्तदिदं पतिसंमतम्। यथा तस्याः प्रसीदन्त्या हारदानं हनूमते॥ ३॥

भगवत्प्रपत्तेः पूर्वोक्तनित्यकैङ्कर्यप्राप्तिपर्यन्तफलाविनाभावमाह—**तयैव सर्वं संपत्स्यते इति ॥** एवकारेण अत्रोपायान्तरव्यवधाननैरपेक्ष्यं द्योत्यते । यद्वा, * अस्तु ते इत्येतावतैव पर्याप्ते *तयैवेत्यादिकं विभीषणसहागतराक्षसन्यायेन यथाभिमतानुबन्धिरक्षणाभिप्रायम् । अथवा, श्लोकत्रयोदितज्ञानित्वादिकमत्र परत्र च यत्प्रार्थयिष्यते, तत्सर्वमिह सर्वशब्दार्थः; उक्तेन सह वक्ष्यमाणमनुक्तं चानुबन्धिरक्षणमभिमतत्वाविशेषात्संकलय्य प्रोच्यते । *संपत्स्यते इति भविष्यन्निर्देशः प्रपत्त्यनन्तरक्षणप्रभृति तत्तदुचितकालाभिप्रायः । वदान्यत्वव्यञ्जकं चेदं वाक्यद्वयम्; प्रियवाग्दानशीलो हि वदान्यः॥४॥

अखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपस्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूप, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःसौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगाम्भीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यसंकल्पकृतित्वकृतज्ञताद्यसंख्येयकल्याणगुणगणौघमहार्णव, स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यनिरतिशयसुगन्धनिरतिशयसुखस्पर्शनिरतिशयौज्ज्वल्यकिरीटमकुटचूडावतंसमकरकुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबन्धनपीताम्बरकाञ्चीगुणनूपुराद्यपरिमितदिव्यभूषण, स्वानुरूपाचिन्त्यशक्तिशङ्खचक्रगदासिशार्ङ्गाद्यसंख्येयनित्यनिरवद्यनिरतिशयकल्याणदिव्यायुध, स्वाभिमतनित्यनिरवद्यानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणश्रीवल्लभ, एवंभूतभूमिनीलानायक, स्वच्छन्दानुवर्तिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तकल्याणगुणगणशेषशेषाशनगरुडप्रमुखनानाविधानन्तपरिजनपरिचारिकापरिचरितचरणयुगल, परमयोगिवाङ्मनसापरिच्छेद्यस्वरूपस्वभावस्वाभिमतविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवानन्तपरिमाणनित्यनिरवद्यनिरतिशयवैकुण्ठनाथ, स्वसंकल्पानुविधायिस्वरूपस्थितिप्रवृत्तिस्वशेषतैकस्वभावप्रकृतिपुरुषकालात्मकविविधविचित्रानन्तभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानरूपनिखिलजगदुदयविभवलयलील, सत्यकाम, सत्यसंकल्प, परब्रह्मभूत, पुरुषोत्तम, महाविभूते, श्रीमन्, नारायण, वैकुण्ठनाथ, अपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौन्दर्यमहोदधे, अनालोचितविशेषाशेषलोकशरण्य, प्रणतार्तिहर, आश्रितवात्सल्यैकजलधे, अनवरतविदितनिखिलभूतजातयाथात्म्य, अशेषचराचरभूतनिखिलनियमननिरत, अशेषचिदचिद्वस्तुशेषिभूत निखिलजगदाधार, अखिलजगत्स्वामिन्, अस्मत्स्वामिन्, सत्यकाम, सत्यसंकल्प, सकलेतरविलक्षण, अर्थिकल्पक, आपत्सख, श्रीमन्, नारायण, अशरण्यशरण्य, अनन्यशरणः त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये ॥ ५ ॥

एवं श्रीमच्छब्दाभिप्रेतमर्थमुपयोगविशेषपर्यन्तमुदाहृत्य, प्राप्यत्वप्रापकत्वोपयुक्तसर्वाकारसंग्राहकनारायणशब्दं व्याचिख्यासुः, तत्र तत्पुरुषव्युत्पत्तौ अयनशब्दार्थम्, बहुव्रीहौ अन्यपदार्थं च दिव्यात्मस्वरूपं तावदाह—**अखिलेति ॥** अत्र संबुद्ध्यन्तप्रयोगाद्याख्येयेऽपि तथात्वेन स्वच्छब्दाध्याहार इति केचित् । * श्रीमन्नारायण स्वामिन्नित्यादौ मन्त्रा

न्तरे च तत् द्रष्टव्यम् । अन्ये तु, प्रार्थनानुगुणतात्पर्यानुसारेण संबुद्धिरिह प्रयुज्यत इत्याहुः । अखिलहेयप्रत्यनीकत्वम् अखिलहेयात्यन्ताभाववत्त्वम्; तेन कतिपयहेयरहितेभ्यो व्यवच्छेदः । कल्याणैकतानत्वं कल्याणानां सर्वेषां गुणानां साधारणाश्रयभूतविस्तारत्वम् । नित्यादीनामपि न सर्वमङ्गलगुणवत्त्वम् । * समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्, * तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः * स च सर्वगुणोपेतः इत्यादिप्रसिद्धः उभयलिङ्गाधिकरणार्थ उपयोगातिशयात्प्रथममिहोक्तः । * नराज्ञातानि तत्त्वानीत्याद्युक्तकारणत्वादिशङ्कितमचिद्वृतं चिद्वृतं च विकारापुरुषार्थादिकं प्रणतोपेक्षादिपर्यन्तमवद्यं न किंचिदप्यस्यास्ति; न च कल्याणगुणेष्वस्य अविद्यमानः कश्चिदित्यर्थः । पश्चात्तु ज्ञानबलादिगुणोक्तिरेतद्विवरणम् । स्वरूपनिरूपकं ज्ञानत्वादिकमप्यत्र कल्याणशब्देन सामान्यतः संगृहीतम् । एवं सगुणनिर्गुणश्रुत्योर्विषयभेदेन अविरोधात् कुदृष्टिपक्षश्च निरस्तः । यद्वा, कल्याणैकतानं प्रदेशभेदेन कालभेदेनाप्यकल्याणत्वरहितमित्यर्थः । * ज्ञानानन्दैकस्वरूप इति तु तद्विशदीकरणम्; ज्ञानतया आनन्दतया च कात्स्न्र्येन कल्याणत्वमुक्तं भवति । जडात् भोग्यात् प्रतिकूलोदासीनरूपज्ञानाभ्यां च व्यवच्छेदाय ज्ञानानन्दयारुभयोरप्युक्तिः । आनन्दकल्याणशब्दौ स्वपरापेक्षया आनुकूल्यं ब्रूतः । एवम् * आनन्दादयः प्रधानस्य * अक्षरधियां त्ववरोधः इत्यधिकरणद्वयोक्तं स्वरूपनिरूपकवर्गद्वयं व्यञ्जितं भवति । अथ वा, हेयप्रत्यनीकत्वम् आश्रितानां यथोपायं स्वेच्छया हेयनिवर्तकत्वम्; तथा सति लोके स्वसंकल्पायत्तहेयसद्भावस्य न विरोधः । न च विरुद्धघटनशक्तिकल्पना, स्वरूपमात्रेण हेयनिवर्तकत्वस्यानङ्गीकारात्, अन्यथाऽतिप्रसङ्गात् । कल्याणैकतानत्वम्, आश्रितानामभिमतेषु कल्याणेष्वैकाग्र्यम्, अनिष्टनिवर्तनमिष्टप्रापणं चेत्यर्थः । स्वस्य निर्दोषमङ्गलगुणाकरत्वमप्यत्रार्थसिद्धम्; * फलमत उपपत्तेरित्यधिकरणार्थश्च दर्शितः ॥

(**स्वेतरेत्यादि** ॥) त्रिविधानां चेतनानामचेतनानां च पराधीनत्वादिसाम्यादेवंभूतं वस्त्वन्तरं नास्तीत्यभिप्रायेणाह—**स्वेतरसमस्तवस्तुविलक्षणेति** ॥ एतेन ज्ञानभोगसाम्येऽपि सर्वप्रकारसाम्यनिषेधः सिद्धः । * नित्यं विभुं सर्वगतं सुसूक्ष्मम् * विश्वमेवेदं पुरुषः इत्यादिप्रसिद्धं त्रिविधपरिच्छेदराहित्यं प्राधान्यतः पृथगाह—**अनन्तेति** ॥ सर्वव्यापित्वात् देशपरिच्छेदराहित्यम्; सर्वकालवर्तित्वात् कालपरिच्छेदाभावः; साक्षात्परंपरया वा सर्वप्रकारित्वेन सर्ववस्तुसामानाधिकरण्यार्हत्वाद्वस्तुपरिच्छेदविरहः; येन केनापि प्राशस्त्येन स्वस्मादुत्कृष्टैः कैश्चिद्वस्तुभिरधरीकृतत्वाभावाद्वा । तद्विग्रहादीनां तु सन्तोऽपि केचिदतिशयास्तद्विभूतिगता एवेति तैरपि तस्यैवोत्कर्षः । वितस्त्यादिभिः प्रस्थतुलादिभिश्च परिच्छेदो देशपरिच्छेदान्तर्गत एवेति तन्निषेधेन सोऽपि निषिद्धः । वस्त्वन्तरशून्यत्वाद्वा सर्ववस्तुस्वरूपैक्याद्वा वस्तुपरिच्छेदाभाव इति पक्षौ तु सर्वप्रमाणविरुद्धौ, अनन्तपदपूर्वापरश्रुतिविरुद्धौ च ॥

(**स्वाभिमतेत्यादि** ॥) यद्यपि दिव्यात्मस्वरूपापेक्षया सर्वेषामाधेयत्वं समानम्; यद्यपि च विग्रहस्य गुणनियाम्यतया गुणानामन्तरङ्गत्वम्; तथाऽपि स्वरूपवद्भूषणास्त्रस्वरूपनिखिलजगदाधारत्वेन तदनुरूपत्वात्, तादृशस्वरूपव्यञ्जकत्वात्, सालम्बनयोगविषयत्वेन मुमुक्षूणां शुभाश्रयत्वाच्च प्राधान्यं दर्शयितुं गुणेभ्योऽपि पूर्वं विग्रहमाह—**स्वाभिमतानुरूपेति** ॥ निरवधिकानन्दरूपस्य स्वस्याप्यभिमतमनुरूपं च दिव्यरूपम् । स्वरूपस्य नित्यनिरवधिकानुकूलत्वमन्याभिमतिं न बाधते, सर्वस्य सर्वदा विशिष्टैकानुभवगोचरत्वेन प्रमाणसिद्धत्वात् । सा चाभिरूपस्य आभरणाभिमतिवत् न स्वरूपानुकूल्यबाधिका; एवं भूषणादावप्यभिमतत्वाविरोधः । अनिष्टावहशरीरादिव्यावर्तकैरप्राकृतत्वध्येयत्वप्राप्यत्वादिभिरपि विग्रहादेरानुरूप्यम् । सर्वदा उक्तप्रकारविशिष्टत्वमेकरूपत्वम् । नानारूपेष्वपि व्यूहविभावार्चावतारेष्वप्राकृतशुभाश्रयत्वादिकम्

* समस्ताः शक्तयश्चैताः, *समस्तशक्तिरूपाणि, *बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते। अर्चाऽपि लौकिकी या सा भगवद्भावितात्मनाम्। मन्त्रमन्त्रेश्वरन्यासात्साऽपि षाड्गुण्यविग्रहा इत्यादिभिरुच्यते। परव्यूहादिविग्रहवत् तत्तद्विग्रहानुप्रवेशात् अर्चाऽपि षाड्गुण्यप्रकाशकशुद्धसत्त्वद्रव्यमयीत्यर्थः। देवतिर्यङ्मनुष्यादिविचित्रावतारदशायामपि * आदित्यवर्णं तमसः परस्तात् इत्यादिप्रसिद्धस्य परमपदनिलयविग्रहस्य संनिवेशैकरूप्यं वा विवक्षितम्। चिन्त्यत्वेन चोदितस्याप्यचिन्त्यत्वोक्तिः इतरसजातीयतया चिन्तयितुमशक्यतामाह; तेन अनित्यत्वादिसाधकसावयवत्वाद्यनुमानानां धर्मिग्राहकमानबाधोऽभिप्रेतः। दिव्यशब्दौ द्रव्यतः संनिवेशादिभिश्च वैलक्षण्यपरौ, अप्राकृतस्थानवर्तित्वाप्राकृतत्वपरौ वा, *रूपं विशिष्टं दिवि संस्थितं च, * न भूतसंघसंस्थानो देहोऽस्य परमात्मनः। * न तस्य प्राकृता मूर्तिर्मांसमेदोस्थिसंभवा इत्यादिभिस्तथोक्तेः। अद्भुतत्वम् * तस्य ह वा एतस्य पुरुषस्य रूप यथा माहारजनं वासः, * सर्वाश्चर्यमयं देवम्, * तेनाश्चर्यपरेणाहम्, * अपूर्वरूपसंस्थानमित्यादिप्रसिद्धनिरतिशयवैचित्र्यवत्त्वम्। नित्यत्वमपि * नित्यालिङ्गा स्वभावसंसिद्धिः, * नित्यं नित्याकृतिधरमित्यादिभिरुक्तम्। तेन शुभाश्रयपरविग्रहस्य कल्पितत्वकृतकत्वादिपक्षाः प्रतिक्षिप्ताः। अवतारविग्रहाणामपि सत्यानामेव तत्रैव विभागाविभागावुपदिष्टौ; तेषां प्रत्येकमपि नित्येच्छाधीनतां केचिदाहुः। निरवद्यत्वं क्षेत्रज्ञशरीरवत् कर्ममूलत्वदुःखावहत्वादेरभावात्। दिव्यात्मस्वरूपे प्रक्रान्तयोगपुरुषापेक्षयोक्तमनालम्बनत्वरूपमप्यवद्यं दिव्यविग्रहे नास्ति, तस्य यथाश्रुतं यथादर्शनं च सुखानुसंधेयत्वात्। इह खल्वीश्वरापेक्षया न किंचिदपि प्रतिकूलम्, सर्वस्य तदनुकूलतयैव प्रमाणसिद्धत्वात्। तस्य तु परप्रतिकूलसर्वाश्रयस्यापि स्वप्रतिकूललेशरहिततया समस्तहेयरहितत्वोक्तिः। एवं मुक्तनित्यापेक्षयाऽपि न कस्यचित्प्रातिकूल्यम्, तेषामीश्वरेण समानभोगत्वात्। अचेतनापेक्षया तु प्रतिकूलानुकूले कदाचिदपि न स्तः। [अत एव] तस्य हेयमुपादेयं च नास्ति। तस्य सावद्यत्वोक्तिस्तु चेतनविशेषप्रतिकूलस्वभावयोगितया तदपेक्षा। क्षेत्रज्ञानां तु स्वप्रतिकूलदुःखतत्कारणसंबन्धात्सावद्यत्वम्। ईश्वरबुद्धिविशेषरूपस्य क्षेत्रज्ञकर्मसाध्यनिग्रहस्यापि कर्मवश्यगोचरतया तद्दोषत्वमेव; ईश्वरस्य त्वसौ प्रशासनरूपतया गुण एव। एवं स्थिते दिव्यविग्रहस्य निरवद्यत्वोक्तिरीश्वरापेक्षया तदाश्रितापेक्षया च शरीरत्वादिशङ्कितप्रतिकूलस्वभावराहित्यपरा। निरतिशयत्वम् औज्ज्वल्यादिषु सर्वेष्वन्वीयते; तच्च तदपेक्षयोत्कृष्टाभावात्, अनुत्तमत्ववत्। औज्ज्वल्यम् *आदित्यवर्णम्, *दिवि सूर्यसहस्रस्येत्यादिषूक्तं भास्वरतमत्वम्। सौन्दर्यम् अवयवशोभा; येन * साक्षान्मन्मथमन्मथः इत्युच्यते। * सर्वगन्धः इति श्रुतिरनुकूलगन्धविषया। सकृच्चन्दनादि चात्र कृतकरमित्यभिप्रायेण सौगन्ध्यशब्दः। सौकुमार्यं महाबलत्वेऽपि * पुष्पहासः इति नाम दुहानं मार्दवम्; यथोक्तम्—*सुकुमारौ महाबलौ इति। लावण्यं समुदायशोभा; * भूयिष्ठं तेज एवाद्भिर्बहुलाभिर्मृदूकृतम्। चक्षुरानन्दजननं लावण्यमिति कथ्यते॥ इत्याहुः॥

यौवनमिह न कालकृतावस्था; किंतु तादृशो विग्रहस्वभावः, तद्यौवनस्य नित्यत्वात्। अन्येषामपि हि यौवने कौमारानन्तरभावित्वमुपलक्षणमात्रमेव, युवतयैव केषांचिदुत्पत्तिश्रवणात्। आदिशब्देन शुभाश्रयादिप्रकरणोक्तसर्वगुणसंग्रहः। तत एवानन्त्यम्। निधिशब्द इहाश्रयपरो निरतिशयभोग्यत्वव्यञ्जकश्च॥

(स्वाभाविकेत्यादि॥) एवमुपकारकतमत्वाद्यभिप्रायेण गुणेभ्यः पूर्वं विग्रह उक्तः। अथेदृशविग्रहाभिव्यञ्जकप्रकृष्टगुणभूयिष्ठतामाह—स्वाभाविकेति॥ अत्र सर्वगुणकन्दभूतैराश्रितानाश्रितगोचरव्यापारभेदसाधारणैर्ज्ञानादिभिः परत्वम्, आश्रितरक्षणैकान्तैः सौशील्यादिभिः सौलभ्यं च व्यज्यते। स्वाभाविकशब्देन नित्यत्वमनन्याधीनत्वं चात्र विव-

क्षितम् ; ताभ्यां मुक्तनित्यज्ञानादिभ्यो व्यवच्छेदः । तद्बलादिभ्यो व्यवच्छेदस्तु अनवधिकातिशयत्वादपि । अनवधिकातिशयशब्दः पूर्ववत् । *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च इत्याज्ञातं स्वाभाविकत्वं परत्वं च सर्वेषु गुणेषु योज्यमिति भावः । संकर्षणादिव्यूहत्रयाभिव्यक्तिक्रमेण ज्ञानादिगुणद्वन्द्वत्रिकोक्तिः । प्रत्येकं च गुणद्वन्द्वेषु पौर्वापर्यहेतुर्भगवच्छास्त्रोक्तः ; यथा—* बलं वीर्यं तथा तेज इत्येतत्तु गुणत्रयम् । श्रमाद्यवद्याभावास्त्र्यं ज्ञानादेरुपसर्जनमिति । ज्ञानमिह सर्वसाक्षात्काररूपम् , * यः सर्वज्ञः सर्ववित् * सर्वदर्शी स्वाधीनोऽनादिः सर्वेश्वरः सर्वदृगित्यादिभ्यः । उक्तं च **नाथमुनिभिः**—* यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः इति । **बलं** नाम श्रमप्रसङ्गरहितं सर्वधारणसामर्थ्यम् ; *एष सेतुर्विधरणः, * यत्र विश्वं भवत्येकनीलम् , * तत्सवितुर्वरेण्यम् , * ध्रुवमचलममृतं विष्णुसंज्ञं सर्वाधारं धाम, *यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । * परमात्मा च सर्वेषामाधारः परमेश्वरः इत्यादिसिद्धम् । **ऐश्वर्यम्** * एष सर्वेश्वरः, * सर्वेश्वरेश्वरः कृष्णः इत्यादिषूक्तम् अव्याहतेच्छं सर्वनियन्तृत्वम् ; * अजः सर्वेश्वरः इति च तन्नामपाठः । **वीर्यं** सर्वोपादानत्वे सर्वधारणे सर्वनियमनेऽपि विकाररहितत्वम् ; यथोक्तम्—* विकारविरहो वीर्यं प्रकृतित्वेऽपि मे सदा इत्यादि । **शक्तिः** स्वेतरसर्वनिर्वाहिका * जगत्प्रकृतिभावो मे यः सा शक्तिरितीर्यते इत्यादिपूक्ता सर्वोपादानत्वात्मिका । यद्वा, यत् अन्यैरशक्यत्वादघटितमिव भाति, तद्घटनसामर्थ्यरूपा । **तेजः** अस्वाधीनसहकार्यनपेक्षत्वम् ; तदुक्तम्—*तेजस्त्वन्यानपेक्षता इति, * सहकार्यनपेक्षा मे सर्वकार्यविधौ हि या । तेजः षष्ठगुणं प्राहुस्तमिमं तत्त्ववेदिनः इति च । *न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः *ज्योतींष्यादित्यवद्राजन् कुरून्प्रच्छादयन् श्रियेत्यादिनिदर्शितं पराभिभवनसामर्थ्यं तेजः केचित्प्रचक्षते । लोके कश्चित् स्वापाद्यवस्थायां स्वविभूतिं न जानाति, जानन्नपि न धारयति ; ज्ञात्वा धारयन्नपि न सर्वथा नियन्तुं शक्नोति ; शक्तोऽपि धारणनियमनाभ्यां ग्लानो भवति ; अग्लानोऽपि न तत्सत्तास्थितिहेतुः स्यात् ; तद्धेतुश्च पराधानसहकारिसापेक्षः स्यात् ; नैवमसाविति गुणक्रमोक्तितात्पर्यम् ।

अथ * तवानन्तगुणस्यापि षडेव प्रथमे गुणाः । यैस्त्वयेव जगत् कुक्षावन्येऽप्यन्तर्निवेशिताः, *प्रकृष्टं विज्ञानमित्याद्युक्तषाड्गुण्यविततिरूपा आश्रितसंग्रहणरक्षणयोर्विशेषत उपयुक्ता गुणा उच्यन्ते । तत्र **सौशील्यं** शोभनशीलत्वम् ; तच्च अतिमहीयसोऽप्यतिहीनेषु गुहगोपालादिष्वपि साध्वसप्रशमनानन्यप्रयोजननीरन्ध्रसंश्लेषस्वभावत्वम्—*गुहेन सहितो रामः, *अहं वो बान्धवो जातः इत्यादि । **वात्सल्यम्** *शरणागतवत्सलः इत्याद्यभिप्रेता स्वरक्षणायतयाऽभिमतेषु दोषतिरस्कारिणी प्रीतिः । दोषाणां गुणत्वेन दर्शनमिति त्वतिवादः । क्षमाकाष्ठाभूतवात्सल्यकथनेन क्षमाऽप्युक्ता भवति ; * अपिचेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ * अपि पापेष्वभिरता मद्भक्ताः पाण्डुनन्दन । मुच्यन्ते पातकैः सर्वैः पद्मपत्रमिवाम्भसेति चाह । **मार्दवम्** * तं विना कैकयीपुत्रमित्यादिवादिन आश्रितविरहाक्षमतया सुप्रवेशत्वम् , सापराधेषु शासनोन्मुखस्यापि सामप्रधानत्वं वा ; यदाह—* सामोपहितया वाचा रूक्षाणि परिवर्जयन् इति । **आर्जवम्** * ऋजुबुद्धितया सर्वमाख्यानुमुपचक्रमे इत्यादिपूक्तं मनोवाक्कायव्यापाराणां मिथःसंवादित्वम् ; तेन संश्रितेषु विप्रलिप्सानुदयः । **सौहार्दम्** * सुहृदं सर्वभूतानाम् , * उरसा प्रतिजग्राह पार्थं संछाद्य माधवः इत्यादिप्रसिद्धं सामान्यतो विशेषतश्च हितैषित्वम् ; तच्च विषयभेदात्कचित् * एष एवासाधु कर्म कारयति तमित्याद्युक्ताधोनिनीषया न विरुध्यते । **साम्यं** जातिगुणवृत्तादिनिम्नोन्नतत्वानादरेण सर्वैराश्रयणीयत्वम् ; यथा—*शबर्याः सम्यक् , * धन्योऽहमर्चयिष्यामीत्याह माल्योपजीवनः इत्यादि । अत एव *समोऽहं सर्वभूतेष्वित्याह । एतेन

स्वतोऽपक्षपातित्वम्, आश्रितेषु यथार्हमादरसंभावनाक्रमवैषम्यरहितत्वं च सिध्यति; यथाकर्म फलदायिन ईश्वरस्य आश्रयणोपाधिकपक्षपातोऽपि समत्वाविरोधी। **कारुण्यम्** अनुद्दिष्टस्वप्रयोजनान्तरा परदुःखनिराकरणेच्छा। परदुःखदुःखित्वादिकं तु न लक्षणम्, अव्याप्तेरतिव्याप्तेश्च। सर्वप्रशासितुः सापराधनिग्रहस्यापि शास्त्रसिद्धत्वात् तदविरोधेन कारुण्यं नियन्तव्यम्, लोकेऽपि तथैव व्युत्पत्तेः। **माधुर्यं** क्षीरवदुपायभावेऽपि स्वादुत्वम्; तच्च * माधुर्यं परमित्यादिपूक्तम्। द्वेषवतां जिघांसितानामपि दृष्टिचित्तापहारित्वेन रसावहत्वं वा; येन शिशुपालस्य तादृशी चरमदशा, अनन्यमनसाम् * मच्चित्ता मद्गतप्राणाः इत्याद्युक्तावस्था च। वधोद्योगप्रदर्शनेऽपि हि सौम्यत्वम् * एह्येहि फुल्लाम्बुजपत्रनेत्रेत्यादिषु प्रसिद्धम्। **गाम्भीर्यं** भक्तानुग्रहवदान्यत्वादेरानूलतो दुरवगाहत्वम्; आश्रितापराधेषु प्रतिग्रहीतृनिकर्षादिषु च सतोऽपि स्वज्ञानस्य गोपनेन दुर्ज्ञानत्वं वा। तदभिप्रायेण हि सर्वज्ञस्याप्यविज्ञातृत्वोक्तिः। **औदार्यं** पात्रलाघवं देयगौरवं चानादृत्य दायविभागन्यायेन प्रत्युपकारादिनिरपेक्षं वितरणरसिकत्वम्, प्रभूतं दत्वाऽप्यतृप्तत्वं च। अत एव ह्यर्थिनः सर्वान्स्वयमुदारानाह। **चातुर्यम्** रक्षणीयेषु * जनयन्प्रत्ययं तदेत्यादिप्रसिद्धमतिशङ्काशमनदोषगोपनादिरूपमजडक्रियत्वम्; येन विभीषणसुमुखादिषु विरुद्धानप्यनुकूलयति, शुभाश्रयस्वीकारप्रदर्शनाद्ययलोपायैर्विषयवैराग्यादिकं च जनयति। **स्थैर्यं** शरणागतसंग्रहे दोषप्रदर्शकैरन्तरङ्गैरप्यकम्पनीयत्वम्; तथा चाह—* मित्रभावेन संप्राप्तं न त्यजेयं कथंचनेत्यादि। **धैर्यम्** *अप्यहं जीवितं जह्यामित्यादिपूक्तमत्यन्ताभिमतवियोगप्रसङ्गेऽप्यभिन्नप्रतिज्ञत्वम्। भीष्माद्याश्रितप्रतिज्ञारक्षणाय स्वप्रतिज्ञाभङ्गेऽप्येतादृशप्रतिज्ञासिद्धिः; अत एव * द्योः पतेत्पृथिवी शीर्येत् हिमवान् शकलीभवेत्। शुष्येत्तोयनिधिः कृष्णे न मे मोघं वचो भवेदित्यादिभिरविरोधः। व्यत्ययेन वा स्थैर्यधैर्ये व्याख्यातव्ये। अतर्कितोपनतेऽपि बलवति प्रतिपक्षे सावज्ञदृढचित्तत्वं वा धैर्यम्; यथाऽऽहुः—* कपोले जानक्याः इत्यादि। जीवत्यपि महाबले रावणे सागरेऽप्यलङ्घिते विभीषणमभिषिञ्चता दर्शितोऽयं गुणः। **शौर्यम्** असहायस्यापि भीमे परबले स्वबल इव निर्भयप्रवेशसामर्थ्यम्, यथा—जनस्थानयुद्ध-मूलबलनिबर्हणादिषु। **पराक्रमः** प्रविष्टस्य परसैन्ये * छिन्नं भिन्नं शरैर्दग्धमित्याद्युक्तो व्यापारः। * अभियाता प्रहर्ता च इत्याद्युक्ताविमौ द्वौ गुणौ आश्रितविरोधिभङ्गार्थौ, धैर्यादयस्त्रयो वा॥

अथेष्टप्रापणार्थौ गुणावाह—**सत्यकामसत्यसंकल्पेति**॥ इह एतौ [शब्दौ] भावप्रधानौ कर्मधारयवृत्तौ वा। काम्यन्त इति कामाः, स्वेन स्वाश्रितैश्च भोग्या विभूतयः; ते च सत्याः नित्या इत्यर्थः। अमिथ्याभूतकामत्वम् अप्रतिहतेच्छत्वं च नैरर्थक्यपुनरुक्तिभ्यां नात्र विवक्षितम्। सत्यसङ्कल्पत्वं स्वावताराद्यपूर्वभोग्यान्तरसृष्टौ जगद्व्यापारमोक्षप्रदानादिषु चामोघसङ्कल्पत्वम्; तेन तत्सङ्कल्पादभिमतलाभे निःसंशयत्वं स्यात्॥

उक्तगुणवर्गादधिकोपकारकं गुणद्वयमाह—**कृतित्वकृतज्ञतेति**॥ कृतमिह उपकारः, कृतज्ञादिशब्दे तथा दृष्टेः; तद्वत्त्वं कृतित्वम्, उपकर्तृत्वमित्यर्थः। यद्वा, * अभिषिच्य च लङ्कायामित्याद्युक्तमाश्रितकार्यपूरणेन कृतकृत्यत्वम्, कर्तव्यशेषरहितेषु कृतिशब्दप्रयोगात्। * न मे पार्थास्ति कर्तव्यमित्युक्तं विहितानुष्ठाननैरपेक्ष्यं धर्मप्रवर्तनार्थानुष्ठानत्वं वा विवक्षितम्; तेनापि परोपकारार्थमेव प्रवृत्तत्वमुक्तं भवति; श्रूयते च—* न कर्मणा वर्धते नो कनीयानिति; तथा च श्रुत्यन्तरम्—* स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयानिति। अथवा *आदिकर्मणि क्तः; कृतं कर्तव्यत्वेनोपक्रान्तम् आश्रितानां यद्धितम्, तत्सर्वं पूर्वमेवानेन प्रयोजककर्त्रा प्रारब्धमित्यर्थः। स्वेन कृतं परोपकारं प्रत्यपि स्वस्यैव शेषित्वं वा कृतित्वम्। **कृतज्ञता** परैः कृतस्यानुकूल्यलक्षस्य पश्चात्तैरनन्तापकारकरणेऽपि स्वयं चानन्तप्रत्युपकार-

करणेऽपि अकृतप्रत्युपकारवत् तदनुबन्धिपर्यन्तसंरक्षणाय तस्यैवानुदर्शनम् ; यथोक्तम्—* न स्मरत्यपकाराणां शतमप्यात्मवत्तया । कथंचिदुपकारेण कृतेनैकेन तुष्यति ॥ इति * गोविन्देति यदाक्रन्दत्कृष्णा मां दूरवासिनम् । * त्वदङ्घ्रिमुद्दिश्येत्यादि च । एतेन संश्रितानां पश्चाद्दोषसंभवेऽपि हितैषिणः शिक्षणमात्रप्रवृत्तत्वं सिध्यति । अथवा, अर्थिषु नियमान्तरानुसारेण स्वकृतं तादात्विकप्रत्याख्यानमकृत्यवज्जानातीति कृतज्ञः ; यदूचे—* शिरसा याचतस्तस्य वचनं न कृतं मयेति । इदं च प्राप्तावसरे भरतस्येवापेक्षापूरणाय स्यात् ॥

आदिशब्देन * आनृशंस्यमनुक्रोशः इत्यादिप्रसिद्धसर्वगुणसंग्रहः । असंख्येयशब्दः * यथा रत्नानि जलधेरसंख्येयानि पुत्रक । तथा गुणा ह्यनन्तस्याप्यसंख्येया महात्मनः इत्यादिवचनस्मारकः । आश्रितविरोधिनिरसनार्थतया क्रोधादेरपि **कल्याण**शब्देन संग्रहः । * चतुर्मुखायुर्यदि कोटिवक्त्रः, *वर्षायुतैर्यस्य गुणा न शक्याः इत्यादिप्रसिद्धापरिच्छेद्यगुणानन्त्यं तापत्रयप्रशमनत्वं दुरवगाहत्वं च व्यनक्ति—**गुणगणौघमहार्णवेति** ॥ एकैकगुणस्यावान्तरानेकगुणगर्भत्वं गणशब्देन व्यज्यते । गुणगणा एव ओघाः जलप्रवाहाः, तेषां महार्णव इवायमेकाश्रयभूत इति भावः ॥

अथ स्वरूपस्य विग्रहवत् गुणवच्च विग्रहस्य शोभातिशयहेतुभूतानि भूषणान्युच्यन्ते—**स्वोचितेति** ॥ उक्तस्वरूपरूपगुणवतः स्वस्यानुरूपत्वं स्वोचितत्वम् । किरीटत्वादिभेदस्य तत्तत्स्वरूपोपादानसिद्धत्वात्, आश्चर्यत्वस्य पृथगुक्तेश्च अत्र विविधविचित्रशब्दौ हेमरत्नमुक्तादिमयत्वेन तत्तदवान्तरशिल्पविशेषैश्च प्रत्येकं वैषम्यं ब्रूतः । **अनन्त**शब्दश्चाश्चर्यविशेषकः । असंख्येयत्वविवक्षाया**मपरिमित**शब्दः पृथुतरत्वपरः । नित्यनिरवद्यत्वाभ्यां प्राकृतभूषणव्यावृत्तिः ; * स्रग्वस्त्राभरणैर्युक्तमिति हि नित्यं रूपं प्रतिपाद्यते । सर्वदा निरवद्यत्वेन वा कादाचित्कावद्यशङ्कान्युदासः । सर्वगन्धस्यापि दिव्यरूपस्यामोदातिशयहेतुतया निरतिशयसुगन्धत्वम् । अनभिमतकाठिन्याद्यभावात् निरतिशयसुखस्पर्शत्वम् । सूर्यादितेजोभिभावुकदिव्यविग्रहतेजसाऽप्यनभिभूतत्वात् निरतिशयौज्ज्वल्यत्वम् । कर्णिकामकुटव्यावृत्त्या सर्वाधिपत्यसूचनार्थं किरीटशब्देन मकुटविशेषणम् ; धारकपुरुषभेदेन हि मकुटद्वैविध्यं शिल्पशास्त्रादिप्रसिद्धम् । यद्वा, * नाकुण्डली नामकुटी इति प्रयोगात् शिरोभूषणमात्रे मकुटशब्दः । अथ वा, किरीटस्योर्ध्वभागो मकुटशब्देनोच्यते । मकरसंनिवेशं कुण्डलं **मकरकुण्डलम्** । अविभक्तलक्षणरूपस्यापि श्रीवत्सस्य भूषणसमानतया भूषणत्वोक्तिः । तादृशपृथक्संस्थानयोगाच्च, भूषणदेवताध्याने तदभिव्यक्तिः । **मुक्तादामानि** एकावलीत्रिसरादीनि । पीताम्बरस्य भूषणतयोक्तिः शोभातिशयहेतुत्वमहार्घत्वाद्यभिप्राया ; यथा—* अतसीपुष्पसंकाशः पीतवासा जनार्दनः । व्यभ्राजत सभामध्ये हेम्नीवोपचितो मणिरिति । **आदि**शब्देन च हस्तबन्धाङ्गुलीयकादिसंग्रहः । उक्तगुणोत्कर्षहेतुभूतद्रव्यवैलक्षण्यज्ञापनाय भूषणायुधयोर्दिव्यशब्दः ॥

एवमाश्रितानामनुभवार्थानि भूषणान्युक्त्वा तदनुभवतद्रक्षणयोरुपयुक्तानि दिव्यायुधान्याह—**स्वानुरूपेति** ॥ पूर्वोक्तविग्रहादिविशिष्टापेक्षया स्वशब्दः । तत्तदानुरूप्यं यथोचितं ग्राह्यम् । सर्वेषामायुधानां सर्वायुधकार्य[शक्त]करत्वात् अचिन्त्यशक्तित्वोक्तिः । कुठारटङ्ककुद्दालादिकार्यं सालशैलवसुधातलभेदनमेकेन हि शरेण कृतमुच्यते * बिभेद च पुनः सालान्, * सहायकृत्यं किं तस्येत्यादिभिः । यद्वा, नित्यसूरिसमाविष्टतया तदिच्छानुगुणविचित्रकार्यसामर्थ्यमिह विवक्षितम् ; उक्तं **चोत्तरश्रीरामायणे**—* शरा नानाविधाश्चापि धनुरायतविग्रहम् । अन्वगच्छन्त काकुत्स्थं सर्वे पुरुषविग्रहाः इति । **चक्रस्य हेतिराजत्वेऽपि शङ्खस्य** पूर्वोक्तिः, सर्वशक्तेर्भगवतो मोक्षप्रदानशक्तिसूचकतया अभ्यर्हित-

त्वाभिप्राया ; यथोक्तं **परमसंहितायाम्**—* सृष्टिबीजं तथा पद्मं चक्रं स्थितिनिबन्धनम् । गदा संहारबीजं तु शङ्खं मुक्तिनिबन्धनम् ॥ इति । एवमन्यत्रापि । अत्र पञ्चानां कण्ठोक्तिः प्राधान्यात् । पञ्चायुधानि पञ्चभूतशक्तिरूपाणीति **भा[रते]गवते** प्रोक्तम् ; अस्त्रभूषणाध्यायादिषु तु महदादितत्त्वरूपाणीति ; तदुभयं तात्पर्यभेदादविरोधेन नेयम् । **आदि**-शब्देन हलमुसलादिसंग्रहः । सहस्रभुजविश्वरूपादिविग्रहेष्वायुधानामसंख्येयत्वम् * अनेकदिव्याभरणं दिव्यानेकोद्यतायुधमित्यादिभिः सुव्यक्तम् । नित्यनिरवद्यत्वं पूर्ववत् । शुभलक्षणपौष्कल्यात्, आभरणकोटावपि निविश्य शोभातिशयहेतुत्वात्, अनुकूलतमस्वभावत्वात्, मुमुक्षुध्येयविग्रहविशेषणतया मोक्षोपयोगित्वाच्च निरतिशयकल्याणत्वम् ॥

(**स्वाभिमतेत्यादि** ॥) अथैवंविधभूषणायुधादिविशिष्टस्य निरुपाधिकभोग्यस्य भर्तुः प्रधानभोक्तृत्वेनावस्थिता देवीः प्रतिपादयन् प्रथमं व्याख्येये प्राप्यप्रापकदशयोर्नित्यान्वितत्वेन निर्दिष्टां श्रियमादरातिशयादुक्तप्रकारविशिष्टत्वे प्रमाणदार्ढ्यद्योतनाय पूर्ववत्पुनराह—**स्वाभिमतेति** ॥ श्रियो वल्लभ इति विग्रहे * नित्यानुकूलं स्वतः इत्यादिप्रसिद्धस्वभावायाः श्रियोऽप्यसौ नित्यनिरतिशयभोग्य इति दर्शितं स्यात् । श्रीः वल्लभा यस्येति विग्रहे तु, प्रियतमया तया निवेदितं न प्रत्याख्यातीति फलति । ईदृशं चाभिमतत्वम् * न जीवेयं क्षणमपि विना तामसितेक्षणाम्, * न त्वहं तां विना सीतां जीवेयं हि कथंचन, * कच्चिन्न तद्धेमसमानवर्णम्, * कुशली यदि काकुत्स्थः, * मत्कृते काकमात्रे तु, * यदि रामः समुद्रान्ताम्, * दुष्करं कृतवान् रामः इत्यादिभिस्तात्पर्यवृत्त्या व्यज्यते ॥

नित्यनियतप्राधान्यतारतम्यक्रमेण श्रिया सहैकासनस्थे देव्यौ तच्छायासंकाशतया दर्शयति—**एवंभूतेति** ॥ तदाहुः—* देवि त्वामनु नीलया सह मही देव्यः सहस्रं तथेति । उपदिश्यमानधर्माधारादनिर्दिश्यमानधर्माधारस्य स्वतः प्राप्तवैषम्याविरोधेन साम्यं व्यवस्थाप्यम् । पररूपेऽपि देवीत्रयसंबन्धः प्रमाणसंमतः ; यथोक्तं **वलपौष्करे**—* देवो वैकुण्ठनाथस्तु अनन्तासनसंस्थितः । सेव्यः श्रीभूमिनीलाभिः प्रादुर्भावैस्तु चाखिलैः ॥ शङ्खचक्रधरो नित्यं जानुन्यस्तैकहस्तवान् । अभयप्रदहस्तश्च नीलजीमूतसंनिभः ॥ ध्यातव्यो नित्यलोकस्थो भुक्तिमुक्तिफलप्रदः ॥ इति । **नित्यग्रन्थोक्तध्याने** तु * नागभोगे विन्यस्तबाहुमित्येतत् संहितान्तरमूलम् । एतेन वर्णभुजादिविप्रतिपत्तिरपि निरस्ता । **अचिन्त्यशक्तेरीश्वरस्य स्वच्छन्दवृत्तेः** पररूपेऽपि तत्तत्प्रतिपत्त्यर्थं तत्तत्संहितोक्ता विशेषा नान्योन्यं बाधमर्हन्ति । **यथा** नरसिंहरूपे सप्तसप्ततिभेदाः ; यथा च कृष्णरूपाण्यनन्तानीत्युच्यते । एवं परव्यूहादिष्वपि यथोपदेशं सर्वस्य **सत्यत्वम्** । गीयते च—* पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः इति । क्वचिद्वल्लभतया क्वचिन्नायकतया निर्देशस्य **तत्तद्देव्यनुगुणं तात्पर्यं ग्राह्यम्** ॥

एवं देवीपर्यन्तैराक्रीडितातिशयस्य परमभोग्यस्यारण्यचन्द्रिकात्वव्युदासाय नित्यभोक्तृवर्गमाह—**स्वच्छन्देति** ॥ **सूरयो हि स्वाम्यभिमतं स्वयं साक्षात्कृत्य, आत्मात्मीयं सर्वं तदर्थं विनियुज्य, तमनुवर्तन्त** इति ज्ञापनाय **स्वच्छन्दानुवर्तीत्युक्तम्** । **स्वशब्दः** पूर्वोत्तरवदीश्वरविषयः । **स्थितिरिह** स्वरूपस्य सर्वकालानुवृत्तिः । **प्रवृत्तिः** एषां कैंकर्यरूपो **व्यापारः** । **स्वरूपादीनां भेदः** तत्तत्प्रतियोग्यपेक्षया विलक्षणव्यवहारहेतुभूत आकारः । अशेषेत्यादिकं व्याख्यातम् । **स्वरूपनित्यत्वे** सर्वात्मसाधारणेऽपि सूरिषु विशेषत उक्तेन सदासर्वज्ञत्वलक्षणेन नित्यत्वेन मुक्तव्यावृत्तिः, **नित्यनिरवद्यतया वा ; निरवद्यत्वं** हि दुःखादिदोषगन्धरहितत्वम् ; यथोक्तम्—* हताखिलक्लेशमलैः स्वभावत इति । **ज्ञानादिविशेषणं वा नित्यनिरवद्यत्वम् ; तेन कैङ्कर्ये स्वाधीनस्वार्थकर्तृत्वभोक्तृत्वभ्रमराहित्यसिद्धिः । ज्ञानस्य निरतिशयत्वमीश्वरज्ञानवत्**

सर्वविषयत्वम् । क्रियाया ऐश्वर्यस्य च निरतिशयत्वं कैङ्कर्यमात्रे स्थाप्यम् । सर्वविषयत्वे तु परवत्सर्वशरीरत्वादिप्रसङ्गः । अत एव शक्तानामपि जगद्व्यापारेषूदासीनत्वमित्यापातास्तिकपक्षोऽपि निरस्तः । प्रवृत्तिशब्देन क्रियायाः पृथङ्निर्दिष्टत्वादत्र क्रियाविषयमैश्वर्यमिति वा योज्यम् । तदप्येषां परार्थं पराधीनं च । आदिशब्देन कैंकर्यानुगुणबलवीर्यादिसंग्रहः । तत्तत्सेवाविशेषनियतासंख्यातावान्तरेच्छादिवैचित्र्याभिप्रायेण **अनन्तगुणगणशब्दः** । शेषादीनां विशेषाः *तया सहासीनमित्यादिश्लोकेषु द्रष्टव्याः । आसनवाहनसेनेशद्वारपालादिभेदेन नानाविधत्वम् । **अनन्तत्वमिह** असंख्यातत्वम् । **परिजनाः** छत्रधारकादयः । **परिचारिकाः** अनुग्रहाविमलाद्याः, तथा कान्तिवारुणीसूत्रवतीरुद्रासुकीर्तिप्रभृतयः शेषादिपत्न्यः; ता अपि हि तेषां यथार्हं सान्तःपुरस्वामिसेवाविशेषार्था एव । एवम् *गुणैर्दास्यमुपागत इति न्यायेन स्वामिविग्रहगुणैरपि कैंकर्ये प्रेरितत्वमभिप्रेत्याह—**परिचरितचरणयुगलेति** ॥

एवं नित्यविग्रहादियुक्तस्य नित्यसूरिसेव्यस्य मुक्तगम्यं निवासस्थानमाह—**परमेति** ॥ *परमयोगिवाङ्मनसापरिच्छेद्यस्वरूपस्वभाव इति संबुद्धयन्तं केचिद्व्याचक्षते; तदा पूर्वोक्तानां सर्वेषां परत्वसौलभ्योपयोगित्वज्ञापनाय तदुभयं स्वरूपस्वभावशब्दाभ्यां विवक्षितम्, स्वरूपनिरूपकं निरूपितस्वरूपविशेषकं चेति धर्मवर्गद्वयं वा । एवं सति पूर्वोक्तमेव मुखान्तरेणानवसरे निगमितं स्यात्; इतो वरमनुक्तपरमव्योमप्रकर्षकथनम् । तथा च तद्विशेषणतयैव सप्तम्यन्तत्वेन **श्रीवकुण्ठगद्ये**ऽप्येतत्पठितम् । परमयोगिनः साक्षात्कृतपरब्रह्मस्वरूपाः श्वेतद्वीपवासिनः; *ये तु मुक्ता भवन्तीह नरा भरतसत्तम । तेषां लक्षणमेतद्धि यच्छ्वेतद्वीपवासिनामिति हि स्मर्यते । परमव्योम्नः स्वरूपं शुद्धसत्त्वमयम् । तमसः परस्यापि परमव्योमस्वरूपस्यापरिच्छेद्यत्वं पूर्वादिभागेन व्यवस्थाप्यम् । तत्स्वभावो भोग्यतमत्वादिरूपः । विविधशब्दो भोग्यप्रभृतिषु त्रिष्वप्यन्वेतव्यः । **भोग्यम्** अप्राकृतं स्वाश्रयं शब्दादि । तदुपस्थापकतया स्वीकृतानि **भोगोपकरणानि । भोगस्थानानि** क्रीडापर्वतादीनि । स्वरूपगुणसंस्थानादिवैचित्र्यातिशयेन नित्यमपूर्ववदनुभाव्यतया **अनन्ताश्चर्यत्वम्** । प्रत्येकं महद्भिरसंख्यातैश्च रत्नभूषणभद्रासनादिभिर्योगादनन्तमहाविभवत्वम्; पर्यङ्कविद्यादिषु हि विचित्रनदीह्रदसभादिविशिष्टं मुक्तगम्यं स्थानमुपदिश्यते—*सहस्रस्थूणे विमिते दृढ उग्रे यत्र देवानामधिदेव आस्ते इति च तलवकारा अधीयते । पूर्वोक्तापरिच्छेद्यत्वे हेतुरनन्तपरिमाणत्वम् । अनित्यसावद्यस्थानान्तरव्यवच्छेदार्थमिह **नित्यनिरवद्यत्वोक्तिः** । अत्र पञ्चोपनिषत्प्रतिपाद्यानां भूतानां तत्संघातरूपाणां च केषांचित् भगवन्नित्येष्टत्वेन नित्यत्वमविरुद्धम् । त्रिगुणवत्कर्मिणां भगवत्स्वरूपतिरोधानादिहेतुत्वाभावान्निरवद्यत्वम् । निरतिशयत्वं स्थानगुणैः सर्वैः सर्वस्थानातिशायित्वम् । यथोक्तं **महाभारते**—*रम्याणि कामचाराणि विमानानि सभास्तथा इत्युपक्रम्य, *एते वै निरयास्तात स्थानस्य परमात्मनः इति, *आत्मा केवलतां प्राप्तो यत्र गत्वा न शोचति । ईदृशं परमं स्थानं निरयास्ते च तादृशाः इति च । *कुठि गतिप्रतिघाते इति धातुः; गतिरवगतिः । ज्ञानप्रतिघातककर्मप्रसङ्गरहिता नित्यसूरयो विकुण्ठाः, तैः संबन्धादत्र **वैकुण्ठशब्दो**ऽप्राकृतस्थानपरः; *विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ इत्यादिभिस्तत्सिद्धिः । अत्र हि व्यतिरेकविभक्तिस्वारस्यात् *परमे व्योमन् इत्यादिभिरैकार्थ्याच्च परमपदशब्दो न परमात्मस्वरूपपरः । *नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम्, *दिव्यं स्थानमजरं चाप्रमेयम् *एकान्तिनः इत्यारभ्य *तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः इत्यादिभिः स्थानविशेषस्य स्पष्टोक्तेः । न चैतेषामण्डान्तर्वर्तिभगवल्लोकविषयत्वम्, तदन्तर्वर्तिनां सर्वेषामुत्पत्तिविनाशश्रवणात्, एतस्य च नित्यत्वाक्षरत्वाजरत्वोक्तेः, *अण्डं भित्त्वा तथोद्गता इत्यादिभिरण्डबहि-

भूतत्वसूचनाच्च । तथाऽपि त्रिगुणान्तर्भावोऽस्त्विति चेत्, तन्न; तमस्तत्त्वादर्वाचां सुबालोपनिषदि प्रलयप्रतिपादनात्, मुक्तगतौ शीर्षकपालप्रभृति तमःपर्यन्तं तत्त्वभेदेन गन्तव्यदेशाभिधानात्, * आदित्यवर्णं तमसः परस्तात्, * तमसः परमो धाता शङ्खचक्रगदाधरः इत्यादेश्च । नाथः ईश्वरः । * नाथृनाधृ याच्ञोपतापैश्वर्याशीःषु इति नाथतेरैश्वर्यार्थत्ववचनात् तस्मिन् दिव्यदेशे भगवत ऐश्वर्यं स्वेनाप्यपह्नोतुमशक्यमिति भावः ॥

(स्वसंकल्पेत्यादि ॥) एवं नित्यविभूतियोग उक्तः । अथ तत्प्रतिद्वन्द्विलीलाविभूतियोगं वदन् * कारणं तु ध्येयः, *यो ब्रह्माणं विदधाति पूर्वम्, इत्यादिप्रसिद्धस्य मुमुक्षुसमाश्रयणीयस्य * यतो वा इमानि भूतानि जायन्ते * जन्माद्यस्य यतः इत्याद्युक्तं लक्षणमप्याह—**स्वसंकल्पेति** ॥ बद्धानामीश्वराभिमतापरिज्ञानेन प्रायशः प्रवृत्तिरिति ज्ञापयितुम् अचित्समभिव्याहारेण सर्वचिदचित्साधारणं संकल्पानुविधायित्वमुक्तम्; प्रकृत्यादीनां स्वरूपस्थित्योरीश्वरनित्येच्छावशेन नित्यसिद्धत्वमिहाभिप्रेतम्; प्रवृत्तिषु तु संकल्पजन्यत्वम्; प्रकृतेः स्वरूपं त्रैगुण्येन निरूप्यम्; संसारिपुरुषस्य तु संकुचितज्ञानत्वेन; कालस्य तु कलामुहूर्तादिमयत्वेन; त्रयाणां **स्थितिः** पूर्ववत् । **प्रवृत्तिः** व्यापारः । अत्र प्रकृतिग्रहणं प्राकृतानामप्युपलक्षणम् । तेन नारायणशब्देन * नराज्जातानि तत्त्वानि इत्याद्युक्तनिरुक्तिः सूच्यते । प्रकृत्यात्मकजगदुक्त्या वा कार्यतत्त्वसंग्रहः । लीलाविभूतेरशेषत्वान्यशेषत्वभ्रमसंभवस्थानत्वात् तदपनोदनाय अत्र स्वशेषतैकस्वभावत्वमुक्तम् । शेषत्वस्य शरीरलक्षणत्वसिद्धये यावत्सत्ताकत्वमिह विवक्षितम्; तथा निरुपाधिकान्यशेषत्वराहित्यं च । अत्र शरीरस्वभावेष्वाधेयत्वादिषु संकल्पानुविधायित्वोक्त्या नियाम्यत्वं शाब्दम् । आधेयत्वमप्यभिप्रेतम् । प्रकृत्यात्मकत्वं भोग्यभोगोपकरणादौ । समष्टिव्यष्टिपुरुषविभागरूपतया पुरुषात्मकत्वं भोक्तृवर्गे । अत्र भोक्तृत्वं कर्मोपाधिकम् । परमपदे तु निरुपाधिकभोक्तृणां सतामप्यनुक्तिस्तत्रत्यानां स्वाधीनस्वार्थभोक्तृत्वभ्रमराहित्याभिप्रायेण । क्षणलवादिषु कालावच्छेदेषु कालात्मकत्वम् । तेषां जगच्छब्देन ग्रहणम् अभूत् अस्ति भविष्यतीत्यादिरूपेण जगद्विशेषणत्वप्रतीत्यनुसारात् । व्याप्तस्यापि कालस्य लीलाविभूतिमात्रे पठनम् * कालं स पचते तत्र न कालस्तत्र वै प्रभुः, * कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुरिति नित्यविभूतेरकालकाल्यत्वज्ञापनार्थम् । तत्र तत्तदनित्यसद्भावेऽपि लीलाविभूतिवत् कालनियमो नास्तीति विशेषः । भोग्यप्रभृति सर्वं प्रत्येकं विविधम् । तत्तदवान्तरविशेषविवक्षया **विचित्रत्वोक्तिः** । आश्चर्यतया वा; * जगदेतन्महाश्चर्यं रूपं तस्य महात्मनः इति ह्युच्यते । एकैकवर्गव्यक्तीनामसंख्यातत्वादनन्तत्वम् । भोग्यभोगोपकरणादीनि पूर्ववत् । प्राकृतत्वादिरिह विशेषः । भोगश्चात्र सुखदुःखानुभवात्मकः । महदादीन्यनन्तब्रह्माण्डादीनि च संगृह्यता निखिलशब्देन कतिपयजगत्कारणविरिञ्चादिव्यावृत्तिः । निखिलजगदुदयादेरेकैकस्यैव ब्रह्मलक्षणत्वे संभवत्यपि व्यष्टिसृष्ट्यादिनीत्या संभवन्तीं भिन्नकर्तृकत्वशङ्कां निरसितुमिह त्रितयोक्तिः । जगन्निष्ठानामुदयविभवलयानां परमपुरुषलीलात्वोक्तिः सर्वशरीरतया तत्तद्विशिष्टरूपेण तत्तदवस्थो भवतीत्युपादानत्वसूचनार्था । परिपूर्णतया प्रयोजननिरपेक्षस्य कथं जगद्व्यापार इति शङ्कानिरसनाय लीलाशब्दः । * क्रीडतो बालकस्येव, * क्रीडा हरेरिदं सर्वम् * हरे विहरसि क्रीडाकन्दुकैरिव जन्तुभिः, * लोकवत्तु लीलाकैवल्यमित्यादिभिस्तत्सिद्धिः । लीलारूपप्रयोजनवतोऽप्यवाप्तसमस्तकामत्वं सर्वत्राविहतेच्छत्वम् ॥

एवं नारायणशब्दोक्तं शरण्यत्वं यथानिरुक्ति संबोधितम्; अथ * सत्यकाम इत्यादेः पूर्वापरपुनरुक्तिपरिहाराय प्रागुक्तेष्वेवार्थेषु इदं समाख्याष्टकं प्रमाणीक्रियत इति केचिद्याचख्युः । तत्र चतुर्णां समाख्यात्वं व्यक्तम् । सत्यकामादि-

शब्दानां कथंचित्समाख्यात्वं कल्प्यम् । **परब्रह्मभूते**त्यत्र तु ब्रह्मशब्दमात्रं समाख्या; अन्यथाऽपि नामत्वकल्पने गौरवं स्यात् । अत्र परशब्देन विशेषणं त्वौपचारिकप्रयोगव्यवच्छेदार्थम् । **सत्यकामसत्यसंकल्प**शब्दौ पूर्वं विशेषणमात्रपरतयोक्तौ; इह तु तत्प्रमाणतया यथाश्रुति तत्तद्विशिष्टविषयतयेति विशेषः । लीलापदसूचितं जगन्निमित्तत्वमपि सत्यसंकल्पत्वेन स्थापितम्; जगदुदयादिलीलात्वद्योतितमुपादानत्वं तु * **परब्रह्मभूत** इत्यनेनाभिप्रेतम्, * सर्वं खल्विदं ब्रह्म तज्जलानित्याद्यनुसारात् । एवमभेदश्रुतिबलादुपादानत्वाभिमतस्य ब्रह्मणः स्वरूपपरिणामपक्षेण चिदचिद्वृतसर्वदोषान्वयः शङ्क्येतेति तत्परिहाराय स्वयमेव गीतं श्रुत्यर्थमाह—**पुरुषोत्तमेति** ॥ अत्र पञ्चम्यादिविभक्तित्रयेऽपि समासो द्रष्टव्यः ।

नन्वेवं भेदाभेदश्रुत्योर्विरोधादन्यतरबाधः स्यादित्यत्र घटकश्रुतिसिद्धमाह—**महाविभूते इति** । विभूतिशब्दोऽत्र नियन्तव्यपरः । * यदण्डम् इति श्लोकार्थ इहानुसंधेयः । शरीरतया विभूतित्वादत्र स्वरूपभेदेऽपि सामानाधिकरण्यं मुख्यमिति भावः । एवं सर्वविलक्षणस्य सर्वनियन्तुर्जगद्व्यापारलीलायां स्ववल्लभासामरस्यमभिप्रेत्याह—**श्रीमन्निति** ॥ * विभूतिं प्रति शेषित्वं द्विष्ठमित्यभिप्रयन्नाह—श्रीमन्नितीति **व्यासार्याः** । विभूतीनामाधेयत्वादिनियमैः शरीरत्वं व्यञ्जयितुमाह—**नारायणेति** ॥ नित्यविभूतियोगं शुद्धसृष्ट्युपादानत्वं च प्रभूतोपकारकत्वज्ञापनाय विशेषतः सूचयति—**वैकुण्ठनाथेति** ॥ इदं संबुद्धिद्वयं वा; तदा तु तत्त्वादिसाक्षात्कारप्रतिघातुकरहितदेशादिसंबन्धी वैकुण्ठः । अपेक्षितसिद्ध्यर्थं सर्वैरपि याचनीयस्तत्प्रदानादावीश्वरश्च नाथः ॥

एतत् * सत्यकामेत्यादिपदाष्टकं प्राप्याकारनिष्कर्षार्थमिति पक्षमपि प्रगुणीकुर्मः—* सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता इति कामशब्दोदितानां ब्रह्मगुणानामपि प्राप्यतोक्तिमभिप्रेत्याह—**सत्यकामेति** ॥ प्राप्यानुप्रविष्टनित्यविग्रहविभूतिद्वययोगेऽपि केचित्सत्यकामशब्दं प्रमाणयन्ति । यद्वा, मुमुक्षूणां भोक्तव्यसृष्टेर्भोगस्य चोपकरणतया मता नित्याः पदार्था अस्य सन्तीति भावः । प्राप्तिदशायां विभूतिद्वयेऽप्यपूर्वानन्तभोग्यसृष्टृत्वमाह—**सत्यसंकल्पेति** ॥ प्रकृष्टभोग्यतयापि निरतिशयबृहत्त्वमाह—**परब्रह्मेति** ॥ * ब्रह्म वेद ब्रह्मैव भवतीत्यादिभिरभेदापत्तिशङ्कां परिहरन् बद्धमुक्तविलक्षणतया कैङ्कर्योद्देश्यत्वसंभवमाह—**पुरुषोत्तमेति** ॥ कैङ्कर्यस्थानोपकरणादिसमृद्धिमत्त्वमाह—**महाविभूते इति** ॥ सपत्नीकस्य कैङ्कर्योद्देश्यत्वं सूचयति—**श्रीमन्निति** ॥ संबन्धगुणविभूतिव्यापारैः सर्वैरपि भोग्यत्वातिशयं प्रकाशयितुमाह—**नारायणेति** ॥ सूरिसेव्यविग्रहविभूतिविशिष्टस्य देवयानपथिकविश्रमस्थानत्वमभिसंधायाह—**वैकुण्ठनाथेति** ॥

अत्र तृतीयमपि पक्षं ब्रूमः—प्रकृतस्य शरण्यस्य स्वीकृतसर्वभरनिर्वहणक्रमः सत्यकामादिभिरष्टभिः पदैरेव बोध्यते । **सत्यकाम!** काम इह प्रपन्नेभ्यो निरतिशयानन्दप्रदानेच्छा, तस्याः सामर्थ्याविनाभावात्सत्यत्वम्; तच्च अमोघत्वम् । **सत्यसंकल्पो**ऽत्र प्रतिबन्धनिवर्तनविषयः । * सर्वपापेभ्यो मोक्षयिष्यामि इति हि त्वमेवात्थेति भावः । **परब्रह्मभूत** निरतिशयबृहत्त्वविशिष्टस्त्वं स्वाश्रितानपि ज्ञानतो भोगतश्च परमसाम्यपर्यन्तं बृंहयिताऽसि । **पुरुषोत्तम** * यो मामेवमसंमूढ इत्यादिना त्वद्विदां कृतकृत्यत्वोक्त्या त्वन्निर्वाह्यसर्वभरत्वं त्वयैव सूचितम् । यद्वा * पणु दाने पुरु सुनोतीति पुरुषः; बहुप्रदेभ्यः सर्वेभ्य उत्तमत्वात् पुरुषोत्तम । **महाविभूते** विभूतिरिह विभवनम्, प्रभवनम्, नियमनमित्यर्थः । तस्य महत्त्वमपरिच्छिन्नत्वम्; संश्रितान्संसारकारागृहान्निर्गमय्य तदर्थतया सर्वं नियच्छसीति भावः; * अनन्तो देशकालादिपरिच्छेदविवर्जितः । महाविभूतिरित्युक्तो व्याप्तिः सा महती यतः ॥ इत्यत्रापि नियन्तृत्वेन व्याप्तिर्विवक्षिता । **श्रीमन्** श्रिया नित्यसंयुक्तस्त्वं त्वदभिमतमाश्रितकृत्यं निर्वहसि । **नारायण** संबन्धमनुसंधाय दायविभागन्यायेन स्वामि-

तया स्वार्थं स्वयं स्वात्मानं प्रापयितासीति भावः । **वैकुण्ठनाथ** दिव्यपर्यङ्कसुखासिकायां निजपादमूलसेवां दातुमवस्थितोऽसि । इति त्रिष्वपि पक्षेषु मुखभेदैः पुनरुक्तिपरिहारः सिद्धः ॥

(**अपारेत्यादि** ॥) अथ शरण्यस्य समर्पितसर्वभरस्वीकरणानुगुणाः स्वस्य चाधिकारोपायनिष्पादका उक्ताश्चानुक्ताश्चाकारा अष्टादशभिः पदैर्निष्कृष्यानुसंधीयन्ते ; तत्र स्वापराधस्वनिकर्षस्वहेयसंबन्धस्वरक्षणविसंवादादिदोषपरिहारोपयुक्तानां गुणविशेषाणां प्रकर्षः प्रथममुच्यते—**अपारेति** ॥ कारुण्यस्यापारत्वम् अवश्यदण्डनीयेष्वस्मादृशेष्वपि प्रवृत्तेः ; यथा—* वधार्हमपि काकुत्स्थः कृपया पर्यपालयदिति । स्वेनाप्युक्तम्—* मच्छरैस्त्वं रणे शान्तस्ततः पूतो भविष्यसि इति, * गच्छानुजानामि रणार्दितस्त्वम् इत्यादि च । न्यूनाधिकत्वदर्शनजनितावज्ञासाध्वसपरिहारार्थमिह सौशील्योक्तिः । तस्यापारत्वं विशेषज्ञेषु विरिञ्चादिषु विष्ण्वाद्यवतारैः, अनभिज्ञेषु च मत्स्यकूर्मादिषु तत्तत्स्वरूपैरवतारैः निर्विशेषनीरन्ध्रसंश्लेषात् । वात्सल्यस्य अपारत्वं * रिपूणामपि वत्सलः इत्युक्तम् । औदार्यस्यापारत्वम् अर्थिषूदारत्ववचनहेतुभूतमर्थितप्रदाने स्वप्रयोजनाभिसन्धिमत्त्वम्, संश्रितेभ्यः सविभूतिकं स्वात्मानं दत्त्वा तदनुबन्धिषु पशुमनुष्यपक्ष्यादिष्वपि अविश्रान्तत्वं वा ; श्रूयते हि—*नास्यावरपुरुषाः क्षीयन्ते इति, *नास्याब्रह्मवित्कुले भवतीति च । ऐश्वर्यस्य कथनमिहानादिकालं स्वरक्षणविपरीतवृत्तान् केनचिद्याजेन स्वयमेव नियम्याभिमुखीकरोतीति ज्ञापयितुम् । तस्य **अपारत्वम्** * संसारन्यूनताभीतास्त्रिदशाः परिपन्थिनः इति न्यायेन ब्रह्मादिषु देवेषु सुग्रीवादिषु सुहृत्सु वा विरुन्धानेषु तानपि शरणागतानुगुणीकर्तुं समर्थत्वम् । सौन्दर्यस्य अपारत्वं विरुद्धप्रकृतीनां शूर्पणखादीनां सत्त्वस्थानामृषीणामप्यविशेषेण दृष्टिचित्तापहारितया तुष्टूषाजनकत्वम्, असद्वासनादिशामकत्वं च ; यथोक्तं **श्रीपौष्करे** अर्चावतारप्रकरणे—*संदर्शनादकस्माच्च पुंसां संमूढचेतसाम् । कुवासना कुबुद्धिश्च कुतर्कनिचयश्च यः । कुहेतुश्च कुभावश्च नास्तिकत्वं लयं व्रजेदिति । अतिसुन्दर[नित्य]विग्रहेण भगवतः परत्वानुसंधानं तत्सांनिध्यकारणमिति च तत्रोक्तम्—* नित्यसिद्धे तदाकारे तत्परत्वे च पौष्करे । यस्यास्ति सत्ता हृदये तस्यासौ संनिधिं व्रजेदिति । तत्सूचनार्थमैश्वर्यसौन्दर्ययोरिहाव्यवहितपठनम् ॥

*सर्वस्य शरणं सुहृत्, *सुहृदं सर्वभूतानाम्, *सर्वलोकशरण्याय, *सर्वयोग्यमनायासमित्यादिप्रसिद्धस्वभावस्य वायसवानरराक्षसादिविशेषानादरेणाङ्गीकुर्वतस्ते मादृशजनेऽपि गुणवृत्तादिनिकर्षो न त्यागकारणमित्याह—**अनालोचितविशेषेति** ॥ अत्र विशेषशब्दविवक्षितमनालोचितगुणगणेति श्रीवैकुण्ठगद्ये व्यञ्जितम् । प्रपत्तेः सर्वाधिकारत्वमपि अनेन प्रकाशितम् । *दुर्गसंसारकान्तारमपारमभिधावताम् । एकः कृष्णनमस्कारो मुक्तितीरस्य देशिकः, *प्रणम्य कृष्णं सहसा, * एकोऽपि कृष्णे सुकृतः प्रणामः इत्यादिपूक्तमल्पयत्नप्रसाद्यत्वमाह—**प्रणतार्तिहरेति** ॥ अनेन स्वस्य एवंविधावस्थाहेतुः अवतारविशेषोऽप्यनुसंहितः ; उक्तं हि स्वयमेव—* निरस्तेतरभोगाशो वरदं शरणं गतः इति । अत्र प्रणतशब्दः प्रकृतानुगुण्यात्, *प्रपन्नार्तिहरं विष्णुमित्याद्यनुसाराच्च प्रकृष्टप्रह्वीभावयुक्तप्रपन्नविषयो वा । प्रस्तुतावतारे व्यक्ततमं स्वस्मिन्नुपकारतमं च वात्सल्यगुणं पूर्वं द्विरुक्तमपि * मित्रभावेन संप्राप्तम् * दोषो यद्यपि तस्य स्यादित्यादिस्मरणाय पुनराह—**आश्रितेति** ॥ वात्सल्यगुणोदधौ निग्रहादिकं निमग्नं भवतीत्यभिप्रायेण एकशब्दः । अत एव हि सर्वज्ञत्वादौ स्थितेऽपि अविज्ञातृत्वाद्युक्तिः । उपायान्तरं स्वीक्रियतामित्यत्र * अस्मान्वेत्थ परान्वेत्थ इति प्रकारेण मादृशानामकिंचनानामधिकर्तव्यं हिततमं त्वमेव जानासि ; त्वदायत्तानुकूल्यस्य च शेषवृत्तिविधानेऽपि *न त्वं सुतो न वा [मृ]गतः ; सर्वज्ञस्य ते, *त्वयाऽपि लब्धं भगवन्निदानीम्, *यदि मे न दयिष्यसे इत्यादिकं न विज्ञापनीयमित्यभिप्राये-

णाह—**अनवरतेति** ॥ अनवरतनिखिलशब्दाभ्यां ज्ञानस्य कालतो विषयतश्च संकोचो व्युदस्तः । *त्वमेवैवं कुरुष्व माम्, * कुरुष्व मामनुचरमित्यादिन्यायेन त्वदधीनव्यापारस्य मे त्वयैव प्रातिकूल्यनिवर्तनादिकमपि कार्यमित्याह—**अशेषचराचरेति** ॥ निखिलशब्दः स्वरूपस्थित्यादिनियन्तव्यकात्स्न्र्यपरः, सार्वकालिकनियमनकात्स्न्र्यपरो वा । आगमैराचार्यादिभिरन्तरात्मतया च बहुप्रकारं हि नियमनम् । न हि अविधेयं ते किंचित्, येन मे अभिमतं प्रतिबन्धाद्विलम्बेत, अलभ्यं वा स्यात्, इति भावः । परिपूर्णस्य मे त्वदङ्गीकारेण न किंचित्प्रयोजनमित्यत्राह—**अशेषचिदचिदिति** ॥ न हि मदेकवर्जं तव सर्वशेषित्वम्, अतो ममाप्यतिशये तव चार्थः प्रकल्पत इति भावः । तथाऽपि यथावस्थितरक्षापेक्षा तव नास्ति, कथं च त्वं रक्षणीयः ? इति शङ्कायामाह—**निखिलजगदाधारेति** ॥ गुणादिवत् त्वदपृथक्सिद्धविशेषणस्य ममापेक्षामन्तरेणैव मत्सत्तादिकं त्वयैव रक्ष्यते, तत्साफल्यार्थं रक्षापेक्षादिकमपि त्वयैव कारयितव्योऽहम्, न हि त्वदधीनसत्ताकस्य मे त्वन्निरपेक्षप्रवृत्तिः संभवतीत्यभिप्रायः । एवमेव हि शेषभूतानां स्वतन्त्रस्वामिना त्वयैव यथेष्टं स्वमुद्दिश्य विनियोगः क्रियते इत्याह **अखिलजगत्स्वामिन्निति** ॥ इष्टानिष्टप्रदानसाधारणेऽस्मिन् मद्विनियोगे किं तवायातमित्यत्राह—**अस्मत्स्वामिन्निति** ॥ मदाचार्यसन्ततिसांमुख्येन ममैवंविधत्वसंबन्धज्ञानाद्यवस्थाप्रदानरूपोपकारे प्रवृत्तेन त्वया शेषपूरणं कार्यमिति भावः । परिपूर्णतया पूर्वोपकारप्रत्युपकारनिरपेक्षस्य तव अकिंचननित्यसापेक्षसंश्रितरक्षणमात्मीयनित्यगुणपरित्राणमिति सूचयति—**सत्यकामेति** ॥ सर्वशक्तेस्तव नित्यसूरिवर्गे मन्निवेशनमीषत्करम्, न हि त्वद्व्रतं केनापि हन्तुं शक्यमित्याह—**सत्यसंकल्पेति** ॥ तथाऽप्यपेक्षितार्थमन्यः कश्चिदाश्रीयतामित्यत्राह—**सकलेतरविलक्षणेति** ॥ * विष्णुपोतं विना नान्यत्किंचिदस्ति परायणम् * भवतां कथ्यते सत्यं विष्णुरेकः परायणमित्यादिभिः अन्येभ्यस्तव मोक्षप्रदत्वादिरूपं विशेषं पश्यन्नहं मुमुक्षुः कमन्यमाश्रयेयम्; न हि परतन्त्रः कश्चित् स्वतन्त्रकृत्यं प्रार्थनीयः; न च त्वं परतन्त्र इति भावः । यद्यर्थिनं मां नादियसे कथं तव औदार्यमथा जावेदित्यभिप्रायेणाह—**अर्थिकल्पकेति** । अर्थी च कल्पकश्चेति विग्रहः । अर्थिनां कल्पद्रुम इति वा । उक्तं हि—* स सर्वानर्थिनो दृष्ट्वा समेत्य प्रतिनन्द्य चेति । अर्थिनः कल्पद्रुमा यस्य सः अर्थिकल्पक इति वा विवक्षितम्; यदगीयत—* उदाराः सर्व एवैते इति । अभिमतपुरुषार्थदानार्थमर्थिनामुत्पादकः शास्त्रादिमुखेनार्थित्वापादकश्चेति वा । एवं पूर्वोक्तस्याप्यौदार्यस्य अतिशयप्रदर्शने तात्पर्यादपुनरुक्तिः । *ज्ञातं मया वसिष्ठेनेत्यादिकमनुसंदधानः पाञ्चालीगजेन्द्रादिवदापन्नस्यानन्यगतिकस्य मम एतामापदमवेक्ष्य रक्षितुमर्हसीत्याह—**आपत्सखेति** ॥ आपदि सखिवत् संरक्षक इत्यर्थः । विध्वसनीयत्वस्नेहविषयत्वादिसूचनाय सखिशब्दः । शत्रुमपि * तस्मात्परिश्रान्त इति व्यवस्य न त्वा शरैर्मृत्युवशं नयामीत्यवोचत् ॥

एवं द्वाभ्यामिष्टप्रापकत्वम्, अनिष्टनिवर्तकत्वं च दर्शितम् । अथ तत्र समानाभिप्रायतया नित्ययुक्तामखिलजगन्मातरं पुरस्कुर्वतो मे महान्तोऽप्यपराधास्त्वया क्षन्तव्या इत्याह—**श्रीमन्निति** ॥ संबन्धगुणविभूतिप्रयोजनव्यापारास्ते मदुपेक्षया मन्दफला मा भूवन्, अत आत्मानं नातिवर्तेथा इत्याह—**नारायणेति** ॥ उत्तरखण्डस्थापेक्षया पूर्वं श्रीमन्नित्याद्युक्तम्; इह तु पूर्वखण्डस्थापेक्षया उक्तैः स्वभावैः फलितमाह—**अशरण्यशरण्येति** ॥ स्मर्यते हि—* अगतीनां गतिर्भवानिति । अत एव अनालोचितेत्यादिना न पुनरुक्तिः, तत्र हि तारतम्यानादरे तात्पर्यम् । एतत्सर्वं व्याख्येयविवक्षितप्राप्यप्रापकाकारप्रपञ्चनम् । अस्म्यहमेवम्, एतावतापि किं त्वया लब्धम्, सर्वत्र हि शास्त्रार्थे अधिकारोऽपेक्षित इत्यत्राह—**अनन्यशरण इति** ॥ तत्त्वविदोऽनन्यप्रयोजनस्य मम सिद्धोपायान्तरं नास्ति, * अहमस्म्यपराधानाम्

* न धर्मनिष्ठोऽस्मीत्याद्युक्तावस्थाविशेषविदश्च मे साध्योपायान्तरमपि नास्तीति प्रतिबुद्धोऽस्मि ; अयमेव हि ममात्राधिकार इति भावः । इदं तु व्याख्येयस्योत्तमपुरुषाभिप्रेतमिति ज्ञापनाय, अहमपि न मम शरणमिति व्यञ्जनाय च, अधिकोऽहंशब्दः । अथवा अनन्यशरण इत्युपायान्तरशून्यत्वम्, अहमित्युपायभीरुत्वम्, अतिशङ्काराहित्यम्, प्रयोजनान्तरतदुपायपरित्यागित्वम्, मोक्षार्थप्रपत्त्युन्मुखत्वं च व्यज्यते । एतत्सूचितः कार्पण्यविस्तरः प्रतिवचनवाक्येषु गद्यान्तरयोश्च द्रष्टव्यः । त्वदित्यादिना पूर्वखण्डपदक्रमानुसरणम् । त्वच्छब्दः शरण्यत्वोपयुक्तसर्वाकारवैशिष्ट्यपरः । पादेत्यादिकं प्रागुक्तार्थम् ।

अत्र द्वयम् ॥ पितरं मातरं दारान् पुत्रान्बन्धून्सखीन्गुरून् ।
रत्नानि धनधान्यानि क्षेत्राणि च गृहाणि च ॥
सर्वधर्मांश्च संत्यज्य सर्वकामांश्च साक्षरान् ।
लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो ॥ ६ ॥

अत्र द्वयमित्यस्य व्याख्यातप्रायमिति शेषः ; तात्पर्यं तु पूर्वमेवोक्तम् । यद्वा द्वयम् अर्थानुसंधानेन सह एवमुक्तमिति वा, वक्तव्यमिति वा विवक्षितम् । वाक्यान्तरैः पुनःपुनः प्रपद्यत इति तु नाशङ्कनीयम्, एकसाध्यसिद्ध्यर्थं प्रपत्त्यावृत्तेः प्रतिषेधात्, इह साध्यान्तरायोगाच्च । **पितर**मित्यादिकं तु स्ववाक्यवन्निबन्धनसंवादमुखेन अनन्यशरणत्वादिकं विशदीकृत्य वक्ष्यमाणफलप्रार्थनाप्रस्तावनात्मकमिति द्वयार्थस्य समुदितोक्तिः । तथा ह्यत्र सोपाधिकभोग्यतदुपायत्यागं निरुपाधिकभोग्यतदुपायविशेषपरिग्रहं च स्पष्टयित्वा प्रसादय इत्यादिना सोढुमित्यन्तेनोत्तरखण्डस्य दोषनिवृत्तिप्रार्थना संगृह्यते । पित्रादीनां त्यागोक्त्या भृत्यादिचेतनान्तरत्यागः कैमुत्यसिद्धः । बन्धुशब्द इह संबन्ध्यादिपरः । रत्नानीत्यादिकमुत्कटभोग्यत्वभोगसाधनत्वानामचेतनान्तराणामुपलक्षणम् । चकारेण वा अनुक्तसमुच्चयः । प्रियेषु हितेषु च मोक्षतदुपायानुपयुक्तेषु कुत्रचित् सङ्गोऽपि न युक्त इति ज्ञापनाय पितरमित्यादिविविधोक्तिः ॥

एवं लोकसिद्धप्रियहितान्युदाहृत्य **सर्वधर्मा**नित्यादिना शास्त्रवेद्यानि साधनानि साध्यानि चाह । तत्र सर्वधर्मशब्दः सिद्धसाध्यरूपसपरिकरधर्मकात्स्न्र्यपरः । **सर्वकामा**निति हिरण्यगर्भादिपदपर्यन्तकाम्यविषयः । **अक्षर**शब्द इह आत्ममात्रानुभवगोचरः । धर्माणां कामानां च उपयोगित्वेन वा पित्राद्युदाहरणम् । तच्च यथासंभवं द्रष्टव्यम् । पित्रादीनां त्यागश्चात्र काम्यधर्मोपयोगितया अर्थकामोपयोगितया वा अनुपादानम् । अत एव * मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, * वृद्धौ च मातापितरावित्याद्युक्तभगवदाज्ञानुपालनं न विरुध्यते । सर्वधर्मशब्देन मोक्षसाधनभूतोपासनवर्गसंग्रहेऽपि तन्निवृत्तौ * विहितत्वाच्चाश्रमकर्मापि इति न्यायेन वर्णाश्रमधर्माणामनिवृत्तिः । तदिह त्रैवर्गिकधर्मेषु प्रयोजनान्तरेषु मोक्षोपायान्तरेषु च साधारणं नैराश्यं त्यागः ; तत्र पुरुषार्थान्तरेष्वल्पास्थिरत्वादिदोषदर्शनान्नैराश्यम् । तत एव तदुपायेष्वपि मुक्तिसाधनेष्वन्येषु स्वावस्थादर्शनेन दुष्करत्वादिना नैराश्यमिति विशेषः । **संत्यज्य** सम्यक् त्यक्त्वा, सवासनं परित्यज्येत्यर्थः । यद्वा पञ्चाङ्गसंयुक्तायाः प्रपत्तेरङ्गत्वेनाङ्गित्वेन वा अनुपादानमिह धर्माणां त्यागः । सोऽयं प्रपत्त्युपकारकत्वबुद्धिविरहः संप्रतिपन्नेषु पुरुषार्थान्तरतदुपायेषु मुक्त्युपायान्तरेषु नित्यनैमित्तिकेषु च समान इति सहोक्तिः । **लोकविक्रान्तचरणा**विति चरणे लोकविक्रान्तत्ववचनमनाश्रितानामप्यात्मप्रकाशनेन सौलभ्यादिव्यञ्जकम् । लोकविक्रान्तेति व्यस्तं वा ; तदा तु लोकेषु विक्रान्तः अधिष्ठातेत्यर्थः । ते स्वतन्त्र-

स्वामिनः परमप्राप्यस्य च । विभुशब्देन फलप्रदानौपयिकगुणपौष्कल्यं व्यज्यते । यद्वा विभुशब्देन परत्वम्, ते इत्यनेन सौलभ्यं च संगृह्यते । **अव्रजम्**—व्रजामीत्यर्थः । अनद्यतनत्वमत्राविवक्षितम्; भूतत्वेन निर्देशस्तु कर्तव्यशेषनैरपेक्ष्यव्यञ्जनपरः । त्याज्यानां त्यागस्य पूर्वमस्पष्टत्वादिह तत्प्रपञ्चने तात्पर्यम् ॥ ६ ॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च गुरुस्त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥ ७ ॥

उपायत्वमुपेयत्वं च * माता पिता भ्रातेत्यादिश्रुतिसिद्धसर्वविधबान्धवस्य नारायणस्यैवेत्यभिप्रायेण त्यक्तं सर्वं त्वमेवेत्याह—**त्वमेवेति** ॥ त्वत्पादेत्यत्र त्वच्छब्दाभिप्रेतं चानेन विशदीकृतम् । सर्वेषां जन्तूनां सर्वेषु जन्मसु सर्वविधोपकारकत्वं त्वयि समुचितमित्यभिप्रायेण प्रत्येकं त्वमेवेति सावधारणावृत्तिः । मातापित्रादयो हि तत्प्रयुक्तास्तत्सहकृताश्च तदभिमतयत्किंचित्करणेनोपकुर्युः, अयं चानन्यप्रयोज्यो निरपेक्षश्च स्वेच्छयैव सर्वप्रकारेणोपकरोति । **माता,** प्रलयदशायामुदरे स्थापयित्वा प्रसवनात् । प्रियप्रवर्तकत्वादिभिश्च **पिता**; * अहं जीवप्रदः पिता इति ह्याह । हितप्रवर्तकश्च **बन्धुः,** संबन्धान्तरेणाप्यहितनिवर्तनार्हः । **गुरुः,** * गुशब्द इत्याद्युक्तान्धकारनिरोधित्वात्; तत्र चासौ गुरुशरीरक आदिगुरुश्च । **विद्या,** उपायभूतविद्याप्रवर्तकत्वात् तत्फलप्रदत्वाच्च, अकिंचनानामुपासनरूपविद्यायाः स्थाने निवेशाद्वा । **द्रविणम्,** * अमृतं साधनं साध्यं यं पश्यन्ति मनीषिणः इत्युक्तात् साधनत्वात्, साध्यत्वाच्च । **त्वमेव सर्वमिति** उक्तानुक्तसर्वकात्स्न्यपरम् । **मम**—तत्त्वविदोऽकिंचनस्य त्यक्तान्यसाध्यसाधनस्य त्वयि न्यस्तभरस्य च । **देवदेवेति** सर्वप्रकारोत्कर्षपरम् ॥ ७ ॥

पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ८ ॥
तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ९ ॥

एवं स्वविषयेऽनुसंहितस्य सर्वविधबन्धुत्वस्य सर्वविषयत्वेन निरुपाधिकत्वं सूचयति—**पिताऽसीति** ॥ **लोकस्य**—हिरण्यगर्भादिजन्तुजातस्य । **पूज्यश्च**—पितृत्वगुरुत्वादिभिः सर्वकर्माराध्यत्वश्रुतेश्च समाराध्यः । * गरीयान् ब्रह्मदः पितेत्युक्तमाह—**गरीयानिति** ॥ * गरीयान् पूज्यतम इति तु **भाष्योक्तम्** । **लोकत्रये**—बद्धमुक्तनित्यरूपचेतनवर्गत्रये । यद्वा लोकत्रयशब्देन सर्वलोकवर्तिनां लक्षणा, प्रभावतोऽप्रतिमत्वस्य कण्ठोक्तत्वात् । * न त्वत्समोऽस्तीत्यादिकमिह कारुण्यादिषु योजितम् ॥ **तस्मात्**—तवैव सर्वविधबन्धुत्वात्, प्रभावतः कारुण्यादिगुणैश्च सर्वाधिकत्वात्, त्वद्विषयापराधस्य पित्रादिसर्वविषयापराधरूपत्वात् सर्वविषयापराधानां त्वदाज्ञातिलङ्घनरूपत्वेन त्वदपराधत्वाच्चेति भावः । **प्रणम्येत्यादिकं** प्रपद्य इत्यस्य विवरणम् । प्रकृष्टप्रह्वीभावश्चात्र प्रकरणात् प्रपत्तिरूपः । स च पूर्वकृत एव फलविशेषप्रार्थनार्थमिहानूद्यते । कायप्रणिधानमत्र स्वरक्षणार्थस्वव्यापारान्तरनिवृत्तिव्यञ्जकमात्रम् । **प्रणम्य प्रसादये**—प्रपदनरूपं प्रसादनमनुतिष्ठामि । भक्तिवत् प्रपत्तिरपि प्रसादनविशेषः । मदिष्टविघातानिष्टप्राप्तिहेतुभूतमत्कृतापराधजनितापीतिरूपकालुष्यरहितं करोमीत्यर्थः । **त्वां**—स्वतः सर्वभूतानां सुहृदं मदपराधात्कलुषितबुद्धिम् । **अहम्**—अकिंचनोऽनन्यगतिः त्वत्पत्न्या

दत्तवरः त्यक्तत्वदितरसाध्यसाधनश्च । **ईशम्**–सापराधनिग्रहादिसमर्थम् । **ईड्यम्**–क्षमादिभिः स्तुत्यम् । * न तस्येशे कश्चन तस्य नाम महद्यशः इति श्रुत्युक्तमनेन पदद्वयेन दर्शितम् । क्षुद्रोऽपि जन्तुः संबन्धविशेषादपराधं सहते, किं पुनस्त्वमित्यभिप्रायेण पित्रादिदृष्टान्तः । **प्रियः प्रियाय**–मत्प्रीतिविषयस्त्वं त्वत्प्रीतिविषयाय मह्यम् । * प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः इति हि स्वयमेवात्थ । **अर्हसि देव सोढुमिति** वक्ष्यमाणसंग्रहः । संसारमोचनमपि ते लीलैवेति देवशब्दाभिप्रायः । एतावदन्तं पूर्वखण्डविवरणमिति केचित् ॥ ८ ॥ ९ ॥

मनोवाक्कायैरनादिकालप्रवृत्तानन्ताकृत्यकरणकृत्याकरणभगवदपचारभागवतापचारासह्यापचाररूपनानाविधानन्तापचारान् आरब्धकार्यान्, अनारब्धकार्यान्, कृतान्, क्रियमाणान्, करिष्यमाणांश्च सर्वान् अशेषतः क्षमस्व ॥ १० ॥

अथोत्तरखण्डस्थस्यापि सविशेषणनारायणशब्दस्य पूर्वमेव व्याख्यातत्वात्, अवशिष्टयोश्च चतुर्थीनमसोः पाठक्रमादर्थक्रमस्य बलीयस्त्वात् प्रथमं मनोवाक्कायैरित्यादिभिस्त्रिभिर्वाक्यैरिष्टप्राप्तेः पूर्वभाविनीं ममकारनिवृत्तिवाचिनमःशब्दविवक्षितां सर्वानिष्टनिवृत्तिं प्रार्थयते । तत्र सर्वस्य चानिष्टस्येष्टविघातस्य च कर्ममूलत्वात् तन्निवृत्तिः पूर्वमभ्यर्ध्यते । मानसादिभेदेन त्रिविधः पापराशिः, तद्विपाकश्च मन्वादिभिर्विभक्त इति ज्ञापनाय करणत्रयोपादानम् । अकृत्यकरणादेरहेतुकत्वमन्योन्याश्रयादिकं च परिहर्तुमाह–**अनादिकालप्रवृत्ते**ति ॥ हितप्रवृत्तियोग्यैः करणैरेतावन्तं कालमहिते प्रवृत्तोऽस्मीति निर्वेदश्चात्र व्यञ्जितः । * यद्ब्रह्मकल्पेत्यादिप्रक्रियया अनादिकालप्रवृत्तम्, अत एवानन्तम् । प्रथमोऽनन्तशब्दोऽकृत्यकरणकृत्याकरणरूपसामान्यापचारयोरन्वेतव्यः । द्वितीयस्तु भगवदपचारादौ । अकृत्यकरणादिपञ्चकमुत्तरोत्तरं क्रूरतरम् । यद्यपि केषांचित् कृत्यानामकरणमकृत्यकरणात्मकम्, तथाऽपि शरणागतरक्षणादिकृत्याकरणं महत्तरपातककोटौ स्मर्यत इति ज्ञापयितुमकृत्यकरणादुत्तरं कृत्याकरणोक्तिः । अकृत्यकरणान्तर्गतस्यापि भगवदपचारादेः ब्राह्मणपरिव्राजकन्यायेन प्रकृष्टत्वज्ञापनाय पृथगभिधानम् । यद्यप्यकृत्यकरणादेरप्याज्ञातिलङ्घनरूपतया भगवदपचारत्वम्, तच्चात्रापचारानिति विशेष्यनिर्देशेन व्यज्यते; तथाऽपि शिशुपालादीनामिवाव्यवधानेन भगवत्परिवादादिकमिह भगवदपचारशब्दोक्तम् । अकृत्यकरणशब्देन तु स्ववर्णाश्रमादिनिषिद्धानुष्ठानमात्रम् । कृत्याकरणशब्देन स्ववर्णादिनियतधर्मत्य प्राप्तकाले शक्तेनानुष्ठानम् । भगवदपचाराश्च द्वात्रिंशदपचारादिप्रकरणेषु द्रष्टव्याः । भगवदीयेषु वस्तुषु स्वीयत्वबुद्धिः, अर्चावतारपर्यन्तेष्वक्तारेषु प्राकृतत्वबुद्धिः इत्यादयोऽपि भगवदपचाराः । त्वदपचारेति वक्तव्येऽप्यत्र भगवदपचारशब्दस्तत्तत्प्रमाणोपात्तप्रकारसूचनार्थः । अयथाशास्त्रमर्थाद्युपाधिभिर्भागवतविरुद्धाचरणमिह भागवतापचारः । इमौ विपर्यासेन केचित् वर्णयन्ति । एतयोरेवापचारवर्गयोः * न क्षमामि इत्यादिभिर्विशेषिताः केचित्पूर्वोक्तन्यायादसह्यापचारा इति विभज्यन्ते । ते च * विद्याचोरो गुरुद्रोही, * एकाक्षरप्रदातारम्, * यः शूद्रं भगवद्भक्तम्, * मयि द्वेषानुबन्धोऽभूत् संस्तुतावुद्यते तवेत्यादिषु द्रष्टव्याः ॥

एवं निर्निबन्धनभगवद्भागवतद्वेषावज्ञापरिहासादयश्च यथालोकमसह्यापचारा इत्यनुशिष्यन्ते । एते पञ्चापि प्रत्येकमवान्तरोपाधिभिः नानाविधाः तत्तद्विधास्वपि अवान्तरव्यक्तिभेदैरनन्ताः । **आरब्धकार्यान्**–जात्यायुर्भोगरूपविपाकसंज्ञफलप्रदाने प्रवृत्तान् । यद्यपि, *अनारब्धकार्य एव तु पूर्वे तदवधेरिति उपासने सूत्रितम्, तथाऽपि * साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी इति प्रपत्तौ विशेषवचनादत्रारब्धकार्योपादानम् । अर्थितार्थप्रदस्य शरण्यस्य प्रपत्तृणा-

मार्तितारतम्यानुसारेण यथाप्रार्थितफलप्रदानात् तदिष्टदेहाद्यनुवृत्तौ न प्रत्यक्षादिविरोधः । **अनारब्धकार्यान्**—प्रारब्धकार्यकर्मनिरुद्धावसरतया अनुपक्रान्तफलान् । द्विविधानपि **कृतानित्यवच्छिनत्ति** । **क्रियमाणान्**—आनुकूल्यसङ्कल्पादिमत्त्वेऽपि देशकालादिवैगुण्यात् पूर्वनियुक्तदूरस्थदुर्निवारभृत्यादिमुखेन वा उपक्रान्तानपरिसमाप्तान् । **करिष्यमाणान्**—तद्वदनुबन्धादिमुखेनागत्या प्रमादाद्वा संपतिष्यतः, बुद्धिपूर्वोत्तराघानां पश्चादेव प्रायश्चित्तविधानात् । तेषामप्यत्र संग्रहे तु यथार्हप्रायश्चित्तप्रेरणं क्षमाफलं ग्राह्यम् । **सर्वानशेषत** इति व्यक्तिशक्तिकात्स्न्र्यपरम् । सन्ति हि पापानां बह्व्यः शक्तयः तत्त्वतिरोधायकत्वम्, प्रत्यवायजनकत्वम्, कर्मान्तरानर्हतापादकत्वम्, सजातीयपापारम्भरुचिजनकत्वं चेति । एतास्वन्तिमा वासनेत्युच्यते । सा च प्रत्युत्तरे व्यक्तमनुवदिष्यते । पापशक्तिश्च निग्रहसंज्ञः परमपुरुषबुद्धिविशेष एवेति **क्षमस्वेत्यनेन** व्यज्यते । निग्रहनिवृत्तिरूपो हि प्रसादविशेष इह क्षमा । अत्र भागवतापचारेषु तद्विदितेषु तत्प्रसादनमुखेन भगवतः प्रसादनम् । * मया त्वं परुषाण्युक्तस्तच्च त्वं क्षन्तुमर्हसीति न्यायात् । तदविदितेषु तु अव्यवधानेन, रहस्यप्रायश्चित्तन्यायात् ॥ १० ॥

अनादिकालप्रवृत्तं विपरीतज्ञानमात्मविषयं कृत्स्नजगद्विषयं च विपरीतवृत्तं चाशेषविषयमद्यापि वर्तमानं वर्तिष्यमाणं च सर्वं क्षमस्व ॥ ११ ॥

एवं निषिद्धक्षमा प्रार्थिता । अथ सहेतुककाम्यक्षमा प्रार्थ्यते—**अनादिकालेति** ॥ क्षुद्रपुरुषार्थकामनाया **विपरीतज्ञानसापेक्षतया** अपचाराणामिव शास्त्रार्थज्ञानपूर्वककाम्यानामपि मात्रया भ्रान्तिहेतु[क]त्वं व्यञ्जयितुमिह **विशेषतो** विपरीतज्ञानस्य सहोक्तिः । यथावस्थितविषयविरुद्धाकारावगाहिज्ञानमिह **विपरीतज्ञानम्** । तच्चात्र * योऽन्यथा सन्तमात्मानमित्यादिभिरुक्तः स्वात्मनो जगतश्च स्वनिष्ठत्वस्वतन्त्रत्वस्वशेषत्वभगवदन्यनिष्ठत्वादिभ्रम इत्यभिप्रायेणाह—**आत्मविषयं कृत्स्नजगद्विषयं चेति** ॥ वृत्तशब्दस्य शास्त्रीये प्रसिद्धिप्रकर्षमुपजीव्य **विपरीतवृत्त**मिति बन्धकं काम्यकर्मोच्यते ; अन्यथा पूर्वोक्तेन पुनरुक्तिप्रसङ्गात् । काम्यस्य च विपरीतवृत्तत्वं सात्त्विकत्यागसमदर्शित्वादिविशिष्टहिततमधर्मविपरीतत्वात् । विपरीतवृत्तेऽपि स्वविषयतया पुत्रादिपरविषयतया च [द्वै]वैविध्यं दर्शयति—**अशेषविषय**मिति ॥ **अद्यापि वर्तमानं वर्तिष्यमाणं च** । सद्गुरूपदेशादिभिः परोक्षसम्यग्ज्ञाने निष्पन्नेऽपि बाधितानुवृत्त्यादिनयाद्वासनारागादिभिरनुवर्तमानमित्यर्थः । अत्र **च**कारेण पूर्वकृतविपरीतवृत्तसमुच्चयः । **अद्यापी**त्यनेन च अनादिविपरीतवृत्तसन्ततिः **सूच्यते** । अत्रापि **सर्व**शब्दः पूर्ववत् कात्स्न्र्यपरः । अशेषत इति चानुसन्धेयम् ॥

इह यथाधिकारं यथाचोदितमनुष्ठितानामपि संसारहेतुधर्माणामभिचाराणामिव अनर्थपर्यवसायितया मुमुक्षवपेक्षया पापत्वोक्तेः स्वर्गादिहेतुभूतस्वतन्त्रसंकल्पेऽपि निग्रहविशेषत्वबुद्ध्या काम्यक्षमाप्रार्थनं युक्तम् । यद्यप्येवं पूर्वकृतेषु काम्येषु गतिः, तथाऽपि वर्तमानवर्तिष्यमाणकाम्यक्षमार्थिनां स्वयं तदारम्भ एव न संभवतीति कथं तत्क्षमाप्रार्थनम्? इत्थम्—अज्ञातयादृच्छिकसुकृतन्यायात् सुहृज्जनबुद्ध्या वा संभवत्सु नेदं चोद्यम् । स्वबुद्धिपूर्वमपि वर्तमानेषु काम्येषु मध्ये निर्विण्णानामपि प्रक्रान्तसमापनमन्तरा लब्धवृष्टेः कारीरीशेषसमापनन्यायेन स्यात् । तत्र पश्चिमांशस्याज्ञासिद्धत्वान्न काम्यत्वदोषः । पूर्वांशस्य तु क्षुद्रफलकामनामूलस्य तत्फलजनकत्वाभावेऽपि तादृशवासनाजनकत्वसंभवात् कर्मयोगस्येव * नेहाभिक्रमनाशोऽस्तीति न्यायेन केषांचित्कर्मणामसमाप्तानां कृतांशस्य विलम्बकारिसाधनान्तरपर्यवसितफलजनकत्वात् तत्क्षान्तिः प्रार्थनीया । अत्र पूर्वापरांशयोरधिकारभेदेऽप्यासमाप्तेरैककर्म्याद्वर्तमानव्यपदेशोऽपि युक्तः । उत्तरकालेऽपि

केनचिद्धेतुना निर्वेदविच्छेदात् नित्यत्वभ्रमात् स्वप्नदोषाद्वा काम्यं संभाव्यते । तस्यानुत्पन्नस्यापि क्षमावेक्षणं शीघ्रं स्वोचितप्रायश्चित्तप्रेरणार्थम्, सौभर्यादिन्यायेन क्रमेण वैराग्यजननार्थं वा । उक्तं हि प्रपन्नमधिकृत्यैव—* अथोपायप्रसक्तोऽपि भुक्त्वा भोगाननामयान् । अन्ते विरक्तिमासाद्य विशते वैष्णवं पदमिति ॥ ११ ॥

मदीयानादिकर्मप्रवाहप्रवृत्तां भगवत्स्वरूपतिरोधानकरीं विपरीतज्ञानजननीं स्वविषयायाश्च भोग्यबुद्धेर्जननीं देहेन्द्रियत्वेन भोग्यत्वेन सूक्ष्मरूपेण चावस्थितां दैवीं गुणमयीं मायां दासभूतः शरणागतोऽस्मि तवास्मि दास इति वक्तारं मां तारय ॥ १२ ॥

एवं कर्मनिवृत्तिः प्रार्थिता । अथ कर्महेतुप्रकृतिसंबन्धनिवृत्तिः कर्मनिवृत्त्यैव भवन्त्यपि सर्वेश्वरबुद्धिविशेषाधीनेति ज्ञापयितुमभ्यर्थ्यते—**मदीयेति** ॥ ईश्वरस्य वैषम्यनैर्घृण्यपरिहारार्थं मदीयेत्युक्तम् । अन्योन्याश्रयनिवारणाय बीजाङ्कुरन्यायमभिप्रेत्याह—**अनादिकर्मप्रवाहप्रवृत्तामिति** ॥ प्रकृतिस्वरूपस्य पुरुषवत् अनादित्वात् तत्प्रवृत्तिमात्रे कर्महेतुकत्वमुक्तम् । तत्र च * गुणमायासमावृतः इत्यादिप्रसिद्धं प्रतिकूलप्रवृत्तित्रयं भगवत्स्वरूपेत्यादिभिराह—**भगवत्स्वरूपेति** ॥ **तिरोधानं** नाम क्षेत्रज्ञानां भगवत्स्वरूपविषयज्ञानप्रसरनिरोधः । तथा चात्यन्ततिरोधानादसत्त्वबुद्धिं, सामान्यतो विदितेऽपि भगवति सर्वाश्रयत्वादिधर्मतिरोधानादवरत्वादिबुद्धिं, तदन्येषु स्वनिष्ठत्वादिबुद्धिं च करोतीत्याह—**विपरीतज्ञानजननीमिति** ॥ इदं च जीवस्वरूपतिरोधानतन्मूलदेहात्मभ्रमादेरुपलक्षणम् । एवं तत्त्वत्रयतिरोधानफलभूतं विपरीतज्ञानान्तरमाह—**स्वविषयाया** इति ॥ प्रकाशमानेषु वस्तुषु तिरोधानं नाम तत्तद्भेदकधर्मग्रहणनिवारणम् । इदमेव हि सर्वत्र भ्रान्तेर्निदानम् । उक्तस्या[प]कारत्रयस्य हेतुभूतमवस्थाचतुष्टयं देहेत्यादिभिरुच्यते । **देहेन्द्रियत्वेन**—भोगायतनतया भोगोपकरणतया च । **भोग्यत्वेन**—शब्दादिगुणविशिष्टभूतपञ्चकरूपत्वेन । **सूक्ष्मरूपेण**—देहादिपरिणामरहितांशेन । सेयं प्रकृतिरिदानीं चतुर्भिरप्यंशैरुपकरोति । प्रलयदशायां तु सूक्ष्मरूपेणैव तिरोधानमात्रं करोतीति व्यवस्था *देहयोगाद्वा सोऽपीति सूत्रभाष्ये द्रष्टव्या । ईदृश्याः प्रकृतेः दुरत्ययत्वं स्वतन्त्रलीलाप्रवृत्ततयेति * दैवी ह्येषा गुणमयी इत्यादिना त्वयैव गीतमिति सूचयति—**दैवीमिति** ॥ तिरोधानादिहेतुभूतैरवस्थाचतुष्टयानुवृत्तैर्बन्धहेतुभिः सत्त्वादिगुणैः प्रचुरतामाह—**गुणमयीमिति** ॥ सत्त्वादिगुणसमुदाय एव प्रकृतिरिति **सांख्यपक्षस्तु** * गुणाः प्रकृतिसंभवाः, * प्रकृतेर्गुणसंमूढाः इत्यादिव्यधिकरणप्रयोगबलात् निरस्तः । कचित्तु सत्त्वरजस्तमःशब्दानां द्रव्यपर्यन्तः प्रयोगः * तद्गुणसारत्वात्तु तद्व्यपदेशः इति न्यायेन नेतव्यः । एवमनन्तैर्विभोर्गौर्व्यापारैः परिणामैर्गुणैश्च प्रख्यातमाश्चर्यत्वं समाख्याविशेषेणाह—**मायामिति** ॥ मायां मां तारयेति द्विकर्मकतयाऽन्वयः । **दासभूत** इत्यादिभिर्मूलमन्त्रपदत्रयार्थः सूच्यते । * दासभूताः स्वतः सर्वे, * आत्मदास्यं हरेः स्वाम्यमित्यादिप्रसिद्धं स्वभावतो दासत्वं च्विप्रत्ययाभावेन व्यज्यते । द्वयेऽपि नारशब्दवाच्यानां जीवानां तात्पर्यवृत्त्या दासत्वं ग्राह्यम् । दूरं पलायितेऽपि मयि त्वत्संबन्धस्तावत् दुस्त्यजः । दास्यप्रतिबोधश्च मे संप्रति जात इति भावः । * शरणागतोऽस्मि तवास्मि दासः इति पूर्वोत्तरखण्डार्थनिष्ठत्वं समुच्चित्योक्तम् ।

स्वरूपभरलाभेषु तवैव न ममेति यत् । प्रपन्नस्यानुसन्धानं सारं तदिह दर्शितम् ॥

अस्मीति प्रार्थनाभिप्रायम् । **दासोऽस्मि**—दासवृत्तिपरः स्यामित्यर्थः । अन्यथा तु दासभूत इत्युक्तस्यैव पुनर्वचनमात्रं स्यात् । शरणागतोऽस्मि तवास्मि दासः इति निर्देशौ प्रार्थनात्मनिक्षेपपराविति केचित् । आर्तो वा दृप्तो

वा द्वयवक्ताऽहं तव दयनीय इत्यभिप्रायेणाह—**इति वक्तारमिति** ॥ यद्यप्यत्र फलप्रार्थनार्थं प्रपत्तिकर्तृत्वानुवाद एव युक्तः, तथाऽपि तद्वचनकर्तृत्वानुवादः * भव शरणमितीरयन्तीत्याद्यभिप्रेतवचनप्राशस्त्यादिव्यञ्जनार्थः । **मां**—* स्वयं मृत्पिण्डभूतस्येत्यादिप्रसिद्धस्वरक्षणासमर्थम् । त्रिगुणद्रव्यस्य नित्यतया नाशाभावात् **तारयेत्युक्तम्** । एतेन, * दुरत्यया इत्युक्त स्वयत्नेन दुस्तरत्वं, * मामेव ये प्रपद्यन्ते इत्यादिनाऽभिप्रेतं पराधीनतरणं च गम्यते । एवं नमःशब्दे निवर्तनीयतयाऽभिप्रेतस्य पापस्य भ्रमस्य प्रकृतिसंबन्धस्य च मिथःकार्यत्वं कारणत्वं च यथायोगं द्रष्टव्यम् ॥ १२ ॥

*** तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥**
*** उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् । आस्थितः सहि युक्तात्मा मामेवानुत्तमां गतिम् ॥**
*** बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते । वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥**
इति श्लोकत्रयोदितज्ञानिनं मां कुरुष्व ॥ १३ ॥

अथ निर्वेदमान्द्यादीषद्विलम्बक्षमाणामत्यविशदज्ञानभक्त्योरपि कैङ्कर्योपयोगितया चतुर्थ्यभिप्रेतफलकोटिघटितत्वात् स्वयंप्रयोजनं तदुभयं **तेषा**मित्यादिना प्रार्थ्यते । * तत्पादभक्तिज्ञानाभ्यां फलमन्यत् कदाचन । न याचेत् पुरुषो विष्णुं याचनान्नश्यति ध्रुवम् ॥ इति तावन्मात्रप्रार्थना ह्यनुज्ञाता । अत्र परभक्तिवचनं तदनन्तरभाविपरज्ञानपरमभक्त्योरप्युपलक्षणम् । तच्च प्रतिवचनभागे व्यञ्जयिष्यते । **ज्ञानी**—* प्रकृतिं विद्धि मे परामित्यादिप्रतिपादितभगवच्छेषतैकरसात्मस्वरूपवित् भगवन्तमेव परमप्राप्यं मन्वानः । **नित्ययुक्तः**—ऐश्वर्याद्यर्थिनां स्वाभिलषितप्राप्तौ सिद्धायां भगवता योगो निवर्तते, ज्ञानिनस्तु न तथेति भावः । **एकभक्तिः**—न तु प्रयोजनान्तरविभक्तभक्तिरित्यर्थः । एतदुभयं ज्ञानी विशिष्यत इत्यस्य हेतुः । **अत्यर्थम्**—अत्यभिधेयम्; सर्वज्ञेन सर्वशक्तिना मयाऽपि दुर्वचमिति भावः । * स च मम प्रियः इत्यत्राप्यत्यर्थमित्येतदनुषज्यते । यद्वा स्वप्रीत्यपेक्षया स्वभक्तप्रीतेः प्रकर्षोक्त्या स्तुतिः । **आत्मैव**—सर्वान्तरात्मनो ममाप्यन्तरात्मैव । नन्विदं प्रमाणविरुद्धमित्यत्राह—**मे मतमिति** ॥ प्रकृष्टप्रीतिविषयत्वेनातिवादान्न विरोधः । तथाऽत्यादरहेतुमाह—**आस्थित इति** ॥ **युक्तात्मा**—मद्विरहस्यातिदुःसहतया मयि नित्ययोगप्रवृत्तमनाः । **अनुत्तमां गतिम्**—परमप्राप्यम् । **जन्मनाम्**—पुण्यजन्मनाम् । **ज्ञानवान्**—पूर्वोक्तज्ञानवान् । * वासुदेवः सर्वमिति प्रपद्यत इत्यन्वयः । **सर्वम्**—प्राप्यप्रापकादि । * रामस्य व्यवसायज्ञः इत्यादिनिदर्शितज्ञानविशेषवत्त्वात् महात्मत्वोक्तिः । * महामनाः इति **भाष्यम्** । **सुदुर्लभः**—मत्तः प्रयोजनान्तरार्थिन आर्तादयोऽपि दुर्लभाः । अयं तु कर्मवश्यमध्ये भक्तलाभार्थिना मया देशिकार्थिभिश्चान्यैः सुदुर्लभः, लब्धश्चेदयमलभ्यलाभ इति भावः । उक्तं हि **श्रीपौष्करे** *दुर्लभा भगवद्योगभाविनो भुवि मानवाः । तद्दर्शनात्तदालापात्सुलभं शाश्वतं पदम् ॥ इति । **माम्**—*अज्ञो जन्तुरनीशोऽयमित्युक्तेषु मूर्धाभिषिक्तम् । **श्लोकत्रयोदितज्ञानिनं कुरुष्व** क्रियाफलं त्वद्गामीत्यात्मनेपदेन व्यज्यते । **अव्यवहितत्वादिह** श्लोकत्रयेत्युक्तम् । परभक्तिश्लोकानां भिन्नप्रकरणस्थतया स्थानत्रयेत्युक्तम् । **माम्**—* या प्रीतिरविवेकानामित्युक्तेषु बाह्यविषयसक्तेष्वग्रगण्यम् ॥ १३ ॥

*** पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया, * भक्त्या त्वनन्यया शक्यः,**
*** मद्भक्तिं लभते पराम् इति स्थानत्रयोदितपरभक्तियुक्तं मां कुरुष्व** ॥ १४ ॥

परभक्तिपरज्ञानपरमभक्त्येकस्वभावं मां कुरुष्व ॥ १५ ॥

परभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवोऽहं तथाविधभगवदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भवानि ॥ १६ ॥

अथ शरीरपातसमयभाविनो बुद्ध्याकारानभ्यर्थयते—**परभक्ती**ति । अथवा मुक्तिदशाभाविनां परभक्त्यादीनामिदमपेक्षणम् । एकस्वभावत्वोक्तिर्हि अत्रत्यपरभक्त्यादिव्यवच्छेदार्था । उक्तानामेव तत्रत्यपरभक्त्यादीनां सादरानुवादेन कैङ्कर्यपर्यन्ततां याचते—**परे**ति । अत्र त्वदिति वक्तव्ये भगवच्छब्दः अनुभाव्यपौष्कल्यस्फुटीकरणार्थः । किंकरविशेषणे शेषतैकरतिरूपशब्दे शेषतैकरतिरेव रूपं निरूपकं यस्येति भाव्यम् । **भवानी**ति प्रार्थना । त्वत्किङ्करभावात्पूर्वमसत्कल्पोऽहमिति च सूच्यते । एवं द्वयार्थो व्याख्यातः ॥

सर्वज्ञेऽपि स्वतो देवे याच्ञाविज्ञापनादिभिः । तत्तदिष्टप्रदित्सात्मा प्रीतिरेव प्रसाध्यते ॥
तदेव चोदनोपज्ञमपूर्वं तत्त्ववेदिनाम् । आराध्येन्द्राद्यपायेऽपि फलदानाय तिष्ठति ॥ १४ ॥ १५ ॥ १६ ॥

एवंभूतमत्कैङ्कर्यप्राप्त्युपायतयाऽवक्लृप्तसमस्तवस्तुविहीनोऽपि अनन्ततद्विरोधिपापाक्रान्तोऽपि, अनन्तमदपचारयुक्तोऽपि, अनन्तमदीयापचारयुक्तोऽपि, अनन्तासह्यापचारयुक्तोऽपि, एतत्कार्यकारणभूतानादिविपरीताहङ्कारविमूढात्मस्वभावोऽपि, एतदुभयकार्यकारणभूतानादिविपरीतवासनासंबद्धोऽपि, एतदनुगुणप्रकृतिविशेषसंबद्धोऽपि, एतन्मूलाध्यात्मिकाधिभौतिकाधिदैविकसुखदुःखतद्धेतुतदितरोपेक्षणीयविषयानुभवज्ञानसङ्कोचरूपमच्चरणारविन्दयुगलैकान्तिकात्यन्तिक - परभक्तिपरज्ञानपरमभक्तिविघ्नप्रतिहतोऽपि, येनकेनापि प्रकारेण द्वयवक्ता, त्वं केवलं मदीययैव दयया निश्शेषविनष्टसहेतुकमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नः, मत्प्रसादलब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिः, मत्प्रसादादेव साक्षात्कृतयथावस्थितमत्स्वरूपरूपगुणविभूतिलीलोपकरणविस्तारः, अपरोक्षसिद्धमन्नियाम्यतामद्दास्यैकस्वभावात्मस्वरूपः, मदेकानुभवः, मद्दास्यैकप्रियः, परिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियमदनुभवस्त्वं तथाविधमदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भव ॥ १७ ॥

अथैवमभ्यर्थितस्य भगवतस्तदभ्यनुज्ञादिविषयैः प्रपत्तिजनितप्रसादपरिवाहैः प्रतिवचनैः प्रकृतौपयिकवक्ष्यमाणचरमश्लोकार्थोऽपि प्रतिबोध्यते । तथाहि—अत्र प्रतिहतोऽपीत्यन्तेन अशक्तिपूर्त्या अनागतानन्तकालसमीक्षयाऽप्यदृष्टसन्तारोपायतां प्रकाशयता * अनन्यशरणः इत्युक्तविस्तररूपेण प्रथमपादतात्पर्योक्तिः । येनकेनापीत्यादिना त्वमित्यन्तेन द्वितीयपादोक्ताधिकारिकृत्यलाघवादिव्यञ्जनम् । केवलमित्यादिना तु * अहं त्वा इति वाक्याभिप्रेतानिष्टनिवृत्तिपूर्वकेष्टप्राप्तिप्रकाशनम् । एवंभूतोऽसीत्यादिभिः प्रपन्नविषयशोकापनोदनवाक्याभिप्रेतप्रपञ्चनमिति [विषय]विभागः । एवंभूतमत्कैङ्कर्यै-

त्यत्र एवंभूतेति कैङ्कर्यविशेषणम् । उपायतयेत्यत्र गद्यान्तरोक्तक्रमेण साक्षात् परम्परया वेति भाव्यम् । **अवक्लृप्तम्**—मन्नित्येच्छानियमितमित्यर्थः, मदादेशात्मकैः शास्त्रैर्विहितमिति वा । **समस्तवस्तुशब्देन** प्रस्तुतप्रपत्तिव्यतिरिक्तास्तत्त्वज्ञानपूर्वकाः कर्मयोगादय उपासनपर्यन्ता निवृत्तिधर्माः, तदुपयुक्ताश्चामानित्वाद्यात्मगुणाः संगृह्यन्ते । एतेन परिशब्दद्योतितसपरिकरत्यागव्यञ्जनम् । एवं पश्चादपि तदर्हता न संभवतीति नैराश्यरूपत्यागसिद्ध्यर्थमाह—**अनन्ततद्विरोधीति** ॥ उपासनादिविरोधित्वात् प्रवृत्तिधर्मोऽप्यत्र पापशब्देन संगृहीतः । अनन्तमदपचारेत्यादिभिः पूर्ववत् विशेषापचाराभिभूतत्वस्य पृथगुक्तिः । एकैकवर्गस्य दुस्तरत्वद्योतनाय प्रत्येकमानन्त्यनिर्देशः । उक्तानां पापानां निदानं भक्तियोगादिप्रतिबन्धे द्वारभूतम् * अहंकारविमूढात्मेत्यादिषु प्रसिद्धं पूर्वं विपरीतज्ञानशब्दोपात्तेष्वन्यतममाह—**एतत्कार्येति** ॥ कार्यस्याप्यहंकारस्यानादित्वं बीजाङ्कुरन्यायात्प्रवाहरूपेण भाव्यम् । * अथातोऽहंकारादेशः इत्याद्युक्तयथावस्थिताहंकाराद्यवच्छेदार्थं **विपरीत**शब्दः ; अनहमर्थे अहंत्वाभिमानात् स्वातन्त्र्यारोपाच्च विपरीतत्वम् । **विमूढत्व**मिह तिरोहितत्वम् । नित्यं प्रकाशमानस्याप्यात्मनस्तिरोहितत्वमाधेयत्वविधेयत्वशेषत्वादिधर्माणामनवभासादिति ज्ञापनाय **स्वभाव**शब्दः ।

पापस्याहंकारस्य च प्रवाहनिर्वाहकम् *अशेषतः इति पूर्वत्र संक्षिप्तं विशदमनुभाषते—**एतदुभयेति** ॥ वासनाया अपि प्रवाहरूपेणानादित्वम् । यथावस्थिततत्त्वहितपुरुषार्थव्यावृत्त्यर्थाऽत्र विपरीतत्वोक्तिः । पापस्य वासना पापान्तरारम्भरुचिजनकनिग्रहांशः ; अहंकारस्य वासना भूयोभूयस्तादृशभ्रमजनकबुद्धिसंस्कारः । * भगवत्स्वरूपतिरोधानकरीमित्याद्युक्तमनुवदति—**एतदनुगुणेति** ॥ एतच्छब्देन पूर्वोक्तपापाहंकारवासनारूपत्रितयपरामर्शः । अत्रापि कार्यत्वं कारणत्वं च विवक्षितम् । सात्त्विकप्रकृतिव्यवच्छेदाय विशेषशब्दः । **संबद्धः**—दृढबद्ध इत्यर्थः । एतच्च **मितगद्ये** दुर्विवेचेति पदेन विवृतम् । प्रकृतिसंबन्धस्याभिमतप्रतिबन्धकत्वे द्वारं प्रपञ्चयति—**एतन्मूलेति** ॥ दुःखस्य संसारोद्वेगजनकत्वमपि संभवति । सुखस्य तु संसाररुचिजनकत्वेन विघ्नत्वमधिकमित्यभिप्रायेण पूर्वं सुखस्योक्तिः । दुःखवत् सुखमपि आध्यात्मिकादिभेदेन त्रिविधम् । **आध्यात्मिकम्**—आत्माश्रिताचित्समुदायप्रधानहेतुकम् । तादृशं दुःखं द्विविधम्—शारीरं मानसं चेति । तत्र शारीरं * शिरो [यक्ष्मा] रोगः प्रतिश्यायः इत्यादिनोक्तम् ; मानसं * कामक्रोधभयद्वेषेत्यादिना । **आधिभौतिकं** तु * पशुपक्षिमनुष्याद्यैरित्यादिना । **आधिदैविकं** च * शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवम् इति । अत्र **दुःख**शब्दस्य पूर्वकालीनदुःखविषयत्वात् उत्तरत्र दुःखविघ्नगन्धरहितत्वोक्तेरुत्तरकालस्वास्थ्यपरत्वात् तितिक्षायां वा तात्पर्यादविरोधः । त्रिविधमप्येतत् प्रत्येकमवान्तरहेतुस्वरूपवैषम्यादनन्तप्रकारमिति सूचयितुं **तद्धेतु**शब्दः । सुखदुःखहेतवश्च स्वरूपतो बुद्धिविषयतयाऽपि परभक्त्यादिविघ्नाः । **तदितरे**ति उपेक्षणीयविशेषणम् । उपेक्षणीयविषयश्च तृणादिः ; तदनुभवोऽपि अब्रह्मात्मकानुभवरूपत्वेन पूर्वोक्तविपरीतज्ञानविशेषतया स्वरूपतः संस्कारतश्च प्राप्तविषयानुभवविरोधी । **ज्ञानसंकोचः**—तर्कोपदेशसहकृतैः शास्त्रैरपि परावरतत्त्वविषययथावस्थितज्ञानप्रसराभावः । **मच्चरणारविन्दयुगले**ति स्वयमुक्तिः न दोषाय, ईश्वरस्य यथाभूतार्थशंसिनः सर्वत्र स्वगुणाविष्क्रियादोषरहितत्वात्, तेनापि चरणयोः स्वाश्रितरक्षणसाधनतया संप्रीतिविषयत्वेन स्तुत्यत्वोपपत्तेश्च । तथा चाहुः—* तस्य स्वात्मप्रदाने तु साधनं स्वपदद्वयमिति । अत्र परभक्त्यादिशब्दैः देहपातात्पूर्वभाविनः पश्चाद्भाविनश्चावस्थाविशेषाः संगृह्यन्ते । प्रतिहतोऽपीत्यन्तेषु **अपि**शब्दैस्त्यागानुवादो द्योत्यते । धर्मान्तरनैरपेक्ष्यविशिष्टविधानमपि **द्वयवक्त्रे**त्यनेन सूचितम् । न चैतावता प्रपत्तेस्तदविनाभूताज्ञानां वा निवृत्तिः, * शरणमहं प्रपद्ये इति पूर्वोक्तानुवादत्वेन प्रपत्त्युपश्लिष्टस्यैव द्वयवचनस्यात्र विव-

क्षितत्वात् । येन केनापीत्यस्य तु * आर्तो वा यदि वा दृप्तः, * मित्रभावेन संप्राप्तम्, * विभीषणो वा सुग्रीव यदि वा रावणः स्वयमित्याद्युक्ताधिकारिविशेषानियमे तात्पर्यम् । शरण्यस्य प्रपन्नेष्वादरातिशयादीदृशव्याजमात्रानुभाषणमिति केचित् । एतेन जोवव्यापारनिरपेक्षमोक्षप्रदानादिपक्षाश्च निरस्ताः ।

इतः परं त्वत्प्रवृत्त्यन्तरमनपेक्षितमित्याह—**केवलमिति** ॥ **मदीययैव**—नान्यदीयया, न सहकार्यन्तरापेक्षयेति भावः । दयाऽत्र प्रपत्त्युल्लसिता रक्षणेच्छा । प्रपत्तिजनितप्रसादवैशिष्ट्ये सत्यपि सहजदयायाः प्राधान्यमिह सूचितम् । कर्मणां सुखदुःखजननशक्तिवत् तिरोधायकत्वादिशक्तिरपि निवृत्तेत्यभिप्रायेण निःशेषशब्दः । तेन अशेषत इत्युक्तस्यानूक्तिः । हेतुभूतपापादिसद्भावे पुनरपि विघ्न उत्पद्येतेति तत्परिहारार्थमुक्तम्—**सहेतुकेति** ॥ विघ्नाः पूर्वोक्ताः । एवमनिष्टनिवृत्तिरुक्ता ; अथेष्टप्राप्तिं वदन् प्रथमं * तेषां ज्ञानी इत्यादिप्रार्थितज्ञानपूर्वकपरभक्त्यादिप्रदानमाह—**मत्प्रसादलब्धेति** ॥ इह हि परभक्त्यादिवचनं तत्पूर्वभाविज्ञानविशेषस्याप्युपलक्षणम् । अत्र **प्रसाद**शब्दः प्रपत्तिजनितप्रसादनिरस्तप्रतिबन्धनिरुपाधिकसौहार्दपरः । एवं * मत्प्रसादादेव इति वक्ष्यमाणेऽप्यवधारणेन सहकारिनैरपेक्ष्यं द्योत्यते । **मत्स्वरूपेत्यादिकमुत्तरखण्डस्थनारायणशब्दार्थः** । **विभूति**शब्दोऽत्र नित्यविभूतिविषयः । उपायदशायां शास्त्रविहिततत्तत्स्थानगुणादिपरिच्छिन्नस्वरूपाद्यनुभवाद्यावृत्त्यर्थं यथावस्थितविस्तारशब्दौ ; आरोपशङ्कानिवृत्त्यर्थं वा यथावस्थितशब्दः । हेत्वभावादत्र भ्रमाभावः । एवं सर्वविशिष्टपरमभोक्तव्यसाक्षात्कारे नारशब्दार्थस्वस्वरूपाविर्भावमपि स्वाधीनस्वार्थकर्तृत्वभोक्तृत्वभ्रमनिवृत्तिपूर्वकतद्धोक्तृत्वज्ञापनाय पृथगाह—**अपरोक्षेति** ॥ नियाम्यत्वोक्त्या अत्र व्याप्यत्वधार्यत्वे चाकृष्टे, * अन्तः प्रविष्टः शास्ता, * एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः इति श्रुत्यनुसारात् । एतेन * स स्वराडित्युक्तेऽपि मुक्ते पारतन्त्र्यादेरनपायो दर्शितः । नियाम्यत्वं चिदचित्साधारणम् ; दासत्वं तु चेतनैकनिष्ठम् ; तयोः प्रातिस्विकं प्रयोजनमाह—**मदेकानुभवो मद्दास्यैकप्रिय इति** ॥ ऐश्वर्यकैवल्यपुरुषार्थयोरिव स्वनिष्ठतया स्वतन्त्रतया च स्वात्मानुभवप्रसङ्गोऽपि तदा न संभवतीत्यभिप्रायेण मदेकानुभवशब्दः । स्वाम्यनुभवप्रधाने स्वानुभवे स्वप्राधान्यगन्धनिवृत्त्यर्थं मद्दास्यैकप्रिय इत्युक्तम् । पूर्वोक्तमेवानुभवं परमपुरुषार्थत्वप्रतिबोधाय पूर्ववत् पौष्कल्यादिभिर्विशिनष्टि—**परिपूर्णेति** ॥ तत्प्रयुक्तप्रीतिं तत्परिवाहं च * नित्यकिङ्करो भवानीत्यन्तेन प्रार्थितं प्रयच्छति—**तथाविधेति** ॥ १७ ॥

एवंभूतोऽसि ॥ १८ ॥

ईदृशस्वकैङ्कर्यसाम्राज्ययोग्यतामलभ्यलाभत्वव्यक्त्या संतोषार्थमुत्तरकृत्यविधानार्थं चानुवदति—**एवंभूतोऽसीति** ॥ प्रकृत्यात्मविवेकाद्धार्मिकः, परावरतत्त्वविवेकाद्भागवतः, परावरपुरुषार्थविवेकादनन्यप्रयोजनः, स्वपराधिकारविवेकादनन्यसाधनः, पूर्वोक्तात् * अस्तु ते इत्यनुग्रहविशेषात्प्रमितानुष्ठितभरन्यासः, ततश्च मया स्वीकृतभरः, * नित्यकिङ्करो भवेति दत्तवरश्च त्वं मुक्तप्रायोऽसीत्यर्थः । आख्यातेन * सन्तमेनमित्यवस्था व्यज्यते । यद्वा नित्यकिङ्करो भवेति सत्यसंकल्पेनोक्ते तेन वा स्वेन वा प्रत्याख्यातुमशक्यत्वे निवारकान्तराभावे च तदानीमेव तथाविधात्मानमपश्यतः क्रमात्तत्सिद्धिमाह—**एवमिति** ॥ एवं भवितुमुपक्रान्तोऽसीत्यर्थः ॥ १८ ॥

आध्यात्मिकाधिभौतिकाधिदैविकदुःखविघ्नगन्धरहितस्त्वं द्वयमर्थानुसन्धानेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्स्व ॥ १९ ॥

भयावहायां देहेन्द्रियादिविशिष्टदशायां कथं कुत्र च निरपायः कालक्षेप इत्यत्राह—**आध्यात्मिकेति** ॥ अत्र-त्योत्कटसुखस्याप्युपलक्षणार्थमिह दुःखोक्तिः । श्लोकत्रयाद्युक्तज्ञानभक्तिशालिनं प्रति प्रातिकूल्याविशेषाद्वा दुःखशब्देन सुखस्यापि संग्रहः । गन्धशब्देन वा तद्विवक्षा । तेन सर्वसाधारणः क्षुदादिर्वाऽभिप्रेतः । दुःखस्य द्वयार्थानुसन्धानं प्रति विघ्नत्वं स्यात्, अतस्तद्राहित्योक्तिः । इह च पूर्णविवेकानामाभिमानिकं दुःखं सुखं च नास्ति । सांस्पर्शिकानां तु प्रारब्धकर्मवशात्संभवतामपि प्रतिदिनं कर्मक्षयमोक्षासक्तिदर्शनप्रीत्या द्वयार्थानुसंधानविघ्नत्वं नातीवास्ति । अतो न प्रत्यक्षादिविरोधः । **त्वम्**—अ[त्रत्य]नन्यज्ञानभक्त्यादिप्रार्थनावान् । उच्चारणं प्राधान्येन स्तोतुमर्थानुसन्धाने सहशब्दः । एवमर्थानुसंधानेनेत्यन्वयः । **एवम्**—* अखिलहेयमित्याद्युक्तविशदप्रकारेणेत्यर्थः । एतच्चात्र कृतकृत्यत्वप्रतिसंधानप्रीत्य-र्थम्, अस्य च स्वयंप्रयोजनकैङ्कर्यरूपत्वात् । *यन्मुहूर्तमित्यादिन्यायेन भगवदनुभवप्रीत्यनुवृत्त्यर्थं, संभवद्वन्द्वतितिक्षार्थं, निर्भरत्वानुसन्धानरसानुवृत्त्यर्थं, निषिद्धकाम्यादिसङ्गनिवृत्त्यर्थं च सदेत्युक्तिः । इदं तु स्वभावार्थशास्त्रप्राप्ताविरोधेन नेयम्, अन्यथा सर्वप्रमाणविरोधात् । * तस्य तावदेव चिरं यावन्न विमोक्ष्ये *प्रारब्धमात्रं भुक्त्वात्र तत्त्ववित्सुखमाप्नु-यात् । * प्रारब्धमेव भोक्तव्यं कर्म ब्रह्मविदामपि । * अनारब्धकार्ये एव तु पूर्वे तदवधेः इति दर्शितः प्रक्रान्त-कर्मफलभोगोऽपि प्रपन्नस्य यथाभिलाषं प्रपत्त्युत्पत्तिशरीरावधिरित्यभिप्रायेणाह—**यावच्छरीरपातमिति** ॥ आर्तितारतम्याद-त्रत्यस्थितितारतम्यम् । **अत्रैव**—अत्यन्तासन्नमत्सेवानुगुणे, नतु मत्कैङ्कर्यविरुद्धदेशेष्वित्यर्थः । अत्रानेकपुराणादिप्रसिद्ध-श्रीरङ्गोपादानं भागवताभिमतस्वयंव्यक्तादिभगवत्क्षेत्रान्तराणामप्युपलक्षणम् । **सुखमास्स्व**—कृतकृत्यत्वप्रतिसन्धानेन प्रति-दिनं कर्मक्षयदर्शनेन अविलम्बितानायासपरमपुरुषार्थलाभव्यवसायेन विषमधुकल्पवैषयिकरसवमैरस्यहेतुभूतद्वयार्थानुसन्धान-सारस्येन च संतुष्टो वर्तस्वेत्यर्थः । स चायमत्रत्यसेवासौकर्यार्थ उपदेशः; सुखी भवेतिवदनुग्रहोक्तिर्वा । एवमर्थानु-संधानद्वयवचनसुखासिकाभिर्मनोवाक्कायानामयोग्यव्यापारनिवृत्तिरपि स्यात् ॥ १९ ॥

शरीरपातसमये तु केवलं मदीययैव दयया अतिप्रबुद्धो मामेवावलोकयन्, अप्रच्युतपूर्व-संस्कारमनोरथः, जीर्णमिव वस्त्रं सुखेनेमां प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य, तदानीमेव मत्प्रसाद-लब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशद-तमानन्यप्रयोजनानवधिकातिशयप्रियमदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेष-शेषतैकरतिरूपनित्यकिङ्करो भविष्यसि ॥ २० ॥

भवत्वेवं कृतकृत्यस्योत्तरकृत्यं फलम् । देहपातदशा कीदृशी? परमफलं च कदा? इत्याकाङ्क्षायां प्रारब्धशरीरानु-वर्तकप्रतिबन्धनिवृत्तौ दयार्णवस्य दिव्यशक्तेः स्वस्य पूर्वकृतरक्षासंकल्पानुगुणमन्यैरनिवार्यमुत्तरकृत्यमाह—**शरीरपातसमय** इति ॥ *वाङ्मनसीत्यादिश्रुतिसिद्धायां मनःसंपत्तेः पूर्वावस्थायामित्यर्थः । एतेन *निशि नेतिचेदित्याद्युक्तः कालनियमा-भावश्च सूचितः, * ततस्तं म्रियमाणं तु इतिवत् । अत्र तुशब्दोऽधिकार्यन्तराद्विशेषमनुग्रहकार्यं द्योतयति; यद्वा काष्ठ-पाषाणसंनिभतया स्वेन वा परैर्वा तदानीं प्रबोधस्य दुःसंपादत्वम् । एवं तुशब्दद्योतितमेव विशेषं व्यनक्ति—**केवलमित्या-दिना** ॥ **केवलं**—पूर्वाभ्यासानपेक्षम्, * यं योगिनः इत्याद्युक्तादात्विकस्वयत्ननिरपेक्षं च । **मदीययैव**—मत्स्वभाव-भूतयैव, नान्यदीयया, नापि पूर्वोक्तक्षेत्रवासद्वयार्थानुसंधानजन्यया, नच तादात्विकप्रार्थनासापेक्षयेत्यर्थः । **अतिप्रबुद्धः**—शरीरपातात्पूर्वकाल इव ज्ञानपौष्कल्यवान् । यद्वा न केवलं संकोचाभावमात्रम्, किंतु प्रत्यूषप्रकाशकल्पपूर्वावस्थातोऽति-

शयोऽपि स्यादित्यर्थः । अपरिच्छन्नस्तु प्रबोधो विशिष्टदेशगत्यनन्तरभावी । अन्तिमदशायामादिभरतादिवदन्यदर्शनं तव न स्यादित्याह—**मामेवावलोकयन्निति** ॥ नित्यमनुचिन्तितं मामेव शुभाश्रयविग्रहविशिष्टं विशदमनुसंदधान इत्यर्थः । अविच्छिन्नसाक्षात्कारं कुर्वन्निति वा, तदानीमवलोकनीयं सर्वं भगवदपृथक्सिद्धतयैव भातीति वा अवधारणस्याभिप्रायः । एवं ज्ञानदर्शने प्रोक्ते; अथ वक्ष्यमाणायाः प्राप्तेः पुरुषार्थत्वाय तदिच्छानुवृत्तिमाह—**अप्रच्युतेति** ॥ भगवानेव मे परमप्राप्य इति शास्त्रजन्यानुभवसंस्कारस्य कालविप्रकर्षकायविश्लेषक्लेशादिभिः प्रच्युतिर्न भविष्यति; तत एव संस्कारमूलः प्राप्तिमनोरथोऽपि तदानीं भवतस्त्य[ि]ज्यमानेषु देहतदनुबन्धिषु रागाद्वा, किं भविष्यतीति भयाद्वा न प्रच्यवत इति भावः । *अतिप्रबुद्धः इत्यादिभिः परभक्त्यादित्रयं वा, परमात्मनि विश्रमादनन्तरभाविप्रबोधादिकं वा विवक्षितमिति केचित् ।

लब्धनूतनशुभवस्त्रान्तरस्य जीर्णवस्त्र इव अत्यासन्नदिव्यदेहलाभस्य चिरपरिचितेऽपि भोगायतने जिहासोत्पत्तिमनायासहानप्रीतिं च निदर्शयति—**जीर्णमिव वस्त्रमिति** ॥ *कृतकृत्याः प्रतीक्षन्ते *नोपजनं स्मरन्निदं शरीरमित्यादिभिरभिप्रेतं लब्धपरित्यागक्लेशाभावम्, यमकिंकरादिभयाभावम्, चिकित्सकशल्यप्रयोगन्यायशङ्कितोत्क्रमणदुःखाभावम्, अत्यासन्नपरमपुरुषार्थानुसन्धानहार्दानुग्रहतादात्विकभगवदनुभवातिवाहिकदर्शनजनितहर्षप्रकर्षं च अभिप्रेत्याह—**सुखेनेति** ॥ **इमाम्**—अनाद्यनुवृत्तां भगवत्स्वरूपतिरोधानादिभिरपकारिणीं कारागृहनरकादिवदनुसंहितां दुरत्ययां मदन्यैः त्याजयितुमशक्यां चेति भावः । **प्रकृतिम्**—सततविकारशीलं त्रिगुणद्रव्यम् । उत्क्रान्तिपादे च अर्चिरादिपादे चोक्तं सर्वमभिप्रेत्याह—**स्थूलसूक्ष्मरूपां विसृज्येति** ॥ स्थूलप्रकृतित्यागोऽत्रैव; सूक्ष्मप्रकृतित्यागस्तु *त्रिभावभावनातीतो मुक्तये योगिनां नृप । देवयानं परः पन्था योगिनां क्लेशसंक्षयः ॥ इत्याद्युक्तदेवपथेन दिव्यदेशगमनदशायामेव भवति । *एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य *स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वा अमृतः संभवतीत्यादिषु ब्रह्मप्राप्तिपर्यन्ताभिधानात् तिरोधायकसूक्ष्मप्रकृतिविश्लेषोऽप्यभिप्रेतः । **सुबालोपनिषदि** तु—*अपुनर्भवाय नाड्या कोशं भिनत्ति, कोशं भित्त्वा शीर्षकपालं भिनत्ति, शीर्षकपालं भित्त्वा पृथिवीं भिनत्तीत्यारभ्य *अक्षरं भित्त्वा मृत्युं भिनत्तीत्यन्तेन स्थूलशरीरत्यागपूर्वकतमःपर्यन्तसर्वतत्त्वातिक्रम उक्तः । तदेवं क्रमेण सूक्ष्मप्रकृतिविमोक्षानन्तरं स्वस्यैव प्रसादेन अविलम्बितमनोरथपूर्तिमाह—**तदानीमेवेति** ॥ अपेक्षणीयान्तराभावात् न विलम्ब इति भावः । प्रसाद इह तिरोधायकांशपर्यन्तस्य निग्रहरूपकालुष्यस्य निःशेषनिवृत्त्या सूरिष्विव स्वभावत एवावस्थितं सौहार्दम्; तच्चात्र निर्दुःखनित्यनिरतिशयानन्दमनुभवत्वसावितीच्छैव ॥ २० ॥

मा ते भूदत्र संशयः ॥ २१ ॥

अत्र तावदस्ति क्षुद्रफलेष्वप्युपायगौरवम्; मोक्षे तु *अनेकजन्मसंसिद्धः *क्लेशेन महता सिद्धैः *क्षपयित्वाऽधिकारान् स्वान् शश्वत्कालेन भूयसेत्यादिभिः कृच्छ्रसाध्यतयोक्ते विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरे गुरूपायसाध्ये न्यासमात्रनिष्ठस्य मादृशस्य निर्यत्नलब्धिवचनमुपच्छन्दनमिति केषांचिच्छङ्का जायेत, अतस्तान् विस्रम्भयितुं भाष्यकारमपदिश्याह—**मा ते भूदत्र संशय** इति ॥ ननूपायलाघवप्राप्यगौरवादिनिमित्तशङ्काविधूननेन महाविश्वासपूर्वकं शरणमुपगतस्य संशयप्रसङ्गाभावादत्र तत्प्रतिषेधो निरर्थकः? मैवम्; तादात्विकमहाविश्वासेनोपाये निष्पन्नेऽपि तस्य फलाविनाभावेऽपि केषांचित्प्रारब्धकर्मविपाकवैचित्र्यात् संशयोऽपि संभवति; न च तेनोपायवैकल्यम्, फलप्रतिबन्धो वा ।

मतिकालुष्यनिवृत्तिस्तु अत्रत्यपरभक्त्यादिवत् स्वयं पुरुषार्थः; अतः प्रसन्नेन भगवता संशयनिवर्तनमुपपद्यत इति। यद्वा, यावत्फललाभं विमर्शदशायामक्षोभणीयो विश्वासो महाविश्वासः; स च तात्कालिक उपायाङ्गम्; पश्चात्तु मदभिप्रायं मद्वाक्यं च परामृशतां मदनुग्रहादेव संशयो न भवत्येवेति ज्ञापनार्थमिह *मा ते भूदित्यादि *निःसंशयः इत्यन्तमुच्यते इति। ते—निश्चितशास्त्रार्थस्य सर्वसुहृदि सर्वशक्तौ च मयि न्यस्तभरस्य च। अत्र—मत्प्रयोजनप्रधानायां मन्नित्यकिंकरत्वप्राप्तौ ॥ २१ ॥

***अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन, *रामो द्विर्नाभिभाषते, *सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ *सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ इति मयैव ह्युक्तम् ॥ २२ ॥**

यद्येतदुपच्छन्दनं तदा मे स्ववचनविरोधः—स्यादित्यभिप्रायेणाह—**अनृतं नोक्तपूर्वं मे** इति ॥ इयमनृतानुक्तिराश्रितविषया, आगुरेषु प्रतारणदर्शनात्। अनुक्तपूर्वमप्यनृतं पश्चात् स्वातन्त्र्यादुच्येतेत्यत्राह—**न च वक्ष्ये कदाचनेति** ॥ इतः पूर्वमिवेति भावः। इदमपि त्वद्वाक्यतया पूर्ववदाशङ्कनीयमित्यत्र *सत्यवादी च राघवः इति प्रसिद्धं लोकोक्तिच्छायया स्वयमेवाह—**रामो द्विर्नाभिभाषत** इति ॥ स्वोक्तविरुद्धं नाभिभाषत इत्यर्थः। मम सकृदुक्त्यैवार्थिनामपेक्षितार्थः सिध्येदिति वा तात्पर्यम्। एवं सामान्यतः प्रत्यायितस्य प्रकृतपर्यवसानाय रावणानुजपरिग्रहे पार्थोपदेशपर्यवसाने च विशेषत उक्तं श्लोकद्वयमाह—**सकृदेवेति, सर्वधर्मानिति च** ॥ वेदवैदिकवाक्यमात्रातिशायिनोरनयोः शरण्यवाक्ययोरर्थं तदधिकारयोरभिधास्यामः। इदं मोक्षप्रदानोत्सुकेन मयैवोक्तम्; न तु मदादेशभूतदुरधिगमार्थवेदमुखेन वा संभवद्भ्रमादिदोषपुरुषान्तरमुखेन वेत्याह—**मयैव ह्युक्तमिति** ॥ **हिः** प्रसिद्धौ, हेतौ वा ॥ २२ ॥

अतस्त्वं तव तत्त्वतो मज्ज्ञानदर्शनप्राप्तिषु निस्संशयः सुखमास्स्व ॥ २३ ॥

अन्त्यकाले स्मृतिर्या तु तव कैङ्कर्यकारिता। तामेनां भगवन्नद्य क्रियमाणां कुरुष्व मे ॥ २४ ॥

॥ इति श्रीभगवद्रामानुजविरचिते गद्यत्रये शरणागतिगद्याख्यं पृथुगद्यम् ॥

उक्तमेव स्थिरीकरणार्थं संतोषातिशयार्थं च निगमयति—**अत** इति ॥ **अतः**—सत्यवादिना सत्यव्रतेन मयोक्त्य वाक्यस्य विश्वसनीयतमत्वात्। **त्वम्** प्रामाणिकः। **तव**—*ये प्रपन्ना महात्मानस्ते मे नयनसंपदः इति मत्प्रशंसनीयस्य मत्स्वीकृतभरस्य च। **तत्त्वतः**—संशयविपर्ययराहित्येन। **मज्ज्ञानदर्शनप्राप्तिषु,** यथायोगमत्र परत्र चापेक्षितास्विति शेषः। *निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः। ससंशयान् हेतुबलान्नाध्यावसति माधवः ॥ इत्यादिप्रमाणसूचनायाह—**निःसंशय** इति ॥ सिद्धस्यैव ज्ञानस्य अनुवृत्तौ संशय इह निवार्यते। अनेनैव निर्भरत्वादिकमप्याकृष्यते। **सुखमास्स्व** *आध्यात्मिकेत्यादिना पूर्वं मयोक्तमेव तवोचितमिति भावः। *यावच्छरीरपातमिति पूर्वोक्तस्यानुक्तेरयमभिप्रायः—मत्प्राप्तेः प्रारब्धकर्मप्रतिनियतायुरवसाननिर्बन्धो नास्ति; यावदत्रत्यमदनुभवापेक्षा तावदत्र सुखमास्स्व; परिपूर्णानुभवलाभादिह सुखासिकायामप्युद्वेगे सति आयुःशेषशृङ्खलामप्यपोह्य आत्यन्तिकमत्कैङ्कर्याय मत्पदं गमिष्यसि—इति। एतेनानादिकालमाज्ञातिलङ्घनमूलभगवदप्रसादेन संसरतो मे भगवत्कृपामूलसदाचार्याङ्गीकारेण द्वयोच्चारणानुच्चारणपूर्वकस्वरक्षाभरन्यासे सिद्धे, प्रसादनेष्वस्मादभ्यधिकस्याभावात् स्वीकृतभरः श्रियःपतिर्नारायणः काल-

त्रयवर्तिनः सर्वानप्रसादहेतून् यथार्हं क्षान्त्वा, स्वयमेव स्वार्थमेव मां स्वज्ञानदर्शनप्राप्त्यादिप्रदानेन रक्षेदिति विश्वस्तो निर्भरो निर्भयः संतुष्टो भवे[दि]ति निगमितं भवति ॥ २३ ॥ २४ ॥

इति शारणागतिगद्यं यतीशरङ्गेशसंस्तवनरूपम् । व्यवृणुत देशिकदृष्ट्या विमृश्य निश्चित्य वेङ्कटेशकविः ॥

वितमसि निगमान्ते बिभ्रता देशिकत्वं कृतिभिरनुमतेन क्षेमबुद्ध्या मयैवम् ।
यतिपतिपृथुगद्यव्याकियायां यथाक्तकथितमकथितं च क्षम्यतां नः सयूथ्यैः ॥

॥ इति रहस्यरक्षायां पृथुगद्याधिकारः प्रथमः ॥

॥ श्रीरङ्गगद्यम् ॥

चिदचित्परतत्त्वानां तत्त्वयाथात्म्यवेदिने । रामानुजाय मुनये नमो मम गरीयसे ॥

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदम्, क्लेशकर्माद्यशेषदोषासंस्पृष्टम्, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःसौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगाम्भीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसङ्कल्पकृतित्वकृतज्ञताद्यसंख्येयकल्याणगुणगणौघमहार्णवम्, परब्रह्मभूतम्, पुरुषोत्तमम्, श्रीरङ्गशायिनम्, अस्मत्स्वामिनम्, प्रबुद्धनित्यनियाम्यनित्यदास्यैकरसात्मस्वभावोऽहं तदेकानुभवस्तदेकप्रियः परिपूर्णं भगवन्तं विशदतमानुभवेन निरन्तरमनुभूय, तदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भवानि ॥ १ ॥

॥ रहस्यरक्षायां मितगद्याधिकारः ॥

श्रीमल्लक्ष्मणमुनिना शिष्यहितैकाग्रचेतसा कथितम् ।
मितगद्यम[मृ]मितसारं व्यक्तं व्याख्याति वेङ्कटेशकविः ॥

अत्र द्वयार्थानुसंधानरसिकेन भगवता भाष्यकारेण बृहद्वद्ये व्याख्यातमपि द्वयम्, बहुधा श्रोतव्यमिति मन्यमानेभ्यः शिष्येभ्यः पुनरप्याकिंचन्यादिप्रपञ्चनपूर्वकस्वानुष्ठानप्रकाशनप्रक्रिययैव संक्षेपेण व्याक्रियते । तथा हि—अत्रादिमं वाक्यमुत्तरखण्डस्य विवरणम्; द्वितीयं पूर्वखण्डस्य । तेनैवाधिकारविशेषः कार्पण्यरूपमङ्गं च प्रदर्शितम् । तृतीयं तु महाविश्वासाद्यङ्गान्तरज्ञापकम् । अनन्तरं श्लोकद्वयानुपठनेन पूर्वोक्त एवार्थः प्रमाणतः प्रतिष्ठाप्यते । ततः परेण वाक्येन पूर्णप्रपत्त्यकुशले जनेऽपि तत्पूरणानुगुणप्रपत्तिवाक्योच्चारणवैभवं ख्याप्यते । तत्सिद्ध्यर्थं पश्चाच्चतुर्दशभिः संबुद्धिभिर्नारायणशब्दोक्ताः शरण्याकारविशेषाः प्रकाश्यन्ते । * नमोऽस्तु ते इत्यनेन तु प्रकृतोपाये प्राधानभूतो भरन्यासांशः, फलप्रार्थनं वा निगद्यत इति विभागः ॥

(स्वाधीनेत्यादि ॥) इह च प्रथमं सर्वविभूतिकस्य भगवतः परमप्राप्यत्वादिसिद्ध्यर्थं चतुर्थ्यन्तपदप्रदर्शितं सर्वेश्वरत्वादिकमाह—**स्वाधीनेति ॥** स्वशब्देन मुक्तप्राप्यस्य कैङ्कर्योदेश्यस्य सर्वेश्वरस्य श्रुत्यादिप्रसिद्धं निरतिशयानन्दत्वादिकं

सूच्यते । स्वाधीनशब्देन भगवत्स्वरूपाधीनत्वं तदिच्छाधीनत्वं च विवक्षितम् । सर्वस्य साक्षात्परम्परया वा तदा[श्रय]-श्रिततया तत्स्वरूपाधीनत्वन् । तत्र नित्यानां पदार्थानां तदिच्छाधीनस्वरूपत्वं तदभावे तेषामभावः प्रसजेदिति प्रसङ्ग-मुखेन स्थाप्यम् । तदभिप्रायेण ह्याहुः—*इच्छात एव तव विश्वपदार्थसत्ता नित्यं प्रियास्तव तु केचन ते हि नित्याः । नित्यं त्वदेकपरतन्त्रनिजस्वरूपा भावत्कमङ्गलगुणा हि निदर्शनं नः ॥ इति । अभाषि च **शारीरकान्ते**—* परमपुरुषभोगो-पकरणस्य लीलोपकरणस्य च नित्यतया शास्त्रावगतस्य परमपुरुषस्य नित्येष्टत्वादेव तथाऽवस्थानमस्तीति शास्त्रादवगम्यते इति । अनित्यानां तु तदिच्छाधीनस्वरूपत्वं तदायत्तोत्पत्तिकतया हि प्रसिद्धम् । गुरुद्रव्याणां पतनप्रतिबन्धेन धार्यत्व-मपि तदिच्छाधीनत्वविशेष एव । चेतनशब्द इह जीवविषयः; बद्धमुक्तनित्यरूपेण जीवानां त्रैविध्यम् । **अचेतन**-शब्दश्चात्र अचिद्द्रव्यपरः । त्रिगुणकालशुद्धसत्त्वरूपेण अचेतनत्रैविध्यम् । द्रव्याणां तदधीनत्वोक्त्या तत्तद्धर्माणां तादधीन्यं कैमुत्यसिद्धमिति तदनुक्तिः । अचेतनद्रव्यस्यापि धर्मभूतज्ञानस्य चेतनग्रहणे विशेषणतयोपात्तत्वादत्र पृथगनु-पादानम् । चेतनमात्रे वा त्रैविध्यान्वयः । चेतनाचेतनानां **स्वरूपं** स्वासाधारणस्वभावैर्निरूप्यं धर्मि, तस्य भेदः तत्तद्व्यक्तितो वर्गतश्च परस्परव्यावृत्तिरूपो धर्मः । **स्थितिः**—कालान्तरेऽपि विद्यमानता; सा च द्रव्याणां स्वरूपेण सर्वकालानुवृत्तिरूपा । तेषां तत्तदवस्थाविशिष्टवेषेण तु कालपरिच्छिन्ना कालतारतम्यवती चेति तद्भेदः । **प्रवृत्तिः**—व्यापारः । निवृत्तिरप्यकरणसंकल्परूपा प्रवृत्तिविशेषः । एतद्भेदस्तत्तत्कार्यादिभिर्द्रष्टव्यः । अत्र स्वेच्छाधीनसर्वत्वोक्त्या स्वार्थसर्वोपादा[न]तृत्वसूचनात् सर्वशेषित्वमपि सिध्यति । तदाहुः—*उपादत्ते सत्तास्थितिनियमनाद्यैश्चिदचितौ स्वमुद्दिश्य श्रीमानिति वदति वागौपनिषदी । इति । एवं भगवनः सर्वाधारत्वादिव्यञ्जनात् तदन्येषां चेतनाचेतनद्रव्याणां तं प्रत्याधेयत्वविधेयत्वशेषत्वनियमेन तदपृथक्सिद्धविशेषणतया तच्छरीरत्वं श्रुतिसिद्धं मुख्यमेव स्थापितं भवति । अत्र च कारणवाक्यार्थः, धर्मधर्मिभेदः, चिदचिद्भेदः, जीवेश्वरभेदः, जीवानामन्योन्यभेदः, तेषां ज्ञातृत्वम्, तत एव कर्तृत्वभोक्तृत्वे, ज्ञातृत्वादेः सर्वथा पराधीनत्वम्, परस्य च विभूतिद्वयवत्त्वं सार्वत्रिकत्रैकालिकसर्वनियन्तृत्वं त्रिविध-परिच्छेदराहित्यम्, कालपरमव्योम्नोस्त्रिगुणविकारातिरिक्तत्वम्, प्राज्ञानधिष्ठितप्रकृतिकारणत्वनिरासादिकं च शारीरक-स्थापितमर्थसिद्धम् ॥

अथ भगवत उक्ताकारान्तर्गतसर्वकारणत्वसर्वनियन्तृत्वादिभिः शङ्कितान् दोषान् परिहरति—**क्लेशकर्मेति** ॥ अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च **क्लेशाः** । पुण्यापुण्यरूपं **कर्म** । **आदि**शब्देन *क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः इत्यादिप्रसिद्धविपाकादिसंग्रहः । जात्यायुर्भोगादयो विपाकाः । पूर्वानुभवभाविता आफलोदयं शयानाः संस्कारा आशयाः । कतिपयदोषरहितव्यावृत्त्यर्थमशेषशब्दः । असंस्पृष्टशब्देन स्वभावतोऽनर्हतया कदाचिदपि दोष-स्पर्शो नास्तीति विवक्षितम् । एवं पदद्वयेन *परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे इत्यस्यार्थ उक्तः ॥

(स्वाभाविकेत्यादि ॥) अथ *तेजोबलैश्वर्यमित्यादिभिरुक्तान् निरूपितस्वरूपविशेषकधर्मानाह—**स्वाभाविकेति** । स्वाभाविकत्वमिह नित्यत्वम्, अनन्याधीनत्वं च । तेन नित्यानां मुक्तानां च ज्ञानादिभ्य एतज्ज्ञानादेर्व्यव-च्छेदः । तद्बलादिभ्यो व्यवच्छेदस्तु अनवधिकातिशयत्वादपि । स्वापेक्षाया उत्कृष्टावधिरहितोऽतिशयो येषां ते अन-वधिकातिशयाः । **ज्ञान**मिह सर्वविषयनित्यसाक्षात्काररूपम् । **बलम्** अनाघ्रातश्रमप्रसङ्गं सर्वधारकत्वम् । **ऐश्वर्यं** सर्व-नियन्तृत्वम् । **वीर्यं** सर्वोपादानत्वादावपि अविकृतस्वभावत्वम् । **शक्तिः** विश्वोपादानतार्हत्वम्, स्वेतरसर्वदुर्घटनशक्तिर्वा ।

तेजः अस्वाधीनसहकारिनिरपेक्षत्वम्, पराभिभवनसामर्थ्यं वा । अत्र व्यूहव्यक्त्यादिक्रमेण ज्ञानबलादिद्वन्द्वत्रिक-निर्देशः । षाड्गुण्यस्य प्रथममुपादानम् अन्येषां गुणानां तदन्तर्भावेन तत्प्राधान्यात् परत्वज्ञापकत्वात् आश्रितानाश्रित-गोचरव्यापारभेदसाधारण्याच्च । अथ षाड्गुण्यविततिरूपाः सौलभ्यज्ञापकाः संश्रितसंग्रहणादौ विशेषत उपयुक्ता गुणा उच्यन्ते । अत्र **सौशील्यं** महतो मन्दैः सह नीरन्ध्रसंश्लेषरसिकता । **वात्सल्यम्** आश्रितेषु दोषतिरस्कारिणी प्रीतिः । **मार्दवम्** अकठिनस्वभावतया सुप्रवेशत्वम्, दण्डनीयेष्वपि सामप्रधानत्वं वा । **आर्जवं** कायवाग्बुद्धिव्यापाराणां परस्परमवि-संवादित्वम् । **सौहार्दं** स्वतः सर्वहितैषित्वम् । **साम्यं** सर्वैरप्याश्रयणीयत्वे समत्वम्, स्वतोऽपक्षपातित्व वा । **कारुण्यं** स्वप्रयोजनान्तरानुद्देशेन परदुःखनिराचिकीर्षा । **माधुर्यम्** उपायदशायामपि रञ्जकत्वेन रसावहत्वम्, द्विषतां जिघांसितानामपि दृष्टिचित्तापहारित्वं वा । **गाम्भीर्यं** भक्तानुग्रहादेरगाधत्वम्, आश्रितदोषदर्शनादेः सतोऽपि गोपनेन दुर्ग्रहत्वं वा । **औदार्यं** पात्रलाघवदेयगौरवप्रत्युपकाराद्यनादरेण वितरणशीलत्वम् । **चातुर्यं** शुभाश्रयप्रकाशनाद्ययत्नोपायैर्विमुख-वशीकरणविस्रम्भजननसंश्रितदोषाच्छादनविरुद्धानुकूलीकरणादिषु कुशलत्वम् । **स्थैर्यं** शरणागतसंग्रहे दोषप्रदर्शकैः सुहृद्भिरप्यकम्पनीयत्वम् । **धैर्यम्** अभिमतवियोगप्रसङ्गेऽप्यभग्नप्रतिज्ञत्वम् । व्यत्ययेन वा स्थैर्यधैर्ययोर्व्याख्यानम् । प्रबल-प्रतिपक्षोपनिपातेऽपि सावज्ञदृढचित्तत्वं वा धैर्यम् । **शौर्यं** तु भीमेष्वपि परसैन्येषु असहायस्यापि स्वसैन्येष्विव निर्भय-प्रवेशसामर्थ्यम्; तत्र प्रविष्टस्य परनिराकरणपर्यन्तो व्यापारः **पराक्रमः** । सत्यकामसत्यसंकल्पशब्दौ इह भावप्रधानौ, **कर्मधारयवृत्तौ** वा; **सत्यकामत्वं** नित्यभोग्यवत्त्वम्; **सत्यसंकल्पत्वं** स्वावतारपर्यन्तापूर्वभोग्यसृष्ट्यादावमोघसंकल्पत्वम् । **कृतित्वं** परोपकारकत्वम्, आश्रितरक्षणेन कृतकृत्यत्वं वा, * न मे पार्थास्ति कर्तव्यमित्याद्युक्तं विहितकर्तव्यनिरपेक्षत्वं वा, धर्मसंस्थापकानुष्ठानवत्त्वं वा, परेषां स्वहितप्रवृत्तेः पूर्वमेव कर्तृमुपक्रान्तपरहितत्वं वा, स्वेन कृतं सर्वं प्रति स्वस्यैव शेषित्वं वा । **कृतज्ञता** सकृदञ्जलिकर्तुरपि अनुबन्धिपर्यन्तसंरक्षणाय तत्कृतानुदर्शनम्, अवसरे संश्रितापेक्षितकरणाय स्वकृतप्रत्याख्यानानुदर्शित्वं वा; * शिरसा याचतस्तस्य वचनं न कृतं मयेति ह्याह । आदिशब्देन तत्र तत्र प्रसिद्धा आनृशंस्यादयो गृह्यन्ते । * यथा रत्नानि जलधेरसंख्येयानि पुत्रक इत्यादिस्मारणाय **असङ्ख्येयत्वोक्तिः** । अत्र दोषा-संस्पृष्टत्वं कल्याणगुणयुक्तत्वं च वदता निर्गुणश्रुतेः पशुच्छागोत्सर्गापवादनयाभ्यां दोषरूपविशेषनिषेधपरत्वं सूच्यते ॥

(**परब्रह्मेत्यादि** ॥) उक्तं सर्वस्मात्परत्वं स्वसाम्यप्रदानपर्यन्तं सौलभ्यं च * नारायणः परं ब्रह्म, * परं ब्रह्म परं धामेत्यादिश्रुतिस्मृतिसिद्धप्रकारेण स्थिरीकरोति—**परब्रह्मेति** ॥ यद्यपि * ब्रह्म परिबृढं सर्वतः इति निरुक्तकारवचनात् ब्रह्मशब्द एव परत्वं वदन्नाम च भवति, तथाऽप्यौपचारिकप्रयोगव्यवच्छेदाय परशब्दः । अत्र बृहति बृंहयतीति निरु-क्तिभ्यां व्यापित्वकारणत्वादिसिद्धया शङ्कितात् दोषान् परिहर्तुं भेदश्रुत्याद्यर्थगर्भया भगवद्गीतानिरुक्तया समाख्यया विशिनष्टि—**पुरुषोत्तममिति** ॥ अनेन ब्रह्मशब्दार्थतया कुदृष्टिविकल्पितप्रकारान्तराणि, तामसतन्त्राद्युक्तव्यक्त्यन्तराणि च व्यवच्छिद्यन्ते । अस्य च पञ्चम्यादिविभक्तित्रयेऽपि समासः संभवति । एवं सर्वाधिकत्वेन अस्मदादिभिर्दुरधिगमः स्यादिति शङ्कां परिहरन्, द्वाभ्यां विशेषणाभ्यां सौलभ्यकाष्ठां व्यनक्ति—**श्रीरङ्गशायिनम् अस्मत्स्वामिनमिति** ॥ स्वरूपाद्विग्रहस्य सुखानुसंधेयतया सौलभ्यमधिकम्; तस्मादप्यर्चावतारस्य भक्ताभिमतसर्वदेशकालसंनिधायितया परव्यूहा-दिभ्योऽधिकतमम् । तदा काष्ठाप्राप्तं परत्वमपि तत्र भक्तोपलभ्यं शास्त्रादवसेयम्; यथोक्तम्—* सर्वातिशायि षाड्-गुण्यं संस्थितं मन्त्रबिम्बयोरिति । अत्र मनुष्याणामपि कैङ्कर्योद्देश्यतया अवस्थितस्य निर्भयसेवादियोग्यत्वम् अस्मत्स्वामि-

शब्दाभिप्रेतम् । यथाऽऽहुः—*अर्च्यः सर्वसहिष्णुरर्चकपराधीनाखिलात्मस्थितिः इति । यद्वा स्वाचार्यसंतानसेवितत्वेन प्रीत्यतिशयहेतुत्वमभिप्रेत्यात्रासत्स्वामिशब्दः । प्राचीनरामानुज इव अहमप्यस्य शीलादिगुणैर्दास्यमुपागत इति च भावः ॥

एवं कैङ्कर्यप्रतिसंबन्धितया अनुभाव्यं निर्धारितम् । अथात्माभिमानानुगुणपुरुषार्थव्यवस्थासिद्ध्यर्थमनुभवितुः किंकरस्य स्वात्मनः स्वरूपाविर्भावदशामाह—**प्रबुद्धेति** ॥ प्रबुद्धं प्रकर्षेणावगतम्, स्वाधीनस्वार्थकर्तृत्वभोक्तृत्वभ्रमविरहेण सम्यग्दृष्टमित्यर्थः । नियाम्यत्वदासत्वे *स स्वराड्भवति इत्याम्नातायां मुक्तिदशायामप्यनुवृत्ते इति ज्ञापनाय द्वयोरपि नित्यत्वोक्तिः । निरपेक्षस्वातन्त्र्यनिरुपाधिकशेषित्वप्रसङ्गपरिहाराय एकरसशब्दः । अत्रात्मशब्दः स्वविषयः । स्वभावशब्दो यावदात्मभाव्याकारमाह । ईदृशात्मस्वरूपमपि *व्यतिरेकस्तद्भावभावित्वादिति नयेन परमप्राप्यविशेषणतया फलकोटि-निविष्टमनुसंधेयमिति व्यञ्जयितुम् अधिकोऽहंशब्दः । नित्यनियाम्यत्वप्रबोधकाष्ठामाह—**तदेकानुभव इति** ॥ तस्मिन्नेक-स्मिन्नेव प्रधानतया अनुभवो यस्य स तथोक्तः । आविर्भूतस्वरूपस्य हि भगवदपृथक्सिद्धविशेषणतया तत्प्रधानतयैव स्वानुभवम् *अविभागेन दृष्टत्वादित्यसूत्रयत् । नित्यदास्यैकरसत्वाविर्भावस्य फलमाह—**तदेकप्रिय इति** ॥ **स एव** प्रधानतया नित्यं प्रियो यस्य स तदेकप्रियः । न हि तद्दास्यैकरसस्यास्य *रसो वै सः इत्याद्युक्तस्वाभाविकनिरवधि-कातिशयरसस्वरूपात्तस्मादन्यत्तदानीं प्रधानतयाऽऽस्वाद्यं भवति ॥

तदेवमनुभाव्यानुभवितारावुक्तौ । अथात्रत्यानुभवाद्व्यावृत्तमनुभवप्रकारमाह—**परिपूर्णमिति** ॥ अनन्तगुणविभूति-विशिष्टस्वरूपे अननुभूतांशरहितमित्यर्थः । **भगवन्तं** पराशरादिनिरुक्तप्रकारेणाभयलिङ्गम् । तस्मिन् सामान्यतः सर्वा-कारविषयपरोक्षज्ञानात् परिमिताकारविषयप्रत्यक्षज्ञानाच्च व्यावृत्त्यर्थमाह—**विशदतमानुभवेनेति** ॥ तत्राप्यपरिच्छिन्न-विषयसान्तरप्रत्यक्षाद्व्यवच्छिनत्ति—**निरन्तरमिति** ॥ **अनुभवेन अनुभूय**—अनुभवेन विषयीकृत्येत्यर्थः । तदनुभवेत्यनेन पूर्वोक्तभगवदनुभवानुवादः ; यद्वा, तच्छब्देन भगवदनुभवः परामृश्यते ; तस्यानुभवोऽपि स्वयंप्रकाशस्य तस्यैव स्वरूपम् ; ईदृशोऽयमनुभूयते मयेत्यनुकूलतमभगवदनुभवस्वरूपोल्लेखांशेन जनिता प्रीतिरिहोच्यते । तस्या अनवधिकातिशयत्वेन ऐश्वर्याद्यनुभवजनितप्रीतेर्व्यवच्छेदः । ईश्वरेच्छाधीनेऽपि कैङ्कर्ये स्वप्रीतिकारितत्वोक्तिः नियोगनैरपेक्ष्यं प्रीतेः प्रेरकत्वाति-शयं च व्यनक्ति । कारितशब्द इह शेषतायां वा, तदेकरतौ वा, शेषवृत्ति प्रति प्रयोज्यकर्तरि किंकरे वा अन्वेतव्यः । अशेषावस्थाशब्देन सेव्यस्य भगवतः परत्वव्यूहत्वादयः, सेवकस्य च मुक्तस्य सदेहत्वविदेहत्वादिरूपा अवस्थाः सर्वा विवक्षिताः । शेषताऽत्र शेषवृत्तिः । अभिमतसर्वशेषवृत्तिषु अप्रतिघातमभिप्रेत्य अशेषशब्दः ; स्वामिप्रीत्यर्थत्वाविशेषेण परस्परैकरस्यात्परकृताऽपि शेषवृत्तिः स्वकृतेव भवतीति भावः । ईश्वरस्य मुक्तस्य च स्वच्छन्दानेकदेहपरिग्रहेण वा अनन्तगरुडादिवृत्तिसजातीयकैङ्कर्यसिद्धिः । आत्मा आत्मीयं वा सर्वमशेषशब्देनोच्यते ; तदा तस्य शेषता शेषभाव एव । एवंविधायामशेषशेषतायामेव रतिः प्रीतिरिच्छा वा रूपं निरूपकधर्मो यस्य सः अशेषशेषतैकरतिरूपः । **नित्य-किंकरो भवानि**—उत्तरावधिरहितकैङ्कर्यसाम्राज्यवान् भवेयमिति भावः ॥ १ ॥

स्वात्मनित्यनियाम्यनित्यदास्यैकरसात्मस्वभावानुसन्धानपूर्वकभगवदनवधिकातिशयस्वा-म्याद्यखिलगुणगणानुभवजनितानवधिकातिशयप्रीतिकारितशेषावस्थोचिताशेषशेषतैकरतिरूपनित्य-कैङ्कर्यप्राप्त्युपायभूतभक्तितदुपायसम्यग्ज्ञानतदुपायसमीचीनक्रियातदनुगुणसात्त्विकतास्तिक्यादि -

समस्तात्मगुणविहीनः, दुरुत्तरानन्ततद्विपर्ययज्ञानक्रियानुगुणानादिपापवासनामहार्णवान्तर्निर्मग्नः, तिलतैलवत् दारुवह्निवत् दुर्विवेचत्रिगुणक्षणक्षरणस्वभावाचेतनप्रकृतिव्याप्तिरूपदुरत्ययभगवन्मायातिरोहितस्वप्रकाशः, अनाद्यविद्यासञ्चितानन्ताशक्यविस्रंसनकर्मपाशग्रथितः, अनागतानन्तकालसमीक्षयाऽप्यदृष्टसन्तारोपायः, निखिलजन्तुजातशरण्य, श्रीमन्नारायण, तव चरणारविन्दयुगलं शरणमहं प्रपद्ये ॥ २ ॥

एवं न्यासोपासनसाधारणाधिकारसिद्धयै प्रथमं फलपर उत्तरखण्डो विवृतः । अथोपायपरं पूर्वखण्डं विवृण्वन्, तत्रोत्तमपुरुषविवक्षितमाकिंचन्यरूपं प्रपत्तेर्विशेषाधिकारं कार्पण्यरूपमङ्गं च व्यनक्ति—**स्वात्मनित्यनियाम्येति** ॥ स्वात्मशब्दोऽनुसंधातृस्वरूपपरः । अत्र शेषशेषितत्कैङ्कर्यचिन्तनरसेन तदनुवृत्तिवाञ्छया च पूर्वोक्तस्यैव परमपुरुषार्थस्य विस्तरेणानुवादः । नियाम्यशब्दोऽत्र भावप्रधानः । अनवधिकातिशयस्वाम्यम् अनवच्छिन्नसर्वविषयस्वामित्वम् । आदिशब्देन तथाविधनियन्तृत्वादिसंग्रहः । ऐश्वर्यादिफलान्तरात् कादाचित्कभगवत्कैङ्कर्याच्च व्यावृत्त्यर्थं नित्यकैङ्कर्यशब्दौ । उपायभूतेति च्विप्रत्ययरहितप्रयोगेण मोक्षप्रदत्वं भगवद्भक्तेः स्वभावप्राप्तमिति व्यज्यते । भक्तिशब्द इह वेदान्तोदितसपरिकरभक्तियोगपरः । ज्ञानक्रियाशब्दाभ्यां ज्ञानकर्मयोगौ विवक्षितौ; तयोः सम्यक्त्वं यथावस्थितसकलाङ्गोपसंहारवत्त्वम् । ज्ञानयोगमन्तरेणापि कर्मयोगेनैवात्मावलोकनपूर्वकभक्तियोगाधिकारारोहणस्य भगवद्गीताभाष्यप्रपञ्चितस्याधिकारिविशेषनियततया तदनादरेणात्र स्वारसिकक्रमनिर्देशः । सात्त्विकता * नित्यसत्त्वस्थाः इत्युक्तसत्त्वनिष्ठता; तस्याः फलम् आस्तिक्यादिगुणजातम्, अवस्थाभेदेन तस्या हेतुश्च । * अमानित्वमदम्भित्वम्, * दया सर्वेषु भूतेष्वित्याद्युक्तात्मगुणान्तरसंग्रहाय समस्तशब्दः । प्रपत्त्यपेक्षितज्ञानविश्वासादेस्त्विह न प्रतिषेधः ॥

(**दुरुत्तरेत्यादि** ॥) एवमुपायान्तरतदुपायपरंपराहानिरुक्ता । अथ पूर्वं पश्चाच्चोपायप्रतिबन्धकापायपरंपरान्वयमाह—**दुरुत्तरेति** ॥ दुरुत्तरत्वं भगवत्संकल्पमन्तरेण सनकादिभिरपि लङ्घयितुमशक्यत्वम् । तच्छब्देन पूर्वोक्तसम्यग्ज्ञानादिपरामर्शः । विपर्ययशब्दोऽत्र विपरीतपरः; स च ज्ञानादिषु त्रिष्वन्वीयते । त्रयाणां हेतुः पापवासना । बीजाङ्कुरन्यायसूचनाय अनादिशब्दः । पापानां वासना सजातीयपापान्तरगरभरुचिहेतुभूतः स्वभावविशेषः । पट्टूर्मिसंकुलत्वादिविवक्षया महार्णवत्वरूपणम् । एवंविधस्य पापस्यात्मनिरोधायकत्वप्रकारमाह—**तिलतैलवदिति** ॥ दृष्टान्तद्वयेन * दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि । प्रधानेऽवस्थितो व्यापी इति वचनं स्मार्यते । अल्पश्रुतैः पृथक् ज्ञातुम्, अयोगिभिः पृथक् द्रष्टुम्, अनीश्वरैः पृथक्कर्तुं चाशक्यतया दुर्विवेचत्वोक्तिः । चतुर्दशाध्यायोक्तगुणत्रयबन्धकत्वप्रकारज्ञापनाय त्रिगुणशब्दः । अनुकूलपरिणतेः क्षणमपि व्यवस्थापयितुमशक्यत्वमभिप्रेत्याह—**क्षणक्षरणस्वभावेति** ॥ * अचेतना परार्था च नित्या सततविक्रिया । त्रिगुणा कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते ॥ व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च । स चानादिरनन्तश्च परमार्थेन निश्चितः ॥ इति परमसंहितोक्तम् **अचेतनप्रकृतिव्याप्ति**शब्दैर्दर्शितम् । **प्रकृतौ व्याप्तिरनुप्रवेशः**; प्रकृतेर्व्याप्तिः सर्वतः संबन्धः । अत्र तस्या इव तत्संबन्धस्यापि विचित्रसृष्ट्युपयोगित्वाविशेषान्मायात्वोक्तिः । **दुरत्ययभगवन्मायेत्यनेन** * मम माया दुरत्यया इति पदत्रयसूचनम् । यद्यप्यात्मस्वरूपं नित्यं तथाऽपि **तस्य** भगवच्छेषत्वादिविशिष्टाकारगोचरधर्मभूतज्ञाननिरोधमभिप्रेत्य **तिरोहितस्वप्रकाश** इत्युक्तम् । स्वस्वरूपतिरोधानकरीमित्याद्युक्तमप्युपलक्ष्यते ॥

(अनाद्यविद्येत्यादि ॥) प्रकृतेस्तिरोधायकत्वं कर्मोपाधिकम् । कर्म च भोगैस्तत्तत्प्रतिपदोक्तप्रायश्चित्तैर्वा निःशेषयितुमशक्यमित्यभिप्रायेणाह—**अनाद्यविद्येति ॥** अत्र अविद्याशब्देन अज्ञानं देहात्मभ्रमादिकं च गृह्यते; तस्याश्च कर्महेतुत्वं रागद्वेषद्वारा । * यद्ब्रह्मकल्पेत्याद्युक्तप्रक्रियया अनाद्यविद्यासंचितत्वेनानन्त्यात् प्रत्येकं प्राबल्याच्च भगवद्व्यतिरिक्तैरशक्यविस्रंसनत्वम् । * पशवः पाशिताः पूर्वं परमेण स्वलीलया । तेनैव मोचनीयास्ते नान्यैर्मोचयितुं क्षमाः ॥ इत्याद्युक्तसूचनाय कर्मणः पाशत्वरूपणम् । **प्रग्रथितः** दृढं निबद्धः; * नाभुक्तं क्षीयते कर्म इति हि स्मर्यते । उक्तप्रतिबन्धकभूयस्त्वात् * त्वत्पादकमलादन्यदित्याद्युक्तप्रकारेण कालान्तरेऽप्युपायान्तरसंभावनां प्राङ्न्यायेन प्रतिषेधति—**अनागतेति ॥** वक्ष्यमाणश्रीमत्त्वनारायणत्वाभ्यां फलितम् * सर्वस्य शरणं सुहृत्, * देवानां दानवानां च, *सर्वलोकशरण्याय, * विभीषणो वा सुग्रीव यदि वा रावणः स्वयमित्यादिप्रसिद्धं स्वसंग्रहोपयुक्तं स्वभावमाह—**निखिलजन्तुजातशरण्येति ॥** हिरण्यगर्भादीनामपि संग्रहाय निखिलशब्दः; तेऽपि हि कर्माधीनजन्मभागितया जन्तवः । *पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम् ॥ * एतन्निष्ठस्य मर्त्यस्य मुक्तिर्हस्तस्थिता सदा । तत्संबधिन एवापि मुक्तिमेष्यन्ति वै ध्रुवमित्याद्यर्थमभिप्रेत्य जातशब्दः । स चात्र गुणप्रधानतया अन्वितत्रातपरः । पूर्वखण्डपदक्रमानुसारेण श्रीमदित्यादीनि पदानि । श्रीमच्छब्देन * लक्ष्म्या सह हृषीकेशः इत्याद्युक्तं सूच्यते । सर्वशरण्यत्वौपयिकसंबन्धगुणविशेषादिप्रदर्शनाय नारायणशब्दः । कृपोत्तम्भकत्वातिशयादौचित्याच्च चरणग्रहणम् । उपायदशायामपि भोग्यत्वसूचनाय अरविन्दत्वरूपणम् । शरणशब्द इहोपायपरः । उत्तमपुरुषविवक्षिताधिकारिविशेषव्यञ्जनाय अहंशब्दः; अधिकारविरहादुपायान्तरेषु निराशः, प्रत्यवायभयादिदानीमपायेभ्य उपरतः, शरण्यगुणविवेकादतिशङ्कानिर्मुक्तः, संसारे दोषदर्शनात्परित्यक्तप्रयोजनान्तरतदुपायः, परमपुरुषार्थसङ्गात्पार्थनान्वितभरन्यासोद्यतश्चेति भावः । **शरणं प्रपद्ये** उपायतया आश्रयामि । अकिंचनोऽनन्यगतिरहं श्रीमति नारायणे स्वात्मरक्षाभरं निक्षिपामीत्युक्तं भवति । अत्र सविशेषणनारायणशब्देन विरोधिभूयस्त्वप्राप्यगौरवोपायलाघवादिमूलशङ्कानिरासहेतवः शरण्याकारा विवक्षिताः ॥ २ ॥

एवमवस्थितस्याप्यर्थित्वमात्रेण परमकारुणिको भगवान् स्वानुभवप्रीत्योपनीतैकान्तिकात्यन्तिकनित्यकैङ्कर्यैकरतिरूपनित्यदास्यं दास्यतीति विश्वासपूर्वकं भगवन्तं नित्यकिङ्करतां प्रार्थये ॥ २ ॥

अथ तत्फलितं सोपसर्गधातूक्तम् * रक्षिष्यतीति विश्वासादभीष्टोपायकल्पनम् । गोप्तृत्ववरणं नाम स्वाभिप्रायनिवेदनमिति विभज्य निर्दिष्टमङ्गद्वयम् * प्रार्थनामात्रसंतुष्टो जन्तोर्यच्छति वाञ्छितम् । इति निश्चित्य भगवत्प्रार्थना शरणागतिः ॥ इत्युक्तप्रकारविशेषोपलक्षितप्रकारिवैशिष्ट्याभिप्रायेणाह—**एवमिति ॥** एवमवस्थितस्येत्यनेन अधिकारवैगुण्यं विरोधिभूयस्त्वं च पूर्ववाक्योक्तमेव शरण्यगुणप्रकर्षव्यञ्जनायानूदितम् । अर्थित्वमात्रेणेति उपायलाघवोक्तिः; अद्वयप्रार्थनावाक्यमात्रमपि * नेहाभिक्रमनाशोऽस्ति इति न्यायात् अन्ततः कार्यकरमिति भावः । अथ वा, अत्र सकृत्कर्तव्यभरन्यासलक्षणतया सद्यः स्वाभीष्टसिद्धिः । स्वानुभवप्रीत्येत्यादिना प्राप्यगौरवप्रकाशनम् । उक्तैर्हेतुभिः संभवन्तीं शङ्कामपाकर्तुं परमकारुणिको भगवानिति सुलभत्वपरत्वसूचकपदद्वयोक्तिः; ईदृशस्य हि सर्वविरोधिनिवर्तनार्हता । समर्थस्य निर्दयत्वे दयालोश्चासमर्थत्वे शरण्यत्वं न स्यादिति तत्सिद्ध्यर्थमुभयोक्तिः । स्वानुभवेत्यत्र स्वशब्दः परमात्मविषयः । ऐकान्तिकत्वम् अनन्यविषयत्वम् । आत्यन्तिकत्वमिह फलान्तरोपाधिकनिवृत्तिरहितत्वम्, अत एव पश्चाद्याव-

त्कालमनुवर्तमानत्वं वा । दास्यकिंकरताशब्दाविह वृत्तिपरौ । रतिशब्देन विश्वासस्य महत्त्वरूपप्रकारोऽभिप्रेतः । प्रार्थनाशब्दस्य इच्छामात्रेऽपि प्रयोगसंभवात् तद्व्यावृत्त्यर्थम् *तदेकोपायता याच्ञेत्युक्तयाचनरूपत्वं व्यञ्जयितुं द्विकर्मकप्रयोगः । सर्वस्य प्रार्थितप्रदानसामर्थ्यम्, कैङ्कर्यप्रतिसंबन्धिनस्तस्योभयलिङ्गत्वं च ज्ञापयितुम्—**भगवन्त**मित्युक्तम् । अस्मिन् वाक्ये प्रातिकूल्यवर्जनस्य च आनुकूल्यसंकल्पस्य चार्थसिद्धत्वमवगन्तव्यम् ॥

तवानुभूतिसंभूतप्रीतिकारितदासताम् । देहि मे कृपया नाथ न जाने गतिमन्यथा ॥ ४ ॥

उक्तप्रकारसाध्यसाधनरूपमर्थद्वयं व्याख्येयक्रमेण सुखप्रतिपत्त्यर्थमैतिहासिकश्लोकद्वयेन स्ववाक्यायमानेन संक्षिप्याह—**तवेति** ॥ यद्यपि प्रथमश्लोकेऽपि पूर्वार्धे फलमुपादीयते, तथाऽप्यसौ देहीत्युक्तप्रार्थनाप्राधान्यादुपायपरः । अत्र दासताशब्देन दासवृत्तिर्विवक्षिता, दासभावमात्रस्य च नित्यसिद्धत्वेन साध्यत्वायोगात् । **मे** अनन्यप्रयोजनस्य अनन्योपायस्य च । कृपया नाथेति पदाभ्यां गुणविशेषसंबन्धविशेषविशिष्टस्योपायभाव इति व्यज्यते; नाथशब्दो हि नाथ्यत इति व्युत्पत्त्या रक्षणार्थे प्रार्थनीये स्वामिनि रूढः । **न जाने गतिमन्यथा** उक्तप्रकारात्प्रपत्तिमात्रवशीकार्यात् त्वत्तोऽन्यथाभूतं मदर्हमुपायं सर्वशास्त्रपरामर्शेऽपि न पश्यामि, देवतान्तराणां साक्षान्मोक्षप्रदत्वाभावात् मोक्षोपायतया चोदितस्य त्वदुपासनस्य मया दुःसाधत्वादिति भावः । यद्वा अन्यथेत्यनेन त्वय्यदातरीति विवक्षितम् ॥

सर्वावस्थोचिताशेषशेषतैकरतिस्तव । भवेयं पुण्डरीकाक्ष त्वमेवैवं कुरुष्व माम् ॥ ५ ॥

एवं प्रार्थिते कैङ्कर्यरूपे पुरुषार्थे प्रीतिशब्दोक्तं हेत्वंशं विशिंषन्, स्वाभीष्टप्रदाने स्वप्रयत्नान्तरनैरपेक्ष्यं चापेक्षते—**सर्वेति** ॥ सर्वावस्थाशब्दशेषताशब्दौ पूर्वोक्तार्थौ । तत्तद्दशायां स्वाम्यभिमतप्रकार उचितशब्दः । *जायमानं हि पुरुषम्, *कृपामयमपाङ्गं ते सकृन्मयि निपातय इत्याद्युक्तेन सत्त्वोन्मेषहेतुना कटाक्षविशेषेण मामेवं कुरुष्वेत्यभिप्रायेणोक्तम्—**पुण्डरीकाक्षेति** ॥ यद्वा *पुण्डरीकं परं धाम इत्यादिनिरुक्तेनानेन नाम्ना परमपदवासिनः परिचरणं प्रार्थ्यत इति सूच्यते । त्वदितराशक्येऽस्मिन्नर्थे त्वयि च निरपेक्षोपाये किमीदृशभरन्यासरूपव्याजातिरिक्तमत्प्रयत्नेनेत्यभिप्रायेणाह—**त्वमेवेति** ॥ **त्वं** सर्वज्ञः सर्वशक्तिः परमकारुणिकः । **माम्** आकिंचन्यानन्यगतित्वार्थित्वशालिनम् । त्रितोर्धात्वोरिह देहि कुरुष्वेति परस्मैपदात्मनेपदाभ्यां स्वस्य भगवतश्च यथार्हं क्रियाफलान्वयः सूच्यते ॥

एवंभूततत्त्वयाथात्म्यावबोधतदिच्छारहितस्याप्येतदुच्चारणमात्रावलम्बनेनोच्यमानार्थपरमार्थनिष्ठं मे मनस्त्वमेवाद्यैव कारय ॥ ६ ॥

नन्विह शरण्यशरणागतितत्फलविशेषनिर्धारणपूर्विका फलकामना हि अधिकारिविशेषणम्, न पुनस्तद्वत इव तथाविधतद्वचनमात्रमित्यत्र *अनिच्छन्नप्येवम् इति श्लोकोक्तप्रकारेण सप्रश्रयं प्रतिवक्ति—**एवंभूतेति** ॥ तदिच्छेति इच्छाविषयत्वेन परामृश्यमानार्थत्वात् तत्त्वशब्द इह पुरुषार्थपरः, पुरुषार्थविशेषनिष्कर्षाय जीवात्मपरमात्मतत्त्वपरो वा । अवबोधेच्छा वा तदिच्छेत्युच्यते; तदा पुरुषार्थेच्छाविरहः कैमुत्यात्सिध्यति । श्रियःपतेस्तव प्रसादादद्य साधिकारोऽस्मि, निरधिकारत्वेऽपि लब्धव्याजेन त्वया शेषपूरणं कार्यमिति द्योतयितुम् अपिशब्दः । एवमधिकारवैकल्यमङ्गवैकल्यमङ्गिवैकल्यं चान्वारुह्योक्तम्—उच्चारणमात्रेति । वैषम्यदोषप्रसङ्गपरिहारहेतुस्तव सिद्ध इत्यभिप्रायेण अवलम्बनशब्दः । उच्यमानार्थः उपायोपेयरूपः । एतच्छब्दोऽप्यत्र तद्विषयः । अन्यतरविषयत्वेऽपि तदितर-

स्यार्थात्सिद्धिः । परमार्थनिष्ठत्वम् अज्ञानसंशयविपर्ययरहितव्यवसायानुवृत्तिमत्त्वम् । **मे**—* सकृदुच्चारो भवति, * सकृदुच्चरितं येन, * भव शरणमितीरयन्ति ये इत्याद्युक्तवचनमात्रधनस्य त्वदायत्तसर्वसिद्धेः । **मनः**—* चञ्चलं हि मनः कृष्ण, * मनो दुर्निग्रहं चलम्, *बन्धाय विषयासङ्गीत्याद्युक्तदोषमपि हृषीकेशेन त्वया अनुगृहीतानां सम्यङ्ननसाधनम् । शरण्यस्यापेक्षणीयान्तराभावम्, आत्मनस्त्वरातिशयं च व्यनक्ति—**त्वमेवाद्यैवेति** ।। कारयेत्यनेन प्रपत्तावपि स्वस्य प्रयोज्यकर्तृत्वम्, अध्यात्मशास्त्रैराचार्यमुखेनान्तर्यामितया च भगवतः प्रयोजककर्तृत्वं च प्रकाश्यते । अविकलप्रपत्तिप्रयोगस्यापि भाष्यकारस्येदं वाक्यं विकलप्रयोगाणामन्येषामपि शरण्यानुकम्पया क्षिप्रमुपायपूर्तेः स्यादिति ख्यापनार्थम् ।।

अपारकरुणाम्बुधे, अनालोचितविशेषाशेषलोकशरण्य, प्रणतार्तिहर, आश्रितवात्सल्यैकमहोदधे, अनवरतविदितनिखिलभूतजातयाथात्म्य, सत्यकाम, सत्यसङ्कल्प, आपत्सख, काकुत्स्थ, श्रीमन्, नारायण, पुरुषोत्तम, श्रीरङ्गनाथ, मम नाथ, नमोऽस्तु ते ।। ७ ।।

॥ इति श्रीभगवद्रामानुजविरचिते गद्यत्रये श्रीरङ्गगद्यम् ॥

अथाधिकारोपायफलप्रदानेषु यथार्हमुपयुक्तान् भगवतः प्रकारान् वदन्, प्रथमं सर्वोपयोगिगुणविशेषप्रकर्षमाह—**अपारेति** ।। स्वस्मिन्नपि व्याप्तिमभिप्रेत्य अपारत्वोक्तिः; तत्फलितं स्वेनाप्याश्रयणीयत्वमभिप्रेत्याह—**अनालोचितेति** ।। जातिगुणादिनिकर्षानादरेण सर्वैः शरण्यतया वरणीयेत्यर्थः । अनेन प्रपत्तेः सर्वाधिकारत्वं दर्शितम् । कारुणिकोऽपि यदि विषमः स्यात्, समोऽपि यदि निर्घृणः स्यात्, न तदा सर्वशरण्यः स्यादिति तदर्थमुभयोक्तिः । शरणागतिसमनन्तरलक्षणीयौ गुणावाह—**प्रणतार्तिहर आश्रितवात्सल्यैकमहोदधे** इति ।। प्रणता इह प्रकृष्टप्रह्वीभावयुक्ताः प्रपन्नाः, तेषां तत्तदभिमतालाभनिमित्तामार्तिं हरतीति प्रणतार्तिहरः । अनेन तु प्रपत्तेः सकलफलप्रदत्वं च सूच्यते । प्रणतशब्दस्य प्रह्वीभावमात्रपरत्वे तदार्तिहरणादलप्रयत्नप्रसाद्यत्वं प्रकाश्यते । वात्सल्येन गुणान्तरनिरस्कारमभिप्रेत्य एकशब्दः, येन सर्वज्ञोऽप्यविज्ञातेव स्वतन्त्रोऽप्यस्वतन्त्र इव स्यात् । कारुण्यादिसद्भावेऽप्यज्ञस्यापूर्णस्याशक्तस्य च निरपेक्षरक्षकत्वं न स्यात्; अतस्तत्सिद्ध्यर्थं गुणत्रयम् अनवरतेत्यादिभिरुच्यते । अनवरतनिखिलशब्दाभ्यां ज्ञानस्य कालतो विषयतश्च निःसंकोचत्वोक्तिः; मम अनिष्टनिवर्तनेष्टप्रापणोपयोगिष्वधिकारादिषु किंचिदपि कदाचिदपि तवाज्ञातं नास्तीति भावः । न च तव मादृशाकिंचनपरित्यागहेतुभूतप्रत्युपकारपूर्वोपकारादिप्रयोजनान्तरसापेक्षत्वं गुणवैकल्यं वा कदाचिदप्यस्ति; अतो मद्रक्षणेन स्वगुणान् संरक्षेत्यभिप्रायेणाह—**सत्यकामेति** ।। नित्यभोग्यानन्तकल्याणगुणादिविशिष्टेत्यर्थः । संकल्पमात्रसाधितजगत्सृष्ट्यादेस्तव मद्रक्षणेऽपि न हि संकल्पादतिरिक्तं संपादनीयमित्यभिप्रायेणाह—**सत्यसंकल्पेति** ।। अमोघसंकल्पेत्यर्थः; त्वयैव स्थापितं प्रपन्नविषयं त्वद्व्रतं न कैश्चिदपि प्रतिहन्तुं शक्यमिति भावः । उक्तगुणवर्गहेतुकद्रौपदीगजेन्द्रादिसंरक्षणप्रकारं तद्व्रतस्त्वस्याप्यापत्प्रशमनायोद्घाटयति—**आपत्सखेति** ।। आपदि सखा भवतीत्यापत्सखः; सखेव प्रीतिविश्वासगोचरः संरक्षकश्चेति भावः । तदेतत् निषादवानरराक्षससर्वजातिमुलभे सकृत्प्रपन्नसंरक्षणव्रतिनि सर्वलोकशरण्ये विषयवासमात्रसंरक्षितजङ्गमस्थावरजन्तुजाते अवतारविशेषे सुव्यक्तमित्यभिप्रायेणाह—**काकुत्स्थेति** ।। अनेन * वधार्हमपि काकुत्स्थः कृपया पर्यपालयदित्यादिवाक्यमपि स्मार्यते । अस्य सापराधेष्वप्याश्रितेषु निग्रहोष्मलतानिवारिकया सहधर्मचारिण्या नित्ययोगमाह—**श्रीमन्निति** ।। परहितेष्वपि स्वार्थप्रवृत्त्यनुगुणसंबन्धादिविशेषं व्यनक्ति—**नारायणेति** ।। इदं च पदद्वयं व्याख्येयगतविशिष्टसिद्धोपायोपेयप्रकाशकम् । नारायणशब्दवाच्यजगत्संबन्धादिशङ्कितदोष-

निवृत्त्यर्थं पञ्चदशाध्यायोक्तं काष्ठाप्राप्तं परत्वरूपं वैलक्षण्यं समाख्याति—**पुरुषोत्तमेति** ॥ पुरु सनोतीति पुरुषशब्द-व्युत्पत्त्या बहुप्रदेषूत्तमत्वं वा विवक्षितम्—स्वाश्रितेभ्यः स्वात्मानमपि सविभूतिकं ददातीति । सर्वापेक्षितसाधकसेवानुगुणां सौलभ्यकाष्ठां सूचयति—**श्रीरङ्गनाथेति** ॥ उक्तं चार्चावतारं प्रस्तुत्य भगवता **शौनकेन**—* तामर्चयेत्तां प्रणमेत्तां यजेत्तां विचिन्तयेत् । विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीमिति । **श्रीपौष्करे** तु अर्चावतारस्योपायविरोधिवर्गनिवर्तकत्वमपि दर्शितम्—* संदर्शनादकस्माच्च पुंसां संमूढचेतसाम् । कुवासना कुबुद्धिश्च कुतर्कश्च कुनिश्चयः ॥ कुहेतुश्च कुभावश्च नास्तिकत्वं लयं व्रजेदिति । स्थानविशेषोऽप्यत्र सेवकानां सत्त्वोन्मेषहेतुत्वाभिप्रायेणोपात्तः । स्वयंव्यक्तसैद्ध-वैष्णवरूपभगवत्क्षेत्रवासिनामपि फलविशेषः प्रदर्शितः **श्रीसात्त्वते**—*दुष्टेन्द्रियवशाच्चित्तं नृणां यत्कलुषैर्वृतम् । तदन्तकाले संशुद्धिं याति नारायणालये ॥ इति । तत्रापि स्वाचार्यपरम्पराचिरसेवनजनितप्रसादातिशयात् स्वदोषानादरेण स्वस्यैवंविधावस्थाप्रदत्वेन प्रार्थितपूरणानुगुणतामभिप्रेत्याह—**मम नाथेति** ॥ स्वापेक्षितसिद्ध्यर्थं याचनीयः स्वामी नाथः । एवमभिमुखीकृते भगवति प्रकृतोपायस्य भरन्यासरूपं प्रधानांशं दमयन्त्यादिवृत्तान्तेषु शरणागतिविषयतया प्रसिद्धेन भगवच्छास्त्रोक्तस्थूलसूक्ष्मादियोजनवता नमःशब्देन निगमयन्, प्रयुज्यमानः सोऽयमुपायस्त्वच्छेषतयैव स्वीक्रियतामित्यभिप्रायेणाह—**नमोऽस्तु ते** इति ॥ यद्वा अत्र परत्र चापेक्षितं निर्ममत्वसंस्कृतं कैङ्कर्यं नमःशब्दाभिप्रेतम् । अस्विति आशासनम् । **ते** इत्यत्र प्रकृत्यंशेन प्राप्यत्वप्रापकत्वशेषित्वादिशालितया निरुपाधिकनमःप्रयोगयोग्यत्वमभिप्रेतम् । चतुर्थी चात्र तादर्थ्यपरा । इदमेव वाक्यम् [आवृत्त्या] आवर्त्यमानं पृथुगद्योक्तस्य प्रतिवचनस्य संग्रहोऽपि भवति; सूत्रादिष्विव प्रयोजनप्रकर्षे सत्यावृत्तेरभियुक्तसंमतत्वात् । तत्रायमर्थः—मत्प्रपन्नस्य ते यथामनोरथं मत्कैङ्कर्यं भवत्विति । तदेवं रहस्यत्रयोक्तशरण्यशरणागतितत्फलविशेषाः संदर्शिताः ॥

यदत्र संग्रहेणोक्तमनुक्तमपि किंचन । बृहद्वद्याधिकारे तद्व्यक्तं प्रत्यवमृश्यताम् ॥

॥ इति रहस्यरक्षायां मितगद्याधिकारः समाप्तः ॥

श्रीः

॥ श्रीवैकुण्ठगद्यम् ॥

यामुनार्यसुधाम्भोधिमवगाह्य यथामति । आदाय भक्तियोगाख्यं रत्नं संदर्शयाम्यहम् ॥ १ ॥

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदम्, क्लेशकर्माद्यशेषदोषासंस्पृष्टम्, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणौघमहार्णवम्, परमपुरुषम् भगवन्तं नारायणं स्वामित्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य, ऐकान्तिकात्यन्तिकतत्पादाम्बुजद्वयपरिचर्यैकमनोरथः, तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति मन्वानः, तस्यैव भगवतो नारायणस्य अखिलसत्त्वदयैकसागरस्य अनालोचित [गुणागण] गुणगणाखण्डजनानुकूलामर्यादशीलवतः, स्वाभाविकानवधिकातिशयगुणवत्तया देवतिर्यङ्मनुष्याद्यखिलजनहृदयानन्दनस्य, आश्रितवात्सल्यैकजलधेः, भक्तजनसंश्लेषैकभोगस्य, नित्यज्ञानक्रियैश्वर्यादिभोगसामग्रीसमृद्धस्य महाविभूतेः श्रीमतश्चरणारविन्दयुगलमनन्यात्मसंजीवनेन तद्गतसर्वभावेन शरणमनुव्रजेत् ॥ २ ॥

ततश्च प्रत्यहमात्मोज्जीवनायैवमनुस्मरेत् ॥ ३ ॥

चतुर्दशभुवनात्मकमण्डं दशगुणितोत्तरं चावरणसप्तकं समस्तं कार्यकारणजातमतीत्य वर्तमाने, परमव्योमशब्दाभिधेये, ब्रह्मादीनां वाङ्मनसागोचरे, श्रीमति वैकुण्ठे दिव्यलोके, सनकविधिशिवादिभिरप्यचिन्त्यस्वभावैश्चयैर्नित्यसिद्धैरनन्तैर्भगवदानुकूल्यैकभोगैर्दिव्यपुरुषैर्महात्मभिरापूरिते, तेषामपि इयत्परिणामम् इयदैश्वर्यम् ईदृशस्वभावमिति परिच्छेत्तुमयोग्ये दिव्यावरणशतसहस्रावृते, दिव्यकल्पकतरूपशोभिते, दिव्योद्यानशतसहस्रकोटिभिरावृते, अतिप्रमाणे दिव्यायतने, कस्मिंश्चिद्विचित्रदिव्यरत्नमयदिव्यास्थानमण्टपे, दिव्यरत्नस्तम्भशतसहस्रकोटिभिरुपशोभिते, दिव्यनानारत्नकृतस्थलविचित्रिते, दिव्यालङ्कारालंकृते, परितः पतितैः पतमानैः पादपस्थैश्च नानागन्धवर्णैर्दिव्यपुष्पैः शोभमानैर्दिव्यपुष्पोपवनैरुपशोभिते, सङ्कीर्णपारिजातादिकल्पद्रुमोपशोभितैरसङ्कीर्णैश्च कैश्चिदन्तस्थपुष्परत्नादिनिर्मितदिव्यलीलामण्टपशतसहस्रोपशोभितैः सर्वदाऽनुभूयमानैरप्यपूर्ववदाश्चर्यमावहद्भिः क्रीडाशैलशतसहस्रैरलंकृतैः कैश्चिन्नारायणदिव्यलीलासाधारणैः कैश्चित्पद्मवनालयादिव्यलीलासाधारणैः साधारणैश्च कैश्चित् शुकशारिकामयूरकोकिलादिभिः कोमलकूजितैराकुलैर्दिव्योद्यानशतसहस्रैरावृते, मणिमुक्ताप्रवालकृतसोपानैर्दिव्यामलामृतरसोदकैर्दिव्याण्डजवरैरतिरमणीयदर्शनैरतिमनोहरमधुरस्वरैराकुलैरन्तस्थमुक्तामयदिव्यक्रीडास्थानोपशोभितैर्दिव्यसौग-

न्धिकवापीशतसहस्रैर्दिव्यराजहंसावलीविराजितैरावृते, निरस्तातिशयानन्दैकरसतया चानन्त्याच्च प्रविष्टानुन्मादयद्भिः क्रीडोद्देशैर्विराजिते, तत्रतत्र कृतदिव्यपुष्पपर्यङ्कोपशोभिते, नानापुष्पासवास्वादमत्तभृङ्गावलीभिरुद्गीयमानदिव्यगान्धर्वेणापूरिते, चन्दनागुरुकर्पूरदिव्यपुष्पावगाहिमन्दानिलासेव्यमाने, मध्ये दिव्यपुष्पसञ्चयविचित्रिते महति दिव्ययोगपर्यङ्के अनन्तभोगिनि, श्रीमद्वैकुण्ठैश्वर्यादिदिव्यलोकमात्मकान्त्या विश्वमाप्याययन्त्या शेषशेषाशनादिकं सर्वं परिजनं भगवत्तत्तदवस्थोचितपरिचर्यायामाज्ञापयन्त्या शीलरूपगुणविलासादिभिरात्मानुरूपया श्रिया सहासीनम्, प्रत्यग्रोन्मीलितसरसिजसदृशनयनयुगलम्, स्वच्छनीलजीमूतसङ्काशम्, अत्युज्ज्वलपीतवाससम्, स्वया प्रभया अतिनिर्मलया अतिशीतलया [अतिकोमलया] स्वच्छया माणिक्याभया कृत्स्नं जगदुद्भासयन्तम्, अचिन्त्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतसागरम्, अतिसौकुमार्यादीषत्प्रस्विन्नवदालक्ष्यमाणललाटफलकदिव्यालकावलीविराजितम्, प्रबुद्धमुग्धाम्बुजचारुलोचनम्, सविभ्रमभ्रूलतम्, उज्ज्वलाधरम्, शुचिस्मितम्, कोमलगण्डम्, उन्नसम्, उदग्रपीनांसविलम्बिकुण्डलालकावलीबन्धुरकम्बुकन्धरम्, प्रियावतंसोत्पलकर्णभूषणश्लथालकाबन्धविमर्दशंसिभिश्चतुर्भिराजानुविलम्बिभिर्भुजैर्विराजितम्, अतिकोमलदिव्यरेखालंकृतताम्रकरतलम्, दिव्याङ्गुलीयकविराजितम्, अतिकोमलदिव्यनखावलीविराजिता[नु]तिरक्ताङ्गुलीभिरलंकृतम्, तत्क्षणोन्मीलितपुण्डरीकसदृशचरणयुगलम्, अतिमनोहरकिरीटमकुटचूडावतंसमकरकुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबन्धनपीतांबरकाञ्चीगुणनूपुरादिभिरत्यन्तसुखस्पर्शैर्दिव्यगन्धैर्भूषणैर्भूषितम्, श्रीमत्या वैजयन्त्या वनमालया विराजितम्, शङ्खचक्रगदासिशार्ङ्गादिदिव्यायुधैः सेव्यमानम्, स्वसङ्कल्पमात्रावकल्पितजगज्जन्मस्थितिध्वंसादिके श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यम्, वैनतेयादिभिः स्वभावतो निरस्तसमस्तसांसारिकस्वभावैर्भगवत्परिचर्याकरणयोग्यैर्भगवत्परिचर्यैकभोगैर्नित्यसिद्धैरनन्तैर्यथायोगं सेव्यमानम्, आत्मभोगेनाननुसंहितपरादिकालम्, दिव्यामलकोमलावलोकनेन विश्वमाह्लादयन्तम्, ईषदुन्मीलितमुखाम्बुजोदरविनिर्गतेन दिव्याननारविन्दशोभाजननेन दिव्यगाम्भीर्यौदार्यसौन्दर्यमाधुर्याद्यनवधिकगुणगणविभूषितेन अतिमनोहरदिव्यभावगर्भेण दिव्यलीलालापामृतेन अखिलजनहृदयान्तराण्यापूरयन्तं भगवन्तं नारायणं ध्यानयोगेन दृष्ट्वा, [ततो] भगवतो नित्यस्वाम्यम् आत्मनो नित्यदास्यं च यथावस्थितमनुसन्धाय, 'कदाऽहं भगवन्तं नारायणं मम कुलनाथं मम कुलदैवतं मम कुलधनं मम भोग्यं मम मातरं मम पितरं मम सर्वं साक्षात्करवाणि चक्षुषा? कदाऽहं भगवत्पादाम्बुजद्वयं शिरसा संग्रहीष्यामि? कदाऽहं भगवत्पादाम्बुजद्वयपरिचर्याशया निरस्तसमस्तेतरभोगाशोऽपगतसमस्तसांसारिकस्वभावस्तत्पादाम्बुजद्वयं प्रवेक्ष्यामि? कदाऽहं भगवत्पादाम्बुजद्वयपरिचर्याकरणयोग्यस्तदेकभोगस्तत्पादौ परिचरिष्यामि?

कदा मां भगवान् स्वकीयया अतिशीतलया दृशाऽवलोक्य स्निग्धगम्भीरमधुरया गिरा परिचर्यायामाज्ञापयिष्यति? इति भगवत्परिचर्यायामाशां वर्धयित्वा तयैवाशया तत्प्रसादोपबृंहितया भगवन्तमुपेत्य दूरादेव भगवन्तं शेषभोगे श्रिया सहासीनं वैनतेयादिभिः सेव्यमानम् समस्तपरिवाराय श्रीमते नारायणाय नमः इति प्रणम्योत्थायोत्थाय पुनःपुनः प्रणम्य, अत्यन्तसाध्वसविनयावनतो भूत्वा, भगवत्पारिषदगणनायकैर्द्वारपालैः कृपया स्नेहगर्भया दृशा अवलोकितः, सम्यगभिवन्दितैस्तैस्तैरेवानुमतो भगवन्तमुपेत्य श्रीमता मूलमन्त्रेण मामैकान्तिकात्यन्तिकपरिचर्याकरणाय परिगृह्णीष्व इति याचमानः प्रणम्य, आत्मानं भगवते निवेदयेत् ॥ ४ ॥

ततो भगवता स्वयमेवात्मसंजीवनेनामर्यादशीलवता अतिप्रेमान्वितेनावलोकनेनावलोक्य सर्वदेशसर्वकालसर्वावस्थोचितात्यन्तशेषभावाय स्वीकृतोऽनुज्ञातश्च, अत्यन्तसाध्वसविनयावनतः किंकुर्वाणः, कृताञ्जलिपुटो भगवन्तमुपासीत ॥ ५ ॥

ततश्चानुभूयमानभावविशेषः, निरतिशयप्रीत्या अन्यत्किंचित्कर्तुं द्रष्टुं स्मर्तुमशक्तः, पुनरपि शेषभावमेव याचमानः, भगवन्तमेवाविच्छिन्नस्रोतोरूपेणावलोकनेनावलोकयन्नासीत ॥ ६ ॥

ततो भगवता स्वयमेवात्मसंजीवनेनावलोकनेनावलोक्य सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहमात्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत ॥ ७ ॥

॥ इति श्रीभगवद्रामानुजविरचिते गद्यत्रये श्रीवैकुण्ठगद्यं समाप्तम् ॥

॥ समाप्तं च गद्यत्रयम् ॥

अनया गद्यद्वयोक्तगमनिकयैव श्रीवैकुण्ठगद्यमपि गतार्थप्रायम् । एतयोः स्वानुष्ठानोक्तिमुखेन शिष्यशिक्षणं कृतम्; तस्मिंस्तु उपदेशमुखेनेति विशेषः । तत्र यदादौ पठ्यते—* यामुनार्यसुधाम्भोधिमवगाह्य यथामति, आदाय भक्तियोगाख्यं रत्नं संदर्शयाम्यहमिति; इहासौ भक्तियोगशब्दः स्वयंप्रयोजनभगवदनुसंधानपरः; अन्यथा, * तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति मन्वानः इति वाक्ष्यमाणविरोधात् । अत एव * प्रत्यहमात्मोज्जीवनायेत्यादिकमपि न मुक्तितत्साधनपरम्; अपि तु * ज्ञानी तु परमैकान्ती परायत्तात्मजीवनः इत्यादिप्रसिद्धे अत्रत्यावस्थाविशेषे मरुदेशपथिकपानीयन्यायेन अलभ्यलाभाश्वासनाभिप्रायम् ॥

तेषामपीयत्परिमाणमियदैश्वर्यमीदृशस्वभावमिति परिच्छेत्तुमयोग्ये इति दिव्यायतनविशेषणे तु महत्तरत्वमेव विवक्षितम्, दिव्यावरणसंवृतत्वादिकथनेनैव तत्परिमाणसिद्धेः । अत्र स्वभावशब्दोऽपि निरतिशयभोग्यत्वादिविषयः । न ह्येवंविधविषयेषु परिच्छेदायोग्यत्वोक्त्या सूरीणां सार्वज्ञ्यहानिः, दिव्यायतनगुणप्रकर्षे तात्पर्याच्च । **प्रविष्टानुन्मादयद्भिः क्रीडीदेशैः** इत्यत्रापि हर्षप्रकर्षजनकत्वे तात्पर्यम् । **श्रीमद्वैकुण्ठैश्वर्यादिदिव्यलोकम्** इत्यत्र तु वैकुण्ठशब्देन नगराद्यवान्तरप्रदेशो विवक्षितः; स एव प्रशस्तविभूतिरूपत्वादैश्वर्यशब्देनोपचर्यते । नित्यमुक्तविषयं

देव्या आज्ञाप्तं परिचर्याविशेषेष्विच्छोत्पादनमात्रम्, तेषां सर्वज्ञत्वेन ज्ञानोत्पादननैरपेक्ष्यात् । **पुण्डरीकसदृशचरणयुगलम्** इत्यत्र पुण्डरीकशब्दः पद्मसामान्यमुखेन रक्ताम्बुजपरः । यत्तूक्तम्—**संकल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादिके श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यम्** इति, तत्र यद्यपि जगद्व्यापारमोक्षप्रदत्वे ब्रह्मलक्षणतया मुक्तेष्विव नित्यसूरिष्वपि सर्वेषु न संभवतः; यद्यपि च भगवान् स्वतः सर्वज्ञः; तथाऽपि *प्रियेण सेनापतिना निवेदितं तथाऽनुजानन्तमुदारवीक्षणैरिति न्यायेन भगवद्दत्ततादृशाधिकारतया तत्तदवसरे जगत्सृष्ट्याद्यर्थं भगवते विज्ञापनवाक्यं विष्वक्सेनो व्याहरति; तदा स्वतः सर्वज्ञो भगवान् तन्निवेदितकारीव क्रीडति; तावन्मात्रेण विष्वक्सेनस्य जगद्व्यापारव्यपदेशरूपस्तुतिः; **न्यस्तसमस्तात्मैश्वर्यम्** इत्येतदपि सेनानिर्वहणाद्यर्थाधिकारप्रदानपरम्; *स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिन्यायेन परिमितविषयो वाऽत्र जगच्छब्दः; अतो हिरण्यगर्भादिवत् काचित्कप्रभूतसृष्ट्यादिमात्रान्नास्मिन् ब्रह्मलक्षणप्रसङ्गः । यदपि **आत्मभोगेनाननुसंहितपरादिकाल**मिति, तदपि भगवतः कालविषयमज्ञानं नाभिप्रैति, आनन्दप्रकर्षप्रशंसायां तात्पर्यात् । यच्च **तत्पादाम्बुजद्वयं प्रवेक्ष्यामि** इति मुमुक्षोरभिसंधिरुच्यते, तत्र पूर्वोक्तस्य शिरसा संग्रहणस्य गाढतमत्वं प्रवेशशब्देनाभिप्रेतम् ॥ यदपि **शेषभावाय स्वीकृतः** इति, तत्र यावदात्मभाविकैङ्कर्यकरणाय संकल्पित इत्यर्थः । एवमन्यदपि सर्वं सुसंगतम् ॥

द्वयवचनधनानां द्विःप्रयोगानपेक्षे मुषितनिखिलदोषे मुक्त्युपाये स्थितानाम् ।
अमृतमिव पयोधेरात्तमेतद्यतीन्द्राद्व्यवृणुत मितगद्यं वेङ्कटेशः सुमेधाः ॥

इति रहस्यरक्षायां मितगद्याधिकारः समाप्तः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु रहस्यरक्षायां
॥ गद्यत्रयभाष्यं समाप्तम् ॥

श्रीमद्वेदान्तदेशिकग्रन्थमालायां
व्याख्यानविभागे
॥ प्रथमसम्पुटं समाप्तम् ॥

फारम् ५—१८, लिबर्टी प्रेस्, मद्रपुरी.

श्रीः ।

ग्रन्थमालासंपादकस्य सविनयमावेदनम् ॥

अयि भो महाभागाः ! अवलेपस्त्वतितरां हेयः । हेयस्स इति धृतनिश्चयेष्वग्रेसरश्चायं जनः । अथापि स जनमिममालम्ब्य लब्धप्रतिष्ठो भवति हन्त । अवलेपो न सर्वथा विगीतः । उपादेयोऽपि भवति स सात्त्विकस्सन्नित्युपपादयन्त्युदारधियः । "तदनुबन्धमदावलिप्ते—मयि" इत्याचक्षाणस्स देशिकमणिः प्रतिपत्तिमिमां गाढं ग्राहयति । श्रीपराङ्कुशपरकालादयोऽपि दिव्यसूरिवरेण्याः स्वस्वदिव्यप्रबन्धेषु अवलेपं विगायन्तोऽपि स्ववाग्भिस्तस्य स्वात्मनि सत्तां च सम्यगुपलम्भयन्तः सात्त्विकावलेपसौवादवमेव समाविष्कृतवन्तो भवन्तीति नैतन्निगूढम् । तदास्माकीनोऽपि स स एवेत्यवधारयन्त्वन्तर्वाणयः ।

श्रीमद्वेदान्तदेशिकग्रन्थमालामुद्रणोपक्रमचिन्ताऽप्यस्मादृशां मनसो दवीयसीति स्थिते वस्तुतत्त्वे, सहसा तदुपक्रमणम् अवलीलयैव च तदुपसंहरणमात्मना कृतमसकृदनुध्यायन्नसौ जनस्सत्यमप्रमेयमवलेपमधिवहति पुनःपुनरुद्घुष्यति च "नास्ति समो मम नास्ति समो मम नास्ति समो मम भो" इति । * இல்லே யெனக் கெதிரில்லே யெனக் கெதிரில்லே யெனக் கெதிரே" इत्यनुसंदधानैः श्रीरामानुजपदच्छायाचार्यैः संप्रदर्शितैव सेयं सरणिः ॥

अहो ! कुत्र भो श्रीमद्वेदशिरोगुरोर्दिव्यसूक्तिनिकरः ! कुत्र चाहमज्ञानामकिञ्चनानां चाग्रेसरः । अहह ! कथमिदमघटतेत्यन्तरा चिन्त्यमाने "दुर्विज्ञानस्यहृदयमहो ! दैवमत्र प्रमाणम्" इति पादुकासहस्रफणितिरेव स्मृतिपथमारूढा सती समाहितमनसोऽस्मान् संविदधातीति सूनृतं वचः ; अघटितघटनापटीयसस्सत्यकामस्य सत्यसंकल्पस्य च प्रस्य पुंसश्चेष्टितविशेषे हन्त ! कस्य का नाम पृच्छेति विस्मयाद्विरतिरुचिता ।

परमतितरामिहैकमवभाति विस्मयनीयम् । यदुतैतद्ग्रन्थमालामुद्रणनिष्प्रत्यूहनिष्पत्तौ प्रधानसामग्रीभावं प्रतिपद्यमानस्य, श्रीमन्महीशूरनगरमण्डनायमानश्रीमत्परकालमठाधीश्वराणामप्रमेयगुणमहोदधीनां श्रीमद्वेदमार्गप्रतिष्ठापनाचार्योभयवेदान्तप्रवर्तनधुरन्धराणां श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीलक्ष्मीहयवदनदिव्यपादुकासेवकश्रीमदभिनवरङ्गनाथब्रह्मतन्त्रपरकालमहादेशिकसमाख्यया सुप्रसिद्धानां श्रीश्रीस्वामिचरणानां परमकृपातिशयस्यानिर्व्याजमभिमुखीभवनम् उत्तरोत्तरमभिवृद्धद्युन्मुखीभवनं चेति ।

"प्रथितं पातकिवर्गे कृतघ्न एको हि कृत्स्नमतिशेते । तमिमं क्रियमाणघ्नः तमपि दुरात्मा करिष्यमाणघ्नः ॥" इति श्रीमति संकल्पसूर्योदये गुरुचरणैरनुगृहीतामनर्घसूक्तिमनिशमनुसंदधाने दासे कृतघ्नता क्रियमाणघ्नता करिष्यमाणघ्नता वा कदाऽपि मास्म भजदवकाशमिति एकैवेयमभ्यर्थना नैरन्तर्येण विपरिवर्तते चेतसीति युक्तमस्य वचसो नित्यमाग्रेडनम् । सकलविद्याविहारास्थानमण्डपायितमानसानाम् अनघानुष्ठानपवित्रदिव्यमङ्गलवपुषाममीषां यतिपतीनामनवग्रहमनुग्रहमंकम्पां चानुकम्पामैकान्त्येन समासादितवतो दासस्य दुस्साधं नास्ति किमपि, सर्वं सुसाधमेवेत्यप्रधृष्यमिदं च उत्तरोत्तरमुत्तमोत्तमकार्यवर्गसंपत्तिप्रतीक्षापराणां सतामनवधिकानन्दसंदोहसंदायि समिन्धां सन्ततम् ।

अस्याश्च ग्रन्थमालायाः शोधनविषये यद्यप्यस्माभिस्सहायरन्वभूयत भूयान्पारिश्रमः, तथाऽपि शोधनाया अंशास्सुबहवोऽवशिष्यन्त एवेत्यभिधातुमवकाश इह वर्तत एव। उपचत्वारिंशेभ्यो वत्सरेभ्यः पूर्वं कैश्चन महाविवेकिभिर्महता परिश्रमेण संशोधितं तात्पर्यचन्द्रिकाश्रीकोशमन्वगृह्णन् परमकृपया श्री. उ. वे. विद्वद्वरिष्ठाः नावल्पाक्रम् चतुर्वेदिशतक्रतु - नरसिंहाचार्यवर्याः। सोऽयं श्रीकोशः प्राधान्येन महोपकारमारचयामास शोधन इति सकार्तज्ञ्यं विज्ञापयामः। मुद्रणेऽस्मिन् प्रेक्ष्यमाणं पाठभेदादिकं तस्मादेव श्रीकोशात्संगृहीतमिति वेदितव्यम्। प्रसङ्गादिह किञ्चित्प्रस्तुमः। बहुविदामपि विदुषां धियामविषयाः प्रघट्टकास्सन्ति भूयिष्ठा देशिकदिव्यसूक्तिष्विति नैतन्नवीनं वचः। तत्तादृशीषु दिव्यसूक्तिषु अर्थावगाहनपूर्वकं शोधनावधानमसंभवि बहुषु स्थलेषु। मुद्रितपूर्वश्रीकोशपाठेषु तालकोशपाठेषु च क्वचिद्बहुत्र वा वस्तुतस्सावद्येषु सत्स्वपि त एव पाठास्सुसमीचीना इति साधयितुं परिकरमाबध्नन्तो महान्तस्सुबहवस्समुत्तिष्ठेरन्। तथाविधेषु स्थलेषु पाठांस्तथैव निवेशयितुम् औचितीमनुसृत्य समीकर्तुं चाशक्नुवन्तो वयं "कर्तुं त्यक्तुमपि प्रपत्तुमनलं सीदामि दुःखाकुल" इत्याचार्यवर्यफणितिप्रकारेण सुबहु विह्वला अभूम। तथैव निवेशने, अशुद्धयो नोद्भूता इति विदूषयितुं संनह्येयुः। परिष्करणे तु स्वैरं पाठविपर्यासाः प्रवेशिता इति पटहघोषणां कर्तुमुद्युञ्जीरन्। सुमहदिदं संकटं कथमपोह्यताम्। कथञ्चित् कार्यमिदं सुमहत्तरं दिष्ट्या निष्पत्यूहं निरवर्तयाम। अवश्यमेव शोधनीयेष्वपि स्थलविशेषेषु क्वचिदौदासीन्यमेवास्माभिरवालम्बि।

मात्रया चात्र किञ्चिदुदाहरामः। **ईशावास्योप**निषदि * पूषन्नेकर्षे इत्यादिकायाः षोडश्या ऋचो भाष्ये एवं नाम पङ्क्तिस्संदृश्यते—

> "अत्र वर्तमानव्यपदेश उत्तरवाक्यवत् तात्कालिकानुसन्धानानुवादः। प्रार्थनाप्रकरणानुरोधे तु व्यत्ययेन पश्येयमिति लिङर्थोऽत्र ग्राह्य इत्यपुनरुक्तिः। तदा साधारण्यज्ञापनार्थं सदा पश्यामीति वा निरुपाधिकशेषत्वानुगुणोक्तिः।" इति।

एवमेव मुद्रितचरानेकपुस्तकगतः, उपलभ्यमानद्वित्रतालकोशगतश्च पाठः। सर्वथाऽप्यनन्वयोऽत्र सुस्पष्टः। माननीया महामतयस्त्वत्र पाठमेवमुल्लिखन्ति—

> ".....लिङर्थोऽत्र ग्राह्यः। सदा पश्यामीति वा निरुपाधिकशेषत्वानुगुणोक्तिः। 'ते' इति पुनरुक्तिः तदसाधारण्यज्ञापनार्थम्" इति।

एवञ्च सति संपद्यते हि सुसंगतोऽक्लिष्टश्चान्वयः। केचिदन्यथाऽप्यत्र सूक्तिविन्यासमभिमन्यन्ते। भीरुभिरस्मादृशैरेवंविधेषु स्थलेषु कथमिव स्वातन्त्र्यमाश्रीयताम्? सन्त्येवंविधानि स्थलानि सुबहूनि नाम।

यत्रयत्र पाठविसंवादा वर्तन्ते तत्रतत्र विशदविचारप्रपञ्चनपूर्वकं यथायथं पाठा निरूपयितव्याः, येन विवेकिनां विशेषतोऽवधानं च स्यात्—इति समुत्कण्ठा बलवती समिन्धेऽस्माकम्। आदितः प्रभृति सर्वानपि ग्रन्थानस्यां ग्रन्थमालायामवतीर्णान् सुष्ठु परिशील्य यदि केचित्प्राज्ञपरिवृढा औचित्यविशदीकरणपूर्वकं समीचः पाठान् प्रतिबोधयेयुः ध्रुवमनुबन्धसञ्चिक्या सर्वे तत्प्रकाशयिष्यामः। एकैकं ग्रन्थमेकैकः पण्डितमणिः परिशील्यतु नाम। अत्यन्तमावश्यकं हि कृत्यमिदमवशिष्यते।

अन्यदपि किञ्चिदवश्यमभिधित्सितम्। वयं तु काञ्च्यां स्मः। मुद्रणं तु मद्रपुर्यामन्यत्र च प्रचलति। कानिचिच्छोधनानि सुष्ठु समाकलितान्यपि मुद्रणाल्याधिकृतानां कार्यकराणां भ्रमप्रमादादिवशात् विपर्यासमेव गमितानि भवन्ति। अत्रापि किञ्चिन्निदर्शयामः। **दशावतारस्तोत्रे** * नाथायैव नमःपदमित्यादौ दशमे पद्ये अवसाने "पर्यायचर्यायते" इत्यत्र "पर्यायचर्याः, यते" इति पदच्छेद इति आबाल्यादस्माभिरवधारितमिदम्। "पर्यायचर्याय, ते" इति केषाञ्चिद्बहूनां वाऽत्र भ्रमस्समस्त्येव। तादृशं भ्रममपासितुं "चर्या यते" इति विन्यासं सुस्फुटं संशोधने सूचितवद्भिरप्यस्माभिर्हन्त परस्तात् "चर्याय ते" इत्येव मुद्रणमुपक्लृप्तमुदैक्षि। अथ च महान् विषादस्सत्यमन्वभावि। तावता किमहो फलम्? एवं नाम संपतिताः कतिचिदशुद्धीरधिकृत्य निर्वेद एव शरणं भवत्यस्माकम्। एतादृशनिर्वेदास्पदाशुद्धिविषये शुद्धिपत्रिकाप्रकाशनेऽपि नास्माकमुत्साहस्संजायते। **शरणागतिगद्ये** द्वादशे वाक्ये—"दैवीं गुणमयीं मायां दासभूतः शरणागतोऽस्मि तवास्मि दास इति वक्तारं मां तारय" इति तावत्प्रायः पठन्ति। अत्र तु दासभूत इत्यपपाठः। दासभूतमित्येव सुपाठः—इत्यप्रकम्प्यमध्यवसायमधिवहत्स्वप्यस्मासु हंहो! मुद्रणेऽस्मिन् दासभूतः इत्येव (मूले भाष्ये च) पतितमिति निर्वेदमिमं कुत्र कथं कथयेम? अगत्या शुद्धिपत्रिकयाऽथ समीकरणं भवतीति तु आस्तां नाम।

अन्तत इदं विनिवेद्य विरमामः। वेदान्तविभागान्तर्गतशतदूषण्यादिग्रन्थानामिव, व्याख्यानविभागान्तर्गतगीताभाष्यतात्पर्यचन्द्रिकायाश्च शोधने, श्रीमच्छुकपुरीनित्यनिवासरसिक श्रीमत्परमहंसेत्यादिबिरुदालंकृत श्रीकोळियालम् स्वामिचरणचरणारविन्दवरिवस्यासमधिगतवेदान्तविज्ञानेन अस्मत्प्रियसुहृद्वरश्रीनिवासार्यतनूजन्मना च तिरुपतिनगरनिवासिना काळियालं शठकोपाचार्यशिरोमणिना कृतं साहाय्यं संततमनुस्मरणीयमिति। अथ च नक्तंदिवमखिलग्रन्थवृन्दपरिशोधनप्रवणेष्वस्मत्प्रियजामातृपादेषु न्यायवेदान्तविशारदेषु M. A इत्युपाधिभूषितेषु श्री. उ. वे. अक्कारक्कनिसम्पत्कुमाराचार्येषु तथा शोधनसाहाय्यममितमाहितवत्सु अस्मत्प्रियमित्ररत्नेषु पण्डितवरेषु श्री. उ. वे. अ. मु. श्रीनिवासाचार्येषु च धन्यवादानाम्रेडयति दासदासः।

विष्वब्दे मिथुने कृष्णत्रयोदश्यां रवेर्दिने। इत्थं व्यजिज्ञपद्दासो वादिभोकरवंशजः॥

इति,

श्रीकाञ्ची प्रतिवादिभयङ्कर अण्णङ्गराचार्यः, श्रीवैष्णवदासः.

ग्रन्थमालायाः प्रधानसंपादकः.

॥ पुस्तकसूची - श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

Editor: P. B. Annangaracharya, Conjeeveram.

१. स्तोत्रावलीविभागः । हयग्रीवस्तोत्रादि पादुकासहस्रान्त सकल स्तोत्रजालसमलंकृतः ।

२. वेदान्तविभाग—प्रथमसंपुटम् । अधिकरणसारावली शतदूषणी च ।

३. ,, द्वितीयसंपुटम् । मीमांसापादुका, सेश्वरमीमांसा, न्याय-परिशुद्धिः, न्यायसिद्धाञ्जनं च । ०

४. ,, तृतीयसंपुटम् । सर्वार्थसिद्धिसमेतः तत्त्वमुक्ताकलापः । ०

५. काव्यनाटकविभागः । हंससंदेशः, सुभाषितनीवी, यादवाभ्युदयः, संकल्पसूर्योदयश्च ।

६. व्याख्यानविभाग—प्रथमसंपुटम् । ईशावास्योपनिषद्भाष्यम्, चतुःश्लोकी-भाष्यम्, स्तोत्ररत्नभाष्यम्, गद्यभाष्यं च ।

७. ,, द्वितीयसंपुटम् । गीतार्थसंग्रहरक्षा, गीताभाष्यतात्पर्य-चन्द्रिका च ।

८. ,, तृतीयसंपुटम् । तत्त्वटीका, निक्षेपरक्षा सच्चरित्ररक्षा पाञ्चरात्ररक्षादिकं च ।

శ్రీ విశిష్టాద్వైత సంప్రదాయగ్రన్థ సూచీ.

౧. శ్రీభగవద్రామానుజ గ్రన్థమాలాః—(శ్రీభగవద్రామానుజ మునిభిరను గృహీత భాష్యాదిగ్రన్థసప్తకమేక సంపుటాత్మకమ్. మూల్యమ్ ౬-౦-౦

౨. శ్రీమద్వరవరమునీన్ద్ర గ్రన్థమాలాః—(శ్రీమద్వరవర మునిభిరను గృహీతమ్ (శ్రీవచనభూషణవ్యాఖ్యానం తత్త్వత్రయవ్యాఖ్యానం ముముక్షుప్పడి వ్యాఖ్యానం ఆచార్యహృదయ వ్యాఖ్యానమిత్యేతత్ గ్రన్థచతుష్టయమేకసంపుటాత్మకమ్. ౬-౦-౦

3. శ్రీమద్వేదాన్తదేశిక గ్రన్థమాలాయాం సంప్రదాయ విభాగాః—(శ్రీమన్నిగమాన్తమహాదేశికైరనుగృహీతం సంప్రదాయ పరిశుద్ధ్యాది పరమతిభఞ్జనాన్త సకల రహస్యబృన్దమ్, దేశికప్రబన్ధ బృన్దం చ ఏక సంపుటాత్మకమ్. ౫-౦-౦

ప్రాప్తిస్థానమ్,
ప్రతివాదిభయఙ్కర అణ్ణఙ్గరాచార్యులవారు
గ్రన్థమాలా ఆఫీస్, కాఞ్చీపురం.

प्राप्तिस्थानम्
प्रतिवादिभयङ्कर अण्णङ्गराचार्यः
ग्रन्थमाला आफीस, कञ्चीवरम्.

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमद्यामुनमुनये नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

[व्याख्यानविभागे द्वितीयसंपुटम्]

श्रीभगवद्यामुनमुनिविरचितगीतार्थसंग्रहव्याख्या

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्तदेशिकविरचिता

॥ श्रीमद्गीतार्थसंग्रहरक्षा ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

मानत्वं भगवन्मतस्य महतः पुंसस्तथा निर्णयस्तिस्रस्सिद्धय आत्मसंविदखिलाधीशानतत्त्वाश्रयाः ।
गीतार्थस्य च संग्रहः स्तुतियुगं श्रीश्रीशयोरित्यमून्यद्ग्रन्थाननुसन्दधे यतिपतिस्तं यामुनेयं नुमः ॥ १ ॥

श्रीमद्वेङ्कटनाथेन यथाभाष्यं विधीयते । भगवद्यामुनेयोक्तगीतासंग्रहरक्षणम् ॥ २ ॥

* तत्त्वं जिज्ञासमानानां हेतुभिस्सर्वतोमुखैः । तत्त्वमेको महायोगी हरिर्नारायणः परः ॥ (भा. शा. ३४७. ८३)

* आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥ (ना. पु. १८. ३४)

इत्यादिभिस्तत्त्वहितरूपं समस्ताध्यात्मशास्त्रार्थसारं महर्षयस्संजगृहुः । तदेतदुभयं सर्वोपनिषत्सारसङ्कलनात्मिकायां भगवद्गीतायां प्रतिपाद्यतया प्रदर्शयंस्तत्राप्युपनिषदां तत्त्वप्राधान्यस्य **शारीरके** सूत्रितत्वादिहापि तत्प्रधानतया व्यपदिशति ॥

॥ श्रीगीतार्थसंग्रहः ॥

स्वधर्मज्ञानवैराग्यसाध्यभक्त्येकगोचरः । नारायणः परं ब्रह्म गीताशास्त्रे समीरितः ॥ १ ॥

स्वे धर्माः **स्वधर्माः**—स्ववर्णाश्रमनियतशास्त्रार्थाः, * स्वेस्वे कर्मण्यभिरतस्संसिद्धिं लभते नरः । (१८.४५) इति हि गीयते । स्वस्य धर्म इति समासेऽप्ययमेवार्थः । **ज्ञान**मत्र परशेषतैकरसयथावस्थितात्मविषयम् । **वैराग्यं**—परमात्मव्यतिरिक्तेषु सर्वेषु विरक्तिः, * परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि । (बार्हि. स्मृ.) इति मुमुक्षोः स्वभावप्रतिपादनात् । तथा च **पातञ्जलयोगानुशासनसूत्रं**—* दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् (१. १५) इति । कर्मयोगपरिकरभूतस्यापि वैराग्यस्य पृथगुपादानमपवर्गस्य तदन्वयव्यतिरेकानुविधायित्वेन तत्प्राधान्य-

ज्ञापनार्थं कन्दभूतरागनिवृत्त्या तन्मूलक्रोधादिसमस्तदोषनिवृत्तिज्ञापनार्थं च । तत्र स्वधर्मज्ञानयोः प्रथमं कर्मयोगज्ञानयोगरूपेणावस्थितयोरात्मसाक्षात्कारद्वारा भक्तियोगाधिकारनिर्वर्तकत्वेन तत्साधकत्वम् । तदभिप्रायेणोक्तमात्मसिद्धौ— * उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्यः इति । उत्पन्नभक्तियोगानामपि विशदतमप्रत्यक्षसमानाकारस्य तैलधारावदविच्छिन्नस्मृतिसन्ततिरूपस्य आप्रयाणादनुवर्तनीयस्य अहरहरभ्यासाधेयातिशयस्य भक्तियोगस्य सत्त्वविवृद्धिसाध्यतया तद्विरोधिरजस्तमोमूलभूतपापनिवर्हणद्वारेण सत्त्वोपचयहेतुतयोपकारकत्वादात्मयाथात्म्यज्ञानपूर्वकैः परित्यक्तफलसङ्गकर्तृत्वादिभिः परमपुरुषाराधनैकरूपैर्नित्यनैमित्तिककर्मभिर्भक्तेरुपचीयमानत्वरूपेण साध्यत्वम् । तदेतत्सर्वमभिसन्धायोक्तं भगवता **पराशरेण**—

* इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः । ब्रह्मविद्यामधिष्ठाय तनुं मृत्युमविद्यया ॥ इति । (वि. ६.६.१२) महनीयविषये प्रीतिर्भक्तिः । * [प्रीति]स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते (लै. उ. ९. १९) इति वचनमपि पूज्यविषयविशेषनियतं योज्यम् । सैव वेदनोपासनध्यानादिशब्दैरध्यात्मशास्त्रेषु मोक्षोपायविधिवाक्यैस्सामान्यतो विशेषतश्च प्रतिपाद्यते, गुरुलघुविकल्पानुपपत्तेः, सामान्यशब्दानां समानप्रकरणोक्तविशेषविश्रमे च संभवति द्वारिद्वारादिकल्पनायोगात्, विद्युपास्योर्व्यतिकरेणोपक्रमोपसंहारदर्शनात् * निदिध्यासितव्यः (बृ. ४. ४. ५; ६. ५. ६) इत्यस्य स्थाने विज्ञानशब्दश्रवणाच्च, परमपुरुषवरणीयताहेतुभूतगुणविशेषवत्तैव लभ्यत्वश्रुतेश्च, तद्वरणम्यास्मिन् शास्त्रे भक्त्यधीनत्वोक्तेश्च । एवं सति वेदनेतरमोक्षोपायनिषेधकश्रुतीनां * भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ (गी. ११. ५४) इत्यादिस्मृतीनां चाविरोधः । तदेतदुक्तं **भक्त्येकगोचर** इति । भक्तेरेव गोचरो नान्यस्येत्यर्थः । एतेन कर्मसमुच्चयवाक्यार्थज्ञानादिपक्षाः प्रतिक्षिप्ताः । गोचरत्वमिह फलत्वेन ग्राह्यम्, * भक्त्येकलभ्ये पुरुषे पुराणे (गा. पू. २१९. ३४) इत्यादिभिरेकरूप्यात्, भक्तियोगलभ्य इति स्वोक्तसंवादाच्च । उपायतया फलतया चैकस्यैवावलम्बनादैश्वर्याद्यर्थभक्तिव्यवच्छेदार्थं वात्रैकशब्दः । अत्र ह्यैश्वर्याद्यर्चावतारपुरुषार्थग्रहणं भूमविद्यायामिव निरतिशयपुरुषार्थप्रतिपादनार्थम् । तदभिप्रायेण च **भाष्यम्**—* परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतभक्तियोगमवतारयामास (गी. १) इति । यद्वा निरतिशयैश्वर्ययुक्ततया भक्त्यर्हत्वमिह तद्गोचरत्वम् । ऐकान्तिकत्वादिव्यञ्जनाय त्वेकशब्दः । * परावरज्ञं भूतानाम् (भा. मो. २२९. ७) इत्याद्युक्तपरावरतत्त्वनिश्चयेन अन्यभक्त्युन्मूलनादव्यभिचारेण अनन्यविषयत्वमैकान्तिकत्वम् । सातिशयनिरतिशयपुरुषार्थविवेकेन तदेकभोग्यतया उत्तरावधिराहित्यमात्यन्तिकत्वम् । कारणवाक्यस्थानां सद्ब्रह्मादिसामान्यशब्दानां समानप्रकरणमहोपनिषदादिपठितावाधितासंभवद्वृत्यन्तरनारायणादिविशेषशब्दार्थविश्रमं व्यञ्जयितुं—**नारायणः परं ब्रह्मेति** विशेषतस्सामान्यतश्च व्यपदेशद्वयम् । अनेनाविभक्तिकेऽपि **नारायणानुवाक**वाक्ये पूर्वापरवाक्यच्छायानुसाराच्छाखान्तरसविसर्जनीयपठनाच्च व्यस्तत्वं व्यञ्जितम् । तेन च सर्वपरविद्योपास्यविशेषनिर्धारणार्थतया केवलपरतत्त्वप्रतिपादनपरनारायणानुवाकसिद्ध एवास्य शास्त्रस्य विषयः । तद्विभूतित्वेन * विश्वमेवेदं पुरुषः (तै. ना.) इतिवत्समानाधिकरणतया तत्राज्ञातानां ब्रह्मशिवेन्द्रादीनां नारशब्दार्थानामिहापि * ब्रह्माणमीशम् (गी. ११.१५) इत्यादिभिस्तद्विभूत्येकदेशाश्रयत्वं प्रतिपाद्यत इति ख्यापितम् । उक्तं च **स्तोत्रे** * स्वाभाविकानवधिकातिशयेशितृत्वं नारायण त्वयि न मृष्यति वैदिकः कः । ब्रह्मा शिवश्शतमखः परमस्वराडित्येतेऽपि यस्य महिमार्णवविप्रुषस्ते ॥ (११) इति । **संवित्सिद्धौ** च अद्वितीयश्रुतिव्याख्याने च दर्शितम्—*यथा चोलनृपस्सम्रा-

डद्वितीयोऽस्ति भूतले । इति तत्तुल्यनृपतिनिवारणपरं वचः ॥ न तु तत्पुत्रतद्भृत्यकलत्रादिनिषेधकम् । तथा सुरासुरनर-ब्रह्मब्रह्माण्डकोटयः । क्लेशकर्मविपाकाद्यैरस्पृष्टस्याखिलेशितुः । ज्ञानादिषाड्गुण्यनिधेरचिन्त्यविभवस्य ताः । विष्णोर्विभूति-महिमसमुद्रद्रप्सविप्रुषः ॥ इति । **पुरुषनिर्णये** च एतत्प्रपञ्चो ग्राह्यः । तदेतद्व्यपदेशद्वयं * श्रियःपतिरित्यादिना प्रारम्भ-**भाष्येण** व्याकृतम् । अत एव हि तत्रापि--* परं ब्रह्म पुरुषोत्तमो नारायणः इत्यन्तेन समभिव्याहृतम् । प्रपञ्चितमेत-दस्माभि**स्तात्पर्यचन्द्रिकाया**मिति नात्र विस्तृणीमहे । निर्विशेषणस्यैव ब्रह्मशब्दस्य काष्ठाप्राप्तबृहत्वबृंहणत्वयोगिनि परमात्मन्येव योगरूढत्वेऽपि तस्मादन्यत्र जीवादौ तद्गुणलेशयोगादौपचारिकप्रयोगरूढेस्तद्व्यवच्छेदाय **परम्** इति विशे-षितम् । एवमेव ह्यन्यत्रापि विशेष्यते । व्योमातीतवादिमतनिरासार्थं वा परत्वोक्तिः । गीतैव तत्त्वहितयोर्यथावच्छासनात् **गीताशास्त्रम्** । उपनिषत्समाधिना सिद्धव्यवहारनिरूढेः स्त्रीलिङ्गनिर्देशः । एतेन शास्त्रान्तरादस्य शास्त्रस्याधिक्यं व्यञ्जितम् । स्वयं च **महाभारते** महर्षिणोक्तम्--* अत्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत् (आ. १. २७९) इति । उक्तं चाभियुक्तैः--* यस्मिन् प्रसादमुमुखे कवयोऽपि ये ते शास्त्राण्यशासुरिह तन्महिमाश्रयाणि । कृष्णेन तेन यदिह स्वयमेव गीतं शास्त्रस्य तस्य सदृशं किमिवास्ति शास्त्रम् ॥ इति । पञ्चमवेदे चास्यांशस्य प्राधान्यमुद्धृत्याहुः * भारते भगवद्गीता धर्मशास्त्रेषु मानवम् । वेदेषु पौरुषं सूक्तं पुराणेषु च वैष्णवम् ॥ (पा.) इति । **समीरितः**--सम्यगीरितः; अज्ञानसंशयविपर्ययप्रतिक्षेपेण परमप्राप्यत्वप्रापकत्वसर्वकारणत्वसर्वरक्षकत्वसर्वसंहर्तृत्वसर्वाधिकत्वसर्वाधारत्वसर्वनियन्तृत्व-सर्वशेषित्वसर्ववेद्यवेद्यत्वसर्वहेयरहितत्वसर्वपापमोचकत्वसर्वसमाश्रयणीयत्वादिभिः स्वभावैस्समस्तवस्त्वन्तरविलक्षणतया पुरुषोत्तमत्वेन प्रतिपादित इत्यर्थः । समन्वयसूत्रवन्निरतिशयपुरुषार्थत्वविवक्षया वा समित्युपसर्गः । एवमनेन श्लोकेन शास्त्रार्थः संगृहीतः ॥ १ ॥

ज्ञानकर्मात्मिके निष्ठे योगलक्ष्ये सुसंस्कृते । आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केन चोदिते ॥ २ ॥

अथ त्रिभिः श्लोकैस्त्रयाणां षट्कानामर्थं संगृह्णाति ॥ ज्ञानात्मिका निष्ठा ज्ञानयोगः, कर्मात्मिका निष्ठा कर्मयोगः। निष्ठत्यस्मिन्नर्थे अधिकर्तव्येऽधिकारीति निष्ठा, नियता स्थितिरेव वा निष्ठा, यावत्फलं स्थिरपरिगृहीतमुपायानुष्ठानमित्यर्थः। अनयोः स्वरूपं व्यक्तयिष्यति * कर्मयोगस्तपस्तीर्थे (गी. सं. २३) इत्यादिना । **योगलक्ष्ये**--योगस्साध्यतया लक्ष्यम्--उद्देश्यं ययोस्ते योगलक्ष्ये । अत्र कर्मनिष्ठया ज्ञाननिष्ठामारुह्य तया योगप्राप्तिरिति द्वैतीयः क्रमः । तार्तीयस्तु ज्ञाननिष्ठा-व्यवधानमन्तरेण कर्मनिष्ठयैव यावद्योगारम्भं दृढपरिगृहीतया अन्तर्गतात्मज्ञानया शिष्टतया व्यपदेश्यानां लोकानुविधेया-नुष्ठानानामितरेषामपि निष्प्रमादमुकरोपायसक्तानां योगावाप्तिरिति । योगोऽत्रासनादिविशेषपरिकरवान् साक्षात्कारार्थम् आत्मावलोकनापरनामा चित्तसमाधानविशेषरूपो व्यापारः, तत्साध्यसाक्षात्कार एव वा । तेन स्मृतिसन्ततिविशेषरूपात् स्वकारणभूतज्ञानयोगात्स्वकार्यभूतादात्मानुभवाच्च भेदः । **सुसंस्कृते**--परमात्माधीनत्वतत्प्रीत्यर्थत्वफलान्तरसङ्गराहित्यादि-बुद्धिविशेषैः परिकर्मिते इत्यर्थः । **आत्मानुभूतिसिद्ध्यर्थे**--*सुखमात्यन्तिकं यत्तत् (गी. ६.२१) इत्याद्युक्तप्रकारेण वैषयिकानन्दविलक्षणस्वेतरसमस्तवैतृष्ण्यावहसुखस्वभावप्रत्यगात्मसाक्षात्कारविशेषरूपसिद्धिविशेषप्रयोजने, इत्यर्थः । **पूर्व-षट्केन चोदिते**--कर्तव्यतयाऽनुशिष्टे इति यावत् । तादर्थ्यादुपोद्घातरूपस्य प्रथमाध्यायस्य * न त्वेवाहम् (२. १२) इत्यतः पूर्वस्य द्वितीयाध्यायैकदेशस्य च तदनुप्रवेशवाचोयुक्तिः । आहुश्चोपोद्घातलक्षणं * चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते इति । एवमनेन श्लोकेन प्रथमषट्कस्यावरतत्त्वविषयव्यवहितोपायपरत्वमुक्तम् ॥ २ ॥

मध्यमे भगवत्तत्त्वयाथात्म्यावाप्तिसिद्धये । ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः ॥ ३ ॥

अथ मध्यमषट्कस्य परतत्त्वविषयाव्यवहितोपायपरत्वमाह ॥ पूर्वश्लोके समासस्थस्यापि षट्कशब्दस्यात्र बुद्ध्या निष्कृष्य विपरिणतस्यानुषङ्गः । **भगव**च्छब्दो मध्यमषट्कोक्त [सकल] निखिलजगदेककारणत्वनिर्दोषत्वकल्याणगुणाकरत्वयोगिनि परस्मिन् ब्रह्मणि प्रत्यक्षरं प्रकृतिप्रत्ययरूढिभिश्च **भगवत्पराशरादिभि**र्निरुक्तो द्रष्टव्यः । यस्यैष संग्रहः—*तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः । शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः ॥ (वि. ६.५.७७) इति । अयं च ब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वे निदर्शनतया **शारीरकभाष्यारम्भे** दर्शितः *भगवच्छब्दवत् इति । भक्तेषु भागवतसमाख्या च भजनीये भगवच्छब्दस्य नामधेयतां व्यनक्ति । भगवानेव तत्त्वं—**भगवत्तत्त्वम्** । तत्त्वमिह प्रामाणिकः पदार्थः । *तत्त्वेन प्रवेष्टुम् (गी. ११. ४४) इत्यस्यार्थं व्यनक्ति—**याथात्म्यावाप्तिसिद्धय** इति । ऐश्वर्यादिपुरुषार्थान्तरोक्तेरन्यार्थत्वमनेन सूचितम् । याथात्म्यमत्र अनवच्छेदेन पुष्कलमनारोपितं रूपम् । अवाप्तिः—अनवच्छिन्नानन्दतयाऽनुभूतिः, सैव सिद्धिः पुरुषार्थकाष्ठारूपत्वात् । तस्या वा सिद्धिर्लब्धिः । **ज्ञानकर्माभिनिर्वर्त्य** इत्यनेन प्रथममध्यमषट्कयोः क्रमनियामकस्सङ्गतिविशेषस्सूचितः । तदनुसारेण **सप्तमारम्भे भाष्यम्**—*प्रथमेनाध्यायषट्केन परमप्राप्यभूतस्य परस्य ब्रह्मणो निरवद्यस्य निखिलजगदेककारणस्य सर्वज्ञस्य सर्वभूतात्मभूतस्य सत्यसङ्कल्पस्य महाविभूतेः श्रीमतो नारायणस्य प्राप्त्युपायभूतं तदुपासनं वक्तुं तदङ्गभूतमात्मज्ञानपूर्वककर्मानुष्ठानसाध्यं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनमुक्तम् । इदानीं मध्यमेन षट्केन परब्रह्मभूतपरमपुरुषस्वरूपं तदुपासनं च भक्तिशब्दवाच्यमुच्यते । तदेतदुत्तरत्र—*यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ इत्यारभ्य, *विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते । ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् । (गी. १८. ४६—५४) इति संक्षिप्य वक्ष्यत इति । भक्तिरेव योगः **भक्तियोगः** । *योगस्सन्नहनोपायध्यानसङ्गतियुक्तिषु (ना. शा. ३. १७९) इति पाठाद्योगशब्दोऽत्र उपायपरः । ध्यानपरत्वेऽपि सामान्यविशेषरूपतयाऽन्वयसिद्धिः । **प्रकीर्तितः**—स्वरूपत इतिकर्तव्यतातो विषयतः कार्यतश्च प्रकृष्टतया कीर्तित इत्यर्थः ॥ ३ ॥

एवं षट्कद्वयोक्तनानाविधतत्त्वहितविशोधनपरं क्रमादन्तिमषट्कत्रिकद्वयमित्यभिप्रायेणाह—

प्रधानपुरुषव्यक्तसर्वेश्वरविवेचनम् । कर्म धीर्भक्तिरित्यादिः पूर्वशेषोऽन्तिमोदितः ॥ ४ ॥

प्रधानं—कारणावस्थमचिद्द्रव्यम् । **पुरुषः** अचिन्मिश्रावस्थो विशुद्धावस्थश्चाव्यक्तं तु महदादिविशेषान्तं, तदारब्धदेवतिर्यङ्मनुष्यादिरूपं च कार्यजातम् । **सर्वेश्वरः**—*यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । (गी. १५. १७) इत्युक्तः पुरुषोत्तमः । एतेनार्वाचीनपरिच्छिन्नेश्वरव्यवच्छेदः । समाख्या चैषा सार्था भगवतः, *अजस्सर्वेश्वरस्सिद्ध इति तन्नामपाठात् । एतेषां **विवेचनं**—परस्परव्यावर्तको धर्मः । तेन वा पृथक्त्वानुसन्धानम् । **कर्मधीर्भक्तिरिति** कर्मयोगादीनां स्वरूपग्रहणम्, **इति**—निर्दिष्टपदार्थवर्गः **आदिः** यस्य स इत्यादिः । आदिशब्देन तदुपादानप्रकारः तदुपयुक्तशास्त्रवश्यत्वादिकं च गृह्यते । **पूर्वशेष** इत्यनेन प्रकृतशोधनरूपतया पुनरुक्तिपरिहारः सङ्गतिप्रदर्शनं च । अयं श्लोकः **त्रयोदशारम्भभाष्येण** स्पष्टं व्याख्यातः—*पूर्वस्मिन् षट्के परमप्राप्यस्य परस्य ब्रह्मणो भगवतो वासुदेवस्य प्राप्त्युपायभूतभक्तिरूपभगवदुपासनाङ्गभूतं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनं ज्ञानयोगकर्मयोगलक्षणनिष्ठाद्वयसाध्यमुक्तम् ।

मध्यमे च परमप्राप्यभूतभगवत्तत्त्वयाथात्म्यतन्माहात्म्यज्ञानपूर्वकैकान्तिकात्यन्तिकभक्तियोगनिष्ठा प्रतिपादिता । अतिशयितैश्वर्यापेक्षाणामात्मकैवल्यमात्रापेक्षाणां च भक्तियोगस्तत्तदपेक्षितसाधनमिति चोक्तम् । इदानीमुपरितने तु षट्के प्रकृतिपुरुषतत्संसर्गरूपप्रपञ्चेश्वरतद्याथात्म्यकर्मज्ञानभक्तिस्वरूपतदुपादानप्रकाराश्च षट्कद्वयोदिता विशोध्यन्ते—इति । अत्र त्रिकभेदविवक्षा च षोडशारम्भे दर्शिता—* अतीतेनाध्यायत्रयेण प्रकृतिपुरुषयोर्विविक्तयोस्संसृष्टयोश्च याथात्म्यम्, तत्संसर्गवियोगयोश्च गुणसङ्गतद्विपर्ययहेतुकत्वम्, सर्वप्रकारेणावस्थितयोः प्रकृतिपुरुषयोर्भगवद्विभूतित्वम्, विभूतिमतो भगवतो विभूतिभूतादचिद्वस्तुनश्चिद्वस्तुनश्च बद्धमुक्तोभयरूपादव्ययत्वव्यापनभरणस्वाम्यैरर्थान्तरतया पुरुषोत्तमत्वेन याथात्म्यं च वर्णितम्—इति । तदत्र तृतीयषट्के तत्त्वविशोधनपरं प्रथमत्रिकम् । अनुष्ठानशोधनपरं द्वितीयमिति प्रायिकतयाऽयं विभागो ग्राह्यः ॥ ४ ॥

अस्थानस्नेहकारुण्यधर्माधर्म[भ]धियाऽऽकुलम् । पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम् ॥ ५ ॥

एवं शास्त्रार्थषट्कत्रयार्थश्च चतुर्भिश्श्लोकैस्संगृहीतः । इतः परमष्टादशभिः श्लोकैः प्रत्यध्यायमर्थास्संगृह्यन्ते । तत्र शोकतदपनोदनरूपकथावान्तरसङ्गत्या महर्षिणा प्रथमद्वितीयाध्यायविभागे कृतेऽपि शास्त्रतदुपोद्घातरूपार्थविभागज्ञापनाय द्वितीयैकदेशमपि प्रथमश्लोकेन संगृह्णाति । तद्यज्ञनाय च * तमुवाच हृषीकेशः (२. १०) इत्यस्मात्पूर्वम् अर्थव्याख्यानपूर्वकमयं श्लोको **भाष्यकारै**रुदाहृतः—* एवमस्थाने समुपस्थितस्नेहकारुण्याभ्यामप्रकृतिं गतं क्षत्रियाणां युद्धं परमधर्ममप्यधर्मं मन्वानं धर्मबुभुत्सया च शरणागतं पार्थमुद्दिश्य आत्मयाथात्म्यज्ञानेन युद्धस्य फलाभिसन्धिरहितस्यात्मप्राप्त्युपायताज्ञानेन च विनाऽस्य मोहो न शाम्यतीति मत्वा भगवता परमपुरुषेण अध्यात्मशास्त्रावतरणं कृतम् । तदुक्तम् * अस्थानस्नेहकारुण्यधर्माधर्मधियाऽऽकुलम् । पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम् ॥ इति । * अस्थानशब्दोऽत्र स्नेहकारुण्याभ्यामेवान्वेतव्यः । धर्मेऽप्यधर्मधीः धर्माधर्मधीः ; शुक्तिकारजतधीरितिवत् । प्रकृतिभ्रंशहेतुतया निमित्तभूताभ्यामस्थानस्नेहकारुण्याभ्यां जाता धर्माधर्मधीः **अस्थानस्नेहकारुण्यधर्माधर्मधी**रिति अत्र भाष्याभिप्रायः । *बन्धुस्नेहेन परया च कृपया धर्माधर्मभयेन च अतिमात्रसन्नसर्वाङ्गः इति **प्रथमाध्यायान्तभाष्या**नुसारेण *धर्माधर्मभयाकुलम् इतिपाठे त्रयाणां द्वन्द्वः । धर्माधर्मभयं रज्जुसर्पभयमितिवत् । उद्दिश्य व्याजीकृत्येत्यर्थः । तदेतत्सूचितमारम्भे * पाण्डुतनययुद्धप्रोत्साहनव्याजेन इति । प्रपन्नत्वात्तमुद्दिश्यैवेति वा विवक्षितम् । तदपि सूचितम् * अस्य मोहो न शाम्यतीति मत्वा इति । तदत्र * तमुवाच (२. १०) इत्यादिश्लोकपर्यन्तो ग्रन्थः शास्त्रावतारूपः । तावत्संग्रहणायात्र श्लोके प्रथमाध्याय इत्यनुक्तिः । अस्ति ह्युत्तरेषु सप्तदशसु तत्तदध्यायग्रहणम् । अनन्तरे च संग्रहश्लोके * न त्वेवाहं जातु नासम् (२. १२) इत्यादेरर्थमभिप्रेत्य द्वितीयग्रहणम् । स च द्वितीयान्ते व्याख्यानपूर्वक [मुदाहृतः] मुद्धृतः—* एवमात्मयाथात्म्यं युद्धाख्यस्य च कर्मणस्तत्प्राप्तिसाधनतामजानतश्शरीरात्मज्ञानेन मोहितस्य तेन च मोहेन युद्धान्निवृत्त[स्या]स्य मोहशान्तये नित्यात्मविषया सांख्यबुद्धिस्तत्पूर्विका च असङ्गकर्मानुष्ठानरूपकर्मयोग[विषया] बुद्धिः स्थितप्रज्ञतायोगसाधनभूता द्वितीयाध्याये प्रोक्ता । तदुक्तम्—* नित्यात्मासङ्गकर्महागोचरा सांख्ययोगधीः । द्वितीये स्थितधीलक्षा प्रोक्ता तन्मोहशान्तये ॥ इति ॥ ५ ॥

नित्यात्मासङ्गकर्महागोचरा सांख्ययोगधीः । द्वितीये स्थितधीलक्षा प्रोक्ता तन्मोहशान्तये ॥ ६ ॥

संख्यया–बुद्ध्याऽवधारणीयमात्मतत्त्वं सांख्यम्, तद्विषयबुद्धिस्सांख्यधीः। **नित्यात्मगोचरे**ति तद्विवरणम्। एवमत्र **असङ्गकर्मेहा**शब्देनापि योगशब्दार्थविवरणादपौनरुक्त्यम्। सांख्ययोगयोर्धीः–सांख्ययोगधीः। **स्थितधीः**–स्थितप्रज्ञता, ज्ञाननिष्ठेत्यर्थः। सा साध्यत्वेन लक्ष्यं यस्यास्सा तथोक्ता। **तन्मोहशान्तये**–उक्तप्रकारस्य अर्जुनस्य देहात्मादिभ्रमनिवृत्त्यर्थम्। एवं द्वितीयाध्यायोक्तस्य प्रपञ्चनरूपतया षष्ठान्तानां चतुर्णामेकपेटिकात्वम्। एकीकरणार्थं **तृतीयारम्भे**ऽनुभाषितम्––*तदेवं मुमुक्षभिः प्राप्यतया वेदान्तोदितनिरस्तनिखिलाविद्यादिदोषगन्धानवधिकातिशयासंख्येयकल्याणगुणगणपरब्रह्मपुरुषोत्तमप्राप्त्युपायभूतवेदनोपासनध्यानादिशब्दवाच्यां तदैकान्तिकात्यन्तिकभक्तिं वक्तुं तदङ्गभूतं *य आत्मा अपहतपाप्मा (छा. ८. ९. १) इत्यादिप्रजापतिवाक्योदितं प्राप्तुरात्मनो याथात्म्यदर्शनं तन्नित्यताज्ञानपूर्वकासङ्गकर्मनिष्पाद्यज्ञानयोगसाध्यमुक्तम्–इत्यारभ्य *अतःपरमध्यायचतुष्टयेन इदमेव प्राप्तुः प्रत्यगात्मनो दर्शनं ससाधनं प्रपञ्चयति–इति ॥ ६ ॥

असक्त्या लोकरक्षायै गुणेष्वारोप्य कर्तृताम्। सर्वेश्वरे वा न्यस्योक्ता तृतीये कर्मकार्यता ॥ ७ ॥

असक्त्या––परमपुरुषप्रीतिव्यतिरिक्तस्वर्गादिफलसंगत्यागपूर्वकमित्यर्थः। **लोकरक्षायै**––अनुविधेयानुष्ठानस्य कृत्स्नविदस्स्वस्यानुष्ठानानुसन्धानेनाकृत्स्नविदशिष्टलोकस्य निष्प्रमादलुण्टाकरहितघण्टापथप्रवर्तनार्थमित्यर्थः। एतेन लोकसंग्रहशब्दो (गी. ३. २०) व्याख्यातः। एवं लोकरक्षणार्थं प्रवृत्तेरन्ततः स्वरक्षापर्यन्तत्वं **भाष्योक्तम्**–*अन्यथा लोकनाशजनितं पापं ज्ञानयोगादप्येनं प्राच्यावयेदिति। **गुणेषु**–सत्त्वरजस्तमस्संज्ञकेषु प्रकृतिगुणेष्वित्यर्थः। **आरोप्य कर्तृताम्**–स्वस्य देशकालावस्थादिनियतविषयज्ञानचिकीर्षाप्रयत्नाश्रयत्वलक्षणां कर्तृतां गुणप्रयुक्ततया अनुसन्धायेत्यर्थः। तथा च **भाष्यम्**–*गुणेषु कर्तृत्वानुसन्धानं चेदमेव; आत्मनो न स्वरूपप्रयुक्तमिदं कर्तृत्वम्; अपि तु गुणसंपर्ककृतमिति प्राप्ताप्राप्तविवेकेन गुणकृतमित्यनुसन्धानम् (३. २९) इति। *मयि सर्वाणि कर्माणि(३. ३०) इत्यत्र असच्छब्दाभिप्रेतं व्यनक्ति–**सर्वेश्वरे वा न्यस्ये**ति। गुणानां तदाश्रयस्य त्रिगुणद्रव्यस्य तत्संसृष्टस्य वियुक्तस्य च जीवस्य नियन्तरि भगवति तस्यास्तन्मूलत्वभावनया निवेश्येत्यभिप्रायः। **सूत्रकारश्च** *कर्ता शास्त्रार्थवत्त्वात् (२.३.३३) इत्यादिभिरात्मनः कर्तृत्वमुपपाद्य अनन्तरं तस्य परमात्माधीनत्वं *परात्तु तच्छ्रुतेः (२.३.४०) इत्याह। सर्वेश्वरे कर्तृत्वानुसन्धानप्रकारश्चैवं भाषितः–*इदानीमात्मनां परमपुरुषशरीरतया तन्नियाम्यत्वस्वरूपनिरूपणेन भगवति पुरुषोत्तमे सर्वात्मभूते गुणकृतं च कर्तृत्वमारोप्य कर्मकर्तव्यतोच्यते (गी. ३. ३०) इति। पिण्डितार्थश्च दर्शितः *स्वकीयेनात्मना कर्त्रा स्वकीयैश्चोपकरणैस्स्वाराधनैकप्रयोजनाय परमपुरुषस्सर्वशेषी सर्वेश्वरस्स्वयमेव स्वकर्माणि कारयति (३. ३०) इत्यादिना ॥

प्रसङ्गात्स्वस्वभावोक्तिः कर्मणोऽकर्मताऽस्य च। भेदाज्ञानस्य माहात्म्यं चतुर्थाध्याय उच्यते ॥ ८ ॥

स्वशब्देनावतीर्णावस्थो भगवानिह विवक्षितः, तस्य **स्वभावः**–स्वासाधारणो भावः। **स्वस्वभावोक्तिरुच्यत** इति ओदनपाकः पच्यत इतिवत्। क्रियत इत्यर्थः। **कर्मणोऽकर्मता**–*कर्मण्यकर्म यः पश्येत् (गी.४.१८) इत्यादिभिरुक्ता; अकर्मशब्दोऽत्र तदन्यवृत्त्या कर्मयोगासन्नात्मज्ञानविषयः। अस्य च भेदाः–*दैवमेवापरे यज्ञम् (४. २५) इत्यादिनोक्ताः देवार्चनेन्द्रियनिरोधप्राणायामयागदानहोमतपस्तीर्थसेवास्वाध्यायतदर्थाभ्यासादिरूपा वर्णाश्रमधर्मेतिकर्तव्यताकाः, यथाज्ञानं यथाशक्ति यथारुचि प्रधानतया परिगृहीताः कर्मयोगावान्तरविशेषा इत्यर्थः। **ज्ञानस्य माहात्म्यम्**–

* श्रेयान् द्रव्यमयाद्यज्ञात् (४. ३३) इत्युक्तं प्राधान्यम् । अयं च श्लोकः तृतीयसंगतिपूर्वकं **चतुर्थारम्भे** व्याख्यातः— * तृतीयेऽध्याये प्रकृतिसंसृष्टस्य मुमुक्षोस्सहसा ज्ञानयोगेऽनधिकारात्कर्मयोग एव कार्यः, ज्ञानयोगाधिकारिणोऽपि अकर्तृत्वानुसन्धानपूर्वककर्मयोग एव श्रेयानिति सहेतुकमुक्तम्, [वि]शिष्टतया व्यपदेश्यस्य तु विशेषतः कर्मयोग एव कार्य इति चोक्तम्, चतुर्थेन इदानीमस्यैव कर्मयोगस्य निखिलजगदुद्धारणाय मन्वन्तरादावेवोपदिष्टतया कर्तव्यतां द्रढयित्वा, अन्तर्गतज्ञानतयाऽस्यैव ज्ञानयोगाकारतां प्रदर्श्य, कर्मयोगस्वरूपं तद्भेदाः, कर्मयोगे ज्ञानांशस्यैव प्राधान्यं चोच्यते; प्रसंगाच्च भगवदवतारयाथात्म्यमुच्यत इति । ईदृशं चावतारयाथार्थ्यमत्र निरमन्थि, निखिलहेयप्रत्यनीककल्याणैकतानस्यापि भगवतो जन्म नेन्द्रजालवन्मिथ्या, अपि तु सत्यम्, अवतरंश्च भगवान्सदादिवन्न ज्ञानसंकोचादिमान् भवति, किंतु अजत्वाव्ययत्वसर्वेश्वरत्वादिकं सर्वं पारमेश्वरं स्वभावमजहदेव अवतरति; न चावतारविग्रहोऽप्यस्य गुणत्रयमयः प्राकृतः, प्रत्युत अप्राकृतशुद्धसत्त्वमयः; नचास्य जन्म पुण्यापुण्यरूपेण कर्मणा, अपि तु स्वेच्छयैव; नवा कर्मविपाककाले अस्य जन्म, अपि तु धर्मग्लान्यधर्मोत्थानकाले; नापि भगवज्जन्मनः सुखदुःखमिश्राणि फलानि, अपि तर्हि साधुपरित्राणदुष्कृद्विनाशनधर्मसंस्थापनादीनीति; स्वरूपतः प्रकारतो द्रव्यतः कारणतः कालतः प्रयोजनतश्च दिव्यत्वम्, एवं ज्ञानवतश्चैकस्मिन्नेव जन्मनि उपायपूर्त्याऽनन्तरजन्मप्रतिषेधेन भगवत्प्राप्तिर्गीयते * जन्म कर्म च मे दिव्यम् (४. ९) इत्यादिना । अत एव हि प्राचेतसपराशरपाराशर्यशुकशौनकादयः परमर्षयः प्रायस्तत्रैव निष्ठां भूयसीमाद्रियन्त इति ॥ ८ ॥

कर्मयोगस्य सौकर्यं शैघ्र्यं काश्चन तद्विधाः । ब्रह्मज्ञानप्रकारश्च पञ्चमाध्याय उच्यते ॥ ९ ॥

तृतीयचतुर्थाभ्यां यथांशं संगतिप्रदर्शनपूर्वकमयं श्लोकः **पञ्चमारम्भे** व्याख्यातः—* चतुर्थेऽध्याये कर्मयोगस्य ज्ञानाकारतापूर्वकस्वरूपभेदः, ज्ञानांशस्य च प्राधान्यमुक्तम् । ज्ञानयोगाधिकारिणोऽपि कर्मयोगस्यान्तर्गतात्मज्ञानत्वादप्रमादत्वात्सुकरत्वान्निरपेक्षत्वाच्च ज्यायस्त्वं तृतीय एवोक्तम् । इदानीं कर्मयोगस्यात्मप्राप्तिसाधनत्वे ज्ञाननिष्ठायाश्शैघ्र्यं कर्मयोगान्तर्गताकर्तृत्वानुसन्धानप्रकारं च प्रतिपाद्य तन्मूलं ज्ञानं च विशोध्यत इति । सौकर्यस्यात्रानुद्धरणं पूर्वोक्तानुवादताज्ञापनार्थम् । **सौकर्य**शब्देनात्र * सुखं बन्धात्प्रमुच्यते (५. ३) इत्यस्य हेतुर्दर्शितः । शैघ्र्यं तु * योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति (५. ६) इत्युक्तम् । अत्र विधाशब्द इतिकर्तव्यतापरः, तथा खलु * नैव किंचित्करोमि (५. ८) इत्यादेरधिष्ठिका *यतस्सौकर्याच्छैघ्र्याच्च कर्मयोग एव श्रेयानतस्तदपेक्षितं शृण्विति । अकर्तृत्वानुसन्धानप्रकारशब्दोऽप्येतत्परः । ब्रह्मशब्दोऽत्र ब्रह्मसमानाकारशुद्धात्मविषयः । ज्ञानशब्दश्चात्र समदर्शनरूपज्ञानविपाकविश्रान्तः । प्रकारशब्दस्तु तद्धेतुभूतप्रकारार्थः । अत एव हि * येन प्रकारेणावस्थितस्य कर्मयोगिनस्समदर्शनरूपो ज्ञानविपाको भवति, तं प्रकारमुपदिशतीत्युक्त्वा * न प्रहृष्येत्प्रियं प्राप्य (५. २०) इत्यादिकमवतारितम् । षष्ठारम्भस्त्वेवं संगमितः * उक्तः कर्मयोगस्सपरिकरः, इदानीं ज्ञानयोगकर्मयोगसाध्यात्मावलोकनरूपयोगाभ्यासविधिरुच्यते, तत्र कर्मयोगस्य निरपेक्षयोगसाधनत्वं द्रढयितुं ज्ञानाकारः कर्मयोगो योगशिरस्कोऽनूद्यत इति । एतेन * योगी युञ्जीत (६. १०) इत्यतः पूर्वस्य ग्रन्थस्यानुवादरूपत्वात् **संग्रहे** नोपन्यास इति व्यञ्जितम् ॥ ९ ॥

योगाभ्यासविधिर्योगी चतुर्धा योगसाधनम् । योगसिद्धिस्स्वयोगस्य पारम्यं षष्ठ उच्यते ॥ १० ॥

ननु अत्र पञ्चार्थास्संगृहीताः भाष्ये तु कथमेकः ? इत्थम् । * स्पर्शान्कृत्वा बहिर्बाह्यान् (५. २७) इत्यादिना पञ्चमे प्रस्तुतो योगाभ्यासविधिरेवात्र प्रपञ्च्यत इति तत्प्रधानोऽयमध्यायः, तदनुबन्धाः प्रसङ्गादन्ये प्रतिपाद्यन्त इति ।

एतेनाध्यायान्तरेष्वप्यनेकानुबन्ध एकैकार्थः प्रधानतम इति सूचितम् । तद्यथा—श्रवणाधिकारी, तन्मोहशमनं, कर्मयोगकर्तव्यत्वम्, तदावान्तरभेदः, तदन्तर्गतज्ञानविपाकः, योगाभ्यासविधिः, प्रतिबुद्धप्राधान्यम्, त्रिविधाधिकारवेद्योपादेयविभागः, सप्रक्रा[रो]रको भक्तियोगः, गुणविभूत्यानन्त्यम्, वैश्वरूप्यदर्शनोपायः, भक्त्यारोहक्रमः, विशुद्धक्षेत्रज्ञविज्ञानम्, त्रैगुण्यविशोधनम्, पुरुषोत्तमवैलक्षण्यम्, शास्त्रवश्यत्वम्, शास्त्रीयविवेचनम्, सारोद्धारः इति । अतोऽत्र योगाभ्यासविध्यनुबन्धत्वेन योगिचातुर्विध्यादिप्रदर्शनम् । योगी चतुर्धा—* सर्वभूतस्थमात्मानम् (गी. ६. २९) इत्यादिश्लोकचतुष्टयोदितसमदर्शनचातुर्विध्यात् । तत्र ह्येवं भाष्यम्—* अथ योगविपाकदशा चतुष्प्रकारोच्यत इति । एवं तत्र समदर्शनविपाकक्रमोऽभिप्रेतः, आत्मनां ज्ञानत्वानन्दत्वादिभिरन्योन्यसाम्यदर्शनम्, शुद्धावस्थायामपहतपाप्मत्वादिभिरीश्वरेण साम्यदर्शनम्, परित्यक्तप्राकृतभेदानामसंकुचितज्ञानैकाकारतया ईश्वरेण तदपृथक्सिद्धविशेषणत्वादिभिरन्योन्यं च साम्यदर्शनम्, औपाधिकैः पुत्रादिभिरसंबन्धसाम्यदर्शनं चेति । **योगसाधनम्**—अभ्यासवैराग्यादिकम् । **योगसिद्धिः**—योगभ्रष्टस्यापि प्रत्यवायविरहः; पुण्यलोकाद्यवाप्तिर्विच्छिन्नप्रतिसन्धानाद्यनुरूपविशिष्टकुलोत्पत्तिः अभिक्रमनाशाभावेन क्रमाच्छेषपूरणेनापवर्गाविनाभावः इत्येवंरूपा । **स्वयोगस्य पारम्यम्**—वक्तुर्भगवतो वासुदेवस्य भजनरूपो योगोऽत्र स्वयोगः; तस्य पारम्यं—स्वापेक्षयोत्कृष्टराहित्यम् । एतच्च मध्यमषट्कप्रतिपाद्यमपि तत्प्रस्तावनारूपेण * योगिनामपि सर्वेषामिति प्रथमषट्कान्तिमश्लोकेन दर्शितम् । तथा हि तत्र **भाष्यम्** * तदेवं परविद्याङ्गभूतं प्रजापतिवाक्योदितं प्रत्यगात्मदर्शनमुक्तम्, अथ परविद्यां प्रस्तौतीति ॥ १० ॥

स्वयाथात्म्यं प्रकृत्याऽस्य तिरोधिश्शरणागतिः । भक्तिभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तम उच्यते ॥ ११ ॥

तत्र **भाष्यम्**—* सप्तमे तावदुपास्यभूतपरमपुरुष [स्वरूप] याथात्म्यम्, प्रकृत्या तत्तिरोधानम्, तन्निवृत्तये भगवत्प्रपत्तिः, उपासकविधाभेदो ज्ञानिनश्श्रैष्ठ्यं चोच्यत इति । तत्र प्रकृतिशब्देन * मम माया दुरत्यया (७. १३) इति मायाशब्दो व्याख्यातः । गुणमयीति विशेषणात् सैव हि विवक्षितेति गम्यते । श्रुतावपि * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः इति प्रस्तुतयोर्मायातद्वतोः * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् (श्वे. ४. ९) इति स्वयमेव विवरणाच्च । अतो विचित्रसृष्ट्युपकरणवस्तुत्वात् प्रकृताविह मायाशब्दप्रयोग इति भावः । अष्टमारम्भसङ्गतौ चैतच्छ्लोकार्थः स्पष्टमभिहितः—* सप्तमे परस्य ब्रह्मणो वासुदेवस्योपास्यत्वम्, निखिलचेतनाचेतनवस्तुशेषित्वम्, कारणत्वम्, आधारत्वम्, सर्वशरीरतया सर्वप्रकारत्वेन सर्वशब्दवाच्यत्वम्, सर्वनियन्तृत्वम्, सर्वैश्च कल्याणगुणगणैस्तस्यैव परतरत्वम्, सत्त्वरजस्तमोमयैर्देहेन्द्रियत्वेन भोग्यत्वेन चावस्थितैर्भोक्तृभिर्वैरनादिकालप्रवृत्तदुष्कृतप्रवाहहेतुकैस्तस्य तिरोधानम्, अत्युत्कृष्टसुकृतहेतुकभगवत्प्रपत्त्या च तन्निवर्तनम्, सुकृततारतम्येन च प्रतिपत्तिवैशेष्यादैश्वर्याक्षरयाथात्म्यभगवत्प्राप्त्यपेक्षया चोपासकभेदम्, भगवन्तं प्रेप्सोर्नित्ययुक्ततया एकभक्तितया च अत्यर्थपरमपुरुषप्रियत्वेन च श्रैष्ठ्यं दुर्लभत्वं च प्रतिपाद्य एषां त्रयाणां ज्ञातव्योपादेयभेदांश्च प्रास्तौषीदिति ॥ ११ ॥

ऐश्वर्याक्षरयाथात्म्यभगवच्चरणार्थिनाम् । वेद्योपादेयभावानामष्टमे भेद उच्यते ॥ १२ ॥

अष्टमश्चैवमवतारितः—* इदानीमष्टमे प्रस्तुतान् ज्ञातव्योपादेयभेदान्विविनक्तीति । तत्रैष संग्रहः । **ऐश्वर्यमत्र** इन्द्रप्रजापतिपशुपतिभोगेभ्योऽतिशयितभोगः, **अक्षरयाथात्म्यम्**—विविक्तात्मस्वरूपम्, **वेद्यास्तु** * अक्षरं ब्रह्म परमम्

(८.३) इत्यादिनोक्ताः शुद्धात्मस्वरूपप्रभृतयः, **उपादेयास्तु** तत्तदिष्टफलानुरूपपरमपुरुषचिन्तनान्तिमप्रत्ययगतिचिन्तनादयः, त एव **भावाः**—पदार्थाः, तेषां **भेदः**—तत्तदधिकारानुरूपो विशेषः ॥ १२ ॥

स्वमाहात्म्यं मनुष्यत्वे परत्वं च महात्मनाम् । विशेषो नवमे योगो भक्तिरूपः प्रकीर्तितः ॥ १३ ॥

स्वमाहात्म्यम्- *मया ततमिदं सर्वम् (९. ४) इत्यादिभिः शोधितम् । *अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ (७. २४) इति परत्वस्य मनुष्यदशायामप्यव्ययत्वमुक्तम् । प्रस्तुतावतारविवक्षया मनुष्यावस्थत्वोक्तिः । तन्मुखेन सर्वेष्वप्यवतारेषु अव्ययः परमो भाव उपलिलक्षयिषितः । उक्तं च **श्रीवत्सचिह्नमिश्रैः**—*परो वा व्यूहो वा विभव उत वाऽर्चावतरणो भवन्वाऽन्तर्यामी वरवरद यो यो भवसि वै । स स त्वं सत्त्वैशान्वरगुणगणान् बिभ्रदखिलान् भजद्भ्यो भास्येवं सततमितरेभ्यस्त्वितरथा ॥ (व. स्त. १८) इति । *महात्मानस्तु मां पार्थेत्यादिना (९.१३) महात्मनां विशेषो विशोधितः । अत्र भक्तिरूपस्य योगस्यैव प्राधान्यं **भाष्योक्तम्**—*उपासकभेदनिबन्धना विशेषाः प्रतिपादिताः, इदानीमुपास्यस्य परमपुरुषस्य माहात्म्यं ज्ञानिनां विशेषं च विशोध्य भक्तिरूपस्योपासनस्य स्वरूपमुच्यते इति ॥ १३ ॥

स्वकल्याणगुणानन्त्यकृत्स्नस्वाधीनतामतिः । भक्त्युत्पत्तिविवृद्ध्यर्था विस्तीर्णा दशमोदिता ॥ १४ ॥

अत्र नवमसंगतिपूर्वकं **भाष्यम्**—*भक्तियोगस्सपरिकर उक्तः, इदानीं भक्त्युत्पत्तये तद्विवृद्धये च भगवतो निरङ्कुशैश्वर्यादिकल्याणगुणानन्त्यं कृत्स्नस्य जगतस्तच्छरीरतया तदात्मकत्वेन तत्प्रवर्त्यत्वं च प्रपंच्यत इति । **एकादशारम्भे** च भाषितम् *एवं भक्तियोगनिष्पत्तये तद्विवृद्धये च सकलेतरविलक्षणेन स्वाभाविकेन भगवदसाधारणेन कल्याणगुणगणेन सह भगवतस्सर्वात्मत्वं, तत एव तद्व्यतिरिक्तस्य कृत्स्नस्य चिदचिदात्मकस्य वस्तुजातस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित्वं चोक्तम् । तमेतं भगवदसाधारणं स्वभावं कृत्स्नस्य तदायत्तस्वरूपस्थितिप्रवृत्तितां च भगवत्सकाशदुपश्रुत्य एवमेवेति निश्चित्य तथाभूतं भगवन्तं साक्षात्कर्तुकामोऽर्जुन उवाचेति ॥ १४ ॥

एकादशे स्वयाथात्म्यसाक्षात्कारावलोकनम् । दत्तमुक्तं विदिप्राप्त्योर्भक्त्येकोपायता तथा ॥ १५ ॥

साक्षात्कारहेतुभूतमवलोकनं **साक्षात्कारावलोकनम्**, अवलोक्यतेऽनेनेत्यवलोकनमिह दिव्यं चक्षुः । **विदिप्राप्त्योरिति** दर्शनस्याप्युपलक्षणम् । तथा हि गीयते—*भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ (११. ५४) इति । अयं तु संग्रहो **द्वादशारम्भे** सङ्गतिं विवक्षद्भिर्व्याख्यातः—*भक्तियोगनिष्ठानां प्राप्यभूतस्य परस्य ब्रह्मणो भगवतो नारायणस्य निरङ्कुशैश्वर्यं साक्षात्कर्तुकामायार्जुनायानवधिकातिशयकारुण्यौदार्यसौशील्यादिगुणसागरेण सत्यसङ्कल्पेन भगवता स्वैश्वर्यं यथावदवस्थितं दर्शितम्, उक्तं च तत्त्वतो भगवज्ज्ञानदर्शनप्राप्तीनामैकान्तिकात्यन्तिकभगवद्भक्त्येकलभ्यत्वम् । इति ॥ १५ ॥

भक्तेश्श्रैष्ठ्यमुपायोक्तिरशक्तस्यात्मनिष्ठता । तत्प्रकारास्त्वतिप्रीतिर्भक्ते द्वादश उच्यते ॥ १६ ॥

अत्र च **भाष्यम्**—*अनन्तरमात्मप्राप्तिसाधनभूतादात्मोपासनाद्भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुसुखोपादानत्वाच्च श्रैष्ठ्यं भगवदुपासनोपायश्च तदशक्तस्याक्षरनिष्ठता तदपेक्षिताश्चोच्यन्त इति । अत्रा**तिप्रीतिर्भक्ते** इत्यस्योपादानमुपसंहारमात्रताव्यञ्जनार्थम् । **उपायोक्तिः**—*अथ चित्तं समाधातुम् (१२. ९) इत्यादिश्लोकद्वयेन कृता । भगवति चित्तं समाधातुमशक्तस्य भगवद्गुणाभ्यासस्तत्राप्यशक्तस्य प्रीतिपूर्वकभगवदसाधारणकर्मकरणम्, तस्मि-

न्यसमर्थस्यात्मनिष्ठेति क्रमः । **तत्प्रकाराः**—कर्मयोगाद्यपेक्षिताः *अद्वेष्टा सर्वभूतानाम् (१२. १३) इत्यादिनोक्ताः उपादेयगुणप्रकाराः । तथाच तत्र भाषितम्—*अनभिसंहितफलकर्मनिष्ठस्योपादेयान् गुणानाह इति । **अतिप्रीतिर्भक्तेः**—*ये तु धर्म्यामृतमिदं यथोक्तम् (१२. २०) इत्यादिना अध्यायान्तिमश्लोकेनोक्ता । तदभिप्रेतं चैवमुक्तम् *[त]अस्मादात्मनिष्ठाद्भक्तियोगनिष्ठस्य श्रैष्ठ्यं प्रतिपादयन्यथोपक्रममुपसंहरति इति ॥ १६ ॥

देहस्वरूपमात्माप्तिहेतुरात्मविशोधनम् । बन्धहेतुर्विवेकश्च त्रयोदश उदीर्यते ॥ १७ ॥

अत्र भाष्यम्—*तत्र तावत्त्रयोदशे देहात्मनोस्स्वरूपं देहयाथात्म्यशोधनं देहवियुक्तात्मप्राप्त्युपायो विविक्तात्मस्वरूप[सं]शोधनं तथाविधस्यात्मनश्चाचित्संबन्धहेतुस्ततो विवेकानुसन्धानप्रकारश्चोच्यत इति । अत्र देहस्वरूपमित्यनेनैवाभिप्रेतं देहात्मनोस्स्वरूपमिति देहयाथात्म्यशोधनमिति च विवृतम् । **आत्माप्तिहेतुः**—*अमानित्वम् (१३. ७) इत्यादिभिरुक्तः । **आत्मविशोधनं**—*ज्ञेयं यत्तत्प्रवक्ष्यामि (१३. १२) इत्युपक्रम्य कृतम् । **बन्धहेतुस्तु** *कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु (१३. २१) इत्युक्तः । *ध्यानेनात्मनि पश्यन्ति (१३. २४) इत्यादिना विवेकानुसन्धानप्रकारो यथाधिकारं दर्शितः ॥ १७ ॥

गुणबन्धविधा तेषां कर्तृत्वं तन्निवर्तनम् । गतित्रयस्वमूलत्वं चतुर्दश उदीर्यते ॥ १८ ॥

अत्र प्रकृतिविशोधनरूपतया संगतिपूर्वकं भाष्यम्—*त्रयोदशे प्रकृतिपुरुषयोरन्योन्यसंसृष्टयोः स्वरूपयाथात्म्यं विज्ञाय अमानित्वादिभिर्भगवद्भक्त्यनुगृहीतैर्बन्धान्मुच्यत इत्युक्तम्, तत्र बन्धहेतुः पूर्वपूर्वसत्त्वादिगुणमयसुखादिसङ्ग इति चाभिहितम्—*कारणं गुणसंयोगोऽस्य सदसद्योनिजन्मसु (१३. २१) इति । अथेदानीं गुणानां बन्धहेतुताप्रकारो गुणनिवर्तनप्रकारश्चोच्यते इति । गुणकर्तृत्वादेरिह भाष्येऽनुक्तिः पूर्ववदेवेति भाव्यम् । सत्त्वं सुखज्ञानसङ्गेन बध्नाति; रजस्तु कर्मसङ्गेन; तमस्तु प्रमादालस्यनिद्राभिरिति बन्धहेतुताप्रकारः । तेषां कर्तृत्वं प्रागुक्तप्रकारेण प्राप्ताप्राप्तविवेकेन तेष्वारोपितम्, तच्चात्र *नान्यं गुणेभ्यः कर्तारम् (१४. १९) इति स्मारितम् । गुणनिवर्तनप्रकारस्तु *मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ (१४. २६) इत्यन्तेनोक्तः । अत एवात्र गतित्रयस्वमूलत्वमित्येतत् *ब्रह्मणो हि प्रतिष्ठाऽहम् इत्यध्यायान्तिमश्लोकोक्तमेव संगृह्णाति । तत एव हि तत्रैवं भाषितम् *पूर्वत्र *दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ (७. १४) इत्यारभ्य गुणात्ययस्य तत्पूर्वकाक्षरैश्वर्यभगवत्प्राप्तीनां च भगवत्प्रपत्त्येकोपायतायाः प्रतिपादितत्वादेकान्तभगवत्प्रपत्त्येकोपायो गुणात्ययः, तत्पूर्वकब्रह्मभावश्च (१४. २७) इति । ऊर्ध्वं गच्छन्ति (१४. १८) इत्याद्युक्तगतित्रयविवक्षायां तु संग्रहक्रमभङ्गस्स्यात् ॥ १८ ॥

अचिन्मिश्राद्विशुद्धाच्च चेतनात्पुरुषोत्तमः । व्यापनाद्भरणात्स्वाम्यादन्यः पञ्चदशोदितः ॥ १९ ॥

अत्र *अचिन्मिश्राद्विशुद्धाच्च इत्यस्य सूचनीयां सङ्गतिं विवृण्वन् क्षराक्षरशब्दव्याख्यानतां व्यनक्ति—*क्षेत्राध्याये क्षेत्रक्षेत्रज्ञभूतयोः प्रकृतिपुरुषयोस्स्वरूपं विशोध्य विशुद्धस्यापरिच्छिन्नज्ञानैकाकारस्यैव पुरुषस्य प्राकृतगुणसङ्गप्रवाहनिमित्तो देवाद्याकारपरिणतप्रकृतिसंबन्धोऽनादिरित्युक्तम्, अनन्तरे चाध्याये पुरुषस्य कार्यकारणोभयावस्थप्रकृतिसंबन्धो गुणसङ्गमूलो भगवतैव कृत इत्युक्त्वा गुणसङ्गप्रकारं सविस्तरं प्रतिपाद्य गुणसङ्गनिवृत्तिपूर्वकात्मयाथात्म्यावाप्तिश्च भगवद्भक्तिमूलेत्युक्तम् । इदानीं भजनीयस्य भगवतः क्षराक्षरात्मकबद्धमुक्तविभूतिमत्तां विभूतिभूताक्षराक्षरपुरुषद्वयान्निखिल-

हेयप्रत्यनीककल्याणैकतानतयात्यन्तोत्कर्षेण विसजातीयस्य भगवतः पुरुषोत्तमत्वं च वक्तुमारभते इति । अत्र व्यापन-भरणस्वाम्यानि *यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः (१५. १७) इति प्रतिपादितानि । एवं प्राधान्यतश्चिदचिदीश्वररूपतत्त्वत्रयविशोधनं क्रमादध्यायत्रयेण कृतमित्यनुसन्धेयम् ॥ १९ ॥

देवासुरविभागोक्तिपूर्विका शास्त्रवश्यता । तत्त्वानुष्ठानविज्ञानस्थैर्ये षोडश उच्यते ॥ २० ॥

अत्र पूर्वोत्तरसमस्तप्रतिष्ठापकष्षोडशाध्यायार्थसंगृह्यते । एतदभिप्रायेण **भाष्यम्**—*अनन्तरमुक्तस्य कृत्स्नस्यार्थस्य स्थैर्यं शास्त्रवश्यतां वक्तुं शास्त्रवश्यतद्विपरीतयोर्दैवासुरसर्गयोः विभागं श्रीभगवानुवाच इति । अत एव सप्तदशमवतारयन्नेवमन्वभाषत *दैवासुरविभागोक्तिमुखेन प्राप्यतत्त्वज्ञानं तत्प्राप्त्युपायज्ञानं च वेदैकमूलमित्युक्तम् इति । अत्र शास्त्रवश्यता—*तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ इति अध्यायान्तिमश्लोकेनोक्ता ॥ २० ॥

अशास्त्रमासुरं कृत्स्नं शास्त्रीयं गुणतः पृथक् । लक्षणं शास्त्रसिद्धस्य त्रिधा सप्तदशोदितम् ॥ २१ ॥

अत्र **भाष्यम्**—*इदानीमशास्त्रविहितस्यासुरत्वेन अफलत्वं शास्त्रविहितस्य च गुणतस्त्रैविध्यं शास्त्रसिद्धस्य लक्षणं चोच्यते इति । शास्त्रं यस्य विषयकत्वेन नास्ति तदशास्त्रमित्यभिप्रायेणाशास्त्रविहितस्येत्युक्तम् । *ओं तत्सदिति (१७. २३) शास्त्रसिद्धस्य त्रिविधं लक्षणमुक्तम् ॥ २१ ॥

ईश्वरे कर्तृतावुद्धिस्सत्त्वोपादेयताऽन्तिमे । स्वकर्मपरिणामश्च शास्त्रसारार्थ उच्यते ॥ २२ ॥

तदेतत्पूर्वाध्यायसंगतिप्रदर्शनपूर्वकं व्याचष्टे—*अनेनाध्यायद्वयेन अभ्युदयनिश्रेयससाधनभूतं वैदिकमेव यज्ञतपोदानादिकं कर्म, नान्यत्, वैदिकस्य च कर्मणस्सामान्यलक्षणं प्रणवान्वयः, तत्र मोक्षाभ्युदयसाधनयोर्भेदस्तत्-सच्छब्दनिर्देश्यत्वेन, मोक्षसाधनं च कर्म फलाभिसन्धिरहितं यज्ञादिकम्, तदारम्भश्च सत्त्वोद्रेकाद्भवति, [सत्त्वोद्रेकश्च] सत्त्ववृद्धिश्च सात्त्विकाहारसेवयेत्युक्तम् । अनन्तरं मोक्षसाधनतया निर्दिष्टयोस्त्यागसंन्यासयोरैक्यम्, त्यागस्य च स्वरूपं भगवति सर्वेश्वरे[च] सर्वकर्मणां कर्तृत्वानुसन्धानं, सत्त्वरजस्तमसां कार्यवर्णनेन सत्त्वगुणस्यावश्योपादेयत्वं, स्ववर्णोचितानां कर्मणां परमपुरुषाराधनभूतानां परमपुरुषप्राप्तिनिर्वर्तनप्रकारः, कृत्स्नस्य च गीताशास्त्रस्य सारार्थो भक्तियोगः इत्येते प्रतिपाद्यन्ते इति । अत्र त्यागसन्न्यासशब्दावेकार्थाविति भगवदुक्तेनोत्तरेण स्थापितम् । **भाष्ये** सर्वेश्वरे कर्तृत्वानुसन्धानं च *दैवं चैवात्र पञ्चमम् (१८.१४) इत्यत्रैव दर्शितम्—*अत्र—कर्महेतुकलापे, दैवं पञ्चमम्—परमात्माऽन्तर्यामी कर्मनिष्पत्तौ प्रधानहेतुरित्यर्थः । उक्तं हि *सर्वस्य चाहं हृदि सन्निविष्टो मत्तस्स्मृतिर्ज्ञानमपोहनं च (१५. १५) इति । वक्ष्यति च *ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ (१८. ६१) इति । परमात्मायत्तं च जीवात्मनः कर्तृत्वं *परात्तु तच्छ्रुतेः (ब्र. २. ३. ४०) इत्युपपादितम् । नन्वेवं परमात्मायत्ते जीवात्मनः कर्तृत्वे जीवात्मा कर्मण्यनियोज्यो भवतीति विधिनिषेधशास्त्राण्यनर्थकानि स्युः । इदमपि चोद्यं **सूत्रकारेणैव** परिहृतम् *कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः (२. ३. ४१) इति । एतदुक्तं भवति—परमात्मना दत्तैस्तदाधारैश्च करणकलेबरादिभिस्तदाहितशक्तिभिः स्वयं च जीवात्मा तदाधारस्तदाहितशक्तिस्सन् कर्मनिष्पत्तये स्वेच्छया करणाद्यधिष्ठानाकारं प्रयत्नं चारभते । तदन्तरवस्थितः परमात्मा स्वानुमतिदानेन तं प्रवर्तयतीति जीवस्यापि स्वबुद्ध्यैव प्रवृत्तिहेतु-

त्वमस्ति । यथा गुरुतरशिलामहीरुहादिचलनादिफलप्रवृत्तिषु बहुपुरुषसाध्यासु बहूनां हेतुत्वं विधिनिषेधभाक्त्वं चेतीति । तत्र शास्त्रसारार्थः * सर्वगुह्यतममित्यादिना सादरं संमुखीकृत्य * मन्मना भव मद्भक्तः, * सर्वधर्मान् परित्यज्य (१८.६६) इति श्लोकद्वयेन शिष्टः । चरमश्लोकार्थश्च **तात्पर्यचन्द्रिकायां निक्षेपरक्षायां** चास्माभिः यथाभाष्यं यथासंप्रदायं च समस्तपरपक्षप्रतिक्षेपपूर्वकमुपपादितः । तत्रायमस्मदीयसंग्रहः * सुदुष्करेण शोचेद्यो येन येनेष्टहेतुना । स स तस्याह-मेवेति चरमश्लोकसंग्रहः ॥ इति । सारार्थो भक्तियोग इति **भाष्यं** त्वङ्गाधिकारे प्रपत्तिं प्रत्यपि भक्तेरङ्गित्वेन प्राधा-न्यात् ॥ २२ ॥

कर्मयोगस्तपस्तीर्थदानयज्ञादिसेवनम् । ज्ञानयोगो जितस्वान्तैः परिशुद्धात्मनि स्थितिः ॥ २३ ॥

अथ दशभिश्लोकैस्सुखग्रहणाय कर्मयोगज्ञानयोगभक्तियोगादीनां स्वरूपादिकं विविनक्ति । तत्र कर्मयोगस्य लक्षणं पूर्वमेव दर्शितमिति कृत्वा तत्तदधिकारिणां ज्ञानशक्तियोग्यतानुगुण्येन यथाधिकारं परिग्रहार्थं चतुर्थोक्तानवा-न्तरभेदाननुक्तानपि सर्वानादिशब्देन संगृह्णन्नुदाहरति । आफलोदयं सादरं निरन्तरपरिग्रहोऽत्र सेवनम् ॥ अथ तत्सा-ध्यस्य ज्ञानयोगस्याधिकारिप्रदर्शनपूर्वकं लक्षणमाह । निरन्तरचिन्तनरूपेणेति शेषः । तेन तत्फलतदुपायज्ञानाभ्यां व्यवच्छेदः ॥ २३ ॥

भक्तियोगः परैकान्तप्रीत्या ध्यानादिषु स्थितिः । त्रयाणामपि योगानां त्रिभिरन्योन्यसङ्गमः ॥ २४ ॥

अथान्तरङ्गैस्सह भक्तियोगं लक्षयति । परस्मिन् ब्रह्मण्येकान्तेन प्रीतिः परैकान्तप्रीतिः । तेन महनीयविषये प्रीतिः भक्तिरिति लक्षणं सूचितम् । * स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते (लै. उ. ९. १९) इत्याद्यनुसारेण लक्ष्य-स्वरूपं ध्यानशब्देनोक्तम् । आदिशब्देनार्चनप्रणामाद्यन्तरङ्गवर्गसंग्रहः । उक्तं च **वेदार्थसंग्रहे** * अशेषजगद्धितानु-शासनश्रुतिनिकरशिरसि समधिगतोऽयमर्थः—जीवपरयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्मैर्नित्यकर्तव्यताकपरमपुरुषचरणयुगलध्याना-र्चनप्रणामादिरत्यर्थप्रियस्तत्प्राप्तिफलः । इति । ननु—कर्मयोगेऽप्यात्मज्ञानमाराध्यप्राप्तिश्चानुवर्तते, ज्ञानयोगेऽप्यन्तःकरण-शुद्ध्यर्थं नियतं कर्म न त्याज्यम्, तदाराध्येश्वरभक्तिश्च । एवं भक्तियोगेऽपि तदितरानुवृत्तिस्सिद्धा ; अतो विभागा-नुपपत्तिरित्यत्राह । प्रधानभूते कस्मिंश्चित्कांस्यशर्करान्यायेन गुणतया इतरानुप्रवेशो न विभागभञ्जक इति भावः ॥२४॥

नित्यनैमित्तिकानां च पराराधनरूपिणाम् । आत्मदृष्टेस्त्रयोऽप्येते योगद्वारेण साधकाः ॥ २५ ॥

नन्वेवं परैकान्तप्रीतिस्त्रिष्वपि समाना, । ऐकान्त्यं चानन्यदेवताकत्वपर्यन्तम् । यथोक्तं **मोक्षधर्मे** * ब्रह्माणं शितिकण्ठं च याश्चान्या देवतास्स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ॥ (३५०. ३६) इति । **आश्वमेधिके** च * अनन्यदेवताभक्ता ये मद्भक्तजनप्रियाः । मामेव शरणं प्राप्तास्ते मद्भक्ताः प्रकीर्तिताः ॥ (१०४. ९१) इति । तत-श्चाग्नीन्द्रादिनानादेवतासंकीर्णानां वर्णाश्रमधर्माणामैकान्त्यविरोधात् त्रिष्वपि योगेषु तत्परित्यागः प्राप्त इत्यत्राह । अत्र त्रिभि-स्संगम इत्यर्थतो बुद्ध्या विभज्यान्वेतव्यम् । अयमभिप्रायः—*नियतस्य (गी. १८. ७) *यतःप्रवृत्तिः (गी. १८. ४६) * आचारप्रभवः (भा. आनु. २५४. १३९) * वर्णाश्रमाचारवता (वि. ३. ८. ९) इत्यादिभिर्वर्णाश्रमधर्मैर्नित्यकर्तव्यता-कत्वसिद्धेः, अग्नीन्द्रादिशब्दानामपि प्रतर्दनविद्यान्यायेन तच्छरीरकपरमात्मपर्यन्तत्वानुसन्धानात् * साक्षादप्यविरोधं जैमिनिः (ब्र. १. २. २०) इति न्यायेन यज्ञाग्रहराध्यायोक्त (भा. मो. ३४९) प्रक्रियया च साक्षात्प्रतिपादकत्वेन वा तत्तत्कर्मणामपि परमपुरुषाराधनत्वसंभवात्, तदनुष्ठातुरनन्याराधकत्वसिद्धैरैकान्त्यं प्रतिष्ठितमिति । एतेन कर्मयोगेऽपि

नित्यनैमित्तिकानामितिकर्तव्यतात्वं सूचितम् । तथा * सर्वेऽप्येते यज्ञविदः (४. ३०) इति श्लोके **भाष्यम्**—* [दैव] द्रव्ययज्ञप्रभृतिप्राणायामपर्यन्तेषु कर्मयोगभेदेषु स्वस्वसमीहितेषु प्रवृत्ता एते सर्वे *सह यज्ञैः प्रजास्सृष्ट्वा (३. १०) इत्यभिहितमहायज्ञपूर्वकनित्यनैमित्तिककर्मरूपयज्ञविदस्तन्निष्ठास्तत एव क्षपितकल्मषा यज्ञशिष्टामृतेन शरीरधारणं कुर्वन्त एव कर्मयोगे व्यापृतास्सनातनं ब्रह्म यान्तीति । * एवं बहुविधा यज्ञाः (४. ३२) इत्यत्र चोक्तम्—* एवं हि बहुप्रकाराः कर्मयोगाः ब्रह्मणो मुखे विततास्—आत्मयाथात्म्यावाप्तिसाधनतया स्थिताः । तानुक्तलक्षणानुक्तभेदान्कर्मयोगान् सर्वान् कर्मजान् विद्धि—अहरहरनुष्ठीयमाननित्यनैमित्तिककर्मजान् विद्धीति । * भोक्तारं यज्ञतपसाम् (५. २९) इति श्लोकमवतारयंश्चैवमाह—* उक्तस्य नित्यनैमित्तिककर्मेतिकर्तव्यताकस्य कर्मयोगस्य योगशिरस्कस्य सुशकतामाहेति ॥

अथ त्रयाणां योगानां परभक्तिजनने प्रत्यगात्मदर्शनरूपमवान्तरव्यापारं सहेतुकमाह—**आत्मेति** ॥ योगोऽत्र समाधिरूपमन्तःकरणैकाग्र्यम्, तत्साध्यसाक्षात्कारो दृष्टिः । ननु यद्यपि कर्मयोगस्य ज्ञानयोगव्यवधानमन्तरेणापि आत्मावलोकनसाधनत्वं पूर्वमेवोक्तम् ; तथाऽपि भक्तियोगस्य तत्साधकत्वमयुक्तम्, तस्यात्मावलोकनपूर्वकत्वादिति चेत्, मैवम् ; भक्तिनिष्ठाया एव पर्वभेदेन सर्वोपपत्तेः ज्ञानदर्शनप्राप्तीनामविशेषेण भक्तिसाध्यत्वमुच्यते । तच्च पर्वभेदमन्तरेण नोपपद्यते । अत एव ह्यात्मावलोकनानन्तरं * मद्भक्तिं लभते पराम् (१८. ५४) इति परशब्देन विशेष्यते । अत आत्मावलोकनरहितस्याप्यद्यतनभक्तानामिव स्तुतिनमस्कारकीर्तनादिनिष्ठया सेवारूपत्वादभिव्यक्तया भक्तिशब्दाभिलप्यया आत्मावलोकनमुपपद्यते । दर्शितश्च परावरभक्तिविभागो **वेदार्थसंग्रहे**—* सोऽयं परब्रह्मभूतः पुरुषोत्तमः निरतिशयपुण्यसञ्चयक्षीणाशेषजन्मोपचितपापराशेः परमपुरुषचरणारविन्दशरणागतिजननादाभिमुख्यस्य सदाचार्योपदेशोपबृंहितशास्त्राधिगततत्त्वयाथात्म्यावबोधपूर्वकाहरहरुपचीयमानशमदमतपश्शौचक्षमार्जवभयाभयस्थानविवेकदयाहिंसाद्यात्मगुणोपेतस्य वर्णाश्रमोचितपरमपुरुषाराधनवेषनित्यनैमित्तिककर्मोपसंहृतिनिषिद्धपरिहारनिष्ठस्य परमपुरुषचरणारविन्दयुगलन्यस्तात्ममात्मीयस्य तद्भक्तिकारितानवरतस्तुतिस्मृतिनमस्कृतियतनकीर्तनगुणश्रवणवचनध्यानार्चनप्रणामादिप्रीतपरमकारुणिकपुरुषोत्तमप्रसादविध्वस्तस्वान्तध्वान्तस्य अनन्यप्रयोजनानवरतनिरतिशयप्रियविशदतमप्रत्यक्षतापन्नानुध्यानरूपभक्त्येकलभ्यः । तदुक्तं परमगुरुभिर्भगवद्यामुनाचार्यपादैः—* उभयपरिकर्मितस्वान्तस्य ऐकान्तिकात्यन्तिकभक्तियोगलभ्यः (आ. सि) इतीति ॥२५॥

निरस्तनिखिलाज्ञानो दृष्टाऽऽत्मानं परानुगम् । प्रतिलभ्य परां भक्तिं तयैवाप्नोति तत्पदम् ॥ २६ ॥

एवं यथाधिकारं परिगृहीतैस्त्रिभिरात्मावलोकनसिद्धिद्वारा परभक्त्युत्पादनप्रकारं परभक्तेरेव प्रकृष्टायाः परमप्राप्तिसाधनत्वं च दर्शयति—**निरस्तेति** ॥ उपायविरोधिसर्वाज्ञाननिवृत्तिरिह **निरस्तनिखिलाज्ञान** इत्यनेन विवक्षिता । **परानुगम्**—परानुचरं, परशेषैकरसमित्यर्थः । यथोच्यते * नायं देवो न मर्त्यो वा न तिर्यक् स्थावरोऽपि वा । ज्ञानानन्दमयस्त्वात्मा शेषो हि परमात्मनः ॥ इति । आह च **सर्वज्ञो मन्त्रराजपदस्तोत्रे**—* दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः । अतोऽहमपि ते दास इति मत्वा नमाम्यहम् ॥ इति । प्रतिलभ्य—परमात्मसकाशात्प्राप्येत्यर्थः । तयैव—परमभक्तिरूपविपाकापन्नयेति शेषः । अत्र एवकारेण नैरपेक्ष्यमव्यवहितत्वं च सूच्यते । तत्पदं—तच्चरणम्, पद्यत इति व्युत्पत्त्या पदं मुक्तप्राप्यतया सिद्धं परमपुरुषस्याप्राकृतं स्थानम्, स्वरूपं वा । तदेतत् श्लोकद्वयेन गीयते—* ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ (१८. ५४, ५५) इति ॥ २६ ॥

भक्तियोगस्तदर्थी चेत्समग्रैश्वर्यसाधकः । आत्मार्थी चेत् त्रयोऽप्येते तत्कैवल्यस्य साधकाः ॥ २७ ॥

एवं भक्तेर्मोक्षसाधनत्वमुक्तम्, सैव मध्यमषट्कोक्तप्रकारेणाचिद्व्यपरिणामविशेषानुभवरूपस्यैश्वर्यस्यापि साधिकेत्याह—**भक्तीति** ॥ एकस्य कथं परस्परविरुद्धयोर्बन्धमोक्षयोस्साधनत्वमित्यत्रोक्तम्—**तदर्थी चेदिति** । एकस्यैव तत्तत्फलरागवशाद्विचित्रफलसाधनत्वं * सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः इत्यादिष्वपि प्रसिद्धम् । ब्रह्मादिप्रदेयैश्वर्येभ्यः समधिकत्वमिह समग्रत्वम् । दृष्टं च लोके सम्राट्सामन्तसेवयोस्सिद्धितारतम्यम् । न च हिरण्यगर्भादयो हिरण्यगर्भादिपदं प्रदातुं प्रभवन्ति, स्वयमेव ह्युक्तं ब्रह्मणा * प्राजापत्यं त्वया कर्म मयि सर्वं निवेशितम् (रा. उ. १०४. ७) इति । अन्यत्र चोक्तम्—* युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः । पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुमः ॥ (इति. स. १४. ८) इत्यादि । रौद्रस्यापि पदस्य भगवत्समाराधनप्राप्तत्वमाम्नायते—* अस्य देवस्य मीढुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥ (ऋ ५ अ. ४ अ. ७. व) इति । अस्य—स्वेतरसमस्तव्यावृत्तातिशयतया श्रुत्यादिप्रसिद्धस्य, देवस्य—अनितरसाधारणात्यद्भुताप्रतिहतक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिप्रभृतिनित्यनिरवद्यनिरतिशयान[न्द]न्तमङ्गलगुणमहोदधेः । मीढुषः—* मिह सेचने, सेक्तुः दातुः ; उदारस्येत्यर्थः । वयः—अवयवतया शाखाभूतः, शरीरतयाऽङ्गभूत इत्यर्थः । * वयाश्शाखा इति **यास्कः** । विष्णोः—सर्वव्यापनशीलतया सर्वान्तर्यामिभूतस्य नारायणस्य । * वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णम् (ना.) इति हि श्रूयते । एषस्य एषणीयस्य, प्रार्थनीयस्य, अभिमतफलार्थं याचनीयस्येत्यर्थः । [प्रभृथे] अवभृते हविर्भिः सर्वमेधाङ्गे यागे विष्णवे समर्पितैः स्वात्मपर्यन्तैर्हविर्भिः, विदे हि, विदे—लेभे, हीति—हेतौ, प्रसिद्धौ वा । रुद्रियं—रुद्रस्य संबन्धि, स्वसंबन्धीत्यर्थः । यद्वा ब्रह्मरुद्रेन्द्रादीनां प्रवाहानादित्वात् रुद्रजातिसंबन्धितया प्रथितम् । महित्वं—महिमानमित्यर्थः । एतदुपबृंहणाभिप्रायेण चोक्तं **महाभारते**—* महादेवस्सर्वमेधे महात्मा हुत्वाऽऽत्मानं देवदेवो बभूव (रा. २०. १२) इति । * एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादर्शितपन्थानो सृष्टिसंहारकारिणौ ॥ (भा. मा. ३४२. १२) इत्यादिभिश्च सर्वत्रायमर्थः प्रसिद्ध इत्यलं विस्तरेण । एवमचित्तत्त्वानुभवरूपैश्वर्यसाधकत्वं भक्तेरुक्तम्, अथ चेतनरूपात्मतत्त्वानुभवरूपापवर्गस्य कैवल्यस्य साधनत्वं तस्याः प्रदर्शयन् ज्ञानयोगकर्मयोगयोरप्यर्थस्वभावात्परमपुरुषप्रीतिद्वारेण तत्साधनत्वं युक्तमित्यभिप्रायेणाह—**आत्मेति** । अचिदनुभवादीश्वरानुभवाच्च विविक्तस्वरूपोऽनुभव इह तत्कैवल्यशब्देन विवक्षितः । अत्र च वक्तव्यं सर्वं **तात्पर्यचन्द्रिकायां** प्रपञ्चितमस्माभिः ॥ २७ ॥

ऐकान्त्यं भगवत्येषां समानमधिकारिणाम् । यावत्प्राप्ति पगर्थो चेत्तदेवात्यन्तमश्नुते ॥ २८ ॥

एवमतिशयितैश्वर्यकैवल्यभगवत्प्राप्त्यर्थिनामधिकर्तव्यायां भक्तेस्सारभूतं साधारणं रूपं निष्कर्षयति । **ऐकान्त्यमिति** ॥ ऐकान्त्यमत्रानन्यदेवताकत्वम् । * चतुर्विधा मम जना भक्ता एव हि ते [मे]स्मृताः । तेषामेकान्तिनश्श्रेष्ठास्ते चैवानन्यदेवताः ॥ (भा. आश्व.) **इत्यनुगीतावचनम्** ज्ञानिनामैकान्त्यस्य नित्यत्वाभिप्रायेण । अत्र तु यावत्स्वाभिमतफललाभमैकान्त्यं समानमित्युच्यते । एतेन कर्मयोगज्ञानयोगावस्थयोरप्यैकान्त्यं सिद्धम् ; सर्वत्र भगवत्प्राप्तिपूर्वकत्वावश्यंभावात् । एवमचिदनुभवात्स्वानुभवाच्च विलक्षणमोक्षरानुभवमभ्यर्थयमानस्याधिकार्यन्तरव्यावृत्तात्यन्तिकत्वलक्षणभक्तिवैशिष्ट्यादव्यवधानेनात्यन्तिकतत्प्राप्तिमाह—**यावदिति** ॥ फलान्तरसङ्गरूपान्तरायानुपहतश्चेदव्यवधानेन भगवन्तं प्राप्य पुनस्संसारं न प्राप्नोतीत्यर्थः । पदाभिप्रायेण तदिति नपुंसकत्वम् ॥ २८ ॥

ज्ञानी तु परमैकान्ती तदायत्तात्मजीवनः । तत्संश्लेषवियोगैकसुखदुःखस्तदेकधीः ॥ २९ ॥

अथ * ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः । सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥ (भा. मो. ३४२. ३५) **इत्यनुगीतस्य** * यावत्प्राप्ति परार्थी चेत् (गी. सं २८) इत्युक्तस्याधिकारिणोऽनन्यसाधारणं विशेषमनुष्ठानफलप्राप्तयोश्च प्रकारं तत्रैव च तात्पर्येणास्य शास्त्रस्यापवर्गशास्त्रत्वं चतुर्भिर्विवृणोति—**ज्ञानी त्विति** ॥ एतेन * ज्ञानी त्वात्मैव मे मतम्, (७. १८) * मच्चित्ता मद्गतप्राणाः (१०. ९) इत्यादिकं स्मारितम् । परमश्चासावेकान्ती चेति परमैकान्ती, एकान्तिषु उत्तम इत्यर्थः । परम एकान्तोऽनन्यत्वमस्यास्तीति वा । न केवलमनन्यदेवताकत्वम्, अपि त्वनन्यप्रयोजनत्वमप्यस्यास्तीत्यर्थः । संश्लेषोऽत्र मनोवाक्कायसाध्यतदभिमतशास्त्रचोदितसपर्यामुखेन । वियोगोऽपि तद्विच्छेदः । यदाहुर्महर्षयः * यन्मुहूर्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते । सा हानिस्तन्महच्छिद्रं सा भ्रान्तिस्सा च विक्रिया ॥ एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते । दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम् ॥ इति । **तस्मिन्नेव धीश्चिन्ता यस्य तदेकधीः** ॥ २९ ॥

भगवद्ध्यानयोगोक्तिवन्दनस्तुतिकीर्तनैः । लब्धात्मा तद्गतप्राणमनोबुद्धीन्द्रियक्रियः ॥ ३० ॥

ध्यानमिहानुचिन्तनम् । योगः—तन्मूलमवलोकनम्, विशिष्टक्षेत्रादिवर्तिनः परस्याभिगमनं वा । यदाहुः—* पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ (भाग. २. ३. २२), * योगस्तु द्विविधः प्रोक्तो बाह्यमाभ्यन्तरं तथा । बाह्यं बहिःक्रियापेक्षमान्तरं ध्यानमुच्यते ॥ इति । **उक्तिः**—शुश्रूषुभ्योऽधिकारिभ्यः प्रतिपादनम् । **वन्दनम्**—त्रिभिः करणैः प्रणाम इत्यर्थः । **स्तुतिः**—गुणकथनम् । **कीर्तनम्**—तत्तद्गुणविभवचेष्टितादिगर्भाणां तदसाधारणनामधेयानां संकीर्तनम् । **तैर्लब्धात्मा**—अन्यथा अवस्तुभूतमात्मानं मन्यमान इति भावः ; प्रशिथिलकरणकलेवरादिको भवेदिति वा । प्राणादीनां क्रियायास्तद्गतत्वं तदनुभवाभावे शैथिल्यादिति भाव्यम् । अथवा * यत्करोषि यदश्नासि (गी. ९. २७) इति न्यायेन स्वभावार्थशास्त्रप्राप्तानां कर्मणां भगवति समर्पणम् । **मनः**—संकल्पविकल्पवृत्तिकमन्तःकरणम्, तस्याध्यवसायात्मिका वृत्तिः—**बुद्धिः** । यद्वा, तदेवात्राध्यवसायवृत्तिविशिष्टं बुद्धिरित्युच्यते । यथोक्तं **शारीरकभाष्ये** * अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एवबुद्ध्यहंकारचित्तशब्दैः व्यपदिश्यते (२. ४. ५) इति । **इन्द्रिय**शब्दोऽत्र गोबलीवर्दन्यायाद्बाह्येन्द्रियविषयः ॥ ३० ॥

निजकर्मादि भक्त्यन्तं कुर्यात् प्रीत्यैव कारितः । उपायतां परित्यज्य न्यस्येदेवे तु तामभीः ॥ ३१ ॥

एवंविधस्याधिकारिणः, * सततं कीर्तयन्तो माम् (९. १४) इत्युक्तप्रक्रियया वर्णाश्रमधर्माणामपि लोपस्यादित्यत्राह—**निजकर्मेति** ॥ नित्यदास्यैकस्वभावस्य मुक्तस्येवास्यापि तत्परिचरणं तदाज्ञानुवर्तनप्रीत्यैव यथाशास्त्रं यथाधिकारं यथावसरं च सर्वं घटते । अन्यथा—* सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु (द. स्मृ) इत्यादिभिर्भगवदर्चनादावप्यनधिकारप्रसङ्गात् । तस्माद्योग्यतासिद्ध्यर्थं लब्धांशस्य शैथिल्यपरिहारार्थमुत्तरोत्तरोपचयार्थं सुदृढसिद्धोपायस्यापि स्वानुष्ठानेन परप्रवर्तनरूपभगवदाज्ञानुपालनार्थमवश्यकर्तव्यानामपि कर्मणां विधिपरामर्शमन्तरेण प्रियतमसुहृत्पुत्राद्युपलालनवत्प्रीतिरेव ज्ञानिनः प्रयोजिकेति भावः । तथा च शिष्यते—* यथा युवानं राजानं यथा च मदहस्तिनम् । यथा प्रियातिथिं योग्यं भगवन्तं तथाऽर्चयेत् ॥ (शां. स्मृ) इति । * यथा च पुत्रं दयितं तथैवोपचरेद्धरिम् ॥ इति संहितान्तरम् ॥ एवकाराभिप्रेतमन्यदपि विवृणोति—**उपायतामिति** । मुक्तव्यापारन्यायेन स्वयं स्वादुत्वात् क्षणिकस्य कालान्तरभाविफलसाधनत्वा-

नुपपत्तिदर्शनाच्च नास्य स्वव्यापारे मोक्षोपायतावुद्धिरपि स्यादिति भावः । अतस्तैस्तैराराधितो भगवानेव हि सर्वत्रोपायः, न पुनः क्षणिकं तत्क्रियास्वरूपं तत्साध्यं किंचित्तत्प्रीत्यतिरिक्तमप्रामाणिकमपूर्वादिकं वा । अतस्तस्मिन्नेव * मामेकं शरणं व्रज (१८. ६६) इति वक्तुर्युपायतावुद्धिः कार्येत्याह—**न्यस्ये**दिति । अनाश्रितानां बन्धनमाश्रितानां मोचनं च भगवतः स्वमाहात्म्यानुगुणलीलयैवेत्यभिप्रायेणाह—**देव** इति । * तं ह वै देवमिति शरण्यविषयश्रुतिसूचनार्थमत्र देव-शब्दः । अपारकारुण्यसौशील्यवात्सल्यौदार्यादिगुणनिधौ * मित्रभावेन संप्राप्तम्, (रा. यु. १८. ३) * सकृदेव प्रपन्नाय, (रा. यु. १८. ३३) * अपि चेत्सुदुराचारः (गी. ९. ३०) (गी. ९. ३१) * क्षिप्रं भवति धर्मात्मा, * मन्मना भव मद्भक्तः (९. ३४) * सर्वधर्मान्परित्यज्य (१८. ६६) इति वक्तरि तस्मिन्नेव अशरण्यशरण्ये स्वयमुपायतयाऽवस्थिते स्वापराधनतत्त्वातन्त्र्यतत्संकल्पकिंकरहिरण्यगर्भरुद्रेन्द्रादिक्षुद्रेश्वरादिनिमित्तभयं न कर्तव्यमित्यभिप्रायेणाह—**अभी**रिति ॥ ३१ ॥

एकान्तात्यन्तदास्यैकरतिस्तत्पदमाप्नुयात् । तत्प्रधानमिदं शास्त्रमिति गीतार्थसंग्रहः ॥ ३२ ॥

एवं व्यवस्थितस्य यथामनोरथमन्तरायानुपहतस्य फलसिद्धिमाह—**एकान्ते**ति ॥ उक्तं च परमैकान्तिनां परिचरण-प्रकारमनुक्रम्य तस्य निर्विघ्नत्वं **श्रीपौष्करे**—* प्रवृत्तिकालादारभ्य आत्मलाभावसानिकम् । यत्रावकाशो विघ्नानां विद्यते न कदाचन ॥ इति । एतदेवाभिप्रेत्योक्तं **श्रीसात्त्वते**—* सङ्कल्पादेव भगवान् तत्त्वतो भावितात्मनाम् । व्रतान्तमखिलं कालं सेचयत्यमृतेन तु ॥ [ज्ञात्वैवं बद्धलक्ष्येण] ज्ञात्वैव बन्धं मर्त्येन भवितव्यं सदैव हि । प्राप्तये सर्वकामानां संसार-भयभीरुणा ॥ इति । अतः * श्रूयते खलु गोविन्दे भक्तिमुद्वहतां नृणाम् । संसारन्यूनताभीताम्बिदशाः परिपन्थिनः ॥ सत्यं शतेन विघ्नानां सहस्रेण तथा तपः । विघ्नायुतेन गोविन्दे नृणां भक्तिर्निवार्यते ॥ (वि. ध. २. २५) इत्यादिकं तु पर[म]भक्त्यवस्थातः प्राचीनावस्थाविषयं नेतव्यम् । अत्र भूमविद्यायामिव ऐश्वर्याद्यवांचीनपुरुषार्थप्रतिपादनं परमपुरुषप्राप्ति-रूपप्रधानतमपुरुषार्थपारम्यसमर्थनार्थतया । उक्तं च **श्रीमात्त्वते** * प्रत्ययार्थं च मोक्षस्य सिद्धयस्संप्रकीर्तिताः । इति । अतो मोक्षसाधनत्वमेवास्य शास्त्रस्येत्यभिप्रायेणाह । **तदिति** । अत्र यथार्हं न्यासोपासनरूपप्रापकनिष्ठाप्राप्तृतया निर्दिष्टः परमैकान्ती वा तत्प्राप्यं वा तच्छब्देन परामृश्यते । अथात्र सौगतार्हतादि[मत]सगन्धानां शङ्करादिग्रन्थानां भगवदभि-प्रायविरुद्धताख्यापनाय उक्तसंग्रहप्रकारेण शिष्याणां यथावस्थितसमस्तगीतार्थप्रपञ्चावगाहनाय च निगमयति—**इतीति** । इत्थमेव सत्त्वनिष्ठसंप्रदायपरम्परागतस्समीचीनो गीतार्थः । न पुनः कुदृष्टिभिरुन्नीतः । स चैष स्वयोगमहिमचुलकितपरम-पुरुषविभूतियुगलभगवन्नाथमुनिनियोगानुवर्तिश्रीमद्राममिश्रसकाशाद्बहुशास्त्रविद्भिरस्माभिर्बहुशश्श्रुतस्य भगवद्गीतार्थप्रपञ्चस्य संग्रह इति मुमुक्षुभिस्संग्राह्यतम इति भावः ॥ ३२ ॥

सारं फल्गुनसारथीयवचसां श्रीयामुनेयोद्धृतं विस्पष्टैरिति वेङ्कटेश्वरकविर्व्याचष्ट भाष्याक्षरैः ।
यद्वादेषु कुदृष्टिबाह्यकुहनाकोलाहलास्कन्दिभिर्जङ्घालैर्जयघोषणाघणघणैर्विद्राणनिद्रा दिशः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु श्रीगीतार्थसंग्रहरक्षा समाप्ता ॥

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

[व्याख्यानविभागे द्वितीयसंपुटम्]

श्रीभगवद्रामानुजमुनिभिरनुगृहीतस्य श्रीभगवद्गीताभाष्यस्य व्याख्या

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्तदेशिकविरचिता

॥ तात्पर्यचन्द्रिका ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

॥ अथ प्रथमोऽध्यायः ॥

यतिपरिवृढो यद्वीनानामदर्शयदञ्जसा निगमपरिघन्नेदीयांसं [सुधा] निरामयमाशयम् ।
जननपदवीयातायातश्रमापहरां धियं जनयतु स मे देवः श्रीमान्यतनञ्जयसारथिः ॥

अनुचितपदवीभिश्चिन्तयित्वा प्रयातान्यलमलमतिमात्रत्रासचिन्ताविषादैः ।
उपनिषदमुदारामुद्रमन्पाण्डवार्थं शरणमुपगताच्चस्त्रायते शार्ङ्गधन्वा ॥

सन्तः सारलिहश्चित्ततमःप्रमथिनीमिमाम् । भजन्तु भगवद्गीताभाष्यतात्पर्यचन्द्रिकाम् ॥

श्रीमद्गीतां व्याचिख्यासुः, अविघ्नपरिपूरणप्रचयगमनार्थं परमाचार्यस्य संग्रहश्लोकनिर्माणमुखेन तदर्थोपदेष्टृतां तदनुवृत्तेः स्वाचार्यस्य संप्रीणनतामप्यनुसंदधानः, परमाचार्यभजनरूपं मङ्गलमाचरति—**यत्पदाम्भोरुहेत्यादि** ॥

॥ श्रीगीताभाष्यम् ॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

यच्छब्देन सर्वोत्तराचार्यगुणपौष्कल्यहेतुकां प्रसिद्धिं सूचयति । अम्भोरुहशब्देन भोग्यत्वप्रतीतेर्भक्तिरूपत्वं ध्यानस्य व्यज्यते । द्रोणाचार्यस्य एकलव्य इव यामुनाचार्यस्याहमित्यभिप्रायेण ध्यानशब्दः । सकृत्संदर्शनेन प्रायशः कल्मषाणि विध्वस्तानि, तन्मूलनिरन्तरस्मरणेन तेषां सवासनोन्मूलनं कृतमित्यभिप्रायेण **ध्यानविध्वस्ताशेषकल्मषः**

इत्युक्तम् । **वस्तुताम्**—*अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः (आ. ६) इत्युक्तप्रकाराम् । **अहं वस्तुतामुपयात** इत्याश्चर्यगर्भम् । एवमनिष्टनिवर्तनेष्टप्रापणरूपोपकारस्मृतिप्रेरितवागादित्रितयकरणकः प्रणामः शिष्यशिक्षणार्थं श्रोतृणां फलसिद्ध्यर्थं च ग्रन्थे निवेशितः । तेन स्वाचार्यवत्तदाचार्यपरम्पराया अपि भजनमत्यादरेण करणीयमित्यपि शिक्षितम् । तथा च श्रूयते, *स [चैव आ] चाचार्यवंशो ज्ञेयो भवति, आचार्याणामसावसावित्याभगवत्तः (र.ब्रा.) इति ॥

भा ॥ श्रियःपतिः, निखिलहेयप्रत्यनीककल्याणैकतानः, स्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपः, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणमहोदधिः, स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनानन्तगुणनिधिदिव्यरूपः, स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यापरिमितदिव्यभूषणः, स्वानुरूपासंख्येयाचिन्त्यशक्तिनित्यनिरवद्यनिरतिशयकल्याणदिव्यायुधः, स्वाभिमतानुरूपनित्यनिरवद्यस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणश्रीवल्लभः, स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणगणापरिमितसूरिभिरनवरताभिष्टुतचरणयुगलः, षाड्गुण्यसापरिच्छेद्यस्वरूपस्वभावः, स्वोचितविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवानन्तपरिमाणनित्यनिरवद्याक्षरपरमव्योमनिलयः, विविधविचित्रानन्तभोग्यभोक्तृवर्गपरिपूर्णनिखिलजगदुदयविभवलयलीलः, परं ब्रह्म, पुरुषोत्तमो नारायणः ब्रह्मादिस्थावरान्तमखिलं जगत्सृष्ट्वा स्वेन रूपेणावस्थितः, ब्रह्मादिदेवमनुष्याणां ध्यानाराधनाद्यगोचरः, अपारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः, स्वमेव रूपं तत्तत्सजातीयसंस्थानं स्वस्वभावमजहदेव कुर्वंस्तेषुतेषु लोकेष्ववतीर्यावतीर्य तैस्तैरागधितस्तत्तदिष्टानुरूपं धर्मार्थकाममोक्षाख्यं फलं प्रयच्छन्, भूभारावतारणापदेशेनास्मदादीनामपि समाश्रयणीयत्वायावतीर्योर्व्यां सकलमनुजनयनविषयतां गतः, परावरनिखिलजनमनोनयनहारिदिव्यचेष्टितानि कुर्वन्, पूतनाशकटयमलार्जुनारिष्टप्रलम्बधेनुककालियकेशिकुवलयापीडचाणूरमुष्टिकतोसलकंसादीन्निहत्य अनवधिकदयासौहार्दानुरागगर्भावलोकनालापामृतैर्विश्वमाप्याययन्, निरतिशयसौन्दर्यसौशील्यादिगुणगणाविष्कारेणाक्रूरमालाकारादीन् परमभागवतान् कृत्वा, पाण्डुतनययुद्धप्रोत्साहनव्याजेन परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतं भक्तियोगमवतारयामास ।

अथाभिमतपरदैवतस्य भगवतः स्वरूपरूप[गुणविभव]तादिभावनावर्णनाभ्यामर्थादभङ्गुरं मङ्गलमाचरन्, *स्वधर्मज्ञानवैराग्यसाध्यभक्त्येकगोचरः । नारायणः परं ब्रह्म गीताशास्त्रे समीरितः ॥ (गी.सं. १) इति संग्रहानुरोधेन व्याख्येयशास्त्रप्रधानप्रतिपाद्यं च सप्रकारं दर्शयन्, शास्त्रप्रामाण्यस्थापनाय वक्तुः स्वतः सर्वज्ञत्वपरमकारुणिकत्वसाधुपरित्राणोन्मुखावस्थत्वसर्वशक्तित्वादिना भ्रमविप्रलम्भप्रमादाशक्त्य [द्य] भावप्रदर्शनेनाप्ततमत्वं समर्थयन्, अपवर्गप्रधानचतुर्वर्गोपायबोधात्मकमवान्तरप्रयोजनम् अपवर्गदशानुभाव्यसप्रकारभगवत्स्वरूपं च परमप्रयोजनं प्रकाशयन्, शंकरादिपक्षे शास्त्रोपदेशारम्भाद्यनुपपत्तेर्वक्ष्यमाणायाः स्वपक्षे प्रसङ्गाभावाय शास्त्रोपदेशाद्यनुकूलजीवपरमात्मपारमार्थिकभेदादिकथनेन शास्त्रारम्भं समञ्जसयन्, कारणशोध[नो]कोपासनभेदाभेदघटकवचसां सर्वेषामपि मुख्यतां ख्यापयन्, गुणतनुजनिविभवविहरणादिविधिनिषेधोपनिषदामल्पश्रुतकुमतिविहितप्रतारणकृतकलहकूलङ्कषां विषयव्यवस्थामुपस्थापयन्, अवाप्तसमस्तकामस्यापि लीलामात्रविहितनिखिलव्यापारत्वेन **शारीरकद्वितीयाध्याय**सिद्धं विरोधपरिहारमुपलक्षयन्, जिज्ञास्यजगत्कारणपरब्रह्मभूतदेवताविशेषमपि सर्वशाखाप्रत्ययसामान्यविशेषादिन्यायैः त्रिमूर्तिसाम्यैक्योत्तीर्णव्यक्त्यन्तरत्वव्युदासेन निरूपिताकारं निर्दि-

शन्, * बहु स्याम् [छा. ६. २. ३] इति संकल्पमारभ्य सारथ्यचर्यापर्यन्तस्य सर्वस्य जगद्व्यापारस्याश्रितार्थतया व्याजलाभमात्रादपि परमपुरुषार्थभूतस्वात्मोपलम्भकाध्यात्मशास्त्रावतरणादिना च सौलभ्यातिशयमुद्घोषयन्, प्राप्यत्वोपास्यत्वैकान्तपरत्वसौलभ्यस्थापनौपयिकगुणवर्गद्वये जगत्पतित्वसर्वज्ञत्वसर्वशक्तित्वसर्वेश्वरत्वादिकं परमकारुणिकत्वशुभाश्रयत्वाश्रितार्थावतारत्वविरोधिनिरसनशीलत्वासेचनकदर्शनत्वादिकं चोदाहरन्, पञ्चमवेदपरमप्रतिपाद्यस्य भगवतो नारायणस्य प्राक्तनोदन्तं गीतोपनिषदुपदेशेन संगमयति—**श्रियः पति**रित्यादिना **अवतारयामास**इत्यन्तेन। **तत्रे**त्यादिना **चकारे**त्यन्तेन द्वितीयेन वाक्येन वुभुत्सोर्धृतराष्ट्रस्य ज्ञातांशनिष्कर्षः। **एवं ज्ञात्वापी**त्यादिना तु तृतीयेन [वाक्येन] शास्त्रोपोद्घातारम्भभूतप्रश्नसंगतिः।

अत्र दिव्यात्मस्वरूपव्यतिरिक्तं समस्तमपि नारशब्दार्थतया विविच्य दर्शयिष्यन्, तदयनं स्वरूपमन्यपदार्थतया उत्तरपदार्थतया [च] वा समासद्वयेऽपि प्रधानभूतं प्रथमं निष्कृष्य दर्शयति—**श्रियःपतिरित्यादिना। श्रो.** विशेषज्ञप्तये भर्तुरभिगम्यत्वसिद्धये। समस्तमङ्गलाप्त्यै च प्रथमं श्रीरिहोदिता॥ * एष नारायणः श्रीमान्क्षीरार्णवनिकेतनः। नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीम्॥ (ह. वि. ५४. ५०) अर्थो विष्णुरियं वाणी (वि. १. ८. १८) इत्यादिकमिह भाव्यम्। कतिपयहेयनिवर्तकतीर्थसेवादिव्युदासाय **निखिले**ति विशेषणम्। अत्र हेयशून्यत्वमर्थसिद्धम्। न हि परगतनिखिलहेयनिराकरणसमर्थः स्वगतं हेयं क्षमते। यद्वा हेयविरोधिस्वभावतया हेयशून्यमित्यर्थः। तदा **निखिल**शब्दः सर्वाचिद्गतं विकारादिकं सर्वचिद्गतं क्लेशादिकं च संगृह्णाति; कुमतिपरिकल्पितमंशभेदेनाकल्याणस्पर्शमपाकर्तुं **कल्याणैकतान**शब्दः। अत एव * ज्ञानानन्दैकस्वरूपः इत्यनेनापौनरुक्त्यम्। अथवा सामान्यविशेषनिर्देशरूपत्वादपुनरुक्तिः। यद्वा **कल्याणैकतानः**—कल्याणगुणानामेवाश्रयभूत इति वक्ष्यमाणगुणप्रपञ्चस्य संग्रहः॥

त्रिविधानां चेतनाचेतनानां पराधीनत्वादिसाम्यादेवंभूतं वस्त्वन्तरं नास्तीत्यभिप्रायेणाह—**स्वेतरे**ति। एतेन ज्ञानभोगसाम्येऽपि सर्वप्रकारसमत्वनिषेधः। * नित्यं विभुं सर्वगतम् (मु. १. १. ६) विश्वमेवेदं पुरुषः (ना.) इत्यादिप्रसिद्धं त्रिविधपरिच्छेदराहित्यं प्राधान्यतः पृथगाह—**अनन्ते**ति। **अनन्तं**—त्रिविधपरिच्छेदरहितम्। अत्रैव देशेऽस्ति, अत्र तु नास्तीति देशपरिच्छेदः; अत्र कालेऽस्ति, अत्र तु नास्तीति कालपरिच्छेदः; इदमिदं न भवतीति वस्तुपरिच्छेदः, अल्पवर्णस्वर्णवत् स्वरूपापकृष्टत्वादिकं वा। एवंविधपरिच्छेदत्रयराहित्यं नाम सर्वदेशसर्वकालव्यापित्वसर्वान्तर्यामित्वरूपम्। वस्तुपरिच्छेदराहित्यं हि समस्तवस्तुसामानाधिकरण्ययोग्यत्वादिकम्; न पुनर्मिथोविरुद्धविविधवस्तुतादात्म्यम्, स्वव्यतिरिक्तसमस्तवस्तुमिथ्यात्वं वा; तयोरत्यन्तासंभावितत्वात्। विस्तरस्तु **शतदूषण्यां** कृतोऽस्माभिः। आनन्दस्य ज्ञानविशेषत्वात् ज्ञानानन्दशब्दयोः सामानाधिकरण्यमुपपन्नम्। तर्हि आनन्दशब्दस्य विशेषशब्दत्वात् घटद्रव्यम् इत्यादिवत् आनन्दज्ञानम् इति वक्तव्यमिति चेत्, तन्न; बहुलग्रहणेन सर्वोपपत्तेः। यद्वा आनन्दशब्दस्य अनुकूलवेदनीयेषु जडेष्वपि प्रयोगात्तद्विशेषणतया ज्ञानशब्दस्य पूर्वत्वोपपत्तिः। स्वरूपं प्रतीदं विशेषणद्वयं वा॥

स्वाभाविकेति। स्वरूपापेक्षया गुणविग्रहादीनामपृथक्सिद्धिसाम्येऽपि विग्रहादिधारणनियमनादौ ज्ञानादिगुण[गण]apेक्षत्वप्रदर्शनाय उत्तरोत्तरमुग्रहत्वसिद्धये च प्रथमं गुणोक्तिः। समस्तगुणवृन्दप्रधानतया षाड्गुण्यस्य स्वरूपेणोपादानम्; इतरेषां च सौशील्यादीनां प्रभृतिशब्देन संग्रहणं कृतम्। * तवानन्तगुणस्यापि षडेव प्रथमे गुणाः। यैस्त्वयेव जगत्कुक्षावन्येऽप्यन्तर्निवेशिताः॥ (व. पु. ७५) इति ह्याहुः। संहृतिसृष्टिस्थितिहेतुभूतसंकर्षणादिव्यूहत्रये ज्ञान-

बलादिद्वन्द्वत्रिकस्य यथाक्रमं तत्तत्कार्यविशेषोन्मुखत्वेनाविर्भावविशेषात् ज्ञानबलेत्यादिक्रमविशेषः कृतः । स्वतः सर्वं सर्वदा सर्वधा साक्षात्करोति, तथा साक्षात्कृतं च सर्वं धारयति, धारयन्नेव नियच्छति, धारयन्नियच्छंश्चाशिथिलो भवति, अघटितं च घटयति, तत्र च सहकारिनिरपेक्षो न केनचिदभिभूयते किंतु सर्वाभिभूर्भवति, इति च गुणक्रमपाठ विवक्षा । स्वाभाविकत्वमनन्याधीनत्वम् । मुक्तनित्ययोरपि हि तादृशं ज्ञानादिकं तदनुगुणपरमात्मसंकल्पाधीनम् । अनवधिकत्वमत्रोत्कृष्टावधिराहित्यम् । द्वाभ्यां विशेषणाभ्यां * पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च (श्वे. ६. ८) इत्याम्नाते परत्वस्वाभाविकत्वे प्रतिगुणमन्विते प्रदर्शिते । **असङ्ख्येय**शब्देन **महोदधि**शब्देन च * यथा रत्नानि जलधेरसङ्ख्येयानि पुत्रक । तथा गुणा ह्यनन्तस्य असङ्ख्येया महात्मनः ॥ (व. पु. ७४. ४०; म.) इत्यादि स्मारितम् । कल्याणशब्देन गुणनिषेधवचनानां हेयगुणविषयत्वमुत्सर्गापवादन्यायसिद्धं सूचितम् ॥

अथ कारणोपासनादिप्रकरणेष्वस्त्रभूषणाध्यायादिषु च प्रतिपन्नं विलक्षणविग्रहयोगं दर्शयति—**स्वाभिमतेति** । अभिमतेऽप्यननुरूपत्वस्य अनुरूपेऽप्यनभिमतत्वस्य लोके दृष्टत्वात्तदुभयव्यवच्छेदाय **स्वाभिमतानुरूपेत्युक्तम्** । **एकरूपेत्यनेन** व्यूहविभवाद्यवस्थास्वपि हेयप्रत्यनीकत्वानन्दावहत्वमुमुक्षूपास्यत्वप्राप्यत्वादिस्वभावापरित्यागेऽभिहितः । यद्वा व्यूहादिपरिणामे सत्यपि परमव्योमनिलय[स्य]विग्रहस्य प्राचीनसंस्थानावस्थितिरुक्ता । सावयवत्वादनित्यम् इत्यादीनां धर्मिग्राहकबाधादिभिराभासतामभिप्रेत्य अचिन्त्यत्वोक्तिः । एको दिव्यशब्दः संस्थानवैलक्षण्यपरः, परमव्योमवर्तित्वमात्रपरो वा; इतरस्त्वप्राकृतत्वपरः । विचित्रावतारयोगः, प्रतिक्षणमपूर्ववदनुभाव्यत्वम्, वटपत्रशयनविश्वरूपाद्यवस्थागतमाश्चर्यत्वं च, **अद्भुत**शब्देन विवक्षितम् । नित्यत्वं कालानवच्छिन्नत्वम् । तथा चामनन्ति **रहस्याम्नायविदः**, * नित्याऽलिङ्गा स्वभावसंसिद्धिरिन्द्रियाकाराङ्गप्रत्यङ्गव्यञ्जनवती इति । **श्रीपोष्करे** च, *नित्यसिद्धे तदाकारे तत्परत्वे च पौष्कर । यस्यास्ति सत्ता हृदये तस्यासौ संनिधिं व्रजेत् ॥ इति । **निरवद्यत्वं** जरादिराहित्यम् । उत्तरोत्तरनिरवद्यशब्देषु पूर्वपूर्वेभ्यः सुग्रहत्वं वा विवक्षितम् । शुभाश्रयत्वभोग्यत्वाद्युपयुक्तमङ्गलगुणयोगो **निरतिशयोज्ज्वल**त्वेत्यादिनोक्तः । **निरतिशयत्वं** स्वापेक्षया उत्कृष्टराहित्यम्, अनुत्तमत्ववत् । तच्च प्रतिगुणमन्वेतव्यम् । **औज्ज्वल्यं** भास्वरत्वम् । **सौन्दर्यम्** अवयवशोभा । * सर्वगन्धः (छां. ३. १४. ४) इति श्रुतिरनुकूलगन्धविषया; सुकचन्दनादि चात्र कृतकरमित्यभिप्रायेण **सौगन्ध्य**शब्दः । सौकुमार्यं महाबलत्वेऽपि * पुष्पहासः (वि. स.) इति नाम दुहानं मार्दवम्; यथोक्तम्, * सुकुमारौ महाबलौ (रा. आ. १९. १४) इति । **लावण्यं** समुदायशोभा, यत्तदुच्यते भगवच्छास्त्रे, * विश्वमाप्याययन्कान्त्या पूर्णेन्द्युयुततुल्यया (सा. २.७०) इति । * भूयिष्ठं तेज एवाद्धिर्बहुलाभिर्मृदूकृतम् । चक्षुरानन्दजननं लावण्यमिति कथ्यते ॥ (अहि. ५२) इति ह्याहुः । यौवनं कौमारानन्तर्योपलक्षणीयः स्वभावविशेषः, न तु कौमारानन्तरभाविन्येव दशा; तद्यौवनस्थानादित्वात्, देवादिषु च केषांचित् युवत्वेनैवोत्पत्तिदर्शनात् । आदिशब्देन शुभाश्रयप्रकरणेपूक्ताः सर्वे विग्रहगुणाः संगृहीताः ॥

एवं स्वरूपतद्गुणौ विग्रहतद्गुणौ च प्रतिपाद्य, विग्रहाश्रितमाभरणवर्गमायुधवर्गं च दर्शयति—**स्वोचितेत्यादिपदद्वयेन** । पूर्वोक्तविलक्षणविग्रहविशिष्टं स्वरूपमिह स्वशब्दार्थः । अत्र * आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः । सर्वभूषणभूषार्हाः (रा. कि. ३. १५) इत्यादि भाव्यम् । किरीटहारादिरूपेण **वैविध्यम्** । एकजातीयेष्वपि मणिकाञ्चनादिद्रव्यविशेषवर्णसंस्थानादिविशेषविशिष्टव्यक्तिभेदात् **वैचित्र्यम्** । अपरिमितेत्यसंख्येयत्वोक्तेः अनन्तत्वमाश्चर्यविशेषर्य-

णम् । अनवधिकाश्चर्यरसावहत्वमनन्ताश्चर्यत्वम् ; अथवा अनन्तानि आश्चर्याणि संस्थानविशेषसौगन्ध्यसुखस्पर्शत्वादीनि येषां भूषणानां तानि तथोक्तानि । नित्यनिरवद्यशब्दौ पूर्ववत् । अपरिमितत्वमसंख्येयत्वमेव, न तु ह्रस्वदीर्घादिपरिमाणविरहः । यद्वा अनन्तेत्यसंख्येयत्वम्, अपरिमितेति च विग्रहानुरूपमहत्त्वं विवक्षितम् । भूषणायुधयोर्दिव्यत्वमप्राकृतत्वम् । पूर्वोक्तगुणगणविग्रहाभरणविशिष्टस्वरूपं स्वानुरूपेत्यत्र स्वशब्दार्थः । अमङ्क्वेयेति । पञ्चायुधत्वप्रसिद्धिः प्राधान्यादिति भावः । अचिन्त्यशक्तीति । कुठारटङ्ककुद्दालादिभिः प्रत्येकं कृच्छ्रसाध्यं सालशौलवसुधातलविदारणम् एकेन हि महेषुणा कृतमिति भावः । निरतिशयकल्याणत्वं निरतिशयानन्दावहत्वम्, भूषणकोटावप्यनुप्रवेशात् । यद्वा लोके यान्यायुधलक्षणानि मङ्गलावहतया प्रसिद्धानि, तैः सर्वैः संपूर्णत्वम् ॥

पूर्वं स्वरूपनिरूपकतया सामान्यतोऽभिहितां श्रियं विभूतिमध्येऽपि स्थितां विशेषतो दर्शयन्नर्थात्तत्स्वरूपादिकमप्याह—स्वाभिमतेति । स्वरूपं—स्वासाधारणधर्मविशिष्टं श्रियो दिव्यात्मस्वरूपम् । रूपं—दिव्यविग्रहः । रूपानन्तरो गुणशब्दस्तद्गतनिरतिशयौज्ज्वल्यसौन्दर्यादिपरः । विभवशब्दः परिजनपरिवर्हादिपरः । परत्वसौलभ्यौपयिकगुणवर्गद्वयम् ऐश्वर्यशीलपदाभ्यामुपलक्षितम् । ततश्च आदिशब्दः प्रत्येकमन्वयात् ज्ञानशक्त्यादिकं वात्सल्यादिकं च संगृह्णाति । ऐश्वर्यशीलादयः अनवधिकातिशयाश्च असंख्येयाश्च कल्याणाश्च गुणा इति विशेषणसमासः । एवंविधगुणानां गण इति षष्ठीतत्पुरुषः । ऐश्वर्यशीलादेर्गणविशेषणत्वानौचित्यात्, अनवधिकातिशयत्वस्यापि गणविशेषणत्वे प्रत्येकं गुणानामुत्कर्षस्याशाब्दत्वात्, गुणविशेषणतयैव समास उचितः । स्वरूपम्, रूपम्, तद्गुणः, विभवः, ऐश्वर्यादिगुणगणश्च, इति द्वन्द्वः । स्वरूपादिपञ्चकं भगवदभिमतानुरूपं नित्यं निरवद्यं यस्याः, सा स्वाभिमतेत्यादिगुणगणेत्यन्तेनोक्ता । स्वरूपम्, रूपम्, तद्गुणः, विभवः, ऐश्वर्यम्, शीलम्, इत्यादिगुणगण इति योजनायां स्वरूपरूपयोरपि गुणानुप्रवेशप्रसङ्गः । स्वरूपादेः सर्वस्य परमात्माभिमतत्वं व्यक्तम् । स्वरूपस्य नित्यत्वं निर्विकारतया सर्वकालवर्तमानत्वम् । निरवद्यत्वं पूर्वं परमात्मस्वरूपे प्रतिपादितप्रकारम् ; तद्वत् पितृत्वप्रयुक्तकादाचित्कोष्मलत्वादिराहित्यं वा । अनुरूपत्वं तु यथाप्रमाणं प्राग्वदेव कल्याणैकतानत्वादिकम् । * शान्तानन्त (च. ४) इत्यादिकमिह भाव्यम् । रूपस्य नित्यत्वमवतारादिदशायामपि परमपदनिलयगगवदेकासनस्थितस्य तथावस्थितत्वम् । अनुरूपत्वं च, *अस्या देव्या यथा रूपमङ्गप्रत्यङ्गसौष्ठवम् । रामस्य च यथा रूपं तस्येयमसितेक्षणा ॥ (रा.सु.१५. ५१) * विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मन स्तनुम् (वि. १. ९. १४५) इत्यादिप्रतिपादितम् । विग्रहगुणानां नित्यत्वं नाम ओज्ज्वल्यादेः कदाचिदप्यपकर्षाद्यभावः । निरवद्यत्वं च दुष्प्रेक्षतादिराहित्यम् । अनुरूपत्वं, *घनकनकद्युती युवदशामपि मुग्धदशाम् (श्रीगु. २९) इत्याद्युक्तप्रकारम् । विभवस्यानुरूपत्वं, * देवतिर्यङ्मनुष्येषु पुंस्त्वामा भगवान् हरिः । स्त्रीनाम्नी लक्ष्मीर्मैत्रेय नानयोर्विद्यते परम् (वि. १. ८. ३५) इत्यादिभिरनुसंधेयम् । अनवधिकातिशयत्ववचनादीश्वरव्यतिरिक्ताशेषगोचस्यापि तदैश्वर्यस्य ईश्वराभिमतत्वान्न द्वैराज्यादिदोषः । * अस्येशाना जगतो विष्णुपत्नी (यजु. ४. ४. १२. ५७) इति विष्णुपत्नीत्ववेषेण हि सर्वस्य जगत इयमीष्टे । * ईश्वरीं सर्वभूतानाम् (श्री.) इत्यत्र तु, यद्यपि सर्वभूतानामिति प्रतिसंबन्धिनिर्देशात् स्त्रीप्रत्ययानुसारेण ईश्वरपत्नीति विवक्षा न शक्या । तथापि वाक्यान्तरबलादर्थस्य तथात्वसिद्धिः । निरवद्यत्वं भगवदैश्वर्यैकरसत्वं निग्रहादिप्रसङ्गाभावो वा । प्रतिकूलदण्डकत्वं हि पुंस्त्वानुरूपं तद्बलभस्यैव भागः । शीलस्य नित्यत्वं महत्त्वे सत्यपि मन्दैः सह नीरन्ध्रसंश्लेषे कदाचिदपि स्वोत्कर्षप्रकाशनाभावः ; निरवद्यत्वं तत्र विप्रलम्भाभिप्रायविरहः ।

अनुरूपत्वम्, अनवधिकातिशयत्वं च, * तुल्यशीलवयोवृत्ताम् (रा. सु. १६. ५) इत्याद्युक्तप्रकारम्। एवं श्रियः पृथङ्नित्यस्वरूपरूपगुणविभवैश्वर्यशीलादिप्रतिपादनेन ज्ञानादिगुणवदपृथक्सिद्धशक्तिमात्रत्वम्, व्यूहविशेषत्वम्, स्वरूपैक्यम्, अन्यदन्यदपि वदन्तो निरस्ताः। शक्तित्ववादास्तु पत्नीत्वेन कार्योपयुक्तविशेषणत्वाभिप्रायाः। प्रयुज्यते हि शास्त्रेषु सर्वत्र स्त्रीपुंसात्मकेषु द्वन्द्वान्तरेष्वपि स्व्यंशे शक्तिशब्दः। एकत्ववादास्तु समस्तप्रपञ्चप्रतियोगिकैकशेषित्वाश्रयत्वेन, विशिष्टैक्येन, आत्महविः प्रत्युद्देश्यैकदेवतात्वादिवेषेण वा निर्वाह्याः। अत एव हि * व्यापकावतिसंश्लेषादेकतत्त्वमिवोदितौ (अहि. ४. ७८) इत्युच्यते। उक्तं च **श्रीराममिश्रैः षडर्थसंक्षेपे** * उभयाधिष्ठानं चैकं शेषित्वम् इत्यादि। एवंविधाया भगवत्याः श्रियो वल्लभः प्रियतमः, श्रीः वल्लभा यस्येति वा। न चाभिमतशब्द[:]पुनरुक्तिः, प्रत्येकसमुदायविषयतयाऽभिमतत्वातिशयव्यञ्जनपरत्वादिति ॥

अथ नित्यपरिजनविशिष्टतां दर्शयति—**स्वसङ्कल्पेति।** स्वरूपं धर्म्यंशः। स्थितिः अप्रच्युततयाऽवस्थानम्। प्रवृत्तिः व्यापारः। नित्यानां स्वरूपस्थित्योः परमात्मसंकल्पानुविधायित्वं नाम तन्नित्येच्छासिद्धत्वम्। तच्चानिच्छासंभवे निवर्तयितुं शक्यतामात्रम्। तेषु त्वनिच्छायाः कदाचिदप्यभावात् स्थितेः सदातनत्वम्। इदं च परमात्मसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तित्वं बद्धमुक्तप्रकृतिप्राकृतकालादिष्वपि भाव्यम्। तच्च सर्वं प्रपञ्चयिष्यते। **शेषता**—शेषवृत्तिरित्यर्थः। अशेषशेषता यथाभिमताकारता। अत्र * शरा नानाविधाश्चापि धनुरायतविग्रहम्। अन्वगच्छन्त काकुत्स्थं सर्वे पुरुषविग्रहाः॥ (रा. उ. १०१. ७) * निवासशय्यासनपादुका (स्तो. ४०) इत्यादि द्रष्टव्यम्। एकैककृतस्य वा कैङ्कर्यस्य मिथः सर्वार्थतयाऽनुसन्धानात् सर्वैऽप्यस्य सर्वकैङ्कर्यकारिणो भवेयुः। यद्वा स्वरूपस्थितिप्रवृत्तिभेदा एव अशेषशब्देन संगृह्यन्ते; तेषामशेषाणां परमात्मानं प्रति शेषता शेषभावः। एवमुक्तप्रकारायामशेषशेषतायामितरपरित्यागेन तदेकावलम्बिनी प्रीतिरेव रूपं—स्वरूपं स्वभावो वा येषां ते अशेषशेषतैकरतिरूपाः। ते च सर्वे नित्याः। स्वरूपनित्यत्वस्य सर्वात्मसाधारणत्वात् मुक्तवत्कदाचिदाविर्भूतस्वरूप[भाव]त्वमिह नित्यशब्देन व्युदस्यते, नित्यासंकुचितज्ञानादिगुणा इत्यर्थः। तत एव **निरवद्याः**—क्लेशकर्मस्वातन्त्र्याभिमानादिदोषात्यन्ताभाववन्तः। एषां ज्ञानस्य निरतिशयत्वं परमात्मज्ञानतुल्यत्वम्। क्रियाया निरतिशयत्वं स्वच्छन्दानन्तकैङ्कर्यात्मकत्वम्। ऐश्वर्यस्य निरतिशयत्वं परमात्मकैङ्कर्योपयोगिस्वेच्छागृहीतशरीरेन्द्रियादिनियमने निर्विघातत्वम्; न तु सर्वविषयत्वम्, * जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च (ब्र. ४. ४. १७) इति न्यायात्। अत्र निरतिशयज्ञानक्रियैश्वर्यादिरनन्तो गुणगणो येषामिति विग्रहः। ते च अपरिमिताः असङ्ख्येयाः सूरयः। *सदा पश्यन्ति सूरयः.....तद्विप्रासो विपन्यवो जागृवाँसः समिन्धते (सा. वे. ३. १८. २. ४) इत्याद्यनुसन्धानेनाह—**अनवरताभिष्टुतचरणयुगल इति।** विपन्यवः—विशेषेण स्तुतिशीलाः। * पण व्यवहारे स्तुतौ च, पन च इति हि धातुपाठः। अभिष्टुतेत्यभिर्विशब्दार्थः। स्तुतिशीलत्वादनवरतत्वोक्तिः॥

स्तुतिविषयत्वप्रसक्तमैश्वर्यादेरियत्तारूपं परिच्छेदमपाकरोति—**वाङ्मनसेति।** एतेन *यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम् (के.) * सो अङ्ग वेद यदि वा न वेद (ऋ. ८. ७. ११. ११; यजु. २अ. ८.९.६) * यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह (आ.) इत्यादीनां वाङ्मनसयोरवेद्यत्वार्थतां वदन्तो निरस्ताः। तथा सति * तद्विजिज्ञासस्व (भृ.) * मनसा तु विशुद्धेन * ब्रह्मवित् (आ. १) * आनन्दं ब्रह्मणो विद्वान् (आ. ४) इत्यादिभिः, *यतो वाचो निवर्तन्ते (आ.४) इत्यत्र यच्छब्दादिभिश्च, विरोधप्रसङ्गः। विरोधपरिहाराय मुख्य-

वृत्तिनिषेधविषयतया व्यवस्थाप्यत इति चेत्, आगतोऽसि पन्थानम् ; विषयव्यवस्था तु यथाप्रमाणमस्माभिः क्रियत इति विशेषः । वाङ्मनसेत्यादिकं परमव्योमविशेषणतया केचिद्व्याचक्षते, **श्रीवैकुण्ठगद्ये** तथोक्तेः । वयं तु अत्रैव षष्ठाध्याये * योगिनामपि (४७) इति श्लोके * वाङ्मनसापरिच्छेद्यस्वरूपस्वभावम् इति परमात्मविशेषणत्वेनैवाभिधानात्, कुमति-निरासार्थमपेक्षितत्वाच्च, अत्रापि तथा विवक्षामाचक्ष्महे ॥

स्वोचितेत्यादि । अत्राप्यनन्ताश्चर्यशब्दः पूर्ववत् । **विभवशब्देन** वाहनरत्नादिसंग्रहः । अनन्तपरिमाणत्वं तिर्यगूर्ध्वादिदेशापेक्षया, अधस्तात् प्रकृत्यवच्छिन्नत्वात् । अनन्तशब्दावृत्तिः प्रत्येकमानन्त्ये तात्पर्यानिरेकात् । **नित्यत्वं** प्राकृतव्योमवल्लयरहितत्वम् । **निरवद्यत्वं** शुद्धसत्त्वमयत्वेन रजस्तमस्तत्कार्यराहित्यम् । **अक्षरत्वम्** अंशतोऽपि सृष्टि-संहारविरहः । परमशब्देन परनिर्दिष्टप्रक्रियया प्राकृतव्योमव्यवच्छेदः । एतेन *तदक्षरे परमे व्योमन् (ना.) इत्यादि-श्रुतिसूचनम् । एवं नित्यविभूतियोग उक्तः ॥

अथ लीलाविभूतियोगप्रतिपादनमुखेन *यतो वा इमानि (भृ.१) इत्यादिवाक्यैः, *जन्माद्यस्य यतः (ब्र.१.१.२) इति सूत्रेण च, निरूपितं जिज्ञास्यब्रह्मलक्षणयोगं दर्शयति—**विविधेति** । शब्दस्पर्शादिरूपेण दिव्यादिव्यादिभेदेन चात्र भोग्यवैविध्यवैचित्र्ये । * इमानि इत्यादिश्रुत्या हस्तप्रसारणेन तत्तत्प्रमाणसिद्धसमस्तकार्यप्रकारनिर्देशात् बहुवचनासङ्को-चाच्च भोक्तृणां ज्ञानमुखादितारतम्यहेतुभूतं देवादिरूपेण वैविध्यम्, तदवान्तरविधाभूतब्राह्मणादिरूपेण वैचित्र्यं च, दर्शितम् । यद्वा विविधशब्द एव [सा]अवान्तरभेदं समस्तं वैविध्यं संगृह्णाति । विचित्रशब्दस्त्वाश्चर्यरूपत्वेन मननाशक्य-त्वपरः, * मेघोदयः इत्यारभ्य * विष्णोर्विचित्राः प्रभवन्ति मायाः (स. भा. ३०३) इत्यादिवत् । ज्ञानमुखादितारतम्या-भावेन परमव्योम्नि भोक्तृवैविध्याभावात्परभोग्यनैकरसानां नित्यसूरीणां पृथगुक्तत्वाच्च तत्र भोक्तृवर्गानुक्तिः । भोगोपकरण-भोगस्थानान्यत्राप्यर्थसिद्धानि । एवंविधायाश्च विषमसृष्टेर्विचित्रानादिचेतनकर्मप्रवाहमूलत्वान्न वैषम्यादिदोषः । **निखिल-शब्देन** कतिपयसृष्ट्यादिनिमित्तोपादानभूतचतुर्मुखादिव्यावर्तनम् । **उदयशब्देन** सद्द्वारकाद्द्वारकसमस्तसृष्टिसंग्रहणम् । एवं **विभवशब्देन** विष्ण्ववतारान्तर्यामित्वादिकृतविविधस्थितिसंग्रहः । **लयोऽपि** नित्यनैमित्तिकादिरूपः । निखिल-सृष्ट्यादिष्वन्यतमस्यैव ब्रह्मलक्षणत्वे संभवत्युपात्तव्यतिरिक्तयोः किमन्यः कर्तेति शङ्काव्यावर्तनाय सृष्ट्यादित्रयोपादा-नम् । जगद्भूतानां त्रयाणामुदयविभवलयानामेतद्भूतलीलात्वेन व्यपदेशादुपादानत्वं सूचितम् । जगदाकारेण जायमान-त्वादीन्यस्य लीलाः, * बहु स्यां प्रजायेय (आ. ६., छा. ६. २. ३) इति हि जगत्कारणस्य तस्य संकल्पः । सूक्ष्म-चिदचिद्विशिष्टस्यैवोपादनत्वात् बालस्येव युक्त्वादिप्राप्तौ न स्वरूपगतो विकार इति निर्विकार[त्व]श्रुत्यविरोधः । अवाप्त-समस्तकामस्य कथं जगद्व्यापार इति शङ्कां परिहरता **लीलाशब्देन** निमित्तत्वमपि तस्यैवेति सिद्धम् । एतेन निमित्तो-पादानभेदं वदन्तो निरस्ताः । न च लोके निमित्तोपादानभेददर्शनमात्राद्विरोधः, लौकिककारणविलक्षणत्वाच्छ्रुतिसिद्धस्य ब्रह्मणः । अन्ततो वैशेषिकादिभिरपि घटेश्वरगतसंयोगविभागद्वित्वद्विपृथक्त्वादिकार्येष्वीश्वरस्यैव निमित्तत्वमुपदानत्वं च अभ्युपगतमिति न कश्चिदस्मन्मते दोषः । तथा बुद्धिपूर्वकस्वसुखोत्पादनादावपि द्रष्टव्यम् ॥

एवं ब्रह्मलक्षणयोगान्नारायणस्यैव परब्रह्मत्वं दर्शयन्, सद्ब्रह्मात्मादिसामान्यशब्दानां नारायणाख्यविशेषपर्यवसानं च सूचयन्, *नारायण परं ब्रह्म (ना.) इति श्रुत्यनुकारिणः * नारायणः परं ब्रह्म गीताशास्त्रे समीरितः । इति [गीतार्थ]-शास्त्रार्थसंग्रहश्लोकस्य प्रपञ्चनमिह क्रियत इति ज्ञापयन्, उक्तैः प्रकारैः समाख्यात्रयमस्यैव संगतमिति चोदाहरन्,

उक्तेष्वर्थेषु वा समास्त्यात्रयं प्रमाणयन्, *परं ब्रह्म परं धाम पवित्रं परमं भवान् (गी. १०. १२) *प्रथितः पुरुषोत्तमः (गी. १५. १८) *एष नारायणः श्रीमान् (ह. वि. ५४. ५०) इत्यमीषां कृष्णैकविषयत्वं च दर्शयन्, अभेदश्रुतीनां भेदश्रुतीनां घटकश्रुतीनां कारणशोधकोपासनश्रुतीनां च निष्कृष्टमर्थं संगृह्णाति- **परं ब्रह्म पुरुषोत्तमो नारायण इति ।** सर्वसामानाधिकरण्यं सर्ववैलक्षण्यं च सर्वान्तर्यामित्वेनोपपन्नमिति पदत्रयाभिप्रायः । अत एव अत्र प्रपञ्चबाधभेदाभेदादिना सामानाधिकरण्यं वदन्तो निरस्ताः । *एको ह वै नारायण आसीन्न ब्रह्मा नेशानः इत्यारभ्य *तत्र ब्रह्मा चतुर्मुखोऽजायत (म. उ. १.१.१–१.२.१) *यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै (श्वे.६. १८) इत्याद्युक्तकरणकलेबरप्रदानहितोपदेष्टृत्वादिकमभिप्रेत्याह–**ब्रह्मादि स्थावरान्तमखिलं जगत् सृष्टेति ।** ब्रह्मसृज्यस्य स्थावरपर्यन्तस्य जगतः परमात्मसृज्यत्ववचनात् ब्रह्मादिकर्तृकितः परमात्मा तत्तत्सृजतीति सिद्धम् ॥

अथ स्वेच्छयावतारं तत्प्रयोजनं च वक्तुमनवतारदशायां तत्प्रयोजनानिर्वृत्तिं दर्शयति–**स्वेनेत्यादिना अगोचर इत्यन्तेन ।** अगोचरत्वम् अव्यक्तत्वात् । यथोच्यते–*यैर्लक्षणैरुपेतस्त्वं हरिरव्यक्तरूपधृत् । तैर्लक्षणैरुपेतौ हि व्यक्तरूपधरौ युवाम् ॥ (भा. भो. ३४४. ४८, ४९) इति । ब्रह्मादिदेवेति वचनात् *तदुपर्यपि बादरायणः संभवात् (ब्र. १. ३. २५) इत्यधिकरणेऽर्थित्वसामर्थ्याभ्यां समर्थितं ब्रह्मरुद्रेन्द्रादिदेवजातीनामपि परमात्मोपासनाधिकारित्वं सूचितम् । स्वप्रयोजनाभावे कथं प्रवर्तेतेत्यत्राह–**अपारेति ।** स्वार्थनिरपेक्षया परदुःखासहिष्णुतया, महत्त्वाप्रतिरुद्धया मन्दैः सह निरन्तरसंश्लेषरसिकतया, स्वाभाविकेन परदोषनिरस्कारिणा संबन्धविशेषेण, पिशाचगोपालगोपिकादिभ्यः स्वात्मसमर्पणे कृतेऽपि कियद्दत्तमिति भावयता महौदार्येण च, प्रेरितोऽवतरतीत्यर्थः । अस्त्रभूषणाध्यायोक्तं विग्रहं *समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः । तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥ इति परामृश्य, *समस्तशक्तिरूपाणि तत्करोति जनेश्वर । देवतिर्यङ्मनुष्याद्यैश्चेष्टावन्ति स्वलीलया ॥ (वि. ६.७.७०, ७१) इत्युक्तप्रकारेणावतारविग्रहस्याप्यप्राकृतपरमपदनिलयविग्रहांशविशेषत्वं दर्शयितुं **स्वमेव रूपम्** इत्याद्युपन्यस्तम् । *नैष गर्भत्वमापेदे न योन्यामवसत्प्रभुः (भा. स. ६१.३२) *न तस्य प्राकृता मूर्तिर्मांसमेदोस्थिसंभवा (वायु. १. ३४. ४०) *न भूतसंघसंस्थानो देहोऽस्य परमात्मनः (भा.) इति चोच्यते । *अजोऽपि सन् (गी. ४. ६) इत्यादि वक्ष्यमाणमनुसंदधान आह–**स्वस्य भावमजहदेवेति ।** *यदा यदा हि धर्मस्य ग्लानिर्भवति भारत, *संभवामि युगे युगे (गी. ४. ७, ८.) इत्यादिवीप्सार्थम्, *बहूनि मे व्यतीतानि जन्मानि (गी. ४.५) इत्याद्यर्थं च भावयन्नाह–**तेषुतेषु लोकेष्ववतीर्यावतीर्येति ।** *स उ श्रेयान्भवति जायमनः (यजु. ३. ६. १. ३) *यस्यावतारूरूपाणि समर्चन्ति दिवौकसः । अपश्यन्तः परं रूपम् (वि. १. १०. ८०) इत्यादिकं स्मारयितुम् **अवतीर्यावतीर्य नैर्मत्यैरगधितः** इत्युक्तम् । **तत्तदिष्टानुरूपम्** इति वचनात् फलप्रदाने वैषम्यदोषः परिहृतः । *तस्मिन्प्रसन्ने किमिहास्त्यलभ्यम् (वि. १. १७. ९१) इत्यादि चात्रानुसंधेयम् ॥

एवमवतारसामान्यं तत्प्रयोजनं च दर्शितम् । अथ तद्विशेषं प्रस्तुतान्वितं दर्शयति–**भूभारावतारणेत्यादिना ।** भूभारावतारणं व्याजमात्रम् । सर्वसमाश्रयणीयत्वं तु साक्षादुद्देश्यम् । दुष्कृद्विनाशस्य साधुपरित्राणाख्यमहाप्रयोजनानुषङ्गिकत्वात् **भूभारावतरणापदेशेन** इत्युक्तम् । **अस्मदादीनामिति**–अयोगिनामित्यर्थः । सर्वसमाश्रयणीयत्वं विवृणोति– **सकलेति ।** *यन्न देवा न मुनयो न चाहं न च शंकरः । जानन्ति परमेशस्य तद्विष्णोः परमं पदम् ॥ (वि.१.९.५५)

इत्यादिप्रतिपादितप्रकारेण महायोगिनां परिशुद्धेन मनसाऽपि दुर्ग्रहः सौलभ्यातिरेकात् मनुष्याणां तत्राप्यागोपालमवधीरितविरुद्धाविरुद्धविभागानां मांसचक्षुषा ग्राह्योऽभूदिति भावः । एवमवतरणनयनविषयत्वयोर्न केवलमाराध्यत्वमेव प्रयोजनम्, किंतु तदनुभवोऽपीत्यभिप्रायेणाह—**परावरेति** । पराः—उपासनसमर्थाः ब्रह्मरुद्रभीष्माकूरादयः । अवरास्तु आभीरप्रभृतयः । **निखिलजनेति** स्त्रीपुंसादिविभागोऽपि नास्तीत्यभिप्रेतम्, *पुंसां दृष्टिचित्तापहारिणम् (रा. अ. ३.२९) इतिवत् । दिव्यचेष्टितानि नवनीतनटनादीनि । एवं विशेषणद्वयं साधुपरित्राणप्रकारविशेषतयाऽभिहितम् । अथ साधुपरित्राणानुषङ्गिकं दुष्कृद्विनाशनप्रकारं प्रपञ्चयति—**पूतनेति** । भगवतो बलभद्रस्याप्येतदंशरूपत्वात् प्रलम्बमुष्टिकादिहननमप्येतत्कर्तृकतयोपात्तम् । पुनः साधुपरित्राणान्तर्गतां भोग्यतां दर्शयति—**अनवधिकेति** । प्रियतमस्वरूपसंदर्शनं धारकम्; तच्चेष्टितदर्शनं पोषकम्; तेन सहालापादिः भोगप्रकारः; इति नयनविषयत्वचेष्टितालोकनादिविभागनिर्देशाभिप्रायः । दया—स्वार्थनिरपेक्षा परदुःखनिराकरणेच्छा; सौहार्दं—हितैषित्वम्; अनुरागः—प्रीतिः । एवं साधुपरित्राणं तदौपयिकं दुष्कृद्विनाशनं चोक्तम् । अथ धर्मसंस्थापनम् आराध्यस्वरूपप्रदर्शनेन देशकालविप्रकृष्टानामपि परम्परयानुग्राहकेणोपदेशेन च दर्शयति—**निरतिशयेत्यादिना** वाक्यशेषेण । एतच्चाखिलं *परित्राणाय (४. ८) इति श्लोके व्याख्यास्य[ति]ते । तत्र हि साधूनां लक्षणस्वभावादिकमुक्त्वाऽनन्तरमेवमुक्तम्—*मत्स्वरूपचेष्टितावलोकनालापादिदानेन तेषां परित्राणाय, तद्विपरीतानां विनाशाय च क्षीणस्य वैदिकस्य धर्मस्य मदाराधनरूपस्य आराध्यस्वरूपप्रदर्शनेन स्थापनाय च, देवमनुष्यादिरूपेण युगेयुगे संभवामि इति । उपदेशतो धर्मस्थापनं व्यासादिमुखेनापि कर्तुं शक्यम् । आराध्याकारप्रदर्शनेन स्थापनं तु स्वेनैवावश्यकर्तव्यमिति भावः । बाह्यान्तरकरणग्राह्यगुणवर्गद्वयप्रदर्शनतया सौन्दर्यसौशील्ययोर्ग्रहणम् । **परमभागवतान् कृत्वेति** । भगवद्भक्तिरूपपरमधर्मनिष्ठान् कृत्वेत्यर्थः ॥

एवं प्राचीनभगवच्चरितस्य श्रीमद्गीतार्थोपदेशेन संगतिः प्रदर्शिता । **पाण्डुतनययुद्धप्रोत्साहनव्याजेनेति** तु भारतकथासंगतिः । अत्र व्याजशब्देन *अस्थानस्नेहकारुण्यधर्माधर्मधियाकुलम् । पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम् ॥ (गी. सं. ५) इत्यत्र *उद्दिश्य इति पदस्याभिप्रायो विवृतः । **परमपुरुषार्थ** इत्यादिना शास्त्रस्य परमप्रयोजनाभिधानम् । तेनात्र भूमविद्यायामिवात्मानुभवोक्तिरप्यैश्वर्योक्तिवद्भगवदनुभवापेक्षया निकृष्ट[पर्व]पुरुषार्थत्वज्ञापनायेति सूचितम् । **मोक्षसाधनतयेति** साध्यसाधनभावनिर्देशेन संसार्यात्मन एव नित्यमुक्ति वदन्तो निराकृताः । **वेदान्तोदितं**—वेदान्तविहितम्, न तु वेदान्तोत्पादितमित्यर्थः । एतेन अविधेयज्ञानवादिनो निरस्ताः । वेदान्तोदितस्यार्थस्योपबृंहणमत्र क्रियत इति भावः । **स्वविषयमिति**—मोक्षार्थोपासनवाक्यानामनन्यपरतया साक्षात्परमपुरुषाराधनविषयत्वमेव । अथर्वशिरःप्रतर्दनविद्यादिषु रुद्रेन्द्रादिभिः स्वस्य मुमुक्षूपास्यत्ववचनेऽपि रुद्रेन्द्राद्यन्तर्यामिभूतः परमात्मैवोपास्य इति *शास्त्रदृष्ट्या तूपदेशो वामदेववत् (१. १. ३१) इति **सूत्रकारैरेव** प्रतिपादितमिति भावः । एतेन वेदान्तोदितस्वमाहात्म्यवादिनो भगवतः *स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः (काव्या. १.) इति सूचितम् । **स्वविषयमिति** भक्तियोगस्य सिद्धरूपपरमप्रतिपाद्यानुबन्धित्वं दर्शितम् । प्रधानविधेयांशनिष्कर्षाय **भक्तियोगमित्युक्तम्** । **ज्ञानकर्मानुगृहीतत्वं** ज्ञानकर्मसाध्यत्वम् । एतेन समुच्चयादिपक्षा निरस्ताः । वैराग्यस्य संग्रहश्लोके पृथगुक्तस्यापि निष्ठाद्वयानुप्रविष्टत्वादिहानुक्तिः । एवमुपायोपेयात्मकमुभयमपि शास्त्रप्रतिपाद्यमिति संग्रहश्लोकतात्पर्यमुक्तं भवति । **मोक्षसाधनतया वेदान्तोदितं भक्तियोगमिति** वचनात् उपासनस्यार्वाचीनब्रह्मप्राप्त्यादिसाधनत्वं वाक्यार्थज्ञानमात्रस्य

मोक्षसाधनत्वं च वदन्तः प्रत्युक्ताः । ज्ञानध्यानादिसामान्यवचसां भक्तिरूपविशेषे पर्यवसानमिति च भावः । एतच्चाखिलमुत्तरत्र व्यक्तं भविष्यति ॥

भा ॥ तत्र पाण्डवानां कुरूणां च युद्धे प्रारब्धे स भगवान् पुरुषोत्तमः सर्वेश्वरेश्वरो जगदुपकृतिमर्त्यः आश्रितवात्सल्यविवशः पार्थं रथिनमात्मानं च सारथिं सर्वलोकसाक्षिकं चकार ।

एवं शास्त्रं संगमय्य, शास्त्रोपोद्घातं संगमयितुं **पाण्डुतनयेत्यादिना** सूचितं पूर्ववृत्तान्तं प्रकटयन्, सारथित्वेनावस्थायाचार्यकृत्यकरणे प्रतारकत्वशङ्कां च वारयति—**तत्रेति** । तत्र प्रथमं भक्तियोगमवतारयितुमेवं चकारेत्यर्थः; यद्वा तत्र युद्धे प्रारब्धे इत्यन्वयः; भक्तियोगावतरणव्याजभूतप्रोत्साहनविषयभूते युद्धे प्रारब्धे इत्यर्थः । भगवतोऽवतारदशायामपि पूर्णत्वस्वाच्छन्द्यादिकं वात्सल्यादिमूलसारथ्याद्यपकृष्टकर्मानुष्ठानस्य गुणरूपत्वादिकं च प्रदर्शयितुं **स भगवान्** इत्याद्युक्तम् । **स भगवान् पुरुषोत्तमः सर्वेश्वरेश्वरः** इति चतुर्भिः पदैः स्वरूपगुणवैलक्षण्यविभूत्यादिप्रतिपादनेन परत्वसंग्रहः । सर्वेश्वरेश्वरः इत्यनेन * सर्वेश्वरेश्वरः कृष्णः (वि. ध. ७५. ४३) इत्यादिवचनोक्तं स्वाच्छन्द्यं जगत्कुटुम्बित्वं च ज्ञापितम् । **जगदुपकृतिमर्त्य आश्रितवात्सल्यविवशः** इति सौलभ्यसंग्रहः । अविप्रलम्भकत्वं चानेन व्यञ्जितम्; * जगतामुपकाराय (वि. ६. ७. ७२) * जगदुपकृतिमर्त्यं को विजेतुं समर्थः (वि. ५. ३०. ८०) इत्यादिकमिह स्मारितम् । जगदुपकृतिमर्त्यत्वेऽप्युत्कृष्टचरितं परित्यज्य निकृष्टसारथ्यादिकृत्यं किमर्थं कुरुते इत्यत्रोक्तम्—**आश्रितवात्सल्यविवशः** इति । **पार्थं रथिनमात्मानं च सारथिमिति**—अपकृष्टं पार्थमुत्कृष्टकृत्ये स्वयमेवावस्थाप्य [स्वा]आत्मानमुत्कृष्टं निकृष्टकृत्ये चकारेति भावः । पार्थशब्देन वात्सल्यौपयिकलौकिकसंबन्धविशेषोऽपि सूचितः; पितृष्वसा हि पृथा भगवतः । **सर्वलोकसाक्षिकमिति**—न चासौ निकृष्टकृत्यं सापत्रपो रहस्ये कृतवान्; अत इदमपि आश्रितवात्सल्यस्य नैरपेक्ष्यस्य अर्थापह्नवाद्यसंभवस्य च लिङ्गमिति भावः । यद्वा सर्वेषां स्वसमाश्रयणेन पुरुषार्थलाभाय स्वस्य शास्त्रैकसमधिगम्यमाश्रितपारतन्त्र्यं सर्वलोकप्रत्यक्षं चकारेति भावः ॥

भा ॥ एवं ज्ञात्वाऽपि सर्वात्मनाऽन्धो धृतराष्ट्रः सुयोधनविजयबुभुत्सया सञ्जयं पप्रच्छ ॥

॥ श्रीभगवद्गीतायां प्रथमोऽध्यायः ॥

धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ १

सञ्जय उवाच—

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा । आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २
पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३
अत्र शूरा महेष्वासा भीमार्जुनसमा युधि । युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४
धृष्टकेतुश्चेकितानः काशीराजश्च वीर्यवान् । पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् । सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६
अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम । नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ॥ ७
भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः । अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः । नानाशस्त्रप्रहरणास्सर्वे युद्धविशारदाः ॥ ९
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १०
अयनेषु च सर्वेषु यथाभागमवस्थिताः । भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११

भा ॥ दुर्योधनः स्वयमेव भीमाभिरक्षितं पाण्डवानां बलमात्मीयं च भीष्माभिरक्षितं बलमवलोक्य, [आत्मीय]आत्मविजये तस्य बलस्य पर्याप्ततामात्मीयस्य बलस्य तद्विजये चापर्याप्ततामाचार्याय निवेद्य, अन्तर्विषण्णोऽभवत् ॥ १—११ ॥

अथ * त्वां शीलरूप (स्तो. ५) इत्यादिक्रमेणानन्यसाधारणशीलरूपचरितपरमसत्त्वप्रबलशास्त्रदेवतापारमार्थ्यवेदिशान्तनवसञ्जयादिवचनैरप्यासुरप्रकृतीनां यथावदवगन्तुमशक्यतां प्रदर्शयन्, गीतोपनिषत्प्रस्तावनार्थं प्रथमश्लोकमवतारयति—**एवमिति** । श्रियःपतिरित्यादिना पूर्वोक्तप्रकारेणेत्यर्थः । **सर्वात्मनेति**—न केवलं चक्षुषा, परत्रेह च हितमजानता मनसाऽपीत्यर्थः । एवंविधमान्ध्यं सुयोधनविजयाभिलाषेण प्रश्ने हेतुः । अत्र * मामकाः इति प्रथमोक्त्या ममकारेण, * यत्र योगेश्वरः (१८. ७८) इत्यादिप्रतिवचनप्रक्रियया च, सूचितं प्रष्टुरभिप्रायं दर्शयितुं **सुयोधनेत्यादिकमुक्तम् । सञ्जयमिति** । व्यासप्रसादलब्धसकलभारतसमरवृत्तान्तसाक्षात्कारं *शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् (भा. उ. ६८. ५) इत्यादिवादिनम् । एवं यथार्थदर्शित्वयथादृष्टार्थवादित्वाभ्यामाप्ततमतया निर्णीतमिति भावः । **पप्रच्छ**, समरवृत्तान्तमिति शेषः ॥

धर्मक्षेत्रे—धर्मस्य स्थानभूते, समराध्वरसमुचिते इति भावः । **कुरुक्षेत्रे**—पाण्डवधार्तराष्ट्राणां स्वकूटस्थनामोपलक्षितत्वेन बहुमानविषय इति भावः । **युयुत्सवः समवेताः**—मिथः प्रत्यनीकरूपेण व्यूढा इत्यर्थः । **च, एव**, इत्यव्ययद्वयमनतिरिक्तार्थम्; यद्वा समस्तभूमण्डलवर्तिनां राज्ञां तत्र समाहारेऽपि तादर्थ्याद्वर्गद्वयमेव तथाभूदित्येवकाराभिप्रायः । **अकुर्वत** इत्यात्मनेपदेन कर्त्रभिप्रायक्रियाफलविषयेण स्वार्थतोक्ता ॥

एवं सुयोधनविजयबुभुत्सया कृतस्य प्रश्नस्य * यत्र योगेश्वरः इति साक्षादुत्तरं वक्ष्यन्, तत्प्रत्यायनार्थमखिलमवान्तरवृत्तमपि सञ्जय उवाच—**दृष्ट्वेति** । पाण्डवानीकं व्यूढं दृष्ट्वा इति सुयोधनस्य धैर्यभ्रंशहेतुः । तदधीनो धैर्यभ्रंशरूपोऽवस्थाविशेषः **तु**शब्देन सूच्यते । दृष्ट्वेत्यादेरनुनादयन्नित्यन्तस्याव्यक्तांशं व्यञ्जयति—**दुर्योधन इत्यादिना अकथयदित्यन्तेन** । संज्ञार्थं—सम्यग्ज्ञानार्थम्; संज्ञया परिसंख्यानार्थं वा । तत्र **अन्तर्विषण्णोऽभवत्** इत्यन्तेन **भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि** इत्येवमन्तं व्याख्यातम् । **अपर्याप्तमिति** श्लोकस्यायमर्थः—तत्—तस्मात्; अस्माकं बलं भीष्माभिरक्षितमपर्याप्तं—परबलविजयाय नालम्; इदं त्वेतेषां पाण्डवानां बलं भीमाभिरक्षितं पर्याप्तम्—अस्मद्बलविजयायालम्—इति ।

नन्विदमनुपपन्नं, तद्बलमिति सामानाधिकरण्यप्रतीतिभङ्गायोगात्; पूर्वत्र च परबलस्वबलयोः सामर्थ्यासामर्थ्यहेतूपन्यासाभावात् । न च भीष्मद्रोणादिरक्षितं स्वबलमयमसमर्थं मन्यते । प्रबलानामेव हि भीष्मद्रोणादीनां वधः सोपाधिकः । * न भेतव्यं महाराज (भा. उ. ५५. १) इत्यादिषु च बहुशः स्वबलस्यैव सामर्थ्यं दुर्योधनेनोपन्यस्तम् । न चेदानीं तद्विपरीतप्रतीतौ कारणमस्ति । द्वितीयदिवसारम्भे च दुर्योधन एवं वक्ष्यति—* अपर्याप्तं तदस्माकं बलं पार्थाभिरक्षितम् । पर्याप्तं त्विदमेतेषां बलं पार्थिवसत्तमाः ॥ (भा. भी. ५१. ६) इति । तत्र

चास्माकमपर्याप्तमित्येवान्वयः; न पुनरस्माकं बलमिति । ततोऽत्रापि तथैव वचनव्यक्तिरुचिता । तस्मात् पाठभेदेन, व्यवहितान्वयेन, वाक्यभेदेन, पदार्थभेदेन वा योजना स्यात् । तत्र भीमभीष्मशब्दयोर्विपर्यासात्पाठभेदः । तथा च भीमाभिरक्षितं तद्बलमस्माकमपर्याप्तमित्यन्वये सामानाधिकरण्यम्, तदिति विप्रकृष्टनिर्देशस्वारस्यम्, दुर्योधनाभिप्रायाविरोधश्च । सिध्यति । व्यवहितान्वयेऽप्ययमेवार्थः । द्विधा च व्यवहितान्वयोऽत्र शक्यः । भीमाभिरक्षितभीष्माभिरक्षितशब्दयोर्विपर्यासादेकः । अपर्याप्तं तत्, पर्याप्तं त्विदम्, इत्यनयोर्विपर्यासाद्द्वितीयः । अर्थौचित्याय तु व्यवधानमात्रं सह्यते । वाक्यभेदेऽप्येवं योजना—अपर्याप्तं तदित्येका प्रतिज्ञा; पर्याप्तं त्विदमिति द्वितीया । अत्र को हेतुरिति शङ्कायां हेतुपरं वाक्यद्वयम्; अस्माकं बलं भीष्माभिरक्षितम्, एतेषां तु बलं भीमाभिरक्षितमिति । अस्मद्बलस्य प्रबलाधिष्ठितत्वात् परबलस्य[च] दुर्बलाधिष्ठितत्वादित्यर्थः । पदार्थभेदे त्वेवं योजना—पर्याप्तं—पर्याप्तनं समापनम्; पर्याप्तमिति कर्तरि क्तः, नाशनसमर्थमित्यर्थः; अपर्याप्तं नाशनासमर्थमित्यर्थः । भीष्माभिरक्षितमस्माकं बलं तत् अपर्याप्तं नाशायितुं न शक्नोति । तदित्यत्र पाण्डवबलं कर्तृतया निर्दिश्यते; इदमिति च स्वबलं परबलपर्यापनकर्तृतया; निष्ठायोगाच्च न कर्मणि षष्ठीप्राप्तिः । यद्वा अपर्याप्तम्—अपरिमितमित्यर्थः; पर्याप्तं—परिमितमित्यर्थः; स्वबलस्यैकादशाक्षौहिणीयुक्तत्वात्, परबलस्य सप्ताक्षौहिणीयुक्तत्वाच्च । सर्वथा तावन्न स्वबलदौर्बल्यं परबलप्राबल्यं च युद्धारम्भे दुर्योधनः प्रसञ्जयेदिति । सोऽयं घण्टापथात्पाटच्चरकुटीप्रवेशः । तथा हि—इह तावद्भीष्माभिरक्षितमित्येतत्प्रतिशिरस्तया भीमाभिरक्षितमिति केनाभिप्रायेण निर्दिश्यते? न तावद्भीष्मवद्भीमस्यापि सेनापतित्वेन; धृष्टद्युम्नस्य तत्पतित्वेनोक्तत्वात् । नापि भीष्मसमपौरुषत्वेन; अत्यन्तविषमतया प्रसिद्धेः । यथोक्तं भीष्मेणैव—*शक्तोऽहं धनुषैकेन निहन्तुं सर्वपाण्डवान् । यद्येषां न भवेद्गोप्ता विष्णुः कारणपूरुषः ॥ (भा. भी. १२०. ३१) इति । नापि प्रतिबलाधीश्वरत्वेन; धर्मसूनोस्तथात्वात् । नापि परबलभटप्रधानत्वेन; अर्जुनस्यैव तथा प्रसिद्धेः । अतो भीमस्य समस्तधार्तराष्ट्रवधदीक्षितत्वात्तदुचितसाहसबलसहायादियुक्तत्वाच्च तस्य विशेषतो निर्देशः । एवं सति तत्प्रतिशिरस्त्वेन भीष्मस्य निर्देशोऽपि समस्तपाण्डुतनयसंरक्षणप्रवणत्वेन प्रतिपन्नत्वात् । अतः शत्रुभयसहायातिशङ्कं पदद्वयसूचिते इत्युक्तं भवति । यत्तूक्तं पूर्वत्र परबलस्वबलयोः सामर्थ्यासामर्थ्यहेतुः कश्चिन्नोक्त इति; तदप्यसमीक्षितवचनम् । उपक्रमे हि प्रथममेव स्वबलाच्चतुरक्षौहिणीन्यूनाऽपि *महतीं चमूम् इति प्रतिचमूर्वर्णिता । अनन्तरं *धीमता इत्यन्तेन प्रतिसेनापतिर्वर्णितः । तदनन्तरं च *अत्र शूरा महेष्वासाः इत्यारभ्य *सर्व एव महारथाः इत्यन्तेन दृष्टान्तीकृतभीमार्जुनाभ्यां सहासन्नविंशतिसंख्याः पुरुषा निरतिशयपौरुषतया वर्णिताः । स्वपक्षे तु न चमूर्वर्णिता; नापि सेनापतिः । स्वबलप्रधानपरिसंख्याने च सप्त पुरुषा उपात्ताः । व्यतिरिक्तास्त्वाकृतिगणत्वेन *अन्ये च बहवः शूराः इत्युक्ताः । *मदर्थे त्यक्तजीविताः इति चोक्तम्, न तु मदर्थं जिगीषव इति । साभिसन्धिकत्वमेव तेनापि प्रतिपाद्यत इति चेत्, सत्यम् । तथापि वचनव्यक्तिप्रकार एवंविधः । अभिसन्धिद्योतनायापि हि त्यक्तजीवितत्ववचनं प्रतिभटानां बलीयस्त्वबुद्ध्यैव भवति । अनन्तरं च *तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः इति दुर्योधनस्य जनयितव्यहर्षत्वेन पूर्वं विषादः स्वरसतः [सूच्यते]प्रतीयते । एतदभिप्रायेणोक्तम्—अन्तर्विषण्णोऽभवत् इति । परस्ताच्च *स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् इति धार्तराष्ट्रहृदयसंक्षोभ एवोच्यते । अत उपक्रमे प्रतिचमूत्तत्सेनापतिसमग्रभटवर्णनात्, उपसंहारेऽपि शङ्खशब्दमात्रेण हृदयसंक्षोभवचनात्, मध्ये जनयितव्यहर्षत्वेन विषा[दोत्प]दापत्तितदपनयनसूचनात्, एतच्छ्लोकस्वारस्याच्च, उक्तार्थ एव तात्पर्यम् । अतस्तच्छब्दस्य तस्मादिति हेत्वर्थत्वमुपपन्नम् । अत एव विप्रकृष्टनिर्देशचोद्यं च परिहृतम् । न च परबलमिदानीं दुर्योधनस्य परोक्षम्, *दृष्ट्वा तु

पाण्डवानीकम् * पश्यैताम् * एतेषाम् इत्यादिप्रत्यक्षनिर्देशात् । यत्तु भीष्मद्रोणादिरक्षितस्य स्वबलस्य दौर्बल्यप्रतीति[र]नं युक्तेति, तदप्यसत्; सोपाधिकस्यापि भीष्मद्रोणादिवधस्य ज्ञातोपाधिना दुर्योधनेन शङ्कितत्वोपपत्तेः । यत्तु * न भेतव्यम् इत्यादौ बहुशः स्वबलसामर्थ्यमुपन्यस्तम्; इदानीं तद्विपरीतप्रतीतौ हेतुर्नास्तीति, तदपि न । यथाऽर्जुनो जिघांसया शरचापोद्यमनपर्यन्तं प्रवृत्तोऽपि हन्तव्यबन्धुसमुदायसंनिधिसंदर्शनेनोल्बणैः स्नेहकारुण्यधर्माधर्मभयैराकुलीकृतः पुनर्भगवता पर्यवस्थाप्यते, तथात्रापि दृढघटितव्यूहबहुमहाभटनिबिडप्रतिभटबलसाक्षात्कारादुल्बणभयविषादो दुर्योधनो भीष्मेण पर्यवस्था[प्य]पित इति किमनुपपन्नम्? प्रत्यक्षितं च दुर्योधनेन गोग्रहणस्वग्रहणादिवृत्तान्तेषु सर्वेभ्यः स्वबलभटेभ्यः परेषु सामर्थ्यम् । न चेदानीं तन्न स्मरति; वदति हि स्वयमेव * अकारादीनि नामानि अर्जुनत्रस्तचेतसः (भा. स.) इति । यत्तु द्वितीयदिवसारम्भो[क्ति]क्तवचनवदत्रापि वचनव्यक्तिः कार्येति, तदपि मन्दम् । न ह्यवश्यमेकदेशसादृश्यात् सर्वथा सादृश्येन भवितव्यमिति नियमः । प्रथमद्वितीयदिवसयोरभिप्रायभेदोऽनुपपन्न इति चेत्, न; युद्धसिद्धेश्चञ्चलत्वाद्यनुसंधानेन विषमत्वादभिप्रायपद्धतेः । किं चात्राचार्यभीष्माभ्यां सह व्यूहान्तरमोर्गेषु यथाभागमवस्थापनसेनाधिपतिसंरक्षणादिहितनिरूपणे प्रवृत्तत्वादेवमभिप्राय उपपन्नः । तदेतद्दर्शितम्—**आचार्याय निवेद्यान्तर्विषण्णोऽभवत्** इति । द्वितीयदिवसे तु स्वसहायभूतेभ्यः सर्वेभ्यः पार्थिवेभ्यः स्वधैर्यप्रकाशने बलसान्त्वनादौ च प्रवृत्तत्वात् तथा व्यवहार इति न कश्चिद्दोषः । तदेतदखिलमभिप्रेत्य * दृष्ट्वा त्विति तुशब्दः प्रयुक्तः । इदं च प्रारम्भे दैवोपहतस्य दुर्योधनस्यातर्कितागतविषादमूलं स्वबलस्यापर्याप्तत्ववचनमागामिनमपजयं सूचयति । अतः सर्वजनपठितपाठस्वरससिद्धार्थस्य निर्दोषत्वात्, पाठभेदादिपक्षाः परिक्षीणाः; पाठभेदव्यवहितान्वयवाक्यभेदाप्रसिद्धार्थकल्पनादीनामेव च प्रबलदूषणत्वात् । वाक्यभेदयोजनायां तु प्रतिज्ञाद्वये हेतुद्वयस्य यथाक्रमं तावदन्वयो न घटते । या हि प्रबलो दुर्बलो वा यद्बलं रक्षति, स तस्य पर्याप्तावपर्याप्तौ वा हेतुः स्यात्; न तु तत्प्रतिबलस्य । फलतस्तथानिर्देश इति चेत्, त[था]दाऽप्यस्वारस्यम् । प्रातिलोम्येन हेत्वोरन्वय इति चेत्, तर्हि व्यवहितान्वयोऽप्यागतः । हेतुद्वयं समुच्चित्य प्रत्येकं प्रतिज्ञायां योज्यत इति चेत्, तथापि व्यवहितान्वयास्वारस्ययोर्न परिहारः, समुच्चायकशब्दाभावश्चाधिको दोषः । एवं दूषणान्तराण्यपि भाव्यानि । अतो यथाभाष्यमेवार्थ इति ॥ १–११ ॥

तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः । सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः । सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३
ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ । माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४
पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः । पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः । नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६
काश्यश्च परमेष्वासः शिखण्डी च महारथः । धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७
द्रुपदो द्रौपदेयाश्च सर्वतः पृथिवीपते । सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक् ॥ १८
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् । नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९

तस्य विषादमालक्ष्य भीष्मस्तस्य हर्षं जनयितुं सिंहनादं शङ्खध्मानं च कृत्वा, शङ्खभेरीनिनादैश्च विजयाभिशंसिनं घोषं चाकारयत् ॥

ततः—तं घोषमाकर्ण्य सर्वेश्वरेश्वरः पार्थसारथी रथी च पाण्डुतनयस्त्रैलोक्यविजयोपकरणभूते-महति स्यन्दने स्थितौ त्रैलोक्यं कम्पयन्तौ श्रीमत्पाञ्चजन्यदेवदत्तौ दिव्यौ शङ्खौ प्रदध्मतुः ॥

ततो युधिष्ठिरो वृकोदरादयश्च स्वकीयान् शङ्खान् पृथक्पृथक् प्रदध्मुः। स घोषो दुर्योधनप्रमुखानां सर्वेषामेव भवत्पुत्राणां हृदयानि विभेद। अद्यैव नष्टं कुरूणां बलमिति धार्तराष्ट्रा मेनिरे। एवं तद्विजयाभिकाङ्क्षिणे धृतराष्ट्राय सञ्जयोऽकथयत् ॥ ११—१९ ॥

तस्य संजनयन् इत्यादेः तुमुलोऽभवत् इत्यन्तस्यार्थमाह–**तस्येति**। जनयन्निति शतुः * लक्षणहेत्वोः क्रियायाः (अष्टा. ३. २. १२६) इति हेत्वर्थत्वसूचनाय **जनयितुम्** इत्युक्तम्। सिंहनादं विनद्येत्येतत्, ओदनपाकं पचतीतिवदिति सूचयितुं **कृत्वा** इति पदम्। कृञ्वस्तयः क्रियासामान्यवचना इत्येतद्व्यञ्जनायोदाहरणतया शङ्खध्मानं च **कृत्वा** इत्युक्तम्। ततः शङ्खाः इत्यत्र ततःशब्देन विजिगीषासूचनाय भीष्मेण सेनापतिना कारितत्वं ज्ञापितमित्यभिप्रायेणोक्तम् **अकारय**दिति। शङ्ख**भेरी**ति पणवाद्युपलक्षणम्। ततः श्लोकेऽपि कतिपयवाद्यविशेषनिर्देश उपलक्षणार्थ इति सूचितम्। सिंहनादशङ्खध्मानाभ्यां शङ्खभेर्यादिनादसमुच्चयार्थो द्वितीयश्चकारः। कृत्वेत्यनेन अकार-यदित्यस्य समुच्चयार्थस्तृतीयः ॥

* ततः श्वेतैरित्यादिकं * धनंजय इत्यन्तं व्याचष्टे- **ततस्तमिति**। तत इति व्याख्येयपदम्; **तं घोषमाकर्ण्ये**ति तद्विवक्षितकथनम्। **सर्वेश्वरेश्वरः पार्थसारथिरिति**। सर्वोत्कृष्टेभ्य उत्कृष्टः परमपुरुषो निकृष्टान्मानुषमात्रादपि निकृष्टतामाश्रितवात्सल्येन नीत इति भावः। पाण्डवविजयसूचनाय संजयेनोपात्तो माधवशब्दोऽत्र श्रियःपतित्ववाची सर्वेश्वरेश्वरत्वपर एव। *स्यन्दने स्थितौ इत्यविशेषेण स्थितिव्यवच्छेदाय सारथित्वरथित्वविभागः। *श्वेतैः इत्यादिना प्रतिपादितमहत्त्वव्यक्त्यर्थमुक्तं **त्रैलोक्येति**। नात्र परिमाणादिमहत्त्वमात्रं विवक्षितमिति भावः। **त्रैलोक्यं कम्पयन्ताविति**। तयोः स्यन्दने स्थितिमात्रमपि त्रैलोक्यकम्पनहेतुरिति भावः। यद्वा * दिव्यौ शङ्खौ प्रदध्मतुः इत्याद्युक्तप्रकृष्टाध्मानमूलकशङ्खघोषातिशयेन, * नभश्च पृथिवीं चैवेति वक्ष्यमाणेन च, फलितमिदम्। दिव्यत्वोक्तिदर्शितशङ्खातिशयवैशद्याय पाञ्चजन्यदेवदत्तसंज्ञोक्तिः। एवं भीमसेनादिशङ्खचतुष्टयविशेषे नामनिर्देशोऽपि। **पृथक् पृथक् प्रदध्मुरिति**—यथैकैकशङ्खध्वनिरेव धार्तराष्ट्रहृदयभेदाय स्यात्, तथा प्रदध्मुरिति भावः; यद्वा यथास्वं प्रहर्षोद्यातनाय क्रमात्प्रदध्मुरिति। * स घोषः इति श्लोके नभश्च पृथिवीं चानुनादयन्नपि धार्तराष्ट्राणामेव हृदयानि विभेदेत्यन्वयः; अन्येषां तु हर्षहेतुरभूदिति भावः। **सर्वेषामेव भवत्पुत्राणा**मित्यनेन तेषु दृढचित्तः कश्चिदपि नास्तीति द्योतनाय धार्तराष्ट्रशब्दतद्धृतबहुवचनयोरर्थ उक्तः। व्यदारयत् इत्यस्य वक्ष्यमाणाभिप्रायद्योतकं प्रतिपदं **विभेदे**ति। घोषस्य शस्त्रादिवत् हृदयविदारणत्वं कथमित्यत्राह–**अद्यैवेति**। स्वबलस्य विजयित्वमध्यवस्यतां तन्नाशबुद्धिरेव हि हृदयभेद इति भावः। धार्तराष्ट्रविजयबुभुत्सया पृच्छते धृतराष्ट्राय प्रागुक्तप्रकारेण तदपजयसूचकमेव सञ्जयोऽकथयदित्याह—**एवमिति** ॥

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः। प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ २०
हृषीकेशं तदा वाक्यमिदमाह महीपते।

अर्जुन उवाच—

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१

यावदेतान् निरीक्षेऽहं योद्धुकामानवस्थितान् । कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ २२
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः । धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३

सञ्जय उवाच—

एवमुक्तो हृषीकेशो गुडाकेशेन भारत । सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४
भीष्मद्रोणप्रमुखतस्सर्वेषां च महीक्षिताम् । उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥ २५

अथ युयुत्सूनवस्थितान्धार्तराष्ट्रान्दृष्ट्वा लङ्कादहनवानरध्वजः पाण्डुतनयो ज्ञानशक्तिबलैश्वर्यवीर्यतेजसां निधिं स्वसङ्कल्पकृतजगदुदयविभवलयलीलं हृषीकेशं परावरनिखिलजनान्तरबाह्यकरणानां सर्वप्रकारनियमनेऽवस्थितमाश्रितवात्सल्यविवशतया स्वसारथ्येऽवस्थितं युयुत्सून्यथावदवेक्षितुं तदीक्षणक्षमे स्थाने रथं स्थापयेत्यचोदयत् ॥ स च तेन चोदितस्तत्क्षणादेव भीष्मद्रोणादीनां सर्वेषामेव महीक्षितां पश्यतां यथाचोदितमकरोत् । ईदृशी भवदीयानां विजयस्थितिरिति चावोचत् ॥ २०—२५ ॥

*अथ व्यवस्थितान् इत्यादेः *कुरून् इत्यन्तस्यार्थमाह—**अथेत्यादिना इति चावोचदित्यन्तेन** । तत्र वाक्यत्रये प्रथमेन वाक्येन प्रियचिकीर्षवः इत्यन्तस्यार्थ उच्यते । व्यवस्थितान् इत्यत्र विशब्दसूचितविशेषव्यक्तये **युयुत्सून्** इत्युक्तम् ; *योद्धुकामानवस्थितान् इति ह्यनन्तरमप्युच्यते । कपिध्वजः इत्यत्र कपित्वमात्रप्रतिपत्तलाघवं निवारयितुं सौगन्धिकयात्रायां हनुमद्दत्तं वरम्, स्वरूपसंदर्शनमात्रेण रक्षसामिव परेषां संक्षोभं च सूचयितुं **लङ्कादहनवानरध्वजः** इत्युक्तम् । अप्रच्युतस्वभावत्वप्रतिपादकाच्युतपदाभिप्रेतव्यञ्जनाय **ज्ञाने**त्यादिकम् । हृषीकेशपदव्याख्या **परावरे**त्यादि । यद्वा सृष्ट्यादिकं वीर्यादिकं तदुपलक्षि[न]तं ज्ञानादिकमपि हृषीकेशशब्दार्थ एव । यथोक्तम**हिर्बुध्न्यसंहितायाम्**—*क्रीडया हृष्यति व्यक्तमीशः सन् सृष्टिरूपया । हृषीकेशत्वमीश[स्य]त्वं देवत्वं चास्य तत्स्फुटम् ॥ अविकारितया जुष्टो हृषीको वीर्यरूपया । ईशः स्वातन्त्र्ययोगेन नित्यं सृष्ट्यादिकर्मणि ॥ ऐश्वर्यवीर्यरूपत्वं हृषीकेशत्वमुच्यते ॥ (५२. ४४. ४५. ५६) इति । आश्रितान् न च्यावयति, अतश्च्युतोऽस्य नास्तीत्यच्युतशब्दस्य काचिन्निरुक्तिः । तां दर्शयति—**आश्रितवात्सल्ये**त्यादिना । **स्वसारथ्येऽवस्थित**मिति । हृषीकेशतया सर्वेषां करणानां सर्वप्रकारनियमनेऽवस्थितस्य रथयुग्यमात्रनियमनं किमर्थमिति भावः । निरीक्षे इत्यत्रोपसर्गार्थः **यथावत्** इति दर्शितः । **यावच्छब्दोऽत्र** साकल्यवाची, निरीक्षणकालावधिवाची वा, *यावत्पुरानिपातयोर्लट् (अष्टा. ३. ३. ४) इति निरीक्षणस्य भविष्यत्त्वद्योतको वा । यैः सह मया योद्धव्यं तान्निरीक्षे इत्यत्र, मया सह यैर्योद्धव्यं तानवेक्ष इति नोक्तम् ; अतः *योत्स्यमानानिति श्लोकस्योत्थानम् । *धार्तराष्ट्रस्य दुर्बुद्धेः इति दुर्योधनादिदोषप्रख्यापनतात्पर्याच्च न पौनरुक्त्यम् । यद्वा सेनयोरुभयोर्मध्ये इति पूर्वोक्तत्वात्, सेनयोरुभयोरपि स्थितानपश्यदिति वक्ष्यमाणत्वाच्च, स्वसेनास्थितस्वसहायविषयः पूर्वश्लोकः ; तत्र कैर्मया सह स्थित्वा परैर्योद्धव्यमित्यर्थः । उत्तरस्तु श्लोकः प्रतिसैन्यस्थितधार्तराष्ट्रसहायविषय इति व्यक्त एव । प्रागेव तेषां विदितत्वेऽपि इदानीन्तनसंरम्भादिविशेषदर्शनेन तत्तदुचितसाम्परायिकव्यापारसौकर्याय यथावद्दर्शनमिहार्जुनेनाकाङ्क्षितम् । सेनयोरुभयोर्मध्ये इत्यस्याभिप्रेतकथनं **तदीक्षणक्षमे स्थाने** इति । **अचोदयत्** इत्यनेन स्थापय इत्यत्र प्रत्ययस्य नियोगार्थत्वं दर्शितम् । सर्वप्रशासिता नियोज्योऽभवदित्याश्चर्यमिति भावः ॥

*एवमुक्तः इत्यादेः *महीक्षिताम् इत्यन्तस्यार्थमाह—**स चेति**। अर्जुनवचनरथस्थापनयोर्व्यवधायकाभावफलितमुक्तं **तत्क्षणादेवेति**। भीष्मद्रोणप्रमुखतः इत्यत्र प्रमुखशब्दः आदिशब्दसमानार्थः; तद्वतस्तसिप्रत्ययश्च सार्वविभक्तिकत्वात् षष्ठीबहुवचनार्थ इत्यभिप्रायेणोक्तं **भीष्मद्रोणादीनामिति**। तदा चकारोऽवधारणार्थ इति दर्शयितुं **सर्वेषामेवेत्युक्तम्**। अनादरे षष्ठीति व्यञ्जनाय **पश्यतामिति** पदाध्याहारः; यद्वा प्रमुखतः—अग्रत इत्यर्थः। तदेव महीक्षिताम् इत्यत्रापि बुद्ध्या निष्कृष्य योजनीयम्। तदा चकारः समुच्चयार्थः। भाष्ये त्वेवकारोऽपि तदर्थ एव; पश्यतामिति फलितार्थोक्तिः। उवाच पार्थ इत्यस्य तात्पर्यमाह—**ईदृशीति**। एतान्समवेतान् इति जेतव्यसमुदायप्रदर्शनेन विजयस्थितिरभिप्रेतेति भावः। [यद्वा] धार्तराष्ट्रकर्मकविजयस्थितिरित्यर्थः। अथवा धार्तराष्ट्रकर्तृकविजयस्थितिरित्थमित्युपालम्भगर्भमवोचदित्यर्थः। धृतराष्ट्रं प्रति सञ्जयवाक्याभिप्रायेण **भवदीयानाम्** इत्युक्तम्। अयमेवार्थ उचितः, अर्जुनं प्रति कृष्णेन भवतामित्येतावन्मात्रस्य वक्तव्यत्वात्; धृतराष्ट्रं प्रति तु भवत्पुत्राणाम् इति पूर्वोक्तवत् भवदीयान्विलोक्य इति वक्ष्यमाणवच्चात्रापि भवदीयनिर्देशोपपत्तेः। *किमकुर्वतेति गूढाभिसन्धेः पृच्छतो धृतराष्ट्रस्य गूढाभिसन्धिः सञ्जयो धार्तराष्ट्रहृदयविदारणादिकमेवमकथयत् ॥ २०—२५ ॥

तत्रापश्यत्स्थितान् पार्थः पितॄनथ पितामहान्। आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि। तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥ २७
कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत्।

अर्जुन उवाच—

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८
सीदन्ति मम गात्राणि मुखं च परिशुष्यति। वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९
गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते। न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३०
निमित्तानि च पश्यामि विपरीतानि केशव। न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च। किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च। त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥
आचार्याः पितरः पुत्रास्तथैव च पितामहाः। मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ॥ ३४
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन। अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन। पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान्। स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७
यद्यप्येते न पश्यन्ति लोभोपहतचेतसः। कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्। कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९
कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः। धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ४०
अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः। स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥ ४१
सङ्करो नरकायैव कुलघ्नानां कुलस्य च। पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः । उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन । नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४
अहो बत महत्पापं कर्तुं व्यवसिता वयम् । यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः । धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६

सञ्जय उवाच—

एवमुक्त्वाऽर्जुनस्संख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
अर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥

भा ॥ स तु पार्थो महामनाः परमकारुणिको दीर्घबन्धुः परमधार्मिकस्सभ्रातृको भवद्भिरतिक्रूरैर्मारणैः जतुगृहदाहादिभिरप्यकृद्भिर्तोऽपि परमपुरुषसहायेनात्मना हनिष्यमाणान् भवदीयान् विलोक्य बन्धुस्नेहेन परया कृपया धर्मार्थमभयेन चात्मिकाचन्चलसर्वाङ्गः सर्वथाऽहं न योत्स्यामीत्युक्त्वा बन्धुविश्लेषजनितशोकसंविग्नमानसस्सशरं चापं विसृज्य रथोपस्थ उपाविशत् ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये प्रथमोऽध्यायः ॥ १ ॥

अथाध्यायशेषस्य सङ्कलितार्थमाह—स त्विति । तुशब्देन पूर्वोक्तप्रकाराद्व्यावर्तनात् वक्ष्यमाणप्रकारविशिष्टस्य पार्थस्य विशेषं, *स कौन्तेयः इत्यनेनाभिप्रेतं द्योतयति । बन्धुव्यपदेशमात्रयोग्यशत्रुवधानिच्छया त्रिजयादिकं त्रैलोक्यराज्याधिकमपि तृणाय मन्यत इति **महामना** इत्युक्तम् । *न काङ्क्षे विजयम् इत्यादिकं हि वदति । शत्रूणामप्यसौ दुःखं न सहत इति, **परमकारुणिकत्वोक्तिः** । * कृपया परयाऽऽविष्टः इति ह्युक्तम् । *पितृनथ पितामहान्, *आचार्याः पितरः पुत्राः इत्याद्युक्तस्नेहविषयप्राचुर्यं **दीर्घबन्धु**शब्देनोक्तम् । यद्वा बन्धुना महापकारे कृतेऽपि स्वयं न शिथिलबन्धो भवतीति भावः । *सर्वान्बन्धून्, *स्वजनं हि इत्यादिकमिह भाव्यम् । आततायिपक्षस्थानामप्याचार्यादीनामहन्तव्यत्वानुसन्धानात्, कुलक्षयादिजनिताधर्मपारम्पर्यदर्शनाच्च, **परमधार्मिक** इत्युक्तिः; आततायिवधानुज्ञानमाचार्यादिव्यतिरिक्तविषयमित्यर्जुनस्य भावः । **सभ्रातृक** इति । नायमेक एवैवंविधः, किंतु सर्वेऽपि पाण्डवा इति भावः । एतेन अस्मान्, नः, वयम्, अस्माभिः इत्यादिभिरुक्तं संगृहीतम् । यद्वा, न केवलं स्वापकारमात्रानादरादेष बन्धुवधादिकमुपेक्षते; अपि त्वासन्नतराचार्यादिस्थानीयबहुमतिस्नेहदयादिविषयधर्मराजद्रौपद्याद्यपकारेऽपीति भावः । आचार्यादिवधदोषो भ्रातृणामपि मा भूदित्यर्जुनाभिप्रायः । हन्तव्यत्वसूचनाय घ्नतोऽपि इत्युक्तम् । तद्विवृणोति—**भवद्भिरि**त्यादिना । **जतुगृहदाहादिभि**रित्यादिना आततायिशब्दो व्याख्यातः; * अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः ॥ * आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन (मनु. ८.३५१) इति हि स्मरन्ति । आदिशब्देनासकृच्छब्देन चाततायित्वहेतवः प्रत्येकं बहुशः कृताः, न चेदानीमप्युपरतमिति दर्शितम् । अनुपरतिश्च घ्नतोऽपीति वर्तमाननिर्देशेन सूचिता । **भवद्भिरि**त्यनेन धृतराष्ट्रमपि *मुह्यन्तमनुमुह्यामि दुर्योधनममर्षणम् । (भा. आ. १. १६६) इति पुत्रस्नेहवशादनुमन्तारं तत्तुल्यं व्यपदिशति । एवं च दुर्योधनादीनां सर्वेषामप्यतिलोभोपहतचेतस्त्वादिना महामना इत्युक्तविपरीतत्वमुक्तं भवति । शकुनिकर्णादिसहायानां धार्तराष्ट्रादीनां

हनिष्यमाणानामपि हतत्वनिश्चयेन शोकोत्पत्त्यर्थमुक्तं **परमपुरुषेति** । परमपुरुषः सहायो यस्येति विग्रहः ; **परमपुरुषस्य** सहायो निमित्तमात्रमिति वा । वक्ष्यति हि—*मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् (११. ३३) इति । अर्जुनश्च पूर्वं महाबलसहस्रेभ्योऽपि निरायुधस्य परमपुरुषस्य संनिधिमात्रमेव विजयहेतुतया निश्चित्य तमेव वव्रे । स्नेहाद्यस्थानत्वसूचनाय **भवदीयान्विलोक्येत्युक्तम्** । **बन्धुस्नेहेने**त्यादीनां—नह्यसौ दुर्योधनवत् बन्धुद्वेषनृशंसत्वप्रतिभटभयादिना विषण्णः ; नापि परेषां गुणान्निवर्तते ; न च परमपुरुषसचिवस्य स्वस्य दौर्बल्यादिति भावः । *सीदन्ति इत्यादेः *मनः इत्यन्तस्यार्थः—**अतिमात्रेत्यादिना** संगृहीतः । *एतान्न हन्तुमिच्छामि, *यदि मामप्रतीकारम् इत्यादेरभिप्रेतमाह—**सर्वथाऽहमिति** । सर्वथा बहुप्रकारम्—एषामाततायित्वेऽपि, इदानीं हन्तुमुद्यतत्वेऽपि, युद्धान्निवृत्तेरधर्मकीर्त्यादिहेतुत्वेऽपि, युद्धस्य त्रैलोक्यराज्याद्युपायत्वेऽपि, किं बहुना- सर्वैश्वरेश्वरेण मम हितनयोपदेशिना भवतोक्तत्वेऽपीति भावः । बन्धुविनाशस्य सिद्धत्वाध्यवसायः शोकहेतुः, विषादमात्रमेतो वाऽत्र शोकशब्दः, स च शोकः सशरचापपरित्यागे हेतुरिति व्युत्क्रमपाठेन दर्शितम् । संविग्नमानसः—अत्यर्थचलितयुद्धाध्यवसाय इत्यर्थः । *ओ विजी भयचलनयोः इति धातुः । एवं चलितयुद्धाध्यवसायत्वात् समराभ्यरसुकृकुबादिस्थानीये सशरे चापे विसृज्य प्रायोपवेशादिपर इव रथोपस्थे रथिस्थानाद्विनिवृत्य रथोत्सङ्ग उपाविशदिति भावः ॥ **सर्वान्**—वयस्यान् ॥ **सुहृदः** वयोविशेषानपेक्षया हितैषिणः । **सेनयोरुभयोरपि**—एकैकस्यां सेनायामेते सर्वे प्रायशो विद्यन्त इति भावः । सर्वाभ्य शास्त्रलोकयात्रायुक्तमवलोक्येत्यर्थः । **सर्वान्बन्धून्**- नह्यत्रानागतः कश्चिद्बन्धुरवशिष्यत इति भावः । अधर्मोऽभिभवतीति मानसदोषोक्तिः ॥ **प्रदुष्यन्ती**ति कायिकोक्तिः ॥ ४१ ॥ ४७ ॥

॥ इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां प्रथमोऽध्यायः ॥ १ ॥

॥ अथ द्वितीयोऽध्यायः ॥ २ ॥

सञ्जय उवाच—

तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम् । विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १

श्रीभगवानुवाच—

भा ॥ एवमुपविष्टे पार्थे कुतोऽयमस्थाने समुपस्थितः शोक इत्याक्षिप्य तमिमं विषमस्थं शोकमविद्वत्सेवितं परलोकविरोधिनमकीर्तिकरमनिष्टुदं हृदयदौर्बल्यकृतं परित्यज्य युद्धायोत्तिष्ठेति श्रीभगवानुवाच ॥

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् । अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २

§ मा क्लैब्यं गच्छ कौन्तेय नैतत्त्वय्युपपद्यते । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३

अथ शोकापनोदनविषयो द्वितीयोऽध्याय आरभ्यते । संजयवाक्याविच्छेदेऽपि **सञ्जय उवाचे**ति निर्देशोऽध्यायान्तरारम्भरूपतयाऽन्योक्तिशङ्कापरिहाराय । **तं तथा** इत्यादिश्लोकत्रयं व्याख्याति **एवमिति** । **विषीदन्तम्** इत्यन्तस्य पूर्वाध्यायोक्तानुवादत्वं सूचयितुम् **एवमुपविष्टे पार्थे** इत्युक्तम् । **तथे**ति—अस्थान इत्यर्थः । कृपा च आन्तरो विषादः । ततः अश्रुपूर्णाकुलेक्षणं, बाह्यशोकेनाप्याविष्टमित्यर्थः । विषीदन्तं—पूर्वाध्यायोक्तरीत्या विषादं प्राप्योप-

§ अयं तात्पर्यचन्द्रिकानुसारी पाठः । क्लैब्यं मा स्म गमः पार्थेति पाठान्तरम् ॥

विष्टम् । मधुसूदनशब्देन शोकमूलरजस्तमोनिवर्हणत्वं सूचितम् । **अस्थान इति** विषमशब्दोपचरितार्थः । कश्मलमिह मूर्च्छाकल्पः शोकः ; **शोकसंविग्नमानसः** इति प्रकृतत्वात् । प्रख्यातवंशवीर्यश्रुतादिसूचकाः **अर्जुन, कौन्तेय, त्वा, त्वयि, परन्तप** इति शब्दा आक्षेप[काकु]गर्भा इत्यभिप्रायेण **आक्षिप्य** इत्युक्तम् । कुतःशब्दश्च हेत्वाभासस्य हेतुतां प्रतिक्षिपन् धिक्कारगर्भः । परान् तापयतीति परन्तपः । क्लैब्यमिह कातर्यम् ; तत् हृदयदौर्बल्यशब्देन विवृतम् । पूर्वश्लोकस्थविशेषणानामपि कातर्यत्याज्यताहेतुत्वादर्थतस्तान्यप्यत्र संगमयति—**तमिमं विषमस्थमित्यादिना** । अतत्त्वेभ्यः—कुतर्केभ्यः आरात्—दूरात् याता बुद्धिर्येषां ते आर्याः विद्वांसः ; तदन्ये त्वनार्याः । *अस्वर्ग्यम् इत्यत्राविशेषात् स्वर्गशब्दः परलोकमात्रोपलक्षकः ; नचश्चात्र विरोधिपरतया स्वर्ग्यशब्दनिर्दिष्टस्वर्गहेतुविरोधित्वेऽर्थतस्तत्फलविरोधात् परलोकविरोधिनमित्युक्तम् । क्षुद्रशब्दस्यात्र संकोचकाभावेनापेक्षिकक्षुद्रविषयत्वायोगान्महत्तरस्यार्जुनस्य तथाविधावस्थापर्यालोचनाच्च काष्ठाप्राप्तं क्षुद्रत्वं विवक्षितमिति दर्शयितुम् **अतिक्षुद्रमित्युक्तम्** । कार्ये कारणोपचार इति वा, कारणत्यागस्य कार्यत्यागार्थतया पूर्वोत्तरश्लोकफलितार्थविवक्षया वा **हृदयदौर्बल्यकृतमित्युक्तम्** ; अदृढहृदयत्वकृतमित्यर्थः । *परन्तपेत्यनेन ज्ञापितं प्राकरणिकमर्थमभ्याहृत्योक्तं—**युद्धायोत्तिष्ठेति** ॥ १ ॥ २ ॥ ३ ॥

अर्जुन उवाच—

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन । इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४

गुरूनहत्वा हि महानुभावान् [श्रेयो भोक्तुं]श्रेयश्चर्तुं भैक्षमपीह लोके ।
हत्वाऽर्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ ५

भा ॥ पुनरपि पार्थः स्नेहकारुण्यधर्माधर्मभयाकुलो भगवदुक्तं हिततममजानन्निदमुवाच—भीष्मद्रोणादिकान् गुरून्बहुमन्तव्यान् कथमहं हनिष्यामि ? कथंतरां भोगैकप्रतिमात्रसक्तान् तान् हत्वा तैर्भुज्यमानांस्तानेव भोगान् तद्रुधिरेणोपस्निग्ध्य तेष्वासनेषूपविश्य भुञ्जीय ? ॥ ४ ॥ ५ ॥

अथ भगवदुक्तयुद्धारम्भस्य परम्परया परमनिःश्रेयसहेतुत्वरूपहिततमत्वाज्ञानात् तत्प्रतिक्षेपरूपस्यार्जुनवाक्यस्योत्थानम् । तथाविधाज्ञानस्य चास्थानस्नेहाद्याकुलत्वमूलत्वं वदन्नुत्तरमवतारयति—**पुनरपीति** । उक्तार्थविषयतया पुनरपीदमुवाचेत्युक्तम् । *कथमित्यादिश्लोके चकारस्यानुक्तसमुच्चयार्थत्वप्रदर्शनाय आदिशब्दः ; उपात्तस्यानुपात्तोपलक्षणतया वा । पूजार्हशब्दविवक्षितबहुमन्तव्यत्वहेतुतयोत्तरश्लोकस्थमन्त्राकृष्योक्तं—**गुरूनिति** । **बहुमन्तव्यानिति**—महानुभावानित्युत्तरश्लोकस्थानुसंधानाद्वा ; ते स्वत एव बहुमन्तव्याः ; पितामहत्वधनुर्वेदाचार्यत्वादिभिरत्यन्तबहुमन्तव्या इति भावः । पुष्पादिभिः पूजार्हाणां पूजानिवृत्तिरेव साहसम् ; हननं त्वतिसाहसम् । गुरुभक्त्या च तद्विरोधिभिः सह योद्धव्यम्, न पुनर्गुरुभिरिति कथं गुरूनिषुभिः प्रतियोत्स्यामि इत्यस्य भावः । अहंशब्देन प्रख्यातवंशत्वादिकमभिप्रेतम् । **इषुभिः प्रतियोत्स्यामि** इत्यस्य हननपर्यन्तप्रतियुद्धाभिप्रायत्वमुत्तरश्लोकेन विवृतमिति **हनिष्यामी**त्युक्तम् । मधुसूदनारिसूदनशब्दाभ्यां न हि त्वमपि सान्दीपिन्यादिसूदनः इति सूचितम् । [भोक्तु]चर्तुमित्यत्र भावमात्रार्थस्तुमुन्, न तु क्रियार्थोपपदकः । यद्यपि या काचिज्जीविकाऽऽश्रयणीया ; तथाऽपि गुरुवधलब्धभोगेभ्य इह लोके परधर्मरूपभैक्षाचरणमपि श्रेयः—प्रशस्यतरम् ; महाप्रभावगुरुवधसाध्यपारलौकिकदुःखस्यातिमहत्त्वादिति भावः । प्रकृतविरुद्धार्थत्वभ्रमव्युदासाय पूर्वश्लोकस्थकथंशब्दानुषङ्गादतिनृशंसत्वसामर्थ्यात् तुशब्दद्योतितवैषम्याच्च **कथं तरामित्युक्तम्** । *गर्हायां लडपिजात्वोः

* विभाषा कथमि लिङ् च (अष्टा. ३. ३. १४२, १४३) इति गर्हार्थे इह लिङ्प्रत्ययः ; *अर्थकामानित्यत्र द्वन्द्वादि-भ्रान्तिनिवर्तनाय समासतदंशद्वयार्थो **भोगेष्वतिमात्रसक्तान्** इत्युक्तः । अर्थेषु कामो येषामिति विग्रहः ; अवर्ज्यो हि व्यधिकरणो[ऽपि] बहुव्रीहिर्जन्माद्युत्तरपदः । अर्थ्यन्त इत्यर्थाः भोगाः ; कामश्चातिमात्रसङ्गो वक्ष्यते । यद्वा अर्थं कामयन्त इत्यर्थकामाः । ते निष्कामाश्चेत्, तद्भोगहरणमपि सह्येत ; इदं तु क्षुधितानामोदनहरणवदिति भावः । हननादप्यति-नृशंसत्वसूचनाय भोगरुधिरादिशब्दैरर्थसिद्धः तुशब्देन च द्योतितो विशेषः तैरित्यादिना उक्तः । इहैवेत्यनेन विवक्षितो नृशंसत्वातिशयः तेष्वित्यादिना दर्शितः । गुरुवधसाध्यभोगा रुधिरप्रदिग्धगुरुस्मृतिहेतुत्वात् स्वयमपि तथाविधा इव दुर्भोजा भवन्तीत्यैहलौकिकसुखमपि नास्तीति रुधिरप्रदिग्धशब्दाभिप्राय इत्याह—**तद्रुधिरेणोपमिश्चेति** । उपसेचनं हि स्वयमद्यमानं सदन्यस्यादनहेतुः ; इह तदुभयमपि विपरीतमिति भावः ॥ ४ ॥ ५ ॥

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६
कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७

भा ॥ एवं युद्धमारभ्य निवृत्तव्यापारान् भवतो धार्तराष्ट्राः प्रसह्य हन्युरिति चेत् ; अस्तु । तद्धय-लब्धविजयादधर्म्यादस्माकं धर्माधर्मावजानद्भिस्तैर्हननमेव [श्रेय]गरीय इति मे प्रतिभातीत्युक्त्वा, यन्मह्यं श्रेय इति निश्चितं तत् शरणागताय तव शिष्याय मे ब्रूहीत्यतिमात्रकृपणो भगवत्पादावुपससाद ॥ ६ ॥ ७ ॥

* न चैतद्विद्मः इत्यादेश्चकारद्योतितशङ्कापूर्वकं तात्पर्यार्थमाह—**एवमिति** । बन्धुविनाशाद्भीतेन त्वया धर्मसुत-भीमनकुलाद्यासन्नतरबन्धुविनाश एव कारितः स्यादिति **भवत** इत्यनेन सूचितम् । विद्मः इत्यादिबहुवचनानुसारेणाह—**अस्माकमिति** । अस्माकमित्यनेन हन्तव्यतया निर्दिष्टभीष्मद्रोणाद्यपेक्षया सर्वेषां शिष्यत्वादिकमभिप्रेतम् । पूर्वोत्तरा-र्धाभ्यां विमर्शस्वाभिमतपक्षौ व्यञ्जितौ । यद्वेति यदि वेति च तुल्यार्थम् ; येषां वधेन जीवनमस्माकमनिष्टम्, त एवा-स्मान् जिघांसन्तः स्वहननानुरूपत्वेनावस्थिता इति, यानेव इत्यादेरन्वयार्थः । न जिजीविषामः इत्यनेन सूचितामनिर्णय-पर्यवसिताम्, अत एव प्रश्नहेतुभूतां प्रतिभामाह—**इति मे प्रतिभातीति** । यच्छ्रेयः इत्यादेरन्वयं फलितार्थमुपदेश-योग्यत्वायोक्तां शिष्यगुणसंपत्तिं च स्फुटयति—**यन्मह्यमित्यादिना** । निश्चेतव्याकारनिष्कर्षणाय इतिकरणम् । शास-नीयो हि शिष्यः ; अतः, शिष्यस्तेऽहं शाधि माम् इति वदति । स्वभावोऽत्र धैर्यम् ; कर्तव्यविशेषाज्ञानाच्छोकापनोद-नोपायराहित्यादिना वा अतिमात्रकार्पण्यम् । त्याज्यस्यापरित्यागोऽत्र कार्पण्यमित्येके ; दयाजनकदीनवृत्तिनिरतत्वमित्यपरे । **भगवत्पादावुपससादेति** शिष्यत्वप्रपन्नत्वाद्युक्तिफलम् ॥ ६ ॥ ७ ॥

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८

सञ्जय उवाच—

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः । न योत्स्यामीति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९

भा ॥ एवमस्थाने समुपस्थितस्नेहकारुण्याभ्यामप्रकृतिं गते, क्षत्रियाणां युद्धं परमधर्ममप्यधर्मं मन्वानं धर्मबुभुत्सया च शरणागतं पार्थमुद्दिश्यात्मयाथात्म्यज्ञानेन युद्धस्य फलाभिसन्धिरहितस्यात्मप्राप्त्युपायताज्ञानेन च विना अस्य मोहो न शाम्यतीति मत्वा, भगवता परमपुरुषेण अध्यात्मशास्त्रावतरणं कृतम्। तदुक्तम्—*अस्थानस्नेहकारुण्यधर्माधर्मधियाऽऽकुलम्। पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम् ॥इति॥८॥९॥

*एवमुक्त्वेति श्लोके हृषीकेशपदेन सदर्थश्रवणायार्जुनहृषीकप्रेरकत्वम्, * यच्छोकमुच्छोषणमिन्द्रियाणामित्याद्युक्तेन्द्रियक्षोभशान्तिकरत्वं च, व्यञ्जितम्। हृष्यन्ति हर्षयन्तीति वा हृषीकाणि इन्द्रियाणि। **एवमुक्त्वा**—स्वावस्थामावेद्येत्यर्थः। * निद्रालस्ये गुडाका स्यात् इति गुडाका निद्रा; तस्या ईशो गुडाकेशः, प्रबुद्धस्वभाव इत्यर्थः; पिण्डितकेश इति वा। गोविन्दशब्देन शोकापनोदनयोग्यवाक्छालित्वम्, गाशब्दनिर्दिष्टाया भुवो [लाभाय] भारावतरणार्थप्रवृत्तत्वं चाभिप्रेतम् ॥

एवमनेनापोद्घातेनोचितावसरे वक्ष्यमाणशास्त्रावतरणसङ्गतिं वदन् अर्थादुपोद्घातसंग्रहश्लोकं च व्याकरोति—**एवमिति**। अस्थानशब्दस्य *विषमे समुपस्थितमित्येतद्विषयत्वं व्यञ्जयन्, तस्य स्नेहकारुण्याभ्यामेवान्वयाय तयोः पृथङ्निर्देशं कृतवान्। **अप्रकृतिं गत**मिति आकुलशब्दार्थ उक्तः। तेन स्वभावतो धीरत्वं सूच्यते; * उपहतस्वभावः (७) इति हि स्वेनैवोक्तम्। एतेन कार्पण्यदोषोपहतस्वभावत्वं धर्मसंमूढचेतस्त्वे हेतुतयोक्तमित्यपि दर्शितम्। **धर्मसंमूढचेताः** इत्येतद्विवरणरूपस्य **धर्माधर्मधियेत्यस्य** अर्थः **क्षत्रियाणा**मित्यादिनोक्तः। धर्मेऽप्यधर्मधीः धर्माधर्मधीः, शुक्तिकारजतधीरितिवत्; तत्र यथार्थख्यातिपक्षे भेदाग्रहो विवक्षितः। तामसी चेयं धीः; * अधर्मं धर्ममिति या मन्यते (१८. ३२) इत्यादि हि वक्ष्यते। अत्रास्थानस्नेहकारुण्याभ्यां जाता धर्माधर्मधीरिति विग्रहो द्रष्टव्यः। स्नेहकारुण्यधर्माधर्मभयाकुलेत्यादि प्राचीनभाष्यानुसारेण **धर्माधर्मभयाकुल**मिति पाठे तु त्रयाणां द्वन्द्वः। **पृच्छामि त्वा** इत्यादिसमभिव्याहृतप्रपन्नशब्दार्थः **धर्मबुभुत्सया च शरणागत**मित्युक्तः। एवं योग्योद्देशेन प्रवृत्तिर्युज्यत इत्याह—**पार्थमुद्दिश्येति**। व्याजलाभमात्रेण शास्त्रावतरणं कृतमिति वा भावः। **आकुलं पार्थमुद्दिश्य** इत्यस्य तात्पर्यम् **आत्मे**त्यादिना **मत्वेत्यन्तेनोक्तम्**। आत्मनो याथात्म्यं नित्यत्वभगवदधीनत्वादिकम्; * न हि प्रपश्यामीत्यादिकं वदतोऽस्यायमेव शोकनिरासोपाय इति भावः। **कृत**मित्यस्य केनेत्याकाङ्क्षायां प्रबन्धकर्तृभूतव्यासादिशङ्काव्यावर्तनायोक्तं **भगवता परमपुरुषेणेति**। अनेन पदद्वयेन शास्त्रप्रामाण्याद्युपयुक्तमुभयलिङ्गत्वादिकमभिप्रेतम्। अन्यपरशास्त्रान्तरव्युदासाय **अध्यात्मे**ति विशेषितम्। अस्यार्थस्य सांप्रदायिकत्वायाह—**तदुक्तमिति**। प्रत्यध्यायं संग्रहश्लोकैरर्थभेदेऽभिधीयमानेऽपि इतःपूर्वस्य द्वितीयाध्यायैकदेशस्यापि शास्त्रोपोद्घातत्वम्, अतःपरस्य शास्त्र[ावतरण]रूपत्वं च विवेक्तुम् * अस्थानेत्यादिना संग्रहश्लोकेनानिर्दिष्टप्रथमाध्यायेनैतावत्संगृहीतम्। महर्षिस्तु शोकतदपनोदनरूपकथावान्तरसंगत्या * तं तथेत्यादिकं द्वितीयेऽध्याये न्यवीविशत्; इदमपि सूचितम् * तन्मोहशान्तये इति द्वितीयाध्यायफलं संगृह्णद्भिः। **ततश्चास्थानस्नेहाद्याकुलत्वं प्रथमाध्यायार्थः**; सविशेषः स एवात्र संगत्यर्थमनूदित इत्यपि दर्शितं भवति। नन्वेवंविधमुद्दिश्य कथमपृष्टकर्मयोगज्ञानयोगभक्तियोगादिविषयं शास्त्रमुपदिश्यते; * नापृष्टः कस्यचिद्ब्रूयात् (मनु. २.११०) इति हि स्मरन्ति। विशेषतश्चायं गुह्यगुह्यतरगुह्यतमप्रकारोऽर्थः सहसोपदेष्टुमयुक्तः। *तस्माद्युध्यस्व भारत, * युध्य च इत्यादिषु च प्राकरणिकयुद्धप्रोत्साहनपरत्वमेव प्रतीयते। अतो नास्य शास्त्रस्याध्यात्मपरत्वमिति। अत्रोच्यते—*यच्छ्रेयः स्यादिति प्रश्नवाक्ये **यच्छ्रेयः** इत्यनिर्धारितविशेषं दृश्यते। न चार्जुनस्य युद्धमेव श्रेयस्त्वेन जिज्ञास्यमित्यस्ति नियमः, परमास्तिकस्य तस्य

भगवति संनिहिते प्रस्तुतमुखेन परमनिश्श्रेयसपर्यन्तजिज्ञासोपपत्तेः । अस्तु वा तस्य युद्धमात्रविषया जिज्ञासा ; तथाऽपि परमकारुणिकेन भगवता यच्छ्रेयः इति सामान्यवचनमालम्ब्य परमहितोपदेश उपपन्नः । *युध्यस्वेत्यादिकमपि परमनिश्श्रेयसोपायतयेति तत्रतत्र व्यक्तम् । तस्माद्युक्तमिदम् **अध्यात्मशास्त्रावतरणमिति** ॥ ८ ॥ ९ ॥

तमुवाच हृषीकेशः प्रहसन्निव भारत । सेनयोरुभयोर्मध्ये सीदमानमिदं वचः ॥ १०

भा ॥ [तमेवं] एवं देहात्मनोर्याथात्म्याज्ञाननिमित्तशोकाविष्टम्, देहातिरिक्तात्मज्ञाननिमित्तं च धर्मं भाषमाणम्, परस्परविरुद्धगुणान्वितम्, उभयोस्सेनयोर्युद्धायोद्युक्तयोर्मध्ये अकस्मान्निरुद्योगम्, पार्थमालोक्य परमपुरुषः प्रहसन्निवेदमुवाच—परिहासवाक्यं वदन्निव आत्मपरमात्मयाथात्म्यतत्प्राप्त्युपायभूतकर्मयोगज्ञानयोगभक्तियोगगोचरं *न त्वेवाहं जातु नासमित्यारभ्य *अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः इत्येतदन्तं वचनमुवाचेत्यर्थः ॥ १० ॥

परिहासयोग्यत्वाय *तमिति परामृष्टमाह—**एवमित्यादिना** । *उभयोरित्यनेन सूचितमुक्तं **युद्धायोद्युक्तयोरिति** । एतेनोपदेशावसरलाभोऽपि व्यञ्जितः । *सीदमानमित्यनेन निरुद्योगत्वं फलितम् । युद्धनिवृत्त्यनर्हावस्थाज्ञापकेन *मध्ये इत्यनेनाभिप्रेतमाह—**अकस्मादिति** । अधर्मादिः पराजयादिर्वा युद्धनिवृत्तेः सम्यग्धेतुरत्र नास्ति ; अहेतुकोपक्रान्तत्यागे तु परिहास्यत्वमिति भावः । अत्र हृषीकेशत्वोक्तिफलितं वक्ष्यमाणशास्त्रप्रामाण्याद्युपयुक्तं वक्तुः पुरुषस्य सर्ववैलक्षण्यं **परमपुरुष** इति दर्शितम् । यद्यप्यसौ हृषीकेशत्वात्पार्थस्य हृषीकादिकं सर्वं सङ्कल्पमात्रेण नियम्य भूभारावतारणाय प्रेरयितुं शक्तः ; तथाऽपि जगदुपकृतिमर्त्यतया पार्थतदितरात्मसाधारणपुरुषार्थोपायशास्त्रोपदेशद्वारा प्रवर्तयतीति भावः । यद्वा धीरमर्जुनं हृषीकेशतया स्वयं प्रक्षोभ्य प्रहसन्निव जगदुपकाराय शास्त्रमुवाचेति । संबन्धविशेषात् समनन्तरवाक्यपर्यालोचनया च परिहासार्थत्वौचित्यात् प्रहासस्य पार्थकर्मकत्वमुक्तम् । यद्वा प्रपन्नस्य दोषनिरीक्षणेन परिहासासंभवम्, शिष्यं प्रत्यध्यात्मोपदेशे [प्रहासमात्रं दृष्टान्तानुपयोगं] परिहासमात्रानुपयोगं चाभिप्रेत्य **पार्थ**शब्दः । अतः *प्रहसन्निवेत्यनेन फलितं सरसत्वम्, सुग्रहत्वम्, निखिलनिगमान्तगह्वरनिर्लीनस्य महतोऽर्थजातस्यानायासभाषणम्, इदंशब्दस्य वक्ष्यमाणसमस्तभगवद्वाक्यविषयत्वम्, इङ्गितेनापि विवक्षितसूचनं च दर्शयति—**परिहासेत्यादिना** । *अशोच्यान् इति श्लोकस्यापि उपदेशार्थावधानापादनार्थपरिहासच्छायतया शास्त्रावतरणमात्रत्वेन साक्षाच्छास्त्रत्वाभावात्—*न त्वेवाहम् इत्यारभ्येत्युक्तम् । यद्वाऽत्र *अशोच्यान् इति श्लोकः प्रहसन्निवेत्यस्य विषयः, *न त्वेवाहम् इत्यादिकमिदंशब्दार्थः । अत्र *मा शुचः इत्येतदन्तं **भक्तियोगगोचर**मिति निर्देशः, सर्वसाधकस्यापि चरमश्लोकोक्तप्रपदनस्य प्रकृतान्वयेन भक्तिविरोधिनिवर्तकतयोदाहरिष्यमाणत्वात् ॥ १० ॥

श्रीभगवानुवाच—

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे । गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११

भा॥ अशोच्यान्प्रति अनुशोचसि । *पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः इत्यादिकान् देहात्मस्वभावप्रज्ञानिमित्तवादांश्च भाषसे । देहात्मस्वभावज्ञानवतां नात्र किंचिच्छोकनिमित्तमस्ति । गतासून् देहान् अगतासून् आत्मनश्च प्रति [तयोः] तत्स्वभावयाथात्म्यविदो न शोचन्ति । अतस्त्वयि विप्रतिषिद्धमिदमुपलभ्यते ; यदेतान् हनिष्यामीत्यनुशोचनम्, यच्च देहातिरिक्तात्मज्ञानकृतं धर्माधर्मभाषणम् । अतो देह-

स्वभावं च न जानासि, तदतिरिक्तमात्मानं च नित्यम् ; तत्प्राप्त्युपायभूतं युद्धादिकं धर्मं च । इदं च युद्धं फलाभिसन्धिरहितमात्मयाथात्म्यावाप्त्युपायभूतम् । आत्मा हि न जन्माधीनसद्भावो न मरणाधीनविनाशश्च, तस्य जन्ममरणयोरभावात् । अतः स न शोकस्थानम् । देहस्त्वचेतनः परिणामस्वभावः ; तस्योत्पत्तिविनाशयोगः स्वाभाविक इति सोऽपि न शोकस्थानमित्यभिप्रायः ॥ ११ ॥

* अशोच्यानन्वशोचः इत्युक्ते केचिदशोच्याः शोचन्ति, तदनन्तरमयमपि शोचतीति भ्रान्तिः स्यात् ; तन्निवृत्त्यर्थमुक्तम् **अशोच्यान्प्रती**ति । **अन्वशोचः** इति लङ्प्रयोगोऽनुपपन्नः, शोकस्याद्यतनत्वात्, **भाषसे** इति वर्तमानार्थव्यपदेशवैरूप्याच्च, इत्यत्राह—**अनुशोचसी**ति । अद्यतन एव चिरानुवृत्तत्वविवक्षया सोपसर्गलङ्प्रयोगः ; यद्वा वर्तमानार्थ एव * सुप्तिङुपग्रह इत्यादिना लकारव्यत्ययः । * प्रज्ञावादांश्च भाषसे इत्यत्र * वर्तमानसामीप्ये वर्तमानवद्वा (अष्टा. ३. ३. १३१) इत्यनुशासनाद्भूते लट् । तेन * तूष्णीं बभूव हेत्यनेन न विरोधः । अत्र प्रकृष्टज्ञानवाचिना प्रज्ञाशब्देन देहात्मनोः स्वभावज्ञानमुच्यते । प्रज्ञया कृता व्यवहाराः प्रज्ञावादा इति समासार्थव्यञ्जनाय निमित्तशब्दः । देहात्मभेदज्ञाने सति हि पितॄणां तदर्थपिण्डोदककक्रियायास्तल्लोपनिमित्तप्रत्यवायादेश्च विश्वासपूर्वको व्यवहार इत्येतत्सूचनाय **पतन्ति** इत्याद्युपात्तम् । फलितमाह—**देहात्मे**ति । **गतासून्** इत्यादेर्विवक्षितं विशेष्यं निर्दिशन्, पण्डितशब्दं प्रकृतोपयोगितया व्याकुर्वन्नन्वयमाह—**गतासूनि**ति । यद्यपि गतासूनगतासूनिति शब्दौ निष्प्राणसप्राणवाचकौ ; तथाऽपि तस्यार्थस्य प्रकृतासङ्गतेः—* अविश्रान्तमनालम्बमपाथेयमदेशिकम् । तमःकान्तारमध्वानं कथमेको गमिष्यसि ॥ (भा. मो. ३३०. ३४), * बद्धवैराणि भूतानि द्वेषं कुर्वन्ति चेततः । शोच्यान्यहोऽतिमोहेन व्याप्तानीति मनीषिणा ॥ (वि. १. १७. ८२) इत्यादिषु पण्डितानामेव सप्राणनिष्प्राणविषयशोकदर्शनात्, **अशोच्यानन्वशोचः** इत्यस्य वक्ष्यमाणे विस्तरे च, **अव्यक्तोऽय**मित्यादिना **अथ चैन**मित्यादिना च, नित्यस्यात्मनः अनित्यस्य शरीरस्य चाशोचनीयत्वेन वक्ष्यमाणत्वादत्रापि तद्विषयतैव युक्तेत्यभिप्रायः । देहास्तावन्न शोचनीयाः नश्वरत्वात्, आत्मानोऽपि तथा अनश्वरत्वात्, इत्यूहापोहक्षमबुद्धिरूपा पण्डा येषां तेऽत्र पण्डिताः । प्रज्ञावादविप्रतिषिद्धशोकेनोन्नीतांस्तदज्ञानविषयानाह—**अतो देहे**त्यादिना । शोकस्तु सिद्धः ; प्रज्ञा तु वादमात्रस्थेति भावः । को देहस्वभावः, कथमात्मा देहातिरिक्तो नित्यश्च, कथं चानयोरशोच्यत्वम्, कथं वा घोरं युद्धादिकमात्मप्राप्त्युपायभूतम्, इत्याशङ्क्य तदज्ञानविषयतयोक्तं त्रयं बुद्धिस्थक्रमेण विवृणोति—**इदं चेत्यादिना** । इदमेव युद्धं बुद्धिविशेषसंस्कृतत्वादात्मयाथात्म्यप्राप्तिकरमित्यर्थः । **उपायभूत**मित्यत्र क्विप्रत्ययाप्रयोगादयमेवास्य स्वभावः ; फलान्तराभिसन्धिना तु स प्रतिबध्यत इति भावः । **आत्मा हीति** हिशब्देन * न जायते (क. २. १८) इत्यादिश्रुतिप्रसिद्धिं द्योतयति । आत्मनो देहसंयोगवियोगलक्षणजन्ममरणसद्भावेऽपि नोत्पत्तिविनाशरूपे जन्ममरणे इत्यभिप्रायेणाह—**तस्ये**ति । **देहस्त्वि**ति तुशब्द आत्मापेक्षया वैलक्षण्यं प्रत्यक्षादिसिद्धं द्योतयति । देहत्वेनोपचयात्मकत्वादचेतनत्वाच्च घटादिवत्परिणामस्वभाव इत्यर्थः ॥ ११ ॥

भा ॥ प्रथमं तावदात्मनां स्वभावं शृणु—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२

भा ॥ अहं सर्वेश्वरस्तावत्, अतो वर्तमानात्पूर्वस्मिन् अनादौ काले, न नासम्—अपि त्वासम् । त्वन्मुखाश्चैते ईशितव्याः क्षेत्रज्ञा न नासन्—अपि त्वासन् । अहं च यूयं च सर्वे वयम्, अतः परम्—अस्मा-

दनन्तरे काले, न चैव न भविष्यामः—अपि तु भविष्याम एव। यथाऽहं सर्वेश्वरः परमात्मा नित्य इति नात्र संशयः, तथैव भवन्तः क्षेत्रज्ञा आत्मानोऽपि नित्या एवेति मन्तव्याः।

एवमुपायोपेयनिवर्त्यस्वभावानभिज्ञं प्रति त्रितयोपदेशाय बुभुत्सोत्पादिता। अथ पारलौकिकफलोपायानुष्ठानाधिकारित्वाय देहातिरिक्तत्वेनावश्यं ज्ञातव्यं पुरुषार्थतयोपेयमात्मानं तत्प्राप्तीच्छामुखेन तदुपायेच्छाजननाय प्रथममेवोपदिशतीत्यभिप्रायेणाह—**प्रथममिति।** सृष्टित्यनेन प्रकृतश्लोकस्य प्रतिवादिवाक्यवदुपालम्भमात्रार्थताव्युदासाय अवधानापादनार्थत्वं व्यञ्जितम्। जीवेश्वररूपेष्वात्मसु नित्यत्वे शीघ्रसंप्रतिपत्तियोग्यांशं प्रथममाहेत्यभिप्रायेणाह—**अहमिति।** ईश्वरस्याहंग्रहः सर्वनियन्तृत्वगर्भ इति तद्व्यपदेशफलितमाह—**सर्वेश्वर** इति। **तावदिति** संप्रतिपत्तिसूचनम्। * अतःपरम् इत्यत्र अतःशब्दार्थम्, तस्य पूर्ववाक्येऽपि यथार्हमनुषङ्गम्, जातुशब्दाभिप्रेतं चाह—**अत इत्यादिना।** अनभिमतपक्षनिषेधाय व्यतिरेकरूपेऽपि वाक्ये तुशब्दद्योतितमन्वयमाह—**अपि त्वामिति। न त्वं नेमे** इति भेदनिर्देशेऽपि क्षेत्रज्ञत्वाकारेण समुदायीकुर्वन्, ईश्वरापेक्षया युष्मदिदंशब्दार्थतया फलितमीशितव्यत्वाकारं च साधारणं दर्शयन्, संनिहितनिदर्शनपराया एकदेशोक्तेस्तात्पर्यतो ब्रह्मादिसकलक्षेत्रज्ञविषयत्वं चाह—**त्वन्मुखा** इति। तुशब्दानुषङ्गं क्रियापदे विभक्तिविपरिणामं च दर्शयति—**अपि त्वामन्निति।** * न त्वं नेमे जनाधिपाः इत्यत्र न त्वेवेत्येतदनुपज्य, न त्वं नासीः, नेमे जनाधिपा नासन् इत्यन्वयः। **सर्वे वयम्** इत्यस्य पूर्वोक्तजीवेश्वरसमुदाये संप्रतिपत्तव्यांशं विविनक्ति—**अहं चेति।** *त्यदादीनां मिथोयोगे यः परः स शिष्यते इति युष्मदस्मदोरत्रैकशेषः। एवमुत्तरत्र **भवन्तः** इत्यत्रापि मन्तव्यम्। कालानन्त्यात् पर्वतादीनामिवातिस्थिराणामपि कदाचित् नाशः स्यादित्युत्प्रेक्षां निवारयति—**अपि तु भविष्याम एवेति।** अप्रस्तुतस्वनिर्देशस्य दृष्टान्तार्थताम्, तत्र अहमिति निर्देशाभिप्रेतसर्वेश्वरत्वसर्वात्मत्वाभ्यां नित्यत्वोपपत्तिम्, दार्ष्टान्तिके च नित्यत्वसंभावनां चाह—**यथेति। सर्वेश्वरः**—कालत्रयवर्तिनः सर्वस्याधिपतिः कथं न कालत्रयवर्ती, कथं च सर्वेषां नियन्ता केनचित्कदाचिन्निरुध्येतेति भावः। **परमात्मा**—देशकालस्वरूपानवच्छिन्नव्याप्तिरिति परमात्मपदनिरुक्तिः। तथा च व्याप्तत्वात् व्याप्यैरस्य न नाशः; सर्वात्मत्वेन सर्वकालवर्तित्वं च सिद्धमिति भावः। ननु यः प्रत्यक्षयोग्ये देहातिरिक्ते जीवेऽपि संशेते, स कथं ततो [ऽप्य] व्यतिरिक्तेऽत्यन्तागोचरे परमात्मनि निःसंशयः स्यात्? उच्यते—न ह्यसावर्जुनः, * पुरुषं शाश्वतं दिव्यम् (१०.१२) इत्यादेः स्वयं वक्ता, नारदासितदेवलव्यासादिपरमर्षिशतवचनविदितपरब्रह्मभूतपरमपुरुषस्वभावः, प्रत्यक्षीकृतपुरन्दरलोकसकलास्त्रमन्त्रतपःप्रभावादिः, निरतिशयगुरुदेवताभक्तिः, अस्खलितसकलवर्णाश्रमाचारः, धर्मलोपभयविह्वलः, देहातिरिक्तमात्मानमीश्वरं चात्यन्ताय नास्तीति भ्राम्यति; संशेते वा। तत्प्रकारविशेषानभिज्ञतयैव हि तस्य शोकादिः। ततोऽयमीश्वरं तन्नित्यतां च सर्वेश्वरत्वादिसिद्धां सामान्यतो मन्यते; लोकदृष्ट्या जन्मविनाशादिदर्शनात्, *न प्रेत्य संज्ञाऽस्ति (बृ. ४. ४. १२) इत्यादिश्रुत्यर्थापातप्रतीत्या च, जीवप्रकारविशेषांस्तत्त्वतो न जानातीति न कश्चिद्दोषः। **क्षेत्रज्ञा आत्मान इति।** यथा जीवात् परमात्मनो वैलक्षण्येन जीवस्वभावास्तस्मिन्न भवन्ति, तथा क्षेत्राद्विलक्षणत्वेन वक्ष्यमाणेन क्षेत्रगतमनित्यत्वादिकं तन्नियन्तरि जीवे न शङ्कनीयमिति भावः॥

भा॥ एवं भगवतः सर्वेश्वरान्, आत्मनां परस्परं च भेदः पारमार्थिक इति भगवतैवोक्तमिति प्रतीयते; अज्ञानमोहितं प्रति तन्निवृत्तये पारमार्थिकनित्यत्वोपदेशसमये अहम्, त्वम्, इमे सर्वे, वयमिति व्यपदेशात्। औपाधिका [त्म] भेदवादे हि आत्मभेदस्यातात्त्विकत्वेन तत्त्वोपदेशसमये भेदनिर्देशो न संगच्छते

भगवदुक्तात्मभेदः स्वाभाविक इति श्रुतिरप्याह—* नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् (श्वे. ६. १३ ; क. ५. १३) इति । नित्यानां बहूनां चेतनानां य एको नित्यश्चेतनः, [स] कामान् विदधातीत्यर्थः । अज्ञानकृतभेददृष्टिवादे तु परमपुरुषस्य परमार्थदृष्टेर्निर्विशेषकूटस्थनित्यचैतन्यात्मयाथात्म्यसाक्षात्काराच्निवृत्ताज्ञानतत्कार्यतया अज्ञानकृतभेददर्शनं तन्मूलोपदेशादिव्यवहाराश्च न संगच्छन्ते ।

ता ॥ अथ कुमतिसौचिकविनिर्मितानामामूलचूडमघटितवि[सं]घटितजरत्कर्पटशकलकन्थासगन्धानां प्रबन्धानां दोषान् स्थालीपुलाकन्यायेन निदर्शयन्, प्रथमं शास्त्रोपक्रमविरोधं शास्त्रप्रवृत्त्यनुपपत्तिं च वदति—**एवमित्यादिना ;** एवं—तत्त्वोपदेशप्रवृत्तशास्त्रारम्भोक्तिप्रकारेणेत्यर्थः । **भगवतः सर्वेश्वरादिति ।** उभयलिङ्गात् सर्वनियन्तुः अहमिति निर्दिष्टादित्यर्थः । यदीश्वराज्जीवानां भेदः पारमार्थिको न स्यात्, उभयलिङ्गत्वदुःखित्वादिस्वभावसङ्करः स्यात् ; यदि चात्मनां मिथोभेदः सत्यो न स्यात्, बद्धमुक्तशिष्याचार्यादिव्यवस्थानुपपत्तिः स्यादिति भावः । **भगवतैव**—न तु रथ्यापुरुषकल्पेन केनचित् । यद्वा *त्वमेव त्वां वेत्थ योऽसि सोऽसि (यजु. का. १. ६) *सो अङ्ग वेद यदि वा न वेद (ऋ. ८. ७. ११. ११) इत्युक्तेन भगवता स्वेनैव स्वस्य स्वशरीरभूतजीवानां च तत्त्वमुक्तमिति प्रतीयत इत्यभिप्रायः । **अज्ञानमोहितमिति**—न हि स्वयं बंभ्रम्यमाणस्यासेनापि भ्रान्तिरेवोत्पादनीयेति भावः । बुद्धाद्यवतारेणासुरादिभ्य इवायमुपदेशः किं न स्यादित्यत्रोक्तं—**तन्निवृत्तय** इति । मोहनिवृत्त्यर्था गीतोपनिषदिति भवद्भिरपि स्वीकृत्य व्याख्यानादि च कृतमिति भावः । देहभेदाभिप्रायेण बहुवचनम्, नात्मभेदाभिप्रायेणेति शंकरोक्तं दूषयति—**पारमार्थिकेति ।** न ह्यसौ *न त्वेवाहमित्यादिग्रन्थो भ्रान्तिनिवृत्त्यर्थो मन्त्रपाठः, येन भेदनिर्देशस्यान्यपरतां मन्येमहि ; किं त्वसौ तत्त्वार्थोपदेशरूप इति भावः । **[अहमित्यादि—]अहम्** इति प्रत्यक्त्वेन, **त्वम्** इति स्वाभिमुखचेतनान्तरत्वेन, **इमे** इति स्वपराङ्मुखानेकचेतनत्वेन, **सर्वे** इति एकोपाधिसंगृहीतानेकव्यक्तित्वेन, **वयम्** इति स्वेन सहात्मतयैकवर्गीकृतानन्तव्यक्तित्वेन इति भावः । **इति व्यपदेशादिति**—न ह्यत्र नाहमिति किं चिदस्ति न च त्वमिति नाप्यन्य इति प्रत्यादेशः कृत इति भावः । भास्करमते भेदस्य सत्योपाधिप्रयुक्तत्वात् भेदनिर्देश उपपद्यत इति शङ्कायां तत्रापि सामान्यत उक्तं दूषणमपरिहार्यमित्याह—**औपाधिकेति ।** हिशब्द उपाधिभेदोपहितस्य परोक्तघटाकाशाद्युदाहरणेष्वपि भेदांशात्तिक्त्वाभ्युपगमपरः । उपाधिसत्यत्वेऽपि यथैकस्यैव मुखचन्द्रादेर्मणिकृपाणसरित्समुद्रादिभिः सत्यैरप्युपाधिभिर्भेदोऽपारमार्थिकः, यथा चैकस्यैवाकाशादेर्घटमणिकादिसत्योपाधिभिरपि संयोगभेदातिरिक्तो नोपाध्यधीनो भेदः, एवमन्तःकरणादिभिः सत्यैरप्युपाधिभिर्निरवयत्वेन छेदनभेदनाद्ययोग्यस्य सर्वत्र परिपूर्णस्य ब्रह्मणो भेदोऽपारमार्थिक इत्यभ्युपगन्तव्यम् । ततश्च तत्त्वोपदेशसमये तद्विपरीतोपदेशो हितोपदेशिनो न घटत इति भावः । द्वयोरपि पक्षयोः श्रुतिविरोधोऽपि दूषणम् । स्वपक्षे च श्रुत्यैकार्थ्यान्न बुद्धागमादिवन्मोहनार्थत्वशङ्केत्यभिप्रायेणाह—**भगवदिति ।** यद्वा भास्करपक्षदूषणायैव श्रुतिरुपात्ता ; ततश्च कैमुत्येन शंकरपक्षोऽपि दूषितः । **अपि**शब्दः प्रमाणद्वयसमुच्चये । **भगवदुक्तात्मभेद** इत्यनेन श्रौतवदेव प्रमाणान्तरनैरपेक्ष्यं सूच्यते । श्रुतिरपि नित्या तदाज्ञारूपतयैव हि प्रमाणम् । *नित्यो नित्यानाम् (श्वे. ६. १३) इत्यत्र *पवित्राणां पवित्रम् (वि. स.) इत्यादिवद्योजनया जीवानित्यत्वपर्यवसितमर्थान्तरभ्रमं निरस्यन्, नित्यत्वबहुत्वचेतनत्वसामानाधिकरण्येन निरुपाधिकमेवात्मनां बहुत्वं चेतनत्वं चेति प्रदर्शयन्, तत एवात्मानित्यत्ववादिनां सौगतादीनाम्, अविद्यादिमूलभेदवादिनां शंकरादीनाम्, आगमापायिचैतन्यवादिनां वैशेषिकादीनां, चिच्छक्तिमात्रनित्यत्ववादिनामन्येषामपि निरासमभिप्रयन्, प्रथमान्तपदचतुष्टयसामानाधिकरण्यबलादीश्वरैक्यं तदैक्यस्य हिरण्यगर्भ-

रुद्रेन्द्रादिवत्कालादिभेदाभेदत्वेन प्रवाहेश्वरपक्षप्रतिक्षेपं श्रुत्यन्तरादिप्रसिद्धनित्यचैतन्यप्रसरादिकं सूचयन्, *यदाप्नेयः (य. अ. ३. ९. १७) इत्यादिवदनुवादलिङ्गसद्भावेऽप्यप्राप्तत्वबलेन विशिष्टविधित्वं च व्यञ्जयन्, सर्वदा सर्वत्र सर्वेषां चेतनानामेक एवेश्वरस्तत्तत्कर्मसमाराधितस्तत्तदनुरूपाण्यपेक्षितानि करोतीति श्रुत्यर्थमाह—**नित्यानामिति**। पुनः सिंहावलोकितेन शंकरमतस्योपदेशानुपपत्तिरूपं शास्त्रारम्भमूलघातमाह—**अज्ञानेति**। किमयं भगवान् स्वेन ज्ञातमर्थमुपदिशति, अज्ञातं वा? ज्ञातमपि साक्षात्कृतम्, श्रुतमात्रं वा? उभयत्रापि तदज्ञानं निवृत्तम्, अनिवृत्तं वा? तन्निवृत्तावपि तत्कार्यभेदभ्रमो निवर्तते, न वा? इति विकल्पमभिप्रेत्य साक्षात्कारादज्ञानतत्कार्यनिवृत्तिपक्षे दूषणमाह—**परमपुरुषस्येति**। क्षेत्रज्ञस्य हि अपरमार्थदृष्टिः स्यादिति भावः। **निर्विशेषेत्यादि**—निर्विशेषत्वं सजातीयविजातीयस्वगतभेदराहित्यम्; कूटस्थत्वं मायानिष्ठत्वम्, साधारण्यम्, निर्विकारत्वं वा—स्वयमविक्रियमाणस्यापि कूटस्य यथा स्वसंसर्गिणामयःप्रभृतीनां विकारहेतुत्वं तद्वत्; तत एव **नित्यत्वं** कालानवच्छिन्नत्वम्। **याथात्म्यम्** उक्तप्रकारम्; अयथासाक्षात्कारोऽस्मदादीनामपि परैरभ्युपगत इति तद्व्युदासाय **याथात्म्यसाक्षात्कारोक्तिः**। अज्ञानम् अविद्या; तत्कार्यो भेदभ्रमः; आदिशब्देनानुष्ठापनादि गृह्यते। उपदेशादिव्यवहारो हि उपदेश्यार्थतद्वाचकाधिकारिशिष्याचार्यप्रयोजनभेदादिनानाविधभेददर्शनमूलः। भेददर्शनं चाज्ञानेनैव कृतमिति त्वन्मतम्। ततश्चाज्ञानतत्कार्यनिवृत्तौ कथं तत्कार्यपरम्परानुवृत्तिरिति व्याघातापसिद्धान्तशास्त्रानारम्भोपदेशाभावनिष्फलपरिश्रमत्वश्रुतिविरोधादिदोषशतमुन्मिषेदिति भावः॥

भा॥ अथ परमपुरुषस्याधिगताद्वैतज्ञानस्य बाधितानुवृत्तिरूपमिदं भेदज्ञानं दग्धपटादिवन्न बन्धकमित्युच्यते—नैतदुपपद्यते; मरीचिकाजलज्ञानादिकं हि बाधितमनुवर्तमानं न जलाहरणादिप्रवृत्तिहेतुः। एवमत्राप्यद्वैतज्ञानेन बाधितं भेदज्ञानमनुवर्तमानमपि मिथ्यार्थविषयत्वनिश्चयान्नोपदेशादिप्रवृत्तिहेतुर्भवति। न चेश्वरस्य पूर्वमज्ञस्य शास्त्राधिगततत्त्वज्ञानतया बाधितानुवृत्तिः शक्यते वक्तुम; *यः सर्वज्ञः सर्ववित्, (मु. १.२ ९) *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, (श्वे ६.७) *वेदाहं समतीतानि वर्तमानानि चार्जुन। भविष्याणि च भूतानि मां तु वेद न कश्चन॥ (गी. ७. २६) इति श्रुतिस्मृतिविरोधात्।

ता॥ अद्वैतज्ञानादज्ञाननिवृत्तावपि वासनादिवशाद्भेदभ्रमस्यानुवृत्तिं तस्य चाबन्धकत्वमाशङ्कते—**अथेति। दग्धपटादिवदिति**—यथा दग्धपटादेः पटादिप्रतिभासविषयत्वेऽपि न पटादिकार्यकरत्वम्, तद्वदत्र भेदभ्रमस्यानुवृत्तस्यापि न संसारहेतुत्वमिति भावः। **नैतदुपपद्यत** इति—दृष्टान्तमात्रमुक्तं न तूपपत्तिः, प्रत्युतानुपपत्तिश्च विद्यत इति भावः। अनुपपत्तिं सोदाहरणमाह—**मरीचिकेति**। एवमत्र प्रसङ्गः—विप्रतिपन्नं भेदज्ञानमद्वैतज्ञानबाधिततया मिथ्यार्थमिति निश्चितं चेत्, न स्वविषयानुरूपप्रवृत्तिहेतुः स्यात्; यथा बाधितानुवृत्तं मरीचिकाजलज्ञानम्—इति। एवं च बाधितानुवृत्तभेदज्ञानं दग्धपटादिवत् न स्वकार्यकरमिति बाधितानुवृत्तिफलाभावात् स्वेष्टव्याघात इति भावः। श्रुतमात्रपक्षेऽपि निर्विशेषविषयसाक्षात्कारश्रवणयोर्विषयानतिरेकेणाज्ञाननिवृत्तिरुपपन्नेति कृत्वा सर्वेश्वरे बाधितानुवृत्तिस्वरूपं दूषयति—**न चेति**। ईश्वरत्वादेव पूर्वमज्ञ इति वक्तुं न शक्यते, अनीश्वरत्वप्रसङ्गात्। ईश्वरोऽपि चेत् पूर्वमज्ञः, तस्य शास्त्राधिगमोऽपि न संभवति, तदधिकज्ञानवतोऽन्यस्य शास्त्रोपदेष्टुरभावात्। भावे वा स एवेश्वरोऽनीश्वरो वा सन् कुतश्चित् सिद्धज्ञान इत्यनवस्थादिदोषात्। न च प्रवाहेश्वरपारम्पर्यमस्ति, तस्य दूषितत्वात्। न चेश्वरः स्वकृतेन शास्त्रेण तत्त्वमवगच्छति, वेदानित्यत्वान्योन्याश्रयादिप्रसङ्गात्। न चानादीनेव वेदान् स्मृत्वा तैरर्थमधिजगाम; स्मृत्यादिहेतोः पूर्वोपलम्भस्याप्युपदेष्टृभावादि-

दुःस्थत्वात्—इत्यादिदोषानभिप्रेत्योक्तं—**पूर्वमज्ञस्येत्यादि** । ईश्वरस्य पूर्वमज्ञत्वे शास्त्राधीनज्ञानत्वे तदुपदेष्टृन्तरसद्भावे भ्रान्त्यनुवृत्तौ च श्रुतिस्मृतिविरोधमाह—**यः सर्वज्ञ इति** । स्वरूपतः प्रकारतश्च सर्वं जानाति वेत्तीति विवक्षया सर्वज्ञ-सर्ववित्छब्दयोरपुनरुक्तिः ; सर्वं विन्दति प्राप्नोतीति वा सर्ववित् ॥

भा॥ किंच परमपुरुषश्चेदानींतनगुरुपरम्परा च, अद्वितीयात्मस्वरूपनिश्चये सति अनुवर्तमानेऽपि भेदज्ञाने, स्वनिश्चयानुरूपमद्वितीयात्मज्ञानं कस्मा उपदिशतीति वक्तव्यम् । प्रतिबिम्बवत्प्रतीयमानेभ्योऽर्जुनादिभ्य इति चेत्—नैतदुपपद्यते ; न ह्यनुन्मत्तः कोऽपि मणिकृपाणदर्पणादिषु प्रतीयमानेषु स्वात्मप्रतिबिम्बेषु, तेषां स्वात्मनोऽनन्यत्वं जानन्, तेभ्यः [कमप्यर्थमु]किमप्युपदिशति । बाधितानुवृत्तिरपि तैर्न शक्यते वक्तुम् ; बाधकेनाद्वितीयात्मज्ञानेनात्मव्यतिरिक्तभेदज्ञानकारणस्यानादेर्विनष्टत्वात् । द्विचन्द्रज्ञानादौ तु चन्द्रैकत्वज्ञानेन पारमार्थिकतिमिरादिदोषस्य द्विचन्द्रज्ञानहेतोरविनष्टत्वात् बाधितानुवृत्तिर्युक्ता ; अनुवर्तमानमपि प्रबलप्रमाणबाधितत्वेनाकिंचित्करम् । इह तु भेदज्ञानस्य सविषयस्य सकारणस्यापारमार्थिकत्वेन वस्तुयाथात्म्यज्ञानविनष्टत्वान्न कथञ्चिदपि बाधितानुवृत्तिः संभवति । अतः सर्वेश्वरस्येदानींतनगुरुपरंपरायाश्च तत्त्वज्ञानमस्ति चेद्भेददर्शनतत्कार्योपदेशाद्यसंभवः । नास्ति चेदज्ञानस्य तद्धेतोः स्थितत्वेनाज्ञत्वादेव सुतरामुपदेशो न संभवति ॥

ता ॥ एवमुपदेशस्य हेत्वनुपपत्तिरुक्ता । अथोपदेष्टृताऽपि नोपपद्यत इत्याह—**किं चेति । इदानीन्तनेति ।** न केवलमीश्वरकृतः प्रथम एवोपदेशोऽनुपपन्नः, अपि त्वद्यतनोऽपीति, [कुमति]मठपतिपरम्परायाः शिष्यान्नकुक्षिम्भरेः शिष्याद्यभावात्प्रायोपवेशनं प्रसज्यत इति भावः । अज्ञातोपदेशपक्षानुपपत्तिमभिप्रेत्याह—**स्वनिश्चयेति । न ह्येतेऽनुपलब्धार्थाः**, नापि संदिग्धार्थाः, नापि विप्रलम्भकाः, न च परोक्तानुवादिनः, नापि बालोन्मत्तादिवद्यथोपनतं जल्पाकाः, इति भावः । **कस्मा इति ।** स्वस्मै परस्मै वा ? पूर्वत्र भिन्नतया निश्चिताय, अन्यथा वा ? भिन्नतयेत्यत्रापि सत्यतया निर्णीताय, असत्यतया वा ? परस्मा इत्यत्रापि तात्त्विकाय, अतात्त्विकाय वा ? अतात्त्विकत्वेऽपि तथा प्रतीताय, अन्यथा वा ? इति विकल्प्य प्रष्टे तदुत्तरं वक्तव्यमित्यर्थः । तत्र स्वस्यैव भिन्नस्य सत्यत्वनिश्चयेऽपसिद्धान्ताज्ञत्वादिदोषप्रसङ्गः । असत्यत्वनिश्चये वन्ध्यातनयादिभ्य इवानुपदेशः । अभिन्नतया निश्चिताय स्वस्मै चेत्, अर्जुनादिप्रतिभासमन्तरेण सर्वदोपदेशः स्यात् ; न च तत्रोपदेशस्य किञ्चित्प्रयोजनमस्ति । परस्मै तात्त्विकायेति तु शरीरभेदेऽपि भवान्नाभ्युपगच्छति । अतात्त्विकतयैव प्रतीताय परस्मै चेत्, पूर्ववदेवानिर्वचनीयत्वेनासत्त्वेन वा निश्चितेभ्यः प्रतिबिम्बवन्ध्यासुतादिभ्योऽप्युपदेशप्रसङ्गः । अतात्त्विकस्यैव परस्य तात्त्विकत्वबोधे तु तत्त्ववेदित्वमेव न स्यादिति न तत्त्वोपदेशित्वसिद्धिरिति स्थिते, परमार्थत एकत्वेऽपि भ्रान्त्या भिन्नतया प्रतीयमानेभ्यो बाधकज्ञानबलेनाभिन्नतया निश्चितेभ्यश्चेति पक्षं शङ्कते—**प्रतिबिम्बवदिति** । दूषयति—**नेति** । अनुपपत्तिं विवृणोति—**न हीति** । **अनुन्मत्त** इति—ईश्वरादेरुन्माद एव भवता स्वीकृतः स्यादिति भावः । **कोऽपीति**—किमुतेश्वर इति भावः । **अनन्यत्वं जानन्निति**—अनन्य[त्वं]त्वमजानन्तो बालादयः काममुपदिशेयुः ; अत्रोपदेष्टुरन्यत्वाध्यवसाये भ्रान्तत्वादिप्रसङ्ग इति भावः । **किमपीति**—लौकिकमलौकिकं वा, दृष्टार्थमदृष्टार्थं वा, किं पुनर्मोक्षार्थमित्यर्थः । बाधितानुवृत्तिस्वरूपमभ्युपगम्य पूर्वं दूषणान्तरमुक्तम् ; इदानीं तन्मते तदेव न सिध्यतीत्याह—**बाधितेति** । उपपादयति—**बाधकेनेति** । न हि कारणाभावे कार्यं घटेत, न च दोषनिवृत्तौ भ्रान्तिनिवृत्तिर्नस्यादिति वक्तुं युक्तम् । **अनादेरिति**—स्वरूपतः प्रवाहतो वा अनादेरन्यानिवर्त्यतयैतावन्तं कालमनुवृत्तस्य भेद-

ज्ञानकारणभूतस्य दोषस्य यदि अद्वैतज्ञानेनापि नाशो न स्यात्, नित्यसंसारित्वं ब्रह्मणः स्यादिति भावः। अत्राज्ञानादेरिति कश्चित्पाठः; तत्रादिशब्देन भेदभ्रमस्तद्विषयश्च गृह्यते। परैरुदाहृते दृष्टान्ते बाधितानुवृत्तेरुपपत्तिमाह—**द्विचन्द्रेति**। **पारमार्थिकेति**—न हि पारमार्थिकं बाध्येत, तथा सति बाधाबाधविप्लवप्रसङ्गादिति भावः। **द्विचन्द्रज्ञानहेतोरिति**—न हि बाधकज्ञानेन पूर्वज्ञानस्य कारणं बाध्यते, इन्द्रियादेरपि बाधप्रसङ्गात्; अतो विषय एवारोपितस्तदधिष्ठानविषयेण विरुद्धाकारग्राहिणा ज्ञानेन बाध्यः। न चात्र तिमिरादिद्विचन्द्रज्ञानस्य चन्द्रैकत्वज्ञानस्य वा विषयः। भवतस्तु समस्तभेदभ्रमोपादानस्याज्ञानवासनादेः साक्षिचैतन्यविषयत्वात्, बाधकज्ञानस्य चाद्वितीयात्मव्यतिरिक्तसमस्तभावगोचरत्वात्, कारणस्याप्यनादेर्बाध एवेति भावः। **युक्तेति**—सामग्र्यनुवृत्तौ कार्यानुवृत्तिरुपपन्नेति भावः। यदि भ्रान्तिरनुवृत्ता कथं तर्हि तत्कार्यविस्मयभयादिनिवृत्तिरित्यत्राह—**अनुवर्तमानमपीति**। प्रबलशब्देन परपक्षे भेदभ्रमतद्बाधकयोरविशेषः सूचितः। *द्वयोरपि हि अज्ञानकारणत्वं तैराश्रितम्, अन्यथा सत्यद्वयप्रसङ्गात्। तथाच सति किं कस्य बाधकं बाध्यं वा? न च* दोषमूलत्वं बाधकज्ञानस्याज्ञातमिति वाच्यम्, प्रथममेव श्रवणवेलायां ब्रह्मव्यतिरिक्तसमस्तमिथ्यात्वप्रत्ययात्। न चाज्ञातमिति तावता तत्त्वसिद्धिः; सत्यरजतबाधकेन शुक्तिकाज्ञानेनाज्ञातदोषेणापि तत्त्वतो रजतस्वरूपबाधाभावात्। दोषमूलत्वाविशेषेऽपि पूर्वत्वपरत्वाभ्यां बाध्यबाधकव्यवस्थेति चेत्—न; दोषमूलत्वे ज्ञाते सति परत्वस्याकिञ्चित्करत्वात्, भ्रान्ततयाऽवगतेनोक्तस[र्प]र्वबाधकवाक्यवत्। अन्यथा शून्यमेव तत्त्वमिति माध्यमिकवाक्येन दोषमूलतया ज्ञातेनापि परत्वमात्रेण संविन्मात्रस्यापि बाधः स्यात्। अथ कारणस्यापि बाध्यतया विषयत्वापारमार्थिकत्वलक्षणं दृष्टान्ताद्वैषम्यं विवृण्वन् बाधितानुवृत्त्यसंभवं निगमयति—**इह त्विति। न कथञ्चिदपि**—अनाद्यज्ञानेन वा भेदज्ञानवासनादिभिर्वेत्यर्थः। ज्ञातं वा अज्ञातं वेति विकल्पाभिप्रायेणोपक्रान्तामुपदेशकारणाद्यनुपपत्तिं विकल्पस्फोरणेनोपसंहरति—**अत इति। सुतरामिति**—जानतस्तु बाधितानुवृत्तौ दृष्टान्तमात्रमपि तावदस्ति; अजानत उपदेशे सोऽपि नास्तीति भावः॥

भा॥ किंच गुरोरद्वितीयात्मविज्ञानादेव ब्रह्माज्ञानस्य सकार्यस्य विनष्टत्वात् शिष्यं प्रत्युपदेशो निष्प्रयोजनः। गुरुस्तज्ज्ञानं च कल्पितमिति चेत्, शिष्यतज्ज्ञानयोरपि कल्पितत्वात्तदप्यनिवर्तकम्। कल्पितत्वेऽपि पूर्वविरोधित्वेन निवर्तकमिति चेत्, तदाचार्यज्ञानेऽपि समानमिति तदेव निवर्तकं भवतीत्युपदेशानर्थक्यमेव, इति कृतमसमीचीनवादैः [निरस्तैः]॥ १२॥

ता॥ उपदेशस्य कारणाद्यनुपपत्तिरुक्ता; अथानर्थक्यमाह—**किं चेति**। प्रतिबिम्बवत्प्रतीयमानेभ्य इत्यादिना पूर्वमेव जीवाज्ञानपक्षस्यापि दूषितत्वाद्ब्रह्माज्ञानपक्षे अधिकदूषणमिदमुच्यते। ते खलु—*एकमेव ब्रह्माविद्याशबलमेक एव जीवः; स्वप्नदृश इवैकस्यैव तस्य भ्रमात् स्वप्नदृष्टपुरुषादय इवान्ये जीवादयः प्रतिभान्ति; तस्यैकस्यैवानिश्चितदे[ह]शविशेषस्थितेरनिर्णीतकालेन भविष्यता तत्त्वज्ञानजागरेण समस्तः प्रपञ्चोऽपि स्वप्नप्रपञ्चवद्बाध्यते*—इति वर्णयन्ति। तत्रायमुपदेष्टा वासुदेवादिर्गुरुः स एव, तदृष्टो वा? शिष्योऽप्यर्जुनादिः स एव, तदृष्टो वा? इति विकल्पमभिप्रेत्य, गुरुः स एवेति पक्षे दूषणमाह—**गुरोरिति। सकार्यस्येति**—शिष्याचार्यत्वादेरपीति भावः; तेनोपदेष्टृभावः, प्रष्टृभावः, उपदेशपरिकराभावश्चोक्तो भवति। गुरोस्तदृष्टत्वपक्षमनुवदति—**गुरुरिति**। न हि स्वप्नदृशा कल्पितपुरुषविज्ञानेन स्वप्नो बाध्येत; तद्वदत्रापि गुरोर्ज्ञानेन प्रपञ्चबाधाभावात्तद्बाधायोपदेशः सप्रयोजन इति भावः। दूषयति—**शिष्येति**। अयं भावः—**न तावदत्रार्जुनादिः स एव जीव इति तृतीयकल्पे प्रमाणमुपलभामहे; न च अयं मम शिष्यो जीवो मुक्तो**

भविष्यति, अहं त्वनेन स्वप्नदृशेव कल्पितः—इत्याचार्योऽपि मन्यते, तथा सति स्वसं[सा]हारकारिणे महापकारिणे तस्मै नोपदिशेत्; स्वयं हि स्वप्नस्वभावान्नियमेनैव निवृत्तः स्यादिति न मोक्षोपायमाचरेत्; शिष्योऽपि यदि स्वप्नदृष्टवद्वृरुं मन्येत, ततो न शृणुयात्। गुरुतज्ज्ञानविशेषयोः स्वभ्रान्तिकल्पिततया स्वयमेव तज्ज्ञानविषयविशेषं जानन्, ततः किमर्थं शृणोति? स्वकल्पितोपदेष्टृजनितोपदेशभ्रमात् स्वभ्रान्तिनिवृत्तिरिति च हास्यम्, तमन्तरेणापि स्वप्रत्यक्षभ्रमादपि तन्निवृत्त्युपपत्तेः; न च ज्ञातार्थेऽप्यर्जुनेऽद्य यावत् भ्रमनिवृत्तिर्दृश्यते। अतः शिष्योऽप्याचार्यवत्समस्तप्रपञ्चस्वप्नदृशाऽन्येनैव दृष्ट इति चतुर्थः कल्पः परिशिष्यते। ततश्च शुकवामदेवादिज्ञानवदर्जुनादिज्ञानमपि नाज्ञाननिवर्तकमिति निष्फलः शिष्याचार्याणां कृष्णार्जुनादीनां त्रिवर्गपरित्यागेनापवर्गार्थप्रयास इति शास्त्रारम्भोऽनुपपन्नः। अथ परिहासकाकुपूर्वमपच्छेदनयमाशङ्क्य परिहरति—**कल्पितत्वेऽपीत्यादिना**। एवमुपदेशानुपपत्तौ तस्य सर्वद्रष्टुरेकस्यापि जीवस्य कदाचिदपि मोक्षायोगात् शास्त्रप्रयोजनमपि नास्तीति ततोऽपि शास्त्रारम्भानुपपत्तिरिति फलितम्। एवं शास्त्रोपदेशस्य तदुपदेष्टुस्तच्छ्रोतुस्तत्प्रयोजनस्य चानुपपत्तौ सामान्यतः सर्वस्मिन्नपि परमते दूषिते किमवान्तरदूषणैरित्यन्यपरतयोपसंहरति—**इति कृतमिति**। कृतम्—अलमित्यर्थः; **असमीचीनवादै**रित्यनेन भास्करादिमतेऽप्येवंविधदूषणशतं शारीरकभाष्याद्युक्तं स्मारितम्॥ १२॥

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥ १३

भा॥ एकस्मिन् देहे वर्तमानस्य देहिनः कौमारावस्थां विहाय यौवनाद्यवस्थाप्राप्तावात्मनः स्थिरत्वबुद्ध्या यथाऽऽत्मा नष्ट इति न शोचति, देहाद्देहान्तरप्रातावपि तथैव स्थिर आत्मेति बुद्धिमान्न [शोचति] तत्र मुह्यति। अत आत्मनां नित्यत्वादात्मानो न शोकस्थानम्। एतावदत्र कर्तव्यम्—आत्मनां नित्यानामेवानादिकर्मवश्यतया तत्तत्कर्मोचितदेहसंसृष्टानां तैरेव देहैर्बन्धनिवृत्तये शास्त्रीयं स्ववर्णोचितं युद्धादिकमनभिसंहितफलं कर्म कुर्वतामवर्जनीयतया इन्द्रियैरिन्द्रियार्थरूपशीतोष्णादिप्रयुक्तसुखदुःखदा भवन्ति, ते तु यावच्छास्त्रीयकर्मसमाप्ति क्षन्तव्या इति॥ १३॥

ता॥ आत्मनामशोचनीयत्वाय नित्यत्वमुक्तम्। तत्रात्मनित्यत्वे जन्ममरणादिप्रतीतिर्व्यवहारौ कथमिति शङ्कां दृष्टान्तेन परिहरति—**देहिन इति**। *अस्मिन्निति निर्देशाभिप्रेतमाह—**एकस्मिन्निति**। देहस्यावस्थात्रयान्वयनिदर्शनादपि देहिन्येव तन्निदर्शनमुचितमित्यभिप्रायेणाह—**देहे वर्तमानस्येति**। * कौमारं यौवनं जरेति क्रमनिर्देशसूचितार्थस्वभावफलितमुक्तं **विहायेति**। कौमारयौवनत्यागयोरपि शोकविशेषनिमित्तत्वात्तद्व्यवच्छेदार्थं यथाशब्दतात्पर्यव्यक्त्यर्थं चोक्तम् **आत्मन** इत्यादि। बाल्यावस्थानिवृत्तावप्यात्मनः स्थिरत्वबुद्धिर्हि तद्विनाशनिमित्तशोकाभावहेतुः; सोऽत्रापि समान इत्यर्थः। **देहान्तरप्राप्तिः** इत्यत्रान्तरशब्दसूचितं पूर्वदेहत्यागाख्यं शोकप्रसङ्गकं दर्शयति—**देहादिति**। धीरशब्दस्य प्रकरणविशेषितोऽर्थः, **स्थिर आत्मेति बुद्धिमानिति**। *अशोच्यानित्यादिना प्रागुक्तेन संगमयति—**अत इति**। एवं श्लोकद्वयेन क्रमात् प्राप्यं निवर्त्यं च व्यञ्जितम्। अथात्र हृद्यं प्रापकविषयोत्तरश्लोकद्वयफलितं सङ्कलय्य सङ्गतिमाह—**एतावदिति**। **बन्धनिवृत्तय** इत्यन्तः **अमृतत्वायेत्यस्यार्थः**। शुद्धस्वभावानां संसारानुपपत्तिपरिहारायोक्तम्—**अनादीति**। **कर्मवश्यतया**, न त्वनिर्वचनीयाज्ञानादिवश्यतयेति भावः। स्वतोऽत्यन्तसमानानामात्मनां देहभागादिवैषम्यसिद्ध्यर्थमुक्तम्—**तत्तत्कर्मेति**। **देहैर्बन्धनिवृत्तय** इति। देहैर्यो बन्धस्तस्य निवृत्तय इत्यर्थः। यद्वा तैरेव दे

कर्म कुर्वतामित्यन्वयः । तदा तु बन्धका एव देहा मोक्षसाधनौपयिकास्संभवन्तीत्यवधारणाभिप्रायः । **शास्त्रीयमिति** । अन्यथेश्वरशासनातिलङ्घनाद्दण्ड एव स्यादिति भावः । **स्ववर्णोचितमिति** । न तु त्वया युद्धादिकं परित्यज्य भैक्षं चर्तुं श्रेय इति भावः । अमृतत्वहेतुत्वायोक्तम्—**अनभिसंहितेति** । प्रतिकूलस्वभावस्य कथं कर्तव्यत्वमिति शङ्कानिवर्तकतुशब्दद्योतितमवर्जनीयत्वं तितिक्षितव्यत्वे हेतुः, इत्येतावदत्र कर्तव्यमित्यन्वयः ॥ १३ ॥

भा ॥ इममर्थमनन्तरमेवाह—

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४

भा ॥ शब्दस्पर्शरूपरसगन्धास्साश्रयास्तन्मात्राकार्यत्वान्मात्रा इत्युच्यन्ते । श्रोत्रादिभिस्तेषां स्पर्शाश्शीतोष्णमृदुपरुषादिरूपसुखदुःखदा भवन्ति । शीतोष्णशब्दः प्रदर्शनार्थः । तान् धैर्येण यावद्युद्धादिशास्त्रीयकर्मसमाप्ति तितिक्षस्व । ते चागमापायित्वाद्धैर्यवतां क्षन्तुं योग्याः, अनित्याश्च ते—बन्धहेतुभूतकर्मनाशे सत्यागमापायित्वेनापि निवर्तन्त इत्यर्थः ॥ १४ ॥

ता ॥ आत्मनित्यत्वप्रकरणपर्यवसाने वक्तव्योऽप्ययमर्थस्तात्पर्यातिशयात्सहसोच्यत इत्याह—**इममर्थमनन्तरमिति** । आभिर्मीयन्ते शब्दादय इति श्रोत्रादीनीन्द्रियाणि मात्रा इति शङ्कराद्युक्ताप्रसिद्धयोजनाव्युदासाय मात्राशब्दार्थमाह—**शब्देति । साश्रया** इति । गुणविशिष्टद्रव्यस्य हि तन्मात्राकार्यत्वमिति भावः । **तन्मात्राकार्यत्वादिति** । तन्मात्राणां मात्राशब्दवाच्यत्वे तावन्नास्ति विवादः । शब्दमात्रा स्पर्शमात्रा इत्यादिप्रयोगाश्च सन्ति । ततश्च तत्कार्यद्रव्यस्यापि तदेकद्रव्यत्वात्तच्छब्दगोचरत्वमुपपन्नमिति भावः । कर्मव्युत्पत्तेरपि भावव्युत्पत्तेः प्रसिद्धिप्रकर्षं विषयसंबन्धस्यैव च साक्षात्सुखादिहेतुत्वं मत्वा स्पर्शस्य प्रतिसंबन्ध्यन्तरं निर्दिशन् समासार्थमप्याह—**श्रोत्रादिभिस्तेषां स्पर्शा** इति । शीतोष्णशब्दयोरुपलक्षणत्वं समासार्थं चाह—**शीतोष्णमृदुपरुषादिरूपेति** । एवं हेतुफलभावं विहाय शीतोष्णदास्सुखदुःखदाश्चेति योजनायां पृथग्व्यपदेशवैयर्थ्यमिति भावः । संग्रामे शीतोष्णयोरप्रसक्तत्वात्किमर्थमिदमुच्यत इत्यत्राह—**शीतोष्णशब्दः प्रदर्शनार्थ** इति । शस्त्रपातादेरिति शेषः । शीतोष्णादिकं तु तेषुतेषु वर्णाश्रमधर्मेषु यथासंभवं ग्राह्यम् । धीरमिति वक्ष्यमाणम्, **धीरस्तत्रेति** पूर्वोक्तं चाकृष्याह—**तान् धैर्येणेति** । यद्वाऽत्रैव **कौन्तेयभारत**शब्दाभ्यां क्षत्रियायामुत्पन्नस्य विशिष्टक्षत्रियसान्तानिकस्य ते धैर्यमेवोचितमिति सूचितम् । यथा तपश्चर्यायां यागादौ च वातातपक्षुत्पिपासापश्वालम्भादयो यावत्तत्कर्मसमाप्ति क्षन्तव्याः ; तथाऽत्रापि शस्त्रपातशत्रुवधादयः । तस्मादवर्जनीयेन्द्रियार्थस्पर्शनिमित्तदुःखानां शोकेन दुष्परिहरत्वान्निरर्थके शोके तितिक्षैव युक्तेति भावः । अत्र सुखांशस्य क्षमा नाम उपेक्षया अनुत्सेकः । तत्रापि हेतुरागमापायित्वमेव । अनित्यशब्दस्यापौनरुक्त्यायाह—**बन्धेति** । अनित्यशब्दोऽत्र प्रवाहनित्यतानिषेधकः । नित्या इति पदच्छेदेन नित्यानुबन्धितया तितिक्षितव्यत्वद्योतनं तु मन्दम् । आगमापायित्वात्, मुक्तौ तदभावाच्च । अतश्च प्रवाहतोऽपि नित्यत्वं नास्तीति भावः ॥ १४ ॥

भा ॥ तत्क्षमा किमर्थेत्यत्राह—

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५

भा ॥ यं पुरुषं धैर्ययुक्तमवर्जनीयदुःखं सुखघन्मन्यमानममृतत्वसाधनतया स्ववर्णोचितं युद्धादिकर्मानभिसंहितफलं कुर्वाणं तदन्तर्गताश्शस्त्रपातादिमृदुक्रूरस्पर्शा न व्यथयन्ति ; स एवामृतत्वं साधयति। न त्वादृशो दुःखासहिष्णुरित्यर्थः। आत्मनां नित्यत्वादेतावदत्र कर्तव्यमित्यर्थः ॥ १५ ॥

ता ॥ तत्क्षमा किमर्थेति। किं दृष्टार्थत्वात्, उतादृष्टार्थत्वात्, उत स्वरसवाहित्वेनावर्जनीयत्वात्? न प्रथमः, दुःखरूपतयोपलम्भात्। न द्वितीयः, गुरुवधकुलक्षयादिरूपाधर्मबहुलत्वात्। न तृतीयः, युद्धान्निवृत्त्यैव शस्त्रपाताद्यभावादिति भावः। तितिक्षार्हत्वद्योतनाय * धीरमिति पदम्। सुखदुःखवैषम्याज्ञत्वभ्रमं तयोस्समपरिमाणत्वादिभ्रमं च [निर]व्युदस्यन् किमर्थेति शङ्कां च प्रतिवदति—**अवर्जनीयदुःखं सुखवन्मन्यमान**मिति। यथा ह्यारोग्यकाम औषधादिक्लेशं सुखसाधनत्वात्सुखवन्मत्वा प्रवर्तते ; यथा चार्थार्थी समुद्रतरणादिक्लेशम् ; तथा तापत्रयनिवृत्तिं निरतिशयानन्दं च लिप्सुः तदुपायनान्तरीयकदुःखं सुखवदेव मन्यतेति भावः। [तस्करादिष्वपि]तामसयुद्धेष्वपि संभावितस्य द्वन्द्वतितिक्षामात्रस्य मोक्षहेतुत्वव्युदासायोक्तम्—**अमृतत्वसाधनतये**त्यादि। एते इत्यस्य तात्पर्यमवर्जनीयत्वं च दर्शयितुमुक्तम्—**तदन्तर्गता** इति। व्यथयन्ति—अप्राप्तत्वधिया परितापेन चालयन्तीत्यर्थः ; न तु पीडयन्तीति ; **मृदुक्रूरस्पर्शा** इति मृदुस्पर्शस्याप्युपादानात्। यत्तच्छब्दरूपपरोक्षनिर्देशेन **पुरुषर्षभ** इति विपरीतकाक्या च फलितमाह—**स एवेति। त्वादृशः** अस्थानस्नेहाद्याकुलः। अनन्तरश्लोकार्थप्रसङ्गायात्मनाशप्रतीकारनैरपेक्ष्याय च निगमयति—**आत्मनां नित्यत्वादिति। एतावदिति**, तितिक्षामात्रं न तु शोकादि। **अत्रेति** ; आगमापायिनां तत्त्वज्ञानेन निवर्तिष्यमाणसन्तानानाममृतत्वलक्षणपरमपुरुषार्थोपायानुष्ठानेऽवर्जनीयसन्निधीनां शस्त्रपातादिदुःखानामागतावित्यर्थः। **कर्तव्य**मिति अकरणे त्वपवर्गरूपफलाभावः, स्वधर्मपरित्यागेन प्रत्यवायः, धैर्याद्यभावनिमित्ताकीर्त्यादिप्रसङ्गश्च स्यादिति भावः ॥ १५ ॥

भा ॥ यत्त्वात्मनां नित्यत्वं देहानां स्वाभाविकं नाशित्वं च शोकानिमित्तमुक्तं * गतासूनगतासूंश्च नानुशोचन्ति पण्डिता इति ; तदुपपादयितुमारभते—

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६

भा ॥ असतो देहस्य सद्भावो न विद्यते। सतश्चात्मनो नासद्भावः। उभयोः—देहात्मनोरुपलभ्यमानयोर्यथोपलब्धि तत्त्वदर्शिभिरन्तो दृष्टः—निर्णयान्तत्वान्निरूपणस्य निर्णय इहान्तशब्देनोच्यते। देहस्याचिद्वस्तुनोऽसत्त्वमेव स्वरूपम् ; आत्मनश्चेतनस्य सत्त्वमेव स्वरूपमिति निर्णयो दृष्ट इत्यर्थः। विनाशस्वभावो ह्यसत्त्वम्। अविनाशस्वभावश्च सत्त्वम्। यथोक्तं भगवता पराशरेण—* तस्मान्न विज्ञानमृतेऽस्ति किंचित्कचित्कदाचिद्द्विज वस्तुजातम् (वि. २. १२. ४३) * सद्भाव ए[वं]षो भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् (वि. २. १२. ४५) * अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते। तत्तु नाशि न संदेहो नाशिद्रव्योपपादितम् ॥ (वि. २ १४. २४) * यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसंभूतां तद्वस्तु नृप तच्च किम् ॥ (वि. २. १३. १००) इति। अत्रापि—* अन्तवन्त इमे देहाः (२. १८) * अविनाशि तु तद्विद्धि (२. १७) इति ह्युच्यते। तदेव सत्त्वासत्त्वव्यपदेशहेतुरिति गम्यते। अत्र तु सत्कार्यवादस्या[संगत]प्रस्तुतत्वान्न तत्परोऽयं श्लोकः। देहात्मस्वभावाज्ञानमोहितस्य तन्मोहशान्तये ह्युभयोर्नाशित्वानाशित्वरूपस्वभावविवेक एव वक्तव्यः। स एव * गतासूनगतासून् इति च प्रस्तुतः। स एव च * अविनाशि तु तद्विद्धि * अन्तवन्त इमे देहाः इत्यनन्तरमुपपाद्यते। अतो यथोक्त एवार्थः ॥ १६ ॥

ता ॥ नासतः इति श्लोकं व्यवहितप्रकृतस्थापनोपक्रमतयाऽवतारयति—**यच्चिति । स्वाभाविकं**—परिणामिस्वभावस्यावश्यंभावि, नतु हेतुनिरपेक्षम्; शोकानिमित्तं—शोकनिमित्तविरोधि, शोकाभावनिमित्तमित्यर्थः । इतःपूर्वं स्वभावकथनमात्रत्वात्—**उपपादयितु**मित्युक्तम् । अस्यापि श्लोकस्योपपादनार्थप्रतिज्ञामात्ररूपत्वात् **आरभत** इत्युक्तम् । सदसद्भावाभावादिशब्दानां प्रकरणोचितमर्थविशेषं विवृण्वन् व्याख्याति—**असत** इति । असतस्सतश्चेति व्याख्येयं पदम् । तस्य प्रकरणादिविशेषितार्थप्रतिपादनम्—**देहस्यात्मन** इति । **अनयो**रिति निर्देशफलितमुक्तम्—**उपलभ्यमानयो**रिति । तत्त्वदर्शनस्य तुशब्दद्योतितामुपलम्भानतिवृत्तिमभिप्रेत्याह—**यथोपलब्धितत्त्वदर्शिभि**रिति । एतेन तत्—ब्रह्म, तद्भावस्तत्त्वमिति शङ्करोक्तमपहसितम् । सच्छब्दनिर्दिष्टस्य नित्यस्य विनाशायोगादन्तशब्दस्य निर्णयार्थत्वम् । तत्र शब्दवृत्तिप्रकारम् इह देहात्मविवेकप्रकरणे **तत्त्वदर्शिभि**रित्यादिसन्निधौ च तस्यैवौचित्यं चाह—**निर्णयान्तत्वा**दिति । ननु देहस्य सद्भावो न विद्यत इत्ययुक्तं प्रत्यक्षादिविरोधात्; आत्मनोऽसद्भावो न विद्यत इति चायुक्तम्, *असदेवेदमग्र आसीत् (छा.६.२.१) इत्यादिसकलनिषेधदशायां तस्याप्यसच्छब्दवाच्यत्वात् । अवस्थाविशेषापेक्षयाऽपि सत्त्वमसत्त्वं च देहात्मनोर्द्वयोरपि समानम् । अतो भाष्यान्तरवत्सत्कार्यवादादिविषयतयाऽयं श्लोको व्याख्येय इत्यत्राह—**देहस्येति । अचिद्वस्तुनः चेतनस्य** इति पदाभ्यां सत्त्वासत्त्वयोः स्वभावत्वे हेतुः, चिदचिद्विषयतया सदसच्छब्दयोः प्रयोगश्च सूचितः । नन्वेवमपि देहात्मनोस्सदसत्त्वचोद्यं न परिहृतमित्यत्राह—**विनाशे**ति । हिशब्देन प्रयोगप्रसिद्धिर्द्योतिता । तामेव दर्शयति—**यथोक्त**मिति । **दशश्लोक्याम्** । वस्त्ववस्त्वस्तिनास्तिसत्यासत्यशब्दानां शारीरकभाष्ये पुराणोपक्रमोपसंहारादिना तत्प्रकरणोपक्रमोपसंहारादिना मध्ये *मही घटत्वम् (वि.२.१५.४२) इत्यादिना च सविकारत्वेनैवावस्तुत्वोपपादनात् श्रुतिस्मृत्यन्तरप्रत्यक्षाद्यनुरोधाच्च निर्विकारसविकारतया नित्यानित्यचेतनाचेतनविषयत्वं स्थापितम् । व्यवहारार्हत्वानर्हत्वादिविषयौ सदसच्छब्दौ; तयोः परमार्थापरमार्थविषयसत्यासत्यशब्दाभ्यां कथमैकार्थ्यमिति शङ्कायां नाशानाशयोरेव परमार्थापरमार्थादिशब्दप्रयोगहेतुत्वे महर्षिवचनमुपादत्ते—**अनाशी**ति । विनाशोपलक्षितपरिणामवृद्ध्यादिभिः पूर्वावस्थाप्रहाणेन संज्ञान्तरयोगादेव अवस्तुशब्दवाच्यत्वं, तदभावाच्च वस्तुशब्दवाच्यत्वमित्यस्मिन्नर्थे स्पष्टोक्तिं दर्शयति—**यच्चिति** । अत्रोत्तरश्लोकद्वयैकार्थ्याच्चायमेवार्थ इत्याह—**अत्रापी**ति । एतेन क्वचिच्चेतनविषयासच्छब्दोऽपि देवादिनामरूपप्रहाणाद्यवस्थाविशेषापेक्षयेत्युक्तं भवति । स्वरूपतस्तु निर्विकारत्वात्सच्छब्दवाच्यत्वमेव । श्लोकयोः व्युत्क्रमेणोपादानम् **नासतः** इति क्रमापेक्षया । ततः किमित्यत्राह—**तदेवे**ति । प्रतिज्ञातस्यार्थस्य हेतुर्ह्यनन्तरं वाच्यः । तद्धेतुत्वं चात्र स्वरसतोऽवगम्यमानं परित्यज्यार्थान्तरपरत्वं व्याख्यातुं न युक्तमिति भावः । कुदृष्टिकल्पितव्याख्यां दूषयति—**अत्रेति** । नह्यत्र वैशेषिकादिनिरासः, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनं सांख्यसिद्धान्तोपन्यासादिर्वा प्रक्रियते । न च सत्कार्यवादेन देहात्मविवेकोत्पादनं शोकशान्तिर्वा सिध्येत् । सर्वस्य नित्यत्वाचेतनानामपि नित्यत्ववर्णनमसिद्धस्यात्यन्तासिद्धेन साधनमिति भावः । उक्तार्थपरत्वे महाप्रकरणसङ्गतिमाह—**देहे**ति । यदज्ञानान्मोहः, तस्यैव हि ज्ञापनं तन्निवृत्तये स्यादिति भावः । अत्र *तन्मोहशान्तये इति द्वितीयाध्यायार्थसंग्रहश्लोकस्सूचितः । सत्कार्यवादे पूर्वोत्तरविरोधमभिप्रयन् स्वोक्तस्यावान्तरप्रकरणसङ्गतिमप्याह—**स एवेति** वाक्यद्वयेन । **अनन्तर**मिति । नहि मात्रयाऽप्यन्यव्यवधानमस्तीति भावः । **प्रस्तुत उपपाद्यत** इति शब्दाभ्यामपौनरुक्त्यं दर्शितम् । उपसंहरति—**अत** इति । **यथोक्त एवे**त्यवधारणेनान्येषामपि व्याख्यातॄणामसत्प्रतिभासा निवर्त्यन्ते । यत्तूक्तं **यज्ञस्वामिना**—* असच्छब्देनाशुभं रजस्तमस्तत्कार्यं दुःखादिकं गृह्यते । सच्छब्देन तु सत्त्वतत्कार्यसुखादि-

कम् । भावाभावशब्दाभ्यां चाभ्युदयानभ्युदयपर्यायौ मृत्यमृती । उभयोरपि दृष्टोऽन्त इति च राशिद्वयस्य नश्वरत्व-मुच्यते । ततश्च पूर्वोक्तद्वन्द्वतितिक्षाहेतुभूतदुःखात्मकत्वनश्वरत्वयोरेव प्रपञ्चनं कृतं भवति—इति । तदयुक्तं, रजस्तमः-प्रभृतीनामसदादिशब्दैरुपादाने प्रकरणाद्ययोगात् । एतदभिप्रायेण च **स एव प्रस्तुत** इत्युक्तम् । ननु * मात्रास्पर्शास्तु इति श्लोके मात्राशब्देन सत्त्वादिगुणा उच्यन्ते । तथा च कपिलासुरी[ये]यके * गुणाः गुणमात्राः, गुणलक्षणं गुणा अवयवं, सत्त्वं रजस्तम इति गुणाः । (भा. शा. ३२६) इत्युच्यन्ते । सत्त्वा[दी]दिगुणानां गुणाश्च तेषां मात्रा अप-दिश्यन्ते । तत्र तत्त्वदर्शनताभयनाशस्वभावताप्रसन्नेन्द्रियतासुखस्वप्नबोधनतेति सत्त्वमात्रा इत्यादौ । उपकरणेषु च मात्राशब्दः प्रयुज्यते * लघुमात्रः परिव्रजेत् इत्यादिषु । मात्राशब्देन शब्दादिविषयग्रहणे तु शीतोष्णशब्दपौनरुक्त्यं च स्यात् इति । तदप्यसत्—मात्राशब्दस्य सत्त्वादिषु मुख्यप्रयोगाभावात्, अन्यत्रापि प्रसिद्ध्यभावात्, अत्राप्रसिद्धार्थस्वी-कारहेत्वभावाच्च । शीतोष्णशब्दपौनरुक्त्यं तु सामान्यविशेषपरत्वात्, प्रदर्शनार्थत्वाच्च परिहृतम् । अस्तु तर्हि प्रस्तुतयो-स्सुखदुःखयोरेव सदसच्छब्दाभ्यां ग्रहणम् । मैवम् ; तयोरेवाभ्युदयानभ्युदयरूपत्वविवक्षायां तद्धेतुतया व्यतिरेक-निर्देशायोगात् । सुखदुःखयोर्दुःखसुखकारणत्वनि[षेध]र्देशश्च लोकवेदविरुद्धः । सुखा[वेशाद]दिनैश्वर्यनिवृत्त्यादिकथनं च प्रस्तुतानुपयुक्तम् । एवं योजनान्तरेष्वपि दूषणमूह्यम् । अतो महाप्रकरणपूर्वापरादिसङ्गतेर्यथोक्त एवार्थः ॥ १६ ॥

भा ॥ आत्मनस्त्वविनाशित्वं कथमवगम्यत इत्याह—

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥ १७

तदात्मतत्त्वमविनाशीति विद्धि, येनात्मतत्त्वेन चेतनेन तद्व्यतिरिक्तमिदमचेतनतत्त्वं सर्वं ततं—व्याप्तम। व्यापकत्वेन निरतिशयसूक्ष्मत्वादात्मनो विनाशानर्हस्य तद्व्यतिरिक्तो न कश्चित्पदार्थो विनाशं कर्तु-मर्हति, तद्व्याप्यतया तस्मात् स्थूलत्वात्। नाशकं हि शस्त्रजलाग्निवाय्वादिकं नाश्यं व्याप्य शिथिलीकरोति मुद्गरादयोऽपि हि वेगवत्संयोगेन वायुमुत्पाद्य तद्द्वारेण नाशयन्ति। अत आत्मतत्त्वमविनाशि ॥ १७ ॥

ता ॥ अथ प्राप्यविशेषणतया तदनुप्रवेशात्पुरुषार्थभूतस्य सहसैव शोकनिवृत्तिहेतोरात्मनित्यत्वस्य *नासतः इति श्लोके चरमप्रतिज्ञातस्यापि बुद्धिस्थक्रमेण प्रथममुपपादनं क्रियत इत्यभिप्रायेणाह—**आत्मनस्त्विति** । तुशब्देन जनन-मरणादेस्सर्वलोकसाक्षिकत्वात् * एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानु विनश्यति (बृ. ४. ४. १२) इति देहसमानयोग-क्षेमत्वश्रवणाच्च कथमात्मनो देहाद्विशेष इत्यभिप्रेतम् । एवमपि विशेषोऽस्तीति श्लोकस्थतुशब्दार्थः । तच्छब्दार्थं नपुंसकतात्पर्यं प्रतिज्ञांशं तत्राप्याश्रयसाध्यधर्मयोर्भेदं च व्यनक्ति—**तदात्मतत्त्वमिति** । न विनष्टुं शीलमस्येत्यविनाशि । हेत्वंशप्रतिपादकद्वितीयपादं व्याकुर्वन् सर्वशब्दस्य वाक्यान्वयौचित्यप्राप्तं सङ्कोचम् इदंत्वनिर्देशस्वारस्यसूचितं बाह्यानां परात्वं तद्विपर्ययेणात्मनः फलितं चेतनत्वं तत एवाचेतने चेतनस्यात्मत्वेन व्याप्तिं च गमयति—**येनेति** । चेतनसमुदा-येनाचेतनसमुदायस्तिलतैलदारुवह्न्यादिवद्यथांशं व्याप्त इत्यर्थः । यद्वा सर्वाचेतनानुप्रवेशयोग्यत्वमिह विवक्षितमित्युभय-थाऽपि नात्माणुत्वविरोधः । अत्रायं प्रयोगः—आत्मा शस्त्राद्यधीनविनाशो न भवति, तद्व्यापकत्वेन ततस्सूक्ष्मत्वात्, यथा-ऽऽकाशः । व्यतिरेकेण वा—यो यदधीनविनाशः, स ततस्सूक्ष्मो न भवति, यथा वायुविनाश्यो दीपः—इति । इमं प्रयोगं **व्यञ्जयन् प्रयोगान्तरपरतयोत्तरार्धं व्याचष्टे—व्यापकत्वेनेति । विनाशानर्हस्येत्यव्ययशब्दार्थः** । तस्य हेतुः **निरति-**

शयसूक्ष्मत्वादिति । इदं च निरतिशयसूक्ष्मत्वमचेतनापेक्षया । **कश्चित्** इत्यस्येश्वरोऽपीति पर[स्य]व्याख्या स्वदर्शनविरुद्धेत्यभिप्रायेणाह—**तद्व्यतिरिक्तः कश्चित्पदार्थ** इति । धर्मिनिर्देशोऽयम् । आत्मनो विनाशं कर्तुं नार्हतीति साध्यार्थः । तत्र हेतुमाह—**तद्व्याप्यतया तस्मात्स्थूलत्वादिति** । तस्मात्स्थूलत्वादित्येव हेतुः । तस्यासिद्धिपरिहारायोक्तं—**तद्व्याप्यतयेति** । व्याप्तिपूर्वं दृष्टान्तमाह—**नाशकमिति** । घटादिनाशकमुद्गरादावनैकान्त्यमाशङ्क्य परिहरति—**मुद्गरेति** । अयमभिप्रायः—न तावन्मुद्गरादेस्संयोगमात्रं घटादिनाशकम्, मुद्गरोपरिस्थापितघटस्य नाशप्रसङ्गात् । नापि वेगमात्रम्, असंयोगेऽपि ध्वंसप्रसङ्गात् । नापि तदुभयमात्रम्, वेगवत्तृणसंयोगेऽपि प्रसङ्गात् । न च वेगवद्द्रव्यविशेषसंयोगो नाशकः, तस्यैव पृष्ठभागसंयोगे नाशादर्शनात् । अतो वेगवत्काठिन्यादिविशिष्टद्रव्यविशेषभागविशेषसंयोगविशेष एव नाशक इत्यविवादम् । तथा च वायुविशेषोत्पत्तिरपि प्रायशः प्रत्यक्षसिद्धत्वादविवादा । वायोश्च तत्तद्द्रव्यानुप्रवेशेन नाशकत्वं कठिनतरशब्दाभिघातसंक्षोभ्यमाणपदार्थेष्वभ्युपगतम् । एवं सति क्लृप्तकारणभावस्यात्रापि विद्यमानस्य वायुविशेषस्य नाशहेतुत्वमवश्याभ्युपगमनीयम् । स च वायुः घटाद्यपेक्षया सूक्ष्मः । यत्र तु वेगाभावेऽप्याक्रमणादिमात्रेण नाशकत्वम्, तत्र मुद्गरावयवनुन्ना घटादिद्रव्यावयवविशेषा भागान्तरं स्वस्मात्स्थूलतरमनुप्रविश्य भिन्दन्ति, आक्रमणमूलान्तरवायुनिस्सरणवशाद्वा वायुपूरितभस्त्रिकाक्रमणादिष्विवेति । **अत** इति । उक्तहेतुद्वयेन शस्त्रादेरनाशकत्वात् आत्म[भ्यो]नोऽपि सूक्ष्मतरस्य तन्नाशकस्यान्यस्यादर्शनादीश्वरस्यापि तन्नाशसङ्कल्पाभावादिति भावः ॥ १७ ॥

भा॥ देहानां तु विनाशित्वमेव स्वभाव इत्याह—

अन्तवन्त इमे देहा नित्यस्योक्ताश्शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८

भा॥ * दिह उपचये इत्युपचयरूपा इमे देहा अन्तवन्तः—विनाशस्वभावाः । उपचयात्मका हि घटादयोऽन्तवतो दृष्टाः । नित्यस्य शरीरिणः कर्मफलभोगार्थतया भूतसंघातरूपा देहाः * पुण्यः पुण्येन इत्यादिशास्त्रैरुक्ताः कर्मावसानविनाशिनः । आत्मा त्वविनाशी; कुतः ? अप्रमेयत्वात् । न ह्यात्मा प्रमेयतयोपलभ्यते, अपि तु प्रमातृतया [च] । तथा च वक्ष्यते—* एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः (गी. १३ १) इति । न चानेकोपचयात्मक आत्मोपलभ्यते, सर्वत्र देहे अहमिदं जानामि इति देहस्य चान्यस्य च प्रमातृतयैकरूपेणोपलब्धेः । न च देहादेरिव प्रदेशभेदे प्रमातुराकारभेद उपलभ्यते । अत एकरूपत्वेन अनुपचयात्मकत्वात् प्रमातृत्वाद्व्यापकत्वाच्च आत्मा नित्यः । देहस्तु उपचयात्मकत्वात् शरीरिणः कर्मफलभोगार्थत्वात् अनेकरूपत्वात् व्याप्यत्वाच्च विनाशी । तस्माद्देहस्य विनाशस्वभावत्वादात्मनो नित्यस्वभावत्वाच्च उभावपि न शोकस्थानमिति शस्त्रपातादिपरुषस्पर्शानवर्जनीयान् स्वगतानन्यगतांश्च धैर्येण सोढ्वा अमृतत्वप्राप्तये अनभिसंहितफलं युद्धाख्यं कर्मारभस्व ॥ १८ ॥

ता॥ नासतः इति प्रतिज्ञांशस्योपपादकतयोत्तरश्लोकमवतारयति—**देहानामिति** । अवधारणेन स्वभावशब्देन च असद्व्यपदेशैकान्त्यं सूचितम् । **अन्तवन्तः** इति साध्यस्य हेत्वाकाङ्क्षां शमयन् धर्मिप्रतिपादकमेव देहशब्दं निर्वक्ति—**दिह उपचय** इति । उपचयरूपास्सावयवा इत्यर्थः । देहशब्दो रूढ्या धर्मिप्रतिपादकः; योगेन हेतुप्रतिपादनपर इति भावः । साध्यनिर्देशे प्रकृतिप्रत्यययोरर्थमाह—**विनाशस्वभावा** इति । नात्र निरूपणापेक्षया देशाद्यपेक्षया वा निर्णयपरिमाणादिरन्तो विवक्षितः । मतुप् च नित्ययोगादिविषय इत्यर्थः । व्याप्तिदृष्टान्तावाह—**उपचयेति** । श्रुतितदर्थापत्तिभ्या-

मपि शरीरस्य विनाशस्वभावतामुपपादयतीत्याह—**नित्यस्येति**। **नित्यस्य शरीरिणः** इति पदद्वयसूचिते श्रुतितदर्थापत्ती। **कथं कैरुक्ता** इत्याकाङ्क्षां शमयति—**कर्मेत्यादिना**। शरीरिण इतीनिप्रत्ययेन षष्ठ्या च प्रतीतस्य संबन्धस्य कर्माख्यो हेतुः प्रकृतोपयोगाद्दर्शितः। ईश्वरादिशरीराणामकर्माधीनत्वात्तद्व्यवच्छेदार्थम् **इमे** इति निर्देशसूचितमुक्तम्—**भूतसङ्घातरूपा** इति। अनेकभूतसङ्घातात्मकत्वमपि अनित्यत्वे हेतुः। **कर्मावसानविनाशिन** इति शरीरशब्दनिर्वचनफलितम्। विशरणाद्धि शरीरम्। कैश्चिच्छास्त्रैस्तावद्देहानामुत्पत्तिविनाशौ द्वावप्यभिधीयेते। यैश्च कर्माधीनोत्पत्तिमात्रमुक्तम्, तैरप्यर्थात्कर्मावसाने विनाशोऽप्युक्त एव स्यादिति भावः। एवं च **इमे देहाश्शरीरिणः** इति पदत्रयेण सूचितं भूतसङ्घातरूपत्वसावयवत्वकर्मफलभोगार्थत्वरूपं शरीरानित्यत्वे हेतुत्रयमुक्तम्। **अनाशिनोऽप्रमेयस्येति** पदद्वयमात्मनित्यत्वाख्यसाध्यतद्धेतुपरतया व्याख्याति—**आत्मा त्विति**। नित्यत्वस्य नाशानर्हत्वेन स्थिरीकरणात् **नित्यस्य अनाशिनः** इत्यनयोरपुनरुक्तिः; स्थूलसूक्ष्मनाशविरहाभिप्रायाद्वा। असिद्धो हेतुः, आत्मनोऽप्यस्मत्सिद्धान्ते प्रमाविषयत्वादित्यत्राह—**न ह्यात्मेति**। प्रमेयत्वपर्युदासः प्रमेयतैकस्वभावशरीरादिव्यावर्तनमुखेन प्रमातृत्वपर्यवसितः, नञोऽत्र तदन्यवाचित्वात्। एवमेव हि क्षेत्रक्षेत्रज्ञयोर्विवेको वक्ष्यत इत्याह—**तथा चेति**। एतेन ज्ञानाविषयत्व[मात्रं]मत्र व्याकुर्वन्निरस्तः। प्रमेयत्वं चात्र भोग्यत्वपर्यवसितम्। तद्व्यतिरेकश्च पूर्वोक्तकर्मफलभोगार्थत्वरूपहेतुव्यतिरेक[रूपो]रूपेण भोक्तृत्वपर्यवसितः। ततश्चायं पूर्वोक्तहेत्वन्तरद्वयव्यतिरेकस्यापि प्रदर्शनार्थ इति मत्वा तयोरपि व्यतिरेकमाह—**न चेत्यादिना**। सावयवत्वे योग्यानुपलब्धिमाह—**सर्वत्रेति**। सर्वशब्दोऽत्र देहांशकात्स्न्र्यपरः। तेनाणोरप्यात्मनः पादे मे वेदना, शिरसि मे सुखमित्यादिसुखदुःखनिमित्ततत्तदवयवावच्छिन्नव्यवहारदशायामपि निरवयवत्वोपलब्धिरुक्ता। यद्वा देवादिरूपेण विचित्रप्रकारेष्वनन्तेषु देहेषु क्वचिदपि देहे देहिनस्सावयवत्वं नोपलब्धमित्यर्थः। अहमित्येकवचनमेकस्मिन् देहेऽभिमन्तुरात्मन एकत्वं सूचयति। यद्यात्मा सावयवस्यात्, [अवयवोऽहमिति] तदा वयमिति कदाचिदुपलभ्येत, प्रत्येकं तदवयवानामपि चैतन्यस्यावश्याभ्युपगमनीयत्वात्। सावयवत्वे ह्यवयवसङ्घातरूपोऽवयविरूपो वा स्यात्, उभयथाऽप्यवयवगतविशेषगुणमन्तरेण न तत्र विशेषगुणसिद्धिः। किण्वादिष्वपि हि प्रत्येकमसिद्धाऽपि मदशक्तिः पाकविशेषाद्रसविशेषादिवत्प्रत्येकं जायते। शक्तेश्चापर्यनुयोज्यत्वेऽपि विशेषगुणेष्वयं नियमो दुस्त्यजः। ज्ञानस्य द्रव्यत्वपक्षेऽप्येवमेव, निष्प्रभसमुदाये सप्रभत्वायोगवत्। एवं च सति समाजवदेकस्मिन् देहिनि मिथः कलहासूयेर्ष्यानिग्रहानुग्रहादयोऽप्युपलभ्येरन्। समुदायावयविनोश्चातिपीडायामवयवव्यतिरिक्तयोरभावादवयवानामेवानुभवितृत्वं स्यात्। तथा सति पाण्याद्यवच्छिन्नात्मावयवानुभूतं तदन्योऽवयवो न प्रतिसन्दधीतेति दक्षिणहस्तेन मयैव स्पृष्टं वामहस्तेन पुनः स्पृशामि इत्यादिप्रतिसन्धानं न स्यात्। न चात्मावयवानामाशुतरसञ्चारात्तदुपपत्तिः, आत्मनश्चूर्णपुञ्जकल्पत्वप्रसङ्गेन सङ्घातविशेषस्याप्यसिद्धिप्रसङ्गात्। न च वस्त्रादिषु मृगमदवासनेवान्यवासनासंक्रमः, मात्रानुभूतस्य गर्भस्थेनापि स्मरणप्रसङ्गात्। न च भेदाभेदात्सर्वोपपत्तिः, तस्यैव व्याघातादिदुःस्थत्वस्य शारीरकभाष्यादिषु प्रपञ्चितत्वात्। तदेवम् अहमित्येकत्वेनोपलम्भो निरवयवत्वमन्तरेण नोपपद्यते। एतेनार्था देहेन्द्रियप्राणानामप्यात्मत्वं निरस्तं वेदितव्यम्। *तथाहि—न हि पाण्याद्यारब्धोऽवयव्यस्ति, सत्कार्यवादस्थापनात्।* न च पाण्यादय एवात्मानः, प्रत्येकमहंत्वाद्यभावात्, अविवादनियमासंभवाच्च। न चात्र परस्परोपकार्योपकारकभावाभिमानस्सुवचः। अत एव च न तत्समुदायः। एवमिन्द्रियग्रामे प्राणाख्यसङ्घातेऽपि—इति। **देहस्य चान्यस्य चेति**। गृहक्षेत्रादितुल्यो ममेदम् इति देहस्येदंग्रहः। स्थूलोऽहम् इत्यादिकं तु प्रबुद्धस्यापृथक्सिद्धेः,

अप्रबुद्धस्य तु भ्रान्त्येति न कश्चिद्दोष इति भावः । **प्रमातृतयेति** । विमर्शदशायां प्रमेयस्याप्यात्मनः प्रमातृत्वेनैव हि सर्वदा विषयग्रहणवेलायां स्फुरणम् । अज्ञासिषम् इत्येवमादिरूपेण अन्यदाऽपि प्रमातृत्वं परामृष्टम् । आत्मग्रहणेऽपि मां जानामि इति प्रमातृत्वमपि सुस्थितमेवेति भावः । **एकरूपेणेति** । सावयवत्वे कस्यचिदवयवस्य कदाचित्प्रमातृत्वेऽन्येषां चाप्रमातृत्वेन स्फुरणं स्यात् । न ह्यनेकेषां चेतनानामवयवानां प्रमाप्रसरयौगपद्यनियमोऽस्तीति भावः । अथ पूर्वोक्तमेव मुखभेदेन साधयन् विजातीयसङ्घातात्मकत्वे योग्यानुपलब्धिं चाह—**नचेति** । पाञ्चभौतिकेषु देहादिषु तत्तद्भूतांशभूतत्वगसृङ्मांसादौ तत्तद्भूतप्रयुक्ताकारभेद उपलभ्यते; नैवं प्रमातरि । तथा च श्रूयते—* कृत्स्नः प्रज्ञानघन (बृ. ६.५.१३) एव इत्यादि । यद्वा **आकारभेद** इति पाणिपादादिसन्निवेशभेदो विवक्षितः । तदेवमात्मनो नित्यत्वे देहस्य विनाशित्वे च प्रत्येकं हेतुचतुष्टयं श्लोकद्वयसिद्धं सुखग्रहणाय सङ्कलय्य दर्शयति—**अत इति** । **एकरूपत्वेन**—अभूतसङ्घातात्मकत्वादित्यर्थः । **अनुपचयात्मकत्वात्**—निरवयवत्वादित्यर्थः । नन्विदमखिलमपि हेतुजातमनुपपन्नम्; तथा हि—तत्रासङ्घातरूपत्वस्य निरवयवत्वस्य च रूपरसादिभिर्महदादिभिश्चानैकान्त्यम्; प्रमातृत्वं च यदि कर्मफलभोक्तृत्वं विवक्षितम्, तदानीम् असाधारणानैकान्त्यम्, सकलसपक्षविपक्षव्यावृत्तेः । तत्र चेश्वरादेरपि पक्षीकारे भागासिद्धिश्च । यदि प्रमाश्रयत्वमात्रं विवक्षितम्, तदा सर्वप्रमातृपक्षीकरणे पूर्ववदसाधारण्यम् । जीवमात्रपक्षीकारे त्वीश्वरनित्यत्वस्यापि दृढाभ्युपगमाभावात्तस्मिन् दृष्टान्ते संदिग्धसाध्यवैकल्यादिदोषः । व्यापकत्वं च यदि सर्वव्यापकत्वम्, तदा स्वरूपासिद्धिः, प्रत्येकं क्षेत्रज्ञानामणूनां तदभावात्, ईश्वरापेक्षया व्याप्यत्वाच्च । यदि कतिपयव्यापकत्वम्, तदा शस्त्राकाशादिभिरेवानैकान्त्यम् । शरीरानित्यत्वसाधकं सावयवत्वमपीश्वरदिव्यविग्रहाभरणायुधादिविशेषैः; एवं कर्मफलभोगार्थत्वं च यदि तद्धेतुत्वम्, तदेश्वरजीवस्वरूपादिभिः पूर्ववदनैकान्त्यम् । यदि तदर्थमुत्पन्नत्वम्, तदा व्यर्थविशेषणत्वम्, उत्पन्नत्वमात्रेण व्याप्तिसिद्धेः । सङ्घातरूपत्वमपि सावयवत्ववदनैकान्तिकम् । व्याप्यत्वं च यदि सर्वापेक्षया तदा त्वसिद्धिदोषः । न हि शरीरादिकं पर्वतादिभिर्व्याप्यते । अप्रसिद्धत्वं च हेतोः, कुत्रचिदपि तस्याभावात् । यदि कतिपयापेक्षया, तदेश्वरव्याप्यैर्जीवदिव्यमङ्गलविग्रहादिभिरनैकान्त्यम् । यदि जीवव्याप्यत्वमिति विशेष्येत, तदा नित्यसूरिविग्रहविशेषादिभिः प्रकृत्यादिभिश्च प्राग्वद्व्यभिचारः । एतेन क्षेत्रज्ञव्याप्यत्वमित्यपि निरस्तम् । यदि पुनरव्यापकत्वं विवक्षितम्, तदाऽणिमादैश्वर्यवद्योगिप्रभृतिशरीरेषु स्वरूपासिद्धिः, तच्छरीराणां शिलाद्युन्मज्जननिमज्जनादेरपि योग्यत्वात्—इति । अत्रोच्यते—असङ्घातत्वनिरवयवत्वयोस्तावत् अर्जुनबुद्ध्या घातकतया प्रस्तुतशस्त्राम्याद्यधीनविनाशनिवृत्तेस्साध्यत्वान्न महदादिभिरनैकान्त्यम् । द्रव्यत्वेन विशेषणान्नाम्बादिनाश्यरूपादिभिरनैकान्त्यम् । एवं प्रत्यक्षादिसिद्धनाशकनिषेधे महदादिवत्केवलमीश्वरसङ्कल्पादिना नाशश्शङ्क्येत, तदपि श्रुत्यैव प्रतिषिध्येतेति भावः । प्रमातृत्वस्य भोक्तृत्वपर्यवसाने कर्मफलभोगार्थत्वरूपप्रमेयत्वनिषेधमुखेनानुत्पत्तिपर्यवसितत्वादनुत्पन्नत्वस्य च नित्यत्वेन व्याप्तिसिद्धेः आत्मस्वरूपानुत्पत्तेश्च शास्त्रसिद्धत्वान्न कश्चिद्दोषः । प्रमाश्रयत्वमात्रस्य हेतुत्वे त्वीश्वरो दृष्टान्तः । तत्र साध्यसन्देहो **न त्वेवाहम्** इत्यस्य व्याख्यानदशायां निराकृतः । व्यापकत्वस्य प्रयोगस्तु पूर्वमस्मद्व्याख्यातप्रकारेण शस्त्रादिविषयतया पठितव्य इति न तत्रापि दोषः । शरीरानित्यत्वसाधनेषु च सावयवत्वभूतसङ्घातत्वयोः प्राकृतत्वे सतीति विशेषणान्न व्यभिचारः । एतदर्थं हि **इमे देहाः** इत्युक्तम् । कर्मफलभोगार्थत्वमपि तदर्थमुत्पन्नत्वमेव; न च व्यर्थं विशेषणम्, मुक्तात्मज्ञानविकासस्य व्यवच्छेद्यत्वात् । न हि सोऽनुत्पन्नः, प्रागभावात् । निवृत्ते प्रतिबन्धके करणनिरपेक्षस्वरूपाधीनोत्पत्तित्वमात्रेण हि स्वाभाविक[मु]च्यते;

न त्वनुत्पन्नत्वेन । * दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥ (वि. ध. १०४) इत्यादिकं त्ववबोधादिस्वरूपस्यानुत्पन्नतामाह, न तु तद्विकासस्य । अथवाऽवस्थारूपत्वेन तस्योत्पन्नत्वं मा भूत्राम ; [पृथक्चिन्त्यतात्] । तदवस्थावस्थितस्य व्यवच्छेदाय विशेषणं स्यात् । अस्तु वा विशेषणनैरपेक्ष्यम् ; तथाऽप्युत्पन्नत्वमात्रेणानित्यत्वं तावत्सिद्धम्, अज्ञातोत्पत्तिषु केषुचिच्छरीरेषु हेत्वसिद्धिशङ्कापरिहारः कर्ममूलत्वप्रदर्शनेन क्रियते । कर्मावसानविनाशित्वस्य वा साध्यत्वात्तदौचित्याय चेदं विशेषणं सार्थम् । व्याप्यत्वं च शस्त्राद्यपेक्षया विवक्षितम् । साध्यं च तदधीनविनाशित्वमिति न कश्चिद्दोषः । ननु यो यद्व्याप्यः स तदधीनविनाश इति न व्याप्तिः, ईश्वरव्याप्यैः प्रकृतिपुरुषकालादिभिरनैकान्त्यादिति चेन्न ; योग्यत्वस्य साध्यत्वात्तत्रापि तत्सद्भावात् । ईश्वरनित्येच्छापरिग्रहादेव हि तन्नित्यत्वम्, अन्यथा यदीश्वरो जीवादिस्वरूपमपि संजिहीर्षेत्, कस्तस्य शासिता ? तर्हि जीवाकाशादिव्याप्यैस्तदधीननाशरहितैः शरीरादिभिर्व्यभिचार इति चेन्न, तेषामपि तन्नाश्यत्वयोग्यत्वात् । तन्नाशकैस्तेश्वरस्तु न तत्र जीवादीन्युपकरणीकरोतीति विशेषः । ततश्चैवं प्रयोगः—शरीरादि शस्त्राद्यधीनविनाशयोग्यम्, तद्व्याप्यत्वात् । यत् यद्व्याप्यं तत्तदधीनविनाशयोग्यम्—इति । यद्वा तिष्ठतु सामान्यव्याप्तिः, शस्त्रादिनाश्यत्वमेव साध्यम्, शस्त्रादिव्याप्यत्वादित्येव च हेतुः ; यच्छस्त्रादिव्याप्यं तच्छस्त्रादिनाश्यम्, यथा कदलीकाण्डा[दीति]दि । न चाकाशादि शस्त्रादिव्याप्यम्, सूक्ष्मत्वे सत्यनुप्रवेशस्य विवक्षितत्वात्, सूक्ष्मत्वस्य चात्र यत्र यत्प्रतिहन्यते, तत्राप्रतिहतत्वं ततस्सूक्ष्मत्वमिति निष्कर्षात् । योगिप्रभृतिशरीराणां तु शस्त्रादिव्याप्यत्वमेव परिणामविशेषादेर्निवृत्तम् । अतस्तदधीननाशाभावः । शस्त्राद्यपेक्षया व्यापकत्वमेव तेषामिति तैर्न व्यभिचारः । ततोऽपि सूक्ष्मतरैरीश्वरसङ्कल्पस्वसङ्कल्पादिभिस्तु तन्नाशः । एतेन शस्त्रास्त्रादिप्रतिबन्धकौषधाद्यनुगृहीतशरीरवृत्तान्तोऽपि व्याख्यातः ; औषधादिभिस्तत्र प्रवेशप्रतिबन्धात् । तस्मात्सिद्धमष्टावपि हेतवोऽष्टदिग्विजयिनः—इति । ननु—किमर्थमिह लोकसिद्धं शरीरानित्यत्वं प्रसाध्यते । केषुचिच्छरीरेषु प्रत्यक्षत एव नाशो दृष्टः । अविनष्टेषु भीष्मादिशरीरेष्वपि तत्तुल्यतया नाशित्वं निश्चितमेव । अन्यथा शत्रून् प्रति शस्त्रादिकमपि न प्रहीयेत । स्वयमपि शत्रुशस्त्रादिकं न निवारयेत् । अतः शरीरानित्यत्वस्य संप्रतिपन्नत्वात्संदिग्धे च न्यायापेक्षणान्निरर्थकमिह सावयवत्वाद्यनुमानचतुष्टयम्—इति । अत्रोच्यते—प्रथमं तावदात्मनित्यत्वानुमानानां यच्छस्त्राद्यधीनविनाशम्, तत्सावयवं यथा शरीरमिति व्यतिरेकव्याप्तिप्रदर्शनमेकं प्रयोजनम् । तत एव देहात्मनोर्विरुद्धधर्मप्रपञ्चनेन भेदस्थापनं द्वितीयम् । शस्त्रादिनिवारणरसायनसेवादिभिर्नित्यत्वमपि किं संभवेदिति संदेहापाकरणं तृतीयम् । एवं देहानां नाशतद्धेत्वोरवश्यंभावित्वप्रतिपादनेन स्वदेहवैराग्यजननं चतुर्थम् । परदेहेषु च स्वस्यैकस्यैव नाशहेतुत्वभ्रमनिरसनेन वक्ष्यमाणप्रकारेण स्वतन्त्रकर्तृत्वाभिमानक्षालनं पञ्चमम् । नाशहेतौ सत्यवश्यं नश्यतीति प्रतिपादनात्फलाभिसन्धिरहितकर्मानुष्ठानादिनाऽत्यन्तनाशस्यापि संभावनाद्योतनं षष्ठम् । नश्वरस्वभावत्वादशोचनीयत्वं सप्तमम् । शीघ्रं मोक्षसाधने प्रवर्तितव्यमित्यष्टमम् । एवं यथोचितमन्यदपि भाव्यम्—इति । **तस्माद्युध्यस्व भारत** इत्यत्र तस्मादित्यस्य व्याख्यानं—**देहस्ये**त्यादि, **न शोकस्थान**मि[ति]त्यन्तम् । **मात्रास्पर्शास्तु** इत्यादिश्लोकद्वयप्रतिपादितेन द्वन्द्वतितिक्षारूपपरिकरेणामृतत्वरूपफलेन च पूरयन्नाह—**शस्त्रे**ति । अत्र परगतान् प्रति शोचतः स्वगताभिधानं मर्मोद्घाटनेन मानजननार्थम् । शास्त्रीयत्वादेव हि स्वगतमपि दुःखं सह्यते, तथा यज्ञपशुशत्रुप्रभृतिगतमपि सोढव्यमिति प्रदर्शनार्थं च । युद्धस्यानीप्सितराज्यादिक्षुद्रभोगान्तरप्रधानकत्वव्युदासाय प्रकरणारम्भोक्तमेव फलमुचितमिति **अमृतत्वप्राप्तये** इत्युक्तम् । धात्वर्थस्य

पराभिमतं करणतयाऽन्वयमपाकुर्वन् युध्यस्वेत्यत्र प्रकृतिप्रत्ययार्थौ विविच्याह–**युद्धाख्यं कर्मारभस्वेति** । अयमर्थः **सेश्वरमीमांसायां** प्रपञ्चितोऽस्माभिः ॥ १८ ॥

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९

भा ॥ एनम्—उक्तस्वभावमात्मानं प्रति, हन्तारं हननहेतुं कर्मापि यो मन्यते ; यश्चैनं केनापि हेतुना हतं मन्यते : तावुभौ न विजानीतः, उक्तैर्हेतुभिरस्य नित्यत्वादे[वायं हननहेतुनैनं]नमयं हननहेतुर्न हन्ति, अत एव चायमात्मा न हन्यते। हन्तिधातुरप्यात्मकर्मकः शरीरवियोगकरणवाची । * न हिंस्यात् सर्वा भूतानि, * ब्राह्मणो न हन्तव्यः इत्यादीन्यपि शास्त्राणि अविहितशरीरवियोगकरणविषयाणि ॥ १९ ॥

ता॥ अथ **अविनाशि तु** इति श्लोकेनोक्तं **नैनं छिन्दन्ति** इति प्रपञ्चयिष्यमाणं शस्त्रादीनामात्मनश्च हन्तृत्व-हन्तव्यत्वायोग्यत्वं तद्विपर्ययवेदिनिन्दया द्रढयति–**य एनमिति** । सामानाधिकरण्यभ्रमनिरासायोक्तं–**प्रतीति** । हन्तारम् इत्यस्य तृन्नन्तत्वात् एनमिति द्वितीया * न लोकाव्ययनिष्ठाखलर्थतृनाम् (अष्टा. ३. ३. ६९) इति कृद्योगषष्ठीनिषेधात् । **हननहेतु**मिति । प्रत्ययस्यात्र हेतुमात्रविवक्षेति भावः । न कश्चित्कर्तुमर्हेति इति पूर्वोक्तवत्पदार्थविवक्षया पुलिङ्गत्वोप-पत्तिरिति ज्ञापनायोक्तम्–**कर्मापीति** । छेदनादिहेतुषु कश्चिदपीत्यर्थः । ननु * हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ (क. १. २. १९) इत्यस्य कठवल्लीवाक्यस्योपबृंहणरूपोऽयं श्लोकः । तस्य च वाक्यस्यात्मनो हन्तृत्वहन्तव्यत्वनिषेधार्थत्वं * कर्ता शास्त्रार्थवत्त्वात् (ब्र. २. ३. ३३) इत्यधिकरण-भाष्ये पूर्वपक्षिणोक्तम् । सिद्धान्ते च * यदुक्तं हन्ता चेन्मन्यते इत्यादिना हननक्रियायामकर्तृत्वमात्मनः श्रुयत इत्येव-मनूद्य, *तदात्मनो नित्यत्वेन हन्तव्यत्वाभावादुच्यत इति परिहृतम् । तत् कथमत्रैनं हन्तारमित्यादिना स्वरससिद्धसामा-नाधिकरण्यादिभङ्गेन हननहेतुं कर्मापीत्यध्याहृत्य व्याख्यायते? उच्यते–न तावदत्र शारीरकभाष्यविरोधः, ऐकार्थ्यात् । अत्र हि यस्य कस्यापि हेतोरात्महननहेतुत्वं नास्तीत्युक्तम् । तथा सत्यात्मनोऽप्यात्महननहेतुत्वं नास्तीत्युक्तं भवति । एवं चात्र सामान्योक्तस्य विशेषनिष्ठतामभ्युपेत्योक्तं शारीरके । न तत्र सामानाधिकरण्याभ्युपगमः, आत्मनो हन्तार-मिति वैयधिकरण्येऽपि फलितोक्तेः । तत्र ह्यपेक्षितपदान्तरस्य योग्यविभक्त्यन्ततयाऽध्याहारः । अत्र तु सामानाधिक-रण्यादपि, क्रियाकर्मणोराकाङ्क्षादिमतोः परस्परान्वय एव स्वारसिकः । सामान्यविषयत्वे च प्रकरणौचित्यम् । आत्मनो हन्तृत्वनिषेधरूपविशेषोपसंहारस्तु * वेदाविनाशिनम् इति श्लोके भविष्यति । तस्मादयमिति शब्दस्य भिन्नार्थत्वादिक-मपि न दोषायेति सिद्धम् । प्रतिज्ञान्तरत्वभ्रमव्युदासायाह–**उक्तैरिति । अस्य नित्यत्वादिति** । तत्कार्यशक्तमपि न हि तदयोग्ये प्रवर्तत इति भावः । **एनम्** इति पूर्ववाक्यादनुकृष्योक्तम् । **अत एवचेति** । अयोग्यतया हेत्वभावे तत्क्रियाविषयत्वरूपफलाभाव इति भावः । अयं हननहेतुः, अयमात्मा इत्युभयत्र अयंशब्दप्रयोगात्तन्त्रेणोच्चरितोऽयं शब्दो हन्ति, हन्यते इत्यनयोर्विवक्षाभेदात्कर्तृकर्मसमर्पक इति भावः । कथं तर्हि मनुष्यं हन्ति इत्यादिप्रयोगः । न ह्यसौ शरीरमात्रहननविषयः, मृतशरीरघातकेषु पितृहा मातृहा इत्यादिप्रयोगोपपत्तेराद्यभावात् । मनुष्यादिशब्दा-श्चात्मपर्यवसिता इति नास्सिद्धान्तः । मां जिघांसति इत्यादिप्रयोगेषु व्यक्तमेव हन्तेरात्मकर्मकत्वम् । अतो हिंसा-योग्यश्चेतन एव हन्तिधातोः कर्मभूतः । तथा सति * नायं हन्ति न हन्यते इत्युक्तमुभयमपि नोपपद्यते इत्याशङ्क्याह–**हन्तिधातुरिति** । आत्मकर्मक इत्यनेन शङ्कासूचनम् । सत्यमात्मकर्मक एव स्वतो हन्तिधातुः, न तु [तत्र] तत्स्वरूप-

प्रच्युतिप्रतिपादकः; किंतु मारणपरः। तथैव हि लोकवेदयोः प्रयोगः। मारणं च शरीरविश्लेषणात्मकम्। *मृङ् प्राणत्यागे इति चानुशिष्यत इति भावः। एवं लोकप्रयोगो निर्व्यूढः। *न हिंस्यात्सर्वा भूतानि इति शास्त्रप्रयोगस्य कोऽर्थः? स चास्तु यःकश्चित्, स तावत् सामान्यतो विशेषतश्च निषिद्धत्वादकर्तव्य इत्याशङ्क्याह—**न हिंस्या**दिति। पर[ाभि]मतप्रक्रियया उत्सर्गापवादन्यायाद्वा स्वमतेन विहितशरीरवियोगकरणस्य पशुशत्रुप्रभृतीनामपि हिततमत्वेन हिंसात्वस्यैवाभावाद्वेति भावः॥ १९॥

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ २०

भा॥ उक्तैरेव हेतुभिर्नित्यत्वेनापरिणामित्वादात्मनो जननमरणादयस्सर्व एवाचेतनदेहधर्मा न सन्तीत्युच्यते। तत्र जायते, म्रियते इति वर्तमानतया सर्वेषु देहेषु सर्वैरनुभूयमाने जननमरणे कदाचिदप्यात्मानं न स्पृशतः। नायं भूत्वा भविता वा न भूयः—अयं कल्पादौ भूत्वा भूयः कल्पान्ते च न न भविता; केषुचित्प्रजापतिप्रभृतिदेहेष्वागमेनोपलभ्यमानं कल्पादौ जननं कल्पान्ते च मरणमात्मानं न स्पृशतीत्यर्थः। अतस्सर्वदेहगत आत्मा अजः, अत एव नित्यः, शाश्वतः, प्रकृतिवदविशदजनतपरिणामैरपि नान्वीयते, पुराणः—पुराऽपि नवः, सर्वदा अपूर्ववदनुभाव्य इत्यर्थः। अतश्शरीरे हन्यमानेऽपि न हन्यतेऽयमात्मा॥ २०॥

ता॥ अथ **विपश्चित्** इत्यधीतस्य अत्र **कदाचित्** इत्येकपदमात्रविशेषितस्य न जायते इति कठवल्लीश्लोकस्य पौनरुक्त्यप्रत्यक्षविरोधादिदोषमाशङ्क्याह—**उक्तैरेवेति**। एतेन प्रतिज्ञामात्रत्वशङ्का परास्ता। **नित्यत्वेनापरिणामित्वादिति**—अविनाशित्वेन विकारमात्रस्यापि निरस्तत्वादित्यर्थः। तथाहि—विनाशो नाम पूर्वावस्थाप्रहाणरूपनामान्तरभजनार्हावस्थान्तरापत्तिः। यथा घटादिद्रव्यस्य कपालाद्यवस्था; तदवस्थौन्मुख्यं च तस्या अपक्षयः। सैव कपालाद्यवस्थस्य तस्यैव द्रव्यस्योत्पत्तिः। एवं परिणामवृद्ध्यादिकमुदाहरणीयम्। वक्ष्यति चेममर्थम्—*जातस्य हि ध्रुवो मृत्युरित्यत्र। अतो विनाशित्वनिराकरणेन जननादिकमप्यर्थतो निरस्तम्। **सर्व एवेत्यपौनरुक्त्यार्थमुक्तम्**। एवकारोऽत्र अपिशब्दसमानार्थः। न केवलं हन्तव्यत्वमात्रमेव नास्ति; अपि तु जन्यत्वादिकमपीत्यपुनरुक्तिरिति भावः। **देहधर्मा** इति हन्यमाने शरीरे इति सूचितजननमरणादिव्यवहारविषय उक्तः; तत्र हेतुः—**अचेतनेति**। जननादयो देहधर्मा आत्मनो न सन्तीत्युच्यत इत्यात्मनि देहधर्मान् प्रत्यक्षादिनाऽभिमन्यमानायार्जुनाय *न जायते इत्युपनिषन्मन्त्रेणैव यथावस्थिताकारो विविच्याभिधीयते; न तु देहसंयोगवियोगलक्षणजनिमरणप्रतिक्षेपः क्रियत इत्यर्थः। वाशब्दश्चार्थः। श्लोकस्थपदानां पौनरुक्त्यपरिहाराय वर्तमानादिनिर्देशसिद्धां व्यवस्थां व्यञ्जयन्नाह—**तत्रेति**। ननु कदाचिदित्यनेन वर्तमानकालविवक्षायां वैयर्थ्यम्, लकारेणैव गतार्थत्वात्। भूतभविष्यतोस्संग्रहे वर्तमाननिर्देशो न सङ्गच्छत इत्याशङ्क्योक्तम्—**वर्तमानतयेत्यादि**। तत्तत्कालीनैः पुरुषैस्तेषुतेषु देहेषु जायते म्रियते इति वर्तमानतयैव हि जननमरणयोरनुभवः। अतस्तदपेक्षया वर्तमाननिर्देशोपपत्तिः। तेन कल्पाद्यन्तव्यतिरिक्तस्समस्तः कालः **कदाचि**दिति संगृहीत इति भावः। **भूत्वा** इति पूर्वकालनिर्देशाभिप्रेतमाह—**कल्पादाविति**। तत्र भूयश्शब्दः कल्पान्तपरः। **भूत्वा भविता** इत्यनयोः क्रिययोः प्रत्येकं नञन्वयभ्रमव्युदासायोक्तम्—**न न भवितेति**। भूत्वा न भवितेति विशिष्टं नञन्तरेण प्रतिषिध्यते। **ननु नायं भूत्वा** इत्यादिकं किमर्थमुच्यते? **न जायते** इत्यादिनैव संग्रहीतुं शक्यत्वादित्याशङ्क्याह—**केषुचिदिति**। अयं भावः—कालविशेषे देहविशेषेषु सृष्टिप्रलयविशेषः श्रूयते। स च न देहसंबन्धतद्वियोगमात्रम्, *तोयेन जीवान्

व्यसर्जं भूम्याम् (ना. १. ४) इति कण्ठोक्तेः, प्राक्सृष्टेरेकत्वावधारणादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः एकस्यैव बहुभवनसङ्कल्पादेश्चेति जीवस्वरूपोत्पत्तिनाशावेवाभ्युपगन्तव्याविति जीवानामाप्रलयावस्थायित्ववादशङ्कानिरासाय नायं भूत्वा इत्याद्युक्तम् । तत्र चैवमुत्तरम्–जीवानां विसृष्टिर्नाम सदेहीकरणेन विक्षेपः । प्राक्सृष्टेरेकत्वावधारणं नामरूपविभागाभावात् । एकविज्ञानेन सर्वविज्ञानं च सूक्ष्मचिदचिद्वस्तुशरीरकस्य ब्रह्मणः स्थूलचिदचिद्वस्तुशरीरकतया परिणामात् । अत एव बहुभवनसङ्कल्पाद्युपपत्तिश्च । अतः कल्पाद्यन्तयोरपि ज्ञानसङ्कोचविकासकरदेहविश्लेषसंश्लेषमात्रमेव, न पुनः स्वरूपोत्पत्तिः–इति । **अजो नित्यः** इत्यनयोः पूर्वोक्तार्थस्य सङ्गलय्य निगमनरूपतया तत्तत्कालेषु जन्मादिनिषेधेन सर्वदेहगतात्माजत्वादिविवक्षया वाऽपौनरुक्त्यमित्यभिप्रायेणाह–**अतस्सर्वदेहगत** इति । **अतएव नित्य** इति, उत्पत्तिरहितत्वान्नाशित्वरहित इत्यर्थः । सृष्ट्यवस्थागतस्थूलपरिणामानामात्मनि निरस्तत्वात्प्रलयाद्यवस्थागतसूक्ष्मपरिणामनिरासपरश्शाश्वतशब्द इत्यभिप्रायेणाह–**प्रकृतिवदिति** । पुराणशब्दमपि अक्षरसाम्यान्निर्ब्रूयात् इत्युक्तन्यायेन निर्वक्ति–**पुराऽपि नव** इति । किमिदं पुराऽपि नवत्वम्, अनुत्पन्नस्य कदाचिदपि नवत्वायोगात् । उत्पन्नत्वेऽपीदानीमपि नव इति वा परस्तादपि नव इति वा वक्तव्यम्, पुरा नवत्वस्याविस्मयनीयत्वादित्याशङ्क्याह–**सर्वदेति** । पुराशब्दस्य कालत्रयोपलक्षणतया वा [व्या]वृत्त्यन्तर्गताभिप्रायकापिशब्दसमुच्चितकालान्तरतात्पर्येण वा पुरातनोऽपि नव इति विरोधाभिप्रायेण वा निर्वाहः । नवशब्दोऽप्यत्र नवत्वसहचरिताश्चर्यत्वपरः । वक्ष्यति च * आश्चर्यवत् (२. २९) इत्यादीति भावः । यद्वा सावयवानामवयवाप्यायनादिना नवीकरणं स्यात्, अयं तु निरवयवत्वेनानवीकार्यतया पुराऽपि नव इत्युपपादितम् । इममर्थमर्जुनस्य शङ्क्यमानविषये निगमयतीत्यभिप्रायेणाह–**अत** इति ॥ २० ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१

भा ॥ एवमविनाशित्वेनाजत्वेन व्ययानर्हत्वेन च नित्यमेनमात्मानं यः पुरुषो वेद, स पुरुषो देवमनुष्यतिर्यक्स्थावरशरीरावस्थितेष्वात्मसु कमप्यात्मानं कथं घातयति ? कंवा कथं हन्ति—कथं नाशयति; कथं वा तत्प्रयोजको भवतीत्यर्थः । एतानात्मनो घातयामि हन्मीत्यनुशोचनमात्मस्वरूपयाथात्म्याज्ञानमूलमेवेत्यभिप्रायः ॥ २१ ॥

ता ॥ य एनम् इत्युक्तविपर्ययपरे वेद इत्यादिश्लोके नित्यमिति परमसाध्यानुवादः । अविनाशिनमित्यादिकं तु तद्धेतुरित्यभिप्रायेणाह–एवमिति । व्ययशब्देनात्र जन्मनाशव्यतिरिक्तविकाराः विवक्षिताः; अपक्षय एव वा छेदनादियोग्यावयवविश्लेषादिर्वा । कमिति निर्धारणस्यानिर्धारितानेकव्यक्तिसापेक्षत्वादाह **देवमनुष्येत्यादि** । घातयतिहन्त्योः पौनरुक्त्यमाशङ्क्य बुद्धिस्थक्रमेणार्थमाह–**कथं नाशयतीत्यादि** । वेदितुर्विशेषेण हन्तृत्वादिनिषेधो न युज्यते । आत्मनो नित्यत्वे तदवेदितुरपि तद्धननायोगादित्याशङ्कापरिहाराय फलितार्थं वदन् प्रकृतेन सङ्गमयति–**एतानिति** । नात्र श्लोके हन्तृत्वादिमात्रं निषिध्यते; किंतु तत्प्रयुक्तं शोचनम्; तदुत्पादकप्रकारप्रतिषेधायैव ह्यत्र कथंशब्द इति भावः ॥ २१ ॥

भा ॥ यद्यपि नित्यानामात्मनां शरीरविश्लेषमात्रं क्रियते ; तथाऽपि रमणीयभोगसाधनेषु शरीरेषु नश्यत्सु तद्वियोगरूपं शोककनिमित्तमस्त्येवेत्यत्राह—

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ २२

भा ॥ धर्मयुद्धे शरीरं त्यजतां त्यक्तशरीरादधिकतरकल्याणशरीरग्रहणं शास्त्रादवगम्यत इति जीर्णानि वासांसि विहाय नवानि कल्याणानि वासांसि गृह्णतामिव हर्षनिमित्तमेवात्रोपलभ्यते ॥ २२ ॥

ता ॥ शङ्कापूर्वकं **वासांसि** इति श्लोकमवतारयति—**यद्यपीति** । ननु सार्वभौमादिशरीरपरित्यागे तत्तत्कर्मानुरूपनारकितिर्यक्स्थावरादिशरीरपरिग्रहसंभावनया प्रलयवदपरिगृहीतशरीरतयाऽवस्थितिसंभावनया चास्त्येव शोकनिमित्तम् । न च नूतनत्वमात्रं सुखाय, चिरन्तननरपतिभवनपरित्यागेनापि नूतनकारागारप्रवेशादेः जीर्णांशुकप्रहाणेन नूतनगोणीग्रहणादेश्च दुःखरूपत्वात् । नच वयमिह मानुषादिशरीरविलयसमनन्तरमभिनववसनपरिधानवदनिमिषदेहादिसंग्रहमुपलभामह इत्यत्राह—**धर्मयुद्ध** इति । **अधिकतरेति** कल्याणविशेषणम् । नवशब्दाभिप्रेतोक्तिः—**कल्याणानीति** । **हर्षनिमित्तमेवेति**—पुरा शोकाविषयमात्रे शोकः कृतः; इदानीं तु तद्विपरीतहर्षविषये क्रियत इति भावः ॥ २२ ॥

भा ॥ पुनरपि * अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् इति पूर्वोक्तमविनाशित्वं सुखग्रहणाय व्यञ्जयन् द्रढयति—

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यस्सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४

भा ॥ शस्त्राग्न्यम्बुवायवः छेदनदहनक्लेदनशोषणान्यात्मानं प्रति कर्तुं न शक्नुवन्ति सर्वगतत्वादात्मनस्सर्वतत्त्वव्यापनस्वभावतया सर्वेभ्यस्तत्त्वेभ्यस्सूक्ष्मत्वादस्य तैर्व्याप्यनर्हत्वात्; व्याप्यकर्तव्यत्वाच्च छेदनदहनक्लेदनशोषणानाम् । अत आत्मा नित्यः स्थाणुरचलोऽयं सनातनः स्थिरस्वभावोऽप्रकम्प्यः पुरातनश्च ॥ २३ ॥ २४ ॥

ता ॥ पूर्वोक्तेन पुनरुक्तिं दार्ढ्यसुखग्रहणरूपप्रयोजनभेदेन परिहरन् **नैनम्** इति श्लोकद्वयमवतारयति—**पुनरपीति । नैनम्** इत्यादौ सार्धश्लोके वैशद्याय पृथगुक्तं करणासामर्थ्यं विषयायोग्यत्वं च परस्परप्रतियोगितया अन्यतरत्र इतरदन्तर्भवतीति भाष्ये पृथगनुपात्तम् । **अच्छेद्यः** इत्यादौ प्रत्ययोऽर्हार्थः । तेन **नैनं छिन्दन्ति** इत्यादिष्वपि तदर्हत्वं शस्त्रादेः प्रतिषिध्यत इति दर्शयति—**न शक्नुवन्तीति** । सर्वगतपदं पूर्वोक्तहेत्वनुवादतया व्याचष्टे—**सर्वगतत्वादात्मन** इति । अणोरात्मनः कथं सर्वगतत्वमित्याशङ्क्याह—**सर्वतत्त्वेति** । नात्र बहुश्रुत्यादिविरुद्धं जीवविभुत्वं सर्वगतशब्देनोच्यते; किंत्वनुप्रवेशविशेषयोग्यतेति स्वभावशब्दं प्रयुञ्जानस्य भावः । व्यापित्वस्य पूर्वोक्तं हेतुत्वप्रकारं प्रपञ्चयति **सर्वेभ्य** इति । **अत आत्मा नित्य** इति—सूक्ष्मत्वेन छेदनाद्ययोग्यत्वादात्मा नाशरहित इत्यर्थः । **स्थिरेत्यादि । स्थाणुरचल** इति पदद्वयं नित्यत्वप्रपञ्चनरूपम्, नाशायोग्यत्वनाशकाविषयत्वपरं वा, स्वाभाविकौपाधिकाविशदपरिणामराहित्यपरं वेति भावः । **पुरातन** इति । अत्र नित्यशब्देनानन्तत्वस्योक्तत्वात्सनातनशब्दोऽनादित्वपरतया सङ्कोचनीय इति भावः ॥ २३ ॥ २४ ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५

भा ॥ छेदनादियोग्यानि वस्तूनि यैः प्रमाणैर्व्यज्यन्ते ; तैरयमात्मा न व्यज्यत इत्यव्यक्तः ; अतश्छेद्यादिविसजातीयः । अचिन्त्यश्च—सर्ववस्तुविजातीयत्वेन तत्तत्स्वभावयुक्ततया चिन्तयितुमपि नार्हः; अतश्चाविकार्यः—विकारानर्हः । तस्मादुक्तलक्षणमेनमात्मानं विदित्वा तत्कृते नानुशोचितुमर्हसि ॥ २५ ॥

ता ॥ पूर्वोक्तानुमानानामुपलम्भयुक्तिविरोधपरिहारमुखेन सर्वदूषणपरिहारपरं प्रकृतोपसंहारपरं च **अव्यक्तः** इति श्लोकं व्याख्याति—**छेदने**ति । शरीरादीनि यैः प्रमाणैश्छेदनादियोग्यतया प्रत्याय्यन्ते ; तैस्तथाऽसौ न प्रत्याय्यते । अहं जानामि इत्यादिरूपेणैव ह्यात्मन उपलम्भः । शास्त्रतस्तु नित्यत्वादिविशिष्टरूपेणेति न पूर्वोक्तानुमानानां धर्मिग्राहकविरोध इति भावः । निरूपितश्च मोक्षधर्मे व्यक्ताव्यक्तशब्द [र्थ] :—*इन्द्रियैर्गृह्यते यद्यत्तत्तद्व्यक्तमिति स्थितिः । अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम् (भा.शा.३३०.४१) इति । ननु कुमूलनिहितबीजस्याङ्कुरायोग्यत्वे साध्ये न तावद्व्यक्त्यपेक्षया धर्मिग्राहकविरोधः । तथाऽप्यन्वयव्यतिरेकविषयभूतबीजत्वजात्याक्रान्ततया सामान्यतो विरोध एव भवति । तद्वदत्रापि दृष्टसजातीयतया विरोधस्यादित्याशङ्क्याह—**अतश्छेद्यादिविसजातीय** इति । साजात्यग्राहकाभावाद्वैजात्यग्रहाच्चेति भावः । सहेतुकं सप्रकारं चाचिन्त्यशब्दार्थमाह—**सर्वे**ति । एतेन सौगताद्यभिमतानामात्मानित्यत्वसाधनानां सत्त्वादीनां तदनुग्राहकतर्काणां चोपलम्भागमादिविरोधात् मूलशैथिल्यमुक्तं भवति । **अतश्चे**ति । पूर्वोक्तप्रमाणानां बाधकाभावादपीत्यर्थः । यद्वा अनुमानान्तरमिदमुच्यते । तथा हि—आत्मा विकारानर्हः, विकारित्वग्राहकप्रमाणशून्यत्वात्, यथेश्वरस्वरूपम्, इत्यन्वयदृष्टान्तः, यथा घटादिः, इति व्यतिरेकः । यद्वा सामान्येन व्याप्तिः—यद्यादृशाकारग्राहकप्रमाणशून्यम्, तत्तादृशाकारं न भवति, यथा नीलं न पीताकारमिति । अविकार इत्येतावति निर्दिष्टे कादाचित्कविकाराभावमात्रेण सिद्धसाधनता[शङ्का] स्यादिति तत्परिहार[कं]करं प्रत्ययार्थं विवृणोति—**विकारानर्ह** इति । निषेधापेक्षया वेदनस्य पूर्वकालत्वात् क्त्वानिर्देशः ; ननु शोकापेक्षया । तेनात्मवेदनस्य शोकाभावहेतुत्वमुक्तं भवति । **अर्हसि**—आत्मवेदिनस्ते शोक्योग्यतैव न स्यादिति भावः ॥ २५ ॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथाऽपि त्वं महाबाहो! नैवं शोचितुमर्हसि ॥ २६

भा ॥ अथ नित्यजातं नित्यमृतं देहमेवैनमात्मानं मनुषे, न देहातिरिक्तमुक्तलक्षणम् ; तथाऽप्येवमतिमात्रं न शोचितुमर्हसि, परिणामस्वभावस्य देहस्योत्पत्तिविनाशयोरवर्जनीयत्वात् ॥ २६ ॥

ता ॥ एवं देहातिरिक्तात्माभ्युपगमे शोकनिमित्ताभाव उक्तः । अथ नास्तिकदृष्ट्या देहात्मवादेऽपि शोकनिमित्तं नास्तीत्युच्यते—**अथचे**त्यादिना श्लोकत्रयेण । अथेति पक्षान्तरारम्भार्थः, प्रश्नार्थो वा, अभ्युपगमार्थो वा । वाशब्दो विशेषणद्वयसमुच्चयार्थः । **नित्यजातं नित्यमृतं** नियतोत्पत्तिनाशमित्यर्थः । उत्तरश्लोके चेममर्थं प्रपञ्चयिष्यति । न हि नित्यस्य जातत्वमृतत्वसंभवः । न च जन्ममरणक्रियास्वरूपं नित्यत्वेन विशेषयितुं शक्यम् । व्यस्तस्य नित्यशब्दस्यात्मविशेषणत्वभ्रमव्युदासाय **नित्यजातम्** इतिवत् **नित्यमृतम्** इति समस्योक्तम् । **देह**मिति विशेषणादिसामर्थ्यफलितमुक्तम् । **एवे**ति चशब्दार्थः । अवधारणफलितमाह—**नदेहे**ति । पूर्वमात्मनो नाशाभावाच्छोकप्रसङ्ग एव नास्तीत्युक्तम् । **इदानीं** देहतयाऽभिमतस्यात्मनो नाशे सत्यपि दुष्परिहरत्वान्महाबाहुस्त्वं नातीव शोचितुमर्हसीत्यभिप्रायेण **एवं**शब्दः । **यद्वा पूर्वं** देहातिरिक्तात्माभ्युपगमात्परलोकादिभयेनातिमात्रशोकोऽपि युज्येत । इदानीं तु संसारमोचकादिवन्महाबाहो-

स्तवातिमात्रप्रीतिस्थाने कथमतिमात्रशोक इति भावः। त्वं महाबाहो इति शूरस्य ते स्वपरमरणोद्वेगो न युक्त इत्याकूतम्। प्रतिज्ञाया हेतुसाकाङ्क्षत्वादुत्तरश्लोकस्थं वा विशेषणद्वयसूचितं वा हेतुं निष्कृष्याह—**परिणामे**ति ॥ २६ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७

भा ॥ उत्पन्नस्य विनाशो ध्रुवः—अवर्जनीय उपलभ्यते ; तथा विनष्टस्यापि जन्म अवर्जनीयम्। कथमिदमुपपद्यते—विनष्टस्योत्पत्तिरिति, सत एवोत्पत्त्युपलब्धेः, असतश्चानुपलब्धेः। उत्पत्तिविनाशादयस्ततो द्रव्यस्यावस्थाविशेषाः। तन्तुप्रभृतीनि हि द्रव्याणि सन्त्येव रचनाविशेषयुक्तानि पटादीन्युच्यन्ते। असत्कार्यवादिनाऽप्येतावदेवोपलभ्यते। न हि तत्र तन्तुसंस्थानविशेषातिरेकेण द्रव्यान्तरं प्रतीयते। कारकव्यापारनामान्तरभजनव्यवहारविशेषाणामेतावतैवोपपत्तेः न द्रव्यान्तरकल्पना युक्ता। अत उत्पत्तिविनाशादयस्ततो द्रव्यस्यावस्थाविशेषाः। उत्पत्त्याख्यामवस्थामुपयातस्य द्रव्यस्य तद्विरोध्यवस्थान्तरप्राप्तिर्विनाश इत्युच्यते। मृद्द्रव्यस्य पिण्डत्वघटत्वकपालत्वचूर्णत्वादिवत् परिणामिद्रव्यस्य परिणामपरम्परा अवर्जनीया। तत्र पूर्वावस्थस्य द्रव्यस्योत्तरावस्थाप्राप्तिर्विनाशः। सैव तदवस्थस्य चोत्पत्तिः। एवमुत्पत्तिविनाशाख्यपरिणामपरम्परा परिणामिनो द्रव्यस्यापरिहार्येति न तत्र शोचितुमर्हसि ॥ २७ ॥

ता ॥ ध्रुवमृत्युमृतादिशब्दानामर्थान्तरव्युदासाय प्रकृतोपपादकं **जातस्ये**त्यादिकं व्याख्याति—**उत्पन्नस्ये**त्यादि। **उपलभ्यत** इति **हि**शब्दसूचितप्रमाणप्रसिद्धिरुच्यते। हेतुपरत्वेऽपि हिशब्दस्यार्थात्तत्सिद्धिः। मृतस्य जन्मव्याघाताभिप्रायेण चोदयति—**कथ**मिति। यदि केवलमौपदेशिकोऽयमर्थस्स्यात्, तदाऽभ्युपगम्येत। अत्र तु *जातस्य हीति लोकसिद्धानुवादेन [उ]च्यते। लोके च प्रागसत एवोत्पत्तिर्दृष्टा ; न तु कदाचिदुत्पद्य निरुद्धस्य। यदि च नष्टं पुनर्जायेत, तदा दुःखात्यन्तनिवृत्तेरशक्यत्वादपवर्गशास्त्रमखिलमप्रमाणं स्यात्। व्याधिशत्रुविजयादिप्रयासश्च निरर्थकस्स्यात्। पुत्रादिमरणे च न शोचनीयम्। अतो नेदमुपपत्तिमदिति भावः। परिहरति—**सत एवे**ति। नन्विदमुभयमप्ययुक्तम्, सत उत्पत्तिनैरपेक्ष्यात्, प्रागसतामेव च घटादीनामुत्पत्तिदर्शनादित्याशङ्क्याह—**उत्पत्ती**ति। निदर्शयति—**तन्तुप्रभृतीनि हीति**। अ[न्य]न्यतन्तुसंयोगात्पूर्वं दीर्घैकतन्त्वारब्धे च त्वयाऽप्येवमिष्यत इति भावः। उक्तं च **नारायणाचार्यैः**—*एकस्माद्दीर्घतमात्तन्तोः पटादेरुत्पत्तिर्दृष्टा—इति। असत्कार्यवादिनं प्रति किमवयवीति कश्चिदवयवसमुदायातिरिक्तः पदार्थो दृश्यते कल्प्यते वेति विकल्पमभिप्रेत्य प्रथमकल्पे दूषणमाह—**अस**दिति। **एतावत्**—रचनाविशेषयुक्तत्वमात्रमित्यर्थः। **वादिनोपलभ्यत** इति पदाभ्यां वाङ्मनसविसंवादमभिप्रैति। एतावदेवेत्युक्तमर्थं प्रपञ्चयति—**नही**ति। द्वितीयकल्पं दूषयति—**कारके**ति। यदि साङ्ख्यवद्वयमपि सर्वस्याप्यनागन्तुकत्वं वदामः, तदा भवेदेव कारकव्यापार[ादि]नैरर्थक्यादिदोषः। वयं हि द्रव्याणां सर्वेषामनागन्तुकत्वं तदवस्थानां चागन्तुकत्वं ब्रूमः। घटादिवत्प्रदीपादिष्वप्यवस्थान्तरापत्तिरनुमीयते। चूर्णितविशीर्णघटस्येव तु सूक्ष्मावस्थाप्राप्त्याऽनुपलम्भः। अतो न कश्चिद्दोष इति भावः। व्यवहारविशेषोऽत्र उदकाहरणादिरभिमतः, नामान्तरभजनस्य पृथगुक्तत्वात्। एतेन कारणसंख्यापरिमाण[ादि]बुद्धिसंस्थानादिभेदः पूर्वत्वोत्तरत्वनष्ट[त्व]ानष्टत्वादिरपि निर्व्यूढः। द्रव्यान्तरकल्पनायां गुरुत्वान्तरकार्यादिप्रसङ्गस्यावयवावयविगुरुत्वयोरन्यतरप्रतिबन्धादिना निर्वाहश्चातिक्लिष्ट इत्यभिप्रायेणाह—**न द्रव्यान्तरे**ति। आहुश्च—*यदि द्रव्यान्तरं कार्यं कारणेभ्यो भवेदिह। गुरुत्वमतिरिच्येत कार्ये तच्च न दृश्यते। द्विपलं घट इत्येतद्व्यपदेशो न युज्यते (भा.मो.) इति। निगमयति—

अत इति । तावत एवोपलम्भादन्यस्याप्यनुपलम्भात्कल्पकानां चान्यथैवोपपन्नत्वादित्यर्थः । ननु भवतु नामोत्पत्तिर्द्रव्यस्यावस्थाविशेषः ; विनाशस्त्वभावरूपः, तद्विरुद्धश्च कथं तदवस्थेत्युच्यत इत्याह—**उत्पत्त्याख्यामिति** । अयमभिप्रायः—न तावदभावाख्यं किञ्चित्पदार्थान्तरं विविच्योपलभामहे । नापि नास्तिव्यवहारादिना कल्पयितुं युक्तम्, उभयसंप्रतिपन्नावस्थान्तरादिनैव तन्निर्वाहात् । न च श्यामावस्थाप्रहाणेन रक्तावस्थापरिग्रहे घटनाशव्यवहारप्रसङ्गः, कपालाद्यवस्थावद्रक्तावस्थाया घटावस्थाविरोधित्वस्य भवताऽप्यनभ्युपगमात् । न च भावत्वेनैकराश्यनुप्रविष्टानां विरोधो न युज्यत इति वाच्यम्, तेजस्तिमिरशीतोष्णतृणदहनादीनां भावानामेव सहानवस्थानवध्यघातुकत्वलक्षणविरोधदर्शनादभावाभावस्य च भावत्वस्वीकारात् । अन्यथा पदार्थत्वेनैकराशेरभावस्यापि भावविरोधो न कथञ्चिदुपपद्येत । तदेवं विरोध्युत्तरावस्था प्रध्वंसः । विरोधिपूर्वावस्था प्रागभावः । वस्त्वन्तरगतासाधारणविरोधिधर्म एव समानाधिकरणव्यधिकरणनिषेधभेदेनान्योन्याभावोऽत्यन्ताभावश्च । देशकालसंभेदविशेषस्तत्कृतावस्थाविशेषो वा संसर्गाभावः । प्रतियोग्यादिभेदाच्च पितृत्वपुत्रत्वादिव्यवहारवत् अस्तिनास्तीत्यादिव्यवहारवैचित्र्यमिति । ननु यदि कपालत्वाद्युत्तरावस्थाप्राप्तिर्विनाशः, तर्हि कपालविनाशे घटविनाश एव विनष्टः स्यादिति चूर्णावस्थायां घटोन्मज्जनप्रसङ्गः । यदि च पिण्डावस्था घटप्रागभावः, तदा पिण्डीकरणात्पूर्वं प्रागभावाभावाद्घटसिद्धिर्घटात्यन्ताभावो वा स्यादित्यत्राह—**मृद्द्रव्यस्येति** । अयमभिप्रायः—न तावदेकैव कपालत्वावस्था घटत्वावस्थाविरोधिनी, चूर्णत्वाद्यवस्थानामपि तद्विरुद्धत्वात् । अभावरूपं प्रध्वंसमभ्युपगच्छतोऽपि विरोध्यवस्थापरंपरा अवर्जनीया । ततः कपालत्वचूर्णत्वादीनां विरोध्युत्तरावस्थात्वाविशेषात्तासु सर्वास्ववस्थासु घटविनाशव्यवहारोपपत्तिः । एवं प्रागभावेऽपि विरोधिपूर्वावस्थापरम्परया निर्वाहः । एवमनभ्युपगमे [अ]व्यतिरिक्ताभावपक्षेऽप्युक्तदोषो दुर्वारः । तत्रापि हि यदि घटाख्यं द्रव्यं घटप्रागभावनिवृत्तिः, तर्हि घटनिवृत्तौ घटप्रागभावनिवृत्तिरेव निवृत्तेति पुनः घटप्रागभावोन्मज्जनप्रसङ्गः । तथाच सति मध्ये प्रागभावस्य विच्छेदायोगाद्घट एव न स्यात् । प्रागभावस्य च सामग्रीसम्पत्तौ भावशिरस्कत्वान्नष्टाया एव घटव्यक्तेः पुनरुन्मज्जनं स्यात् । एवं यदि प्रध्वंसस्य घट एव प्रागभावः, तदा घटोत्पत्तेः पूर्वं प्रध्वंसप्रागभावाभावात्पिण्डावस्थायां घटप्रध्वंसः स्यात् । तथा च सति घट एव कदाचिदपि नोत्पद्येत, स्वप्रध्वंसे वर्तमाने स्वोत्पत्त्ययोगात्, अन्यथा कपालाद्यवस्थायामपि तदुन्मज्जनप्रसङ्गात् । एवं च पिण्डावस्थायां घटविनाशप्रसङ्गे विनाशस्य भावोत्तरकालीनत्वात्पिण्डात्प्रागेव घटसिद्धिः स्यात् । ततश्च तत्सिद्धिनाशकालयोर्द्वयोरपि कारकव्यापारानर्थक्यं स्यात्—इत्यादि दूषणशतं देयम् । अतस्सुष्ठूक्तं **विरोध्यवस्थापरम्परैव प्रागभावप्रध्वंसौ** इति । **पिण्डत्वघटत्वेत्यादिना** * मही घटत्वं घटतः कपालिका कपालिकाचूर्णरजस्ततोऽणुः । (वि. २.१२.४३) इति भगवत्पराशरवचनं स्मारयति । तत्र हि प्रकरणे नास्त्यवस्त्वसत्यादिशब्दानामवस्थान्तरापत्तिनिबन्धनत्वं स्पष्टम् । व्याख्यातं च **शारीरकभाष्ये** । नन्वेवमपि *जातस्य हि ध्रुवो मृत्युः इत्येतावदुपपद्यताम्, उत्पन्नस्य घटादेर्नाशदर्शनात् । *ध्रुवं जन्म मृतस्य च इति तु नोपपद्यते, नष्टस्य घटादेः पुनरुत्पत्त्यदर्शनात् । न च पुनरुत्पत्तिरस्य शोकनिमित्तम्, येन तस्यावर्जनीयत्वं प्रतिपाद्येतेत्यत्राह—**तत्रेति** । अयमभिप्रायः—यदवस्थस्य द्रव्यस्य विनाशः, न तदवस्थस्यैव पुनरुत्पत्तिरुच्यते, किंतु तस्यैव द्रव्यस्यावस्थान्तरविशिष्टस्य । एकमेव हि द्रव्यं घटाकारेण नष्टं कपालाकारेणोत्पद्यते । एकैव हि कपालावस्था घटावस्थस्य द्रव्यस्य नाशः कपालावस्थस्य तस्यैवोत्पत्तिः । अत एवमुपपन्नं नष्टस्योत्पत्तिरिति । **सैव**—उत्तरावस्थाप्राप्तिरित्यर्थः । अत्र प्राप्तिशब्देन प्रथमक्षणागमस्य विवक्षितत्वादुत्तरेषु क्षणेषूत्पत्तिशब्दप्रयोगाभाव उपपन्न

इति सूचितम् । एवं सति पुनरुत्पत्तेरवर्जनीयत्वप्रतिपादनं च नाशावर्जनीयत्वप्रतिपादनमेव । तत एव शोकापनोदनार्थताऽपि युक्ता । यद्वा य[दि]दीदमचिह्नव्यं नष्टमिति शोचसि, तर्हि तदेव द्रव्यं तदुत्तरावस्थतयोत्पन्नमिति किं न प्रीयस इति भावः । एकस्यैव परिणामस्य निरूपणभेदादुत्पत्त्याख्या विनाशाख्या चेति **उत्पत्तिविनाशाख्यपरिणामेत्युक्तम्** । एवं प्रलयापेक्षया सृष्टेर्विनाशत्वेऽपि पुरुषार्थयोगायोगादिविवक्षया व्यवहारव्यवस्था । **परिणामिन** इति अपरिहार्यत्वकारणं तत्स्वभावत्वमुक्तम् । इतिशब्देनापरिहार्यपदं हेत्वभिप्रायमिति व्यञ्जयति ॥ २७ ॥

भा ॥ सतो द्रव्यस्य पूर्वावस्थाविरोध्यवस्थान्तरप्राप्तिदर्शनेन योऽल्पीयाञ्छोकः, सोऽपि मनुष्यादिभूतेषु न संभवतीत्याह—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८

मनुष्यादिभूतानि सन्त्येव द्रव्याण्यनुपलब्धपूर्वावस्थान्युपलब्धमनुष्यत्वादिमध्यमावस्थान्यनुपलब्धोत्तरावस्थानि स्वेषु स्वभावेषु वर्तन्त इति न तत्र परिदेवनानिमित्तमस्ति ॥ २८ ॥

ता॥ एवमपरिहार्यत्वेनाशोचनीयत्वमुक्तम् । अथ तत्तद्वस्तूनां प्रतिनियतस्वभावत्वेन पूर्वोत्तरावस्थायां सुखरूपत्वदुःखरूपत्वयोरन्यतरविवेकानर्हानुपलभ्यदशापत्त्या चाशोचनीयत्वमुच्यते—**अव्यक्तादीनी**ति । भूतशब्दस्यात्र देहपरत्वार्थमुक्तम्—**मनुष्यादीनी**ति । अव्यक्तव्यक्तादिशब्दानां प्रकृत्यवस्थाविशेषादिपरत्वभ्रमव्युदासाय **यादवप्रकाशोक्त**सद्ब्रह्मादिपरत्वस्य च प्रकृतानुपयोगज्ञापनायोक्तम्—**अनुपलब्धे**त्यादि । * अदर्शनादिहायातः पुनश्चादर्शनं गतः । नासौ तव न तस्य त्वं वृथा किमनुशोचसि ॥ (भा. स्त्री. २. १२) इति ह्यन्यत्राप्युच्यते । **स्वेषु स्वभावेषु वर्तन्त** इति । अयमभिप्रायः—न तावदेषां द्रव्याणां मनुष्यत्वादिव्यक्तावस्था स्वभावः, संहतिविशेषादिसाध्यत्वात् । नाप्यव्यक्तपूर्वोत्तरावस्था, तस्या अपि विभागादिसाध्यत्वात् । अतस्सामान्यतः परिणामित्वमात्रं स्वभावः । ततश्च यथा परिणामिनो द्रव्यस्याव्यक्तपूर्वावस्था व्यक्तमध्यावस्था च न शोकनिमित्तम् ; एवमुत्तरावस्थाऽ[पीति]पि । एवकारोऽत्रावर्जनीयत्वपरः, स्वभावप्राप्तिपरो वा । यद्यव्यक्तावस्थैव स्वभाव इति मनुषे, तदा स्वभावपरित्यागलक्षणमनुष्यत्वाद्यवस्थैव शोचनीया । यदि पुनर्मनुष्यत्वाद्यवस्थैव स्वभावः प्रतिबन्धकवशादव्यक्तावस्थेति मन्वीथाः, तदाऽपि प्रतिबन्धकस्यावर्जनीयत्वादागन्तुकस्य तस्य कदाचिदपगमे पुनर्मनुष्यत्वादिसिद्धेश्चायलभ्यत्वान्न कथञ्चिदपि शोचनीयम् । यदि तु स्वभाव एव वस्तूनां सामान्यतश्शोकनिमित्तम्, तर्हि प्रतिनियतविचित्रस्वभावानन्तवस्तुसन्तते जगति सर्वस्य सर्वदा दुःखजलनिधावेव मज्जनमिति नेदानीं विशेषतश्शोकनिमित्तमस्ति । अथौपाधिकस्यापि सुखहेतोर्वियोगाच्छोकः, तदा दुःखहेतूनां शत्रुप्रभृतीनां भैक्षचर्यादेश्च परमार्थतश्शोकनिमित्तत्वम् ; न तु सुखहेतोश्शत्रुनिरसनस्य सार्वभौमत्वादेर्वा । अथ सुखहेतोः स्वशरीरादेर्नाशात् विभेषि ? तर्हि महाबाहुना भारतेन त्वया जिघांसूनां सन्निधौ यथाशक्ति व्यापारेण शरीरादिरक्षणं कार्यम् । यदि च बन्धुवधादिनिमित्तलोकापवादादेर्भीतिः, तदा समर्थस्य ते बन्धुसंरक्षणाद्यभावनिमित्तो महीयानपवादस्यात्, भीरुत्वादिनिमित्ता मरणातिरिक्ता चाकीर्तिस्स्यात्, नचायं दुस्त्यजः शीतातपादिसांस्पर्शिकदुःखवच्छोकः, किंत्वविचारितरमणीयाभिमानमूलतया तन्निवृत्त्या परिहार्यः ; अत एव[वं] देहात्ममोहमहाग्रहगृहीतस्त्वं लोकायतसमयरहस्यतत्त्वविचारेणापि न कथञ्चिदपि शोचितुमर्हसीति परिदेवना [का—] किंनिमित्तेत्यर्थः । तदिदमुक्तम्—**न तत्र परिदेवनानिमित्तमस्ति**—इति ॥

भा ॥ एवं शरीरात्मवादेऽपि नास्ति शोकनिमित्तमित्युक्त्वा शरीरातिरिक्त आश्चर्यस्वरूप आत्मनि द्रष्टा वक्ता श्रोता श्रवणायत्तात्मनिश्चयश्च दुर्लभ इत्याह—

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥ २९

भा ॥ एवमुक्तस्वभावं स्वेतरसमस्तवस्तुविसजातीयतया आश्चर्यवदवस्थितमनन्तेषु जन्तुषु महता तपसा क्षीणपापः उपचितपुण्यः कश्चित्पश्यति । तथाविधः कश्चित्परस्मै वदति । एवं कश्चिदेव शृणोति । श्रुत्वाऽप्येनं यथावदवस्थितं तत्त्वतो न कश्चिद्वेद । चकारात् द्रष्टृवक्तृश्रोतृष्वपि तत्त्वतो दर्शनं तत्त्वतश्श्रवणं दुर्लभमित्युक्तं भवति ॥ २९ ॥

ता ॥ एवमन्वारुह्यवादपरिसमापनेन पूर्वोक्तं स्वसिद्धान्तमेव देहात्ममोहमूलदुरितावलीमलीमसे जगति तदधिकारिदुर्लभत्वादिकथनेन प्रशंसतीत्याह—एवमिति । कतिपयपदविशेषितोऽयमौपनिषद एव *आश्चर्यवदित्यादिश्लोकः । **एवमुक्तस्वभावम्** इति **एन**मित्यस्यार्थः । अव्यक्तोऽयम् इत्यादिनोक्तं वैजात्यम् आश्चर्यत्वहेतुतयाऽऽह—**स्वेतरे**ति । आश्चर्यवच्छब्दस्य पश्यत्यादिक्रियाविशेषणत्वभ्रमव्युदासायोक्तम्—**आश्चर्यवदवस्थितमिति** । आत्मनो वैलक्षण्यकथनमेवात्रोचितमिति भावः । एतेन कर्तृदृष्टान्ततया शङ्करोक्तं योजनान्तरमपि दूषितम् । कश्चिदिति निर्धारणार्थमाह—**अनन्तेष्विति** । ज्ञानेन हीनानां नराणामपि पशुभिस्समत्वदर्शनायोक्तम्—**जन्तुष्विति** । **कश्चि**दित्यस्य तात्पर्यार्थमाह—**महतेति** । यथा चोच्यते—*कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते इति । अन्यशब्दोऽत्र पूर्वोत्तरवाक्यगतकश्चिच्छब्दसमानार्थः । **परस्मा** इत्यर्थलब्धोक्तिः । **श्रुत्वाऽपि न वेद** इत्युक्ते व्याघातशास्त्रानारम्भादिदोषस्यादित्याशङ्क्योक्तम्—**यथावदवस्थितं तत्त्वत** इति । प्रामाणिकसमस्ताकारयुक्तमनारोपितेन प्रकारेणेत्यर्थः । तत्त्ववेदिनोऽत्र दुर्लभत्वमात्रे तात्पर्यं, श्रुत्वाऽपीत्यादिवाक्यस्थचकारस्यानुक्तसमुच्चयार्थत्वं, तत्समुच्चेतव्यानि चाह—**चकारादि**ति । देहातिरिक्तस्यात्मनो द्रष्टैव तावद्दुर्लभः ; किमुत यथावस्थितद्रष्टा ? तथाविधेषु सत्स्वपि वक्तैव दुर्लभः ; किमुत सकलरहस्यवक्ता ? तादृशेषु सत्स्वपि श्रोतैव दुर्लभः ; किंपुनर्बाह्यान्तरसकलशिष्यगुणसम्पन्नतया यथावस्थितश्रोता त्वादृशः ? इत्यभिप्रायः । प्रथमं श्रवणम्, ततो मननाच्छ्रवणायत्तात्मनिश्चयः, ततश्च वचनयोग्यता, तत्रापि चिराभ्यासादिना यथावस्थितवचनयोग्यता, ततश्च निदिध्यासनाद्दर्शनम्, ततो[ऽपि] रत्नतत्त्ववत् चिरनिरीक्षणसंस्कारात्सविशेषदर्शनमिति वा क्रमः । अत्र देहातिरिक्तश्चेदात्मा, किं तथा नोपलभ्यते ? इति शङ्कापाकरणाय दुर्ज्ञानत्वकथनम् । सर्वैर्ज्ञातुमशक्ये वा वस्तुनि किं त्वामेकमुपालभे ? इति भावः ॥ २९ ॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३०

भा ॥ सर्वस्य देवादिदेहिनो देहे वध्यमानेऽप्ययं देही नित्यमवध्यो मन्तव्यः । तस्मात्सर्वाणि देवादिस्थावरान्तानि भूतानि विषमाकाराण्यप्युक्तेन स्वभावेन स्वरूपतस्समानानि नित्यानि च । देहगतं तु वैषम्यमनित्यत्वं च । ततो देवादीनि सर्वाणि भूतान्युद्दिश्य न शोचितुमर्हसि ; न केवलं भीष्मादीन्प्रति ॥ ३० ॥

ता ॥ अथ यथा देवादिस्थावरान्तेषु भूतेषु देहांशे जातिगुणदेशकालदुर्भेदत्वसुमेदत्वादिवैषम्यमुपलभ्यते ; तद्व-

देहिन्यपि सुखित्वदुःखित्वादिवैषम्यं दृश्यते । देवादिशब्दाश्च देवत्वादिविशिष्टात्मपर्यन्ताः । एवं नित्यत्वानित्यत्वादिलक्षणवैषम्यमपि संभाव्येतेति शङ्कानिराकरणायोच्यते—**देही**ति । **वध्यमानेऽपी**ति सामर्थ्यानीतमुक्तं *हन्यमाने शरीरे (२.२०) इतिवत् । अन्यथा देहे सर्वस्येत्यस्य नैरर्थक्यं, देहीत्येतावतैव देहवर्तित्वसिद्धेः । भूतशब्दोऽत्र क्षेत्रज्ञपर्यन्तः । **सर्वाणि** इत्यादिसूचितशङ्काहेतुः **विषमाकाराण्यपि** इत्यनूदितः । देवादिभेदात्तत्प्रयुक्तसुखादिभेदाच्चेति शेषः । **उक्तेन स्वभावेने**ति । पूर्वोक्तसूक्ष्मत्वाच्छेद्यत्वादिनेत्यर्थः । **नित्यानि चे**ति । न तु नित्यत्वानित्यत्वलक्षणवैषम्यं शङ्कनीयमित्यर्थः । **देहगतं तु वैषम्य**मिति । देहमात्रगतं देवादिसन्निवेशवैषम्यम् । सुखादिवैषम्यं त्वात्मगतमपि तत्तद्देहौपाधिकधर्मभूतज्ञानावस्थाविशेषतारतम्यात्मकम् । चेतनानां देहादिशब्दैर्व्यपदेशस्तु शरीरस्यापृथक्सिद्धिमात्रनिबन्धन इति भावः । प्रकृतसङ्गतिज्ञापनाय सर्वाणीत्यस्य व्यवच्छेद्यमाह—**न केवलं भीष्मादीन् प्रती**ति ॥ ३० ॥

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥ ३१

भा॥ अपि चेदं प्रारब्धं युद्धं प्राणिमारणमपि अग्नीषोमीयादिवत् स्वधर्ममवेक्ष्य न विकम्पितुमर्हसि । धर्म्यात्—न्यायतः प्रवृत्ताद्युद्धादन्यन्न हि क्षत्रियस्य श्रेयो विद्यते । *शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ (१८. ४३) इति हि वक्ष्यते । अग्नीषोमीयादिषु च न हिंसा पशोः, निहीनतरच्छागादिदेहपरित्यागपूर्वककल्याणतरदेहस्वर्गादिप्रापकत्वश्रुतेस्संज्ञपनस्य *न वा उ वे तन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिस्सुगेभिः । यत्र यन्ति सुकृतो नापि दुष्कृतः । तत्र त्वा देवस्सविता दधातु । (यजु. ४. ६. ९. ४६ ; यजु. ब्रा. ३ ७. ७. ९४) इति हि श्रूयते । इह च युद्धे मृतानां कल्याणतरदेहप्राप्तिरुक्ता, वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति इत्यादिना । अतश्चिकित्सकशल्यादिकर्म आतुरस्येवास्य रक्षणमेवाग्नीषोमीयादिषु संज्ञपनम् ॥ ३१ ॥

ता॥ एवम् *अशोच्यानन्वशोचस्त्वम् इत्यादिना *न त्वं शोचितुमर्हसि इत्यन्तेनास्थानकारुण्यमपोदितम् । अथ **स्वधर्मे**मित्यादिना **मरणादतिरिच्यते** इत्यन्तेन धर्माधर्मधीरपोद्यते—**अपि चे**ति । समुच्चेतव्यहेत्वन्तरपरप्रकरणभेदद्योतनार्थः । *धर्म्याद्धि युद्धात् इति वाक्यशेषप्रदर्शितं *स्वधर्मम् इत्यस्य विशेष्यमाह—**इदं युद्धमि**ति । स्वो धर्मः स्वस्य वा धर्मः स्वधर्मः । विकम्पितुमित्येतत्सामर्थ्यसिद्धमुक्तं—**प्रारब्धमि**ति । अधर्मधीहेतुं सामान्यनिषेध[विषय]मनुवदति—**प्राणिमारणमपी**ति । प्रबलं विशेषशास्त्रं निषेधशास्त्रात्, निषेधस्याप्रसक्तिं वा स्मारयति—**अग्नीषोमीयादिवदि**ति । धर्मयुद्धव्यतिरिक्तस्य कस्यचिदन्यस्य श्रेयसः क्षत्रिये स्वरूपनिषेधभ्रमं व्युदस्यन् क्षत्रियस्य प्रशस्यतरं ध[र्मि]र्म्ययुद्धादन्यन्नास्तीत्येतदर्थमन्वयमाह—**धर्म्यादि**ति । धर्म्यत्वं धर्मादनपेतत्वम् । तद्धेतुर्न्यायतः प्रवृत्तत्वम् । तच्च निरायुधनिवृत्तशरणागतादिषु शस्त्रप्रयोगाद्यभावात् । **हि**शब्दसूचितं वक्ष्यमाणमाह—**शौर्यमि**ति । ननु अग्नीषोमीयादिवत् इत्येतदेव न संप्रतिपन्नम्, तस्यापि हिंसात्वेनाधर्मत्वस्यावर्जनीयत्वात् । न च निषिद्धत्वमुपाधिः ; *न हिंस्यादिति सामान्यनिषेधेन तस्य साधनव्यापकत्वात् । नापि विहितेतरत्वमुपाधिः, अविहिताप्रतिषिद्धेष्वपि तस्य विद्यमानत्वेन साध्यव्यभिचारात् । न च [साध्यसमव्याप्तत्वाभिप्रायेण] सामान्यनिषेधो विशेषविधिवाक्यविरोधात्सङ्कुचितविषयः, सङ्कोचहेतोर्विरोधस्यैवाभावात्, सामान्यविशेषवाक्ययोः प्रत्यवायक्रतुसाधनत्वपरत्वादेकस्यैव क्रतुप्रत्यवायसाधनत्वाविरोधात् । न च प्रत्यवायसाधनं न विधीयेतेति वाच्यम्, हरीतकीभक्षणादिष्विव क्रत्वनुप्रविष्टप्रायश्चित्तार्हहिंसासाध्यदुःखस्याल्पतया क्रतुसाध्यसुखस्य च

भूयस्तया तदुपपत्तेः । उक्तं च **साङ्ख्यैः**—*हिंसा हि पुरुषस्य दोषमावक्ष्यति कृतोश्चोपकरिष्यति (सां. कौ. २) इत्यादि । आह च **पञ्चशिखाचार्यः**—*स्यात् स्वल्पसङ्करः [स]सुपरिहरस्सप्रत्यवमर्शः (व्या.भा.२.१३) इति । अतोऽग्नीषोमीयवदित्यसिद्धस्यासिद्धमेव निदर्शनमुक्तमित्यत्राह—**अग्नीषोमीयादिषु चे**ति । अधर्मसाधको हिंसात्वहेतुरसिद्धः । उपाधिश्च न पक्षव्यापकः, पक्षस्याहिंसारूपत्वात्, तत एव निषेधाभावाच्चेति भावः । अहिंसात्वमेवोपपादयति—**निहीनतरे**ति । अनर्थप्रापकव्यापारत्वं हि हिंसालक्षणम् । अत्र तु तद्विपरीतत्वेन रक्षणत्वमेव युक्तमिति मन्त्रलिङ्गेन ज्ञापयति—**नवा** इति । एतदिति क्रियाविशेषणम् । सुगेभिरिति—सुगैरित्यर्थः । पिष्टपश्वादिविधिस्तु कार्तयुगधर्मनिष्ठाधिकारिविशेषनियतः *पशुयज्ञैः कथं हिंस्रैर्मादृशो यष्टुमर्हति (भा. मो. १७५. ३४) इत्यादिवचनाच्चेति भावः । अस्त्वग्नीषोमीयादौ श्रुतिबलादहिंसात्वम्, इह तु कथमित्यत्राह—**इह चे**ति । अयमप्यर्थः श्रुतिस्मृतिसिद्ध इति भावः । ननु *अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः (छा. ८. १५. १) इत्यादिनाऽग्नीषोमीयादेर[पि]न्यस्य हिंसात्वं प्रतीयते; अन्यथाऽन्यत्रेति तद्व्यवच्छेदानुपपत्तेरित्यत्राह—**अत** इति । अयमभिप्रायः—न तावदिह दुःखजननमात्रं हिंसा, रक्षणरूपेषु चिकित्सकशल्यप्रयोगादिष्वपि प्रसङ्गात् । नापि प्राणवियोजनमात्रम्, अतद्रूपेषु सर्वस्वहरणनारकपीडादिषु हिंसाशब्दप्रयोगदर्शनात् । न चायमुपचारः, नियामकाभावात्, विपरिवर्तेस्यापि दुर्वारत्वात् । अतोऽनर्थपर्यवसितस्तादात्विकदुःखजनको व्यापारो हिंसेत्येव तत्त्वम्—इति । ततश्च *अन्यत्र तीर्थेभ्यः इत्येतत्पश्वादेर्भाविपुरुषार्थविशेषानभिज्ञपामरदृष्ट्योक्तम् । तस्मिन्नपि वाक्ये 'हिंसात्वं नास्तीत्येव तात्पर्यम् । उक्तं च मनुना—*तस्माद्यज्ञे वधोऽवधः (मनु. ५. ३९) इति । अत्रापि वध इति पामरदृष्ट्याऽनुवादः । अवध इति तत्त्वकथनम् । यद्यपि क्रत्वनुप्रविष्टानां सोमोच्छिष्टभक्षणप्रभृतीनां हिंसालक्षणव[त्त]न्न लक्षणान्तरेण व्यवच्छेदशक्यः; तथाऽपि तेषां प्रत्यवायानाधायक्रत्ववचनबलादेव तथात्वमङ्गीकुर्मः; पुनः क्रत्वर्थतया विधानमात्रेण । नन्वेवमुत्सर्गापवादन्यायस्य कीदृशो विषयः? तादृश एव, यत्र निरवकाशविशेषवाक्यविरोधादेव सावकाशसामान्यशब्दसङ्कोच इति निस्तरङ्गमेतत् ॥ ३१ ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२

भा ॥ अयत्नोपनतमिदं निरतिशयसुखोपायभूतं निर्विघ्नमीदृशं युद्धं सुखिनः पुण्यवन्तः क्षत्रिया लभन्ते ॥ ३२ ॥

ता ॥ पुनरपि प्राणिमारणस्यापि युद्धस्य प्रशंसामुखेनाधर्मभ्रममुन्मूलयति—**यदृच्छये**ति । यदृच्छयोपपन्नमित्यत्राहेतुकत्वादिभ्रमव्युदासायाह—**अयत्नोपनतमि**ति । प्राक्तननिरतिशयपुण्यविपाकलभ्यत्वादिदानीमयत्नोपनतत्वम् । **निरतिशयसुखोपायभूतमि**ति । स्वर्गशब्दो हि *यस्मिन्नोष्णं न शीतं *दुःखेन यत्र संभिन्नं नच ग्रस्तमनन्तरम् । अभिलाषोपनीतं यत्तत्सुखं स्वः पदास्पदम् ॥ (शा.भा. ६.१.१) इति निरतिशयसुखविशेषे व्युत्पन्नः । देशविशेषस्तु तादृशसुखभोगस्थानतया **स्वर्गः** । धर्माणां च स्वतो निरतिशयसुखसाधनत्वं स्वभावः । फलाभिसन्ध्यादिलक्षणप्रतिबन्धकवशादन्यथात्वमिति च्विप्रत्ययमप्रयुञ्जानस्य भावः । अपावृतशब्दाभिप्रेतं निर्विघ्नत्वम् । सुखिन इत्यस्य **पुण्यवन्त** इति प्रतिपदम् । नहि सुखमेवंदृशयुद्धलाभहेतुः; अतोऽत्र सुखशब्देन सुखसाधनं लक्ष्यत इति भावः । यद्वा, अत्र सुखिशब्दः सुखयोग्यत्वलक्षणसंबन्धपरः । तद्योग्यत्वं च पुण्यवत्त्वमेवेति भावः ॥ ३२ ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३

भा ॥ अथ क्षत्रियस्य स्वधर्मभूतमिमम्—आरब्धं संग्रामं मोहान्न करिष्यसि चेत्—ततः प्रारब्धस्य धर्मस्याकरणात्स्वधर्मफलं निरतिशयसुखं विजयेन निरतिशयां च कीर्तिं हित्वा पापं निरतिशयमवाप्स्यसि ॥

ता ॥ एवं युद्धस्य धर्म्यत्वेन निरतिशयसुखसाधनत्वमुक्तम् । अथ तदकरणे प्रत्यवायमाह—**अथचेदिति** । युद्धाकरणस्य ब्राह्मणादीनां पापहेतुत्वाभावात् त्वंशब्दः क्षत्रियत्वपर इत्यभिप्रायेणोक्तम्—**क्षत्रियस्य स्वधर्मभूतमिति** । **इमम्** इति निर्देशाभिप्रेतमुक्तम्—**आरब्धमिति** । **मोहात्**—धर्मेऽप्यधर्मत्वभ्रमादित्यर्थः । न हि युद्धस्याकरणमात्रं क्षत्रियस्यापि प्रत्यवायहेतुः, सर्वदा युद्धकरणप्रसङ्गादित्यत उक्तं—**प्रारब्धस्येति** । **स्वमर्धफलमिति** । धर्मशब्दोऽत्र फलपरः, अन्यथा पौनरुक्त्यात्, अनुवादमात्रत्वेऽनिष्टप्रसङ्गपर्यवसानाभावाच्चेति भावः । आगामिकीर्तिविषयत्वायोक्तं—**विजयेनेति** । न केवलं दृष्टादृष्टरूपनिरतिशयपुरुषार्थहा[न]निमात्रम्, निरतिशयदुःखहेतुभूतं पापमप्यवाप्स्यसीति वाक्यार्थः ॥ ३३ ॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिः मरणादतिरिच्यते ॥ ३४

भा ॥ न ते केवलं निरतिशयसुखकीर्तिहानिमात्रम्, पार्थो युद्धे प्रारब्धे पलायितः इत्यव्ययां—सर्वदेशकालव्यापिनीमकीर्तिं च समर्थान्यसमर्थान्यपि सर्वाणि भूतानि कथयिष्यन्ति । ततः किमिति चेत्—शौर्यवीर्यपराक्रमादिभिस्सर्वसंभावितस्य तद्विपर्ययजा ह्यकीर्तिर्मरणादतिरिच्यते ; एवंविधाया अकीर्तेर्मरणमेव तव श्रेय इत्यर्थः ॥ ३४ ॥

ता ॥ एवं दृष्टादृष्टरूपफलहानिरदृष्टप्रत्यवायश्चोक्तः । अथ दृष्टप्रत्यवायमाह—**अकीर्तिं चेति** । अकीर्तिरिह दुष्कीर्तिः । न ते केवलमित्यादौ नापि पारलौकिकनिरतिशयपापमात्रमित्यनुसन्धेयम् । **प्रारब्धे पलायित** इति कान्दिशीकतया प्रथमव्यापारमप्यकृत्वेति भावः । अव्ययशब्देनाविनाशित्वाभिधानात्सर्वकालव्यापित्वमुच्यताम् ; सर्वदेशव्यापित्वं तु कथमुच्यते ? इत्थं—यद्यकीर्तिस्सर्वदेशव्यापिनी न स्यात्, सर्वकालव्यापिन्यपि न स्यात्, कालक्रमेण सङ्कोचाद्विच्छेदोपपत्तेः—इति । यद्वा देशतः कालतश्चान्यूनत्वमेवात्र अव्ययत्वं विवक्षितम् । भूतान्यपीति [**अपि**]शब्दान्वयः । चापीत्यनतिरिक्तार्थत्वे निष्प्रयोजनत्वम् । ततो भूतानि इति सामान्यनिर्देशात्, अपिशब्दान्वयबलाच्चोक्तं **समर्थान्यसमर्थान्यपीत्यादि** । अकीर्तेरिष्टत्वमाशङ्क्योत्तरार्धमुच्यत इत्याह—**ततः किमिति** । चश्शङ्कानिराकरणार्थः । अर्जुनस्य संभावितत्वहेतूनाह—**शौर्येति** । **सर्वसंभावितस्येति** । पूर्वनिर्दिष्टैस्समर्थैरसमर्थैश्च भूतैस्संभावितस्येत्यर्थः । ननु मरणादतिरेकः किं हेयतया, उपादेयतया वा ? न प्रथमः, *जीवन् भद्राणि पश्यति (भा. वि. ३८. ४४), *आत्मार्थे पृथिवीं त्यजेत् (भा. उ. १२७,४९) इत्यादिवचनात् । न द्वितीयः प्रकरणविरोधादित्यत्राह—**एवंविधाया इति** । *जीवन् भद्राणि इत्यादिकं तु क्षत्रियापुत्रस्य तेऽद्य नोपादेयम् । न चेयमकीर्तिर्लघीयसी, येन मरणाच्छ्रेयसी स्यात् । किंत्वेवंविधा सर्वदेशकालव्यापिनी, इयं च नरकायापि स्यात्, तथैव स्मृत्यादिसिद्धत्वात् । तथाचोत्तरस्मिन् रामायणे रघुनाथवाक्यम्—*अकीर्तिर्यस्य गीयेत लोके भूतस्य कस्यचित् । पतत्येवाधमान् लोकान्यावच्छब्दस्स कीर्त्यते ॥ (४५. ११,१२) इति । युद्धे मरणं तु तत एव स्वर्गाय स्यादिति भावः ॥ ३४ ॥

भा ॥ बन्धुस्नेहात्कारुण्याच्च युद्धान्निवृत्तस्य शूरस्य ममाकीर्तिः कथमागमिष्यतीत्यत्राह—

भयाद्रणादुपरतं मंस्य[मन्य]न्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५

भा ॥ येषां कर्णदुर्योधनादीनां महारथानामितःपूर्वं त्वं शूरो वैरीति बहुमतो भूत्वेदानीं युद्धे समुपस्थिते निवृत्तव्यापारतया लाघवं—सु[नि]ग्रहतां यास्यसि. ते महारथास्त्वां भयाद्युद्धादुपरतं मंस्यन्ते । शूराणां हि वैरिणां शत्रुभयादते बन्धुस्नेहादिना युद्धादुपरतिर्नोपपद्यते ॥ ३५ ॥

ता ॥ एवं धर्माधर्मभ्रमो निवारितः । अथास्थानस्नेहः क्षिप्यते * भयात् इत्यादिना । **बन्धुस्नेहादित्यादि** । शूरस्य सतः स्नेहकारुण्याभ्यां निवृत्तस्य मे कीर्तिरेव स्यादिति भावः । येषामित्यतिप्रसिद्धपरामर्शात्कर्णदुर्योधनादीनामित्युक्तम् । तेनापकार[रि]वर्गं स्मारयति । यद्यपि भीष्मादयो याथार्थ्यं जानीयुः, तथाऽपि कर्णादयो न तथेति भावः । भूत्वेत्यस्य यास्यसीत्युत्तरक्रियैकरस्येन स्नात्वा होष्यामि इत्यादिष्विव क्रियापेक्षया पूर्वेणापि भविष्यता कालेन संबन्धभ्रमव्युदासायोक्तम्—**[इतः]पूर्वमिति** । बहुभिर्गुणैर्बहुत्वेन मतो हि बहुमत इत्यभिप्रायेणाह—**शूरो वैरीति** । यदि शूरस्त्वं प्रागपि निर्वैरः, यदि च वैरी त्वं शौर्यरहितः, तदा हि महारथा न त्वां गणयेयुरिति भावः । तत्क्षणावधि वैरानुवृत्तिसूचनायोक्तम्—**इदानीमिति** । लाघवफलं सु[नि]ग्रहता लाघवशब्देनोपचरिता । सु[नि]ग्रहत्वं चात्र सु[नि]ग्रहत्वाभिमानविषयत्वम्, बन्धुस्नेहादित्याद्युक्तां शङ्कां निराकरोति—**शूराणां हीति** । यदि शूरत्ववैरित्वयोरन्यतरन्न स्यात्, तदा युज्येताप्यन्यथासिद्धिरिति भावः ॥ ३५ ॥

भा ॥ किंच,

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६

भा ॥ शूराणामस्माकं सन्निधौ कथमयं पार्थः क्षणमपि स्थातुं शक्नुयात्, असत्सन्निधानादन्यत्र ह्यस्य सामर्थ्यमिति तव सामर्थ्यं निन्दन्तः शूराणामवाच्यवादांश्च बहून्वदिष्यन्ति तव शत्रवो धार्तराष्ट्राः; ततोऽधिकतरं दुःखं किं तव ? एवंविधावाच्यश्रवणान्मरणमेव श्रेय इति त्वमेव मंस्यसे ॥ ३६ ॥

ता ॥ एवं प्राचीनमपकारं भविष्यल्लाघवारोपं चाभिधाय पुनरागामिनाऽप्यपकारेणास्थानस्नेहत्वं द्रढयतीत्यभिप्रायेणाह—**किंचेति** । प्रस्तुतोदन्तफलितं सामर्थ्यनिन्दाप्रकारमाह—**शूराणामस्माकमित्यादिना** । **शूराणामवाच्यवादांश्च बहूनिति** । शूरान् प्रति ये न वाच्याः, किंतु कान्दिशीकान् प्रति, तान् पारुष्याश्लीलपरिहासादिवादानित्यर्थः । **अहित**शब्दोऽत्र अवाच्यवादहेतुपर इत्यभिप्रायेणाह—**शत्रवो धार्तराष्ट्रा** इति । यदि च भीष्मद्रोणकृपशल्यादयः किञ्चिद्वदेयुः, तदा शौर्यगौरवादिना सह्येतापि । कथं पुनरशूरैश्शूराभिमानिभिर्महापकारिभिः कृतान् बहूनवाच्यवादान् सहेथा इति भावः । ननु गुणविशिष्टवाचिशब्देषु हि तरबाद्यौचित्यम्; न जात्यादिशब्देषु; नहि घटतर इत्यादिकं प्रयुज्यत इत्यत्राह—**तत इति** । ततोऽवाच्यवादात् तच्छ्रवणादिति फलितम् । दुःखशब्दः प्रातिकूल्यविशिष्टवाची । प्रतिकूलतरमितिकदुःखतरमित्युक्तमित्यधिकतरशब्देन प्रत्ययार्थं निष्कृष्य वदतो भावः । **तवेति**—नहि त्वं रथ्यापुरुषः, न च समाध्यादिनिष्ठः, येनात्र दुःखिता न स्यादिति भावः । किंशब्दः पूर्वश्लोकोक्तदुःखतरमरणतत्पर इत्याह—**एवमिति** ।

त्वमेव मंस्यसे इति । गाण्डीवसामर्थ्यादिनिन्दाप्रसङ्गे धर्मपुत्रमपि हि भवान् हन्तुमुद्योक्ष्यते, किं पुनः कर्णादीन् । अत इदानीं निवृत्तोऽपि तदा दुस्सहतरदुःखप्रेरितो युद्धं करिष्यसीति हृदयम् ॥ ३६ ॥

भा ॥ अतश्शूरस्यात्मना परेषां हननमात्मनो वा परैर्हननमुभयमपि श्रेयसे भवतीत्याह—

हतो वा प्राप्स्य[से]सि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७

भा ॥ धर्मयुद्धे परैर्हतश्चेत्तत एव परमनिःश्रेयसं प्राप्स्यसि ; परान्वा हत्वा अकण्टकं राज्यं भोक्ष्यसे ; अनभिसंहितफलस्य युद्धाख्यस्य धर्मस्य परमनिःश्रेयसोपायत्वात् तच्च परमनिःश्रेयसं प्राप्स्यसि ; तस्माद्युद्धायोद्योगः परमपुरुषार्थलक्षणमोक्षसाधनमिति निश्चित्य तदर्थमुत्तिष्ठ । कुन्तीपुत्रस्य तवैतदेव युक्तमित्यभिप्रायः ॥ ३७ ॥

ता ॥ हतो वा इति श्लोकं पूर्वश्लोकवाक्यशेषतयाऽवतारयति—**अत** इति । उभयथाऽपि तव लाभ इति भावः । प्राप्स्यसे, भोक्ष्यसे इत्यर्जुनं प्रत्यभिधानेऽपि शूरस्येत्यादिसाधारणाभिधानं भीष्मादिहननस्य तच्छ्रेयोहेतुतया शोकहेतुत्वं नास्तीति ज्ञापनार्थम् । श्रेयस इत्यनेन यथेच्छं स्वर्गराज्यादिसुखापवर्गान् संगृह्णाति । न हि हतत्वमात्रात्पुरुषार्थ इत्यत उक्तं—**धर्मयुद्ध** इति । **तत एवेति** । श्रेयस्साधनतया शास्त्रसिद्धहननादेवेत्यर्थः । **परमनिश्श्रेयसमिति** । स्वर्गशब्दोऽत्रामृतत्वप्रकरणात्परमनिःश्रेयसपरः, तत्स्थानपरो वा । यथा * स एतेन प्राज्ञेनात्मनाऽस्मालोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके *सर्वान्कामानाप्त्वा अमृतस्समभवत् (ऐ. ३. ४.) * अनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति (के.४.९) * स्वर्गलोका अमृतत्वं भजन्ते (क. १.१.१३) इति, राज्यं सुराणामपि चाधिपत्यम् (२. ८) इति क्षुद्रस्वर्गापेक्षकार्जुनोद्देशेन वचनाच्चायमेवार्थ इति भावः । **परान्वा हत्वेति** । महारथानां भीष्मद्रोणकर्णादीनां जयो हि हननमन्तरेण न युज्यत इति भावः । * जित्वा * भोक्ष्यसे इत्युभाभ्यां फलितमुक्तम्—**अकण्टकमिति** । प्रतिकूलेषु जाग्रत्सु राज्यं सिद्धमपि हि न भोगाय स्यादिति भावः । अर्जुनानादृतराज्यभोगमात्रपर्यवसानव्युदासायाह—**अनभिसंहितेति** । मुमुक्षोर्हि राज्यभोगादिरानुषङ्गिकः । संबुद्धितात्पर्यमाह—**कुन्तीपुत्रस्येति** । * [मृ]शतं सूते क्षत्रिया राजपुत्री (भा. द्रो. ७७. १८) इति हि प्रसिद्धम् । नहि सिंहीसुतेन हरिणीकुमारचरितमनुसरणीयम् । न च शुद्धक्षेत्रजन्मना त्वया महीयसो धर्मस्य विच्छेदः कार्य इति भावः ॥ ३७ ॥

भा ॥ मुमुक्षोर्युद्धानुष्ठानप्रकारमाह—

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८

भा ॥ एवं देहातिरिक्तमस्पृष्टसमस्तदेहस्वभावं नित्यमात्मानं ज्ञात्वा युद्धे चावर्जनीयशस्त्रपातादिनिमित्तसुखदुःखार्थलाभालाभजयपराजयेष्वविकृतबुद्धिः स्वर्गादिफलाभिसन्धिरहितः केवलकार्यबुद्ध्या युद्धमारभस्व । एवं कुर्वाणो न पापमवाप्स्यसि—पापं दुःखरूपं संसारं नावाप्स्यसि; संसारबन्धान्मोक्ष्यस इत्यर्थः ॥३८॥

ता ॥ एवमस्थानस्नेहकारुण्यधर्माधर्मधियाकुलत्वमुपशमितम् । अथ धर्मत्वेन स्थापितस्य मुमुक्षुविषयानुष्ठानप्रकारं वदतीत्याह—**मुमुक्षोरिति** । नहि राज्यादिका[मा]मिनामीदृशी बुद्धिरपेक्षिता । अतोऽल्पास्थिरदुःखमिश्रयुद्धसाध्यफलेन किं

ममेति नाशङ्कनीयमिति भावः । पूर्वोक्तमात्मतत्त्वज्ञानमनुष्ठानदशायामनुवर्तनीयतया दर्शयति—**एवमिति** । **देहातिरिक्त-**मिति । सति धर्मिणि हेयविरहादिधर्मचिन्तेति भावः । पौनरुक्त्यभ्रमपरिहाराय लाभालाभयोर्धनादिविषयत्वमुक्तम् । विषमयोस्सुखदुःखप्रवाहयोस्समीकरणं कथमित्यत्रोक्तम्—**अविकृतबुद्धिरिति** । विकारो हर्षशोकादिरूपः ; तदभावकथ-नेन विवेकादिसप्तकान्तर्गतानवसादानुद्धर्षयोर्ग्रहणम् । **युद्धायेति** । तादर्थ्यविभक्तिसूचितान्यार्थत्वनिवृत्तिरुच्यते—**स्वर्गा-**दीति । * मा फलेषु कदाचन (२. ४७) * एतान्यपि तु (१८. ६) इत्यादिवक्ष्यमाणमत्रानुसंहितम् । तत इत्यस्योप-युक्तहेतुविशेषपरत्वमेवोचितम्, आनन्तर्यादिपरत्वं तु अनुपयुक्तमित्यभिप्रायेणाह—**केवलकार्यबुद्ध्येति** । पापशब्दोऽत्र न गुरुवधादिशङ्कितपापपरः, युद्धस्य स्वधर्मतामात्रेण तन्निवृत्तौ सुखदुःखसाम्यादिबुद्धिविशेषस्य *एवमित्यनूदितस्य नैर-र्थक्यप्रसङ्गात् । न च कृतपापपरः, नावाप्स्यसीत्यनन्वयात् । करिष्यमाणे च न प्रायश्चित्तम् । न च विद्याव्यतिरिक्तेषू-त्तराघाश्लेषः । अतोऽत्रामृतत्वप्रकरणान्मुमुक्षवपेक्षयाऽनिष्टफलत्वाविशेषेण पुण्यपापरूपसकलसांसारिककर्मपरः । ततश्च तत्फलभूतस्संसारोऽत्र लक्ष्यत इत्यभिप्रायेणाह—**दुःखरूपं संसार**मिति । *नैवं पापमवाप्स्यसि इत्युक्ते पापहेतुत्वा-भावमात्रं प्रतिभातीत्यत्राह—**संसारबन्धा**दिति । परम्परयेति शेषः । * सोऽमृतत्वाय कल्पते (२.१५) इति पूर्वोक्तमिह स्मारितम् ॥ ३८ ॥

भा ॥ एवमात्मयाथात्म्यज्ञानमुपदिश्य तत्पूर्वकं मोक्षसाधनभूतं कर्मयोगं वक्तुमारभते—

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९

भा ॥ साङ्ख्या बुद्धिः ; बुद्ध्याऽवधारणीयमात्मतत्त्वं साङ्ख्यम् । ज्ञातव्ये आत्मतत्त्वे तज्ज्ञानाय य बुद्धिरभिधेया * न त्वेवाहम् इत्यारभ्य * तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि इत्यन्तेन, सैषा तेऽभिहिता । आत्मज्ञानपूर्वकमोक्षसाधनभूतकर्मानुष्ठाने यो बुद्धियोगो वक्तव्यः, स इह योगशब्देनोच्यते । * दूरेण ह्यवरं कर्म बुद्धियोगात् (२. ४९) इति हि वक्ष्यते । तत्र योगे या बुद्धिर्वक्तव्या, तामिमामभिधीयमानां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ; कर्मणा बन्धः कर्मबन्धः, संसारबन्ध इत्यर्थः ॥ ३९ ॥

ता॥ अथ पूर्वप्रकरणोक्तशोकापनोदनहेतुषु प्रधानार्थेनोत्तरप्रकरणारम्भं संगमयति—**एवमिति** । तत्पूर्वकशब्देना-त्मज्ञानकर्मयोगयोः क्रमाभिधानौचित्यमुक्तम् ; आत्मयाथात्म्यज्ञानोपदेशानन्तरं तच्चिन्तनरूपज्ञानयोगाभिधानस्यौचित्येऽपि तस्य कर्मयोगसाध्यत्वात्प्रथमं कर्मयोग उच्यते । पश्चात्तु तत्फलतया * प्रजहाति यदा कामान् (२. ५५) इत्यादिना ज्ञानयोगो वक्ष्यते । **वक्तुमिति**—प्रसक्तं प्राधान्येन प्रपञ्चयितुमित्यर्थः । सांख्ययोगाख्यवेदविरोधितन्त्राभिधानभ्रमं सांख्य-शब्दस्यात्र *ज्ञानयोगेन सांख्यानाम् (३. ३) इति• वक्ष्यमाणज्ञानयोगविषयत्वभ्रमं च व्युदस्यन्नाह—**सांख्येति** । * बुद्धिर्मतिश्च मेधा संख्या संवित्तिरुपलब्धिः इति नैघण्टुकाः । * पुरुषं निर्गुणं सांख्यम् (म. उ) इत्याद्यौपनिषद-प्रसिद्ध्या परमात्मवदात्मन्यपि सांख्यशब्द उपपन्नः । नच *ज्ञानयोगेन सांख्यानाम् इत्यादिप्वर्थवैरूप्यप्रसङ्गः, तद्बुद्धि-योगेन सर्वत्र तच्छब्दप्रयोगात् । सदपि च वैरूप्यं प्रकरणाद्यानुगुण्येन सर्वत्र सह्यते । एकवचनस्य जात्यभिप्रायत्वज्ञाप-नाय—**आत्मतत्त्व**मित्युक्तम् । **तज्ज्ञानाये**त्यनेन तन्निर्णयमात्रमव्यवहितफलमिति दर्शितम् । **बुद्धिरिति** । निर्णयफल-वाक्ययुक्तिपरामर्शगर्भा बुद्धिर्विवक्षितेति न साध्यसाधनभावविरोधः । अथवा बुद्धिरिह शास्त्रनिष्पाद्यो निर्णयः ।

तज्ज्ञानायेति साक्षात्कारादिपरः । आत्मतत्त्वाभिधानप्रदेशमवच्छिद्याह—**न त्वेवेति** । ततः परस्तात्तु स्वधर्ममित्यादिना धर्माधर्मभ्रमास्थानस्नेहयोराक्षेपो हि क्रियत इति भावः । योगशब्दस्यात्र प्रकरणादिविशेषितमर्थमाह—**आत्मज्ञानेत्यादिना** । इहेत्यभिप्रेतं विवृणोति—**दूरेणेति** । **इमामिति** निर्देशसूचितमविलम्बिताभिधानमाह—**अभिधीयमानामिति** । एतेनानुष्ठानानुप्रविष्टबुद्धेस्तद्विषयाभिधीयमानबुद्धेश्च भेदोऽपि दर्शितः । यद्वा, अनुष्ठानप्रकारविषयबुद्धिजनकमभिधानं शृण्वित्यर्थः । एतेन कर्मयोगशब्दोऽप्यत्र बुद्धिविशेषयोगमूल इति दर्शितम् । बुद्ध्या ययेत्यनयोर्वैयधिकरण्येन क्रियाद्वयान्वयभ्रमं निरस्यति—**यया बुद्ध्या युक्त** इति । कर्मबन्धशब्दस्यानतिशयितार्थसमासान्तरमपाकरोति—**कर्मणा बन्ध** इति । *तृतीया तत्कृतार्थेन गुणवचनेन (अष्टा. २.१.३०) इति तत्पुरुषः । बन्धशब्दस्यात्र मुख्यार्थासंभवात् अभिप्रेतमाह—**संसारेति** । एतेनानुष्ठीयमानकर्मसंबन्धहानभ्रमोऽपि निरस्तः ॥ ३९ ॥

भा ॥ वक्ष्यमाणबुद्धियुक्तस्य कर्मणो माहात्म्यमाह—

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४०

भा॥ इह कर्मयोगे नाभिक्रमनाशोऽस्ति; अभिक्रमः—आरम्भः, नाशः फलसाधनभावनाशः, आरब्धस्यासमाप्तस्य विच्छिन्नस्यापि न निष्फलत्वम्, आरब्धस्य विच्छेदे प्रत्यवायोऽपि न विद्यते । अस्य कर्मयोगाख्यस्य धर्मस्य स्वल्पांशोऽपि महतो भयात्—संसारभयात् त्रायते । अयमर्थः *पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते (६. ४०) इत्युत्तरत्र प्रपञ्चयिष्यते । अन्यानि हि लौकिकानि वैदिकानि च साधनानि विच्छिन्नानि न फलाय भवन्ति, प्रत्यवायाय च भवन्ति ॥४० ॥

ता ॥ ननु, *इमां शृण्वित्युक्तेऽनन्तरं *व्यवसायेत्यादि वक्तव्यम्, मध्ये *नेहाभिक्रम इत्येतन्न संगच्छत इत्यत्राह—**वक्ष्यमाणेति** । उपक्रमे माहात्म्यकथनेन बुभुत्सातिशयजननाय प्ररोचना क्रियत इति भावः । इहेत्यनेन सूचितं कर्मान्तरेभ्यो वैलक्षण्यमाह—**कर्मयोग** इति । अभिमुखक्रमणशङ्कां व्युदस्यति—**अभिक्रम आरम्भ** इति । उपक्रमशब्दवदयमिति भावः । क्रियारूपस्याभिक्रमस्य कथमविनाशित्वमित्यत्राह—**नाशः फलसाधनभावनाश** इति । तात्पर्यमाह—**आरब्धस्येति** । प्रत्यवायशङ्काहेतुं दर्शयन् द्वितीयं पादं व्याकरोति—**आरब्धस्य विच्छेद** इति । उक्तविवरणरूपमुत्तरार्धं व्याख्याति—**अस्येति** । **संसारभया**दिति । महत्त्वविशेषितं भयं संसारभयमेव हीति भावः । स्वल्पांशस्यापि संसारनिवृत्तिहेतुत्वं देशकालादिवैगुण्यात्प्रामादिकाकृत्यकरणादिना च विच्छिन्नस्याप्यवश्यं पुनस्सन्धानादिति दर्शयन्नस्य श्लोकस्योक्तार्थैकपरत्वं संग्रहविस्ररूपत्वेन वक्ष्यमाणापौनरुक्त्यं चाह—**अयमर्थ** इति । कृतांशस्य कथं नाशप्रसङ्ग इति शङ्कायामिहेत्यस्य व्यवच्छेद्यं दर्शयति—**अन्यानि** हीति । **लौकिकानी**त्यतिशङ्काहेतुदृष्टान्त उक्तः । **वैदिकानी**ति सामान्यनिर्देशस्यायं भावः—नित्यनैमित्तिकान्यपि विच्छेदे सति न फलाय स्युः; प्रत्यवायाय च भवेयुः । अशक्त्यादिमूलमीषद्वैकल्यमात्रं हि तत्र सह्यम् । काम्येषु त्वङ्गवैकल्येऽपि नैष्फल्यमिति विशेष इति । **प्रत्यवायाय च भवन्ती**ति । न केवलं स्वर्गादेरलाभमात्रम्, ब्रह्मरक्षस्त्वप्राप्त्यादिरपि स्यादिति भावः ॥ ४० ॥

भा ॥ काम्यकर्मविषयाया बुद्धेर्मोक्षसाधनभूतकर्मविषयां बुद्धिं विशिनष्टि—

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१

भा ॥ इह—शास्त्रीये सर्वस्मिन् कर्मणि व्यवसायात्मिका बुद्धिरेका—मुमुक्षुणाऽनुष्ठेये कर्मणि बुद्धिर्व्यवसायात्मिका बुद्धिः, व्यवसायो निश्चयः, सा हि बुद्धिरात्मयाथात्म्यनिश्चयपूर्विका। काम्यकर्मविषया तु बुद्धिरव्यवसायात्मिका। तत्र हि कामाधिकारे देहातिरिक्तात्मास्तित्वज्ञानमात्रमपेक्षितम्, नात्मस्वरूपयाथात्म्यनिश्चयः। स्वरूपयाथात्म्यनिश्चयेऽपि स्वर्गादिफलार्थित्वतत्साधनानुष्ठानतत्फलानुभवानां संभवादविरोधाच्च। सेयं व्यवसायात्मिका बुद्धिः एकफलसाधनविषयतयैका; एकस्मै मोक्षाख्यफलाय हि मुमुक्षोस्सर्वाणि कर्माणि विधीयन्ते। अतश्शास्त्रार्थस्यैकत्वात् सर्वकर्मविषया बुद्धिरेकैव; यथैकफलसाधनतया आग्नेयादीनां पण्णां सेतिकर्तव्यताकानामेकशास्त्रार्थतया तद्विषया बुद्धिरेका, तद्वदित्यर्थः। अव्यवसायिनां तु स्वर्गपुत्रपश्वन्नादिफलसाधनकर्माधिकृतानां बुद्धयः फलानन्त्यादनन्ताः। तत्रापि बहुशाखाः; एकस्मै फलाय चोदितेऽपि दर्शपूर्णमासादौ कर्मणि *आयुराशास्ते इत्याद्यवगतावान्तरफलभेदेन बहुशाखत्वं च विद्यते। अतोऽव्यवसायिनां बुद्धयोऽनन्ता बहुशाखाश्च। एतदुक्तं भवति—नित्येषु नैमित्तिकेषु कर्मसु प्रधानफलान्यवान्तरफलानि च यानि श्रूयमाणानि, तानि सर्वाणि परित्यज्य मोक्षैकफलतया सर्वाणि कर्माण्येकशास्त्रार्थतयाऽनुष्ठेयानि; काम्यानि च स्ववर्णाश्रमोचितानि तत्तत्फलानि परित्यज्य मोक्षसाधनतया नित्यनैमित्तिकैरेकीकृत्य यथाबलमनुष्ठेयानि—इति ॥

ता ॥ एवं माहात्म्याभिधानव्याजेनास्य कर्मणस्सर्वकर्मभ्यो वैषम्यमुक्तम्। अथोपदेष्टव्यतया प्रतिज्ञातां तद्विषयबुद्धिं काम्यकर्मविषयबुद्धिभ्यो हेतुफलवैषम्येण विशिंषन्नुपदिशतीत्याह—**काम्ये**ति। *इह इति सङ्गृह्णीतमाह—**शास्त्रीये सर्वस्मिन् कर्मणी**ति। अविहिताप्रतिषिद्धलौकिककर्मणां भिन्नफलत्वात्तद्विष [ये] यत्वेऽप्यैक्यं मा भूदित्यत उक्तं **शास्त्रीय** इति। यद्वा संग्राहकोपाधिकथनमिदम्। प्रस्तुतयुद्धादिमात्रव्युदासाय **सर्वस्मिन्नि**ति नित्यनैमित्तिककाम्यतदवान्तरविधाभेदसंग्रहः। नानाकर्मविषयनानाबुद्धेः कथमेकत्वमिति शङ्कायां विशेषणप्रकरणसामर्थ्यफलितेन विषयेण बुद्धिं विशिनष्टि—**मुमुक्षुणे**ति। व्यवसायशब्देन कृत्यध्यवसायभ्रमं निरस्यति—**निश्चय** इति। पौनरुक्त्यव्युदासाय [व्यवसाय] विषयं समासांशोत्तरपदलक्ष्यं च दर्शयन् मुमुक्षुणेत्युक्तमुपपादयति—**सा हीति**। व्यवसायात्मिकेत्येतद्व्यवच्छेद्यमाह—**काम्ये**ति। ननु देहातिरिक्तपारलौकिकात्मज्ञानमन्तरेण कथं देहान्तरानुभाव्यस्वर्गादिसाधनयागादिमहाप्रयासानुष्ठानमित्यत्राह—**तत्र हीति**। कामनयाऽधिक्रियत इति वा, कामेनाधिकारो यत्रेति वा कामाधिकारः काम्यकर्म, तदधिकारित्वं वा। यद्वा तच्छास्त्रम्। अधिकारश्च मदभिलषितसाधनत्वान्मदर्थमिदं कर्मेत्यभिमानः। **देहातिरिक्तात्म**शब्देन देहान्तरपरिग्रहार्हस्थिरत्वमभिप्रेतम्; अन्यथाऽतिरेकमात्रनिर्णयेऽपि देहसमकालनाशित्वभ्रमे सति पारलौकिककाम्यकर्माननुष्ठानप्रसङ्गात्। मात्रशब्दाभिप्रेतं विवृणोति—**नात्मे**ति। आत्मस्वरूपयाथात्म्यं चात्र नित्यत्वस्वयंप्रकाशत्वानन्दत्वभगवत्प्रकारत्वस्वभाविकापहतपाप्मत्वादिरूपमभिप्रेतम्। ननु देहोत्तरकालमनुभाव्ययोः स्वर्गापवर्गयोः क्वचिदात्मास्तित्वज्ञानमात्रमपेक्षितम्; क्वचित्तद्याथात्म्यनिश्चय इति कुतोऽयं विवेक इत्यत्राह—**स्वरूपे**ति। अयमभिप्रायः—कामाधिकारे याथात्म्यनिश्चयोऽनुपपत्त्या शास्त्रबलाद्वाऽपेक्ष्यते? पूर्वत्रापि याथात्म्यनिश्चयाभावे किं स्वर्गादिफलेच्छैव न स्यात्, उत तत्साधनानुष्ठानम्, उत तत्फलानुभवः? न प्रथमः, सुखरूपतया प्रमाणसिद्धेषु स्वरसत इच्छासिद्धेः। न द्वितीयः, तदर्थिनस्तदनुकूलकरणकलेबरादिमतः स्वस्य तत्फलकालेऽप्यवस्थानं निश्चिन्वतः पामरकृष्यादिन्यायेनानुष्ठानोपपत्तेः। न तृतीयः, अविकलानुष्ठितोपायस्य फलोत्पत्तेरन्यनिरपेक्षत्वात्, अनुभवार्थमेवोत्पन्नतया च तदनुभवसिद्धौ सार्वभौमादिभोगेष्विव स्वर्गादिभोगेष्वनुभववेलायाम[प्य]त्मयाथात्म्यानुभवनैरपेक्ष्यात्। तदेतदखिलमुक्तं **संभवा**दित्यन्तेन। अनुपपत्त्यभावोऽत्र संभवः। नापि शास्त्रबलादिति वक्तुं युक्तम्; शास्त्रमपि दृष्टार्थं वा विदधीत; अदृष्टार्थं वा? [अ]तत्र केवल-

दृष्टार्थत्वं दत्तोत्तरम् । अन्यत्रापि न तावद्यागादिकरणशरीरनिर्वर्तकत्वम्, तदनालोचनात् । नापि कर्तुरात्मनस्संस्कारतयाऽनुप्रवेशः, कामाधिकारप्रकरणेषु प्रोक्षणादिविधिवत् आत्मानं तत्त्वतो जानीयात् इति विध्यभावात्, वेदान्तविहितज्ञानस्यातिशयितफलान्तरार्थत्वादिना कर्मशेषत्वाभावस्य **शारीरके** समर्थितत्वात् । आत्मतत्त्वानभिज्ञानामपि च स्वर्गादिफलं प्रतिपादयन्ति हि—*प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येऽभिनन्दन्ति मूढाः (मु. १. २. ७) इत्याद्याश्श्रुतयः । *यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः इत्यादि चानन्तरमेवोच्यते । अविदुषां धूमादिमार्गेण स्वर्गारोहणादिकं चोपनिषत्सु जोघुष्यते । अतो विध्यभावादेवारादुपकारकत्वमपि निरस्तम् । तदेतदखिलमुक्तम्—**अविरोधाच्चे**ति । शास्त्रादिविरोधाभावादित्यर्थः । पक्षान्तरे च शास्त्र[न्तर]विरोधस्स्यादिति भावः । मोक्षाधिकारे तु निखिलमिदमन्यथा । तथाहि—यथावस्थितस्वरूपप्राप्तिरेव हि मोक्षपुरुषार्थः । स कथमनिश्चीयमान इष्येत । कथं च तज्ज्ञानं तदिच्छामप्यन्तरेण तत्साधनमनुष्ठीयेत । स्वरूपयाथात्म्यज्ञानं च विहिततया साधनानुप्रवेशीति कथं तद्व्यतिरेके [ण] साधनं पुष्कलमनुष्ठितं स्यात् । कथं च स्वरूपाविर्भावलक्षणफलानुभवः स्वनिश्चयशून्यस्य स्यात्—इति युक्तिविरोधः । चोदयन्ति च शास्त्राणि मोक्षस्य सर्वविधोपकारकतया आत्मतत्त्वज्ञानम् । अतस्तदभावे शास्त्रविरो[धः]धोऽपि स्यादिति । ननु व्यवसायात्मिकाया बुद्धेः किमिदमेकत्वम्? न तावद्व्यक्त्यैक्यम्, तथाविधबुद्धिसन्तानसंभवात् । नापि विषयैक्यादेकरूपत्वम्, अङ्गप्रधानाद्यवान्तरविषयभेदेन तदयोगात् । नापि समुदायगोचरत्वात्तद्योगः, काम्यकर्मस्वपि तत्साम्यादित्यत उक्तम्—**एकफलसाधनविषयतये**ति । तदेवोपपादयति—**एकस्मा** इति । **सर्वाणी**ति । नित्यनैमित्तिककाम्यानां सर्वेषां कर्मणां मुमुक्षुणाऽनुष्ठितानां साक्षात्परम्परया वा मोक्षसाधनोपकारित्वेन मोक्ष एक एव प्रधानफलम् । *सर्वमायुरेति (छा. ४. ११. २) इत्याद्यवान्तरफलाभिधानमपि तदुपयोगित्वमात्रादिति भावः । अस्तु सर्वेषामेकफलसाधनत्वम्, तथाऽपि क्रमभाविकर्मस्वरूपनानात्वे कथं तद्बुद्धेरैक्यमित्यत्राह—**अत** इति । एकफलसाधनतया सर्वेषां कर्मणामेकविधिगृहीतत्वेनैकशास्त्रार्थत्वात्तद्गोचरबुद्धिरवान्तरकर्मभेदसद्भावेऽप्येकशास्त्रार्थगोचरत्वादेकेत्युच्यत इत्यर्थः । पृथग्विधिसिद्धानां पृथग्वाक्यसिद्धेतिकर्तव्यताकानां कथमेकशास्त्रार्थत्वमित्यत्रोक्तप्रकारेणैकत्वे दृष्टान्तमाह—**यथे**ति । आग्नेयादयो हि सेतिकर्तव्यताकाष्पङ्यागाः उत्पत्तिवाक्यैः पृथगुत्पन्नास्समुदायानुवादिवाक्यद्वयेन समुदायद्वयत्वमापन्नाः कामाधिकारे पुनरेकफलसाधन[त्व]वेषेणैकतया विधीयन्ते । तथा चैकशास्त्रार्थगोचरतया तद्बुद्धिरप्येकैव तद्वदित्यर्थः । *अव्यवसायिनाम् इति हेतुपरमित्याह—**स्वर्गपुत्रे**त्यादिना । **फलानन्त्यादनन्ता** इति । फलबाहुल्याद्बहुलाः; सर्गाद्यनन्तफलभेदेन तत्साधनानामपि कर्मणां भिन्नशास्त्रार्थत्वात्तद्विषया बुद्धयोऽपि यावत्फलभेदं भेदिन्य इत्यर्थः । अनन्तबहुशाखशब्दयोः प्रधानाप्रधानस्वरूपभेदप्रकारभेदविषयतया पौनरुक्त्यं परिहरन् कर्मभेदापादकत्वाभावेऽपि वैषम्यान्तरपरं बहुशाखशब्दं व्याचष्टे—**तत्रापी**ति । एकैकस्यैव बहुशाखत्वमुपपादयति—**एकस्मा** इति । एकैकमपि हि काम्यकर्म प्रधानफलावच्छिन्नवेषेण एकपादपस्थानीयमविरोधिगुणफलाद्यवच्छिन्नतत्तदंशभेदेन बहुशाखं भवति । मोक्षशास्त्रे तु सर्वायुःप्राप्त्यादिकमपि साधनानुष्ठानाद्यर्थत्वेन मोक्षोपयोगितया तदेकफलान्तर्भूतमित्युक्तम् । वैषम्यद्वयोपपत्तिस्थैर्याभिप्रायेण निगमयति—**अत** इति । प्रधानावान्तरफलभेदादित्यर्थः । आकाङ्क्षाक्रमेणान्वयप्रदर्शनायानन्ता बहुशाखा इति व्युत्क्रमेण व्याख्यातम् । ननु कथं भिन्नप्रधानावान्तरफलसाधनतयैव विहितानां नित्यनैमित्तिककाम्यकर्मणामेकमेव फलं स्यात्; कथंतरामेकशास्त्रार्थत्वम्? काम्यानां च कर्मणां निष्कामेन कथमनुष्ठानम्? यदि च तत्तत्काम्यफलाभावेऽपि तत्तत् [काम्य]कर्मानुष्ठानम्, तर्हि तत्तदधिकाराभावेऽपि ब्राह्मणादेः क्षत्रियादिधर्मानुष्ठानप्रसङ्गः;

सर्वकाम्योपसंहारः फलादिविरोधाद्याहतो दुष्करश्च । कतिपयोपसंहारे तु किं कियदनुष्ठेयमित्यत्र किंनियामकमित्यादि-शङ्कापरिहाराय बुद्ध्येकत्वबहुत्वोक्तेः [फल] प्रयोजनमाह—**एतदुक्तमिति** । नित्यनैमित्तिकयोः प्रधानफलान्यवान्तरफलानि च प्राजापत्यलोकादिप्राप्त्युपात्तदुरितक्षयाकरणनिमित्तप्रत्यवायपरिहारादिरूपाणि । संवलितनित्यनैमित्तिकयोरप्यत्र नित्य-नैमित्तिकशब्देन संग्रहः । काम्यशब्दः केवलकाम्यपरः । ननु तानि सर्वाणि परित्यज्येत्ययुक्तम्, मुमुक्षोरप्युपात्तदुरित-क्षयादेरवश्यापेक्षितत्वादित्यत उक्तम्—**मोक्षैकफलतये**ति । दुरितक्षयादेरप्यन्तःकरणशुद्धिद्वारेणोपकारकत्वान्न पृथ-क्फलत्वमिति भावः । **एकशास्त्रार्थतयाऽनुष्ठेयानी**ति । विनियोगभेदादन्यत्र भिन्नफलत्वं भिन्नशास्त्रार्थत्वं च । अत्र तु सर्वेषामप्येकत्र विनियुक्तानां फलैक्यं शास्त्रार्थैक्यं च युज्यते । सिद्धं च नित्यकाम्यज्योतिष्टोमादावपि विनियोग-पृथक्त्वमिति भावः । **स्ववर्णाश्रमोचितानी**ति । कस्यचिद्धि किञ्चित्फलमुद्दिश्य कानिचित्कर्माणि विधीयन्ते । तेषा-मेव कर्मणां फलान्तरार्थतया विनियोगेऽपि स एवाधिकारी भवितुमर्हति * क्लृप्तकल्प्यविरोधे तु युक्तः क्लृप्तपरिग्रहः इति न्यायादधिकार्यन्तरकल्पने प्रमाणाभावात् । यथा नित्यकाम्यज्योतिष्टोमादौ, यथा चाध्ययनस्य जपादाविति भावः । निष्कामस्य काम्यकर्मानुष्ठानोपपादनायोक्तम्—**तत्तत्फलानि परित्यज्य मोक्षसाधनतये**ति । **नित्यनैमित्तिकैरेकी-कृत्ये**ति—एकफलसाधनतयैकशास्त्रार्थीकृत्येत्यर्थः । **यथाबलमिति** । शक्त्यनुरोधेन हि शास्ति शास्त्रम् । आह च **मनुः**—*तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् (मनु. ४. १८) इति । एवं नित्यनैमित्तिकयोरिव काम्येष्वपि मुमुक्षोः कतिपयाङ्गवैकल्येऽपि न दोष इत्युक्तं भवति । एतेन विच्छेदे प्रत्यवायाभावकथनमपि न ज्योतिष्टोमाद्येकैकान्त-र्विच्छेदपरम्; अपि त्वामोक्षादनुष्ठेयैकशास्त्रार्थभूतकर्मकलापे प्रयाजादिवदितिकर्तव्यतास्थानीयैकैककर्मानुष्ठानेऽपि देशादि-वैगुण्यकृतोत्तरानुष्ठानपरमिति च दर्शितम् ॥ ४१ ॥

भा ॥ अथ काम्यकर्माधिकृतान्निन्दति—

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३
भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४

भा॥ यामिमां पुष्पितां—पुष्पमात्रफलाम्, आपातरमणीयां वाचमविपश्चितः—अल्पज्ञाः भोगैश्वर्यगतिं प्रति वर्तमानां प्रवदन्ति, वेदवादरताः—वेदेषु ये स्वर्गादिफलवादाः तेषु सक्ताः, नान्यदस्तीति वादिनः—तत्सङ्गा-तिरेकेण स्वर्गादेरधिकं फलं नान्यदस्तीति वदन्तः, कामात्मानः—कामप्रवणमनसः, स्वर्गपराः—स्वर्गपरायणाः, स्वर्गादिफलावसाने पुनर्जन्मकर्माख्यफलप्रदां, क्रियाविशेषबहुलां—तत्त्वज्ञानरहिततया क्रियाविशेषप्रचुरां, भोगै-श्वर्यगतिं प्रति वर्तमानां यामिमां पुष्पितां वाचं ये प्रवदन्तीति संबन्धः। तेषां भोगैश्वर्यप्रसक्तानां तया—वाचा भोगैश्वर्यविषयया अपहृतज्ञानानां यथोदितव्यवसायात्मिका बुद्धिः, समाधौ मनसि न विधीयते,—नोत्पद्यते; समाधीयतेऽस्मिन्नात्मज्ञानमिति समाधिर्मनः । तेषां मनस्यात्मयाथात्म्यनिश्चयपूर्वकमोक्षसाधनभूतकर्मविषया बुद्धिः कदाचिदपि नोत्पद्यते इत्यर्थः । अतः काम्येषु कर्मसु मुमुक्षुणा न सङ्गः कर्तव्यः ॥ ४२ ॥ ४३ ॥ ४४ ॥

ता॥ एवं काम्यकर्मविषयबुद्धितो मोक्षसाधनभूतकर्मविषयाया बुद्धेः वैलक्षण्यमुपपाद्य अनन्तरं मोक्षसाधने प्रवृत्ति-शैघ्र्यार्थमितरफलवैतृष्ण्यजननाय तत्तत्फलसाधनकर्माधिकृतान् निन्दतीत्युपरितनश्लोकत्रयमवतारयति—**अथेति** । **काम्य-कर्माधिकृतानि**ति । काम्यकर्मसु स्वर्गादिस्वाभिलषितसाधनत्वस्वार्थताबुद्धियुक्तानित्यर्थः । पुष्पितामित्येतत्फलव्यवच्छेद-

मुखेनासुखोदर्कत्वपरमित्यभिप्रायेणाह—**आपातरमणीया**मिति । **अल्पज्ञा** इति । विविधं पश्यच्चित्त्वं हि विपश्चित्त्वम् । * पृषोदरादीनि यथोपदिष्टम् (अष्टा. ६. ३. १०९) इति पश्यच्छब्दावयवस्य यच्छब्दस्य लोपः । तच्च बहुज्ञत्वम् । तद्व्यतिरेकश्चात्रोपनिषत्साध्यस्थिरास्थिरादिविवेकाभावादल्पज्ञत्वमिति भावः । जन्मकर्मेत्यादेः गतिविशेषणत्वभ्रमव्युदासाय गतिं प्रतीत्यस्यापेक्षितपूरणाय च क्रममुल्लङ्घ्य प्रागेवोपात्तं **भोगैश्वर्यगतिं प्रति वर्तमाना**मिति । एतेन वाचमित्येतस्य काम्यविधिभागपरत्वमुक्तं भवति । सामान्येन वैदिकनिन्दाभ्रममपाकरोति—**स्वर्गादिफलवादा** इति । वेदशब्दोऽत्र * वेदेषु वेदान्तेषु च गीयते (वि. ६. ४. ४०) इत्यादाविव कर्मभागपरः । तत्रापि विधिभागफल[ार्थ]वादभागविषयतया पुरुषवाक्यवेदवाक्यविषयतया वा * वाचं, * वेदवादेत्यनयोरपौनरुक्त्यमिति भावः । नान्यदस्तीतिवादे पूर्वोत्तरपदानामर्थं हेतुतया उपादत्ते—**तत्सङ्गातिरेकेणे**ति । अपवर्गस्वरूपनिषेधोऽशक्य इत्यभिप्रायेणोक्तम्—**अधिकं फलमिति** । वादिनः इत्यनेन तथावदनशीलत्वविवक्षाव्यञ्जनाय **वदन्त** इति वर्तमानप्रत्ययान्तेन व्याख्यातम् । **कामप्रवणमनस** इति । कामेष्वात्मा मनो येषां ते कामात्मान इति व्यधिकरणबहुव्रीहिरिति भावः । **स्वर्गपरायणा** इति । स्वर्गः परः परायणं परमप्राप्यं येषां ते स्वर्गपराः ; मोक्षविमुखा इति भावः । कामात्मानः स्वर्गपराः इतिपदद्वयस्य सामान्यविशेषविषयतया दृष्टादृष्टविषयतया वा हेतुसाध्यविषयतया वा कामौन्मुख्यान्यवैमुख्यपरतया वा पुनरुक्तिपरिहारः । स्वर्गादिफलभोगमध्ये जन्मादिभ्रमं व्युदस्यति—**स्वर्गादिफलावसान** इति । * यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते (छा. ५. १०. ५) * प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे ॥ (बृ. ६. ४. ६) * आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन (गी. ८. १६) * स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः (वि. ६. ५. ५०) इत्यादिश्रुतिस्मृतय इह द्रष्टव्याः । जन्मवत्कर्मणोऽप्यनुशयाख्यकर्मशेषफलत्वख्यापनाय समानाधिकरणसमासतां दर्शयति—**जन्मकर्माख्यफलप्रदामि**ति । कर्मशेषेण पुनरुत्कृष्टापकृष्टजन्मप्राप्तौ श्रुतिस्तावत्—* प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरां मृत्युं ते पुनरेवापि यन्ति (मु. १. २. ७), * तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणाः अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा (छा. ५. १०. ७) इत्यादिः । जन्मकर्मादेस्सर्वस्य कर्मशेषमूलत्वे स्मृतयश्च—* वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य स्वकर्मफलमनुभूय ततश्शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते । विप्लवन्ते विपरीता नश्यन्ति (गौ. २. ११. १०, ११) इति । तथा * ततः परिवृतौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते । तच्चक्रवदुभयोर्लोकयोस्सुख एव वर्तते (आ. २. १. २, ३) इत्यादयः । वैराग्यपादे चायमर्थो व्यक्तमनुसन्धेयः । अत्र जन्माख्यकर्मफलप्रदामिति केषुचित्कोशेषु **पाठः** । ननु ज्योतिष्टोमादिक्रियाविशेषस्वरूपमात्रं कामिनो ज्ञानिनश्च समानम् ; तत्कथं क्रियाविशेषबहुलाम् इति कामिनो विशिष्यामिधीयते ? तत्रोक्तम्—**तत्त्वज्ञानरहिततये**ति । ज्ञानिनां हि सर्वं कर्म क्रियमाणमपि ज्ञानप्रचुरमेव । तच्चैकफलसाधनतया एकशास्त्रार्थरूपम् । न च मोक्षानुपयुक्तास्सर्वे क्रियाविशेषास्तेन क्रियन्ते । अतः प्रयासबहुलं परिमितनश्वरफलं चामुमुक्षोः कर्मेति भावः । अन्येषां वाचा अन्येषामपहृतचित्तत्वभ्रमं निरस्यन् षष्ठ्यन्तपदयोरदृष्टविशेष्ययोः प्रस्तुतविशेष्यविषयत्वं चाह—**तेषामि**ति । **तये**ति यद्वृत्तप्रतिनिर्देशरूपव्याख्येयोपादानम् । तत्परामृष्टं प्रकृतं चेतोपहरणहेतुमाह—**भोगैश्वर्यविषय-**

येति । अपहृतचेतसाम् इत्यस्य पूर्वपदेनार्थपौनरुक्त्यपरिहाराय तदर्थस्य प्रकृतव्यवसायात्मकबुद्ध्यभावहेतुत्वाय चोक्तम्—**अपहृतात्मज्ञानानामिति** । **यथोदितेति**—प्रागुक्तप्रकारेत्यर्थः । न विधीयते—केनचिद्धेतुना न क्रियत इत्यर्थः । ततः फलितमुच्यते—**नोत्पद्यत** इति । समाधिशब्दस्य बुद्धिविशेषविवक्षायामत्रानन्वयान्मनोविषयत्वे व्युत्पत्तिमाह—**समाधीयतेऽस्मिन्निति** । निधीयतेऽस्मिन्निति निधिवत् । यथोदितेत्याद्युक्तं प्रकारं विवृणोति—**तेषां मनसीत्यादिना** । विधीयत इति वर्तमाननिर्देशतात्पर्यसिद्धमुक्तम्—**कदाचिदपीति** । एषां निन्दा किमर्थेत्यत आह—**अत** इति । व्यवसायात्मकबुद्धिविरोधादित्यर्थः । **मुमुक्षुणा न सङ्गः कर्तव्य** इति—निस्सङ्गेन काम्यानामपि करणमनुमन्यते । स्वरूपमात्रस्य मोक्षविरोधित्वाभावात् मोक्षेच्छाऽस्ति चेद्बन्धकेच्छा न कार्येत्युक्तं भवति ॥ ४२ ॥ ४३ ॥ ४४ ॥

एवमत्यल्पफलानि पुनर्जन्मप्रसवानि कर्माणि मातापितृसहस्रेभ्योऽपि वत्सलतरतया आत्मोज्जीवने प्रवृत्ता वेदाः किमर्थं वदन्ति, कथं वा वेदोदितं त्याज्यतयोच्यत इत्यत आह—

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन । निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५
यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६

भा ॥ त्रयो गुणास्त्रैगुण्यं सत्त्वरजस्तमांसि ; सत्त्वरजस्तमःप्रचुराः पुरुषास्त्रैगुण्यशब्देनोच्यन्ते ; तद्विषया वेदाः ; तमःप्रचुराणां रजःप्रचुराणां सत्त्वप्रचुराणां च वत्सलतरतयैव हितमवबोधयन्ति वेदाः । यद्येषां स्वगुणानुगुण्येन स्वर्गादिसाधनमेव हितं नावबोधयन्ति, तदैते रजस्तमःप्रचुरतया सात्त्विकफलमोक्षविमुखाः स्वापेक्षितफलसाधनमजानन्तः कामप्रावण्यविवशा अनुपादेयेषु उपादेयभ्रान्त्या प्रविष्टाः प्रनष्टा भवेयुः, अतस्त्रैगुण्यविषया वेदाः, त्वं तु निस्त्रैगुण्यो भव—इदानीं सत्त्वप्रचुरस्त्वं तदेव वर्धय ; नान्योन्यसङ्कीर्णगुणत्रयप्रचुरो भव ; न तत्प्राचुर्यं वर्धयेत्यर्थः । निर्द्वन्द्वः—निर्गतसकलसांसारिकस्वभावः, नित्यसत्त्वस्थः—गुणद्वयरहितनित्यप्रवृद्धसत्त्वस्थो भव ; कथमिति चेत् ; निर्योगक्षेमः आत्मस्वरूपतत्प्राप्त्युपायबहिर्भूतानामर्थानां योगं प्राप्तानां च क्षेमं परित्यज्य आत्मवान् भव—आत्मस्वरूपान्वेषणपरो भव । [अप्राप्तस्य प्राप्तिर्योगः प्राप्तस्य परिरक्षणं क्षेमः ।] एवं वर्तमानस्य ते रजस्तमःप्रचुरता नश्यति ; सत्त्वं च वर्धते । न च वेदोदितं सर्वं सर्वस्योपादेयम् ; यथा सर्वार्थपरिकल्पिते सर्वतःसंप्लुतोदके उदपाने पिपासोर्यावानर्थः—यावदेव [पानीयं] प्रयोजनम्, तावदेव तेनोपादीयते, न सर्वम् । एवं सर्वेषु च वेदेषु ब्राह्मणस्य विजानतः—वैदिकस्य मुमुक्षोः यदेव मोक्षसाधनं तदेवोपादेयम् ; नान्यत् ॥ ४५ ॥ ४६ ॥

ता ॥ अथैवं काम्यकर्मसु तदधिकृतेषु च निन्दितेषु हिततमोपदेशिनश्शास्त्रस्येदृशकर्मविधानमनुपपन्नम् । विहितस्य चात्र त्याज्यतयोपदेशो व्याहतः ; कर्मविधिशास्त्राणामप्रामाण्यं वा, तत्प्रामाण्ये वा तन्निषेधोपदेशस्याप्रामाण्यं प्रसज्यत इति शङ्कामुत्तरश्लोकद्वयेन परिहरतीत्याह—**एवमत्यल्पेत्यादिना** । पुनर्जन्म येषां प्रसवभूतं तानि पुनर्जन्मप्रसवानि । संसारविपिनवानस्पत्यानां हि कर्मणां परिणिनंसोः फलस्य नियतपूर्ववर्त्तसूचकत्वादिभिर्देहविशेषपरिग्रहः प्रसूनस्थानीयः । प्रियहितोपदेशितया मातापित्रोरुपादानम् । सर्वजन्मानुवृत्तिसूचनाय सहस्रशब्दः । सर्वात्मसाधारणतया चतुर्विधपुरुषार्थसकलापुरुषार्थनिवृत्तितत्साधनाभिधायितया कदाचिदप्यनुपरमादिना च वत्सलतरत्वोक्तिः । अतिशयहेतुत्रयम् **आत्मोज्जीवने प्रवृत्ता** इति त्रिभिस्सूचितम् । न हि देहादेरारोग्यादिमात्रे कदाचिदेव व्याप्रृता इति क्रमात्त्रयाणां भावः । **किमर्थं वदन्तीति** । न तावत्प्रतारणार्थं, हितोपदेशित्वात् । नापि हितान्तरपर्यवसितोपच्छन्दनार्थं, प्रतिप्रकरणं तत्त-

त्फलमात्रपर्यवसितत्वात् । अतोऽनाधेयातिशयपरमकारुणिकपुरुषोत्तमाज्ञारूपाणां वेदानामामूलपर्यवसानमपरिमितदुःखदुर्दिनानुबन्धिसुखकणखद्योतसाधनोपदेशो विषसंपृक्तमधुभोजनोपदेशवदयुक्तः; निषेध एव तु तत्र कर्तव्यः । यद्वा न सोऽपि, प्रत्यक्षादेस्तत्प्रसञ्जकत्वाभावात्; स्वयं प्रसज्य प्रतिषेधस्य जम्बालमज्जनक्षालनसमत्वादित्यभिप्रायः । **कथंवे**ति । वेदविरुद्धं हि त्याज्यतयोपदेश्यं, न तु वेदविहितमिति भावः । **त्रयो गुणास्त्रैगुण्यमि**ति । अत्रार्थान्तरासंभवात् चातुर्वर्ण्यादीनां स्वार्थे इत्युपसङ्ख्यानात् स्वार्थिकप्रत्ययः । गुणशब्दस्य प्रयोगप्राचुर्यात् संख्याविशेषान्वयबलात् (अष्टा. वा. ५. १. १२४) वक्ष्यमाणपर्यालोचनाच्च सिद्धमर्थविशेषं निर्दिशति—**सत्त्वरजस्तमांसी**ति । स्वर्गादिफलकरणेतिकर्तव्यताधिकारिविशेषादिविषया हि वेदाः; न पुनस्सत्त्वरजस्तमोविषया दृश्यन्त इत्यत्राह—**सत्त्वरजस्तमःप्रचुरा** इति । तत्तद्गुणप्राचुर्यात्पुरुषास्तत्तच्छब्देनोपचर्यन्ते । भाष्यान्तरोक्ता तु फललक्षणा मन्दा; अधिकारिव्यवस्थापनं त्वत्रोपयुक्ततममिति भावः । अस्त्वेवं गुणत्रयप्रचुरपुरुषविषया वेदाः; चोद्यस्य किमायातमित्यत्राह—**तम** इति । एकस्मिन्नेवाधिकारिणि गुणत्रयप्राचुर्यभ्रमनिरासेन तत्तद्विधिनिषेधविषयाधिकारिवैचित्र्याभिव्यक्त्यर्थं **तमःप्रचुराणामि**त्यादिपृथङ्निर्देशः । तामसाद्यधिकारिबाहुल्याल्पत्वाल्पतरत्वप्रकाशनाय सत्त्वरजस्तमसामत्र व्युत्क्रमपाठः । ततश्च क्रमादैहिकामुष्मिकापवर्गाभिलाषिण उपलक्ष्यन्ते । **सत्त्वप्रचुराणामि**ति दृष्टान्ताभिप्रायम् । अत एव ह्युपपादकग्रन्थे **यद्येषा**मित्यादिना रजस्तमःप्रचुराणामेव ग्रहणम् । **स्वगुणानुगुण्येने**ति । यथा वातपित्तकफोपात्तशुद्धसमसङ्कीर्णप्रकृतीन् पुरुषानालोच्य हितोपदेशिनो वैद्यास्तत्तत्प्रकृत्यनुकूलं भोजनभेषजादि विदधति, अ[सात्म्या]पथ्यादीनि च निषेधन्ति; तदभावे च यथा दुरुपदेशादिमूढचेतसः प्राणिनोऽपथ्यगरलादिसेवया प्रणश्यन्ति, यथा च ताम्बूलाद्यर्थिनः पुत्राः पित्रादिभिस्तत्प्रदानाभावे चौर्यादिना प्रणश्यन्ति, तथाऽत्रापीति भावः । **स्वर्गादिसाधनमेवे**ति—न हि पिपासादिपीडितानां तदानीं रसायनादिकं विधेयमिति भावः । मोक्षवैमुख्यं स्वापेक्षितफलसाधनाज्ञानं च तमःकृत्यम् । कामप्रावण्यादिकं तु यथांशं रजस्तमःकृत्यम्; कामप्रावण्यविवशाः काम्यफलाभिसन्धिबलेनात्मानं नियन्तुमशक्ताः । **अनुपादेयेष्वि**त्यादि—यथा बौद्धादय इति भाव्यम् । **प्रनष्टा भवेयु**रिति—दुष्कर्मविपाकेन स्थावरादिभावमप्याश्रित्याचित्कल्पतया पुरुषार्थयोग्यतागन्धरहिता भवेयुरित्यर्थः । **अत** इति—उक्तप्रकारेण काम्योपदेशस्य हिततमत्वादित्यर्थः । **त्वं त्वि**ति तुशब्देनाधिकारिवैषम्यं द्योतयति । किमस्याधिकारिणो वैषम्यं, कथं च संसारिणस्त्रैगुण्यनिषेधः, तथा सति नित्यसत्त्वस्थः इत्यनेन विरोधश्च स्यादित्यत्राह—**इदानीं सत्त्वप्रचुर** इति । * शिष्यस्तेऽहम् (२. ७) इत्यादिवचनपरामर्शादिदमुक्तम् । अर्जुनशब्दसंबुद्धितात्पर्यलब्धो विशेषोऽस्य सत्त्वप्राचुर्यम् । अर्जुनशब्दस्यावदातपर्यायत्वात् सत्त्वस्यापि शुक्लशब्दव्यपदेशादधिकारिवैषम्यस्य चापेक्षितत्वात्तथा प्रसिद्ध्यादिबलाच्चेदमेवात्र तात्पर्यम् । **तदेव वर्धये**ति—न तु सिद्धं सत्त्वप्राचुर्यं परित्यज्य विहिताकरणनिषिद्धकरणादिना रजस्तमसी वर्धयेत्यर्थः । * निस्त्रैगुण्यो भव इति निषेधे गुणत्रयसाधारणे सति कथं सत्त्वं वर्धयेत्युच्यत इत्यत्राह—**नान्योन्ये**ति । सत्यं गुणत्रयसाधारणो निषेधः; स तु संकीर्णविषयः, अन्यथा नित्यसत्त्वस्थः इति वक्ष्यमाणानुपपत्तेरितिभावः । निस्त्रैगुण्यो भवेत्येतत् अरोगो भवेत्यादिवत्पुरुषव्यापारासाध्यत्वेन प्रेषणानुपपत्तेः आशीरूपमिव दृश्यत इत्यत्राह—**न तदिति** । रजस्तमःप्राचुर्यहेतुभूताहारादिकं परित्यजेत्युक्तं भवति । **निर्गते**त्यादि । द्वन्द्वशब्दः पुण्यपापमूलसकलसांसारिकस्वभाववर्गद्वयपर इति भावः । **एतेन** फलस्वरूपं वा साधनानुष्ठानदशासमकालीनस्वास्थ्यं वा द्वन्द्वतितिक्षारूपेतिकर्तव्यता वा विवक्षिता । **गुणद्वयरहिते**ति । नित्यसत्त्वस्थपदमब्भक्षादिवदवधारणगर्भमिति भावः । यद्वा

नित्यपदेन कदाचिदपि गुणान्तरानभिभूतत्वमिहाभिप्रेतम् । अत एव च प्रवृद्धत्वम् । गुणान्तराभिभवे हि नित्यप्रवृद्धिर्न स्यादिति भावः । सत्त्वसंबन्धमात्रस्य सर्वक्षेत्रज्ञसाधारणत्वान्नित्यप्रवृद्धेत्युक्तम् । ननु रजस्तमःप्राचुर्यं न वर्धयेति निषेधः, सत्त्वप्राचुर्यं वर्धयेति विधिश्च नोपपद्यते । न ह्यसौ एतद्रजः, इदं च तमः, इदमहं वर्धयामि इति बुद्ध्या प्रवर्तते; यतो निषिद्धयेत; यतश्च सिद्धे रजस्तमसी शमयेत् । न चासौ सत्त्वतदुपायौ जानाति, येन तत्र प्रवर्तेत । अतः किमसौ कथं कुर्यादित्यभिप्रायेण शङ्कते—**कथमिति चेदि**ति । तत्र निषेधस्य विधेश्चोपपादकतया नियोगक्षेम आत्मवान् इति पदद्वयं क्रमाद्व्याचष्टे—**आत्मस्वरूपेत्या**दिना । नियोगक्षेमः इति सामान्येन निषेधो मुमुक्षोर्विहितव्यतिरिक्तविषय इति ज्ञापनाय बहिर्भूतानामित्यन्तमुक्तम् । आत्मवान् भव इत्यत्र मत्वर्थानुपपत्तिमाशङ्क्याह—**आत्मस्वरूपान्वेषणपर** इति । स्वस्यैवाप्रमत्ततागर्भस्वबुद्धिविशेषतः प्राप्त्यपेक्षया संबन्धविषयः प्रत्ययः । यद्वा स्वरूपान्वेषणादेव ह्ययमात्मानं लभते, अन्यथा आत्महानिरेव स्यादिति भावः । एवं निषेधस्य विधेश्चानुष्ठानाय विषय उक्तः । ततः किमित्यत्र तदुभयाधीनं फलद्वयमाह—**एवमि**ति । न साक्षाद्गुणान्विषयीकृत्य तव किञ्चित्कर्तव्यम्, तेषां तु नियोगक्षेमत्वात्मवत्त्वाभ्यामसात्त्विकाहारादित्यागहेतुभ्यां स्वयमेव यथार्हं नाशोन्मेषौ स्यातामिति भावः ॥ ४५ ॥

ता ॥ अथ सनिदर्शनमधिकारिभेदं प्रतिपादयन्तं *यावानर्थः इति श्लोकं व्याचष्टे—**न चे**ति । वर्णाश्रमप्रवरचरणादिभेदेन प्रतिनियताधिकारिविषया हि वेदोदिता धर्मा इति भावः । **सर्वार्थपरिकल्पित** इति—तत्तत्प्रयोजनाभिलाषिसर्वाधिकार्यर्थं परिकल्पिते । यद्वा सर्वशब्दः प्रयोजनकात्स्न्यपरः; स्नानपानादिनानाप्रयोजनार्थं परिकल्पिते । एतच्च *सर्वतस्संप्लुतोदके इत्यनेनार्थसिद्धमुक्तम् । उदपानं कूपतटाकादि । **पिपासो**रिति दार्ष्टान्तिकप्रस्थनानुरोधेनाध्याहारः । **नन्वत्र** दृष्टान्तदार्ष्टान्तिकयोः का सङ्गतिः? न हि पिपासोरुदपाने यावत्प्रयोजनं, तावदेव विजानतस्सर्वेषु वेदेष्वित्याशङ्कां परिहर्तुं वाक्यपूरणायाध्याहृत्योक्तम्—**तावदेव तेनोपादीयत** इत्यादि । सर्वेषु चेति चकार उपादेयानुपादेयांशसङ्कलनद्योतनार्थः । ननु ब्राह्मणस्येत्येतत्प्रकरणासङ्गतम्, क्षत्रियायैव ह्युपदिश्यते । कश्चात्र ब्राह्मणस्य विशेषः, ब्रह्मविद्याया अपि त्रैवर्णिकसाधारणत्वात् । विजानत इति चायुक्तम्; विजानन्नेव हि कामाधिकारादिष्वपि प्रवर्तते । ब्राह्मणशब्दश्चात्र न *तदधीते (अष्टा. ४. २. ५९) इत्याद्यर्थान्तरपरः; *ब्राह्मोऽजातौ (अष्टा. ६. ४. १७१) इति निपातनेन जातिव्यतिरिक्तार्थेषु ब्राह्म इत्येव वक्तव्यत्वात् । तत्राह—**वैदिकस्य मुमुक्षो**रिति । ब्रह्म अणतीति निरुक्त्या ब्रह्मणः *शकन्ध्वादिषु पररूपं वक्तव्यम् (अष्टा. वा. ६.१.९४) इति पररूपे कृते प्रज्ञादित्वादण्प्रत्यये च ब्राह्मण इति रूपं भवति । ब्रह्म चात्र वेदः, वेदेष्वित्यत्रैव प्रसक्तत्वात् । अतोऽत्र ब्राह्मणशब्दो वैदिकमात्रपर इति न क्षत्रियार्थोपदेशाद्यनुपपत्तिः । ब्राह्मणशब्दस्यात्र सन्न्यासिपरत्वेन शङ्करव्याख्या त्वतिमन्दा । *अमौनं च मौनं च निर्विद्याथ ब्राह्मणः (बृ. ५.५.१) इति श्रुतिस्तु योगिनः प्रकृष्टतरान्तरसत्त्वमवस्थाविशेषमाह । *विजानत इति च विशिष्टज्ञानवत्त्वमुच्यते । विशिष्टत्वं च हेयोपादेय[विभाग]विषयतया । तथाविधज्ञानवांश्च मुमुक्षुरेव स्यादिति । तावानित्यस्य व्यवच्छेद्यमाह—**नान्य**दिति । वेदोदितमपि न मोक्षसाधनव्यतिरिक्तमुपादेयम्, अनधिकृतत्वात् । न ह्यन्यवर्णाश्रमान्यफलकामुकादिधर्मोऽन्यस्योपादेय इति भावः ॥ ४६ ॥

भा ॥ **अतस्सत्त्वस्थस्य मुमुक्षोरेतावदेवोपादेयमित्याह—**

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥ ४७

भा ॥ नित्ये नैमित्तिके काम्ये च केनचित् फलविशेषेण संबन्धितया श्रूयमाणे कर्मणि नित्यसत्त्वस्थस्य मुमुक्षोस्ते कर्ममात्रेऽधिकारः । तत्संबन्धितयाऽवगतेषु फलेषु न कदाचिदप्यधिकारः । सफलस्य बन्धरूपत्वात् फलरहितस्य केवलस्य मदाराधनरूपस्य मोक्षहेतुत्वाच्च । मा च कर्मफलयोर्हेतुर्भूः । त्वयाऽनुष्ठीयमानेऽपि कर्मणि नित्यसत्त्वस्थस्य मुमुक्षोस्तवाकर्तृत्वमप्यनुसन्धेयम् । फलस्यापि क्षुन्निवृत्त्यादेर्न त्वं हेतुरित्यनुसन्धेयम् । तदुभयं गुणेषु वा सर्वेश्वरे मयि वाऽनुसन्धेयमित्युत्तरत्र वक्ष्यते । एवमनुसन्धाय कर्म कुरु । अकर्मणि—अननुष्ठाने * न योत्स्यामीति यत्त्वयाऽभिहितं न तत्र ते सङ्गोऽस्तु ; उक्तेन प्रकारेण युद्धादिकर्मण्येव सङ्गोऽस्त्वित्यर्थः ॥ ४७ ॥

ता ॥ एवं तर्हि मोक्षसाधनेतरसकलपरित्यागे नित्यनैमित्तिकनिषेधशास्त्रातिलङ्घनेन कामचारदोषस्स्यात् ; तावानिति च कियानुच्यत इति शङ्कायामुत्तरश्लोकमवतारयति—**अत** इति । न कामचारदोषः, एतावत उपादेयत्वात् ; नाप्यन्येच्छोरन्योपायप्रवृत्तिदोषः, तत्तत्फलपरित्यागेन साधारणस्वरूपमात्रस्योपादेयत्वादिति भावः । कर्मणि इति सामान्यशब्दस्य योग्यान्विशेषानाह—**नित्य** इत्यादिना । * केनचित् इत्यादिकं राशित्रयेऽपि संबध्यते । तेन नित्यनैमित्तिकयोरपूर्वमात्रार्थतामिच्छतां कुदृष्टीनां दृष्टिरपहृता । कर्मान्तराधिकारोपात्तदुरितक्षयाकरणनिमित्तप्रत्यवायपरिहारप्राजापत्यादिलोकपशुपुत्रादि यथासंभवं नित्यादेः फलम् । **फलविशेषेणेति** । यथोत्पत्तिवाक्यैः स्वरूपेणैवोत्पन्नानां कर्मणां कामाधिकारे स्वर्गादिफलविशेषेण संबन्धितया श्रुतत्वात् स्वर्गादिकं फलमिष्यते ; एवं मोक्षाधिकारेऽपि मोक्षाख्यफलविशेषेण संबन्धितया श्रुतत्वात् सोऽपि फलमिति भावः । ते इतिशब्दस्य प्रकृतान्विततात्पर्यमाह—**नित्यसत्त्वस्थस्य मुमुक्षोरिति** । मोक्षतत्साधनादिफलव्यवच्छेदाय **तत्संबन्धितयाऽवगते**ष्वित्युक्तम् । स्वर्गपश्वादिष्विति शेषः । मेति न निषेधविधिः ; किंत्वभावमात्रबोधक इति **न कदाचि**दित्युक्तम् । फलयोग्यतानिषेधात्तत्सङ्गनिषेधोऽपि फलितः । कर्ममात्राधिकारे फलानधिकारे च बुद्धिस्थक्रमेण हेतुद्वयमाह—**सफलस्ये**ति । न हि मोक्षमिच्छतो बन्धरूपफलाभिलाष उपपन्नः । न च तद्धेतुपरित्याग उचित इति भावः । **केवलस्ये**त्येतन्न फलराहित्यमात्रपरं, **फलरहितस्ये**त्युक्तत्वात् । अपि तर्हि स्वरूपत एव प्रयोजनत्वपरम् । तत्र हेतुः—**मदाराधनरूपस्ये**ति । **कर्मफलयो**रिति । पुनरुक्तिप्रसङ्गकषष्ठीसमासादपि उभयपदार्थप्रधानो द्वन्द्व एवोचितः । वक्ष्यमाणाकर्तृत्वानुसन्धानसंग्रहश्चात्र युक्त इति भावः । *कर्मण्येवाधिकारस्ते, * मा ते सङ्गोऽस्त्वकर्मणि इति पूर्वोत्तरवचनाभ्यामयं कर्महेतुत्वनिषेधो व्याहन्येतेत्यत्राह—**त्वये**ति । नात्र वस्तुतो हेतुत्वं निषिध्यते ; अपि तु हेतुत्वानुसन्धानमित्यर्थः । ननु फलहेतुत्वनिषेधः पुनरुक्तः, मा फलेषु कदाचन इत्युक्तत्वात् । यदि तु भोजनादिसाध्यक्षुन्निवृत्त्यादिफलनिषेधः ; तदा तदुपायरागस्यापि निवृत्तेश्शरीरधारणादेरप्यभावप्रसङ्गेनोपायानुष्ठानस्यैव लोपस्स्यादित्यत्राह—**फलस्यापी**ति । **क्षुन्निवृत्त्यादे**रित्यनेन पौनरुक्त्यं परिहृतम् । **न त्वं हेतुरित्यनुसन्धेय**मिति । नात्र क्षुन्निवृत्त्यादिस्वरूपं निषिध्यते । अपि त्वात्मनस्तद्धेतुत्वानुसन्धानमिति भावः । ननु कथं कर्मफलयोः स्वयं हेतुस्सन् न हेतुरित्यनुसन्धीयेत ? एवं च चार्वाकादिवदनयोर्निर्हेतुकत्वमनुसन्धेयं स्यात् ; ततश्चोपायानुष्ठानमेव हीयेत । अहेतुकतया बुध्यमाने प्रयासायोगादित्यत्राह—**तदुभय**मिति । उभयं कर्महेतुत्वं फलहेतुत्वं च । **उत्तरत्रे**ति । अयमेव हि तृतीयाध्यायप्रधानार्थः । तथा हि **संग्रहः**—* असक्त्या लोकरक्षायै गुणेष्वारोप्य कर्तृताम् । सर्वेश्वरे वा न्यस्योक्ता तृतीये

कर्मकार्यता ॥ (७) इति । एवमहेतुकत्वचोद्यं तावत्परिहृतम् । तथाऽप्यात्महेतुकत्वानुसन्धाननिषेधेन अननुष्ठानप्रसङ्गस्तदवस्थ इति चेन्मैवम् ; नह्यत्रानुष्ठानस्याननुष्ठानतया भ्रान्तिरुच्यते ; नाप्यनुष्ठातृत्वस्य सतोऽप्यप्रतिपत्तिर्विधीयते ; येन विरोधस्स्यात् ; किंत्वनेकहेतुके कस्मिंश्चिदेकस्यैव हेतुत्वं त्रैगुण्याद्युपाधिके स्वरूपप्रयुक्तत्वं च भ्रान्तिसिद्धमिति तदुभयं निषिध्यते । वक्ष्यते हि * शरीरवाङ्मनोभिः (१८. १५) इत्यादौ, तृतीयाध्याये च । किंच, साक्षात्कर्तृत्वाननुसन्धानविधावपि नाकर्तृत्वानुसन्धानकर्तृत्वप्रतिपत्तिनिषेधयोरप्याननुष्ठानप्रसङ्गः । स हि कुर्वन्नेव स्वकृतोपकारनिगूहनवदाहा[र्याव]र्यबोधेन तथा प्रतिपद्यते । अन्यत्र वा कर्मणि क्रियमाण इति न कश्चिद्दोषः । *सर्वेश्वर इति निर्देशः तस्मिन् कर्तृत्वाद्ध्यवसायौचित्यार्थः । जीवस्यापि हि कर्तृत्वं तत्त्वतः परमात्मायत्तमिति * परात्तु तच्छ्रुतेः (ब्र. २. ३. ४०) इत्यधिकरणे स्थापितम् । पूर्वोत्तरवाक्याद्यविरोधाय कर्मस्वरूपपरित्यागं परिहरति—**एवमिति** । गुणेश्वराधीनत्वबुद्धावपि किं मे परित्यक्तफलेन दुःखस्वरूपेण भोजनादिकर्मणेति त्वया नोदासितव्यमिति भावः । **अननुष्ठान** इति । **अकर्मणी**त्यत्र कर्मशब्दः क्रियावाची ; नञप्यत्र तदभावपर इति भावः । अननुष्ठानस्य प्रतिषेधार्थं प्रसङ्गं स्मारयति—**नयोत्स्यामी**ति । अकर्मसङ्गनिषेधफलितमन्यत्र सङ्गमाह—**उक्तेने**ति ॥ ४७ ॥

भा ॥ एतदेव स्फुटीकरोति—

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८

भा ॥ राज्यबन्धुप्रभृतिषु सङ्गं त्यक्त्वा युद्धादीनि कर्माणि योगस्थः कुरु, तदन्तर्भूतविजयादिसिद्ध्यसिद्ध्योस्समो भूत्वा कुरु । तदिदं सिद्ध्यसिद्ध्योस्समत्वं योगस्थ इत्यत्र योगशब्देनोच्यते । योगसिद्ध्यसिद्ध्योस्समत्वरूपं चित्तसमाधानम् ॥ ४८ ॥

ता ॥ अनन्तरग्रन्थं संगमयति—**एतदेवे**ति । अवधारणेनार्थान्तरपरत्वव्युदासः । **स्फुटीकरोती**ति पौनरुक्त्यपरिहारः । **राज्यबन्धुप्रभृतिष्वि**ति । राज्यप्रभृतिषु सङ्गः फलद्वारा बाधकः ; बन्धुप्रभृतिषु सङ्गस्तु युद्धाद्यननुष्ठानद्वारेति तदुभयमपि त्याज्यत्वादत्र सङ्गशब्देन संगृहीतमिति भावः । **युद्धादीनी**ति प्रकृतविशेषप्रदर्शनम् । आनुषङ्गिकत्वसूचनायोक्तं—**तदन्तर्भूते**ति । * लाभालाभौ जयाजयौ (३८) इति पूर्वोक्तानुसन्धानेनाह—**विजयादी**ति । योगस्थः सिद्ध्यसिद्ध्योस्समो भूत्वेत्यनयोरेकवाक्यत्वे पौनरुक्त्याद्भिन्नवाक्यत्वे तु तादृशश्रुतिवाक्यविशेषोपबृंहणौपयिकयोगशब्दार्थव्याख्यानरूपत्वेनापौनरुक्त्याच्च कुर्वितीदमावर्तितम् । * विद्याविनयसंपन्ने (५. १८) इत्यादिप्रदेशान्तरोक्तसमत्वान्तरव्यावर्तनायोक्तम्—**तदिदं सिद्ध्यसिद्ध्योरि**ति । सार्वत्रिकयोगशब्दप्रयोगविषयव्यावृत्त्यर्थमुक्तम्—**योगस्थ इत्यत्रे**ति । योगशब्दस्य सिद्ध्यसिद्धिसाम्ये क्वचिदपि प्रयोगो न दृश्यत इत्याह—**योग** इति । चित्तसमाधाने प्रयोगस्तावद्योगानुशासनादिसिद्धः । इदमपि समत्वं तद्रूपमिति योगशब्दार्थ इत्याकूतम् ॥ ४८ ॥

भा ॥ किमर्थमिदमसकृदुच्यत इत्यत आह—

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९

भा ॥ योऽयं प्रधानफलत्यागविषयोऽवान्तरफलसिद्ध्यसिद्ध्यात्मत्वविषयश्च बुद्धियोगः, तद्युक्तात्कर्मण इतरत् कर्म दूरेणावरम् । महदिदं द्वयोरुत्कर्षापकर्षरूपं वैरूप्यम् । उक्तबुद्धियोगयुक्तं कर्म निखिलसांसारिकदुःखं विनिवर्त्य परमपुरुषार्थलक्षणं च मोक्षं प्रापयति ; इतरदपरिमितदुःखरूपं संसारमिति । अतः कर्मणि क्रियमाणे उक्तायां बुद्धौ शरणमन्विच्छ ; शरणं—वासस्थानम् । तस्यामेव बुद्धौ वर्तस्वेत्यर्थः । कृपणाः फलहेतवः—फलसङ्गादिना कर्म कुर्वाणाः कृपणाः—संसारिणो भवेयुः ॥ ४९ ॥

ता ॥ अभ्यासरूपतात्पर्यलिङ्गविवक्षामभिप्रयन् पौनरुक्त्यशङ्काद्वारेणोत्तरश्लोकमवतारयति—**किमर्थ**मिति । इदं साम्यानुसन्धानरूपं चित्तसमाधानम् । तद्ध्यनन्तरं प्रशस्यते । कर्ममात्रनिन्दाभ्रमं परिजिहीर्षन् बुद्धियोगशब्दस्य प्रकरणविशेषितं वाच्यांशं तावदाह—**योऽय**मिति । अजहल्लक्षणया बुद्धिप्राचुर्यहेतुकतया लक्षितमाह—**तद्युक्तात्कर्मण** इति । **इतरदि**त्यनेन प्रकरणविहितकर्मव्यतिरिक्तविषयाऽत्र कर्मनिन्देति सूचितम् । दूरावरशब्दयोरत्र विवक्षितं निष्कर्षति—**महदिति** । तृतीया प्रकारे । कृपणाः फलहेतव इत्यनन्तरवाक्येन बुद्धियुक्त इत्यादिना च वक्ष्यमाणं श्रुतिस्मृत्यन्तरादितश्च सिद्धं वैरूप्यप्रकारमाह—**उक्तेति** । नीतिमन्त्रौषधकेवल्यागादिव्यावर्तनाय निखिलशब्दः । तस्योपाधिविशेषावच्छिन्न[त्वात्]कात्स्न्येंऽपि प्रयोगादवच्छेदकोपाध्यन्तरव्यावर्तनायोक्तम्—**सांसारिके**ति । केवलकर्मसाध्यस्वर्गादिव्यावर्तनाय परमशब्दः । अपरिमितशब्देन स्वभावसंख्याकालादिप्रयुक्तसंभावितसमस्तपरिच्छेदनिरासः । हिशब्दस्य हेत्वर्थतामभिप्रयन्नाह—**अत** इति । प्रकरणादिविरुद्धसाङ्ख्याद्युक्तकर्मस्वरूपपरित्यागपूर्वकज्ञानमात्रोपादानभ्रमव्युदासायोक्तं **कर्मणि क्रियमाण** इति । **उक्तायामिति** । तात्पर्यातिशयव्यक्त्यर्थं पूर्वोक्तमभ्यस्यत इति भावः । * उपाये ग्रहरक्षित्रोश्शब्दश्शरणमित्ययम् (अहि. ३६. ३४) इत्यादिनाऽवगतं शरणशब्दस्य रक्षकाद्यर्थान्तरं व्यावर्तयन् विवक्षितं वक्तुं वाच्यं तावदाह—**वासस्थान**मिति । नन्विदमसङ्गतं बुद्धेर्वासस्थानभूतगृहाद्याश्रयत्वाभावादित्यत्राह—**तस्यामेवे**ति । कर्मयोगनिष्ठा ह्यत्रोपदिश्यत इति भावः । * कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः (नाम. ३. वि. ४९) इति कृपणशब्दस्य पुरुषविशेषे रूढत्वात्, बुद्धियुक्त इत्यादिना फलाभिसन्धिरहितपुरुषाणां प्रशस्यमानत्वात्, * मा कर्मफलहेतुर्भूः (४७) इति पुरुषे फलहेतुशब्दस्य प्रकृतत्वात् * कृपणाः फलहेतवः इत्यत्रापि फलाभिसन्धिपूर्वककर्मकारिणः पुरुषा एव निन्द्यन्ते, न तु फलहेतुमात्रमित्यभिप्रायेणाह—**फलसङ्गादिनेति** । पुरुषाणामपि हि स्वकर्मद्वारा फलहेतुत्वमस्त्येव, * जन्मबन्धविनिर्मुक्ताः इत्यादेः प्रतिरूपतया परमनिश्श्रेयसवैधुर्यस्यात्र कृपणशब्देनाभिधातुमुचितत्वात् **संसारिण** इत्युक्तम् । अकृपणप्रदर्शनपरानन्तरश्लोकपरामर्शाच्चायमेवार्थ उचित इति भावः ॥ ४९ ॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५०

भा ॥ बुद्धियोगयुक्तस्तु कर्म कुर्वाणः उभे सुकृतदुष्कृते अनादिकालसञ्चिते अनन्ते जहाति । तस्मादुक्ताय बुद्धियोगाय युज्यस्व । योगः कर्मसु कौशलम्—कर्मसु क्रियमाणेष्वयं बुद्धियोगः कौशलम्—अतिसामर्थ्यम् । अतिसामर्थ्यसाध्य इत्यर्थः ॥ ५० ॥

ता ॥ * बुद्धियुक्तो जहातीह इत्यस्येह—कर्मणि क्रियमाणे बुद्धियुक्त इत्यन्वयमभिप्रेत्याह—**बुद्धियोगयुक्तस्तु कर्म कुर्वाण** इति । यद्वा **कर्म कुर्वाण** इति प्रकरणापन्नमुक्तम्, इहशब्दस्य तु जहातिनाऽन्वयः, * इहैव तैर्जितस्सर्गः

(५. १९) इत्यादिवत् । ततश्च प्रतिबन्धकनिवृत्तिरुक्ता भवति । बुद्धिरहितकेवलकर्मादिभिरनिवर्त्यत्वार्थमाह—**अनादिकालसंचितेऽनन्ते** इति । अनादिकालसंचितत्वमनन्तत्वनिदानम् । सुकृतस्य हानिरपुरुषार्थः स्यादित्यत्रोक्तम्—**बन्धहेतुभूते** इति । न हि काञ्चनकालायसशृङ्खलयोर्बन्धहेतुत्वे कश्चिद्विशेषः, मुमुक्षवपेक्षया च स्वर्गादिकारणं सुकृतमपि दुष्कृतमेव ; अलौकिकत्वे सत्यनिष्टफलसाधनत्वात् । स्वर्गादेरपि हि मुमुक्षवपेक्षया निरयत्वम् *एते वै निरयास्तात स्थानस्य परमात्मनः (भा. मो. १९८. ११) इत्यादिभिः प्रतिपादितमिति भावः । *बुद्धियुक्तः इत्यस्य, *योगाय इत्यस्य च भिन्नार्थपरत्वव्युदासायाह—**तस्मादुक्ताय बुद्धियोगाय**इति । युज्यस्व—सन्नह्यस्व, उद्युक्तो भवेत्यर्थः । *समत्वं योग उच्यते इतिवद्योगशब्दव्याख्याश्रमनिरासायाह—**कर्मस्विति** । कौशलशब्दस्य तात्पर्यं वक्तुं वाच्यं तावदाह—**अतिसामर्थ्यमिति** । बुद्धियोगस्य कर्मसामर्थ्यात्मकत्वं कथमित्यत्राह—**अतिसामर्थ्यसाध्य इत्यर्थ** इति । कार्ये कारणशब्द उपचरितः । अनेन श्लोकेन बन्धकसुकृतदुष्कृतहानमुक्तम् ॥ ५० ॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१

भा ॥ बुद्धियोगयुक्ताः कर्मजं फलं त्यक्त्वा कर्म कुर्वन्तः, तस्मात् जन्मबन्धविनिर्मुक्ताः अनामयं पदं गच्छन्ति । हि—प्रसिद्धं ह्येतत्सर्वासूपनिषत्स्वित्यर्थः ॥ ५१ ॥

ता ॥ अथ तत्फलभूतबन्धनिवृत्तिपूर्वकामृतत्वप्राप्तिपरस्य *कर्मजम् इति श्लोकस्य हेतुफलभावक्रमेणान्वयमाह—**बुद्धियोगयुक्ता** इति । कर्मजं फलं सांसारिकम् ; जन्मबन्धो जन्मना बन्धः, स्वच्छन्दत्वहानिः ; अथवा जन्मैव बन्ध इति कर्मधारयः । अनामयं पदं—स्थानविशेषो वा, परमप्राप्यं परमात्मस्वरूपं वा, प्रकरणवशादत्र ब्रह्मपर्यन्तजीवस्वरूपं वा । पद्यते गम्यत इति पदम् । त्रयमपि हि साक्षादन्यथा वा मुक्तप्रायत्वात्पदशब्दवाच्यम् । हिशब्दस्यात्र हेतुत्वादिपरत्वासंभवत्वात्प्रसिद्धिपरत्वम् । प्रसिद्धिस्थलं चाह—**प्रसिद्धमिति** ॥ ५१ ॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२

भा॥ उक्तप्रकारेण कर्मणि वर्तमानस्य तया वृत्त्या निर्धूतकल्मषस्य ते बुद्धिर्यदा मोहकलिलम्—अत्यल्पफलसङ्गहेतुभूतं मोहरूपं कलुषं व्यतितरिष्यति, तदा अस्मत्त इतःपूर्वं त्याज्यतया श्रुतस्य फलादेरितःपश्चाच्छ्रोतव्यस्य च कृते स्वयमेव निर्वेदं गन्तासि—गमिष्यसि ॥ ५२ ॥

ता॥ एवमुक्तप्रकारो हेयोपादेयविभागो युक्त्यागमनिरपेक्षं तवैव स्पष्टो भविष्यतीति चमत्कारार्थमुच्यते—*यदा इति श्लोकेन । मोहतरणहेतुं प्रकृतं दर्शयति—**उक्तेति** । पुण्यपापरूपसांसारिककर्मणा हि मोहः ; तच्च फलाभिसन्ध्यादिरहितकर्मणा निवर्त्यम् । ततः कारणाभावात्कार्याभाव इति भावः । **अत्यल्पफलसङ्गहेतुभूत**मित्यनेन मोहस्येदानीं निर्वेदप्रतिबन्धकत्वमुच्यते । मोहस्वरूपातिरिक्तस्य तत्साध्यस्य कालुष्यस्याभावात् **मोहरूपम**ित्युक्तम् । **कलुष**शब्दोऽत्र कालुष्यपरः । **अस्मत्त** इति । आप्ततमेभ्य इति भावः । **त्याज्यतया**इति निर्वेदयोग्यत्वायोक्तम् । न हि श्रोतव्येषु श्रुतेषु च उपादेयांशो निर्वेदहेतुः । यद्वा श्रोतव्यस्येत्यस्योपादेयविषयत्वाय श्रुतस्येत्यत्र त्याज्यतयेति विशेषणम् । हेय-

सङ्गमुपादेयवैतृष्ण्यं च परामृश्य भवति हि निर्वेदः । स च स्वावज्ञारूपः । यथाऽऽहुः गान्धर्ववेदिनः—*तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् (दश. ४५.) इति । श्रोतव्यस्येत्यादेस्संबन्धसामान्यषष्ठ्या विवक्षितविशेषकथनम्—कृत इति । स्वयमेवेति । असद्वाक्यादिनिरपेक्ष इत्यर्थः । *गन्तासि इत्यत्र पदभेदभ्रमं निरस्यति गमिष्यसीति । *गन्तासि इत्यत्र द्वितीयान्वयात्तृजन्तत्वं न युज्यते । तृन्नन्तत्वे तु भविष्यत्त्वविवक्षा न स्वारसिकी । अतो लुड[न्ततयै]न्तैकपद्यं युक्तम् । एवं *जेतासि (११. ३४) इति वक्ष्यमाणेऽपि । अनद्यतनविहितलुडन्तोऽपि शब्दो व्यतितरिष्यतीत्येतत्तुल्यतया भविष्यन्मात्रार्थेन व्याख्यातः [इति] ॥ ५२ ॥

भा ॥ *योगे त्विमां शृणु इत्यादिनोक्तस्यात्मयाथात्म्यज्ञानपूर्वकस्य बुद्धिविशेषसंस्कृतस्य धर्मानुष्ठानस्य लक्ष्यभूतं योगाख्यं फलमाह—

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३

भा ॥ श्रुतिः—श्रवणम् । अस्मत्तः श्रवणेन विशेषतः प्रतिपन्ना, सकलेतरविसजातीयनित्यनिरतिशयसूक्ष्म[तत्त्व]ात्मविषया, स्वयमचला-एकरूपा, बुद्धिरसङ्गकर्मानुष्ठानेन निर्मलीकृते मनसि, यदा निश्चला स्थास्यति, तदा योगम्—आत्मावलोकनम्, अवाप्स्यसि । एतदुक्तं भवति—शास्त्रजन्यात्मज्ञानपूर्वककर्मयोगः स्थितप्रज्ञताख्यज्ञाननिष्ठामापादयति ; ज्ञाननिष्ठारूपा स्थितप्रज्ञता तु योगाख्यमात्मावलोकनं साधयति—इति ॥ ५३

ता ॥ *नित्यात्मासङ्गकर्महागोचरा साङ्ख्ययोगधीः । द्वितीये स्थितधीलक्षा प्रोक्ता तन्मोहशान्तये ॥ (६) इति संग्रहश्लोकमनुसन्दधानो ज्ञानयोगाभिधानोपक्रमभूतमुत्तरश्लोकमवतारयति—योगे त्विति । बुद्धिविशेषो *व्यवसायात्मिका इत्यादिना पूर्वोक्तः । लक्ष्यभूतम्—उद्देश्यभूतमित्यर्थः । श्रुतिविप्रतिपन्ना इत्यस्य प्रकृतानुपयुक्ताप्रकृतवैदिकवाक्यविरोधार्थताभ्रमं *श्रोतव्यस्य श्रुतस्य च इति प्रकृतानुरोधेन व्युदस्यति—श्रुतिः श्रवणमित्यादिना । अस्मत्त इति—सार्वज्ञ्यसर्वशक्तिपरमकारुण्यादिभिरनाघ्रातभ्रमविप्रलम्भप्रमादादिदोषगन्धादव्याजबन्धोरीश्वरादिति भावः । विशब्दस्य विरुद्धार्थताव्युदासाय वैशिष्ट्यार्थतामीश्वराच्छ्रवणेन सिद्धां दर्शयति—विशेषत इति । स्थास्यतीति स्थायित्वं ह्युक्तम्, विशेषं पूर्वोक्तं व्यनक्ति—सकलेतरेति । *अर्थेनैव विशेषो हि निराकारतया धियाम् इति हि प्रसिद्धमिति भावः । निश्चलाचलशब्दयोः पौनरुक्त्यपरिहारायोक्तम्—स्वयमित्यादि । उद्देश्यान्तर्गतमचलत्वम्, निश्चलत्वं तु तत्र विधेयो विशेष इति स्वयंशब्दस्य भावः । एकरूपार्थविषयत्वादेकरूपा विषयान्तरसञ्चाररहिता चेत्यर्थः । अथवा *श्रुतिविप्रतिपन्ना इति श्रवणस्योक्तत्वान्मननस्थिरीकृतत्वं कुतर्कैरकम्पनीयत्वं च पदाभ्यां विवक्षितम् । यद्वा पूर्वोक्तबहुशाखत्वानन्तत्वनिषेधपरोऽचलशब्द इत्यभिप्रायेणोक्तम्—एकरूपेति । समाधीयते अस्मिन्नात्मज्ञानमिति समाधिर्मन इति निर्वचनेन तैलधारावदविच्छिन्नस्थितिहेतुतामभिप्रयतोक्तम्—असङ्गेत्यादि । समाधिशब्दस्यात्र बुद्धिविशेषपरत्वे पुनरुक्त्यादिः, तत्कालपरत्वे तु लक्षणा च स्यादिति भावः । योगशब्दस्यात्र ज्ञानयोगरूपनिश्चलबुद्धिसाध्यफलविषयत्वात् आत्मावलोकनमित्युक्तम् । *योगस्सन्नहनोपायध्यानसङ्गतियुक्तिषु (नाम. ३. ना. १७९) इत्यादिभिरनेकार्थतया प्रसिद्धोऽयं शब्दस्तत्तद्वाक्यानुकूलमनुसन्धेयः । ननूपायतया हि योगो विहितः, स कथं फलतयाऽत्र निर्दिश्यते । आत्मज्ञानपूर्वकस्य च कर्मयोगस्यात्मज्ञानमेव साध्यं चेदात्माश्रयादिदोषः । श्रवणमननाभ्यां स्थितप्रज्ञस्य ह्यनुष्ठानम् ; तथा च कथमनुष्ठानसाध्या स्थित-

प्रज्ञता ; निश्चलप्रज्ञास्थितिमन्तरेण च कोऽसावपरस्तदापाद्यो योग इत्यत्राह—**एतदुक्तमिति** । तत्र प्रथमचोद्यं **कर्मयोग-शब्देन योगाख्यमात्मावलोकनमित्यनेन** च परिहृतम् । शास्त्रजन्यात्मज्ञानात्मावलोकनशब्दाभ्यामात्माश्रयादिनिरासः । आत्मज्ञाननिष्ठाशब्दाभ्यां श्रवणमात्रसिद्धतत्त्वनिश्चयज्ञानयोगविषयाभ्यां तृतीयस्य परिहारः । चतुर्थोऽप्युक्तप्रकारेण साक्षात्कारतद्धेतुस्मृतिसन्ततिभेदात्परिहृतः । प्रथमं शास्त्रतस्तत्त्वज्ञानम्, ततः स्मृतिसन्ततिरूपमुपासनम्, ततस्तन्मूल-स्साक्षात्कार इति ज्ञानपर्वभेदः प्रदर्शितः ॥ ५३ ॥

भा ॥ एवमुक्तः पार्थोऽसङ्गकर्मानुष्ठानरूपकर्मयोगसाध्यस्थितप्रज्ञतायाः योगसाधनभूतायास्स्वरूपम्, स्थितप्रज्ञस्यानुष्ठानप्रकारं च पृच्छति—

अर्जुन उवाच—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४

भा ॥ समाधिस्थस्य स्थितप्रज्ञस्य का भाषा— को वाचकश्शब्दः? तस्य स्वरूपं कीदृशमित्यर्थः। स्थितप्रज्ञः किं च भाषणादिकं करोति ? ॥ ५४ ॥

ता॥ प्रश्नरूपस्योत्तरश्लोकस्यावतारं तत्र पूर्वोत्तरार्धयोः क्रमान्निष्कृष्टप्रश्नार्थं चाह—**एवमिति** । पूर्वार्धस्याभिप्रेतं वक्तु-मन्वयं तावदाह—**समाधीति** । समाधिरत्र पूर्वनिरुक्तप्रकारं मनः । तत्र स्थितिः तद्वशीकरणेनावस्थानम् । * किं प्रभा-षेत इत्यनेन पुनरुक्तिपरिहाराय * स्थितप्रज्ञस्य का भाषा इत्यत्र कर्तृतयाऽन्वयशङ्कामपाकरोति—**को वाचकश्शब्द** इति । ननु * स्थितप्रज्ञः इत्येव वाचके सिद्धे किं वाचकान्तरं पृच्छ्यते, किं चात्र वाचकप्रश्नस्य प्रयोजनमित्यत्राह—**तस्येति** । केनचिद्वाचकेन हि कस्यचित्प्रकारभूतप्रवृत्तिनिमित्तविशि[ष्ट]ष्टस्वरूपं निर्देष्टव्यमिति भावः । स्थितप्रज्ञशब्दात् स्थितधी-शब्दस्यार्थान्तरपरत्वभ्रमनिरासाय * स्थितप्रज्ञः इति पूर्वार्धोक्तशब्द एवात्रावर्तितः । **किंच भाषणादिकमिति** । * किं प्रभाषेत इत्यादयः किंशब्दाः क्रियाविशेषणतयाऽन्वीयमानाः क्रियाप्रकारप्रश्नपरा इति भावः । * किं प्रभाषेत इति वाचिके * किं व्रजेत इति कायिके च पृष्टे * किमासीत इति मानसपरम्, ध्यानार्थत्वादत्रासनस्य ॥ ५४ ॥

भा ॥ वृत्तिविशेषकथनेन स्वरूपमप्युक्तं भवतीति वृत्तिविशेष उच्यते—

श्रीभगवानुवाच—

प्रजहाति यदा कामान् सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५

भा ॥ आत्मन्येवात्मना, मनसा आत्मैकावलम्बनेन तुष्टस्तेन तोषेण तद्व्यतिरिक्तान् सर्वान्मनोगतान् कामान् यदा प्रकर्षेण जहाति ; तदाऽयं स्थितप्रज्ञ इत्युच्यते ; ज्ञाननिष्ठाकाष्ठेयम् ॥ ५५ ॥

ता ॥ एवं करणत्रयानुष्ठानप्रकारप्रश्नस्य साक्षादुत्तरेषु * प्रजहाति इत्यादिषु चतुर्षु श्लोकेषु प्रथमस्य स्वरूप-प्रश्नोत्तरतामपि दर्शयति—**वृत्तिविशेषेति** । प्रकृष्टानुकूल्ययोगिन्यात्मनि प्रीतिरूपस्य तोषस्य कामान्तरप्रहाणहेतुत्वात्तथा-ऽन्वयमाह—**आत्मन्येवेति** । सर्वशब्दस्य * आत्मनि तुष्टः इत्येतत्सन्निधानसिद्धं सङ्कोचमाह—**तद्व्यतिरिक्तानिति** । यद्वा * आत्मन्येवात्मना तुष्टः इति यथाक्रममेवान्वयः ; आत्मैकविषयेण मनसाऽन्यतोजातालंबुद्धिरूपसन्तोष इत्यर्थः ।

एतदभिप्रायेणोक्तम्—**मनसाऽऽत्मैकावलम्बनेन तुष्ट** इति। **तेन तोषेणेति**। * न विवेदात्मनो गात्रं तत्स्मृत्याह्लाद-संस्थितः (वि. १. १७. ३९) इतिवत्। **प्रकर्षेणेति**—अपुनरङ्कुरमित्यर्थः। स्थितप्रज्ञविषयश्लोकचतुष्टयं तदवस्था-चतुष्टयविषयमिति मन्वानश्चतुर्थीयमवस्थेत्याह—**ज्ञाननिष्ठाकाष्ठेयमिति**। उक्तं च **हैरण्यगर्भैः**—* दृष्टानुश्रविकविषय-वितृष्णस्य वशीकारसंज्ञा वैराग्यम् (पा. सू. १. १६) इति। ऐहिकामुष्मिकसकलफलविसुखस्य यस्तेषु फलेषु स-वासनरागत्यागः, सा वशीकारसंज्ञेत्युच्यत इत्यर्थः॥ ५५॥

भा। अनन्तरं ज्ञाननिष्ठस्य ततोऽर्वाचीनादूरविप्रकृष्टावस्थोच्यते—

दुःखेष्वनुद्विग्नमनास्सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते॥ ५६

भा॥ प्रियविश्लेषादिदुःखनिमित्तेषु उपस्थितेष्वनुद्विग्नमनाः न दुःखी भवति; सुखेषु विगतस्पृहः—प्रियेषु सन्निहितेष्वपि विगतस्पृहः, वीतरागभयक्रोधः—अनागतेषु स्पृहा रागः, तद्रहितः; प्रियविश्लेषाप्रियाग-मनहेतुदर्शननिमित्तं दुःखं भयं, तद्रहितः, प्रियविश्लेषाप्रियागमनहेतुभूतचेतनान्तरगतदुःखहेतुभूतस्वमनो-विकारः क्रोधः, तद्रहितः; एवंभूतो मुनिः—आत्ममननशीलः स्थितधीरित्युच्यते॥ ५६॥

ता॥ अथैकेन्द्रियसंज्ञाख्यतृतीयावस्थोच्यत इत्याह—**ततोऽर्वाचीने**ति। * ओ विजी भयचलनयोः इति धातुरत्र चलनार्थः, * वीतरागभय इति भयस्य पृथगभिधानात्। यद्वा * अनुद्विग्न इति निर्दुःखत्वमात्रं विवक्षितम्, तत एव * दुःखेषु इत्येतदपि दुःखहेतुपरमिति मन्वान आह—**दुःखनिमित्तेष्विति**। आदिशब्देनाप्रियागमनसंग्रहः। भयहेतु-व्यावृत्त्यर्थमुक्तम्। **उपस्थितेष्विति**—दुःखोत्पादनप्रवृत्तेष्वित्यर्थः। दुःखशब्दवदेवात्र सुखशब्दस्यापि हेतुपरतां तत्रापि पृथङ्निर्दिष्टरागविषयाद्विलक्षणतां चाह—**प्रियेषु सन्निहितेष्वपीति**। विगतस्पृहवीतरागशब्दयोरपुनरुक्तितां व्यनक्ति—**अनागतेषु स्पृहा राग** इति। स्पृहारागशब्दौ सामान्यविशेषविषयौ। ततश्च विशेषशब्दसन्निधाने गोबलीवर्दन्याया-त्सामान्यशब्दस्तद्व्यतिरिक्तपर इति भावः। पुनरुक्तिपरिहाराय भयस्य दुःखविशेषतामाह—**प्रियेत्यादिना हेतुदर्शननिमित्तं दुःखमित्यन्तेन**। प्रियविश्लेषाप्रियागमनयोर्दुःखरूपयोस्सामग्रीदशामापन्नो यो हेतुः सूचकश्च निमित्तादिः, तस्य यद्दर्शनं सकलसहकारिसंपत्त्युत्प्रेक्षागर्भम्, दर्शनमिति ज्ञानमात्रपरं वा; तेन यद्दुःखं तदानीमेवाङ्गकम्पादिहेतुरुत्पद्यते, तद्भय-मित्यर्थः। क्रोधलक्षणे प्रियविश्लेषादिस्त्रैकालिकः, सर्वत्र क्रोधोत्पत्तिदर्शनात्। अचेतनेषु वातातपकण्टकादिषु बाधकेष्वपि क्रोधाभावात् **चेतने**त्युक्तम्। यस्तून्मत्तस्तत्रापि कुप्यति, सोऽपि चेतनत्वाध्यासेन। अन्तरशब्देन स्वदुःखहेतुस्वमनो-विकारव्यावर्तनम्। स हि तथाविधो निर्वेदादिरूपस्स्यात्। क्रोधादात्महननाद्यपि परपीडाभिसन्धिगर्भम्। मनोविकारो-ऽत्र रजस्तमस्समुन्मेषकृतो व्यापारविशेषः। तदधीनो ज्ञानविशेष इह तच्छब्देनोपचर्यते। मुनिर्मननशीलइति व्युत्पत्तिः, तस्य मननस्यात्र साक्षात्करिष्यमाणात्मविषयत्वव्यक्त्यर्थमुक्तम्—**आत्ममननशील** इति। एवमस्यास्तृतीयावस्थाया उद्वेग-स्पृहादिविरहसाम्येऽप्यौत्सुक्यमात्रक्षमवासनाशेषस्य भस्मच्छन्नदहनवदवस्थितत्वाच्चतुर्थावस्थातो विशेषः॥ ५६॥

भा॥ ततोऽर्वाचीनदशा प्रोच्यते—

यस्सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥ ५७

भा ॥ यस्सर्वत्र प्रियेष्वनभिस्नेहः—उदासीनः, प्रियसंश्लेषविश्लेषरूपं शुभाशुभं प्राप्याभिनन्दनद्वेषरहितः, सोऽपि स्थितप्रज्ञः ॥ ५७ ॥

ता ॥ अथ व्यतिरेकसंज्ञाख्या द्वितीया दशोच्यत इत्याह—**ततोऽर्वाचीनदशे**ति । अप्रियेषु स्नेहप्रसङ्गाभावात्प्रियमात्रविषयः सर्वत्रेतिशब्द इति दर्शयति—**प्रियेष्वि**ति । अभिस्नेहस्य प्रवृत्तिपर्यन्ततया तदभावोऽत्र तद्विषयोपादानप्रवृत्तिराहित्यपर्यन्त इत्याह—**उदासीन** इति । एतेन प्रियेत्यादिना च व्यतिरेकसंज्ञात्वं व्यनक्ति । अपक्वान् कषायान् पक्वेभ्यः पृथगनुसन्धाय तेषामपि पाकापादनदशा हि व्यतिरेकसंज्ञा । तत्र स्वयंप्रियेषु प्रवृत्तिरहितो दैवागतप्रियसंश्लेषविश्लेषयोश्चाभिनन्दनादिरहित इत्युक्ते पक्वेतरेषां रागादीनां पाकाभिलाषेण मनोव्यापारविशेषनिवारणमुक्तं स्यात् । अभिनन्दनं चात्राभितो नन्दनम्—अनुबन्धिषु कालान्तरे च प्रीत्यनुवृत्तिहेतुभूतनन्दनमित्यर्थः; एवं द्वेषेऽपि ॥ ५७ ॥

भा ॥ ततोऽर्वाचीनदशामाह—

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८

भा ॥ यदेन्द्रियाणीन्द्रियार्थान् स्पृष्टमुपयुक्तानि, तदैव कूर्मोऽङ्गानीवेन्द्रियार्थेभ्यस्सवशः प्रतिसंहृत्य मन आत्मन्यवस्थापयति, सोऽपि स्थितप्रज्ञः । एवं चतुर्विधा ज्ञाननिष्ठा पूर्वपूर्वा उत्तरोत्तरनिष्पाद्या ॥ ५८ ॥

ता ॥ अथ यतमानसंज्ञाख्या प्रथमा दशोच्यते इत्याह—**ततोऽर्वाचीनदशे**ति । प्रसक्तप्रतिषेधार्थमाह—**स्पृष्टमुपयुक्तानी**ति । तेन वार्धकरोगादिप्रयुक्ताशक्तिसुषुप्त्यादिकृतनिवृत्तिव्यवच्छेदः । **तदैवे**ति भोगानन्तरनिवृत्तिव्युदासः । **कूर्मोऽङ्गानीवे**त्यनेनेन्द्रियाणां सङ्कल्पविशेषमात्रनियाम्यत्वमुच्यते । **सर्वश** इति विलोकनभाषणविलासपरिहासादिनिवृत्तिपरः; विषयदोषदर्शनादिहेतुप्रकारपरो वा । **प्रतिसंहृत्ये**त्यनेनेन्द्रियनिरोधस्यात्ममननाङ्गता दर्शिता । अत्र च ज्ञाननिष्ठावस्थाविशेषप्रकरणे सुषुप्त्यादिविलक्षणा व्यापारोपरतिस्तत्साध्यात्मगोचरमनोवस्थापनपर्यन्ता विवक्षितेत्याह—**मन आत्मनी**ति । किमर्थमिदमवस्थाचतुष्टयं विभज्योपदिश्यत इत्यत आह—**एव**मिति । प्रथमं बाह्येन्द्रियाणि विषयेभ्यः प्रतिसंहृत्य मन आत्मनि व्यवस्थापयितुं यतेत; इयं यतमानसंज्ञा । अथ बलात्संहृतान्यपि बाह्येन्द्रियाणि सावशेषरागद्वेषादिदोषकलुषितं मनः पुनःपुनरवसरे प्रेरयेत्, स्वयं चात्मनि स्थातुं न शक्नुयात्; अतः पक्वावशिष्टरागद्वेषादीनौदासीन्यानभिनन्दनादिक्रमेण पचेत् । इयं व्यतिरेकसंज्ञा । ततः पक्वेऽपि दोषशेषे[ण] अनादिविषयानुभवभावितवासनामात्रमात्मानमनुबुभूषन्तीं शेषुषीं प्रतिबिभत्सेत्; तत्र निरतिशयानन्दरूपमात्मानं पुरुषद्वेषिण्या योषित इव युवानं प्रदर्श्य प्रदर्श्य क्रमादात्मनि तोषमुत्पाद्य तेन तोषविशेषेण दवीयसा च स्मृतिविधुरेण कालेन बाह्यविषयवासनाजालमुन्मूलयितुमीहेत । सेयमेकेन्द्रियसंज्ञा । या पुनस्समस्तवासनाविलयादौत्सुक्यमात्रस्याप्यसंभवेन परमवैराग्यदशा; सा वशीकारसंज्ञा ज्ञाननिष्ठाकाष्ठा योगाख्यमात्मावलोकनं साधयति । तच्चावलोकनं परम्परया निरतिशयपुरुषार्थभूतामृतत्वाय कल्पत इति दर्शितं भवति । कामानां तथात्वेनादर्शनं, तथा दृश्यमानेष्वपि निस्सङ्गता, सङ्गलेशेन भुज्यमानेष्वपि नातिस्नेहः, प्रचुरेऽपि रागे तन्निरोधसंरम्भ इति चावस्थावैषम्यम् । आत्मरतित्वं तस्य स्वरूपम्, * आश्चर्यवद्वदति इति तस्य तदेकभाषणं, तदनुसन्धानरूपं तदासनं, तत्प्राप्त्यर्थप्रवृत्तिरूपं तस्य व्रजनं चेति प्रश्नचतुष्कोत्तरं सिद्धम् ॥ ५८ ॥

भा ॥ इदानीं ज्ञाननिष्ठाया दुष्प्रापतां तत्प्राप्त्युपायं चाह—

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९

भा ॥ इन्द्रियाणामाहारा विषयाः, निराहारस्य विषयेभ्यः प्रत्याहृतेन्द्रियस्य देहिनो विषया विनिवर्तमाना रसवर्जं विनिवर्तन्ते ; रसो रागः, विषयरागो न निवर्तत इत्यर्थः । रागोऽप्यात्मस्वरूपं विषयेभ्यः परं सुखतरं दृष्ट्वा निवर्तते ॥ ५९ ॥

ता ॥ अथोत्तरप्रकरणं पूर्वेण पृथगर्थं प्रदर्श्य सङ्गमयन्नवतारयति—**इदानी**मिति । ज्ञाननिष्ठायाश्चतुर्विधाया अपीति शेषः । निराहारस्येत्यनेन भोजननिषेधभ्रमं व्युदस्यति—**इन्द्रियाणा**मित्यादिना । * न चैकान्तमनश्नतः, * युक्ताहारविहारस्य (६. १६, १७) इति हि वक्ष्यते । अन्यत्रापि * अत्याशनादतीपानात् (ना. १. ३४) इति ह्युच्यते । **मोक्षधर्मे** च—* दशैतानीन्द्रियोक्तानि द्वाराण्याहारसिद्धये (२३८. ९) इति सर्वेन्द्रियविषयाणामाहारशब्देन ग्रहणं दृष्टम् । न च प्रसिद्धाहारनिषेधमात्रादशेषविषयनिवृत्तिः, तस्य कतिपयेन्द्रियविषयत्वादिति भावः । रसवर्जमित्येतावति वाक्यतात्पर्यमिति द्योतनाय विनिवर्तमाना इत्यनूदितम् । आत्मगोचररागव्यवच्छेदायाह—**विषयराग** इति । प्रस्तुता एव विषयाः परमिति निर्देशस्यावधित्वमर्हन्तीति **विषयेभ्यः पर**मित्युक्तम् । कालादिकृतपरत्वमात्रस्यात्रानुपयुक्तत्वाद्विषय[राग]निवर्तनौपयिकं परशब्दार्थमाह—**सुखतर**मिति । विषया हि सुखरूपाः ; आत्मस्वरूपं तु ततोऽप्यतिशयेन सुखरूपम् । अत्र * दृष्ट्वा निवर्तते इति दर्शनस्य रागकर्तृकतया निर्देश औपचारिकः । यद्वा दृष्ट्वा स्थितस्यास्य देहिनो रागो निवर्तत इत्यन्वयः । एवमात्मदर्शनेन विना विषयरागो न निवर्तत इत्युक्तम् ॥ ५९ ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६०

आत्मदर्शनेन विना विषयरागो न निवर्तते, अनिवृत्ते विषयरागे विपश्चितो यतमानस्यापि पुरुषस्येन्द्रियाणि प्रमाथीनि—बलवन्ति, मनः प्रसह्य हरन्ति । एवमिन्द्रियजय आत्मदर्शनाधीनः, आत्मदर्शनमिन्द्रियजयाधीनमिति ज्ञाननिष्ठा दुष्प्रापा ॥ ६० ॥

ता ॥ अथानिवृत्ते विषयरागे दुर्जयानीन्द्रियाणीत्युच्यते—*यतत इति श्लोकेन । विपश्चित्त्वं यतमानत्वे हेतुरिति द्योतनायोक्तं—**विपश्चितो यतमानस्यापी**ति । अत्र विपश्चित्त्वं शास्त्रजन्यहेयोपादेयविवेकवत्त्वम् । बलवतां प्रमाथित्वं हि * बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति (मनु. २. २१५) इति स्मर्यते—इति ज्ञापनाय **बलवन्ती**त्युक्तम् । इन्द्रियाणां बलं च रागादिरेव । उक्तश्लोकद्वयतात्पर्यसिद्धमन्योन्याश्रयणं तत्फलं चाह—**एव**मिति ॥ ६० ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१

भा ॥ अस्य सर्वस्य परिजिहीर्षया विषयानुरागयुक्ततया दुर्जयानीन्द्रियाणि संयम्य चेतसश्शुभाश्रयभूते मयि मनोऽवस्थाप्य समाहित आसीत । मनसि मद्विषये सति निर्दग्धाशेषकल्मषतया निर्मलीकृत विषयानुरागरहितं मन इन्द्रियाणि स्ववशानि करोति । ततो वश्येन्द्रियं मन आत्मदर्शनाय प्रभवति । यथोक्तम्—* यथाऽग्निरुद्धतशिखः कक्षं दहति सानिलः । तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥ (वि. ६. ७. ७४ ; मा. पु. २२२. १६) इति, तदाह—वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठितेति ॥ ६१ ॥

ता ॥ तर्ह्यन्योन्याश्रयदूषितेऽर्थे साध्यसाधनभावः कथं पूर्वमुपदिष्ट इत्यत्रोच्यते—तानि सर्वाणि इति । अस्येति । अन्योन्याश्रयादिदोषस्येत्यर्थः । संयम्येति । विषयस्पर्शनिवारणमात्रमत्रोच्यते, न त्विन्द्रियजयावस्था । मत्परः इत्यत्र वक्तृविग्रहवैशिष्ट्यविवक्षया सिद्धं शुभाश्रयविग्रहविशेषवत्त्वं चेतस इत्यादिना विवृतम् । शुभशब्देन हिरण्यगर्भादेः आश्रयशब्देन परिशुद्धात्मस्वरूपस्य च व्यवच्छेदः । युक्तशब्देनात्र विषयस्वभावात्सुकरं चित्तसमाधानं विवक्षितमित्याह—समाहित इति । मत्परः इत्येतावता कथमन्योन्याश्रयादिपरिहार इत्यत्राह—मनसीति । अत्राशेषशब्देनोपायविरोधिसर्वकर्मसंग्रहः । निर्मलीकृतं—रजस्तमोविरहितं ; तत एव शब्दादिविषयानुरागरहितम् । अत्र प्रज्ञाशब्दस्य ज्ञाननिष्ठाफलपर्यन्तत्वमात्मदर्शनशब्देनोक्तम् । शुभाश्रयानुसन्धानस्य कल्मषविनाशकत्वे स्मृत्यन्तरसंवादमाह—यथेति । आत्मदर्शनमन्तरेणैवेन्द्रियजयसिद्धेर्नान्योन्याश्रयः । अतः पूर्वोक्तसाध्यसाधनभावोपपत्तिरित्युत्तरार्धेनोच्यत इत्याह—तदाहेति ॥ ६१ ॥

भा ॥ एवं मय्यनिवेश्य मनः स्वयत्नगौरवेणेन्द्रियजये प्रवृत्तो विनष्टो भवतीत्याह—

ध्यायतो विषयान्पुंसस्सङ्गस्तेषूपजायते । सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३

भा ॥ अनिरस्तविषयानुरागस्य हि मय्यनिवेशितमनस इन्द्रियाणि संयम्यावस्थितस्याप्यनादिपापवासनया विषयध्यानमवर्जनीयं स्यात् । ध्यायतो विषयान् पुंसः पुनरपि सङ्गोऽतिप्रवृद्धो जायते । सङ्गात्संजायते कामः । कामो नाम सङ्गस्य विपाकदशा । पुरुषो यां दशामापन्नो विषयानभुक्त्वा स्थातुं न शक्नोति स कामः ॥ कामात्क्रोधोऽभिजायते—कामे वर्तमाने, विषये चासन्निहिते, सन्निहितान् पुरुषान् प्रत्येभिरस्मदिष्टं विहतमिति क्रोधो भवति । क्रोधाद्भवति संमोहः—संमोहः कृत्याकृत्यविवेकशून्यता, [त]यया सर्वं करोति । ततश्च प्रारब्धे इन्द्रियजयादिके प्रयत्ने स्मृतिभ्रंशो भवति । स्मृतिभ्रंशाद् बुद्धिनाशः—आत्मज्ञाने यो व्यवसायः कृतस्तस्य नाशः स्यात्, बुद्धिनाशात्पुनरपि संसारे निमग्नो विनष्टो भवति ॥ ६२ ॥ ६३ ॥

ता ॥ उक्तान्योन्याश्रयणफलभूताया इन्द्रियजयात्मदर्शनयोरसिद्धेः प्रकारः श्लोकद्वयेन प्रपञ्च्यत इत्याह—एवमिति । अदृष्टात्मस्वरूपस्य विषयान् ध्यायत इत्यनुवादसिद्धां विषयेषु स्वरसवाहितां सहेतुकमाह—अनिरस्तेति । अत्र संयम्येति निमीलनादिमात्रकृतं निवारणमुच्यते । उपजायत इत्यत्रोपसर्गाभिप्रेतं विविच्य दर्शयति—अतिप्रवृद्धो जायत इति । सङ्गकामयोरभेदात्कार्यकारणभावानुपपत्तिरित्यत्राह—कामो नामेति । विपाकदशाशब्देन सामान्यत उक्तेऽपि व्यावृत्ताकारप्रतिपत्तिर्न स्यादिति तल्लक्षणमाह—पुरुष इति । सर्वदा कामस्य क्रोधहेतुत्वं नास्तीत्यत उक्तं—विषये चासन्निहित इति । न केवलं कामप्रतिबन्धकानेव पुरुषान् प्रति क्रोधः, अपि तु कृत्याकृत्यविवेकान्धतया तस्यां दशायामुपलभ्यमानान् सर्वान् प्रत्यपीति द्योतनाय सन्निहितानित्युक्तम् । ईश्वरोऽपि क्रोधवेगमभिनयन् कस्मिंश्चिदेव रक्षसि द्रुह्यति * सदेवगन्धर्वमनुष्यपन्नगं जगत्सशैलं परिवर्तयाम्यहम् (रा. आ. ६४. ७६) इत्याह । अयं चाभिजायत इत्यत्रोपसर्गाभिप्रेतार्थः ; अभितो जायत इत्यर्थः । समित्येकीकारे, ततोऽत्र संमोहः कृत्याकृत्याविवेकात्मा मोह इत्यभिप्रायेणाह—कृत्येति । संमोहस्य स्मृतिभ्रंशहेतुत्वेऽवान्तरव्यापारमाह—तयेति । * क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि (रा. सु. ५५. ४) इत्याद्यनुसारेणोक्तम्—सर्वमिति । ततश्चेति । सावान्तरव्यापारात्संमोहादित्यर्थः । स्मर्तव्ये मस्तुतविषये स्मृतिभ्रंशं योजयति—प्रारब्धेति । स्मृतिभ्रंशादित्युत्तरवाक्यशेषबलात् स्मृतिविभ्रमशब्दस्य तदेकार्थत्वा-

योक्तम्-**स्मृतिभ्रंशो भवतीति** । बुद्धिनाश इत्यत्र प्रकृतं बुद्धेर्विशेषमाह—**आत्मेति** । न तावदिह सामान्यतो ज्ञानमात्रं बुद्धिशब्दार्थः, न चेतःपूर्वमात्मदर्शनं सिद्धम् ; न च भविष्यदात्मदर्शनादिकमिदानीं नाशयोग्यम् । अतस्तल्लिप्सया कृतस्तदुपायानुष्ठानाध्यवसाय इहोपायस्मृतिसाध्यो बुद्धिशब्देनोच्यत इति भावः । प्रणश्यतीत्यत्र नित्यस्यात्मनो नाशो ह्यसत्समत्वम् । तच्च यथावस्थिताकारानुपलम्भः । स च देहात्मभ्रमादिकृतः, तत्रापि हेतुर्देहसंबन्ध इत्यभिप्रायेणोक्तं—**संसारे निमग्न** इति ॥ ६२ ॥ ६३ ॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४

भा ॥ उक्तेन प्रकारेण मयि सर्वेश्वरे चेतसश्शुभाश्रयभूते न्यस्तमना निर्दग्धाशेषकल्मषतया रागद्वेषवियुक्तैरात्मवश्यैरिन्द्रियैर्विषयांश्चरन् विषयांस्तिरस्कृत्य वर्तमानो विधेयात्मा—विधेयमनाः प्रसादमधिगच्छति । निर्मलान्तःकरणो भवतीत्यर्थः ॥ ६४ ॥

ता ॥ अथ * तानि सर्वाणि (६१) इत्युक्तार्थकरणेऽन्योन्याश्रयपरिहारप्रकारः परमप्रयोजनभूतसंसारनिवृत्तिश्च श्लोकद्वयेन प्रपञ्च्यते—**रागद्वेषेति** । रागद्वेषवियोगोऽपि कुत इत्यत्र पूर्वोक्त एव हेतुरित्यभिप्रायेणाह—**उक्तेनेति** । रागद्वेषवियोगोऽत्रेन्द्रियाणामात्मवश्यताहेतुः । विषयांश्चरन्नित्यनेन विषयभोगभ्रमव्युदासायात्मवश्यत्वफलमाह—**विषयांस्तिरस्कृत्य वर्तमान** इति । चरतिरत्र गत्यर्थः, आक्रमणरूपगतिपरः, भक्षणार्थो वा, संहरणपर इत्युभयथाऽपि तत्तिरस्कारार्थत्वमत्र विवक्षितम् । तिरस्कारोऽत्रानादरः, तथा च नैघण्टुकाः—*अनादरः परिभवः परीभावस्तिरस्क्रिय (नाम. १. ना. २०४) इति । बाह्येन्द्रियतद्विषयविजयो हि मनोविजयार्थ इत्यभिप्रायेणाह—**विधेयमना** इति । * विधेयात्मेति मनसः प्रसक्तत्वात् * प्रसन्नचेतस इति वक्ष्यमाणत्वाच्च प्रसादो मनोनैर्मल्यमित्याह—**निर्मलेति** ॥ ६४ ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५

भा ॥ अस्य पुरुषस्य मनःप्रसादे सति प्रकृतिसंसर्गप्रयुक्तसर्वदुःखानां हानिरुपजायते । प्रसन्नचेतसः आत्मावलोकनविरोधिदोषरहितस्य मनसः तदानीमेव हि विविक्तात्मविषया बुद्धिः पर्यवतिष्ठते । अतो मनःप्रसादे सर्वदुःखानां हानिर्भवत्येव ॥ ६५ ॥

ता ॥ * प्रसादे इति श्लोके प्रसादहानिशब्दयोः क्रमात् षष्ठीद्वयान्वयभ्रमं व्युदस्यन्नन्वयप्रकारमाह—**अस्येति** । * दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चात्मनः (वि. ६. ७. २२) इत्याद्यभिप्रेतौपाधिकत्वेन हानियोग्यत्वार्थमाह—**प्रकृतीति** । प्रतिबन्धकाभावे ह्याशु कार्योत्पत्तिरित्यभिप्रायेण प्रसन्नचेतस इत्यस्यार्थमाह—**आत्मावलोकनविरोधिदोषरहितस्य [मनस]** इति । मनःप्रसादस्य सर्वदुःखहानिहेतुत्वमात्मदर्शनहेतुत्वादुपपद्यत इति हेत्वर्थस्य हिशब्दस्यार्थमाह—**अत** इति ॥ ६५ ॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६

भा ॥ मयि सम्यस्तमनोरहितस्य स्वयत्नेनेन्द्रियनियमने प्रवृत्तस्य कदाचिदपि विविक्तात्मविषया बुद्धिर्न सेत्स्यति। अत एव तस्य तद्भावना च न संभवति। विविक्तात्मानमभावयतो विषयस्पृहाशान्तिर्न भवति। अशान्तस्य—विषयस्पृहायुक्तस्य कुतो नित्यनिरतिशयसुखप्राप्तिः ॥ ६६ ॥

ता ॥ अथ पूर्वोक्तान्योन्याश्रयफलभूतामात्मदर्शनासिद्धिं * बुद्धिनाशात्प्रणश्यति (६३) इत्येतद्विवरणरूपेणानूद्य ततः परमप्रयोजनस्याप्यलाभप्रकार उच्यते—**नास्ती**ति। *युक्त आसीत मत्परः (६१) इति पूर्वोक्तस्य निवृत्तिरयुक्तशब्देनोच्यत इति तात्पर्येणाह—**मयी**ति। * यततो ह्यपीति (६०) पूर्वोक्तं स्मारयति—**स्वयत्नेने**ति। नास्तीत्यनेनाभिप्रेतमाह—**कदाचिदपीत्यादि**ना। अतिचिरकालप्रयासेनापीत्यर्थः। द्वितीयपादस्थमयुक्तस्येति पदं शृङ्खलौचित्यायायुक्तत्वफलभूतबुद्ध्यभावलक्षकमिति तात्पर्येणाह—**अत एवे**ति। यद्वा तस्येत्ययुक्तपरामर्शः, अत एवेति तु बुद्ध्यभावादेवेत्यर्थः। अथवा परम्परया हेतुत्वमभिप्रेत्यायुक्तत्वादेवेति विवक्षा; भिन्नविषयभावनान्तरनिषेधायोगात्तद्भावनेत्युक्तम्। * रसोऽप्यस्य परं दृष्ट्वा निवर्तते (५९) * रागद्वेषवियुक्तैः (६४) * सुखेषु विगतस्पृहः (५६) इत्याद्यानुगुण्येन शान्तिं विशिनष्टि—**विषयस्पृहाशान्ति**रिति। अशान्तस्यैव स्वर्गादिसुखलाभादमृतत्वप्रकरणसिद्धं सुखस्य विशेषमाह—**नित्यानिरतिशये**ति। अनेन श्लोकेन प्रत्याहारादियोगावयवचतुष्टयस्य तत्फलस्य निःश्रेयसस्य च यथासंभवमभिधातात्पर्याभ्यां पूर्वपूर्वाभावादुत्तरोत्तरस्यालाभस्सूचितो भवति ॥ ६६ ॥

भा ॥ पुनरप्युक्तेन प्रकारेणेन्द्रियनियमनमकुर्वतोऽनर्थमाह—

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७

भा ॥ इन्द्रियाणां विषयेषु चरतां वर्तमानानां वर्तनमनु यन्मनो विधीयते—पुरुषेणानुवर्त्यते तन्मनोऽस्य विविक्तात्मप्रवणां प्रज्ञां हरति—विषयप्रवणां करोतीत्यर्थः; यथाऽम्भसि नीयमानां नावं प्रतिकूलो वायुः प्रसह्य हरति ॥ ६७ ॥

ता ॥ अथेन्द्रियनिग्रहाभावे बुद्ध्यभावस्य पूर्वोक्तस्य प्रकारः * इन्द्रियाणाम् इत्यनन्तरश्लोकेनोच्यत इत्यपुनरुक्तिः; आदरार्थं वा पुनरुक्तिरित्यभिप्रायेणाह—**पुनरपी**ति। केवलस्पन्दादिमात्रव्युदासाय **विषयेष्वि**त्युक्तम्। इन्द्रियाणां सर्वेषां न विषयेषु संचारोऽस्ति, अतस्तदौन्मुख्यमर्थ इति व्यञ्जनाय * इन्द्रियाणीन्द्रियार्थेषु वर्तन्ते (गी. ५. ९) इति प्रयोगान्तरानुसारेण **वर्तमाना**मित्युक्तम्। यत्तच्छब्दयोर्मनोविषयत्वमेवोचितं, प्रज्ञाहरणे तस्यैव प्रधानत्वात्; मनसो बाह्येन्द्रियानुविधाने सर्वेन्द्रियसाधारण्येन वक्तव्ये यदिति निर्धारणस्य प्रयोजनाभावात् बाह्येन्द्रियस्य मनोनुविधाने प्रज्ञाहरणाभावाच्च। * यद्येकं क्षरतीन्द्रियम् (मनु. २. ९९) इति मनुवचने तु मनसोऽनुक्तत्वादिन्द्रियशब्दाभ्यासादेकशब्दबलाच्च निर्धारणार्थतैव। नच तत्तुल्यत्वमस्यापि वाक्यस्य निर्बन्धनीयमिति कृत्वा **वर्तनमनु यन्मन** इत्याद्युक्तम्। **विधीयते** इत्यस्य कर्त्रपेक्षां पूरयति—**पुरुषेणे**ति। स्वस्यैवायमविनय इति भावः। अनभिसंहितदेशप्रापणं हि दृष्टान्तेऽभिप्रेतमिति प्रदर्शयन् हरतेर्विनाशनार्थताभ्रमव्युदासाय चाह—**विषयप्रवणा**मिति। अम्भसीत्यस्य हरतिनाऽन्वयभ्रान्तिमपाकरोति—**अम्भसि नीयमाना**मिति। अनिष्टविषयप्रापणनिदर्शनत्वायोक्तं—**प्रतिकूल** इति ॥ ६७ ॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८

भा ॥ तस्मादुक्तेन प्रकारेण शुभाश्रये मयि निविष्टमनसो यस्येन्द्रियाणीन्द्रियार्थेभ्यः सर्वशो निगृहीतानि, तस्यैवात्मनि प्रज्ञा प्रतिष्ठिता भवति ॥ ६८ ॥

ता ॥ * यदा संहरते इत्याद्युपक्रान्त इन्द्रियनिग्रहोपदेश उपसंह्रियते—तस्मादिति श्लोकेन ॥ **तस्मा**दिति—इन्द्रियानुविधायिनो मनसः प्रज्ञाप्रतिष्ठाविरोधित्वादित्यर्थः । निग्रहहेतुं प्रागुक्तमनुकर्षति—**उक्तेने**त्यादिना ॥ ६८ ॥

भा ॥ एवं नियतेन्द्रियस्य प्रसन्नमनसस्सिद्धिमाह—

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९

भा ॥ या आत्मविषया बुद्धिः सर्वभूतानां निशा—निशेवाप्रकाशा, तस्यामात्मविषयायां बुद्धौ इन्द्रियसंयमी प्रसन्नमनाः जागर्ति—आत्मानमवलोकयन्नास्त इत्यर्थः । यस्यां—शब्दादिविषयायां बुद्धौ सर्वाणि भूतानि जाग्रति—प्रबुद्धानि भवन्ति ; सा शब्दादिविषया बुद्धिरात्मानं पश्यतो मुनेर्निशेवाप्रकाशा भवति ॥ ६९॥

ता ॥ एवमुपायमुपदिश्य फलमुपदिशतीत्याह—**एव**मिति । प्रागुक्तस्यैव फलस्य प्रशंसापरत्वादपुनरुक्तिः, अतो * या निशा इत्यादिभिः त्रिभिः श्लोकैः * प्रजहाति इत्यादिनोक्तावस्थाचतुष्टयसिद्धिः निगम्यते । * विहाय कामान्, * निःस्पृहः इत्युभाभ्यां यतमानव्यतिरेकसंज्ञयोरुपलक्षणम् । यद्वा श्लोकद्वयेनावस्थाचतुष्टयफलं, तृतीयेन त्ववस्थाचतुष्टयं निगम्यत इति विभागः । * या इति प्रसिद्धतया निर्देशोऽत्र प्रस्तुतप्रज्ञाविषयः, साक्षान्निशाया देशकालभेदेन विपरिवर्तमानायाः सर्वभूतसाधारण्याभावादिति तात्पर्येणाह—**या आत्मविषये**ति । उपचारनिमित्तं व्यनक्ति—**निशेवाप्रकाशे**ति । स्वप्रकाशाया अपि बुद्धेरप्रसृतदशायामप्रकाशत्वमुपपद्यते । इन्द्रियनिग्रहस्य प्रकृतत्वात्स एवात्र संयमिशब्दार्थ इत्यभिप्रायेणोक्तम्—**इन्द्रियसंयमी**ति । या पुनः * त्रयमेकत्र संयमः इति धारणाध्यानसमाधीनां समुच्चितानां संयमत्वेन **पातञ्जलपरिभाषा** (३. ४) साऽत्र न विवक्षितेति भावः । इन्द्रियसंयमस्य बुद्धिजनने अवान्तरव्यापारं पूर्वोक्तमाह—**प्रसन्नमना** इति । जागर्तीत्यत्र मुख्यार्थायोगादाह—**आत्मानमि**ति । बुद्धौ जागरणशब्दनिर्दिष्टं प्रबुद्धत्वं प्रकाशमानप्रसृतबुद्धिविशिष्टत्वमेव ; सा च सविषया प्रकाशत इति भावः । बुद्धिप्रकरणत्वाद्यस्यामिति निर्देशोऽपि बुद्धिविषयः ; सा च बुद्धिः भूतानीत्यसंयमिनिष्ठतया व्यपदेशादात्मदर्शिनो निशात्ववचनाच्च **शब्दादिविषये**त्युक्तम् । **सर्वभूताना**मित्यत्र समासनिमग्नोऽपि सर्वशब्दो भूतानीत्यत्रापि बुद्ध्या निष्कृष्यान्वेतव्य इति **सर्वाणी**त्युक्तम् । **पश्यत** इत्यत्र कर्माकाङ्क्षायाम् **आत्मान**मिति प्रकरणसिद्धमुक्तम् ॥ ६९ ॥

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ ७०

भा ॥ यथा स्वेनैवापूर्यमाणमेकरूपं समुद्रं नादेय्य आपः प्रविशन्ति, आसामपां प्रवेशेऽप्यप्रवेशे च समुद्रो न कञ्चन विशेषमापद्यते ; एवं सर्वे कामाः—शब्दादयो विषयाः यं संयमिनं प्रविशन्ति—इन्द्रियगोचरतां यान्ति, स शान्तिमाप्नोति—शब्दादिष्विन्द्रियगोचरतामापन्नेष्वनापन्नेषु च स्वात्मावलोकनतृप्त्यैव यो न विकारमाप्नोति, स एव शान्तिमाप्नोतीत्यर्थः । न कामकामी—यश्शब्दादिभिर्विक्रियते, स कदाचिदपि न शान्तिमाप्नोति ॥ ७० ॥

ता ॥ एवं शब्दाद्यदर्शनपर्यवसितात्मदर्शनमयी सिद्धिरुक्ता; एतस्या एव सिद्धेरर्वाचीनामदूरविप्रकृष्टां शब्दादिविषयदर्शनेऽप्यविकारतारूपामवस्थामाह—**आपूर्यमाण**मिति । अत्र प्रवेशाप्रवेशयोरविशेषोपलम्भस्य विवक्षितत्वात् **आपूर्यमाण**मिति न प्रविशन्तीभिर्नादेयीभिरद्भिरापूरणं विवक्षितम्, अपि तु दार्ष्टान्तिके विवक्षितायाः स्वात्मावलोकनतृप्तेः प्रतिनिर्देशः क्रियते इति दर्शयति—**स्वेनैवे**ति । अचलप्रतिष्ठशब्दोऽत्र सीमातिलङ्घनादिहेतुभूतवृद्धिह्रासराहित्यपर इत्याह—**एकरूप**मिति । नादेय्य इत्यनेन समुद्रप्रयत्ननिरपेक्षं स्वतस्समुद्रप्रावण्यं सूच्यते । दृष्टान्ते निर्मथितार्थमाह—**आसा**मिति । कामा इत्यत्र कर्मणि व्युत्पत्तिमभिप्रेत्याह—**शब्दादयो विषया** इति । अविकारतासिद्ध्यर्थं यच्छब्दस्य पूर्वोक्तसंयमित्वाभिप्रायतामाह—**यै संयमिन**मिति । रूपादिविषयाणां पुरुषे प्रवेशो नान्नपानादिवच्छरीरान्तःप्रवेशः । अतः तत्तदिन्द्रियद्वारा ज्ञानविषयत्वमेव विवक्षितमित्यभिप्रायेणाह—**इन्द्रिये**ति । यस्येति शेषः । तद्वदित्यनेन सिद्धमाह—**शब्दादिष्वि**ति । नित्यनिरवद्यनिरतिशयस्वात्मानुभवानन्दसन्दोहमग्नो नश्वरदुःखमिश्रसातिशयविषयानुभवानन्दबिन्दुषु न सज्जत इति भावः । * न कामकामी इत्येतत्पूर्वोक्तस्यार्थस्य व्यतिरेकेण दृढीकरणमिति व्यञ्जयति—**य** इति । विकारस्य प्रसक्तत्वात्कामित्वं स्वकार्यं विकारमप्यजहल्लक्षणया लक्षयतीति **विक्रियत** इत्युक्तम् । कामान्कामयितुं शीलं यस्य स कामकामी । **कदाचिदपी**ति—यावत्कामपरित्यागमित्यर्थः । एतेन, यो विक्रियते, स न शान्तिमाप्नोतीत्यनयोरैकार्थ्यशङ्का परिहृता । विषयदर्शने विक्रियमाणोऽन्यदाऽपि स्पृहारहितो न स्यादित्यर्थः ॥ ७० ॥

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ ७१

भा ॥ काम्यन्त इति कामाश्शब्दादयः । यः पुमान् शब्दादीन् सर्वान्विषयान् विहाय तत्र निस्स्पृहः तत्र ममतारहितश्च, अनात्मनि देहे आत्माभिमानरहितश्चरति ; स आत्मानं दृष्ट्वा शान्तिमधिगच्छति ॥ ७१ ॥

ता ॥ किं कामकामिनः सर्वदा शान्तिर्न स्यादिति शङ्कामपाकुर्वन्नदर्शनाविकारत्वावस्थयोः कारणभूतां विषयसंग्रहणस्पृहाममकारदेहात्मभ्रमाणां क्रमात्कार्यकारणभावनिबन्धनानुलोमप्रतिलोमान्वयव्यतिरेकद्वयानां निवृत्तिरूपामवस्थामाह—**विहाये**ति । पूर्वत्रात्र च श्लोके प्रयुक्तं कामशब्दं निर्वक्ति—**काम्यन्त** इति । **चरती**ति वर्तत इत्यर्थः । आत्मदर्शिपुरुषपर्वभेदविषयौ पूर्वश्लोकौ ; अयं त्वात्मदर्शनार्थिपुरुषविषय इति विवेकं द्योतयति—**आत्मानं दृष्ट्वे**ति । अनयोश्श्लोकयोर्विषयानुभवनिवृत्तिलक्षणा * सा निशा इति पूर्वश्लोकोक्त[ा]शान्तिरुक्ता ॥ ७१ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
साङ्ख्ययोगो नाम द्वितीयोऽध्यायः ॥

भा ॥ एषा नित्यात्मज्ञानपूर्विका असङ्गकर्मणि स्थितिः स्थितधीलक्षणा ब्राह्मी—ब्रह्मप्रापिका, ईदृशीं कर्मणि स्थितिं प्राप्य न विमुह्यति—पुनस्संसारं नाप्नोति, अस्यां स्थित्यामन्तिमेऽपि वयसि स्थित्वा ब्रह्मनिर्वाणमृच्छति—निर्वाणमयं ब्रह्म गच्छति, सुखैकतानमात्मानमवाप्नोतीत्यर्थः ॥ ७२ ॥

ता ॥ * एषा इति श्लोकेन परमप्रयोजनतया प्रकृतायास्संसारनिवृतिलक्षणशान्तेरुपसंहारः क्रियते ; यद्वा श्लोकत्रये शान्तिनिर्वाणशब्दाभ्यामेकमेव फलमुच्यते । * ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति (४. ३९) इत्यत्र परं निर्वाणमाप्नोतीति हि व्याख्यास्यति । * एषा ब्राह्मी इति श्लोकेनाध्यायार्थस्य निगमनं फलाव्यभिचारस्थापनं च । * एषा इति निर्देशस्य पूर्वोक्तनिखिलप्रकारपरामर्शित्वात्तं प्रकारमाह—**नित्ये**ति । स्थितधीर्लक्षं यस्यास्सा स्थितधीलक्षा—ज्ञानयोगाख्यस्थितप्रज्ञतासाधनभूतेत्यर्थः । ब्राह्मीत्यत्र तद्धितविवक्षितसंबन्धविशेषं दर्शयति—**ब्रह्मप्रापिके**ति । एनामित्यन्वादेशोऽपि सप्रकारपरामर्शीति व्यञ्जयति—**ईदृशी**मिति । मोहनिषेधफलितमाह—**पुन**रिति । अन्तकाल इत्युत्क्रान्तिकालभ्रमव्युदासायाह—**अन्तिमेऽपि वयसी**ति । * उत्तमे चेद्वयसि साधुवृत्तः (बो. सू.) इत्यादिवत् । एतेन बाल्यादिषु विषयप्रवणस्यापि पश्चान्निर्विण्णस्याधिकारस्सूचितः । किंपुनर्ब्रह्मचर्यादिकालमारभ्य स्थित इति च भावः । स्थित्यां स्थितिस्तत्संबन्धः । षष्ठीसमासभ्रमापाकरणायाह—**निर्वाणमयं ब्रह्मे**ति । निर्वाणब्रह्मशब्दयोरत्रार्वाचीनविषयतामाह—**सुखे**ति ॥

भा ॥ एवमात्मयाथात्म्यं युद्धाख्यस्य च कर्मणस्तत्प्राप्तिसाधनतामजानतश्शरीरात्मज्ञानेन मोहितस्य तेन च मोहेन युद्धान्निवृत्तस्य मोहशान्तये नित्यात्मविषया साङ्ख्यबुद्धिः, तत्पूर्विका च असङ्गकर्मानुष्ठानरूपकर्मयोगविषया बुद्धिः स्थितप्रज्ञतायोगसाधनभूता द्वितीयेऽध्याये प्रोक्ता ; तदुक्तं * नित्यात्मासङ्गकर्मेहागोचरा साङ्ख्ययोगधीः । द्वितीये स्थितधीलक्षा प्रोक्ता तन्मोहशान्तये ॥ (सं. ६) इति ॥

ता ॥ ननु नित्यात्मज्ञानतत्साक्षात्कारयोरपि प्रकृतत्वात्कर्मनिष्ठामात्रनिगमनपरोऽयं श्लोक इत्ययुक्तमिति शङ्कायां प्रधानभूततदनुबन्धेनान्यकथनमिति दर्शयन्नुत्तराध्यायचतुष्टयसङ्गतिं वक्तुमुक्तमर्थं च सङ्कलय्य वदन् * नित्यात्मेत्यादिकं द्वितीयाध्यायार्थसंग्रहश्लोकमपि व्याख्याति—**एव**मिति । मोहस्य हेतुस्वरूपकार्याणि विशदयति—**आत्मे**त्यादिना **निवृत्तस्ये**त्यन्तेन । व्याख्यानव्याख्येयात्मना संग्रहश्लोकस्थसमासान्तर्गतपद[द्वन्द्व]द्वयस्य यथासङ्ख्यं संबन्धं व्यनक्ति—**नित्यात्मे**त्यादिना । **साङ्ख्यबुद्धिरि**ति । कर्मयोगात्प्राक् *एषा तेऽभिहिता साङ्ख्ये बुद्धिः (३९) इत्युक्तमात्मतत्त्वज्ञानमुच्यते ; तव्यक्त्यर्थं हि **नित्यात्मविषये**त्युक्तम् । ज्ञानयोगस्तु कर्मयोगसाध्यतयाऽनन्तरं पृथगेवोपादीयते । **स्थितधीलक्षे**ति । अत्र स्थितधीशब्दो भावप्रधानः ; तल्लक्षत्वं च तत्साधनत्वम् । **स्थितप्रज्ञतायोगे**त्यत्र स्थितप्रज्ञताशब्दो योगशब्देन सह विशेषणविशेष्यभावेन द्वन्द्वेन वाऽत्र समस्यते ; योगाख्यं फलमित्यपि पूर्वं पृथगुक्तेः । सांप्रदायिकत्वायाह—**तदुक्त**मिति ॥

॥ इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां द्वितीयोऽध्यायः ॥ २ ॥

॥ अथ तृतीयोऽध्यायः ॥ ३ ॥

भा॥ तदेवं मुमुक्षुभिः प्राप्यतया वेदान्तोदितनिरस्तनिखिलाविद्यादिदोषगन्धानवधिकातिशयासंख्येयकल्याणगुणगणपरब्रह्मपुरुषोत्तमप्राप्त्युपायभूतवेदनोपासनध्यानादिशब्दवाच्यां तदैकान्तिकात्यन्तिकभक्तिं वक्तुं तदङ्गभूतं * य आत्माऽपहतपाप्मा (छा. ८. ७. १) इत्यादिप्रजापतिवाक्योदितं प्राप्तुरात्मनो याथात्म्यदर्शनं तन्नित्यताज्ञानपूर्वकासङ्ककर्मनिष्पाद्यज्ञानयोगसाध्यमुक्तम्। प्रजापतिवाक्ये हि दहरवाक्योदितपरविद्याशेषतया प्राप्तुरात्मनस्स्वरूपदर्शनं * यस्तमात्मानमनुविद्य विजानाति (छा. ८. ७. १) इत्युक्त्वा जागरितस्वप्नसुषुप्त्यतीतं प्रत्यगात्मस्वरूपमशरीरं प्रतिपाद्य * एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८. १२. २) इति दहरविद्याफलेनोपसंहृतम्। अन्यत्रापि * अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति (क.२.१२) इत्येवमादिषु देवं मत्वेति विधीयमानपरविद्याङ्गतया अध्यात्मयोगाधिगमेनेति प्रत्यगात्मज्ञानमपि विधाय * न जायते म्रियते वा विपश्चित् (१८) इत्यादिना प्रत्यगात्मस्वरूपं विशोध्य * अणोरणीयान् इत्यारभ्य (२०) * महान्तं विभुमात्मानं मत्वा धीरो न शोचति (२२) * नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥ (२३) इत्यादिभिः परस्वरूपं तदुपासनमुपासनस्य च भक्तिरूपतां प्रतिपाद्य * विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥ (३. ९) इति परविद्याफलेनोपसंहृतम्। अतःपरमध्यायचतुष्टयेनेदमेव प्राप्तुः प्रत्यगात्मनो दर्शनं ससाधनं प्रप[ञ्च्यते]श्चयति—

ता ॥ अथ सङ्गतिं विवक्षुस्साक्षान्मोक्षोपायं वक्ष्यमाणं तत्स्वरूपं तत्प्राप्यं च दर्शयन् द्वितीयाध्यायोक्त[स्य]ार्थस्य साक्षान्मोक्षोपायत्वाभावेनापवर्गप्रधाने शास्त्रे सङ्गत्यभावाशङ्कां परिहर्तुमितिकर्तव्यतात्वं प्रथयति—**तदेव**मिति। तत्—शङ्कारायुक्तप्रकारनिराकरणेन यथावत् द्वितीयाध्यायनिर्वाहादित्यर्थः। **एव**मिति स्वोक्तौचित्यं निर्दिशति। * ब्रह्मविदाप्नोति परम् (आ.१) * परं ज्योतिरुपसंपद्य (छा.८.३.४) * परात्परं पुरुषमुपैति (मु.३.२.८) * रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति (आ. ७) * परमं साम्यमुपैति (मु.३.१.३) इत्यादिश्रुतिशतं * कर्मकर्तृव्यपदेशाच्च (ब्र.१.२.४) इत्यादिसूत्रगणं चाभिप्रेत्योक्तम्—**मुमुक्षुभिः प्राप्यतये**ति। मुमुक्षुभिरिति बहुवचनेन सर्वब्रह्मविद्यानिष्ठानां प्राप्यमेकमिति द्योतयति। उपबृंहणीयानुरोधेन तदुपबृंहणार्थवर्णनाय **वेदान्तोदिते**त्युक्तम्। प्राप्यत्वोपयुक्तं प्रकृतिपुरुषवैलक्षण्यं सगुणनिर्गुणादिश्रुतिविषयव्यवस्थाम्, * आनन्दादयः प्रधानस्य (ब्र. ३. ३. ११) * अक्षरधियां त्ववरोधः (ब्र. ३. ३. ३३) इत्यादिसूत्रोक्तं सर्वविद्योपास्यसाधारणाकारं चाभिप्रेत्य **निरस्ते**त्यादिकमुक्तम्। कारणशोधकवाक्यैकार्थ्यं सामान्यशब्दानां विशेषोपसंहारम्, तत एव त्रिमूर्त्यैक्यसाम्यातिरेकव्यवच्छेदान्तरत्वनिरासम्, एकस्यैव जगदुपादाननिमित्तत्वम्, उदाहरिष्यमाणश्रुतौ * स उत्तमः पुरुषः (छा. ८.१२.३) इत्युक्तिम्, * उत्तमः पुरुषस्त्वन्यः (१५. १७) इति वक्ष्यमाणप्रकरणार्थं च दर्शयितुं समास्याद्वयमाह—**परब्रह्मपुरुषोत्तमे**ति। ज्ञानकर्मसमुच्चयान्यतरानुगृहीतान्यतरैकैकमात्रपक्षाणां निराकरणाय * नान्यः पन्थाः (पु.) * नायमात्मा (क. १. २. २३) इत्यादिनिषेधतात्पर्यं वेदनादिसामान्यशब्दानां भक्तिलक्षणचरमविशेषे पर्यवसानं चाभिप्रेत्योक्तम्—**उपायभूते**त्यादि। **तदैकान्तिके**त्यत्र तत्कर्तुन्यायसिद्धोपास्यप्राप्यैक्यद्योतनाय तच्छब्दः। एकत्रान्तो निश्चय एकान्तः; तन्निबन्धना भक्तिरैकान्तिकी। ऐकान्तिकत्वं नाम देवतान्तरफलान्तरपरित्यागेन

प्राप्यप्रापकभूतैकनिष्ठत्वम् । उक्तं च **मोक्षधर्मे**—*ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ॥ (३४२. ३६) इत्यादि । स्मरन्ति च—*परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि (बा. स्मृ.) इति । वक्ष्यति चात्रैव *भक्त्या त्वनन्यया (११.५४) *मयि चानन्ययोगेन भक्तिरव्यभिचारिणी (१३.१०) इत्यादि । विनाशाभावोऽत्यन्तशब्देन विवक्षितः । ततोऽत्र फलदशायामप्यनिवर्त्यत्वमात्यन्तिकत्वम् । एकैव भक्तिर्बहुल-बहुलतरबहुलतमादिभावेनोपायदशामारभ्य फलदशापर्यन्तं प्रचीयमाना निरतिशयतामापद्यते । तद्यथा शारीरकेऽपीति-कर्तव्यताचिन्तनात्परस्ताद्भक्तिरङ्गिनो स्वरूपतो विशोधिता, तद्वदत्रापीत्यभिप्रायेणाह—**भक्तिं वक्तुं तदङ्गभूत**मित्यादि । अङ्गतायां प्रमाणमाह—**य आत्मे**ति । **प्राप्तु**रिति परव्यावृत्त्यर्थम् । आत्मदर्शनस्य परविद्याङ्गतायां प्रमाणं प्रपञ्चयति—**प्रजापती**ति । फलवत्सन्निधावफलं तदङ्गम् । तत्र सन्निधिस्तावदुच्यते—**दहरे**ति । प्रत्यगात्मविषयत्वव्यक्त्यर्थं तत्प्र-करणोदितप्रत्यगात्मपरिशोधनप्रकारमाह—**जागरिते**ति । प्रजापतिर्हि क्रमाज्जागरिताद्यवस्थात्रयविशिष्टं प्रत्यगात्मानमुपदि-देश । इन्द्रस्तु *नाहमत्र भोग्यं पश्यामि (छा. ८. ९. २) इति तत्रतत्र विमुखः पुनःपुनः पप्रच्छ ; ततः शुश्रूषोर्यो-ग्यतां विज्ञाय प्रजापतिः *अशरीरं वाव सन्तम् (छा. ८. १२. १) इति परिशुद्धं स्वरूपमुक्तवान् । अत्राङ्गत्वसिद्ध्यर्थं दहरविद्यातः पृथक्फलाभावं तदेकफलत्वं चाह—**एवमेवे**ति । एतदुक्तं भवति—प्रजापतिवाक्यं हि दहरविद्याप्रकरणगतम् । नच प्रजापतिवाक्योदितप्रत्यगात्मदर्शनस्य निःश्रेयसातिरिक्तं फलमुक्तम् ; न च केवलं प्रत्यगात्मदर्शनं निःश्रेयससाधनम्, *नान्यः पन्थाः (पु.) इत्यादिविरोधात्, तत्कतुन्यायाच्च । नचात्र जीवप्राप्तिरेव फलमुच्यते, *परं ज्योतिः इति विशे-षणात् (ना.) *नारायण परो ज्योतिः (पु) इत्यादिना च परज्योतिश्शब्दस्य परमात्मविषयत्वप्रसिद्धेः, दहरविद्यायां पूर्व-त्रापि तस्यैव परंज्योतिश्शब्देनोक्तेः, उपसंपत्तुरुपसंपत्तव्याद्भेदस्य च स्वरससिद्धेः, प्राप्तुरात्मनः तत्र परब्रह्मसाम्यापन्न-पुरुषलभ्यनिरतिशयस्वच्छन्दभोगनिर्दुःखताद्यभिधानाच्च । अतः प्रधानफलस्यैवात्र तदङ्गेऽपि निर्देशात्परविद्याङ्गं प्रत्यगात्म-दर्शनम्—इति । अथ *न जायते म्रियते इत्यादिभिः कतिपयपदावापोद्वापभेदितैः श्लोकैः प्रत्यभिज्ञातार्थतया भगवद्गीता-प्रबन्धसमानाकारां भक्तिशब्दकण्ठोक्तिमतीं कठवल्लीमुपनिषदमुक्तस्यार्थस्य निर्विशङ्कं विशदीकरणायोदाहरति—**अन्यत्रा-पी**ति । साङ्गसफलप्रधानविधिवाक्ये प्रधानांशमङ्गांशं च विभजते—**देवं मत्वे**ति । *अध्यात्मयोगाधिगमेनेत्यत्र साक्षा-त्परविषययोगपरत्वे मत्वेत्यस्य साध्यत्वायोगात्, शास्त्रजन्यज्ञाने योगशब्दस्यावाचकत्वात्, मत्वेत्यत्र शास्त्रेणेत्यध्याहृत्य व्युत्क्रमान्वयानौचित्याज्जीवस्यापि परवत्तत्रैव वि[वरि]चारयिष्यमाणत्वाच्च जीवालम्बनयोगपरत्वं युक्तम् । अङ्गतया विहितस्य ज्ञानस्य ज्ञेयैकनिरूपणीयस्वरूपस्यापेक्षितज्ञेयस्वरूपशोधनोपदेशमाह—**न जायत** इति । एवं प्रथमषट्कोपबृंहणीयांश उक्तः । यथा संगृहीतं—*ज्ञानकर्मात्मिके निष्ठे योगलक्ष्ये सुसंस्कृते । आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केन चोदिते ॥ (गीसं.२) इति । अथ द्वितीयतृतीयषट्कोपबृंहणीयांशमुदाहरति—**अणोरणीयानि**त्यादिना । इदमपि संगृहीतम्—*मध्यमे भगवत्तत्त्वयाथात्म्यावाप्तिसिद्धये । ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः ॥ प्रधानपुरुषव्यक्तसर्वेश्वरविवेचनम् । कर्मधीर्भक्तिरित्यादिः पूर्वशेषोऽन्तिमोदितः ॥ (३, ४) इति । अणोरणीयानित्यादेरर्थमाह—**परस्वरूपमि**ति । महान्तं विभुमित्याद्युक्तमाह—**तदुपासन**मिति । नायमात्मेत्यस्याभिप्रेतमाह—**उपासनस्य चे**ति । केवलमनन[निदिध्यासन]ध्यान-श्रवणनिषेधमुखेन भक्त्यारूयवरणीयताहेतुगुणविशेषविधिपरमिदं वाक्यमिति **शारीरकभाष्यादिषु** विशदं व्याख्यातम् । ***मत्वा धीरो हर्षशोकौ जहाति (क.१.२.१२) *मत्वा धीरो न शोचति (क.१.२.२२) इत्युक्तस्यैव परविद्याफलस्योप-**

संहारेऽपि विशदोपदेशं प्रत्यगात्मज्ञान[स्य]स्यैतदेकफलत्वप्रदर्शनायाह—**विज्ञाने**ति । एवमुपक्रमोपसंहारादिभिः परविद्यामयेऽस्मिन् प्रकरणे [तु] * अध्यात्मयोगाधिगमेन देवं मत्वा (क. १. २. १२) इति परमात्मज्ञानकारणतया निर्दिष्टं पृथक्फलरहितं च प्रत्यगात्मज्ञानं परविद्याङ्गतया सिद्धमिति तदुपबृंहणतया प्रतीयमानेऽस्मिन्नपि प्रकरणे तथात्वमध्यवसातव्यमित्युक्तं भवति । एवं सङ्क्षेपोक्तिपर्यवसाने प्रतिपत्तिसौकर्याय कुमतिमतभङ्गाय चात्मज्ञानस्य वक्ष्यमाणपरविद्याङ्गतामुपपाद्योक्तविस्तररूपस्य प्रथमषट्कशेषस्योक्तांशेन सङ्गतिमाह—**अतः पर**मिति । एकस्मिन्नेव षट्के संग्रहविस्तररूपेण पेटिकाभेदप्रवृत्तिः । इदमेवेत्यवधारणेनास्मिन्नध्यायचतुष्टये परमात्मप्रसङ्गतद्ध्यानादेः * युक्त आसीत मत्परः (२.६१) इति पूर्ववदेवात्मदर्शनशेषत्वमवगमयति । पुनरुक्तिपरिहाराय **प्रपञ्चयती**त्युक्तम् । सप्रयोजनत्वाय प्रपञ्चनप्रकारमाह—**ससाधन**मिति ॥

अर्जुन उवाच—

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन । तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १
व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे । तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २

भा । यदि कर्मणो बुद्धिरेव ज्यायसीति ते मता, किमर्थं तर्हि घोरे कर्मणि मां नियोजयसि । एतदुक्तं भवति—ज्ञाननिष्ठैवात्मावलोकनसाधनम्; कर्मनिष्ठा तु तस्याः निष्पादिका; आत्मावलोकनसाधनभूता च ज्ञाननिष्ठा सकलेन्द्रियमनसां शब्दादिविषयव्यापारोपरतिनिष्पाद्येत्यभिहिता । इन्द्रियव्यापारोपरतिनिष्पाद्यमात्मावलोकनं चेत्सिषाधयिषितं, सकलकर्मनिवृत्तिपूर्वकज्ञाननिष्ठायामेवाहं नियोजयितव्यः । किमर्थं घोरे कर्मणि सर्वेन्द्रियव्यापाररूपे आत्मावलोकनविरोधिनि कर्मणि मां नियोजयसीति । अतो मिश्रवाक्येन मां मोहयसीव प्रतिभाति । तथा ह्यात्मावलोकनसाधनभूतायास्सर्वेन्द्रियव्यापारोपरतिरूपायाः ज्ञाननिष्ठायास्तद्विपर्ययरूपं कर्म साधनं तदेव कुर्विति वाक्यं विरुद्धं व्यामिश्रमेव; तस्मादेकममिश्ररूपं वाक्यं वद; येन वाक्येनाहमनुष्ठेयरूपं निश्चित्य श्रेयः प्राप्नुयाम् ॥ १ ॥ २ ॥

ता ॥ अत्रार्जुनः प्रागेव समस्तव्यापारविरतिवासनायन्त्रितः कर्मयोगज्ञानयोगाख्यप्रवृत्तिनिवृत्त्यात्मकसाधनोपदेशे निवृत्त्युपदेशांशरसिकश्चोद्यमुखेन पृच्छति—**ज्यायसी**ति । प्रथमश्लोकस्यान्वयं तावदाह—**यदी**ति । कर्मणो बुद्धिर्ज्यायसीति कुत्रोपदिष्टम्? * दूरेण ह्यवरं कर्म बुद्धियोगात् (२. ४९) इत्यादि तु बुद्धिविशेषविशिष्टकर्मयोगपरमिति व्याख्यातम् । ज्यायस्त्वं च किंरूपमिहाभिमतम्? बुद्धेर्ज्यायस्त्वे च कर्मणि यथाधिकारं नि[यम]योगस्य को दोषः? घोरशब्दश्च भयङ्करपर्यायः । नच कर्मयोगो भयङ्करः । किंशब्दश्चात्र प्रश्नपरो वा प्रतिक्षेपपरो वा? इत्यादिकमाशङ्क्याह—**एतदुक्त**मिति । तत्र बुद्धेर्ज्यायस्त्वप्रकारं पूर्वं तदुक्तिप्रकारं चाह—**ज्ञाननिष्ठे**वेति । स्थितप्रज्ञताप्रकरणे कर्मणो ज्ञाननिष्ठाहेतुत्वमुक्तम्; ज्ञाननिष्ठाया एव चात्मावलोकनहेतुत्वम् । ततश्च अव्यवधानाद्बुद्धिर्ज्यायसीति यथाधिकारं नियोगानर्हत्वाय ज्ञाननिष्ठानिष्पादनस्य कर्मप्रत्यनीकरूपत्वमुक्तं प्रकटयति—**आत्मे**ति । * यदा संहरते (५८) इत्याद्युक्तं स्मारयति—**सकलेन्द्रिये**त्यादिना । किंशब्दस्य प्रतिक्षेपपरत्वं ज्यायसीचेदित्यत्र चेच्छब्दस्य निश्चितविषयत्वं चाभिप्रेत्य फलितमाह—**इन्द्रिय**व्यापारेति । सकलकर्मेत्यसङ्कल्पकर्मसंग्रहणपरम् । **किमर्थ**मिति । न तावत् स्वप्रयोजनार्थम्, परिपूर्णत्वात् । नच सांसारिकफलप्रदानार्थम्, जनार्दनस्य जनिनिरासकस्य तव तन्निवर्तनस्वाभाव्यात् । नापि भूभारभूतधार्तराष्ट्रादिवधनिमित्तीकृत-

मद्विप्रलम्भार्थम्, प्रपन्नं मां प्रति केशवस्य ब्रह्मरुद्रादिपितुस्ते तदनौचित्यात्। नापि फलशैघ्र्यार्थम्, पारम्पर्यस्य पूर्वमुपदिष्टत्वात्। नच सौकर्यार्थम्, अकरणनिमित्तप्रत्यवायपरिहारार्थं वा, सकलेन्द्रियव्यापाररूपत्वेन तदुपरतिनिष्पाद्यात्मावलोकनविरोधितया मुमुक्षोर्घोरत्वात्। न च लोकसंग्रहार्थम्, लोकस्यापि यथावस्थिताकारोपदेशस्यैवोचितत्वात्। अतो भवतः प्राणसमतया भवतैवोद्वोषितं मां भवदनभिमते कर्मणि न नियोजयितुमर्हसीति भावः। घोरशब्दस्यात्र शास्त्रीयप्राणिपीडनपरत्वायोगात्प्रकृतोपयुक्तमभिप्रे[त्या]तमाह—**सर्वेन्द्रियव्यापाररूप** इति। अथापि कथं घोरत्वमित्यत्राह—**आत्मावलोकनविरोधिनी**ति। उक्तमर्थं हेतूकुर्वन् द्वितीयश्लोकार्थमाह—**अत** इति। अचेतनाया बुद्धेर्मोहनस्यौपचारिकत्वान्मामित्युक्तम्। इवशब्दद्योतितमाह—**प्रतिभाती**ति। एतेन कारुणिकत्वात् त्वं तावन्न मोहयसि, अहं तु मन्दो मुह्यामीत्युक्तं भवति। व्यामिश्रशब्दाभिप्रेतं व्याघातं तत्प्रकारं चोपपादयति—**तथाही**ति। तद्विपर्ययरूपं कर्म तस्याः कथं साधनम्, तद्विरुद्धं च कथं तदर्थिना कर्तव्यमिति व्याहतिद्वयमिहाभिप्रेतम्। **एक**मित्येतन्न ज्ञानकर्मणोरन्यतरविषयम्, तयोरेकस्यैव कर्मण उपदिष्टत्वात्। तत्र च स्वस्यानुपपन्नताप्रतिभासे तथा भ्रमनिवृत्तेश्चानन्तरमपेक्षणीयत्वात्तस्याश्च व्यामिश्रत्वनिवृत्तिसाध्यत्वाद्वाक्यशब्दस्य चैतच्छ्लोकगतस्य विशेष्यसमर्पकत्वौचित्यादित्यभिप्रेत्योक्तम्—**अमिश्ररूपं वाक्य**मिति। पूर्वेणान्वयभ्रमव्युदासाय निश्चित्येत्यादेरर्थमाह—**येने**ति। निश्चित्येत्यस्य न तावद्वदेत्यनेनान्वयः, सर्वज्ञस्य तस्य प्रागप्यनिश्चययायोगात्, व्यामिश्रवाक्येनापि परव्यामोहनमात्रस्य शङ्कितत्वात्। अतोऽर्जुनस्यैव निश्चयाकाङ्क्षा; ततश्च निश्चित्य श्रेयः प्राप्नुयामित्येवान्वयः। निश्चयसापेक्षं संदिग्धविषयमाह—**अनुष्ठेयरूप**मिति ॥ १ ॥ २ ॥

श्रीभगवानुवाच—

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥ ३

भा ॥ पूर्वोक्तं न सम्यगवधृतं त्वया। पुरा ह्यस्मिन् लोके विचित्राधिकारिपूर्णे, द्विविधा निष्ठा ज्ञानकर्मविषया यथाधिकारमसङ्कीर्णैव मयोक्ता। न हि सर्वो लौकिकः पुरुषस्संजातमोक्षाभिलाषस्तदानीमेव ज्ञानयोगाधिकारे प्रभवति,अपि त्वनभिसंहितफलेन केवलपरमपुरुषाराधनवेषेणानुष्ठितेन कर्मणा विध्वस्तस्वान्तमलः, अव्याकुलेन्द्रियो ज्ञाननिष्ठायामधिकरोति। * यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ (१८. ४६) इति परमपुरुषाराधनैकवेषता कर्मणां वक्ष्यते। इहापि * कर्मण्येवाधिकारस्ते (२. ४७) इत्यादिना अनभिसंहितफलं कर्मानुष्ठेयं विधाय तेन विषयव्याकुलतारूपमोहादुत्तीर्णबुद्धेः * प्रजहाति यदा कामान् (२. ५५) इत्यादिना ज्ञानयोग उदितः। अतस्साङ्ख्यानामेव ज्ञानयोगेन स्थितिरुक्ता। योगिनां तु कर्मयोगेन। सङ्ख्या बुद्धिः, तद्युक्तास्साङ्ख्याः—आत्मैकविषयया बुद्ध्या संबन्धिनस्साङ्ख्याः; अतदर्हाः कर्मयोगाधिकारिणो योगिनः। विषयव्याकुलबुद्धियुक्तानां कर्मयोगेऽधिकारः; अव्याकुलबुद्धीनां तु ज्ञानयोगेऽधिकार उक्त इति न किंचिदिह विरुद्धं व्यामिश्रमभिहितम् ॥ ३ ॥

ता ॥ एवमसङ्कीर्णरूपे वाक्ये बुभुत्सिते पूर्वोक्तस्यैवासङ्कीर्णरूपतां प्रकटयन् श्रीभगवानुवाच—**लोकेऽस्मिन्निति**। **मया प्रोक्तेति** निर्देशात्काका च फलितमाह—**पूर्वोक्तमिति**। * अस्मिन् लोके इत्यस्य प्रकृतोपयोगितात्पर्यमाह—**विचित्राधिकारिपूर्णे** इति। तेन ज्ञानयोगकर्मयोगयोरधिकारिभेदसंभवः, परस्परविरुद्धानामपि धर्माणां प्रतिनियताधिकारिविषयत्वव्यवस्थापकवर्णाश्रमदेशकालकामनानिमित्तादिदृष्टान्तश्च सूचितः। अनघशब्देनाप्येतदेवाभिप्रेतम्। यथाऽस्मिन्

लोकेऽनघतया त्वमपवर्गसाधनेऽधिकरोषि, इतरे तु काम्यादौ, तद्वदनघमात्रस्य कर्मयोगेऽधिकारः, अनघतराणां तु ज्ञानयोग इति संसारदाहज्वरचिकित्सकस्य सर्वज्ञस्य भिषजस्तत्तदवस्थोचितोऽयमुपदेशः। प्रोक्तेत्यस्य सोपसर्गस्याभिप्रेतमाह—**यथाधिकार**मिति। अधिकारानतिलङ्घनमत्र प्रकर्षः। द्वैविध्यमात्रस्य ज्ञातत्वात्तदुक्त्यभिप्रेतमाह—**असङ्कीर्णे**ति। **मये**ति। तत्तदधिकारभेदवेदिना तत्तद्धितकामेनास्पृष्टभ्रमविप्रलम्भप्रमादाशक्तिगन्धेनेत्यर्थः। ज्यायसि ज्ञानयोगे तिष्ठति कर्मयोगः कथमाद्रियेतेत्यत्राह—**न** हीति। मोक्षाभिलाषे जातेऽपि जन्मान्तरशतसुचरितमृदितक[षाया]ल्मषाणां केषाञ्चिदेव तदानीमेव ज्ञानयोगाधिकारः, तथा दर्शनात्; ततश्शक्ताशक्तविषयतया ज्ञानकर्मयोगयोर्व्यवस्थेति भावः। नन्वशक्तानां कदाचिदपि ज्ञानयोगाधिकारो न स्यात्, तच्छक्तिहेतुतयोक्तस्य कर्मयोगानुष्ठानस्य तत्प्रातिकूल्यचोद्यस्थितेरित्यत्राह—**अनभिसंहिते**ति। सर्वज्ञत्वसर्वशक्तित्वकारुण्यादिविशिष्टभगवदनुग्रहरूपादृष्टद्वारा ज्ञानहेतुत्वाय परमपुरुषाराधनरूपतोक्तिः। व्याकुलेन्द्रियत्वं हि ज्ञाननिष्ठाविरोधि, तच्च स्वान्तमलमूलम्, तदप्यनादिपुण्यपापरूपदुष्कर्ममूलरजस्तमोमयम्; तच्च सत्त्वोन्मेषहेतुभूतैर्वंविधकर्मनिर्हरणीयम्; अतो ज्ञाननिष्ठाहेतुभूतशान्तिहेतुत्वात्तदनुकूल एव कर्मयोग इत्युक्तं भवति। * धर्मेण पापमपनुदति (ना. ५०) इत्यादिकमिहाभिप्रेतम्, अनभिसंहितफलत्वं पूर्वमेवोक्तमिति कृत्वा केवलपरमपुरुषाराधनवेषतायां कर्मणैव सिद्धिप्राप्तौ च वक्ष्यमाणं दर्शयति—**यत** इति। प्रोक्तशब्दनिर्दिष्टमव्यामिश्राभिधानमभिसंहितफलत्वोक्तिं च व्यनक्ति—**इहापी**ति। * यदा ते मोहकलिलं (२.५२) * श्रुतिविप्रतिपन्ना ते (५३) इत्याद्यर्थं स्मारयति—**विषये**ति। आभिप्रायिकमवधारणं व्यञ्जयन्नुत्तरार्धं व्याचष्टे—**अतस्साङ्ख्यानामे**वेति। साङ्ख्यशब्दस्यात्र सिद्धान्तविशेषनिष्ठपरत्वं व्युदस्यति—**सङ्ख्या बुद्धि**रित्यादिना। अतदर्हा इत्यशक्तिविषयत्वं सूचितम्। **कर्मयोगाधिकारिण** इति। योगिशब्दस्थो योगो ह्यत्र कर्मयोगः; प्रत्ययार्थस्संबन्धश्चात्र तद्योग्यतारूप इत्यर्थः। अतदर्हत्वं तदर्हत्वं च विशदयन्विरोधशङ्कापरिहारस्य फलितत्वेनाव्यामिश्राभिधानमुपसंहरति—**विषये**ति॥ ३॥

भा॥ सर्वस्य लौकिकस्य पुरुषस्य मोक्षेच्छायां जातायां सहसैव ज्ञानयोगो दुष्कर इत्याह—

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति॥ ४

भा॥ न शास्त्रीयाणां कर्मणामनारम्भादेव, पुरुषो नैष्कर्म्यं—ज्ञाननिष्ठां प्राप्नोति। न चारब्धस्य शास्त्रीयस्य त्यागात्; यतोऽनभिसंहितफलस्य परमपुरुषाराधनवेषस्य कर्मणस्सिद्धिस्सा; अतस्तेन विना तां न प्राप्नोति। अनभिसंहितफलैः कर्मभिरनाराधितगोविन्दैरविनष्टानादिकालप्रवृत्तानन्तपापसञ्चयैरव्याकुलेन्द्रियतापूर्विकाऽऽत्मनिष्ठा दुस्संपादा॥ ४॥

ता॥ ननु मोक्षेच्छैव हि कर्मयोगेऽपि पुरुषं प्रवर्तयति; सा यदि जाता, ततः किमव्यवहिते ज्ञानयोगे न प्रवर्तयतीति शङ्का * न कर्मणाम् इति श्लोकेन निराक्रियत इत्याह—**सर्वस्ये**ति। लौकिकस्येत्यनेन संसारलोकान्तर्गततया विषयव्याकुलेन्द्रियत्वमभिप्रेतम्। **सहसैवे**ति। कर्मयोगमकृत्वेत्यर्थः। निषेधस्यान्यविषयत्वज्ञापनाय शास्त्रीयशब्दः। नैष्कर्म्यशब्दस्याननुष्ठानादिपरत्वे साध्याविशेषादिदोषस्स्यात्, अतो निष्कर्मा निष्क्रान्तकर्मयोगः पर्यवसितकर्मयोगः ज्ञाननिष्ठ इत्यर्थः; तस्य भावो नैष्कर्म्यमित्यभिप्रायेणाह—**ज्ञाननिष्ठा**मिति। संन्यसनशब्दस्याप्यत्र कर्मणामित्यनेनैवान्वयं संन्यसनस्वभावादारब्धविषयत्वं तत एव सव्यसाचिनः समरजिहासावृत्तान्तं चाभिप्रेत्याह—**न चारब्धस्ये**ति। नैष्कर्म्यशब्दानुषङ्गेऽपि संभवति पुनस्सिद्धिशब्देनाभिधानस्य तात्पर्यं व्यञ्जयति—**यत** इति। अनारम्भं संन्यसनं च सङ्गलय्याह—

अतस्तेन विनेति । कारणभूतकर्माभावे **कथं कार्यं** स्यादिति भावः । पञ्चम्या हेतुपरत्वं निषेधान्वयेन [तत्तन्नि]षेध्यान्वयेन वा योज्यम् । पूर्वत्र कर्मयोगानारम्भे ज्ञानयोगासिद्धिस्स्यादिति वाक्यार्थः ; उत्तरत्र तु यत्कर्मयोगत्यागादेव ज्ञानयोगसिद्धिरित्यभिप्रेतम्, तदयुक्तम्, सा हि तेनैव जन्येति तात्पर्यम् । तदिमामुभयीमपि वाक्यवृत्तिमभिप्रेत्य श्लोकाभिप्रेतमर्थमाह—**अनभिसंहिते**ति । कर्मभिरित्यस्यानाराधितेत्यनेनान्वयः । एतेन * अनाराधितगोविन्दा ये नरा दुःखभागिनः (वि. ध. २९. १३) इत्यादिकं स्मारितम् । अनभिसंहितफलकर्माभावे निःश्रेयसौपयिकपरमपुरुषप्रीत्यभावः, तदभावाच्च पापसञ्चयानुपरमः, तेन च रजस्तमोमयमनोमलानपायः, ततश्च रागद्वेषादिदोषाणां दीर्घायुष्ट्वम्, तेषु च जीवत्सु नेन्द्रियव्याकुलताशान्तिः, बहिर्विषयव्याकुलेषु च तेषु न प्रत्यगर्थनिष्ठेति तादृशकर्मपरित्यागेन ज्ञाननिष्ठामनुतिष्ठासुस्सप्तभौमस्य गोपुरस्य सप्त[मं तलं]ममन्तरं प्रथमं चिकीर्षतीत्यपहास्यमिति भावः ॥ ४ ॥

भा ॥ एतदेवोपपादयति—

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५

भा ॥ न ह्यस्मिन् लोके वर्तमानः पुरुषः कश्चित्कदाचिदपि कर्माकुर्वाणस्तिष्ठति ; न किंचित्करोमीति व्यवसितोऽपि सर्वः पुरुषः प्रकृतिसंभवैस्सत्त्वरजस्तमोभिः प्राचीनकर्मानुगुणं प्रवृद्धैर्गुणैः स्वोचितं कर्म प्रत्यवशः कार्यते—प्रवर्त्यते । अत उक्तलक्षणेन कर्मयोगेन प्राचीनं पापसंचयं नाशयित्वा गुणांश्च सत्त्वादीन् वशे कृत्वा निर्मलान्तःकरणेन संपाद्यो ज्ञानयोगः ॥ ५ ॥

ता ॥ अनन्वयशङ्कां परिहरन्ननन्तरश्लोकमवतारयति—**एतदेवे**ति । परमपुरुषाराधनवेषस्य कर्मणस्त्यागे ज्ञाननिष्ठाया दुस्संपादत्वमेवेत्यर्थः । प्रथमो हिशब्दः पूर्वश्लोकार्थोपपादनद्योतकः । द्वितीयस्त्वेतच्छ्लोकपूर्वार्धोक्तोपपादनार्थः । प्रकरणारम्भे * लोकेऽस्मिन् इत्युक्ताधिकारिवैचित्र्यमपि * कश्चित् * सर्वः इत्याभ्यामभिप्रेतमिति ज्ञापनाय—**अस्मिन् लोके** इत्युक्तम् । जातुशब्दो दिवसादिस्थूलकालपरः । क्षणशब्दस्त्वत्र * क्षणो व्यापारवैकल्ये कालभेदाल्पकाल्योः इत्यनेकार्थपाठात्तदन्तर्गताल्पकालविषय इत्यपौनरुक्त्यम् । तदुभयसंग्रहेण **कदाचिदपी**त्युक्तम् । प्रलयादिदशाव्यतिरिक्ते सर्वस्मिन् काल इत्यर्थः । स्वपतोऽपि हि स्वापाख्यं कर्म, अत एव हि तत्र देशकालादिनियमेनानुज्ञाप्रतिषेधौ भवतः । * अकर्मकृत् इत्यत्राकर्मणः कर्ता न विवक्षितः ; किंतु कर्मणोऽकर्तेति व्यञ्जनाय—**कर्माकुर्वाण** इत्युक्तम् । सर्वशब्दाभिप्रेतमाह—**न किञ्चित्करोमीति व्यवसितोऽपी**ति । अयं चार्थः * कर्मेन्द्रियाणि संयम्येत्युत्तरश्लोके व्यक्तो भविष्यति । प्रकृतिजत्वेन विशेषणात्सत्त्वरजस्तमोभिरिति विशेषलाभः । प्रकृतौ नित्यं विद्यमानानां कथं प्रकृतिजत्वमित्यत्रोक्तं—**प्राचीने**त्यादि । तथा चाहुः—* कर्मवश्या गुणा ह्येते सत्त्वाद्याः पृथिवीपते (वि. २. १३. ७०) इति । एतेन कर्मयोगतनूकृतगुणकज्ञाननिष्ठव्यवच्छेदः । स्वोचितशब्देन तृतीयषट्के वक्ष्यमाणः प्रकारो दर्शितः । स्वशब्दोऽत्र गुणपरः ; * अवशस्सर्वः इत्युद्देश्यविशेषणत्वभ्रमव्युदासाय—**अवशः कार्यत** इत्युक्तम् । कार्यते इत्यस्य प्रयोज्यकर्मपरत्वव्युदासेन प्रयोज्यकर्तृविषयत्वव्यक्त्यर्थं—**प्रवर्त्यत** इत्युक्तम् । व्याख्यातश्लोकद्वयतात्पर्यमाह—**अत** इति । अतः—गुणपरतन्त्रतया कर्मयोगमन्तरेण ज्ञानयोगस्य दुस्सम्पादत्वादित्यर्थः । पापनाशाद्गुणवशीकरणम् ; तच्च मोक्षार्थप्रवृत्त्यनु-

। रजस्तमःप्राचुर्यनिवृत्तिर्वा तत्कार्यरागद्वेषाद्यभावो वा निर्मलत्वमिहाभिप्रेतम् ॥ ५ ॥

भा ॥ अन्यथा ज्ञानयोगाय प्रवृत्तो मिथ्याचारो भवतीत्याह—

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६

भा ॥ अविनष्टपापतया अजितान्तःकरणः आत्मज्ञानाय प्रवृत्तो विषयप्रवणतया आत्मनि विमुखीकृतमनाः विषयानेव स्मरन् य आस्ते, अन्यथा संकल्प्य अन्यथा चरतीति स मिथ्याचार उच्यते ; आत्मज्ञानायोद्युक्तो विपरीतो विनष्टो भवतीत्यर्थः ॥ ६ ॥

ता ॥ अकरणे बाधं वदतीत्याह—**अन्यथे**ति । कर्मयोगमकृत्वेत्यर्थः । * मनसा स्मरन् इत्यनेनार्थसिद्धं हेतुमाह—**अविनष्टे**ति । **आत्मनि विमुखीकृतमना** इति । * विमूढात्मा इत्यत्रात्मशब्दो मनोविषयः । विमूढत्वमात्मवैमुख्यम् । येभ्य एवेन्द्रियाणि निरोद्धुमिष्टानि तानेवेत्येवकारार्थः । मिथ्याचारप्रकारमाह—**अन्यथासङ्कल्प्ये**ति । अन्यथाभाव एव ह्यन्ततः सर्वत्र मिथ्यात्वम् । अत्रापि सङ्कल्पितज्ञानयोगविपरीताचारतया ज्ञानयोगाभिमतस्तस्याचारो मिथ्येत्युक्तं भवति । मिथ्याचारसंज्ञा[न]मात्रव्युदासेन दोषपर्यवसानायाह—**आत्मे**ति । विपरीतविनष्टशब्दाभ्यामुपायवैपरीत्यात्फलवैपरीत्यमिति दर्शितम् । द्वितीयेऽध्याये * ध्यायतो विषयान्, इत्यारभ्य * बुद्धिनाशात्प्रणश्यति (२. ६२, ६३) इत्यन्तेनास्यैवार्थस्य प्रपञ्चनं कृतमिति विनष्टशब्देन स्मारितम् ॥ ६ ॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तस्स विशिष्यते ॥ ७

भा ॥ अतः पूर्वाभ्यस्तविषयसजातीये शास्त्रीये कर्मणि इन्द्रियाण्यात्मावलोक[ने]नप्रवृत्तेन मनसा नियम्य तैस्स्वत एव कर्मप्रवणैरिन्द्रियैरसङ्गपूर्वकं यः कर्मयोगमारभते ; सोऽसंभाव्यमानप्रमादत्वेन ज्ञाननिष्ठादपि पुरुषाद्विशिष्यते ॥ ७ ॥

ता ॥ प्रथममेव ज्ञानयोगमारुरुक्षुमपोह्य कर्मयोगिनं प्रशंसति—**यस्त्वि**ति श्लोकेन । प्रकृतेन संगमयन् व्याख्याति—**अत** इति । न हि कश्चिदित्यादिना ज्ञानयोगस्य दुष्करत्वे यो हेतुरुक्तः, तस्यैव कर्मयोगं प्रत्युपकारकत्वेन **सौकर्यप्रतिपादनार्थं—पूर्वाभ्यस्तविषयसजातीये** इत्युक्तम् । इन्द्रियाणां निश्शेषनियमनस्य कर्मयोगारम्भस्य च मिथो विरुद्धत्वादविरोधसिद्ध्यर्थमुक्तं—**शास्त्रीये कर्मणि** इति । यदि पूर्वाभ्यास उपकारकत्वेन स्वीक्रियते, तर्हि निषिद्धेभ्यो नियमनमशक्यम्, तेष्वेव वासनायाः प्राचुर्यादिति शङ्कानिरासाय, कर्मणः फलान्तरपरित्यागाय चोक्तम्—**आत्मावलोक[ने]नप्रवृत्तेने**ति । निषिद्धानामात्मावलोकनविरोधित्वाध्यवसायात्तेषु स्थिराऽपि वासना तिरस्क्रियत इति भावः । * **कर्मेन्द्रियैः** इत्यनेनाभिप्रेतं सौकर्यं विशदयति—**स्वत एव कर्मप्रवणैरिन्द्रियै**रिति । असङ्गस्य कर्मयोगारम्भापेक्षितत्वादसक्तमदस्य यद्वृत्तवाक्यांशेऽन्वयमाह—**असङ्गपूर्वक**मिति । वैशिष्ट्यप्रकारं विशेषस्य चावधिं दर्शयति—**असंभाव्यमानप्रमादत्वेन ज्ञाननिष्ठादपी**ति ॥ ७ ॥

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः ॥ ८

भा ॥ नियतं—व्याप्तम् ; प्रकृतिसंसृष्टेन [अभि]हि व्याप्तं कर्म, [अनादिवासनया प्रकृतिसंसृष्टस्त्वं नियतत्वेन] प्रकृतिसंसृष्टस्त्वमनादिवासनया नियतत्वेन सुशकत्वादसंभावितप्रमादत्वाच्च कर्मणः कर्मैव कुरु ; अकर्मणो ज्ञाननिष्ठाया अपि कर्मैव ज्यायः। * नैष्कर्म्यं पुरुषोऽश्नुते (३. ४) इति प्रकृमादकर्मशब्देन ज्ञाननिष्ठैवोच्यते ; ज्ञाननिष्ठाधिकारिणोऽप्यनभ्यस्तपूर्वतया ह्यनियतत्वेन दुश्शकत्वात्सप्रमादत्वाच्च ज्ञाननिष्ठायाः कर्मनिष्ठैव ज्यायसी ; कर्मणि क्रियमाणे चात्मयाथात्म्यज्ञानेनात्मनोऽकर्तृत्वानुसन्धानमनन्तरमेव वक्ष्यते । अत आत्मज्ञानस्यापि कर्मयोगान्तर्गतत्वात्स एव ज्यायानित्यर्थः। कर्मणो ज्ञाननिष्ठाया ज्यायस्त्ववचनं ज्ञाननिष्ठायामधिकारे सत्येवोपपद्यते ; यदि सर्वं कर्म परित्यज्य केवलं ज्ञाननिष्ठायामधिकरोषि, तर्ह्यकर्मणस्ते ज्ञाननिष्ठस्य ज्ञाननिष्ठोपकारिणी शरीरयात्राऽपि न सेत्स्यति। यावत्साधनसमाप्ति शरीरधारणं चावश्यं कार्यम् ; न्यायार्जितधनेन महायज्ञादिकं कृत्वा तच्छिष्टाशनेनैव शरीरधारणं कार्यम्, * आहारशुद्धौ सत्त्वशुद्धिस्सत्त्वशुद्धौ ध्रुवा स्मृतिः (छा. ७. २६. २) इत्यादिश्रुतेः ; * ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात् (३. १३) इति वक्ष्यते। अतो ज्ञाननिष्ठस्यापि कर्माकुर्वतो देहयात्राऽपि न सेत्स्यति ; यतो ज्ञाननिष्ठस्यापि म्रियमाणशरीरस्य यावत्साधनसमाप्ति महायज्ञादि नित्यनैमित्तिकं कर्मावश्यं कर्तव्यम् ; यतश्च कर्मयोगेऽप्यात्मनोऽकर्तृत्वभावनयाऽऽत्मयाथात्म्यानुसन्धानमन्तर्भूतम् ; यतश्च प्रकृतिसंसृष्टस्य कर्मयोगस्सुशकोऽप्रमादश्च ; अतो ज्ञाननिष्ठायोग्यस्यापि ज्ञानयोगात्कर्मयोगो ज्यायान्। तस्मात्त्वं कर्मयोगमेव कुर्वित्यभिप्रायः ॥ ८ ॥

ता ॥ अथ सौकर्यनिष्प्रमादत्वदुस्त्यजत्वादिहेतुभिः कर्मयोगस्यैव ज्यायस्त्वं दर्शयन् * ज्यायसी चेत्कर्मणः इत्यादेस्साक्षादुत्तरमाह—**नियत**मित्यादिना । नियतशब्दस्य मन्दप्रयोजनात्क्रियाविशेषणत्वादपि प्रभूतप्रयोजनसमानाधिकरणकर्मविशेषणत्वमेवोचितम् । ततश्च कर्मणो नियतत्वं स्वभावतश्शास्त्रतो वा स्यादुभयतो वा । तत्रैकस्मिन्नुभयविवक्षाक्लृप्तिस्तावद्गरीयसी । * शरीरयात्रा इत्यत्र तु शास्त्रीयकर्म[णि]नियमाभिप्रायो व्याख्यास्यते । अतोऽत्र स्वभावतो नियतत्वं विवक्षितम् । ज्ञाननिष्ठाया दुष्करत्वे प्रस्तुते कर्मनिष्ठा[याः]यां सौकर्यमेव चानन्तरं वक्तुमुचितमित्येतदखिलमभिप्रेत्याह—**नियतं व्याप्त**मित्यादि । केन किंनिबन्धना व्याप्तिरित्यत्राह—**प्रकृतिसंसृष्टेने**ति । * अकर्मण इतिपदे नञस्तदन्यविषयत्वं विभक्तेश्च पञ्चमीत्वेनावधिविषयत्वं व्यञ्जयति—**ज्ञाननिष्ठाया अपी**ति । अत्रार्कर्मशब्दस्य ज्ञाननिष्ठाविषयत्वं कथम् ? * मा ते सङ्गोऽस्त्वकर्मणि (२. ४७) इत्यत्र हि स एव कर्माभावविषयतया व्याख्यातः ; तद्वदत्राप्यनुष्ठानत्यागे प्रसक्ते तस्मादनुष्ठानमेव ज्याय इति वक्तुमुचितमित्यत्राह—**नैष्कर्म्यमि**ति । अत्र उपक्रमे कर्मयोगज्ञानयोगयोः तारतम्यमनुयुक्तम् ; तस्यैव चोत्तरमिह विवक्षितम् । मुमुक्षुसाध्यत्वेन निर्दिष्टस्य नैष्कर्म्यस्य सुषुप्त्यादिसुलभ-कर्माभावत्वं चायुक्तम्, कर्मानारम्भान्नैष्कर्म्यमित्यत्र साध्याविशेषप्रसङ्गाच्च । अतो ज्ञाननिष्ठैवात्राकर्मशब्देनाभिधीयत इत्यर्थः। कर्मनिष्ठाया ज्यायस्त्वे वक्ष्यमाणं हेत्वन्तरमाह—**कर्मणि क्रियमाणे चे**त्यादिना । **अनन्तरमेवे**त्यासन्नत्वाभिधानेन तस्येहाभिप्रेतत्वं दर्शितम् । ज्ञानयोगशक्तस्यापि कर्मयोगानुष्ठानायाभिप्रायिकमर्थमाह—**कर्मण** इति । इह **ज्ञाननिष्ठाया** इति पञ्चमी । अप्रसक्तप्रतियोगिकं ज्यायस्त्ववचनमयुक्तमिति भावः । उत्तरार्धस्यावतारमाह—**यदी**ति । अत्र त्वकर्मण इति बहुव्रीहिः, ते इत्यनेन सामानाधिकरण्यादिति व्यञ्जनाय **अकर्मणस्ते ज्ञाननिष्ठस्ये**त्युक्तम् । ननु सर्वकर्मपरित्यागिनो यदि शरीरयात्राऽपि न स्यात्ततो लब्धोपायस्य तस्य स्वरसतः प्रतिबन्धनिवृत्तेरयत्नलभ्यैव मुक्तिस्स्यादित्याशङ्क्याह—**यावदि**ति । न हि साधनानुप्रवेशमात्रात्फलसिद्धिः, किंतु साधनसंपूर्तेरेव । सा च न त्रिचतुरदिवसलभ्या ; येन शरीरमुपेक्षेमहि । चिरकालसाध्यायां च साधनसंपूर्तौ तावन्तं कालं शरीरमवश्यं रक्षणीयम् । अनिष्पन्नोपाय-

स्यौदासीन्यात्तत्परित्यागे प्रत्यवायोऽपि स्यादिति भावः। अस्तु शरीरधारणमपेक्षितम्, तथाऽपि तन्न स्वेच्छया चिरकालं कर्तुं शक्यम्, नाप्यौदासीन्यमात्रात्तन्निवृत्तिः, आरम्भककर्मविशेषेण शरीरस्य नियतावधिकत्वात्। स्मरन्ति च कर्मिणां प्रतिनियतानि *विवाह[ो] जन्ममरण[म्] (इ. स. ३) इत्यादीनि। अस्तु वा स्वेच्छया शरीरधारणम्, तथाऽपि यत्किञ्चिल्लौकिककर्मणैव तत्सुशकमित्यत्राह—न्यायार्जितेति। अयमभिप्रायः—द्विविधानि कर्मफलानि, नियतानि, अनियतानि चेति। प्रबलशापादिसंभवानि नियतानि; इतराण्यनियतानि। अनियतत्वं च तेषां देशकालाद्यपेक्षया, न तु स्वरूपतः; येन कर्मणां निष्फलत्वप्रसङ्गस्स्यात्। ततश्च यान्यत्रानियतानि तत्र स्वव्यापारविषयतया तान्यधिकृत्य प्रायश्चित्तमन्त्रौषधनीतिशास्त्रादीनि। अन्यथा विजिगीषुभिरुपपन्नपरिपन्थिभिरपि न चतुरङ्गादिकमङ्गीक्रियेत; आतुरैरपि न भेषजमुपभुज्येत; स्वेच्छया किञ्चित्करणाभावे स्वारसिककर्तृत्वाभावाच्छास्त्रस्याप्यनुदयः; अत एवं ज्ञानयोगमारुरुक्षता त्वया कर्मवश्यत्वमेव जगतो निवर्तितमिति सम्यगयत्नसिद्धो मोक्षस्समर्थितः—इति। एवकारेण न्यायार्जनयज्ञशिष्टाशनादेर्नियमविधित्वं द्योतितम्। एवं शरीरधारणाभावे स्वारसिकं विशरारुत्वं द्योतयति शरीरशब्दः। एवंविधा च शरीरयात्रा ज्ञानयोगासाध्यभक्तियोगदशायामप्यविच्छेद्येत्यभिप्रायेणाहारशुद्धिश्रुत्युपादानम्। श्रौतस्यार्थस्यात्रापि विवक्षितत्वज्ञापनाय वक्ष्यमाणतामाह—ते त्वघमिति। पूर्वोपपादितान् हेतून् बुद्धिस्थक्रमेण विविच्योद्बृंहन्नाभिप्रायिकं शाब्दं चाखिलमर्थं सुखग्रहणाय सङ्कलय्य दर्शयति—यत इति। ज्ञाननिष्ठायोग्यस्यापि कर्मयोगो ज्यायान्, तस्मात्त्वं ज्ञानयोगयोग्योऽपि कर्मयोगमधिकुर्विति वा; न त्वमिदानीं ज्ञानयोगयोग्यः, अतः कैमुत्यात्कर्मयोगमेव कुर्विति वा त्वंशब्दाभिप्रायः॥ ८॥

भा॥ एवं तर्हि द्रव्यार्जनादेः कर्मणोऽहङ्कारममकारादिसर्वेन्द्रियव्याकुलतागर्भत्वेनास्य पुरुषस्य कर्मवासनया बन्धनं भविष्यतीत्यत्राह—

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचर॥ ९

भा॥ यज्ञादिशास्त्रीयकर्मशेषभूताद्द्रव्यार्जनादेः कर्मणोऽन्यत्रात्मीयप्रयोजनशेषभूते कर्मणि क्रियमाणेऽयं लोकः कर्मबन्धनो भवति। अतस्त्वं यज्ञार्थं द्रव्यार्जनादिकं कर्म समाचर। तत्रात्मप्रयोजनसाधनतया यस्सङ्गः, तस्मात्सङ्गान्मुक्तस्तत्समाचर। एवं मुक्तसङ्गेन यज्ञाद्यर्थतया कर्मणि क्रियमाणे यज्ञादिभिः कर्मभिराराधितः परमपुरुषोऽस्यानादिकालप्रवृत्तकर्मवासनामुच्छिद्याव्याकुलात्मावलोकनं ददातीत्यर्थः॥ ९॥

ता॥ *यज्ञार्थात् इति श्लोकः कर्मविधिनिषेधयोर्विषयव्यवस्थापक इति ज्ञापयितुं शङ्कते—**एवं तर्हीति।** **द्रव्यार्जनादेरित्यत्रादिशब्देन** महायज्ञादिग्रहणम्। **ममकारादीत्यत्र** तु रागद्वेषाभिनिवेशवचनादानविहरणादिग्रहणम्। **अहंकारममकारादेर्मनोवृत्तिविशेषत्वादिन्द्रियव्याकुलतारूपत्वोक्तिः। अस्य पुरुषस्येति।** मुमुक्षोरपीति भावः। **कर्मवासनयेति।** प्राचीनयाऽनुपरतयाऽद्यतनव्यापाराभ्यासोपबृंहितया चेति भावः। **बन्धनं भविष्यतीति।** उत्तरोत्तरशरीरबन्धादिना संसारानुवृत्तिप्रसङ्ग इत्यर्थः। अत्र *यज्ञो वै विष्णुः (श. ब्रा. १.१.१.२.१३; यजु. १.७.४.४) इति श्रुतेः। *यज्ञ ईश्वरः इति पौर्व्याख्यातम्; तच्चाविरुद्धमस्माकम्; तथाऽपि समनन्तरश्लोकादिपठितयज्ञशब्दैकार्थ्यमुचितमित्यभिप्रायेणाह—**यज्ञादिशास्त्रीयकर्मेति।** यज्ञादीत्यादिशब्देन यज्ञशब्दस्योपल[क्षण]क्ष्यपरत्वं ज्ञाप्यते। शास्त्रीयकर्मशब्देनोपलक्षणोपलक्ष्याणां सामान्यतस्संग्राहकाकारं तदर्थकर्मणो निर्दोषत्वहेतुं च दर्शयति। **यज्ञार्थात्—यज्ञप्रयोज-**

नात्। तदिदं दर्शितम्—**शेषभूतादिति**। कर्मैव बन्धनं कर्मणा वा बन्धनं यस्य स कर्मबन्धनः; तस्य च बन्धकत्वं स्ववासनाद्वारा, न पुनः पापतया; अविहिताप्रतिषिद्धविषयत्वादत्र कर्मबन्धनशब्दस्य। * अस्य पुरुषस्य कर्मवासनया बन्धनं भविष्यतीति शङ्काग्रन्थेनायमर्थो दर्शितः। लोकोऽत्र संसारिचेतनवर्गः। **अत** इति। यज्ञार्थस्य कर्मणो बन्धहेतुत्वाभावादित्यर्थः। द्रव्यादिलाभहेतुभूतयुद्धप्रोत्साहनस्य व्यक्त्यर्थं **द्रव्यार्जनादिकमित्युक्तम्**। तादर्थ्ये सङ्गत्यागश्चेत्युभयमपि विधेयमिति ज्ञापनाय पृथग्वाक्यकरणम्। कर्तृत्वफलत्यागयोर्विलक्षणं सङ्गत्यागस्य स्वरूपं दर्शयति—**तत्रेति**। यत्किञ्चित् प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इतिचेत्सत्यम्; प्रयोजनसाधनत्वबुद्ध्यभावेऽपि सुहृदुपचारवद्भगवत्समाराधनरूपतया स्वरूपेण प्रयोजनत्वबुद्ध्या प्रवृत्त्युपपत्तिः। **मुक्तसङ्ग** इत्यत्र सङ्गस्य बन्धकत्वविवक्षया **सङ्गान्मुक्त** इत्युक्तम्। प्रकृतचोद्यस्यादृष्टद्वारा फलप्रदत्वेन परिहारं वदन्नतदर्थस्य बन्धहेतुत्वोक्त्या फलितं तदर्थस्य मोक्षहेतुत्वप्रकारं दर्शयति—**एवमिति**। एतेन कर्मणामप्रामाणिकापूर्वद्वारा फलप्रदत्वमिति कुदृष्टिमतं निरस्तम्, आर्थवादिकापेक्षितदेवताप्रीतिद्वारैव फलप्रदत्वोपपत्तौ * स एनं प्रीतः प्रीणाति (यजु. ५.५.१०.४८) इत्यादिश्रुतहानाश्रुतकल्पनाद्यनुपपत्तेः। **कर्मभिराराधित** इत्यनेन हविर्ग्रहणं प्रीतिश्चाभिप्रेते; **परमपुरुष** इति तदविनाभूतादित्यवर्णादिश्रुतिसिद्धविग्रहविशेषवत्त्वम्, सर्वब्रह्माण्डयुगपत्कर्मसन्निधिशक्तिश्च, **ददाती**ति वरप्रदत्वमिति विग्रहादिपञ्चकप्रदर्शनम्। **कर्मवासनामुच्छिद्ये**ति विपरीतवासनाचोद्यं परिहृतम्॥ ९॥

भा॥ **यज्ञशिष्टेनैव सर्वपुरुषार्थसाधननिष्ठानां शरीरधारणकर्तव्यतामयज्ञशिष्टेन शरीरधारणं कुर्वतां दोषं चाह—**

सह यज्ञैः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥ १०

भा॥ *** पतिं विश्वस्य (ना.) इत्यादिश्रुतेर्निरुपाधिकः प्रजापतिशब्दः सर्वेश्वरं विश्वस्य स्रष्टारं विश्वात्मानं परायणं नारायणमाह। पुरा—सर्गकाले स भगवान् प्रजापतिरनादिकालप्रवृत्ताचित्संसर्गविवशा उपसंहृतनामरूपविभागास्स्वस्मिन् प्रलीनाः सकलपुरुषार्थानर्हाश्चेतनेतरकल्पाः प्रजास्समीक्ष्य परमकारुणिकस्तदुज्जिजीवयिषया स्वाराधनभूतयज्ञनिर्वृत्तये यज्ञैस्सह तास्सृष्ट्वैवमुवाच—अनेन यज्ञेन प्रसविष्यध्वम्, आत्मनो वृद्धिं कुरुध्वम्; एष वो यज्ञः परमपुरुषार्थलक्षणमोक्षाख्यस्य कामस्य तदनुगुणानां च कामानां प्रपूरयिता भवतु॥ १०॥**

ता॥ उक्तमर्थद्वयं * सह यज्ञैः इत्यारभ्य * मोघं पार्थ स जीवति इत्यन्तेन निन्दाप्रशंसादिभिर्द्रढयतीत्याह—**यज्ञशिष्टेनैवेति। सर्वपुरुषार्थसाधननिष्ठाना**मित्यनेन * प्रजास्सृष्ट्वा इति सामान्यनिर्देशफलितमुक्तम्। अत्र प्रजापतिशब्दस्य हिरण्यगर्भादिविषयत्वव्युदासायाह—**पतिं विश्वस्येती**ति। हिरण्यगर्भादेरपि, नतु हिरण्यगर्भादिवदण्डावच्छिन्नस्येत्यर्थः। तत एवोक्तम्—**निरुपाधिक** इति। श्रुतार्थस्वभावादपि स एव सर्वप्रजापतिरिति प्रदर्शनाय **सर्वेश्वर**मित्यादिविशेषणोक्तिः। **नारायणम्**—एतदखिलं नारायणशब्दवाच्यस्यैव हि नारायणानुवाकादिषु प्रतिपाद्यत इति भावः। **उक्तं** च जगत्पतित्वं स्रष्टृत्वादिकं च समुचित्य भगवता **पराशरेण**—* कलौ जगत्पतिं विष्णुं सर्वस्रष्टारमीश्वरम् (वि. ६. १. ५०) इति। * अनुमानात्तदुद्धारं कर्तुकामः प्रजापतिः (वि. १. ४. ७) इति च वराहरूपे भगवति [:] तेन * प्रजापतिः (ना. १. १) इत्यादिश्रुत्यनुसारात्प्रयुक्तः। किंच स्वतन्त्रस्य कर्मपरतन्त्रान्प्रति नियोगो

ह्ययम् । अतोऽत्र * प्रजास्सृष्ट्वा इति प्रजाशब्दस्सर्वान् ब्रह्मपर्यन्तान् जगदन्तर्व्यवस्थितान् कर्मजनितसंसारवशवर्तिनो यज्ञाद्यधिकारिणः प्राणिनः संगृह्णाति । अतोऽत्र प्रजापतिशब्द उपक्रमस्थप्रजाशब्दानुरोधात्संकोचेन तद्वैरूप्यायोगाच्च परित्यक्तरूढिरकर्मवश्यं नियोक्तारं सर्वेश्वरं नारायणमाह । तथा सृज्यसमस्तक्षेत्रज्ञविषयो ह्ययमनवच्छिन्नः प्रजाशब्दः, पुरेति प्रलयानन्तरकालाभिधानात् । ततश्च * सदेव सोम्येदमग्र आसीत् तदैक्षत बहु स्यां प्रजायेयेति (छा. ६. २. १) * सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनाः (छा. ६. ८. ४) * एको ह वै नारायण आसीन्न ब्रह्मा नेशानः इत्यारभ्य, * तत्र ब्रह्मा चतुर्मुखोऽजायत बृहदात्व्यक्षश्शूलपाणिः पुरुषोऽजायत (महो. १. १), * सिसृक्षुर्विविधाः प्रजाः (मनु. १. ८) इत्यादिषु हिरण्यगर्भादेरपि प्रजात्वावगमान्नारायणस्य च तज्जनकत्वावगतेः * प्रजास्सृष्ट्वेत्यनवच्छेदेन निर्दिष्टो विश्वस्य स्रष्टा नारायण एवेति स एवात्र प्रजापतिः । किंच * तस्माद्यज्ञात्सर्वहुतः, ऋचस्सामानि जज्ञिरे * सर्वाणि रूपाणि विचित्य धीरः, नामानि कृत्वाभिवदन्यदास्ते (पु.) इति यज्ञैस्सह सर्वप्रजानां स्रष्टृतया निर्दिष्टोऽप्यधिकार-पुरुषस्यापि स्रष्टा सहस्रशीर्षत्वादिविशिष्टः [महा]परमपुरुष एव । अतोऽपि *सह यज्ञैः प्रजाः सृष्ट्वेति निर्दिष्टः प्रजापतिः विश्वस्य स्रष्टा स एव । तथा * सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते (वि. ध. ६८. ५१) इत्यादिवचनबला-द्धिरण्यगर्भाख्यप्रजापतिमुखेनापि विश्वस्रष्टा * सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः (सु. ७) इति श्रुतस्स एव विश्वात्मा । किं चात्र निर्दिश्यमानं देवानां भावनादिकं परमात्मात्मकानामेवेति * अहं हि सर्वयज्ञानाम् (९. २४) इत्यादौ व्यक्तं भविष्यति । * यस्मिन्निदँ सं च वि चैति, * प्रजापतिश्चरति गर्भे अन्तः (ना. ६. १) इत्यादिकम्—**विश्वस्य स्रष्टारं विश्वात्मानमिति** विशेषणाभ्यां सूचितम् । अतोऽप्यत्र विश्वात्मानं तमेवाह । तथा * प्रजापतेस्सभां वेश्म प्रपद्ये (छा. ८. १४. १) इत्यत्र परमप्राप्यतया च प्रजापतिशब्दनिर्दिष्टोऽपि परमात्मैवेति *न च कार्ये प्रत्यभिसन्धिः (ब्र. ४. ३. १३) इति सूत्रे प्रत्यपादि । अतोऽपि परायणं तमेवाह । एवं **सर्वेश्वरमित्यादिविशे-षणैस्तत्तत्प्रमाणसूचनं कृतम्** । एवं श्यामैकरूपसप्तदशायातयामाज्यदैवतविष्णुविषयप्रजापतिशब्दश्रुतिरप्यनुसन्धेया । पुराशब्दस्य वचनान्वयप्रतीतिव्युदासेन ब्रह्माद्यगोचरसृष्ट्यन्वयव्यक्त्यर्थमाह—**पुरा सर्गकाल** इति । श्रुतिस्मृत्यादिषु सृष्टि-प्रकरणप्रसिद्धिप्रकारमभिप्रैति—**स भगवानिति** । भगवच्छब्देन सृष्ट्यादिपञ्चकृत्योपयुक्तहेयप्रत्यनीककल्याणगुणविशिष्टत्वं दर्शितम् । तथा मानवे धर्मशास्त्रे प्रथमम् * आसीदिदं तमोभूतमिति प्रलयमभिधाय *ततस्स्वयंभूर्भगवान् इति भगव-च्छब्देन सर्वस्रष्टा निर्दिष्टः । अनन्तरं च * ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः * तद्विसृष्टस्स पुरुषो लोके ब्रह्मेति कीर्त्यते (मनु. १. अ.) इति हिरण्यगर्भाख्यप्रजापतेः स्रष्टा नारायण इत्युक्तम् । अत्र प्रजापतिरुवाचेति पराक्तया निर्देशस्तु सारथिभूतस्य स्वस्य प्रजापतिशब्दप्रतिपन्नात् स्वस्माद्भेदोपचारेणेति मन्तव्यम् । एवमुत्तरत्रापि सर्वत्र पराक्त्व-निर्देशेषु यथार्हमनुसन्धेयम् । सर्वत्र सृष्टेस्संहारपूर्वकत्वदर्शनादत्रापि तथा विवक्षन्, संहारस्य प्रयोजनं सृष्टेर्हेतुं चाह—**अनादीति** । अनवरतसुखदुःखोपभोगायासपरिश्रान्तानां विश्रमार्थम् अश्रान्तापथप्रवृत्तिवासनाविच्छेदार्थं चोपसंहारः । अतो न संहारे नैर्घृण्यदोषः । तादृशसुखदुःखोपभोगप्रदाने च परमात्मनित्यसङ्कल्पसिद्धजीवस्वातन्त्र्यनिबन्धनानादिकर्म-प्रवाहहेतुकाचित्संसर्ग एव हेतुरिति न तत्रापि वैषम्यनैर्घृण्ये । सूत्रितं च * वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति (ब्र. २. १. ३४) * न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च (ब्र. २. १. ३५), * कृतप्रयत्ना-पेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः (ब्र. २. ३. ४१) इति । **उपसंहृतनामरूपविभागाः स्वस्मिन् प्रलीना इति**

असद्व्यपदेश एकत्वव्यपदेशादिश्च निर्व्यूढः । नामरूपप्रहाणं स्वस्मिन् प्रलयश्च मोक्षवत्पुरुषार्थ एव स्यादित्याशङ्क्याह—**सकलेति** । त्रिवर्गोऽप्यनर्हाः ; किं पुनरपवर्ग इति भावः । तत्र हेतुमाह—**चेतनेतरकल्पा** इति । स्वप्रकाशत्वेऽप्यत्यन्तज्ञानसङ्कोचात्तत्कल्पत्वम् ; न तु ज्ञानविनाशात् । प्रजाः—हिरण्यगर्भादिकाः ; समीक्ष्य—सम्यगवलोक्य ; एतेन *जायमानं हि पुरुषं यं पश्येन्मधुसूदनः (भा. मो. ३४८. ७२) *नावेक्षसे यदि (स्तो. १०) इत्यादिकमभिप्रेतम् । *स एकाकी न रमेत (महो.१) इति श्रुतेः *परमकारुणिकः किल त्वम् (वि.ध.९८.३७) इत्यादिस्मृतिसिद्धगुणविशेषे तात्पर्यमाह—**परमकारुणिक** इति । अवाप्तसमस्तकामस्य जगद्व्यापारानुपपत्तिं परिहरति—**तदुज्जिजीवयिषयेति** । कारुणिका हि स्वार्थनिरपेक्षा एव परोज्जिजीवयिषया प्रवर्तन्ते, सैव प्रवृत्तिरस्य लीलाऽपीति न दोष इति भावः । यज्ञैस्सहेति निर्देश उज्जीवनोपायविशेषनिष्पत्त्यर्थ इत्यभिप्रायेणाह—**स्वाराधने**ति । यज्ञैरिति वैविध्यसूचनाय बहुवचननिर्देशे पूर्वं कृतेऽपि अनेनेत्येकवचनेन परामर्शो जात्येकत्वपर इत्यभिप्रायेणाह—**अनेन यज्ञेने**ति । *सहयज्ञाः इति शंकरयादवप्रकाशीयपाठस्त्वप्रसिद्धेरनादृतः । *प्रसविष्यध्वमित्यत्र *षूञ् प्राणिप्रसवे *षूङ् गर्भविमोचने इति धातुद्वयेऽपि प्रजननमात्रप्रतीतिस्स्यात् ; न च द्वादशाहादिवत्सर्वेषां यज्ञानां प्रजामात्रं फलम् । अतस्सन्तत्युपलक्षिता स्वनिष्पाद्या समृद्धिरत्र विवक्षितेत्यभिप्रायेणाह—**आत्मनो वृद्धिं कुरुध्व**मिति । यज्ञसाध्यः कामो निषिद्धेतरधर्माविरुद्धसमस्तकाम्यवर्गः ; तत्रापि मोक्षतत्साधनोपकारिषु तात्पर्यभूयस्त्वमित्यभिप्रायेण मोक्षतदनुगुणोपादानम् । रुचिवैचित्र्यज्ञापनायेष्टशब्देन विशेषणम् । मोक्षस्येष्टकामशब्देन संग्रहाय—**परमपुरुषार्थलक्षणे**त्युक्तम् । अवधीरितस्वर्गाय अर्जुनायोपदेशात् *मा फलेषु (२. ४७) *श्रेयः परमिति पूर्वापरानुगुण्याच्चात्र मोक्षार्थतोक्तिर्युक्ता । **प्रपूरयिते**ति । *दुह प्रपूरणे इति हि धातुः । ननु प्रपूरणं हि पूरणाभावेऽनुशिष्टम्, प्रस्थानप्रस्मरणादिष्विवात्रापि प्रशब्दस्याभावविषयत्वात् । अत एव हि *गां दोग्धि इत्यादिप्रयोगः । सत्यम्, तथाऽपि गां दोग्धीत्यत्रापि गोरेव पयोरेचनम्, न तु पयसः स्वरूपैवैकल्यम् ; तद्वदत्रापि गोस्थानीयाद्यज्ञतः क्षीरस्थानीयाः कामा लभ्यन्ते ; तैस्तस्य रेचनं स्यात् ; फलदातुस्सकाशात्फलमादाय युष्मभ्यं ददात्वित्यर्थः ; तेन यज्ञाराधितोऽहं युष्मभ्यं कामान् ददामीत्युक्तं भवति ॥ १० ॥

भा ॥ कथम्?

देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११

भा ॥ अनेन देवताराधनभूतेन देवान् मच्छरीरभूतान् मदात्मकानाराधयत । *अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च (९. २४) इति हि वक्ष्यते । यज्ञेनाराधितास्ते देवा मदात्मकाः स्वाराधनापेक्षितान्नपानादिकैर्युष्मान् पुष्णन्तु । एवं परस्परं भावयन्तः परं श्रेयो मोक्षाख्यमवाप्स्यथ ॥ ११ ॥

ता ॥ यज्ञेनात्मनो वृद्धिः कथम्? क्षणिक[:] क्रियारूपश्च यज्ञः कथं कालान्तरभाविफलसाधनम्? *नान्यः पन्थाः (पु.) इत्यादिना ज्ञानस्यैव मोक्षप्रदत्वे सिद्धे कथं स्वर्गादिसाधनतया निर्दिष्टो यज्ञो मोक्षसाधनम्? स्मरन्ति च *कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते । तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ (भा. मो.२४७.७) इति । तथा *नैव धर्मी न चाधर्मी (भा.आश्व.१९.७) *ज्ञानं संन्यासलक्षणम् (ना.प.उ ; भा.आश्व.४३.२६) इति च ; कथं च मोक्षबहिर्भूतानां विचित्रसांसारिककामानां तदनुगुणत्वम्? इति शङ्कास्तवकमभिप्रेत्याह—**कथमिति** । तत्र *देवान्

भावयतेति प्रथमस्योत्तरम् । देवताराधनं चाराधकस्यातिशय एव, अतस्स एवात्मनो वृद्धिः । * यज देवपूजायामिति यज्ञपदमकृतिं धातुं स्मारयति—**देवताराधनभूतेनेति** । यज्ञस्य मोक्षहेतुत्वानुपपत्तिपरिहारायाह—**मदात्मकानिति** । परमात्मसमाराधनतया कृतं कर्मैव मोक्षसाधनज्ञानाङ्गतया स्थित्वा मोक्षं साधयतीति प्रागेवोक्तम् । मदात्मकानित्यस्यान्तर्यामिब्राह्मणादिसिद्धत्वसूचनाय **मच्छरीरभूतानि**त्युक्तम् । यज्ञेन देवानां भावनं हि सन्तोषवत्तया भावनमित्यभिप्रायेणोक्तम्—**आराधयतेति** । तदभिप्रायेण च ब्राह्मणं * तस्मादितः प्रदानं देवा उपजीवन्ति (यजु.३.२.९.७) इति । मदात्मकानित्यस्यात्रानुक्तस्य कथमुपादानमित्यत्राह—**अहं हीति** । क्षणिकस्य फलप्रदानानुपपत्तिपरिहाररूपं द्वितीयं पादं व्याख्याति—**यज्ञेनेत्यादिना पुष्णन्त्वित्यन्तेन** । प्रस्तुताकारपरामर्शितच्छब्दार्थः **यज्ञेनाराधिता** इति । देवानां फलप्रदानशक्तिसिद्ध्यर्थं पुनः **मदात्मका** इत्युक्तम् । एवं च क्षणिकस्यापि देवताप्रीतिरूपापूर्वद्वारा फलसाधनत्वम् ; महाप्रलये त्विन्द्रादिलयेऽपि परदेवताप्रीतिद्वारा पुनः फलप्रदत्वमुपपन्नमित्युक्तं भवति । चतुर्थशङ्कापरिहारमभिप्रेत्याह—**स्वाराधनेति** । देवैराराधकानां भावनं नाम अपेक्षितैः पोषणमित्यभिप्रायेणोक्तम्—**पुष्णन्त्विति** । उत्तरार्धमुक्तस्यैवार्थस्य मोक्षोपयोगित्वज्ञापकमित्यभिप्रायेणाह—**एवमिति** । स्वर्गादिरूपश्रेयोव्यावृत्त्यर्थं परत्वविशेषणमित्यभिप्रायेणोक्तम्—**मोक्षाख्यमिति** ॥११॥

इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२

भा ॥ यज्ञभाविताः—यज्ञेनाराधिताः मदात्मका देवाः इष्टान् भोगान् वो दास्यन्ते—उत्तमपुरुषार्थलक्षणं मोक्षं साधयतां ये इष्टा भोगास्तान् भोगान् पूर्वपूर्वयज्ञभाविता देवा दास्यन्ते, उत्तरोत्तराराधनापेक्षितान् सर्वान् भोगान् वो दास्यन्ते इत्यर्थः । स्वाराधनार्थतया तैर्दत्तान् भोगान् तेभ्योऽप्रदाय यो भुङ्क्ते चोर एव सः । चौर्यं हि नाम—अन्यदीये तत्प्रयोजनायैव परिकल्पिते वस्तुनि स्वकीयतामबुद्धिं कृत्वा तेन स्वात्मपोषणम् । अतोऽस्य न परमपुरुषार्थानर्हतामात्रम् ; अपि तु निरयगामित्वं च भविष्यतीत्यभिप्रायः ॥ १२ ॥

ता ॥ * ते देवा भावयन्तु वः इत्युक्तस्य पोषणस्य प्रकारो * देवान् भावयतेत्यस्य व्यतिरेके प्रत्यवायश्चोच्यते—**इष्टानिति** श्लोकेन । इष्टानित्यस्यार्थः—**उत्तरोत्तराराधनापेक्षितानि**ति । न हि मुमुक्षुभिरुदरपूरणाद्यर्थं भोगा इष्यन्त इति भावः । बहुवचनासङ्कोचमभिप्रेत्योक्तम्—**सर्वानिति** । दास्यन्त इति कर्त्रभिप्रायक्रियाफलात्मनेपदस्वभावानुरोधेनात्मार्थपाचकानां चोरत्वसिद्ध्यर्थं—**स्वाराधनार्थतये**त्युक्तम् । ननु किमत्र चोरत्वम् ? न हि देवानां भोगानसौ गूढं प्रसह्य वा हरति । न च तैर्दत्तस्य स्वहस्तागतस्य भोगश्चौर्यम् । न हि राजादिसेवकास्तद्दत्तभोजिनश्चोरा इति शूलमारोप्यन्ते । एवं च सति सर्वेषां यज्ञादिफलभुजामविशेषेण चोरत्वं प्रसज्यत इत्याशङ्क्याह—**चौर्यं हीति** । परबुद्ध्या परप्रयोजनत्वेन परिकल्पितस्य स्वकीयस्य, परानुमत्या स्वप्रयोजनतया परिकल्पितस्यान्यदीयस्य च व्यवच्छेदाय **अन्यदीय** इत्यादिविशेषणद्वयम् । तेन स्वात्मपोषणमिति चौर्यस्य फलम् । अन्यदीये स्वकीयताबुद्धिकरणमित्येव लक्षणम् । तत्प्रयोजनत्वेत्यन्यदीयत्वफलम् । तेन स्वात्मपोषणानौचित्यद्योतनम् । वस्तुशब्देन चोरयितव्यावान्तरभेदाविवक्षां द्योतयति । **बुद्धिं कृत्वे**त्यनेन चौर्यस्य न कायिकव्यापारोऽवश्यापेक्षित इति सूचितम् । बुद्धिपूर्वत्वं च द्योतितम् । एवं च सति * योऽन्यथा सन्तम् (मा. उ. ४२. ३५) इत्याद्युक्तात्मचौर्यमपि लक्षितं भवति । भगवदीये तद्गतातिशयाधानेच्छयैव परिकल्पिते प्रत्यगात्मनि स्वातिशयाबद्धस्वतन्त्रत्वाभिमानरूपत्वात्तस्य । नन्वेवमप्यत्रोदाहरणे कथं चोरत्वम् ? उच्यते—

देवा हि कर्मभिराराधिता अपि हविर्ग्रहणार्थमेव फलं प्रयच्छन्ति ; यथा राजानष्षड्भागसंग्रहाय स्वाराधकेभ्यः क्षेत्रादिकम् ; तत्र करप्रदानविमुखाः पुरुषा इव हविरादिकमप्रयच्छन्तो दण्ड्या एव—इति । चोरत्वनिर्देशफलितं व्यनक्ति—**अत** इति । चोरत्वादित्यर्थः । **पुरुषार्थानर्हतेत्यनेन** विहितकर्माकरणस्याधिकारित्वनिवृत्तिहेतुत्वमपि ख्यापितम् । **भविष्यतीत्यनेन** प्रत्यवायस्य देहान्तरभावितया योग्यानुपलम्भबाधाभावस्सूचितः ॥ १२ ॥

भा ॥ तदेव विवृणोति—

यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात् ॥ १३

भा ॥ इन्द्राद्यात्मनावस्थितपरमपुरुषाराधनार्थतयैव द्रव्याण्युपादाय विपच्य तैर्यथावस्थितं परमपुरुषमाराध्य तच्छिष्टाशनेन ये शरीरयात्रां कुर्वते, ते त्वनादिकालोपार्जितैः किल्बिषैरात्मयाथात्म्यावलोकनविरोधिभिस्सर्वैर्मुच्यन्ते । ये तु परमपुरुषेणेन्द्राद्यात्मना स्वाराधनाय दत्तानात्मार्थतयोपादाय विपच्याश्नन्ति ते पापात्मानोऽघमेव भुञ्जते । अघपरिणामित्वादघमित्युच्यते । आत्मावलोकनविमुखाः नरकायैव पचन्ते ॥ १३ ॥

ता ॥ पुनरुक्तिपरिहारायार्थान्तरपरत्वव्युदासाय चाह—**तदेव विवृणोति** इति । तत्र पूर्वार्धं * श्रेयः परमवाप्स्यथ इत्यस्य प्रकारकथनम् ; उत्तरार्धं तु * तैर्दत्तान् इत्याद्युक्तचोरत्वप्रपञ्चनरूपम् । यज्ञाकृष्टयष्टव्याकारविशेषकथनम्—**इन्द्राद्यात्मने**त्यादि । अवधारणेन केवलेन्द्राद्यर्थत्वस्वार्थत्वयोर्व्यवच्छेदः । द्रव्योपादानपचनदशयोरपि परमपुरुषाराधनार्थत्वबुद्धिः कार्येति ज्ञापनाय—**द्रव्याण्युपादाये**त्याद्युक्तम् । एतच्च * ये पचन्ति इत्येतद्व्यतिरेकलब्धम् । केवलेन्द्राद्याराधनस्यापि वस्तुतः परमपुरुषाराधनरूपत्वादत्र तद्व्यवच्छेदाय तत्तद्देवतायजनस्य परमपुरुषपर्यन्तत्वसिद्धये च—**यथावस्थित**मित्युक्तम् । यज्ञशिष्टममृताख्यमशितुं शीलं येषां ते यज्ञशिष्टाशिनः । रागप्राप्तशरीरयात्रा यज्ञशिष्टेनैव कार्येति नियमः । सन्तः यज्ञशिष्टाशिन एव वर्तमाना इत्यर्थः । तदेतदुच्यते—**शरीरयात्रां कुर्वते** इति । यद्वा सन्त इति पदमुत्तरार्धस्थपापशब्दप्रतिस्थानीयत्वात्साधकविषयम् । उत्तरार्धवदत्रापि साध्यसाधनांशविभागद्योतनाय यत्तच्छब्दाभ्यां वाक्यभेदकरणम् । तुशब्देन सद्भ्यः पापानां विशेषे बोधिते तेभ्योऽपि सतां विशेषोऽर्थात्सिद्ध इति द्योतनायाह—**ते त्वनादी**ति । अत्र चुल्ल्यादिपञ्चसूनाकृतपापमात्रव्यवच्छेदार्थं सर्वशब्दबहुवचनाभ्यां प्रदर्शितं किल्बिषानन्त्यं समर्थयितुम् **अनादिकालोपार्जितै**रित्युक्तम् । द्विविधानि किल्बिषाणि प्राप्तिविरोधीन्युपायविरोधीनि चेति । तत्र प्राप्तिविरोधीनि भक्तियोगैकनिवर्त्यानीति तेभ्योऽत्र सर्वशब्दसङ्कोचमभिप्रेत्योक्तम्—**आत्मयाथात्म्यावलोकनविरोधिभिरिति** । स्मरन्ति च—* ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥ (भा. मो. २०३. ८) इति । एतेन विरोधित्वाविशेषात्सांसारिकपुण्यान्यप्यत्र किल्बिषशब्देनोच्यन्ते इत्यपि सूचितम् । पूर्वोत्तराघविघातिनो भक्तियोगाद्विशेषसूचनाय—**उपार्जितै**रित्युक्तम् । * आत्मकारणादित्यत्र कारणशब्दः प्रयोजनरूपहेतुपर इति ज्ञापनायोक्तम्—**आत्मार्थतये**ति । पचनमात्रस्याघभोजनत्वेन निन्दानुपपत्तेः * आत्मकारणात्पचन्तीत्यनेनार्थसिद्धमुक्तम्—**अश्नन्ती**ति । पुल्लिङ्गोऽत्र पापशब्दस्तद्गुणसारन्यायात्पापविशिष्टविषय इत्यभिप्रायेणोक्तम्—**पापात्मान** इति । पापस्वभावा इत्यर्थः । अघशब्दस्य भोज्यनिन्दार्थमौपचारिकत्वद्योतनायाघमेवेत्येवकार उक्तः । उपचारनिमित्तं संबन्धमाह—**अघपरिणामित्वा**दिति । अघहेतुत्वादित्यर्थः । फलितमनिष्टद्वयमाह—**आत्मावलोकनविमुखा** इति । आत्मार्थं पचमानस्य

पूर्वकिल्बिषनिवृत्त्यभावादात्मावलोकनवैमुख्यम्; उत्तरोत्तरकिल्बिषहेतुत्वाच्च पुनर्नरकप्राप्तिरिति * केवलाघो भवति केवलादी (अष्ट. २. ८; ऋग्वे. ८. ६. २३. १०. १०. ११७. ६) इति वचनाभिप्रेतमाह—नरकायैवेति। न पुनरैहिकायामुष्मिकाय वा सुखायेति भावः ॥ १३ ॥

भा ॥ पुनरपि लोकदृष्ट्या शास्त्रदृष्ट्या च सर्वस्य यज्ञमूलत्वं दर्शयित्वा यज्ञानुवर्तनस्यावश्यकार्यतामननुवर्तने दोषं चाह—

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः। यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्। तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः। अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६

भा ॥ अन्नात्सर्वाणि भूतानि भवन्ति पर्जन्याद्यान्नसंभव इति सर्वलोकसाक्षिकं यज्ञात्पर्जन्य इति च शास्त्रेणावगम्यते * अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः (ब्र. पु. २९. ४) इत्यादिना। यज्ञश्च द्रव्यार्जनादिकर्तृव्यापाररूपकर्मसमुद्भवः, कर्म च ब्रह्मोद्भवम्। अत्र च ब्रह्मशब्दनिर्दिष्टं प्रकृतिपरिणामरूपंशरीरम्। * तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते (मु. १.२.९) इति हि ब्रह्मशब्देन प्रकृतिर्निर्दिष्टा; इहापि * मम योनिर्महद्ब्रह्म इति हि वक्ष्यते। अतः कर्म ब्रह्मोद्भवम् इति प्रकृतिपरिणामरूपशरीरोद्भवं कर्मेत्युक्तं भवति। *ब्रह्माक्षरसमुद्भवम् इत्यत्राक्षरशब्दनिर्दिष्टो जीवात्मा, अन्नपानादिना तृप्ताक्षराधिष्ठितं शरीरं कर्मणे प्रभवतीति कर्मसाधनभूतं शरीरमक्षरसमुद्भवम्; तस्मात् सर्वगतं ब्रह्म सर्वाधिकारिगतं शरीरं नित्यं यज्ञे प्रतिष्ठितं यज्ञमूलमित्यर्थः। एवं परमपुरुषेण प्रवर्तितमिदं चक्रम्—अन्नात् भूतशब्दनिर्दिष्टानि सजीवानि शरीराणि, पर्जन्यादन्नम्, यज्ञात्पर्जन्यः, यज्ञश्च कर्तृव्यापाररूपात्कर्मणः, कर्म च सजीवाच्छरीरात्, सजीवं शरीरं पुनरप्यन्नात्—इत्यन्योन्यकार्यकारणभावेन चक्रवत्परिवर्तमानम्। इह साधने वर्तमानो यः कर्मयोगाधिकारी ज्ञानयोगाधिकारी वा नानुवर्तयति—न प्रवर्तयति, यज्ञशिष्टेन देहधारणमकुर्वन् सोऽघायुर्भवति; अघारम्भायैव यस्यायुरघपरिणतं वोभयरूपं वा सोऽघायुः; अत एवेन्द्रियारामो भवति, नात्मारामः; इन्द्रियाण्येवास्योद्यानानि भवन्ति; अयज्ञशिष्टवर्धितदेहमनस्त्वेनोद्रिक्तरजस्तमस्क आत्मावलोकनविमुखतया विषयभोगैकरतिर्भवति। अतो ज्ञानयोगादौ यतमानोऽपि निष्फलप्रयत्नतया मोघं पार्थ स जीवति ॥ १४ ॥ १५ ॥ १६ ॥

उक्तस्यैवार्थस्य प्रमाणप्रदर्शनपूर्वकप्रपञ्चनम् * अन्नाद्भवन्ति इत्यादिना क्रियत इत्यादरार्थत्वादपौनरुक्त्यमित्यभिप्रायेणाह—पुनरपीति। यद्यपि लोकदृष्ट्या साक्षाद्यज्ञमूलत्वं दर्शयितुमशक्यम्, तथाऽपि शास्त्रदृष्टिसमुचितवेषेणैतदुच्यत इत्यदोषः। विभजिष्यते च लोकशास्त्रदृष्ट्योर्विषयांशः। पर्जन्यशब्देनात्र पर्जन्यकार्यं वर्षं लक्ष्यते। अन्नादित्यादौ * वृष्टेरन्नं ततः प्रजाः (मनु. ३. ७६) इत्ययमंशो लोकसिद्धत्वादनुपात्तः। * कर्मसमुद्भवः इत्युक्ते पुण्यपापरूपकर्मसमुद्भव इति धीस्स्यात्, तद्व्युदासाय—द्रव्यार्जनेत्याद्युक्तम्। अत्र मुख्यार्थसंभवाद्यज्ञशब्देनापूर्वलक्षणां वदन्तो निरस्ता इति भावः। आदिशब्देन द्रव्यस्यार्जितस्य पचनादि गृह्यते। ननु कर्तृव्यापाररूपस्य कर्मणः कथं ब्रह्मोद्भवत्वम्, तद्धि प्रत्यगात्मजन्यं शरीरेन्द्रियादिजन्यमिति वा निर्देष्टुं युक्तम्; न च सर्वसाधारणं ब्रह्मणो हेतुत्वमिह विशिष्य निर्देष्टव्यम्; ब्रह्मणश्चाक्षरसमुद्भवत्वमनुपपन्नम्; ब्रह्मशब्दस्य परमात्मविषयत्वे वा द्वयोरपि नित्यत्वात् तत्कारणभूतस्य कस्यचिदक्षरस्याभावात्। ब्रह्माक्षरशब्दयोर्वेदपरमात्मविषयतया शङ्करव्याख्याऽपि चक्रत्वासङ्गता। यादवप्रकाशाद्युक्तं ब्रह्मशब्दस्य

स्फोटादिपरत्वमक्षराणां तद्व्यञ्जकत्वादिकं च तत्तत्प्रक्रियादूषणादेव निरस्तम् । *स्फोटस्त्वं वर्णसंश्रयः (हरि. २७९.५४) इति तु वर्णानां स्वार्थस्फुटीकरणशक्तिपरमित्याद्याशङ्क्याह—**अत्र** चेति । चश्शङ्कानिवृत्तौ । अत्रेत्यनेन ब्रह्मशब्दस्य साक्षात्परमपुरुषे मुख्यत्वेऽपि प्रकरणादिबलात्तत्सादन्यत्र तद्गुणलेशयोगादौपचारिकोऽयमित्यभिप्रेतम् । द्रव्यार्जनादिकर्मणश्शरीरिणा साध्यत्वात्तत्र शरीर्यंशस्याक्षरशब्देन विविच्य वक्ष्यमाणत्वात् शरीरांशस्य विवक्षयाऽयं ब्रह्मशब्द इति—**प्रकृतिपरिणामरूपं शरीर**मित्युक्तम् । प्रकृतिपरिणामरूपे शरीरे तद्व्यत्वेन ब्रह्मशब्दनिर्देशाय प्रकृतौ तत्प्रयोगं तावदाह—**तस्मादेत**दिति । एतत् प्रधानाख्यं ब्रह्म कार्याकारेण नामरूपविभागविभक्तं चेतनभोग्यं च जायते इति हि श्रुत्यर्थः । न च तत्र ब्रह्मशब्दः परमात्मविषयः * यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म (मु. १. ९) इति परमात्मनः पृथङ्निर्दिष्टत्वात् । नापि प्रत्यगात्मविषयः, * नामरूपमन्नं च इत्यनेन साक्षात्संबन्धायोगात् ; अन्नत्वं चात्यन्तामुख्यं स्यात्—इति भावः । योनिशब्दनिर्देशान्ममेति परमात्मनः पृथङ्निर्देशाच्च * मम योनिर्महद्ब्रह्म (१४. ६) इत्यत्र ब्रह्मशब्दस्य प्रकृतिविषयत्वं सिद्धम् । **अत** इति—ब्रह्मशब्दस्य प्रकृतौ प्रयोगाच्छरीरस्य च तत्परिणामरूपत्वाद्द्रव्यार्जनादेश्शरीरसाध्यत्वात्परमात्मनश्च जन्यत्वायोगादित्यर्थः । एवमत्रत्यब्रह्मशब्दस्य शरीरविषयत्वे सिद्धे तदासन्ने प्रत्यगात्मनि अक्षरशब्दो युक्त इत्यभिप्रायेणाह—**ब्रह्माक्षरसमुद्भवमित्यत्रे**ति । जीवस्य चाक्षरशब्दवाच्यत्वं * क्षरं प्रधानममृताक्षरं हरः (श्वे. १. १०) * कूटस्थोऽक्षरः (१५. १३) इत्यादिसिद्धम् । नन्वेवमपि * ब्रह्माक्षरसमुद्भवम् इत्ययुक्तम्, स्वशरीरस्य सर्वस्य स्वबुद्धिपूर्वत्वाभावात् । न चात्र चक्रत्वं दृश्यते, अन्नप्रभृतिशरीरपर्यन्तस्य कार्यकारणभावेऽपि शरीरहेतोरक्षरस्य अन्नादिजन्यत्वाभावात् । नच * अन्नाद्भवन्ति भूतानि इति जीवो निर्दिष्टः, तत्र भूतशब्दस्यान्नविकारशरीरमात्रविषयत्वात् ; तत्राह—**अन्नपानादिने**ति । अयमभिप्रायः—न तावदिह शरीरमात्रमक्षरजन्यतया निर्दिष्टम्, किंतु * कर्म ब्रह्मोद्भवम् इत्यनेन कर्मसाधनभूतम् ; तत्साधनत्वं च शरीरस्य प्रत्यगात्माधिष्ठितस्यैव ; तस्य चाधिष्ठातृत्वशक्तिरन्नपानादिजनिततृप्तिनिबन्धना । एवं च सति कर्मसाधनत्वविशिष्टं शरीरं प्रत्यगात्माधिष्ठानहेतुकत्वादक्षरसमुद्भवमिति युक्तमेव ; चक्रत्वं चोपपन्नम्, अक्षरस्यापि शरीराधिष्ठाने अन्नपानादिसापेक्षत्वात् ; न ह्यवश्यमुत्पत्तावेवापेक्षा चक्रत्वहेतुः ; यद्वा कर्म जीवाधिष्ठितशरीरजन्यम्, जीवाधिष्ठितं शरीरं चान्नजन्यम्, * अन्नाद्भवन्ति भूतानि इति वचनात् । भूतशब्दश्चात्र * भ्रामयन् सर्वभूतानि इत्यादाविव सजीवशरीरपरः । अतोऽत्र चक्रत्वमुपपन्नम्—इति । इमं च प्रकारमनन्तरं वक्ष्यति । एवमस्मिन् चक्रेऽनुवर्तनीये पुरुषस्य शास्त्रवश्यस्य कर्तव्यांशनिष्कर्षायोच्यते—**तस्मादि**ति । सङ्कुचितस्य शरीरस्य सर्वव्याप्तत्वायोगादक्षरस्य च तदाधारस्य निर्दिष्टत्वात्तदवान्तरभेदसंग्रहपरस्सर्वशब्द इत्यभिप्रायेणोक्तम्—**सर्वाधिकारिगतमि**ति । न केवलं कर्मयोगाधिकारिणः शरीरं यज्ञसापेक्षम्, किंतु ज्ञानयोगाधिकारिणोऽपीत्यर्थः । यज्ञे प्रतिष्ठितमित्यत्राधिकरणत्वाद्ययोगादाह—**यज्ञमूलमित्यर्थ** इति । प्रवर्तितमित्यस्य प्रवर्तकापेक्षायां * सह यज्ञैः इत्यादिना प्रकृतौ * देवान् भावयत इत्यादिना यज्ञेषु प्रजाः प्रवर्तयन् प्रजापतिरेवासौ भवितुमर्हतीत्यभिप्रायेणोक्तम्—**परमपुरुषेणे**ति । लोकदृष्टिशास्त्रदृष्टिभ्यां सिद्धमन्याशक्यत्वमपरोक्षयतोक्तम्—**इद**मिति । अन्नादित्याना पुनरप्यन्नादित्यन्तेन चक्रत्वं व्यज्यते ; न तावदत्र भवनक्रियायोगिमात्रं निर्दिश्यते, महदादेः कार्यस्यान्नजन्यत्वाभावात् ; अत एव न महाभूतानि, नापि वेतालादिसहपठितभूतजातिः, तत्कथनस्यात्रानुपयुक्तत्वात्, अन्नजन्यत्वे विशेषाभावाच्च ; नापि शरीरमात्रम्, शरीरस्यानुत्पत्तेः, शरीरलक्षणाक्रान्तस्य सर्वस्यान्नजन्यत्वाभावाच्च ; नापि केवलजीवः, तत्स्वरूपनित्यत्वादेरुक्त-

त्वात्। अतः परिशेषाद्भूतशब्दोऽत्र जीवविशिष्टाचित्परिणामविशेषपर इत्यभिप्रायेणोक्तम्—**सजीवानि शरीराणीति**। *कर्म ब्रह्मोद्भवं *ब्रह्माक्षरसमुद्भवम् इत्याभ्यां फलितं समुच्चित्य चक्रत्वसिद्ध्यर्थं निर्दिशति—**कर्म च सजीवाच्छरीरादिति**। **अन्योन्यकार्यकारणभावेनेति** यथासंभवं साक्षात्परम्परया च सिद्धमुक्तम्; न हि साक्षात्सर्वेषामन्योन्यकार्यत्वं कारणत्वं वा, अन्योन्याश्रयप्रसक्तत्वात्; यद्वा कस्यचित्कारणत्वं च सङ्कलय्यान्योन्यकार्यकारणभाव उक्तः। चक्रशब्दोपचारनिमित्तं व्यनक्ति—**चक्रवत्परिवर्तमानमिति**। इह लोके वर्तमानो यः पुरुष इति अधिकरणाधिकर्तव्ययोस्सामान्यनिर्देशादपि इह साधने योऽधिकारिविशेष इति विशेषपरामर्श एवोचितः, इदंशब्दादेस्सन्निहितपरामर्शप्रावण्यात्, अनपेक्षिताभिधानादपि अपेक्षिताभिधानौचित्याच्च—इति **साधने वर्तमाने** इत्यादेर्भावः। अनुवर्तयतीत्यत्रानुमन्तृत्वादिमात्रव्यवच्छेदार्थं पुरुषव्यापारप्राधान्यद्योतनार्थं च **प्रवर्तयती**ति व्याख्यातम्। श्लोके चानुशब्दप्रयोगः परमपुरुषप्रवर्तितानुवर्तनरूपत्वात्प्रवाहरूपत्वाद्वा। अघायुरित्यादीनां त्रयाणां पृथक्पृथग्दोषत्वव्यक्त्यर्थं पूर्वपूर्वस्योत्तरोत्तरहेतुत्वज्ञापनार्थं च भवतीति पृथग्वाक्यकरणम्। अघकारणत्वादघकार्यत्वादुभयसंग्राहकाघसंबन्धित्वमात्राद्वाऽत्राघशब्देनायुषो लक्षणेत्यभिप्रायेण—**अघारम्भायैवेत्यादि** निर्वाहत्रयमुक्तम्। **अत एवेति**—उक्तप्रकारेणाघायुष्ट्वादेवेत्यर्थः। इन्द्रियाराम इत्यस्याभिप्रेतं व्यवच्छेद्यमाह—**नात्माराम** इति। विशेषणत्वादिसिद्धव्यवच्छेदाभिप्रायसिद्ध्यर्थं समासतदंशयोरर्थमाह—**इन्द्रियाण्येवेति**। इन्द्रियाणां कथमारामत्वमिति शङ्कायाम् *एवं प्रवर्तितम् इत्यादिना *इन्द्रियारामः इत्यन्तेन फलितमाह—**अयज्ञशिष्टेति**। **अत इति**—विषयभोगैकरतित्वादित्यर्थः। स इति निर्देशस्य पूर्वव्याख्यातप्रकारयच्छब्दार्थविषयत्वात् मोघशब्दस्य निष्फलप्रयत्नताविषयस्य प्रतिहन्तव्यप्रयत्नसाकाङ्क्षत्वाच्चाह—**ज्ञानयोगादौ यतमानोऽपीति** ॥ १६ ॥

भा ॥ असाधनायत्तात्मदर्शनस्य मुक्तस्येव महायज्ञादिवर्णाश्रमोचितकर्मानारम्भ इत्याह—

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ १७
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८
तस्मादसक्तस्सततं कार्यं कर्म समाचर। असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९

भा ॥ यस्तु ज्ञानयोगकर्मयोगसाधननिरपेक्ष स्वत एवात्मरतिरात्माभिमुखः, आत्मनैव तृप्तो नान्नपानादिभिरात्मव्यतिरिक्तैः, आत्मन्येव च सन्तुष्टो नोद्यानस्रक्चन्दनगीतवादित्रनृत्तादौ, धारणपोषणयोग्यादिकं सर्वमात्मैव यस्य, तस्यात्मदर्शनाय कर्तव्यं न विद्यते, स्वत एव सर्वदा दृष्टात्मस्वरूपत्वात्। अत एव तस्यात्मदर्शनाय कृतेन तत्साधनेन नार्थः—न किंचित्प्रयोजनम्; अकृतेनात्मदर्शनसाधनेन न कश्चिदनर्थः; असाधनायत्तात्मदर्शनत्वात्। स्वत एवात्मव्यतिरिक्तसकलाचिद्वस्तुविमुखस्यास्य सर्वेषु प्रकृतिपरिणामविशेषेष्वाकाशादिभूतेषु सकार्येषु न कश्चित्प्रयोजनतया व्यपाश्रयः; यतस्तद्विमुखीकरणाय साधनारम्भः; स हि मुक्त एव। यस्मादसाधनायत्तात्मदर्शनस्यैव साधनाप्रवृत्तिः, यस्माच्च साधने प्रवृत्तस्यापि सुशकत्वादप्रमादत्वादन्तर्गतात्मयाथात्म्यानुसन्धानत्वाच्च ज्ञानयोगिनोऽपि मात्रया कर्मानुवृत्त्यपेक्षत्वाच्च कर्मयोग एवात्मदर्शननिवृत्तौ श्रेयान्, तस्मादसक्तपूर्वकं कार्यमित्येव सततं यावदात्मप्राप्ति कर्मैव समाचर। *असक्तः, कार्यम्, इति वक्ष्यमाणाकर्तृत्वानुसन्धानपूर्वकं च कर्माचरन् पुरुषः कर्मयोगेनैव परमाप्नोति *आत्मानं प्राप्नोतीत्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥

ता ॥ एवं ज्ञानयोगाद्यधिकारिणोऽपि कर्मकर्तव्यताया उक्तत्वात्, *तस्मादसक्तः इत्यादिना वक्ष्यमाणत्वाच्च तन्मध्ये *यस्त्वात्मरतिः इत्यादिश्लोकौ न ज्ञानयोगाद्यधिकारिविषयौ, किंतु फलदशाविषयावित्यभिप्रायेणाह—**असाधना-**

यत्नेति । एतेन * अभयं सर्वभूतेभ्यो दत्वा नैष्कर्म्यमाचरेत् (भा. आश्व. ४६. १८) इत्याद्युक्तसंन्यासाश्रमिपरत्वेन परव्याख्यानं निरस्तम्, तस्यापि स्वाश्रमधर्मनिष्ठस्य सर्वकर्मनिवृत्त्यभावात् । वर्णाश्रमविशिष्टस्यैव हि [भिन्न]वर्णाश्रमधर्मारम्भः, न पुनर्वर्णाश्रमादिनामरूपविनिर्मुक्तस्येति मुक्तशब्दस्य भावः । यस्त्विति **तु**शब्दः साधननिष्ठव्यावृत्त्यर्थ इत्यभिप्रायेण **ज्ञानयोगकर्मयोगसाधननिरपेक्ष** इत्युक्तम् । कथं तर्हि साधनाभावे साध्यसद्भावः इत्यत्राह—**स्वत एवेति** । प्रतिबन्धकं हि तन्निवर्त्त्यम्; आत्माभिमुखत्वं तु स्वतःप्राप्तमिति भावः । रतिशब्दोऽत्राभिमुख्यविषयः, तृप्त्यादेः पृथङ्निर्देशात् । * आत्मरतिरेव * आत्मन्येव इति पूर्वापरवत् * आत्मतृप्तः इत्यत्राप्यवधारणं विवक्षितमित्यभिप्रायेणाह—**आत्मनैवेति** । तृप्तितुष्टिशब्दौ हि पोषकभोग्यजन्यप्रीतिविषयतया प्रसिद्धावित्यभिप्रेत्य तत्तदुचितं व्यवच्छेद्यमाह—**नान्नपानादिभिरिति, नोद्यानेत्यादि** च । *आत्मरतिः इत्यादेर्व्यवच्छेद्यत्रयं सङ्कलय्य सूचयन्वाक्यार्थमाह—**धारणेति** । आदिशब्देन भोगस्थानादि विवक्षितम्; यस्य तु ज्ञानयोगनिष्ठस्यापि धारणादिकमन्नपानादिभिरेव, तस्य कर्तव्यं विद्यत एवेति भावः । ननु * तस्य कार्यं न विद्यते इत्युक्तम्, मुक्तस्यापि * जक्षत् क्रीडन् (छा. ८. १२. ३) इत्यादिकार्यश्रवणात् । न चात्र कार्यमिति * न तस्य कार्यम् इतिवच्छरीरादि निर्दिश्यते, तन्निषेधस्येदानीमनुपयुक्तत्वात्, तदत्यन्तनिषेधस्य च * द्वादशाहवत् (शा. ४. ३. १२) इत्यादिसूत्रतद्विषयश्रुतिभिर्विरुद्धत्वादित्याशङ्क्योक्तम्—**आत्मदर्शनाय कर्तव्यं न विद्यते** इति । यस्त्वात्मरतिः इत्यादिनाऽभिप्रेतं हेतुं व्यनक्ति—**स्वत एवेति** । * स्वत एव सर्वदा इत्युभाभ्याम् उत्पत्त्यर्थं विनाशपरिहारार्थं च साधनापेक्षा नास्तीति ज्ञापितम् । अर्थशब्दस्यात्र प्रयोजनविषयतां वदन् * तस्य कार्यं न विद्यते इत्यनेन पौनरुक्त्यं परिहरति—**न किंचित्प्रयोजन**मिति । प्रयोजनाभावात्कर्तव्यं नास्तीत्युक्तं भवति । नाकृतेनेत्यत्रार्थो न निषेध्यः, किंत्वकरणे प्रत्यवाय इत्यभिप्रायेणाह—**न कश्चिदनर्थ** इति । अर्थानर्थौ ह्यात्मदर्शनतदभावौ; तत्र पूर्वस्य सिद्धत्वात् न साध्यत्वम्, उत्तरस्य चात्यन्तनिवृत्तत्वान्न निवर्तनीयत्वमित्यभिप्रायेणाह—**असाधनायत्तात्मदर्शनत्वा**दिति । * न चास्य इत्यादिना प्रतिबन्धनिवृत्त्यर्थमपेक्षा नास्तीत्युच्यत इत्यभिप्रायेणाह—**स्वत एवेत्यादि** । अस्येतिशब्द आत्मरतिरित्यादिनिर्दिष्टप्रकारपरामर्शीत्यभिप्रायेणोक्तम्—**सकलाच्चिद्वस्तुविमुखस्येति** । सर्वशब्दस्यात्रासङ्कोचनेन सावान्तरभेदसमस्तप्राकृतभोग्यविषयतामाह—**प्रकृतीत्यादिना सकार्येष्वित्यन्तेन** । परिणामशब्देनात्र भूतशब्दस्य भवनक्रियायोगिपरत्वं दर्शितम् । * अर्थव्यपाश्रयः इत्यत्रार्थशब्दो भावप्रधान इति व्यनक्ति—**प्रयोजनतया व्यपाश्रय** इति । व्यपाश्रयः स्वीकरणम् । अर्थ एव व्यपाश्रयः स्वीकरणीयमिति वाऽभिप्रेतम् । एतेन प्रयोजननिमित्तो व्यपाश्रय इति परव्याख्या निरस्ता । न चास्येत्यादेर्हेत्वभिप्रायेण वा मुक्त एव हि साधननिरपेक्ष इति श्लोकद्वयार्थनिगमनाभिप्रायेण वोच्यते—**स हि मुक्त एवेति** ॥ १७ ॥ १८ ॥

ता ॥ तस्मादित्येतत्कर्मणः कर्तव्यतायां पूर्वोक्तसमस्तहेतुपरामर्शीत्यभिप्रायेणाह—**यस्मादिति** * असक्तः कार्यम् इत्युभयमपि कर्मणोऽनुष्ठानप्रकारपरमित्यभिप्रायेणोक्तम्—**असङ्गपूर्वकं कार्यमित्येवेति** । कार्यमित्येव, न तु तत्कार्यस्वर्गाद्यपेक्षयेत्यर्थः । सततमित्यत्र ज्ञानयोगाधिकारे सत्यपि कर्मयोगस्यैवानुष्ठेयत्वायाह—**यावदात्मप्राप्ती**ति । ज्ञानयोगव्यवधानमन्तरेणापि कर्मयोग एवात्मप्राप्तिं साधयतीति * असक्तो हि इत्यादिनोच्यत इत्यभिप्रायेणाह—**असक्त इति** । **कर्माचरन्....परमाप्नोतीति** । न पुनः कर्माचरणानन्तरमन्यत्कृत्वेत्यर्थः । कर्माचरन् परमाप्नोतीत्युक्ते अर्थसिद्धं कर्मणस्साधनत्वं व्यनक्ति—**कर्मयोगेनैवेति** । अत्र प्राप्यतया निर्दिष्टः परो देहातिरिक्तात्मप्रकरणत्वात्प्रकृतेः परो जीव इत्यभिप्रायेणाह—**आत्मानं प्राप्नोतीत्यर्थः इति** ॥ १९ ॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।

भा ॥ यतो ज्ञानयोगाधिकारिणोऽपि कर्मयोग एवात्मदर्शने श्रेयान् ; अत एव हि जनकादयो राजर्षयो ज्ञानिनामग्रेसराः कर्मयोगेनैव संसिद्धिमास्थिताः—आत्मानं प्राप्तवन्तः ॥

ता ॥ कर्मयोगस्य ज्यायस्त्वं शिष्टानुष्ठानेनोदाहियते—**कर्मणैवेति**—हिशब्दसूचितं ज्ञानयोगाधिकारं दर्शयति—**राजर्षयो ज्ञानिनामग्रेसरा** इति । राजानो हि विस्तीर्णगाधमनसः ; तत्रापि ऋषित्वादतीन्द्रियार्थद्रष्टारः, तत्राप्यात्मविदः, तत्रापि निसर्गनिगृहीतेन्द्रियत्वात्प्रकृष्टोत्पत्तिकसत्त्वादिना च तेषामग्रगण्या इत्यर्थः । कर्मणैवेत्येवकारो ज्ञानयोगशक्तस्यापि कर्मयोगानुपरतिपरः । संसिद्धिशब्दस्य परमाप्तीतीयुक्तनिदर्शनपरत्वात्—**आत्मानं प्राप्तवन्त** इत्युक्तम् । एवं च सति कर्मणैवेति पूर्वप्रसक्तज्ञानयोगनैरपेक्ष्यपरमवधारणमप्युपपन्नं भवति ॥ २० ॥

भा ॥ एवं प्रथमं मुमुक्षोर्ज्ञानयोगानर्हतया कर्मयोगाधिकारिणः कर्मयोग एव कार्य इत्युक्त्वा ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगात्कर्मयोग एव श्रेयानिति सहेतुकमुक्तम् । इदानीं शिष्टतया व्यपदेश्यस्य सर्वथा कर्मयोग एव कार्य इत्युच्यते—

लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ २०
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१

भा ॥ लोकसंग्रहं पश्यन्नपि कर्मैव कर्तुमर्हसि ; श्रेष्ठः कृत्स्नशास्त्रज्ञतयाऽनुष्ठातृतया च प्रथितो यद्यदाचरति ; तत्तदेवाकृत्स्नविज्जनोऽप्याचरति ; अनुष्ठीयमानमपि कर्म श्रेष्ठो यत्प्रमाणं यदङ्गयुक्तमनुतिष्ठति तदङ्गयुक्तमेवाकृत्स्नविल्लोकोऽप्यनुतिष्ठति । अतो लोकरक्षार्थं शिष्टतया प्रथितेन श्रेष्ठेन स्ववर्णाश्रमोचितं कर्म सकलं सर्वदाऽनुष्ठेयम् ; अन्यथा लोकनाशजनितं पापं ज्ञानयोगादप्येनं प्रच्यावयेत् ॥ २१ ॥

उत्तरसङ्गत्यर्थमुक्तं संग्रहेणोद्गृह्णाति—एवमिति । इदानीमित्यनेन लोकसंग्रहमित्यादिकं * विद्वान्युक्तस्समाचरन् (२६) इत्यन्तमविच्छिन्नं—**सर्वथेति** । लोकरक्षार्थम्, लोकोपप्लवजनितस्वपापेन ज्ञानयोगादपि प्रच्यावकेनोभयभ्रष्टत्वपरिहारार्थं चेत्यर्थः । लोकसंग्रहमपीत्यन्वये लोकसंग्रहस्याप्रधानता प्रतीयेत, पश्यन्नपीत्युक्ते तु कर्मकर्तव्यतायां पूर्वोक्तहेतुभ्यो लोकसंग्रहस्याधिक्यं द्योत्येतेत्ययमन्वय उक्तः । एवकारो ज्ञानयोगव्यवच्छेदाय कर्तुमेवार्हसीत्यन्वेतव्य इत्यभिप्रायेणोक्तम्—**कर्मैव कर्तुमर्हसीति** । यद्वा लोकसंग्रहमेवेत्येवकारो लोकसंग्रहस्य नैरपेक्ष्यपरः, कर्मैवेति तु प्रकरणापन्नमुक्तम् । अर्हसीत्यनेन कर्मयोगैकानुष्ठानकारणमर्जुनस्य वैशिष्ट्यं द्योत्यते—**श्रेष्ठ** इति । * प्रशस्यस्य श्रः (अष्टा. ५. ३. ६०) इत्यनुशासनात्प्रशस्यतम इत्यर्थः । तच्चास्य प्रशस्यतमत्वमनुष्ठातॄणामनुविधेयानुष्ठानत्वोपयोगीति मत्वा * तानकृत्स्नविदो मन्दान् कृत्स्नवित्न विचालयेत् (२९) इति वक्ष्यमाणं चानुसन्धाय—**कृत्स्नशास्त्रज्ञतयाऽनुष्ठातृतया च प्रथित** इत्युक्तम् । अकृत्स्नविदोऽनुष्ठातुः कृत्स्नवित्त्वेऽप्यननुष्ठातुरुभयाकारवत्त्वेऽपि अप्रसिद्धस्यानुविधेयानुष्ठानता नास्तीति तद्व्यवच्छेदाय पदत्रयम् । * स यत्प्रमाणं कुरुते इत्यत्र स यच्छास्त्रं प्रमाणीकरोति तदनुवर्तते लोक इत्यस्मिन्नर्थे तदनुवर्तनस्य तदर्थानुष्ठानरूपत्वादर्थतः पुनरुक्तिस्स्यात् ; कुरुत इति चैतद्ध्रुध्यत इत्येतस्मिन्नर्थे नेतव्यम् । *लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसीति पूर्ववाक्ये च कर्तुमर्हसीत्येतावन्मात्रमुक्तम्, श्रुतिस्मृत्यादिकमपि प्रमाणीकर्तुमर्हसीत्यनुपन्यस्तम् ; येन तदर्थमिदमुच्येत * यद्यदाचरतीत्यङ्गिन्यनुष्ठेयस्वरूपे निर्दिष्टे तत्प्रकारे त्वपेक्षिते बुभुत्सा जायते ; अतस्तदभिधानमेवो-

चितमित्यभिप्रायेण यत्प्रमाणं यदङ्गयुक्तमित्युक्तम् । प्रमाणशब्दोऽत्रावधिपरः ; अनुष्ठेयकर्मस्वरूपस्य चावधिरङ्गान्येव ; अत एव हि विध्यन्तशब्देनेतिकर्तव्यतामुपचरन्ति । यत्प्रमाणं यथाभूतमिति यादवप्रकाशभाष्यमप्येतत्परमेव । असिन्नर्थे कुरुते इतिशब्दस्वारस्यप्रदर्शनाय–**अनुतिष्ठतीत्युक्तम्** । अन्यथाऽर्थान्तरे लक्षणा स्यादिति भावः । यत्प्रमाणमिति निर्दिष्टविशिष्टसिद्ध्यर्थं तच्छब्दार्थमाह–**तदङ्गयुक्तमिति** । ननु यच्छब्देनाङ्गे निर्दिष्टे कथं तच्छब्देनाङ्गविशिष्टपरामर्शः ? इत्थम्, यदङ्गयुक्तमनुतिष्ठति तदाचरतीत्युक्ते तदङ्गमाचरतीत्येव शब्दवृत्तिः अङ्गस्यचाङ्गिपृथग्भावायोगादर्थतस्तदङ्गविशिष्टमिति सिद्धम् । आभिप्रायिकौ करणाकरणयोरर्थानर्थौ प्रकाशयति–**अत** इति । लोकानुविधेयानुष्ठानत्वादित्यर्थः–**सर्वदेति** । यावदात्मप्राप्तीत्यर्थः । ननु स्वयं यदि ज्ञानयोगेन मुक्तो भवति किमस्य लोकेन संगृहीतेनासंगृहीतेन वेत्यत्राह–**अन्यथेति** । ज्ञानयोगाधिकार्यहमिति कृत्वा कर्मयोगपरित्यागे सतीत्यर्थः । ज्ञानयोगादपीत्यपिशब्द उभयभ्रष्टतां द्योतयति ॥ २१ ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२

भा ॥ न मे सर्वेश्वरस्याप्तकामस्य सर्वज्ञस्य सत्यसङ्कल्पस्य त्रिषु लोकेषु देवमनुष्यादिरूपेण स्वच्छन्दतो वर्तमानस्य किंचिदपि कर्तव्यमस्ति, यतोऽनवाप्तं कर्मणाऽवाप्तव्यं न किंचिदप्यस्ति; अथापि लोकरक्षायै कर्मण्येव वर्ते ॥ २२ ॥

ता ॥ मयाऽपि हि निरपेक्षेणैव लोकक्षोभे निष्प्रत्यवायेनापि परमकारुणिकतया लोकरक्षार्थं कर्मैव क्रियते ; त्वया तु सापेक्षेण सप्रत्यवायेन किं पुनरित्युच्यते * न मे पार्थेत्यादि श्लोकत्रयेण । मे इति पदेन कर्मवश्यचेतनान्तरव्यावृत्तो यथावस्थितो हीश्वरः परामृश्यत इत्यभिप्रायेण विलक्षणनित्यसिद्धविभूतिगुणपौष्कल्यस्य व्यञ्जनानि सर्वेश्वरस्येत्यादिविशेषणान्युक्तानि–**सर्वेश्वरस्येति** । श्रुतिस्मृती हि ममैवाज्ञा, सा चान्यैरनुवर्तनीया, न हि मे नियन्त्रन्तरमस्ति, यदधीनप्रत्यवायभयात्कुर्यामिति भावः । **आप्तकामस्येति** । न च मे सङ्कल्पमात्रादसाध्यमितःपूर्वमभिलाषदशामात्रापन्नं प्रयोजनमस्ति, यदुपायतया कर्म कर्तव्यमिति भावः–**सर्वज्ञस्य सत्यसङ्कल्पस्येति** । नापि मे कर्मवश्यानां देवमनुष्यतिरश्चां सजातीयतयाऽवतीर्णस्यापि तेषामिव ज्ञानसङ्कोच इच्छाप्रतिघातो वाऽस्ति, यन्निवृत्त्यर्थं कर्म कार्यमित्याशयः । त्रिषु लोकेष्वित्यत्रार्थसिद्धं विशेषमध्याहृत्याह–**देवमनुष्येति** । उक्तं च भगवता **पराशरेण**–* समस्तशक्तिरूपाणि तत्करोति जनेश्वरः । देवतिर्यङ्मनुष्याख्या चेष्टावन्ति स्वलीलया ॥ जगतामुपकाराय न सा कर्मनिमित्तजा । चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥ (वि. ६. ७. ७१, ७२) इति । * नानवाप्तमवाप्तव्यम् इत्येतत्कर्तव्याभावेऽपेक्षितहेतुपरतया व्याख्याति–**यत** इति । उत्तरश्लोकपर्यालोचनसिद्धं प्रयोजनमाह–**अथापि लोकरक्षायै** इति । अथापीति चकारस्यार्थः कर्मणि वर्त एवेत्युक्ते न कदाचिदपि कर्मणो विरम्य ज्ञानयोगमनुतिष्ठामीति फलितम् ; तद्व्यञ्जनायोक्तम्–**कर्मण्येव वर्ते** इति । यद्वा प्रकरणौचित्यादेवकारोत्र भिन्नक्रमः ॥ २२ ॥

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् । सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४

भा ॥ अहं सर्वेश्वरस्सत्यसङ्कल्पः स्वसङ्कल्पकृतजगदुदयविभवलयलीलश्छन्दतो जगदुपकृतिमर्त्यो जातोऽपि मनुष्येषु शिष्टजनाग्रेसरवसुदेवगृहेऽवतीर्णस्तत्कुलोचिते कर्मण्यतन्द्रितस्सर्वदा यदि न वर्तेय, मम

शिष्टजनाग्रेसरवसुदेवसूनोर्धर्मार्थकृत्स्नविदशिष्टास्तधर्मप्रकारेणायमेव धर्म इत्यनुवर्तन्ते ; ते च स्वकर्तव्याननुष्ठानेनाकरणे प्रत्यवायेन चात्मानमलब्ध्वा निरयगामिनो भवेयुः ; अहं कुलोचितं कर्म न चेत्कुर्याम्, एवमेव सर्वे शिष्टलोका मदाचारायत्तधर्मनिश्चयाः अकरणादेवोत्सीदेयुः—नष्टा भवेयुः । शास्त्रीयाचाराननुपालनात्सर्वेषां शिष्टकुलानां संकरस्य च कर्ता स्याम् । अत एवेमाः प्रजाः उपहन्याम् । एवमेव त्वमपि शिष्टजनाग्रेसरपाण्डुतनयो युधिष्ठिरानुजोऽर्जुनस्तन् यदि ज्ञाननिष्ठायामधिकरोषि ; ततस्त्वदाचारानुवर्तिनोऽकृत्स्नविदशिष्टा मुमुक्षवः स्वाधिकारमजानन्तः कर्मनिष्ठायां नाधिकुर्वन्तो विनश्येयुः । अतो व्यपदेश्येन विदुषा कर्मैव कर्तव्यम् ॥ २४ ॥

ता ॥ कर्तव्यप्रयोजनयोरभावे किमर्थं तर्हि कर्म क्रियत इति शङ्कायामुच्यते यदि ह्यहमिति । पूर्वश्लोकः त्रिषु लोकेष्विति निर्देशात्सर्वावतारपरः ; अ यं तु मनुष्या इति दर्शनात्कृष्णावतारासाधारणः । तस्मादहमिति निर्देशस्येश्वरस्वभावसमुचितकृष्णावतारासाधारणाकारविषयतामाह—**सर्वेश्वर** इत्यादिभिः । **सर्वेश्वरस्सत्यसङ्कल्प** इति । पूर्ववत् आप्तकामत्वाविरोधायोच्यते—**स्वसङ्कल्पकृतेति** । स्वसङ्कल्पमात्रेण सर्वं नियन्तुं शक्तोऽपि ज्ञानप्रदानादिद्वारा प्रवर्तनार्थं जगदुपकृतिमर्त्यो जातोऽपीत्युक्तम्, अन्यथा भूतावेशन्यायेन प्रवर्तितानां शास्त्रवश्यताभावात्तत्तदनुष्ठानाधीनं फलं न स्यात् ; * छन्दतस्संप्रवर्तते इत्याद्यनुसारेणाह—**छन्दत** इति । न तु कर्मणेत्यर्थः । कर्मफलभोक्तृत्वं व्युदस्यता **जगदुपकृतिमर्त्य** इत्यनेन * जगदुपकृतिमर्त्यं को विजेतुं समर्थः (वि. ५. ३०. ८०) इति पुराणोक्तिस्स्मारिता । अपिशब्देनाकर्मवश्यावतारोऽपीत्यभिप्रेतम् । * अजायमानो बहुधा विजायते (ना) * नाकारणात्कारणाद्वा (वि. ५. १. ५१) * इच्छागृहीताभिमतोरुदेहः (वि. ६. ५. ८४) इत्यादिकमत्रानुसंहितम् । अनुविधेयानुष्ठानत्वसिद्ध्यर्थं हिशब्दद्योतितप्रसिद्धिप्रकारविवरणार्थं चोक्तम्—**मनुष्येष्वित्यादि** । नन्वयमीश्वरः कस्मिन् कर्मणि वर्तेत, न ह्यस्य परमार्थतो वर्णाश्रमास्सामान्यधर्मयोग्यं मनुष्यत्वादिकं वाऽस्ति, येनाकर्मवश्य इच्छया कर्म कुर्वाणोऽपि तत्तदुचितं कर्मोपाददीत—इति शङ्कायां * कुलोचितमतिः क्षात्रं धर्मं स्वं बहुमन्यते (रा. अ. १.१६) इत्याद्यनुसारेणाह—**तत्कुलोचित** इति । अयं भावः—सत्यमस्य परमार्थतो वर्णाश्रमादिकं नास्ति, तथाऽपि तत्तदुचितकर्मकरणायाप्राकृतमेव विग्रहं तत्तज्जातीयसन्निवेशं परिणमयति ; तत्र तत्तज्जातीयत्वबुद्ध्या पुरुषाणामनुविधेयानुष्ठा[नः]नत्वं स्यात्—इति । **अतन्द्रितः**—अनुदासीनः । **सर्वदेति** जातुशब्दार्थः ; जात्वपीति हि तदभिप्रायः । अनुविधेयत्वोपयुक्तप्रकारविवक्षां ममेत्यत्रापि दर्शयति—**मम शिष्टेति** । सर्वश इति प्रमाणपौष्कल्यपरम्, सेतिकर्तव्यताकत्वपरं वेत्यभिप्रायेणाह—**सर्वप्रकारेणेति** । **अनुवर्तन्ते**—अनुवर्तेरन्नित्यर्थः ; प्रसङ्गरूपस्यापि सिद्धवत्कारामिप्रायेण वर्तमानव्यपदेशः । वक्ष्यमाणप्रसङ्गार्थं मनुष्याणां पूर्वसिद्धस्वानुवृत्तिमात्राभिप्रायेण [वा] अनिष्टप्रसङ्गपरत्वायाह—**ते चेति** । शास्त्रमेवानुसृत्य तथाकरणं नाद्रियेरन्नित्यत्राह—**उत्सीदेयुरिति** । लोकशब्दस्याचारपरजनविषयतामौचित्यसिद्धामभिप्रेत्योक्तम्—**शिष्टलोका** इति । इमे इतीदंशब्दबहुवचनयोस्सामर्थ्यात्—**सर्व** इत्युक्तम् । सर्वेषां शास्त्रार्थानां सर्वैर्निश्चेतुमशक्यत्वाच्छिष्टाचारदत्तदृष्टीनामुक्तायां अनुवृत्तेः प्रकारमालोच्योक्तम्—**मदाचारेत्यादि** । विशरणार्थसंभवात्पुरुषार्थहानापुरुषार्थप्राप्तिरूपो नाश इहोत्साद इत्याह—**नष्टा भवेयुरिति** । * असन्नेव (आ. ६) इत्यादिवदेतत् । अकरणस्योत्सादहेतुत्वेऽवान्तरव्यापारस्सङ्करः ; स च ब्राह्मणादिधर्मस्य युद्धनिवृत्त्यादेः क्षत्रियादिभिरनुष्ठानम् । उपहतिः पश्वादपि कर्मानर्हता । स्वात्मनि दृष्टान्तभूते दर्शितमर्थं दार्ष्टान्तिकेऽभिप्रेतं व्यञ्जयति—**एवमेव त्वमिति** । * न मे पार्थ (२१) इति पार्थशब्दसंबुद्ध्यभिप्रेतमनुविधेयत्वोपयोग्याकारत्रयमाह—**शिष्टेति** । युधिष्ठिरशब्दोपादानं युद्धप्रोत्साहनाय रणयज्ञास्त्यक्षत्रधर्मनिष्ठताद्योतनार्थम् ; किं तव पित्रादिप्रतिसंबध्यन्तरेण, स्वयमेव हि शिष्टजनाग्रेसर-

तयोर्वशीविराटतनयादिवृत्तान्तैः प्रसिद्धस्त्वमित्यभिप्रायेणाह—**अर्जुनस्सन्निति** । धर्मो हि शिष्टेनानुष्ठेयः ; ज्ञानयोगश्च परमधर्मः ; ततश्च तदनुवर्तनं लोकस्य मोक्षायैव स्यादिति सर्वलोकरक्षैव भवेदिति शङ्कायामुक्तम्—**स्वाधिकारमजानन्त** इति । तदनधिकारिणां तत्रानुप्रवेशेनोभयभ्रष्टता स्यादिति भावः । लोकसंग्रहमित्यादिनोक्तमुपसंहरति—**अत** इति ॥ २३ ॥ २४ ॥

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान् युक्तस्समाचरन् ॥ २६

भा ॥ अविद्वांसः—आत्मन्यकृत्स्नविदः, कर्मणि सक्ताः कर्मण्यवर्जनीयसंबन्धाः आत्मन्यकृत्स्नवित्तया तदभ्यासरूपज्ञानयोगेऽनधिकृताः कर्मयोगाधिकारिणः कर्मयोगमेव यथा आत्मदर्शनाय कुर्वते ; तथा आत्मनि कृत्स्नवित्तया कर्मण्यसक्तो ज्ञानयोगाधिकारयोग्योऽपि व्यपदेश्यदिशष्टो लोकरक्षार्थं स्वाचारेण शिष्टलोकानां धर्मनिश्चयं चिकीर्षुः, कर्मयोगमेव कुर्यात् । अज्ञानामात्मन्यकृत्स्नवित्तया ज्ञानयोगोपादानाशक्तानां मुमुक्षूणां कर्मसङ्गिनामनादिकर्मवासनया कर्मण्येव नियतत्वेन कर्मयोगाधिकारिणां कर्मयोगादन्यदात्मावलोकनसाधनमस्तीति न बुद्धिभेदं जनयेत् । किं तर्हि ? आत्मनि कृत्स्नवित्तयाज्ञानयोगशक्तोऽपि पूर्वोक्तरीत्या कर्मयोग एव ज्ञानयोगनिपेक्ष आत्मावलोकनसाधनमिति बुद्धया युक्तः कर्मैवाचरन् सकलकर्मस्वकृत्स्नविदां प्रीतिं जनयेत् ॥ २५ ॥ २६ ॥

ता ॥ लोकस्य कर्मयोगज्ञानयोगयोरधिकारानधिकारप्रकारो विदुषस्तु स्वाधिकारतिरस्कारेण तदधिकारानुरूपाचरणं लोकसङ्ग्रहप्रकारश्चोच्यते—**सक्ता** इत्यादिश्लोकद्वयेन । अवेदनं प्रस्तुतविषयमिति ज्ञापनायोक्तम्—**आत्मन्यकृत्स्नविद** इति । एवमुत्तरत्र विद्वानज्ञानामिति शब्दयोरपि द्रष्टव्यम् । अत्यन्तानात्मज्ञताव्युदासायाकृत्स्नशब्दः । पूर्वोक्तं प्रकृतिसंबन्धेन कर्मणोऽवर्जनीयत्वं सक्ताः इत्यनेन विवक्षितमित्यभिप्रायेणाह—**कर्मण्यवर्जनीयसंबन्धा** इति । अविद्वांसः कर्मणि सक्ता इत्युभयं न सांसारिककर्मतत्परपुरुषविषयम्, तथा सति कर्मयोगमपि परित्यज्य सांसारिककर्मण्येव विदुषाऽप्यनुष्ठेयानि स्युः ; तस्माज्ज्ञानयोगानधिकारः कर्मयोगाधिकारश्च ताभ्यां सूच्यत इत्यभिप्रायेण **आत्मन्यकृत्स्नवित्तये**त्यादिकमुक्तम् । एवमुत्तरत्र *अज्ञानां कर्मसङ्गिनाम् (२६) इत्यत्रापि ग्राह्यम् ; यथा कुर्वन्ति तथा कुर्यादित्येतदपि न केवलं दृष्टान्तदार्ष्टान्तिकविषयम्, अपि तु येन प्रकारेण स्वानुष्ठानं दृष्ट्वाऽन्ये कर्म कुर्युः, तेन प्रकारेण विद्वानाचरेदित्येतदभिप्रायम् ; तथासति हि *चिकीर्षुर्लोकसंग्रहम् (२५) इत्यपि संगतं भवतीत्यभिप्रायन्वाक्यार्थमाह—**आत्मनी**त्यादिना **कुर्या**दित्यन्तेन । विद्वान् असक्तः इत्युभाभ्यां फलितमुक्तं—**ज्ञानयोगाधिकारयोग्योऽपी**ति । संग्रहशब्देन लोकरञ्जनादिभ्रमव्युदासायाह—**धर्मनिश्चय**मिति । लोकस्य संग्रहणमेकीकृत्य स्वीकरणं स्वानुष्ठाने समानाभिप्रायतया सयूथ्यतापादनमित्यर्थः । कर्मवासना उत्तरोत्तरपुण्यपापारम्भकपूर्वपूर्वपुण्यपापांशविशेषः ; उत्तरोत्तरशरीरप्रेरणसमर्थस्मृतिहेतुः पूर्वपूर्वशरीरप्रेरणानुभवविशेषजनितसंस्कारो वा ; वादित्रवादनादिसंस्कारवत् । बुद्धिभेदो बुद्धेरन्यथाकरणम् ; तच्च प्रकृतविषयं दर्शयति—**कर्मयोगादन्य**दित्यादिना । *युक्तः इत्यनेन लोकसंग्रहार्थं कुर्वतः स्वापेक्षितविलम्बाभावाय प्रागुक्तनिरपेक्षत्वबुद्धियोगो विवक्षित इति—**बुद्धया युक्त** इत्युक्तम् । *जोषयेत् इत्यस्यार्थः—**प्रीतिं जनये**दिति । *जुषी प्रीतिसेवनयोः इति हि धातुः । कर्मसङ्गिनः पुरुषान् सर्वकर्माणि जोषयेदित्यन्वयः ॥ २५ ॥ २६ ॥

भा ॥ कर्मयोगमनुतिष्ठतो विदुषोऽविदुषश्च विशेषं प्रदर्शयन् कर्मयोगापेक्षितमात्मनोऽकर्तृत्वानुसन्धानप्रकारमुपदिशति—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥ २७
तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८

भा ॥ प्रकृतेर्गुणैस्सत्त्वादिभिः स्वानुरूपं क्रियमाणानि कर्माणि प्रति अहङ्कारविमूढात्माऽहं कर्तेति मन्यते ; अहङ्कारेण विमूढ आत्मा यस्यासावहङ्कारविमूढात्मा ; अहङ्कारो नाम अनहमर्थे प्रकृतावहमभिमानः ; तेन अज्ञात[त्म]स्वरूपो गुणकर्मसु अहं कर्तेति मन्यत इत्यर्थः । गुणकर्मविभागयोः—सत्त्वादिगुणविभागे तत्तत्कर्मविभागे च तत्त्ववित् गुणास्सत्त्वादयः स्वगुणेषु स्वेषु कार्येषु वर्तन्त इति मत्वा गुणकर्मसु अहं कर्तेति न सज्जते ॥ २७ ॥ २८ ॥

ता ॥ प्रकृतेः इत्यादिश्लोकचतुष्टयस्यार्थमाह—**कर्मयोग**मिति । **विदुषोऽविदुषश्चेति** व्युत्क्रमेण श्लोकद्वयार्थः । तृतीये त्वेतद्विशदीकरणमुखेनाविचाल्यमुक्तम् । **कर्मयोगापेक्षितं** कर्मयोगेतिकर्तव्यताभूतमित्यर्थः । प्रकृतेर्गुणैः इत्युक्ते प्रसिद्धिप्रकर्षादिसिद्धं विशेषं प्रस्तुतानुपयुक्तशब्दादिप्राकृतगुणव्यवच्छेदायाह—**सत्त्वादिभि**रिति । वक्ष्यमाणसात्त्विकादिकर्मविभागं सर्वशः इति प्रकारवाचिपदसूचितमाह—**स्वानुरूप**मिति । कर्ता इति तृजन्तयोगात् षष्ठीप्राप्तिस्स्यादिति तत्परिहाराय कर्मसु कर्तृत्वाहंत्वोक्तिभ्रमव्युदासाय च **कर्माणि प्रती**त्युक्तम् । तृन्नन्तत्वविवक्षायां त्वियं फल्गुक्तिः । **अहङ्कारविमूढात्मे**ति—समासांशत्रयस्य बह्वर्थपरस्य अत्रार्थं विवक्षन् विगृह्णाति—**अहङ्कारेणे**ति । नात्राहंभावमात्रमुच्यते, तस्यात्मस्वभावान्तर्गतत्वात् ; नापि अहङ्कारास्यमचिद्द्रव्यम्, तस्यापि देहात्मभ्रमं द्वारीकृत्य कार्यकरत्वे सति अव्यवहितस्य तस्यैव वक्तुमुचितत्वात् ; नापि गर्वः, उत्कृष्टपरिभवादिहेतुत्वेनानिर्देशात् । अतोऽहङ्कार इति देहात्मभ्रम एवात्र विवक्षित इत्यभिप्रायेणाह—**अहङ्कारो नाम अनहमर्थे प्रकृतावहमभिमान** इति । एतेनाहङ्कारशब्दस्याभूततद्भावे च्विप्रत्ययेन व्युत्पत्तिर्दर्शिता । **अज्ञात[त्म]स्वरूप** इति । विमूढः आत्मा स्वरूपं यस्य स विमूढात्मा दिशो विमुह्येयुः इतिवद्विमूढशब्दोऽत्र मोहविषयसमानाधिकरण इति भावः । गुण कर्मविभागयोः इत्यत्र उपसर्जनान्वयिषष्ठीत्वादपि विषयससमीत्वमुचितमिति मत्वोक्तं—**सत्त्वादिगुणविभागे तत्तत्कर्मविभागे** चेति । विभागशब्दो द्वन्द्वात्परत्वात्पत्येकमन्वितः । गुणानां साक्षाद्गुणेषु वृत्त्यभावात्परोक्तप्रक्रिययेन्द्रियतद्विषयादिविवक्षायां पदद्वयोपचारात् ससम्यन्तो गुणशब्दो गुणकार्येष्वौपचारिक इत्यभिप्रायेणोक्तं—**स्वगुणेषु स्वेषु कार्येष्वि**ति । गुणकार्याणि च विभजिष्यन्ते । यद्वा कारणस्य प्राधान्यात्कार्यस्य च तदपेक्षया गुणत्वादेवमुक्तम् ॥ २७ ॥ २८ ॥

प्रकृतेर्गुणसंमूढास्सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥ २९

भा ॥ अकृत्स्नविदस्स्वात्मदर्शनाय प्रवृत्ताः प्रकृतिसंसृष्टतया प्रकृतेर्गुणैर्यथावस्थितात्मनि संमूढा-गुणकर्मसु क्रियास्वेव सज्जन्ते, न तद्विविक्तात्मस्वरूपे ; अतस्ते ज्ञानयोगाय न प्रभवन्तीति कर्मयोग एव तेषामधिकारः । एवभूतांस्तान् मन्दानकृत्स्नविदः कृत्स्नवित् स्वयं ज्ञानयोगावस्थानेन न विचालयेत् । ते किल मन्दाः श्रेष्ठजनाचारानुवर्तिनः कर्मयोगादुत्थितमेनं दृष्ट्वा कर्मयोगात् प्रचलितमनसो भवेयुः, अतश्श्रेष्ठस्स्वयमपि कर्मयोगे तिष्ठन्नात्मयाथात्म्यज्ञानेनात्मनोऽकर्तृत्वमनुसन्दधानः, कर्मयोग एवात्मावलोकने निरपेक्षसाधनमिति

दर्शयित्वा तानकृत्स्नविदो जोषयेदित्यर्थः। ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगादस्यैव ज्यायस्त्वं पूर्वमेवोक्तम्। अतो व्यपदेश्यो लोकसंग्रहायैतमेव कुर्यात्। प्रकृतिविविक्तात्मस्वभावनिरूपणेन गुणेषु कर्तृत्वमारोप्य कर्मानुष्ठानप्रकार उक्तः। गुणेषु कर्तृत्वानुसन्धानं चेदम्—आत्मनो न स्वरूपप्रयुक्तमिदं कर्तृत्वम्, अपि तु गुणसम्पर्ककृतमिति प्राप्ताप्राप्तविवेकेन गुणकृतम्—इत्यनुसन्धानम् ॥ २९ ॥

ता ॥ प्रकृतेर्गुण इति श्लोके तावन्न निषिद्धादिसङ्गो विवक्षितः, तदानीमविचाल्यत्वानुपपत्तेः; अतः पुरुषार्थोपायेषु केषुचित्सङ्गो वक्तव्यः; प्रस्तुतश्च पुरुषार्थोऽत्रात्मदर्शनम्; तत्र चाकृत्स्नविदधिकारे कस्मिंश्चित्तदुपाये सङ्गो विवक्षित इत्यभिप्रायेण—**अकृत्स्नविदस्त्वात्मदर्शनाय प्रवृत्ता** इत्याद्युक्तम्। * अहङ्कारविमूढात्मा (२७) इत्यात्मविषयो हि संमोहः प्रकृतः; अतो गुणैस्संमूढा इत्येव समासः; उपसर्जनस्यापि च गुणशब्दस्य * देवदत्तस्य गुरुकुलम् इत्यादिष्विव प्रकृतेरित्यनेनान्वय एवोपपन्न इत्यभिप्रायेणोक्तं—**प्रकृतेर्गुणैर्यथावस्थितात्मनि संमूढा** इति। * गुणकर्मसु इत्यस्य कर्मयोगपर्यवसानायोक्तं—**क्रियास्वेवे**ति। परिसंख्यापरत्वव्यक्त्यर्थमेवकारः। तत्सूचितं व्यवच्छेद्यमाह—**न तदिति**। गुणकर्मसङ्गोक्तिफलितमविचालनहेतुमाह—**अतस्त** इति। **न प्रभवन्ति**—न समर्था इत्यर्थः। तेषां प्रतिषेध्यविचालनप्रसङ्गाय मन्दानित्युक्तमित्यभिप्रायेण विचलनप्रक्रियामाह—**ते किल मन्दा** इति। स्वयं मन्दत्वाच्छ्रेष्ठजनाचारानुवर्तिनः। मन्दत्वं चात्र स्वयमाचारनिर्णयापाटवं विवक्षितम्; अकृत्स्नवित्त्वफलितं विचालनीयत्वकारणम् अधैर्यलक्षणमल्पत्वं वा। * मूढाल्पापटुनिर्भाग्या मन्दाः इति नैघण्टुकाः। न विचाल्येत् इत्येतत्पूर्वोक्तजोषणशेषमिति दर्शयति—**अत** इति। ज्ञानयोगाधिकारिणः कर्मयोगे स्थितिर्निकृष्टाधिकारपरिग्रहस्यादित्याशङ्क्याह—**ज्ञानयोगाधिकारिणोऽपी**ति। स्वकार्यमात्रसमीक्षयाऽपि कर्तव्यं किमुत परार्थसमुचिते स्वार्थत्व इत्यभिप्रायेणाह—**अत** इति। उत्तरश्लोकमवतारयितुमुक्तांशमुद्गृह्णाति—**प्रकृतीति**। वक्ष्यमाणश्लोकप्रकारेण तु सर्वेश्वरे सर्वकर्मसंन्यासः कार्यः; मध्ये गुणेषु कर्तृत्वानुसन्धानकथनं तावताऽपि देहात्मविवेकादिकं सिध्यतीत्यभिप्रायेणेति भावः। **आरोप्य**—अनुसंधायेत्यर्थः। एतां दशामवलम्ब्य पल्लवग्राहिणां कापिलादीनां मतं समुत्थितमिति तन्मतव्यावर्तनायाचेतनानां गुणानां कथं ज्ञानचिकीर्षाप्रयत्नलक्षणं कर्तृत्वमिति शङ्काव्युदासाय चाह—**गुणेष्विति**। **इदम्**—वक्ष्यमाणम्। **इदं कर्तृत्व**मिति—पुण्यपापादिकर्तृत्वमित्यर्थः। स्वाभाविकं हि कर्तृत्वं मुक्तावस्थायामपि नापैति, तस्य गुणसंपर्ककृतत्वाभावात्। **प्राप्ताप्राप्तविवेकेने**ति—अन्वयव्यतिरेकाभ्यां युक्तायुक्तनिश्चयेन वेत्यर्थः। अत्राकर्तृत्वोक्तेरकरणशेषत्वं पूर्वापरविरुद्धम्; अनुसन्धानशेषार्थत्वं तु पूर्वापरसङ्गतमित्यभिप्रायेणानुसन्धानोक्तिः। एतेन * कर्ता शास्त्रार्थवत्त्वात् (ब्र. २. ३. ३३) इत्यधिकरणार्थस्सूचितः ॥ २९ ॥

भा ॥ इदानीमात्मनां परमपुरुषशरीरतया तन्नियाम्यत्वस्वरूपनिरूपणेन भगवति पुरुषोत्तमे सर्वात्मभूते गुणकृतं च कर्तृत्वमारोप्य कर्मकर्तव्यतोच्यते—

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३०

भा ॥ मयि सर्वेश्वरे सर्वभूतान्तरात्मभूते सर्वाणि कर्माण्यध्यात्मचेतसा संन्यस्य, निराशीर्निर्ममश्च विगतज्वरो युद्धादिकं सर्वं चोदितं कर्म कुरुष्व। आत्मनि यच्चेतस्तदध्यात्मचेतः, आत्मस्वरूपविषयेण श्रुतिशतसिद्धेन ज्ञानेनेत्यर्थः। * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा.....अन्तः प्रविष्टं कर्तारमेतम् (यजु. आ.

३. ११. २१, २३) * य आत्मनि तिष्ठन्नात्मनोऽन्तरोऽयमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (बृ.५.७.२३) इत्येवमाद्याः श्रुतयः परमपुरुषप्रवर्त्यं तच्छरीरभूतमेनमात्मानम्, परमपुरुषं च प्रवर्तयितारमाचक्षते। स्मृतयश्च * प्रशासितारं सर्वेषाम् (मनु. १२. १२२) इत्याद्याः। * सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च (१५. ५५) * ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ (१८. ३१) इति वक्ष्यते। अतो मच्छरीरतया मत्प्रवर्त्यात्मस्वरूपानुसन्धानेन सर्वाणि कर्माणि मयैव क्रियमाणानीति मयि परमपुरुषे संन्यस्य तानि च केवलं मदाराधनानीति कृत्वा तत्फले निराशीः तत एव तत्र कर्मणि ममतारहितो भूत्वा विगतज्वरो युद्धादिकं कुरुष्व। स्वकीयेनात्मना कर्त्रा स्वकीयैश्चापकरणैस्स्वाराधनैकप्रयोजनाय परमपुरुषस्सर्वशेषी सर्वेश्वरः स्वयमेव स्वकर्माणि कारयतीत्यनुसन्धाय कर्मसु ममतारहितः प्राचीनेनानादिकालप्रवृत्तानन्तपापसञ्चयेन कथमहं भविष्यामीत्येवंभूतान्तर्ज्वरविनिर्मुक्तः परमपुरुष एव कर्मभिराराधितो बन्धान्मोचयिष्यतीति सुखेन कर्मयोगमेव कुरुष्वेत्यर्थः। * तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम् (श्वे. ६. ७), * पतिं विश्वस्य (ना. ११. ३. २०८), * पतिं पतीनाम् (श्वे. ६. ७) इत्यादिश्रुतिसिद्धं हि सर्वेश्वरत्वं सर्वशेषित्वं च। ईश्वरत्वम्—नियन्तृत्वम्, शेषित्वम्—पतित्वम् ॥३०॥

ता ॥ अथ तदनन्तरस्य * परात्तु तच्छ्रुतेः (ब्र. २. ३. ४०) इत्यधिकरणस्यार्थे तत्परोऽयमित्यभिप्रायेणोत्तरश्लोकमवतारयति—**इदानी**मिति। नियाम्यतायाः स्वरूपत्वोक्तिः, स्वरूपनिरूपकत्वात्। **भगवती**त्यादिपदत्रयेण * मयि इत्यभिप्रेतस्योक्तिः। **भगवती**ति नियन्तृत्वोपास्यत्वफलप्रदत्वाद्युपयुक्तकल्याणगुणजातवति हेयप्रत्यनीके चेति भावः। **पुरुषोत्तम** इति। नियमनार्थानुप्रवेशादिनाऽप्यस्पृष्टहेयप्रसक्तौ * उत्तमः पुरुषस्त्वन्यः (१५. १७) इति वक्ष्यमाणप्रकारवैलक्षण्यवतीति भावः। **सर्वात्मभूते गुणकृतं चे**ति। त्रिगुणस्याचिद्द्रव्यस्यापि सर्वात्मभूतस्स एव हि नियन्तेति भावः। एतेन * असक्त्या लोकरक्षायै गुणेष्वारोप्य कर्तृताम्। सर्वेश्वरे वा न्यस्योक्ता तृतीये कर्मकार्यता ॥ (सं. ७) इति तृतीयाध्यायसंग्रहश्लोके तुल्यविकल्पो नाभिमत इत्यपि सूचितं भवति। मयीत्यनेनाभिप्रेते सर्वेश्वरत्वे हेतुतया सर्वभूतान्तरात्मभूतत्वोक्तिः। * ईश्वरस्सर्वभूतानाम् (१८. ६१) इत्यादि वक्ष्यमाणं चानेन ख्यापितम्। **सर्वाणी**ति—स्वकृतानि गुणकृतानि चेत्यर्थः। * युध्यस्व इत्येतच्छास्त्रीयोपलक्षणमित्यभिप्रायेणोक्तम्—**युद्धादिक**मिति। **आत्मनी**ति। * अध्यात्म इति। सप्तम्यर्थे समास इत्यर्थः। अत्र चेतश्शब्दस्य श्रुतिशतसिद्धतत्त्वानुसन्धानरूपज्ञानगोचरतां व्यनक्ति—**आत्मस्वरूपे**ति। श्रुतिशतसिद्धं प्रकारं दर्शयति—**अन्तरि**ति। अन्तःप्रविष्टत्वशासितृत्वाभ्यां नृपादिगगनादिव्यावर्तकाभ्यां सर्वात्मत्वसिद्धिः। **कर्तार**मिति—जीवव्यापारेषु प्रयोजककर्तारमित्यर्थः; यद्वा प्रेरणक्रियाकर्तारमित्यर्थः; तदुच्यते—**प्रवर्तयितार**मिति। उपात्तश्रुतीनामैदंपर्यदृढीकरणाय मन्वाद्युपबृंहणानुग्रहमाह—**स्मृतयश्चे**ति। एतस्मिन्नपि शास्त्रेऽभ्यासलिङ्गायास्यैवार्थस्य वक्ष्यमाणतामाह—**सर्वस्य चे**ति। * मयि सर्वाणि इत्यस्याभिप्रायव्यञ्जनाय पार्थसारथेरीश्वरस्य च प्रत्यक्पराङ्निर्देशयोरीश्वरैकविषयत्वं दर्शयितुं वचनद्वयोपादानम्। एवमर्थस्वरूपमुपपाद्य तज्ज्ञानस्य कर्तृत्वसंन्यासहेतुतां *संन्यस्य, निराशीः, निर्ममः इति त्रयाणां पदानां कर्तृत्वत्यागफलत्यागस्वकीयतासङ्गत्यागविषयतामुत्तरोत्तरस्य च पूर्वपूर्वहेतुकतां पाठक्रमसूचितां प्रकाशयति—**अत** इति—अस्यार्थस्य श्रुतिस्मृत्यन्तरादिसिद्धत्वादित्यर्थः। **मयैव क्रियमाणानी**ति—भृत्यप्रवर्तकेन राज्ञेव सद्वारकमद्वारकं चेति भावः। ऋत्विज इव परस्य कर्तृत्वेऽपि स्वस्य फलाभिसन्धिस्स्यादिति तन्निरासाय निराशीरित्युक्तमित्यभिप्रायेणाह—**तानि चे**ति। **तत एवे**ति—फलद्वारा हि कर्मणि ममता;

मदभिलषितसाधनत्वान्मदर्थमिदं कर्म इति कर्मण्यैश्वर्यबोधो ह्यधिकार इति भावः । ननु यदीश्वरे कर्तृत्वं संन्यस्तम्, कथं तर्हि युध्यस्वेति जीवः कर्तृतया निर्दिश्यते ? यदि चासौ निराशीः, कथं परमपुरुषाराधनरूपेऽपि कर्मणि प्रवर्तेत, यदि च निर्ममः, स कथं * ममेदं कर्म इति बुध्यमानः कर्म कुर्यात् ? यदिच स्वव्यापारं नानुसन्धत्ते, तदा त्यागरूपव्यापारमपि न मन्येत, ततश्च विगतज्वर इत्यप्यनुपपन्नमित्याशङ्क्याह—**स्वकीयेनात्मना कर्त्रेति** । स्वशेषभूतेन जीवेन प्रयोज्यकर्त्रेत्यर्थः । **स्वकीयैश्चोपकरणै**रिति । यथाऽसौ जीवः परशेषभूतः ; तथा तस्य स्वशेषतया प्रागभिमतं हविरादिकमपि परशेषभूतमिति भावः । **स्वाराधनैकप्रयोजनाये**ति—शेषस्य शेष्यतिशयाधानमेव प्रयोजनमिति भावः । आह च **वेदार्थसंग्रहे**—* परगतातिशयाधानेच्छयोपादेयत्वमेव यस्य स्वरूपं स शेषः, परश्शेषी इति । स्वकीयेनेत्यादौ प्रमाणसूचनाय सर्वशेषीत्याद्युक्तम् । **स्वयमेवे**ति । आराध्यभूत एवाराधनं कारयतीति भावः । एवकारेण प्रवर्तकान्तरं च व्युदस्तम् । **कारयती**ति—सर्वेश्वरस्सन् स्वेष्टं सर्वं स्वयमेव कर्तुं शक्तोऽपि स्वशेषभूतजीवानां शास्त्रवश्यत्वतत्फलभोक्तृत्वादिसिद्ध्यर्थं तान् कर्तॄन् कारयतीति भावः । प्राकरणिकं प्रतिषेध्यज्वरविशेषप्रसङ्गं दर्शयति—**प्राचीने**त्यादिना । अस्तु श्रुतिसिद्धमीश्वरत्वम्, कारयितृत्वस्य किमायातमित्यत्राह—**ईश्वरत्वं नियन्तृत्व**मिति । **शेषित्वं पतित्व**मिति—चेतनगतं शेषित्वं पतित्वमेवेति भावः । यद्वा श्रुतिभाष्यपठितयोश्शेषित्वेश्वरत्वयोः को भेद इति शङ्काऽपाक्रियते—**ईश्वरत्वं नियन्तृत्वमित्यादि**ना ॥ ३० ॥

भा ॥ अयमेव साक्षादुपनिषत्सारभूतोऽर्थ इत्याह—

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१

भा ॥ **ये मानवाश्शास्त्राधिकारिणोऽयमेव शास्त्रार्थ इत्येतन्मे मतं निश्चित्य तथाऽनुतिष्ठन्ति, ये चाननुतिष्ठन्तोऽप्यस्मिन् शास्त्रार्थे श्रद्दधाना भवन्ति, ये चाश्रद्दधाना अप्येवं शास्त्रार्थो न संभवतीति नाभ्यसूयन्ति —अस्मिन् महागुणे शास्त्रार्थे दोषमनाविष्कुर्वन्तो भवन्तीत्यर्थः ; ते सर्वे बन्धहेतुभिरनादिकालारब्धैस्सर्वैः कर्मभिर्मुच्यन्ते ; तेऽपि कर्मभिः इत्यपिशब्दादेषां पृथक्करणम् । इदानीमननुतिष्ठन्तोऽप्यस्मिन् शास्त्रार्थे श्रद्दधाना अनभ्यसूयवश्च श्रद्धया चानसूयया च क्षीणपापा अचिरेणैवमेव शास्त्रार्थमनुष्ठाय मुच्यन्त इत्यर्थः ॥ ३१ ॥**

* ये मे मतम् इति श्लोके मे मतमित्यौपनिषदपुरुषस्य सिद्धान्ताभिमानप्रदर्शनान्मोक्षसाधनत्वोपदेशमात्रस्य कृतकरत्वाच्च तत्प्राशस्त्यपरोऽयं श्लोक इत्यभिप्रायेणाह—**अयमेव साक्षादि**ति । ज्ञानयोगनिरपेक्ष इत्यर्थः । सारभूतः प्रधानभूतः * सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु (नाम. ३. ना. ३२६) इति नैघण्टुकाः । प्राधान्यं चात्र मोक्षसाधने ज्यायस्त्वम् । मानवशब्दस्यात्रानधिकृतशूद्रादिसंग्राहकत्वादधिकृतदेवादिप्रतिक्षेपकत्वाच्च तदुभयपरिहाराय य इति प्रमाणसिद्धानुवादेनाधिकारिमात्रोपलक्षकोऽयं शब्द इत्यभिप्रायेणोक्तम्—**ये मानवाश्शास्त्राधिकारिण** इति । नित्यमनुतिष्ठन्तीत्युक्तं नित्यमनुष्ठानं निर्णयपूर्वकमेव प्रामाणिकत्वनिश्चयशून्यस्यानुष्ठानं कदाचिद्भज्येतापीत्यभिप्रायेणोक्तम्—**अयमेव शास्त्रार्थ** इत्यादि । एतत्—अयमेवेत्युक्तम् ; यद्वा एतन्मे मतं शास्त्रार्थ इति निश्चित्येत्यन्वयः ; शासितुर्मतमेव हि शास्त्रार्थ इति भावः । **श्रद्धावन्त** इति पदमनुष्ठानात्पूर्वावस्थापरमित्याह—**ये चाननुतिष्ठन्तोऽपी**ति । **ततोऽप्यर्वाचीनावस्थाऽनसूयेत्याह—ये चाश्रद्दधाना** इति । **गुणेषु दोषाविष्करणमसूये**त्यसूयालक्षणाभिप्रायेणाह—

अधिकारिणिति । अपिशब्दो वर्ग[द्व]त्रयसमुच्चयपर इति ते सर्वे इत्युक्तम् । ननु * संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते ; श्रद्धावन्त इत्यादौ च भवन्तीत्यध्याहारश्चानुचितः । यच्छब्दस्य चैकत्र प्रयुक्तस्यावृत्तिरनुपपन्नेत्यत्राह—तेऽपीति । एषामिति—अधिकारिणाम्, बुद्धिस्थानां वाक्यानां वा । अयमभिप्रायः—नात्रैकवाक्यत्वं संभवति, अपिशब्दानन्वयात् अपिशब्दो ह्यत्रानुष्ठातृभिस्सहाधिकार्यन्तरसमुच्चयपरो वा, अनुष्ठातृणामपकर्षपरो वा स्यात् । तत्र ज्ञानयोगिनां समुच्चयस्संभवन्नप्यत्रानपेक्षितः ; कर्मयोगप्रशंसाप्रकरणानुचितश्च । ज्ञानयोगिभ्यः कर्मयोगिनामपकर्षसूचनं त्वत्रात्यन्तविरुद्धम् ; नित्यमनुष्ठातृणां * श्रद्धावन्तोऽनसूयन्तः इति विशेषणाभिधानं च निरर्थकम्, न हि नित्यमनुतिष्ठन्तोऽश्रद्दधाना असूयन्तश्च भवेयुः । अवस्थात्रयविषयत्वे तु समुच्चयपरतया वा अर्वाचीनावस्थापकर्षपरतया वा शक्यमपिशब्दा नेतुमिति । अनुष्ठातृणां श्रद्धानसूयामात्रवतां च तुल्यफलत्वेऽनुष्ठानविधायकशास्त्रवैयर्थ्यं स्यादित्याशङ्क्याह—इदानीमिति । श्रद्धानसूययोः पापनिर्हरणहेतुत्वं च * *धर्मश्रुतो वा दृष्टो वा स्मृतो वा कथितोऽपि वा । अनुमोदितो वा राजेन्द्र पुनाति पुरुषं सदा ॥* (भा. आश्व. ९४. २९) इत्यादिसिद्धम् ॥ ३१ ॥

भा ॥ भगवदभिमतमौपनिषदमर्थमननुतिष्ठतामश्रद्दधानानामभ्यसूयतां च दोषमाह—

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२

भा ॥ ये त्वेतत्सर्वमात्मवस्तु मच्छरीरतया मदाधारं मच्छेषभूतं मदेकप्रवर्त्यमिति मे मतं नानुतिष्ठन्ति—नैवमनुसन्धाय सर्वाणि कर्माणि कुर्वते, ये च न श्रद्दधते, ये चाभ्यसूयन्तो वर्तन्ते ; तान् सर्वेषु ज्ञानेषु विशेषेण मूढांस्तत एव नष्टानचेतसो विद्धि ; चेतःकार्यं हि वस्तुयाथात्म्यनिश्चयः ; तदभावादचेतसो विपरीतज्ञानास्सर्वत्र विमूढाश्च ॥ ३२ ॥

ता ॥ व्यतिरेकनिन्दयाऽप्युक्तार्थप्राशस्त्यातिरेक उच्यत इत्यभिप्रायेणाह—भगवदिति । पूर्वोक्तव्यतिरेकरूपत्वादभ्यसूयोक्तिरश्रद्धोपलक्षणतयेत्यभिप्रायेण अश्रद्दधानानामित्युक्तम् । आधेयं शेषभूतं विधेयमपि हि शरीरमित्यभिप्रायेण मदाधारमित्यादि पदत्रयम्, स्वरूपस्थितिप्रवृत्तितादधीन्यपरं च । परबुद्धिवृत्तिविशेषरूपं मतं कथमनुष्ठेयमननुष्ठेयं वा, सिद्धवस्तुनि च कथमनुष्ठानमित्यत्राभिप्रेताध्याहारेणाह—नैवमनुसन्धायेति । सर्वेषु ज्ञानेषु विशेषेण मूढानिति यथावस्थितात्मस्वरूपानभिज्ञतया अहं ममेत्यादिषु सर्वेषु ज्ञानेषु ज्ञातव्यवस्तूनां यथावस्थितस्वरूपप्रकारानभिज्ञानित्यर्थः । नष्टानिति—पुरुषार्थायोग्यानित्यर्थः । किं तत्त्वज्ञानरहितस्यान्तःकरणमपि नास्तीत्यत्राह—चेतःकार्यमिति । कार्यादर्शनात्कारणं नास्तीत्युपचर्यत इति भावः । फलितमाह—विपरीतज्ञानास्सर्वत्र विमूढाश्चेति ॥ ३२ ॥

भा ॥ एवं प्रकृतिसंसर्गिणस्तद्गुणोद्रेककृतं कर्तृत्वं तच्च परमपुरुषायत्तमित्यनुसन्धाय कर्मयोगशेषेण ज्ञानयोगयोग्येन च कर्मयोगस्य सुशकत्वादप्रमादत्वादन्तर्गतात्मज्ञानतया निरपेक्षत्वादितरस्य दुश्शकत्वात् सप्रमादत्वात् शरीरधारणाद्यर्थतया कर्मापेक्षत्वात्कर्मयोग एव कर्तव्यः ; व्यपदेश्यस्य तु विशेषतस्त एव कर्तव्यः इति चोक्तम्, अतःपरमध्यायशेषेण ज्ञानयोगस्य दुश्शकतया सप्रमादतोच्यते—

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३

भा ॥ प्रकृतिविविक्तमीदृशमात्मस्वरूपं तदेव सर्वदाऽनुसन्धेयमिति च शास्त्राणि प्रतिपादयन्तीति ज्ञानवानपि स्वस्याः प्रकृतेः प्राचीनवासनायास्तादृशं प्राकृतविषयेष्वेव चेष्टते ; कुतः ? प्रकृतिं यान्ति भूतानि—अचित्संसृष्टा जन्तवोऽनादिकालप्रवृत्तवासनामेव यान्ति ; तानि वासनानुयायीनि भूतानि [प्रति] शास्त्रकृतो निग्रहः किं करिष्यति ॥ ३३ ॥

ता ॥ उत्तरप्रघट्टकसंगत्यर्थं प्रतिपत्तिसौकर्यार्थं च पूर्वोक्तं सङ्कलय्य दर्शयति—एवमिति । मुक्तानां कर्तृत्वस्य गुणाधीनत्वाभावात्—प्रकृतिसंसर्गिण इत्युक्तम् । ज्ञानयोगानादरहेतुभूतदुश्शकत्वादिसमर्थनपरमनन्तरप्रकरणमित्यभिप्रायेणाह—अतःपरमिति । नानुतिष्ठन्तीत्यस्य हेतुरपि सदृशमित्यादिनाऽभिप्रेतः । ज्ञानवानपीत्यत्र न तावल्लौकिकज्ञानमात्रमुच्यते, तस्य प्रकृत्यनुकूलप्रवृत्तिविरोधित्वाभावेनापिशब्दानन्वयात् । नाप्यात्मसाक्षात्कारपर्यन्तं ज्ञानं, तस्यामवस्थायां प्रकृत्यनुवर्तित्वप्रसङ्गाभावात् । अतो यदालम्ब्य ज्ञानयोगे प्रवर्तितुमुत्सहते, तज्ज्ञानमिह विवक्षितम् ; तच्च शास्त्रजन्यं यथावस्थितात्मतत्त्वज्ञानमित्यभिप्रायेणाह—प्रकृतिविविक्तमिति । ईदृशमिति—यथावस्थितपरशेषत्वादिविशिष्टस्वरूपनिर्देशः । तदेवेति—विषयानुभवव्यवच्छेदः । सर्वदेति—आ फलावाप्तेरित्यर्थः । स्वस्याः प्रातिस्विक्या इत्यर्थः । चेतनप्रवृत्तिरूपचेष्टाया असाधारणकारणं हि रागद्वेषौ, तौ चानन्तरश्लोकेऽभिधीयेते । तन्मूलश्च प्राचीनवासनैव । अतोऽत्र प्रकृतिशब्देन स्वभावव्यपदेशार्हानादिवासनैव विवक्षितेत्यभिप्रायेणोक्तं—प्राचीनवासनाया इति । सदृशमित्यनेनाभिप्रेतमानुरूप्यमाह—प्राकृतविषयेष्विति । शब्दादिविषयवासनया पुनरपि तत्रैव प्रवर्तत इत्यर्थः । कुत इति । ज्ञानवांश्चेत् ज्ञानानुरूपं चेष्टताम्, कुतः प्रकृत्यनुरूपं चेष्टत इत्यर्थः । अत्रोत्तरं * प्रकृतिं यान्ति भूतानि इति । पुनरुक्तिशङ्कां परिहरन्नुत्तरत्वं विवृणोति—अचिदिति । अचित्संसृष्टा जन्तव इति भूतशब्दार्थः । अनादिकालप्रवृत्ताचित्संसर्गकृतापरोक्षाभङ्गुरदेहात्मभ्रमजनितामत्यन्तप्रचितां वासनामद्यतनपरोक्षशास्त्रजन्यज्ञानं न सहसैव निरोद्धुं क्षममित्यभिप्रायः । तदेव विवृणोति—तानीति । निग्रह इति—नियमनमित्यर्थः । अत्र मम वाऽन्यस्य वेति निग्रहकर्त्रध्याहारो न युक्तः । * अनिच्छन्नपि (३६) इत्यादिप्राकरणिकार्थानुसारेण शास्त्रकृतत्वमेवोचितम् । किं करिष्यतीति—न किञ्चिदपि निरोद्धुं शक्यमित्यर्थः ॥ ३३ ॥

भा ॥ प्रकृत्यनुयायित्वप्रकारमाह—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४

भा ॥ श्रोत्रादिज्ञानेन्द्रियस्यार्थे शब्दादौ वागादिकर्मेन्द्रियस्य चार्थे वचनादौ प्राचीनवासनाजनितत्तदनुबुभूषारूपो यो रागोऽवर्जनीयो व्यवस्थितः ; तदनुभवे प्रतिहते चावर्जनीयो यो द्वेषो व्यवस्थितः ; तावेवं ज्ञानयोगाय यतमानं नियमितसर्वेन्द्रियं स्ववशे कृत्वा प्रसह्य स्वकार्येषु संयोजयतः ; ततश्चायमात्मस्वरूपानुभवविमुखो विनष्टो भवति । ज्ञानयोगारम्भेण रागद्वेषवशमागम्य न विनश्येत् ; तौ हि रागद्वेषावस्य दुर्जयौ शत्रू ज्ञानाभ्यासं वारयतः ॥ ३४ ॥

ता ॥ वासनायास्त्वानुरूपचेष्टाहेतुत्वेऽवान्तरव्यापारोऽनन्तरमुच्यत इत्यभिप्रायेणाह—प्रकृत्यनुयायित्वेति । इन्द्रियस्येन्द्रियस्येतिवीप्सा सर्वेन्द्रियसंग्रहार्थेत्यभिप्रायेण ज्ञानेन्द्रियकर्मेन्द्रियोपादानम् । अर्थशब्दोऽत्र विषयपरः । साध्यस्य च व्यापारविषयत्वाद्वचनादेरप्यत्रार्थशब्दार्थता दर्शिता । व्यवस्थितावित्यत्रोपसर्गार्थविवरणम्—अवर्जनीय इति ।

वासनाया इच्छाद्वारेणैव प्रवृत्तिहेतुत्ववचनात् ज्ञानवासनैव कर्महेतुत्ववेषेण कर्मवासनेत्युच्यते ; नतु वासनान्तरमस्तीत्यपि सूचितं भवति । *इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितावित्युक्ते शब्दादिविषयेषु रागवद्द्वेषोऽपि किं स्वरसवाहीति शङ्का स्यात्, तद्व्युदासायाह—**तदनुभव** इति । ततःकिमिति शङ्कायां *सदृशं चेष्टते इत्यनेनैकीकृत्यानुसन्दधानस्तात्पर्यार्थमाह—**तावेवमिति** । एवम्—उक्तवासनानुयायित्वप्रकारेणेत्यर्थः । **नियमितसर्वेन्द्रियमित्यनेन** बलात्क्षणमात्रनिमीलनादिनियमनमुच्यते । **स्वकार्येष्विति**—विषयानुभवेषु वचनादानादिषु कर्मसु चेत्यर्थः । *सङ्गात्संजायते इत्यारभ्य *बुद्धिनाशात्प्रणश्यतीत्यन्तं पूर्वप्रपञ्चितमवसरे स्मारयति—**ततश्चायमिति** । *तयोर्न वशमागच्छेदित्येतन्न तावद्रागद्वेषनिषेधमात्रम्, तदा ह्यौचित्यात् ज्ञानयोगाङ्गविधानं स्यात् । तच्च ज्ञानयोगानादरणीयताप्रकरणासङ्गतम् ; अतोऽत्र **यया वचनव्यक्त्या** ज्ञानयोगानादरणीयता उच्येत, सैव ग्राह्येत्यभिप्रायेणाह—**ज्ञानयोगेति** । कर्मयोगारम्भे तु चिराभ्यस्तसजातीयविषयेषु प्रवृत्तेर्न रागद्वेषयोर्बलात्कार इति भावः । **आगम्य न विनश्येदिति**—विनाशहेतुभूतं तद्वशगमनं परिहरेदित्यर्थः । तद्वशगमने कथं विनाश इति शङ्कायां चतुर्थपादमवतारयति—**तौ हीति** । *काम एष क्रोध एषः इत्यादिभिः श्लोकैर्वक्ष्यमाणमाकारमभिप्रेत्य **दुर्जयौ शत्रू** इत्युक्तम् । परिपन्थित्वं प्रकृतविषयं योजयति—**ज्ञानाभ्यासं वारयत** इति । मुक्तिघण्टापथे लुण्टाकवदवस्थितावित्यर्थः ॥ ३४ ॥

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५

भा॥अतस्सुशकतया स्वधर्मभूतः कर्मयोगो विगुणोऽप्यप्रमादगर्भः प्रकृतिसंसृष्टस्य दुश्शकतया परधर्मभूतात् ज्ञानयोगात्स्वगुणादपि किंचित्कालमनुष्ठितात् सप्रमादाच्छ्रेयान् ; स्वेनैवोपादातुं योग्यतया स्वधर्मभूते कर्मयोगे वर्तमानस्यैकस्मिन् जन्मन्यप्राप्तफलतया निधनमपि श्रेयः, अनन्तरायहततयाऽनन्तरजन्मन्यप्यव्याकुलकर्मयोगारम्भसंभवात् । प्रकृतिसंसृष्टस्य स्वेनैवोपादातुमशक्यतया परधर्मभूतो ज्ञानयोगः प्रमादगर्भतया भयावहः ॥ ३५ ॥

ता ॥ श्रेयानित्यत्र श्लोके स्वधर्मपरधर्मशब्दौ न तावद्वर्णाश्रमाद्यपेक्षया प्रयुज्येते, परवर्णाश्रमादिधर्मानुष्ठानस्य दूरतो निरस्तत्वेन तन्निषेधायोगात्, अत्रच तत्प्रसङ्गाभावात् ; परधर्मात्स्वनुष्ठितात्स्वधर्मो विगुणश्श्रेयानिति चोक्ते श्रेयश्शब्दस्य प्रशस्यतरवाचित्वात्स्वनुष्ठितपरधर्मस्य प्रशस्यत्वमात्रं प्रसज्येत ; न च तदुपपद्यते, स्वनुष्ठितस्य दुरनुष्ठितस्य वा परधर्मस्याधर्मत्वेन गर्हणीयत्वात् । अथ क्षत्रधर्मभूतयुद्धपरित्यागाभिलाषिणोऽर्जुनस्य स्वधर्मभूतयुद्धप्रशंसा ब्राह्मणादिधर्मभूततत्परित्यागनिन्दा च क्रियत इतिचेत्—अस्त्वेतावताऽपि निषेध्यस्य प्रसङ्गः, तस्य प्रशस्यत्वमात्रप्रसङ्गचोद्यं तु न परिहृतम् ; न चात्र स्वधर्मं परित्यज्य परधर्मं कुर्यामित्यर्जुनस्याभिसन्धिः ; अत्रैव ह्यस्येदानीं स्वधर्मत्वबुद्धिः ; स्वधर्मतया भ्रान्यतः परधर्मत्वमत्र ज्ञाप्यत इतिचेत्—तन्न, स्वनुष्ठितात्परधर्मादित्यनुवादरूपत्वानुपपत्तेः ; परधर्मतया संप्रतिपन्नत्वे ह्येवं व्यपदेश उपपद्यते ; तत्रच परधर्मत्वज्ञापनं निष्प्रयोजनम्, अधर्मत्वमात्रस्यैव ज्ञाप्यत्वात् ; अतोऽत्र स्वधर्मपरधर्मशब्दौ प्रशस्यतयाऽनादरणीयतया च प्रकृतकर्मयोगज्ञानयोगविषयौ ; एवंच सति ज्ञानयोगस्य प्रशस्यत्वमात्रप्रसङ्गोऽपि न दूषणम् ; पूर्वश्लोकद्वयप्रकृतवासनानुवर्तित्वेन सङ्गतिश्च स्यात् ; अथ केनेत्युत्तरश्लोकस्थप्रश्नोऽप्येवमेवोपपद्यते । अत्र ह्यनिच्छतोऽपि पापाचरणहेतुः क इति प्रश्नः ; स च ज्ञानयोगदुष्करत्वकथनेनैव संगच्छेत ; अनिच्छतोऽपि मे क्षत्रधर्मत्यागः

केनेति प्रश्नार्थ इतिचेत्, न, अस्यानिच्छत्वाभावात्, *काम एष क्रोध एषः (३७) इत्याद्युत्तरानुपपत्तेश्च; नहि कामक्रोधाभ्यामर्जुनो युद्धं परित्यजति, किंतु कारुण्यादिनेत्युपक्रमेऽप्युक्तम्; अतस्स्वधर्मपरधर्मशब्दौ स्वशक्यपरशक्यधर्मविषयौ; तदेतदखिलमभिप्रेत्याह—**अतस्सुशकतयेति**। अतः—श्लोकद्वयोक्तवासनानुवर्तित्ववशादित्यर्थः। **विगुणोऽपि**—अङ्गवैकल्ययुक्तोऽपीत्यर्थः। विगुणस्य कथं श्रेयस्त्वमित्यत्रोक्तम्—**अप्रमादगर्भ** इति। वैगुण्यमात्रं स्वरूपविच्छेदाद्वरमिति भावः। स्वनुष्ठितादित्यस्य वैगुण्यप्रतियोग्याकारपरतया सुशब्दस्साद्गुण्यपर इत्याह—**सगुणादपीति**। अनुष्ठितशब्दस्य भूतार्थप्रत्ययान्तत्वाद्भूतत्वस्य चातिक्रान्ततारूपत्वात्प्रागनुष्ठानं पश्चाद्विच्छेदश्च सूचित इत्यभिप्रायेणोक्तं—**कंचित्कालमनुष्ठितात्तत्प्रमादादिति**। एवं विच्छेदाविवक्षायां स्वनुष्ठिताज्ज्ञानयोगाद्विगुणः कर्मयोगश्श्रेयानित्येतदसङ्गतं स्यात्, सगुणस्याविच्छिन्नस्य फलाविनाभावादिति भावः। सुशकतयेत्युक्तहेतुविवरणमुखेन स्वधर्मशब्दार्थं च विवृण्वन् विगुणस्य कर्मणः फल[विना]भावात्कथं श्रेयस्त्वमिति शङ्कापरिहारतया तृतीयं पादं व्याख्याति—**स्वेनैवेति**। स्वेनैव—प्रकृतिसंसृष्टतया व्याप्रियमाणेन्द्रियेणैवेत्यर्थः। यद्वा स्वेच्छयैवेति भावः। **एकस्मिन् जन्मन्यप्राप्तफलतयेति**। अयमभिप्रायः—यद्यप्यात्मसाक्षात्कारादिफलार्थतया विहितत्वात्कर्मयोगः काम्यकर्मैव; तथाऽप्यस्य काम्यकर्मणोऽयं विशेषः, यद्विगुणानुष्ठितमपि जन्मान्तरेऽपि सगुणानुष्ठानद्वारा फलं साधयतीति। वैगुण्यं त्वस्य फलविलम्बमात्रप्रयोजकम्, काम्यकर्मान्तरवन्न फलाभावप्रयोजकमिति। एकस्मिन् जन्मनीत्यभिप्रेतं विवृण्वन् जन्मान्तरेऽपि विगुणस्य कथं फलसाधनत्वमित्यत्राह—**अनन्तरायहततयेति**। इन्द्रियाणामनुभूतसजातीयविषयसमर्पणेन कर्मयोगस्वरूपस्यात्यन्तविच्छेदाभावादित्यर्थः। अव्याकुलत्वमत्राविकलत्वम्। एतच्च सर्वं * नेहाभिक्रमनाशोऽस्ति (२. ४०) इति पूर्वं सङ्ग्रहेणोक्तम्। * पार्थ नैवेह नामुत्र (६. ४०) इत्यादिना प्रपञ्चयिष्यते च। अव्यवहितानन्तरजन्मनि पौष्कल्यनिर्णयाभावेन **संभवादित्युक्तम्**। अनन्तरे ततोऽनन्तरे वा फलं तावत्सिद्धमिति भावः। यदि विगुणस्य कर्मयोगस्य जन्मान्तरस्थं फलमभिप्रेत्य श्रेयस्त्वमुच्यते; तर्हि ज्ञानयोगस्यापि तथा किं न स्यादित्यत्र चतुर्थं पादं व्याख्याति—**प्रकृतीति**। जन्मान्तरेऽपि फलं न संभवतीत्यभिप्रायेण भयावह इत्युच्यते। स्वरूपेण विच्छिन्नस्य कथं जन्मान्तरेऽपि फलम्? [अ]विच्छिन्नस्य विगुणस्य फलं विलम्बितमिति भावः॥ ३५॥

अर्जुन उवाच—

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥ ३६

भा॥ अथायं ज्ञानयोगाय प्रवृत्तः पुरुषः स्वयं विषयाननुभवितुमनिच्छन्नपि केन प्रयुक्तो विषयानुभवरूपं पापं बलान्नियोजित इव चरति॥ ३६॥

ता॥ ननु * सदृशं चेष्टते इत्यादिना वासनानुवर्तित्वमुक्तम्; वासना च चेतनस्येच्छाद्वारेण प्रवर्तिका। एवं च सति ज्ञानयोगमिच्छतस्तद्विरोधितया विषयानुभवमनिच्छतोऽपि कथं वासनाविषयानुभवे प्रवृत्तिहेतुरिति पृच्छति—**अथ केनेति**। अत्र * अनिच्छमानोऽपि बलादाताडयेव नियोजितः इति यादवप्रकाशपाठोऽपपाठः। **अथशब्दोऽत्र** प्रश्नार्थकः, कात्स्न्यर्थपरो वा। **ज्ञानवानपीति** ज्ञानवत्त्वेन निर्दिष्टपरामर्शकोऽयं शब्द इत्यभिप्रायेणोक्तम्—**अयं ज्ञानयोगाय प्रवृत्त** इति। न ह्ययं वासनयाऽप्यनिच्छापूर्वं प्रवर्तते चेतनत्वादिति पुरुषशब्दस्य भावः। अनिच्छन्नोऽपि

वायूदकादिप्रेरिताः प्रवर्तन्ते; तद्वदत्रापि केनचित्प्रेरकेण बलवता भवितव्यमिति मत्वोक्तं—बलादित्यादि । * बलादिव नियोजितः इत्यस्य केनेत्यादिप्रश्नविरुद्धावगतार्थतां परिहर्तुं क्रमभेदेनान्वय उक्तः । वायूदकादिबलान्नियोजितो यथाऽनिच्छन्नप्याचरति, तथाऽयमप्याचरति; तत्र केन प्रयुक्त इति प्रश्नार्थः ॥ ३६ ॥

श्रीभगवानुवाच—

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७

भा ॥ अस्योद्भवाभिभवरूपेण वर्तमानगुणमयप्रकृतिसंसृष्टस्य ज्ञानायारब्धस्य रजोगुणसमुद्भवः प्राचीनवासनाजनितश्शब्दादिविषयः कामो महाशनः शत्रुः विषयेष्वेनमाकर्षति : एष एव प्रतिहतगतिः प्रतिहतिहेतुभूतचेतनान् प्रति क्रोधरूपेण परिणतो महापाप्मा परहिंसादिषु प्रवर्तयति । एनं रजोगुणसमुद्भवं सहजं ज्ञानयोगविरोधिनं वैरिणं विद्धि ॥ ३७ ॥

ता ॥ अथ *इन्द्रियस्येत्यादिना संग्रहेणोक्तमेवार्थं प्रश्नस्योत्तरतया प्रपञ्चयन् भगवानुवाच—**काम एष** इति । विषयानुभववासनाबीजानां कामक्रोधाद्यङ्कुरोत्पादने रजोगुणस्सल्लिसेकः ; कामादिर्ह्यस्मन्मते ज्ञानविशेषरूप आत्मधर्मः ; रजस्तु प्रकृतिगुणः ; अन्यधर्मस्य कथमन्यत्र कार्यकरत्वमित्यत्रोक्तम्—**गुणमयप्रकृतिसंसृष्टस्ये**ति । औष्ण्याश्रयदहनसंयोगाद्यथा करतलादौ स्फोटादिः, तथा गुणाश्रयप्रकृतिसंसर्गादात्मनि कामादिरिति भावः । तर्हि गुणत्रयमयप्रकृतिसंसर्गात्सत्त्वादिकार्यज्ञानादिरपि युगपदेव किं न स्यादित्यत्रोक्तम्—**उद्भवाभिभवरूपेण वर्तमाने**ति । पूर्वश्लोकोक्तायंशब्दस्यात्रापेक्षयाऽस्येति विपरिणम्यानुषङ्गः । रजोगुणप्रचुरस्यास्य कथं ज्ञानयोगप्रारम्भमात्रमपीति चोद्यमुद्भवाभिभवक्रमेण मात्रया मध्ये कदाचित्सत्त्वोन्मेषसंभावनया निरस्तमित्यभिप्रेत्य-**ज्ञानायारब्धस्ये**त्युक्तम् । आरब्ध इति भुक्ता ब्राह्मणाः इतिवत्कर्तरि क्तः । एष इति पदेन पापाचरणे प्रयोजकः प्रश्नविषयः परामृश्यते । तेनैव *सदृशं चेष्टते (३३) *इन्द्रियस्येन्द्रियस्यार्थे (३४) इति श्लोकद्वयोक्तार्थोऽप्यत्र स्मारित इत्यभिप्रेत्य—**प्राचीने**त्यादिविशेषणद्वयमुक्तम् । पूर्वोत्तरागद्वेषावस्थान्तरापन्नावत्र कामक्रोधशब्देन व्यपदिश्येते इति भावः । महाशनत्वविवरणम्—**विषयेष्वेनमाकर्षती**ति । महदशनं भोग्यं यस्य स महाशनः । एष इति निर्देशस्यावृत्त्या वाक्यभेदः । अत्र च वाक्यद्वयस्यैकमेव मुखभेदेन प्रतिपाद्यम् । अन्यथा कः पापाचरणे प्रयोजक इति प्रश्ने काम एष क्रोधश्च इत्यादिप्रकारेण निर्देष्टव्यम् । अनन्तरं च विद्ध्येताविह वैरिणौ इति वक्तव्यम् । उत्तरत्रच षट्स्वपि श्लोकेषु *तेन, एतेन, कामरूपेण, अस्य, एनं, यः, कामरूपम् इति सर्वत्रैकवचननिर्देशः काममात्रनिर्देशश्च क्रियते ; न तु कामात्क्रोधस्य पृथक्त्वेनाभिधानम् । ततश्च काम एवावस्थाभेदेन क्रोधतयाऽत्र विवक्षितः; तदवस्थाद्वयविषयतया च वाक्यभेद उचितः । महाशनो महापाप्मेति पदद्वयमपि बाहुल्यानुसारेणौचित्यात्क्रमेण तदुभयविषयमित्येतदखिलमभिप्रेत्याह—**एष एवे**ति । प्रतिहतगतिरिति क्रोधारूये परिणामे हेतुरुक्तः । एकस्यैव शब्दादिविषयकामावस्थातः क्रोधावस्थाया विषयतो भेदप्रदर्शनार्थमतिप्रसङ्गपरिहारार्थं चोक्तम्—**प्रतिहतीत्यादि** । महापाप्मतां विवृणोति—**परहिंसादिषु प्रवर्तयतीति** । महान् पाप्मा कार्यतया यस्यास्तीति स महापाप्मा । * क्रुद्धो हन्याद्गुरूनपि (रा. सु. ५५.५) इति हि प्रसिद्धम् । एतच्छ्लोकोक्तं रजोगुणाख्यं पूर्वोक्तं प्रकृतिशब्दव्यपदेशार्हं वासनाख्यं कारणं चोपस्थाप्य तदुभयकार्यताविशिष्टम् एनमित्यन्वादेशः परामृशतीत्यभिप्रायेण **रजोगुणसमुद्भवं सहजमिति**

पदद्वयमुक्तम् । इह वैरिणमित्यत्र इहशब्दः प्रमादवत्तया बुभुत्सितज्ञानयोगविषय इत्यभिप्रायेणोक्तम्—**ज्ञानयोगविरोधिनमिति** ॥ ३७ ॥

धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८

भा ॥ यथा धूमेन वह्निराव्रियते ; यथाऽऽदर्शो मलेन ; यथा चोल्बेनावृतो गर्भः ; तथा तेन—कामेन इदं जन्तुजातमावृतम् ॥ ३८ ॥

ता ॥ वैरित्वप्रकार उच्यते—**धूमेनेति** । तत्र यथेत्यन्तमेकं वाक्यम् । आदर्शो मलेन चेत्यत्र चकाराद्यथाशब्दोऽनुषक्त इति व्यञ्जनाय **यथा धूमेनेत्युक्तम्** । पूर्वस्मिन् श्लोके क्रोधस्यापि कामावस्थान्तरत्वव्यपदेशादुत्तरत्र च * कामरूपेण, कामरूपम् इति तस्यैवानुवृत्तेरत्रापि तच्छब्देन काम एव परामृश्यत इति व्यञ्जनाय—**तेन कामेनेत्युक्तम्** । इदमिति सामान्यनिर्देशोऽप्यचिद्ग्रहणासंभवात्प्रकरणवशात्सर्वक्षेत्रज्ञसंग्रहणौचित्यादिदंशब्दस्य वक्ष्यमाणपरत्वादपि लोकप्रतीतपरत्वस्वारस्याच्च * यया क्षेत्रज्ञशक्तिस्सा वेष्टिता (वि. ६. ७. ६२) इत्यादिवत् क्षेत्रज्ञानामावरणमिहोच्यत इत्यभिप्रायेणोक्तम्—**इदं जन्तुजातमिति** । जन्तुशब्देन शरीरित्वस्य विवक्षितत्वादावरणार्हत्वं दर्शितम् । नपुंसकनिर्देशस्य सामान्यविषयत्वप्रदर्शनाय जातशब्दः । अनादिवासनानुबन्धित्वेन सहजत्वम्, निवृत्तस्यापि पुनःपुनरुपाधिवशादागमनम्, स्वेच्छया निवर्तयितुमशक्यत्वं च दर्शयितुं दृष्टान्तत्रयोपादानम् ॥ ३८ ॥

भा ॥ आवरणप्रकारमाह—

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९

भा ॥ अस्य जन्तोः ज्ञानिनो ज्ञानस्वभावस्यात्मविषयं ज्ञानमेतेन—कामाकारेण विषयव्यामोहजननेन नित्यवैरिणा आवृतम् ; दुष्पूरेण—प्राप्त्यनर्हविषयेण, अनलेन च—पर्याप्तिरहितेन ॥ ३९ ॥

ता ॥ * आवृतं ज्ञानम् इत्यादेः पौनरुक्त्यव्युदासायाह—**आवरणप्रकारमाहेति** । अत्र * तेनेदमावृतमित्युक्ते किं तदावृतमित्याकाङ्क्षाया अपि कथंताकाङ्क्षा युक्तेति भावः । अत्र ज्ञानिशब्दो न तावन्निष्पन्नज्ञानविषयः, तदवस्थस्य तस्य कामावृतज्ञानत्वाभावात् । ततश्चानिष्पन्नज्ञानसर्वक्षेत्रज्ञपरत्वमेवोचितमित्यभिप्रायेण—**अस्य जन्तोर्ज्ञानिन इत्युक्तम्** । ज्ञानिन इत्यत्र मतुप्प्रत्ययस्य श्रुतिसिद्धस्वाभाविकसंबन्धपरत्वप्रदर्शनायावरणस्यौपाधिकत्वद्योतनाय च **ज्ञानस्वभावस्येत्युक्तम्** । क्षेत्रज्ञस्यापि कर्मफलभोक्तृशब्दादिविषयज्ञानावरणाभावात्—**आत्मविषयं ज्ञानमित्युक्तम्** । कामरूपशब्दस्य स्वेच्छागृहीतरूपत्वे प्रसिद्धेस्तद्भ्रमव्युदासायोक्तम्—**कामाकारेणेति** । कामस्वभावादर्थादाक्षिप्तमात्मविषयज्ञानावरणप्रकारं व्यञ्जयति—**विषयव्यामोहजननेनेति** । **नित्यवैरिणा**—आत्मसाक्षात्कारोत्तरावधिनाऽनादिवैरिणेत्यर्थः । नित्यसंसारिसद्भावपक्षे चास्य केषुचिदात्मसु नित्यवैरित्वं सिद्धम् । योग्यैर्लब्धैरलंभावराहित्यमनलशब्दार्थः । * तृष्णाखनिरगाधेयं दुष्पूरा केन पूर्यते । या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते ॥ इत्युक्तप्रकारेणायोग्येषु दुर्लभेषु प्रवृत्तिहेतुत्वं दुष्पूरशब्दविवक्षितमित्यभिप्रायेणोक्तम्—**दुष्पूरेण प्राप्त्यनर्हविषयेण, अनलेन च पर्याप्तिरहितेनेति** । **यद्वा अनलशब्दोऽग्निपर्यायः कामे गौणः ; नद्यादेर्विषयविभागः पर्याप्तिर्वा स्यात्, तद्रहितेति भावः ॥ ३९ ॥**

भा ॥ कैरुपकरणैरयं काम आत्मानमधितिष्ठतीत्यत्राह—

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४०

भा ॥ अधितिष्ठत्येभिरयं काम आत्मानमितीन्द्रियाणि मनो बुद्धिरस्याधिष्ठानम्; एतैरिन्द्रियमनोबुद्धिभिः कामाधिष्ठानभूतैर्विषयप्रवणैर्देहिनं प्रकृतिसंसृष्टं ज्ञानमावृत्य विमोहयति—विविधं मोहयति, आत्मज्ञानविमुखं विषयानुभवपरं करोतीत्यर्थः ॥ ४० ॥

ता ॥ एवमावरणप्रकार उक्तः; अथावरणोपकरणान्यनन्तरं नियन्तव्यत्वोपदेशायोच्यन्त इत्यभिप्रायेणाह—कैरिति । आत्मानमधितिष्ठति—स्वतन्त्रमात्मानमाक्रम्य परतन्त्रं करोतीत्यर्थः । इन्द्रियशब्दोऽत्र गोबलीवर्दन्यायाद्बाह्येन्द्रियपरः । बुद्धिरत्रापुरुषार्थेषु पुरुषार्थत्वाध्यवसायः । प्रकृतानुपयुक्ताधिकरणादिधीव्युदासाय करणव्युत्पत्तिं दर्शयति—**अधितिष्ठत्येभिरिति** । एतैर्विमोहयतीति ह्युच्यत इति भावः । अधिष्ठानक्रियाकरणभूतानामिन्द्रियादीनामवान्तरव्यापारप्रदर्शनाय—**विषयप्रवणैरित्युक्तम्** । **प्रकृतिसंसृष्टमिति** । देहिशब्देनेन्द्रियादेरवर्जनीयत्वं गुणवश्यत्वं च सूच्यत इति भावः । विशब्दः * अनात्मन्यात्मबुद्धिर्या चास्वे स्वमिति या मतिः (वि. ६. ७. ११) इत्याद्युक्तभ्रान्तिवैविध्यपर इत्यभिप्रायेणाह—**विविधं मोहयतीति** । भ्रान्तिवैविध्यं भोग्ये स्वात्मन्यभोग्यताभ्रमेणाभोग्येषु च विषयेषु भोग्यताभ्रमेण विवृण्वन् प्रकृतोपयोगित्वं [च] दर्शयति—**आत्मज्ञानेति** ॥ ४० ॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१

भा ॥ यस्मात्सर्वेन्द्रियव्यापारोपरतिरूपे ज्ञानयोगे प्रवृत्तस्यायं कामरूपद्दशत्रुः विषयाभिमुख्यकरणेनात्मनि वैमुख्यं करोति, तस्मात्प्रकृतिसंसृष्टतयेन्द्रियव्यापारप्रवणस्त्वमादौ—मोक्षोपायारम्भसमय एव, इन्द्रियव्यापार[नु]रूपे कर्मयोगे इन्द्रियाणि नियम्यैनं ज्ञानविज्ञाननाशनम्—आत्मस्वरूपविषयस्य ज्ञानस्य तद्विवेकविषयस्य च नाशनं पाप्मानं कामरूपं वैरिणं प्रजहि—नाशय ॥ ४१ ॥

ता ॥ अथ कामस्यात्माधिष्ठानोपकरणेष्विन्द्रियमनोबुद्धिषु प्रथममिन्द्रियाणां नियमनं कामविजयोपायतयोपदिश्यते—**तस्मादिति** श्लोकेन । तस्मादित्येतत्प्रकृतस्य ज्ञानयोगस्योक्तप्रकारदुष्करत्वपरामर्शीत्याह—**यस्मादित्यादिना** । त्वमितिनिर्देशोऽर्जुनस्य तदानींतनावस्थापर इत्यभिप्रायेणोक्तं—**प्रकृतिसंसृष्टतया इन्द्रियव्यापारप्रवणस्त्वमिति** । आदाक्त्यनेनाभिप्रेतमाह—**मोक्षेति** । नात्रेन्द्रियनियमनमत्यन्तव्यापारोपरमः, आदौ तस्याशक्यत्वात्; प्रपञ्चितं च तत्पागेव । कर्मयोगार्थं चेन्द्रियनियमनं प्रागपि * यस्त्विन्द्रियाणि मनसा (७) इत्यादावुक्तम् । अतोऽत्रापि तथैव वर्णनीयमित्यभिप्रायेणोक्तम्—**इन्द्रियव्यापारानुरूप** इत्यादि । ज्ञानविज्ञानयोः द्वयोरप्यात्मविषयत्वं प्रकरणात्सिद्धम् । तत्र च * ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः (मनु. १. ९७) इतिवत्स्वरूपतद्विवेकविषयत्वादपौनरुक्त्यमित्यभिप्रायेणोक्तम्—**आत्मस्वरूपेत्यादि** । विज्ञानं—विविच्य ज्ञानम्, व्यावृत्ततया ज्ञानमित्यर्थः । प्रत्यग्ज्ञानानन्दत्वादिविशिष्टमात्मनः स्वरूपम् । अणुत्वनित्यत्वज्ञातृत्वभोक्तृत्वकर्तृत्वादिभेदको धर्मवर्गोऽत्र विवेकः । यद्वा देहातिरिक्तः कश्चिदात्माऽस्तीत्येतावत्स्वरूपमिह विवक्षितम्; [तत्रा]नादयोऽप्यणुत्वादिविद्वेकतया विवक्षिताः । अथवा तत्सर्वं स्वरूपम्; विवेको

विवेककरणं शास्त्रम्; ततः प्रमेयं प्रमाणं चोक्तं भवति । एनं पाप्मानमित्यन्वादेशात्प्रस्तुतकामविषयः पाप्मशब्दः; तस्य पाप्मशब्देनाभिधानं निषेधविषयतया, ज्ञानविरोधित्वेनानिष्टफलत्वाच्चेत्यभिप्रेत्य **कामरूपं वैरिणमित्युक्तम्** ॥ ४१ ॥

भा ॥ ज्ञानविरोधिषु प्रधानमाह—

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२

भा ॥ ज्ञानविरोधे प्रधानानीन्द्रियाण्याहुः, यत इन्द्रियेषु विषयव्यापृतेषु आत्मनि ज्ञानं न प्रवर्तते। इन्द्रियेभ्यः परं मनः—इन्द्रियेषु उपरतेष्वपि मनसि विषयप्रवणे आत्मज्ञानं न संभवति। मनसस्तु परा बुद्धिः—मनसि वृत्त्यन्तरविमुखेऽपि विपरीताध्यवसायप्रवृत्तौ सत्यां ज्ञानं न प्रवर्तते। सर्वेषु बुद्धिपर्यन्तेषु उपरतेष्वपीच्छापर्यायः कामो रजस्समुद्भवो वर्तते चेत्—स एवैतानीन्द्रियादीन्यपि स्वविषये वर्तयित्वा आत्मज्ञानं निरुणद्धि; तदिदमुच्यते * यो बुद्धेः परतस्तु सः इति; बुद्धेरपि यः परस्स काम इत्यर्थः ॥ ४२ ॥

ता ॥ एवं विरोधिमात्राणामिन्द्रियाणां नियन्तव्यत्वमुक्तम् । अथ मनोबुद्धिकामानां नियन्तव्यतरतमत्वादिसिद्ध्यर्थमुत्तरोत्तरं विरोधितमत्वेन निर्दिश्यन्त इत्यभिप्रायेणाह—**ज्ञानविरोधिष्विति** । परशब्दस्यात्र कारणत्वादिपरत्वायोगात्प्राधान्यमेव विवक्षितम् । तच्च प्रकरणवशात् ज्ञानविरोधापेक्षयेत्यभिप्रायेणोक्तं—**ज्ञानविरोधे प्रधानानीति** । प्राधान्यं चेन्द्रियाणां देशकालादिरूपसामान्यविरोध्यन्तरापेक्षया, शरीरापेक्षया वा सूक्ष्मत्वदुर्ग्रहत्वादिभिः । इन्द्रियाणां प्राधान्यहे[तु]तुं विरोधित्वप्रकारमाह—**यत** इति । इन्द्रियेभ्यो मनसः परत्वे हेतुमाह—**इन्द्रियेष्विति** । पूर्ववाक्याद्यत इत्यनुषञ्जनीयम् । एवमुत्तरत्रापि हेतुवाक्ये भाव्यम् । विषयासन्निधानहठात्करणादिना बाह्येन्द्रियेषु विषयेभ्य उपरतेष्वपि मनसा तत्तद्विषयेषु चिन्त्यमानेष्वात्मज्ञानं न स्यात्; ततो बाह्येन्द्रियोपरतिवेलायामपि विरोधित्वादस्य तेभ्यः परत्वम् । मनसो बुद्धेः परत्वे हेतुमाह—**मनसि वृत्त्यन्तरेति**। ननु मनसो विषयान्तरवृत्तिवैमुख्ये कथं तद्गोचराध्यवसायप्रवृत्तिः; मनसा कञ्चिद्विषयमालम्ब्य तत्रैव हि कुर्यां न कुर्यामित्याद्यध्यवसीयते? उच्यते—नात्र मनसो निश्शेषव्यापारनिवृत्तिः वृत्त्यन्तरवैमुख्यं विवक्षितम्; किंतु बलादप्यशक्यनिरोधस्वारसिकविषयान्तरप्रावण्यनिवृत्तिः । सूचितं चैतत्पूर्ववाक्ये * मनसि विषयप्रवणे इति । अतो यदृच्छया निद्रालस्यादिभिः मनसः स्वरसतो विषयैकशरणत्वाभावेऽपि दुराग्रहादिमात्रेण विपरीताध्यवसायप्रवृत्तौ मनसस्तथाविधमपि प्रावण्यं स्यादेव । एवं च मनसस्त्विति तुशब्दः शङ्कानिरासार्थः; एवंविधवैलक्षण्यार्थो वा । अध्यवसायादपि कामस्य परत्वे हेतुमाह—**सर्वेष्विति** । वासनाकार्यत्वस्य स्वानुरूपाध्यवसायहेतुत्वस्य च द्योतनाय—**इच्छापर्याय** इत्युक्तम् । इन्द्रियमनोबुद्ध्युपरतिवेलायां कथं कामस्योत्पत्तिरित्यत्रोक्तं—**रजस्समुद्भव** इति । प्राचीनकर्मोन्मिषितरजोदूषितमनोमात्रसंभव इत्यर्थः । नन्विन्द्रियादीनां विषयान्तरवैमुख्ये सिद्धे विषयेच्छायास्सद्भावेऽपि को विरोधः? आत्मानुभवेच्छया तत्रैवाध्यवसायमनःप्रावण्ययोरुपपत्तेरित्यत्रोक्तं—**स एवेत्यादि** । सत्यम्, आत्मेच्छाऽप्यस्त्येव, सा हि कादाचित्कालपसत्त्वमूला, विषयेच्छा तु प्रचितप्राचीनकर्मोद्भावितनिरन्तरानुवृत्तरजोमूला; तस्मादात्मेच्छा यावदात्मदर्शनाध्यवसायादिकं करोति, तावद्विषयेच्छा प्रबला विषयानुभवाध्यवसायादिकमेव कुर्यादिति भावः । एवमत्र कामस्य पूर्वेषां प्रवर्तकत्ववचनं बुद्धिमनसोरपि पूर्वपूर्वप्रवर्तकत्वस्योपलक्षणं मन्तव्यम् । **रजस्समुद्भवः, वर्तयित्वेति** पदाभ्यां कामस्याध्यवसायादिनिरपेक्षोत्पत्तिकत्वतदुपकरणत्वलक्षणं वैषम्यं तुशब्दद्योतितं

विवृतम् । अर्थान्तरपरत्वमनन्वयभ्रमं च निरस्यन्नुक्तार्थपरतया चतुर्थं पादमुपादत्ते—**तदिदमुच्यत** इति । परत इति शब्दस्य पूर्ववाक्यत्रयस्थपरशब्दतुल्यार्थत्वात्सार्वविभक्तिकप्रत्ययेन प्रथमार्थत्वं स इत्यस्य प्रकरणसिद्धं विशेष्यं च व्यञ्जयति—**बुद्धेरपी**ति । *अहङ्कारस्य भोक्तृत्वादधिष्ठानत्वाच्च बुद्धेः परत्वमिति केषाञ्चिद्व्याख्यानं प्रकृतासङ्गत्यादिभिरनादरणीयम् । ननु, *इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥ (कठ. ३. १०, ११) इति हि कठवल्ल्यां नियन्तव्यवर्गेऽश्रूयते । स्पष्टं चेदम् *आनुमानिकमप्येकेषाम् (ब्र. १. ४. १) इत्यधिकरणे व्याख्यातम् । अस्मिन्नपि श्लोके तत्प्रत्यभिज्ञायते; न चेन्द्रियमनसोर्मध्येऽर्थानामदर्शनात् *महतः परमव्यक्तमव्यक्तात्पुरुषः परः इत्यनयोरनुपादानाच्च भिन्नार्थत्वमिति वाच्यम्; संग्रहविस्तररूपेण कतिपयाभिधानसकलाभिधानयोरुपपत्तेः; सृष्टिप्रकरणादिषु कतिपयसमस्तसृज्यतत्त्वादिनिर्देशवत् । *आहुरिति वचनात् क्वचिदन्यत्रास्यार्थस्याभिधानमवश्याभ्युपगन्तव्यम्; ततश्च *यो बुद्धेः परतस्तु सः इत्यस्य *बुद्धेरात्मा महान्परः इत्यनेन तुल्यार्थत्वादात्मविषयत्वमेवोचितम्; एवं च सति *एवं बुद्धेः परं बुद्ध्वेत्यादौ उत्तरश्लोकेऽपि द्वितीयान्तात्मशब्दश्चेतनविषयतयोपपन्नतरस्स्यात्; अतः कथं स काम इति व्याख्यायते ? उच्यते—यद्यपीन्द्रियादित्रयं तदेवात्र प्रत्यभिज्ञातम्; तथाऽपि स एव क्रमोऽत्र कात्स्न्र्येन न विवक्षितः; पूर्वत्र *इन्द्रियाणि मनो बुद्धिः (४०) इति श्लोके निर्दिष्टानामिन्द्रियादिकामपर्यन्तानां चतुर्णां विरोधिनामेवात्र तारतम्यनिर्देशोपपत्तेः, इन्द्रियमनोबुद्धीनां च क्रमस्यात्र न कश्चिद्भङ्गः । कठवल्ल्यर्थपरत्वे त्वर्थानामत्रानिर्देशान्मात्रया क्रमभङ्गस्यात् । विरोधित्वे जेतव्यत्वे च प्रधानतया पूर्वत्रोत्तरत्र च काम एव व्यपदिश्यते । अतस्स एवात्र सर्वप्रधानतया *यो बुद्धेः परतस्तु सः इति निर्देशमर्हति; अन्यथा स इति शब्दस्य विशेष्यमौपनिषदं दूरस्थं स्यात् । यदि त्वात्माऽप्यत्र नियन्तव्यतयाऽभिमतः, तदा *इन्द्रियाणि मनो बुद्धिरित्यत्रात्माऽप्यधिष्ठानतया व्यपदिश्येत; नचैतत्तथा कृतम्; आत्मा हि तत्र चतुर्भिर्मोहनीयतया व्यपदिष्टः; अतश्चतुर्णां नियमनमेवानेन कार्यम्; तथा सत्युत्तरश्लोकस्थात्मशब्दोऽप्येतदनुरोधेन वर्णनीयः; एतस्यैवानुवादो हि एवं बुद्धेः परमिति व्यक्तः । पादद्वयस्थितस्य बुद्ध्वा इत्यादिक्रियाद्वयस्य कर्मद्वयं च भिन्नमेव स्वरसप्रतीतम् । अतस्तत्र द्वितीयान्तात्मशब्दो नियन्तव्यतया निर्दिष्टमनोविषयः । तृतीयान्तस्तु मनोनियमनकरणभूताध्यवसायविषयः । आहुरिति निर्देशस्तु नावश्यमुपनिषदभिप्रायेण; *इन्द्रियाणां [तु सर्वेषां] हि चरतां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञादृतेः पादादिवोदकम् ॥ (मनु. २. ९९) इत्याद्यनुसारेण मन्वादय आहुरित्यपि विवक्षोपपत्तेः । तस्मात् *यो बुद्धेः परतस्तु सः इति काम एव निर्दिश्यते । तदेतदखिलमभिप्रेत्योक्तं—**तदिदमुच्यत** इत्यारभ्य **स काम इत्यर्थ** इत्यन्तम् ॥ ४२ ॥

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३

॥ इति श्रीभगवद्गीतासूपनिषत्सु **कर्मयोगो** नाम तृतीयोऽध्यायः ॥ ३ ॥

भा ॥ एवं बुद्धेरपि परं कामं ज्ञानयोगविरोधिनं वैरिणं बुद्ध्वा ।आत्मानं—मनः आत्मना—बुद्ध्या कर्मयोगेऽवस्थाप्य एनं कामरूपं दुरासदं शत्रुं जहि—नाशय ॥ ४३ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये तृतीयोऽध्यायः ॥ ३ ॥

ता ॥ *सदृशं चेष्टते इत्याद्युपक्रान्तज्ञानयोगसप्रमादतोपसंहारद्वारा मनसः कर्मयोगेऽवस्थापनमभिधायाध्यायार्थोऽप्युपसंह्रियते—एवमितिश्लोकेन । कामविजयात्पूर्वं मनसस्संस्तम्भनं नाम कर्मयोगे स्थापनमेव, न पुनरत्यन्तवशीकृतत्वम्, सति हि कामे मनसोऽपि क्षोभस्स्यादिति पूर्वमेवोक्तमित्यभिप्रायेण—**कर्मयोगेऽवस्थाप्येत्युक्तम्** । **दुरासदम्**—अननुष्ठितकर्मयोगैरनिरस्तपापैरगृहीतसुदृढसत्त्वकवचैर्दोषदर्शनेऽप्यपाकर्तुमशक्यमित्यर्थः । अचेतनस्य कामस्य शत्रुत्वारोपेण हिंसनीयत्वोक्तिफल्गिं तु नाशनमेवेत्यभिप्रायेण प्रजहि, जहि इत्यनयोर्नाशयेति व्याख्यत ॥ ४३ ॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ॥ ४ ॥

भा ॥ तृतीयेऽध्याये प्रकृतिसंसृष्टस्य मुमुक्षोस्सहसा ज्ञानयोगेऽनधिकारात् कर्मयोग एव कार्यः ज्ञानयोगाधिकारिणोऽप्यकर्तृत्वानुसन्धानपूर्वककर्मयोग एव श्रेयानिति सहेतुकमुक्तम्; शिष्टतया व्यपदेश्यस्य तु विशेषतः कर्मयोग एव कार्य इति चोक्तम्। चतुर्थेनेदानीमस्यैव कर्मयोगस्य निखिलजगदुद्धरणाय मन्वन्तरादावेवोपदिष्टतया कर्तव्यतां द्रढयित्वा अन्तर्गतज्ञानतयाऽस्यैव ज्ञानयोगाकारतां प्रदर्श्य, कर्मयोगस्वरूपम्, तद्भेदाः, कर्मयोगे ज्ञानांशस्यैव प्राधान्यं चोच्यते । प्रसङ्गाच्च भगवदवतारयाथात्म्यमुच्यते ।

श्रीभगवानुवाच—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः । स कालेनेह महता योगो नष्टः परन्तप ॥ २
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः । भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३

भा ॥ योऽयं तवोदितो योगः स केवलं युद्धप्रोत्साहनायेदानीमुदित इति न मन्तव्यम्। मन्वन्तरादावेव निखिलजगदुद्धरणाय परमपुरुषार्थलक्षणमोक्षसाधनतयेमं योगमहमेव विवस्वते प्रोक्तवान्, विवस्वांश्च मनवे, मनुरिक्ष्वाकवे; इत्येवं संप्रदायपरम्परया प्राप्तमिमं योगं पूर्वे राजर्षयो विदुः। स महता कालेन तत्तच्छ्रोतृबुद्धिमान्द्याद्विनष्टप्रायोऽभूत् । स एवायमस्खलितस्वरूपः पुरातनो योगः सख्येनातिमात्रभक्त्या च मामेव प्रपन्नाय ते मया प्रोक्तः—सपरिकरस्सविस्तरमुक्त इत्यर्थः। मदन्येन केनापि ज्ञातुं वक्तुं चाशक्यम्, यत इदं वेदान्तोदितमुत्तमं रहस्यं ज्ञानम् ॥ १ ॥ २ ॥ ३ ॥

ता ॥ अथ चतुर्थसंगतिं वक्तुं तृतीयाध्यायार्थं संग्रहेणोद्गृह्णाति—**तृतीयेऽध्याय** इति । **सहेतुकमिति**—ज्ञानयोगकर्मयोगयोस्सप्रमादत्वनिष्प्रमादत्वादिहेतुपूर्वकमित्यर्थः । एतेन *असक्त्या लोकरक्षायै गुणेष्वारोप्य कर्तृताम् । सर्वेश्वरे वा न्यस्योक्ता तृतीये कर्मकार्यता ॥ (७) इति संग्रहश्लोकोऽपि व्याख्यातः । अशक्तस्य शक्तत्वेऽप्यप्रसिद्धस्य च, स्वार्थनिपुणस्य च कर्मयोग एव कार्यः; प्रसिद्धस्य त्वशक्तस्य, शक्तस्य वा स्वार्थं लोकरक्षार्थं च स एव कार्य इति तृतीयाध्यायेनाधिकारिचिन्तनम् कर्मयोगस्य ज्ञानयोगाद्वैषम्यचिन्तनं च कृतमिति भावः । अथाधिकर्तव्यतयोक्तस्य कर्मयोगस्य प्रामाणिकत्वं, ज्ञानमिश्रत्वं, स्वरूपं, तद्वैविध्यं, ज्ञानांशप्राधान्यं, प्रासङ्गिको भगवदवतार इति षडर्था इहोच्यन्त इत्याह—**चतुर्थेनेति** । ननु *प्रसङ्गात्स्वस्वभावोक्तिः कर्मणोऽकर्मताऽस्य च । भेदाज्ञानस्य माहात्म्यं चतुर्थाध्याय उच्यते ॥ (८) इति चत्वारोऽर्थास्संगृहीताः; तत्कथमत्र षडर्थानुकीर्तनम्? उच्यते—प्रसङ्गात्स्वस्वभावोक्तिरित्यत्र प्रसङ्गः प्रामाणिकत्वप्रसङ्गः,

अस्य च भेदाः इत्यत्र स्वरूपमन्तरेण तद्भेदस्य दुर्ज्ञानत्वात्स्वरूपमपि विवक्षितम्; **चकारेण वा तत्समुच्चय इति संग्रहेऽपि षडर्था एव विवक्षिताः**। **स्वस्वभावोक्तिः**—स्वस्याकर्मवश्यावतारत्वादिस्वभावोक्तिः। **कर्मणोऽकर्मता**—कर्मयोगस्यान्तर्गतज्ञानतया ज्ञानयोगाकारता; **ज्ञानस्य माहात्म्यं**—कर्मयोगान्तर्गतज्ञानांशस्य प्राधान्यम्; एवं *चतुर्थेनेत्यादिभाष्येणायमपि श्लोको व्याख्यातः। कर्तव्यता हि तृतीयाध्याये प्रोक्ता; अतस्तद्दार्ढ्यमात्रमत्र पुरावृत्तास्यानेन क्रियत इति—**कर्तव्यतां द्रढयित्वेत्यस्य** भावः। *साक्षादध्यायार्थानां सङ्गतिं प्रदर्श्य प्रासङ्गिकं पृथगाह—**प्रसङ्गाच्चेति**। इममिति-निर्देशपूर्वकमुपदेशपरम्पराकथनस्य तात्पर्यमाह—**योऽयमित्यादिना न मन्तव्यमित्यन्तेन**। योगोऽत्र कर्मयोगः। अत्र ज्ञानयोगपरत्वेन परव्याख्यानं प्रकृतासंगतं, कुरु कर्मेत्यादिवक्ष्यमाणविरुद्धं चेति भावः। मनोरपि जनयित्रे तदुपदेष्ट्रे च विवस्वते प्रोक्तत्वादर्जुनेन चादावित्यनुवदिष्यमाणत्वात्फलितमुक्तं—**मन्वन्तरादाविति**। **निखिलजगदुद्धरणायेति**। न केवलं युद्धप्रोत्साहनार्थमर्जुनमात्रार्थं वा, किंतु समस्ताधिकारिवर्गापवर्गदानायेत्यर्थः। मन्वन्तरादावुपदेशात्तस्य निखिलजगत्साधारण्यं सूचितम्। नित्यसर्वज्ञे भगवति स्थितत्वादव्ययत्वम्। अथवा अव्ययत्वमिह फलद्वारा। इममिति निर्देशश्च पूर्वोक्तमोक्षसाधनत्वमप्यभिप्रैतीति ज्ञापनाय **परमेत्याद्युक्तम्**। प्रागपि न फलान्तरार्थमुक्तमिति भावः। अहं प्रोक्तवानित्यनेन मन्वन्तरादौ, महाकल्पारम्भे, भारतसमरारम्भे वा मदन्यः कश्चिदस्य यथावज्ज्ञाता वक्ता च दुर्लभ इत्यभिप्रेतम्। प्रसङ्गादवश्यं ज्ञातव्यं स्वावतारयाथात्म्यं वक्तुं स्वस्य मन्वादिकालविरोधरूपशङ्कोत्थापनं च कृतमिति व्यञ्जनाय **अहमेवेत्युक्तम्**। **विवस्वते प्रोक्तवानिति** न ह्ययमसुरादिभ्यो मयोपदिष्टो बुद्धाद्यागमार्थः, किंतु सर्व[वेदा]देवात्मने विवस्वत इति भावः। **विवस्वांश्च मनवे, मनुरिक्ष्वाकव** इति—*यद्वै किंच मनुरवदत्तद्भेषजम् (यजु. २. २. १०. ५४) इति सकलजगद्भेषजभूतवचनतया प्रसिद्धमर्यादाप्रवर्तनविशदाधिकृतकोटिनिविष्टपित्रादिक्रमेण ह्युपदेशपरंपरा प्राप्ता, नतु संभवद्विप्रलम्भकुहकपाषण्ड्यादिसंसर्गप्रवृत्तेति भावः। एतत्सर्वम्—**एवं संप्रदायपरंपरयेत्यनेन** व्यक्तम्। परंपराशब्देनेक्ष्वाकोरर्वाचीनानामपि ग्रहणात्कृतादियुगे संप्रदायाविच्छेदो विवक्षित इति चाभिप्रायः। इदानीं नाशस्याभिधानात् **पूर्वे राजर्षय इत्युक्तम्**। **राजर्षयो विदुः**—राजानो हि विस्तीर्णागाधमनसः, तत्रापि ऋषित्वादतीन्द्रियार्थदर्शनक्षमाः; ते च बहवः; ते चाश्वपतिजनकाम्बरीषप्रभृतयस्सर्वेऽप्यविगानेनेमं कर्मयोगमनुष्ठितवन्त इति भावः। कालदैर्घ्यस्य विच्छेदहेतुत्वप्रकारमिहशब्दसूचितमाह—**तत्तच्छ्रोतृबुद्धिमान्द्यादिति**। इह, विचित्राधिकारिपूर्णे जगति—कृतत्रेतादिषु युगेषु कालक्रमेण बुद्धिशक्त्यनुष्ठानादयोऽपचीयमाना दृष्टाः, श्रुताश्चेति भावः। नष्ट इत्यत्रात्यन्तविच्छेदो नाभिमतः, व्यासभीष्माक्रूरादेरिदानीमपि विद्यमानत्वादित्यभिप्रायेणोक्तं—**विनष्टप्रायोऽभूदिति**। स एवायमिति सप्रत्यभिज्ञसावधारणनिर्देशफलितमुक्तम्—**अस्खलितस्वरूप इति**। पुरातनोऽद्येति निर्देशाभ्यां कालभेदमात्रेणापि न स्वरूपे वा प्रकारे वा भेद इति सूचितम्। भक्तोऽसीति वर्तमाननिर्देशादनिवृत्ता भक्तिस्सूचिता। अल्पीयसी तु भक्तिः कदाचिन्निवर्तेतापीत्यभिप्रायेणोक्तम्—**अतिमात्रेति**। **भक्तोऽसि**—शास्त्रदृष्टमहत्त्वानुसंधानेन प्रीतिमानसीत्यर्थः; सखा चासि—अवतारदृष्टसौलभ्यविशेषेण प्रणयविस्रम्भवानसीत्यर्थः। ते, मयेति शब्दावपि *शाधि मां त्वां प्रपन्नम् (२.७) इति प्रागुक्तप्रपत्तृप्रपत्तव्ययोः प्रत्यभिज्ञापकावित्ययमपि प्रवचनहेतुरिति ज्ञापनायोक्तं—**मामेव प्रपन्नाय ते मया प्रोक्त इति**। प्रोक्त इत्यत्र सोपसर्गधात्वर्थं विवृणोति—**सपरिकरस्सविस्तरमिति**। परिकरोऽङ्गम्; शब्दस्य प्रपञ्चो विस्तरः; अङ्गोक्तिरप्यत्र विस्तरेति भावः। अहं प्रोक्तवान् मयाऽद्य प्रोक्त इत्याभ्यां सूचितमाह—**मदन्येनेति**। प्रलयेन वा, युगादिस्वभावेन वा

संप्रदायविच्छेदे सति पुनरहमेव संप्रदायप्रवर्तकस्याम्; करणायत्तज्ञानेन मदन्येन हिरण्यगर्भादिनाऽपि मदुपदेशमन्तरेण ज्ञातुं वक्तुं चाशक्यमित्यर्थः। सख्यभक्तिप्रपत्त्यादिगुणपौष्कल्ययुक्तायोपदेश्यत्वे भगवद्व्यतिरिक्तेन ज्ञातुं वक्तुं चाशक्यत्वे हेतुपरं रहस्यमित्यादीति दर्शयति—**यत** इति। हिशब्दोऽत्र हेतुपरः; रहस्यत्वाद्योग्यायोपदेश्यम्; उत्तमरहस्यत्वान्मदन्येन ज्ञातुं वक्तुं चाशक्यमिति विभागः। उत्तमरहस्यत्वे हेतुः—**वेदान्तोदितमिति**। नपुंसकनिर्देशयोग्यं विशेष्यमुक्तं **ज्ञानमिति** ॥ १ ॥ २ ॥ ३ ॥

भा ॥ अस्मिन् प्रसङ्गे भगवदवतारयाथात्म्यं यथावत् ज्ञातुमर्जुन उवाच—

अर्जुन उवाच—

अवरं भवतो जन्म परं जन्म विवस्वतः।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४

भा ॥ कालसङ्ख्यया अवरम्, अस्मज्जन्मसमकालं हि भवतो जन्म। विवस्वतश्च जन्म कालसङ्ख्यया परम्—अष्टाविंशतिचतुर्युगसङ्ख्यासङ्ख्यातम्। त्वमेवादौ प्रोक्तवानिति कथमेतदसंभावनीयं यथार्थं जानीयाम्? ननु जन्मान्तरेणापि वक्तुं शक्यम्, जन्मान्तरकृतस्य महतां स्मृतिश्च युज्यत इति नात्र कश्चिद्विरोधः। न चासौ वक्तारमेनं वसुदेवतनयं सर्वेश्वरं न जानाति, य[त] एवं वक्ष्यति * परं ब्रह्म परं धाम पावत्रं परमं भवान्। पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥ आहुस्त्वामृषयस्सर्वे देवर्षिनारदस्तथा। असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ (१०. १२, १३) इति। युधिष्ठिरराजसूयादिषु भीष्मादिभ्यश्चासकृच्छ्रुतं * कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः। कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम्॥ (भा. स. ३८. २६) इत्येवमादिषु। कृष्णस्य हि कृते इति कृष्णस्य शेषभूतमिदं कृत्स्नं जगदित्यर्थः। अत्रोच्यते—जानात्येवायं भगवन्तं वसुदेवसुतं पार्थः। जानतोऽप्यजानत इव पृच्छतोऽयमाशयः—निखिलहेयप्रत्यनीककल्याणैकतानस्य सर्वेश्वरस्य सर्वज्ञस्य सत्यसङ्कल्पस्यावाप्तसमस्तकामस्य कर्मपरवशदेवमनुष्यादिसजातीयं जन्म किमिन्द्रजालादिवन्मिथ्या? उत सत्यम्? सत्यत्वे च कथं जन्मप्रकारः? किमात्मकोऽयं देहः? कश्च जन्महेतुः? कदा च जन्म? किमर्थं च जन्मेति परिहारप्रकारेण प्रश्नार्थो विज्ञायते ॥ ४ ॥

ता ॥ * प्रसङ्गात्स्वस्वभावोक्तिः (८) इति संग्रहश्लोकानुसारेणाह—**अस्मिन् प्रसङ्ग** इति। कर्तव्यताद्दढीकरणार्थकथाप्रसङ्गे इत्यर्थः। **भगवदवतारयाथात्म्यम्**—अकर्मवश्यत्वादिरूपम्। **यथावदिति**—प्रातिभासिकत्वादिप्रतिक्षेपकप्रमाणोपपत्तिपूर्वकमित्यर्थः। परावरशब्दाभ्यां न दैवमानुषत्वस्वरूपजातिवैषम्यमुच्यते, तस्योपदेशविरोधित्वाभावात्, देवानामपि देवत्वेन च कृष्णस्य विदितत्वात्, जन्मशब्दस्य च जननवाचितया साक्षाज्जातिवाचकत्वाभावात्, आदाविति कालविरोधस्य च व्यक्तमुक्तत्वात्, * बहूनि मे व्यतीतानि (५) * यदा यदा हि (७) * युगेयुगे (८) इत्येवमादिरूपस्योत्तरस्य च कालविरोधपरिहाररूपत्वात्। अतः परावरशब्दौ कालसङ्ख्योत्कर्षापकर्षविषयावित्यभिप्रायेणोक्तम्—**कालसङ्ख्ययेति**। अवरत्वहेतुतया विवक्षितं कालावधिं दर्शयति—**अस्मदिति**। **समकालमिति**—अदूरविप्रकृष्टमित्यर्थः। त्वंशब्द इदानीन्तनत्वाभिप्रायतया विरोधपर इति द्योतनाय **त्वमेवेत्युक्तम्**। कथमेतदित्याक्षेपसूचितमुक्तम्—**असंभावनीयमिति**। विजानीयामित्यत्रोपसर्गविवक्षितमाह—**यथार्थमिति**। जन्मान्तरस्यैवाभावाद्वा, जन्मान्तरानुभूतस्य स्मृत्ययोगाद्वा, वक्तुर्जन्मान्तरस्मृतिमत्तया श्रोतुरविदितत्वाद्वा स्वल्पेतज्जन्मावलम्बनेन विरोधचोद्यम्; नचैतदखिलमत्र संभवतीति

प्रभमाक्षिपति—नन्विति । **जन्मान्तरेणापि वक्तुं शक्यमिति** । न हि तदानीन्तनेन जन्मना तदानीन्तनायोपदेशो विरुद्ध इत्यर्थः । **महतामिति** । न केवलमीश्वरस्य कृष्णस्य, अन्येषामपि महतामिति भावः । श्रूयन्ते हि जातिस्मर[ण]-वृत्तान्ताः । * जातिं स्मरति पौर्विकीमिति च **मनुः** (४. १४८) । **युज्यत** इति । अनुभवेन संस्कारे प्रागेव निष्पन्ने तस्य च अदृष्टविशेषादिवशादुद्बोधे जन्मान्तरानुभूतस्मृतौ न काचिदयुक्तिः ; यथा प्रथमस्तन्यपाने स्तन्यस्य पिपासाशान्ति-हेतुत्वस्मृताविति भावः । महतामन्येषां स्मृतिः ; ईश्वरस्य तु प्राचीनवृत्तान्तगोचरसाक्षात्कारः स्मृतिरित्युपचर्यते । **कश्चिदिति** । कालविप्रकर्षरूपो वा कारणाभावादिरूपो वेत्यर्थः । **असाविति** । वृद्धोपसेवादिभिः श्रुतादिबहुलोऽर्जुनः । **वक्तारमिति** । विवस्वते प्रोक्तवानहमिति स्वसौ वक्तारम्, यद्वा विवस्वते वक्तारमित्यर्थः । **एनं वसुदेवतनयमिति** । मानुषव्यापारजन्मभ्यां तिरोहितेश्वरभावमपीत्यभिप्रायः । **सर्वेश्वरमिति** । विवस्वदादीनामपीश्वरमिति भावः ; यद्वा, गोवर्धनोद्धरणाद्यतिमानुषवृत्तान्तैरवतारदशायामेव चतुर्भुजत्वादिना च व्यक्तिरेश्वरत्वमिति भावः । उक्तज्ञानसद्भावं कार्येण, व्यवहारेण, कारणेनोपदेशेन च स्थापयति—**यत एवमिति** । **एवम्**—अनेकाप्ततमोपदेशादिभिरीश्वरत्वनिष्कर्षपूर्वक-मित्यर्थः । अर्जुनस्य स्ववाक्येन स्वोक्तमहर्षिगणोपदेशेन च ज्ञानानुमानमुक्तम् ; भारतकथावगतेन बन्धूपदेशेन च ज्ञान-वत्तामाह—**युधिष्ठिरेति** । बहुष्वपि वृत्तान्तेष्वाप्ततमेभ्यो बहुभ्यो बहुधा श्रुतमित्यर्थः । **कृष्ण एवेति** । स्थितिहेतुत्वेन प्रसिद्धस्य एवोत्पत्त्यादेरपि हेतुः, न तु ब्रह्मरुद्रादिः प्रधानादिर्वा । यद्वा लौकिकैः पुरुषैः वसुदेवतनयतया प्रतीयमानः कृष्ण एवेत्यर्थः । हिशब्दः * एको ह वै नारायण आसीत् (महो. १. १) इत्यादिश्रुतिप्रसिद्धिं दर्शयति । **लोकाना-मिति** । * लोकस्तु भुवने जने (नाम. ३. ना. १५७) । तत्रान्यतरविवक्षायामितरदार्थम् ; उत्पत्त्यप्ययशब्दावत्रोत्पादक-नाशकपरौ । चकारः प्रसिद्धिप्रकर्षादनुक्तं स्थितिहेतुत्वादिकं समुच्चिनोति । एवं * यतो वा इमानि भूतानि (भृ. १) इत्यादिना ब्रह्मलक्षणतयोक्तं सर्वकारणत्वमुक्तम् । अत एव हि * परं ब्रह्म इत्यर्जुनोक्तिः । कृष्णस्य हीत्यत्र हिशब्देन * पतिं विश्वस्य (ना. १०. १) * करणाधिपाधिपः (श्वे. ६. ९) इत्यादिप्रसिद्धिस्मृच्यते । कृते इत्यस्य अनेकार्थसाधा-रणत्वात्तादर्थ्यपरत्वव्यञ्जनायाह—**कृष्णस्य शेषभूतमिति** । अत्र च्विप्रत्ययाभावात् स्वाभाविकत्वं सूचितम् ; * दास-भूतास्स्वतस्सर्वे (पाञ्च.) इत्यादिवत् । कृष्णस्य कृते भूतमिति कृष्णार्थमुत्पन्नं सत्तायोगि चेत्यर्थः । * जन्माद्यस्य यतः, (ब्र. १. १. २) * इमानि भूतानि (भृ. १) इत्यादिवदत्रापीदंशब्दस्तत्तत्प्रमाणसिद्धविचित्रचेतनाचेतनसमुदायपरः ; पूर्वा-र्धोक्तसृज्यत्वसंहार्यत्वादिप्रकारानुवादपरो वा । तेन तदधीनोत्पत्त्यादिमत्त्वात्तादर्थ्ये हेतुरुक्तो भवति, * कस्योदरे (स्तो. र. १४) इत्यादिवत् । अथ चोद्यवादिनोक्तमभ्युपगमेन प्रतिवक्ति—**जानात्येवेति** । अवधारणेन नास्मिन्नंशे विवाद इति सूचितम् । अयमिति निर्देशः पूर्ववच्छतार्थत्वं सूचयति । वसुदेवसूनुं भगवानिति जानातीत्यर्थः । नामपरो गुणपरो वाऽत्र भगवच्छब्दः । वसुदेवसूनुपार्थशब्दाभ्यां मातुलसुतत्वपैतृष्वसेयत्वसूचनेन इतरपुरुषवदीश्वरत्वादितिरोधायकप्राकृतसंबन्धे सत्यपि सुकृतवशादुपदेशवशाच्च जानातीत्यभिप्रेतम् । तर्हि प्रश्नो निरवकाश इत्यत्राह—**जानतोऽपीति** । नात्यन्ताज्ञात-मनेन पृच्छ्यते, ज्ञातमेव विशेषान्तरजिज्ञासया परिपृष्टमिति भावः । **अजानत इवेत्यनेन** विनयगर्भपरिप्रश्नप्रकारश्च सूचितः । अज्ञातांशबुभुत्सां जन्मादेर्मिथ्यात्वादिशङ्कां च जनयन्तो भगवति ज्ञातांशविशेषा उपादीयन्ते—**निखिलेत्यादि-षष्ठ्यन्तपदैः** । **निखिलहेयप्रत्यनीकेति** । यः परगतमपि जन्मजरादिहेयं निर्कर्तयति, स कथं स्वयं तदेवोपाददीतेति भावः । **कल्याणैकतानस्येति** । स्वरूपानन्दतृप्तस्य किं जन्मनेति भावः । **सर्वेश्वरस्येति** । यदि कश्चित्स्वच्छन्दोऽस्य

नियन्ता स्यात्तदा जन्मादि घटेत, न च सोऽस्तीत्याशयः । **सर्वज्ञस्येति** । यद्यसौ स्वस्य हितमहितं च न जानाति, तदा हि स्वेच्छयैव बालादीनाममेध्यादिस्पर्शवज्जन्मादिपरिग्रहः स्यादित्यभिप्रायः । **सत्यसङ्कल्पस्येति** । हिताहितज्ञाने सत्यपि कश्चिच्छुष्के पतिष्यामीति कर्दमे पतति ; न चासौ तथेति हृदयम् ; यद्वा लोकरक्षणाद्यर्थमेवावतार इति हि परमोत्तरं स्यात् ; तदप्ययुक्तं, सङ्कल्पमात्रेण रक्षणाद्युपपत्तेरिति भावः । **अवाप्तसमस्तकामस्येति** । यदि साध्यं किंचित्प्रयोजनं स्यात्, तदा तदर्थं जन्मादि परिगृह्येत ; नच तदप्यस्तीति भावः । एवं च सतीश्वरो न वस्तुतो जन्मादिमान्, अकर्मवश्यत्वात्, मुक्तात्मवत् इत्यन्वयेन ; यो जन्मादिमान्, स कर्मवश्यः, यथा संसारी इति व्यतिरेकेण चैकमनुमानम् । तत्रैव पक्षसाध्यादौ जन्मकारणभूतेश्वरादिनियोगाविषयत्वादिति द्वितीयम् । द्वयोरप्यनुमानयोः यो यत्कारणरहितः न स तत्कार्यवान्, यथा संप्रतिपन्न इति सामान्यतो वा व्याप्तिः ; सर्वेश्वरत्वादित्युक्ते तु न दृष्टान्तः । केवलव्यतिरेकिविवक्षा तु देहपरिग्रहरहितघटादिसपक्षसद्भावात्केवलव्यतिरेकिप्रामाण्यस्य च सामान्यतो यामुनाचार्यादिभिर्निरस्तत्वादयुक्ता । एवं देहपरिग्रहाद्यभावे संकुचितज्ञानशून्यत्वात्, प्रतिहतसङ्कल्परहितत्वात्, अपूर्णकामत्वरहितत्वात्, साध्यप्रयोजनरहितत्वादिति मुक्तात्मघटादिदृष्टान्तेन हेतवः । यद्वा परमसाम्यापन्नान् मुक्तानेव दृष्टान्तीकृत्य सर्वज्ञत्वात्सत्यसंकल्पत्वादवाप्तसमस्तकामत्वादित्येव हेतवः । एवं यदि जन्मादयस्स्युः, तदा कर्मवश्यत्वमनीश्वरत्वमसर्वज्ञत्वमसत्यसंकल्पत्वमपूर्णकामत्वं च क्षेत्रज्ञवत्स्यादिति प्रसङ्गाश्च विवक्षिताः । * निखिलहेयेत्याद्युक्तोभयलिङ्गत्वे च हेतवस्सर्वेश्वरत्वादयः । पूर्वोक्ताकारविरोधितया मिथ्यात्वशङ्काहेतुः सामान्यतो विदितो जन्मप्रकार उच्यते—**कर्मपरवशदेवमनुष्यादिसजातीय**मिति । कर्मपरवशा देवमनुष्यादयः, तेषां सजातीयं तज्जन्मसमानतया प्रतीयमानमित्यर्थः । यद्वा जन्मशब्दोऽत्र जायमानविग्रहपरः, ईश्वरेण परिगृह्यमाणत्वादिन्द्रजालादिवदित्युक्तम् । स्वेच्छया परेषां विचित्रभ्रमजननं हीन्द्रजालम् ; तेनात्र तत्प्रतिभातलक्षणा । आदिशब्देन शैलूषभूमिकापरिग्रहादि गृह्यते । मिथ्यात्वपक्षे न तत्र कश्चित्प्रकारो निरूपणीय इति कृत्वा सत्यत्वपक्षे शङ्कते—**सत्यत्व** इति । **कथ**मिति । किं पारमेश्वरस्वभावपरित्यागेन, अन्यथा वेत्यर्थः । **किमात्मक** इति । किं त्रिगुणात्मकः, उताप्राकृत इत्यर्थः । **अयमि**ति । भूतसङ्घसंस्थानवत्प्रतीयमान इति भावः । **देह** इति । उपचयरूपतया ह्युपलभ्यत इति भावः । **कश्च जन्महेतु**रिति । किं सङ्कल्पमात्रमुतेश्वरस्यापि स्वेच्छापरिगृहीते पुण्यपापे इत्यर्थः । **कदा चे**ति । किं पुण्यपापविपाककाले, उत धर्मग्लान्यादिकाल इत्यर्थः । **किमर्थं चे**ति । किं सुखदुःखोपभोगार्थम्, उत साधुपरित्राणाद्यर्थमित्यर्थः । इत्ययमाशय इत्यन्वयः । ननु * अवरमिति श्लोके व्याघातमात्रमेव चोद्यते ; तत्र बहुषु प्रश्नेष्वाशय इति कुतोऽवगतमित्यत्राह—**परिहारे**ति । अयमभिप्रायः—न ह्यन्यस्य प्रश्ने तदन्यविषयतया प्रतिवचनमुपपद्यते ; तथा सति प्रतिवक्तुरनभिप्रायज्ञतादिप्रसङ्गात् । अतो यावद्विषयं प्रतिवचनं तावद्विषय एवायं परिप्रश्न इत्यभ्युपगन्तव्यम् । अत्र च प्रतिवचने चतुर्भिः श्लोकैर्जन्मसत्यत्वं, जन्मप्रकारः [जन्म]देहयाथात्म्यं, जन्मनो हेतुकालप्रयोजनानि च क्रमात्प्रतिपाद्यानि प्रतीयन्ते ; अतस्तान्येव प्रष्टव्यतयाऽभिप्रेतानीति ॥ ४ ॥

श्रीभगवानुवाच—

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५

भा ॥ अनेन जन्मनस्सत्यत्वमुक्तम्, बहूनि मे व्यतीतानि जन्मानीति वचनात्, तव चेति दृष्टान्तत्वोपादानाच्च ॥ ५ ॥

ता ॥ एवूत्तरं क्रमाद्भगवानुवाच—* बहूनीत्यादिभिः । नहि पूर्वजन्मनामेकत्वबहुत्वे पृष्टे, न च तज्ज्ञानाज्ञाने, इति शङ्कायामाह—अनेनेति । कथं जन्मनस्सत्यत्वमुक्तं बहुत्वातीतत्वतज्ज्ञानादिर्हि वाचनिकतया प्रतीयत इत्यत्राह—बहूनीति । अयमभिप्रायः—इदानीन्तनस्त्वं तदानीन्तनाय कथमुक्तवानिति प्रश्ने जन्मान्तरेणाहमुक्तवान्, तच्चेदानीमनुसन्धाय वदामीति साक्षादुत्तरमुच्येत, तस्य च प्रश्नस्यान्यपरत्वस्य पूर्वं सहेतुकमुक्तत्वादवश्यं प्रष्टव्येष्वर्थेषु यत्परत्वमत्र व्याकर्तुं शक्यं तत्पराण्येव बहूनीत्यादिविशेषणानि ; सत्यत्वे हि बहुत्वातीतत्वादीनि स्वरसानि, जन्मानीति चोक्तम्, न जन्मप्रतिभासा इति, तव चेत्यपृष्टस्यार्थस्य उपादानमप्येतत्सत्यत्वदृष्टान्ताभिप्रायमन्तरेण न घटते, नचार्जुनस्य जन्म मिथ्या, तस्य वा तथात्वप्रतिभासः, तत्संभवे वा कृष्णजन्मनि कुतोऽस्य संशयः—इति ॥ ५ ॥

भा ॥ अवतारप्रकारम्, देहयाथात्म्यम्, जन्महेतुं चाह—

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६

भा ॥ अजत्वाव्ययत्वसर्वेश्वरत्वादि सर्वं पारमेश्वरं प्रकारमजहदेव स्वां प्रकृतिमधिष्ठाय आत्ममायया संभवामि । प्रकृतिः—स्वभावः, स्वमेव स्वभावमधिष्ठाय स्वेनैव रूपेण स्वेच्छया संभवामीत्यर्थः । स्वस्वरूपं हि * आदित्यवर्णं तमसः परस्तात् (पु.) * क्षयन्तमस्य रजसः पराके (सा. उ. १७. २. ४. २) * य एषोऽन्तरादित्ये हिरण्मयः पुरुषः (छा. १. ६. ६) * तस्मिन्नये पुरुषो मनोमयः अमृतो हिरण्मयः (शीक्षा. ६. १) * सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि (ना. ६. १. ८) * भारूपस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसः (छा. ३. १४. २) * माहारजनं वासः (वृ. ४. ३. ६) इत्यादिश्रुतिसिद्धम् । आत्ममायया—आत्मीयया मायया * माया वयुनं ज्ञानम् इति ज्ञानपर्यायोऽत्र मायाशब्दः । तथाचामियुक्तप्रयोगः—* मायया सततं वेत्ति प्राणिनां च शुभाशुभम् इति । आत्मीयेन ज्ञानेन—आत्मसङ्कल्पेनेत्यर्थः । अतोऽपहतपाप्मत्वादिसमस्तकल्याणगुणात्मकत्वं सर्वमैशं स्वभावमजहत् स्वमेव रूपं देवमनुष्यादिसजातीयसंस्थानं कुर्वन्नात्मसङ्कल्पेन देवादिरूपस्संभवामि । तदिदमाह— *अजायमानो बहुधा विजायते (पु.) इति श्रुतिः । इतरपुरुषसाधारणं जन्माकुर्वन्देवादिरूपेण स्वसङ्कल्पेनोक्तप्रक्रियया जायत इत्यर्थः * बहूनि मे व्यतीतानि जन्मानि तव चार्जुन । तान्यहं वेद सर्वाणि * तदाऽऽत्मानं सृजाम्यहं * जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः इति पूर्वापराविरोधाच्च ॥ ६ ॥

ता ॥ अथ प्रकारादिप्रश्नत्रयोत्तरमनन्तरश्लोक इत्याह—अवतारेति । अजाव्ययशब्दाभ्यां प्रकृतिपुरुषयोरिव स्वरूपतो धर्मतश्च विकारा न सन्तीत्युच्यते । अजाव्ययशब्दौ कर्मकृतजन्ममरणनिवृत्तिपरौ वा ; तेन हेयप्रत्यनीकत्वमुक्तं भवति । * भूतानामीश्वरोऽपीति कल्याणगुणाकरत्वाप्रच्युतिरुपलक्ष्यते । यद्वा अजशब्देन स्वरूपतः शरीरद्वारा च जन्मयुक्ताचित्क्षेत्रज्ञाभ्यां व्यावर्तनम् । * अव्ययात्मेत्यात्मशब्दस्य स्वभावपरतया नञोऽत्यन्ताभावपरतया च कदाचिज्ज्ञानसङ्कोचादिमतो मुक्ताद्यावृत्तिः । ईश्वरशब्देन नित्यासङ्कुचितज्ञानेभ्यो नित्येभ्यो व्यवच्छेदः । * अव्ययात्मेत्यत्रापि पूर्वोत्तरवत् अपि सन्नित्यनुषञ्जनीयम् । अत्र च पूर्वार्धेन तृतीयचतुर्थपादाभ्यां च प्रश्नत्रयस्य क्रमात्परिहारः । आदिशब्देनेश्वरत्वोपलक्षितसर्वज्ञत्वसत्यसङ्कल्पत्वावाप्तसमस्तकामत्वादीनि गृह्यन्ते । सर्वमिति । न कस्यचिदपि स्वभावलेशस्य हानिरिति भावः । परमेश्वरसंबन्धि पारमेश्वरं परमेश्वरत्वमयुक्तमित्यर्थः । अपि सन्नित्यस्य वर्तमाननिर्देशस्य तात्पर्यमाह—अजहदेवेति । एतेन तत्तदवतारेषु तासुतास्ववस्थासु च पारमेश्वरस्वभावस्य सत एव स्वेच्छया तिरोधानमात्रमिति

सूचितम् । तथा चाहुः * गुणैष्षड्भिरित्युपक्रम्य * भवान् सर्वत्रैव त्वगणितमहामङ्गलगुणः (व. स्त. १६) इति । अवतारेषु हि परमेश्वरत्वं व्यपदिश्यते । * ईशन्नपि महायोगी (भा. उ. ६७. १४) * कृष्ण एव हि लोकानां (भा.स. ३६. २३) * व्यक्तमेष महायोगी परमात्मा (रा. यु. ११४. १४) इत्यादिभिः । नात्र प्रकृतिशब्देन * प्रकृतिं स्वामवष्टभ्य विसृजामि (गी. ९. ८) इत्यादिष्विव त्रिगुणा प्रकृतिरुच्यते, अवतारे[ष्व[पि तद्विग्रहस्य त्रिगुणोपादानकत्वाभावात् । तथा चोक्तं * न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः (भा.) * न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसंभवा (वा. पू. ३४.४० ; वरा. १४.४१) इति । अतोऽत्रावतारोपयुक्ताऽन्या प्रकृतिरुच्यत इत्यभिप्रायेणाह—**प्रकृतिस्स्वभाव** इति । * प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे इति नैघण्टुकाः । विग्रहस्यापि * नित्यालिङ्गा स्वभावसंसिद्धिः (र. ब्रा.) इत्येकायनश्रुत्यनुसारेण निरुपाधिकस्वासाधारणविशेषणत्वात्, स्वभावशब्देनोपादानम् । गोबलीवर्दन्यायाच्चात्र विग्रहाख्यस्वभावविशेषपरता । स्वभावपर्यायप्रकृतिशब्देनापृथक्सिद्ध[द्धि]लाभेऽपि स्वामितिनिर्देशो जीवसाधारणत्रिगुणप्रकृतिव्यवच्छेदार्थ इत्यभिप्रायेणोक्तम्—**स्वमे**वेति । अन्तरादित्याधिकरणभाष्येऽप्येतद्व्याख्यातं * स्वमेव स्वभावमास्थाय, न संसारिणां स्वभावमित्यर्थः (१.१.२१) इति । प्रकृतिशब्दस्यात्र विग्रहपरतामधिष्ठायेत्यनेन सूचितं स्वातन्त्र्यं च दर्शयति—**स्वेनैव रूपेणे**ति । यद्वा स्वमेव स्वभावमित्याद्येकवाक्यं सङ्कलितार्थपरम्, तदधिष्ठायेत्येतदन्तं पूर्वार्धस्यार्थः ; स्वेनैव रूपेणेति तु तृतीयपादस्य ; स्वेच्छयेति चतुर्थपादस्य ; अस्यां योजनायां प्रकृतिशब्दोऽवतारोपादानभूतदिव्यविग्रहमेवाह । अवतारविग्रहोपादानभूतप्रकृतेर्बहुश्रुतिसिद्धतामाह—**स्वस्वरूप**मिति । * स्वरूपं ब्रह्मणोऽपरम् (वि. १.२२.६१)इति प्रयोगात् स्वरूपशब्दोऽत्र विग्रहपरः । * आदित्यवर्णं तमसः परस्तात् (पु.) इत्यनेनाप्राकृतत्वम्, स्वासाधारणनिरतिशयदीप्तियुक्तत्वं च सिद्धम् । तत्प्रकरणे च देशविशेषवर्तित्वनित्यसूरिसेव्यत्वलक्ष्मीपतित्वादिकमपि भाव्यम् । * क्षयन्तमित्यत्र रजश्शब्दोऽपि मूलप्रकृतिविषयः, न तु लोकविषयः * तमसः परस्तादित्यनेन तुल्यार्थत्वात् । रजोगुणकत्वाच्च रजश्शब्देनोपादानम् । व्याप्तस्य देशविशेषे * क्षयन्तमिति निवासवचनाद्विग्रहवत्त्वं सिद्धत् । एवं परमपदनिलयनित्यविग्रहसद्भावश्रुतिद्वयेन दर्शितः । तस्यैव विग्रहस्यावतारदशां दर्शयति—**य एष** इति । * आदित्यवर्णं * हिरण्मयः इति च एक एव वर्णः प्रतियोगिभेदाधीनप्रातिकूल्यानुकूल्याभ्यां मुखभेदेन निर्दिश्यते । यथाऽऽहुर्**द्रमिडाचार्याः** * हिरण्मय इति रूपसामान्याच्चन्द्रमुखवत् (१. १. २१. सारे) इति । यद्वा, हिरण्यविकारत्वव्यवच्छेदार्थं द्रमिडभाष्यम् । [अ]तत्र * मयूरकण्ठच्छविशुद्धहेम इति शिल्पशास्त्रानुसाराच्छ्यामत्वसिद्धिः । अथवा स्वेच्छया तत्रतत्र रूपभेदेऽपि न दोषः ; युगादिभेदे पर्यायतः सितरक्तादिविकल्पितवासुदेवादिव्यूहरूपभेदवत् । तस्यैव हृदयान्तर्वर्तित्वे श्रुतिमुदाहरति—**तस्मि**न्निति । **मनोमय** इति—विशुद्धेन मनसा प्रचुरः, ग्राह्य इत्यर्थः । आभ्यां श्रुतिभ्यामुपासनस्थानविशेषस्थितिर्दर्शिता । कारणवाक्येऽपि तस्य सद्भावं दर्शयति—**सर्व** इति । विद्युत इति पदं विद्युद्वर्णादित्यन्यत्र व्याख्यातम् । * शान्त उपासीत (छा. ३. १४. १) इति पूर्वोक्तमुपासनं * स ऋतुं कुर्वीत इत्यनूद्य तच्छेषतया विधीयमानेषु पारमार्थिकेषु गुणेषु विग्रहस्य सहपाठं दर्शयति—**भारूप** इति । भास्वररूपं इत्यर्थः । * माहारजनं वासः (बृ. ४. ३. ६) इत्येषा श्रुतिः **शारीरके** व्याख्याता—* तस्य ह वा एतस्य पुरुषस्य रूपं यथा महारजनं वासः (३. २. २०) इत्यादिनाऽऽकारविशेषं चाभिधाय, इति । सर्वासु चासु श्रुतिषु विलक्षणस्थानविशिष्टत्ववर्णविशेषपुरुषशब्दादिभिः पूर्वोपात्तपुरुषसूक्तवाक्यैकार्थ्यं सिद्धम् । षष्ठीसमासे स्वस्वामित्वलक्षणस्संबन्धोऽत्र विवक्षित इत्याह—**आत्मीयये**ति । * माया वयुनं ज्ञानम् इति

निघण्टूपादानम् । स्वेच्छावतरणप्रकरणे स एवार्थ उचित इति भावः । निघण्टुसिद्धमर्थं तन्मूलभूताभियुक्तप्रयोगेण द्रढयति—**तथाचेति** । * मायया वेत्ति इति निर्देशादियं माया निघण्टुसिद्धं ज्ञानमेव, परप्रसिद्धमायायास्तत्त्वार्थप्रकाशकत्वाभावादिति भावः । एतेन प्रकृतिशब्दस्यात्र त्रिगुणात्मकप्रकृतिविषयत्वं मायाशब्दस्य मिथ्यार्थपरत्वं च शङ्करोक्तं प्रत्युक्तम् । * आत्ममायया इत्यस्य न परमार्थतो लोकवदिति व्यवच्छेदश्चायुक्तः ; अन्येषामपि जन्मनस्तन्मते मिथ्यात्वाविशेषात् । फलितं वक्तुमाह—**आत्मीयेन ज्ञानेनेति** । ज्ञानमात्रस्य कथमवतारहेतुत्वम् ? तथा सति सर्वदाऽवतारप्रसङ्गादित्यत्राह—**आत्मसंकल्पेनेत्यर्थ** इति । श्लोकस्य पिण्डितार्थं विशदयति—**अत** इति । **अपहतपाप्मत्वादीत्यनेन** दहरविद्यासुबालोपनिषत्प्रभृतिषु निर्दोषत्वमङ्गलगुणाकरत्वप्रतिपादकानां वाक्यानां स्मारणम् । **समस्तकल्याणगुणात्मकत्वमित्यादिना** * समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशा[वृ]द्भूतभूत[व]सर्गः । इच्छागृहीताभिमतोरुदेहस्संसाधिताशेषजगद्धितो [यः]ऽसौ (वि.६.५.८४) इत्यादि स्मारितम् । ईश्वरस्वभावस्सर्वोऽप्युभयलिङ्गत्वेन संगृहीत इत्यभिप्रायेणोक्तम्—**सर्वमैशं स्वभावमिति** । स्वमेव रूपमित्यादिना * समस्तशक्तिरूपाणि तत्करोति जनेश्वर । देवतिर्यङ्मनुष्या[दि] स्याचेष्टावन्ति स्वलीलया ॥ (वि.६.७.७१) इत्यादि भगवत्पराशरवचनं स्मारितम् । अजत्वश्रुत्या स्मृतिरियं बाध्येतेत्यत्राह—**तदिदमाहेति** । अजायमानत्वजायमानत्वोक्त्या व्याहतत्वादन्यपरेयं श्रुतिरित्यत्राह—**इतरेति** । * अजायमानः इति सामान्यनिषेधो * बहुधा विजायते (पु.) इति विशेषविधिसन्निधानात्सङ्कुचितविषयः । अतो विरोधे शान्ते तात्पर्यान्तरं न कल्प्यम् । न चेदं *बहु स्याम् (छा.६.२.३ ; आ.६.२) इतिवज्जगद्रूपेण बहुभवनम् , * तस्य धीराः परिजानन्ति योनिम् (पु.) इत्यनन्तरवाक्यैर्मुमुक्षूणामत्यन्तोपकारकावताररहस्यज्ञानस्यैव वक्तुमुचितत्वात् , अस्य च तदैकार्थ्यादिति भावः । सत्यमिथ्यात्वाभ्यां विरोधपरिहारशङ्कां प्रतिक्षेप्तुं * प्रकृतिं स्वामधिष्ठाय इत्यस्य विग्रहपरत्वे, मायाशब्दस्य ज्ञानपरत्वे च हेत्वन्तरमाह—**बहूनीति** । वेद, सृजामि, दिव्यम् इति शब्दैर्जन्मनो बुद्धिपूर्वत्वेच्छामात्रकृतत्वदिव्यत्वादीनि प्रतीयन्ते । मायादिशब्दस्याविद्यादिपरत्वे तु तदखिलं विरुध्येत । नह्यत्र जन्मशब्दो जन्मप्रतिभासवाची ; न च प्रध्वस्तपर्यायो व्यतीतशब्दो बाधपरः ; न च मायागृहीतस्य सर्ववेदित्वम् ; नापि मिथ्याभूते सृष्टिशब्दः ; न च त्रिगुणप्रसूतस्य दिव्यत्वमिति भावः ॥ ६ ॥

भा ॥ जन्मकालमाह—

यदायदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥ ७

भा ॥ न कालनियमोऽस्मत्संभवस्य ; यदा यदा हि धर्मस्य वेदोदितस्य चातुर्वर्ण्यचातुराश्रम्यव्यवस्थयाऽवस्थितस्य कर्तव्यस्य ग्लानिर्भवति ; यदा यदा च तद्विपर्ययस्याधर्मस्याभ्युत्थानं तदाऽहमेव स्वसङ्कल्पेनोक्तप्रकारेणात्मानं सृजामि ॥ ७ ॥

ता ॥ कदेति प्रश्नस्योत्तरमुच्यत इत्याह—**जन्मकालमाहेति** । युगानियमस्य वक्ष्यमाणत्वात् * यदायदा इति वीप्सा युगान्तर्वर्तिकालनियमपरेत्यभिप्रायेणाह—**न कालेति** । जीववत्पुण्यापुण्यविपाककृतो वा, व्यवस्थितस्वसङ्कल्पकृतो वा मन्वन्तरमहाकल्पादिरूपो वा कालनियमो नास्तीत्यर्थः । प्रमाणतस्स्वरूपतश्च ग्लानिप्रकारसूचनाय बाह्यधर्मधर्मैकदेशव्यवच्छेदाय च **वेदोदितस्येत्यादिविशेषणम्** । * वेदोदितस्य कर्तव्यस्येति धर्मलक्षणमप्युक्तं भवति । अधर्मशब्दे

नञो विरोधिविषयत्वमभिप्रेत्योक्तं—**तद्विपर्ययस्येति**। ततश्चावैदिकागमोदितस्य वर्णाश्रमादिव्यवस्थारहितस्य तत एवाकर्तव्यस्येति पूर्वोक्तप्रकारवैपरीत्यं फलितम्। धर्मग्लानेरधर्मोत्थानस्य च तुलाग्रनमनोन्नमनवत्परस्पराविनाभावित्वं च दर्शितम्। तदेत्यत्रापि * यदायदा इत्येतत्प्रतिनिर्देशरूपत्वाद्वीप्साऽनुसंधेया। धर्मस्य ग्लानिमपि न सहे, किंपुनर्विच्छेदमिति ग्लानिशब्दतात्पर्यम्। एवमधर्मस्योद्गममात्रमपि न सहे, किमुत शाखानुशाखतामित्यभ्युत्थानशब्दाभिप्रेतम्। * अहं सृजामि इत्यत्रापेक्षणीयान्तरादर्शनात् **अहमेव स्वसंकल्पेनेत्युक्तम्**। तेन कालस्याप्यधिष्ठातुस्तस्य कालपरतन्त्रत्वं परिहृतं भवति। * आत्मानं सृजामि इत्येतन्न तावत्स्वरूपविषयं, तस्य नित्यत्वात्, आत्माश्रयादिप्रसङ्गाच्च; नापि जीवविषयं, तस्य प्रकरणासङ्गतत्वात्; नाप्याद्यविग्रहविशिष्टस्वात्मविषयं, तस्यापि रूपस्य नित्यत्वात्; अतोऽवतारविग्रहविशिष्टस्वात्माऽत्र * आत्मानमिति निर्दिश्यत इत्यभिप्रायेणोक्तम्—**उक्तप्रकारेणेति** ॥ ७ ॥

भा ॥ जन्मनः प्रयोजनमाह—

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगेयुगे ॥ ८

भा ॥ साधव उक्तलक्षणधर्मशीला वैष्णवाग्रेसरा मत्समाश्रयणे प्रवृत्ता मन्नामकर्मस्वरूपाणां वाङ्मनसागोचरतया मद्दर्शनेन विना स्वात्मधारणपोषणादिकमलभमानाः क्षणमात्रकालं कल्पसहस्रं मन्वानाः प्रशिथिलसर्वगात्रा भवेयुरिति मत्स्वरूपचेष्टितावलोकनालापादिदानेन तेषां परित्राणाय तद्विपरीतानां विनाशाय च क्षीणस्य वैदिकस्य धर्मस्य मदाराधनरूपस्याराध्यस्वरूपप्रदर्शनेन स्थापनाय च देवमनुष्यादिरूपेण युगेयुगे संभवामि; कृतत्रेतादियुगविशेषनियमोऽपि नास्तीत्यर्थः ॥ ८ ॥

ता ॥ किमर्थमिति प्रश्नस्योत्तरमुच्यत इत्याह—**जन्मन** इति। साधुशब्दोऽत्र नासमर्थादिविषयः, दुष्कृच्छब्दप्रतियोगिरूपत्वात्; अतस्सुकृतिविषयोऽयमित्यभिप्रायेणोक्तम्—**उक्तलक्षणधर्मशीला** इति। **उक्तलक्षण**शब्देन * वेदोदितस्य इत्यादि परामृश्यते। ये पुनरुक्तलक्षणधर्मेण देवतान्तराण्येव उपासते; येच वैष्णवाः प्रतर्दनविद्या[दि]न्यायेन तत्तद्देवताविशिष्टवेषेणैव भगवन्तमुपासते; न तेषामवतारप्रदर्शनेऽत्यन्तनिर्बन्धः; तत्तद्देवताकञ्चुकितवेषेणैव तदपेक्षितसकलप्रदानोपपत्तेरित्यभिप्रायेणोक्तम्—**वैष्णवाग्रेसरा** इति। भगवद्भक्तवर्या इत्यर्थः। **उक्तलक्षणधर्मशीला** इति **वैष्णवाग्रेसरा** इति पदाभ्यां * न चलति निजवर्णधर्मतो यः (वि. ३. ७. २०) * वर्णाश्रमाचारवता (वि. ३. ८. ९) इत्यादि सूचितम्। यथावस्थितमुपायं प्राप्यं चावलम्बमाना इति च फलितम्। त्राणं हि नामात्रानिष्टनिवर्तनपूर्वकेष्टप्रापणम्। एवंविधवैष्णवाग्रेसराणाम् अनिष्टश्च भगवदलाभः; तत्समाश्रयणपूर्वकतल्लाभेनैव च तस्यानिष्टस्य निवर्तनमित्यभिप्रेत्योच्यते—**मत्समाश्रयणेत्यारभ्य, आलापादिदानेनेत्यन्तम्**। न ह्यमीषामन्नपानताम्बूलादि धारणपोषणादिकम्, किंत्वहं कृष्ण एव सर्वमित्यभिप्रायेणोच्यते—**मद्दर्शनेन विना स्वात्मधारणपोषणादिकमलभमाना** इति। अदर्शनं चानिष्पन्नयोगावस्थत्वात्। यद्यमी मत्साक्षात्कारात्पूर्वमल्पं कालं लोचने मीलयित्वा सहेरन्, तदाऽहमपि तादृशीं तेषामवस्थां सहेयापि, नत्वेते तथेत्यभिप्रायेणोक्तं—**क्षणेत्यादि**। * त्रुटि युगायते त्वामपश्यताम् (भाग. १०. ३१. १५) इत्यादिकमिह भाव्यम्। अदर्शनदुःखस्य च चरमावस्थोच्यते—**प्रशिथिलसर्वगात्रा भवेयुरिति**। स्वविश्लेषपरिक्लिष्टानामुज्जीवनाय प्रवृत्तस्य क्रमाद्भक्तानुभाव्याकारा उच्यन्ते—**मत्स्वरूपचेष्टितावलोकनालापादिदानेनेति**। नञ्प-

वर्गसुखादिवदवतारमन्तरेण स्वसंकल्पमात्रेणै[व] तद्दातुं शक्यमिति भावः । *परित्राणाय इत्यनोपसर्गेण विविधानिष्ट-निवृत्तिपूर्वकविविधेष्टप्राप्तिस्सूचितेत्यभिप्रायेण **मन्नाम[गुण]कर्मेत्यादिकं धारणेत्यादिकं स्वरूपचेष्टितेत्यादिकं** चोक्तम् । स्वरूपमत्र विग्रहः । एवं साधूनामान्तरभयात्परित्राणमुक्तम्; अथ तेषामेव बाह्यभयात्परित्राणमुच्यत इत्यभिप्रायेणाह—**तद्विपरीतानां विनाशाय** चेति । चकारोऽन्वाचयार्थः । इदमप्युक्तमन्तरादित्याधिकरणभाष्ये *साधवो ह्युपासकाः, तत्परित्राणमेवोद्देश्यम्; आनुषङ्गिकस्तु दुष्कृतां विनाशः, संकल्पमात्रेणापि तदुपपत्तेः (१. १. २१) इति । भागवतापराधो हि दुष्कृत्यकाष्ठेत्यभिप्रायेण—**तद्विपरीतानाम**ित्युक्तम् । *रिपूणामपि वत्सलः (रा. यु. ५०. ५६) *मच्छरैस्त्वं रणे शान्तस्ततः पूतो भविष्यसि (रा. यु. ४१. ६८) इतिवद्दुष्कृतामपि विनाशो नात्यन्तविनाशः; किंतु, वैपरीत्यहेतुभूतराक्षसप्रभृतिशरीरग्रन्थ्यादि[वि]निवर्तनम्; तन्निवृत्तौ च तेषामपि धार्मिकत्वं संभवेदिति सोऽपि धर्मसंस्थापनपर्यवसितः । मच्छेषभूतमाराधनं मयैव हि स्थापनीयमित्यभिप्रायेण—**मदाराधनरूपस्ये**त्युक्तम् । अनुष्ठानमुखेनोपदेशमुखेन च धर्मप्रवर्तनं व्यासादिद्वाराऽपि शक्यम्; आराध्यरूपप्रदर्शनेन भक्त्युत्पादनमवतारासाधारणप्रयोजनम्; परश्शतपरुषवादी जन्मत्रयशत्रुश्शिशुपालोऽपि हि कृष्णदर्शनेन प्रीतिमान्भूत्वा मुक्तिं गत इत्यभिप्रायेण—**आराध्यस्वरूपप्रदर्शनेने**त्युक्तम् । *रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम् (रा. अ. ३. २९) इत्यादि च भाव्यम् । एतेन धर्मस्य सम्यक्स्थापनं हि स्वपर्यन्ततया स्थापनमित्युक्तं भवति । युगेयुग इति वीप्सातात्पर्यं व्यनक्ति—**कृतत्रेतादी**ति । ननु प्रतियुगमवश्यं संभवामि, नापि युगविशेषनिर्बन्ध इति भावः ॥ ८ ॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९

भा ॥ एवं कर्ममूलहेयत्रिगुणप्रकृतिसंसर्गरूपजन्मरहितस्य सर्वेश्वरत्वसार्वज्ञ्यसत्यसङ्कल्पत्वादिसमस्तकल्याणगुणोपेतस्य साधुपरित्राणमत्समाश्रयणैकप्रयोजनं दिव्यम्—अप्राकृतं मदसाधारणं मम जन्म चेष्टितं च तत्त्वतो यो वेत्ति, स वर्तमानं देहं परित्यज्य पुनर्जन्म नैति, मामेव प्राप्नोति, मदीयदिव्यजन्मचेष्टितयाथात्म्यविज्ञानेन विध्वस्तसमस्तमत्समाश्रयणविरोधिपापोऽस्मिन्नेव जन्मनि यथोदितप्रकारेण मामाश्रित्य मदेकप्रियो मदेकचित्तो मामेव प्राप्नोति ॥ ९ ॥

ता ॥ प्रासङ्गिकस्यावतारयाथात्म्यकथनस्य परमप्रकृतमोक्षोपयोगित्वमुच्यते—*जन्म कर्मेति श्लोकेन । **एव**मिति । *अजोऽपीत्यादिनोक्तप्रकारेणेत्यर्थः । दिव्यमित्यस्यैवार्थः **अप्राकृत**मिति । **मदसाधारण**मित्यनेन *बहु स्यां प्रजायेय (आ. ६) इत्युक्तजन्मव्यवच्छेदः । वह्न्यौष्ण्यादिवद्धर्मिग्राहकप्रमाणसिद्धः पदार्थान्तरेष्वदृष्टश्च प्रकारो न तर्कबाध्य इति च भावः । *जन्म कर्म च मे दिव्यम् इत्युक्ते [जन्मबन्धहेतुभूतं]जन्मवत्तद्धेतुभूतं पुण्यमपि किमस्तीति शङ्काव्युदासाय **चेष्टित**मिति व्याख्यातम् । **तत्त्वत** इति । संशयविपर्ययरहितमित्यर्थः । देहं परित्यज्येत्युक्ते प्रारब्धकर्मपर्यवसानदेहं परित्यज्येति साधारणप्रतीतिस्स्यात्, तद्व्यवच्छेदाय—**वर्तमानदेहं परित्यज्ये**त्युक्तम् । एतच्च *यो वेत्ति स पुनर्जन्म नैति इति वेदितृत्वावस्थापेक्षया पुनर्जन्मप्रतिषेधात्फलितम् । *पुनर्जन्म नैति इत्यनेन विरोधिनिवृत्तिरुच्यते; मामेतीतीष्टप्राप्तिः । न केवलं विरोधिनिवृत्तिमात्रेण स्वात्मानन्दानुभवमात्रम्, अपि त्वकाररहस्यज्ञानवान्मामेव प्रामोतीत्यवधारणार्थः । ननु वर्तमानदेहं परित्यज्येत्यप्युक्तम्, प्रारब्धकर्मावसाने हि मोक्षशरीरके निर्णीतः;

प्रारब्धस्य च कर्मणः कियन्ति जन्मानि साध्यानीति न नियमः; व्यासादिष्वनियमदर्शनात्। न च जन्मकर्मज्ञानमात्रान्मोक्षः, दीर्घकालनैरन्तर्यादरसेवनीयदुष्करतरकर्मज्ञानानुगृहीतोपासनशास्त्रार्थनैरर्थक्यप्रसङ्गादित्यत्राह—**मदीयेति**। दिव्यजन्मचेष्टितज्ञानेनोपासनविरोधिनां समस्तानां पापानां निवृत्तत्वादस्मिन्नेव जन्मनि जन्मान्तरारम्भकपापांशप्रशमनसमर्थपुष्कलोपासननिष्पत्तेर्न जन्मान्तरपरिग्रहः। स्मरन्तिच * विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि (वि. ६. ७. ३५) इति। एवं चोपासनपौष्कल्यहेतुतयाऽस्याभिधानात्परम्परया मोक्षसाधनत्वमिति नोपासनशास्त्रवैयर्थ्यमिति भावः। **यथोदितप्रकारेण मामाश्रित्येति** पुष्कलध्यानावस्थोच्यते। **मदेकप्रिय** इति तु भक्तिरूपापन्नतोक्तिः। अहमेक एव प्रियः प्रीतिविषयो यस्य स मदेकप्रियः; * प्रियो हि ज्ञानिनोऽत्यर्थमहम् (७. १७) इति वक्ष्यते। एतेन पुरुषार्थान्तरनिष्ठव्यवच्छेदः। **मदेकचित्त** इति समाध्यवस्था। मय्येकस्मिन्नेव चित्तं यस्य स मदेकचित्तः॥ ९॥

भा॥ तदाह—

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः।
बहवो ज्ञानतपसा पूता मद्भावमागताः॥ १०

भा॥ मदीयजन्मकर्मतत्त्वज्ञानाख्येन तपसा पूता बहव एवं संवृत्ताः। तथा च श्रुतिः * तस्य धीराः परिजानन्ति योनिम् (ना) इति। धीराः—धीमतामग्रेसराः एवं तस्य जन्मप्रकारं जानन्तीत्यर्थः॥ १०॥

ता॥ उपासनवैयर्थ्य[मित्य]दिशङ्कोत्तरत्वेन योऽयमर्थ उक्तः, अयमेव * वीतराग इति श्लोकेनोच्यत इत्याह—तदाहेति। तदेव पूर्वप्रस्तुतं ज्ञानमिह * ज्ञानतपसेत्युच्यते; * मन्मया मामुपाश्रिताः इति तु परम्परया तत्साध्यज्ञानमित्यभिप्रायेणाह—**मदीयेति**। अस्य श्लोकस्य पूर्वश्लोके व्याख्यातप्रायत्वात् **एवं संवृत्ता** इति संग्रहेणोक्तम्। तथा हि ज्ञानतपसा पूता इत्यस्यार्थो **मदीयेत्यारभ्य पाप इत्यन्तेन** प्रपञ्चितः। * मामाश्रित्य इत्यनेन * मामुपाश्रिताः इत्यस्यार्थ उक्तः। * मदेकप्रियः इत्यनेन * वीतरागभयक्रोधाः इत्यस्यार्थोऽभिप्रेतः; विषयान्तरेषु प्रीतिर्हि रागः; तद्विरोधिषु निरसनेच्छा क्रोधः; आगामीष्टविरोध्यनिष्टागमोत्प्रेक्षा भयम्। तदेतदखिलमपि न वासुदेवभक्तानामस्ति, तदेकप्रियत्वेन विषयान्तरे रागाभावात्, तत एव तन्मूलक्रोधाभावात्, तल्लाभालाभव्यतिरिक्तेष्टानिष्टाभावेन भयाभावाच्च। इदं च * न क्रोधो न च मात्सर्यम् (वि. स.) इत्यादिषु प्रसिद्धम्। * मदेकचित्तः इति * मन्मयाः इत्यस्यार्थः। ज्ञानविषयभूतेन मया प्रचुरा मन्मयाः, तादात्म्यविकारार्थयोरत्रानुपपन्नत्वात्; अन्तर्यामित्वविवक्षायां तस्य सर्वसाधारणत्वाच्च। मन्मया इत्यत्रेश्वरामेददर्शिन इति शङ्करोक्तं शास्त्रोपक्रमादिविरोधाच्छब्दस्यावाचकत्वाच्च निरस्तम्। * मामेव प्राप्नोतीत्यनेन * मद्भावमागताः इत्यस्यार्थो दर्शितः। मुक्त्यवस्थायामपि तादात्म्यस्य श्रुतिस्मृतितदर्थापत्तिसूत्रादिविरुद्धत्वात्, अत्रापि * मामेति सोऽर्जुन इति कर्मकर्तृव्यपदेशात्, * मम साधर्म्यमागताः (१४. २) इति परस्ताद्वक्ष्यमाणत्वाच्च, * मद्भावमागताः इत्यस्य मत्स्वभावमपहतपाप्मत्वादिकं प्राप्ता इत्यर्थः। यद्वा * ब्रह्मैव भवति (मु. ३. २. ९) इत्यादाविवात्यन्तसाम्यात्तद्व्यपदेशः। अवताररहस्यस्य च ज्ञातव्यत्वे श्रुतिरप्यस्तीत्याह—**तथा चेति**। उक्तार्थसंवादित्वं विवृणोति—**धीमतामग्रेसरा** इत्यादिना। एवं धीरशब्दनिर्वचनेन प्रागुक्तभगवत्प्राप्तिपर्यन्ताभङ्गुरज्ञानवत्त्वमुक्तं भवति। * परिजानन्तीत्यत्रोपसर्गेण पूर्वोक्तयथावस्थितप्रकारोऽभिप्रेतइति **ज्ञापनाय एवं तस्य जन्मप्रकारं जानन्तीत्युक्तम्। धीमतामग्रेसरा एवेति पाठे तु विशेषविधेः शेषनिषेधः फलित इति भावः॥ १०॥**

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११

भा ॥ न केवलं देवमनुष्यादिरूपेणावतीर्य मत्समाश्रयणापेक्षाणां परित्राणं करोमि, अपि तु ये मत्समाश्रयणापेक्षा यथा—येन प्रकारेण स्वापेक्षानुरूपं मां संकल्प्य प्रपद्यन्ते—समाश्रयन्ते ; तान् प्रति तथैव तन्मनीषितप्रकारेण भजामि— मां दर्शयामि । किमत्र बहुना, सर्वे मनुष्याः मदनुवर्तनैकमनोरथा मम वर्त्म— मत्स्वभावं सर्वे योगिनां वाङ्मनसागोचरमपि स्वकीयैश्चक्षुरादिकरणैस्सर्वशस्त्वापेक्षितैस्सर्वप्रकारैरनुभूयानुवर्तन्ते ॥ ११ ॥

ता ॥ एवं साधुपरित्राणाद्यर्थदेवमनुष्यादिसजातीयस्वेच्छावतारवर्णनमुखेनोपासनोपयुक्तं स्वस्य सौलभ्यमुक्तम् । अथ तस्यैव काष्ठाप्राप्तां दशां दर्शयति—* ये यथेति श्लोकेन । अत्र कृष्णावतारवृत्तान्तेन सहार्चावतारवृत्तान्तोऽपि संगृहीतः । ये यथा, तांस्तथैवेति शब्दाः पूर्वोक्ताधिकारितदनुष्ठानप्रकारादिनियमनिवृत्तिपरा इत्यभिप्रायेणाह—**न केवलमिति** । **स्वापेक्षानुरूपमिति**—पतित्वपुत्रत्वसारथित्ववाहनारसिंहादिप्रक्रिययेत्यर्थः । **सङ्कल्प्य**—मनोरथविषयं कृत्वेत्यर्थः । एतदेवात्र प्रपदनमित्याह—**समाश्रयन्त** इति । तांस्तथैव भजाम्यहमित्यत्र तद्भजनप्रकारेणाहमपि तान्भजामीत्येतदसङ्गतमिति शङ्कानिरासाय तथैवेत्यस्यार्थमाह—**तन्मनीषितप्रकारेणे**ति । न तु स्वकीयपरत्वानुरूपप्रकारेणेति भावः । अत्र यथाभिलषितफलप्रदानेन पक्षपातपरिहारार्थत्वं परोक्तं पूर्वोत्तराभ्यां नात्यन्तसङ्गतम्, * चातुर्वर्ण्यम् (१३) इत्यादिनाऽर्थतः पुनरुक्तिश्च स्यात् । सेवकान् प्रति सेव्यस्य भजनं नाम सुलभदर्शनत्वमित्यभिप्रायेण **मां दर्शयामी**त्युक्तम् । उक्तार्थस्य लोकेऽपि प्रदर्शनपरमुत्तरार्धम् ; नपुनः * यदि ह्यहं न वर्तेयम् (३.२३) इत्यादाविव स्वस्य लोकानुविधेयानुष्ठानवत्त्वपरम्, तस्येहासङ्गतत्वादित्यभिप्रायेण वाङ्मनसागोचरसौलभ्यपरतां विवृणोति—**किमत्र बहुने**ति । मनुष्यशब्दः स्त्र्यादीनामपि संग्राहक इत्यभिप्रायेण सर्वशब्दः । अत्र वर्त्मशब्दो न साक्षात्सरणिवाचकः, असङ्गतवाक्यार्थत्वप्रसङ्गात् । नाप्याचारपरः, तस्याप्यत्रासङ्गतत्वेनोक्तदूषणत्वात् । अत एव * एवं प्रवर्तितं चक्रम् (३. १६) * तेनैव स्थापिता ब्रह्ममर्यादा लोकभाविनी इत्याद्युक्तशास्त्रमर्यादानुवर्तनपरत्वमपि निरस्तम् । अतोऽत्र सौलभ्योपदेशप्रकरणे स्वासाधारणविग्रहचेष्टासौशील्यादिस्वभावसमुदायपरत्वमेवोचितमित्यभिप्रायेणोक्तं—**मम वर्त्म मत्स्वभावं सर्वमिति** । सरणिवाचकमपि हि शब्दमुपचारात्स्वभावविषयतया प्रयुञ्जते । यथा * कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयीत्यमिति । मनुष्या इत्यनेन सूचितमुच्यते **योगिनामिति** । योगपरिशुद्धमनसां वाङ्मनसागोचरमपि मांसचक्षुषो मनुष्या बाह्येन्द्रियैरप्यनुभवन्तीत्यर्थः । प्रियतमपितृपुत्रसुहृद्भ्रातृभृत्यसारथित्वादिरूपाण्यर्चावताररूपाणि च * सर्वशः इत्यनेन विवक्षितानीत्याह—**स्वापेक्षितैरिति** । **अनुभूयानुवर्तन्ते**—अनुभवन्तो वर्तन्त इत्यर्थः । अलङ्करणयात्रोत्सवसेवादिर्वाऽत्र प्रकारः । अत्र योगिनां वाङ्मनसागोचरमपि *चक्षुरादिकरणैरिति वचनादर्चावताररूपेऽपि पररूपत्वानुसन्धानं दर्शितम् । यथा स्मरन्ति * तामेव ब्रह्मरूपिणीम् (वि.ध.१०३.३०) इति । वक्ष्यति च भगवान् * भुजैश्चतुर्भिः (भा.मौ.५.३४) इत्यादि । एवं प्रसङ्गात् सौलभ्यातिरेकं सारथ्यादिना पश्यतोऽपि पाण्डवस्योपासिसिषापूर्त्यर्थं कण्ठोक्त्याऽप्युपदिदेश । नन्वेतावताऽपि चोद्यानुमानतर्काणां कः परिहार उक्तो भवति? तदुच्यते—हेयप्रत्यनीकः स्वयं हेयं कथमुपाददीतेति चोद्यमवतारादेर्हेयत्वाभावादेव निरस्तम् ; तदभावश्चाकर्मवश्यत्वाभावकृतत्वस्वेच्छाकृतत्वादिभिः । पुण्यपापाद्यभावे नियन्त्रन्तराभावे च कथं जन्मादीत्येतदपि स्वेच्छया परिहृतम् । हिताहिताज्ञानाद्यशक्त्यादिचोद्यमकर्मवश्यस्य लोक्याऽवतरतो-

ऽस्याहितामावात्तदज्ञानाभावाच्च निरस्तम् । प्रयोजनाभावचोद्यं तु साधुपरित्राणादिप्रयोजनवर्णनेनापाकृतम् । यत्तु साधुपरित्राणादौ सङ्कल्पमात्रेणापि शक्ये किमवतारादिनेति, तदपि *परित्राणाय साधूनाम् (८) इत्यत्र *मन्त्रामेत्यारभ्य *आलापादिदानेन तेषां परित्राणायेत्यन्तेन भाष्येण, *धर्मसंस्थापनार्थायेत्यत्र *आराध्यस्वरूपप्रदर्शनेनेत्यनेन, *ये यथा (११) इत्यत्र सर्वसाधारणस्वसौलभ्यातिरेकप्रदर्शनेन च परिहृतम् । यदुक्तम्–ईश्वरो न वस्तुतो जन्मादिमान् अकर्मवश्यत्वात्, मुक्तात्मवदिति, तत्रेश्वराभ्युपगमानभ्युपगमयोर्धर्मिग्राहकबाधाश्रयासिद्धी । किंच किमत्र कर्महेतुकजन्मादिरहित इति साध्यार्थः? उताकर्महेतुकजन्मादिरहित इति? अथवा सामान्येन जन्मादिमात्ररहित इति? न प्रथमः, सिद्धसाधनात् । न द्वितीयः, हेतोरप्रयोजकत्वात्; न हि कर्मनिवृत्तिरकर्महेतुकं जन्मापि निवर्तयति; निषेध्यस्वरूपसमर्पकप्रमाणेन बाधश्च; यथाऽग्नेरनौष्ण्यानुमाने । न तृतीयः, दृष्टान्तस्य साध्यविकलत्वात्; मुक्तस्यापि हि शरीरपरिग्रहो *जक्षत्क्रीडन् रममाणः (छा. ८. १२. ३) *स एकधा भवति त्रिधा भवति (छा. ७. २६. २) इत्यादिश्रुतिसिद्धः । तर्हि मुक्तोऽपि पक्षीकृत इति चेत्, तदा को दृष्टान्तः? घटादिरितिचेन्न, तत्र शरीरपरिग्रहाद्यभावस्य अचेतनत्वोपाधिकत्वात् । एतेन यो जन्मादिमान् स कर्मवश्य इति व्यतिरेकोऽपि भग्नः । यस्त्वीश्वरनियोगाविषयत्वादिति, सोऽपि प्रथमेन तुल्यार्थः; पुण्यपापनिरूपकशास्त्रस्यैवेश्वराज्ञारूपत्वात् । यत्तु तत्कारणरहितत्वात्, यो यत्कारणरहितः, न स तद्वानिति, तदप्यसत्, उपादानकारणविवक्षया प्रयोगे त्वप्राकृताकर्मनिमित्तावतारोपादाननित्यविग्रहसद्भावोपपादनाद्धेत्वसिद्धेः । निमित्तविवक्षया प्रयोगे तु संकल्पादिनिमित्तोपपादनात् । सामान्यविवक्षाऽपि तत एवोक्तोत्तरा । एवं संकुचितज्ञानशून्यत्वादित्यादिष्वपि धर्मिग्राहकबाधादिकं भाव्यम् । साध्यप्रयोजनरहितत्वादित्यत्र हेत्वसिद्धिश्च, साधुपरित्राणलीलादिप्रयोजनस्योक्तत्वात् । तथाऽपीदानींतनं सुखं [तदा] प्राक् नास्तीति तेनांशेनापूर्णत्वं प्रसज्यत इतिचेन्नेदमपूर्णत्वम्, इष्टविघाताभावात्, इच्छाकाले च तत्सिद्धेः, तदानीमपि यदीच्छेत्सिध्येदिति योग्यतासद्भावात्, उत्तरकालीनस्यापि तस्य प्रागपीश्वरेण सर्वज्ञेन स्वसुखतयाऽनुसंधीयमानत्वात् । एवमतीतेऽपि भाव्यम् । भविष्यतोऽपि सुखत्वेन प्रकाशमानत्वे किमर्था तत्रेच्छेति चेदुत्पत्त्यर्थेति ब्रूमः । तया किं प्रयोजनमिति चेत्सैव । सा तर्हि पूर्वोत्तरकाल्योर्नास्तीति तयोः काल्योरपूर्णत्वमिति चेन्न, तत्कालीनतया तयैव सर्वदा ज्ञायमानया पूर्णत्वात् । ननु कस्यचिदिप्यमाणत्वं तदलाभे दुःखादितिचेन्न, तल्लाभस्य प्रयोजनत्वेनैव तदुपपत्तेः । अशक्तस्य हि तदिच्छतस्तदसिद्धे र्दुःखं जायते; शक्तस्य तु तदिच्छैव तत्सुखत्वं पुष्यतीति न संकटं किंचिदिति । एतेन साध्यप्रयोजनरहितत्वे हेतौ मुक्तदृष्टान्तोऽपि साधनविकलः, *जक्षत्क्रीडन्नित्यादिश्रुतेः । ये तु परमसाम्यापन्नदृष्टान्तेन सर्वज्ञत्वादित्यादिहेतवः, तेष्वपि साध्यविकलत्वादिदोषस्समानः । प्रसङ्गाश्चानुमानवद्व्याप्तग्राह्यभावेन दूषिता इति । तदेवं सिद्धं जन्मादिकमीश्वरस्य सत्यम्, तत्प्रतिपादकं च वचः प्रमाणमिति । यत्त्ववतारेषु दुःखशोकभयादिकं क्वचिदुच्यते, तदस्यापहतपाप्मत्वादिबलात् *तेन वञ्चयते लोकान् (भा. उ. ६७. १५) इत्यादिवचनबलाच्चाभिनयमात्रं मन्तव्यमिति ॥ ११ ॥

भा ॥ इदानीं प्रासङ्गिकं परिसमाप्य प्रकृतस्य कर्मयोगस्य ज्ञानाकारतांप्रकारं वक्तुं तथाविधकर्मयोगाधिकारिणो दुर्लभत्वमाह—

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२

भा ॥ सर्व एव पुरुषाः कर्मणां फलं काङ्क्षमाणाः इन्द्रादिदेवतामात्रं यजन्ते—आराधयन्ति, न तु कश्चिदनभिसंहितफलः इन्द्रादिदेवतात्मभूतं सर्वयज्ञानां भोक्तारं मां यजते । कुत एतत्? यतः क्षिप्रमस्मिन्नेव मानुषे लोके कर्मजा पुत्रपश्वन्नाद्यादिसिद्धिर्भवति । मनुष्यलोकशब्दस्स्वर्गादीनामपि प्रदर्शनार्थः । सर्व एव लौकिकाः पुरुषा अक्षीणानादिकालप्रवृत्तानन्तपापसंचयतयाऽविवेकिनः क्षिप्रफलाकाङ्क्षिणः पुत्रपश्वन्नाद्यस्वर्गाद्यर्थतया सर्वाणि कर्माणीन्द्रादिदेवताराधनमात्राणि कुर्वते; न तु कश्चित्संसारोद्विग्नहृदयो मुमुक्षुरुक्तलक्षणं कर्मयोगं मदाराधनभूतमारभत इत्यर्थः ॥ १२ ॥

ता ॥ एवमध्यायार्थतयाऽभिहितेषु षट्सु प्रसङ्गकं प्रासङ्गिकं चोक्तम्, अथ प्रकृतस्य कर्मयोगस्य ज्ञानाकारताप्रकारं वक्तुं तदुपोद्घाततया षट् श्लोकाः प्रवर्तन्ते । तत्राधिकारिविषयाश्चत्वारः, कर्मस्वरूपविषयौ द्वावित्यवान्तरविषयविभागः । तदिदमभिप्रयन् प्रथमं श्लोकमवतारयति—**इदानी**मिति । * काङ्क्षन्तः इत्यत्र विशेषनिर्देशाभावात् **सर्व एव पुरुषा** इत्युक्तम् । ये मुमुक्षुतया संभाव्यन्ते, तेऽपि हि प्रथमं त्रिवर्गप्रवणा इत्येवकाराभिप्रायः । * कर्मणां सिद्धिम् इत्यत्र कर्मस्वरूपसिद्धिशङ्काव्युदासायोक्तम्—**फल**मिति । इहशब्दाभिप्रेतमाह—**इन्द्रादिदेवतामात्र**मिति । इह या देवतात्वेन प्रतीयन्ते, ता इत्यर्थः । * यज देवपूजायामिति धात्वर्थव्यञ्जनाय—**आराधयन्ती**त्युक्तम् । एतेन तत्तद्देवताराधनभूतानां दानहोमादीनामपि संग्रहः । * सर्वाणि कर्माणीत्यनन्तरमेतद्व्यञ्जयिष्यति । व्यतिरेकरूपमाभिप्रायिकं कर्मयोगाधिकारिदौर्लभ्यमाह—**न तु कश्चिदि**ति । **सर्वयज्ञानां भोक्तार**मित्यनेन * अहं हि सर्वयज्ञानाम् (९. २४) * भोक्तारं यज्ञतपसाम् (५. २९) इत्यादि वक्ष्यमाणं सूचितम् । हेतुपरहिशब्दार्थव्यञ्जनाय शङ्कते—**कुत एत**दिति । महति फले स्थिते क्षुद्रफलाकाङ्क्षा किंनिबन्धनेत्यर्थः । क्षिप्रमानुषशब्दाभ्यां कालतो देशतश्चासत्तिरुच्यते । * वायुर्वै क्षेपिष्ठा देवता (यजु. २. १. १) इत्यादिकं क्षिप्रशब्देन स्मारितम् । **अस्मिन्नेवे**त्यनेन मानुषशब्दफलितदेशासत्तिद्योतनम् । क्षिप्रलाभादस्मिन्नेव लोके लाभाच्च क्षुद्रेष्वपि फलेषु प्रथममाकाङ्क्षा स्यादिति भावः । मानुषलोकौचित्येन सिद्धिं विशेषयति—**पुत्रपश्वि**त्यादि । अपवर्गफलप्रकरणफलितमाह—**मनुष्ये**ति । अतिशयितफलसद्भावेऽपि क्षुद्रफलाकाङ्क्षायां तदनुषङ्गिदुःखसन्तानानुद्वेगे च हेतुं दर्शयन् कण्ठोक्तमाभिप्रायिकं च सङ्कलय्य वाक्यार्थमाह—**सर्व एवेति** । **लौकिका** इति त्रिवर्गप्रावण्यनिदर्शनार्थमुक्तम् । **अविवेकिनः**—अविवेकित्वादित्यर्थः । **क्षिप्रफलाकाङ्क्षिण** इति क्षुद्रत्वनश्वरत्वदुःखानुबन्धित्वादिदोषपुञ्जानादरेण * वरमद्य काकः श्वो मयूरात् इतिवन्मन्यमाना इति भावः । उपलक्षणोपलक्ष्यभूतैहिकामुष्मिकसङ्कल्पेनोक्तम्—**पुत्रपश्वन्नाद्यस्वर्गादी**ति । एतेन * कर्मणां सिद्धिमित्यत्र सिद्धिशब्दस्सामान्यविषय इति दर्शितम् । **सर्वाणि कर्माणि**—यागदानहोमादीनि ॥ १२ ॥

भा ॥ यथोक्तकर्मयोगारम्भविरोधिपापक्षयहेतुमाह—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३

भा ॥ चातुर्वर्ण्यप्रमुखं ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत् सत्त्वादिगुणविभागेन तदनुगुणशमादिकर्मविभागेन च विभक्तं मया सृष्टम् । सृष्टिग्रहणं प्रदर्शनार्थम्, मयैव रक्ष्यते, मयैव चोपसंहियते । तस्य—विचित्रसृष्ट्यादेः कर्तारमप्यकर्तारं मां विद्धि ॥ १३ ॥

ता ॥ नन्वक्षीणानन्तपापसंचयत्वं सर्वेषां समम्, ततश्चाविवेकित्वात्क्षिप्रफलकाङ्क्षित्वमपि समानम्; अतः कस्यापि मुमुक्षाविरहान्मोक्षोपायशास्त्रमप्रमाणं स्यादित्याशङ्क्य श्लोकद्वयेन तत्परिहारः क्रियत इत्यभिप्रायेणाह—**यथोक्तेति**। पूर्वश्लोकोक्तेषु देवतान्तराधीनेषु क्षुद्रफलेष्वपि सर्वकर्तुः स्वस्यैव हेतुत्वं चातुर्वर्ण्यमित्यादिना दर्शितम्। व्यष्टिसृष्ट्यन्तर्गतचातुर्वर्ण्यकथनं समस्तव्यष्टिसृष्टिसंग्रहार्थमित्यभिप्रायेण **चातुर्वर्ण्यप्रमुखमित्युक्तम्**। वैषम्यनैर्घृण्यपरिहारप्रस्तावाय व्यष्टिसृष्ट्युपादानम्। *गुणकर्मविभागशः इत्येतत्प्रपञ्चयिष्यमाणसत्त्वादिविभागविषयमित्यभिप्रायेण—**सत्त्वादीत्युक्तम्**। सत्त्वादिमूलत्वात्सर्वव्यापाराणां **तदनुगुणेत्युक्तम्**। *तमश्शूद्रे रजः क्षत्रे ब्राह्मणे सत्त्वमुत्तमम् (भा. आश्व. ३९. ११) इत्यादिगुणविभागः, *ब्राह्मणक्षत्रियविशाम् (गी. १८. ४१) इत्यादिकर्मविभागः। **शमादिकर्मेति**—शमाद्यनुष्ठेयकर्मेत्यर्थः। *शमो दमः (८.४२) इत्युपक्रम्य *ब्राह्मं कर्म स्वभावजम् इति वक्ष्यते। एवं देवतिर्यङ्मनुष्यादिजातिषु वाराहपाद्मेशानकल्पादिषु च पुराणादिषु प्रपञ्चितस्तत्तद्गुणोद्रिक्तो विषमसृष्टिप्रकारो द्रष्टव्यः। श्रुत्यादिषु सृष्ट्यादिसमस्तहेतुतयेश्वरस्य ज्ञातव्यत्वविधानादत्र सृष्टिग्रहणं रक्षादेरपि प्रदर्शनपरमित्याह—**सृष्टीति**। एतेन व्यष्टिसृष्ट्यादिव्यापारत्रयस्यापि स्वकर्तृकत्ववचनात्, *सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते (वि. ध. ६८. ५१) इत्यादेरर्थोऽप्युक्तो भवति। सूत्रितं चैतत् *संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् (ब्र. २. ४. १७) इति ॥ १३ ॥

भा ॥ कथमित्यत्राह—

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४

भा ॥ यत इमानि विचित्रसृष्ट्यादीनि कर्माणि मां न लिम्पन्ति—न मां संबध्नन्ति; न मत्प्रयुक्तानि तानि देवमनुष्यादिवैचित्र्याणि, सृज्यानां पुण्यपापरूपकर्मविशेषप्रयुक्तानीत्यर्थः। अतः प्राप्ताप्राप्तविवेकेन विचित्रसृष्ट्यादेर्नाहं कर्ता; यतश्च सृष्टाः क्षेत्रज्ञाः सृष्टिलब्धकरणकलेबराः सृष्टिलब्धं भोग्यजातं फलसङ्गादिहेतुस्वकर्मानुगुणं भुञ्जते; सृष्ट्यादि[फले]कर्मफले च तेषामेव स्पृहेति न मे स्पृहा। तथाऽऽह सूत्रकारः—*वैषम्यनैर्घृण्ये न सापेक्षत्वात् (२. १. ३४) इति। तथा च भगवान् पराशरः—*निमित्तमात्रमेवा[त्रं]सौ सृज्यानां सर्गकर्मणि। प्रधानकरणीभूता यतो वै सृज्यशक्तयः ॥ निमित्तमात्रं मुक्त्वैतं नान्यत्किंचिदपेक्षते। नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु वस्तुताम् ॥ (वि. १. ४. ५१, ५२) इति। सृज्यानां देवादीनां क्षेत्रज्ञानां सृष्टेः कारणमात्रमेवायं परमपुरुषः; देवादिवैचित्र्ये तु प्रधानकारणं सृज्यभूतक्षेत्रज्ञानां प्राचीनकर्मशक्तय एव। अतो निमित्तमात्रं मुक्त्वा—सृष्टेः कर्तारं परमपुरुषं मुक्त्वा इदं क्षेत्रज्ञवस्तु देवादिविचित्रभावे नान्यदपेक्षते; स्वगतप्राचीनकर्मशक्त्यैव हि देवादिवस्तुभावं नीयत इत्यर्थः। एवमुक्तेन प्रकारेण सृष्ट्यादेः कर्तारमप्यकर्तारं सृष्ट्यादिकर्मफलसङ्गरहितं च यो मामभिजानाति; स कर्मयोगारम्भविरोधिभिः फलसङ्गादिहेतुभिः प्राचीनकर्मभिर्न संबध्यते—मुच्यत इत्यर्थः ॥ १४ ॥

ता ॥ एककार्यापेक्षयैकस्यैव कर्तृत्वं तदभावश्चेति व्याहतमित्यभिप्रायेण चोदयति—**कथमिति**। कर्तृत्वं तावन्मुख्यम्, अकर्तृत्वं तु वैषम्यप्रयोजकत्वाभावादुच्यत इति व्यञ्जयति—**यत इति**। कर्मशब्दोऽत्र न पुण्यपापविषयः, प्रकृतानुपयुक्तत्वादिदानीं कर्मवश्यत्वशङ्काभावात्, शङ्कितविरोधपरिहारात्मकत्वस्यैव युक्तत्वादनपेक्षितविधानादपेक्षितविधानप्रावल्याच्चेत्यभिप्रायेण **इमानि विचित्रसृष्ट्यादीनि कर्माणीत्युक्तम्**। *न मां लिम्पन्तीत्यस्य मुख्यासङ्गतेर्लक्ष्यं

तावदाह–**न मां संबध्नन्ति**। कथमेतावता विरोधपरिहार इत्यत्राह–**न मत्प्रयुक्तानीति**। वैषम्यांशे विशेषहेतुत्वं निषिध्यत इति न विरोध इति भावः। कस्तर्हि विषमसृष्टेर्विशेषहेतुरित्यत्राह–**तानीति**। उक्तहेतुवशादकर्तृत्वव्यपदेशौचित्यं निगमयति–**अत इति**। **प्राप्ताप्राप्तविवेकेन**–पुण्यपापतारतम्यानुगुणसुखदुःखादिविषमसृष्टितारतम्यदर्शनकृतविशेषनिष्कर्षेणेत्यर्थः। यथा विचित्रेष्वङ्कुरेषु क्षितिजलादीनि सामान्यकारणानि, वैचित्र्यं [तु] स्ववीजवैचित्र्यहेतुकं, तद्वदिति भावः। एवं विशेषप्रयोजकत्वाभावेनाकर्तृत्वमुक्तम्। अथ विशेषसृष्टिफलनिःस्पृहत्वेनाकर्तृत्वमुच्यत इत्यभिप्रायेण * न मे कर्मेत्यादिकं व्याख्याति–**यतश्चेति**। स्वस्य स्पृहानिषेध इतरेषां स्पृहासत्त्वाभिप्राय इति व्यञ्जनाय **सृष्टा** इत्यादिकमुक्तम्। **सृष्टाः क्षेत्रज्ञा** इति [क्रम]कर्मनिर्देशेन भोक्तृत्वदशापन्नक्षेत्रज्ञसिद्ध्यर्था सृष्टिरित्यभिप्रेतम्। भोक्तृत्वोपयुक्ताकार उच्यते **सृष्टिलब्धकरणकलेबरा** इति। नहि मदीयकरणादिलाभार्था सृष्टिरिति भावः। फलसङ्गादिहेतुशब्दो बहुव्रीहितत्पुरुषयोरन्यतरेण स्वकर्मविशेषकः। फलसङ्गादिहेतुभिरिति वा पाठः। स्वकर्मानुगुणं, न तु तन्निरपेक्षकेवलमत्सङ्कल्पविशेषानुगुणमिति भावः। कर्मफल इत्यत्रापि कर्मशब्दः प्रस्तुतसृष्ट्यादिकर्मविषयः; फलस्वभावात्तु पुण्यपापरूपं कर्म फलितमित्यभिप्रायेण **सृष्ट्यादि [फले] कर्मफले** चेत्युक्तम्। प्रवाहानादिवासना[दि]मूलतत्तदिच्छानुरूपं प्रवर्तयन् तत्तदिच्छाहेतुकतत्तत्पुण्यपापानुगुणं फलं प्रयच्छामि, न तु स्वेच्छानुरूपं प्रयच्छामि, नापि स्वातन्त्र्यमात्रेण विषमं फलं ददामि, न च स्वप्रयोजनार्थं परान्पीडयामीत्येतदखिलमपि न मे स्पृहेत्यन्तोनोक्तं भवति। * अत्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत् (भा. आ. १. २७९) इति पञ्चमवेदे गीतोपनिषत्संग्रहीतुश्शारीरकसूत्रेणोक्तार्थं संवादयति–**तथा ऽऽहेति**। तत्प्रितुर्देवतापारमार्थ्यविदो वचनं च दर्शयति–**तथा चेति**। तत्र हि वराहप्रादुर्भावमभिधाय * भूराद्यांश्चतुरो लोकान्पूर्ववत्समकल्पयत् (वि. १. ४. ४९) इत्यन्तेन पृथिवीसमुद्धरणभूपर्वतादिविभागलोकविभागादिकमुक्त्वा * ब्रह्मरूपधरो देवस्ततोऽसौ रजसा वृतः। चकार सृष्टिं भगवांश्चतुर्वक्त्रधरो हरिः (वि. १. ४. ५०) इति चतुर्मुखशरीरस्य भगवतो विष्णोः स्वर्गादिलोकान्तर्वर्तिसृष्टिरेव प्रसक्ता। ततो * निमित्तमात्रम् (वि. १. ४. ५१, ५२) इति श्लोकद्वयमुक्तम्। अनन्तरं च * यथा ससर्ज देवोऽ[सौ]यं देवर्षिपितृदानवान्। मनुष्यतिर्यग्वृक्षादीन् भूव्योमसलिलैकसः॥ इत्यादिः * विस्तरात् (वि. १. ५. १,२) इत्यन्तो मैत्रेयप्रश्नोऽपि देवादिविषमसृष्टिविषयः। प्रतिवक्ता च भगवता **पराशरेण** * मैत्रेय कथयाम्ये[तत्]ष शृणुष्व सुसमाहितः। यथा ससर्ज देवोऽसौ देवादीनखिलान्विभुः॥ (वि.१.५.३) इत्यारभ्य * किमन्यच्छ्रोतुमिच्छसि (वि. १. ५. २६) इत्यन्तेनाल्पविस्तरे कृते पुनरतिविस्तरे मैत्रेयेण पृष्टे * कर्मभिर्भाविताः पूर्वैः कुशलाः कुशलैस्तु ताः। स्थ्यात्या तयाऽप्यनिर्मुक्तास्संहारेऽप्युपसंहृताः। स्थावरान्तास्सुराद्याश्च प्रजा ब्रह्मंश्चतुर्विधाः॥ (वि. १. ५. २८) इत्यादिना तत्तत्कर्माधीनदेवादिविषमसृष्टिर्हि प्रपञ्च्यते। अतः पूर्वापरपर्यालोचनया सृज्यशब्देनात्र देवमनुष्यादयः सृज्यविशेषा निर्दिश्यन्ते; शक्तिशब्देन च तत्तत्कर्मैव। वक्ष्यति हि कर्मण्यपि शक्तिशब्दम् * अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते (वि. ६. ७. ६१) इत्यादौ। * निमित्तमात्रमिति च नोपादानत्वनिषेधः, श्रुतिस्मृतिसूत्रपूर्वापरव्याकोपप्रसङ्गात्। अतस्तत्तत्कर्मविशेषप्रयुक्ततया प्रकरणोदितविषमसृष्टैर्वैषम्यांशं प्रति प्राधान्यमनेन निषिध्यते, * मय्येवेते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् (गी.११.३३) इतिवत्। * प्रधानकारणीभूता यतो वै सृज्यशक्तयः (वि. १. ४. ५१,५२) इति ह्यत्राप्युच्यते। नन्वेवं सत्यप्रधानत्वमीश्वरस्योक्तं स्यात्, तदपि सूत्रादिविरुद्धं, कर्तृत्वविरुद्धं च; * स्वतन्त्रः कर्ता (अष्टा. १. ४. ५४) इति हि कारकचक्रं प्रति प्राधान्यं कर्तृलक्षणं स्मरन्ति। अतोऽयं प्रधानशब्द उपादानपर इति चेत्, तन्न, निमित्तोपादानैक्यश्रुत्यादिविरोधात्; उपादाने

करणशब्दानौचित्याच्च । नचास्वातन्त्र्यप्रसङ्गः, विशेषप्रयोजकस्य करणभूतस्यादृष्टस्यापि तत्सापेक्षत्वात् । अतो द्वितीयश्लोकेनापि साधारणकारणतयेश्वराकाङ्क्षणमसाधारणकारणान्तरनैरपेक्ष्यं चोच्यते । तदेतदखिलमभिप्रेत्य श्लोकद्वयं व्याख्याति—**सृज्यानामिति** । सृज्यशब्दस्य प्रकरणविशेषितोऽर्थः **क्षेत्रज्ञानामित्यनेनोक्तः** । निमित्तशब्दस्यात्रोपादानसहपठितनिमित्तपरत्वव्युदासायाह—**कारणमात्रमिति** । सृज्यशक्तय इत्यत्र समानाधिकरणसमासभ्रमव्युदासाय **सृज्यभूतेत्याद्युक्तम्** । प्रलयकाले करणकलेवरादिरहितानामविभागापन्नानां कथं कर्मेति शङ्काव्युदासाय—**प्राचीनेत्युक्तम्** । पूर्वकल्पसंभवशरीरैः कर्माणि निष्पन्नानि, *नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि (ब्र. कै. प्र. २६. ७०) इति हि स्मरन्ति ; न च नित्यानां क्षेत्रज्ञानां प्रलयेऽप्यत्यन्ताविभागः । सूत्रितं चैतत्—*न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च (ब्र. २. १. ३५) इति । वस्तुशब्दोऽत्र प्रकरणादिसिद्धसृज्यविशेषविषय इत्यभिप्रायेण **इदं क्षेत्रज्ञवस्त्वित्युक्तम्** । स्वशक्त्या वस्तु वस्तुतां नीयते इत्युक्ते अवस्थान्तरं नीयत इत्येवोक्तं भवति ; प्रागसतस्सत्तायोगित्वविवक्षायां सत्कार्यवादसिद्धान्तविरोधात्, *स्वशक्त्या वस्तु वस्तुतामित्यत्र आत्माश्रयादिप्रसङ्गाच्च । तच्चावस्थान्तरमस्मिन्प्रकरणे प्रलयदशापन्नानां देवादिभाव एवेत्यभिप्रायेण **देवादिवस्तुभावमित्युक्तम्** । तदेवं कर्तृत्वाकर्तृत्वयोरविरोध उपपादितः । उक्तार्थस्य प्रकृतोपयोग उच्यते—**इति मामित्यादिना** । इतिशब्दः *चातुर्वर्ण्यमित्यादिकं सर्वं परामृशतीत्यभिप्रायेणाह—**एवमिति** । कर्मभिरिति सामान्यतो निर्देशेऽपि प्रकृतज्ञानमात्रात्सर्वकर्मविनाशायोगात्, *एवं ज्ञात्वा कृतं कर्मेत्यनन्तरवाक्यानुरोधाच्च संकोचे कार्ये प्रकृतोपयुक्तो विशेषोऽयमेवेत्यभिप्रायेण **कर्मयोगारम्भविरोधिभिरित्याद्युक्तम्** । विरोधित्वेऽवान्तरव्यापारकथनं **फलसङ्गादिहेतुभिरिति** । यद्वा फलसङ्गादिना कृतत्वात्फलादिद्वारा कर्मयोगारम्भविरोधिभिरिति भावः । अत्र प्राचीनशब्देन निष्पन्नोपासनस्य श्रुतराधाश्लेष इत्यभिप्रेतम् । प्राचीनैः प्रागेव बद्धस्य कैश्चिदबन्ध इत्यत्राह—**मुच्यत इत्यर्थ इति** । एवं श्लोकद्वयेन यथोक्तकर्मयोगारम्भविरोधिपापक्षयहेतुरुक्तः ॥ १४ ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५

भा ॥ एवं मां ज्ञात्वा विमुक्तपापैः पूर्वैरपि मुमुक्षुभिरुक्तलक्षणं कर्म कृतम् । तस्मात्त्वमुक्तप्रकारमद्विषयज्ञानविधूतपापः पूर्वैर्विवस्वन्मन्वादिभिः कृतं पूर्वतरं—पुरातनं तदानीमेव मयोक्तं वक्ष्यमाणाकारं कर्मैव कुरु ॥ १५ ॥

ता ॥ तत्पूर्वकं कर्मयोगं शिष्टानुष्ठानप्रदर्शनेन द्रढयन् अर्जुनं प्रत्यनुशास्ति—*एवमिति श्लोकेन । **एवमिति—कर्तृत्वाकर्तृत्वादिनोक्तप्रकारेणेत्यर्थः** । *ज्ञात्वा कृतं कर्मेत्युक्ते ज्ञानस्य कर्मकरणहेतुत्वं सूचितम् । *कर्मभिर्न स बध्यते इति च पूर्वमुक्तम् । अतो विरोधिपापनिवर्तनद्वारा ज्ञानस्य कर्महेतुत्वमिति व्यञ्जनाय—**ज्ञात्वा विमुक्तपापैरित्युक्तम्** । कर्मशब्दोऽत्र मुमुक्षुकर्तव्यविषयत्वाद्व्यवहितमपि प्रधानप्रकृतं कर्मयोगमवलम्बत इत्यभिप्रायेण—**उक्तलक्षणमित्युक्तम्** । त्वंशब्दो गृहीतस्वयाथात्म्योपदेशतां सूचयतीत्यभिप्रायेण—**त्वमुक्तप्रकारमद्विषयज्ञानविधूतपाप इत्युक्तम्** । *इमं विवस्वते (४. १) इत्यादावुदाहृतानुष्ठातारः पूर्वैरिति परामृश्यन्त इत्यभिप्रायेण **विवस्वन्मन्वादिभिरित्युक्तम्** । पूर्वतरमित्यस्य क्रियाविशेषणत्वव्युदासायाह—**पुरातनमिति** । तदभिप्रेतमाह—**तदानीमेव मयोक्तमिति** । **एवं प्रवाहानादित्वमिह विवक्षितम् । कर्मयोगस्वरूपनिष्कर्षोपोद्बलरूपत्वादस्य वक्ष्यमाणाकारमित्युक्तम् ॥ १५ ॥**

भा ॥ वक्ष्यमाणस्य कर्मणो दुर्ज्ञानतामाह—

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६

भा ॥ मुमुक्षुणाऽनुष्ठेयं कर्म किंरूपम्, अकर्म च किम्; अकर्मेति कर्तुरात्मनो याथात्म्यज्ञानमुच्यते; अनुष्ठेयं कर्म तदन्तर्गतं ज्ञानं च किंरूपमित्युभयत्र कवयः—विद्वांसोऽपि, मोहिताः—यथावन्न जानन्ति । एवमन्तर्गतज्ञानं यत्कर्म तत्ते प्रवक्ष्यामि, यत् ज्ञात्वाऽनुष्ठाय अशुभात्—संसारबन्धात् मोक्ष्यसे; कर्तव्यकर्मज्ञानं ह्यनुष्ठानफलम् ॥ १६ ॥

ता ॥ *किं कर्मेति श्लोके कर्माकर्मशब्दाभ्यां पृथक् ज्ञातव्यभ्रमस्यादिति तद्व्युदासायाह—**वक्ष्यमाणस्य कर्मण** इति । *कर्मण्यकर्म यः पश्येत् (४. १८) इत्यादिना कर्माकर्मणोर्द्वयोरप्येककर्मयोगांशत्वं हि वक्ष्यते; अत्रापि श्लोके *तत्ते कर्म प्रवक्ष्यामीति ह्युच्यत इत्यभिप्रेत्य **वक्ष्यमाणस्य कर्मण** इत्युक्तम् । दुर्विज्ञानत्वज्ञापनायाह—**मुमुक्षुणाऽनुष्ठेय**मिति । *अकर्मेति कर्माभावादिव्युदासायाह—**आत्मनो याथात्म्यज्ञान**मिति । अनुष्ठानोपयोगित्वज्ञापनाय **कर्तुरि**त्युक्तम् । *कवयः क्रान्तदर्शिनः इति प्रसिद्ध्याऽर्थान्तरप्रसिद्धेरत्रानुपयोगाच्च **विद्वांस** इत्युक्तम् । *मोहिताः इत्यत्राज्ञानमयथाज्ञानं च विवक्षितम्; तदुभयसंग्रहायाह—**यथावन्न जानन्ती**ति । मोहिताः—विप्रकीर्णैश्शास्त्रैरिति शेषः । *किं कर्म किमकर्मेति द्वयोः प्रकृतत्वेऽपि *कर्म प्रवक्ष्यामि *कुरु कर्मैव (३.८) *गहना कर्मणो गतिः (४.१७) इति पूर्वापरपरामर्शेन कर्मणः प्राधान्यमकर्मणस्तद्विशेषणत्वं च विवक्षितमित्यभिप्रायेण तच्छब्दाभिप्रेतं वैशिष्ट्यं व्यनक्ति—**एवमन्तर्गतज्ञान**मिति । संसारबन्धादिपरमप्रयोजनविवक्षयोक्तम्—**ज्ञात्वा मोक्ष्यस** इति । एतावति निर्दिष्टे अनुष्ठायेति कुतो लब्धमित्यत्राह—**कर्तव्यकर्मज्ञान**मिति । अत्र ज्ञात्वेतिपदमजहल्लक्षणया कर्मज्ञानानुष्ठाने अपि गृह्णाति । *कुरु कर्मैव तस्मात्त्वम् (४. १५) इति ह्यनन्तरमेवोक्तम्; अन्यथा कर्मानुष्ठानविधिनैरर्थक्यं च स्यादिति भावः ॥ १६ ॥

भा ॥ कुतोऽस्य दुर्ज्ञानतेत्यत्राह—

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७

भा ॥ यस्मान्मोक्षसाधनभूते कर्मस्वरूपे बोद्धव्यमस्ति, विकर्मणि; च नित्यनैमित्तिककाम्यरूपेण, तत्साधनद्रव्यार्जनाद्याकारेण च विविधता[मा]पन्ने कर्म विकर्म । अकर्मणि—ज्ञाने च बोद्धव्यमस्ति । गहना—दुर्विज्ञाना मुमुक्षोः कर्मणो गतिः । विकर्मणि बोद्धव्यं—नित्यनैमित्तिककाम्यद्रव्यार्जनादौ कर्मणि फलभेदकृतं वैविध्यं परित्यज्य मोक्षैकफलतयैकशास्त्रार्थत्वानुसन्धानम् । तदेतत् *व्यवसायात्मिका बुद्धिरेका (२. ४१) इत्यत्रैवोक्तमिति नेह प्रपञ्च्यते ॥ १७ ॥

ता ॥ *तत्ते कर्म प्रवक्ष्यामीत्युक्ते अनन्तरं कर्मैवोपदेक्ष्यम्, *कर्मणो ह्यपीत्यादि तु कस्यामाकाङ्क्षायामुच्यत इत्यत्राह—**कुतोऽस्ये**ति । यस्मादिति हिशब्दार्थः । कर्मणो बोद्धव्यमित्यादिरूपेण वचनं बोद्धव्यांशविशेषनिष्कर्षपरमिति व्यञ्जनाय **कर्मस्वरूपे बोद्धव्यमस्ती**त्युक्तम् । अत्र संबन्धसामान्ये षष्ठी । *गहना कर्मणो गतिः इत्यत्र गतिशब्दो बोद्धव्यप्रकारपर इत्यपि स्वरूपशब्दाभिप्रायः । अत्र विकर्मशब्देन *पाषण्डिनो विकर्मस्थान् (वि.३.१८.९७) इत्यादा-

क्वि न विरुद्धं कर्मोच्यते, तस्यात्रोपयोगाभावात्; अतोऽत्र विशब्दोऽनुष्ठेयवैविध्यपरः; वैविध्यं च तत्र नित्यादिरूपं प्रसिद्धमित्यभिप्रायेणाह—**नित्येति**। आदिशब्देन रक्षणतदुपायप्रवृत्त्यादि गृह्यते। अत्र विकर्माकर्मशब्दयोः प्रतिषिद्धकर्मतूष्णींभावपरत्वेन परव्याख्यानं * गहना कर्मणो गतिरिति निगमनेन विरुद्धम्। तत्रापि विकर्माद्युपलक्षणार्थत्वं क्लिष्टम्। एवमुत्तरेष्वपि श्लोकेष्वैदमर्थ्येन व्याख्यानं निरस्तम्। यस्मादिति पूर्वमुक्तत्वात्, गहनेत्यत्र तस्मादिति भाव्यम्। गहनत्वं दुष्प्रवेशत्वम्; तच्चात्र ज्ञानत इत्यभिप्रायेण—**दुर्विज्ञानेत्युक्तम्**। ननु मुमुक्षोः फलान्तरार्थेऽपि कर्मणि किं बोद्धव्यमिति शङ्कायां वक्तव्ये परिशेषयितुं तस्योक्तनामाह—**विकर्मणीति**। किमत्र प्रमाणमित्यत्राह—**तदेतदिति**। **नेह प्रपञ्च्यते**—अस्माभिर्भगवता वेति शेषः ॥ १७ ॥

भा ॥ कर्माकर्मणोर्बोद्धव्यमाह—

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८

भा ॥ अकर्मशब्देनात्र कर्मेतरत्प्रस्तुतमात्मज्ञानमुच्यते। कर्मणि क्रियमाण एवात्मज्ञानं यः पश्येत्, अकर्मणि चात्मज्ञाने वर्तमान एव यः कर्म पश्येत्। किमुक्तं भवति? क्रियमाणमेव कर्मात्मयाथात्म्यानुसन्धानेन ज्ञानाकारं यः पश्येत्, तच्च ज्ञानं कर्म योगाख्यान्तर्गततया कर्माकारं यः पश्येदित्युक्तं भवति। क्रियमाणे हि कर्मणि कर्तृभूतात्मयाथात्म्यानुसन्धाने सति तदुभयं संपन्नं भवति। एवमात्मयाथात्म्यानुसन्धानगर्भं कर्म यः पश्येत्, स बुद्धिमान्—[स] कृत्स्नशास्त्रार्थवित्, मनुष्येषु स युक्तः—मोक्षायार्हः, स एव कृत्स्नकर्मकृत्—कृत्स्नशास्त्रार्थकृत् ॥ १८ ॥

ता ॥ एवमुपोद्घातः स्थितः; अथ प्रकृतमुपदिश्यत इत्यभिप्रायेणाह—**कर्माकर्मणोरिति**। * कर्मण्यकर्म यः पश्येदिति कर्मणि बोद्धव्यमुच्यते। * अकर्मणि च कर्म यः इति तु ज्ञाने। अकर्मशब्दस्यात्र परोक्तकर्माभावस्वतन्त्रज्ञाननिष्ठाविषयतामपास्य तदन्यद्युत्पत्त्या आसत्त्या च सिद्धमाह—**अकर्मेति**। अत्र—कर्मयोगोपदेशप्रकरण इत्यर्थः। अन्वयार्थं दर्शयति—**कर्मणीति**। अवधारणं शङ्काहेतुभूतविरोधद्योतनेन ज्ञानकर्मणोरनन्वितत्वपरिहारार्थम्। नन्विदमयुक्तं, अन्यानुष्ठानेऽन्यदर्शनस्यानपेक्षितत्वात्, अन्यस्मिन्ननुष्ठीयमाने तदन्यज्ञानस्य दुष्करत्वात्, अन्यस्मिंश्चानुसन्धीयमाने तदन्यस्य कर्तुमशक्यत्वात्; अन्यतरत्रेतरदर्शनेन तदन्यप्रतिक्षेपश्च स्यादित्यभिप्रायेण चोदयति—**किमुक्तं भवतीति**। यदेतद्युगपदशक्यत्वं चोदितं, तत्किं शास्त्रार्थत्वाकारभेदेन? अन्यथा वा? इति विकल्पमभिप्रेत्य प्रथमं दूषयति—**क्रियमाणमेवेति**। ज्ञानविशिष्टस्य कर्मणः उपायतया विहितत्वेन परस्परमन्वितत्वमिति न भिन्नशास्त्रार्थत्वमिति भावः। एतेन परस्परनिरपेक्षार्थद्वयपरतया परस्परप्रतिक्षेपशङ्काऽपि प्रत्युक्ता। द्वितीयेऽपि किं स्वरूपभेदमात्रेण दुष्करत्वम्? उत विरुद्धत्वात्? न प्रथमः, एकेनैव प्रेक्षणगमनभाषणादेर्युगपदनुष्ठानात्। न द्वितीयः, गमनस्थानयोरिव ज्ञानकर्मणोर्विरोधाभावात्। नचानुपयोगः, ध्यानविशेषविशिष्टविघ्ननिर्हरणार्थचेष्टाजपादिन्यायादित्यभिप्रायेणाह—**क्रियमाणे हीति**। **तदुभयम्**—कर्मणो ज्ञानविशिष्टत्वं, ज्ञानस्य कर्मविशिष्टत्वं **च**। **बुद्धिमानित्यत्र** * भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः (अष्टा. वा.५.२.९४) इति प्रत्ययवशात् प्रकृष्टा बुद्धिर्विवक्षितेत्याह—**कृत्स्नशास्त्रार्थविदिति**। **कृत्स्नकर्मकृदिति** ज्ञानन्तरमुच्यते; तदनुरूपैव च बुद्धिरत्राभिधेयेति भावः। * **बुद्धिमान् कृत्स्नकर्मकृदिति ज्ञानेऽनुष्ठाने च अभिहिते तदधीनफलयोग्यत्वमेव हि योग्यपर्यायेण युक्तशब्देनात्राभिधेयमित्यभिप्रेत्य**

मोक्षायाई इत्युक्तम् । *स बुद्धिमान् *स युक्त इति तच्छब्दद्वयेन वाक्यभेदे सिद्धे कृत्स्नकर्मकृदित्येतदपि भिन्नवाक्यमेव भवितुमर्हति; ज्ञानफल्योः पौष्कल्यस्येवानुष्ठानपौष्कल्यस्यापि प्रशंसाहेतुत्वे प्राधान्यादित्यभिप्रायेण तच्छब्दानुषङ्गमाह—स एव कृत्स्नकर्मकृदिति ॥ १८ ॥

भा ॥ प्रत्यक्षेण क्रियमाणस्य कर्मणो ज्ञानाकारता कथमुपपद्यत इत्यत्राह—

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९

भा ॥ यस्य मुमुक्षोस्सर्वे द्रव्यार्जनादिलौकिककर्मपूर्वकनित्यनैमित्तिककाम्यरूपकर्मसमारम्भाः कामवर्जिताः—फलसङ्गरहिताः; सङ्कल्पवर्जिताश्च—प्रकृत्या तद्गुणैश्चात्मानमेकीकृत्यानुसन्धानं सङ्कल्पः; प्रकृतिवियुक्तात्मस्वरूपानुसन्धानयुक्ततया तद्रहिताः; तम्—एवं कर्म कुर्वाणं पण्डितं कर्मान्तर्गतात्मयाथात्म्यज्ञानाग्निना दग्धप्राचीनकर्माणमाहुस्तत्त्वज्ञाः । अतः कर्मणो ज्ञानाकारत्वमुपपद्यते ॥ १९ ॥

ता ॥ प्रत्यक्षेणेति । प्रत्यक्षविरुद्धं न शास्त्रेणोपपत्त्या वा प्रतिपादयितुं शक्यमिति भावः । क्रियमाणस्येति । नहि चिरप्रध्वस्तं स्मृतिदशापन्नं ज्ञानमात्रपरिशेषाज्ज्ञानाकारमित्युच्यते, किंतु क्रियमाणमेवेदं कर्मेति भावः । यद्वा प्रत्यक्षेण क्रियमाणस्येति पदाभ्यां ज्ञानविषयस्य ज्ञानकार्यस्य च कथं ज्ञानैक्यमित्यभिप्रेतम् । कथमुपपद्यत इति । नेदमुपपत्तिसहम्; यदि परं दृष्टिविधानादाविव भावनीयम्, तदा आत्मयाथात्म्यानुसन्धानगर्भमित्यादि नोपपद्यत इति भावः । सर्वशब्दासङ्कोचात् द्रव्यार्जनादिसंग्रहः । कामसङ्कल्पवर्जिता इत्यत्र न तावत्काम एव सङ्कल्प इति समासः, पर्यायत्वादिप्रसङ्गात् । नापि कामानां सङ्कल्प इति, उपयुक्तोभयपदार्थप्रधाने द्वन्द्वे संभवत्येकपदार्थप्रधानतत्पुरुषायोगात् । अतः कामसङ्कल्पाभ्यां वर्जिता इत्येवार्थ इत्यभिप्रेत्याह—कामवर्जिता इति । वर्जितशब्दस्य प्रत्येकमन्वयं दर्शयता द्वन्द्वो ह्ययं समासान्तरात्प्रबल इति सूचितम् । कर्मप्रकरणे कामो हि फलसङ्ग इत्यभिप्रायेणाह—फलसङ्गरहिता इति । सङ्कल्पोऽत्र न कर्मानुष्ठानसङ्कल्पः, तदभावेऽनुष्ठानायोगात् । नापि फलसङ्कल्पः, कामशब्देन कृतकरत्वात् । अतोऽत्र प्रकृतिवियुक्तात्मोपदेशप्रकरणे तदुपयुक्तः कश्चिदर्थो वक्तव्य इत्यभिप्रायेणाह—प्रकृत्येति । समित्येकीकारे, कल्पो भ्रान्तिज्ञानम्, प्रकृत्येति देहरूपेण परिणतयेति शेषः । तद्गुणैरात्मन एकीकरणं नाम गुणहेतुके कर्मविशेषे स्वहेतुत्वानुसन्धानम्; यद्वा प्रकृतिगुणभूतानां सत्त्वरजस्तमसां देवत्वमनुष्यत्वादिसन्निवेशानां स्थौल्यकार्श्यशुक्लकृष्णादीनां च स्वमात्मानं प्रति गुणत्वेनानुसन्धानम् । एतेन अस्वे गृहादौ स्वमिति बुद्धिरपि संगृहीता भवति । एवंविधकामसङ्कल्परहित्ये पण्डितशब्दाभिप्रेतं हेतुमाह—प्रकृतिवियुक्तेति । पण्डितं—हेयोपादेयभूतदेहात्मादिविवेकज्ञानवन्तम्; ऊहापोहक्षमा हि बुद्धिः पण्डा । चरमोक्तस्यापि पण्डितशब्दस्य तं पण्डितमित्युद्देश्यनिवेशः, पापनिवर्तकत्वलक्षणज्ञानप्राशस्त्यविध्यौचित्यात् । अप्रस्तुतस्वतन्त्रज्ञानान्तरव्यवच्छेदायोक्तं—कर्मान्तर्गतेति । नह्यत्र क्रियमाणमेव कर्म ज्ञानाग्निना दह्यते, निष्फलत्वप्रसङ्गात्; नाप्युत्तरं, तस्य विद्यामाहात्म्यनिवर्त्यत्वात्; अतः प्राचीनेत्युक्तम् । तत्त्वज्ञा इति । प्राप्यस्य प्राप्तुश्चात्मनः प्रापकस्य च कर्मयोगस्यासन्दिग्धाविपरीतस्वरूपज्ञा बुधशब्देन विवक्षिता इति भावः । शब्दोत्तरं निगमयति—अत इति ॥ १९ ॥

भा ॥ एतदेव विवृणोति—

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥ २०

भा ॥ कर्मफलसङ्गं त्यक्त्वा नित्यतृप्तः—नित्ये स्वात्मन्येव तृप्तः निराश्रयः—अस्थिरप्रकृतावाश्रयबुद्धिरहितो यः कर्माणि करोति, स कर्मण्याभिमुख्येन प्रवृत्तोऽपि नैव किंचित्कर्म करोति—कर्मापदेशेन ज्ञानाभ्यासमेव करोतीत्यर्थः ॥ २० ॥

ता ॥ अनन्तरश्लोकस्यार्थान्तरपरत्वपौनरुक्त्ययोर्व्युदासायाह—**एतदेव विवृणोतीति** । नित्यतृप्त इत्यत्र नित्यं तृप्त इति नार्थः, तृप्तिहेत्वनुक्तेः ; कर्मफलासङ्गं त्यक्त्वेति कामवर्जितत्वविवरणेन अनित्यत्यागेऽभिहिते सङ्कल्पवर्जितत्वविवरणतया नित्यस्वीकारस्य च वक्तुमुचितत्वादित्यभिप्रेत्य **नित्ये स्वात्मन्येव तृप्त** इत्युक्तम् । * निराश्रयः इत्यत्र न तावदाश्रयभूतदेशादिमात्रं निषिध्यते, तत्परित्यागस्य अशक्यत्वात् ; अतोऽत्र लौकिकानां य आश्रयणीयत्वबुद्धिविषयः, तस्याश्रयणीयत्वबुद्धिरेव निषिध्यत इत्यभिप्रेत्योक्तम्—**अस्थिरेत्यादि** । तद्वृत्तस्य आकाङ्क्षया य इत्यध्याहृतम् । अभिशब्दार्थ आभिमुख्यं तदेकपरता । नैव किंचिदित्युक्ते सामान्यतो ज्ञानमपि निषिद्धं स्यादिति तद्व्युदासायोचितं विशेष्यमाह—**नैव किंचित्कर्मेति** । कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोतीति व्याहतमिदमित्याशङ्क्याह—**कर्मापदेशेनेति** । विपरीतविषयसंचरणेन ज्ञानाभ्यासविरोधिनामिन्द्रियाणामनुकूलविषयसंचरणमात्रं हि कर्मयोग इति भावः ॥ २० ॥

भा ॥ पुनरपि कर्मणो ज्ञानाकारतैव विशोध्यते—

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१

भा ॥ निराशीः—निर्गतफलाभिसन्धिः ; यतचित्तात्मा—यतचित्तमनाः ; त्यक्तसर्वपरिग्रहः—आत्मैकप्रयोजनतया प्रकृतिप्राकृतवस्तुनि ममतारहितः यावज्जीवं केवलं शारीरमेव कर्म कुर्वन् किल्बिषं—संसारं नाप्नोति, ज्ञाननिष्ठाव्यवधानरहितकेवलकर्मयोगेनैवंरूपेणात्मानं पश्यतीत्यर्थः ॥ २१ ॥

ता ॥ * यस्य (१९) इति श्लोकेन ज्ञानाकारत्वमुपपादितम् ; * त्यक्त्वा (२०) इति श्लोकेन तदेव विवृतम् । अतःपरं श्लोकत्रयेण तदेव विशोध्यत इत्यपुनरुक्ततामाह—**पुनरपीति** । उक्तार्थस्य दुर्ज्ञानत्वाद्विशदप्रतिपत्त्यर्थं पूर्वं बहुप्रदेशेषु व्याकीर्णाभिहितानां संकलय्य प्रतिपत्त्यर्थम् अस्यैवार्थस्यादरविषयत्वद्योतनार्थं चोक्त एवार्थः पुनरपि विविच्य प्रतिपाद्यते । कर्मपौष्कल्यादिविषयसर्वाशीर्निषेधपरत्वव्युदासाय **निर्गतफलाभिसन्धिरित्युक्तम्** । यतचित्तात्मेत्येतन्नियन्तव्यविषयम् । तत्र नियन्तव्यस्य नियन्तृव्यतिरेकस्स्वारसिकः । आत्मशब्दस्य चित्तस्वरूपाद्यर्थकत्वं तु निरर्थकम् । अतो मनोविषयत्वे युक्ते तदवस्थाविशेषरूपस्य बुद्ध्यहङ्काराख्यवृत्तिसहपठितस्य चित्तस्य वाचकोऽयं चित्तशब्द इत्यभिप्रायेण—**यतचित्तमना** इत्युक्तम् । विषयान्तरचिन्तारहितमना इत्यर्थः । * अध्यवसायाभिमानचिन्तावृत्तिभेदान्मनएव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते इति **शारीरकभाष्ये** (२.४.५) व्यक्तमुक्तम् । सृष्ट्यादिप्रकरणेषु तु बुद्ध्यादिशब्दो महदादिवाचकः । अत्र चित्तस्य पृथगभिधानं मनसो बुद्ध्यहङ्कारावस्थयोरप्युपलक्षणम् । **प्रकृतिप्राकृतेति**—सर्वशब्दाभिप्रेतभोग्यभोगोपकरणादिसंग्रहः । सर्वविषयः परिग्रहः सर्वपरिग्रहः । स च स्वकीयताभिमानः । * पर्यायौ च

परोवार आलवाले परिच्छदे । पत्नीस्वीकारशपथमूल्येष्वपि परिग्रहः ॥ इति **वैजयन्ती** । शारीरशब्दसामर्थ्याच्छरीरावधिकत्वं सिद्धमिति **यावज्जीवमित्युक्तम्** । **शारीरं** शरीरसंबन्धि; शरीरिणो दुस्त्यजमिति भावः । यद्वा बुद्धिव्यापारभूतफलसङ्गादिराहित्यात् **शारीरमित्युक्तम्** । अथवा शारीरमेव—शरीरधारणाद्यर्थमेव, न तु स्वर्गाद्यर्थमिति भावः । मनोनियमनातिशयसापेक्षज्ञानयोगव्यवच्छेदाय वा शारीरशब्दः । अत्र पारिव्रज्यासङ्गतेर्द्रव्याग्निसाध्यकर्मव्यवच्छेदः परोक्तो न युक्तः । किल्बिषशब्दफलितमुक्तम्—**संसार**मिति । * शारीरं केवलं कर्म इत्युक्ते यज्ञादिकर्मणोऽपि निषेधः प्रतीयेतेति तद्व्युदासार्थं केवलशब्दस्यात्र व्यवधाननिषेधपरत्वमाह- **ज्ञाने**ति ॥ २१ ॥

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥ २२

भा ॥ यदृच्छोपनतशरीरधारणहेतुवस्तुसन्तुष्टः, द्वन्द्वातीतः—यावत्साधनसमाप्त्यवर्जनीयशीतोष्णादिसहः, विमत्सरः—अनिष्टोपनिपातहेतुभूतस्वकर्मनिरूपणेन परेषु विगतमत्सरः, समस्सिद्धावसिद्धौ च—युद्धादिकर्मसु जयादिसिद्ध्यसिद्ध्योस्समचित्तः, कर्मैव कृत्वाऽपि—ज्ञाननिष्ठां विनाऽपि, न निबध्यते—न संसारं प्रतिपद्यते ॥ २२ ॥

ता ॥ * शारीरं कर्म कुर्वन्नित्युक्ते शरीरधारणार्थद्रव्यार्जनादिष्ववश्यं प्रवृत्तिस्स्यात्, ततश्चावर्जनीयाश्शस्त्रपातादिशीतोष्णमृदुपरुषादिस्पर्शाः, तत्रच प्रवृत्तिविघातेषु क्रोधस्स्यात्, विहतायां च प्रवृत्तौ मोघप्रयत्नतया संतापो लाभे प्रहर्षश्च स्यातामिति कर्मयोग एवात्मदर्शनविरोधिसमस्तवैरिणामुत्थापकः प्रसज्यत इति शङ्कानिरासाय दृष्टफलेष्वसङ्ग उच्यते—*यदृच्छेति श्लोकेन । तत्र शरीरधारणाद्यर्थेषु साभिसन्धिकात्यन्तव्यापारनिवृत्तिपरं प्रथमपादं व्याख्याति—**यदृच्छोपनते**ति । समस्तव्यापारनिवृत्तौ विवक्षितायां स्वयमुपनतानां निगरणादिव्यापारोऽपि निवृत्तस्स्यात्; अतो व्याप्रियमाणस्यैवाभिसन्ध्यादिनिवृत्तिरिह विवक्षिता । एतेन यदा स्वयमेव यत्किञ्चिच्छरीरधारणवस्त्वागमः, तदा ततोऽतिशयितमाधुर्यादिविशिष्टेषु न प्रवर्तितव्यमित्यप्युपदिष्टं भवति । **यावदि**त्यादिना—* मात्रास्पर्शास्तु (२. १४) इत्यादि[ना] पूर्वप्रपञ्चितं स्मारितम् । **अनिष्टे**त्यादि । यथा आतपादिहेतुषु तपनादिषु स्वकर्मनिरूपणेन न क्रोधः, यथा छत्रादिभिरातपनिवारणादिमात्रमेव क्रियते, तावदत्रापि कर्तव्यमिति भावः । **युद्धादी**त्यादिना *सुखदुःखे समे कृत्वा (२. ३८) *सिद्ध्यसिद्ध्योस्समो भूत्वा (२. ४८) इत्यादिकं स्मारितम् । कृत्वेत्यस्य सामर्थ्यात् **कर्मैवे**त्युक्तम् । बन्धहेतौ सत्यपि न बध्यत इति विरोधव्युदासाय अपिशब्दतात्पर्यमाह—**ज्ञाननिष्ठां विने**ति । कर्मयोगानुष्ठानपूर्वकस्वतन्त्रज्ञानयोगं विनाऽपीत्यर्थः । न निबध्यत इत्यस्य कर्मणैव ज्ञाननिष्ठाफलसिद्धौ तात्पर्यमाह—**न संसार**मिति ॥ २२ ॥

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३

भा ॥ आत्मविषयज्ञानावस्थितमन[स्कत्वे]स्त्वेन निर्गततदितरसङ्गस्य तत एव निखिलपरिग्रहविनिर्मुक्तस्य उक्तलक्षणयज्ञादिकर्मनिर्वृत्तये वर्तमानस्य पुरुषस्य बन्धहेतुभूतं प्राचीनं कर्म समग्रं प्रविलीयते—निश्शेषं क्षीयते ॥ २३ ॥

ता ॥ * त्यक्त्वा कर्मफलासङ्गम् (२०) *त्यक्तसर्वपरिग्रहः, *यतचित्तात्मा (२१) इत्येतैः पूर्वं बुद्धिपूर्वस्सङ्गपरित्यागादिरुक्तः । इदानीं तथाविधनियमवतोऽवस्थान्तरे यज्ञाद्यर्थद्रव्यार्जनादिव्यापृतस्यापि स्वरसत एव सङ्गाभावादिकं

वदन्ननन्तस्यापि विरोधिकर्मणः कर्मयोगप्रभावान्निवृत्तिमाह—*गतसङ्गस्येति श्लोकेन । पूर्वोक्तैर्बुद्धिपूर्वसङ्गत्यागादिभिः आत्मज्ञाने मनोऽवस्थितम् । अतो नेदानीं नियन्तव्यम् । ततश्च सङ्गोऽपि निरतिशयभोग्यस्यात्मनोऽनुसन्धानात्सवासनं **स्वयमेव** गतः । एवं सङ्गेऽपि निवृत्ते न स्वयं सर्वपरिग्रहास्त्याज्याः ; किंतु, तैरयं मुक्तः । एवं जितसमस्तजेतव्यस्य यथावस्थितोपाये निष्प्रत्यूहं प्रवर्तमानस्य आत्मसाक्षात्कारतत्प्राप्तिविरोधि पूर्वकृतं पुण्यपापरूपं सर्वं कर्म विनश्यतीत्येतदखिलं दर्शयति—**आत्मविषये**ति । कर्मशब्दः प्रथमान्तः *प्रविलीयत इत्यनेनान्वितः । *आचरत इत्यस्य तु कर्मविषयत्वं स्वरससिद्धम् । अन्यथा *समग्रं प्रविलीयत इत्येतदपि साकाङ्क्षं स्यादित्येतदभिप्रेत्य **यज्ञादिकर्मनिवृत्तये वर्तमानस्ये**त्याद्युक्तम् । **यज्ञा**येत्यनेन स्वकुक्षिभरणादिमात्रनिरासः । समग्रशब्दस्य उपसर्गस्य चाभिप्रायात् **निश्शेष**मित्युक्तम् । *सहाग्रेण फलेन वर्तत इति परव्याख्यानमप्रसिद्धार्थत्वादर्थसिद्धकथनरूपत्वाच्च हेयम् । धातोश्श्लेषे कारणापत्तौ च प्रयोगात्तद्व्युदासाय क्षीयत इत्युक्तम् ॥ २३ ॥

भा॥ प्रकृतिवियुक्तात्मस्वरूपानुसन्धानयुक्ततया कर्मणो ज्ञानाकारत्वमुक्तम्, इदानीं सर्वस्य सपरिकरस्य कर्मणः परब्रह्मभूतपरमपुरुषात्मकत्वानुसन्धानयुक्ततया ज्ञानाकारत्वमाह—

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४

भा॥ ब्रह्मार्पणमिति हविर्विशेष्यते, अर्प्यतेऽनेनेत्यर्पणं स्रुगादि, तद्ब्रह्मकार्यत्वाद्ब्रह्म, ब्रह्म यस्य हविषोऽर्पणं तद्ब्रह्मार्पणम्, ब्रह्म हविः ब्रह्मार्पणं हविस्स्वयं च ब्रह्मभूतम्, ब्रह्माग्नौ—ब्रह्मभूते अग्नौ ब्रह्मणा कर्त्रा हुतमिति सर्वं कर्म ब्रह्मात्मकतया ब्रह्ममयमिति यस्समाधत्ते, स ब्रह्मकर्मसमाधिः, । तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गन्तव्यम्, ब्रह्मात्मकतया ब्रह्मभूतमात्मस्वरूपं गन्तव्यम् । मुमुक्षुणा क्रियमाणं कर्म परब्रह्मात्मकमेवेत्यनुसन्धानयुक्ततया ज्ञानाकारं साक्षादात्मावलोकनसाधनम् ; न ज्ञाननिष्ठाव्यवधानेनेत्यर्थः ॥ २४ ॥

ता॥ *ब्रह्मार्पणमिति श्लोकोऽपि प्रकारभेदेन कर्मणो ज्ञानाकारत्वोपपादक इति पूर्वेण सङ्गतिं दर्शयति—**प्रकृतीति** । **सर्वस्य**—नित्यनैमित्तिकादिरूपस्य । **सपरिकरस्य**—स्रुक्स्रुवहविरादिविशिष्टस्येत्यर्थः । ब्रह्मशब्दः पुरुषोत्तम एव मुख्यवृत्त इति शारीरकभाष्यारम्भे प्रपञ्चितम् । अत्र च मुख्ये संभवति गौणत्वमन्याय्यम् ; सर्वस्य च परमपुरुषात्मकत्वानुसन्धानं शास्त्रसिद्धम् । स्वयं च वक्ष्यति *मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् (९.१६) इतीत्यभिप्रायेण परब्रह्मभूतपरमपुरुषात्मकत्वानुसन्धानोक्तिः । अत्र ब्रह्मव्यतिरिक्तार्पणहविरादिमिथ्यात्वभावनं, ब्रह्मण एव यज्ञत्वकल्पनादिकं च परोक्तं प्रत्यक्षादिविरोधप्रकृतासङ्गत्यादिभिर्निरसनीयम् । एकवाक्यत्वे संभवति वाक्यभेदायोगात्, ब्रह्मार्पणमित्यस्य व्यस्तपदत्वेन वाक्यभेदभ्रमव्युदासायाह—**ब्रह्मार्पणमिति हविर्विशेष्यत** इति । ब्रह्मण्यर्पणं प्रक्षेपो यस्येति समासे व्यधिकरणबहुव्रीहिस्स्यात्, ब्रह्माग्नौ हुतमित्यनेन पौनरुक्त्यं च ; अतस्समानाधिकरणबहुव्रीहिरयम् ; अर्पणशब्दश्चात्र करणव्युत्पत्त्यास्रुगादिविषयः । अधिकरणादिव्युत्पत्तावपि पूर्वोक्तपौनरुक्त्यादिदोष इत्येतदभिप्रेत्याह—**अर्प्यतेऽनेने**ति । **ब्रह्मकार्यत्वादिति** हेतुः सर्वत्रानुषञ्जनीयः । ब्रह्मणि स्रुगादिदृष्टिविधिभ्रमव्युदासाय **ब्रह्मकार्यत्वाद्ब्रह्म, स्वयं च ब्रह्मभूतं, ब्रह्मभूतेऽग्नावित्याद्युक्तम्** । ब्रह्मणा हुतमित्यत्रार्पणहविरग्निशब्दवद्विशेष्यनिर्देशाभावात्करणस्य च ब्रह्मार्पणमित्युक्तत्वात् पारिशेष्यात्कर्तरि तृतीयेति व्यञ्जनाय **ब्रह्मणा कर्त्रा हुत**मित्युक्तम् । नन्वत्र पूर्वोत्तरार्धयोरन्वयो न दृश्यते ; **न च पूर्वार्धं पृथग्वाक्यम्, अपूर्णत्वात्** ; अत आह—**इतीत्यादि समाधत्त**इत्यन्तम् । **ब्रह्मात्मकतया ब्रह्ममय**मिति ।

तत्कार्यत्वेन, तच्छरीरतया वा तदात्मकत्वात्, तदितिव्यपदेशार्हमित्यर्थः। एतेन ब्रह्मकर्मसमाधिशब्दोऽपि व्याख्यात इत्याह—स इति। ब्रह्मात्मके कर्मणि समाधिरनुसन्धानं यस्य स तथोक्तः। गत्यभावादिह व्यधिकरणबहुव्रीहिः। यद्वा समाधत्त इति समाधिशब्दार्थः; ब्रह्मरूपं कर्म समाधत्ते—अनुसन्धत्ते। *ब्रह्मैव तेन गन्तव्यमित्यत्रापि कर्मयोग-साक्षात्कार्यमात्मस्वरूपमत्र स्रुग्घविरमयादिवत् ब्रह्मशब्देनोच्यत इत्याह—ब्रह्मात्मकतयेति। फलितं ज्ञानाकारत्वं वदन् वाक्यार्थमाह—मुमुक्षुणेति। आत्मावलोकनसाधनमित्यनेन *ब्रह्म गन्तव्यमित्यस्यार्थो दर्शितः। साक्षाच्छब्देन न ज्ञाननिष्ठेत्यादिना च एवकारार्थो विवृतः॥ २४॥

भा॥ एवं कर्मणो ज्ञानाकारतां प्रतिपाद्य कर्मयोगभेदानाह—

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति॥ २५

भा॥ दैवम्—देवार्चनरूपं यज्ञम् अपरे कर्मयोगिनः पर्युपासते—सेवन्ते, तत्रैव निष्ठां कुर्वन्तीत्यर्थः। अपरे ब्रह्माग्नौ यज्ञं यज्ञेनैवोपजुह्वति; अत्र यज्ञशब्दो हविस्स्रुगादियज्ञसाधने वर्तते; *ब्रह्मार्पणं ब्रह्म हविरिति न्यायेन यागहोमयोर्निष्ठां कुर्वन्ति॥ २५॥

ता॥ उक्तार्थसंगतिपूर्वकं *दैवमेव इत्यादेः *प्राणान्प्राणेषु जुह्वति (४. ३०) इत्यन्तस्य प्रघट्टकस्यार्थमाह—एवं कर्मण इति। देवसंबन्धि दैवम्, तत्संबन्धित्वं च तदर्चनरूपत्वमिति—देवार्चनरूपमित्युक्तम्। दैवमेवेत्यवधारणेन अपरे इत्यादिना च विकल्पसिद्धः; ततश्च देवसंबन्धमात्रं साधारणं नात्र वाच्यम्, अतोऽर्चनशब्देन वक्ष्यमाणयाग-होमादिभ्यो व्यावृत्तिस्सूचिता। यागादेरपि देवार्चनत्वेऽपि तत्तद्देवतारूपादिसपर्यायां ह्यर्चनशब्दः प्रसिद्धः। *कर्मयोगेन योगिनाम् (३. ३) इत्युपक्रमवदत्रापि योगिशब्दः कर्मयोगनिष्ठविषय इति ज्ञापनाय कर्मयोगिन इत्युक्तम्। दैवस्य यज्ञत्वेन दृष्टिरत्र विधीयत इति भ्रमव्युदासाय निरन्तरानुष्ठानप्रयुक्तचरणपर्यायेण व्याख्याति—सेवन्त इति। *सेवा भक्तिरुपास्तिः इति नैघण्टुकाः। अत्र सेवोपासनशब्दौ सेव्यं प्रति करणत्रयस्यानुकूलवृत्तिनैरन्तर्यपरौ; न तु ध्यानमात्र-परौ; भक्तिशब्दस्तु ध्यानस्य प्रीतिरूपतां वक्ति। ननु मन्वादिभिः *देवताभ्यर्चनं चैव समिदाधानमेव च (मनु. २. १७६) इति नित्यकर्मतया स्मरणाद्देवतार्चनरूपो यज्ञस्सर्वेषामपि कर्मयोगिनामवश्यकर्तव्यः; स कथं विकल्प्यत इत्यत्राह—तत्रैव निष्ठां कुर्वन्तीत्यर्थ इति। ननु *ब्रह्मार्पणमित्यत्र श्लोके कश्चित्कर्मयोगभेदोऽभिहितः; अर्पणहवि-रग्न्यादिविशेषनिर्देशेनावान्तरभेदप्रतीतेः। तत्र च तेनेति कर्ताऽपि निर्दिष्टः; तत्प्रतियोगिकोऽयमपरशब्द इति किं नाङ्गीक्रियते? तदुच्यते—*ब्रह्मार्पणमितिश्लोको न कर्मयोगस्वरूपभेदविषयः; किंतु सर्वेषामपि कर्मयोगानां ब्रह्मात्मक-त्वानुसन्धानाख्यसाधारणगुणविषयः; तत्रैव ब्रह्मकर्मसमाधिनेति सामान्येनोक्तेः। अतोऽर्पणहविरादिग्रहणं तत्तत्कर्मयोग-भेदापेक्षिततत्तत्कारकविशेषोपलक्षणार्थम्। अत एव निवृत्तिलक्षणयज्ञप्रसङ्गात् *दैवमेवापरे इत्यादिभिः प्रवृत्तिलक्षण-यज्ञोक्तिरिति परोक्तं परास्तम्। *ब्रह्माग्नावपरे यज्ञमित्यत्र यज्ञस्वरूपस्य, परमात्मादेर्वा साक्षाद्द्योतव्यत्वहोमसाधनत्वा-नुपपत्तेर्यज्ञसाधनलक्षणया द्वितीयान्तयज्ञशब्दो हविर्विषयः; तृतीयान्तस्तु स्रुगादिविषय इत्याह—अत्रेति। ननु *ब्रह्माग्नौ ब्रह्मणा हुतम् (२४) इति पूर्वमेवोक्तम्, अत्रापि *ब्रह्माग्नावपरे इत्युच्यते, अतोऽत्र यज्ञं यज्ञेनेत्यनयोरर्थोऽन्यथा वर्णनीयः; इतरथा पौनरुक्त्यप्रसङ्गः; सर्वकर्मयोगसाधारणस्यार्थस्य विशेषतया निर्देशोऽप्यनुपपन्न इत्यत्राह—ब्रह्मार्पणं ब्रह्महविरिति न्यायेनेति। अत्र यज्ञशब्दाज्जुह्वतिशब्दाच्च यागहोमयोर्निष्ठाया एव विवक्षितत्वादवान्तरभेदत्व-

मपौनरुक्त्यं चोपपन्नमिति भावः । अत्राग्नित्वेन कल्पिते ब्रह्मणि यज्ञशब्दनिर्दिष्टं जीवमपूर्वं वा हविष्ट्वेन परिकल्प्य प्रक्षिपन्तीत्यादिपरव्याख्यानानि शब्दवृत्तिपरिक्लेशादेव निरस्तानि । कर्मप्रकरणाच्चात्र सर्वत्र मानसयज्ञत्वकल्पसिपक्षोऽप्ययुक्तः ॥ २५ ॥

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वति ॥ २६

भा ॥ अन्ये श्रोत्रादीनामिन्द्रियाणां संयमने प्रयतन्ते । अन्ये योगिनः इन्द्रियाणां शब्दादिविषयप्रवणतानिवारणे प्रयतन्ते ॥ २६ ॥

ता ॥ * श्रोत्रादीनीत्यत्र संयमस्य साक्षादग्नित्वाभावाच्छ्रोत्रादेश्च होतव्यत्वाभावात्तात्पर्यमाह—**अन्य** इति । संयमस्याग्नित्वं श्रोत्रादीनां निर्व्यापरत्वलक्षणभस्मसात्करणात् । नन्विन्द्रियनियमनमपि सर्वकर्मयोगिसाधारणं कथमत्र विशिष्योच्यत इत्यत्रोक्तम्—**संयमने प्रयतन्त** इति । एवमुत्तरत्रापि प्रयतन्त इत्यनयोस्तात्पर्यं ग्राह्यम् । तथा निष्ठाशब्देऽपि । अत्र प्रतीन्द्रियं संयमभेदात्संयमाग्निष्विति बहुवचनम् । * शब्दादीनित्यत्र इन्द्रियेषु शब्दादिविषयान् समर्पयन्तीति भ्रमव्युदासायाह—**इन्द्रियाणां शब्दादिविषयप्रवणतानिवारण** इति । इन्द्रियाणां नियमनं हि श्रोत्रादीनीत्यादिनोक्तम्; अत्र तु * इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः (कठ. १. ३. १०) इतिवद्विषयमनसोर्हि नियमनं क्रमेणोच्यते । विषयस्य नियमनं नाम दूरीकरणम्, तत्सन्निधिपरिहार इति यावत् । तत एवेन्द्रियाणां तत्प्रवणता निवर्तत इति भावः । कस्तर्हीन्द्रियाग्निषु शब्दादेर्होमो नाम? उच्यते—होमेन हविषो विनाशः क्रियते, तद्वदत्र शब्दादेरिन्द्रियेषु विनाशो नाम तत्संबन्धविनाशो विवक्षितः—इति । यद्वा श्रोत्रदीनीत्यत्र विषयसन्निधिपरिहारो विवक्षितः; इह तु सन्निहितानामपि विषयाणामकिञ्चित्करत्वापादनमिति विभागः । **विषयप्रवणतानिवारण** इत्यनेनात्यन्तसमस्तविषयनिवृत्तेर्दुष्करत्वान्निषिद्धादिभ्योऽत्यन्तनिवारणं धर्माविरुद्धेष्वतिसङ्गनिवृत्तिश्च विवक्षिता ॥ २६ ॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७

भा ॥ अन्ये ज्ञानदीपिते मनस्संयमयोगाग्नौ सर्वाणीन्द्रियकर्माणि प्राणकर्माणि च जुह्वति; मनस इन्द्रियप्राणकर्मप्रवणतानिवारणे प्रयतन्त इत्यर्थः ॥ २७ ॥

ता ॥ इन्द्रियार्थयोर्नियमने अभिहिते * अर्थेभ्यश्च परं मन इति क्रमेण मन एव नियन्तव्यतया वक्तव्यम्, अतोऽत्रात्मसंयमशब्देन मनोनियमनमुच्यत इति ज्ञापयति—**मनस्संयमयोगाग्नाविति** । मनस्संयम एव योगसाधनत्वादिना योगः; मनस्संयमस्य वा योगः—प्राप्त्यादिः; तस्य ज्ञानदीपितत्वं देहातिरिक्तशुद्धात्मस्वरूपानुसन्धानमूलत्वम् । श्रोत्रादीनां शब्दादीनामिव चात्र[पि] होतव्यतयोक्तानामिन्द्रियकर्मणां प्राणकर्मणां च नियमनमुच्यते चेत्पौनरुक्त्यादिदोषस्यादिति शङ्काव्युपासायाह—**मनस** इति । इन्द्रियकर्म—दर्शनस्पर्शनादिकं, वचनादानादिकं च; प्राणकर्म—उच्छ्वासनिश्वासादिकम् । यद्वा प्राणसंवादादिसिद्ध इन्द्रियव्यापारादिहेतुस्सूक्ष्मो व्यापारविशेषः । तेन वक्ष्यमाणप्राणायामाद्व्यवच्छेदः । अत्रापि प्रवणतानिवारणशब्दतात्पर्यं पूर्ववत् । श्रोत्रादीनां पूर्वमुपादानात्कर्मेन्द्रियमात्रनियमनपरो वाऽयं श्लोकः ॥ २७ ॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८

भा ॥ केचित्कर्मयोगिनो द्रव्ययज्ञाः—न्यायतो द्रव्याण्युपादाय देवतार्चने प्रयतन्ते, केचिच्च दानेषु, केचिच्च यागेषु, केचिच्च होमेषु, एते सर्वे द्रव्ययज्ञाः । केचित्तपोयज्ञाः कृच्छ्रचान्द्रायणोपवासादिषु निष्ठां कुर्वन्ति । योगयज्ञाश्चापरे पुण्यतीर्थपुण्यस्थानप्राप्तिषु निष्ठां कुर्वन्ति । इह योगशब्दः कर्मनिष्ठाभेदप्रकरणात्तद्विषयः । केचित्स्वाध्यायाभ्यासपराः । केचित्तदर्थज्ञानाभ्यासपराः । यतयः—यतनशीलाः, संशितव्रताः—दृढसङ्कल्पाः ॥ २८ ॥

ता ॥ प्रत्येकं यज्ञशब्दप्रयोगाद्बहुविधकर्मयोगभेदनिष्ठा उच्यन्ते । तत एवापरशब्दोऽपि प्रत्येकमन्वितः । तत्र द्रव्यैर्यज्ञा येषां ते द्रव्ययज्ञाः । यद्वा द्रव्यात्मका यज्ञा येषामिति विग्रहः । द्रव्यशब्दसामर्थ्यात्तत्साध्ययज्ञविशेषास्सर्वे संगृहीता इति देवतार्चनदानयागहोमाः पृथगुक्ताः । अतो द्रव्ययज्ञा इत्यादि बहुवचनमपि तत्तदवान्तरभेदविषयमिति भावः । ननु देवतार्चनयागादेः पूर्वमेवोक्तत्वान्निरर्थकं पुनर्वचनमितिचेन्न, द्रव्यशब्दस्य साधारणत्वेन दानस्यापि संग्रहात्, पूर्वं च तस्यानुक्तत्वेनापौनरुक्त्यात् । तर्हि दानयज्ञा इति विशिष्य वक्तव्यम् ; तदपि न, अर्चनदानयागहोमयज्ञानां चतुर्णामपि तपोयज्ञादिभ्यो व्यावृत्तावान्तरसंग्राहकसूचनार्थतया न्यायार्जितद्रव्यसाध्यत्वज्ञापनार्थतया च सामान्यशब्दोपयोगात् । तदेतदभिप्रेत्योक्तम्—**एते सर्वे द्रव्ययज्ञा** इति । यद्वा अर्चनादिस्वरूपस्य यज्ञत्वं प्रागुक्तम् ; इहतु तदर्थद्रव्यार्जनादेरेवेत्यभिप्रायेण **न्यायत** इत्यादि **प्रयतन्त** इत्यन्तमुक्तम् । तपः शास्त्रीयो भोगसङ्कोचः ; तदवान्तरभेदप्रदर्शनम् **कृच्छ्रे**त्यादि । * योगयज्ञाः इत्यत्र योगस्संयोगः, प्राप्तिरित्यर्थः । सा चात्र पुण्यतीर्थाद्यभिगमनतन्निवासादिरूपा विवक्षितेत्यभिप्रायेणाह—**पुण्यतीर्थे**ति । पुण्यस्थानशब्दोऽत्र देवतास्थानाश्रमजनपदविशेषादिसंग्राहकः । नन्विह योगशब्दः साक्षाद्योगे कर्मयोगमात्रे वा किं न वर्तत इत्यत्राह—**इहे**ति । कर्मनिष्ठाप्रकरणत्वात्साक्षाद्योगविषयत्वं न युक्तम् ; तद्भेदप्रकरणत्वात् तत्सामान्यविषयत्वं चानुचितम् ; तद्भेदेषु च पारिशेष्याद्योगशब्दसामर्थ्याच्च तीर्थादिप्राप्तिरेव ग्राह्या । सूचितं चैतत्**संग्रहे** 'परमाचार्यैः * कर्मयोगस्तपस्तीर्थदानयज्ञादिसेवनम् (२३) इतीति भावः । स्वाध्यायाभ्यासतदर्थज्ञानयोः पृथग्धर्मत्वेन पृथग्यज्ञ [त्वेन] त्वनिर्देशोपपत्तेः, द्वन्द्वस्य प्राधान्याच्च विभज्य निर्दिशति—**केचित्स्वाध्यायाभ्यासपरा** इति । स्वाध्याय [इति] सहपाठौचित्यादात्मज्ञानस्य च सर्वसाधारणत्वादर्थज्ञानस्यानुष्ठानेऽप्युपयोगात्—**केचित्तदर्थज्ञानाभ्यासपरा** इत्युक्तम् । परशब्दोऽत्र साधारण्यव्यवच्छेदाय तन्निष्ठतामाह । यतिशब्दस्यात्राश्रमविशेषपरत्वानौचित्यात्सर्वकर्मयोगनिष्ठसाधारणविशेषपरत्वौचित्याच्च प्रकृतिप्रत्ययार्थविभागेन निर्वक्ति—**यतनशीला** इति । सर्वप्रयोगानुगतः सर्वकर्मयोगनिष्ठसाधारणश्च सङ्कल्पोऽत्र व्रतशब्दार्थ इत्यभिप्रेत्य **दृढसङ्कल्पा** इत्युक्तम् । संशितत्वमत्राकुण्ठत्वम् । तच्च दृढत्वमेव ॥ २८ ॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।

भा ॥ अपरे कर्मयोगिनः प्राणायामेषु निष्ठां कुर्वन्ति । ते च त्रिविधाः पूरकरेचककुम्भकभेदेन ; अपाने जुह्वति प्राणमिति पूरकः, प्राणेऽपानमिति रेचकः, प्राणापानगती रुद्ध्वा .... प्राणान् प्राणेषु जुह्वति इति कुम्भकः । [सप्राणायामेषु] प्राणायामपरेषु त्रिष्वप्यनुषज्यते नियताहारा इति ॥ २९ ॥

ता ॥ * प्राणायामपरायणाः इत्यनेन वर्गत्रयस्य सामान्यसंग्रहः क्रियत इति व्यञ्जनाय—**प्राणायामेषु निष्ठां कुर्वन्ती**ति पृथग्वाक्यं कृतम् । प्राणायामनिष्ठानामवान्तरभेदज्ञापनाय **पूरके**त्यादिना प्राणायामावान्तरभेदप्रदर्शनम् । तत्तद्भेदप्रतिपादकांशं विविनक्ति—**अपान** इत्यादिना । ऊर्ध्वप्रवृत्तस्य प्राणस्य अधःप्रवेशनं हि पूरकः । ततश्च **अपाने जुह्वती**त्येतदुपचारादुपपन्नम् । एवमधःस्थितस्य वायोरूर्ध्वप्रवर्तनं हि रेचक इति **प्राणेऽपानमि**[त्यप्यु]त्युपचरितम् । वायोरूर्ध्वाधोगमननिवारणेनावस्थापनं कुम्भक इति **प्राणापानगती रुद्धे**त्यादेरभिप्रायः । प्राणान्—प्राणवृत्तिभेदानित्यर्थः । आहारनियमस्तु दृष्टादृष्टोपकारद्वारा सर्वप्राणायामसाधारणतया विहित इत्याह—**प्राणायामपरेषु त्रिष्वपी**ति ॥

सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३०
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।

भा ॥ [दैव]द्रव्ययज्ञप्रभृति प्राणायामपर्यन्तेषु कर्मयोगभेदेषु **स्वसमीहितेषु प्रवृत्ता एते सर्वे * सह यज्ञैः प्रजाः सृष्ट्वा** (३. १०) **इत्यभिहितमहायज्ञपूर्वकनित्यनैमित्तिककर्मरूपयज्ञविदः तन्निष्ठाः तत एव क्षपितकल्मषाः यज्ञशिष्टामृतेन शरीरधारणं कुर्वन्त एव कर्मयोगे व्यापृताः सनातनं ब्रह्म यान्ति** ॥

ता ॥ किमेतेषामुच्चावचकर्मयोग [भेद] निष्ठानामवान्तरफलभेदोऽस्ति, किं प्राणायाम[ादि]निष्ठानां यज्ञादिकं त्याज्यमिति शङ्काद्वयं निराक्रियते * सर्वेऽपीति श्लोकेन । **स्वसमीहितेष्वि**ति वचनादविशिष्टफलतया विकल्पे न्याय्ये तत्तत्सामर्थ्याद्यनुसारिणी स्वेच्छैव हि विशेषनियामिकेति सूचितम् । सामान्यस्य यज्ञशब्दस्य असङ्कोचप्रदर्शनाय **सहयज्ञै**रित्यादिकमुक्तम् । * यज्ञक्षपितकल्मषाः * यज्ञशिष्टामृतभुजः इत्याभ्यां * यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः (३. १३) इत्यादिप्रागुक्तप्रत्यभिज्ञानात्तत्प्रकरणे च यज्ञशिष्टाशनस्य शरीरयात्रार्थत्वप्रपञ्चनात् तत्स्मरणायोक्तम् **यज्ञशिष्टामृतेन शरीरधारणं कुर्वन्त एवे**ति । प्राणायामादिषु निष्ठावतामपि नित्यत्वादिना यज्ञादिकमवश्यकार्यमित्यपि सिद्धम् । एवकारेण नैवंविधशरीरधारणादिव्यापार आत्मावलोकनविरोधी, किंतूपयुक्त इत्यभिप्रेतम् । **व्यापृता** इति । अन्यथा व्यापार एवाशक्य इति भावः । * ब्रह्मैव तेन गन्तव्यम् (२४) इति पूर्वव्याख्याततुल्यार्थत्वादुपसंहारस्थं * सनातनं ब्रह्म यान्तीत्येतदव्याख्यातम् ॥

नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१

भा ॥ **अयज्ञस्य—महायज्ञादिपूर्वकनित्यनैमित्तिककर्मरहितस्य, नायं लोकः—न प्राकृतलोकः, प्राकृतलोकसंबन्धिधर्मार्थकामाख्यः पुरुषार्थो न सिध्यति । कुत इतोऽन्यो मोक्षाख्यः पुरुषार्थः ? परमपुरुषार्थतया मोक्षस्य प्रस्तुतत्वात्तदितरपुरुषार्थः अयं लोकः इति निर्दिश्यते ; स हि प्राकृतः** ॥ ३१ ॥

ता ॥ कर्मयोगावान्तरभेदनिष्ठत्वाभिमानेन सामान्यधर्मभूतनित्यनैमित्तिकादिपरित्यागिनः सकलपुरुषार्थानर्हतोच्यते—* नायमित्यर्धेन । **अयज्ञस्ये**ति व्याख्येयं पदम् । * नायं लोकः इत्यत्रायमिति निर्देशाभिप्रेतं दर्शयति—**न प्राकृतलोक** इति । लोकस्वरूपमात्रनिषेधभ्रमव्युदासायाह—**प्राकृतलोकसंबन्धी**ति । * अयं लोकः इति प्रत्यक्षसिद्धभूलोकपरत्वौचित्यात् * कुतोऽन्यः इतीदं स्वर्गादिपरं किं न स्यादित्याशङ्क्याह—**परमपुरुषार्थतये**ति । अयज्ञस्य मोक्षाभावे प्रतिपादिते हि तदर्थं तदुपादानं स्यादिति भावः । मोक्षव्यतिरिक्तदृष्टानुश्रविकपुरुषार्थवर्गत्रयस्यायं लोक इति

निर्देशहेतुभूतसाधारणोपाधिं प्रस्तुतपरमपुरुषार्थविरुद्धरूपत्वं च व्यञ्जयितुमाह—**स हि प्राकृत** इति । प्रकृतिपरिणामविशेषरूपत्वात्तत्संसृष्टस्य प्राप्यत्वाच्च प्राकृतत्वोक्तिः ॥ ३१ ॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२

एवं हि बहुप्रकाराः कर्मयोगाः ब्रह्मणो मुखे विततताः आत्मयाथात्म्यावाप्तिसाधनतया स्थिताः ; तान्—उक्तलक्षणानुक्तभेदान् कर्मयोगान्सर्वान्कर्मजान्विद्धि—अहरहरनुष्ठीयमाननित्यनैमित्तिककर्मजान् विद्धि । एवं ज्ञात्वा यथोक्तप्रकारेणानुष्ठाय मोक्ष्यसे ॥ ३२ ॥

ता ॥ एवं कर्मयोगावान्तरभेदानुपदिश्य तत्तद्भेदेऽपि साधारणानां नित्यनैमित्तिकानामवश्यानुष्ठेयत्वं तत्परित्यागे प्रत्यवायश्चाभिहितः ; अस्यैवार्थस्योपसंहारः क्रियते * एवमिति श्लोकेन । बहुप्रकारकर्मयोगभेदोपदेशानन्तरमेव * एवं बहुविधा यज्ञाः इति वचनं प्रकृतविषयमेव भवितुमर्हतीत्यभिप्रायेणाह—**एवं हि बहुप्रकाराः कर्मयोगा** इति । ब्रह्मशब्दोऽत्र यथावस्थितात्मविषयः, वेदादिपरत्वे प्रकृतौचित्याभावात् । मुखशब्दश्चोपायविषयः । आहुश्च नैघण्टुकाः * मुखं तु वदने मुख्ये ताम्रे द्वाराभ्युपाययोः इति । आत्मनः प्राप्त्युपाये कर्मयोगे अवान्तरभेदतया विततता इत्यर्थः । **तदाह—आत्मयाथात्म्येति** । तानिति निर्देशः प्रस्तुतसमस्ताकारपरामर्शी, **सर्वानिति** चाशेषावान्तरभेदसंग्रह इत्यभिप्रायेण **उक्तलक्षणानुक्तभेदानित्युक्तम्** । उभाभ्यां पदाभ्याम् एवंशब्दबहुविधशब्दयोरर्थोक्तिर्वा । अन्तर्भूतज्ञानतया ज्ञानाकारत्वमुक्तलक्षणत्वम् । उक्तलक्षणानिति वदताऽध्यायार्थतयाऽऽरम्भनिर्दिष्टेषु कर्मयोगस्वरूपाभिधानमपि कृतं भवतीति सूचितम् । * सर्वान्कर्मजान्विद्धीति पृथग्वचनात्प्राणायामादीनां प्राधान्यं नित्यनैमित्तिकादीनां तदर्थत्वं चाह—**अहरहरिति** । अनेन तस्याकरणे सर्वानर्हतया यावत्फलमनुष्ठेयत्वं प्रतिदिवसं पापहरणेनोत्तरोत्तरसत्त्वोन्मेषहेतुत्वेनात्यन्तोपयुक्तत्वं च सूचितम् ॥ ३२ ॥

भा ॥ अन्तर्गज्ञानतया कर्मणो ज्ञानकारत्वमुक्तम् ; तत्रान्तर्गतज्ञाने कर्मणि ज्ञानांशस्यैव प्राधान्यमाह—

श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३

भा ॥ उभयाकारे कर्मणि द्रव्यमयादंशात् ज्ञानमयोंऽशश्रेयान् ; सर्वस्य कर्मणस्तदितरस्य चाखिलस्योपादेयस्य ज्ञाने परिसमाप्तेः तदेव सर्वैस्साधनैः प्राप्यभूतं ज्ञानं कर्मान्तर्गतत्वेनाभ्यस्यते, तदेव [हि] अभ्यस्यमानं क्रमेण प्राप्यदशां प्रतिपद्यते ॥ ३३ ॥

ता ॥ * श्रेयानित्यादेराध्यायपरिसमाप्तेर्ज्ञानविषयस्यैकप्रघट्टकस्य सङ्गतिपूर्वकमर्थमाह—**अन्तर्गतेति** । अवान्तरभेदप्रतिपादनरूपावान्तरप्रकरणात्प्राचीनेन कर्मणो ज्ञानाकारत्वप्रतिपादकप्रघट्टकेनास्य साक्षात्सङ्गतिः । ननु द्रव्यमयाद्यज्ञात् ज्ञानयज्ञश्रेयानिति निर्दिष्टे सत्यात्मसाक्षात्कारान्तरङ्गज्ञानयोगप्राधान्यं ग्रहीतुमुचितम् ; * सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इत्यनेन कर्मफलस्य सर्वस्य ज्ञानेऽन्तर्भावश्च प्रतीयते ; * अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः (३६) * ज्ञानाग्निस्सर्वकर्माणि (३७), * योगसंन्यस्तकर्माणम् (४१) इत्यादिनिर्देशाश्चानन्तरभाविनः कर्मयोग-

विरोधिनः ; * न हि ज्ञानेन (३८) इति श्लोकोऽपि कर्मयोगात् ज्ञानयोगस्य पावनत्वातिरेकपर इति प्रतीयते ; * ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति (३९) इत्येतदपि ज्ञानयोगस्यान्तरङ्गतया शीघ्रकारित्वमितरस्य विलम्बितफलत्वं व्यनक्ति ; * येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि (३५) इति ज्ञानस्वरूपकथनमपि ज्ञानयोगत्वं द्रढयति ; न हि कर्मयोगान्तर्गतेन आत्मज्ञानेनैव सर्वं साक्षात्क्रियते ; * स्वाध्यायज्ञानयज्ञाश्च (२८) इत्यत्र च द्रव्ययज्ञादेः पृथक्त्वेन ज्ञानयज्ञो निर्दिष्टः ; अतो ज्ञानयोगप्रशंसाप्रकरणमिदमिति ग्राह्यमिति । अत्रोच्यते—* श्रेयान् द्रव्यमयाद्यज्ञात् इत्यत्र तावत् ज्ञानप्राधान्यमात्रम् ; न ज्ञानयोगविवक्षा वक्तुमुचिता, * कर्म ज्यायो ह्यकर्मणः (३. ८) इत्यादिषु सर्वत्र तद्विपरीतकर्मप्राधान्यस्यैव प्रपञ्चितत्वात् ; उत्तराध्यायेऽपि * तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते (५. २) इत्यादेर्वक्ष्यमाणत्वात्, मध्ये तद्विरुद्धार्थप्रतिपादनायोगात् ; अतोऽत्र ज्ञानयज्ञशब्दः कर्मयोगांशविषयः । * स्वाध्याय-ज्ञानयज्ञाश्च (४.२८) इत्यत्र तु स्वाध्यायार्थाभ्यासरूपज्ञानयज्ञपरत्वमुक्तम्, आत्मयाथात्म्यमपि स्वाध्यायार्थ इति तस्य चास्य च नातिप्रकर्षः । * तस्मादज्ञानसंभूतम् (४२) इत्यध्यायोपसंहारश्लोके च ज्ञानासिना संशयं छित्त्वा योगमातिष्ठोत्तिष्ठेति युद्धोत्साहविधानेन कर्मयोगस्तदन्तर्गतज्ञानं च व्यक्तं प्रतीयते ; न हि ज्ञानयोगस्य श्रेयस्तया युद्धार्थमुत्तिष्ठेति संगच्छते । * सर्वं कर्मेत्येतत्तु कर्मान्तर्गतज्ञानांशस्य प्राधान्यहेतुमात्रपरमेव, * अपि चेदसि (३६) * ज्ञानाग्निस्सर्वकर्माणि (३७) * नहि ज्ञानेन सदृशम् (३८) इत्यादेरपि न ज्ञानयोगैकान्त्यम्, ज्ञानांशस्य पापनिवर्तकत्वरूपप्रशंसापरत्वात् । * योगसंन्यस्तकर्माणम् (४१) इत्यत्रापि कर्मणः फलसङ्गादिराहित्यज्ञानाकारतापत्तिमात्रं विवक्षितम् । * ज्ञानं लब्ध्वा परां शान्तिम् (३९) इति श्लोके [तु] कर्मयोगान्तर्गतज्ञानांशस्य साक्षात्काररूपपरिपाकावस्थोच्यते, * तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति, (३८) * श्रद्धावान् लभते ज्ञानम् (३९) इत्यनन्तरमेव परिपाकावस्थाया विशदीकरणात् । एतेन * येन भूतान्यशेषेण द्रक्ष्यसि (३५) इत्येतदपि निर्व्यूढम् । तदेतदखिलमभिप्रेत्याह—**उभयाकार** इति । **कर्मणि** कर्मयोग इत्यर्थः । अनुष्ठेयपरो वाऽत्र कर्मशब्दः । **द्रव्यमयादंशादिति** । यज्ञशब्दोऽत्र यज्ञांशविषय इति भावः । सर्वाखिलशब्दयोरत्र विषयभेदादपौनरुक्त्यमाह—**तदितरस्येति** । कर्मेतरत्किमन्यदिहोपादेयम्? कथं च कर्मणस्तस्य ज्ञाने परिसमाप्तिः? इत्यत्राह **तदेवेति** । **सर्वैस्साधनैरिति**—तदितरोपादेयप्रदर्शनम् । **प्राप्यभूतमिति** तत्र तत्परिसमाप्तिज्ञापनम् । कर्मणस्तत्र परिसमाप्तिं विवृणोति—**तदेवाभ्यस्यमानमिति** । अवधारणेन साध्यसाधनभावोऽवस्थाभेदमात्रनिबन्धन इत्यभिप्रेतम् । एतेन कर्मणस्त्वान्त[र्गत]र्भूतज्ञाने परिसमाप्तिस्साक्षात्कारलक्षणसाध्यदशाविवक्षयेत्युक्तं भवति ॥ ३३

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४

तदात्मविषयं ज्ञानं * अविनाशि तु तद्विद्धि (२. १७) इत्यारभ्य * एषा तेऽभिहिता (२. ३९) इत्यन्तेन मयोपदिष्टम्। तद्युक्तकर्मणि वर्तमानस्त्वं विपाकानुगुणं कालेकाले प्रणिपातपरिप्रश्नसेवादिभिर्विशदाकारं ज्ञानिभ्यो विद्धि । साक्षात्कृतात्मस्वरूपास्तु ज्ञानिनः प्रणिपातादिभिस्सेविताः ज्ञानबुभुत्सया परितः पृच्छतस्तत्त्वाशयमालक्ष्य ज्ञानमुपदेक्ष्यन्ति ॥ ३४ ॥

ता ॥ उपदिष्टमेव ज्ञानं तत्तद्विपाकदशायां प्रतिक्षणवैशद्याय पुनःपुनर्ज्ञानिभ्यः श्रोतव्यमित्युच्यते * तद्विद्धीति श्लोकेन । **तदिति** परोक्षवन्निर्देशः प्रकरणप्रारम्भोक्तप्रकारपरामर्शीति व्यञ्जनाय **अविनाशीत्यादि मयोपदिष्टमित्यन्त-**

मुक्तम् । इतः पूर्वमनुपदिष्टस्य ज्ञानस्य कस्यचिच्छ्रोतव्यत्वं नात्रोच्यत इति भावः । **तद्युक्तकर्मणि वर्तमानस्त्वमिति** विपाकहेतुः । **विपाकानुगुणं कालेकाल** इति प्रश्नावसरः । अदृष्टद्वारा प्रणिपातादेर्विपाकानुगुण्यं [वा] विवक्षितम् । * गुरुमेवाभिगच्छेत् (मु. १. २. १२) इत्यादिविधिप्राप्तं चैतत् । प्रणिपातादेरितरेतरयोगो विवक्षित इति व्यञ्जनाय— **प्रणिपातपरिप्रश्नसेवाभिः** इति द्वन्द्वसमासेन व्याख्या । * स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् (वि. ६. ६. २) इत्यादीनि शास्त्राणि **कालेकाल** इति वीप्सया द्योतितानि । **विशदाकार**मिति पुनःश्रवणस्य नैष्फल्यपरिहारः । ननु किमिदानीं भगवता ज्ञानमविशदमुपदिष्टम्? किंवा बीभत्सुनाऽविशदेन ज्ञातम्, येनैतदुच्यते? इत्येतदपि **विपाकानुगुण**शब्देन परिहृतम्; विशदमेवोपदिष्टं भगवता, अवधानादिमांश्चार्जुनः, तथाऽप्यनादिकर्मोपार्जितैरनन्तैः पापकवाटैरन्तःकरणरूपस्य तत्त्वज्ञानप्रसरद्वारस्योपरुद्धत्वादिदानीं नातिवैशद्यं जायते; * पित्तघ्नमञ्जनमनाप्नुषि जातु नेत्रे नैव प्रभाभिरपि शङ्खसितत्वबुद्धिः (वै. स्त. १६) इतिवत् । यथावस्थितकर्मयोगनिरस्तेषु पापेषु विशदज्ञानार्हावस्था स्यात्, तदा च पूर्वोपदिष्टस्य सामान्यतो ज्ञातस्यार्थस्य ज्ञातांशसंवादायाज्ञातांशज्ञानाय विस्मृतप्रतिबोधनाय च पुनश्श्रवणं कार्यमिति । अयमर्थोऽनुगीतावृत्तान्तेन व्यक्तो भविष्यति । **ज्ञानिनः** अहं वा, अन्ये वेति भावः । * तत्त्वदर्शिन इति विशेषणं तेषामेतज्ज्ञानोपदेष्टृत्वाधिकारं सूचयतीति व्यञ्जनाय—**साक्षात्कृतात्मस्वरूपा** इत्युक्तम् । तत्त्वदर्शिभिरपि * नासंवत्सरवासिने प्रब्रूयात् न विनयादिरहिताय च वक्तव्यमित्यादिविधिप्रयुक्तविलम्बोऽनतिलङ्घनीय इ[त्या]त्यत्राह— **प्रणिपातादिभि**रिति । * तस्मै स विद्वानुपसन्नाय सम्यक् इत्युपक्रम्य * प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् (मु. १. २. १३) इति श्रुतेर्विधिपरत्वं च जानन्तस्ते तत्त्वदर्शित्वाद्यथावदुपदेक्ष्यन्तीति भावः । प्रकर्षेण नीचैः पतनं प्रणिपातः; प्रश्नपूर्वाङ्गभूतः प्रणामोपसंग्रह[ण]ादिर्विवक्षितः । परिप्रश्नः—स्वबुद्धिमत्तातिरेकगूहनेनाजानत इव साक्षात्प्रष्टव्यानभिधानेन तदनुबन्धिविषयः प्रश्नः । प्रतिवादिवत्कुयुक्तिभिः प्रत्यवस्थानं न कर्तव्यमिति भावः । सेवा तु भक्तिः, चिरानुवर्तनं वा ॥

भा ॥ आत्मयाथात्म्यविषयस्य ज्ञानस्य साक्षात्काररूपस्य लक्षणमाह—

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५

भा ॥ यत् ज्ञानं ज्ञात्वा पुनरेवं—दे[वा]द्याद्यात्माभिमानरूपं तत्कृतं ममताद्यास्पदं च मोहं न यास्यसि, येन च देवमनुष्या द्याकारेणानुसंहितानि सर्वाणि भूतानि स्वात्मन्येव द्रक्ष्यसि, यतस्त्वान्येषां च भूतानां प्रकृतिवियुक्तानां ज्ञानैकाकारतया साम्यम्, प्रकृतिसंसर्गदोषविनिर्मुक्तमात्मस्वरूपं सर्वं सममिति च वक्ष्यते * निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः (५. १९) इति । अथो मयि सर्वभूतान्यशेषेण द्रक्ष्यसि, मत्स्वरूपसाम्या[च]त् परिशुद्धस्य सर्वस्यात्मवस्तुनः; * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः (१४. २) इति हि वक्ष्यते; तथा * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति (मु. ३. १. ३१) इत्येवमादिषु नामरूपविनिर्मुक्तस्यात्मवस्तुनः परस्वरूपसाम्यमवगम्यते; अतः प्रकृतिविनिर्मुक्तं सर्वमात्मवस्तु परस्परं समं सर्वेश्वरेण च समम् ॥ ३५ ॥

ता ॥ कर्मान्तर्भूतस्यात्मयाथात्म्यज्ञानस्य विपाकानुगुणं कालेन वेदनीयस्य साक्षात्कारावस्थायाश्चिह्नं *यज्ज्ञात्वेत्यनेन श्लोकेनोच्यत इत्याह—**आत्मयाथात्म्ये**ति । एवमित्यस्यार्थो दे[वे]त्यादिनोक्तः । * अशेषेणेत्यस्य तात्पर्यार्थमाह—**देवमनुष्ये**त्यादि । तेन * विद्याविनयसंपन्ने (५. १८) इत्यादि वक्ष्यमाणं स्मारितम् । भूतशब्देनाचित्संसृष्ट-

क्षेत्रज्ञा विवक्षिताः । तेन देवाद्याकारानुसन्धाने हेतुर्दर्शितः । * आत्मन्यथो मयि इति सप्तम्योस्सामानाधिकरण्यभ्रमव्युदासाय—**स्वात्मन्येवेत्युक्तम्** । एवंविधस्य प्राकरणिकस्य साक्षात्कारस्य स्वात्मविषयत्वात् * अथो मयि इत्यनेन पृथग्भावसूचनाद्वक्ष्यमाणसमदर्शित्वविपाकक्रमाच्च व्यधिकरणतैवोचितेति भावः । **सर्वाणि भूतानि स्वात्मनि द्रक्ष्यसि**—प्रकृतिसंसर्गेण विषमतया प्रतिपन्नानि भूतानि परिशुद्धतया ज्ञाते स्वात्मनि निदर्शनभूते स्थालीपुलाकादिन्यायेन द्रक्ष्यसीत्यर्थः । आधाराधेयभावाद्यर्थान्तरभ्रमव्युदासाय प्रकृतार्थे हेतुमाह—**यतस्त्वेति** । **प्रकृतिवियुक्तानामिति** । औपाधिकवैषम्यविगमावस्थायामिति भावः । * पुमान्न देवो न नरः (वि. २.१३.९८) * नायं देवो न मर्त्यो वा इत्याद्यनुसारेणाह—**ज्ञानैकाकारतयेति** । स्वात्मनि सर्वानुसन्धानहेतुतयोक्तं साम्यं परस्ताद्वक्ष्यमाणत्वादिहानुक्तमित्यभिप्रायेणाह—**प्रकृतिसंसर्गेति** । **अथो मयीत्यादि** । मन्निदर्शनेन स्वात्मानं परांश्च द्रक्ष्यसीत्यर्थः । अनीश्वराणां कर्मवश्यानां कथमीश्वरनिदर्शनेनानुसन्धानमित्यत्राह—**मत्स्वरूपसाम्यात्परिशुद्धस्येति** । हेतुतयोक्तमीश्वरसा[म्य]धर्म्यमपि परस्ताद्वक्ष्यत इति नेहोक्तमित्याह—**इदमिति** । परिशुद्धात्मनः परमात्मसाम्ये श्रुतिरप्यस्तीत्याह—**तथेति** । पुण्यपापे विधूय निरञ्जनः—पुण्यपापविगमात्तत्कृतप्रकृतिसंसर्गतत्प्रयुक्तक्लेशादिरहितः । **नामरूपविनिर्मुक्तस्येतिपदेन** * तथा विद्वान्नामरूपाद्विमुक्तः (मु. ३.२.८) इति तत्रत्यं वाक्यान्तरमपि स्मारितम् । ईश्वरसाम्यस्य काचित्कताशङ्कां निरस्य श्रुतिस्मृतिसिद्धं हेतुं सङ्कलय्य दर्शयति—**अत** इति । एतेन श्रुत्यादिसिद्धमीश्वरसाम्यमपि जीवानां परस्परसाम्ये हेतुरित्यप्युक्तं भवति । एतेन क्षेत्रज्ञानां परस्परमीश्वरेण चैक्यमिहोच्यत इति वदन्तः प्रत्युक्ताः । ननु स्वात्मनि सर्वेश्वरे च सर्वेषामाधेयतया दर्शनमिह विधीयत इति प्रतीयते ; मैवं, स्वात्मनस्सर्वाधारत्वायोगात् । परमात्मपर्यन्तबुद्ध्योपपद्यत इति चेत्, न ; जीवसमाधेः प्रकरणार्थत्वात् । अतः स्वात्मनि परेषां दर्शनं सर्वसमानाकारानुसन्धानम् ॥ ३५ ॥

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६

भा ॥ यद्यपि सर्वेभ्यः पापेभ्यः पापकृत्तमोऽसि, सर्वं पूर्वार्जितं वृजिनरूपं समुद्रमात्मविषयज्ञानरूपप्लवेनैव संतरिष्यसि ॥ ३६ ॥

ता ॥ एवं ज्ञानांशस्य प्राधान्यं विपाकानुगुणं कालेकाले वेदनीयत्वं लक्षणं चोक्तम्, अथ तस्य विरोधिनिवर्तकत्वरूपं माहात्म्यमुच्यते—* अपिचेदितिश्लोकेन । चेच्छब्दपर्यायो यदिरपिश्च [संहतौ]सहितौ यद्विषयौ तद्विषयावत्रापिचेदित्येताविति व्यञ्जनाय **यद्यपीत्युक्तम्** । पापकृत्तमशब्दप्रतियोगित्वात्पापेभ्य इति शब्दः पापविशिष्टपुरुषविषयः, पापमात्रे वा हेतौ पञ्चमी । ज्ञानप्लवेन संतरिष्यसीत्यनयोस्सामर्थ्यात् **वृजिनरूपं समुद्रमिति** रूपितम् । समुद्रत्वानुगुणं सर्वशब्दोक्तमानन्त्यमनादिकालप्रवृत्ततयेत्याद्यभिप्रायेणाह—**पूर्वार्जितमिति** ॥ ३६ ॥

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७

भा ॥ सम्यक्प्रवृद्धोऽग्निरिन्धनसञ्चयमिवात्मयाथात्म्यज्ञानरूपोऽग्निर्जीवात्मगतमनादिकालप्रवृत्तानन्तकर्मसञ्चयं भस्मीकरोति ॥ ३७ ॥

ता ॥ नन्वेकस्य कथमनादिकालप्रवृत्तानन्तपापनिवर्तकत्वम्, * नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि (ब्र. कै. प्र. २६. ७०) इत्यादिवचनाच्च पापस्वरूपनिवर्तकत्वमनुपपन्नम्, केवलं विल[म्ब्य]म्बाय स्यादित्याशङ्क्योच्यते—*यथैधांसीति । समुद्रसंतरणदृष्टान्तः पुनःप्रवेशाविरोधी; काष्ठभस्मसात्करणदृष्टान्तेन तु पुनः कार्यकरत्वप्रसङ्गोऽपि प्रतिषिद्धः । भस्मसात्कुरुते—भस्मीभूतानि कुरुते, अकार्यकराणि कुरुत इत्यर्थः । समिद्ध इत्यत्र सर्वदहनयोग्यत्वायोपसर्गधात्वर्थयोर्व्यञ्जनम् **सम्यक्प्रवृद्ध** इति । एधांसीति बहुवचनमेकस्यानेकनिवर्तकत्वाभिप्रायमिति दर्शयति—**इन्धनसञ्चय**मिति । सर्वकर्माणीति वचनाद्विरोधित्वेन स्थितस्य सांसारिकपुण्यविशेषस्यापि निवर्तकत्वमवगतम् । * नाभुक्तमित्यादि त्वन्यपरम्, अन्यथा प्रायश्चित्तशास्त्राण्यपि कुप्येयुरिति भावः ॥ ३७ ॥

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८

भा ॥ यस्मादात्मज्ञानेन सदृशं पवित्रं शुद्धिकरमिह जगति वस्त्वन्तरं न विद्यते, तस्मादात्मज्ञानं सर्वपापं नाशयतीत्यर्थः । तत्—तथाविधं ज्ञानं यथोपदेशमहरहरनुष्ठीयमानज्ञानाकारकर्मयोगसंसिद्धः कालेन स्वात्मनि स्वयमेव लभते ॥ ३८ ॥

ता ॥ लोकदृष्टान्तेन दर्शितोऽर्थो वह्नेः पदार्थान्तरादृष्टदाहकत्ववत्पवित्रतमस्वभावत्वेनोपपाद्यते * न हीत्यर्धेन । तदाह—**यस्मा**दिति । **वस्त्वन्तर**मिति ज्ञानरहितकर्मपुण्यस्थानादिकम्, * क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः (या. स्मृ. ३. १.) इत्युक्तादीश्वरज्ञानादर्वाचीनेषु परिशुद्धात्मज्ञानतुल्यं पावनं नास्तीत्यर्थः । ननु इदानीं तथाविधज्ञानं कुर्यामिति साभिसन्धिकस्यापि तन्न जायते; अतस्तस्य पुरुषव्यापाराविषयत्वादविधेयत्वमिति शङ्का परिहियते—**तत्स्वय**मित्यर्धेन । तच्छब्देन विपाकावस्थं परामृश्यत इत्याह—**तथाविध**मिति **यथोपदेश**मिति । शास्त्रीयत्वमविकलत्वं कालेकाले वेदनीयत्वं च सूचितम् । तथाविधज्ञानस्य संस्कारप्राचुर्याद्विरोधिपापनिवर्तनाच्च स्वयमागमे हेतुः * योगसंसिद्धः इत्यनेनोच्यत इत्यभिप्रायेणाह—**ज्ञानाकारकर्मयोगसंसिद्ध** इति । पक्वकषायत्वलक्षणयोग्यतापन्न इत्यर्थः । स्वयंशब्देन तदानीमुपदेशनैरपेक्ष्यमुच्यत इत्यभिप्रायेणाह—**स्वयमेवे**ति । ज्ञानस्वरूपस्य साक्षात्स्वप्रयत्नागोचरत्वेऽपि तन्मूलभूतोक्ताकारकर्मयोगद्वारा तस्य विधेयत्वमुपपद्यत इति भावः । अत्र * आत्मनीति विषयसप्तमी, इदानीं तद्रहितेऽपीत्यभिप्रायेणाधिकरणा[र्थे]र्थत्वं वा, स्वात्मसाक्षिकमिति वा विवक्षितम् ॥ ३८ ॥

भा ॥ तदेव विस्पष्टमाह—

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९

भा ॥ एवमुपदेशात् ज्ञानं लब्ध्वा चोपदिष्टज्ञानवृद्धौ श्रद्धावान् तत्परः—तत्रैव नियतमनास्तदितरविषयात्संयतेन्द्रियोऽचिरेण कालेनोक्तलक्षणविपाकदशापन्नं ज्ञानं लभते, तथाविधं ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति—परं निर्वाणमाप्नोति ॥ ३९ ॥

ता ॥ पूर्वश्लोकार्धयोरनन्तरश्लोकार्धे व्युत्क्रमेण विवरणरूपे इत्यभिप्रायेणाह—**तदेव विस्पष्टमाहे**ति । श्रद्धावत्त्वादिकं स्वयं ज्ञानलाभे हेतुः; * अज्ञश्चाश्रद्दधानश्च (४.४०) इति वक्ष्यमाणत्वादत्रापि ज्ञश्रद्धावांश्चेति विवक्षितमिति **ज्ञापनार्थं**, तत्र दशाभेदव्यञ्जनार्थं, श्रद्धोत्पत्तिसिद्ध्यर्थं चोक्तम्—**उपदेशाज्ज्ञानं लब्धे**ति । **श्रद्धावान्** त्वरमाणः ।

*अश्रद्धधान इत्यत्र अत्वरमाणः इति हि व्याख्यास्यति । तदेव परमुपादेयतयाऽभिसन्ध्यास्पदं यस्य स तत्परः । तदाह—**तत्रैव नियतमना** इति । *अचिरेणेत्येतदुत्तरवाक्यस्थमपि *कालेन इत्येतत्सूचितविलम्बशङ्कापरिहारार्थमपेक्षितत्वात्पूर्वार्धेऽप्यन्वेतव्यमित्यभिप्रायेण **अचिरेण कालेनोक्तलक्षणेत्याद्युक्तम्** । भक्तियोगव्यवहितः प्रारब्धकर्मावसानभावी च मोक्षः कथमचिरेणेत्युच्येतेति भावः । *पूर्वं कालेन इति पदं द्वित्रदिनादिव्यवच्छेदार्थम् । *अचिरेणेति तु ज्ञानयोगदेहान्तरादिविलम्बनिषेधार्थमित्यविरोधः । शान्तिशब्दोऽत्रोपायस्य निश्शेषनिष्पन्नत्वात्र तदङ्गभूतशमविषय इति व्यञ्जनाय—**परं निर्वाणमाप्नोतीत्युक्तम्** । *स शान्तिमाप्नोति न कामकामी *स शान्तिमधिगच्छति *ब्रह्म निर्वाणमृच्छतीति द्वितीयाध्यायान्तिमश्लोकत्रयेऽपि फलदशाविषये शान्तिनिर्वाणशब्दौ समानविषयौ । तत्र मध्यमश्लोकस्थं *शान्तिमधिगच्छतीत्येतदत्रापि प्रत्यभिज्ञातम् । तत्पूर्वोत्तरश्लोकस्मारणायात्र—**आप्नोति**पदं **निर्वाण**पदं चोक्तम् ॥ ३९ ॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४०

भा ॥ अज्ञः—एवमुपदेशलब्धज्ञानरहितः, उपदिष्टज्ञानवृद्ध्युपाये चाश्रद्दधानः—अत्वरमाणः, उपदिष्टे च ज्ञाने संशयात्मा—संशयमनाः विनश्यति—विनष्टो भवति । अस्मिन्नुपदिष्टे आत्मयाथात्म्यविषये ज्ञाने संशयात्मनोऽयमपि प्राकृतो लोको नास्ति, न च परः, धर्मार्थकामरूपपुरुषार्थाश्च न सिध्यन्ति, कुतो मोक्ष इत्यर्थः ; शास्त्रीयकर्मसिद्धिरूपत्वात्सर्वेषां पुरुषार्थानाम्, शास्त्रीयकर्मजन्यसिद्धेश्च देहातिरिक्तात्मनिश्चयपूर्वकत्वात् । अतस्सुखलवभागित्वमात्मनि संशयात्मनो न संभवति ॥ ४० ॥

ता ॥ उक्त एवार्थो व्यतिरेकेण स्थाप्यते *अज्ञश्चेति श्लोकेन । **उपदेशलब्धज्ञानरहित** इति । पूर्वक्रमनिर्देशौचित्यादश्रद्धाहेत्वाकाङ्क्षणात्, संशयदशासमभिव्याहाराच्च अज्ञशब्दोऽत्र शास्त्रजन्यज्ञाननिवृत्तिपर इति भावः । संशयस्य पृथगभिहितत्वात् *अश्रद्दधानः इत्येतन्न विश्वासनिषेधपरम्, किं त्वाकाङ्क्षानिषेधपरम् ; प्रकृष्टाकाङ्क्षैव हि त्वरेत्यभिप्रायेण **अत्वरमाण** इत्युक्तम् । **संशयमना** इति—संशय्यतेऽनेनेति संशयः, संशयकारणं संशयहेतुभूतमना इत्यर्थः ; यद्वा संशये मनो यस्येति विग्रहः । नित्यस्यात्मनः पुरुषार्थशून्यत्वलक्षणस्य विनाशस्य पूर्वापरभावेन संतन्यमानस्य प्राचीनस्यैवानुवृत्तिप्रदर्शनाय प्रकृतिप्रत्ययार्थभेदविवक्षया **विनष्टो भवती**त्युक्तम् । *विनष्टा वा प्रनष्टा वा (रा. सु. १३. १७) इत्यादिषु प्रध्वंसव्यतिरिक्तविषये प्रयोगोऽप्यनेन सूचितः । विनश्यतीत्यस्य विवरणमुत्तरार्धम् । अयमपीत्यनेनायंशब्देन निर्दिष्टक्षुद्रतासूचनम् । *नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम (४. ३१) इतिवदत्रापि लोकशब्दः पुरुषार्थविषयः । कैमुतिकन्यायप्रदर्शनार्थं च *अयं लोक इत्युक्तम् । मोक्षप्रकरणत्वाच्चात्रायंशब्दपरशब्दयोर्न भौमदिव्यविषयत्वमुचितमित्यभिप्रायेणाह—**धर्मार्थे**ति । मोक्षोपायभूतार्थे संशयात्मनः कथं पुरुषार्थान्तरासिद्धिरित्यत्राह—**शास्त्रीये**ति । अस्तु तत्तच्छास्त्रैरेव तत्तत्सिद्धिः, किमनेन मोक्षोपयुक्तेनेत्यत्राह—**शास्त्रीयकर्मजन्यसिद्धेश्चे**ति । अयमभिप्रायः—न ह्यायुर्वेदादिवत्केवलमे[तद्दे]कदेहान्तर्भाविफलसाधनं कर्म तत्तच्छास्त्रैः प्रतिपाद्यते, येन देहातिरिक्तात्मज्ञाननिरपेक्षता स्यात् ; देहान्तरभाव्येव हि यज्ञादिसाध्यं स्वर्गादिकं फलं प्राचुर्येण प्रतिपाद्यते ; अतो देहातिरिक्तात्मनिश्चयोऽत्यन्तापेक्षितः—इति । उभयविधपुरुषार्थराहित्योपसंहारपरं *न सुखमित्येतदिति व्यञ्जनायाह—**अत** इति । यद्वाऽनन्तसुखदुःखभोगरूपनिश्श्रेयसनिरयपर्यन्तसंशयस्य मनस्तापहेतुत्वात्तदानीन्तनदुःखाभिप्रायेण *न सुखमित्युक्तम् । **अथवा पुरुषार्थयोग्यताभिमानमूलसुखाभावोऽभिप्रेतः ॥ ४० ॥**

योगसंन्यस्तकर्माणं ज्ञानसंच्छिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥ ४१

भा ॥ यथोपदिष्टयोगेन संन्यस्तकर्माणम्—ज्ञानाकरतापन्नकर्माणं यथोपदिष्टेन चात्मज्ञानेनात्मनि संच्छिन्नसंशयम्, आत्मवन्तम्—मनस्विनम् उपदिष्टार्थे दृढावस्थितमनसं बन्धहेतुभूतप्राचीनानन्तकर्माणि न निबध्नन्ति ॥ ४१ ॥

ता ॥ अध्यायप्रधानार्थ उपसंहियते *योगसंन्यस्तेति श्लोकेन । **यथोपदिष्टयोगेने**ति * कर्मण्यकर्म यः पश्येत् (१८) इत्यादिनोपदिष्टबुद्धियोगेनेत्यर्थः । एतेनात्मावलोकनरूपयोगव्युदासः । संन्यस्तकर्माणमित्यत्र कर्मस्वरूपत्यागभ्रमव्युदासाय **ज्ञानाकारतापन्नकर्माण**मित्युक्तम् । कर्तृत्वादित्यागगर्भज्ञानाकारतापत्त्या कर्माकारत्वतिरस्कारोऽत्र कर्मणस्संन्यासशब्देनोपचर्यते । स्वरूपत्यागपरत्वे तु पूर्वापरादिविरोध इति भावः । ज्ञानयोगादिव्युदासाय **यथोपदिष्टेन चात्मज्ञानेने**त्युक्तम् । आत्मनो देहातिरिक्तत्वादिसंशयो ह्यत्र निषिध्यत इति व्यञ्जनाय **आत्मनी**त्युक्तम् । *आत्मवन्तमित्यत्रात्मशब्दः संबन्धविषयप्रत्ययसामर्थ्यात्प्रयोगप्रौढ्या च मनोविषय इत्यभिप्रायेण **मनस्विन**मित्युक्तम् । अतिशयेन संबन्धोऽत्र मतुबर्थः ; स चातिशयः केनाप्यविचाल्यत्वमिति द्योतनायोक्तम्—**उपदिष्टार्थे दृढावस्थितमनस**मिति । परमप्रयोजनोपसंहाररूपत्वव्यञ्जनाय **बन्धहेतुभूते**त्यादिकमुक्तम् ॥ ४१ ॥

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु **ज्ञानयोगो** नाम चतुर्थोऽध्यायः ॥ ४ ॥

भा ॥ तस्मादनाद्यज्ञानसंभूतं हृत्स्थम् आत्मविषयं संशयं मयोपदिष्टेनात्मज्ञानासिना छित्त्वा मयोपदिष्टं कर्मयोगमातिष्ठ ; तदर्थमुत्तिष्ठ भारतेति ॥ ४२ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये चतुर्थोऽध्यायः ॥ ४ ॥

ता ॥ एवं विस्तरेणोपपाद्योपसंहृतोऽर्थोऽर्जुनं प्रति कर्तव्यतया निगम्यते—*तस्मादिति श्लोकेन । संशयस्याज्ञानसंभूतत्वं विशेषाग्रहस्य संशयहेतुत्वात् । **हृत्स्थं**—हृदि शल्यमिवार्पितम्, यद्वा हृत्स्थमित्य[स्य]न्तरमिति भावः । *आत्मनः इति षष्ठ्या विषयविषयित्वलक्षणसंबन्धविशेषे पर्यवसानमत्र विवक्षितमिति द्योतनाय **आत्मविषयं संशय**मित्युक्तम् । यद्वा *एनं संशयमिति निर्देशादात्मविषयत्वं सिद्धम् ; *आत्मनः इत्यस्य तु *ज्ञानासिना इत्यनेनान्वयाय **आत्मज्ञानासिने**त्युक्तम् । काकाक्षिन्यायेन उभयत्र वाऽन्वयः । **मये**त्यनेनोपदेष्टुस्सर्वज्ञत्वकारुणिकत्वादिपौष्कल्यादाप्ततमत्वं विवक्षितम् । कर्मयोगोपदेशोपसंहारतया योगशब्दोऽत्र नेतरविषय इति ज्ञापनाय **मयोपदिष्टं कर्मयोग**मित्युक्तम् । भरतकुलसंभूतार्जुनस्य स्वधर्मभूतयुद्धार्थमुत्थानमेव कर्मयोगार्थमुत्थानमिति भारतशब्दाभिप्रायव्यञ्जनाय **तदर्थमुत्तिष्ठ भारते**त्युक्तम् । तेनैव मोक्षोपाययोग्यत्वाय योगिवंशप्रसूतत्वमप्यर्जुनस्य सूच्यते ॥ ४२ ॥

॥ इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां चतुर्थोऽध्यायः ॥ ४ ॥

॥ अथ पञ्चमोऽध्यायः ॥ ५ ॥

भा ॥ चतुर्थेऽध्याये कर्मयोगस्य ज्ञानाकारतापूर्वकस्वरूपभेदो ज्ञानांशस्य च प्राधान्यमुक्तम् ; ज्ञानयोगाधिकारिणोऽपि कर्मयोगस्यान्तर्गतात्मज्ञानत्वादप्रमादत्वात्सुकरत्वाच्चिरपेक्षत्वाच्च ज्यायस्त्वं तृतीय एवोक्तम् । इदानीं कर्मयोगस्यात्मप्राप्तिसाधनत्वे ज्ञाननिष्ठायाश्शैघ्र्यं कर्मयोगान्तर्गतकर्तृत्वानुसन्धानप्रकारं च प्रतिपाद्य तन्मूलं ज्ञानं च विशोध्यते ॥

अर्जुन उवाच—

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १

भा ॥ कर्मणां संन्यासं—ज्ञानयोगं पुनः कर्मयोगं च शंससि । एतदुक्तं भवति—द्वितीयेऽध्याये मुमुक्षोः प्रथमं कर्मयोग एव कार्यः, कर्मयोगेन मृदितान्तःकरणकषायस्य ज्ञानयोगेनात्मदर्शनं कार्यमिति प्रतिपाद्य, पुनस्तृतीयचतुर्थयोर्ज्ञानयोगाधिकारदशापन्नस्यापि कर्मनिष्ठैव ज्यायसी, सैव ज्ञाननिष्ठानिरपेक्षा आत्मप्राप्तौ साधनमिति कर्मनिष्ठां प्रशंससि—इति । तत्रैतयोर्ज्ञानयोगकर्मयोगयोरात्मप्राप्तिसाधनभावे यदेकं सौकर्याच्छैघ्र्याच्च श्रेयः—श्रेष्ठमिति सुनिश्चितम्, तन्मे ब्रूहि ॥ १ ॥

ता ॥ अथ पञ्चमस्यांशतस्तृतीयचतुर्थाभ्यां सङ्गतिप्रदर्शनायोक्तानुक्तांशविवेकेन पञ्चमस्यानुक्तांशे तात्पर्यप्रदर्शनाय चाह—**चतुर्थेऽध्याय** इति । **कर्मयोगस्य ज्ञानाकारते**त्यादिकं चतुर्थाध्यायप्रधानार्थोऽयमिति द्योतनार्थम्, सङ्गतिप्रदेशप्रदर्शनार्थं च । **तृतीय एवे**ति । कर्तव्यतोपदेशलक्षण एवेत्यर्थः । पञ्चमार्थमाह—**इदानी**मिति । अत्रैवं **संग्रहश्लोकः**—*कर्मयोगस्य सौकर्यं शैघ्र्यं काश्चन तद्विधाः । ब्रह्मज्ञानप्रकारश्च पञ्चमाध्याय उच्यते ॥ (९) इति । अत्र *सौकर्यं शैघ्र्यमिति संगृहीतत्वेऽपि भाष्ये शैघ्र्यमात्रवचनं सौकर्यस्य तृतीयाध्यायोक्तस्यैवानुवादः पञ्चमे शैघ्र्यौपयिकतया क्रियत इति ज्ञापनार्थम्, शैघ्र्यं तु तत्रानुक्तत्वादत्र साक्षात्प्रतिपाद्यम् । *काश्चन तद्विधाः, ब्रह्मज्ञानप्रकारश्च इत्युभयोर्व्याख्यानरूपेण **कर्मयोगे**त्यादिना तृतीयचतुर्थाभ्यामंशतस्सङ्गतिरुक्ता भवति । **ज्ञाननिष्ठाया** इति पञ्चमी । तत्र **प्रकार**शब्देन **विशोध्यत** इति वचनाच्चानुक्तांशतात्पर्येणापौनरुक्त्यं दर्शितम् । **तन्मूलं ज्ञान**मिति विपाकदशापन्नज्ञानं विवक्षितम् । अथ *तद्विद्धि प्रणिपातेन (४. ३४) इत्येतदनुसन्दधानोऽनुक्तमपेक्षितमंशं संजिज्ञासुरुक्तमेवार्थं परिपृच्छन्नर्जुन उवाच—*संन्यासमिति । संन्यासयोगशब्दावत्र प्रकृतवक्ष्यमाणसाङ्ख्ययोगविषयतया नार्थान्तरपरावित्यभिप्रायेणाह—**कर्मणां संन्यासं ज्ञानयोग**मिति । कर्मणामित्येतदुभयान्वितम् । ननु कर्मयोगस्य त्याज्यत्वं क्वचिदपि नोक्तम् ; प्रत्युत तदेवोपादेयतया प्रपञ्चितम् ; न च ज्ञानयोगस्य प्रशंसा कापि कृता ; येन *संन्यासं....योगं च शंससीत्युच्यते । उभयोः प्रशंसने कृतेऽपि विकल्प इत्येव मन्तव्यम्, न पुनरन्यतराधिक्यप्रभावकाश इत्यत्राह—**एतदुक्त**मिति । **प्रतिपाद्येत्यन्तेन** *संन्यासं कर्मणामित्यस्याभिप्रायो विवृतः । कषायनिवृत्त्यर्थः कर्मयोगः । तन्निवृत्तौ कर्मयोगं परित्यज्य ज्ञानयोग उपादेयः ; अतो ज्ञानयोग एवात्मदर्शने साक्षात्साधनमिति द्वितीये प्रतिपादितमिति भावः । **पूर्वं संन्यस्तस्य पुनर्योगं** शंससीति भ्रमव्युदासाय *शंससीत्यनेन पुनश्शब्दान्वयमाह—**तृतीयचतुर्थयो**रिति । **द्वितीय इत्येतत्तृतीयचतुर्थयोरित्येतच्च** भाष्यकारैस्स्वानुसन्धानेनोक्तम्, न पुनरर्जुनवाक्यानुकारः । अत्र मृदितकषायस्य कर्मयोग-

स्त्याज्यश्चेत्कथमुपादेयः, ज्ञानयोगस्य दर्शनसाधनत्वे कथमव्यवधानेन तत्संभव इति भावः । * कर्म ज्यायो ह्यकर्मणः (३. ८.) इति ज्यायस्त्वेन [कथनात्प्र]शंसनमित्यभिप्रायेणाह—**प्रशंससीति** । **तत्रेति** द्वयोरप्यव्यवहितसाधनत्वे विवक्षिते इत्यर्थः । **एतयोरित्यत्र** निर्धारितान्यतरविषय एकशब्दः । तत्र सामान्याकारविवक्षया नपुंसकत्वम्, श्रेयश्शब्दविशेषणतया वा । **सौकर्याच्छैघ्र्याच्चेति** फलस्यैकत्वात्तन्निबन्धनं श्रैष्ठ्यमिहायुक्तमिति भावः । श्रेयस्सुनिश्चितमित्यन्वयः । श्रेयस्त्वेन सुनिश्चितमित्यर्थः । क्रियाविशेषणत्वं तु निरर्थकमित्यभिप्रायेणाह—**श्रेष्ठमिति सुनिश्चितमिति** । श्रेयश्शब्दस्य फलादिष्वपि प्रयोगप्राचुर्यात्तद्व्युदासाय तारतम्यप्रश्नानुगुण्येन प्रकृतिप्रत्ययार्थव्यञ्जनाय श्रेष्ठशब्देन व्याख्यातम् । अत्रैकफलसाधनत्वाद्विकल्पे प्राप्ते सौकर्यादिगुणयोगाच्छ्रेयस्त्वोक्तिः ॥ १ ॥

श्रीभगवानुवाच—

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥ २

भा ॥ संन्यासो ज्ञानयोगः कर्मयोगश्च ज्ञानयोगशक्तस्याप्युभौ निरपेक्षौ निःश्रेयसकरौ । तयोस्तु कर्मसंन्यासात्—ज्ञानयोगात् कर्मयोग एव विशिष्यते ॥ २ ॥

ता ॥ अथ सद्वारकत्वाभिधानस्य अधिकारिविशेषनियततया द्वयोरप्यव्यवहितसाधनत्वमुपपादयंस्तत एव मृदितकषायस्यापि सौकर्यशैघ्र्यसङ्गिनस्तस्यैव कर्तव्यतां च द्रढयन्भगवानुवाच—*संन्यास इति । ज्ञानयोगाशक्तस्य कर्मयोगसापेक्षत्वात्तच्छक्तस्यैव निरपेक्षसाधनत्वोक्तिरुपपन्नेत्यभिप्रायेणाह—**ज्ञानयोगशक्तस्यापीति** । * उभौ निःश्रेयसकरावित्येतत्सामर्थ्यात् * एकमप्यास्थितस्सम्यगुभयोर्विन्दते फलम् (४) इति वक्ष्यमाणानुसन्धानाच्च **निरपेक्षाविति**युक्तम् । चकारेणाप्येतदेव व्यज्यते । अन्वाचयेतरेतरयोगसमाहारा हि पृथक्फलसाधनत्वप्रकरणविरुद्धाः । अतः पृथक्त्वातन्त्र्यगर्भस्समुच्चय एवात्र चार्थः । तर्हि द्वावप्यनियमेन यथेच्छमुपादेयौ, कर्मयोगस्य तु किमर्थं प्रशंसेति शङ्काव्युदासाय तुशब्दः । तदभिप्रायव्यञ्जनार्थमेवकारः ॥ २ ॥

भा ॥ कुत इत्यत्राह—

ज्ञेयस्स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३

यः कर्मयोगी तदन्तर्गतात्मानुभवतृप्तस्तद्व्यतिरिक्तं किमपि न काङ्क्षति, तत एव किमपि न द्वेष्टि, तत एव द्वन्द्वसहश्च ; स नित्यसंन्यासी—नित्यज्ञाननिष्ठ इति ज्ञेयः । स हि सुकरकर्मयोगनिष्ठतया सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

ता ॥ द्वयोः श्रेयस्साधनत्वाविशेषे[ऽपि] कर्मयोग एव विशिष्यत इति प्रतिज्ञामात्रम् ; तत्र हेत्वाकाङ्क्षायां सौकर्यास्त्यं हेतुमाहेत्याह—**कुत इत्यत्राहेति** । * ज्ञेयः इति श्लोकः * नित्यसंन्यासी इत्येतावता ज्ञानयोगनिष्ठविषय इति न मन्तव्यम्, * कर्मयोगो विशिष्यते इति प्रतिज्ञाय ज्ञानयोगनिष्ठस्य सुखेन मोक्षोक्तेरसङ्गतत्वात्, * संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः (६) इति वक्ष्यमाणविरोधाच्च । अतः कर्मयोगनिष्ठस्यैव प्रशंसेयमित्यभिप्रायेणाह—**यः कर्मयोगीति** । काङ्क्षाया बाह्यमात्रविषयत्वव्यञ्जनार्थं तद्धेयत्वार्थं च **तदन्तर्गतात्मानुभवतृप्त** इत्युक्तम् । काङ्क्षा हि

प्रतिहन्यमाना द्वेषहेतुरित्यभिप्रायेण **तत एव किमपि न द्वेष्टी**ति व्युत्क्रमेण व्याख्यातम् । द्वन्द्वस्वरूपनिवृत्तिव्युदासाय द्वन्द्वसहशब्दः । **तत एव द्वन्द्वसहश्चे**ति । रागद्वेषवतो द्वन्द्वतितिक्षा न शक्येति भावः । नित्यसंन्यासित्वे हिशब्दस्य हेतुपरत्वव्यञ्जनाय **स हीत्युक्तम्** । सुखशब्दोऽत्र सौकर्यपर इत्याह—**सुकरकर्मयोगनिष्ठतये**ति ॥ ३ ॥

भा ॥ ज्ञानयोगकर्मयोगयोरात्मप्राप्तिसाधनभावेऽन्योन्यनैरपेक्ष्यमाह—

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितस्सम्यगुभयोर्विन्दते फलम् ॥ ४

भा ॥ ज्ञानयोगकर्मयोगौ फलभेदात्पृथग्भूतौ ये प्रवदन्ति, ते बालाः—अनिष्पन्नज्ञानाः ; न पण्डिताः—अकृत्स्नविदः । कर्मयोगो ज्ञानयोगमेव साधयति ; ज्ञानयोग[एक एव]स्त्वेक आत्मावलोकनं साधयतीति तयोः फलभेदेन पृथक्त्वं वदन्तो न पण्डिता इत्यर्थः । उभयोरात्मावलोकनैकफलयोरेकफलत्वेन एकमप्यास्थितस्तदेव फलं लभते ॥ ४ ॥

ता ॥ निःश्रेयसकरावुभौ (२) इत्यभिप्रेतं विवृणोतीत्यभिप्रायेणाह—**ज्ञानयोगकर्मयोगयो**रिति । अत्र सांख्ययोगशब्दौ न कापिलहैरण्यगर्भसिद्धान्तविषयौ, तयोरप्रस्तुतत्वात्, महाप्रकरणासङ्गतत्वात्, * तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते (२) * संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः (६) इत्यादिपूर्वोत्तरविरोधात्, **शारीरकसूत्रेषु च** * रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च (२.२.१) * एतेन योगः प्रत्युक्तः (२.१.३) इत्यादिभिस्सूत्रैस्तयोरपि सिद्धान्तयोः महर्षिणैवापाकरणात् ; * बहवः पुरुषा राजन् सांख्ययोगविचारिणः । नैत इच्छन्ति पुरुषमेकं कुरुकुलोद्वह ॥ (भा. मो. ३५१. २) * समासेन तु तद्व्यासः पुरुषैकात्म्यमुक्तवान् (भा. मो. ३५१. ७) इति **मोक्षधर्मे** तयोर्विरुद्धांशवचनाच्च । अतस्संख्यया बुद्ध्याऽवधारणीयमात्मतत्त्वं सांख्यम्, तदवधारणरूपं सांख्यम्, योगश्चात्र कर्मयोग इत्यभिप्रायेण ज्ञानयोगकर्मयोगशब्दोपादानम् । * पृथग्बालाः प्रवदन्तीति न स्वरूपपृथक्त्वं निषिध्यते, तस्य प्रामाणिकत्वात् । न च तत्समुच्चयविधानपरमिदम्, * एकमप्यास्थितस्सम्यगुभयोर्विन्दते फलम्, * यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते (५), * संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः (६) इत्यादिभिः पृथगनुष्ठानस्यैव सिद्धत्वात् । अतः फलैक्यस्य * एकमप्यास्थितः इत्यादिना विधानात्, अत्र फलभेदकृतभेदनिषेधे तात्पर्यमित्याह—**फलभेदात्पृथग्भूतौ**ति । अस्य वाक्यस्य पृथक्फलवादिनां निन्दारूपत्वात्, **ये प्रवदन्ति ते बाला** इति बालत्वस्योपादेयतया वचनव्यक्तिर्दर्शिता । उत्तरश्लोकेऽप्येकफल[त्व]वादिप्रशंसायां * यः पश्यति (५) इत्यनूद्य * स पश्यतीति हि विधीयते । बालशब्दस्यात्र मुख्यायोगादुपचरितमाह—**अनिष्पन्नज्ञाना** इति । अपक्वयौक्तिकज्ञानेष्वपक्वपर्यायशब्दोपचारः, बालसाम्याद्वा बालाः । * न पण्डिताः इत्यत्र अशास्त्रीयानुष्ठानपर्यन्ताज्ञानव्युदासायोक्तम्—**अकृत्स्नविद** इति । * तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य (बृ.५.५.९) इत्यादिप्रसिद्धं सदाचार्यप्रसादैकसमधिगम्यार्थविषयं ज्ञानमिह पाण्डित्यम् ; अतो बालाः इत्युक्तेऽपि तदभावोक्तिर्न पुनरुच्यत इति भावः । फलादिभेदभ्रमप्रकारं * न पण्डिताः इत्यस्यापि * बालाः **इतिवद्विधिविषयत्वं** च दर्शयति—**कर्मयोग** इति । **ज्ञानयोगमेवे**ति । न तु कस्मिन्नप्यधिकारिणि साक्षादात्मावलोकनमित्यर्थः । ये तु * ये बालास्त एवं वदन्ति, ये पण्डितास्ते तु न इति वचनव्यक्तिमाहुः ; तेषामप्ययमेवार्थः फलतोऽङ्गीकार्यः । उभयोः फलमेकेन कथं लभ्यमित्यत्राह—**उभयो**रिति । निर्धारणे षष्ठी ; एकशब्दश्चान्यतरपर्यायः ; द्वयोरपि **तुल्यफलत्वादन्यतरास्थानेऽपि** तत्फलं सिध्यतीत्यर्थः ॥ ४ ॥

भा ॥ एतदेव विवृणोति—

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५

भा ॥ सांख्यैः—ज्ञाननिष्ठैः । यदात्मावलोकनरूपं फलं प्राप्यते ; तदेव कर्मयोगनिष्ठैरपि प्राप्यते । एवमेकफलत्वेनैकं—वैकल्पिकं सांख्यं योगं च यः पश्यति, स पश्यति—स एव पण्डित इत्यर्थः ॥ ५ ॥

ता ॥ भिन्नफलत्वेन पृथक्त्वाभिधायिनां निन्दा कृता ; अथैकफलत्वेनैक्याभिधायिनां प्रशंसनं क्रियत इत्यभिप्रायेणाह—**एतदेव विवृणोतीति** । * सांख्यैरित्यत्र सिद्धान्तविशेषनिष्ठभ्रमव्युदासायाह—**ज्ञाननिष्ठैरिति** । सांख्यमात्मज्ञानशास्त्रं तद्वेदिन इह सांख्याः ; यद्वा संख्या बुद्धिः, ज्ञानयोगः ; तन्निष्ठास्सांख्याः ; अथवा सांख्य आत्मा, तद्वेदिनोऽपि साङ्ख्याः । स्थानशब्दोऽत्र * विन्दते फलमितिवत्फलविषयः, न तु देशविशेषविषयः, ज्ञानयोगादिमात्रप्राप्यदेशविशेषाभावात् । तच्च फलं पूर्वोत्तरानुवृत्तमात्मावलोकनमित्यभिप्रायेण **यदात्मावलोकनरूपं फलमित्युक्तम्** । अत्र * यदेव साङ्ख्याः पश्यन्तीति **यादवप्रकाशोक्तः** पाठोऽप्रसिद्धत्वादनादृतः । * योगैरित्येतल्लक्षणया वा प्रत्ययविशेषाद्वा तन्निष्ठविषयमिति व्यञ्जनाय **कर्मयोगनिष्ठैरित्युक्तम्** । अत्र सांख्ययोगशब्दौ नोपायपरौ, बहुवचनानौचित्यादिति भावः । * एकमित्युक्ते[:] एकशास्त्रार्थत्वादिभ्रमव्युदासायाह—**एवमेकफलत्वेने**ति । अङ्गाङ्गिभावेतरेतरयोगरहितयोरुपाययोरेकफलत्वलक्षणं ह्यैक्यमनुष्ठाने विकल्पाय स्यात् । तथा च सूत्रम्—* विकल्पोऽविशिष्टफलत्वात् (ब्र. ३. ३. ५७) इति । तदाह—**वैकल्पिक**मिति । * स पश्यतीत्येतत् * न पण्डिताः (४) इत्येतत्प्रतिरू[पमिति]पं दर्शयति—**स एव पण्डित** इति ॥ ५ ॥

भा ॥ इयान् विशेष इत्याह—

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६

भा ॥ संन्यासः—ज्ञानयोगस्तु अयोगतः—कर्मयोगादृते प्राप्तुमशक्यः ; योगयुक्तः—कर्मयोगयुक्तः स्वयमेव मुनिः—आत्ममननशीलः सुखेन कर्मयोगं साधयित्वा नचिरेण—अल्पेनैव कालेन ब्रह्माधिगच्छति—आत्मानं प्राप्नोति । ज्ञानयोगयुक्तस्तु महता दुःखेन ज्ञानयोगं साधयति ; दुःखसाध्यत्वादात्मानं चिरेण प्राप्नोतीत्यर्थः ॥ ६ ॥

ता ॥ ननु * कर्मयोगो विशिष्यते (२) इति वचनम्, अत्र वैकल्पिकत्ववचनं च कथमुपपद्यते, अत्यन्ततुल्यत्वे हि विकल्प इति शङ्कायां सौकर्यशैघ्र्याभ्यां वैशिष्ट्यम्, फलस्यात्यन्ततुल्यतया च विकल्पः ; अधिकारिभेदप्रतिनियतत्वाच्च न दुष्करविलम्बितोपायनैरर्थक्यमित्यभिप्रायेण वैषम्यमुच्यत इत्याह—**इयान् विशेष इत्याहे**ति । **तु**शब्दोऽन्योन्यवैषम्यपरः ; * अयोगतः इत्यनेन कर्मयोगमन्तरेण ज्ञानयोगस्वरूपमेव न सिध्यतीत्यभिप्रेतम् ; तदाह—**कर्मयोगादृत** इति । * शक्यमञ्जलिभिः पातुं वाताः (रा. कि. २८. ८) इत्यादिवद्दुःखशब्दस्यात्र नपुंसकत्वम् । मुनिशब्दे प्रकृतापेक्षितप्रकृतिप्रत्ययार्थविवरणम्—**मननशील** इति । तत्राकर्तृत्वानुसन्धानप्रकरणबलान्मननस्यात्मविषयत्वोक्तिः । **स्वयमेव**—ज्ञानयोगमन्तरेणेत्यर्थः । * दुःखमाप्तुमयोगतः इत्येतद्व्यतिरेकानुसन्धानात् **सुखेन कर्मयोगं साधयित्वेत्युक्तम्** । * न चिरेणेति नञः क्रियान्वये चिरेणाप्यधिगमो न स्यादिति भ्रमस्स्यात्, तद्व्युदासाय **नचिरेणेत्युक्तम्** । नैकादिवत

नचिरेणेति समस्तप्रयोगः । ब्रह्मशब्दोऽत्र परिशुद्धात्मस्वरूपलक्षणकर्मयोगाव्यवहितफलविषय इति व्यञ्जनाय **आत्मानं प्राप्नोतीत्युक्तम्** । प्राप्तिरिह साक्षात्कारः । एवमव्यवहितात्मप्राप्तिसाधनत्वं वदता प्रकृतसंन्यासो ब्रह्मशब्देनोच्यत इति शङ्करोक्तं प्रत्युक्तम् । तव्यतिरेकेण पूर्वोक्तं पूरयति—**ज्ञानयोगयुक्त** इति । दुःखसाध्यत्वाद्विलम्बितफलो ज्ञानयोगः ; कर्मयोगस्तु सुखसाध्यत्वादविलम्बितफल इति वैषम्यमनेन श्लोकेनोक्तं भवति ॥ ६ ॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७

भा ॥ कर्मयोगयुक्तस्तु शास्त्रीये परमपुरुषाराधनरूपे विशुद्धे कर्मणि वर्तमानः तेन विशुद्धमनाः विजितात्मा स्वाभ्यस्ते कर्मणि व्यापृतमनस्त्वेन सुखेन विजितमनाः, ततएव जितेन्द्रियः कर्तुरात्मनो याथात्म्यानुसन्धाननिष्ठतया सर्वभूतात्मभूतात्मा सर्वेषां देवादिभूतानाम् आत्मभूत आत्मा यस्यासौ सर्वभूतात्मभूतात्मा ; आत्मयाथात्म्यमनुसन्दधानस्य हि देवादीनां स्वस्य चैकाकार आत्मा ; देवादिभेदानां प्रकृतिपरिणामविशेषरूपतयाऽऽत्माकारत्वासंभवात् । प्रकृतिवियुक्तस्सर्वत्र देवादिदेहेषु ज्ञानैकाकारतया समानाकार इति * निर्दोषं हि समं ब्रह्म (१९) इत्यनन्तरमेव वक्ष्यते । स एवंभूतः कर्म कुर्वन्नपि अनात्मन्यात्माभिमानेन न लिप्यते—न संबध्यते । अतोऽचिरेणात्मानं प्राप्नोतीत्यर्थः ॥ ७ ॥

ता ॥ कर्मयोगस्य सुखसाध्यत्वे शीघ्रफलाधिगमे च हेतुरुच्यते—* योगयुक्तः इति श्लोकेन । पूर्वावात्मशब्दौ मनोविषयौ, जितेन्द्रियसमभिव्याहारात् । * योगयुक्तः इत्यनेनैव सिद्धो विशुद्धमनस्त्वे हेतुः **शास्त्रीय** इत्यादिनोच्यते । विशुद्धिरत्र रजस्तमोनिवृत्तिस्तन्मूलरागद्वेषादिकषायनिवृत्तिश्च । प्राक्समर्थितं स्मारयति—**स्वाभ्यस्ते कर्मणी**ति । प्रधानस्य मनोनिग्रहस्य वक्तुमुचितत्वात्, * विजितदेहः इति परव्याख्यानं मन्दमिति भावः । सर्वेन्द्रियकूटस्थे मनसि जिते बाह्यानीन्द्रियान्तराणि जितानि भवन्तीत्यभिप्रायेण **तत एवे**त्युक्तम् । सर्वभूतेत्याद्युपपादनाय **कर्तु**रित्युक्तम् । प्रथमस्य भूतशब्दस्यात्र देवादिदेहमात्रविषयताम्, द्वितीयस्य क्रियात्मतां विग्रहं च दर्शयति—**सर्वेषा**मिति । भिन्नानामैक्यं हि विरुद्धमित्यत्राह—**आत्मयाथात्म्य**मिति । अयमभिप्रायः—सत्यम्, न स्वरूपैक्यं विधीयते, तस्य प्रत्यक्षानुमानागमपूर्वापरविरुद्धत्वात्, किंत्वेकाकारत्वम् ; यथा सर्वस्मिन् गृहे वर्तमानो व्रीहिरयमेवेत्युक्ते तज्जातीयत्वमुक्तं भवति, तद्वदत्रापि सर्वस्मिन् देहे वर्तमानोऽयमेवात्मेति प्रयोगेऽपि देहान्तरवर्तिनामस्य चात्मनस्समानत्वमुक्तं भवतीति । ननु समानत्वमपि प्रत्यक्षादिविरुद्धम्, देवतिर्यग्ब्राह्मणक्षत्रियब्रह्मचारिगृहस्थपण्डितापण्डितशक्ताशक्तधनिकदरिद्रस्थविरतरुणादिनिरवधिकवैषम्यनिर्भरत्वादात्मनाम् ; अन्यथा * ब्राह्मणो यजेत (श. ब्रा. ५. १. ५. २) इत्याद्यात्मपर्यन्तशास्त्रीयप्रयोगोऽपि भज्येतेत्यत्राह—**देवादिभेदाना**मिति । अयं भावः—सत्यम्, देवादिवैषम्यं प्रामाणिकमेव, तत्तु न स्वरूपप्रयुक्तम्, तस्य कर्मोपाधिकप्रकृतिपरिणामभेदनिबन्धनत्वात् ; शुद्धाकारविवक्षया तु समानत्वमिहोच्यते इति । साम्यस्यात्र विवक्षितत्वे संवादकमनन्तरमेव साम्याभिधानं दर्शयति—**प्रकृतिवियुक्त** इति । * कुर्वन्नपि न लिप्यते इत्यत्र न तावन्निषिद्धं कुर्वन्नपि न दुष्टो भवतीत्युच्यते, तथा सति बहुव्याकोपप्रसङ्गात् ; न च कर्मयोगं कुर्वन्नपि तेनैव न लिप्यत इति, तथा च सति निष्फलप्रयासत्वेन तस्याननुष्ठानप्रसङ्गात् । अतोऽत्र न केवलं ज्ञानयोगनिष्ठः, अपि तु **कर्मयोगं कुर्वन्नप्यात्मसाक्षात्काराख्यफलविरोधिना केनचिन्न लिप्यत इत्येवार्थ इत्यभिप्रायेण अनात्मन्यात्माभिमानेने-**

त्याद्युक्तम् । *नैव किंचित्करोमि (८) इत्यादिकं ज्ञानन्तरमुच्यत इति भावः । *न लिप्यते इत्यत्र सवासनं संबन्धनिषेधो विवक्षित इत्याह—**न संबध्यत** इति । प्रस्तुतार्थतया निगमयति—**अत** इति ॥ ७ ॥

भा ॥ यतस्सौकर्याच्छैघ्र्याच्च कर्मयोग एव श्रेयान्, अतस्तदपेक्षितं शृणु—

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपञ्श्वसन् ॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९

भा ॥ एवमात्मतत्त्ववित् श्रोत्रादीनि ज्ञानेन्द्रियाणि, वागादीनि च कर्मेन्द्रियाणि, प्राणाश्च स्वविषयेषु वर्तन्त इति धारयन्—अनुसन्दधानो नाहं किंचित्करोमीति मन्येत ; ज्ञानैकस्वभावस्य मम कर्ममूलेन्द्रियप्राणसंबन्धकृतमीदृशं कर्तृत्वं न स्वरूपप्रयुक्तमिति मन्येतेत्यर्थः ॥ ८ ॥ ९ ॥

ता ॥ एवमर्जुनस्य परिपृच्छतस्साक्षात्प्रश्नस्योत्तरमुक्तम् । अथ तदाशयविदो भगवत आभिप्रायिकं वाक्यमुत्तरसङ्गत्यर्थं दर्शयति—**यत** इति । युक्तोऽत्र योगनिष्ठः ; तत्त्ववित्—तदन्तर्गतात्मतत्त्वविज्ञानवान् ; तदाह—**एवमात्मतत्त्वविदिति** । *पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्निति चक्षुश्श्रोत्रत्वग्घ्राणजिह्वाख्यज्ञानेन्द्रियव्यापाराः । *गच्छन्, प्रलपन्, विसृजन्, गृह्णन्निति पादादिकर्मेन्द्रियव्यापाराः । तत्र *विसृजन्निति पायूपस्थव्यापारसंग्रहः । उक्तं च—*पायूपस्थे विसर्गार्थमिन्द्रिये तुल्यकर्मणी । विसर्गे च पुरीषस्य विसर्गे चाभिकामतः ॥ (भा. मो. २७५.२१) इति । *स्वपन् श्वसन्, उन्मिषन्, निमिषन् इति [तु] प्राणव्यापाराः । स्वापस्य तमोवृत्तित्वेऽपि प्राणाधीनत्वं सिद्धम् । *उन्मिषन्, निमिषन्निति तु व्यानाख्यप्राणव्यापारः । *श्वसन् इति तु प्राणसंज्ञकप्राणविशेषव्यापारः । गृह्णन्निति पाणिव्यापारपरोऽपि अपानव्यापारस्यापि तन्त्रेण ग्राहकः । *तदपानेनाजिघृक्षत्तदावयत्स य एषोऽन्नस्य ग्रहो यद्वायुः (ऐ. १. ३. १०) इति । एवं विभागज्ञापनाय **श्रोत्रादीनि ज्ञानेन्द्रियाणि वागादीनि च कर्मेन्द्रियाणि प्राणाश्चेत्युक्तम्** । इन्द्रियशब्दोऽत्र सर्वेन्द्रियप्रवृत्त्यादिहेतुतया प्राणसंवादादिषु प्रसिद्धं मुख्यप्राणमजहल्लक्षणया लक्षयतीति तात्पर्यम् । *इन्द्रियार्थेष्वित्येतदपि तथैव लक्षकमिति व्यञ्जनाय **स्वविषयेष्वित्युक्तम्** । नन्विन्द्रियप्राणेष्वकर्तृषु कर्तृत्वाध्यासः स्वस्याकर्तृत्वबुद्धिश्च भ्रान्तिरेव स्यात् ; आत्मन एव कर्तृत्वस्य *कर्ता शास्त्रार्थवत्त्वात् (ब्र. २. ३. ३३) इत्यादिभिः स्थापितत्वादित्यत्राह—**ज्ञानैकस्वभावस्येति** । कर्मणां मिथ्यात्वानुसन्धानमिह परोक्तमयुक्तम्, *इन्द्रियाणीन्द्रियार्थेषु वर्तन्ते इत्यस्याप्याननुसन्धेयत्वप्रसङ्गात् । मुक्तस्य स्वेच्छागृहीतेन्द्रिया[दे:]दिव्यवच्छेदायोपाधीनामप्यौपाधिकत्वव्यञ्जनाय च **कर्ममूलशब्दः** । **ईदृशमिति**—पुण्यपापरूपमित्यर्थः । अत्र *तत्त्ववित्तिदिति निरुपाधिकस्वरूपपरत्वात्, *कार्यकारण (गी. १३. २०) इत्यादाविव न चिदचिद्व्यापारविभागोक्तिः ॥ ८ ॥ ९ ॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १०

भा ॥ ब्रह्मशब्देन प्रकृतिरिहोच्यते । *मम योनिर्महद्ब्रह्म (१४. ३) इति हि वक्ष्यते । इन्द्रियाणां प्रकृतिपरिणामविशेषरूपत्वेन इन्द्रियाकारेणावस्थितायां प्रकृतौ *पश्यञ्छृण्वन् इत्याद्युक्तप्रकारेण कर्माण्याधाय फलसङ्गं त्यक्त्वा नैव किंचित्करोमीति यः कर्माणि करोति, सः प्रकृतिसंसृष्टतया वर्तमानोऽपि प्रकृत्यात्माभि-

मानरूपेण बन्धहेतुना पापेन न लिप्यते। पद्मपत्रमिवाम्भसा—यथा पद्मपत्रमम्भसा संसृष्टमपि न लिप्यते तथा न लिप्यत इत्यर्थः ॥ १० ॥

ता ॥ नन्वेवं फलाभिसन्धिपूर्वकेऽपि कर्मणि क्रियमाणे *नैव किंचित्करोमीति भावनया तत्करणेऽपि न दोषस्स्यात्; यदि च परमार्थतः स्वस्यैव कर्तृत्वं किं तस्यौपाधिकत्वानुसन्धानेन प्रयोजनम्; तथाऽनुसन्धानेऽपि प्रकृतिसंसर्गएवैनं देहात्मभ्रमे निमज्जयेदिति शङ्का निराक्रियते *ब्रह्मणीति श्लोकेन। न तावदत्र ब्रह्मशब्देन जीव उच्यते, तत्कर्तृत्वतिरस्कारप्रकरणत्वात्। नापि परं ब्रह्म, औपाधिकत्वप्रतिपादनप्रकरणे तदनपेक्षणात्, अनन्तरं च *सर्वकर्माणि मनसा (१३) इति श्लोकेन देहकर्तृत्वाभिसन्धानाभिधानात्। अतः पूर्वोक्तस्यार्थस्य आकाङ्क्षितफलनिर्देशपरत्वोपपत्तेः, ब्रह्मशब्दोऽत्रेन्द्रियाकारपरिणतप्रकृतिगोचरः। भवति हि प्रकृतिकार्येऽपि ब्रह्मशब्दप्रयोगः *तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते (मु. १. १. १०) इति। तदेतदखिलमभिप्रेत्याह—**ब्रह्मशब्देने**ति। ब्रह्मशब्दस्य प्रकृतौ प्रयोगं भगवद्गीतायामेवोदाहरति—**मम योनि**रिति। भवतु प्रकृतौ ब्रह्मशब्दः, प्रस्तुतस्य किमायातमिति शङ्कायां पूर्वश्लोकार्थन्यायाभ्यामुपबृंहितं वाक्यार्थमाह—**इन्द्रियाणा**मिति। ननु बृहत्त्वगुणात्प्रयोगबलाच्च मूलप्रकृतिर्ब्रह्मशब्देनोच्यताम्, तत्र दर्शनश्रवणादिकर्तृत्वानुसन्धानमशक्यम्, मूलप्रकृतिरूपे तद्धेतुत्वाभावादिति शङ्कानिराकरणाय **अवस्थिताया**मित्यन्तमुक्तम्। औपचारिकोऽपि कारणविषयः प्रयोगो द्रव्यैक्यात् कार्यमपि गोचरयेदिति भावः। **कर्माणी**ति बहुवचनं पूर्वोक्तवैविध्यपरमिति प्रदर्शनायोक्तम्—**पश्यञ्च्छृण्वन्नित्याद्युक्तप्रकारेणे**ति। *यः करोतीत्यात्मन्येव कर्तृत्वनिर्देशात्तदौपाधिकत्वस्मारणाय पूर्वोक्तमाकृष्टम्—**नैव किंचित्करोमी**ति। पापशब्दोऽत्र देहात्मभ्रमविषयः *योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥ (भा. आ. ७४. २८) इत्यादिषु चात्मान्यथाज्ञानस्य पापत्वं प्रसिद्धम्। आत्मनोऽकर्तृत्वानुसन्धानप्रकरणे तन्निवृत्तिरेव वक्तुमुचितेत्यभिप्रायेण **प्रकृत्यात्माभिमानरूपेणे**त्युक्तम्। **बन्धहेतुने**ति। तत्र पापलक्षणद्योतनम्। अलौकिकमनिष्टफलासाधारणकारणं हि पापम्। प्रयुक्तश्च पापशब्दोऽनेकेष्व[प्य]र्थेषु, यथा *न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते (छा. ८. ४. १) इति। ननु पद्मपत्रमम्भसा संस्पृष्टं कथमत्र दृष्टान्त इत्यत्राह—**यथे**ति। न संसर्गमात्रनिषेधायात्र दृष्टान्तः; किंतु यथा पद्मपत्रस्य जन्मस्थित्यादिकं सर्वमम्भस्येव, तथाऽपि न तत्कार्यक्लेशादिः, तद्वत् प्रकृत्यधीनभोगस्थित्यादेरस्य तत्कार्यदेहात्मभ्रमादिर्न स्यादिति भावः॥

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ॥ ११

भा ॥ कायमनोबुद्धीन्द्रियसाध्यं कर्म स्वर्गादिफलसङ्गं त्यक्त्वा योगिन आत्मविशुद्धये कुर्वन्ति; आत्मगतप्राचीनकर्मबन्धविनाशाय कुर्वन्तीत्यर्थः ॥ ११ ॥

ता ॥ एवमुक्तार्थदृढीकरणाय शिष्टाचारसिद्धतोच्यते—*कायेनेति श्लोकेन। बुद्धिरत्र कृत्यध्यवसायः। *केवलैरिति कर्तृत्वाभिमानत्यागो विवक्षितः। अथवा ममत्वबुद्धिविषयतारहितैरित्यर्थः। तदा *कायेनेत्यादौ केवलेनेत्यादि परिणाम्यम्। यद्वा कायशब्देन कर्मेन्द्रियवर्गस्यापि लक्षणया संग्रहणात् *केवलैरिन्द्रियैरिति ज्ञानेन्द्रियाण्युच्यन्ते; तेषां च केवलत्वं वचनादानादिकर्मरहितत्वम्; ततश्च *धर्मश्रुतो वा दृष्टो वा (भा. आ. ९४. २९) इत्यादिकं सूचितं भवति। आत्मशुद्धेरत्रैव फलतया निर्देशात्, निष्फलप्रवृत्त्ययोगाच्च **स्वर्गादिफलसङ्ग**मित्युक्तम्। **शुद्धिर्हि**

केनचिद्दूषितस्यापेक्षिता ; स च दोषोऽत्र स्वतश्शुद्धस्याप्यात्मनोऽनादिकालकृतमात्मतत्त्वसाक्षात्कारविरोधि कर्मेत्यभिप्रायेणाह—**आत्मगतेति** ॥ ११ ॥

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२

भा ॥ युक्तः—आत्मव्यतिरिक्तफलेष्वचपलः, आत्मैकप्रवणः कर्मफलं त्यक्त्वा केवलमात्मशुद्धये कर्मानुष्ठाय नैष्ठिकीं शान्तिमाप्नोति—स्थिरमात्मानुभवरूपां निर्वृतिमाप्नोति । अयुक्तः—आत्मव्यतिरिक्तफलेषु चपलः आत्मावलोकनविमुखः कामकारेण फले सक्तः कर्माणि कुर्वन् नित्यं कर्मभिर्बध्यते—नित्यसंसारी भवति। अतः फलसङ्गरहितः इन्द्रियाकारेण परिणतायां प्रकृतौ कर्माणि संन्यस्य आत्मनो बन्धमोचनायैव कर्माणि कुर्वीतेत्युक्तं भवति ॥ १२ ॥

ता ॥ एकस्यैव कर्मणो बन्धहेतुत्वं मोक्षहेतुत्वं च फलसङ्गतदभावादिरूपसहकारिविशेषाद्युज्यत इतीममर्थं विशदयति * युक्त इति श्लोकेन । अत्र युक्तशब्देन समाहितचेतस्त्वमुच्यते, तच्चात्र फलान्तरविरक्तिपूर्वकमात्मप्रावण्यमेवेति व्यञ्जनाय **आत्मव्यतिरिक्तेत्याद्युक्तम्** । **कर्मफलं त्यक्त्वेति** वचनात्कर्मस्वरूपानुष्ठानं पूर्वोक्तमिहार्थसिद्धं दर्शितम् । **नैष्ठिकीं शान्तिमित्यनेन** साक्षान्मोक्षप्रतीतिस्स्यात्, तद्व्युदासायाह—**स्थिरमिति** । प्रकरणलब्धोऽयं विशेषः । निष्ठायां भवतीति नैष्ठिकी । * कामकारेणेति न स्वैरचारो विवक्षितः, तस्य दूरनिरस्तत्वात् ; अतः कामकर्तृकं प्रेरणं कामकारः, तेन यथाभिमतफलसङ्गमात्रं विवक्षितमित्याह—**कामकारेण फले सक्त** इति । निबध्यत इत्यत्रोपसर्गेण नितरां बन्धो विवक्षित इति दर्शयति—**नित्यसंसारी भवतीति** । वर्तमानव्यपदेशाद्वा तथा विवक्षा । * नैव किंचित्करोमि (८) इत्यादेः * फले सक्तो निबध्यते (१२) इत्यन्तस्य संकलितार्थमुत्तरश्लोकसङ्गत्यर्थमाह—**अत इति** ॥ १२ ॥

भा ॥ अथ देहाकारेण परिणतायां प्रकृतौ कर्तृत्वसंन्यास उच्यते—

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३

भा ॥ आत्मनः प्राचीनकर्ममूलदेहसंबन्धप्रयुक्तमिदं कर्मणां कर्तृत्वम् , न स्वरूपप्रयुक्तमिति विवेकविषयेण मनसा सर्वाणि कर्माणि नवद्वारे पुरे संन्यस्य देही स्वयं वशी देहाधिष्ठानप्रयत्नमकुर्वन् देहं च नैव कारयन् सुखमास्ते ॥ १३ ॥

ता ॥ अनन्तरश्लोकार्थमाह—**अथेति** । शरीराश्रितेष्विन्द्रियप्राणेषु कर्तृत्वसंन्यासाभिधानादनन्तरं तदाश्रये शरीर एव कर्तृत्वसंन्यास उच्यत इति सङ्गतिः । शरीरे कर्तृत्वसंन्यासं प्रति करणतयोक्तस्य मनसः करणीभावानुगुणव्यापारं दर्शयितुम् **आत्मन इत्याद्युक्तम्** । नहि देवादिदेहसंबन्धमात्रकृतं पुण्यपापकर्तृत्वं, तत्संबन्धमात्रस्याकर्मवश्येऽपि सद्भावात्, अतः **प्राचीनकर्ममूलेत्युक्तम्** । मुख्यैस्सप्तभिरर्वाग् द्वाभ्यां चात्र नवद्वारता ; *पुरमेकादशद्वारम् (क. २. ५. १) इति श्रुतौ नाभिब्रह्मरन्ध्राभ्यां सहैकादशद्वारतोक्तिः । **पुरे संन्यस्य** इति । पुरस्य संन्यसनक्रियाधिकरणत्वेनान्वयः प्रकृतानुपभावः । * नवद्वारे पुरे इति निर्देशस्सावयवत्वनिरवयवत्वसच्छिद्रत्वनिश्छिद्रत्वपृथुत्वाणुत्वस्वतन्त्रत्वपरतन्त्रत्वनियन्तृत्वनियन्तव्यत्वादिभिर्देहात्मनोर्विवेकस्य प्रदर्शनार्थः । **स्वयमिति** । देहादिपारतन्त्र्यरहित इत्यर्थः ; यद्वा परिशुद्धेन

स्वेन रूपेणेति भावः । **वशी**—अभिमानबलात्काराद्यविषय इत्यर्थः । **प्रयत्नाश्रयत्वशरीरस्पन्दादिहेतुत्वयोरौपाधिकत्वात् * नैव कुर्वन्नित्याद्युक्तम्** । **सुखमास्ते**—कर्तृत्वाभिमानप्रयुक्तक्लेशादिरहित आस्त इत्यर्थः । पुरमिव शरीरम्, पौरानिवेन्द्रियाणि, सार्वभौममिव परमात्मानम्, भृत्यमिव स्वात्मानं पश्यतो भवति हि स्वास्थ्यम्, देहात्मभ्रमे हि पुरादिष्वासीनोऽहमिति मन्यते; तन्निवृत्तौ च देह एव पुरस्थानीयो भवतीति भावः ॥ १३ ॥

भा ॥ साक्षादात्मनस्स्वाभाविकं रूपमाह—

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४

भा ॥ अस्य देवतिर्यङ्मनुष्यस्थावरात्मना प्रकृतिसंसर्गेण वर्तमानस्य लोकस्य देवाद्यसाधारणं कर्तृत्वं तत्तदसाधारणानि कर्माणि तत्तत्कर्मजन्यदेवादिफलसंयोगं च, अयं प्रभुः—अकर्मवश्यः स्वाभाविकस्वरूपेणावस्थितआत्मा न सृजति—नोत्पादयति । कस्तर्हि ? स्वभावस्तु प्रवर्तते । स्वभावः—प्रकृतिवासना ; अनादिकालप्रवृत्तपूर्वपूर्वकर्मजनितदेवाद्याकारप्रकृतिसंसर्गकृततत्तदात्माभिमानजनितवासनाकृतमीदृशं कर्तृत्वादिकं सर्वम् ; न स्वरूपप्रयुक्तमित्यर्थः ॥ १४ ॥

ता ॥ एवमौपाधिकस्य रूपस्योपाधिषु संन्यास उक्तः, अथ स्वस्मिन्ननुसन्धेयस्वाभाविकरूपमुच्यत इति सङ्गत्यभिप्रायेणाह—**साक्षादिति** । विचित्रजनविषयेण * लोकस्येत्यनेनाभिप्रेतमुपाधिवैचित्र्यादिकं दर्शयितुम् **अस्येत्याद्युक्तम्** । **कर्तृत्वं** प्रयत्नादिरूपम्, **कर्माणि** शरीरेन्द्रियादिचेष्टाः । यद्यात्मनां स्वाभाविकमिदं कर्तृत्वादिकम्; तदा सर्वेषामेकरूपं तत्स्यात्; न च तथा दृश्यत इत्यभिप्रायेण **देवाद्यसाधारणं कर्तृत्वमित्याद्युक्तम्** । देवाद्यसाधारणं देवत्वादिजातिमत्पिण्डपरिग्रहदशाप्रतिनियतमित्यर्थः । **फलसंयोगः**—फलस्यानुभवः । प्रकरणवशात् **प्रभु**शब्दोऽत्र जीवविषय इति प्रदर्शनार्थम् **अयं प्रभुरित्युक्तम्** । जीवे प्रभुशब्दाभिप्रेतमाह—**अकर्मवश्यः स्वाभाविकस्वरूपेणावस्थित** इति । अत्र हि प्रकरणे *मयि सर्वाणि (३.३०) इत्यादिना जीवस्य कर्तृत्वं परमात्मन्यध्यस्यते; अतोऽत्राकर्तृविषयः प्रभुशब्दो न परविषय इति भावः । * न सृजतीत्यत्र * सृज विसर्गे इति धातोस्त्यागार्थत्वे कर्तृत्वादित्रयं स्वीकरोतीति वाक्यार्थस्यादिति तद्व्युदासायाह—**नोत्पादयती**ति । कारणान्तरादर्शनात् तस्यैव कर्तृत्वमित्यभिप्रायेण चतुर्थपादस्य शङ्कामाह—**कस्तर्ही**ति । सृजतीति शेषः । स्वभावशब्दं प्रकरणोपयुक्तविशेषे स्थापयितुं वाच्यं तावदाह—**प्रकृती**ति । ननु चेतनस्यात्मनः कर्तृत्वादिकं नास्ति, अचेतनायास्तु वासनायाश्चेतनगुणमात्रभूतायाः कर्तृत्वादिकमिति कथमिदं [ज्ञायते] जाघटीति? यद्यात्मनः स्वतश्शुद्धस्य न कर्तृत्वम्, तर्हि तस्य वासनाऽपि कुतस्समागता? यदि न कुतश्चित्, तदा वासनैव स्वाभाविकीति तत्कृतकर्तृत्वादिकमपि स्वाभाविकं स्यात् । यदि कुतश्चिद्धेतोः, तदा तस्यापि स्वाभाविकत्वे पूर्वदोषः ; औपाधिकत्वे त्वकर्तुरात्मनस्तदागमोऽपि कुतः? यदि वासनया, तर्ह्यन्योन्याश्रयणम् ; यद्यन्यस्मात्कुतश्चित्, तत्रापि तथैवेत्यनवस्थेत्यादिचोद्यनिरासाय **तु**शब्दः । तदाह—**अनादिकालेति** । बीजाङ्कुरन्यायादन्योन्याश्रयादिपरिहारः । वासनाहेतुवैचित्र्यसिद्ध्यर्थं **देवाद्याकारे**त्याद्युक्तम् । यथा तप्तायःपिण्डे वह्निसंसर्गाद्वह्नित्ववुद्धिः, तथाऽत्रेति दर्शयितुं **संसर्गकृत**शब्दः । **वासनाकृतं**—वासनाख्यविशेषहेतूपाधिकमित्यर्थः ॥ १४ ॥

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५

भा ॥ कस्यचित् स्वसंबन्धितयाऽभिमतस्य पुत्रादेः पापं दुःखं नादत्ते —नापनुदति। कस्यचित् प्रतिकूलतयाऽभिमतस्य सुकृतं सुखं च नादत्ते—नापनुदति। यतोऽयं विभुः न कांचित्कः, न देवादिदेहाद्यसाधारणदेशः, अत एव न कस्यचित्संबन्धी, न कस्यचित् प्रतिकूलश्च। सर्वमिदं वासनाकृतम्। एवंस्वभावस्य कथमियं विपरीतवासनोत्पद्यते ? अज्ञानेनावृतं ज्ञानं—ज्ञानविरोधिना पूर्वपूर्वकर्मणा स्वफलानुभवयोग्यत्वाय अस्य ज्ञानमावृतं—संकुचितम्। तेन ज्ञानावरणरूपेण कर्मणा देवादिदेहसंयोगस्तत्तदात्माभिमानरूपमोहश्च जायते। ततश्च तथाविधात्माभिमानवासना, तदुचितकर्मवासना च ; वासनातो विपरीतात्माभिमानः, कर्मारम्भश्चोपपद्यते ॥ १५ ॥

ता ॥ आत्मनोऽकर्तृत्वादिकस्य, वासनायाः कर्तृत्वादिकस्य च विवरणं *नादत्ते इति श्लोकस्यार्धद्वयम्। परगतपापसुकृतयोरादानप्रसङ्गाभावात्तत्प्रतिषेधोऽनुचितः ; अतस्तत्कार्यं दुःखं सुखं च लक्ष्यते ; तत्रापि परगतसुखदुःखयोस्स्वस्मिन्नाकर्षणं न शक्यम् ; अतस्तदपनयनमात्रं विवक्षितमित्यभिप्रायेणाह—**कस्यचि**दिति। कस्यचिदित्यनेन सूचितमपनोदनहेतुविशेषं दर्शयितुं **स्वसंबन्धितयाऽभिमतस्ये**त्याद्युक्तम्। आदत्ते इत्यस्य करोत्याद्यर्थत्वानौचित्यादपहरणार्थत्वे च प्रयोगादपहरणनिषेधेनैव तुल्यतया करणनिषेधसिद्धेः **नापनुदती**ति व्याख्यातम् ॥ **विभुरि**ति न परिमाणविशेषाद्यभिप्रायम्, जीवस्याणुतया श्रुत्यादिसिद्धेः। नापि प्रभुत्वपरम्, अत्रानुपयुक्तत्वात्। अतस्तत्तत्कर्मानुकूलसमस्तदेहानुप्रवेशयोग्यतामात्रं प्रतिनियतदेशराहित्यं विवक्षितम्। अत एव आगन्तुकेषु मित्रामित्रादिषु संबन्धित्वं प्रतिकूलत्वं च आगन्तुकानां तत्तद्देहानामेव, न त्वात्मन इति सिध्यति। तत एव चानुकूलप्रतिकूलपुरुषविषयदुःखाद्यपनयनमौपाधिकमित्यायातम्। तदेवं कार्याभावौपयिकहेत्वभावप्रतिपादनपरो विभुशब्द इत्यभिप्रायेणाह—**यतोऽय**मिति। उत्तरार्धोत्थानाय शङ्कते—**एवंस्वभावस्ये**ति। **विपरीतवासना**—स्वभावविरुद्धवासनेत्यर्थः। अत्रोत्तरम्—*अज्ञानेनावृतं ज्ञानमिति। *अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते। यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा ॥ संसारतापानखिलानवाप्नोत्यतिसंततान्। तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ॥ सर्वभूतेषु भूपाल तारतम्येन [वर्तते]लक्ष्यते ॥ (वि.६.८.६१-६३) इति भगवत्**पराशर**वचनमनुस्मरन्नाह—**ज्ञानविरोधिने**ति। अत्र नञस्तदन्यतदभावार्थत्वमावरणानुपयुक्तमिति भावः। **स्वफले**त्यादि—न ह्य[साव]संकुचितज्ञानस्संसारतापानुभवयोग्य इति भावः। अत्यन्तविलोपपरिहारायावरणशब्दोपचरितमाह—**संकुचित**मिति। *न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते (बृ. ६. ३. ३०) इत्यादिश्रुतिसिद्धमनेन स्मारितम्। **देवादिदेहसंयोग** इति जन्तुशब्दाभिप्रेतोऽर्थः। स च मोहजनने कर्मणो द्वारम्। शङ्कोत्तरत्वमाह—**ततश्चे**ति। आत्मनि प्रतिषिद्धस्येष्टानिष्टाचरणस्यान्यहेतुतामाह—**वासनात** इति ॥ १५ ॥

भा ॥ *सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि। (४. ३६), *ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा (४. ३७), *न हि ज्ञानेन सदृशं पवित्रम् (४. ३८) इति पूर्वोक्तं स्वकाले संगमयति—

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६

भा ॥ एवं वर्तमानेषु सर्वेष्वात्मसु येषामात्मनामुक्तलक्षणेनात्मयाथात्म्योपदेशजनितेन आत्मविषयेण अहरहरभ्यासाधेयातिशयेन निरतिशयपवित्रेण ज्ञानेन तत्—ज्ञानावरणमनादिकालप्रवृत्तानन्तकर्मसंचयरूपमज्ञानं नाशितम्, तेषां तत् स्वाभाविकं परं ज्ञानमपरिमितमसंकुचितमादित्यवत्सर्वं यथावस्थितं प्रकाश-

यति। तेषामिति विनष्टाज्ञानानां बहुत्वाभिधानादात्मस्वरूपबहुत्वम् *न त्वेवाहं जातु नासम् (२.१२) इत्युपक्रमावगतमत्र स्पष्टतरमुक्तम्। न चेदं बहुत्वमुपाधिकृतं, विनष्टाज्ञानानामुपाधिगन्धाभावात्। *तेषामादित्यवज्ज्ञानम् इति व्यतिरेकनिर्देशात् ज्ञानस्य स्वरूपानुबन्धिधर्मत्वमुक्तम्। आदित्यदृष्टान्तेन च ज्ञातृज्ञानयोः प्रभाप्रभावतोरिवावस्थानं च। ततएव संसारदशायां ज्ञानस्य कर्मणा संकोचो मोक्षदशायां विकासश्चोपपन्नः ॥ १६ ॥

ता ॥ एवं तृतीयाध्यायोक्ताकर्तृत्वानुसन्धानस्य प्रकारविशेषाः प्रतिपादिताः; अथ चतुर्थाध्यायोक्तस्य ज्ञानविशेषस्य विशोधनं क्रियत इत्यभिप्रायेणाह—**सर्वे**मिति। **स्वकाले**—अकर्तृत्वानुसन्धानप्रकारकथनादनन्तरं ज्ञानस्वरूपकथनावसर इत्यर्थः। यद्वा *तद्विद्धि प्रणिपातेन (४. ३४) इत्यत्र *उपदेक्ष्यन्ति इति स्वेनैव निर्दिष्टे विपाककाल इत्यर्थः। **एवं वर्तमानेषु**—मुह्यत्स्वपीत्यर्थः। यद्वा कर्मयोगनिष्ठेष्वित्यर्थः। अज्ञानेन ज्ञानमावृतं चेत्, कथं ज्ञानेन तस्य नाश इति शङ्कां व्यवच्छिन्दता तुशब्देन द्योतितं ज्ञानस्य विशेषं दर्शयितुम् **उत्कलक्षणेने**त्यादि **निरतिशयपवित्रेणे**त्यन्तमुक्तम्। आत्मनो ज्ञानेनेत्यन्वयः। **आत्मविषयेणे**ति। *आत्मनः इति षष्ठ्यास्संबन्धसामान्यमात्रपरत्वं, कर्तृविषयत्वं चात्रानुपयुक्तमिति भावः। तच्छब्दपरामृष्टप्रकारमाह—**ज्ञानावरणमि**ति। अज्ञानस्वरूपस्यातिगहनत्वसूचनार्थम्, निरतिशयपवित्रस्य ज्ञानभास्वतो निश्शेषाज्ञानतिमिरकुक्षिंभरित्वप्रदर्शनार्थं च **अनादिकालेत्या**द्युक्तम्। उत्तरार्धगततच्छब्दार्थः **स्वाभाविक**मिति। सामानाधिकरण्यस्वारस्यात्परमिति ज्ञानविशेषणम्; तदर्थमाह—**अपरिमितमसंकुचित**मिति। ज्ञानस्य परत्वं ह्यनविच्छिन्नविषयत्वम्; तत्र च हेतुस्संकोचाभाव इत्यभिप्रायः। **सर्वे**मिति प्रकाशयतेरर्थसिद्धकर्मोक्तिः। अज्ञाननिवृत्तौ च ज्ञानस्य सर्वगोचरत्वं श्रौतमिति भावः। *आदित्यवदिति दृष्टान्तसामर्थ्यसिद्धमाह—**यथावस्थित**मिति। एतेन परमित्यत्र पदमिति विशेष्याध्याहारः, परमार्थतत्त्वमिति विवक्षा वा परोक्ता निरस्ता। भेदव्यपदेशबलाद्द्वैतमतस्योपक्रमविरोधः प्रागुक्तः। मध्येऽपि स एव तात्त्विको भेदः स्पष्टमुपदिश्यत इति तस्य तात्पर्यविषयत्वं दर्शयति—**तेषा**मिति। **विनष्टाज्ञानाना**मिति—नहीदं बहुत्वं भ्रान्तिसिद्धमुपाधिसिद्धं वा वक्तुं शक्यमिति भावः। सत्यमिथ्योपाधिकृतभेदवादिनो**र्भास्करशङ्कर**योर्मतमनूद्य परिहरति—**न चेद**मिति। मिथ्याभूतस्याज्ञानाख्योपादानस्य विनाशे तदुपात्तमिथ्याभूतान्तःकरणाद्युपाधेरपि निवृत्तेरिति शङ्करं प्रति हेत्वर्थः। इतरं प्रत्यज्ञानशब्दवाच्यस्य कर्मादेर्विनाशे तन्निमित्तशरीरान्तःकरणाद्युपाधिनिवृत्तेरित्यर्थः। शङ्करमतदूषणप्रसङ्गे तदुक्तं ज्ञानमात्रात्मवादं दूषयितुं शुद्धदशायां ज्ञातृत्वं[त्वमत्र] सिद्धमिति दर्शयति—**तेषा**मिति। संबन्धविषयतया षष्ठी व्यतिरेकगर्भेति **व्यतिरेकनिर्देशा**दित्युक्तम्॥ विनष्टोपाधीनामात्मनां धर्मतया निर्देशात्, ज्ञानस्य स्वरूपानुबन्धित्वसिद्धेरागन्तुकचैतन्यवादोऽपि निरस्तः। आदित्यशब्दोऽत्रादित्यप्रभापरः, प्रभाद्वारैणैवादित्यस्य प्रकाशकत्वात्; धर्मभूतज्ञाने च सैव दृष्टान्तो भवितुमर्हति, *यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः। दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा॥ (वि. ध. १०४. ५५) इत्यादिसाम्याच्च; तदेतदभिप्रेत्य तत्फलितमाह—**आदित्यदृष्टान्तेने**ति। ततः प्रस्तुतस्य किमित्यत्राह—**तत एवेति**। प्रभयथाया आवारकसन्निधौ संकोचस्तन्निवृत्तौ पुनर्विकासश्च दृश्यते, तथा ज्ञानस्यापीति भावः। यद्वा तेषामादित्यवदवस्थितानां प्रभातुल्यं ज्ञानमित्यर्थः। प्रभायाः प्रदीपादित्याद्यपृथक्सिद्धतेजोद्रव्यविशेषत्वं, ज्ञानस्यात्मधर्मत्वेऽपि द्रव्यत्वम्, संकोचविकासयो[गि]म्यत्वादीनि च **शारीरकभाष्ये** प्रपञ्चितानि। एवं प्रभातुल्यद्रव्यत्वोपपादनेन प्रकृतमावृतत्वादिकं युज्यत इत्याह—**तत एवेति** ॥ १६ ॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७

भा ॥ तद्बुद्धयः—तथाविधात्मदर्शनाध्यवसायाः, तदात्मानः—तद्विषयमनसः, तन्निष्ठाः—तदभ्यासनिरताः, तत्परायणाः—तदेव परमप्रयोजनमिति मन्वानाः, एवमभ्यस्यमानेन ज्ञानेन निर्धूतप्राचीनकल्मषाः तथाविधमात्मानमपुनरावृत्तिं गच्छन्ति । यदवस्थादात्मनः पुनरावृत्तिर्न विद्यते, स आत्मा अपुनरावृत्तिः ; स्वेनरूपेणावस्थितमात्मानं गच्छन्तीत्यर्थः ॥ १७ ॥

ता ॥ आत्मानुभवसौधसोपानस्य ज्ञानस्यारोहणक्रमं दर्शयति—*तद्बुद्धयः इति श्लोकेन । तच्छब्देनात्र पूर्वप्रस्तुतस्वाभाविकात्मस्वरूपं पूर्वश्लोकोक्तं ज्ञानं वा परामृश्यत इत्यभिप्रायेण—**तथाविधात्मदर्शनाध्यवसाया** इत्युक्तम् । *तदात्मानः इत्यनेन द्रष्टव्यत्वाध्यवसायादनन्तरो दर्शनार्थप्रवृत्तियोग उच्यत इत्यभिप्रायेण—**तद्विषयमनस** इत्युक्तम् । तन्निष्ठत्वं विषयान्तरवैमुख्यात्तत्परायणत्वे हेतुः । अयनशब्दोऽत्र कर्मणि ल्युडन्तः प्राप्यपरः । वाक्यार्थज्ञानादिमात्रव्यावृत्त्यर्थम् **एवमभ्यस्यमानेने**त्युक्तम् । प्राप्तिप्रतिबन्धककल्मषनिवृत्तिर्ह्युपान्त्यपर्व । अतोऽन्तिमं प्राप्यमत्रापुनरावृत्तिशब्देन विवक्षितम् ; स च यथावस्थित आत्मैवेत्यभिप्रायेण—**तथाविधमात्मान**मिति । अपुनरावृत्तिशब्दस्यात्रानुद्दिष्टावध्यन्तरपरामर्शा[सा]पेक्षसमासान्तरव्युदासेनात्मविशेषणत्वायाह—**यदवस्था**दिति । नन्वात्मन एव *क्षीणे पुण्ये मर्त्यलोकं विशन्ति (९. २१) इति पुनरावृत्तिरुच्यते ; यदवस्थादिति चायुक्तम्, मोक्षस्याप्यवस्थाविशेषत्वे नित्यत्वायोगात् पुनरावृत्तिप्रसङ्गादित्यत्राह—**स्वेन रूपेणे**ति । औपाधिकसमस्ताकारनिवृत्तिरूपावस्थाविनाशकासंभवात्परमतेऽपि प्रध्वंसरूपत्वादनिवर्त्येति भावः ॥ १७ ॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८

भा ॥ विद्याविनयसंपन्ने, केवलब्राह्मणे, गोहस्तिश्वश्वपचादिष्वत्यन्तविषमाकारतया प्रतीयमानेष्वात्मसु पण्डिताः—आत्मयाथात्म्यविदः, ज्ञानैकाकारतया सर्वत्र समदर्शिनः । विषमाकारस्तु प्रकृतेः, नात्मनः ; आत्मा तु सर्वत्र ज्ञानैकाकारतया सम इति पश्यन्तीत्यर्थः ॥ १८ ॥

ता ॥ कीदृशोऽयमात्मसाक्षात्कार इत्याकाङ्क्षायां *येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि (४. ३५) इति प्रागुक्तं व्यनक्ति—*विद्याविनयेति श्लोकेन । *विद्याविनयसंपन्ने ब्राह्मणे इति पदद्वयं न समानाधिकरणम्, निर्विशेषणसमुदायसहपठितत्वात्, विद्याविनयसंपन्नविशेषणप्रतिशीर्षानुक्तेश्च । *गवि हस्तिनीत्याकारवैषम्यं वाह्यान्निदर्शितम् ; श्वश्वपचशब्दाभ्यां वृत्त्यादिवैषम्यम् ; तद्वत्पूर्वाभ्यामपि मिथो वैषम्यमेवाभिप्रेतम् ; अतो *ब्राह्मणे इति ब्राह्मणत्वजात्याक्रान्त[ता]मात्रं विवक्षितमिति दर्शयति—**केवलब्राह्मण** इति । सात्त्विकराजसतामसरूपानेकोदाहरणाभिप्रेतमाह—**अत्यन्तविषमे**ति । **आत्मस्वि**ति । शरीराणामन्योन्यवैषम्यनिषेधो दुश्शक इति भावः । अत्र समदर्शित्वोपयुक्तमूहापोहक्षमत्वं पण्डितत्वमिति दर्शयितुम् **आत्मयाथात्म्यविद** इत्युक्तम् । समं द्रष्टुं शीलं येषां ते समदर्शिनः । ननु प्रत्यक्षसिद्धं शरीरवैषम्यम् ; शरीरिणामपि तत्तद्विशिष्टत्वात्तत्कृतज्ञानादिवैषम्यं च दुरपह्नवम् ; अतोऽत्यन्तविषमेषु पदार्थत्वादिवत्स्थूलं सामान्यमकिञ्चित्करमित्यत्राह—**विषमाकारस्त्वि**ति । *प्रकृतेरिति संबन्धसामान्ये षष्ठी । तेन साक्षा-

त्प्रकृतिगतं देवत्वादिकम्, तत्प्रयुक्तं सुखित्वादिकं च कथंचित्संबन्धमात्रात् **प्रकृतेरि**त्युक्तम्। न शरीरगतं वैषम्यं प्रतिषिध्यते, किंतु तदेवात्र प्रतिपाद्यते। न च तत्तच्छरीरविशिष्टत्वलक्षणम्, तन्मूलज्ञानसङ्कोचादिलक्षणं वा वैषम्यमपह्नूयते; अपि तु तस्यौपाधिकत्वमुच्यते। न च शरीरादिविशिष्टत्वं विरो[धि]धः, स्वाभाविकस्वरूपसाम्यमात्रपरत्वात्। न चैतदत्यन्तस्थूलम्, शुद्धानामात्मनां स्वरूपभेदस्य दुर्वचत्वात्स्फुटविशेषाकारान्तराभावादिति भावः। ननु तथाऽपि ब्राह्मणादिषु पूज्यत्वादिसाम्यबुद्धौ अभोज्यान्नत्वादिदोषः [कथं] स्मृतः? तत्राह—**आत्मा त्विति** ॥ १८ ॥

इहैव तैर्जितस्सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९

भा ॥ इहैव—साधनानुष्ठानदशायामेव तैस्सर्गो जितः—संसारो जितः; येषामुक्तरीत्या सर्वेष्वात्मसु साम्ये स्थितं मनः। निर्दोषं हि समं ब्रह्म—प्रकृतिसंसर्गदोषवियुक्ततया सममात्मवस्तु हि ब्रह्म। आत्म[वस्तु] साम्ये स्थिताश्चेद्ब्रह्मणि स्थिता एव ते; ब्रह्मणि स्थितिरेव हि संसारजयः; आत्मसु ज्ञानैकाकारतया साम्यमेवानुसन्दधाना मुक्ता एवेत्यर्थः ॥ १९ ॥

ता ॥ इदानीम् [इह] समदर्शित्वं न कालान्तरभाविफलसाधनमात्रम्, किंत्विदानीमेव निश्श्रेयसकल्पां क्लेशनिवृत्तिं दिशतीति समदर्शिनां प्रशंसा क्रियते—*इहैवेतिश्लोकेन। **साधनानुष्ठानदशायामेवेति**। इहशब्दस्यात्र लोकपरत्वादपि स्वावस्थाविशेषपरत्वमेवोचितमिति भावः। **संसारो जित** इति—मुक्तप्रायास्त इत्यर्थः। सृष्ट्यादेरत्रानन्वयात्सर्गशब्दस्सृज्यत इति व्युत्पत्त्याऽत्र संसारपरः। ब्राह्मणचण्डालादीनां स्पृश्यत्वादिसाम्यप्रसङ्गव्युदासाय—**उक्तरीत्येत्युक्तम्**। निरुपाधिकात्मस्वरूपं ज्ञानैकाकारतया सममिति पूर्वभाष्योक्तप्रकारेणेत्यर्थः। नन्वात्मन्येव स्थितिस्संसारजय[हेतु]: न तु तत्साम्ये; तत्राह—*निर्दोषं हि समं ब्रह्मेति। ब्रह्मत्वमेव विधेयम्, अन्यथा *तस्माद्ब्रह्मणि ते स्थिताः इत्यनन्वयात्; समदर्शिनां ब्रह्मणि स्थिताः, समस्य ब्रह्मत्वात्—इति ह्यन्वयस्स्यात्; ततश्चोक्तचोद्यपरिहार इत्यभिप्रायेणाह—**आत्मवस्त्विति**। ततः किं प्रकृतस्थेत्यत्राह—**ब्रह्मणि स्थितिरिति**। ब्रह्मशब्दोऽत्र शुद्धात्मनि ब्रह्मसाम्यात्। अत्र फलितं पिण्डितार्थमाह—**आत्मस्विति** ॥ १९ ॥

भा ॥ येन प्रकारेणावस्थितस्य कर्मयोगिनस्समदर्शनरूपो ज्ञानविपाको भवति, तं प्रकारमुपदिशति—

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २०

भा ॥ यादृशदेहस्थस्य यदवस्थस्य प्राचीनकर्मवासनया यत्प्रियं भवति, यच्चाप्रियम्, तदुभयं प्राप्य हर्षोद्वेगौ न कुर्यात्। कथम्? स्थिरबुद्धिः—स्थिरे आत्मनि बुद्धिर्यस्य सः स्थिरबुद्धिः, असंमूढः—अस्थिरेण शरीरेण स्थिरमात्मानमेकीकृत्य मोहः—संमोहः, तद्रहितः; तच्च कथम्? ब्रह्मविद्ब्रह्मणि स्थितः—उपदेशेन ब्रह्मवित्सन् तस्मिन् ब्रह्मण्यभ्याससयुक्तः। एतदुक्तं भवति—तत्त्वविदामुपदेशेन आत्मयाथात्म्यविद्भूत्वा तत्रैव यतमानो देहात्माभिमानं परित्यज्य स्थिररूपात्मावलोकनप्रियानुभवे व्यव[सि]स्थितः अस्थिरे प्राकृते प्रियाप्रिये प्राप्य हर्षोद्वेगौ न कुर्यात्—इति ॥ २० ॥

ता ॥ प्रियाप्रिये, तदधीनहर्षोद्वेगौ च देहतदवस्थाद्युपाधिभेदनिबन्धनाविति व्यञ्जयितुं—**यादृशदेहस्थस्य यदवस्थस्येत्याद्युक्तम्**। **यदवस्थस्येत्येतद्देहादिकृतज्ञानसङ्कोचाद्यवस्थाविषयं वा**। प्रियाप्रियरूपकारणागमे तत्कार्यहर्षो-

द्वेगनिवृत्तिर्दुश्शकेत्यभिप्रायेणाह—**कथमिति** । तत्रोत्तरम्—**स्थिरबुद्धिरिति** । समानाधिकरणसमासादप्युपयोगातिशयादत्र व्यधिकरणसमास उपपन्न इत्यभिप्रायेणाह—**स्थिरे आत्मनीति** । * असंमूढः इत्यत्र समित्युपसर्ग एकीकारपरः ; एवंविधस्थिरबुद्धित्वासंमूढत्वयोर्हेत्वाकाङ्क्षां दर्शयति—**तच्च कथमिति** । स्थिरबुद्धित्वासंमूढत्वे द्वे अपि सङ्कलय्य तदिति परामृश्यते । * ब्रह्मविद्ब्रह्मणि स्थितः इति शब्दाभ्यां सिद्धमवान्तरदशाविशेषं विशदयति—**उपदेशेनेत्यादिना** । **सन्निधत्यनेनोपदेशजनितज्ञानमनूद्य** विशिष्टं विज्ञानं विधीयत इति सूचितम् । उक्तमेवार्थं समदर्शित्वरूपज्ञानविपाकाभिलाषिणामव्याकुलानुष्ठानपर्वक्रमप्रदर्शनार्थं श्लोकस्थपदानां हेतुकार्यभावेन महावाक्यान्वयं दर्शयति—**एतदुक्तमिति** । बाह्यकुदृष्ट्युपदेशनिवृत्त्यर्थं **तत्त्वविदामित्युक्तम्** । **भूत्वेत्येतदप्यनुवादत्वसूचनार्थम्** ॥ २० ॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यस्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१

भा ॥ एवमुक्तेन प्रकारेण बाह्यस्पर्शेषु—आत्मव्यतिरिक्तविषयानुभवेषु, असक्तात्मा—असक्तमनाः अन्तरात्मन्येव यस्सुखं विन्दति—लभते ; स प्रकृत्यभ्यासं विहाय ब्रह्मयोगयुक्तात्मा—ब्रह्माभ्यासयुक्तमनाः ब्रह्मानुभवरूपमक्षयं सुखं प्राप्नोति ॥ २१ ॥

ता ॥ एवं हर्षोद्वेगावकुर्वतस्समदर्शित्वप्रयुक्तं निरतिशयसुखं स्वयमापततीत्युच्यते—* बाह्येति श्लोकेन । *सुखं विन्दति इत्यस्य * सुखमक्षय्यमश्नुते इत्यतो भेदप्रदर्शनाय—**लभत** इत्युक्तम् । अक्षयसुखप्रारम्भोऽयमिति भावः । **प्रकृत्यभ्यासं विहायेत्यर्थलब्धोक्तिः** । प्रकृत्यभ्यासः—पुनःपुनः प्राकृतशब्दादिभोग्यचिन्ता । * विन्दत्यात्मनि यस्सुखम् इत्युपदेशादिजन्यज्ञानमूलं सुखमुक्तम् । * सुखमक्षयमश्नुते इति तु साक्षात्कारानन्तरभावि नित्यं सुखमुच्यत इति विशेषं दर्शयितुं—**ब्रह्मानुभवरूपमित्युक्तम्** ॥ २१ ॥

भा ॥ प्राकृतस्य भोगस्य सुत्यजतामाह—

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२

भा ॥ विषयेन्द्रियस्पर्शजाः ये भोगाः दुःखयोनय[एव ते]स्ते—दुःखोदर्काः । आद्यन्तवन्तः—अल्पकालवर्तिनो ह्युपलभ्यन्ते । न तेषु तद्याथात्म्यविद्रमते ॥ २२ ॥

ता ॥ अनादिकालं बाह्यस्पर्शरसिकस्य तत्परित्यागः कथमित्याकाङ्क्षायामार्जनरक्षणादिदोषदर्शनात्तत्रोपरमशक्य इति * ये हि इत्यादि श्लोकेनोच्यत इत्यभिप्रायेणाह—**प्राकृतस्येति** । * संस्पर्शजाः इत्यनेनाभिप्रेतमौपाधिकत्वं व्यञ्जयति—**विषयेन्द्रियसंस्पर्शजा** इति । स्पर्शोऽत्र संबन्धमात्रम् । एतेन सुखस्वरूपस्य क्षुद्रत्वमुक्तम् । *दुःखयोनय इत्यत्र **तत्पुरुषविवक्षां दर्शयितुं—दुःखोदर्का** इत्युक्तम् । संस्पर्शजत्वात्परलोकेऽपि दुःखयोनित्वं स्वध्यवसानमित्येवकाराभिप्रायः । नखलु हिरण्यगर्भभोगादभ्यधिकः प्राकृतभोगोऽस्ति ; सोऽपि स्वमानेन शतसंवत्सरपरिमिततया मानुषादिसम इति दर्शयितुम्—**अल्पकालवर्तिन** इत्युक्तम् । क्षणरुचिबुद्बुदादिष्विवावान्तरस्थितिकालवैषम्येऽप्याद्यन्तवत्त्वं त्वविशिष्टमिति भावः । एवं * संस्पर्शजाः इत्यादिविशेषणत्रयेणाल्पत्वदुःखमिश्रत्वान्तवत्त्वानि दर्शितानि । प्रत्यक्षसिद्धेषु दोषेषु निपुणस्य किमुपदेशापेक्षयेति दर्शयितुम्—**उपलभ्यन्त** इत्युक्तम् । बुधशब्देनात्र पञ्चविधोपरमोपयुक्तविवेकज्ञानवत्त्वं विव-

क्षितमिति दर्शयितुम् **तद्याथात्म्यविदित्युक्तम्** । न तेषु रमते, किंतु क्रमादुपरमत इति भावः । सागरतरणराजसेवादिषु शरीरविनाशपर्यन्ता आर्जनदोषाः । सहस्रप्राकारपरिवृतगर्भगृहे निवेशितस्यापि रक्ष्यवस्तुनो राजदहनचोरमूषिकादयस्तन्निवारणक्लेशादयश्च रक्षणदोषाः । *स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः (वि. ६. ५. ५०) इत्यादयः क्षयदोषाः । *न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ (वि. ४. १०. २२) *अलाभे मत्तकाशिन्या दृष्ट्वा तिर्यक्षु कामिता इत्यादिवदुत्तरोत्तररागप्रबन्धानर्थहेत्वयोग्यविषयप्रवृत्त्यादयो भोगदोषाः । सर्वस्य चास्य प्रायशः परहिंसागर्भत्वात्तदधीना ऐहिकामुष्मिकदुःखसंततयो हिंसादोषाः । पञ्चविधाश्चैते दोषाः प्रत्यक्षादिसिद्धा इति तद्भावनावतां प्राकृतस्यानादिकालशीलितस्यापि सुत्यजत्वं सिद्धमिति भावः । उक्तं च **तुष्टिप्रकरणे साङ्ख्यैरपि** *बाह्या विषयोपरमात्पञ्च (सां. का. ५०) इति ॥ २२ ॥

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३

भा ॥ शरीरमोक्षणात् प्रागिहैव—साधनानुष्ठानदशायामेव आत्मानुभवप्रीत्या कामक्रोधोद्भवं वेगं सोढुं—निरोद्धुं यः शक्नोति, स युक्तः—आत्मानुभवायार्हः । स एव शरीरविमोक्षोत्तरकालमात्मानुभवैकसुखस्संपत्स्यते ॥ २३ ॥

ता ॥ एवं बाह्यस्पर्शेष्वसक्तस्यात्मनि सुखं विन्दतः प्राकृतभोगेषु दोषदर्शिनः स्वरसवाहिनीं दशामनुवदंस्तथाभूतस्यात्मसाक्षात्कारे तदधीनसुखे च योग्यतामाह—*शक्नोति इति । आशरीरपातात्कामक्रोधौ दुर्जयावित्यभिप्रायेणाह—**शरीरविमोक्षणात्प्रागिति** । आत्मसाक्षात्करदशायां कामक्रोधप्रसङ्गो न विद्यत इति तत्प्रसङ्गनिवारणदशाज्ञापनाय *इहैव इत्यनेन साधनानुष्ठानदशोच्यते । *विन्दत्यात्मनि यस्सुखमिति पूर्वोक्तहेतुं स्मारयति—**आत्मानुभवप्रीत्येति** । **वेगो**ऽत्र मनोवाक्कायानामतित्वरिता प्रवृत्तिः । तत्रानुचितविषयाभिध्याननीचचाटुनरपतिशुद्धान्तप्रवेशादयः कामजा वेगाः । परहिंसाद्युपायचिन्तनपरुषभाषणप्रहारादयः क्रोधजा वेगाः । *सोढुमित्यस्य तितिक्षार्थत्वव्युदासायोक्तम्—**निरोद्धुमिति** । **शक्नो**ति—शक्तस्सन्नुत्सहत इत्यर्थः । युक्तशब्दोऽत्र समाधिलाभपर इत्याह—**आत्मानुभवायार्ह** इति । *प्राक् शरीरविमोक्षणादित्यस्य शरीरानन्तरमेव फलयोगे तात्पर्यम् ; अन्यथा तद्वचनस्य निष्फलत्वप्रसङ्गादित्यभिप्रायेण—**स एव शरीरविमोक्षोत्तरकाल**मित्युक्तम् । *सुखमक्षयमश्नुते इत्याद्युक्तफलभूतभविष्यत्सुखयोगोऽत्रापि *स सुखी इति व्यपदिश्यत इत्यभिप्रायेणाह—**आत्मानुभवैकसुखस्संपत्स्यत** इति ॥ २३ ॥

योऽन्तस्सुखोऽन्तरारामस्तथाऽन्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४

भा ॥ यो बाह्यविषयानुभवं सर्वं विहाय अन्तस्सुखः—आत्मानुभवैकसुखः, अन्तरारामः—आत्मैकोद्यानः स्वगुणैरात्मैव सुखवर्धको यस्य स तथोक्तः, तथाऽन्तर्ज्योतिः—अत्मैकज्ञानो यो वर्तते, स ब्रह्मभूतो योगी ब्रह्मनिर्वाणम—आत्मानुभवसुखं प्राप्नोति ॥ २४ ॥

ता ॥ एवं परित्यक्तं प्राकृतभोग्यभोगोपकरणादिकं सर्वमात्मनि तदेकरसिकत्वाय कल्पयन् *विन्दत्यात्मनि यस्सुखम् (२१) इत्युक्तमुपायदशास्थं प्रपञ्चयति—*योऽन्तस्सुखः इति श्लोकेन । अन्तश्शब्दाभिप्रायं पूर्वोक्तं चानु-

सन्धायोक्तम्—**यो बाह्यविषयानुभवं सर्वं विहाये**ति । अन्तश्शब्दोऽत्र बाह्यव्यतिरेकादात्मपरः । आत्मैवात्मन्येव वा सुखं यस्य सोऽन्तस्सुखः । तत्र फलितोक्तिः—**आत्मानुभवैकसुख** इति । अवधारणस्याविशेषेण सर्वत्रान्वयादेकशब्दः । * अन्तरारामः इत्यस्याभिप्रेतं वक्तुं पदार्थं तावदाह—**आत्मैकोद्यान** इति । आरामो हि भोगस्थानभूतच्छायापल्लवपुष्पफलादिभिस्स्वगुणैस्सुखवर्धकः । तद्वदत्रापि स्वगुणैरपहतपाप्मत्वज्ञानानन्दादिभिः स्वविषयवादकरण[संवादकरण]ग्रन्थकरणादिक्रीडोत्थापकैरात्मैव सुखवर्धक इत्यारामशब्देनोपचर्यत इत्याह—**स्वगुणै**रिति । एवं भोग्यं भोगस्थानं च आत्मैवेत्युक्तम्; अथ भोगोपकरणादिकमपि स एवेति अन्तर्ज्योतिश्शब्देनोच्यत इत्यभिप्रायेणाह—**आत्मैकज्ञानो यो वर्तत** इति । अन्येषां हि भोग्यानां स्वरूपादुपकरणस्य भिन्नत्वादुपकरणमपि हि तदर्थतया पृथक् ज्ञातव्यम्; अतस्तेषु तदेकज्ञानत्वं नास्तीति भावः । यद्वा प्रकाश[क]न्तरनैरपेक्ष्यं बाह्यप्रकाशाभावमात्रं वाऽत्र विवक्षितम् । पूर्वं शरीरात्माभिमानाद्देवमनुष्यादिभूतोऽयमिदानीं तु तन्निवृत्त्या यथावस्थितासंकुचितज्ञानादिस्वरूपेणावस्थित इति ब्रह्मभूतशब्दाभिप्रायः । ब्रह्मैव निर्वाणमिति वा, ब्रह्मणि निर्वाणमिति वा, समासार्थमभिप्रयन्नत्र विवक्षितमाह—**आत्मानुभवसुख**मिति । अत्र निर्वाणशब्दस्य परोक्तशान्त्यर्थत्वं सुखप्रकरणानौचित्यान्मन्दमिति भावः ॥ २४ ॥

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानस्सर्वभूतहिते रताः ॥ २५

भा ॥ छिन्नद्वैधाः—शीतोष्णादिद्वन्द्वैर्विमुक्ताः, यतात्मानः—आत्मन्येव नियमितमनसः, सर्वभूतहिते रताः—आत्मवत्सर्वेषां भूतानां हितेष्वेव निरताः, ऋषयः—द्रष्टारः आत्मावलोकनपराः, य एवंभूतास्ते क्षीणाशेषात्मप्राप्तिविरोधिकल्मषाः ब्रह्मनिर्वाणं लभन्ते ॥ २५ ॥

ता ॥ समदर्शित्वरूपज्ञानविपाकसिद्ध्यर्थम् अनुष्ठानप्रकारो हि * न प्रहृष्येत् (२०) इत्यादिनोच्यते । तत्र हर्षोद्विगनिवृत्तिः, बाह्यविषयनिस्सङ्गत्वम्, तदर्थदोषदर्शनम्, कामक्रोधवेगनिवारणम्, आत्मन्येव सर्वविधभोग्यताकल्पनं च क्रमाच्छ्लोकपञ्चकेनोक्तम् । अथ प्रागुक्तद्वन्द्वसहत्वादिस्मारणपूर्वकं सर्वभूतहिते रतत्वं नाम समदर्शित्वेऽत्यन्तान्तरङ्गं साधनमुपदिश्यते—* लभन्ते इति श्लोकेन । * छिन्नद्वैधाः इत्यनेन भेदस्वरूपनिषेधभ्रमव्युदासायाह—**शीतोष्णादिद्वन्द्वैर्विमुक्ता** इति । द्वैधशब्दस्यात्र संशयाद्यर्थत्वं चानुचितमिति भावः । नियन्तव्येषु प्रधानं मन इहात्मशब्देनोच्यते । **नियमनं** च तस्योचितविषयावस्थापनमित्यभिप्रायेण—**आत्मन्येव नियमितमनस** इत्युक्तम् । * श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् । आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ इति **पञ्चमवेदद्रष्टृ**ा परमार्षिणा निर्णीतोऽयमर्थ इति ज्ञापनाय—**आत्मवदि**ति दृष्टान्तः, **हितेष्वेवे**त्यवधारणं च । सर्वशब्दोऽत्र दृष्टान्तभूतं स्वात्मानमात्मान्तरं च संगृह्णातीति भावः । एवमवस्थितस्य परिशुद्धान्योन्यसदृशात्मस्वरूपसाक्षात्कारवत्त्वमृषिशब्देन विवक्षितमिति ज्ञापनायाह—**द्रष्टार** इति । **एवंविधसाक्षात्कारसिद्धावनिष्टनिवृत्तिरिष्टप्राप्तिश्च** *क्षीणकल्मषाः *ब्रह्मनिर्वाणं लभन्ते इत्युभाभ्यामुच्यत इत्याह—**य एवंभूता** इति । *नहि ज्ञानेन सदृशं पवित्रमिह विद्यते (४.३८) इति ज्ञानस्य कल्मषनिवर्तकत्वं प्रागेवोक्तमिह स्मारितम् ॥

भा ॥ उक्तलक्षणानां ब्रह्मात्यन्तसुलभमित्याह—

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विजितात्मनाम् ॥ २६

भा॥ कामक्रोधवियुक्तानां—यतीनां यतनशीलानां, यतचेतसां—नियमितमनसां, विजितात्मनां—विजितमनसां, ब्रह्मनिर्वाणमभितो वर्तते, एवंभूतानां हस्तस्थं ब्रह्मनिर्वाणमित्यर्थः॥ २६॥

ता॥ एवं षड्भिः श्लोकैस्समदर्शित्वसाधकमनुष्ठानप्रकारमुपदिश्य तत्र शीघ्रप्रवृत्तिसिद्ध्यर्थं फलस्याविलम्बितत्वमनन्तरमुच्यत इत्यभिप्रायेणाह—**उक्तलक्षणानामिति**। कामक्रोधवियुक्तेत्युक्तिः *शक्नोति (२३) इति श्लोकार्थानुवादः। क्रोधनिवृत्त्यैव सर्वभूतहितेरतत्वमि[त्यपि]ति सूचितम्। *यतीनामित्यत्र रूढेरयुक्तत्वात् प्रकृतिप्रत्ययार्थवैशद्याय **यतनशीलानामि**त्युक्तम्। तेन *न प्रहृष्येत् इति (२०) श्लोकद्वयार्थोऽनूदितः। *यतचेतसामित्येतदात्मन्येव सर्वाकारकल्पनानुवाद इति दर्शयितुं **नियमितमनसामि**त्युक्तम्। *विजितात्मनामित्यनेन दोषप्रदर्शनेनान्तःकरणावर्जनपरस्य *ये हि (२२) इतिश्लोकस्यार्थस्सूचित इति प्रदर्शनाय **विजितमनसामि**त्युक्तम्। एवं पुनरुक्तिपरिहाराज्ञानाद्विदितात्मनामिति परैः पठितम्। *अभितो वर्तते इत्यत्यन्तासन्नकालत्वं विवक्षितमिति दर्शयति—**एवंभूतानामिति**। **हस्तस्थम्**, ननु हस्ताद्धृतदण्डादिग्राह्यफलादिवद्व्यवहितलाभमिति भावः॥ २६॥

भा॥ उक्तं कर्मयोगं स्वलक्ष्यभूतयोगशिरस्कमुपसंहरति—

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः। प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥ २७
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः। विगतेच्छाभयक्रोधो यस्सदा मुक्त एव सः॥ २८

भा॥ बाह्यान् विषयस्पर्शान् बहिः कृत्वा—बाह्येन्द्रियव्यापारं सर्वमुपसंहृत्य, योगयोग्यासने ऋजुकाय उपविश्य चक्षुषी भ्रुवोरन्तरे—नासाग्रे विन्यस्य नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा—उच्छ्वासनिश्श्वासौ समगती कृत्वा आत्मावलोकनादन्यत्र प्रवृत्त्यनर्हेन्द्रियमनोबुद्धिः, तत एव विगतेच्छाभयक्रोधः, मोक्षपरायणः—मोक्षैकप्रयोजनः, मुनिः—आत्मावलोकनशीलः यः, सः सदा मुक्त एव—साध्यदशायामिव साधनदशायामपि मुक्त एवेत्यर्थः॥ २७॥ २८॥

ता॥ *ज्ञानकर्मात्मिके निष्ठे योगलक्ष्ये सुसंस्कृते। आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केन चोदिते॥ (सं. २) इतिसंग्रहमनुसंदधान उत्तरश्लोकानां सङ्गतिमाह—**उक्तं कर्मयोगमिति**। स्पर्शशब्दस्यात्रानुभवपरस्यानुभाव्यार्थज्ञापनाय—**विषयस्पर्शानि**त्युक्तम्। फलितमाह—**बाह्येन्द्रियव्यापारं सर्वमुपसंहृत्ये**ति। *उपविश्यासने (६. १२) इत्यादिवक्ष्यमाणानुसन्धानेन **योगयोग्ये**त्याद्युक्तम्। *चक्षुः इत्येकवचनं करणाकारैक्यादिति दर्शयितुं—**चक्षुषी** इत्युक्तम्। *संप्रेक्ष्य नासिकाग्रम् (६. १३) इति वक्ष्यमाणेन *नासाग्रन्यस्तलोचनः (हस्ति) इत्यादिप्रकरणान्तरोक्त्या च *भ्रुवोरन्तरे कृत्वा इत्यस्यैकार्थ्यमाह—**नासाग्र** इति। नासाभ्यन्तरसञ्चारमात्रस्य स्वतस्सिद्धस्य विधेयत्वायोगात्, *समौ कृत्वा इत्येतदेव विधेयमिति दर्शयितुं—**नासाभ्यन्तरचारिणौ प्राणापानौ**त्यनुवादः। अपानस्य नासाभ्यन्तरसञ्चारव्यञ्जनाय **उच्छ्वासनिश्श्वासौ**त्युक्तम्। एक एव हि वायुर्नासापुटेन निष्क्रामन् प्रविशंश्च प्राणोऽपान इति चोच्यते। वृत्तिस्थानादिसाम्यायोगाद्गतिसाम्योक्तिः। न दीर्घमुच्छ्वसन्नपि निश्श्वसन्नित्यर्थः। साक्षात्कारात्यन्ताव्यवहितपूर्वावस्थाविषयत्वाद्यतशब्दस्य **प्रवृत्त्यनर्हे**त्यर्थ उक्तः। *स्पर्शान् कृत्वा बहिर्बाह्यान् इत्यत्र प्रवृत्तिनिवारणम्; *यतेन्द्रियः इत्यादौ तु तत्फलभूता प्रवृत्त्यनर्हतेत्यपुनरुक्तिरिति भावः। ज्ञानार्थधातौ निष्पन्नस्य मुनिशब्दस्य योगावस्थायाम् आत्मसाक्षात्काररूपज्ञानविशेषे तात्पर्यमाह—**आत्मावलोकनशील** इति। अत्र वाच्यमत्वादप्यन्तरङ्गभूतोऽयमर्थ इति भावः। सदाशब्दाभिप्रेतं व्यनक्ति—**साध्यदशायामिवेति। मुक्त एव**—मुक्तप्राय इत्यर्थः॥ २७॥ २८॥

भा ॥ उक्तस्य नित्यनैमित्तिककर्मेतिकर्तव्यताकस्य कर्मयोगस्य योगशिरस्कस्य सुशकतामाह—

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु **कर्मसंन्यासयोगो** नाम पञ्चमोऽध्यायः ॥ ५ ॥

भा ॥ **यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिमृच्छति, कर्मयोगकरण एव सुखमृच्छति । सर्वलोकमहेश्वरं**—सर्वेषां लोकेश्वराणामपीश्वरम् ; *तमीश्वराणां परमं महेश्वरम् **(श्वे. ६. ७) इति हि श्रूयते । मां सर्वलोकमहेश्वरं सर्वसुहृदं ज्ञात्वा** मदाराधनरूपः कर्मयोग इति सुखेन तत्र **प्रवर्तत इत्यर्थः ; सुहृद आराधनाय हि सर्वे प्रयतन्ते ॥ २९ ॥**

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये पञ्चमोऽध्यायः ॥ ५ ॥

ता ॥ अध्यायारम्भे *संन्यासं कर्मणां कृष्ण (१) इत्यादिना वैषम्ये पृष्टे ज्ञानयोगस्य दुष्करत्वादिकम्, कर्मयोगस्य सौकर्यम् शैघ्र्यं चोक्तम् । ततश्च सेतिकर्तव्यताकसशिरस्ककर्मयोगो विशदीकृतः । अथात्रोपसंहारेऽपि प्राक्प्रश्नोत्तरतया प्रक्रान्तसौकर्यादिकमेव प्रकारान्तरेण स्थिरीक्रियत इत्यभिप्रायेणाह—**उक्तस्येति** । अत्र कर्मयोगशब्देन ***दैवमेव** (४.२४) इत्याद्युक्तप्रातिस्विकप्रधानांशो गृहीतः । **नित्यनैमित्तिककर्मेतिकर्तव्यताकस्येत्यनेन** सर्वकर्मयोगभेदनिष्ठानां ज्ञानयोगभक्तियोगनिष्ठानां चावर्जनीयस्साधारणांशः । सुशकत्वम्—अनिर्वेदेन प्रवृत्तिविषयत्वम् । शान्तिशब्दोऽत्र न भगवत्प्राप्तिरूपमोक्षपरः जीवोपासनप्रकरणत्वात् ; नापि कर्मयोगसाध्यफलपरः, ततोऽप्युपयुक्तस्य प्रसिद्धिस्वारस्यानुरोधिनः कर्मा[ङ्गापग]ङ्गोपशमस्य वक्तुमुचितत्वात् ; *ज्ञात्वा इत्यत्रानुष्ठायेत्यध्याहारसापेक्षत्वप्रसङ्गात् ; अतः *सुखं बन्धात्प्रमुच्यते (५. ३) इत्यादिनोक्तं मनःक्लेशशान्त्यादिरूपं सुखमत्र शान्तिशब्देन विवक्षितमित्यभिप्रायेणाह—**कर्मयोगकरण एव सुखमृच्छतीति** । भगवत्समानाधिकरणतया सर्वलोकप्रतिसंबन्धिकतया च महेश्वरशब्दस्यात्र न रूढिविशेषेण प्रवृत्तिरित्याह—**सर्वेषां लोकेश्वराणामपीति** । सर्वेषां लोकानां महान्तमीश्वरमित्येव तु समासार्थः । तत्र प्रमाणमाह—**तमीश्वराणामिति** । श्रुतावपि महेश्वरशब्दस्सप्रतिसंबन्धिकत्वात्परमत्वविशेषणाच्च न रूढः ; तद्वदत्रापि । सर्वशब्दासङ्कोचान्महत्त्वविशेषणाच्च रुद्रादिलोकेश्वरान्तरव्यवच्छेद उक्तः । *सर्वेश्वरेश्वरः कृष्णः (वि.ध.७४.४४) इति हि स्मर्यते । कर्मयोगस्य दुःखरूपस्य अनुष्ठानदशायामेव कथं सुखमिति शङ्कां विशेषणत्रयेण व्युदस्यति—**मामित्यादिना** । महोदारसार्वभौमप्रियसखसेवायामिव कर्मयोगे सुखबुद्ध्यैव प्रवर्तत इति भावः । **मदाराधनरूपः कर्मयोग** इत्यनेन ***भोक्तारं यज्ञतपसाम्** इत्यस्यार्थो विवृतः । यज्ञास्तपांसिच कर्मयोगवर्गोपलक्षणमिति भावः । सौहार्दस्य प्रयोजनान्तरनिरपेक्षसमाराधनहेतुत्वे लोकदृष्टान्तमाह—**सुहृद इति** । **सर्व इति** । न केवलं शास्त्रनिष्ठाः, किं तु पामरास्तिर्यञ्चोऽपि **केचित्** स्वेषु सौहार्दवन्तं पुरुषं [हि] इङ्गिताकारैरुपलक्ष्य तावन्मात्रेण संप्रीतास्तदनुवर्तनमतिप्रयत्नेन कुर्वन्तीत्यर्थः । **पुरुषान्तरवदैश्वर्यमदगर्वमूलदौर्मुख्यादिवर्जनं चास्य सुहृत्त्वेन लभ्यते ॥ २९ ॥**

॥ इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीः

॥ अथ षष्ठोऽध्यायः ॥ ६ ॥

श्रीभगवानुवाच—

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्नचाक्रियः ॥ १

भा ॥ उक्तः कर्मयोगस्वपरिकरः, इदानीं ज्ञानयोग[कर्मयोग]साध्यात्मावलोकनरूपयोगाभ्यासविधिरुच्यते । तत्र कर्मयोगस्य निरपेक्षयोगसाधनत्वं द्रढयितुं ज्ञानाकारः कर्मयोगो योगशिरस्कोऽनूद्यते ; कर्मफलं—स्वर्गादिकमनाश्रितः, कार्यं—कर्मानुष्ठानमेव कार्यम्, सर्वात्मनाऽसत्सुहृद्भूतपरमपुरुषाराधनरूपतया कर्मैव मम प्रयोजनं न तत्साध्यं किंचिदिति यः कर्म करोति ; स संन्यासी च— ज्ञानयोगनिष्ठश्च ; योगी च— कर्मयोगनिष्ठश्च ; आत्मावलोकनयोगसाधनभूतोभयनिष्ठ इत्यर्थः । न निरग्निर्नचाक्रियः—न चोदितयज्ञादिकर्मस्वप्रवृत्तः, न च केवलज्ञाननिष्ठः ; तस्य हि ज्ञाननिष्ठैव, कर्मयोगनिष्ठस्य तूभयमस्तीत्यभिप्रायः ॥ १ ॥

ता ॥ षष्ठाध्यायोपक्रमस्य पूर्वोक्तार्थानुवादरूपतां दर्शयितुं पूर्वेणाविच्छिन्नानुसंधानार्थमध्यायसंगतिवचनात्पूर्वमेव व्याख्येयोपादानम् । वृत्तवर्तिष्यमाणाभिधानमुखेन संगतिं दर्शयति—**उक्त** इति । कर्मयोग उक्तः, तत्साध्यतयोपक्षिप्तः समाधिलक्षणो योग एवात्र सानुबन्धः प्रतिपाद्य इति संगतिः । **योगाभ्यासविधिरुच्यत** इति । * योगाभ्यासविधिर्योगी चतुर्धा योगसाधनम् । योगसिद्धिस्त्वयोगस्य पारम्यं षष्ठ उच्यते ॥ (सं. १०) इति संग्रहश्लोके प्रथमं योगाभ्यासविधेरुपादानादन्येषां च तदर्थत्वात्स एवाध्यायप्रधानार्थतया संगृहीत इति भावः । * अनाश्रितः इत्यादीनां * समबुद्धिर्विशिष्यते इत्यन्तानां नवानां श्लोकानां प्रागुक्तानधिकार्थत्वान्निष्प्रयोजनत्वमाशङ्क्याह—**तत्रेति** । अभ्यासो हि तात्पर्यलिङ्गम्, अव्यवहितनिर्देशश्च नैरपेक्ष्यं सूचयेदिति भावः । **ज्ञानाकारो योगशिरस्क** इति पदाभ्यां साधनस्य प्रागुक्तमन्तर्गतात्मज्ञानत्वादिलक्षणं पौष्कल्यं, साध्यस्यात्मावलोकनस्याव्यवहितत्वं चाभिप्रेतम् । * अनाश्रितः इति श्लोके पूर्वार्धेन ज्ञानाकारकर्मयोगानुवादः, उत्तरार्धेन नैरपेक्ष्यदृढीकरणम् । * भोक्तारं यज्ञतपसाम् (५. २९) इत्यव्यवहितपूर्वश्लोकालोचनया **सर्वात्मनाऽसत्सुहृद्भूतेत्यादिकमुक्तम्** । ततश्च कर्मफलमनाश्रित इत्युक्ते निष्फलप्रवृत्तिस्स्यादिति शङ्कायां कर्मस्वरूपफलत्वस्य वक्तुमुचितत्वात्कार्यशब्दः प्रयोजनविषय इति दर्शयितुं—**कर्मानुष्ठानमेव कार्यमिति** वचनव्यक्तिर्दर्शिता । कार्यशब्दस्य चोदितविषयत्वे मन्दप्रयोजनत्वं स्यादिति भावः । ननु कर्मयोगनिष्ठमनूद्य तस्यैव ज्ञानयोगनिष्ठत्वं कर्मयोगनिष्ठत्वं च विधातुमयुक्तम् ; प्रथमे विरोधात्, द्वितीये तूद्देश्योपादेयविभागाभावपौनरुक्त्यनिष्प्रयोजनत्वेभ्य इति शङ्कायामाह—**आत्मावलोकनेति** । पृथक्साधनभूतोभयसाध्यं फलमनेन लब्धमित्युभयनिष्ठत्वमुपचारादुच्यते ; ततश्च कर्मयोगस्य निरपेक्षसाधनत्वं विवक्षितमिति भावः । यद्वा कर्मयोगांशभूतज्ञानक्रियाभेदेन परिहार इति भावः । अग्निशब्दस्यात्राग्निसंबन्धिकर्मलक्षकत्वव्यञ्जनाय यज्ञादिशब्दः । लक्ष्यार्थानां संग्राहकं चोदितत्वम् । * निरग्निः इत्यनेनैव कर्मनिवृत्तेरुक्तत्वादक्रियशब्दः क्रियानिवृत्तिमुखेन क्रियाव्यतिरिक्तनिष्ठत्वलक्षकः ; व्यतिरिक्तश्चात्रासन्नो ज्ञानयोग इति दर्शयितुं—**केवलज्ञाननिष्ठ इत्युक्तम्** । यद्वा, * न निरग्निर्नचाक्रियः इत्युभाभ्यां श्रौतस्मार्तक्रियाविशेषनिषेधकाभ्यां फलितमाह—**नचोदितेत्यादि** । तदभिप्रेतमाह—**न केवलज्ञाननिष्ठ** इति । * अनग्निरनिकेतस्स्यात्, * त्यक्त्वा द्रव्याग्निसाध्यानि कर्माणि (मनु. ६. २५, ४३) इत्यादिप्रतिपादितसंन्यासाश्रमव्यवच्छेद इहासङ्गत इति भावः ॥ १ ॥

भा ॥ उक्तलक्षणकर्मयोगे ज्ञानमप्यस्तीत्याह—

यं संन्यास इति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ॥ २

भा ॥ यं संन्यास इति—ज्ञानयोग इति, आत्मयाथात्म्यज्ञानमिति प्राहुः, तं कर्मयोगमेव विद्धि । तदुपपादयति—न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चनेति । आत्मयाथात्म्यानुसन्धानेन अनात्मनि प्रकृताद्यात्मसङ्कल्पः संन्यस्तः—परित्यक्तो येन स संन्यस्तसङ्कल्पः, अनेवंभूतः असंन्यस्तसङ्कल्पः । न ह्युक्तेषु कर्मयोगिष्वनेवंभूतः कश्चन कर्मयोगी भवति ; * यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः (४. १९) इति ह्युक्तम् ॥ २ ॥

ता ॥ संन्यासमनूद्य योगत्वे विधीयमाने ज्ञानयोगे कर्मयोगसद्भावप्रतिपादनभ्रमस्स्यात्, तच्च * न ह्यसंन्यस्त इत्युपपादनविरुद्धम्, अत्रानुपयुक्तं चेत्यभिप्रायेणाह—**उक्तलक्षणे**ति । योगोद्देशेन संन्यासत्वविधिपरं वाक्यमित्यर्थः । संन्यासशब्दस्याभिप्रेतं वक्तुं प्राकरणिकं वाच्यं तावदाह—**ज्ञानयोग** इति । अत्र तदभिप्रेतमाह—**आत्मयाथात्म्यज्ञान**मिति । समुदायवाचकशब्दस्तदंशेऽपि प्रयुज्यत इति भावः । **तं कर्मयोगमेव विद्धी**ति—कर्मयोगान्तर्गतमेव विद्धीत्यर्थः । **आत्मयाथात्म्ये**त्यादेरयमभिप्रायः—सङ्कल्पशब्दो न तावदत्र कुर्यामिति सङ्कल्पविषयः, तदभावे कर्मकरणस्यैव अशक्यत्वात् । नापि फलाभिसन्धिविषयः, तथात्वेऽपि कर्मयोगे ज्ञानयोगान्तर्भावप्रतिज्ञाया उपपादकत्वासिद्धेः । अत एव * सङ्कल्पमूलः कामो [वै] हि यज्ञास्सङ्कल्पसंभवाः (मनु. २. ३) इत्यादिस्मृतिपठितः कामस्य कर्मणां च हेतुस्सङ्कल्पोऽत्र न विवक्षितः । तस्मादेकीकृत्य कल्पोऽत्र सङ्कल्पः । सचात्र देहात्मगोचरः । तत्परित्यागश्च तत्त्वज्ञानात् । एवं सत्येव * नहीत्यादेरुक्तोपपादकत्वमुपपद्यत—इति । * कश्चनेति निर्देशः प्रागुक्तकर्मयोगनिष्ठवैविध्यसूचक इत्यभिप्रायेण **उक्तेषु कर्मयोगिष्वि**त्युक्तम् । सिद्धो ह्यत्रोपपादको भवति । तत्सिद्धिरत्र कुत इत्याकाङ्क्षायां हिशब्दाभिप्रेतमाह—**यस्ये**ति ॥ २ ॥

भा ॥ कर्मयोग एवाप्रमादेन योगं साधयतीत्याह—

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३

भा ॥ योगम्—आत्मावलोकनं प्राप्तुमिच्छोर्मुमुक्षोः कर्मयोग एव कारणमुच्यते । तस्यैव योगारूढस्य—प्रतिष्ठितयोगस्यैव, शमः—कर्मनिवृत्तिः कारणमुच्यते । यावदात्मावलोकनरूपमोक्षावाप्ति कर्म कार्यमित्यर्थः ॥ ३ ॥

ता ॥ * आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते इत्यत्र विशेषविधिश्शेषनिषेधपर इत्यभिप्रायेणाह—**कर्मयोग एवे**ति । कर्मयोगमात्रसाध्यो हि योगो न परमात्मावलोकनमित्यभिप्रायेणाह—**आत्मावलोकनमि**ति । आमोक्षाद्यत्किञ्चित्कर्म कर्तव्यमित्यभिप्रायेणाह—**मुमुक्षो**रिति । आत्मावलोकनस्यात्र मोक्षकल्पतया [मोक्ष] मुमुक्षुशब्दोपचारः । * योगारूढस्येति युक्तावस्थाविषयत्वश्रमव्युदासाय—**प्रतिष्ठितयोगस्ये**त्युक्तम् । * कर्म कारणमित्युक्तकर्मप्रतियोगिकश्शमस्तन्निवृत्तिरेवात्र भवितुमर्हतीत्यभिप्रायेण **शमः कर्मनिवृत्ति**रित्युक्तम् । एतेन *मुनिरत्र परिव्राजकः, शमश्च पारिव्रज्यरूपः इति परोक्तं निरस्तम् । ननु प्रतिष्ठितयोगस्य किं कारणापेक्षया, न ह्यन्यदस्य कार्यमस्तीति शङ्कायां * योगारूढस्य इत्यादिना कर्मनिवृत्तिविधानं ततः पूर्वमनिवृत्त्यभिप्रायमिति दर्शयति—**यावदि**ति ॥ ३ ॥

भा ॥ कदा प्रतिष्ठितयोगो भवतीत्यत्राह—

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४

भा ॥ यदाऽयं योगी स्वात्मैकानुभवस्वभावतया इन्द्रियार्थेषु—आत्मव्यतिरिक्तप्राकृतविषयेषु तत्संबन्धिषु च कर्मसु नानुषज्जते – न सङ्गमर्हति; तदा हि सर्वसङ्कल्पसंन्यासी योगारूढ इत्युच्यते । तस्मादारुरुक्षोर्विषयानुभवार्हतया तदननुषङ्गाभ्यासरूपः कर्मयोग एव योगनिष्पत्तिकारणम् । अतो विषयाननुषङ्गाभ्यासरूपं कर्मयोगमेवारुरुक्षुः कुर्यात् ॥ ४ ॥

ता ॥ संगमयति—**कदे**ति । **अयं योगी**ति । यावदात्मावलोकनं कर्मयोगे वर्तमान इति भावः । अर्थसिद्धं हेतुमाह—**आत्मैकानुभवस्वभावतये**ति । अनित्यत्वहेयत्वादिसूचनाय प्राकृतशब्दः । **कर्मस्वि**ति न चोदितकर्ममात्रविषयम्, तस्य स्वारसिकसङ्गास्पदत्वाभावेन निषेधायोगात् । नापि परोक्तप्रक्रियया ऽग्निहोत्रादिनित्यनैमित्तिकविषयम्, वैदिकस्य तत्र निस्सङ्गत्वायोगात् । अतो यो हि यदिच्छति, तस्य तस्मिंस्तत्साधने वा कार्यतावुद्धिरिति न्यायादिन्द्रियार्थेषु सङ्गिनां तदुपायभूतेषु विहितेषु निषिद्धेष्वनुभयेषु च कर्मसु यथासंभवं सङ्गस्यादिति तन्निषेध एवोचित इत्यभिप्रायेण—**तत्संबन्धिषु च कर्मस्वि**त्युक्तम् । सङ्गं त्यजति निवर्तयतीत्यादिषु प्रयोगेषु जायमानस्य सङ्गस्य बलान्निवर्तनं प्रतीयते; अत्र तु **नानुषज्जत** इत्युक्तम् । सङ्गस्त्वयमेव न जायत इत्यर्थः । ततः फलितमाह—**न सङ्गमर्हती**ति । हिशब्दस्य वाक्यार्थान्वयौचित्यात्—**तदा ही**त्युक्तम् । तदा ह्यसौ सर्वसङ्कल्पसंन्यासी योगारूढो भवति; नतु सङ्गकाल इति भावः । व्याख्यातश्लोकद्वयतात्पर्यार्थमाह—**तस्मा**दिति । इष्टकारणत्वोपदेशो हि तत्र प्रवृत्त्यर्थ इति तात्पर्येणाह—**अत** इति ॥ ४ ॥

भा ॥ तदेवाह—

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५

भा ॥ आत्मना—मनसा; विषयाननुषक्तेन [मनसा] आत्मानमुद्धरेत् । तद्विपरीतेन मनसा आत्मानं नावसादयेत् । आत्मैव—मन एव ह्यात्मनो बन्धुः; तदेवात्मनो रिपुः ॥ ५ ॥

ता ॥ श्लोकद्वयाभिप्रेतमर्थं विवृणोतीत्याह—**तदेवाहे**ति । * आत्मना इत्यस्य करणार्थत्वौचित्यात् **मनसेत्युक्तम्** । **विषयाननुषक्तेन तद्विपरीतेने**त्युभयं क्रियाद्वयसामर्थ्यात्पूर्वोत्तरानुसन्धानाच्चोक्तम् । **उद्धरेत्**—योगारूढतापादनेन संसारसमुद्रादुत्तारयेत्; न पुनरधो नयेदित्यर्थः । आत्मोद्धरणात्मावसादयोर्द्वयोरपि मनसो हेतुत्वं प्रपञ्च्यते—**आत्मैवे**ति । अन्ये बन्धवोऽपवर्गविरोधित्वादबन्धवः । अन्ये च रिपव आत्मप्रवृत्तिमूलभूता इत्यवधारणाभिप्रायः ॥५॥

बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६

भा ॥ येनपुरुषेण स्वेनैव स्वमनो विषयेभ्यो जितम्, तन्मनस्तस्य बन्धुः । अनात्मनः—अजितमनसः स्वकीयमेव मनः स्वस्य शत्रुवत् शत्रुत्वे वर्तेत—स्वनिश्श्रेयसविपरीते वर्तेतेत्यर्थः । यथोक्तं भगवता

पराशरेणापि—* मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मनः ॥ (वि. ६. ७. २८) इति ॥ ६ ॥

ता ॥ एकस्यैवैकं प्रति बन्धुत्वं रिपुत्वं च व्याहतमिति शङ्का परिहियते—* बन्धुरात्मेतिश्लोकेन । **स्वेनैवेति**—स्वात्मनेत्यर्थः । मनसो विजयो नाम विषयेभ्यो व्यावर्तनमित्यभिप्रायेणोक्तम्—**विषयेभ्यो जितमिति** । बन्धुत्वोपपादनं हि मनसो विजयेनोक्तम्, शत्रुत्वोपपादनमपि हि तदभावेनेत्यभिप्रायेणोक्तम्—**अनात्मनः अजितमनस इति** । **आत्मैव** इत्येवकाराभिप्रेतमाह—**स्वकीयमेव मन** इति । स्वशेषभूतमेव हि विरोधि संजातमिति भावः । शत्रुशब्दयोः **पुनरुक्तिभ्रमव्युदासायान्वयमाह—शत्रुवच्छत्रुत्वे वर्तेतेति** । संप्रतिपन्नो बाह्यशत्रुरिह दृष्टान्ततः । शत्रुकृत्यमिह **शत्रुत्वं विवक्षितमित्याह—स्वनिश्श्रेयसविपरीत** इति । नन्वत्रात्मनेत्यादीनां मनोविषयत्वं कथम्? कार्यकरणसङ्घातविषयत्वं हि **परैरुक्तम्** ; ऐकरूप्येण सर्वेषामात्मशब्दानां स्वात्मविषयत्वं किं न स्यात्? कथं च मनसो जयादिः विषयव्यावर्तनादिरूप इति शङ्कायां कर्मक[र्तृत्वा]त्रादिभेदव्यपदेशौचित्यात्पूर्वोत्तरानुसन्धानाच्च सिद्धमेवार्थं संवादेन द्रढयति—**यथोक्तमिति** ॥६

भा ॥ योगारम्भयोग्याऽवस्थोच्यते—

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानावमानयोः ॥ ७

भा ॥ शीतोष्णसुखदुःखेषु मानावमानयाश्च जितात्मनः—जितमनसः विकाररहितमनसः प्रशान्तस्य मनसि परमात्मा समाहितः—सम्यगाहितः । स्वरूपेणावस्थितः प्रत्यगात्माऽत्र परमात्मेत्युच्यते, तस्यैव प्रकृतत्वात्। तस्यापि पूर्वपूर्वावस्थापेक्षया परमात्मत्वात्। आत्मा परं समाहित इति वाऽन्वयः ॥ ७ ॥

ता ॥ प्रतिष्ठितयोगत्वावस्था, तदारोहणोपायश्चोक्तौ ; अथ योगप्रक्रियां वक्तुं तदारम्भदशा ज्ञाप्यत इत्याह—**योगारम्भेति** । सप्तम्याः * समाहितः इत्यनेन अन्वयभ्रमव्युदासायान्वयं पदार्थांश्च व्यञ्जयति—**शीतोष्णेति** । एतेन * मानावमानयोस्समस्य इति परोक्ताध्याहारोऽनपेक्षित इति दर्शितम् । शीतोष्णादिषु द्वन्द्वेष्वनुभूयमानेषु कथं मनसो विजय इत्यत्राह—**विकाररहितमनस** इति । विकारश्च हर्षोद्रेकादिरूपः प्रागुक्तः । * प्रशान्तस्य इत्येतद्बाह्येन्द्रिय-व्यापारनिवृत्तिपरम्, मनोविकारनिवृत्तेरुक्तत्वात् । असन्निहितफलाभिसन्ध्यादिराहित्यपरं वा । * समाहितः इत्यस्याकाङ्क्षितं **प्रकृतमुचितं चाधिकरणमाह—मनसीति** । **सम्यगाहित** इति—विशदानुसन्धानयोग्यो जात इत्यर्थः । जीवात्मप्रकरणे परमात्मा कथमुच्यत इत्यत्राह—**स्वरूपेणेति** । **अत्रेति** प्रकरणौचित्यसूचनम् । तदेव दर्शयति—**तस्यैवेति** । एवकारेण प्रासङ्गिको हि पूर्वं परमात्मप्रसङ्ग इति ज्ञापितम् । अवरस्य जीवस्य परमात्मशब्दविषयत्वं कथमित्यत्राह—**तस्यापीति** । तथाऽपि परमात्मशब्दस्य प्रसिद्धार्थैः परित्यक्तस्स्यात्, परत्वं च सङ्कुचितम्, परमशब्दनिर्वचनं च न घटते ; परो मा अस्मादिति हि तत् । नच पूर्वपूर्वावस्थापेक्षया परो मा अस्मादित्यन्वयस्सिध्यतीत्यरुचेरन्वयान्तरमाह—**आत्मा परमिति** । **अत्र चाधिकं केवलमिति** वा परशब्दार्थः ॥ ७ ॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥ ८

भा ॥ ज्ञानविज्ञानतृप्तात्मा—आत्मस्वरूपविषयेण ज्ञानेन, तस्य च प्रकृतिविसजातीयाकारविषयेण विज्ञानेन च तृप्तमनाः कूटस्थः देवाद्यवस्थास्वनुवर्तमानसर्वसाधारणज्ञानैकाकारात्मनि स्थितः, तत एव विजितेन्द्रियः, समलोष्टाश्मकाञ्चनः—प्रकृतिविविक्तस्वरूपनिष्ठतया प्राकृतवस्तुविशेषेषु भोग्यत्वाभावाल्लोष्टाश्मकाञ्चनेषु समप्रयोजनो यः कर्मयोगी, स युक्त इत्युच्यते—आत्मावलोकनरूपयोगाभ्यासार्ह इत्युच्यते ॥ ८ ॥

ता ॥ इन्द्रियविजयो द्वन्द्वसहत्वं चोक्तम् ; अथ तयोर्हेतुरुच्यते—* ज्ञान इति श्लोकेन । ज्ञानविज्ञानशब्दयोः पौनरुक्त्यव्युदासायोपसर्गद्योतितं विषयविशेषं व्यञ्जयति—**आत्मस्वरूपे**त्यादिना । पारलौकिकसमस्तकर्मापेक्षितदेहादिव्यतिरिक्तत्वधीरिह ज्ञानम् । मोक्षाधिकारिणो विशेषतोऽपेक्षितनित्यत्वनिरतिशयानन्दत्वादिधीस्तु विज्ञानम्, न पुनरुपासनरूपज्ञानं तत्सामग्र्यापरत्वाद्वाक्यस्येति भावः । कूटे निष्ठतीति कूटस्थः । कूटशब्दश्च परिशुद्धात्मन्यौपचारिकः । कूटस्य ह्यांगन्तुकविनश्वरायःपिण्डादिसंश्लेषविश्लेषरूपावस्थाप्रवाहे वर्तमानेऽपि स्वस्वरूपे न शैथिल्यादिरूपो विकारः, तद्वदत्रापि देवादिशरीरसंश्लेषविश्लेषरूपावस्थाप्रवाहेऽपि *न जायते म्रियते (गी. २. २०) इत्यादिनोक्तप्रकारेण निर्विकारत्वं सिद्धमिति कूटशब्देनोपचारो युज्यत इत्यभिप्रायेणाह—**देवादी**ति । शिग्वरपर्यायकूटविवक्षया वोपचारः । कूटस्थ इव वा साधारणतयाऽनुसन्धानादसौ कूटस्थ इत्यभिप्रायेणाह—**देवाद्यवस्थास्वि**ति । देवशब्दोऽत्र भावप्रधानः । अनुवर्तमानत्वात्सर्वसाधारणत्वमित्यपौनरुक्त्यम् । यद्वा सर्वात्मसाधारणेत्यर्थः । पूर्वश्लोकोक्तजितेन्द्रियत्वादौ हेतुरयमुक्त इत्याह—**तत एवे**ति । स्वरूपकार्यकारणादिभिरत्यन्तविषमाणां लोष्टादीनां समत्वं कथमिति शङ्कानिराकरणाय **प्रकृती**त्यादि **समप्रयोजन** इत्यन्तमुक्तम् । लोष्टाश्मभेदवदश्मकाञ्चनादिभेदोऽपीत्यनेकदृष्टान्ताभिप्रायः । अत्रोद्देश्योपादेयांशौ विभजते—**य** इत्यादिना । युक्तशब्द एवात्र योग्यपर्यायः ; प्रकरणवशात्तु योगाभ्यासविषयत्वं सिद्धम् । यद्वा प्रकृतिप्रत्यययोरर्थभेदविवक्षया **योगाभ्यासार्ह** इत्युक्तम् ॥ ८ ॥

भा ॥ तथा च—

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९

भा ॥ वयोविशेषानङ्गीकारेण स्वहितैषिणस्सुहृदः ; सवयसो हितैषिणो मित्राणि, अरयो निमित्ततोऽनर्थेच्छवः ; उभयहेत्वभावात् उभयरहिता उदासीनाः ; जन्मत एवोभयरहिता मध्यस्थाः ; जन्मत एवानिष्टेच्छवो द्वेष्याः ; जन्मत एव हितैषिणो बन्धवः ; साधवो धर्मशीलाः ; पापाः पापशीलाः ; आत्मैकप्रयोजनतया सुहृन्मित्रादिभिः प्रयोजनाभावाद्विरोधाभावाच्च तेषु समबुद्धियोंगाभ्यासार्हत्वे विशिष्यते ॥ ९ ॥

ता ॥ * समलोष्टाश्मकाञ्चनः इति अचेतनेषूक्त एवार्थश्चेतनविषयतया प्रपञ्च्यत इत्यभिप्रायेणाह—**तथाचे**ति । यद्वा सुहृदादिषु समबुद्धित्वस्य दुष्करत्वादत्र *विशिष्यते इत्युक्तेश्च समदर्शित्वातिशयोऽत्र विवक्षितः । तथाच—अपिचेत्यर्थः । सुहृन्मित्रबन्धुशब्दानाम् अरिद्वेष्यशब्दयोरुदासीनमध्यस्थशब्दयोश्च पौनरुक्त्यमपाकर्तुं तत्तत्पदव्याख्या । बन्धुशब्दस्तावत्पित्रादिषु प्रसिद्धः, मित्रशब्दश्च सवयस्सु, अतः पारिशेष्यात्सुहृच्छब्दस्तदुभयव्यतिरिक्तविषय इत्यभिप्रायेणाह—**वयोविशेषानङ्गीकारेणे**ति । **सवयस** इत्यनेन मित्राणां क्रीडादिरूपप्रियैषित्वमप्यस्तीति सूचितम् । बन्धुशब्दास[त्ते]क्तेर्द्वेष्यशब्दस्तावत्सहजशत्रुविषयः प्राप्तः, ततोऽत्रापि पारिशेष्यादरिशब्दं कृत्रिमशत्रुविषयमाह—**अरयो निमित्ततोऽनर्थेच्छव** इति । मध्यस्थशब्दोऽपि द्वेष्यबन्धुशब्दास[त्ते]क्तेर्हेतुतो हिताहितप्रवृत्तियोग्येषु प्रयोगाभावाच्च जन्मत

एवोभयरहितविषय उचितः । ततः परिशेषादौदासीन्यस्य प्रवृत्तिप्रति[बन्धक]संबन्धिकत्वेन तत्स्मारकत्वात्कारणागमे हिताहितप्रवृत्तियोग्यास्तदभावमात्रेण तद्रहिता उदासीना इत्यभिप्रायेणाह–**उभयेति** । उभयं हितैषित्वमहितैषित्वं च । जन्मतस्संबन्धिनो बन्धव इत्येतावन्मात्रस्य दुर्योधनादिष्वतिव्याप्तेः **जन्मत एव हितैषिणो बन्धव** इत्युक्तम् । एवं स्वप्रतिसंबन्धिनः पुरुषा उक्ताः; अथ साधारण्येन श्लाघ्यत्वनिन्द्यत्वाद्याश्रयाः पुरुषास्साधुपापशब्दाभ्यामभिधीयन्त इत्यभिप्रायेणाह–**साधव** इति । वाक्यार्थमाह–**आत्मैकेति** । सुहृदादिभिः प्रयोजनाभावादितरैर्विरोधाभावाच्चेत्यर्थः । ननु युक्तं नाम सुहृदादिषु समबुद्धित्वम्; न तु साधुषु पापेषु च योगिनां समं प्रयोजनम्, सत्सङ्गमादेरसत्परित्यागादेश्च ज्ञानवृद्धिहेतुत्वेन तेषामवश्यापेक्षितत्वात् । उच्यते–नेदानीमुपजीयकदशापन्नो योगी निर्दिश्यते; किंतु श्रुतसकलश्रोतव्यः कृतसकलकर्तव्यः साक्षात्कारात्यन्तयोग्यदशापन्नः; तथाविधस्य च तस्य साधुभिः पापैश्च प्रयोजनाभावस्समः; केवलं योगोपयुक्तरहस्यस्थानादेरेवोपादेयत्वादिति भावः । योगाभ्यासार्हदशा हि प्रागप्युक्ता; इयं तु तत्र काष्ठाप्राप्तावस्थेति * विशिष्यते इत्यस्य भावः । तदाह–**योगाभ्यासार्हत्वे विशिष्यते** इति । अत्र विमुच्यत इति परैः पठितात्पाठविकल्पादयमेव पाठ उचित इति भावः ॥ ९ ॥

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १०

भा ॥ योगी—उक्तप्रकारकर्मयोगनिष्ठः, सततम्—अहरहर्योगकाले, आत्मानं युञ्जीत—आत्मानं युक्तं कुर्वीत, स्वदर्शननिष्ठं कुर्वीतित्यर्थः; रहसि—जनवर्जिते निश्शब्दे देशे स्थितः, एकाकी—तत्रापि न सद्वितीयः, यतचित्तात्मा—यतचित्तमनस्कः, निराशीः—आत्मव्यतिरिक्ते कृत्स्ने वस्तुनि निरपेक्षः, अपरिग्रहः—तद्व्यतिरिक्ते कस्मिंश्चिदपि ममतारहितः ॥ १० ॥

ता ॥ अथाध्यायप्रधानार्थभूतयोगाभ्यासविधिरुच्यते–* योगी युञ्जीत इत्यादिना । युञ्जीतेति साक्षात्काररूपस्य योगस्य विधीयमानत्वाद्योगीत्यनेन कर्मयोगनिष्ठत्वानुवादः क्रियत इत्यभिप्रायेणाह–**उक्तप्रकारेति** । * सततम् इत्येतन्न सर्वकालविषयम्, तथा योगशास्त्रैः अनभिहितत्वात्, अशक्यत्वाच्च; अतः प्रतिदिवसं योगयोग्यतया विहितसत्त्वोत्तरकालसामस्त्यपरमित्यभिप्रायेणाह–**अहरहर्योगकाल** इति । * युञ्जीत इत्यत्र विवक्षितमर्थं वक्तुं प्रकृतिप्रत्ययार्थभेदं दर्शयति–**युक्तं कुर्वीतेति** । तत्र * युज समाधौ इति प्रकृत्यंशस्य विवक्षितं व्यनक्ति–**स्वदर्शनेति** । आत्माऽत्र मनः, स्वात्मा वा । जनवर्जितेऽपि देशे बाह्यदेशस्थितानां शब्दस्यागमे सति मनस्समाधानं न स्यादिति तन्निवृत्त्यर्थमुक्तं–**निश्शब्द** इति । * रहसि इति विजनदेशाभिधानेऽपि पुनः * एकाकी इति पदं रहस्यार्हात्यासन्नशिष्यसब्रह्मचार्यादिसन्निधिपरित्यागार्थमित्यभिप्रायेणाह–**तत्रापि न सद्वितीय** इति । यद्वा रहश्शब्देन जनवर्जनद्वारा निश्शब्दत्वं लक्ष्यते । एकाकिशब्देन तु जनवर्जनमेवोच्यत इति भावः । व्युत्थानकालेऽपि एकाकित्वमनेनोच्यत इत्येके । ततोऽप्यस्यार्थस्यात्यन्तोपकारित्वादेवं योजना । एतेन * रहसि स्थितः * एकाकी च इति विशेषणात् संन्यासं कृत्वेत्यर्थः इति शंकरोक्तं प्रत्युक्तम् । आत्मशब्देन मनसोऽभिधानेऽपि तस्यैव चिन्तारूपवृत्त्यपेक्षया तद्विशिष्टापेक्षया वा चितशब्द इत्यभिप्रायेणाह–**यतचित्तमनस्क** इति । आशीश्शब्दस्यानेकार्थत्वादिह निषेध्यविशेषव्यक्त्यर्थमुक्तम्–**निरपेक्ष** इति । **अपरिग्रहशब्देन बुद्ध्या स्वीकारपर्यायः परिग्रहोऽत्र निषिध्यत** इत्यभिप्रायेणाह–**ममतारहित** इति ॥ १० ॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम् ॥ ११
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः । उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२

भा ॥ शुचौ देशे—अशुचिभिः पुरुषैरनधिष्ठिते अपरिगृहीते च, अशुचिभिर्वस्तुभिरस्पृष्टे च पवित्रभूते देशे, दार्वादिनिर्मितं नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरमासनं प्रतिष्ठाप्य तस्मिन्मनःप्रसादकरे सापाश्रय उपविश्य योगैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः—सर्वात्मनोपसंहृतचित्तेन्द्रियक्रियः आत्मविशुद्धये—बन्धनिवृत्तये योगं युञ्ज्यात्—आत्मावलोकनं कुर्वीत ॥ ११ ॥ १२ ॥

ता ॥ बाह्योपकरणनियममाह—* शुचौ देश इत्यादिना । शुचिशब्दस्संकोचकाभावात्संसर्गजं स्वाभाविकं चाशुचित्वं निवर्तयतीत्यभिप्रायेणाह—**अशुचिभिरिति** । अशुचयः पुरुषाः पाषण्डिपतितादयः । **अनधिष्ठिते अपरिगृहीते चेति** । अधिष्ठानम्—परकीयेषु निर्वाहकत्वादिरूपेण संसर्गः ; परिग्रहः—स्वकीयत्वाभिमानः ; तदुभयवर्जिते । शुचिशब्दः शास्त्रान्तरोक्तं शोधकत्वमपि लक्षयतीत्यभिप्रायेणोक्तम्—**पवित्रभूत** इति । च्विप्रत्ययरहितप्रयोगात्स्वतश्शुद्धिरुक्ता ; * नात्युच्छ्रितं नातिनीचमित्यादि दृष्टसौकर्यार्थम् । स्थिरत्वं हेतुर्दार्वादिनिर्मितत्वम् ; तस्य कठिनत्वान्मृदुत्वार्थं चेलम्, तत्रापि निस्तरङ्गत्वार्थं शुद्ध्यर्थं चाजिनम्, सर्वस्योपरिशुद्ध्यर्थं सत्त्वोन्मेषार्थं च कुशाः । * कुशाजिनचेलोत्तरमिति कश्चिद्ग्राष्यपाठः ; तथा सत्युत्तरोत्तरमार्दवसिद्ध्यर्थमुक्तमिति मन्तव्यम् । * विपरीतोऽत्र क्रमश्चेलादीनामिति च शांकरम् । केचित्त्वव्यवस्थितक्रमत्वमूचुः । **प्रतिष्ठाप्य**—दृढं स्थापयित्वा । तत्रासन उपविश्येत्यन्वयव्यक्त्यर्थं **तस्मिन्नित्यादिकमुक्तम्** । उक्तानां शुचिदेशादीनां दृष्टादृष्टद्वारा योगोपयोगं दर्शयितुं **मनःप्रसादकर** इत्युक्तम् । **सापाश्रय उपविश्येति**—अन्यथा पाश्चात्यधारणप्रयत्नस्समाधिविरोधी स्यादिति भावः । उपविश्य ; न तु तिष्ठन् शयानो वा । तथाच **सूत्रितम्** * आसीनस्संभवात् (ब्र. ४. १. ७) इति । स्थानशयनयोश्च आयासनिद्रादिप्रसङ्गेन योगो न संभवेत् । तत्रैकाग्रम् इत्यन्वयभ्रमव्युदसाय—**योगैकाग्र**मित्युक्तम् । विरुद्धान्यवृत्तेरेतद्वृत्तिप्रधानत्वमिहैकाग्रत्वम् । * अव्याकुलमेकाग्रमिति केषुचिद्ग्राष्यकोशेषु पाठः ; आत्मावलोकनोन्मुखं कृत्वेत्यर्थः । सार्वभौमो हि चित्तस्य वृत्तिनिरोधो योगतया योगशास्त्रेऽभिहित इत्यभिप्रायेण **सर्वात्मनोपसंहृतचित्तेन्द्रियक्रिय** इत्युक्तम् । चित्तमिह चिन्तावृत्तिः, इन्द्रियाणि च बाह्यानि, * एकाग्रं मनः कृत्वेति वचनात् । बाह्यविषयेभ्य एवायमुपसंहारः, अन्यथाऽऽत्मावलोकनमपि न स्यात् । एतेन * मनसो निश्शेषवृत्तिविलयो योगः इति वदन्तो निरस्ताः । शुद्धान्तःकरणस्य साक्षात्कारसाध्या [ह्या]त्मविशुद्धिर्मोक्ष एवेत्यभिप्रायेण—**बन्धनिवृत्तय** इत्युक्तम् । * अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः (वि. ६. ७. ७७) इति कर्मबन्धो ह्यात्मनामशुद्धिरुच्यते ; * योगं युञ्जीत इत्येतत् * ओदनपाकं पचति इतिवदित्यभिप्रायेण **आत्मावलोकनं कुर्यादित्युक्तम्** ॥ ११ ॥ १२ ॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरम् । संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३
प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः । मनस्संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४

भा ॥ कायशिरोग्रीवं समम्—अचलं—सापाश्रयतया स्थिरं धारयन्, दिशश्चानवलोकयन्, स्वनासिकाग्रं संप्रेक्ष्य, प्रशान्तात्मा—अत्यन्तनिर्वृतमनाः, विगतभीर्ब्रह्मचर्ययुक्तो मनस्संयम्य मच्चित्तो युक्तः—अवहितो मत्पर आसीत—मामेव चिन्तयन्नासीत ॥ १३ ॥ १४ ॥

ता ॥ एवं शुचिदेशासनादिरूपं बाह्यं योगोपकरणं मनसश्चैकाग्र्यमुक्तम् ; अथान्तरान्तरतमयोः कायमनसोः क्रमात्कर्तव्यनियमविशेषा उच्यन्ते—* समम् इत्यादिश्लोकद्वयेन । * कायशिरोग्रीवम् इति द्वन्द्वैकवद्भावः ; ततएव नपुंसकता । अत्र सिद्धापरनामा शरीरस्य मध्यमप्रदेशः कायशब्देन विवक्षितः । *समम्, अचलम्, स्थिरम् इति धारणक्रियाविशेषणानि । सममित्यत्रार्जवं विवक्षितम् ; अचलशब्देन निष्कम्पत्वेऽभिहतेऽपि स्थिरमित्येतदङ्गकम्पकरश्रमहेतुभूतपश्चाद्धारणप्रयत्ननिवृत्तिहेत्वभिप्रायमिति दर्शयितुं **सापाश्रयतया स्थिरम्**इत्युक्तम् । अनेनाचलत्वस्य चिरानुवर्तनयोग्यत्वमुक्तं भवति । बाह्येभ्यो व्यावर्तनं नासिकाग्रे स्थापनं चेति क्रमप्रदर्शनाय—*दिशश्चानवलोकयन् * स्वनासिकाग्रं संप्रेक्ष्य इति व्युत्क्रमेणोक्तम् । यद्वा शतुरत्र हेत्वर्थत्वाद्दिक्छब्दोपलक्षितबाह्यसकलपदार्थावलोकननिवृत्त्यर्थं योगारम्भक्षणे स्वनासिकाग्रप्रेक्षणमिति भावः । भोग्येतरानुपयुक्तविषयनिरीक्षणमपि निवर्तनीयमित्यभिप्रायेण—**दिशश्चेत्युक्तम्** । निमीलनेनापि बाह्यानवलोकनसिद्धौ स्वनासिकाग्रावेक्षणं निद्रादिनिवृत्त्यर्थम् । * संप्रेक्ष्य नासिकाग्रम् इत्येतावत्यभिहिते परनासिकाग्रप्रेक्षणमपि शङ्केयेति तद्व्यवच्छेदार्थमुक्तम् * स्वमिति । मनस्यन्तर्मुखे नासासंप्रेक्षणस्यासंभवाच्चक्षुषो दृष्टिसन्निपातमात्रमिह विवक्षितम् । अतस्संप्रेक्ष्येत्यत्र इवशब्दो लुप्तो द्रष्टव्य इति शाङ्करम् । नायनस्य तेजसस्स्वच्छन्दवृत्त्या नासाग्रसन्निपातमात्रमिह विवक्षितम्, * मनस्संयम्य इति संयमस्याभिधानात् प्रशान्तात्मशब्दो [ऽयं] योगोपयुक्तमनस्सन्तोषपर इत्यभिप्रायेण—**अत्यन्तनिर्वृतमना** इत्युक्तम् । * ब्रह्मचारिव्रते स्थितः इत्यनेन ब्रह्मचर्याश्रमप्रतीतिः, शङ्करोक्तप्रक्रियया वा ब्रह्मचर्यंगुरुशुश्रूषाभिक्षाचर्यादिधीस्स्यादिति तद्व्यवच्छेदायाह—**ब्रह्मचर्ययुक्त** इति । ब्रह्मचर्यं च स्तनवति पिशितपिण्डे भोग्यताधीगर्भस्मरणालोकनालापादिरहितत्वमत्र विवक्षितम् । स्मरन्तिच—* ब्रह्मचर्यं च योषित्सु भोग्यतावुद्धिवर्जनमित्यादि । तथा * स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥ (अ. पु. ३७२. १० ; बा. स्मृ.) इति । युक्तशब्दस्य पूर्वोत्तरप्रतिपन्नात्मावलोकनाभिधानादपि तदुपयुक्तावधानविषयत्वमत्रोचितमित्यभिप्रायेण—**अवहित** इत्युक्तम् । मच्चित्तशब्दो भगवति चित्तस्यानुप्रवेशपरः । मत्परशब्दस्तु तदेकचित्तत्वपरः, तदनुवृत्तिपरो वेत्यपौनरुक्त्यमाह—**मामेवेति** । यद्वा स्त्र्यादौ भोग्यचिन्ता, राजादौ च महति परधीर्लोके विभक्ता, मयि तु तदुभयमित्यपुनरुक्तिः ॥

युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५

भा ॥ एवं मयि परस्मिन् ब्रह्मणि पुरुषोत्तमे मनसश्शुभाश्रये सदा आत्मानं—मनो युञ्जन् नियतमानसः—निश्चलमानसः, मामेव चिन्तयन् मत्स्पर्शपवित्रीकृतमानसतया निश्चलमानसः, मत्संस्थां निर्वाणपरमां शान्तिमधिगच्छति—निर्वाणकाष्ठारूपां मत्संस्थां—मयि संस्थितां शान्तिमधिगच्छति ॥ १५ ॥

जीवात्मयोगप्रकरणे * मच्चित्तो मत्परः इति परमात्मचिन्तनं किमर्थं विधीयत इत्यत्रोच्यते—* युञ्जन्नेवम् इति । एवमित्यनुवादे । *मच्चित्तः *मत्परः इत्युक्तमच्छब्दाभिप्रेतं परत्वादिकं विवृण्वन्नाह—**एवं मयीति** । **परस्मिन् ब्रह्मणीत्यनेन** सर्वकारणत्वेन सर्वात्मकत्वादिकं विवक्षितम् । तथात्वेऽपि समस्तवैलक्षण्येन तद्गततदोषासंस्पर्शो देवताविशेषनिष्कर्षश्च **पुरुषोत्तमशब्दाभिप्रेतः** । उक्ताकारविशिष्टत्वात् मनसश्शुभाश्रयत्वम् । एतेन शुभाश्रयत्वं प्रकरणान्त-

रोक्तदिव्यमङ्गलविग्रहविशिष्टत्वमप्यभिप्रेतम् । तत्रात्मशब्दः प्रकृतानुवादपरतया मनोविषयः । युञ्जन्नित्यस्य प्रयोजनं नियतमानसत्वम्, तच्च निश्चलमानसत्वम् । तदुत्पत्तौ हेतोरवान्तरव्यापारोऽयमित्यभिप्रायेणाह—**मत्स्पर्शेति** । **मत्संस्था**मित्यादि परमप्रयोजनम् । *निर्वाणपरमामित्यत्र निर्वाणं परमं यस्या इति समासे विशेषणव्यत्यासास्वारस्यम्, निर्वाणहेतुशान्तेश्च * नियतमानसः इत्यनेन सिद्धत्वात् पुनरुक्तिश्च स्यात्; परमशब्दश्चास्वरसः । अतो निर्वाणस्य परमामिति समासः, परमशब्दश्च परमावस्थाविषय इत्यभिप्रायेणाह—**निर्वाणकाष्ठेति** । परमात्मनि संस्थिता च शान्तिरशनायादिषड्ऊर्मिराहित्यरूपा । यद्वा **मयि संस्थितां शान्ति**मित्येतदेव * शुभाश्रये स्थितिमित्य[ने]न्तेन विवृतम् ॥ १५ ॥

भा ॥ एवमात्मयोगमारभमाणस्य मनोनैर्मल्यहेतुभूतां मनसो भगवति शुभाश्रये स्थितिमभिधायान्यदपि योगोपकरणमाह—

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः । न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७

भा ॥ अत्यशनानशने योगविरोधिनी, अतिविहाराविहारौ च, तथाऽतिमात्रस्वप्नजागर्ये; तथा चात्यायासानायासौ । मिताहारविहारस्य मितायासस्य मितस्वप्नावबोधस्य सकलदुःखहा—बन्धनाशनो योगस्संपन्नो भवति ॥ १६ ॥ १७ ॥

ता ॥ उचितदेशप्रभृति परमात्मचिन्तनपर्य[न्तमपि]न्तं ह्यत्र योगोपकरणमेव; अतः **अन्यदपी**त्युक्तम् । योगोपकरणं—योगोपकारकम् । अत्यशनादेर्योगविरोधित्वं * नात्यश्नतः इति श्लोकस्यार्थः । मिताहारादेस्तु योगोपयुक्तत्वं * युक्ताहारेति श्लोकेनोच्यत इति व्यतिरेकतोऽन्वयतश्च एक एवार्थः स्थिरीक्रियत इति विभागमभिप्रेत्याह—**अत्यशनेति** । * युक्ताहारेति श्लोके विहारायासयोरपि उक्तत्वात्पूर्वत्रापि हि तावभिप्रेताविति दर्शयितुम्—**अतिविहारा-विहारावत्यायासानायासा**वित्युक्तम् । * जाग्रतः इत्यत्राप्यतिरनुषञ्जनीयः । पूर्वश्लोकोक्तातिशब्दप्रतियोगिकत्वाद्युक्तशब्दो मितपर इत्यभिप्रायेण—**मिताहारे**त्यादिकमुक्तम् । श्रूयते हि * यद्ध्यात्मसंमितमन्नं तदवति तन्न हिनस्ति, तद्यत्कनीयो न तदवति इति। स्मरन्ति च * उदरस्यार्धमन्नस्य तृतीयमुदकस्य तु । वायोस्सञ्चरणार्थं तु चतुर्थमवशेषयेत् ॥ इति । अतो न्यूनाधिकादिसमस्तदोषराहित्यं युक्तशब्देनाभिप्रेतम् । द्वन्द्वात्पूर्वमपि परमिव प्रत्येकमन्वेतव्यम् । विहारशब्दस्सञ्चारपरः; तन्द्रीपरिहारार्थविनोदनपरो वा । पारिशेष्यादौचित्याच्च चेष्टाशब्दार्थोऽत्र श्रमहेतुरायासः । दुःखशब्दासङ्कोचाद्योगसामर्थ्याच्च **सकले**ति विशेषितम् । तत्फलितमाह—**बन्धनाशन** इति । एवंविधस्य योगो दुःखहा भवतीत्यन्वये योगस्य पूर्वसिद्धताश्रमः स्यात्; तद्व्युदासाय **सम्पन्नो भवती**त्युक्तम् ॥ १६ ॥ १७ ॥

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निस्स्पृहस्सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८

भा ॥ यदा प्रयोजनविषयं चित्तमात्मन्येव विनियतम्—विशेषेण नियतं निरतिशयप्रयोजनतया तत्रैव नियतं निश्चलमवतिष्ठते, तदा सर्वकामेभ्यो निस्स्पृहस्सन् युक्त इत्युच्यते—योगार्ह इत्युच्यते ॥ १८ ॥

ता ॥ एवं परिकरोक्तिसमनन्तरं योगदशां प्रदर्शयितुं ततः पूर्वा प्रागुक्तैव योगयोग्यदशा परामृश्यते * **यदा विनियतम्** इति श्लोकेन । * आत्मन्येव इत्येवकारव्यवच्छेद्यक्षुद्रप्रयोजनान्तरज्ञापनाय सामान्यतः **प्रयोजनविषयमित्युक्तम्** । प्रयोजनान्तरेषु सत्सु क्वचित् विशेषेण नियतत्वे को हेतुरित्यत्राह—**निरतिशयेति** । * युक्तः इत्येतावतोऽत्र विधेयत्वात् * निःस्पृहः इत्यस्याप्युद्देश्यकोट्यनुप्रवेशाय—**निःस्पृहस्सन्नित्युक्तम्** । सर्वकामेभ्यो निर्गता स्पृहा यस्य स तथोक्तः सर्वकामेषु निःस्पृह इत्यर्थः ॥ १८ ॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९

भा ॥ निवातस्थो दीपो यथा नेङ्गते—न चलति ; अचलस्सप्रभस्तिष्ठति ; यतचित्तस्य—निवृत्तसकलेतरमनोवृत्तेः योगिनः—आत्मनि योगं युञ्जतः आत्मस्वरूपस्य सोपमा ; निवातस्थतया निश्चलसप्रभदीपवन्निवृत्तसकलेतरमनोवृत्तितया निश्चलो ज्ञानप्रभ आत्मा तिष्ठतीत्यर्थः ॥ १९ ॥

ता ॥ अथ योगदशा लक्ष्यते—* यथेत्यादिना । दीपस्याचलत्वे हेतुर्निवातस्थत्वम् । इङ्गतेश्चेष्टार्थत्वे विवक्षिते दीपे तदनन्वयात्साधारण्यसिध्यर्थमाह—**नचलतीति** । निश्चलत्वे पर्वतादिनिदर्शनसद्भावेऽपि दीपदृष्टान्ताभिप्रेतमर्थं दर्शयितुमाह—**अचलस्सप्रभस्तिष्ठतीति** । * यतचित्तस्येत्यनेन चिन्तारूपवृत्तिनियमनवचनमुपलक्षणमित्याह—**निवृत्तेति** । मनोमात्रपर्यायो वाऽत्र चित्तशब्दः । **इतर**शब्देनात्मविषयवृत्तिरस्तीति सूचितम् । अन्यथा *युञ्जतो योगमित्येतद्व्याहन्येतेत्यभिप्रायेणाह—**आत्मनि योगं युञ्जत** इति । आत्मनि विषये साक्षात्कारं कुर्वत इत्यर्थः । * **नेङ्गते** इति न शरीरस्य निष्कम्पत्वमुदाह्रियते, * समं कायशिरोग्रीवं धारयन्नचलं स्थिरम् (६।१३) इति तस्योक्तत्वात्, ध्यानदशासाधारण्येन समाधिदशाविशेषकत्वानुपपत्तेश्च । नापीन्द्रियाणां निष्कम्पत्वम्, * योगिनः सोपमेत्यन्वयायोगात् । नाप्यात्मस्वरूपस्य निश्चलत्वम्, अवस्थान्तरेऽपि तत्सिद्धेः । अतस्स्वयंप्रकाशज्ञानप्रभानिरस्तसमस्तवृत्त्यन्तरपरिशुद्धात्मस्वरूपप्रदर्शनार्थोऽयं दृष्टान्त इति सूचयितुं * योगिनः इत्युक्तेऽपि पुनरपि * आत्मनः इत्युक्तमित्यभिप्रायेण—**आत्मस्वरूपस्य सोपमेत्युक्तम्** । * योगिनः आत्मनः इति व्यधिकरणे षष्ठ्यौ । ननु, * सोपमेत्यत्र उपमाशब्द उपमितिपरो वा, दृष्टान्तपरो वा? उभयथाऽपि न संभवति, यथेति निर्दिष्टप्रकारपरामर्शित्वादत्र तच्छब्दस्य, उपमाशब्दस्य च तत्समानाधिकरणत्वात् ; सप्रभस्तिष्ठतीत्येतच्च कथं दार्ष्टान्तिके निर्वाह्यम्? अयोगिनामप्यात्मस्वरूपस्य चलत्वप्रतीत्यभावात् किमर्थं च निश्चलत्वो पदेश इत्यत्राह—**निवातस्थतयेति** । अयमभिप्रायः—उपमेति दृष्टान्तगतं साधर्म्यमत्र निर्दिश्यते । तस्माद्यथेत्यनेन सोपमेत्यस्यान्वय उपपन्नः । प्रभायाश्च प्रतिधर्मोऽत्र ज्ञानम् । आत्मनो निश्चलत्वं चात्र स्वप्रभाभूतज्ञानस्य विविधप्रसरणनिवृत्तिः । सा च बाह्यविषयेषु मनोवृत्तेरेवाभावात् संसारदशायां च ज्ञानस्येन्द्रियद्वारैव प्रसरणादिति । स्मृता—समाधिदशासन्दर्शिभिर्योगिभिरिति शेषः ॥ १९ ॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥ २०
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् । वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः । यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ॥ २२
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् । स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३

भा ॥ योगसेवया हेतुना सर्वत्र निरुद्धं चित्तं यत्र योगे उपरमते—अतिशयितसुखमिदमिति रमते यत्र च योगे आत्मना—मनसा आत्मानं पश्यन् अन्यनिरपेक्षमात्मन्येव तुष्यति, यत्तदतीन्द्रियमात्मबुद्ध्येकग्राह्यमात्यन्तिकं सुखम्, यत्र च योगे वेत्ति—अनुभवति, यत्र च योगे स्थितः सुखातिरेकेण तत्त्वतस्तद्भावान्न चलति, यं योगं लब्ध्वा योगाद्विरतस्तमेव काङ्क्षमाणो नापरं लाभं मन्यते, यस्मिंश्च योगे स्थितो विरतोऽपि गुणवत्पुत्रवियोगादिना गुरुणाऽपि दुःखेन न विचाल्यते, तं दुःखसंयोगवियोगं—दुःखसंयोगप्रत्यनीकाकारं योगशब्दाभिधेयं विद्यात्; स एवंरूपो योग इत्यारम्भदशायां निश्चयेनानिर्विण्णचेतसा—हृष्टचेतसा योगो योक्तव्यः ॥ २०—२३ ॥

ता ॥ पुनरपि योगदशैव आदरातिरेकाय निरतिशयपुरुषार्थत्वप्रतिपादनेन प्रपञ्च्यते—यत्रेत्यादिभिः। * निरुद्धमित्यत्र परिगृहीतत्वविनष्टत्वादिभ्रमव्युदासाय—**योगसेवया हेतुना सर्वत्र निरुद्धमित्युक्तम्**। सर्वतो निरुद्धमित्युक्ते प्रवृत्तस्य निवारणमात्रं प्रतीयेत; सर्वत्रेत्युक्ते तूत्तरोत्तरप्रवृत्त्यनुदयोऽपि सिध्यतीति सप्तमीनिर्देशः। * योगसेवया निरुद्धं यत्रोपरमते इत्युक्ते योगस्य पृथगुपादानात्, यच्छब्दार्थस्य योगाव्यतिरेकः प्रतीयेतेति तद्व्युदासाय * योगसंज्ञितमिति वक्ष्यमाणान्वयेन **यत्र योग** इत्युक्तम्। * यत्र यस्मिन् काले इति परोक्तमयुक्तम्, उपरितनयच्छब्दभिन्नार्थत्वप्रसङ्गात्, प्रतिनिर्देशस्थयोगशब्दानन्वयाच्चेति भावः। * यत्रोपरमते इत्यत्र यतो विच्छिद्यत इति भ्रमापाकरणायाह—**अतिशयितेति**। यत्र सिद्धेऽन्यत उपरमत इत्यध्याहारेण योजना न युक्ता; तथा सति निरुद्धमित्यनेन पुनरुक्तिश्च स्यात्। उपसर्गाणां च नानार्थत्वादयमेवातिशयितार्थ उपपन्नः। आसक्तिप्रतिपादनद्वारा तात्पर्येण वाऽयमर्थस्सिध्यतीति भावः। **यत्र चैवेत्येवकारस्य** यथाक्रमान्वये प्रयोजनाभावात्, उचितान्वयप्रदर्शनाय—**आत्मन्येव तुष्यतीत्युक्तम्**। **अन्यनिरपेक्षमित्यवधारणतोषशब्दाभ्याम्** अर्थसिद्धोक्तिः। यद्वा * आत्मानं पश्यंस्तुष्यतीत्येतावतैव विवक्षितसिद्धौ पुनरात्मनीति निर्देशः तदन्यव्युदासार्थ इत्यभिप्रायः। आत्मनि परमात्मानमिति योजना तु जीवयोगविषयत्वादिहासङ्गता। अतीन्द्रियमित्युक्तत्वात्, परिशेषात्, औचित्याच्च *बुद्धिग्राह्यमित्यत्र बुद्धिं विशिनष्टि—**आत्मबुद्ध्येकग्राह्यमिति**। **आत्यन्तिकं**—पुनर्दुःखसंभेदरहितमित्यर्थः। यदेवंविधं सुखं तच्चत्र वेत्तीत्यन्वयः। यद्वा यत्तदिति पिण्डितं प्रसिद्धयतिशयार्थं तदित्येवार्थः। केचित्तु यत्तच्छब्दान्वयप्रकारमजानन्तः * सुखमात्यन्तिकं यत्रेति पठन्ति। * वेत्ति यत्रेति यत्रशब्दः पूर्वोत्तरवाक्यसाधारणतया मध्ये प्रयुक्तः वेत्तीत्यस्यापवर्गदशानुभाव्यसुखप्रतिसन्धानपरत्वव्युदासाय [भो]योगरूपापरोक्ष्यामिप्रायेण—**अनुभवतीत्युक्तम्**। आत्मनि तुष्यतीति पूर्वमितरसुखनिरपेक्षत्वपरम्। * सुखमात्यन्तिकमित्यादिकं तु स्वरूपसुखानुभवपरमित्यपौनरुक्त्यम्। **सुखातिरेकेणेति**—उक्त एवाचलत्वहेतुरुचित इति भावः। प्रामाणिकार्थान्न चलतीति वा, सम्यङ्नचलतीति वा निर्वहणं मन्दम्। योगदशायां च सुखातिरेकेण स्वरसतस्तदवस्थतयैव चिरतरावस्थानाभिधानमुचितमपेक्षितं चेत्यभिप्रायेण * तत्त्वतः इत्यस्य **तद्भावादिति** प्रतिपदमुक्तम्। इतरविषयनिरोधनैरपेक्ष्ये यत्रेतिश्लोकेनोक्ते। तत आत्मस्वरूपसुखानुभवस्तस्य स्वरसवाहितया दुर्विच्छेदत्वं च * सुखमिति श्लोकेनाभिहिते। अथ * यं लब्ध्वेति श्लोकेन योगविरतिकालेऽपि तस्यैवाभिलाषपदत्वाद्बाह्यसुखाभिलाषेण दुःखेन चानास्कन्दनमुच्यत इति विभागज्ञापनाभिप्रायेण—**योगाद्विरत** इत्यादिकमुक्तम्। योगदशायां तु लाभान्तरप्रतिसन्धानमेव नास्तीति भावः। * गुरुणाऽपीत्युक्तगौरवव्यञ्जनाय—**गुणवत्पुत्रवियोगादिनेत्युक्तम्**। * पुत्रजन्मविपत्तिभ्यां न परं सुखदुःखयोरिति ह्याहुः। **न विचाल्यते**—योगप्रतिकूलमवसादं न गच्छतीत्यर्थः। दुःखसंयोगस्य वियोगस्तस्यासंबन्धः अभाव इत्यर्थः, स च भावान्तरमिति

ज्ञापनायाह—**दुःखसंयोगप्रत्यनीकाकार**मिति। दुःखसंयोगस्य वियोगो यत्रेति व्यधिकरणबहुव्रीहौ फलितोक्तिरियम्। अथवा, वियोगशब्दोऽत्र वियुज्यतेऽनेनेति करणार्थघञन्तो वियोगहेतुपर इति भावः। निर्विण्णचेतसेति पदच्छेदे संसारे तापत्रये वेत्यध्याहारस्स्यात्; तत्तु सप्रयोजने योजनान्तरे संभवति न युक्तम्; तस्मादनिर्विण्णचेतसेति पदच्छेदः। निश्चयशब्दोऽपि तेनैव हेतुसमर्पणेनान्वितः; न तु *योक्तव्य इत्यनेन, निरर्थकान्वयप्रसङ्गात्। अनिर्विण्णत्वहेतुश्च निश्चयः पूर्वोक्तनिरतिशयपुरुषार्थत्वेनैव स्यात्; तदेतदखिलमभिसन्धायाह—**स एवमिति**। **एवंरूपः**—निरतिशयपुरुषार्थरूप इत्यर्थः *योक्तव्य इत्युक्तत्वात् आरम्भोपकारकत्वद्योतनाय **आरम्भदशाया**मित्युक्तम्। *मनसा क्लिश्यमानस्तु समाधानं च कामयेत्। अनिर्वेदं मुनिर्गच्छन् कुर्यादेवात्मनो हितम्॥ (मनु. ६) इति ह्युच्यते। अतो विरक्त्युपयुक्तनिर्वेदोऽन्यः; अयं त्वन्यादृश इति **हृष्टचेतसे**त्युक्तम्। **योक्तव्यः**—कर्तव्य इत्यर्थः॥ २०—२३॥

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः। मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥ २४
शनैश्शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत्॥ २५

भा॥ स्पर्शजास्सङ्कल्पजाश्चेति द्विविधाः कामाः, स्पर्शजाः—शीतोष्णादयः, सङ्कल्पजाः—पुत्रक्षेत्रादयः, तत्र सङ्कल्पप्रभवाः स्वरूपेणैव त्यक्तुं शक्याः, तान्सर्वान्मनसैव तदनन्वयानुसन्धानेन त्यक्त्वा स्पर्शजेष्ववर्जनीयेषु तन्निमित्तहर्षोद्वेगौ त्यक्त्वा समन्ततः सर्वस्माद्विषयात्सर्वमिन्द्रियग्रामं विनियम्य शनैश्शनैर्धृतिगृहीतया—विवेकविषयया बुद्ध्या सर्वस्मादात्मव्यतिरिक्तादुपरम्य आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥ २४॥ २५॥

ता॥ अथ ममकारपरित्यागादिकं प्राग्विप्रकीर्णोक्तमखिलमिदानीं सुखग्रहणायेह सौकर्यप्रदर्शनाय च संकलय्य योगदशापर्यन्ततया स्म[।]र्यते *सङ्कल्पेत्यादिभिः श्लोकैः। *सङ्कल्पप्रभवान्सर्वान् कामांस्त्यक्त्वा इत्येतावतैव सिद्धौ पुनः *अशेषत इति पदं निश्शेषत्यागानर्हाणां विषयाणां सूचकम्। नचोत्तरवाक्ये तदन्वयः, ग्रामशब्देन पर्याप्तत्वात्। अतः प्रयुक्तपदवैयर्थ्यपरिहाराय *अशेषतश्च कामांस्त्यक्त्वेति चकाराभावेऽपि योज्यम्। अपि च सङ्कल्पप्रभवत्वेन विशेषणमेव असङ्कल्पप्रभवकामसूचकमित्यभिप्रायेण विभजते—**स्पर्शजा** इति। मनसैवेति पदं मध्यस्थितत्वादपेक्षितत्वाच्च काकाक्षिन्यायेन पूर्वोत्तरान्वितमिति दर्शयितुं—**तान् सर्वान् मनसैवे**त्यादिकमुक्तम्। कामत्यागकरणस्य मनसोऽवान्तरव्यापारस्तदनन्वयानुसन्धानम्; कर्मोपाधिकशरीरान्विता हि पुत्रादयः, न त्वात्मस्वरूपान्विता इत्यनुसन्धानेनेत्यर्थः। *न प्रहृष्येदित्यादिभिः प्रागेवोक्तं स्मारयति—**स्पर्शजेष्वि**त्यादिना। *समन्ततः इत्यत्र पदच्छेदादिभ्रमव्युदासायाह—**सर्वस्माद्विषया**दिति। प्रक्रान्ताया अशिथिलत्वरूपाया धृतेर्हेतुमाह—**विवेकविषयये**ति। **उपरम्य**—बाह्यलाभार्थं मानसमुद्योगं वारयित्वेत्यर्थः। उपरम्येति व्याख्यानमङ्गत्वद्योतनाय। **किञ्चिदपी**ति—आत्मव्यतिरिक्तमनुकूलप्रतिकूलोदासीनं सर्वमित्यर्थः॥ २४॥ २५॥

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥ २६

भा॥ चलस्वभावतयाऽऽत्मन्यस्थिरं मनः यतोयतो विषयप्रावण्यहेतोः बहिः निश्चरति, ततस्ततो यत्नेन मनो नियम्यात्मन्येव अतिशयितसुखभावनया वशं नयेत्॥ २६॥

ता ॥ पूर्वोक्तमेव दुर्ग्रहत्वद्योतनायावधानविधानाय च प्रपञ्चयति—*यतो यतः इति । *चञ्चलम् *अस्थिरम् इत्यनयोः पौनरुक्त्यनिरासायोक्तं—**चलस्वभावतयाऽऽत्मन्यस्थिर**मिति । सामान्यविशेषविषयत्वादपुनरुक्तिः । *चञ्चलम् इति स्वभावातिरिक्तहेतुनिवृत्तिपरं वा । यतोयतो निश्चरति—येनयेनेन्द्रियद्वारेण निश्चरतीत्यर्थः । यद्वा यंयं विषयमभिमुखीकृत्येत्यर्थः । प्रयोजनतया वा हेतौ पञ्चमी । तद्व्यञ्जनायाह—**विषयप्राप्यहेतो**रिति । विषयसंबन्धार्थमित्यर्थः । विषयप्राप्यत्व हेतोरिति वा । संभवन्ति ह्यर्कितोपनता विषयसन्निधानतत्कीर्तनादयो विषयप्राप्यहेतवः । सुखभावनया वशीकरणं शक्यमित्युच्यते—**अतिशयितसुखभावनये**ति ॥ २६ ॥

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७

भा ॥ प्रशान्तमनसम्—आत्मनि निश्चलमनसम्, तत एव हेतोर्दग्धाशेषकल्मषम्, तत एव शान्तरजसं—विनष्टरजोगुणम्, तत एव ब्रह्मभूतं—स्वस्वरूपेणावस्थितमेनं योगिनम्, आत्मस्वरूपानुभवरूपमुत्तमं सुखमुपैति; ह्रीति हेतौ; उत्तमसुखरूपत्वादात्मस्वरूपस्येत्यर्थः ॥ २७ ॥

ता ॥ आत्मवशीकरणोपायः प्रागुक्तः, अनन्तरं च तदेवाह—*प्रशान्तमनसम् इति श्लोकेन । तत्र विप्रकीर्णावस्थितानां पदानामन्वयक्रममर्थं च दर्शयति—**प्रशान्तमनस**मित्यादिना । *योगिनम्, अकल्मषं, शान्तरजसं, शान्तमनसं, ब्रह्मभूतमेनम् इति हेतुकार्यभावेनान्वयक्रमः । स्वविषययोगस्य स्वकल्मषनिवर्तकत्वं पञ्चगव्यप्राशनादेरिव परसङ्कल्पायत्तम् । **ब्रह्मभूत**मिति देहात्मभ्रमादिप्रयुक्तक्लेशादिदशारूपाब्रह्मत्वव्यवच्छेदार्थम्; तदाह—**स्वरूपेणावस्थित**मिति । अणोरपि हि जीवस्य *स चानन्त्याय कल्पते (श्वे. ५. ९) इति श्रुतेर्धर्मतो बृहत्त्वमस्त्येव । उत्तमशब्देन वैषयिकसुखव्यवच्छेदो विवक्षित इति व्यञ्जनाय—**स्वरूपानुभवरूप**मित्युक्तम् । *ब्रह्मसंस्पर्शम् (२८) इति ह्यनन्तरमुच्यते । निरतिशयत्वाद्दुःखसंभेदविरहाद्वोत्तमत्वम् । पूर्वश्लोकोक्तमनोवशीकरणे वा, एतच्छ्लोकोक्तसुखोपागमे वा हेतुपरो हिशब्द इत्याह—**ह्रीति हेतौ**विति । हेतुस्वरूपं विशदयति—**उत्तमे**ति ॥ २७ ॥

एवं युञ्जन् सदाऽऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८

भा ॥ एवमुक्तप्रकारेणात्मानं युञ्जन् तेनैव विगतप्राचीनसमस्तकल्मषो ब्रह्मसंस्पर्शो—ब्रह्मानुभवरूपं सुखमत्यन्तमपरिमितं सुखेनानायासेन सदाऽश्नुते ॥ २८ ॥

ता ॥ एवं योगप्रभावादाविर्भवतस्सुखस्यात्मानुभवरूपत्वं साक्षात्कारात्पश्चान्निरतिशयत्वमनिवर्तनीयत्वमनायाससाध्यत्वं चोच्यते—*एवं युञ्जन्निति । एवंशब्देन *योगी युञ्जीत इत्यारभ्योक्तः प्रकारः परामृश्यत इत्यभिप्रायेण—**उक्तप्रकारेणे**त्युक्तम् । संस्पर्शशब्दोऽनुभवलक्षकः, बुद्ध्या सह संबन्धपरो वेत्यभिप्रायेण—**ब्रह्मानुभवरूप**मित्युक्तम् । *एवं युञ्जन् इत्यनेनैव सर्वस्योक्तत्वात्तत्र च नियतकाले सदाशब्दान्वयायोगात्सुखस्य चाविनाशित्ववचनस्यापेक्षितत्वात्सदाऽश्नुत इत्यन्वयः । ततश्चात्यन्तशब्दोऽपि सावधिकत्वरूपान्तवृत्तिद्वारा निरतिशयत्वपर इत्यभिप्रायेण—**अपरिमित**मित्युक्तम् । *सुखेन सुखमश्नुते इति सुखसाधनसुखान्तराभावात्सुखेनेत्यनायासत्वं विवक्षितम् ॥ २८ ॥

भा ॥ अथ योगविपाकदशा चतुष्प्रकारोच्यते—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९

भा ॥ स्वात्मनः परेषां च भूतानां प्रकृतिवियुक्त[ात्म]स्वरूपाणां ज्ञानैकाकारतया साम्याद्वैषम्यस्य च प्रकृतिगतत्वाद्योगयुक्तात्मा प्रकृतिवियुक्तेष्वात्मसु सर्वत्र ज्ञानैकाकारतया समदर्शनः सर्वभूतस्थं स्वात्मानं सर्वभूतानि च स्वात्मनीक्षते—सर्वभूतसमानाकारं स्वात्मानं स्वात्मसमानाकाराणि च सर्वभूतानि पश्यतीत्यर्थः । एकस्मिन्नात्मनि दृष्टे सर्वस्यात्मवस्तुनस्तत्साम्यात्सर्वमात्मवस्तु दृष्टं भवतीत्यर्थः । *सर्वत्र समदर्शनः (याज्ञ.) इति वचनात् *योऽयं योगस्त्वया प्रोक्तस्साम्येन (३३) इत्यनुभाषणाच्च, *निर्दोषं हि समं ब्रह्म (५. १९) इति वचनाच्च ॥ २९ ॥

ता ॥ एवं योगाभ्यासविधिः प्रपञ्चितः *आत्मलाभसुखं यावत्तावद्ध्यानमुदाहृतम् इत्याद्युक्तफलपर्यन्तत्वं चोक्तम्; **अथ चतुर्धा योगी प्रतिपाद्यत इति चतुर्णां श्लोकानामर्थमाह—अथेति** । समदर्शित्वरूपयोगविपाकस्य पर्वक्रमेण तारतम्याच्चतुष्प्रकारत्वम् । अत्र प्रथमदशोच्यते—*सर्वभूतस्थम् इति श्लोकेन । समदर्शनत्वोपपत्तये स्वरूपतस्साम्यं प्रकारवैषम्यस्य चौपाधिकत्वं दर्शयति—**स्वात्मन** इत्यादिना **गतत्वा**दित्यन्तेन । भूतशब्दोऽत्राचिद्विशिष्टचेतनवाचकोऽपि *सत्यं भूतहितं प्रोक्तम् (यो. या; व्या) इत्यादिष्विव चेतनांशपरः । **योगयुक्तात्मा**—योगविनियुक्तमनाः, यद्वा योगसमधिगतात्मस्वरूप इत्यर्थः । योगयुक्तात्मत्वं समदर्शनत्वे हेतुः । समदर्शनत्वस्यैव प्रतियोगिविशेषनिर्देशेन प्रपञ्चनं **सर्वभूतस्थम्** इत्यादि । आत्मशब्दस्यात्रात्मसामान्यविषयत्वपरमात्मविषयत्वव्यावर्तनेन स्वपर्यायत्वद्योतनाय—**स्वात्म**शब्दः । नन्वन्योन्याधाराधेयभावः कथमुपपद्यते ? कथं चाणोः स्वात्मनस्सर्वभूतस्थत्वम् ? विप्रकीर्णदेशावस्थितानां च सर्वभूतानां कथमेकदेशस्थिते स्वात्मनि स्थितिः ? अतोऽयमात्मशब्दः परमात्मविषयस्स्यादिति ; तत्राह—**सर्वभूतसमानाकार**मिति । नन्वसौ स्वात्ममात्रानुसन्धानरूपे योगे प्रवृत्तः कथं स्वगतसाम्यप्रतियोगितया स्वप्रतियोगिकसाम्याश्रयतया च स्वव्यतिरिक्तात्मवर्गमीक्षेतेत्यत्राह—**एकस्मिन्नि**ति । एकजातीयेषु पदार्थेष्वेकव्यक्तिदर्शनेनैव स्थालीपुलाकन्यायात्तज्जातीयं सर्वमपि तथात्वेनानुसंहितं भवति हीति भावः । *सर्वभूतस्थमित्यादेस्साम्यमेव विवक्षितमिति दर्शयितुमेतद्ग्रन्थैकदेशं पूर्वोत्तरप्रकरणग्रन्थं चोदाहरति—**सर्वत्रे**ति । अयमभिप्रायः—*सर्वत्र समदर्शनः इति सर्वेषामात्मनां परस्परसाम्यदर्शनमुच्यते ; तदेव *सर्वभूतस्थमिति प्रपञ्च्यते । अत एव च बाह्यभूतेष्वात्मतत्त्वस्य, तस्मिंश्च तेषां स्थितिदर्शनमिहासङ्गतम् । न चेदं परमात्मयोगप्रकरणम् ; येन तथाविधपरमात्मानुसन्धानमुपदिश्येत । नच जीवात्मयोगोपयुक्तं परमात्मध्यानमिदमुच्यते, समाधिदशाभेदविषयत्वात् । न च जीवानां परमात्मनश्च साम्यमिहोच्यते, तस्यापि *यो मामिति विशेषनिर्देशयु[क्त]क्ते श्लोकद्वये प्रतिपादयितुमुचितत्वात् ; अस्य परमात्मविषयत्वे *यो माम् इति श्लोकद्वयेन मात्रया पौनरुक्त्यं च स्यात् । *योऽयं योगः इत्येतदनुवादे च साम्यमात्रमेवोच्यते, न तु परस्पराधाराधेयभावः । प्रागपि *विद्याविनय (५. १८) इत्यादौ साम्यमात्रमेवोक्तम् । अतोऽत्र जीवानां परस्परसाम्यमेव विवक्षितमिति ॥ २९ ॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३०

भा ॥ ततोऽपि विपाकदशापन्नो मम साधर्म्यमुपागतः * निरञ्जनः परमं साम्यमुपैति (मु. ३. १. ३) इत्युच्यमानं सर्वस्यात्मवस्तुनो विधूतपुण्यपापस्य स्वरूपेणावस्थितस्य मत्साम्यं पश्यन् यस्सर्वत्रात्मवस्तुनि मां पश्यति, सर्वमात्मवस्तु च मयि पश्यति ; अन्योन्यसाम्यादन्यतरदर्शनेन अन्यतरदपीदृशमिति पश्यति ; तस्य स्वात्मस्वरूपं पश्यतोऽहं तत्साम्यान्न प्रणश्यामि—नादर्शनमुपयामि ; ममापि मां पश्यतो मत्साम्यात् स्वात्मानं मत्सममवलोकयन् स नादर्शनमुपयाति ॥ ३० ॥

ता ॥ एवं देवमनुष्यादिप्रकृतिपरिणामविशेषरूपभेदनिरसनेन ज्ञानद्रव्यतयैकरूपत्वानुसन्धानमुक्तम् । अथ तस्यैव देवादिभेदहेतुभूतपुण्यपापतारतम्यविधूननेन परमात्मना परमसाम्यानुसन्धानमुच्यते—* **यो माम्** इति । अस्यापि श्लोकस्य साम्यविषयत्वे हेतुः प्रागेवोक्तः । **ततोऽपि विपाकदशापन्नः**—प्रथमदशातोऽधिकां विपाकदशां प्राप्त इत्यर्थः । जीवात्मनां परमात्मनश्च साधर्म्यं वक्ष्यमाणं स्मारयति—**मम साधर्म्य**मिति । **उपागतः** बुध्या प्राप्त इत्यर्थः । नह्यसाविदानीं मुक्तः । पुण्यपापविधूननेन साम्यप्रतिपादनाय * निरञ्जनः इति श्रुतिरुपात्ता । * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति (मु. ३. १. ३) इति हि सा ; * यो मां पश्यतीत्यनुवादः तत्सिद्धौ हि भवति ; सा कुत इति शङ्कायां साम्यं तावदुपात्तश्रुत्यादिसिद्धम् । तदनुसन्धानं च विहितम् ; ततश्च तदनुवादोऽप्युपपन्न इति ज्ञापनाय **मत्साम्यं पश्यन् यस्सर्वत्रात्मवस्तुनि मां पश्यती**त्यवान्तरवचनव्यक्तिभेदो दर्शितः । परमात्मनः सर्वव्यापितया सर्वेषां परमात्मनिष्ठतया च प्रतीतिर्ह्यत्र स्वरसतो जायते ; तच्चात्र प्रकरणादिवशादनुचितम् । ततश्च साम्यदर्शनमेव विवक्षितमिति वाच्यम् ; तदप्ययुक्तम्, स्वात्मानुसन्धानस्वरूपयोगविपाके परमात्मनोऽन्येषां च स्फुरणाभावादिति पूर्ववच्छङ्कायामाह—**अन्योन्ये**ति । **अन्यतरदर्शनेनान्यतरदपी**ति—एकव्यक्तिदर्शनेन व्यक्त्यन्तरमपीत्यर्थः । * तस्याहमित्यादौ न तावत्प्रध्वंसनिषेधः क्रियते, नित्यतया बहुप्रमाणप्रतिपादितयोर्जीवेश्वरयोरिदानीमनित्यत्वशङ्काभावात्, तस्य * न प्रणश्यामीत्यादिपरस्परप्रतियोगिनिर्देशानुपपत्तेश्च । न हि किञ्चिदपि वस्तु किञ्चित्प्रत्यनष्टं किञ्चित्प्रति च नष्टं भवति । अतोऽसावदर्शनविषय एवात्र नाशशब्दः । णशधातोश्च अदर्शनार्थत्वं धातुपाठपठितम् । ततश्च न प्रणश्यामीति कोऽर्थः ? नादर्शनमुपयामीति, तदेतद्दर्शयति—**तस्येत्या**दिना । तादृशत्वानुसन्धानस्याभावो निषिध्यत इति भावः । * स च मे न प्रणश्यतीत्येतद्दृष्टान्तार्थं, साम्यस्य सर्वज्ञबुद्धिविषयतया प्रामाणिकत्वार्थं, पूर्ववच्छङ्कापरिहारार्थं चेत्यभिप्रायेणाह—**ममापी**ति । सर्वसाक्षात्कारिणोऽपि मम स्वरूपानुसन्धानांशेऽपि तत्साम्यात्तत्स्वरूपमप्यनुसंहितं भवति हीत्यर्थः । स इत्यनेन तदवस्थस्य मुक्तप्रायत्वं विवक्षितमिति व्यञ्जयितुमाह—**मत्साम्यात्स्वात्मानं मत्सममवलोकयन्नि**ति ॥ ३० ॥

भा ॥ ततोऽपि विपाकदशामाह—

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१

भा ॥ योगदशायां सर्वभूतस्थितं मामसंकुचितज्ञानैकाकारतया एकत्वमास्थितः प्राकृतभेदपरित्यागेन सुदृढं यो भजते, स योगी व्युत्थानकालेऽपि यथातथा वर्तमानः स्वात्मानं सर्वभूतानि च पश्यन् मयि वर्तते मामेव पश्यति—स्वात्मनि सर्वभूतेषु च सर्वथा मत्साम्यमेव पश्यतीत्यर्थः ॥ ३१ ॥

ता ॥ तृतीयां विपाकदशामाहेत्याह—**तत** इति । अकर्मवश्यत्वाकारेणेश्वरसाम्यदर्शनं पूर्वश्लोकोक्तम्, *सर्वभूतस्थितमित्यनेन तु कर्मरूपाविद्यावेष्टनविधुरत्वादसङ्कुचितज्ञानाकारतया साम्यानुसन्धानम्, तत्संस्कारप्रभावेन व्युत्थानकालेऽपि स्वरसतस्तथाविधानुसन्धानानुवृत्तिश्चेत्येतदुच्यते । *यो भजति स सर्वथा वर्तमानोऽपीत्यनेन कालभेदस्सिद्धः, नच समाधिदशायामेव यथातथा वर्तमानत्वमुपपद्यते । सर्वभूतस्थितेन परमात्मनैकत्वानुसन्धानं नाम स्वस्यापि सर्वभूतस्थितत्वेन तदेकप्रकारत्वानुसन्धानम् । तच्चाणोरात्मनस्स्वरूपेण न संभवति । धर्मतश्च परिशुद्धात्मनो व्याप्तिः *वालाग्रेत्यारभ्य *सचानन्त्याय कल्पते (श्वे.५.९) इति श्रुतिसिद्धा । **सूत्रं** च *प्रदीपवदावेशस्तथा हि दर्शयति (४.४.१५) इति । अतोऽत्रापि तथैव साम्यं विवक्षितमिति दर्शयितुम्—**असङ्कुचितज्ञानैकाकारतयैकत्वमास्थित** इत्युक्तम् । **प्राकृतभेदपरित्यागेने**ति; कर्मोपाधिकप्रकृतिविशेषसंसर्गकृतज्ञानतारतम्यरूपभेदपरित्यागेनेत्यर्थः । अनेनैकत्वोक्तेस्स्वरूपभेदनिरासार्थत्वं परिहृतम् । सर्वात्मनां ब्रह्मपृथक्सिद्धत्वविवक्षयाऽप्येकत्वोक्तिश्च घटते । आस्थितशब्दस्य तात्पर्यार्थः—**सुदृढमि**ति । ततश्च व्युत्थानकालेऽपि तथाविधानुसन्धानप्रवाहहेतुभूतसंस्कारप्राबल्यं सूचितम् । *मां भजति मत्समात्मावलोकनमपि हि मद्भजनमित्यभिप्रायः । *सर्वथेत्यस्य लौकिककृत्याव्यापृतोऽपीत्यभिप्रायः । *मयि वर्तते इत्यस्य परमात्मनि स्थितिर्नार्थः, तस्य योग्ययोगिसाधारणत्वात् । अतो वृत्तिरत्र बुद्धिवृत्तिरित्यभिप्रायेणाह—**मामेव पश्यती**ति । जीवदर्शनमात्रेण कथं परमात्मदर्शनमित्यत्राह—**स्वात्मनी**ति । व्युत्थानकाले स्वात्मसाक्षात्काराभावेऽपि विशदपरोक्षानुसन्धाने परेषामपि तथात्वसिद्धेः फलितत्वोक्तिरियम् ॥ ३१ ॥

भा ॥ ततोऽपि काष्ठामाह—

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२

भा ॥ स्वात्मनश्चान्येषां चात्मनामसंकुचितज्ञानैकाकारतयौपम्येन स्वात्मनि चान्येषु च सर्वत्र वर्तमानं पुत्रजन्मादिरूपं सुखं तन्मरणादिरूपं च दुःखमसंबन्धसाम्यात्समं यः पश्यति, परपुत्रजन्ममरणादिसमं स्वपुत्रजन्ममरणादिकं यः पश्यतीत्यर्थः; स योगी परमो मतः—योगकाष्ठां गतो मतः ॥ ३२ ॥

ता ॥ प्रबलदुःखहेत्वागमेऽपि निर्विकरत्वापादिकां योगविपाककाष्ठाभूतां कर्मज्ञानतारतम्यप्रयुक्तसुखदुःखतारतम्यनिवृत्त्यनुसन्धानरूपां चतुर्थीं दशामाहेत्याह—**ततोऽपि काष्ठामाहे**ति । *आत्मौपम्येन इत्यस्य न पश्यतिनाऽन्वयः, सममित्यनेन पौनरुक्त्यप्रसङ्गात् । अतस्सर्वत्रात्मौपम्येनेत्यन्वयः । उपमाशब्दस्तुल्यवचनः । तस्य भाव औपम्यम् । सर्वेषामात्मनां पूर्वोक्तेन देहविलक्षणत्वादिसाम्येनेत्यर्थः । *सर्वत्र इत्येतदेव काकाक्षिन्यायेन *समं पश्यति इत्यत्राप्यन्वितम् । सर्वेषामत्यन्तविषमतया उपलभ्यमानसुखदुःखान्वयसाम्यभ्रमव्युदासेन व्यतिरेकसाम्यानुसन्धानं दर्शयति—**असंबन्धसाम्यादि**ति । परेष्वसंबन्धानुसन्धानस्य निष्प्रयोजनत्वादिहाभिप्रेतमाह—**परे**ति । परपुत्रजन्मादेस्स्वात्मनि स्वपुत्रजन्मादेश्च परेषु यथा न संबन्धः, तथा स्वात्मन्यपीत्युक्तं भवति । परमशब्दाभिप्रेतमाह—**योगकाष्ठां गतो मत** इति । जीवात्मयोगकाष्ठेयम्, परमात्मयोगस्य परस्ताद्वक्ष्यमाणत्वात् ॥ ३२ ॥

अर्जुन उवाच—

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन । एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥३३

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४

भा ॥ योऽयं देवमनुष्यादिभेदेन जीवेश्वरभेदेन चात्यन्तभिन्नतयैतावन्तं कालमनुभूतेषु सर्वेष्वात्मसु ज्ञानैकाकारतया परस्परसाम्येन अकर्मवश्यतया चेश्वरसाम्येन च सर्वत्र समदर्शनरूपो योगस्त्वया प्रोक्तः, एतस्य योगस्य स्थिरां स्थितिं न पश्यामि, मनसश्चञ्चलत्वात् । तथा ह्यनवरताभ्यस्तविषयेष्वपि स्वत एव चञ्चलं पुरुषेणैकत्रावस्थापयितुमशक्यं मनः पुरुषं बलात्प्रमथ्य दृढमन्यत्र चरति ; तस्य स्वाभ्यस्तविषयेष्वपि चञ्चलस्वभावस्य मनसस्तद्विपरीताकारात्मनि स्थापयितुं निग्रहं प्रतिकूलगतेर्महावातस्य व्यजनादिनेव सुदुष्करमहं मन्ये । मनोनिग्रहोपायो वक्तव्य इत्यभिप्रायः ॥ ३३ ॥ ३४ ॥

ता ॥ एवं ज्ञानैकाकारतया निर्दोषतया ब्रह्मतद्गुणसंबन्धेनेतरासंबन्धेन च साम्यं श्लोकचतुष्टयेनोक्तम् । अत्र श्लोकद्वयेन साम्यानुसन्धानोक्तिः, तृतीयचतुर्थश्लोकाभ्यां तु दृढतरदृढतमसाम्यानुसन्धानफलपर्वद्वयोक्तिरित्येके । योगाभ्यासविधिश्चतुर्धा योगी चोक्तः । अथ प्रागुक्तमेव योगसाधनं विशदं ज्ञातुं पुनरर्जुन उवाच—* योऽयमिति । **देवेत्या**रभ्य **अनुभूतेष्वित्यन्तमनाद्युपचितसुदृढविपरीतवासनया साम्यानुसन्धानस्याशक्यत्वप्रदर्शनार्थम् । परस्परवैषम्यम् **देव**-**मनुष्यादिभेदेनेति । **जीवेश्वरभेदेन**—कर्मवश्यत्वाकर्मवश्यत्वादिभेदेनेत्यर्थः । **अत्यन्तभिन्नतयेति ; नह्यत्र खण्ड**मुण्डादिवत् भेदकधर्ममात्रम्, किंतु विरुद्धस्वभावत्वमेव हि दृश्यत इति भावः । **एतावन्तं कालमिति** * कालाध्वनोरत्यन्तसंयोगे द्वितीया (अष्टा. २. ३. ५) । **अकर्मवश्यतया चेश्वरसाम्येनेति चस्साम्यद्वयसमुच्चयार्थः । अकर्मव**श्यतया चेश्वरसाम्येन चेति कश्चित्पाठः । तदा पूर्वश्चकार ईश्वरसाम्येऽपि ज्ञानैकाकारत्वसंग्रहार्थः । द्वितीयस्तु पूर्ववत् । ज्ञानपुरुषार्थवैषम्ययोः कर्मवैषम्यफलत्वात् अकर्मवश्यतयेत्यनेनैव तयोरपि निवृत्तिसंग्रहः फलित इति तयोरनुपादानम् । **त्वया प्रोक्तः**—स्वतस्सर्वज्ञेन त्वयैव ह्येतदनुसन्धातुं प्रवक्तुं च शक्यमिति भावः । * अहं न पश्यामि इति अनादिभेदानुसन्धानवानजितचित्तश्चाहं न पश्यामीति भावः । **स्थिरां स्थितिं**—चिरानुवृत्तिमित्यर्थः । * मधुसूदन—रजस्तमोमयप्रबलविरोधिनिरसनशीलस्त्वमेव मनोनिग्रहोपायमुपदिशेति भावः । * चञ्चलं हि मनः इत्युत्तरवाक्यानुसन्धानेन **मनस** इत्यध्याहृतत् । हीति निपातस्य यादवप्रकाशोक्तादचिद्विशेषणार्थत्वादपि स्फुटमुचितं चात्र हेत्वर्थत्वमाह—**तथा हीति** । हेतुभूतं चञ्चलत्वं संप्रतिपन्नस्थले प्रदर्शनीयम् । अतश्चलस्वभावत्वमत्र चञ्चलशब्दार्थ इति दर्शयितुम्—**अनवरतेत्यादिकम्** । चञ्चलत्वफलमाह—**पुरुषेणेति** । * प्रमाथि—प्रमथनशीलम् । **प्रमथ्य**—व्याकुलीकृत्येत्यर्थः । बलवच्छब्दः प्रमथनक्रियाविशेषणं वा, बलवत्त्वात्प्रमाथीति हेतुपरो वेत्यभिप्रायेण **बलात्प्रमथ्येत्युक्तम्** । वैपरीत्ये दार्ढ्यमित्याह* **दृढमन्यत्रेति** । *तस्य इति परामर्शाभिप्रेतमाह—**स्वाभ्यस्तेति** । **तद्विपरीताकार** इति ; अनभ्यस्तपूर्व इत्यर्थः । **स्थापयितुं**—स्थापनार्थम् । दार्ष्टान्तिके मनसि प्रदर्शितस्य चञ्चलत्वादेः दृष्टान्ते विवक्षितत्वप्रदर्शनाय **प्रतिकूलेत्यादिकमुक्तम्** । मनोनिग्रहोपायदुर्बलत्वज्ञापनाय वायोर्मन्दैर्निग्रहासंभावनार्थं च **व्यजनादिनेवेत्युक्तम्** । एवं दुष्करत्ववचनं न प्रतिक्षेपार्थम्, किन्तूपायपरिप्रश्नार्थमित्याह—**मन इति ॥ ३३ ॥ ३४ ॥**

श्रीभगवानुवाच—

असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६

भा ॥ चलस्वभावतया मनो दुर्निग्रहमेवेत्यत्र न संशयः ; तथाऽप्यात्मनो गुणाकरत्वाभ्यासजनिताभिमुख्येनात्मव्यतिरिक्तेषु दोषाकरत्वजनितवैतृष्ण्येन च कथंचिद्गृह्यते ; असंयतात्मना—अजितमनसा महताऽपि बलेन योगो दुष्प्राप एव ; उपायतस्तु वश्यात्मना—पूर्वोक्तेन मदाराधनरूपेणान्तर्गतज्ञानेन कर्मणा जितमनसा यतमानेनायमेव समदर्शनरूपो योगोऽवाप्तुं शक्यः ॥ ३५ ॥ ३६ ॥

ता ॥ अथार्जुनेन कण्ठोक्तमनुवदन् बुभुत्सितमुपायं श्लोकद्वयेनाह भगवान् । तत्र * दुर्निग्रहं * चलम् इति पदद्वयमर्जुनोक्तप्रतिज्ञाहेत्वनुवादरूपमाह—**चलस्वभावतये**ति । असंशयमित्येतत्सत्यमितिवदर्थाङ्गीकारपरम् । तुशब्दाभिप्रेतं विशेषं दर्शयति—**तथाऽपी**ति । अनुकूलतयाऽभ्यासो हि तत्र प्रावण्यहेतुस्स्यादित्यभ्यासविशेषं तत्फलंच व्यनक्ति—**आत्मन** इति । नित्यत्वज्ञानत्वानन्दत्वाकर्मवश्यत्वामलत्वादयोऽत्र गुणाः । कथञ्चिदित्यवधानार्थम् । एवं मनसो ग्रहणोपाय उक्तः ; ततश्च * एतस्याहं न पश्यामि (३३) इत्युक्तमर्थं विषयविशेषे व्यवस्थापयति—* असंयत इति श्लोकेन । मनोनिग्रहप्रकरणत्वात् असंयतवश्यशब्दसमभिव्याहारसामर्थ्याच्चात्र आत्मशब्दो मनोविषयः । महाबाहुसंबुद्धिसूचितमाह—**महताऽपि बलेने**ति । * उपायेन तु यच्छक्यं न तच्छक्यं पराक्रमैरिति भावः । * मे मतिः इत्यनेन निस्सन्देहत्वं विवक्षितमित्याह—**दुष्प्राप एवे**ति । **उपायतस्तु वश्यात्मने**ति व्याख्येयान्वयप्रदर्शनम् । तद्व्याख्यानम्—**पूर्वे**त्यादि । उक्तलक्षणं कर्ममात्रं मनोनिग्रहोपायः ; अभ्यासवैराग्ये तु तस्यैवाङ्गतयोक्ते इति भावः । **यतमानेन**—योगमभ्यस्यतेत्यर्थः ॥

भा ॥ अथ * नेहाभिक्रमनाशोऽस्ति (२. ४०) इत्यादावेव श्रुतं योगमाहात्म्यं यथावच्छ्रोतुमर्जुनः पृच्छति, अन्तर्गतात्मज्ञानतया योगशिरस्कतया च हि कर्मयोगस्य माहात्म्यं तत्रोदितं, तच्च योगमाहात्म्यमेव ।

अर्जुन उवाच—

अयतिश्श्रद्धयोपेतो योगाच्चलितमानसः । अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७
कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति । अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८
एतं मे संशयं कृष्ण च्छेत्तुमर्हस्यशेषतः । त्वदन्यः संशयस्यास्य च्छेत्ता न ह्युपपद्यते ॥ ३९

भा ॥ श्रद्धया योगे प्रवृत्तो दृढतराभ्यासरूपयतनवैकल्येन योगसंसिद्धिमप्राप्य योगाच्चलितमानसः कां गतिं गच्छति ? उभयविभ्रष्टोऽयं छिन्नाभ्रमिव कच्चिन्न नश्यति ? यथा मेघशकलः पूर्वस्माद्बृहतो मेघाच्छिन्नः परं बृहन्तं मेघमप्राप्य मध्ये विनष्टो भवति, तथैव कच्चिन्न नश्यति ? कथमुभयविभ्रष्टता ? अप्रतिष्ठो विमूढो ब्रह्मणः पथीति, यथावस्थितं स्वर्गादिसाधनभूतं कर्म फलाभिसन्धिरहितस्यास्य पुरुषस्य स्वफलसाधनत्वेन प्रतिष्ठा न भवतीत्यप्रतिष्ठः, प्रक्रान्ते ब्रह्मणः पथि विमूढः तस्मात्पथः प्रच्युतः, अतः उभयविभ्रष्टतया किमयं नश्यत्येव ? उत न नश्यति ? तमेनं संशयमशेषतश्छेत्तुमर्हसि, स्वतः प्रत्यक्षेण युगपत् सर्वं सदा पश्यतस्त्वत्तोऽन्यस्संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३७—३९ ॥

ता ॥ एवं प्रागुक्तमेव योगसाधनं यथावच्छ्रुतम् ; अथ प्रागुक्तमेव योगमाहात्म्यं श्रोतव्यं सर्वप्रकारान्वितं प्रपञ्चेन श्रोतुं पृच्छतीत्याह—**अथे**ति । योगमाहात्म्यशब्देन संग्रहश्लोकस्थयोगसिद्धिशब्दो व्याख्यातः । सिद्धिकारणं हि

माहत्म्यम् ; सिद्धिश्चात्र शिथिलस्यापि योगस्य चिरतरमनेकपुण्यलोकावाप्तिः, पुनर्योगयोग्ययोगिकुलसंभवः, तद्द्वारा पुनर्योगपौष्कल्यम्, ततश्चापवर्ग इत्येवंरूपा । एषा च सिद्धिः अनितरसाधारणेन माहात्म्येन । ननु * नेहाभिक्रमनाशोऽस्ति (२. ४०) इत्यादौ कर्मयोगस्य माहात्म्यमुक्तम् ; अत्र तु तत्फलभूतस्यात्मावलोकनरूपयोगस्य ; अतः कथं श्रुतमित्युक्तम् ? तत्राह—**अन्तर्गते**ति । ततः किमित्यत्राह—**तच्चे**ति । योगाङ्कुरभूतात्मज्ञानगर्भतया पुष्कलयोगस्वरूपसाधनतया च हि कर्मयोगस्य माहात्म्यं तत्रोदितम्, ततश्च योगोपाधिके तदङ्गभूतकर्मयोगमाहात्म्येऽभिहिते अङ्गिभूतयोगमाहात्म्यमेवोक्तं भवतीति भावः । * अयतिरित्यादिपदानामर्थौचित्यात्क्रमभेदेनन्वयो दर्शितः । तत्र प्रवृत्तस्य हि ततश्चलितत्वं वाच्यम्, नतु तत्र श्रद्धोपेतमात्रस्येति ; अतश्श्रद्धया तत्कार्यलक्षणेत्यभिप्रायेण—**योगे प्रवृत्त** इत्युक्तम् । उपेतशब्द एव वा अत्र श्रद्धाकृतयोगाधिगमपर इत्यभिप्रायः । **योगसंसिद्धिमप्राप्य**—योगसिद्धेः पूर्वमेवेत्यर्थः । **योगाच्चलितमानसः**—पुष्कलयोगं कर्तुमननुगुणचित्त इत्यर्थः । **काम्**—कामभोगमोक्षनिरयेषु कतमामित्यर्थः । * कां गतिं गच्छतीति सामान्यनिर्दिष्टमेव * कच्चिदित्यादिना विवृतम् । दृष्टान्तेऽप्युभयभ्रष्टत्वप्रकारं दर्शयति—**यथे**ति । उभयभ्रष्टताविवरणरूपत्वात् * विमूढो ब्रह्मणः पथीत्येकस्याभिधानाच्च पारिशेष्यादप्रतिष्ठपदं सांसारिकफलसाधनकर्मभ्रंशाभिप्रायमित्याह—**यथावस्थित**मिति । कर्मस्वरूपानुष्ठानप्रयासादौ न किञ्चिन्न्यूनम्, अभिसन्धिवैषम्यात्तु निष्फलं संवृत्तमित्यभिप्रायः । * विमूढो ब्रह्मणः पथीति ब्रह्मपथेऽज्ञानं न विवक्षितम् ; ज्ञात्वोपक्रम्य निवृत्तं प्रति पृच्छ्यमानत्वात् । अतो विमोहकार्ययोगनिवृत्तिरत्र विमूढशब्देन लक्ष्यत इत्यभिप्रायेण—**प्रक्रान्त** इत्यादि **प्रच्युत** इत्यन्तमुक्तम् । **ब्रह्मणः पथि**—ब्रह्मप्राप्त्युपायभूते योग इत्यर्थः । * एतं मे संशयमिति निर्दिश्यमानस्य संशयस्यार्थसिद्धं शिरोन्तरमाह—**किमर्थं नश्यत्येवे**ति । **अर्हसि**—सर्वज्ञत्वकारुणिकत्वप्रियसखत्वादियुक्तस्त्वं योग्योऽसीत्यर्थः । कृष्णशब्देन त्वच्छब्देन चाभिप्रेतमाह—**स्वत** इति । करणाधीनम्, अविशदानुमानादिप्रायम्, क्रमभावि, कतिपयविषयम्, कादाचित्कमपि हि त्वदन्येषां ज्ञानमिति भावः । एतेन * यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः । तं प्रणम्य हरिं शास्त्रं न्यायतत्त्वं प्रचक्ष्महे ॥ इति तु भगवन्नाथमुनिमिश्राणां वचनमनुसंहितम् । **न ह्युपपद्यत** इति युक्तिविरोधाभिप्रायः ॥ ३७–३९ ॥

श्रीभगवानुवाच—

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४०

भा ॥ श्रद्धया योगे प्रक्रान्तस्य तस्मात्प्रच्युतस्येह चामुत्र च विनाशो न विद्यते, प्राकृतस्वर्गादिभोगानुभवे ब्रह्मानुभवे चाभिलषितानवाप्तिरूपः प्रत्यवायाख्यानिष्ठावाप्तिरूपश्च विनाशो न विद्यत इत्यर्थः ; न हि निरतिशयकल्याणरूपयोगकृत्कश्चित्कालत्रयेऽपि दुर्गतिं गच्छति ॥ ४० ॥

ता ॥ अथोभयपुरुषार्थान्वयमुखेन उभयविभ्रष्टतां परिहरति—* पार्थ इति । तस्येत्यनेन परामृष्टमाकारद्वयमाह—**श्रद्धये**ति । इहामुत्रशब्दयोर्भूर्लोकस्वर्गलोकादिपरत्वं परिहृत्यात्र विवक्षितमाह—**प्राकृते**ति । यथा मुमुक्षोः पुण्यमपि पापकोटौ निक्षिप्यते, तथा तस्य स्वर्गादिकमपीहशब्दनिर्देशार्हं प्रकरणसङ्गतं चेति भावः । विनाशशब्दः *प्रत्यवायो न विद्यते (२. ४०) इति प्रागुक्तमप्यत्र सर्वं संगृह्णातीत्याह—**प्रत्यवायाख्ये**ति । कल्याणशब्दस्यात्र प्रस्तुतविशेषपर्यवसानव्यञ्जनायाह—**निरतिशये**ति । * गच्छतीत्यनवच्छिन्नवर्तमाननिर्देशात्—**कालत्रयेऽपी**त्युक्तम् । अनेक-

कालोपचितानन्तपुण्यसाध्यत्वेन प्रागपि दुष्कृताभावः, इदानीं च निरतिशयकल्याणरूपयोगप्रवृत्तिः, परस्तादपि पुण्यलोकावाप्तियोगसिद्ध्यपवर्गप्रभृतिरिति कालत्रयेऽपि दुर्गत्य[संभ]भावः । **दुर्गतिः**—निरयोऽनिष्टमात्रं वा । **हिर्हेतौ**, प्रसिद्धौ वा । नहि योगे प्रक्रान्तस्य कस्यचित्कस्मिंश्चित्काले दुर्गतिप्राप्तिः कुतश्चित्प्रमाणात्सिद्धेति भावः ॥ ४० ॥

भा ॥ कथमयं भविष्यतीत्यत्राह—

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१

भा ॥ यज्जातीयभोगाभिकाङ्क्षया योगात्प्रच्युतोऽयमतिपुण्यकृतां प्राप्यान् लोकान् प्राप्य तज्जातीयानतिकल्याणान् भोगान् योगमाहात्म्यादेव भुञ्जानो यावत्तद्भोगतृष्णावसानं शाश्वतीस्समास्तत्रोषित्वा तस्मिन् भोगे वितृष्णः शुचीनां श्रीमतां योगोपक्रमयोग्यानां कुले योगोपक्रमे भ्रष्टो योगमाहात्म्याज्जायते ॥ ४१ ॥

ता ॥ उभयभ्रष्टतापरिहारायोक्तमुभयान्वयं प्रपञ्चयति—*प्राप्येत्यादिना *परां गतिमित्यन्तेन । योगभ्रंशहेतुं पुण्यकृल्लोकप्राप्तिकृतातिशयितप्राकृतपुरुषार्थयोगे कर्मास्यसाधनरहितत्वेऽपि योगमाहात्म्यस्यैव साधनत्वं भोगावसानहेतुं वैतृष्ण्यमुत्पाद्य पुनर्योगमाहात्म्यस्यैव योगारम्भयोग्यकुलोद्भवहेतुत्वं च प्रदर्शयति—**यज्जातीये**ति । सर्वेषां मात्रया पुण्यकृत्त्वसद्भावेऽपि केषुचित्पुण्यकृच्छब्दप्रयोगस्तेषामतिशयितपुण्यकृत्त्वनिबन्धन इत्याह—**अतिपुण्यकृता**मिति । तज्जातीयत्वेऽपि ततोऽतिशयितत्वाय **अतिकल्याणानि**त्युक्तम् । दृश्यते ह्येकजातीयेष्वपि रूपरसगन्धादिषु भूलोकेऽपि तारतम्यम् । एवं दिव्यादिव्यभेदः । यदि पुराकृतैः पुण्यैः पुण्यलोकावाप्तिः; पापैरपि पुराकृतैः पापलोकप्राप्तिस्स्यादित्यत्राह—**योगमाहात्म्यादेवे**ति । धर्मार्थसंपादितद्रव्यस्य भोगार्थविनियोगवदिति भावः । नह्यसौ पुण्यक्षयादिव योगमाहात्म्यक्षयान्निवर्तते, तस्याक्षयत्वादिति दर्शयितुं—**याव**दित्यादिकमुक्तम् । विषमविपाकसमयकर्ममूलसत्त्वोन्मेषकृतविवेकोदयवशान्निरन्तरभोगप्रकर्षादिवशाच्च वैतृष्ण्यसंभवस्सौभरिप्रभृतिवृत्तान्तेषु भाव्यः । शुचित्वं श्रीमत्त्वं च अदृष्टद्वारा दृष्टद्वारा च योगोपकारकमित्याह—**योगोपक्रमयोग्याना**मिति । योगभ्रष्टस्य स्वान्वयाद्योगोपक्रमानुगुणस्वभावानामित्यर्थः । *अथ वा योगिनामेव कुले इति इतोऽप्यतिशयितजन्मनो वक्ष्यमाणत्वात् *शुचीनाम् इत्यादिविशेषणसामर्थ्याच्च **योगोपक्रमे भ्रष्ट** इत्युक्तम् ॥ ४१ ॥

अथवा योगिनामेव कुले [महति] भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२

भा ॥ परिपक्वयोगश्चलितश्चेत् योगिनां धीमतां योगं कुर्वतां स्वयमेव योगोपदेशक्षमाणां महतां कुले भवति; तदेतदुभयविधं योगयोग्यानां योगिनां च कुले जन्म, लोके प्राकृतानां दुर्लभतरम्; एतत्तु योगमाहात्म्यकृतम् ॥ ४२ ॥

ता ॥ *अथवेति व्यवस्थितविकल्पार्थम्, अतिशयितजन्मनिर्देशोऽतिशयितहेतुसाकाङ्क्ष इति दर्शयितुं **परिपक्वयोगश्चलितश्चेदि**त्युक्तम् । *योगिनां कुले इहि कस्यचिद्योगिनस्सन्ताने प्रसूतिर्नोच्यते; तावन्मात्रस्यात्यन्त-

योगोपकारकत्वाभावात्, किं तूपदेशार्हत्वाय योगिनां सतामेव पुत्रादित्वेन जायत इति दर्शयितुं **योगं कुर्वतामिति** वर्तमाननिर्देशः । * शुचीनां श्रीमतामित्यन्यस्मादुपदेष्टुर्योगाधिगमं प्रत्यानुगुण्यमात्रमुक्तम्; इह तु * धीमतामिति वचनात्तेषामेवोपदेष्टृत्वयोग्यतोच्यत इत्याह—**स्वयमेवेति** । * पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः (भर.), * तव दास्यसुखैकसङ्गिनाम् (स्तो. ५५) इत्यादिप्रतिपादितवैभवयुक्तैर्महत्त्वम् । पूर्वश्लोकस्थगेहशब्दतुल्यार्थत्वादत्रापि कुलशब्दो गृहवाची । **एतदुभयविधमिति**—साधारणस्येदृशमित्यनुवादस्य उभयान्वयित्वमेव ह्युचितमिति भावः । प्रकृतिमात्रदर्शिजनविषयेण लोकशब्देन मुमुक्षुव्यतिरिक्तविवक्षामाह—**प्राकृतानामिति** । दुर्लभतरं कथं लभ्येतेत्यत्रेदृशशब्दाभिप्रेतमाह—**एतत्त्विति** ॥ ४२ ॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ॥ ४३=

भा ॥ तत्र जन्मनि तमेव पौर्वदैहिकं योगविषयं बुद्धिसंयोगं लभते । ततस्सुप्तप्रबुद्धवद्भूयस्संसिद्धौ यतते । यथा नान्तरायहतो भवति; तथा यतते । तेन पूर्वाभ्यासेन—पूर्वेण योगविषयेणाभ्यासेन सः योगभ्रष्टो ह्यवशोऽपि योग एव ह्रियते । प्रसिद्धं ह्येतद्योगमाहात्म्यमित्यर्थः ॥ ४३= ॥

ता ॥ ततः किमायातमपवर्गस्य, पूर्वदेहारब्धस्य योगस्य शिथिलत्वात्; योगिकुलजन्ममात्रस्य च मोक्षहेतुत्वाभावादित्यत्रोत्तरं * तत्र तमिति । तत्रशब्दस्य सप्तमीसाम्याद्देहविषयत्वभ्रमव्युदासाय पूर्वोक्तवाक्यार्थेनान्वयमाह—**तत्र जन्मनी**[त्यादी]ति । तत्पूर्वदेहे संसारहेतुबुद्धेरपि सद्भावात्तद्व्यवच्छेदाय तमित्युक्तमित्याह—**योगविषयमिति । ततः**—बुद्धिसंयोगादित्यर्थः । जन्मान्तरे समस्तसंस्कारतिरोधानस्य दृश्यमानत्वात्कथमिदमुपपद्यत इति शङ्कायां पुण्यकृतां तथाविधस्संस्कारभ्रंशो नास्तीति प्रदर्शनाय **सुप्तप्रबुद्धवदिति** दृष्टान्त उक्तः । * संसिद्धौ इत्यत्रोपसर्गाभिप्रेतमाह—**यतेति । तेनेत्यस्यार्थो योगविषयेणेति** । * तेनैव इत्यवधारणफलितमाह—**योग एव ह्रियत** इति । हिशब्दार्थमाह—**प्रसिद्धमिति** । प्रसिद्धिश्चादिभरतविदुरभीष्मादिवृत्तान्तेषु द्रष्टव्या । पार्थकुरुनन्दनशब्दाभ्यामुभयकुलशुद्ध्यादिसूचकाभ्यामर्जुनस्यापि * शुचीनां श्रीमतामित्याद्यन्वयस्सूचितः ॥ ४३= ॥

जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४

अप्रवृत्तयोगो योगे जिज्ञासुरपि ततश्चलितमानसः पुनरपि तामेव जिज्ञासां प्राप्य कर्मयोगादिकं योगमनुष्ठाय शब्दब्रह्मातिवर्तते । शब्दब्रह्म—देवमनुष्यपृथिव्यन्तरिक्षस्वर्गादिशब्दापलापयोग्यं ब्रह्म प्रकृतिः । प्रकृतिबन्धाद्विमुक्तो देवमनुष्यादिशब्दाभिलापानर्हं ज्ञानानन्दैकतानमात्मानं प्राप्नोतीत्यर्थः ॥ ४४ ॥

ता ॥ * जिज्ञासुः इत्यादिप्रकरणवशाद्वासनाया विच्छिन्न]घटक]त्वप्रदर्शनार्थमित्याह—**अप्रवृत्तेति** । * **जिज्ञासुरपि इति** सप्तम्यन्तापिशब्दयोस्सामार्थ्यात्—**अप्रवृत्तयोग** इत्युक्तम् । यद्यपि * न लोकाव्ययनिष्ठाखलर्थतृनाम् (अष्टा. २. ३. ६९) इति कर्मणि षष्ठीनिषेधः; तथाऽप्यत्र संबन्धसामान्यविवक्षया * योगस्य इति षष्ठी । योगिनश्चलितस्य

योगः, प्रक्रान्तयोगस्य चलितस्य तत्प्रक्रमः, योगमारुरुक्षोश्चलितस्यारुरुक्षेति तत्तदवस्थानुरूपं प्रतिसमाधानमिति भावः। **कर्मयोगादिकं**—कर्मयोगज्ञानयोगावित्यर्थः। यद्वा, कर्मयोग उपक्रमो यस्यात्मसाक्षात्काररूपस्य योगस्य स तथोक्तः। ब्रह्मशब्दोऽत्र न परब्रह्मविषयः, तस्यातिवर्तनीयत्वानुपपत्तेः, * शब्दब्रह्म इति विशेषणायोगाच्च। अतएव न जीवविषयः। नापि वेदविषयः, तस्याप्यतिवर्तनीयत्वानिरूपणात्। नापि लक्षणया वेदप्रतिपाद्यकर्मविषयः, तत्फलविषयो वा, तत्रापि वेदे ब्रह्मशब्दस्य गौणः प्रयोगः, तस्य परस्तात्लक्षणा, उपनिषदंशात्संकोच इति बहुदोषप्रसङ्गात्। नापि शब्दजन्यं ज्ञानमात्रं शब्दब्रह्म, योगं जिज्ञासोस्तदतिवृत्तेर्विरुद्धत्वात्। * स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् (वि. ६. ६. २) इत्यादिप्रकोपप्रसङ्गाच्च। योगमारुरुक्षुः पुरुषश्शब्दश्रवणजनितज्ञानमात्रवतः पुरुषादधिकः * ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः। कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः॥ (मनु. १.९७) इति वदिति चेत्, तदपि न; अध्याहाराद्यापातात्, अप्रस्तुताभिधानप्रसङ्गात्, पूर्वोत्तरवाक्या नन्वयाच्च। अतः प्रकृतावपि ब्रह्मशब्दप्रयोगस्यात्रापि प्राचुर्यादतिवर्तनीयत्वौचित्याच्च ब्रह्मशब्दोऽत्र प्रकृतिविषयः। तस्या एव भोग्यभोगोपकरणभोगस्थानाख्यपरिणामप्रदर्शनाय * शब्दब्रह्मेति व्यपदेशः। * सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वा (पु.) इत्यादिश्रुतेः विभक्तरूपा हि प्रकृतिर्देवादिशब्दाभिलप्या। तदेतदखिलमभिप्रेत्य **देवमनुष्येत्यादिकमुक्तम्**। प्रकृत्यतिवर्तनशब्दार्थं फलितं च दर्शयति—**प्रकृत्तिबन्धादिति**। **देवमनुष्येत्यादिना** * पुमान्न देवो न नरः (वि. २. १३. ९८) इत्यादिकं स्मारितम्। **ज्ञानानन्दैकतानमित्यनेन** च * ज्ञानानन्दमयस्त्वात्मा शेषो हि परमात्मनः (पाञ्च.) इत्यादिकम्॥ ४४॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥ ४५

भा॥ यत एवं योगमाहात्म्यम्, ततोऽनेकजन्मार्जितपुण्यसञ्चयैः संशुद्धकिल्बिषः संसिद्धस्संजातः प्रयत्नाद्यतमानस्तु योगी चलितोऽपि पुनः परां गतिं यात्येव॥ ४५॥

ता॥ तदेवं योगभ्रष्टस्य पुनस्संसिद्धौ यत्नपर्यन्तमुक्तम्। अथ तत एव तस्यात्मप्राप्तिलक्षणपरमपुरुषार्थयोगोऽभिधीयते—* प्रयत्नात् इति। * ततः इति पदं यथास्थानान्वये प्रयोजनाभावात्प्रकृतहेतुपरमाह—**यत** इति। अनेकजन्मसंसिद्धः—अनेकैर्जन्मभिस्सम्यग्योगयोग्यो जात इत्यर्थः। तत्र हेतुः—संशुद्धकिल्बिषत्वम्। * प्रयत्नाद्यतमानस्तु इन्द्रियनियमनादिप्रयत्नेन योगे यतमानः इत्यपुनरुक्तिः। अथवाऽधिकं यतमान इत्यर्थः। तुशब्दद्योतितं पूर्वोक्तं व्यञ्जयितुं **चलितोऽपीत्युक्तम्**। चलितोऽपि पुनरिति वा ततश्शब्दव्याख्या। * परां गतिमिति योग एव वा तत्साध्यात्मप्राप्त्यादिर्वोच्यते॥ ४५॥

भा॥ अतिशयितपुरुषार्थनिष्ठतया योगिनस्सर्वस्मादाधिक्यमाह—

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ ४६

भा॥ केवलतपोभिर्यः पुरुषार्थस्साध्यते, आत्मज्ञानव्यतिरिक्तैर्ज्ञानैश्च यः, यश्च केवलैरश्वमेधादिभिः कर्मभिः, तेभ्यस्सर्वेभ्योऽधिकपुरुषार्थसाधनत्वाद्योगस्य तपस्विभ्यो ज्ञानिभ्यः कर्मिभ्यश्चाधिको योगी; तस्माद्योगी भवार्जुन॥ ४६॥

ता ॥ एवंविधं योगस्य माहात्म्यं तपःप्रभृतिषु न कस्यचिदप्यस्ति ; अतस्तपस्विप्रभृतिभ्यो योगी समधिक इति योगं योगिनं च प्रशंसन् जीवात्मयोगोपदेशमुपसंहरतीत्यभिप्रायेणाह—**अतिशयितेति** । योगिनोऽपि तपोज्ञानकर्मणां सद्भावात्तद्व्यवच्छेदाय केवलादिशब्दः । **आत्मज्ञानव्यतिरिक्तैर्ज्ञानै**रिति—सन्ति हि तत्तद्योगशास्त्रोक्तानि औपनिषदानि च देवतान्तरचन्द्रसूर्यादिग्रहणेन्द्रियादिविषयाणि ज्ञानानि । तपश्शब्दार्थात्कर्मशब्दार्थस्य वैषम्यं दर्शयितुम् अश्वमेधाद्युपादानम् । तपःप्रभृतीनां योगस्य च फलद्वारा तारतम्यमिह विवक्षितमिति दर्शयितुं पुरुषार्थाभिधानम् ॥ ४६ ॥

भा ॥ तदेवं परविद्याङ्गभूतं प्रजापतिवाक्योदितं प्रत्यगात्मदर्शनमुक्तम् ; अथ परविद्यां प्रस्तौति—

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ ४७

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
योगाभ्यासयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

भा ॥ * **योगिनामिति पञ्चम्यर्थे षष्ठी । * सर्वभूतस्थमात्मानम्** (२९) **इत्यादिना चतुर्विधा योगिनः प्रतिपादिताः : तेष्वनन्तर्गतत्वाद्वक्ष्यमाणस्य योगिनो न निर्धारणे षष्ठी संभवति । * अपि सर्वेषामिति सर्वशब्दनिर्दिष्टास्तपस्विप्रभृतयः । तत्राप्युक्तेन न्यायेन पञ्चम्यर्थो ग्रहीतव्यः । योगिभ्योऽपि सर्वेभ्यो वक्ष्यमाणो योगी युक्ततमः । तदपेक्षया अवरत्वे तपस्विप्रभृतीनां योगिनां च न कश्चिद्विशेष इत्यर्थः ; मेर्वपेक्षया सर्षपाणामिव । यद्यपि सर्षपेष्वन्योन्यन्यूनाधिकभावो विद्यते ; तथाऽपि मेर्वपेक्षया अवरत्वनिर्देशस्समानः । मत्प्रियत्वातिरेकेणानन्यधारणस्वभावतया मद्गतेनान्तरात्मना—मनसा, श्रद्धावान्—अत्यर्थमत्प्रियत्वेन क्षणमात्रविश्लेषासहतया मत्प्राप्तिप्रवृत्तौ त्वरावान् यो मां भजते, मां—विचित्रानन्तभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानपरिपूर्णनिखिलजगदुदयविभवलयलीलम्, अस्पृष्टाशेषदोषानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसङ्ख्येयकल्याणगुणगणनिधिम, स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूपम्, वाङ्मनसापरिच्छेद्यस्वरूपस्वभावम्, अपारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिम्, अनालोचितविशेषाशेषलोकशरण्यम्, प्रणतार्तिहरम्, आश्रितवात्सल्यैकजलधिम्, अखिलमनुजनयनविषयतां गतम्, अजहत्स्वस्वभावम्, वसुदेवगृहेऽवतीर्णम्, अनवधिकातिशयतेजसा निखिलं जगद्व्याप्यवस्थितम्, आत्मकान्त्या विश्वमाप्याययन्तम्, भजते—सेवते, उपास्त इत्यर्थः । स मे युक्ततमो मतः—स सर्वेभ्यश्श्रेष्ठतमः इति सर्वं सर्वदा यथावस्थितं स्वत एव साक्षात्कुर्वन् अहं मन्ये ॥ ४७ ॥**

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये षष्ठोऽध्यायः ॥ ६ ॥

ता ॥ एवं सर्वस्मादाधिक्ये जीवात्मयोगिनः प्रतिपादिते ततः परमपुरुषार्थो नास्तीति श्रोता चरितार्थबुद्धिस्स्यादिति शङ्कमानो भूमविद्यायामिव स्वयमेव ततोऽप्यतिशयितपुरुषार्थसाधकं तदङ्गिनं स्वविषयभक्तियोगं मध्यमषट्केन प्रतिपादयितुं स्वयमेव प्रस्तौतीत्याह—**तदेवमिति** । उक्तैः प्रमाणतर्कैरुपपादितप्रकारेणेत्यर्थः । सङ्गत्यर्थं प्रथमषट्कस्य मध्यमषट्कशेषत्वमाह—**परविद्याङ्गभूतमिति** । तत्र प्रमाणद्योतनम्—**प्रजापतिवाक्योदितमिति** । प्रागेवेदं प्रपञ्चितम् । एतेन परिशुद्धप्रत्यगात्मदर्शनमात्रस्य परमयोग्यत्वादिकं वदन्तोऽन्तिमयुगवेदान्तिप्रभृतयो निरस्ताः । **परविद्या—**

परां विद्यामित्यर्थः, * अथ परा यया तदक्षरमधिगम्यते (मु. १. १. ५) इत्यादिवत् । यद्वा, परमात्मनो विद्यामित्यर्थः । **प्रस्तौति**—प्रस्तावमात्रमिदम्; प्रपद्ये ह्यनन्तरं भविष्यतीति भावः । *तपस्विभ्योऽधिकः इत्यादिप्रकरणादत्रापि *योगिभ्यः इत्यर्थोऽभिप्रेत इति मन्वान आह—**योगिना**मिति । **पञ्चम्यर्थे षष्ठी**ति—संबन्धसामान्यषष्ठ्यास्संबन्धविशेषे विवक्षावशात्पर्यवसानमिति भावः । नन्वेवं किमर्थं परिक्लिश्यते, निर्धारणे षष्ठ्यत्र संभवति । तथा हि—प्रागुक्तेषु चतुर्षु योगिषु * सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः (३०) इति योगी कश्चिदुक्तः, अत्रापि * श्रद्धावान् भजते यो मामिति स एव प्रत्यभिज्ञायते ; अतस्तन्निर्धारणे[न] * युक्ततमः इति प्रशंसाऽत्र क्रियते । * युक्ततमः इत्यत्र प्रत्ययश्च निर्धारणार्थत्वसूचकः ; तस्मान्नासौ पञ्चम्यर्थे षष्ठीति ; तत्राह—**सर्वभूतस्थ**मिति । एतेन पूर्वश्लोके योगीत्येकवचननिर्देशोऽप्यत्र बहुवचनेनानुवादस्य विषयोऽपि दर्शितः ; ततः किमित्यत्राह—**तेष्वि**ति । अयमभिप्रायः—परमात्मोपासको हि योगी मध्यमषट्केन वक्ष्यते ; तस्य च प्रस्तावोऽत्र क्रियते ; न चासौ प्रागुक्तः ; * सर्वभूतस्थितं यो मामित्यादेश्च साम्यानुसन्धानविषयत्वं प्रागेव प्रतिपादितम्; ततो न तस्यात्र प्रत्यभिज्ञा ; किंच * आत्मौपम्येन (३२) इति श्लोके * सर्वभूतस्थितमित्याद्युक्तयोगिनोऽपि परतरो योगी प्रागुक्तः ; ततश्च *सर्वभूतस्थितम् इत्यादिनोक्तयोगिनोऽत्र सर्वस्मादाधिक्यप्रतिपादने पूर्वेण विरोधः स्यात्; अतोऽत्र योगिनस्तेष्वन्यतमत्वायोगान्न निर्धारणे षष्ठीयम्; तदिदमुक्तम्—**तेष्वनन्तर्गतत्वादि**ति । ननु पूर्वोक्तान्वक्ष्यमाणं च योगिनं सामान्येन संगृह्य तेष्वन्यतमस्य वक्ष्यमाणस्य निर्धारणं किं न स्यात्? **मैवम्**; प्रतिपन्नेषु केषुचित्प्रतिपन्न एव हि कश्चिन्निर्धार्यः, अन्यथाऽतिशयविधानार्थमनुवादायोगात् । न च वक्ष्यमाणो योगी श्रोतुरर्जुनस्य इतःपूर्वं प्रतिपन्नः । इदमपि **वक्ष्यमाणस्ये**ति पदेन सूचितम् । अतः प्रागुक्तेभ्यो योगिभ्योऽधिकस्य वक्ष्यमाणस्य योगिनः प्रस्ताव एवायं भवितुमर्हति; ततश्च पञ्चम्यर्थत्वे विवक्षणाये न निर्धारणे षष्ठी संभवतीति । * योगिनामपि सर्वेषामिति सामानाधिकरण्येन योजनायामपिशब्दस्य मन्दप्रयोजनत्वं स्यात्, योगिनां हि प्रशंसा तदा सूचिता स्यात्, सा च प्रागेव प्रतिपन्नत्वादत्र न सूचनमपेक्षते । समुद्रादपि विपुलोऽयमित्यादिव्यवहारेष्विव विपरीतप्रतीतिश्च स्यात् ; अपिशब्दस्य समुच्चयार्थत्वं प्रसिद्धिप्रकर्षवदत्रापि संभवदपरित्याज्यम्; * योगिनामपीत्यनेनैव गतार्थत्वेन सर्वशब्दश्च नात्यन्तापेक्षितः; यदि चापेस्समुच्चयार्थत्वम्, सर्वशब्दस्य च समुच्चेतव्यार्थान्तरपरत्वं संभवति, ततस्तदेवोपादातुमुचितम् ; संभवन्ति चात्र सर्वशब्दार्थतया तपस्विप्रभृतयः प्रसक्ताः; ते च न योगिशब्देन संगृहीताः मुख्ये संभवति च तेन तल्लक्षणा न युक्ता । योगिभ्यो न्यूनानामपि तेषामुपादानं दृष्टान्तार्थतयाऽत्यन्तोचितमेव । योगिनां तपस्विप्रभृतीनां च समुच्चयोऽवरत्वसाम्यप्रतिपादनौपयिकत्वादत्यन्तापेक्षितः । तदेतत्सर्वमभिप्रयन्नाह—**अपि सर्वेषा**मिति । **उक्तेन न्यायेने**ति । प्रकरणवशात्तेष्वनन्तर्गतत्वादन्तर्भावयितुमशक्यत्वाच्चेति भावः । तपस्व्यादिसंग्रहाभिप्रायं वक्तुं फल्गितमन्वयमाह—**योगिभ्य** इति । **युक्ततम** इति । अधिक इत्यर्थः । यद्वा योगिनां तपस्विप्रभृतीनां च यथास्वमुपाययुक्तत्वात्तेभ्यस्सर्वेभ्योऽयमतिशयितोपाययुक्त इत्यर्थः । अथवा, योग्यतम इत्यर्थः । एतदखिलमभिप्रेत्य * श्रेष्ठतम इति वक्ष्यति । योगिभ्योऽपि न्यूनतमास्तपस्विप्रभृतयः किमर्थमत्र संगृह्यन्त इत्यत्र दृष्टान्तार्थतां विशदयति—**तदपेक्षयेति** । लौकिकोदाहरणेन द्रढयति—**मेर्वपेक्षयेति** । **नन्ववरत्वे न कश्चिद्विशेष इत्ययुक्तम्**; तथा सति तपस्विप्रभृतीनां योगिनां चात्यन्तसमत्वप्रसङ्गात्; अस्ति च विशेषो मेर्वपेक्षयाऽपि सर्षपाणां मात्रया न्यूनाधिकभावेनावरत्वा-

वरतरत्वरूपः । तत्राह—**यद्यपीति** । नेदानीं मिथस्तारतम्यं निषिध्यते ; किंतु मिथस्तारतम्यवतामप्यत्यन्तातिशयितापेक्षया न्यूनत्वमात्रमविशिष्टम् ; तावतैव चावरत्वव्यवहारोऽप्यविशिष्टो जायत इति भावः । **मत्प्रियत्वातिरेकेणेति** । अहं प्रियः प्रीतिविषयो यस्य स मत्प्रियः, तस्य भावस्तत्त्वं—भक्त्यतिरेकेणेत्यर्थः । **अनन्यधारणस्वभावतयेति**—स्वाभिमतभोग्यमेव हि धारकमिति भावः । बाह्येन्द्रियशरीराद्यपेक्षयाऽत्र मनसोऽन्तरात्मशब्दवाच्यत्वम् । भक्तिकाष्ठादशायां श्रद्धाशब्दस्येच्छादिमात्रविषयत्वमनुचितम् ; अत इच्छाकार्यत्वराविषयतामिच्छायाश्च त्वराहेतुं तीव्रदशापत्तिं दर्शयति—**अत्यर्थेत्यादिना** । भजनीयतया निर्दिष्टस्य श्रुतिस्मृत्यादिशतैः, वक्ष्यमाणषट्कद्वयेन चोक्तानुपासनोपयुक्ताकारान्मामित्यनेन विवक्षितान् दर्शयति—**विचित्रेत्यादिना आप्याययन्तमित्यन्तेन** । तत्रापि * वाङ्मनसापरिच्छेद्यस्वरूपस्वभावमित्यन्तानि विशेषणानि परत्वौपयिकानि । ततः पराणि तु सौलभ्यौपयिकानीति विवेकः । तदुभयाभिधानं च अतिसुलभस्य तृणादेः, अतिदुर्लभस्य मेर्वादेश्चान्यतरवैकल्येनानुपादेयत्वात् । कारणवाक्यस्थानां सद्ब्रह्मात्मादिसामान्यशब्दानामनन्यथासिद्धविशेषोपस्थापकनारायणपदार्थपर्यवसानमभिप्रयन् * जन्माद्यस्य यतः (ब्र. १. १. २) इति सूत्रनिरूपितार्थेन * यतो वा इमानि (भृ.) इत्यादिवाक्येन प्रतिपादितं जिज्ञास्यस्य ब्रह्मणो लक्षणं दर्शयिष्यमाणजगत्कारणत्ववैश्वरूप्यादिवैभवे धनञ्जयसारथौ दर्शयति—**विचित्रेति** । कारणत्वमुखेन लीलाविभूतियोगः प्रतिपादितः ; अथ कारणत्वशङ्कितदोषवत्त्वगुणवैकल्यशङ्कानिवृत्त्यर्थं शोधकवाक्यादिसिद्धमुभयलिङ्गत्वं दर्शयति—**अस्पृष्टेति** । **अस्पृष्टाशेषदोषेत्यस्य** गुणविशेषणत्वे दोषसामानाधिकरण्याभावो विवक्षितः ; गुणिविशेषणत्वे दोषात्यन्ताभावः । अथ शुभाश्रयाप्राकृतविग्रहविशिष्टत्वप्रतिपादनमुखेन दिव्याभरणायुधमहिषीपरिजनस्थानादियोगमुपलक्षयन् नित्यविभूतियोगं सूचयति—**स्वाभिमतेति** । एवमुभयविभूतियोगादुभयलिङ्गत्वाच्च फलिते केवलपरत्वे वाङ्मनसापरिच्छेद्यतयोपासनायोग्यत्वमपि सूचयितुं परत्वातिशयमाह—**वाङ्मनसेति** । स्वरूपमीश्वरत्वादिकम् ; आनन्दत्वादिकं वा । स्वभाव[ा]स्तु निरूपितस्वरूपविशेषका धर्माः । उक्तं परत्वमेव स्वरूपम्, वक्ष्यमाणं सौलभ्यं तु स्वभाव इत्येके । अवतारसौलभ्यहेतूनाह—**अपारेत्यादिना** । प्रत्येकमेषां महोदधिं * स्त्रियो वैश्यास्तथा शूद्राः (गी. ९.३२) * अभयं सर्वभूतेभ्यः (रा. यु. १८. ३५), * सर्वलोकशरण्याय (१७. २५), * यदि वा रावणस्स्वयम् (१८. ३६) इत्यादिभिस्सिद्धं दर्शयति—**अनालोचितेति** । विशेषाः—जातिगुणवृत्तविशेषादिरूपाः । उक्ताः कारुण्यादिगुणाः एवंविधशरण्यत्वे हेतवः । शरण्यशब्देनाभिगमनीयत्वमुक्तम् ; तत्फलभूतविरोधिनिरसनशीलतामाह—**प्रणतार्तिहरमिति** । सर्वसाधारणतया गुणान्तरैस्सह निर्दिष्टमपि वात्सल्यगुणं भूयोऽपि विशेषसंबन्धानुसन्धानाय विशेषतोऽवतारेषु कार्यकरत्वज्ञापनाय, सापराधानामभीतये, ज्ञानादिरहितदशायामपि स्वयमेव रक्षक इति प्रदर्शनाय, तत्प्रतिबन्धकभूतपरमात्मवैमुख्यनिवृत्तये च पृथगनुसन्धत्ते—**आश्रितवात्सल्यैकजलधिमिति** । उक्तकारुण्यादिगुणगणफलितं प्रकृतावतारस्यावतारान्तराद्वैलक्षण्यमाह—**अखिलेति** । * अजोऽपि सन्नव्ययात्मा (४. ६) इत्यादिना पूर्वोक्तं स्मारयति—**अजहदिति** । अवतारविशेषमाश्रितो हि मामित्याहेत्यभिप्रायेणाह—**वसुदेवेति** । तेजःकान्तिरूपावतारविग्रहगुणविशेषाभ्यामवतारदशायामेव परत्वसौलभ्यव्यञ्जकाभ्याम् उपासकचित्ताकर्षणमभिप्रेत्याह—**अनवधिकेति** । अत्रापि भास्वरत्वं तेजः ; तत एवानभिभवनीयत्वमपि सिद्धम् । **कान्तिस्तु** रामणीयकम्, लावण्यापरपर्यायचन्द्रिकाकल्पा प्रभा वा । अत एव हि **आप्याययन्तमित्युक्तम्** ।

एतेन * विष्वमाप्याययन् कान्त्या (सा. सं. २. ७०) इत्यादिकं स्मारितम् । * भजते इत्यस्य विवक्षितं वक्तुं धातुपाठपठितमर्थं तावद्दर्शयति—सेवत इति । * सेवा भक्तिरुपास्तिः इति नैखण्टुकप्रसिद्धिमाश्रित्य विवक्षिते श्रुतिप्रसिद्धे स्थापयति—उपास्त इत्यर्थ इति । * योगिनामपि सर्वेषामित्युक्तवर्गद्वयं सङ्कलय्य सर्वेभ्य इत्युक्तम् । * मे मतः इत्यत्रासच्छब्दाभिप्रेतमाह—सर्वमित्यादिना । अत्रापि * यो वेत्ति युगपत्सर्वम् इत्यादिकमनुसंहितम् ॥ ४७ ॥

॥ इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां षष्ठोऽध्यायः ॥ ६ ॥

इति श्रीमद्भगवद्गीतायां

॥ प्रथमषट्कं समाप्तम् ॥

श्रीः

॥ अथ सप्तमोऽध्यायः ॥ ७ ॥

भा ॥ प्रथमेनाध्यायषट्केन परमप्राप्यभूतस्य परस्य ब्रह्मणो निरवद्यस्य निखिलजगदेककारणस्य सर्वज्ञस्य सर्वभूतस्य सत्यसङ्कल्पस्य महाविभूतेः श्रीमतो नारायणस्य प्राप्त्युपायभूतं तदुपासनं वक्तुं तदङ्गभूतमात्मज्ञानपूर्वककर्मानुष्ठानसाध्यं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनमुक्तम् । इदानीं मध्यमेन षट्केन परब्रह्मभूतपरमपुरुषस्वरूपं तदुपासनं च भक्तिशब्दवाच्यमुच्यते । तदेतदुत्तरत्र * यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ (१८.४६) इत्यारभ्य * विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते । ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ (५४) इति संक्षिप्य वक्ष्यते । उपासनं तु भक्तिरूपापन्नमेव परप्राप्त्युपायभूतमिति वेदान्तवाक्यसिद्धम् । * तमेव विदित्वाऽतिमृत्युमेति (श्वे. ३. ८) * तमेवं विद्वानमृत इह भवति (पु॰ इत्यादिनाऽभिहितं वेदनम् , * आत्मा वा अरे द्रष्टव्यः....निदिध्यासितव्यः (बृ. ६. ५. ६) आत्मानमेव लोकमुपासीत (३ ४. १५) * सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः (छा. ७. २६. २), *भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ (मु. २. २. ८) इत्यादिभिरेकार्थ्यात्स्मृतिसन्तानरूपं दर्शनसमानाकारं ध्यानोपासनशब्दवाच्यमित्यवगम्यते । पुनश्च * नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ (क. २. २३) इति विशेषणात् परेणात्मना वरणीयताहेतुभूतं स्मर्यमाणविषयस्यात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रियरूपं स्मृतिसन्तानमेवोपासनशब्दवाच्यमिति हि निश्चीयते । तदेव हि भक्तिरित्युच्यते, * स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते (लै उ) इत्यादिवचनात् । अतः तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते (पु) * नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ (गी.११.५३,५४) इत्यनयोरेकार्थत्वं सिद्धं भवति । तत्र सप्तमे तावदुपास्यभूतपरमपुरुष[स्वरूप]याथात्म्यं, प्रकृत्या तत्तिरोधानं, तन्निवृत्तये भगवत्प्रपत्तिः, उपासकविधाभेदो, ज्ञानिनश्श्रैष्ठ्यं चोच्यते ॥

ता ॥ षट्कसङ्गतिमाह—**प्रथमेने**ति । **परमे**त्यादिना वक्तुमित्यन्तेन द्वितीयषट्कार्थ उक्तः । ततःपरं प्रथमषट्कार्थः । प्रथमेनाध्यायषट्केनोक्तमित्यन्वयः । * मामुपेत्य (८. १६) इत्यादीनामर्थं दर्शयति—**परमप्राप्यभूतस्ये**ति । तेन परिशुद्धजीवमात्रव्यावर्तनम् । परमप्राप्यत्वे हेतुः परब्रह्मत्वादिकम् । * परं ब्रह्म परं धाम (१०. १२) इत्यादिकं वक्ष्यति । पुरुषोत्तमत्वप्रकरणादीनामर्थो निरवद्यत्वम् । एतेनाचिद्गता विकाराः चिद्गताः क्लेशादयश्च परिहृताः । * अहं सर्वस्य प्रभवः (१०. ८) इत्यादेरर्थमाह—**निखिले**ति । चिदचिदात्मकं सर्वं जगत्प्रति निमित्तोपादानभूतस्येत्यर्थः । एवं परमप्राप्यस्यैव कारणत्वप्रतिपादनाद्व्योमातीतमतं निरस्तम् । निमित्तोपादानत्वोपयुक्तं * मत्तः परतरम् (७) इत्याद्यभिप्रेतं **सर्वेश**त्वादिकम् । **सर्वभूतस्य**—सर्वान्तर्यामितया सर्वशरीरकस्येत्यर्थः । * सर्वं समाप्नोषि ततोऽसि सर्वः (११.४०) इति हि वक्ष्यति । * भूमिरापः (४) इत्यादिना विभूत्यध्यायादिना च वक्ष्यमाणं महाविभूतित्वं नारायणशब्दनिर्वचनमपि **परमप्राप्यभूतस्य....महाविभूतेरि**त्यादिना सूचितम् ।

एतदुक्तं भवति—

परत्वान्निरवद्यत्वात्पितृत्वाद्धितवेदनात् । अन्तरात्मतया दोषप्रतिक्षेपक्षमत्वतः ॥
भोगलीलार्थनिस्सीमविभूतिद्वययोगतः । श्रीमत्त्वादप्युपास्योऽयं प्राप्यो नारायणः परः ॥ इति ॥

प्राप्त्युपायभूतं तदुपासनमिति । परमात्मोपासनमेव तत्कतुन्यायात्तत्प्राप्त्युपायः ; जीवज्ञानं कर्मानुष्ठानं च तन्निर्वर्तकत्वेन परम्परयोपाय इति भावः । अङ्गप्राप्त्योर्वचनानन्तरमङ्गिप्राप्त्ययोः प्रतिपादनमिति सङ्गत्यभिप्रायेणाह—**इदानी**मिति । पूर्वोक्तात्परिशुद्धात्मनो व्यावृत्तिं वक्ष्यमाणवैभवसंग्रहं चाभिप्रेत्याह—**परब्रह्मभूतपरमपुरुषस्वरूप**मिति । एतेन तत्त्वपरेषु सामान्यब्रह्मशब्दस्य विशेषे स्थितिर्दर्शिता । अथ [अनुष्ठेय]मोक्षोपायपरेषु वेदान्तवाक्येषु वेदनोपासनादिशब्दानां विशेषपर्यवसानमाह—**तदुपासनं च भक्तिशब्दवाच्य**मिति । एवं वाक्यद्वयेन षट्कद्वयसंग्रहश्लोकावप्यर्थाद्व्याख्यातौ । तथा हि—* ज्ञानकर्मात्मिके निष्ठे योगलक्ष्ये सुसंस्कृते । आत्मानुभूतिसिद्ध्यर्थं पूर्वषट्केन चोदिते । मध्यमे भगवत्तत्वयाथात्म्यावाप्तिसिद्धये । ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः ॥ (सं २, ३) इति । **आत्मज्ञानपूर्वकेत्यनेन** सुसंस्कृतशब्दो व्याख्यातः ; बुद्धिविशेषसंस्कृतत्वं हि प्रागेवोपपादितम् । * योगलक्ष्ये * आत्मानुभूतिसिद्ध्यर्थं इत्यत्र योगो विषयान्तरेभ्यश्चित्तवृत्तिनिरोधः ; तज्जन्यसाक्षात्कारस्त्विहात्मानुभूतिशब्देनोच्यत इत्यपौनरुक्त्यमित्यभिप्रायेण **याथात्म्यदर्शन**मित्युक्तम् । तत्त्वयाथात्म्यशब्दविवरणं **परब्रह्मभूते**त्यादि । तत्त्वशब्दोऽत्र स्वरूपपरः । याथात्म्यं—यथावस्थितः प्रकारः । भक्तेः कर्मानुष्ठानसाध्यात्मदर्शनहेतुकत्वम् अष्टादशे वक्ष्यत इत्याह—**तदेतदि**ति । ननु * तमेव विदित्वाऽतिमृत्युमेति (श्वे. ३. ८) इत्यादिबलाद्वेदनमात्रेण मोक्षः प्रतीयते ; अस्तु वा * उपासीत इति बलादुपासनरूपेण वेदनेन मोक्षः ; तथाऽपि न भक्त्या मोक्ष इति क्वचिदपि श्रुतम् । कर्मसमुच्चयश्च श्रुतिसिद्धो दुस्त्यजः । परमपुरुषविषयस्यैवोपासनस्य मोक्षसाधनत्वमित्यपि दुर्वचम् ; रुद्रेन्द्राद्युपासनस्यापि मोक्षसाधनत्वेनाथर्वशिरःप्रतर्दनकौषीतक्यादिषु श्रुतेरित्याद्याशङ्क्याह—**उपासनं त्वि**ति । उपासनमेव, न तु ज्ञानमात्रमित्येका प्रतिज्ञा ; तत्रापि भक्तिरूप[पन्न]मेव, नोपासनमात्रमिति द्वितीया ; एवंविधमुपासनमेव, न तु कर्मसमुच्चितमिति तृतीया ; तच्च परविषयमेवेति चतुर्थी । एषा तु तत्कतुन्यायात्सूचिता । **परप्राप्त्युपायभूत**मिति **वेदान्तवाक्यसिद्ध**मिति । एतच्चतुष्टयमपि वेदान्तवाक्यैरेव सिद्धम्, न तु कल्प्यम्, नाप्युपबृंहणसापेक्षमिति भावः । तत्र प्रथमां प्रतिज्ञां समर्थयते—**तमेवे**त्यादिना **अवगम्यत** इत्यन्तेन । * श्रोतव्यो मन्तव्यः (बृ. ६. ५. ६) इत्येतयोस्तु रागप्राप्तश्रवणमननानुवादरूपत्वात्तत्परित्यागेन * द्रष्टव्यो निदिध्यासितव्यः इति विध्यंश उपात्तः । ध्यानोपासनशब्दयोरैकार्थ्यं दर्शयितुमुभयविशिष्टवाक्योपादानम् । * द्रष्टव्यो....निदिध्यासितव्यः इत्यनयोर्भिन्नार्थत्वप्रसिद्धेरेकवाक्यस्थयोरेकार्थत्वे पौनरुक्त्यादिदोषाच्च दर्शनं ध्यानं च पृथगेव विहितमिति शङ्कायां तयोरपि सामान्यविशेषरूपतयैक्यमेवेति दर्शयितुं स्मृतिमात्रं दर्शनमात्रं च पृथक्सर्वग्रन्थिमोक्षहेतुतया वदतोरत एवैकार्थविषययोर्वाक्ययोरुपादानम् । एतदुक्तं भवति—समानप्रकरणपठितविशेषे सामान्यशब्दानां पर्यवसानं न्यायसिद्धम् ; अतोऽत्र वेदनादिसामान्यशब्दानां ध्यानोपासनादिशब्दवाच्ये विशेषे पर्यवसानमभ्युपेत्यम् ; ध्यानं च तैलधारावदविच्छिन्नस्मृतिसन्ततिरूपमिति * ध्रुवा स्मृतिः (छा. ७. २६. २) इत्यादिसिद्धम् ; सा च ध्रुवा स्मृतिस्सर्वग्रन्थिविप्रमोक्षहेतुतया विहिता ; दर्शनं च तद्धेतुतया विहितम् ; न चेदमुपायद्वयं, गुरुलघुतारतम्यात्फलस्य चाविशिष्टत्वाल्लघौ सति नियमेन गुरोरपरिग्रहेणानुपायत्वप्रसङ्गात् ; नच द्वारद्वारिभावः, एकस्मिन्वाक्ये विशिष्टैकविधिसंभवे पृथग्विधेः परिग्रहायोगात् ; न च दर्शने स्मृतिशब्देनोपचारे कश्चिद्गुणः ; अतो

ध्रुवा स्मृतिरेव दर्शनशब्देन विशेषिता ; स्मृतेश्च दर्शनरूपत्वं नाम विशदतमतया दर्शनसमानाकारत्वमेव । भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनसमानाकारता भीरुकामुकादिषु । यथा *वृक्षे वृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम् । गृहीतधनुषं रामं पाशहस्तमिवान्तकम् । (रा. आ. ३९. १४) इत्यादि । तथा *लीनेव प्रतिबिम्बितेव (मालती ५) इत्यादि । एवं च स्मृतिदर्शनशब्दयोरैकार्थ्ये सिद्धे *द्रष्टव्यो निदिध्यासितव्यः इत्यनयोरेकवाक्यस्थयोरपि सामान्य-विशेषरूपेणैकार्थ्यमेवेति । अथ द्वितीयां प्रतिज्ञामुपपादयितुमाह—**पुनश्चेति** । एतदुक्तं भवति—*नायमात्मा इत्यादिना केवलश्रवणमननिदिध्यासननिषेधः, अत्यन्तनिषेधे त्वनेकप्रमाणविरोधात् । *यमेवैषः इत्यादिना[पि] वरणीयत्वहेतु-भूतस्वक्रियासाध्यो गुणविशेषो विधीयते, ईश्वरस्वाच्छन्द्यमात्राभिधाने वैषम्यनैर्घृण्यादिदोषप्रसङ्गाच्छास्त्रानर्थक्याच्च । तथा सिद्धगुणाभिधानेऽपि शास्त्रानर्थक्यमेव, विधेयान्तराभावात् । स च वरणीयताहेतुस्साध्यो गुणो भक्तिरेव । प्रिय-तम एव हि वरणीयो भवति । परमात्मविषयप्रीतिमानेव परमात्मना वरणीयः, *प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः (१७) इति स्ववचनादिभिस्तथाऽवगतेः—इति । तस्याश्च प्रीतेः स्वयमपि स्वादुतमत्वमुपायान्तरेष्वदृष्टपूर्वं दर्शयति—**स्मर्यमाणेत्यादिना** । *या प्रीतिरविवेकानाम् इत्यारभ्य *तेषु तेष्वच्युता भक्तिरच्युताऽस्तु सदा त्वयि (वि. १. २०. १८) *क नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् । क जपो वासुदेवेति मुक्तिबीजमनुत्तमम् (वि. २. ६. ३४) इत्यादिभिभगवद्भक्तेस्स्वादुतमत्वं सिद्धम् । स्मृतिस्सन्तन्यते यत्रेति वा, स्मृतेः सन्तानो यत्रेति वा स्मृतिसन्तान-शब्देन प्रकृतं वेदनं विशेष्यते इति नपुंसकत्वोपपत्तिः । पुल्लिङ्गतया वा पठितव्यम् । अस्त्वेवं, तथाऽपि भक्तेर्मोक्षोपा-यत्वं कथमित्यत्राह—**तदेव हीति** । महनीयविषये प्रीतिरेव हि भक्तिरिति भावः । तत्र प्रमाणमाह—**स्नेहेति** । महनीय-विषये प्रीतिरेव हि स्नेहपूर्वमनुध्यानमिति भाव्यम्, अन्यथा स्नेहपूर्वस्वप्रियतमानुध्यानस्यापि भक्तित्वप्रसङ्गात् । एवं भक्तिरूपत्वानभ्युपगमे श्रुतिस्मृत्योः परस्परविरोधः । अभ्युपगमे तूपबृंहणीयत्वोपबृंहणत्वाभ्यां परस्परानुकूल्यमित्यभिप्रा-येणाह—**अत** इति । वेदनशब्दनिर्दिष्टस्य मुक्त्युपायस्य भक्तिरूपत्वादित्यर्थः । परमपुरुषव्यतिरिक्तोपायनिषेधमुखेन तज्ज्ञानव्यतिरिक्तोपायनिषेधश्श्रुतौ सिद्धः । तद्भक्तिव्यतिरिक्तोपायनिषेधः स्मृतौ । तदेतद्भक्तिवेदनशब्दयोरैकार्थ्ये हि घटते । अन्यथा तु मिथो व्याघात इति । एवं प्रतिज्ञाद्वयं कण्ठोक्त्योपपादितम् ; अन्यत्प्रतिज्ञाद्वयं त्वर्थतः स्थापितम् । तथा हि—वेदनव्यतिरिक्तनिषेधात्समुच्चयपक्षो निरस्तः । कर्मापेक्षणं त्वङ्गतयेति तत्तद्वाक्यार्थनिरूपणेन सिद्धं भवति । श्वेताश्वतरपुरुषसूक्तवाक्ययोरेकविषयतयोपादानात्सर्वशाखागतपुरुषसूक्तवाक्यैकार्थ्यं सर्वोपनिषदां दर्शितम् । तत्र च *महान् प्रभुर्वै पुरुषस्सत्त्वस्यैष प्रवर्तकः (श्वे. ३. १२) इत्यादिबलात्पुरुषविषयत्वमेव व्यक्तम् । शिवादिशब्दास्तु शुद्धिगुणयोगादिना परमपुरुष एव मुख्याः । अथर्वशिरःप्रतर्दनविद्यादिष्वपि रुद्रेन्द्राद्यन्तर्यामिपरमपुरुषोपासनमेव विधेय-मिति स्थापितं शारीरके । **तत्रेति**—मध्यमषट्क इत्यर्थः । **उपास्यभूतेत्यनेन** प्रकृतसङ्गतिस्सूचिता । उपास्यभूतः परमपुरुषो हि षष्ठाध्यायान्तिमश्लोके *मामिति प्रस्तुतः । एतेन *स्वयाथात्म्यं प्रकृत्याऽस्य तिरोधिश्शरणागतिः । भक्तभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तम उच्यते ॥ इति संग्रहश्लोकोऽपि व्याख्यातः ॥

श्रीभगवानुवाच—

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १

भा ॥ मय्यभिमुख्येन सक्तमनाः—मत्प्रियत्वातिरेकेण मत्स्वरूपेण गुणैश्च चेष्टितेन मद्विभूत्या विश्लेषे सति तत्क्षणादेव विशीर्यमाणस्व[भाव]रूपतया मयि सुगाढं बद्धमनाः तथा मदाश्रयः—स्वयं च मया विना विशीर्यमाण[स्वरूप]तया मदाश्रयो मदेकाधारः, मद्योगं युञ्जन्—योक्तुं प्रवृत्तो योगविषयभूते मामसंशयं—निस्संशयम्, समग्रम्—सकलम्, यथा ज्ञास्यसि—येन ज्ञानेनोक्तेन ज्ञास्यसि; तज्ज्ञानमवहितमनाः त्वं शृणु ॥

ता ॥ अथ भजनीयतया * माम् इति प्रस्तुतं स्वात्मानं भजननिर्वृत्तये यथावस्थितमुपदिशामीति भगवानुवाच—* मय्यासक्त इति । * आसक्त इत्यत्रोपासनार्थमाभिमुख्यमुपसर्गविवक्षितमित्याह—**आभिमुख्येने**ति । तदेव सहेतुकं प्रपञ्चयति—**मत्प्रियत्वे**त्यादिना । अहं प्रियः प्रीतिविषयो यस्य स मत्प्रियः; तस्य भावस्तत्त्वम् । यद्वा, मम प्रियत्वातिरेकेण—मत्प्रियत्वातिरेकेणेत्यर्थः । **मद्विभूति**शब्देनात्र भगवदसाधारणपरिजनपरिग्रहभूषणादीनि गृह्यन्ते, नतु विभूतिमात्रम्, कदाचिदपि तद्विश्लेषायोगात् । यद्वा, विभूतित्वेनाननुभवो विभूत्या विश्लेषः । स्वरूपादिभिरपि हि विश्लेषो यथाभिलषितानुभवाभाव एव । **विशीर्यमाणस्वरूपतये**ति—कार्याक्षमत्वलक्षणशैथिल्येनेत्यर्थः । तेनचात्र मनो विशेष्यते । पौनरुक्त्यप्रसङ्गं परिहर्तुं—**स्वयं चे**त्युक्तम् । * मदाश्रयः इत्यत्राऽभक्ष इत्यादाविवावधारणं विवक्षितमिति दर्शयति—**मदेकाधार** इति । मदनुभवैकधारक इत्यर्थः । योगशब्देन योगोपकारकभजनीयतत्त्वविषयज्ञानमिहोच्यते, न तु योगस्य साक्षादनुष्ठानमित्यभिप्रायेण * युञ्जन् इति शत्रभिप्रेतमाह—**योक्तुं प्रवृत्त** इति । प्रारब्धापरिसमाप्तरूपवर्तमाने प्रारम्भोऽत्र विवक्षित इति भावः । योगात्पूर्वमेव तत्त्वतो ज्ञातव्यत्वार्थम्—**योगविषयभूत**मित्युक्तम् । * असंशयं समग्रम् इत्युभयं क्रियाविशेषणम् । समग्रशब्दो निस्संशयत्वाय सर्वप्रकारविशिष्टत्वपर इति दर्शयितुम्—**सकल**पदम्; विशेषदर्शनेन हि संशयनिवृत्तिः । * तच्छृणु इति प्रतिनिर्देशवशादुत्तरश्लोकालोचनया उक्तिश्रवणयोरेकविषयत्वसिद्धेश्चात्र * यथेतिशब्दो ज्ञानपर इत्यभिप्रायेण—**येन ज्ञानेनोक्तेन ज्ञास्यसी**त्युक्तम् । उक्तेन—वक्ष्यमाणवाक्यप्रतिपाद्येनेत्यर्थः । श्रूयमाणविषयस्यादृष्टचरत्वाच्छ्रोतुरवधानकरणं प्रथमश्लोकप्रयोजनमिति दर्शयति—**अवहितमना** इति ॥ १ ॥

ज्ञानं तेऽहं सविज्ञानम् इदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यते ॥ २

भा ॥ अहं ते मद्विषयमिदं ज्ञानं विज्ञानेन सहाशेषतो वक्ष्यामि; विज्ञानम्—विविक्ताकारविषयं ज्ञानम् । यथाऽहं मद्व्यतिरिक्तात्समस्तचिदचिद्वस्तुजातान्निखिलहेयप्रत्यनीकतया नानाविधानवधिकातिशयासंख्येयकल्याणगुणगणानन्तमहाविभूतितया च विविक्तः, तेन विविक्तविषयज्ञानेन सह मत्स्वरूपविषयं ज्ञानं वक्ष्यामि । किं बहुना; यत् ज्ञानं ज्ञात्वा मयि पुनरन्यत् ज्ञातव्यं नावशिष्यते ॥ २ ॥

ता ॥ * तच्छृणु (१) इत्युक्तमर्थं पुनस्सावधानत्वातिशयसंपादनायाहमपि सर्वज्ञस्सर्वशक्तिर्वक्ष्यामीति वदन् * असंशयं समग्रम् इत्युक्तमर्थं किञ्चिद्विशदयति—* ज्ञानं तेऽहम् इति श्लोकेन । ज्ञानविज्ञानशब्दयोः पौनरुक्त्यव्युदासाय उपसर्गसिद्धं विशेषं दर्शयति—**विज्ञानं विविक्ताकारविषयं ज्ञानमि**ति । अत्र ज्ञानविज्ञानशब्दाभ्यां तज्जनकवाक्यलक्षणा । श्रोतव्यत्ववक्तव्यत्वे वा तज्जनकवाक्यद्वारा तत्रोपचरिते । **ज्ञानं ज्ञात्वे**ति ओदनपाकं पचतीतिवत् । एतेन विज्ञानशब्दस्यात्र निदिध्यासनविषयत्वं परोक्तं प्रत्युक्तम् । अर्थस्थितिपरिज्ञानं त्वत्र * यज्ज्ञात्वा इत्यादिनाऽपि व्यज्यते । [illegible] निरूपकनिरूपितस्वरूपविशेषकधर्मविषयतया ज्ञानविज्ञानशब्दयोरपुनरुक्तिः । उभयलिङ्गतयोभयविभूतिविशिष्ट-

तया च वक्ष्यमाणं विविक्तत्वं दर्शयति—**यथाऽहमिति** । नानाविधानवधिकातिशयासंख्येयकल्याणगुणगणश्च अनन्तमहाविभूतिश्चेति पृथग्बहुव्रीही । * ज्ञानं तु विज्ञानगुणोपपन्नं कर्माशुभं पश्यति वर्जनीयम् (भा. मो. १९९. १७) इत्यत्रापि विज्ञानशब्देनैतदेव विवक्षितम् । अतिशयितविषयज्ञानस्यान्यानादरहेतुत्वात् । * अशेषतः इत्येतस्यैव विवरणं ज्ञानप्रशंसारूपं चोत्तरार्धं व्याख्याति—**किं बहुनेति** । * इह भूयः इत्यस्यार्थो—**मयि पुनरिति** । अवश्यज्ञातव्यसमस्ताकारविशिष्टमिहोपदिशामीत्युक्तं भवति ॥ २ ॥

भा ॥ वक्ष्यमाणस्य ज्ञानस्य दुष्प्रापतामाह—

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३

भा ॥ मनुष्याः—शास्त्राधिकारयोग्याः, तेषां सहस्रेषु कश्चिदेव सिद्धिपर्यन्तं यतते । सिद्धिपर्यन्तं यतमानानां सहस्रेषु कश्चिदेव मां विदित्वा मत्तस्सिद्धये यतते । मद्विदां सहस्रेषु कश्चिदेव तत्त्वतो यथावस्थितं मां वेत्ति । न कश्चिदित्यभिप्रायः । * स महात्मा सुदुर्लभः (१९) * मां तु वेद न कश्चन (२६) इति हि वक्ष्यते ॥

ता ॥ पुनरपि प्रकारान्तरेण प्रशंसा क्रियत इत्यभिप्रायेणाह—**वक्ष्यमाणस्येति** । मनुष्यशब्दोऽत्र न जातिविशेषाभिप्रायः, देवादीनामप्यधिकारस्य शारीरके समर्थितत्वात् । अतस्सिद्ध्यर्थयतनयोग्यमात्राभिप्राय इति दर्शयति—**शास्त्राधिकारयोग्या** इति । सिद्ध्यर्थयतनमात्रं प्रायेण सर्वसाधारणम्, अतः * सिद्धय इत्यस्य * कश्चिदित्युक्तविशेषान्वयाय—**सिद्धिपर्यन्तमित्युक्तम्** । * मां वेत्तीत्युक्तवेदनस्य [म] तदधीनसिद्धिपर्यन्तयतनार्थत्वं * यतताम्पि सिद्धानामित्यनुवादेनाभिप्रेतमित्याह—**मां विदित्वा मत्तस्सिद्धये यतत** इति । प्राप्यस्यैव प्रापकत्वादिकमिह तत्त्वम् । * तत्त्वत इति विशिष्टं वेदनं सामान्यतोऽपि वेदनमात्रे सत्येव हि भवति ; अतो यतताम्पि सिद्धानां कश्चिन्मां वेत्ति ; मद्वेदिषु कश्चिन्मां तत्त्वतो वेत्तीति वाक्यद्वयं विवक्षितमित्यभिप्रायेण **सिद्धिपर्यन्तं यतमानानामित्यादिवाक्यभेदः** । * कश्चिन्मां वेत्तीत्यत्र कश्चिदेव वेत्ति, न द्वाविति विवक्षा व्यासभीष्माद्यनेकदर्शनादयुक्ता ; कश्चिद्वेत्त्येवेति विवक्षा चात्र निरर्थिका, दौर्लभ्यवचनविरुद्धा च ; अतोऽर्थस्वभावाद्वक्ष्यमाणसंवादाच्च फलितं दुर्लभत्वाभिप्रायं दर्शयति—**न कश्चिदिति** ॥ ३ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४

भा ॥ अस्य विचित्रानन्तभोग्यभोगोपकरणभोगस्थानरूपेणावस्थितस्य जगतः प्रकृतिरियं गन्धादिगुणकपृथिव्यप्तेजोवाय्वाकाशादिरूपेण मनःप्रभृतीन्द्रियरूपेण महदहंकाररूपेण चाष्टधा भिन्ना मदीयेति विद्धि ॥ ४ ॥

ता ॥ अथ * भूमिरित्यादिना *न त्वहं तेषु ते मयीत्यन्तेन स्वयाथात्म्यमुपदिश्यते । तत्र प्रथमं कार्यकारणरूपाचिद्विलक्षणत्वं [तच्छे] शेषित्वादिमुखेन दर्शयति । भूम्यादीनां प्रकृतिकार्याणामत्र प्रकृतित्वेन उच्यमानत्वाद्व्यष्टिसृष्ट्यपेक्षया प्रकृतित्वमिह विवक्षितमित्यभिप्रायेणाह—**अस्येति** । केचिदाहुः—*अष्टौ प्रकृतयः (ग) इतिश्रुतेरिह भूम्यादिशब्दैस्तन्मात्राणि गृह्यन्ते ; मनश्शब्देन मनसः कारणभूतोऽहंकारः ; अहंकारशब्देन त्वहंकारवासनास्पदमव्यक्तं मूल-

कारणमिति । एवं समस्तपदमुख्यार्थभङ्गक्लेशाद्वयष्टयपेक्षया प्रकृतित्वं वरमिति भावः । यद्वा, प्रकृतिशब्देन मूलप्रकृतिरेवोच्यते ; द्रव्यैक्यात्सैवाष्टधाऽवस्थितेत्युच्यते ; एषा हि पूर्वमेका पश्चादष्टधा परिणता । अत्र स्वोपदेशप्रवृत्तस्य प्रकृतेरष्टविधत्वाद्युपदेशो न सङ्गतः ; नच स्वकीयत्वात्तत्सङ्गतिः, तथात्वेनेतः प्रागनुपदिष्टत्वात् । अतः प्रत्यक्षादिसिद्धपृथिव्याद्याकारपरिणता प्रकृतिरिहानूद्यते ; स्वस्य तद्विलक्षणत्वतच्छेषित्वतन्नियामकत्वादिसिद्ध्यर्थं * मे इति तस्यास्स्वकीयत्वं विधीयत इत्यभिप्रायेणोक्तम्—**मदीयेति विद्धीति** । पृथिव्यादीनामितरेतरवैषम्यार्थं, भोग्यत्वसिध्यर्थमनुक्तानां तन्मात्राणां कार्यविशेषप्रदर्शनार्थं च **गन्धादिगुणकेत्युक्तम्** । एतेन भूतोक्तिस्तन्मात्रोपलक्षणार्थेत्यपि दर्शितम् । तदभिप्रायेण **आकाशादीत्यादिशब्दोऽपि** पठ्यते । तन्मात्राणां भूतानां चानतिविप्रकर्षात्संख्यानिवेशः । मनश्शब्दः करणभूतेन्द्रियवर्गोपलक्षणार्थ इति दर्शयितुम् **मनःप्रभृतीन्द्रियरूपेणेत्युक्तम्** । बुद्ध्यहंकारशब्दयोरत्र ज्ञानगर्वार्थान्तरभ्रमव्युदासाय तत्त्वविशेषविषयत्वं ज्ञापयति—**महदहङ्काररूपेणेति** । एवं समष्टिव्यष्टितत्त्वमखिलमुक्तम् [भवति] । अत्र संबन्धसामान्यविहिताऽपि षष्ठी स्वस्वामिलक्षणसंबन्धविशेषपर्यवसिता ॥ ४ ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५

भा ॥ इयं ममापरा प्रकृतिः ; इतस्त्वन्याम्—इतोऽचेतनाया अचेतनभोग्यभूतायाः प्रकृतेर्विसजातीयाकारां जीवभूतां परां—तस्या भोक्तृत्वेन प्रधानभूतां चेतनरूपां मदीयां प्रकृतिं विद्धि ; ययेदम् अचेतनं कृत्स्नं जगद्धार्यते ॥ ५ ॥

ता ॥ एवमचिद्विलक्षणत्वं प्रतिपादितम् ; अथ तथाभूताज्जीवादपि विलक्षणत्वं प्रतिपाद्यते, * अपरेयमिति श्लोकेन । अपरा—अनुत्कृष्टा अप्रधानभूतेत्यर्थः । तुशब्दोऽत्यन्तवैलक्षण्यपरः । * इतः परामित्येतावतैव स्वरूपमेदे सुवचेऽप्यन्यशब्दो वैजात्यदृढीकरणार्थ इत्यभिप्रायेण **अचेतनाया इत्यादिकमुक्तम्** । * भोक्ता भोग्यम् (श्वे. १. १२) इत्यादिश्रुत्यनुसारेण भोक्तृत्वभोग्यत्वाभ्यां परत्वापरत्वे दर्शिते । * इदं जगदिति प्रमाणसिद्धनिर्देशासङ्कोचात् **कृत्स्नमित्युक्तम्** । तत्र *इदमिति पराक्त्वनिर्देशेन सूचितमचेतनत्वम् । इदं च धारणं जागरादिषु सङ्कल्पत इति प्रत्यक्ष[दि]सिद्धम् ; अन्यदाऽपि स्वरूपतो धारणमिति ॥ ५ ॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६

भा ॥ एतच्चेतनाचेतनसमष्टिरूपमदीयप्रकृतिद्वययोनीनि ब्रह्मादिस्तम्बपर्यन्तान्युच्चावचभावेनावस्थितानि चिदचिन्मिश्राणि मदीयानि सर्वाणि भूतानीत्युपधारय । मदीयप्रकृतिद्वययोनीनि हि तानि मदीयान्येव । तथा प्रकृतिद्वययोनित्वेन कृत्स्नस्य जगतः तयोर्द्वयोरपि मद्योनित्वेन मदीयत्वेन च कृत्स्नस्य जगतः अहमेव प्रभवोऽहमेव च प्रलयोऽहमेव च शेषीत्युपधारय । तयोश्चिदचित्समष्टिभूतयोः प्रकृतिपुरुषयोरपि परमपुरुषयोनित्वं श्रुतिस्मृतिसिद्धम् । * महानव्यक्ते लीयते । अव्यक्तमक्षरे लीयते । अक्षरं तमसि लीयते । तमः परे देव एकी भवति (सु. २), * विष्णोस्स्वरूपात्परतोदिते द्वे रूपे प्रधानं पुरुषश्च विप्र (वि. १.२.२४), * प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि । परमात्मा च सर्वेषामाधारः परमेश्वरः । विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥ (वि. ६. ४. ३०, ३१) इत्यादिका हि श्रुतिस्मृतयः ॥ ६ ॥

ता ॥ एवं समष्टिदशोक्ता; * एतद्योनीनीत्यर्धेन तु व्यष्टिरुच्यते; * अहं कृत्स्नस्येति तु समष्टिव्यष्ट्योस्सङ्कलितयोः कार्यत्वादिकथनम्, * सर्वाणि भूतानीति चिदचिन्मयकार्यनिर्देशात्। एतच्छब्दः प्रस्तुतप्रकारप्रकृतिपुरुषपरामर्शी; न तु प्रकृतिमात्रपर इति दर्शयति—एतच्चेतनेत्यादिना। एतेन स्वरूपतो निर्विकारस्यापि चेतनस्य देवादिशरीरेन्द्रियतदधीनज्ञानक्रियाभोगादिविशिष्टवेषापेक्षया तत्पूर्वाचित्कल्पावस्थस्य प्रकृतित्वमुपपन्नमिति सूचितम्। व्याख्येये मदीयानीत्येतन्न दृश्यते; तत्कथमत्र निर्दिश्यत इत्यत्राह—मदीयप्रकृतिद्वययोनीनीति। इतिशब्दाप्रयोगेऽपि वाक्यार्थसिद्धाविति शब्दः स्वकीयत्वपरामर्शार्थ इति भावः। भगवदभिप्रायस्थवचनरूपत्वादत्र मदीयशब्दोक्तिः। तथेत्यस्य तथासतीत्यर्थः। तस्यैव विवरणम्—प्रकृतिद्वयेत्यादि। पूर्वोक्तशेषित्वादिसमुच्चयार्थो वा तथाशब्दः। प्रभवप्रलयशब्दावत्रोत्पत्तिलयस्थानपरौ। ननु * अजामेकाम् (श्वे. ४. ५) * नित्यो नित्यानां (क. ५. १२) * प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि (गी. १३. १९) इत्यादिषु सत्सु कार्यविषयकृत्स्नशब्देन प्रकृतिद्वयस्यापि संग्रहः कथमवगम्यत इत्यत्राह—चिदचित्समष्टीति। प्रकृतिपुरुषयोः परमात्मनि प्रलयश्रुतिबलात्तयोस्तस्मादुत्पत्तिरपि श्रुतिसिद्धैव स्यादित्यभिप्रायेणोपादत्ते—महानिति। प्रकृतिपुरुषयोः परमात्मनि लयो नाम क्षीरे नीरस्येव विभागानर्हस्संश्लेषविशेषः। तेन द्रव्यस्वरूपस्य नित्यत्वात् * अजामित्यादेरविरोधः। उक्तार्थे स्मृतिमुदाहरति—विष्णोरिति। परतोदिते परत उदित इत्यर्थः; आर्षस्सन्धिभेदः। यद्वा, स्मृतिरपीयं प्रलयपरैव, तत्प्रकरणस्थत्वात्। * दो अवखण्डने इत्यत्र दिते इति निष्ठान्तं पदम्; पृथग्भूते इत्यर्थः। तेन प्रलयदशायामपि प्रधानपुरुषेश्वराणां मिथः स्वरूपभेदोऽस्त्येवेत्युक्तं भवति। अदिते इति वा पदच्छेदः; अपृथग्भूते इत्यर्थः; तेन विभागानर्हः संश्लेषविशेष उक्तो भवति; प्रलयप्रकरणस्थत्वादत्रापि पूर्वोत्तरोपादीयमानश्रुतिस्मृतिसमानार्थत्वाभिप्रायाच्च। स्वाभिमतार्थे स्फुटार्थं वचनमुदाहरति—प्रकृतिरिति ॥ ६ ॥

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।

भा ॥ यथा सर्वकारणस्यापि प्रकृतिद्वयस्य कारणत्वेन सर्वाचेतनवस्तुशेषिणश्चेतनस्यापि शेषित्वेन कारणतया शेषितया चाहं परतरः; तथा ज्ञानशक्तिबलादिगुणयोगेन चाहमेव परतरः। मत्तोऽन्यत्—मद्व्यतिरिक्तं ज्ञानबलादिगुणान्तरयोगि किंचिदपि परतरं नास्ति ॥

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७

भा ॥ सर्वमिदं चिदचिद्वस्तुजातं कार्यावस्थं कारणावस्थं च मच्छरीरभूतं सूत्रे मणिगणवदात्मतयाऽवस्थिते मयि प्रोतम—आश्रितम्। * यस्य पृथिवी शरीरम् (बृ. ५. ७. ३) * यस्यात्मा शरीरम् (बृ. ५. ७. २२) * एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः (सु. ७) इत्यात्मशरीरभावेनावस्थानं च जगद्ब्रह्मणोरन्तर्यामिब्राह्मणादिषु सिद्धम् ॥ ७ ॥

ता ॥ * मत्तः परतरमित्यत्र पूर्वोक्तस्यैवार्थस्य व्यतिरेकेण दृढीकरणमात्रपरत्वे मन्दप्रयोजनत्वम्; अहं परतर इत्येवंरूपेण पूर्वमनुक्तेश्च तद्व्यतिरेकनिषेधोऽपि नातीवोचितः। अतोऽनुपदिष्टपूर्वार्थपरत्वमेव शब्दस्य संभवदपरित्याज्यमित्यभिप्रायेणाह—यथेति। पूर्वश्लोकस्थतथाशब्दोऽत्रानुषक्तः; ततश्चानन्तमहाविभूतियोगोऽनन्तगुणयोगे दृष्टान्तित इत्यभिप्रायेणाह—तथा ज्ञानशक्तीति। शेषित्वेनेत्यन्तमर्थस्थितिप्रदर्शनम्; कारणतया शेषितया चेति परतरत्वप्रकार-

कथनमित्यपुनरुक्तिः । नन्वहमेवेत्यवधारणमशक्यम्, स्वस्मात्परतरनिषेधेऽपि समनिषेधाप्रतीतेरित्यत्राह—**मत्तोऽन्यत् मद्व्यतिरिक्तमिति** । अयमभिप्रायः—* मत्तः इति पञ्चमी न परतरमित्यनेनान्विता, तथा सत्यन्यशब्दानन्वयप्रसङ्गात्; अतो मत्तोऽन्यत्परतरं नास्तीत्यन्वये अहमेव परतर इति फलितम्; ततश्च समाभ्यधिकदरिद्रत्वमुक्तं भवति—इति । **ज्ञानबलादिगुणान्तरयोगि किंचिदपीत्यनेन** ब्रह्मेशानादयोऽधिकारिणः परिशुद्धात्मानश्च क्रोडीकृताः । एवं * भूमिरापः (४) इत्यादिना निरपेक्षप्रकृतिपरिणामवादः, केवलचेतनसन्निधिमात्रपरिणामित्वं, प्रकृतिपुरुषयोरीश्वरं प्रत्यशेषत्ववादश्च निरस्तः । * मत्तः परतरमित्यनेन तु त्रिमूर्त्यैक्यसाम्योत्तीर्णव्यक्त्यन्तरप्रवाहेश्वरपक्षाः प्रतिक्षिप्ताः ॥

अथ पूर्वोक्तसर्वोपादानत्वप्रसक्तसविकारत्वपरिहारार्थं पृथक्सिद्धप्रकृतिपुरुषादिवादनिरासार्थं च सर्वाधारत्वमुखेन सर्वशरीरित्वमुच्यते * मयीत्यर्धेन । * सर्वमिदमित्यनेन सर्वावस्थसमस्तचिदचिद्वस्तुसंग्रह इत्यभिप्रायेणोक्तं—**चिदचिद्वस्तुजातमित्यादि** । सूत्रमणिगणदृष्टान्तसामर्थ्यात् प्रोतमित्यनेन चानुप्रवेशाश्रयाश्रयिभावप्रतीतेश्शरीरलक्षणमपि सूचितमित्यभिप्रायेण—**मच्छरीरभूतमित्यादिकमुक्तम्** । एकस्यैव सर्वाधारत्वमनुप्रविष्टस्य गूढत्वमाधेयभूतप्रकृत्याद्यधीनस्थितिविरहश्च सूत्रदृष्टान्तसिद्धः । प्रोतशब्देन सूत्रवद्बहिर्व्याप्तयभावप्रतीतिव्युदासायाह—**आश्रितमिति** । अत्र सुबालोपनिषद्वाक्योपादानमन्तर्यामिणो नारायणत्वव्यक्त्यर्थमन्तर्यामिब्राह्मणानुक्ततत्त्वान्तरसंग्रहार्थं च ॥ ७ ॥

भा ॥ अतस्सर्वस्य परमपुरुषशरीरत्वेनात्मभूतपरमपुरुषप्रकारत्वात्सर्वप्रकारः परमपुरुष एवावस्थित इति सर्वैश्शब्दैस्तस्यैवाभिधानमिति तत्तत्सामानाधिकरण्येनाह

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः । प्रणवस्सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८
पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् । बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १०
बलं बलवतां चाहं कामरागविवर्जितम् । धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११

भा ॥ एते सर्वे विलक्षणा भावा मत्त एवोत्पन्नाः, मच्छेषभूताः, मच्छरीरतया मय्येवावस्थिताः ; अतस्तत्तत्प्रकारोऽहमेवावस्थितः ॥ ८, ९, १०, ११ ॥

ता ॥ एवं भूमिरापः (४) इत्यादिना भेदश्रुत्यर्थः उपबृंहितः । * मयि सर्वम् (७) इति तु घटकश्रुत्यर्थः । **अथ** तदुभयनिर्वाहकाभेदश्रुत्यर्थोपबृंहणं क्रियत इत्यभिप्रायेणाह—**अत** इति । केचित् * मयि सर्वमिदमित्यस्य रसादिधर्मविशिष्टे मयि प्रोतमित्यर्थः, तद्विवरणं * रसोऽहमित्यादि, इति व्याचख्युः । तत्परिहारायाह—**सर्वस्य परमपुरुषशरीरत्वेनेति** । परोक्ते त्वाधाराधेयभाववैपरीत्यादिदोष इति भावः । प्रकारवाचिशब्दानां प्रकारिणि पर्यवसानस्वाभाव्यं जातिगुणादिशब्देष्वपि सामान्यतस्सिद्धमिति दर्शयितुं प्रकारत्वोपादानम् । **अभिधानं**—मुख्यवृत्त्या बोधनम् । **यद्यपि** रसादिशब्दा लोके निष्कर्षकाः प्रयुज्यन्ते, व्यधिकरणतया चात्राबादिद्रव्योपादानम्; तथाऽपि रसादीनां परमात्मशरीरभूतद्रव्यप्रकारत्वेन परमात्मनः प्रकारत्वाद्रसादिशब्दानां चात्र तत्समानाधिकरणतया प्रयोगात्तत्र निष्कर्षकत्वं नास्तीत्यभ्युपगन्तव्यम् । [अत्र]द्रव्योपादानं तु तत्रतत्र द्रव्ये प्रधानभूतरसगन्धादिप्रकारिभूतोऽहमिति ज्ञापनार्थम् । द्रव्यप्रकाराणां च तत्प्रकारत्वं * काठिन्यवान्यो बिभर्ति (वि. १. १४. २८) इत्यादिषु प्रयुक्तमिति भावः । रसस्य पृथिव्यां स्थितौ

सत्यामप्यपां रूपादिगुणान्तरसद्भावेऽपि *रसोऽहमप्सु इति विशिष्योपादानं तेजस्तत्त्वादब्रूपपरिणामस्य पूर्वतत्त्वानुत्पन्नरस-प्रधानत्वात् । अन्यत्र च *आत्तगन्धा तदा भूमिः प्रलयत्वाय कल्पते (वि. ६. ४. १४) इत्यादिना च पृथिव्यादीनां गन्धरसाद्यधीनत्वमुक्तम् । एवमुत्तरत्रापि प्राधान्यतो विशेषनिर्देशे यथोचितं भाव्यम् । प्रभा स्वाश्रयातिरिक्तप्रसारि-तेजोद्रव्यविशेषः । प्रभयैव चन्द्रसूर्यौ जगदुपकारहेतुभूताविति तौ तत्प्रधानौ । सर्वेषां वेदानां बीजत्वादिना तेषु प्रणवः प्रधानभूतः । पौरुषं—पुरुषस्य भावः, यतः पुरुषबुद्धिरित्येके; सन्तानपरंपराहेतुभूतं रेत इत्यपरे; यद्वा पौरुषं सामर्थ्यं कर्तृत्वशक्तिरित्यर्थः, तयैव हि कर्तुरात्मनः कारकान्तरेभ्यः प्राधान्यम् । नृषु जीवेष्वित्यर्थः । यद्वा पौरुषं पुंस्त्वम्; स्त्रीनपुंसकव्यावृत्तः सत्त्वादिस्वभावविशेषः । नृशब्दश्च पुरुषपर्यायः । पुण्यो गन्धः—तुलस्यादिगन्धः; सुरभिगन्धमात्रं वा; तद्योगेन हि पृथिवी सत्त्वोन्मेषस्य सुखस्य वा हेतुर्भवति । विभावसुरत्राग्निः । तत्र च तेजः—दाहकत्वशक्तिः । भूतशब्देनात्र शरीरिणो गृह्यन्ते । सर्वशब्देनात्र ब्रह्मशर्वादीनामपि संग्रहः । तेषु जीवनं—प्राण-नम्, प्राणस्थितिहेतुर्वा । येन सर्वाणि भूतानि जीवन्ति, भूतेषूपजीवनीयं वा रूपम् । सर्वभूतानां सनातनं बीजं प्रकृतितत्त्वम् । अथवा प्रधानधर्मनिर्देशप्रकरणत्वाद्बीजशब्दोऽत्रोपादानत्वास्व्यस्वभावपरः । सर्वेषां परिणामिद्रव्याणां स्वकार्यपरिणामसामर्थ्यमित्यर्थः । अथवा बीजं प्ररोहकारणं जङ्गमस्थावरभूतानां तत्तदुपादानद्रव्यम् । बुद्धिः—अध्यव-सायः, ज्ञानमात्रं वा । तेजस्विनः प्रतापशीलाः, तेषां तेजः—अनभिभवनीयत्वं, पराभिभवसामर्थ्यं वा । तेजोऽभिमान इति केचित्; प्रागल्भ्यमित्यपरे । बलं—धारणादिशक्तिः । कामरागवशात्स्वकार्ये प्रवृत्तस्य बलस्य परपीडादिहेतुत्वा-द्धर्मोपयुक्तशरीरादिधारणमात्रादिविषयत्वाय *कामरागविवर्जितमित्युक्तम् । कामः—इच्छायाः काष्ठाप्राप्तदशा । राग इच्छा । यद्वा कामशब्दः काम्यपरः, तद्विषयो रागः कामरागः । भूतेषु—देवमनुष्यादिरूपेणावस्थितेषु जन्तुषु । धर्माविरुद्धः कामः—स्वदारप्रीत्यादिः । अथ *रसोऽहमित्यादिसामानाधिकरण्यं सहेतुकमुपपादयति—**एत** इति । नचायं तदधीनसामर्थ्यप्रदर्शनार्थः *राजा राष्ट्रमित्यादिवदारोपः, मुख्यसंभवे वृत्त्यन्तरायोगादिति भावः । **एत इत्यनेनेश्वर-व्यतिरिक्तैरशक्यक्रियत्वमभिप्रेतम् । सर्वइत्यनेन ब्रह्मरुद्रादिभिरन्यैश्च क्रियमाणानामपि ब्रह्मादिशरीरपरमात्माधीनसृष्टत्वम्** *अहं कृत्स्नस्य (६) इति पूर्वोक्तं स्मारितम् । वक्ष्यमाणराजसतामसेभ्यो वैलक्षण्यार्थमुक्तं—**विलक्षणा** इति । *मत्त एव पृथग्विधाः (१०. ५) इति च वक्ष्यते । एतेन *न विलक्षणत्वादस्य (ब्र. २. १. ४) इत्यधिकरणार्थोऽपि स्मारितः । **मत्त एवोत्पन्ना** इत्यादि तत्तद्वस्त्वनुरूपं यथासंभवं सामानाधिकरण्यहेतुः । गुणजातिशरीरेष्वनुगतस्सामानाधिकरण्य-हेतुरपृथक्सिद्धिरिति प्रदर्शनायोक्तं—**मय्येवावस्थिता** इति ॥ ८-९-१०-११ ॥

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२

भा ॥ किं विशिष्याभिधीयते ; सात्त्विका राजसास्तामसाश्च जगति देहत्वेनेन्द्रियत्वेन भोग्यत्वेन तत्त-द्धेतुत्वेन चावस्थिता ये भावाः, तान् सर्वान् मत्त एवोत्पन्नान् विद्धि ; ते मच्छरीरतया मय्येवावस्थिता इति च । नत्वहं तेषु—नाहं कदाचिदपि तदायत्तस्थितिः ; अन्यत्रात्मायत्तस्थितित्वेऽपि शरीरस्य शरीरेणात्मन-स्थितावप्युपकारो विद्यते ; मम तु तैर्न कश्चित्तथाविध उपकारः, केवललीलैव प्रयोजनमित्यर्थः ॥ १२ ॥

ता ॥ *रसोऽहमित्यादेः प्रदर्शनार्थत्वं *ये चेत्यस्योपसंहारतां च दर्शयति—किं विशिष्येति । तत्तद्धेतुत्वे-नेति समष्टिदशाया अपि संग्रहः । अयं च देहत्वादिविभागोऽनुभूयमानप्रकारानुवादियच्छब्दाभिप्रेतः । सात्त्विकता-

दिकं देहादिषु प्रत्येकमन्वितम् । अपि च * प्रहर्षः प्रीतिरानन्दः सुखं संशान्तचित्तता (भा. मो. २१९. २७) इत्यादयस्सात्त्विका भावाः । * अतुष्टिः परितापश्च [शोको लोभ] क्रोधो मोहस्तथा क्षमा (२८) इत्यादयो राजसाः । * अविवेकस्तथा मोहः प्रमादः स्वप्नतन्द्रिता (२९) इत्यादयस्तामसाः । एते चान्यत्र प्रपञ्चिता इहाभिप्रेताः । * मत्त एवेत्यवधारणेन निमित्तोपादनैक्यं सात्त्विकत्वादिना वैचित्र्यशक्तितत्तदुचितानेकनिमित्तत्वादिप्रतिक्षेपश्च कृतः । कारणत्वेन सह सामानाधिकरण्यनिबन्धननियमनगर्भं शरीरत्वेन तादधीन्यमपि सप्तम्या विवक्षितमिति दर्शयितुम् **मच्छरीरतया मय्येवावस्थिता** इत्युक्तम् । * नत्वहं तेष्वित्यत्र व्याप्तिप्रतिक्षेपभ्रमनिरासायाह—**नाहमिति** । किमर्थमिदमप्रसक्तं प्रतिषिध्यत इत्याशङ्क्याह—**अन्यत्रेति** । तुशब्दोऽत्र शङ्कानिवृत्त्यर्थः । सर्वोपकारनिषेधे तदुत्पादनादिवैयर्थ्यपरिहाराय **तथाविध** इत्युक्तम् । अभिप्रेतमुपकारान्तरमहंशब्दाभिप्रेतपरिपूर्णत्वमुखेन दर्शयति—**केवलेति** ॥ १२ ॥

त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३

भा ॥ तदेवं चेतनाचेतनात्मकं कृत्स्नं जगन्मदीयं कालेकाले मत्त एवोत्पद्यते, मयि च प्रलीयते, मय्येवावस्थितम्, मच्छरीरभूतम्, मदात्मकं चेत्यहमेव कारणावस्थायां कार्यावस्थायां च सर्वशरीरतया सर्वप्रकारोऽवस्थितः । अतः कारणत्वेन शेषित्वेन च ज्ञानाद्यसङ्ख्येयकल्याणगुणगणैश्चाहमेव सर्वैः प्रकारैः परतरः; मत्तोऽन्यत्केनापि कल्याणगुणगणेन परतरं न विद्यते । एवंभूतं मां त्रिभ्यस्सात्त्विकराजसतामसगुणमयेभ्यो भावेभ्यः परं मदसाधारणैः कल्याणगुणगणैस्तत्तद्भोग्यताप्रकारैश्च परम्—उत्कृष्टतमम्, अव्ययं सदैकरूपमपि तैरेव त्रिभिर्गुणमयैर्निहीनतरैः क्षणध्वंसिभिः पूर्वकर्मानुगुणदेहेन्द्रियभोग्यत्वेनावस्थितैः पदार्थैर्मोहितं देवतिर्यङ्मनुष्यस्थावरात्मनाऽवस्थितं सर्वमिदं जगन्नाभिजानाति ॥ १३ ॥

ता ॥ एवं स्वयाथात्म्यमुपदिष्टम् । अथ * त्रिभिरित्यादिना प्रकृत्याऽस्य तिरोधिमुपदिशति । अत्र * मामित्यनेन * भूमिरापोऽनलः (४) इत्यारभ्योक्तं यथावस्थितस्वरूपं गुणमयभावेभ्यः परत्वप्रदर्शनायानूदितमिति दर्शयितुमाह—**तदेवमिति** । उत्पत्तिप्रलययोरविरोधं सर्वेषु कल्पेषु तस्यैव कारणत्वं चाभिप्रेत्योक्तम्—**कालेकाल इति** । * **त्रिभिर्गुणमयैरेभिरिति** पदत्रयेण दुःखमिश्रत्वनश्वरत्वसातिशयत्वादीनि विवक्षितानि । रजस्तमोमिश्रत्वाद्दुःखमिश्रत्वम् । सुखदुःखमोहात्मका हि त्रयो गुणाः । कार्यत्वादनित्यत्वमिन्द्रियपरिच्छिन्नत्वात्क्षुद्रत्वमिति भावः । * मामेभ्यः परमव्ययमिति तु त्रिभिर्निखिलहेयप्रत्यनीकस्वरूपत्वनिरतिशयानन्दत्वनित्यत्वान्यभिप्रेतानीति दर्शयति—**एवंभूतमिति** । कारणत्वेन पितृत्वाद्धितैषिणम्, शेषित्वेन शेषभूतानामुज्जीवनमप्यात्मलाभं मन्वानम्, सर्वज्ञत्वसर्वशक्तित्वादिभिरनिष्टनिवर्तनेष्टप्रापणयोरन्यनिरपेक्षं चेति **एवंभूत**शब्दाभिप्रायः । दुःखमिश्रत्वादिविशिष्टतया प्रस्तुता एव भावाः * **एभ्यः इत्यधिकृत्य** परामृश्यन्त इति प्रदर्शनाय **त्रिभ्य** इत्यादिकमुक्तम् । * एभ्यः परमित्यत्र * तमसः परस्तादित्यादिष्विव देशादिविवक्षाव्युदासायोत्कृष्टत्वोक्तिः । **तत्तद्भोग्यताप्रकारैश्चेति**—समुद्रे गोप्पदमस्तीतिवत् । श्रूयते हि * **यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितम्** (छा. ७. १. ३) इति । शब्दस्पर्शादिरूपेण प्राकृता भावा भोग्याः । परमात्मा तु ज्ञानशक्त्यादिगुणगणैः स्वरूपसमवेतैश्शब्दादिविसजातीयानुकूल्यप्रकारैरप्राकृतैश्च शब्दादिभिः प्राकृतैश्च तैरेव स्वकर्मतत्तावोधादप्राकृतकल्पैः प्रत्येकं भोग्यतायामनवधिकातिशयपरत्वविशिष्ट[म्] इति भावः । एवं निर्दिष्टभोग्यतम-

स्वरूपस्याविकारित्वेन कालावच्छेदव्युदासपरोऽव्ययशब्द इत्यभिप्रायेणाह—**सदैकरूपमिति**। **तैरेवेति**। उक्तदोषत्रययुक्तैरेवेत्यर्थः। **त्रिभिरिति**—गुणाः परस्परन्यूनाधिकभावेनावस्थिता अप्यविनाभूताः। ततश्च गुणत्रयमयानां भावानां दुःखमिश्रत्वमवर्जनीयमिति भावः। **निहीनतरैरिति**। कर्मानुरूपगुणत्रयमयभोगास्तत्तत्कर्मानुरूपेण क्षुद्रा इति भावः। **क्षणध्वंसिभिरिति**—कर्मावसाने क्षणान्तरं स्थातुं न प्रभवन्तीति भावः। ननु सत्त्वेन कथं मोहः? इत्थम्—यथा विषसंपृक्तेऽप्यन्ने मधुनिषेको मन्दस्य भोजनाभिलाषमुत्पादयति; तथा तत्तत्कर्मानुरूपानर्थपर्यवसितमुखलवहेतुत्वेन युक्तं सत्त्वस्यैव मोहहेतुत्वम्—इति। सर्वशब्दोऽत्र देवजात्यनुप्रविष्टब्रह्मरुद्रादेस्संग्रहपरः। इदंशब्दोऽनुभूयमानभोक्तृवर्गवैचित्र्याभिप्रायः। जगच्छब्दश्चाचिद्विशिष्टचेतनवाचीत्यभिप्रायेण **देवेत्यादिकमुक्तम्**। * ब्रह्माद्यास्सकला देवा मनुष्याः पशवस्तथा। विष्णुमायामाहात्म्यमोहान्धतमसावृताः॥ (वि. ५. ३०. १७) इत्यादिकमत्रानुसन्धेयम्॥ १३॥

भा॥ कथं स्वत एवानवधिकातिशयानन्दे नित्ये सदैकरूपे लौकिकवस्तुभोग्यताप्रकारैश्चोत्कृष्टतमे त्वयि स्थितेऽप्यत्यन्तनिर्हानेषु गुणमयेष्वस्थिरेषु भावेषु सर्वस्य भोक्तृवर्गस्य भोग्यत्वबुद्धिरुपजायत इत्यत्राह—

दैवी ह्येषा गुणमयी मम माया दुरत्यया। १३॥

भा॥ ममैषा गुणमयी—सत्त्वरजस्तमोमयी माया यस्माद्दैवी—देवेन क्रीडाप्रवृत्तेन मयैव निर्मिता, तस्मात्सर्वैर्दुरत्यया—दुरतिक्रमा। अस्याः मायाशब्दवाच्यत्वमासुरराक्षसास्त्रादीनामिव विचित्रकार्यकरत्वेन; यथाच * ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम्। आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनम्। तेन मायासहस्रं तच्छम्बरस्याशुगामिना। बालस्य रक्षता देहमेकै [कंच निषूदितम्] कश्येन सूदितम्॥ (वि. १.१९.२०) इत्यादौ। अतो मायाशब्दो न मिथ्यार्थवाची। ऐन्द्रजालिकादिष्वपि केनचिन्मन्त्रौषधादिना मिथ्यार्थविषयायाः पारमार्थिक्या एव बुद्धेरुत्पादकत्वेन मायावीनि प्रयोगः। तथा मन्त्रौषधादिरेव च तत्र माया, सर्वप्रयोगेष्वनुगतस्यैकस्यैव शब्दार्थत्वात्। तत्र मिथ्यार्थेषु मायाशब्दप्रयोगो मायाकार्यबुद्धिविषयत्वेनौपचारिकः, मञ्चाः क्रोशन्तीतिवत्। एषा गुणमयी पारमार्थिकी भगवन्मायैव * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् (श्वे. ३. ४. १०) इत्यादिष्वभिधीयते। अस्याः कार्यं भगवत्स्वरूपतिरोधानम्, स्वस्वरूपभोग्यत्वबुद्धिश्च। अतो भगवन्मायया मोहितं सर्वं जगद्भगवन्तमनवधिकातिशयानन्दस्वरूपं नाभिजानाति॥ १३॥

ता॥ उक्तायामर्थस्थितौ मोह एवायं न घटत इतिशङ्कायां * दैवीत्यादिकमवतारयति—**कथमिति**। **सर्वस्येति** सत्त्वोत्तरतया तत्त्वज्ञानप्रच्युतिरहिताया देवजातेरिति भावः। उत्कृष्टापकृष्टसन्निधावुत्कृष्टग्रहणशीलता भोक्तृवर्गस्येत्यनेन सूचिता। हिशब्दोऽत्र दुरतिक्रमत्वहेत्वर्थः। देवेन निर्मिता दैवीति तद्धितार्थः। * दिवु क्रीडेत्यादिधातौ देवशब्दनिष्पत्तिः; एतेन * देवात्मशक्तिम् (श्वे. १. ३) इति श्रुतिसूचनम्। दैवी, मम इतिशब्दाभ्यां मायाप्रवर्तकस्य देवस्य मायिनश्च कृष्णस्य भेदभ्रमव्युदासाय **मयैवेत्युक्तम्**। नहि स्वच्छन्देनाघटितघटनासमर्थेनेश्वरेण लीलार्थं प्रवर्तिता माया अनीश्वरैस्सर्वभूतैरपि लङ्घितुं शक्यत इति **सर्वैरित्यस्य** भावः। अत्ययशब्दस्यात्र नाशार्थत्वव्युदासायाह—**दुरतिक्रमेति**। दुःखेनानतिक्रमणीया, भगवत्प्रपत्तिरहितैर्लङ्घयितुमशक्यैव। मायाशब्दस्य पराभिमतमर्थं दूषयिष्यन् स्वाभिमतमर्थं तावदाह—**अस्या इति**। सत्येष्वेवासुरराक्षसास्त्रादिषु मायाशब्दप्रयोगो न मिथ्यात्वनिबन्धन इति भावः। **यथाचेति** * तेन मायासहस्रमित्यत्र न मिथ्यार्थविषयत्वमुत्प्रेक्षितुमपि शक्यम्, मिथ्याभूतस्य शस्त्रस्य निषूदनीयत्वाभावादिति

भावः । आदिशब्देन * मायया सततं वेत्ति प्राणिनां च शुभाशुभम्, * देवमायेव निर्मिता (रा. बा. १. २६) इत्यादिप्रयोगसंग्रहः । अपिच दण्डनीतौ सामाद्युपायचतुष्टयादन्ये मायोपेक्षेन्द्रजालरूपाः अमुख्यास्त्रय उपाया उपदिष्टाः; तत्र माया अन्यथाभूतस्य वस्तुनोऽन्यथाकरणशक्तिः; इन्द्रजालं तु तथाप्रतिभासनशक्तिरिति विभागः । तस्मात्सत्यविषय एव मायाशब्द इत्यभिप्रायेणाह—**अत** इति । मायाशब्दप्रयोगस्य सत्यविषयत्वादित्यर्थः । ननु मिथ्याभूतार्थप्रदर्शकेषु तत्संबन्धान्मायाविशब्दः प्रयुज्यते; अतो मायाशब्दो मिथ्यार्थेऽपि प्रयुक्त इत्यत्राह—**ऐन्द्रजालिकेति** । असत्यत्ववदसत्योत्पादकत्वमपि न मायाशब्दप्रवृत्तिनिमित्तमिति दर्शयितुम् **पारमार्थिक्या एवेत्युक्तम्** । भ्रान्तिज्ञानमपि स्वरूपतः सत्यम्; आरोपितस्तु विषयो मिथ्येत्युच्यते । तथाऽप्यन्ततो मिथ्यार्थसंबन्धो निमित्तमित्यत्राह—**तथेति** । मन्त्रौषधादेर्मिथ्यार्थस्य च सन्निधाने किं विशेषनियामकमित्यत्राह—**सर्वेति** । न ह्येकशक्त्यैव निर्वाहे संभवत्यनेकशक्तिकल्पना युक्तेति भावः । मिथ्याभूतेष्वेवार्थेषु मायेयमिति प्रयोगो भवति, तत्र च विचित्रकार्यकरत्वाभावान्मिथ्यात्वमेव निमित्तमाश्रयणीयमित्यत्राह—**तत्रेति** । अयं भावः—यत्र संबन्धाद्गुणयोगाद्वा प्रयोगो दुर्निर्वहः; तत्र हि शक्त्यन्तरकल्पागौरवं सह्यम्; संभवति चात्र परम्परया संबन्धः, मायाकार्यज्ञानविषयत्वात् । नच मिथ्यात्वे प्रवृत्तिनिमित्ततया स्वीकृतेऽस्त्रादिषु तत्संबन्धगन्धः । मिथ्यार्थस्य च गुणाभावादेव तद्गुणयोगो दूरनिरस्तः । अपिच मिथ्याभूतेषु शुक्तिकारजतादिषु तत्प्रयोगाभावान्मिथ्यात्वविशेषे निष्कृष्यमाणे अस्मदुक्त एव विशेषेऽन्तर्भवतीति । * त्वं हि लोकगतिर्देव न त्वां केचित्प्रजानते । ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम् ॥ (रा. उ. ११०. १०) * योगनिद्रा महामाया (वि. ५. १. ७१) इत्यादिष्वपि भगवतो विचित्रकार्यविशेषोपयेगितया वा प्रकृतितत्त्वाभिमानिदेवतात्वादिरूपेण वा मायेत्युक्तम् । अतो युक्तं विचित्रकार्यकरत्वमेव मायाशब्दप्रवृत्तिनिमित्तमिति । श्रुतावपि विचित्रसृष्ट्युपादाने प्रकृतौ सत्यायामेव मायाशब्दः प्रयुक्त इत्याह—**एषेति** । महेश्वरशब्दस्यात्र रुद्रविषयत्वभ्रमव्युदासाय भगवच्छब्दः । श्वेताश्वतरोपनिषदपि पुरुषसूक्तप्रत्यभिज्ञानमहापुरुषशब्दसत्त्वप्रवर्तकत्वादिभिर्भगवद्विषयतयैव प्रतीयते । महेश्वरशिवादिशब्दास्तु तस्मिन्नवयवशक्त्या गुणयोगेन वा प्रवृत्ताः, रुद्रस्यान्यत्र कार्यत्वकर्मवश्यत्वसंप्रतिपत्तेरिति भावः । * मायां तु प्रकृतिं विद्यादिति न तत्र प्रकृत्यनुवादेन मायात्वं विधीयते; किंतु मायाशब्दार्थानुवादेन प्रकृतित्वमिति वाक्यस्वारस्यावगतम्; पूर्वत्र * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः (श्वे. ४. ९) इत्यभिहिते केयं मायेत्याकाङ्क्षायां प्रवृत्तत्वादिति भावः । अस्मिन्प्रकरणे मायाशब्दप्रयोगनिदानमत्रोपयुक्तं विचित्रकार्यं दर्शयति—**अस्या** इति । तदेतदखिलमभिप्रेत्य भगवद्यामुनमुनिभिरुक्तम्—* स्वयाथात्म्यं प्रकृत्याऽस्य तिरोधिश्शरणागतिः (गी. सं. ११) इति । **चोद्यपरिहारतां दर्शयन्नुपसंहरति—अत** इति ॥ १३ ॥

भा ॥ मायाविमोचनोपायमाह—

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४

भा ॥ मामेव—सत्यसङ्कल्पं परमकारुणिकमनालोचितविशेषाशेषलोकशरण्यं ये शरणं प्रपद्यन्ते, ते एतां—मदीयां गुणमयीं मायां तरन्ति—मायामुत्सृज्य मामेवोपासत इत्यर्थः ॥ १४ ॥

ता ॥ * प्रकृत्याऽस्य तिरोधिश्शरणागतिः (११) इति संग्रहश्लोके तन्निवृत्त्यर्थमित्यध्याहर्तव्यमिति दर्शयन्ननन्तरग्रन्थमवतारयति—**मायाविमोचनेति** । यच्छासनादलङ्घनीयं निगलनम्, तन्निवृत्तिरपि तेनैव कार्या, न त्वन्येनेति

* मामेवेत्यवधारणाभिप्रायं व्यञ्जयति—**सत्यसङ्कल्प**मिति । नहि बन्धविषय एव सङ्कल्पस्सत्यः; अपि तु मोक्षविषयोऽपीति स एव प्रपदनीय इति भावः । शक्तस्यापि निर्घृणस्य प्रपत्त्या न किञ्चित्प्रयोजनमित्यत उक्तं—**परमकारुणिक**मिति । परमकारुणिकस्यापि लोकवत्परिग्राह्यापरिग्राह्यविभागे किमस्यासह्यापराधशालिनो जनस्य तत्प्रपत्त्येत्यत्रोक्तम्—**अनालोचिते**त्यादि । वायसशाखामृगविभीषणद्रौपदीप्रभृतिषु चैतत्स्पष्टम् । * यदि वा रावणस्त्वयम् (रा. यु. १८. ३५) इति च तदुक्तिः । * एतामित्यस्याभिप्रेतमाह—**मदीयां गुणमयी**मिति । अपीति शेषः । उपासनप्रकरणत्वाद्वक्ष्यमाणार्तादिचतुष्टयसाधारणत्वाच्चोपासनाङ्गभूता प्रपत्तिरत्रोच्यत इत्यभिप्रायेणाह—**मायामुत्सृज्ये**ति ॥ १४ ॥

भा ॥ किमिति भगवदुपासनापादिनीं भगवत्प्रपत्तिं सर्वे न कुर्वत इत्यत्राह—

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
मायया ऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५

भा ॥ दुष्कृतिनः—पापकर्माणो मां न प्रपद्यन्ते । दुष्कृततारतम्येन ते चतुर्विधा भवन्ति—मूढाः, नराधमाः, मायया ऽपहृतज्ञानाः, आसुरं भावमाश्रिताः इति । मूढाः—विपरीतज्ञानाः, पूर्वोक्तप्रकारेण भगवच्छेषतैकरसमात्मानं भोग्यजातं च स्वशेषतया मन्यमानाः । नराधमाः—सामान्येन ज्ञातेऽपि मत्स्वरूपे मदौन्मुख्यानर्हाः । मायया ऽपहृतज्ञानाः—मद्विषयं मदैश्वर्यविषयं च ज्ञानं प्रस्तुतं येषां तदसंभावनापादिनीभिः कूटयुक्तिभिरपहृतम्, ते तथोक्ताः । आसुरं भावमाश्रिताः—मद्विषयं मदैश्वर्यविषयं च ज्ञानं सुदृढमुपपन्नं येषां द्वेषायैव भवति ; त आसुरं भावमाश्रिताः । उत्तरोत्तराः पापिष्ठतमाः ॥ १५ ॥

ता ॥ * ये प्रपद्यन्ते इति विशेषनिर्देशप्रतिक्षेपाभिप्रायेणाशङ्कते—**किमिती**ति । सुकृतित्वदुष्कृतित्वभेदः साक्षाच्छङ्कोत्तरम्; तत्तारतम्यकथनं त्वत्यन्तहेयात्यन्तोपादेयाकारभेदज्ञापनार्थमित्यभिप्रायेणाह—**दुष्कृतिन** इति । उत्तरश्लोकस्थचतुर्विधपदमत्रापि चतुर्विधपुरुषनिर्देशवशादाकृष्य दर्शितम् । मूढत्वादिविशेषणानामेकस्मिन्नेव समुच्चयः किं न स्यादिति शङ्काव्युदासाय पदचतुष्टयव्याख्या । मूढत्वापहृतज्ञानत्वयोर्मध्ये काचिदवस्था नराधमशब्देन विवक्षितेत्यभिप्रायेणाह—**सामान्येने**ति । उपनिषदर्थनिश्चयाभावेऽपि सर्वलोकप्रसिद्धेतिहासपुराणादिभिस्सामान्यज्ञानम् । सुमेरुप्रभृतिष्विव सुलभत्वापरिज्ञानादौन्मुख्यानर्हत्वम् । उत्पन्नस्यैव हि ज्ञानस्यापहारः; स च विचित्रमोहजनकतया मायाशब्दवाच्याभिः कुदृष्टिबाह्यप्रसूतकूटयुक्तिभिरेवेत्यभिप्रायेणाह—**मद्विषय**मिति । * आसुरं भावमाश्रिताः इत्येतदनपहृतज्ञानविषयमित्याह—**सुदृढमुपपन्न**मिति । निपुणतमप्रतिपादितप्रक्रियया प्रमाणतर्कैरबाध्यत्वेन निश्चितमित्यर्थः । असुरसंबन्धी भाव आसुरो भावः; असुरा हि भगवन्तमतिशयितशक्तिं जानन्त एव द्वेषमाचरन्ति । वक्ष्यते चासुरप्रकृतीनां भावप्योऽशे । * विष्णुभक्तिपरो देवो विपरीतस्तथाऽऽसुरः (वि. ध. १०२. ७४) इति न्यायाच्चायमासुरो भावो भगवति द्वेष एवेत्यभिप्रायेण **द्वेषायैव भवती**त्युक्तम् । एषामुत्तरोत्तरेषां ज्ञानांशेनातिशयादुत्कृष्टतमत्वभ्रमस्यादिति तन्निरासायाह—**उत्तरोत्तरा** इति । * विदुषोऽतिक्रमे दण्डभूयस्त्वम् (गौ. ध. २. १२. ६) इतिन्यायेन ज्ञानप्रकर्ष एवात्र पापिष्ठतमत्वे हेतुः; ज्ञानातिशयेऽपि वैमुख्यं च प्राचीनपापातिशयादेवेति भावः ॥ १५ ॥

चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६

भा ॥ सुकृतिनः—पुण्यकर्माणो मां शरणमुपगम्य मामेव भजन्ते । ते च सुकृततारतम्येन चतुर्विधाः, सुकृतगरीयस्त्वेन प्रतिपत्तिवैशेष्यादुत्तरोत्तराधिकतमा भवन्ति । आर्तः—प्रतिष्ठाहीनः, भ्रष्टैश्वर्यः पुनस्तत्प्राप्तिकामः । अर्थार्थी—अप्राप्तैश्वर्यतया ऐश्वर्यकामः । तयोर्मुखभेदमात्रम् ; ऐश्वर्यविषयतयैक्यादेक एवाधिकारः । जिज्ञासुः—प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुः ; ज्ञानमेवास्य स्वरूपमिति जिज्ञासुरित्युक्तम् । ज्ञानी च—* इतस्त्वन्यां प्रकृतिं विद्धि मे पराम् (७) इत्यादिनाऽभिहितभगवच्छेषतैकरसात्मस्वरूपवित् ; प्रकृतिवियुक्तकेवलात्मन्यपर्यवस्यन् भगवन्तं प्रेप्सुः भगवन्तमेव परमप्राप्यं मन्वान ॥ १६ ॥

ता ॥ * चतुर्विधो भजन्ते इत्यत्र भजनपर्यवसिता प्रपत्तिर्विधित्सिता ; पूर्वश्लोके तन्निषेधादत्र तद्विधानस्यैवोचितत्वादित्यभिप्रायेण—**शरणमुपगम्येत्युक्तम्** । सुकृतित्वाविशेषे कथमधिकारिभेद इत्यत्रोक्तं—**सुकृततारतम्येनेति** । तारतम्यं विवृणोति—**सुकृतगरीयस्त्वेनेति** । विश्वासादेस्साधारणत्वेऽपि प्रपत्तेर्वैशिष्ट्यं फलेच्छाभेदात् । आर्तशब्दोऽत्रार्तिमूलपूर्वस्थितिशैथिल्यपर इत्यभिप्रायेणाह—**प्रतिष्ठाहीन इति** । आर्तस्य हि परभजनमार्तिनिवृत्त्यर्थमेवेत्यभिप्रायेणाह—**भ्रष्टैश्वर्यः पुनस्तत्प्राप्तिकाम इति** । पाठक्रमादप्यर्थक्रमस्य प्रबलत्वाज्जिज्ञासोः प्रागेवार्थार्थिन उपादानम् । आर्तात्तस्य विशेषं दर्शयति—**अप्राप्तेति** । अर्थशब्दोऽत्रार्थनीयभोगविशेषपरः । फलद्वारा ह्यधिकारिभेदोऽभिधीयते ; फलं चार्तस्यार्थार्थिनश्चैश्वर्यमेकमेव । यदा पुनस्तदवान्तरभेदेन भेदकल्पनं ; तदा भेदान्तरमपि वक्तुं शक्यमित्यत्राह—**तयोरिति** । प्रसिद्धेनावान्तरभेदेन विशेषव्यपदेशमात्रमिति भावः । जिज्ञासुशब्देन ज्ञानार्थिमात्रं किं न गृह्यते, भगवन्तमेव वा जिज्ञासुः, भक्तिश्रद्धारहितः कुतूहलमात्रेण भगवन्तं जिज्ञासमानो वा, यथैकत्रद्वितादयः—* यूयं जिज्ञासवोऽभक्ताः (भा. मो. ३४४. ३१) इति । * आरोग्यं भास्करादिच्छेच्छिल्यमिच्छेद्धुताशनात् । ईश्वराज्ज्ञानमन्विच्छेन्मोक्षमिच्छेज्जनार्दनात् । (ब्र. पु.) इत्युक्ताधिकारिचतुष्टये चात्र प्रत्यभिज्ञायमाने जिज्ञासुरपि स एव भवितुमर्हति ; तत्राह—**प्रकृतीति** । भगवन्तं जिज्ञासोरन्ततो भगवानेव प्राप्यतयाऽभिमत इति न पुरुषार्थभेदः ; तद्भेदाच्चात्राधिकारिभेदः प्रतिपाद्यते । आर्तः, अर्थार्थीति बाह्यपुरुषार्थाभिलाषिणो निर्दिष्टाः, भगवदर्थी च ज्ञानीति ; जीवात्मस्वरूपं चाधिकानन्दस्वरूपं प्राप्यं चान्यत्र प्रसिद्धम् ; अत्रापि परस्तादधिकारिभेदस्समर्थयिष्यते ; अतः परिशेषादात्मार्थिविषयोऽयं जिज्ञासुशब्द इति भावः । ज्ञानार्थिवाचके जिज्ञासुशब्दे कथमात्मार्थित्वं व्याक्रियत इत्यत्राह—**ज्ञानमेवेति** । ज्ञानमिह शुद्धात्मानुभवरूपं विवक्षितमिति भावः । ज्ञानिनोऽधिकार्यन्तरत्वानुगुणान्वक्ष्यमाणान्विशेषाननुसन्धाय विशिष्टज्ञानत्वं दर्शयति—**इतस्त्वन्यामित्यादिना** । **केवलात्मन्यपर्यवस्यन्निति**—नगरं प्रविविक्षोरध्वगस्य छायातरुमूलस्वापवदात्मानुभवविलम्ब इति भावः । अत्र जिज्ञासार्वक्तव्यं सर्वमष्टमे प्रपञ्चयिष्यामः । विशिष्टज्ञानफलभूतं पुरुषार्थान्तरपरिग्रहमाह—**भगवन्तं प्रेप्सुरिति** । तत्र हेतुमाह—**भगवन्तमिति** । **भगवन्तमेवेत्यात्मानुभवविलम्बाक्षमत्वमभिप्रेतम्** ॥ १६ ॥

तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ १७

भा ॥ तेषां ज्ञानी विशिष्यते । कुतः ? नित्ययुक्त एकभक्तिरिति च । ज्ञानिनो हि मदेकप्राप्यस्य मया योगो नित्यः ; इतरयोस्तु यावत्स्वाभिलषितप्राप्ति मया योगः । तथा ज्ञानिनो मय्येकस्मिन्नेव भक्तिः ; इतरयोस्तु स्वाभिलषिते तत्साधनत्वेन मयि च ; अतस्त्व एव विशिष्यते । किञ्च, प्रियो हि ज्ञानिनोऽत्यर्थमहम्—अत्यर्थशब्दोऽभिप्रेयवचनः ; ज्ञानिनोऽहं यथा प्रियः, तथा मया सर्वेण सर्वशक्तिनाऽप्यभिधातुं न शक्यत

इत्यर्थः ; प्रियत्वस्येयत्तारहितत्वात् । यथा ज्ञानिनामग्रेसरस्य प्रह्लादस्य * स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः । न विवेदात्मनो गात्र तत्स्मृत्याह्लादसंस्थितः । (वि. १. १७. ३९) इति । तथैव सोऽपि मम प्रियः ॥ १७

ता ॥ एवं भक्तभेद उक्तः ; तत्र प्रतिबुद्धस्य श्रैष्ठ्यं दर्शयति—**तेषा**मिति । इममेवार्थं परस्तादपि वक्ष्यति—* चतुर्विधा मम जना भक्ता एव हि ते श्रुताः । तेषामेकान्तिनश्श्रेष्ठास्ते चैवानन्यदेवताः । अहमेव गतिस्तेषां निराशीःकर्मकारिणाम् । ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः । सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥ (भा. मो. ३४२. ३३-३५) इति । तेषामिति निर्धारणे षष्ठी । विशिष्यते—श्रेष्ठतम इत्यर्थः । किं प्रशंसा[मात्रा]र्थमिदमिति शङ्कते—**कुत** इति । वैशिष्ट्यहेतुपरं विशेषणद्वयमित्याह—**नित्ययुक्तः एकभक्तिरिति** चेति । **ज्ञानिनो** हीत्यादि—प्रापकस्य तस्यैव प्राप्यत्वात्फलदशायामपि योगोऽनुवृत्त इत्यर्थः । आर्तस्यार्थार्थिनश्चैकाधिकारित्वनिर्णयादितरयोरिति द्विवचनम् । एतेनात्मार्थिनः फलदशायां परमात्मभोग्यतानुसन्धानं नास्तीति सिद्धम् । एकस्मिन् भक्तिर्यस्य स **एकभक्ति**रिति व्यधिकरणबहुव्रीहिः । एकशब्दाभिप्रेतमुपास्यफलयोरभेदं दर्शयितुम्—**एकस्मिन्नेवेत्यवधारणम्** । * प्रियो हि इत्यादिना हेत्वन्तरमुच्यत इत्यभिप्रायेणाह—**किंचेति** । अतिशयितकाष्ठां वक्तुमाह—**अर्थशब्दोऽभिधेयवचन इति । अत्यर्थ**मत्यभिधेयम् ; अभिधेयातिक्रमणं चात्राभिधेयान्तराद्वैलक्षण्यम् ; तच्चाभिधातुमशक्यतेत्यभिप्रायेणाह—**ज्ञानिनोऽहमिति** । अभिधातुमशक्यमित्यस्येश्वरवचनत्वात्तेनाप्यशक्यमिति फलितमित्यभिप्रायेणोक्तम्—**मयेत्यादि** । ननु **सर्वज्ञेन** यदज्ञातं तदसदेव स्यात्, यत्र चासावशक्तः, तत्र चास्यानीश्वरत्वं स्यादित्यत्राह—**प्रियत्वस्येति** । गगनकुसुमादिवदसत्त्वनिबन्धनमज्ञानं न दोषाय ; अन्यथा भ्रान्तत्वप्रसङ्गात् । इयत्ताया अभावादेव तद्वाचकशब्दोऽपि नास्तीति तदप्रयोगोऽपि नाशक्तिहेतुरिति भावः । हिशब्दद्योतितां प्रसिद्धिमुदाहरति—**यथेति** । **ज्ञानिनामग्रेसरस्येत्यनेन** जन्मसिद्धनिरतिशयज्ञानवत्त्वं बाधकवचनादिभिर्विभीषिकासहस्रैश्चाकम्पितत्वं विवक्षितम् । * कृषिर्भूवाचकशब्दो णश्च निर्वृतिवाचकः (भा. उ. ६९. ५) इति कृष्णशब्देनात्र निर्वृतिहेतुत्वादिकं विवक्षितम् । प्रवाहानादिकृष्णावतारकृतकालियमर्दनसूचनं वा ; भक्तदुःखानां कर्षणाद्वा कृष्णः । तीव्रदुःखहेतुसद्भावेऽपि दुःखानुभवाभावो निरतिशयप्रीत्यन्तरमत्तयेति भावः । आत्मज्ञानमपि तदानीं मृग्यं, किं पुनर्गृहादिकल्पशरारज्ञानमित्यात्मनो गात्रमित्यस्य भावः । * स च मम प्रिय इत्यत्राप्यत्यर्थशब्दस्समुच्चयसामर्थ्यादर्थस्वभावाच्चानुषक्त इत्यभिप्रायेणाह—**तथैवेति** । यथाऽहं त्रिविधपरिच्छेदरहितनिरतिशयानन्दस्वरूपोऽनन्तगुणविभूतिर्ज्ञानिनः प्रियस्तथाऽयमेक एव ज्ञानी मम निरतिशयप्रीतिविषय इत्युक्तं भवति । * स च मम प्रिय इत्यत्र निरतिशयप्रीतिं कुर्वतोऽपि महोदारस्येश्वरस्यापि तत्प्रीत्युपाधिकप्रीतिकरणादतृप्तिस्सूचितेति केचिदाचार्याः ॥ १७ ॥

उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ १८

भा ॥ सर्व एवैते मामेवोपासत इत्युदाराः—वदान्याः । ये मत्तो यत्किंचिदपि गृह्णन्ति, ते हि मम सर्वस्वदायिनः । ज्ञानी त्वात्मैव मे मतम्—तदायत्तधारणोऽहमिति मन्ये कस्मादेवम्? यस्मादयं मया विनाऽऽत्मधारणासंभावनया मामेवानुत्तमं प्राप्यमास्थितः ; अतस्तेन विना ममाप्यात्मधारणं न संभवति । ततो ममात्मा हि सः ॥ १८ ॥

ता ॥ * तेषामिति श्लोकस्यार्थ एव * उदारा इत्यनेनापि दृढीक्रियते । ज्ञानिनोऽत्यर्थप्रियत्ववचनादन्येषामपि किञ्चित्प्रियत्वं फलितम्; तदेव * उदारास्सर्वे इति पादेन विशदीकृतम् । तदेकोपायत्वस्य साधारण्यं **मामेवोपासत** इत्यनेन दर्शितम् । उदारशब्दस्यात्र मन्दप्रयोजनोत्कर्षमात्रपरत्वव्युदासाय प्रसिद्ध्यनुरोधेनाह—**वदान्या** इति । अर्थित्वेनावस्थितानां कथं [उदार]वदान्यत्वमित्यत्राह—**ये मत्त** इति । सकलफलप्रदत्वलक्षणं परमौदार्यमेव हि मम सर्वस्वम्; तच्च प्रतिग्रहीतृसापेक्षं तदभावे कथं स्यादित्युक्तं भवति । * मतमिति नपुंसकत्वान्न ज्ञानीत्यनेनान्वयः; मत इति परोक्तपाठस्त्वप्रसिद्धः; तस्मादितिशब्दोऽध्याहृतः । अयमर्थस्त्वय्यन्तसिद्धान्तो भवतु वा मा वा; कृष्णसिद्धान्तस्त्वयमिति भावः । आत्मशब्दस्यात्र बहुप्रमाणविरुद्धत्वान्न तादात्म्यादिविषयत्वम्; तथा सति व्यतिरेकनिर्देशबाधश्च । अतस्तदभिप्रेतमाह—**तदायत्ते**ति । शरीरं प्रति धारको ह्यात्मा । प्रियत्वातिशयप्रतिपादनाय सावधारणोऽयमात्मत्वारोपः । अस्मिन्नभिमानमात्रसारे भवत्सिद्धान्ते किं प्रमाणमभिमतमित्याकाङ्क्षायाम् *आस्थित इत्यादिकमुच्यत इत्याह—**कस्मादे**वमिति । हिर्हेतौ । * युक्तात्मेत्याशंसायां क्तः; परमात्मयोगाशंसाविशिष्ट एव आत्मा यस्य सोऽत्र युक्तात्मा; तदेतदभिप्रेत्योक्तं—**मया विनाऽऽत्मधारणासंभावनये**ति । मदनुसन्धानाभावे सति अर्थान्तरानुसन्धानप्रवृत्तेरसमर्थस्वभावतयेत्यर्थः । **मामेवे**ति—अयुक्तदशायामसत्त्वमेव हि स्यादिति भावः । **मामेव**—उपायभूतमेव, न तु फलान्तर[रूप]त्वमित्यर्थः । **प्राप्य**मिति—गतिशब्दोऽत्र गन्तव्यपरः । अस्त्वेवं तदायत्तधारणो यथाप्रमाणं ज्ञानी, ततः किमायातं भगवतस्तदायत्तधारणत्वस्येत्यत्राह—**अतस्तेन विने**ति । सहृदयानां मदभिप्रायविदां चैतद्यक्तमित्यभिप्रायः । तथा हि * न तस्यान्यः प्रियतरः प्रतिबुद्धैर्महात्मभिः । विद्यते त्रिषु लोकेषु ततोऽस्येकान्तितां गतः । नारदैतद्धि ते सत्यं वचनं समुदाहृतम् । नास्य भक्तैः प्रियतरो लोके कश्चन विद्यते ॥ (भा. मो. ३५३.६५) इति । **ततो ममात्मा हि स** इति—आधारत्वादि विशेषो ह्यात्मलक्षणमिति भावः । ऐश्वर्यादिकामास्सर्व एव मत्स्वरूपस्यातिशयहेतवः; ज्ञानी तु मम स्वरूपसत्ताहेतुरिति स्वभक्तस्तुतिपरः श्लोकः ॥ १८ ॥

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥ १९

भा ॥ नाल्पसंख्यासङ्ख्यातानां पुण्यजन्मनां फलमिदम्, यन्मच्छेषतैकरसात्मयाथात्म्यज्ञानपूर्वकं मत्प्रपदनम्; अपि तु बहूनां जन्मनां पुण्यजन्मनामन्ते—अवसाने, वासुदेवशेषतैकरसोऽहं तदायत्तस्वरूपस्थितिप्रवृत्तिश्च, सचासङ्ख्येयैः कल्याणगुणगणैः परतर इति ज्ञानवान्भूत्वा, वासुदेव एव मम परमप्राप्यं प्रापकं च, अन्यदपि यन्मनोरथवर्ति स एव मम तत्सर्वमिति मां प्रपद्यते—मामुपास्ते; स महात्मा—महामनाः सुदुर्लभः—दुर्लभतरो लोके । वासुदेवस्सर्वमित्यस्यायमेवार्थः, * प्रियो हि ज्ञानिनोऽत्यर्थमहम्, *आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिमिति प्रक्रमात् । ज्ञानवांश्चायमुक्तलक्षण एव, अस्यैव पूर्वोक्तज्ञानित्वात्, * भूमिरापः इत्यारभ्य *अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूताम् (५) इति हि चेतनाचेतनप्रकृतिद्वयस्य परमपुरुषशेषतैकरसतोक्ता; * अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । (७) इत्यारभ्य * ये चैव सात्त्विका भावा राजसास्तामसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ (१२) इति प्रकृतिद्वयस्य कार्यकारणोभयावस्थस्य परमपुरुषायत्तस्वरूपस्थितिप्रवृत्तित्वं परमपुरुषस्य च सर्वैः प्रकारैस्सर्वस्मात्परतरत्वमुक्तम्; अतस्स एवात्र ज्ञानीत्युच्यते ॥ १९ ॥

ता ॥ पुनरप्युक्तज्ञानवत्त्वस्यानेकजन्मसाध्यपुण्यफलत्वेन दुर्लभतरतया ज्ञानिनः श्रैष्ठ्यं दर्शयति—*बहूनामिति श्लोकेन । *ये जन्मकोटिभिस्सिद्धास्तेषामन्तेऽत्र संस्थितिः (पौ. सं) इति **भगवच्छास्त्रं**, *जन्मान्तरसहस्रेषु (इ. स. १७) इत्यादिकां स्मृतिं चानुसन्दधान आह—**नान्पेति** । *बहूनां जन्मनामित्यत्र न तावद्बहुजन्मसद्भावमात्रं विवक्षितम्, तस्यात्रानुपयुक्तत्वात् । न च बहुजन्ममात्रस्य ज्ञानहेतुत्वमुच्यते; सर्वेषामयत्नतो ज्ञानित्वप्रसङ्गात् । अतः **पुण्यजन्मनाम्** इति विशेषितम् । ईदृशज्ञानवत्त्वमेवंभूतविशिष्टप्रपत्तौ हेतुरिति दर्शयितुं, ज्ञानवतोऽनेकजन्मश्रमव्युदासाय च **ज्ञानवान् भूत्वेत्युक्तम्** । *वासुदेवस्सर्वमिति सामानाधिकरण्यस्य बाधाध्यासतादात्म्यादिविषयत्वायोगाच्छरीरशरीरिभावादिनिर्वाहादपि प्रकरणविशेषसिद्धस्यार्थस्य ग्राह्यतरत्वात् **परमप्राप्य**मित्यादिकमुक्तम् । लौकिकं धारकादिकमभिप्रेत्याह—**अन्यदपी**त्यादि । *त्वमेव माता च पिता त्वमेव, *माता पिता भ्राता निवासश्शरणं सुहृद्गतिर्नारायणः (सु. ६) इत्यादिकमपीहाभिप्रेतम् । प्रपत्तेरत्रोपासनाङ्गत्वादाह—**मामुपास्त** इति । ज्ञानिनोऽपि स्वरूपमहत्त्वं प्रमाणविरुद्धम्; पङ्क्तिपावनत्वादिमाहात्म्यं सदपि प्रकृतेऽनपेक्षितम्; तस्माज्ज्ञानविशेषाधीनमाहात्म्यमिह विवक्षितमित्याह—**महामना** इति । फलान्तरपरस्यापि भगवदुपासकस्य दुर्लभत्वात्तद्व्यवच्छेदाय सुशब्द इति दर्शयितुं **दुर्लभतर इत्युक्तम्** । *वासुदेवस्सर्वमिति सामानाधिकरण्यस्य पराभिमतमर्थं प्रतिक्षिपन् स्वोक्तं द्रढयति—**वासुदेव** इति । अत्र **ह्युपक्रमः** प्राप्यभेदनिबन्धनाधिकारिभेदपरः । प्रकरणविरुद्धः, प्रकरणानुपयुक्तो वाऽर्थः प्रकरणविशेषसिद्धोपयुक्ततमार्थे जागरूकेऽनादरणीय इति भावः । ज्ञानवानित्यत्रापि निर्विशेषादिज्ञानजीवमात्रज्ञानादिव्युदासायाह—**ज्ञानवांश्चायमिति** । उक्तलक्षणः वासुदेवशेषतैकरसस्वात्मवेदीत्यर्थः । उक्तलक्षणत्वे हेतुमाह—**अस्यैव पूर्वोक्तज्ञानित्वादिति** । *ज्ञानी च भरतर्षभ (१६) इति पूर्वोक्ते ज्ञानिनि कथमुक्तलक्षणत्वमित्यत्राह—**भूमिराप इत्यारभ्येति** । यद्वा पूर्वोक्तज्ञानित्वादित्येकभक्तित्वादिकं विवक्षितम्; *भूमिराप इत्यादिना हेत्वन्तरोक्तिः । **कार्यकारणोभयावस्थस्ये**ति—कार्यत्वकारणत्वरूपोभयावस्थाविशिष्टस्येत्यर्थः । स्वरूपस्थित्यादितादधीन्यं *मयि सर्वं (७), *रसोऽहमित्यादिषु व्यक्तम् । उक्तलक्षणत्वं निगमयति—**अत** इति । **स एवे**ति—*वासुदेवशेषतैकरसोऽहमित्यादिनोक्तलक्षण एवेत्यर्थः । उक्तलक्षण एव ज्ञानवानित्यभिधीयत इति दर्शयितुं **ज्ञानीत्युच्यत** इत्युपसंहृतम् ॥ १९ ॥

भा ॥ तस्य ज्ञानिनो दुर्लभत्वमेवोपपादयति—

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियतास्स्वया ॥ २०

भा ॥ सर्व एव हि लौकिकाः पुरुषाः स्वया प्रकृत्या—[पाप]वासनया गुणमयभावविषयया नियताः—नित्यान्विताः तैस्तैस्स्ववासनानुरूपैर्गुणमयैरेव कामैः—इच्छाविषयभूतैः हृतमत्स्वरूपविषयज्ञानाः तत्तत्कामसिद्ध्यर्थमन्यदेवताः—मद्व्यतिरिक्ताः केवलेन्द्रादिदेवताः तं तं नियममास्थाय—तत्तद्देवताविशेषमात्रप्रीणनासाधारणं नियममास्थाय, प्रपद्यन्ते—ता एवाश्रित्यार्चयन्ते ॥ २० ॥

ता ॥ *कामैस्तैस्तैरित्यादेः, *सर्गे यान्ति परन्तपेत्यन्तस्य प्रकृतसङ्गतिमाह—**तस्ये**ति । देवतान्तरफलान्तरसङ्गादिकं प्रतिबन्धकमिति भावः । [हृतज्ञाना इत्यत्र] बहुवचनासङ्गोचं *सर्वभूतानि संमोहमिति वक्ष्यमाणं चानुसन्धायोक्तं—**सर्व एव हीति** । **स्वयेति** । प्राचीनस्वकीयानुभवजनितया प्रत्यात्मनियतया तदेकनिष्ठफलप्रसाधिकयेत्यर्थः । **वासनाया नियतविषयेच्छाजनकत्वायोक्तं—गुणमयभावविषययेति** । एतेन स्वभावपर्यायः प्रकृतिशब्दोऽत्र *कामैस्तैस्तै-

रित्यादिसमभिव्याहारात्तत्तदिच्छाहेतुभूतसहजवासनाविषय इत्यपि निर्व्यूढम् । नियतत्वं नामादृष्टव्यभिचारस्संबन्ध इत्यभिप्रायेणोक्तं **नित्यान्विता** इति । वीप्साभिप्रेतमाह—**स्ववासनानुरूपै**रिति । * लभते च ततः कामान् (२२) इत्यनन्तरामिधीयमानैकार्थ्यात्कामशब्दोऽत्र कर्मणि व्युत्पन्नः । * हृतज्ञाना इत्यत्र ज्ञानशब्देन पूर्वप्रसक्तमेव ज्ञानं विवक्षितमिति प्रदर्शयितुं—**हृतमत्स्वरूपविषयज्ञाना** इत्युक्तम् । तदेव चान्यदेवताभजनकारणम् । फलकारणयोस्स्वरूपेण निर्दिष्टयोरपि साध्यसाधनभावोऽर्थसिद्ध इति दर्शयितुं **तत्तत्कामसिद्ध्यर्थमित्युक्तम्** । **तैस्तैः**—तत्तद्देवताभिर्दातुं शक्यैरित्यर्थः । इन्द्रादिदेवतानामपि भगवत्पर्यन्तानुसन्धाने तत्तद्विशेषणविशिष्टस्य भगवत एव तत्तद्देवतात्वान्नान्यदेवतात्वं तथाविधानुसन्धानराहित्यनिबन्धनमिति ज्ञापनायोक्तं—**मद्व्यतिरिक्ताः केवलेन्द्रादिदेवता** इति । एतेन * कामैस्तैस्तैरित्यादिकमितरभक्तत्रयविषयमिति परोक्तं निरस्तम् । तत्तत्कामार्थमपि निपुणैर्भगवानेव प्रपदनीयः; अत एव हि संगृहीतम्—* ऐकान्त्यं भगवत्येषां समानमधिकारिणाम् (गी. सं. २८) इति । अन्यथा * तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिरिति भावः । **तंतं नियम**मिति—नियमोऽत्र सङ्कल्पविशेषादिः । * श्रद्धयाऽर्चितुमिच्छतीति वक्ष्यमाणवशादत्रापि प्रपत्तेरर्चनाङ्गत्वं दर्शयति—**ता एवाश्रित्यार्चयन्त** इति । विश्वासगर्भफलसदृत्ववरणपूर्वकं तत्तत्कर्मभिः प्रीणयन्तीत्यर्थः । प्रपत्तिस्वरूपसामर्थ्यादवधारणसिद्धिः । * तदेकोपायता याच्ञा (वि. सं.) इति हि तल्लक्षणम् ॥ २० ॥

योयो यांयां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति ।
तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१

भा ॥ ता अपि देवता मदीयास्तनवः * य आदित्ये तिष्ठन् ... यमादित्यो न वेद यस्यादित्यश्शरीरम् (बृ. ५.९) इत्यादिश्रुतिभिः प्रतिपादिताः । मदीयास्तनव इत्यजानन्नपि योयो यांयां मदीया [मादित्या]मिन्द्रादिकां तनुं भक्तश्श्रद्धयाऽर्चितुमिच्छति : तस्यतस्याजानतोऽपि मत्तनुविषयैषा श्रद्धेत्यहमनुसन्धाय तामेवाचलां—निर्विघ्नां विदधाम्यहम् ॥ २१ ॥

ता ॥ एवं देवतान्तरफलान्तरसक्ता अपि तत्तदाराधनतत्फलयोश्शैथिल्ये सति * अलाभे मत्तकाशिन्या दृष्टा तिर्यक्षु कामितेति न्यायेन अनर्थहेतुषु निषिद्धेषूपायेषु निमज्जेयुरिति भयात्परमकारुणिकोऽहमेव तत्तदाराधनहेतुश्रद्धाविघ्नशान्तिं तत्फलं च प्रयच्छामीति श्लोकद्वयेनाह—* योयां इति । एक एवेश्वरो रामकृष्णाद्यवतारवदादित्यादिविग्रहभाक्, नतु चेतनान्तर[मन्ती]मिति कुदृष्टिमतनिरासायाह—**ता अपी**ति । अयमभिप्रायः—पूर्वश्लोके * प्रपद्यन्तेऽन्यदेवताः (२०) इति निर्देशो न तावदीश्वरासाधारणविग्रहविशेषविषयः, तद्विशिष्टेश्वरविषयो वा भवितुमर्हति, तत्रान्यदेवतात्वव्यपदेशायोगात्, रामकृष्णादिवदेव । ततश्च चेतनान्तरविषयत्वमवश्याभ्युपगमनीयम् । * देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि (२३) इति च पृथग्वक्ष्यते । अतोऽत्र तनुशब्दः पूर्वोत्तरपरामर्शवशाच्चेतनविशेषविषयः इति । सर्वासां चेतनविशेषरूपदेवतानामीश्वरशरीरत्वप्रदर्शनार्थं श्रुतिमुदाहरति—**य आदित्य** इति । नात्र तनुत्वेन भजनं विवक्षितम्, तथा सति प्रतर्दनविद्यादिष्विव परमात्मोपासनत्वप्रसङ्गात्, * ननु मामभिजानन्ति तत्त्वेन (९. २४) इति वक्ष्यमाणत्वाच्चेत्यभिप्रायेणाह—**मदीयास्तनव इत्यजानन्नपी**ति । तर्हि तनुत्वेनात्र निर्देशोऽनुपपन्नो निरर्थकश्च, यांयां देवतामित्येव हि वक्तव्यमित्यत्राह—**तस्यतस्ये**ति । यथा नरपतेरात्मस्वरूपमजानतोऽपि राजशरीरप्रसाधनादिकं कर्तुरन्ततो राजादिनैव फलमिति न्यायसूचनादुपपन्नोऽत्र तनुशब्द इति भावः । जातायाश्श्रद्धाया अचलत्वं प्रतिबन्धकराहित्येनाफलाभं निरन्तरसंतन्यमानत्वमित्यभिप्रायेणोक्तम्—**निर्विघ्नामिति** ॥ २१ ॥

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् ॥ २२

भा ॥ स तया—निर्विघ्नया श्रद्धया युक्तस्तस्य—इन्द्रादेराराधनं प्रतीहते । ततो—मत्तनुभूतेन्द्रादिदेवताराधनात्तानेव हि स्वाभिलषितान्कामान्मयैव विहितान्लभते । यद्यप्याराधनकाले आराध्येन्द्रादयो मदीयास्तनवः, तत एव तदर्चनं च मदाराधनमिति न जानाति ; तथाऽपि तस्य वस्तुतो मदाराधनत्वादाराधकाभिलषितमहमेव विदधामि ॥ २२ ॥

ता ॥ * स तयेति श्लोकेऽपि पूर्ववद्दीप्सा भाव्या । * तयेत्यस्य प्रस्तुतोपयुक्ताकारपरामर्शित्वज्ञापनाय **निर्विघ्नयेत्युक्तम्** । स्त्रीलिङ्गेन देवताशब्देन तनुशब्देन च पूर्वनिर्देशोऽपि * तस्येति पुंल्लिङ्गेन प्रतिनिर्देशो बुद्धिस्थतत्तद्देवपरः । * देवान्देवयजो यान्तीति ह्यनन्तरमुच्यत इत्यभिप्रायेण तस्येन्द्रादेरित्युक्तम् । यद्यपि तस्या इति पदच्छेदश्शक्यः, तथाऽपि राधनमित्यस्योपसर्गरहितस्य आराधने प्रसिद्ध्यभावात्तदनादरः । यद्वा, फल्गितोक्तिरियं ; राधनमित्येव पदच्छेदः । **तत** इति व्याख्येयनिर्देशः । तद्व्याख्यानम्—**भत्तनुभूतेन्द्रादिदेवताराधना**दिति । अयमभिप्रायः—* तत इतिपदस्येन्द्रादिपरत्वं मन्दम् , * मयैव विहितानिति स्वस्यैव फलदातृत्ववचनात् । ततस्तन्निमित्तमेवात्रापेक्षितम् । **अतः** * तस्याराधनमीहते इति प्रधानतया प्रस्तुतपरामर्श एवायमिति । * हितानित्यत्र हीत्यव्ययम् । सर्वत्र तच्छब्दनिर्देशात्कामानित्यत्रापि तानिति विशेषणमुचितम् ; भगवत्तस्समस्ताभिलषितदायित्वसूचनादपेक्षितं च । हितत्ववचनं च प्रकरणविरुद्धम् । * अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसामिति (६. २३) [ण]तन्निन्दाप्रवृत्तत्वादित्यभिप्रायेणोक्तम्—**तानेव हि स्वाभिलषिता**निति । त्वद्विषयज्ञानहीनस्य त्वया फलदानं कथमित्यत्र * मयैवेत्यवधारणाभिप्रेतमाह—**यद्यपी**ति ॥ २२ ॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३

भा ॥ तेषामल्पमेधसाम्—अल्पबुद्धीनामिन्द्रादिमात्रयाजिनां तदाराधनफलमल्पम् , अन्तवच्च भवति । कुतः ? देवान् देवयजो यान्ति—यत इन्द्रादीन् देवान् तद्याजिनो यान्ति । इन्द्रादयोऽपि हि परिच्छिन्नभोगाः परिमितकालवर्तिनश्च : ततस्तत्सायुज्यं प्राप्ताः तैस्सह प्रच्यवन्ते । मद्भक्ता अपि तेषामेव कर्मणां मदाराधनरूपतां ज्ञात्वा परिच्छिन्नफलसङ्गं त्यक्त्वा मय्यर्पणैकप्रयोजनाः मां प्राप्नुवन्ति : न च पुनर्निवर्तन्ते । * मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते (८. १६) इति हि वक्ष्यते ॥ २३ ॥

ता ॥ यदि भवत्प्रसादात्तेषामपि फलसिद्धिस्तर्हि तत्र को विशेषो भवदुपासकेभ्य इत्यत्रोत्तरम्—* **अन्तवत्तु** इत्यादि । पूर्वार्धे संभवत्येकवाक्यत्वे वाक्यभेदभ्रमनिरासाय **तेषामल्पमेधसा**मिति सामानाधिकरण्यं दर्शितम् । **तेषा**मिति फलाल्पत्वहेतुपरामर्श इत्याह—**इन्द्रादिमात्रयाजिना**मिति । तत्र हेतुरल्पबुद्धित्वम् । अल्पेष्विन्द्रादिषु तदधीनफलेषु च मेधा बुद्धिर्येषां तेऽल्पमेधसः । अल्पगोचरत्वादल्पा मेधा येषामिति वा । अल्पमेधस्त्वादेव तत्फलस्याप्यल्पत्वं सिद्धमिति कृत्वा **अल्पमन्तवच्च भवतीत्युक्तम्** । * देवान् देवयज इत्यत्र देवशब्दो गोवलीवर्दन्यायान्मच्छब्दोक्तभगवद्व्यतिरिक्तदेवपरः अथवा मनुष्यादिसहपठितकर्मवश्यदेवजातिविशेषपर इत्यभिप्रायेण **इन्द्रादीन् देवांस्तद्याजिन**

इत्युक्तम् । कथमिन्द्रादिप्राप्तिः फलस्याल्पास्थिरत्वहेतुरित्यत्राह—**इन्द्रादयोऽपि हीति** । अस्तु तेषामल्पभोगत्वमस्थिरत्वं च; ततः किं तदुपासकस्य भवत्प्रसादाधीनफललाभस्येत्यत्राह—**तत इति** । केवलेन्द्रादियाजिनां तत्तदभिलषितं तत्सायुज्यादिकमेव हि भगवान् प्रयच्छति; सायुज्यं च समानभोगत्वमेव; तत इन्द्रादिभोगस्य परिमितस्वरूपत्वात्परिमितकालवर्तित्वाच्च तत्समानस्तदुपासकभोगोऽपि तथाविध एव भवेदिति भावः । *मामिति निर्दिष्टभगवत्स्वरूपस्य निरतिशयानन्दमयत्वात्तत्साधर्म्यमागतस्यापि निरतिशयभोगत्वं सिद्धम् । **सूत्रं** च *भोगमात्रसाम्यलिङ्गाच्च (४.४.२९) इति । तन्नित्यत्वाच्च तदुपासकभोगस्यापि नित्यत्वं दर्शयति—**नच पुनर्निवर्तन्त** इति । अत्राभिप्रेतं वक्ष्यमाणवचनेन विशदयति—**मामुपेत्येति** । अत्रापि **सूत्रम्** *अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् (४.४.२२) इति । *मद्भक्ता यान्ति मामपीत्यत्र भगवति फलान्तरार्थिनामपि मोक्षे विश्रमो **नारायणार्यैरुक्तः**—*तथा देवतान्तरभक्तानामपेक्षितार्थलाभ एव फलम्; भगवद्भक्तानां तु न तावन्मात्रं फलम्; किं तु स्वभावप्रासादनभिसंहितादपि पापक्षयात्सत्त्वाधिक्योन्मीलनेन शुद्धेषु धर्मेषु श्रद्धोत्पत्त्या शनैश्शनैर्ज्ञानवैराग्यादिलाभद्वारेण पूर्वोक्तभक्तिविशेषलाभाच्चिरतरेणापि कालेन भगवत्प्राप्तिर्भविष्यतीति नित्यफलत्वमित्यभिप्रायः इति । इदं च **शाण्डिल्यसंहितायामपि** भागवतापचारसंग्रहे प्रोक्तं—*भगवन्तं समुद्दिश्य तदेकशरणा नराः । कदाचिन्न च हीयन्ते काम्यकर्मरता अपि ॥ इति ॥ २३ ॥

भा ॥ इतरे तु सर्वसमाश्रयणीयत्वाय मम मनुष्यादिष्ववतारमप्यकिञ्चित्करं कुर्वन्तीत्याह—

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४

भा ॥ सर्वैः कर्मभिराराध्योऽहं सर्वेश्वरो वाङ्मनसापरिच्छेद्यस्वरूपस्वभावः परमकारुण्यादाश्रितवात्सल्याच्च सर्वसमाश्रयणीयत्वायाजहत्स्वभाव एव वसुदेवसूनुरवतीर्ण इति ममैवं परं भावमव्ययमनुत्तममजानन्तः प्राकृतराजसूनुसमानमितः पूर्वमनभिव्यक्तमिदानीं कर्मवशाज्जन्मविशेषं प्राप्य व्यक्तिमापन्नम्—प्राप्तं मामबुद्धयो मन्यन्ते ; अतो मां नाश्रयन्ते ; न कर्मभिराराधयन्ति च ॥ २४ ॥

ता ॥ ननु फलान्तरदेवतान्तरवासनया हि त्वद्विषयज्ञानप्रतिबन्ध उक्तः; त्वत्साक्षात्कारभावे हि तदुपपत्तिः; त्वयि कारुण्यादिगुणप्रेरिते सर्वसमाश्रयणीयत्वायावतारवशादशेषजननयनगोचरे कथं त्वत्परित्याग इत्यत्रोत्तरम्—*अव्यक्तं व्यक्तिमापन्नमित्यादीत्यभिप्रायेणाह—**इतरे त्विति** । इतरे—चतुर्विधसुकृतिभ्योऽन्ये । *परं भावमित्यनेनाभिप्रेतं निरतिशयपरत्वसौलभ्यरूपं स्वभावं दर्शयति—**सर्वैः कर्मभिरित्यादिना अवतीर्ण** इत्यन्तेन । **अजहत्स्वभाव** इत्यव्ययशब्दाभिप्रेतोक्तिः । अस्मादुत्तमं नास्तीत्यनुत्तमम्—अनवधिकातिशयमित्यर्थः । अत्र *अव्यक्तं व्यक्तिमापन्नमित्येतत्सामर्थ्यादवतारविषयत्वम्, तत्रापि *मामित्यस्यौचित्यादवतारविशेषविषयत्वं च सिद्धमित्यभिप्रेत्योक्तं—**वसुदेवसूनुरवतीर्ण** इति, **प्राकृतराजसूनुसमान**मिति च । इदं सर्वावतारोपलक्षणतया विशेषोदाहरणमात्रं वा । *अव्यक्तं व्यक्तिमापन्नमित्यनयोरर्थान्तरभ्रमव्युदासायाह—**प्राकृतेत्यादि** । मन्दमतिबोध्यतया निन्द्यमानोऽर्थोऽत्रायमेव भवितुमर्हतीति भावः । इतः पूर्वमनभिव्यक्तत्वमिदानीमवताराद्व्यक्तत्वमपि प्रमाणसिद्धम्; तत्कथमत्र प्रतिक्षिप्यत इत्यत्रोक्तं—**कर्मवशाज्जन्मविशेषं प्राप्येति** । उत्सर्गापवादादिनयात्सङ्गोच इति भावः । *अबुद्धय इत्यनेन परमात्मतदवतारादिविषयश्रवणमननादिराहित्यं वैलक्षण्यज्ञापकलिङ्गदर्शनेऽपि तदूहशक्तिवैकल्यं च विवक्षितम् । फलितमाह—**अत इत्यादि** ।

आश्रयणमत्र [प्रीति]प्रपत्तिपूर्वकभजनम्, तदभावाच्च तदज्ञतया वर्णाश्रमादिधर्मान्, स्तुतिनमस्कारादींश्च न कुर्वत इत्याह—**न कर्मभिरिति** ॥ २४ ॥

भा ॥ कुत एवं न प्रकाश्यत इत्यत्राह—

नाहं प्रकाशस्सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५

भा ॥ क्षेत्रज्ञासाधारणमनुष्यत्वादिसंस्थानयोगाख्यमायया समावृतोऽहं न सर्वस्य प्रकाशः । मयि मनुष्यत्वादिसंस्थानदर्शनमात्रेण मूढोऽयं लोको मामतिवाय्विन्द्रकर्माणमतिसूर्याग्नितेजसमुपलभ्यमानमप्यजमव्ययं निखिलजगदेककारणं सर्वेश्वरं मां सर्वसमाश्रयणीयत्वाय मनुष्यत्वसंस्थानमास्थितं नाभिजानाति ॥ २५ ॥

ता ॥ यदि त्वमप्रतिहतसङ्कल्पस्साभिसंधिकं सर्वसमाश्रयणीयत्वायावतीर्णः, तर्हि कथं तत्फलासिद्धिरित्यभिप्रायेण शङ्कते—**कुत** इति । मायाशब्दस्तावद्विचित्रसृष्टिकरार्थवाचितया प्रागेव प्रपञ्चितः । त्रिगुणात्मिकया मायया समावृतत्वं तु परावस्थावतारावस्थयोस्साधारणम्; असाधारणश्चावरणहेतुरत्र संभवे वक्तुमुचितः; सङ्कल्पादिश्च साधारणः; योगशब्दोऽपि संबन्धे प्रचुरप्रयोगत्वात्तदर्थः प्राप्तः; तत्संबन्धी चार्थसिद्धः; सचात्रौचित्यात्प्रदेशान्तरेषु प्र[दर्शित]सिद्धत्वाच्च मनुष्यादिसंस्थानवेष[विशेष]भाषादिरेव; तेनैवेन्द्रजालमायाव्यवच्छेदोऽपि सिद्धः इत्यभिप्रायेणाह—**मनुष्यत्वादीति** । प्रकाशः, परस्वभावेनेति शेषः । तर्हि तवैवायं दोष इत्यत्रोत्तरं—**मूढोऽय**मित्यादि । अधिगम्यत्वायापादितं मनुष्यत्वादिकं दुर्मतीनां परित्यागहेतुरभूत्; नच पारमेश्वरस्वभावो मया सर्वस्तिरोहितः; लोकोत्तरकर्मतेजःप्रभृतीनां प्रकाशनात् । किंत्वयं मन्दो लोको यत्किञ्चित्साधर्म्याद्धनावृते मयूखमालिनि खद्योतभावमवगच्छतीत्यभिप्रायेणाह—**मयी**ति । मूढः—मयि मनुष्यत्वादिभ्रमविशिष्ट इत्यर्थः । * मामिति तदानीन्तनोपलभ्यमानाकारनिर्देशसामर्थ्यात्प्रदेशान्तरोक्तत्वाच्च **अतिवाय्विन्द्रकर्माण**मित्याद्युक्तम् । परावस्थस्याज्ञानं सर्वेषां प्राप्तमेव हि । इहतु *परं भावमजानन्तो ममाव्ययमनुत्तमम्(२४) इति मनुष्यत्वे परत्वस्याज्ञानमुच्यते; तत्र प्रतिषेध्यस्य ज्ञानस्य प्रसङ्गार्थं लिङ्गोक्तिरियम् । निरतिशयदीप्तियुक्तत्वमपि जगत्कारणपरमपुरुषासाधारणधर्मतया वेदान्तेषु निर्णीतम् । अतिवाय्विन्द्रकर्मत्वं च सर्वनियन्तृत्वलिङ्गम् । * मामजमित्यनेन फलितमाह—**निखिलजगदेककारण**मिति । * अव्ययमित्यनेन लब्धमाह—**सर्वेश्वर**मिति । स्वरूपतो धर्मतश्च निर्विकारत्वं हि तस्याव्ययत्वम् । एतेन * अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्निति (४.६) प्रागुक्तसूचनं वा । अजमव्ययं नाभिजानाति, किंतु पुरुषान्तरवत्कर्माधीनजन्मानं ज्ञानसङ्कोचादिमन्तं जानातीति शेषः ॥ २५ ॥

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६

भा ॥ अतीतानि वर्तमानान्यनागतानि च सर्वाणि भूतान्यहं वेद—जानामि । मां तु वेद न कश्चन—मयाऽनुसंधीयमानेषु कालत्रयवर्तिषु भूतेषु मामेवंविधं वासुदेवं सर्वसमाश्रयणीयत्वायावतीर्णं विदित्वा मामेव समाश्रयन्न कश्चिदुपलभ्यत इत्यर्थः । अतो ज्ञानी सुदुर्लभ एव ॥ २६ ॥

ता ॥ अयं लोको नाभिजानातीत्येतावता वर्तमानमात्रपरत्वं नाशङ्कनीयं; किं तु त्रैकाल्यवर्तीन्यपि भूतानि न जानन्तीत्युच्यते—* वेदाहमित्यादिना । अत्र * अतीतानीति पृथङ्निर्दिष्टत्वात् भूतानि इत्येतल्लोकज्ञपरम् । स्वस्य

सर्वज्ञत्वमत्र किमर्थमुच्यत इत्यत्राह—**मयेति**। तद्वेदनफलं हि तदेकसमाश्रयणमिति दर्शयितुं—**मामेव समाश्रयन्ति**-त्युक्तम्। परमप्रकृतेन सङ्गमयति—**अत** इति ॥ २६ ॥

भा ॥ तथा हि—

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत।
सर्वभूतानि संमोहं सर्गे यान्ति परन्तप ॥ २७

भा ॥ इच्छाद्वेषाभ्यां समुत्थितेन शीतोष्णादिद्वन्द्वाख्येन मोहेन सर्वभूतानि सर्गे—जन्मकाल एव संमोहं यान्ति। एतदुक्तं भवति—गुणमयेषु सुखदुःखादिद्वन्द्वेषु पूर्वपूर्वजन्मनि यद्विषयाविच्छाद्वेषावभ्यस्तौ; तद्वासनया पुनरपि जन्मकाल एव तदेव द्वन्द्वाख्यमिच्छाद्वेषविषयत्वेन समुत्थितं भूताना मोहनं भवति; तेन मोहेन सर्वभूतानि संमोहं यान्ति; तद्विषयेच्छाद्वेषस्वभावानि भवन्ति, न मत्संश्लेषवियोगसुखदुःखस्वभावानि। ज्ञानी तु मत्संश्लेषवियोगैकसुखदुःखस्वभावः; न तत्स्वभावं किमपि भूतं जायते—इति ॥ २७ ॥

ता ॥ एवं ज्ञानिनो दौर्लभ्याय कालत्रयवर्तिसर्वभूतसाधारणं भगवद्ज्ञानकारणम् *इच्छेति श्लोकेनोच्यत इत्यभिप्रायेणाह—**तथा** हीति। पदार्थमन्वयार्थं च दर्शयति—**इच्छाद्वेषाभ्या**मिति। इच्छाद्वेषाभ्यां समुत्तिष्ठतीति इच्छा-द्वेषसमुत्थः। ननु जन्मकाल एवेच्छाद्वेषौ कारणाभावान्न संभवतः; संभवन्तौ वा भगवद्विषयौ किं न स्याताम्? नचे-च्छाद्वेषमात्रेण शीतोष्णादेरुत्थानं, तस्य च हेमन्तघर्मादिस्वकारणाधीनत्वात्। द्वन्द्वस्य च कथं मोहशब्दार्थता? मोहेन मोहं यान्तीत्यात्माश्रयादिप्रसङ्गः। इच्छाद्वेषावेव द्वन्द्वशब्देन गृह्येते; अतो द्वन्द्वनिमित्तो मोहो द्वन्द्वमोह इत्यादि परव्याख्यानं च पुनरुक्त्यादिदुस्थम्। एतेन सुखं मे भूयात्, दुःखं मा भूदित्यभिनिवेशो द्वन्द्वमोह इत्यपि मन्द-मित्यादिकमाशङ्क्याह—**एतदुक्तं भवती**ति। जन्मान्तरवासनाख्यं कारणमस्ति; वासनायाश्च स्वकारणस्वभावविषयत्वा-दिच्छाद्वेषयोर्न भगवत्संश्लेषवियोगविषयत्वप्रसङ्गः। उत्थानं चेच्छाद्वेषविषयतया स्फुरणमेव। मोहशब्दत्य करणे व्युत्पत्त्या द्वन्द्वे प्रयोगः। मोहकारणस्य मोहजनने च नात्माश्रयादिरिति भावः। अभोग्ये भोग्यताबुद्धिरद्वेष्ये च द्वेष्यताबुद्धिरिह संमोह इत्यभिप्रायेणाह—**तद्विषये**ति। एवंविधसंमोहवशादिच्छाद्वेषयोस्साक्षात्प्राप्तविषयपरित्यागं दर्श-यति—**न मत्संश्लेषे**ति। उचितविषयेच्छाद्वेषशालिनं सुदुर्लभं ज्ञानिनं तद्व्यतिरेकप्रकाशनाय दर्शयति—**ज्ञानी त्वि**ति। *ज्ञानी तु परमैकान्ती तदायत्तात्मजीवनः। तत्संश्लेषवियोगैकसुखदुःखस्तदेकधीः ॥ (२९) इति **संग्रहः**। तद्व्यति-रेकमेव भूतानां जन्मसिद्धं दर्शयति—**न तदिति** ॥ २७ ॥

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ताः भजन्ते मां दृढव्रताः ॥ २८

भा ॥ येषां त्वनेकजन्मार्जितेनोत्कृष्टपुण्यसंचयेन गुणमयद्वन्द्वेच्छाद्वेषहेतुभूतं मदौन्मुख्यविरोधि चानादिकालप्रवृत्तं पापमन्तगतम्—क्षीणम्; ते पूर्वोक्तेन सुकृततारतम्येन मां शरणमनुप्रपद्य गुणमयान्मोहा-द्विनिर्मुक्ताः जरामरणमोक्षाय, महते वैभवाय, मत्प्राप्तये च दृढव्रताः—दृढसङ्कल्पाः मामेव भजन्ते ॥ २८ ॥

ता ॥ यद्येवं सर्वभूतानि संमोहं यान्ति; तर्हि भगवदुपासनं कदाचिदपि कस्यचिदपि न स्यात्; अतः *चतु-र्विधा भजन्ते मामित्यादिनोक्तं चानुपपन्नं स्यादित्यत्रोत्तरं—*येषां त्वित्यादि। *पुण्यकर्मणाम् इत्येतत्पापनिवृत्तिहेतुपरम्।

तथा च श्रुतिः * धर्मेण पापमपनुदति (ना. ५०) इति । जनशब्दश्च जननवति वर्तमानत्वात् पुण्यप्रचयहेतुभूतानेकजन्मसूचनपर इत्यभिप्रायेणोक्तम्—**अनेकजन्मार्जितेनोत्कृष्टपुण्यसञ्चयेने**ति । भगवज्ज्ञानप्रतिबन्धकपापनिवर्तकत्वाच्चोत्कृष्टत्वं फलितम् । गुणमयशब्देन सुखदुःखरूपभगवत्संश्लेषविश्लेषाख्यद्वन्द्वव्यवच्छेदः । * द्वन्द्वमोहविनिर्मुक्ता मां भजन्ते इति फलद्वयदर्शनात्तत्प्रतिबन्धकेऽपि पापे द्वन्द्वेच्छाद्वेषहेतुभूतं मदौन्मुख्यविरोधि चेति भेदो दर्शितः । अनेकजन्मार्जितोत्कृष्टपुण्यनाश्यत्वायोक्तम्—**अनादिकालप्रवृत्तमि**ति । उपासनारम्भे पापस्य द्वन्द्वमोहस्य च निश्शेषविनष्टत्वाभावादन्तगतशब्देनाल्पावशिष्टत्वं विवक्षितमित्यभिप्रायेणोक्तं—**क्षीणमि**ति । * मामेव ये प्रपद्यन्ते (१४) इत्यादिकं * चतुर्विधा भजन्ते माम् (१६) इत्यादिकं च प्रागुक्तमनन्तराभिधीयमानं च * जरामरणमोक्षाय इत्यादिकमनुसन्दधान आह—**ते पूर्वोक्तेने**ति । नचात्र द्वन्द्वमोहविनिर्मुक्तत्ववचनादैश्वर्यार्थिनां प्रसङ्गानुपपत्तिः, तेषामपि क्षुद्रतरद्वन्द्वनिरोधस्यावश्यापेक्षितत्वात् । व्रतशब्दस्सङ्कल्पविशेषे[षु] मुख्यः ; तत्संबन्धादेव क्रियाविशेषे[षु] तत्प्रयोग इत्यभिप्रायेण—**दृढसङ्कल्पा** इत्युक्तम् । दृढव्रतशब्देन देवतान्तरपरित्यागादिनियमोऽपि यथाप्रमाणं सूचित इत्यभिप्रायेण—**मामेव भजन्त** इत्युक्तम् । *मां भजन्ते इत्यने[न]नैव भजनाङ्गत्वादेरपि सिद्धत्वात् **मत्प्राप्तये चेत्य[न्ते]नेन** दृढसङ्कल्पत्वं स्वाभिमतफलविषयतया व्याख्यातम् ॥ २८ ॥

भा ॥ अत्र त्रयाणां भगवन्तं भजमानानां ज्ञातव्यविशेषानुपादेयांश्च प्रस्तौति—

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९

भा ॥ जरामरणमोक्षाय—प्रकृतिवियुक्तात्मस्वरूपदर्शनाय मामाश्रित्य ये यतन्ते ; ते तद्ब्रह्म विदुः, अध्यात्मं च कृत्स्नं विदुः, कर्म चाखिलं विदुः ॥ २९ ॥

ता ॥ अथाष्टमाध्याये प्रपञ्चयिष्यमाणस्यार्थस्य प्रस्तावश्लोकद्वयेन क्रियत इत्याह—**अत्रे**ति । * जरामरणमोक्षायेत्येतावतो निर्देशात् **प्रकृतिवियुक्तात्मस्वरूपदर्शनाये**त्युक्तम् । यतनमत्राराधनरूपं विवक्षितम् । एषां ब्रह्माध्यात्मकर्मादीनां सप्तानां प्रश्नपूर्वकं प्रपञ्चो भविष्यति । अत्र * विदुः इति सिद्धवन्निर्देशो वर्तमानापदेशोऽपि विध्यर्थः ॥ २९ ॥

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३०

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु **विज्ञानयोगो** नाम सप्तमोऽध्यायः ॥ ७ ॥

भा ॥ अत्र य इति पुनर्निर्देशात्पूर्वनिर्दिष्टेभ्योऽन्ये अधिकारिणो ज्ञायन्ते ; साधिभूतं साधिदैवं मामैश्वर्यार्थिनो ये विदुः—इत्येतदनुवादसरूपमप्यप्राप्तार्थत्वाद्विधायकमेव ; तथा साधियज्ञमित्यपि त्रयाणामधिकारिणामविशेषेण विधीयते, अर्थस्वाभाव्यात् । त्रयाणां हि नित्यनैमित्तिकरूपमहायज्ञाद्यनुष्ठानमवर्जनीयम् । ते च प्रयाणकालेऽपि स्वप्राप्त्यानुगुणं मां विदुः । तेचेति चकारात्पूर्वे जरामरणमोक्षाय यतमानाश्च प्रयाणकाले विदुरिति समुच्चीयन्ते ; अनेन ज्ञानिनोऽप्यर्थस्वाभाव्यात्साधियज्ञं मां विदुः, प्रयाणकालेऽपि स्वप्राप्त्यानुगुणं मां विदुरित्युक्तं भवति ॥ ३० ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये सप्तमोऽध्यायः ॥ ७ ॥

ता ॥ * साधिभूतेति श्लोकस्यैश्वर्यार्थिविषयत्वं वक्तुमधिकारि[णो]भेदमात्रज्ञापकं तावद्दर्शयति—**अत्रेति** । पूर्वाधिकारिविषयत्वे * साधियज्ञं च ते विदुरिति हि वक्तव्यम्; नचैवं शिष्टाः पठन्ति ; नचात्र यच्छब्दावृत्तेः प्रयोजनमस्तीति भावः । प्रश्नोत्तरवशाच्चाधिकारिभेदस्सेत्स्यति । एवं सामान्येन ज्ञातमधिकारिभेदमधिभूतादिसामर्थ्याद्विशिनष्टि—**ऐश्वर्यार्थिन** इति । * जरामरणमोक्षायेत्यादाविव अत्रापि यच्छब्दवशादनुवादत्वं प्रतीतमिति तत्प्रतिक्षिपति—**इत्येतदित्यादिना** । * यदाग्नेयोऽष्टाकपालः (शत. २. ५. १. ११) इत्यादिवदिति भावः । अस्य विधित्वं प्रभादिवशाच्च फलिष्यति । न ह्यवगते प्रभाद्यवकाशः । * साधियज्ञम् इत्यस्यैकस्मिन्नधिकारिणि निर्दिष्टस्याप्यर्थस्वाभाव्यात्तिष्वप्यन्वयं दर्शयति—**तथेति** । **अर्थस्वाभाव्यादिति**—सर्वाधिकारिसाधारणतया प्रमाणसिद्धयज्ञाख्यपदार्थस्वाभाव्यादित्यर्थः । एतदेव दर्शयति—**त्रयाणां हीति** । अन्यथा * सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु (द. स्मृ) इत्यादिक्रमेण [अकर्मण्य]-कर्मानर्हत्वादिप्रसङ्ग इत्यभिप्रायेणाह—**अवर्जनीय**मिति । अपि चेत्येकाव्ययत्वे प्रयोजनाभावात् पृथक्त्वे सप्रयोजनतया अन्वयसंभवाच्च विभज्याह—**तेचे**ति । अन्तिमप्रत्ययस्यै[कस्यै]व वक्ष्यमाणं विषयविशेषेण प्राप्यानुगुणाकारत्वं युक्तचेतश्शब्देन विवक्षितमित्याह—**स्वप्राप्यानुगुण**मिति । चकारस्य पृथगन्वयेन लब्धमाह—**तेचे**ति । **चकारा**दिति—यद्वृत्त प्रतियोगिकत्वात्तद्वृत्तमैश्वर्यार्थिविषयमेव । चकारात्तु पूर्वश्लोकोक्तानां समुच्चयः । तेषामपि ह्यन्तिमप्रत्यये विशेषो वक्ष्यत इति भावः । * त्रयाणामित्यादिकमयुक्तं, ज्ञानिनामत्र प्रसङ्गाभावादित्यत्राह—**अनेने**ति । यज्ञान्तिमप्रत्ययमात्रयोरधिकारित्रयसाधारण्यसिद्धेरिति भावः ॥ ३० ॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां सप्तमोऽध्यायः ॥ ७ ॥

॥ अथ अष्टमोऽध्यायः ॥ ८ ॥

भा ॥ सप्तमे परस्य ब्रह्मणो वासुदेवस्योपास्यत्वम्, निखिलचेतनाचेतनवस्तुशेषित्वम्, कारणत्वम्, आधारत्वम्, सर्वशरीरतया सर्वप्रकारत्वेन सर्वशब्दवाच्यत्वम्, सर्वनियन्तृत्वम्, सर्वैश्च कल्याणगुणगणैस्तस्यैव परतरत्वम्, सत्त्वरजस्तमोमयैर्देहेन्द्रियत्वेन भोग्यत्वेन चावस्थितैर्भावैरनादिकालप्रवृत्तदुष्कृतप्रवाहहेतुकैस्तस्य तिरोधानम्, अत्युत्कृष्टसुकृतहेतुकभगवत्प्रपत्त्या च तन्निवर्तनम्, सुकृततारतम्येन च प्रतिपत्तिवैशेष्यादैश्वर्याक्षरयाथात्म्यभगवत्प्राप्त्यपेक्षयोपासकभेदम्, भगवन्तं प्रेप्सोर्नित्ययुक्ततयैकभक्तितया चात्यर्थपरमपुरुषप्रियत्वेन च श्रेष्ठ्यम् दुर्लभत्वं च प्रतिपाद्य एषां त्रयाणां ज्ञातव्योपादेयभेदांश्च प्रास्तौषीत् । इदानीमष्टमे प्रस्तुतान् ज्ञातव्योपादेयभेदान् विविनक्ति ॥

अर्जुन उवाच—

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम । अधिभूतं च किं प्रोक्तम् अधिदैवं किमुच्यते ॥ १
अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन । प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २

भा ॥ जरामरणमोक्षाय भगवन्तमाश्रित्य यतमानानां ज्ञातव्यतयोक्तं तद्ब्रह्माध्यात्मं च कर्म च किमिति वक्तव्यम् । ऐश्वर्यार्थिनां ज्ञातव्यमधिभूतमधिदैवं च किम् ? त्रयाणां ज्ञातव्योऽधियज्ञशब्दनिर्दिष्टश्च कः ? तस्य चाधियज्ञभावः कथम् ? प्रयाणकाले चैभिस्त्रिभिर्नियतात्मभिः कथं ज्ञेयोऽसि ? ॥ १, २ ॥

ता ॥ सप्ततिप्रदर्शनायाह—**सप्तम** इति । **परस्य ब्रह्मणो वासुदेवस्योपास्यत्वमिति** *मय्यासक्तमनाः (१) इत्यादेरर्थः ; तत्रैव **उपासनं** प्रस्तुतम् । तच्छेषतया चान्यत्सर्वमिहोच्यते । तस्यैव प्रपञ्चनम् * अहं सर्वस्य प्रभवः

(१०. ८), * वासुदेवस्सर्वं (७. १९), * चतुर्विधा भजन्ते माम् (७. १६) इत्यादिभिः परस्तात्क्रियत इति भावः। **परस्येत्यादि**भिरुपहितब्रह्मव्योमातीतादिपक्षप्रतिक्षेपः। ब्रह्मशब्दस्य विशेषशब्दसमभिव्याहारादेवतान्तरव्यावृत्तिः। वासुदेवशब्देनात्रावतारविशेषो वा विवक्षितः। **निखिलेत्यादि**भिरुपास्यत्वपरब्रह्मत्वोपयुक्ताकारकथनम्। **निखिलचेतनाचेतनवस्तुशेषित्वमिति** * भूमिरापः (७. ४) इत्यादेः श्लोकद्वयस्यार्थः। निखिलशब्देन कार्यकारणादिरूपावस्थासंग्रहात् कार्यभूतब्रह्मरुद्रादेरपि क्रोडीकारः। कारणत्वम् * एतद्योनीनि (७. ६) इति श्लोकस्यार्थः। * मत्तः परतरं नान्यत् (७) इत्युक्तस्य परत्वस्य * मामेभ्यः परम् (१३) इत्यत्रोपयुक्ततया तत्रैवोदाहर्तुमत्र तदतिक्रमेण * मयि सर्वम् (७) इत्याद्युक्ताधारत्वोपादानम्। * रसोऽहम् (८) इत्यादिसामानाधिकरण्यफलितं सर्वशब्दवाच्यत्वम्। तत्र हेत्वाधारत्वादिविशेषसिद्धं सर्वशरीरकत्वम्। एवं शेषित्वाद्यनुवादेन वक्ष्यमाणतत्तदधिकारिप्राप्यवस्तुविशेषसामानाधिकरण्यस्यापि शरीरात्मभावहेतुकत्वं दर्शितम्। * मत्त एवेति तान्विद्धि (१२) इत्यादिषु प्रवृत्तितादधीन्यस्यापि विवक्षितत्वात्सिद्धं सर्वनियन्तृत्वम्। **सर्वैश्चेत्यनेनानिर्दिष्टानाम्**, अन्येषां च आभिप्रायिकाणां संग्रहः। **तस्यैवेत्यवधारणेन** * नान्यत्किञ्चिदस्ति (७) इत्यस्यार्थ उक्तः। * त्रिभिर्गुणमयैः (१३) इति श्लोकस्य सार्धस्यार्थः **सत्त्वेत्यादिनोक्तः**। * मामेव (१४) इत्याद्युक्तप्रपत्तेः सुकृतविशेषहेतुकत्वं * जनास्सुकृतिनः (१६) इत्यनेन दर्शितमाह—**अत्युत्कृष्टसुकृतेति**। *न मां दुष्कृतिनः (१५) इत्यादेः पूर्वोक्तिरोधानप्रकारविशेषकथनरूपत्वात्सुकृतिप्रशंसाशेषत्वाच्च तदर्थोऽत्र पृथङ्नोपात्तः। * चतुर्विधाः (१६) इत्यादिकं **सुकृततारतम्येनेत्यादिनाऽनुसंहितम्**। उपासकभेदं चेत्यन्वयः। * तेषां ज्ञानी (१७) इत्यादेःश्लोकद्वयस्यार्थो **भगवन्तमित्यादिनोक्तः**। * बहूनां जन्मनाम् (१९) इत्यादिना * सर्गे यान्ति परन्तप (२७) इत्यन्तेन सिद्धमाह—**दुर्लभत्वमिति**। * येषां तु (२८) इत्यादेरध्यायशेषस्य अर्थमाह—**एषां त्रयाणामिति**। ज्ञातव्यमिह सिद्धरूपं विवक्षितम्। **उपादेयम्**—अनुष्ठेयम्। एतेन * स्वयाथात्म्यम् (११) इत्यादि संग्रहश्लोकस्यार्थोऽपि प्रपञ्चितः। अयं त्वष्टमस्य संग्रहः * ऐश्वर्याक्षरयाथात्म्यभगवच्चरणार्थिनाम्। वेद्योपादेयभावानामष्टमे भेद उच्यते ॥ (१२) इति। अत्र भेदोक्तेरध्यायार्थत्वात्स्वरूपप्रस्तावः प्रागेव कृत इति दर्शितम्। प्रस्तुतसङ्गतिमाह—**इदानीमिति** ॥

जीवस्वरूपादिज्ञातव्यस्योपासनाद्यनुष्ठेयस्य च भेदजिज्ञासयाऽर्जुन उवाच—* किं तदिति। * आर्तो जिज्ञासुः (७.१६) इत्यादिना प्रागेवाधिकारित्रयस्योक्तत्वात् *जरामरणमोक्षाय (२९) इत्यादिषु यच्छब्दावृत्तिसामर्थ्यादर्थस्वभावाच्चाधिकारिभेदस्तेषां ज्ञातव्योपादेयवस्तुप्रतिनियमश्चार्जुनेन ज्ञातः; तत्रैव विशेषबुभुत्सयाऽयं प्रश्नः। वक्ष्यते च विशेषः। ततश्च * किंतद्ब्रह्मेत्यर्थमक्षरयाथात्म्यार्थिविषयम्, *अधिभूतं चेत्यर्थमैश्वर्यार्थिविषयम्; *अधियज्ञः इति श्लोकस्तु अर्थस्वभावात् त्रयाणां साधारण इति विविनक्ति—**जरामरणेति**। **कथमिति** प्रकारप्रश्ने। **अधियज्ञभाव इत्यर्थलब्धम्**। **अत्रेत्येतच्छब्दश्शास्त्रसन्निध्युपाधिकः**; तच्चोत्तरग्रन्थे व्याख्यास्यति—* अत्र इन्द्रादौ मम देहभूते इति। *अस्मिन्नितीदंशब्दस्तु स्वप्रत्यक्षसन्निध्युपाधिकः; प्रत्यक्षा हीन्द्रादयोऽपि प्रष्टुर्जुनस्य। एतच्छब्देदंशब्दयोश्चैकस्मिन्वाक्ये सामानाधिकरण्येन प्रयोगो दृश्यते—* स एष द्वाभ्यां दर्शनीभ्यां विराड्भ्यामनयोर्द्यावापृथिवीयोर्द्वि[पद]वचनयोरयं पुरुषः प्रतिष्ठितः इत्यादौ। यद्वा * अत्रेति यज्ञस्वरूपपरामर्शः; नियतात्मत्वं त्रयाणामपेक्षितम्; अत्र बहुवचनमधिकारित्रयपरमित्यभिप्रायेणोक्तम्—**एभिस्त्रिभिरिति** ॥ १, २ ॥

श्रीभगवानुवाच—

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३

भा ॥ तद्ब्रह्मेति निर्दिष्टं परममक्षरं न क्षरतीत्यक्षरम्, क्षेत्रज्ञसमष्टिरूपम्। तथा च श्रुतिः—*अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते [सु. २] इत्यादिका। परममक्षरं प्रकृतिविनिर्मुक्तमात्मस्वरूपम्। स्वभावोऽध्यात्ममुच्यते—स्वभावः—प्रकृतिः। अनात्मभूतम्, आत्मनि संबध्यमानं, भूतसूक्ष्मतद्वासनादिकं पञ्चाग्निविद्यायां ज्ञातव्यतयोदितम्। तदुभयं प्राप्यतया त्याज्यतया च मुमुक्षुभिर्ज्ञातव्यम्। भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः—भूतभावः—मनुष्यादिभावः; तदुद्भवकरो यो विसर्गः *पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति (छा. ५. ९. १) इति श्रुतिसिद्धो योषित्संबन्धजः, स कर्मसंज्ञितः। तच्चाखिलं सानुबन्धम् उद्वेजनीयतया, परिहरणीयतया च मुमुक्षुभिर्ज्ञातव्यम्। परिहरणीयता चानन्तरमेव वक्ष्यते, *यदिच्छन्तो ब्रह्मचर्यं चरन्ति (१२) इति ॥ ३ ॥

ता ॥ *अक्षरं ब्रह्म परममित्यत्र उद्देश्योपादेयान्यथाभावनिरासायाह—**तद्ब्रह्मेति निर्दिष्टमिति**। ब्रह्मशब्दोऽत्र परमात्मसाधर्म्यादुपचारवृत्त्येति भावः। अक्षरशब्दस्य निर्वचनं प्रतिपाद्यं च दर्शयति—**न क्षरतीत्यादिना**। क्षेत्रज्ञसमष्टौ श्रौतं प्रयोगं दर्शयति—**तथा चेति**। ल्योऽत्र संश्लेषविशेषः। अथवा श्रुतावक्षरशब्देन उन्मग्नचेतनांशः प्रकृत्यवस्थाविशेष एव अभिधीयत इति साक्षात्प्रलयार्थत्वेऽपि न विरोधः। तथाऽपि शब्दप्रवृत्तिद्वारभूतचिदंशे तात्पर्यात्तदुदाहरणम्। *परममक्षरमित्यत्र विशेषणाभिप्रेतमाह—**प्रकृतिविनिर्मुक्तमात्मस्वरूपमिति**। स्वभावशब्दार्थः—**प्रकृतिरिति**। नियतसंबद्धमिति यावत्। किं तदित्याकाङ्क्षायाम् अध्यात्मशब्दानुसारेणाह—**अनात्मेति**। आत्मन्यधिवसनात् संबध्यमानमित्यध्यात्मशब्दनिर्वचनम्। तत एव सिद्धमनात्मत्वम्। **तद्वासनादिकं**—तत्संसर्गोपाधिकाज्ञानकर्मवासनादिकम्। भूतसूक्ष्मादेर्ज्ञातव्यत्वे श्रुतिं दर्शयति—**पञ्चाग्निविद्यायामिति**। *वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति (छा. ५. ३. ३) इत्युपक्रम्य *इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति (छा. ५. ९. १) इत्युक्त्वा *तद्ध इत्थं विदुः (छा. ५. १०. १) इत्यप्च्छब्दोपलक्षितपञ्चभूतसूक्ष्मवेद्यत्वं ह्युक्तमिति भावः। ननूपायकर्तृभूतेदानीन्तनात्मस्वरूपपरित्यागेन परिशुद्धात्मस्वरूपकथनं मुमुक्षोः कोपयुक्तम्? भूतसूक्ष्मादिकथनं च किमर्थमित्यत्राह—**तदुभयमिति**। यथाक्रममन्वयः। अत्र पञ्चमाहुतेर्विवक्षितत्वाद्योनिजभूतविषयोऽयं भूतशब्द इत्यभिप्रायेणाह—**भूतभावो मनुष्यादिभाव इति**। मनुष्यत्वादिविशिष्टशरीरयोग इत्यर्थः। विशिष्टस्य विसर्गस्य ज्ञातव्यत्वे तस्य मनुष्यादिभावहेतुत्वे च श्रुतिं दर्शयति—**पञ्चम्यामिति**। अत्र मूत्रमरुन्मलादिविसर्गव्यवच्छेदार्थमुक्तं—**भूतभावोद्भवकर इति**। तदेव दर्शयति—**योषित्संबन्धज इति**। विसर्गविशेषणसामर्थ्यादेतत्सिद्धम्। एवं कर्मसंज्ञितरेतोविसर्गज्ञानस्य सप्रयोजनतामाह—**तच्चाखिलमिति**। अत्र कर्माभिप्रायेण नपुंसकनिर्देशः। **अखिलं**—मनुष्यत्वमृगत्वादिजातिभेदहेतुत्वाऽनेकप्रकारम्। **सानुबन्धं**—हेतुभूतैः कर्मभिः फलभूतैश्च गर्भवासादिभिस्सहितमित्यर्थः। पञ्चाग्निविद्यायामचितसर्वावस्थानुयायित्वदुस्त्यजत्वगर्भजन्मादिदुःखकरत्वादेः फलितत्वाज्जुगुप्सनीयतारूपाऽऽत्मभयावहत्वरूपा चोद्वेजनीयता युक्ता। **परिहरणीयता तु कृतस्सिध्येदित्यत्राह—परिहरणीयता चेति** ॥ ३ ॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४

भा ॥ ऐश्वर्यार्थिनां ज्ञातव्यतया निर्दिष्टमधिभूतं क्षरो भावः वियदादिभूतेषु वर्तमानस्तत्परिणामविशेषः क्षरणस्वभावो विलक्षणश्शब्दस्पर्शादिस्ताश्रयः, विलक्षणास्ताश्रयाश्शब्दस्पर्शरूपरसगन्धाः ऐश्वर्यार्थिभिः प्राप्यास्तैरनुसन्धेयाः। पुरुषश्चाधिदैवतम्—अधिदैवतशब्दनिर्दिष्टः पुरुषः । अधिदैवतम्—देवतोपरि वर्तमानः इन्द्रप्रजापतिप्रभृतिकृत्स्नदेवतोपरि वर्तमानः, इन्द्रप्रजापतिप्रभृतीनां भोग्यजातादिलक्षणशब्दादेर्भोक्ता पुरुषः । सा च भोक्तृत्वावस्था ऐश्वर्यार्थिभिः प्राप्यतयाऽनुसन्धेया । अधियज्ञोऽहमेव [—अधियज्ञशब्दनिर्दिष्टोऽहमेव] । अधियज्ञः—यज्ञैराराध्यतया वर्तमानः । अत्र इन्द्रादौ मम देहभूते आत्मतयाऽवस्थितोऽहमेव यज्ञैराराध्य इति महायज्ञादिनित्यनैमित्तिकानुष्ठानवेलायां त्रयाणामधिकारिणामनुसन्धेयमेतत् ॥ ४ ॥

ता ॥ ऐश्वर्यार्थिनां ज्ञातव्यतया निर्दिष्टमित्येतदधिदैवतेऽप्यनुषञ्जनीयम् । अधिभूतक्षरशब्दनिर्वचनानुरोधेन व्याख्याति—**वियदादी**ति । भूतशब्दस्यात्र जन्तुविषयत्वव्यवच्छेदाय वियदादिशब्दः । शब्दाद्यवस्थातद्भोग्योर्द्वयोरपि क्षरशब्देन संग्रहणाय **क्षरणस्वभाव** इति निर्वचनम् । नश्वर इत्यर्थः । **विलक्षण** इति—* इन्द्रप्रजापतिप्रभृतीनां भोग्यजातादिति वक्ष्यमाणमत्रापि द्रष्टव्यम् । एवंविधं च वैलक्षण्यं स्वासाधारणभक्तियोगप्रसन्नपरमात्मसङ्कल्पविशेषप्रसूतभोगरूपत्वात् । अस्य ज्ञातव्यताहेतुं दर्शयति—**विलक्षणा** इति । * क्षरो भावः इत्येकवचनं जात्यभिप्रायमिति भावः । **प्राप्याः**—प्राप्यत्वादित्यर्थः । अधिदैवतशब्दे रूढिभ्रमव्युदासायाह—**अधिदैवतशब्दनिर्दिष्ट** इति । तन्निरुक्तिः **देवतोपरिवर्तमान** इति । देवतोपरीति संबन्धसामान्यषष्ठ्या समासः । दैवतशब्दस्यात्र सर्वेश्वरात्सङ्कोचं देवतान्तरेष्वभिव्याप्तिं चाह—**इन्द्रे**ति । उपरि वर्तमानत्वमिह न केवलं देशाद्यपेक्षया ; किंतु भोगप्रकर्षादपीत्यभिप्रायेणेत्याह—**इन्द्रे**त्यादि **पुरुष** इत्यन्तम् । ननु पुरुषान्तरमिह विवक्षितम्, स्वात्मस्वरूपपुरुषानुसन्धानमधिकार्यन्तरस्यापि समानम् ; ततोऽत्र को विशेष इत्यत्राह—**साचे**ति । न परिशुद्धस्वरूपमिहानुसन्धेयम्, न चाशुद्धेऽपि हेयत्वमिह भाव्यम् । पुरुषशब्दनिर्देशश्चात्र भावप्रधान इति भावः । **अहमेवे**ति **क** इति प्रश्नस्योत्तरम् । **कथमि**ति प्रश्नस्योत्तरत्वं तदभिप्रेतं विवृणोति—**अधियज्ञ** इति । यज्ञे संबध्यमानोऽधियज्ञः । तत्र च सर्वेश्वरस्याराध्यतया संबन्ध इत्याह—**यज्ञैराराध्यतया वर्तमान** इति । इन्द्रादयो हि तत्र आराध्याश्श्रुताः ; तत्कथमहमेवेत्युच्यत इत्यत्रोत्तरम् * **अत्र देहे** इत्यनेन विवक्षितमिति दर्शयति—**अत्रेन्द्रादाविति** । * अधियज्ञोऽहमेवात्र देहे इतीश्वरेणाभिधीयमानत्वात्तद्देहविषयत्वं प्रतीतम् ; सचेश्वरदेहः * यज देवपूजायामिति याज्यदेवतापेक्षयज्ञप्रसङ्गादिन्द्रादिरेवेत्यभिप्रायेणोक्तम्—**इन्द्रादाविति** । * यां यां तनुम् (७. २१) इति प्रागुक्तं स्मारयति—**मम देहभूत** इति । कर्मणा क्वचिद्देहो भवति ; न तथाऽत्र देहत्वं कादाचित्कमिति ज्ञापनाय **देहभूत** इति प्रयोगः । देहभूतकेवलेन्द्रादिव्यवच्छेदार्थम्—**अहमेवेत्यवधारणम्** । पूर्वनिर्दिष्टब्रह्माध्यात्मकर्माधिभूताधिदैववत्न तत्त्वान्तरमिति ज्ञापनार्थं वा । * विष्णुस्सर्वा देवताः (ऐ. ब्रा.) इति च श्रुतिः । एतेन * कथमिति प्रश्नस्याप्युत्तरं दत्तम् । तत्तद्विशिष्टस्याराध्यत्वात्, * देहभृतां वरेत्यनेनाध्यात्मचिन्तानुगुणसत्त्वोत्तरदेहेन्द्रियादिमत्त्वम्, स्वस्यालौकिकेन्द्रादिदेहवत्त्वे निदर्शनं चाभिप्रेतम् । एवंविधाधियज्ञविज्ञानमनुष्ठानानुप्रविष्टम् ; न तु तदुपकारकमात्रम् ; नचैश्वर्यार्थिमात्रविषयमिति दर्शयति—**इति महायज्ञे**ति । अकरणनिमित्तानर्हतादिपरिहाराय त्रयाणामवश्यकर्तव्यताद्योतनाय—**नित्यनैमित्तिके**ति ॥ ४ ॥

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेबरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५

भा ॥ इदमपि त्रयाणां साधारणम् । अन्तकाले च मामेव स्मरन् कलेबरं त्यक्त्वा यः प्रयाति ; स मद्भावं याति—मम यो भावः स्वभावः तं याति ; तदानीं यथा मामनुसन्धत्ते, तथाविधाकारो भवतीत्यर्थः ; यथा आदिभरतादयस्तदानीं स्मर्यमाणमृगसजातीयाकारास्संभूताः ॥ ५ ॥

ता ॥ * प्रयाणकाले इत्यस्य प्रश्नस्य संग्रहेणोत्तरम् * अन्तकाले इति श्लोकः । अतो न ज्ञानिमात्रविषय इत्यभिप्रायेणाह—**इदमपीति** । अधियज्ञपदार्थस्वाभाव्याद्वक्ष्यमाणप्रकाराच्चेति भावः । अन्वयं दर्शयति—**अन्तकाले-चेति** । * मद्भावं यातीत्यत्र श्रुत्यादिविरुद्धतादात्म्यावासिभ्रमव्युदासायाह—**मम यो भाव** इति । नन्वीश्वरस्वभाव-प्राप्तौ [स्या] पि कृशोदरीनोडनिहितकीटस्य तज्जातीयत्ववदीश्वरान्तरत्वप्रसङ्गः, त्रयाणामधिकारिणां गुणाष्टकरूपेश्वरस्व-भावप्राप्तयविशेषेऽधिकारिभेदश्च न स्यादित्यत आह—**तदानी**मिति । तत्तदनुसन्धेयाकारविशेषसाम्यप्राप्तिर्विवक्षिता । साम्यं च स्वरूपभेद[के]कवैधर्म्ये स्थिते सत्येवेति न कश्चिद्दोष इति भावः । एवं प्राप्तिप्रश्नाः प्रत्युक्ताः ; * नास्त्यत्र संशयः इत्यनेन अभिप्रेतां प्रयोजकप्रसिद्धिं दर्शयति—**यथाऽऽदिभरतादय** इति । एतेनोदाहरणेनापि तादात्म्यभ्रमो निरस्तः ; न ह्यादिभरतस्य स्मर्यमाणमृगेण तादात्म्यम् ; अपि तु तत्समानाकारमृगशरीरपरिग्रह एवेति तत्रैव प्रसिद्धम् । तदानीं—देहवियोगकाल इत्यर्थः ॥ ५ ॥

भा ॥ स्मर्तुस्स्वविषयसजातीयाकारतापादनमन्तिमप्रत्ययस्य स्वभाव इति सुस्पष्टमाह—

यंयं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेबरम् ।
तंतमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६

भा ॥ अन्ते—अन्तकाले । यंयं वापि भावं स्मरन् कलेबरं त्यजति, तंतं भावमेव मरणानन्तरमेति । अन्तिमप्रत्ययश्च पूर्वभावितविषय एव जायते ॥ ६ ॥

ता ॥ न केवलमीश्वरविषयान्तिमप्रत्ययस्वभावोऽयमिति मन्तव्यम्, किंतु सर्वसाधारणमिदमत्राप्युक्तमिति प्रयोजकाकारो * यंयमिति श्लोकेनोच्यत इत्याह—**स्मर्तुरिति** । अन्तशब्दोऽत्र पूर्वश्लोकाभिहितान्तकालपरः । तस्य चान्तिमप्रत्ययप्रभावज्ञापनाय *स्मरन् इत्यनेनान्वय इति दर्शयति—**अन्ते अन्तकाले** इति । वीप्सया * वाऽपीत्यनेन च स्मर्तव्यविषयानियमो नीचोत्तमविषयवैषम्याभावश्च दर्शितः । * तंतमिति वीप्सया त्वसङ्कीर्णतत्तत्प्राप्तिः । अवधारणेन प्रबलपुण्यान्तरेणापि तस्या दुर्वारत्वं च विवक्षितम् । भावशब्दोऽत्र स्वभावपरः । धर्मिप्रत्ययस्तु नान्तरीयकः । भाव-शब्दस्यात्र पदार्थपरत्वे प्रस्तुतभावशब्दवैरूप्यम्, * तंतमेतीति साजात्यलक्षणा च । * तंतमेवैतीत्यत्र यत्र क्वचन जन्मनि सर्वसाधारणतज्जातियोगमात्रव्युदासायोक्तम्—**मरणानन्तर**मिति । नह्यादिभरतमृगत्वे जन्मान्तरव्यवधानम् । * सदा तद्भावभावितः इत्यनेनान्तिमस्मृतिहेतुर्विवक्षित इत्याह—**अन्तिमप्रत्ययश्चेति** । तद्भावभावितः—तद्भावनावासित इत्यर्थः, तस्मिन् भावो भावितो येनेति वा तद्भावभावितः ॥ ६ ॥

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिः मामेवैष्यस्यसंशयः ॥ ७

भा॥ यस्मात् पूर्वकालाभ्यस्तविषय एवान्तिमप्रत्ययो जायते, तस्मात्सर्वेषु कालेष्वाप्रयाणादहरहर्मामनुस्मर। अहरहरनुस्मृतिकरं युद्धादिकं वर्णाश्रमानुबन्धि श्रुतिस्मृतिचोदितं नित्यनैमित्तिकं च कर्म कुरु। एवमुपायेन मय्यर्पितमनोबुद्धिरन्तकाले च मामेव स्मरन् यथाभिलषितप्रकारं मां प्राप्स्यसि ; नात्र संशयः ॥ ७ ॥

ता ॥ एवमन्तिमप्रत्ययाधीने फले अन्तिमप्रत्यये चानवरतभावनाधीने भवताऽपि तथाविधभावना तदनुग्राहकं कर्म च कर्तव्यमित्युच्यते—* तस्मादिति श्लोकेन । * सर्वेषु कालेष्वित्यनेन * स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते (छा. ८. १५. १) * प्रायणान्तमोङ्कारमभिध्यायीत (प्र. ५. १) इत्यादिश्रुतिश्चानुस्मृतेत्यभिप्रायेण **आप्रयाणादित्युक्तम्** । **सूत्रं** च * आप्रयाणात्तत्रापि हि दृष्टम् (४. १. १२) इति । प्रतिमासं प्रतिपक्षमनुस्मरणेऽप्याप्रयाणादिति वक्तुं शक्यमिति तद्व्युदासाभिप्रायेण बहुवचनमित्याह—**अहरहरिति** । *तं पूर्वापररात्रेषु युञ्जानः इत्यादिविहितैकाग्रतानुरूपसात्त्विककालेष्वित्युक्तं भवति । तथा च **सूत्रम्**—* यत्रैकाग्रता तत्राविशेषात् (४. १. ११) इति । * युध्यच इति विहितस्य युद्धस्य अत्र * फलवत्सन्निधावफलं तदङ्गमित्यादिन्यायादनुस्मृत्यङ्गत्वं सिद्धम् ; तच्च युद्धमत्र प्रस्तुतत्वादुपलक्षणतयोक्तम् ; ततश्च प्रमाणसिद्धं यथास्वं वर्णाश्रमकर्मावश्यं कर्तव्यमित्युक्तं भवतीत्यभिप्रायेणाह—**अहरहरनुस्मृतिकरं युद्धादिक**मिति । **वर्णाश्रमानुबन्धी**त्युपलक्ष्यसंग्राहकाकारः । **चोदित**मित्यनेन शमादिविधेश्चोदितव्यतिरिक्तविषयत्वं सूचितम् । नित्यनैमित्तिकशब्देन फलाभिसन्धिपूर्वकर्मव्युदासः । * मय्यर्पितमनोबुद्धिरित्यस्य उक्तार्थानुवादरूपत्वं दर्शयति—**एव**मिति । **उपायेन**—कर्मादिरूपेणेत्यर्थः । अनुस्मरणमेवात्र मनसोऽर्पणम् ; बुद्धेरर्पणं तु फलप्रदत्वाध्यवसायः । प्रकरणसिद्धावान्तरव्यापारकथनम्—**अन्तकाले च मामेव स्मरन्निति** । यद्वा अत्रोपायेनेति कर्मानुगृहीतानुस्मृतिरेवोच्यते । तत्फलं * मय्यर्पितमनोबुद्धिरिति । तस्यैवार्थः—**अन्तकाले च मामेव स्मरन्निति** । पूर्वोत्तरानुवृत्ताधिकारित्रयसाधारण्यायाह—**यथाभिलषितप्रकारं मामिति** । * निस्संशयेषु सर्वेषु नित्यं वसति वै हरिः । ससंशयान् हेतुबलान्नाध्यावसति माधवः ॥ (भा. मो. ३६९. ७१) इत्यादिवत् * असंशय इत्यस्यार्जुनविशेषणत्वेऽपि फलितमाह—**नात्र संशय** इति । * अ मा नो नाः प्रतिषेधे (काव्यानु) इति वचनादकारो वाऽत्र पृथगनुसन्धेयः । * एतमितः प्रेत्याभिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्साऽस्ति (छा. ३. १४. ४) इत्यादिकमत्रानुसन्धेयम् ॥७॥

भा ॥ एवं सामान्येन स्वप्राप्त्यावाप्तिरन्तिमप्रत्ययाधीनेत्युक्त्वा तदर्थं त्रयाणामुपासनप्रकारभेदं वक्तुमुपक्रमते ; तत्रैश्वर्यार्थिनामुपासनप्रकारं यथोपासनमन्तिमप्रत्ययप्रकारं चाह—

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८

भा ॥ अहरहरभ्यासयोगाभ्यां युक्ततया नान्यगामिना चेतसा अन्तकाले परमं पुरुषं दिव्यं मां वक्ष्यमाणप्रकारं चिन्तयन् मामेव याति—आदिभरतमृगत्वप्राप्तिवदैश्वर्यविशिष्टतया मत्समानाकारो भवति। अभ्यासः—नित्यनैमित्तिकाविरुद्धेषु सर्वेषु कालेषु मनसोपास्यसंशीलनम्। योगस्त्वहरहर्योगकालेऽनुष्ठीयमानं यथोक्तलक्षणमुपासनम् ॥ ८ ॥

ता ॥ अन्तिमप्रत्ययप्रसङ्गात्तद्धेतुतया * अनुस्मरेत्युपासनं प्रस्तुतम् ; तत्प्रकारभेदोऽनन्तरप्रघट्टकार्थ इत्यभिप्रायेणाह—**एव**मिति । गतिभेदोऽपि वक्ष्यमाणोऽनेनोपलक्षणीयः । * अभ्यासेत्यादिश्लोकत्रयार्थमाह—**तत्रेति** । योग-

शब्दस्य संबन्धमात्रपरत्वे नैरर्थक्यादत्र ध्यानपरत्वं वक्तुं युक्तम्, तत्पुरुषाच्च द्वन्द्वस्योभयपदार्थप्रधानत्वात्परिग्राह्यत्वमस्ति; तदाह—**अभ्यासयोगाभ्या**मिति। * नान्यगामिनेत्येतन्नैकादिशब्दवत्, अनन्यगामिनेत्यर्थः। अन्यत्र विषयान्तरे गन्तुं शीलं नास्येति नान्यगामि। अभ्यासयोगशब्देन प्राचीनचिन्तनस्योक्तत्वात्, * अनुचिन्तयन्नित्येतदन्तिमस्मृतिपरमिति प्रदर्शनाय **अन्तकाल** इत्युक्तम्। चिन्तनस्य ध्यानस्य च पुरुष एवात्र कर्म; स च परमशब्देन विशेषितत्वादीश्वर एवेत्यभिप्रायेण **मा**मिति पदद्वयम्। * दिव्यमित्यस्य सूर्यमण्डले स्थितमिति शङ्करोक्तं निर्मूलम्, * आदित्यवर्णं तमसः परस्तादिति वक्ष्यमाणविरुद्धं चेत्यभिप्रायेणाह—**वक्ष्यमाणप्रकार**मिति। अनन्तरश्लोकद्वयेनेति शेषः। कथमैश्वर्यार्थिनोऽनपेक्षितपरमपुरुषप्राप्तिः फलतयोच्यत इत्यत्राह—**आदिभरते**ति। अन्तकाले स्मर्यमाणभोगप्रदानोपयुक्ताकारविशिष्टपरमपुरुषसमानैश्वर्यप्राप्तिरिह परमपुरुषप्राप्तिः। तत्साम्यापत्तिरेव हि तत्प्राप्तितया * यंयमिति श्लोकेनोदाहृतेति भावः। * आरम्बणसंशलीनं पुनःपुनरभ्यासः इति **वाक्यकार**वचनानुरोधेनाभ्यासशब्दार्थमाह—**अभ्यास** इति। पुनःपुनरिति वचनान्मध्येऽवश्यंभाविभिः कैश्चिद्व्यवधानं सूचितमित्यभिप्रायेणोक्तम्—**नित्यनैमित्तिकाविरुद्धेष्वि**ति। **सर्वेषु कालेष्वि**ति—न केवलं योगकाले, तदातनस्य शीलनस्य योगशब्देनोपात्तत्वादिति भावः। आरम्बणम्—आलम्बनम्; तच्चात्रोपास्यशब्देन व्याख्यातम्। योगशब्देनात्राङ्गिस्वरूपमुच्यत इत्यभिप्रायेणाह—**योगस्त्वि**ति। **यथोक्ते**ति। अत्यर्थप्रियविशदतमप्रत्यक्षतापन्नेत्यर्थः॥ ८॥

कविं पुराणमनुशासितारम् अणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात्॥ ९

प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्॥ १०

भा॥ **कविं—सर्वज्ञम्, पुराणम्—पुरातनम्, अनुशासितारम्—विश्वस्य प्रशासितारम्, अणोरणीयांसम्—जीवादपि सूक्ष्मतरम्, सर्वस्य धातारम्—सर्वस्य स्रष्टारम्, अचिन्त्यरूपम्—सकलेतरविसजातीयस्वरूपम्, आदित्यवर्णं तमसः परस्तात्—अप्राकृतस्वासाधारणदिव्यरूपम्, तमेवंभूतमहरहरभ्यस्यमानभक्तियुक्तयोगबलेनारूढसंस्कारतया अचलेन मनसा प्रयाणकाले भ्रुवोर्मध्ये प्राणमावेश्य—संस्थाप्य; तत्र भ्रूमध्ये दिव्यं पुरुषं योऽनुस्मरेत्; स तमेवोपैति—तद्भावं याति, तत्समानैश्वर्यो भवतीत्यर्थः॥ ९॥ १०॥**

ता॥ क्रान्तदर्शी हि कविरित्युच्यते; अत्र तु कविशब्दः ईश्वरविषयत्वात् सर्वदर्शित्वपर इत्यभिप्रायेणाह—**सर्वज्ञ**मिति। पुराणशब्देनानादित्वं विवक्षितमित्यभिप्रायेणोक्तं—**पुरातन**मिति। अनुपूर्वश्शासिर्विविच्य ज्ञापनार्थ इत्येतावन्मात्रपरत्वव्युदासाय **विश्वस्य प्रशासितार**मित्युक्तम्। ईश्वरस्य सतोऽनुशासनमाज्ञापनमेवेति भावः। अनुशा[स्यकर्माकाङ्क्षायां]सनं कस्येत्याकाङ्क्षायां *सर्वस्य धातारमित्यत्र सर्वस्येति पदमाकर्षणीयम्; विशेषनिर्देशाभावाद्वा सर्वविषयत्वमित्यभिप्रायेण—**विश्वस्ये**त्युक्तम्। *एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः (बृ. ५. ८. ९) इत्यादिकमत्र भाव्यम्। * अन्तः प्रविष्टश्शास्ता जनानाम् (य. आ. ३. ३) इत्यादिषु प्रशासनसहपठितान्तःप्रवेशौपयिकसूक्ष्मतरत्वमत्र * अणोरणीयांसमित्युच्यत इत्यभिप्रायेणोक्तं—**सूक्ष्मतर**मिति। * धाता पुरस्ताद्यमुदाजहार (पु.) * सूर्याचन्द्रमसौ धाता [यथापूर्वमकल्पयत् (ना.) इत्यादिषु धातृशब्दस्य स्रष्टरि प्रयोगाद्धातूनां चानेकार्थगर्भत्वात्

सर्वस्य स्रष्टारमित्युक्तम् । *विष्णुना विधृते भूमी (यजु. आ. १. २७) * सर्वाधारं धाम विष्णुसंज्ञम् (मै. उ.) **इत्युक्तं सर्वाधारत्वं सर्वस्रष्टुरेवेति** फलितोक्तिर्वा । उक्तप्रकारस्येश्वरस्वरूपस्य सामान्यतो दृष्टैस्तर्कैरसंभावनीयतां केचिदभिमन्येरन्निति तन्निरासपरम् * अचिन्त्यरूपमितिपदमित्यभिप्रायेणाह—**सकलेतरविसजातीयस्वरूपमिति** । वर्णयोगस्य स्वरूपेणाघटनात् प्रमाणसिद्धविलक्षणविग्रहद्वारा तद्योगमाह—**अप्राकृतेति** । * येन सूर्यस्तपति तेजसेद्धः (काठके. ३. ९. ७) * यस्यादित्यो भामुपयुज्य भाति (भा. आनु. १५८. २२—१) * तस्य भासा सर्वमिदं विभाति (मु. २. २. ११) * तं देवा ज्योतिषां ज्योतिः (बृ. ६. ४. १६) इत्यादिषु निरतिशयदीप्तियोगस्सिद्धः । * आदित्यवर्णं तमसः परस्तात् (ना) इति श्रुतिखण्डस्यात्र निबन्धः, * तम आसीत्तमसा गूढमग्रे प्रकेतम् (ऋ. ७. ७. १०. ११. ७; अष्ट. २. ७. ९) * तमसस्तन्महिनाजायतैकं (अष्ट. २. ४. ९) * यदा तमः (श्वे. ४. १८) इत्यादिश्रुत्यन्तरोपलक्षणार्थः । तेन * तमसः इति सर्वकारणभूततमोद्रव्यविवक्षा । * तमसः परस्तादित्यनेन फलितमप्राकृतत्वम्; तत एवचाकर्माधीनत्वं, नित्यत्वं, निरवद्यत्वमित्यादि सूचितम् । एतच्छ्लोकच्छायश्च मानवश्श्लोकः—* प्रशासितारं सर्वेषामणीयांसमणीयसाम् । रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ॥ (मनु. १२. १२२) इति । अनुकूलानां हितरमणीयत्वाद्याकारेण हिरण्यवर्णत्वरुक्माभत्वादिव्यपदेशः । प्रतिकूलदुष्प्रेक्षत्वप्रकाशातिरेकादिविवक्षया आदित्यवर्णत्वाद्युक्तिः । * दिवि सूर्यसहस्रस्य (११. १२) इत्यादि च वक्ष्यति । एतेनादित्यशब्दस्य नित्यचैतन्यप्रकाशपरत्वं, तमश्शब्दस्य चाज्ञानविषयत्वं परोक्तं निरस्तम् । श्लोकद्वयस्यान्वयं दर्शयति—**तमेवंभूतमित्यादिना** । * भक्त्या युक्तो योगबलेनेति पृथङ्निर्देशात्परोक्तप्राणजयबलादिपृथगर्थतापतीतिस्स्यादिति तदपाकरणाय विशिष्टैकार्थतां दर्शयितुं **भक्तियुक्तयोगबलेनेत्युक्तम्** । मनसोऽचलत्वे हेतुरिदम्; तस्य चावान्तरव्यापारः योग्यपर्याययुक्तशब्देन विवक्षित इत्याह—**आरूढसंस्कारतयेति** । * आवेश्येत्यनेन योगप्रकरणेषूक्तं निश्चलावस्थापनं विवक्षितमित्याह—**संस्थाप्येति** । अत्र पुरुषध्यानस्यापि भ्रूमध्यमेव देशः, देशान्तरानभिधानाद्योगप्रकरणान्तरेषूपदेशाच्च तत्सिद्धेरिति विभाव्योक्तं—**तत्र भ्रूमध्य इति** । तमेवंभूतं दिव्यं पुरुषम् इत्यन्वयः । *तं तमेवैति (६) इत्यवधारणदर्शनात् *स तं परं पुरुषमित्यत्रापि तमितीतरव्यवच्छेदपरमित्यभिप्रायेणाह—**स तमेवोपैतीति** । * यः प्रयाति स मद्भावं याति (५) इति प्रक्रान्तप्रकार एवात्र विवक्षित इति दर्शयति—**तद्भावं यातीति** । भावप्रधानोऽत्र निर्देश इति भावः । तत्र तादात्म्यादिभ्रमं व्युदस्यति—**तत्समानैश्वर्यो भवतीत्यर्थ इति** । परमसाम्यापत्तिव्यवच्छेदाय समानैश्वर्य इत्युक्तम् । एतेन * कविमित्यादिभिस्सर्वज्ञत्वादयो गुणाः ऐश्वर्यप्रदत्वार्थमनुसन्धेयतयोक्ताः, नतु प्राप्यत्वार्थमिति फलितम् । एवमन्तिमकालस्मर्तव्यतया निर्दिष्ट एवाकारः प्रागपि ध्येयतयोक्त इति मन्तव्यम् । एवमुत्तरत्रापि ॥ ९ ॥ १० ॥

भा ॥ अथ कैवल्यार्थिनां स्मरणप्रकारमाह—

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११

भा ॥ यदक्षरम्—अस्थूलत्वादिगुणकं वेदविदो वदन्ति, वीतरागाश्च यतयो यदक्षरं विशन्ति, यदक्षरं प्राप्तुमिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्पदं संग्रहेण ते प्रवक्ष्ये । पद्यते गम्यते चेतसेति पदम्; तत् निखिलवेदान्तवेद्यं मत्स्वरूपमक्षरं यथोपास्यम्, तथा संक्षेपेण प्रवक्ष्यामीत्यर्थः ॥ ११ ॥

ता ॥ अथ मन्दप्रयोजनोक्तपरव्याख्याप्रतिक्षेपाय * यदक्षरमित्यादिश्लोकत्रयस्यार्थमाह—अथेति । स्मरण-शब्दोऽत्रोपासनस्यान्तिमप्रत्ययस्य च संग्राहकः, उभयोरपि स्मृतिविशेषत्वात् । * नावेदविन्मनुते तं बृहन्तम् (काठ. ३. ९. ७) इत्युक्तप्रमाणान्तरागोचरत्वपरेण * वेदविदो वदन्तीयनेन सूचितवेदोक्तप्रकारकथनम्—**अस्थूलत्वादि-गुणक**मिति । * अस्थूलमनण्वह्रस्वम् (बृ. ५. ८. ७) इत्यादिश्रुतिरिह विवक्षिता । **ब्रह्मचर्यम्**—ऊर्ध्वरेतस्त्वादिकम् । यद्वा * अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तत्....अथ यन्मौनमित्याचक्षते....अथ यत्सत्रायणमित्याचक्षते....अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत् (छा. ८. ५. १) इति श्रुतेः ब्रह्मप्राप्त्यर्था या काचिदपि चर्या ब्रह्मचर्यम् । वीतरागा यतय एव * यदिच्छन्तो ब्रह्मचर्यं चरन्तीत्यत्रापि कर्तारः । एतेन फलोपाययोः प्रदर्शनम् । पदशब्दस्यात्र रूढार्थानुपपत्तेरुपपन्नं योगमाह—**पद्यत** इति । अत्र पदशब्देन ज्ञानविषयत्वमुखेन उपास्यत्वादिकमभिप्रेतमित्याह—**गम्यते चेतसेति** । यत्तच्छब्दाभिप्रेतां प्रसिद्धिमाह—**निखिलेति** । अक्षरशब्दस्यात्र विकारादिदोषरहितपरमात्मविषय-त्वात् **मत्स्वरूपमित्युक्तम्** । स्वासाधारणं रूपमित्यर्थः । अक्षररूपपरमात्मोपासनमत्राक्षरस्वरूपजीवात्मप्राप्त्यर्थम् ॥ ११ ॥

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च । मूर्ध्न्याधायात्मनः प्राणम् आस्थितो योगधारणाम् ॥ १२
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३

भा ॥ *सर्वाणि श्रोत्रादीनीन्द्रियाणि ज्ञानद्वारभूतानि संयम्य—स्वव्यापारेभ्यो विनिवर्त्य, हृदयकमल-निविष्टे मय्यक्षरे मनो निरुध्य, योगाख्यां धारणामास्थितः—मय्येव निश्चलां स्थितिमास्थितः, ओमित्येकाक्षरं ब्रह्म मद्वाचकं व्याहरन्, वाच्यं मामनुस्मरन्, आत्मनः प्राणं मूर्ध्न्याधाय देहं त्यजन् यः प्रयाति ; स याति परमां गतिं—प्रकृतिवियुक्तं मत्समानाकारमपुनरावृत्तिमात्मानं प्राप्नोतीत्यर्थः । * यस्स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ॥ (२०, २१) इत्यनन्तरमेव वक्ष्यते ॥ १२ ॥ १३ ॥*

ता ॥ * सर्वद्वाराणि संयम्येत्यत्र नवद्वारप्रतीतिनिरासाय प्रत्याहारविषयताद्योतनाय चाह—**सर्वाणि श्रोत्रादी-नीति** । द्वारानुबन्धरहितस्पर्शनादीन्द्रियाणां कथं द्वारशब्दार्थतेत्यत्रोक्तं—**ज्ञानद्वारभूतानी**ति । संयमनमत्र शब्दादि-विषयौन्मुख्यनिवर्तनमित्यभिप्रायेणाह—**स्वव्यापारेभ्यो विनिवर्त्ये**ति । * मनो हृदि निरुध्य चेत्यत्र हृन्मात्रस्य ध्येयता-ऽनुपपत्तेरित्यत्रोक्तं—**हृदयकमलनिविष्टे मय्यक्षर** इति । हृच्छब्दोऽत्र तत्रत्यपुरुषलक्षकः ; अन्यथा * मामनुस्मरन्नित्यन-न्तरोक्तिर्न घटेतेति भावः । अर्थक्रमेण बलवता दुर्बलस्य पाठक्रमस्य बाधमभिप्रेत्य * मनो हृदि निरुध्येत्यस्यानन्तरम् * आस्थितो योगधारणामित्यादिकं व्याख्यातम् । प्रत्याहारानन्तरपठितधारणाव्यवच्छेदायाह—**योगाख्यां धारणामिति** । षष्ठीसमासात्समानाधिकरणसमासस्य प्राबल्यं निषादस्थपतिन्यायसिद्धम् । धारणाशब्दाभिप्रेतमाह—**मय्येव निश्चलां स्थितिमिति** । प्रणवस्य ब्रह्मप्रतिपादकत्वात् ब्रह्मेतिव्यपदेश इत्यभिप्रायेण **मद्वाचकमित्युक्तम्** । मन्त्रस्यार्थविशेष-प्रकाशनमुखेनोपकारकत्वमप्यत्र ब्रह्मशब्देन प्रतिपादनाद्विवक्षितमित्यभिप्रायेण **वाच्यं मामनुस्मरन्नित्युक्तम्** । प्रणवस्य भगवद्वाचकत्वं योगाङ्गत्वादिकं च श्रुतिस्मृत्यादिसिद्धम् । यथा **कठवल्ल्यां** * सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥ (२. १५) इति । अत्र नाम्ना नामिनो निर्देशः । तथा * प्रणवो धनुश्शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ (मु. २. २. ४) इति । तथा * आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ध्याननिर्मथनाभ्यासात्पश्येद्-

ब्रह्माग्निगूढवत् ॥ (ध्यान) इति । तथा * ओमित्येवं ध्यायथात्मानम् (मु. २. २. ६) इति । तथा *यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत, स तेजसि सूर्ये संपन्नः यथा पादोदरस्त्वचा विनिर्मुक्त एवं ह वै स पाप्मना विनिर्मुक्तस्स सामभिरुन्नीयते ब्रह्मलोकम्, स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते (प्र. ५. ५) इति । तथा * वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिङ्गनाशः । स भूय एवेन्धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे । स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥ (श्वे. १. १३. १४) इति । अत्रैव श्लोके * विष्णुं पश्येद्धृदि स्थितमिति योगयाज्ञवल्क्यपाठः । तथा *कांस्यघण्टानिनादस्तु यथा लीयति शान्तये । ओङ्कारस्तु तथा योज्यश्शान्तये शान्तिमिच्छता । यस्मिन् स लीयते शब्दस्तत्परं ब्रह्म गीयते ॥ इति । तथा * ओं खं ब्रह्म ओं खं पुराणम् (बृ. ७. १. २) इति । * ओमित्येतदक्षरं ब्रह्मास्य पादाश्चत्वारो वेदाश्चतुष्पादिदमक्षरम्, परं ब्रह्म पूर्वास्य मात्रा पृथिव्यकारः इत्यारभ्य * प्रथमा रक्तपीता महद्ब्रह्मदैवत्या द्वितीया विद्युमती कृष्णा विष्णुदैवत्या तृतीया शुभा शुक्ला रुद्रदैवत्या याऽवसानेऽस्य चतुर्थ्यर्धमात्रा विद्युमती सर्ववर्णा पुरुषदैवत्या (अथर्व) इति च । अत्र अर्धमात्राधिदैवभूतः पुरुष एवावतीर्णावस्थो द्वितीयमात्रादैवत्वेन विष्णुरिति चोक्तः । तथा * ओमिति ब्रह्म ओमितीदं सर्वम् (शी. ८. १) इति, * ओङ्कारमेवेदं सर्वम् (छा. २. २३. २) इति । तथा *हृदिस्था देवतास्सर्वा हृदि प्राणाः प्रतिष्ठिताः । हृदि त्वमसि यो नित्यं तिस्रो मात्राः परस्तु सः । तस्योत्तरतश्शिरो दक्षिणतः पादो य उत्तरतस्स ओङ्कारो य ओङ्कारस्स प्रणवो यः प्रणवस्स सर्वव्यापी यस्सर्वव्यापी सोऽनन्तो योऽनन्तस्तत्तारं यत्तारं तत्सूक्ष्मं यत्सूक्ष्मं तच्छुक्लं यच्छुक्लं तद्वैद्युतं यद्वैद्युतं तत्परं ब्रह्म (अथ. २) इति । अत्र प्रकरणादिवशात्प्रतर्दनविद्यावदन्तरितं शासनमनुसन्धेयम् । मुमुक्षोरुत्क्रमणप्रकरणे च प्रणवश्श्रूयते * अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स ओमिति वा होद्वामीयते स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम् । तदेष श्लोकः—शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ (छा. ८. ६. ६) इति । महाभारते च महेश्वरवचनम् * ओमित्येवं सदा विप्राः पठध्वं ध्यात केशवम् (ह. वि. १३३. १०) इति । आह च भगवान् याज्ञवल्क्यः—*देवतायाः परायाश्च ह्यालम्बः प्रणवस्स्मृतः । कश्चिदाराधनाकामो विष्णोर्भक्त्या करोति वै । तदाराधनसान्निध्ये प्रतिमां व्यञ्जिकां यथा । धातुद्रव्यादिपाषाणैः कृत्वा भावं निवेशयेत् । श्रद्धाभक्त्यादराद्यैश्च तस्य देवः प्रसीदति । ओङ्कारेण तथा चात्मा ह्युपास्ते स प्रसीदति । सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च । मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् । ओमित्येकाक्षरं ब्रह्म व्याहारन्मामनुस्मरन् । यः प्रयाति त्यजन् देहं स याति परमां गतिम् । य एतं प्रणवेनाद्यमक्षरं प्रतिपद्यते । ततोऽक्षरेण वेदेन वेद्यं ब्रह्माधिगच्छति । एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मभूयाय कल्पते । अदृष्टविग्रहो देवो भावग्राह्यो निरामयः । तस्योङ्कारः स्मृतं नाम तेनाहूतः प्रसीदति । तस्मादोमिति पूर्वं तु कृत्वा युञ्जीत तत्परः । ब्रह्मोङ्कारविधानेन तत्त्वेन प्रतिपद्यते ॥ इति । अत्र * सर्वद्वाराणि इत्यादिश्लोकयोर्भगवद्वाक्यतया प्रसिद्धयोरुदाहरणात् * मामिति निर्देशस्तद्विषयः । पुनश्चात्र हैरण्यगर्भादिसिद्धान्तेषु प्रणवार्थं प्रपञ्च्यान्तेऽप्याह—* त्रिरात्मा त्रिस्वभावश्च तथा त्रिव्यूह एव च । पञ्चरात्रे तथा ह्येष भगवद्वाचकः स्मृतः । बलं वीर्यं तथा तेजस्त्रिरात्मेति च संज्ञितः । ज्ञानैश्वर्ये तथा शक्तिस्त्रिस्वभाव इति स्मृतः । सङ्कर्षणोऽथप्रद्युम्नो ह्यनिरुद्धस्तथैव च । त्रिव्यूह इति निर्दिष्ट ओङ्कारो विष्णुरव्ययः । भगवद्वाचकः प्रोक्तः प्रकृतेर्वाचकस्तथा । व्यक्ताव्यक्तो वासुदेवः प्रभवः प्रलयस्तथा ॥ इति । यच्चात्र हैरण्यगर्भकापिलावान्तरतन्त्र-

स्सनत्कुमारब्रह्मिष्ठपाशुपताख्येषु सिद्धान्तेष्वर्थभेदवर्णनं, तदपि तत्तदर्थविशेषान्तरितपरमपुरुषपर्यवसानमभिप्रेत्येति मन्तव्यम् । अत एव हि विष्णुप्रतिपादकतयाऽन्तकाले स्मर्तव्यत्वेनोपसंहियते—* ओङ्कारं विपुलमचिन्त्यमप्रमेयं सूक्ष्माख्यं ध्रुवमचरं च यत्पुराणम् । तद्विष्णोः पदमपि पद्मज प्रसूतं देहान्ते मम मनसि स्थितं करोतु इति । प्रणवेनैवात्र भगवदर्चनमुच्यते—*तल्लिङ्गैरर्चयेन्मन्त्रैस्सर्वान् देवान् समाहितः । नमस्कारेण पुष्पाणि विन्यसेत्तु यथाक्रमम् । आवाहनादिकं कर्म यत्न सूक्तं मया त्विह । तत्सर्वं प्रणवेनैव कर्तव्यं चक्रपाणये । दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा । अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् । विष्णुर्ब्रह्मा च रुद्रश्च विष्णुरेव दिवाकरः । तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्दनात् ॥ (भा. स.) इति । तथा परमपुरुषसाक्षात्कारकारणतया चात्र प्रणवोपासनप्रकार उच्यते । * ओंभूर्भुवस्सुवर्महर्जनस्तपस्सत्यमिति वैदिकम् । * एतदुच्चार्य वै ब्रह्म परे व्योम्नि नियोजयेत् । हृदयेऽग्निश्च वायुश्च जीवो यस्समुदाहृतः । ओङ्कारपद्मनाले तु उद्धृत्योपरि योजयेत् । अप्राणाच्छून्यभूतात्तु चेतोङ्गं जीवसंज्ञितम् । जायते तु यतस्तस्मात्पुनस्तत्र निवेशयेत् । घण्टाशब्दवदोङ्कारमुपासीत समाहितः । पुरुषं निर्मलं शुभ्रं पश्येद्वै नात्र संशयः ॥ इति । **योगानुशासनसूत्रं च** * क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः, तस्य वाचकः प्रणवः (१. २४, २५) इति । अतः प्रणवस्य भगवद्वाचकत्वं समाध्युत्क्रमणाद्यवस्थासु तेनैव भगवदनुस्मरणं च सिद्धम् । *शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ (छा. ८. ६. ६), *ऊर्ध्वमेकस्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥ (या. स्मृ. ३. १६७) इत्यादिश्रुतिस्मृत्यनुसारान्मुमुक्षोरुत्क्रमणौपयिकमिदं मूर्ध्नि प्राणाधानम् । **त्यजन् यः प्रयाती**ति—त्यक्त्वा यः प्रयातीत्यर्थः । आत्मार्थिनो ह्यात्मा गन्तव्यः; तत्रापुनरावृत्तित्वमात्रात्परमगतित्वोक्तिरित्यभिप्रायेणाह—**प्रकृती**ति । ईदृशस्यात्मनः परमगतिशब्देन व्यपदेशो न केवलं प्रकरणवशात्; किंत्वस्मिन्नेवाध्याये तद्विषय एवायं प्रयोगोऽप्यस्तीत्याह—**यस्स सर्वे**ष्विति ॥ १२ ॥ १३ ॥

भा ॥ एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्यानुगुणं भगवदुपासनप्रकार उक्तः ; अथ ज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारं चाह—

अनन्यचेतास्सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४

भा ॥ नित्यशः मामुद्योगप्रभृति सततं—सर्वकालम् अनन्यचेता यः स्मरति—अत्यर्थमत्प्रियत्वेन मत्स्मृत्या विना आत्मधारणमलभमानो निरतिशयप्रियां स्मृतिं यः करोति ; तस्य नित्ययुक्तस्य—नित्ययोगं काङ्क्षमाणस्य योगिनोऽहं सुलभः—अहमेव प्राप्यः ; न मद्भाव ऐश्वर्यादिकः ; सुप्रापश्च । तद्वियोगमसहमानोऽहमेव तं वृणे । मत्प्राप्तयनुगुणोपासनविपाकं तद्विरोधिनिरसनमत्यर्थमत्प्रियत्वादिकं चाहमेव ददामीत्यर्थः । * यमेवैष वृणुते तेन लभ्यः (क. २.२३ ; मु. ३.२.३) इति हि श्रूयते । वक्ष्यते च—* तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपायान्ति ते ॥ तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ (१०. १०, ११) इति ॥ १४ ॥

ता ॥ सप्तम्यर्थमनुवदति—**एवमि**ति । अध्यायारम्भगतप्रश्नोत्तरयोस्तत्सञ्ज्ञके पूर्वाध्यायान्ते चायं क्रमो न विवक्षितः, अधियज्ञान्तिमप्रत्ययस्योस्साधारण्येन प्रतिपादने तात्पर्यात्। इहतु प्रतिनियतार्थोपदेशरूपत्वादुत्तरोत्तरमुत्कृष्टता-

प्रदर्शनायैश्वर्याक्षरयाथात्म्यभगवच्चरणार्थिनः क्रमेणोक्ता इति भावः । अत्र च एवमिति निर्देशात् स्वप्राप्यानुगुणमिति निर्देशाच्च प्रकरणस्याधिकारित्रयविषयत्वव्यवस्थापकहेतवः प्रदर्शिताः । तथाहि ; एवमत्र कैश्चिच्छङ्क्येत—नन्वत्र *ते ब्रह्म तद्विदुः (७.२९) किं तद्ब्रह्म (८.१) * अक्षरं ब्रह्म परमम् (३) इति ब्रह्मशब्दस्य साक्षाद्ब्रह्मविषयत्वे को बाधः ? तस्यैव च सर्वात्मत्वादध्यात्मशब्देनापि तद्गतं सर्वं ग्रहीतुमुचितम् ; * भूतभावोद्भवकरो विसर्गः (३) इत्यपि जगत्सृष्टिग्रहणं युक्तं, देवतोद्देशेन द्रव्यत्यागो वा ; सचात्र निवृत्तिलक्षणो यज्ञः । * अधिभूतं क्षरो भावः (४) इति च अधिभवतीति व्युत्पत्तेः प्राणिजातं, *पुरुषश्चाधिदैवतमिति परब्रह्मावस्थाविशेषः, समष्टिपुरुषादिर्वा । अधियज्ञस्सर्वयज्ञाभिमानिनी विष्ण्वाख्या देवता, * यज्ञो वै विष्णुः (यजु. १.७.४.४) इति श्रुतेः । * अन्तकाले च (५) इत्यादि श्लोकत्रयमपि मुमुक्षोरेवान्तिमप्रत्ययमधिकृत्योक्तम् ; प्रश्नप्रतिवचनश्लोकानां पूर्वाध्याये प्रस्तुताधिकारित्रयज्ञातव्योपादेयपरत्वेऽप्युपरितनाश्श्लोकाः प्रधानतया सुदुर्लभत्वेन निर्दिष्टज्ञानिपरा युक्ताः ; अन्यथा * मामेव स्मरन् (५) * मामेवैष्यसि (७) इत्यादेर्बाधात् । अत एव *प्रयाणकाले च कथम् (२) *अन्तकाले च माम् (५) इति श्लोकयोरधिकारित्रयपरत्वेऽपि तद्विवरणेऽत्र तदैकाग्र्यं ग्राह्यमित्यपि निरस्तम् ; तत्रापि चाधिकारित्रयपरत्वं न प्रतीयते ; नचैश्वर्यार्थिनः परमपुरुषविषयान्तिमप्रत्ययसापेक्षतायां प्रमाणं पश्यामः । एवमुत्तरेष्वपि श्लोकेष्वेक एवाधिकारी, तद्वेद्यं चैकमेव पुनःपुनरनूद्य विशेषतो विशदीक्रियते । नच पुनरुक्तिदोषः, अभ्यासस्य ज्ञानिप्राधान्यलिङ्गत्वात् ; * संसिद्धिं परमां गताः (१५) * स याति परमां गतिं (१३) * तमाहुः परमां गतिम् (२१) इत्यमीषामैकार्थ्यं च प्रतीतमपरित्याज्यम् ; नच परमगन्तव्यातिरिक्ता परमसंसिद्धिः । * तमाहुः परमां गतिमिति परोक्षनिर्देशश्च * पुरुषस्सपरः पार्थ (२२) इतिवत्स्यात् । * परमं पुरुषं दिव्यं (८) * स तं परं पुरुषमुपैति दिव्यं (१०) * पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया (२२) इत्यमीषां भिन्नार्थत्वकल्पनं चायुक्तम् ; परैरपि च सर्वैः प्रायश एवमैककण्ठ्येन व्याख्यातम्—इति । अत्रैवं परिहारक्रमः—* अधियज्ञोऽहमेव (४) इतिवदहमेव ब्रह्मेत्यनुक्तेरध्यात्मादिवदत्र ब्रह्मशब्दार्थस्याप्यर्थान्तरत्वं तावत्प्रतीतम् ; नच ब्रह्मशब्दादक्षरशब्दस्य परमात्मनि रूढ्यतिशयः, येन ततस्तद्व्याख्यानं स्यात् । * एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । येचाप्यक्षरमव्यक्तम् (१२. १) इत्यादिषु च परमात्मनोऽन्यदेवोपास्यमक्षरशब्देन प्रतीयते । * द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्तमेव च । क्षराक्षरस्वरूपे ते सर्वभूतेषु च स्थिते । अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत् (वि. १. २२. ५५, ५६) इत्यादिषु चाक्षरपरब्रह्मशब्दौ परिशुद्धात्मविषयौ शारीरकभाष्ये समर्थितौ । अतोऽत्र * किं तद्ब्रह्म इत्युक्तेऽहमेव ब्रह्मेत्यव्याख्यानात्स्वेतरविषयब्रह्मशब्दः परमशब्दविशेषिताक्षरशब्दानुगुण्याच्च प्रकृतेरीश्वराच्चान्यस्मिन् परिशुद्धात्मन्युपचाराद्वर्तते ; पश्चाच्चायमेव * अव्यक्तोऽक्षर इत्युक्तः (२१) इति वक्ष्यते । नचासौ श्लोकः परमात्मपर इति शङ्कनीयम् , * ये चाप्यक्षरमव्यक्तं, * ये त्वक्षरमनिर्देश्यं (१२.३), * क्षरश्चाक्षर एव च (१५.१६) इत्यादिष्विवात्रापि अक्षरशब्दस्य भगवद्व्यतिरिक्तविषयत्वप्रतीतेः । संसिद्धिशब्दश्च परमगतिशब्दनिर्दिष्टप्राप्यविलक्षणां समीचीनां सिद्धिं स्वरसत उपसर्गशक्त्या व्यनक्ति ; अत एव स्वभावादिशब्दा अधिकारित्रयज्ञातव्योपादेयवस्तुविशेषपरा उक्ताः । एवं स्ववाक्यपर्यालोचनया पूर्वाध्यायप्रकृतपरामर्शेन च प्रश्नप्रतिवचनवाक्यानामधिकारित्रयविषयत्वे सिद्धे तदनन्तराणमपि ग्रन्थानां यथासंभवं सर्वविषयत्वं युक्तम् । प्रक्रान्ते चाधिकारित्रये यद्वृत्तत्रयेणानूद्यमाने कैवल्यभगवत्प्राप्तिकामयोरनन्तरं स्पष्टमभिधानात् *अभ्यास (८) इत्यादिकं परिशेषादैश्वर्यार्थिविषयम् । यच्चैश्वर्यार्थिनां परमपुरुषविषयान्तिमप्रत्ययसापेक्षतायां प्रमाणं नास्तीति ; तदपि न, श्रीमद्भागवते पुराणे ध्रुवचरिते तद्दृष्टेः—*भक्तिं हरौ भगवति प्रवहन् (४.९.११) इत्यादिना । अतो यथोक्त एवार्थः ।

यद्यपि ब्रह्मपुरुषपरगत्यादिशब्दैरिह सर्वत्र परमात्मभजनतत्प्राप्त्यादिरेव प्रतीयते; तथाऽपि[तावता]एकाधिकारिविषयत्वं वक्तुं न युज्यते, पूर्वत्र प्रयाणकाले भ्रूमध्ये प्राणावेशस्य तत्रैव परमात्मध्यानस्य च विहितत्वादनन्तरं च हृदि ध्यानस्य मूर्ध्नि प्राणावेशस्य च तत्काल एव विधानात्। तदिदं द्वयं परस्परविरुद्धं किं कालभेदाद्व्यवस्थाप्येताधिकारिभेदाद्वा? तत्र न तावत्कालभेददृश्रुतः; प्रत्युत कालैक्यमेव श्रूयते; अतः परिशेषात्सिद्धोऽधिकारिभेदः। किंच *शतं चैका च (छा. ८. ६. ६) इत्यादिभिर्मूर्धन्यनाड्या निष्क्रमणं मोक्षहेतुः, अन्याभिर्निष्क्रमणं फलान्तरहेतुरित्यवगते प्रयाणकाले भ्रूमध्ये मूर्ध्नि च प्राणावेशस्योत्क्रमणशेषतया तत्तद्देशगतनाड्योत्क्रमणे प्रतीते सिध्येदधिकारिभेदः। पूर्वत्र चाध्याये *चतुर्विधा भजन्ते माम् (७. १६) इत्यादावयमधिकारिभेदः प्रस्तुतः; तदन्ते च *जरामरणमोक्षाय (७. २९) *साधिभूताधिदैवं माम् (७. ३०) इति श्लोकयोर्यच्छब्दावृत्त्याऽधिकारिभेदप्रतीतिर्भाष्ये प्रतिपादिता; सा चात्रापि स्फुटा; *अणोरणीयांसमनुस्मरेद्यः (९) *यः प्रयाति त्यजन् देहं (१३) *यो मां स्मरति नित्यशः (१४) इति। एतदस्मिन्नभिप्रेत्योक्तम्—**एवमैश्वर्यार्थिन** इत्यादि। उक्तश्चाधिकारी *अनन्यचेताः इत्युच्यत इति परोक्तं निराकुर्वन् *अनन्यचेताः इति श्लोकस्यार्थमाह—**अथे**ति। *नित्यशः इत्यनेनात्मानुभवादिफलान्तरव्यवधाननैरपेक्ष्यं विवक्षितमित्याह—**उद्योगप्रभृती**ति। अन्यथा *सततमित्यनेन पुनरुक्तिस्संकोचक्लेशो वा स्यादित्यभिप्रायेणाह—**सततं सर्वकाल**मिति। अनन्यचेतश्शब्देनाभिप्रेतं स्मृतेर्भक्तिरूपापन्नत्वं दर्शयति—**अत्यर्थे**ति। अनन्यचेतस्त्वादेव स्मरणस्याच्छिद्रत्वम्। उत्कण्ठनेऽपि च स्मरतिः प्रयुज्यते—*आतरौ स्मरतां वीरौ (रा. अ. १. ३) इत्यादिषु। *नित्ययुक्तस्य योगिनः इत्युक्तानुवादः फलस्याव्यवहितत्वद्योतनाय। अत्र अहंशब्देनेश्वरस्य प्रत्यगर्थोऽभिप्रेतः। तेन तद्विशेषणभूताक्षरादिफलप्राप्तिव्यवच्छेदो विवक्षित इत्यभिप्रायेणाह—**अहमेवे**ति। तदेव विवृणोति—**न मद्भाव** इति। भगवत्प्राप्तेः फलान्तरेभ्योऽतिशयितफलत्वात्तत्प्राप्तौ प्रयासातिरेकसंभावनाव्यवच्छेदाय सुलभपदमित्यभिप्रायेणाह—**सुप्राप्श्चे**ति। अकृच्छ्रेण प्राप्य इत्यर्थः। *ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल् (अष्टा. ३. ३. १२६) इत्यनुशिष्यते। आश्रितवत्सलस्येश्वरस्य सौलभ्यं रागप्राप्तमित्याह—**तद्वियोगमि**ति। उक्तस्यातिवादमात्रत्वशङ्काव्युदासाय श्रुतिमूलतामाह—**यमेवे**ति। अत्र वरणशब्देन किमुच्यते? न तावच्छेषत्वशरीरत्वाद्याकारेण स्वीकारः, तस्य नित्यसिद्धत्वात्; न च तद्विपरीतः, विरुद्धत्वादेव; न च प्राप्तिप्रदानम्, *तेन लभ्य इत्यनेन पौनरुक्त्यप्रसङ्गात्; नचान्योऽत्र प्रकारः, असंभवादित्यत्राह—**मत्प्राप्त्यनुगुणे**ति। विपाकोऽत्र ध्रुवानुस्मृतिरूपत्वदर्शनसमानाकारत्वादिरूपः। तद्विरोधिनो दुष्कृतरजस्तमोरागद्वेषमोहादयः। **अत्यर्थमप्रियत्वं**—निरतिशयभक्तिरूपम्। आदिशब्देन परमपदपर्यङ्कासत्तिपर्यन्तं यन्मध्येऽपेक्षितम्, तत्सर्वं विवक्षितम्। **अहमेवे**ति परमकारुणिकस्य ममैवायं भर इत्यभिप्रायः। *तस्याहं सुलभः इत्यादेरुक्तार्थपरत्वस्थिरीकरणायास्यैवार्थस्य वक्ष्यमाणं विस्तरमुदाहृतश्रुत्युपबृंहणरूपं दर्शयति—**वक्ष्यते चे**ति॥ १४॥

भा॥ अतः परमध्यायशेषेण ज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिमैश्वर्यार्थिनः पुनरावृत्तिं चाह—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥ १५

भा॥ मां प्राप्य पुनर्निखिलदुःखालयमशाश्वतम्—अस्थिरं जन्म न प्राप्नुवन्ति। यत एते महात्मानः—महामनसः, यथावस्थितमत्स्वरूपज्ञाना अत्यर्थमप्रियत्वेन मया विना आत्मधारणमलभमाना मय्यासक्तमनसो मदाश्रया मामुपास्य परमसंसिद्धिरूपं मां प्राप्ताः॥ १५॥

ता ॥ इतः पूर्वं त्रयाणामधिकारिणां केचन वेद्योपादेयभेदाः प्रतिपादिताः ; अतः परमधिकारौपयिकतयाऽवश्य-वेद्यस्य फलस्य स्थिरास्थिरत्वलक्षणविशेषं दर्शयतीत्याह—**अतः परमिति** । अत्र ज्ञानिनस्तावदपुनरावृत्तिरुच्यत *मामुपेत्येति श्लोकेन । दुःखानन्त्यस्य सर्वप्रमाणसिद्धत्वाद् दुःखशब्दस्य निर्विशेषणस्य सङ्कोचायोगात् **निखिलेत्युक्तम्** । जन्मनश्चा-शाश्वतशब्दनिर्दिष्टमस्थिरत्वं जन्माविनाभूतदेहभोगाद्यस्थिरत्वरूपमिह विवक्षितम्, जन्मशब्दो वाऽत्र जनिमच्छरीरपरः । *महात्मानः इति स्तुतिमात्रादपि माहात्म्यस्यात्र संसिद्धिहेतुत्वमुचितमित्यभिप्रायेणाह—**यत इति** । महामनस्त्वं ज्ञानिनां प्राक्प्रपञ्चितमिहानूदितं दर्शयति—**यथावस्थिते**त्यादिना । अभिलषितस्य फलस्य सिद्धिव्यपदेशौचित्यात्परमशब्दस्वार-स्याच्च **परमसंसिद्धिरूपं मा**मित्युक्तम् । **परमसंसिद्धिरूपं**—परमपुरुषार्थरूपमित्यर्थः । समीचीनसिद्धिस्संसिद्धिः ॥ १५

भा ॥ ऐश्वर्यगतिं प्राप्तानां भगवन्तं प्राप्तानां च पुनरावृत्तावपुनरावृत्तौ च हेतुमाह—

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६

भा ॥ ब्रह्मलोकपर्यन्ता ब्रह्माण्डोदरवर्तिनस्सर्वे लोका भोगैश्वर्यालयाः पुनरावर्तिनः—**विनाशिनः** । अत ऐश्वर्यगतिं प्राप्तानां प्राप्यस्थानविनाशाद्विनाशित्वमवर्जनीयम् । मां—सर्वज्ञं सत्यसङ्कल्पं निखिलजगदुत्पत्ति-स्थितिलयलीलं परमकारुणिकं सदैकरूपं प्राप्तानां विनाशप्रसङ्गाभावात्तेषां पुनर्जन्म न विद्यते ॥ १६ ॥

ता ॥ अप्रसक्तस्य प्रतिषेधायोगात्प्रतिषेध्यस्य प्रसङ्गिनश्च आसन्नवर्तिन उपादातुमुचितत्वान्नश्वरफलभूतैश्वर्यार्थिनां जन्ममात्रं तन्निषेधमुखेन सूचितम् ; अतस्तत्रापि हेतुरेव केवलं वक्तव्य इत्यभिप्रायेणाह—**ऐश्वर्यगतिमिति** । *मामु-पेत्य तु इति भगवतः प्रतियोगीकरणादाङ्गोऽत्राभिविधिपरत्वाभिप्रायेणाह—**ब्रह्मलोके**ति । प्रकृत्याख्यभगवन्मायामहोदधौ ब्रह्माण्डैरपि यदा बुद्बुदायितम्, तदा कैव कथा तदन्तर्वर्तिनां लोकानामित्यभिप्रायेण **ब्रह्माण्डोदरवर्तिन** इत्युक्तम् । तेन परमाकाशव्यवच्छेदसिद्धिश्च । ऐश्वर्यानित्यताप्रतिपादनपरत्वायोक्तम् **भोगैश्वर्यालया** इति । भुवनशब्दसमभि-व्याहृतस्य लोकशब्दस्य जनविषयत्वायोगाल्लोकस्य गमनाभावेन पुनरावृत्तेरप्यभावात्पुनरावृत्तिशब्देन प्रवाहतो विनाशमात्रं लक्ष्यत इत्याह—**विनाशिन** इति । पुनरावृत्तिशब्दस्याजहल्लक्षणावृत्तेस्तल्लोकगतपुरुषपुनरावृत्तिरेव वा द्वारम् । फलित-माह—**अत** इति । *मामित्यत्र तुशब्देन द्योतितानपुनरावृत्तिहेतुविशेषान् दर्शयति—**मां सर्वज्ञ**मित्यादिना । असर्वज्ञ-मसत्यसङ्कल्पं कार्यकोटिघटितं निर्घृणं रजस्तमोमूलरागद्वेषादिनानाविकारशालिनं कञ्चन क्षुद्रदैवतं प्राप्तानां हि तदन्येन तेनैव वा पुनरावृत्तिस्स्यादिति विशेषणानां तात्पर्यम् ॥ १६ ॥

भा ॥ ब्रह्मलोकपर्यन्तानां लोकानां तदन्तर्वर्तिनां च परमपुरुषसङ्कल्पकृतामुत्पत्तिविनाशकालव्यव-स्थामाह—

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः । रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ १७
अव्यक्ताद्व्यक्तयस्सर्वाः प्रभवन्त्यहरागमे । राज्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ १८
भूतग्रामस्स एवायं भूत्वाभूत्वा प्रलीयते । राज्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९

भा ॥ ये मनुष्यादिचतुर्मुखान्तानां मत्सङ्कल्पकृताहोरात्रव्यवस्थाविदो जनाः, ते ब्रह्मणश्चतुर्मुखस्य यद्वयः, तच्चतुर्युगसहस्रावसानं विदुः ; रात्रिं च तथारूपाम् । तत्र ब्रह्मणोऽहरागमसमये त्रैलोक्यान्तर्वर्तिनो

देहेन्द्रियभोग्यभोगस्थानरूपा व्यक्तयश्चतुर्मुखदेहावस्थादव्यक्तात् प्रभवन्ति। तत्रैवाव्यक्तावस्थाविशेषे चतुर्मुखदेहे रात्र्यागमसमये प्रलीयन्ते। स एवायं कर्मवश्यो भूतग्रामोऽहरागमे भूत्वाभूत्वा रात्र्यागमे प्रलीयते। पुनरप्यहरागमे प्रभवति। तथा वर्षशतावसानरूपयुगसहस्रान्ते ब्रह्मलोकपर्यन्ता लोकाः ब्रह्मा च * पृथिव्यप्सु प्रलीयते आपस्तेजसि लीयन्ते (सु २) इत्यादिक्रमेण अव्यक्ताक्षरतमःपर्यन्तं मय्येव प्रलीयन्ते। एवं मद्व्यतिरिक्तस्य कृत्स्नस्य कालव्यवस्थया मत्त उत्पत्तेर्मयि प्रलयाच्चोत्पत्तिविनाशयोगित्वमवर्जनीयमित्यैश्वर्यगर्वितप्राप्तानां पुनरावृत्तिरपरिहार्या। मामुपेतानां तु न पुनरावृत्तिप्रसङ्गः ॥ १७—१९ ॥

ता ॥ सहस्रेत्यादिश्लोकत्रयस्य पिण्डितार्थमाह—**ब्रह्मलोकपर्यन्तानामिति**। हिरण्यगर्भादिस्वातन्त्र्यसिद्धसत्यलोकादिस्थैर्यशङ्काव्युदासायाह—**परमपुरुषसङ्कल्पकृतामिति**। ईश्वरस्वातन्त्र्यमेव ह्रस्वन्यूनातिरिक्तदिनरात्र्यादिविचित्रव्यवस्थायां कारणम्। तथा चोच्यते * कालस्य हि च मृत्योश्च (भा. उ. ६७. १३), * कालचक्रं जगच्चक्रम् (भा. उ. ६७. १२) इत्यादिभिः। एवमेवोक्तमन्यत्र * ततो युगसहस्रान्ते संहरिष्ये जगत्पुनः। कृत्वा मत्स्थानि भूतानि चराणि स्थावराणि च ॥ (भा. मो. ३४१) इत्यादि। यत्तु **मानवे** * तद्वै युगसहस्रं तु ब्राह्मं पुण्यमहर्विदुः। रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः ॥ (मनु. १.७३) इति; तत्र य इत्येव पाठाद्यथाक्रममन्वयः। इह तु * सहस्र इति श्लोके * यत् इत्यस्याहश्शब्देनैव ह्रस्वयो घटते; ततश्च * ते इत्यस्य * ये इति पदमपेक्षितम्; तत्रापि * विदुस्तेऽहोरात्रविदो जनाः इत्यन्वये प्रसङ्गरहिताहोरात्रवेदिव्युत्पादनरूपं स्तुतिपरं वाक्यं प्रस्तुतासङ्गतं स्यात्; ततश्च * येऽहोरात्रविदो जनास्त एवं विदुरित्यन्वयः। एवं कालव्यवस्थायां प्रामाणिकत्वप्रतिपादनपरोऽत्र स्वीकार्य इत्यभिप्रायेणाह—**ये मनुष्यादीति**। अनूद्यमानमहोरात्रवेदित्वं यथाप्रसिद्धि सर्वविषयमेव भवितुमर्हति; तेन चतुर्मुखस्यापि मनुष्यादितुल्यता द्योतिता स्यादित्यभिप्रायेण **मनुष्यादी**त्यादिकमुक्तम्। ब्रह्मशब्दस्यात्र परमात्मविषयत्वभ्रमव्युदासाय **चतुर्मुख**शब्दः। **तस्यैव हि सहस्रयुगप्रतिनियताहोरजनीविभागः प्रसिद्ध** इति भावः। * सविशेषणौ विधिनिषेधौ विशेषणमुपसंक्रामतः इति न्यायात् * येऽहोरात्रविदो जना इत्यहोरात्रवेदितांशस्यानूदितत्वाच्च सहस्रयुगपर्यन्तनावेदनमेवात्र विधेयमित्यभिप्रायेण **तच्चतुर्युगसहस्रावसानं विदुरित्युक्तम्**। सहस्रयुगानि पर्यन्तं यस्य तत्सहस्रयुगपर्यन्तम्। युगशब्दश्चात्र प्रमाणान्तरानुसाराच्चतुर्युगपरः। अस्त्वेवं चतुर्मुखस्याहोरात्रव्यवस्था; ततः किं प्रस्तुतस्येत्यत्रोत्तरम् * अव्यक्तादिति श्लोकः। **तस्यार्थमाह—तत्रेति**। अयमभिप्रायः—अत्र व्यक्तिशब्दस्तावन्न महदादिविषयः, चतुर्मुखात्प्रागेव तदुत्पत्तेः। अतश्चतुर्मुखसृज्यमात्रविषय एवासौ। व्यज्यन्त इति व्यक्तयः। तत्रापि सत्यलोकादेः प्रतिकल्पं प्रलयाभावात् त्रैलोक्यान्तर्वर्तिदेहेन्द्रियादिवस्तुमात्रविषयत्वमेव स्वीकार्यम्। तेषां चोत्पत्तिः ब्रह्मशरीरादेव। ततश्चात्राव्यक्तशब्दोऽपि न मूलाव्यक्तविषयः; अपि तु तदुपादानकब्रह्मशरीरपरः। शरीरे चाव्यक्तशब्दप्रयोगस्सूत्रेऽप्युपपादितः * सूक्ष्मं तु तदर्हत्वात् (ब्र. १. ४. २) इति। एवंविधसृष्टिप्रलयकारणविशेषं तदनुच्छेदाच्च सृष्टिप्रलयसन्तानानुच्छेदमकृताभ्यागमकृतविप्रणाशप्रसङ्गपरिहारमुक्तस्यार्थस्य सर्वेष्वपि कल्पेषु अभिव्याप्तिं यथापूर्वकल्पनं च * भूतग्रामः इति श्लोकः प्रतिपाद्यतीत्यभिप्रायेणाह—**स एवाय**मिति। भूतशब्दोऽत्राचिद्विशिष्टक्षेत्रज्ञपरः। सृज्यत्वसंहार्यत्वहेतुभूतमवशत्वं कर्मनिबन्धनमेव हीत्यभिप्रायेण—**कर्मवश्य** इत्युक्तम्। * अहरागमे इति पदं * भूत्वेत्यत्राप्यनुवर्तनीयमित्यभिप्रायेण **अहरागमे भूत्वेत्यन्वय** उक्तः। इदं च नैमित्तिकप्रलयप्रतिपादनं श्रुत्यादिसिद्धप्राकृतप्रलयस्याप्युपलक्षणम्; तेन सत्यलोकविनाशसिद्धिः; * आब्रह्मभुवनाल्लोकाः (१६) इति **ह्युपक्रान्तमित्यभिप्रायेणाह—तथेति**। यद्वा रात्र्यागमशब्द एव

ब्रह्मणोऽन्तिमरात्र्यागममपि शक्त्या संगृह्णातीति भावः । तदेतत्सूचितम्—**वर्षशतावसानरूपयुगसहस्रान्त** इति । तथा चान्यत्र स्मर्यते—*निजेन तस्य मानेन आयुर्वर्षशतं स्मृतम् (वि. १.३.५) इति । एवमहरागमब्दोऽपि प्रथममहस्सङ्गृह्णाति । पृथिव्यादितत्त्वानामेव विलये तदारब्धानां ब्रह्मलोकब्रह्मशरीरब्रह्माण्डादीनां का कथेत्यभिप्रायेण **पृथिवीत्यादिश्रुतिरुदाहृता** । तमोवस्थाचिद्द्रव्यस्यैकीभावो हि परस्मिन्नेव देवे श्रूयते । अत्रापि * अहं कृत्स्नस्य जगतः प्रभवः प्रलयः (७. ६) इत्यादिकं ह्युच्यत इत्यभिप्रायेण—**मय्येवेत्युक्तम्** । एवं * यो ब्रह्माणं विदधाति पूर्वम् (श्वे. ६. १८) * एको ह वै नारायण आसीन्न ब्रह्मा नेशानः (महो. १. १) इति क्रमेण पुनर्ब्रह्मादिसृष्टिः, पुनश्च तत्प्रलय इत्यादिकमपि भाव्यम् । ईदृशसृष्टिप्रलयप्रतिपादनस्य प्रकृतोपयोगं दर्शयति—**एवमिति** । सर्वेषु सृष्टिप्रलयप्रकरणेष्विदमेव तात्पर्यं भाव्यम् । **मद्व्यतिरिक्तस्य कृत्स्नस्येत्यनेन** * अहं कृत्स्नस्य इति प्रागुक्तं स्मारितम् । उक्तं च **मोक्षधर्मेऽपि**—* नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् । ऋते तमेकं पुरुषं वासुदेवं सनातनम् ॥ (३४७. ३२) इति ॥ १७—१९ ॥

भा ॥ अथ कैवल्यं प्राप्तानामपि पुनरावृत्तिर्न विद्यत इत्याह—

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः । यस्स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २०
अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१

भा ॥ तस्मादव्यक्तात्—अचेतनप्रकृतिरूपात्पुरुषार्थतया परः—उत्कृष्टो भावोऽन्यो—ज्ञानैकाकारतया तस्माद्विसजातीयः, अव्यक्तः—केनचित्प्रमाणेन न व्यज्यत इत्यव्यक्तः, स्वसंवेद्यस्वासाधारणाकार इत्यर्थः; सनातनः—उत्पत्तिविनाशानर्हतया नित्यः, यस्सर्वेषु वियदादिभूतेषु सकारणेषु सकार्येषु विनश्यत्सु तत्रतत्र स्थितोऽपि न विनश्यति; सोऽव्यक्तोऽक्षर इत्युक्तः * ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते (१२. ३) * कूटस्थोऽक्षर उच्यते (१५. १६) इत्यादिषु ; तं वेदविदः परमां गतिमाहुः । अयमेव * यः प्रयाति त्यजन् देहं स याति परमां गतिम् (८.१३) इत्यत्र परमगतिशब्दनिर्दिष्टोऽक्षरः प्रकृतिसंसर्गवियुक्तस्वरूपेणावस्थित आत्मेत्यर्थः । यमेवंभूतं स्वरूपेणावस्थितं प्राप्य न निवर्तन्ते ; तन्मम परमं धाम—परं नियमनस्थानम् । अचेतनप्रकृतिरेकं नियमनस्थानम् ; तत्संसृष्टरूपा जीवप्रकृतिर्द्वितीयं नियमनस्थानम् ; अचित्संसर्गवियुक्तं स्वरूपेणावस्थितं मुक्तस्वरूपं परमं नियमनस्थानमित्यर्थः । तच्चापुनरावृत्तिरूपम् । अथवा प्रकाशवाची धामशब्दः ; प्रकाशश्चेह ज्ञानमभिप्रेतम् ; प्रकृतिसंसृष्टात् परिच्छिन्नज्ञानरूपादात्मनोऽपरिच्छिन्नज्ञानरूपतया मुक्तस्वरूपं परं धाम ॥ २० ॥ २१ ॥

ता ॥ * परः इत्यादिश्लोकद्वयस्यार्थमाह—**अथेति** । अयमभिप्रायः—भगवन्तं प्राप्तानाम् अपुनरावृत्तिः प्रागेवोक्ता ; अव्यक्तात्परत्वेन निर्दिष्टोऽक्षरश्च जीव एव भवितुमर्हति, *अपरेयमितस्त्वन्याम् (७. ५) इत्यादि प्रत्यभिज्ञानात् ; वक्तव्या च कैवल्यार्थिनामवरोहाभावादपुनरावृत्तिः ; अत एव तत्परमेवेदं श्लोकद्वयम्—इति । अव्यक्तस्यैव पूर्वप्रकृतत्वात्, अत्राप्यव्यक्तादित्येव पदच्छेदः । तस्य चापेक्षया परशब्दान्यशब्दाभ्यामप्यन्वयः । तत्र च पौनरुक्त्यव्युदासायोत्कृष्टत्वाभिधानमुखेन पुरुषार्थरूपत्वपरः परशब्दः । तत एव च स्वरूपभेदस्य सिद्धत्वादन्यशब्दः प्रकारान्यत्वपरः । स च प्रकारभेदश्चेतनत्वरूप एव प्रमाणसिद्ध इत्यभिप्रायेणाह—**तस्मादिति** । भावशब्दोऽत्र पदार्थमात्रवाची । **व्यक्तः इति पदच्छेदो न युक्तः, * अव्यक्तोऽक्षरः इत्यत्रैवाभिधानात् ; दुर्ग्रहे च जीवे व्यक्तशब्दप्रयोगानुपपत्तेरित्यभिप्रायेणाह—केनचिदिति** । ननु जीवस्याव्यक्तत्वमयुक्तं, प्रत्यक्षानुमानागमैर्यथासंभवं तद्व्यक्तेः, अन्यथा खपुष्पत्व-

प्रसङ्गादित्यत्राह—**स्वसंवेद्येति**। प्रमाणान्तराणि हि साधारण्येन तत्प्रतिपादकानीति भावः। नित्यत्वे द्वितीयाध्यायोक्तहेतुस्मारणम् **उत्पत्तिविनाशानर्हतयेति**। भूतशब्दोऽत्र महाभूतपरः, तद्विनाशेऽप्यात्मस्थितिवचनेन नित्यत्वस्यानायासलाभात्। तत्र सर्वशब्दाभिप्रायवशादेव सकारणत्वं सकार्यत्वं च सिद्धमित्यभिप्रायेणाह—**वियदादीति**। प्रसक्तो हि नाशो जीवे निषेध्यः; प्रसङ्गश्चात्र नश्यत्पदार्थानुप्रवेशवशात्; यथा तिलेषु दह्यमानेषु तदनुप्रविष्टं तैलमपि दह्यते; ततश्च सर्वेषु भूतेषु नश्यत्स्वित्यस्यैव सामर्थ्यलब्धमुक्तं **तत्र तत्र स्थितोऽपीति**। *यस्स सर्वेष्वित्यत्र स इत्यस्य प्रयोजनमान्ध्यादुत्तरत्रापेक्षितत्वाच्च **सोऽव्यक्तोऽक्षर** इत्यन्वय उक्तः; यद्वाऽयमध्याहारः। उक्त इत्यस्य कुत्रेत्याकाङ्क्षायामाह—**ये त्विति**। अनयोः प्रकरणयोरक्षरशब्दस्य जीवविषयत्वं तत्रैव व्यक्तम् *उत्तमः पुरुषस्त्वन्यः (१५. १७) इत्यादिभेदव्यपदेशात्। अतोऽत्राप्यध्याये *अक्षरं ब्रह्म परमम् (३) *अव्यक्तोऽक्षरः इत्यक्षरशब्दाभ्यां परिशुद्धजीव एव व्यपदिश्यते। *ये त्वित्यत्राक्षराव्यक्तशब्दयोर्द्वयोरपि प्रयोगादत्रापि *अव्यक्तोऽक्षर इत्युक्तः इति तदुभयनिर्देशाच्च तत्प्रत्यभिज्ञासिद्धेरिति भावः। ननु कथं वक्ष्यमाणप्रकरणस्थमत्र *उक्तः इत्यनेनान्विततयोपादीयते? इत्थं—तत्तत्प्रकरणोपबृंहणीयश्रुत्यभिप्रायेण तदुपादानात्, *निहताः पूर्वमेव (गी. ११.३३) इतिवत्त्वसङ्कल्पारोहाद्वेति। *आहुरित्यत्र कर्त्रपेक्षायां *यदक्षरं वेदविदो वदन्ति (११) इति प्रसक्तमुचितं च कर्तृविशेषमाकृष्याह—**तं वेदविद** इति। *स याति परमां गतिम् (१३) इति सामान्यनिर्देश एतेन विशेषित इति दर्शयति—**अयमेव यः प्रयातीत्यादिना**। यद्वा अत्र *तमाहुः परमां गतिमिति निर्देशः *स याति परमां गतिम् (१२) इति पूर्वोक्तप्रत्यभिज्ञापनार्थ इति भावः। तत्राक्षरपरमगतिशब्दयोः प्रयोगयोग्यतां दर्शयति—**प्रकृतीति**। अनिवृत्तिहेतुत्वेनायमर्थ उक्त इत्यभिप्रायेण **एवंभूतं स्वरूपेणावस्थितमित्युक्तम्**। *तद्धाम परमं मम इति संबन्धमात्रविधानस्य प्रागेव सिद्धेः स्थानस्य च स्थानिसापेक्षत्वनियमात् *य आत्मनि तिष्ठन् (शत. माध्य. १४. ६. ५. ३०) इत्याद्युक्तमधिष्ठेयं स्थानपर्यायं धामशब्देन विवक्षितमित्याह—**नियमनस्थानमिति**। अत्र किमपरं नियमनस्थानं यद्व्यवच्छेदाय परमशब्द इत्यत्राह—**अचेतनेति**। अत्र परमधामत्वव्यपदेशात्परिशुद्धात्मविषयत्वं सिद्धम्; ततश्चाशुद्धो जीवोऽप्यपर एव विवक्षित इत्याह—**तत्संसृष्टेति**। यदि मुक्तोऽपि परमात्मपरतन्त्रः, तर्हि स्वतन्त्रेण परमात्मना पुनरपि संसारगर्ते प्रक्षिप्येतेत्यत्राह—**तच्चेति**। अयं भावः—अविद्यादिर्हि संसारकारणम्, न तु पारतन्त्र्यम्; अविद्यादेश्च प्रक्षयादीश्वरकारुण्यादीनां च स्वाभाविकत्वान्न मुक्तस्य संसारगन्ध इति। यद्वा न केवलं भगवत्प्राप्तिरेव अपुनरावृत्तिरूपा, किंतु परिशुद्धजीवप्राप्तिरपि अवरोहणाभावात्तथेति भावः। नियमनस्थानमित्याश्रितविशेषणोपादानानुपपत्त्यरुचेराह—**अथवेति**। अस्तु धामशब्दस्तेजःपर्यायः प्रकाशवाची, तस्य कथमत्रान्वय इत्यत्राह—**प्रकाशश्चेति**। विशेषणफलितं दर्शयति—**प्रकृतिसंसृष्टादिति**। प्रकाशपक्षे तत् परमं धाम, मच्छेषभूतमिति वाक्यार्थः। यद्यपि *अपरेयम् (७.५) इत्यादिना प्रागेव स्वशेषत्वमुक्तम्, तथाऽपि समष्टिचेतनमात्रविषयत्वं तत्र प्रतीयते; इह तु मुक्तस्यापि स्वशेषत्वमुच्यत इत्यपौनरुक्त्यम्॥ २०॥ २१॥

मा॥ ज्ञानिनः प्राप्यं तु तस्मादत्यन्तविभक्तमित्याह—

पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तस्स्थानि भूतानि येन सर्वमिदं ततम्॥ २२

भा ॥ * मत्तः परतरं नान्यत्किञ्चिदस्ति धनंजय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ (७. ७), *मामेभ्यः परमव्ययम् (७. १३) इत्यादिना निर्दिष्टस्य यस्य अन्तस्स्थानि सर्वाणि भूतानि, येन च परेण पुरुषेण सर्वमिदं ततम्, स परः पुरुषः * अनन्यचेतास्सततम् (८. १४) इत्यनन्यया भक्त्या लभ्यः ॥ २२ ॥

ता ॥ * पुरुषस्स इति श्लोके तुशब्देनार्थान्तरद्योतनादनन्यया भक्त्येत्यस्य सामर्थ्यात्पुरुषशब्दस्य परमात्मनि पुरिशयत्वपूर्णत्वपूर्वसद्भावपुरुदानादिभिर्निमित्तैः * सहस्रशीर्षा पुरुषः (पु.) इत्यादिप्रयोगप्राचुर्यात्परशब्देन विशेषणाच्च पूर्वोक्तात्फलादधिकफलोपदेशार्थोऽयं श्लोक इत्यभिप्रायेणाह—**ज्ञानिन** इति । **विभक्तं** विवेचकैरिति शेषः । विलक्षणमिति वाऽर्थः । गगनाद्यन्तस्थितावपि गगनादेः परत्वाभावात्तत्सिद्ध्यर्थं * यस्येत्यादिप्रसिद्धवन्निर्देशोऽत्र पूर्वोक्तपरत्वपर इति दर्शयति—**मत्त** इति । अनुवादपुरोवादयोरैकार्थ्यमिति भावः । * यस्मात्परं नापरम् (श्वे. ३. ९) इत्यारभ्य * तेनेदं पूर्णं पुरुषेण सर्वमिति श्रुतिस्मारणाय **येन च परेण पुरुषेणेत्युक्तम्** । भक्तेरनन्यत्वं कीदृशमित्यत्राह—**अनन्यचेता** इति ॥ २२ ॥

भा ॥ अथात्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाह । द्वयोरप्यर्चिरादिका गतिश्श्रुतौ श्रुता, सा चापुनरावृत्तिलक्षणा । यथा पञ्चाग्निविद्यायां * तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः (छा. ५. १०. १) इत्यादौ अर्चिरादिकया गतस्य परब्रह्मप्राप्तिरपुनरावृत्तिश्चाम्नाता * स एनान् ब्रह्म गमयति....एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते (छा. ४.१५.६) इति । न च प्रजापतिवाक्यादौ श्रुतपरविद्याङ्गभूतात्मप्राप्तिविषयेयं * तद्य इत्थं विदुरिति गतिश्रुतिः, *ये चेमेऽरण्ये श्रद्धा तप इत्युपासते इति परविद्यायाः पृथक्श्रुतिवैयर्थ्यात् । पञ्चाग्निविद्यायां च * इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति (छा. ५. ९. १) इति * रमणीयचरणाः.....कपूयचरणाः (छा. ५. १०. ७) इति पुण्यपापहेतुको मनुष्यादिभावोऽपामेव भूतान्तरसंसृष्टानाम्, आत्मनस्तु तत्परिष्वङ्गमात्रमिति चिदचितोर्विवेकमभिधाय * तद्य इत्थं विदुः * तेऽर्चिषमसंभवन्ति * इमं मानवमावर्तं नावर्तन्ते इति विविक्ते चिदचिद्वस्तुनी त्याज्यतया प्राप्यतया च य इत्थं विदुस्तेऽर्चिरादिना गच्छन्ति, न च पुनरावर्तन्त इत्युक्तमिति गम्यते । आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च * स एनान् ब्रह्म गमयतीति ब्रह्मप्राप्तिवचनादचिद्विमुक्तमात्मवस्तु ब्रह्मात्मकतया ब्रह्मशेषतैकरसमित्यनुसन्धेयम्, तत्कतुन्यायाच्च । परशेषतैकरसत्वं च * य आत्मनि तिष्ठन्... यस्यात्मा शरीरम् (शत. माध्य. १४. ६. ५. ३०) इत्यादिश्रुतिसिद्धम् ।

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३
अग्निर्ज्योतिरहश्शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४

भा ॥ अत्र कालशब्दो मार्गस्याहःप्रभृतिसंवत्सरान्तकालाभिमानिदेवताभूयस्त्या मार्गोपलक्षणार्थः । यस्मिन्मार्गे प्रयाता योगिनोऽनावृत्तिं, पुण्यकर्माणश्चावृत्तिं यान्ति ; तं मार्गं वक्ष्यामीत्यर्थः । अग्निर्ज्योतिरहश्शुक्लष्षण्मासा उत्तरायणमिति संवत्सरादीनां प्रदर्शनम् ॥ २३ ॥ २४ ॥

ता ॥ * यत्र काले त्वित्यादेः * योगयुक्तो भवार्जुनेत्यन्तस्य तात्पर्यमाह—**अथेति** । अत्र धूमादिमार्गकथनं हेयत्वार्थम् ; अर्चिरादिमार्गोपदेशस्तु तदनुसन्धानार्थ एवेति तत्रैव तात्पर्यमिति भावः । ननु परमपुरुषार्थनिष्ठस्यैव अर्चिरादिगतिः, तत्कथमत्र साधारण्यमुच्यत इत्यत्राह—**द्वयोरपीति** । आत्मनिष्ठस्याप्य[नाव्]पुनरावृत्तेः पूर्वोक्तत्वात्तस्याप्य-

र्चिरादिकैव गतिरिति दर्शयितुमाह—**सा चेति** । साधारण्यापुनरावृत्त्योश्श्रुतिमेव दर्शयति—**यथेति** । अग्निफलमेवाङ्गेऽपि व्यपदिश्यत इत्याशङ्क्य परिहरति—**नचेति** । हेतुमाह—**येचेति** । यद्यप्यग्निफलमेवाङ्गेऽपि निर्देष्टुं युक्तम्, तथाऽप्यग्निना सहाङ्गस्य तुल्यत्वेन पृथङ्निर्दिष्टस्य तत्फलनिर्देशो न युक्त इति भावः । एतेन प्रथमषट्कोदितप्रत्यगात्मवेदनादत्रत्याक्षरयाथात्म्यानुसन्धानस्य भेदोऽपि दर्शितः । * तद्य इत्थं विदुः इत्यस्य प्रत्यगात्मनिष्ठविषयत्वं कथमित्यत्राह—**पञ्चाग्निविद्यायां चेति** । * आपः पुरुषवचसो भवन्ति इति त्रिवृत्कृतानामभिधीयमानत्वाद्भूतान्तरसंसर्गसिद्धिः । **अपामेवेत्यात्मस्वरूपपरिणामव्युदासायोक्तम्** । एवंविधशरीरसंबन्धमात्रस्याप्यौपाधिकत्वप्रदर्शनायाह—**पुण्यपापहेतुक इति** । * रमणीयचरणा रमणीयां योनिं....कपूयचरणाः कपूयां योनिमित्यादिवचनात्र केवलाचिद्विषयमिदं प्रकरणम् । *तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते इत्युक्तयद्वृत्तद्वयस्य * तेऽर्चिषमित्येकेन तद्वृत्तेन प्रतिनिर्देशादुभयोर्गतिरविशिष्टेति ज्ञापनाय * तद्य इत्थं विदुः * तेऽर्चिषमिति व्यवहितमुपात्तम् । इत्थंशब्दानूदितं प्रस्तुताकारविशेषं दर्शयति—**विविक्ते इति** । ननु * तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयतीत्यर्चिरादिना गतस्य ब्रह्मप्राप्तिश्श्रूयते; तत्कथं केवलात्मोपासकस्य ब्रह्मप्रापकार्चिरादिप्राप्तिरित्यत्राह—**आत्मयाथात्म्येति** । अयं पञ्चाग्निविद्यानिष्ठो न केवलात्मोपासकः; अपितु ब्रह्मात्मकस्वात्मानुसन्धायीति भावः; अन्यथा तत्क्रतुन्यायविरोध इत्यभिप्रायेणाह—**तत्क्रतुन्यायाच्चेति** । चकार इतरेतरयोगे । यथावस्थितात्मानुसन्धानस्य परशेषैकरसत्वानुसन्धानरूपत्वे प्रमाणमाह—**य आत्मनीति** । आदिशब्देन * पतिं विश्वस्य (ना. ६. ११. ३) * करणाधिपाधिपः (श्वे. ६. ९) इत्यादिवाक्यशतं गृह्यते । अत्र शारीरकभाष्यादिविरोधो मन्दैराशङ्कितः; इह तावच्छ्रुतिसूत्रभाष्यादिष्वन्यत्र च पञ्चाग्निविदः परमात्मात्मकस्वात्मानुसन्धातृत्वमर्चिरादिगतिश्चाविशेषेणोच्यते । तस्याश्च ब्रह्मगमयितृत्वस्य श्रुत्यादिष्विह च * तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः इति सिद्धत्वात् पञ्चाग्निविदोऽपि परमात्मप्राप्तिरस्त्येवेति स्वीकर्तव्यम् । तत्र प्राप्तौ ज्ञानिनां परमात्मा स्वविशिष्टो भोग्यः; अक्षरयाथात्म्यनिष्ठानां तु स्वस्वरूपमेव पूर्वं भोग्यम्; वस्वादिपदप्राप्तिपूर्वकब्रह्मप्राप्तिसाधनमधुविद्यादिन्यायादन्ततो ब्रह्मप्राप्तिः; ईदृशपर्वक्रमप्रतिनियमश्च प्राचीनापेक्षाभेदात्; स च प्राचीनकर्मविशेषादिति * चतुर्विधा भजन्ते माम् (७. १६) इति प्रागेव दर्शितः । नचात्र जिज्ञासोरन्य एवात्मयाथात्म्यविदिति भाष्यते, जिज्ञासुवेद्यतयोक्तस्वभावविसर्गयोरत्र च पञ्चाग्निविद्योदाहरणात्; मध्ये च कैवल्यार्थिन एव मूर्धन्यनाड्या निष्क्रमणमनावृत्तिश्चोक्ता; आत्मयाथात्म्याक्षरयाथात्म्यशब्दयोश्चात्र न भिन्नार्थत्वम्; तस्योपासने किञ्चिदस्ति विशेषः; अक्षरयाथात्म्यविदः—परमात्मशरीरभूतस्वात्मोपासकाः, ज्ञानिनस्तु—स्वात्मशरीरकपरमात्मोपासका इति । अयमेव विशेषः * तद्य इत्थं विदुर्ये चेमेऽरण्ये (छा. ५. १०. १) इति विभागनिर्देशाभिप्रेत इति भाष्यादिषूक्तः । **सारे तु** * उभयेऽपि हि परिपूर्णं ब्रह्मोपासते मुखमेदेन; स्वात्मशरीरकं ब्रह्म केचन, ब्रह्मात्मकस्वात्मानमितरे (४. ३. १४) इति । अत एव सप्तमे प्रक्रान्तो जिज्ञासुः परमात्मप्राप्तिकामज्ञानिव्यतिरिक्तत्वाद्ब्रह्मात्मकस्वात्मानुसन्धायीति न भ्रमितव्यम् । तस्य चोदारकोटिमात्रे निवेशस्स्वात्मानुभवविलम्बविमुखज्ञानिव्यतिरेकात् । अर्चिरादिगतिनिषेधस्तु ब्रह्मात्मकत्वानुसन्धानरहितस्वात्मोपासनविषयः । इदमपि भाष्यादिषु व्यक्तमेवोक्तं—*तस्मादचिन्मिश्रं केवलं वाऽचिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते न तानयति; अपि तु परं ब्रह्मोपासीनान्, आत्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानातिवाहिको गणो नयति (ब्र. ४. ३. १५) इत्यादिभिः । **अत्पुनरुच्यते**—* ये तु शिष्टाश्रयो भक्ताः फलकामा हि ते मताः । सर्वे व्यवनधर्माणः

(भा. मो. ३५०) इति; तत्रापि आत्ममात्रानुभवसुखस्य अस्थिरत्वादेव च्यवनधर्मत्वमुच्यते; न तावता पुनस्संसार-प्रसङ्गः, * इन्द्रलोकात्परिभ्रष्टो मम [गेय]लोकपरायणः। प्रमुक्तस्सर्वसंसारैर्मम लोकं च गच्छति (व. पु. १३९. ९८) * प्रच्युतो वा एषोऽस्माल्लोकादगतो देवलोकम् (यजु. ६.१.१.५) इत्यादिष्विवोत्तरोत्तरातिशयितपदप्राप्तावपि पूर्वपदभ्रंश-मात्राच्च्यवनधर्मत्ववाचोयुक्तेरविरोधात्, परिमितसुखानुभवविलम्बेन तदानीं निरतिशयसुखानुभवाद्रष्टत्वेनापि निन्दो-पपत्तेश्च। उपासनदशानुभूते परमात्मनि फलदशायां किञ्चित्कालमनुभवविच्छेदाद्वा प्राप्तभ्रंशलक्षणं च्यवनधर्मत्वम्। *प्रतिबुद्धस्तु मोक्षभाक् (भा. मो. ३५०) इति चाव्यवहितमोक्षभाक्त्वं प्रतिबुद्धस्योच्यते; न तावताऽन्यस्य मोक्षाभावः, * भुक्त्वा च भोगान्विपुलांस्त्वमन्ते मत्प्रसादतः। ममानुस्मरणं प्राप्य मम लोकमवाप्स्यसि॥ (वि. ५.१९.२६) इति-वदविरोधात्। यथा च मुमुक्षोरेव कस्यचिन्मध्ये ब्रह्मकायनिषेवणसुखमुच्यते; तथाऽत्रापि स्थानविशेषे स्वात्मानुभव-विलम्बः। यथा च * अथवा नेच्छते तत्र ब्रह्मकायनिषेवणम्। उत्क्रामति च मार्गस्थ[श्शान्ती]श्शीतीभूतो निरामयः॥ (मो. ध. १९४.२७) इत्यादिना ब्रह्मकायनिषेवणसङ्गात् मुक्तस्य देवयानेन मार्गेण परमाकाशगमनमुच्यते; तद्वदिहापि स्वात्मानुभवस्थानात्प्रच्युतस्य परमव्योमाधिरोहस्स्यात्; अर्चिरादिगतिश्चास्यावान्तरफलानुभवात्पश्चाद्वा, गतिमध्ये वा। दक्षिणायनमृतस्य ,चन्द्रमसस्सायुज्यवद्विश्रममात्ररूपोऽयमवान्तरफलानुभव इत्युभयथाऽपि न विरोधः। एतेन पश्चादे-वास्याप्रतीकालम्बनत्वमित्यपि निरस्तं, मधुविद्यावदेव प्रथममपि तदुपपत्तेः। स्मरन्ति च स्वात्मानुभवस्थानं मुक्तिस्थाना-दर्वाचीनं * योगिनाममृतं स्थानं स्वात्मसन्तोषकारिणाम्। एकान्तिनस्सदा ब्रह्मध्यायिनो योगिनो हि ये। तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः॥ (वि. १.६.३८) इति। अमृतस्थानवर्तिनां च मुक्तत्वव्यपदेशो जरामरणादिविरहात्पुन-र्जन्महेतुभूतपुण्यपापविगमाच्च। अस्ति च परित्यक्तस्थूलदेहानामपि तत्तदुपासनविशेषाधीनमपवर्गादर्वाचीनं फलम्। तच्च प्रकृतिलयादिशब्देन साङ्ख्याः पठन्ति * धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण। ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः॥ वैराग्यात्प्रकृतिलयस्संसारो भवति राजसाद्रागात्। ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः॥ (सां. का. ४४, ४५) इति। * विपर्ययादिष्यते बन्धः इत्यत्रच **वाचस्पतिना** व्याख्यातं—* विपर्ययात्—अतत्त्वज्ञानात्, इष्यते बन्धः; स च त्रिविधः—प्राकृतिको वैकृतिको दाक्षिणिकश्चेति। तत्र प्रकृतावात्मज्ञानाद्ये प्रकृतिमुपासते; तेषां प्राकृतिको बन्धः। यः पुराणे प्रकृतिलयान् प्रकृत्योच्यते—* पूर्णं वर्षसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः इति। वैकारिको बन्धः तेषाम्; ये विकारानेव भूतेन्द्रियाहङ्कारबुद्धीरुपासते पुरुषबुद्ध्या; तान् प्रतीदमुच्यते; यथा—* दशमन्वन्तराणीह तिष्ठन्तीन्द्रिय-चिन्तकाः। भौतिकास्तु शतं पूर्णं सहस्रं त्वभिमानिकाः। बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः। ते खल्वमी विदेहा ये तेषां वैकृतिको बन्धः इति। एवमव्यक्तादितत्त्वचिन्तकानामिव प्रत्यगात्मतत्त्वचिन्तकानामपि तदुचितदेशकालं ततोऽतिशयितं फलमुपपद्यते। अत एव भूमविद्यायां प्रत्यगात्ममात्रोपासकस्याप्यतिवादित्वमुक्तम्। ब्रह्मात्मकस्वात्मानु-सन्धाने तु ब्रह्मप्राप्तौ विश्रमादपुनरावृत्तिरिति विशेषः। अत एवाक्षरानुभवस्यान्तवत्त्वे तदर्थिनः कथमैश्वर्यार्थिवदपवर्गाधि-कार्यन्तरत्वमित्यपि निरस्तम्, बाह्यान्तरभोक्तव्यविभागादावृत्त्यनावृत्तियोग्यताभेदाच्च तद्भेदोपपत्तेः। विलम्बाक्षमाणां पुन-रियं निष्ठा—* सर्वधर्मांश्च संत्यज्य सर्वकामांश्च साक्षरान्। लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो (विह. सं.) इति। * कैवल्यं भगवन्तं च मन्त्रोऽयं साधयिष्यति (बृ. हा. ३.४०) इत्यादिष्वपि कैवल्यशब्देनात्ममात्रानुभवसुखं तदपेक्षिभिः प्राप्यमुच्यते। एतच्चान्तरायकोटिनिविष्टत्वादादितस्सावधाना ज्ञानिनः परिहरन्ति। केचित्तु ब्रह्मानुभववैमुख्येन नित्य-मात्मानुभवसुखमिच्छन्ति; न तत्र भाष्यकारादिसंप्रदायं प्रमाणं युक्तिं वा पश्यामः। निश्शेषकर्मक्षये स्वाभाविकरूपावि-

भविना ब्रह्मानुभवावश्यंभावात्, कर्मशेषयोगे तु संसारप्रसङ्गाच्च । जरामरणादिहेतुभूतसर्वकर्मविनाशादसंसारः, तावन्मात्रेण च मुक्तत्वव्यपदेशः ; ब्रह्मानुभवप्रतिबन्धककर्मणस्त्वविनाशात्तदनुभवाभाव इति चेत् ; अस्त्वेवम्, एतत्कर्म परस्तादपि न नङ्क्ष्यतीत्यत्र न नियामकमस्ति—इत्येषा दिक् ॥

परप्राप्त्यादिरहितनित्यकैवल्यकल्पना । सूत्रभाष्यश्रुतिस्मृत्याद्यबाधेन न सिध्यति ॥
अतोऽधिकारिभेदेन ह्यवस्थाभेदमाश्रिताः । अन्यामपि गतिं प्राञ्चः प्रतीचीं प्रत्यपादयन् ॥
तत्रावृत्तिपरप्राप्तिवैरूप्यादेरयोगतः । अस्मदुक्तं श्रुतिस्मृत्योरनपायं रसायनम् ॥

ननु—अर्चिरादिगतिमाहेति कथमुच्यते? * यत्र काले इति कालविशेषो ह्युपक्रम्यत इत्यत्राह—**अत्र कालशब्द इदि** । शारीरके दक्षिणायनादिमृतस्यापि मोक्ष उक्तः * अतश्चायनेऽपि दक्षिणे (ब्र. ४. २. १९) इति । अत्र च * **शुक्लकृष्णे गती ह्येते** (२६) इत्यनन्तरमेवोच्यते ; अन्यथा * अग्निर्ज्योतिरित्यादिना च विरुध्येत ; * नैते सृती पार्थ जानन् (२७) इति च मार्गवाचिना शब्देनोपसंहियत इति भावः । **यत्र काले प्रयाता** इति व्यवहितेन संबन्धं दर्शयन् योगिनामावृत्तिः कथमिति च शङ्कां परिहरन् * यत्र काले इति श्लोकस्य वाक्यार्थमाह—**यस्मिन्निति** । अत्र योगिनः—ज्ञानिनः, पुण्यकर्मसंबन्धिनश्च, * सरूपाणामेकशेष एकविभक्तौ (अष्टा. १. २. ६४) इत्यनुशासनात् । यद्वा पुण्यकर्माण इत्यध्याहृतम् । *तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षड्दङ्डेति मासांस्तान्, मासेभ्यस्संवत्सरम् (छा. ५.१०.१) इत्यादिश्रुत्यनुसारेणोक्तं **संवत्सरादीनां प्रदर्शन**मिति । एतद्वैशद्यमर्चिरादिपादे । तत्रैव संगृहीतं **वरदगुरुभिः** * अर्चिरहस्सितपक्षानुदगयनाब्दमरुदर्केन्दून् । अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः ॥ (तत्त्व) इति । अग्निर्ज्योतिरिति अग्निरूपज्योतिरित्यर्थः । तेन देवयानप्रथमपर्वस्थार्चिर्विवक्षा । अत एवाग्निज्योतिषोर्भिन्नदेवतात्वं कालाभिमानि[विशेषत्वं]देवतात्वं च वदन्तः प्रत्युक्ताः ॥ २३ ॥ २४ ॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५

भा ॥ एतच्च धूमादिमार्गस्थपितृलोकादेः प्रदर्शनम् । अत्र योगिशब्दः पुण्यकर्मसंबन्धिविषयः ॥ २५ ॥

ता ॥ पितृलोकादेरित्यादिशब्देन आकाशचन्द्रग्रहणम् । योगिनो धूमादिमार्गः पुनरावृत्तिश्च कथमुच्यत इत्यत्राह—**अत्र योगिशब्द** इति । अत्र योगशब्द उपायमात्रवाची ; यद्वा संबन्धमात्रवाची ; धूमादिसामर्थ्यात्तु पुण्यकर्मस्वरूपसंबन्धिविशेषसिद्धिरिति भावः । * अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति (छा. ५. १०. ३) इत्यादिका श्रुतिरत्रोपबृंहिता ॥ २५ ॥

शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥ २६

भा ॥ शुक्ला गतिः—अर्चिरादिका, कृष्णा च धूमादिका । शुक्लयाऽनावृत्तिं याति ; कृष्णया तु पुनरावर्तते । एते शुक्लकृष्णे गती ज्ञानिनां, विविधानां पुण्यकर्मणां च श्रुतौ शाश्वते मते । * तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति (छा. ५. १०. १) * अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति (छा. ५. १०. ३) इति ॥ २६ ॥

ता ॥ उक्तमार्गद्वये श्रुतिप्रसिद्धिः प्रदर्श्यते—*शुक्लकृष्णे इति श्लोकेन। अत्र शुक्लपक्षकृष्णपक्षान्वयाद्वा, शुद्ध्यशुद्धिविवक्षया वा, अभिमन्तृस्वरूपस्याभिमन्तव्ये आरोपादेर्वा, गत्योश्शुक्लकृष्णशब्दोपचारः। अत्राधिकृतवर्गद्वय-विषयजगच्छब्दाभिप्रेतप्रदर्शनं—**ज्ञानिनां विविधानां पुण्यकर्मणां** चेति। *इष्टापूर्ते दत्तमित्युपासते इत्युक्ततत्तत्कर्म-निष्ठभेदाभिप्रायेण विविधशब्दः। हिशब्देन श्रुतिप्रसिद्धिर्द्योतितेति **श्रुताविति**युक्तम्। शाश्वतत्वं प्रवाहरूपेणानाद्य-नन्तत्वं व्यवस्थितत्वम् ॥ २६ ॥

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७

भा ॥ एतौ मार्गौ जानन् योगी प्रयाणकाले कश्चन न मुह्यति; अपि तु स्वेनैव देवयानेन पथा याति। तस्माद्दहरहरर्चिरादिगतिचिन्तनाख्ययोगयुक्तो भव ॥ २७ ॥

ता ॥ *नैते सृती इति श्लोकेन यद्यपि मार्गचिन्तनमप्युपासनवत्परमपुरुषप्राप्त्यर्थमेव; तथाऽपि मार्गज्ञानम् अभिगन्तुरत्याकुलगमनार्थमिति लोके सिद्धम्; अत्रापि तथोपकारस्संभवन्न परित्याज्यः; तत्प्रसादादेव हि तत्सिद्धिरपी-त्यभिप्रायेणाह—**एताविति**। **कश्चने**ति—कश्चिदपीत्यर्थः। **न मुह्यति**—*तत्प्रकाशितद्वारः (ब्र. ४. २. १६) इत्यादि-प्रकारेण स्पष्टमार्गो भवतीत्यर्थः। मार्गद्वयज्ञानं हेयमार्गप्रहाणार्थमित्यभिप्रायेणाह—**अपि त्विति**। गतिज्ञानस्य फलमुप-दिश्य तस्मादिति हेतुतया परामृश्य साक्षाद्योगविधानस्यासङ्गतत्वाद्योगशब्दोऽत्र ध्यानमात्रविषयः; तच्च ध्यानं प्रस्तुत-गतिचिन्तनरूपमेव भवितुमर्हतीत्यभिप्रायेणाह—**तस्मादि**ति ॥ २७ ॥

अथाध्यायद्वयोदितशास्त्रार्थवेदनफलमाह—

वेदेषु यज्ञेषु तपस्सु चैव दाने च यत्पुण्यफलं प्रदिष्टम्।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥ २८

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
अक्षरपरब्रह्मयोगो नाम अष्टमोऽध्यायः ॥ ८ ॥

भा ॥ ऋग्यजुस्सामाथर्वरूपवेदाभ्यासयज्ञतपोदानप्रभृतिषु सर्वेषु पुण्येषु यत्फलं निर्दिष्टम्, इदम्—अध्यायद्वयोदितं भगवन्माहात्म्यं विदित्वा तत्सर्वमत्येति—एतद्वेदनसुखातिरेकेण तत्सर्वं तृणवन्मन्यते। योगी ज्ञानी च भूत्वा ज्ञानिनः प्राप्यं परमाद्यं स्थानमुपैति ॥ २८ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये अष्टमोऽध्यायः ॥ ८ ॥

ता ॥ *इदं विदित्वेति सामान्यतो निर्देशादविशेषाच्चैकप्रकरणभूताध्यायद्वयार्थो गृह्यत इत्यभिप्रायेणाह—**अथेति**। *वेदेष्वित्यपि यज्ञादिवत्फलकारणतयोपादानम्; नतु प्रतिपादकतया; तदा यज्ञादिफलव्यतिरिक्तविषयतया सङ्कोचनीयत्वापातात्। वेदाभ्यासस्य च दुरितक्षयादिफलप्रदत्वं श्रुत्यादिसिद्धम्। यज्ञादिफलानां प्रतिपादकतयोपादाने च प्रस्तुताध्यायद्वयार्थस्यापि वेदार्थत्वात्ततोऽपि सङ्कोचस्स्यात्। तदेतत्सर्वमभिप्रेत्य **वेदाभ्यासे**त्युक्तम्। *दाने चेति **चकारस्यानुक्तसमुच्चायकत्वप्रदर्शनाय—प्रभृतिशब्दः**। *पुण्यफलमित्यत्र पुण्यशब्देन फलविशेषणतया यज्ञादीनामेव

सामान्यतो निर्देशः फलस्य श्लाघ्यताप्रदर्शनार्थ इत्यभिप्रायेण यज्ञादिविशेष्यतया **पुण्येष्वित्युक्तम्** । **अध्यायद्वयोदितं भगवन्माहात्म्यमिति** । सप्तमारम्भे हि भगवन्माहात्म्यं प्रक्रान्तम्; तदनुबन्धादन्यत्सर्वमुक्तमिति भावः । *परं स्थानमुपैतीति योगानुष्ठानसाध्यस्य साक्षात्फलस्य पृथगुच्यमानत्वात्तद्विषयत्वे पौनरुक्त्यात्, अधिकपुण्यफलप्राप्तिर्विवक्षायां लक्षितलक्षणापातात्, संसारनिवृत्तिमात्रपरत्वेऽपि पुण्यफलशब्देन पापफलस्यापि लक्षयितव्यत्वात् *तत्सर्वमत्येतीत्येतत्तद्विवेकमूलविरक्त्यभिप्रायम् । अतिशयितफलवेदनं हि *मनःप्रीतिरनायासादित्यादिन्यायेन फलान्तरवैतृष्ण्यहेतुरित्यभिप्रायेणाह—**एतद्वेदने**ति । भगवन्माहात्म्यज्ञानस्य परस्थानप्राप्तिहेतुत्वे प्रागुक्तज्ञानविशेषरूपद्वारप्रदर्शनं *योगी इत्यनेन क्रियत इत्यभिप्रायेण **ज्ञानी च भूत्वेत्युक्तम्** । परत्वं देशकालयोगादिभिः, *आदित्यवर्णं तमसः परस्तात् (श्वे. ३.८) *तदक्षरे परमे व्योमन् (ना.), *दिव्यं स्थानमजरं चाप्रमेयम् (भा. मौ. ५.३२), *एते वै निरयास्तात स्थानस्य परमात्मनः (भा. मो. १९८.६) इत्यादेः । **आद्यम्**—अनादिमित्यर्थः । *आदौ भवं कारणं ब्रह्म इति परोक्तं तु स्थानशब्दवैषम्यादयुक्तम् ॥ २८ ॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायाम् अष्टमोऽध्यायः ॥ ८ ॥

॥ अथ नवमोऽध्यायः ॥ ९ ॥

भा ॥ उपासकभेदनिबन्धना विशेषाः प्रतिपादिताः । इदानीमुपास्यस्य परमपुरुषस्य माहात्म्यं, ज्ञानिनां विशेषं च विशोध्य भक्तिरूपस्योपासनस्य स्वरूपमुच्यते ।

श्रीभगवानुवाच—

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १

भा ॥ *इदं तु ते गुह्यतमं, भक्तिरूपमुपासनाख्यं ज्ञानं विज्ञानसहितम्—उपासनगतविशेषज्ञानसहितम्, अनसूयवे ते प्रवक्ष्यामि । मद्विषयं सकलेतरविसजातीयमपरिमितप्रकारं माहात्म्यं श्रुत्वा एवमेव संभवतीति मन्वानाय ते प्रवक्ष्यामीत्यर्थः । यज्ज्ञानमनुष्ठानपर्यन्तं ज्ञात्वा मत्प्राप्तिविरोधिनः सर्वस्मादशुभान्मोक्ष्यसे ॥ १ ॥

ता ॥ *स्वमाहात्म्यं मनुष्यत्वे परत्वं च महात्मनाम् । विशेषो नवमे योगो भक्तिरूपः प्रकीर्तितः ॥ (१३) इति संग्रहश्लोकमपि व्याकुर्वंस्तदनुसारेणाष्टमनवमयोस्सङ्गतिं च दर्शयति—**उपासके**त्यादिना । **विशेषाः**—ज्ञातव्योपादेयभेदाः । परमपुरुषमाहात्म्यस्य ज्ञानिनां विशेषस्य च प्रागेव प्रकृतत्वात्तत्प्रभावविशोधनमात्रमत्रोपासनतत्फलानुप्रविष्टतया क्रियते; अध्यायप्रधानार्थस्तूपासनस्वरूपनिष्कर्ष इत्यभिप्रायेण **विशोध्येति** विच्छिद्य **भक्तिरूपस्येत्यादि** पृथगुक्तम् । भजनोपासनशब्दयोरस्मिन्नेवाध्याये प्रकरणान्तरेषु च समानविषयतयैव प्रयोगवशाच्छ्रुतिसिद्धोपासनस्यैवात्र भक्तिशब्देन विशेषणं कृतमित्यभिप्रायेण **भक्तिरूपस्योपासनस्ये**त्युक्तम् ।

अत्र *इदं तु ते गुह्यतममिति ज्ञानस्योपक्रान्तत्वात्, *मन्मना भवेति चोपसंहियमाणत्वात्, मध्ये च बहुशो भजनस्यैवाभ्यस्यमानत्वात्, प्रत्यक्षरूपत्वनिरतिशयप्रियत्वकीर्तनयतननमस्काररूपत्वादीनां चापूर्वाणां भक्तिस्वरूपानुप्रवेशिनां प्रकाराणां प्रतिपाद्यमानत्वात्, स्वरूपतस्साध्यतया निरतिशयफलप्रतिपादनात्, *राजविद्येत्यादिना प्रशंसा-

रूपार्थवाददर्शनाच्चात्रोपक्रमोपसंहारादितात्पर्यलिङ्गैः भक्तिस्वरूपनिष्कर्षेऽध्यायस्य तात्पर्यम्; तदन्विततयाऽन्यदत्रोच्यत इत्यभिप्रायः। *इदं तु ते इत्यत्र वक्ष्यमाणमेव बुद्धिस्थतया *इदमिति निर्दिष्टम्। *एष तु वा अतिवदति (छा. ७. १६. १) इति प्राणविदपेक्षया सत्यविदोऽधिकत्ववत्, तुशब्देन कर्मयोगज्ञानयोगाभ्यामप्यस्याधिक्यं विवक्षितम्। तयोर्हि गुह्यत्वम्, गुह्यतरत्वं च। इदं तु गुह्यतमम्। इदं च शुश्रूषातिशयोत्थापनार्थम्, गोपनाधिक्यशिक्षणार्थं चोक्तम्। उपबृंहणीयवेदान्तवाक्येष्विवात्रापि ज्ञानशब्दस्य वक्ष्यमाणविशेषपर्यवसानप्रदर्शनाय—**भक्तिरूपमुपासनाख्यमि**त्युक्तम्। **उपासनगतविशेषज्ञानसहित**मिति पूर्वोक्तविज्ञानादत्रत्यविज्ञानस्य भेदः; तद्ध्युपास्यादिविशेषज्ञानम्, उपासनगतविशेषः, उपासनप्रकारः। प्रस्तुतौपयिकमनसूयुत्वप्रकारं दर्शयति—**मद्विषय**मिति। गुणेषु दोषाविष्करणचित्तवृत्तिविशेषो ह्यसूया; तद्विपर्ययश्च गुणेषु गुणाध्यवसाय एव हीति भावः। एतेनोपदेशयोग्यायोग्यविभागेन शिष्यशिक्षणं कृतम्। स्मरन्ति च विद्याया वचनम्—*असूयकाय मां मादाः (भा. मो. ३२८. ४९) इत्यादि। वक्ष्यति च *इदं ते नातपस्कायेत्यारभ्य *न च मां योऽभ्यसूयति (१८.६७) इति। **प्रवक्ष्यामि**—कृत्स्नं लघु व्यक्तं च वक्ष्यामीत्यर्थः। **यज्ज्ञानमनुष्ठानपर्यन्तं ज्ञात्वे**ति—न ह्यनुष्ठेयज्ञानमात्रादनुष्ठानफलम्; अत उपासनस्वरूपं ज्ञात्वा तदनुष्ठानद्वारा मोक्ष्यस इत्युच्यत इति भावः। कर्मादिभिर्हि भक्त्युत्पत्त्यादिविरोधिपापनिरसनम्; भक्त्या तु भगवत्प्राप्तिविरोधिसमस्तपापनिरसनं हि प्रमाणसिद्धमित्यभिप्रायेण—**मत्प्राप्तिविरोधिनस्सर्वस्मादशुभा**दित्युक्तम्। अशुभशब्दस्यात्र स्वर्गाद्यपरपर्यायस्यामोहननिरयहेतुभूतपुण्यशब्दाभिलप्यपापविषयत्वमपि **सर्वस्मा**दित्यनेन विवक्षितम्॥ १॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्॥ २

भा॥ राजविद्या—विद्यानां राजा, राजगुह्यं—गुह्यानां राजा। राज्ञां विद्येति वा राजविद्या; राजानो हि विस्तीर्णागाधमनसः; महामनसामियं विद्येत्यर्थः। महामनस एव हि गोपनीयगोपनकुशला इति तेषामेव गुह्यम्। इदमुत्तमं पवित्रं—मत्प्राप्तिविरोध्यशेषकल्मषापहम्। प्रत्यक्षावगमम्—अवगम्यत इत्यवगमो विषयः; प्रत्यक्षभूतोऽवगमो विषयो यस्य ज्ञानस्य तत्प्रत्यक्षावगमम्, भक्तिरूपेणोपासनेनोपास्यमानोऽहं तदानीमेवोपासितुः प्रत्यक्षतामुपगतो भवामीत्यर्थः। अथापि धर्म्यं—धर्मादनपेतम्; धर्मत्वं हि निश्श्रेयससाधनत्वम्; स्वरूपेणैवात्यर्थप्रियत्वेन तदानीमेव मद्दर्शनापादनतया च स्वयं निश्श्रेयसरूपमपि निरतिशयनिश्श्रेयसरूपात्यन्तिकमत्प्राप्तिसाधनमित्यर्थः। अत एव सुसुखं कर्तुं—सुसुखोपादानम्। अत्यर्थप्रियत्वेनोपादेयम्। अव्ययम्—अक्षयं, मत्प्राप्तिं साधयित्वाऽपि स्वयं न क्षीयते। एवंरूपमुपासनं कुर्वतो मत्प्रदाने कृतेऽपि न किंचित्कृतं मयाऽस्येति मे प्रतिभातीत्यर्थः॥ २॥

ता॥ उपायान्तरेभ्योऽस्योपायस्यातिशयं दर्शयति—**राजविद्ये**ति। राजशब्दस्यात्र क्षत्रियविषयत्वे *विशेषविधिश्शेषनिषेधं गमयतीति न्यायात् ब्राह्मणादेरनधिकारप्रसङ्गाद्राज्ञां विद्येति विग्रहमनादृत्याह—**विद्यानां राजा.... गुह्यानां राजे**ति। समानाधिकरणसमासफलमनुरुध्येदमुक्तम्; शब्दार्थस्तु राजभूता विद्येति। राजदन्तादिषु वा पाठो द्रष्टव्यः। *पवित्रमिदमुत्तममित्युत्तमशब्दसमानन्यायतया राजशब्दोऽत्र श्रेष्ठवाची। एवमप्रसिद्धार्थक्लेशमसहमान आह—**राज्ञां विद्येति। ब्राह्मणादेरधिकारनिषेधपरत्वशङ्कापरिहारायोपचारनिमित्तं गुणं दर्शयति—राजानो हीति। फलित-**

माह—**महामनसा**मिति । अजहल्लक्षणा वा गौणी वा वृत्तिरिह विवक्षिता, अन्यैर्ज्ञातुमशक्यत्वादिति भावः । **राजगुह्य**मित्यस्यापि सप्रयोजनत्वायौपचारिकार्थत्वं दर्शयति—**महामनस एव हीति** । उपायविरोधिनिवर्तककतिपयनिवर्तकव्यवच्छेदार्थमुत्तमशब्दविशेषितपवित्रशब्दविवक्षितमाह—**मत्प्राप्ती**ति । * प्रत्यक्षावगममित्यत्र प्रत्यक्षरूपज्ञानपरत्वे नपुंसकत्वायोगाज्ज्ञानस्यैव विशेष्यस्य ज्ञानमेव विशेषणीकृत्य बहुव्रीह्ययोगाच्च कर्मणि व्युत्पत्त्या बहुव्रीहित्वं घटयति—**अवगम्यत** इत्यादिना । नन्विदमयुक्तम्, उपासनस्य स्मृतिसन्ततिरूपत्वात्, उपास्यस्य चाप्रत्यक्षत्वश्रुतेः, प्रत्यक्षस्य तु विषयान्तरस्य भक्तावनन्वयादित्यत्राह—**भक्तिरूपेणे**ति । * भक्त्या त्वनन्यया शक्यः (गी. ११. ५४) इत्यादिकमिह भाव्यम् । **तदानीमेवे**त्यासत्तिवशादुक्तम् । स्वयं फलभूतानां हि फलान्तरसाधनत्वरूपं धर्मत्वं दुर्लभमित्यभिप्रायेणाह—**अथापि धर्म्य**मिति । * धर्मपथ्यर्थन्यायादनपेते (अष्टा. ४. ४. ९२) इति सूत्रानुसारेण धर्म्यशब्दं निर्वक्ति—**धर्मादिति** । अभिप्रेतं विवृणोति—**धर्मत्वं हीत्यादिना** । प्रीतिपर्यायधृतिवाचके धातौ करणविवक्षया व्युत्पन्नो ह्ययं धर्मशब्द इति भावः । उक्तं चाभियुक्तैः * धर्म इत्युपसंहार्ये यच्छ्रेयस्करभाषणम् । तद्धर्मपदवाच्यार्थनिरूपणविवक्षया ॥ इत्यादि । श्रेयसोऽत्रावच्छेदकाभावात् * मुक्तिः कैवल्यनिर्वाणश्रेयोनिश्श्रेयसामृतम् (नाम. १. धी. ४६) इति नैघण्टुकपाठाच्च **निरतिशये**त्यादिकमुक्तम् । **अत एवे**ति—स्वरूपतस्साध्यतश्च पुरुषार्थरूपत्वादित्यर्थः । कर्तुं सुसुखं—करणे सुसुखमित्यर्थः । सुसुखमित्यस्य तुमुनन्तक्रियाकर्मीभावश्रमव्युदासायाह—**सुसुखोपादान**मिति । उपसर्गसुखशब्दयोरत्राभिप्रेतमाह—**अत्यर्थे**ति । स्वरूपतो विषयतश्चात्यर्थानुकूलत्वात्सुखेनानुष्ठेयमित्यर्थः । फलविनाश्यं हि सर्वमन्यत्कर्म ; इदं तु सुकरमपि फलेनापि न क्षीयते ; अपवर्गरूपं फलमप्येतस्य नालमित्यतिशयपरोऽव्ययशब्द इत्यभिप्रायेणाह—**अक्षयमिति** । तद्विवृणोति—**मत्प्राप्ति**मिति । तर्हि किमन्यदधिकं साध्यमिति शङ्कायामभिप्रेतमाह—**एवंरूप**मिति ॥ २ ॥

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३

भा ॥ अस्योपासनाख्यस्य धर्मस्य निरतिशयप्रियमद्विषयतया स्वयं निरतिशयप्रियरूपस्य परमनिश्श्रेयसरूपमत्प्राप्तिसाधनस्याव्ययस्योपादानयोग्यदशां प्राप्य अश्रद्दधानाः—विश्वासपूर्वकत्वरारहिताः पुरुषाः मामप्राप्य मृत्युरूपे संसारवर्त्मनि नितरां वर्तन्ते । अहो महदिदमाश्चर्यमित्यर्थः ॥ ३ ॥

ता ॥ उक्तप्रकारश्रद्धेयज्ञानानुष्ठानाभावे मोक्षो न सिध्यतीति दर्शयन् स्वरूपतः फलतश्च निरतिशयसुखरूपस्य सर्वैरनुष्ठानाभावे हेतुं च वदन् * नान्यः पन्था अयनाय (पु.) इत्यादिकमुपबृंहयति * अश्रद्दधाना इति श्लोकेन । अस्येति पूर्वोक्तसर्वाकारपरामर्शी इत्याह—**निरतिशये**त्यादिना । धर्मस्येति संबन्धसामान्यविषयायाः षष्ठ्याः फलितान्वयप्रदर्शनायाह—**उपादानयोग्यदशां प्राप्ये**ति । यद्वा श्रद्धानिषेधस्तत्प्रसङ्के सति हीत्यभिप्रायः । कारणनिवृत्तेः कार्यानुष्ठाननिवृत्तिपर्यन्तत्वप्रदर्शनायोक्तं—**विश्वासपूर्वकत्वरारहिता** इति । **मृत्युरूप** इति बाधकस्वरूप इत्यर्थः । अथवा मरणगर्भत्वादेव मृत्युरूपता । * निवर्तन्ते इत्यत्र प्रतिनिवृत्तिविवक्षायामवधिसाकाङ्क्षत्वादत्र च तन्निर्देशाभावात्, *मामप्राप्येति पृथङ्निर्दिष्टत्वेन परमपुरुषस्याप्यवधित्वकल्पनायोगात्, *संसारवर्त्मनीति सप्तम्यास्स्वरसत आधेयसाकाङ्क्षत्वात्, उपसर्गाणां चानेकार्थत्वात् **नितरां वर्तन्त** इत्युक्तम् । स्वरूपतः फलतश्च निरतिशयपुरुषार्थं सुकरं चोपासनं ज्ञात्वाऽपि परित्यज्य पुरुषाः पुरुषार्थतारतम्यविदोऽपि निरतिशयापुरुषार्थमयं संसारमादरेण सेवन्त इति विस्मयाविद्-

स्येश्वरस्य इदं वचनमित्यभिप्रायेणाह—**अहो** इति । आश्चर्यतमो दुष्कर्मप्रभाव इत्यभिप्रायेणाह—**महदिदमाश्चर्यमिति** । अश्रद्धाहेतव आन्तरशत्रवोऽपि त्वया निराकार्या इति *परन्तपेति संबुद्धेर्भावः ॥ ३ ॥

भा ॥ शृणु तावत्प्राप्यभूतस्य ममाचिन्त्यमहिमानम्—

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५

भा ॥ इदं चेतनाचेतनात्मकं कृत्स्नं जगत्, अव्यक्तमूर्तिना—अप्रकाशितस्वरूपेण मया अन्तर्यामिणा, ततम्—अस्य जगतो धारणार्थं नियमनार्थं च शेषित्वेन व्याप्तमित्यर्थः । यथाऽन्तर्यामिब्राह्मणे *यः पृथिव्यां तिष्ठन्....यं पृथिवी न वेद (बृ. ५. ७. ३) *य आत्मनि तिष्ठन्....यमात्मा न वेद (बृ. ५. ७. २२. मा) इति चेतनाचेतनवस्तुजातैरदृष्टेनान्तर्यामिणा तत्रतत्र व्याप्तिरुक्ता । ततो मत्स्थानि सर्वभूतानि-सर्वाणि भूतानि मय्यन्तर्यामिणि स्थितानि । तत्रैव ब्राह्मणे *यस्य पृथिवी शरीरं...यः पृथिवीमन्तरो यमयति, *यस्यात्मा शरीरं....य आत्मानमन्तरो यमयतीति शरीरत्वेन नियाम्यत्वप्रतिपादनात्तदायत्ते स्थितिनियमने प्रतिपादिते, शेषित्वं च । नचाहं तेष्ववस्थितः—अहं तु न तदायत्तस्थितिः, मत्स्थितौ तैर्न कश्चिदुपकार इत्यर्थः । न च मत्स्थानि भूतानि—न घटादीनां जलादेरिव मम धारकत्वम्; कथम्? मत्सङ्कल्पेन । पश्य ममैश्वरं योगम्—अन्यत्र कुत्रचिदसंभावनीयं मदसाधारणमाश्चर्यं योगं पश्य । कोऽसौ योगः? भूतभृन्न च भूतस्थो ममात्मा भूतभावनः—सर्वेषां भूतानां भर्ताऽहं, नच तैः कश्चिदपि ममोपकारः । ममात्मैव भूतभावनः—मम मनोमयस्सङ्कल्प एव भूतानां भावयिता धारयिता नियन्ता च ॥ ४ ॥ ५ ॥

ता ॥ एवमध्यायप्रधानार्थस्य प्रापकस्य माहात्म्यमुक्तम्; अथ प्राप्यमाहात्म्यद्वाराऽपि तदेव स्थिरीक्रियत इत्यभिप्रायेणाह—**शृणु तावदिति** । *इदं सर्वमिति निर्देशः प्रमाणसिद्धसमस्तवस्तुपर इत्यभिप्रायेण—**इदं चेतनाचेतनात्मकमित्युक्तम्** । *अव्यक्तमूर्तिनेत्यस्य विग्रहविषयत्वेऽत्रानुपयोगात्स्वरूपविषयोऽयमौपचारिकः प्रयोग इति दर्शयितुम् **अप्रकाशितस्वरूपेणेत्युक्तम्** । आकाश[दि]वत्सन्निधिमात्ररूपव्याप्तिव्युदासाय बहुप्रमाणसिद्धो व्याप्तिप्रकारो *मयेत्यनेनाभिप्रेत इत्याह—**अन्तर्यामिणेति** । उक्तप्रकाराया व्याप्तेः प्रयोजनं तन्निदानं च दर्शयति—**अस्येति** । अत्र धारणमनन्तरग्रन्थसिद्धम् । अत एव नियमनमप्यर्थसिद्धम् । धारणं हि प्रशासनाधीनं श्रूयते । शेषित्वं तु प्रागुक्तम्, शरीरित्वेनार्थसिद्धं च । अप्रकाशितस्वरूपत्वेन नियामकत्वेन च सर्वव्याप्तिं श्रुतौ दर्शयति—**यथेति** । पृथिव्युदाहरणं तत्प्रकरणोक्तसर्वाचेतनोपलक्षणार्थम् । उक्तप्रकारव्यापकत्ववशात् *मत्स्थानीत्यनेन जगतः पृथक्सिद्धता निरस्यत इत्यभिप्रायेणाह—**तत** इति । श्रीविश्वरूपादिषु विग्रहाश्रितत्वमपि सर्वस्योच्यते; अत्र तु स्वरूपनिष्ठतेत्यपौनरुक्त्याय—**मय्यन्तर्यामिणीत्युक्तम्** । अनयोर्धारणनियमनयोरपि व्याप्त्या सहाधीत[तां दर्शयितुमाह]तामाह—**तत्रैवेति** । **स्थितिनियमने**—स्थितिप्रवृत्ती इत्यर्थः । शरीरशरीरित्ववचनात् धृतिश्शेषित्वं च तत्रार्थसिद्धे इत्यभिप्रायेणाह—**शेषित्वं चेति** । *मया ततमिदं सर्वमित्यभिधायैव *न चाहं तेष्ववस्थितः इति वचनं व्याहतम्, *यः पृथिव्यां तिष्ठन्नित्यादिश्रुतिविरुद्धं चेत्यत्राह—**अहं त्विति** । *मत्स्थानि सर्वभूतानीति प्रस्तुतप्रकारा स्थितिरत्र निषिध्यते । *स भगवः कस्मिन् प्रतिष्ठितः इत्यत्र *स्वे महिम्नि यदि वा न महिम्नि (छा. ७. २४. १) इति हि श्रूयत इति भावः । उक्तं विवृणोति—**मत्स्थितावि**ति । **न कश्चिदिति**—स्वरूपतस्सङ्कल्पादृष्टादिना वेति भावः । *मत्स्थानि, *न च मत्स्थानीत्येतद्व्याहत-

मित्यत्राह—**न घटादीना**मिति । मूर्तं हि मूर्तान्तरं पतनप्रतिघातिना संयोगेन धारयति ; न तथाऽत्रेति भावः । लोकदृष्टविपरीतं न संभवतीत्यभिप्रायेण शङ्कते—**कथ**मिति । शरीरशरीरिणोरिव संभवमभिप्रेत्याह—**मत्सङ्कल्पेने**ति । स्वेच्छाधीनधारकत्वं हि विहितम् । अस्वतन्त्रतया धारकत्वं तु निषिध्यत इत्यविरोध इति भावः । * ऐश्वरमित्यनेनानन्यसाधारणत्वं फलितम्, * पश्येत्यनेन चाश्चर्यता द्योतितेत्यभिप्रायेणाह—**अन्यत्रे**ति । * योगस्सन्नहनोपायध्यानसङ्गतियुक्तिषु (नाम. ३. ना. १०९) इति पाठात्सङ्कल्परूपं ध्यानमिह योगः, युज्यमानस्वभावादिर्वा । * पश्य मे योगमित्युक्ते योगस्वरूपमेवानन्तरं वक्तव्यमिति तदाकाङ्क्षां दर्शयति—**कोऽसा**विति । * भूतभृन्न च भूतस्थः इत्यत्रार्थौचित्यादहमित्येव विशेष्यम् । अथवा * भूतभावनः इतिवत् * ममात्मेति निर्दिष्टसङ्कल्पविशेषणत्वेऽपि फलितकथनं **सर्वेषां भूतानां भर्ताऽहमित्यादि** । * आत्मेति विशेषनिर्देशः परिसङ्ख्यानयात्तदतिरिक्तसहकारिव्यवच्छेदार्थ इत्यभिप्रायेणाह—**ममात्मैवेति** । *ममात्मेति व्यधिकरणनिर्देशस्त्वारस्यसिद्धमात्मशब्दार्थमाह—**मम मनोमयस्सङ्कल्प** इति । एतेन *देहादिसङ्घातेऽहङ्कारमध्यारोप्य लोकबुद्ध्यनुसारेण * ममात्मेति व्यपदेश इति शङ्करोक्तं प्रत्युक्तम् । सङ्कल्प एव मनःकार्यतयाऽन्यत्र प्रसिद्धो मनःप्रतिपादकेनात्मशब्देनात्र व्यपदिष्टः । यद्वा आत्मशब्दोऽत्र सङ्कल्परूपमनःपर एव, * मनसैव जगत्सृष्टि (वि. ५. २२. १५) * मनोऽकुरुत स्यामिति (बृ. १.२. १) इत्यादेः । तदर्थ[ता]ज्ञापनाय तु मनोमयशब्दः । धारणनियमनयोरेव प्रकृतत्वात्, अनन्तरश्लोके च निर्दिश्यमानत्वात्, सृष्टेश्च ततोऽप्यनन्तरं वक्ष्यमाणत्वादत्र भूतभावन इत्येतत्सत्तादधीन्यनियमनाद्युपलक्षणमित्यभिप्रायेणाह—**धारयिता नियन्ता** चेति । अथवा *भूतभृन्न च भूतस्थ इत्यस्यैवायमर्थः ॥ ४ ॥ ५ ॥

भा ॥ सर्वस्यास्य स्वसङ्कल्पायत्तस्थितिप्रवृत्तित्वे निदर्शनमाह—

यथाऽऽकाशस्थितो नित्यं वायुस्सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६

भा ॥ *यथा आकाशे अनालम्बने महान् वायुस्स्थितस्सर्वत्र गच्छति ; स तु वायुर्निरालम्ब[स्थितो]नो मदायत्तस्थितिरित्यवश्याभ्युपगमनीयः [मयैव धृत इति विज्ञायते] ; एवमेव सर्वाणि भूतानि तैरदृष्टे मयि स्थितानि मयैव धृतानीत्युपधारय । यथाऽऽहुर्वेदविदः—* मेघोदयस्सागरसन्निवृत्तिरिन्दोर्विभागः स्फुरितानि वायोः । विद्युद्विभङ्गो गतिरुष्णरश्मेर्विष्णोर्विचित्राः प्रभवन्ति मायाः ॥ इति ; विष्णोरनन्यसाधारणानि महाश्चर्याणीत्यर्थः । श्रुतिरपि * एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (बृ. ५ ८.९) * भीषास्माद्वातः पवते, भीषोदेति सूर्यः, भीषास्मादग्निश्चेन्द्रश्च (आ. ८) इत्यादिका ॥ ६ ॥

ता ॥ यथाऽऽकाशस्थित इति श्लोके स्वस्मिन् सर्वभूतस्थितेराकाशे वायुस्थितिर्दृष्टान्त इति केचिदाहुः ; तदयुक्तम् ; आकाशस्य वाय्वपेक्षया नियमनधारणयोरभावात्तथाविधस्थितेरिह प्रकृतत्वेन तन्निदर्शनार्थत्वस्यैवौचित्याच्चेत्यभिप्रायेणाह—**सर्वस्ये**ति । * आकाशस्थितस्सर्वत्रग इत्याभ्यामीश्वरैकधार्यत्वं तदेकप्रेर्यत्वं च विवक्षितमित्यभिप्रायेणाह—**यथाऽऽकाशोऽनालम्बन** इति । महत्त्वं चान्याशक्यत्वायोक्तम् । अभिप्रेतं निदर्शनप्रकारं विशदयति—**स त्वि**ति । यथा निरालम्बने विहायसि विहङ्गमशरीरादेश्चेतनविशेषाधिष्ठेयत्वम् ; एवमेव वाय्वादेरपीति भावः । **तैरदृष्ट** इत्यनेन अनुपलम्भबाधनिरासाय पूर्वोक्तश्रुत्यादिसिद्धायोग्यत्वमदर्शनम् । ईश्वरानुमानमनभ्युपगच्छतां कथमिदं निदर्शनमित्यत्राह—**यथाऽऽहुर्वेद-**

विद इति । आगममूलसंभावनातर्कपरमिति भावः । **वेदविद** इत्यनेनाधीयमानानधीयमानवेदोपबृंहणरूपता द्योतिता । अस्मदाद्यगोचरोपादानोपकरणसंप्रदानादीनां तत्क्षणादेव सकलदिङ्मुखव्यापिनां धाराधराणामुत्पत्तिः, सकलभुवनाप्लावनलम्पटस्यैव जलनिधेरम्बरालम्बिनां तरङ्गाणां वेलातले निवृत्तिः, प्रतिनियतकलावृद्धिक्षयशृङ्गोन्नमनादिरूपश्चन्द्रमसो विभागः, अशङ्कितागमानामनियतदिग्विशेषाणां तृणगिरितरुषण्डलुण्टाकानां चण्डमारुतादीनां विप्फूर्तयः, प्रशान्तदहनमिहिरहिमकरादिमहसि प्रावृषि निशीथेऽप्यविदितपूर्वोत्तरक्षणानां क्षणरुचीनां विभङ्गः, निरालम्बने विहायसि महीयसो मिहिरमण्डलस्य प्रतिनियतदिनरजनिमासायनसंवत्सरादि वैदेशिकस्संचारः, एवंविधान्यन्ये च परिवेषोपरागेन्द्रचापकरकस्तनिताशनिभूकम्पप्रभञ्जनभ्रमणादयोऽत्यद्भुतप्रकारास्सर्वे सर्वव्यापिनस्सर्वशक्तेर्विष्णोरेव विचित्र[सृष्टि]शक्तिमूला भवितुमर्हन्तीति श्लोकार्थः । मायाशब्दस्य मिथ्यार्थत्वनिरसनायाह—**विष्णोरिति** । संबन्धसामान्यस्य नियाम्यत्वधार्यत्वादिविशेषपर्यवसानाय * यथाऽऽहुर्वेदविदः इत्यनेनाभिप्रेतं विवृणोति—**श्रुतिरपीति** । प्रशासनमत्र सङ्कल्पविशेषः । भीषेति—भयादित्यर्थः ॥ ६ ॥

भा ॥ सकलेतरनिरपेक्षस्य भगवतस्सङ्कल्पात्सर्वेषां स्थितिः प्रवृत्तिश्चोक्ता ; तथा तत्सङ्कल्पादेव सर्वेषामुत्पत्तिप्रलयावपीत्याह-

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७

भा ॥ स्थावरजङ्गमात्मकानि सर्वाणि भूतानि, मामिकाम्—मच्छरीरभूताम् , प्रकृतिं—तमश्शब्दवाच्यां नामरूपविभागनर्हां, कल्पक्षये—चतुर्मुखावसानसमये मत्सङ्कल्पाद्यान्ति ; तान्येव भूतानि कल्पादौ पुनर्विसृजाम्यहम् ; यथाऽऽह मनुः—* आसीदिदं तमोभूतं....सोऽभिध्याय शरीरात्स्वात् (१. ५) इति । श्रुतिरपि * यस्याव्यक्तं शरीरम् (सु. ७) इत्यादिका, * अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते (सु. २) * तम आसीत्तमसा गूढमग्रे प्रकेतम् (अष्ट. २. ८. ९) इति च ॥ ७ ॥

ता ॥ अप्रस्तुतसृष्टिप्रलयाभिधानस्य सङ्गतिमाह—**सकलेति** । प्रवृत्तिश्चेत्यर्थसिद्धोक्तिः । * मामिकामित्यनेन शेषत्वं सिद्धम् ; तच्च शरीरतयेत्यवगतं * यस्य तमश्शरीरम् (बृ. ५. ७. १३) इति ; अतो **मच्छरीरभूतामित्युक्तम्** । सर्वभूतशब्देन समस्तकार्यावस्थासंग्रहात्—**तमश्शब्दवाच्यामित्युक्तम्** । * तम....एकी भवति (अष्ट. २. ८. ९) इत्युक्तप्रदर्शनं **नामरूपविभागानर्हामिति** । सर्वभूतशब्दात्, प्रकृतिं यान्तीति वचनाच्च प्राकृतप्रलय एवात्र विवक्षित इत्याह—**चतुर्मुखावसानसमय** इति । **कल्पक्षये**—अन्तिमब्रह्मदिवसावसान इत्यर्थः । कल्पानां क्षय इति वा विवक्षितम् । ब्रह्मायुःपरो वाऽत्र कल्पशब्दः, * संहर्ता च स्वयं प्रभुः (वि. १. २. ६७), * मनसैव जगत्सृष्टिं संहारं च करोति यः (वि. ५. २२. १५) इत्याद्युक्तेः, अत्रैव * पुनस्तानि विसृजामीति वचनाच्च । मदीयां प्रकृतिं यापयामीत्यभिप्रायः । तदाह—**मत्सङ्कल्पाद्यान्तीति** । तानि—तत्सजातीयानीत्यर्थः ; तदभिप्रायेण **तान्येवेत्युक्तम्** । * यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव (वि. १. ६. ६५) इतिवत् । यथा कुन्तोशरीरात्तवोत्पत्तिस्त्वयाऽनुपलब्धाऽप्याप्तवाक्यादृढप्रतिपन्ना, तथा मच्छरीरात्प्रपञ्चस्योत्पत्तिं ममैव वाक्यादभ्युपगच्छेति * कौन्तेय इत्यस्य भावः । * मच्छरीरभूतां....तमश्शब्दवाच्यामिति स्वोक्तमर्थं मेषजायमानयत्किञ्चनोक्तेर्मनोर्वचनेन संवादयति—**यथाऽऽहेति** । * आसीदिदम् (मनु. १. ८) इत्यादिकायां सप्तश्लोक्यां नारायणस्यैव परमकारणत्वं ब्रह्मादेरशेषस्य तत्सृष्टत्वं

च सुव्यक्तमुक्तमनुसन्धेयम् । कारणावस्थस्याप्यचिद्द्रव्यस्य परमात्मशरीरतयाऽत्यन्तभिन्नत्वे तमश्शब्दवाच्यत्वादौ च मनोरूपबृंहणीयां श्रुतिं दर्शयति—**श्रुतिरपी**ति ॥ ७ ॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८

भा ॥ स्वकीयां विचित्रपरिणामिनीं प्रकृतिमवष्टभ्य—अष्टधा परिणमय्येमं चतुर्विधं देवतिर्यङ्मनुष्य-स्थावरात्मकं भूतग्रामं मदीयाया मोहिन्या गुणमय्याः प्रकृतेर्वशादवशं पुनःपुनः कालेकाले विसृजामि ॥ ८ ॥

ता ॥ * विसृजामीत्युक्तायास्समष्टिव्यष्टिरूपायास्सृष्टेः प्रकारः प्रदर्श्यते—* प्रकृतिं स्वामिति श्लोकेन । * विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् । ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः । सूयते पुरुषार्थं च तेनैवाधिष्ठितं जगत् । गौरनाद्यन्तवती सा जनित्री भूतभाविनी (मं. उ.) इत्यादिश्रुत्यनुसारेणास्य श्लोकस्यार्थमाह—**स्वकीया**मिति । उपादानद्रव्यस्य कर्त्राऽवष्टम्भो ह्यधिष्ठानम्; तच्चाभिमतकार्यविशेषानुगुणमध्यमावस्थाप्रापणमेवेत्यभिप्रायेणोक्तम्—**अष्टधा परिणमय्ये**ति । * भूमिरापः (७.४) इत्यादिना प्रागुक्तमष्टविधत्वम् । एवमर्थसिद्धस्समष्टिसृष्टिप्रकार उक्तः; भूतग्रामशब्दोऽत्र देवतादिजात्यवच्छिन्नव्यष्टिजीवस्तोमपरः, अचेतनपरत्वे प्रकृतेर्वशादवशमित्यनेनानन्वयात् । तस्य चतुर्विधस्य सावान्तरभेदस्य संग्रहार्थः कृत्स्नशब्दः । एवंविधकार्यत्वे प्रकृतिपरवशत्वे च योग्यताप्रदर्शनार्थम्—* इममिति निर्देश इत्यभिप्रायेणोक्तम्—**इमं चतुर्विधं**मित्यादि । चातुर्विध्यमेव विवृणोति—**देवे**ति । * प्रकृतेर्वशादित्यनेनाभिप्रेतः * प्रकृतिं मोहिनीं श्रिताः (१२) इत्यत्र च कण्ठोक्तोऽवशत्वहेतुः—**मोहिन्या** इत्युक्तः । तत्रापि हेतुर्गुणमयत्वं * त्रिभिर्गुणमयैः (७.१३) इत्यादिनोक्तम् । पुनःपुनरित्यनेन तदुत्पत्तिप्रलयोचितद्विपरार्धसहस्रयुगादिप्रतिनियतानाद्यनन्तप्रवाहकालावच्छेदविशेषो विवक्षित इत्यभिप्रायेणाह—**कालेकाल** इति । **विसृजामि**—विविधं सृजामि, विचित्रनामरूपदेशकालभोगादियुक्तं करोमीत्यर्थः ॥ ८ ॥

भा ॥ एवं तर्हि विषमसृष्ट्यादीनि कर्माणि नैर्घृण्याद्यापादनेन भ[ग]वन्तं बध्नन्तीत्यत्राह—

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९

भा ॥ न च तानि विषमसृष्ट्यादीनि कर्माणि मां निबध्नन्ति—मयि नैर्घृण्यादिकं नापादयन्ति, यतः क्षेत्रज्ञानां पूर्वकृतान्येव कर्माणि देवादिविषमभावहेतवः; अहं तु तत्र वैषम्ये असक्तः तत्रोदासीनवदासीनः; यथाऽऽह सूत्रकारः—* वैषम्यनैर्घृण्ये न सापेक्षत्वात् (२. १. ३४) * न कर्माविभागादिति चेन्नानादित्वात् (३५) इति ॥ ९ ॥

ता ॥ * न च मां तानि कर्माणीत्येतन्न पुण्यपापरूपकर्मविषयम्, तस्याप्रस्तुतत्वेन * तानीति परामर्शायोगात्; सृष्टिसंहारादेश्च प्रस्तुतत्वात्तत्परामर्श एवोचितः; तस्य दोषरूपत्वमपि सृज्यदेवादिवैषम्यादिना द्योतितमिति तन्निरासार्थोऽयं श्लोक इत्यभिप्रायेणाह—**एवं तर्हीति** । **सृष्ट्यादीनी**त्यादिशब्देन स्थितिसंहारनिग्रहानुग्रहादिसंग्रहः । **नैर्घृण्यादी**त्यादिशब्देन पक्षपातित्वाव्यवस्थितत्वादि संगृह्यते । * निबध्नन्तीति न संसाररूपो बन्ध उच्यते, जगत्सृष्ट्यादेस्संसारहेतुत्वाभावात्, परोक्षधर्माधर्मसंबन्धशङ्कापसङ्गाभावात्, दौर्जन्ये सत्यपीश्वरस्य नियामकाभावात्; अतो नैर्घृण्यादि-

रूपदोषानुबन्ध एवात्र शङ्कितः प्रतिषिध्यत इत्याह—**मयीति** । **चशब्दानिवृत्त्यर्थः** । सृष्टिवैषम्ये प्रयोजकमभिप्रेतमाह—**यत इति** । * स्वशक्त्या वस्तु वस्तुतां (वि. १. ४. ५२) * कर्मभिर्भाविताः पूर्वैः (वि. १. ५. २८) * आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥ (वि. ध. १०४. २३) * वाचिकैः पक्षिमृगताम् (मनु. १२. ९) * अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते । यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा । संसारतापानखिलानवाप्नोत्यतिसन्ततान् । तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥ (वि. ६. ७. ६२, ६३) इत्यादिभिस्सिद्धोऽयमर्थः । * तेषु कर्मस्वसक्त[म्] इत्युक्ते सति अकर्तृत्वादिभ्रमस्स्यादिति तन्निरासायोक्तं—**तत्र वैषम्य** इति । **असक्तः**—प्रयोजकत्वरूपसंबन्धरहित इत्यर्थः । असक्तत्वे दृष्टान्त उच्यते **उदासीनवदासीन** इति । यथा कस्मिंश्चित्कर्मणि उदासीनस्तत्र प्रयोजकत्वरूपसंबन्धरहितः ; तथा कर्ताऽप्यसौ तस्मिन्नरो उदासीनवदासीन इत्यर्थः । तेन कर्मानुष्ठानदशायामीश्वरस्य वैषम्यादुदासीनत्वमेवोच्यते । विषमसृष्टेः कर्मसापेक्षत्वे जीवानां तत्कर्मप्रवाहाणां च अनादितया प्रलयकालेऽपि तत्सद्भावे सूत्रद्वयं दर्शयति—**यथाऽऽहेति** ॥ ९ ॥

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते ॥ १०

भा ॥ तस्मात् क्षेत्रज्ञकर्मानुगुणं मदीया प्रकृतिस्सत्यसङ्कल्पेन मयाऽध्यक्षेणेक्षिता सचराचरं जगत्सूयते । अनेन क्षेत्रज्ञकर्मानुगुणमदीक्षणेन हेतुना जगत्परिवर्तत इति मत्स्वाम्यं सत्यसङ्कल्पत्वं नैर्घृण्यादिदोषरहितत्वमित्येवमादिकं मम वसुदेवसूनो रैश्वरं योगं पश्य । यथाऽऽह श्रुतिः—* अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥ (श्वे ४ ९) इति ॥ १० ॥

ता ॥ यदि कर्मानुगुणा विषमसृष्टिः ; तर्हि प्रकृतिरेव परिणामशीला तदनुगुणं परिणमतां, किं त्वयेत्यत्रोच्यते—**मयाऽध्यक्षेणेति** । * सर्वभूतानीत्युपक्रान्तस्वसङ्कल्पाधीनसृष्टिप्रलयोपसंहारताद्योतनायाह—**तस्मादिति** । * मयाऽध्यक्षेणेति पदद्वयाभिप्रेतं श्रौतमर्थमाह—**सत्यसङ्कल्पेन....ईक्षिता**—इति । *कर्माध्यक्षस्सर्वभूताधिवासः (श्वे. ६.११) * यो अस्याध्यक्षः (ऋ. ७. ७. १०. १. १७) * ध्यायतेऽध्यासिता तेन (मं. उ) इत्यादिकमत्र भाव्यम् । अधिकमश्नुत इति अध्यक्ष इति केचित् । जगच्छब्दस्तत्राप्यन्वेतव्यः, पूर्वार्धगतसचराचरशब्द उत्तरत्रापीत्यभिप्रायेण—**सचराचरं जगदित्युक्तम्** । * सूयते इत्यनेन * सूयते पुरुषार्थं च (मं. उ.) इत्यादिश्रुतिः स्मारिता । पूर्वार्धे सृष्टिहेतुतयोक्तमेवोत्तरत्रापि संहारहेतुतया * अनेन हेतुनेति परामर्शार्हम् ; न पुनः प्रधानतयोपस्थिताऽपि सृष्टिः, तस्याः प्रलयादिकं प्रत्यहेतुत्वादित्यभिप्रायेणाह—**अनेने**ति । तेनाध्यक्षशब्दस्यात्र अविक्रियदृशिमात्रपरतां वदन्तः प्रत्युक्ताः । कर्मवशाज्जीवशेषभूतं प्रपञ्चं प्रति कथं तव स्वाम्यम्, कथं च कारुणिकस्यापि कर्मपरतन्त्रतया दुःखमुत्पादयितुस्सत्यसंकल्पतेत्यत्राह—**मत्स्वाम्य**मिति । * पश्य मे योगम् (५) इत्युपक्रान्तनिर्वहणरूपताप्रदर्शनाय **ममेत्यादिकम्** । * अवजानन्ति मामित्यनन्तरश्लोकस्थास्मच्छब्दानुसन्धानवशात् * मे इत्येतन्निरतिशयसौलभ्यसंछादितेश्वरभावमवतारमभिप्रैतीति **वसुदेवसूनोरित्युक्तम्** । एतेन * मनुष्यत्वे परत्वं च (१३) इति संग्रहश्लोकांशोऽनुसंहितः । युज्यत इति व्युत्पत्त्या स्वाम्यादेरत्र योगशब्दार्थतोक्ता । प्रकृतेरीश्वराधीनपरिणामत्वे जीवानां कर्मानुगुणप्रकृतिवशत्वे च श्रुतिमुदाहरति—**यथाऽऽहेति** ॥ १० ॥

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११

भा ॥ एवं मां भूतमहेश्वरं सर्वज्ञं सत्यसङ्कल्पं निखिलजगदेककारणं परमकारुणिकतया सर्वसमाश्रयणीयत्वाय मानुषीं तनुमाश्रितं स्वकृतैः पापकर्मभिर्मूढा अवजानन्ति—प्राकृतमनुष्यसमं मन्यन्ते । भूतमहेश्वरस्य ममापारकारुण्यौदार्यसौशील्यवात्सल्यनिबन्धनं मनुष्यत्वसमाश्रयणलक्षणमिमं परं भावमजानन्तो मनुष्यत्वसमाश्रयणमात्रेण मामितरसजातीयं मत्वा तिरस्कुर्वन्तीत्यर्थः ॥ ११ ॥

ता ॥ महात्मनां विशेषं वक्तुं मूढानां स्वभाव उच्यते—* अवजानन्तीति श्लोकद्वयेन । प्रकृतसङ्गत्यर्थमेवंशब्दः । * भूतमहेश्वरमित्यस्य भावविशेषणत्वायोगात् व्यवहितेनापि * माम् इत्यनेनान्वयः । भूतमहेश्वरादिशब्देनाभिप्रेतप्रदर्शनम्—**सर्वज्ञमित्यादि** । **मानुषीं**—मनुष्यसंबन्धिनीम् ; मनुष्यसजातीयसन्निवेशवतीमित्यर्थः । यथा हिरण्मयमृण्मयघटयोर्द्रव्यवैजात्येऽपि संस्थानसाम्यम्, तद्वदत्रापि । इदं च मत्स्यादितन्वाश्रयणस्याप्युपलक्षणम् । मौढ्यस्यापीश्वराधीनत्वेन तद्दोषव्युदासाय—**स्वकृतैः पापकर्मभिरित्युक्तम्** । अवज्ञाकरणं दर्शयति—**प्राकृतेति** । * परं भावमजानन्त इत्यनेन भ्रमहेतोर्भेदाग्रहस्य कथनम् ; * मानुषीं तनुमाश्रितमिति तु सादृश्यस्य ; ताभ्यां प्राकृतमनुष्यसजातीयताभ्रमः ; ततश्च यथाकथञ्चित्प्रतीयमानोत्कर्षापह्नवेन निकर्षापादनरूपावज्ञा ; तदेतदखिलं विशदयति—**भूतमहेश्वरस्येति । मनुष्यत्वसमाश्रयणलक्षणमिति**—अजहत्स्वस्वभावस्य अनितरसाधारणमेवंविधमनुष्यत्वाश्रयणमपि वस्तुतः परत्वानुप्रविष्टमिति भावः ॥ ११ ॥

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२

भा ॥ मम मनुष्यत्वे परमकारुण्यादिपरत्वतिरोधानकरीं राक्षसीमासुरीं च मोहिनीं प्रकृतिमाश्रिताः, मोघाशाः—मोघवाञ्छिताः निष्फलवाञ्छिताः, मोघकर्माणः—मोघारम्भाः, मोघज्ञानाः—सर्वेषु मदीयेषु चराचरेष्वर्थेषु विपरीतज्ञानतया निष्फलज्ञानाः, विचेतसः—तथा सर्वत्र विगतयाथात्म्यज्ञानाः, मां सर्वेश्वरमितरसमं मत्वा मयि यत्कर्तुमिच्छन्ति, यदुद्दिश्यारम्भान् कुर्वते, तत्सर्वं मोघं भवतीत्यर्थः ॥ १२ ॥

ता ॥ * मोघाशा इति श्लोकेन प्रस्तुतस्य हेतुफले प्रतिपाद्येते । मोहनप्रकृत्याश्रयणं हि मोघाशत्वादौ हेतुरिति **पूर्वमुत्तरार्धव्याख्या । राक्षसीं**—रक्षस्संबन्धिनीं तामसीम् ; **आसुरीम्**—असुरसंबन्धिनीं राजसीं क्रोधलोभादिमयीमित्यर्थः । **प्रकृतिं**—स्वभावमित्यर्थः । * यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः । प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ (गी. १७. ४) * मन्ये त्वां राक्षसं क्रूरमथवा तामसात्मकम् । यस्मात्क्षिपसि गोविन्दं पाण्डवं च धनञ्जयम् ॥ (भा. भी. ६६. ३१) इत्यादिप्विवेति द्रष्टव्यम् । * मोहिनीमित्यनेन भगवत्परत्वतिरोधानादिकमभिप्रेतम् । * **मोघाशाः इति समासांशद्वयार्थकथनम् मोघवाञ्छिता । निष्फलवाञ्छिता** इति फलपर्यन्तकर्मस्वरूपासिद्ध्यभिप्रायेण **मोघारम्भा इत्युक्तम्** । उपक्रमप्रभृति निष्फलप्रवृत्तय इत्यर्थः । ज्ञानस्य मोघत्वं हि स्वाधीनप्रवृत्त्यभिमतफलराहित्यम् । तच्चायथार्थत्वनिबन्धनम् । तस्य चात्र विषयविशेषनिर्देशाभावाद्यथासंभवं सर्वविषयत्वमुचितमित्यभिप्रायेणाह—**सर्वेष्विति । वैपरीत्यं च अस्वतन्त्रे स्वतन्त्रत्वम्, अन्यदीये स्वकीयत्वम्, अजडे नित्ये जडत्वानित्यत्वादिकम्, अस्थिरे स्थिरत्व-**

मित्यादिकं द्रष्टव्यम् । * मोघज्ञानाः इति ज्ञानविशेषस्य विहितत्वात्तत एव तत्कारणस्य च निषेद्धुमशक्यत्वात् * विचेतसः इति निषेधस्तदतिरिक्तज्ञानपर इत्यभिप्रायेणाह—**सर्वत्र विगतयाथात्म्यज्ञाना** इति । ननु मोघाशत्वादिकमसिद्धम्, स्वर्गपश्वाद्यभिलषितसिद्धेः, तदुपायभूतयागादिषु यथार्थज्ञानाच्चेत्यत्राह—**मामिति** । अत्र यथार्थज्ञानाभावान्मोघज्ञानत्वम्, तत एव मोघाशत्वमोघारम्भत्वे इति क्रमः ॥ १२ ॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३

भा ॥ ये तु स्वकृतैः पुण्यसञ्चयैः मां शरणमुपगम्य विध्वस्तसमस्तपापबन्धा दैवीं प्रकृतिमाश्रिता महात्मानः, ते भूतादिमव्ययम्—वाङ्मनसागोचरनामकर्मस्वरूपं परमकारुणिकतया साधुपरित्राणाय मनुष्यत्वेनावतीर्णं मां ज्ञात्वाऽनन्यमनसो मां भजन्ते ; मत्प्रियत्वातिरेकेण मद्भजनेन विना मनस्यात्मनश्च बाह्यकरणानां च धारणमलभमाना मद्भजनैकप्रयोजना भजन्ते ॥ १३ ॥

ता ॥ एवमवज्ञाप्रवृत्तमूढभूयिष्ठे लोके निष्फलस्तवावतार इति शङ्कायामवतारसाफल्यकारिणां महात्मनां वृत्तकथनव्याजेन भक्तिं प्रसञ्जयति—* महात्मानस्त्विति । महात्मशब्देन, तुशब्देन च सिद्धं भजनौपयिकमतिशयं दर्शयन् उद्देश्योपादेयांशं च विभजते—**ये त्विति** । * जनास्मुकृतिनः (७. १६) * मामेव ये प्रपद्यन्ते (७. १४) इत्यादि प्रागुक्तं प्रतिसंधापयति—**स्वकृतैः पुण्यसंचयैर्भो शरणमुपगम्येति** । **दैवीं**—सात्त्विकीम् । *भूतादिमित्यनेनाशक्योपासनं परत्वं विवक्षितमित्याह—**वाङ्मनसेति** । * मामित्यनेनावतारपर्यवसितं सौलभ्यं सहेतुकमाह—**परमकारुणिकतयेति** । अवतारस्य दयादिमूलकत्वेन कर्ममूलकत्वाभावाज्ज्ञानसङ्कोचाद्यभावोऽव्ययशब्देनोच्यते । अनन्यमनस्त्वं सहेतुकं विवृणोति—**मत्प्रियत्वेति** । आर्ताद्यधिकार्यन्तरव्यवच्छेदार्थत्वादनन्यप्रयोजनत्वविवक्षाऽत्रोचिता । पार्थशब्देनेन्द्रसूनुस्त्वमपि दैवप्रकृतिरिति सूचितम् ॥ १३ ॥

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४

भा ॥ अत्यर्थमत्प्रियत्वेन मत्कीर्तनयतननमस्कारैर्विना क्षणाणुमात्रेऽप्यात्मधारणमलभमानाः, मद्गुणविशेषवाचोनि मन्नामानि स्मृत्वा पुलकाञ्चितसर्वाङ्गाः, हर्षगद्गदकण्ठाः, नारायणकृष्णवासुदेवेत्येवमादीनि सततं कीर्तयन्तः, तथैव यतन्तः—मत्कर्मस्वर्चनादिकेषु तदुपकारकेषु भवननन्दनवनकरणादिकेषु च दृढसङ्कल्पा यतमानाः, भक्तिभारावनमितमनोबुद्ध्यभिमानपद्मद्वयकरद्वयशिरोभिरष्टाङ्गैरचिन्तितपांसुकर्दमशर्करादिके धरातले दण्डवत्प्रणिपतन्तः, सततं मां नित्ययुक्ताः—नित्ययोगं काङ्क्षमाणा आत्मानं मदास्यव्यवसायिन उपासते ॥१४॥

ता ॥ *भजन्तीत्युपासनं प्रसक्तम् ; अथ तदेव कीर्तनयतननमस्कारेषु प्रेरयन्त्याऽत्यर्थप्रियत्वलक्षणावस्थया विशेष्यते—**सततमिति** । कीर्तनादीनां त्रयाणां वाङ्मनःकायकर्मरूपतां तेषामेव प्रकरणान्तरेषु सिद्धं प्रकारम्, सततमित्यस्य च कीर्तनयतननमस्कारनित्ययुक्तत्वोपासनेष्वविशेषेणान्वयमाह—**अत्यर्थेति** । अत्यर्थमत्प्रियत्वं भक्त्येत्यस्यार्थः । क्षणे महापृथिव्यादिवत्कल्पिते तस्य चरमावयवतया कल्पितोंऽशः—**क्षणाणुमात्रेऽपीत्युक्तः** । नाम्नां स्वादुत्वातिशयसिद्ध्यर्थम् **मद्गुणविशेषवाचोनीत्युक्तम्** । नामकीर्तनं चेष्टितादिकीर्तनस्योपलक्षणम् । गुणानुसन्धानाभावेऽपि स्वरूपतः प्रीति-

जननाय पुनः **मन्नामानी**ति व्यपदेशः । **पुलकाञ्चितसर्वाङ्गा** इत्यादिकं तत्तत्प्रदेशोक्तशब्दोपादानम् ; यथा *तन्नाम-स्मरणोद्भूतपुलकश्वेदिपुञ्जवः (वि. ध. ७४.४८) इति । **हर्षगद्गदकण्ठा** इत्यनेन *स्वरनेत्राङ्गविक्रिया (भा. आश्व. ११५) इत्यादिभक्तिलक्षणग्रन्थस्मारणम् । *कृषिर्भूवाचकश्शब्दो णश्च निर्वृतिवाचकः (भा. उ. ६९.५) इति कृष्णशब्दोऽपि पुरुषार्थहेतुत्वप्रतिपादनमुखेन परव्यूहादिसमस्तावस्थासाधारण इति ज्ञापनाय व्यापकयोर्मध्ये पठितः । अवतारान्तरेष्वपि कृष्णशब्दः प्रयुज्यते—*उद्धृताऽसि वराहेण कृष्णेन शतबाहुना (ना) इति । यद्वा **नारायणे**ति परत्वानुसन्धानम्, **कृष्णवासुदेवे**ति तु अवतारविशेषपरतया सौलभ्यानुसन्धानम् ; *यज्ञेशाच्युत गोविन्द माधवानन्त केशव । कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तुते । इति राजाऽऽह भरतो हरेर्नामानि केवलम् ॥ (वि. २. १३. ९) *नाम्नोऽस्ति यावती शक्तिः पापनिर्हरणे हरेः, *कमलनयन वासुदेव विष्णो धरणिधराच्युत शङ्खचक्रपाणे ॥ (वि. ३. ७. ३३) *एतावताऽलमघनिर्हरणाय पुंसां (भाग. ६.३.२४) *सङ्कीर्त्य नारायणशब्दमात्रम् इत्यादिषु सर्वत्र सङ्कीर्तनप्रभावः प्रसिद्धः । रहसि जनसन्निधौ च व्रीडादिराहित्यमपि सततशब्देन व्यञ्जितम् । **तथैव**—सततं भक्त्येत्यर्थः । **मत्कर्म-स्वित्यादिकं** भक्तियोगासाधारणयतनविषयप्रदर्शनम् । तत्कर्मयतने दृढसङ्कल्पत्वं महत्यामापदि संपदि चान्याश्रयणपरि-हारार्थम् । **भक्तिभारे**त्यादिकं प्रणामस्य रागप्राप्तत्वकथनम् । *मनोबुद्ध्यभिमानेन सह न्यस्य धरातले । कूर्मवच्चतुरः पादाञ्छिरस्तत्रैव पञ्चमम् ॥ (सा. सं. ६. १८७) इत्युक्तोऽष्टाङ्गप्रणामः । *नित्ययुक्ताः इति आशंसायां क्त इत्याह—**नित्ययोगं काङ्क्षमाणा** इति । काङ्क्षमाणशब्दश्चानश्प्रत्ययान्तः, *ताच्छील्यवयोवचनशक्तिषु चानश् (अष्टा. ३. २. १२९) इत्यनुशासनात् । *दासभूताः (पञ्च) इत्याद्युक्तस्वरूपानुरूपेण नित्ययोगं विशिनष्टि—**आत्मान्तं मद्दास्य-व्यवसायिन** इति ॥ १४ ॥

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५

भा ॥ अन्येऽपि महात्मानः पूर्वोक्तैः कीर्तनादिभिः ज्ञानाख्येन यज्ञेन च यजन्तो मामुपासते । कथम् ? बहुधा पृथक्त्वेन—जगदाकारेण, विश्वतोमुखम्—विश्वप्रकारमवस्थितं मामेकत्वेनोपासते । एतदुक्तं भवति—भगवान् वासुदेव एव नामरूपविभागानर्हांतिसूक्ष्मचिदचिद्वस्तुशरीरस्सन् सत्यसङ्कल्पो विविधविभक्तनाम-रूपस्थूलचिदचिद्वस्तुशरीरस्स्यामिति संकल्प्य स एक एव देवतिर्यङ्मनुष्यस्थावराख्यविचित्रजगच्छरीरोऽव-तिष्ठत इत्यनुसंदधानाश्च मामुपासते इति ॥ १५ ॥

ता ॥ *भजन्त्यनन्यमनसः इत्यनन्यमनस्त्वेन प्रथममुपासनं विशेषितम् ; ततश्च कीर्तनादिभिरन्तरङ्गैः । अथ वेषाकारविशेषप्रदर्शनेनापि तदेव विशेष्यते—*ज्ञानयज्ञेनेत्यादिना *सदसच्चाहमर्जुनेत्यन्तेन । चकारः पूर्वोक्त-कीर्तनादिसमुच्चयार्थः । अपिस्त्वन्य इत्यनेनान्वितः, अन्यथा नैरर्थक्यादित्यभिप्रायेणाह—**अन्येऽपी**ति । अन्यशब्दोऽत्र पूर्वोपासकपरः । यज्ञेन यजन्तः—यज्ञेन प्रीणयन्त इत्यर्थः । *बहुधा *पृथक्त्वेन इत्यनेन समष्टिव्यष्टितदवान्तर-भेदसमस्तसंग्रह इत्याह—**जगदाकारेणे**ति । विश्वतोमुखशब्दस्यात्र समभिव्याहारानुगुणं विवक्षितमाह—**विश्वप्रकार**मिति । **अनेकत्वेन पृथक्त्वेन चोपासत इत्यन्वयः किं नोच्यते ? कथं चैकस्यैव सतो बहुत्वेनावस्थानम् ? तथा च सविकारत्व-नश्वरत्वादिदोषाः स्युः ; बहुधाऽवस्थितस्यैकत्वेनोपासितुर्दृष्टिविभ्रमभ्रान्तिश्च स्यादित्यत्राह—एतदुक्तमिति । एतेन**

परोक्तप्रक्रिययोपासनविधात्रयपरत्वं भेदाभेदादिवर्णनं च प्रत्युक्तम् । **भगवानित्यनेन** सृष्ट्याद्यौपयिकगुणप्रपञ्चप्रदर्शनम् । **वासुदेवशब्दे** प्रथमांशेन सर्वसामानाधिकरण्यव्यपदेशनिदानसर्वशरीरकत्वपर्यवसितव्याप्तिविशेषः, द्वितीयांशेन सृष्टिप्रयोजनं क्रीडादिरेवेत्युच्यते । द्वाभ्यां च पदाभ्याम् अनन्योपासकैकान्तिजनशीलितमन्त्रविशेषोऽपि स्मारितः । पृथिव्यादिबहुत्वमात्रस्य प्रत्यक्षादिसिद्धत्वादेकस्यैव सतो बहुत्वं हि शास्त्रवेद्यम् ; ततश्च तथाभूतैकत्व एवात्र वाक्यतात्पर्यम् ; तच्चैकस्य सर्वशरीरत्वेन निर्व्यूढमिति न कश्चिद्दोषः ॥ १५ ॥

भा ॥ तथा हि विश्वशरीरोऽहमेवावस्थित इत्याह—

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६

भा ॥ अहं क्रतुः—अहं ज्योतिष्टोमादिकः क्रतुः ; अहमेव महायज्ञः ; अहमेव पितृगणपुष्टिदा स्वधा ; औषधम्—हविश्चाहमेव. अहमेव च मन्त्रः ; अहमेव चाज्यम् ; प्रदर्शनार्थमिदम् ; सोमादिकं च हविरहमेवेत्यर्थः ; अहमाहवनीयादिकोऽग्निः ; होमश्चाहमेव ॥ १६ ॥

ता ॥ यद्यपि परव्यूहादिरूपेणैकत्वपृथक्त्वे वक्तुं शक्ये ; तथाऽपि अनन्तरग्रन्थानुसारादुक्त एवार्थ इत्यभिप्रायेण * अहं क्रतुरित्यादिश्लोकचतुष्टयस्य प्रकृतसङ्गतिमर्थं चाह—**तथा हीति** । **ज्योतिष्टोमादिक इत्यनेन महायज्ञ इत्यनेन च** * विषयविशेषप्रदर्शनात्क्रतुयज्ञशब्दयोः पौनरुक्त्यपरिहारः । शारीरमानसश्रौतस्मार्तादिविभागस्तु न प्रसिद्ध्यनुसारीति भावः । महायज्ञः—ब्रह्मयज्ञादिः पञ्चविधः । अविशेषादेवकारस्सर्वत्रान्वेतव्यः । क्रतुतदवयवादिप्रसङ्गात् स्वधाशब्दसहपाठादाज्यस्य च पृथगुक्तत्वादोषधिविकारहविर्विशेषविषयोऽयमौषधशब्द इत्याह—**औषधं हविश्चाहमेवेति** । एतेन स्वधौषधशब्दयोरन्नभेषजादिपरत्वव्याख्या प्रत्युक्ता । *विशेषविधिश्शेषनिषेधार्थ इति शङ्कां परिहरति—**प्रदर्शनार्थमिति** । एवमुत्तरेष्वपि पितामहादिकथनं प्रपितामहादिप्रदर्शनार्थं ग्राह्यम् । अत्राग्निशब्दस्य प्रकरणविशेषाद्भूततृतीयादिमात्रविषयत्वं न युज्यत इत्यभिप्रायेणाह—**अहमाहवनीयादिकोऽग्निरिति** । हविषां पृथगुक्तत्वादत्र हुतशब्दो भावार्थ इत्याह—**होमश्चेति** ॥ १६ ॥

पिताऽहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥ १७

भा ॥ अस्य—स्थावरजङ्गमात्मकस्य जगतः, तत्रतत्र पितृत्वेन, मातृत्वेन, धातृत्वेन, पितामहत्वेन च वर्तमानोऽहमेव । अत्र धातृशब्दो मातापितृव्यतिरिक्ते उत्पत्तिप्रयोजके चेतनविशेषे वर्तते । यत्किञ्चिद्वेद्यं पवित्रम्—पावनम्, तदहमेव । वेदकर्त्रश्च वेदबीजभूतः प्रणवोऽहमेव । ऋक्सामयजुरात्मको वेदश्चाहमेव ॥ १७ ॥

ता ॥ * पिताऽहमस्येत्यादौ न स्वस्वरूपेण पितृत्वादिकमिहोच्यते ; अपि तु पितृत्वादिरूपेण प्रतिपन्नानां स्वान्तर्यामिकत्वम् ; तथा सति हि प्रकृतसङ्गतिरित्यभिप्रायेणाह—**अस्येति** । स्थावरेष्वपि तानितानि कारणानीश्वरशरीराणीति तत्रापि तस्य पितृत्वादिव्यवहारः । एकस्यैव सर्वपितृत्वाद्यभावात् प्रतिनियतपदर्शनाय—**तत्रतत्रेत्युक्तम्** । धातृशब्दो हि स्रष्टृचेतनविशेषपरतया प्रसिद्धः ; ततश्चात्र पौनरुक्त्यमित्याशङ्क्याह—**अत्रेति** । पित्रा समभिव्याहृतत्वादित्यर्थः ; गोबलीवर्दन्यायादिति भावः । रुद्रेन्द्रादिसहपाठे हि चतुर्मुखस्मरतेति भावः । धात्वर्थभूतधारणादिद्वारोत्पत्ति-

प्रयोजकत्वम् । वेद्यत्वमात्रस्य सर्वसाधारण्यात् वेद्यपवित्रशब्दयोर्विशेषणविशेष्यभावेन अन्वयस्संभवन्प्रतीयमानो बाधकाभावान्न त्याज्य इत्यभिप्रायेणाह—**यत्किञ्चिदिति** । वेदनस्यानन्तरमभिधीयमानत्वात्पवित्रत्वसामर्थ्याच्च—**वेदवेद्यमित्युक्तम्** । नपुंसकनिर्देशाद्विशेषकाभावाच्च अनुक्तसमस्तवेदवेद्यसंग्रहविषयोऽयमिति ज्ञापनाय—**यत्किञ्चिच्छब्दः** । सङ्कोचकसंज्ञापरत्वव्युदासाय—**पावनमित्युक्तम्** । सप्रतिसंबन्धिनिर्देशमध्यपाताद्वेद्यप्रतिसंबन्धिनिर्देशरूपत्वज्ञापनाय—**वेदकश्चेत्युक्तम्** । ऋक्सामयजुषां पृथगभिधानेऽपि तदनुप्रविष्टस्य पृथगुक्तिः किमभिप्रायेत्यत्राह—**वेदबीजभूत** इति ॥ १७ ॥

गतिर्भर्ता प्रभुस्साक्षी निवासश्शरणं सुहृत् ।
प्रभवप्रलयस्थानं निधानं बीजमव्ययम् ॥ १८

भा ॥ गम्यत इति गतिः—तत्रतत्र प्राप्यस्थानमित्यर्थः ; भर्ता—धारयिता, प्रभुः—शासिता, साक्षी—साक्षाद्दृष्टा, निवासः—वासस्थानं वेश्मादि, शरणम्—इष्टस्य प्रापकतयाऽनिष्टस्य निवारणतया च समाश्रयणीयमचेतनश्शरणम्, स चाहमेव ; सुहृत्—हितैषी, प्रभवप्रलयस्थानम्—यस्यकस्यचित्यत्रकुत्रचिदुत्पत्तिप्रलययोर्यत् स्थानम्, तदहमेव, निधानं निधीयत इति निधानम्, उत्पाद्यमुपसंहार्यं चाहमेवेत्यर्थः ; अव्ययं बीजम्—तत्रतत्र व्ययरहितं यत्कारणम्, तदहमेव ॥ १८ ॥

ता ॥ गतिशब्दस्याग्र्यप्रायन्यायेन द्रव्यपरत्वौचित्यान्नात्र भावार्थपरत्वमित्यभिप्रायेण स्थानपरत्वमाह—**गम्यत इतीति** । सर्वजनसाधारणेषु अर्थेषु निर्दिश्यमानेषु तन्मध्ये स्त्रीविशेषमात्रप्रतिसंबन्धिपदार्थो न वक्तुमुचितः, धारणार्थत्वं च बिभर्तिधातोः प्रसिद्धमित्यभिप्रायेणाह—**भर्ता धारयितेति** । प्रभुशब्दस्यात्र प्रभूतनामात्रपरत्वे * जगतः इत्यनेनान्वयो न स्यादित्यभिप्रायेणाह—**शासितेति** । **साक्षाद्दृष्टेति**—* साक्षाद्दृष्टरि संज्ञायाम् (अष्टा. ५. २. ९१) इति हि साक्षिशब्दोऽनुशिष्यते । **वासस्थान**मिति । अत्र भावादिपरत्वानौचित्यादधिकरणार्थोऽयं घञिति भावः । गतिशब्देन **पौनरुक्त्यनिरासायोक्तं—वेश्मादी**ति । गतिशब्दस्तु स्वर्गपृथिव्यादिगन्तव्यदेशपर उक्तः, तत्तद्देशानुभाव्यभोग्यपरो वा । शरणशब्दस्यात्र निवासशब्दनिर्दिष्टगृहाद्यचेतनपरत्वव्युदासायाह—**इष्टस्ये**ति । इष्टप्राप्त्यनिष्टनिवारणयोर्यथेच्छं प्रत्येकसमुदायाभ्यामन्वयः । * शरणं गृहरक्षित्रोः (नाम. ३. ना. २०९) इति पाठादत्र रक्षितृपरश्शरणशब्दः । **हितैषी**ति—शोभनहृदययुक्तो हि सुहृत्, शोभनत्वं च हृदयस्य हितगोचरत्वमिति भावः । **यस्यकस्यचिदिति** । न केवलं ब्रह्मादेरव्यक्तादेर्वा यदुत्पत्तिप्रलयस्थानमित्यभिप्रायः । * प्रभवः इति व्यस्तं परोक्तं पाठान्तरमप्रसिद्धेरनार्जवाच्चानादृतम् । * **प्रभवप्रलयस्थान**मिति प्रसक्तत्वात् तत्र यत्प्रभवति, यच्च प्रलीयते, तदत्र निधानशब्देन विवक्षितमित्यभिप्रायेणाह—**निधीयते इति निधान**मिति । कर्माधोऽयं ल्युट्प्रत्ययः । एतेन निधानशब्दस्य प्रलयस्थानविशेषणत्वेन अव्याकृतपरत्वयोजना निरस्ता । * प्रभवप्रलयस्थानमित्यस्योपादानविवक्षायां बीजशब्दः कारणमात्रपरः ; तस्योपादानपरत्वविवक्षायां बीजाधारक्षित्यादिदेशपरः पूर्व इत्यभिप्रायेणाह—**तत्रतत्रेति** ॥ १८ ॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९

भा ॥ अग्न्यादित्यादिरूपेणाहमेव तपामि ; ग्रीष्मादावहमेव वर्षं निगृह्णामि । तथा वर्षासु चाहमेवोत्सृजामि । अमृतं चैव मृत्युश्च—येन जीवति लोको येन च म्रियते, तदुभयमहमेव । किमत्र बहुनोक्तेन ;

सदसच्चाहमेव—सद्यद्वर्तते, असद्यदतीतमनागतं च, सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्तत्प्रकारोऽहमेवावस्थित इत्यर्थः। एवं बहुधा पृथक्त्वेन विभक्तनामरूपावस्थितकृत्स्नजगच्छरीरतया तत्प्रकारोऽहमेवावस्थित इत्येकत्वज्ञानेनानुसन्दधानाश्च मामुपासते ॥ १९ ॥

ता ॥ एवं *प्राधान्यतः (१०.१९) इति वक्ष्यमाणप्रकारेण लोके तत्तच्छब्दवाच्यतया प्रसिद्धानां प्रकृष्टपदार्थानां सत्तायास्स्वाधीनत्वप्रदर्शनम्; अथ प्रवृत्तितादधीन्यमनेनोच्यते—* तपामीति। स्वरूपतस्तापहेतुत्वाभावाद्विशिष्टे तद्दर्शयति—**अग्न्यादित्यादी**ति। आदिशब्देन अम्बुयादितसद्द्रव्यविवक्षा। एककर्तृकयोर्विरुद्धयोः कालादिभेदेन व्यवस्थेत्यभिप्रायेणाह—**ग्रीष्मादा**विति, **वर्षास्वि**ति च। अत्र पर्जन्यादिरूपेणेति भाव्यम्। एवं रश्मिविशेषोऽपि ग्राह्यः। * अहं क्रतुः (१६) इत्युपक्रम्य एतावताऽधियज्ञाधिप्रजाधिवेदाध्यात्माधिदैवतविवक्षेति केचित्। अथ साधकबाधकरूपेण संगृह्योच्यते—* अमृतं चैव मृत्युश्चेति। मृतिकारणाभिधायिमृत्युशब्दसहप्रयोगान्मृतिप्रतिबन्धकमात्रविषयोऽयममृतशब्दः; सुधापरत्वे तु विषेण सह पठितव्यम्; अमृतसहपाठाच्च मृत्युशब्दस्य वैवस्वतादिपरत्वमयुक्तमित्यभिप्रायेणाह—**येने**ति। त्रैकाल्यवर्तिसर्वसंग्रहेण उपसंहारपरतां दर्शयति—**किमत्रे**ति। अत्र सच्छब्दवदसच्छब्दोऽपि भावान्तराभाववादाद्वस्तुविशेषपरः, अन्यथा अहमिति सामानाधिकरण्यायोगादित्यभिप्रायेणाह—**यद्वर्तते यदतीतमनागतं चेति**। असच्छब्दोऽत्र वर्तमानान्यविषयः। ननु प्रकरणान्तरेष्विव चेतनाचेतनादिविषयत्वमनयोः किं नोच्यत इत्यत्राह—**सर्वावस्थेति**। सर्वस्य भगवदात्मकत्वं हि प्रकृतम्; त्रैकालिकसमस्तसंग्रहौचित्याय वर्तमानत्वादिविवक्षायामपि चिदचितोर्न त्यागः; तयोरेव तत्तदवस्थाविशेषविशिष्टस्वरूपविषयत्वात्। अथवा **सर्वे**त्यादिकम्, * अहं क्रतुरित्याद्युक्तकृत्स्नवाक्यार्थकथनमनुसंधेयम्। सर्वनादधीन्यवचनं प्रकृतेनोपासनेन संगमयति—**एवं बहुधे**त्यादिना। विशिष्टैकत्वमिह विवक्षितम्; न पुनः प्रलयदशापन्नमविभक्तकत्वलक्षणम्। प्रस्तुतज्ञानयज्ञत्वस्मारणाय **ज्ञानेनानुसन्दधाना** इत्युक्तम् ॥ १९ ॥

भा ॥ एवं महात्मनां ज्ञानिनां भगवदनुभवैकभोगानां वृत्तमुक्त्वा तेषामेव विशेषं दर्शयितुमज्ञानां कामकामानां वृत्तमाह—

त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २०
ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्नाः गतागतं कामकामा लभन्ते ॥ २१

भा ॥ ऋग्यजुस्सामरूपास्तिस्रो विद्यास्त्रिविद्यम्; केवलं त्रिविद्यनिष्ठास्त्रैविद्याः, न तु त्रय्यन्तनिष्ठाः। त्रय्यन्तनिष्ठा हि महात्मानः पूर्वोक्तप्रकारेण निखिलवेदवेद्यं मामेव ज्ञात्वाऽतिमात्रमद्भक्तिकारितकीर्तनादिभिर्ज्ञानयज्ञेन च मदेकप्राप्या मामेवोपासते। त्रैविद्यास्तु वेदप्रतिपाद्यकेवलेन्द्रादियागशिष्टसोमान् पिबन्तः, पूतपापाः—स्वर्गादिप्राप्तिविरोधिपापात्पूताः, तैः केवलेन्द्रादिदैवत्यतयाऽनुसंहितैर्यज्ञैर्वस्तुतस्तद्रूपं मामिष्ट्वा, तथावस्थितं मामजानन्तः स्वर्गतिं प्रार्थयन्ते। ते पुण्यम्—दुःखासंभिन्नं सुरेन्द्रलोकं प्राप्य तत्रतत्र दिव्यान् देवभोगानश्नन्ति। ते तं विशालं स्वर्गलोकं भुक्त्वा तदनुभवहेतुभूते पुण्ये क्षीणे पुनरपि मर्त्यलोकं विशन्ति। एवं त्रय्यन्तसिद्धज्ञानविधुरा काम्यस्वर्गादिकामाः केवलं त्रयीधर्ममनुप्रपन्नाः गतागतं लभन्ते—अल्पास्थिरस्वर्गादीननुभूय पुनःपुनर्निवर्तन्त इत्यर्थः ॥ २० ॥ २१ ॥

ता ॥ * सदसच्चाहमर्जुनेत्यस्यानन्तरं * त्रैविद्या इत्यादिकमसङ्गतमिति शङ्कायां पूर्वोत्तरानुवृत्तप्रघट्टकार्थं प्रदर्शयन् संगतिमाह—**एवं महात्मनामिति** । **महात्मनां ज्ञानिनां भगवदनुभवैकभोगानामिति** त्रिभिः * महात्मानस्तु, * ज्ञात्वा *अनन्यमनसः (१३) इति प्रागुक्तस्मारणम् । * अवजानन्ति (११) इत्याद्यपेक्षया * महात्मानस्तु इत्यादेः विशेषकथनरूपत्वेऽपि भजनकीर्तनादेर्भक्तस्वरूपनिरूपकतया **वृत्तमुक्त्वेत्युक्तम्** । एवं निरूपितस्वरूपाणां तेषां निरतिशयफलसौकर्यादिकमभिधास्यमानं विशेषो भवितुमर्हतीति **तेषामेव विशेषं दर्शयितुमित्युक्तम्** । **अज्ञानामित्यनेन** * परं भावमजानन्तः (११) इति प्रागुक्ता एवात्र फल्गुफल्यागादिभिः प्रपद्यन्त इति सूचितम् । * त्रैविद्याः इत्यत्र सङ्ख्याविशेषप्रसिद्ध्या * त्रयीधर्ममिति वक्ष्यमाणानुसन्धानाच्च विद्यां विशिषन् समासार्थं चाह—**ऋग्यजुरिति** । **तिस्रो विद्यास्समाहृताः** इति द्रष्टव्यम् । द्विगुसमासत्वात् त्रिविद्यमित्येकवद्भावनपुंसकत्वे । * अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते (अष्टा. वा. २. ४. १७) इत्यस्य * पात्रादिभ्यः प्रतिषेधो वक्तव्यः इत्यपवादः । * तदधीते तद्वेद (अष्टा. ४. २. ५९) इत्यण्प्रत्ययविवक्षयाऽऽह—**त्रिविद्यनिष्ठा** इति । सर्ववेदविषयत्वे विरोधात्कर्ममात्रविषयत्वज्ञापनाय—**केवलशब्दः** । तदेव विशदयति—**नतु त्रय्यन्तनिष्ठा** इति । विषयव्यवस्थापनाय पूर्वोक्तानां महात्मनामपि वेदैकदेशभूतोपनिषन्निष्ठत्वं सर्वस्यापि वेदस्य तत्तद्द्वारा भगवत्परत्वस्वीकारं च वदन्, यथावस्थितज्ञानाधीनपुरुषार्थविशेषाभिलाषतदुपायनिष्ठतामात्रेण विशेषात्सिद्धान्तान्तरनिष्ठत्वभ्रमं च व्युदस्यन्, केवलत्रयीनिष्ठवृत्तव्याख्यानावसरे तव्यवच्छेद्यमखिलं दर्शयति—**त्रय्यन्तनिष्ठा हीति** । एतेन प्रकरणान्तरेषु * चतुर्थी विद्या इति मोक्षसाधनभूता त्रय्यन्तविद्यैवोच्यते इति दर्शितम् । यथाऽऽह जनकाय याज्ञवल्क्यः—* एषा तेऽन्वीक्षिकी विद्या चतुर्थी सांपरायिकी (भा. मो. ३१९.४६) इति * चतुर्थी राजशार्दूल विद्यैषा सांपरायिकी (३५) इति च । **वेदप्रतिपाद्येति**—कर्मभागमात्रप्रतिपाद्येत्यर्थः । महात्मनामपि विद्याङ्गकर्मगतसोमपानसद्भावात्तद्व्यवच्छेदायोक्तं—**केवलेन्द्रादियागशिष्टेति** । अयज्ञशिष्टसोमपानस्याधर्मत्वाद्यागशिष्टत्वोक्तिः । * स्वर्गार्ति प्रार्थयन्ते इत्यनन्तरमभिधानात्तत्प्रतिबन्धकपापनिरासकत्वमात्रमेवात्र सोमपानस्येत्यभिप्रायेण—**स्वर्गादिप्राप्तिविरोधिपापात्पूता इत्युक्तम्** । स्वर्गशब्दोपलक्षणार्थत्वज्ञापनायादिशब्दः । पापस्य पूतत्वं नाम निरस्तत्वम्; तदेव हि पुरुषस्य पूतत्वमित्यभिप्रायेण **पापात्पूता** इति निर्देशः । पापान्मुक्ता इत्यर्थः । स्वर्गाद्यर्थिनां तत्त्वतो भगवज्ज्ञानाभावस्य साक्षाद्भगवद्याजिनां भगवत्प्राप्तेः केवलेन्द्रादियागानामपि वस्तुतः परमपुरुषाराधनरूपत्वस्य तज्ज्ञानाभावाच्च तेषां **वैकल्यस्य** * ये त्वन्यदेवताभक्ताः (९. २३) इत्यादिश्लोकत्रयेण वक्ष्यमाणत्वात्, * यज्ञैर्मामिष्ट्वेत्येतत्परमपुरुषस्य स्वानुसन्धानमात्रमूलं वचः; न पुनर्यजमानानुसन्धानमूलमिति ज्ञापनायोक्तं **तैरित्यादि अजानन्त इत्यन्तम्** । अनुष्ठानस्य फलकामनापूर्वकत्वेऽपि यज्ञानन्तरमेव हि फलं देहीति देवतां प्रति प्रार्थनम्; अतः * इष्ट्वा प्रार्थयन्ते इति क्रमोपपत्तिः । पुण्यक्रियातज्जन्यादृष्टयोर्लोकसामानाधिकरण्यायोगात्सुरेन्द्रलोकस्य फलमात्ररूपस्य पावनत्वेनाश्रुतत्वात्प्रभूतदुःखासंभिन्नत्वस्य च श्रुतत्वात्पुण्यप्रतिक्षेप्यपापकार्यदुःखनिवृत्तिपरोऽयं पुण्यशब्द इत्यभिप्रायेणोक्तं—**दुःखासंभिन्नमिति** । पुण्यसाध्यसुखमयत्वलक्षणायां वा दुःखनिवृत्तिरर्थसिद्धा । पुण्यसाध्यत्वलक्षणायां स्वर्थतः पुनरुक्तिस्स्यात् । सुरेन्द्रलोकं प्राप्येत्युक्तेऽपि पुनः * दिवीति निर्देशो विचित्रभोगाश्रयतत्तदवान्तरप्रदेशविशेषविषयो भवितुमर्हतीति—**तत्रतत्रेत्युक्तम्** । **दिव्यानिति** मोहनत्वाय भौमभोगवैलक्षण्यकथनम् । **दिव्यान्**—दिवि भवान्; **देवभोगान्**—देवानां भोग्यानित्यर्थः । **देवभोग्यपशुपुरोडाशादिभौमव्यवच्छेदार्थं च दिव्यशब्दः** । देवा हि स्वरूपतः कालतश्च परिमितान् स्वभोगान् स्वभोग्यैस्संविभजन्ते । **अश्नन्ति**—**भुञ्जते, अनुभवन्तीत्यर्थः** । **भुक्त्वेति अनूद्यते** । * विशालमित्यनेन भौमभोगा-

पेक्षया पृथुत्वसूचनम् । **स्वर्गलोकं भुक्त्वेति**—स्वर्गलोकसंभवान् भोगाननुभूयेत्यर्थः । नहि स्वर्गानुभवाद्बन्धकपुण्यान्तरक्षयः; कर्मशेषेण विशिष्टजात्यादिप्राप्तिश्रूयत इत्यभिप्रायेणोक्तं—**तदनुभवहेतुभूतेति** । एतेन—*स्वर्गेऽपि पातभीतस्य (वि. ६. ५. ५०) इत्यादि दर्शितम् । मर्त्यशब्देन भूलोकेऽप्यस्थिरत्वं द्योतितम् । एवंशब्दाभिप्रेतेन प्रकारेण त्रयीशब्दस्य तत्र सङ्कोचं, कामकामत्वे हेतुं च दर्शयति—**एवं त्रय्यन्तसिद्धज्ञानविधुरा** इति । अनुवादोऽयं स्वरूपतो मोक्षानुगुणस्यापि धर्मस्य प्रकारविशेषात्पुनरावृत्तिहेतुत्वमिति ज्ञापनार्थः । पूर्वः कामशब्दः कर्मणि व्युत्पन्न इत्याह—**काम्यस्वर्गादिकामा** इति । मोक्षस्यापि फलतया काम्यमानत्वात्ततोऽत्र सङ्कोचाय स्वर्गादिशब्दः । केवलशब्देन त्रय्यन्तसिद्ध[न्त]स्वाङ्गिभूतपरमधर्मरहित्योक्तिः । गतं चागतं च गतागतं; तदेव लभन्ते । नहि गमनागमनमात्रं दोष इत्यत्राह—**अल्पेति** । अनुभवदशायामप्यल्पत्वात् *यथा पशुरेवं स देवानाम् (बृ. ३. ४. १०) इति प्रक्रिययाऽतिशयितब्रह्मादिसुखानुसन्धानेन दुःखत्वम्; तस्य चास्थिरत्वानुसन्धानाद्दुःखतरत्वम्; तत्प्रध्वंसागमे तु दुःखतमत्वम्; घटीयन्त्रन्यायेन पुनःपुनरावृत्त्यधीनगर्भवासव्याधिनिरयादिसंभवं तु दुःखं वक्तुमपि दुस्सहम्; तच्चासंख्यातप्रवाहमिति भावः ॥ २० ॥ २१ ॥

भा ॥ महात्मानस्तु निरतिशयप्रियरूपमच्चिन्तनं कृत्वा मामनवधिकातिशयानन्दं प्राप्य न पुनरावर्तन्त इति तेषां विशेषं दर्शयति—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२

भा ॥ अनन्याः—अनन्यप्रयोजनाः, मच्चिन्तनेन विनाऽऽत्मधारणालाभान्मच्चिन्तनैकप्रयोजनाः मां चिन्तयन्तो ये महात्मानो जनाः पर्युपासते—सर्वकल्याणगुणान्वितं सर्वविभूतियुक्तं मां परित उपासते, अन्यूनमुपासते, तेषां नित्याभियुक्तानाम्—मयि नित्याभियोगं काङ्क्षमाणानाम्, अहम् मत्प्राप्तिलक्षणं योगम्, अपुनरावृत्तिरूपं क्षेमं च वहामि ॥ २२ ॥

ता ॥ उपायस्यापि सुखरूपतया फलस्य च नित्यनिर्दोषनिरतिशयानन्दतया महात्मनां विशेषोऽभिधीयत इत्याह—**महात्मानस्त्विति** । अनन्यत्वविशेषणवशाच्चिन्तनस्य निरतिशयसुखरूपत्वसिद्धिः । **मामित्यादिना योगक्षेमशब्दविवक्षितमुक्तम्** । यद्यपि *ये त्वन्यदेवता (२३) इति वक्ष्यमाणावेक्षणेऽनन्यदेवताप्रतीतिः; तथाऽपि प्रकृतकाम्यव्यवच्छेदार्थत्वादुपायसहचरं ततोऽन्यत्फलं व्यवच्छेत्तुम् **अनन्यशब्दः** । अत एवैकत्वानुसन्धानपरत्वं चायुक्तमिति दर्शयति—**अनन्यप्रयोजना** इति । तत्र हेतुमाह—**मच्चिन्तनेन विनेति** । *अनन्याश्चिन्तयन्त इति समभिव्याहारसामर्थ्याच्चिन्तनादन्यस्य निषेधसिद्धिः । निर्विशेषणस्य जनशब्दस्याकृतिगणतुल्ये जने प्रयोगात्तद्व्यवच्छेदाय **प्रकरणसिद्धमुक्तं ये महात्मानो जना** इति । तेषामेव हि जननसाफल्यमिति भावः । *पर्युपासते इत्यत्र प्रयुक्तस्य **परीत्यस्योपसर्गस्य नैरर्थक्यायोगात्तदर्थं** परित इति विवक्षिते तस्यैव प्रमाणान्तरसिद्धविशेषं दर्शयति—**सर्वकल्याणेति** । **प्रतीकोपासनव्यवच्छेदार्थमिदमुक्तमित्यभिप्रायेणाह—अन्यूनमिति** । अखण्डितगुणविभूतिकमित्यर्थः । अत्र *अहमित्यनेन **परमोदारत्वसौशील्यादिगुणविवक्षा** । नहि मोक्षकाङ्क्षिणामानुषङ्गिकभोगप्रदानेऽपि मोक्षानुपयुक्तशरीरयात्रादिरूपौ योग-

क्षेमौ दातव्यावित्यभिप्रायेणाह—मत्प्राप्तीति । अलब्धलाभो योगः; लब्धरक्षणं क्षेमः । समाहारार्थत्वादेकवद्भावः । वहामि—ददामीत्यर्थः ॥ २२ ॥

ये त्वन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३

भा ॥ ये त्विन्द्रादिदेवताभक्ताः केवलत्रयीनिष्ठाः श्रद्धयाऽन्विताः इन्द्रादीन् यजन्ते; तेऽपि पूर्वोक्तेन न्यायेन सर्वस्य मच्छरीरतया मदात्मकत्वेनेन्द्रादिशब्दानां च मद्वाचित्वाद्वस्तुतो मामेव यजन्ते; अपित्वविधिपूर्वकं यजन्ते। इन्द्रादीनां देवतानां कर्मस्वाराध्यतया अन्वयं यथा वेदान्तवाक्यानि * चतुर्होतारो यत्र संपदं गच्छन्ति देवैः (य. आ. ३.११. २१) इत्यादीनि विदधति; न तत्पूर्वकं यजन्ते । वेदान्तवाक्यजातं हि परमपुरुषशरीरतयाऽवस्थितानामिन्द्रादीनामाराध्यत्वं विदधदात्मभूतस्य परमपुरुषस्यैव साक्षादाराध्यत्वं विदधाति । चतुर्होतारः—अग्निहोत्रदर्शपूर्णमासादीनि कर्माणि, यत्र—परमात्मन्यात्मतयाऽवस्थिते सत्येव तच्छरीरभूतैरिन्द्रादिदेवैः, संपदं गच्छन्ति—इन्द्रादिदेवतानामाराधनान्येतानि कर्माणीतीमां संपदं गच्छन्तीत्यर्थः ॥ २३ ॥

ता ॥ सर्वासामपि देवतानां भगवच्छरीरत्वात् * त्रैविद्या माम् (२०) इत्युक्तप्रकारेण वस्तुतस्त्वसमाराधनमिति जानन् भवान् किं न केवलकर्मिणामपि मोक्षरूपयोगक्षेमं प्रयच्छतीत्यत्रोत्तरमुच्यते—* ये त्वित्यादिश्लोकद्वयेन । तुशब्दश्शङ्कानिवृत्त्यर्थः । * अन्यदेवताभक्ताः इत्येतत्समभिव्याहारफलितम् इन्द्रादीनिति । पूर्वोक्तेन न्यायेनेति । * मयि सर्वम् (७.७) इत्यादौ, अस्मिन्नप्यध्याये * मया ततमिदं सर्वम् (४) इत्यादौ चेति भावः । मामेव यजन्तीत्यन्तं शङ्कितानुवादरूपम्; शेषं तु विधेयरूपमित्यभिप्रायेणाह—अपि त्विति । विधिस्स्वज्ञानद्वारा यस्य पूर्वः—कारणं, तद्विधिपूर्वकम्; तदन्यदविधिपूर्वकम् । कथमविधिपूर्वकत्वं विहितानामित्यत्राह—इन्द्रादीनामिति । तत्पूर्वकमिति—तथाविधविध्यनुसन्धानपूर्वकमित्यर्थः । यथा विदधतीत्युक्तं विवृणोति—वेदान्तेति । इन्द्रादीनामाराध्यत्वमात्रं कर्मभागे प्रतिपादितम्; तेषामेव यथावस्थितं स्वरूपं वेदान्तेष्विति न विरोधः । साक्षादिति—निरुपाधिकमित्यर्थः, प्रधानतयेति वा । हविरुद्देश्यपरमपुरुषविशेषणतयेन्द्रादीनामुद्देश्यानुप्रवेशः; यथा प्रतर्दनविद्यादिषूपास्यानुप्रवेश इति भावः । * चतुर्होतारः इत्युपात्तवाक्यस्य कथं प्रस्तुतार्थता; तत्राह—चतुर्होतार इति । उपलक्षणतामभिप्रेत्योक्तम्—अग्निहोत्रदर्शपूर्णमासादीनीति । * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा (य. आ. ३. १०. २) इत्यादिप्रसिद्धः यत्रशब्दार्थ उच्यते—परमात्मनीत्यादिना । * यस्यादित्यश्शरीरम् (बृ. ७. ७. ९) इत्यादिवाक्यानुसन्धानेन तच्छरीरभूतेत्यादिकमुक्तम् । कर्मणां देवैस्साध्या संपत् तदाराधनत्वरूपोऽतिशय एव; स चान्ततः फलसाधनत्वप्रकारे पर्यवसित इत्यभिप्रायेणाह—इन्द्रादिदेवतानामित्यादि ॥ २३ ॥

भा ॥ अतस्त्रैविद्या इन्द्रादिशरीरस्य परमपुरुषस्याराधनान्येतानि कर्माणि; आराध्यश्च स एवेति न जानन्ति, ते च परिमितफलभागिनश्च्यवनस्वभावाश्च भवन्ति; तदाह—

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४

भा ॥ प्रभुरेव च—तत्तत्र फलप्रदाता चाहमेवेत्यर्थः ॥ २४ ॥

ता ॥ अविधिपूर्वकत्वविवरणरूपतां, तथाविधस्यात्यन्तनैष्फल्यशङ्कापरिहाररूपतां च * अहं हीति श्लोकस्य दर्शयति—**अत** इति । सर्वशब्देनेन्द्राद्युद्देशेन क्रियमाणानामित्यभिप्रेतम् । **आराध्यश्चेति** भोक्तृशब्दाभिप्रेतोक्तिः । * च्यवन्तीत्यनेन कुतश्चिदिति सिद्धम्, तच्च तत्तत्कर्मसाध्यमस्थिरं फलमेवेति * यान्तीत्यनन्तरश्लोकवशाद्वाक्यान्तराच्च लब्धम्; तदाह—**परिमिते**त्यादिना । फलस्य परिमितत्वं देशतः कालतस्स्वरूपतश्च । अतस्तद्भागिनां च्यवनस्वभावता । प्रभुशब्दस्यात्र * गतिर्भर्ता प्रभुः (१८) इत्यादिष्विव शास्तृत्वादिविवक्षाव्युदासाय योग्यमर्थमाह—**तत्रतत्रे**ति । **सूत्रं च** * फलमत उपपत्तेः (३.२.३७) इति । यथेन्द्राद्याराधनतया प्रयोगेऽपि तत्रतत्र फलप्रदोऽहम्, न तथा मदाराधनत्वेऽन्यः फलप्रद इत्येवकारार्थः ॥ २४ ॥

भा ॥ अहो महदिदं वैचित्र्यम्, यदेकस्मिन्नेव कर्मणि वर्तमानास्सङ्कल्पमात्रभेदेन केचिदत्यल्पफलभागिनश्च्यवनस्वभावाश्च भवन्ति; केचनानवधिकातिशयानन्दपरमपुरुषप्राप्तिरूपफलभागिनोऽपुनरावर्तिनश्च भवन्तीत्याह—

यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्याः यान्ति मद्याजिनोऽपि माम् ॥ २५

भा ॥ व्रतशब्दस्सङ्कल्पवाची; देवव्रताः—दर्शपूर्णमासादिभिः कर्मभिः इन्द्रादीन्यजामह इति इन्द्रादियजनसङ्कल्पा ये, त इन्द्रादीन् देवान् यान्ति । ये च पितृयज्ञादिभिः पितॄन् यजामह इति पितृयजनसङ्कल्पाः, ते पितॄन् यान्ति । ये च यक्षरक्षःपिशाचादीनि भूतानि यजामह इति भूतयजनसङ्कल्पाः, ते भूतानि यान्ति । ये तु तैरेव यज्ञैः देवपितृभूतशरीरकं परमात्मानं भगवन्तं वासुदेवं यजामह इति मां यजन्ते, ते मद्याजिनो मामेव यान्ति । देवादिव्रताः देवादीन् प्राप्य तैस्सह परिमितं भोगं भुक्त्वा तेषां विनाशकाले तैस्सह विनष्टा भवन्ति । मद्याजिनस्तु मामनादिनिधनं सर्वज्ञं सत्यसङ्कल्पमनवधिकातिशयासंख्येयकल्याणगुणगणमहोदधिमनवधिकातिशयानन्दं प्राप्य न पुनर्निवर्तन्त इत्यर्थः ॥ २५ ॥

ता ॥ एकस्यैव कर्मणः कथं भोगमोक्षविरुद्धफलसाधनत्वमित्यत्र सङ्कल्पाख्यसहकारिवैचित्र्यात्तदुपपत्तिरिति प्राप्यवैषम्यं * यान्तीति श्लोकेन प्रदर्श्यत इत्यभिप्रायेणाह—**अहो महदिति** । संकल्पभेदाद्विचित्रफलसाधनत्वं ज्योतिष्टोमादिष्वपि सिद्धम् । **व्रतशब्दस्संकल्पवाचीति** । अत्र संकल्पविशेषाद्धि फलभेद इति भावः । * देवव्रताः इत्यादौ यजनं * भूतेज्येत्यत्र व्रतं चापेक्षया मेलितम् । भूतशब्दस्यात्र प्राणिमात्रादिपरत्वव्युदासेन राजसतामसयाज्यवर्गप्रदर्शनाय—**यक्षे**त्यादिकम् । न देवयजनपितृयजनादिवत् क्रियास्वरूपभेदोऽत्रेति ज्ञापनाय **तैरेवे**त्युक्तम् । वाक्यान्तरविहितदेवयजनाद्यनुवादेन फलविशेषोऽत्र प्रदर्श्यते, न तु ज्योतिष्टोमादिवाक्यवत्फलार्थोपायविधानं क्रियत इति ज्ञापनाय यत्तच्छब्दविन्यासेन व्याख्यातम् । देवेषु व्रतं येषां ते देवव्रताः; भूतानुद्दिश्येज्या येषां ते भूतेज्याः । तत्तत्प्राप्यभेदवचनं तत्तत्समानदेशकालसमानभोगत्वार्थमिति दर्शयति—**देवादिव्रता** इति । **अनादिनिधनमित्यनेन** प्राप्यानित्यत्वनिबन्धनायाः पुनरावृत्तेः प्रतिक्षेपः; **सर्वज्ञमित्यनेन** विरोध्यज्ञाननिमित्तायाः; **सत्यसङ्कल्पमित्यनेन** त्वशक्तिमूलाया भगवत्स्वातन्त्र्यशङ्कितायाश्च । भक्तान्नावर्तयेयमित्यपि सङ्कल्पोऽस्य सत्य एवेति भावः । स्वरूपतश्च परिमितत्वप्रयुक्तभोगाल्पत्वव्युदासाय **अनवधिके**त्यादि विशेषणद्वयम् । एतेनान्यवैतृष्ण्यहेतुतया स्वेच्छोपाधिकपुनरावृत्तिव्युदासः ॥ २५ ॥

भा ॥ मद्याजिनामयमपि विशेषोऽस्तीत्याह—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६

भा ॥ सर्वसुलभं पत्रं वा पुष्पं वा फलं वा तोयं वा यो भक्त्या मे प्रयच्छति—अत्यर्थमत्प्रियत्वेन तत्प्रदानेन विनाऽऽत्मधारणमलभमानतया तदेकप्रयोजनो यो मे पत्रादिकं ददाति ; तस्य प्रयतात्मनः तत्प्रदानैकप्रयोजनत्वरूपशुद्धियुक्तमनसः, तत्—तथाविधभक्त्युपहृतम्, अहम्—सर्वेश्वरो निखिलजगदुदयविभवलयलीलोऽवाप्तसमस्तकामस्सत्यसङ्कल्पोऽनवधिकातिशयासंख्येयकल्याणगुणगणस्वाभाविकानवधिकातिशयानन्दस्वानुभवे वर्तमानोऽपि, मनोरथपथदूरवर्ति प्रियं प्राप्येवाश्नामि । यथोक्तं मोक्षधर्मे—*याः क्रियास्संप्रयुक्तास्स्युरेकान्तगतबुद्धिभिः । तास्सर्वाश्शिरसा देवः प्रतिगृह्णाति वै स्वयम् ॥ (३५३. ६४) इति ॥ २६ ॥

ता ॥ समानेऽप्यायासे प्राप्यवैषम्यमुक्तम् ; अथोपायवैषम्यमुच्यत इत्याह—**मद्याजिना**मिति । मद्यजनशीलानामित्यर्थः । **अयमपी**ति । उपास्यसौलभ्यातिशयप्रयुक्तोपायसौकर्यरूप इत्यर्थः । पत्रपुष्पफलानां प्रायशो हेतुकार्यभावात्क्रमविन्यासः । तस्य तत्तत्कालानुरूपं यथासंभवं किमपि लभ्यमिति भावः । पत्रादीनां समासाकरणादसमुच्चयाच्च परस्परनैरपेक्ष्यं सूचितम् ; तद्द्योतनाय—**पत्रं** वेत्यादिविकल्पकरणम् । एकैकेन तुष्यति भगवानिति ह्युच्यते * अन्यत्पूर्णादपां कुम्भादन्यत्पादावनेजनात् । अन्यत्कुशलसंप्रश्नान्न चेच्छति जनार्दनः ॥ (भा. उ. ८७. १३) इति । सर्वाभावेऽपि तोयं लभ्यमित्यभिप्रायेण तस्य पश्चादुक्तिः । न चैतद्वित्तव्ययादिसाध्यतया दरिद्रादीनां दुर्लभमित्यभिप्रायेण **सर्वसुलभ**मित्युक्तम् । अन्यत्र चाहुः—* पत्रेषु पुष्पेषु फलेषु तोयेष्वकीतलभ्येषु सदैव सत्सु । भक्त्येकलभ्ये पुरुषे पुराणे मुक्त्यै किमर्थं क्रियते न यत्नः ॥ (गा. पू. २१९. ३४ ; न. पु) इति । य इति सामान्यनिर्देशेन सापराधनिरपराधजडाजडादिविभागमपि न पश्यामीत्यभिप्रेतम् । वक्ष्यति हि * येऽपि स्युः पापयोनयः, स्त्रियो वैश्याः (३२) इत्यादि । भक्त्येत्यनेन दृष्टादृष्टप्रत्यवायपरिहारफलान्तरहेतुत्वव्यवच्छेदः ; तद्व्यनक्ति—**अत्यर्थे**ति । प्रयतात्मशब्दं व्याख्यातिं—**तत्प्रदानेने**ति । * तस्य ताम्रतलौ तात चरणौ सुप्रतिष्ठितौ । सुजातमृदुरक्ताभिरङ्गुलीभिरलङ्कृतौ । प्रयतेन मया मूर्ध्ना गृहीत्वा चाभिवन्दितौ ॥ (भा. व. १८८. १३३) इत्यादिष्विव प्रयोजनान्तररागरूपाशुद्धिविरहः प्रयतत्वमित्यर्थः । पुण्येष्वपि फलाभिसन्धिरेव हि मनसोऽशुद्धिः । तदप्याहुः * तपो न कल्कोऽध्ययनं न कल्कः स्वाभाविको वेदविधिर्न कल्कः । प्रसह्य चि[वि]त्ता-हरणं न कल्कस्तान्येव भावोपहतानि कल्कः ॥ (भा. आ. १. ३०१) इति । * भक्त्युपहृतमिति पुनः कीर्तनं भगवदादरणीयत्वे हेतुरयमेवेति ज्ञापनार्थम् । तथा च स्वयमेवाह—* अप्यप्युपहृतं भक्तैः [प्रेम्णा भूर्येव मे भवेत्] मम भोगाय जायते । भूर्यप्यभक्तोपहृतं न मे [तोषाय] भोगाय जायते ॥ (भाग. १०. ८१. २) इति । फलाभिलाषिणामपि काचिद्भक्ति-रस्तीति तद्व्युदासाय तच्छब्द इत्यभिप्रायेण—**तथाविधभक्त्युपहृत**मित्युक्तम् । पत्रादिक्षुद्रद्रव्यपरिग्रहपरिपन्थिनः प्रकारा अहंशब्देन विवक्षिता इति दर्शयितुं **सर्वेश्वर** इत्यादिकम् । अपिशब्दः प्रत्येकमन्वेतव्यः । **सर्वेश्वर** इति । यथेन्द्रादयस्स्वशक्तिवृद्धये हविरादिकं गृह्णन्ति ; न हि तथाऽहम्, सर्वगोचरसदातननियमनशक्तिशालित्वादिति भावः । **निखिलजगदुदयविभवलयलील** इति । न हि मल्लीलोपकरणाद्धविर्भूतं पत्रादिकं मह्यं दीप्यत इति भावः । **अवाप्तसमस्तकाम** इति । न हि मे अनवाप्तमवाप्तव्यमस्तीत्यभिप्रायः । **सत्य-**

सङ्कल्प इति । नहि ममाशक्यं किञ्चिदन्येनोपहृतं स्वीक्रियत इति भावः । **अनवधिके**त्यादि । गुणतस्स्वरूपतश्च निरतिशयानन्दतृप्तस्य मे कियदिदं पत्रादिकमिति तात्पर्यम् । स्वाभाविकशब्देन हेतुनैरपेक्ष्यम्, वर्तमानशब्देन चानिवर्त्यत्वं विवक्षितम् । *परिपूर्णोऽपि भगवान् भक्तैर्यत्किञ्चिदोरितम् । सापेक्षवत्तदादत्ते तेन प्रीतो ददात्यलम् ॥ (भा. मो. ३५३. ६४) इत्यस्यार्थमभिप्रयन्नाह—**मनोरथे**ति । *अश्नामीत्युपभोगमात्रलक्षणा ; तेन निवेद्याभावे पत्रादिकमपि निवेद्यं स्यादिति व्यज्यते । फलान्तरार्थिजनसमर्पितानां *तत्सर्वं देवदेवस्य चरणावुपतिष्ठते (भा. मो. ३५३. ६३) इति भगवत्पादोपसर्पणमुक्त्वा परमैकान्तिजनदत्तानां भगवताऽत्यादरेण शिरसा प्रतिग्रहो मोक्षधर्मेऽभिहित इत्याह—**यथोक्त**मिति ॥ २६ ॥

भा ॥ यस्मात् ज्ञानिनां महात्मनां वाङ्मनसागोचरोऽयं विशेषः, तस्मात्त्वं च ज्ञानी भूत्वोक्तलक्षण-भक्तिभारावनमितात्मात्मीयः कीर्तनयतनार्चनप्रणामादिकं सततं कुर्वाणो लौकिकं वैदिकं च नित्यनैमित्तिकं कर्म चेत्थं कुर्वित्याह—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७

भा ॥ यत् देहयात्राशेषभूतं लौकिकं कर्म करोषि, यच्च देहधारणायाश्नासि, यच्च वैदिकं होमदान-तपःप्रभृति नित्यनैमित्तिकं कर्म करोषि, तत्सर्वं मदर्पणं कुरुष्व—अर्प्यत इत्यर्पणम् ; सर्वस्य लौकिकस्य वैदिकस्य च कर्मणः कर्तृत्वम्, भोक्तृत्वम्, आराध्यत्वं च यथा मयि समर्पितं भवति तथा कुरु। एतदुक्तं भवति—यागदानादिषु आराध्यतया प्रतीयमानानां देवादीनां कर्मकर्तुर्भोक्तुः तव च मदीयतया मत्सङ्कल्पायत्त-स्वरूपस्थितिप्रवृत्तितया च मय्येव परमशेषिणि परमकर्तरि त्वां च कर्तारं भोक्तारमाराधकम्, आराध्यं च देवताजातम्, आराधनं च क्रियाजातम्, सर्वं समर्पय ; तव मन्नियाम्यतापूर्वकमच्छेषतैकरसतामाराध्यादे-श्चैतत्स्वभावगर्भतामत्यर्थप्रीतियुक्तोऽनुसंधत्स्वेति ॥ २७ ॥

ता ॥ उक्तार्थफलितपरतया उत्तरश्लोकस्य संगतिमाह—**यस्मा**दिति । महात्मनां विशेष उक्तः ; अथ तत्परि-गृहीतं भक्तियोगं वक्तुं तदङ्गभूतं बुद्धिविशेषमनुशास्तीत्यभिप्रायेण **इत्थं कुर्वित्युक्तम्** । *यत्करोषीति श्लोकेन स्वभा-वार्थशास्त्रप्राप्तसर्वकर्मसमर्पणविषयमन्त्रविशेषोऽपि स्मारितः । इममेव च श्लोकं *यत्करोमीत्युपक्रम्य *भगवन्निति संबुद्ध्या *त्वदर्पणमित्यन्तं मन्त्रमेव केचिदनुसंदधते । तत्र *यत्करोषीत्येतद्बोबलीवर्दन्यायात्सङ्कुचितं स्वभावप्राप्त-विषयमित्याह—**यदे**हेति । *अश्नासीत्येतदर्थप्राप्तवर्गोपलक्षणमित्यभिप्रायेणाह—**यच्च देहधारणायाश्नासी**ति । *यज्जु-होषीत्यादेरशास्त्रप्राप्तसमस्तोपलक्षणत्वमुपलक्षणीयसंग्राहकाकारं च दर्शयति—**यच्च वैदिक**मिति । अत्र यच्छब्दास्सर्वं करोषीत्यादिक्रियाविशेषानुवादकाः ॥ अर्पणशब्दस्य भाववाचित्वे व्यधिकरणबहुव्रीहिक्लेशात्तत्पुरुषत्वौपयिककर्मप्रत्ययान्ततां व्युत्पादयति—**अर्प्यत इत्यर्पण**मिति । *कृत्यल्युटो बहुलम् (अष्टा. ३. ३. ११३) इति कर्मणि ल्युट् । मय्यर्पितं कुरुष्वेति शब्दार्थः । अन्यत्र स्थितस्य स्थायिनः ततोऽन्यस्मिन्निवेशनं हि समर्पणम् ; तच्चात्र क्षणिके कर्मणि कथ-मित्यत्राह—**सर्वस्ये**ति । ननु जीवस्यैव कर्तृत्वं भोक्तृत्वं च *कर्ता शास्त्रार्थवत्त्वात् (ब्र. २. ३. ३३) इत्यधिकरणे स्थापितम् ; इन्द्रादीनां चाराध्यत्वं श्रुतम् ; तथाच देवतामेदो मीमांसितः ; अतन्निष्ठस्य तन्निष्ठत्वानुसन्धाने भ्रान्तिरेव स्यात् ; तत्कथमीश्वरे तत्समर्पणमित्यत्राह—**एतदुक्त**मिति । **परमकर्तरी**ति *परात्तु तच्छ्रुतेः । (ब्र. २. ३. ४०)

इत्यधिकरणार्थः स्मारितः । **कर्तारं भोक्तारमाराधकमिति** । क्रियायास्तत्फलस्य तत्प्रदातॄणां चेति शेषः । परमकर्तृत्वात्कर्तृत्वसमर्पणम् ; परमशेषित्वादाराध्यत्वादिसमर्पणम् । कर्तृत्वादौ त्वयि समर्पिते साक्षात्कर्तर्याराध्यविशेषणभूतेन्द्रादौ च किमनुसन्धेयमिति शङ्कायां समर्पणं शिक्षयति—**तवेति** । भक्तिप्रकरणात्प्रीतियुक्तत्वोक्तिः ॥ २७ ॥

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८

भा ॥ एवं संन्यासाख्ययोगयुक्तमनाः आत्मानं मच्छेषतामन्नियाम्यतैकरसं कर्म च सर्वं मदाराधनमनुसंदधानो लौकिकं वैदिकं च कर्म कुर्वन् शुभाशुभफलैरनन्तैः प्राचीनकर्माख्यैर्बन्धनैर्मत्प्राप्तिविरोधिभिस्तवैर्मोक्ष्यसे ; तैर्विमुक्तो मामेवोपैष्यसि ॥ २८ ॥

ता ॥ * संन्यासयोगयुक्तात्मेत्ययं फलविधानार्थः पूर्वश्लोकार्थानुवादः ; न तु ज्ञानकर्मयोगादिपर इत्यभिप्रायेणान्वयमाह—**एवं संन्यासाख्येति** । योगशब्दोऽत्रानुसंधानपरः । तदेव प्रकृतसमर्पणानुवादिना संन्यासशब्देन विशेष्यते । **आत्मानमित्यादि** तद्विवरणम् । **लौकिकमित्यादि** स्वभावार्थप्राप्तयोस्सामान्यरूपम् । **शुभाशुभफलैः**—अनुकूलप्रतिकूलफलैरित्यर्थः । **अनन्तैरिति** बहुवचनाभिप्रेतकथनम् । समर्पणबुध्या क्रियमाणस्य बन्धकत्वाभावात्तद्व्यवच्छेदाय **प्राचीन**शब्दः । अभिमतगतिनिवृत्तिहेतुर्हि बन्धनमित्यभिप्रायेण **मत्प्राप्तिविरोधिभिरित्युक्तम्** । तेनोपायविरोधिव्यवच्छेदश्च । एतेनैव शुभफलस्यापि कर्मणोऽतिशयितफलप्रतिबन्धकत्वात् हेयत्वं निर्व्यूढम् । * मामुपैष्यसीत्येतत्सामर्थ्यात् **सर्वैरित्युक्तम्** । * मोक्ष्यसे इत्युक्त एवार्थः * विमुक्तः इत्यनूद्यत इत्यपौनरुक्त्याभिप्रायेणाह—**तैर्विमुक्त इति** । अत्र विमुक्तिशब्दस्य जीवन्मुक्तिपरत्वं वदन्तस्तदसंभवादेव निरसनीयाः । कर्तृत्वफलप्रदत्वादिवत्फलत्वमपि स्वस्यैवेत्यभिप्रायेण **मामेवोपैष्यसीत्युक्तम्** । यद्वा क्रमेण प्राप्त्या विलम्बव्यवच्छेदार्थ एवकारः । * मामेवैष्यसि (३४) इति च वक्ष्यते ॥ २८ ॥

भा ॥ ममेमं परममतिलोकं स्वभावं शृणु—

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९

भा ॥ देवतिर्यङ्मनुष्यस्थावरात्मनाऽवस्थितेषु जातितश्चाकारतस्स्वभावतो ज्ञानतश्चात्यन्तोत्कृष्टापकृष्टरूपेण वर्तमानेषु सर्वेषु भूतेषु समाश्रयणीयत्वे समोऽहम् ; अयं जात्याकारस्वभावज्ञानादिभिर्निकृष्ट इति समाश्रयणे न मे द्वेष्योऽस्ति—उद्वेजनीयतया न त्याज्योऽस्ति । तथा समाश्रितत्वातिरेकेण जात्यादिभिरत्यन्तोत्कृष्टोऽयमिति तद्युक्ततया समाश्रयणे न कश्चित्प्रियोऽस्ति—न संग्राह्योऽस्ति । अपि त्वत्यर्थमप्रियत्वेन मद्भजनेन विनाऽऽत्मधारणालाभान्मद्भजनैकप्रयोजना ये मां भजन्ते ; ते जात्यादिभिरुत्कृष्टा अपकृष्टा वा मत्समानगुणवद्यथासुखं मय्येव वर्तन्ते । अहमपि तेषु मदुत्कृष्टेष्विव वर्ते ॥ २९ ॥

ता ॥ दुर्लभसुलभोत्कृष्टापकृष्टादिद्रव्यतारतम्यादर्शनेन स्वीकारः * पत्रमिति श्लोकेन प्रोक्तः । तेन सौलभ्यमुक्तं भवति । * यत्करोषीत्यादिना क्रियमाणस्य सर्वस्य बुद्धिविशेषमात्रेण तदाराधनत्वसंपत्त्या तदेव दृढीकृतम् । अथ भक्तियोगाधिकारिप्रशंसनपरे * समोऽहमिति श्लोके तु जात्याकारादितारतम्यानादरेण भक्तैस्स्वस्यैकरस्यमुच्यते ।

तेन सौशील्यमुक्तं भवति। कंसादिनिग्रहादक्रूराद्यनुग्रहात् *तत्कुरुष्व मदर्पणम्, *मामुपैष्यसीत्याद्युक्तेश्च जाता रागद्वेषशङ्का प्रतिक्षेप्येत्यभिप्रायेणाह—**ममे**ति। अहंशब्दोऽत्र स्वेतरव्यवच्छेदपर इत्यभिप्रायेण **अतिलोकमि**त्युक्तम्। *समोऽहमित्यस्य प्रतिशिरोभूतं वैषम्यं सर्वशब्देन विवक्षितमित्यभिप्रायेणाह—**देवे**ति। **जातितः**—देवत्वमनुष्यत्व-ब्राह्मणत्वक्षत्रियत्वादेः; **आकारतः**—अभिरूपस्त्रीत्वपुंस्त्वसमविषमाङ्गत्वादेः। वक्ष्यति हि *येऽपि स्युः पापयोनयः, स्त्रियो वैश्यास्तथा शूद्राः (३२) इति। *स्वभावतः इत्यनेन सात्त्विकराजसत्वादिकं विवक्षितम्। देवादीनां भगवत्समाश्रयणं *तदुपर्यपि बादरायणस्संभवात् (ब्र. १. ३. २५) इत्यधिकरणे समर्थितम्; तिरश्चामपि गजेन्द्रवानरेन्द्रादिषु पुण्याधिक्यनिबन्धनज्ञानविशेषवत्सु प्रथितम्। तस्मात्तिर्यगधिकरणाविरोधः। स्थावरेष्वपि शापादिजातेषु क्वचिज्ज्ञानं महर्षयः कथयन्ति। ततश्च मनोवृत्तिरूपं समाश्रयणं तत्रापि संभवेदेव। *न मे द्वेष्योऽस्ति न प्रियः इत्यस्य प्रतिषेधस्य प्रसङ्गसाकाङ्क्षत्वाज्जात्यादिभिर्निकर्षोत्कर्षौ प्रतिषेध्यप्रसञ्जकतयोक्ताविति्याह—**अय**मिति। तद्द्वेष्यत्वप्रियत्वे हि त्याज्यत्वसंग्राह्यत्वार्थे इति तन्निषेधात्तन्निषेधः फलित इत्यभिप्रायेणोक्तम्—**उद्वेजनीयतया न त्याज्योऽस्तीति, न संग्राह्योऽस्ती**ति च। समाश्रयणाधीनप्रियत्वप्रतिषेधभयात्—**समाश्रितत्वातिरेकेणे**त्युक्तम्। यदि, न प्रियत्वहेतुतया प्रसिद्धाज्जात्यादिभिरुत्कर्षात्प्रियत्वम्; कुतस्तर्हि? यदि न कुतश्चित्, *स च मम प्रियः इत्यादिविरोध इति शङ्का-निराकरणार्थस्तुशब्द इत्यभिप्रायेणाह—**अपि त्वि**ति। *भक्त्या भजन्ति इत्यनयोः पौनरुक्त्यपरिहारायान्वयमाह—**अत्यर्थे**ति। *ये इत्येतदुत्कर्षापकर्षानियमाभिप्रायमित्याह—**ते जात्यादिभि**रिति। तुल्यानामिवान्योन्यमैकरस्यमिह *मयीत्यादिना विवक्षितमित्यभिप्रायेणोक्तम् **मत्समानगुणवद्यथासुख**मिति। ननु स्वामित्वेन त्वामनुसंधाय भजतां कथं त्वयि समानगुणवद्वृत्तिरित्यस्योत्तरं *तेषु चाप्यहमित्यनेनोच्यत इत्यभिप्रायेणाह—**अहमपी**ति। सौशील्यातिरेकतो मत्तोऽप्युत्कृष्टानिवाहं *शिरसा देवः प्रतिगृह्णाति (भा. मो. ३५३. ६४) इत्युक्तप्रक्रियया संभावयामि; ततश्च ते मत्परमेश्वरत्वाद्यनुसंधाननिबन्धनसाध्वसविधुरास्सुखं मां सेवन्त इति भावः। अहं च ते चान्योन्यं पित्रादिष्विव न्यस्तभरा इति पिण्डितार्थः। स्वजातिप्रतिनियतधर्मैर्भजनान्नापकृष्टजातिनिर्देशविरोधः॥ २९॥

भा॥ तत्रापि—

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यस्सम्यग्व्यवसितो हि सः॥ ३०

भा॥ तत्रतत्र जातिविशेषे जातानां यस्समाचार उपादेयः परिहरणीयश्च; तस्मादतिवृत्तोऽप्युक्त-प्रकारेण मामनन्यभाक् भजनैकप्रयोजनो भजते चेत्; साधुरेव सः—वैष्णवाग्रेसर एव सः, मन्तव्यः—बहु-मन्तव्यः, पूर्वोक्तैस्सम इत्यर्थः। कुत एतत्? सम्यग्व्यवसितो हि सः—यतोऽस्य व्यवसायस्सुसमीचीनः। भगवान् निखिलजगदेककारणभूतः परं ब्रह्म नारायणश्चराचरपतिरस्मत्स्वामी मम गुरुर्मम सुहृत् मम परमं भोग्यमिति सर्वैर्दुष्प्रापोऽयं व्यवसायस्तेन कृतः, तत्कार्यं चानन्यप्रयोजनं निरन्तरं भजनं तस्यास्ति, अत-स्साधुरेव; बहुमन्तव्यश्च। अस्मिन् व्यवसाये तत्कार्ये चोक्तप्रकारभजने संपन्ने सति तस्याचारव्यतिक्रम-स्स्वल्पवैकल्यमिति न तावताऽनादरणीयः, अपि तु बहुमन्तव्य एवेत्यर्थः॥ ३०॥

ता॥ एवं समाश्रयणस्वीकारे जात्याद्यपकर्षोऽकिञ्चित्कर इत्युक्तम्; ततश्चोपरि वृत्तापकर्षोऽप्यकिञ्चित्कर इत्युच्यते *अपि चेदिति श्लोकेनेत्यभिप्रायेणाह—**तत्रापी**ति। ब्राह्मणाचारः शूद्रादेरधर्मः; शूद्राचारश्च ब्राह्मणादेः;

एवं ब्राह्मणस्य निषिद्धं मधुमांसादिकं शूद्रस्य न निषिध्यते; शूद्रस्य निषिद्धं च कपिलाक्षीरादिकं ब्राह्मणस्य प्रशस्तम्; अतस्त्वजातिनियमाद्यपेक्षया दुराचारत्वं दोष इत्यभिप्रायेणाह—**तत्रतत्रेति** । विहिताकरणं निषिद्धकरणं चेत्युभयमपि दुराचार इति ज्ञापनाय **उपादेयः परिहरणीयश्चेत्युक्तम्** । अत्र * चेदित्यस्य नैरर्थक्यादिपरिहाराय दुराचरोऽपि भजते चेदित्यन्वयः प्रदर्शितः । **उक्तप्रकारेणेति** । सततकीर्तनादिनेत्यर्थः । प्रकरणविशे[ष]षितोऽनन्यभागित्यस्यार्थो **भजनैकप्रयोजन** इति । तेनैव देवतान्तरभजनप्रसङ्गो दूरनिरस्तः । यथोच्यते—* ब्रह्माणं शितिकण्ठं च याश्चान्या देवतास्स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् । (भा. मो. ३५०. ३६) इति । ननु * आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः (वि. स.) आचारहीनं न पुनन्ति वेदाः (वासिष्ठ. ६.३) * सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु (दक्ष. २. २२) इत्यादिषु सत्सु दुराचारस्य केनाकारेण साधुत्वमित्यत्राह—**वैष्णवाग्रेसर** इति । अनन्यभजनं वैष्णवाग्रेसरत्वे प्रयोजकम् । ननु * साधवः क्षीणदोषास्स्युः (वि. ३. ११. ३) इति भगवत्पराशरवचनात् क्षीणपापानां च कृष्णभक्तिस्मरणात्साधुशब्दोऽत्र कथं वैष्णवाग्रेसरपर उक्तः, आचारशून्यस्य शिष्टापरिग्रहादसाधुत्वमेवेत्यत्रोत्तरं * मन्तव्यः इत्युच्यत इति दर्शयति—**बहुमन्तव्य** इति । अर्थसिद्धबोद्धव्यतामात्रकथनं निरर्थकम्; संपूर्वस्य मनिधातोश्च बहुमतिरर्थः; उपसर्गार्थाश्च धातुलीना इति भावः । अपरिग्रहे सति खल्वसाधुत्वशङ्का; न तु सोऽस्तीत्याह—**पूर्वोक्तैस्सम** इति । * विष्णुरेव भूत्वा (यजु. २.१.३.१६) इत्यादौ साम्येऽप्येवकारः प्रयुज्यत इति भावः । पूर्वोक्तैर्महात्मभिरित्यर्थः । ननु स्वाचारदुराचारयोः पुष्कलविकलोपाययोर्न तावदुपायतस्साम्यम्; तत एव न फलतोऽपीति शङ्कायां * सम्यगित्यादिकमवतारयति—**कुत एतदिति** । **यत** इति । हिर्हेताविति भावः । व्यवसायस्य समीचीनतां प्राधान्यतो व्यवसेयविषयविशेषेण विशदयति—**भगवानिति** । भगवान्—उभयलिङ्गकः । **निखिलजगदेककारणभूत** इत्यनेन ब्रह्मत्वसाधकं श्रौतं लक्षणमुक्तम् । तेन * ज्ञात्वा भूतादिमव्ययम् (१३) इति पूर्वोक्तं च स्मारितम् । सामान्यशब्दस्य विशेषे पर्यवसानं * नारायण परं ब्रह्म (ना) इत्यादितत्त्वनिर्णायकवाक्यं चाभिप्रेत्य—**परं ब्रह्म नारायण** इत्युक्तम् । * चराचरपतिः * पतिं विश्वस्यात्मेश्वरम् (ना) पतिं पतीनाम् (श्वे. ६. ७.) इत्यादि द्रष्टव्यम् । एवं परत्वव्यवसायः । **अथ सौलभ्याध्यवसायः अस्मत्स्वामीति** । नह्यहं तद्विभूतेर्बहिर्भूतः; स्वशेषभूतं मामसौ स्वयमेव लब्धुमुपक्रान्त इति भावः । एवं पदद्वयेन सांसिद्धिकस्संबन्धो दर्शितः, अत्यन्तमूर्खस्य मम सम्यग्ज्ञानप्रदायी महोपकारकोऽयमित्यभिप्रायेण **मम गुरुरित्युक्तम्** ॥ अनन्तमहापराधशालिनि मय्यपि शोभनहृदयोऽयमित्यभिप्रायेण **मम सुहृदित्युक्तम्** । अतिक्षुद्रदुःखमिश्रनश्वरसुखकणसङ्गिनो मे निरतिशयनिर्दोषनित्यसुखसागरं स्वात्मानं प्रकाशितवानित्यभिप्रायेण **मम परं भोग्यमित्युक्तम्** । गुरुत्वसुहृत्त्वे प्रापकत्वार्थे; भोग्यत्वं तु प्राप्यत्वार्थम् । **सर्वैर्दुष्प्रापे** इति—आचारबहुलेष्वपि तादृशो व्यवसायो न दृश्यते; आकरेऽपि शिलाशकलमनुपादेयम्; अवकरेऽपि रत्नमादरणीयमिति भावः । * बहूनां जन्मनामन्ते (गी. ७. १९) इति ह्येवंविधो व्यवसाय उक्तः । स्मरन्ति च **श्रीपौष्करे** च * ये जन्मकोटिभिस्सिद्धाः * **अनेकजन्मसंसारचिते** पापसमुच्चये । नाक्षीणे जायते पुंसां गोविन्दाभिमुखी स्थितिः इति । श्रीशुकं प्रति जनकश्चाह—* **ज्ञानं च व्यवसायश्च द्वौ परप्रतिपादकौ** । व्यवसायादृते ब्रह्म नासादयति तत्परम् ॥ (भा. मो. ३३४. ४७) इति । व्यवसायमात्रेण कथं भजमानैस्समानत्वमित्यत्राह—**तत्कार्यं चेति** । * भजते मामित्यत्र व्यवसायोऽन्तर्गतः, व्यवसित इत्यत्राप्यर्थाद्भजनम्; अनन्यभजनमूलबहुमन्तव्यत्वहेतुतया हि व्यवसायोऽयमुक्त इति भावः । अविकलानुष्ठायिवद्विकलानुष्ठायी कथं बहुमन्तव्य इत्यत्राह—**अस्मिन्निति** । तादृशे पुरुषे स्वल्पैकल्यनिमित्तोऽनादर एव महापराधस्त्या-

दिति भावः । * स्मृतसंभाषितो वाऽपि पूजितो वा द्विजोत्तम (इ. स. ३२), * स च पूज्यो यथा ह्यहम् (गा. पू. २१९) इत्यादिप्रमाणसूचनाभिप्रायेण निगमयति—**अपि तु बहुमन्तव्य एवेति** ॥ ३० ॥

भा ॥ ननु * नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वाऽपि प्रज्ञानेनैनमाप्नुयात् ॥ (क. २. २४) इत्यादिश्रुतेः आचारव्यतिक्रम उत्तरोत्तरभजनोत्पत्तिप्रवाहं निरुणद्धीत्यत्राह—

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१

भा ॥ *मत्प्रियत्वकारितानन्यप्रयोजनमद्भजनेन विधूतपापतयैव समूलोन्मूलितरजस्तमोगुणः* **क्षिप्रं धर्मात्मा भवति**—क्षिप्रमेव विरोधिरहितसपरिकरमद्भजनैकमना भवति । एवंरूपभजनमेव हि * धर्मस्यास्य परन्तप (३) इत्युपक्रमे धर्मशब्दोदितम् । शश्वच्छान्तिं निगच्छति—शाश्वतीमपुनरावर्तिनीं मत्प्राप्तिविरोध्याचारनिवृत्तिं गच्छति । कौन्तेय त्वमेवास्मिन्नर्थे प्रतिज्ञां कुरु—मद्भक्तावुपक्रान्तो विरोध्याचारमिश्रोऽपि न नश्यति ; अपि तु मद्भक्तिमाहात्म्येन सर्वं विरोधिजातं नाशयित्वा शाश्वतीं विरोधिनिवृत्तिमधिगम्य क्षिप्रं परिपूर्णभक्तिर्भवतीति ॥ ३१ ॥

ता ॥ अस्वन्येषां बहुमन्तव्यः, स्वस्य तु कार्यासिद्धिरिति शङ्कापूर्वकमनन्तरश्लोकमवतारयति—**ननु नाविरत** इति । न केवलं प्राप्तिमात्रनिषेधश्रुतौ ; अपि तु प्रज्ञानस्यापि निषेधोऽभिप्रेत इत्यभिप्रायेणोक्तम्—**उत्तरोत्तरभजनोत्पत्तिप्रवाहं निरुणद्धी**ति । तथाचोच्यते—* पापं प्रज्ञां नाशयति क्रियमाणं पुनःपुनः । नष्टप्रज्ञः पापमेव पुनरारभते द्विज ॥ (भा. उ. ३५. ७३) इति । प्रतिबन्धकरजस्तमोमूलभूतपापनिरासाय ह्याचारः ; तस्मिंश्च पापे मद्भजनेन विनिवृत्ते सति नोपासनप्रतिबन्ध इत्यभिप्रायेणाह—**मत्प्रियत्वे**ति । विकलस्य विलम्बशङ्काप्रतिक्षेपार्थः क्षिप्रशब्दः । धर्मशब्दोऽत्र प्रकरणादनन्यभजनपरः । आत्मशब्दश्च तत्करणभूतमनोविषयः । * अनन्यमनसः * मन्मना भव इति हि पूर्वापरम् ; भजनमेव कथं भजनोत्पत्तिप्रतिबन्धकनिवर्तकमिति चेत्तन्न, परिपूर्णभजनस्य साध्यत्वात्, भक्त्युपक्रमस्य च हेतुत्वात् ; तदेतदाह—**क्षिप्रमेवे**त्यादिना । नन्वत्र धर्मशब्दो वर्णाश्रमधर्ममात्रपरः किं न स्यादित्यत्राह—**एवंरूपे**ति । सामान्यशब्दस्य प्राकरणिकविशेषविषयत्वमेव न्याय्यम् ; प्रयुक्तश्चायमेव शब्दः प्रक्रमे भजनरूपविशेषविषयतयेति भावः । अस्तु भजनप्रभावात्पापनिवृत्तिः ; तथाऽपि परितापरहितबुद्धिपूर्वानुवृत्तदुराचारसन्तानः कथं न प्रतिबन्धक इत्यत्रोत्तरं—**शश्वच्छान्तिं निगच्छती**ति । **मत्प्राप्तिविरोध्याचारनिवृत्ति**मिति—प्रकरणविशेषतश्शान्तिशब्दार्थः । * प्रतिजानीहि इत्यत्र ज्ञानमात्रविधावुपसर्गस्य नैरर्थक्यात्, * वास्तोष्पते प्रतिजानीह्यस्मान् (यजु. ३. ४. १०. ३६) इत्यादिष्वगत्या नैरर्थक्यस्वीकारादत्र च ज्ञानविधेः प्रयोजनाभावात्, प्रतीयमानप्रतिज्ञार्थस्यात्यन्तनिर्णीतत्वस्थापकतयाऽपेक्षितत्वाच्चाह—**कौन्तेय त्वमेवास्मिन्नर्थे प्रतिज्ञां कुरु**वेति । प्रतिजानामीति स्वप्रतिज्ञानादपि * प्रतिजानीहीति श्रोतुरेव प्रतिज्ञाविधानमत्यन्तस्थैर्याभिप्रायमिति व्यञ्जनायोक्तं **त्वमेवे**ति । *न मे भक्तः प्रणश्यतीत्ययं प्रतिज्ञाविषय इति **ज्ञापनाय अस्मिन्नर्थे** इत्युक्तम् । परिपूर्णोपासकस्य नाशप्रसङ्गाभावात् * अपिचेत्सुदुराचारः इत्युक्तविषयत्वाच्चाह—**मद्भक्तावुपक्रान्तो विरोध्याचारमिश्रोऽपी**ति । उपक्रान्तभक्तिरपि हि भक्त इत्युच्यते । भक्तस्य नाशनिषेधः शश्वदित्याद्युक्ततत्प्रतिकूलनाशमुखेन परिपूर्तिपर्यवसित इत्यभिप्रायेणाह—**अपि त्वि**ति । अत्रोपरिचरादिवृत्तान्तो ग्राह्यः । यथोपरिचरो

भगवद्धर्ममास्थितः कदाचिद्देवानामृषीणां विवादे पिष्टपश्वादि महर्षिविरुद्धमनृतमभिधाय निपतितः क्षिप्रं भगवतोदस्तः ; यथा च * उपमानमशेषाणां साधूनां यस्सदाऽभवत् (वि. १. १५. १५६) इति प्रसिद्धः प्रह्लादः कदाचिद्भगवन्तं प्रतियोद्धुं प्रवृत्तश्शीघ्रं प्रत्यबुध्यत ; यथा च पापिष्ठः क्षत्रबन्धुर्भगवन्नामप्रभावादनन्तरजन्मनि जातिं स्मरन् तीव्रनिर्वेदो भगवन्तं शरणमुपगम्य ह्यमुच्यत । इतिशब्दस्य * अस्मिन्नर्थे इत्यनेनान्वयः ॥ ३१ ॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ३२

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३

भा ॥ स्त्रियो वैश्याश्शूद्राश्च पापयोनयोऽपि मां व्यपाश्रित्य परां गतिं यान्ति : किं पुनः पुण्ययोनयो ब्राह्मणा राजर्षयश्च मद्भक्तिमास्थिताः । अतस्त्वं राजर्षिरस्थिरं तापत्रयाभिहतत्वया असुख चेमं लोकं प्राप्य वर्तमानो मां भजस्व ॥ ३२ ॥ ३३ ॥

ता ॥ * अपिचेत्सुदुराचारः इत्यागन्तुकपापोक्तिः ; अथ जन्मत एव पापिष्ठानां जात्याद्यपकर्षेऽपि स्वसमाश्रयणमात्रेण फलसिद्धिं प्राक्प्रस्तुतां प्रपञ्च्य तत एव जात्याद्युत्कर्षे भक्तिपौष्कल्ये च कैमुतिकन्यायमुक्त्वा जात्यादिभिरुत्कृष्टत्वं फले निस्सन्देह उपायमातिष्ठेत्युच्यते—* मां हीत्यादिश्लोकद्वयेन । स्त्रीवैश्यशूद्राणां परगतिविरोधितया शङ्किताकारानुवादार्थः पापयोनिशब्दः । तत्र ये पापयोनयोऽपि स्युरित्यन्वयः । त्रैवर्णिकस्य विद्यादिमतोऽपि वैश्यस्य शूद्रादिभिस्सह पापयोनित्वेन परिगणनं सत्रानधिकारित्वात् । ऋत्विज एव हि सर्वे सत्रेषु यजमानाः, अर्त्विज्यं च ब्राह्मणस्य, स च सत्राधिकाररूप उत्कर्षः * तस्माद्राजपेययाज्यार्त्विजीनः (यजु. १. ३. २. १४) इति क्षत्रियस्यापि श्रुतः । पापयोनिशब्दप्रतिशिरस्त्वात्पुण्यशब्दोऽत्र पुण्ययोनिपरः प्रदर्शितः । * किंपुनरित्यादि कैमुतिकन्यायादनायासत्ववचनम् । राजर्षिप्रदर्शनमर्जुनस्य फलसिद्धिप्रतिपादनार्थमित्यभिप्रायेणाह - अतस्त्वमिति । राजर्षिशब्देन सामर्थ्यं व्यञ्जितम् ; अस्थिरमित्यादिना त्वर्थित्वम् । अनित्यशब्दस्य * सततविक्रिया इत्युक्तप्रकारेण क्षणध्वंसभावविषयत्वज्ञापनायास्थिरशब्दः । असुखशब्दस्यात्र पर्युदासवृत्त्या दुःखपरतां सांसारिकसुखस्यापि दुःखकोटिनिवेशात्सुखराहित्यपरत्वं चाभिप्रेत्याह—तापत्रयेति । * इममित्यनेन अतिक्षुद्रत्वं निर्दिष्टम् । * प्राप्येत्यस्यानुवादरूपताज्ञापनाय प्राप्य वर्तमान इत्युक्तम् । एवमनित्यत्वासुखत्वक्षुद्रत्वानुदर्शनाद्भजनवैमुख्यनिवृत्तिर्भवतीत्यभिप्रायः ॥ ३२ ॥ ३३ ॥

भा ॥ भक्तिस्वरूपमाह—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥ ९ ॥

भा ॥ मन्मना भव—मयि सर्वेश्वरेश्वरे, निखिलहेयप्रत्यनीककल्याणैकताने, सर्वज्ञे, सत्यसङ्कल्पे निखिलजगदेककारणे, परस्मिन् ब्रह्मणि, पुरुषोत्तमे, पुण्डरीकदलामलायताक्षे, स्वच्छनीलजीमूतसङ्काशे,

युगपदुदितदिनकरसहस्रसदृशतेजसि, लावण्यामृतमहोदधौ, उदारपीवरचतुर्बाहौ, अत्युज्ज्वलपीताम्बरे, अमलकिरीटमकरकुण्डलहारकेयूरकटकभूषिते, अपारकारुण्यसौशील्यसौन्दर्यमाधुर्यगाम्भीर्यौदार्यवात्सल्य-जलधौ, अनालोचितविशेषाशेषलोकशरण्ये सर्वस्वामिनि तैलधारावदविच्छेदेन निविष्टमना भव। तदेव विशिनष्टि—मद्भक्तः। अत्यर्थमप्रियत्वेन युक्तो मन्मना भवेत्यर्थः। पुनरपि विशिनष्टि—मद्याजी—अनवधिकातिशयप्रियमदनुभवकारितमद्यजनपरो भव। यजनं नाम परिपूर्णशेषवृत्तिः। औपचारिकसांस्पर्शिकाभ्यवहारिकादिसकलभोगप्रदानरूपो हि यागः। यथा मदनुभवजनितनिरवधिकातिशयप्रीतिकारितमद्यजनपरो भवसि; तथा मन्मना भवेत्युक्तं भवति। पुनरपि तदेव विशिनष्टि—मां नमस्कुरु—अनवधिकातिशयप्रियमदनुभवकारितात्यर्थप्रियाशेषशेषवृत्तावपर्यवस्यन् मय्यत्यन्तमतिमात्रप्रह्वीभावव्यवसायं कुरु। मत्परायणः—अहमेव परमयनं यस्यासौ मत्परायणः, मया विनाऽऽत्मधारणासंभावनया मदाश्रय इत्यर्थः। एवमात्मानं युक्त्वा मत्परायणस्त्वमेवमनवधिकातिशयप्रीत्या मदनुभवसमर्थं मनः प्राप्य मामेवैष्यसि। आत्मशब्दो ह्यत्र मनोविषयः। एवंरूपेण मनसा मां ध्यात्वा मामनुभूय मामिष्ट्वा मां नमस्कृत्य मत्परायणो मामेव प्राप्स्यसीत्यर्थः। तदेवं लौकिकानि शरीरधारणार्थानि वैदिकानि च नित्यनैमित्तिकानि कर्माणि मत्प्रीतये मच्छेषतैकरसो मयैव कारित इति कुर्वन् सततं मत्कीर्तनयतननमस्कारादिकान् प्रीत्या कुर्वाणो मन्नियाम्यं निखिलजगन्मच्छेषतैकरसमिति चानुसन्दधानोऽत्यर्थप्रियमद्गुणगणं चानुसन्धायाहरहरुक्तलक्षणमिदमुपासनमुपाददानो मामेव प्राप्स्यसि ॥ ३४ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये नवमोऽध्यायः ॥ ९ ॥

ता ॥ * भजस्वेत्युक्तभक्तिस्वरूपनिष्कर्षोऽनन्तरं क्रियत इति संगतिं दर्शयति—**भक्तिस्वरूपमाहेति**। सामान्येन सर्वासु परविद्यासूपास्यतया तदुपयुक्ततया च प्रमाणशतैः प्रतिपादिताः स्वरूपरूपगुणादयोऽत्रास्मच्छब्देन विवक्षिता इत्यभिप्रायेणाह—**मयीति**। * तमीश्वराणां परमं महेश्वरं (श्वे. ६. ७) * न तस्येशे कश्चन (ना) इत्यादेरर्थमाह—**सर्वेश्वरेश्वर** इति; न ह्यसमर्थसेवया किंचिल्लभ्यते; नच ब्रह्माण्डान्तरादेरनीश्वरा ब्रह्मेशानादयोऽपि मोक्षदानशक्ता इति भावः। * क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता (या. स्मृ. ३.३४) इति ह्युच्यते। हेयास्पदस्य गुणरहितस्य च भजनीयत्वाभावादितरव्यावृत्त्यर्थं सगुणनिर्गुणश्रुतीनां विषयव्यवस्थयोभयलिङ्गत्वमाह—**निखिलेति**। समस्तानिष्टनिवर्तकत्वादनन्तभोग्यमयत्वाच्चायमेवोपास्य इति भावः। अनन्तमङ्गलगुणोपलक्षकतया ध्येयलक्षणजगत्कारणत्वमोक्षप्रदत्वौपयिकं गुणद्वयं **सर्वज्ञे सत्यसङ्कल्प** इत्युक्तम्। * यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते (मु. १. १. ९) इति, * सत्यकामस्सत्यसङ्कल्पः (छा. ८. ७. १) इति च। अनिष्टनिवृत्त्यादौ चास्याज्ञातं सहकारिसापेक्षत्वं च नास्तीति भावः। * यतो वा इमानि भूतानि जायन्ते इत्युपक्रम्य * तद्विजिज्ञासस्व (भृ) * कारणं तु ध्येयः (अथर्व) इत्याद्यभिप्रायेण **निखिलजगदेककारण** इत्युक्तम्। निखिलशब्देनाव्यक्तादेर्ब्रह्मरुद्रादेश्च संग्रहः। व्योमातीतनिर्गुणवादादिनिराकरणं, सामान्यविशेषशब्दयोरैकरस्यं चाभिप्रेत्य **परस्मिन् ब्रह्मणि पुरुषोत्तम** इत्युक्तम्। अनेन सर्वात्मकत्वं सर्वविलक्षणत्वं चाविरुद्धमुपदर्शितं भवति। नारायणानुवाकं पुरुषसूक्तादिकं च स्मारितम्। एतावता विशिष्टं स्वरूपमुक्तम्; अथ सर्वशाखादिपठितपुरुषसूक्तादिसिद्धं शुभाश्रयप्रकरणप्रपञ्चितं च विग्रहतद्गुणादिकमच्युते। * तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी (छा. १. ६. ७) इत्याद्युक्तपरत्वचिह्नमाह—**पुण्डरीकदलामलायताक्ष** इति।

स्वच्छेत्यादिना * नीलतोयदमध्यस्था (ना) इत्यादिकमनुसंहितम् । स्वच्छत्वं मणिमुकुरसलिलकाचादिवद्व्यवहितप्रकाशप्रतिबिम्बादियोग्यः प्रसादविशेषः । * दिवि सूर्यसहस्रस्य (गी. ११.१२) इत्यादि वक्ष्यमाणं, * तमेव भान्तम् (मु. २. २. १०) इत्यादिश्रुतिं चाभिप्रेत्योक्तं **युगपदित्यादि** । यद्वा, तेजःप्राचुर्यं प्रतिकूलैर्दुष्प्रेक्षत्वं चाभिप्रेत्य **युगपदित्यादिकमुक्तम्** । **लावण्येत्यादिना** तु तस्यैवानुकूलभोग्यत्वाकर्षकत्वादिकमभिप्रेतम् । चक्षुरानन्दजनकस्तेजोविशेषो हि लावण्यम् । तत इदमुच्यते—* लोचनैरनुजग्मुस्ते तमादृष्टिपथात्पुनः । मनोभिरनुजग्मुश्च कृष्णं प्रीतिसमन्विताः ॥ अतृप्तमनसामेवं तेषां केशवदर्शने । क्षिप्रमन्तर्दधे शौरिश्चक्षुषां प्रियदर्शनः ॥ (भा. स. २. २६) * अमृतस्येव नातृप्यन् प्रेक्षमाणा जनार्दनम् । * नहि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात् । नरश्शक्नोत्यपाकृष्टुमतिक्रान्तेऽपि राघवे ॥ (रा. अ. १७. १५) इति । बाहूनामुदारत्वमौर्जित्यमभिमतफलप्रदत्वं च । यत्र रूपान्तरं न विशिष्टं, तत्र वक्तुर्वसुदेवनन्दनस्य रूपं विवक्षितम्; तच्च सर्वावतारोपलक्षणम् । चतुर्भुजत्वं भगवतः कृष्णस्य पररूपस्य सांसिद्धिकम्; द्विभुजत्वं सहस्रभुजत्वादिकं चाहार्यमित्याशयेनोक्तं **चतुर्बाहाविति** । * अथवाऽपि चतुर्भुजं * भुजैश्चतुर्भिस्समुपेतमेतद्रूपं विशिष्टं दिवि संस्थितं च । भूमौ गतं पूजयताप्रमेयं सदा हि तस्मिन्निवसामि देवाः ॥ (भा. मौ. ५. ३४) इत्यादिकमिह भाव्यम् । श्रुत्यादिप्रसिद्धं दिव्याम्बरयोगमाह—**अत्युज्ज्वलेति** । मूर्धादिपादान्तदिव्यावयवगतसमस्ताभरणवर्गोपलक्षणतया किरीटाद्युक्तिः । * ध्येयस्सदा इत्युपक्रम्य * केयूरवान् मकरकुण्डलवान् किरीटी (नार. ६२. १७) इत्यादिकमिह द्रष्टव्यम् । मकरशब्दो मकराकारकुण्डलपरः । **अपारेत्यादिना** सौलभ्योपयोगिनोऽमिताम्युन्दरत्वादिमिश्रास्समाश्रयणीयत्वेऽत्यन्तापेक्षितास्स्वरूपरूपयोर्गुणा उक्ताः । *सर्वलोकशरण्याय (रा. यु. १७) * सुदुष्टो वाऽप्यदुष्टो वा (रा. यु. १८) * विभीषणो वा सुग्रीव यदि वा रावणस्स्वयम् (रा. यु. १८. ३७) इत्यादिकमनुसन्धाय कारुण्यादिफलितमाह—**अनालोचितेति** । आश्रितसंरक्षणं स्वलाभं मत्वा प्रवर्तत इत्यभिप्रायेणोक्तं—**सर्वस्वामिनीति** । * कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् (भा. सभा. ४२. २३) इत्युक्तम् । * निदिध्यासितव्यः (बृ. ६. ५. ६) * ध्यायीत (मु. २. २. ६) * ध्रुवा स्मृतिः (छा. ७. २६. २) * आवृत्तिरसकृदुपदेशात् (ब्र. ४. १. १) इत्याद्यनुसन्धानेन मनश्शब्दस्यात्र ध्यानास्यमनोवृत्तिविशेषविषयतामाह—**तैलधारेति** । * मय्येव मन आधत्स्वेति (१२. ८) वक्ष्यते । अत्र *मामेवैष्यसीति साध्यगतावधारणात्साधनेऽप्यवधारणं विवक्षितमिति गम्यते । तेन चानन्यमनस्त्वादिकं सिद्धम् । ततश्च तैलधारादिवदविच्छेदोऽपि फलित इति भावः । * यमेवैष वृणुते तेन लभ्यः (क. २. २३) इति श्रुत्युपबृंहणतामभिप्रेत्याह—**तदेवेति** । भक्तेरपि ज्ञानविशेषरूपत्वाद्विशेषकत्वमुपपद्यत इत्यभिप्रायेणाह—**अत्यर्थेति** । स्वतन्त्रार्थान्तरविधानशङ्कानिरासायाह—**पुनरपीति** । भक्तिस्वरूपविशेषनिष्कर्षपरत्वात्तदसाधारणशास्त्रविशेषप्रतिपादितपूजाविशेषपरोऽयं यजनशब्द इत्यभिप्रायेणाह—**यजनं नामेति** । शेषवृत्तिः कैङ्कर्यम् । इदं च * पत्रं पुष्पम् (२६) इत्यादिना प्रदर्शितस्य भगवच्छास्त्रप्रपञ्चितस्य संग्रहशासनम् । अतोऽत्र यजिर्दर्शपूर्णमासादिविषय इति न भ्रमितव्यम् । * यज देवपूजायामित्येव च पठ्यते । *देवतामुद्दिश्य द्रव्यत्यागो यागः इति चाहुः । अग्निहोत्रादिव्यतिरिक्तेष्वपि पञ्चमहायज्ञादिषु यजिर्निरूढः । अन्यत्रापि * कृष्णो वाक्यैरिज्यते संमृशानैः (भा. आनु. २८. ६) इत्यादयः प्रयोगाः । अतोऽत्र भगवच्छास्त्रादिप्रपञ्चितविषयोऽयं यजिरित्यभिप्रायेणाह—**औपचारिकेति** । औपचारिकाः नीराजनादयः; सांस्पर्शिकाः—सक्तचन्दनादयः; आदिशब्देन सांदृष्टिकदीपादिग्रहणम् । * मय्याजीत्यनेन बाह्यक्रियापरेण मन्मनस्त्वं कथं विशेष्यत इत्यत्राह—**प्येति** । **पुनरपीत्यादावपि पूर्ववत्** । **पूर्वोक्तादधिकरूपत्वं दर्शयितुम् अपर्यवस्यन्नित्यन्तमुक्तम्** । **अत्यन्तशब्देन**

दास्यस्य स्वरूपप्राप्तता विवक्षिता। **अतिमात्र**शब्देन तस्य निरतिशयभोगरूपत्वं सूचितम्। त्रिविधप्रणतिसंग्रहाय णमधातुस्वरूपनिरूपणेन प्रह्वीभावशब्दः। *प्रेक्षावतः प्रवृत्तिर्या प्रह्वीभावात्मिका स्वतः। उत्कृष्टं परमुद्दिश्य तन्नमः परिगीयते॥ (अहि. ५२. १०) इति हि नमश्शब्दो विवृतः। ज्ञानविशेषकत्वव्यक्त्यर्थं **व्यवसाय**शब्दः। *परायणः इत्यत्र परशब्दविशेषणसामर्थ्यादवधारणं विवक्षितमित्यभिप्रायेण **अहमेवे**त्युक्तम्। फलितमाह—**मया विने**ति। एषैव भक्तेः परमा काष्ठा प्राप्तेरव्यवहितपूर्वभाविनीति फलाभिलाषज्ञापनार्थो मत्परायणशब्द इत्यभिप्रायः। एवंशब्दानूदितमाकारमाह—**अनवधिके**त्यादिना। *आत्मानं *युक्त्वा इति पदयोरत्रोचितार्थप्रदर्शनं **मनः प्राप्ये**ति। युजिस्त्र योगार्थस्समाध्यर्थो वा। *मन्मना भव इत्युक्तार्थस्त्वम् *एवमात्मानमित्यनुवादेन प्रतीयत इत्यभिप्रायेणाह—**आत्मशब्दो** हीति। मनसोऽत्र निर्देशो ध्यानादिकरणत्वेनेति प्रदर्शयन् श्लोकस्य पिण्डितार्थमाह—**एवंरूपेणे**ति। निरतिशयप्रीतिमतेत्यर्थः। ध्यानादिकं *मद्भक्त इति विशेषणाद्भागरूपमित्यभिप्रायेण **मामनुभूये**त्युक्तम्। अथ सुखग्रहणायाध्यायाप्रधानार्थभूतसाङ्गोपाङ्गफलशिरस्कभक्तिस्वरूपं संक्षेपेण निष्कृष्य वदन्नुपसंहरति—**तदे**वमिति। तत्—तस्मादित्यर्थः; तव दुःखबहुलसंसारसागरपतितत्वात्, मम च परत्वसौलभ्यादियुक्तस्य समस्तदुःखसागरोत्तरणसांयात्रिकत्वात्, उपायस्य चात्यन्तसुकरत्वादिगुणयुक्तत्वादित्यर्थः। एवमिति—पूर्वग्रन्थैरुक्तप्रकारेणेत्यर्थः। **लौकिकानी**त्यादि **कुर्वन्नि**त्यन्तं *यत्करोषि इत्यादेरर्थः; **मन्नियाम्य**मित्यादिकं *मया ततमित्यादेरभिप्रेतकथनम्; **अत्यर्थप्रियमद्गुणगण**मिति *समोऽहम्, *पत्रं पुष्पम् इत्यादेरर्थः। गुणानुसन्धानाद्भक्तेः पुरुषसाध्यत्वं युज्यत इत्यभिप्रायेणाह—**मद्गुणगणं चानुसन्धायाहरहरुक्तलक्षणमिदमुपासनमुपाददान** इति। *इति मत्वा भजन्ते मामित्यादिकमत्रानुसंहितम्। **अहरहरि**त्यादिकं *मन्मनाः इत्यादेर्विवक्षितम्। आप्रयाणत्वासिद्ध्यर्थम् **अहरहरि**त्याद्युक्तम्। **उक्तलक्षण**मिति—अनन्यप्रयोजननमस्कारादिप्रेरकमदेकधारकत्वदशापर्यन्तनिरतिशयप्रीतिरूपमित्यर्थः॥ ३४॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां नवमोऽध्यायः॥ ९॥

॥ अथ दशमोऽध्यायः॥ १०॥

भा॥ भक्तियोगस्सपरिकर उक्तः। इदानीं भक्त्युत्पत्तये तद्विवृद्धये च भगवतो निरङ्कुशैश्वर्यादिकल्याणगुणगणानन्त्यम्, कृत्स्नस्य जगतस्तच्छरीरतया तदात्मकत्वेन तत्प्रवर्त्यत्वं च प्रपञ्च्यते—

श्रीभगवानुवाच—

भूय एव महाबाहो शृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १

भा॥ मम माहात्म्यं श्रुत्वा प्रीयमाणाय ते मद्भक्त्युत्पत्तिविवृद्धिरूपहितकामनया भूयो मन्माहात्म्यप्रपञ्चविषयमेव परमं वचो यद्वक्ष्यामि; तदवहितमनाश्शृणु॥ १॥

ता॥ दशमसङ्गतिं वक्तुं नवमार्थं सप्तमप्रभृत्यध्यायत्रयार्थं वा संगृह्याह—**भक्तियोग** इति। *स्वकल्याणगुणानन्त्यं कृत्स्नस्वाधीनतामतिः। भक्त्युत्पत्तिविवृद्ध्यर्था विस्तीर्णा दशमोदिता (१४) इति संग्रहश्लोकं व्याकुर्वन् सङ्गतिमाह—**इदानी**मिति। पूर्वत्र सपरिकरभक्तियोगस्वरूपप्रपञ्चनपरतया स्वकल्याणगुणादेस्संग्रहेण कथनम्; इह तु तत्प्रपञ्चनमित्यवसरप्राप्तिरपौनरुक्त्यं च *विस्तीर्णेत्यनेन विवक्षितमिति दर्शयितुम् **इदानीं प्रपञ्च्यत** इति पदद्वयम्। **अर्जुनस्य**

वक्ष्यमाणार्थश्रवणयोग्यत्वं तस्यार्थस्य च परमहितसाधनत्वादिकं च वदन् सोपच्छन्दनं सावधानयति—*भूय एवेति श्लोकेन । प्रश्नमन्तरेणापि स्वयमेव प्रतिपादने हेतुः *प्रीयमाणायेत्यनेनोच्यत इत्यभिप्रयंस्तादृशप्रीतेर्विषयं दर्शयति—**मम माहात्म्यं श्रुत्वे**ति । बाहुशालिनां हि परोत्कर्षकथनमसूयावहम् ; भवतस्तु शिशुपालादिव्याकुले जगति भाग्यवशादीदृशी प्रीतिस्सञ्जातेति *महाबाहो, *प्रीयमाणाय इत्यनयोर्भावः । यद्वा बाहुबलाद्यथा ते बाह्यशत्रुविजयः, तथा मद्विषय-प्रीतिबलादान्तरशत्रवोऽपि त्वया जिता इति भावः । प्रकरणादर्थस्वभावाच्च हितं विशिनष्टि—**मद्भक्त्युत्पत्तिविवृद्धि-रूपे**ति । *सर्वपापैः प्रमुच्यते (३) *सोऽविकम्प्येन योगेन युज्यते (७) इति हि वक्ष्यत इति भावः । उक्तमात्रस्य पुनरभिधाने प्रयोजनाभावात् *भूय एवेत्यनेन प्रक्रान्तगुह्यतमानुबन्ध्यर्थप्रपञ्चनरूपत्वं विवक्षितमित्यभिप्रायेण **भूयो मन्माहात्म्यप्रपञ्चविषयमे**वेत्युक्तम् । एतेनैव वचसः परमत्वे हेतुरपि दर्शितः । शृण्वत एवार्जुनस्य पुनः *शृण्विति विधानं विशिष्टश्रवणार्थमित्यभिप्रायेणाह—**तदवहितमना** इति । पूर्वमनसूयवे दोषनिवृत्त्या गहनमात्रमुक्तम् ; इदानीमुच्यमाने प्रीयमाणाय गुणसंपत्त्याऽतिगहनमुच्यते ; अतस्त्वयाऽत्यन्तावहितेन भवितव्यमिति भावः ॥ १ ॥

न मे विदुस्सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २

भा ॥ सुरगणा महर्षयश्चातीन्द्रियार्थदर्शिनोऽधिकतरज्ञाना अपि मे प्रभवम्—प्रभावं न विदुः—मम नामकर्मस्वरूपस्वभावादिकं न जानन्ति ; यतस्तेषां देवानां महर्षीणां च सर्वशोऽहमादिः—तेषां स्वरूपस्य ज्ञान-शक्त्यादेश्चाहमादिः ; तेषां देवत्वदेवर्षित्वादिहेतुभूतपुण्यानुगुणं मया दत्तं ज्ञानं परिमितम् ; अतस्ते परिमित-ज्ञाना मत्स्वरूपादिकं यथावन्न जानन्ति ॥ २ ॥

ता ॥ वक्ष्यमाणस्य ज्ञानस्यातिदुर्लभत्वमादरणीयतरत्वायोच्यते—*न मे विदुरिति श्लोकेन । *सुरगणाः *महर्षयः इत्याभ्यां प्रतिषेधौपयिकप्रतिषेध्यसंभावनास्थलप्रदर्शनमित्यभिप्रायेणोक्तम् **अतीन्द्रियार्थदर्शिनोऽधिकतर-ज्ञाना अपी**ति । प्रभवगोचरवेदनमत्र निषिध्यते ; न तु प्रभवः, विशिष्टनिषेधे गौरवात्, कर्माधीनोत्पत्तेरभावादेव तद्वेदनस्य निषेद्धुमयुक्तत्वात्, अनन्तरं च *यो माम् (३) *इति प्रभावज्ञानमेवोच्यते, न तु जन्मज्ञानम्, *अज-मित्येव वचनात् । अत एवाक्तारहस्यविषयत्वमपि नात्रान्वितम्, प्रपञ्चितं च तत्प्रागेव ; इह त्वन्यदप्रपञ्च्यते ; ततश्चात्र देवर्षिभिरप्यवेद्यः ईश्वरे विद्यमानश्च प्रभवः—प्रकर्षेण सत्ता प्रभाव एव भवितुमर्हतीत्यभिप्रायेण—**प्रभावमि**त्युक्तम् । प्रभावं विविच्याह—**मम नामे**ति । जन्मविषयत्वे हेतुरनन्वित इत्यभिप्रायेण **यत** इत्यनेन हिशब्दस्य हेतुपरता दर्शिता । *सर्वशः इति न देवादीनां कार्त्स्न्यमात्रं विवक्षितम्, तस्य बहुवचनासङ्कोचादपि सिद्धेः ; अतस्तदभिप्रेतं व्यञ्जयति—**तेषां स्वरूपस्ये**त्यादिना । कथमसौ प्रभावापरिज्ञानहेतुरिति शङ्कायामभिप्रेतं हेतुत्वप्रकारं विशदयति—**तेषां देवत्वे**ति । **वैषम्यनैर्घृण्यपरिहाराय** परिमितत्वसिद्धये च पुण्यानुगुणत्वकथनम् । *को अद्धा वेद क इह प्रवोचत् । कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनाय । अथा को वेद यत आबभूव । इयं विसृष्टिर्यत आबभूव । यदि वा दधे यदि वा न । यो अस्याध्यक्षः परमे व्योमन् । सो अङ्ग वेद यदि वा न वेद (अष्ट. २. ८. ९. ७६) इत्यादिश्रुत्यभिप्रायेणाह—**अत** इति । *यन्न देवा न मुनयो न चाहं न च शङ्करः । जानन्ति परमेशस्य तद्विष्णोः परमं पदम् ॥ (वि. १. ९. ५५) इत्यादिस्मृतिश्च द्रष्टव्या ॥ २ ॥**

भा ॥ तदेतदेवाद्यचिन्त्यस्वयाथात्म्यविषयज्ञानं भक्त्युत्पत्तिविरोधिपापविमोचनोपायमाह—

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढस्स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३

भा ॥ न जायत इत्यजः ; अनेन विकारिद्रव्यादचेतनात्तत्संसृष्टात्संसारिचेतनाच्च विसजातीयत्वमुक्तम् ; संसारिचेतनस्य हि कर्मकृताच्चित्संसर्गो जन्म । * अनादित्यनेन पदेनादिमतोऽजान्मुक्तात्मनो विसजातीयत्वमुक्तम् । मुक्तात्मनो ह्यजत्वमादिमत्, तस्य हेयसंबन्धस्य पूर्ववृत्तत्वात्तदर्हतास्ति ; अतोऽनादिमित्यनेन तदनर्हतया तत्प्रत्यनीकतोच्यते ; * निरवद्यम् (श्वे. ६. १९) इत्यादिश्रुत्या च । एवं हेयसंबन्धप्रत्यनीकस्वरूपतया तदनर्हं मां लोकमहेश्वरम् —लोकेश्वराणामपीश्वरं मर्त्येश्वरसंमूढो यो वेत्ति ; इतरसजातीयतयैकीकृत्य मोहस्संमोहः, तद्रहितोऽसंमूढः, स मद्भक्त्युत्पत्तिविरोधिभिस्सर्वैः पापैः प्रमुच्यते । एतदुक्तं भवति—लोके मनुष्याणां राजा इतरमनुष्यसजातीयः, केनचित्कर्मणा तदाधिपत्यं प्राप्तः ; तथा देवानामधिपतिरपि ; तथाऽण्डाधिपतिरपीतरसंसारिसजातीयः, तस्यापि भावनात्रयान्तर्गतत्वात् , * यो ब्रह्माणं विदधाति (श्वे. ६. ८) इति श्रुतेश्च । तथाऽन्येऽपि, ये केचनाणिमाद्यैश्वर्यं प्राप्ताः । अयं तु लोकमहेश्वरः—कार्यकारणावस्थादचेतनाद्बद्धान्मुक्ताच्च चेतनादीक्षितव्यात्सर्वस्माच्चाखिलहेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणगुणैकतानतया नियमनैकस्वभावतया च विसजातीय इतीतरसजातीयतामोहरहितो यो मां वेत्ति, स सर्वैः पापैः प्रमुच्यते इति ॥ ३ ॥

ता ॥ देवादिभिरप्यवेदनीयत्वकथनस्य वक्ष्यमाणोपयोगं व्यञ्जयन् * यो मामिति श्लोकाभिप्रेतमाह—**तदेतदिति** । * यो वेत्यनुवादरूपत्वप्रतीतावप्यर्थतः फलानुवादेनोपायविधाने तात्पर्यमित्यभिप्रायेण **उपायमाहेत्युक्तम्** । अजशब्दस्य व्यवच्छेद्यप्रदर्शनाय व्युत्पत्तिं तावदाह—**न जायत इत्यज** इति । विशेषणसामर्थ्यफलितात्तदुचिताद्व्यवच्छेद्याद्व्यावृत्तिमाह—**अनेनेति** । **विकारिद्रव्यात्तत्संसृष्टा**दित्युभाभ्यां व्यवच्छेदयोग्यत्वं दर्शितम् । * अजो नित्यश्शाश्वतः (श्वे. ६. १०) इत्यादिभिर्नित्यस्य जीवस्य कथमचित्सस्गमात्रेणाजशब्दव्यवच्छेद्यत्वमित्यत्राह—**संसारिचेतनस्येति** । ईश्वरस्यापि सर्वशरीरतया तत्तदचित्संसर्गस्य विद्यमानत्वात्तद्व्युदासाय **कर्मकृते**त्युक्तम् । मुक्तस्यापि स्वरूपानादित्वमस्ति ; ततः कथं व्यवच्छेद्यत्वमित्यत्राह—**मुक्तात्मनो ह्यजत्वमादिमदिति** । अजत्वविशेषवेषेणानादित्वमिह विवक्षितम् । स्वरूपानादित्वविवक्षायां तु पौनरुक्त्यमिति भावः । मुक्तदशायामचित्संसर्गो नास्ति, प्राचीनसंसर्गविवक्षायां बद्धादेर्व्यवच्छेदस्स्यात् ; अतस्तदानींतनस्वरूपाद्व्यावृत्तिः कथमुक्ता स्यादित्यत्राह—**तस्येति** । सहकारिसन्निधौ कुर्वत्स्वभावत्वं, सहकार्यभावप्रयुक्तकार्याभाववत्त्वमपि हि योग्यतेत्यभिप्रायः । कालविशेषावच्छेदरहितनिरवद्यत्वविधायकश्रुत्या च अयमर्थस्सिद्ध इत्याह—**निरवद्यमिति** । अन्वयार्थमाह—**एवमिति** । देवैर्महर्षिभिश्च दुर्लभं ज्ञानं मन्दप्रज्ञेषु मर्त्येषु भाग्यवशात्कस्यचिज्जायत इति निर्धारणार्थत्वमुचितम् । उत्तरार्धे च फलनिर्देशेनासंमूढमर्त्यशब्दयोस्समुचितान्वयो नास्ति ; * यो मामेवमसंमूढो जानाति पुरुषोत्तमम् (१५. १९) इति च वक्ष्यमाणच्छायाऽत्र युक्तेत्यभिप्रायेण **मर्त्येष्वसंमूढो यो वेत्तीत्युक्तम्** । असंमूढशब्दार्थं वक्तुमुपसर्गाभिप्रेतमर्थं व्यञ्जयति—**इतरेति** । * एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः । सोऽविकम्प्येन योगेन युज्यते नात्र संशयः ॥ (७) इत्यनन्तरमेव वक्ष्यमाणत्वादत्रापि तदुपयुक्तपापविमोक्ष एवाभिप्रेत इत्यभिप्रायेण **मद्भक्त्युत्पत्तिविरोधिभिरित्युक्तम्** । **लोकमहेश्वरे परस्मिन् प्रतिपन्ने च**

न संमोहप्रसङ्गः ; येन तन्निषेधस्स्यात् । कथं च ब्रह्मरुद्रसनकादिषु जीवत्सु परमपुरुषस्यैव लोकमहेश्वरत्वम् ; कथं वा बद्धमुक्तविलक्षणत्वेऽपि नित्यसूरिवर्गाद्व्यवच्छेद इत्यादिशङ्कायां संमोहोदयतदभावप्रकारौ विवृणोति—**एतदुक्तमिति** । तत्तदधिपतीनामपि लोके तत्तत्सजातिदर्शनादत्राषि सामान्यतोऽवगते शङ्कावकाशः । मनुष्यदेवाधिपतिप्रभृतिवदण्डाधिपतिप्रभृतेरपि कर्मविशेषनूलपरिमितदेशकालविषयभगवत्संकल्पाधीनैश्वर्ययोगितया भगवत एवोत्तरावधि-रहितमैश्वर्यम् । लोकमहेश्वरशब्देन सर्वगोचरैश्वर्यस्य विवक्षितत्वादेव नित्यानामपि व्यवच्छेदसिद्धिरिति भावः । सजातीयस्य कथमधिकत्वसिद्धिरित्यत्रोक्तं—**केनचित्कर्मणेति** । कथमण्डाधिपतेस्तदधीनस्वरूपस्थितिप्रवृत्तिभिरितरसंसारिभिस्साजात्यमित्यत्राह—**तस्यापीति** । कर्मभावना ब्रह्मभावनोभयभावनेति भावनात्रयम् । तेषामपि भावनात्रययोगादिकं भगवत्पराशरशौनकादिभिः प्रपञ्चितम् । यथा हिरण्यगर्भादीनुपक्रम्य * अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः (वि. ६. ७. ७७) इति ; * आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः । यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः । (वि. ध. १०४. २२) इति । प्रतिबुद्धैरनुपास्यत्वं भगवदधीनत्वं च पञ्चम एव वेदे सुव्यक्तं—* ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् (भा. मो. ३५०. ३६), * एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादर्शितपन्थानौ सृष्टिसंहारकारकौ (भा. मो. १६९. १९) इत्यादिभिः । भावनात्रयान्वयेन सह हिरण्यगर्भस्य कार्यत्वादिसमुच्चयार्थः चशब्दः । सनकसनत्कुमाररुद्रादिब्रह्मकुमारवर्गमभिप्रेत्याह—**तथाऽन्येऽपीति** । **अणिमादीति**—* अणिमा महिमा च तथा लघिमा गरिमा वशित्वमैश्वर्यम् । प्राप्तिः प्राकाम्यं चेत्यष्टैश्वर्याणि योगयुक्तस्य । तानि च कर्माधीनभगवत्सङ्कल्पाधीनान्येव । रौद्रम्याणिमाद्यैश्वर्यस्य क्वचिदकृत्रिमत्वोक्तिरपि जन्मप्रभृतिसिद्धतामाह ; अन्यथा *महादेवस्सर्वमेधे महात्मा हुत्वाऽऽत्मानं देवदेवो बभूव (भा. रा. २०. १२) इत्यादिभिर्विरोधात् । लोकशब्दो लोक्यत इति व्युत्पत्त्या सर्वसंग्राहक इत्यभिप्रायेणाह—**कार्येति** । **निखिलेत्यादिकं** महच्छब्दस्याभिप्रेतविवरणम् ; **नियमनैकस्वभावतयेति** ईश्वरशब्दस्य ॥ ३ ॥

भा ॥ एवं स्वस्वभावानुसन्धानेन भक्त्युत्पत्तिविरोधिपापनिरसनम्, विरोधिनिरसनादेवार्थतो भक्त्युत्पत्तिं च प्रतिपाद्य स्वैश्वर्यस्वकल्याणगुणगणप्रपञ्चानुसन्धानेन भक्तिविवृद्धिप्रकारमाह—

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमश्शमः । सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ ४
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५

भा ॥ **बुद्धिः**—मनसो निरूपणसामर्थ्यम्, **ज्ञानम्**—चिदचिद्वस्तुविशेषविषयो निश्चयः, **असंमोहः** पूर्वगृहीताद्रजतादेर्विसजातीये शुक्तिकादिवस्तुनि सजातीयतावुद्धिनिवृत्तिः ; **क्षमा**—मनोविकारहेतौ सत्यप्यविकृतमनस्त्वम् ; **सत्यम्**—यथादृष्टविषयं भूतहितरूपं वचनम् ; तदनुगुणा मनोवृत्तिरिहाभिप्रेता, मनोवृत्तिप्रकरणात् ; **दमः**—बाह्यकरणानामनर्थविषयेभ्यो नियमनम् ; **शमः**—अन्तःकरणस्य तथा नियमनम् ; **सुखम्**—आत्मानुकूलानुभवः ; **दुःखम्**—प्रतिकूलानुभवः ; **भवः**—भवनम् ; अनुकूलानुभवहेतुकं मनसो भवनम् ; **अभावः**—प्रतिकूलानुभवहेतुको मनसोऽवसादः ; **भयम्**—आगामिनो दुःखस्य हेतुदर्शनजं दुःखम् ; **अभयम्**—तन्निवृत्तिः ; **अहिंसा**—परदुःखाहेतुत्वम् ; **समता**—आत्मनि सुहृत्सु विपक्षेषु चार्थानर्थयोस्समबुद्धित्वम् ; **तुष्टिः**—सर्वेष्वात्मसु दृष्टेषु तोषस्वभावत्वम् ; **तपः**—शास्त्रीयो भोगसङ्कोचरूपः कायक्लेशः ; **दानम्**—स्वकीयभोग्यानां परस्मै प्रतिपादनम् ; **यशः**—गुणवत्ताप्रथा ; **अयशः**—नैर्गुण्यप्रथा ; **एतदुभयं**

तदनुगुणमनोवृत्तिद्वयं मन्तव्यम्, तत्प्रकरणात्; तपोदाने च तथा। एवमाद्यास्सर्वेषां भूतानां भावाः—प्रवृत्तिनिवृत्तिहेतवो मनोवृत्तयो मत्त एव—मत्सङ्कल्पायत्ता भवन्ति ॥ ४ ॥ ५ ॥

ता ॥ * भक्त्युत्पत्तिविवृद्ध्यर्थेत्यत्र विवक्षितं विवृण्वन्नुक्तेन तत्फलितेन च वक्ष्यमाणप्रकरणस्य च सङ्गतिमाह—**एवमिति**। बुद्धिज्ञानशब्दयोः पौनरुक्त्यपरिहाराय * बुद्धिमत्त्वाज्ज्ञानातीति प्रयोगानुसारेण शक्तिलक्षणया बुध्यतेऽनयेति व्युत्पत्त्या वा हेतुकार्यपरतया व्याख्याति—**बुद्धिर्मनसो निरूपणसामर्थ्यमिति**। असंमोहासत्त्या तद्धेतुभूतं ज्ञानमिह विवक्षितमित्यभिप्रायेणाह—**ज्ञानं चिदचिद्वस्तुविशेषविषयो निश्चय** इति। बुद्धिज्ञानशब्दयोरध्यवसायमोक्षधीविषयत्वेन व्याख्यानं शब्दद्वयसङ्कोचादिप्रसङ्गादनादृतम्। विजातीये सजातीयतावुद्धिस्संमोहः; तदुदाहरति—**पूर्वेति**। **पूर्वगृहीतात्**—आपणादिनिष्ठतयाऽनुभूतादित्यर्थः। इदं च स्मर्यमाणाध्यासोदाहरणम्। न कोपाख्यविकारामात्रेण सुषुप्त्यादिषु क्षमाशब्दः, अपितु कोपहेतुषु सत्सु तदभावे तत्प्रयोग इत्यभिप्रायेणाह—**मनोविकारेति**। क्रोधहेतावाक्रोशताडनादौ सत्यपीत्यर्थः। ननु कथं हेतौ सति तत्कार्यनिवृत्तिः; तथात्वे तस्य हेतुत्वमेव हीयेत। उच्यते—न ह्यवश्यं हेतौ सति कार्येण भवितव्यमिति नियमः; अपितु प्रतिबन्धकरहितायां सामग्र्यां सत्याम्; अन्यथा प्रत्येकं हेतूनां प्रतिबद्धानां च तत्तत्कार्यजनकत्वे कार्यस्य सदातनत्वसार्वत्रिकत्वप्रसङ्गात्; नित्यविभोश्च कारणस्य सद्भावात्; तर्हि कः क्षमायां विस्मय इति चेद्यथा मणिमन्त्रादिभिः स्फोटसामग्री स्तभ्यते, तथा प्रबलविवेकाख्यप्रतिबन्धकेन कोपसामग्र्या दुर्निवारायाः स्तम्भनादिति भावः। वस्तुसत्यत्वस्य यथार्थदर्शनमप्यपेक्षितम्, तथाऽपि **यथादृष्टवचनमात्रे** वक्तुर्नापराधः, भ्रमस्य दैवागतत्वादित्यभिप्रायेण **यथादृष्टविषयमित्येतावदुक्तम्**। परमार्थत्वेऽपि परानर्थहेतोः *सत्यं भूतहितं प्रोक्तम् (व्या. स्मृ) इत्यादिभिस्सत्यत्वप्रतिक्षेपात् **भूतहितरूपमिति** विशेषितम्। भावशब्दस्य **मनोवृत्तौ** प्रसिद्धिप्रकर्षबलमग्र्यप्रायनयं चाभिप्रेत्य सत्यशब्दस्यात्र लाक्षणिकत्वमाह—**तदनुगुणेति**। शमदमशब्दयोरेकैकस्योभयनियमनाभिधानसामर्थ्येऽपि पौनरुक्त्यपरिहाराय विषयभेदे वक्तव्ये नियमनक्रमेण दमशमयोर्बाह्यान्तरकरणविषयत्वोक्तिः। शास्त्रीयेभ्यो नियमनस्य निषिद्धत्वात् **अनर्थविषयेभ्य** इत्युक्तम्। **तथेति** अनर्थविषयेभ्य एव। अनुकूलत्वमात्रं प्रतिकूलत्वमात्रमेव च सुखदुःखयोर्लक्षणम्; तथाऽपि मनोवृत्तिरूपत्वसिद्ध्यर्थमनुभवशब्दः। सुखदुःखभयाभयमध्यपठितत्वात् * भवोऽभावः इत्यत्रापि परस्परविरुद्धार्थविषयत्वं संभवदपरित्याज्यम्; ततश्च भवभावशब्दयोः प्रत्ययभेदमात्रमेव, न त्वर्थभेदः; तत्र चाभाव इत्येव पदच्छेदः; तयोरपि मनोवृत्तिरूपत्वं वक्तव्यम्; प्रस्तुतयोरेव च सुखदुःखयोस्तद्धेतुत्वमुचितम्; अत एव * भवो भव्यता, भावोऽभिप्रायः इत्यादि परव्याख्यानं मन्दम्; तदेतदखिलमभिप्रेत्याह—**अनुकूलेति**। **भवनमिति** उद्भवोऽत्र विवक्षितः, अवसादप्रतियोगित्वात्। अनवसादानुद्धर्षौ हि सहोक्तौ **वाक्यकारेण**—* तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः (बोधा) इति। सुखदुःखशब्दाभ्यां पौनरुक्त्यव्युदासाय भयाभयशब्दयोस्तद्विशेषविषयतां दर्शयति—**आगामिन** इति। आगामिप्रत्यवायोत्प्रेक्षा **भयमिति** लक्षणेऽपि तस्यैव ज्ञानविशेषस्य प्रतिकूलरूपत्वाद्दुःखत्वम्; नह्यन्यो दुःखाख्यो गुणोऽस्मद्दर्शने। **परदुःखाहेतुत्वमित्यत्र** दुःखशब्देनाहितं विवक्षितम्, चिकित्सादौ हितरूपदुःखकरणस्य हिंसात्वाभावात्, प्रपञ्चितं चैतत्प्रागेव। **अभयाहिंसयोरभावरूपयोरपि** भावान्तरत्ववैषेण मनोवृत्तिरूपत्वं भाव्यम्। समत्वप्रकारेषु बहुषु सत्स्वपि **हिंसानिषेधप्रसङ्गाद्धिंसाविषयभूतशत्रुस्मृतिर्जाता**; ततश्च द्वेषाद्यभावेन शत्रुमित्रादिसाम्यं प्रदेशान्तरप्रपञ्चितमिह विवक्षितमित्यभिप्रायेणाह—**आत्मनीति**। * सममतिरात्मसुहृद्विपक्षपक्षे (वि. ३. ७. २०) इति भगवत्पराशरवचनमिह तत्तत्पदैः स्मारितम्।

ता ॥ उक्तार्थस्यानन्तरमुदाहरणप्रदर्शनमुखेन प्रपञ्चनं क्रियत इत्यभिप्रायेणाह—**विभूतिज्ञानेति** । तदेव हि ज्ञानं भक्तिरूपेण परिणमत इत्यभिप्रायेण विभूतिज्ञानविपाकरूपत्वोक्तिः । असंकोचात्कार्यभूतब्रह्मादिसमस्तगोचरः सर्वशब्द इत्यभिप्रायेण—**विचित्रेत्यादिकमुक्तम्** । प्रभवशब्दस्यात्रोत्पत्तिक्रियादिमात्रपरत्वव्युदासायाह—**उत्पत्तिकारणमिति** । अत्र वक्ष्यमाणप्रकारेण सृष्ट्युपयुक्तकल्याणगुणयोगोऽपि गर्भितः । ब्रह्मादेरपि स्वप्रवृत्तिसामर्थ्यं मदधीनमिति * मत्तस्सर्वमित्यनेन विवक्षितमित्यभिप्रायेणाह—**सर्वं मत्त एवेति** । पूर्वोक्तविभूत्याद्यनुवादरूपतां दर्शयति—**इतीदमित्यादिना** । स्वाभाविकनिरङ्कुशशब्दाभ्याम् अर्वाचीनेश्वरव्यवच्छेदाय श्रुतिसिद्धाहेतुसाध्यत्वानवधिकत्वोक्तिः । वक्तृरूपावतारसौलभ्यपरास्मच्छब्दाभिप्रेतं * मां भजन्ते इत्युच्यमानभजनस्यात्यन्तोपयुक्तं योगशब्दार्थमाह—**सौशील्येत्यादिना** । **सौशील्यवात्सल्येति** दिव्यात्मगुणवर्गस्य प्रदर्शनार्थम्, **सौन्दर्येत्याकर्षकतमदिव्यमङ्गलविग्रहगुणवर्गस्य** । **बुधशब्देनात्र** प्रकृतज्ञानविशेषवन्तः प्रागुक्ता महात्मानो विवक्षिता इत्यभिप्रायेण—**ज्ञानिन इत्युक्तम्** । मत्वा भावसमन्विता इत्यन्वयः ; एवंविधज्ञानस्य भक्तिसाधनत्वे तात्पर्यात् । * मामित्यनेनात्र भजनदशानुसन्धेयगुणगणविशिष्टस्वरूपं विवक्षितमित्यभिप्रायेणोक्तं—**सर्वकल्याणगुणान्वितमिति** । अनेकार्थस्य भावशब्दस्य प्रकृतानुगुणमर्थमाह—**भावो मनोवृत्तिविशेष इति** । तमेव विशेषं विशदयति—**मयि स्पृहयालव इति** ॥ ८ ॥

भा ॥ कथम् ?

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ ९

भा ॥ मच्चित्ताः—मयि निविष्टमनसः, मद्गतप्राणाः—मद्गतजीविताः, मया विनाऽऽत्मधारणमलभमाना इत्यर्थः ; स्वैःस्वैरनुभूतान् मदीयान् गुणान् परस्परं बोधयन्तो मदीयानि दिव्यानि रमणीयानि कर्माणि च कथयन्तः तुष्यन्ति च रमन्ति च—वक्तारस्तद्वचनेनानन्यप्रयोजनेन तुष्यन्ति ; श्रोतारश्च तच्छ्रवणेनानवधिकातिशयप्रियेण रमन्ते ॥ ९ ॥

ता ॥ भावसमन्वितत्वप्रपञ्चनमेवानन्तरं क्रियत इत्यभिप्रायेण तदाकाङ्क्षां दर्शयति—**कथमिति** । भक्तिपरिपाकक्रमविशेषसिद्धाकारप्रदर्शनं * मच्चित्ताः इत्यादिभिश्चतुर्भिर्विशेषणैः क्रियत इत्यभिप्रायेण—**मयि निविष्टमनस इत्यादिकमुक्तम्** । * मद्गतप्राणाः इत्यस्य तात्पर्यप्रदर्शनाय पर्यायं तावदाह—**मद्गतजीविता इति** । भक्तगतस्य जीवितस्य कथं तद्गतत्वमित्यत्राह—**मया विनेति** । बोधनकथनशब्दयोरेकविषयत्वे पौनरुक्त्याद्विषयभेदो वाच्यः ; तत्र च **बोधयन्तः** इत्यनेन [अ]ज्ञातार्थज्ञापनं *कथयन्तः इत्यनेन च इतिवृत्तवर्णनं च स्वरसतः प्रतीयत इत्यभिप्रायेण—**स्वैस्वैरित्यादिकमुक्तम्** । **दिव्यानीत्यतिमानुषत्वप्रयुक्ताद्भुतत्वं** विवक्षितम् । तस्यैव भोग्यत्वं **रमणीयानीत्यनेनोक्तम्** । * तुष्यन्ति च रमन्तिचेत्यनयोर्द्वयोरपि कथकविषयत्वेऽनतिभिन्नार्थतया मन्दप्रयोजनत्वात्कस्यचित्कथकविषयत्वमन्यस्य कथनाक्षिप्तश्रोतृविषयत्वं च युक्तम् ; तत्र च स्वप्रयोजनान्तरसाधकपरप्रीत्यर्थं हि लोके कथाप्रयोगो दृष्टः । तोषशब्दश्चाधिकस्पृहानिवृत्त्यर्थः ; ततोऽत्र * तुष्यन्तीत्यनन्यप्रयोजनकथकविषयम्, पारिशेष्यात् * रमन्तीत्यस्य श्रवणमूलत्वं लब्धम् । * तुष्यन्ति च रमन्ति चेत्यनयोः * मच्चित्ताः इत्याद्युक्तैककर्तृत्वं कथनश्रवणयोरेकस्मिन्नेव कालभेदेन संभवाच्च परित्याज्यम् । तदेतदखिलमभिप्रेत्याह—**वक्तार इत्यादि रमन्त इत्यन्तम्** ॥ ९ ॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १०

भा ॥ तेषां सततयुक्तानाम्—मयि सततयोगमाशंसमानानां मां भजमानानामहं तमेव बुद्धियोगं विपाकदशापन्नं प्रीतिपूर्वकं ददामि ; येन ते मामुपयान्ति ॥ १० ॥

ता ॥ भगवद्गुणविभूतिज्ञानस्य भक्त्युत्पत्तिविवृद्धिहेतुत्वमुक्तम् ; तथाविधविवृद्धभक्तेर्भगवत्प्राप्तिपूर्वभाविविशदतमसाक्षात्काररूपावस्थाविशेषहेतुत्वं भगवत्प्रसादावान्तरव्यापारकमुच्यते—**तेषा**मिति । **मयि सततयोगमाशंसमानानामिति**—नहि सततं समाधानरूपो योगश्शक्यः; सततशब्देन प्रतिदिनविवक्षा च न स्वारसिकी, न च प्राप्तिरूपसततयोग इदानीं वृत्तः; अत आशंसार्थत्वमेव युक्तमिति भावः । **तमेवेति** । आशंसाविषयान्तर्गतमेवेत्यर्थः । सततयोगाशंसयैव भजने प्रीतिरूपत्वस्य फलितत्वात् *प्रीतिपूर्वकमित्यस्य भजनान्वये प्रयोजनं मन्दम् ; * ददामीत्यनेनान्वये तु भजनावान्तरव्यापारकथनरूपेण परमोदारत्वादिभगवद्गुणगणप्रकाशनेन च महत्प्रयोजनमित्यभिप्रायेण **प्रीतिपूर्वकं ददामीत्यन्वय** उक्तः । * मामुपयान्तीत्यत्रापरामृष्टपदपदार्थभूढैरैक्यापत्तिर्व्याख्याता ॥ १० ॥

भा ॥ किञ्च,

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११

भा ॥ तेषामेवानुग्रहार्थमहम्, आत्मभावस्थः—तेषां मनोवृत्तौ विषयतयाऽवस्थितो मदीयान् कल्याणगुणगणांश्चाविष्कुर्वन् मद्विषयज्ञानाख्येन भास्वता दीपेन ज्ञानविरोधि प्राचीनकर्मरूपाज्ञानजं मद्व्यतिरिक्तपूर्वाभ्यस्तविषयप्रावण्यरूपं तमो नाशयामि ॥ ११ ॥

ता ॥ उक्तबुद्धियोगोत्पत्तिप्रतिबन्धनिरसनं * तेषामेवेति श्लोकेनोच्यत इत्यभिप्रायेणाह—**किंचेति** । अनुकम्पाशब्देनात्र अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिहेतुः *मदनुग्रहाय (११. १) इति वक्ष्यमाणप्रसादविशेषो विवक्षितः, सहजकारुण्यमात्रपरत्वेऽर्थशब्दस्य व्यर्थत्वादित्यभिप्रायेणोक्तम्—**अनुग्रहार्थ**मिति । अत्र चाहंचब्देनानुग्रहौपयिकज्ञानशक्तिकरुणादिव्यमङ्गलविग्रहादिविशिष्टस्वरूपं विवक्षितम् । **मनोवृत्ताविति**—आत्मभावशब्दस्यात्रात्मत्वस्वस्वभावादिपरत्वेऽधिकप्रयोजनं नास्ति ; मनोवृत्तिविषयत्वं तु बुद्धियोगस्यात्यन्तोपयुक्तमिति भावः । व्याप्तस्येश्वरस्य कीदृशीयमपूर्वा स्थितिरित्यत्रोक्तं—**विषयतयेति** । दीपतया रूपितस्य ज्ञानस्य भास्वरत्वं परितः प्रकाशनम् ; तच्च प्रकारविशेषप्रकाशनं भवितुमर्हति । तथाविधविशदानुभवादज्ञाननिवृत्तिः, शब्दादिप्राकृतगुणप्रावण्यनिवृत्तिश्चेत्यभिप्रायेणाह—**मदीयान्कल्याणगुणगणांश्चाविष्कुर्वन्निति** । हेतुकार्यभावेन व्यपदेशादज्ञानतमश्शब्दयोरत्रार्थान्तरं वाच्यम् ; कर्मणि च ज्ञानविरोधित्वेनाज्ञानशब्दः ; यथोक्तम्—*अविद्या कर्मसंज्ञान्या (वि. ६. ७. ६१) इति । कर्मजन्यं भगवत्साक्षात्काररूपप्रकाशप्रतिबन्धकं च तमोऽर्थस्वभावाद्विषयान्तरप्रावण्यमेव । निरतिशयभोग्यभगवज्ज्ञानस्य भोग्यान्तरप्रावण्यनिवर्तकत्वं युक्तं, *स्थितेऽरविन्दे (स्तो. २७) इत्यादिन्यायात् ; तदेतदभिप्रेत्योक्तं—**ज्ञानविरोधीत्यादि** । तमश्शब्देन तमोवृत्तिलक्षणादिपक्षोऽप्यनेन निरस्तः । यद्यपि विषयप्रावण्यनिवृत्तिपूर्वकं भजनं, तथाऽपि संस्कारशेषादनुवृत्तं सूक्ष्मं प्रावण्यमिह भजनविनाश्यत्योक्तमिति नान्योन्याश्रयः ॥ ११ ॥

भा ॥ एवं सकलेतरविसजातीयं भगवदसाधारणं शृण्वतां निरतिशयानन्दजनकं कल्याणगुणगणयोगं तदैश्वर्ययोगं च श्रुत्वा तद्विस्तारं श्रोतुकामोऽर्जुन उवाच—

अर्जुन उवाच—

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।

भा ॥ परं ब्रह्म परं धाम परमं पवित्रमिति यं श्रुतयो वदन्ति, स हि भवान् । * यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति (भृ) * ब्रह्मविदाप्नोति परम् (आ) * स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति (मु. ३. २. ९) इति । तथा परं धाम ; धामशब्दो ज्योतिर्वचनः, परं ज्योतिः—* अथ यदतः परो दिवो ज्योतिर्दीप्यते (छा. ३. १३. ७) * परं ज्योतिरुपसंपद्य स्वेनरूपेणाभिनिष्पद्यते (छा. ८. १२. २) * तं देवा ज्योतिषां ज्योतिः (बृ. ४. १६) इति । तथा च परमं पवित्रम्—परमं पावनम् ; स्मर्तुरशेषकल्मषाश्लेषकरम्, विनाशकरं च । * यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते (छा. ४ १४. ३) * तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते (छा. ५. २४. ३) * नारयण परं ब्रह्म तत्त्वं नारयणः परः । नारयण परो ज्योतिरात्मा नारायणः परः (ना) इति हि श्रुतयो वदन्ति ॥ ११ॱ ॥

ता ॥ *परं ब्रह्मेत्यादेः *अमृतमित्यन्तस्यार्जुनवाक्यस्य पूर्वोत्तरसंगतिं दर्शयति—**एवमिति** । *यो मामजम् (३) इत्याद्यनुसन्धानेनोक्तं—**सकलेतरेत्यादि** । *तुष्यन्ति च रमन्ति च (९) इत्यनेनोक्तमाह—**शृण्वतां निरतिशयानन्दजनकमिति** । *विस्तरेणात्मनो योगं (१८) *विस्तरस्य मे (१९) इति प्रष्टृप्रतिवक्तृभ्यां विस्तरशब्दप्रयोगेऽपि वक्ष्यमाणस्यार्थप्रपञ्चरूपत्वाच्छब्दप्रपञ्चोपलक्षितार्थप्रपञ्चेऽत्रत्यविस्तरशब्दस्य तात्पर्यमिति दर्शयितुं **तद्विस्तारं श्रोतुकाम** इत्युक्तम् । विस्तरं श्रोतुकामश्चार्जुनस्संग्रहोक्तस्यार्थस्य प्रतिपन्नतां तस्य सत्यत्वाध्यवसायेनानसूयुतां च दर्शयति—**परंब्रह्मेत्यादिभिः** । अत्र तावत् *भवानिति प्रथमान्तत्वात् *आहुरित्युत्तरत्र न संबन्धः, * परं ब्रह्मेत्यादीनां प्राथम्यादिनोद्देश्यत्वं, *भवानित्यस्य च विधेयत्वं प्रतीतम् ; उद्देश्यस्य च पूर्वमेव सिद्धिरपेक्षिता ; तदाह—**यं श्रुतयो वदन्ति, सहि भवानिति** । त्रिष्वपि क्रमाच्छ्रुतीरुदाहरति । तत्र *यतो वेत्युपास्यब्रह्मलक्षणवाक्यम् ; तत्पुरोवादेनोपास्यं ब्रह्मैव प्राप्यमिति प्रदर्शनाय परशब्दविशेषणसिद्धये च * ब्रह्मविदिति वाक्यमुपात्तम् । उभयत्रास्फुटं वाक्यं *स यो हेति । * ब्रह्मैव भवतीत्येतच्छारीरकभाष्ये (१. १. ४) व्याख्यातम्—* प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव, यथा सेयं गौः इति । ब्रह्मात्यन्तसाम्याद्ब्रह्मव्यपदेशो मुख्यप्राय इत्यर्थः । सेयं गौरिति दृष्टान्तोऽपि साधर्म्यमूलव्यपदेशविषयः ; यद्वा * ब्रह्मैव भवतीत्यत्राप्येवकार इवशब्दार्थोऽपि स्यादिति केचित् * इववद्वैवमेवेति निघण्टुसद्भावात्, * वैष्णवं वामनभालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयति (यजु. २. १. ३. १६) इत्यादिप्रयोगसद्भावाच्च । नह्यत्र पशुयागमात्रेण विष्णुरेवासौ जातः ; नापि स्पर्धमानस्य मोक्षाधिकारः ; न च विष्णुरेव भवतीति तावदेव फलं निर्दिष्टं, किंतु * इमान् लोकानभिजयतीति सांसारिकफलमुक्तम् ; अतः पराक्रमादिगुणयोगेन विष्णुरिव भूत्वेमान् लोकानभिजयतीति वाक्यार्थ इति । अतो * ब्रह्मैव भवतीति साधर्म्यहेतुकं सामानाधिकरण्यम् । * परमं साम्यमुपैति (मु. ३. १. ३) इति हि श्रुतिः । वक्ष्यति च * मम साधर्म्यमागताः (१४. २) इति । श्रुतिप्रदर्शनार्थं विषयमुपादायशोधयति—**तथेत्यादिना** । सामानाधिकरण्यप्रयोगाद्ब्रह्मस्वरूपान्तरसामानाधिकरण्यसहपाठाभावाद्भगवत्तत्त्वच्छ्रुतिप्रतिपादितपरत्वप्रकारव्युदासे तात्पर्याच्च अत्र

धामशब्दस्य स्थानादिपरत्वमयुक्तमित्यभिप्रायेणाह—**धामशब्दो ज्योतिर्वचन** इति । * विष्णुसंज्ञं सर्वाधारं धाम (मैत्राव) इत्यादि धामशब्दप्रयोगेऽपि परं धामेति विशेषणादर्शनात्पर्यायान्वयमुखेन तत्प्रदर्शयति—**परंज्योतिरिति** । * अथ यदतः इत्यादिवाक्येनाप्राकृतलोकादिविशिष्टत्वं * पादोऽस्य सर्वा भूतानि (छा. ३. १२. ६) इत्यादिव्यपदेश-सिद्धपुरुषसूक्तप्रकरणैकार्थ्याच्च समीहितमखिलं सिद्धम् ; * परंज्योतिरुपसंपद्येति वाक्येन मुक्तप्राप्यत्वादिकम्, * परं-ज्योतिरिति विशिष्टप्रयोगश्च सिद्धः । *तं देवा ज्योतिषां ज्योतिरित्यादिना देवोपास्यत्वमुखेन ज्योतिषां ज्योतिष्ट्वेन च परत्वमर्थलब्धम् । भगवदसाधारणं परमशब्दविशेषितं पावनत्वं दर्शयितुं पवित्रशब्दस्यात्र संज्ञात्वव्युदासायाह—**परमं पावन**मिति । **विनाशकर**मित्यत्र कल्मषशब्दो बुद्ध्या निष्कृष्यानुसन्धेयः । **प्रदूयन्ते**—नश्यन्तीत्यर्थः । **सूत्रं च** * तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् (ब्र. ४. १. १३) इति । तत्त्वनिर्णयैकतत्परनारायणानुवाक-वाक्येनापि परब्रह्मत्वादिकं * भवानिति निर्दिष्टदेवताविशेषस्यैव संवादयति—**नारायणे**ति । अनयोर्वाक्ययोः **प्रथमौ** नारायणशब्दौ लुप्तविभक्तिकौ ; * तत्त्वं नारायणः परः इत्यादिसहपाठवशाद्व्यस्तत्वं प्रथमान्तत्वं च प्राप्तम् । **तथैव** सविभक्तितया श्रुत्यन्तरेऽधीयते * नारायणः परं ब्रह्म (महो) इत्यादि । एतेन पञ्चमीसमासतां वदन् भगवद्द्वेषी प्रत्युक्तः, सर्वश्रुतिस्मृतिसूत्रन्यायविरोधाच्च । **इति हि श्रुतयो वदन्ती**त्यत्र * यतो वा इमानि (भृ. १) इत्यादिक-मखिलमन्वेतव्यम् ; मध्ये तत्तदर्थवैशद्यायावान्तरवाक्यम् ॥ ११८ ॥

पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२
आहुस्त्वामृषयस्सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासस्स्वयं चैव ब्रवीषि मे ॥ १३

भा ॥ ऋषयश्च सर्वे परावरतत्त्वयाथात्म्यविदस्त्वामेव शाश्वतं दिव्यं पुरुषमादिदेवमजं विभुमाहुः ; तथैव देवर्षिर्नारदः असितो देवलो व्यासश्च । * एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः । नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीम ॥ (ह. वि. १२३. ६२) *पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः । साक्षाद्देवः पुराणोऽसौ स हि धर्मस्सनातनः ॥ * ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः । ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् । पवित्राणां हि गोविन्दः पवित्रं परमुच्यते । पुण्यानामपि पुण्योऽसौ मङ्गलानां च मङ्गलम् । त्रैलोक्यं पुण्डरीकाक्षो देवदेवस्सनातनः । आस्ते हरिरचिन्त्यात्मा तत्रैव मधुसूदनः ॥ (भा. व. ७६. २४-२८) तथा * यत्र नारायणो देवः परमात्मा सनातनः । तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च ॥ तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं तत्तपोवनम् । तत्र देवर्षयस्सिद्धास्सर्वे चैव तपोधनाः ॥ ....आदिदेवो महायोगी यत्रास्ते मधु-सूदनः । पुण्यानामपि तत्पुण्यं माभूत्ते संशयोऽत्र वै ॥ (भा. व. ९०. २८-३२) * कृष्ण एव हि लोकानामुत्पत्ति-रपि चाप्ययः । कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् ॥ (भा. स. ३८. ३३) इति । तथा स्वयमेव ब्रवीषि च * भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ (७. ४) इत्यादिना * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते (१०. ८) इत्यन्तेन ॥ १२ ॥ १३ ॥

ता ॥ एवं श्रुतिसिद्धोऽर्थः स्मृतीतिहासपुराणायमानमहर्षिवचनाच्छ्रुतिवदन्यानपेक्षसर्वज्ञवचनाच्च सिद्ध इत्याह—***पुरुषमिति** सार्धेन । सर्वशब्देनाविगीतत्वं विवक्षितम् । **परावरतत्त्वयाथात्म्यविद** इति ऋषिशब्दाभिप्रेतोक्तिः ।

तेनाप्ततमत्वमुक्तं भवति । * त्वामित्येतद्ब्रह्मरुद्रादिविशेषान्तरव्युदासार्थमित्यभिप्रायेण **त्वामेवेत्युक्तम्** ; यद्वा अवतीर्णं त्वामेवेत्यर्थः । **शाश्वतं**–नित्यम्, **दिव्यं**–परमव्योमनिलयम्, **पुरुषं**–* परात्परं पुरिशयं पुरुषमीक्षते (प्र. ५. ५) इत्यादिप्रतिपादितम् । * शाश्वतं दिव्यं पुरुषमिति व्युत्क्रमोपादानं दिवि वर्तमानस्य पुरुषस्य पुरुषसूक्तोदितामृतत्रिपाद्विभूतिविशिष्टवेषेण शाश्वतत्वमिह विवक्षितमिति व्यञ्जनार्थम् । आदिश्चासौ देवश्चेत्यादिदेवः जगत्कारणभूतः क्रीडारूपजगद्व्यापारश्चेत्यर्थः । स्मरन्ति च * क्रीडतो बालकस्येव (वि. १. २. १८), * क्रीडा हरेरिदं सर्वम् (भा. मो.), * बालः क्रीडनकैरिव (भा. स. ९०. ३१) इति । सूत्रितं च * लोकवत्तु लीला कैवल्यम् (ब्र. २. १. ३३) इति । एतेन ब्रह्मादीनामपि देवजात्यनुप्रविष्टानां परमपुरुषलीलोपकरणत्वं कार्यत्वं चोक्तं भवति । * नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते (ना. उ.), * एको ह वै नारायण असीन्न ब्रह्मा नेशानः (महो. १. १), * तस्माच्च देवा बहुधा संप्रसूतास्साध्या मनुष्याः पशवो वयांसि (मु. २. १. ७) * एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ (भा. व. ८६. २४), * आवां तवाङ्गे संभूतौ (भा. मो. ३५०. १९) इत्यादेः कारणवाक्यस्यार्थ उक्तः । शोधकवाक्यार्थमुपलक्षयति–**अजमिति** । कर्मकृतजन्मादिरहितमित्यर्थः । स्वरूपापेक्षया वा निर्विकारत्वमुच्यते । विभुम् * आकाशवत्सर्वगतश्च नित्यः (ह. वि. १३२. ४८) इति प्रक्रियया व्याप्तं ; नियन्तारमिति वा ; एतेन कारणत्वाद्यनुगुणव्याप्तिनियमनादिकमन्तर्यामिब्राह्मणादिसिद्धं स्मारितम् । एतैः पदैः * एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः (सु. ७) इति श्रुतिस्मूचिता । सर्व इति सामान्यतस्संग्रहेऽप्याप्ततमत्वविवक्षया नारदादेः पृथगभिधानम् । देवर्षिशब्देन जात्याऽपि सत्त्वोत्तरत्वं प्रकाश्यते । तत्राप्यसौ * देवर्षीणां च नारदः (गी. १०. २६) इति प्रकृष्टः । असितः, देवलश्च तस्य पिता । व्यासश्चात्र भगवान् पाराशर्यः । * आहुस्त्वामृषयस्सर्वे इत्यादिकं संवादयति–**येचे**ति । वेदविदः कर्मभागवेदिनः, अध्यात्मविदः वेदान्तार्थवेदिनः । कृष्णं महात्मानं सनातनं धर्मं वदन्तीत्यन्वयः । महात्मशब्देन सर्वातिशायिपरमैश्वर्यादिकं विवक्षितम् ; महानात्मेति परमात्मत्वं वा, * स वा एष महानज आत्मा (बृ. ६. ४. २२) इत्यादेः । यागदानादयो हि देशकालादिपरिमितफलदायिनः, स्वयं चानित्याः ; अयं तु नित्यनिरतिशयफलदायी, नित्यश्चेति सनातनशब्देन धर्मस्य विशेषणम् । पवित्रशब्दोऽत्र पापनिर्बर्हणपरः । पुण्यशब्दोऽभिमतफलविशेषसाधनपरः । मङ्गलशब्दश्च स्वसन्निधिमात्रेणातिसमृद्धिहेतुभूतकल्याणवस्तुपरः । * त्रैलोक्यं पुण्डरीकाक्षः (भा. व. ८६. २८) इति कार्यकारणभावेन शरीरात्मभावेन वा सामानाधिकरण्यम् । त्रयो लोकास्त्रैलोक्यम्–बद्धमुक्तनित्या इत्यर्थः । यद्वोपलक्षणतया भूम्यन्तरिक्षादिकमुच्यते । पुण्डरीकाक्षशब्देन अन्तरादित्यविद्याप्रतिपादितविलक्षणविग्रहत्वं दर्शितम् । * तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी (छा. १. ६. ७) इत्यस्य च वाक्यस्य **द्रमिडभाष्योदितेषु** षट्स्वर्थेषु सिद्धान्तत्वेन **भाष्यकार**परिगृहीतास्त्रयोऽर्थाः । तथा हि **वेदार्थसंग्रहे** दर्शितं *गम्भीराम्भस्समुद्भूतसुमृष्टनालरविकरविकसितपुण्डरीकदलामलायतेक्षणः इति। इदं च **वरदगुरुभिस्तत्त्वसारे** प्रपञ्चितम्। नारायणशब्देन परतत्त्वनिर्णयैकपरनारायणानुवाकसूचनम् । *श्रीमान् * क्षीरार्णवनिकेतनः इत्याभ्यां * ह्रीश्च ते लक्ष्मीश्च पत्न्यौ (ना) * अम्भस्यपारे (ना) * यमन्तस्समुद्रे (ना) इत्यादिकं स्मारितम् । * उत्सृज्यागतः इत्यवतारमात्रत्वं विवक्षितम्, कृष्णावतारदशायामपि क्षीरार्णवगतनागपर्यङ्कशायिविग्रहस्य तत्रैव स्थितत्वात् । **साक्षादिति** । न त्वौपचारिकः, आत्मान्तरव्यवहितो वेत्यर्थः । **तथेति**–प्रकरणान्तरत्वव्यक्त्यर्थम् । * देवर्षिर्नारदस्तथेति व्याख्येयविभागावगमात्तदुक्तवाक्योपादानमपि तथाविभागेन कुर्महे इति च दर्शितम् । * तत्र कृत्स्नमित्यादि नारायणस्यैव

सर्वाश्रयत्वात्, सर्वप्रकारातिशययोगित्वाद्वा । * तत्पुण्यमित्यादिकं ब्रह्मशब्दानुरोधेन नारायणविषयं वा, प्रकरणविशेषेण तदाश्रितस्थानप्रशंसनं वा । **स्वयमेवेति** । स्वतस्सर्वज्ञो ब्रह्मादीनामपि गुरुस्त्वमेवेत्यर्थः ।*भूमिरापः (७. ४) इत्यादिषु सर्वशेषित्वं सर्वकारणत्वं सर्वशरीरित्वमित्यादिकमुक्तम् ॥ १२ ॥ १३ ॥

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥ १४

भा ॥ अतस्सर्वमेतद्यथावस्थितवस्तुकथनं मन्ये, न प्रशंसाद्यभिप्रायम् : यन्मां प्रत्यनन्यसाधारणमनवधिकातिशयं स्वाभाविकं तवैश्वर्यं कल्याणगुणानन्त्यं च वदसि । अतो भगवन्—निरतिशयज्ञानशक्तिबलैश्वर्यवीर्यतेजसां निधे, ते व्यक्तिं—व्यञ्जनप्रकारम्, नहि परिमितज्ञाना देवा दानवाश्च विदुः ॥ १४ ॥

ता ॥ सङ्गत्यर्थमाह—**अत** इति । आप्ततमैराम्नायैर्महर्षिभिर्भवताऽपि चोक्तत्वादिति भावः । * ऋतं मन्ये इत्यस्याभिप्रेतमाह—**न प्रशंसाद्यभिप्राय**मिति । अन्येषु हि तद्गुणारोपणेन प्रशंसेत्यभिप्रायः । * मामित्यनेन * शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् (गी. २. ७) इत्यादिकमभिप्रेतम् । वदिरिह शिष्यमनुवदन् शास्त्यर्थे वर्तमानो द्विकर्मकः । एवं शिष्यस्यानुभाषणं शासनविशेषप्रार्थनार्थम् । **अनन्यसाधारणमनवधिकातिशय**मिति विशेषणाभ्यां समाधिकराहित्यम्, **स्वाभाविक**मित्यनन्याधीनत्वं विवक्षितम् । अतो न विदुरित्यन्वयः । * ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ (वि. ६. ५. ७९) इति भगवत्**पराशर**वचनानुसारेण देवादिभिरवेद्यत्वाय भगवच्छब्दार्थं दर्शयति—**निरतिशयज्ञाने**त्यादिना । व्यक्तिशब्दोऽत्र * किमात्मिकैवैषा भगवतो व्यक्तिः (र. ब्रा.) इत्यादिष्विव न विग्रहादिपरः, अप्रसक्तत्वादनन्तरं चापृच्छ्यमानत्वात्; अतो * वक्तुमर्हस्यशेषेणेत्यनन्तरं विवक्षोः अन्ये त्वत्प्रतिपादनप्रकारमपि न जानन्ति, किं पुनः प्रत्यक्षादिवत्प्रकाशनमित्ययमर्थोऽपेक्षितत्वात्स्वीकार्य इत्यभिप्रायेणाह—**व्यञ्जनप्रकार**मिति । * अक्षरक्षरयोर्व्यक्तिम् [पृ]इच्छाम्यरिनिषूदन । उपलब्धुम् (मो. ध. ३०८. २) इतिवत् । **परिमितज्ञाना** इति हिशब्दतात्पर्योक्तिः ॥ १४ ॥

स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५

भा ॥ हे पुरुषोत्तम, आत्मना आत्मानम्—त्वां स्वयमेव—स्वेनैव ज्ञानेन वेत्थ । भूतभावन—सर्वेषां भूतानामुत्पादयितः, भूतेश—सर्वेषां भूतानां नियन्तः, देवदेव—दैवतानामपि परमदैवत, यथा मनुष्यमृगपक्षिसरीसृपादीन् सौन्दर्यसौशील्यादिकल्याणगुणगणैर्दैवतान्यतीत्य वर्तन्ते, तथा तानि सर्वाणि दैवतान्यपि तैस्तैर्गुणैरतीत्य वर्तमान, जगत्पते—जगत्स्वामिन् ॥ १५ ॥

ता ॥ देवादीनां भगवद्वैभवे वक्तृत्वयोग्यता प्रतिक्षिप्ता ; अथ भगवत एव स्ववैभववचनयोग्यतामाह—* स्वयमेवेति श्लोकेन । अत्र * पुरुषोत्तमेति संज्ञा ; शेषं तु तत्संज्ञान्वयौपयिकगुणपरमिति विभजनाय पूर्वमेव **हे पुरुषोत्तमे**त्युक्तम् । अत्र * त्वमेव त्वां वेत्थ योऽसि सोऽसि (काठ. १. ३. १) इति श्रुतिस्मरणाद्यभिप्रायेण * आत्मानमित्यस्य **त्वा**मिति प्रतिपदम् । * स्वयमेवेत्यनेन फलितोक्तिः **स्वेनैव ज्ञानेने**ति । **आत्मना**—अन्यैरननुगृहीत इत्यर्थः । यथाऽन्येषां * मत्तस्स्मृतिर्ज्ञानम् (गी. १५. १५) इति ; न तथाऽस्येति भावः । यद्वा * आत्मनेत्यस्य

व्याख्या ज्ञानेनेति ; * आत्मा जीवे इत्यारभ्य * यत्रेऽर्केऽग्नौ मतौ वायौ इति पाठात् । भावनशब्दस्य चिन्ताद्यर्थ-परत्वव्युदासायाह—उत्पादयितरिति । भूतेशजगत्पतिशब्दयोः पौनरुक्त्यशङ्काव्युदासाय नियन्तृत्वस्वामित्वकथनम् । रक्षणे व्युत्पन्नस्यापि पतिशब्दस्य शेषित्वे रूढिः । * स कारणं करणाधिपाधिपः (श्वे. ६. ८), * तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम् । पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् ॥ (श्वे. ६. ७) इति श्रुतिसिद्धाश्चत्वारोऽर्थाः * भूतभावनेत्यादिभिश्चतुर्भिः प्रतिपाद्यन्त इति ज्ञापनाय **दैवतानामपि परमदैवतेति** श्रुतिगतैः पदैर्व्याख्यातम् । देवशब्दस्य जातिविशेषवाचकत्वेन प्रतिसंबन्धिशब्दत्वाभावात् द्वितीयो देवशब्द उत्कर्षविशेषविषयतया औपचारिक इति मुख्यगौणानुगतमुपचारनिमित्तं दर्शयति—**यशेति** । अन्योन्यवैलक्षण्यस्याकिंचित्करत्वायात्यन्तवैलक्षण्य-ज्ञापनाय च मृगपक्षिसरीसृपग्रहणम् । यथा देवादीनां कीटः, तथा परमात्मनो देवा अपि । * कीटास्समस्तास्सुरा दृष्टे यत्र (मुकुन्द) इति ह्याहुः । **सौन्दर्यसौशील्येति**विग्रहगुणानामात्मगुणानां चोपलक्षणम् ॥ १५ ॥

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६

भा ॥ दिव्याः—त्वदसाधारण्यो विभूतयो याः, तास्त्वमेवाशेषेण वक्तुमर्हसि—त्वमेव व्यञ्जयेत्यर्थः । याभिरनन्ताभिर्विभूतिभिः—यैर्नियमनविशेषैर्युक्तः इमान् लोकांस्त्वं नियन्तृत्वेन व्याप्य तिष्ठसि ॥ १६ ॥

ता ॥ आत्मशब्दोऽन्यविभूतित्वव्युदासार्थ इत्याह—**त्वदसाधारण्य** इति । * विभूतयः इति प्रथमान्तत्वेन * वक्तुमर्हसीत्यनेन अन्वयायोगात् **विभूतयो या** इति यच्छब्दाध्याहारः । यद्वा दिव्या हि, अतोऽवश्यवक्तव्याः ; अतस्ता वक्तुमर्हसीति वाक्यवृत्तिज्ञापनार्थः । * अर्हसीति योग्यत्वनिर्देशेन तत्प्रार्थनं विवक्षितम् । ईश्वरेणाप्यशेषेण वक्तुम्, अर्जुनेन च श्रोतुमशक्यत्वाद्वचनतः प्रसादतश्च प्रकाशनमात्रमिह प्रार्थ्यते ; * न हि ते भगवन् व्यक्तिम् (१४) इति हि पूर्वमुक्तमित्यभिप्रायेणाह—**त्वमेव व्यञ्जयेत्यर्थ** इति । बहुवचनासङ्कोचात् * अशेषेणेति निर्देशाच्च आनन्त्यमिह विवक्षितम्, * नास्त्यन्तो विस्तरस्य (१९) इत्याद्युत्तरवशाच्चेत्यभिप्रायेण **अनन्ताभिरित्युक्तम्** । विपूर्वो भवतिः भावप्रत्ययान्तो नियमनवाचीत्युक्तम् । न चात्रार्थान्तरं घटते, नियन्तव्यसामानाधिकरण्याद्यभावादित्यभिप्रायेण **यैर्नियमनविशेषैरित्युक्तम्** । प्रभूतनियमनविषये कौतुकातिरेकद्योतनाय विशेषशब्दः । तृतीयाया इह करणाद्यर्थत्वा-योगादित्थंभूतलक्षणार्थत्वं विवक्षितमित्यभिप्रायेण **युक्त** इत्युक्तम् । अत्र विभूतिशब्दस्य नियन्तव्यपरत्वेऽश्वत्थादीनां न लोकव्याप्तिकारणत्वम् ; नच तद्विशिष्टस्य, तैस्सह वा तदितरव्याप्तिः ; नच व्याप्तौ नियन्तव्यानामित्थंभूतलक्षणत्वम्, **नैरर्थक्यात्** ; नियमनविशेषाणां तु श्रुत्यनुसारादाकाशादिव्याप्तिव्यवच्छेदार्थत्वाच्च तदुपपत्तिरित्यभिप्रायेणाह—**नियन्तृत्वेन व्याप्येति** । * अन्तःप्रविष्टश्शास्ता जनानाम् (य. आ. ३. १०), * अन्तरो यमयति अन्तर्याम्यमृतः (बृ. ५. ७) इत्यादि हि श्रूयते । * व्याप्य तिष्ठसीत्यनेन * व्याप्य नारायणः स्थितः (ना) इति श्रुतिः स्मारिता ॥ १६ ॥

कथं विद्यामहं योगी त्वां सदा परिचिन्तयन् ।
केषुकेषु च भावेषु चिन्त्योऽसि भगवन्मया ॥ १७

भा ॥ अहं योगी—भक्तियोगनिष्ठस्सन् भक्त्या त्वां सदा परिचिन्तयन्—चिन्तयितुं प्रवृत्तः चिन्त-नीयं त्वां परिपूर्णैश्वर्यादिकल्याणगुणगणं कथं विद्याम् ? पूर्वोक्तबुद्धिज्ञानादिभावव्यतिरिक्तेष्वनुक्तेषु केषुकेषु च भावेषु मया नियन्तृत्वेन चिन्त्योऽसि ? ॥ १७ ॥

ता ॥ योगिशब्दः प्रकरणविशेषात् * त्वां सदा परिचिन्तयन्नित्यादेस्सामर्थ्याच्च योगिविशेषविषय इत्याह—**भक्तियोगनिष्ठस्सन्निति** । सन्नित्यनेन निष्पन्नयोगिपरत्वमपि व्यावर्तितम् । अत्र * योगिन्निति परेषां पाठोऽनार्षः । * सदेतिविशेषणसामर्थ्यात् **भक्तयेति** सिद्धम् । वेदनात्पूर्वं चिन्तनाशक्तेः, * कथं विद्यामित्यस्य चिन्तनहेतुत्वात् * लक्षणहेत्वोः क्रियायाः (अष्टा. ३. २. १२६) इति शतुरनुशासनाच्च **चिन्तयितुं** प्रवृत्त इत्युक्तम् । * त्वामिति धर्मिविशेषस्य प्रतिपन्नत्वात्प्रकारविशेषेषु बुभुत्सेति ज्ञापनायोक्तम्—**परिपूर्णेत्यादि** । प्रश्नो ह्यज्ञातविशेषज्ञापनार्थ इत्यभिसन्धायोक्तं—**पूर्वोक्तेत्यादि** । * भावेष्विति सप्तम्यभिप्रेतोक्तिः प्रकृतानुकर्षणं वा—**नियन्तृत्वेनेति** ॥ १७ ॥

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १८

भा ॥ * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते (१०.८) इति संक्षेपेणोक्तं तव स्रष्टृत्वादियोगं, विभूति—नियमनं च, भूयो विस्तरेण कथय। त्वयोच्यमानं त्वन्माहात्म्यामृतं शृण्वतो मे तृप्तिर्नास्ति हि ; ममातृप्तिस्त्वयैव विदितेत्यभिप्रायः ॥ १८ ॥

ता ॥ प्रतिकूलजनानां नरकादिगमयितृत्वात् अनुकूलजनैः स्वाभिलषितं याच्यमानत्वाद्वा जनार्दनः । **विस्तर**बुभुत्साहेतुज्ञापनार्थं योगशब्दविवक्षितव्यक्त्यर्थं च भूयश्शब्दफलितमाह—**अहं सर्वस्येति** । अमृतशब्दोऽत्रातृप्तिसमभिव्याहारान्माहात्म्ये भोग्यत्वपरः । भोग्यतमत्वायोक्तं—**त्वयोच्यमान**मिति । त्वन्मुखचन्द्रनिस्सृतमिति भावः । हिशब्दाभिप्रेतं विवृणोति—**ममेति** ॥ १८ ॥

श्रीभगवानुवाच—

हन्त ते कथयिष्यामि विभूतीरात्मनश्शुभाः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९

भा ॥ हे कुरुश्रेष्ठ! मदीयाः कल्याणीर्विभूतीः प्राधान्यतस्ते कथयिष्यामि । प्राधान्यशब्देनोत्कर्षो विवक्षितः ; * पुरोधसां च मुख्यं माम् (२४) इति हि वक्ष्यते । जगत्युत्कृष्टाः काश्चन विभूतीर्वक्ष्यामि, विस्तरेण वक्तुं श्रोतुं च न शक्यते, तासामानन्त्यात् । विभूतित्वं नाम नियाम्यत्वम्, सर्वेषां भूतानां बुद्ध्यादयः पृथग्विधा भावा मत्त एव भवन्तीत्युक्त्वा * एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः (७) इति प्रतिपादनात् । तथा तत्र योगशब्दनिर्दिष्टं स्रष्टृत्वादिकं विभूतिशब्दनिर्दिष्टं तत्प्रवर्त्यत्वमिति ह्युक्तम् । पुनश्च * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते । इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ (८) इति ॥ १९ ॥

ता ॥ एवमतृप्त्या पृच्छन्तमर्जुनं प्रति अतिप्रसन्नो भगवांस्तस्याभिजनादिवर्णनमुखेन योग्यतां दर्शयन् विभूतेर्विस्तरेण प्रत्येकं वक्तुं श्रोतुं च अशक्यत्वात्केनचिदुपाधिविशेषेण संगृहीता विभूतीर्वक्ष्यामीत्याह—**हन्तेति** । ते—अनसूयुत्वप्रीयमाणत्वातृप्तत्वादिगुणपूर्णायेति भावः । गुणत्वादिप्रतियोगिकशेषित्वादिप्राधान्यविवक्षायां वक्ष्यमाणसमस्तोदाहरणव्याप्त्यभावाद्गुणानां च प्राधान्येन व्यपदेक्ष्यमाणत्वात्संग्राहकमर्थविशेषमाह—**प्राधान्यशब्देनेति** । तस्यैव विवक्षितत्वं वक्ष्यमाणेन संवादयति—**पुरोधसामिति** । पिण्डितार्थमाह—**जगतीति** । विस्तरेण कथयेति पृच्छन्तं प्रति प्राधान्यतः **कथयिष्यामीति कथमुच्यत इति शङ्कायां** *नास्त्यन्तो विस्तरस्य मे इत्युच्यते । विभूतीनामिति शेषः । * **विभूते-**

विस्तरो मया (४०) इति हि वक्ष्यते । नास्तिशब्दाभिप्रेतमशक्यत्वं दर्शयति—**विस्तरेण वक्तुमिति** । नेदं वक्तृश्रोत्रोरसामर्थ्यनिबन्धनमित्याह—**तासामानन्त्यादिति** । तदेतदुक्तं—* नास्त्यन्त इति । वक्ष्यमाणेषु पदार्थेषु विभूतिशब्दप्रयोगनिमित्तमाह—**विभूतित्वं नामेति** । नियन्तव्यवस्त्वन्तरविषयो विभूतिशब्दो विभवनकर्मपरः । अन्यत्र च * ब्रह्मा दक्षादयः कालः (वि. १. २२. ३१), * विष्णुर्मन्वादयः कालः (३२), * रुद्रः कालान्तकाद्याश्च (३३) इत्यादिषु * जनार्दनविभूतयः इति नियन्तव्येषु विभूतिशब्दो दृष्ट इति भावः । कुत इत्यत्राह—**सर्वेषामिति** । प्रस्तुतं तादधीन्यं ह्येतच्छब्देन परामृश्यत इति भावः । समनन्तरश्लोकेनापि तस्य श्लोकस्य तदर्थपरत्वं दर्शयति—**तथेति** । नन्वस्य श्लोकस्य व्याख्याने पूर्वं * सौशील्यवात्सल्यसौन्दर्यादिकल्याणगुणयोगमित्युक्तम्; इहतु योगशब्दनिर्दिष्टं स्रष्टृत्वादिकमुच्यते; तत्कथं घटते? इत्थम्, उभयत्रोभयमप्यादिशब्देन संगृहीतमित्येकार्थत्वात् । अत एव हि * एतां विभूतिं योगं च (७) इत्यत्र * मम हेयप्रत्यनीककल्याणगुणगणरूपं योगं चेति प्रयोजकेन संगृहीतम् । * एतां विभूतिमित्यादेः पूर्वं नियमनपरत्वेन व्याख्यानेऽपि अत्र तदुपादानं समृद्ध्याद्यर्थान्तरव्युदासेन सोपसर्गधात्वर्थव्यञ्जनार्थम् । * विस्तरेणात्मनो योगं विभूतिं चेत्यत्र तु * याभिर्विभूतिभिरिति तत्पूर्वप्रश्नवाक्यस्थविभूतिशब्दैकार्थ्यस्वारस्यान्नियमनार्थतोक्ता । अतः प्रश्नोत्तरपरयोरीषद्वैरूप्यं सह्यम् ॥ १९ ॥

भा ॥ तत्र सर्वभूतानां प्रवर्तनरूपं नियमनमात्मतयाऽवस्थायेतीममर्थं योगशब्दनिर्दिष्टं सर्वस्य स्रष्टृत्वं पालयितृत्वं संहर्तृत्वं चेति सुस्पष्टमाह—

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २०

भा ॥ सर्वेषां भूतानां मम शरीरभूतानाम् आशये—हृदये अहमात्मतयाऽवस्थितः । आत्मा हि नाम शरीरस्य सर्वात्मना आधारः, नियन्ता, शेषी च । तथा वक्ष्यते—* सर्वस्य चाहं हृदि सन्निविष्टो मत्तस्स्मृतिर्ज्ञानमपोहनं च (१५. १५), * ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ (१८. ६१) इति । श्रूयते च * यस्सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुः यस्य सर्वाणि भूतानि शरीरं यस्सर्वाणि भूतान्यन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः (बृ. ५. ७. १५) इति, * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः (शत. १४. ५. ३०) इति च । एवं सर्वभूतानामात्मतयाऽवस्थितोऽहं तेषामादिर्मध्यं चान्तश्च, तेषामुत्पत्तिस्थितिप्रलयहेतुरित्यर्थः ॥ २० ॥

ता ॥ * विस्तरेणात्मनो योगं विभूतिं चेति पृष्टमर्थद्वयं विस्तरेण वक्तुं तस्योत्तरद्वयम् * अहमात्मेति श्लोकेन संगृह्योच्यत इत्यभिप्रायेणाह—**तत्रेति** । एतेन प्रागुक्तेषु वक्ष्यमाणेषु च सामानाधिकरण्यनिर्देशेषु यथासंभवं निमित्तद्वयमुक्तं भवति । **आत्मतयाऽवस्थित** इति फलितान्वयप्रदर्शनम् । अनेकार्थोऽप्यात्मशब्दश्शरीरप्रतिसंबन्धिनि प्रसिद्धिप्राचुर्यात्प्रतिसंबन्धिरूपं शरीरमपेक्षते; ततश्च वृत्त्यन्तर्गतोऽपि भूतशब्दो बुद्ध्या निष्कृष्यान्वेतव्य इत्यभिप्रायेण **सर्वेषां भूतानां मम शरीरभूतानामित्युक्तम्** । ईश्वरस्य जीवशरीराणि भूतानि, जीवांश्च प्रति, कथमात्मत्वमित्यत्रात्मलक्षणं दर्शयति—**आत्मा हीति** । त्रयमप्येकं लक्षणमित्येके । तत्र श्रुत्याद्यनुसारेण जन्मादित्रयस्य

ब्रह्मलक्षणत्व इव शङ्कितमात्रव्यवच्छेदार्थतया त्रयाणां साफल्यं भाव्यम्। लक्षणत्रयमिति चान्ये। तत्र त्वेवं विवेकः—* यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यमित्यादि शरीरलक्षणवाक्यमपि भाव्यम्। शरीरलक्षणान्तराणि च तत्रतत्र विस्तरेण प्रतिक्षिप्तानि। चैतन्यविशिष्टं प्रत्यगात्मस्वरूपविशेषणभूतद्रव्यं शरीरमिति भाष्याभिप्रेतोऽस्माकं निष्कर्षः। अत्र सर्वभूतशब्देन शरीरमात्रानिर्देशशङ्काव्युदासाय आशयशब्दस्य च हृदयविषयत्वव्यञ्जनायाधारत्वनियन्तृत्वादेरात्मलक्षणत्वसिद्ध्यर्थं चाह—**तथेति**। * सर्वस्य चाहम् (गी. १५. १५) इत्यस्यानन्तरं * द्वाविमौ पुरुषौ (१६) इत्युपक्रम्य * क्षरस्सर्वाणि भूतानि इति वचनात्सर्वभूतशब्दोऽचिद्विशिष्टक्षेत्रज्ञपर इति निश्चीयते; तद्वदत्रापि। तथाऽस्मिन्नेव प्रकरणे * उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। * यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ (१७) इत्युक्तम्। अत्र बिभर्तीश्वर इत्याभ्याम् आधारत्वनियन्तृत्वे स्पष्टे; ईश्वरशब्दरूढ्या च स्वामित्वसिद्धिः; न खलु गरुडादिषु भुजङ्गादीन्नियच्छत्सु तदीश्वरशब्दः। ईश्वरशब्दस्याहंशब्दस्य चात्रैकविषयत्वं श्लोकद्वयोपादानेन दर्शितम्। अत्र हि सर्वभूतशब्दो जीवपर एव * यन्त्रारूढानि मायया (गी. १८. ६१) इत्यभिधानात्। * भ्रामयन्नित्यनेन नियन्तृत्वादिसिद्धिः। हृद्देशस्थित्या च * मयि सर्वमिदं प्रोतम् (७. ७) इत्याद्युक्तधारकत्वादि सूचितम्। एवं चिदचिदात्मकसमस्तवस्तुशरीरत्वं सर्वभूतशब्दान्वयेनैव वदन्तीं श्रुतिं दर्शयति—**यस्सर्वेषु भूतेष्विति**। चिदंशं प्रति शरीरित्वं प्रपञ्चयद्वाक्यमुपादत्ते—**य आत्मनीति**। आत्मत्वेनावस्थानस्योपादानत्वनिमित्तत्वोपयोगात्पूर्वार्धेन सङ्गमयन्नुत्तरार्धं व्याख्याति—**एवमिति**। एवमात्मतयाऽवस्थितोऽहमित्यनेन निर्विकारस्य स्वस्यैवोपादानत्वस्थापनम्। देशतः कालतो वा आदिमध्यान्तत्वमात्रमनुचितमिति तदुपचरितमाह—**तेषामुत्पत्तीति** ॥ २० ॥

भा॥ एवं भगवतस्स्वविभूतिभूतेषु सर्वेष्वात्मतयाऽवस्थानं तत्तच्छब्दसामानाधिकरण्यनिर्देशहेतुं प्रतिपाद्य विभूतिविशेषान् सामानाधिकरण्येन व्यपदिशति। भगवत्यात्मतयाऽवस्थिते हि सर्वे शब्दास्तस्मिन्नेव पर्यवस्यन्ति; यथा देवो मनुष्यः पक्षी वृक्षः इत्यादयश्शब्दाश्शरीराणि प्रतिपादयन्तस्तत्तदात्मनि पर्यवस्यन्ति; भगवतस्तत्तदात्मतयाऽवस्थानमेव तत्तच्छब्दसामानाधिकरण्यनिबन्धनमिति विभूत्युपसंहारे वक्ष्यति * न तदस्ति विना यत्स्यान्मया भूतं चराचरम् (३९) इति सर्वेषां स्वेनाविनाभाववचनात्। अविनाभावश्च नियाम्यतेति * मत्तस्सर्वं प्रवर्तते (८) इत्युपक्रमोदितम्।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥ २१

भा॥ द्वादशसंख्यासंख्यातानामादित्यानां द्वादशो य उत्कृष्टो विष्णुर्नामादित्यः, सोऽहम्। ज्योतिषां—जगति प्रकाशकानां योंऽशुमान् रविरादित्यगणः, सोऽहम्। मरुतामुत्कृष्टो मरीचिर्यः, सोऽहमस्मि। नक्षत्राणामहं शशी; नेयं निर्धारणे षष्ठी, *भूतानामस्मि चेतना (२२) इतिवत्। नक्षत्राणां पतिर्यश्चन्द्रः, सोऽहमस्मि॥२१

ता॥ *आदित्यानामहं बिष्णुरित्युपक्रम्य *यच्चापि सर्वभूतानां बीजं तदहमर्जुन (३९) इत्यन्तं सामानाधिकरण्यप्रपञ्चकम् *अहमात्मा (२०) इति श्लोकेन सङ्गमयन्नवतारयति—**एवं भगवत** इति। एतेन *अहमात्मेत्यादिकास्समस्ताश्चतस्रो बिभूतयः इति मतान्तरं निरस्तम्। **विभूतिविशेषानिति**। प्राधान्यत इति द्युपक्रान्तम्। ननु शरीरत्वाविशे-

श्शरीरादिशब्दा नात्मनि पर्यवस्यन्ति ; तद्वदत्रापीति लक्षणास्वीकार एव न्याय्यः ; न शक्तिकल्पना, लाघवाच्चेत्यत्राह—**भगवती**ति । हिशब्दो हेत्वर्थः । अपृथक्सिद्धविशेषणवाचिनश्शब्दास्तत्तद्द्वारा धर्मिण्यपि मुख्यवृत्ता इति प्रयोजकरूपेण गुणादिष्वपि सिद्धत्वान्न शक्तिकल्पनागौरवमिति भावः । तदेतदुक्तं—**पर्यवस्यन्ती**ति । शरीरवाचिशब्दानां स्वरसतस्तत्तदात्मनि पर्यवसानमपृथक्सिद्ध्युपाधिकं दर्शयति—**यथे**ति । शरीरादिशब्दास्तु गुण इत्यादिशब्दवन्निष्कर्षकशब्दत्वान्न धर्मिणि पर्यवस्यन्ति । एतदभिप्रायेणोक्तं—**देवो मनुष्यः पक्षी वृक्ष इत्यादयश्शब्दा** इति । अध्यासादिहेतुकसामानाधिकरण्यशङ्कामपनयति—**भगवतस्तत्तदात्मतये**ति । नह्युपक्रमोपसंहारविरुद्धोऽर्थो मध्ये स्वीकार्यः ; न च ब्रह्मणस्सर्वहेयमयत्वं भ्रमाद्वा तत्त्वतो वाऽङ्गीकर्तुं युक्तमिति भावः । **अविनाभाववचना**दिति-आत्मना विना हि शरीरभूतं न भवतीति भावः । अग्निना विना धूमो नास्ति ; गुणिना विना गुणो नास्तीत्युक्ते अग्न्यादिरेव परमार्थः, धूमादिस्तु मिथ्याभूत इति वा, अग्न्याद्यात्मक इति वा प्रत्ययो हि न भवति ; तद्वदत्रापीति । ननु यज्ञदत्तं विनाऽन्ये गृहे न सन्ति, रज्जुं विना सर्पादिकं नास्तीत्युक्ते यथैकस्यैव सत्त्वं तदतिरिक्तानां चासत्त्वं प्रतीयते, तद्वदत्रापि किं न स्यादित्यत्राह—**अविनाभावश्चे**ति । असंजातविरोधिकालसमुदितोपक्रमविरुद्धतया उपसंहारस्य नोदय इत्युपक्रमाधिकरणसिद्धमिति भावः । **नियाम्यतये**त्यनेन धूमाग्निव्याप्तिवैषम्यमपि दर्शितम् । एवमेतावता ग्रन्थेन * अहमात्मा गुडाकेश सर्वभूताशयस्थितः (२०) इति सर्वशरीरवर्तिनां जीवानां **ब्रह्मस्वरूपैक्य**मुच्यत इति कुदृष्टिमतमुन्मूलितम् ।

आदित्यानाम्—अदित्यपत्यानाम् । *अजघन्यो जघन्यजः इत्यादिवचनानुसारेण **द्वादशो य उत्कृष्ट** इत्युक्तम् । अत्र चोत्तरेषु च निर्धारणार्थविशेषप्रदर्शनार्थ उत्कृष्टशब्दः । स च * पुरोधसां च मुख्यम् (२४) इति वक्ष्यमाणमुख्यपर्यायतया अपेक्षितप्रदेशे सर्वत्र निहितः । अत्र चोद्धियमाणानां पदार्थानां केषांचित्प्राधान्यं प्रत्यक्षम् ; केषांचिदागमिकम् । क्वचिदव्यवहितं, क्वचिज्जीवव्यवहितं च सामानाधिकरण्यम् । ज्योतिश्शब्देन तारकामात्रग्रहणे ततो बहिर्भूतस्य तत्संबन्धरहितस्य च रवेर्निर्धारणाद्ययोगात् **प्रकाशकाना**मिति सामान्येनोक्तम् । जगत्कारणभूतपरज्योतिरपेक्षया रवेः खद्योतकल्पत्वात्तद्व्यवच्छेदाय **जगतीति** विशेषितम् । * अंशुमानिति निर्धारणोपयिकातिशयितप्रकाशयोगो मतुपा विवक्षितः, अन्यथा पौनरुक्त्यात् । रविशब्दस्य द्वादशादित्यसाधारणत्वादेकवचनं समुदायाभिप्रायमिति प्रदर्शनायोक्तम्—**आदित्यगण** इति । मरुतो वायवः एकोनपञ्चाशद्दितिपुत्राः, येषां सप्तकास्सप्त गणा भवन्ति । शशिनोऽपि यदि नक्षत्रत्वं स्यात्, तदा हि तस्माद्वर्गात्तस्य निर्धारणमित्यभिप्रायेणाह—**नेयमि**ति । कस्तर्ह्यत्रार्थ इत्यत्राह—**नक्षत्राणां पतिरि**ति । * प्राधान्यतः इति ह्युपक्रान्तमिति भावः । ननु पूर्वापरेषु सर्वेषु निर्धारणार्थेषु मध्ये कस्यचित्संबन्धमात्रपरत्वमयुक्तम् ; नक्षत्रशब्देन निशि प्रकाशमात्रं छत्रिन्यायाद्ग्राह्यम्, * सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणि (यजु. ५.४.१.३) इति श्रुतेश्चन्द्रमण्डलस्यापि वा स्वर्गिणां भोगस्थानत्वान्नक्षत्रत्वं * यो वा इह यजते अमुं स लोकं न क्षते तन्नक्षत्राणां नक्षत्रत्वं देवगृहा वै नक्षत्राणि (अष्ट.१.५.२.१०) इति ; तत्राह—**भूतानामस्मि चेतनेतिवदि**ति । मुख्ये संभवति लक्षणा न न्याय्या, नचात्र सर्वत्र निर्धारणार्थता * भूतानामस्मि चेतना (२२), * सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन (३२), *वादः प्रवदतामहम् (३३), *अहमेवाक्षयः कालः—(३३), *उद्गवश्च भविष्यताम् (३४)*द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् । जयोऽस्मि व्यवसायोऽस्मि (३६) इत्यादिषु निर्धारणाभावात् ; अतोऽत्र चन्द्रस्य नक्षत्रजातीयत्वाभावात् षष्ठ्यभिहितस्य संबन्धसामान्यस्य प्रमाणसिद्धविशेषे पर्यवसानमिति भावः ॥ २१ ॥

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२

भा ॥ वेदानाम्—ऋग्यजुस्सामाथर्वणां य उत्कृष्टस्सामवेदः, सोऽहम् । देवानामिन्द्रोऽहमस्मि । एकादशानामिन्द्रियाणां यदुत्कृष्टं मनइन्द्रियम्, तदहमस्मि। इयमपि न निर्धारणे । भूतानां चेतनावतां या चेतना, साऽहमस्मि ॥ २२ ॥

ता ॥ गीतिर्हि सामशब्दार्थः; तस्य वेदेषु निर्धारणं कथमिति शङ्काव्युदासाय * सामवेदोऽस्मीति निर्देश इति प्रदर्शयति—**ऋग्यजुरिति** । सामवेदस्योत्कर्षो गीतिप्रधानत्वसहस्रशाखत्वादिभिः; अन्येषां तु तदभावात्तावन्मात्रेणापकर्षः; न तु प्रामाण्यतारतम्यात् । * ऋक्च वा इदमग्रे साम चास्तां सैव नाम ऋगासीदमो नाम साम सा वा ऋक्सामो पावदन्मिथुनं संभवाव प्रजात्या इति नेत्यब्रवीत् साम ज्यायान्वा अतो मम महिमा (ऐ. ब्रा.) इति गीतिरूपस्य साम्नः प्राधान्याद्गीत्यात्मकस्य सामवेदस्य प्राधान्यम्; * ऋग्भ्यो जातं वैश्यं वर्णमाहुः यजुर्वेदं क्षत्रियस्याहुर्योनिं सामवेदो ब्राह्मणानां प्रसूतिः (काठ. ३. ९. ५०) इतिच । देवा इति स्वर्गवासिनो विवक्षिताः; ब्रह्मादिसंग्रहायोगात् । वासवशब्दस्येन्द्रशब्देन व्याख्यानमतिशयद्योतनार्थम् , * इदि परमैश्वर्ये इति । * इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः (क. ३. १०), *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च (मु. २. १. ३) इत्यादिषु मनस इन्द्रियेभ्यः पृथगभिधानात्कथम् * इन्द्रियाणां मनश्चास्मीति निर्धारणमित्यत्राह—**एकादशेन्द्रियाणां यदुत्कृष्टं मन इन्द्रिय**मिति । अयमभिप्रायः—* इन्द्रियाणि दशैकं च (गी. १३. ५) * एकादशं मनश्चात्र (वि. १.२.४७) इत्यादिषु मनसोऽपीन्द्रियत्वेन व्यपदेशात्काचित्कः पृथग्व्यपदेशो गोवलीवर्दनयादिति निर्धारणोपपत्तिरिति । नहि भूतेषु चेतनासंज्ञकं किञ्चिद्भूतमस्तीत्यभिप्रायेणाह—**इयमपी**ति । षष्ठीति शेषः । * तेजस्तेजस्विनां, * सत्त्वं सत्त्ववताम् (३६) इत्यादिवद्विशिष्टे सारभूतविशेषणांशो विवक्षित इत्यभिप्रायेण—**चेतनावताम**ित्युक्तम् । ननु भूतानां षष्ठत्वेन चेतनासंज्ञं किमप्यन्यत्रोच्यते; यथा * महाभूतानि खं वायुरग्निरापस्तथा मही । षष्ठस्तु चेतनाधातुरात्मा सप्तम उच्यते । अष्टमं तु मनो ज्ञेयम् (मो. ध. ३३७. ४६) इति; तथा * षष्ठस्तु चेतनाधातुर्मन इत्युपदिश्यते (भा. आ. २१४. १९) इति च । अत्र मनसोऽधिष्ठानतया चेतनायास्तदपृथग्वचनमित्यविरोधः । अतो * भूतानामस्मि चेतना इति निर्धारणार्थत्वं युज्यत इति; मैवं, नहि भूतषष्ठनिर्देशमात्रान्महाभूतत्वम्, अन्यथाऽपि संख्यानिवेशसंभवात्, अत्र च सप्तमतया अष्टमतया च निर्दिष्टयोर्महाभूतत्वानभ्युपगमात् , चेतनाशब्दस्य च अप्रसिद्धार्थत्वात्, प्रसिद्धार्थस्वीकारस्योचितत्वात् । अतस्संबन्धमात्रविवक्षयैव अत्र षष्ठी युक्तेति ॥ २२ ॥

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुश्शिखरिणामहम् ॥ २३

भा ॥ रुद्राणामेकादशानां शङ्करोऽहमस्मि । यक्षरक्षसां वैश्रवणोऽहम् । वसूनामष्टानां पावकोऽहम्। शिखरिणाम्—शिखरशोभि[ता]नां पर्वतानां मध्ये मेरुरहम् ॥ २३ ॥

ता ॥ रुद्राणामिति—रुद्रेष्वेकस्य शङ्करसंज्ञयैवोत्कर्षद्योतनम् । यक्षराक्षसजात्योरदूरविप्रकर्षात्—यक्षरक्षसामित्युक्तम्, न तु वित्तेशस्य राक्षसत्वगन्धः; यद्वा * नक्षत्राणामहं शशीतिवज्जातिद्वयपतित्वमात्रमिह विवक्षितम् ।

वित्तेशसंज्ञया च धनदस्यासाधारणैश्वर्योत्कर्षद्योतनम् । * स्थावराणां हिमालयः इति पर्वतमात्राणां परस्ताद्वक्ष्यमाणत्वात् * मेरुश्शिखरिणामित्यत्र शिखरिशब्देन पर्वतविशेषो विवक्षितः; शक्तश्चायं शब्दो विशेषं दर्शयितुमित्यभिप्रायेणोक्तं—शिखरशोभिनां पर्वतानामिति । प्रशंसापरः प्रत्यय इति भावः । प्रशस्तरत्नकाञ्चनादिमयशिखरविशेषयोगान्मेरोरतिशयः ॥ २३ ॥

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥ २४

भा ॥ पुरोधसामुत्कृष्टो बृहस्पतिर्यः, सोऽहमस्मि । सेनानीनां—सेनापतीनां स्कन्दोऽहमस्मि । सरसां सागरोऽहमस्मि ॥ २४ ॥

ता ॥ बृहस्पतिसंज्ञया बृहतां पतिरित्यतिशयसिद्धिः; गिरां पतिर्ह्यसौ । सेनानीशब्देनात्र कर्मवश्यसेनापतिसंग्रहः । स्कन्दस्य देवसेनानीत्वलक्षणोऽतिशयः । सरश्शब्देन प्रवाहव्यतिरिक्तस्थास्नुसलिलाशयमात्रस्य विवक्षितत्वात्सागरसंग्रहः; स्रोतसां पृथग्वक्ष्यमाणत्वात् ॥ २४ ॥

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५

भा ॥ महर्षीणां मरीच्यादीनां भृगुरहम् । अर्थाभिधायिनश्शब्दा गिरः; तासामेकमक्षरं प्रणवोऽहमस्मि । यज्ञानामुत्कृष्टो जपयज्ञोऽस्मि । पर्वतमात्राणां हिमवानहम् ॥ २५ ॥

ता ॥ * देवर्षीणां (२५), *मुनीनाम् (३७) इत्यादेर्वक्ष्यमाणत्वादत्र महच्छब्देन विशेषणाच्च *महर्षीणामिति ऋषिगणविशेषो विवक्षित इत्यभिप्रायेण मरीच्यादीनामित्युक्तम् । * गिरामिति न शब्दमात्रं विवक्षितम्; समुद्रघोषादिषु तत्प्रयोगाभावात् । अत एव नाक्षरमात्रम्, * अक्षराणामकारोऽस्मीति पृथग्वक्ष्यमाणत्वाच्च । ततएव *एकमक्षरमित्यप्यकारव्यतिरिक्तविषयम् । * ओमित्येकाक्षरं ब्रह्म (गी. ८. १३) इत्यादिषु प्रणवेऽप्येकशब्दविशेषितोऽक्षरशब्दः प्रयुक्त इत्यभिप्रायेणाह—अर्थाभिधायिन इति । अर्थाभिधायिषु प्रणवस्योत्कर्षः सर्वोत्कृष्टार्थाभिधायित्वादिना, शङ्कुना पर्णानामिव सर्वासां वाचां प्रणवेन संतृण्णत्वश्रुतेश्च । यज्ञेषु जपयज्ञस्य प्राशस्त्यमन्यत्र सिद्धं * विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः (मनु. २.८५) इति । किंच *कुर्याद्धृतपशुं संख्ये[सङ्गे] कुर्यात्पिष्टपशुं तथा । न त्वेव तु वृथा हन्तुं पशुमिच्छेत्कथंचन ॥ (मनु. ५. ३७) इति । * पशुयज्ञैः कथं हिंस्रैः मादृशो यष्टुमर्हति (भा. मो. १७५. ३४) *हिंसात्मकैस्तु किं तस्य यज्ञैः कार्यं महात्मनः । प्रस्वापे च प्रबोधे च पूजितो येन केशवः ॥ इत्यादिवचनबलादहिंसात्मकयज्ञानर्हाणां हिंसात्मकयज्ञानुज्ञानम् । तत्रापि विधितः प्रवृत्तेः अपकारानभिसन्धानादुपकारश्रुतेर्देवताप्रीणनत्वाच्च न प्रत्यवायः । फलार्थिनां तु तत्फलमल्पमस्थिरं, दुःखमिश्रं च । अहिंसात्मकास्तु यज्ञा विशिष्टाधिकारिसा[पेक्षा]ध्या भगवतोऽतिप्रीणनत्वादपवर्गप्रत्यासन्नाः । अत एव ह्युपरिचरादयः पिष्टपशुभिरिष्टवन्तः । एवमितरेषु यज्ञेषु हिंसादिप्रसङ्गोऽधिकारिविशेषादिना विषयव्यवस्थापनमित्यादिर्महान् क्लेशः; जपयज्ञे तु तत्प्रसङ्गाभावादव्याक्षेपेणार्थप्रतीत्या सर्वविषयोगद्वारा सहसा समाधौ निवेशनाच्च यज्ञान्तरेभ्यो जपयज्ञः प्रशस्ततमः; सर्वाश्रमसाधारण्यात्,

* जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ (मनु. २. ८७) इति विधुरादेरपि सिद्धिहेतुत्वाच्च । पर्वतविशेषाणां पूर्वमुक्तत्वाद्वृक्षाणां वक्ष्यमाणत्वाच्च तदुभयव्यवच्छेदार्थं हिमवतश्शैलराजत्वप्रसिद्ध्यनुरोधार्थं चोक्तं—**पर्वतमात्राणामिति** ॥ २५ ॥

अश्वत्थस्सर्ववृक्षाणां देवर्षीणां च नारदः । गन्धर्वाणां चित्ररथस्सिद्धानां कपिलो मुनिः ॥ २६
उच्चैश्श्रवसमश्वानां विद्धि माममृतोद्भवम् । ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७
आयुधानामहं वज्रं धेनूनामस्मि कामधुक् । प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥ २८
अनन्तश्चास्मि नागानां वरुणो यादसामहम् । पितॄणामर्यमा चास्मि यमस्संयमतामहम् ॥ २९

भा ॥ वृक्षाणां पूज्योऽश्वत्थोऽहम् । देवर्षीणां नारदोऽहम् । कामधुक्—दिव्या सुरभिः । जननहेतुः कन्दर्पश्चाहमस्मि । सर्पाः—एकशिरसः ; नागाः—बहुशिरसः । यादांसि—जलवासिनः, तेषां वरुणोऽहम् । दण्डयतां वैवस्वतोऽहम् ॥ २६—२९ ॥

ता ॥ ननु * सर्ववृक्षाणामित्येतदनुपपन्नं, पारिजाताद्यपेक्षया अश्वत्थस्य निकृष्टत्वादित्यत्रोक्तं—**पूज्य इति** । पारिजातादीनामप्यश्वत्थवत्पूज्यत्वं नास्तीति भावः । देवा मन्त्रदर्शिनो देवर्षयः, देवर्षिषु नारदस्य बहुप्रकारोऽतिशयो बहुषु प्रदेशेषु महाभारत एव प्रपञ्चितः । चित्ररथः—गन्धर्वराजः । * सिद्धानामित्यादि । पूर्वसंचितसुकृतविशेषवशाज्जन्मप्रभृतिसिद्धाणिमाद्यैश्वर्याः सिद्धाः । आदिविद्वान्सिद्धः इति कपिलमाहुः । * ऋषिं प्रसूतं कपिलं महान्तम् (श्वे. ५. २) इति च श्रुतिः । * ददृशुः कपिलं तत्र वासुदेवं सनातनम् (रा. बा. ४०. २४) इति चाहुः । अयमपि परशुरामादिवत् ॥ * अमृतोद्भवमिति जन्मतः प्रकर्षसूचनम् । अमृतमत्र जलं, मथ्यमानावस्था सुधैव वा । गजेन्द्रशब्देन दिग्गजा विवक्षिताः । तेषु प्रधानतया दिक्पालेश्वरस्य शचीपतेरौपवाह्य ऐरावतः । अमृतोद्भवत्वं च काकाक्षिन्यायादैरावतेऽप्यन्वेतव्यम् । रथन्तरसामोद्भवत्वं वा द्रष्टव्यम् । नराधिपशब्देनैव निर्वाहकत्वलक्षणोऽतिशयस्सिद्धः * आयुधानामित्यर्वाचीनायुधपरं, सुदर्शनाद्यपेक्षया दधीचेरस्थिसंभवस्य वज्रस्यापि निकृष्टत्वात् । धेनूनां—दोग्ध्रीणाम् । **दिव्या सुरभिरिति** । यौगिकः कामधुक्शब्दोऽत्र व्यक्तिविशेषनिष्ठ इति भावः । प्रजनशब्देन जननहेतुत्वं कन्दर्पस्यासाधारणोऽतिशय उक्तः । स मदायत्त इत्यर्थः । अप्रजार्थकन्दर्पव्यवच्छेदार्थो वा प्रजनशब्दः । पर्याययोस्सर्पनागशब्दयोः कथं पृथग्व्यपदेश इत्यत्राह—**सर्पा एकशिरसः ; नागा बहुशिरस** इति । यादश्शब्देन वरुणस्यापि संग्रहार्थमाह—**यादांसि जलवासिन** इति । यद्वा जलजन्तुमात्रं विवक्षितम् ; तेषां पतित्वेन संबन्धो वरुणस्य तत्साजात्याभावाद्ग्राह्यः । अर्यमा—पितृराजः । संयमतां—संयच्छतामित्यर्थः ; तदाह—**दण्डयतामिति** ॥ २६—२९ ॥

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३०

भा ॥ अनर्थप्रेप्सुतया गणयतां मध्ये कालः—मृत्युरहम् ॥ ३० ॥

ता ॥ * उपमानमशेषाणां साधूनां यस्सदाऽभवत् (वि. १. १५. १५६) इत्यादिना प्रह्लादोत्कर्षः । * अहमेवाक्षयः कालः (३३) इति नित्यस्य कालतत्त्वस्य परस्ताद्वक्ष्यमाणत्वात् यमस्य च पूर्वमुक्तत्वात्तद्व्यतिरिक्तः पुरुषविशेष इह

कालशब्देन विवक्षितः; अचेतनस्य च कालस्य गणयितृत्वं न युज्यते; *कलयतामित्यस्य विज्ञातृमात्रपरत्वे तेषु कालस्य निर्धारणमयुक्तम्; अतस्तदुचितमर्थविशेषं दर्शयति–**अनर्थेति**। नहि मरणातिरिक्तोऽनर्थ इति भावः। मृगेन्द्रशब्देनैव सिंहस्यातिशयस्सिद्धः। पक्षिषु वैनतेयस्य वेगातिशयाद्वेदमयत्वादिना चोत्कर्षः॥ ३०॥

पवनः पवतामस्मि रामश्शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥ ३१

भा॥ पवताम्—गमनस्वभावानां पवनोऽहम्। शस्त्रभृतां रामोऽहम्। शस्त्रभृत्त्वमत्र विभूतिः, अर्थान्तराभावात्। आदित्यादयश्च क्षेत्रज्ञा आत्मत्वेनावस्थितस्य भगवतश्शरीरतया धर्मभूता इति शस्त्रभृत्त्वस्थानीयाः॥ ३१॥

ता॥ *पवतामित्यनेन पवनासाधारणक्रिया विवक्षिता चेन्निर्धारणं नोपपद्येतेति तदुपपत्तये **गमनस्वभावानामित्युक्तम्**। अजस्रगमनशीलानामित्यर्थः। पवनप्रेरिता एव हि तारकादयोऽप्यजस्रं परिभ्रमन्ति। सोमपवनादिष्ववात्र शोधनान्वयिगमनमिहाविवक्षितम्। *रामश्शस्त्रभृतामहमिति परशुरामस्यापि जेता रावणहन्ता रामो विवक्षित इति तदुचितममोघशस्त्रत्वलक्षणमतिशयमाह–**शस्त्रभृत्त्वमत्र विभूतिरिति**। पूर्वोत्तरेष्विव राम एव विभूतिः किं न स्यादित्यत्राह–**अर्थान्तराभावादिति**। अचिद्विशेषस्य चेतनान्तरस्य वा शस्त्रभृच्छब्दवाच्यस्यात्रासंभवादित्यर्थः। अर्थान्तराणां मध्ये स्वासाधारणधर्मविशेषनिर्देशे रीतिभङ्गः स्यादित्यत्राह–**आदित्यादयश्चेति**। शस्त्रभृत्त्वस्यान्येषां च भगवन्तं धर्मिणं प्रति धर्मत्वमविशिष्टमित्येकैव रीतिः; निर्धारणानिर्धारणभेदवन्मुखभेदमात्रं न दोष इति भावः। तत्रादित्यशब्देन *ज्योतिषां रविरंशुमान् (२१) इत्युक्तो रविर्विवक्षितः। *आदित्यानामहं विष्णुरित्युक्तस्वादित्यो रामतुल्यः। मकरो मत्स्यराजः। स्रोतस्सु जाह्नव्याः विष्णुपदोद्भवत्वसर्वज्ञशिरोधृतत्वत्रैलोक्यप्रवृत्तत्वादिभिरतिशयः॥ ३१॥

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥ ३२

भा॥ सृज्यन्त इति सर्गाः, तेषाम् आदिः—कारणम्; सर्वदा सृज्यमानानां सर्वेषां प्राणिनां तत्रतत्र स्रष्टारोऽहमेवेत्यर्थः। तथाऽन्तः—सर्वदा संहियमाणानां तत्रतत्र संहर्तारोऽप्यहमेव। तथा च मध्यं पालनम्; सर्वदा पाल्यमानानां पालयितारश्चाहमेवेत्यर्थः। जल्पवितण्डादि कुर्वतां तत्त्वनिर्णयाय प्रवृत्तो वादो यस्सोऽहम्॥ ३२॥

ता॥ सर्गशब्देन सृष्टिमात्रविवक्षायाम् *आदिरन्तश्चेत्यादिनाऽन्वययोगात्कर्मार्थोऽत्र सर्गशब्द इत्याह–**सृज्यन्त इति सर्गा** इति। आदिमध्यान्तशब्दानामत्रावयवविशेषाद्यर्थता न युक्ता, अनतिशयितार्थत्वात्। नापि कालविशेषार्थता, कालस्य वक्ष्यमाणत्वेनात्र पृथग्व्यपदेशप्रयोजनाभावात्। नचोत्पत्त्यादिक्रियामात्रार्थता, *उद्भवश्च भविष्यताम् (३५) इति वक्ष्यमाणेन पौनरुक्त्यप्रसङ्गात्। नचेश्वरस्यैव कारणत्वादिकमिहोच्यते *अहमादिश्च मध्यं च (२०) इत्युपक्रमेण कृतकरत्वात्। नचेदं सामान्यतस्तन्निगमनम्, उपर्युपरि वचनात्। तस्माल्लोकसिद्धोत्पत्त्यादिहेतुपरत्वमेवोचितं लक्षणया। तत्राप्युपादानकारणस्य *बीजं मां सर्वभूतानाम् (७.१०) इत्युक्तत्वाच्च निमित्तकारणमात्रमिह विवक्षितम्। *सर्गाणामित्यविशेषवचनेन सर्वदेशकालवर्तिसृज्यप्रतियोगिकसर्वनिमित्तकारणवर्गस्य स्वाधीनत्वममि-

प्रेतम्। तदेतदखिलमभिसंहितं—**सर्वदेत्यादिवाक्यत्रयेण**। अध्यात्मविद्या—जीवपरमात्मयाथात्म्यविद्या। सा विषयतः फलतश्च विद्यान्तरेभ्य उत्कृष्टा। *प्रवदतामिति नान्योन्यविवादमात्रं विवक्षितम्, तत्र वादास्यविशेषस्यास्मरणात्, *अध्यात्मविद्या विद्यानामिति विद्याप्रसङ्गात्तदर्थकथाविषयत्वोपपत्तेः। न च *सत्त्वं सत्त्ववतामितिवद्वादास्यकथाविशेषवत्त्वमभिप्रेतम्; अन्यापेक्षयाऽतिशयसूचनसंभवे तत्परित्यागायोगात्। अतः *प्रवदतामिति कथात्रयसाधारणरूपमिह विवक्षितम्; तदाह—**जल्पवितण्डादि कुर्वतामिति**। **तत्त्वनिर्णयाय प्रवृत्त** इत्यनेन स्वल्पफलविजिगीषुकथातोऽतिशयितापवर्गपर्यवसितफलत्वेन वादस्योत्कर्षप्रदर्शनम्॥ ३२॥

अक्षराणामकारोऽस्मि द्वन्द्वस्सामासिकस्य च।
अहमेवाक्षयः कालः धाताऽहं विश्वतोमुखः॥ ३३

भा॥ अक्षराणां मध्ये *अकारो वै सर्वा वाक् इति श्रुतिसिद्धस्सर्ववर्णानां प्रकृतिरकारोऽहम्। **सामासिकः**—समाससमूहः; तस्य मध्ये **द्वन्द्वसमासोऽहम्**; स ह्युभयपदार्थप्रधानत्वेनोत्कृष्टः। **कलामुहूर्तादिमयोऽक्षय**. कालोऽहमेव। **सर्वस्य स्रष्टा** हिरण्यगर्भश्चतुर्मुखोऽहम्॥ ३३॥

ता॥ बह्वृचोपनिषदि श्रूयते—*अ इति ब्रह्मेति। तथा *अकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति इति श्रुत्यैव प्रपञ्चितं प्रकृतित्वमाह—**सर्ववर्णानां प्रकृतिरिति**। निर्धारणौपयिकबहुत्वसिद्ध्यर्थं प्रत्ययार्थं दर्शयति—**सामासिकस्समाससमूह** इति। पूर्वोत्तरान्यपदार्थप्रधानेभ्योऽव्ययीभावतत्पुरुषबहुव्रीहिभ्यो द्वन्द्वस्योत्कर्षमाह—**स ह्युभये**ति। अक्षयशब्देन *कला मुहूर्ताः काष्ठाश्च (ना), *कलामुहूर्तादिमयश्च कालः (वि. ४. १. ८४) इति श्रुतिस्मृत्यादिसिद्धबहुविधविकाररूपलोकक्षयहेतुभूतानन्तावच्छेदे सत्यपि स्वरूपतोऽनाद्यन्तत्वं विवक्षितमित्यभिप्रायेणाह—**कले**ति। *अनादिर्भगवान्कालो नान्तोऽस्य द्विज विद्यते (वि. १. २. २६), *कालोऽस्मि लोकक्षयकृत्प्रवृत्तो नान्तो न चादिर्न च मेऽस्ति मध्यम् इत्यादिभिरिदं कालाधिष्ठातृत्वं व्यक्तम्। धातृशब्दरूढ्या विश्वतोमुखत्वविशेषणेन च हिरण्यगर्भ एवात्रोच्यत इत्यभिप्रायेणाह—**सर्वस्ये**ति। धातृशब्देनैवाण्डान्तर्वर्तिसमस्तविधातृत्वलक्षण उत्कर्षस्सिद्ध इति प्रदर्शनाय **सर्वस्य स्रष्टे**त्युक्तम्। एतेन कर्मफलविधातृत्वेन व्याख्यान्तरं निरस्तम्। विश्वतः इति दिक्चतुष्टयमात्रमिह विवक्षितमिति ज्ञापनायोक्तं **चतुर्मुख** इति। वेदचतुष्टयप्रवर्तनादिकं चानेन सूचितम्॥ ३३॥

मृत्युस्सर्वहरश्चाहम् उद्भवश्च भविष्यताम्।
कीर्तिश्श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥ ३४

भा॥ सर्वप्राणहरो मृत्युश्चाहम्। उत्पत्स्यमानानामुद्भवाख्यं कर्म चाहम्। श्रीरहम्; नारीणां कीर्तिश्चाहम्; वाक्चाहम्; स्मृतिश्चाहम्; मेधा चाहम्; धृतिश्चाहम्; क्षमा चाहम्॥ ३४॥

ता॥ कर्मानुरूपदण्डनकालावच्छेदाधिकृतयोर्यमकालाख्यपुरुषयोरुक्तत्वाद्यमादेशकारिप्राणहरणाधिकृतपुरुषविशेष इह *मृत्युस्सर्वहरः इत्युच्यत इति ज्ञापनाय **सर्वप्राणहर** इत्युक्तम्। प्रलये सर्वसंहर्तेश्वर इह मृत्युरिति कैश्चिदुक्तं मन्दम्, *भूतानामन्त एव चेत्युक्तत्वात्। उद्भवसहपाठादत्र मृत्युशब्दो मरणपर इति केचित्। उद्भवशब्दस्त्वस्मत उत्पत्तिक्रियापरः। **उद्भवस्थानादि** निमित्तोपादानादिकं चात्र पृथगेव निर्दिष्टमिति क्रियापरत्वमेवोचितमित्यभिप्रायेण

उद्भवाख्यं कर्मेत्युक्तम् । कीर्त्यादयो नेह गुणविशेषा विवक्षिताः; तेषां पुरुषेष्वपि चोद्भूतत्वेन * नारीणामिति विशेष[ण]त्वायोगात् । न च नारीशब्दोऽत्र स्त्रीलिङ्गपदार्थमात्रपरः, मुख्यबाधाभावात् । अतो नारीविशेषनिर्धारणमेव क्रियते । तत्र च श्रिय एव सर्वनारीभ्योऽतिशयितत्वात्सैव प्रथमं वक्तव्या; * कीर्तिश्श्रीरिति [तु] पाठक्रमोऽर्थक्रमेण बाध्यत इत्यभिप्रायेण **श्रीरहं कीर्तिश्चाहमित्युक्तम्** । एताश्च भगवदसाधारणशक्तयः । अन्यत्र तु तत्तदभिमानविशेषात्तत्तच्छब्दः ॥ ३४ ॥

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५

भा ॥ साम्नां बृहत्सामाहम् । छन्दसां गायत्र्यहम् । कुसुमाकरो वसन्तः ॥ ३५ ॥

ता ॥ सामसु बृहत्साम्न उत्कृष्टत्वं श्रुत्यैव सिद्धं * बृहच्च वा इदमग्रे रथन्तरं च आस्तां वाक्च वै तन्मनश्चास्तां वाग्वै रथन्तरं मनो बृहत्तद्बृहत्पूर्वं ससृजानं रथन्तरमत्यमन्यत तद्रथन्तरं गर्भमधत्त (ऐ. बा. ४. १९. ६) इति । गायत्र्याश्छन्दसां मातृत्वेनोत्कर्षः श्रुतिषु छन्दोविचित्यां च प्रपञ्चितः । तथा **बह्वृचोपनिषदि** * अग्रं वै छन्दसां गायत्री इति । मासेषु मार्गशीर्षस्यातिशयः वर्षगर्भाधानकालत्वान्मासाधिदेवेषु केशवादिषु द्वादशसु प्रथमस्य केशवस्य मासत्वादृतुवर्गारम्भकालत्वाच्च । कुसुमाकरशब्देनैव वसन्तस्य प्रत्यक्षसिद्धस्सर्वप्राणिसुखहेतुरतिशयो द्योतितः । * वसन्ते वसन्ते ज्योतिषा यजेत, (आ. श्रौ.) * वसन्ते दीक्षयेद्ग्रिं ग्रीष्मे राजन्यमेव च इत्यादिभिश्च ॥ ३५ ॥

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६

भा ॥ छलं कुर्वतां छलास्पदेष्वक्षादिलक्षणं द्यूतमहम् । जेतॄणां जयोऽस्मि । व्यवसायिनां व्यवसायोऽस्मि । सत्त्ववतां सत्त्वम्—महामनस्त्वम् ॥ ३६ ॥

ता ॥ *छलयतामित्यत्र * तत्करोति (अष्टा. वा. ३. १. २५) इति णिजित्यभिप्रायेण—**छलं कुर्वतामित्युक्तम्** । अक्षसंचारादिमात्रेण जयपराजयारोपादिह छलत्ववाचोयुक्तिरित्यभिप्रायेण **अक्षादिलक्षणमित्युक्तम्** । * तेजस्तेजस्विनमित्यादिवत् दीव्यतां द्यूतमहमित्यनभिधानात् * छलयतामिति छलकरणमात्रवचनाच्च छलस्थानान्तरेभ्यः क्रयविक्रयऋणदायसंक्तिसंगरादिभ्यो द्यूतस्यातिशयितत्वं विवक्षितमित्यभिप्रायेण **छलास्पदेष्वित्युक्तम्** । वञ्चनास्पदेष्वित्यर्थः । अक्षादीत्यादिशब्देन सजीवनिर्जीवसमस्तद्यूतवर्गसंग्रहः । यद्वा निर्जीवमात्रग्रहणाय **अक्षादिलक्षणमित्युक्तम्** । तस्य चातिशयितत्वमनायासेन धर्माविरोधेनाभ्युपगमादेव समस्तधनहरणादेश्शक्यत्वात् । तेजस्विसत्त्ववच्छब्दयोः पूर्वोत्तरयोस्तेजस्सत्त्वाभ्यामवरुद्धत्वात्तत्र जयव्यवसाय[शब्द]योरन्वयानौचित्यात्तदुचितौ जेतृव्यवसायिशब्दौ पूर्वापरच्छायया ऽर्थाक्षिप्तावित्यभिप्रायेण **जेतॄणां व्यवसायिनामिति** चोक्तम् । * द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु (नाम. ३. ना.) इत्यादिभिस्सत्त्वशब्दस्यानेकार्थसिद्धेर्व्यवसायस्य चोक्तत्वात्सत्त्ववच्छब्दप्रसिद्ध्यनुरोधेनार्थविशेषं दर्शयति—**सत्त्वं महामनस्त्वमिति** । एतेन पराभिभवसामर्थ्यलक्षणात्तेजसोऽपि सत्त्वस्यात्र भेद उक्तः ॥ ३६ ॥

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७

भा ॥ वसुदेवसूनुत्वमत्र विभूतिः, अर्थान्तराभावादेव। पाण्डवानां धनंजयोऽर्जुनोऽहम्। मुनयः—मननेनात्मयाथात्म्यदर्शिनः, तेषां व्यासोऽहम्। कवयः—विपश्चितः ॥ ३७ ॥

ता ॥ * वृष्णीनां वासुदेवोऽस्मीत्यत्रापि रामवत्साक्षात्स्वावतारत्वादाह—**वसुदेवसूनुत्वमत्र विभूतिरिति। अर्थान्तराभावादेवेत्येवकारेण** रामप्रसङ्गे हेतोः प्रागेवोक्तत्वं सूचितम्। ननु वसुदेवसूनुत्वमिति केयं विभूतिः। नहि सूनुत्वमात्रेणातिशयः, अतिप्रसङ्गात्। नच वसुदेवास्यपितृविशेषसूनुत्वेन, तस्याप्यनेकसाधारणत्वेन निर्धारणायोगात्। नच वासुदेवशब्दप्रसिद्धिमात्रेण, तावन्मात्रस्य अतिशयं प्रत्यप्रयोजकत्वात्। नचेह वसुदेवसूनुत्वमुपदेश्यम्, अर्जुनस्य संप्रतिपन्नत्वादेव; अतस्साक्षादवतारत्वं नोचितम्। अत एव वृष्णीनामहमस्मीति नोक्तमित्यत्रोच्यते। वासुदेवशब्दोऽत्र लक्षणया वसुदेवगृहे चतुर्भुजतयाऽवतारप्रभृति अतिमानुषगुणविग्रहपराक्रमादिरूपमागोपालं प्रसिद्धमतिशयं लक्षयति। तस्य चार्जुनं प्रत्यभिधानं दृष्टान्तार्थम्। सर्वनाम्नो युष्म[दस्म]च्छब्दादपि साक्षान्नाम्नोऽत्यासन्नत्वादिभिरतिशयोऽत्र विवक्षितः। अर्मे युधिष्ठिरस्य सर्वातिशायित्वात्, बले च भीमसेनस्य, आभिरूप्यादिषु च माद्रीसुतयोः, अर्जुन इति प्रसिद्धनामधेयेन विशदीकरणम्। तेन स्वाभिमुखमर्जुनं प्रति त्वमिति निर्देशाभावात् किं धनंजयाख्योऽन्य इति शङ्काव्युदासः। नह्यत्र पारोक्ष्यप्रसङ्गः, अपरोक्षस्यैव सर्वस्यात्र सर्वदर्शिना वचनादिति। ऋषित्वं ह्यदृष्टविशेषादतीन्द्रियार्थदर्शित्वम्; तच्च प्रायशः प्रागेवोक्तम्; अतो मुनीनामित्यनेन तदतिरिक्तो निर्वचनबलात् * एतमेव विदित्वा मुनिर्भवति (बृ. ६. ४. २२) इति श्रुत्यनुसाराच्च विवक्षित इत्यभिप्रायेणाह—**मुनयो मननेनात्मयाथात्म्यदर्शिन** इति। तथाविधश्च भगवतो व्यासस्यातिशयस्तद्ग्रन्थैरेव सिद्धः—* आलोड्य सर्वशास्त्राणि विचार्य च पुनःपुनः। इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥ (गा. पू. २२२. १) इत्यादिभिः; * तपोविशिष्टादपि वै वसिष्ठान्मुनिसत्तमात्। मन्ये श्रेष्ठतमं त्वाऽद्य रहस्यज्ञानवेदनात् ॥ (भा. आ. १. ९६) इति च। अयमपि कश्चिद्विभवावतारो गण्यते * वेदविद्भगवान् कल्की पातालशयनः प्रभुः (अहि. ५, ५६) इति। कवीनामिति न निबन्धृत्वं विवक्षितम्, तथा सति वाल्मीकिप्रभृतेस्सर्वातिशायित्वात्; अतः क्रान्तदर्शी कविरिति विवक्षित इत्यभिप्रायेणाह—**कवयो विपश्चित** इति। उशनसो विपश्चस्तु वैलक्षण्यं नीतिनिपुणत्वादिभिः। प्रसिद्धं ह्येतत् * न कश्चिन्नोपनयते पुमानन्यत्र भार्गवात्। [एष नः] शेषसंप्रतिपत्तिस्तु बुद्धिमत्स्ववतिष्ठते ॥ (भा. आ.) इत्यादिषु ॥ ३७ ॥

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८

भा ॥ नियमातिक्रमणे दण्डं कुर्वतां दण्डोऽहम्। विजिगीषूणां जयोपायभूता नीतिरस्मि। गुह्यानां संबन्धिषु गोपनेषु मौनमस्मि। ज्ञानवतां ज्ञानं चाहम् ॥ ३८ ॥

ता ॥ नियमातिक्रमण इति दण्डयोग्यत्वकथनम्, अदण्ड्यविषयदण्डस्यातिशयेन नरकहेतुत्वात्। नीतिरस्मि नीतिमतामिति वक्तव्यम्, जिगीषतामित्यनेन तु कोदृशोऽन्वय इत्यत्राह—**विजिगीषूणां जयोपायभूता नीतिरिति**। बुद्धिव्यापारविशेषो विवक्षितः। लोकविदितस्य वाङ्नियमनरूपस्य मौनस्य गुह्यत्वाभावान्न निर्धारणमुचितम्; मौनशब्दस्यात्मविद्यादिविषयत्वे तु प्रसिद्धित्यागस्स्यात्; नच गुह्यधर्मत्वं मौनस्य, येन * सत्त्वं सत्त्ववतामितिवत्स्यादित्यत्राह—**गुह्यानां संबन्धिषु गोपनेषु मौनमस्मीति**। गुह्यानां गोपनीयत्वं मौनस्य चाषट्कर्णमन्त्रणादपि गोपनो-

पायत्वं संप्रतिपन्नम् ; ततश्चात्र संबन्धमात्रे षष्ठी गोप्यगोपकभावरूपविशेषे विश्रान्ता । * भूतानामस्मि चेतनेति (२२) चैतन्यमात्रस्य पूर्वमुक्तत्वात्, अत्र * ज्ञानं ज्ञानवतामिति पुरुषार्थोपयिकातिशयितज्ञानविशेषोऽभिमतः, * तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् (वि. ६. ५. ८७) इतिवत् ॥ ३८ ॥

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९

भा ॥ सर्वभूतानां सर्वावस्थावस्थितानां तत्तदवस्थाबीजभूतं प्रतीयमानमप्रतीयमानं च यत्, तदहमेव । भूतजातं मया आत्मतयाऽवस्थितेन विना यत्स्यात्, न तदस्ति । *अहमात्मा गुडाकेश सर्वभूताशयस्थितः (२०) इति प्रक्रमात् * न तदस्ति विना यत्स्यान्मया भूतं चराचरम् इत्यत्राप्यात्मतयाऽवस्थानमेव विवक्षितम् । सर्वं वस्तुजातं सर्वावस्थं मया आत्मभूतेन युक्तं स्यादित्यर्थः । अनेन सर्वस्यास्य सामानाधिकरण्यनिर्देशस्यात्मतयाऽवस्थितिरेव हेतुरिति [प्रकटितम्] प्रकटयति ॥ ३९ ॥

ता ॥ * सर्वभूतानां बीजमिति न प्रधानमात्रमुच्यते, तस्य साक्षात्सर्वभूतबीजत्वाभावात् ; नापि व्रीह्यादिलक्षणं बीजं, तस्य सर्वभूतशब्दसंगृहीतेषु जङ्गमेष्वनन्वयात् ; ततश्चाविशेषेण तत्तत्कार्यावस्थद्रव्यापेक्षया तत्तत्कारणावस्थोपादानद्रव्यमात्रमिह विवक्षितमित्यभिप्रायेणाह—**सर्वावस्थे**ति । एतेन प्राकृतनैमित्तिकसृष्ट्यादेः * अहमादिश्च (२०) इत्यादिनोक्तत्वादिह नित्यसृष्टिहेतुभूततत्तद्द्रव्यशरीरकत्वेन तद्धेतुत्वमपि प्रदर्शितम् । * यच्चापीत्यनेनाभिप्रेतमाह—**प्रतीयमानमप्रतीयमानं चे**ति । अप्रतीयमानम्—अनुमानादिवेद्यमित्यर्थः । * न तदस्तीत्यादौ स्वव्यतिरिक्तासत्त्वादिविधिपरत्वभ्रमव्युदासायाविनाभावार्थतोक्तिः । उपक्रमविरोध्युपसंहारो नोदेतुमलमित्यभिप्रायेणाह—**भूतजातमि**ति । आत्मतयाऽवस्थितेन अविनाभावमुपपादयति—**अहमात्मे**ति । व्यतिरेकोक्तिफलितमन्वयविशेषं दर्शयति—**सर्वमि**ति । उपक्रमोपसंहारयोरविनाभावकथनस्य भगवदभिप्रेतं प्रयोजनमाह—**अनेने**ति । कचित्कचिद्द्रव्यव्यतिरिक्तैस्सामानाधिकरण्यमपि तदाश्रयद्रव्यस्य भगवच्छरीरत्वादिति प्रागेव प्रपञ्चितमस्माभिः ॥ ३९ ॥

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४०

भा ॥ मम दिव्यानां—कल्याणीनां विभूतीनामन्तो नास्ति ; एष तु विभूतेर्विस्तरो मया कैश्चिदुपाधिभिः संक्षेपतः प्रोक्तः ॥ ४० ॥

ता ॥ निश्शेषवचनाशक्यतां प्रागुक्तामेव स्मारयति—* नान्तोऽस्तीति । दिव्यशब्देन देशविशेषवर्तित्वादिविवक्षायां पूर्वमनियतदेशवर्तिनाम् [अ]दिव्यानां प्रपञ्चनं विरुध्येतेत्यत उक्तं—**कल्याणीनामि**ति । *विभूतीरात्मनश्शुभाः (१९) इति ह्युपक्रान्तम् । उद्देशतः—एकदेशतः, प्रयोजकाकारैः विभूत्युद्धारेणेत्यर्थः । तदभिप्रायेणाह—**कैश्चिदुपाधिभिस्संक्षेपत** इति ॥ ४० ॥

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥ ४१

भा॥ यद्यद्विभूतिमत्—ईशितव्यसंपन्नं भूतजातं श्रीमत्—कान्तिमत्, धनधान्यसमृद्धं वा, ऊर्जितं कल्याणारम्भेषूद्युक्तम्; तत्तन्मम तेजोंशसंभवमित्यवगच्छ। तेजः—पराभिभवनसामर्थ्यम्, ममाचिन्त्यशक्तेर्नियमनशक्त्येकदेशसंभवमित्यर्थः॥ ४१॥

ता॥ *प्राधान्यतः (१९) इत्युपक्रम्य प्रपञ्चितमर्थमनुक्तानामवश्यवक्तव्यप्रधानविभूतीनां संग्रहाभिप्रायेणोपसंहरति *यद्यदिति श्लोकेन। विभूतिशब्दस्य प्राकरणिकमर्थमनुसंधायोक्तम्—**ईशितव्यसंपन्नमिति**। सत्त्वशब्दोऽत्र जन्तुपरः। वीप्साभिप्रायव्यञ्जनाय जातशब्दः। विभूतिमच्छ्रीमच्छब्दयोः पौनरुक्त्यं परिहरति—**कान्तिमदिति**। नियन्तव्यविशेषविवक्षया वा गोबलीवर्दन्यायात्पुनरुक्तिपरिहार इत्यभिप्रायेणाह—**धनधान्यसमृद्धं वेति**। ऊर्जितमित्युक्तृष्टत्वादिसामान्यविवक्षायामितरपाठवैयर्थ्यात् विशिष्टमर्थमाह—**कल्याणेति**। ऊर्जाशब्दो ह्यदीनत्वेन सन्नाहशीलत्वपरः। विभूतिमदित्यादि बलादिमतां प्रदर्शनम्। *मम तेजोंशसंभवमित्युक्ते विग्रहगततेजोद्रव्यैकदेशोपादानत्वं प्रतीयेतेति तन्निरासाय प्रकृतौपयिकं तेजश्शब्दार्थमाह—**तेजः पराभिभवनसामर्थ्यमिति**। कोऽयमत्राभिभवो नाम? तत्र च कथमंशसद्भावः? इत्यत्राह—**ममेति**। **अचिन्त्यशक्तेरित्यनेन** चिन्तायोग्यांशनिष्कर्षाय ममेत्यस्याभिप्रायो विवृतः। तेन सर्वगोचरत्वाभङ्गुरत्वाघटितघटनत्वादिसिद्धिः। यथा शैलान्दोलनदोहलिनश्चण्डमारुतस्य तृणप्रेरणादिकं वेगलेशमात्रभवम्, तद्वदिहेति भावः। तेजसोंऽशस्संभवो यस्य तत्तेजोंशसंभवम्॥ ४१॥

अथवा बहुनैतेन किं ज्ञानेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥ ४२

इति श्रीमद्भगवद्गीतासूपनिषत्सु **विभूतिविस्तरयोगो** नाम दशमोऽध्यायः॥ १०॥

भा॥ बहुनैतेनोच्यमानेन ज्ञानेन किं प्रयोजनम्। इदं चिदचिदात्मकं कृत्स्नं जगत्कार्यावस्थं कारणावस्थं स्थूलं सूक्ष्मं च स्वरूपसद्भावे, स्थितौ, प्रवृत्तिभेदे च यथा मत्सङ्कल्पं नातिवर्तेत; तथा मम महिम्नोऽयुतायुतांशेन विष्टभ्याहमवस्थितः। यथोक्तं भगवता पराशरेण—*यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता (वि. १. ९. ५३) इति॥ ४२॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये दशमोऽध्यायः॥ १०॥

ता॥ एवं *प्राधान्यतः (१९) इत्युपक्रान्तमुपसंहृतम्; अथ संक्षेपेण प्रधानाप्रधानसमस्तविभूतिसंग्रहमाह—*अथवेति श्लोकेन। **उच्यमानेनेति**। एतच्छब्द उक्त्यवसानराहित्यपर इति भावः। विभूतिपर्यवसानज्ञानरूपं प्रयोजनं न सिध्येदित्यभिप्रायेणाह—**किं प्रयोजनमिति**। इदमित्यनेन तत्तत्प्रमाणप्रतिपन्नवैचित्र्यं सूचितमित्यभिप्रायेण—**चिदचिदात्मकमित्युक्तम्**। **कार्येत्यादिना** कृत्स्नशब्दाभिप्रेतविवरणम्। **स्थूलं सूक्ष्मं चेति** कार्यकारणावस्थयोर्यथाक्रममन्वयः। **स्वरूपेत्यादिना** विष्टम्भनप्रयोजनकथनम्। अनित्येषु स्वरूपसद्भाव उत्पत्तिः; नित्येषु त्वसद्व्यतिरेकः। नित्यानां स्वरूपमपि हि भगवतो नित्येच्छासिद्धम्। इदं च प्रागेव प्रपञ्चितम्। अत्र स्वरूपैकदेशावतारादिरूपांशव्युदासाय नियमनप्रकरणबलाच्च **मम महिम्न** इत्युक्तम्। अत्र महिमशब्देन प्रकृतं नियमनसामर्थ्यमेव विवक्षितम्। अत एव *तेजोंशसंभवमित्यनेनैकार्थ्यम्। एकशब्दोऽत्रातिक्षुद्रत्वपर इत्यभिप्रायेणोक्तम्—**अयुतायुतांशेनेति**। स्तम्भनमत्र स्वैरान्निवारणम्; स्ववशीकरणरूपमधिष्ठानं वा। **एकांशेनेत्यत्र स्वोक्तमर्थं** संवादयति—**यथोक्तमिति**। विश्वशक्तिः—

विश्वमेव शक्तिः, तत्तत्कार्योपयुक्तविशेषणभूतं विश्वमित्यर्थः । * तेजोंशसंभवमित्यनन्तरमभिधानात् * एकांशेनेत्यस्यापंशशब्दस्य तद्विषयत्वमेव न्याय्यमिति भावः ॥ ४२ ॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां दशमोऽध्यायः ॥ १० ॥

॥ अथ एकादशोऽध्यायः ॥ ११ ॥

भा ॥ एवं भक्तियोगनिष्पत्तये तद्विवृद्धये च सकलेतरविलक्षणेन स्वाभाविकेन भगवदसाधारणेन कल्याणगुणगणेन सह भगवतस्सर्वात्मत्वं तत एव तद्व्यतिरिक्तस्य कृत्स्नस्य चिदचिदात्मकस्य वस्तुजातस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित्वं चोक्तम् । तमेतं भगवदसाधारणं स्वभावं कृत्स्नस्य तदायत्तस्वरूपस्थितिप्रवृत्तितां च भगवत्सकाशादुपश्रुत्यैवमेवेति निश्चित्य तथाभूतं भगवन्तं साक्षात्कर्तुकामोऽर्जुन उवाच। तयैव भगवत्प्रसादादनन्तरं द्रक्ष्यति । *सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्....तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ॥ (११. १३) इति हि वक्ष्यते ।

अर्जुन उवाच—

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १

भा ॥ देहात्माभिमानरूपमोहेन मोहितस्य ममानुग्रहैकप्रयोजनाय परमं गुह्यम्—परमं रहस्यमध्यात्मसंज्ञितम्—आत्मनि वक्तव्यं वचः न त्वेवाहं जातु नासम् (२. १२) इत्यादि, तस्माद्योगी भवार्जुन (६. ४६) इत्येतदन्तं यत्त्वयोक्तम् , तेनायं ममात्मविषयो मोहस्सर्वो विगतः—दूरतो निरस्तः ॥ १ ॥

ता ॥ विश्वरूपाध्यायमवतारयितुं विभूत्यध्यायार्थं संगृह्णाह—**एवमिति** । **भक्तियोगनिष्पत्तये तद्विवृद्धये चेति** प्रयोजनकथनेनानन्तरमर्जुनस्य दिदृक्षा भक्तिविवृद्ध्यधीनेति सूचितम् । **सकलेतरविलक्षणेनेति**—सकलेतरवैलक्षण्यरूपेणेत्यर्थः । यद्वा सकलेतरस्वभावविलक्षणेनेत्यर्थः । एतेनानवधिकातिशयत्वमुक्तं भवति । * अनन्यसाधारणं स्वाभाविकमनवधिकातिशयम् (१०. १४. भा) इति पूर्वोक्तस्यात्र प्रातिलोम्येन प्रत्यभिज्ञानात् **सकलेतरविलक्षणेन भगवदसाधारणेनेत्यनयोर्यथेष्टं** हेतुसाध्यभावेन अन्वयात्समाधिकराहित्यतात्पर्याच्च नानर्थक्यम् । श्रुतार्थनिश्चयाधीनभक्तिविवृद्धिफलभूतदिदृक्षामूलमुत्तराध्यायोपोद्घातरूपमर्जुनवाक्यमवतारयति—**तमेतमिति** । तं—सर्वातिशायिनम्, एतम् उक्तप्रकारम् । **भगवत्सकाशादित्यनेन** निश्चयहेतुभूतमाप्तत्वं सूचितम्; नह्याचार्यान्तरसकाशादुपश्रवणे दिदृक्षायां सत्यामपि दर्शनप्रार्थनं घटत इति च भावः । * एवमेतत् (३) इत्यादिश्लोकार्थाभिप्रायेणाह—**एवमेवेति निश्चित्येति** । ननु * एवमेतद्यथात्थेति पूर्वोक्तमभ्युपगम्य * द्रष्टुमिच्छामि ते रूपमैश्वरमित्यर्थान्तरस्य रूपविशेषस्य दिदृक्षावचनमिव भाति; ततश्च कथं तथाभूतं भगवन्तं साक्षात्कर्तुकाम इत्युच्यते; तत्राह—**तयैवेति** । श्रुतप्रकारेणेत्यर्थः । तद्विवृणोति—**सर्वाश्चर्येति** । * अहं सर्वस्य प्रभवः (१०. ८) इत्यादिना * विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् (४२) इत्यन्तेन प्रतिपादितो ह्यर्थोऽत्र विग्रहविशेषानुबन्धेन प्रत्यक्षं प्रत्यभिज्ञायत इति भावः ।

ता ॥ अत्र साक्षात्कारं प्रार्थयितुं * मदनुग्रहायेत्यादिभिस्त्रिभिरिदश्लोकैः कृतज्ञतामास्तिक्यं भक्तिमत्त्वं च दर्शयति । तत्र प्रथमेन अध्यात्मशब्दादिस्वारस्यात् * भवाप्ययौ इत्यादेस्सप्तमाद्यर्थस्य पृथग्वचनाच्चात्मतत्त्वतदवलोकनोपायश्रवणतत्फलानुवादः क्रियत इत्यभिप्रायेणाह—**देहात्मेति** । * मोहो विगत इत्यनन्तरमभिधानात् मच्छब्देन मोहविशिष्टस्वरूपं विवक्षितमित्यभिप्रायेण **मोहितस्येत्यन्तमुक्तम्** । * मदनुग्रहायेत्यनेन न ह्यन्यत्तेनानवाप्तमवाप्तव्यमस्तीत्यभिप्रेतमित्याह—**ममानुग्रहैकप्रयोजनायेति** । युद्धप्रोत्साहनमात्रशङ्काऽप्यनेन निरस्ता । परमशब्दविशेषितगुह्यशब्देन * मौनं चैवास्मि गुह्यानाम् (१०. ३८) इत्युक्तगुह्यत्वप्रतीतिव्युदासाय रहस्यशब्देन व्याख्या । गुह्यतमभक्तियोगशेषत्वात्परमत्वविशेषणमित्यावृत्त्या परमशब्दपाठेन सूचितम् । आत्मनि प्रतिपादकत्वेनाधिवसनाद्वचसोऽध्यात्मत्वमित्यभिप्रेत्य **आत्मनि वक्तव्यमित्युक्तम्** । उपोद्घातान्मध्यमषट्कप्रस्तावश्लोकार्थाच्चावच्छिद्य जीवात्मप्रधानमंशमध्यात्मशब्दानूदितमाह— **न त्वेवाहमिति** । * अध्यात्मसंज्ञितमित्येतदनुसारात् * अयमित्यपरोक्षनिर्देशाभिप्रेतमुक्तं—**ममात्मविषय इति** । * विगत इत्यनेन सोपसर्गेण सवासनं निश्शेषविनाशो विवक्षित इति प्रदर्शनाय सर्वशब्दः । **दूरतो निरस्त इति** । संस्कारस्यापि तिरस्कारादपुनरङ्कुरं विनष्ट इत्यर्थः ॥ १ ॥

भा ॥ तथा च—

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २

भा ॥ (तथा) सप्तमप्रभृति दशमपर्यन्ते त्वद्व्यतिरिक्तानां सर्वेषां भूतानां त्वत्तः—परमात्मनो भवाप्ययौ—उत्पत्तिप्रलयौ विस्तरशो मया श्रुतौ हि । कमलपत्राक्ष, तवाव्ययं—नित्यं सर्वचेतनाचेतनवस्तुशेषित्वं ज्ञानबलादिकल्याणगुणगणैस्तवैव परतरत्वं सर्वाधारत्वं चिन्तितनिमिषितादिसर्वप्रवृत्तिषु तवैव प्रवर्तयितृत्वमित्याद्यपरिमितं माहात्म्यं च श्रुतम् । हिशब्दो वक्ष्यमाणदिदृक्षाद्योतनार्थः ॥ २ ॥

ता ॥ * भवाप्ययौ हीत्यादेः प्रकृतहेत्वर्थत्वव्युदासेन पृथगर्थत्वव्यञ्जनायाह—**तथा** चेति । **सप्तमप्रभृति दशमपर्यन्त** इति । भाष्यकारः स्वानुसंहिताध्यायोक्त्या तत्रत्यवचनमुपलक्षयति । बहुवचनासङ्कोचसूचितम् * **अहं कृत्स्नस्य** (७. ६) इत्यादिनोक्तमाह—**त्वद्व्यतिरिक्तानामिति** । निवृत्तमानुषत्वश्रमस्यार्जुनस्य वचनत्वात् * **त्वत्त इत्यनेन** भवाप्ययौपयिकरूपत्वं विवक्षितमित्यभिप्रायेण—**परमात्मन** इत्युक्तम् । अप्ययशब्दस्य पञ्चम्यनन्वयाद्भवाप्ययशब्देन संसारमोक्षादिप्रतीतिस्स्यादिति तद्व्युदासायोक्तम्—**उत्पत्तिप्रलयाविति** । निमित्तोपादानसाधारणहेतुमात्रे **पञ्चमीत्यप्ययान्वयः** । * त्वत्तः श्रुतौ इत्यन्वयस्तु मन्दप्रयोजन इति भावः । विस्तरशः विस्तरेणेत्यर्थः । * **कमलपत्राक्षेत्यनेनान्तरादित्यविद्यादिप्रतिपादितपुण्डरीकाक्षत्वविशिष्टाप्राकृतविग्रहवत्त्वमस्मिन्नवतारेऽपि स्पष्टमुपलभ्यत इति सूचितम्** । पुण्डरीकाक्षस्यैव हि सर्वलोककामेशत्वादिकमव्ययं माहात्म्यं तत्र श्रूयते । **माहात्म्यमित्यत्र** * तवेति विपरिणतानुषङ्गः । अव्ययशब्देन कालतो विषयतः सङ्कुचातः प्रकर्षतश्चानवधिकत्वं प्राक्सिद्धमिहाभिप्रेतमित्यभिप्रायेणोक्तं—**नित्यमित्यादि अपरिमितमित्यन्तम्** । * भूमिरापः (७. ४), * मत्तः परतरं नान्यत् (७), * मयि सर्वं (७), * **बुद्धिर्ज्ञानम्** (१०. ४) इत्यादिभिरिदं शेषित्वादिकं प्राक्प्रपञ्चितम् । **हिशब्दो वक्ष्यमाणदिदृक्षाद्योतनार्थ इति । हेतुत्वप्रसिद्ध्याद्यानुगुण्याभावात्प्रकृतानुगुणोऽयमर्थ इति भावः ॥ २ ॥**

एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३

भा ॥ हे परमेश्वर, एवमेतदित्यवधृतम्, यथाऽऽत्थ त्वम्—आत्मानं ब्रवीषि । पुरुषोत्तम आश्रितवात्सल्यजलधे तवैश्वरं त्वदसाधारणं सर्वस्य प्रशासितृत्वे, पालयितृत्वे, स्रष्टृत्वे, संहर्तृत्वे, भर्तृत्वे, कल्याणगुणाकरत्वे, परतरत्वे, सकलेतरविसजातीयत्वेऽवस्थितं रूपं द्रष्टुं—साक्षात्कर्तुमिच्छामि ॥ ३ ॥

ता ॥ * परमेश्वरेत्यनेन वाक्यार्थविश्वासहेतुभूतं परमाप्तत्वादिकं विवक्षितमित्यभिप्रायेणाह—**हे परमेश्वरेति** । तद्व्युत्पादनाय स्वसंवादमात्रार्थत्वव्युदासेन श्रुतप्रतिष्ठाज्ञापनाय चाह—**एवमेतदित्यवधृतमिति** । आश्रितजने दोषदर्शिनः कापुरुषा इति ह्याहुः, अतोऽत्र दिदृक्षमाणे स्वस्मिन् दोषानादररूपनिरतिशयपौरुषं पुरुषोत्तमशब्देन विवक्षितमित्यभिप्रायेण **आश्रितवात्सल्यजलधे** इत्युक्तम् । पुरु सनोतीति वा व्युत्पत्तिरिहाभिप्रेता ; * आविश्य बिभर्ति (१५. १७) इति वक्ष्यमाणं वा ज्ञापितम् । एवं परत्वसौलभ्ये समाख्याभ्यामुक्ते । * ते इति निर्देशे सत्यपि, * ऐश्वरमिति वचनमीश्वरत्वस्वभावाभिव्यञ्जकत्वपरमित्यभिप्रायेण—**त्वदसाधारणमित्युक्तम्** । तस्यैव प्राक्प्रपञ्चितप्रक्रियया विवरणं—**सर्वस्येत्यादि** । एवंस्वभावविशिष्टो हीश्वरशब्दार्थ इति भावः । प्रशासितृत्वादौ रूपस्यावस्थानं नाम तत्तदनुरूपैर्गुणसन्नहनचेष्टितैस्तत्तदभिव्यञ्जकत्वम् । यद्वा प्रशासितृत्वेऽवस्थानं * यथार्हं केशवे वृत्तिमवशाः प्रतिपेदिरे (भा. स. ३९. ३८) इति न्यायेन स्वदर्शनमात्रेण विपरीताध्यवसायं विनिवर्त्य सम्यक्प्रवृत्तिहेतुत्वात् । कल्याणगुणाकरत्वेऽवस्थानं नाम अवतारविग्रहवदज्ञत्वाद्यभिनयानर्हत्वम् । पालयितृत्वेऽवस्थानं तु सत्त्वप्रवर्तनादिमुखेन । स्रष्टृत्वेऽवस्थानं स्वावयवेभ्यो ब्रह्मरुद्रादीनां चातुर्वर्ण्यादीनां च प्रसूतेः । संहर्तृत्वेऽवस्थानं तु वक्ष्यमाणग्रसनादिना । भर्तृत्वेऽवस्थितिस्तु * तत्रैकस्थम् (१३) इत्यादिभिः स्फुटीभविष्यति । परत्वेन शङ्कितानां ब्रह्मरुद्रादीनां स्वैकदेशेऽवस्थानस्य * ब्रह्माणमीशम् (१५) इत्यादिना वक्ष्यमाणतया परतरत्वेऽवस्थानं युक्तम् । **सकलेतरविसजातीयत्व** इति तूक्तसमस्तनिगमनम् ; तत्फलितं वा ; परमेश्वरपुरुषोत्तमसंबुध्यभिप्रेतकथनं वा । * पश्य मे योगमैश्वरम् (८) इति गुह्यतमारम्भे स्वयमुक्तस्यापातप्रतीतार्थस्य दर्शनप्रार्थनानुसारेण * रूपमैश्वरमिति स्वरूपपरतया योजनायाम् * ऐश्वरमित्येकमौपचारिकम् ; इतरत्सर्वं मुख्यम् । स्वरूपानुबन्धेन तु विग्रहदिदृक्षा गर्भिता । रूपशब्दः स्वरूपरूपादिसमस्तासाधारणाकारपरो वा । रूपं प्रकारमित्यर्थः । * द्रष्टुमित्युक्ते दर्शनसमानाकारेऽपि ज्ञाने दर्शनशब्दप्रयोगात्तद्व्यवच्छेदार्थं चाक्षुषज्ञानमात्रपरत्वं च व्यवच्छेत्तुं—**साक्षात्कर्तुमित्युक्तम्** ॥ ३ ॥

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४

भा ॥ तत्—सर्वस्य स्रष्टुः, सर्वस्य प्रशासितुः, सर्वस्याधारभूतं त्वद्रूपं मया द्रष्टुं शक्यमिति यदि मन्यसे ततो योगेश्वर—योगो ज्ञानादिकल्याणगुणयोगः ; पश्य मे योगमैश्वरम् (८) इति हि वक्ष्यते ; त्वद्व्यतिरिक्तस्य कस्याप्यसंभावितानां ज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधे आत्मानं त्वामव्ययं मे दर्शय । अव्ययमिति क्रिया विशेषणम् । त्वां सकलं मे दर्शयेत्यर्थः ॥ ४ ॥

ता ॥ सर्वस्य स्रष्टृत्वादिना तच्छब्दपरामृष्टश्रुताकारोक्तिः । अत्रापि स्वरूपपरत्वे मुख्यता ; रूपपरत्वे, प्रकारमात्रपरत्वे च प्राग्वदनुसन्धेयम् । **योगो ज्ञानादिकल्याणगुणयोग इति** । अत्राणिमाद्यैश्वर्यशक्तिरपि गुणानु-

प्रविष्टा, योगनिर्वाहकत्वादिमात्रं तु दिदृक्षिताकारान्तरङ्गत्वाभावादत्र न विवक्षितमिति भावः । दर्शयिष्यमाणो ह्याकारोऽत्र दिदृक्षितः । नचार्जुनायाष्टाङ्गयोगाद्यर्थान्तरं प्रदर्श्यते, योगशब्दश्च प्रत्यभिज्ञायत इत्यभिप्रायेणाह—**पश्येति** । प्रभुशब्देन—यदि त्वं मन्यसे, तदा न किञ्चित्ते दुष्करमित्यभिप्रेत [मिति तदभिप्रेत] गुणविशेषवत्त्वं दर्शयति—**त्वद्व्यतिरिक्तस्येत्यादिना** । अथवा योगेश्वरशब्दाभिप्रेतोक्तिरियम् । अश्वपतिर्धनपतिरित्यादिवद्गुणभूयस्त्वापेक्षया गुणानामपि नियमनेन वा योगेश्वरशब्द इति भावः । * त्वामिति आत्मशब्दस्यार्थान्तरं त्वयुक्तम् , * माम् (८) इति च वक्ष्यत इति भावः । अव्ययशब्दस्यात्र निष्प्रयोजनत्वशङ्काव्युदासाय, क्षरप्रपञ्चाव्ययतद्रूपप्रदर्शनविरोधपरिहाराय, विशेषतो दिदृक्षोरपेक्षितार्थपरत्वं दर्शयति—**अव्ययमिति क्रियाविशेषणमिति** । ततः किमित्यत्राह—**त्वां सकलमिति** । समस्तगुणविभूतिविग्रहादिविशिष्टरूपमित्यर्थः ॥ ४ ॥

भा ॥ एवं कौतूहलान्वितेन हर्षगद्गदकण्ठेन पार्थेन प्रार्थितो भगवानुवाच—

श्रीभगवानुवाच—

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५

भा ॥ पश्य मे सर्वाश्रयाणि रूपाणि ; अथ शतशस्सहस्रशश्च नानाविधानि—नानाप्रकाराणि, दिव्यानि—अप्राकृतानि, नानावर्णाकृतीनि—शुक्लकृष्णादिनानावर्णानि, नानाकाराणि च पश्य ॥ ५ ॥

ता ॥ अर्जुनस्य भगवत आत्मप्रदर्शने हेतुं प्रश्नादिप्रकारफलितमवस्थाविशेषं दर्शयन् * पश्येत्यादिभगवद्वाक्यस्य संगतिमाह—**एवमिति** । वक्ष्यमाणप्रकारमनुसन्धायाह—**सर्वाश्रयाणीति** । बहुव्रीहित्वान्नपुंसकत्वम् । आदित्यमण्डलादीन्यनन्तान्यधिकरणानि । यद्वा, आश्रयशब्द उपचाराद्विवक्षाभेदेन वा आश्रितपरः । **शतशस्सहस्रशश्चेत्यनेन** परव्यूहविभवाद्यवच्छेदकोडीकृतानन्ताप्राकृतविग्रहवत्त्वं दर्शितम् । यदेकादित्यमण्डलवर्ति रूपं, तत्समानमनन्तब्रह्माण्डेष्वादित्यमण्डलवर्त्यसंख्यातं रूपम् । एवं श्रीविश्वरूपादिरूपान्तरेष्वपि । * रूपंरूपम् प्रतिरूप (क. ५. ९) इत्यादिश्रुत्याऽयमप्यर्थो विवक्षित इति केचित् । यथा द्रक्ष्यसि, तथा करिष्यामीत्यभिप्रायेण पश्येत्युक्तिः । नानाविधानीत्यनेन प्रत्येकं भूषणायुधलाञ्छनभुजसंख्यादिप्रकारविशेषानन्त्यमत्र विवक्षितमित्याह—**नानाप्रकाराणीति** । **अप्राकृतानीति**—अत्र दिव्यशब्देन दिवि वर्तमानत्वादिकं न विवक्षितं, पृथिव्यादिव्यावृत्तेरपि वक्ष्यमाणत्वात् ; द्रव्यवैलक्षण्यं चावश्यवक्तव्यमित्यभिप्रायः । वासुदेवादिषु चतुर्षु युगभेदेन सितरक्तपीतकृष्णरूपपरिवृत्तेरवतारान्तरेषु च तत्तत्फलार्थिध्यानानुगुण्याच्च नानावर्णत्वम् । आकृतिशब्देन सुरनरतिर्यगादिसमानसंस्थानविशेषो विवक्षित इत्यभिप्रायेणाह—**नानाकाराणीति** ॥ ५ ॥

पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६

भा ॥ ममैकस्मिन्रूपे पश्यादित्यान् द्वादश, वसूनष्टौ, रुद्रानेकादश, अश्विनौ द्वौ, मरुतश्चैकोनपञ्चाशतम् । प्रदर्शनार्थमिदम् , इह जगति प्रत्यक्षदृष्टानि शास्त्रदृष्टानि च यानि वस्तूनि, तानि सर्वाण्यन्यान्यपि सर्वेषु लोकेषु सर्वेषु च शास्त्रेष्वदृष्टपूर्वाणि बहून्याश्चर्याणि पश्य ॥ ६ ॥

ता ॥ * शतशोऽथसहस्रशः इति स्वासाधारणानन्तरूपप्रसङ्गेऽपि प्रकृतोपयोगाय * **इहैकस्थमित्येकस्यैव रूपस्य** विशेषतः प्रदर्शयिष्यमाणत्वमनुसन्धायाह—**ममैकस्मिन्निति** । * पश्यादित्यानित्यादिना प्रधानदेवाख्ययञ्जिशत्प्रथमं निर्दिश्यन्त इत्यभिप्रायेण—**द्वादशेत्यादिसङ्ख्याविशेषप्रदर्शनम्** । वक्ष्यमाणानुसारेण दृष्टमात्राश्रयत्वव्युदासायाह—**प्रदर्शनार्थमिति** । अर्जुनेन अन्यैश्चाप्रतिपन्नानामिति शेषः । * अदृष्टपूर्वाणीत्येतदश्रुतपूर्वाणामप्युपलक्षणम्, अनवगतत्वमात्रेण वा सामान्यतस्संग्रह इत्यभिप्रायेणाह—**सर्वेषु च शास्त्रेष्वदृष्टपूर्वाणीति** । एतेनातीन्द्रिये वस्तुनि सामान्यतः शास्त्रावगतेऽपि साक्षात्कारैकसमधिगम्या बहवो विशेषास्सन्तीति सूचितम् ॥ ६ ॥

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि ॥ ७

भा ॥ इह ममैकस्मिन् देहे, तत्राप्येकस्थम्—एकदेशस्थं सचराचरं कृत्स्नं जगत्पश्य ; यच्चान्यद्द्रष्टुमिच्छसि, तदप्येकदेहैकदेश एव पश्य ॥ ७ ॥

ता ॥ इह * देहे इत्येकवचनान्तनिर्देशेनैव प्रदर्शयिष्यमाण एको देहो विवक्षित इत्यभिप्रायेणाह—**इह ममैकस्मिन्देह** इति । एकवचनेन प्रदर्शयिष्यमाणविशेषनिर्देशेन च देहैकत्वस्याभिहितत्वादेकस्थपदेन तदेकदेशे स्थितिर्विवक्षिता । एकस्यावयविनोऽवयवभूतमिति कैश्चिदुक्तं तु भगवद्विग्रहस्य अप्राकृतत्वसमर्थनाच्च निरस्तमित्यभिप्रायेणोक्तं—**तत्राप्येकस्थमेकदेशस्थमिति** । यद्वा कृत्स्नस्य एकस्थत्ववचनात्तदेकदेशस्थितिः फलिता । * यच्चान्यद्द्रष्टुमिच्छसीत्यनेन पाण्डवधार्तराष्ट्रजयादिकमपि गर्भितम् । तत्रापि समुच्चयसामर्थ्यादेहैकदेशाश्रितत्वमाह—**तदपीति** ॥७॥

न तु मां शक्ष्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८

भा ॥ अहं मम देहैकदेशे सर्वं जगद्दर्शयिष्यामि ; त्वं त्वनेन नियतपरिमितवस्तुग्राहिणा प्राकृतेन स्वचक्षुषा, मां—तथाभूतं सकलेतरविसजातीयमपरिमेयं द्रष्टुं न शक्ष्यसे । तव दिव्यम्—अप्राकृतं मद्दर्शनसाधनं चक्षुर्ददामि । पश्य मे योगमैश्वरम्—मदसाधारणं योगं पश्य ; ममानन्तज्ञानादियोगमनन्तविभूतियोगं च पश्येत्यर्थः ॥ ८ ॥

ता ॥ * न तु मां शक्ष्यसे इत्यत्र तुशब्दद्योतितमशक्तिहेतुं पूर्वश्लोकोक्तमाकृष्य दर्शयति—**अहमिति** । **अनेनैवेत्यस्य** विवक्षितमाह—**नियतेति** । दिव्यप्रतिपक्षत्वात्—**प्राकृतेनेत्युक्तम्** । **तथाभूतमित्यादि** । * मामित्यनेनात्र विग्रहादिविशिष्टत्वं विवक्षितमिति भावः । अत्र दिव्यशब्दविवक्षितमाह—**अप्राकृतमिति** । **मद्दर्शनसाधनमित्यप्राकृतत्व**फलितोक्तिः । ऐश्वरपदाभिप्रेतमाह—**मदसाधारणमिति** । प्रकरणादिफलितमैश्वरपदानुगृहीतं च योगशब्दार्थमाह—**अनन्तेति** । नियमनशक्तिरीश्वरत्वम् ; तदनुबन्धी च योगस्तदुचितगुणविभूतियोग एव । चक्षुषो दिव्यत्वाज्ज्ञानादिगुणदर्शनम् । अनन्तवीर्यत्वादिविशिष्टविशेषेण पश्यामीति वक्ष्यतीति भावः ॥ ८ ॥

सञ्जय उवाच—

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९

भा ॥ एवमुक्त्वा सारथ्येऽवस्थितः पार्थमातुलजो महायोगेश्वरो हरिः—महाश्चर्ययोगानामीश्वरः परब्रह्मभूतो नारायणः परममैश्वरं—स्वासाधारणं रूपं पार्थाय—पितृष्वसुः पृथायाः पुत्राय दर्शयामास, तद्विविधविचित्रनिखिलजगदाश्रयं विश्वस्य प्रशासितृ च रूपम् ॥ ९ ॥

ता ॥ *महायोगेश्वरो हरिरित्यनयोस्तिरस्कारकं पूर्वप्रतिपन्नं रूपमाह—**सारथ्येऽवस्थितः पार्थमातुलज** इति । एतेन दिव्यरूपप्रकाशनहेतुभूतवात्सल्यादिसूचनं च । महत्त्वेन विशेषणादाश्चर्यत्वम् । महच्छब्दस्य च योगेश्वरविशेषणत्वादपि योगविशेषणत्वमत्रोचितमित्यभिप्रायेणाह—**महाश्चर्ययोगाना**मिति । अन्येष्वप्याश्चर्ययोगस्य तदधीनत्वमीश्वरशब्देन विवक्षितम् । *महायोगेश्वरो हरिरिति पदद्वयाभिप्रेतं सामान्यविशेषवाक्यार्थं दर्शयति—**परब्रह्मभूतो नारायण** इति । *पश्य मे योगमैश्वरं, *परमं रूपमैश्वरम् इत्यनयोरदूरविप्रकर्षेण घटनादैकार्थ्यम् । ऐश्वरं रूपं दर्शयामासेत्युक्ते स्वेतरस्य कस्यचिद्रूपमिति धीस्स्यादिति तद्व्युदासायोक्तं—**स्वासाधारण**मिति । रूपशब्दस्यात्रापि सानुबन्धस्वरूपपरतया तदभिव्यञ्जकविग्रहपरतया स्वरूपादिसमस्तासाधारणाकारमात्रपरतया वा निर्बाहो ग्राह्यः । अत्र पार्थशब्देन स्वस्वरूपप्रदर्शनार्थः प्रीतिहेतुस्संबन्धोऽभिप्रेत इति प्रदर्शनायाह—**पितृष्वसुः पृथायाः पुत्रा**येति । परममैश्वरं रूपमित्युक्तं विवृणोति—**तद्विविधे**ति । निखिलजगदाश्रयत्वं स्वरूपतो विग्रहद्वारा च । यद्वा *अनेकेत्यादेरुत्थानप्रदर्शनमिदम् । तत एव हि *तच्चेदृशमिति संहितम् । *इहैकस्थमित्यादिभिस्सिद्धोऽयमर्थः । प्रशासितृशब्देनाधिष्ठातृत्वं विवक्षितम् ॥९॥

भा तच्चेदृशम्—

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् । अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १०
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् । सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११

भा ॥ देवं—द्योतमानम्, अनन्तम्—कालत्रयवर्तिनिखिलजगदाश्रयतया देशकालपरिच्छेदानर्हम्, विश्वतोमुखम्—विश्वदिग्वर्तिमुखम्, स्वोचितदिव्याम्बरगन्धमाल्याभरणायुधान्वितम् ॥ १० ॥ ११ ॥

ता ॥ वक्त्राभरणायुधेष्वनेकत्वं जातिवैचित्र्यादपि द्रष्टव्यम् । नानाजातीयबहुवक्त्रयोगो हि श्रीविश्वरूपध्याने भगवच्छास्त्रेषु पठ्यते; अन्यथाऽनेकनयनत्वनिर्देशो निरर्थकस्स्यात्, वक्त्रानेकत्वेनैव तत्सिद्धेः । अनेकमद्भुतं दर्शनं यस्य तदनेकाद्भुतदर्शनम्—अनवधिकातिशयाश्चर्यतया दृश्यमानमित्यर्थः । दिव्यत्वमप्राकृतत्वम् । सर्वाश्चर्यमयम्—आश्चर्यभूतसर्वतत्त्वाश्रयभूतमित्यर्थः । अत एव *अनेकाद्भुतदर्शनमित्यनेनापुनरुक्तिः । *जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः (वि. ५. १९. ७) इत्यादि भाव्यम् । देवशब्दस्यात्रानुपयुक्तजातिविशेषादिमात्रनिष्ठतान्व्युदासार्थं विग्रहविशिष्टविषयत्वप्रदर्शनार्थं च—**द्योतमान**मित्युक्तम् । आनन्त्यप्रकारं, तद्धेतुं चाह—**निखिले**त्यादिना । कृत्स्नजगदाश्रयत्वस्य कण्ठोक्तत्वात्फलितं कालत्रयवर्त्याश्रयत्वमपि । तदुभयफलितं देशकालपरिच्छेदानर्हत्वमत्र यथासंभवं विग्रहद्वारमद्वारकं च । आनन्त्यं तु स्वरूपगतम् । विग्रहविशेषणवर्गमध्यवर्तित्वादनन्तशब्दोऽपि विग्रहविषयः । *दृष्ट्वाऽद्भुतमित्यत्र *अनन्तायामविस्तारमत्यद्भुतमत्युग्रमिति रूपविषयमेव वक्ष्यति । तत्रश्चात्यन्तपृथुत्वादिमात्रप्रदर्शने तात्पर्यमित्यन्ये । एवम् *अनन्तायामविस्तारे इति वक्ष्यमाण एतदनुवादोऽपि निर्बाह्यः । विश्वव्यापिनोऽप्यस्य विग्रहस्य शक्तिविशेषात्सर्वत्राप्रतिघातो युक्तः । अष्टैश्वर्यशालिनां योगिनामपि भूम्नावुन्मज्जति निमज्जतीति सिद्धिविशेषोऽभिधीयते । अतोऽस्य

प्रकृत्यादिकृत्स्नजगदाश्रयत्वं वक्ष्यमाणं नानुपपन्नम् । अत एवास्यभूषणरूपेण सर्वाश्रयत्वमिहोच्यत इत्येतदपि नाशङ्कनीयम्, तत्र * देवदेवस्य शरीरमित्यत्र शरीरविशेषणतयाऽनन्तायामविस्तारत्वाद्युक्तेः । न च वटपत्रशायिविग्रहवदघटितघटनाशक्त्या सूक्ष्मरूपेण वाऽल्पीयस्यपि सर्वान्तर्भावप्रकाशनमित्यपि वाच्यम्, तथाऽनुक्तेस्तद्विपरीतोक्तेश्च । अतो यथाश्रुत एवार्थः । एतच्चारम्भभाष्य एव अचिन्त्यशब्देन स्थापितमिति । * अनेकवक्त्रेत्युक्तमेवात्र विश्वतोमुखशब्देन विशेष्यत इत्यभिप्रायेणाह—**विश्वदिग्वर्तिमुखमिति** । साक्षाद्विग्रहविषयत्वात् * विश्वतश्चक्षुरुत विश्वतोमुखः (ना.) इत्यादिष्विव नात्र सर्वत्र मुखशक्तियोगोऽपि विवक्षितः । सर्वत्र मुखयुक्तमिति च परोक्तमयुक्तम्, पाणिपादादिषु मुखाभावादिति भावः । अविशदविशदोपलम्भक्रमेण पाठक्रममनादृत्य * देवमित्यादिकं पूर्वं व्याख्यातम् । स्वगताकारप्रतीतेः परस्ताद्धि पृथक्सिद्धद्रव्यविशिष्टताप्रतीतिः ; तथैव च प्रदर्शनमुचितमित्यभिप्रायेणाम्बरादिकं पूर्वमुक्तमपि परस्तादर्शितं—**स्वोचिते**त्यादिना । अत्रापि पाठक्रमोल्लङ्घनेनाम्बरादिक्रमेण निर्देशोऽन्तरङ्गत्वबहिरङ्गत्वतारतम्यप्रदर्शनाय । अत्र * दर्शयामासेति पूर्वेणान्वयः ॥ १० ॥ ११ ॥

भा ॥ तामेव देवशब्दनिर्दिष्टां द्योतमानतां विशिनष्टि—

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भास्सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२

भा ॥ तेजसोऽपरिमितत्वदर्शनार्थमिदम् ; अक्षयतेजस्स्वरूपमित्यर्थः ॥ १२ ॥

ता ॥ * दिवीत्यादिश्लोकस्य सङ्गतिमाह—**तामेवेति** । निर्दिष्टस्य भास्वरत्वस्य निरतिशयत्वलक्षणो विशेष उच्यत इत्यर्थः । सङ्ख्याविशेषेण परिच्छन्नत्वशङ्काव्युदासायाह—**तेजस इति** $ ॥ १२ ॥

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३

भा ॥ तत्रानन्तायामविस्तारे, अनन्तबाहूदरवक्त्रनेत्रे, अपरिमिततेजस्के, अपरिमितदिव्यायुधोपेते, स्वोचितापरिमितदिव्यभूषणे, दिव्यमाल्याम्बरधरे, दिव्यगन्धानुलेपने, अनन्ताश्चर्यमये, देवदेवस्य दिव्ये शरीरे अनेकधा प्रविभक्तं—ब्रह्मादिविविधविचित्रदेवतिर्यङ्मनुष्यस्थावरादिभोक्तृवर्गपृथिव्यन्तरिक्षस्वर्गपातालातलवितलसुतलादिभोगस्थानभोग्यभोगोपकरणभेदभिन्नं प्रकृतिपुरुषात्मकं कृत्स्नं जगत् * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते (१०. ८) * हन्त ते कथयिष्यामि विभूतीरात्मनश्शुभाः (१९) * अहमात्मा गुडाकेश सर्वभूताशयस्थितः (२०) * आदित्यानामहं विष्णुः (२१) इत्यादिना * न तदस्ति विना यत्स्यान्मया भूतं चराचरम् (३९) * विष्टभ्याहमिदं कृत्स्नमंकांशेन स्थितो जगत् (४२) इत्यन्तेनोदितम् , एकस्थम्—एकदेशस्थम् ; पाण्डवो भगवत्प्रसादलब्धतद्दर्शनानुगुणदिव्यचक्षुरपश्यत् ॥ १३ ॥

ततस्स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १४

भा ॥ ततो धनंजयो महाश्चर्यस्य कृत्स्नस्य जगतः स्वदेहैकदेशेनाश्रयभूतं कृत्स्नस्य प्रवर्तयितारं चाश्चर्यसमानन्तज्ञानादिकल्याणगुणगणं देवं दृष्ट्वा विस्मयाविष्टो हृष्टरोमा शिरसा दण्डवत्प्रणम्य कृताञ्जलिरभाषत ॥ १४

$ अत्र ग्रन्थपात इव ।

अर्जुन उवाच—

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च [दीप्तान्] दिव्यान् ॥ १५

भा ॥ देव तव देहे सर्वान् देवान् पश्यामि ; तथा सर्वान् प्राणिविशेषाणां संघान्, तथा ब्रह्माणं—चतुर्मुखमण्डाधिपतिं, तथेशं कमलासनस्थं—कमलासने ब्रह्मणि स्थितमीशं, तन्मतेऽवस्थितं ; तथा देवर्षिप्रमुखान् सर्वानृषीन्, उरगांश्च वासुकितक्षकादीन् दीप्तान् ॥ १५ ॥

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥ १६

भा ॥ अनेकबाहूदरवक्त्रनेत्रम् अनन्तरूपं त्वां सर्वतः पश्यामि ; विश्वेश्वर—विश्वस्य नियन्तः, विश्वरूप—विश्वशरीर, यतस्त्वमनन्तः, अतस्तव नान्तं न मध्यं न पुनस्तवादिं च पश्यामि ॥ १६ ॥

ता ॥ * सर्वतोऽनन्तरूपमित्यन्वये * सर्वतः इति शब्दस्य वैयर्थ्यं स्यात ; * सर्वतः पश्यामीत्यन्वयस्तु दिव्यचक्षुर्लाभानुगुणत्वाद्युक्तः । विश्वरूपत्वे हेतुपरो विश्वेश्वरशब्द इत्यभिप्रायेणाह—**विश्वस्य नियन्तरिति** । व्याप्यनियन्ता हि शरीरी । * नान्तं न मध्यमित्यादौ विद्यमानस्यादर्शनं न विवक्षितम् ; अर्जुनस्य दिव्यचक्षुर्लाभेन तदयोगात्, अतोऽत्र *अनन्तरूपमिति हेतुगर्भविशेषणाद्विषयाभावादेव शशशृङ्गादेरिवादर्शनमुक्तमित्यभिप्रायेणाह—**यत** इति। इदं च * विश्वरूपेत्यनेनापि विवक्षितम् । अत्र देशतः कालतश्चादिमध्यान्तनिषेधो भाव्यः । आद्यन्तरूपावच्छेदाभावात्तदुभयनिरूपणीयमध्याभावोऽपि सिद्धः ॥ १६ ॥

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वा दुर्निरीक्षं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७

भा ॥ तेजोराशिं सर्वतो दीप्तिमन्तं समन्ताद्दुर्निरीक्षं दीप्तानलार्कद्युतिमप्रमेयं त्वां किरीटिनं गदिनं चक्रिणं च पश्यामि ॥ १७ ॥

ता ॥ * किरीटिनमित्यादेः पाठक्रममनादृत्य उपलब्धार्थक्रमानुरोधेनान्वयमाह—**तेजोराशिमित्यादिना** । * तेजोराशिमिति धर्मिस्वरूपनिर्देशः । सर्वतो दीप्तिमन्तं—* तस्य भासा सर्वमिदं विभाति (क. ५.१५) इत्यादिवत्सर्वव्यापिप्रभायोगिनम् । * समन्तादिति कृत्स्नविग्रहप्रदेशविवक्षयाऽभिहितम् । दीप्तानलार्कद्युतिमिति दुर्निरीक्षत्वे हेतुः । अत्र द्युतिशब्देन किरणरूपं तेजो विवक्षितम् ; अतः * दीप्तिमन्तमित्यनेनापौनरुक्त्यम् । यद्वा पूर्वत्र सर्वव्याप्तित्वे तात्पर्यम् ; इह तु दुष्प्रेक्षत्वहेतुभूतातितीव्रत्वे । अप्रमेयम्—ईदृक्त्वेयत्ताभ्यां परिच्छेत्तुमशक्यम् । एतावता सामान्योपलम्भकथनमित्यभिप्रायेण **अप्रमेयं त्वामित्यवच्छिद्योक्तम्** । अदृष्टपूर्वरूपदर्शनेऽपि त्वदसाधारणचिह्नैः त्वां प्रत्यभिजानामीत्यभिप्रायेणाह—**किरीटिनं गदिनं चक्रिणं च पश्यामीति** । किरीटिनमिति भूषणवर्गोपलक्षणम् । तत्रापि किरीटनिर्देशस्तस्य सर्वेश्वरत्वव्यञ्जकत्वात् । किरीटकरण्डिकाभेदेन द्विधा हि मकुटजातिः ; तत्र किरीट उत्कृष्टधार्यः । गदिनं चक्रिणमित्यायुधवर्गोपलक्षणम् । तत्रापि चक्रादेर्व्यपदेशो भगवदसाधारणत्वेन प्रसिद्धत्वात् ॥ १७ ॥

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययश्शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८

भा ॥ उपनिषत्सु *द्वे विद्ये वेदितव्ये (मु. १. १. ४) इत्यादिषु वेदितव्यतया निर्दिष्टं परममक्षरं त्वमेव; अस्य विश्वस्य परं निधानम्—विश्वस्यास्य परमाधारभूतस्त्वमेव; त्वमव्ययः—व्ययरहितः; यत्स्वरूपो यद्गुणो यद्विभवश्च त्वं तेनैव रूपेण सर्वदाऽवतिष्ठसे। शाश्वतधर्मगोप्ता शाश्वतस्य नित्यस्य वैदिकस्य धर्मस्य एवमादिभिरवतारैस्त्वमेव गोप्ता । सनातनस्त्वं पुरुषः [मतो मे]—*वेदाहमेतं पुरुषं महान्तं (पु) * परात्परं पुरुषम् (मु. ३. २. ८) इत्यादिषूदितस्सनातनपुरुषस्त्वमेवेति मे मतः—ज्ञातः। यदुकुलतिलकस्त्वमेवंभूत इदानीं साक्षात्कृतो मयेत्यर्थः ॥ १८ ॥

ता ॥ * त्वमक्षरमित्यादिना भगवत्प्रभावदर्शनादेवमक्षरवेदितव्याव्ययसनातनपुरुषादिशब्दैर्मुण्डकोपनिषदादिस्मारणमित्यभिप्रायेणाह—**उपनिषत्स्विति** । **निर्दिष्टमिति**—* अथ परा यया तदक्षरमधिगम्यते (मु. १. १. ५) इत्यादिनेति शेषः । * विष्णुसंज्ञं, सर्वाधारं धाम (मै. उ) इत्याद्यनुसन्धानेनाह—**विश्वस्यास्य परमाधारभूत इति**। निधीयतेऽस्मिन्निति निधानम्; निधानानामपि निधानत्वात्परं निधानम् । * आधारभूतं विश्वस्येत्याद्युक्तजीवव्यवच्छेदार्थः परशब्दः । * भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणेऽर्पिताः (कौ. ३. ९) इति हि श्रूयते । अनन्याधारत्वाय परमशब्देन व्याक्रिया । अव्ययशब्देन * तदव्ययम् (मु. १. १. ६), * अनन्तमव्ययं कविम् (ना) इत्यादिकं स्मारितम् । स्वरूपस्य गुणस्य विभवस्य वा यदाकदाचित्प्रच्युतिर्हि व्ययः; स सर्वोऽप्यस्य नास्तीत्यविशेषिताव्ययशब्देनोच्यते, दृश्यमानाकारानुवादित्वंशब्दनिर्दिष्टविशेषकत्वादव्ययशब्दस्य जीवादिसाधारणस्वरूपमात्रनित्यतोक्तावतिशयाभावादित्यभिप्रायेणाह—**यत्स्वरूपो यद्गुणो यद्विभवश्चेति** । अत्र विभवशब्देन नित्यविभूतिर्विवक्षिता; विभूतियुगलविवक्षायां तु दृश्यस्वरूपस्यान्यूनानतिरिक्तत्वमात्रमिह विवक्षितमिति भाव्यम् । शश्वद्भवश्शाश्वतः; शाश्वतत्वे हेतुः नित्यागममूलत्वमित्यभिप्रायेण **वैदिकस्येत्युक्तम्** । * नारायणश्शाश्वतधर्मगोप्ता (भा. मो. ३३६. ५) इत्यादिष्वपि वैदिक एव विशेषधर्म उच्यत इत्यभिप्रायः । प्रत्यक्षशास्त्राभ्यामवगतोऽयमर्थ उच्यत इत्यभिप्रायेण—**एवमादिभिरवतारैरित्युक्तम्** । पुरुषविषयेण श्रुतिद्वयेनोपास्यत्वप्राप्यत्वप्रदर्शनम् । आदिशब्देन * येनाक्षरं पुरुषं वेद सत्यम् (मु. १. २. १३) इत्यादिकं क्रोडीकृतम् । सनातनशब्देन सत्यशब्दोपबृंहणम् । *मतः इति स्वाभिमानमात्रप्रतीतिव्युदासायाह—**ज्ञात** इति । अत्र श्लोके * त्वमिति प्राचीनमांसचक्षुःप्रतिपन्नाकारानुवादः, शेषेण तु दिव्यचक्षुर्लाभसाक्षात्कृताकारकथनम्, प्रभावमात्रज्ञानस्य प्रागेव सिद्धत्वादित्यभिप्रायेणाह—**यदुकुलेति** । मतशब्दोऽत्र सामान्यपरः * पश्यामीत्युक्तसाक्षात्काराख्यविशेषपर्यवसित इत्यभिप्रायेण—**इदानीं साक्षात्कृत इत्युक्तम्** ॥ १८ ॥

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वा दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ १९

भा ॥ **अनादिमध्यान्तम्**—आदिमध्यान्तरहितम् । **अनन्तवीर्यम्**—अनवधिकातिशयवीर्यम्; वीर्यशब्दः प्रदर्शनार्थः; अनवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधिमित्यर्थः । **अनन्तबाहुम्**—असंख्येयबाहुम्; सोऽपि प्रदर्शनार्थः; अनन्तबाहूदरपादवक्त्रादिकम् । **शशिसूर्यनेत्रम्**—शशिधरसूर्यवच्च प्रसादप्रतापव-

युक्तसर्वनेत्रम् । देवादीननुकूलान् नमस्कारादि कुर्वाणान्प्रति प्रसादः; तद्विपरीतानसुरराक्षसादीन् प्रति प्रतापः; * रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः (३६) इति हि वक्ष्यते। दीप्तहुताशवक्त्रम्—प्रदीप्तकालानलवत्संहारानुगुणवक्त्रम् । स्वतेजसा विश्वमिदं तपन्तम्—तेजः पराभिभवनसामर्थ्यम्; स्वकीयेन तेजसा विश्वमिदं तपन्तं त्वां पश्यामि—एवंभूतं सर्वस्य स्रष्टारं सर्वस्याधारभूतम्, सर्वस्य प्रशासितारम्, सर्वस्य संहर्तारम्, ज्ञानाद्यपरिमितगुणसागरम्, आदिमध्यान्तरहितमेवंभूतदिव्यदेहं त्वां यथोपदेशं साक्षात्करोमीत्यर्थः। एकस्मिन् दिव्यदेहे अनेकोदरादिकं कथम्? इत्थमुपपद्यते—एकस्मात्कटिप्रदेशादनन्तपरिमाणादूर्ध्वमुद्गता यथोदितोदरादयः, अधश्च यथोदितदिव्यपादाः; तत्रैकस्मिन्मुखे नेत्रद्वयमिति च न विरोधः ॥ १९ ॥

ता ॥ * अनादिमध्यान्तमिति नञस्तदन्यपरत्वे * सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन (१०. ३२), *अहमादिश्च मध्यं च भूतानामन्त एव च (१०. २०) इत्यादिभिर्विरुध्येत; अतो निषेधपरतामाह—**आदिमध्यान्तरहित**मिति । * नान्तं न मध्यमित्यादिकं स्वरूपविषयम्; इदं तु विग्रहविषयमित्यपौनरुक्त्यम्। यद्वा उत्पत्तिस्थितिनाशरूपविकारनिषेधः क्वचित्; अन्यत्र तत्तद्धेतुनिषेध इत्यादिरूपेण विभजनीयम् । अथवाऽत्र कालाभिमानिरूपदर्शनात् * अनादिर्भगवान्कालः (वि. १. २. २६) इत्यादिवत्कालाख्यविभूतिनित्यत्वविवक्षा । वीर्यस्यानन्त्यं नाम तारतम्यप्रयुक्तावच्छेदनिवृत्तिरित्यभिप्रायेणाह—**अनवधिकातिशयवीर्य**मिति । निर्दिष्टमात्रपरत्वव्युदासाय सन्नियोगशिष्टानामन्यतरोक्ताविवरदपि सिध्यतीत्यभिप्रायेणाह—**वीर्यशब्दः प्रदर्शनार्थ** इति । * अनेकबाहु (१६) इति बाहुनानात्वमात्रं पूर्वमुक्तम्; *अनन्तबाहुमिति तु संख्यानिवृत्तिरुच्यत इत्यपौनरुक्त्यमित्यभिप्रायेणाह—**असंख्येयबाहु**मिति । * अनेकबाह्वदरवक्त्रनेत्रमिति पूर्वनिर्दिष्टसमुदाये कस्यचिदसंख्येयत्वविधानमितरेषां सर्वेषामपि प्रदर्शनार्थमित्यभिप्रायेणाह—**सोऽपी**ति । * शशिसूर्यनेत्रमित्यत्र चन्द्रसूर्ययोरेव न नेत्रत्वरूपणम्, रूपणप्रकरणाद्यभावात्, अस्य च रूपस्यानन्तनयनविशिष्टत्वात्; अतस्साधर्म्यमेव विवक्षितम्। तत्रापि केषांचिच्छशितुल्यत्वं केषांचित्सूर्यतुल्यत्वमिति विभाजकाभावात्सर्वेषामुभयतुल्यत्वं विवक्षितमित्याह—**शशिवदि**ति । युगपत्प्रसादप्रतापयोर्विरुद्धयोर्विषयं व्यवस्थापयति—**देवादीनि**ति । तदेव वक्ष्यमाणेन स्थापयति—**रक्षांसी**ति । * दीप्तानलार्कद्युतिम् (१७) इति प्रागभिधानेऽपि पुनः * दीप्तहुताशवक्त्रमिति विशेषतोऽभिधानं वक्त्रसाध्यजगद्ग्रसनाख्यविशेषतात्पर्येणेत्यभिप्रायेणाह—**प्रदीप्तकालानलवदि**ति । **संहारानुगुणे**ति साधर्म्यकथनम् । अत्र हुताश एव वक्त्रमिति परोक्तनिरसनाय * कालानलसन्निभानीति वक्ष्यमाणानुसन्धानेन **कालानलवदित्युक्तम्** । पावकश्च वसुगणेऽन्तर्भूतः पृथगुक्तः । * विश्वमिदं तपन्तमिति वचनादत्र तेजश्शब्देन अन्यानपेक्षत्वं न विवक्षितम्, प्रकृतानुपयोगात्; अतस्तदुचितमर्थमाह—**तेज** इति । * कालः पचति भूतानि (भा. मो. २३९. २५) इत्यादेः इदं निदानसूचनमित्यभिप्रायेणाह—**स्वकीयेने**ति । पूर्वं श्रुतमनन्तरं दिव्यचक्षुषा साक्षात्कृतं सर्वमाकारं संकलय्याह—**एव**मिति । एकस्य देहस्य अनेकबाहुमुखादियोगश्श्रुतपूर्वो दृष्टपूर्वश्च; उदरादेरनेकत्वं तु कथमिति चोदयति—**एकस्मिन्निति** । परिहरति—**इत्थ**मिति । श्रुतानुरूपं सर्वमुपपादनीयमिति भावः । **एकस्मा**दित्यादि । अयमभिप्रायः—* अनेकबाह्वदरवक्त्रनेत्रम् (१६) इत्यवयवानेकत्वमात्रवचनाद्रूपमेकमिति गम्यते; एकविग्रहविषयपूर्वापरपरामर्शाच्च । नच * पश्य मे पार्थ रूपाणि (५) इत्युपक्रमादिहाप्यनेकविग्रहविषयमनेकोदरत्वादिकमिति वाच्यम्; तथा सति अनेकविग्रहमित्येतावतो वक्तव्यत्वात् । न चानेकेषु शरीरेष्वनेकबाह्वदरत्वादिकं विशेषतो वक्तव्यम् । नच

भगवच्छास्त्रे अनेकोदरादिमद्रूपं न दृष्टमिति वाच्यम्; तस्य शास्त्रस्येदानीं निश्शेषप्रवृत्त्यभावात्। नारदादिदृष्टरूपाण्यपि तत्रेदानीं न पश्यामः। इतोऽन्यथा[हि]ऽपि श्रीविश्वरूपं नारदेन दृष्टम्; ततोऽन्यदेव धृतराष्ट्रेण दृष्टम्। अतो यथा संहिताभेदेन वराहनारसिंहादेरन्यथान्यथा सन्निवेशवर्णभुजादिवैचित्र्यं, तद्वच्छ्रीविश्वरूपविग्रहेऽपि वचनबलादेव तथातथा वैचित्र्यमङ्गीकुर्मः, अतश्शाखामूलनानात्वेऽपि काण्डैक्याद्वृक्षैक्यवद्बाहूदरादिभेदेऽपि भेदोक्तिरहितकटिप्रदेशैक्यादिह रूपैक्यम्—इति। एतच्च सर्वं यथोदितशब्देन सूचितम्। **एकस्मिन्मुखे नेत्रद्वयमिति**—एकैकस्मिन्नित्यर्थः॥ १९॥

भा॥ एवंभूतं त्वां दृष्ट्वा देवादयोऽहं च प्रव्यथिता भवाम इत्याह—

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्॥ २०

भा॥ द्युशब्दः पृथिवीशब्दश्चोभावुपरितनानामधस्तनानां च लोकानां प्रदर्शनार्थौ। द्यावापृथिव्योरन्तरम्—अवकाशः, यस्मिन्नवकाशे सर्वे लोकास्तिष्ठन्ति; सर्वोऽयमवकाशो दिशश्च सर्वास्त्वयैकेन व्याप्ताः। दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदम्—अनन्तायामविस्तारमत्यद्भुतमत्युग्रं च रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम्—युद्धदिदृक्षया आगतेषु ब्रह्मादिदेवासुरपितृगणसिद्धगन्धर्वयक्षराक्षसेषु प्रतिकूलानुकूलमध्यस्थरूपं लोकत्रयं सर्वं प्रव्यथितम्—अत्यन्तभीतम्। महात्मन्—अपरिच्छेद्यमनोवृत्ते। एतेषामप्यर्जुनस्येव विश्वाश्रयरूपसाक्षात्कारसाधनं दिव्यं चक्षुर्भगवता दत्तम्। किमर्थमिति चेत्; अर्जुनाय स्वैश्वर्यं सर्वं प्रदर्शयितुम्; अत इदमुच्यते—* दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्निति॥ २०॥

ता॥ **एवंभूतमिति**। अत्युग्ररूपमित्यर्थः। प्रव्यथितविशेषणानुसारेण लोकशब्दोऽत्र जनविषय इत्याह—**देवादय इति**। * दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् (२३) इति वक्ष्यमाणावेक्षणेन **अहं चेत्युक्तम्**। अनन्तत्वस्य बहुशोऽभिहितत्वादवच्छिन्नलोकद्वयव्यापिवचनं तदुपलक्षितलोकवर्गद्वयप्रदर्शनार्थमित्यभिप्रायेणाह—**द्युशब्द इति**। * अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये (नाम. ३. ना. ३४७) इत्यनेकार्थान्तरशब्दस्य प्रस्तुतानुगुणमर्थमाह—**अवकाश इति**। शक्तिविशेषादिवशात्सप्रतिघत्वविरोधाद्यभावाभिप्रायेणावकाशं विवृण्वन्पिण्डितार्थमाह—**यस्मिन्निति**। **अनन्तायामविस्तारमिति** पूर्वोक्तस्यानुकर्षणम्। अयमभिप्रायः—पूर्वापरवाक्ययोर्विग्रहैकविषयतया मध्ये स्वरूपव्यापिकथनप्रयोजनाभावाद्विग्रहस्य चातिमहत्त्वेन कण्ठोक्तत्वात्तद्विषयोऽयं व्याप्तिव्यपदेश इति। नात्र लोकत्रयशब्देन पृथिव्यादिकं विवक्षितम्, तत्र प्रव्यथितत्ववचनायोगात्। अतः * मञ्चाः क्रोशन्तीतिवत्तद्वर्तिनः प्राणिनो वक्तव्याः, ततश्च लक्षणा; अतोऽपि लोकशब्दस्यैव मुख्यत्वेन जनविषयत्वं वरम्। जनस्य त्रित्वं च शत्रुमित्रोदासीनरूपेण सुप्रसिद्धम्। तस्य च सर्वस्य जनस्यात्र समवायो युद्धदिदृक्षया सिद्धः। अत एव लोकत्रयवर्तिकतिपयपुरुषव्यथादर्शनेन लोकत्रयनिर्देश इति न भ्रमितव्यम्। नापीदमर्जुनस्योत्प्रेक्षणं, दृष्टस्यैव सर्वस्य वचनात्। तदेतदाह—**युद्धेति**। अत्र देवासुरादिग्रहणं मानुषव्यवच्छेदार्थं, युद्धायागतानां सर्वेषां भगवद्विग्रहादर्शनात्। सोपसर्गस्य धातोर्विवक्षितमाह—**अत्यन्तभीतमिति**। महात्मशब्दस्य गम्भीरबुद्धिविशेषवत्सु प्रसिद्धत्वात्, विग्रहस्योग्रत्ववदाशयापरिच्छेदस्यापि भयहेतुत्वादत्रायमेवार्थ उचित इत्यभिप्रायेणाह—**अपरिच्छेद्येति**। ननु *दर्शयामास पार्थाय (९) इति द्युपक्रान्तम्; तत्कथं देवासुरादीनामपि मानुषवन्मांसचक्षुषां भगवद्विग्रहसाक्षात्कार उच्यत इत्यत्राह—**एतेषामपीति**। अर्जुनस्य शिष्यभूतस्यात्यन्तोपसन्नस्य निरति-

शयभक्तेस्स्वविग्रहप्रकाशनं प्राप्तम्; तदर्थं च तस्यैव दिव्यचक्षुर्दत्तम्; वक्ष्यति च—* देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः (५२) इति । अतस्सामान्येन सर्वस्य जनस्य दिव्यचक्षुःप्रदाने कारणं न पश्याम इत्यभिप्रायेण शङ्कते—**किमर्थ**मिति । परिहरति—**अर्जुनाय**ेति । देवादीनामपि दिदृक्षासंभवात्सर्वेषामवतारसाक्षात्कारवत्सुकृतविपाकसन्निपाताक्षुद्राणामिव महतामपि भयावहत्वादिना निरङ्कुशैश्वर्यप्रकाशनेन प्रकृतोपयोगाच्च दिव्यचक्षुर्दानमिति भावः । तदेवार्जुनवाक्येन संवादयति—**अत इद**मिति ॥ २० ॥

अमी हि त्वा सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१

भा ॥ अमी सुरसंघाः उत्कृष्टास्त्वां विश्वाश्रयमवलोक्य हृष्टमनसस्त्वत्समीपं विशन्ति । तेष्वेव केचिदत्युग्रमत्यद्भुतं च तवाकारमालोक्य भीताः प्राञ्जलयस्स्वज्ञानानुगुणं स्तुतिरूपाणि वाक्यानि गृणन्ति—उच्चारयन्ति । अपरे महर्षिसंघास्सिद्धसंघाश्च परावरतत्त्वयाथात्म्यविदः स्वस्तीत्युक्त्वा पुष्कलाभिर्भगवदनुरूपाभिः स्तुतिभिः स्तुवन्ति ॥ २१ ॥

ता ॥ * अमी हि त्वा विशन्तीत्यत्र न संहारादिकं विवक्षितं, स्तुत्यादिभिस्सहपाठाद्धार्तराष्ट्रादिवदासन्नोपसंहाराभावात्; परोक्तस्यावतीर्णसुरसङ्घविषयत्वस्य * वीक्षन्ते इत्यादिभिर्विरोधाच्च ; अतोऽत्र समीपगमनरूपसेवाप्रकारोऽभिधीयत इत्यभिप्रायेणाह—**अमी सुरसङ्घा** इत्यादिना । * केचिद्भीता इत्यनेन धार्ष्ट्यरहितानां पृथगभिधानादनेन वाक्येन अक्षोभ्याशया हर्षवन्तो विवक्षिता इति व्यञ्जनाय ब्रह्मादीनां सर्वेषां देवानां सेवार्थागमनं प्रथममुच्यते । **उत्कृष्टा** इति तु सुरशब्दव्यञ्जितोक्तिः । विनाशार्थप्रवेशव्यवच्छेदाय-**हृष्टमनस** इत्युक्तम् । वक्ष्यमाणवक्त्रप्रवेशव्यवच्छेदायाह—**त्वत्समीप**मिति । * केचिदिति पृथक्करणस्य समुदायविशेषसाकाङ्क्षत्वात् * सुरसङ्घा इति च प्रसक्तत्वाज्जात्यन्तराननुवादाच्च **तेष्वेवे**त्युक्तम् । **अत्युग्रमत्यद्भुतं चे**ति भीत्यादिहेतुभूतप्रकृताकारकथनम् । * पुष्कलाभिरिति वक्ष्यमाणत्वादिह तदभावो विवक्षित इत्यभिप्रायेण **स्वज्ञानानुगुण**मित्युक्तम् । **स्तुतिरूपाणी**त्यादिना * गृणन्तीत्यस्यापेक्षितकर्माध्याहारः । श्रुत्यादिसिद्धस्तुतिपाठमात्रपरत्वायाह—**उच्चारयन्ती**ति । एतेनापि *केचिदित्यस्य देवविशेषविषयत्वं सिद्धम्, अन्येषां तु भूतानां पलायनस्य वक्ष्यमाणत्वात् । * महर्षीत्यादिना पृथग्व्यपदेशविशेषणादिफलितमपरशब्देन व्यञ्जितम् । महर्षिसङ्घाः—भृग्वादिगणाः ; सिद्धसंघाः—सनकमुख्याः ; महर्षित्वादिसूचितं पुष्कलस्तुतिहेतुमाह—**परावरतत्त्वयाथात्म्यविद** इति । * जितं ते इत्यादिवत् भक्तिपरवशानां मङ्गलाशासनं वा, सेव्यसंदर्शनमात्रे सेवकस्य वक्तव्यः स्वस्तिशब्दः; स्तुतिस्तु तदनन्तरं गुणप्रकर्षोक्तिः । अत एव गोब्राह्मणेभ्यो जगतो वा स्वस्तीति परोक्तं प्रकृतासङ्गतम् । अत्र स्तुतेः पौष्कल्यं प्रामाणिकसर्वेश्वरत्वादिकथनमित्यभिप्रायेणाह—**भगवदनुरूपाभि**रिति ॥ २१ ॥

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२

भा ॥ ऊष्मपाः—पितरः, * ऊष्मभागा हि पितरः (अष्ट. १. ३. १०. ६१) इति श्रुतेः । एते सर्वे विस्मयमापन्नास्त्वां वीक्षन्ते ॥ २२ ॥

ता ॥ देवजातिभेदसमभिव्याहारानुगुणमूष्मपशब्दार्थमाह—**पितर** इति ॥ २२ ॥

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥ २३

भा ॥ **बहीभिर्दंष्ट्राभिरतिभीषणाकारं लोकाः पूर्वोक्ताः प्रतिकूलानुकूलमध्यस्थास्त्रिविधाः सर्वे एवाहं च तवेदमीदृशं रूपं दृष्ट्वा अतीव व्यथिता भवामः ॥ २३ ॥**

ता ॥ रुद्रादित्या इत्यादिना विस्मय उक्तः; * रूपं महत्ते इति भीतिरुच्यते । पूर्वोक्तलोकत्रयशब्दस्यात्रत्यलोकशब्दस्य च प्रत्यभिज्ञयैकविषयत्वं दर्शयति—**लोकाः पूर्वोक्ता** इति । इदमीदृशमिति प्रकारिणः प्रकाराणां च निर्देशः । प्रस्थानप्रस्मरणादिषु प्रशब्दस्य निषेधपरत्वदर्शनात् * प्रव्यथिताः इत्यत्र तद्व्युदासायाह—**अतीवेति** । **व्यथिताः**—चलिताः, भीता वा ॥ २३ ॥

नभस्स्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वा प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥ २४

भा ॥ **नभश्शब्दः * तदक्षरे परमे व्योमन् (ना) * आदित्यवर्णं तमसः परस्तात् (ना) * क्षयन्तमस्य रजसः पराके (यजु. २. २. १२. ६८) * यो अस्याध्यक्षः परमे व्योमन् (अष्ट. २.८.९.६) इत्यादिश्रुतिसिद्धत्रिगुणप्रकृत्यतीतपरमव्योमवाची, सविकारस्य प्रकृतितत्त्वस्य, पुरुषस्य च सर्वावस्थस्य, कृत्स्नस्याश्रयतया नभस्स्पृशमिति वचनात्, * द्यावापृथिव्योरिदमन्तरं हि व्याप्तमिति पूर्वोक्तत्वाच्च । दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा प्रव्यथितान्तरात्मा—अत्यन्तभीतमनाः धृतिं न विन्दामि—देहस्य धारणं न लभे; मनसश्चेन्द्रियाणां च शमं न लभे । विष्णो—व्यापिन्! सर्वव्यापिनमतिमात्रमत्यद्भुतमतिघोरं च त्वां दृष्ट्वा प्रशिथिलसर्वावयवो व्याकुलेन्द्रियश्च भवामीत्यर्थः ॥ २४ ॥**

ता ॥ आकाशपर्यायाणामनेकेषां परस्मिन् पदे प्रयोगमभिप्रेत्याह—**नभश्शब्द** इति । **त्रिगुणे**ति विशेषणात्परमव्योम्नश्शुद्धसत्त्वमयत्वसूचनम्; अत्र प्रसिद्धप्राकृताकाशपरत्वे, गार्गिविद्योक्ताकाशशब्दवन्मूलप्रकृतिविषयत्वे वा को दोष इत्यत्राह—**सविकारस्ये**ति । * इहैकस्थं जगत्कृत्स्नं....यच्चान्यद्द्रष्टुमिच्छसि (७) * बहून्यदृष्टपूर्वाणि पश्य (६) इत्यादिकं ह्युक्तमिति भावः । हेत्वन्तरमाह—**द्यावापृथिव्यो**रिति । प्रसिद्धद्युपृथिव्यादिसर्वलोकव्यापकत्वं हि तत्रोक्तम्; अन्यथा पुनरुक्तिस्स्यात्; अतः प्रकृतिपुरुषादिसर्वाश्रयत्वेषेण नभस्स्पृक्त्वोक्तिः अप्राकृतव्योमस्पर्शित्वविषयेति भावः । अनेकवर्णत्वमिह प्रतिनियतानन्तावयवविशेषवर्तिभिस्सितरक्तादिभिर्वर्णैः किम्मीरत्वम्; तथैव ह्यन्यत्र श्रीविश्वरूपविग्रहस्यानेकवर्णत्वमुक्तम्; अन्नमयाद्यपेक्षया मनोमयस्यान्तरत्वाच्चेतनस्वरूपविषयत्वे प्रव्यथितशब्दादनतिरिक्तप्रयोजनत्वादत्रान्तरात्मशब्देन मनो विवक्षितमित्यभिप्रायेणोक्तम्—**अत्यन्तभीतमना** इति । अचेतनेऽप्यन्तःकरणे भीतिव्यपदेशश्चेतनत्वारोपेण भीत्यतिशयद्योतनार्थः । * न लभे च शर्म (२५) इति सुखस्य वक्ष्यमाणत्वात् धृतिशब्दोऽत्र न प्रीतिपर्यायसुखविशेषविषयः; धारणे च प्रसिद्धोऽयम्; अतो धार्यानिर्देशेऽपि प्रकरणादर्थस्वभावाच्च देहविषयमिदं धारणमित्यभिप्रायेण **देहस्य धारणमित्युक्तम्**। **मनसश्चेन्द्रियाणां चे**त्यपि सामर्थ्याच्छमशब्दप्रसिद्ध्या च लब्धम्; अन्यथा

तत्रापि पुनरुक्तिस्स्यादिति भावः। विष्णुशब्दस्यात्र संज्ञामात्रपरत्वादप्युपयुक्तनिर्वचनसिद्धार्थपरत्वमुचितमित्यभिप्रायेणाह—**व्यापिन्निति**। पिण्डितार्थमाह—**सर्वव्यापिन**मिति। **अतिमात्रं**—महापरिमाणमित्यर्थः॥ २४॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास॥ २५

भा॥ युगान्तकालानलवत्सर्वसंहारे प्रवृत्तान्यतिघोराणि तव मुखानि दृष्ट्वा दिशो न जाने; सुखं च न लभे। जगतां निवास देवेश—ब्रह्मादीनामीश्वराणामपि परममहेश्वर! मां प्रति प्रसन्नो भव। यथाहं प्रकृतिं गतो भवामि, तथा कुर्वित्यर्थः॥ २५॥

ता॥ अवयवान्तरेभ्यो मुखानामतिभीषणत्वव्यञ्जनाय *दंष्ट्रेति श्लोकः; स्वस्यातिभीतत्वप्रदर्शनेन प्रसादनार्थं च। **सर्वसंहारे प्रवृत्तानीति** कालानलसाधर्म्योक्तिः; कालाभिमानिरूपतया तद्व्यापारानुबन्धसूचनं च। **अतिघोराणीति** *दंष्ट्राकरालानीत्यस्यार्थः। करालशब्दो दन्तुरत्वं, विकृतत्वं भीषणत्वं वाऽऽह। जगन्निवासशब्दे बहुव्रीहिविवक्षायाम् *इहैकस्थमित्यादिप्रकृतसर्वाधारत्वानुवादो न स्यात्; तत्पुरुषविवक्षायां तु प्रकृतैकार्थ्यमित्यभिप्रायेणाह—**जगतां निवासे**ति। देवेशशब्देन *तमीश्वराणां परमं महेश्वरम् (श्वे. ६. ७) इति श्रुतिप्रसिद्धसर्वेश्वरेश्वरत्वं यथोपदेशं साक्षात्कृतमिति सूचितमित्यभिप्रायेणाह—**ब्रह्मादीना**मित्यादि। अनेन ब्रह्मादयोऽपि त्वां वीक्षितुं न शक्नुवन्ति, किमुताहं क्षुद्रजन्तुरित्यभिप्रेतमिति व्यञ्जयति—**मां प्रती**ति। किमर्जुने भगवतः क्रोधः, येन प्रसादः प्रार्थ्यत इत्यत्र प्रसादफलमाह—**ययाऽहं**मिति॥ २५॥

भा॥ एवं सर्वस्य जगतः स्वायत्तस्थितिप्रवृत्तित्वं दर्शयन् पार्थसारथी राजवेषच्छन्नाऽवस्थितानां धार्तराष्ट्राणां यौधिष्ठिरेष्वनुप्रविष्टानां चासुरांशानां संहारेण भूभारावतरणं स्वमनीषितं स्वेनैव करिष्यमाणं पार्थाय दर्शयामास। स च पार्थो भगवतः स्रष्टृत्वादिकं सर्वैश्वर्यं साक्षात्कृत्य तस्मिन्नेव भगवति सर्वात्मनि धार्तराष्ट्रादीनामुपसंहारमनागतमपि तत्प्रसादलब्धेन दिव्येन चक्षुषा पश्यन्निदं [चो]प्रोवाच—

अमी[च त्वा]सर्वे धृतराष्ट्रस्य पुत्रास्सर्वैस्सहैवावनिपालसङ्घैः।
भीष्मो द्रोणस्सूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः॥ २६

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः॥ २७

भा॥ अमी धृतराष्ट्रस्य पुत्राः दुर्योधनादयस्सर्वे भीष्मो द्रोणस्सूतपुत्रः—कर्णश्च तत्पक्षीयैरवनिपालसमूहैस्सर्वैरस्मदीयैरपि कैश्चिद्योधमुख्यैस्सह त्वरमाणा दंष्ट्राकरालानि भयानकानि तव वक्त्राणि विनाशाय विशन्ति; तत्र केचिच्चूर्णितैरुत्तमाङ्गैर्दशनान्तरेषु विलग्नास्संदृश्यन्ते॥ २६॥ २७॥

ता॥ *अमी इत्यादिश्लोकपञ्चकार्थोत्थानहेतुं तस्य पूर्वेण संगतिं चाह—**एव**मिति। अवश्यंभावितया **स्वमनीषित**मित्युक्तम्। स्वमनीषितभारावतरणज्ञापनाय भीषणरूपाविष्कारः; तेन च युद्धप्रोत्साहनं सिध्येदिति भावः। वक्ष्यमाणमर्जुनादेरुपकरणमात्रत्वं तद्व्यापाराभावेऽपि शक्यत्वं चाभिप्रेत्य—**स्वेनैव करिष्यमाण**मित्युक्तम्। तदानीं युद्धभूमौ

स्वितमनां वक्ष्यमाणभगवद्वक्त्रप्रवेशस्याघटितत्वया इन्द्रजालादिशङ्कां परिहरति—**स च पार्थ** इति । भगवतस्सर्वगोचरत्वदृष्ट्यादिसाक्षात्कारे धार्तराष्ट्रादिकतिपयजन्तुसंहारो नात्यद्भुत इत्यभिप्रायेणाह—**तस्मिन्नेवेति** । *सर्वे समाप्नोषि ततोऽसि सर्वः (४०) इति वक्ष्यमाणप्रकारेण सर्वशरीरतया सर्वभूतस्सत्यसङ्कल्पो भगवानेव धार्तराष्ट्रादिविलयेऽपि सर्वविधं कारणम्; लौकिका[नाम]तीन्द्रियेण रूपेण ग्रसन् भगवानेव प्रधानतमो हेतुः, दृष्टास्त्वर्जुनशरादयः काक्तालीयवन्निमित्तमात्रमिति भावः । **अनागतमपी**त्यादि—लौकिकं हि प्रत्यक्षं वर्तमाननियतमिति भावः । **इद**मिति—धार्तराष्ट्रादिविशेषविषयमित्यर्थः । **यद्वा वर्तिष्यमाणमपि** साक्षात्काराद्वर्तमानवद्व्यपदिशतीति भावः । अस्मदीयैरिति पृथगभिधानादवनिपालसङ्घैरित्येतत्परपक्षविषयमिति व्यञ्जनाय—**तत्पक्षीयै**रित्युक्तम् । दुर्योधनादीनां सर्वेषामिव तत्पक्षीयाणामपि सर्वेषां वधस्य युद्धे करिष्यमाणत्वात् **सर्वै**रित्युक्तम् । **अस्मदीयै**रिति वचनात्स्वपक्षस्थानामपि वधस्त्वेषां चावस्थानं विवक्षितम् । परेषु सर्वैरिति विशेषणात्स्वकीयेषु योधमुख्यैरित्युपादानाच्च पाण्डवपक्षीयाणां युद्धे निश्शेषवधाभावः **कैश्चि**दित्युक्तः । शीघ्रं संहरणस्य तत्तदपराधत्वरामूलत्वं त्वरमाणपदेन विवक्षितम् । यद्वा समरसंरम्भादिस्सर्वोऽपि व्यापारस्तेषां स्ववधार्थ इति भावः । *भयानकानीति पृथगुक्तत्वात्करालशब्दोऽत्र सान्तरालत्वविकृतत्वपरः, दन्तुरत्वपरो वा; *करालं दन्तुरे वक्त्रे इत्यादि । *अमी च त्वेत्यत्र क्रियानिर्देशाभावेऽपि *मा भवन्तमनलः पवनो वेत्यादिष्विवाध्याहारेणैव क्रियान्वयो गुण एव । **यद्वा विशन्ती**ति वक्ष्यमाणपदमत्रापि पठितव्यम् । अथवा दृष्ट्वा प्रव्यथितान्तरात्मानो धृतिं न विन्दन्तीति विपरिणतानुषङ्गेण वाक्यसमाप्तिः; न पुनः श्लोकद्वयमप्येकवाक्यतया विवक्षितम्, पूर्वश्लोके त्वेति कर्मतया निर्देशात्परत्र वक्त्राणि त इत्युक्तेः । *अमी सर्वे धृतराष्ट्रस्य पुत्राः इति वा भाष्याभिप्रेतः पाठः, *दुर्योधनादयस्सर्वे इत्युक्तेः; अत एव हि विशन्तीत्यनेनैकवाक्यतया व्याख्यातम् । रक्षणार्थं भगवति प्रवेशव्युदासाय वक्ष्यमाणपरामर्शात् **विनाशाये**त्युक्तम् । **तत्र** धार्तराष्ट्रादिष्वित्यर्थः । यद्वा तेषु वक्त्रेष्वित्यर्थः । केचिद्विनाशाय विशन्ति; केचित्तु विनष्टास्संदृश्यन्ते इत्युक्तं भवति ।

*विद्धयेनमिह वैरिणमित्यस्यानन्तरं (३. ३७) **यादवप्रकाशो**यैः *इह केचित्त्वश्लोकान्पठन्तीति विलिख्य व्याख्यातम्—

अर्जुन उवाच—भवत्येष कथं कृष्ण कथं चैष विवर्धते । किमात्मकः किमाचारस्तन्ममाचक्ष्व पृच्छतः ॥ १ ॥

श्रीभगवानुवाच—एष सूक्ष्मः परश्शत्रुर्देहिनामिन्द्रियैस्सह । सुखं तत्र इवासीनो मोहयन्पार्थ तिष्ठति ॥ २ ॥
कामक्रोधमयो घोरस्तम्भहर्षसमुद्भवः । अहङ्कारोऽभिमानात्मा दुस्तरः पापकर्मभिः ॥ ३ ॥
हर्षमस्य निवर्त्यैष शोकमस्य ददाति च । भयं चास्य करोत्येष मोहयंश्च मुहुर्मुहुः ॥ ४ ॥
स एष कलुषः क्षुद्रश्छिद्रापेक्षी धनञ्जय । रजःप्रवर्तितो मोहान्मानुषाणामुपद्रवः ॥ ५ ॥ इति ।

अत्र च

*नानारूपैः पुरुषैर्वध्यमाना विशन्ति ते वक्त्रमचिन्त्यरूपम् । यौधिष्ठिरा धार्तराष्ट्राश्च योधाश्शस्त्रैः कृत्ता विविधैस्सर्व एव ॥
दिव्यानि कर्माणि तवाद्भुतानि पूर्वाणि पूर्वेऽप्यृषयस्तुवन्ति । नान्योऽस्ति कर्ता जगतस्त्वमेको धाता विधाता च विभुर्भवश्च ॥
तवाद्भुतं किंनु भवेदसह्यं किंवा शक्यं परतः कीर्तयिष्ये । कर्तासि लोकस्य यतस्त्वयं विभो त्वत्तस्सर्वं त्वयि सर्वं त्वमेव ॥
अत्यद्भुतं कर्म न दुष्करं ते कर्मोन्मानं न च विद्यते ते । न ते गुणानां परिमाणमस्ति न तेजसो नापि बलस्य नर्द्धेः ॥ इति ।

अत्र *दिव्यानीत्यादयश्श्लोका **नारायणार्यै**रपि लिखिताः । *प्रजापतिस्त्वं प्रपितामहश्च (३२) इत्यस्यानन्तरमन्य श्लोकः

*अनादिमानप्रतिमप्रभावस्सर्वेश्वरस्सर्वमहाविभूतिः । न हि त्वदन्यः कश्चिदस्तीह देव लोकत्रये दृश्यतेऽचिन्त्यकर्मा ॥ इति । एते श्लोकास्सन्ति नवेति देवो जानाति । पूर्वव्याख्यातृभिरनुदाहृतत्वादध्ययनप्रसिद्ध्यभावाच्च भाष्यकारैरनादृताः । नच गीताशास्त्रस्य श्लोकसङ्ख्या व्यासादिभिरुक्ता । अर्वाचीनास्त्वविश्वसनीया इति ॥ २६ ॥ २७ ॥

यथा नदीनां बहवोऽम्बुवेगास्समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८

यथा प्रदीप्तज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २९

भा ॥ एते राजलोका बहवो नदीनामम्बुप्रवाहाः समुद्रमिव, प्रदीप्तज्वलनमिव च शलभाः, तव वक्त्राण्यभिविज्वलन्ति स्वयमेव त्वरमाणा आत्मनाशाय विशन्ति ॥ २८ ॥ २९ ॥

ता ॥ * त्वरमाणाः इत्युक्तस्वव्यापारमूलविनाशत्वे, सर्वेषां चैकस्मिन्नेवोपसंहारे तस्य चैकस्य सर्वसंहारानुगुणसामान्याकारेणावस्थानमात्रे च दृष्टान्तद्वयं श्लोकद्वयेनोच्यते—**यथे**ति । पाण्डवादीनां सर्वेषामपि विनाशानभिधानाज्जगत्प्रतपन्तीत्येतावन्मात्रस्य चानन्तरमुक्तेः * नरलोकवीरा इत्युक्त एवार्थो * लोका इत्युक्त इत्यभिप्रायेण **एते राजलोका** इति सङ्कलय्य कथितम् । * अम्बुवेगा इत्यत्र वेगशब्दस्यात्र वेगवद्विषयत्वव्यञ्जनाय प्रवाहशब्दः । पतङ्गशब्दस्यानेकार्थस्यात्र शकुन्तादिविषयत्वव्यावर्तनाय **शलभा** इत्युक्तम् । * अभिविज्वलन्तीति पदं पूर्वश्लोकस्थमपि समनन्तरश्लोकगतज्वलनदृष्टान्तौपयिकमिति व्यञ्जनाय ज्वलनदृष्टान्तादनन्तरं पठितम् । * समृद्धवेगा इत्येतत्प्रागुक्तत्वरमाणपदसमानार्थमित्यभिप्रेत्य **स्वयमेव त्वरमाणा** इत्युक्तम् । पतङ्गानां प्रदीपादिषु पक्षवेगादिभिर्नाशकत्वस्यापि संभवात्तद्व्यवच्छेदः * प्रदीप्तज्वलनमिति वचनेन विवक्षित इति व्यञ्जनाय—**आत्मनाशाये**त्युक्तम् । नदीप्रवाहस्य नाशो नाम पृथग्भूतप्रवाहाकारत्यागः, येन नदीप्रवाहव्यपदेशस्तस्मिन्नेव द्रव्ये निवर्तते ; पतङ्गानां तु द्रव्यान्तरव्यपदेशयोग्यभस्मतापत्तिरिति प्रकारभेदप्रदर्शनाय दृष्टान्तद्वयाभिधानम् । यद्वा स्वेच्छया निवर्तितुमशक्यमित्येवमभिप्रायः प्रवाहदृष्टान्तः ; तथाविधस्य विनाशस्य स्वेच्छामूलव्यापारहेतुकत्वव्यञ्जनाय पतङ्गदृष्टान्तः । ईश्वरस्यापि च सर्वप्रवेशेऽप्यपरिपूर्णत्वविवक्षया समुद्रनिदर्शनम्, सहसा विध्वंसनाय तु ज्वलनोदाहरणम् ॥ २८ ॥ २९ ॥

लेलिह्यसे ग्रसमानस्समन्ताल्लोकान् समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३०

भा ॥ राजलोकान् समग्रान् ज्वलद्भिर्वदनैर्ग्रसमानः कोपवेगेन तद्रुधिरावसिक्तमोष्ठपुटादिकं लेलिह्यसे—पुनःपुनर्लेहने करोषि । तवातिघोरा भासः—रश्मयः तेजोभिः—स्वकीयैः प्रकाशैर्जगत्समग्रमापूर्य प्रतपन्ति ॥ ३० ॥

ता ॥ ईश्वरः किं संहरणेऽत्यन्तनिर्व्यापारः, येन * स्वयमेव त्वरमाणाः इत्युच्यत इत्यस्योत्तरं * लेलिह्यसे इति श्लोकेनोच्यते । संहरणादेर्निदानं तत्तच्चेतनानां व्यापारविशेषः ; तत्तदुपाधिककोपादिविशिष्टस्तु भगवान् संहृत्यादिकं करोतीति भावः । राजलोकानिति पूर्ववद्व्याख्यम् । समग्रान्—युद्धाय समवेतानित्यर्थः । * लेलिह्यसे इत्यस्य सङ्गिहीर्षानुभावत्वव्यञ्जनाय—**कोपवेगेने**त्युक्तम् । **तद्रुधिरे**त्यादिना ग्रसनलेहनाभ्याम् अर्थसिद्धमुच्यते । क्रियासमभि-

हारे हि यङो विधानम्; पौनःपुन्यं भृशार्थो वा क्रियासमभिहार इत्यभिप्रायेणाह—**पुनःपुनर्लेहनमिति**। भास्तेज-श्शब्दयोः पौनरुक्त्यशङ्काव्युदासाय **रश्मय** इति, **स्वकीयैः प्रकाशैरिति** चोक्तम्। **समग्रं**—सर्वमित्यर्थः। **प्रतपन्ति**—संतापयन्ति, प्रसनार्थं पचन्तीति भावः। यद्वा ब्रह्मादीनामपि पश्यतां दुस्सहत्वमात्रे तात्पर्यम्॥ ३०॥

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद।
विज्ञातुमिच्छामि भवन्तमाद्यं नहि प्रजानामि तव प्रवृत्तिम्॥ ३१

भा॥ *दर्शयात्मानमव्ययम् (४) इति तवैश्वर्यं निरङ्कुशं साक्षात्कर्तुं प्रार्थितेन भवता निरङ्कुशमैश्वर्यं दर्शयताऽतिघोररूपमिदमाविष्कृतम्। अतिघोररूपः को भवान्, किं कर्तुं प्रवृत्त इति भवन्तं ज्ञातुमिच्छामि। तवाभिप्रेतां प्रवृत्तिं न जानामि। एतदाख्याहि मे। नमोऽस्तु ते देववर प्रसीद—नमस्तेऽस्तु सर्वेश्वर। एवं कर्तुमनेनाभिप्रायेणेदं संहर्तृ रूपमाविष्कृतमित्युक्त्वा प्रसन्नरूपश्च भव॥ ३१॥

ता॥ एवमत्यन्तघोराकारदर्शनं सोढुमशक्तो धनञ्जयस्त्वसर्वैश्वर्यप्रकाशनप्रवृत्तस्य तादृशघोररूपाविष्कारे तात्पर्य-कथनं पुनः प्रसन्नरूपपरिग्रहार्थं प्रसादं चापेक्षते—*आख्याहीति श्लोकेन। भक्तस्य मे भयानकरूपप्रदर्शने कोऽभि-प्राय इत्यज्ञानात्प्रश्न इत्याह—**दर्शयेत्यादिना**। उपदेशसाक्षात्काराभ्यां भगवतः प्रतिपन्नत्वात् *को भवानिति प्रश्नो न स्वरूपसंज्ञादिविषयः, *नहि प्रजानामि तव प्रवृत्तिमिति प्रवृत्तिप्रश्नाभिप्रायेणाज्ञातांशश्चात्रैव निर्दिश्यत इति तद्विषय-जिज्ञासयैवायं प्रश्नो युक्त इत्याभिप्रायेण **किं कर्तुं प्रवृत्त** इत्युक्तम्। कृष्णरूपप्रच्छन्नागत[तदात्वाभिवृद्ध] दैत्याभिव्यक्त-स्वरूपान्तरादिशङ्कयाऽयं प्रश्न इति कैश्चिदुक्तमेतेन निरस्तम्। तदानीं परिदृश्यमानविग्रहादिप्रवृत्तिमात्रव्युदासाय **अभिप्रेतामित्युक्तम्**। देववरशब्देन ब्रह्मरुद्राद्यपेक्षयाऽपि समुत्कृष्टत्वं वदताऽत्यन्तोत्कृष्टविषये स्वरसभावित्वं नमस्कारस्य द्योत्यत इत्यभिप्रायेण **सर्वेश्वर**शब्दः। यथोक्तमहिर्बुध्न्येन—*नन्तव्यः परमशेषी शेषा नन्तार ईरिताः। नन्तृनन्तव्य-भावोऽयं न प्रयोजनपूर्वकः॥ (५२. ७) इति। श्लोकस्य पिण्डितार्थमाह—**एवं कर्तुमिति**। *प्रसीदेत्यनेन फलित-मुच्यते—**प्रसन्नरूपश्चेति**। एतदेव हि पश्चात् *तदेव मे दर्शय रूपम् (४५) इत्यादौ प्रपञ्चयिष्यते॥ ३१॥

भा॥ आश्रितवात्सल्यातिरेकेण विश्वैश्वर्यं दर्शयतो भवतो घोररूपाविष्कारे कोऽभिप्राय इति पृष्टो भगवान् पार्थसारथिस्स्वाभिप्रायमाह—पार्थोद्योगेन विनाऽपि धार्तराष्ट्रप्रमुखमशेषं राजलोकं निहन्तुमहमेव प्रवृत्त इति ज्ञापनाय मम घोररूपाविष्कारः, तज्ज्ञापनं च पार्थमुद्योजयितुमिति।

श्रीभगवानुवाच—

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वा न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः॥ ३२

भा॥ कलयति—गणयतीति कालः; सर्वेषां धार्त्तराष्ट्रप्रमुखानां राजलोकानामायुरवसानं गणयन्नहं तत्क्षयकृत् घोररूपेण प्रवृद्धो राजलोकान् समाहर्तुम्—आभिमुख्येन संहर्तुमिह प्रवृत्तोऽस्मि। अतो मत्सङ्कल्पादेव त्वामृतेऽपि—त्वदुद्योगमृतेऽपि एते धार्तराष्ट्रप्रमुखास्तव प्रत्यनीकेषु येऽवस्थिता योधाः, ते सर्वे न भविष्यन्ति—विनङ्क्ष्यन्ति॥ ३२॥

ता ॥ * कालोऽस्मीत्यादिश्लोकत्रयस्यार्थं संकलय्यादौ संगमयति—**आश्रितेत्यादिना** । **आश्रितवात्सल्यातिरेकेणेत्यनेन** घोररूपाविष्कारानौचित्यं द्योत्यते । * एवं कर्तुमनेनाभिप्रायेणेति निर्दिष्टयोर्निःश्रेणिकाक्रमेणोत्तरं ददाति—**पार्थोद्योगेनेत्यादिना** । कालशब्दस्यात्र कलामुहूर्तादिमयकालद्रव्यमात्रपरत्वे भगवता सामानाधिकरण्यायोगादिन्द्रप्राणाधिकरणन्यायेन तदन्तर्यामिविषयत्वं वा, आकाशप्राणाधिकरणन्यायेन यौगिकार्थत्वं वा, सृष्टिस्थितिकालव्यावृत्त[सर्व]संहर्तृकालाभिमानित्वविशिष्टभगवत्स्वरूपानुसंधानासाधारणं ध्येयविग्रहविशेष[विशिष्ट]निष्ठतापरत्वं वा स्वीकार्यम् । तत्र त्रिष्वपि कालशब्दस्य यौगिकोऽर्थः प्रतीयमानः प्रकृतापेक्षितत्वादपरित्याज्य इत्यभिप्रायेणाह—**कलयतीति** । संबन्धाद्यर्थादपि गणनस्यात्र संहरणानुगुणत्वात् **गणयतीत्युक्तम्** । प्रकृतविशेषपरतया योजयति—**सर्वेषामिति** । लोकशब्दस्य राजलोकशब्देन व्याख्यानं पूर्ववत् । * प्रवृद्ध इति रूपमहत्त्वं विवक्षितमित्याह—**घोररूपेण प्रवृद्ध इति** । यद्वा ग्रसनोन्मुखावस्थ इति भावः । * समाहर्तुमिति पदेन समुदायकरणादिकं न विवक्षितम्, प्रस्तुतासंगतत्वात्; नापि संहरणमात्रं * लोकक्षयकृदित्यनेन पुनरुक्तिप्रसङ्गात्; अतस्संहरणमेव मध्यनिविष्टेनाप्युपसर्गान्तरेण विशेष्यत इत्याह—**आभिमुख्येनेति** । अपरोक्षत इत्यर्थः । भृत्यैश्शत्रुनिरसनवन्न परोक्षस्संहारोऽयमिति भावः । आभिमुख्यमात्रमेव वा संहारहेतुरिति भावः । * मनसैव जगत्सृष्टिं संहारं च करोति यः । तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः ॥ (वि. ५. २२. १५) इत्याद्यनुसारेणाह—**अतो मत्संकल्पादेवेति** । निमित्तभूतव्याप्रियमाणाकारस्त्वमिति विवक्षित इत्यभिप्रायेण—**त्वदुद्योगमृतेऽपीत्युक्तम्** । न भविष्यन्तीत्युक्ते नोत्पत्स्यन्त इति प्रतीतिस्स्यादिति तद्व्यवच्छेदायोत्तरकालसत्तानिषेधपरतामाह—**विनङ्क्ष्यन्तीति** ॥ ३२ ॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३

भा ॥ तस्मात्त्वं तान् प्रति युद्धायोत्तिष्ठ, तान् शत्रून् जित्वा यशो लभस्व : धर्म्यं राज्यं च समृद्धं भुङ्क्ष्व । मयैवैते कृतापराधाः पूर्वमेव निहताः—हनने विनियुक्ताः ; त्वं तु तेषां हनने निमित्तमात्रं भव ; मया हन्यमानानां शस्त्रादिस्थानीयो भव। सव्यसाचिन् ; * षच समवाये ; सव्येन शरसचनशीलस्सव्यसाची ; सव्येनापि करेण शरसमवायकरः ; करद्वयेन योद्धुं समर्थ इत्यर्थः ॥ ३३ ॥

ता ॥ यदि मदुद्योगमृतेऽपि धार्तराष्ट्रादयो न भविष्यन्ति ; तर्हि किमर्थं मामुद्योजयसीत्यत्रोत्तरं—* **तस्मात्त्वमिति श्लोकः** । मद्भक्तस्य ते जययशोराज्यादिलाभार्थं त्वदुद्योजनमिति परिहाराशयः । * जित्वा शत्रूनिति यशोराज्ययोस्साधारणहेतुः । वैषम्यनैर्घृण्यपरिहारेण जिघांसाहेतुप्रदर्शनार्थं **कृतापराधा** इत्युक्तम् । ननु पूर्वमेव निहता इति प्रत्यक्षविरुद्धम् ; तथा सति तद्धननार्थं निमित्तमात्रं भवेत्युद्योजनं च व्यर्थमित्यत्राह—**हनने विनियुक्ता** इति । हनने विनियोगस्तदर्थसंकल्पः ; हन्तव्यत्वेन संकल्पिता इत्यर्थः । सङ्कल्पस्यामोघत्वात्फलसिद्ध्यविनाभावेन निहतत्वोक्तिः । एवमपि निष्ठार्थो घटते ; ईश्वरसंकल्पप्रभृति फलपर्यन्ते क्रियासमुदाये संकल्पांशस्य निष्पन्नत्वादेकदेशे च समुदायशब्दप्रयोगोपपत्तेस्स्थालोकाष्ठादिव्यापारेषु प्रत्येकं पचतिप्रयोगवत् । अत्राशंसायामादिकर्मणि क्त इत्येके । * **निमित्तमात्रमित्युपादानत्वनिषेधः प्रतीयते ; तत्र च प्रसङ्गाभावात्प्रतिषेधोऽपि नोपपद्यत इत्यत्राह—मया हन्यमानानामिति । मयैवोपकरणीकृतेन तत्प्रतिपत्तिमता भवता पापनैर्घृण्यपराजयादिशङ्का न कार्येति भावः । मात्रशब्दः प्राधान्यव्यवच्छे-**

दार्थ इत्यभिप्रायेणाह—**शस्त्रादिस्थानीय** इति । सव्यसाचिपदेन संबोधनं युद्धौपयिकासाधारणातिशयद्योतनार्थमित्याभिप्रायेण व्युत्पादयति—**षच समवाये** इत्यादिना । सव्यशब्दस्य करणार्थतां धातोः प्रकृतोचितं कर्मविशेषं ताच्छील्यार्थतां च प्रत्ययस्य दर्शयति—**सव्येनेति** । समवायोऽत्र शरसंधानम् । परिसंख्यान्यायात् दक्षिणेन शरसमवायं कर्तुमशक्त इति शङ्कामपनयन् सव्यशब्दस्य पादादिसाधारणस्य प्रस्तुतौपयिकं विशेष्यमप्याह—**सव्येनापि करेणेति** । अयोगव्यवच्छेदार्थं सव्योपादानम्, न त्वन्ययोगव्यवच्छेदार्थमिति भावः । फलितमाह—**करद्वयेनेति** । भूभारनिर्हरणार्थं तवेदृशं सामर्थ्यं मया संकल्पितमिति समर्थशब्दाभिप्रायः ॥ ३३ ॥

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथाऽन्यानपि योध[वीरान्]मुख्यान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान् ॥ ३४

भा ॥ द्रोणभीष्मकर्णादीन् कृतापराधतया मयैव हनने विनियुक्तान् त्वं जहि—त्वं हन्याः । एतान् गुरून् बन्धूंश्चान्यानपि भोगसक्तान् कथं हनिष्यामीति मा व्यथिष्ठाः—तानुद्दिश्य धर्माधर्मभयेन बन्धुस्नेहेन कारुण्येन च मा व्यथां कृथाः । यतस्ते कृतापराधा मयैव हनने विनियुक्ताः; अतो निर्विशङ्को युध्यस्व । रणे सपत्नान् जेतासि—जेष्यसि । नैतेषां वधे नृशंसतागन्धः; अपितु जय एव लभ्यत इत्यर्थः ॥ ३४ ॥

ता ॥ अर्जुनस्यास्थानस्नेहकारुण्यधर्माधर्मभयमूलं * कथं भीष्मम् (२. ४) इत्यादिकं साक्षात्प्रतिवक्ति—**द्रोणं चेति** । * मा व्यथिष्ठाः इत्यत्र पूजार्हान् मन्वान इति वाक्यशेषाभिप्रायेणाह—**गुरूनिति** । **गुरून् बन्धून् भोगसक्तानिति** पदैर्धर्माधर्मभयबन्धुस्नेहकारुण्यानां हेतुप्रदर्शनम् । अत्र च धर्माधर्मभयादिर्व्यर्थाहेतुरित्याह—**तानुद्दिश्येति** । धर्माधर्मभयादिकं तु पृष्ठतः करोमि; द्रोणादयो हि तैस्तैर्हेतुभिर्दुर्जयाश्शत्रवः; युद्धसिद्धिश्च चञ्चलेति भीरुरस्मीति यदि ब्रवीषि; तर्हि मा भैषीरित्यभिप्रायेण * मा व्यथिष्ठाः, * युध्यस्वेत्यादिकमुच्यत इत्याह—**यतस्त** इति । * जेतासीत्यत्र द्वितीयया तृज[न्तता]न्तायोगात्तनश्च भविष्यदर्थत्वासिद्धेर्लुडन्ततयैकपद्यम्; तत्रानद्यतनविवक्षाऽपि नास्तीत्यभिप्रायेणाह—**जेष्यसीति** । शङ्कितानिष्टनिवृत्तावितिष्टप्राप्तौ च श्लोकतात्पर्यमित्याह—**नैतेषामिति** । अर्जुनस्यापजयशङ्काभावात् * मा व्यथिष्ठाः इत्यादिकमारम्भोक्तनृशंसत्वशङ्कापरिहारार्थमिति भावः । अनुकूलेषु ह्यानृशंस्यं शस्यत इत्यभिप्रायेण सपत्नशब्द इति चाभिप्रेतम् ॥ ३४ ॥

सञ्जय उवाच—

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५

भा ॥ एतदाश्रितवात्सल्यजलधेः केशवस्य वचनं श्रुत्वा अर्जुनस्तस्मै नमस्कृत्य भीतभीतो भूयस्ते प्रणम्य कृताञ्जलिर्वेपमानः किरीटी सगद्गदमाह ॥ ३५ ॥

ता ॥ * एतच्छ्रुत्वेति श्लोके नमस्कारद्वयहेतुं विप्रकीर्णानां पदानामुचितान्वयप्रकारं च दर्शयति—**एतदाश्रितेति** । वचनश्रवणमात्रादवश्यस्य प्रथमो नमस्कारः; भीतभीतस्य वक्ष्यमाणवाक्यप्रारम्भार्थौ पुनःप्रणामाञ्जली, अपेक्षाशब्देन स्वविग्रहादिप्रकाशनबलत्वाभिप्रायस्याविष्कारमपि वात्सल्येनैव कृतवानित्यभिप्रायेणाह—**आश्रितवात्सल्यजलधे-**

रिति । ब्रह्मेशरक्षकत्वादिभिः केशवः ; आश्रितसंसारकर्षणादिभिः कृष्णः । भगवच्चरणारविन्दवन्दनेन किरीटजुष्टं शिरः कृतार्थतां गतमित्यभिप्रायेणात्र किरीटिपदप्रयोगः । * भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् (भाग. २. ३. २१) इति हि महर्षिणोक्तम् ॥ ३५ ॥

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥ ३६

भा ॥ स्थाने—युक्तम् ; यदेतद्युद्धदिदृक्षयाऽऽगतमशेषदेवगन्धर्वसिद्धयक्षविद्याधरकिन्नरकिंपुरुषादिकं जगत्, त्वत्प्रसादात् त्वां सर्वेश्वरमवलोक्य।तव प्रकीर्त्या सर्वं प्रहृष्यति, अनुरज्यते च। यच्च त्वामवलोक्य रक्षांसि भीतानि सर्वा दिशः प्रद्रवन्ति। सर्वे सिद्धसंघाः—सिद्धाद्यनुकूलसंघाः नमस्यन्ति च। तदेतत्सर्वं युक्तमिति पूर्वेण संबन्धः ॥ ३६ ॥

ता ॥ * स्थाने हृषीकेशेति श्लोकश्रीविष्णुपञ्जरादिषु विनियुक्तो मन्त्रः प्रसिद्धः । * स्थाने इत्यस्य अधिकरणार्थताप्रतीतिव्युदासायाह—**युक्तमिति** । अत्र जगच्छब्दविवक्षितार्थं तस्य प्रकीर्तिमूलप्रहर्षनिदानं च व्यनक्ति—**यदेतदिति** । प्रहृष्यतीत्यनेन प्रियातिथिलाभादाविवाक्षिप्तमनःप्रीतिर्विवक्षिता । * अनुरज्यते इति तु पित्रादिषु पुत्रादेरिव स्नेह इत्यपुनरुक्तिः । **त्वामवलोक्येत्यनेन** रक्षसां भीतिहेतुप्रदर्शनम् । प्रकीर्त्येत्यस्यानुषङ्गस्तु विरुद्धत्वादयुक्तः । अन्यकर्तृकप्रकीर्त्येति तु कल्पनागौरवम् । अवलोकनं तु * वीक्षन्ते त्वाम् (२२) इति देवासुरादीनां सर्वेषामुक्तमिति भावः । सिद्धशब्दोऽत्रानुकूलवर्गप्रदर्शनार्थ इत्यभिप्रायेण **सिद्धाद्यनुकूलसंघा** इत्युक्तम् ॥ ३६ ॥

भा ॥ युक्ततामेवोपपादयति—

कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।

भा ॥ महात्मन्, ते—तुभ्यं गरीयसे ब्रह्मणो—हिरण्यगर्भस्यापि आदिभूताय कर्त्रे हिरण्यगर्भादयः कस्माद्धेतोर्न नमस्कुर्युः ॥ ३६ ॥

ता ॥ * कस्मादित्यादिकं पूर्वेण संगमयति—**युक्ततामिति** । * ते इत्यस्य प्रथमाबहुवचनत्वभ्रमव्युदासाय **तुभ्यमित्युक्तिः** । प्रणतिकर्तारस्त्वर्थसिद्धा अनुषक्ता एवेति भावः । ब्रह्मशब्दस्यानेकार्थेषु प्रयोगादिह सर्वप्रणन्तव्यत्वोपयोगाय हिरण्यगर्भपदेन व्याख्या । * आदिकर्त्रे इति सविशेषणनिर्देशेन व्यवच्छेद्यभूतनूतनहिरण्यगर्भकर्तृसंभावनाभ्रमव्युदासाय **आदिभूतायेति** व्यस्योक्तम् । कर्तृशब्देन निमित्तत्वस्योक्तत्वात् आदिशब्द उपादानत्वपरः; स्वस्य कारणान्तरनिषेधार्थो वा । नमश्शब्दयोगवन्नमनमात्रयोगेऽपि चतुर्थी विधत इति ज्ञापनाय **नमस्कुर्युरित्युक्तम्** । * पञ्चशिखाय तथेश्वरकृष्णायैतान्नमस्यामः (सां. कौ) इत्यादिवत् ॥ ३६ ॥

अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७
त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।

भा ॥ अनन्त देवेश जगन्निवास त्वमेवाक्षरम्, न क्षरतीत्यक्षरं जीवात्मतत्त्वम् । * न जायते म्रियते वा विपश्चित् (क. २. १८) इत्यादिश्रुतिसिद्धो जीवात्मा हि न क्षरति । सदसच्च त्वमेव—सदसच्छब्दनिर्दिष्ट

कार्यकारणभावेनावस्थितं प्रकृतितत्त्वम्, नामरूपविभागवत्तया कार्यावस्थं सच्छब्दनिर्दिष्टं तदनर्हतया कारणावस्थमसच्छब्दनिर्दिष्टं च त्वमेव। तत्परं यत्—तस्मात्प्रकृतेः प्रकृतिसंबन्धिनश्च जीवात्मनः परम्—अन्यन्मुक्तात्मतत्त्वं यत्, तदपि त्वमेव। अतस्त्वमादिदेवः, पुरुषः पुराणः, त्वमस्य विश्वस्य परं निधानम्—निधीयते त्वयि विश्वमिति त्वमस्य विश्वस्य परं निधानम्; विश्वस्य शरीरभूतस्यात्मतया परमाधारभूतस्त्वमेवेत्यर्थः ॥ ३७॥

ता॥ *त्वमक्षरमिति (१८) प्रागप्युक्तत्वादत्र * त्वमक्षरमिति तदतिरिक्तार्थपरत्वमुचितम्; *तत्परमित्यस्य सामर्थ्याच्चात्राक्षरसदसच्छब्दानामवरतत्त्वविषयत्वं न्याय्यम्; तत्र च भावाभावशब्दाभिलप्यविकारयोगितया सदसच्छब्दयोरचित्परत्वं निर्विकारतयाऽक्षरशब्दस्य जीवात्मविषयत्वं चोचितमित्यभिप्रायेणाह—**न क्षरतीति**। जीवस्वरूपस्य निर्विकारत्वे श्रुतिं दर्शयति—**न जायत** इति। कार्यकारणयोस्सदसच्छब्देन व्यपदेशः * असद्वा इदमग्र आसीत्, ततो वै सदजायत (आ. ७) इत्यादिश्रुतिसिद्ध इत्यभिप्रायेण कार्यकारणभावकथनम्। एकस्मिन्नेव द्रव्ये सदसच्छब्दप्रयोगनिदानमाह—**नामरूपे**ति। * अक्षरं सदसदिति निर्दिष्टोभयपरामर्शी तच्छब्दः। विशेषकाभावात्तिलतैलदारुवह्न्यादिवत् परस्परमिलिततदुभयापेक्षया परत्वं च मुक्तात्मनः प्रसिद्धमिति * सदसत्तत्परं यदित्यनूद्यत इत्यभिप्रायेण **मुक्तात्मतत्त्वमित्युक्तम्**। प्रकृतिपुरुषशरीरकत्वं मुक्तात्मनस्तादर्थ्यं च कारणत्वसाधकमित्याह—**अत** इति। सर्वतत्त्वात्मकत्वादित्यर्थः। जगन्निवासशब्देन जगन्निवासो यस्येति विग्रहः। अतो निधानशब्देनात्राधारत्वमेवानुक्तं विवक्षितमिति प्रदर्शनायाधिकरणव्युत्पत्तिं दर्शयति—**निधीयते त्वयी**ति। तेन * त्वमक्षरमित्यादिसामानाधिकरण्यकारणं विश्वशरीरित्वं विवक्षितमित्याह—**विश्वस्य शरीरभूतस्ये**ति। एतेन निधानशब्दत्यात्राव्यक्तपरत्वं कैश्चिदुक्तं निरस्तम्॥ ३७॥

वेत्ताऽसि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप॥ ३८

भा॥ जगति सर्वो वेदिता वेद्यं च सर्वं त्वमेव, एवं सर्वात्मतयाऽवस्थितस्त्वमेव परं च धाम—स्थानं प्राप्यस्थानमित्यर्थः। त्वया ततं विश्वमनन्तरूप—त्वयाऽऽत्मत्वेन विश्वं—चिदचिन्मिश्रं जगत् ततं—व्याप्तम्॥ ३८॥

ता॥ * वेत्तासीत्यादौ परमात्मनो वेदितृत्वादिमात्रविधानेऽतिशयाभावात्कारणावस्थद्रव्यान्तर्यामित्वस्य चोक्तत्वात्, कार्यावस्थज्ञातृज्ञेयान्तर्यामित्वमेवात्र विवक्षितमित्यभिप्रायेणाह—**जगति सर्वो वेदिता वेद्यं चे**ति। धामशब्दस्थानेकार्थस्यापि स्थाने प्रसिद्धिप्रकर्षात्स एवार्थ उचितः। स्थानं च प्राप्यमिति प्रसिद्धम्। अतः परत्वेन विशेषितप्राप्यत्वमेवात्र विवक्षितमित्यभिप्रायेणाह—**प्राप्यस्थान**मिति। यद्वा परमप्राप्यं भगवदसाधारणं स्थानं विवक्षितं स्यात्; तेनापि पूर्ववत्सामानाधिकरण्यव्यपदेशः। आमनन्ति च तदप्राकृतं स्थानम् * अरश्च ह वै प्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि। तदैरंमदीयं सरः तदश्वत्थस्सोमसवनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमितम् (छा. ८. ५. ३) इति, तथा * सहस्रस्थूणे विमिते दृढ उभे यत्र देवानामधिदेव आस्ते (तव) इति। सामान्यतो विशेषतश्च प्रवृत्तयोः पूर्वोत्तरसामानाधिकरण्ययोर्मध्यस्थेन * त्वया ततमित्यादिना शरीरात्मभाव एव निबन्धनमिति स्पष्टमुच्यत इत्यभिप्रायेणाह—**त्वयाऽऽत्मत्वेने**ति॥ ३८॥

भा॥ अतस्त्वमेव वाच्यादिशब्दवाच्य इत्याह—

वायुर्यमोऽग्निर्वरुणश्शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।

भा ॥ सर्वेषां प्रपितामहस्त्वमेव, पितामहादयश्च ; सर्वासां प्रजानां पितरः प्रजापतयः, प्रजापतीनां पिता हिरण्यगर्भः प्रजानां पितामहः, हिरण्यगर्भस्यापि पिता त्वं प्रजानां प्रपितामहः ; पितामहादीनामात्मतया तत्तच्छब्दवाच्यस्त्वमेवेत्यर्थः ॥ ३८ ॥

ता ॥ * इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यस्सुपर्णो गरुत्मान्, एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः (ऋ. २. ३. २२. ४६) * तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः, तदेव शुक्रममृतं तद्ब्रह्म तदापस्स प्रजापतिः (ना) इत्यादिश्रुत्युपबृंहणाभिप्रायेण * त्वया ततं विश्वमिति निर्दिष्टं शरीरात्मभावं * वायुर्यमोऽग्निः इत्यादिसामानाधिकरण्यहेतुत्वेनाह—**अतस्त्वमेवेति** । संबन्धिविशेषानुपादानात्प्रपितामहत्वं सर्वप्रतिसंबन्धिकमित्यभिप्रायेणाह—**सर्वेषां प्रपितामहस्त्वमेवेति** । चशब्दः पितामहादिसमुच्चयार्थक इत्यभिप्रयन्नाह—**पितामहादयश्चेति** । सर्वप्रपितामहस्य कस्यचिदभावेन तच्छरीरकत्वेन प्रपितामहत्वायोगादन्यथा तदाह—**सर्वासां प्रजानां पितर** इत्यादिना । प्रजापतयः दक्षादयः । चशब्दसमुच्चितपितामहत्वं तु तच्छरीरकतयेत्याह—**पितामहादीनामात्मतयेति** ॥ ३८ ॥

नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९
नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।

भा ॥ अत्यद्भुताकारं भगवन्तं दृष्ट्वा हर्षोत्फुल्लनयनोऽत्यन्तसाध्वसावनतस्सर्वतो नमस्करोति ॥ ३९ ॥

ता ॥ * नमो नमस्तेऽस्तु इत्यादिनोक्तनमने विश्वरूपप्रदर्शनप्रकटितपरत्वसौलभ्यानुभवजनितभयहर्षावेव हेतुरित्यभिप्रायेणाह—**अत्यद्भुताकारमिति** ॥ ३९ ॥

अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४०

भा ॥ [अनन्तवीर्य—] अ[परि]मितवीर्य, अपरिमितपराक्रमस्त्वं सर्वमात्मतया समाप्नोषि, ततस्सर्वोऽसि—यतस्त्वं सर्वं चिदचिद्वस्तुजातमात्मतया समाप्नोषि, अतः सर्वस्य चिदचिद्वस्तुजातस्य त्वच्छरीरतया त्वत्प्रकारत्वात्सर्वप्रकारस्त्वमेव सर्वशब्दवाच्योऽसीत्यर्थः, * त्वमक्षरं सदसत् (३७) * वायुर्यमोऽग्निः (३९) इत्यादिसर्वसामानाधिकरण्यनिर्देशस्यात्मतया व्याप्तिरेव हेतुरिति सुव्यक्तमुक्तं—*त्वया ततं विश्वमन्तरूप (३८) * सर्वं समाप्नोषि ततोऽसि सर्वः इति च ॥ ४० ॥

ता ॥ अनन्तस्य वीर्यमिव वीर्यं यस्येत्यन्यथाप्रतिपत्तिवारणायाह—**अ[परि]मितवीर्येति** । अमितशब्दस्याप्रमितपरत्वे शास्त्रादिसिद्धिविरोधात्—**अपरिमितपराक्रमेत्युक्तम्** । *सर्वं समाप्नोषीत्यत्राकाशादिवद्व्याप्तिव्युदासाय * अन्तःप्रविष्टश्शास्ता जनानां सर्वात्मा (य. आ. ३. ११. २१) इत्यादिश्रुत्युक्तात्मत्वपर्यवसितनियमनार्थव्याप्तिर्विवक्षितेत्यभिप्रयन्नाह—**सर्वमात्मतयेति** । * पुरुष एवेदं सर्वम् (पु) * आत्मैवेदं सर्वं (छा. ७. २५. २) * नारायण एवेदं सर्वम् (ना. उ.) इत्यादिश्रुतिस्थसर्वशब्दसामानाधिकरण्योपबृंहणाय * सर्वत एव सर्वेति पूर्वोक्तसर्वशब्दसामानाधिकरण्यं न बाधार्थम्, अपि तु शरीरात्मभावनिबन्धनविशिष्टैक्यपरमित्युक्तमित्यभिप्रायेणाह—**यतस्त्वमित्यादि** । सकलवेदवेदान्ततदुपबृंहणेषु भगवद्वाचिशब्दानां सर्वचिदचिद्वस्तुवाचिसामान्यविशेषसकलशब्दसामानाधिकरण्यस्यापि शरीरात्मभाव एव निबन्धनमित्येतत्प्रपञ्चफलितमित्यभिप्रायेणाह—**त्वमक्षरं सदसदित्यादि** ॥ ४० ॥

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेमं मया प्रमादात्प्रणयेन वाऽपि ॥ ४१
यच्चापहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाऽप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२

भा ॥ तवानन्तवीर्यत्वामितविक्रमत्वसर्वान्तरात्मत्वस्रष्टृत्वादिको यो महिमा, तमिममजानता मया प्रमादान्मोहात्प्रणयेन चिरपरिचयेन वा, सखेति—मम वयस्य इति मत्वा हे कृष्ण, हे यादव, हे सखे इति त्वयि प्रसभं—विनयापेतं यदुक्तम् ; यच्च परिहासार्थं सर्वदैव सत्कारार्हस्त्वमसत्कृतोऽसि ; विहारशय्यासनभोजनेषु च सहकृतेष्वेकान्ते वा समक्षं वा यदसत्कृतोऽसि ; तत्सर्वं त्वामप्रमेयमहं क्षामये ॥ ४१ ॥ ४२ ॥

ता ॥ इदंशब्दविशेषितमहिमशब्दः प्रकृतमहिमानुवादीत्यभिप्रयन्नाह—**अनन्तवीर्यत्वामितविक्रमत्वेत्यादि** । प्रमादशब्दस्याज्ञानपरत्वे * अजानतेत्यनेन पौनरुक्त्यात्सजातीयत्वभ्रमपरत्वमभिप्रेत्य **प्रमादान्मोहादित्युक्तम्** । सखेति बुद्धिहेतुत्वस्वारस्यात्प्रीतिवाचिनाऽपि प्रणयशब्देन तदौपयिकचिरपरिचयोपचारो युक्त इत्याशयेनाह—**प्रणयेन चिरपरिचयेनेति** । * सयुजा सखाया (मु. ३. २. १) इति श्रुतिप्रतिपन्नसखित्वबुद्धेर्मोहादिजन्यत्वासंभवेन * सखेति मत्वेत्येतल्लौकिकवयस्यत्वबुद्धिपरमित्याशयेनाह— **मम वयस्य इति मत्वेति** । * हेकृष्णेत्यादिकं प्रसभोक्त्याकारसमर्पकमित्याशयेनान्वयं दर्शयन् प्रकृतोचितविनयाभावपरत्वमाह—**हे कृष्णेत्यादि** । * यच्चेत्यत्र चशब्दाभिप्रेतासत्कारबहुत्वसिद्ध्यर्थं * यदसत्कृतोऽसीत्यस्यावृत्त्या वाक्यभेदमङ्गीकृत्य अर्थमाह—**यच्च परिहासार्थमित्यादिना** । परिहासार्थमप्यसत्कारो महद्विषयेऽपराध एवेत्यभिप्रायेण मध्यमपुरुषाक्षिप्तार्थमाह—**सर्वदैव सत्कारार्हस्त्वमिति** । एकशब्दफलितोक्तिः—**एकान्त इति** ॥ ४१ ॥ ४२ ॥

पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३

भा ॥ अप्रतिमप्रभाव ! त्वमस्य सर्वस्य चराचरस्य लोकस्य पिताऽसि । अस्य लोकस्य गुरुश्चासि ; अतस्त्वमस्य चराचरस्य लोकस्य गरीयान्—पूज्यतमः । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽपि—त्वदन्यः कारुण्यादिना केनापि गुणेन न त्वत्समोऽस्ति, कुतोऽभ्यधिकः ॥ ४३ ॥

ता ॥ त्वया क्षामणे कृतेऽपि क्षमेऽहमिति केन निश्चितम्, मदन्यः कश्चिदाश्रीयतामिति भगवदभिप्रायमुन्नीय तदुत्तरत्वेन हेतुफलभावेन प्रवृत्ते श्लोकद्वये प्रथमश्लोकस्थविशेषणान्यप्रतिमप्रभावत्वोपपादकानीत्यभिप्रायेण—**अप्रतिमप्रभावेति** प्रथममुक्तम् । पितृगुरुपूज्यशब्दानां संबन्धिसापेक्षत्वेन लोकशब्दस्य सर्वत्रान्वयमाह—**अस्य लोकस्य पिताऽसीत्यादिना** । निरुपाधिकपितृत्वगुरुत्वे पूज्यतमत्वहेतुरित्यभिप्रायेणाह—**अत इति** । पूज्यत्वे गरीयस्त्वमनवच्छिन्नमिति ज्ञापनाय प्रवृत्तं * न त्वत्समोऽस्तीति वाक्यं व्याख्यास्यन् प्रयोजनातिशयसत्त्वाल्लोकत्रयशब्दस्यात्रान्वयमाह—**लोकत्रयेऽपि त्वदन्य इति** । अत्र लोकत्रयशब्देन कृतकमकृतकं कृतकाकृतकमित्युक्तलोकत्रयं वा, लोक्यतेऽनेन प्रमाणान्तरमात्रार्थ इति व्युत्पत्त्या वेदत्रयं वा विवक्षितम् । साम्यस्य भेदघटितत्वात् * न त्वत्समोऽस्तीत्यनेनैव अन्यस्मिन्भगवत्साम्यनिषेधलाभादन्यपदानर्थक्यमित्याशङ्कापरिहाराय अन्यस्त्वत्समो नास्ति, त्वमेव तव समः इत्यर्थलाभार्थं

*त्वदन्यः इत्युद्देश्यसमर्पकत्वेनान्यशब्दस्यान्वय उक्तः । तेन कार्यत्वकर्मवश्यत्वादिना भगवदन्यत्वेन प्रसिद्धानां विधिशिवादीनां *हिरण्यगर्भस्समवर्ततात्रे (यजु. ४. १. ८. ३१), *अजस्य नाभावध्येकमर्पितं (यजु. ४. ६. २. ८), *यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः (श्वे. ४.१८) इत्यादिषु तत्तद्वाचिशब्दश्रवणेन कारणत्वादिना भगवत्साम्यापातप्रतीतावपि *आकाशस्तल्लिङ्गात् (ब्र. १. १. २३), *प्राणस्तथाऽनुगमात् (२९), *शास्त्रदृष्ट्या तूपदेशो वामदेववत् (३१), साक्षादप्यविरोधं जैमिनिः (१. २. २९) इत्यादिन्यायानुरोधेन *एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः (मु. ७), *एको ह वै नारायण आसीन्न ब्रह्मा नेशानः (महो. १. १) इत्यादिश्रुतिसिद्धसर्वान्तरात्मत्वापहतपाप्मत्वादिविशिष्टभगवदसाधारणधर्मप्रतिपादकवाक्यस्थहिरण्यगर्भाजशिवादिशब्दानां भगवत्परतया न तेषां भगवत्साम्यगन्धोऽपीति लभ्यते । **केनापि गुणेने**ति—किमुत सकलकल्याणगुणैर्जगत्कारणत्वमोक्षप्रदत्वादिना चेति भावः । अनेन साम्यैक्योत्तीर्णव्यक्त्यन्तरत्वपक्षा निरस्ता वेदितव्याः ॥ ४३ ॥

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४

भा ॥ यस्मात् त्वं सर्वस्य पिता, पूज्यतमो गुरुश्च, कारुण्यादिगुणैश्च सर्वाधिकोऽसि ; तस्मात् त्वामीशमीड्यं प्रणम्य प्रणिधाय च कायं प्रसादये ; यथा कृतापराधस्यापि पुत्रस्य, यथा च सख्युः प्रणामपूर्वं प्रार्थितः पिता वा सखा वा प्रसीदति ; तथा त्वं परमकारुणिकः प्रियः प्रियाय मे सर्वं सोढुमर्हसि ॥ ४४ ॥

ता ॥ *तस्मादिति पूर्वश्लोकोक्तनिरुपाधिकपितृत्वपूज्यतमत्वादिकं हेतुत्वेन परामृशतीत्यभिप्रायेणाह—**यस्मात्त्वं सर्वस्य पिते**त्यादिना । *प्रणम्येति प्रपदनमुच्यते ; पूर्वोक्तपितृत्वादिपरामर्शिना *तस्मादित्यनेन *अहमित्यनेन चानुकूल्यसंकल्पाद्यङ्गानि सूचितानि । *प्रणिधाय कायमित्यनेन *यद्धि मनसा ध्यायति (यजु. ६. १. ७. ३८) इत्युक्तरीत्या करणपूर्तिस्सूचिता । प्रणम्य प्रसादये—प्रसादार्थं प्रणमामीत्यर्थः । प्रसादये, सोढुमित्याभ्यामर्थसिद्धं वदन् दृष्टान्तदार्ष्टान्तिकयोस्साधर्म्यमुपपादयति—**यथा कृतापराधस्यापी**त्यादिना ॥ ४४ ॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५

भा ॥ अदृष्टपूर्वमत्यद्भुतमत्युग्रं च तव रूपं दृष्ट्वा हृषितोऽस्मि—प्रीतोऽस्मि । भयेन प्रव्यथितं च मे मनः । अतस्तदेव तव सुप्रसन्नं रूपं मे दर्शय । प्रसीद देवेश जगन्निवास—मयि प्रसादं कुरु, देवानां ब्रह्मादीनामपीश, निखिलजगदाश्रयभूत ॥ ४५ ॥

ता ॥ विचित्रस्यापि दृष्टपूर्वस्यैवाश्चर्यविषयत्वदर्शनात् *अदृष्टपूर्वमित्यनेन फलितमाह—**अत्यद्भुत**मिति । *भयेन च प्रव्यथितं मनो मे इत्यनेनाक्षिप्तम् *आख्याहि मे को भवानुग्ररूपः इत्यत्रोक्तं विशेषणमाह—**अत्युग्रं चे**ति । *भयेन चेत्यत्र चशब्दस्य निष्प्रयोजनत्वादुक्तव्यथाहेत्वन्तरसमुच्चयार्थत्वमयुक्तमित्युक्तप्रीतिसमुच्चयार्थत्वमभिप्रेत्य व्यवहितान्वयमाह—**प्रव्यथितं च मे मन** इति । पूर्वार्धोक्तस्य व्यथासहितप्रीतिजनकत्वस्योत्तरार्धार्थहेतुत्वमभिप्रेत्याह—**अत** इति । **तच्छब्दस्य पूर्वप्रसिद्धाकारपरामर्शित्वेन तदभिप्रेतमाकारमाह—सुप्रसन्नमि**ति । अनेन केवलप्रीतिहेतुत्वं सूचितम् ।

भगवतस्य रक्षणमवश्यं कार्यमित्यभिप्रायेण—मे दर्शयेत्युक्तम् । * देव, * देवेशेति संबोधनद्वयेन * तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम् (श्वे. ६.७) इति श्रुत्यर्थोऽभिप्रेत इत्याशयेन—देवानां ब्रह्मादीनामपीशेत्युक्तम् । दृश्यमानरूपस्य * तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा (१३) इति जगदाश्रयत्वेन दृश्यमानात्वात् * जगन्निवासेत्यनेन तदुच्यत इत्यभिप्रयन्नाह—जगदाश्रयभूतेति ॥ ४५ ॥

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६

भा ॥ तथैव पूर्ववत् किरीटिनं, गदिनं, चक्रहस्तं त्वां द्रष्टुमिच्छामि । अतस्तेनैव पूर्वसिद्धेन चतुर्भुजेन रूपेण युक्तो भव । सहस्रबाहो विश्वमूर्ते—इदानीं सहस्रबाहुत्वेन विश्वशरीरत्वेन दृश्यमानरूपस्त्वं तेनैव रूपेण युक्तो भवेत्यर्थः ॥ ४६ ॥

ता ॥ * तथैवेत्यस्य पूर्वं जगदाश्रयमत्यद्भुतं रूपं द्रष्टुमैच्छम्, तथैव पूर्वरूपं द्रष्टुमिच्छामीत्यर्थभ्रमं व्युदस्यन् अतीतावस्थाविशिष्टस्य कथं प्रदर्शनमिति शङ्कां चार्थात्परिहरन् अन्वयभेदेन तद्व्याचष्टे—तथैव पूर्ववत्किरीटिनमिति । पूर्वदृष्टसजातीयमेव द्रष्टुमिच्छामीत्यर्थः । * रूपेणेत्यत्र तृतीयायाः करणार्थत्वासंभवात् रूपेण युक्तो भवेत्युक्तम् । सहस्रबाहूदरविश्वमूर्तिविशिष्टस्य चतुर्भुजरूपयुक्तत्वासंभवं कालभेदेन परिहरति—इदानीमिति ॥ ४६ ॥

श्रीभगवानुवाच—

मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७

भा ॥ यन्मे तेजोमयं—तेजसां राशिं, विश्वं—विश्वात्मभूतम्, अनन्तम्—अन्तरहितम्; प्रदर्शनार्थमिदम्, आदिमध्यान्तरहितम्; आद्यम्—मद्व्यतिरिक्तस्य कृत्स्नस्यादिभूतम्, त्वदन्येन केनापि न दृष्टपूर्वं रूपम्, तदिदं प्रसन्नेन मया मद्भक्ताय ते दर्शितम् : आत्मयोगात्—आत्मनस्सत्यसंकल्पत्वयोगात् ॥ ४७ ॥

ता ॥ * तेजोमयमित्यत्र मयटः प्राचुर्यार्थत्वमभिप्रेत्याह—तेजसां राशिमिति । विश्वात्मभूतमिति विश्वव्यापकमित्यर्थः । अचेतनस्य हि नात्मत्वं संभवति । * अनादिमध्यान्तम् (१९) इति पूर्वमुक्तत्वात् * अनन्तमित्येतदितरोपलक्षणमित्याह—प्रदर्शनार्थमिदमिति । * आद्यमित्यत्र प्रतिसंबन्धिविशेषानिर्देशात् कृत्स्नस्यादिभूतमित्युक्तम् । * त्वदन्येनेत्यनेनार्थसिद्धमाह—केनापीति । प्रसादस्य निर्हेतुकत्वे वैषम्यनैर्घृण्यप्रसङ्गात् * तवेत्यनेनाभिप्रेतं प्रसादहेतुमाह—मद्भक्ताय त इति । योगशब्दस्य ध्यानपरत्वभ्रमव्युदासाय व्याचष्टे—आत्मनस्सत्यसङ्कल्पत्वयोगादिति ॥ ४७

भा ॥ अनन्यभक्तिव्यतिरिक्तैस्सर्वैरप्युपायैर्यथावदवस्थितोऽहं द्रष्टुं न शक्य इत्याह—

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपश्शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८

भा ॥ एवंरूपो यथावदवस्थितोऽहं मयि भक्तिमतस्त्वत्तोऽन्येन [एकान्त]ऐकान्तिकात्यन्तिकभक्तिरहितेन केनापि पुरुषेण वेदयज्ञादिभिः केवलैर्द्रष्टुं न शक्यः ॥ ४८ ॥

ता ॥ कथमेतद्रूपस्य मदन्येन केनाप्यदृष्टपूर्वत्वम्? येनकेनचिदुपायेनान्यैरपि दर्शनसंभवादित्यत्र एतदुपपादकत्वेनोत्तरश्लोकमवतारयति—**अनन्यभक्तिव्यतिरिक्तैरित्यादिना** । * एवंरूपः इत्यस्याप्राकृतरूपविशिष्टपरत्वे कृष्णावताररूपस्य सर्वैर्दृश्यमानत्वानुपपत्त्या मनुष्यादिविसजातीयत्वाप्राकृतत्वादिरूपपरत्वमभिप्रेत्याह—**यथावदवस्थितोऽहमिति** । एकान्तभक्तिरहितानामवताररूपदर्शनं तु मनुष्यादिसजातीयत्वप्राकृतत्वादिरूपेणायथावस्थितदर्शनमेवेति भावः । * त्वदित्येतत् पृथक्पदं भक्तिमत्परं चेत्यभिप्रयन्नाह—**मयि भक्तिमतस्त्वत्तोऽन्येनेति** । अत्रान्यपदेन अर्जुनान्यत्वविवक्षायां *भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन (५४) इत्युत्तरग्रन्थविरोधापत्त्या भक्तिमदन्यत्वमात्रं विवक्षितमित्याह—**एकान्तभक्तिरहितेन केनापीति** । वेदशब्दोऽर्थवत्तया श्रुतवेदपरः । तेन * श्रोतव्यः (बृ. ४. ४. ५) इत्युक्तश्रवणं लभ्यत इत्यध्ययनस्य पृथगुक्तत्वात्क्रियाशब्देन गोबलीवर्दनयाद्यज्ञाध्ययनादिव्यतिरिक्तहोमादिक्रिया उच्यन्त इत्यभिप्रेत्य **वेदयज्ञादिभिरित्युक्तम्** । * तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन (बृ. ६. ४. २२) इति श्रुत्या वेदयज्ञादीनां भक्तिद्वारा दर्शनसाधनत्वप्रतीतेः कथमयं निषेध इति शङ्कावारणाय **केवलैरित्युक्तम्** ॥ ४८ ॥

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९

भा ॥ ईदृशघोररूपदर्शनेन ते या व्यथा, यश्च विमूढभावो वर्तते, तदुभयं माभूत्; त्वयाऽभ्यस्तपूर्वमेव सौम्यं रूपं दर्शयामि, तदेवेदं मम रूपं प्रपश्य ॥ ४९ ॥

ता ॥ * दृष्ट्वा रूपं, * मा ते व्यथा मा च विमूढभावः इत्यत्र क्रियापदविशेषाश्रवणादेतद्रूपदर्शनेन न व्यथा, तेन नच विमूढभाव इति प्रतीतिस्स्यात् ; अभूदित्यध्याहारेऽपि एतद्रूपदर्शनस्य व्यथाद्यभावहेतुत्वप्रतीतिस्स्यात्; तद्वारणाय व्याचष्टे—**ईदृशघोररूपदर्शनेनेत्यादिना** । तदेवेदं मे रूपं पुनः पश्येत्युक्त्या भीत्यादिहेतुभूतमेवेदं पुनः **पश्येत्यर्थभ्रमस्यात्**; अतस्तच्छब्दमन्यथा व्याचष्टे—**अभ्यस्तपूर्वमेव सौम्यं रूपमिति** । वर्तमानार्थकेदंशब्देन रूपद्वयस्यैककालीनत्वभ्रमव्युदासाय वर्तमानसामीप्यपरं तदित्यभिप्रायेण **दर्शयामीत्यध्याहृतम्** । तथा चेदंशब्दः प्रदर्शयिष्यमाणपर इति भावः ॥ ४९ ॥

सञ्जय उवाच—

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं भूत्वा पुनस्सौम्यवपुर्महात्मा ॥ ५०

भा ॥ एवं पाण्डुतनयं भगवान् वसुदेवसूनुरुक्त्वा भूयः स्वकीयमेव चतुर्भुजं रूपं दर्शयामास; अपरिचितस्वरूपदर्शनेन भीतमेनं पुनरपि परिचितसौम्यवपुर्भूत्वा आश्वासयामास च, महात्मा—सत्यसंकल्पः। अस्य सर्वेश्वरस्य परमपुरुषस्य परस्य ब्रह्मणो जगदुपकृतिमर्त्यस्य वसुदेवसूनोश्चतुर्भुजमेव स्वकीयं रूपम्; कंसान्नीतवसुदेवप्रार्थनेन आकंसवधाद्भुजद्वयमुपसंहृतं, पश्चादाविष्कृतं च। * जातोऽसि देव देवेश शङ्खचक्रगदाधर। दिव्यं रूपमिदं देव प्रसादेनोपसंहर ॥ ....उपसंहर विश्वात्मन् रूपमेतच्चतुर्भुजम् (वि. ५. ३. १३) इति हि प्रार्थितम्। शिशुपालस्यापि द्विषतोऽनवरतभावनाविषयश्चतुर्भुजमेव वसुदेवसूनो रूपम् *उदारपीवरचतुर्बाहुं शङ्खचक्रगदाधरम् (वि. ४. १५. १३) इति। अतः पार्थेनात्र * तेनैव रूपेण चतुर्भुजेनेत्युच्यते ॥ ५० ॥

ता ॥ सहजप्रीतिद्योतनायाह—**एवं पाण्डुतनयं वसुदेवसूनुरिति** । * स्वकमित्यत्र स्वपदं कृष्णावतारपरमित्यभिप्रेत्य—**स्वकीयमेव चतुर्भुजं रूपमित्युक्तम्** । * भीतमेनमित्यत्र इदानीं प्रदर्शितचतुर्भुजरूपदर्शनेन भीतत्वभ्रमव्युदासायाह—**अपरिचितस्वरूपदर्शनेने**ति । कथमस्य इच्छामात्रेण नानारूपपरिग्रहादिकमित्यतस्तदुपपादकत्वेनोक्तं * महात्मेत्येतत्प्रकृतोपयोगितया व्याचष्टे—**सत्यसंकल्प** इति । अप्रतिहतसंकल्पत्वात्सर्वमुपपन्नमिति भावः । कृष्णस्य द्विभुजतया नन्दव्रजे अवस्थानाच्चतुर्भुजं रूपं कथमेतस्य स्वकीयमित्यतस्तप्रमाणं तदुपपादयति—**अस्य सर्वेश्वरस्ये**त्यादिना । समाश्रयणीयतौपयिकपरत्वसौलभ्यव्यञ्जनाय **अस्य सर्वेश्वरस्ये**त्यादिविशेषणानि । स्वकीयं रूपमिति कृष्णावतारस्य सहजं रूपमित्यर्थः ॥ ५० ॥

अर्जुन उवाच—

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तस्सचेताः प्रकृतिं गतः ॥ ५१

भा ॥ अनवधिकातिशयसौन्दर्यसौकुमार्यलावण्यादियुक्तं तवैवासाधारणं मनुष्यत्वसंस्थानसंस्थितमतिसौम्यमिदं तव रूपं दृष्ट्वा इदानीं सचेतास्संवृत्तोऽस्मि, प्रकृतिं गतश्च ॥ ५१ ॥

ता ॥ * मानुषं रूपमित्यस्य कर्मजन्यप्राकृतरूपपरत्वभ्रमव्युदासायेदंशब्दाभिप्रेतं वदंस्तद्व्याचष्टे—**अनवधिकातिशयसौन्दर्ये**त्यादिना ॥ ५१ ॥

श्रीभगवानुवाच—

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ५२

भा ॥ ममेदं सर्वस्य प्रशासनेऽवस्थितं सर्वाश्रयं सर्वकारणभूतं रूपं यद्दृष्टवानसि ; तत्सुदुर्दर्शं—न केनापि द्रष्टुं शक्यम् । अस्य रूपस्य देवा अपि नित्यं दर्शनकाङ्क्षिणः, ननु दृष्टवन्तः ॥ ५२ ॥

ता ॥ यच्छब्दस्य प्रसिद्धपरामर्शित्वेन प्रसिद्धाकारानाह—**सर्वस्य प्रशासनेऽवस्थित**मित्यादिना । * नित्यमित्यस्य पदार्थैकदेशदर्शनान्वयस्यागतिकस्य आश्रयणमनुचितमित्यभिप्रेत्याकाङ्क्षाया नित्यत्वं दर्शनाभावमवगमयतीत्याशयेनाह—**न तु दृष्टवन्त** इति ॥ ५२ ॥

भा ॥ कुत इत्यत्राह—

नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ ५४

भा ॥ वेदैरध्यापनप्रवचनाध्ययनश्रवणजपविधयैर्यागदानहोमतपोभिश्च, मन्त्रक्रियाविरहितैः केवलैः यथावदवस्थितोऽहं द्रष्टुमशक्यः । अनन्यया तु भक्त्या तत्त्वतश्शास्त्रैर्ज्ञातुं, तत्त्वतस्साक्षात्कर्तुं, तत्त्वतः प्रवेष्टुं च शक्यः । तथा च श्रुतिः—* नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ (क. २. २३) इति ॥ ५३ ॥ ५४ ॥

ता ॥ उत्तरश्लोकस्यैतदुपपादकतया न पौनरुक्त्यमित्याशयेन तमवतारयति—**कुत इत्यत्राहेति** । वेदानां स्वरूपेण साधनत्वाप्रसक्त्या तन्निषेधोऽनुपपन्न इत्यतस्तदभिप्रेतमाह—**वेदैरध्यापनप्रवचनेति** । दानेज्याकथनं होमस्याप्युपलक्षणमित्यभिप्रयन्नाह—**यागदानहोमतपोभिश्चेति** । भक्तिद्वारा साधनत्वस्य *तमेतं वेदानुवचनेन (बृ. ६. ४. २२) इत्यादिश्रुत्यवगतत्वात् **मद्भक्तिविरहितैरित्युक्तम्** । एवंविधशब्दो मानुषत्वादिभ्रमानर्हत्वाप्राकृतत्वादिपर इत्याह—**यथावदवस्थितोऽहमिति** । न केवलं साक्षात्कारमात्रे साधनत्वेन भक्तिरपेक्षिता; किंतु *शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् (भा. उ. ६८. ५) इत्यादिवच्छास्त्रतोऽर्थनिर्णये साक्षात्कारानन्तरभाविन्यां प्राप्तावपीत्यभिप्रायेण *ज्ञातुं, *प्रवेष्टुम् इत्युभयं पूर्वश्लोकाप्रसक्तमिह प्रसञ्जितम् । *तत्त्वत इत्येतत् त्रिष्वप्यविशेषादपेक्षितत्वाच्चान्वितम् । तत्त्वतः प्रवेशः परिपूर्णप्राप्तिः, यथावस्थितसर्वाकारेणानुभव इत्यर्थः । तेन व्यूहविभवादिमात्रप्राप्तिव्यवच्छेदः । **स्मर्यन्ते च** साक्षान्मुक्तेरर्वाञ्चः प्राप्तिपर्वभेदाः—*लोकेषु विष्णोर्निवसन्ति केचित्समीपमृच्छन्ति च केचिदन्ये । अन्येतु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्तः ॥ इति । *एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् (गी. ६. ४२) **इत्यस्य** व्याख्याने **यादवप्रकाशैश्चोक्तम्**—*इदमल्पीयसीं योगसिद्धिं गतस्य मृतस्य फलम्; यदि प्रथमां योगसिद्धिं गतो म्रियते, त्यजति वा योगं, श्वेतद्वीपे जायते; भगवत्सालोक्यं वा याति; यदि ततोऽप्यधिकां योगसिद्धिं गतो **म्रियते**, विष्णुपार्षदो भवति; यदि ततोऽप्यधिकां, पार्षदेश्वरो भवति; यदि ततोऽप्यधिकां, द्वारपालो भवति; यदि ततोऽप्यधिकां, भगवतोऽङ्गसंवाहको भवति; यदि ततोऽप्यधिकां मन्त्रिस्थानीयः पृथगैश्वर्ययुक्तो भवति; यदि पूर्णां योगसिद्धिं गतो म्रियते, भगवत्सायुज्यं गतो मुक्तः परमैश्वर्ययुक्तो भवति—इति वैष्णवेषु योगशास्त्रेषु मर्यादा । तदेतत्सर्वमिह सूचितं भगवता—*अथ वा योगिनाम् (गी. ६. ४२) इत्यादिनेति । ज्ञानदर्शनप्राप्तिहेतुत्वे भक्तेः पर्वभेदान्नान्योन्याश्रयणादिदोषः । पूर्वजन्मसुकृतमूलसात्त्विकजनसंवादादिजनितं यथाच्छ्रवणानुगुणं किञ्चिदानुकूल्यरूपं भक्तिमात्रं शास्त्रजन्यज्ञानोत्पत्तौ सहकारि भवति । उत्कटदिदृक्षागर्भा तु परभक्तिस्साक्षात्कारहेतुः; साक्षात्कृते तु परिपूर्णानुभवाभिनिवेशलक्षणा परमभक्तिः प्रवेशहेतुरिति । अत्र *अनन्ययेति पदं प्रागुक्तप्रक्रियया अनन्यप्रयोजनयेति भाव्यम् । अनन्यदेवताकयेत्येके । ऐक्यानुसन्धानविवक्षा तु प्रागेव दूषिता; प्रत्यक्षादिविरुद्धा च । तदेतदखिलमभिप्रेत्य संगृहीतम्—*एकादशे स्वयाथात्म्यसाक्षात्कारावलोकनम् । दत्तमुक्तं विदिप्राप्त्योर्भक्त्येकोपायता तथा ॥ (गी. सं १५) इति । भक्तिप्रशंसापरत्वशङ्कामपाकरोति—**तथा चेति** । *नायमात्मेत्यादौ *न पृथिव्यां नान्तरिक्षे न दिव्यमिश्चेतव्यः (यजु. ५. २. ७. ३५) इत्यादाविव केवलानां निषेधः । यच्छब्दानूदितो वरणीयताहेतुगुणविशेषो भक्तिरेवेत्यर्थस्वभावादुपबृंहणबलाच्च सिद्धम् । अत्र तनुशब्दस्य विग्रहपरत्वे स्वरूपादिकं तत्परत्वे च विग्रहादिकमर्थलब्धम् ॥ ५३ ॥ ५४ ॥

मत्कर्मकृन्मत्परमो मद्भक्तस्सङ्गवर्जितः ।
निर्वैरस्सर्वभूतेषु यस्स मामेति पाण्डव ॥ ५५

इति श्रीमद्भगवद्गीतासूपनिषत्सु **विश्वरूपसंदर्शनयोगो** नाम एकादशोऽध्यायः ॥ ११ ॥

भा ॥ वेदाध्ययनादीनि सर्वाणि कर्माणि मदाराधनरूपाणीति यः करोति, स मत्कर्मकृत् । मत्परमः—सर्वेषामारम्भाणामहमेव परमोद्देश्यो यस्य स मत्परमः । मद्भक्तः—अत्यर्थमत्प्रियत्वेन मत्कीर्तनस्तुतिध्यानार्चनप्रणामादिभिर्विना आत्मधारणमलभमानो मदेकप्रयोजनतया यस्सततं तानि करोति, स मद्भक्तः । सङ्ग-

वर्जितः—मदेकप्रियत्वेनेतरसङ्गमसहमानः । निर्वैरस्सर्वभूतेषु—मत्सम्श्लेषवियोगैकसुखदुःखस्वभावत्वात्स्वदुःखस्य स्वापराधनिमित्तत्वानुसंधानाच्च, सर्वभूतानां परमपुरुषपरतन्त्रत्वानुसंधानाच्च सर्वभूतेषु वैरनिमित्ताभावात्तेषु निर्वैरः । य एवं भूतस्स मामेति—मां यथावदवस्थितं प्राप्नोति; निरस्ताविद्याद्यशेषदोषगन्धो मदेकानुभवो भवतीत्यर्थः ॥ ५५ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये एकादशोऽध्यायः ॥ ११ ॥

ता ॥ * नाहं वेदैरित्यादेः *वेदानुवचनेन (बृ. ६.४.२२) इत्यादिश्रुतिविरोधपरिहाराय भक्त्यङ्गभावेन वेदानुवचनादीनामुपयोगं वदन् *प्रवेष्टुमित्युक्तं प्राप्तिहेतुं भक्त्यवस्थाविशेषं विविनक्ति—**मत्कर्मकृदिति** । * नाहं वेदैरित्यादिनोक्तान्येव कर्माणि भगवति समर्पणान्मत्कर्मशब्देनोच्यन्ते, कीर्तनादीनि तु प्रागुक्तानि भक्त्यन्तर्गतत्वान्मद्भक्तशब्देऽनुप्रवेशमर्हन्तीत्यभिप्रायेणाह—**वेदाध्ययनेति** । कर्मप्रसङ्गात्तत्साध्यतया बुद्धिस्थं फलमिह मत्परमशब्देनोच्यत **इत्याह—सर्वेषामिति** । लौकिकानामन्नपानादिस्थानेऽस्य कीर्तनादिकमित्यभिप्रायेणाह—**आत्मधारणमलभमान** इति । भक्तेः काष्ठाप्रा[प्ति]प्तदशायां यादृशी निस्सङ्गता, तां सहेतुकां दर्शयति—**मदेकप्रियत्वेनेति** । तृषितस्यामृतधारायां तृणादिनिरोधवन्मन्यमानं सङ्गं एवैनं यथा स्वयं विरक्तो वर्जयति; तथा स्वयं सङ्गं जातोद्वेग इत्यभिप्रायेण **इतरसङ्गमसहमान इत्युक्तम्** । तादृश्यां भक्तिकाष्ठायां न केवलं शास्त्रवश्यत्वेन निर्वैरता; अपितु कारणाभावात् कार्याभाव इत्याह—**मत्संश्लेषेति** । परमात्मनि रक्ततया तदितरविरक्तस्य सांसारिकक्षुद्रसुखदुःखयोरुपेक्षकत्वात्तन्निवर्तकेषु तत्प्रवर्तकेषु च नास्य वैरसंभवः । नच स्वापराधं जानतः परो द्वेषविषयः । नच कशादिवत्परतन्त्रतयाऽवगताय कश्चिदनुन्मत्तः कुप्येत् । आत्मन इव परेषामपि विश्वरूपभगवद्रूपत्वानुसन्धाने कथं वैरावकाश इति भावः । **एवंभूतः**—एवंविधः । प्रवेष्टुमिति प्रागुक्तानुसन्धानेनाह—**मां यथावदवस्थितमिति** । प्रवेशप्राप्त्यादिशब्दानामन्यार्थतां कुदृष्ट्यभिमतां निराकर्तुं परमनिश्श्रेयसरूपायाः प्राप्तेस्स्वरूपं शोधयति—**निरस्तेति** । निरस्तत्वमपुनरङ्कुरविनष्टत्वम् । अविद्या—अज्ञानान्यथाज्ञानतत्कारणकर्मादिरूपा । पूर्वावस्थायामपि कतिपयाविद्यादिनिवृत्तिरस्तीति तद्व्यवच्छेदायाशेषपदम् । सवासननिरासद्योतनाय गन्धशब्दः । **मदेकानुभव** इति—* सर्वं ह पश्यः पश्यति (छा. ७. २६. २) इत्युक्तं सर्वमपि सर्वशरीरोऽहमेव; तथा च श्रुत्यन्तरं * ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानस्सर्वमेवाविशन्ति (मु. ३. २. ५) इति—इति भावः ॥५५॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायाम् एकादशोऽध्यायः ॥ ११ ॥

श्रीः ।

॥ अथ द्वादशोऽध्यायः ॥ १२ ॥

भा ॥ भक्तियोगनिष्ठानां प्राप्यभूतस्य परस्य ब्रह्मणो भगवतो नारायणस्य निरङ्कुशैश्वर्यं साक्षात्कर्तुकामायार्जुनायानवधिकातिशयकारुण्यौदार्यसौशील्यादिगुणसागरेण सत्यसंकल्पेन भगवता स्वैश्वर्यं यथावदवस्थितं दर्शितम् ; उक्तं च तत्त्वतो भगवज्ज्ञानदर्शनप्राप्तीनामैकान्तिकात्यन्तिकभगवद्भक्त्येकलभ्यत्वम् । अनन्तरमात्मप्राप्तिसाधनभूतादात्मोपासनात् भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुसुखोपादनत्वाच्च श्रैष्ठ्यम् , भगवदुपासनोपायश्च, तदशक्तस्याक्षरनिष्ठता, तदपेक्षिताश्चोच्यन्ते । भगवदुपासनस्य प्राप्यभूतोपास्यश्रैष्ठ्यात् श्रैष्ठ्यं तु * योगिनामपि सर्वेषां मद्गतेनान्तरात्मना । श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ (६. ४७) इत्यत्रोक्तम् ।

अर्जुन उवाच—

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १

भा ॥ एवम्—* मत्कर्मकृत् (११. ५५) इत्यादिनोक्तेन प्रकारेण, सततयुक्ताः—भगवन्तं त्वामेव परं प्राप्यं मन्वानाः, ये भक्ताः, त्वाम्—सकलविभूतियुक्तमनवधिकातिशयसौन्दर्यसौशील्यसार्वज्ञ्यसत्यसंकल्पत्वाद्यनन्तगुणसागरं परिपूर्णमुपासते ; ये चाप्यक्षरम्—प्रत्यगात्मस्वरूपं, तदेव चाव्यक्तं—चक्षुरादिकरणानभिव्यक्तस्वरूपमुपासते ; तेषामुभयेषां के योगवित्तमाः—के स्वसाध्यं प्रति शीघ्रगामिन इत्यर्थः । * भवामि न चिरात्पार्थ (७) इत्युत्तरत्र योगवित्तमत्वं शैघ्र्यविषयमिति हि व्यञ्जयिष्यते ॥ १ ॥

ता ॥ प्रसक्तायां भक्तेश्श्रैष्ठ्यादिकमुच्यत इति द्वादशाध्यायार्थसङ्गतिं वक्तुं पूर्वोक्तमनुवदन् भक्तियोगप्रकरणे वैश्वरूप्यप्रदर्शनसङ्गतिमप्यर्थाद्विविनक्ति—भक्तियोगनिष्ठानामिति । साक्षात्कृते हि पूर्णोपासनं शक्यम्, उपास्यत्वफलत्वोपयुक्ताकारेण तत्प्रकाशनं च युक्तमिति भावः । प्रस्तुतसाक्षात्कारादिकारणप्रधानसङ्गतिस्थलमाह—उक्तं चेति । स्वप्रकाशनहेतुः कारुण्यादिकम् । तदैव कार्यसिद्ध्यर्थं सत्यसङ्कल्पत्वोक्तिः । उपायफलनिर्देशानन्तरं फलाविलम्बाद्युक्तिरिति सङ्गतिमाह—अनन्तरमिति । एतेन * भक्तेः श्रैष्ठ्यमुपायोक्तिरशक्तस्यात्मनिष्ठता । तत्प्रकारास्त्वतिप्रीतिर्भक्ते द्वादश उच्यते ॥ (१६) इति संग्रहश्लोकोऽपि व्याख्यातः । * अतिप्रीतिरित्यादिना संगृहीतस्य द्वादशाध्यायान्तिमश्लोकार्थस्य भाष्ये चकारेण संग्रहः । उपक्रान्तोपसंहारमात्ररूपत्वात्तस्य पृथगनुक्तिः । अस्मिन्नध्याये योगवित्तमयुक्ततमादिशब्दैः प्रश्नोत्तरगतैस्तारतम्यमात्रमुच्यते । तच्चोपास्यप्रकर्षहेतुकफलतारतम्यनिबन्धनं किं न स्यादित्यत्राह—भगवदुपासनस्येति । संप्रतिपन्नांशे पुनः प्रश्नो न युक्त इति भावः ।

अव्यवहितवाक्यसङ्गतिव्यञ्जनार्थमासत्तिवशादौचित्याच्चैवंशब्दानूदितमाह—मत्कर्मकृदित्यादिनोक्तेन प्रकारेणेति । सततयुक्तशब्दोऽत्र सततयोगाशंसापर इत्यभिप्रायेणाह—भगवन्तं त्वामेव परं प्राप्यं मन्वाना इति । * मत्परम इति हि पूर्वश्लोकोक्तम् । सुग्रहत्वानुगुणाकारसूचनार्थं सकलेत्यादिना * त्वामिति निर्देशस्य प्रागुपदेशदिव्यचक्षुर्भ्यां प्रतिपन्नविभूत्यादिवैशिष्ट्यपरत्वं दर्शितम् । यद्वा * पर्युपासते इत्यत्रोपसर्गाभिप्रेतोक्तिरियम् । तदाह—

परिपूर्णमिति । अक्षरशब्दस्य प्रकृतावीश्वरे च प्रयोगादिह तद्व्यावृत्त्यर्थमाह—**प्रत्यगात्मस्वरूपमिति** । अव्यक्तशब्दस्याक्षरशब्दसमभिव्याहृताचिद्विशेषपरत्वव्युदासायाह—**तदेव चाव्यक्तमिति** । यच्छब्दत्रयाभावादुत्तरे च विशेषणविशेष्यव्यक्तेरत्रोपास्यत्रयपरत्वमनुचितमिति भावः । * पञ्चविंशकमव्यक्तं षड्विंशः पुरुषोत्तमः । एतज्ज्ञात्वा विमुच्यन्ते यतयश्शान्तबुद्धयः ॥ इति **यमस्मृति**वचनेऽपि पुरुषोत्तमादर्वाचीन एवाव्यक्तशब्दः । अत्र योगवित्तमशब्दाभिप्रेतमाधिक्यं दर्शयति—**के स्वसाध्यमिति** । प्रश्नस्योपास्याधिक्यादिपरत्वं मा भूत् ; उक्तार्थपरत्वे किं प्रमाणमित्यत्राह—**भवामीति** । प्रश्नान्यथानुपपत्त्यैव पारिशेष्यादयमर्थस्सिद्धः ; उत्तरवाक्ये तु स्पष्टः । * क्लेशोऽधिकतरस्तेषाम् (५) इति चाक्षरनिष्ठात्प्रकर्ष उच्यत इति भावः ॥ १ ॥

श्रीभगवानुवाच—

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २

भा ॥ अत्यर्थमत्प्रियत्वेन मनो मय्यावेश्य श्रद्धया परयोपेताः नित्ययुक्ताः—नित्ययोगं काङ्क्षमाणाः ये मामुपासते—प्राप्यविषयं मनो मय्यावेश्य ये मामुपासत इत्यर्थः । ते युक्ततमाः मे मताः—मां सुखेनाचिरात्प्राप्नुवन्तीत्यर्थः ॥ २ ॥

ता ॥ * मय्यावेश्येत्यत्रोपासनान्यथानुपपत्तिलभ्यविषयीकरणमात्रपरत्वे निष्प्रयोजनत्वादक्षरनिष्ठस्याप्युपायतया भगवति चित्तावेशसाम्यात्तद्व्यवच्छेदार्थमाह—**प्राप्यविषयमिति** ॥ २ ॥

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः । ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५

भा ॥ ये त्वक्षरम्—प्रत्यगात्मस्वरूपम्, अनिर्देश्यम्—देहादन्यतया देवादिशब्दानिर्देश्यम्, [अ]तत एव चक्षुरादिकरणानभिव्यक्तम्, सर्वत्रगमचिन्त्यं च—सर्वत्र—देवादिदेहेषु वर्तमानमपि तद्विसजातीयतया तेनतेन रूपेण चिन्तयितुमनर्हम्, तत एव कूटस्थम्—सर्वसाधारणम्, तत्तद्देहाद्यसाधारणाकाराभावद्धमित्यर्थः ; अपरिणामित्वेन त्वासाधारणाकारान्न चलति न च्यवत इत्यचलम्, तत एव ध्रुवम्—नित्यम् । सन्नियम्येन्द्रियग्रामम् चक्षुरादिकमिन्द्रियग्रामं सर्वं स्वव्यापारेभ्यस्सम्यङ्नियम्य, सर्वत्र समबुद्धयः—सर्वत्र देवादिविषमाकारेषु देहेष्ववस्थितेष्वात्मसु ज्ञानैकाकारतया समबुद्धयः, तत एव सर्वभूतहिते रताः—सर्वभूतहितरतित्वाधिवृत्ताः, सर्वभूताहितरतित्वं ह्यात्मनो देवादिविषमाकाराभिमाननिमित्तम् ; य एवमक्षरमुपासते, तेऽपि मां प्राप्नुवन्त्येव—मत्समानाकारमसंसारिणमात्मानं प्राप्नुवन्त्येवेत्यर्थः । * मम साधर्म्यमागताः (१४.२) इति हि वक्ष्यते । श्रूयते च * निरञ्जनः परमं साम्यमुपैति (मु. ३. १ ३) इति । तथा अक्षरशब्दनिर्दिष्टात्कूटस्थादन्यत्वं परस्य ब्रह्मणो वक्ष्यते * कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः (१५. १६) इति । * अथ परा यया तदक्षरमधिगम्यते (मु. १. १. ५) इत्यक्षरविद्यायां तु अक्षरशब्दनिर्दिष्टं परमेव ब्रह्म, भूतयोनित्वादेः । तेषामव्यक्तासक्तचेतसां क्लेशस्त्वधिकतरः । अव्यक्ता हि गतिः—अव्यक्तविषया मनोवृत्तिः, देहवद्भिः—देहात्माभिमानयुक्तैः, दुःखेनावाप्यते ; देहवन्तो हि देहमेवात्मानं [मन्यन्ते] मन्यन्ते ॥ ३—५ ॥

ता ॥ अक्षरनिष्ठस्यापकर्षमाह—* ये त्वक्षरमित्यादिश्लोकत्रयेण । सर्वप्रकारनिर्देशनिषेधस्य स्ववचनविरोधादिदुष्टत्वाद्यथावस्थितस्वरूपे निषेध्यतया विवक्षितं निर्देशविशेषं सहेतुकमाह—**देहादन्यतये**ति । यद्यपि देहादन्यस्मिन्नपि देहिनि देहद्वारा देवादिशब्दाः प्रवर्तन्ते ; तथाऽपि विविच्य निर्देष्टव्ये प्रकृतिसंबन्धरहिते चापवृक्तात्मस्वरूपे तावत्तादृशवृत्तिरपि न संभवतीत्यभिप्रायः । **तत एव**—देहादन्यत्वादेवेत्यर्थः । अत्यन्तानभिव्यक्तत्वविवक्षायाम् * उपासत इति स्ववाक्येनापि विरोध इत्यभिप्रायेणाह—**चक्षुरादिकरणानभिव्यक्त**मिति । * सर्वत्रगमित्यत्राणुत्वश्रुतिविरोधपरिहारायाह—**देवादिदेहेष्वि**ति । यद्वा निषेध्यस्य चिन्त्यत्वस्य प्रसङ्गार्थं * सर्वत्रगमित्युक्तमित्याह—**देवादिदेहेषु वर्तमानमपी**ति । **तेनतेन रूपेणे**ति आत्मचिन्ताविधिविरोधाच्चिन्त्यत्वमात्रनिषेधो न शक्यत इति भावः । **तत एव कूटस्थ**मिति तत्तद्विलक्षणत्वादित्यर्थः । अनेकेषां संतन्यमानानां पुरुषाणां साधारणो हि पूर्वः पुरुषः कूटस्थः ; अत्र तु साधारण्यमात्रं लक्ष्यत इत्याह—**सर्वसाधारण**मिति । एतेन कूटशब्दनिर्दिष्टमायाध्यक्षत्वं वा राशिवत्स्थितत्वं वा वदन्तः प्रसिद्धार्थपरित्यागादिभिर्निरस्ताः । अतः कूट इव निश्चलं बुद्धिक्षयादिरहितमित्यप्यत्र मन्दम् । नन्वेकदा सर्वसाधारणत्वमसिद्धम्, कालभेदेन सर्वजातीयशरीरपरिग्रहेऽपि सर्वव्यक्तिपरिग्रहो नास्ति, अतः कथं सर्वसाधारणत्वमित्यत आह—**देवादी**नि । नह्यसाधारणा देवत्वादय आत्मन्यव्यवधानेन संबध्यन्त इति भावः । उत्क्रान्त्यादिमतो जीवस्य स्पन्दनिषेधादेरनुपपन्नत्वादत्राचलशब्दविवक्षितमाह—**अपरिणामित्वेने**ति । अनित्यत्वं हि परिणामेन व्याप्तम् । ततश्च व्यापकाभावाद्व्याप्याभावो विवक्षित इत्यपुनरुक्तिरित्याह—**तत एव ध्रुव**मिति । * उपासत इत्यनेनैव मनोनियमनस्य सिद्धत्वात्तदुपयुक्तबाह्येन्द्रियव्यापारनियमनपरतया व्याचष्टे—**चक्षुरादिक**मिति । **सम्यङ्नियम्ये**ति * अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहः (वि. ध. १०४. ३) इत्यादिकमभिप्रेत्योक्तम् । * शुनि चैव श्वपाके च पण्डितास्समदर्शिनः (गी. ५. १८) इत्यादिकमभिप्रेत्य **आत्मम्यु ज्ञानैकाकारतया समबुद्ध्य** इत्युक्तम् । **तत एव**—समबुद्धित्वादेव । **य एवमक्षरमुपासते**—अक्षरशब्दवाच्यं प्रत्यगात्मानं प्राप्यतया निश्चित्य परमात्मानं तत्प्रापकतयोपासते । **तेऽपी**ति मद्व्यतिरिक्तप्राप्यान्तरनिश्चयवन्तोऽपीत्यर्थः । **मां प्राप्नुवन्त्येव**—* विष्णुशक्तिः परा प्रोक्ता (वि. ६. ७. ६१) इत्युक्तप्रकारेण * अविभागेन दृष्टत्वात् (ब्र. ४. ४. ४) इत्यपृथक्सिद्धविशेषणभूतं मुक्तस्वरूपं मत्समानाकारं प्राप्नुवन्तीत्यर्थः । प्रमेयशरीरं साधीयः, यदि प्रमाणमुपलभामह इत्याशङ्क्य सोपबृंहणश्रुतिमुदाहरति—**परमं साम्यमुपैती**ति । ननु *अथ परा यया तदक्षरमधिगम्यते (मु. १. १. ५) * अक्षरमम्बरान्तधृतेः (ब्र. १. ३. ९) इत्यादिषु परब्रह्मासाधारणतया प्रयुज्यमानमक्षरपदं कथं जीवात्मवाचकम् ? उच्यते—* अमृताक्षरं हरः (श्वे. १. ९) * कूटस्थोऽक्षर उच्यते (गी. १५. १६) इत्यादिषूक्तत्वादित्याह—**तथाऽक्षरशब्दनिर्दिष्टा**दित्यादिना । *पञ्चविंशकमव्यक्तं षड्विंशः पुरुषोत्तमः । एतज्ज्ञात्वा विमुच्यन्ते यतयश्शान्तबुद्धयः ॥ (य. स्मृ.) इत्युक्तप्रकारेणाव्यक्तजीवात्मासक्तचेतसां क्लेशस्त्वधिकतरः, मय्यावेशितचेतस्त्वाभावात् । अव्यक्तविषया मनोवृत्तिस्सर्वेन्द्रियोपरतिरूपा । ननु देहवत्त्वं सनकादीनामपि संभवतीत्याशङ्क्य—**देहात्माभिमानयुक्तै**रित्युक्तम् ॥ ३–५ ॥

भा ॥ भगवन्तमुपासीनानां युक्ततमत्वं सुव्यक्तमाह—

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः । अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७

भा ॥ ये तु लौकिकानि देहयात्राशेषभूतानि देहधारणार्थानि चाशनादीनि कर्माणि, वैदिकानि च यागदानहोमतपःप्रभृतीनि सर्वाणि सकारणानि सोद्देश्यान्यध्यात्मचेतसा मयि संन्यस्य, मत्पराः—मदेकप्राप्याः, अनन्येनैव योगेन—अनन्यप्रयोजनेन योगेन मां ध्यायन्त उपासते—ध्यानार्चनप्रणामस्तुतिकीर्तनादीनि स्वयमेवात्यर्थप्रियाणि प्राप्यसमानि कुर्वन्तो मामुपासत इत्यर्थः । तेषां मत्प्राप्तिविरोधितया मृत्युभूतात्संसाराख्यात्सागरादहमचिरेणैव कालेन समुद्धर्ता भवामि ॥ ६ ॥ ७ ॥

ता ॥ * ये तु सर्वाणीति । देहयात्राशेषभूतानि कृष्यादीनि, सकारणानि संध्यावन्दनसहितानि, सोद्देश्यानि स्वर्गाद्युद्देशेन चोदितानि । अध्यात्मचेतसा—आत्मनि परमात्मनि यच्चेतः, तदध्यात्म[चेतः]म् ; तेन चेतसा । मत्पराः—अहं परः परमप्राप्यं येषां ते मत्परा इति हृदि निधाय मदेकप्राप्या इत्युक्तम् । अनन्यप्रयोजनेनेति । उपलक्षणं भगवद्ध्यानं * सततं कीर्तयन्तः (९.१४) इत्याद्युक्तानाम् । भगवत्प्राप्त्युपाये प्रयोजनत्वधीर्भगवति तद्भक्ते [वृद्धि]र्विधिरिति भावः । स्वयमेवेति—न तु फलापेक्षयेत्यर्थः । मृत्युभूतात्संसाराख्यादिति—निषादस्थपतिन्यायात्समानाधिकरणसमास उचितः । हेयत्वार्थं च विशेषणमत्रोपयुक्तमिति भावः । मत्प्राप्तिविरोधितयेति मृत्युत्वोपचारनिमित्तम् । सत्यां हि भगवत्प्राप्तौ अमृतत्वम् । नेत्यस्य व्यस्ततया क्रियान्वयभ्रमव्युदासाय अचिरेणैव कालेन समुद्धर्तेत्यन्वय उक्तः ॥ ६ ॥ ७ ॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८

भा ॥ अतोऽतिशयितपुरुषार्थत्वात्सुलभत्वादचिरलभ्यत्वाच्च मय्येव मन आधत्स्व—मयि मनस्समाधानं कुरु । मयि बुद्धिं निवेशय—अहमेव परमप्राप्य इत्यध्यवसायं कुरु । अत ऊर्ध्वं मय्येव निवसिष्यसि—अहमेव परमप्राप्य इत्यध्यवसायपूर्वकमनोनिवेशनानन्तरमेव मयि निवसिष्यसीत्यर्थः ॥ ८ ॥

ता ॥ सामान्येनोक्तं कर्तव्यमर्थं * मय्येवेत्यादिना श्रोतर्यर्जुने निवेशयतीति सङ्गतिप्रदर्शनायाह—अत इति । प्रागुक्तमत्रत्यं च समुच्चित्य हेतुत्रयमुक्तम्—अतिशयितपुरुषार्थत्वादित्यादिना । समाध्युपक्रमपरत्वव्यक्त्यर्थं—मयि मनस्समाधानं कुर्वित्युक्तम् । उपायभूतमनस्समाधानेन पुनरुक्तिपरिहाराय बुद्धिशब्दार्थं प्राप्यभूतं तद्विषयविशेषं चाह—अहमेवेति । * अत ऊर्ध्वमित्युपदेशकालानन्तर्यपरत्वव्युदासायाह—अध्यवसायपूर्वकमनोनिवेशनानन्तरमिति । अन्यवधानविषयेण *अत ऊर्ध्वमित्यनेन अवधारणं फलितमिति वा, तत्रैवकारस्यान्वयमभिप्रेत्य वा अनन्तरमेवेत्युक्तम् । मयि निवसिष्यसि—निवत्स्यसीति यावत् । अत्राधारत्वमात्रं सर्वदाऽस्ति, तद्बुद्धिश्च श्रवणत एव जातेति न तत्परत्वमत्रोचितम् ; अतो मनोनिवेशनानन्तरमेव मुक्तवद्भविष्यसीत्यर्थः । यद्वा दृष्टादृष्टसर्वप्रकाररक्षके मयि, आचार्ये शिष्यवत् पितरि पुत्रवदवस्थित इति निर्भयो भवेत्यभिप्रायः । भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुसुखोपादानत्वाच्च श्रैष्ठ्यमुक्तम् । तस्मिन्मय्यध्यवसायं कुरुष्वेति चार्जुनं प्रत्यनुशिष्टम् ॥ ८ ॥

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥ ९

भा ॥ अथ सहसैव मयि स्थिरं चित्तं समाधातुं न शक्नोषि, ततोऽभ्यासयोगेन मामाप्तुमिच्छ—स्वाभाविकानवधिकातिशयसौन्दर्यसौशील्यसौहार्दवात्सल्यकारुण्यमाधुर्यगाम्भीर्यौदार्यशौर्यवीर्यपराक्रमसार्वज्ञ्य-सत्यकामत्वसत्यसंकल्पत्वसर्वेश्वरत्वसकलकारणत्वाद्यसंख्येयगुणसागरे निखिलहेयप्रत्यनीके मयि निरतिशय-प्रेमगर्भस्मृत्यभ्यासयोगेन स्थिरं चित्तसमाधानं लब्ध्वा मां प्राप्तुमिच्छ ॥ ९ ॥

ता ॥ अथ शब्दादिविषयवासनाकृष्टचेतसोऽत्यन्तादृष्टपूर्वे त्वयि कथं स्थिरं चित्तसमाधानं शक्यमित्यर्जुनाशय-मुन्नीय तदुपायमुपदिशति—* अथ चित्तमिति । कदाचिदप्यशक्यत्वेऽनुपदेश्यत्वमेव, तदुपायोपदेशश्च व्यर्थस्स्यादि-त्यत्राह—**सहसैवेति** । **स्थिर**मिति क्रियाविशेषणम् ; मनसश्चलस्वभावत्वान्न तद्विशेषणत्वमुचितम् । **अथेति** प्रश्नार्थः ; **यद्यर्थविश्रान्तो** वा । **तत** इति—साक्षाच्चित्तसमाधानाशक्तत्वादित्यर्थः । एवमुत्तरत्राप्यथततश्शब्दयोरर्थो ग्राह्यः । किं-**विषयोऽभ्यासः**, **कथं** च तस्यापि शक्यत्वम् , कथं वा तेन त्वत्प्राप्तिरित्यत्राह—**स्वाभाविकेति** । इतरपरिहारहेतुभूत-गुणवति तु विशेषेण सज्जन्त इत्यभिप्रायेण गुणगणग्रहणम् । अयमेवाभिप्रायः * मद्गुणानुसन्धानकृतेत्यत्र (११. भा) व्यक्तो भविष्यति । तत्तद्गुणानां प्रत्येकं चित्ताकर्षकत्वप्रकारो यथासंभवमनुसन्धेयः । सकलकारणत्ववचनं पितृत्वेन प्रीत्यर्थमाश्चर्यत्वार्थं च । गुणवत्यपि यत्किंचिद्दोषदर्शनेऽपि मात्रया विरज्येरन्निति तत्परिहाराय निखिलहेयप्रत्यनीक-त्वोक्तिः । हिरण्यादिवद्विपरीताभ्यासपरिहाराय—**निरतिशयप्रेमगर्भेत्युक्तम्** । आलम्बने पुनःपुनस्स्थापनमभ्यासः ; स एव योगः । अभ्यासवैराग्याभ्यां चित्तनिरोधश्च योगानुशासनेऽस्मिन्नपि शास्त्रे पूर्वमेवोक्तः । अभ्यासमात्रस्याव्यवधानेन प्राप्तिहेतुत्वव्युदासाय **स्थिरं चित्तसमाधानं लब्ध्वेत्युक्तम्** ॥ ९ ॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥ १०

भा ॥ अथैवंविधस्मृत्यभ्यासेऽप्यसमर्थोऽसि, मत्कर्मपरमो भव—मदीयानि कर्माण्यालयनिर्माणोद्यान-करणप्रदीपारोपणमार्जनाभ्युक्षणोपलेपनपुष्पाहरणपूजाप्रवर्तननामसंकीर्तनप्रदक्षिणस्तुतिनमस्कारादीनि, तान्य-त्यर्थप्रियत्वेनाचर ; अत्यर्थप्रियत्वेन मदर्थं कर्माणि कुर्वन्नपि अचिरादभ्यासयोगपूर्विकां मयि स्थिरां चित्तस्थितिं लब्ध्वा मत्प्राप्तिरूपां सिद्धिमवाप्स्यसि ॥ १० ॥

ता ॥ चिराभ्यस्तेषु प्रत्यक्षेषु शीघ्रलभ्येषु भोग्येषु प्रसक्तस्य मनसो दुर्निग्रहत्वाद्गुणवति विशुद्धेऽपि त्वय्यभ्यासो न शक्यः ; कर्मस्वेव हि तेषुतेषु वासना ; ततः कर्मस्वेव मनः प्रवर्तेतेत्यर्जुनाभिप्रायमुन्नीय शीलितसजातीयमभ्यासो-पायमुपदिशति * अभ्यासेऽपीति । अथशब्दोऽत्रानुषक्तः । एवंविधत्वं निरतिशयप्रेमगर्भत्वम् । * सर्वकर्मेति परस्ताद्य-ज्ञादिकर्मणां पर्वान्तरत्वेन वक्ष्यमाणत्वादत्र च * मत्कर्मेति विशेषतो निर्देशाच्च भगवदसाधारणं भक्त्यन्तरङ्गं * सततं कीर्तयन्तो मामित्यादिभिः (९. १४) प्राक्प्रपञ्चितमितिहासपुराणभगवच्छास्त्रादिप्रसिद्धं कर्मात्र विवक्षितमित्यभिप्रायेण—**आलयनिर्माणेत्यादिकमुक्तम्** । परमशब्दाभिप्रेतमाह—**तान्यत्यर्थप्रियत्वेनाचरेति** । *मामिच्छाप्तुमिति पूर्वश्लोकोक्ता प्राप्तिरेवात्रापि सिद्धिशब्देन विवक्षितेति तत्स्थानप्राप्त्या प्रतीयते । तत्र पूर्वप्रक्रियया परंपरयैवास्यापि कर्मणस्साधकत्व-मित्यपिशब्देन द्योत्यत इति ज्ञापनायाह—**अभ्यासयोगपूर्विकामिति** । तत्तत्कर्मणामतिपवित्रत्वात्प्रतिकर्म तच्चिन्तनाच्च तत्स्मृत्यभ्यासोऽचिरात्सिध्यतीत्यर्थसिद्धमित्यभिप्रायेण **अचिरादित्युक्तम्** ॥ १० ॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११

भा ॥ अथ मद्योगमाश्रित्यैतदपि कर्तुं न शक्नोषि—मद्गुणानुसन्धानकृतमदेकप्रियत्वाकारं भक्तियोगमाश्रित्य भक्तियोगाङ्कररूपमेतन्मत्कर्मापि कर्तुं न शक्नोषि, ततोऽक्षरयोगमात्मस्वभावानुसन्धानरूपं परभक्तिजननं पूर्वषट्कोदितमाश्रित्य तदुपायतया सर्वकर्मफलत्यागं कुरु । मत्प्रियत्वेन मदेकप्राप्यताबुद्धिर्हि प्रक्षीणाशेषपापस्यैव जायते । यतात्मवान्—यतमनस्कः । ततोऽनभिसंहितफलेन मदाराधनरूपेणानुष्ठितेन कर्मणा सिद्धेनात्मध्यानेन निवृत्ताविद्यादिसर्वतिरोधाने मच्छेषतैकस्वरूपे प्रत्यगात्मनि साक्षात्कृते सति मयि परा भक्तिः स्वयमेवोत्पद्यते । तथा च वक्ष्यते * स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः (१८. ४६) इत्यारभ्य * विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते । ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् (५४) इति ॥ ११ ॥

ता ॥ स्वार्थेष्वेव कर्मसु निबद्धचित्तस्य कथं त्वदर्थेषु कर्मस्वत्यर्थप्रियत्वेन प्रवृत्तिस्संभवेदित्यत्र तदुपायपरंपराकाष्ठाभूतं कर्मयोगं प्रत्यभिज्ञापयति—* अथैतदिति । * मद्योगमाश्रितः इत्यस्याक्षरयोगविषयेणोत्तरार्धेन अन्वयव्युदासाय पूर्वार्धान्वयमाह—**अथ मद्योग**मिति । तस्याशक्यत्वज्ञापनायाह—**मद्गुणे**ति । भक्तियोगावस्थाविशेषेष्वतः पूर्वावस्था नास्तीति व्यञ्जनाय **भक्तियोगाङ्कररूप**मित्युक्तम् । * मद्योगमित्यनेन जीवात्मयोगव्यवच्छेदः । ततश्च मद्योगमाश्रित्य तदङ्कुरे कर्मण्यसमर्थश्चेज्जीवात्मयोगमाश्रित्य तदङ्कुरे कर्मयोगे प्रवर्तस्वेति वाक्यार्थः । तदेतदभिप्रेत्याह—**ततोऽक्षरे**ति । अक्षरयोगस्याप्यव्यवधानेन मोक्षोपायत्वव्युदासाय **परभक्तिजननमि**त्युक्तम् । सप्रकाराक्षरयोगप्रत्यभिज्ञापनार्थं, मध्यमषट्कोदिताक्षरयोगव्यवच्छेदार्थं च **पूर्वषट्कोदित**मित्युक्तम् । सर्वकर्मफलत्यागस्याव्यवधानेन भक्तियोगजनकत्वव्युदासाय **तदुपायतये**त्युक्तम् । कर्मयोगपूर्वकात्मसाक्षात्कारस्य भक्त्युत्पत्त्युपयोगित्वप्रकारं प्रकरणान्तरोक्तं दर्शयति—**मत्प्रियत्वेने**ति । * मय्येव मन आधत्स्वेति पूर्वं परमात्मनि मनस्समाधानं विहितम्; तदशक्तं प्रत्युपदिश्यमानाक्षरयोगाङ्कररूपे कर्मणि प्रवृत्तस्य तु पूर्वषट्कप्रपञ्चितैर्हेतुभिः मनोनियमनशक्यत्वं * यतात्मवानित्युक्तमित्यभिप्रायेण **यतमनस्क** इत्युक्तम् । कर्मयोगस्यानन्तरश्लोकेऽभिधास्यमानक्रमेण परम्परया भक्तियोगजनकत्वप्रकारमाह—**ततोऽनभिसंहिते**ति । फलत्यागं कुर्विति साध्यांशत्यागवचनेन तत्पूर्वकसाधनानुष्ठानं विवक्षितमिति ज्ञापनाय **अनभिसंहितफलेने**त्यादिकमुक्तम् । अनन्राभिधास्यमानमनश्शान्तिद्वाराऽऽत्मध्यानसिद्धिः । अविद्या संसारकारणं कर्म, * अविद्या कर्मसंज्ञा इत्युपक्रम्य * यया क्षेत्रज्ञशक्तिस्सा वेष्टिता (वि. ६. ७. ६१) इति वचनात् । आदिशब्देन * अनात्मन्यात्मबुद्धिर्या (वि. ६. ७. ११) इत्याद्युक्तसंग्रहः । यद्वाऽत्र अविद्या देहात्मभ्रमादिः; आदिशब्देन कर्मवासनादिसंग्रहः । परभक्तिजनकत्वसिद्ध्यर्थमुक्तं—**मच्छेषतैकस्वरूप** इति । यथा बाल्ये बालक्रीडाप्रसङ्गेन नरेन्द्रभवनान्निष्क्रान्तस्य मार्गाद्भ्रष्टस्य व्याधगृहीतस्य पक्षिणे वर्तमानस्य राजकुमारस्याप्तोपदेशात्स्वात्मनस्तथात्वं मत्वा विमृशतस्स्वात्मनि राजसाम्यमज्ञत्वादिषु पश्यतस्तस्मिन् यथा पितृत्वप्रीतिर्निरतिशया जायते; एवमस्यापि यथोपदेशं भगवच्छेषभूते स्वात्मनि तत्साम्याकारेण साक्षात्कृते भक्तिसिद्ध्यर्थं न किञ्चित्कर्तव्यमस्तीत्यभिप्रायेण **मयि परा भक्तिस्स्वयमेवोत्पद्यत** इत्युक्तम् । एतेनाध्यायारम्भे * ये चाप्यक्षरमव्यक्तम् (१) इत्युक्ताक्षरयोगोऽप्यक्षरसाक्षात्कारद्वारा परभक्तिमुत्पाद्य परमात्मप्राप्तौ विश्राम्यतीति सिद्धम् । स एव चात्रापि प्रथमषट्कोक्तोऽक्षरयोगः प्रस्पष्टमुच्यते । ननु यदशक्तं प्रति यदुपदिश्यते, तत्तुल्य-

फलमशक्ताधिकारं साधनान्तरं दृष्टम्; यथाऽवगाहनाशक्तस्य स्नानान्तराणि। उच्यते चान्यत्र क्रियायोगस्य साक्षान्मोक्ष-साधनत्वं—* मोक्षकारणमव्यक्तमचिन्त्यमपरिग्रहम्। तमाराध्य जगन्नाथं क्रियायोगेन मुच्यते॥ (वि. ध. १. ५४.) इति। तथाऽत्रापि किं न स्यादिति शङ्कायां कर्मयोगस्य भक्तियोगसाधनत्वम् अष्टादशाध्याये वक्ष्यमाणं दर्शयति—**तथा चेति**। अन्यत्र चाप्ययं क्रमस्फुटः—* तत्र चित्तं समावेष्टुं न शक्नोति भवान्यदि। तदभ्यासपरस्तस्मिन् कुरु योगं दिवानिशम्। तत्राप्यसामर्थ्यवतः क्रियायोगो महात्मनः। ब्रह्मणा यस्समाख्यातस्तत्परस्सततं भव। करोषि यानि कर्माणि देवदेवे जगत्पतौ। समर्पयस्व भद्रं ते ततः कर्म प्रहास्यसि। प्रधानं कारणं योगो विमुक्तेर्दैतिजेश्वर। क्रियायोगश्च योगस्य परमं तस्य साधनम्॥ (वि. ध. ८१. २९) इति। * मद्भक्तिं लभते पराम् (१८. ५४) इति वक्ष्यमाणफलस्य कर्मयोगहेतुकत्वं प्रकरणसिद्धमिति ज्ञापनाय—* **स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः इत्यारभ्येत्युक्तम्॥ ११॥**

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥ १२

भा॥ अत्यर्थप्रीतिविरहितात्कर्कशरूपात् स्मृत्यभ्यासादक्षरयाथात्म्यानुसन्धानपूर्वकं तदापरोक्ष्यज्ञान-मेवात्महितत्वे विशिष्यते। आत्मापरोक्ष्यज्ञानादप्यनिष्पन्नरूपात्तदुपायभूतात्मध्यानमेवात्महितत्वे विशिष्यते; तद्ध्यानादप्यनिष्पन्नरूपात्तदुपायभूतं फलत्यागेनानुष्ठितं कर्मैव विशिष्यते। अनभिसंहितफलादनुष्ठितात् कर्मणोऽनन्तरमेव निरस्तपापतया मनसश्शान्तिर्भविष्यति, शान्ते मनसि आत्मध्यानं संपत्स्यते, ध्यानाच्च तदापरोक्ष्यम्, तदापरोक्ष्यात्परा भक्तिरिति भक्तियोगाभ्यासाशक्तस्यात्मनिष्ठैव श्रेयसी। आत्मनिष्ठस्याप्य-शान्तमनसो निष्ठाप्राप्तयेऽन्तर्गतात्मज्ञानानभिसंहितफलकर्मनिष्ठैव श्रेयसीत्यर्थः॥ १२॥

ता॥ अथाव्यवहितोपायानधिकारनिमित्तखेदनिवृत्त्यर्थं रजनीकरबिम्बलिप्सोदस्तहस्तस्तनन्धयवदशक्ये प्रवृत्ति-परिहारार्थं च व्यवहितानेवोपायान्यथाधिकारं सौकर्यातिशयेन प्रशंसन्नुक्तमुपपादयति—* श्रेयो हीति। यथावस्थितवेषेणा-भ्यासात्तदुपायस्य श्रेयस्त्वं वक्तुमयुक्तं, वैपरीत्यात्; अतोऽनधिकारिणा क्रियमाणो भगवदभ्यासः परिपक्वफलरसलोलुप-वटुकरमृदितशलाटुवद्विरस एव स्यादिति तदपेक्षया यथावस्थितरसाभ्यासहेतोश्श्रेयस्त्वमुचितमेव भवेदित्यभिप्रायेण **अत्यर्थप्रीतिविरहितादित्युक्तम्**। तत एव च पित्तोपहतपयःपानवदक्षीणपापस्य दुष्करतामाह—**कर्कशरूपादिति**। अत्र परमात्माभ्यासोपायत्वेन विहितं ज्ञानं जीवात्मविषयमेव युक्तम्; तच्च ध्यानसाध्यत्वेन विवक्षितत्वादपरोक्षाकारमित्यभिप्रायेण **अक्षरयाथात्म्यानुसन्धानपूर्वकं तदापरोक्ष्यज्ञानमित्युक्तम्**। * श्रेयः इत्यस्य * विशिष्यते इत्यस्य च समानार्थ-त्वज्ञापनाय **हितत्वे विशिष्यत इत्युक्तम्**। व्यवहितोपायस्यापि सौकर्यातिशयलक्षणमत्र हितत्वम्; न तु मुख्यत्वादि-रूपम्। **अनिष्पन्नरूपादित्यस्यापि** पूर्ववदभिप्रायः। कर्मणो रजस्तमोमूलरागद्वेषादिनिवृत्तिरूपशान्तिजनकत्वेऽवान्तर-व्यापारमाह—**निरस्तपापतयेति**। ननु * त्यागाच्छान्तिरित्यत्रापि पूर्ववच्छ्रेयस्त्वविधानमेवोचितम्, अन्यथा रीतिभङ्ग-प्रसङ्गात्, ध्यानस्य कर्मसाध्यतया विवक्षितत्वेन ततोऽन्यस्य कर्मसाध्यत्वनिर्देशायोगात् शान्तिव्यवहितस्य च कथं वैशिष्ट्य-मित्यत्राह—**शान्ते मनसीति**। अयमभिप्रायः—* अनन्तरमिति निर्देशेनैव रीतिस्त्यक्तेति प्रतीयते; ततश्च यदनन्तरं यद्दृश्यते, तस्य तत्कार्यत्वमेव व्यक्तम्; ध्यानं प्रति शान्तेर्हेतुतया ध्यानस्य कर्मसाध्यत्वात्तद्वैशिष्ट्याभिप्रायानुरूपमेव

चेदम्—इति । अत्र *त्यागाच्छान्तिरनन्तरमिति हेतुकार्यभावनिर्देश उपलक्षणतया ध्यानादिष्वप्यभिमत इति ज्ञापनाय ध्यानाच्चेत्यादिकमुक्तम् । ननु * श्रेयो हि ज्ञानमभ्यासादित्यत्र स्वारस्येन अभ्यासप्रभृत्युत्तरोत्तरमन्तरङ्गत्वाकारेण प्रकृष्टं ज्ञानादिकमिति किं नाङ्गोक्रियत इत्यत्र पिण्डितार्थं वदन् व्यवहितनिष्ठाश्रैष्ठ्यं निगमयति—**इति भक्तियोगाभ्यासाशक्तस्येति** । अयमभिप्रायः—* अथ चित्तं समाधातुं न शक्नोषि (९) इति ह्युपक्रान्तम्; * अथैतदप्यशक्तोऽसि (११) इत्यनेन च भक्तियोगाङ्गुरेऽप्यशक्तस्य कर्मफलत्यागो विहितः; स चात्र * ध्यानात्कर्मफलत्यागः इति प्रत्यभिज्ञायते; ततश्चाभ्यासापेक्षया तस्याशक्तविषयत्वे सिद्धे तदुभयमध्यगतयोरपि ज्ञानध्यानयोरभ्यासात्पूर्वभावित्वेन कर्मणः परत्वेन च प्रतीयमानयोस्तत्तदशक्ताधिकारिविशेषविषयत्वं सिद्धम्—इति ॥ १२ ॥

भा ॥ अनभिसंहितफलकर्मनिष्ठस्योपादेयान् गुणानाह—

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च । निर्ममो निरहङ्कारस्समदुःखसुखः क्षमी ॥ १३
सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः । मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः ॥ १४

भा ॥ अद्वेष्टा सर्वभूतानाम्—विद्विषतामपकुर्वतामपि सर्वेषां भूतानामद्वेष्टा—मदपराधानुगुणमीश्वरप्रेरितान्येतानि भूतानि द्विषन्त्यपकुर्वन्ति चेत्यनुसन्दधानः, तेषु द्विषत्स्वपकुर्वत्सु च सर्वभूतेषु मैत्रीं मूर्तिं कुर्वन् मैत्रः, तेष्वेव दुःखितेषु करुणां कुर्वन् करुणः, निर्ममः—देहेन्द्रियेषु तत्सम्बन्धिषु च निर्ममः, निरहङ्कारः—देहात्माभिमानरहितः, तत एव समदुःखसुखः—सुखदुःखागमयोः साङ्कल्पिकयोः हर्षोद्वेगरहितः, क्षमी—स्पर्शप्रभवयोरवर्जनीययोरपि तयोर्विकाररहितः, संतुष्टः—यदृच्छोपनतेन येनकेनापि देहधारणद्रव्येण संतुष्टः, सततं योगी—सततं प्रकृतिवियुक्तात्मानुसन्धानपरः, यतात्मा—नियमितमनोवृत्तिः, दृढनिश्चयः—अध्यात्मशास्त्रोदितेष्वर्थेषु दृढनिश्चयः, मय्यर्पितमनोबुद्धिः—भगवान् वासुदेव एवानभिसंहितफलेनानुष्ठितेन कर्मणा आराध्यते, आराधितश्च ममात्मापरोक्ष्यं साधयिष्यतीति मय्यर्पितमनोबुद्धिः, य एवंभूतो मद्भक्तः—एवं कर्मयोगेन मां भजमानो यः, स मे प्रियः ॥ १३ ॥ १४ ॥

ता ॥ एवं * भक्तेश्श्रैष्ठ्यमुपायोक्तिरशक्तस्यात्मनिष्ठता (गी. सं. १६) इत्येतावदुक्तम्; *तत्प्रकारास्त्वतिप्रीतभक्तेद्वादश उच्यते इत्युक्तमुभयमवशिष्टम्; तत्रापि * ये तु धर्म्यामृतमित्यध्यायान्तिमश्लोकेनातिप्रीतिरुच्यते, ततः पूर्वैः * अद्वेष्टेत्यादिभिस्सप्तभिश्श्लोकैरात्मनिष्ठप्रकारा उच्यन्त इत्याह—**अनभिसंहितेति** । * तत्प्रकाराः इत्यनेनेतिकर्तव्यताविशेषरूपाः प्रकारा विवक्षिता इति ज्ञापनायोक्तम्—**उपादेयान् गुणानाहेति** । ननु कर्मनिष्ठस्योपादेयान् गुणानाहेति कथं संगच्छते? एषु हि श्लोकेषु * मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः (१४), * सर्वारम्भपरित्यागी यो मद्भक्तस्स मे प्रियः (१६), * शुभाशुभपरित्यागी भक्तिमान्यस्स मे प्रियः (१७), * अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः (१९) इति भक्तिनिष्ठ एव प्रियत्वेन पुनःपुनरुच्यते । * प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः (७. १७) इति सप्तमोक्त एव ज्ञानी प्रियशब्देन प्रत्यभिज्ञायते; तत्समानाधिकरणानां च * अद्वेष्टेत्यादीनां तदुपायभक्त्यङ्गपरत्वं युक्तमिति । अत्रोच्यते—* ध्यानात्कर्मफलत्यागः (१२) इति कर्मप्रसङ्गानन्तरमेव पठितानां तदङ्गत्वं प्रतीयते । अङ्गभूतानां चैषामुपकारः * त्यागाच्छान्तिरनन्तरमित्युक्तः । प्रागपि कर्मयोगाङ्गतया चैते प्रतिपादिताः । या तु स्वयमस्मै * मद्भक्त इत्यादिभिः प्रतीता भक्तिः, सा कर्मयोगान्तर्भूतभक्तिरेवेति तत्रतत्र श्लोके व्याख्यास्यति ।

नहि भक्तिगन्धरहितौ कर्मज्ञानयोगौ; यथोक्तं—*त्रयाणामपि योगानां त्रिभिरन्योन्यसंगमः (गी. सं. २४) इति। साक्षाद्भक्तिनिष्ठास्तु *येतु (२०) इति श्लोकेन वक्ष्यन्ते। तत्र हि तुशब्देन, *मत्परमा भक्ता इति मत्परमशब्दविशेषणेन, *अतीव मे प्रियाः इति प्रियत्वातिशयवर्णनेन च भक्तान्तरप्रतिपत्तिर्दृढतरा जायते। ततश्च तत्पूर्वं प्रियत्वमात्रेण निर्दिष्टास्त्ववाचीना एव भक्ता इति संग्रहविस्तरकृतोराशयः। प्रसक्तप्रतिषेधाय *सर्वभूतानामिति सविशेषणनिर्देशाभिप्रेतमाह—**विद्विषतामपकुर्वतामपीति**। विशेषणे तात्पर्यमिति ज्ञापनाय **सर्वेषामिति** व्यासः। **विद्विषतामिति** मानसः, **अपकुर्वतामिति** वाचिकः कायिकश्च व्यापारः। न केवलं तेष्वद्वेषमात्रम्, अपितु मैत्री चेत्याह—**मैत्र इति**। मैत्रीहेतुं दर्शयति—**मदपराधेति**। अयमेवाद्वेषस्यापि हेतुः। **मैत्रीं मतिं कुर्वन्निति** सामान्यविषये तद्धिताभिप्रेतविशेषोक्तिः। **मैत्रीं** हितैषिणीमित्यर्थः। करुणाया निरुपाधिकत्वायाह—**तेष्वेव दुःखितेष्विति**। **करुणां कुर्वन्निति** करुणशब्दनिर्वचनम्। नामधातोः णिजन्तात्पचादित्वादच्प्रत्ययः, अर्शआदित्वाद्वा मत्वर्थीयः। एवं मैत्रशब्दे। द्विषत्स्वपकुर्वत्स्वेवेति चैवकाराभिप्रायः। निरहङ्कारत्वं निर्ममत्वे हेतुः। ममकारप्रसङ्गस्थले हि निर्ममत्वं विधेयमित्यभिप्रायेणाह—**देहेन्द्रियेषु तत्संबन्धिषु चेति**। अनात्मन्यात्मबुद्धिर्ह्यत्र निषेध्योऽहंकार इत्यभिप्रायेणाह—**देहात्माभिमानरहित इति**। एतेन *निर्गताहंप्रत्यय इति परव्याख्या दूषिता, अहमर्थस्यैवात्मत्वसमर्थनात्। **तत एवेति** निर्ममत्वनिरहंकारत्वाभ्यामित्यर्थः। **क्षमीति**—नापकर्तृषु क्षमा विवक्षिता, *अद्वेष्टेत्यादिना गतार्थत्वात्। ततश्च *तांस्तितिक्षस्वेति (२.१४) प्रागुक्तावर्जनीयसांस्पर्शिकद्वन्द्वतितिक्षा स्मार्यते। तत्पौनरुक्त्यपरिहाराय *समदुःखसुखः इत्येतदाभिमानिकविषयम्। तथा सति निर्ममत्वनिरहंकारत्वानन्तरोक्तिश्च संगच्छत इत्यभिप्रायेण **सांकल्पिकयोरित्युक्तम्**। अहङ्काराममकारप्रयुक्तयोरित्यर्थः, *संतुष्टो येनकेनचित् (१९) इति वक्ष्यमाणत्वात्, *यदृच्छालाभसंतुष्टः (४.१२) इति प्रागुक्तत्वाच्च स एव संतोषोऽत्राप्यादरार्थं संग्रहेणोक्त इत्यभिप्रायेणाह—**यदृच्छोपनतेन येनकेनापीति**। अन्यत्रापि ह्युच्यते—*येनकेनचिदाच्छन्नो येनकेनचिदाशितः। यत्रक्वचनशायी [स्यात्]च तं देवा ब्राह्मणं विदुः॥ (भा. मो. २५१.१२) इति। शास्त्रीयेष्वयत्नोपनतेषु प्रभूताल्पसरसविरसादिवैषम्यं नानुसन्धेयमिति भावः। यथोक्तमजगरेण—*न सन्निपतितं धर्म्यमुपभोगं यदृच्छया। प्रत्याचक्षे न चाप्येनमनुरुन्धे सुदुर्लभम्॥ (भा. मो. १७९.२४) इति। **सततमिति**—योगकालोपकारकवासनास्थैर्यार्थम्। योगशब्दश्चात्र योगदर्शनानुग्राहकप्राचीनानुसन्धानपरः, साक्षाद्योगस्य सर्वदा कर्तुमशक्यत्वादित्यभिप्रायेणाह—**सततं प्रकृतिवियुक्तेति**। सततमात्मचिन्तनवदनात्मचिन्तननिवृत्तिरपि योगान्तरङ्गमिति यतात्मशब्देनोच्यत इत्याह—**नियमितमनोवृत्तिरिति**। अन्येषां यत्र संदेहप्रसङ्गः, तत्र ह्यस्य निश्चयो वाच्यः; स चात्रानुष्ठानोपकारक एव ग्राह्यः; तदाह—**अध्यात्मशास्त्रेति**। *मयीत्यनेन *अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च (९.२४) इत्युक्तमाराध्यत्वं फलप्रदत्वं चात्र कर्मयोगनिष्ठस्य मनोबुद्ध्यर्पणार्थमपेक्षितमभिसंहितमित्यभिप्रायेणाह—**भगवानिति**। भगवच्छब्देन सकलफलप्रदत्वौपयिकोभयलिङ्गत्वोक्तिः। वासुदेवशब्देन सर्वकर्माराध्यत्वौपयिकसर्वदेवतान्तर्यामित्वोक्तिः। वक्तृरूपविवक्षा वा। आराध्यत्वेन चिन्तनमत्र मनसोऽर्पणम्। फलप्रदत्वाध्यवसायो बुद्ध्यर्पणम्। यद्वा द्वयोरपि चिन्ताध्यवसायौ भाव्यौ। मनसाऽध्यवसायो वा मनोबुद्धिः। उद्देश्यांशं निष्कर्षयति—**य एवंभूतो मद्भक्त इति**। अशक्तस्य शक्यनिष्ठाप्रतिपादनप्रकरणत्वात्साक्षाद्भक्तियोगनिष्ठाद्यवच्छिन्दन् श्लोकद्वयस्य पिण्डितार्थमाह—**एवं कर्मयोगेनेति**। उद्देश्यविशेषणेष्वपि तात्पर्यं मीमांसकैरेवाङ्गीकृतम्, यत्र धर्मिविशेषणप्रयोगस्य गत्यन्तरं नोपलभ्यमिति भावः। प्रियः प्रीतिविषयः, प्रीतोऽहं तदभिलषितं ददामीति भावः॥ १३॥ १४॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यस्स च मे प्रियः ॥ १५

भा ॥ यस्मात् कर्मनिष्ठात् पुरुषान्निमित्तभूतात्लोको नोद्विजते, यो लोकोद्वेगकरं कर्म किञ्चिदपि न करोतीत्यर्थः ; लोकाच्च निमित्तभूताद्यो नोद्विजते—यमुद्दिश्य सर्वलोको नोद्वेगकरं कर्म करोति, सर्वाविरोधित्वनिश्चयात् ; अत एव कञ्चन प्रति हर्षेण, कञ्चन प्रत्यमर्षेण, कञ्चन प्रति भयेन, कञ्चन प्रत्युद्वेगेन मुक्तः ; एवंभूतो यः, सोऽपि मम प्रियः ॥ १५ ॥

ता ॥ अथ निर्ममत्वादिफलभूतं लोकोद्वेगकरकर्मत्यागरूपं गुणं विदधत्तत्फल्योगं च दर्शयति—* यस्मादिति श्लोकेन । यच्छब्दावृत्तिमात्रेणाधिकार्यन्तरत्वशङ्कानिवृत्त्यर्थम् **यस्मात्कर्मनिष्ठादि**त्युक्तम् । लोकगताया उद्वेगनिवृत्तेः कर्मनिष्ठं प्रति विधातुमशक्यत्वादुद्वेगकारणभूतकर्मनिवृत्तिर्विधेयत्वेन विवक्षितेति दर्शयति—**यो लोकोद्वेगकर**मिति । अपकाररूपत्वाभावेऽप्यश्लीलभाषणादिमात्रेणापि हि लोकोद्वेगो जायत इत्यभिप्रायेण **किञ्चिदपी**त्युक्तम् । एतेन * अद्वेष्टेत्यादिना पूर्वोक्तात्, * समश्शत्रौ च (१८) इत्यादिना वक्ष्यमाणाच्च वैषम्यं सिद्धम् । * लोकान्नोद्विजते च यः इत्यत्रापि हेत्वभावे तात्पर्यम्, अन्यथा पूर्वोत्तरपौनरुक्त्यप्रसङ्गात्, असिन्नपि श्लोके * हर्षामर्षभयोद्वेगैर्मुक्तः इत्युद्वेगाभावस्य विहितत्वात्, * यस्मान्नोद्विजते इत्यनेन भिन्नरीतित्वप्रसङ्गाच्चेत्यभिप्रायेणाह—**यमुद्दिश्ये**ति । लोकगतोद्वेगकरकर्मनिवृत्तिरपि नास्य विधेयेति विधेयं दर्शयितुं लोकस्य तथाविधकर्माकरणे हेतुमाह—**सर्वे**ति । यथा सर्वाविरोधित्वेन कर्मनिष्ठं लोको निश्चिनुयात्, तथाऽसौ कर्मनिष्ठो वर्तेतेत्युक्तं भवति । * यो न हृष्यति न द्वेष्टि (१७) इति वक्ष्यमाणादत्र हर्षादेर्विषयभेदेन निवर्तकभेदेन च वैषम्यज्ञापनायाह—**अत एव कंचन प्रती**ति । **अत एवे**ति—उपकारापकारादिहेतुभेदाभावादित्यर्थः । **कंचन प्रत्युद्वेगेने**ति—भयादेः पृथगुक्तत्वाद्भयकार्यभूतं कर्म वा जुगुप्सा वाऽत्रोद्वेगः । * यस्मान्नोद्विजते इत्यादिवाक्यत्रयार्थसङ्कलनेनाह—**एवंभूतो य** इति । पूर्वश्लोकोक्तमैत्रत्वकरुणत्वादिगुणगणाभावेऽपि लोकोद्वेगकरकर्मनिवृत्तिमात्रेणापि प्रीतो भवामीति * सचेत्यादिनोच्यत इत्याह—**सोऽपी**ति ॥ १५ ॥

अनपेक्षश्शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तस्स मे प्रियः ॥ १६

भा ॥ अनपेक्षः—आत्मव्यतिरिक्ते कृत्स्ने वस्तुन्यनपेक्षः, शुचिः—शास्त्रविहितद्रव्यवर्धितकायः, दक्षः—शास्त्रीयक्रियोपादानसमर्थः, अन्यत्रोदासीनः, गतव्यथः—शास्त्रीयक्रियानिर्वृत्ताववर्जनीयशीतोष्णपरुषस्पर्शादिदुःखेषु व्यथारहितः, सर्वारम्भपरित्यागी—शास्त्रीयव्यतिरिक्तसर्वकर्मारम्भपरित्यागी, य एवंभूतो मद्भक्तः, स मे प्रियः ॥ १६ ॥

ता ॥ आत्ममात्रापेक्षत्वेन शास्त्रीयमात्रजागरूकत्वं तद्व्यतिरिक्तेष्वत्यन्तनिरीहत्वं चाह—* अनपेक्ष इति श्लोकेन । प्रस्तुताधिकारविरोधव्युदासाय सामान्यं विशेषे नियमयति—**आत्मव्यतिरिक्त** इति । अन्येषु संकोचकाभावात् **कृत्स्न** इत्युक्तम् । फलभूतस्य शुचित्वस्य स्वरूपेण विधातुमशक्यत्वात्तद्धेतौ तात्पर्यमित्याह—**शास्त्रविहिते**ति । अन्यविषयसामर्थ्यस्यानुपयुक्तत्वात्तदुपयुक्तानुष्ठानसामर्थ्यं दक्षशब्देनाभिधीयत इत्याह—**शास्त्रीये**ति । विरोधपरिहारायौदासीन्यं विहितव्यतिरिक्तविषयमित्याह—**अन्यत्रोदासीन** इति । अविहिताप्रतिषिद्धेष्वित्यर्थः । अपक्षपातित्वमिहौदासीन्यं वदन्तः

*समशत्रौ चेत्यादिवक्ष्यमाणपौनरुक्त्यान्निरस्ताः । निषिध्यमानव्यथाप्रसङ्गं दर्शयति—**शास्त्रीयक्रियानिवृत्ताविति** । विहितयोगारम्भादिव्यवच्छेदायाह—**शास्त्रीयव्यतिरिक्तेति** । सामिसंधिकपरित्यागस्यात्र विवक्षितत्वात् माध्यस्थ्यरूपौदासीन्याद्भेदः । यद्वा निष्प्रयत्नतारूपोदासीनत्वफलं सर्वकर्मारम्भपरित्यागः । कर्मात्र वाक्कायव्यापारः । स एवारभ्यमाणत्वादारम्भः । तस्योपादानं वा । एतदखिलमपि मद्भक्तिविशिष्टतयैव प्रियत्वकारणमिति मद्भक्तशब्देन विवक्षितमित्याह—**य एवंभूतो मद्भक्त इति** ॥ १६ ॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यस्स मे प्रियः ॥ १७

भा ॥ यो न हृष्यति—यन्मनुष्याणां हर्षनिमित्तं प्रियजातं तत्प्राप्य यः कर्मयोगी न हृष्यति ; यच्चाप्रियम्, तत्प्राप्य न द्वेष्टि ; यच्च मनुष्याणां शोकनिमित्तं भार्यापुत्रवित्तक्षयादिकम्, तत्प्राप्य न शोचति ; तथाविधमप्राप्तं च न काङ्क्षति ; शुभाशुभपरित्यागी पापवत्पुण्यस्यापि बन्धहेतुत्वाविशेषादुभयपरित्यागी ; य एवंभूतो भक्तिमान्, स मे प्रियः ॥ १७ ॥

ता ॥ अथ दैवादागतेष्वपि प्रियाप्रियेषु शोकहर्षाद्यभावोऽनागतेषु निषिद्धव्यतिरिक्तेष्वपि वाञ्छारहितत्वं तत्कारणत्यागश्चोच्यते—*यो न हृष्यतीति श्लोकेन । *हर्षामर्षेति पूर्वं पुरुषविशेषनिमित्तं हर्षादिकं निषिद्धम् ; इह त्वर्थलाभादिनिमित्तमिति विशेष इत्यभिप्रायेणाह—**यन्मनुष्याणामिति** । यच्छब्दव्याख्यानरूपेण *कर्मयोगीत्यनेन हर्षाभावहेतुस्सूचितः । आत्मव्यतिरिक्तनिस्स्पृहो ह्ययमिति भावः । *अद्वेष्टा सर्वभूतानामित्युक्ताद्विशेषज्ञापनायाह—**यच्चाप्रियं तत्प्राप्येति** । हेत्वनागमने हर्षद्वेषशोकादेरभावस्य सर्वजनसाधारणत्वाद्विकारहेतौ सति निर्विकारत्वं **अस्य** विधेयविशेष इति ज्ञापनाय तत्तन्निमित्तकथनम् । *मिथिलायां प्रदीप्तायां न मे किंचन दह्यते (भा. रा. १७. १९) इतिवत् । प्राप्ते काङ्क्षणीयत्वाभावात् **अप्राप्तमित्युक्तम्** । **तथाविधं**—यद्विनाशे शोकस्यात्, तथाभूतमित्यर्थः । एतेन शोकादिनिवृत्तौ हेतुस्सूचितः । यथोक्तं भगवता **पराशरेण**—*यावतः कुरुते जन्तुस्संबन्धान्मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥ (वि. १. १७. ६६) इति । शुभाशुभशब्दयोर्मङ्गल्यतदितरमात्रविषयतया प्रयोगेऽपि मङ्गल्यत्वाद्याकारताऽपि पुण्याद्याकाररूपत्वेनैवेति तन्निषेधे तात्पर्यम् । तत्र पापस्य दूरनिरस्तत्वात् दृष्टान्तार्थं तदुपादानमित्यभिप्रायेणाह—**पापवत्पुण्यस्यापीति** । स्वर्गादिहेतोः पुण्यस्य विधिविषयस्यापि तत्साधनत्ववेषेण त्याज्यत्वे हेतुमाह—**बन्धहेतुत्वाविशेषादिति** । एतेन स्वर्गादिहेतोः पुण्यस्यापि मुमुक्ष्वपेक्षया पापत्वमेवेति सूचितम् । शास्त्रवेद्यमनिष्टसाधनं हि पापम् । श्रुतिश्च—*न सुकृतं न दुष्कृतमित्युक्त्वा *सर्वे पाप्मानोऽतो निवर्तन्ते (छा. ८. ४. १) इति निगमनेन सुकृतस्यापि पाप्मतामाह ॥ १७ ॥

समश्शत्रौ च मित्रे च तथा मानावमानयोः । शीतोष्णसुखदुःखेषु समस्सङ्गविवर्जितः ॥ १८
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येनकेनचित् । अनिकेतस्स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९

भा ॥ *अद्वेष्टा सर्वभूतानाम् (१३) इत्यादिना शत्रुमित्रादिषु द्वेषादिरहितत्वमुक्तम् ; अत्र तेषु सन्निहितेष्वपि समचित्तत्वं ततोऽप्यतिरिक्तो विशेष उच्यते । आत्मनि स्थिरमतित्वेन निकेतनादिष्वसक्त इत्यनिकेतः ; तत एव मानावमानादिष्वपि समः ; य एवंभूतो भक्तिमान्, स मे प्रियः ॥ १८ ॥ १९ ॥

ता ॥ * समश्शत्रौ चेत्यादिना श्लोकद्वयेन बहुविधं सहेतुकं साम्यमुच्यते ; तत्र पुनरुक्तिमाशङ्क्य परिहरति—अद्वेष्टेति । सन्निहितस्वरूपमानावमानादिद्वन्द्वान्तरसहपाठवशादत्र शत्रुमित्रयोरपि सन्निहितयोर्विवक्षा । सन्निधिर्हि विकारमतिशयेन जनयति । **ततोऽप्यतिरिक्त** इति । दूरस्थासन्नसाधारणात् अद्वेषमात्रादतिरिक्त इत्यर्थः । क्वचिदपि सङ्गवर्जितत्वाच्छीतोष्णादिषु समत्वम् । निन्दास्तुत्योः फलभूतामर्षानुरागादिरहितत्वान्निष्फलत्ववेषेण तुल्यत्वम् । * मौनीति नात्र मननं विवक्षितम्, * स्थिरमतिरित्यनेनैव सिद्धत्वात् ; मुनिर्मननशीलः, तस्य भावो मौनमित्यप्रसिद्धार्थता च स्यात् ; नापि समस्तशब्दानुच्चारणं, तस्यात्यन्तापेक्षाभावात्, सङ्कीर्तनादिविधेश्च ; नच कालविशेषादिनियतमौनव्रतं, तस्योपयुक्तत्वेऽपि पूर्वोत्तरसंगत्यभावात् ; निन्दन्तं हि निन्दन्ति लौकिकाः, स्तुवन्तं च स्तुवन्ति ; ततः प्रसक्तनिन्दास्तोत्रप्रतिक्षेपपरत्वमेवोचितम् । * संतुष्टो येनकेनचिदिति मौनित्वे हेत्वन्तरपरम् ; अन्यथा *संतुष्टस्सततं योगीति पूर्वोक्तेन पुनरुक्तिप्रसङ्गात् । यदृच्छयाऽऽगतैर्यत्किञ्चिद्द्रव्यैरसंतुष्टो हि सापेक्षतया स्तुतिपूर्वं कञ्चन याचते, अदातारं च द्विष्याद्वा, अन्यस्तुतितात्पर्येण वा निन्दति । स्थिरमतित्वस्य प्रकरणविशेषितं विषयं दर्शयन् सर्वस्योपरि निर्दिष्टस्य तस्य साक्षात्परंपरया वा पूर्वोक्तसमस्तहेतुत्वं च दर्शयति—**आत्मनी**ति । निकेतननिषेधस्य क्षेत्रादिनिषेधोपलक्षणतया आदिशब्दः । अत्र * सम इति द्वौ परिव्राड्विषयाविति **यादवप्रकाशोक्तस्य** न लिङ्गं पश्यामः । शत्रुमित्रसाम्यादिगुणानां मुमुक्षौ गृहस्थेऽप्यवश्यंभावात् ; अनिकेतत्वस्य च * नचापि रम्यावसथप्रियस्य (आप. १०. ६) इत्यादिन्यायेन निस्सङ्गतयाऽपि निर्वाहात् । गृहस्थादिषु निकेतसद्भावनिषेधस्यानुपकारकत्वात्, तत्सद्भावस्य क्वचिद्योगाद्युपकारकत्वसंभावनया च तत्सङ्गमात्रमेव निषेध्यतया विवक्षितमिति दर्शयितुम् **असक्त** इत्युक्तम् । अत एव * अद्वेष्टेत्यादीनां सर्वेषामप्यक्षरोपासकसंन्यासिविषयत्वं शंकरोक्तं निरस्तम् । क्वचित्सक्तस्य हि स्वरूपतस्सुखत्वरहितैर्मानादिभिः प्रीत्यादिकम् ; अतः क्वचिदपि सङ्गाभावान्मानादिषु समत्वमित्याह—**तत एवे**ति । पूर्वश्लोकेप्विवात्रापि यत्तच्छब्दाध्याहारेणोद्देश्यविधेयांशविभागं दर्शयति—**य एवंभूतो भक्तिमान्स मे प्रिय** इति ॥ १८ ॥ १९ ॥

भा ॥ **अस्मादात्मनिष्ठाद्भक्तियोगनिष्ठस्य श्रैष्ठ्यं प्रतिपादयन् यथोपक्रममुपसंहरति—**

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २०

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु **भक्तियोगो** नाम द्वादशोऽध्यायः ॥ १२ ॥

भा ॥ **धर्म्यं चामृतं चेति धर्म्यामृतम्, ये तु प्राप्यसमं प्रापकं भक्तियोगम्, यथोक्तम्—* मय्यावेश्य मनो ये माम् (२) इत्यादिनोक्तेन प्रकारेण, उपासते ; ते भक्ताः अतितरां मम प्रियाः ॥ २० ॥**

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये द्वादशोऽध्यायः ॥ १२ ॥

ता ॥ अध्यायोपक्रमे प्रश्नपूर्वकं भक्तियोगनिष्ठस्य अक्षरनिष्ठाच्छ्रैष्ठ्यं युक्तम् ; भक्तियोगाशक्तिप्रसङ्गेन अक्षरयोगस्य परंपरया भक्तियोगसाधनत्वं तदपेक्षितगुणाश्चोक्ताः ; अथाध्यायारम्भगतप्रश्नस्योत्तरं प्रपञ्चितं निगमयतीत्याह—**अस्मादि**ति । * मय्यावेश्य मनो ये माम् (२) इति श्लोकोऽयं चैकार्थ एव द्युपलभ्यत इत्यभिप्रायेण—**यथोपक्रम**मित्युक्तम् । तत्र * नित्ययुक्ताः इत्युक्त एवार्थोऽत्र * मत्परमाः इत्युच्यते । तत्र * श्रद्धया परयोपेताः इत्युक्तम् ; अत्र

तु * श्रद्दधानाः इति । तत्र * ते मे युक्ततमा मताः इत्युक्तम्; अत्र तु तत्फलित्वेन * भक्तास्तेऽतीव मे प्रियाः इत्युच्यते । अतस्स एवार्थोऽत्रोपसंह्रियते । अस्य चाधिकार्यन्तरपरत्वे तुशब्दविशेषणादयो हेतवः पूर्वमेवोक्ताः । अनेनैव च श्लोकेन मध्यमषट्कप्रधानार्थभक्तियोगोपसंहारश्च कृतो भवति । * धर्म्यामृतमित्यनेन विवक्षितमाकारद्वयं वक्तुं तदुपयुक्तं कर्मधारयत्वं दर्शयति—**धर्म्यं चामृतं चेति** । धर्मादनपेतं धर्म्यम् । अतोऽत्र धर्म्यशब्देन साधनत्ववचनादमृतशब्देनामृतसाधनत्वस्याविवक्षितत्वात्फलत्वदेव भोग्यत्वं विवक्षितमित्याह—**ये तु प्राप्यसममिति** । **यथोक्तमिति**व्याख्येयपदोपादानम् । प्रसङ्गागतकर्मयोगोक्तेर्व्युदासाय **मय्यावेश्येत्यादिकमुक्तम्** । पूर्वोक्तानामन्येषामपि भक्तत्वमस्तीति तद्व्यवच्छेदाय **ते भक्ता** इति विशेष्यते । पूर्वेषु प्रियत्वमुदारत्वप्रयुक्तम्; अस्मिंस्तु स्वाभिमतान्तरात्मत्वप्रयुक्तम् । अतो ह्यतीव प्रियत्वमिहोक्तम् । उक्तं च प्रागेव—* उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् (७. १८) इत्याद्युपक्रम्य, * स महात्मा सुदुर्लभः (७. १९) इति । एतेन * अद्वेष्टेत्यादिना प्रक्रान्तं धर्मजातं * ये तु धर्म्यामृतमिति श्लोकेनोपसंह्रियत इति परोक्तं निरस्तम्, भिन्नाधिकारविषयत्वस्य व्यञ्जितत्वात् ॥ २० ॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां द्वादशोऽध्यायः ॥ १२ ॥

इति श्रीमद्भगवद्गीतायां

॥ द्वितीयषट्कं समाप्तम् ॥

श्रीः

॥ अथ त्रयोदशोऽध्यायः ॥ १३ ॥

भा ॥ पूर्वस्मिन् षट्के परमप्राप्यस्य परस्य ब्रह्मणो भगवतो वासुदेवस्य प्राप्त्युपायभूतभक्तिरूपभगवदुपासनाङ्गभूतं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनं ज्ञानयोगकर्मयोगलक्षणनिष्ठाद्वयसाध्यमुक्तम् । मध्यमे च परमप्राप्यभूतभगवत्तत्त्वयाथात्म्यतन्माहात्म्यज्ञानपूर्वकैकान्तिकात्यन्तिकभक्तियोगनिष्ठा प्रतिपादिता । अतिशयितैश्वर्यापेक्षाणामात्मकैवल्यमात्रापेक्षाणां च भक्तियोगस्तत्तदपेक्षितसाधनमिति चोक्तम् । इदानीमुपरितने षट्के प्रकृतिपुरुषतत्संसर्गरूपप्रपञ्चेश्वरतद्याथात्म्यकर्मज्ञानभक्तिस्वरूपतदुपादानप्रकाराश्च षट्कद्वयोदिता विशोध्यन्ते । तत्र तावत् त्रयोदशे—देहात्मनोस्स्वरूपम्, देहयाथाम्यशोधनम्, देहवियुक्तात्मप्राप्त्युपायः, विविक्तात्मस्वरूपसंशोधनम्, तथाविधस्यात्मनश्चाचित्संबन्धहेतुः, ततो विवेकानुसन्धानप्रकारश्चोच्यते ।

श्रीभगवानुवाच—

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १

भा ॥ इदं शरीरम्—देवोऽहम्, मनुष्योऽहम्, स्थूलोऽहम्, कृशोऽहमित्यात्मना भोक्ता सह सामानाधिकरण्येन प्रतीयमानं भोक्तुरात्मनोऽर्थान्तरभू[तं तस्य]तस्य भोगक्षेत्रमिति शरीरयाथात्म्यविद्भिरभिधीयते । एतत् अवयवशस्संघातरूपेण च, इदमहं वेद्मीति यो वेत्ति, तं वेद्यभूतादस्माद्देहादितृत्वेनार्थान्तरभूतम्, क्षेत्रज्ञ इति तद्विदः—आत्मयाथात्म्यविदः, प्राहुः । यद्यपि देहव्यतिरिक्तघटाद्यर्थानुसन्धानवेलायां देवोऽहम्, मनुष्योऽहं घटादिकं जानामीति देहसामानाधिकरण्येन ज्ञातारमात्मानमनुसन्धत्ते, तथाऽपि देहानुभववेलायां देहमपि घटादिकमिव इदमहं वेद्मीति वेद्यतया वेदिताऽनुभवतीति वेदितुरात्मनो वेद्यतया शरीरमपि घटादिवदर्थान्तरभूतम् । तथा घटादेरिव वेद्यभूताच्छरीरादपि वेदिता क्षेत्रज्ञोऽर्थान्तरभूतः । सामानाधिकरण्येन प्रतीतिस्तु वस्तुतश्शरीरस्य गोत्वादिवदात्मविशेषणतैकस्वभावतया तदपृथक्सिद्धेरुपपन्ना । तत्र वेदितुरसाधारणाकारस्य चक्षुरादिकरणाविषयत्वाद्योगसंस्कृतमनोविषयत्वाच्च प्रकृतिसन्निधानादेव मूढाः प्रकृत्याकारमेव वेदितारं पश्यन्ति; तथा च वक्ष्यति * उत्क्रामन्तं स्थितं वाऽपि भुञ्जानं वा गुणान्वितम् । विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ (१५. १०) इति ॥ १ ॥

ता ॥ अथ तृतीयषट्कसंगतिं वक्तुं प्रथमद्वितीयषट्कार्थं संग्रहेणाह—पूर्वस्मिन्निति । अत्र पदानां भावः प्राक्प्रपञ्चितः । *ज्ञानकर्मात्मिके निष्ठे योगलक्ष्ये सुसंस्कृते । आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केन चोदिते ॥ (गी. सं. २) इति प्रथमषट्कार्थसंग्रहः । सिषाधयिषितपर्यन्ताविच्छिन्नसाधनानुष्ठानमिह निष्ठा । * मध्यमे भगवत्तत्त्वयाथात्म्यावाप्तिसिद्धये । ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः ॥ (३) इति संग्रहानुसारेण मध्यमषट्कप्रधानार्थमुक्त्वा प्रसङ्गोक्तं चाह—अतिशयितेति । इति चेति चकारोऽन्वाचयार्थः । इदं चान्ते संगृहीतं * भक्तियोगस्तदर्थी चेत्समग्रैश्वर्यसाधनम् । आत्मार्थी चेत्तयोऽप्येते तत्कैवल्यस्य साधकाः ॥ (२७) इति । * प्रधानपुरुषव्यक्तसर्वेश्वरविवेचनम् । कर्म चीर्भक्तिरित्यादिः पूर्वशेषोऽन्तिमोदितः ॥ (४) इति संग्रहश्लोकव्याख्यानाभिप्रायेण तृतीयषट्कं पूर्वोक्तषट्कद्वयेन संगमयति—इदानीमिति । इदानीं—सामान्यतः प्रतिपत्त्या बुभुत्सोदयेन विशोधनावसरे प्राप्त इत्यर्थः । तत्संसर्ग-

रूपप्रपञ्चेति व्यक्तशब्दार्थविवरणम् । संसर्गोऽत्र समुदायः ; यद्वा, *तस्मिन् गर्भं दधाम्यहम् । संभवस्सर्वभूतानां ततो भवति (गी. १४. ३) इति संसर्गविशेषमूलत्वात्संसर्गरूपतोक्तिः । याथात्म्यशब्देन विवेचनशब्दाभिप्रेतकथनम् । विविच्यतेऽनेनेति व्यावर्तकधर्मोऽत्र विवेचनम् । **तदुपादानप्रकारा** इति आदिशब्दसंगृहीतोक्तिः । **षट्कद्वयोदिता विशोध्यन्त** इत्यनेन *पूर्वशेषोऽन्तिमोदितः (गी. सं. ४) इत्येतदभिप्रेतसंगतिविशेषविवरणम् । **विशोध्यन्त** इति वचनं वक्ष्यमाणस्य सर्वस्य सामान्यतः पुनरुक्तिपरिहारार्थम् । आभिप्रायिकानुक्तापेक्षितांशप्रतिपादनेन प्रागुक्तानां सर्वप्रकारेण निस्संशयीकरणं विशोधनम् ॥

अथ *देहस्वरूपमात्मासिहेतुरात्मविशोधनम् । बन्धहेतुर्विवेकश्च त्रयोदश उदीर्यते ॥ (१७) इति संग्रहश्लोकमपि व्याकुर्वन्नयोदशमवतारयति—**तत्र तावदिति** । **तत्र**—तृतीयषट्के वक्तव्ये [वा] । **तावत्**—प्रथममित्यर्थः । तेनाध्यायान्तरेभ्यो वक्ष्यमाणेभ्यः पञ्चभ्योऽस्य पूर्वत्वं संगतिविशेषसिद्धमित्यभिप्रेतम् । तथा हि, प्रथमषट्कं हि शास्त्रोपोद्घातशास्त्रावतरणहेतुभूतशोकनिवर्तकात्मदर्शनपरद्विकेन आत्मदर्शनस्यैव साधनप्रपञ्चनपरचतुष्केण च भिन्नम् । द्वितीयं च षट्कं साधनाधिकारिफलादिभेदपरिकरितभक्तियोगस्वरूपपरेण तदुत्पत्तिविवृद्धय[र्थार्थ]र्थपरेण च त्रिकभेदेन भिन्नम् । तथा तृतीयं च षट्कं त्रिकद्वयात्मकम् । तत्र प्रथमत्रिकं प्रधानपुरुषव्यक्तसर्वेश्वररूपतत्त्वविवेचनपरम् । तत्र प्रसङ्गेन तु मात्रया कर्तव्यानुप्रवेशः । षोडशादित्रिकं कर्तव्यविवेचनपरम् । तत्रापि तत्तत्प्रसङ्गान्मात्रया तत्त्वानुप्रवेशः । शास्त्रवश्यत्वादिविवेकोऽपि हि कर्तव्यसिद्ध्यर्थमेव । एवं त्रिकभेदो विवक्षित इति षोडशारम्भे दर्शयिष्यति—*अतीतेनाध्यायत्रयेणेत्यादिना । अत्र *प्रधानपुरुषव्यक्तसर्वेश्वरविवेचनम् (गी. सं. ४) इति समासपदेन प्रथमत्रिकार्थस्संगृहीतः । *कर्मधीर्भक्तिरित्यादिरिति तु कर्तव्यरूपद्वितीयत्रिकार्थस्संगृहीत इति भाष्यकाराभिप्रायः । एतेन *समाप्तं च पञ्चदशेऽध्याये शास्त्रम् ; उत्तरैस्त्रिभिः खिलाध्यायैः परिशिष्टा नानाधर्मा निरूपिताः इति **यादवप्रकाश**कल्पनाऽपि निरस्ता । अत्र च त्रिके त्रयोदशचतुर्दशाभ्यां *गतासूनगतासूंश्च (२. ११) इत्यादिना क्रमेण देहात्मविवेकादिमुखेन प्रवृत्तप्रथमषट्कार्थशेषभूतदेहात्मयाथात्म्यसंसारतन्निवृत्तितन्निवर्तकादि परिशोध्यते । पञ्चदशेन तु मध्यमषट्कप्रतिपादितद्विविधप्रकृतिशेषिभूतचतुर्विधाधिकारिभजनीयपरमपुरुषपरिशोधनं क्रियते । इमं च भेदं पञ्चदशारम्भे सूचयिष्यति—*क्षेत्राध्यायेत्यादिना । क्षेत्राध्यायप्रसक्तबन्धहेतुगुणसङ्गस्य बन्धहेतुताप्रकारतन्निवृत्त्यादिपरतया *परं भूयः इत्यादेः अध्यायस्य (१५) पश्चाद्भावित्वं सिद्धम् । ततः क्षेत्राध्यायस्य तृतीयषट्कादित्वं युक्तमिति । तदेतदखिलमभिप्रेत्य—**तत्र तावत् त्रयोदश इत्युक्तम् । देहात्मनोस्स्वरूपं देहयाथात्म्यशोधन**मिति अध्यायशरीरपर्यालोचनेन संग्रहश्लोकेऽनुक्तस्यापि चकारसमुच्चितस्योक्तिः । देहस्वरूपमिति तत्प्रतिसंबन्ध्यात्मस्वरूपस्याप्युलक्षण[र्थ]म् । *आत्मविशोधनमिति संग्रहश्च देहयाथात्म्यशोधनस्याप्युपलक्षणम् । **देहात्मनोस्स्वरूप**मिति धर्मनिर्देशो विवक्षितः । विवेकशब्देन च न विविच्य प्रतिपादनमात्रं भेदमात्रं वा विवक्षितम्, *आत्मविशोधनमित्यनेनैव गतार्थत्वात् । *ध्यानेनात्मनि पश्यन्ति (२४) इत्यादिना द्रष्टव्यत्वेन निर्दिष्टस्यात्मनः *समं सर्वेषु (२७) इत्यादिना स्वयं विविच्यानुसंधानप्रकारो हि वक्ष्यते । तदाह—**ततो विवेकानुसन्धानप्रकारश्चेति** ।

अथ *गतासूनगतासूंश्च (२. ११) इति प्राक्स्वेनैवोपक्षिप्तक्रमेण सप्तमारम्भप्रकृतिद्वयनिर्देशक्रमेण चापृष्टोऽप्यवसरे प्राप्ते स्वयमेव परिशोधयितुं भगवानुवाच—*इदं शरीरमिति । भ्रान्तिरूपलोकोपलम्भप्रकारनिर्देशपर इदंशब्द

इत्यभिप्रायेण देवोऽहमित्याद्युक्तिः । देवोऽहम्, मनुष्योऽहमित्यनन्तजातिभेदोपलक्षणम्; स्थूलोऽहम्, कृशोऽहमित्यनन्तगुणभेदोपलक्षणम् । एवं जातिगुणोदाहरणं गच्छामीत्यादिक्रियाविशेषोपलक्षणार्थम् । संसारिणां भोक्तृत्वं हि प्रायशो देहात्मभ्रममूलमित्यभिप्रायेण **आत्मना भोक्त्रेत्युक्तम्** । * क्षेत्रमित्यभिधीयते इत्यनेनैव भोग्यत्वं प्रतीतम् । ततश्च केदाराद्देवदत्त इव प्रतिसंबन्धित्वेनार्थाक्षिप्तो भोक्ता भोक्तृत्वाकारेणार्थान्तरभूतस्सिद्ध इत्याह—**भोक्तुरात्मनोऽर्थान्तरभूतस्येति** । भोगस्योत्पत्तिस्थानतया क्षेत्रत्ववाचोयुक्तिरित्याह—**भोगक्षेत्रमिति** । क्षतत्राणक्षयक्षरणाद्यप्रसिद्धक्लिष्टार्थग्रहणात्क्षेत्रवत्कर्मबीजफलोत्पत्तिस्थानत्वग्रहणमेवोचितमिति भावः । *अभिधीयत इत्यनेनाकाङ्क्षितोचितकर्त्रध्याहारः **शरीरयाथात्म्यविद्भिरिति** । यद्वा * तद्विदः इति पदमत्रापि विपरिणामेन प्रकृतविषयतया * तद्विद्भिरिति भाव्यम् । विपरिणते च तस्मिन् तच्छब्दः प्रकृतक्षेत्रपर इत्यभिप्रायः । * एतद्यो वेत्तीत्यनेनैव देहाद्व्यतिरेकस्स्फुटीक्रियत इत्याह—**एतदवयवशस्सङ्घातरूपेण चेदमहं वेद्मीतीति** । अयमभिप्रायः—इदमहमिति प्रत्यक्त्वपराक्त्वाभ्यामेव तावद्भेदः प्रतीयते, गृहादिवदेव । न च देवोऽहम्, मनुष्योऽहमिति सामानाधिकरण्यव्यपदेशहेतुभूतदेहात्मबुद्ध्या सा प्रतीतिः भ्रान्तिरिति युक्तम्, तयैव देहात्मबुद्धेर्बाधात् । बलवता हि दुर्बलं बाध्येत । उपपत्तिशास्त्रे च प्राक्प्रपञ्चिते बलं व्यतिरेकबुद्धेः, देहात्मबुद्धेस्तूभयमपि प्रतिकूलमिति । प्रागुक्तां प्रत्येकसमुदायादिविकल्पानुपपत्तिमभिप्रेत्य **अवयवशस्सङ्घातरूपेण चेत्युक्तम्** । **अवयवश** इति—मम मूर्धा, मम हस्तः इत्यादिरूपेणावयवेभ्योऽहमर्थस्स्फुटं भिन्नतया प्रतीयते; न त्वहं मूर्धेत्यादिरूपेणेति भावः । **सङ्घातरूपेण चेति**—मम शरीरमित्येव हि सङ्घातेऽपि भेदधीरिति भावः । * एतद्यो वेत्तीत्यनेनाभिप्रेतमुपलम्भसिद्धं भेदं दर्शयति—**वेद्यभूतादिति** । * तद्विदः इत्यत्र **सामान्यज्ञानमात्रस्य निर्णयानुप्युक्तत्वात् आत्मयाथात्म्यविद इत्युक्तम्** । ननु ज्ञाता तावदात्मेति सिद्धम्; सच जानामीति प्रतीतिसिद्धः; सैव प्रतीतिर्ज्ञातृत्वमिव देहात्मकत्वमपि देवोऽहमित्यादिरूपेण युगपद्गृह्णाति; प्रत्यक्षसिद्धस्य तस्य **युक्त्या शास्त्रेण** वा देहातिरिक्तत्वसाधने धर्मिग्राहकप्रमाणविरोध इति शङ्काभिप्रायेणाह—**यद्यपीति** । यदि ज्ञातुर्देहसमानाधिकरणतयैव प्रतीतिस्स्यात्, तदैवं शक्येतापि; नच तदस्ति, देहस्यैव प्रधानतया वेद्यत्वदशायां व्यधिकरणतयैव प्रतीतिसिद्धेः; नच धर्मिग्राहकसिद्धस्सर्वोऽप्याकारो नारोपित इति नियमः । बुद्बुदमुक्ताफलचषकमुकुरादिसमानपरिमाणान्येव ग्रहनक्षत्रहिमकरमार्तण्डमण्डलानि सर्वैरुपलभ्यन्ते; युक्त्या शास्त्रेण चातिपृथुपरिमाणतया स्थाप्यन्ते; तद्वदत्रापीत्यभिप्रायेणाह—**तथाऽपीति** । अतो धर्मिग्राहकविरोधरहितश्रुत्युपपत्तिसमानार्थव्यतिरेकप्रत्ययसिद्धं देहात्मनोः परस्परभेदं सनिदर्शनमाह—**इति वेदितुरित्यादिना** । इतिर्हेतौ । ननु यद्यतो भिद्यते, न तत्तत्समानाधिकरणतया प्रतीयते; यथा घटेन पटः; समानाधिकरण[तया च]श्च मृद्घटादिवद्देहो ज्ञात्रा प्रतीयत इति विपरीतयुक्तिमाशङ्क्याह—**सामानाधिकरण्येनेति** । अयमभिप्रायः—न तावत्सामानाधिकरण्यमात्रेणाभेदः, जातिगुणादिष्वभावात् । नच तानि न सन्तीति सौगती गतिः, अबाधितप्रत्ययबलेन दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिभिश्च धर्मधर्मिभेदसमर्थनात् । न चात्र भेदाभेदः, व्याघातादिप्रसङ्गात् । अतो यथा जातिगुणक्रियादिष्वपृथक्सिद्धेरेव संबन्धविशेषात्सामानाधिकरण्यं, तद्वदत्रापीति सर्वानुवृत्तं वक्तव्यमित्यन्यथैव, अन्यथाऽपि वोपपन्नं भेदसाधने सामानाधिकरण्यमिति । **विशेषणतैकस्वभावतयेत्यपृथक्सिद्धि[विशदीकरणम्]विवरणम्** । ननु जातिगुणादिवदिह धर्मधर्मिभावस्सामानाधिकरण्यदशायां न प्रतीयते; यथा गौर्गच्छतीत्यादिषु गोत्वशुक्लत्वादिविशिष्ट इति बुद्धिः, न तथाऽत्र धीः; देवोऽहं, मनुष्योऽहमित्यत्र हि मनुष्यत्वविशिष्टोऽहमिति प्रतीतिः; नतु देवशरीरविशिष्टोऽहं, मनुष्यशरीरविशिष्टोऽहमिति । अतो

घट इत्यत्र घटत्वविशिष्टपिण्डमात्रप्रतीतिवत् देवोऽहं, मनुष्योऽहमित्यत्र देवत्वादिजातिविशिष्टपिण्डमात्रप्रतीतेर्देहस्य किंचित्मति विशेषणत्वादर्शनान्नापृथक्सिद्धिनिबन्धनं देहात्मसामानाधिकरण्यमित्यत्राह—**तत्र वेदितुरिति** । ज्ञानत्व-नित्यत्वसूक्ष्मत्वादिरत्रासाधारणाकारः । अयमभिप्रायः—किं बाह्यकरणैर्देहमात्रप्रतीतिरिह विवक्षिता ? उत मनोमात्रेण ? अथवा परिशुद्धेन मनसा ? नाद्यः, चक्षुरादीनामात्मग्रहणशक्त्यभावेन योग्यानुपलम्भाभावात् । न द्वितीयः, मनस आत्मग्रहणशक्तत्वेऽपि तस्याशुद्धस्य देहव्यावर्तकपरिमाणादिविशिष्टत्वेन ग्रहणाशक्तेः । न तृतीयः, असिद्धेः । अतिरिक्ततया ग्रहणार्थमेव हि योगोपदेशः । यथा च योगिनामुपलम्भः । अतो यथा गृह्यमाणयोरेव क्षीरनीरद्रव्ययो-र्न्यूनाधिकसमभावेन संसर्गविशेषेषु क्षीरत्वेन नीरत्वेन वोपलम्भः ; तद्वदत्रापि गृह्यमाणयोरेव देहात्मनोस्सन्निधिविशेष-वशेन रजस्तमोवृद्धिहेतुकर्मवशेन च भेदाग्रहादैक्याध्यास इति निर्णीतदोषतादृशोपलम्भवशेन विरोधो न शङ्कनीय इति । मोहहेतुभूतगुणमयप्रकृतिसन्निधानेन मूढतया यथावस्थितात्मादर्शने तस्य योगसंस्कृतमनोवेद्यत्वे च वक्ष्यमाणमुदाहरति—**वक्ष्यतीति** ॥ १ ॥

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २

भा ॥ देवमनुष्यादिसर्वक्षेत्रेषु वेदितृत्वैकाकारं क्षेत्रज्ञं च मां विद्धि—मदात्मकं विद्धि ; * क्षेत्रज्ञं चापीत्यपिशब्दात् क्षेत्रमपि मां विद्धीत्युक्तमिति गम्यते । यथा क्षेत्रं क्षेत्रज्ञविशेषणतैकस्वभावतया तदपृथ-क्सिद्धेः तत्सामानाधिकरण्येनैव निर्देश्यम्, तथा क्षेत्रं क्षेत्रज्ञं च मद्विशेषणतैकस्वभावतया मदपृथक्सिद्धेः मत्सामानाधिकरण्येनैव निर्देश्यौ विद्धि । पृथिव्यादिसंघातरूपस्य क्षेत्रस्य क्षेत्रज्ञस्य च भगवच्छरीरतैकस्वरूपतया भगवदात्मकत्वं श्रुतयो वदन्ति * यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः (बृ. ५.७.३) इत्यारभ्य * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः (बृ. ५.७.२२) इत्याद्याः । इदमेवान्तर्यामितया सर्वक्षेत्रज्ञानामात्मत्वेनावस्थानं भगवतस्तत्सामानाधिकरण्येन व्यपदेशहे[तुं]तुः । * अह-मात्मा गुडाकेश सर्वभूताशयस्थितः (१०. २०) * न तदस्ति विना यत्स्यान्मया भूतं चराचरम् (१०. ३९) * विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् (१०. ४२) इति पुरस्तादुपरिष्टाच्चाभिधाय, मध्ये सामानाधि-करण्येन व्यपदिशति * आदित्यानामहं विष्णुः (१०. २१) इत्यादिना । यदिदं क्षेत्रक्षेत्रज्ञयोर्विवेकविषयं तयो-र्भेदात्मकत्वविषयं च ज्ञानमुक्तम्, तदेवोपादेयं ज्ञानमिति मम मतम् । केचिदाहुः—* क्षेत्रज्ञं चापि मां विद्धीति सामानाधिकरण्येनैकत्वमवगम्यते । ततश्चेश्वरस्यैव सतोऽज्ञानात्क्षेत्रज्ञत्वमिव भवतीत्यभ्युपगन्तव्यम् । तन्निवृत्त्यर्थश्चायमेकत्वोपदेशः । अनेन चाप्ततमभगवदुपदेशेन, रज्जुरेषा न सर्प इत्याप्तोपदेशेन सर्पत्वभ्रम-निवृत्तिवत्क्षेत्रज्ञत्वभ्रमो निवर्तते इति । ते प्रष्टव्याः—अयमुपदेष्टा भगवान् वासुदेवः परमेश्वरः किमात्म-याथात्म्यसाक्षात्कारेण निवृत्ताज्ञानः ? उत न ? इति । निवृत्ताज्ञानश्चेत् ; निर्विशेषचिन्मात्रैकस्वरूपे आत्मन्य-तद्रूपाध्यासासंभावनया कौन्तेयादिभेददर्शनं, तान् प्रत्युपदेशादिव्यापाराश्च न संभवन्ति । अथात्मसाक्षा-त्काराभावादनिवृत्ताज्ञानः, न तर्ह्यज्ञत्वादेवात्मज्ञानोपदेशसंभवः ; * उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः (४. ३४) इति ह्युक्तम् । अत एवमादिवादा अनाकलितश्रुतिस्मृतीतिहासपुराणन्यायस्वबाग्विरोधैरज्ञानिभि-र्जगन्मोहनाय प्रवर्तिता इत्यनादरणीयाः ।

अत्रेदं तत्त्वम्—अचिद्वस्तुनश्चिद्वस्तुनः परस्य [च] ब्रह्मणो भोग्यत्वेन, भोक्तृत्वेन, चेशितृत्वेन च स्वरूपविवेकमाहुः काश्चन श्रुतयः—* अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः (श्वे. ४.९), * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् (श्वे. ४. १०), * क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः (श्वे. १. १०), * अमृताक्षरं हरः इति भोक्ता निर्दिश्यते; प्रधानमात्मनो भोग्यत्वेन हरतीति हरः। * सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः (श्वे. ६. ९), * प्रधानक्षेत्रज्ञपतिर्गुणेशः (श्वे. ६. १३), पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् (ना), * ज्ञाज्ञौ द्वावजावीशनीशौ (श्वे. १. ९), * नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् (श्वे. १. ३), * भोक्ता भोग्यं प्रेरितारं च मत्वा (श्वे. १. ५), * पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति (श्वे. १. ६), * तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशीति (मु ३. १. १), * अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः (श्वे. ४. ५. ना.), (* गौरनाद्यन्तवती सा जनित्री भूतभाविनी (मै. उ.), * समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः (श्वे. ४. ७) इत्याद्याः। अत्रापि * अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां (७. ४), * सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः। भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥....मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम्। हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते॥ (९. ७) * प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि (१३. १४), * मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्। संभवस्सर्वभूतानां ततो भवति भारत॥ १४. ३) इति। जगद्योनिभूतं महद्ब्रह्म मदीयं प्रकृत्याख्यं भूतसूक्ष्ममचिद्वस्तु यत्, तस्मिन् चेतनाख्यं गर्भं संयोजयामि; ततो मत्सङ्कल्पकृताच्चिदचित्संसर्गादेव देवादिस्थावरान्तानामचिन्मिश्राणां सर्वभूतानां संभवो भवतीत्यर्थः। श्रुतावपि भूतसूक्ष्मं ब्रह्मेति निर्दिष्टं * तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते (मु १.१.९) इति)। एवं भोक्तृभोग्यरूपेणावस्थितयोः सर्वावस्थावस्थितयोश्चिदचितोः परमपुरुषशरीरतया तन्नियाम्यत्वेन तदपृथक्स्थितिं परमपुरुषस्य चात्मत्वमाहुः काश्चन श्रुतयः। * यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति (बृ. ५. ७. ३) इत्यारभ्य * य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः (बृ. ५. ७. २२. मा.) इति; तथा * यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं यं पृथिवी न वेद इत्यारभ्य, * योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद, * यो मृत्युमन्तरे सञ्चरन् यस्य मृत्युश्शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः (सु. ७) अत्र मृत्युशब्देन तमश्शब्दवाच्यं सूक्ष्मावस्थमचिद्वस्त्वभिधीयते, अस्यामेवोपनिषदि * अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते (सु. २) इति वचनात्; * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा (य. आ. ३. ११. २) इति च। एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थकारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थं कारणावस्थं च जगत् स एवेत्याहुः * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं (छा. ६. २. १) * तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत (६. २. ३) इत्यारभ्य * सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः (६. ८. ६) * ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो (६. ८. ७) इति। तथा * सोऽकामयत, बहु स्यां प्रजायेयेति, स तपोऽतप्यत, स तपस्तप्त्वा, इदं सर्वमसृजत इत्यारभ्य * सत्यं चानृतं च सत्यमभवत् (आ. ६) इति। अत्रापि भूतसूक्ष्मचिद्व-

चिदचितोः परमपुरुषस्य च स्वरूपविवेकः स्मारितः * हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि (छा. ६. ३. २), * तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्.... विज्ञानं चाविज्ञानं च, सत्यं चानृतं च सत्यमभवत् (आ. ६) इति च। एवंभूतमेव नामरूपव्याकरणं * तदैतद्धर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत (बृ. ३. ४. ७) इत्यत्राप्युक्तम्। अतः कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति, कारणात् कार्यस्यानन्यत्वेन कारणविज्ञानेन कार्यस्य ज्ञाततयैकविज्ञानेन सर्वविज्ञानं च समीहितमुपपन्नतरम्। *हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि (छा. ६. ३. २) इति * तिस्रो देवताः इति सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात् सर्वे वाचकाश्शब्दाः अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनश्शब्दस्य सामानाधिकरण्यं मुख्यवृत्तम्। अतः स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति ब्रह्मोपादानं जगत्। सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्मैव कारणमिति जगतो ब्रह्मोपादानत्वेऽपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासङ्करोऽप्युपपन्नतरः। यथा शुक्लकृष्णरक्ततन्तुसंघातोपादानत्वेऽपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव शौक्ल्यादिसंबन्ध इति कार्यावस्थायामपि न सर्वत्र वर्णसङ्करः; तथा चिदचिदीश्वरसंघातोपादानत्वेऽपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियन्तृत्वाद्यसङ्करः। तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं कार्यत्वं च; इह तु चिदचितोस्सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात् तत्प्रकारः परमपुरुष एव कारणं कार्यं च; स एव सर्वदा सर्वशब्दवाच्य इति विशेषः। स्वभावभेदस्तदसङ्करश्च तत्र चात्र च तुल्यः। एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरम्। स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयाऽवस्थानात्कार्यत्वमप्युपपन्नम्। अवस्थान्तरापत्तिरेव हि कार्यता। निर्गुणवादाश्च परस्य ब्रह्मणो हेयगुणसंबन्धाभावादुपपद्यन्ते। * अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः (छा. ८. १. ५) इति हेयगुणान् प्रतिषिध्य * सत्यकामस्सत्यसङ्कल्पः इति कल्याणगुणगणान्विदधतीयं श्रुतिरन्यान्यत्र सामान्येनावगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापयति। ज्ञानस्वरूपं ब्रह्मेति वादश्च सर्वज्ञस्य सर्वशक्तेर्निखिलहेयप्रत्यनीककल्याणगुणाकरस्य ब्रह्मणस्स्वरूपं ज्ञानैकनिरूपणीयं स्वप्रकाशतया ज्ञानस्वरूपं चेत्यभ्युपगमादुपपन्नतरः। * यस्सर्वज्ञस्सर्ववित् (मु. १. १. १०) * पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च (श्वे. ६. ८) * विज्ञातारमरे केन विजानीयात् (बृ. ४. ४. १४) इत्यादिका ज्ञातृत्वमावेदयन्ति। *सत्यं ज्ञानम् (आ. १) इत्यादिकाश्च ज्ञानैकनिरूपणीयतया स्वप्रकाशतया च ज्ञानस्वरूपताम्; *सोऽकामयत, बहु स्याम् (आ.) * तदैक्षत बहु स्याम् (छा. ६. २. ३) * तन्नामरूपाभ्यामेव व्याक्रियत (बृ. ३. ४. ७) इति ब्रह्मैव स्वसङ्कल्पाद्विचित्रस्थिरत्रसरूपतया नानाप्रकारमवस्थितमिति तत्प्रत्यनीकाब्रह्मात्मकवस्तुनानात्वमतत्त्वमिति प्रतिषिध्यते। * मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति....नेह नानास्ति किञ्चन (क. ४. १०) * यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् (बृ. ४. ४. १४) इत्यादिना; न पुनः * बहु स्यां प्रजायेय (आ. ६; छ. ६. २. ३) इत्यादिश्रुतिसिद्धं स्वसङ्कल्पकृतं ब्रह्मणो नानानामरूपभाक्त्वेन नानाप्रकारत्वमपि निषिध्यते। *यत्र त्वस्य सर्वमात्मैवाभूत् (बृ. ६.५.१५) इति निषेधवाक्यारम्भे च तत्स्थापितं * सर्वे ते परादाद्योऽन्यत्रात्मनस्सर्वे वेद (बृ. ४. ४. ६) * तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः (सु २) इत्यादिना। एवं चिदचिदीश्वराणां स्वरूपभेदं स्वभावभेदं च वदन्तीनां कार्यकारणभावं कार्यकारणयोरनन्यत्वं वदन्तीनां च सर्वासां श्रुतीनामविरोधः, (चिदचितोः परमात्मनश्च सर्वदा

शरीरात्मभावं शरीरभूतयोः कारणदशायां नामरूपविभागानर्हसूक्ष्मदशापत्तिं कार्यदशायां च तदर्हस्थूलदशापत्तिं वदन्तीभिः) श्रुतिभिरेव ज्ञायत इति ब्रह्माज्ञानवादस्यौपाधिकब्रह्मभेदवादस्यान्यस्याप्यपन्यायमूलस्य सकलश्रुतिविरुद्धस्य न कथंचिदप्यवकाशो दृश्यत इत्यलमतिविस्तरेण ॥ २ ॥

ता ॥ अथैवमन्योन्यव्यावर्तकाकारवत्तया निर्दिष्टयोः क्षेत्रक्षेत्रज्ञयोर्द्वयोरपि परमात्मव्यावृत्तिसिद्ध्यर्थमुभयानुवृत्तं तच्छेषत्वमुपदिश्य एवं यथावस्थितक्षेत्रक्षेत्रज्ञज्ञानमेव मोहनिवृत्तिनिमित्तमित्यभिप्रायेण प्रशंसति—* क्षेत्रज्ञं चापीति श्लोकेन । शरीरातिरिक्तस्य बद्धावस्थस्यात्र क्षेत्रज्ञशब्देनोपादानम्, स च स्वक्षेत्रापेक्षया शरीरी, मदपेक्षया शरीरमिति समानाधिकरणनिर्देशतात्पर्यमित्याह—**देवमनुष्यादीति** । * क्षेत्रज्ञमित्येकवचनेन जात्यैक्यमभिप्रेतमिति दर्शयितुं **सर्वक्षेत्रेषु वेदितृत्वैकाकारमित्युक्तम्** । फलितमाह—**मदात्मकं विद्धीति** । अनुक्तसमुच्चयार्थोऽपिशब्दः, अन्यथा निरर्थकत्वप्रसङ्गादित्यभिप्रायेणाह—**क्षेत्रज्ञं चापीत्यपिशब्दादिति** । कण्ठोक्तं समुच्चयागतमाभिप्रायिकं च संकलय्याह—**यथा क्षेत्रमिति** । जीवस्य तच्छरीरेण सामानाधिकरण्ये यो हेतुः, स एवात्रापि विद्यत इति मुख्यमेव सामानाधिकरण्यमिति ज्ञापनायापृथक्सिद्धिकथनम् । ननु क्षेत्रज्ञविशेषणत्वं प्रत्यक्षसिद्धत्वात्स्वीक्रियते; क्षेत्रक्षेत्रज्ञयोः परमात्मानं प्रति विशेषणत्वं न प्रतीयते; प्रत्युत स्वतन्त्रतयैव क्षेत्रज्ञो घटपटादयश्च प्रतीयन्ते; अतो न सामानाधिकरण्यं मुख्यमिति शङ्कायां विशेष्यस्याप्रत्यक्षत्वादश्रुतवेदान्तानां विशेषणत्वाग्रहणमित्यभिप्रायेणाह—**पृथिव्यादिसङ्घातरूपस्येति** । पृथिव्यादेः परमात्मानं प्रति शरीरत्ववचनादेव तत्संघातरूपस्य देवमनुष्यादिपिण्डस्यापि शरीरत्वमुक्तमेव; शरीरधातूनां च पृथक्परमात्मशरीरत्वं व्यपदिश्यत इति, ततोऽपि तत्समुदायस्य शरीरत्वमुक्तं भवतीत्यभिप्रायेण—**पृथिव्यादिसङ्घातरूपस्येत्युक्तम्** । जीवं प्रति क्षेत्रस्येव नावस्थामेदनिबन्धनमनयोर्द्रव्ययोः परमात्मशरीरत्वमिति ज्ञापनाय **भगवच्छरीरतैकस्वरूपतयेत्युक्तम्** । यथा पृथिव्यादेः लोके शरीरत्वेनाप्रसिद्धस्यापि परमात्मशरीरत्वं श्रुतिवशात्स्वीकार्यम्, तथा स्वक्षेत्रं प्रति शरीरिणोऽपि जीवस्येति भावः । एवं स्वरूपभेदेऽन्तर्यामित्वे च सिद्धे श्रुतिषु सामानाधिकरण्यव्यपदेशस्तन्निबन्धनः; तदुपबृंहणे [चास्यां स्मृतौ स्मृत्यन्तरे च । अस्मिंश्च विभूत्यध्याये] चास्मिन् अन्तर्यामित्वं पुरस्तादुपरिष्टाच्चाभिधाय मध्ये सामानाधिकरण्यनिर्देशादात्मत्वेनावस्थानमेव सामानाधिकरण्ये हेतुरिति श्रुत्युपबृंहणं कृतं भवति । तत्समानतयाऽस्मिन्नपि सामानाधिकरण्ये स एवार्थ इत्यभिप्रायेणाह—**इदमेवेति** । उत्तरार्धं व्याख्याति—**यदिदमिति** । प्रस्तुतविविक्ताकारविशिष्टयोरेव हि क्षेत्रक्षेत्रज्ञयोरिह परामर्शः, तत्तायःपिण्डादिवदलीकाकारज्ञानस्य पथ्यादिसाधारणत्वात्तस्य चात्र प्रशंसानुपपत्तेरित्यभिप्रायेण विवेकविषय[मित्यु]त्वोपादानम् । नहि ज्ञानस्य ज्ञानत्वमात्रं विधेयं, पुनरुक्त्यादिप्रसङ्गात्; न चान्येषां ज्ञानानां ज्ञानत्वनिषेधे तात्पर्यं, व्याघातात्; नच ज्ञानमित्यनूद्य मतत्वमात्रमत्र विधीयते, ज्ञानशब्दावृत्तिनैरर्थक्यात्; अतोऽत्र ज्ञानस्यैव ज्ञानमिति विधानं परिग्राह्यत्वार्थप्रशंसापरमित्यभिप्रायेणाह—**तदेवोपादेयं ज्ञानमिति । मम मतमिति** । सर्वभूतसुहृदोमम सर्वशास्त्रार्थोपयोगितया सर्वहितत्वेनेदमेवोपादेयतयाऽभिमतमिति भावः ।

एवमस्य श्लोकस्य श्रुतिस्मृत्यन्तरपूर्वापरसंगतमर्थमभिधाय कुदृष्टिदृष्टिं दूषयितुमनुभाषते—**केचिदित्यादिना । केचिदिति** निरूपकाभासत्वमभिप्रेतम् । बहुवचनेन जगद्व्यामोहनतत्तद्ग्रन्थकारकुमतिपरंपराद्योतनम् । **सामानाधिकरण्येनैकत्वमवगम्यत इति** । * भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति हि तल्लक्षणमिति भावः । **सर्वज्ञत्वाज्ञत्वादिविरुद्धधर्मवतोरेकत्वं कथमवगन्तुं शक्यमित्यत्राह—ततश्चेति** । श्रुतस्य हानायोगात्तदर्थापत्त्येत्यर्थः । **एवकारेण विरोधशङ्काद्योतनम्** । **संसारस्यौपाधिकत्वेन सर्वाभ्युपगतत्वात्ततः क्षेत्रज्ञत्वाभावेऽपि दोषवशात्संभव इत्यभि-**

भावेन अज्ञानादित्युक्तम् । ननु दोषवशादपि विरुद्धं न संभवति ; नहि दोषेण तेजसस्तिमिरत्वापादनं संभवति ; नच क्षितिजलादिसमवधाने शिलाशकलस्याङ्कुरारम्भकत्वमित्यत्राह—**क्षेत्रज्ञत्वमिवेति** । विरुद्धाकारसद्भावो ह्यसंभावितः ; तदारोपस्तु रज्जुसर्पादिवदुपपन्न इति भावः । **अभ्युपगन्तव्यमिति**—गत्यन्तरादर्शनादिति भावः । यदि परमार्थतस्संसारित्वं नास्ति ; कथं संसारनिराकरणायोपदेशादि क्रियते ? नहि परमार्थतो व्याध्यभावे तन्निरासाय चिकित्सोपपद्येतेत्यत्राह—**तन्निवृत्त्यर्थ इति** । क्षेत्रज्ञत्वभ्रमनिवृत्त्यर्थ इति यावत् । नह्ययमैक्योपदेशो दृष्टिविध्यादिष्विवान्यशेषतया भाति ; अपि तु आत्मयाथात्म्यज्ञानार्थ इति भवद्भिरप्यभ्युपेतमित्यभिप्रायेण **अयमित्युक्तम्** । चन्द्रभेदभ्रमनिवर्तकतदैक्योपदेशवदिति भावः । अबाधितात्प्रत्यक्षतो भेदे दृढं प्रतीयमाने कथं तदुपजीवकेन संभवदभिप्रायान्तरेण परोक्षेणोपदेशेन बाध इत्यत्राह—**अनेन चेति** । सामान्यवेषेणोपजीवकत्वं न बाधकत्वविरोधि ; अन्यथा भेदानुमानेन ज्वालैक्यबाधायोगात् ; अत एव परोक्षत्वमपि न दौर्बल्यप्रयोजकम् । निर्दोषत्वमेव हि प्राबल्यनिदानम् । वाक्यस्य च दोषा वक्तुर्भ्रमविप्रलम्भप्रमादाशक्तयः । अत्र च वक्तुर्वासुदेवस्याप्ततमत्वेन विप्रलम्भगन्धाभावः ; भगवत्त्वेन भ्रमप्रमादाशक्तीनामसंभवः । अतस्तदुपदेशेन क्षेत्रज्ञत्वभ्रमस्य प्रत्यक्षस्यापि बाध उपपद्यत इति भावः ।

एवमनुभाषितं दूषयितुमुपक्रमते—**ते प्रष्टव्या इति** । सर्वज्ञस्येश्वरस्यैव सतोऽज्ञानात्क्षेत्रज्ञत्वभ्रमो भवति ; **स एव चेश्वरः क्षेत्रज्ञायोपदिशतीति** व्याकुलभाषिणः किमभिप्रेतमित्याशयपरिशोधनेन दूषणं वक्तव्यमिति भावः । **अयमिति**—* नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः (२. १२) इत्युपक्रमे भेदेनैव स्वात्मानमुपदिशन्, **परस्ताच्च क्षराक्षरपुरुषवैलक्षण्यमेव स्वात्मनोऽभिधास्यन्**, निष्कृष्टव्यवहारेषु जीवानां परागर्थभूत इति भावः । **उपदेष्टेति**—यद्यसावप्यज्ञः, तदाऽर्जुनवदस्यापि शिष्यत्वमेवोचितं, न तूपदेष्टृत्वमिति भावः । **भगवानिति**—पराज्ञाननिवृत्त्यर्थमेव ह्ययमुपदिशति, स्वस्य तत्त्वज्ञत्वादित्यभिप्रायः । वासुदेव इत्यत्रान्तर्यामित्वादिविवक्षायां * सर्वत्रासौ समस्तं च वसत्यत्र (वि. १. २. १२) इति भेद एव व्यक्त इति भावः । वसुदेवतनयत्वविवक्षायां तु स एव ह्यवतीर्णः * सर्वलोकमहेश्वरम् (५. २९), * बिभर्त्यव्यय ईश्वरः (१५. १७), * यस्मात्क्षरमतीतोऽहम् (१५. १८) इत्यादिषु स्वात्मानमीश्वरत्वेनैव मन्यमानो जीवेभ्यस्सर्वप्रकार[रं]वैलक्षण्यमुपदिशतीत्यभिप्रायेण **परमेश्वरशब्दः** । ईश्वरस्य भ्रमहेतुभूतमज्ञानं न कदाचिदप्यस्तीति तैर्वक्तुं न शक्यं, तथासतीशितव्यप्रतिभासाभावादीश्वरत्वस्यैवासिद्धिप्रसङ्गात्, अज्ञानमन्तरेण च मिथ्याभूतभेदप्रतिभासायोगात्, परबुद्धिविषयत्वोल्लेखरूपस्य तु मिथ्यार्थप्रतिभासस्य परसद्भावसापेक्षत्वात्, तस्य च तैरनभ्युपगमात् । अत ईश्वरस्यापि पूर्वमज्ञानमस्ति ; तच्च पश्चाज्ज्ञाननिवर्त्यमित्यभ्युपगन्तव्यम् । तच्चोपदेशदशायां भवदभिमतहेतुविशेषेण निवृत्तं न वेत्यभिप्रायेण विकल्पयति—**किमित्यादिना** । प्रथमं शिरो दूषयितुमनुवदति—**निवृत्ताज्ञानश्चेदिति** । **निर्विशेषेत्यादि** । कारणाभावात्कार्याभाव इति भावः । अभ्युपगताधिष्ठानविशेषस्वभावादेवाध्यासो न संभवति ; किं पुनर्दोषस्यापि निवृत्ताविति**अभिप्रायेण** निर्विशेषचिन्मात्रत्वोपादानम् । तथा हि—सविशेषे वस्तुनि कस्मिंश्चिदसाधारणाकारे तिरोहिते तद्विरुद्धाकारान्तराध्यासः । ज्ञाता च कंचिदर्थमन्यथा मन्येत ; नतु ज्ञप्तिमात्रम् । **कौन्तेयादीत्यादिशब्देन** जिघांसितधार्तराष्ट्रादिग्रहणम् । **उपदेशादीत्यादिशब्देन** सारथ्यादेरपि संग्रहः । द्वितीयं शिरोऽनुभाषते—**अथेति** । निवर्तकसाक्षात्काररहितत्वादिति भावः । **न तर्हीति** । नहीन्द्रियलिङ्गशब्दादिवदज्ञत्वेऽपि परज्ञानजनकत्वं संभवति, उपदेशवाक्यप्रयोगस्य ज्ञानपूर्वकत्वावश्यंभावात् अप्रमितोपदेशोऽनाप्ततमसज्ञादिति भावः । तत्त्वसाक्षात्कारवत एवा-

ध्यात्मोपदेष्टृत्वे तस्यैवोक्तिं दर्शयति—**उपदेक्ष्यन्तीति** । एवं शङ्करपक्षोक्तं दोषं भास्करादिपक्षेऽप्यतिदिशति—**अत इति** । शंकरमते भेदश्रुतयस्सगुणश्रुतयोऽन्तर्यामिश्रुतयः प्रकृतिपुरुषनित्यत्वश्रुतयस्तथाविधाश्च स्मृत्यादयो विरुद्धा एव ; अभेदश्रुत्यादयश्च मुख्यार्थपरित्यागेन निर्विशेषलक्षकतया तैरेवाभ्युपगमात् मुख्यार्थप्रतिपादकाकारेण विरुद्धाः । विषयव्यवस्थादिभिर्विरोधपरिहारे संभवति बाध्यबाधकभावा[द्य]भ्युपगमान्नयायविरोधः । स्ववचनविरोधस्तु, ब्रह्म निर्विशेषम्, एवंत्वादित्यत्र हेतुसाध्यधर्मान्वयावश्यंभावात्, अनुभूतिरवेद्या इत्यत्रानुभूतिशब्दबोध्यत्वादेरवश्याभ्युपगन्तव्यत्वात् । एवं ब्रह्म न शब्दप्रतिपाद्यमित्यादिष्वपि भाव्यम् । भास्करपक्षे तु भेदगोचरश्रुत्यादिभिस्तत्प्रतिपक्षमभेदमसहमानैर्विरोधो वक्तव्यः । अचितोऽपि ब्रह्मस्वरूपैक्याभ्युपगमात् निर्विकारत्वप्रतिपादकैर्विरोधः । ब्रह्मण एवोपहितस्य जीवत्वान्निर्दोषश्रुतिविरोधः । अभेदश्रुतयोऽपि प्रायशो न मुख्याः । जीवेश्वरसामानाधिकरण्ये घटाकाशो महाकाशः इतिवन्निर्दिश्यमानवैषेणैक्यासिद्धेः । एवमेव चिदीश्वरयोरपि न सामानाधिकरण्यस्वारस्यम् । सर्वज्ञत्वादिगुणगणविशिष्टस्य ब्रह्मणस्सर्वतादात्म्ये सर्वदुःखप्रतिसन्धानप्रसङ्गान्निरवद्यश्रुत्यादिविरोधप्रशमनाभावेन न्यायविरोधः । **यादवप्रकाशपक्षे** तु स्वत एव भिन्नाभिन्नसर्वजीवत्वाभ्युपगमोऽतिशयितः । सर्वानुवृत्तसन्मात्रस्य ब्रह्मत्वाभ्युपग[मात्]मे अदृश्यत्वादिश्रुतिविरोधश्च । सत्ताया घटादिधर्मत्वेन प्रतीयमानत्वात् ब्रह्मणो जातिरूपत्वप्रसङ्ग इत्यादयो दोषा द्रष्टव्याः । अनयोस्स्ववचनविरोधस्तु ससभङ्गीवादिनामिव भेदाभेदाभ्युपगमात्तन्मूलनिर्दोषत्वसदोषत्वसामानाधिकरण्याच्च व्यक्तः । **जगन्मोहनाय प्रवर्तिता** इति न तेषामभिप्रायेणोच्यते, * अज्ञानिभिरित्युक्तत्वात् ; अपितु तेषामज्ञानां वादो दैवाज्जगन्मोहनाय जात इत्युच्यते ।

ननु युष्मत्पक्षेऽपि श्रुतिविरोधादिदूषणं समानम् । तथा हि—यदि जगद्ब्रह्मणोरत्यन्तभेद एवाभ्युपगतः, तदा * तन्नामरूपाभ्यां व्याक्रियत (श्वे. ४. ९) इति कारणस्यैव ब्रह्मणः कार्यनामरूपभाक्त्वश्रुतिविरोधः, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधः ; नहि घटज्ञानेन ततोऽत्यन्तभिन्नस्य पटस्य ज्ञातत्वं संभवति ; अत्यन्तभिन्नयोर्जगद्ब्रह्मणोस्सामानाधिकरण्यं च न संभवति, घटपटवदेव लक्षणया निर्वाहश्चेत् परपक्षे कः प्रद्वेषः ? ब्रह्मोपादानत्वं च जगतो न सिध्यति, मृद्घटादिवज्जगद्ब्रह्मणोरेकद्रव्यत्वानभ्युपगमात् ; अन्यथा सत्कार्यवादविरोधात् । यदि भिन्नैरेव प्रकृतिपुरुषेश्वरैर्जगदारम्भः, ते किमेकीभूताः कार्यमारभन्ते ? उत पृथगवस्थिता एव ? पूर्वत्र परस्परस्वभावसंकरः परपक्षवत्प्रसक्तः । उत्तरत्रापि किं पृथक्कार्यकराणि ? उत न ? पृथक्कार्यकरत्वे सर्वस्य ब्रह्मकारणत्वमभ्युपगतं पलायते ; एककार्यकरत्वे कार्यावस्थायां स्वभावसंकरस्तदवस्थः । यदि च ब्रह्म स्वरूपतो निर्विकारं, तदा तस्य कार्यात्मकत्ववादिनीभिश्रुतिभिर्विरोधः । अथ सविकारत्वाभ्युपगमः, तदा परपक्षप्रसक्तनिर्विकारश्रुतिविरोधस्तदवस्थः । यदि च सर्वदा सर्वज्ञत्वादिगुणगणविशिष्टमेव ब्रह्म, तदा निर्गुणश्रुतिभिः ज्ञानमात्रश्रुतिभिश्च व्याघातः । सर्वदा भेदश्च यद्यभ्युपगतः, तदा भेदनिषेधकश्रुतिविरोधः । न्यायविरोधश्च, विधिनिषेधयोरर्थस्वभावलब्धेन पौर्वापर्येणापच्छेदवद्बाध्यबाधकभावस्यानभ्युपगमात् । स्ववचनविरोधश्च, सर्वात्मकं ब्रह्म सर्वविलक्षणं चेत्यभ्युपगमात् । अतो दोषसाम्ये कस्य मतं तत्त्वमिति चोद्यमभिप्रायानभिज्ञैः परैः श्वराहकलहन्यायेन प्रवर्तितं परिहृत्य समीचीनशारीरकन्यायानुगृहीतसर्ववेदान्तसारार्थप्रतिपादनपरतामस्य शास्त्रस्य स्थापयितुमाह—**अत्रेदं तत्त्वमिति** । **अत्र**—श्रुतिस्मृतीतिहासाद्यविरुद्धार्थगवेषणायामित्यर्थः ; **अत्रादिष्विति वा** । **इदं**—यथाप्रमाणं वक्ष्यमाणम् ; **नतु शङ्करादुक्तमित्यर्थः** । **तत्त्वं**—प्रामाणिकमित्यर्थः । शङ्कितान्

दोषान् परिहरिष्यन् स्वपक्षं तावत्प्रमाणतस्थापयति—**अचिद्वस्तुन** इत्यादिना **सत्यमभवदित्यन्तेन** । भोग्यत्वादिकं यथाक्रमम् । **भोग्यत्वेन भोक्तृत्वेन चेशितृत्वेन चे**ति भेदकधर्मान्तराणामुपादास्यमानश्रुतिसिद्धानामुपलक्षणम् । अनुक्तसमुच्चयार्थेन चकारेण वा तत्संग्रहः । **स्वरूपविवेकं**—स्वरूपाणां भिन्नत्वमित्यर्थः । विवेकशब्दो भ्रमनिराकरणद्योतनार्थः । नहि भेदवादिनीनां श्रुतीनां श्रुतित्वे सर्पस्मृतिरित्यभिप्रायेण **काश्चन श्रुतय** इत्युक्तम् । बहुवचनेन भूयसां न्यायोऽप्यविरुद्ध इति ज्ञापितम् । भेदश्रुत्यविरोधेन सामानाधिकरण्यश्रुत्यर्थं स्थापयितुं प्रथमं भेदश्रुत्युपादानम् । **अस्मादित्यनेन** साक्षाद्विकाराश्रयत्वमचिद्व्यस्येति सिद्धम् । अन्यो मायया सन्निरुद्धः इत्यनेनोपहितस्य ब्रह्मण एव जीवत्वमित्यादिप्रलापा निर्मूलिताः । नह्यत्र मायया सन्निरोधादन्यत्वमुच्यते ; अपि तु अन्यस्यैव सतो मायया सन्निरोधः । सन्निरुद्धः—स्वाभाविकसर्वज्ञत्वनिरतिशयानन्दाद्याविर्भावरहित इत्यर्थः । पराभिमतो मायाशब्दार्थश्श्रुत्यैव प्रतिक्षिप्त इति दर्शयितुमाह—**मायां त्विति** । क्षरमित्यादौ हरशब्दस्योत्तरपदान्वयेन कुट्टप्युन्नीतयोजनान्तरप्रतिक्षेपार्थमाह—**अमृताक्षरं हर इति भोक्ता निर्दिश्यत** इति । रुद्रे रूढस्य कथं भोक्तृमात्रसाधारण्यमित्यत्राह—**प्रधानमिति** । **हरतीति हरः** इत्येतावन्निर्वचनम् ; शेषमर्थसिद्धकथनम् । अयमभिप्रायः—यदि हरशब्दः * देव एक इत्यनेनान्वीयते, तदा * अमृताक्षरमित्यस्य विधेयत्वं न स्यात् ; अथ * अमृताक्षरमित्यसमस्तं लुप्तविभक्तिकमुद्देश्योपादेयपरमुच्येत, तदा विभक्तिलोपक्लेशो व्युत्क्रमेणोद्देश्योपादेयनिर्देशश्च स्यात् । नचात्र * क्षरं त्वविद्या ह्यमृतं तु विद्या (श्वे. ५. १) इतिवदमृतशब्द एवोद्देश्यपरः, क्षराक्षरशब्दयोरेव मिथःप्रतिरूपत्वात् । ऋक्षु च पादभेदेनार्थव्यवस्था संभवन्ती न परित्याज्या । एवं * क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः (श्वे. ५. १) इति वाक्यान्तरशैली चानुसृता स्यात्, अन्यथा व्यवहितान्वयश्च । नच * देव एकः इत्यत्र विशेषाकाङ्क्षाऽस्ति । तावता च माहात्म्यमतिशयेन व्यज्यते । *क्षरात्मानौ (श्वे. १. १०) इति पुल्लिङ्गान्तानुवादश्च तल्लिङ्गनिर्दिष्टविषयतायां स्वरसः । शब्दान्तरेणानुवादस्तु पक्षद्वयेऽपि समः । असत्पक्षे तु हरशब्दस्यात्मजातिविषयत्वज्ञापनार्थतया सप्रयोजनश्च । * अमृताक्षरमिति सविशेषणनिर्देशोऽपि तत्स्वभावविशेषज्ञापनेन सार्थः । एवं हरशब्दस्यात्र प्रधानसहपठितपुरुषतत्त्वविषयत्वे अवश्यंभाविनि लक्षणादेश्चासंभवे श्रुत्यन्तरस्वप्रकरणादिविरुद्धरूढिपरित्यागेन यौगिकार्थपरत्वमैन्द्यादिन्यायेनाङ्गीकार्यमिति । क्षेत्रज्ञेश्वरयोस्सर्वज्ञत्वाकिंचिज्ज्ञत्वनियन्तृत्वनियाम्यत्वरूपं भेदं द्वयोरप्यजत्वं च द्विशब्देनैव संख्याय वदन्तीं श्रुतिं दर्शयति—**ज्ञाज्ञाविति** । सुषुप्तिमरणमूर्च्छाप्रलयेषु क्षेत्रज्ञस्यात्यन्ताज्ञत्वम् ; जागरस्वप्नयोरपि ज्ञानं कतिपयविषयम्, अज्ञानं त्वनन्तगोचरम् । ईश्वरात्पृथग्भूतानामेव जीवानां नित्यत्वं बहुत्वं जीवेश्वरयोश्चैतन्याश्रयत्वमीश्वरस्य चाद्वितीयत्वं सकलफलप्रदत्वं च * नित्यो नित्यानामिति श्रुत्या सिद्धम् । स्वशब्दादेव भेदस्य वेद्यत्ववादिनीं भेदज्ञानपूर्वकपरमात्मप्रीतिविषयत्वेन मोक्षं च प्रतिपादयन्तीं श्रुतिमाह—**पृथगिति** । जीवेश्वरयोरेकशरीरानुप्रविष्टयोरेव कर्मफलभोक्तृत्वाभोक्तृत्वरूपवैधर्म्यपरं वाक्यमाह—**तयोरन्य** इति । तयोरन्यः—तयोरेक इत्यर्थः । **स्वाद्वत्तीति** पुण्यफलोदाहरणमुपलक्षणार्थम् । **अभिचाकशीति**—अभितोऽधिकं प्रकाशते । तादृशजीवनियन्तृत्वलक्षणोऽतिशय एव तदानीमपि सिध्यति ; नतु ज्ञानसङ्कोचादीत्युक्तं भवति । सत्त्वरजस्तमोमय्याः प्रकृतेः पुरुषस्य चाजत्वं, प्रकृतेः पुरुषकर्मानुरूपपरिणामविशेषभाक्त्वेनाध्यासप्रसङ्गराहित्यं, बद्धमुक्तव्यवस्थां, मुक्तदशायामपि प्रकृतेर्विश्लेषमात्रं च ज्ञापयति—**अजामिति** । उक्तश्रुत्युपबृंहणायास्मिन्नेव प्रतिपादितं नित्यं प्रकृतिपुरुषेश्वरभेदं दर्शयति—**अत्राप्यहङ्कार इतीति** । **मे प्रकृतिरिति** व्यधिकरणनिर्देशादीश्वरात्प्रकृतिपुरुषयोर्भेदसिद्धः । * **इतस्त्वन्यामित्यनेन प्रधानात्पुरुषस्य भेदः । सृष्टिप्रलययोरध्यासतन्निवृत्तिरूपत्वव्युदासाय परमात्मशरीर-**

भूतप्रकृत्यविभागविभागरूपत्वमाह—**सर्वभूतानी**ति । अत्रापि * मामिकामित्यादिभिर्भेदः स्फुटः । प्रधानपुरुषयोश्चराचरावस्थापत्तेः परमात्मभ्रममूलत्वव्युदासाय तदधिष्ठानमूलतामाह—**मयेति** । जीवानामध्यासाधीनसिद्धित्वव्युदासाय प्रकृतिपुरुषयोरविशेषेणानादित्वं दर्शयति—**प्रकृतिं पुरुषं चेति** । प्रकृतेरेव साक्षात्परिणामाश्रयत्वं, सृष्टयौपयिकप्रकृतिपुरुषसंसर्गविशेषस्य परमात्मसङ्कल्पाधीनत्वं, तत एव जगत्सृष्टिम्, एवंप्रकारेण त्रयाणामन्योन्यभेदं चोदाहरति—**मम योनिरिति** । जगदपेक्षया योनित्वं, जगत्स्रष्टुरधिष्ठातृतया संबन्धः; तदाह—**जगद्योनी**ति । मुख्यब्रह्मणो ममेति व्यधिकरणनिर्देशाद्योनित्वसामर्थ्याच्च ब्रह्मशब्दोपचरितमाह—**प्रकृत्याख्य**मिति । चिन्मिश्रभूतोत्पत्तिहेतुतया प्रकृत्याधेयतया च सिद्धं गर्भशब्दार्थमाह—**चेतनाख्य**मिति । * दधामीत्याधानं विवक्षितमित्याह—**संयोजयामी**ति । विस्तरोऽस्य स्थाने भविष्यति । एवं बहुषु प्रदेशेषु प्रकृतिपुरुषजगत्सृष्ट्यादिप्रतिपादनदशायां जीवाध्यासजगन्मिथ्यात्वादिसूचकं न किंचिद्दृश्यत इत्यभिप्रायः ।

एवं चिदचिदीश्वराणां स्वरूपभेदः काणादप्रभृतिभिरभ्युपगत इति ततो विशेषं घटकश्रुतिसिद्धं शरीरात्मभावं सामानाधिकरण्यमुख्यत्वसिद्ध्यर्थमाह—**एवं भोक्त्रि**ति । एकीभावावस्थायामपि शरीरत्वं * यस्य तमश्शरीरम् (बृ. ५. ७. १३), * यस्य मृत्युश्शरीरमित्यादिभिस्सिद्धमिति ज्ञापनाय **सर्वावस्थावस्थितयो**रित्युक्तम् । प्रत्यक्षाद्यप्रास्तस्य जगद्ब्रह्मणोश्शरीरात्मभावस्य तत्त्वोपदेशतत्परानेकश्रुतिसिद्धत्वान्न तत्परित्यागश्[ङ्]क्यः । तदनुगुणतया च शरीरलक्षणमनुसन्धेयमिति भावः । अन्तर्यामिब्राह्मणे सर्वावस्थप्रकृतिपुरुषयोरविशेषेण परमात्मशरीरत्वं दर्शयति—**यः पृथिव्या**मिति । इममेवार्थमीषदावापोद्वापभेदेन प्रतिपादयन्त्या सुबालोपनिषदा अन्तर्यामिब्राह्मणोक्तमपहतपाप्मत्वादिगुणयोगमद्वितीयत्वं नारायणत्वं च विशदयति—**यः पृथिवी**मिति । अत्र मृत्युशब्दस्य स्थानप्रमाणेन अतिसूक्ष्मदशापन्नमूलप्रकृतिविषयत्वमाह—**अत्रे**ति । अत्र अक्षरपर्यायादनन्तरे पर्याये इत्यर्थः । तेजःप्रतिद्वन्द्वितमोव्युदासाय **सूक्ष्मावस्थमचिद्वस्त्वि**त्युक्तम् । **अस्यामेवे**त्यनेन शीघ्रप्रत्यभिज्ञानं सूचितम् । आत्मलक्षणपूर्वकमात्मत्वं दर्शयत्तैत्तिरीयकवाक्यमाह—**अन्तःप्रविष्ट** इति । नृपनभोव्यावर्तकाभ्यामन्तःप्रवेशनियमनाभ्यां शरीरित्वसिद्धिः । उक्तभेदश्रुतिघटकश्रुत्यनुसारेण सामानाधिकरण्यश्रुतीनामपि मुख्यमेवाह—**एवं सर्वावस्थे**ति । अत्रोभयावस्थपरमपुरुषप्रकारद्वयैक्यं सामानाधिकरण्यश्रुतीनां विवक्षितमित्यर्थः । **इममर्थं ज्ञापयितु**मिति—न पुनश्श्रुत्यन्तरस्वप्रकरणस्ववचनप्रत्यक्षादिविरुद्धं ज्ञापयितुमित्यर्थः । छान्दोग्यवदेव सामानाधिकरण्यं, तस्य च चेतनांशेऽप्यनुप्रवेशपूर्वकत्वं तैत्तिरीयके दर्शयति—**तथे**ति । स तपोऽतप्यत—आलोचनमकरोदित्यर्थः; * तपसा चीयते ब्रह्म (मु. १. १. ९) इति प्रकरणे * यस्य ज्ञानमयं तपः इति व्याख्यानात् । न केवलं प्रकरणान्तरगतैर्घटकवाक्यैर्भेदाभेदश्रुत्यविरोधः, अपि तु स्वप्रकरणस्थैरपीत्याह—**अत्रापी**ति । समानाधिकरणनिर्देशवतोः छान्दोग्यतैत्तिरीयकप्रकरणयोरित्यर्थः । जीवेनात्मना—जीवेन मयेत्यर्थः । * सिंहेन भूत्वा बहवो मयाऽऽत्ताः (वि. ध. ९८. १७) इतिवत् । * तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्येत्यचिदनुप्रवेशो व्यक्तः; जीवे तु सामानाधिकरण्यमात्रं तदनुप्रवेशकृतमिति तैत्तिरीयके व्यक्तमित्यभिप्रायेणाह—**तत्सृष्टे**ति । एवं जीवशरीरकपरमात्मानुणं, नाम्नां च परमपुरुषपर्यन्तत्वं, तत एव सामानाधिकरण्यमुख्यत्वं च सिद्धम् । एतदैकरस्यात्सर्वायेन चिदचिदनुप्रवेशोक्तिरहितप्रकरणान्तरेष्वपि नामरूपव्याकरणवचनमेवंप्रकारप्रवेशाभिप्रायपूर्वकमेवेत्याह—**एवंभूतमे**वेति ।

इत आरभ्य प्रागुक्तचोद्यानां क्रमेण परिहारः। तथा हि—कारणविज्ञानेन कार्यस्य ज्ञातत्वं नाम कार्यशब्द-निर्दिष्टस्य द्रव्यस्य कारणविज्ञानेन विषयीकृतत्वम्। पूर्वमासीनं देवदत्तं दृष्ट्वा तमेव गच्छन्तमप्यवलोक्य असौ पूर्वमेव दृष्टः इति हि वदति; अतः कार्यावस्थायाः पूर्वमज्ञातत्वेऽपि नास्य व्यवहारस्यामुख्यत्वमि[ति; एतद]त्यभिप्रायेणाह—**अतः कार्यवस्थ** इति। परपक्षे त्वेतदनुपपन्नतरमिति चाभिप्रेतम्। तथा हि—एकनिर्विशेषविज्ञानेन सर्वस्य ज्ञातत्वमित्यत्र ज्ञातव्यसर्वशब्दार्थाभावात्, सत्यमिथ्यार्थैक्यप्रसङ्गादिभिश्च सर्वस्य ज्ञातत्वमित्येतन्न घटते; सर्वस्य मिथ्यात्वेन ज्ञातत्व-मिति योजनायामध्याहारादिदोषः; अविद्याविशिष्टैकब्रह्मविज्ञानेन तत्कार्यप्रपञ्चविज्ञानमिति विवक्षायामदूरविप्रकर्षेणासत्पक्ष एवानुप्रवेशः; सर्वप्रमाणसंक्षोभस्त्वधिकः। एवमेव पक्षान्तरयोरपि सूक्ष्माचिच्छक्तिवैशिष्ट्यस्य दुष्परिहरत्वाद्विशिष्टैक्य-विज्ञाने तत्कार्यविज्ञानमित्येव निर्वाह्यम्; तथा च निर्विकारनिर्दोषश्रुत्यविरुद्धोऽसत्पक्ष एवोपपन्नतर इति। **परपक्षे** सामानाधिकरण्यस्य लाक्षणिकत्वं तैरेवाभ्युपगतमिति न किंचित्तत्र वक्तव्यमिति कृत्वा स्वपक्षे तन्मुख्यत्वमुपपादयति—**अहमिमा** इति। प्रकरणान्तराधीतानामपि तत्त्वानां संकुचिताभिधानप्रकरणेऽपि शाखान्तरनयेन समाहारमभिप्रेत्याह—**तिस्रो देवता इति सर्वमचिद्वस्तु निर्दिश्येति**। जगद्ब्रह्मणोस्स्वरूपतोऽत्यन्तभेदेऽपि विशिष्टवेषेण कार्यकारणयो-रेकद्रव्यत्वसिद्धेर्जगतो ब्रह्मोपादानत्वं युज्यत इत्याह—**अतः स्थूलेति**। सामानाधिकरण्यव्यपदेशस्य मुख्यत्वादित्यर्थः। सत्कार्यवादाविरोधश्च सिद्ध इत्यभिप्रायः। उपादानावस्थायामैक्यापत्त्या प्रसक्तं स्वभावसंकरं परिहरति—**सूक्ष्मेति**। बालस्य युवत्वापत्तौ बालशरीरस्य तदभिमानिचेतनस्य च यथा स्वभावसंकरो नास्ति, तद्वदत्रापीत्यभिप्रायेण **संघात-स्योपादानत्वेनेत्युक्तम्**। एककार्यारम्भात्कार्यदशायां प्रसक्तसंकरं निरस्यति—**यथा शुक्लेति**। ननु शुक्लकृष्णरक्त-तन्तूपात्तस्य पटस्य न केनचिच्छुक्लेन कृष्णेन रक्तेन वा तन्तुविशेषेण विशेषतस्सामानाधिकरण्यं दृश्यते; तन्तवः पट इति तु कथंचिदुच्येत; अतोऽत्रापि प्रकृतिपुरुषेश्वररूपसङ्घातोपात्तस्य जगत ईश्वरेण विशेषतस्सामानाधिकरण्यं न स्यादित्यत्राह—**तन्तूनामिति**। अयमभिप्रायः—न सर्वप्रकारसाधर्म्यमभिप्रेत्य तन्तुपटदृष्टान्तः; अपि तु स्वरूपतोऽत्यन्त-भिन्नानां संभूय कार्यदशायामपि स्वभावासंकरमात्रमभिप्रेत्य; सामानाधिकरण्य तु यत्र शब्दानामेकविशेष्यपर्यवसान-हेतुभूतप्रकारप्रकारिभावोऽस्ति, तत्र स्यात्, नान्यत्रेति। कस्तर्हि अविशेष इत्यत्रोपजीव्यांशमाह—**स्वभावेति**। उपा-दानत्वेन कार्यभावेऽपि निर्विकारश्रुत्यविरोधमाह—**एवंच सतीति**। एवं विशिष्टस्योपादानत्वात्सर्वदैवासंकीर्णस्वभावत्वा-च्चेत्यर्थः। निर्विकारश्रुतिस्तु स्वरूपविषया; उपादानत्वकार्यत्वश्रुतिर्विशिष्टविषयेति नानयोः परस्परविरोधः। स्वरूप-परिणामपक्षे तु निर्विकारश्रुतेर्न कश्चिद्विषय इति भावः। नहि वयं स्वरूपैकदेशेऽपि विकारं ब्रूम इत्यभिप्रायेण **उपपन्न-तरमित्युक्तम्**। अविकृतस्य कार्यत्वप्रकारमाह—**स्थूलावस्थस्येति**। **आत्मतयाऽवस्थानादिति**। तदातनतत्तन्नियमन-धारणावस्थाविशेष एव हि कार्यत्वम्; कार्यशब्दोऽत्र नामरूपव्याकरणस्य अन्तर्यामिपर्यन्तत्वश्रुतेस्तत्पर्यन्त इति तस्य मुख्यत्वमिति भावः। तथाऽपि प्राप्ताप्राप्तविवेकेन विशेषणस्यैव कार्यत्वमिति चोद्यं परिहरति—**अवस्थेति**। विशेषणाना-मवस्थान्तरापत्तौ तदवस्थतत्तन्नियमनविशिष्टत्वलक्षणावस्थान्तरापत्तिर्विशेष्येऽप्यस्तीति भावः। उत्सर्गापवादन्यायेन सगुणश्रुत्यविरोधाय निर्गुणवादानां विषयं व्यवस्थापयति—**निर्गुणवादाश्चेति**। एवं व्यवस्थापितं विषयभेदमेकस्मिन्नेव वाक्ये श्रुतिरेव दर्शयतीत्याह—**अपहतेति**। अवधारणेन न्यायनैरपेक्ष्यं सूचितम्। आर्थगुणनिषेधं परिहरति—**ज्ञान-स्वरूपमिति**। **सर्वज्ञस्य सर्वशक्तेरित्यादिकं** श्रुत्यन्तरसिद्धाविरोधार्थम्। **ज्ञानैकनिरूपणीयमिति**—स्वरूपनिरूपण-धर्मशब्दा हि धर्ममुखेन धर्मिणमपि प्रतिपादयन्तीति भावः। सूत्रितं च *तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्,

*यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् (ब्र. २. ३. २९, ३०) इति । अनुक्तसमुच्चयार्थेन सौत्रचकारेण द्योतितं वृत्त्यन्तरमभिप्रेत्याह—**स्वप्रकाशतया ज्ञानस्वरूपं चे**ति । धर्मभूतज्ञानवज्ज्ञानशब्दप्रवृत्तिनिमित्तयोगोऽप्यस्तीति भावः । निर्विशेषवादिनो ज्ञातृत्वं परित्यजन्ति; वैशेषिकादयस्तु ज्ञानत्वम्; उभयेषामपि श्रुतिविरोधमभिप्रेत्य स्वपक्षे तदानुगुण्यमाह—**यस्सर्वज्ञ** इति । भेदनिषेधकवाक्यानां भेदविधायकवाक्याविरुद्धं विषयमाह—**सोऽकामयते**ति । ब्रह्मगुणविभूतिरूपभेदस्य विहितत्वात्तन्निषेधो न शक्य इति भावः । पराभिमतं श्रुतिविरोधेन प्रतिक्षिपति—**न पुनरि**ति । *यत्र त्वस्येत्यादेरब्रह्मात्मकनानात्वनिषेधे तात्पर्यं श्रुत्यैव ह्युक्तमित्याह—**निषेधवाक्यारम्भ** इति । अन्यथोपक्रमविरोध इति भावः । **तत्स्थापितमि**ति—*बहु स्यामित्यादिश्रुत्यन्तरसिद्धं वक्ष्यमाणनिषेधानास्कन्दिततत्वेनासंजातविरोधदशायां स्थापितमित्यर्थः । अथ स्वपक्षे सर्वप्रकाराविरोधं परपक्षेषु च सर्वप्रकारविरोधं श्रुतहानाश्रुतकल्पनादिरूपं सम्रहेण वदन्नुपसंहरति—**एवमि**ति । **श्रुतिभिरेवेति**—न्यायेऽपि नात्यन्तापेक्षा, स्फुटतरत्वादस्यार्थस्येति भावः । **अन्यस्यापीति** यादवप्रकाशनैयायिकाद्यभिमतयोजनासंग्रहः । **अपन्यायमूलस्य सकलश्रुतिविरुद्धस्येत्युभयं** ब्रह्माज्ञानवादादिषु सर्वेषु नेतव्यम् ॥ २ ॥

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३

भा ॥ तत्क्षेत्रं यच्च—यद्द्रव्यम्, यादृक्च—येषामाश्रयभूतम्, यद्विकारि—ये चास्य विकाराः, यतश्च—यतो हेतोरिदमुत्पन्नम्, यस्मै प्रयोजनायोत्पन्नमित्यर्थः, यत्—यत्स्वरूपं चेदम्, स च यः—स च क्षेत्रज्ञो यः—यत्स्वरूपः, यत्प्रभावश्च—ये चास्य प्रभावाः, तत्सर्वम्, समासेन—संक्षेपेण मत्तः शृणु ॥ ३ ॥

ता ॥ शृण्वत एवार्जुनस्य पुनः *शृण्वित्यवधानार्थमुच्यते—*तत्क्षेत्रमिति । *महाभूतानि (५) इत्युपक्रम्य संघातः (६) इत्यन्तवक्ष्यमाणपरामर्शादाद्यन्तौ यच्छब्दौ जडद्रव्यतत्संघातविषयावित्यपुनरुक्तिरित्यभिप्रायेणाह—**यद्द्रव्यमि**ति । वक्ष्यमाणेन्द्रियाद्याश्रयत्वानुसारेण यादृक्छब्दार्थमाह—**येषामाश्रयभूत**मिति । ये विकारा अस्य कार्यतया सन्ति, तद्विकारि; तत्र यच्छब्दनिर्दिष्टे तात्पर्यमिति प्रकाशनाय **ये चास्य विकारा** इत्युक्तम् । *यतः इति नोपादानादिपरं, प्रथमं तदुक्तेरित्यभिप्रायेणाह—**यतो हेतो**रिति । चेतनाधृतिः (६) इति वक्ष्यमाणं हेतुविशेषमाह—**यस्मै प्रयोजनाये**ति । क्षेत्रकर्तुरीश्वरस्य धीस्थतया प्रयोजनमपि हेतुः; प्रयुज्यते च अध्ययनेन वसतीति । **यत्स्वरूप**मिति संघातपरम् । सन्निवेशविशेषो हि शरीरत्वादि; अतः प्रथमयच्छब्दो जडाजडद्रव्यविशेषनिर्धारणार्थः; द्वितीयस्तु जडत्वनिश्चये जडद्रव्येष्वनेकेष्वन्यतमात्मकत्वसंघातात्मकत्वनिश्चयार्थ इति भावः । *मामिति (२) परमात्मनोऽपि प्रसङ्गात्तत्परामर्शभ्रमव्युदासायाह—**स च क्षेत्रज्ञ** इति । *यः *यत्प्रभावः इत्युभाभ्यां स्वरूपप्रकारयोर्निर्देशः । **प्रभावा आश्चर्यभूताः प्रकृष्टास्त्वभावविशेषाः ॥ ३ ॥**

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४

भा ॥ तदिदं क्षेत्रक्षेत्रज्ञयाथात्म्यम् ऋषिभिः—पराशरादिभिः बहुधा—बहुप्रकारं गीतम्—*अहं त्वं च तथाऽन्ये च भूतैस्संज्ञाम पार्थिव । गुणप्रवाहपतितो भूतवर्गोऽपि वार्त्तयम् ॥ कर्मवश्या गुणा होते

सत्त्वाद्याः पृथिवीपते । अविद्यासञ्ज्ञितं कर्म तच्चाशेषेषु जन्तुषु ॥ आत्मा शुद्धोऽक्षरश्शान्तो निर्गुणः प्रकृतेः परः ॥ (वि. २. १३. ७१) । तथा * पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः । ततोऽहमिति कुत्रैतां संज्ञां राजन्करोम्यहम् (वि. २.१३.८९); तथा [च] * किं त्वमेतच्छिरः किं नु उरस्तव तथोदरम् । किमु पादादिकं त्वं वै तवैतत्किं महीपते ॥ समस्तावयवेभ्यस्त्वं पृथग्भूय व्यवस्थितः । कोऽहमित्येव निपुणो भूत्वा चिन्तय पार्थिव ॥ (वि. २. १३. १०३) इति । एवं विविक्तयोर्द्वयोर्वासुदेवात्मकत्वं चाहुः * इन्द्रियाणि मनो बुद्धिस्सत्त्वं तेजो बलं धृतिः । वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च ॥ (वि. स.) इति । छन्दोभिर्विविधैः पृथक्—पृथग्विधैश्छन्दोभिश्च ऋग्यजुस्सामाथर्वभिः देहात्मनोः स्वरूपं पृथग्गीतम्—* तस्माद्वा एतस्मादात्मन आकाशस्संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः (आ. १) इति शरीरस्वरूपमभिधाय तस्मादन्तरं प्राणमयं तस्माच्चान्तरं मनोमयमभिधाय * तस्माद्वा एतस्मान्मनोमयात् । अन्योऽन्तर आत्मा विज्ञानमयः इति क्षेत्रज्ञस्वरूपमभिधाय * तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः इति क्षेत्रज्ञस्याप्यन्तरात्मतया आनन्दमयः परमात्माऽभिहितः । एवमृक्सामाथर्वसु च तत्रतत्र क्षेत्रक्षेत्रज्ञयोः पृथग्भावस्तयोर्ब्रह्म मकत्वं च सुस्पष्टं गीतम् । ब्रह्मसूत्रपदैश्चैव—ब्रह्मप्रतिपादनसूत्राख्यैः पदैः शारीरकसूत्रैः, हेतुमद्भिः—हेतुयुक्तैः, विनिश्चितैः—निर्णयान्तैः ; * न वियदश्रुतेः (२. ३. १) इत्यारभ्य क्षेत्रप्रकारनिर्णय उक्तः, * नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः (२. ३. १८) इत्यारभ्य [* ज्ञोऽत एव (२. ३. १९) इत्यादिभिः] क्षेत्रज्ञयाथात्म्यनिर्णय उक्तः ; * परात्तु तच्छ्रुतेः (२. ३ ४०) इति भगवत्प्रवर्त्यत्वेन भगवदात्मकत्वमुक्तम् ; एवं बहुधा गीतं क्षेत्रक्षेत्रज्ञयाथात्म्यं मया संक्षेपेण सुस्पष्टमुच्यमानं शृण्वित्यर्थः ॥ ४ ॥

ता ॥ स्वेनोपदिश्यमानस्यार्थस्येतिहासपुराणमीमांसानुगृहीतानेकश्रुतिसिद्धत्वमाह—* ऋषिभिरिति श्लोकेन । विशदोपबृंहणवाक्यानुसारेण अविशदवेदवाक्यार्थनिश्चयाय प्रथममृषिभिर्गीतत्वाक्तिः । राजसतामसोपबृंहणव्यवच्छेदाय ऋषिशब्दोक्तान्विशिनष्टि—**पराशरादिभि**रिति । **बहुप्रकार**मिति । अर्थस्यैकत्वेऽपि वचनव्यक्तौ रथचक्र[नद्या]नाभ्यादिकल्पनाप्रकारभेदः । यद्वा संक्षेपविस्तरादिरूपेणेत्यर्थः । अविविक्तदेहात्मस्वरूपस्य राज्ञो वाह्यवाहकत्वोक्तिप्रतिक्षेपार्थं वाक्यम्—**अहं त्वं चे**ति । अध्यात्मगन्धिवाक्यश्रवणमूलस्य कस्त्वमिति प्रश्नस्योत्तरं—**पिण्ड** इति । * शिरःपाण्यादिलक्षणः इत्यनेन कृत्स्नैकदेशचेतनत्वविकल्पो द्योतितः । प्रतिपादितार्थस्य श्रोतर्यपि स्वप्रत्ययेन दृढीकरणार्थं वाक्यं **किं त्वमि**ति । एवम् * इदं शरीरमिति श्लोकेनोक्तस्य संवादकमुपात्तम् । ननु * द्वासुपर्णा (मु. ३. १. १) इति मन्त्रे * तयोरन्यः पिप्पलं स्वाद्वत्तीति कर्मफलभोक्ता जीव उच्यते ; * अनश्नन्नन्यो अभिचाकशीतीति परमात्मेति **शारीरके** * गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् (१. २. ११) * स्थित्यदनाभ्यां च (१. ३. ६) इत्यादिषु प्रपञ्चितम् । **पैङ्गिरहस्यब्राह्मणे** तु * तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमिति जन्तुवाचिना सत्त्वशब्देन जीवमभिधाय * अनश्नन्नन्यो अभिचाकशीति * अनश्नन्नन्यो अभिपश्यतीति [क्षेत्र]ज्ञः, द्वावेतौ सत्त्वक्षेत्रज्ञौ तदेतत्सत्त्वं येन स्वप्नं पश्यति अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञः इति क्षेत्रज्ञशब्देन परमात्मानमेवाभिधत्ते । तावेवात्र क्षेत्रज्ञोपद्रष्टृशब्दौ प्रत्यभिज्ञायेते * तं प्राहुः क्षेत्रज्ञः (गी. १३. १) इति, * उपद्रष्टाऽनुमन्ता (२२) इति च । **मनुश्च** *योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥ (१२. १२) इति क्षेत्रज्ञशब्देन परमात्मानमाह ।

अतः कथमत्र क्षेत्रज्ञो जीव इत्युच्यत इति शङ्कामर्थात्परिहरन् * क्षेत्रज्ञं चापि मां विद्धीत्यस्य संवादकं तस्य स्वोक्तार्थानुगुण्यं सूचयन्नवतारयति—**एवं विविक्तयो**रिति । तथा च क्षेत्रज्ञशब्दस्य जीवेऽपि प्रयोगदर्शनात्क्षेत्रज्ञो जीव इत्युपपद्यते । प्रत्येकं समुदायेन वा ममेदं शिरः, ममेमौ पाणी, ममेदं शरीरमिति क्षेत्रवेदितृत्वाज्जीवस्य क्षेत्रज्ञत्वम् ; परमात्मनस्तु, इदं शरीरमेतत्कर्मारम्भायैतत्कर्मफलभोगायेत्यादिक्षेत्रयाथात्म्यवेदितृत्वेन । एतच्च * एतदवयवशस्संघातरूपेण च * इदमहं वेद्मीति यो वेत्तीति भाष्येण * योऽस्यात्मनः कारयितेति मनुवचनेन च ज्ञापितम् । एवमुपद्रष्टृत्वमपि जीवस्य स्वशरीरमात्रं प्रति, परमात्मनस्तु सर्वचेतनाचेतनान् प्रतीत्युभयोरप्युपद्रष्टृत्वमविरुद्धम् । अतो न कस्यापि प्रमाणस्य विरोध इति भावः । स्वरूपवैविध्यस्य छन्दोभिरिति बहुवचनेनैव लाभात् विविधशब्दः प्रकृतप्रतिपाद्यप्रकारवैविध्यपर इत्यभिप्रायेणाह—**पृथग्विधै**रिति । पृथग्भूताः विधाः प्रतिपाद्यप्रकारा येषामिति विग्रहः । *आम्नायश्छन्दसां दण्डः इत्यादिप्रयोगानुसारेण छन्दश्शब्दो वेदपरः, न तु गायत्र्यादिपर इत्यभिप्रयन्नाह—**ऋग्यजुरि**ति । पृथक्छन्दस्य ऋषिभिरुक्तात्पृथक्त्वपरत्वभ्रमव्युदासायाध्याहारानुषङ्गाभ्यां योजयति—**देहात्मनोः स्वरूपं पृथग्गीत**मिति । परस्परविलक्षणं गीतमित्यर्थः । * तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिताः एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः (कौ. ३. ९) * एष म आत्माऽन्तर्हृदये....एतमितः प्रेत्याभिसंभवितास्मि (छा. ३. १४. ४) * दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाश्शुभ्रो ह्यक्षरात्परतः परः (मु. २. १. २) * स कारणं करणाधिपाधिपः (श्वे. ६. ९) * भोक्ता भोग्यं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति (श्वे. १. ९) इत्यादिकमभिप्रेत्याह—**एवमृक्सामाथर्ववे**ति । * ब्रह्मसूत्रेत्यत्र लुप्तषष्ठ्यर्थस्संबन्धः प्रतिपादकत्वमित्यभिप्रेत्य * सूत्रपदैरित्यत्र पष्ठीसमासभ्रमं वारयति—**ब्रह्मप्रतिपादनसूत्राख्यैः पदै**रिति । फलितमाह—**शारीरकसूत्रै**रिति । **हेतुयुक्तै**रिति—हेतुप्रतिपादकैरित्यर्थः । कर्मणि क्ताश्रयणे प्रयोजनाभावाद्विशेषतो निश्चितं येषामिति भावे क्तं बहुव्रीहिं चाभिप्रेत्याह—**निर्णयान्तै**रिति । निर्णयफलकैरित्यर्थः । **न वियदश्रुतेरित्यारभ्येत्यनेन** * अस्ति तु (२. ३. २) इत्यादिकं सूत्रषट्कम् , * एतेन मातरिश्वा व्याख्यातः (२. ३. ८), * तेजोऽतस्तथा ह्याह (१०), *आपः (११), * पृथिवी (१२) इति सूत्रचतुष्टयं च विवक्षितम् । **उक्त** इति—अनेनाकाशादीनामुत्पत्तिकथनेन तत्संघातात्मकक्षेत्रयाथात्म्यमुक्तप्रायमिति भावः । **नात्मा श्रुतेरित्यारभ्येत्यनेन** * ज्ञोऽत एव (२. ३. १९), उत्क्रान्तिगत्यागतीनां, * स्वात्मना चोत्तरयोः, * नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् , * स्वशब्दोन्मानाभ्यां च, * अविरोधश्चन्दनवत् , * अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि, * गुणाद्वाऽऽलोकवत् , * व्यतिरेको गन्धवत्तथा च दर्शयति, * पृथगुपदेशात् , * तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् , * यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् , * पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् , * नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा, * कर्ता शास्त्रार्थवत्त्वात् , *उपादानाद्विहारोपदेशाच्च, * व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः, * उपलब्धिवदनियमः, * शक्तिविपर्ययात् , * समाध्यभावाच्च, * यथाच तक्षोभयथा, * परात्तु तच्छ्रुतेः (४०) इत्यन्तं सूत्रजातमभिप्रेतम् । **इत्यारभ्य ज्ञोऽत एवेत्यादि**भिरिति पाठे त्वादिशब्देनैतद्विवक्षितम् । **भगवत्प्रवर्त्यत्वेने**ति चेतनं प्रति नियमेन नियाम्यद्रव्यत्वस्य शरीरलक्षणत्वादिति भावः । **श्रुत्यादिभिः प्रतिपादितस्यैव क्षेत्रक्षेत्रज्ञयाथात्म्यस्य ज्ञातुं शक्यत्वात् त्वत्तः किमर्थं श्रोतव्यमित्याशङ्कापरिहाराय पूर्वोक्तं * ज्ञानमार्गेण मे शृणु (३) इत्येतदत्र संगमय्य तत्तात्पर्यमाह—एवं बहुधा गीतमित्यादि । क्षेत्रक्षेत्रज्ञयाथात्म्यस्य**

श्रुत्यादिभिरतिविस्तरेण बहुधा गीतत्वात्किंचिज्ज्ञेन स्पष्टमवगन्तुमशक्यत्वात्सर्वज्ञेन मया संक्षेपेण सुस्पष्टमुच्यमानं तच्छ्रोतव्यमिति भावः ॥ ४ ॥

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ ५
इच्छा द्वेषस्सुखं दुःखं संघातश्चेतनाधृतिः । एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६

भा ॥ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव चेति क्षेत्रारम्भकद्रव्याणि; पृथिव्यप्तेजोवाय्वाकाशा महाभूतानि, अहंकारो भूतादिः, बुद्धिर्महान्, अव्यक्तं प्रकृतिः; इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचरा इति क्षेत्राश्रितानि तत्त्वानि; श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणीति, तानि दश, एकमिति मनः, इन्द्रियगोचराश्च पञ्च—शब्दस्पर्शरूपरसगन्धाः; इच्छा द्वेषस्सुखं दुःखमिति क्षेत्रकार्याणि क्षेत्रविकारा उच्यन्ते; यद्यपीच्छाद्वेषसुखदुःखान्यात्मधर्मभूतानि, तथाऽप्यात्मनः क्षेत्रसंबन्धप्रयुक्तानीति क्षेत्रकार्यतया क्षेत्रविकारा उच्यन्ते; तेषां पुरुषधर्मत्वं * पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते (२०) इति वक्ष्यते; संघातश्चेतनाधृतिः—आधूतिराधारः, सुखदुःखे भुञ्जानस्य भोगापवर्गौ साधयतश्च चेतनस्याधारतयोत्पन्नो भूतसंघातः; प्रकृत्यादिपृथिव्यन्तद्रव्यारब्धमिन्द्रियाश्रयभूतमिच्छाद्वेषसुखदुःखविकारि भूतसंघातरूपं चेतनसुखदुःखोपभोगाधारत्वप्रयोजनं क्षेत्रमित्युक्तं भवति; एतत् क्षेत्रं समासेन—संक्षेपेण सविकारं—सकार्यमुदाहृतम् ॥ ५ ॥ ६ ॥

ता ॥ * तत्क्षेत्रं यच्च यादृक्चेत्यादौ * यच्चेति प्रतिज्ञातस्य * महाभूतान्यहंकारो बुद्धिरव्यक्तमेव चेत्येतत्प्रतिपादकमित्यभिप्रायेणाह—**महाभूतानीत्यारभ्य इति क्षेत्रारम्भकद्रव्याणी**ति । भूतशब्दस्य सशरीरचेतनादावपि प्रयोगात्तद्व्यवच्छेदाय प्रकृतोपयुक्तमर्थमाह—**पृथिव्यप्तेज** इति । अहंकारशब्दस्य त्रिविधाहंकारवाचित्वेऽपि सात्त्विकाहंकारस्येन्द्रियारम्भकत्वाद्राजसस्योभयानुग्राहकत्वात्तामसपरत्वमाह—**अहंकार** इति । बुद्धिशब्दस्याध्यवसायपरत्वभ्रमव्युदासायाह—**बुद्धिर्महा**निति । अव्यक्तशब्दस्य * अव्यक्तमक्षरे लीयते (सु. २) इत्युक्ताव्यक्तपरत्वे तत्कारणमपि वक्तव्यं स्यादित्यभिप्रायेणाह—**अव्यक्तं प्रकृति**रिति । *इन्द्रियाणि दशैकं चेत्यादिकं * यादृक्चेति प्रतिज्ञातस्य प्रतिपादकमित्यभिप्रायेणाह—**इन्द्रियाणि दशे**त्यारभ्य **इति क्षेत्राश्रितानि तत्त्वानी**ति । इन्द्रियाणामेकादशत्वव्यक्तीकरणाय तद्गोचरा इत्युक्तपञ्चसंख्यास्पष्टीकरणाय च * त्वक्चक्षुर्नासिका जिह्वा श्रोत्रमत्र च पञ्चमम् । शब्दादीनामवान्तरार्थं बुद्धियुक्तानि [वै] च द्विज । पायूपस्थौ करौ पादौ वाक्च मैत्रेय पञ्चमी । विसर्गशिल्पगत्युक्ति कर्म तेषां च कथ्यते । एकादशं मनश्चात्र (वि. १. २. ४८, ४२) इति पराशरोक्त्यनुसारेण तानि इन्द्रियार्थांश्च विशेषतः कथयति—**श्रोत्रत्वगि**त्यादिना । * इच्छा द्वेषस्सुखं दुःखमित्येतत् * यद्विकारीत्युक्तस्य प्रतिपादकमित्याशयेनाह—**इच्छा द्वेष** इति । इच्छादीनां भूतसङ्घातरूपक्षेत्रपरिणामत्वाभावेन कथं क्षेत्रविकारत्वम्, प्रत्युतात्मधर्मभूतज्ञानविकारत्वमेवेत्याशयेन शङ्कते—**यद्यपी**ति । तेषां क्षेत्रविकारत्वव्यपदेश औपचारिक इत्याशयेन परिहरति—**तथापी**ति । क्षेत्रासाधारणकार्यत्वमुपचारनिमित्तमिति भावः । ननु कथमिच्छादीनां धर्मभूतज्ञानविकारत्वम्, * कामस्सङ्कल्पः (बृ. ३. ५. ३) इत्यादिना तेषां मनोविकारत्वश्रवणात्, * पञ्चवृत्तिर्मनोवद्व्यपदिश्यते (२. ४. ११) इति सूत्रभाष्ये * न कामादिकं मनसस्तत्त्वान्तरमिति भाषितत्वाच्चेत्यत आह—**तेषामि**ति । नचाश्रयत्वमन्तरेण हेतुत्वमस्त्विति वाच्यम्, * कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते (गी. १३. २०) इति पूर्ववाक्ये क्रियाश्रयत्वरूपकर्तृत्वं प्रति प्रकृतेराश्रयत्वेन हेतुत्वोक्त्या तद्वैरूप्या-

पत्तेः । नचान्तःकरणावच्छिन्नचैतन्यरूपजीवस्य पुरुषशब्देन विवक्षितत्वात्, *कामस्संकल्पः इत्यादिश्रुत्यनुसारेण योग्यतयाऽन्तःकरणस्य तदाश्रयत्वपरमेव *पुरुषस्सुदुखःखानाम् (१३. २०) इति वाक्यमिति वाच्यम्, देहादिवदन्तःकरणस्यापि प्रकृतिपरिणामत्वेन कार्यकरणकर्तृत्वे सुखदुःखानां भोक्तृत्वे च हेतुः प्रकृतिरुच्यत इत्येवोक्त्यापत्तेः । चैतन्यसंबन्धप्रयुक्तं भोक्तृत्वाश्रयत्वमिति *पुरुषस्सुखदुःखानामित्युक्तिरिति चेत्; कर्तृत्वाश्रयत्वमपि तत्संबन्धायत्तमिति तत्रापि तथोक्तिस्स्यात् । नचैवं *कामस्सकल्प इति श्रुतेः *पञ्चवृत्तिर्मनोवद्व्यपदिश्यते (२. ४. ११) इति सूत्रभाष्यस्य च कथमुपपत्तिरिति वाच्यम्, कामसंकल्पादिशब्दवाच्यधर्मभूतज्ञानपरिणामहेतुभूतमनोवृत्तीनां तत्कार्यवाचिशब्देनाभिधानपूर्वकं मनसस्तत्त्वान्तरत्वाभावप्रतिपादनपरत्वेनोपपत्तेः । ननूभयसंप्रतिपन्नमनोवृत्तिभिरेव तत्तन्नाम्नीभिस्सर्वकार्योपपत्तौ कामादिशब्दवाच्यधर्मभूतज्ञानपरिणामकल्पने प्रमाणाभावात्कामादिशब्दानां मनोवृत्तिषु लाक्षणिकत्वमनुपपन्नमिति चेन्न, *सोऽकामयत (आ. ६) *अथ पुरुषो ह वै नारायणोऽकामयत (ना. उ.) इति स्थाने *तदैक्षत (छा. ६.२.३) *स ईक्षांचक्रे (प्र. ६. ३) इत्यन्तःकरणरहितजगत्कारणाश्रितज्ञानविशेषवाचीक्षतिशब्दपाठात्, *स तपोऽतप्यत (आ. ६) इति तत्स्थानपठिततपश्शब्दस्य *यस्य ज्ञानमयं तपः (मु. १. १. ९) इति ज्ञानशब्देन व्याख्यानात्, *स यदि पितृलोककामो भवति संकल्पादेवास्य पितरस्समुत्तिष्ठन्ति (छा. ८. २. १) इति मुक्ताश्रितत्वेन कामसंकल्पयोश्श्रवणात्, सुखत्वापरपर्यायानन्दत्वस्य *रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति (आ. ७) *आनन्दं ब्रह्मणो विद्वान् (आ. ९) इत्यादिषु *अनुकूलज्ञानमेव ह्यानन्दः इति भाष्यकृदुक्तरीत्या मुक्तब्रह्मसंबन्धिज्ञानवृत्तित्वश्रवणात्, *निरस्तातिशयाह्लादसुखभाव[ण]णा । भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥ (वि. ५. ६. ५९) इति भगवदनुभवरूपभगवत्प्राप्तेस्सुखरूपत्वस्मृतेश्च कामसंकल्पसुखादीनां ज्ञानावस्थाविशेषत्वस्य अवश्याभ्युपगमनीयत्वात् । मनोवृत्तीनामज्ञानत्वेनान्याधीनप्रकाशतयाऽनन्याधीनप्रकाशत्वादिरूपव्यापकनिवृत्त्या व्याप्यभूतार्थान्तरप्रकाशादिहेतुत्वासंभवेन ज्ञानावस्थाविशेषानङ्गीकारे विषयप्रकाशव्यवहारादेरनुपपत्तेस्स्वप्रकाशज्ञानावस्थाविशेषाणामावश्यकत्वात् । अनेकशक्तिकल्पने गौरवेण कामसंकल्पादिशब्दानां वृत्तिषु लाक्षणिकत्वस्य न्याय्यत्वाच्च । नच वृत्तीनां चैतन्यसंबन्धेन विषयप्रकाशादिसमर्थत्वमिति वाच्यम्, निर्विशेषचैतन्यस्य सर्वविषयविमुखस्य विषयप्रकाशाद्ययोग्यत्वेन तत्सहायस्य *शतमप्यन्धानां न पश्यतीति न्यायेन विषयप्रकाशादिसामर्थ्यानापादकत्वान्निर्विशेषचैतन्यस्य तद्योग्यत्वे तेनैव प्रकाशाद्युपपत्तौ वृत्त्यवच्छेदकल्पना निष्फला स्यात् । नच संसारदशायां संकुचितस्य तस्य विषयव्यव[स्थित्यौ] स्थौपयिकतया साफल्यमिति वाच्यम्, तस्य संकोचाङ्गीकारे निर्विकारत्वादिप्रतिपादकश्रुत्यादिविरोधाच्चक्षुरादिवृत्तिभिरेव विषयव्यवस्थोपपत्तेश्च; धर्मभूतज्ञानस्य च विकारोऽङ्गीकृत एवेति न किंचिदनुपपन्नमस्माकमिति । एतत्सर्वमभिप्रेत्य भाषितम्—**तेषां पुरुषधर्मत्वं *पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते इति वक्ष्यत** इति । *चेतनाधृतिरित्यत्र न तावत्पदद्वयम्, चैतन्यस्य क्षेत्रानन्तर्भावात्; एकपदत्वेऽपि चेतनाया धृतिरिति न विग्रहः, धृतिशब्दस्याधारपरत्वे शरीरस्य चैतन्याधारत्वासंभवात्; भोगस्थानपरत्वे निर्विशेषचैतन्यस्य भोक्तृत्वानभ्युपगमात् *एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः (प्र. ४. ९) इति ज्ञातृत्वकर्तृत्वविशिष्टचेतनस्यैव भोक्तृत्वश्रवणाच्च । चेतनस्याधृतिरिति विग्रहः । चेतनशब्देनात्मा निर्दिश्यते । *भूतैराघ्राम (वि. २. ३. ६९) इतिवत् आधृतिशब्दोऽपि *अकर्तरि च कारके संज्ञायाम् (अष्टा. ३. ३. ९) इत्याधारपर इत्याह—**आधृतिराधार** इति । अत्रोद्दिष्टार्थक्रमवशाद्व्युत्क्रमेण व्याख्यातम् । आधारस्थात्र भोगायतनत्वरूपत्वान्नाधेयत्वरूपशरीरलक्षणविरोध इत्यभिप्रेत्याह—**सुखेति** । *महाभूतानीत्यादेस्तुमहत्त्वाय

* महाभूतानीत्यादेः * तत्क्षेत्रं यच्च यादृक्चेत्यादियद्वृत्तपञ्चकार्थविषयतां दर्शयन्निण्डितार्थमाह—**प्रकृत्यादी**ति । सविकारशब्देनेच्छादीनां क्षेत्रपरिणामत्वशङ्काव्युदासायाह—**सकार्य**मिति ॥ ५ ॥ ६ ॥

भा ॥ अथ क्षेत्रकार्येष्वात्मज्ञानसाधनतयोपादेया गुणाः प्रोच्यन्ते—

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७

भा ॥ अमानित्वम्—उत्कृष्टजनेष्ववधीरणारहितत्वम् ; 'अदम्भित्वम्—धार्मिकत्वयशःप्रयोजनतया धर्मानुष्ठानम् दम्भः, तद्रहितत्वम् ; अहिंसा—वाङ्मनःकायैः परपीडारहितत्वम् ; क्षान्तिः—परैः पीड्यमानस्यापि तान्प्रत्यविकृतचित्तत्वम् ; आर्जवम्—परान्प्रति वाङ्मनःकायप्रवृत्तीनामेकरूपता ; आचार्योपासनम्—आत्मज्ञानप्रदायिन्याचार्ये प्रणिपातपरिप्रश्नसेवादिनिरतत्वम् ; शौचम्—आत्मज्ञानतत्साधनयोग्यता मनोवाक्कायगता शास्त्रसिद्धा ; स्थैर्यम्—अध्यात्मशास्त्रोदितेऽर्थे निश्चलत्वम् ; आत्मविनिग्रहः—आत्मस्वरूपव्यतिरिक्तविषयेभ्यो मनसो निवर्तनम् ॥ ७ ॥

ता ॥ पूर्वं क्षेत्रज्ञादपि पश्चाज्ज्ञानोद्देशेऽपि तत्साधनानामनुष्ठेयानामिच्छादिवत्क्षेत्रकार्यत्वात्तदनन्तरमिह तदुक्तिरित्यभिप्रायेणाह—**अथ क्षेत्रकार्येष्वि**ति । विद्याभिजनधनादिसंपत्तिमूल उत्कृष्टजनावमानहेतुर्गर्वोऽत्र मानः ; तद्वान्मानी, तदन्योऽमानी ; तस्य भावस्तत्त्वम् ; मानित्वस्याभावो वाऽत्रामानित्वम् ; एवमदम्भित्वमपि ; तदाह—**तद्रहितत्वमि**ति । * धर्मध्वजः (वि. ध. ८१. ३५) इति स्मृत्यनुसारेणाह—**धार्मिकत्वयशःप्रयोजनतये**ति । न पुनश्चोदितकर्तव्यताबुद्धयेति भावः । अनर्थैकफलपरपीडारूपो व्यापारो हिंसा ; स च वाङ्मनःकायैस्त्रिभिरपि शापादिद्वारा संभवतीति संभावितसमस्तप्रकारनिषेधस्य वचनात्सिद्धस्य असंकोचेन विवक्षितत्वात् **वाङ्मनःकायै**रित्युक्तम् । **परपीडे**ति प्राप्तिकत्वाभिप्रायम्, अशास्त्रीयस्वपीडाया अपि हिंसात्वात् । * मनस्यन्यद्वचस्यन्यत् इत्येवंरूपं हि कौटिल्यम् ; तन्निवृत्तिरार्जवमित्यभिप्रायेणाह—**परान्प्रति वाङ्मनःकायप्रवृत्तीनामेकरूपते**ति । उपकारबुद्धया आचार्योपासनस्य स्वरसवाहित्वज्ञापनायाह—**आत्मज्ञानप्रदायिनी**ति । यद्वा आत्मज्ञानापेक्षितत्वज्ञापनाय तदुक्तिः । * तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया (४. ३४) इति प्राक्प्रपञ्चितमिहोपासनशब्देन संगृहीतमिति ज्ञापनाय प्रणिपाताद्युपादानम् । अशुचित्वं श्रुत्तरकर्माद्ययोग्यत्वरूपम् ; शुचित्वं च तद्योग्यत्वम् ; तच्चात्र प्रकरणविशेषितविषयमित्याह—**आत्मज्ञाने**ति । रागादयोऽनृतादयो निषिद्धभक्षणादयश्च मनोवाक्कायानामशुद्धयः । प्रत्यक्षाद्यगोचरत्वप्रामाणिकत्वप्रतिपादनाय तत्तद्विशेषावगमाय च **शास्त्रसिद्धे**त्युक्तम् । **स्थैर्यं** निश्चलत्वम् ; तच्च प्रकृते नियच्छति—**अध्यात्मे**ति । निश्चलत्वं बाह्यकुदृष्टिभिरक्षोभणीयत्वं, निस्संदेहत्वमित्यर्थः । निग्राह्यत्वसामर्थ्यादत्रात्मशब्दो मनोविषयः । अत एव परोक्तं सङ्गातपरत्वमयुक्तम् । स्वभावेन सर्वतः प्रवृत्तस्य निग्रहश्चापथान्निवर्तनं, तदाह—**आत्मस्वरूपे**ति ॥ ७ ॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८

भा ॥ इन्द्रियार्थेषु वैराग्यम्—आत्मव्यतिरिक्तेषु विषयेषु सदोषतानुसंधानेनोद्वेजनम् ; अनहंकारः—अनात्मनि देहे आत्माभिमानरहितत्वम् , प्रदर्शनार्थमिदम् ; अनात्मीयेष्वात्मीयाभिमानरहितत्वं च विवक्षितम् ;

जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्—सशरीरत्वे जन्ममृत्युजराव्याधिदुःखरूपस्य दोषस्यावर्जनीयत्वानुसंधानम् ॥ ८ ॥

ता ॥ बाह्यविषयवैराग्यं हि आत्म[नि]रागनिबन्धनमित्यभिप्रायेणाह—**आत्मव्यतिरिक्तेषु विषयेष्विति** । विरागस्य भावो वैराग्यम्, तत्प्रकारमाह—**सदोषतानुसंधानेनोद्वेजन**मिति। दुःखसाध्यत्वदुःखमिश्रत्वनश्वरत्वादिभिस्तेषां दोषमयत्वम्। गर्वरूपस्याहंकारस्य पूर्वं निषेधादत्रानहंकारशब्देन देहात्मभ्रमो निवार्यत इत्याह—**अनात्मनी**ति। अहंकारस्य निषेधस्तन्मूलस्य सर्वत्र तत्सहपठितस्य ममकारस्यापि निषेधं प्रदर्शयितुमित्याह—**प्रदर्शनार्थ**मिति। शरीरप्रयुक्तजन्मादिदोषदर्शनं *नह वै सशरीरस्य सतः प्रियाप्रिययोः (छा. ८. १२. १) इत्यादिप्रकारेण शरीरस्य हेयताप्रतिपत्त्यर्थमित्यभिप्रायेणाह—**सशरीरत्व** इति। जन्ममृत्युजराव्याधिभिर्जन्यं दुःखं जन्ममृत्युजराव्याधिदुःखम्, स एव दोष इति समासार्थः। जन्मादय एव वा दुःखान्तास्सर्वे दुःखसाधनत्वाद्दुःखत्वाच्च दोषाः। नहि तुषतण्डुलवच्छरीरमवस्थाप्य दोषाः परिहर्तुं शक्या इति दर्शयितुमवर्जनीयत्वोक्तिः। अनुदर्शनं भूयोभूयोदर्शनमित्याह—**अनुसंधान**मिति ॥ ८ ॥

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९

भा ॥ असक्तिः—आत्मव्यतिरिक्तपरिग्रहेषु सङ्गरहितत्वम् । अनभिष्वङ्गः पुत्रदारगृहादिषु—तेषु शास्त्रीयकर्मोपकरणत्वातिरेकेण स्नेहरहितत्वम् । संकल्पप्रभवेष्विष्टानिष्टोपनिपातेषु हर्षोद्वेगरहितत्वम् ॥ ९ ॥

ता ॥ पूर्वम् *इन्द्रियार्थेषु वैराग्यमिति सांस्पर्शि[क]के शब्दादिविषये विरक्तिरुक्ता; इदानीम् *असक्तिरित्याभिमानिकेषु सङ्गरहितत्वमुच्यत इति पुनरुक्तिं परिहर्तुम् **आत्मव्यतिरिक्तपरिग्रहेष्वि**त्युक्तम्। तर्हि गृहस्थस्य मुमुक्षोराभिमानिकसर्वधर्मपरित्यागेन कथमाश्रमधर्मो निर्वर्त्येतेत्यत्रोच्यते—**अनभिष्वङ्गः पुत्रदारगृहादिष्वि**ति। नात्र तेषूपयुक्तानामपि स्वरूपेण त्यागो विवक्षितः, प्रव्रजितस्याप्यवर्जनीयेषु सङ्गमात्रनिषेधात्—*न कुण्ड्यां नोदके सङ्गो न चेले न च विष्टरे। नागारे नासने नान्ये यस्य वै मोक्षवित्तु सः ॥ इति। अतो धर्मोपयुक्तत्वमात्रेण [तु] परिग्रह एवेत्यभिप्रायेणाह—**शास्त्रीये**ति। सङ्गोऽभिष्वङ्गहेतुः, *सङ्गात्संजायते कामः (२. ६२) इत्युक्तत्वात्। अतः कारणाभावात्कार्याभाव इति भावः। अभिष्वङ्गोऽतिसक्तिः। सांस्पर्शिकेष्टानिष्टयोस्समचित्तत्वस्याशक्यत्वादाह—**संकल्पप्रभवेष्वि**ति। पुत्रदारादिप्रसङ्गात्तद्विषयत्वं युक्तमेवेति [च] भावः ॥ ९ ॥

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १०

भा ॥ मयि—सर्वेश्वरे चैकान्ययोगेन स्थिरा भक्तिः; जनवर्जितदेशवासित्वम्, जनसंसदि चाप्रीतिः ॥१०

ता ॥ *मयीत्यनेनान्यभक्त्युन्मूलनेनाव्यभिचारित्वोपयुक्ताकारविवक्षामाह—**मयि सर्वेश्वर** इति। ***अनन्ययोगेने**ति देवतान्तरादिपरित्यागस्संगृहीतः। तत एव चाव्यभिचारित्वं तन्मूलं स्थैर्यम्, अन्यथा पुनरुक्तेरित्यभिप्रायेणाह—**ऐकान्त्ययोगेन स्थिरे**ति। *अनन्ययोगेनापृथक्समाधिनेति शंकरोक्तमेतेन प्रत्युक्तम्। न व्यभिचरितुं शीलमस्या इत्यव्यभिचारिणीति। समाधिविरोधपरिहारार्थं **विविक्तेत्यादि**। *अहेरिव गणाद्भीतः (भा. मो. २५१. ३)

इत्यादिवत् । उक्तं च मोक्षधर्मे—* नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च । सत्यं धृतिर्दण्डनिधान-मार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥ (२८३. ३८) इति । जनोऽत्र सत्त्वोत्तरेतरः ॥ १० ॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थचिन्तनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११

भा ॥ आत्मनि ज्ञानम्—अध्यात्मज्ञानं तन्निष्ठत्वम् ; तत्त्वज्ञानार्थचिन्तनम्— तत्त्वज्ञानप्रयोजनं यच्चिन्तनं तन्निरतत्वमित्यर्थः ; ज्ञायतेऽनेनात्मेति ज्ञानम् , आत्मज्ञानसाधनमित्यर्थः ; क्षेत्रसंबन्धिनः पुरुषस्यामानित्वादिकमुक्तं गुणवृन्दमेवात्मज्ञानोपयोगि, एतद्व्यतिरिक्तं सर्वं क्षेत्रकार्यमात्मज्ञानविरोधीत्यज्ञानम् ॥ ११ ॥

ता ॥ * अध्यात्मज्ञाननित्यत्वमित्यत्र नित्यशब्देनाविच्छिन्नानुवृत्तिर्विवक्षितेत्याह—**तन्निष्ठत्वमिति** । तत्त्व-ज्ञानार्थचिन्तनमिति, उक्तस्य तत्त्वज्ञानस्य अर्थचिन्तनमित्यनुचितम् ; न हि तत्त्वज्ञानस्य कोऽर्थ इति चिन्तन-प्रकारः, अपितु तत्त्वं किमिति ततस्तत्त्वचिन्तनमिति वा तत्त्वार्थचिन्तनमिति वा वक्तव्यम् ; न पुनस्तत्त्वज्ञानार्थ-चिन्तनमिति । एवं तत्त्वज्ञानविषयस्य प्रयोजनस्य वा चिन्तनं, तत्त्वज्ञानपुरुषार्थदर्शनमित्यादिकमपि मन्दप्रयोज-नम् ; दर्शनशब्दश्चात्राध्येतृभिर्न पठ्यते ; ततोऽस्यार्थान्तरमुचितमाह—**तत्त्वज्ञानप्रयोजन**मिति । फलितमन्यत्र चिन्ता-राहित्यमभिप्रेत्याह—**तन्निरतत्वमित्यर्थ** इति । अमानित्वादीनां सर्वेषामविशेषेण ज्ञानशब्दनिर्देशोचितं निर्वचनमाह—**ज्ञायतेऽनेने**ति । आत्मेत्यर्थप्रकरण[ादि]लब्धविषयविशेषाभिधानम् । करणव्युत्पत्तिं विवृण्वन् फलितमाह—**आत्म-ज्ञाने**ति । आपातप्रतीत्यादेः पूर्वसिद्धत्वादपरोक्षादिज्ञानमिह विवक्षितम् । * एतज्ज्ञानमिति निर्दिश्य * यदतोऽन्यथेति सामान्येन तद्व्यतिरिक्तस्य सर्वस्याज्ञानतोक्तिरस्तस्य सर्वस्य परिहरणीयत्वपरेत्यभिप्रायेणाह—**क्षेत्रसंबन्धिन** इति । क्षेत्र-संबन्धोक्तिस्तदत्यन्तनिवृत्तेः ज्ञानसापेक्षत्वसूचनार्था । * एतदित्यवच्छिद्य निर्देशेनाभिप्रेतं **गुणवृन्दमेवेत्यवधारणेन** विवृतम् । न केवलं प्रकृतगुणप्रतिपक्षभूतमानित्वादिमात्रमित्यभिप्रायेणाह—**एतद्व्यतिरिक्तं सर्वमिति** । * अज्ञानमित्यत्र करणव्युत्पत्तिनैरपेक्ष्यात्प्रसिद्धभावव्युत्पत्त्यनुसारेण ज्ञानविरोधित्वमुच्यत इत्याह—**क्षेत्रकार्यमात्मज्ञानविरोधीत्यज्ञान-मिति** । अवैरूप्याय करणार्थत्वेऽप्यसौ फलितोक्तिर्वा ॥ ११ ॥

भा ॥ अथ * एतद्यो वेत्तीति वेदितृत्वलक्षणेनोक्तस्य क्षेत्रज्ञस्य स्वरूपं विशोध्यते—

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२

भा ॥ अमानित्वादिभिस्साधनैः ज्ञेयं प्राप्यं यत्प्रत्यगात्मस्वरूपं तत्प्रवक्ष्यामि, यत् ज्ञात्वा जन्मजरा-मरणादिप्राकृतधर्मरहितममृतमात्मानं प्राप्नोति ; अनादि—आदिर्यस्य न विद्यते, तदनादि ; अस्य हि प्रत्यगात्मन उत्पत्तिर्न विद्यते ; तत एवान्तो न विद्यते, श्रुतिश्च * न जायते म्रियते वा विपश्चित् (क. २. १८) इति ; मत्परम्—अहं परो यस्य तन्मत्परम् , * इतस्त्वन्यां प्रकृतिं विद्धि मे पराम् , जीवभूताम् (७. ५) इति ह्युक्तम् । भगवच्छरीरतया भगवच्छेषतैकरसं ह्यात्मस्वरूपम् ; तथाच श्रुतिः—* य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति (बृ. ५. ७. २२. मा.) इति, यथा * स कारणं करणाधि-पाधिपो न चास्य कश्चिज्जनिता न चाधिपः (श्वे. ६. ९) * प्रधानक्षेत्रज्ञपतिर्गुणेशः (श्वे. ६. १६) इत्यादिका ।

ब्रह्म—बृहत्त्वगुणयोगि, शरीरादेरर्थान्तरभूतम्, स्वतश्शरीरादिभिः परिच्छेदरहितं क्षेत्रज्ञतत्त्वमित्यर्थः ; * स चानन्त्याय कल्पते (श्वे. ५. ९) इति हि श्रूयते ; शरीरपरिच्छिन्नत्वं चास्य कर्मकृतम् ; कर्मबन्धान्मुक्तस्यानन्त्यम् ; आत्मन्यपि ब्रह्मशब्दः प्रयुज्यते—* स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते । ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च (गी. १४. २६. २७) * ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ (गी. १८. ५४) इति । न सच्चासदुच्यते—कार्यकारणरूपावस्थाद्वयरहिततया सदसच्छब्दाभ्यामात्मस्वरूपं नोच्यते, कार्यावस्थायां हि देवादिनामरूपभाक्त्वेन सदित्युच्यते, तदनर्हतया कारणावस्थायामसदित्युच्यते ; तथा च श्रुतिः—* असद्वा इदमग्र आसीत् । ततो वै सदजायत (आ. ७) * तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत (बृ. ३. ४. ७) इत्यादिका । कार्यकारणावस्थाद्वयान्वयस्त्वात्मनः कर्मरूपाविद्यावेष्टनकृतः, न स्वरूपकृत इति सदसच्छब्दाभ्यामात्मस्वरूपं नोच्यते । यद्यपि * असद्वा इदमग्र आसीदिति कारणावस्थं परं ब्रह्मोच्यते, तथाऽपि नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरं परं ब्रह्म कारणावस्थमिति कारणावस्थायां क्षेत्रक्षेत्रज्ञस्वरूपमप्यसच्छब्दवाच्यम् ; क्षेत्रज्ञस्य साऽवस्था कर्मकृतेति परिशुद्धस्वरूपं न सदसच्छब्दनिर्देश्यम् ॥ १२ ॥

ता ॥ ज्ञाता हि पूर्वमुद्दिष्टः—* स च यो यत्प्रभावश्च (३) इति ; स एव पुनः परामृष्टः ; तत्कथं * ज्ञेयं यत्तत्प्रवक्ष्यामीत्युच्यत इत्याह—**अथेति** । वेद्यविशेषस्यात्मनो लक्षणतया हि वेदितृत्वं प्रागुक्तमिति भावः । अत एव * ज्ञेयं यदित्यादेः परब्रह्मविषयत्वभ्रमो निरस्तः, * क्षेत्रक्षेत्रज्ञयोर्ज्ञानमिति प्रक्रमात्, * क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा (३४) इति उपसंहरिष्यमाणत्वात् ; मध्येच * प्रकृतिं पुरुषं चैवेति तयोरेव निरूपणात्, इन्द्रियाधीनभोगत्वोत्क्रमणगुणवश्यत्वादिवचनाच्च । स्वरूपशब्देन नपुंसकनिर्देशविवक्षाद्योतनम् ; वक्ष्यमाणब्रह्मशब्दापेक्षया वा नपुंसकत्वम् । स्वेतरसमस्तव्यावर्तकं हि लक्षणम् । तत्र वेदितृत्वलक्षणेन विविक्तस्वरूपस्य किमन्यत्स्वरूपशोधनमिति चेत् ; तन्न, लक्षणेनान्यत्वमात्रं हि प्रतीयते, न पुनर्भावाभावरूपाः सर्वे प्रकाराः ; यथा गन्धवती पृथिवीत्यत्र तेनाकारेण जलादिव्यावृत्तिमात्रं सिध्यति, न पुनः पाकजरूपादिमत्त्वादिकम्, तद्वदिहापि ज्ञातृत्वलक्षणाभिधानेऽपि तस्य ज्ञातुः कार्यत्वाकार्यत्वादिविवेको न सिध्येत् ; अतस्स वक्तव्य इत्यभिप्रायेण * ज्ञेयमित्यनेन सूचितां संगतिमाह—**अमानित्वादिभिरिति** । **प्रवक्ष्यामि**—प्रकर्षेण यथावद्वक्ष्यामीत्यर्थः । * अनादिमदिति पदच्छेदो न युक्तः, प्रत्ययमन्तरेणापि बहुव्रीहिवशात्तदर्थसिद्धेरित्यभिप्रायेणाह—**आदिर्यस्येति** । अनादि—कारणरहितमित्यर्थः । अयमर्थः * नात्मा श्रुतेः (ब्र. २. ३. १८) इत्यधिकरणसिद्ध इत्यभिप्रायेणाह—**अस्य हीति** । पूर्वोक्तामृतत्वेऽपि हेतुरयमित्य[भिप्रायेण]ह—**तत एवेति** । उभयत्र प्रमाणमाह—**श्रुतिश्चेति** । * अनादिमदिति पदच्छेदेऽत्र निर्दिश्यमानं ब्रह्म परशब्देन विशेषणीयम् ; तच्चाप्रकरणत्वादस्वरसम् ; अतः प्रकरणोचितपदच्छेदार्थमाह—**अहं परो यस्येति** । प्रागुक्तसंग्रहो ह्ययमित्यभिप्रायेणाह—**इतस्त्वन्यामिति** । परशब्दोऽत्र शेषिपरः । शरीरत्वे शेषत्वे च क्रमाच्छ्रुतिमाह—**तथा चेति** । एतेन * मत्परमिति पदच्छेदेऽर्थासंभवान्मतुपो बहुव्रीहिणा समानार्थत्वेऽपि प्रयोगः श्लोकपूरणार्थ इति शंकरोक्तं प्रत्युक्तम् । ननु परशब्देनाविशेषितोऽपि ब्रह्मशब्दः परमात्मन्येव मुख्यः, तत्कथमस्य जीवविषयत्वमित्यत्राह—**बृहत्त्वगुणयोगीति** । अणुत्वेन श्रुतिसिद्धस्य संकुचितज्ञानस्य कथं बृहत्त्वमित्यत्राह—**शरीरादिभिरिति** । **परिच्छेदरहितम्**—स्वतस्सर्वविषयत्वार्हस्य ज्ञानस्य संकोचरहितमित्यर्थः । स्वरूपाविर्भावदशायां बृहत्त्वं श्रुतिसिद्धमित्याह—**सचेति** । अनन्तस्वभावस्य परिच्छिन्नत्वासंभवादान-

न्यमौपचारिकमित्यत्राह—**शरीरपरिच्छिन्नत्वं चेति** । औपाधिकमवस्थाभेदेनाविरुद्धं चेत्यभिप्रायः । औपचारिकस्यापि ब्रह्मशब्दप्रयोगस्य प्रसिद्धिमाह—**आत्मन्यपीति** । अत एव हि परं ब्रह्मेति विशेषणस्य सार्थतेत्यभिप्रायः । **अत्रैव शास्त्रे** बहुषु प्रदेशेषु प्रत्यगात्मन्येव ब्रह्मशब्दप्रयोगं दर्शयति—**स गुणानिति** । **ब्रह्मभूयाय**—ब्रह्मत्वाय । नहि जीवस्य मुक्तस्यापि साक्षाद्ब्रह्मत्वम्, * मम साधर्म्यमागताः (गी. १४. २) इत्यादिविरोधादिति भावः । * ब्रह्मणो हि प्रतिष्ठाऽहमित्यत्र * अहमिति परं ब्रह्म निर्दिश्यते ; तत्प्रतिष्ठं च ब्रह्म ततोऽन्यदेवेति भावः । * ब्रह्मभूतः (१८. ५४) इत्यत्र श्लोके परब्रह्मप्राप्तिसाधनभूतभक्त्युत्पत्तेः पूर्वमेव ब्रह्मभूतत्वं च नहि परब्रह्मस्वरूपत्वमिति भावः । * न सत्तन्नासदुच्यते इत्यत्र न सर्वप्रकारोक्तिगोचरत्वप्रतिक्षेपः, स्ववचनविरोधात् । न च सत्त्वासत्त्वनिषेधः, * परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायात् ; नापि सदसत्संज्ञकाभ्यां वस्तुभ्यां व्यावृत्तिः ; तयोरसिद्धत्वात् ; नच शुभाशुभादिव्यवच्छेदः, शुभत्वनिषेधायोगात् ; अतोऽत्र किमुच्यत इत्यत्राह—**कार्यकारणेति** । परिशुद्धाकारविषयमिदमिति ज्ञापनाय **आत्मस्वरूपमित्युक्तम्** । अवस्थाद्वये सदसच्छब्दयोः प्रयोगनिमित्तमाह—**कार्यावस्थायामिति** । तन्निबन्धनं श्रुतौ परमात्मादिविषयप्रयोगं दर्शयति—**तथाचेति** । *असद्वा इदमित्यत्रासच्छब्दनिर्दिष्टं हि *तत इति कारणतयोच्यते ; * सदजायतेति कार्यं सच्छब्देन, * तद्धेदमिति समानार्थश्रुत्यन्तरेणासदादिशब्दौ क्रमान्नामरूपप्रहाणतद्योगनिमित्तौ व्याख्यातौ । ननु * असद्वा इदमग्र आसीदित्याद्युक्तमवस्थाद्वयं जीवस्याप्यस्त्येव, अन्यथा प्रागुक्तप्रकृतित्वानुपपत्तेः, * तोयेन जीवान्व्यससर्ज भूम्याम् (ना) इति श्रुत्या च तत्सिद्धेरित्यत्राह—**कार्यकारणेति** । कर्मोपाधिकमेव ह्यवस्थाद्वयम्, न पुनस्स्वाभाविकम् । अत्र स्वाभाविकरूपमुच्यत इत्यर्थः । ननु * कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः (ब्र. १. ४. १४) इत्यस्मिन्नधिकरणे सदसदव्याकृतादयस्सर्वे कारणवाक्यगताश्शब्दाः परमात्मपरा इति निर्णीतम्, तत्कथमत्रासच्छब्देन जीवप्रसङ्ग इत्यत्राह—**यद्यपीति** । सदसच्छब्दौ ह्यत्र परमात्मनि सद्वारकौ, अतो द्वारभूते जीवेऽपि तद्वाच्यत्वं सिद्धमिति भावः । तर्हि परिशुद्धावस्थायामपि कार्यनामरूपविभागाभावादसच्छब्दः प्राप्त इत्यत्राह—**क्षेत्रज्ञस्येति** । कर्मकृतावस्थाद्वयनिषेधेऽत्र तात्पर्यमिति भावः ॥ १२ ॥

सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३

भा॥ सर्वतः पाणिपादं तत्—परिशुद्धात्मस्वरूपं सर्वतःपाणिपादकार्यशक्तम्, तथा सर्वतोऽक्षिशिरोमुखं सर्वतश्श्रुतिमत्—सर्वतश्चक्षुरादिकार्यकृत्, * अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुस्स शृणोत्यकर्णः (श्वे. ३. १९) इति परस्य ब्रह्मणोऽपाणिपादस्यापि सर्वतः पाणिपादादिकार्यकृत्त्वं श्रूयते, प्रत्यगात्मनोऽपि परिशुद्धस्य तत्साम्यापत्त्या सर्वतः पाणिपादादिकार्यकृत्त्वं श्रुतिसिद्धमेव ; * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति (मु. ३. १. ३) इति हि श्रूयते ; * इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः (१४. २) इति च वक्ष्यते। लोके सर्वमावृत्य तिष्ठति—लोके यद्वस्तुजातं तत्सर्वं व्याप्य तिष्ठति, परिशुद्धस्वरूपं देशादिपरिच्छेदरहिततया सर्वगतमित्यर्थः ॥ १३ ॥

ता ॥ आत्मस्वरूपस्याशरीरत्वान्निरवयवत्वान्निरिन्द्रियत्वाच्च पाणिपादप्रसङ्ग एव नास्ति, न चेदमनेकबाहुत्वादिप्रागुक्तपरं, जीवप्रकरणत्वस्थापनात्; अत एव जीवकर्मगृहीतैस्त्वेच्छागृहीतैश्च पाण्यादिभिर्विश्वात्मकस्य ब्रह्मणो योग उच्यत इत्यादिकल्पनाऽपि निरस्ता। पादादिषु पाण्याद्यभावाच्च सर्वत इत्यपि न घटते ; तत्कथं सर्वतः पाणिपादत्वादिक-

मित्यत्राह—**परिशुद्धेति** । पाण्यादिरहितस्यापि परिशुद्धात्मनः पाण्यादिशब्दलक्षिते शक्तियोगे श्रुतिं दर्शयितुं परमात्मनस्तद्रहितस्यापि तच्छक्तियोगं तावद्दर्शयति—**अपाणीति** । * अपाणिपादः (श्वे. ३. १९) इति निषेध्यस्य कर्मेन्द्रियवर्गस्योपलक्षणम्; * अचक्षुरकर्णः इति ज्ञानेन्द्रियवर्गस्य [उपलक्षणम्] । तर्हि परमात्मासाधारणस्वभावस्यात्र अल्पशक्तौ जीवे कथं व्यपदेश इत्यत्राह—**प्रत्यगात्मनोऽपीति** । मुक्तदशायां ब्रह्मगुणाष्टकयोगादसंकुचितज्ञानशक्तेस्तदुपपत्तिरिति भावः । साम्यश्रुतिसंकोचाभावाद्विशेषकण्ठोक्त्यभावेऽपि सर्वतःपाणिपादत्वादिकं सिद्धमेवेत्यभिप्रायेणैवकारः । साम्यापत्तिमात्रे सर्वथा साम्यं कथं श्रुतिसिद्धमित्यत्राह—**तदे**ति । इदं हि परमसाम्यं जगद्व्यापारव्यतिरिक्तसर्वविषयमिति फलपादे मीमांसितमिति भावः । सच श्रुत्यर्थोऽत्राप्युपदेक्ष्यते, तद्विवक्षाऽत्र युक्तेत्याह—**इदं ज्ञान**मिति । * तिष्ठतीत्यत्र व्याप्तेरप्रच्युतिर्विवक्षिता । कर्मवेष्टितज्ञानस्याणोः कथं सर्वव्यापित्वावस्थितिरित्यत्राह—**परिशुद्धेति** । इदं च व्यापकत्वं धर्मभूतज्ञानद्वारेति निरूपितं **शारीरके**—*प्रदीपवदावेशस्तथा हि दर्शयति (४. ४. १५) इत्यादिना; जीवस्वरूपस्याणुत्वेनैव लक्षणात्, निर्विकारश्रुत्या च स्वरूपविकारायोगात् ॥ १३ ॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४

भा ॥ सर्वेन्द्रियगुणाभासम्—सर्वेन्द्रियगुणैराभासो यस्य तत्सर्वेन्द्रियगुणाभासम्, इन्द्रियगुणा इन्द्रियवृत्तयः, इन्द्रियवृत्तिभिरपि विषयान् ज्ञातुं समर्थमित्यर्थः । स्वभावतस्सर्वेन्द्रियविवर्जितम्—विनैवेन्द्रियवृत्तिभिः स्वत एव सर्वं जानातीत्यर्थः । असक्तम्—स्वभावतो देवादिदेहसङ्गरहितम्, सर्वभृच्चैव—देवादिसर्वदेहभरणसमर्थं च, * स एकधा भवति त्रिधा भवति (छा. ७. २६. २) इत्यादिश्रुतेः । निर्गुणम्—तथा स्वभावतस्सत्त्वादिगुणरहितम्। गुणभोक्तृ च—सत्त्वादीनां गुणानां भोगसमर्थं च ॥ १४ ॥

ता ॥ स्वरूपमिन्द्रियगुणैराभासत इत्यादिपरोक्तव्युदासायाह—**सर्वेन्द्रियगुणैराभासो यस्येति** । योग्यत्वं शुद्धावस्थायामप्यस्तीति भावः । नन्विन्द्रियाण्येव करणभूतानि, न पुनरिन्द्रियगुणा इत्यत्राह—**इन्द्रियगुणा इन्द्रियवृत्तय** इति । स्वयंप्रकाशस्यात्मस्वरूपस्य कथमिन्द्रियवृत्तिभिराभासः? विषयाभासविवक्षायामपि परिशुद्धस्वरूपप्रसङ्गः कथमैन्द्रियिकज्ञानोक्तिरित्यत्राह—**इन्द्रियवृत्तिभिरपीति** । एतेन * सर्वेन्द्रियव्यापारैः व्याप्तमिव ज्ञेयमिति शंकरस्योद्ग्रन्थकल्पना निरस्ता । कदाचिदिन्द्रियवत्तः कथं सर्वेन्द्रियविवर्जितत्वमित्यत्राह—**स्वभावत** इति । सर्वेन्द्रियनिषेधे तदधीनज्ञानाभावात्परोक्तं पाषाणकल्पत्वप्रसङ्गं प्रागुक्तेन परिहरति—**विनैवेति**। मुक्तस्यापि जगदाधारत्वाभावात्पर्यायेण सर्वजातीयदेहभृत्त्वाभावाच्च तच्छक्तिरत्रापि विवक्षिता; स्वतस्तत्सङ्गराहित्यं च *असक्तमित्युच्यत इत्याह—**स्वभावतो देवादीति**। सामर्थ्यं परिशुद्धावस्थाभाविना कार्येण दर्शयति—**स एकधेति** । आत्मस्वरूपस्य भिदुरत्वाभावाज्जक्षणादिश्रुतिवशाच्च विग्रहद्वारैव हि त्रिधाभवनादिक[थन]मिति भावः । एतेन * सर्वभृत्त्वं सर्वाध्यासाधिष्ठानत्वमिति वदन् प्रत्युक्तः । * निर्गुणमित्यत्र न सत्त्वादिगुणसमवायित्वं प्रतिषिध्यते, तस्याशुद्धावस्थायामपि प्रसङ्गाभावात्; * गुणभोक्तृ चेत्येतत्पक्षरूपत्वाभावाच्च; अतोऽत्र कर्मोपाधिकस्य प्राकृतगुणभोगस्य प्रतिक्षेपः क्रियत इति न निर्विशेषवादावकाश इत्यभिप्रायेणाह—**स्वभावतस्सत्त्वादिगुणरहितमिति** । **स्वभावत** इत्यनेन गुणभोक्तृत्वविरोधपरिहारः । **भोगसमर्थमित्यत्रापि पूर्ववदभिप्रायः । औपाधिकं गुणभोक्तृत्वं, स्वभावतस्तदभावः, तत्सामर्थ्यमात्रं तु नित्यमित्यविरोधः ॥ १४ ॥**

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १५

भा ॥ पृथिव्यादीनि भूतानि परित्यज्याशरीरो बहिर्वर्तते ; तेषामन्तश्च वर्तते, * जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा (छा. ८. १२. ३) इत्यादिश्रुतिसिद्धस्वच्छन्दवृत्तिषु : अचरं चरमेव च—स्वभावतोऽचरं चरं च देहित्वे, सूक्ष्मत्वात्तदविज्ञेयम्—एवं सर्वशक्तियुक्तं सर्वज्ञं तदात्मतत्त्वमस्मिन् क्षेत्रे वर्तमानमप्यतिसूक्ष्मत्वा-देहात् पृथक्त्वेन संसारिभिरविज्ञेयम्, दूरस्थं चान्तिके च तत्—अमानित्वाद्युक्तगुणरहितानां विपरीतगुणानां पुंसां स्वदेहे वर्तमानमप्यतिदूरस्थम्, तथा अमानित्वादिगुणोपेतानां तदेवान्तिके वर्तते ॥ १५ ॥

ता ॥ सशरीरत्वावस्थायां हि भूतान्तर्वृत्तिरिति मुक्तस्याशरीरत्वात्तद्बहिर्वृत्तिर्युक्ता ; तदन्तर्वृत्तिस्तु कथमित्यत्राह—**जक्षदिति** । स्वच्छन्दवृत्तिषु तेषामन्तश्च वर्तत इत्यन्वयः । नचैतत्कर्मकृतं सशरीरत्वं, * स्वेन रूपेणाभिनिष्पद्यते (छा. ८. १२. २) इत्याविर्भूतस्वरूपस्य तदुक्तेः, तस्य च विधूतपुण्यपापत्वात् * स्वराड्भवति (छा. ७. २५. २) इति वचनाच्च । तदेतदभिप्रेत्य **स्वच्छन्दवृत्तिष्वित्युक्तम्** । * स यदि पितृलोककामो भवति (छा. ८.२.१) * इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन् (भृ) इत्यादिकमादिशब्देन गृह्यते । स्वरूपतो निर्विकारस्यात्मनस्त्रिधा भावादिकं जक्षणादिकं पितृलोककामादिकं च शरीरपरिग्रहमन्तरेण नोपपद्यते ; शरीरं चास्य प्राकृतानामप्राकृतानां वा भूतानां संघात एवेति भूतान्तर्वर्तित्वं सिध्यतीत्यभिप्रायः । अचरत्वचरत्वयोर्न चराचरान्तरत्वे शुद्धावस्थायामन्वयः ; अतः * बहिरन्तः इत्युक्तसशरीरत्वाशरीरत्वे तत्र हेतू इति दर्शयति—**स्वभावतोऽचरं चरं च देहित्व** इति । पादाद्य-धीनसंचारतदभावाविह विवक्षितौ । योग्यानुपलम्भबाध[क]परिहारायोच्यते—**सूक्ष्मत्वात्तदविज्ञेय**मिति । अहमिति नित्यमुपलभ्यमानस्य अविज्ञेयत्वं केनाकारेणेत्यत्राह—**एवं सर्वशक्तियुक्तं सर्वज्ञ**मिति । तच्छब्दपरामृष्टोऽयमर्थः । योग्यत्वशङ्कासूचनाय दूरत्वाद्यनुपलम्भकारणान्तराभावोपलक्षणतया **अस्मिन् क्षेत्रे वर्तमानमपी**त्युक्तम् । पृथिव्याद्यपे-क्षया सूक्ष्माणामपि वाय्वादीनां पृथगुपलम्भोऽस्तीति तद्व्युदासायोक्तम्—**अतिसूक्ष्मत्वादि**ति । * अहं जानामीत्यात्मन उपलम्भे सत्यपि विविच्य ज्ञातुमशक्य[त्व]मविज्ञेय[त्व]मिति सोपसर्गनिषेधेन विवक्षितमिति दर्शयितुं—**देहात्पृथक्त्वेने-त्युक्तम्** । पृथक्त्वस्य सर्वदा सर्वैरनुपलम्भे शशशृङ्गादिवदप्रामाणिकत्वमेव स्यात्, योगाभ्यासविधानस्य च निरर्थकत्वं स्यादित्यत्रोक्तं—**संसारिभिरिति** । योगिनामपि मुक्तवदविच्छिन्नविशदतमप्रत्ययाभावात्—**संसारिभिरिति** सामान्येनोक्तम् । यद्वा योगविरहिता इह संसारिशब्देन विवक्षिताः, योगिनामासन्नमोक्षत्वेन मुक्तप्रायत्वात् । * दूरस्थं चान्तिके च तदित्यनेन न व्याप्तिर्विवक्षिता, तस्याः * सर्वमावृत्य तिष्ठतीति प्रागेवोक्तत्वात् । अतोऽत्र सूक्ष्मत्वात्संसारिभिरविज्ञेयस्य कथं तैरेव विज्ञातव्यत्वविधिरिति शङ्काव्युदासायाधिकारिभेदेन दुर्ग्रहत्वसुग्रहत्वपरत्वमाह—**अमानित्वादी**ति ॥ १५ ॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६

भा ॥ देवमनुष्यादिभूतेषु सर्वत्र स्थितमात्मवस्तु वेदितृत्वैकाकारतया अविभक्तम् ; अविदुषां देवा-द्याकारेण अयं देवो मनुष्यः इति विभक्तमिव च स्थितम् ; * देवोऽहम्, मनुष्योऽहमिति देहसामानाधिकर-ण्येनानुसन्धीयमानमपि वेदितृत्वेन देहादर्थान्तरभूतं ज्ञातुं शक्यमिति आदावुक्त[म्]मेव * एतद्यो वेत्ति (१)

इति ; इदानीं प्रकारान्तरैश्च ज्ञातुं शक्यमित्याह—भूतभर्तृ चेति। भूतानां पृथिव्यादीनां देहरूपेण संहतानां यद्भर्तृ, तद्भर्तव्येभ्यो भूतेभ्योऽर्थान्तरं ज्ञेयम्, अर्थान्तरमिति ज्ञातुं शक्यमित्यर्थः। तथा ग्रसिष्णु—अन्नादीनां भौतिकानां ग्रसिष्णु, ग्रस्यमानेभ्यो भूतेभ्यो ग्रसितृत्वेनार्थान्तरभूतमिति ज्ञातुं शक्यम्, प्रभविष्णु च—प्रभवहेतुश्च, ग्रस्तानामन्नादीनामाकारान्तरेण परिणतानां प्रभवहेतुः, तेभ्योऽर्थान्तरमिति ज्ञातुं शक्यमित्यर्थः; मृतशरीरे ग्रसनप्रभवादीनामदर्शनान्न भूतसंघातरूपं क्षेत्रं ग्रसनप्रभवभरणहेतुरिति निश्चीयते ॥ १६ ॥

ता ॥ स्वरूपभेदवत्स्वविग्रहक्षेत्रादिष्वविभक्तशब्दप्रयोगात् * पण्डितास्समदर्शिनः (५. १८) इति प्रागुक्तं साम्यमिहापि विवक्षितमित्याह—**देवमनुष्यादी**ति। **अविभक्तं**—स्वरूपेण देव[त्व]ादिविभागरहितमित्यर्थः। * विभक्तमिवेतीवशब्देन भ्रान्तोपलम्भविषयीकारसूचनमाह—**अविद्युषा**मिति। एवं शुद्धद्रव्यस्थोक्ता, तत्र * भूतभर्त्रित्यादीनां जगद्व्यापारभ्रमव्युदासाय प्रकरणस्य भोक्तृव्यतिरेकपरतामेव वदन् पूर्वोक्तपुनरुक्तिं च परिहरति—**देवोऽहमित्यादिना ग्रन्थद्वयेन**। अहंत्वानहंत्वज्ञातृत्वाज्ञ[ातृ]त्वादिरूपो भेदः प्रागुक्तः; अत्र त्वाधाराधेयभावभोक्तृत्वभोग्यत्वविकार्यत्वविकारहेतुत्वैर्विवेकः क्रियत इत्यर्थः। अत्र जीवभर्तव्यविषयो भूतशब्दोऽचिन्मात्रपरः; तत्रापि प्रसिद्ध्यनुरोधेन महाभूतविषयत्वेऽपि क्षेत्रप्रकरणात्तादृशपरिणामवद्भूतविषय इत्याह—**भूतानां**मिति। ज्ञेयशब्दश्च * ज्ञेयं यत्तत्प्रवक्ष्यामीत्युपक्रान्तत्वेऽपि पुनरिहोच्यमानत्वात्तदतिरिक्तार्थतया व्याख्यातः। भर्तृत्वभर्तव्यत्वफलितमाह—**अर्थान्तर**मिति। **प्रभवहेतु**रिति—देहव्यतिरिक्तत्वोपपादने तात्पर्यादयमेवार्थ उचित इति भावः। प्रभवोऽत्र रेतोगर्भादिरूपेण परिणामः। **आकारान्तरेण**—रसमलधात्वादिरूपेणेत्यर्थः। ननु शरीरेणैव ग्रासादिकं क्रियमाणं दृश्यते, न च कार्यकरणसंघातमन्तरेण निरवयवस्य ग्रसनादिसंभवः, तत्कथमात्मधर्मत्वेन व्यपदिश्यत इति शङ्कायामुक्तमर्थं व्यतिरेकेण द्रढयति—**मृतशरीर** इति। क्षेत्रं शरीरत्ववेषेण ग्रसनादिकारणम्? उत भूतसंघातमात्रेण? आद्ये शरीरत्वस्यात्मप्रतियोगिकत्वादात्मसापेक्षत्वं ग्रसनादेरसिद्धम्, द्वितीये मृतशरीरादिष्वदर्शनादयुक्तिः। यद्यपि मृतशरीरेऽपि केचिद्विशेषा दृश्यन्ते; तथाऽपि जीवज्ञानपूर्वकग्रसनभरणाद्यभावान्न ते जीवापेक्षाः। ईश्वरापेक्षा तु सार्वत्रिकीति न तत्र विशेष इति भावः। अत्र भरणग्रसनादिकं रज्ज्वादिषु सर्पादेरिवेति वदन्तश्रुतहानाश्रुतकल्पनादिभिर्निरस्ताः ॥ १६ ॥

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७

भा॥ ज्योतिषाम्—दीपादित्यमणिप्रभृतीनामपि तदेव ज्योतिः—प्रकाशकम्, दीपादित्यादीनामप्यात्मप्रभारूपं ज्ञानमेव प्रकाशकम्; दीपादयस्तु विषयेन्द्रियसन्निकर्षविरोधितमसनिरसनमात्रं कुर्वते; तावन्मात्रेण तेषां प्रकाशकत्वम्। तमसः परमुच्यते—तमश्शब्दस्सूक्ष्मावस्थप्रकृतिवचनः, प्रकृतेः परमुच्यत इत्यर्थः। अतो ज्ञानं ज्ञेयम्—ज्ञानैकाकारमिति ज्ञेयम्। तच्च ज्ञानगम्यम्—अमानित्वादिभिर्ज्ञानसाधनैरुक्तैः प्राप्यमित्यर्थः। हृदि सर्वस्य विष्ठितम्—सर्वस्य मनुष्यादेः हृदि विशेषेणावस्थितम्—सन्निहितम्॥ १७ ॥

ता ॥ ननु स्वरूपमात्रप्रकाशरूपस्य आत्मस्वरूपस्य कथं मण्यादिप्रकाशकत्वमित्यत्राह—**दीपादित्यादीनामपी**ति। दीपादित्यादीनां यथा विषयसंबन्धिप्रभाद्वारा प्रकाशकत्वं, न स्वरूपतः, तद्वदत्रापि प्रभास्थानीयेन ज्ञानाख्यधर्मेण प्रकाशकत्वमिति भावः। अन्यप्रकाशकानामपीत्यपिशब्दार्थः। प्रकाश्यभूतघटादिवत्तत्प्रकाशक[ः]ज्ञानाश्रयभूते

प्रत्यगात्मनीति भावः । विषयेन्द्रियसन्निकर्षशब्देनात्र सामग्रीमध्यपातिसन्निकर्षोऽभिप्रेतः; तन्मूलप्रकाशो वा लक्षितः, संतमसस्य कुड्यादिव[द्विषय]दिन्द्रियसन्निकर्षविरोधित्वाभावात् । अन्यथा संतमसवर्तिनः पुरुषस्य संतमसान्तरितप्रकाशमध्यवर्तिनां पदार्थानां कुड्यान्तरितपदार्थवदप्रकाशप्रसङ्गात् । एतेन दीपादेश्चाक्षुषपदार्थमात्रप्रतिनियततया ज्ञानवन्न सर्वव्यापकं प्रकाशकत्वमिति सूचितम् । **तावन्मात्रेण**—न तु साक्षात्प्रकाशजनकत्वेनापीत्यर्थः । ज्योतिस्सन्निकर्षात्मसिद्धिप्राचुर्याच्चात्र तमश्शब्दस्य तिमिरविषयत्वधीव्युदासायाह—**तमश्शब्द** इति । ज्योतिषामपि प्रकाशकतया कैमुत्यसिद्धस्य तिमिरात्परत्वस्याभिधाने प्रयोजनाभावात्, प्रकृतेः परत्वस्य चावश्यवक्तव्यत्वात्, तमश्शब्दस्य च *यस्य तमश्शरीरं (बृ. ५. ७. १३), *तम आसीत्तमसा गूढमग्रे प्रकेतं (अष्ट. २. ८. ९. ४), *यदा तमस्तत् (श्वे. ४. १८), *तम एव एकीभवति (सु. २), आसीदिदं तमोभूतम् (मनु. १. ६) इत्यादिषु मूलप्रकृतिविषयतया श्रौतस्मार्तप्रयोगप्राचुर्याच्चेति भावः । परम्—अन्यदित्यर्थः; भोक्तृतया प्रधानभूतमिति वा । प्रागपि हि ते परावरतया [प्रकृती] विभक्ते । **उच्यत** इति । *निर्गुणः प्रकृतेः परः (वि. २. १४. २९) इत्यादिष्विति शेषः । एतेन जडवैलक्षण्यं विवक्षितमित्यभिप्रायेणाह—**अत** इति । पूर्ववद्वैधर्म्यानुसंधानशक्यतायां ज्ञेयशब्दस्य तात्पर्यम्; अन्यथा पौनरुक्त्यादित्यभिप्रायेणाह—**ज्ञानैकाकारमिति ज्ञेय**मिति । *ज्ञानगम्यमित्यत्र सर्वसाधारणज्ञानविषयत्वमात्राभिधाने प्रयोजनाभावात् *ज्ञेयमित्यनेन पौनरुक्त्याद्गम्यशब्दस्य प्राप्यपर्यायत्वप्रसिद्धेश्च प्रकृतसंगतं विवक्षितमाह—**अमानित्वादिभिरिति** । *एतज्ज्ञानमितिवत् (११) अत्रापि करणव्युत्पत्तिं व्यनक्ति—**ज्ञानसाधनैरुक्तै**रिति । **मनुष्यादे**रिति । पिण्डस्येति शेषः । भोक्तृत्वादिरूपेणावस्थानं विशेषेणावस्थानम् । यद्वा हृदि स्वरूपेणावस्थानम्; अवयवान्तरेषु तु स्वधर्मभूतज्ञानेनेति विशेषः । स्थितिशब्दस्यात्र मुख्यार्थायोगात्सन्निधिमात्रपरत्वमुक्तम्; सर्वस्य गृहेऽप्ययमेव व्रीहिरितिवज्जात्यैक्यविवक्षया सर्वस्य हृदि स्थितिनिर्देशः ॥ १७ ॥

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८

भा ॥ एवं *महाभूतान्यहङ्कारः (५) इत्यादिना *संघातश्चेतनाधृतिरित्यन्तेन क्षेत्रतत्त्वं समासेनोक्तम् । *अमानित्वम् (७) इत्यादिना *तत्त्वज्ञानार्थचिन्तनमित्यन्तेन ज्ञातव्यस्यात्मतत्त्वस्य ज्ञानसाधनमुक्तम् । *अनादि मत्परम् (१२) इत्यादिना *हृदि सर्वस्य विष्ठितमित्यन्तेन ज्ञेयस्य क्षेत्रज्ञस्य याथात्म्यं च सङ्क्षेपेणोक्तम् । मद्भक्तः एतत्—क्षेत्रयाथात्म्यम्, क्षेत्राद्विविक्तात्मस्वरूपप्राप्त्युपाययाथात्म्यम्, क्षेत्रज्ञयाथात्म्यं च विज्ञाय, मद्भावायोपपद्यते मम यो भावः—स्वभावः, असंसारित्वम्; असंसारित्वप्राप्तये उपपन्नो भवतीत्यर्थः ॥ १८ ॥

ता ॥ उपसंहरन्नुक्तयाथात्म्यज्ञानस्य फलं चाह—*इतीतिश्लोकेन । प्रकृतपरामर्शिन एतच्छब्दस्य विशेषकाभावात्प्रकृतार्थत्रयविषयत्वमाह—**क्षेत्रयाथात्म्य**मित्यादिना । *मद्भावायेत्यत्र साम्यश्रुत्यादिविरुद्धतादात्म्यभ्रमव्युदासायाह—**मम यो भावः स्वभाव** इति । नित्यसिद्धज्ञानत्वादिस्वभावव्यवच्छेदायाह—**असंसारित्वमिति** । ***उपपद्यते** इत्यस्य ज्ञानजन्ययोग्यतायां तात्पर्यमुपपन्नशब्देन दर्शितम् ॥ १८ ॥

भा ॥ अथात्यन्तविविक्तस्वभावयोः प्रकृत्यात्मनोस्संसर्गस्यानादित्वं संसृष्टयोर्द्वयोः कार्यभेदस्संसर्गहेतुश्चोच्यते—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९

भा ॥ प्रकृतिपुरुषावुभावन्योन्यसंसृष्टावनादी इति विद्धि ; बन्धहेतुभूतान् विकारान्—इच्छाद्वेषादीन्, अमानित्वादिकांश्च गुणान् मोक्षहेतुभूतान् प्रकृतिसंभवान् विद्धि ; पुरुषेण संसृष्टेयमनादिकालप्रवृत्ता क्षेत्राकारपरिणता प्रकृतिः स्वविकारैरिच्छाद्वेषादिभिः पुरुषस्य बन्धहेतुर्भवति ; सैवामानित्वादिभिस्स्वविकारैः पुरुषस्यापवर्गहेतुर्भवतीत्यर्थः ॥ १९ ॥

ता ॥ अथ * बन्धहेतुरित्यनेन (गी. सं. १७) संगृहीतं * प्रकृतिं पुरुषमित्यारभ्य विवेकानुसंधानात्पूर्वस्यार्थं विविनक्ति—अथेति । संसर्गहेतुश्चेति । प्रवाहानादेस्संसर्गस्य निमित्तमित्यर्थः । * उभावनादी इत्यत्र प्रकृतिं पुरुषं चेतीतरेतरयोगपरचकारेण लब्धं विशेषं दर्शयति—प्रकृतिपुरुषावुभावन्योन्यसंसृष्टाविति । तदपेक्षया द्विवचनान्तप्रयोग उपपन्नः । प्रकृतिपुरुषाविति अत्र * परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः (अष्टा. २. ४. २६) इति पुल्लिङ्गत्वम् । तद्विशेषणत्वात् * उभावनादी इत्यनयोरपि तल्लिङ्गत्वमेव । * इच्छाद्वेष इत्यादिना (६) * अमानित्वमित्यादिना (७) च निर्दिष्टा यथाक्रमं विकारगुणशब्दाभ्यामनूद्यन्त इति दर्शयति—बन्धहेतुभूतानिति । * तत्क्षेत्रं....यद्विकारि (३) इति प्रकरणोपक्रमे विकारिशब्दः क्षेत्रकार्यमात्रपरः ; तत्प्रत्यभिज्ञानाच्चात्रापि विकारशब्दस्तद्विषयः । अतः प्रकरणबलान्न महदादिविकारपरत्वम् ; तत्साहचर्याच्च गुणशब्दस्यापि प्राकरणिकार्थविषयत्वौचित्यात्सत्त्वादिगुणविषयत्वमयुक्तमिति भावः । *विकारांश्च गुणांश्चेति भेदोक्तिर्निदानज्ञापनाय बन्धमोक्षहेतुत्वेन वचनम् । हेयोपादेयगुणवर्गद्वयोपदेशो हानोपादानार्थतया सप्रयोजनः, तस्य प्रकृतिसंभवत्वोपदेशस्तु किमर्थ इति शङ्कायामुच्यमानतया ज्ञातव्यार्थं * विद्धीत्यधिकोक्त्यभिप्रेतमाह—पुरुषेणेति । प्रकृतेरेवाकारभेदेन हेयत्वोपादेयत्वज्ञापनार्थस्तत्संभवत्वोपदेश इति भावः । स्वविकारैरित्यमानित्वादीनां विकारत्व[1]भाषणं * प्रकृतिसंभवानित्युक्तप्रकृतिकारणत्वाविशेषाद्बोधबलीवर्दनयसूचनार्थम् ॥ १९ ॥

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २०

भा ॥ कार्यं—शरीरम् कारणानि—ज्ञानकर्मात्मकानि समनस्कानीन्द्रियाणि, तेषां क्रियाकारित्वे पुरुषाधिष्ठिता प्रकृतिरेव हेतुः ; पुरुषाधिष्ठितक्षेत्राकारपरिणतप्रकृत्याश्रया भोगसाधनभूताः क्रिया इत्यर्थः । पुरुषस्याधिष्ठातृत्वमेव ; तदपेक्षया * कर्ता शास्त्रार्थवत्त्वात् (ब्र. २ ३. ३३) इत्यादिकमुक्तम् ; शरीराधिष्ठानप्रयत्नहेतुत्वमेव हि पुरुषस्य कर्तृत्वम् ; प्रकृतिसंसृष्टः पुरुषः सुखदुःखानां भोक्तृत्वे हेतुः, सुखदुःखानुभवाश्रय इत्यर्थः ॥ २० ॥

ता ॥ अथान्योन्यसंसृष्टयोः प्रकृतिपुरुषयोस्संसर्गविशेषनिबन्धनो व्यापारभेद उच्यते—* कार्यकारणेति श्लोकेन । कार्यं शरीरमिति । प्रकरणात् कारणशब्दस्य समभिव्याहाराच्च अत्र कार्यशब्दो भोगायतनास्यकार्यविशेषपर इति भावः । * इन्द्रियाणि दशैकं च (५) इति इन्द्रियादिप्रकृतविषयोऽत्र कारणशब्द इत्याह—ज्ञानकर्मात्मकानीति । एतेन * कार्यं भूततन्मात्ररूपेण दशविधम् ; करणं बुद्ध्यहंकाररूपेण त्रयोदशविधम् ; तेषां स्वरूपोत्पत्तौ प्रतिक्षणपरिणामे च हेतुर्मूलप्रकृतिः इत्यादिव्याख्यानान्तराणि निरस्तानि । * कार्यकरणकर्तृत्वे इति पूर्वोक्तं

पाठान्तरमप्रसिद्धेरनादृतम् । कर्तृशब्दोऽत्र न प्रयत्नाद्याश्रयत्वपरः, अचेतने तदसंभवात्; अतो यथास्वं व्यापाराश्रयत्वं विवक्षितमित्याह—**तेषां क्रियाकारित्व** इति । यद्यप्यबुद्धिपूर्वेषु केषुचिन्मनश्श्रोत्रादिव्यापारेषु पुरुषेच्छाधीनत्वं नास्ति; तथाऽपि तेषां पुरुषभोगार्थत्वात् भोक्तृत्वदशापन्नपुरुषसन्निधानरूपमधिष्ठानमपेक्षितम्; बाहुल्येन च प्रयत्नाधीनत्वमस्तीत्यभिप्रायेणाह—**पुरुषाधिष्ठितेति** । विभज्य व्यापारनिर्देशात् **प्रकृतिरेवेत्यवधारणलाभः** । ननु पुरुषाधिष्ठिता प्रकृतिरित्ययुक्तं, प्रलयदशायां करणकलेबरविधुरस्य संसारिणः स्वेच्छया प्रकृत्यधिष्ठानासंभवादित्यत्राह—**पुरुषाधिष्ठितक्षेत्राकारपरिणतेति** । भोगतत्साधनयोराश्रयत्वलक्षणं हेतुत्वमिह विविच्यत इत्यभिप्रायेण प्रकृत्याश्रयत्वादिकथनम् । प्रकृतेः कर्तृत्वे *कर्ता शास्त्रार्थवत्त्वात् (ब्र. २. ३. ३३) इत्यादिभिस्सूत्रैर्विरोधस्स्यादित्यत्राह—**पुरुषस्याधिष्ठातृत्वमेवेति**। यदि पुरुषस्याधिष्ठातृत्वमात्रं, तदा साक्षात्कर्तृत्वं प्रकृतेरेवेति पुरुषस्य कर्तृत्वमौपचारिकं स्यादित्यत्राह—**शरीराधिष्ठानेति** । अयमाभिप्रायः—नहि प्रयत्नाधीनपरिस्पन्दाश्रयत्वलक्षणं कर्तृत्वं पुरुषस्य सूत्र्यते; तत्र शास्त्रार्थवत्त्वादिहेतूनामन्यथासिद्धेः; नच शरीरादिप्रेरकप्रयत्नाश्रयत्वे कर्तृशब्दस्यौपचारिकता, कृतिप्रयत्नयोः पर्यायत्वात्कृत्याश्रयत्वरूपत्वाच्च कर्तृत्वस्य । ततश्चान्यत्रैव कर्तृत्वमौपचारिकमिति फलितम् । यदि पुनर्यथास्वं व्यापाराश्रयत्वमेव सर्वेषां कर्तृत्वमित्युच्यते; तथाऽपि पुरुषस्य कर्तृत्वं मुख्यमेवेति । ननु पुरुषस्सुखदुःखानां भोक्तेत्ययुक्तम्, शुद्धस्य पुरुषस्य प्रियाप्रियविधुरत्वश्रुतेः । यद्यपि मोक्षे विलक्षणं सुखमनुभूयते, तथाऽपि दुःखप्रसङ्गस्तु नास्त्येवेत्यत्राह—**प्रकृतिसंसृष्ट** इति । *नह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति (छा. ८. १२. १) इत्यपि श्रूयत इति भावः । विषयेन्द्रियादिरूपेण परिणतायाः प्रकृतेरपि भोक्तृत्वे हेतुत्वमस्ति; तत्कथं पुरुषो विशिष्य निर्दिश्यत इत्यत्राह—**सुखदुःखानुभवाश्रय** इति । तत्कालस्वसमवेतसुखदुःखसाक्षात्कारो भोग इति भोगलक्षणमप्यनेन सूचितम् । एतेन निर्विकारपुरुषसन्निधानात् प्रकृतेरेव भोक्तृत्वमिति पक्षो निरस्तः । तदा *पुरुषोऽस्ति भोक्तृभावात् (सां. का. १७), *पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य (२१) इत्यादिस्वग्रन्थविरोधश्च । अयं हि पक्षः **शारीरके** *रचनानुपपत्तेश्च (२. २. १) इत्यारभ्य *विप्रतिषेधाच्चासमञ्जसम् (९) इत्यन्तैस्सूत्रैर्विस्तरेण प्रतिक्षिप्तः । अत्र च श्लोके यदि प्रकृतेरेव भोक्तृत्वमपि विवक्षितं स्यात्, तदा कर्तृत्वे भोक्तृत्वे च प्रकृतिरेव हेतुरिति वक्तव्यम्; नतु विवेक्तव्यम्; भोक्तृत्वस्यापि कर्तृत्वविशेषत्वात्, *शास्त्रफलं प्रयोक्तरि (पू. मी. ३. ७. १८) इति न्यायाच्च । नच वाच्यं कर्तृत्वं प्रकृतेस्स्वतस्सिद्धं, भोक्तृत्वे तु तस्याः पुरुषो हेतुरिति प्रदर्शनाय विवेक इति; पुरुषनिरपेक्षायाः केवलायाः प्रकृतेः कर्तृत्वस्याप्ययोगादनभ्युपगमाच्च । अन्यथा विशुद्धकेवलज्ञानोदयेऽपि *तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम् (सां. का. ६५) इत्युक्तसप्तरूपविनिवृत्तिभङ्गप्रसङ्गात् । तथाच मुक्तावपि यथापूर्वमेव प्रकृतिप्रवृत्तिस्स्यात् । *संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् । पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ॥ जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ (सां. का. १७. १८) इत्यधिष्ठानायुगपत्प्रवृत्तिभ्यां पुरुषतद्बहुत्वकल्पनं च भज्येत । अत्र *पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणानित्यनन्तरोक्तिश्च व्याहन्येतेति भावः ॥ २० ॥

भा ॥ एवमन्योन्यसंसृष्टयोः प्रकृतिपुरुषयोः कार्यभेद उक्तः; पुरुषस्य स्वतस्स्वानुभवैकसुखस्यापि वैषयिकसुखदुःखोपभोगहेतु[त्व]माह—

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।

भा ॥ गुणशब्दः स्वकार्येष्वौपचारिकः ; स्वतस्स्वानुभवैकसुखः पुरुषः प्रकृतिस्थः—प्रकृतिसंसृष्टः, प्रकृतिजान् गुणान्—प्रकृतिसंसर्गोपाधिकान् सत्त्वादिगुणकार्यभूतान् सुखदुःखादीन्, भुङ्क्ते—अनुभवति ॥

भा ॥ प्रकृतिसंसर्गहेतुमाह—

कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१

भा ॥ पूर्वपूर्वप्रकृतिपरिणामरूपदेवमनुष्यादियोनिविशेषेषु स्थितोऽयं पुरुषस्तत्तद्योनिप्रयुक्तसत्त्वादिगुणमयेषु सुखदुःखादिषु सक्तस्तत्साधनभूतेषु पुण्यपापकर्मसु प्रवर्तते ; ततस्तत्पुण्यपापफलानुभवाय सदसद्योनिषु साध्वसाधुषु योनिषु जायते ; ततश्च कर्मारभते ; ततो जायते ; यावदमानित्वादिकानात्मप्राप्तिसाधनभूतान् गुणान् [न]सेवते, तावदेव संसरति ; तदिदमुक्तं * कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु इति ॥२१॥

ता ॥ उक्तैकदेशे शङ्कोदयार्थम् [उक्त]वक्ष्यमाणपुनरुक्तिपरिहारार्थं चोक्तं विविच्यानुभाषते—एवमिति । परिशुद्धस्य स्वानुभवसुखैकतानस्य प्रत्यगात्मनो वैषयिकबाह्यसुखदुःखोपभोगो न तात्त्विकः स्यात्, अपि तु स्फटिकमणौ जपाकुसुमपाटलिमवदासक्तिविशेषादारोपित एव स्यादिति शङ्का *पुरुष इत्यर्धेन परिहियत इत्याह—**पुरुषस्येति** । सत्त्वादिगुणा न साक्षाद्भोक्तव्याः, [अपि तु] सुखदुःखमोहकार्योन्नेयतयाऽतीन्द्रियत्वात् ; तत्सुखदुःखानां भोक्तृत्वं च प्रसक्तमुपपादनीयम् ; तच्च हिशब्देन द्योतितम् । अत्र तु *प्रकृतिजान् गुणान् भुङ्क्त इति गुणभोक्तृत्वं कथमुच्यत इत्यत्राह—**गुणशब्द** इति । **स्वकार्येष्विति** लक्षणानिमित्तकथनम् । स्वशब्देन गुणस्वरूपग्रहणम् । यद्यपि गुणशब्दस्सुखदुःखेष्वपि मुख्यः, तथाऽपि प्रकृतिगुणत्वस्य विवक्षितत्वादौपचारिक इत्युक्तम् । उत्तरत्रापि हि बहुशो गुणशब्दस्सत्त्वादिविषय एव । यथावस्थिताकारोऽत्र पुरुषशब्देनानूदित इत्याह—**स्वतस्स्वानुभवैकसुख** इति । प्रकृतिस्थशब्दस्स्वास्थ्यादिपरोऽपि प्रयुज्यत इति तद्व्युदासाय—**प्रकृतिसंसृष्ट** इत्युक्तम् । *प्रकृतिजानित्यनेन प्रकृत्याश्रयत्वं न विवक्षितम्, सुख्यहं, दुःख्यहमिति स्वाश्रिततयैव तदुपलम्भात्, अन्तःकरणविकाराणां सुखादीनां स्वात्मन्यारोप इति पक्षस्य[।]निर्दिष्टप्रमाणविरुद्धत्वात् । अतस्तदुपाधिकत्वमेव विवक्षितमिति ज्ञापनाय प्रकृतिसंसर्गोपाधिकत्वोक्तिः । आदिशब्देन पूर्वसमभिव्याहृतेच्छाद्वेषादिसंग्रहः । तेऽपि हि कर्मफलभूता भोक्तव्याः । आत्मनेपदान्तत्वादर्थानन्वयाच्चात्र पालनार्थत्वमयुक्तम्; अभ्यवहारार्थोऽप्यत्रानौचित्यादेव त्यक्तः; अतोऽत्र भुङ्क्त इति प्रस्तुतानुभवमात्रं विवक्षितम् । स्वसमवेतवर्तमानसुखदुःखसाक्षात्कारो भोग इत्यपि हि लक्षयन्तीत्यभिप्रायेणाह—**अनुभवतीति** ॥

स्वानुभवैकतानस्य वैषयिकसुखदुःखोपभोगे प्रकृतिसंसर्गो हेतुरुक्तः, परिशुद्धस्यात्मनस्सोऽपि प्रकृतिसंसर्गः कथमिति शङ्कामनन्तरं परिहरतीत्यभिप्रायेणाह—**प्रकृतिसंसर्गहेतुमाहेति** । बीजाङ्कुरन्यायेन प्रवाहानादित्वादन्योन्याश्रयणचक्रकादिपरिहारसिद्धौ नानवस्थादोषः; प्रवाहेषु च पूर्व[हेतु]वैचित्र्यादुत्तरोत्तरवैचित्र्यसिद्धिः । गुणसङ्गस्य विहितनिषिद्धकर्मद्वारा तत्फलानुभवार्थविचित्रजन्महेतुत्वाच्छास्त्रसाफल्यं, *कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्.... रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् (छा. ५. १०. ७) इति सदसद्योनिप्राप्तेः कर्ममूलत्वश्रुत्यविरोधं चाह—**पूर्वपूर्वेति** । सत्त्वादीनां साक्षात्सङ्गास्पदत्वायोगादत्रापि गुणशब्दस्य पूर्ववदौपचारिकत्वाभिप्रायेण **सत्त्वादिगुणमयेषु सुखदुःखादिष्वित्युक्तम्** । दुःखसङ्गो नाम दुःखे सुखभ्रान्त्या सङ्गः ; दुःखहेतुषु हि सागरतरणादिषु सुखकरसङ्गात्सज्जते ; *भ्रान्तिज्ञानवतां पुंसां प्रहारोऽपि सुखायते (वि.१.१७.६१) इति चाहुः । यो हि यदिच्छति,

तस्य तस्मिन् तत्साधने वा कार्यताबोध इति स्थिते सुखस्य स्वरूपेण कर्तुमशक्यत्वात्तत्साधनेष्वेव पुरुषप्रवृत्तिरित्यभिप्रायेण **तत्साधनभूतेष्वित्युक्तम्** । श्रूयते च—* स यथाकामो भवति तत्क्रतुर्भवतीति (बृ. ६. ४. ५); सदसच्छब्दयोरस्ति-नास्तीत्यार्धधतायामनन्वयात्, * तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा....अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकर-योनिं वा चण्डालयोनिं वा इत्यादिश्रुत्यनुसाराच्च, साध्वसाधुशब्दः साध्वसाधुषु योनिष्विति वदता * सदसतोर्योनिषु जन्मस्विति परव्याख्या निरस्ता । बहुवचनेनैकस्यैव पुरुषस्य प्रवाहरूपेण विचित्रानन्तसदसद्योनिसंबन्धो विवक्षित इत्यभि-प्रायेण **ततश्च कर्मारभते, ततो जायत** इत्यादिकमुक्तम् । एवं प्रवाहतोऽनादित्ववदविच्छेदात्प्रवाहानन्तत्वमपि किं स्यादिति शङ्कां परिहरति—**यावदिति** । प्रकृतिसंसर्गस्य गुणसंसर्गः कारणमित्युक्ते सति, अर्थात् * कारणाभावे कार्या-भाव इति न्यायादमानित्वादिभिर्गुणसङ्गनिवृत्त्या सदसद्योनिजन्मप्रवाहोऽप्युच्छिद्येतेत्युक्तं भवतीत्याह—**तदिदमुक्तमिति** । अत्र कण्ठोक्त्यभावेऽपि गुणसङ्गस्य पूर्वपूर्वदेहसंबन्धप्रयुक्तत्वं कर्मद्वारा योनिप्राप्तिहेतुत्वादिकं च श्रुतिस्मृत्यन्तरानुसारा-दभिप्रायत उक्तमिति भावः ॥ २१ ॥

उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ २२

भा ॥ अस्मिन् देहेऽवस्थितोऽयं पुरुषो देहप्रवृत्त्यनुगुणसङ्कल्पादिरूपेण देहस्योपद्रष्टा अनुमन्ता च भवति । तथा देहस्य भर्ता च भवति ; तथा देहप्रवृत्तिजनितसुखदुःखयोर्भोक्ता च भवति । एवं देहनियमनेन, देहभरणेन, देहशेषित्वेन च देहेन्द्रियमनांसि प्रति महेश्वरो भवति । तथाच वक्ष्यते * शरीरं यदवाप्नोति यच्चा-प्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ (१५. ८) इति । अस्मिन् देहे देहेन्द्रियमनांसि प्रति परमात्मेति चाप्युक्तः । देहे मनसि चात्मशब्दोऽनन्तरमेव प्रयुज्यते—* ध्यानेनात्मनि पश्यन्ति केचि-दात्मानमात्मना (२४) इति ; अपिशब्दान्महेश्वर इत्यप्युक्त इति गम्यते ; पुरुषः परः—* अनादि मत्परम् (१२) इत्यादिनोक्तोऽपरिच्छिन्नज्ञानशक्तिरयं पुरुषोऽनादिप्रकृतिसंबन्धकृतगुणसङ्गादेतद्देहमात्रमहेश्वरो देहमात्र-परमात्मा च भवति ॥ २२ ॥

ता ॥ सदसद्योनिजन्मसमनन्तरभाविनः पुरुषस्वभावानाह—* उपद्रष्टेति श्लोकेन । द्रष्टा प्रमाणादिवशेन दृश्यानां प्रदर्शकः ; उपद्रष्टा यथाप्रियं प्रवृत्तः ; अनुमन्ता—प्रवर्तमानस्यानुसंधाता ; तत्तत्साधर्म्यादिहोपद्रष्टृनुमन्तृशब्दा-वित्याह—**देहप्रवृत्त्यनुगुणसंकल्पादिरूपेणेति** । आदिशब्देन प्रेरणं संगृहीतम् । यद्वा प्रवृत्तस्य प्रवर्तकोऽनुमन्तेति भेदमभिप्रेत्य आदिशब्दः । उपद्रष्टृत्वानुमन्तृत्वादेः प्रतिसंबन्धिसापेक्षत्वादधिकरणतया सन्निहितोऽपि देहः प्रतिसं-बन्धितयाऽप्यर्थादन्वयमर्हतीत्यभिप्रायेण **देहस्येत्युक्तम्** । नियन्तृत्वधारकत्वशेषित्वानां शरीरप्रतिसंबन्ध्यात्मलक्षणानां विभागप्रदर्शनाय प्रवृत्तिविषयोपद्रष्टृत्वानुमन्तृत्वयोरेकवाक्यकरणं, **तथेत्यादिवाक्यभेदश्च** । भर्ता—धारकः । **उक्तहेतुकं** सन्निहितदेहादिविषयमेवास्य महेश्वरत्वमित्याह—**एवमिति** । देहजन्यफलभोक्तृत्वकथनेन देहस्य तदर्थतया देहिन-श्शेषित्वं फलितमित्यभिप्रायेणाह—**देहशेषित्वेन चेति** । कर्माधीनजननमरणभागिनि जीव एवेश्वरशब्दस्य परिच्छिन्न-विषयतया प्रयोगं दर्शयति—**तथा चेति** । जीवात्मन्येव ज्ञानतो व्याप्तया परमात्मशब्दप्रयोगोपपत्तये सन्निहितसंकोच-

कान्वयमाह—**अस्मिन्देह** इति । साक्षात्परमात्मविषयत्वे सति अस्मिन् देह इत्यसङ्गतमिति भावः । अत्र देहेन्द्रिय-मनांसीति मनसः पृथगुपादानं तस्याप्यात्मशब्दप्रयोगविषयत्वप्रदर्शनार्थम् । परमशब्दव्यवच्छेद्याभावाज्जीवविषयत्वानुपपत्तिरित्यत्राह—**देहे मनसि चे**ति । अयं प्रयोगः प्रबन्धान्तरे प्रदेशान्तरे वा न मृग्यः ; अपि त्वेतत्प्रकरणे श्लोकमात्र-व्यवधानेन ; अतो व्यवच्छेद्यसन्निधानमपि तद्व्यवच्छेदमात्रार्थत्वस्य व्यवस्थापकमित्यभिप्रायेण **अनन्तरमेवे**त्युक्तम् । परमात्मशब्दवन्महेश्वरशब्दस्यापि सन्निहितसंकोचकावच्छिन्नविषयत्वं चकारातिरिक्तविषयेणापिशब्देनापि प्रतीतमित्याह—**अपिशब्दादि**ति । * उक्तः इत्यनेनापरमात्मन्ययमापेक्षिकः परमात्मादिशब्द इति सूचितम् । * पुरुषः परः इत्यत्र पर-शब्दस्यापि पूर्ववदवच्छिन्नविषयत्वानुग्राहकं देहव्यपदेशस्यापेक्षिकमहेश्वरत्वादिव्यपदेशस्य च तात्पर्यं, श्लोके चोद्देश्योपादेय-विभागं, पिण्डितार्थं च दर्शयति—**अनादी**ति । **अनादिमत्परमित्यादिनोक्त** इति [अनेन] परमत्वाभा[व उक्तः]-वोक्तिः । **अपरिच्छिन्नज्ञानशक्ति**रिति तु परत्वमात्रप्रदर्शनम् । **अय**मित्यनेन तन्मध्यपतितः * उपद्रष्टेति श्लोकोऽपि तद्विषय एवेति प्रकरणस्य जीवविषयत्वं प्रदर्शितम् । * देहेऽस्मिन्नित्यनेन प्रागुक्तो हेतुर्विवक्षित इत्यभिप्रायेण **अनादि-प्रकृतिसंबन्धकृतगुणसङ्गादि**त्युक्तम् ॥ २२ ॥

य एनं वेत्ति पुरुषं प्रकृतिं च गुणैस्सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३

भा ॥ एनम्—उक्तस्वभावं पुरुषम्, [एनाम्—] उक्तस्वभावां च प्रकृतिं वक्ष्यमाणस्वभावयुक्तै-स्सत्त्वादिभिर्गुणैस्सह, यो वेत्ति—यथावद्विवेकेन जानाति, स सर्वथा—देवमनुष्यादिदेहेष्वतिमात्रक्लिष्टप्रकारेण वर्तमानोऽपि, न भूयोऽभिजायते—न भूयः प्रकृत्या संसर्गमर्हति, अपरिच्छिन्नज्ञानलक्षणमपहतपाप्मानमात्मानं तद्देहावसानसमये प्राप्नोतीत्यर्थः ॥ २३ ॥

ता ॥ अथ विवेकानुसंधानप्रकारं वक्तुं तत्रात्यादराय तत्फलं प्रथमं प्रदर्श्यते * य एनमिति श्लोकेन । अन्वादेशः प्रागुक्तविविक्ताकारपरामर्शीत्याह—**उक्तस्वभाव**मिति । प्रकृतेरपि प्रागेवोक्तत्वात् * एनामिति विपरिणम्य **उक्तस्वभावामि**त्युक्तम् । गुणानां तु प्राक्प्रदर्शनमात्रम् ; प्रपञ्चनं तु चतुर्दशाध्याय इत्यभिप्रायेणाह—**वक्ष्यमाणस्व-भावयुक्तै**रिति । प्रकृतिपुरुषयोरेव प्रधानत्वाद्गुणानां चाप्रधानत्वात् **गुणैस्सहे**त्युक्तम् । पुरुषस्य प्रकृत्या समुच्चित्य सहनिर्देशोऽपि गुणशब्दोऽत्र पूर्वोत्तरप्रपञ्चितप्रकृतिगुणमात्रविषय इति ज्ञापनाय **सत्त्वादिभिरि**त्युक्तम् । प्रकृतितद्गुण-सहितवेदनमशुद्धवेदनं स्यादिति शङ्कायाम् * एनं वेत्तीत्यनेनाभिप्रेतमाह—**यथावद्विवेकेन जानाती**ति । उच्छास्त्र-प्रवृत्तित्वशङ्काव्युदासाय * सर्वथेत्यनेन नानाविधदेहसंसर्गप्रयुक्तो योगविरोधिविचित्रक्लेशान्वयो विवक्षित इत्यभिप्रायेणाह—**देवमनुष्यादी**ति । एतदुक्तं भवति—तत्त्वविदः प्रारब्धकर्मवशात्तदानीन्तनक्लेशानुभवेऽपि नेतरपुरुषसाधर्म्येण जन्मान्तर-मनुमातुं शक्यमिति । अपिशब्दादक्लिष्टवृत्तिषु कैमुत्यं सूचितम् । * न जायते म्रियते (२. २०) इत्यनेनैव आत्म-स्वरूपस्य जन्माभाव उक्तः ; अतोऽत्र तत्प्रसङ्गाभावात्तत्र भूयश्शब्दानन्वयाच्च * सदसद्योनिजन्मसु (२१) इति प्रसक्त-देहसंसर्गलक्षणजनिरेव निषिध्यत इत्यभिप्रायेणाह—**न भूयः प्रकृत्या संसर्गमर्हती**ति । प्रलयाद्यवस्थासु विनष्टदेहस्य देहानन्तरमेव देहसंबन्धलक्षणजन्यभावेऽपि पुनर्देहसंबन्धयोग्यताऽस्ति, अस्य तु ज्ञानाग्निदग्धकर्मत्वात् साऽपि नास्तीत्यभि-प्रायेणार्हतिशब्दः । अनर्हतामेव व्यञ्जयन् पुनर्भवादिरूपानिष्टनिवृत्तेरर्थादिष्टप्राप्तिपर्यन्ततामाह—**अपरिच्छिन्ने**ति ।

अज्ञानस्य कर्मणश्च निश्शेषविनाशात् नहि देहसंबन्धयोग्यतेत्यभिप्रायेण **अपरिच्छिन्नज्ञानलक्षणमपहतपाप्मान-**मिति विशेषणद्वयम् । भूयश्शब्दाभिप्रेतमाह—**तद्देहावसानसमय** इति ॥ २३ ॥

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ २४

भा ॥ केचित्—निष्पन्नयोगा आत्मनि—शरीरेऽवस्थितमात्मानम् आत्मना—मनसा ध्यानेन—योगेन पश्यन्ति । अन्ये च अनिष्पन्नयोगाः, सांख्येन योगेन—ज्ञानयोगेन, योगयोग्यं मनः कृत्वा आत्मानं पश्यन्ति । अपरे—ज्ञानयोगानधिकारिणः तदधिकारिणश्च सुकरोपायसक्ताः, व्यपदेश्याश्च, कर्मयोगेनान्तर्गतज्ञानेन मनसो योगयोग्यतामापाद्यात्मानं पश्यन्ति ॥ २४ ॥

ता ॥ उक्तमेवार्थं श्लोकद्वयेन विवृण्वन्नात्मज्ञानस्य पर्वभेदानाह—**ध्यानेने**ति । अधिकरणतया, कर्मतया, करणतया च निर्देशादात्मशब्दत्रयमिह भिन्नविषयमिति तत्तदुचितमाह—**आत्मनि शरीर** इत्यादिना । उत्तरोत्तरापकृष्ट-पर्वनिर्देशक्रमात् ध्यानशब्दोऽत्र सांख्यादप्युत्कृष्टं साक्षाद्योगाख्यं पर्वाभिधत्ते । **अनिष्पन्नयोगा** इत्यादि पर्वक्रमप्रदर्शन-मात्मदर्शने स्वतन्त्रोपायत्वशङ्काव्युदासार्थम् । * ज्ञानयोगेन सांख्यानाम् (३. ३) इति पूर्वोक्तानुसारेण * सांख्येन योगेनेत्यस्यार्थमाह—**ज्ञानयोगेने**ति । * अपरे इत्यनेन प्रागुक्तकर्मयोगाधिकारिवर्गविवक्षेत्यभिप्रायेणाह—**ज्ञानयोगा-नधिकारिण** इत्यादिना ॥ २४ ॥

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५

भा ॥ अन्ये तु—कर्मयोगादिष्वात्मावलोकनसाधनेष्वनधिकृता अन्येभ्यः—तत्त्वदर्शिभ्यो ज्ञानिभ्यः श्रुत्वा कर्मयोगादिभिरात्मानमुपासते ; तेऽप्यात्मदर्शनेन मृत्युमतितरन्ति ; ये श्रुतिपरायणाः—श्रवणमात्र-निष्ठाः, ते च श्रवणनिष्ठाः पूतपापाः क्रमेण कर्मयोगादिकमारभ्यातितरन्त्येव मृत्युम् ; अपिशब्दाच्च पर्वभेदो-ऽवगम्यते ॥ २५ ॥

ता ॥ अनिष्पन्नकर्मयोगानां मुमुक्षूणां कर्मयोगोपक्रमदशोच्यते । * अन्ये त्विति तुशब्देन, * एवमजानन्तः इत्यनेन च स्वविवेचनशक्त्याद्यभावात्कर्मयोगादिष्वनधिकृतत्वं द्योतितम् । * अन्येभ्यः इत्यनेन उपदेष्टृ[त्व]विषयेण *उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः (४.३४) इति प्रागुक्ता विवक्षिता इत्यभिप्रायेणोक्तं—**तत्त्वदर्शिभ्यो ज्ञानिभ्य** इति । * तेऽपीत्यादिना कर्मयोगोपक्रमेऽप्यसमर्था निर्दिश्यन्त इत्यभिप्रायेणाह—**तेऽप्यात्मे**ति । यद्वाऽस्य वाक्यस्य पूर्वेणान्वयः ; * श्रुतिपरायणाश्चेत्यन्वयेन वाक्यान्तरम् ; तद्दर्शयति—**ये श्रुतिपरायणा** इति । श्रुतिः परमयनं **निष्ठा** येषां **ते श्रुतिपरायणाः** ; श्रुतिपरायणशब्दश्श्रुत्वोपासीनेभ्यो व्यवच्छेदकः ; अन्यथा श्रुत्वेत्युक्तेऽपि श्रुतिपरायणशब्दस्य नैरर्थक्यप्रसङ्गादित्यभिप्रायेणाह—**श्रवणमात्रनिष्ठा** इति । अत्र श्रवणनिष्ठायाः पावनत्वरूपं प्राशस्त्यं विवक्षितमित्याह—**श्रवणनिष्ठाः पूतपापा** इति । **क्रमेणे**त्यादिना कर्मयोगादिविधिवैयर्थ्यप्रसङ्गपरिहारः । अत्र पृथगुपायान्तरपरत्वं किं न स्यादित्यत्राह—**अपिशब्दादि**ति । अपिशब्देनान्येषां कैमुत्यमेषामपकृष्टपर्वनिष्ठत्वं च सूचितमिति भावः ॥ २५ ॥

भा ॥ अथ प्रकृतिसंसृष्टस्यात्मनो विवेकानुसन्धानप्रकारं वक्तुं सर्वं स्थावरं जङ्गमं च सत्त्वं क्षेत्रक्षेत्रज्ञसंसर्गजमित्याह—

यावत्संजायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६

भा ॥ यावत् स्थावरजङ्गमात्मना सत्त्वं जायते, तावत् क्षेत्रक्षेत्रज्ञयोरितरेतरसंयोगादेव जायते—संयुक्तमेव जायते, न त्वितरेतरवियुक्तमित्यर्थः ॥ २६ ॥

ता ॥ एवमात्मदर्शनमुक्तं, तदर्थं * समं सर्वेषु (२७) इत्यादिभिःश्लोकैः प्रकृतिपुरुषयोर्विवेकानुसंधानप्रकारो वक्ष्यते । स चाविविक्तप्रतीतौ सत्यामेवोपदेष्टव्यः, अन्यथा निष्प्रयोजनत्वात् ; सा च न दोषमन्तरेण घटते ; सच दोषोऽत्र भोक्तृत्वभोगायतनत्वनिर्वाहकस्संसर्गविशेषः ; तदिदं * यावत्संजायते इति श्लोकेनोच्यत इति संगतिमाह—अथेति । सर्वशब्देन यावच्छब्दस्यात्र साकल्यपरत्वमुक्तम् । यावच्छब्दस्य यच्छब्दार्थत्वेन व्याख्यानमवाचकत्वान्मन्दप्रयोजनत्वाच्चायुक्तमिति भावः । सत्त्वशब्दोऽत्र जन्तुपरः ; * द्रव्यामुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु (नाम. ३. ना) इति पाठात् । वृक्षगुल्मलतावीरुत्तृणादिषु चैतन्यविकासाभावमात्रेण जैनप्रक्रियया केवलाचेतनत्वशङ्कानिरासायात्र स्थावरशब्दः । स्थावरजङ्गमत्वयोर्बाल्ययौवनवार्धकादिवदयावच्छरीरभावित्वाभावज्ञापनाय—स्थावरजङ्गमात्मनेत्युक्तम् । क्षेत्रक्षेत्रज्ञाभ्यां सहान्यस्य संयोगशङ्काव्युदासायोक्तम्—इतरेतरसंयोगादिति । विधेयांशं दर्शयितुं—संयोगादेवेत्युक्तम् । मातापितृसंसर्गात्पुत्रोत्पत्तिवत्क्षेत्रक्षेत्रज्ञसंयोगात्ततोऽन्यत्सत्त्वं जायेतेत्यत्राह—संयुक्तमेवेति । पृथक्सिद्धप्रसिद्धक्षेत्रक्षेत्रज्ञसंबन्धव्यवच्छेदायाह—नत्विति । * तद्विद्धीति तच्छब्देन जन्मनः परामर्शः ॥ २६ ॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७

भा ॥ एवमितरेतरयुक्तेषु सर्वेषु भूतेषु देवादिविषमाकारात् विविक्तं तत्रतत्र तत्तद्देहेन्द्रियमनांसि प्रति परमेश्वरत्वेन स्थितमात्मानं ज्ञातृत्वेन समानाकारं तेषु देहादिषु विनश्यत्सु विनाशानर्हस्वभावेनाविनश्यन्तं यः पश्यति, स पश्यति—स आत्मानं यथावदवस्थितं पश्यति ; यस्तु देवादिविषमाकारेणात्मानमपि विषमाकारं जन्मविनाशादियुक्तं च पश्यति, स नित्यमेव संसरतीत्यभिप्रायः ॥ २७ ॥

ता ॥ अथ समत्वविषमत्वनियन्तृत्वनियाम्यत्वनित्यत्वानित्यत्वैर्द्वयोर्विवेकानुसंधानमभिधाय तदेव तत्त्वाध्यवसायरूपत्वेन परमपुरुषार्थहेतुतया प्रशंसति—* सममिति श्लोकेन । * क्षेत्रक्षेत्रज्ञसंयोगादित्यत्र शंकरेणोक्तम् * आकाशवन्नि[रंश]रवयवतया अवयवसंश्लेषलक्षणसंयोगासंभवात्क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमेन समवायासंभवाच्च विषयविषयिणोस्तयोरितरेतरधर्माध्यासलक्षणस्संयोगः ; तन्निवर्तनं च सम्यग्दर्शनं * समं सर्वेष्वित्यादिनोच्यते इति ; तदेतद्बालिशभाषितम्, निरवयवस्यापि संयोगसंभवात् ; युतसिद्धयोस्संबन्धस्संयोगः इति हि तं लक्षयन्ति ; स च निरवयवयोस्सावयवयोर्निरवयवसावयवयोश्च संभवति । तन्मते च अध्यासानुपपत्त्यादयः पपञ्चिताः । * सर्वेषु भूतेष्विति देवमनुष्यादिरूपवैषम्यं विवक्षितम् । यथा मृण्मयहिरण्मयादिघटोपात्तस्यापि गङ्गोदकस्य तत्रतत्र स्थितिमात्रमेव, न तन्मृण्मयत्वादिसिद्धिः ; तथाऽऽत्मनोऽपि देवमनुष्यादिदेहेषु स्थितिमात्रमेव ; नतु रुग्मप्रक्षिप्तकाष्ठादिलवणत्वन्यायेन स्वरूपेण

देवमनुष्यत्वादिवैषम्याश्रयत्वमिति * तिष्ठन्तमित्यस्याभिप्रायमाह—**देवादिविषमाकाराद्विविक्तमिति**। यद्वा * सममिति वचनादर्थाक्षिप्तवैषम्यनिवृत्तिकथनमिदम्; * तिष्ठन्तमिति तु परत्रान्वेतव्यम्। अतो हि भाष्यते—**परमेश्वरत्वेन स्थितमिति**। अनीश्वरस्याल्पशक्तेः क्षेत्रज्ञस्य कथं परमेश्वरत्वमित्यत्र पूर्ववत्संकोचमाह—**तत्रतत्र तत्तद्देहेन्द्रियमनांसि प्रतीति**। देहात्माभिमानिनो हि देहनाशादात्मनाशं मन्यन्ते; नत्वप्रतीतस्य परमात्मनो नाशम्; तस्मात् * अविनश्यन्तमिति प्रसक्तविनाशप्रतिषेधार्थपदसमानाधिकरणः परमेश्वरशब्दः प्रक्रान्तविषय इति भावः। समशब्देन न बाह्यदेवत्वादिवैषम्यनिवृत्तिमात्रं विवक्षितम्; अपितु * गवामनेकवर्णानां क्षीरस्य[त्वे]प्येकवर्णता। क्षीरवत्पश्यते ज्ञानं लिङ्गिनस्तु गवां यथा॥ (अ. बि. उ) इति श्रुत्यनुसारेणात्मनां स्वरूपेषु मिथो वैषम्यनिवृत्तिरपि। तच्च साम्यं कथंभूतमिति शङ्कायाम् * एतद्यो वेत्ति (१) इति प्रक्रमानुसारेणाह—**ज्ञातृत्वेन समानाकारमिति**। ज्ञानत्वादेरप्युपलक्षणमेतत्। * येन सर्वमिदं ततम् (१८. ४६) इत्यादिना प्रपञ्चितानविनाशित्वहेतून् स्मारयति—**विनाशानर्हस्वभावेनेति**। * यः पश्यति स पश्यतीत्यनयोरनतिशयितार्थतया नैरर्थक्यम्, उद्देश्योपादेयभङ्ग्यैत्यत्राह—**स आत्मानं यथावदवस्थितमिति**। इतरे तु पीतशङ्खादिदर्शिवद्विपरीतदर्शितया पश्यन्तोऽपि न पश्यन्तीति भावः। * स पश्यतीति प्रशंसयाऽत्र परमपुरुषार्थलाभादिनिबन्धना व्यतिरेकनिन्दा च फलितेत्यभिप्रायेणाह—**यस्त्विति**॥ २७॥

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्॥ २८

भा॥ सर्वत्र—देवादिशरीरेषु तत्तच्छेषित्वेनाधारतया नियन्तृतया च स्थितमीश्वरम्—आत्मानं देवादिविषमाकारवियुक्तं ज्ञानैकाकारतया समं पश्यन् आत्मना—मनसा, स्वम्—आत्मानं, न हिनस्ति—रक्षति, संसारान्मोचयति; ततः—तस्मात् ज्ञातृतया सर्वत्र समानाकारदर्शनात्, परां गतिं याति; गम्यत इति गतिः, परं गन्तव्यं यथावदवस्थितमात्मानं प्राप्नोति; देवाद्याकारयुक्ततया सर्वत्र विषम[ाकार]मात्मानं पश्यन् आत्मानं हिनस्ति—भवजलधिमध्ये प्रक्षिपति॥ २८॥

ता॥ उक्तमुपपादयति—* समं पश्यन्निति श्लोकेन। हीति हेतौ। प्रस्तुतं समदर्शनं ह्यत्र फलद्वारा स्तूयते। * सर्वत्रावस्थितो देहे (३२) इति वक्ष्यमाणावेक्षणेन * सर्वत्रेति शब्दस्य विवक्षितमाह—**देवादिशरीरेष्विति**। * भर्ता भोक्ता महेश्वरः (२२) इति पूर्वोक्तानुरोधेन * समवस्थितमित्यत्रोपसर्गसामर्थ्यलब्धस्थितिवैशेष्यं व्यनक्ति—**तत्तच्छेषित्वेनेत्यादिना**। अतएव हि * स्थितमित्येतावद्विभज्य निर्दिष्टम्। ईश्वरशब्देनापि शेषित्वनियन्तृत्वे सिद्धे। अत्रापीश्वरशब्दः पूर्वोक्तन्या[यात्परि]येनावच्छिन्नविषयोऽनुसंधेयः। देहात्माभिमानप्रसक्तदेवादिवैषम्यप्रतिषेधार्थोऽत्र समशब्द इत्यभिप्रायेणाह—**देवादिविषमाकारवियुक्तमिति**। * क्षेत्रक्षेत्रज्ञसंयोगात् (२६) * यदा भूतपृथग्भावम् (३०) इति पूर्वापरपरामर्शाद्देहसंबन्धसिद्धवैषम्यनिवृत्तिर्विवक्षितेति भावः। तृतीयान्त आत्मशब्दोऽत्र करणविभक्त्यन्तत्वादौचित्याच्च मनोविषयः; द्वितीयान्तस्तु हिंसाकर्मत्वसामर्थ्यात्संसार्यात्मविषय इति ज्ञापयति—**मनसा स्वमात्मानमिति**। समदर्शि[त्वात्]नो हिंसकत्वं नास्तीत्यत्र अविहिताप्रतिषिद्ध[वर्ग]कर्तृवत्समदर्श[न]कस्याबाधकत्वमात्रमुक्तं स्यात्; तच्चानर्थकम्; अपिच विषमदर्शिनोऽप्यात्मा नित्यत्वान्न हिंसार्हः; अतोऽत्र * न हिनस्तीत्यनेन किमपि समदर्शनसाध्यं पुरुषेष्टमभिप्रेतमित्याह—**रक्षतीति**। प्रकरणतो वाक्यशेषाच्च रक्षां विशिनष्टि—**संसारादिति**। ततश्शब्दोऽत्र न वाक्या-

र्थादिपरामर्शी, अनिष्टनिवृत्तेरपि स्वयंफलत्वेनेष्टप्राप्तिहेतुत्वनिर्देशानौचित्यात् ; अत उभयकारणं समदर्शनमेव परामृश्यत इत्याह—**तस्मादित्यादिना** । * परां गतिमिति प्राप्यविशेषस्य विवक्षितत्वाद्भावार्थमात्रपरत्वे तदसिद्धेस्तदुचितां व्युत्पत्तिमाह—**गम्यत इतीति** । तदेव विशिनष्टि—**यथावदिति** । प्रकरणं हीदं जीवविषयं समर्थितम् ; परगतिशब्दश्च * अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् (गी. ८. २१) इत्यादिषु जीवेऽपि प्रयुक्तचर इति भावः । आत्मनि वैषम्यदर्शी तु स्वात्मानं हिनस्तीति, विशेषनिषेधश्शेषाभ्यनुज्ञानार्थः इति न्यायेन सिद्धमित्याह—**देवाद्याकारेति** । नित्यस्यात्मस्वरूपस्याच्छेद्यत्वादिस्वभावतया * कं घातयति हन्ति कम् (२. २१) इति प्रागुक्तस्य का[सा]ऽसौ हिंसेत्यत्राह—**भवजलधीति** । अनेनापि श्लोकेन प्रकृतिपुरुषयोस्स्वाकारानुदर्शनद्वारा संसारहेतुत्वमोक्षहेतुत्वाभ्यामपि विवेक उक्तो भवतीत्यभिप्रायः ॥ २८ ॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति ॥ २९

भा ॥ सर्वाणि कर्माणि * कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते (२०) इति पूर्वोक्तरीत्या प्रकृत्या क्रियमाणानीति यः पश्यति, तथा आत्मानं ज्ञानाकारमकर्तारं च यः पश्यति, तस्य प्रकृतिसंयोगस्तदधिष्ठानं तज्जन्यसुखदुःखानुभवश्च कर्मरूपाज्ञानकृतानीति च यः पश्यति, स आत्मानं यथावदवस्थितं पश्यति ॥ २९ ॥

ता ॥ अथ साक्षात्क्रियाश्रयत्वतदभावादिवैधर्म्यमुच्यते—* प्रकृत्यैवेति श्लोकद्वयेन । अत्र कर्माण्याकुञ्चनप्रसारणादीनि । प्रकृत्या क्रियमाणानां कर्मणां स्वरूपदर्शनमात्रं विद्वदविद्वत्साधारणम् ; विदुषस्तु प्रकृत्या क्रियमाणत्वदर्शनं विशेष इत्युपादेयांशविशदीकरणाय **क्रियमाणानीतीति** इतिकरणम् । अकर्तृत्वमात्मशब्दाभिप्रेतेन शुद्धाकारेण स्थापयति—**ज्ञानाकारमिति** । * ज्ञाताकारमिति वा पाठः । कथं तर्हि शास्त्रवश्यत्वतत्फलभोक्तृत्वादिकमित्यत्राह—**तस्येति** । सर्वस्यास्य चक्रवत्परिवर्तमानोपाधिप्रवाहनिबन्धनत्वान्न कश्चिद्दोष इति भावः ॥ २९ ॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३०

भा ॥ प्रकृतिपुरुषतत्त्वद्वयात्मकेषु देवादिषु सर्वेषु भूतेषु सत्सु तेषां देवत्वमनुष्यत्वह्रस्वत्वदीर्घत्वादिपृथग्भावमेकस्थम्—एकतत्त्वस्थम्, प्रकृतिस्थं यदा पश्यति, नात्मस्थम्, तत एव—प्रकृतित एवोत्तरोत्तरपुत्रपौत्रादिभेदविस्तारं च यदा पश्यति, तदैव ब्रह्म संपद्यते—अनवच्छिन्नज्ञानैकाकारमात्मानं प्राप्नोतीत्यर्थः ॥

ता ॥ अथ परिणामित्वापरिणामित्वलक्षणं वैषम्यमुच्यते—* यदेतिश्लोकेन । [एकशब्देनान्यतरस्यनिर्धारणार्थे] भूतशब्दोऽत्र तिलतैलवन्मिथश्श्लिष्टचिदचित्समुदायपर इत्यभिप्रायेणाह—**प्रकृतिपुरुषेति** । पृथग्भावशब्दोऽत्र जातिरूपं गुणादिरूपं च भेदमविशेषात्संगृह्णाति । स च सर्वोऽप्यवस्थान्तरापत्तिरूपतया निर्विका[रात्पुरुषा]रस्वरूपाद्भेदः, तदाह—**देवत्वमनुष्यत्वह्रस्वत्वदीर्घत्वादिपृथग्भावमिति** । एकशब्दोऽत्र प्रकृतयोरन्यतरनिर्धारणार्थ इत्याह—**एकतत्त्वस्थमिति** । किं तदेकमित्यत्राह—**प्रकृतिस्थमिति** । यद्यात्मा अत्रैकशब्देन विवक्षितः, तदा तस्यैव देवादिवैषम्यदर्शनमुक्तं स्यात् ; तच्च * समं पश्यन् (२८) इत्याद्युपक्रमेण * पण्डितास्समदर्शिनः इत्यादिस्मृत्यन्तरोक्त्या च विरुध्येतेत्यभिप्राये-

णाह—**नात्मस्थमिति** । सन्मात्रस्यैकस्यैव ब्रह्मणस्सकलविकल्पसकलपरिणामास्पदत्वमिहोच्यत इति परेषां जल्पाः प्रागेव निरस्ता इति चाभिप्रायः । * आत्मा वै पुत्रनामाऽसि (मं. प्र. २. १२) इत्यादिषु योऽयमात्मनः पुत्रादिरूपः परिणामः प्रतीयते, सोऽपि * अङ्गादङ्गात्संभवसीत्यादिकमनुसंदधानस्य प्रकृत्यंशगत एव प्रकाशेतेत्युच्यते * तत एव च विस्तारमिति । तद्विवृणोति—**प्रकृतित एवेति** । प्रकृतितत्त्वस्य प्रथमं देवादिरूपविचित्रपरिणामे, तन्मूले च सन्तानव्यपदेशभाजि परिणामे भोक्तुः पुरुषस्य भोगार्थसन्निधिमात्रमपेक्षितम्, न पुनर्भोगायतनादिगतविकारास्पदत्वमपीत्येवकाराभिप्रायः । * ब्रह्म संपद्यते इत्यत्र परमात्मभावस्य विरुद्धत्वाज्जीवात्मभावस्य नित्यसिद्धत्वात् * परमं साम्यमुपैति (मु. ३. १. ३) * मम साधर्म्यमागताः (गी. १४. २) इत्यादिभिरैकार्थ्यात्परब्रह्मसाम्यापत्तिर्विवक्षितेत्यभिप्रायेणाह—**अनवच्छिन्नमिति** । यद्वा देहात्मविवेकज्ञानमात्रेण साक्षात्परमात्मप्राप्तिर्न स्यादित्यभिप्रायः । ब्रह्म संपद्यते—ब्रह्म भवतीत्यर्थः । तत्र फलितार्थकथनम्—**आत्मानं प्राप्नोतीति** । यद्वा ब्रह्मेति द्वितीयान्तम्; संपद्यत इति संप्राप्नोतीत्यर्थः ॥ ३० ॥

अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१

भा ॥ अयं परमात्मा देहान्निष्कृष्य स्वस्वभावेन निरूपितः, शरीरस्थोऽपि अनादित्वात्—अनारभ्यत्वात् अव्ययः—व्ययरहितः, निर्गुणत्वात्—सत्त्वादिगुणरहितत्वात्, न करोति, न लिप्यते—देहस्वभावैर्न लिप्यते ॥

ता ॥ आत्मनो नित्यत्वाकर्तृत्वापरिणामित्वादिभिरुक्तं वैधर्म्यं सहेतुकं स्थिरीकरोति—* अनादित्वादिति श्लोकेन । आपेक्षिकपरमात्मत्वविषयेण * अयं परमात्मेत्यनेनाभिप्रेतमाह—**देहान्निष्कृष्येत्यादिना** । ज्ञानसङ्कोचरूपव्ययस्य देहादिप्रेरणरूपकर्तृत्वस्य च प्रत्यक्षादिसिद्धत्वात्कथमव्ययत्वादिरित्यत्राह—**स्वस्वभावेन निरूपित** इति । अनादित्वादित्यव्ययहेतोरुत्पत्तिराहित्यं विवक्षितमित्याह—**अनारभ्यत्वादिति** । आरभ्यमाणमेव हि व्येतीति दृष्टमिति भावः । * निर्गुणत्वादिति सामान्येन ज्ञानादिगुणनिषेधपरिहारायाह—**सत्त्वादिगुणरहितत्वादिति** । एवं हेतुद्वयशक्त्यनुसारेण यथायोग्यं साध्यद्वयान्वयो दर्शितः । लेपशङ्काप्रतिषेधयोस्संभावितविषययोरेव युक्तत्वात्, * तत्सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम् इत्याम्नातस्य पटादिषु पङ्कादेरिव संसर्गेण लेपकत्वस्वभावात् * शरीरस्थोऽपीत्यनेन सूचितमाह—**देहस्वभावैरिति** ॥ ३१ ॥

भा ॥ यद्यपि निर्गुणत्वान्न करोति, नित्यसंयुक्तो देहस्वभावैः कथं न लिप्यत इत्यत्राह—

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते ॥ ३२

भा ॥ यथा आकाशं सर्वगतमपि सर्वैर्वस्तुभिस्संयुक्तमपि सौक्ष्म्यात्सर्ववस्तुस्वभावैर्न लिप्यते, तथा आत्मा अतिसौक्ष्म्यात्सर्वत्र—देवमनुष्यादौ देहेऽवस्थितोऽपि तत्तद्देहस्वभावैर्न लिप्यते ॥ ३२ ॥

ता ॥ * न करोतीत्युक्तमकर्तृत्वं तु पूर्वत्रोत्तरत्र च विशोधितस्वरूपम्; * शरीरस्थोऽपि न लिप्यते इत्यस्मिन् साध्यांशे रुमागतकाष्ठादिन्यायशङ्का अनन्तरश्लोकेन परिहियत इत्याह—**यद्यपीति** । * संसर्गजा दोषगुणा भवन्ति * शुष्केणार्द्रं दह्यते मि[श्र]त्रभावात् (भा. रा. ७३. २३) इति हि प्रसिद्धमिति भावः । * यं प्राप्यातिपवित्राणि

वस्त्राण्याभरणानि च । अशुचित्वं क्षणाद्यान्ति किमन्यदशुचिस्ततः ॥ इति न्यायाद्देहेन क्षणमात्रयोगेऽपि वस्त्रादय उपहन्यन्ते ; किंपुनरनादिसंयुक्त इत्यभिप्रायेणाह—**नित्यसंयुक्त** इति । संसर्गस्य संसर्गिणि संसर्म्यन्तरस्वभावापादकत्वमनियतमिति व्यभिचारोपपादनार्थो * यथा सर्वगतमित्यनुवाद इति ज्ञापनायोभयत्र अपिशब्दोपादानम् । सर्वगतत्वानुवादः * शरीरस्थोऽपीति शङ्कोत्थापक इति च भावः । **सर्वैर्वस्तुभिस्संयुक्तमपीति** सर्वगतशब्देन परस्परविरुद्धानन्तस्वभावलेपप्रसङ्गोऽभिप्रेत इति भावः । यथा आकाशो भूतान्तरेभ्यस्सूक्ष्मः, तथा आकाशादपि सूक्ष्मतरोऽयमिति ज्ञापनार्थमुक्तम्—**अतिसौक्ष्म्यादिति** । तथेत्यनेन हेतुरप्यतिदिश्यत इति भावः । केचित्पदार्थाः कैश्चित्संसर्गे तत्स्वभावलेपरहिता अपि ततोऽन्यैः कैश्चित्संसर्गे तत्स्वभावलेपवन्तो दृश्यन्ते ; यथा कार्पासादावञ्जनादिवासनयाऽपि न श्यामतादियोगः, लाक्षारसवासनया त्वरुणता दृष्टा ; तथेहापि संभवतीति शङ्काव्युदासाय दृष्टान्तदार्ष्टान्तिकयोस्सर्वशब्दः ॥३२

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३

भा ॥ यथैक आदित्यः स्वया प्रभया कृत्स्नमिमं लोकं प्रकाशयति, तथा क्षेत्रमपि क्षेत्री, ममेदं क्षेत्रमीदृशम् इति कृत्स्नम्—बहिरन्तश्चापादतलमस्तकं स्वकीयेन ज्ञानेन प्रकाशयति ; अतः प्रकाश्याल्लोकात्प्रकाशकादित्यवद्वेदितृत्वेन वेद्यभूतादस्मात् क्षेत्रादत्यन्तविलक्षणोऽयमुक्तलक्षण आत्मेत्यर्थः ॥ ३३ ॥

ता ॥ अथाध्यायारम्भे * एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति वेद्यत्ववेदितृत्वाभ्यां प्रतिपादितं संघातात्मकत्वासंघातात्मकत्वप्रयुक्तनानात्वैकत्वाभ्यां सिद्धं च भेदं दृष्टान्तपूर्वं स्थिरीकरोति,—* यथा प्रकाशयतीति श्लोकेन । स्वरूपधर्मभूतयोर्ज्ञानयोरेकजातीययोरपि वैधर्म्यप्रदर्शनार्थं प्रभोदाहरणम् । * कृत्स्नं क्षेत्रमित्यनेन कृत्स्नशब्देन सर्वेषां शरीराणां संग्रहः प्रतीयते । व्याचख्युश्च परे—* रविदृष्टान्तोऽत्र रविवत्सर्वक्षेत्रेष्वेक आत्मा अलेपकश्चेति ज्ञापनार्थ इति । तच्चायुक्तं, प्रतिक्षेत्रमात्मनां भिन्नत्वादेकैकस्य सर्वक्षेत्रप्रकाशनाभावाज्जातिपरत्वे तु आदित्यदृष्टान्तासङ्गतिरित्यभिप्रायेणाह—**बहिरन्तश्चापादतलमस्तकमिति** । बहिस्त्वगादिः, अन्तर्मांसादिः । एकैकस्य शरीरस्य अवयवभेदप्रयुक्तनानात्वेन आत्मव्यतिरेकप्रदर्शनार्थमवयवेषु कस्यचिद्वेदितृत्वशङ्काव्युदासार्थं च कृत्स्नशब्द इति भावः । अनेकावयवसमुदायात्मकाच्छरीरात्तदखिलमपि ज्ञातृत्वेन प्रतिसंधीयमान एक आत्मा भिन्न इत्युपलम्भबलसिद्धमित्युक्तं भवति । न प्रकाशकत्वमात्रप्रतिपादनपरोऽत्र दृष्टान्तः ; अपितु तदधीनवैलक्षण्यपर इत्याह—**प्रकाश्यादिति** । कर्मकर्तृभावादिना भेदोऽत्र स्फुट इति भावः ॥ ३३ ॥

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४

इति श्रीमद्भगवद्गीतासूपनिषत्सु **क्षेत्रक्षेत्रज्ञविभागयोगो** नाम त्रयोदशोऽध्यायः ॥ १३ ॥

भा ॥ एवम्—उक्तेन प्रकारेण क्षेत्रक्षेत्रज्ञयोरन्तरं—विशेषं विवेकविषयज्ञानाख्येन चक्षुषा ये विदुः, भूतप्रकृतिमोक्षं च, ते परं यान्ति—निर्मुक्तबन्धमात्मानं प्राप्नुवन्ति ; मोक्ष्यतेऽनेनेति मोक्षः, अमानित्वादिकं [उक्तं] मोक्षसाधनमित्यर्थः ; क्षेत्रक्षेत्रज्ञयोर्विवेकविषयेणोक्तेन ज्ञानेन तयोर्विवेकं विदित्वा भूताकारपरिणत-

प्रकृतिमोक्षोपायममानित्वादिकं चावगम्य य आचरन्ति, ते निर्मुक्तबन्धाः स्वेन रूपेणावस्थितमनवच्छिन्नज्ञानलक्षणमात्मानं प्राप्नुवन्तीत्यर्थः ॥ ३४ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये त्रयोदशोऽध्यायः ॥ १३ ॥

ता ॥ अथैतदध्यायप्रधानार्थभूतहेयोपादेयविज्ञानस्य फलमुच्यते—क्षेत्रक्षेत्रज्ञयोरिति । एवंशब्दानूदितमाह—**उक्तेन प्रकारेणेति** । अज्ञत्ववेदितृत्वधार्यत्वधारकत्वशेषत्वशेषित्वादिप्रकारेणेत्यर्थः । *अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये (नाम. ३. ना. १८७) इत्यनेकार्थस्यान्तरशब्दस्यात्र विवक्षितमाह—**विशेषमिति** । * ज्ञानचक्षुषेत्यत्र दिव्यज्ञानादिप्रसङ्गव्युदासार्थं विवेकविषयत्वोक्तिः । प्रक्रान्तोपदेशलब्धज्ञानमिह विवक्षितमिति भावः । ज्ञानस्य चक्षुष्टवरूपणमपरोक्षज्ञानान्तरहेतुत्वात् । विविच्यतेऽनेनेति विवेकोऽत्र व्यावर्तकाकारः । भूतमय्याः प्रकृतेर्मोक्षः भूतप्रकृतिमोक्षः, भूतानां जीवानां प्रकृतेर्मोक्ष इति वा । यत्तु * भूतानां प्रकृतिरविद्यालक्षणा अव्यक्ताख्या, तस्याः प्रकृतेर्मोक्षणमभावगमनम् इति शंकरेणोक्तम्, तत् * गौरनाद्यन्तवती (मं. उ) इत्यादिश्रुतिविरोधादवधीरणीयम् । जीवात्मज्ञानफलविषयत्वात्परशब्दोऽत्र परिशुद्धजीवविषयः । तस्य च परत्वं संसारित्वलक्षणस्वकीयपूर्वावस्थापेक्षयेत्यभिप्रायेणाह—**निर्मुक्तबन्धमिति** । अध्यायारम्भे क्षेत्रक्षेत्रज्ञौ पूर्वमुपपादितौ ; परंपरया परिशुद्धात्मप्राप्त्युपायतया अमानित्वादिगुणवर्गश्च ; अतोऽत्र निगमनेऽपि क्षेत्रक्षेत्रज्ञाभ्यां सह समुच्चीयमानो भूतप्रकृतिमोक्षस्स एव गुणवर्गो भवितुमर्हतीत्यभिप्रायेणाह—**मोक्ष्यतेऽनेनेति** । लुप्ताभ्यासे सन्नन्ते वा, मोक्षशब्दप्रकृतिके मोक्षयतीति णिजन्ते वा * मोक्ष मोक्षणे इति धात्वन्तरे वा **मोक्ष्यत** इति यक्प्रयोगः । तत्र चायं मोक्षशब्दः * अकर्तरि च कारके संज्ञायाम् (अष्टा. ३. ३. १९) इति करणार्थघञन्तः । उक्तेषु ज्ञातव्येषु सिद्धं ज्ञातव्यांशं विवृण्वन्, वाक्यार्थज्ञानमात्रस्य साक्षान्मोक्षहेतुत्वाभावादनुष्ठानशेषतां च ज्ञापयन्, भूतप्रकृतिमोक्षशब्देनानिष्टनिवृत्तिं सूचयन्, * परं यान्तीत्यनेन चेष्टप्राप्तिर्विवक्षितत्वं दर्शयन्, पिण्डितं महावाक्यार्थमाह—क्षेत्रक्षेत्रज्ञयोरिति ॥ ३४ ॥

॥ इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां त्रयोदशोऽध्यायः ॥ १३ ॥

॥ अथ चतुर्दशोऽध्यायः ॥ १४ ॥

भा ॥ त्रयोदशे प्रकृतिपुरुषयोरन्योन्यसंसृष्टयोः स्वरूपयाथात्म्यं विज्ञायामानित्वादिभिर्भगवद्भक्त्यनुगृहीतैर्बन्धान्मुच्यत इत्युक्तम् । तत्र बन्धहेतुः पूर्वपूर्वसत्त्वादिगुणमयसुखादिसङ्ग इति चाभिहितं * कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु (२१) इति । अथेदानीं गुणानां बन्धहेतुताप्रकारो गुणनिवर्तनप्रकारश्चोच्यते ।

श्रीभगवानुवाच—

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयस्सर्वे परां सिद्धिमितो गताः ॥ १

भा ॥ परम्—पूर्वोक्तादन्यत् प्रकृतिपुरुषान्तर्गतमेव सत्त्वादिगुणविषयं ज्ञानं भूयः प्रवक्ष्यामि । तच्च ज्ञानं सर्वेषां प्रकृतिपुरुषविषयज्ञानानामुत्तमम् । यज्ज्ञानं ज्ञात्वा सर्वे मुनयस्तन्मननशीलाः इतः—संसार [बन्धा] न्मुक्तात्परां सिद्धिं गताः—परां-परिशुद्धात्मस्वरूपप्राप्तिरूपां सिद्धिमवासाः ॥ १ ॥

ता ॥ पूर्वाध्यायप्रकृतविशोधनरूपतयाऽस्य तत्संगतिं प्रदर्शयन् * गुणबन्धविधा तेषां कर्तृत्वं तन्निवर्तनम् । गतित्रयस्वमूलत्वं चतुर्दश उदीर्यते ॥ इति **संग्रहश्लोकं** (१८) व्याचष्टे—**त्रयोदश** इति । * इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते इत्यारभ्य *इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ (१८) इत्यन्तार्थमभिप्रेत्य **प्रकृतिपुरुषयो**रित्यादि **बन्धान्मुच्यत इत्युक्त**मित्यन्तमभिहितम् । **गुणानां बन्धहेतुताप्रकार** इत्यनेन * गुणबन्धविधेत्येतद्व्याख्यातम् । **गुणनिवर्तनप्रकारश्चे**त्यनेन * तन्निवर्तनमित्येतद्व्याख्यातम् । संग्रहोक्तगुण-कर्तृत्वगतित्रयस्वमूलत्वयोर्भाष्येऽनुक्तिरन्यार्थानुवादत्वप्रासङ्गिकत्वाभ्यामिति द्रष्टव्यम् ।

परशब्दस्योत्कृष्टपरत्वे उत्तमशब्देन पौनरुक्त्यं स्यादित्यन्यथा व्याचष्टे—**पूर्वोक्तादन्य**दिति । एवं सत्युक्तस्यैव **पुनर्वचने** * परं भूयः प्रवक्ष्यामीत्येतद्विरुध्येतेत्याशङ्कावारणाय तदभिप्रेतमाह—**प्रकृतिपुरुषान्तर्गतमेवे**ति । संग्रहेण पूर्वाध्यायोक्तं गुणानां बन्धहेतुत्वमेव विस्तरेणात्र भूयः प्रवक्ष्यामीति *भूयः प्रवक्ष्यामीत्यस्यार्थ इति न विरोध इति भावः । * ज्ञानानामुत्तमं ज्ञानं भूयः प्रवक्ष्यामीत्यन्वयसंभवेऽपि तज्ज्ञानस्यावश्यज्ञातव्यत्वसिद्धये * ज्ञानानामुत्तममित्यस्य वाक्य-भेदेन विधेयतयाऽन्वयमाह—**तच्च ज्ञानमिति** । * ज्ञानानामिति सामान्यनिर्देशेन सर्वज्ञानापेक्षयोत्तमत्वलाभेऽपि भगव-द्विषयज्ञानापेक्षयोत्तमत्वासंभवात्तद्व्यवच्छेदाय **सर्वेषां प्रकृतिपुरुषविषयज्ञानानामि**त्युक्तम् । एतज्ज्ञानविषयज्ञानमात्रस्य परसिद्धिहेतुत्वासंभवात्तदभ्यासरूपानुष्ठानालाभाच्च **सर्वे मुनयस्तन्मननशीला** इत्युक्तम् । * इतः इत्यस्य प्रकृतज्ञान-हेतुतापरत्वे, तदभावेऽपि भूतभव्यसमुच्चा[र]रिन्यायेन तद्धेतुतालाभाद्भगवद्भक्त्येकलभ्यभगवत्प्राप्तिरूपसिद्धेरेतत्साध्यत्वा-संभवेन परत्वप्रतिसंबन्धिविशेषस्य अपेक्षितत्वाच्च तत्परत्वमाह—**इतस्संसारमण्डलात्परा**मिति । इयं परा सिद्धिः कीदृशी-त्यतः तत्स्वरूपमाह—**परां परिशुद्धात्मस्वरूपप्राप्तिरूपा**मिति ॥ १ ॥

भा ॥ पुनरपि तज्ज्ञानं फलेन विशिनष्टि—

इदं ज्ञान[म]मुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ २

भा ॥ इदम्—वक्ष्यमाणं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः—मत्साम्यं प्राप्ताः, सर्गेऽपि नोप-जायन्ते—न सृजिकर्मतां भजन्ते ; प्रलये न व्यथन्ति च—न च संहृतिकर्मताम् [भजन्ते] ॥ २ ॥

ता ॥ अपौनरुक्त्यं सूचयन् उत्तरश्लोकमवतारयति—**पुनरपि तज्ज्ञान**मिति । इष्टप्राप्तिः पूर्वत्रोक्ता, अनिष्ट-निवृत्तिरत्रोच्यत इति न पौनरुक्त्यमिति भावः । इदंशब्दस्योक्तपरत्वे प्रकृतासंगत्या अन्यथा व्याचष्टे—**वक्ष्यमाण**मिति । * आगता इत्यस्यागमनकर्तृपरत्वे प्रकृतानन्वयात्प्राप्त्यर्थत्वमाह—**प्राप्ता** इति । * व्यथन्तीत्यस्य दुःखार्थकत्वेऽपि जनिसमभिव्याहारात्संहारलक्षकत्वमुचितमित्यभिप्रायेणाह—**न च संहृतिकर्मतां भजन्त** इति ॥ २ ॥

भा ॥ अथ प्राकृतानां गुणानां बन्धहेतुताप्रकारं वक्तुं सर्वस्य भूतजातस्य प्रकृतिपुरुषसंसर्गजत्वं * यावत्संजायते किञ्चित् (१३. २६) इत्यनेनोक्तं भगवता स्वेनैव कृतमित्याह—

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
संभवस्सर्वभूतानां ततो भवति भारत ॥ ३

भा ॥ कृत्स्नस्य जगतो योनिभूतं मम महद्ब्रह्म यत्, तस्मिन् गर्भं दधाम्यहम्; *भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयम् (७. ४) इति निर्दिष्टा अचेतनप्रकृतिर्महदहङ्कारादिविकाराणां कारणतया महद्ब्रह्मेत्युच्यते। श्रुतावपि क्वचित्प्रकृतिरपि ब्रह्मेति निर्दिश्यते— * यस्सर्वज्ञस्सर्ववित्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥ (मु. १. १. १०) इति; * इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूताम् (७. ५.) इति चेतनपुञ्जरूपा या परा प्रकृतिनिर्दिष्टा, सेह सकलप्राणिबीजतया गर्भशब्देनोच्यते। तस्मिन्नचेतने योनिभूते महति ब्रह्मणि चेतनपुञ्जरूपं गर्भं दधामि; अचेतनप्रकृत्या भोगक्षेत्रभूतया भोक्तृवर्गपुञ्जभूतां चेतनप्रकृतिं संयोजयामीत्यर्थः। ततस्तस्मात्प्रकृतिद्वयसंयोगान्मत्संकल्पकृतात्सर्वभूतानां ब्रह्मादिस्तम्बपर्यन्तानां संभवो भवति ॥ ३ ॥

ता ॥ गुणसंबन्धहेतुताप्रकारतन्निवर्तनप्रकारप्रतिपादकत्वाभावात् *मम योनिर्महद्ब्रह्मेति श्लोकः प्रकृतासंगत इति शङ्कापरिहाराय तच्छ्लोकमवतारयति—**अथ प्राकृतानामिति**। वक्ष्यमाणगुणबन्धहेतुत्वमपि स्वकृतमिति द्योतनाय सर्वभूतजातस्य प्रकृतिपुरुषसंसर्गजत्वं स्वकृतमित्यनेनोच्यत इति भावः। **कृत्स्नस्य जगतो योनिभूतमिति**—मम योनिभूतमित्यन्वये *अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा। मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ (७. ६) इत्यादिभिर्विरोधः; स्वयोनिभूते तस्मिन् गर्भाधानाभिधानं चानुपपन्नम्; *तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता इत्युत्तरश्लोकवैरस्यं, *तस्मिन् गर्भं दधाम्यहमित्यसामञ्जस्यं च। अतः जगत्पितृत्वेनावस्थितस्य स्वस्य जगद्गर्भाधानक्षमसाक्षाद्विकारिद्रव्यमिह योनिशब्देन विवक्षितमिति भावः। *मम योनिरित्येतत् *भूमिराप इत्यादिप्रतिपादितार्थविषयत्वादनुवादरूपमिति ज्ञापनार्थं तच्छब्दप्रतिसंबन्धितया यच्छब्दनिर्देशः। ननु जगद्योनिभूतं महद्ब्रह्म परमात्मैव; *वासुदेवः परा प्रकृतिः, *यद्भूतयोनिं (मु. १.१.६), *कर्तारमीशं पुरुषं ब्रह्मयोनिम् (मु. ३. १. ३) इत्यादिषु श्रूयते; स कथं *ममेति व्यतिरेकेण निर्दिश्यते? ब्रह्मशब्दस्य च न प्रकृतिवाचकत्वं, *महद्ब्रह्मेति विशेषणं च तत्प्रतिकूलमेव; अतः परमात्मस्वरूपमेव *ब्रह्म पुच्छं प्रतिष्ठा (आ. ५) इत्यादिष्विवात्रापि भेदेनोपचर्यत इति योज्यम्। तत्राह—**भूमिराप** इति। अयमभिप्रायः—षट्कद्वयोक्तवैशद्याय हि तृतीयषट्कप्रवृत्तिः; ततश्च *भूमिराप इत्यादौ स्वशेषतया निर्दिष्टा प्रकृतिरेवात्रापि संबन्धि[विभक्ति]वशात्प्रकृतिशब्दपर्यायोनिशब्दादिभिश्च तद्गर्भशब्दाभिहितचेतनप्रकृत्याधानक्षेत्रत्वेन भोगायतनत्वप्रतीतेश्च प्रत्यभिज्ञायते। *एतद्योनीनि (७.६) इति योनिशब्दोऽपि पूर्वं तत्र प्रयुक्तः। तस्याश्च महतां भूतानां तत्कारणस्याहंकारस्य तत्कारणस्य महत्तत्त्वस्य च कारणतया तत्तत्कार्यापेक्षया महत्त्वविशेषितब्रह्मत्वमप्युपपन्नम्। ब्रह्मशब्दश्च कारणत्वबृहत्त्वादिसादृश्यादब्रह्मण्यपि प्रयोक्तुं युज्यते, तथा च श्रौतप्रयोगोऽप्यस्ति। प्रकृतेर्जगद्योनित्ववचनं तु न परमात्मनो जगदुपादानत्वविरुद्धम्; अपि त्वनुगुणमेव, प्रकृतिविशिष्टवेषेणैव निर्विकारस्य तस्य जगद्योनित्वात्। अतो हि पूर्वम् *एतद्योनीनि भूतानि सर्वाणीत्युपधारयेत्युक्त्वा तदनन्तरम् *अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा (७. ६) इत्युक्तमिति। प्रसिद्धगर्भासंभवात् गर्भशब्दाभिलप्यत्वमत्र जीवस्य कथमित्यत्राह—**इतस्त्वन्यामिति**। *मम योनिरित्यनेन प्रत्यभिज्ञापितस्वकीयप्रकृतिद्वयविषयप्राचीनवचनपरामर्शादनन्तरग्रन्थसामञ्जस्याच्च गर्भशब्दोऽत्र परप्रकृतिशब्दनिर्दिष्टचित्समष्टिपर इति भावः। *गर्भमित्येकवचनं समुदायैक्यपरमिति ख्यापनाय पुञ्जशब्दः। अन्वितार्थमाह—**तस्मिन्निति**। ननु पूर्वं *ययेदं धार्यते जगत् (७. ५) इति चेतनप्रकृतेराधारत्वमचेतनस्य च धार्यत्वमुक्तम्। इह तु *तस्मिन् गर्भं दधाम्यहमिति तद्विपरीतमुच्यत इत्यत्राह—**अचेतनेति**। नात्र तादधीन्यपर्यन्ताधा-

राधेयभावोऽभिमतः; अपि तु तदेवेदमित्यभेदनिर्देशमात्रयोग्यस्संयोगः; तथाविधसंयोगकरणस्य कर्मवश्यानां पुंसां कर्मानुरूपभोगः प्रधा[गप्रदा]नं प्रयोजनमित्युक्तं भवति। अत्र तत इति नानन्तर्यपरम्, मन्दप्रयोजनत्वात्; आनन्तर्येण हेतुभावस्य फलितत्वादपि तत्कण्ठोक्तेर्युक्तत्वात्। अतः *क्षेत्रक्षेत्रज्ञसंयोगात् (२६) इति पूर्वाध्यायोक्त एव हेतुरिह सांख्यमतशङ्कानिरासाय स्वाधीनत्वेन विशेष्यत इत्यभिप्रायेणाह—**प्रकृतिद्वयसंयोगान्मत्संकल्पकृतादिति**। अत एव तस्य कार्यकरत्वं चोपपन्नमिति भावः। अत्र *सर्वभूतानामिति न महदादितत्त्वपरं, भूतशब्दस्य महदादिष्वरूढत्वात्। नापि महाभूतादिविवक्षा, क्षेत्रज्ञानां बन्धहेतुप्रकारपरत्वात्। तच्च क्षेत्रज्ञत्वं भूतशब्दविवक्षितसृज्यत्वाविशेषात्, *आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः। प्राणिनः कर्मजनितसंसारवशवर्तिनः॥ (वि. ध. १०४. २३), *ब्रह्माद्यास्सकला देवा मनुष्याः पशवस्तथा। विष्णुमायामहावर्तमोहान्धतमसावृताः॥ (वि. ५. ३०. १७), *हिरण्यगर्भो भगवान् (वि. ६. ७.५६) इत्यादिभिश्च ब्रह्मेशानादेरपि समानमित्यभिप्रायेण सर्वशब्द इति दर्शयितुं—**ब्रह्मादिस्तम्बपर्यन्तानामित्युक्तम्**। *अबुद्धिपूर्वकस्सर्गः प्रादुर्भूतस्तमोमयः (वि. १. ५. ४) इत्यादिषु चतुर्मुखसंकल्पमन्तरेणैव स्थावरादिसृष्टिवचनाद्धिरण्यगर्भक्त् तत्सृष्टानामपि स्तम्बपर्यन्तानां परमात्मसृज्यत्वं स्पष्टम्॥ ३॥

भा॥ कार्यावस्थोऽपि चिदचित्प्रकृतिसंसर्गो मयैव कृत इत्याह—

सर्वयोनिषु कौन्तेय मूर्तयस्संभवन्ति याः।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता॥ ४

भा॥ सर्वासु देवगन्धर्वयक्षराक्षसमनुष्यपशुमृगपक्षिसरीसृपादिषु योनिषु तत्तन्मूर्तयो याः संभवन्ति—जायन्ते, तासां ब्रह्म महत् योनिः—कारणम्; मया संयोजितचेतनवर्गो महदादिविशेषान्तावस्था प्रकृतिः कारणमित्यर्थः। अहं बीजप्रदः पिता—तत्रतत्र च तत्तत्कर्मानुगुण्येन चेतनवर्गस्य संयोजकश्चाहमित्यर्थः॥ ४॥

ता॥ एवमनेन श्लोकेन प्राकृतनैमित्तिकसृष्ट्योस्स्वाधीनत्वमुक्तम्; अथ नित्यसृष्टिरपि स्वेनैव कृतेत्युच्यते—*सर्वयोनिष्विति श्लोकेन। श्लोकयोः पुनरुक्तिपरिहारमभिप्रेत्याह—**कार्यावस्थोऽपीति**। नित्यसर्गावच्छिन्नोऽपीत्यर्थः। हिरण्यगर्भमूलचतुर्विधसृष्टेस्समनन्तरमप्याप्रलयात्क्षुद्रेष्वपि जन्तुषु या संततिः, तत्रापि नेश्वरस्स्वयमुदासीनस्सन्नन्यैः कारयतीत्यभिप्रायेण सर्वयोनिशब्द इत्याह—**देवगन्धर्वेत्यादिना**। प्रमाणसिद्धं प्रतिनियतकारणवस्तुवैजात्यलक्षणं वैचित्र्यं स्रष्टुस्स्वस्य विचित्रशक्तियोगज्ञापने *याः इति प्रसिद्धवन्निर्देशोनानूद्यत इत्यभिप्रायेणाह—**तत्तन्मूर्तय इति**। *संभवन्तीत्यस्य संभावनार्थताव्युदासार्थमुपादानोपादेयभावज्ञापनार्थं चाह—**जायन्त इति**। अव्यवहितोपादानत्वाद्यभावात् **कारणमित्युक्तम्**। चित्संपर्कविरहे सर्वेश्वराधिष्ठानविरहे च केवलस्याचिन्मात्रस्य हेतुत्वायोगमभिप्रेत्याह—**मया संयोजितचेतनवर्गेति**। *सर्वयोनिष्वित्यादिना निर्दिश्यमानचरमव्यष्टिसृष्टौ बहुयोनिकतया प्रतीयमानायां च कथमेकस्या मूलप्रकृतेर्योनित्वमित्यत्राह—**महदादिविशेषान्तावस्थेति**। विशेषाः पञ्चभूतानि। अत्र को बीजशब्दार्थः? किं च पितृव्यपदेशहेतुभूतं तत्प्रदानम्? *तासां ब्रह्म महद्योनिरहं बीजप्रदः पितेत्यनेन च सेश्वरसांख्यवत्प्रकृतेरेवोपादानत्वम्, ईश्वरस्य च केवलनिमित्तत्वं प्रतीयते; तच्च श्रुतिविरुद्धम्; एकस्यामेव च योनावेकस्मिन्नेवाविषमे पितरि जायमानानां वैषम्यं किंनिबन्धनमित्यत्राह—**तत्रतत्रेति**। महद्ब्रह्म योनिरिति पूर्वश्लोकोक्ता प्रकृतिरत्रापि स्वशब्देनोपात्ता। तत्र [illegible]शब्दस्थानीयो बीजशब्दस्तत्तत्सृष्ट्यनुगुणचेतनवाचीति भावः॥ ४॥

भा ॥ एवं सर्गादौ प्राचीनकर्मवशादचित्संसर्गेण देवादियोनिषु जातानां पुनःपुनर्देवादिभावेन जन्महेतुमाह—

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ ५

भा ॥ सत्त्वरजस्तमांसि त्रयो गुणाः प्रकृतेः स्वरूपानुबन्धिनः स्वभावविशेषाः प्रकाशादिकार्यैकनिरूपणीयाः प्रकृत्यवस्थायामनुद्भूतास्तद्विकारेषु महदादिषूद्भूता महदादिविशेषान्तैरारब्धदेवमनुष्यादिदेहसंबन्धिनमेनं देहिनमव्ययम्—स्वतो गुणसंबन्धानर्हं देहे वर्तमानं निबध्नन्ति, देहे वर्तमानत्वोपाधिना निबध्नन्तीत्यर्थः ॥ ५ ॥

ता ॥ ननु नैमित्तिकसर्गादौ प्राचीनकर्मानुरूपपरमपुरुषसंकल्पकृताचित्संसर्गाज्जन्मोपपद्यते ; प्राचीनं च कर्म तेनैव दत्तफलम्, तदारम्भककर्मावसाने च तच्छरीरं विनश्येत् ; स्वतश्चात्मा विशुद्धः ; कुतः पुनरस्य नित्यसृष्टिविषयतेत्यत्र गुणबन्धप्रकरणमवतारयति—**एवमिति** । **एवं**—समष्टिव्यष्टिविषयश्लोकद्वयोक्तप्रकारेणेत्यर्थः । स्वरूपनिरूपकधर्मा हि धर्मिणं कदाचिदपि न त्यजन्ति, अतः प्रकृतिसंभवत्वमिह कार्यदशायां विषमतयोद्भवमात्रमित्यभिप्रायेणाह—**प्रकृतेस्स्वरूपानुबन्धिन** इति । निरुपाधिका इत्यर्थः । कार्यावस्थप्रकृतिगतेभ्यश्शब्दादिगुणेभ्यस्स्वरूपनिरूपकत्वनित्यानुबन्धित्वलक्षणवैषम्यप्रकाशनाय इतिशब्दः । सत्त्वादीनामेव प्रकृतिद्रव्यतां वदतस्सांख्यान् प्रतिक्षिपति—**स्वभावविशेषा** इति । असाधारणधर्मविशेषा इति यावत् । चेतनासाधारणत्वेऽप्यौपाधिकास्सुखदुःखादयः ; स्वाभाविका अपि साधारणा द्रव्यत्वादयः ; तदुभयव्यवच्छेदाय—**स्वरूपानुबन्धिनस्स्वभावविशेषा** इति पदद्वयम् । एतेन * गुणा इति पारिभाषिकश्शब्दः, न रूपादिवद्द्रव्याश्रिता गुणाः इत्यादि शंकरोक्तं निरस्तम् । गुणशब्दप्रसिद्धिस्तन्मते विरुद्धेति भावः । ननु शब्दादिवन्न सत्त्वादिसंज्ञा गुणाः प्रत्यक्षेण दृश्यन्ते ; न च नित्यातीन्द्रियेऽनुमानं क्रमत इति शारीरके स्थापितम् ; नचानुपलब्धेषु प्रकृतिगुणेषु वायसरदनवदुपदेशस्य प्रयोजनं पश्यामः ; अतो वैशेषिकादिवदन्यपरत्वमिह वक्तुं युक्तमित्यत्राह—**प्रकाशादी**ति । अयमभिप्रायः—प्रकाशप्रवृत्तिमोहरूपाणि कार्याणि तावत्प्रत्यक्षाणि । तत्कारणविशेषाश्च कार्यभूतैस्तैरेव सामान्यतोऽनुमीयन्ते, कारणविशेषमन्तरेण कस्यापि कार्यस्यानुत्पत्तेः । सच विशेषस्सत्त्वादिरूप इत्यागमसिद्धम् । न चात्र निष्प्रयोजनता, अतीन्द्रियविषभेषजशक्तिविशेषोपदेशवद्धानोपादानपर्यवसानादिति । कार्यैकनिरूपणीयाश्चेत्प्रतिसर्गदशायां सुखदुःखादिकार्याभावात्सत्त्वादिगुणानामभावः प्राप्नोति ; अतः कथं स्वरूपानुबन्धित्वमित्यत्राह—**प्रकृत्यवस्थायामनुद्भूता** इति । कार्यहेतुरुद्भवस्तदानीं नास्तीति भावः । **तद्विकारेष्वित्यादि** । परिणामवशात्पुष्पफलादिषु गन्धाद्युद्भववदिति भावः । प्रकृतितद्विकारस्था गुणास्स्वतोऽव्ययत्वाद्गुणसंबन्धानर्हं कथं बध्नन्तीत्यस्योत्तरं देहिशब्द इत्याह—**महदादी**ति । अव्ययशब्दोऽत्र गुणसंबन्धकृतज्ञानसंकोचरूपव्ययनिषेधपर इत्यभिप्रायेणाह—**अव्ययं स्वतो गुणसंबन्धानर्हमिति** । तथाऽपि * शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते (१३. ३१) इत्युक्तस्य कथं बन्धास्त्यो लेप इत्यत्र आमोक्षादविच्छिन्नदेहसंबन्धोपाधिकत्वं * देहे इत्यनेनाभिप्रेतमित्याह—**देहे वर्तमानत्वोपाधिनेति** । एतेन * क्षेत्रज्ञं बध्नन्तीव ; तमास्पदीकृत्य आत्मानं प्रतिलभन्त इति शंकरदुरुक्तिर्निरस्ता । न ह्येष गुणबन्धः प्रकोष्ठबलेन हन्तुं शक्यत इत्यभिप्रायेण महाबाहुशब्दः । * दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः इति भावः । **यद्वा स्वबाहुजबलेन परेषां बन्ध इति वा ॥ ५ ॥**

भा ॥ सत्त्वरजस्तमसामाकारं बन्धनप्रकारं चाह—

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६

भा ॥ तत्र सत्त्वरजस्तमस्सु सत्त्वस्य स्वरूपमीदृशम्—निर्मलत्वात्प्रकाशकम् ; प्रकाशसुखावरणस्वभावरहितता निर्मलत्वम् ; प्रकाशसुखजननैकान्तस्वभावतया प्रकाशसुखहेतुभूतमित्यर्थः । प्रकाशो—वस्तुयाथात्म्यावबोधः ; अनामयम्—आमयाख्यकार्यं न विद्यत इत्यनामयम, अरोगताहेतुरित्यर्थः । एष सत्त्वाख्यो गुणो देहिनमेनं सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति–पुरुषस्य सुखसङ्गं ज्ञानसङ्गं च जनयतीत्यर्थः । ज्ञानसुखयोस्सङ्गे हि जाते तत्साधनेषु लौकिकवैदिकेषु प्रवर्तते ; ततश्च तत्फलानुभवसाधनभूतासु योनिषु जायत इति सत्त्वं सुखज्ञानसङ्गद्वारेण पुरुषं बध्नाति । ज्ञानसुखजननं पुनरपि तयोस्सङ्गजननं च सत्त्वमित्युक्तं भवति ॥ ६ ॥

ता ॥ * तत्रेत्यादिश्लोकत्रयस्य प्रकृतसंगतिमाह–**सत्त्वे**ति । **आकारम्**–निरूपकस्वभावमित्यर्थः । * तत्रेति निर्धारणार्थः समुदायनिर्देश इत्याह–**सत्त्वरजस्तमस्स्विति** । ननु निर्मलानां स्फटिकमण्यादीनां न प्रकाशकत्वं दृश्यत इत्याह–**प्रकाशे**ति । मलशब्दोऽत्र तमस्स्वभावभूतप्रकाशविरोध्याकारपर इत्यर्थः । वक्ष्यमाणपरामर्शादिह सुखोपादानम् । आवरणस्वभावरहितानामप्याकाशवाय्वादीनां न प्रकाशकत्वमित्यत्राह–**प्रकाशसुखजननैकान्तस्वभावतये**ति । सत्त्वमिश्ररजस्तमसोरपि भ्रान्तिबुद्धिविशेषहेतुत्वस्य वक्ष्यमाणत्वात्कथमिह सत्त्वस्यैव प्रकाशजनकत्वमित्यत्राह–**प्रकाशो वस्तुयाथात्म्यावबोध** इति । राजसतामसधियोरप्यधिष्ठानस्वरूपप्रकाशादिकं सत्त्वस्यांश इति भावः । सत्त्वस्यामयप्रसङ्गाभावात्तन्निषेधो न युक्त इत्यत्राह–**आमयाख्यकार्यं न विद्यत** इति । [आमयाख्यं कार्यं न विद्यत इत्यर्थः ।] अत्र सहपठिते गुणान्तरे कार्यत्वेनामयस्य संबन्धोऽस्ति, सोऽत्र प्रसक्तः प्रतिषिध्यत इति भावः । आमयाख्यकार्यनिषेधोऽत्र फलतस्तद्विपरीतकार्यान्तरविध्यभिप्रायेणेत्याह–**अरोगताहेतु**रिति । * तन्निबध्नातीत्युत्तरश्लोकयोरिवात्रापि स्वरूपनिर्देशेन बन्धहेतुत्वनिर्देशेन च वाक्यभेदमाह–**एष** इति । अन्यतस्सिद्धस्य सुखादिसङ्गस्य करणतामात्रं तृतीयया प्रतिपादितम् ; नच तदुक्तम्, हेत्वन्तरानुक्तेः ; तत्राह–**पुरुषस्ये**ति । बन्धावान्तरव्यापारत्वमिह विवक्षितमिति भावः । बन्धो हि कर्मफलानुभवार्थदेहसंबन्धः ; स च कर्ममूलः, स कथं सुखादिसङ्गादित्यत्राह–**ज्ञानसुखयो**रिति । ननु वैदिकसाधनानुष्ठानं योनिप्राप्त्यैव भवतीति युक्तम् ; लौकिकं तु साधनं दृष्टफलमात्राय स्याद्वा, नवा ; न तु जन्मान्तरादिप्रसाधकम् । प्रवृत्तिदृष्टान्ततयाऽपि लौकिकग्रहणं मन्दप्रयोजनम् । अत्र ब्रूमः–अत्र लौकिकशब्देन स्मार्तग्रहणम् ; अथवा निषिद्धग्रहणम् ; हिंसादेस्सुखसाधनत्वं हि लौकिकम् ; अलौकिक्या तु शक्त्या पापिष्ठजन्मादिप्रसाधकत्वमिति । रजसि च वक्ष्यति, * ताश्च [क्रियाः] पुण्यपापरूपाः (७) इति । यदि सत्त्वमेव प्रकाशं सुखं च स्वयं जनयति, *ततस्सिद्धयोस्तयोः प्रवृत्तिहेतुस्सङ्गो न जायेतेत्यत्राह–**ज्ञानसुखे**ति । बीजाङ्कुरन्यायेनोत्तरसङ्गतद्विषययोस्सत्त्वं साधकमित्यर्थः । * न काङ्क्षे विजयम् (गी. १. ३२) इत्यादिवदतस्तव न सङ्ग इत्यभिप्रायेणानघशब्दः ॥ ६ ॥

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७

भा ॥ रजो रागात्मकम्—रागहेतुभूतम् । रागो योषित्पुरुषयोरन्योन्यस्पृहा । तृष्णासङ्गसमुद्भवम्—तृष्णासङ्गयोरुद्भवस्थानम् । तृष्णासङ्गहेतुभूतमित्यर्थः । तृष्णा—शब्दादिसर्वविषयस्पृहा ; सङ्गः पुत्रमित्रादिषु

संबन्धिषु संश्लेषस्पृहा । तथा देहिनं कर्मसु—क्रियासु स्पृहाजननद्वारेण निबध्नाति ; क्रियासु हि स्पृहया याः क्रिया आरभते देही, ताश्च पुण्यपापरूपा इति तत्फलानुभवसाधनभूतासु योनिषु जन्महेतवो भवन्ति । अतः कर्मसङ्गद्वारेण रजो देहिनं निबध्नाति । तदेवं रजो रागतृष्णासङ्गहेतुः कर्मसङ्गहेतुश्चेत्युक्तं भवति ॥ ७ ॥

ता ॥ रजसो लोभ एवच (१७) इति वक्ष्यते ; अतः * प्रकाशकम्, * मोहनमिति पूर्वोत्तरवत् * रागात्मकमित्यत्रापि रागहेतुत्वं विवक्षितमित्याह—**रागहेतुभूत**मिति । कारणे कार्योपचारः । रज्यतेऽनेनेति व्युत्पत्त्या वा रागहेतुत्वं रागशब्देन विवक्षितमिति भावः । सहप्रयुक्ततृष्णादिशब्दपुनरुक्तिपरिहाराय रागशब्दं प्रयोगप्राचुर्यानुसारेण विषयविशेषे नियच्छति—**योषित्पुरुषयोरन्योन्यस्पृहे**ति । तृष्णासङ्गाभ्यां रजस उत्पत्तिकथनं मन्दम् ; रजोगुणात्तयोरुत्पत्त्यभिधानं तु बन्धावान्तरव्यापारज्ञापनेन सार्थकमित्यभिप्रायेणाह—**तृष्णासङ्गयोरुद्भवस्थान**मिति । आत्मधर्मभूतयोस्तयोरात्मैव ह्युद्भवस्थानमित्यत्राह—**तृष्णासङ्गहेतुभूतमित्यर्थ** इति । * क्षुत्तृष्णोपशमम् (वि. १. १७. ६०) इत्यादिप्रयोगात्पिपासामात्रशङ्काव्यावृत्त्यर्थमाह—**तृष्णा शब्दादिसर्वविषये**ति । सांस्पर्शिकगुणपञ्चकग्रहणमिदम् । **पुत्रमित्रादिष्वित्याभिमानिकपरम्**, विषयतृष्णा विषयवैतृष्ण्यमित्यादिप्रयोगात् । तृष्णा सांस्पर्शिकसमस्तविषया ; सङ्गस्तु परिशेषात् प्रयोगानुसाराच्च आभिमानिकविषय इति भावः । रागादिहेतुकस्तद्विषयोपायसङ्गोऽत्र कर्मसङ्ग इत्याह—**तथे**ति । ननु रागतृष्णासङ्गा अप्यन्यत्र सुखविशेषसङ्गा एव व्याख्याताः । ज्ञानसुखयोस्सङ्गे जाते तत्साधनेषु प्रवृत्तिवचनात्सत्त्वेनापि क्रियासङ्गो जन्यते ; तत्कथं विवेकः ? इत्थं—सत्त्वगुणस्सुखं प्रधानीकृत्य तदर्थतयाऽन्यत्र सज्जयति ; * प्रयोजनेषु सज्जन्ते न विशेषेषु पण्डिताः इतिवत् । रजोगुणस्तु तत्तद्वस्तूनि क्रियास्वरूपं च प्रधानीकृत्य सुखमल्पं प्रभूतं वेत्यत्रोदासीनो भवति । राजदाराभिलाषदुष्पुत्रादिसंरक्षणवृथाचेष्टादिप्वेतद्व्यक्तमिति । कर्मसङ्गस्य कथं बन्धद्वारत्वमित्यत्राह—**क्रियासु हीति** । कर्मसङ्गवद्रागादेरपि बन्धद्वारत्वज्ञापनाय पिण्डितमाह—**तदेवमिति** । तत्—रागादीनां बन्धे पर्यवसानेन साफल्यादित्यर्थः । एवम्—सत्त्वतमोव्यावृत्तस्वभावेनोक्तप्रकारेणेत्यर्थः ॥ ७ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८

भा ॥ ज्ञानादन्यदिहाज्ञानमभिप्रेतम् । ज्ञानं वस्तुयाथात्म्यावबोधः ; तस्मादन्यत् तद्विपर्ययज्ञानम् । तमस्तु वस्तुयाथात्म्यविपरीतविषयज्ञानजम् । मोहनं सर्वदेहिनाम्—मोहो विपर्ययज्ञानम् ; विपर्ययज्ञानहेतुरित्यर्थः । तत्—तमः प्रमादालस्यनिद्राहेतुतया तद्द्वारेण देहिनं निबध्नाति । प्रमादः—कर्तव्यात्कर्मणोऽन्यत्र प्रवृत्तिहेतुभूतमनवधानम् ; आलस्यम्—कर्मस्वनारम्भस्वभावः, स्तब्धतेति यावत् ; पुरुषस्येन्द्रियप्रवर्तनभान्त्या सर्वेन्द्रियप्रवर्तनोपरतिर्निद्रा ; तत्र बाह्येन्द्रियप्रवर्तनोपरमः स्वप्नः ; मनसोऽप्युपरतिः सुषुप्तिः ॥ ८ ॥

ता ॥ अत्यन्तपरिहरणीयत्वलक्षणवैषम्यद्योतनाय—**तमस्त्वि**ति तुशब्दः । अज्ञानशब्दस्य पुण्यपापरूपे कर्मणि ज्ञानाभावादिषु च प्रयोगादिह तद्व्यावृत्तं मोहजनकत्वानुरूपं कारणविशेषमाह—**ज्ञानादन्यदि**ति । सर्वज्ञानव्यतिरेकव्युदासायाह—**ज्ञानं वस्तुयाथात्म्यावबोध** इति । विपर्ययज्ञानस्य तमोजनकत्वं पापानुष्ठानादिद्वारा । तमःकार्यतया वक्ष्यमाणं धर्मवैपरीत्यज्ञानमिह मोहशब्देन विवक्षितमित्याह—**मोहो विपर्ययज्ञान**मिति । प्रत्ययस्यात्र हेतुमात्रपरतामाह—**विपर्ययज्ञानहेतुरित्यर्थ** इति । **अनवधान**मित्येतावत्प्रमादशब्दार्थः । **कर्तव्यादी**त्यादिना प्रमादस्य

बन्धहेतुत्वनिर्वहणम्; अकर्तव्ये हि प्रवृत्तिः पापिष्ठजन्मादिहेतुर्भवति; एवं कर्तव्यकर्मस्वनारम्भोऽपि; स्मरन्ति हि—* अकुर्वन्विहितं कर्म निन्दितं च समाचरन्। प्रसजंश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः॥ (मनु. ११. ४४) इति। आलस्यशब्दस्यात्र सम्प्रयोजनेऽपि विषये प्रवृत्तिविरोधिस्वभावपरतामाह—**स्तब्धतेति**। सर्वदा तमसि वर्तमानेऽपि कदाचिन्निद्रा कुत इत्यत्राह—**इन्द्रियप्रवर्तनश्रान्त्येति**। स्वप्नस्यानुक्तिशङ्कापरिहाराय स्वप्नसुषुप्त्योर्निद्राभेदत्वं दर्शयति—**तत्रेति**। निद्राया बन्धकत्वं चोदितानुष्ठानविरुद्धादकालकरणात्काले चाकरणात्पापिष्ठस्वप्नद्वारा च द्रष्टव्यम्। उक्तं च * युक्तस्वप्नावबोधस्य (६. १७) इति॥ ८॥

भा॥ सत्त्वादीनां बन्धद्वारभूतेषु प्रधानान्याह—

सत्त्वं सुखे संजयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत॥ ९

भा॥ सत्त्वं सुखसङ्गप्रधानम्; रजः कर्मसङ्गप्रधानत्; तमस्तु वस्तुयाथात्म्यज्ञानमावृत्य विपरीतज्ञानहेतुतया कर्तव्यविपरीतप्रवृत्तिसङ्गप्रधानम्॥ ९॥

ता॥ * सत्त्वं सुखे इति श्लोकस्य अर्थविभागेन पुनरुक्ततां परिहरति—**सत्त्वादीनामिति**। **सत्त्वं सुखसङ्गप्रधानमिति**। ज्ञानसङ्गोऽपि सुखार्थ इति भावः। **रजः कर्मसङ्गप्रधानमिति**। रागतृष्णादयोऽपि हि कर्मणि विश्राम्यन्तीति भावः। निश्शेषज्ञानावरणे सुषुप्तयादिरूपत्वात्प्रमादाख्यदशाऽपि न स्यादित्यत्राह—**वस्तुयाथात्म्यज्ञानमावृत्येति**॥ ९॥

भा॥ देहाकारपरिणतायाः प्रकृतेः स्वरूपानुबन्धिनस्सत्त्वादयो गुणाः; तेच स्वरूपानुबन्धित्वेन सर्वदा सर्वे वर्तन्त इति परस्परविरुद्धं कार्यं कथं जनयन्तीत्यत्राह—

रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजस्सत्त्वं तमश्चैव तमस्सत्त्वं रजस्तथा॥ १०

भा॥ यद्यपि सत्त्वादयस्त्रयः प्रकृतिसंसृष्टात्मस्वरूपानुबन्धिनः, तथाऽपि प्राचीनकर्मवशाद्देहाप्यायनभूताहारवैषम्याच्च सत्त्वादयः परस्परसमुद्भवाभिभवरूपेण वर्तन्ते। रजस्तमसी कदाचिदभिभूय सत्त्वमुद्रिक्तं वर्तते। तथा तमस्सत्त्वे अभिभूय रजः कदाचित्। कदाचिच्च रजस्सत्त्वे अभिभूय तमः॥ १०॥

ता॥ अनन्तरग्रन्थस्यासंगतिशङ्कां परिहरति—**देहाकारेति**। परस्परविरुद्धं—यथार्थायथार्थज्ञानसुखदुःखसङ्गादिरूपमित्यर्थः। उद्भवाभिभवानियमप्रसङ्गपरिहाराय भगवदनुग्रहनिग्रहहेतूनां कर्मणां विषमविपाकसमयत्वात्तदनुरूपोद्भवाभिभवप्राह उपपद्यत इत्याह—**प्राचीनकर्मवशादिति**। यथा वातपित्तकफानां तत्तत्प्रचुरैर्द्रव्यैरुपचयं * वृद्धिस्समानैस्सर्वेषां विपरीतैर्विपर्ययः (अष्टाङ्ग. १. १४) इत्यायुर्वेदविदो वदन्ति, तथाऽत्रापि वक्ष्यमाणसात्त्विकाद्याहारभेदादित्याह—**देहाप्यायनभूताहारवैषम्याच्चेति**। * ततो देवा अभवन् परासुराः (यजु. ५. ३. ३. ११) इत्यादिष्विव भवतिरत्रोद्भवविषय इत्याह—**उद्रिक्तं वर्तत इति**। रजस्तमसोरुद्भूतयोः परिहारार्थमयमुद्भवाभिभवोपदेशः॥ १०॥

भा॥ तत्र कार्योपलब्ध्यैवाधगच्छेदित्याह—

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्यात् विवृद्धं सत्त्वमित्युत ॥ ११

भा ॥ सर्वेषु चक्षुरादिषु ज्ञानद्वारेषु यदा वस्तुयाथात्म्यप्रकाशे ज्ञानमुपजायते, तदा तस्मिन् देहे सत्त्वं प्रवृद्धमिति विद्यात् ॥ ११ ॥

ता ॥ ते च कुतो ज्ञाते चिकित्सितव्ये इत्यत्र * सर्वद्वारेष्वित्यादिश्लोकत्रयमवतारयति—**तत्रेति** । नात्र द्वारशब्दो नवद्वारविषयः, नाप्येकादशेन्द्रियविषयः, तेषां सर्वेषां ज्ञानेनानन्वयात् ; अतश्चैतन्यप्रसरद्वारभूतमनष्षष्ठज्ञानेन्द्रियवर्गपर इत्याह—**चक्षुरादिषु ज्ञानद्वारेष्विति** । प्रकाशशब्दोऽत्र न प्रथमान्तः, ज्ञानशब्देन पुनरुक्तिप्रसङ्गात्, प्रकाश इत्यस्य व्याख्यानं ज्ञानमितीति कैश्चिदुक्तस्य क्लिष्टत्वात् । सप्तम्यन्तत्वे तु ज्ञानफलभूतव्यवहारानुगु[ण]ण्यविषयतया वा, प्रकाश्यस्वरूपादिपरतया वा, ज्ञानशब्देन मनोवृत्तिविवक्षया वा अन्वय उपपद्यत इत्यभिप्रायेणाह—**वस्तुयाथात्म्यप्रकाशे ज्ञान**मिति । एतेन * प्रकाश आलोकस्थानीयः, ज्ञानं चक्षुस्थानीयम् इति वदन्तो निरस्ताः । **एकस्यैव** योगिनः सौभर्यादेर्युगपत्परिगृहीतानेकदेहस्य देहभेदेन गुणभेदवृद्धिसंभवज्ञापनार्थं युगपन्महाप्रलयादिवत्सर्वसाधारण्यपरिहारार्थं च * अस्मिन् देहे इति विशेषितमित्याह—**तदा तस्मिन् देहे सत्त्वं प्रवृद्धमिति** ॥ ११ ॥

लोभः प्रवृत्तिरारम्भः कर्मणामशमस्स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२

भा ॥ लोभः—स्वकीयद्रव्यस्यात्यागशीलता, प्रवृत्तिः—प्रयोजनमनुद्दिश्यापि चलनस्वभावता, आरम्भः कर्मणां—फलसाधनभूतानां कर्मणामारम्भः, अशमः—इन्द्रियानुपरतिः, स्पृहा—विषयेच्छा । एतानि रजसि प्रवृद्धे जायन्ते ; यदा लोभादयो वर्तन्ते तदा रजः प्रवृद्धमिति विद्यादित्यर्थः ॥ १२ ॥

ता ॥ * लोभः प्रवृत्तिरित्यादौ स्पृहाशब्दपौनरुक्त्यपरिहाराय रूढिप्रकर्षसिद्धं लोभशब्दार्थमाह—**स्वकीयद्रव्यस्यात्यागशीलतेति** । आरम्भशब्दस्साभिसन्धिकप्रवृत्तौ समभ्प्रयोगः । अत्र * कर्मणामिति समभिव्याहारस्वारस्याच्च तत्सिद्धम् । अतोऽत्रारम्भशब्दो दृष्टादृष्टफलसाधनभूतकृषियज्ञादिविषयः । अतश्च प्रवृत्तिशब्दोऽत्र ततो व्यावृत्ततृणच्छेदाङ्गकम्पादिवृथाचेष्टाविषय इत्याह—**प्रयोजनमनुद्दिश्यापि चलनस्वभावतेति** । द्वाभ्यामपौनरुक्त्याय अशमोऽत्र प्रवृत्तिहेतुरिन्द्रियोद्रिक्ततेत्याह—**इन्द्रियानुपरतिरिति** । पूर्वश्लोकवदत्रापि गुणविवृद्धिलिङ्गोपदेशपरतामाह—**यदेति** ॥ १२

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३

भा ॥ अप्रकाशः—ज्ञानानुदयः, अप्रवृत्तिश्च—स्तब्धता, प्रमादः—अकार्यप्रवृत्तिफलमनवधानम् , मोहो—विपरीतज्ञानम् । एतानि तमसि प्रवृद्धे जायन्ते—एतैस्तमः प्रवृद्धमिति विद्यात् ॥ १३ ॥

ता ॥ * अप्रकाशोऽप्रवृत्तिश्चेति श्लोके प्रमादो हि समीक्षावसरे सत्यप्यसमीक्षा, अतोऽप्रकाशप्रमादयोस्सामान्यविशेषरूपत्वाद्दोबलीवर्दनयेनापुनरुक्तिरित्यभिप्रायेणाह—**अप्रकाशो ज्ञानानुदय** इति । प्रागुक्तनिद्रादिरूप इहायमभिप्रेतः । **अप्रवृत्तिश्च** प्रागुक्तमालस्यमित्याह—**स्तब्धतेति** । **मोहप्रमादावपि हि तावेवेत्याह—प्रमाद इत्यादिना** ॥ १३ ॥

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥ १४

भा ॥ यदा सत्त्वं प्रवृद्धम्, तदा सत्त्वे प्रवृद्धे देहभृत् प्रलयम्—मरणं याति चेत्, उत्तमविदाम्—उत्तमतत्त्वविदाम्, आत्मयाथात्म्यविदां, लोकान्—समूहान्, अमलान्—मलरहितान्, अज्ञानरहितान्, प्रतिपद्यते—प्राप्नोति; सत्त्वे प्रवृद्धे तु मृतः आत्मविदां कुलेषु जनित्वा आत्मयाथात्म्यज्ञानसाधनेषु पुण्यकर्मस्वधिकरोतीत्युक्तं भवति ॥ १४ ॥

ता ॥ अन्त्यकाले रजस्तमस्समुद्भवहेतूनामादावेव परिहरणार्थमन्त्यकालप्रवृद्धानां गुणानां पृथक्फलमुच्यते—* यदा सत्त्वे इत्यादिना श्लोकद्वयेन । देहप्रलयविवक्षया देहभृदिति विशेषणमित्यभिप्रायेणाह—मरणं यातीति । उत्तम.....(नोच्यन्ते । देवलोकशब्दो वा परब्रह्मलोकमपि संगृह्णातीति \$ .....) ॥ १४ ॥

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।

भा ॥ रजसि प्रवृद्धे मरणं प्राप्य फलार्थं कर्म कुर्वतां कुलेषु जायते; तत्र जनित्वा स्वर्गादिफलसाधनकर्मस्वधिकरोतीत्यर्थः ॥

तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५

भा ॥ तथा तमसि प्रवृद्धे मृतो मूढयोनिषु—श्वसूकरादियोनिषु जायते; सकलपुरुषार्थारम्भानर्हो जायत इत्यर्थः ॥ १५ ॥

कर्मणस्सुकृतस्याहुस्सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६

एवं सत्त्वप्रवृद्धौ मरणमुपगम्यात्मविदां कुले जायते; तेनानुष्ठितस्य सुकृतस्य—फलाभिसन्धिरहितस्य मदाराधनरूपस्य कर्मणः फलं पुनरपि ततोऽधिकसत्त्वजनितं निर्मलं—दुःखगन्धरहितं भवतीत्याहुस्सत्त्वगुणपरिणामविदः । अन्त्यकालप्रवृद्धस्य रजसस्तु फलं फलसाधनकर्मसङ्गिकुलजन्मफलाभिसन्धिपूर्वककर्मारम्भतत्फलानुभवपुनर्जन्मरजोवृद्धिफलाभिसन्धिपूर्वककर्मारम्भपरम्परारूपं सांसारिकदुःखप्रायमेवेत्याहुस्तद्गुणयाथात्म्यविदः । अज्ञानं तमसः फलम्—एवमन्त्यकालप्रवृद्धस्य तमसः फलमज्ञानपरम्परारूपम् ॥ १६ ॥

भा ॥ तदधिकसत्त्वादिजनितं निर्मलादिफलं किमित्यत्राह—

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७

भा ॥ एवं परम्परया जातादधिकसत्त्वादात्मयाथात्म्यापरोक्ष्यरूपं ज्ञानं जायते । तथा प्रवृद्धाद्रजसस्स्वर्गादिफललोभो जायते । तथा प्रवृद्धाच्च तमसः प्रमादः—अनवधाननिमित्तासत्कर्मणि प्रवृत्तिः; ततश्च मोहः—विपरीतज्ञानम्; ततश्चाधिकतरं तमः; ततश्चाज्ञानम्—ज्ञानाभावः ॥ १७ ॥

\$ इतःपरं श्लोकपञ्चकस्य तात्पर्यचन्द्रिका न लभ्यते ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८

भा ॥ एवमुक्तेन प्रकारेण सत्त्वस्था ऊर्ध्वं गच्छन्ति—क्रमेण संसारबन्धान्मोक्षं गच्छन्ति । रजस-स्स्वर्गादिफललोभकरत्वाद्राजसाः फलसाधनभूतं कर्मानुष्ठाय तत्फलमनुभूय पुनरपि जनित्वा तदेव कर्मानुतिष्ठन्तीति मध्ये तिष्ठन्ति । पुनरावृत्तिरूपतया दुःखप्रायमेव तत् । तामसास्तु जघन्यगुणवृत्तिस्था उत्तरोत्तर-निकृष्टतमोगुणवृत्तिषु स्थिता अधो गच्छन्ति—अन्त्यत्वम्, ततस्तिर्यक्त्वम्, ततः क्रिमिकीटादिजन्म, [ततः] स्थावरत्वम्, ततोऽपि गुल्मलतात्वम्, ततश्च शिलाकाष्ठलोष्टतृणादित्वं गच्छन्तीत्यर्थः ॥ १८ ॥

भा ॥ आहारविशेषैः फलाभिसन्धिरहितसुकृतविशेषैश्च परम्परया प्रवर्धितसत्त्वानां गुणात्ययद्वारेण ऊर्ध्वगमनप्रकारमाह—

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९

भा ॥ एवं सात्त्विकाहारसेवया फलाभिसन्धिरहितभगवदाराधनरूपकर्मानुष्ठानैश्च रजस्तमसी सर्वात्मनाऽभिभूय उत्कृष्टसत्त्वनिष्ठो यदाऽयं द्रष्टा गुणेभ्योऽन्यं कर्तारं नानुपश्यति ; गुणा एव स्वानुगुणप्रवृत्तिषु कर्तार इति पश्यति ; गुणेभ्यश्च परं वेत्ति—कर्तृभ्यो गुणेभ्यश्च परम्—अन्यमात्मानमकर्तारं वेत्ति ; स मद्भाव-मधिगच्छति—मम यो भावस्तमधिगच्छति । एतदुक्तं भवति—आत्मनस्स्वतः परिशुद्धस्वभावस्य पूर्वपूर्वकर्म-मूलगुणसङ्गनिमित्तं विविधकर्मसु कर्तृत्वम् ; आत्मा स्वतस्त्वकर्ता अपरिच्छिन्नज्ञानैकाकार इत्येवमात्मानं यदा पश्यति, तदा मद्भावमधिगच्छतीति ॥ १९ ॥

ता ॥ ननु *ऊर्ध्वं गच्छन्ति सत्त्वस्थाः इति यदि सत्त्वस्थस्यापवर्गोऽभिधीयते ; तर्ह्यनन्तरं गुणत्रयातीतस्या-पवर्गवचनं व्याहन्येतेति शङ्कायामनन्तरग्रन्थमवतारयति—**आहारविशेषै**रिति । आहारविशेषादेस्सत्त्वविवृद्धिहेतुत्वं पूर्वा-परसिद्धम् । सांसारिकत्रिगुणातिक्रमः, प्रबुद्धेन सत्त्वेनोर्ध्वगमनं च सुसंगतमिति भावः । *यज्ञशिष्टाशिनस्सन्तः (३. १३), *भोक्तारं यज्ञतपसां (५. २९), *रजस्तमश्चाभिभूय सत्त्वं भवति भारत (१४. १०) इति पूर्वोक्तानुसारेण प्रकृतसंगतमर्थमाह—**एवं सात्त्विकाहारे**ति । **सर्वात्मने**ति ; अपुनरुद्भवमित्यर्थः । *नान्यं गुणेभ्यः कर्तारमिति गुणव्यतिरिक्तस्य कर्तृत्वनिषेधस्तत्र कर्तुरात्मनो गुणेभ्योऽन्यत्वनिषेधधीर्मा भूदितीत्याह—**गुणा एवे**ति । पुरुषधर्मभूत-प्रयत्नाश्रयत्वलक्षणकर्तृत्वव्युदासायाह—**स्वानुगुणप्रवृत्तिषु कर्तार** इति । क्वचित्कर्तृत्वानुदर्शनस्यानात्मविदामपि संभवा-त्ततो विशेष उच्यते—**गुणेभ्यश्चे**ति । परत्वं प्रकृताकारापेक्षया नियन्तुमाह—**कर्तृभ्य** इति । *कर्तृभ्यः परमित्युक्त्या कर्तृत्वातिशयधीव्युदासः । **अन्य**मिति । गुणानां परस्परमिवान्यत्वेऽपि कर्तृत्वमविरुद्धमित्यत्र प्रस्तुताकारविरहोऽन्य-शब्दाभिप्रेत इत्याह—**अकर्तार**मिति । गुणाश्रयप्रवृत्तीनामनाश्रयभूतं स्वतश्च तन्मूलप्रवृत्त्यनर्हमित्यर्थः । स्वरूपैक्यभ्रम-व्युदासायानन्तरग्रन्थ इत्यभिप्रायेण मद्भावशब्दार्थमाह—**मम यो भाव** इति । गुणानां कर्तृत्वज्ञानमनुपयुक्तम्, आत्मनो-ऽकर्तृत्वं तु *कर्ता शास्त्रार्थवत्त्वात् (ब्र. २. ३. ३३) इत्यादिविरुद्धम् ; तत्राह—**एतदुक्त**मिति । पुण्यपापरूपेषु लौकिकेषु च कर्मसु कर्तृत्वमस्वाभाविकं, न पुनः प्रयत्नाश्रयत्वमित्यभिप्रायेणाह—**आत्मनस्स्वत** इति । एतेन परशब्द-

स्यात्र परमात्मपरत्वं न विवक्षितमित्यपि दर्शितम् । **विविधकर्मस्विति**—सांसारिकसात्त्विकराजसतामसकर्मस्वित्यर्थः । **स्वतस्त्वकर्तेति**—गुणकृतेषु तेष्वेव ; अन्यथा * जक्षत्क्रीडन् (छा. ८. १२. ३) इत्यादिविरोधात् । अत्र * मद्भावमिति तादात्म्यं प्रतीतं स्यात्, तच्च * मम साधर्म्यमागताः (२) इति प्रागुक्तविरुद्धम् । श्रुतिश्च * परमं साम्यमुपैति (मु. ३. १. ३) इति । श्रुत्यन्तरं च * यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम ॥ (क. ४. १५) इति । अत्रोदकद्वयस्य संसर्गेऽपि स्वरूपैक्यासंभवात्तादृक्छब्दस्वारस्याच्च साम्यपरत्वं व्यक्तम् । आह च जनकाय वसिष्ठः—* परेण परधर्मी च भवत्येष समेत्य वै । विशुद्धधर्मा शुद्धेन बुद्धेन च स बुद्धिमान् । विमुक्तधर्मा मुक्तेन समेत्य हि तदा भवेत् । वियोगधर्मिणा चैव वियोगात्मा भवत्यपि । विमोक्षिणा विमोक्षी च समेत्येह तदा भवेत् । शुचिना च शुचिश्चैव भवत्यमितदीप्तिमान् । विमलात्मा भवत्येष समेत्य विमलात्मना । केवलात्मा तथा चैव केवलेन समेत्य वै । स्वतन्त्रश्च स्वतन्त्रेण स्वतन्त्रत्वमवाप्नुयात् (भा. मो. ३१३. २६-३०) इति ॥ १९ ॥

भा ॥ कर्तृभ्यो गुणेभ्योऽन्यमकर्तारमात्मानं पश्यन् भगवद्भावमधिगच्छतीत्युक्तम् : स भगवद्भावः कीदृश इत्यत आह—

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २०

भा ॥ अयं देही देहसमुद्भवान्—देहाकारपरिणतप्रकृतिसमुद्भवानेतान् सत्त्वादीन् त्रीन् गुणानतीत्य तेभ्योऽन्यं ज्ञानैकाकारमात्मानं पश्यन् जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमात्मानमनुभवति ; एष मद्भाव इत्यर्थः ॥ २० ॥

ता ॥ तदेवमनेकश्रुतिस्मृत्यादिविरुद्धं मुक्तस्य भगवत्त्वं कथमुच्यत इति शङ्कायामुक्तमर्थं कर्तृभ्य इत्यादिनाऽनूद्यानन्तरश्लोकमवतारयति—**स भगवद्भावः कीदृश** इति । * देहसमुद्भवानित्यत्र देहोत्पत्तिबीजभूतानिति परव्याख्यानमयुक्तम्, * गुणाः प्रकृतिसंभवाः इतिवदत्रापि प्रकृतिपरिणतिरूपदेहाश्रयत्ववचनस्य युक्तत्वादित्यभिप्रायेणाह—**देहाकारपरिणतप्रकृतिसमुद्भवानिति** । वक्ष्यमाणप्रकारेण गुणात्ययो बद्धदशायामेवेत्याह—**गुणानतीत्य तेभ्योऽन्यमित्यादिना** । **जन्ममृत्युजरादुःखैः** जन्मादिकृतैर्दुःखैरित्यर्थः ; जन्मादिभिस्तत्साध्यैश्च दुःखैरिति वा । * मद्भावं सोऽधिगच्छति (१९) इत्युक्तमेव * विमुक्तोऽमृतमश्नुते इत्यनेन विवृतमित्याह—**आत्मानमनुभवति, एष मद्भाव इत्यर्थ** इति । **एष** इति—न पुनश्श्रुत्यादिवि[रोध]रुद्ध इत्यर्थः ॥ २० ॥

भा ॥ अथ गुणातीतस्य स्वरूपसूचनाचारप्रकारं गुणात्ययहेतुं च पृच्छन् अर्जुन उवाच—

अर्जुन उवाच—

कैर्लिङ्गैस्त्रिगुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते ॥ २१

भा ॥ सत्त्वादीन् त्रीन् गुणानेतानतीतः कैर्लिङ्गैः—कैर्लक्षणैः उपलक्षितो भवति ? किमाचारः—केनाचारेण युक्तोऽसौ ? अस्य स्वरूपावगतिलिङ्गभूताचारः कीदृश इत्यर्थः । कथं चैतान्—केनोपायेन सत्त्वादींस्त्रीन् गुणानतिवर्तते ? ॥ २१ ॥

ता ॥ अत्र स्वावस्थानिरूपणाद्यर्थमर्जुनप्रश्नमवतारयति—**अथेति** । ***कैर्लिङ्गैः** *किमाचारः इत्यनयोरान्तरबाह्य-[रूपोप]लक्षणपरत्वादेकराशित्वं *कथं चेत्युपायस्य पृथक्प्रश्नश्चेत्यभिप्रेत्याह—**स्वरूपसूचनाचारप्रकारं गुणात्ययहेतुं चेति** । लिङ्गशब्दस्य वेषादावपि प्रयोगात्तस्य च *न लिङ्गं धर्मकारणम् (मनु. ६. ६६) इति गुणाती[तोप]तलक्षण-त्वायोगादान्तरशमाद्यसाधारणधर्मविवक्षामभिप्रेत्याह—**कैर्लक्षणैरिति** । *किमाचारः इत्यस्य कोऽस्याचार इति बहुव्रीहि-मभिप्रेत्याह—**केनाचारेण युक्तोऽसाविति** । अत्राचारशब्दस्याव्यभिचारिबाह्यलिङ्गपरतामाह—**अस्य स्वरूपावगति-लिङ्गभूतेति** । यद्यपि स्वसंवेद्यैरान्तरैस्स्वस्मिन् गुणात्ययः प्रतीयेत, तथाऽपि परेषु बाह्यैराचारैस्तदनुमानमिति तदर्थं पृथक्प्रश्न इति भावः । कथंशब्दस्यात्रोपायभूतप्रकारपरतायाः प्रतिवचन[द्वा]प्रकारेणावगतत्वात् प्रतिक्षेपप्रकारपरतामनुष्ठान-बाह्यफलदशाप्रकारपरतां च व्युदस्यति—**केनोपायेनेति** ॥ २१ ॥

श्रीभगवानुवाच—

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ २२

भा ॥ आत्मव्यतिरिक्तेषु वस्तुष्वनिष्टेषु संप्रवृत्तानि सत्त्वरजस्तमसां कार्याणि प्रकाशप्रवृत्तिमोहाख्यानि यो न द्वेष्टि, तथा आत्मव्यतिरिक्तेष्विष्टेषु वस्तुषु तान्येव निवृत्तानि न काङ्क्षति ॥ २२ ॥

ता ॥ आत्मव्यतिरिक्तेष्वित्यादि । अयमभिप्रायः—आत्मव्यतिरिक्तानि वस्तूनि द्विविधानि इष्टान्यनिष्टानिच; तत्रानिष्टतत्साधनेषु संप्रयुक्तेषु द्वेषः; इष्टतत्साधनेषु च निवृत्तेषु काङ्क्षेति लोकसिद्धम् । तत्रानिष्टेषु साध्येषु साधनतया संप्रवृत्तानि गुणकार्याणि यो न द्वेष्टि; इष्टेषु च साध्येषु साधनतया स्थित्वा विनिवृत्तानि पुनर्न काङ्क्षति । प्रकाश-स्यानिष्टसाधनत्वं भयादिहेतुषु व्यक्तम्; इष्टसाधनत्वमनुकू[लविषये]लेषु; प्रवृत्तेरपथ्यभेषजादिषु; मोहस्यानुकूलेषु प्रतिकूलबुद्धौ, प्रतिकूलेषु वाऽनुकूलबुद्धौ, इति । द्वेषकाङ्क्षयोः प्रतिषेधार्थप्रसङ्गसिद्ध्यर्थमिष्टानिष्टोक्तिः ॥ २२ ॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ २३

भा ॥ उदासीनवदासीनः—गुणव्यतिरिक्तात्मावलोकनतृप्त्या अन्यत्रोदासीनवदासीनः, गुणैर्द्वेषा-काङ्क्षाद्वारेण यो न विचाल्यते; गुणास्स्वेषु कार्येषु प्रकाशादिषु वर्तन्त इत्यनुसन्धाय यस्तूष्णीमवतिष्ठते। नेङ्गते—न गुणकार्यानुगुणं चेष्टते ॥ २३ ॥

ता ॥ कथं तर्हीते, कथं च सशरीर इष्टानिष्टसाधनसंपत्तौ न विक्रियेतेत्यत्रोत्तरम्—**उदासीनवदिति** । आत्म-व्यतिरिक्तौदासीन्यं तद्गुणकार्यद्वेषकाङ्क्षानिवृत्तिहेतुः । **न विचाल्यते**—बाह्यविषयेषु कार्यद्वारा न प्रवर्तत इत्यर्थः । अविचाल्यत्वविवरणाय **द्वेषाकाङ्क्षाद्वारेणेति** विचलनप्रकारोक्तिः । *गुणा गुणेषु वर्तन्ते (३. २८) इत्युक्तस्य *गुणा वर्तन्त इत्यस्य चैकार्थ्यं दर्शयन्नविचाल्यताहेतुमाह—**गुणास्स्वेषु कार्येष्विति** । इतिकरणमनुसंधानप्रकारपरमित्याह—**अनुसंधायेति** । एवकाराभिप्रेतमाह—**तूष्णीमिति** । छन्दोभङ्गभयादार्षं परस्मैपदमित्याह—**तूष्णीमवतिष्ठत इति** । स्वकार्यप्रवृत्तैः किमेभिर्ममेति भावः । तदेतदौदासीन्यविवरणम् । *न विचाल्यते इत्येतत्तु *नेङ्गते इति विवृतम् । **तदाह—न गुणकार्यानुगुणं चेष्टत इति** । न द्वेषकाङ्क्षानुगुणं प्रवर्तत इत्यर्थः ॥ २३ ॥

. समदुःखसुखस्स्वस्थस्समलोष्टाश्मकाञ्चनः । तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ २४
मानावमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः । सर्वारम्भपरित्यागी गुणातीतस्स उच्यते ॥ २५

भा ॥ समदुःखसुखः—सुखदुःखयोस्समचित्तः, स्वस्थः—स्वस्मिन् स्थितस्स्वात्मैकप्रियत्वेन तद्व्यतिरिक्तपुत्रादिजन्ममरणादिसुखदुःखयोस्समचित्त इत्यर्थः । तत एव समलोष्टाश्मकाञ्चन. । तत एव तुल्यप्रियाप्रियः—तुल्यप्रियाप्रियविषयः । धीरः—प्रकृत्यात्मविवेककुशलः । तत एव तुल्यनिन्दात्मसंस्तुतिः—आत्मनि मनुष्यत्वाद्यभिमानकृतगुणागुणनिमित्तस्तुतिनिन्दयोस्स्वासंबन्धानुसन्धानेन तुल्यचित्तः । तत्प्रयुक्तमानावमानयोः तत्प्रयुक्तमित्रारिपक्षयोरपि स्वसंबन्धाभावादेव तुल्यचित्तः । तथा देहित्वप्रयुक्तसर्वारम्भपरित्यागी । य एवंभूतः, स गुणातीत उच्यते ॥ २४ ॥ २५ ॥

ता ॥ समदुःखसुखत्वादिकं प्रागेव सुशिक्षितम्, स्वस्थशब्देन विकारराहित्यगुणाननुविधानादिमात्रप्रतिपादनं पुनरुक्तम्; आत्मनिष्ठताविधानं तु बहुविधसमचित्तताप्रतिपादने हेतुतयोपयुक्तमित्यभिप्रायेणाह—**स्वस्मिन् स्थित** इति । तदभिप्रेतमाह—**स्वात्मैकप्रियत्वेने**ति सुखदुःखप्रियाप्रियादिशब्दानामनतिभिन्नार्थानामपि लोकव्यवहारच्छायया पुनरुक्तिः परिहृता । **तत एव**-स्वस्थत्वादेवेत्यर्थः । प्रियाप्रियोपनतावक्षोभ्यत्वादेस्तुल्यप्रियाप्रियादिशब्दैस्सिद्धत्वादत्र विवक्षितं धीविशेषवत्त्वलक्षणं धीरत्वं निन्दास्तुतिसाम्यादौ यथा हेतुर्भवति, तथा विशिनष्टि—**प्रकृत्यात्मविवेककुशल** इति । * धीरः इत्यन्तैरान्तरलक्षणान्युक्तानि । अथ बाह्याचारलिङ्गप्रश्नोत्तरमित्यभिप्रायेणाह—**तत एव तुल्यनिन्दात्मसंस्तुति**रिति । * समदुःखः इत्यादिकं बाह्यलिङ्गपरमिति केचित् । स्तुतिनिन्दे हि गुणदोषख्यापनरूपे; तत्र विविक्तात्मदर्शिनो देहगतैस्सौन्दर्यवैरूप्यादिगुणदोषैः स्तुतिनिन्दाप्रवृत्तौ परस्तुतिनिन्दयोरिव न प्रीत्यादिसंभव इत्याह—**आत्मनी**ति । * मूर्खाः पूजितपूजकाः (भा. उ. ३३. ६२) इति न्यायेन लौकिका. स्तुतं मानयन्ति, निन्दितमवमन्यन्ते; मानावमानप्रकाराश्च लोकव्यवहारतश्शास्त्रतश्च सिद्धाः; तत्र मानयितारो मित्राणि भवन्ति; अवमन्तारस्त्वरयः इति लोकदृष्टक्रमविवक्षामाह—**तत्प्रयुक्ते**ति । वाचिकस्तुतिनिन्दयोः पृथगुपादानादत्र मानावमानशब्दौ मानसकायिकविषयौ । समबुद्धेरपि गुणातीतस्य परबुद्धिकल्पितौ मित्रारिपक्षौ विद्येते । आरभ्यन्त इत्यारम्भाः—कर्माणि, कृतप्रतिकृतादिरूपाः । अपवर्गार्थारम्भव्यवच्छेदायाह—**देहित्वप्रयुक्ते**ति । सांसारिकसर्वारम्भपरित्यागीत्यर्थः । एतदेव बाह्याचारलिङ्गम् । आन्तरैरद्वेषादिभिर्बाह्यैरारम्भपरित्यागादिभिश्च गुणातीतो लक्ष्यते । त एव च गुणात्ययोपाया इति प्रश्नत्रयं प्रत्युक्तं भवति ॥ २४ ॥ २५ ॥

भा ॥ अथैवंरूपगुणात्यये प्रधानहेतुमाह—

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६

भा ॥ * नान्यं गुणेभ्यः कर्तारम् (१९) इत्यादिनोक्तेन प्रकृत्यात्मविवेकानुसन्धानमात्रेण न गुणात्ययस्संपत्स्यते, तस्यानादिकालप्रवृत्तविपरीतवासनाबाध्यत्वसंभवात्, माम्—सत्यसङ्कल्पं परमकारुणिकमाश्रितवात्सल्यजलधिम्, अव्यभिचारेण—ऐकान्त्यविशिष्टेन भक्तियोगेन च यस्सेवते, स एतान् सत्त्वादीन् गुणान् दुरत्ययान् अतीत्य ब्रह्मभूयाय—ब्रह्मत्वाय कल्पते—ब्रह्मभावयोग्यो भवति; यथावस्थितमात्मानममृतमव्ययं प्राप्नोतीत्यर्थः ॥ २६ ॥

ता ॥ तत्र * मां चेति श्लोकेन पृथगुपायविधिशङ्काव्युदासायाह—**अथेति** । गुणात्ययहेतुष्वप्रधानकथनानन्तरमित्यर्थः । अत एव हि **प्रधानहेतु**माहेत्युक्तम् । **नान्यमि**त्यादि—दृष्टद्वारोपकारकाणां प्रतिबन्धकभूयस्तया केवलानां न कार्यकरत्वमिति भावः । * मामित्यनेन वासनापर्यन्तानादिप्रतिबन्धकप्रशमनौपयिकगुणयोगविवक्षामाह—**सत्यसंकल्प**मित्यादिना । * पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ (ब्र. ३. २. ४) इति सूत्रोक्तप्रकारेण बन्धसंकल्पवत्तन्निवर्तनसंकल्पोऽपि परमात्मनो न प्रतिहन्येतेति भावः । सत्यसंकल्पस्यापि समत्वादौदासीन्यपरिहाराय परमकारुणिकत्वोक्तिः । सदोषेषु संसारिषु करुणायाः कोऽवकाश इत्यत्राह—**आश्रितवात्सल्यजलधि**मिति । एवं निग्रहानुग्रहसाधारणस्य सत्यसंकल्पत्वस्य अनुग्रहप्रावण्यप्रदर्शनार्थं कारुण्यवात्सल्यरूपगुणद्वयमुक्तम् । अव्यभिचारो देवतान्तरादिपरित्यागरूप इत्यभिप्रायेणाह—**ऐकान्त्यविशिष्टेने**ति । भक्तियोगेन सह तदङ्गानां पूर्वोक्तानां समुच्चयार्थश्चशब्दः । तैरपि परमात्मैव हि सेव्यते । * एतानित्यनेन गुणानां बन्धकत्वं पूर्वोक्तं परामृश्यत इत्यभिप्रायेणाह—**दुरत्ययानि**ति । एतेन * दैवी ह्येषा गुणमयी (७. १४) इत्यादिश्लोकोक्तमपि स्मारितम् । *कल्पत इत्यनेनाभिप्रेतमाह—**ब्रह्मभावयोग्यो भवती**ति । कोऽसौ जीवस्य ब्रह्मभावः, का च तद्योग्यतेत्यत्राह—**यथावस्थित**मिति । * ब्रह्मभूतः प्रसन्नात्मा (१८. ५४) इत्यादिष्विव अमृतत्वाव्ययत्वादिभिर्ब्रह्मसाम्यमेव श्रुत्यादिसिद्धमिह ब्रह्मभावः; तच्च ब्रह्मसमं रूपं * जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते (१४. २०), * देहे देहिनमव्ययम् (१४. ५) इत्यादिभिरिहैवोक्तम् । अनन्तरश्लोके च * अमृतस्याव्ययस्य चेति विशेष्यत इति भावः । साङ्गेनैकान्तिकात्यन्तिकभक्तियोगेन सेवितोऽहमेव मुमुक्षोर्मोक्षप्रद इत्युक्तं भवति ॥ २६ ॥

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च । २७

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु **गुणत्रयविभागयोगो** नाम चतुर्दशोऽध्यायः ॥ १४ ॥

भा ॥ हिशब्दो हेतौ; यस्मादहमव्यभिचारिभक्तियोगेन सेवितोऽमृतस्याव्ययस्य च ब्रह्मणः प्रतिष्ठा, तथा शाश्वतस्य च धर्मस्य, अतिशयितनित्यैश्वर्यस्यैकान्तिकस्य च सुखस्य—* वासुदेवस्सर्वम् (७. १९) इत्यादिना निर्दिष्टस्य ज्ञानिनः प्राप्यस्य सुखस्येत्यर्थः । यद्यपि शाश्वतधर्मशब्दः प्रापकवचनः, तथाऽपि पूर्वोत्तरयोः प्राप्यरूपत्वेन तत्साहचर्यादयमपि प्राप्यलक्षकः । एतदुक्तं भवति—पूर्वत्र * दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते (७. १४) इत्यारभ्य गुणात्ययस्य तत्पूर्वकाक्षरैश्वर्यभगवत्प्राप्तीनां च भगवत्प्रपत्त्येकोपायतायाः प्रतिपादितत्वादेकान्तभगवत्प्रपत्त्येकोपायो गुणात्ययस्तत्पूर्वकब्रह्मभावश्चेति ॥ २७ ॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये चतुर्दशोऽध्यायः ॥ १४ ॥

ता ॥ एवमपवर्गप्रदानप्रसङ्गे **शारीरके** यथा * फलमत उपपत्तेः (३. २. ३७) इति सामान्यतस्सकलफलप्रदत्वं फलस्यानन्याधीनत्वख्यापनायोपपादितं, तथाऽत्रापि मध्यमषट्कप्रपञ्चितफलत्रयप्रदातृत्वं प्रकृतहेतुत्वस्थापनार्थतयाऽनन्तरश्लोकेनोच्यत इत्यभिप्रायेणाह—**हिशब्दो हेतौ**विति । नात्र ब्रह्मशब्दस्साक्षात्परब्रह्मविषयः, * अहं ब्रह्मणः प्रतिष्ठेति वैयधिकरण्यादिविरोधात्; नच भोक्तृभोग्यनियन्तृरूपेण त्र्यंशस्य ब्रह्मण ईश्वरांशः पृथुत्वात्प्रतिष्ठेति वाच्यम्, ईश्वरस्यैव ब्रह्मत्वस्थापनात्; नच निर्विकल्पकं रूपं विकल्पितस्य ब्रह्मणः प्रतिष्ठेति वा, प्रत्यगात्मा परमात्मनः प्रतिष्ठेति

वा वाच्यं, श्रुत्यादिवैपरीत्यात्, तन्मतनिर्मूलनाच्च; नापि मूलप्रकृत्यादिविषयः, प्रस्तुतहेतुत्वायोगात्; अतो *ब्रह्मभूयाय कल्पते इति जीवस्य फलदशाभावित्वेन निर्दिष्टं रूपमिह ब्रह्मशब्देनोपचर्यते; तादृशस्य रूपस्याहं प्रतिष्ठा। किमुक्तं भवति? मुमुक्षोः परब्रह्मसमानपरिशुद्धस्वरूपप्राप्तौ शास्त्रोदितेषु सिद्धेषु साध्येषु च पदार्थेषु कः प्रधानहेतुरिति विमर्शे अहमेव विश्रान्तिभूमिरिति। यद्वा प्रतिष्ठाशब्द आधारवाची, तच्चाधारत्वम् *एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (बृ. ५. ८. २) इति श्रुत्यनुसारेण नियमनगर्भमिति * सा च प्रशासनात् (ब्र. १. ३. १०) इति सूत्रेणोक्तम्। अतश्शुद्धात्मस्वरूपस्यापि मदेकनिर्वाह्यत्वात् प्रस्तुतं ब्रह्मभूयं मद्भजनैकलभ्यमित्यर्थः। शाश्वतधर्मशब्देन तत्फललक्षणामाह—**अतिशयितनित्यैश्वर्यस्येति**। इन्द्रप्रजापतिप्रभृतिभोगापेक्षयाऽतिशयितत्वम्। नित्यत्वं चातिचिरकालवर्तित्वमात्रमापेक्षिकमिह मन्तव्यम्। **वासुदेव** इत्यादि। अयमभिप्रायः—एकान्तिलभ्यं सुखमिहैकान्तिसंबन्धादैकान्तिकमुच्यत इति। **निर्दिष्टस्येति** ज्ञानिविशेषणम्। एवमपवर्गेऽप्यैकान्तिकसुखवचनात्पाषाणकल्पादिपक्षाः परिक्षीणाः। नच *इच्छाद्वेषस्सुखं दुःखम् (गी. १३. ६) इति गणनात्सुखं सर्वं क्षेत्रकार्यमिति भ्रमितव्यं, *रसं ह्येवायं लब्ध्वऽऽनन्दीभवति (आ. ७) इत्यन्यादृशसुखाभिधानात्। अत एव *अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः (छा. ८. १२. १) इति श्रुतिरपि दुःखसहचारिसुखनिषेधपरेति मन्तव्यम्। ननु शाश्वतधर्मशब्देनातिशयितैश्वर्यलक्षणा न युक्ता, मुख्यार्थबाधाद्यभावात्; *नारायणः[सात्वत]शाश्वतधर्मगोप्ता (भा. मो. ३४३.५) इत्यादिषु च प्रसिद्धः कार्तयुगधर्मोऽत्र शाश्वतविशेषणेन प्रतीयते; तस्य प्रलयादिषु पाषण्डाद्युपप्लवेषु * यदायदा (गी. ४. ७) इति क्रमेण परिपालनात्तदेकप्रतिष्ठत्वं च सर्वत्र प्रसिद्धम्; तत्राह—**यद्यपीति**। * ब्रह्मणो हीत्यस्य प्राप्यरूपत्वमुपपादितम्। सुखस्यैकान्तिकस्येत्यस्य तु साक्षाद्भगवदनुभवसुखपरत्वं स्पष्टम्। अल्पत्वादिदूषितात्मानुभवैश्वर्यसुखव्यवच्छेदाय ह्यैकान्तिकशब्दः। तेदुभयमध्यपाठादग्रथप्राबल्यन्यायेन प्रागुक्तमैश्वर्यमिह विवक्षितमिति तत्साधनवाचिना तल्लक्षणा युक्ता। अत एवानेन कार्तयुगधर्मोऽपि न विवक्षितः। ऐकान्तिकसुखसाधनत्वेन तु पृथक्सोऽनुसन्धातव्य इति। नन्विहाप्रस्तुतैश्वर्यादिप्रसङ्गः किमर्थः? नचान्यदुपक्रम्यान्यन्निगमयितुं युक्तम्, कथं च तत्प्रतिष्ठारूपत्वस्य प्रकृतहेतुत्वम्? सिद्धस्य च हेतुभावः? क तत्सिद्धिः? कथं च गुणात्ययमन्तरेणाव्यभिचरितभगवद्भक्तियोगः? तेनैव तदत्ययेऽन्योन्याश्रयणमित्यादिशङ्कायामाह—**एतदुक्तं भवतीति**। प्रागुक्तसर्वपुरुषार्थस्वाधीनताप्रत्यभिज्ञापनस्य प्रस्तुत[स्य]गुणात्ययपूर्वकब्रह्मभूयस्वाधीनतास्थापनं प्रयोजनम्। अव्यभिचरितभक्तियोगशब्दोऽत्र भक्त्यङ्गभूतं प्रपदनं क्रोडीकरोतीति पूर्वोत्तरैकार्थ्यमिति भावः॥ २७॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां चतुर्दशोऽध्यायः॥ १४॥

॥ अथ पञ्चदशोऽध्यायः॥ १५॥

भा॥ क्षेत्राध्याये क्षेत्रक्षेत्रज्ञभूतयोः प्रकृतिपुरुषयोः स्वरूपं विशोध्य विशुद्धस्यापरिच्छिन्नज्ञानैकाकारस्यैव पुरुषस्य प्राकृतगुणसङ्गप्रवाहनिमित्तो देवाद्याकारपरिणतप्रकृतिसंबन्धोऽनादिरित्युक्तम्। अनन्तरे चाध्याये पुरुषस्य कार्यकारणोभयावस्थप्रकृतिसंबन्धो गुणसङ्गमूलो भगवतैव कृत इत्युक्त्वा गुणसङ्गप्रकारं सविस्तरं प्रतिपाद्य गुणसङ्गनिवृत्तिपूर्वकात्मयाथात्म्यावाप्तिश्च भगवद्भक्तिमूलेत्युक्तम्। इदानीं भजनीयस्य भगवतः क्षराक्षरात्मकबद्धमुक्तविभूतिमत्ताम्, विभूतिभूतात् क्षराक्षरपुरुषद्वयात् निखिलहेयप्रत्यनीककल्याणैकतानतया अत्यन्तोत्कर्षेण विसजातीयस्य भगवतः पुरुषोत्तमत्वं च वक्तुमारभते। तत्र तावत् असङ्गरूपशस्त्र-

छिन्नबन्धामक्षराख्यविभूतिं वक्तुं छेद्यरूपबन्धाकारेण विततमचित्परिणामविशेषमश्वत्थवृक्षाकारं कल्पयन् श्रीभगवानुवाच—

श्रीभगवानुवाच—

ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १

भा ॥ यं संसाराख्यमश्वत्थम् ऊर्ध्वमूलमधश्शाखमव्ययं प्राहुश्श्रुतयः, * ऊर्ध्वमूलोऽवाक्छाख एषोऽश्वत्थस्सनातनः (क. ६. १) * ऊर्ध्वमूलमवाक्छाखं वृक्ष यो वेद संप्रति (यजु. आ १. ११. ५) इत्याद्याः। सप्तलोकोपरिनिविष्टचतुर्मुखादित्वेन तस्योर्ध्वमूलत्वम् । पृथिवीनिवासिसकलनरपशुमृगकृमिकीटपतङ्गस्थावरान्ततया अधश्शाखत्वम् । असङ्गहेतुभूतादासम्यग्ज्ञानोदयात् प्रवाहरूपेणाच्छेद्यत्वेनाव्ययत्वम् । यस्य चाश्वत्थस्य छन्दांसि पर्णान्याहुः । छन्दांसि—श्रुतयः * वायव्यं श्वेतमालभेत भूतिकामः (यजु. २. १. १) * ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः (यजु. २. २. १) इत्यादिश्रुतिप्रतिपादितैः काम्यकर्मभिर्वर्धतेऽयं संसारवृक्ष इति छन्दांस्येवास्य पर्णानि । पर्णैर्हि वृक्षो वर्धते । यस्तमेवंभूतमश्वत्थं वेद, स वेदवित् । वेदो हि संसारवृक्षच्छेदोपायं वदति ; छेद्यवृक्षस्वरूपज्ञानं छेदनोपायज्ञानोपयोगीति वेदविदित्युच्यते ॥ १ ॥

ता ॥ एवमध्यायद्वयेन प्रथमषट्कोदितप्रकृतिपुरुषतत्प्रकारविशेषविशोधनं कृतम् । तत्रेयं प्रकृतिः स्वगुणैर्यदधीनसत्तादिः ; पुरुषश्च यदपराधाद्बद्धः ; यत्प्रसादाच्च मोक्ष्यत इत्युक्तम् ; स इदानीं मध्यमषट्कोदितः परमात्मा विशोध्यत इति सङ्गतिमाह—**क्षेत्राध्याय** इत्यादिना **आरभत** इत्यन्तेन । एतेन * अचिन्मिश्राद्विशुद्धाच्च चेतनात्पुरुषोत्तमः । व्यापनाद्भरणात्स्वाम्यादन्यः पञ्चदशोदितः ॥ (१९) इति संग्रहश्लोकोऽप्युनुसंहितः । त्रयोदशशेषतया चतुर्दशे वृत्ते तदन्ते * मां चेत्यादिश्लोकद्वयेन अव्यभिचारिभक्त्या भजनीयः फलप्रदश्च परमपुरुषः प्रसक्तः ; पञ्चदशे तत्प्रकर्षविशेषविशोधनपरतया चतुर्दशेन संगतिः **भजनीयस्ये**त्यनेन दर्शिता । विभूतिमत्त्वप्रतिपादनमिह वैलक्षण्यप्रतिपादनार्थमित्यभिप्रायेण **आरभत** इत्युक्तम् । प्रकृताभ्यां बद्धमुक्ताभ्यां विभूतिमत्त्वमिह वर्ण्यत इत्यपि प्रकृताध्यायद्वयसंगतिरभिप्रेता । [अ]तत्र * ऊर्ध्वमूलमित्यादेरध्यायारम्भग्रन्थस्य जरद्गवादिवाक्यवदनन्वितत्वम्, अन्वितत्वेऽपि प्रकृताप्रकृतप्रकरिष्यमाणासंगतिं च परिहर्तुमाह—**तत्र ताव**दिति । प्रतिपत्तिसौकर्यार्थं श्रुत्यनुसारेणेदमश्वत्थवृक्षाकारकल्पनम् । परतत्त्वबुभुत्साहेतुभूतवैराग्यार्थमित्येके, विभूतितयाऽवसितायाश्च विभूतिमत्परतत्त्वप्रतिपादनार्थत्वात् । * तस्येत्यनन्तरम् (२) असङ्गशस्त्रच्छेद्यत्वोक्तेस्सङ्गविषयस्संसार एवात्राश्वत्थरूपेण कल्पित इति गम्यते । तत्र लौकिकाश्वत्थाद्वैलक्षण्यज्ञापनायोर्ध्वमूलत्वाद्याश्चर्यप्रदर्शनमिति भावः । ननु मूलप्रकृतिरेवात्राश्वत्थतया कल्प्यत इति किं न गृह्यते ? * गुणप्रवृद्धा विषयप्रवालाः इत्यादीनिच तत्र सुसंगतानि ; मैवम्, साक्षात्सङ्गविषयत्वाभावादसङ्गशस्त्रच्छेद्यत्वस्य च मुख्यस्याविनाशित्वेनानन्वयात्, तदिदमभिप्रेत्योक्तम्-**अचित्परिणामविशेष**मिति, **यं संसाराख्य**मिति च । अयमेवार्थः पुराणेऽपि पठ्यते—* अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोच्छ्रितः । बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः । महाभूतविशाखश्च विषयैः पत्रशाखवान् । धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः । आजीव्यस्सर्वभूतानां ब्रह्मवृक्षस्सनातनः । एतद्ब्रह्मवनं चैव ब्रह्मवृक्षस्य तस्य तत् । एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना । ततश्चात्मरतिं प्राप्य यस्मान्नावर्तते पुनः ॥ (भा. आश्व. ३५. २०, नार. पु. १६. ५) इत्यादि । केचित्पुरुषाणामेकैकस्मिञ्छरीरे शिरस ऊर्ध्वत्वात्पाण्यादीनां चाधोमुखत्वा-

दूर्ध्वमूलत्वादिकल्पनामाहुः । पुनश्चान्यथाऽऽहुः—*तदिदं व्यष्टिक्षेत्रम्, अथ समष्टिक्षेत्रमुच्यते ; कृत्स्नमिदं ब्रह्माण्डं हिरण्यगर्भशरीरं विराडित्युच्यते ; तस्य *द्यौश्शिरश्चक्षुषी चन्द्रसूर्यौ दिशश्श्रोत्रे मध्यमाकाशं शरीरं पृथिवी पादौ तस्मिन्नप्यूर्ध्वमूलमधश्शाखम् इति योजयितव्यम् । प्राणिवंशो वा अश्वत्थो वृक्षः ; तस्य मूलं ब्रह्मा उपरिष्टात्स्थितः इत्यादि । *अधश्चोर्ध्वं चेति श्लोके तु प्रकृत्यादिविशेषान्तं कृत्स्नं वृक्षत्वेन कल्प्यत इति । एवं सर्वास्वपि योजनासु संसारहेयता-प्रतिपादने तात्पर्यं वक्तव्यम् । ततो वरं संसारस्यैव साक्षाद्वृक्षत्वेन कल्पनम् । *अधश्चोर्ध्वं चेति श्लोके तु *तस्येति परामर्शात्पूर्वकल्पितस्यैव वृक्षस्य प्रतीतेर्न वृक्षान्तरकल्पना युक्ता । *न रूपमस्येत्यादौ स एवैको वृक्षः परामृश्यते । तस्मादेकस्यैव संसारस्य वृक्षत्वकल्पना भाष्यकारैर्व्याख्याता । अत्रानिर्दिष्टकर्तृकस्य *आहुरित्यस्य वाक्यान्तरकर्तृत्वशङ्का-व्युदासायाह—**श्रुतय** इति । ननु *ऊर्ध्वमूलोऽवाक्छाख एषोऽश्वत्थस्सनातनः (क. ६. १) इति श्रुतिरिह कथं संसार-विषयतयोदाहियते ? एष इति प्रकृतस्य वक्ष्यमाणस्य च पुरुषस्य परामर्श उचितः ; मैवम्, पुरुषस्य स्वरूपेणोर्ध्वमूलत्वा-द्यसंभवात् । मुमुक्षूणां तस्मिन्नेव सङ्गादसङ्गशस्त्रच्छेद्यत्वोक्तेश्च अघटितत्वात्, उपहितवेषेण तु तथोक्तौ प्राप्ताप्राप्त-विवेकेनोपाधावेव विश्रमादिति । श्वो न स्थास्यतीत्यश्वत्थः ; छेद्यत्वाच्च वृक्षः ; तदेतदुपात्तश्रुतिद्वये विशेषतस्सामान्य-तश्च कल्पनालम्बनम् । ऊर्ध्वमूलत्वमधश्शाखत्वं च व्यष्टिसृष्टिप्रक्रियया घटयति—**सप्तलोकेत्यादिना** । पृथिवीत्यध-स्तनलोकानामुपलक्षणम् । अव्ययत्वच्छेद्यत्ववचनं व्याहतमित्यत्राह—**असङ्गहेतुभूतादासम्यग्ज्ञानोदयादिति** । तत्त्व-ज्ञानात्प्रागपि विनाशदर्शनविरोधपरिहाराय प्रवाहरूपत्वोक्तिः । अक्षरसंख्यारूपच्छन्दोव्यवच्छेदायाह—**छन्दांसि श्रुतय इति** । पर्णवत्संसारवृक्षस्य यथावस्थिताकारं संछाद्य रक्षन्तीति ज्ञापनायात्र छन्दश्शब्दः । संसारवृक्षपर्णत्वेन रूपणाच्छन्द-श्शब्दोऽत्र *वेदवादरताः (गी. २. ४२) इत्यादिष्विव त्रिवर्गपरांशविषय इत्यभिप्रायेणाह—**वाय्यमिति** । असं-बन्धिनां छन्दसां कथं पर्णत्वमित्यत्राह—**श्रुतिप्रतिपादितैरिति** । तथाऽपि वृक्षावयवेषु बहुषु पर्णत्वेन रूपणे को विशेष इत्यत्रोक्तम्—**वर्धत इति** । तद्विवृणोति—**पर्णैर्हीति** । *तमिति सप्रकारपरामर्शविवक्षया आह—**एवंभूतमिति** । ननु यस्संसाराश्वत्थं वेद, स वेदविदित्यसंगतम् ; नहि संसारोऽश्वत्थो वा वेदाः, येन तद्वेदिनो वेदवित्त्वमुच्यते ; अतोऽत्र *आद्यं तु त्र्यक्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता । स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥ (मनु. ११. २६५) इत्यादिष्विव प्रणवविषयत्वं कार्तयुगैकवेदपरत्वं वा युक्तम् । प्रणवस्यार्धमात्रायाः कारणपरमपुरुषदेवताकत्व-श्रुतेः ऊर्ध्वमूलत्वं सुसंगतम् । कार्तयुगवेदस्यापि वेदान्तरूपत्वात्सर्वमूलत्वाच्च तथा निर्देशो घटते । एवं छन्दःपर्ण-त्वादिकं चोभयोस्सुगमम् । शङ्कुना पर्णानामिव प्रणवेन सर्वासां वाचां संतृण्णत्वश्रुतेः *महतो वेदवृक्षस्य मूलभूतो महानयम् । स्कन्धभूता ऋगाद्यास्ते शाखाभूतास्तथा परे ॥ (ई. सं. १. २४) इति धर्मविशेषप्रतिपादकभागस्य मूल-त्वोक्तेश्च । अतस्तथाभूतवेदविशेषवेदिन इह वेदवित्त्वेन स्तुतिः, न त्ववेदभूतयत्किंचिद्वेदिन इति ; तत्राह—**वेदो हीति** । अत्र वेदशब्दोऽपवर्गार्थवेदभागपरः । ततः किमित्यत्राह—**छेद्यवृक्षेति** । अयमभिप्रायः—असङ्गशस्त्रच्छेद्यत्वा-नुपपत्तेरेव प्रणवादिपरत्वमप्ययुक्तमेव ; *ततः पदं तत्परिमार्गितव्यमित्येतदपि तत्रासंगतम्, *शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति (वि. ६. ५. ६४) इतिवदिति चेन्न, विरुद्धत्वात् ; तत्र हि तन्निष्णातस्य परब्रह्माधिगम उच्यते ; अत्र तु तच्छित्त्वा ततः पदं परिमार्गितव्यमिति ; अतोऽस्यान्यार्थसंभवात्संसारविषयत्वे सिद्धे तद्विदो वेदवित्त्वेन स्तुतिः, तज्ज्ञानस्य वेदान्तप्रतिपाद्यार्थज्ञानोपयोगितयैवेति । *ऊर्ध्वमूलमित्यादिकं नैमित्तिकसृष्टिप्रक्रिययोक्तम् ॥ १ ॥

अधश्चोर्ध्वं च प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।

भा ॥ तस्य—मनुष्यादिशाखस्य वृक्षस्य तत्तत्कर्मकृता अपराश्चाधश्शाखाः पुनरपि मनुष्यपश्वादिरूपेण प्रसृता भवन्ति ; ऊर्ध्वं च गन्धर्वयक्षदेवादिरूपेण प्रसृता भवन्ति । ताश्च गुणप्रवृद्धाः—गुणैस्सत्त्वादिभिः प्रवृद्धाः, विषयप्रवालाः—शब्दादिविषयपल्लवाः ॥ १८ ॥

ता ॥ अथ नित्यसृष्टिप्रक्रिययाऽप्युच्यते—*अधश्चेति । **अपराश्चेति** पूर्वोक्तपुनरुक्तिपरिहारार्थम् । **पुनरपीति** नित्यसृष्टिद्योतनम् ; कर्मलोकमधिकृत्य ऊर्ध्वं प्रवृत्तेर्विवक्षितत्वाद्गन्धर्वादिपरत्वम् ; अत एव पूर्वोक्तेन चतुर्मुखलोकावधिकाधश्शाखत्वेनाविरोध इत्यभिप्रायेणाह—**गन्धर्वयक्षदेवादिरूपेणेति** । प्रागुक्तप्रक्रियया गुणानामुत्तरोत्तरजन्महेतुत्वेन देवमनुष्यादिशाखानां गुणप्रवृद्धत्वम् । गुणा इह साधारणास्सलिलस्थानीयाः ; प्रकाण्डस्थानीया वा । अत्र विषयशब्दस्य सर्वसाधारणज्ञानादिविषयपरत्वव्युदासायाह—**शब्दादीति** । प्रवालशब्दस्यात्र विद्रुमार्थत्वासंभवज्ञापनाय पल्लवशब्दः । शाखासु हि भोग्यत्वेन पल्लवास्समुद्भवन्ति । तद्वदेव [वेदा]देवादिषु शाखास्थानीयेषु भोग्यतया शब्दादेरुद्भवात्पल्लवस्थानीयत्वम् ॥

भा ॥ कथमित्यत्राह—

अधश्च मूलान्यनुसंततानि कर्मानुबन्धीनि मनुष्यलोके ॥ २

भा ॥ ब्रह्मलोकमूलस्यास्य वृक्षस्य मनुष्याग्रस्य, अधः—मनुष्यलोके च, मूलान्यनुसन्ततानि । तानि च कर्मानुबन्धीनि—कर्माण्येवानुबन्धीनि मूलानि, अधो मनुष्यलोके च भवन्तीत्यर्थः ; मनुष्यत्वावस्थायां कृतैर्हि कर्मभिः अधो मनुष्यपश्वादयः, ऊर्ध्वं च देवादयो भवन्ति ॥ २ ॥

ता ॥ ननु ऊर्ध्वमूलस्याधश्शाखत्वं मूलानुगुण्येनोपपद्यतां नाम ; पुनरधश्चोर्ध्वं च प्रसृतेः किं मूलमिति शङ्काभिप्रायेणाह—**कथमित्यत्राहेति** । * अधश्च मूलानीत्यवान्तरमूलोक्तिः । प्रासादशिखरप्ररूढप्रलम्बिताया लतायाः क्षितिसंसर्गजमूलप्रान्तरप्रसूतोर्ध्वशाखान्तरवदित्यभिप्रायेणाह—**ब्रह्मलोकमूलस्येति** । मनुष्यलोकग्रहणं तत्र कर्माधिकारभूयस्त्वज्ञापनार्थम् । समानाधिकरणसमासौचित्यात्कर्मणामेव च सर्वत्र मूलत्वोपपत्तेस्तदनुबन्धिनां गुणानामन्येषां वा मूलत्वनिर्देशायोगमभिप्रेत्याह—**कर्माण्येवानुबन्धीनीति** । पुरुषमनुबध्नन्तीत्यनुबन्धीनि ; यद्वा सुदृढाविच्छिन्नानीत्यर्थः । आत्मानुबन्धिनां कर्मणां मनुष्यलोकस्थमूलत्वोक्तेः किं नियामकमित्यत्र मूलत्वप्रकारमुपपादयति—**मनुष्यत्वावस्थायां कृतैरिति** । यथा न्यग्रोधादेरूर्ध्वशाखस्य शाखाग्रे बीजरूपं जटारूपं वा मूलं जायते ; तथा अधश्शाखस्यापि स्यादिति भावः ॥ २ ॥

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा ।

भा ॥ अस्य—वृक्षस्य चतुर्मुखादित्वेनोर्ध्वमूलत्वम्, तत्सन्तानपरम्परया मनुष्याग्रत्वेनाधश्शाखत्वम्, मनुष्यत्वे कृतैः कर्मभिर्मूलभूतैः पुनरप्यधश्चोर्ध्वं च प्रसृतशाखत्वमिति यथेदं रूपं निर्दिष्टम्, न तथा संसारिभिरुपलभ्यते, मनुष्योऽहं देवदत्तस्य पुत्रो यज्ञदत्तस्य पिता तदनुरूपपरिग्रहश्चेत्येतावन्मात्रमुपलभ्यते । तथाऽस्य वृक्षस्य अन्तः—विनाशोऽपि गुणमयभोगेष्वसक्तकृत इति नोपलभ्यते । तथाऽस्य गुणसङ्ग एवादिरिति नोपलभ्यते । तस्य प्रतिष्ठा चानात्मन्यात्माभिमानरूपमज्ञानमिति नोपलभ्यते ; प्रतितिष्ठत्यस्मिन्नेवेति ह्यज्ञानमेवास्य प्रतिष्ठा ॥ २८ ॥

ता ॥ ननु सर्वप्रत्यक्षसंमतेऽस्मिन् संसारे * यस्तं वेदेति कस्यचिन्निन्द्वेदनेन प्रशंसनमयुक्तमित्यत्रोच्यते—*न रूपमस्येति । नात्र रूपानुपलम्भवचनस्य रूपाभावे तात्पर्यं, निर्दिष्टरूपविरोधादित्यभिप्रायेणाह—**अस्य वृक्षस्येति** । सर्वेषां संसारोपलम्भे सत्यपि प्रकृताकारेण नोपलम्भ इति तथाशब्दाभिप्रेतं विवृणोति—**चतुर्मुखादित्वेनेत्यादिना** । **संसारिभिरिति**—अपवर्गोपयुक्तज्ञानरहितैरिति भावः; संसारिष्वेव यस्तथा वेद, स मुक्तप्राय इति वा । कूटस्थपितृपुत्रादिरूपेण लोकेऽपि मूलशाखापल्लवादिकं दृश्यत इत्यत्राह—**मनुष्योऽहमिति** । तेषां हेयस्यापि संसारस्योपादानोपयुक्तं ज्ञानमस्ति; न तु हानार्थमिति भावः । * नान्तः इत्यादावपि तथाशब्दस्यानुषङ्गमाह—**तथाऽस्येति** । समभिव्याहृतासङ्गशस्त्रच्छेद्यत्वानुगुणमन्तशब्दार्थमाह—**विनाश इति** । आत्यन्तिकप्रलय इहासङ्गनिष्पादितोऽन्तशब्देन विवक्षितः; तस्य च स्वरूपतः कारणतश्चानुपलम्भः; नित्यप्रलयमात्रं हि संसारिभिर्दृश्यत इत्यभिप्रायेणाह—**गुणमयभोगेष्वसङ्गकृत इति** । भोगशब्दोऽत्र भोग्यपरः । प्रमाणसिद्धस्यान्तस्यादेः प्रतिष्ठायाश्च स्वरूपनिषेधभ्रमव्युदासाय उपलभ्यते इति पदमनुषञ्जितम् । गर्भादिरूपस्यावान्तरादेरुपलम्भात्प्रधानभूत आदिरिह विवक्षित इत्याह—**गुणसङ्ग एवेति** । अत्र प्रतिष्ठाशब्देन परोक्तं परमात्माभिधानमयुक्तं, निस्सङ्गानां सङ्गविषयस्य तस्यासङ्गशस्त्रच्छेद्यवृक्षप्रतिष्ठात्वनिर्देशानौचित्यात्; अत आदिभूतस्य सङ्गस्यापि निदानं क्षेत्रादिस्थानीयमज्ञानमिह अर्थौचित्यात्प्रतिष्ठोच्यत इत्याह—**अनात्मन्यात्माभिमानरूपमिति** । एतेन संप्रतिष्ठा मध्यमिति व्याख्याऽपि निरस्ता । अज्ञाने कथं प्रतिष्ठाशब्दवृत्तिरित्यत्राह—**प्रतितिष्ठतीति** । अयं भावः—मूलस्थितिभूमिः वृक्षस्य प्रतिष्ठा; कर्म च संसारवृक्षस्य मूलत्वेनोक्तम्; तच्च * अविद्यासञ्चितं कर्म (वि. २. १३. ७०) इति वचनादज्ञाने स्थितं, तदधीनत्वात्तदनुष्ठानस्य; ममकारस्यापि कर्महेतोरहङ्कार एव कन्द इति स इह संसारवृक्षप्रतिष्ठेति ॥ २८ ॥

अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा ॥ ३
ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः ।

भा॥ एनम्—उक्तप्रकारं सुविरूढमूलम्—सुष्ठु विविधं रूढमूलमश्वत्थं सम्यग्ज्ञानमूलेन दृढेन गुणमयभोगासंगाख्येन शस्त्रेण छित्वा, ततो—विषयासंगाद्धेतोस्तत्पदं परिमार्गितव्यम्—अन्वेषणीयम्: यस्मिन् गता भूयो न निवर्तन्ते ॥ ३८ ॥

ता ॥ * एनमिति सङ्गास्पदप्रकृतिवैचित्र्यपरामर्श इत्याह—**उक्तप्रकारमिति** । सुष्ठुत्वं दृढनिरूढवासनत्वेनान्यैरिच्छेत्तुमशक्यत्वम् । विविधत्वं—प्रायश्चित्तादिभिरेकैकस्य कर्मण्यमूलस्य च्छेदेऽप्यनादिकालं मनोवाक्कायैर्बुद्धिपूर्वकमबुद्धिपूर्वकं च विधिनिषेधविषयविचित्रकर्मणामनन्तप्रकारसंभृतत्वम् । असङ्गोऽपि कदाचित्तादात्विकव्याध्यादिक्लेशादपि भवति; स तु न दृढः; अतः—**सम्यग्ज्ञानमूलेनेत्युक्तम्** । विषयत्यागदशायामिव आत्मान्वेषणदशायामप्यसङ्गोऽनुवर्तनीय इति ज्ञापनाय ततश्शब्दः । अत एव ततःपरमिति परशब्दाध्याहारेण व्याख्यान्तरमयुक्तमित्यभिप्रायेणाह—**ततो विषयासङ्गाद्धेतोरिति** । * आत्मानमन्विच्छेत् (भा. उ. ३३. ६४) इत्यादिसूचनायाह—**अन्वेषणीयमिति** । छन्दोनुरोधाय च्छान्दसं * निवर्तन्तीति परस्मैपदमित्यभिप्रायेण स्वयमात्मनेपदं प्रायुङ्क्त ॥ ३८ ॥

भा ॥ कथमनादिकालप्रवृत्तो गुणमयभोगसंगस्तन्मूलं च विपरीतज्ञानं निवर्तत इत्यत आह—

तमेव चाद्यं पुरुषं प्रपद्ये[य]तः प्रवृत्तिः प्रसृता पुराणी ॥ ४

भा ॥ अज्ञानादिनिवृत्तये तमेव चाद्यम्—कृत्स्नस्यादिभूतं, * मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् (गी. ९. १०) * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते (१०. ८) * मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय (७. ७) इत्यादिषूक्तमाद्यं पुरुषमेव शरणं प्रपद्येत्—तमेव शरणं प्रपद्येत । यतो—यस्मात् कृत्स्नस्य स्रष्टुरियं गुणमयभोगसङ्गप्रवृत्तिः, पुराणी—पुरातनी प्रसृता । उक्तं हि मयैतत्पूर्वमेव * दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ (७. १४) इति । * प्रपद्येयतः प्रवृत्तिरिति वा पाठः ; तमेव चाद्यं पुरुषं प्रपद्य—शरणमुपगम्य, इयतः—अज्ञाननिवृत्त्यादेः कृत्स्नस्यैतस्य साधनभूता प्रवृत्तिः पुराणी—पुरातनी प्रसृता ; पुरातनानां मुमुक्षूणां प्रवृत्तिः पुराणी ; पुरातना हि मुमुक्षवो मामेव शरणमुपगम्य निर्मुक्तबन्धास्संजाता इत्यर्थः ॥ ४ ॥

ता ॥ ननु दृढस्यासङ्गशस्त्रस्य लाभे हि तेन च्छिद्येत ; तदेव तु संसारिभिर्दुर्लभतरमिति शङ्कयोत्तरग्रन्थं संगमयति—**कथ**मिति । * निर्मानमोहाः इत्यादिसमनन्तरग्रन्थानुसन्धानेनाह—**अज्ञानादिनिवृत्तय** इति । आद्यत्वं पूर्वोक्तप्रकारं तच्छब्देन स्थाप्यत इत्याह—**मये**ति । यदाज्ञातिलङ्घनाद्बन्धः, स एव हि प्रसादितो मोचक इत्यभिप्रायेणैवकारः । तत्प्रपञ्चनरूपस्य * यतः प्रवृत्तिः इत्यादेर्महदादिसृष्टिमात्रपरत्वव्युदासायेममेवार्थं प्रपत्तिवाक्ये प्रागुक्तं स्मारयति—**उक्तं हीति** । *तेषामेवानुकम्पार्थं (१०. ११), *मच्चित्तस्सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि (१८. ५८), * मामेकं शरणं व्रज (१८. ६६) इत्यादिकमपि भाव्यम् । अत्र प्रसृतादिशब्दैस्सत्यत्वस्यैव प्रतीतेः, परेषामिन्द्रजालदृष्टान्तश्शब्दस्वारस्येन प्रत्यक्षादिभिश्च बाधितः । छन्दोवदृषीणां प्रयोगानुमतेः * प्रपद्येदिति परस्मैपदम् । तत्र स्वाभिमतं पाठान्तरमर्थान्तरं चाह—**पप्रद्ये**त्यादिना । उत्तमपुरुषत्वे वाक्यानन्वयात् * इयतः इति पदच्छेदः । एवं च शङ्कायास्साक्षादिदमुत्तरं स्यादिति भावः । इयच्छब्दस्यात्र प्रकृतसाकल्यपरत्वमाह—**अज्ञाननिवृत्त्यादेः कृत्स्नस्ये**ति । पुरुषव्यापारविषयत्वाय **साधनभूते**त्युक्तम् । षष्ठ्यभिहितं संबन्धसामान्यमिह साध्यसाधनभावरूपविशेषे विश्रान्तमिति भावः । * प्रसृता पुराणीत्यनेन शिष्टाचारप्रदर्शनमभिमतमित्याह—**पुरातनाना**मिति । तदेव विवृणोति—**पुरातना हीति** ॥ ४ ॥

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्तास्सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५

भा ॥ एवं मां शरणमुपगम्य निर्मानमोहाः—निर्गतानात्मात्माभिमानरूपमोहाः, जितसङ्गदोषाः—जितगुणमयभोगसङ्गाख्यदोषाः, अध्यात्मनित्याः—आत्मनि यत् ज्ञानं तदध्यात्मम्, आत्मज्ञाननिरताः, विनिवृत्तकामाः—विनिवृत्ततदितरकामाः, सुखदुःखसंज्ञैर्द्वन्द्वैश्च विमुक्ताः, अमूढाः—आत्मानात्मस्वभावज्ञाः, तदव्ययं पदं गच्छन्ति—अनवच्छिन्नज्ञानाकारमात्मानं यथावस्थितं प्राप्नुवन्ति ; मां शरणमुपगतानां मत्प्रसादादेवैतास्सर्वाः प्रवृत्तयस्सुशकास्सिद्धिपर्यन्ता भवन्तीत्यर्थः ॥ ५ ॥

ता ॥ अस्मिन्नर्थे * निर्मानमोहाः इत्याद्यनन्तरवाक्यमपि * इयतः इत्युक्तस्य विवरणतया सुसङ्गतमित्यभिप्रायेणाह—**एव**मिति । अत्र सामर्थ्यात्सङ्गनिवृत्तेः कारणं निर्मानमोहत्वमिति तदनुरूपं व्याख्याति—**निर्गतानात्मात्माभिमानरूपमोहा** इति । * अमूढाः इति पृथगुक्तेरत्र मानमोहमेलनव्याख्यानमयुक्तमिति भावः । आत्मसङ्गव्यवच्छेदाय—**गुणमये**ति विशेषणम् । जितसङ्गत्वफलमध्यात्मनित्यत्वम् ; तच्च * अध्यात्मज्ञाननित्यत्वम् (१३. ११) इति

प्रागुक्तं, तदाह–**आत्मनि यज्ज्ञानमिति** । योगकाले नैरन्तर्येण, उत्थानकालेऽपि प्राचुर्येणाध्यात्मज्ञाननिरतत्वम् । स्वादुतमे स्वात्मज्ञाने निरतत्वात्तदितरकामनिवृत्तिः । विनिवृत्तकामत्वमिह विशेषतो निवृत्तकामत्वं; तच्च विषयसन्निधावप्युपेक्षकत्वम् । सङ्गकामयोर्हेतुहेतुमद्भावस्यपूर्वोक्तत्वाच्चापुनरुक्तिः । **सुखदुःखसंज्ञैः**–अनुकूलप्रतिकूलस्वभावैरित्यर्थः । इदं चोपायदशाविवक्षायां द्वन्द्वतितिक्षापरम्; फलदशापरत्वे दुःखात्यन्तनिवृत्तिपरम् । * त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत् । मोहितम् (७. १३) इत्युक्तमायातरणादिहामूढत्वम्, तच्च देहात्मभ्रमनिवृत्तेः * निर्मानमोहाः इत्यनेनोक्तत्वात्तद्व्यतिरिक्तात्मानात्मविषयसमस्तभ्रमनिषेधरूपमित्यभिप्रायेणाह–**आत्मानात्मस्वभावज्ञा** इति । यद्वा मोहहेतुनिवृत्तिलक्षकोऽत्रामूढशब्दः, अन्योन्यव्यावर्तकासाधारणधर्मप्रतीत्या ह्यात्मानात्मैक्यमोहो निवर्तनीय इति भावः । स्वरूपतो निर्विकारत्वादात्मनां व्ययो ज्ञानसङ्कोचविकासरूपः; तन्निषेधफलितमाह–**अनवच्छिन्नज्ञानाकार**मिति । पद्यत इति पदं * प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः (वि. ६. ७. ९३) इति परिशुद्धात्मनोऽपि परमात्मवत्प्राप्यत्वात्पदत्वम् । नचात्र परमात्मा पदशब्दाभिप्रेतः, अनन्तरश्लोके तस्यैव तच्छब्दपरामृष्टस्य मम धामेति व्यधिकरणनिर्देशात् । नच पदशब्दधामशब्दयोरिह दिव्यस्थानविषयत्वं, * परिमार्गितव्यमिति तस्यान्वेषणीयत्वविध्ययोगात् । तस्य हि फलतया अस्तीति ज्ञातव्यत्वमात्रम्; न त्वात्मवत्समाधिपर्यन्तगवेषणास्पदत्वम् । मम धामेति निर्दिष्टस्यैव हि संसारावस्था *ममैवांशः (७) इत्यादिनोच्यते । अन्यथा परस्थानप्रतिपादनानन्तरं * ममैवांशः इति बद्धावस्थजीवनिर्देशोऽपि नातीव सङ्गत इति भावः । उक्तशङ्कापरिहारतया * तमेवेत्यादेः पिण्डितं तात्पर्यार्थमाह–**मां शरण**मिति ॥ ५ ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ ६

भा ॥ तदात्मज्योतिर्न सूर्यो भासयते, न शशाङ्कः, न पावकश्च । ज्ञानमेव हि सर्वस्य प्रकाशकम्; बाह्यानि तु ज्योतींषि विषयेन्द्रियसंबन्धविरोधितमोनिरसनद्वारेणोपकारकाणि । अस्य च प्रकाशको योगः, तद्विरोधि चानादिकर्म, तन्निवर्तनं चोक्तं भगवत्प्रपत्तिमूलमसङ्गादि । यद्गत्वा पुनर्न निवर्तन्ते, तत्परमं धाम–परं ज्योतिः, मम–मदीयम्; मद्विभूतिभूतो ममांश इत्यर्थः । आदित्यादीनामपि प्रकाशकत्वेन तस्य परमत्वम् । आदित्यादीनि हि ज्योतींषि न ज्ञानज्योतिषः प्रकाशकानि; ज्ञानमेव सर्वस्य प्रकाशकम् ॥ ६ ॥

ता ॥ प्रकाशकान्तरनैपेक्ष्यद्योतनाय तच्छब्दाभिप्रेतमाह–**आत्मज्योतिरिति** । अयं भावः–तच्छब्दस्य प्रकृतपरामर्शित्वस्वारस्यात् *पदमव्ययं तदिति परिशुद्धात्मस्वरूपस्य प्रकृतत्वात्, उत्तरश्लोकेऽपि * ममैवांशो जीवलोके जीवभूतः इति तस्यैवोक्तेः, अत्रापि श्रुतिसिद्धस्वयंज्योतिष्टव्यञ्जकधामशब्दप्रयोगात् जीवविषयोऽयं श्लोक इति । सूर्याद्यप्रकाश्यत्वं स्वभाववैपरीत्येन स्थापयति–**ज्ञानमेव हीति** । **सर्वस्येति** प्रकाश्यवर्गस्य, तत्प्रकाशकतयाऽभिमतसूर्यादिज्योतिषोऽपीति भावः । ज्ञानं चेत्सर्वस्य प्रकाशकं, तर्हि बाह्येष्वपि किं सूर्याद्यपेक्षया? कथं च तेषु प्रकाशकत्वव्यवहारः? इत्यत्राह–**बाह्यानि त्विति** । **संबन्धविरोधीति** सामग्रीमध्यपातिविशिष्टसंबन्धाकारविवक्षयोक्तम् । नहि कुड्यादिवत्तमो व्यवधायकं, तमोव्यवहितालोकस्थग्रहणात् । एवं सर्वप्रकाशकमात्मज्योतिस्स्वयमेव किं न प्रकाशते, केन वाऽन्येन तत्प्रकाश्यमित्यत्राह–**अस्य चेति** । चस्त्वर्थश्शङ्कानिवृत्यर्थः । स्वयंप्रकाशस्यापि यथावस्थितसमस्ताकारग्रहणे संसारिणां योग एवोपाय इति भावः । प्रकाशकान्तरप्रतिक्षेपे वेद्यत्वनिषेधशङ्काऽप्यनेन परिहृता । विशेषनिषेधश्शेषाभ्यनुज्ञानपर

इति भावः । योगोऽपि सर्वेषां किं न सिध्येत्? तत्राह—**तद्विरोधीति** । सांसारिकं कर्म योगोत्पत्तिप्रतिबन्धकमित्यर्थः । तर्हि सर्वेषां न सिध्येदिति शङ्कायां प्रकृतेन परिहरति—**तन्निवर्तनं चेति** । **गत्वा**—प्राप्येत्यर्थः । धामशब्दोऽत्र प्राग्वन्न नियमनस्थानपरः ; अपि तु सूर्याद्यपेक्षत्वप्रतिक्षेपात्स्वरूपस्य प्रकाशरूपत्वसिद्धेर्ज्योतिर्वाची । तत एव मम परं ज्योतिरित्यन्वयो मन्दः । ममेति स्वसंबन्धविधिस्तु मुक्तदशाभाविपरमसाम्यशङ्कितस्वातन्त्र्यपरिहारेण सार्थ इत्यभिप्रायेणाह—**परं ज्योतिर्मम मदीयमिति** । * ममैवांशः इति वक्ष्यमाणस्यापि निदानमिहाभिप्रेतमिति व्यञ्जयन् षष्ठ्युक्तं संबन्धसामान्यं विशेषे नियच्छति—**मद्विभूतिभूत** इति । विभूतित्वं च न गृहिणो गृहादिवत्, अपि त्वपृथक्सिद्धविशेषणांशत्वेनेत्याह—**ममांश** इति । अयमभिप्रायः—न तावन्निरवयव एकस्मिन् स्वरूपेऽशव्यपदेशः, अंशस्यैकवस्त्वेकदेशरूपत्वेन भेदाश्रयत्वादंशांशिभावस्य । अन्यथा, एकस्मिन् कोंऽशः, कश्चांशी? नहि स एव तस्यांश इति भ्रान्तोऽपि ब्रूयात् । नच भेदाभेदसंभवः, व्याघातसर्वश्रुतिकोपादिप्रसङ्गात् । *पादोऽस्य विश्वा भूतानि (पु), *तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् (श्वे. ४. १०), * यथाऽग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनस्सर्व एवात्मानो व्युच्चरन्ति (बृ. ४. १. २०) इत्यादिश्रुतिप्रतीतांशत्वं विशिष्टे विशेषणांशतयेति * अंशो नानाव्यपदेशात् (ब्र. २. ३. ४२) इत्यधिकरणे * प्रकाशादिवत्तु नैवं परः (४५) इति सूत्रे स्थापितम् । अतोऽनेकेष्वेव केनचिदुपाधिनैकतयाऽभिमतेषु कश्चिन्निरूप्यमाणोंऽश इति व्यपदिश्यते । एवमेव हि पटादिराश्यादिष्वपि । तच्च विशेषणविशेष्यभावेनावस्थितेष्वपि विशिष्टैक्ये विशेषणांश इत्यादिव्यपदेशेषु तुल्यम् । तस्मादत्रात्यन्तभिन्नयोर्जीवपरयोर्विभूतितद्भावेन विशिष्टैक्याद्विशेषणभूतो जीवो निष्कृष्य व्यपदिश्यमानः प्रधानापेक्षयांऽश इति व्यपदिश्यत इति । अत्र निरङ्कुशपारम्यवत्परमात्मव्यतिरिक्तविषयधामशब्दनिर्दिष्टज्योतिर्विशेषणभूतं परमत्वं सन्निहितज्योतिरपेक्षयेति तत्फलितमाह—**आदित्यादीनामपीति** ॥ ६ ॥

ममैवांशो जीवलोके जीवभूतस्सनातनः ।
मनष्षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७

भा ॥ **इत्थमुक्तस्वरूपस्सनातनो ममांश एव सन् कश्चिदनादिकर्मरूपाविद्यावेष्टितो जीवभूतो जीवलोके वर्तमानो देवमनुष्यादिप्रकृतिपरिणामविशेषशरीरस्थानि मनष्षष्ठानीन्द्रियाणि कर्षति । कश्चिच्च पूर्वोक्तेन मार्गेणास्या अविद्यायाः मुक्तः स्वेन रूपेणावतिष्ठते ; जीवभूतस्वतिसंकुचितज्ञानैश्वर्यः कर्मलब्धप्रकृतिपरिणामविशेषरूपशरीरस्थानामिन्द्रियाणां मनष्षष्ठानामीश्वरः तानि कर्मानुगुणमितस्ततः कर्षति ॥ ७ ॥**

ता ॥ यद्येवं त्वद्विभूतितया तवांश एव, तर्हि नित्यसूरिवर्गवदविशेषेण सर्वेषां परिशुद्धाकारयोगः किं न स्यादित्यत्र बद्धस्यापि स्वविभूतित्वमनूद्य बद्धमुक्तादिव्यवस्थापनं * ममैवांशः इत्यादिनोच्यत इत्यभिप्रायेणाह—**इत्थमुक्तस्वरूप** इति ॥ ७ ॥$

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ ८

भा ॥ **यच्छरीरमवाप्नोति, यस्माच्छरीरादुत्क्रामति, तत्रायमिन्द्रियाणामीश्वरः एतानीन्द्रियाणि भूतसूक्ष्मैस्सह गृहीत्वा संयाति । वायुर्गन्धानिवाशयात्—यथा वायुः स्रक्चन्दनकस्तूरिकाद्याशयात्—तत्स्थानात् सूक्ष्माशयवैस्सह गन्धान् गृहीत्वाऽन्यत्र संयाति, तद्वदित्यर्थः ॥ ८ ॥**

$ अत्र ७. ८. ९. श्लोकानां तात्पर्यचन्द्रिका न लभ्यते ।

भा ॥ कानि पुनस्तानीन्द्रियाणीत्यत्राह—

श्रोत्रं चक्षुस्स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९

भा ॥ एतानि मनष्षष्ठानीन्द्रियाण्यधिष्ठाय—स्वस्वविषयवृत्त्यनुगुणानि कृत्वा, तान् शब्दादीन् विषयानुपसेवते—उपभुङ्क्ते ॥ ९ ॥

उत्क्रामन्तं स्थितं वाऽपि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १०

भा ॥ एवं गुणान्वितं सत्त्वादिगुणमयप्रकृतिपरिणामविशेषमनुष्यत्वादिसंस्थानपिण्डसंसृष्टम्, पिण्डविशेषादुत्क्रामन्तं पिण्डविशेषेऽवस्थितं वा, गुणमयान् विषयान् भुञ्जानं वा कदाचिदपि प्रकृतिपरिणामविशेषमनुष्यत्वादिपिण्डाद्विलक्षणं ज्ञानैकाकारं विमूढा नानुपश्यन्ति । विमूढाः—मनुष्यत्वादिपिण्डाकारात्माभिमानिनः । ज्ञानचक्षुषस्तु पिण्डात्मविवेकविषयज्ञानवन्तः सर्वावस्थमप्येनं विविक्ताकारमेव पश्यन्ति ॥ १०

ता ॥ कर्मकलापनिगलितस्य कलेवरकारागृहेऽवस्थानम्, तत्रोत्क्रमणप्रवेशादिक्लेशाः, तत्रस्थस्य च विषमधुकल्पक्षुद्रतरविषयोपसेवा चोक्तानि । अथ तदुपरि तन्निदानभूतमात्मापहरणचौर्यमुपक्षिप्य योग्यानुपलम्भं च परिहरति—* उत्क्रामन्तमिति श्लोकेन । गुणान्वितत्वमितरेषां हेतुरित्यभिप्रायेण पूर्वं तद्व्याख्या । उत्क्रमणादिकथनं सर्वावस्थोपलक्षणमित्यभिप्रायेण **कदाचिदपीत्युक्तम्** । अहमिति नित्यमुपलभ्यमाने सर्वेषां स्वात्मनि, भुञ्जानतादौ च स्वात्मसाक्षिके कथं केचिन्नानुपश्यन्तीत्युच्यत इत्यत्राह—**मनुष्यत्वादिपिण्डाद्विलक्षण**मिति । प्रकृतिपरिणामविशेषमनुष्यत्वादिविशिष्टपिण्डादित्यर्थः । ज्ञानैकाकारत्वोक्तिर्वैलक्षण्यप्रकाराणामुपलक्षणार्था । * विमूढा नानुपश्यन्तीति भगवतस्सानुक्रोशोक्तिः । यथावस्थितात्मादर्शनमूलं विमूढत्वं तद्विषयमेवेत्याह—**मनुष्यत्वादिपिण्डात्माभिमानिन** इति । नित्यस्वप्रकाशत्वाद्व्यतिरेकाय विविक्ताकारत्वोक्तिः ॥ १० ॥

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ ११

भा ॥ मत्प्रपत्तिपूर्वकं कर्मयोगादिषु यतमानास्तैर्निर्मलान्तःकरणा योगिनो योगाख्येन चक्षुषा आत्मनि—शरीरेऽवस्थितमपि शरीराद्विविक्तं स्वेन रूपेणावस्थितमेनं पश्यन्ति । यतमाना अप्यकृतात्मानः—मत्प्रपत्तिविरहिणः तत एवासंस्कृतमनसः, तत एवाचेतसः—आत्मावलोकनसमर्थचेतोरहिताः, नैनं पश्यन्ति ॥

ता ॥ उक्त एवार्थस्सहेतुकमुपपाद्यते—*यतन्त इति श्लोकेन । *यतन्तो योगिन इति पूर्वप्रपञ्चितमिह स्मारितमित्याह—**मत्प्रपत्तिपूर्वक**मिति । आत्मशब्दोऽत्रार्थान्तरानन्वयात्प्रस्तुतशरीरविषयः । तथा सत्यदर्शनशङ्काहेतुश्चानूदितो भवतीत्यभिप्रायेणाह—**शरीरेऽवस्थितमपी**ति । यतमानानां कथमकृतात्मत्वमित्यत्राह—**मत्प्रपत्तिविरहिण** इति । अत्रासंस्कृतमनस्त्वम्—शरणवरणाभावः । विद्यमानस्यापि चेतसः प्रकृतोपयोगाभावादसत्कल्पत्वमचेतश्शब्देन विवक्षितमित्याह—**आत्मावलोकनसमर्थचेतोरहिता** इति ॥ ११ ॥

भा ॥ एवं रविचन्द्राग्नीनामिन्द्रियसन्निकर्षविरोधिसंतमसनिरसनमुखेनेन्द्रियानुग्राहकतया प्रकाशकानां ज्योतिष्मतामपि प्रकाशकज्ञानज्योतिरात्मा मुक्तावस्थो जीवावस्थश्च भगवद्विभूतिरित्युक्तम् – * तद्धाम परमं मम * ममैवांशो जीवलोके जीवभूतस्सनातनः इति । इदानीमचित्परिणामविशेषभूतमादित्यादीनां ज्योतिष्मतां ज्योतिरपि भगवद्विभूतिरित्याह—

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२

भा ॥ अखिलस्य जगतो भासकमेतेषामादित्यादीनां यत्तेजः, तन्मदीयं तेजः—तैस्तैरारार्धितेन मया तेभ्यो दत्तमिति विद्धि ॥ १२ ॥

ता ॥ * यदादित्यगतं तेजः इत्यादेः पूर्वोत्तरासङ्गतिपरिहाराय सुखग्रहणाय चोक्तमर्थं निष्कृष्याह—**एवं रविचन्द्राग्नीना**मिति । आत्मज्योतिषो विभूतित्वोक्त्यनन्तरं तत्प्रकाशनासमर्थतया व्यवच्छेद्यत्वेन प्रसक्तानां प्राकृतज्योतिषामपि विभूतित्वोक्तिर्युक्तेत्युक्तं भवति । अन्येषां तेजः कथमन्यस्य स्यात् ? अतोऽत्रादित्यादितादात्म्यं प्रतीयत इत्य-त्राह—**तैस्तैराराधितेने**ति । श्रूयते हि * येन सूर्यस्तपति तेजसेद्धः (काठ. ३. ९), * यस्यादित्यो भासुपयुज्य भाति, * न तत्र सूर्यो भातीत्युपक्रम्य * तस्य भासा सर्वमिदं विभाति (मु. २. २. ११) इति । अतस्सर्वं स्वत ईश्वरशेषभूतं सत् तत्तत्कर्मानुरूपात्तत्सङ्कल्पात्किय न्तंचित्कालमन्येषामपि शेषत्वं भजत इति भावः । अत्र तेजश्शब्देन चैतन्यज्योतिर्विवक्षा * जगद्भासयतेऽखिलमित्यादिना न सङ्गच्छते ; नह्यादित्यादिगतत्वेन चैतन्यमस्माकं घटादीन् प्रकाशयति । सर्वत्र चैतन्याविशेषेऽप्यादित्यादिषु सत्त्वाधिक्याद्दर्पणादिवदित्यप्यसारम्, तन्मते चैतन्यस्य व्यङ्ग्यत्वाद्यसंभवादिति ॥ १२ ॥

भा ॥ पृथिव्याश्च भूतधारिण्या धारकत्वशक्तिर्मदीयेत्याह—

गामाविश्य च भूतानि धारयाम्यहमोजसा ॥
पुष्णामि चौषधीस्सर्वास्सोमो भूत्वा रसात्मकः ॥ १३

भा ॥ अहं पृथिवीमाविश्य सर्वाणि भूतान्योजसा—ममाप्रतिहतसामर्थ्येन धारयामि । तथाऽहममृतरसमयस्सोमो भूत्वा सर्वौषधीः पुष्णामि ॥ १३ ॥

ता ॥ ज्योतिषां प्रकाशकत्वशक्तिस्स्वकीयेत्युक्तम् ; एवमन्येषामपि सर्वेषां तत्तद्विशेषकार्यजननशक्तिस्स्वकीयेति पृथिवीसोमवैश्वानराणां धारणाप्यायनपचनशक्तिभिरुपलक्ष्यते ; अन्यथा स्वशक्तिमात्रकथने प्रकृतवैरूप्यादित्यभिप्रायेणाह—**पृथिव्याश्च भूतधारिण्याः धारकत्वशक्तिर्मदीयेति । सर्वाणी**ति—चराणि स्थावराणि चेत्यर्थः । अन्ये हि पदार्थाः प्रतिघातिना संयोगेन धारयन्ति ; अतस्तद्व्यवच्छेदार्थम् * ओजसा इति स्वासाधारणशक्तिनिर्देशः । तदभावे पृथिव्या धारकत्वशक्तिः प्रतिहन्येतेत्यभिप्रायेणाह—**ममाप्रतिहतसामर्थ्येने**ति । श्रूयते च * येन द्यौरुग्रा पृथिवी च दृढे (यजु. ४. १. ८. ५) * स दाधार पृथिवीं द्यामुतेमां (यजु. ४. २. ८. २) * येनेमे विधृते उमे, विष्णुना विधृते भूमी (य. आ. १. ८. २) * एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः (बृ. ५. ८. ९) इति ।

सोमत्वाकारोऽत्र रसात्मक इति विशेष्यते । तेन पोषणद्वारविवक्षामाह—**अमृतरसमयस्सोमो भूत्वेति** । अत्र विशेषणशक्त्या रसैः पुष्णामीति गम्यते ॥ १३ ॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४

भा ॥ अहं वैश्वानरः—जाठरानलो भूत्वा सर्वेषां प्राणिनां देहमाश्रितः तैर्भुक्तं खाद्यचो[चू]ष्यलेह्यपेयात्मकं चतुर्विधमन्नं प्राणापानवृत्तिभेदसमायुक्तः पचामि ॥ १४ ॥

ता ॥ जाठरानलो भूत्वेति । * कोष्ठेऽग्नि[र्भुक्तमृ]र्भोक्तुमिच्छति (मो. ध. २४५. ८) इति तेन भुक्तमिति भावः । ननु * त्रेधा विहितं वा इदमन्नमशनं पानं खाद[त] इति वचनात्कथं चातुर्विध्यम् ? तत्राह—**खाद्यचूष्यलेह्यपेयात्मक**मिति । आकारान्तरेण संग्रहादन्यत्र त्रैधोपदेश इति भावः । * अपानप्राणयोर्मध्ये प्राणापानसमाहितः । समन्वितस्समानेन सम्यक्पचति पावकः ॥ (भा. आनु. २४६. २३) इत्यादिष्वान्तरपवनवृत्तिसन्धुक्षितो ह्यग्निः पचनाय प्रभवतीत्युच्यत इत्यभिप्रायेणाह—**प्राणापानवृत्तिभेदसमायुक्त** इति । एक एव हि वायुश्शारीरोऽनेकवृत्तिरिति * पञ्चवृत्तिर्मनोवद्व्यपदिश्यते (ब्र. २. ४. ११) इति सूत्रभाष्येण * प्राणोऽपानो व्यान उदानस्समान इत्येतत्सर्वं प्राण एव (बृ. १. ५. ३) इति श्रुत्योप्पादितम् ॥ १४ ॥

भा ॥ अत्र परमपुरुषविभूतिभूतौ सोमवैश्वानरौ * अहं सोमो भूत्वा * वैश्वानरो भूत्वेति तत्सामानाधिकरण्येन निर्दिष्टौ । तयोश्च सर्वस्य भूतजातस्य च परमपुरुषसामानाधिकरण्यनिर्देशहेतुमाह—

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ १५

भा ॥ तयोस्सोमवैश्वानरयोः सर्वस्य च भूतजातस्य सकलप्रवृत्तिनिवृत्तिमूलज्ञानोदयदेशे हृदि सर्वं मत्संकल्पेन नियच्छन् अहमात्मतया सन्निविष्टः । तथाहुश्रुतयः * अन्तःप्रविष्टश्शास्ता जनानां सर्वात्मा (य आ. ३. ११. २) * यः पृथिव्यां तिष्ठन् (बृ. ५. ७. ३) * य आत्मनि तिष्ठन्नात्मनोऽन्तरो...यमयति, (बृ ५. ७. २२. मा) * पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् (ना) * अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म (छा. ८.१.१) इत्याद्याः । स्मृतयश्च * शास्ता विष्णुरशेषस्य जगतो यो जगन्मयः (वि. १.१७. २०), * प्रशासितारं सर्वेषामणीयांसमणीयसां (मनु. १२. १२२), यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः (मनु. ८. ९२) इत्याद्याः । अतो मत्त एव सर्वेषां स्मृतिर्जायते ; स्मृतिः—पूर्वानुभूतविषयमनुभवसंस्कारमात्रजं ज्ञानम् । ज्ञानम्—इन्द्रियलिङ्गागमयोगजो वस्तुनिश्चयः ; सोऽपि मत्तः । अपोहनं च, अपोहनम्—ज्ञाननिवृत्तिः । अपोहनम्—ऊहनं वा, ऊहनमूहः, ऊहो नामेदं प्रमाणमित्थं प्रवर्तितुमर्हतीति प्रमाणप्रवृत्त्यर्हतानिष्ठं सामग्र्यादिनिरूपणजन्यं प्रमाणानुग्राहकं ज्ञानम् ; स चोहो मत्त एव । वेदैश्च सर्वैरहमेव वेद्यः । अतोऽग्निसूर्यवायुसोमेन्द्रादीनां मदन्तर्यामिकत्वेन मदात्मकत्वात्तत्प्रतिपादनपरैरपि सर्वैर्वेदैरहमेव वेद्यः, देवमनुष्यादिशब्दैर्जीवात्मैव । वेदान्तकृत्—वेदानाम्—* इन्द्रं यजेत, वरुणं यजेतेत्येवमादीनामन्तः—फलम् ; फले हि ते सर्वे वेदाः पर्यवस्यन्ति ; अन्तकृत्—फलकृत् ; वेदोदितफलस्य प्रदाता चाहमेवेत्यर्थः । तदुक्तं पूर्वमेव * यो यो यां यां तनुं भक्तः श्रद्धया-

ऽर्चितुमिच्छति (७. २१) इत्यारभ्य * लभते च ततः कामान् मयैव विहितान् हि तानिति, * अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च (९. २४) इति च। वेदविदेव चाहं—वेदविद्याहमेव। एवं मदभिधायिनं वेदमहमेव वेद ; इतोऽन्यथा यो वेदार्थं ब्रूते न स वेदविदित्यभिप्रायः ॥ १५ ॥

ता ॥ * सर्वस्य चाहमिति श्लोकस्यासङ्गत्यशङ्कापरिहारायोक्तसामानाधिकरण्यहेतुपरत्वेन सङ्गतिमाह—**अत्र परमपुरुषविभूतिभूताविति**त्यादिना । चशब्द उक्तसमुच्चयार्थ इत्यभिप्रेत्य उक्तार्थमाह—**तयोस्सोमवैश्वानरयो**रिति । * सर्वस्येत्यस्य * हृदीत्येतत्समभिव्याहारसामर्थ्यलब्धार्थमाह—**सर्वस्य भूतजातस्ये**ति । * हृदीति निर्देशस्य प्रयोजनं सूचयितुं तत्स्वभावमाह—**सकलप्रवृत्ती**ति । आकाशवन्निविष्टत्वव्यवच्छेदायाह—**आत्मतया सन्निविष्ट** इति । आत्मत्वोपपादनायोक्तम्—**सर्वं मत्सङ्कल्पेन नियच्छन्नि**ति । **तथाऽऽहु**रिति—नियमनार्थमन्तःप्रविष्टत्वेनात्मत्वेन चेममाहुरित्यर्थः । प्रथमपादोक्तार्थो द्वितीयपादेनोच्यमानार्थे हेतुरित्याह—**अत** इति । **सर्वेषां, जायत** इति चार्थसिद्धकथनम् । श्रुत्युपबृंहणस्मृतिभ्रमव्युदासायाह—**स्मृतिरि**ति । बाह्यविषयानन्वितत्वमतव्युदासायोक्तम्—**पूर्वानुभूतविषय**मिति । प्रत्यभिज्ञानप्रत्यक्षव्यावृत्त्यर्थं मात्रपदम् । गोबलीवर्दन्यायमभिप्रेत्य ज्ञानपदं व्याचष्टे—**इन्द्रियलिङ्गे**ति । * अपोढदोष इत्यादिप्रयोगानुसारेणापोहनशब्दस्य निवृत्तिपरत्वम्, निवृत्तेः प्रतियोगिसाकाङ्क्षत्वेन प्रकृतज्ञानप्रतियोगिकत्वं चाभिप्रेत्याह—**अपोहनं ज्ञाननिवृत्ति**रिति । पूर्वम् * अपपरी वर्जने (अष्टा. १. ४. ८८) इत्यपेत्यस्य वर्जनद्योतकत्वमभिप्रेत्य व्याख्यातम् ; इदानीं तदविवक्षया * अध्याहारस्तर्क ऊहः (नाम. १. धी) इति कोशानुसारेण ज्ञानपदोक्तप्रमाणज्ञानानुग्राहकतर्कपरत्वमुचितमित्यभिप्रायेण व्याचष्टे—**अपोहनमूहनं वे**ति । ऊहनशब्दश्च भावे ल्युडन्त इत्याशयेनाह—**ऊहनमूह** इति । **इत्थं प्रवर्तितुमर्हती**ति—चाक्षुषप्रमा रूपिरूपतदेकाश्रययोग्यचक्षुस्संबन्धविषये प्रवर्तितुमर्हतीत्येवमादिरूपप्रमाणप्रवृत्त्यर्हताविषयमित्यर्थः । * सर्वस्य चाहं हृदि सन्निविष्टः इत्युक्तसर्वान्तरात्मत्वस्य * वेदैश्च सर्वैरहमेव वेद्यः इत्यत्रापि हेतुत्वमाह—**अत** इति । **सर्वैर्वेदैरहमेव वेद्य** इति—* नारायणं महाज्ञेयम् (ना) * वचसां वाच्यमुत्तमम् (जि) इत्युक्तप्रधानवेद्योऽहमेवेत्यर्थः । शरीरवाचिशब्दैरात्मन एव प्रधानवेद्यत्वे दृष्टान्तमाह—**देवमनुष्यादी**ति । * चत्वारः पञ्चदशरात्रा देवत्वं गच्छन्ति, * शरीरजैः कर्मदोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥ (मनु. १२. ९) इत्याद्यनन्यथासिद्धवैदिकलौकिकप्रयोगान्मनुष्यादिशब्दानामात्मपर्यन्तत्वं मुख्यमेवेति भावः । वेदान्तशब्दस्योपनिषत्परत्वे वेदनाशपरत्वे च प्रकृतासङ्गत्याऽनुपपत्त्या चान्तशब्दस्य चरमवाचित्वमभिप्रेत्य व्याचष्टे—**वेदाना**मिति । **इन्द्रं यजेते**ति—इन्द्रं यजेत, वरुणं यजेतेत्येवमर्थवाक्यानामित्यर्थः । * ऐन्द्रं दध्यमावास्यायाम् (यजु. २. ५. ४. १), * ऐन्द्रं पयोऽमावास्यायां * तावतो वारुणांश्चतुष्कपालान्निर्वपेत् (यजु. २. ३. १२. १) इत्यादीनामिति यावत् । अन्तशब्दस्य कथं फलपरत्वमित्यतस्तदुपपादयति—**फले** हीति । * अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च (गी. ९. २४) इतिवत् । * वेदैश्च सर्वैरहमेव वेद्यः इत्यनेन फलितसर्वकर्मसमाराध्यत्वानन्तरं तत्फलप्रदत्वोक्तिस्तैरेव सङ्गतेति सूचयन्फलितमर्थं ससंवादमाह—**वेदोदितफलस्ये**त्यादिना । एवकारस्य यथाश्रुतान्वये अयोगव्यवच्छेदार्थत्वं स्यात् ; तच्चायुक्तम्, भगवति वेदवित्त्वायोगस्या[प्रस]युक्तेः ; अतो विशेष्यान्वयमाह—**वेदविद्याहमेवे**ति । * ये च वेदविदो विप्राः (भा. व. ८६. २६) इति भगवदतिरिक्तानामपि वेदवित्त्वप्रतीतेः **अहमेवे**ति कथमितरयोगव्यवच्छेद इत्यतस्तदभिप्रायमाह—**एवं मदभिधायिन**मिति ॥ १५ ॥

भा ॥ अतो मत्त एव सर्ववेदानां सारभूतमर्थं शृणु—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६

भा ॥ क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्रथितौ । तत्र क्षरशब्दनिर्दिष्टः पुरुषो जीवशब्दाभिलपनीयब्रह्मादिस्तम्बपर्यन्तक्षरणस्वभावाचित्संसृष्टसर्वभूतानि । अत्राचित्संसर्गरूपैकोपाधिना पुरुष इत्येकत्वनिर्देशः । अक्षरशब्दनिर्दिष्टः कूटस्थः अचित्संसर्गवियुक्तः स्वेन रूपेणावस्थितो मुक्तात्मा । स त्वचित्संसर्गाभावादचित्परिणामविशेषब्रह्मादिदेहासाधारणो न भवतीति कूटस्थ इत्युच्यते । अत्राप्येकत्वनिर्देशोऽचिद्वियोगरूपैकोपाधिनाऽभिहितः । नहीतः पूर्वमनादौ काले मुक्त एक एव । यथोक्तं * बहवो ज्ञानतपसा पूता मद्भावमागताः (गी. ४. १०) * सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च (१४. २) इति ॥ १६ ॥

ता ॥ सर्ववेदसाररूपपुरुषोत्तमयाथात्म्यप्रतिपादनमुक्तेन सङ्गमयन्नवतारयति—**अतो मत्त एवेति** । लोक्यतेऽनेनेति व्युत्पत्त्या प्रमाणपरत्वमभिप्रेत्य * प्रथितः इत्येतदनुषज्य वचनविपरिणामेन योजयति—**लोके प्रथितावि**ति । **प्रमाणं च** *अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः (ना) इत्यादिकमभिप्रेतम् । पुरुषशब्दनिर्दिष्टात्मनस्स्वरूपेण क्षरत्वायोगाच्छरीरद्वारा तदित्यभिप्रेत्य तृतीयपादं व्याचष्टे—**तत्र क्षरशब्दनिर्दिष्ट** इत्यादिना । * क्षरः इत्येकत्वनिर्देशेन * भूतानीति बहुत्वनिर्देशस्तूपाधिकृत इति शङ्काव्युदासायाह—**अत्राचित्संसर्गे**ति । बद्धात्मनां स्वरूपतो भेदाभावे सर्वदुःखसुखप्रतिसन्धानं सर्वेषां स्यादिति भावः । कूटस्थशब्दोऽनेकसन्ततिमूलपुरुषे प्रसिद्धः; सचात्र न परमपुरुषः, *उत्तमः पुरुषस्त्वन्य इति तस्य पृथग्वक्ष्यमाणत्वात् । नापि हिरण्यगर्भादिः, तस्य देहसंबन्धित्वेन क्षरशब्दनिर्दिष्टत्वात्; नापि मुक्तात्मा, रूढ्याद्यविषयत्वादित्यतस्तत्र योगवृत्तिमभिप्रेत्य मुक्तात्मपर इत्याह—**अचित्संसर्गवियुक्त इति** । योगवृत्तिमुपपादयति—**स त्विति** । **ब्रह्मादिदेहे**ति—ब्रह्मादिदेहसंबन्धायत्तविचित्रसुखदुःखाद्यसाधारणाकारो न भवतीत्यर्थः । एतेन *स्वेन रूपेणाभिनिष्पद्यते (छा. ८.१२.२) इति श्रुत्युक्तासङ्कुचितज्ञानैकाकारत्वलक्षणसाधारणाकारो भवतीत्युक्तं भवति । तथाच कूटवत्तिष्ठतीति कूटस्थ इति व्युत्पत्तिरपि सूचिता । साधारणाकारत्वमेवात्र कूटसादृश्यमिति भावः । अत्राप्येकत्वनिर्देश एकोपाधिक्रोडीकारनिबन्धन एवेत्याह—**अत्रापी**ति । **निर्देशः अभिहित** इत्येतत्, * पाकं पचतीतिवद्दृष्टव्यम् । उक्तार्थे हेत्वभिप्रायेण मुक्तात्मबहुत्वं सप्रमाणमाह—**पूर्वमनादौ काल** इति ॥ १६ ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७

भा ॥ उत्तमः पुरुषस्तु ताभ्यां क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्यः—अर्थान्तरभूतः परमात्मेत्युदाहृतस्सर्वासु श्रुतिषु । परमात्मेति निर्देशादेव ह्युत्तमः पुरुषो बद्धमुक्तपुरुषाभ्यामर्थान्तरभूत इत्यवगम्यते । कथम्? यो लोकत्रयमाविश्य बिभर्ति—लोक्यत इति लोकः, तत्त्रयम्—लोकत्रयम्; अचेतनं तत्संसृष्टचेतनो मुक्तश्चेति प्रमाणावगम्यमेतत्त्रयं य आत्मतया आविश्य बिभर्ति, स तस्माद्व्याप्यादर्तव्याद्यार्थान्तरभूतः; यतस्सोऽव्ययः, ईश्वरश्च; अव्ययस्वभावो हि व्ययस्वभावादचेतनासंबन्धेन तदनुसारिणश्चेतनादचित्संबन्धयोग्यतया पूर्वसंबन्धिनो मुक्ताद्यार्थान्तरभूत एव । तथैतस्य लोकत्रयस्येश्वरः, ईशितव्यात्तस्मादर्थान्तरभूतः ॥ १७ ॥

ता ॥ अप्राप्तत्वादन्यत्वस्य विधेयत्वं वदन् तस्य प्रतियोगिसापेक्षत्वात्प्रकृतक्षराक्षरपुरुषयोरेव प्रतियोगित्वमाह—**उत्तमः पुरुषस्तु ताभ्यामिति** । * परमात्मेत्युदाहृत इत्यस्य विधेयपरत्वासंभवेन अन्यत्वहेतुपरत्वमाह—**सर्वासु श्रुतिष्विति** । * तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः (ना), * आत्मा नारायणः परः (ना) इत्यादिष्वित्यर्थः । **परमात्मेतिनिर्देशहेतुत्वोपपादकत्वेनोत्तरार्धमवतारयति—कथमिति** । लोकशब्दस्य भुवनपरत्वे लोकत्रयं—भूरादिलोकत्रयं, स्वर्गमर्त्यपातालरूपलोकत्रयं वा स्यात् । तथा च तद्व्यापनभरणयोस्सर्वात्मत्वपर्यवसितपरमात्मत्वोपपादकत्वेन क्षराक्षरात्मकसर्वान्यत्वसाधकत्वं न स्यात् । कृतकमकृतकं कृतकाकृतकमिति लोकत्रयपरत्वेऽपि तत्रत्यपुरुषेषु लक्षणा स्वीकार्या; ततो वरं योगवृत्त्याश्रयणमित्यभिप्रेत्य व्याचष्टे—**लोक्यत इति लोक** इत्यादिना । कथमचाक्षुषयोर्बद्धमुक्तयोर्लोकनकर्मत्वमित्यत आह—**प्रमाणावगम्यमेतत्त्रयमिति** । * य इति * अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा (य. आ. ३. ११), * भर्ता सन् म्रियमाणो बिभर्ति (य. आ. ३. १४) इत्यादिकमत्राभिप्रेतम् । **स इति**—परमात्मेति निर्दिष्ट इत्यर्थः । * य इत्यस्य तत्परत्वात्प्रत्येकं विशेषणानामन्यत्वसाधन[ा]सामर्थ्यात्तदर्थस्थितिमात्रविवक्षायामत्रानपेक्षितोक्त्या पदान्तरवैयर्थ्यादित्यभिप्रायेणाह—**इतश्चेति** । अत्रावेशभरणेश्वरत्वानां कर्मकर्तृभावेन [निर्दिष्टयोः] अन्यत्वोपस्थापकत्वम्, अव्ययत्वस्य तु साक्षात्स्वभावविरोधादित्यभिप्रायेणाह—**अव्ययस्वभावो होति** । एवमवान्तरवैषम्यं दर्शयिष्यति—* अव्ययस्वभावतया व्यापनभरणैश्वर्यादियोगेन चेति । **तत्संबन्धेन तदनुसारिण इति**—तदधीनजन्मविनाशादिक्लेशभाज इत्यर्थः; तद्वत् ज्ञानसङ्कोचविकासलक्षणविकारयोगिन इति वा । योग्यता नाम, सहकारिसन्निधौ कुर्वत्स्वभावत्वं, सहकार्यभावप्रयुक्तकार्याभाववत्त्वं वा । सा च मुक्तस्याप्यस्तीति स्वभावविरोधस्तत्राप्यविशिष्ट इत्याह—**अचित्संबन्धयोग्यतया पूर्वसंबन्धिन इति** । अनवच्छिन्ना[त्म]व्ययत्वं मुक्तस्यापि नास्तीति भावः । ईश्वरशब्दोऽत्र नानुपयुक्तसंज्ञामात्ररूप इत्यभिप्रायेणाह—**तथैतस्येति** । अत्रात्मलक्षणान्तर्गतानुप्रवेशधारणनियमनानां कण्ठोक्तौ स्वार्थधारणादिवशादेव शेषित्वमपि सिध्यतीत्यभिप्रायेण संग्रहश्लोके स्वाम्योक्तिः । तथाच तत्र नियन्तृत्वमुपलक्षणीयम् । एवम् * अव्ययत्वव्यापनभरण स्वाम्यैरित्यनन्तराध्यायारम्भभाष्येऽपि द्रष्टव्यम् । यद्वा केवलनियन्तृत्वादिविशिष्टेष्वपीश्वरशब्दस्य प्रयुक्तचरत्वाभावात्स्वाम्योपश्लिष्टनियमनवेषे च निरूढप्रयोगत्वादीश्वरशब्देनैव शेषित्वमप्युपस्थापितम् । अपि चात्र * यः इति व्यासप्रद्यनुवादे * मयि सर्वमिदं प्रोतम् (७. ७) इत्यादिपुरोवादपरामर्शात्तत्प्रकरणे * भूमिरापः (७. ४) इत्यादिनोक्तं शेषित्वमप्याकृष्यत इति * पतिं विश्वस्यात्मेश्वरम् (ना) इति पतिशब्दस्थाने चेश्वरशब्दः प्रयुक्त इति भावः ॥ १७ ॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८

भा ॥ यस्मादेवमुक्तैस्स्वभावैः क्षरं पुरुषमतीतोऽहम्, अक्षरान्मुक्तादप्युक्तैर्हेतुभिरुत्कृष्टतमः, अतोऽहं लोके वेदे च पुरुषोत्तम इति प्रथितोऽस्मि । वेदार्थावलोकनाल्लोक इति स्मृतिरिहोच्यते । श्रुतौ स्मृतौ चेत्यर्थः । श्रुतौ तावत् * परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, स उत्तमः पुरुषः (छा. ८. १२. ३) इत्यादौ । स्मृतावपि * अंशावतारं पुरुषोत्तमस्य ह्यनादिमध्यान्तमजस्य विष्णोः (वि. ५. १७. ३३) इत्यादौ ॥१८॥

ता ॥ एवं प्रतिज्ञातमन्यत्वं श्रुतिस्मृतिप्रसिद्धधात्वर्थया समाख्यया स्थापितम् । तदेव पुनस्तथाभूतसमाख्यान्तरेण * उत्तमः पुरुष इत्यनुवादस्मारितेन स्थिरीक्रियते * यस्मादिति श्लोकेन । एतेन पूर्वश्लोके पराक्त्वनिर्देशोऽपि

स्वविषय एवेति दर्शितम्। अत्र यतोऽसावग्निमान्, अत एव धूमवानित्यादिवत्साध्यमेव साधकं प्रति नियामकतया हेतुर्व्यपदिश्यते। तच्च साध्यं सहेतुकमिह समाख्यानिदानमित्यभिप्रायेणाह—**यस्मादेवमुक्तैस्स्वभावैरिति**। *क्षरमतीत इति तत्स्वभावगन्धानाघ्रातत्वमुच्यते। अत्रापि क्षरशब्दः प्रस्तुतैकार्थ्यान्न प्रधानविषय इत्याह—**क्षरं पुरुषमिति**। अक्षरशब्दस्य प्रधानेश्वरादिष्वपि प्रयोगात्तद्व्यवच्छेदाय *कूटस्थोऽक्षरः इत्युक्तैकार्थ्यमाह—**अक्षरान्मुक्तादिति**। एतेन पुरुषोत्तमशब्दनिरुक्तिरप्यत्र दर्शिता। **उक्तैर्हेतुभिरिति**—*षष्ठी हेतुप्रयोगे (अष्टा. २. ३. २६) इति नियमस्य प्रयोजनरूपहेतुविषयतयैव प्रयोगप्राचुर्यान्न तृतीयानुपपत्तिः। उत्तमशब्दे प्रकृतिप्रत्ययभेदेन विवक्षितमाह—**उत्कृष्टतम इति**। मुक्तो हि बद्धादुत्कृष्टः; ततोऽप्यसौ सर्वान्तरात्मत्वादिभिरुक्तैर्हेतुभिरुत्कृष्टतमः। प्रथितशब्देन केवलप्रथाविधेः प्रकृतानन्वयात्सविशेषणोऽसौ विशेषणोपसंक्रामीत्यभिप्रायेण **पुरुषोत्तम इतीति** इतिकरणम्। नात्र लोकशब्दो भुवनविषयो जनविषयो वा, तत्र प्रकृतनिरुक्तिविवक्षाप्रमाणत्वासंभवात्। नच काव्यादिप्रयोगपरता, तत्राप्यतितरां स्वारस्याभावात्। अतो वेदसहपाठात्तदनुवर्तिस्मृतिपरोऽयम्, तत्र च लोक्यतेऽनेन वेदार्थ इति व्युत्पत्त्या वृत्तिरित्यभिप्रायेणाह—**वेदार्थावलोकनादिति**। **श्रुतौ स्मृतौ चेत्यर्थ** इति। अयमभिप्रायः—श्रूयते नित्यमिति हि श्रुतिः। अतो वक्तृदोषप्रसङ्गाभावादशिथिलसंप्रदायत्वाच्च तदुक्तं तावत्प्रामाणिकमेव। स्मृतिरप्यल्पश्रुतैर्दुरवबोधसकलशाखानुगतमर्थं सङ्कलय्योपबृंहयन्ती परमाप्ततममन्वादिप्रणीता प्रमाणमेवेति तया वेदार्थावलोकनं युक्तमिति। *परं ज्योतिरुपसंपद्येति मुक्तोपसंपत्तव्यतया निर्दिष्टो निरतिशयदीप्तियुक्तः पुरुष एवात्र *स उत्तमः पुरुषः इति परामृश्य विशेष्यते; तदुपबृंहणाय हि *उत्तमः पुरुषस्त्वन्यः इति तत्तुल्यव्यस्तप्रयोगोऽयं प्रदर्शित इत्यभिप्रायेण *परं ज्योतिरित्यादिवाक्योदाहरणम्। अत्र *प्रथितः पुरुषोत्तमः इत्यस्योक्तसमस्तप्रयोगप्रदर्शनार्थतया *अंशावतारं पुरुषोत्तमस्येति स्मृत्युदाहृतिः। अत्र *विष्णोरिति संज्ञानिर्देशोऽपि *पुरुषोत्तमस्येति विशेषणैकार्थ्यस्य विवक्षितत्वाद्योगरूढोऽयं शब्द इति सिद्धम्। एतेन *रूढ्या तु कामं पुरुषोत्तमोऽस्तु इति प्रलपन् वेदबाह्यः प्रत्युक्तः। ननु कथं यौगिकार्थविवक्षायामस्य साधुता, न तावदसौ समानाधिकरणसमासः, *सन् महत्परमोत्तमोत्कृष्टाः पूज्यमानैः (अष्टा. २. १. ६१) इति प्रथमानिर्दिष्टस्योत्तमशब्दस्योपसर्जनतया पूर्वनिपातापातात्। नापि व्यधिकरणसमासः, उत्तमः पुरुष इवेत्युपमितविवक्षानुपपत्तेः; तदर्थतयोदाहृतायां श्रुतावपि वैयधिकरण्यादर्शनात्। नचासौ षष्ठीसमासः, निर्धारणे तन्निषेधात्। नचान्यस्यापीह संभव इति। मैवं; षष्ठीसमासस्यैवात्र युक्तत्वात्; नहि वयमत्र निर्धारणार्थतां ब्रूमः। पुत्रादिवत्संबन्धिशब्दो ह्यसौ। अधमादिसापेक्षं ह्युत्तमत्वम्। इदं च सूचितम्—**उक्तैर्हेतुभिरुत्कृष्टतम** इति। जातिगुणादिसंबन्धिशब्देषु हि निर्धारणे षष्ठी। संबन्धसामान्यविहिता च षष्ठी तत्तत्संबन्धिशब्दसमभिव्याहारानुरोधेन तत्संबन्धविशेषं प्रतिपादयति। एवमेव हि नागोत्तमादिशब्दानां साधुत्वं वैयाकरणैर्व्याख्यातम्। अत्र च *उत्तमःपुरुषस्त्वन्यः, *क्षरमतीतोऽहमक्षरादपि चोत्तमः इति चार्थकथनमात्रं, ननु तत्समासांशद्वयविवक्षा। एवमेव *स उत्तमः पुरुष इति श्रुत्युदाहरणमपि। केचित्तु पञ्चमीसमासं व्याकुर्वते। नचोत्तमशब्दयोगे पञ्चमी न शिष्टेति वाच्यं; यथा *यस्मादधिकम् (अष्टा. २. ३. ९) इत्यादिसौत्रप्रयोगादशिष्टस्यापि परिग्रहः; एवम् *अक्षरादपि चोत्तमः इत्यादिप्रयोगबलादेव तत्परिग्रहोपपत्तेः। इदमपि सूचितम्—**मुक्तादप्युक्तैर्हेतुभिरुत्कृष्टतम** इति। योगविभागाच्च पञ्चम्या उत्तमादिशब्दैस्समासोऽप्यनुशिष्ट एव। एवं सप्तमीसमासत्वेऽपि न दोषः, शौण्डादिष्वपठितत्वेऽपि तत्रापि योगविभागाभ्यनुज्ञानादेव तदुपपत्तेः। एतत्सर्वं विजानद्भिर्महाकविभिरपि विवक्षितयोग एवायं प्रयुज्यते प्रतिपाद्यते च। तथाऽऽदि-

स्वविषय एवेति दर्शितम् । अत्र यतोऽसावग्निमान्, अत एव धूमवानित्यादिवत्साध्यमेव साधकं प्रति नियामकतया हेतुर्व्यपदिश्यते । तच्च साध्यं सहेतुकमिह समाख्यानिदानमित्यभिप्रायेणाह—**यस्मादेवमुक्तैस्स्वभावैरिति** । *क्षरमतीत इति तत्स्वभावगन्धानाघ्रातत्वमुच्यते । अत्रापि क्षरशब्दः प्रस्तुतैकार्थ्यान्न प्रधानविषय इत्याह—**क्षरं पुरुषमिति** । अक्षरशब्दस्य प्रधानेश्वरादिष्वपि प्रयोगात्तद्व्यवच्छेदाय *कूटस्थोऽक्षरः इत्युक्तैकार्थ्यमाह—**अक्षरान्मुक्तादिति** । एतेन पुरुषोत्तमशब्दनिरुक्तिरप्यत्र दर्शिता । **उक्तैर्हेतुभिरिति**—*षष्ठी हेतुप्रयोगे (अष्टा. २. ३. २६) इति नियमस्य प्रयोजनरूपहेतुविषयतयैव प्रयोगप्राचुर्यान्न तृतीयानुपपत्तिः । उत्तमशब्दे प्रकृतिप्रत्ययभेदेन विवक्षितमाह—**उत्कृष्टतम** इति । मुक्तो हि बद्धादुत्कृष्टः ; ततोऽप्यसौ सर्वान्तरात्मत्वादिभिरुक्तैर्हेतुभिरुत्कृष्टतमः । प्रथितशब्देन केवलप्रथाविधेः प्रकृतानन्वयात्सविशेषणोऽसौ विशेषणोपसंक्रामीत्यभिप्रायेण **पुरुषोत्तम इतीति** इतिकरणम् । नात्र लोकशब्दो भुवनविषयो जनविषयो वा, तत्र प्रकृतनिरुक्तिविवक्षाप्रमाणत्वासंभवात् । नच काव्यादिप्रयोगपरता, तत्राप्यतितरां स्वारस्याभावात् । अतो वेदसहपाठात्तदनुवर्तिस्मृतिपरोऽयम्, तत्र च लोक्यतेऽनेन वेदार्थ इति व्युत्पत्त्या वृत्तिरित्यभिप्रायेणाह—**वेदार्थावलोकनादिति** । **श्रुतौ स्मृतौ चेत्यर्थ** इति । अयमभिप्रायः—श्रूयते नित्यमिति हि श्रुतिः । अतो वक्तृदोषप्रसङ्गाभावादशिथिलसंप्रदायत्वाच्च तदुक्तं तावत्प्रामाणिकमेव । स्मृतिरप्यल्पश्रुतैर्दुरवबोधसकलशास्त्रानुगतमर्थं सङ्कलय्योपबृंहयन्ती परमाप्ततममन्वादिप्रणीता प्रमाणमेवेति तया वेदार्थावलोकनं युक्तमिति । *परं ज्योतिरुपसंपद्येति मुक्तोपसंपत्तव्यतया निर्दिष्टो निरतिशयदीप्तियुक्तः पुरुष एवात्र *स उत्तमः पुरुषः इति परामृश्य विशेष्यते ; तदुपबृंहणाय हि *उत्तमः पुरुषस्त्वन्यः इति तत्तुल्यव्यस्तप्रयोगोऽयं प्रदर्शित इत्यभिप्रायेण *परं ज्योतिरित्यादिवाक्योदाहरणम् । अत्र *प्रथितः पुरुषोत्तमः इत्यस्योक्तसमस्तप्रयोगप्रदर्शनार्थतया *अंशावतारं पुरुषोत्तमस्येति स्मृत्युदाहृतिः । अत्र *विष्णोरिति संज्ञानिर्देशेऽपि *पुरुषोत्तमस्येति विशेषणैकार्थ्यस्य विवक्षितत्वाद्योगरूढोऽयं शब्द इति सिद्धम् । एतेन *रूढ्या तु कामं पुरुषोत्तमोऽस्तु इति प्रलपन् वेदबाह्यः प्रत्युक्तः । ननु कथं यौगिकार्थविवक्षायामस्य साधुता, न तावदसौ समानाधिकरणसमासः, *सन् महत्परमोत्तमोत्कृष्टाः पूज्यमानैः (अष्टा. २. १. ६१) इति प्रथमानिर्दिष्टस्योत्तमशब्दस्योपसर्जनतया पूर्वनिपातापातात् । नापि व्यधिकरणसमासः, उत्तमः पुरुष इवेत्युपमितविवक्षानुपपत्तेः ; तदर्थतयोदाहृतायां श्रुतावपि वैयधिकरण्यादर्शनात् । नचासौ षष्ठीसमासः, निर्धारणे तन्निषेधात् । नचान्यस्यापीह संभव इति । मैवं ; षष्ठीसमासस्यैवात्र युक्तत्वात् ; नहि वयमत्र निर्धारणार्थतां ब्रूमः । पुत्रादिवत्संबन्धिशब्दो ह्यसौ । अधमादिसापेक्षं ह्युत्तमत्वम् । इदं च सूचितम्—**उक्तैर्हेतुभिरुत्कृष्टतम** इति । जातिगुणादिसंबन्धिशब्देषु हि निर्धारणे षष्ठी । संबन्धसामान्यविहिता च षष्ठी तत्तत्संबन्धिशब्दसमभिव्याहारानुरोधेन तत्संबन्धविशेषं प्रतिपादयति । एवमेव हि नागोत्तमादिशब्दानां साधुत्वं वैयाकरणैर्व्याख्यातम् । अत्र च *उत्तमःपुरुषस्त्वन्यः, *क्षरमतीतोऽहमक्षरादपि चोत्तमः इति चार्थकथनमात्रं, नतु तत्समासांशद्वयविवक्षा । एवमेव *स उत्तमः पुरुष इति श्रुत्युदाहरणमपि । केचित्तु पञ्चमीसमासं व्याकुर्वते । नचोत्तमशब्दयोगे पञ्चमी न शिष्टेति वाच्यं ; यथा *यस्मादधिकम् (अष्टा. २. ३. ९) इत्यादिसौत्रप्रयोगादशिष्टस्यापि परिग्रहः ; एवम् *अक्षरादपि चोत्तमः इत्यादिप्रयोगबलादेव तत्परिग्रहोपपत्तेः । इदमपि सूचितम्—**मुक्तादप्युक्तैर्हेतुभिरुत्कृष्टतम** इति । योगविभागाच्च पञ्चम्या उत्तमादिशब्दैस्समासोऽप्यनुशिष्ट एव । एवं सप्तमीसमासत्वेऽपि न दोषः, शौण्डादिष्वपठितत्वेऽपि तत्रापि योगविभागाभ्यनुज्ञानादेव तदुपपत्तेः । एतत्सर्वं विजानद्भिर्महाकविभिरपि विवक्षितयोग एवायं प्रयुज्यते प्रतिपाद्यते च । तथाऽऽदि-

काव्ये *नच तेन विना निद्रां लभते पुरुषोत्तमः (रा. बा. १८.२९) इति । तदेतत्सर्वमभिसन्धाय भगवद्यामुनमुनिभिरुक्तं स्तोत्रे—*कः पुण्डरीकनयनः पुरुषोत्तमः कः (१२) इति ॥ १८ ॥

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९

भा ॥ य एवम्—उक्तेन प्रकारेण पुरुषोत्तमं मामसंमूढो जानाति—क्षराक्षरपुरुषाभ्यामव्ययस्वभावतया व्यापनभरणैश्वर्यादियोगेन च विसजातीयं जानाति, स सर्ववित्—मत्प्राप्त्युपायतया यद्वेदितव्यं तत्सर्वं वेद । भजति मां सर्वभावेन—ये च मत्प्राप्त्युपायतया मन्मजनप्रकारा निर्दिष्टास्तैश्च सर्वैर्भजनप्रकारैर्मां भजते, सर्वैर्मद्विषयैर्वेदनैर्मम या प्रीतिर्या च मम सर्वैर्मद्विषयैर्भजनैः ; उभयविधा सा प्रीतिरनेन वेदनेन मम जायते ॥ १९ ॥

ता ॥ एवं पुरुषोत्तमशब्दनिर्वचनं तथाऽनुचिन्तनार्थमिति व्यञ्जयन् पुरुषोत्तमत्ववेदनं स्तौति—*यो मामेवमिति श्लोकेन । पुरुषोत्तमत्वेन जानातीति विवक्षायामसंमूढपदनैरर्थक्यम् । अत एव *पुरुषोत्तमं मामित्यर्थस्थितिं निर्दिश्य तत्र यथावज्ज्ञानम् *असंमूढो जानातीत्यनेनोच्यते । तदाह—**य एवमुक्तेने**ति । एकीकृत्य मोहरहितत्वमसंमूढत्वम् । तच्च पूर्वोक्तस्वप्रकारान्यत्वानुसन्धानादित्याह—**क्षराक्षरे**ति । एवमसंमूढशब्देन पराभिमतजीवेश्वरैक्यवेदनस्य भ्रान्तिरूपत्वं प्रकृतिपुरुषेश्वरभेदस्य पारमार्थिकत्वं च व्यञ्जितम् । *स सर्वविदित्यत्र पुरुषोत्तमशब्दार्थवेदनेनाष्टादशविद्यास्थानादिवेदनासिद्धेरत्र चानपेक्षितकेशकीटादिसङ्ख्यावेदनेन स्तुत्यसंभवात्, तस्य *भजति मां सर्वभावेनेत्यत्र मन्दप्रयोजनत्वाच्च भजनानुष्ठानोपयोगिविषयतया नियच्छति—**मत्प्राप्त्युपायतये**ति । भजनक्रियावशीकृतस्सर्वभावशब्दो भजनावान्तरभेदतया प्राक्प्रपञ्चितकीर्तनयतनादिप्रकारपरः । *वासुदेवस्सर्वम् (गी. ७. १९) इत्याद्यर्थविवक्षातोऽप्ययमेवार्थः स्तुत्युपयोगातिशयादिहोपादेय इत्यभिप्रायेणाह—**ये चे**ति । भावशब्दोऽत्र क्रियावाची पदार्थमात्रवाची वा सन्प्रकाराख्यविशेषे विश्रान्तः । नन्वत्र तत्त्वहितवेदनं हितानुष्ठानं च शास्त्रफलं विवक्षितम् । तत्र न तावत्पुरुषोत्तमत्ववेदनमेव परव्यूहविभवगुणचेष्टितादिसर्ववेदनं सर्वविधभजनकरणं च, स्वरूपान्यथात्वात् । नचारोप्य स्तुतिः, अनूर्जितत्वान्निष्फलत्वाच्च । नचात्र हेतुफलभावविवक्षा, *एतद्बुध्वा बुद्धिमान् स्यादित्यनन्तरेण पौनरुक्त्यात् ; अतो निरर्थकमिदमित्यत्राह—**सर्वैर्मद्विषयै**रिति ॥ १९ ॥

भा ॥ इत्येतत्पुरुषोत्तमत्ववेदनं पूजयति—

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।
एतद्बुद्ध्वा बुद्धिमांत्स्यात्कृतकृत्यश्च भारत ॥ २०

इति श्रीमद्भगवद्गीतासूपनिषत्सु **पुराणपुरुषोत्तमयोगो** नाम पञ्चदशोऽध्यायः ॥ १५ ॥

भा ॥ इत्थं मम पुरुषोत्तमत्वप्रतिपादनं सर्वेषां गुह्यानां गुह्यतममिदं शास्त्रं त्वमनघतया योग्यतम इति कृत्वा मया तवोक्तम् । एतद्बुद्ध्वा बुद्धिमांत्स्यात्कृतकृत्यश्च—मां प्रेप्सुना उपादेया या बुद्धिस्सा सर्वा उपात्ता स्यात् ; यच्च तेन कर्तव्यम्, तत्सर्वं कृतं स्यादित्यर्थः । अनेन श्लोकेनानन्तरोक्तं पुरुषोत्तमविषयं ज्ञानं शास्त्रजन्यमेवैतत्सर्वं करोति, नतु साक्षात्काररूपमित्युच्यते ॥ २० ॥

इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये पञ्चदशोऽध्यायः ॥ १५ ॥

ता ॥ यदि पुरुषोत्तमत्ववेदनमात्रेण भगवतस्सर्वविधा प्रीतिर्जायते, तर्हि भजनाद्यनुष्ठानविधिवैयर्थ्यम्; तत्राह—**इत्येतदिति**। सर्वासां प्रतीतीनामेतदेव हि मूलकारणम्। फलसाम्याद्वा सर्वस्य विदितत्वकृतकृत्यत्ववचनमिति भावः। इत्येतदित्यादिकमुत्तरश्लोकावतारिका वा। रहस्यतया गोपनीयतमत्वं पारमार्थिकत्वं फलप्रकर्षं च व्यञ्जयन्निगमयति—*इति गुह्येति श्लोकेन। एतदेव गीताशास्त्रनिगमनमिति वदतां प्रतिक्षेपायाह—**पुरुषोत्तमत्वप्रतिपादनमिति**। पञ्चदशोऽध्याय इत्यर्थः। *अनघेति संबुद्धिरधिकारिसूचनार्थेत्याह—**अनघतया योग्यतम इति कृत्वेति**। एवं भारतसंबुद्धिरपि जन्मतोऽधिकारित्वसूचनार्था। **इदमिति**—अस्य वक्ता श्रोता च दुर्लभः इत्यभिप्रायः। **इदं**—शास्त्रान्तरेभ्य उत्कृष्टतममिति वा। उक्तं चाभियुक्तैः—*यस्मिन् प्रसादसुमुखे कवयोऽपि ते ते शास्त्राण्यशासुरिह तन्महिमाश्रयाणि। कृष्णेन तेन यदिह स्वयमेव गीतं शास्त्रस्य तस्य सदृशं किमिहास्ति शास्त्रम् ॥ इति। **मया**—वक्तव्यतत्त्ववेदिना, त्वदधिकारवेदिना, तव सख्या चेत्यर्थः। प्रागुक्तशास्त्रानुवादताभ्रमव्युदासायाह—**तवोक्तमिति**। *सा विद्या या विमुक्तये....विद्याऽन्या शिल्पनैपुणम् (वि. १. १९. ४१) *तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् (वि. ६. ५. ८७) *एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा (गी. १३.१२) इत्यादिभिरन्यासां बुद्धीनाम् अबुद्धिप्रायतोक्तेरिह बुद्धिशब्दविवक्षितमाह—**मां प्रेप्सुनोपादेयेति**। कृत्यशब्दोऽप्यत्र मुमुक्ष्वपेक्षितविषयः। तस्यैव *तत्कर्म यन्न बन्धाय (वि. १. १९.४१) इत्यादिषु ग्रहणात्, अन्येषां च *आयासायापरं कर्मेति निन्दनादित्यभिप्रायेणाह—**यच्च तेन कर्तव्यमिति**। प्रस्तुतोऽर्थस्तज्ज्ञानं वाऽत्र प्रशंसनीयम्, किमत्र शास्त्रग्रहणेन? तथाचात्र पूर्वश्लोकपौनरुक्त्यमित्याह—**अनेन श्लोकेनेति**। अयमभिप्रायः—सार्थकशास्त्रज्ञानं शक्त्या *एतद्बुद्ध्येत्यनूद्यते; अतोऽर्थज्ञान एव तात्पर्यम्; तत्र शास्त्रशब्दग्रहणं शास्त्रमात्रजन्यस्यापि ज्ञानस्य फलाविनाभावापेक्षयेति। *स सर्वविदित्यादेः (१९) *बुद्धिमान्त्स्यादित्यादेश्च अर्थैक्यमभिसन्धाय[पि] पुनरुक्तिपरिहारश्चात्र कृतः। भारत एतद्बुद्ध्या त्वमपि कृतकृत्य इति च भावः ॥ २० ॥

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां पञ्चदशोऽध्यायः ॥ १५ ॥

॥ अथ षोडशोऽध्यायः ॥ १६ ॥

भा ॥ अतीतेनाध्यायत्रयेण प्रकृतिपुरुषयोर्विविक्तयोस्संसृष्टयोश्च याथात्म्यं तत्संसर्गवियोगयोश्च गुणसङ्गतद्विपर्ययहेतुकत्वम्, सर्वप्रकारेणावस्थितयोः प्रकृतिपुरुषयोर्भगवद्विभूतित्वम्, विभूतिमतो भगवतो विभूतिभूतादचिद्वस्तुनश्चिद्वस्तुनश्च बद्धमुक्तोभयरूपाद्व्ययत्वव्यापनभरणस्वाम्यैरर्थान्तरतया पुरुषोत्तमत्वेन याथात्म्यं च वर्णितम्। अनन्तरमुक्तस्य कृत्स्नस्यार्थस्य स्थेम्ने शास्त्रवश्यतां वक्तुं शास्त्रवश्यतद्विपरीतयोर्दैवासुरसर्गयोर्विभागं श्रीभगवानुवाच—

श्रीभगवानुवाच—

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १

अहिंसा सत्यमक्रोधस्त्यागश्शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २

तेजः क्षमा धृतिश्शौचमद्रोहो नातिमानिता। भवन्ति संपदं दैवीमभिजातस्य भारत ॥ ३

भा ॥ इष्टानिष्टवियोगसंयोगरूपस्य दुःखस्य हेतुदर्शनञ्च दुःखं भयम्, तन्निवृत्तिरभयम्। सत्त्वसंशुद्धिः—सत्त्वस्यान्तःकरणस्य रजस्तमोभ्यामस्पृष्टत्वम्। ज्ञानयोगव्यवस्थितिः—प्रकृतिवियुक्तात्मस्वरूपविवेक-

निष्ठा। दानम्—न्यायार्जितधनस्य पात्रे प्रतिपादनम्। दमः—मनसो विषयौन्मुख्यनिवृत्तिसंशीलनम्। यज्ञः—फलाभिसन्धिरहितभगवदाराधनरूपमहायज्ञाद्यनुष्ठानम्। स्वाध्यायः—सविभूतेर्भगवतस्तदाराधनप्रकारस्य प्रतिपादकः कृत्स्नो वेद इत्यनुसन्धाय वेदाभ्यासनिष्ठा। तपः—कृच्छ्रचान्द्रायणद्वादश्युपवासादेर्भगवत्प्रीणनकर्मयोग्यतापादनस्य करणम्। आर्जवम्—मनोवाक्कायवृत्तीनामेकनिष्ठता परेषु। अहिंसा—परपीडावर्जनम्। सत्यम्—यथादृष्टार्थगोचरभूतहितवाक्यम्। अक्रोधः—परपीडाफलचित्तविकाररहितत्वम्। त्यागः—आत्महितप्रत्यनीकपरिग्रहविमोचनम्। शान्तिः—इन्द्रियाणां विषयप्रावण्यनिरोधसंशीलनम्। अपैशुनम्—परानर्थकरवाक्यानिवेदनाकरणम्। दया भूतेषु—सर्वभूतेषु दुःखासहिष्णुत्वम्। अलोलुप्त्वम्—अलोलुपत्वम्। अलोलुत्वमिति वा पाठः; विषयेषु निस्स्पृहत्वमित्यर्थः। मार्दवम्—अकाठिन्यम्, साधुजनसंश्लेषार्हतेत्यर्थः। ह्रीः—अकार्यकरणे व्रीडा। अचापलम्—स्पृहणीयविषयसन्निधावचञ्चलत्वम्। तेजः—दुर्जनैरनभिभवनीयत्वम्। क्षमा—परनिमित्तपीडानुभवेऽपि परेषु तं प्रति चित्तविकाररहितता। धृतिः—महत्यामप्यापदि कृत्यकर्तव्यतावधारणम्। शौचम्—बाह्यान्तरकरणानां कृत्ययोग्यता शास्त्रीया। अद्रोहः—परेष्वनुपरोधः; परेषु स्वच्छन्दवृत्तिनिरोधरहितत्वमित्यर्थः। नातिमानिता—अस्थाने गर्वोऽतिमानित्वम्, तद्रहितता। एते गुणाः दैवीं संपदमभिजातस्य भवन्ति—देवसंबन्धिनी संपत् दैवी, देवा भगवदाज्ञानुवृत्तिशीलाः, तेषां संपत्, सा च भगवदाज्ञानुवृत्तिरेव, तामभिजातस्य—तामभिमुखीकृत्य जातस्य, तां निर्वर्तयितुं जातस्य भवन्तीत्यर्थः ॥१–३॥

ता ॥ तृतीयषट्कस्य त्रिकभेदादिप्रकारः प्रागेवास्माभिः प्रपञ्चितः। तत्र त्रिकभेदं प्रदर्श्य त्रिभिस्सङ्गततया षोडशमवतारयितुं तत्त्वत्रयविशोधनपरस्य त्रयोदशादित्रिकस्यार्थं क्रमादनुवदति—**अतीतेनाध्यायत्रयेणेति**। गुणसङ्गतद्विपर्ययहेतुकत्वमिति पाठः। कप्रत्ययप्रयोगाभावेऽप्यत्र बहुव्रीहित्वमेवेति। *इति गुह्यतमं शास्त्रमिति पूर्वाध्यायान्ते शास्त्रमुपक्षिप्तम्। अनघभारतशब्दाभ्यां च तदधिकारी सूचितः। स एव हि *मा शुचस्संपदं दैवीमभिजातोऽसि पाण्डव (५) इति वक्ष्यते। तत्रोक्तार्थव्यवसायस्य शास्त्राधीनत्वात्पुरुषस्य शास्त्रवश्यत्वं तावद्वक्तव्यम्। तच्च *तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ इत्यध्यायान्ते वक्ष्यते। तदर्थमेव च पूर्वाध्यायान्तसूचिताधिकारिविशेषविवेचनायात्रादौ दैवासुरविभागोक्तिः। तदभिप्रायेण संगृहीतं *देवासुरविभागोक्तिपूर्विका शास्त्रवश्यता। तत्त्वानुष्ठानविज्ञानस्थैर्ये षोडश उच्यते ॥ (सं. २०) इति। तदेतत्सर्वमभिप्रेत्याह—**अनन्तरमिति**। **उक्तस्य कृत्स्नस्यार्थस्येति** वक्ष्यमाणस्यानुष्ठानविवेकस्याप्युपलक्षणम्। उक्तैकदेशविशोधनरूपत्वाद्वा त[द्वि]दविवक्षा। संग्रहश्लोकोक्तानुष्ठानमपि **कृत्स्नस्येति** विशेषणेन अन्तर्भावितम्। हेयोपादेयस्वभावकथनस्य हानोपादानार्थतया फलितमाह—**शास्त्रवश्यतां वक्तुमिति**। शास्त्रवश्यत्वकथने देवासुरविभागोक्तिः कुत्रोपकुरुते; तत्राह—**शास्त्रवश्यतद्विपरीतयोरिति**। भगवदाज्ञा हि शास्त्रम्, तदनुवर्तिनो देवास्तेनानुगृह्यन्ते; अतस्तथा वर्तितव्यम्। तदाज्ञातिक्रामिणोऽसुरास्तेन निगृह्यन्ते; अतस्तथा न वर्तितव्यमिति भावः। नैसर्गिकविरोधद्योतनायात्र वक्ष्यमाणसर्गशब्दोपादानम्।

विभागोऽत्र गुणक्रियादिभिर्वक्ष्यमाणैः। *यया स्वप्नं भयं शोकम् (गी. १८. ३५) इत्यादिभिस्समश्शीलं हि भयम्; तत्सात्त्विकस्य दैवसर्गस्य न भवतीत्यभिप्रायेण भयनिरूपणार्थं तत्प्रतियोगिस्वरूपं शिक्षयति—**इष्टानिष्टेति**। वियोगसंयोगशब्दाविष्टानिष्टाभ्यां यथाक्रममन्वेतव्यौ। इदं च स्वरूपकथनम्; नतु भयलक्षणानुप्रविष्टम्; आगामिदुःख-

हेतुदर्शनजं दुःखमित्येव हि तत्। सत्त्वसंशुद्धिः—सत्त्वाधिष्ठानमन्तःकरणमिह सत्त्वम् ; तस्य समीची[न]शुद्धिस्संशुद्धिः, सर्वदोषनिवृत्तिः । तत्र कन्दभूतरजस्तमोनिवृत्त्या कामरागासूयावञ्चनादिसर्वदोषनिवृत्तिमभिप्रेत्याह—**रजस्तमोभ्यामस्पृष्टत्वमिति** । ज्ञानयोगशब्दोऽत्र न कर्मयोगादीनां व्यवच्छेदार्थः, तेषामपि सात्त्विकोपादेयत्वात् ; अतः कर्मज्ञानभक्तीनां साधारणं शास्त्रीयं शुद्धात्मस्वरूपविवेचनमिह विवक्षितमित्याह—**प्रकृतिवियुक्तेति** । ज्ञानमेवात्रोपायत्वाद्योगः । यद्वा शास्त्रजन्यज्ञाननिष्पाद्यं चिन्तनं ज्ञानयोगः । **न्यायार्जितेत्यादिकं** दानस्य शास्त्रीयाकारप्रदर्शनम्, अनेवंकरणस्य **राजसतामसत्वेन** वक्ष्यमाणत्वात् । एतच्च यथाविभवमनुसन्धेयम् । दमनं दमः, तच्चान्तःकरणकर्मकम् अमार्गान्निवर्तनं प्रकरणान्तरादिसिद्धमाह—**मनस** इति । बाह्येन्द्रियनियमनं हि शान्तिशब्देन वक्ष्यति । एतेन केषां चिदनयोश्शब्दयोर्व्युत्क्रमेणार्थव्याख्यानं निरस्तम् । *यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् (१७) इत्यासुरयज्ञानां वक्ष्यमाणत्वादत्र मोक्षप्रकरणेऽभिमतं सात्त्विकं यज्ञविशेषमाह—**फलाभिसन्धिरहितेति** । समस्तनित्यनैमित्तिकोपलक्षणतयाऽत्र यज्ञोपादानमित्यादिशब्दः । अपकृष्टदेवताविषयस्य अल्पफलकाम्यकर्मविधायकस्य च वेदभागस्य *यावानर्थ उदपानन्यायात् मुमुक्षुणाऽनभ्यसनीयत्वमाशङ्क्य तत्रापि त्रैवर्गिकवेदाभ्यासाद्व्यावृत्तिं प्रकरणलब्धामाह—**सविभूतेरिति** । *सर्वे वेदा यत्पदमामनन्ति (क. २. १५), *सर्वे वेदा यत्रैकं भवन्ति (य. आ. ३. ११. १) इत्यादिक्रमेणानुसन्धाय पठत उपनिषदभ्यासविधिप्रयुक्तस्य सर्वं प्रणवाष्टाक्षरषडक्षरद्विषट्कनिषदुपनिषदभ्यासकल्पमित्यभिप्रायः । एतेन *अन्या वाचो विमुञ्चथ (मु. २. २. ५) इत्यादिकमप्यन्यपरं निवृत्तम्, *ओमित्यात्मानं ध्यायथेति ध्यानदशायां प्रणवस्यैवोपादेयत्वे तात्पर्याच्च । यद्यपि स्वेनाधीयत इति स्वाध्यायः स्वशाखा ; तथाऽपि *नचैकं प्रति शिष्यते इति न्यायात्सर्वशाखानुगतस्यार्थस्यानुसन्धेयत्वात्, जपविधेश्च सर्वत्राविशेषात्—**वेदाभ्यासनिष्ठेति** सामान्येनोक्तम् । शास्त्रीयो भोगसङ्कोचस्तप इति लक्षिते तद्विशेषानुदाहरति—**कृच्छ्रेति** । *एकभुक्तेन नक्तेन तथैवायाचितेन च । उपवासेन दानेन न निर्द्वादशिको भवेत् ॥ (अ. स्मृ. १. १२४) इत्यादिविहितद्वादशीसमाराधनार्थैकादश्युपवासोऽत्र द्वादश्युपवास इत्युक्तः । यद्वा तिथिव्रतेषु तिथिद्वयव्रते च द्वादश्युपवासोऽप्यस्त्येव । आदिशब्देन करणत्रयनिष्पाद्यानां वक्ष्यमाणानां तपसां ग्रहणम् । राजसतामसग्राह्यफलार्थतपोव्यवच्छेदार्थमाह—**भगवत्प्रीणनकर्मयोग्यतापादनस्येति** । तपसा शुद्धस्य ह्यर्चनादिष्वधिकारः । अत्रान्येषामपि करणत्रयस्य स्वस्मिन्नैकरूप्यात्तद्व्यावृत्त्यर्थमाह—**परेष्विति** । कौटिल्यप्रसङ्गस्थले हि तन्निवृत्तिर्वक्तव्येत्यभिप्रायः । **परपीडावर्जनमिति** स्वपीडोपलक्षणम् । स्वपीडाऽपि मूर्खाणां परपीडाभिप्रायेति वा भावः । यथादृष्टार्थवचनेनैव सत्यवादी भवति ; तथाऽपि *सत्यं भूतहितं प्रोक्तम् (व्या. स्मृ) इति नियमात् भूतहितोक्तिः । **परपीडाफलेति** प्राग्वद्व्याख्यम् । स्वभावार्थशास्त्रप्राप्तानां निद्राशनमहायज्ञदण्डकुण्डिकादीनां त्यागायोगाद्विशेषे नियच्छति—**आत्महितप्रत्यनीकेति** । दमशब्देन मनोनियमनस्योक्तत्वात् *शान्तो दान्तः (बृ. ६. ४. २२) इत्यादिष्विव शान्तिरिह बाह्येन्द्रियगतेत्यभिप्रायेणाह—**इन्द्रियाणामिति** । अक्रोधाहिंसादिष्विव प्रतियोगिलक्षणद्वारेण अपैशुनं लक्षयति—**परानर्थेति** । *दयेत्येतावता भूतविषयत्वे सिद्धेऽपि पुनरुपादानं बहुवचनं च शत्रुमित्रादिसर्वविषयाभिप्रायेण । यथोक्तं गौतमेन—*दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति (गौ. ध. ७. १०) इति । अन्यत्र च—*सर्वभूतदया पुण्यम् (पा. पा. ७३. ५७) इत्यादि । तदाह—**सर्वभूतेष्विति** । *तापत्रयेणाभिहतं यदैतदखिलं जगत् । तदा शोच्येषु भूतेषु [द्वेषं प्राज्ञः करोति कः] करुणां न करोति कः ॥ (वि. १. १७. ७०) इति हि करुण्याख्यचित्तपरिकर्म प्रह्लादः प्राह । दुःखासहिष्णुत्वं तन्निराकरणेच्छेत्यर्थः । लुपिधातौ

यङ्लुगन्ते क्विपि कृते लोलुबिति पकारान्तं पदम्; अचि कृते तु लोलुप इति; तद्व्यञ्जयति—**अलोलुप्त्वम् अलोलुपत्वमिति**। *लुप् छेदने इति धातौ लोलू इति यङ्लुगन्तम्; तत्र *[त्वे च (अष्टा. ३. ३. ६४) इति] च्छान्दसं ह्रस्वमभिप्रेत्याह—**अलोलुत्वमिति वा पाठ** इति। अयोग्यस्पृहारूपं लौल्यमिह निषिध्यत इत्यभिप्रायेणाह—**विषयेष्विति**। मुख्यस्य मार्दवस्यात्रानन्वयात् [स्मितपूर्वक]पूर्वभाषित्वमुखसौम्यत्वादिव्यङ्ग्यमौपचारिकं दर्शयितुमाह—**अकाठिन्यमिति**। कठिनं हि द्रव्यमन्येषामनुप्रवेशानर्हम्; तद्वदिह स्तब्धप्रकृतिरिति तद्व्यतिरेकविवक्षया फलतो मार्दवं व्यनक्ति—**साधुजनेति**। अवमतत्वादीनां योगोपकारकत्वात्तन्मूला व्रीडा सत्त्वनिष्ठानामयुक्ता; अत उपयुक्तं ह्रीविशेषमाह—**अकार्यकरणे व्रीडेति**। प्रख्याताभिजनविद्यावृत्ता हि महान्तः परेष्वप्यकार्यकारिष्वपत्रपन्ते; स्वयं तु किमुतेति भावः। अलोलुपत्वाचापलत्वयोरपौनरुक्त्यायाह—**स्पृहणीयविषयसन्निधाविति**। एतेन क्रीडापरिहासमृगयाक्षादिष्वप्रसङ्गोऽपि दर्शितः। भूतेतरविषयस्तेजश्शब्दः पराभिभवनसामर्थ्ये अन्यानपेक्षतायां वा प्रयुज्यते; अतोऽत्राभिभावकत्वाविनाभूतमनभिभवनीयत्वं विवक्षितम्; तच्च दुर्जनावकाशप्रदायिकार्पण्याभावद्वारेत्यभिप्रायेणाह—**दुर्जनैरिति**। अक्रोधात् क्षमायाः विशेषं दर्शयति—**परनिमित्तपीडानुभवेऽपीति**। निरपराधेषु निर्विकारता ह्यौदासीन्यमात्रम्; न तु क्षमा; पठ्यते च निरपराधेष्वपि क्रोधः—*ब्राह्मणा गणिका वैद्यास्सारमेयाश्च कुक्कुटाः। दृष्टमात्रेण कुप्यन्ति न जाने तत्र कारणम्॥ इतीत्यभिप्रायः। **परेषु तं प्रतीति**—परेषां पीडानुभवं प्रतीत्यर्थः। भयचापलनिवृत्तेः पृथगुक्तत्वादुपस्थितायामपि महत्यामापदि शास्त्रीयानुष्ठानसंकल्पस्य अप्रच्युतावलम्बनमिह सात्त्विकी धृतिरित्यभिप्रायेणाह—**महत्यामिति**। *महत्यापदि संप्राप्ते स्मर्तव्यो भगवान् हरिः (भा. स. ९०. ४२) इति सुकरमुख्यकर्तव्यापरित्यागादितरदपि कर्तव्यं कृतमेव हि स्यादिति भावः। वक्ष्यति च सात्त्विकीं धृतिं—*धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिस्सा पार्थ सात्त्विकी॥ (१८. ३३) इति। योगेनाव्यभिचारिण्या—मोक्षसाधनभूतभगव[दाराध]दुपासनास्थ्यप्रयोजनेन प्रयोजनान्तरनिरपेक्षयेत्यर्थः। शरीरवाङ्मनांसि ह्यशुचिपुरुषस्पर्शाशुचिद्रव्योपयोगादिभिरुपहतसत्त्वानि तेषुतेषु कर्मस्वयोग्यानि शास्त्रैरिशिष्यन्ते। तदभावोऽत्र शौचमित्याह—**बाह्येति**। प्रत्यक्षसिद्धकरणपाटवादिरूपकृत्ययोग्यताव्यवच्छेदायाह—**शास्त्रीयेति**। अहिंसाया उक्तत्वादद्रोहस्य ततो विशेषप्रदर्शनायाह—**परेष्वनुपरोध इति**। प्रबलेन हि दुर्बलास्स्ववशे स्थापितास्स्वाच्छन्द्यान्निवार्यन्ते; सोऽयमुपरोधः; तदकरणमत्रानुपरोध इत्याह—**स्वच्छन्देति**। स्वस्य तु योगोपकारी स्वच्छन्दवृत्तिनिरोधस्तप एव। अतः **परेष्विति** विशेषितम्। मानो गर्व इति पर्यायः; स तु सामान्यत इह निषेद्धुमिष्टः; तथाऽपि वंशवीर्यश्रुताद्यनुगुणं मात्रया भवन्नसौ सह्येतापि; अन्यथाभवन्नसुराणां धर्मतया वक्ष्यमाणोऽत्र न प्रसङ्गमर्हतीत्यभिप्रायेण सोपसर्गमाननिषेध इत्याह—**अस्थाने गर्व इति**। *दैवीं संपदमित्युक्ते देवानां विभूतिः प्रतीयेत; सा चात्र नान्वेति; अतोऽभिप्रेतमवतारयितुं व्युत्पत्तिं तावदाह—**देवसंबन्धिनीति**। *सत्त्वं देवगुणं विद्यादितरावासुरौ गुणौ (भा. मो. २१८. २२) इति विभागात्, *सत्त्वात्संजायते ज्ञानम् (गी. १४. १७) इति सत्त्वस्यानुष्ठानपर्यन्तज्ञानहेतुत्वाच्च सत्त्वोत्तरत्वादेव भगवदाज्ञां नातिवर्तन्ते; तदादावेवाह—**भगवदाज्ञानुवृत्तिशीला इति**। सैव च तेषां संपदभिमता, अविवेकिनां भोग्यतत्साधनसमृद्धिवत्तेषां भगवदाज्ञानुवृत्तेः प्रीतिविषयत्वात्परमपुरुषार्थहेतुत्वाच्चेत्याह—**सा चेति**। उक्तं च *महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥ (९. १३) इति। अन्यत्र च *विष्णुभक्तिपरो देवः (वि. ध. १०९. ७४) इति। जातस्येत्यकर्मकस्य जायतेः पतत्यादिष्विवोपसर्गवशात्सकर्मकत्वात्कर्मणि द्वितीयान्वयमाह—**तामभिमुखीकृत्येति**। *अभिरभागे (अष्टा. १.४.९१) इति कर्म-

प्रवचनीययोगाद्वा द्वितीया। **अभिमुखीकृत्य**—अभिलक्ष्य; यथा दैवी संपद्भवति, तथा कृत्वा जातस्येति यावत्। **ईदृशगुणयुक्तानामेवंविधायास्संपदोऽवश्यंभावित्वमत्र** अभिमुखीकरणं विवक्षितम्। तथाच स्मर्यते—*जायमानं हि पुरुषं यं पश्येन्मधुसूदनः। सात्त्विकस्स तु विज्ञेयस्स वै मोक्षार्थचिन्तकः॥ (भा. ३४९. ७३) इति। तदिदमाह—**तां निर्वर्तयितुं जातस्ये**ति॥ १–२॥

दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥ ४

भा॥ दम्भः—धार्मिकत्वख्यापनाय धर्मानुष्ठानम्। दर्पः—कृत्याकृत्याविवेककरो विषयानुभवनिमित्तो हर्षः। अतिमानश्च—स्वविद्याभिजनाननुगुणोऽभिमानः। क्रोधः—परपीडाफलचित्तविकारः। पारुष्यम्—साधूनामुद्वेगकरः स्वभावः। अज्ञानम्—परावरतत्त्वकृत्याकृत्याविवेकः। एते स्वभावा आसुरीं संपदमभिजातस्य भवन्ति। असुरा भगवदाज्ञातिवृत्तिशीलाः॥ ४॥

ता॥ *दम्भो दर्पः इत्यादौ भवन्तीत्यनुषज्यते। **धार्मिकत्वख्यापनाये**ति—न तु भगवदाज्ञानुवृत्तिबुद्धयेत्यर्थः। **कृत्याकृत्याविवेककर** इति। शास्त्रातिलङ्घनहेतुरिति भावः। अतिमानशब्दोक्तगर्वापरपर्यायादभिमानात्तत्कारणस्य दर्पस्य विशेषमाह—**विषयानुभवनिमित्त** इति। एतेनाचार्यभगवत्सन्दर्शनादिनिमित्तहर्षव्यवच्छेदः। अस्थान इति पूर्वोक्तमत्र **स्वविद्याभिजनाननुगुण** इत्यनेन विवृतम्। विद्याभिजनग्रहणं वीर्यादेरप्युपलक्षणम्। *वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च। वेषवाग्वृत्तिसारूप्यमाचरन्विचरेदिह॥ (मनु. ४. १७) इत्यस्योल्लङ्घनमिहाभिप्रेतम्। बाह्यकुदृष्टिषु चोरादिषु च वाक्पारुष्यं दण्डपारुष्यं च नातीव दोष इत्यभिप्रायेणाह—**साधूनामुद्वेगकरस्स्वभाव** इति। अत एव साधुबहिष्कारात्छास्त्रबहिष्कारोऽपि स्यादेवेत्यर्थः। प्राप्तकालनिद्रादिरूपमनुपयुक्तविषयं चाज्ञानमासुराणामन्येषामपि तुल्यमदोषश्च। तद्यवच्छिनत्ति—**परावरे**ति। ईदृशाज्ञानमूलमागमान्तरेषु परावरतत्त्वव्यत्ययकल्पनं, वेदविरुद्धाचारपरिग्रहश्च। पूर्वोक्तकतिपयगुणव्यतिरेकप्रदर्शनमिहोपलक्षणार्थम्। चकारेण वाऽनुक्तसमस्तसमुच्चयः। आसुरीं संपदमभिव्यङ्क्तुमाह—**भगवदाज्ञातिवृत्तिशीला** इति। यान् प्रत्युच्यते च *पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः। रजसा तमसा चैव मानसं समभिप्लुतम्॥ (भा. मो. ३५७. ७७) इति; *विपरीतस्तथासुरः (वि. ध. १०९. ७४) इति च। प्रजापतिवाक्ये च देहात्माभिमानादिमूलत्रिवर्गमात्रनिष्ठामधिकृत्योच्यते * असुराणां ह्येषोपनिषत् (छा. ८. ८. ५) इति। अत्र संपच्छब्दो भगवदाज्ञातिलङ्घनरुचीनामभिप्रायेणोपालम्भाभिप्रायेण[वा]संपद्यत इत्येतावन्मात्रविवक्षया वा नेतव्यः॥ ४॥

दैवी संपद्विमोक्षाय निबन्धायासुरी मता।

भा॥ दैवी—मदाज्ञानुवृत्तिरूपा संपत्, विमोक्षाय—बन्धान्मुक्तये भवति; क्रमेण मत्प्राप्तये भवतीत्यर्थः। आसुरी—मदाज्ञातिवृत्तिरूपा संपत्, निबन्धाय भवति—अधोगतिप्राप्तये भवतीत्यर्थः॥ ४॥

वा॥ देवासुरस्वभावयोश्श्रद्धोद्वेगजननाय * ऊर्ध्वं गच्छन्ति सत्त्वस्थाः (१४. १८) इत्यादिनोक्तमिह संक्षिप्य —***दैवी** संपदित्यर्थेन। विमोक्षस्येष्टप्राप्तिपर्यन्ततां वक्तुमात्यन्तिकानिष्टनिवृत्तिरूपं शब्दस्य मुख्यार्थमाह—**बन्धा**इति। अव्यवहितहेतुत्वविवक्षायां समाधिपर्यन्तशास्त्रार्थवैयर्थ्यं स्यादित्यभिप्रायेणाह—**क्रमेणे**ति। आत्मसाक्षात्कारो वा। **निबन्धः**—नियतो बन्धः। तत्र * अधोगच्छन्तोत्येतत्स्मारयति—**अधोगतो**ति॥ ४॥

भा ॥ एतच्छ्रुत्वा स्वप्रकृत्यनिर्धारणादतिभीतायार्जुनायैवमाह—

मा शुचस्संपदं दैवीमभिजातोऽसि पाण्डव ॥ ५

भा ॥ शोकं मा कृथाः; त्वं तु दैवीं संपदमभिजातोऽसि, पाण्डव—धार्मिकाग्रेसरस्य हि पाण्डोस्तनयस्त्वमित्यभिप्रायः ॥ ५ ॥

ता ॥ अत्र * मा शुचः इति वचनं न शास्त्रोपक्रमप्रक्रान्ताशोच्यविषयशोकप्रतिषेधार्थम्, तस्य बहुधा परिहृतत्वात्, * संपदं दैवीमभिजातोऽसीत्यनेन तत्परिहारासंभवाच्च । अतो * निबन्धायासुरी मतेत्युक्ते शास्त्रीयमर्यादानतिलङ्घिन्यपि स्वात्मनि * स्थिरो निगूढाहङ्कारः (दश. २. ४) इति प्रक्रियया धीरोदात्तनायकगुणभूतस्य निगूढस्वाहङ्कारत्वस्य स्वात्मसाक्षिकत्वात्तावन्मात्रेणापि स्वस्मिन्नासुरत्वमतिशङ्कमानस्य श्रुतद्विविधसंपत्कस्य भीमत्सोस्स्वप्रकृत्यनिर्धारणात् पुनरपारसंसारसागरनिमज्जनभीत्या शोचतो दैवप्रकृतित्वज्ञापनेन शोकमपनयतीत्याह—**एतच्छ्रुत्वेति** । अत्राप्यस्थाने शोकं त्वमेवाहारयसीत्यभिप्रायेणाह—**शोकं मा कृथा** इति । नहि देवप्रकृतीनां धर्मोत्तराणामासुराः पुत्रास्संभवन्तीत्यभिप्रायेण पाण्डवशब्दसंबुद्धिरित्याह—**धार्मिकाग्रेसरस्येति** ॥ ५ ॥

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६

भा ॥ अस्मिन् कर्मलोके कर्मकराणां भूतानां सर्गौ द्विविधौ—दैवश्चासुरश्चेति; सर्गः—उत्पत्तिः, प्राचीनपुण्यपापरूपकर्मवशाद्भगवदाज्ञानुवृत्तितद्विपरीतकरणायोत्पत्तिकाल एव विभागेन भूतान्युत्पद्यन्त इत्यर्थः । तत्र दैवस्सर्गो विस्तरशः प्रोक्तः—देवानां मदाज्ञानुवृत्तिशीलानामुत्पत्तिर्यदाचारकरणार्था, स आचारः कर्मयोगज्ञानयोगभक्तियोगरूपो विस्तरशः प्रोक्तः; असुराणां सर्गश्च यदाचारार्थः, तमाचारं मे शृणु—मम सकाशाच्छृणु ॥ ६ ॥

ता ॥ स्वरूपादिभिस्समेषु सर्वेष्वात्मसु दैवासुरविभागस्य किं निदानमिति शङ्कां सविशेषानुवादेन परिहरन्नत्यन्तपरिहर्तव्यत्वज्ञापनाय प्रसक्तस्यासुरवृत्तान्तस्य विवक्षितमुपक्षिपति—* द्वौ भूतसर्गाविति श्लोकेन । * अस्मिन् लोके इति न लोकान्तरव्यवच्छेदार्थम्, सर्वत्र देवासुरविभागसिद्धेः; न च निरर्थकाधिकरणमात्रनिर्देशो युक्तः; अतो लोकोपलम्भसिद्धाकारेण विहितनिषिद्धकरणसूचनमिह विवक्षितमित्यभिप्रायेणाह—**कर्मकराणामिति** । कर्मलोकविवक्षया वा * अस्मिन्निति विशेषणम् । * सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु इति बह्वर्थस्याभिप्रेतं वक्तुमिहार्थवशाद्धातोः प्रयोज्यव्यापारपरत्वं तावदाह—**सर्ग उत्पत्तिरिति** । उत्पत्तिस्वरूपे कथं दैवत्वासुरत्वविभाग इति शङ्कायां * लोकेऽस्मिन्नित्यनेन दैवासुरविभागे सर्गशब्देन चाभिप्रेतं संकलय्याह—**प्राचीनेति** । दैवासुरसंपदर्थत्वादुत्पत्तौ दैवासुरत्वोक्तिरित्यर्थः । सर्गशब्दस्य स्वभावपरत्वं सृज्यमानपरत्वं चाप्रसिद्धत्वादनादृत्य प्रसिद्धसृष्टिपरत्वेन व्याख्या[त]नम् । दैवस्सर्गो विस्तरशः प्रोक्त इत्युक्ते देवानां सर्गादिकं वंशानुचरितकीर्तनवत्प्रतीयते; नच तथा कृतम् । यद्यपि * प्रजहाति यदा कामान् (२. ५५), * दैवमेवापरे यज्ञं (४. २५), * चतुर्विधा भजन्ते मां (७. १६), * महात्मानस्तु मां पार्थ (९. १३) इत्यादिभिर्ज्ञानयोगकर्मयोगभक्तियोगनिष्ठाः पुरुषा निर्दिष्टाः; तथाऽपि तत्कर्तव्यप्रपञ्चन एव तत्रापि तात्पर्यम्, अतोऽत्र दैवसर्गस्य विस्तरेणोक्तिस्तत्कार्यद्वारेत्यभिप्रायेण **यदाचारकरणार्थेत्यादिकमुक्तम्** । * अभयं सत्त्वसंशुद्धिः

इत्यादिकं प्राग्विस्तरेणोक्तस्य संग्रहणमित्यभिप्रायेण कर्मयोगादिग्रहणम् । * आसुरं सर्गमित्यत्रापि वक्ष्यमाणानुसारादेवमेव विवक्षेत्याह—**असुराणामिति** । आसुरं सर्गं मे शृण्वित्युक्ते सर्गान्वयेन कर्तरि षष्ठीप्रतीतिस्स्यात्; ततोऽपि शृण्वित्यस्यापेक्षितमाप्ततमत्वसूचनमेवोचितमित्यभिप्रायेणाह—**मम सकाशादिति** । अविदितमुपादेयं यथा नोपादातुं शक्यं, तथा हेयमप्यविदितं न हातुं शक्यम्; अतोऽत्र सावधानो भवेत्यभिप्रायेण * शृण्वित्युक्तम् ॥ ६ ॥

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७

भा ॥ प्रवृत्तिं च निवृत्तिं च—अभ्युदयसाधनं मोक्षसाधनं च वैदिकं धर्मम् **आसुरा न विदुः**—न जानन्ति । **शौचम्**—वैदिककर्मयोग्यत्वं शास्त्रसिद्धम्; तद्बाह्यमान्तरं चासुरेषु **न विद्यते : नापि चाचारः**—तद्बाह्यान्तरशौचं येन सन्ध्यावन्दनादिना आचारेण जायते, सोऽप्याचारस्तेषु न विद्यते । यथोक्तम्—* संध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु (द. स्मृ. २. २२) इति । तथा **सत्यं च तेषु न विद्यते**—यथाज्ञानं भूतहितरूपभाषणं तेषु न विद्यते ॥ ७ ॥

ता ॥ अत्र प्रवृत्तिनिवृत्तिशब्दौ न लौकिकविषयौ; आसुराणामेव लौकिकेष्टानिष्टप्राप्तिपरिहारार्थमपथप्रवृत्तेस्सत्पथनिवृत्तेश्च सिद्धत्वात्; न च विहितनिषिद्धमात्रविषयौ, रागप्राप्तशास्त्रप्राप्तविषयौ वा, * न शौचं नापि चाचारः इत्यादेः पुनरुक्तिप्रसङ्गात्; अतोऽत्र मुमुक्ष्वपेक्षितप्रवर्तकनिवर्तकधर्मविवेकाभावे तात्पर्यमित्याह—**अभ्युदयसाधनमित्यादिना** । तावेतौ धर्मौ स्मर्येते—* प्रवृत्तिलक्षणं धर्मं प्रजापतिरथाब्रवीत् । निवृत्तिलक्षणं धर्ममृषिर्नारायणोऽब्रवीत् ॥ (भा. मो. २१९. २) इति । * न विदुरित्यत्र * न सत्यं तेषु विद्यते इतिवदसद्भावमात्रं न विवक्षितम्, अपितु शतकृत्वः प्रतिपादितेऽपि तमःप्राचुर्यादपरिज्ञानमित्यभिप्रायेणाह—**न जानन्तीति** । * कृत्स्नयोग्यतेति प्रागुक्तमत्र **वैदिककर्मयोग्यत्वमित्यनेन** विवृतम् । बाह्यशौचमशुचिसंशीलनादिभिरवश्यकर्तव्याकरणाच्च न विद्यते; आन्तरं त्वात्मगुणाभावात् । * न शौचं नापि चाचारः इति क्रमात्कार्यकारणयोर्निषेध इत्यभिप्रायेणाह—**तदिति** । ननु संध्यावन्दनादेर्वर्णाश्रमधर्मस्य * प्राजापत्यं गृहस्थानाम् (वि. १. ६. ३७) इत्यादिभिः फलान्तरं श्रूयते; तत्कथं तस्य शौचहेतुत्वोक्तिरित्यत्राह—**यथोक्तमिति** । व्यतिरेकोक्त्या हेतुहेतुमद्भावोऽत्र दृढीकृतः । इदं नित्यकर्मान्तरहानादावपि ग्राह्यम् । **यथाज्ञानमित्यादि**—विप्रलम्भरसिकत्वात् यथाज्ञानं भाषणाभावः, हिंसास्वभावत्वाद्धितरूपभाषणाभावः ॥ ७ ॥

भा ॥ किंच—

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहेतुकम् ॥ ८

भा ॥ असत्यम्—जगदेतत्सत्यशब्दनिर्दिष्टब्रह्मकार्यतया ब्रह्मात्मकमिति नाहुः । **अप्रतिष्ठम्**—तथा ब्रह्मणि प्रतिष्ठितमिति न वदन्ति । ब्रह्मणाऽनन्तेन धृता हि पृथिवी सर्वान् लोकान् बिभर्ति । यथोक्तं * तेनेयं नागवर्येण शिरसा विधृता मही । बिभर्ति मालां लोकानां सदेवासुरमानुषाम् ॥ (वि. २. ५. २७) इति । **अनीश्वरम्**—सत्यसंकल्पेन परेण ब्रह्मणा सर्वेश्वरेण मयैतन्नियमितमिति च न वदन्ति । * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते (१०. ८) इति ह्युक्तम् । वदन्ति चैवम्—**अपरस्परसंभूतम्, किमन्यत्**—योषित्पुरुषयोः

परस्परसंबन्धेन जातमिदं मनुष्यपश्वादिकमुपलभ्यते, अनेवंभूतं किमन्यदुपलभ्यते ? किंचिदपि नोपलभ्यत इत्यर्थः । अतस्सर्वमिदं जगत् कामहेतुकमिति ॥ ८ ॥

ता ॥ एवं न सत्यस्याभाषणमात्रम्, अपितु तद्विपरीतभाषणमस्तीत्यनन्तरमुच्यत इत्याह—**किंचे**ति । असत्यशब्दोऽत्र न मिथ्यात्वपरः, तस्य लोकोपलब्धिस्ववचनविरोधादिभिरेव प्रतिक्षिप्तत्वेन अतिस्थूलत्वात्, परमार्थं स्थिरं चैश्वर्यमभिमत्य निरूढाभिनिवेशानामासुराणां प्रपञ्चमिथ्यात्वकूटयुक्तिभिः प्रतार्यत्वासंभवाच्च । यथा वयमनृतप्रायाः, तथा सर्वं जगदिति प्राहुरिति व्याख्याऽपि मन्दा; जगच्छब्दस्य चेतनमात्रविषयत्वाभावात्, निषेधानां चात्र पूर्वोक्ताकारव्यतिरेकपरत्वात्, * अप्रतिष्ठमनीश्वरम् इतिवच्छास्त्रसिद्धप्रतिषेधपरत्वात्, असुराणां च शास्त्रप्रद्वेषशीलत्वात् । अतोऽत्र शास्त्रसिद्धस्य प्रतिषेधपरोऽयं शब्दः । तच्च सत्यं ब्रह्मैवेति * सत्यं ज्ञानमनन्तं ब्रह्म (आ) इत्यादिषु प्रसिद्धम् । छान्दोग्ये च चेतनाचेतननियन्तृत्वेन ब्रह्मनामतयाऽसौ निरुक्तः—* तस्य हवा एतस्य ब्रह्मणो नाम सत्यमिति, तानि हवा एतानि त्रीण्यक्षराणि सत् ति यमिति तद्यत्सत्तदमृतम् अथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति (छा. ८. ३. ४, ५) इति । अतोऽत्र कपिलगुरुकुमारिलजिनसुगतचार्वाकादिमतानुवर्तिन इवाब्रह्मात्मकं जगदाहुरिति विवक्षामाह—**सत्यशब्दे**ति । अप्रतिष्ठशब्देनापि सर्वलोकविरोधादिभिः प्रत्यक्षसिद्धप्रतिष्ठानिषेधासंभवाच्छास्त्रेषु प्रतिष्ठात्वेन उपदिष्टसर्वप्रतिषेधविवक्षामाह—**तथे**ति । तदेवोदाहरणविशेषेण विवृणोति—**ब्रह्मणाऽनन्तेने**ति । एतेन प्रतिष्ठाशब्दस्य धर्माधर्ममात्रपरत्वेन व्याख्या निरस्ता । **सर्वाल्लोकान् बिभर्ती**ति । स्वरूपतः कार्यतश्चेति भावः । आदिकूर्मशेषदिङ्नागप्रभृतिभिर्मही विधृतेति शास्त्रेणोक्ते हि हैतुकैरेवं जल्प्यते—* धर्ता धरित्र्या यदि कश्चिदन्यस्तस्यापरस्तस्य परस्ततोऽन्यः । एवं हि तेषामनवस्थितिस्स्यात्ततो हि भत्रर्या भुव एव शक्तिः ॥ इति । वायुवेगवशाच्च भूभ्रमणवादं केचिदिच्छन्ति । गुरुत्वान्नित्यपतनं च **जैना**ः । अनीश्वरशब्दोऽप्यत्र न प्रतिमाराजादिलौकिकेश्वरप्रतिषेधार्थः, तैस्तत्प्रतिषेधाभावात् । यथाऽनुवदन्ति—* लोकव्यवहारसिद्ध इति **चार्वाका**ः (न्या. कु.) इति । नच ब्रह्मनिषेधमात्रार्थः, * असत्यमित्यादिना पुनरुक्तेः । अतोऽत्र व्युत्पत्त्यनुसारेणालौकिकनियन्तृनिषेधे तात्पर्यमित्याह—**सत्यसंकल्पेने**त्यादिना । अयस्कान्तादिवदचित्स्वभावात् *जीवाजीवात्मकं सर्वं जगदेतन्निरीश्वरमिति जैनादिदृष्ट्या धर्मादिमात्रवशाद्वा, * परमेश्वरसंज्ञो ज्ञः किमन्यो मय्यवस्थितः (वि. १. १७. २३) इतिवदाभिमानिकेश्वरशासनाद्वा, देशकालावच्छिन्नेश्वरसमुदायप्रवाहवशाद्वा जगत्प्रवृत्तिरिति हि तत्तन्मतमिति भावः । **नियमित**मिति—ये तु मद्व्यतिरिक्तान्प्रजापतिपशुपतिप्रभृतीनपि परमेश्वरत्वेन कल्पयन्ति, त आसुरा एवेति भावः । अन्येऽपि केचिदीश्वराः प्रवर्तका दृश्यन्ते; श्रूयन्ते च; तत्कथं भगवतस्सर्वनियमनमित्यत्राह—**अहं सर्वस्ये**ति । अन्येषामपि नियन्तृणां नियमनरूपप्रवृत्तिर्भगवदधीनैव । तथा च सूत्रितं * कर्ता शास्त्रार्थवत्त्वात् (ब्र. २. ३. ३३) इत्युपक्रम्य * परात्तु तच्छ्रुतेः (४०) इति । एवं त्रिभिर्जगत उत्पत्तिस्थितिप्रवृत्तीनां परब्रह्माधीनत्वं नेच्छन्तीत्युक्तं भवति । तत्र जगदुत्पत्तेः प्रतिज्ञातं ब्रह्मनैरपेक्ष्यमन्यतस्सिद्धतयैवमुपपादयन्तीत्याह—**वदन्ति चैव**मिति । * अपरस्परेत्यादिकं न पूर्वेणैकवाक्यम्, * किमन्यदित्यादेरनन्वयाच्लिष्टकल्पनादनुपपत्तेश्च । एतदेवैषामासुरत्वे पर्याप्तं, किमन्यदुच्यत इति कल्पना अध्याहारादिग्रस्ता । **वदन्ति चैव**मिति तु नाध्याहारादिविवक्षयोक्तम्, * एतां दृष्टिमित्यनेनैव तत्सिद्धेः । अतः * कामहेतुकमित्यस्यैवोपपादनाय * अपरस्परसंभूतमित्याद्युक्तिरित्यभिप्रायेणाह—**योषिदि**ति । क्रियासान्तत्येन हेतुफलभावरहितमिति व्याख्यान्तरमतिमन्दं, प्रसिद्धतमार्थत्यागात् * कामहेतुकमित्यनन्वयाच्चेत्यभिप्रायेणाह—**अनेवंभूतं**

किमन्यदुपलभ्यत इति । यद्यपि योषित्पुरुषसंसर्गमन्तरेणैव स्वेदजानां स्थावराणां चोत्पत्तिर्दृश्यते ; तथाऽपीश्वरमात्रहेतुका देवादिसृष्टिर्नोपलभ्यते ; दृश्यमानं त्वयोनिजं योनिजवदेव दर्शनबलादङ्गीकुर्मः ; तत्राप्यन्वयव्यतिरेकावस्थिततत्तत्सामग्रीमात्रात्कार्यसिद्धिसंभवे किमीश्वरेण कर्त्रा कल्पितेनागमिकतया स्वीकृतेन वेति भावः । * अकिंचित्कामहेतुकम् इति परोक्तपाठान्तरस्य अप्रसिद्धत्वादिभिरनादरव्यक्त्यर्थं * किमन्यदिति पाठस्य प्रतिनिषेधपरतां व्यनक्ति—**किंचिदपि नोपलभ्यत** इति । **अत** इति—अन्वयव्यतिरेकबलादित्यर्थः । * कामहेतुकमिति दृष्टकारणोपलक्षणम् । कामप्रावण्यवशात्तदुक्तिः । यथा पाषण्डागमा अपि तत्तत्पुरुषप्रवर्तिता इति तत्तदागमैस्तदातनप्रत्यक्षमूलतयोपदेशपरंपरया च व्यवस्थाप्यन्ते, यथा वा चिरन्तननगरवृत्तान्तादयः ; एवं कल्पेकल्पे प्रवृत्तमीश्वरशिल्पिनो जगन्नगरवृत्तान्तं संभावितमपि तीव्रौषधकल्पशास्त्रप्रद्वेषादपलपन्तीत्युक्तं भवति ॥ ८ ॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽशुभाः ॥ ९

भा ॥ एतां दृष्टिमवष्टभ्य—अवलम्ब्य, नष्टात्मानः—अदृष्टदेहातिरिक्तात्मानः, अल्पबुद्धयः—घटादिवत् ज्ञेयभूते देहे ज्ञातृत्वेन देहव्यतिरिक्त आत्मोपलभ्यत इति विवेकाकुशलाः, उग्रकर्माणः—सर्वेषां हिंसकाः जगतः क्षयाय प्रभवन्ति ॥ ९ ॥

ता ॥ एतां दृष्टिमिति—विपरीतां दृष्टिमित्यर्थः । * अवष्टभ्येत्याक्रमणादिप्रतीतिव्युदासायाह—**अवलम्ब्येति** । नित्यस्यात्मनो विनाशाभावात् * णश अदर्शने इति धात्वर्थोऽत्र विवक्षित इत्याह—**अदृष्टेति** । स्वयंज्योतिषः प्रत्यगात्मस्वरूपस्य देहाध्यासाधिष्ठानतया नित्यमुपलम्भाद्देहातिरिक्तत्वेन विशेषितम् । नष्टात्मत्वहेतुरिहाल्पबुद्धित्वमुच्यत इति पुनरुक्तिपरिहाराभिप्रायेणाह—**घटादिवदिति** । यद्वा पशुमृगादिवत्कर्मवशात्स्वारसिको विविक्तात्मानुपलम्भः । * अल्पबुद्धयः इति तु तत्परिहाराशक्तिरुच्यत इति भावः । एवं परावरात्मविषयविपरीतदृष्टिरुक्ता ; अथ * प्रभवन्त्युग्रकर्माणः इत्यादिना तत्फलमुच्यते । * उग्रकर्माणः इत्यत्रोग्रव्रतादिप्रतीतिव्युदासायाह—**सर्वेषां हिंसका** इति । अशुभाः—स्वसंसर्गिणामपि दोषावहा इत्यर्थः । **जगतः क्षयाय प्रभवन्ति**—* अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् (३. १०), * परस्परं भावयन्तः श्रेयः परमवाप्स्यथ (११) इत्यादिप्रतिपादितां भगवन्मूलां लोकभावनधर्ममर्यादामतिलङ्घयन्ति ; तदनुवर्तिनश्चान्येऽपि मन्दाः तदाचारोपदेशादिविलम्भादिक्रमेण सर्वस्य जगतस्त्रिवर्गापवर्गरूपवृद्धिविरहिणस्त्रिविधतापाभिहतिरूपाय क्षयाय भवन्तीत्यर्थः ॥ ९ ॥

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥ १०

भा ॥ दुष्पूरम्—दुष्प्रापविषयं काममाश्रित्य तत्सिषाधयिषया मोहात्—अज्ञानात्, असद्ग्राहान्—अन्यायगृहीतपरिग्रहान्, गृहीत्वा, अशुचिव्रताः—अशास्त्रविहितव्रतयुक्ताः दम्भमानमदान्विताः प्रवर्तन्ते ॥ १० ॥

ता ॥ कामो हि जगद्धेतुरुक्तः ; अतस्स एव हि तेषामाश्रयणीयोऽभिमतः ; तदाश्रयणेतिकर्तव्यतारूपास्तु दम्भमानमदोऽशुचिव्रतपर्यन्ता इत्युच्यते—* काममिति श्लोकेन । दुष्प्रापविषयत्वं दुष्पूरत्वे हेतुः ; यद्वा विषयम

कामस्य पूरणम्; अतो दुष्प्रापविषयत्वमेव दुष्पूरत्वम्। आश्रित्य—प्रयोजनतयाऽभिसंधायेत्यर्थः। तदभिप्रायेणाह—**तत्सिषाधयिषयेति**। विपरीतप्रवृत्तिहेतुभूतं कृत्याकृत्यविवेकान्धत्वमिह मोहशब्देन विवक्षितमित्याह—**अज्ञानादिति**। असत् ग्रहणम्—आर्जनं येषां तेऽत्रासद्ग्राहाः। धर्माभिसंधिमन्तो हि न्यायेनार्जयन्ति; कामप्रवणास्तु चौर्यादिभिस्तदुपकरणानीत्याह—**अन्यायगृहीतपरिग्रहानिति**। परिग्रहशब्दोऽत्र परिग्राह्यपरः। *ईहन्ते कामभोगार्थमन्यायेनार्थसंचयानिति (३२) त्वेतस्यैव विवरणम्। अत एवाशुभाभिनिवेशानिति व्याख्याऽप्यत्र मन्दा। **गृहीत्वेति** तादात्विकविनियोगपरत्वादात्मीयत्वाभिमानपरत्वाद्वा पुनरुक्तिपरिहारः। पाषण्डागमादिनिर्दिष्टानि हि व्रतानि पुरुषस्य दर्शनस्पर्शनाद्ययोग्यताहेतुत्वात्स्वयमशुचीन्येवेत्यभिप्रायेणाह—**अशास्त्रविहितव्रतयुक्ता** इति। धर्माभिसंधिरहितानामपि तामसानां विषहरणपाषाणस्फोट[न]वदित्यस्तम्भनप्रतिमाजल्पादिवञ्चनोपायैर्वशीकृतानां वेदबाह्येषु व्रतेषु मात्रया संयोगो भवति; यद्वा शौर्याहंकारादिमूलदशास्त्रविरुद्धस्सङ्कल्पोऽत्र व्रतशब्दाभिप्रेतः। शास्त्रीयेष्वपि व्रतेषु भगवत्समाराधनविवक्षामजानतामयथाशास्त्रकरणादशास्त्रविहितप्रयुक्तत्वम्। दम्भमानौ प्रागेव व्याख्यातौ। मदोऽत्र धनाभिजनविद्यादिमूलमयथायथचेष्टितारम्भकमौद्धत्यम्॥ १०॥

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः।
कामोपभोगपरमा एतावदिति निश्चिताः॥ ११

भा॥ अद्य श्वो वा मुमूर्षवः चिन्तामपरिमेयाम्—अपरिच्छेद्यां, प्रलयान्तां—प्राकृतप्रलयावधिकालसाध्यविषयाम्, उपाश्रिताः, तथा कामोपभोगपरमाः—कामोपभोग एव परमपुरुषार्थ इति मन्वानाः, एतावदिति निश्चिताः—इतोऽधिकः पुरुषार्थो न विद्यत इति संजातनिश्चयाः॥ ११॥

ता॥ एवं प्रवर्तकानामुपर्युपरि मनोविकारादय उच्यन्ते—*चिन्तामपरिमेयामित्यादिभिः। अशक्यविषयवृथाप्रयासव्यञ्जनायाह—**अद्य श्वो वेति**। *अपरिमेयामित्यसंख्येयविषयत्वेनानन्तशाखत्वं विवक्षितमित्याह—**अपरिच्छेद्यामिति**। *प्रलयान्तामित्यत्र शरीरपातावधिकत्वोक्तिर्मन्दा; अनन्तकालसाध्यमल्पकालेन सिषाधयिषन्तीति व्यामोहातिशयख्यापनेन सप्रयोजनमिदम्; प्रलयशब्दश्च प्रसिद्धतमविषय उचितः; चिन्तयितॄणां पुरुषाणामाप्रलयस्थायित्वाभावाच्चिन्तायास्स्वरूपेण प्रलयान्तत्वं चायुक्तमित्यभिप्रायेणाह—**प्राकृतप्रलयावधिकालसाध्यविषयामिति**। असंख्येयेषु चिन्ताविषयेष्वेकैकोऽपि दुस्साध इति भावः। प्रयोजनतयाऽभिमतेषु कामोपभोग एव परमो येषां तेऽत्र कामोपभोगपरमाः; तदाह—**कामोपभोग एवेति**। स्वर्गापवर्गप्रतिषेधार्थ एतावच्छब्द इत्याह—**इतोऽधिक इति**। **संजातनिश्चया इति**—अत्र निश्चितशब्दे *भुक्ता ब्राह्मणाः इतिवत्कर्तरि क्त इति भावः॥ ११॥

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥ १२

भा॥ आशापाशशतैः—आशाख्यपाशशतैर्बद्धाः, कामक्रोधपरायणाः—कामक्रोधैकनिष्ठाः, कामभोगार्थमन्यायेनार्थसंचयान् प्रतीहन्ते॥ १२॥

ता॥ चिन्ता कर्तव्यविषया; आशा तु फलविषया; आशाविषयाणामसंख्यातत्वात्तदाशानामपि शतशाखत्वेन तथात्वम्। *कामक्रोधपरायणाः इत्यत्र क्रोधस्य परमप्राप्यतया तदभिमानविषयत्वाभावात्कामक्रोधयोरैकाग्र्यमात्रं विव-

क्षितमित्याह–**कामक्रोधैकनिष्ठा** इति । अयनशब्दोऽत्र आश्रयपरः; कामो हि विहन्यमानः क्रोधात्मना परिणमतीति प्राक्प्रपञ्चितस्मारणे तात्पर्यात्पूर्वोत्तरापुनरुक्तिः । **कामभोगार्थ**मिति । विषयानुभवार्थम् । परमनिश्श्रेयससाधनभूतपरमपुरुषसमाराधनार्थं यत्कर्तव्यं, हन्त तदनर्थावहातिक्षुद्रक्षणिकसुखाभासार्थमासीदिति भावः । **अन्यायेने**ति–नहि यज्ञादिवन्न्यायार्जितैः कामोपभोगो न निष्पाद्यत इति भावः । द्वितीयान्वयज्ञापनायाह–**प्रतीति** । प्रवर्तन्ते ईहन्त इत्युभयमत्र समानविषयं, तत्र ईहया निष्पादयन्तीति विवक्षितत्वात् * अर्थसञ्चयानिति द्वितीयान्वयः ॥ १२ ॥

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १३

भा ॥ इदम्—क्षेत्रपुत्रादिकं सर्वं मया मत्सामर्थ्येनैव लब्धम्, नादृष्टादिना; इमं च मनोरथमहमेव प्राप्स्ये, नादृष्टादिसहितः । इदं धनं मत्सामर्थ्येन लब्धं मे अस्ति, इदमपि पुनर्मे मत्सामर्थ्येनैव भविष्यति ॥ १३ ॥

ता ॥ एवं * सहस्रभगसंदर्शनात्मकश्च महानन्दलक्षणो मोक्षः इत्यादिभिः कामोपभोगः परमपुरुषार्थ इति कृत्वा तदर्थमर्थपुरुषार्थस्वीकार इत्युक्तम्; अथ तत्र प्रवृत्तस्य व्यतिरेकसंज्ञासंस्थितयोगिवलब्धालब्धकृताकृतप्रत्यवेक्षणमुच्यते–**इदमद्ये**त्यादिना । एतेन पूर्वोक्तचिन्ताविषयानन्त्यमप्युदाहृतं भवति । वक्ष्यमाणधनव्यतिरिक्तविषयत्वद्योतनाय पुत्रक्षेत्रादिशब्दः । सात्त्विकानामीश्वराद्यधीनकृताकृतप्रत्यवेक्षणाव्यवच्छेदाय अहङ्कारगर्भतयाऽपि तथाविधानुसन्धानस्य भ्रान्तिरूपत्वं * मयेत्यनेन सूच्यत इत्याह–**मत्सामर्थ्येनैवे**ति । एवकाराभिप्रेतं विवृणोति–**नादृष्टादिने**ति । एवमेवोत्तमपुरुषाकृष्टाहंशब्दव्याख्यानरूपे * अहमेवेत्यादावप्यभिप्रायः । * इदमस्तीदमपीति चिन्तायां विषयभूयस्त्वज्ञापनम् ॥ १३ ॥

असौ मया हतश्शत्रुर्हनिष्ये चापरानपि ।

भा ॥ असौ मया बलवता हतश्शत्रुः, अपरानपि शत्रूनहं शूरो वीरश्च हनिष्ये, किमत्र मन्दधीभिर्दुर्बलैः परिकल्पितेनादृष्टपरिकरेण ॥ १३८ ॥

ता ॥ एवमिष्टप्राप्तावभिप्राय उक्तः; अथानिष्टनिवृत्तावुच्यते–**असौ मये**ति । अत्र * मयेत्यादेश्शत्रुहननोपयुक्तगुणवत्ताभिमानगर्भतामाह–**बलवते**ति । शूरः व्याघ्रादिवत्परबलं तृणीकृत्य निर्भयप्रवेशशीलः, * शूरं भीरुं कविं जडम् (भा. मो. १७४. ३२) इति शूरस्य भीरुप्रतियोगिकत्वेन पाठात् । वीरोऽत्र पराक्रमे ग्लान्यादिविकाररहितः । प्रेक्षावदनन्तपुरुषप्रवृत्तिविषयादृष्टानादरेण स्वसामर्थ्यमात्रावलम्बने को हेतुरित्यत्राह–**किमत्रे**ति । **मन्दधीभि**रिति । अयमभिप्रायः–अर्थादिग्रहणलुब्धैः निगूढाभिप्रायैर्ग्रन्थैः प्रतारिता दानयज्ञादिषु प्रवृत्तास्सिद्धमप्यर्थं परित्यज्य कृपणा भवन्तीति । **दुर्बलै**रिति । प्रबलो हि न प्रतारयितुं शक्यते, * न मेदसाध्या बलदर्पिता जनाः (रा. सु. ४१. ३) इति न्यायादिति भावः । **परिकल्पितेने**ति–न तु लोकायतशास्त्रविवक्षितप्रत्यक्षान्वयव्यतिरेकरूपप्रमाणसिद्धेनेत्यर्थः ॥१३८॥

भा ॥ तथा च—

ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥ १४

भा ॥ ईश्वरोऽहम्—स्वाधीनोऽहम्, अन्येषां चाहमेव नियन्ता। अहं भोगी—स्वत एवाहं भोगी, नादृष्टादिभिः। सिद्धोऽहम्—स्वतस्सिद्धोऽहम्, न कस्माच्चिददृष्टादेः। तथा स्वत एव बलवान्; स्वत एव सुखी ॥ १४ ॥

ता ॥ एवमिष्टप्राप्त्यनिष्टपरिहारयोस्स्वसामर्थ्यमात्राधीनत्वभ्रम उक्तः; अतस्स्वसामर्थ्यादावपि कारणभूतादृष्टादि-नैरपेक्ष्यभ्रम उच्यते—ईश्वरोऽहमित्यादिनेत्याह—**तथा चेति** । सर्वेश्वरवदीशितव्यत्वाभावोऽप्यत्रेश्वरशब्देन विवक्षित इत्याह—**स्वाधीनोऽहमिति** । स्वव्यतिरिक्तसमस्तनियन्तृत्वाभिमानोऽप्यत्राभिप्रेत इत्याह—**अन्येषां चेति** । तवांसकूटे भूमण्डलम्, त्वं हि सर्वेषां नियन्ता इत्युक्ते तथाविधत्वाभिधानादेव हि तथाविधानां प्रीत्यादिसंभव इति भावः । **पूर्वा-परानुगुण्यात्** * भोगीति भोगसामर्थ्यपरम्; तत्राहं चेत्, न धर्मस्वभावादेवंभूत इत्यहंशब्दाभिप्रायमाह—**स्वत एवेति । सिद्धः**—*ज्ञानाद्यतिशयसंपन्न इत्यर्थः । सिद्धसमीहित इति वा ।* **सुखी**ति—*पुत्रजन्मादिसुखयोगीत्यर्थः । भोगिसुखशब्दयो-र्हेतुफलविवक्षया वा पौनरुक्त्यपरिहारः ।* एषामीश्वरत्वादीनामभिजनान्तानां भुक्तशिष्टकर्ममूलत्वं प्रागेव श्रुतिस्मृतिभि-रुपपादितम् ॥ १४ ॥

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५

भा ॥ अहं स्वतश्चाढ्योऽस्मि ; [अभिजनवानस्मि—स्वत एवोत्तमकुले प्रसूतोऽस्मि ;] अस्मिन् लोके मया सदृशः कोऽन्यस्स्वसामर्थ्यलब्धसर्वविभवो विद्यते ? अहं स्वयमेव यक्ष्ये, दास्यामि, मोदिष्ये इत्यज्ञान-विमोहिताः—ईश्वरानुग्रहनिरपेक्षेण स्वेनैव यागदानादिकं कर्तुं शक्यमित्यज्ञानविमोहिता मन्यन्ते ॥ १५ ॥

ता ॥ अस्मिँल्लोके इति—लोकान्तरं तु नास्तीति हि तदभिप्रायः; यद्वा अस्तिशब्दाभिप्रेतसार्वकालिकसम-निषेधविवक्षया * अस्मिँल्लोके इति निर्देशः । यावल्लोकमन्वेषणेऽपीति भावः । प्रकृतैरेवाकारैरेकैकशोऽपि सदृशः प्रतिषिध्यत इत्याह—**स्वसामर्थ्येति** । मया सदृशः क इत्येतावति वक्तव्ये, *अन्यशब्दः अन्यत्वमेवासामर्थ्ये हेतुरिति द्योतनार्थः* । यद्वा, मत्तोऽन्यो मया सदृशो नास्ति ; अहमेव मया सदृश इति * रामरावणयोर्युद्धं रामरावणयोरिव (रा. यु. ११०. २४) इतिवद्भाव्यम् । * यक्ष्ये दास्यामीत्येतत्सात्त्विकविडम्बनमात्रविश्रान्तेन दम्भेनैव ; *दम्भेनाविधि-पूर्वकमिति ह्यनन्तरं विशेष्यते । **मोदिष्य** इति न स्वर्गादिविवक्षया ; अपि तु यजमानत्वादिनिमित्तमहच्छब्दादि-लाभेन । * यक्ष्ये इत्यादिप्रतिपत्तावपि प्राकरणिकीमहङ्कारोपहतिं दर्शयति—**ईश्वरानुग्रहनिरपेक्षेणेति** । **इत्यज्ञान-विमोहिता** इत्येव पर्याप्तं ; **मन्यन्त** इति तु वैशद्यार्थमुक्तम् ॥ १५ ॥

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ १६

भा ॥ अदृष्टेश्वरादिमहङ्कारमृते स्वेनैव सर्वं कर्तुं शक्यमिति कृत्वा एवं कुर्याम, तच्च कुर्याम्; अन्यच्च कुर्यामित्यनेकचित्तविभ्रान्ताः, एवंरूपेण मोहजालेन समावृताः, कामभोगेषु प्रकर्षेण सक्ताः, मध्ये मृताः अशुचौ नरके पतन्ति ॥ १६ ॥

ता ॥ ईश्वरे न्यस्तभरा हि प्रायशो निश्चिताः, तव्यतिरेकमाह—**स्वेनैव सर्वमिति । इति कृत्वा**—इति मत्वेत्यर्थः । चिन्तारूपवृत्तियुक्तं मन एव चित्तम् ; त[त्र]त्प्रवृत्तिभेदादनेकत्वोक्तिः ; तद्दर्शयति—**एवं कुर्यामित्यादिना । विभ्रान्ताः**—विक्षिप्ता इत्यर्थः । यद्वा विभ्रान्तिर्विपरीतज्ञानम् ; मोहस्त्वज्ञानम् । अथवा *अन्यथा चिन्तितं कार्यं देवेन कृतमन्यथा इति न्यायाच्चिन्तानामेव भ्रान्तिरूपत्वमाह—**एवंरूपेणेति** । *न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ (मनु. २. ९४ ; वि. ४. १०. २३) इत्ययमर्थ उपसर्गेण द्योत्यत इत्याह—**प्रकर्षेण सक्ता** इति । *इदं कृतमिदं कार्यमिदमन्यत्कृताकृतम् । एवमीहासमायुक्तं कृतान्तः कुरुते वशे ॥ (भा. मो. १७५. २१) इत्युक्तमाह—**मध्ये मृता** इति । अशुचौ कामभोगे प्रसक्तानां तथाविधमेव फलमित्यभिप्रायेण नरकस्याशुचित्वविशेषणम् । पूयरुधिरवसादिमयत्वं चाशुचित्वम् ॥ १६ ॥

आत्मसंभाविताः स्तब्धाः धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १७

भा ॥ आत्मनैव संभाविताः, आत्मनैवात्मानं संभावयन्तीत्यर्थः । स्तब्धाः—परिपूर्णमन्यमाना न किंचित्कुर्वाणाः । कथम् ? धनमानमदान्विताः—धनेन विद्याभिजनाभिमानेन च जनितमदान्विताः, नामयज्ञैः—नामप्रयोजनैः, यष्टेतिनाममात्रप्रयोजनैर्यज्ञैः यजन्ते । तदपि दम्भेन हेतुना यष्ट्रत्वख्यापनाय, अविधिपूर्वकम्—अयथाचोदनं यजन्ते ॥ १७ ॥

ता ॥ *आत्मसंभाविताः इत्यत्र परसंभावनाप्रसङ्गरहिततया *अब्भक्षः इतिवदवधारणगर्भतामाह—**आत्मनैव संभाविता** इति । आत्मप्रशंसादिरूपदोषव्यक्त्यर्थमाह—**आत्मनैवात्मान**मिति । परैस्संभाविता अपि हि सन्तो लज्जन्ते । स्तब्धताहेतुः **परिपूर्णमन्यमाना इति । न किंचित्कुर्वाणा** इति तुशब्दार्थः । किंचित्—गुरुवन्दनादिकमपीत्यर्थः । धनादिदृष्टसंपत्तिमदेन अदृष्टवैकल्यतिरस्कार इति वक्तुं पारलौकिकाप्रवृत्तिहेतुं शङ्कते—**कथ**मिति । *विद्यामदो धनमद-स्तृतीयोऽभिजनो मदः (भा. उ. ३४. ४६) इति सन्नियोगशिष्टत्वाद्धनस्यात्रोक्तेश्च तत्समभिव्याहृतो मदहेतुर्मानो विद्याभिजननिबन्धन इत्याह—**विद्याभिजनाभिमानेन** चेति । नामसंबन्धिनो यज्ञा नामयज्ञाः ; संबन्धश्चात्र धर्मादि-प्रयोजनाभिसन्धिव्युदासाय फलफलिभावेनेत्यभिप्रायेणाह—**नामप्रयोजनै**रिति । कीर्त्यादिष्वपि नामशब्दप्रयोगात्तदभि-संधेश्च *दम्भेनेत्यादिना सिद्धेस्संज्ञायां प्रसिद्धिप्रकर्षादपहासार्थत्वौचित्याच्च—**यष्टेतिनाममात्रप्रयोजनै**रित्युक्तम् । अत एव *यज्ञसमाख्यामात्रम् ; न तु वस्तुतोऽसौ यज्ञः इति व्याख्याऽपि मन्दा प्रदर्शिता ; अविधिपूर्वकत्वोक्त्यैव तदर्थ-सिद्धेश्च । **दम्भेन हेतुने**त्यभिसंधिविशेषस्य हेतुत्वोक्तिः । **यष्ट्रत्वख्यापनाये**ति तु विषयतः प्रयोजनतश्च तद्विवरणम् । विधिरत्र विधायकं वाक्यम् । तदुक्तप्रकारपरित्यागोऽत्राविधिपूर्वकत्वमित्याह—**अयथाचोदन**मिति ॥ १७ ॥

भा ॥ ते चेदृग्भूता यजन्त इत्याह—

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८

भा ॥ अन्यापेक्षोऽहमेव सर्वं करोमीत्येवंरूपमहंकारमाश्रिताः, तथा सर्वस्य करणे मद्बलमेव पर्याप्त-मिति च बलम्, अतो मत्सदृशो न कश्चिदस्तीति च दर्पम्, एवंभूतस्य मम काममात्रेण सर्वं संपत्स्यत इति

कामम्, मम ये अनिष्टकारिणस्तान् सर्वान् हनिष्यामीति च क्रोधम्, एवमेतान् संश्रिताः स्वदेहेषु परदेहेषु चावस्थितं सर्वस्य कारयितारं पुरुषोत्तमं मामभ्यसूयकाः—प्रद्विषन्तः, कुयुक्तिभिर्मन्स्थितौ दोषमाविष्कुर्वन्तो मामसहमाना अहंकारादिकान् संश्रिता यागादिकं सर्वं क्रियाजातं कुर्वत इत्यर्थः ॥ १८ ॥

ता ॥ पुनरुक्त्यादिपरिहारायानन्तरश्लोकस्य सात्त्विकयजनेतिकर्तव्यतारूपगुणवैपरीत्यपरत्वमाह—**ते चेदृग्भूता यजन्त** इति । क्रमेण दाम्भिकयज्ञेतिकर्तव्यताक्रमं विवृणोति—**अनन्यापेक्ष** इत्यादिभिः । भगवानेव सर्वं कारयतीत्यस्य प्रतिक्षेपोऽहंकारः, यत्परिहाराय स्मर्यते * यद्यहंकारमाश्रित्य यज्ञदानतपःक्रियाः । कुर्वंस्तत्फलमाप्नोति पुनरावर्तनं तु तत् ॥ (भा. मो. २१०. ७३) इति । बलवत्त्वमात्रस्यादोषत्वेऽपि * भगवतो बलेनेत्यस्य विपरीतं स्वबलपर्याप्त्यनुसंधानम्, तदुभयमूलो दर्पस्सर्वावज्ञानहेतुः पूज्यपूजाप्रतिस्पर्धी, भगवत्प्रसादादेवेष्टप्राप्त्यनिष्टपरिहारावित्यस्य विपरीतौ कामक्रोधाविति । संश्रिताः—सम्यगाश्रिताः, निरपेक्षहेतुत्वेनाभिमन्यमाना इत्यर्थः । अत्र **परदेहेष्विति** यज्ञानुकूलप्रतिकूलर्त्विक्तस्करादिविवक्षया । सप्तम्या स्थितिस्सिद्धा; सा च प्रवर्तनाद्यर्थमिति श्रुत्यादिभिः प्राक्प्रपञ्चितम्; तत्प्रतिपत्तिविरुद्धं स्मारयति—**सर्वस्य कारयितार**मिति । हितप्रवर्तनमेवासूयाहेतुरिति भावः । **पुरुषोत्तम**मिति—यद्वैलक्षण्यविज्ञानमात्रात्कृतकृत्यो भवतीत्युक्तम्, सहि महोपकारी द्वेषासूयास्पदमेषामिति भावः । सर्वप्रवर्तनादिगुणकथनं गुणेषु दोषाविष्करणरूपासूयालक्षणव्यक्त्यर्थम् । पुरुषोत्तमप्रकरणे हि स्मृत्यादिप्रवर्तनाय * सर्वस्य चाहं हृदि सन्निविष्टः (१५. १५) इत्युक्तम्; तदेवात्र * मामात्मपरदेहेष्वित्यनेन स्मार्यत इति च भावः । * प्रद्विषन्तोऽभ्यसूयकाः इत्यनयोः प्रातिलोम्येन हेतुकार्यतयाऽन्वयक्रमं यजन्त इत्यनुकर्षणेन वाक्यसमाप्तिं चाह—**कुयुक्तिभि**रिति । ईश्वरपरतन्त्रत्वे कथं कर्मवश्यता? फलानां कर्ममूलत्वे च किमीश्वरेणेत्यादयः कुयुक्तयः । अनसूयालक्षणव्याजेनासूयामपि बृहस्पतिरलक्षयत्—* न गुणान्गुणिनो हन्ति स्तौति मन्दगुणानपि । नान्यदोषेषु रमते साऽनसूया प्रकीर्तिता ॥ (अ. स्मृ. १. ३४) इति । असहिष्णुत्वरूपेण लक्षणेन द्वेषं विवृणोति—**मामसहमाना** इति । असहमानत्वं च तदाज्ञातिलङ्घनपर्यन्तमनुसंधेयम् । एतच्च स्ववंश्यानामप्यशुचिनरकपतने निदानम्; यथोच्यते * मज्जन्ति पितरस्तस्य नरके शाश्वतीस्समाः । द्विष्याद्यो विबुधश्रेष्ठं देवं नारायणं हरिम् ॥ (भा. मो. ३२६. ६) इति, एवं * [यत्] ये द्विषन्ति महात्मानं न स्मरन्ति [जनार्दनम्] च केशवम् । न तेषां पुण्यतीर्थेषु गतिस्संसर्गिणामपि ॥ (भा. मो. ३३६. ३६) इत्यादि चात्रानुसंधेयम् । * नामयज्ञैरित्यस्योपलक्षणतामाह—**यागादिकं सर्व**मिति ॥ १८ ॥

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९

भा ॥ य एवं मां द्विषन्ति, तान् क्रूरान् नराधमानशुभानहमजस्रं संसारेषु जन्मजरामरणादिरूपेण परिवर्तमानेषु संतानेषु, तत्राप्यासुरीष्वेव योनिषु क्षिपामि—मदानुकूल्यप्रत्यनीकेष्वेव जन्मसु क्षिपामि; तत्तज्जन्मप्राप्त्यनुगुणप्रवृत्तिहेतुभूतबुद्धिषु क्रूरास्वहमेव संयोजयामीत्यर्थः ॥ १९ ॥

ता ॥ एवंविधप्रद्वेषादिपूर्वकयागादेरपि यथोचितप्रतिकूलफलप्रदोऽहमेवेत्युच्यते—* तानहमित्यादिश्लोकद्वयेन । वैषम्यनैर्घृण्यपरिहारार्थस्तानित्यनुवाद इत्यभिप्रायेणाह—**य एवं मां द्विषन्ती**ति । अत्र चतुर्भिर्विशेषणैः * न मां ः (७. १५) इत्यादिनोक्ताश्चतुर्विधा दुष्कृतिन एव विवक्षिता इति तद्व्याख्यानमिदम् । तथा हि—नराधमशब्द-

स्तावत्स एव; * आसुरं भावमाश्रिताः इत्येतत्तु द्विषन्त इत्येतत्समानार्थतया प्रागेव व्याख्यातम्; एवं क्रूराशुभशब्दावपि यथायोगं मूढादिशब्दसमानार्थौ नेतव्यौ इति। अत्रात्यन्ताविभागेन योजनं चासुरराश्यैक्यात्। जन्मादिचक्रपरिवृत्तिष्वविच्छिन्नतयैकाकारेण सरणात् संसारस्संतानः। संसरति पुरुषोऽस्मिन्निति अधिकरणार्थघञन्तोऽत्र संसारशब्दः। तद्बहुत्वोक्तिश्चक्रपरिवृत्त्यानन्त्यादित्याह—**जन्मजरे**त्यादिना। संसारशब्दस्य सदसज्जन्मसाधारणत्वाद्विशेष्यत इत्याह—**तत्रापी**ति। * एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् (६. ४२) इत्याद्युक्तभगवद्योगानुकूलसात्त्विकजन्मविशेषव्यवच्छेदाय तामसत्वम् * आसुरीष्वेवेत्युच्यत इत्याह—**मदानुकूल्यप्रत्यनीकेष्वि**ति। ईदृशं प्रतिकूलजन्म देवादिचतुर्विधयोनिष्वपि द्रष्टव्यम्। * एष एवासाधु कर्म कारयति तं यमधो निनीषति (कौ. ३. ९) इत्यादिश्रुत्यनुसारेण * क्षिपामीत्युक्तस्य द्वारमाह—**तत्त**दिति। पापप्रवृत्तिहेतुभूतक्रूरबुद्ध्यादिप्रदानमपि प्राचीनप्रद्वेषादिफलभूतत्वान्नेश्वरस्य वैषम्यनैर्घृण्यापादकम्॥ १९॥

आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्॥ २०

भा॥ मदानुकूल्यप्रत्यनीकजन्मापन्नाः पुनरपि जन्मनिजन्मनि मूढाः मद्विपरीतज्ञाना मामप्राप्यैव—अस्ति भगवान् सर्वेश्वरो वासुदेव इति ज्ञानमप्राप्य ततस्ततो जन्मनोऽधमामेव गतिं यान्ति॥ २०॥

ता॥ उत्तरोत्तरमपकर्षपरम्परोच्यते—* आसुरीमिति श्लोकेन। मूढशब्दतः फलितमाह—**मद्विपरीतज्ञाना इति**। यद्वा विपरीतज्ञानमेवात्र मोहः; स च वाक्यार्थानुगुण्यात्स्वविषयो विशेषितः। सत्त्वोत्तराणामपि परब्रह्मप्राप्तेरनेकजन्मसंसिद्धिसाध्यतया तामसेषु तत्प्रसङ्गप्रतिषेधयोरनौचित्यात्प्राप्तेः प्रथमपर्वभूतशास्त्रजन्यज्ञानप्राप्तिरिहाशास्त्रवश्येष्वासुरेषु प्रतिक्षिप्यते। तत्र शास्त्रजन्यज्ञानत्वव्यक्त्यर्थमाह—**अस्ति भगवा**निति। अधमत्वस्योत्तमावधिसापेक्षत्वादवधिसमर्पणसमर्थतया सन्निहितः ततश्शब्दो न हेतुपर उचित इत्यभिप्रायेणाह—**ततस्ततो जन्मन** इति॥ २०॥

भा॥ अस्यासुरस्वभावस्यात्मनाशस्य मूलहेतुमाह—

त्रिविधं नरकस्यैतद् द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेत्तत्त्रयं त्य[ज]जेत्॥ २१

भा॥ अस्यासुरस्वभावरूपस्य नरकस्यैतत् त्रिविधं द्वारम्, तच्चात्मनो नाशनम्; कामः क्रोधो लोभ इति। त्रयाणां स्वरूपं पूर्वमेव व्याख्यातम्। द्वारम्—मार्गो हेतुरित्यर्थः। तस्मादेतत्त्रयं त्य[ज]जेत्; तस्मात्—अतिघोरनरकहेतुत्वात् कामक्रोधलोभानाम्, एतत्त्रितयं दूरतः परित्य[ज]जेत्॥ २१॥

ता॥ अवश्यपरिहरणीयं संक्षिप्योच्यत इत्यभिप्रायेणानन्तरग्रन्थं संगमयति—**अस्ये**ति। यथावस्थितस्यात्मनोऽप्राप्तिरेव **आत्मनाशः**; सचासुरस्वभाव एवेत्यभिप्रायेणाह—**आसुरस्वभावस्यात्मनाशस्ये**ति। मूलच्छेदात्सर्वोऽप्यासुरस्वभावश्छिन्न एवेत्यभिप्रायेणाह—**मूलहेतु**मिति। **आसुरस्वभावरूपस्य नरकस्ये**ति—एतस्मादधिकं किमन्यन्नरकमिति भावः। आसुरस्वभावपरिहारार्थं हितमूलोऽयमुपदेश इति वा, * तमोद्वारैरित्यनन्तरैकार्थ्यं वा विवक्षितम्। **आत्मनो नाशनमिति—* असन्नेव स भवति (आ) इत्यादिक्रमेणेति** भावः। प्रवेशहेतुर्हि द्वारं, तेनापि प्राप्तिमात्रहेतुत्वमिह

विवक्षितमित्यभिप्रायेणोपचारावलम्बनक्रममाह—**मार्गो हेतुरित्यर्थ** इति । द्वारं नाशनं, प्रविशन्नेव नश्यतीति भावः । त्याज्यस्य दोषोक्तिस्त्यागविध्युपकारिकेत्यभिप्रायेणाह—**तस्मा**दिति । रौरवादिर्नरकः पापक्षयहेतुः; आसुरस्वभावस्त्वसौ पापार्जनहेतुत्वादतिघोर इत्यभिप्रायेणाह—**अतिघोरनरकहेतुत्वा**दिति । सर्वस्यासुरस्वभावस्य परित्याज्यत्वेऽपि विशेष-निषेधोऽत्यन्तपरिहरणीयत्वज्ञापनायेत्याह—**दूरतः परित्यजे**दिति ॥ २१ ॥

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनश्श्रेयस्ततो याति परां गतिम् ॥ २२

भा ॥ एतैः—कामक्रोधलोभैः तमोद्वारैः मद्विपरीतज्ञानहेतुभिः विमुक्तो नरः आत्मनः श्रेय आचरति—लब्धमद्विषयज्ञानो मदानुकूल्ये प्रयतते ; ततो मामेव परां गतिं याति ॥ २२ ॥

ता ॥ त्याज्यस्य दोषोक्त्या त्यागो विहितः; त्यागस्यैवेदानीं फलप्रवाह उच्यते—*एतैरिति श्लोकेन । **मद्विपरीतज्ञानहेतुभि**रिति तमःफलोक्तिः; तमश्शब्दो वाऽत्र तत्पर्यन्तलक्षकः; तमोद्वारैर्विमुक्तत्वात्तमसाऽपि विमुच्यते; श्रेयश्चरणं च तत्त्वज्ञानपूर्वकमित्यभिप्रायेणाह—**लब्धमद्विषयज्ञान** इति । **श्रेय आचरती**त्यनेन प्रागुक्तभगवत्प्रद्वेषादि निवृत्तिर्विवक्षिता । श्रेयः प्रशस्तं; तच्च संग्रहाद्भगवदानुकूल्यं, तदनुप्रवेशात्सर्वस्य शास्त्रीयस्येत्यभिप्रायेणाह—**मदानु-कूल्य** इति । ततश्श्रेयश्चरणादेव हेतोरित्यर्थः । *मामप्राप्यैवेत्यादिपरामर्शादिह परगतिशब्दनिर्दिष्टः प्राप्यपर्यवसान-भूमिः परमपुरुष इत्याह—**मामेव परां गति**मिति ॥ २२ ॥

भा ॥ शास्त्रानादरोऽस्य नरकस्य प्रधानहेतुरित्याह—

यश्शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ २३

भा ॥ शास्त्रं वेदाः, विधिरनुशासनम्, वेदाख्यं मदनुशासनमुत्सृज्य यः कामकारतो वर्तते—स्व-च्छन्दानुगुणमार्गेण वर्तते, न स सिद्धिमवाप्नोति—न कामप्यामुष्मिकीं सिद्धिमवाप्नोति ; न सुखं किंचि-दवाप्नोति ; न परां गतिं—कुतः परां गतिं प्राप्नोतीत्यर्थः ॥ २३ ॥

ता ॥ आसुरस्वभावेषु मूलतया प्रधानभूतास्त्रय उक्ताः; तेभ्योऽपि प्रधानतमः परिहार्यो हेतुरनन्तरमुच्यत इत्याह—**शास्त्रानादर** इति । सर्वावस्थसमस्तपुरुषहितानुशासनाच्छास्त्रशब्दो वेदेष्वेव प्रथमं प्राप्तः; तदनुबन्धादन्ये-ष्वित्यभिप्रायेणाह—**शास्त्रं वेदा** इदि । विधायकवाक्यस्य शास्त्रशब्देनोपात्तत्वात् तद्व्यापारोऽत्र विधिशब्दविवक्षित इत्याह—**विधिरनुशासन**मिति । फलितमाह—**वेदाख्यं मदनुशासन**मिति । शास्त्रमेव विधिरिति सामानाधिकरण्यं वा विवक्षितम् । मदनुशासनमित्यनेन *श्रुतिःस्मृतिर्ममैवाज्ञा (वि. ध. ७६. ३१) इत्यादिस्मारणम् । एतेनान्यथा लिङा-द्यर्थं वर्णयन्तोऽपि प्रत्युक्ताः । लिङादयो हि प्रशासितुरभिप्रायमाक्षेपादभिधानतो वा व्यञ्जयन्ति । शास्त्रप्रतिपक्षभूतः कामकारोऽत्र न शास्त्रीयवैकल्पिकादिविषय इत्यभिप्रायेणाह—**स्वच्छन्दानुगुणमार्गे**ति *अथ केन प्रयुक्तोऽयं (३. ३६), *काम एष क्रोध एषः (३७) इत्याद्युक्तकामप्रयुक्तेत्युक्तं भवति । *या वेदबाह्याः स्मृतयो याश्च काश्च कुदृ-ष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥ (मनु. १२. ९५) इत्याद्यनुसन्धानेनाह—**न कामप्यामु-**

ष्मिकीं सिद्धिमिति । आमुष्मिकसुखहेतुभूतामुपायसिद्धिमित्यर्थः । न सुखं—न स्वर्गादिसुखमित्यर्थः । यद्वा **आमुष्मिकीं सिद्धिमिति** स्वर्गादिफलविषयम्; **सुखमिति** त्वैहिकपरम्; अत एव हि किञ्चिच्छब्दः । इहापि हि सुखं शास्त्रीयानुष्ठानजनितपरमपुरुषानुग्रहादेव । अत एव ह्युच्यते—* अनाराधितगोविन्दा ये नरा दुःखभागिनः (वि. ध. १९. १३) इति । कैमुत्यप्रदर्शनायात्रान्यसुखसमभिव्याहार इत्याह—**कुतः परां गतिमिति** ॥ २३ ॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ २४

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु **दैवासुरसंपद्विभागयोगो** नाम षोडशोऽध्यायः ॥ १६ ॥

भा ॥ तस्मात्कार्याकार्यव्यवस्थितौ—उपादेयानुपादेयव्यवस्थायां शास्त्रमेव तव प्रमाणम्—धर्मशास्त्रेतिहासपुराणाद्युपबृंहिता वेदाः यदेव पुरुषोत्तमाख्यं परं तत्त्वं तत्प्रीणनरूपं तत्प्राप्त्युपायभूतं च कर्माधबोधयन्ति, तच्छास्त्रविधानोक्तं तत्त्वं कर्म च ज्ञात्वा—यथावदन्यूनातिरिक्तं विज्ञाय, कर्तुं त्वमर्हसि—तदेवोपादातुमर्हसि ॥२४॥

॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये षोडशोऽध्यायः ॥ १६ ॥

ता ॥ अध्यायोक्तं सर्वमेतदर्थमित्यभिप्रायेणानुशिष्यते—**तस्माच्छास्त्रमिति** । अत्र कार्याकार्यशब्दयोरुत्पाद्यानुत्पाद्यादिविषयत्वस्यासङ्गतिमभिप्रेत्याह—**उपादेयानुपादेयव्यवस्थायामिति** । अनुष्ठानविपर्ययस्य तत्त्वविपर्ययस्य च आसुरस्वभावे प्रदर्शितत्वादत्र च तद्विपर्ययस्य विवक्षितत्वात्कार्याकार्यशब्दौ तत्त्वातत्त्वयोः प्रदर्शनार्थावित्यभिप्रायेणोपादेयादिसाधारणशब्दः । उपादानमत्र यथाशास्त्रं मनसा स्वीकरणम् । शास्त्रमेवेत्ययुक्तं, *श्रुतिःस्मृतिस्सदाचारः (याज्ञ. १.१.७) इत्यादिविरोधादित्यत्राह—**धर्मशास्त्रेति** । आदिशब्देनाचारग्रहणम् । * यजन्त्यविधिपूर्वकं (९. २३), * न तु मामभिजानन्ति (२४) इत्यादिव्यवच्छेदाय ज्ञात्वेत्यादिकमुच्यत इत्याह—**यदेवेति** । सर्वाणि हि शास्त्राणि साक्षाद्वा परम्परया वा परमपुरुषसमाराधनतयैव सर्वाणि कर्माणि विदधति; तत्र तत्त्वहितयोः *वेदैश्च सर्वैरहमेव वेद्यः (१५. १५) इत्युक्तं परतत्त्वं प्रागुक्तसमाख्यया स्मारयति—**पुरुषोत्तमाख्यमिति** । **तत्प्राप्त्युपायभूतं चेति**—सर्वेषां हि फलसङ्गादित्यागेनानुष्ठितानां परब्रह्मप्राप्त्युपायत्वमेव स्वभाव इति भावः । अत्र **अवबोधयन्तीत्यनेनाज्ञातज्ञापनरूपविधानशब्दार्थो विवृतः** । अयथाशास्त्रं कर्मणां करणं च न कर्तव्यमित्यभिप्रायेण * कर्तुमर्हसीत्युक्तम् । तस्मादप्यनुष्ठानतत्त्वाध्यवसायसाधारण्यमाह—**उपादातुमिति** । * अर्हसीत्येतदनुसारी मध्ये त्वमितिनिर्देशः तस्य दैवीसंपदमभिजातस्य योग्यत्वातिशयद्योतनाय । एतदुक्तं भवति—सत्त्वोत्तरेण भवता कुहकपुरुषकौशलातिशयपरिग्राहितमोहनशास्त्राभासप्रक्रियानुधावनेन नित्यभगवदाज्ञारूपवेदाख्यशास्त्रसारभूताद्यथाधिकारं कर्मयोगभक्तियोगरूपभगवदनन्यभजनपरमधर्मान्न प्रच्युतेन भवितव्यम्; अपितु स एव नित्यमुपादेय इति । इहेति निर्देशः कर्माधिकारभूमिप्रदर्शनार्थः, कर्मवश्यावस्थत्वज्ञापको वा ॥२४

इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां षोडशोऽध्यायः ॥ १६ ॥

श्रीः ।

॥ अथ सप्तदशोऽध्यायः ॥ १७ ॥

भा ॥ देवासुरविभागोक्तिमुखेन प्राप्यतत्त्वज्ञानं तत्प्राप्त्युपायज्ञानं च वेदैकमूलमित्युक्तम् । इदानीमशास्त्रविहितस्यासुरत्वेनाफलत्वम्, शास्त्रविहितस्य च गुणतस्त्रैविध्यम्, शास्त्रसिद्धस्य लक्षणं चोच्यते । तत्राशास्त्रविहितस्य निष्फलत्वमजानन् अशास्त्रविहिते श्रद्धासंयुक्ते यागादौ सत्त्वादिनिमित्तफलभेदबुभुत्सया अर्जुनः पृच्छति—

अर्जुन उवाच—

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयाऽन्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १

भा ॥ शास्त्रविधिमुत्सृज्य श्रद्धयान्विता ये यजन्ते, तेषां निष्ठा का ? किं सत्त्वम् ? आहोस्विद्रजः ? अथ तमः ? निष्ठा—स्थितिः ; स्थीयतेऽस्मिन्निति स्थितिः, सत्त्वादिरेव निष्ठेत्युच्यते । तेषां किं सत्त्वे स्थितिः, किं वा रजसि, किं वा तमसीत्यर्थः ॥ १ ॥

ता ॥ उक्तशेषतया सप्तदशमवतारयितुमुक्तमुद्गृह्णाति—**देवासुरे**ति । प्रकृतस्य मुखभेदेन प्रपञ्चनपरतया सङ्गतिमाह—**इदानी**मिति । हेयोपादेयव्यवस्थायाः शास्त्रैकमूलत्वोक्तिसमनन्तरमित्यर्थः । * अशास्त्रमासुरं कृत्स्नं शास्त्रीयं गुणतः पृथक् । लक्षणं शास्त्रसिद्धस्य त्रिधा सप्तदशोदितम् ॥ (२१) इति संग्रहश्लोकं विवृणोति—**अशास्त्रविहितस्ये**त्यादिना । अत्र सामान्यतो विशेषतश्च शास्त्रीयार्थविभजनमध्यायानुवृत्तार्थः । * सप्तदशोदितमित्येतत्संग्रहश्लोकवाक्यत्रयेऽपि प्रत्येकमन्वेतव्यम् । एतत्सर्वं सप्तदशोदितमिति सर्वोपसंहारेण वाऽन्वयः । * ज्ञात्वा शास्त्रविधानोक्तम् (१६. २४) इत्यस्यानन्तरं * ये शास्त्रविधिमुत्सृज्येति प्रश्नः कथं संगच्छत इत्यत्राह—**तत्रे**ति । **अशास्त्रविहितस्य निष्फलत्वमजानन्नि**ति । अयमभिप्रायः—प्रेक्षावतां स्वतः प्रयोजने तदुपाये वा बुभुत्सा ; अतस्सत्त्वादिनिष्ठाभेदबुभुत्सा तन्मूलफलविशेषपर्यन्ता ; नच निष्फलत्वज्ञाने फलविशेषजिज्ञासा ; ततश्च लोकसिद्धाः कृषिचिकित्सादयोऽपि प्रेक्षावत्प्रवृत्तिविषयास्सफला एव दृश्यन्ते, अन्यथा शास्त्रस्यापि निर्मूलत्वप्रसङ्गात् ; अलौकिकेष्वप्याचारसिद्धाः कतिकति धर्माः ; नच ते यत्किञ्चित्फलमन्तरेण स्युः, प्रेक्षावतामप्रवृत्तिप्रसङ्गात् ; नच श्रद्धापूर्वकानुष्ठानेऽङ्गवैकल्यात्फलाभावस्संभवति ; नच प्रेक्षावद्भिरनन्तैर्जन्मभिर्बहुवित्तव्ययायासादिनाऽनुष्ठीयमानेषु दृष्टप्रयोजनरहितेषु कर्मसु अदृष्टपर्यवसानमन्तरेण गतिः ; अतश्शास्त्रविहितादस्य यदि किञ्चिद्वैषम्यमुच्यते, तदा सत्त्वादिगुणभेदप्रयुक्तफलतारतम्यमात्रमेव स्यात् ; अतः * यश्शास्त्रविधिमुत्सृज्य वर्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ (१६. २३) इति पूर्वोक्तमपि प्रायशः प्रकृष्टसुखाभावविवक्षया । * कामकारतः इति विशेषणं वाऽश्रद्धायुक्तव्यवच्छेदार्थमिति दुरुपदेशबाह्यागमस्योत्प्रेक्षावृद्धव्यवहारमात्रकल्पिते ह्यत्र धर्माभिसन्धिश्रद्धादियोगान्नैष्फल्यनिवृत्तिर्युक्तेत्यर्जुनस्याशयः—इति । विशिष्टस्याफलत्वशङ्कास्पदत्वाय कर्तृविशेषणं क्रियाविशेषणतया व्याचष्टे—**श्रद्धासंयुक्ते यागादाविति** । यागोऽत्र दानाद्युपलक्षणार्थः । देवपूजात्वाविशेषात्तत्संग्रहो वा ।

अत्र कृष्णशब्देन * कृषिर्भूवाचकश्शब्दो णश्च निर्वृतिवाचकः (भा. उ. ६९. ५) इति सर्वापेक्षितसिद्धयौपयिकीं निरुक्तिमभिप्रैति । तुशब्देन शास्त्रीयनिष्ठातः कामकारतश्च व्यावृत्तिर्विवक्षिता । विपरिणतस्य किंशब्दस्य आहो इति पदस्य वा अत्रावृत्तिमभिप्रेत्याह—**किं सत्त्वमिति** । विनाशाद्यर्थव्यवच्छेदार्थं सत्त्वादिसामानाधिकरण्याय चाधिकरणव्युत्पत्तिमवतारयितुं पर्यायेण स्वरूपं व्यनक्ति—**निष्ठा स्थितिरिति** । *तेषां निष्ठा तु केति पृष्ट एवार्थः *सत्त्वमित्यादिना विशेष्यत इत्यभिप्रायेण फलितमाह—**तेषामिति** ॥ १ ॥

भा ॥ एवं पृष्टो भगवानशास्त्रविहितश्रद्धायास्तत्पूर्वकस्य च यागादेर्निष्फलत्वं हृदि निधाय शास्त्रीयस्यैव यागादेर्गुणतस्त्रैविध्यं प्रतिपादयितुं शास्त्रीयश्रद्धायाः त्रैविध्यं तावदाह—

श्रीभगवानुवाच—

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ २

भा ॥ सर्वेषां देहिनां श्रद्धा त्रिविधा भवति । सा च स्वभावजा—स्वभावः स्वासाधारणो भावः, प्राचीनवासनानिमित्तस्तत्तद्रुचिविशेषः ; यत्र रुचिस्तत्र श्रद्धा जायते । श्रद्धा हि, स्वाभिमतं साधयत्येतदिति विश्वासपूर्विका साधने त्वरा । वासना रुचिश्च श्रद्धा चात्मधर्मा गुणसंसर्गजाः ; तेषामात्मधर्माणां वासनादीनां जनकाः देहेन्द्रियान्तःकरणविषयगता धर्माः कार्यैकनिरूपणीयाः सत्त्वादयो गुणाः—सत्त्वादिगुणयुक्तदेहाद्यनुभवजा इत्यर्थः । ततश्चेयं श्रद्धा सात्त्विकी राजसी तामसी चेति त्रिविधा । तामिमां श्रद्धां शृणु ; सा श्रद्धा यत्स्वभावा, तं स्वभावं शृण्वित्यर्थः ॥ २ ॥

ता ॥ श्रद्धा कतिविधेति प्रश्नाभावेऽपि तदुक्तिवै[घट्य]यर्थ्यशङ्कां परिहरन् श्रद्धात्रैविध्यकथनस्य प्रयोजनं चाह—**एवं पृष्ट** इत्यादिना । पूर्वोपदिष्टविरुद्धं पृष्ट इत्यर्थः । **हृदि निधाये**ति—क्रमेण साक्षादुत्तरमवतारयितुमित्यर्थः । प्रश्नस्यात्यन्तानादरपरत्वज्ञापनाय वा सहसा साक्षादुत्तरानुक्तिरिति भावः । **गुणतस्त्रैविध्य**मिति—गुणभेदनिमित्तफलभेदयोगित्वमिति भावः । अत्र हि श्रद्धायोगात्सात्त्विकत्वं शास्त्रोल्लङ्घनात्तामसत्वं तदुभयसमुच्चयाद्राजसत्वमाशङ्कितम् । तत्र तावच्छ्रद्धापूर्वकत्वं फलसाधनत्वायोपयुक्तम् ; तच्छास्त्रीयेष्वेव ; तत्रापि श्रद्धाया नत्वैकान्तिकत्वमित्यभिप्रायेण शास्त्रीयश्रद्धायास्त्रैविध्यग्रहणम् । एतेन परिसंख्यान्यायेनाशास्त्रीयेषु फलभेदनिमित्तं त्रैविध्यं प्रत्युक्तम् । अत्र श्रद्धाभेदात्सत्त्वादिनिष्ठाभेदनिर्णय इत्युक्तं भवति । देहिनामित्यनेन तत्तद्देहानुरूपमधिकारिवैचित्र्यं विवक्षितमित्यभिप्रायेणाह—**सर्वेषामिति** । ब्रह्मादीनामपीत्यर्थः । * देहिनामिति सत्त्वादिगुणप्रचुरदेहविशेषानुरूपमिति भावः । साधारणेषु शास्त्रेषु तत्प्ररोचकेष्वर्थवादादिषु च कथं पुरुषभेदनियतश्रद्धाभेद इति शङ्कायां * सा स्वभावजेति वाक्यान्तरमित्यभिप्रायेणाह—**सा चेति** । कार्यासाधारणत्वाय कारणासाधारणत्वविवक्षामाह—**स्वभावस्स्वासाधरणो भाव** इति । कोऽसौ भावः, कश्च तस्याप्यसाधारण्यहेतुरित्यत्राह—**प्राचीनेति** । भावशब्दोऽत्र धर्मविशेषपरः । नानार्थे स्वभावशब्दे कथमत्र रुचिविवक्षेत्यत्राह—**यत्र रुचिरिति** । रुचिश्रद्धयोः कार्यकारणभावोऽन्वयव्यतिरेकसिद्ध इत्यर्थः । रुचिव्यतिरिक्ता तत्कार्यभूता का श्रद्धेत्यत्राह—**श्रद्धा हीति** । * श्रद्धा विश्वासकाङ्क्षयोरिति स्वरार्पर्यन्तविश्वासेऽपि हि श्रद्धाशब्दं नैघण्टुकाः पठन्ति । ननु * कामस्संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव (बृ. ३. ५. ३) इति श्रवणात्

अन्तःकरणधर्मेष्वात्मानमलिम्पत्सु श्रद्धादिषु गुणकृतत्वाच्च गुणधर्मत्वसंभवे[ऽपि] कथमत्र स्वशब्देन देहिशब्देन च निर्दिष्टप्रत्यगात्मनि तदन्वयोक्तिः, तत्राह—**वासने**ति । शुद्धस्वभावस्यैवात्मनः कर्ममूलगुणमयप्रकृतिसंसर्गोपाधिकधर्मभूत-ज्ञानपरिणतिविशेषा इत्यर्थः । श्रद्धाभेदेषु सात्त्विकादिसंज्ञानिवेशाय निर्गुणस्यात्मनः कथं सत्त्वादिमूलत्वासनादियोग इति शङ्काव्युदासाय च देहिशब्दसूचितप्रक्रियया गुणसंसर्गजत्वं विवृणोति—**तेषा**मिति । यथौषधादिविशिष्टदहनादिसंबन्धा-त्पार्थिवादिषु पाकजगुणारम्भः, तथाऽत्रेति भावः । तत्तत्कार्यहेतुतया शास्त्रसिद्धानामनुपलब्ध्या निराकरणमयुक्तमित्यभि-प्रायेणाह—**कार्यैकनिरूपणीया** इति । अतीन्द्रियाणामननुभूतानां कथं वासनाहेतुत्वमित्यत्राह—**सत्त्वादिगुणयुक्ते**ति । मूलकारणापेक्षया श्रद्धायास्सात्त्विकादिसंज्ञाभेद इत्याह—**ततश्चे**ति । सात्त्विकत्वादित्रैविध्येन श्राविताया पुनः * शृण्विति किमुच्यत इत्यत्राह—**सा श्रद्धा यत्स्वभावे**ति । स्वरूपस्य सामान्यतस्त्रैविध्यस्य च विदितत्वादविदितप्रकारविशेषाभि-प्रायेण * शृण्वित्युक्तम् ॥ २ ॥

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धस्स एव सः ॥ ३

भा ॥ सत्त्वम्—अन्तःकरणम्, सर्वस्य पुरुषस्यान्तःकरणानुरूपा श्रद्धा भवति ; अन्तःकरणं यादृश-गुणयुक्तम्, तद्विषया श्रद्धा जायत इत्यर्थः । सत्त्वशब्दः पूर्वोक्तानां देहेन्द्रियादीनां प्रदर्शनार्थः । श्रद्धामयोऽयं पुरुषः ; श्रद्धामयः— श्रद्धापरिणामः । यो यच्छ्रद्धः—यः पुरुषो यादृश्या श्रद्धया युक्तः, स एव सः—स तादृशश्रद्धापरिणामः । पुण्यकर्मविषये श्रद्धायुक्तश्चेत्, पुण्यकर्मफलसंयुक्तो भवतीति श्रद्धाप्रधानः फलसंयोग इत्युक्तं भवति ॥ ३ ॥

ता ॥ * सत्त्वानुरूपेत्यत्र न सत्त्वगुण उच्यते ; सर्वस्य पुरुषस्य श्रद्धायास्तदधीनत्वे राजसतामसश्रद्धाविभागा-योगात् । सहकारित्वेन सत्त्वं सर्वत्रापेक्षितमिति चेन्न, रजस्तमसोरपि तथात्वात् । त्रैगुण्यं हि परस्पराङ्गभावेन स्थितयैव हि वातपित्तकफादिवत्सर्वं कार्यमारभते । अतोऽत्र सर्वश्रद्धासाधारणकारणत्वेन निर्दिष्टं सत्त्वं गुणत्रयोपष्टब्धमन्तःकरण-मेवेत्याह—**सत्त्वमन्तःकरण**मिति । आनुरूप्यं विवृणोति—**अन्तःकरणं यादृशगुणयुक्त**मिति । यद्विषयरुचिजनक-वासनोत्तम्भकसत्त्वादियुक्तमित्यर्थः । पूर्वं * देहिनां सा स्वभावजेत्युक्तम् ; इह त्वन्तःकरणहेतुकत्वमुच्यते ; तदेतन्न वैकल्पिकं, सिद्धे तदयोगात् ; नापि पुरुषभेदेन विकल्पः, सर्वस्येत्युक्तेः ; नापि समुच्चयः, नैरपेक्ष्यप्रतीतेरित्यत्राह—**सत्त्वशब्द** इति । सामग्रीमध्यपातिषु तत्रतत्रान्यतमनिर्देशो नानुपपन्न इति भावः । * श्रद्धामय इत्यत्र मयटस्स्वा-र्थिकत्वे निष्प्रयोजनत्वात्प्राचुर्यार्थत्वेऽपि प्रकृतानुपयोगाच्छ्रद्धाफलान्वयविवक्षया विकारार्थत्वमाह—**श्रद्धापरिणाम** इति । एवं सामान्येन श्रद्धाजन्यफलसंबन्धित्वमुक्तम् ; तत्र * यो यच्छ्रद्ध इत्यादिना श्रद्धाविशेषवतः फलविशेष उच्यत इत्याह—**यः पुरुष** इति । श्रद्धान्तरवैधर्म्यद्योतनाय यत्तच्छब्दयोः यादृश्येत्यादिना प्रकारपरामर्शित्वोक्तिः । * आयुर्घृतम् (यजु. २.३.२.२) इत्यादिवत्कार्यकारणभावातिशयविवक्षया * स एव सः इति निरूढोऽयमारोप इत्याह—**स तादृशश्रद्धा-परिणाम** इति । एतेन * स एव सः इत्यत्र विधेयभेदाभावात्पुनरुक्तिशङ्काऽपि परिहृता । पुरुषस्य नित्यत्वाद्धर्मभूत-ज्ञानविकासादेश्चेन्द्रियद्वारा व्यवस्थितत्वाद्देहादेश्चाचित्परिणामविशेषत्वात्किमपेक्ष्य श्रद्धापरिणामत्वोक्तिरित्यत्राह—**पुण्य-कर्मेति** । **फलभेदबुभुत्सया अत्र प्रश्नोदय इति च भावः ॥ ३ ॥**

भा ॥ तदेव विवृणोति—

यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४

भा ॥ सत्त्वगुणप्रचुराः सात्त्विक्या श्रद्धया युक्ता देवान् यजन्ते । दुःखासंभिन्नोत्कृष्टसुखहेतुभूतदेवयागविषया श्रद्धा सात्त्विकीत्युक्तं भवति । राजसा यक्षरक्षांसि यजन्ते । अन्ये तु तामसा जनाः प्रेतान् भूतगणान् यजन्ते । दुःखसंभिन्नाल्पसुखजननी राजसी श्रद्धा ; दुःखप्रायात्यल्पसुखजननी तामसीत्यर्थः ॥ ४ ॥

ता ॥ प्रक्रान्तश्रद्धायास्सात्त्विकत्वादिविभागोऽनन्तरं सात्त्विकराजसतामसश्रद्धेयैः प्रदर्श्यत इत्यभिप्रायेणाह—**तदेव विवृणोतीति** । तत्—फलविशेषाणां श्रद्धाविशेषनिबन्धनत्वमित्यर्थः । पुरुषस्य सत्त्वादयो ह्युपचीयमानास्स्वानुरूपे विषये श्रद्धां जनयन्तीत्यभिप्रायेणाह—**सत्त्वगुणप्रचुरा** इति । सर्वेषु त्रैगुण्यसंश्रितेषु केनचिद्विशेषेण निर्देशस्तत्प्राचुर्यात् । तत्र सात्त्विक्या श्रद्धयेति पुरुषस्य सात्त्विकत्वकथनेन अर्थसिद्धहेतुकथनम् । श्रद्धाया एव स्वरूपेण निर्दिष्टत्वात् * तां शृण्विति श्रद्धास्वभावो हि ज्ञापयितुं विवक्षित इत्यभिप्रायेणाह—**दुःखासंभिन्नेति** । आराध्यसायुज्यादिर्हि आराधनानां फलमित्यभिप्रायेण दुःखासंभिन्नत्वादिकथनम् । एवमुत्तरयोरपि भाव्यम् । तामसानामितरेभ्योऽत्यन्तवैधर्म्यज्ञापनायान्यशब्दः । भूतगणा रुद्रपार्षदादयः ॥ ४ ॥

भा ॥ एवं शास्त्रीयेष्वेव यागादिषु श्रद्धायुक्तेषु गुणतः फलविशेषः, अशास्त्रीयेषु तपोयागप्रभृतिषु मदनुशासनविपरीतत्वेन न कश्चिदपि सुखलवः, अपि त्वनर्थ एवेति हृदि निहितं व्यञ्जयन्नाह—

आशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥ ५
कर्शयन्तश्शरीरस्थं भूतग्राममचेतसः । मां चैवान्तश्शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६

भा ॥ अशास्त्रविहितमतिघोरमपि तपो ये जनाः तप्यन्ते । प्रदर्शनार्थमिदम् , अशास्त्रविहितं बह्वायासं यागादिकं ये कुर्वते, दम्भाहंकारसंयुक्ताः कामरागबलान्विताः शरीरस्थं पृथिव्यादिभूतसमूहं कर्शयन्तः, मदंशभूतं जीवं चान्तश्शरीरस्थं कर्शयन्तो ये तप्यन्ते, यागादिकं च कुर्वते ; तानासुरनिश्चयान्विद्धि । असुराणां निश्चय आसुरो निश्चयः ; असुरा हि मदाज्ञाविपरीतकारिणः ; मदाज्ञाविपरीतकारित्वात्तेषां सुखलवसंबन्धो न विद्यते ; अपित्वनर्थव्राते पतन्तीति पूर्वमेवोक्तं * पतन्ति नरकेऽशुचौ (१६. १६) इति ॥ ५ ॥ ६ ॥

ता ॥ एवमर्थात्प्रश्नस्य निषेधः कृतः ; अथ कण्ठोक्त्येत्यभिप्रायेणाह—**एवमिति** । * न स सिद्धिम् (१६. २३) इत्यादिप्रागुक्तस्मारणाय **न कश्चिदपि सुखलव** इत्युक्तम् । **अपि त्वनर्थ एवेत्यनेन** पूर्वोक्तनरकपतनस्मारणम् । प्रश्नवाक्यगतश्रद्धान्वितत्वानुभाषणविवक्षया तत्कार्यातिप्रयासज्ञापनपरो घोरशब्द इत्यभिप्रायेणाह—**अतिघोरमपीति** । ननु *यजन्ते श्रद्धयाऽन्विताः इति यागविषये प्रश्ने *तप्यन्त इति तपसोत्तरं कथं संगच्छत इत्यत्राह—**प्रदर्शनार्थमिदमिति** । संग्राहकाकारं दर्शयन् फलितमाह—**अशास्त्रविहितमिति** । वेदबाह्यागमोक्तं, वैदिकमप्यनधिकारिभिर्देशकालद्रव्यक्रियादिनियमानादरेणायथानुष्ठितं चाशास्त्रविहितम् । दारुणपर्यायघोरशब्दाभिप्रेतमाह—**बह्वायासमिति** । **यागादिकमित्यनेन** प्रश्नेऽपि यागग्रहणं प्रदर्शनार्थमिति ज्ञापितम् । अत एव हि प्रश्नोत्तरयोरेकविषयत्वम् । शास्त्रैरचोदितानां चोदकान्तरमुच्यते—**दम्भाहङ्कारसंयुक्ता** इत्यादिना । बलमत्र कामरागयुक्तत्वादसात्त्विकम् । * बलं बलवतां चाहं

कामरागविवर्जितम् (७. ११) इति हि प्रागुक्तम् । न केवलं परत्र नरकम्; अपि त्विहापि कायकर्शनमित्यभिप्रायेण शरीरस्थभूतसमूहकर्शनोक्तिः । * अन्तर्याम्यमृतः (बृ. ५. ७. १४), * अनश्नन्नन्योऽभिचाकशीति (मु. ३. १. १) * न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि (ब्र. ३. २. ११) इत्यादिभिः परमात्मनस्स्वरूपतो धर्मतो वा कर्शनासंभवात्संभवे च शास्त्रविहितोपवासादिभिरपि प्रसङ्गाच्छरीरकर्शनेन च शरीरिणां क्षेत्रज्ञानां ज्ञानसुखादिसङ्कोचरूपस्य कर्शनस्य श्रुतिस्मृतिलोकसिद्धत्वात् * अन्तश्शरीरस्थमित्यनेन शरीरावच्छिन्नक्षेत्रज्ञत्वसूचनात् * क्षेत्रज्ञं चापि मां विद्धि (१३. २), *ममैवांशः (१५.७) इति प्रागुक्तप्रक्रियया सर्वशरीरकपरमात्मविशेषणांशभूतजीवविवक्षयाऽत्र *मामिति निर्देश इत्याह—**मदंशभूतं जीव**मिति । मच्छरीरभूतजीवपीडनं मत्पीडनतुल्यमिति दोषातिशयसूचनार्थोऽयमुपचारः । शास्त्रोल्लङ्घनेनात्मपीडनरूपमपि पापमेषामायातमित्यभिप्रायः । यज्ञस्य स्वतो याज्यभावनत्वाच्छास्त्रीयप्रकारविरहेऽपि नात्यन्तविकलता; तपसस्तु स्वतस्सर्वकर्शनतया शास्त्रीयप्रकाराभावे भावनत्वं न स्यादिति हैतुकप्रायाणां विभागं प्रतिक्षेप्तुमाह—**यागादिकं चे**ति । आसुरो निश्चयो येषां ते आसुरनिश्चयाः; तत्र तद्धितस्य संबन्धमात्रपरतामाह—**असुराणा**मिति । तदभिप्रेतनिश्चयस्य विशेषं व्यञ्जयितुमाह—**असुरा ही**ति । आसुरनिश्चयत्वख्यापनं प्रागुक्तानर्थपर्यवसानप्रकाशनायेत्याह—**मदाज्ञाविपरीतकारित्वा**दिति । * आसुरनिश्चयानित्येतावता कथमयमर्थस्सिध्येदित्यत्राह—**पूर्वमेवे**ति ॥ ५ ॥ ६ ॥

भा ॥ अथ प्रकृतमेव शास्त्रीयेषु यज्ञादिषु गुणतो विशेषं प्रपञ्चयति । तत्राहारमूलत्वात्सत्त्वादिवृद्धेराहारत्रैविध्यं प्रथममुच्यते । * अन्नमयं हि सोम्य मनः (छा. ६. ५. ४) * आहारशुद्धौ सत्त्वशुद्धिः (छा. ७. २६. २) इति हि श्रूयते ।

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७

भा ॥ आहारोऽपि सर्वस्य प्राणिजातस्य सत्त्वादिगुणत्रयान्वयेन त्रिविधः प्रियो भवति । तथैव यज्ञोऽपि त्रिविधः, तथा तपो दानं च । तेषां भेदमिमं शृणु—तेषामाहारयज्ञतपोदानानां सत्त्वादिभेदेनेममुच्यमानं भेदं शृणु ॥ ७ ॥

ता ॥ एवमुत्तरे प्रतिषेधरूपेऽर्थतः कण्ठोक्त्या च दत्ते पुनराहारादित्रैविध्यवर्णनमबुभुत्सितोपन्यासस्स्यादित्याह—**अथ प्रकृतमेवे**ति । अयमभिप्रायः—अशास्त्रीयेषु सत्त्वादिनिष्ठामूलफलभेदे बुभुत्सिते शास्त्रीयेष्वेवायमिति प्रत्युक्तम् । तत्र श्रद्धातद्वतां श्रद्धेयानां च गुणतो विभाग उपन्यस्तः । तच्छ्रवणादेव तत्तुल्ययोगक्षेमेषु सर्वेषु बुभुत्सा भीमत्सोर्जायेतेत्यत एव तद्भेदोपन्यासः इति । **प्रपञ्चयतीत्यनेन** पौनरुक्त्यशङ्काऽपि परिहृता । यज्ञतपःप्रभृतिषु शास्त्रीयेषु तिष्ठत्सु रागप्राप्तस्याहारस्य प्रथमोपदेशः केनाभिप्रायेणेत्यत्राह—**तत्रे**ति । *वृद्धिस्समानैस्सर्वेषां विपरीतैर्विपर्ययः (अष्टाङ्ग) इत्यायुर्वेदोक्तन्यायसञ्चारादाप्यायकद्रव्यगुणानुसारेणान्तःकरणादेस्सत्त्वादिवृद्धिश्श्रौतीत्यभिप्रायेण **अन्नमय**मिति । आहारस्य सत्त्वस्य चात्र रजस्तमोराहित्यं शुद्धिः । अपिशब्दः प्रागुक्तश्रद्धेयदेवतादिभेदवत्सात्त्विकादिविभागानुकर्षणार्थः । * पचाम्यन्नं चतुर्विधम् (१५. १४) इति प्रागुक्तचातुर्विध्याविरोधाय चतुर्विधेऽप्येतद्गुणकृतत्रैविध्यमिहोच्यत इत्यभिप्रायेणाह—**सत्त्वादिगुणत्रयान्वयेने**ति । * त्रिविध इति सामान्यतो विभागेऽपि विशेषतो वक्ष्यमाणाकारापेक्षयेहेदमुच्यत इत्याह—**सत्त्वादिभेदेने**ममिति । वक्ष्यमाणस्यात्रासत्त्या वर्तमानव्यपदेश इत्याह—**उच्यमाने**मिति । **गुणानां स्वविशिष्टानुभवबभित्वासनाद्वारा स्वानुरूपविषयरुचिजननात्तत्तदाहाराणां तत्तद्गुणविशिष्टप्रियत्वम् ॥ ७ ॥**

आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहारास्सात्त्विकप्रियाः ॥ ८

भा ॥ सत्त्वगुणोपेतस्य सत्त्वमया आहाराः प्रिया भवन्ति । सत्त्वमयाश्चाहारा आयुर्विवर्धनाः, पुनरपि सत्त्वस्य विवर्धनाः । सत्त्वमन्तःकरणम्, अन्तःकरणकार्ये ज्ञानमिह सत्त्वशब्देनोच्यते । * सत्त्वात्संजायते ज्ञानम् (गी. १४. १७) इति सत्त्वस्य ज्ञानविवृद्धिहेतुत्वात्, आहारोऽपि सत्त्वमयो ज्ञानविवृद्धिहेतुः । तथा बलारोग्ययोरपि विवर्धनाः । सुखप्रीत्योरपि विवर्धनाः—परिणामकाले स्वयमेव सुखस्य विवर्धनाः । तथा प्रीतिहेतुभूतकर्मारम्भद्वारेण प्रीतिवर्धनाः । रस्याः—मधुररसोपेताः । स्निग्धाः—स्नेहयुक्ताः । स्थिराः—स्थिरपरिणामाः । हृद्याः—रमणीयवेषाः । एवंविधास्सत्त्वमया आहारास्सात्त्विकस्य पुरुषस्य प्रियाः ॥ ८ ॥

ता ॥ आयुर्विवर्धनत्वादय आहारगुणाः केचिदायुर्वेदादवगन्तव्याः; केचिच्छास्त्रनिरपेक्षाः प्रत्यक्षत एव सिद्धाः; पूर्वमेव सत्त्वविवृद्ध्या हि सात्त्विकाहाररुचिरित्यभिप्रायेणाह—**पुनरपी**ति । आयुषस्सर्वपुरुषार्थनिष्पादनोपयोगित्वेन प्रथमग्रहणम्; सत्त्वस्य तु विशेषतो मुमुक्षोरपेक्षितत्वात्तदनन्तरोक्तिः । *आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः (छा. ७. २६. २) इति श्रुतेरुपबृंहणार्थत्वादाहारसाध्यसत्त्वविवृद्धिर्ज्ञानपर्यन्तेत्यभिप्रायेण ज्ञाने सत्त्वशब्दमुपचारयितुं तत्कारणे तावदवतारयति—**सत्त्वमन्तःकरण**मिति । * द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु (नाम. ३. ना) इति ज्ञानविशेषे च सत्त्वशब्दः प्रयुक्तचर इत्यभिप्रायेणाह—**अन्तःकरणकार्यं ज्ञान**मिति । **इह**—आहारशुद्धिश्रुत्युपबृंहणदशायामित्यर्थः । **यथा** तत्तद्द्रव्यगतानां रसादीनां शरीरधात्वादिपोषकत्वेन शास्त्राभिहिततत्तद्द्रव्याणामपि तथा व्यपदेशः; तथेहापि सत्त्वगुणस्य ज्ञानविवृद्धिहेतुत्वे तदाश्रयस्याहारद्रव्यस्यापीत्यभिप्रायेणाह—**सत्त्वात्संजायते ज्ञान**मिति । बलारोग्ययोस्सुखप्रीत्योश्च निरन्तरपाठस्समुच्चित्य प्रवृत्त्या परस्परविनाभावविवक्षयेत्यभिप्रायेण—**बलारोग्ययोस्सुखप्रीत्यो**रिति द्वन्द्वविभजनम् । बलमिह प्राणाग्न्योरुपचयः; आरोग्यं धातुसाम्यादि । कर्मदोषाग्निधातुवैषम्येण हि रोगाः प्रादुर्भवन्ति । तस्य रस्यत्वहृद्यत्वाभ्यां तादात्विकसुखजनकत्वसिद्धेस्तत्पौनरुक्त्यपरिहाराय सुखवर्धकत्वं **परिणामकाल** इति विशेषितम् । प्रीतिवर्धकत्वाद्भेदप्रदर्शनाय **स्वयमेवे**त्यद्वारकत्वोक्तिः । यथोन्मादादिहेतुभूतानि द्रव्याणि भक्षितानि लोकोद्वेगादिजनककर्मद्वारा पुरुषस्याप्रीतिं वर्धयन्ति; तथा सत्त्वहेतुभूतान्यपि मङ्गलेषु लोकोपकारकेषु परलोकादिहितेषु च कर्मसु प्रचोद्य तद्द्वारेण प्रीतिं जनयन्तीत्यभिप्रायेणाह—**प्रीतिहेतुभूतकर्मारम्भद्वारेणे**ति । * कटूवम्लेत्यादिना रसान्तराणामसात्त्विकत्वेन वक्ष्यमाणत्वात्तत्प्रयोगप्राचुर्यानुसाराच्च अत्र रससब्दो रसविशेषविषय इत्याह—**मधुररसोपेता** इति । अनेन प्रत्ययस्यात्र संबन्धमात्रोपलक्षकताऽपि दर्शिता । रस्यन्त इति वा रस्याः; तत्र **मधुररसोपेता** इति कारणोक्तिः । माधुर्यं हि रसान्तरेभ्यश्शरीरस्थितौ विशेषेण हेतुर्भवति । यथोक्तं वाग्भटेन * रसास्स्वाद्वम्ललवणाति[क्तकटूतोक्ष्ण]क्षोषणकषायकाः । षड्द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः ॥ (अष्टाङ्ग) इति । भोजनं च स्वस्थस्य मधुररसप्रायतया नियम्यते—*षड्रसान्मधुरप्रायान्नात्यद्भुतविलम्बितम् इति । रसायनाधिकारेषु च मधुर एवैको विधीयते । एवं स्नेहयुक्त आहारोऽपि रौक्ष्यविरोधी रूक्षेण वायुना शरीरस्यापि विशारुतां वारयतीत्यप्यायुर्वेदावसितम् । अद्यमान आहारे स्वरूपस्थैर्यस्यासंभवाच्छरीरास्थ्यसंघातस्थैर्यहेतुभूतरसरुधिरमांसमेदोस्थिमज्जाशुक्लाख्यधातुसप्तकरूपपरिणामस्य बलादेश्च स्वसाध्यस्य चिरकालस्थायित्वलक्षणं स्थैर्यं विवक्षितमित्याह—**स्थिरपरिणामा** इति । उपयोगात्पूर्वमेव जुगुप्सनीयमविवेकरूपविशेषादि-

विरहात्संदर्शनमात्रेणापि प्रीतिजनकत्वमिह हृद्यत्वमित्याह—**रमणीयवेषा** इति । येषु धर्मशास्त्रायुर्वेदयोरुभयोरपि सांगत्यं, तेषां सर्वेषामिदमुपलक्षणमित्यभिप्रायेणाह—**एवंविधा** इति । एतेन प्रागुक्तयुक्ताहारत्वं च विवृतम् ॥ ८ ॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९

भा ॥ **कटुरसाः, अम्लरसाः, लवणोत्कटाः, अत्युष्णाः, अतितीक्ष्णाः, रूक्षाः, विदाहिनश्चेति कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ; अतिशैत्यातितैक्ष्ण्यादिना दुरुपयोगास्तीक्ष्णाः ; शोषकरा रूक्षाः ; तापकरा विदाहिनः । एवंविधा आहारा राजसस्येष्टाः । ते च रजोमयत्वाद्दुःखशोकामयवर्धनाः रजोवर्धनाश्च ॥ ९ ॥**

ता ॥ कट्वम्लशब्दयोस्त्रिकटुकतिन्त्रिप्यादिषु विशेषतः प्रयोगादिह तावन्मात्रविवक्षाव्युदासायाह—**कटुरसा अम्लरसा** इति । सात्त्विकस्यापि व्रतादिव्यतिरिक्तकालेषु रुचिमात्रार्थलवणयोगानुमतेः स्वरूपतो लवणस्याहारत्वासंभवात्प्रत्यक्षलवणस्य गोमांसतुल्यतया स्फुटनिषेधाच्चात्र तद्व्यतिरिक्तापेक्षया लवणशब्द इत्यभिप्रायेणाह—**लवणोत्कटा** इति । * स्निग्धमुष्णं च भोजनम् (अष्टाङ्ग) इति कोष्णस्य भोजनस्य विहितत्वात् **अत्युष्णो**तिविशेषितम् । * कट्वादीनां विदाहिनः इति भ्रमव्युदासायात्र समासोक्तिः । तीक्ष्णस्यापि मरीच्यादेस्तत्तद्द्रव्यरोचनार्थं मात्रयाऽनुमतेस्तत्राप्युपसर्गस्यान्वयो दर्शितः । उष्णस्य पृथगुपात्तत्वादत्र तीक्ष्णशब्दो न तत्पर्यायः ; आशुकारिषु मरीच्यादिष्वायुर्वेदे तीक्ष्णत्वमुच्यते ; अतोऽत्र प्रयोगक्षणप्रभृति प्रतिकूलतमानि द्रव्याणि तीक्ष्णानीत्यभिप्रायेणोदाहरति—**अतिशैत्ये**ति । स्नेहप्रतिपक्षभूतो गुणो रौक्ष्यमनुशिष्यत इत्यभिप्रायेणाह—**शोषकरा रूक्षा** इति । वातकोपनत्वमनेन सिद्धम् । अत्र विदाहिशब्दे प्रकृतिप्रत्यययोर्विवक्षितं व्यनक्ति—**तापकरा** इति । पित्तकोपना इत्यर्थः । **एवंविधा** इति पूर्ववत् । * तृष्णासङ्गसमुद्भवम् (१४. ७) इत्यादि प्रागुक्तं स्मारयति—**रजोमयत्वा**दिति । कटुप्रभृतीनां दुःखादिहेतुत्वं च प्रायशोऽन्वयव्यतिरेकयोग्यमायुर्वेदविशोधितं च । दुःखप्रदत्वं धातुवैषम्यादिद्वारा ; शोकप्रदत्वं तत्परामर्शजपश्चात्तापादिना ; आमयः कालक्रमेण । न केवलमत्रैव तमोवद्दुःखादिहेतुत्वम् ; अपितु परंपरया परलोके देहान्तरेऽपीत्यभिप्रायेण सत्त्ववर्धकसात्त्विकाहारसमानन्यायसिद्धमर्थमाह—**रजोवर्धनाश्चे**ति ॥ ९ ॥

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १०

भा ॥ **यातयामम्—चिरकालावस्थितम् , गतरसम्—त्यक्तस्वाभाविकरसम्, पूति—दुर्गन्धोपेतम्, पर्युषितम्—कालातिपत्त्या रसान्तरापन्नम् , उच्छिष्टम्—गुर्वादिभ्योऽन्येषां भुक्तशिष्टम्, अमेध्यम्—अयज्ञार्हम्, अयज्ञशिष्टमित्यथः ; एवंविधं तमोमयं भोजनं तामसप्रियं भवति । भुज्यत इत्याहार एव भोजनम् । पुनश्च तमसो वर्धनम् । अतो हितैषिभिस्सत्त्वविवृद्धये सात्त्विकाहार एव सेव्यः ॥ १० ॥**

ता ॥ सात्त्विकराजसाहारयोर्गुणकार्यकथनेऽपि तामसे गुणमात्रकथनमदूरविप्रकर्षेण राजससमानकार्यत्वात् । सर्वेष्वाहारेषु यामातिक्रमणमात्रेण दोषाभावात्तेषुतेषु द्रव्येषु यावता कालेन दुष्टता, तावद्विवक्षामाह—**यातयामं चिरकालावस्थितमिति** । यामश्चेष्टोऽशः ; यथा * घृतात्सरं मण्डमिवातिसूक्ष्मम् (श्वे. ४. १६) इतीति केचित् । तेन

निर्वीर्यत्वमुक्तं भवति । तदपि **चिरकालावस्थितमित्यनेन अर्थसिद्धम्** । अम्मयेषु पृथिवीमयेषु च आहारेषु तत्तत्पाकभेदेनापि कदाचिदपि सर्वरसत्यागाभावात्तत्तद्द्रव्यस्वभावतयाऽनुशिष्टरसत्यागेन रसान्तरापत्तिरिह गतरसशब्देन विवक्षिते-त्याह—**त्यक्तस्वाभाविकरस**मिति । एतेन गतरसशब्देन निर्वीर्यस्योक्ततया यातयामं मन्दपक्वमिति व्याख्या निरस्ता । यद्यपि पूतिशब्दोऽसात्त्विकतया भगवच्छास्त्रादिसिद्धे करञ्जादिद्रव्येऽपि प्रयुज्यते; तथाऽपि अत्र द्रव्यविशेषोपादान-प्रकरणाभावाद्व्रणादिमुखेन सर्वाहारोपलक्षणप्रकरणाच्चात्र पूतिशब्देन हेयतया लोकशास्त्रप्रसिद्धगुणविवक्षामाह—**दुर्गन्धो-पेत**मिति । कालातिपत्तिमात्रस्य यातयामशब्देन ग्रहणात्, रसत्यागस्य * गतरसमित्युक्तत्वात्, येषु कालातिपत्तौ दोषः, क्षीरादिष्विव [अना]आतञ्चनादिभिश्च रसान्तरापत्तिः, तत्र कालातिक्रमणमात्रेण रसान्तरापन्नत्वमिह विवक्षितमित्याह—**कालातिपत्त्या रसान्तरापन्न**मिति । हेयविकृत्यन्तरादीनामुपलक्षणमिदम् । अत एव पक्वानामविकलानामपि जलादीनां राज्यन्तरित्वादिना त्यागः । एतेन यातयामशब्दोऽत्र रसान्तरापत्तिरहितकालातिक्रममात्रदुष्टविषय इति दर्शितम् । उच्छिष्टविशेषस्य शास्त्रानुमतेराचार्योच्छिष्टस्य च पापविशेषप्रायश्चित्ततया पवित्रत्वेनापि ग्रहणात्तद्व्यतिरिक्तविषयोऽत्र उच्छिष्टशब्द इत्याह—**गुर्वादिभ्योऽन्येषा**मिति । **गुर्वादी**त्यादिशब्देन पितुः ज्येष्ठस्य भ्रातुः भार्याविषये भर्तुश्च ग्रहणम् । यत्तु * अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् । तस्या उच्छेषणमददुः । तत्प्राश्नात् । सा रेतोऽधत्त (यजु. ६.५. ६.१) इत्यादौ उच्छेषणप्राशनमाम्नायते; तद्ब्रह्मौदनादिविधिपरत्वादन्यपरम् । भुक्तावशिष्टपाक-पात्रस्थौदनविषयत्वेऽप्यविरुद्धम् । अप्राप्तत्वाद्विधिपरत्वस्वीकारेऽपि अदितिसाध्यदेवसंव्यवहारमात्रविषयम् । न तावता अद्यतनानामनुष्ठानप्राप्तिः; प्राप्तावपि तथाविधकर्मनियतम् । नचात्र विधिस्तत्कल्पनावकाशश्चेत्यप्राप्तिरेव । यत्तु भगवता नारदेन जातिस्मरेण प्राचीनशूद्रजन्मानुष्ठानमनुस्मृत्योक्तम्—* उच्छिष्टलेपाननुमोदितो द्विजैस्सकृत्स्म भुञ्जे तदपास्त-किल्बिषः (भाग. १. ५. २५) इत्यादि; तदपि तस्मिन् जन्मनि नारदस्तेषां शिष्यश्शूद्रश्चेति तादृशेष्वेव तत्प्राप्नोति; नान्यादृशेषु । तथा सति हि वाक्यान्तरमपि न विरुध्येत । न च वचनविरोधे लिङ्गदर्शनमात्रेणानुष्ठानकल्पनिः । प्रतिषेधति **ह्याचार्यपुत्रादेरप्युच्छिष्टम्**—* उच्छिष्टाशनवर्जमाचार्यवदाचार्यपुत्रे वृत्तिः (आप. १. २. ७. ३०) इत्यादिना । किमुतान्येषाम्? भागवतस्य तु आचार्यव्यतिरिक्तसमस्तोच्छिष्टभक्षणेऽपि तीव्राणि प्रायश्चित्तान्यनुशिष्यन्ते । यथा **सनत्कुमारीयसंहितायामुदाहृतमित्यागमप्रामाण्ये** भगवद्यामुनाचार्यैरुपात्तं * निर्माल्यं भक्षयित्वैवमुच्छिष्टमगुरोरपि । मासं पयोव्रतो भूत्वा जपन्नष्टाक्षरं सदा । ब्रह्मकूर्चं ततः पीत्वा इत्यादि । भाष्ये चात्र गुरुशब्द आचार्यविषयः पितृ-विषयो वेत्ययुक्तम्, गुरुशब्दार्थोपाध्यायाद्युच्छिष्टग्रहणशास्त्राभावात् । नच यत्किंचिदुपदेशमात्रेऽप्याचार्यत्वम्, *उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ (मनु. २. १४०) इत्यादिभिस्तल्लक्षणात्, अन्यत्र प्रयोगस्योपचारादपि संभवात् । यश्चोपनेता प्रणवादिमात्रमुपदिश्य विरतः, यश्च केवलं रहस्यशब्दनिर्दिष्टा मोक्ष-साधनभूता विद्यास्तत्तच्छ्रुतिमुखेन शिक्षयति; तयोरप्याचार्यत्वादिकं वचनबलादङ्गीक्रियते । उक्तं च गुर्वादिलक्षणं भगवता **याज्ञवल्क्येन**—* स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति । उपनीय ददद्वेदमाचार्यस्स उदाहृतः । एक-देशमुपाध्यायः इति । यत्तु *एकाक्षरप्रदातारमाचार्यं योऽवमन्यते (अत्रि १.१०) इत्यादि, तदवमतिनिवारणाद्यर्थमाचार्य-दृष्टिमात्रेणोच्यते; न तावता आचार्यत्वप्रयुक्तसर्वोपनिपातः । यद्यप्याचार्यशब्दो निरुक्त्याद्यनुसारादस्त्रशस्त्रादिशिक्षकेषु द्रोणकृपादिषु प्रयोगप्रौढ्या च यथाप्रयोगं सर्वत्र मुख्य इति कैश्चिदङ्गीक्रियेत; तथाऽप्युच्छिष्टभक्षणानुमतिनिदानमाचार्यत्वं प्रणवादित्रिकपूर्वकमरहस्योपदेष्टर्येव; तथैव शास्त्रैर्नियमाच्छिष्टाचाराच्च । प्रत्यक्षश्रुत्यादिविरुद्धस्तु भ्रान्तानामभिप्रायान्तरेण

शास्त्रोल्लङ्घिनामप्याचारो न शिष्टाचारः । यदपि कैश्चित्पठ्यते * नारायणैकनिष्ठस्य याया [चेष्टा] वृत्तिस्तदर्चनम् । योयो जप्यस्स जपस्तद्ध्यानं यन्निरीक्षणम् । तत्पादाम्बुतुलं तीर्थं तदुच्छिष्टं सुपावनम् । तदुक्तिमात्रं मन्त्राग्र्यं तत्स्पृष्टमखिलं शुचि ॥ (विह. सं.) इति, इदमपि नारायणैकनिष्ठप्रशंसापरम्; न तु स्वयं विधायकम् । अन्यतः प्राप्तेरेव अत्र प्रशंसा । तत्र प्रथमश्लोकस्स्वभावप्राप्तमर्थप्राप्तं चानुवदति; यच्च शास्त्रप्राप्तम्; न तु पुनश्शास्त्रान्तरनिषिद्धपरामर्शि । प्रमाणप्राप्तविषयत्वादेव हि * अतुलं सुपावनमग्र्यमखिलम् इति विशेषणेषु सेरम्भः । * ब्राह्मणाः पादतो मेध्याः इत्यादिभिर्विप्रपादोदकस्य सामान्यतः पावनत्वप्राप्तौ भागवतत्वावस्थायाम्, * अतुलं तीर्थमिति विशेष्यते । एवमनेकान्तिनोऽप्युपनेतृप्रभृतेरुच्छिष्टे पावनत्वेन प्राप्ते तस्य नारायणैकनिष्ठत्वदशायां सुपावनत्वं विधीयते । तथा महापुरुषकृतस्तुत्यादेर्मङ्गलत्वमत्वे सिद्धे * तदुक्तिमात्रं मन्त्राग्र्यमिति भगवदनन्यप्रणीतस्य गाथागीतादेरपि मन्त्राग्र्यवत्फलादिहेतुत्वं प्रतिपाद्यते । एवमशुद्धानां शोधकापेक्षायां निर्णेजनादिवन्महात्मनां स्पर्शोऽपि माहात्म्यविशेषवशाच्छोधकतया प्राप्तः * तत्स्पृष्टमखिलं शुचीत्यनेन सर्वस्यापि द्रव्यस्य पृथक्चोदितशोधकभेदस्य भागवतस्पर्श एकश्शोधको भवितुमर्हतीत्युच्यते । अन्यथा भागवतेन यदृच्छादिस्पृष्टचण्डाललशुनगृञ्जनाद्यशुद्धग्रहणेनालेपकवादवत्स्पृश्यास्पृश्यभक्ष्याभक्ष्याद्यद्वैतप्रसङ्गः । एतेन परमाप्तस्य भक्ताङ्घ्रिरेणोर्भाषागाथाऽपि निर्व्यूढा । एवं हि सा संस्कृतेन विपरिणंस्यते—* दिव्यैरवेद्यविभवेति यदि ब्रुवन्ति माध्वीमनोज्ञतुलसीक यदीति चाहुः । ऊनक्रिया अपि परानपि कारयन्तो भुक्ताधिकं ददति चेन्ननु तत्पवित्रम् ॥ इति । इदमपि संकीर्तनप्रशंसापरमिति प्रकरणात्स्ववाक्यस्वारस्याच्च सुव्यक्तम् । भुक्तशेषशब्दश्च पाकपात्रस्थविषयत्वेऽपि न विरुद्धः; यथा * अन्नशेषः किं क्रियतामित्यादौ; [अवशिष्टं] भुक्तशिष्टं तु पाकपात्रस्थमपि त्याज्यमेव । तत्परिहारार्थोऽयं प्रतिप्रसवः । अन्यथाऽपि प्रमाणान्तराविरोधायाचार्योच्छिष्टविषयमेव स्यात् । तथा हि—* ऊनो हीनः परिस्रस्तो नष्टः इति विकलभागवतान् दुष्कर्मतारतम्याच्चतुर्धा रहस्याम्नायविदस्समामनन्ति । तत्रोनत्वाद्यवस्थायामनाचार्योच्छिष्टस्यापवित्रत्वं प्रसक्तम्; तत्र यद्यनन्यत्वस्थैर्यव्यञ्जनं संकीर्तनं स्यात्, तदा तदुच्छिष्टमपवित्रं न भवतीति अनन्यत्वभङ्गे ह्याचार्यस्यापि सर्वथा वर्जनं तत्रैवान्नातमित्यलमतिप्रसङ्गेन । मेधाविरोधिन्यप्यमेध्यशब्दप्रयोगात्तस्य च दृष्टप्रत्यवायमात्रपर्यवसानात्ततोऽपि दोषातिशयसूचनाय मेधोऽत्र यज्ञः, तदर्हं मेध्यं, तद्विपरीतममेध्यमित्याह—**अयज्ञार्हमिति** । ननु यज्ञार्हस्यापि द्रव्यस्याभक्षणीयत्वं मन्वादिभिरुच्यते, यथा—*वृथाकृसरसंयावं पायसापूपमेव च । अनुपाकृतमांसानि देवान्नानि हवींषि च ॥ (मनु. ५. ७) इति । तत्राह—**अयज्ञशिष्टमित्यर्थ इति** । एतेन सात्त्वतादिशास्त्रेषु * नानिवेद्य हरेः किंचित्समश्नीयात्तु पावनम् (शा. स्मृ) इत्यादिकमप्यत्रानुसंहितम् । आहियन्त इत्याहारास्तत्तद्द्रव्याणि प्रतीयन्ते, नच भोजनक्रियामात्रे यातयामत्वाद्युक्तिरन्वेति; नापि मुख्ये संभवति लक्षणा न्याय्या । अतः * कृत्यल्युटो बहुलम् (अष्टा. ३. ३. ११३) इति कर्मणि ल्युडन्ततामाह—**भुज्यत इति** । **पुनश्च तमसो वर्धन**मिति, पूर्ववत् । आहारत्रैविध्योक्तेरभिप्रेतमाह—**अत इति** । पथ्यापथ्यविभागोक्तौ पथ्यग्रहणवदिति भावः । एवमेव यज्ञादित्रैविध्योक्तावप्यन्ततोऽभिप्रायो ग्राह्यः ॥ १० ॥

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनस्समाधाय स सात्त्विकः ॥ ११

भा॥ फलाकाङ्क्षारहितैः पुरुषैः विधिदृष्टः—शास्त्रदृष्टः मन्त्रद्रव्यक्रियादिभिर्युक्तः, यष्टव्यमेवेति—भगवदाराधनत्वेन स्वयंप्रयोजनतया यष्टव्यमिति मनस्समाधाय यो यज्ञ इज्यते, स सात्त्विकः ॥ ११ ॥

ता ॥ अफलस्य कस्यचिदाकङ्क्षाप्रतीतिव्युदासायाह—**फलाकाङ्क्षारहितैरिति** । परमात्मप्रीत्यतिरिक्तनिरपेक्षैरित्यर्थः । * विधिदृष्ट इत्युक्ते प्रजापतिना दृष्टत्वं प्रतीयेत ; स हि सर्वेषां यज्ञानां द्रष्टेत्यामनन्ति ; नचात्र प्रजापतिदृष्टत्वोक्त्याऽनुष्ठाने कश्चिदुपकारः ; अतो विधायकशास्त्रमेवात्र विधिशब्देन विवक्षितमित्याह—**शास्त्रदृष्ट इति** । शास्त्रैकप्रमाणतया प्रसिद्धे शास्त्रदृष्टत्वोक्तिरनपेक्षितेत्यत्र यथाशास्त्रकरणादवैकल्यं तद्विवक्षितमाह—**मन्त्रेति** । *यज देवपूजायामिति धात्वर्थानुसारेणाह—**भगवदाराधनत्वेनेति** । अवधारणाभिप्रेतमाह—**स्वयंप्रयोजनतयेति** । अयमभिप्रायः—यद्यपि प्रयोजनमनुद्दिश्य न प्रवृत्तिः, तथाऽपि प्रागुक्तसुहृत्समाराधनन्यायेन यज्ञादिप्रवृत्तेरेव प्रयोजनत्वाभिसन्धिस्संभवतीति । **मनस्समाधायेति**—प्रकारान्तराद्विनिवार्य प्रस्तुतप्रक्रियायामेकाग्रं कृत्वेत्यर्थः । यज्ञ इज्यते—यज्ञः क्रियत इत्यर्थः ॥ ११ ॥

अभिसन्धाय तु फलं दम्भार्थमपि चैव यः ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२

भा ॥ **फलाभिसन्धियुक्तैर्दम्भगर्भो यशःफलश्च यो यज्ञ इज्यते, तं यज्ञं राजसं विद्धि** ॥ १२ ॥

ता ॥ दम्भहेतुकत्वमिह दम्भार्थशब्देन विवक्षितमित्याह—**दम्भगर्भ इति** । दाम्भिकत्वख्यापनाभिसन्धिरहित इत्यर्थः । केवलं दम्भगर्भस्तु तामसः । अत ऐहिकामुष्मिकफलसंभेदमात्रमिह राजसत्वं विवक्षितमित्यभिप्रायेणाह—**यशःफलश्चेति** । दम्भानुसाराद्वा दृष्टैकफलत्वोक्तिः । * भरतश्रेष्ठेति—त्वं तु सात्त्विकयज्ञा[द्य]धिकारीत्यभिप्रायः ॥ १२ ॥

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३

भा ॥ **विधिहीनम्—ब्राह्मणोक्तिहीनम्, सदाचारयुक्तैर्विद्वद्भिर्ब्राह्मणैर्यजस्वेत्युक्तिहीनमित्यर्थः ; असृष्टान्नम्—अचोदितद्रव्यम्, मन्त्रहीनमदक्षिणं श्रद्धाविरहितं च यज्ञं तामसं परिचक्षते** ॥ १३ ॥

ता ॥ असृष्टान्नत्वमन्त्रहीनत्वाद्युक्त्यैव चोदितप्रकारविहीनत्वसिद्धेरत्र * विधिहीनमित्ययथाशास्त्रत्वं न विवक्षितम्; अन्यस्य चावश्यापेक्षितस्य हानिरिह सूचयितुमुचितेत्यभिप्रायेणाह—**ब्राह्मणोक्तिहीनमिति** । शास्त्रोदित एवार्थस्सद्भिरनुशिष्टोऽनुष्ठेय इतीममर्थं विवृणोति—**सदाचारेति** । लोभातिशयाद्दक्षिणाया अप्यभावे अन्नदानाभावस्य कैमुत्यसिद्धत्वात् * अदक्षिणमित्यनेनैवान्नादानादेरुपलक्षणादसृष्टशब्दस्वारस्याद्दोषातिशयख्यापनोपयोगाच्चासृष्टान्नशब्देन शूद्रप्रतिग्रहादिविवक्षामाह—**अचोदितद्रव्यमिति** । यज्ञार्थं सृष्टमिह सृष्टशब्देन विवक्षितम् । न्यायागतमित्यर्थः । तदन्यदसृष्टं, यथा—* न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत धर्मवित् । यजमानो हि भिक्षित्वा प्रेत्य चण्डालतां व्रजेत् (मनु. ११. २४) इति ॥ १३ ॥

भ ॥ **अथ तपसो गुणतस्त्रैविध्यं वक्तुं तस्य शारीरवाङ्मनोनिष्पाद्यतया स्वरूपमेदं तावदाह—**

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४

भा ॥ **देवद्विजगुरुप्राज्ञानां पूजनम्, शौचम्—तीर्थस्नानादिकम्, आर्जवम्—यथामनइशारीरवृत्तम्, ब्रह्मचर्यम्—योषित्सु मोग्यतावुद्धियुक्तेक्षणादिरहितत्वम्, अहिंसा—अप्राणिपीडा ; एतच्छारीरं तप उच्यते** ॥

ता ॥ आहारादीनां सात्त्विकत्वादित्रैविध्ये प्रक्रान्ते तपसः करणभेदेन त्रैविध्योक्तिः किमर्थेत्यत्राह—**अथेति** । देवद्विजगुरुप्राज्ञानां सन्निधौ तत्तदुचितश्शास्त्रोदित आचार इह पूजनमित्युच्यते । यथा—* प्रशस्तमङ्गल्यदेवायतन-चतुष्पथादिप्रदक्षिणमावर्तेत मनसा वा तत्समम्रम् (गौ. ९. ६७) इत्यादि । तथा * प्रदक्षिणं व्रजेद्विप्रान् गामश्वत्थं हुताशनम् (भा. आश्व) इति । * आसनेभ्यस्समुत्तस्थुर्मानयन्तः पुरोहितम् (रा. अ. ५. २४), ऊर्ध्वं प्राणा ह्युत्क्रमन्ति यूनः स्थविर आ[यति]गते । अभ्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥ (मनु. २. १२०) इत्यादि । तथा * न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः । ऋषयश्चक्रिरे धर्मं योऽनूचानस्स नो महान् ॥ (मनु. २. १५४) इति । शुद्धिरूपस्य फलभूतस्य शौचस्य तपस्त्वेन विभजनायोगात्तद्धेतुमाह—**तीर्थस्नानादिकमिति** । आर्जवस्य शारीरतपस्त्वेन व्यपदेशार्थं वाङ्मनःकायानामैकरूप्यं शरीरप्रधानतया व्यपदिशति—**यथामनश्शारीरवृत्तमिति** । * ब्रह्मचर्यं च योषित्सु भोग्यतावुद्धिवर्जनम् इत्याद्यनुसारेणाह—**योषित्स्विति** । तादृशप्रेक्षणादिकमपि [हि] * स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्य-भाषणम् (बा. स्मृ) इत्यादिना मैथुनत्वेन विभज्य स्मरन्तीति प्रागेव दर्शितम् । अत्रापीक्षणादिरहितत्वग्रहणं ब्रह्मचर्यस्य शारीरतपस्त्वज्ञापनाय ॥ १४ ॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५

भा ॥ परेषामनुद्वेगकरं सत्यं प्रियहितं च यद्वाक्यं स्वाध्यायाभ्यसनं चेत्येतद्वाङ्मयं तप उच्यते ॥ १५ ॥

ता ॥ अनुद्वेगकरमित्यादि—पुरुषमर्मोद्घाटनापरिवादादिराहित्यादनुद्वेगकरत्वन् । भयादेरहेतुभूतमित्यर्थः । सत्यं यथादृष्टार्थविषयभूतहितवाक्यमिति प्रागेव दर्शितम् । प्रियत्वमत्र स्वागतधर्मानुमोदनादिरूपेण ; अप्राप्तविषयस्तुत्यादिरूप-प्रियवचनस्य निषिद्धत्वात्तत्परिहाराय हितत्ववचनं पुरुषार्थपर्यवसायीत्यभिहितम् । * स्वाध्यायाभ्यसनमिति जपयज्ञोक्तिः ॥

मनःप्रसादस्सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६

भा ॥ मनःप्रसादः—मनसः क्रोधादिरहितत्वम् , सौम्यत्वम्—मनसः परेषामभ्युदयप्रावण्यम् , मौनं—मनसा वाक्प्रवृत्तिनियमनम् , आत्मविनिग्रहः—मनोवृत्तेर्ध्येयविषयेऽवस्थापनम् , भावसंशुद्धिः—आत्म-व्यतिरिक्तविषयचिन्तारहितत्वम् ; एतन्मानसं तपः ॥ १६ ॥

ता ॥ मनःप्रसादसौम्यत्वशब्दाभ्यां परेष्वहिताभिप्रायरूपकालुष्यनिवृत्तिः, हिताभिप्राययोगश्च विवक्षित इत्याह—**मनसः क्रोधादिरहितत्वमित्यादिना** । * वसति हृदि सनातने च तस्मिन् भवति पुमान् जगतोऽस्य सौम्यरूपः (वि. ३. ७. २४) इत्यादिनोक्तमाकारसौम्यत्वमपि मनस्सौम्यत्वफलमेव । अत एव हि तेन मनसस्सौम्यत्वमुन्नीयते । इह च मानसतपोविभजनान्मनस इति बुद्ध्या निष्कृष्यानुषङ्गितम् । मौनस्यापि मानसतपस्त्वाय मनोव्यापारप्राधान्य-माह—**मनसा वाक्प्रवृत्तिनियमनमिति** । *आत्मविनिग्रहः इति अप्राप्तविषयविनिवारणं हि प्राप्तविषयैकाग्र्यार्थमित्यभि-प्रायेणाह—**ध्येयविषयेऽवस्थापनमिति** । * भावसंशुद्धिरित्यस्य मनःप्रसादादिभिः पुनरुक्तिपरिहारायाह—**आत्मव्यति-रिक्तविषयचिन्तारहितत्वमिति** । भावशब्दोऽत्राभिप्रायार्थः । तस्य संशुद्धिस्समस्तेतरवर्जनम् । एतेन परदारादिषु

मनसो रहस्यपि प्रवृत्तिर्दूरतो निरस्ता । अत्र तपसश्शारीरत्वादिविभागः तत्र शरीरादिप्राधान्यात्; अन्यथा * पञ्चैते तस्य हेतवः (गी. १८. १५) इत्यनेन विरोधात् ॥ १६ ॥

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैस्सात्त्विकं परिचक्षते ॥ १७

भा ॥ अफलाकाङ्क्षिभिः—फलाकाङ्क्षारहितैः, युक्तैः—परमपुरुषाराधनरूपमिदमिति चिन्तायुक्तः नरैः परया श्रद्धया यत् त्रिविधं तपः कायवाङ्मनोभिस्तप्तम्, तत्सात्त्विकं परिचक्षते ॥ १७ ॥

ता ॥ एवं शारीरवाचिकमानसरूपेण त्रिविधस्यापि तपसः सत्त्वादिगुणभेदेन त्रैविध्यमुच्यते—*श्रद्धयेत्यादिना । फलाकाङ्क्षानिषेधेन सह पठितो युक्तशब्दस्तदुपयुक्तभगवत्प्रीतिलक्षणफलान्तरध्यानपर इत्यभिप्रायेणाह—**परमपुरुषाराधनेति** ॥ १७ ॥

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८

भा ॥ मनसा आदरस्सत्कारः, वाचा प्रशंसा मानः, शारीरो नमस्कारादिः पूजा । फलाभिसन्धिपूर्वकं सत्काराद्यर्थं च दम्भेन हेतुना यत्तपः क्रियते, तदिह राजसं प्रोक्तम्; स्वर्गादिफलसाधनत्वेनास्थिरत्वात् चलमध्रुवम् । चलत्वम्—पातभयेन चलनहेतुत्वम्, अध्रुवत्वम्—क्षयिष्णुत्वम् ॥ १८ ॥

ता ॥ पुनरुक्तिशङ्कापरिहाराय सत्कारमानपूजाशब्दानां क्रमान्मनोवाक्कायनिष्पाद्यसंभावनापरत्वोक्तिः । *अफलाकाङ्क्षिभिरिति सात्त्विकस्य तपसो विशेषणादिह फलाकाङ्क्षा अर्थसिद्धेत्यभिप्रायेणाह—**फलाभिसंधिपूर्वकमिति** । **स्वर्गादिफलसाधनत्वेनास्थिरत्वादिति** । अस्थिरस्वर्गादिफलसाधनत्वादित्यर्थः । स्वरूपतः कादाचित्कत्वोक्तेरनुपयोगात्फलद्वाराऽत्र चलत्वमध्रुवत्वं च । तत्राध्रुवशब्देन फलानित्यत्वोक्तेश्चलशब्दः फलस्य विद्यमानदशाभाविदोषपरः । विद्यते च तत्र चलयतीति व्युत्पत्त्या चलशब्दस्य शक्तिरित्यभिप्रायेणाह—**पातभयेन चलनहेतुत्वमिति** । अत्र चलशब्देन अनित्यफलत्वम्, अध्रुवशब्देन प्रतिबन्धसंभवादनैकान्तिकफलत्वं चोच्यत इत्ययुक्तम्, अन्यत्रापि प्रतिबन्धसंभवस्याविशेषादिति भावः ॥ १८ ॥

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९

भा ॥ मूढाः—अविवेकिनः, मूढग्राहेण—मूढैः कृतेनाभिनिवेशेन आत्मनश्शक्त्यादिकमपरीक्ष्य आत्मपीडया यत्तपः क्रियते, परस्योत्सादनार्थं च यत्क्रियते, तत्तामसमुदाहृतम् ॥ १९ ॥

ता ॥ अहितप्रवृत्तिहेतुभूतमूढत्वमहितेष्वेव हितत्वभ्रम इत्यभिप्रायेणाह—**अविवेकिन** इति । मूढानामभिनिवेशेनेति समासार्थः; तत्र कर्तरि षष्ठीति सुव्यक्त्यर्थमाह—**मूढैः कृतेनाभिनिवेशेनेति** । सामान्येनोक्तमनुष्ठातरि विशिष्याह—**आत्मनश्शक्त्यादिकमपरीक्ष्येति** । आदिशब्देन शास्त्रपर्युदस्तत्वम्, * अशक्यानि दुरन्तानि समव्ययफलानि च । असाध्यानि च वस्तूनि नारभेत विचक्षणः ॥ इत्याद्युक्तविषयदोषाश्च संगृहीताः । अयथाबलारम्भादिरिहात्म-

पीडा, तेनाल्पपीडाकरयथाबलव्रतादिव्यवच्छेदः । यथोक्तं—* सन्निरीक्ष्य बलाबलम् इति । स्मरन्ति च—* देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेत् ॥ इत्यादि ॥ १९ ॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २०

भा ॥ फलाभिसन्धिरहितं दातव्यमिति देशे काले पात्रे चानुपकारिणे यद्दानं दीयते, तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

ता ॥ राजसे दाने * फलमुद्दिश्येति विशेषणादत्र स्वर्गादिफलसङ्गनिवृत्तिर्विवक्षिता । * अनुपकारिणे इत्येतत् दृष्टफलाभिसंधिरहिताभिप्रायम् । *दातव्यमित्येतत्सात्त्विकतपःप्रभृतिष्विवाभिसंध्यन्तरव्युदासार्थमित्याह—**फलाभिसन्धिरहित**मिति । यद्यप्यत्र पात्रमेवार्थतोऽनुपकारित्वेन विशेष्यते, तथाऽपि संप्रदानत्वद्रव्यप्रतिष्ठाधिकरणत्वयोर्विवक्षया चतुर्थीसप्तम्योस्सहप्रयोगः । पात्रे सिद्धेऽनुपकारिणे तस्मा इति वाऽन्वयः । प्रात्रे दीयते, तच्चानुपकारिणे दीयत इति वा वाक्यभेदो[वा] ग्राह्यः । देशकालशब्दावत्र दानार्हतया चोदितपुण्यदेशकालविषयौ । पात्रं तु * न विद्यया केवलया जन्मना वाऽपि पात्रता । यस्य वृत्तमिमे चोक्ते तद्धि पात्रं प्रचक्षते ॥ (या. स्मृ. आ. २००) इत्यादिभिर्विवक्षितम् ॥ २० ॥

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥ २१

भा ॥ प्रत्युपकारकटाक्षगर्भं फलमुद्दिश्य च परिक्लिष्टम्—अकल्याणद्रव्यकं यद्दानं दीयते, तद्राजसमुदाहृतम् ॥ २१ ॥

ता ॥ प्रत्युपकारकटाक्षगर्भमिति—प्रत्युपकाराभिप्रायपूर्वकमित्यर्थः । एतेन पूर्वकृतप्रत्युपकाररूपता, भाविप्रत्युपकारप्रयोजकता च संगृहीता । द्रव्यरागात्परिक्लेशेन त्यजन् हि पुरुषः कल्याणमंशं स्वस्मै स्थापयित्वा अन्यत्परस्मै समर्पयतीत्यभिप्रायेणाह—**अकल्याणद्रव्यक**मिति । अश्रद्धाहतत्वाद्वा द्रव्यस्याकल्याणत्वमिह परिक्लिष्टशब्दार्थ इति भावः ॥२१॥

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२

भा ॥ अदेशकाले अपात्रेभ्यश्च यद्दानं दीयते, असत्कृतम्—पादप्रक्षालनादिगौरवरहितम्, अवज्ञातम्—सावज्ञम्, अनुपचारयुक्तं यद्दीयते, तत्तामसमुदाहृतम् ॥ २२ ॥

ता ॥ अदेशः कलिङ्गकोकटादिः । अकालो रात्र्यादिः । अपात्राणि पङ्क्तिदूषकमूर्खतस्करकितववन्दिवैतालिकादयः । सत्कृतं सत्करणं, तद्रहितमसत्कृतम् ; तदाह—**पादप्रक्षालने**ति । प्रतिग्रहीतृपुरुषावज्ञैव क्रियापर्यन्तप्रसारात्तद्विशेषणतया व्यपदिश्यत इत्यभिप्रायेणाह—**सावज्ञ**मिति । अवज्ञाया वाचिकादिविषयत्वमाह—**अनुपचारयुक्त**मिति । शास्त्रप्रामाण्यानिश्चयेन संदिग्धपरलोकत्वात्पात्रेभ्यस्स्वस्योत्कर्षाभिमानाच्चासत्कारावज्ञे । देशादिसंपत्तावप्यसत्कृतत्वादि परिहर्तव्यम् ॥ २२ ॥

भा ॥ एवं वैदिकानां यज्ञतपोदानानां सत्त्वादिगुणभेदेन भेद उक्तः, इदानीं तस्यैव वैदिकस्य यज्ञादेः प्रणवसंयोगेन तत्सच्छब्दव्यपदेश्यतया च लक्षणमुच्यते—

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३

भा ॥ ओं तत् सत् इति त्रिविधोऽयं निर्देशः—शब्दो ब्रह्मणः स्मृतः—ब्रह्मणोऽन्वयी भवति । ब्रह्म च वेदः ; [ब्रह्म]वेदशब्देन वैदिकं कर्मोच्यते ; वैदिकम्—यज्ञादिकम् ; यज्ञादिकं कर्म ओं तत्सदिति शब्दान्वितं भवति । ओमितिशब्दस्यान्वयो वैदिककर्माङ्गत्वेन प्रयोगादौ प्रयुज्यमानतया : तत्सदितिशब्दयोरन्वयः पूज्यत्वाय वाचकतया । तेन त्रिविधेन शब्देनान्विता ब्राह्मणा वेदान्वयिनस्त्रैवर्णिकाः वेदाश्च यज्ञाश्च पुरा विहिताः—पुरा मयैव निर्मिता इत्यर्थः ॥ २३ ॥

ता ॥ उक्तत्रैविध्यवदुपर्यपि त्रैविध्यान्तरोक्तिरिति शङ्काव्युदासाय उक्तसमस्तलक्षणपरतयोत्तरमवतारयति—**एव**मित्यादिना । ब्रह्मणः त्रैविध्यविधिरनपेक्षितः, लक्ष्येषु [दुष्टेषु] उद्दिष्टेषु लक्षणविधिस्त्वपेक्षित इत्यभिप्रायेण * **ब्रह्मणः स्मृतः** इत्यन्वयो दर्शितः । वक्ष्यमाणप्रकारेण त्रिष्वपि निर्देशेषु कर्मस्त्वेनान्वययोगात् **ब्रह्मणोऽन्वयी भवती**ति संबन्धसामान्यार्थतोक्तिः । ननु * ओं तत्सदिति वैदिकस्य यज्ञादेर्लक्षणमुच्यत इत्युक्तमयुक्तं, ब्रह्मशब्दस्य तद्वाचकत्वाभावात्, मुख्यार्थबाधाभावाच्च । त्रयाणां च साक्षात्परब्रह्मनामत्वं श्रुतिसिद्धं, * तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् (क. २. १५) इति वा (?) * एतस्य महतो भूतस्य नाम भवति योऽस्यैतदेव नाम वेद ब्रह्म भवति इति, * सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः (छा. ६. ८. ६) इत्यादिषु । अतः शास्त्रप्रधानप्रतिपाद्यपरब्रह्मनिर्देशप्रकारोऽयमुपासकसंव्यवहारार्थमुपदिश्यत इति युक्तम् । विगुणमपि हि कर्म ब्रह्मणोऽभिधानत्रयप्रयोगेण सगुणं संपादितं भवति । कर्मणि कर्मान्तरेण लौकिकवाचा निद्राप्रमादादिभिश्च व्यवाये सन्तस्सर्वत्र ओं तत्सदित्युदाहरेयुः ; अत एव चाध्यायाद्यन्तेषु सर्वेष्वयमेव त्रिविधो निर्देशः पठ्यत इति शङ्कायां, कर्मणि ब्रह्मशब्दमवतारयितुं तत्प्रतिपादके प्रयोगस्तावत्सिद्ध इत्यभिप्रायेणाह—**ब्रह्म च वेद** इति । वेदाभिधानस्य पूर्वापरवशात्तदर्थपरतामभिप्रेत्याह—**वेदशब्देने**ति । वेदनिरूढप्रयोगेण शब्देनेत्यर्थः । ब्रह्मशब्देनेति केषांचित्पाठः । अयमभिप्रायः—यद्यपि * ओं तत्सदिति शब्दानां साक्षात्परब्रह्मनामत्वं प्रसिद्धं, तथाऽप्यत्र तद्विवक्षा न युक्ता ; अध्याये तत्प्रश्नाद्यभावात्, अनन्तरं च * ब्राह्मणास्तेनेत्यादिनाऽनन्वयप्रसङ्गाच्च । अतो वेदेनोपलक्षणेन वैदिकस्यैवायं त्रिधा निर्देशः—इति । एतदेव विवृणोति—**वैदिक**मिति । त्रयाणामन्वयप्रकारेऽवान्तरभेदं वक्ष्यमाणमुपक्षिपति—**ओ**मिति । करणाद्यर्थासंभवादुपलक्षणतृतीयार्थमाह—**तेन त्रिविधेन शब्देनान्विता** इति । ब्राह्मणशब्दोऽत्र ब्रह्मशब्दविवक्षितवेदान्वयात् त्रैवर्णिकविषयः । * ब्रह्मवादिनामिति ह्यनन्तरमुच्यते । **तेनै**व प्रणवान्वयप्रकारोऽपि सूचित इत्यभिप्रायेणाह—**वेदान्वयिनस्त्रैवर्णिका** इति । * विहिताः इत्यस्य कर्त्रपेक्षायां * चातुर्वर्ण्यं मया सृष्टम् (गी. ४. १३) इत्यादिपरामर्शेनाह—**पुरा मयैव निर्मिता** इति । वेदानां विहितत्वं यथापूर्वं प्रपञ्चितं, * यो वै वेदांश्च प्रहिणोति तस्मै (श्वे. ६. १७) * अनादिनिधना ह्येषा वागुत्सृष्टा (भा. मो. २३४. ९३) इत्यादिश्रुतिस्मृतिभिस्तन्नित्यत्वसिद्धेः ॥ २३ ॥

भा ॥ अथाऽस्याम् ओं तत्सदिति शब्दानामन्वयप्रकारो वर्ण्यते ; प्रथममोमितिशब्दस्यान्वयप्रकारमाह—

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्तास्सततं ब्रह्मवादिनाम् ॥ २४

भा ॥ तस्मात् ब्रह्मवादिनाम्—वेदवादिनां त्रैवर्णिकानां यज्ञदानतपःक्रियाः विधानोक्ताः—वेदविधानोक्ताः आदावोमित्युदाहृत्य सततम्—सर्वदा प्रवर्तन्ते । वेदाश्चोमित्युदाहृत्यारभ्यन्ते । एवं वेदानां वैदिकानां च यज्ञादीनां कर्मणामोमितिशब्दान्वयो वर्णितः । ओमितिशब्दान्वितवेदधारणात्तदन्वितयज्ञादिकर्मकरणाच्च ब्राह्मणशब्दनिर्दिष्टानां त्रैवर्णिकानामप्योमितिशब्दान्वयो वर्णितः ॥ २४ ॥

ता ॥ *तस्मादित्यादीनां चतुर्णां श्लोकानां प्रकृतप्रपञ्चनरूपतामाह—**त्रयाणा**मिति । ब्राह्मणवेदयज्ञानामित्यर्थः । यज्ञशब्दोऽत्र तपोदानादीनामुपलक्षकः, * यज्ञदानतपःक्रिया इत्यादि श्लोकमनन्तरमुच्यते । अनुष्ठानस्वरूपानुप्रवेशात्तत्रापि प्राथम्याच्चात्रापि प्रथममोङ्कारस्योक्तिरित्यभिप्रायेणाह—**प्रथम**मिति । **तस्मादि**ति—सर्वस्रष्टा मया तदैव तदन्वितत्वेन विहितत्वादित्यर्थः । करणव्युत्पत्त्या विधानमिह वैदिकं विधायकवाक्यमित्याह—**वेदविधानोक्ता** इति । यज्ञदानादीनामोङ्कारपूर्वकत्वं तत्तद्विधायकैस्सिद्धमित्यभिप्रायेणाह—**आदावि**ति । ओमित्युदाहरणं चात्र श्रुतवेदान्तानां सर्वान्तरपरब्रह्मानुसंधानेन तत्समाराधनबुद्ध्याऽनुसंधाय । स्मरति च भगवान् शौनकः—* हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेषु च इति । अश्रुतवेदान्तानामपि तद्वाचकशब्दाभिधानान्मङ्गलादिलाभोऽर्थसिद्धः । एवं च प्रणवस्य वैदिकसमस्तान्वयसिद्धिः । यद्यपि * वसन्तेवसन्ते ज्योतिषा यजेत (आ. श्रौ), * शरदि वाजपेयेन यजेत (,,) इत्यादिभिः कालविशेषनियताः क्रिया विधीयन्ते; तथाऽपि सर्वासां क्रियाणां प्रणवपूर्वकत्वे तु न कालविशेषनियम इति सततशब्दतात्पर्यमित्यभिप्रायेणाह—**सर्वदे**ति । स्वर्गसाधनत्वेनानुष्ठाने अपवर्गसाधनत्वेनानुष्ठाने च प्रणवान्वयस्साधारण इति भावः । अत्र श्लोके वेदानामनुपादानेऽपि पूर्वश्लोके * ब्राह्मणास्तेन वेदाश्चेत्युक्तत्वात् * यद्वेदादौ स्वरः प्रोक्तः (ना), * ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा । स्रवत्यनोंकृतं पूर्वम् (मनु. २. ७४) इत्याद्यनुसारेणाह—**वेदाश्चे**ति । * विधानोक्ता इत्यनेन ब्रह्मवाचिशब्देन च वेदानामप्यत्र श्लोके प्रणवान्वयस्सूचित इत्यभिप्रायेणाह—**एव**मिति । ओमित्युदाहरणकर्तृत्वव्यपदेशेन तदन्वितब्रह्मवादित्वव्यपदेशेन च ब्राह्मणानामप्योमितिशब्देनान्वयः प्रदर्शित एवेत्याह—**ओमितिशब्दान्वितवेदधारणादि**ति ॥ २४ ॥

भा ॥ अथैतेषां तदितिशब्दान्वयप्रकारमाह—

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥ २५

भा ॥ फलमनभिसन्धाय वेदाध्ययनयज्ञतपोदानक्रियाः मोक्षकाङ्क्षिभिस्त्रैवर्णिकैर्याः क्रियन्ते, ताः ब्रह्मप्रा[प्तिसाधन]प्त्युपायतया ब्रह्मवाचिना तदितिशब्देन निर्देश्याः ; * स वः कः किं यत्तत्पदमनुत्तमम् (वि. स.) इति तच्छब्दो हि ब्रह्मवाची प्रसिद्धः । एवं वेदाध्ययनयज्ञादीनां मोक्षसाधनभूतानां तच्छब्दनिर्देश्यतया तदितिशब्दान्वय उक्तः । त्रैवर्णिकानामपि तथाविधवेदाध्ययनाद्यनुष्ठानादेव तच्छब्दान्वय उपपन्नः ॥ २५ ॥

ता ॥ एवं स्वर्गापवर्गसाधनसमस्तवैदिकसाधारणं प्रणवान्वयरूपं लक्षणमुक्तम्; अथ तत्सच्छब्दौ मोक्षसाधनानां त्रिवर्गसाधनानां च विशेषलक्षणतयोच्येते । वक्ष्यति चैतदष्टादशारम्भे—* वैदिकस्य च कर्मणस्सामान्यलक्षणं

प्रणवान्वयः; तत्र मोक्षाभ्युदयसाधनयोर्भेदः तत्सच्छब्दनिर्देश्यत्वेन—इति । **एतेषा**मिति त्रयाणां परामर्शः । उक्तानां यज्ञादीनामुपलक्षणतया वेदेष्वपि तच्छब्दप्रवृत्तिज्ञापनाय वेदाध्ययनोपादानम् । * मोक्षकाङ्क्षिभिरित्यनेन सूचितमाह—**ब्रह्मप्राप्तिसाधनतये**ति । तदिति फलमनभिसन्धायेत्यन्वयः । तच्छब्दाभिधेयब्रह्मप्राप्तिसाधनतया तच्छब्दोपचार्यमिति बुद्ध्वा फलान्तरमनभिसन्धायेत्यर्थः [इति] । इतिकरणसामर्थ्यात् * उदाहृत्येति पदं वा पूर्वश्लोकादनुषञ्जनीयमित्यभिप्रायेणाह—**तदितिशब्देन निर्देश्या** इति । तच्छब्दस्य ब्रह्मनामत्वे सिद्धे हि तेन तत्प्राप्तिसाधनतयेति लक्षणा, तदेव कुत इत्यत्र तदिति श्रुतेरुपबृंहणेन विशदीकृतत्वमभिप्रेत्याह—**स व** इति । **भगवन्नामसहस्रे** * यानि नामानि गौणानि विख्यातानि महात्मनः इति प्रक्रमात् * नाम्नां सहस्रमिति निगमनाच्च यत्तदादिशब्दानां सर्वनामतया व्यापिनामपि विशेषतस्साक्षात्परब्रह्मनामत्वं सिद्धमिति भावः । श्लोकेऽनुक्तस्यापि वेदाध्ययनस्य प्रयोजकेन संगृहीतत्वमाह—**एव**मिति । तथाऽपि त्रयाणामन्वयो न सिध्यति, ब्राह्मणशब्दनिर्दिष्टानां त्रैवर्णिकानां मोक्षसाधनतत्वनिबन्धनतच्छब्दनिर्देश्यत्वाभावादित्यत्राह—**त्रैवर्णिकानामपी**ति । मोक्षकाङ्क्षिभिः क्रियन्त इत्यनेन परम्परया तदन्वयस्सूचित इति भावः ॥ २५ ॥

भा ॥ अथैषां सच्छब्दान्वयप्रकारं वक्तुं लोके सच्छब्दस्य व्युत्पत्तिप्रकारमाह—

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६

भा ॥ सद्भावे—विद्यमानतायां, साधुभावे – कल्याणभावे च सर्ववस्तुषु सदित्येतत्पदं प्रयुज्यते लोकवेदयोः । तथा केनचित्पुरुषेणानुष्ठिते लौकिके प्रशस्ते—कल्याणे कर्मणि सत्कर्मेदमिति सच्छब्दो युज्यते—प्रयुज्यते इत्यर्थः ॥ २६ ॥

ता ॥ त्रयाणां त्रिभिरन्वये प्रतिपिपादयिषिते * सद्भावे साधुभावे चेत्यप्रस्तुतोपन्यासः किमर्थ इत्यत्राह—**अथैषा**मिति । यथा प्रयोगबलाद्विद्यमानत्वादिषु सच्छब्दप्रवृत्तिरङ्गीक्रियते, एवं प्रस्तुतेऽपीत्यभिप्रायेणानेकार्थोदाहरणं **विद्यमानताया**मिति । असद्विलक्षणत्वरूपसत्त्वविषयो वा, वर्तमानत्वविषयो वा सद्भावशब्द इति भावः । * साधुकारी साधुर्भवति (बृ. ६. ४. ५) इत्यादिष्विवात्रापि साधु[भाव]शब्दः पुण्यादिरूपत्वपर इत्याह—**कल्याणभाव** इति । तच्छब्दान्वये * मोक्षकाङ्क्षिभिरिति विशेषणात्, इह तु * प्रशस्ते कर्मणीति प्रशस्ततामात्रनिमित्तवचनान्मोक्षेतरपुरुषार्थसाधनलक्षणतया सच्छब्दोऽत्र व्युत्पाद्यत इति भावः । अत्यन्तविजातीयेष्वप्युक्तोपाधिद्वययोगे सच्छब्दोऽनुवृत्त इत्यभिप्रायेणाह—**सर्ववस्तुष्वि**ति । * प्रयुज्यते इत्यविशेषनिर्देशात्प्रयोग स्यसार्वत्रिकत्वेन दार्ढ्यंसू च्यत इत्याह—**लोकवेदयो**रिति । * तथेति प्रस्तुतासन्ने लौकिकोदाहरणार्थम्, अन्यथा पुनरुक्तिप्रसङ्गादित्यभिप्रायेणाह—**लौकिक** इति । * साधुभावे इति निर्दिष्टमेव निमित्तं प्रकृतासन्नोदाहारणान्तरे प्रशस्तशब्देनावतार्यत इत्यभिप्रायेणाह—**कल्याण** इति । धातुलीनार्थव्यञ्जनमात्रमुपसर्गेण क्रियते । अतोऽत्र श्लोके * युज्यते प्रयुज्यते इतिपदद्वयमेकार्थमित्याह—**प्रयुज्यत इत्यर्थ** इति ॥ २६ ॥

यज्ञे तपसि दाने च स्थितिस्सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७

भा ॥ अतो वैदिकानां त्रैवर्णिकानां यज्ञे तपसि दाने च स्थितिः कल्याणतया सदित्युच्यते । कर्म च तदर्थीयम्—त्रैवर्णिकार्थीयं यज्ञदानादिकं सदित्येवाभिधीयते । तस्माद्वेदा वैदिकानि कर्माणि ब्राह्मणशब्द-निर्दिष्टास्त्रैवर्णिकाश्च ओं तत्सदितिशब्दान्वयरूपलक्षणेन अवेदेभ्यश्चावैदिकेभ्यश्च व्यावृत्ता वेदितव्याः ॥ २७ ॥

ता ॥ एवं सच्छब्दस्य व्युत्पत्तिप्रकारं प्रयोगं चोदाहृत्य तदुपजीवनेनानन्तरं लिलक्षयिषिते ब्राह्मणादित्रिके तत्प्रयोगोपपत्तिरुपसंहियत इत्यभिप्रायेणाह—**अत** इति । स्थितिमुखेन स्थातॄणां स्थापकानां च वेदानां सच्छब्दार्थान्वयो-ऽर्थादुच्यत इत्यभिप्रायेणाह—**वैदिकाना**मिति । अध्यायान्तेषु * ओं तत्सदिति पाठात्स्थितिशब्दोऽत्र अन्तपर इति व्याख्यान्तरं प्रकृतोपयुक्तप्रसिद्धतमार्थे संभवत्ययुक्तमिति भावः । स्थितिशब्देन बुद्धावुपस्थापिताः स्थातारस्तच्छब्देन परामृश्यन्त इत्यभिप्रायेणाह—**त्रैवर्णिकार्थीय**मिति । त्रिविधनिर्देशविषयतया प्रकृतेश्वरार्थीयमिति व्याख्यान्तरमति-व्यवहितपरामर्शात्सर्वेषां यज्ञादीनामतदर्थीयत्वाच्च अयुक्तमिति भावः । यज्ञाद्यर्थीयसाधनसम्पादनरूपकर्मणि सच्छब्द-निर्देशवचनादपि प्रक्रान्ते यज्ञादावेव तदुक्तिरिहोपपन्नेत्यभिप्रायेणाह—**यज्ञदानादिक**मिति । * तदर्थीयमिति सामान्य-संग्रहावलम्बिना आदिशब्देनाध्ययनादिग्रहणाद्वेदानामपि सच्छब्दान्वयोऽत्र प्रदर्शित एव । भवत्वेवं त्रयाणां त्रिभिर-न्वयः, तदुक्तिरिह किमर्थेत्यत्र लक्षणोक्तिप्रयोजनभूतविविक्तानुसन्धानप्रतिपादनमुखेन * ओं तत्सदित्यादिश्लोकैः **फलितं** वदन्नुपसंहरति—**तस्मादि**ति । यत्तु कैश्चित् * ओं तत्सदित्यमीषां वाक्यत्वकल्पनेन वाक्यार्थवर्णनं, यत्फलाभिसन्धि-रहितं कर्म, [तच्छोभनमिति युक्तम् ; तदों] सच्छोभनमिति यत्तदों तदेवेत्यर्थः इति ; एतदेव विवक्षितमित्यत्र न कश्चि-द्धेतुः ; नचोपयोगः ; लक्षणत्वाभिधानं त्वनुष्ठानोपयुक्तमिति भावः ॥ २७ ॥

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८

इति श्रीमद्भगवद्गीतासूपनिषत्सु **श्रद्धात्रयविभागयोगो** नाम सप्तदशोऽध्यायः ॥ १७ ॥

भा ॥ अश्रद्धया कृतं शास्त्रीयमपि होमादिकमसदित्युच्यते । कुतः ? न च तत्प्रेत्य, नो इह—न मोक्षाय, न सांसारिकाय च फलाय [इति] ॥ २८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये सप्तदशोऽध्यायः ॥ १७ ॥

ता ॥ * शास्त्रविधिमुत्सृज्येत्यादिना अध्यायारम्भे प्रश्नोत्तरमुखेन श्रद्धायुक्तस्याप्यशास्त्रीयस्यासुरत्वेनासत्त्वं प्रति-पाद्य शास्त्रीयस्य ततो व्यावृत्तिर्दर्शिता ; इदानीं व्यतिरेकेण प्रकृतानां सदितिनिर्देशार्हत्वदृढीकरणाय शास्त्रीयस्यापि श्रद्धा-रहितस्यासत्त्वमुच्यते, विशिष्टव्यतिरेकस्य विशेषणाभावे विशेष्याभावे च समानत्वादित्यभिप्रायेणाह—**अश्रद्धया कृतं शास्त्रीयमपी**ति । कृतशब्दस्य हुतदत्तयोरन्वयः, * तप्तमित्यनेन तपसः कृतत्वसिद्धेः । हुतदत्तशब्दावत्र भावार्थौ । एवं कृतशब्दस्य विशेषणतयाऽन्वयेऽपेक्षिते सामान्यविषयपरोपकारादिविषयत्वक्लृप्तिरयुक्तेति च भावः । यद्यप्यशास्त्रीय-वन्निरयपतनैकहेतुत्वं नास्ति, तथाऽपि तत्तद्वाक्योदितफलाभावादसत्त्वमुपपद्यत इत्यभिप्रायेण हेत्वाकाङ्क्षां दर्शयति—**कुत** इति । * येयं प्रेते (क. १. २०) इति श्रुत्य[नु]विरोधेन प्रेत्यशब्दस्य मुक्तदशाविषयत्वोपपत्तौ * मोक्षकाङ्क्षिभिरित्याद्युक्त-फलव्यतिरेकस्य * न च तत्प्रेत्येत्यादिना विवक्षितत्वमाह—**न मोक्षायेति** । परिशेषसिद्धमिहशब्दस्यार्थमाह—**न सां-**

सारिकाय च फलायेति । श्रद्धायुक्तमप्यवैदिकं, वैदिकमपि श्रद्धाहीनं दृष्टादृष्टप्रयोजनविरहादननुष्ठेयम्; उभयविध-प्रयोजनयोगाद्वैदिकमेव श्रद्धापूतमेवानुष्ठेयमित्यध्यायसार इति भावः ॥ २८ ॥

॥ इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां सप्तदशोऽध्यायः ॥ १७ ॥

॥ अथ अष्टादशोऽध्यायः ॥ १८ ॥

भा ॥ अतीतेनाध्यायद्वयेन अभ्युदयनिश्श्रेयससाधनभूतं वैदिकमेव यज्ञतपोदानादिकं कर्म, नान्यत्; वैदिकस्य च कर्मणस्सामान्यलक्षणं प्रणवान्वयः; तत्र मोक्षाभ्युदयसाधनयोर्भेदः तत्सच्छब्दनिर्देश्यत्वेन; मोक्ष-साधनं च कर्म फलाभिसन्धिरहितं यज्ञादिकम्; तदारम्भश्च सत्त्वोद्रेकाद्भवति; सत्त्ववृद्धिश्च सात्त्विकाहार-सेवया; इत्युक्तम्। अनन्तरं मोक्षसाधनतया निर्दिष्टयोस्त्यागसंन्यासयोरैक्यम्, त्यागस्य च स्वरूपम्, भगवति सर्वेश्वरे च सर्वकर्मणां कर्तृत्वानुसन्धानम्, सत्त्वरजस्तमसां कार्यवर्णनेन सत्त्वगुणस्यावश्योपादेयत्वम्, स्व-वर्णोचितानां कर्मणां परमपुरुषाराधनभूतानां परमपुरुषप्राप्तिनिर्वर्तनप्रकारः, कृत्स्नस्य गीताशास्त्रस्य सारार्थो भक्तियोग इत्येते प्रतिपाद्यन्ते। तत्र तावत्त्यागसंन्यासयोः पृथक्त्वैकत्वनिर्णयाय स्वरूपनिर्णयाय चार्जुनः

अर्जुन उवाच—

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १

भा ॥ त्यागसंन्यासौ हि मोक्षसाधनतया विहितौ—* न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानशुः....वेदान्तविज्ञानसुनिश्चितार्थास्संन्यासयोगाद्यतयश्शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृता-त्परिमुच्यन्ति सर्वे ॥ (ना) इत्यादिषु। अस्य संन्यासस्य त्यागस्य च तत्त्वम्—याथात्म्यं पृथग्वेदितुमिच्छामि। अयमभिप्रायः—किमेतौ संन्यासत्यागशब्दौ पृथगर्थौ, उतैकार्थावेव? यदा पृथगर्थौ, तदा अनयोः पृथक्त्वेन स्वरूपं वेदितुमिच्छामि; एकत्वेऽपि तस्य स्वरूपं वक्तव्यमिति ॥ १ ॥

ता ॥ कर्तव्यविशोधनप्रधाने अन्तिमेऽध्यायत्रिकेऽस्याध्यायस्य पश्चाद्भावित्वज्ञापनाय षोडशसप्तदशयोर्दैवासुर-विभागोक्त्यादिमुखेन हेयोपादेयविभजनपरतया प्रघट्टकैक्यमभिप्रेत्याह—**अतीतेने**ति। **वैदिकस्य कर्मणस्सामान्य-लक्षणं प्रणवान्वयः, तत्र मोक्षाभ्युदयसाधनयोर्भेदस्तत्सच्छब्दनिर्देश्यत्वेने**ति विभजमानस्यायमभिप्रायः—विशे-षणादिसामर्थ्यलब्धोऽयं विभागः। ब्रह्मणः पारोक्ष्यात् *तदिति निर्देशः। तज्ज्ञाने तु सन्मार्गत्वविवक्षया सच्छब्दः। क्रमादेते सात्त्विकराजसतामसा इति विभागस्तु कस्यचिदुत्प्रेक्षाकल्पितः—इति। एवमुक्तेष्वप्यर्थेषु मोक्षसाधनभूतांश-स्वरूपशोधनमुत्तराध्यायेन क्रियत इति सङ्गत्यभिप्रायेणाह—**अनन्तर**मिति। *ईश्वरे कर्तृताबुद्धिस्सत्त्वोपादेयताऽन्तिमे। स्वकर्मपरिणामश्च शास्त्रसारार्थ उच्यते ॥ (२२) इति संग्रहश्लोके त्यागसंन्यासैक्यतत्स्वरूपानुक्तिरीश्वरे कर्तृताबुद्धे-श्लोक्तया तदुपन्यासादिति मन्तव्यम्। सत्त्वोपादेयत्वमत्र तात्पर्यवृत्त्याऽभिधीयत इत्यभिप्रायेणाह—**सत्त्वरजस्तमसां कार्यवर्णनेने**ति। *स्वधर्मज्ञानवैराग्यसाध्यमवश्यैकगोचरः इति संग्रहारम्भोक्तप्रधानकर्तव्यपरोऽत्र शास्त्रसारार्थशब्द इत्यभिप्रायेणाह—**सारार्थो भक्तियोग** इति। स्वर्गादिसाधनानां यज्ञदानादीनां स्वरूपाविशेषेऽपि मध्योगान्मोक्षसाधनत्वं,

तद्विशेषमिदानीं शोधयितुमर्जुनः पृच्छतीत्यभिप्रायेण प्रकृते प्रश्नं सङ्गमयति–**तत्र तावदिति** । सत्त्वविवृद्धितदुपायादिकथनं त्यागादिविशिष्टमोक्षसाधनकर्मार्थतया । संन्यासशब्दस्याश्रमविशेषादिरूढेस्त्यागमात्रेऽपि शक्तेश्च पृथक्त्वैकत्वशङ्का । वादिविप्रतिपत्त्यादिभिस्स्वरूपविशेषानिश्चयः ।

त्यागसंन्यासयोर्विशेषतस्तत्त्वबुभुत्साहेतुमाह–**त्यागसंन्यासौ** हीति । कर्मस्वरूपे स्वर्गापवर्गादिसाधारणे त्यागादिसंज्ञकविशेषणयोगादेव ह्यपवर्गसाधनत्वम् । अतः प्राप्ताप्राप्तविवेकेन विशेषणे तत्साधनत्वव्यपदेशः । संशयविपर्ययोपमर्दी विशेष इह तत्त्वशब्देन विवक्षित इत्याह–**याथात्म्य**मिति । पृथक्त्वं वेदितुमिच्छामीत्युक्ते निश्चितपृथक्त्वस्य तत्तत्स्वरूपजिज्ञासा प्रतीयते; नच तद्युक्तं, पूर्वत्र पृथक्त्वनिश्चयहेत्वभावादुत्तरत्र चैकत्वस्यैव वक्ष्यमाणत्वात् । अतोऽयं प्रश्नोऽनुपपन्नः; प्रतिवचनासङ्गतिश्चेत्यत्राह–**अयमभिप्राय** इति । *तत्त्वं वेदितुमिच्छामीत्येतदेव विक्षितम्; पृथक्त्वनिर्देशस्तु संशयकोट्यन्यतरोपक्षेपमात्रपरः; पृथक्त्वमस्ति चेत्तद्वेदितुमिच्छामीति वा वाक्यावृत्तिरित्यभिप्रायेणाह–**किमि**ति ॥ १ ॥

भा ॥ अथानयोरेकमेव स्वरूपम्, तच्चेदृशमिति निर्णेतुं वादिविप्रतिपत्तिं दर्शयन् श्रीभगवानुवाच—

श्रीभगवानुवाच—

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २

भा ॥ केचन विद्वांसः काम्यानां कर्मणां न्यासं स्वरूपत्यागं संन्यासं विदुः । केचिच्च विचक्षणाः नित्यानां नैमित्तिकानां काम्यानां च सर्वेषां कर्मणां फलत्याग एव मोक्षशास्त्रेषु त्यागशब्दार्थ इति प्राहुः । तत्र शास्त्रीयत्यागः काम्यकर्मस्वरूपविषयः, सर्वकर्मफलविषय इति विवादं प्रदर्शयन् एकत्र संन्यासशब्दमितरत्र त्यागशब्दं प्रयुक्तवान्, अतस्त्यागसंन्यासशब्दयोरेकार्थत्वमङ्गीकृतमिति ज्ञायते । तथा *निश्चयं शृणु मे तत्र त्यागे भरतसत्तम (४) इति त्यागशब्देनैव निर्णयवचनात् *नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहात्तस्य परित्यागः तामसः परिकीर्तितः ॥ (७) *अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् । भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ (१२) इति परस्परपर्यायतादर्शनाच्च तयोरेकार्थत्वमङ्गीकृतमिति निश्चीयते ॥२॥

ता ॥ पृथक्त्वैकत्वतत्स्वरूपजिज्ञासया प्रश्नश्चेत् तत्र कस्मिन्नंशे *काम्यानामित्यादिमतभेदोपन्यासस्य सङ्गतिरित्यत्राह–**अथे**ति । अयमभिप्रायः–न्यायतो ह्यत्र निर्णयः प्रतिपाद्यते; संदिग्धे च न्यायावतारः; सन्देहश्चात्र वादिविप्रतिपत्तिनिबन्धन इति न्यायविषयविशोधनाय विप्रतिपत्त्युपन्यासः–इति । एतेन कथितार्थयोरपि संन्यासत्यागशब्दयोर्विप्रतिपत्तिप्रशमनाय अस्मिन्नध्याये पुनः प्रश्न इत्यपि सूचितम् । एकत्वस्वीकारेण प्रतिवचनात्पृथक्त्वप्रतिक्षेपोऽर्थसिद्ध इत्यभिप्रायेणाह–**एकमेव स्वरूप**मिति । स्वमतस्य *निश्चयं शृण्विति (४) वक्ष्यमाणत्वात् *कवयः विचक्षणाः इति पदद्वयं नार्थप्राशस्त्या[र्थ]र्थवक्तृगौरवपरम्; अपि तु विप्रतिपत्त्युपयुक्तवेदनमात्रपरमित्यभिप्रायेणाह–**केचन विद्वांस** इति । अनन्तरश्लोकेन भेदस्य *एके, अपरे इति व्यक्तमुक्तत्वादिहापि तद्विवक्षेत्यभिप्रायेण **केचनेत्युक्तम्** । *काम्यानां कर्मणां न्यासमिति विशेषणादितरेषामपरित्यागः प्रतीयते; उत्तरत्र च *सर्वकर्मफलत्यागमिति विशेषणादत्र काम्यस्वरूपत्यागश्चेत्यभिप्रायेणाह–**स्वरूपत्यागमिति** । काम्यस्वरूपत्यागं वदतामयमभिप्रायः–न तावन्नित्यनैमित्तिकत्व

अकरणे प्रत्यवायात्कर्मान्तरानर्हतापत्तिभयाद्वा काम्यमनुष्ठीयते । नच त्रिवर्गसाधनाय, तस्यापवर्गप्रत्यनीकत्वात् । नच तदेव कर्मापवर्गस्यापि स्वयं साधनम्, उपासनादिनैरर्थक्यप्रसङ्गात् । नच विनियोगपृथक्त्वेन विद्याङ्गतया तत्परिग्रहः, यज्ञादिश्रुतेर्नित्यनैमित्तिकमात्रविषयत्वेऽपि विरोधाभावात् । अत एव हि * सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् (ब्र. ३.४. २६) इत्यधिकरणमाश्रमधर्मसापेक्षतापरं भाष्यते । तस्मात्स्वर्गादिसंज्ञनरकहेतवः काम्याः क्रिया मुमुक्षुभिर्नानुष्ठेयाः—इति । सर्वकर्मफलत्यागमिति वदतां त्वयमाशयः—फलविरोधाद्धि काम्यानां त्यागश्शङ्क्यते ; अतः फलमेव त्यज्यताम्, न च निष्फलानुष्ठानप्रसङ्गः, नित्यनैमित्तिकवदेव भगवत्प्रीतिमात्रार्थतया तदनुष्ठानोपपत्तेः । नचैव न विधिः, * यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति (बृ. ५. ८. ९) इत्यादिनाऽक्षरशब्दनिर्दिष्टपरमपुरुषवेदनावेदनाभ्यामेव तस्यैव कर्मणो नित्यानित्यफलसाधनत्वश्रुतेः । अतो नित्यनैमित्तिकानामिव काम्यानामपि न स्वरूपत्यागः—इति । विवादस्य भिन्नविषयत्वायोगादत्र त्यागसंन्यासशब्दयोरेकार्थत्वावश्यंभावात्पृथगर्थत्वशङ्कापरिहारोऽर्थलब्ध इत्याह—**तत्रेति**• । एतेन, संन्यासत्यागशब्दयोः पृथगर्थत्वमङ्गीकृत्य कस्यचित्काम्यस्वरूपप्रहाणविषयतया कस्यचित्तु नित्यनैमित्तिकफलोपेक्षार्थतां च वदन्तः प्रत्युक्ताः । न ह्यत्र काम्येतरकर्मफलत्यागमित्युच्यते । ततश्च संकोचकाभावात् त्रिविधमपि कर्म संगृह्णाति—* सर्वकर्मेति । तदिदमुक्तम्—**नित्यानां नैमित्तिकानां काम्यानां च सर्वेषां कर्मणा**मिति । नित्यानामपि * प्राजापत्यं गृहस्थानाम् (वि. १. ६. ३७) इत्यादिना फलसंयोगोऽवगतः । अत्र श्लोके त्यागसंन्यासशब्दयोरर्थभेदव्युत्पादनपरतां निरसितुमैकार्थ्ये प्रस्पष्टं हेतुद्वयमाह—**तथेति** । नह्यर्थद्वयविषयेऽत्र विमर्शे अन्यतरस्यैव निश्चय उपपन्न इत्यभिप्रायेणोक्तम्—**त्यागशब्देनैवेति** । **परस्परपर्यायतादर्शनाच्चेति** । अयमभिप्रायः—* नियतस्य तु संन्यासः कर्मणो नोपपद्यते इति निषिद्ध एव हि संन्यासः * मोहात्तस्य परित्याग इति त्यागशब्देनानूद्य तामसत्वेन निन्द्यते, अन्यथा जरद्वादिवाक्यवत्परस्परानन्वयप्रसङ्गात् । एवं * भवत्यत्यागिनां प्रेत्येत्युक्त एवार्थः * ननु संन्यासिनां क्वचिदिति व्यतिरेकेण दृढीक्रियते । नच तदन्यविधिरन्याभावस्य व्यतिरेकः । अत इमौ शब्दावत्राप्येकार्थाविति । **अङ्गीकृत**मिति । प्रतिवक्त्रा भगवतेति शेषः ॥ २ ॥

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३

भा ॥ एके—मनीषिणः कापिला वैदिकाश्च तन्मतानुसारिणो रागादिदोषबन्धकत्वात् सर्वं यज्ञादिकं कर्म मुमुक्षुणा त्याज्यमिति प्राहुः ; अपरे पण्डिताः यज्ञादिकं कर्म न त्याज्यमिति प्राहुः ॥ ३ ॥

ता ॥ एवं * काम्यानामिति श्लोकेन फलविरोधतदभावद्वारा विरोधो दर्शितः । अथ * त्याज्यं दोषवदिति श्लोकेन स्वरूपतो दोषयोगतदभावाभ्यां प्रत्यवायत्वादिमुखेन विवादः प्रदर्श्यते । वैधहिंसाऽपि कापिलैर्निषिद्धत्वेन दोषतयाऽङ्गीक्रियते । यथोक्तमीश्वरकृष्णेन * दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः (सां. का. २) इति । **उक्तं च पञ्चशिखाचार्यैः** * स्यात् स्वल्पस्संकरस्सुपरिहरस्सप्रत्यवमर्शः इति । अतो वैधहिंसा पुरुषस्य दोषमावक्ष्यति, क्रतोश्चोपकरिष्यतीति तन्मतम् । अतः * एके इति शब्देन सामान्यतो निर्दिष्टा वादिनः * दोषवदिति हेत्वन्वयादिसामर्थ्यादोषास्पदृष्टान्तोक्तिबलाद्वा विशेषतो व्यज्यन्त इत्याह—**कापिला वैदिकाश्च तन्मतानुसारिण** इति । एतेन सर्वकर्मस्वरूपसंन्यासवादिनां मतमपि वेदबाह्यत्वेन दर्शितम् । **रागादिदोषबन्धकेति**—रागादयो दोषा बन्धका इति सर्व-

सैद्धान्तिकसंमतत्वात्तदुदाहरणम् ; यद्वा कर्मैव रागादिदोषवत् ; अत एव बन्धकमित्यभिप्रायः । अस्यां योजनायामादिशब्दो हिंसादिकमपि संगृह्णाति । **सर्वं यज्ञादिकं कर्मेति**—कर्मशब्दोऽत्र सामान्यविषयोऽपि * यज्ञदानतपःकर्म न त्याज्यमिति पक्षान्तरे विशेषणाच्छास्त्रचोदितविषयः ; तत्र च विशेषकाभावात्काम्यविषयत्वे पौनरुक्त्याच्च सर्वविषय इति भावः । सर्वेस्त्याज्यत्वे तद्विधायकस्य शास्त्रस्याप्रामाण्यप्रसङ्गात् **मुमुक्षुणे**ति विशेषितम् । अपरशब्दोऽत्र स्वमतानुसारिविषयः । * यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तदिति हि स्वमतं वक्ष्यत इत्यभिप्रायेणाह—**पण्डिता** इति । त्याज्योपादेयविभागतत्त्वविद इत्यर्थः ॥ ३ ॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधस्संप्रकीर्तितः ॥ ४

भा ॥ तत्र—एवं वादिविप्रतिपन्ने त्यागे—त्यागविषयं निश्चयं मत्तश्शृणु ; त्यागः क्रियमाणेष्वेव वैदिकेषु कर्मसु फलविषयतया, कर्मविषयतया, कर्तृत्वविषयतया च पूर्वमेव हि मया त्रिविधस्संप्रकीर्तितः—* मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ (३. ३०) इति । कर्मजन्यं स्वर्गादिकं फलं मम न स्यादिति फलत्यागः ; मदीयफलसाधनतया मदीयमिदं कर्मेति कर्मणि ममतायाः परित्यागः कर्मविषयस्त्यागः ; सर्वेश्वरे कर्तृत्वानुसंधानेनात्मनः कर्तृतात्यागः कर्तृत्वविषयस्त्यागः ॥ ४ ॥

ता ॥ * तत्रेतिशब्दः प्रकृतविप्रतिपत्तिविषयनानुवादमुखेन न्यायप्रवृत्तिविषयसंदिग्धताद्योतक इत्यभिप्रायेणाह—**एवं वादिविप्रतिपन्न** इति । * मे निश्चयमित्यनेन मतान्तरोत्थानशङ्काव्युदासायाह—**त्यागविषयं निश्चयं मत्तश्शृण्विति** । मत्तः—भ्रमादिदोषरहितादित्यर्थः । * त्यागो हीत्यादिकं न वक्ष्यमाणसात्त्विकादित्यागत्रैविध्यविषयं, किं तु सात्त्विकत्यागावान्तरभेदविषयं, * संप्रकीर्तितः इत्यस्य प्रागुक्ततत्परत्वस्वारस्यात्, हिशब्देन श्रोतृसंप्रतिपत्त्यादिप्रतीतेश्चेत्यभिप्रायेणाह—**त्यागः क्रियमाणेष्वेवे**त्यादि । *मयि सर्वाणीत्येक एव श्लोकस्त्रिविधत्यागपर इति । अत्र निष्फलानुष्ठानस्वरूपत्यागं, साङ्ख्यमतशङ्कां च प्रतिक्षेप्तुं त्रयाणां स्वरूपं विविनक्ति—**कर्मजन्य**मित्यादिना । **मदीयफलसाधनतये**त्यादि । स्वकीयप्रीतिसाधनतया स्वार्थमेव भगवान्प्रवर्तयतीति हि मुमुक्षोरनुसंधानमिति भावः । स्वकर्तृत्वस्य तादधीन्यतदनुमतिसापेक्षत्वादिभिस्सर्वेश्वरे कर्तृत्वानुसंधानम् । कर्तृत्वत्यागस्तु अनेककर्तृके परप्रयुक्तस्वात्मकर्तृकत्वानुसन्धानमित्युत्तरत्र विशोधयिष्यते ॥ ४ ॥

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।

भा ॥ यज्ञदानतपःप्रभृति वैदिकं कर्म मुमुक्षुणा न कदाचिदपि त्याज्यम्, अपि त्वाप्रयाणादहरहः कार्यमेव ॥ ४* ॥

भा ॥ कुतः ?

यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५

भा ॥ यज्ञदानतपःप्रभृतीनि वर्णाश्रमसंबन्धीनि कर्माणि मनीषिणां—मननशीलानां पावनानि । मननमुपासनम् ; मुमुक्षूणां यावज्जीवमुपासनं कुर्वतामुपासननिष्पत्तिविरोधिप्राचीनकर्मविनाशनानीत्यर्थः ॥ ५ ॥

ता ॥ एवं त्रिविधत्यागानुवादस्य स्वरूपत्यागव्यवच्छेदार्थतोच्यते—* यज्ञदानेत्यादिना । विविदिषाद्युत्पत्तेः प्राग्यज्ञादिकमनुष्ठेयं, पश्चात्तु परित्याज्यमित्याख्यातीति केचित्; तन्मतव्युदासायाह—**न कदाचिदपीति** । * स खल्वेवं वर्तयन्यावदायुषम् (छा. ८. १५. १०) इति श्रुत्यभिप्रायेणाह—**अपि त्वाप्रयाणादिति** । तथाच सूत्रम्—* आप्रयाणात्तत्रापि हि दृष्टम् (ब्र. ४. १. १२) इति । **अहरहरिति** चोदितकालोपलक्षणम् । ननु विद्यानिष्ठस्य किमर्थं कर्म? न तावदारादुपकारित्वेन, समुच्चयादिपक्षानभ्युपगमात्; नापि तत्त्वज्ञानार्थं, सपरिकरात्प्रमाणादेव तत्सिद्धेः, न च तदनुस्मरणरूपोपासनार्थं, तस्यापि संस्कारपाटवादिसाध्यत्वात्; नचान्यत्किञ्चित्कर्मसाध्यं मुमुक्ष्वपेक्षितं प्रयोजनं पश्यामः; न च प्रयोजनमनुद्दिश्य मन्दस्यापि प्रवृत्तिरित्यभिप्रायेण **कुत** इत्याकाङ्क्षाप्रदर्शनम् । चकारोऽनुक्तसमुच्चयार्थ इत्यभिप्रायेण प्रभृतिशब्दः । **वर्णाश्रमसंबन्धीनीति** । नित्यनैमित्तिकानामपि स्वरूपत्याग इति यः पक्षः, स इह प्रतिक्षिप्यत इति भावः । यज्ञादीनां सन्निपत्योपकारद्योतनायोपकर्तव्यज्ञानस्वरूपपरोऽत्र मनीषिशब्द इत्यभिप्रायेणाह—**मननशीलानामिति** । मनस ईषिणो मनीषिण इति व्युत्पत्तौ फलितोक्तिरियम् । श्रवणानन्तरभावियौक्तिकमननव्यवच्छेदायाह—**मननमुपासन**मिति । * पावनानि मनीषिणामिति समभिव्याहारसिद्धमुपकारप्रकारं व्यनक्ति—**मुमुक्षूणा**मित्यादिना । * प्रायणान्तमोंकारमभिध्यायीत इति प्रक्रम्य * यः पुनरेतं त्रिमात्रेणैवोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत (प्र.५.५) इत्युपासनं यावज्जीवमनुष्ठेयमिति निगम्यते । अतस्तदङ्गमपि यावज्जीवमनुष्ठेयम् । तच्च * स खल्वेवं वर्तयन्यावदायुषम् (छा. ८. १५. १०) इत्यादिभिर्व्यज्यत इति भावः । उपासनवदुत्तराघनिवर्तकत्वाभावात्प्राचीनशब्दः ॥ ५ ॥

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६

भा ॥ यस्मान्मनीषिणां यज्ञदानतपःप्रभृतीनि पावनानि, तस्मादुपासनवदेतान्यपि यज्ञादिकर्माणि मदाराधनरूपाणि, सङ्गम्—कर्मणि ममतां फलानि च त्यक्त्वा अहरहराप्रयाणादुपासननिर्वृत्तये मुमुक्षुणा कर्तव्यानीति मम निश्चितमुत्तमं मतम् ॥ ६ ॥

ता ॥ एवं पावनत्वोक्त्या * त्याज्यं दोषवति पक्षः प्रतिक्षिप्तः । * निश्चयं शृण्वित्यादिनोक्त एवार्थः * एतान्यपीति श्लोकेन निर्दोषत्वाध्यवसायार्थं निगमनात्मना दृढीक्रियत इत्यपुनरुक्तिः । हेतुसाध्यभावेन पूर्वोत्तरग्रन्थौ संगमयति—**यस्मा**दिति । मनीषिशब्दसूचितोपासनसमानयोगक्षेमताद्योतनाय अपिशब्द इत्याह—**उपासनवदेतान्यपी**ति । परमात्मप्रीतिद्वारा कर्मणां पावनत्वादिसिद्ध्यर्थमाह—**मदाराधनरूपाणी**ति । सङ्गशब्दस्य फलत्यागोक्त्या पुनरुक्तिं परिहरति—**कर्मणि मम**तामिति । **निश्चित**मिति—नात्र पुनस्त्वया संशयितव्यमिति भावः । **उत्तम**मिति—असर्वज्ञानामन्येषामेतद्विरुद्धं स्वरूपत्यागादिमतं सर्वाधमत्वादनादरणीयमिति भावः ॥ ६ ॥

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७

भा ॥ नियतस्य—नित्यनैमित्तिकस्य महायज्ञादेः कर्मणः, संन्यासः—त्यागो नोपपद्यते, *शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः (३. ८) इति शरीरयात्राया एवासिद्धेः, शरीरयात्रा हि यज्ञशिष्टाशनेन निर्वर्त्यमाना सम्यग्ज्ञानाय प्रभवति; अन्यथा *ते त्वघं भुञ्जते पापाः (३. १३) इत्ययज्ञशिष्टाघरूपाशनाप्यायने मनसो विप-

रीतज्ञानाय भवति। *अन्नमयं हि सोम्य मनः (छा. ६. ५. ४) इत्यन्नेन हि मन आप्यायते; *आहारशुद्धौ सत्त्वशुद्धिस्सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः॥ (छा. ७. २६. २) इति ब्रह्मसाक्षात्काररूपं ज्ञानमाहारशुद्ध्यायत्तं श्रूयते। तस्मान्महायज्ञादिनित्यनैमित्तिकं कर्म आप्रयाणात् ब्रह्मज्ञानायैवोपादेयमिति तस्य त्यागो नोपपद्यते। एवं ज्ञानोत्पादिनः कर्मणो बन्धकत्वमोहात्परित्यागस्तामसः परिकीर्तितः। तमोमूलस्त्यागस्तामसः, तमःकार्याज्ञानमूलत्वेन त्यागस्य तमोमूलत्वम्। तमो ह्यज्ञानस्य मूले *प्रमादमोहौ तमसो भवतोऽज्ञानमेव च (१४. १७) इत्यत्रोक्तम्। अज्ञानं तु ज्ञानविरोधि विपरीतज्ञानम्; तथा च वक्ष्यते—*अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता। सर्वार्थान्विपरीतांश्च बुद्धिस्सा पार्थ तामसी॥ (३२) इति। अतो नित्यनैमित्तिकादेः कर्मणस्त्यागो विपरीतज्ञानमूल एवेत्यर्थः॥ ७॥

ता॥ अथ *नियतस्येत्यादिना मतान्तराणामधमत्वं स्वमतस्योत्तमत्वं च प्रपञ्च्यते। वर्णाश्रमप्रयुक्ततया दुस्त्यजत्वं नियतशब्देनाभिप्रेतमित्याह—**नित्यनैमित्तिकस्येति**। तुशब्दसहितस्संन्यासशब्दोऽत्र *त्याज्यं दोषवदित्यत्र स्वरूपत्यागानुवादी, स एव हि *मोहात्तस्य परित्यागः इत्युत्तरार्धेन निन्दत इत्यभिप्रायेण **संन्यासस्त्याग इत्युक्तम्**। पावनत्वेनावश्यकर्तव्यत्वे शिष्टे पुनस्त्यागो नोपपद्यत इति शासनं प्राक्प्रपञ्चितदृष्टादृष्टानुपपत्तिस्मारणपरमित्यभिप्रायेणानुपपत्तिं विवृणोति—**शरीरयात्राऽपीति**। केवलाशनादिनाऽपि लौकिकदेहयात्रा सिध्येदित्यत्राह—**शरीरयात्रा हीति**। *पञ्चभूतात्मकैर्भोगैः पञ्चभूतात्मकं वपुः। आप्यायते (वि. ६. ७. १८) इति स्मरणात्कथमाहारेण मनस आप्यायनमित्यत्राह—**अन्नमयं हीति**। सात्त्विकाहंकारकार्यस्यान्नविकारत्वासंभवादाप्यायनोक्तिः। *स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः इत्येतत् *भिद्यते हृदयग्रन्थिः (मु. २. २. ८) इत्यादिकया समानार्थया श्रुत्या दर्शनशब्देन विशेष्यत इत्यभिप्रायेण **ब्रह्मसाक्षात्काररूपमित्युक्तम्**। विशदतमत्वात्साक्षात्कारोक्तिरिह भाव्या। सकृदनुष्ठितस्य विद्योपकारित्वशङ्कां परिहरन्निगमयति—**तस्मादिति**। *नोपपद्यते इत्यस्य कारणाभावे कथं कार्यं स्यादिति भावः। उक्तप्रकारेणापरित्याज्यत्वनियमवत्त्वं तस्येत्यनूद्यत इत्यभिप्रायेणाह—**एवं ज्ञानोत्पादिन इति**। *त्याज्यं दोषवदित्यनूदितस्य मतस्यैतद्दूषणमित्यभिप्रायेणाह—**बन्धकत्वमोहादिति**। *तत्र भवः (अष्टा. ४. ३. ५३) इत्यण्प्रत्ययेन तामसशब्दं निर्वक्ति—**तमोमूल इति**। संबन्धमात्रेऽपि तद्धितार्थे फलितविशेषोऽयम्। तामसबुद्धिमूलत्वेन सद्वारकं तमोमूलत्वं विवृणोति—**तमःकार्येति**। नन्वत्र समभिव्याहृतमोहमूलत्वेनैव तमोमूलत्वे दर्शयितव्ये तमःकार्याज्ञानमूलत्वोक्तिः किमर्था? तदर्थैव; नह्युक्तस्यैव पुनश्शब्दान्तरव्यञ्जने प्रयोजनम्, अधिकबोधनं तु युक्तमविरुद्धं चेति। ननु *प्रमादमोहौ तमसो भवतोऽज्ञानमेव (१४. १७) चेति श्लोके मोहशब्देन विपरीतज्ञानस्य पृथगुक्तत्वादज्ञानशब्देन ज्ञानाभाव उच्यत इति व्याख्यातम्; इह पुनः, अज्ञानं तु ज्ञानविरोधि विपरीतज्ञानमिति कथमुच्यते? इत्थं—ज्ञानाभावस्यापि प्रवृत्तिहेतुत्वं विपरीतज्ञानद्वारेति प्रदर्शनार्थं, श्लोकस्थमोहशब्दस्य प्रयोजनान्तरविवक्षया वा, श्लोकस्थस्याज्ञानशब्दस्य मोहविषयत्वज्ञापनार्थं वेति। तामसबुद्धेः कर्मत्यागहेतुतां वक्ष्यमाणेन व्यनक्ति—**तथाचेति**। तत्त्वविदो न परित्यजन्तीत्यभिप्रायेण तामसनिर्देशफलितं निगमयति—**अत इति**। *नित्यनैमित्तिकादेरित्यादिशब्देन फलाभिसंधिरहितकाम्यानामपि वक्ष्यमाणानां ग्रहणम्। **विपरीतज्ञानेत्यनेनायथाज्ञानमूलाद्राजसत्यागाद्विशेषप्रदर्शनम्**। *अयथावदिति (३१) हि राजसबुद्धिर्वक्ष्यते॥ ७॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥ ८

भा ॥ यद्यपि परंपरया मोक्षसाधनभूतं कर्म ; तथाऽपि दुःखात्मकद्रव्यार्जनसाध्यत्वात् बह्वायासरूपतया कायक्लेशकरत्वाच्च मनसोऽवसादकरमिति तद्भीत्या योगनिष्पत्तये ज्ञानाभ्यास एव यतनीय इति यो महायज्ञाद्याश्रमकर्म परित्यजेत्, स राजसं—रजोमूलं त्यागं कृत्वा तदयथावस्थितशास्त्रार्थरूपमिति ज्ञानोत्पत्तिरूपं त्यागफलं न लभेत ; * अयथावत्प्रजानाति बुद्धिस्सा पार्थ राजसी (३१) इति हि वक्ष्यते। नहि कर्म दृष्टद्वारेण मनःप्रसादहेतुः, अपितु भगवत्प्रसादद्वारेण ॥ ८ ॥

ता ॥ तदेवमन्तरङ्गतया स्वरूपशब्दव्यपदेश्यस्वरूपनिरूपकधर्मप्राणप्रदधर्मवैपरीत्याभावेऽपि निरूपितस्वरूपविशेषकधर्मवैपरीत्येन राजसीं बुद्धिं वक्ष्यमाणामनुस्मरन् राजसत्यागं विवृणोति—**यद्यपीत्यादिना** । * दुःखमित्येवेत्यवधारणात् * कायक्लेशभयादिति चोक्तेरधर्मत्वमोहोऽत्र नास्तीति फलितम् । * अर्थानामार्जने दुःखम् (भा. व. २. ४४) इत्याद्यनुसारेणाह—**दुःखात्मकेति** । **मनसोऽवसादकर**मिति—अनवसादो हि विवेकादिसाधनसप्तके गणित इति भावः । **अन्तरङ्गबहिरङ्गविरोधे** बहिरङ्गत्यागो युक्त इत्यभिप्रायेणाह—**ज्ञानाभ्यास एवेति** । * यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः । आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥ (मनु. १२. ९२) इत्यनुवादवाक्यान्यस्य मूलम् । * स कृत्वा राजसं त्यागमित्यनुवादविवक्षितमाह—**अयथावस्थितेति** । वक्ष्यमाणसात्त्विकत्यागफलमिह त्यागफलशब्देन विवक्षितम्, मुमुक्षुप्रकरणत्वात्कर्मत्यागे तत्साध्यस्वर्गादिफलस्य प्रसङ्गाभावाच्चेत्यभिप्रायेणाह—**ज्ञानोत्पत्तिरूपमिति** । दुःखात्मकत्वादिप्रयुक्तमनोवसादशङ्कां परिहरति—**नहीति** । * फलसंविभक्तसया हि (द्र. भा.) इत्याद्युक्तक्रमेण कर्मभिः प्रसादितो भगवान्मनसोऽनवसादमेव करोतीत्यर्थः ॥ ८ ॥

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागस्सात्त्विको मतः ॥ ९

भा ॥ नित्यनैमित्तिकमहायज्ञादिवर्णाश्रमविहितं कर्म मदाराधनरूपतया कार्यं—स्वयंप्रयोजनमिति मत्वा सङ्गम्—कर्मणि ममतां फलं च त्यक्त्वा यत्क्रियते, स त्यागस्सात्त्विको मतः—स सत्त्वमूलः ; यथावस्थितशास्त्रार्थज्ञानमूल इत्यर्थः । सत्त्वं हि यथावस्थितवस्तुज्ञानमुत्पादयतीत्युक्तं * सत्त्वात्संजायते ज्ञानम् (१४. १७) इति, वक्ष्यते च * प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये। बन्धं मोक्षं च या वेत्ति बुद्धिस्सा पार्थ सात्त्विकी ॥ (३०) इति ॥ ९ ॥

ता ॥ अथ * त्यागो हीत्यादिना स्मारितमेवोद्धृत्य सत्त्वकार्ययथावस्थितज्ञानमूलतया तस्यैव शास्त्रीयत्वं द्रढयति—* कार्यमित्येवेति श्लोकेन । * नियतस्य तु संन्यासः कर्मणो नोपपद्यते (७) इति प्रकृमादिहापि नियतशब्दः कर्मविशेषणमिति तदर्थमाह—**नित्येति** । आहत्य कार्यत्वं हि प्रयोजनस्यैव । तदर्थतयैव हि साधनस्य कार्यता ; तस्मादफलस्य कथं कर्तव्यत्वमित्यत्राह—**मदाराधनरूपतया कार्यमिति** । तदभिप्रेतमाह—**स्वयंप्रयोजनमिति** । कर्तृत्वत्यागोऽप्यत्रानुसंधेयः । अत एव ह्यनन्तरश्लोके * त्यागीति शब्दस्सङ्गफलकर्तृत्वत्यागीति व्याख्यायते ॥ ९ ॥

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी च्छिन्नसंशयः ॥ १०

भा॥ एवं सत्त्वसमाविष्टो मेधावी—यथावस्थिततत्त्वज्ञानः, तत एव च्छिन्नसंशयः, कर्मणि सङ्कल्पफलकर्तृत्वत्यागी, न द्वेष्ट्यकुशलं कर्म, कुशले च कर्मणि नानुषज्जते। अकुशलं कर्मानिष्टफलम्, कुशलं च कर्मेष्टरूपस्वर्गपुत्रपश्वन्नाद्यादिफलम्, सर्वस्मिन् कर्मणि ममतारहितत्वात्, त्यक्तब्रह्मव्यतिरिक्तसर्वफलत्वात्, त्यक्तकर्तृत्वाच्च तयोः क्रियमाणयोः प्रीतिद्वेषौ न करोति। अनिष्टफलं पापं कर्मात्र प्रामादिकमभिप्रेतम्, * नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥ (क. २. २४) इति दुश्चरिताविरतेर्ज्ञानोत्पत्तिविरोधित्वश्रवणात्। अतः कर्मणि कर्तृत्वसङ्कल्पफलानां त्यागश्शास्त्रीयत्यागः, न कर्मस्वरूपत्यागः॥ १०॥

ता॥ सत्त्वादिमूलशास्त्रीयत्यागयुक्तस्य * वर्तते सात्त्विको भावः (मो. ध. २९१. २१) * इत्युपेक्षेत तत्तदा (मो. ध. २९२. २९) * उदासीनवदासीनः (गी. १४. २३) इत्यादिप्रसिद्धं विकाराभावरूपं लक्षणमुच्यते—* न द्वेष्टीति श्लोकेन। तेनोक्तलक्षणत्यागस्य सत्त्वमूलत्वमप्युपपादितं भवति। तत्र हेतुकार्यक्रमौचित्येन भिन्नक्रमतया व्याख्याति—**सत्त्वसमाविष्ट** इत्यादिना। * धीर्धारणावती मेधा (नाम. १. धी.) इति नैघण्टुकाः। श्रुतिश्च * मेधा मनीषे मा विशतां समीची भूतस्य भव्यस्यावरुध्यै (य. आ. ५. ४२) इति। अत आचार्योपदिष्टेष्वर्थेषु अप्रच्युतेरन्यासङ्गराहित्यं च फलितमाह—**यथावस्थिततत्त्वज्ञान** इति। अत्र शुभाशुभपर्यायकुशलाकुशलशब्दाभ्यां प्रतिषिध्यमानद्वेषसङ्गहेत्वनुवाद इत्यभिप्रायेणानिष्टफलत्वाद्युक्तिः। * त्यागीत्युक्तस्य त्यागस्य हेतुतां विवृणोति—**सर्वस्मिन्नित्यादिना**। यथाऽन्यदीयेऽन्यकर्तृके कर्मणि स्वसंबन्धविरहाद्बाधकाद्यभावनिश्चयेन द्वेषाद्यभावः, तथाऽत्रापीत्यभिप्रायः। अननुष्ठानदशायां [हि] हर्षद्वेषप्रसङ्गाभावात् **क्रियमाणयोरित्युक्तम्**। ननु * कुशले नानुषज्जते इत्येतदुक्तम्, स्वर्गादिषु निस्सङ्गतामात्रेण काम्यानुष्ठानेऽपि तत्फलानन्वयशास्त्रात्; * न द्वेष्ट्यकुशलं कर्मेति तु विरुद्धम्, फलसङ्गाभावे सत्येव निषिद्धानां फलान्वयात्, अन्यथा क्वचिदपि प्रत्यवायाभावप्रसङ्गात्। नहि नरकादिकं कस्यचिदिष्टं स्यात्। एवं दृष्टप्रत्यवायहेतुत्वप्यद्वेषो न युक्त इत्यत्र प्रामादिकविषयत्वेन परिहार उक्तः। नन्वधिकारिविशेषे बुद्धिपूर्वैरपि पापकर्मभिरलेपः किं न स्यादित्यत्राह—**नाविरत** इति। एतच्छ्लोकार्थं प्रकृतहेतुतया घटयन्परमप्रकृतं निगमयति—**अत** इति॥ १०॥

भा॥ तदाह—

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥ ११

भा॥ नहि देहभृता—म्रियमाणशरीरेण कर्माण्यशेषतस्त्यक्तुं शक्यम्, देहधारणार्थानामशनपानादीनां तदनुबन्धिनां च कर्मणामवर्जनीयत्वात्। तदर्थं च महायज्ञाद्यनुष्ठानमवर्जनीयम्। यस्तु तेषु महायज्ञादिकर्मसु फलत्यागी, स एव * त्यागेनैके अमृतत्वमानशुः (ना) इत्यादिशास्त्रेषु त्यागीत्यभिधीयते, फलत्यागीति प्रदर्शनार्थः, फलकर्तृत्वकर्मसङ्गानां त्यागीति, * त्रिविधस्संप्रकीर्तितः (४) इति प्रक्रमात्॥ ११॥

ता॥ * नियतस्येत्यादिप्रतिपादितयुक्तिविवरणपूर्वकं फलत्यागेनोपलक्षणेन प्रागुक्तत्रिविधोऽपि सात्त्विकत्यागो * नहीति श्लोकेन निगम्यत इत्याह—**तदाहेति**। अत्र * देहभृतेति न प्राणिमात्रनिर्देशः, अनुपयोगात्। अतः कर्मस्वरूपत्यागाशक्यताहेतुरक्षयार्थो विवक्षित इत्यभिप्रायेणाह—**म्रियमाणशरीरेणेति**। शक्यमिति त्यजनपरत्वान्नपुंसकत्वैकत्वे, सामान्यरूपविवक्षणाद्वा। देहभृत्त्वहेतुकमशक्यत्वं विवृणोति—**देहधारणार्थानामिति**। तदनुबन्धिनोऽर्थार्जना-

दयो भवन्तु लौकिकानि; किं शास्त्रीयैरित्यत्राह—**तदर्थं चेति** । श्रुतिस्वारस्यहेतुकां स्वरूपत्यागशङ्कां परिहर्तुं * यस्त्वित्यादिकमुच्यत इत्यभिप्रायेणाह—**यस्त्विति** । * अभिधीयते इत्यस्य कैरित्याकाङ्क्षाशमनाय * त्यागेनैके इत्यादिश्रुत्युपादानम् । प्रक्रान्तनिगमनपरत्वेन प्रदर्शनार्थतां द्रढयति—**त्रिविध इति** ॥ ११ ॥

भा ॥ ननु कर्माण्यग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनि महायज्ञादीनि च स्वर्गादिफलसंबन्धितया शास्त्रैर्विधीयन्ते; नित्यनैमित्तिकानामपि * प्राजापत्यं गृहस्थानाम् (वि. १. ६. ३८) इत्यादिफलसंबन्धितयैव हि चोदना। अतस्तत्फलसाधनस्वभावतयाऽवगतानां कर्मणामनुष्ठाने बीजावापादीनामिवानभिसंहितफलस्यापीष्टानिष्टरूपफलसंबन्धोऽवर्जनीयः, अतो मोक्षविरोधिफलत्वेन मुमुक्षुणा न कर्मानुष्ठेयमित्यत उत्तरमाह—

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२

भा ॥ अनिष्टम्—नरकादिफलम्, इष्टम्—स्वर्गादि, मिश्रम्—अनिष्टसंभिन्नं पुत्रपश्वन्नाद्यादि; एतत्त्रिविधं कर्मणः फलम्, अत्यागिनाम्—कर्तृत्वममताफलत्यागरहितानां प्रेत्य भवति । प्रेत्य—कर्मानुष्ठानोत्तरकालमित्यर्थः । नतु संन्यासिनां क्वचित्—न तु कर्तृत्वादिपरित्यागिनां क्वचिदपि मोक्षविरोधिफलं भवति। एतदुक्तं भवति—यद्यप्यग्निहोत्रमहायज्ञादीनि [नित्यान्येव] तान्येव; तथाऽपि जीवनाधिकारकामाधिकारयोरिव मोक्षाधिकारे च विनियोगपृथक्त्वेन परिह्रियते। मोक्षविनियोगश्च * तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन (बृ. ६. ४. २२) इत्यादिभिरिति। तदेवं क्रियमाणेष्वेव कर्मसु कर्तृत्वादिपरित्यागरूपशास्त्रसिद्धस्संन्यासः, स एव च त्याग इत्युक्तः ॥ १२ ॥

ता ॥ लौकिकफलसाधनकर्मप्रक्रिययैव हि वैदिकानामपि फलसाधनत्वव्यवस्थापनम् । लौकिकानि च कर्माणि फलेच्छाभावेऽपि स्वशक्त्यनुरूपं फलन्ति । एवं वैदिकेष्वपीत्यभिप्रायेण शङ्कते—**नन्विति** । नन्वग्निहोत्रादीनां महायज्ञादीनां च विनियोगपृथक्त्वेन आश्रमाङ्गत्वस्वर्गाद्यर्थत्वाविरोधात्स्वर्गाद्यर्थतयाऽनुष्ठानं मा भूत्, आश्रमार्थतयाऽनुष्ठाने तु को विरोध इत्यत्राह—**नित्यनैमित्तिकानामपीति** । बीजावापादिदृष्टान्तेन * अकुशलमित्युक्तस्य प्रामादिकस्यापि बन्धकत्वं सूचितम् । न हि भूमौ प्रमादनिपतितं बीजं न फलति । तस्मात् [अमृत]आम्ररसार्थिनो विषतरुबीजावापतुल्योऽयं कर्मकलाप इत्यभिप्रायेण फलितं स्वरूपत्यागमाह—**अत इति** । अमुमुक्षूणामिदमनिष्टत्वादित्रैविध्यम्, मुमुक्ष्वपेक्षया स्वर्गादेरप्यनिष्टत्वादित्यभिप्रायेण नरकस्वर्गादिकथनम् । कारीर्यादिसाध्यवृष्ट्यादिफलानां जीवदशाभावित्वस्थितेः प्रेत्येति प्रदर्शनार्थम्; अन्यथा तस्मिन्नेव शरीरे त्यागिनामपि त्रिविधस्यापि फलस्य आरम्भानुमतिप्रसङ्गात्; * नतु संन्यासिनां क्वचिदिति व्यतिरेकोक्त्या तस्यापि बाधाच्चेत्यभिप्रायेणाह—**कर्मानुष्ठानोत्तरकालमिति** । अत्राप्यनिष्टफलानन्वयः पूर्वोक्तरीत्या प्रामादिककर्मविषयो मन्तव्यः । उक्तस्य चोद्यस्य प्रतिज्ञामात्रेणोत्तरमिदमुच्यते; न तु कयाचिद्युक्त्येत्यत आह—**एतदुक्तमिति** । विनियोगपृथक्त्वं विनियोजकवाक्यपृथक्त्वेन ग्राह्यम् । विनियोगात्पृथक्त्वेन ज्योतिष्टोमादिषु पापक्षयादिनानाफलत्वं सिद्धम् । **परिह्रियते**—विरुद्धफलत्वचोद्यमिति शेषः । ननु * तमेवं विद्वानमृत इह भवति, नान्यः पन्थाः (पु) इति नियमनाद्वेदनमेव मोक्षसाधनतया विधीयते, कर्म तु व्यवच्छिद्यते; अतः कथं मोक्षाधिकारे विनियोगोक्तिः? तत्राह—**मोक्षविनियोगश्चेति** । असिना जिघांसति, अश्वेन जिगमिषतीत्यादिष्विवार्थस्वभावादिहापीष्य-

माणधात्वर्थकरणतयाऽन्वयः। अतो वेदनोत्पत्तिद्वारेण परंपरया साधनत्वान्मोक्षविनियोगः। अव्यवहितसाधनविवक्षया तु *नान्यः पन्थाः इत्यादिभिर्निषेध इति भावः। एवं परिप्रश्नाभिप्रेतमन्यथाऽपि प्रतिवक्तुमुपक्रमत इत्यभिप्रायेण संगत्यर्थमुक्तमंशं निगमनच्छाययाऽनुवदति—**तदेवमिति**। **तत्**—स्वरूपत्यागादेस्तामसत्वादित्यर्थः। **एवं**—वर्णाश्रमादिनियतस्य दुस्त्यजत्वप्रकारेणेत्यर्थः। अस्मिन्नेव श्लोके *भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचिदिति त्यागाभावविपर्ययस्य संन्यासशब्देनानुकथनात्त्यागसंन्यासपृथक्त्वशङ्का च परिहृतेत्याह—**स एव च त्याग** इति ॥ १२ ॥

भा ॥ इदानीं भगवति पुरुषोत्तमे अन्तर्यामिणि कर्तृत्वानुसंधानेन आत्मन्यकर्तृत्वानुसंधानप्रकारमाह, तत एव फलकर्मणोरपि ममतापरित्यागो भवतीति। परमपुरुषो हि स्वकीयेन जीवात्मना स्वकीयैश्च करणकलेबरप्राणैः स्वलीलाप्रयोजनाय कर्माण्यारभते; अतो जीवात्मगतं श्रुन्निवृत्त्यादिकमपि फलम्, तत्साधनभूतं च कर्म परमपुरुषस्यैव।

पञ्चैतानि महाबाहो कारणानि निबोध मे।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३

भा ॥ संख्या—बुद्धिः; सांख्ये कृतान्ते—यथावस्थिततत्त्वविषयया वैदिक्या बुद्धया अनुसंहिते निर्णये सर्वकर्मणां सिद्धये—उत्पत्तये, प्रोक्तानि पञ्चैतानि कारणानि निबोध मे—मम सकाशादनुसंधत्स्व। वैदिकी हि बुद्धिः शरीरेन्द्रियप्राणजीवात्मोपकरणं परमात्मानमेव कर्तारमवधारयति—*य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः (बृ. ५. ७. २२) *अन्तःप्रविष्टश्शास्ता जनानां सर्वात्मा (य. आ. ३. ११. २) इत्यादिषु ॥ १३ ॥

ता॥ *अनिष्टमिष्टमित्यादेरनन्तरं कारणपञ्चकोक्तेः का संगतिरित्यत्राह—**इदानीमिति**। साक्षात्प्रश्नविषये प्रत्युक्ते सतीत्यर्थः। **भगवति पुरुषोत्तम** इत्युभाभ्यां प्रागुक्तप्रकारेण सर्वान्तर्यामिणः तद्गतत्वतत्प्रयुक्तदोषाभावस्थापनम्। **प्रकारमाहे**त्यनेन आतृतीयाध्यायादनुक्रान्तस्याकर्तृत्वानुसंधानस्यात्रैव सहेतुकयथावस्थितस्वरूपशोधनमिति दर्शितम्। त्रिषु त्यागेषु प्रक्रान्तेषु अन्यतमस्य प्रकारशोधनमिति संगतिः। त्रिविधेऽपि त्यागे सात्त्विकतया प्रक्रान्ते किमिति कर्तृत्वत्यागप्रकारमात्रोपपादनमित्यत्राह—**तत एवे**ति। इतिशब्दोऽत्र हेत्वर्थः। ऋत्विगादिषु कर्तृत्वेऽपि यजमानादेः कर्मणि फले च ममता दृश्यते; तद्वदस्यापि किं न स्यात्; अतः कर्तृत्वत्यागमात्रात्कथं कर्मणि फले च ममताबुद्धिनिवृत्तिरित्यत्राह—**परमपुरुषो हीति**। होति प्रमाणप्रसिद्धिसूचनम्। *त्वं न्यञ्चद्भिरुदञ्चद्भिः कर्मसूत्रोपपादितैः। हरे विहरसि क्रीडाकन्तुकैरिव जन्तुभिः॥ *बालः क्रीडनकैरिव (भा. स. ६१. ३१) *कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् (,,. ४१. २३) इत्यादिप्रसिद्धमाह—**स्वकीयेने**त्यादिना। करणाधिपाधिपो हि परमपुरुषश्श्रूयते; अतः करणानां जीवशेषत्वदशायामपि गजतुरगाद्यलङ्कारेषु राज्ञ इव परमपुरुषस्य शेषित्वं न निवर्तत इत्यभिप्रायेणाह—**स्वकीयैश्च करणकलेबरप्राणै**रिति। सङ्कोचकाभावाद्दृष्टादृष्टफलप्रदानादिकमपि तस्य लीलेत्याह—**स्वलीलाप्रयोजनाये**ति। *लोकवत्तु लीलाकैवल्यम् (ब्र. २. १. ३३) इत्यादिभिरिदं मीमांसितमिति भावः। **लीलादिप्रयोजनाये**ति पाठे तु आदिशब्देन कारुण्यादिमूलभक्तरक्षणादिग्रहणम्। ननु शास्त्रीयस्य कर्मणः परमपुरुषसमाराधनतयैव विधानात्फलपर्यन्तस्य तस्य तदीयता युक्ता; लौकिकं तु कर्म न तथा शिष्टम्; नापि तथाऽध्यक्षं, श्रुन्निवृत्त्यादेः फलस्य जीवगामित्वेनैवोप-

लम्भात्; अतो लौकिकानां फलानां जीवशेषत्वे तत्साधनस्यापि कर्मणस्तदर्थता युक्ता; तस्मात् *सिद्धये सर्वकर्मणामित्यादिभिस्सर्वविषयसङ्गत्यागाद्युपपादनमशक्यमिति; तत्राह—**अत इति**। **परमपुरुषस्यैवेति**—षष्ठी स्वस्वामिभावाख्यसंबन्धविशेषविश्रान्ता। यथा पञ्जरशकुन्तपोषणादिकं तत्सुखादिकं च सार्वभौमस्य शेषभूतं, तथाऽत्रापीति भावः।

*सांख्ये कृतान्ते इति न सांख्यसिद्धान्तो विवक्षितः, तत्रेश्वरानभ्युपगमात्, करणातिरिक्तस्य कर्तृत्वानभ्युपगमेन *कर्ता करणं च पृथग्विधम् (१४) इति कर्तृकरणविभागोक्त्यसंभवात्, तस्य वेदविरुद्धत्वे तत्त्वोपदेशाय तदुपन्यासायोगात्, अविरुद्धत्वेऽपि वेदमूलत्वस्यैवाङ्गीकर्तव्यत्वे वेद एव विश्रमात्, अर्थौचित्याय च रूढिपरित्यागेन यौगिकार्थावलम्बनस्य सर्वसंमतेः; अतो वेदेष्वेव यथावस्थिततत्त्वनिर्णयाय प्रवृत्तो भागस्सांख्यकृतान्तशब्देन विवक्षित इत्यभिप्रायेण **निर्वक्ति—संख्या बुद्धिरिति**। प्रकरणानुरोधेन बुद्धिं विशिनष्टि—**यथावस्थितेति**। यदिह शङ्करेणोक्तं *पदार्थास्संख्यायन्ते यस्मिन् शास्त्रे तत्सांख्यं वेदान्तः, स एव कृतान्तः, कृतस्य कर्मणोऽस्मिन्नन्तः इति; तदसत्, वेदान्तेष्वपि कर्मान्वयस्य स्थापितत्वात्, रूढिपरित्यागे चावश्यंभाविन्युचिततमयोगस्यैव ग्रहीतुं युक्तत्वात्। अन्तशब्दो निश्चयपरतया नैघण्टुकैः पठितः; स एव बुद्धिपूर्वसंपादिततया कृतशब्देन विशेष्यत इत्यभिप्रायेण **अनुसंहिते निर्णय इत्युक्तम्**। यद्वा निर्णयशब्दोऽत्र निर्णीतवस्तुपरः; कृतान्तशब्दस्य सिद्धान्तपर्यायस्य तत्तदभ्युपगतार्थरूढत्वात्। **अत एव हि अनुसंहित** इति विशेषितम्। नहि निर्णय एवानुसन्धातव्यः। अथवा प्राचां निर्णयः **पौरनुसंहित** इति भावः। निर्णायकशब्दपरो वाऽत्र निर्णयशब्दः। तदानीं *प्रोक्तानीत्यनेन समन्वयः। सिद्धिशब्देन फलपर्यन्तत्वादिकमिहाविवक्षितम्; यत्कर्म प्रारभते, पञ्चैते तस्य हेतवः इति कर्मस्वरूपोपसंपत्तेरेवानन्तरोक्तेरित्यभिप्रायेणाह—**उत्पत्तय इति**। *मम कारणानीत्यसंभवान्मदीयानि कारणानीत्युक्तेरिह दैवशब्दनिर्दिष्टस्य स्वस्य स्वकीयत्वाभावेनानन्वयादुचितमन्वयमाह—**मम सकाशादनुसन्धत्स्वेति**। वक्ष्यमाणानां पञ्चानां यथादर्शनं विविक्ते हेतुभावे मनस्समाधानविधानार्थमिदमिति भावः। षड्विंशकमनभ्युपगच्छतां पञ्चविंशकं च कर्तृत्वारोपमात्राधिकरणं प्रतिपादयतां प्रकरणमिदं विरुद्धमित्यभिप्रायेण यौगिकार्थपरत्वमुपपादयति—**वैदिको हीति**। शरीरेन्द्रियप्राणजीवात्मोपकरणमिति बहुव्रीहिः। उपकरणं—विविक्षितकार्यार्थनयोपात्तः परिकरः॥ १३॥

भा॥ तदिदमाह—

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥ १४
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥ १५

भा॥ न्याय्ये—शास्त्रसिद्धे, **विपरीते**—प्रतिषिद्धे वा सर्वस्मिन् कर्मणि शारीरे, वाचिके, मानसे च **पञ्चैते हेतवः**। **अधिष्ठानम्**—शरीरम्; अधिष्ठीयते जीवात्मनेति महाभूतसंघातरूपं शरीरमधिष्ठानम्। **तथा कर्ता**—जीवात्मा; अस्य जीवात्मनो ज्ञातृत्वं कर्तृत्वं च—*ज्ञोऽत एव (ब्र. २. ३. १९) *कर्ता शास्त्रार्थवत्त्वात् (३३) इति च सूत्रोपपादितम्। **करणं च पृथग्विधम्**—वाक्पाणिपादादिपञ्चकं समनस्कं कर्मेन्द्रियम्, **पृथग्विधम्**—कर्मनिष्पत्तौ पृथग्व्यापारम्। **विविधा च पृथक्चेष्टा**—चेष्टाशब्देन पञ्चात्मा वायुरभिधीयते तद्वृत्तिवाचिना; शरीरेन्द्रियधारणस्य प्राणापानादिभेदभिन्नस्य वायोः पञ्चात्मनो विविधा च चेष्टा—विविधा वृत्तिः। **दैवं चैवात्र पञ्चमम्**—अत्र—कर्महेतुकलापे दैवं पञ्चमम्—परमात्माऽन्तर्यामी कर्मनिष्पत्तौ प्रधानहेतुरित्यर्थः।

उक्तं हि * सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च (१५. १५) इति । वक्ष्यति च * ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ (६१) इति । परमात्मायत्तं च जीवात्मनः कर्तृत्वम्—* परात्तु तच्छ्रुतेः (ब्र. २. ३. ४०) इत्युपपादितम् । नन्वेवं परमात्मायत्ते जीवात्मनः कर्तृत्वे जीवात्मा कर्मण्यनियोज्यो भवतीति विधिनिषेधशास्त्राण्यनर्थकानि स्युः । इदमपि चोद्यं सूत्रकारेणैव परिहृतं * कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः (२. ३. ४१) इति । एतदुक्तं भवति—परमात्मना दत्तैस्तदाधारैश्च करणकलेवरादिभिस्तदाहितशक्तिभिस्स्वयं च जीवात्मा तदाधारस्तदाहितशक्तिस्सन् कर्मनिष्पत्तये स्वेच्छया करणाद्यधिष्ठानाकारं प्रयत्नं चारभते; तदन्तरवस्थितः परमात्मा स्वानुमतिदानेन तं प्रवर्तयतीति जीवस्यापि स्वबुद्ध्यैव प्रवृत्तिहेतुत्वमस्ति; यथा गुरुतरशिलामहीरुहादिचलनादिफलप्रवृत्तिषु बहुपुरुषसाध्यासु बहूनां हेतुत्वं विधिनिषेधभाक्त्वं चेति ॥ १४ ॥ १५ ॥

ता ॥ उक्तविवरणतया श्लोकद्वयस्यापुनरुक्तिं परमते विरोधं चाभिप्रेत्याह—**तदिदमाहे**ति । तत्—श्रुतिसिद्धम्, इदं विवक्षितमित्यर्थः । न्याय्यं—न्यायादनपेतं, *धर्मपथ्यर्थन्यायादनपेते (अष्टा. ४. ४. ९२) इत्यनुशासनात् । न्यायशब्दश्चात्र अर्थान्तरानौचित्याद्व्युत्पत्त्यनुरोधाच्च शास्त्रमेवानुसन्धत्त इत्यभिप्रायेणाह—**शास्त्रसिद्ध** इति । शास्त्रसिद्धेन सह लौकिकविवक्षायां तदन्यद्वेति वक्तव्यम्; विहिते निर्दिष्टे विपरीतशब्दश्च निषिद्धे स्वरसः; कैमुत्येन च लौकिकं लभ्यमित्यभिप्रायेणाह—**प्रतिषिद्धे** वेति । **सर्वस्मिन् कर्मणी**ति फलितोक्तिः । यथा शारीरमानसवाचिकेषु कर्मसु शरीरादीनां प्राधान्येन प्रतिनियतता; न तथाऽमी पञ्च हेतवः; अपितु प्रतिकर्म पञ्चाप्यपेक्षिता इत्यभिप्रायेण शारीरत्वाद्युक्तिः । पञ्चहेतुकेषु सर्वेषु कर्मसु प्राधान्यादेव हि शारीरत्वादिविभागः । यद्यपि जगत्सृष्ट्यादिषु परमात्मैव कारणं, तथापि क्षेत्रज्ञकर्तृकेषु परमात्मना स्वेच्छयैवमुपकरणीकृतान्येतानीत्यभिप्रायेण हेत्वन्तरोक्तिः । * अधिष्ठानं क्षेत्रमाहुः (भा. मो. ३१९. १४) इति करालायाह वसिष्ठः; तदनुसारेणाह—**अधिष्ठानं शरीर**मिति । श्रुतिश्च * मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम् (छा. ८. १२. १) इति शरीरेऽधिष्ठानशब्दं प्रयुङ्क्ते । * कृत्यल्युटो बहुलम् (अष्टा. ३. ३. ११३) इति कर्मार्थतया शरीरेऽधिष्ठानशब्दं व्युत्पादयति—**अधिष्ठीयत** इति । अधिष्ठातुर्जीवस्यापि परमात्माधिष्ठेयत्वात्तद्व्यवच्छेदाय **जीवात्मने**ति विशेषितम् । जीवाधिष्ठेयस्यापि करणादेः पृथङ्निर्देशात्तत्संकोचायाह—**महाभूतसंघातरूप**मिति । विश्वकर्तुरिह दैवशब्देन पृथग्ग्रहणात्कर्तृशब्दस्य चात्र *शास्त्रफलं प्रयोक्तरि (पू. मी. ३. ७. १७) इति न्यायसूचनार्थत्वाच्च **कर्ता जीवात्मे**त्युक्तम् । ननु कर्तृत्वं हि ज्ञानचिकीर्षापूर्वककर्मार्थप्रयत्नयोगित्वं; ज्ञानमात्रस्यात्मनो ज्ञातृत्वासंभवात्तन्मूलं कर्तृत्वमपि न स्यादेवेत्यत आह—**अस्य जीवात्मनो ज्ञातृत्वं कर्तृत्वं चे**ति । * ज्ञोऽत एवेत्यादिसूत्रग्रहणं, श्रुत्यादेरपि तत एवाकर्षणात् । कर्मोत्पत्तिहेतूपन्यासात्करणशब्दोऽत्र कर्मेन्द्रियमात्रपर इत्यभिप्रायेणाह—**वागि**ति । यद्यपि ज्ञानेन्द्रियाणां तत्तद्विषयज्ञानोत्पादनद्वारा परंपरया कर्मणि हेतुत्वमस्ति, तथाऽपि वस्तुमात्रेष्वालोचितेषु मनसा संकल्प्यैव कर्मकरणान्मनसश्चान्यव्यापारव्यवधानाभावात् **समनस्क**मित्युक्तम् । ज्ञानेन्द्रियस्यापि मनसः कर्मेन्द्रियप्रवृत्तिष्वपि साधारण्यात्कर्मेन्द्रियत्वोक्तिः । * शरीरवाङ्मनोभिरित्यत्रैवोक्तेः मनसः संकल्पादिकर्मापेक्षया वा कर्मेन्द्रियत्ववादः । सांख्यैरप्येवमेवोक्तं—* बुद्धीन्द्रियाणि चक्षुश्श्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थान्कर्मेन्द्रियाण्याहुः ॥ उभयात्मकमत्र मनस्संकल्पकमिन्द्रियं च साधर्म्यात् (सां. का. २६, २७) इति । कर्महेतुषूपादीयमानेषु * पृथग्विधमिति विशेषणं तदुपयुक्तव्यापाराख्यविधापरमित्याह—

कर्मनिष्पत्तौ पृथग्व्यापारमिति । वागादिष्वेकैकस्य वचनादानविहरणोत्सर्गानन्दसंकल्पादिक्रियाव्यापारो हि मिथो विलक्षणः । प्रयत्नमूला शरीरादिक्रियैव हि चेष्टेत्युच्यते; अतोऽत्र कर्मणस्तदेव कारणमित्यात्माश्रयस्स्यात्; तत्राह—**चेष्टाशब्देन पञ्चात्मा वायु**रिति । **अभिधीयत** इति शब्देन प्रतिपादनमात्रं विवक्षितम् । अत्र तद्धेतावन्यस्मिन् लक्षयितव्ये वागादीनां करणादिशब्दैरुपात्तत्वात्प्राणसंवादादिषु करणानां शरीरस्य च स्थितिप्रवृत्तेः प्राणायत्तत्वश्रुतेः, प्राणप्रवृत्तिनिमित्तचेष्टावाचिना शब्देन प्राणलक्षणाऽत्र युक्तेत्यभिप्रायेणाह—**तद्वृत्तिवाचिने**ति । चेष्टाशब्देनेति पूर्वेणान्वयः । प्राणसंवादादिस्मारणेन प्राणलक्षणाया औचित्यं वृत्तेर्वैविध्यं च विवृणोति—**शरीरेन्द्रिये**ति । पृथक्छब्दविविधशब्दयोः पौनरुक्त्यपरिहारायाह—**शरीरेन्द्रियधारकस्य प्राणापानादिभेदभिन्नस्ये**ति । अधिष्ठानकर्तृकरणव्यापारापेक्षया शरीरेन्द्रियवर्गरूपविषयभेदेन च पृथक्त्वं प्राणादिवृत्तिभेदप्रतिनियतोच्छ्वासनिमेषोन्मेषादिव्यापारैर्वैविध्यं चेति भावः । पञ्चात्मशब्दोऽत्र पञ्चवृत्तित्वपरः; तथा च सूत्रम्—*पञ्चवृत्तिर्मनोवद्व्यपदिश्यते (ब्र. २.४.११) इति । पञ्चवृत्तित्वोक्तिश्च नागकूर्मकृकरदेवदत्तधनंजयरूपवृत्त्यन्तरपञ्चकस्यापि प्रदर्शिका । *दैवं चैवात्र पञ्चममित्यत्र दैवाख्यप्रधाननिर्धारणार्थमत्रेत्यनुवाद इत्याह—**अत्र कर्महेतुकलाप** इति । परमात्मनः पञ्चमतया परिगणने श्रुत्यर्थपाठादिक्रमासंभवाद्वाचः क्रमवर्तित्वेन यथासंभवं परिगणनेऽपि *पञ्चममिति पूरणनिर्देशो प्रयोजनाभावात्, यथा कठवल्ल्याम् *इन्द्रियेभ्यः परा ह्यर्थाः इत्युपक्रम्य *महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥ (३.११) इतीन्द्रियादिसमस्तप्रवृत्तौ प्रधानहेतुः परमपुरुषो वशीकरणीयकाष्ठात्वेन निर्दिष्टः, तद्वदिहापीत्यभिप्रायेणाह—**परमात्मान्तर्यामी**ति । ननु *दैवं पुराकृतं कर्म *दैवं दिष्टं भागधेयम् (नाम. १. का) इत्यादिषु प्राचीनकर्मरूपभाग्यपर्यायतया दैवशब्दं पठन्ति; तस्य च हेतुत्वमुपपन्नम्; अतः कथमत्र परमात्मेत्युच्यते? इत्थं—नहि प्रागेव विनष्टानां कर्मणां स्वरूपेण हेतुत्वं संभवति; अतः कर्मजन्यादृष्टरूपपरमपुरुषसंकल्पस्यैव हेतुत्वं वक्तव्यं; ततो वरं तस्यैव दैवशब्देन प्रतिपादनम्; अस्ति च दैवशब्दस्य दैवनपर्यायतयाऽपि लोकवेदयोः प्रसिद्धिः; यथा—*सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते । वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम् ॥ (ना. पु. १८.३३) इति । नह्यत्रार्थान्तरं संभवति । एवं **श्रीमद्रामायणे**ऽपि *स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम् । अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते ॥ (अ. ३०.३३) इति । तथा सभापर्वणि *श्रूयतां परमं दैवं दुर्विज्ञेयं मयाऽपि च । नारायणस्तु पुरुषो विश्वरूपो महाद्युतिः ॥ (४६.४०) इति । तथा याज्ञवल्क्यप्रणीते योगशास्त्रे *आर्षं छन्दश्च मन्त्राणां दैवतं ब्राह्मणं तथा इति । उक्त एवार्थः पुनः *आर्षं छन्दश्च दैवं चेत्यादिनाऽपि निर्दिश्यते । तत्रैव दैत्यमोहनार्थे प्रजापत्युपदेशानुवादे *आत्मानं पूजयेन्नित्यं भूषणाच्छादनादिभिः । स्वदेह एव दैवं स्यादन्यद्दैवं न विद्यते ॥ इति । तथा *दैवाधीनं जगत्सर्वं मन्त्राधीनं तु दैवतम् । तन्मन्त्रं ब्राह्मणाधीनं तस्माद्विप्रा हि दैवतम् ॥ (विह. २२.१५) इति । अस्मिन्नपि शास्त्रे *साधिभूताधिदैवं माम् (७.३०) इति प्रस्ताव्य *अधिदैवं किमुच्यते (८.१) इति पृष्टमर्थं *पुरुषश्चाधिदैवतम् (८.४) इति प्रतिवक्ति । छान्दोग्ये च आदित्याख्यदैवतवर्तिनः पुरुषस्याधिदैवतमिति नामोच्यते—*तस्योपनिषदहरित्यधिदैवं तस्योपनिषदहमित्यध्यात्ममिति । एवमन्यत्रापि द्रष्टव्यम् । अन्यैरपि चात्र दैवशब्दश्चक्षुराद्यनुग्राहकादित्यादिविषयतया व्याख्यातः । वयं त्वादित्यादीनामप्यनुग्राहकं परमात्मानमिह दैवं ब्रूम इति विशेषः । प्रयुक्तं च **स्तोत्रे** *प्रख्यातदैवपरमार्थविदां मतैश्च (१५) इति । **लक्ष्मीकल्याणे** च *धर्मे प्रमाणं समयस्तदीयो वेदाश्च तत्त्वं च तदिष्टदैवमिति । तस्माद्दैवशब्दोऽत्र देवतापर्यायः । स चात्र सर्वप्रवर्तकहेतुपरत्वाद्विशेषकाभावाच्च परदेवताविषय उचित इति **परमात्माऽन्तर्यामी कर्मनिष्पत्तौ प्रधान-**

हेतुरित्युक्तम् । यथाऽसौ सर्वेषामात्मा, न तथाऽस्य कश्चिदित्यतः परमात्मा । यथा शरीरादेः प्रवृत्तौ जीवः प्रधानहेतुः, तथा तस्याप्यसावित्यभिप्रायेणान्तर्यामित्वोक्तिः । तद्विवक्षामत्र पूर्वापराभ्यां स्थापयति—**उक्तं हीत्यादिना** । ननु *स्वतन्त्रः कर्ता (अष्टा. १. ४.५४) इति कर्तृलक्षणमनुशिष्टम् ; इह च कर्तेति क्षेत्रज्ञ एव निर्दिष्टः ; अतः कारकान्तरप्रयोक्तृत्वं कारकान्तराप्रयोज्यत्वं च तस्याङ्गीकर्तव्यम् । तस्मादैवमप्यत्राधिष्ठानादिवत्तदपेक्षया गुणीभूतं वक्तव्यमित्यत्राह—**परमात्मायत्तं चेति** । उत्पन्नज्ञानचिकीर्षाप्रयत्नस्य हि पुरुषस्य कारकान्तरप्रयोक्तृत्वादिकम् ; ज्ञानाद्युत्पत्तिरेव तु परमात्मायत्तेति श्रुतिसिद्धत्वात्, जीवस्य परायत्तकर्तृत्वं स्वातन्त्र्यं चाविरुद्धमिति शारीरके स्थापितमिति भावः । इममभिप्रायमजानन्वायूदकादिवत्परमात्मनः प्रेरकत्वमिति चोदयति—**नन्वेवमिति** । ज्योतिष्टोमादिषु यदि परमात्मा प्रेरयति ; तदा न जीवस्य किंचिद्विधेयम् ; नहि प्रबलेन ह्रियमाणस्य गमनविधिः ; अथ निरुन्धे, तथापि न विधेयं ; नहि दुर्बलस्य प्रबलेन निरुद्धस्य गमनविधिः । एवं यत्र परमात्मा प्रवर्तयति, तत्र निवृत्तेरशक्यत्वान्निषेधो निष्फलः ; यत्र तु न प्रवर्तयेत्, तत्र तु प्रवृत्तेरेवाशक्यत्वान्न निषेधापेक्षेति भावः । इयमत्र चार्वाकेतरसमस्तसिद्धान्तावलम्बिनी चोद्यकाष्ठा—* निग्रहानुग्रहाज्ञातपूर्वादृष्टप्रचोदितः । निग्रहानुग्रहार्हः इतीदं घटते कथम् ॥ इति । जीवस्य ज्ञातृत्वकर्तृत्वपारतन्त्र्याभावचोद्यवत् पारतन्त्र्येऽपि विधिनिषेधवैयर्थ्यप्रसङ्गचोद्यमपि पञ्चमवेदतदुपनिषदोर्द्रष्टा भगवान्बादरायणः स्वयमेव परिजहारेत्याह—**इदमपीति**। विहितप्रतिषिद्धावैयर्थ्यादिहेतुभ्य एव चेतनेन कृतं प्रयत्नमपेक्ष्य परमात्मा उत्तरोत्तरेषु प्रवर्तयतीति सूत्रार्थः । तत्र सर्वप्रवृत्तिषु परमात्माधीनासु कथं कृतप्रयत्नापेक्षत्वमुच्यते ? वैयर्थ्यचोद्यस्य चावैयर्थ्यसिद्ध्यर्थतया परिहारे साध्याविशेषश्च स्यादिति शङ्कायां सूत्रस्याभिप्रायिकमर्थमाह—**एतदुक्तमिति** । अयमभिप्रायः—यत्तावदीश्वरस्य यन्त्रादिवत्स्वसंकल्पकल्पितप्रवृत्तिशक्तीनां करणकलेबराणां समर्पणं, यच्च भूतलादिवत्सर्वप्रवृत्तिनिवृत्त्यानुगुण्येन स्वरूपतस्संकल्पतश्च सर्वाधारतयाऽवस्थानं, यदपि करणकलेबराद्यधिष्ठानशक्तिप्रदानं, यच्च प्रवृत्त्यालम्बनबाह्यविषयपुरस्करणं, तत्सर्वं जीवस्य कर्तृत्वानुगुणं सर्वप्रवृत्तिनिवृत्तिसाधारणं चेति न तत्र चोद्यावकाशः । एतावतैव सर्वप्रवृत्तिनिवृत्तिसाधारणमुदासीनत्वं भगवत उच्यते । एवं लब्धशक्तेः पुरुषस्य प्रवृत्तिकाले यत्कार्यनिष्पत्त्यर्थमीश्वरस्यानुमन्तृत्वं, तदपि न जीवस्य कर्तृतां वारयति ; अपितूत्तेजनातीति न ततोऽपि विधिनिषेधवैयर्थ्यम् । नचैकस्मिन्नेव कर्मणि परमात्मास्यकर्त्रन्तरसाहचर्यं जीवस्यानियोज्यताकारणं, प्रत्येकमशक्येषु संभूय बहुभिरनुष्ठीयमानेष्वपि लोके विधिनिषेधतत्फलादिदर्शनात् प्रवृत्तिशक्तस्येच्छायामन्यैरनिवार्यत्वेन स्वातन्त्र्यादिसिद्धेः । एवं *कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः (गी. ३. ५) इत्यादिष्वपि ज्ञानेच्छापुरस्कारेण प्रवर्तनादिच्छाविशेषादेश्च स्ववासनादिविशेषमूलत्वाज्जीवस्य कर्तृत्वं सुस्थितम् । अत एव ह्यत्र हेतुपञ्चके कर्तेति समाख्यासमाधिना कर्तृत्वेनैव जीवो निरूप्यते । यत्तु करणकलेबरशक्तिज्ञानवाञ्छादिषु विषमप्रदानमहितप्रवृत्तावनिवारणमनुमननं प्रत्यवायजननं च, तदप्यनादिपूर्वकर्मवैषम्योपाधिकतया नेश्वरस्य वैषम्यनैर्घृण्यापादकम् । प्रवृत्तिवैषम्यस्यादृष्टवैषम्यमूलत्वेऽपि तदेवादृष्टं शास्त्रपुरस्कारेणास्य दृष्टादिकमारभते ; तदप्येवमिति विधिनिषेधावकाशलाभः । नहि पूर्वं यज्ञादिकारणमदृष्टं कृतमिति तेनैवेदानीं यज्ञादिकं निष्पद्यते, शास्त्रजन्यबुद्ध्यादिसापेक्षत्वात्तस्य । एवं पापहेतुभूतमप्यदृष्टं स्वबुद्धयैव निवृत्तियोग्यतया शासनानर्हदशामापाद्य पापे प्रवर्तयति ; तदपि तथेति । अन्यथाऽदृष्टमूलत्वाद्धितेतरप्रवृत्त्योर्न शास्त्रापेक्षेति वादिनः पूर्वादृष्टेऽपि तथा प्रसङ्गात्स्ववचनविरोधः । अथादृष्टमूलत्वे शास्त्रवैयर्थ्यप्रसङ्गः ; सार्थकं च शास्त्रं परैरभ्युपगम्यत इत्यदृष्टमूलत्वमेव नोपपद्येतेति मन्यसे ; तदपि न, लौकिकविधिनिषेधयोरपि तथा प्रसङ्गात् । तत्रापि हि सामग्रीवैचित्र्यमूलत्वे प्रवृत्तिनिवृत्त्यादि वैचित्र्यस्य किं गामानयेत्यादिनियोगेन, अथ सोऽपि

नियोगस्त्वसामग्र्योपनीतः प्रवृत्तिनिवृत्तिसामग्रीमध्यमध्यास्त इति पश्यसि, एवं वैदिकनियोगोऽपीति संपश्येथाः । तर्हि लौकिकमपि नियोगं परित्यजाम इति चेत्; हन्त परस्परसंव्यवहारव्युत्पत्त्याद्यसंभवाद्विलीनं लोकायतेनापीति मूकीभव । एवं सामान्यतस्सर्वेषु अदृष्टवैषम्यमूलेष्वपि कर्मसु शास्त्रे सावकाशे तदेव शास्त्रमीश्वरबुद्धिविशेषं चेददृष्टमुपदिशति, तथाविधोऽयमीश्वरः प्रमाणबलादवगत इति न तत्र परिचोदनावकाशः । नचैष दोषः, यथोक्तमाचार्यैर्वादिहंसाम्बुवाहैः * वैषम्ये सति कर्मणामविषमः किं नाम कुर्यात्कृती किं वोदारतया ददीत वरदो वाञ्छन्ति चेदुर्गतिमिति । तदयं चार्वाकेतरसमस्तसिद्धान्तनिष्ठानां साधारणपरिहारसारः—श्लो. तत्तदिष्टादृष्टमूलशास्त्रवश्यदशान्वयात् । पुनस्तथातथादृष्टा-नुत्पत्तिरुपपद्यते ॥ पुमर्थसाधनत्वेन प्रतीते स्वेच्छया पुमान् । प्रवर्तेतेति तादर्थ्यात्सावकाशाऽत्र चोदना ॥ इति । अत्र करणकलेबरप्रदानादिसाधारणोपकारसापेक्षतया जीवकर्तृत्वस्य परापेक्षत्वं सन्निधत्तेनोक्तम् । कर्मनिष्पत्तये इत्यादिना तु प्रवृत्तिविशेषे जीवस्य स्वातन्त्र्यं दर्शितम् । तत्रापि परस्य किंचित्कारः तदन्तरवस्थित इत्यादिनोक्तः । तं—कृत-प्रयत्नमित्यर्थः ॥ १४ ॥ १५ ॥

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६

भा ॥ एवं—वस्तुतः परमात्मानुमतिपूर्वके जीवात्मनः कर्तृत्वे सति, तत्र—कर्मणि केवलमात्मानमेव कर्तारं यः पश्यति, स दुर्मतिः—विपरीतमतिः, अकृतबुद्धित्वात्—अनिष्पन्नयथावस्थितवस्तुबुद्धित्वात्, न पश्यति—न यथावस्थितं कर्तारं पश्यति ॥ १६ ॥

ता ॥ यद्येवं पञ्चानां हेतुत्वेऽप्यात्मैव कर्ता, तद्धीकर्तृत्वानुसंधानं भ्रान्तिरूपमेव स्यात् । विधिनिषेधादिसंरक्षणाय कर्तृत्वं तावदुत्सृजम् । नच सहकारिनिरपेक्षकर्तृत्वं प्रतिषिध्यत इति वाच्यम्; तस्य प्रसङ्गाभावेन प्रतिषेधायोगात् । नहि कश्चिद्देहेन्द्रियदण्डचक्रादिनिरपेक्षः करोमीति मन्यत इति शङ्कायां नियन्त्रन्तरनिरपेक्षस्वाभाविककर्तृत्वभ्रमस्य देहाद्यात्मभ्रमवतां चानेकाधीने कर्मण्यनन्याधीनत्वाभिमानस्य निवारणमकर्तृत्वानुसंधानमित्युच्यते—*तत्रैवमिति श्लोकेन । परमात्मानुमतिपूर्वक इति सर्वनिर्वाहकप्रधानहेतुग्रहः । आत्मानमिति—स्वात्मानमित्यर्थः । अत एव च कर्तृशब्दोऽत्र न पूर्ववद्धर्मिसमर्पकः; इतरथा कर्मप्रारम्भहेतुमित्यध्याहारप्रसङ्गाच्चेत्यभिप्रायेणाह—केवलमात्मानमेव कर्तारमिति । तुशब्दोऽत्रावधारणार्थो व्याख्यातः । शङ्कानिवर्तकत्वेऽपि वा केवलशब्दोक्तव्यक्त्यर्थ एवकारः । नन्वत्र केवलशब्देन स्वाभाविककर्तृत्वानुवादमात्रं स्यादिति चेन्न, चतुर्भिस्संभूयकरणे प्रस्तुते तदनभिज्ञनिन्दायां तद्व्यवच्छेदार्थत्वस्वारस्यात्तस्या-पेक्षितत्वाच्च । तत्र यत्परैरुक्तम्—* आत्मनोऽविक्रियस्वभावत्वेनाधिष्ठानादिभिस्संहतत्वानुपपत्तेः विक्रियावतो ह्यन्यैस्संहननं, संहत्य वा कर्तृत्वं स्यात्; नत्वविक्रियस्यात्मनः केनचित्संहननमस्तीति न संभूयकारित्वमुपपद्यते इति; तदसत्, स्वरूपो-त्पत्त्यादिविकाररहितस्यात्मनः * दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि । प्रधानेऽवस्थितो व्यापी चेतनात्मात्म-वेदनः ॥ (वि. २. ७. २८) इत्यादिभिश्शास्त्रैर्द्रव्यान्तरेण संहननस्य ज्ञानचिकीर्षाद्याधारतया सहकारिभिस्संभूय-कर्तृत्वस्य च स्थापनात्; अन्यथाऽत्रापि *पञ्चैते तस्य हेतवः इति कर्तुरपि हेतुत्वेन परिगणनस्य भङ्गप्रसङ्गादिति । *स दुर्मतिरित्येतदुक्तस्यैवानुवादः; अन्यथा पौनरुक्त्यादित्यभिप्रायेणाह—विपरीतमतिरिति । अकृतबुद्धिरिहाध्यात्मशास्त्रैरनि-ष्पादितबुद्धिः; तदाह—अनिष्पन्नेति । * यः पश्यति, न स पश्यतीति व्याघातात्, सदपि दर्शनमयथाभावेनास-

त्कल्पतया निन्द्यत इत्यभिप्रायेणाह—**न यथावस्थितमिति** । बाह्येषु यथावस्थितदर्शनसंभवात्मकृतविषये नियच्छति—**कर्तारमिति** । स्वभावार्थशास्त्रप्राप्तव्यतिरिक्तेषु न प्रवर्तेत; अवश्यकर्तव्येषु स्वभावादिप्राप्तेष्वपि स्वस्मिन्नधिष्ठानादिषु च यथांशं कर्मबन्धं न्यस्य प्रवर्तेतेति हृदयम् ॥ १६ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ १७

भा ॥ परमपुरुषकर्तृत्वानुसंधानेन यस्य भावः—कर्तृत्वविषयो मनोवृत्तिविशेषो नाहंकृतः—नाहमभिमानकृतः, अहं करोमीति ज्ञानं यस्य न विद्यत इत्यर्थः । बुद्धिर्यस्य न लिप्यते—अस्मिन् कर्मणि मम कर्तृत्वाभावादेतत्फलं न मया संबध्यते, न च मदीयं कर्मेति यस्य बुद्धिर्जायत इत्यर्थः । स इमान् लोकान् युद्धे हत्वापि तान्न निहन्ति; न केवलं भीष्मादीनित्यर्थः । ततस्तेन युद्धाख्येन कर्मणा न निबध्यते—तत्फलं नानुभवतीत्यर्थः ॥ १७ ॥

ता ॥ दुर्मतिप्रसङ्गे कस्तर्हि सुमतिरिति बुभुत्सायामेवंविधाकर्तृत्वानुसंधानस्य प्रयोजनमुच्यते—* यस्येति श्लोकेन । भावोऽत्राभिप्रायः, अर्थान्तरानन्वयात् । सच प्रकरणात्समभिव्याहाराच्च विशेष्यते—**कर्तृत्वविषयो मनोवृत्तिविशेष इति** । * अहंकृतः इत्यत्र कर्त्रर्थत्वानन्वयात्कर्मार्थित्वेऽपि मनोवृत्तिविशेषस्याहमभिमानविषयत्वायोगात्तन्मूलत्वमात्रमिह विवक्षितमित्याह—**अहमभिमानकृत** इति । अत्राहंशब्देनाहमभिमानलक्षणा वा । यद्वा * अहंकृतः इति भुक्ता ब्राह्मणा इतिवत् कर्तरि क्तः; अहमभिमानकृत इति फलितोक्तिः । ननु आत्मनोऽहमर्थत्वात्कथमहमभिमानवर्जनम् ? तत्राह—**अहं करोमीति** । सावधारणमिदं योज्यम्, अन्यथा साक्षात्कर्तृत्वविरोधात् । एवं कर्तृत्वत्यागे कण्ठोक्ते परिशेषात्तेनार्थसिद्धः फलसङ्गत्यागो * बुद्धिर्यस्य न लिप्यते इत्यनूद्यत इत्याह—**अस्मिन्निति** । * नाविरतो दुश्चरितात् (क. २. २४) इत्यादिप्रतिषिद्धवैधेतरहननव्युदासाय शास्त्रोपक्रमादिसिद्धमनुकृष्याह—**युद्धे हत्वाऽपीति** । न हन्ति—हननाभिमानजन्यादृष्टवत्तया तत्फलसंबन्धयोग्यहन्त्रन्तरविलक्षण इत्यर्थः; अन्यथा * हत्वापि न हन्तीति व्याघातात् । यत्तु परैरुक्तम्—* आत्मनो हननकर्तृत्वाभावात्तत्कार्येणाधर्मफलेन न संबध्यत इत्युच्यते इति; तदसत्, * यस्य नाहंकृतो भावः इति विशेषणवैयर्थ्यात्; अविदुषोऽन्यस्यापि तन्मते कर्तृत्वाभावात्; तस्मिन्नपि च कर्मफललेपस्य मिथ्यात्वाभ्युपगमात् । * कथं भीष्मम् (२: ४) इत्यादेः प्रश्नस्य कैमुत्येन प्रतिक्षेपार्थम् * इमाल्लोकानिति सामान्येनोच्यत इत्यभिप्रायेणाह—**न केवलमिति** । अत्र * न हन्तीत्यस्य * न निबध्यते इति व्याख्यानमिति योजना समीचीने गत्यन्तरे संभवति न युक्ता । अतो * यस्य नाहंकृतो भावः, बुद्धिर्यस्य न लिप्यते इत्यनयोर्हेतुसाध्यभावेनावस्थितयोः फलमपि हेतुसाध्यभावेन * न हन्ति न निबध्यते इत्यनूद्यत इत्याह—**तत** इति । * न निबध्यते इत्यनेन कर्मसाध्यमोक्षविरोधिफलानन्वयो विवक्षित इत्यभिप्रायेणाह—**तत्फलं नानुभवतीति** । एतेन * क्रियाकाले नाहंकारः, क्रियोत्तरकाले मया कृतमिति प्रतिसंधानालेपः, * न हन्ति न निबध्यते इत्युभाभ्यामैहिकामुष्मिकप्रत्यवायप्रतिषेधः इति योजनान्तरं निरस्तम् ॥ १७ ॥

भा ॥ सर्वमिदमकर्तृत्वाद्यनुसन्धाने सत्त्वगुणवृद्धयैव भवतीति सत्त्वस्योपादेयताज्ञापनाय कर्मणि सत्त्वादिगुणकृतं वैषम्यं प्रपञ्चयिष्यन् कर्मचोदनाप्रकारं तावदाह—

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८

भा ॥ ज्ञानम्—कर्तव्यकर्मविषयं ज्ञानम्, ज्ञेयं च—कर्तव्यं कर्म, परिज्ञाता—तस्य बोद्धेति त्रिविधा कर्मचोदना—बोधबो[ध्य]द्धव्यबोद्धृयुक्तो ज्योतिष्टोमादिकर्मविधिरित्यर्थः । तत्र बोद्धव्यरूपं कर्म त्रिविधं संगृह्यते—करणं कर्म कर्तेति । करणम्—साधनभूतं द्रव्यादिकम्; कर्म—यागादिकं; कर्ता—अनुष्ठातेति ॥ १८॥

ता ॥ एवं सात्त्विकत्यागो विशोधितः; अथ तदर्थं *नित्यसत्त्वस्थः (२. ४५) इत्यादिभिर्बहुधा प्रागर्वाक् च प्रसक्ता सत्त्वोपादेयता निरवशेषं विशोध्या; तत्र मध्ये कर्मचोदनाप्रकारादिकथनं कथं संगच्छत इत्यत्राह—**सर्वमिति** । कर्मचोदनाप्रकारोक्तिस्तदनुबन्धिषु ज्ञानादिषु गुणतस्त्रैविध्यं प्रपञ्चयितुमित्यर्थः । **कर्तव्यकर्मविषयमित्यादि**—ज्ञानज्ञेयज्ञातृशब्दास्सामान्यविषया अपि कर्मचोदना त्रैविध्यार्थत्वाद्विशेषपरा इति भावः । एतेन ज्ञानशब्दस्यात्र शास्त्रपरत्वव्याख्या निरस्ता । प्रवर्तकवचनरूपचोदनास्वरूपविलक्षणानां ज्ञानादीनां कथं चोदनाभेदत्वोक्तिरित्यत्राह—**बोधबो[ध्य]द्धव्यबोद्धृयुक्त इति**। ज्ञानादीनां चोदनानुबन्धित्वमात्रेण विधाशब्दोक्तं प्रकारत्वमित्यर्थः । एवं *त्रिविधः कर्मसंग्रहः इत्यत्र हेतुद्वयसहितस्वरूपेण त्रैविध्यम् । अनुक्तविषयत्रैविध्यान्तरोक्तिशङ्काव्युदासाय त्रिष्वन्यतमं विविच्यत इत्याह—**तत्रेति** । संग्रहशब्दस्य कर्मणि व्युत्पत्तिमाह—**संगृह्यत इति** । कर्मैव संग्रह इति कर्मधारयः, कर्मणो वा संग्रहः । *व्रीहिभिर्यजेत (आप. श्रौ. ६. ३१. २४) दध्ना जुहोति (,, ६. २५. १०) इत्यादिप्रतिपादितं क्रियाकरणमिह करणशब्देनोच्यते, फलापेक्षया तु कर्मण एव करणत्वादित्यभिप्रायेणाह—**साधनभूतं द्रव्यादिकमिति** । आदिशब्देन जात्यादिग्रहणम् । नन्वत्र ज्ञायतेऽनेनेति ज्ञानं, तदेव करणमित्युच्यते; ज्ञानादित्रयमेव हि करणकर्मकर्तृशब्दैर्विवृतमिति युक्तम्; अत एव हि *ज्ञानं कर्म च कर्ता चेत्यनन्तरानुवादसंगतिरिति चेत्; मैवं, शब्दस्वारस्याभावात्, उक्तमात्रस्य च शब्दान्तरेण पुनरभिधाने प्रयोजनाभावादुक्तावान्तरविभजनस्य तु विवेकोपयुक्तत्वादिति भावः । कर्तृकरणसमभिव्याहारात्कर्मशब्दोऽपि कारकविशेषविषय इति शङ्कामपाकरोति—**कर्म यागादिकमिति** । क्रियास्वरूपं हि गुणतस्त्रिविधं विभजिष्यत इति भावः । नियोज्यावस्थतया *परिज्ञातेति निर्दिष्ट एवानुष्ठात्रवस्थतया पुनः कर्मशेषतया तत्प्रकारत्वेन *कर्तेति व्यपदिश्यत इत्याह—**कर्ता अनुष्ठातेति** ॥ १८ ॥

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९

भा ॥ कर्तव्यकर्मविषयं ज्ञानमनुष्ठीयमानं च कर्म तस्यानुष्ठाता च सत्त्वादिगुणभेदतस्त्रिधैव प्रोच्यते । गुणसंख्याने—गुणकार्यगणने, यथावच्छृणु तान्यपि—तानि गुणतो भिन्नानि ज्ञानादीनि यथावच्छृणु ॥ १९ ॥

ता ॥ *ज्ञानं ज्ञेयं परिज्ञाता इत्युक्ता एव पदार्थाः *ज्ञानं कर्म च कर्ता चेत्यनूद्यन्ते । ज्ञातृत्वकर्तृत्वयोरवस्थाभेदमात्रत्वात् ज्ञानोक्त्यैव ज्ञातुरपि सिद्धेरिहानुक्तिः; ज्ञेयशब्दस्य च कर्मविषयत्वात् । करणं तु कर्मानुप्रविष्टत्वान्न पृथग्विभजिष्यते । गुणसंख्यानशब्देन सांख्यराद्धान्तविवक्षायां प्रमाणाभावात्प्रकृते चानुपयोगात् गुणस्वरूपगणने च ज्ञानादेरनुप्रवेशाभावात्—**गुणकार्यगणन इत्युक्तम्** । **यथावच्छृणु**—यथावच्छ्रवणयोग्यमवधानं कुर्वित्यर्थः । *यथावदिति विवक्षितं प्रकारमाह—**गुणतो भिन्नानीति** ॥ १९ ॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २०

भा ॥ ब्राह्मणक्षत्रियब्रह्मचारिगृहस्थादिरूपेण विभक्तेषु सर्वेषु भूतेषु—कर्माधिकारिषु येन ज्ञानेनैकम्—आत्माख्यं भावं, तत्राप्यविभक्तम्—ब्राह्मणत्वाद्यनेकाकारेष्वपि भूतेषु सितदीर्घादिविभागवत्सु ज्ञानाकार आत्मनि विभागरहितम्, अव्ययं—व्ययस्वभावेष्वपि ब्राह्मणादिशरीरेष्वव्ययम्, अविकृतं फलादिसङ्गानर्हं च कर्माधिकारवेलायामीक्षते, तज्ज्ञानं सात्त्विकं विद्धि ॥ २० ॥

ता ॥ सात्त्विकज्ञानादिकथनं कर्तृत्वे गुणपारतन्त्र्यज्ञापनार्थम् । सर्वभूतशब्दाभिप्रेतमनात्मविद्भिरनुसंहितं बाह्य-वैचित्र्यमाह—**ब्राह्मणे**त्यादिना । ज्ञानशब्दस्यात्र प्रकृतकर्मचोदनानुबन्धिकर्मानुष्ठानदशाभाविज्ञापनपरत्वात् **कर्माधिकारि-ष्विति** भूतानि विशेषितानि । भावशब्दोऽत्र पदार्थपर्यायः । **एक**मिति जात्यैक्यविवक्षयोच्यते, आत्मबहुत्वस्य प्रागेव समर्थितत्वात्, अद्वैतदर्शनं सात्त्विकज्ञानमिति परोक्तस्य निर्मूलत्वात्, * नानाभावानिति चानन्तरं बहुत्वोक्तेः, साम्यानुसन्धानप्रपञ्चनस्यात्र प्रत्यभिज्ञानात्, कर्तेति प्रकृतप्रत्यगात्मविषयत्वौचित्येन परमात्मपरत्वायोगाच्चेत्यभिप्रायेणाह—**आत्माख्य**मिति । **सितदीर्घे**त्यादिना—* गवामनेकवर्णानां क्षीरस्याप्येकवर्णता (अ. बि. उ) इत्यादिश्रुतिसूचनम् । अत्र सर्वभूतशब्देन ब्राह्मणत्वादिजातिग्रहणाद्गुणाद्यवान्तरविभागपरो विभक्तशब्द इति च भावः । केनाकारेणैकत्वमित्यत्राह—**ज्ञानाकार** इति । प्रतिपिध्यमानस्य व्ययस्य प्रसञ्जकमाह—**व्ययस्वभावेष्वपी**ति । प्रागुक्तं फलादिसङ्गरूपविकृतिराहित्य-मप्यविकृतत्वपरेणाव्ययशब्देन संगृहीतमित्याह—**फलादिसङ्गानर्हं चे**ति । सङ्गोऽत्र संबन्धः; अनुभव इत्यर्थः । इच्छा-परत्वेऽपि भोगोऽर्थसिद्धः । कर्मचोदनानुबन्धिज्ञानफलत्वात् **कर्माधिकारवेलाया**मित्युक्तम् । मयेदं कर्तव्यमित्यनुसंधान-दशायामित्यर्थः । येन ज्ञानेनेक्षते—विषयीकरोतीत्यर्थः ॥ २० ॥

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१

भा ॥ सर्वेषु भूतेषु—ब्राह्मणादिषु ब्राह्मणाद्याकारपृथक्त्वेनात्माख्यानपि भावान्नानाभूतान् सितदीर्घादि-पृथक्त्वेन च पृथग्विधान् फलादिसंयोगयोग्यान् कर्माधिकारवेलायां यज्ज्ञानं वेत्ति, तज्ज्ञानं राजसं विद्धि ॥२१॥

ता ॥ पृथक्त्वेन च पृथग्विधान्—पृथक्त्वेन विशेषितानित्यर्थः । पृथक्त्वादिशब्दानां पुनरुक्तिपरिहारायाह—**ब्राह्मणाद्याकारपृथक्त्वेने**ति । * सर्वेषु भूतेष्विति विशिष्टानुवादः; तत्र * भावानिति विशेष्यनिष्कर्ष इत्यभिप्रायेणाह—**आत्माख्यानपि भावानि**ति । जातिभेदविशेष्यभेदगुणादिभेदपरतया पृथक्त्वनानात्वपृथग्विधशब्दानामपुनरुक्तिः । उक्तव्यतिरेकपरतया फलादिसंयोगयोग्यत्वोक्तिः । **ज्ञानं वेत्ती**ति कर्तृत्वोपचारः ॥ २१ ॥

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहेतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२

भा ॥ यत्तु—ज्ञानम्, एकस्मिन् कार्ये—एकस्मिन् कर्तव्ये कर्मणि प्रेतभूतगणाद्याराधनरूपे अत्यल्प-फले कृत्स्नफलवत् सक्तम्, अहेतुकम्—वस्तुतस्त्वकृत्स्नफलवत्तया तथाविधसङ्गहेतुरहितम्, अतत्त्वार्थवत्—

पूर्ववदेवात्मनि पृथक्त्वादियुक्ततया मिथ्याभूतार्थविषयम्, अत्यल्पफलं च प्रेतभूताद्याराधनविषयत्वादल्पं च, तज्ज्ञानं तामसमुदाहृतम् ॥ २२ ॥

ता ॥ कार्यशब्दोऽत्र नोत्पत्तिमात्रपरः, स्वकर्तव्यविषयत्वात्; एकशब्दश्च सज्ज्ञानर्हत्वाय फलद्वारा परिमितपरः; तस्यापि हेतुः प्रागुक्तपरिमितशक्तीनामाराधनमित्यभिप्रायेणाह—**एकस्मिन् कर्तव्ये कर्मणि प्रेतभूतगणाद्याराधनरूपेऽत्यल्पफल** इति। कर्मस्वरूपकार्यमात्रस्यापि सज्ज्ञयोग्यत्वाभावः; तत्रापि फलविवक्षायामाह—**कृत्स्नफलवदि**ति। कृत्स्नफलहेतुभूतकर्मणीवेत्यर्थः। कार्यभूतस्य ज्ञानस्य सङ्गस्य वा कारणमात्रनिषेधायोगात्प्रेक्षावत्सङ्गहेतुरिह प्रतिषिध्यत इत्याह—**वस्तुत** इति। * अहैतुकमिति पाठेऽपि हैतुकादन्यत्वविवक्षयाऽयमेवार्थो ग्राह्यः। **पूर्ववदेवे**ति—राजसवदित्यर्थः। एकस्मिन्कार्ये सक्तमहेतुकमित्यनेनैवाल्पफलत्वसिद्धेः खद्योतप्रकाशवत्स्वरूपत एवाल्पत्वं स्वारसिकमल्पशब्देन विवक्षितमित्यपुनरुक्तिरित्यभिप्रायेण **अत्यल्पफलं च प्रेतभूताद्याराधनविषयत्वादल्पं चे**त्युक्तम्। * सत्त्वात्संजायते ज्ञानम् (१४. १७) इति पूर्वोक्तं तु राजसतामसज्ञानयोरज्ञानत्वविवक्षया। उक्तं हि * एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा (१३. ११) इति ॥ २२ ॥

भा ॥ एवं कर्तव्यकर्मविषयज्ञानस्याधिकारवेलायामधिकार्यंशेन गुणतस्त्रैविध्यमुक्त्वा अनुष्ठेयस्य कर्मणो गुणतस्त्रैविध्यमाह—

नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३

भा ॥ नियतम्—स्ववर्णाश्रमोचितम्, सङ्गरहितम्—कर्तृत्वादिसङ्गरहितम्, अरागद्वेषतः कृतम्—कोतिंरागादकीर्तिद्वेषाच्च न कृतम्, अदम्भेन कृतमित्यर्थः: अफलप्रेप्सुना—अफलाभिसन्धिना कार्यमित्येव कृतं यत्कर्म, तत्सात्त्विकमुच्यते ॥ २३ ॥

ता ॥ अधिकार्यंशेनेति—अविभक्तत्वविभक्तत्वादिविशेषितकर्माधिकारिस्वरूपानुसंधानेनेत्यर्थः। विशिष्टे कर्मणि विशेषणतयाऽधिकारिणोंऽशत्वोक्तिः। यद्यपि सङ्गशब्दो विभज्य फलसङ्गकर्तृत्वत्यागप्रतिपादने विशेषविषयः, तथाऽपि सङ्गरहितमित्यत्र संकोचकाभावादपेक्षितत्वाच्च कण्ठोक्तफलप्रेप्सातिरिक्तसामान्यविषय इत्याह—**कर्तृत्वादिसङ्गरहित**मिति। आदिशब्देन ममता गृह्यते। * मुक्तसङ्गोऽनहंवादी (२६) इत्यादिकथितः कर्तृधर्म इह तद्द्वारा कर्मविशेषणत्वेन योजितः। ब्रह्मणि रागात्संसारद्वेषाच्च क्रियमाणस्य कर्मणः कथमरागद्वेषतः कृतत्वमित्यत्राह—**कोतिंरागादकीर्तिद्वेषा**च्चेति। सङ्गशब्दपुनरुक्तिश्चानेन परिहृता। अकारस्यासमस्तत्वविवक्षया वा फलितोक्तिविवक्षया वा **न कृत**मित्युक्तम्। * तपो दम्भेन चैव यत् (१७. १८) इत्याद्युक्तप्रतिषेधार्थमिदमित्यभिप्रायेणाह—**अदम्भेने**ति। **कार्यमित्येवे**ति सात्त्विकत्यागस्मारणम् ॥ २३ ॥

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४

भा ॥ यत्तु पुनः कामेप्सुना—फलप्रेप्सुना साहंकारेण वा; वाशब्दाश्चार्थे, कर्तृत्वाभिमानयुक्तेन च, बहुलायासं यत्कर्म क्रियते, तद्राजसम्—बहुलायासमिदं कर्म मयैव क्रियत इत्येवंरूपाभिमानयुक्तेन यत्कर्म क्रियते, तद्राजसमित्यर्थः ॥ २४ ॥

ता ॥ * कामेप्सुनेत्यनेन * अफलप्रेप्सुनेत्युक्तविपरीतोक्तिं व्यनक्ति—**फलप्रेप्सुनेति** । संबन्धसामान्यषष्ठ्याऽत्र समासः । अत्र विकल्पाद्यसंभवात् **वाशब्दश्चार्थे** इत्युक्तम् । प्रवृत्तिप्रधानरजोमूलतयाऽनुपयुक्तप्रयासमिश्रणाद्बहुलायासत्वम् । तत्र च सर्वत्र स्वयमेव हेतुरित्यभिमानस्साहंकारशब्देन विवक्षितः । तत एव बहुलायासपदं च सप्रयोजनमित्यभिप्रायेणाह—**बहुलायासमिदं कर्म मयैवेति** ॥ २४ ॥

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५

भा ॥ **कृते कर्मण्यनुबध्यमानं दुःखमनुबन्धः ; क्षयः—कर्मणि क्रियमाणे अर्थविनाशः ; हिंसा— तत्र प्राणिपीडा ; पौरुषम्—आत्मनः कर्मसमापनसामर्थ्यम् ; एतानि अनवेक्ष्य—अविमृश्य, मोहात्—परमपुरुषकर्तृत्वाज्ञानात् यत्कर्मारभ्यते, तत्तामसमुच्यते** ॥ २५ ॥

ता ॥ क्षयशब्देन तादात्विकार्थव्ययदोषविवक्षणादुपसर्गशक्त्या चानुबन्धशब्द एतत्संबन्धितया पश्चाद्भाविदुःखपर इत्याह—**कृते कर्मणीति** । हिंसा स्वविषया परविषया चेत्यभिप्रायेण **तत्र प्राणिपीडेति** सामान्योक्तिः । दैवमतिसंबन्धिनः पौरुषस्य पुरुषसंबन्धिदृष्टसामग्रीसमवधानरूपतामाह—**आत्मनः कर्मसमापनसामर्थ्यमिति** । भविष्यतोऽनुबन्धादेस्साक्षात्कारासंभवाद्युक्तिभिरागमैश्च अपरामर्शोऽत्रानवेक्षणमित्याह—**अविमृश्येति** । अनुबन्धाद्यज्ञानस्य [पृथ]प्रागुक्तत्वात्प्रकान्ताकर्तृत्वज्ञानप्रत्यनीकोऽत्र मोहशब्दार्थ इत्याह—**परमपुरुषेति** ॥ २५ ॥

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २६

भा ॥ **मुक्तसङ्गः—फलसङ्गरहितः, अनहंवादी—कर्तृत्वाभिमानरहितः, धृत्युत्साहसमन्वितः—आरब्धे कर्मणि यावत्कर्मसमाप्तयवर्जनीयदुःखधारणं धृतिः, उत्साहः—उद्युक्तचेतस्त्वम्, ताभ्यां समन्वितः, सिद्ध्यसिद्ध्योर्निर्विकारः—युद्धादौ कर्मणि तदुपकरणभूतद्रव्यार्जनादिषु च सिद्ध्यसिद्ध्योरविकृतचित्तः कर्ता सात्त्विक उच्यते** ॥ २६ ॥

ता ॥ * अनहंवादीत्यनेन कर्तृत्वाभिमानरूपसङ्गस्य पृथङ्निषेधात् * मुक्तसङ्ग इत्यत्र सङ्गशब्दस्संकुचितविषय इत्याह—**फलसङ्गरहित** इति । तत एव कर्मणि स्वकीयतानुसन्धानरूपसङ्गोऽपि प्रतिषिद्धः । अहंवदनशीलोऽहंवादी ; तदन्योऽनहंवादी ; तत्र मनःपूर्वा हि वागित्यभिप्रायेणाह—**कर्तृत्वाभिमानरहित** इति । कर्तृत्वस्य विविच्यमानत्वात्तदुपयुक्ता धृतिरिह विवक्षितेत्याह—**आरब्ध** इति । प्रयत्नरूपस्योत्साहस्य कर्तृशब्देनैव सिद्धत्वाद्राजसादिकर्तृसाधारण्याच्च विशेषविवक्षामाह—**उद्युक्तचेतस्त्वमिति** । * मुक्तसङ्ग इत्यनेन स्वर्गादिफलसङ्गनिवृत्तेरुक्तत्वात् *सिद्ध्यसिद्ध्योर्निर्विकार इत्यस्य दृष्टफलविषयतामाह—**युद्धादाविति** । मुक्तसङ्गत्वफलं वा निर्विकारत्वम् ॥ २६ ॥

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७

भा ॥ **रागी—यशोर्थी, कर्मफलप्रेप्सुः—कर्मफलार्थी ; लुब्धः—कर्मापेक्षितद्रव्यव्ययस्वभावरहितः, हिंसात्मकः—परान् पीडयित्वा तैः कर्म कुर्वाणः, अशुचिः—कर्मापेक्षितशुद्धिरहितः, हर्षशोकान्वितः—युद्धादौ कर्मणि जयादिसिद्ध्यसिद्ध्योर्हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः** ॥ २७ ॥

ता ॥ *कर्मफलप्रेप्सुरित्यनेनानुश्रविकस्वर्गादिफलार्थित्वस्याभिधानात् *रागीत्यानुषङ्गिकदृष्टफलसङ्गविवक्षामाह—**यशोर्थीति** । अपात्रव्ययादिराहित्यस्य गुणत्वात् **कर्मापेक्षितेति** विशेषितम् । *काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकरम् (आप. २. ४. ९. ११) इत्याद्युक्तविपरीतस्वभावताऽत्र हिंसात्मकशब्देन विवक्षितेत्याह—**परान्पीडयित्वेति** । कर्तृत्वोपयोगाय **तैः कर्म कुर्वाण** इति फल्गितोक्तिः । एवं **कर्मापेक्षितशुद्धिरहित** इत्यपि । न हि दर्शनस्पर्शनादियोग्यशुचित्वमात्रेण कर्मण्यतानिष्पत्तिरिति भावः ॥ २७ ॥

अयुक्तः प्राकृतः स्तब्धश्शठो नैकृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८

भा ॥ अयुक्तः—शास्त्रीयकर्मायोग्यः, विकर्मस्थः, प्राकृतः—अनधिगतविद्यः, स्तब्धः—अनारम्भशीलः, शठः—अभिचारादिकर्मरुचिः, नैकृतिकः—वञ्चनपरः, अलसः—आरब्धेष्वपि कर्मसु मन्दप्रवृत्तिः, विषादी—अतिमात्रावसादशीलः, दीर्घसूत्री—अभिचारादिकर्म कुर्वन् परेषु दीर्घकालयत्यनर्थपर्यालोचनशीलः, एवंभूतो यः कर्ता, स तामसः ॥ २८ ॥

ता ॥ अवधानाभावादेः *प्राकृत इत्यादिना सिद्धेरयुक्तशब्देन अनर्हत्वं विवक्षितमित्याह—**शास्त्रीयेति** । अशुचिशब्दनिर्दिष्टाद्राजसस्यायोग्यत्वादधिकमयोग्यत्वमिह विवक्षितमित्याह—**विकर्मस्थ** इति । एवं हि तस्यायोग्यतातिशयः; यथा—*शैवान्पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान् । विकर्मस्थान् द्विजान् शूद्रान् सचेलो जलमाविशेत् ॥ इति । शास्त्राध्ययनतदर्थोपदेशादिजनितसात्त्विककर्मानुष्ठानानुगुणविशेषराहित्यं प्राकृतशब्देन विवक्षितमित्याह—**अनधिगतविद्य** इति । पूज्येष्वपि त्वरितावश्यकर्तव्यययोचितप्रणामाद्यारम्भविपरीतं स्तिमितस्वभावत्वमिह स्तब्धशब्दार्थ इत्याह—**अनारम्भशील** इति । गूढविप्रियकृत्त्वं शठत्वं; तच्च प्रकरणाच्छास्त्रोदिततामसकर्मद्वारेत्याह—**अभिचारादिकर्मरुचिरिति** । पुनरुक्तिपरिहाराय मायाप्रतारणादिलौकिककर्मद्वारा नैकृतिकत्वमाह—**वञ्चनपर** इति । *श्वःकार्यमद्य कुर्वीतेति न्यायाच्छास्त्रीयेषु त्वरितेन भवितव्यम्; तद्वैपरीत्यमिहालस्यं, तत्रानारम्भस्य स्तब्धशब्देनोक्तत्वात् **आरब्धेष्विति** विशेषितम् । *विषादीत्यत्र धातोरेवावसादार्थत्वादुपसर्गेण तत्प्रकर्षः, प्रत्ययेन ताच्छील्यं च विवक्षितमित्याह—**अतिमात्रावसादशील** इति । अवसादश्च लक्षितो **वाक्यकारेण**—*देशकालवैगुण्याच्छोकवस्त्वाद्यनुस्मृतेश्च तज्जं दैन्यमभास्वरत्वं मनसोऽवसादः इति । प्रारब्धकर्मणां शीघ्रमसमापनरूपमन्दप्रवृत्तित्वादेरलसादिशब्देन निर्दिष्टत्वादवयवशक्तेश्शठादिसमभिव्याहारस्य चानुगुणदीर्घसूत्रत्वं विशिनष्टि—**अभिचारादिकर्म कुर्वन्परेषु दीर्घकालवर्त्यनर्थपर्यालोचनशील** इति । *सूत्र सूत्रणे इति धातुः, सूत्रणं चिन्तनं; ताच्छील्यार्थप्रत्ययः; दीर्घसूत्रणाद्दीर्घसूत्री । निरपराधशकुन्तादिग्रहणार्थदीर्घसूत्रकर्तृसमानतया दीर्घसूत्रीत्यौपचारिकग्रहणं तु मन्दमिति भावः ॥ २८ ॥

भा ॥ एवं कर्तव्यकर्मविषयज्ञाने कर्तव्ये च कर्मणि अनुष्ठातरि च गुणतस्त्रैविध्यमुक्तम्; इदानीं सर्वत्रसर्वपुरुषार्थनिश्चयरूपाया बुद्धेर्धृतेश्च गुणतस्त्रैविध्यमाह—

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ २९

भा ॥ बुद्धिः—विवेकपूर्वकं निश्चयरूपं ज्ञानम्, धृतिः—आरब्धायाः क्रियाया विघ्नोपनिपातेऽपि धारणम्, तयोस्सत्त्वादिगुणतस्त्रिविधं भेदं पृथक्त्वेन प्रोच्यमानं यथावच्छृणु ॥ २९ ॥

ता ॥ ज्ञानत्रैविध्यमुक्तम् ; पुनर्बुद्धित्रैविध्यं वक्ष्यते ; तत्र पर्यायतया पुनरुक्तिशङ्कां परिहर्तुमुक्तस्य विशेषविषयता-मनुवदति—**एवं कर्तव्यकर्मविषयज्ञान** इति । प्रकृतोपयुक्तमनन्तरं प्रस्तूयत इति संगत्यभिप्रायेणाह—**इदानी**मिति । ज्ञानत्रैविध्यं पूर्वोक्तम्, पुनरिह त्रैविध्यकथनं किमर्थमिति शङ्कायामनुष्ठानदशाभाव्यनुसंधानाद्विलक्षणस्तद्धेतुतया ततः पूर्वभाविशास्त्रादिजन्योऽध्यवसाय इह बुद्धिशब्दार्थ इत्याह—**सर्वतत्त्वसर्वपुरुषार्थनिश्चयरूपाया** इति । एतेन * ज्ञानं-बुद्धेर्वृत्तिः, बुद्धिस्तु वृत्तिमतीति परोक्तं निरस्तम् । तदेव व्यनक्ति—**बुद्धिर्विवेकपूर्वकं निश्चयरूपं ज्ञानमिति । विवेकपूर्वं**—पक्षान्तरप्रतिक्षेपपर्यन्तविचारपूर्वमित्यर्थः । प्रस्तुतत्रिविधानुष्ठानोपयुक्तप्रकारेण त्रिविधाया धृतेस्साधारणं रूप-माह—**आरब्धाया** इति । अयमपि संकल्पदार्ढ्यादिरूपो बुद्धिस्वभावविशेष एव । गुणतो विभक्ते वाच्ये, वचने चासंकीर्ण-स्वरूपेऽन्वयात्त्रिविधपृथक्त्वशब्दयोरपुनरुक्तिमाह—**त्रिविधं भेदं पृथक्त्वेन प्रोच्यमान**मिति । एवं बुद्ध्यादिकार्य-कात्स्न्यपरस्य * अशेषेणेत्यस्य श्रवणेऽन्वयादपुनरुक्तिः **यथावच्छृणु**मिति दर्शिता । सावधानः संशयविपर्ययरहितं शृण्वि-त्यर्थः । दिग्विजये मानुषदैवधनवच्छमादिधनं च जेतव्यमिति संबुद्धेर्भावः ॥ २९ ॥

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिस्सा पार्थ सात्त्विकी ॥ ३०

भा ॥ प्रवृत्तिः—अभ्युदयसाधनभूतो धर्मः, निवृत्तिः—मोक्षसाधनभूतः, तावुभौ यथावस्थितौ या बुद्धिर्वेत्ति ; कार्याकार्ये—सर्ववर्णानां प्रवृत्तिनिवृत्तिधर्मयोरन्यतरनिष्ठानां देशकालावस्थाविशेषेषु, इदं कार्यम्, इदमकार्यमिति या वेत्ति ; भयाभये—शास्त्रातिवृत्तिर्भयस्थानं, तदनुवृत्तिरभयस्थानम्, बन्धं मोक्षं च—संसार-याथात्म्यं तद्विगमयाथात्म्यं च या वेत्ति ; सा सात्त्विकी बुद्धिः ॥ ३० ॥

ता ॥ कार्याकार्यशब्दाभ्यां पुनरुक्तिशङ्कापरिहाराय * प्रवृत्तिलक्षणं धर्मं प्रजापतिरथाब्रवीत् । निवृत्तिलक्षणं धर्ममृषिर्नारायणोऽब्रवीत् ॥ (भा. मो. २१९.४,२) इत्याद्यनुसारेण प्रवृत्तिनिवृत्तिशब्दयोः प्रधानकर्मविषयत्वमाह—**अभ्यु-दयसाधनभूत** इत्यादिना । राजसतामसबुद्ध्योः *अयथावदित्यादिविशेषणादिहार्थतस्तन्निवृत्तेर्विवक्षितत्वज्ञापनाय यथा-वस्थितत्वोक्तिः । कार्याकार्यशब्दयोरिह प्रकृतप्रधानकर्मेतिकर्तव्यताभूतदृष्टादृष्टव्यापारपरत्वमाह—**सर्ववर्णानामित्यादिना ।** तत्र सूक्ष्मधीवेद्यत्वाय **देशकालावस्थाविशेषेष्वि**ति विशेषितम् । स्मर्यते हि—* शरीरं बलमायुश्च वयः कालं च कर्म च । समीक्ष्य धर्मविद्बुद्ध्या प्रायश्चित्तानि निर्दिशेत् ॥ (बो. सू. १. १. १६) इति ; * देशं कालं तथाऽऽत्मानम् इत्यादि च । अत्र शक्याशक्ययोरपि कार्याकार्यशब्दाभ्यामेव ग्रहणम् । भयाभययोस्स्वरूपज्ञानस्य सर्वसाधारणत्वादिह तन्निमित्तज्ञानं विवक्षितम् ; तच्च प्राकरणिकविशेषविषयमाह—**शास्त्रातिवृत्तिर्भयस्थान**मिति । बिभेत्यस्मादिति भयम् ; सर्वप्रशासितुरीश्वरादेव हि तत्त्वविदां भयमभयं च ; नहि तत्प्रेरणमन्तरेण केनचिद्बाधितुमबाधितुं वा शक्यम् । तत-स्तदाज्ञानुवृत्त्यतिवृत्ती एव भयाभयनिमित्तमिति भावः । बन्धमोक्षसद्भावज्ञानस्यापि साधारण्याद्याथात्म्यमिति विशे-षितम् । बन्धस्य मिथ्यात्वादिवादो मोक्षस्य पाषाणवद्भावादिमतं च याथात्म्यशब्देन व्युदस्तम् । **वेत्तीति कर्तृत्वो-पचारः ; स्वाच्छन्द्येन विषयीकरोतीत्यर्थः ॥ ३० ॥**

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिस्सा पार्थ राजसी ॥ ३१

भा ॥ यया पूर्वोक्तं द्विविधं धर्मं तद्विपरीतं च तन्निष्ठानां देशकालावस्थादिषु कार्यं चाकार्यं च यथावन्न जानाति, सा राजसी बुद्धिः ॥ ३१ ॥

ता ॥ धृतिसाधनं धर्म इति व्युत्पत्त्या धर्मशब्दस्य प्रवृत्तिनिवृत्तिधर्मसाधारण्यादुभयप्रसङ्गाच्च पूर्वोक्तं द्विविधमित्युक्तम् ॥ ३१ ॥

अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता ।
सर्वार्थान्विपरीतांश्च बुद्धिस्सा पार्थ तामसी ॥ ३२

भा ॥ तामसी तु बुद्धिः तमसाऽऽवृता सती सर्वार्थान्विपरीतान्मन्यते । अधर्मं धर्मं, धर्मं चाधर्मं, सन्तं चार्थमसन्तम्, असन्तम् चार्थं सन्तं, परं च तत्त्वमपरम्, अपरं च तत्त्वं परम् । एवं सर्वं विपरीतं मन्यत इत्यर्थः ॥ ३२ ॥

ता ॥ *तामसीत्यनेनैव तमोमूलत्वसिद्धेः *तमसाऽऽवृतेत्यनेन तादात्विकतमोनिरुद्धप्रसरत्वं विवक्षितमित्याह—तमसाऽऽवृता सतीति । *सर्वार्थानित्यनेन सिद्धसाध्यरूपसमस्तानुक्तसंग्रहमाह—सन्तं चार्थमसन्तमित्यादिना । एतेन बाह्यानां कुदृष्टीनां च मतं तामसमिति दर्शितम् । उक्तं च मनुना—*या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि तास्स्मृताः ॥ (१२. ९५) इति । अत्र राजसतामसबुद्ध्योरियान्विशेषः—असमग्रवेदनमन्यथावेदनं च राजस्यां, *यथावन्न जानाति इति व्याख्यानात्; तामस्यां तु सर्वं विपरीतं मन्यते, *सर्वार्थान् इत्युक्तेरित्येके । अन्ये त्वाहुः—प्रकारान्यथात्वं प्रकार्यन्यथात्वं च विशेषः । यद्यपि उभयत्राधिष्ठानभूते धर्मिण्यतद्धर्म एवाध्यास्यते; तथाऽपि स्वरूपनिरूपकधर्मवैपरीत्ये तामसता; यथा शुक्तिरजतभ्रमे; निरूपितस्वरूपविशेषकधर्मवैपरीत्ये तु राजसता; यथा पीतशंखभ्रम इति ॥ ३२ ॥

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिस्सा पार्थ सात्त्विकी ॥ ३३

भा ॥ यया धृत्या योगेनाव्यभिचारिण्या मनःप्राणेन्द्रियाणां क्रियाः पुरुषो धारयते; योगः—मोक्षसाधनभूतं भगवदुपासनम्; योगेन प्रयोजनभूतेनाव्यभिचारि[ण्यः]ण्या योगोद्देशेन प्रवृत्तास्तत्साधनभूता मनःप्रभृतीनां क्रियाः यया धृत्या धारयते, सा सात्त्विकीत्यर्थः ॥ ३३ ॥

ता ॥ राजसधृतौ त्रिवर्गोक्तेरपवर्गसाधनभूतो योग इह विवक्षितः; स चानन्योपासनमेव प्रागनुशिष्टमित्याह—योगो मोक्षसाधनभूतं भगवदुपासनमिति । फलान्तरसङ्गोऽत्र व्यभिचारः; योगस्य तन्निरोधकरणं स्वरूपतः फलतश्च महानन्दरूपत्वेनेत्याह—योगेन प्रयोजनभूतेनेति । योगाव्यभिचारोक्तिसामर्थ्याद्यथासंभवमुपकारविवक्षया योगोद्देशेन प्रवृत्ताः तत्साधनभूता इत्युक्तम् । मानसी क्रिया तावत्साक्षात्करणं; प्राणक्रियाऽपि *यत्र मनस्तत्र वायुर्यत्र वायुस्तत्र मनः इत्यन्योन्यपरिष्वङ्गात्; यथोच्यते—*पुनर्वायुपथं प्राप्य मनो भ्रमति वायुवत् इति; तथा प्राणायामक्रियया च

योगविरोधिक्लेशपापादिजयहेतुत्वात् । बाह्येन्द्रियक्रिया तु * स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् । स्वाध्याय-योगसंपत्त्या परमात्मा प्रकाशते ॥ (वि. ६. ६. २) इत्यादिभिरुत्थानकालभावियोगाङ्गनिषेवणरूपेण प्रत्याहारे निरुध्यमानरूपेण वा ॥ ३३ ॥

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिस्सा पार्थ राजसी ॥ ३४

भा ॥ फलाकाङ्क्षी पुरुषः प्रकृष्टसङ्गेन धर्मकामार्थान् यया धृत्या धारयते, सा राजसी । धर्मकामार्थशब्देन तत्साधनभूता मनःप्राणेन्द्रियक्रिया लक्ष्यन्ते । * फलाकाङ्क्षीत्यत्रापि फलशब्देन राजसत्वाद्धर्मकामार्था एव विवक्षिताः । अतो धर्मकामार्थापेक्षया मनःप्रभृतीनां क्रिया यया धृत्या धारयते, सा राजसीत्युक्तं भवति ॥

ता ॥ प्रसङ्गशब्दोऽत्र न प्रासङ्गिकत्वार्थः, तदनुपयोगात् । धृतेस्स्वव्यापारविषयत्वाय प्रकृतप्रक्रियानुसाराय च धर्मादिशब्दैस्तत्तत्साधनलक्षणोक्ता । सामान्यस्यापि फलशब्दस्यात्र सात्त्विकत्यागफलादपवर्गात्सङ्कोचायाह—**फलाकाङ्क्षीत्यत्रापीति** । लाक्षणिकप्रयोगाभिप्रेतं विवृण्वन् शब्दतोऽर्थतश्च फलितमाह—**अत इति** ॥ ३४ ॥

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिस्सा पार्थ तामसी ॥ ३५

भा ॥ यया धृत्या स्वप्नं—निद्रां, मदं—विषयानुभवजनितं मदं स्वप्नमदावुद्दिश्य प्रवृत्ता मनःप्राणादीनां क्रियाः दुर्मेधा न विमुञ्चति—धारयति ; भयशोकविषादशब्दाश्च भयशोकादिदायिविषयपराः ; तत्साधनभूताश्च मनःप्राणादिक्रिया यया धारयते, सा धृतिस्तामसी ॥ ३५ ॥

ता ॥ स्वप्नशब्दोऽत्र सुषुप्तेरप्युपलक्षक इत्यभिप्रायेणाह—**निद्रामिति** । दैवागतोन्मादादिव्यवच्छेदाय दुर्नीतिमूलत्वं मदस्यात्र दर्शयति—**विषयानुभवजनितमिति** । अस्वाधीनानां स्वप्नादीनां कथं पुरुषेण धारणमिति शङ्कायामत्रापि हेतुलक्षणा पूर्ववदित्याह—**स्वप्नमदावुद्दिश्येति** । स्वप्नमदयोस्सुखाभिमानास्पदतया भयादेः पृथक्कृत्य व्याख्यानम् । दुर्मेधाः—दुर्मेधस्त्वादित्यर्थः । दुर्मेधस्त्वं मेधातो मोक्तव्यत्वहेतुरिति सूचनाय * न विमुञ्चतीत्युच्यत इत्यभिप्रायेणाह—**न विमुञ्चति धारयतीति** । न चात्र भीरोर्धृतिर्विरुद्धेति वाच्यम्, आगाम्यनवेक्षणेन दुर्मतेस्तद्धेत्वनुवर्तनपरत्वात् । भयदायी विषयो दुर्मानमूलप्रबलविरोधादिः ; शोकदायी तु क्रोधादिमूलबन्धुवधादिः ; विषाददायी तु वृथावित्तव्ययादिः ॥ ३५ ॥

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।

भा ॥ पूर्वोक्तास्सर्वे ज्ञानकर्मकर्त्रादयो यच्छेषभूताः, तच्च सुखं गुणतस्त्रिविधमिदानीं शृणु ॥

अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६

भा ॥ यस्मिन् सुखे चिरकालाभ्यासात् क्रमेण निरतिशयां रतिं प्राप्नोति, दुःखान्तं च निगच्छति—निखिलस्य सांसारिकस्य दुःखस्यान्तं निगच्छति ॥ ३६ ॥

ता ॥ अनन्तरग्रन्थसंगत्यर्थं तुशब्दद्योतितं व्यनक्ति—**पूर्वोक्ता इति** । भरतर्षभशब्दोऽत्र प्रकृष्टसात्त्विकसुखसङ्गयोग्यताज्ञापनार्थः । **इदानीमिति** । साधनभेदस्योक्तस्य साध्यभेदाकाङ्क्षावसर इत्यर्थः ॥ आपातमधुरत्वाभावात्सात्त्विक-

सुखस्याभ्याससापेक्षत्वम् ; लोकेऽप्याभ्यासिकी क्षुद्रा प्रीतिरस्ति ; तद्व्युदासाय **क्रमेण निरतिशयामित्युक्तम्** । **रतिम्**—अत्यन्तादरमित्यर्थः । दुःखशब्दस्यात्र संकोचकाभावात्कृत्स्नविषयत्वोक्तिः ॥ ३६ ॥

भा ॥ **तदेव विशिनष्टि**—

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७

भा ॥ **यत्तत्सुखम्**, अग्रे—योगोपक्रमवेलायां बह्वायाससाध्यत्वाद्विविक्तस्वरूपस्याननुभूतत्वाच्च **विषमिव**—दुःखमिव भवति ; **परिणामेऽमृतोपमम्**—परिणामे—विपाके अभ्यासबलेन विविक्तात्मस्वरूपाविर्भावे **अमृतोपमं भवति** ; **तच्चात्मबुद्धिप्रसादजम्**—आत्मविषया बुद्धिः—आत्मबुद्धिः, तस्याः निवृत्तसकलेतरविषयत्वं **प्रसादः**, **निवृत्तसकलेतरविषयबुद्ध्या विविक्तस्वभावात्मानुभवजनितं सुखममृतोपमं भवति** ; **तत्सुखं सात्त्विकं प्रोक्तम्** ॥ ३७ ॥

ता ॥ अभ्याससापेक्षत्वदुःखान्तहेतुत्वयोः प्रयोजकरूपमनन्तरमुच्यत इत्यभिप्रायेणाह—**तदेव विशिनष्टीति** । *यत्तदिति तच्छब्दशिरस्केण यच्छब्देनानुवादः श्रुत्यादिप्रसिद्धतरत्वद्योतनाय । *तत्सुखमिति प्रीत्यतिदेशः । *विषमिवेत्यनेन आपातप्रातिकूल्यमात्रं विवक्षितमित्याह—**दुःखमिवेति** । अनेन मन्दमतीनां जिहासास्पदत्वं दर्शितम् । न हि सुखं नाम किंचिद्वस्तु विषवदमृतवच्च परिणमते ; अतस्तदुपचरितमाह—**अभ्यासबलेन विविक्तात्मस्वरूपाविर्भाव** इति । बुद्धेरात्मीयत्वादिमात्रोक्तेरफलत्वात् **आत्मविषयेत्युक्तम्** । बुद्धेरयोग्यविषयसंसर्गरूपकालुष्यनिवृत्तिर्हि प्रसाद इत्यभिप्रायेणाह—**निवृत्तसकलेतरविषयत्वमिति** । जरामरणादिनिवर्तकत्वाद्भोग्यतमत्वेन हातुमशक्यत्वाच्चामृतोपमत्वम् । परशेषतैकरसस्य स्वरूपस्य यथावदाविर्भावे परमात्मानुभवसुखस्यान्तर्नीतत्वादिह पृथगनुक्तिः ॥ ३७ ॥

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८

भा ॥ **अग्रे**—अनुभववेलायां, **विषयेन्द्रियसंयोगात् यत्तदमृतमिव भवति** ; **परिणामे**—विपाके **विषयाणां सुखतानिमित्तक्षुदादौ निवृत्ते तस्य च सुखस्य निरयादिनिमित्तत्वाद्विषमिव पीतं भवति** ; **तत्सुखं राजसं स्मृतम्** ॥ ३८ ॥

ता ॥ **विषयाणां**—तत्तदिन्द्रियार्थानामन्नपानादीनामित्यर्थः । **सुखतानिमित्तक्षुदादौ निवृत्ते** इति राजसस्य सुखस्य दृष्टप्रातिकूल्यनिदानोक्तिः । यदुक्तं भगवता **पराशरेण**—*अम्भेश्शीतेन तोयस्य तृषा भक्तस्य च क्षुधा । क्रियते सुखकर्तृत्वं तद्विलोमस्य चेतरैः ॥ (वि. १. १७. ६४) इति । *क्षुत्तृष्णोपशमं तद्वच्छीताद्युपशमं सुखम् । मन्यते बालबुद्धित्वाद्दुःखमेव हि तत्पुनः ॥ (,,. ६०) इति च । दृष्टसुखतानिमित्तनिवृत्तावुपेक्षणीयतामात्रव्यावृत्त्यर्थं दुःखोदर्कत्वं *परिणामे विषमिवेत्यनेन व्यज्यते । पारदारिकरसादीनि हि भयादिभूयिष्ठक्षणिकक्षुद्रतरसुखान्यनन्तरकालभाव्यतिघोरनिरतिशयदुःखाय भवन्तीत्यागामिकं विषत्वमाह—**निरयादिनिमित्तत्वादिति** ॥ ३८ ॥

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९

भा ॥ यत्सुखमग्रे चानुबन्धे च—अनुभववेलायां विपाके च आत्मनो मोहनम्—मोहहेतुर्भवति ; मोहोऽत्र यथावस्थितवस्त्वप्रकाशोऽभिप्रेतः ; निद्रालस्यप्रमादोत्थम्—निद्रालस्यप्रमादजनितम्, निद्रादयो ह्यनुभववेलायामपि मोहहेतवः ; निद्राया मोहहेतुत्वं स्पष्टम् ; आलस्यम्—इन्द्रियव्यापारमान्द्यम् ; इन्द्रियव्यापारमान्द्ये च ज्ञानमान्द्यं भवत्येव ; प्रमादः कृत्यानवधानरूप इति तत्रापि ज्ञानमान्द्यं भवति ; ततश्च तयोरपि मोहहेतुत्वम् ; तत्सुखं तामसमुदाहृतम् । अतो मुमुक्षुणा रजस्तमसी अभिभूय सत्त्वमेवोपादेयमित्युक्तं भवति ॥ ३९ ॥

ता ॥ अनुबध्यत इत्यनुबन्धो विपाकः, मोहनशब्दस्यात्र भावार्थानन्वयात्करणार्थत्वमाह—**मोहहेतुरिति** । निद्रादिजन्यसुखस्य विपरीतज्ञानहेतुत्वाभावात् **मोहोऽत्र यथावस्थितवस्त्वप्रकाश** इत्युक्तम् । राजससुखस्य विपाके मोहहेतुत्वं, तामससुखस्य तु तदानीमपीति लोकसिद्धमित्यभिप्रायेणोक्तं विवृणोति—**निद्रादयो हीति** । **स्पष्टमिति**—न युक्त्यागमसापेक्षमित्यर्थः । अलसस्य प्रवृत्त्यभावमात्रं दृश्यते, न ज्ञानाभाव ईत्यत्राह—**आलस्यमिन्द्रियव्यापारमान्द्यमिति** । ततः किमित्यत्राह—**इन्द्रियेति** । करणव्यापारतारतम्यानुगुणं हि कार्यतारतम्यम् । ज्ञानस्य मान्द्यं चाल्पविषयत्वम् । तच्च विषयान्तरप्रकाशाभावगर्भमिति भावः । प्रमादस्य स्वरूपेणैवापेक्षिताज्ञानरूपतामाह—**कृत्यानवधानरूप इति** । एवमालस्यप्रमादयोरज्ञानानुविद्धत्वं दर्शितम् ; तद्धेतुत्वं तु कथमित्यत्राह—**ततश्चेति** । ज्ञानस्यापटुत्वं हि क्रमादत्यन्ताज्ञाने विश्राम्यतीति भावः । निद्रायास्सुखहेतुत्वमायासविश्रमहेतुत्वादिभिः, विच्छेदकेषु रोषाच्च लोकसिद्धम्, इन्द्रियव्यापारमान्द्यस्याप्यक्षसंक्षोभादिनिवृत्तिद्वारा, अनवधानस्य तु बुद्धेरेकाग्रताकल्पनरूपप्रयासनिवृत्त्येति । सुखाभासप्रसङ्गेनाकालनिद्रादिकं नोपादेयमित्युक्तं भवति । स्मरन्ति च—* यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते (द. स्मृ) इत्यादि । आहुश्चायुर्वेदविदः—* अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता । सुखायुषी पराकुर्यात्कालरात्रिरिवापरा ॥ इति । गुणकृतविभागप्रकरणतात्पर्यमनुष्ठानपर्यवसानरूपप्रयोजनेनोपसंहरति—**अत इति** ॥ ३९ ॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिस्स्यात्त्रिभिर्गुणैः ॥ ४०

भा ॥ पृथिव्यां मनुष्यादिषु दिवि देवेषु वा प्रकृतिसंसृष्टेषु ब्रह्मादिस्थावरान्तेषु प्रकृतिजैरेभिस्त्रिभिर्गुणैर्मुक्तं यत्सत्त्वं—प्राणिजातं, न तदस्ति ॥ ४० ॥

ता ॥ प्राकृतगुणातीतशुद्धसत्त्वमयभगवत्प्राप्तिलक्षणमोक्षात्प्राङ्नियतदेशकालफलभोगैरुच्चावचैस्सर्वैरपि क्षेत्रज्ञैरुक्तस्य त्रिगुणस्य निश्शेषदुस्त्यजत्वमुखेन गुणकार्यप्रकरणं निगम्यते—* न तदस्तीति श्लोकेन । गुणत्रयप्रकरणं तु नात्रोपसंहृतम्, अनन्तरमपि * स्वभावप्रभवैर्गुणैरित्युक्तेः । * दिवि देवेष्विति सत्त्वोत्तरदेशाधिकारिणामुपलक्षणम् । तत्तुल्यतया * पृथिव्यामित्यत्रापि **मनुष्यादिष्विति** राजसतामसाधिकारिविवक्षास्थापनम् । * हिरण्यगर्भो भगवान् (वि. ६. ७. ५६) * आब्रह्मस्तम्बपर्यन्ताः (वि. ध. १०४. २२) इत्याद्यनुसारेण बहुवचनाभिप्रेतमाह—**ब्रह्मादिष्विति** । गुणप्रकरणात्सत्त्वशब्दस्य गुणविशेषार्थताश्रमव्युदासाय प्राणिशब्दः । समुदायरूपेणापि निर्धार्यमाणेषु तत्रापि गुणनिर्मुक्तं न किंचित्सत्त्वमित्यभिप्रायेण जातशब्दः । जातमिति वा व्यस्तम्, आसंसारं जन्मप्रभृति गुणबद्धताद्योतनार्थम् ॥ ४० ॥

भा ॥ * त्यागेनैके अमृतत्वमानशुः (ना) इत्यादिषु मोक्षसाधनतया निर्दिष्टस्त्यागः संन्यासशब्दार्थादनन्यः ; स च क्रियमाणेष्वेव कर्मसु कर्तृत्वत्यागमूलः फलकर्मणोस्त्यागः ; कर्तृत्वत्यागश्च परमपुरुषे कर्तृत्वानुसंधानेनेत्युक्तम् । एतत्सर्वं सत्त्वगुणवृद्धिकार्यमिति सत्त्वोपादेयताज्ञापनाय सत्त्वरजस्तमसां कार्यभेदाः प्रपञ्चिताः । इदानीमेवंभूतस्य मोक्षसाधनतया क्रियमाणस्य कर्मणः परमपुरुषाराधनवेषतां, तथानुष्ठितस्य च कर्मणस्तत्प्राप्तिलक्षणं फलं प्रतिपादयितुं ब्राह्मणाद्यधिकारिणां स्वभावानुबन्धिसत्त्वादिगुणभेदभिन्नं वृत्त्या सह कर्तव्यकर्मस्वरूपमाह—

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१

भा ॥ ब्राह्मणक्षत्रियविशां स्वकीयो भावः स्वभावः, ब्राह्मणादिजन्महेतुभूतं प्राचीनकर्मेत्यर्थः ; तत्प्रभवास्सत्त्वादयो गुणाः । ब्राह्मणस्य स्वभावप्रभवो रजस्तमोभिभवेनोद्भूतस्सत्त्वगुणः ; क्षत्रियस्य स्वभावप्रभवस्तमस्सत्त्वाभिभवेनोद्भूतो रजोगुणः ; वैश्यस्य स्वभावप्रभवस्सत्त्वरजोभिभवेनाल्पोद्रिक्तस्तमोगुणः ; शूद्रस्य स्वभावप्रभवस्तु रजस्सत्त्वाभिभवेनात्युद्रिक्तस्तमोगुणः । एभिः स्वभावप्रभवैर्गुणैस्सह प्रविभक्तानि कर्माणि शास्त्रैः प्रतिपादितानि । ब्राह्मणादय एवंगुणकाः, तेषां चैतानि कर्माणि, वृत्तयश्चैता इति हि विभज्य प्रतिपादयन्ति शास्त्राणि ॥ ४१ ॥

ता ॥ एवं सर्वेषां संसारिणां गुणत्रयवश्यत्वमुक्तम् ; अथ तत्तद्गुणतारतम्यवद्धेयोगिनामधिकारिणां यथाधिकारं शास्त्रैर्विभक्तानि कर्मादीनि विविच्यन्ते । तस्य परमप्रस्तुतेन संगत्यर्थमध्यायारम्भप्रक्रान्तं प्रदर्शयति—**त्यागेने**त्यादिना । **संन्यासशब्दार्थादनन्य** इति—श्रुतावपि हि * त्यागेनैके (ना) * संन्यासयोगात् (ना) इत्युभावेकविषयाविति भावः । **एवंभूतस्ये**ति—त्रिविधत्यागयुक्तस्येत्यर्थः । **वृत्त्या सहे**ति—कृषिगोरक्ष्यादीनि हि वक्ष्यमाणानि जीविकाविशेषा इति भावः । अत्र * ब्राह्मणक्षत्रियविशामिति समासो द्विजत्वे सति वेदाधिकारात् । प्राचीनकर्मानुरूपं सत्त्वादिगुणवृद्धिः प्रागेव प्रपञ्चिता ; अतस्तद्धेतुकं कर्मात्र तत्तद्गुणप्रचुरपुरुषासाधारणधर्मतया स्वभाव इति दर्शितम् । एतेन * कर्मवश्या गुणा ह्येते सत्त्वाद्याः पृथिवीपते (वि. २.१३.७०) इति वचनादौपाधिकानां गुणनां चात्र स्वाभाविकतोक्तिशङ्काऽपि निरस्ता । गुणविभागप्रकारो ब्राह्मपुराणादिषु प्रपञ्चितः । तस्यायं संक्षेपः—* तमश्शूद्रे रजः क्षत्रे ब्राह्मणे सत्त्वमुत्तमम् (भा. आश्व. ३९.११) इति । अस्यार्थं वदन्प्रकृतं विवृणोति—**रजस्तमोभिभवेनोद्भूतस्सत्त्वगुण** इति । उत्तमशब्दस्य * रजः क्षत्रे इत्यादिष्वप्यन्वयमाह—**क्षत्रियस्ये**त्यादिना । **अल्पोद्रिक्त** इति शूद्राद्व्यवच्छेदाय । अतीन्द्रियाणां गुणानामपि शास्त्राधीनविभागत्वात्कर्मप्रविभागे गुणानां कर्तृत्वाद्यसंभवाच्च **गुणैस्सहे**त्युक्तम् । गुणापेक्षया शास्त्रेण विभक्ततया गुणप्रविभक्तत्वोपचारादयमेवार्थ उचित इति भावः । कैर्विभक्तानीति शङ्कायां **शास्त्रै**रिति शेषपूरणम् । स्वरूपविभागस्य शास्त्राधीनत्वाभावादसंकीर्णबोधनं विवक्षितमित्याह—**प्रतिपादितानी**ति । विभज्य प्रतिपादनं विवृणोति—**ब्राह्मणादय** इति । कर्मशब्द एव सामान्यतो वृत्तिमपि संगृह्णाति, तादर्थ्याद्वा तदाक्षेप इत्यभिप्रायेणाह—**वृत्तयश्चे**ति । जीवनोपाया इत्यर्थः ॥ ४१ ॥

शमो दमस्तपश्शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्म कर्म स्वभावजम् ॥ ४२

भा ॥ शमः—बाह्येन्द्रियनियमनम्, दमः—अन्तःकरणनियमनम्, तपः—भोगनियमनरूपशास्त्रसिद्धः कायक्लेशः, शौचं—शास्त्रीयकर्मयोग्यता, क्षान्तिः—परैः पीड्यमानस्याप्यविकृतचित्तता, आर्जवं—परेषु मनोनुरूपं बाह्यचेष्टाप्रकाशनम्, ज्ञानम्—परावरतत्त्वयाथात्म्यज्ञानम्, विज्ञानम्—परतत्त्वगतासाधारणविशेषविषयं ज्ञानम्, आस्तिक्यम्—वैदिक[र्थ]स्य कृत्स्नस्य सत्यतानिश्चयः प्रकृष्टः, केनापि हेतुना चालयितुमशक्य इत्यर्थः; भगवान् पुरुषोत्तमो वासुदेवः परब्रह्मशब्दाभिधेयो निरस्तनिखिलदोषगन्धः स्वाभाविकानवधिकातिशयज्ञानशक्त्याद्यसङ्ख्येयकल्याणगुणगणो निखिलवेदवेदान्तवेद्यः, स एव निखिलजगदेककारणं निखिलजगदाधारभूतः, निखिलस्य स एव प्रवर्तयिता; तदाराधनभूतं च वैदिकं कृत्स्नं कर्म, तैस्तैराराधितो धर्मार्थकाममोक्षाख्यं फलं प्रयच्छतीत्यस्यार्थस्य सत्यतानिश्चय आस्तिक्यम्; *वेदैश्च सर्वैरहमेव वेद्यः (१५. १५) * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते (१०. ८) * मयि सर्वमिदं प्रोतम् (७. ७) * भोक्तारं यज्ञतपसां....ज्ञात्वा मां शान्तिमृच्छति (५. २९) * मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय (७. ७) * यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥ (१८. ४६) * यो मामजमनादिं च वेत्ति लोकमहेश्वरम् (१०. ३) इति ह्युच्यते। तदेतद्ब्राह्मणस्य स्वभावजं कर्म ॥ ४२ ॥

ता ॥ *शमो दमः इत्यादौ पूर्वं व्याख्यातानामपि गुणानां पुनर्व्याख्यानं वर्णानुबन्धेन विधानेऽवान्तरविशेषशङ्कापाकरणार्थं *ब्राह्मं कर्मेत्युक्तकर्मत्वसिद्धये, नियमनादिरूपेण पुरुषव्यापारसाध्यत्वज्ञापनार्थं च। अतश्शौचादावपि तदापादनं ग्राह्यम्। अस्ति मतिरस्येत्यास्तिकः; तद्भाव आस्तिक्यं; तच्चाप्रामाणिकेषु भवद्दोषाय; प्रत्यक्षादिसिद्धे तु नासावतिशयः; शास्त्रीयेष्वपि काचित्कसंशयादौ कुदृष्टित्वप्रसङ्गः; अतो—वैदिक[र्थ]स्य कृत्स्नस्येत्युक्तम्। सहपठितविज्ञानादेर्भेदज्ञापनाय सत्यतानिश्चयस्य प्रकृष्टत्वोक्तिः। तद्विवृणोति—केनापीति। वैदिकस्य कृत्स्नस्येत्युक्तं कुदृष्ट्याद्यभिमतवैदिकार्थसंग्रहव्युदासाय प्राधान्येन संकलय्य व्यनक्ति—भगवानित्यादिना। अत्र विशेषणानां प्रागेव व्याख्यातत्वादिह.....। सर्ववेदसारतयोद्धृतस्यार्थस्य तदुपबृंहणेऽस्मिञ्छास्त्रे तथात्वेनैव प्रस्पष्टतामाह—वेदैश्चेति। निखिलवेदवेदान्तवेद्य इत्युक्तार्थक्रमानुसारेण विप्रकीर्णवाक्योद्धारक्रमः। श्लोकार्थं निगमयति—तदेतदिति। ब्रह्मणः कर्म ब्राह्मम्; ब्रह्मशब्दोऽत्र ब्राह्मणजातिपर इत्यभिप्रायेणाह—ब्राह्मणस्येति ॥ ४२ ॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३

भा ॥ शौर्यं—युद्धे निर्भयप्रवेशसामर्थ्यं, तेजः—परैरनभिभवनीयता, धृतिः—आरब्धे कर्मणि विघ्नोपनिपातेऽपि तत्समापनसामर्थ्यं, दाक्ष्यं—सर्वक्रियानिर्वृत्तिसामर्थ्यं, युद्धे चाप्यपलायनम्—युद्धे चात्ममरणनिश्चयेऽप्यनिवर्तनम्, दानम्—आत्मीयस्य धनस्य परस्वत्वापादनपर्यन्तस्त्यागः, ईश्वरभावः—स्वव्यतिरिक्तसकलजननियमनसामर्थ्यम्, एतत् क्षत्रियस्य स्वभावजं कर्म ॥ ४३ ॥

ता ॥ *शूरं भीरुं कविं जडम् (भा. मो. १७४. ३२) इति भीरुप्रतियोगिनि शूरशब्द इत्यभिप्रायेणाह—निर्भयप्रवेशसामर्थ्यमिति। मानसशारीरसंवलनमिदम्। प्रविष्टस्य परैः परिभवे प्रवेशोऽपि दोषस्स्यात्, अतस्तत्परिहाराय तेज इहोक्तमित्याह—परैरनभिभवनीयतेति। दाक्ष्याद्धृतेर्विशेषो विघ्नोपनिपातेऽपीति दर्शितः। प्रवृत्तिसामर्थ्यात्प्रवृत्तापरित्यागो ह्यन्य एव। *युद्धे चापीत्यत्रापिशब्दद्योतितं तीव्रं पलायननिमित्तमाह—आत्ममरणनिश्चये

ऽपीति । अत्रेश्वरभावशब्देन दुष्टनिग्रहशिष्टानुग्रहशक्तिर्विवक्षितेत्यभिप्रायेणाह—**स्वव्यतिरिक्तेति** । **सकलजनेति** स्वराष्ट्राद्यवच्छिन्नविषयम् ॥ ४३ ॥

कृषिगोरक्ष्यवाणिज्यं वैश्यं कर्म स्वभावजम् ।

भा॥ कृषिः—सस्योत्पादनं कर्षणम्, गोरक्ष्यम्—पशुपालनमित्यर्थः, वाणिज्यम्—धनसञ्चयहेतुभूतं क्रयविक्रयात्मकं कर्म, एतद्वैश्यस्य स्वभावजं कर्म ॥ ४३* ॥

ता॥ रूढिं व्युत्पत्तिं चानुसृत्य फलतस्स्वरूपतश्च कृषिं दर्शयति—**सस्योत्पादनं कर्षण**मिति । एवं वाणिज्य-व्याख्यानेऽपि ग्राह्यम् । गौः रक्ष्या यत्र, तत्कर्म गोरक्ष्यमित्यभिप्रायेणाह—**पशुपालन**मिति । रक्ष्यमिति भावार्थे वा, रक्षणमित्यर्थः । गौरक्ष्यमिति वा पाठः । गां रक्षतीति गोरक्षः तस्य कर्म गौरक्ष्यं पशुपालनं ; वणिजः कर्म वाणिज्य-मितिवत् । एवं विशः कर्म वैश्यं ; * गुणवचनब्राह्मणादिभ्यः कर्मणि च (अष्टा. ५.१.१२४) इति ष्यञ् प्रत्ययः ॥४३*

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४

भा ॥ पूर्ववर्णत्रयपरिचर्यारूपं शूद्रस्य स्वभावजं कर्म । तदेतच्चतुर्णां वर्णानां वृत्तिभिस्सह कर्तव्यानां शास्त्रविहितानां यज्ञादिकर्मणां प्रदर्शनार्थमुक्तम् । यज्ञादयो हि त्रयाणां वर्णानां साधारणाः । शमादयोऽपि त्रयाणां वर्णानां मुमुक्षूणां साधारणाः । ब्राह्मणस्य तु सत्त्वोद्रेकस्य स्वाभाविकत्वेन शमदमादयस्सुखोपादाना इति कृत्वा तस्य शमादयः स्वभावजं कर्मेत्युक्तम् । क्षत्रियवैश्ययोस्तु स्वतो रजस्तमःप्रधानत्वेन शमदमादयो दुःखोपादाना इति कृत्वा न तत्कर्मेत्युक्तम् । ब्राह्मणस्य वृत्तिर्याजनाध्यापनप्रतिग्रहाः ; क्षत्रियस्य जनपदपरि-पालनम् ; वैश्यस्य च कृष्यादयो यथोक्ताः ; शूद्रस्य तु कर्तव्यं वृत्तिश्च पूर्ववर्णत्रयपरिचर्यैव ॥ ४४ ॥

ता ॥ शास्त्रान्तरानुसारेण परिचर्यायाः प्रकृतत्रितयानुबन्धित्वमाह—**पूर्ववर्णत्रये**ति । ननु षट्कर्मा ब्राह्मणः, त्रिकर्माणौ क्षत्रियवैश्यौ, शूद्रस्यापि *भार्यारतिश्शुचिर्भृत्यभर्ता श्राद्धक्रियारतः । नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ॥ (याज्ञ. १. ५. १२१) इत्यादयो धर्मा विधीयन्ते ; तत्कथमिह तत्कर्मणामियत्तानिर्देश इत्यत्राह—**तदेतदिति** । प्रदर्श-नीयानुदाहरति—**यज्ञादयो हीति** । प्रदर्शनार्थत्वे हेत्वन्तरमाह—**शमादयोऽपीति** । शमादीनां मोक्षार्थिवर्णत्रयसाधारण्येन कथं ब्राह्मणस्यैव तदुक्तमित्यत्राह—**ब्राह्मणस्य त्विति** । *स्वभावप्रभवैरिति पूर्वोक्तानुविधानात्सहजत्वविवक्षयाऽत्र स्वभावजशब्द इत्यभिप्रायेणाह—**सत्त्वोद्रेकस्य स्वाभाविकत्वेन शमदमादयस्सुखोपादाना** इति । वर्णान्तरगुणसंभेदं निर्वहति—**क्षत्रियवैश्ययो**रिति । **न तत्कर्मेत्युक्त**मिति—तत्कर्मेति नोक्तमित्यन्वयः । उक्तानां वृत्तीनां प्रदर्शनार्थत्वाय चतुर्णां वृत्त्यंशं विविच्य विवृणक्ति—**ब्राह्मणस्य वृत्ति**रित्यादिना । शूद्रधर्मो वृत्तिश्च **याज्ञवल्क्येन** स्मर्यते—* शूद्रस्य द्विजशुश्रूषा तया जीवन्वणिग्भवेत् । शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥ (१. ५. १२०) इति ; मनुस्तत्र विशेषमाह—* विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते (१०. १२३) इति ; तदिदमभिप्रेत्याह—**शूद्रस्य तु कर्तव्यं वृत्तिश्च पूर्ववर्णत्रयपरिचर्यैवेति** । नन्विदमयुक्तं, * भार्यारतिरित्यादेरुक्तत्वात् ; * मां हि पार्थ व्यपाश्रित्येत्यारभ्य, * स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् (९. ३२) इति च स्वयमेवाह ; * वसन्ते दीक्षयेद्विप्रमित्यारभ्य * हेमन्ते शूद्रमेव च । स्त्रियं च वर्षाकाले तु पञ्चरात्रविधानतः ॥ इति भगवत्समाराधनार्थं दीक्षा च विहिता ; तथा * ब्राह्मणैः क्षत्रियैर्वैश्यैश्च कृतलक्षणैः । अर्चनीयश्च सेव्यश्च नित्ययुक्तैस्स्वकर्मसु । सात्त्वतं विधिमास्थाय गीत-

स्संकर्षणेन यः ॥ (भा. भी. ६६. ३९) इति दीक्षितशूद्रादेर्भगवदर्चनादिकं स्पष्टमुक्तम्; तथा युगधर्मान् प्रक्रम्योच्यते—* कृतं नाम युगं पूर्वं यत्र धर्मस्सनातनः । कृतमेव[च] न कर्तव्यं यस्मिन् काले नरोत्तम । ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्च कृतलक्षणाः । कृते युगे [भवन्तोह] समभवन् स्वकर्मनिरतास्सदा । एकवेदसमायुक्ता एक[त]मन्त्रविधिक्रियाः । पृथग्धर्मास्त्वेकवे[दा]द्या धर्ममेकमनुव्रताः । चातुराश्रम्ययुक्तेन कर्मणा कालयोगिना । अकामफलसंयोगाः प्राप्नुवन्ति परां गतिम् ॥ (वि. ध. १०८. १९) इति । **श्रीसात्त्वते** च * अष्टाङ्गयोगयुक्तानां हृद्यागनिरतात्मनाम् । योगिनामधिकारस्स्यादेकस्मिन् हृदयेशये । व्यामिश्रयागमुक्तानां विप्राणां वेदवादिनाम् । समन्त्रे तु चतुर्व्यूहे ह्यधिकारो न चान्यथा । त्रयाणां क्षत्रियादीनां प्रपन्नानां च तत्त्वतः । अमन्त्रमधिकारस्तु चतुर्व्यूहक्रियाक्रमे । सक्रिये मन्त्रचक्रे तु वैभवीये वि[लो]वेकिनाम् । ममतासन्निरस्तानां स्वकर्मनिरतात्मनाम् । कर्मवाङ्मनसैस्सम्यग्भक्तानां परमेश्वरे । चतुर्णामधिकारो वै [प्राप्ते] वृत्ते दीक्षाक्रमे सति ॥ (२. ७-११) इत्यधिकारविशेषनियमः कृतः । सप्तमे च व्रतविधानपरिच्छेदे * दा[नेऽ]नार्चने तु शूद्राणां व्रतकर्मणि सर्वदा । असिद्धान्नं तु विहितं सिद्धं वा ब्राह्मणेच्छया ॥ स्मकर्मणा यथोत्कर्षमभ्येति [च] न तथाऽर्चनात् । तस्मात्स्वेनाधिकारेण कुर्यादाराधनं सदा ॥ सर्वत्राधिकृतो विप्रो वासुदेवादिपूजने । यथा तथा न क्षत्राद्यास्तस्माच्छा[स्त्रार्थ]स्योक्तमाचरेत् ॥ नयेन्नक्ताशनैर्भक्त्या दिनान्येतानि मौद्गलः । व्रताद्यन्ते तु विहितं परिपीडं हि तस्य वै ॥ (५३-५६) इति व्रतविशेषक्रमो दर्शितः । मौद्गलेति भगवच्छास्त्रे शूद्रनाम । परिपीडमुपवासः । तथा मन्त्रेषु चैवं नियमोऽन्यत्र कृतः । * वौषट्स्वाहावषट्कारनिष्ठानां तु प्रतिक्रिया । नमस्कारेण विहिता इति । तथा नारदीये **श्रीमदष्टाक्षरकल्पे** *न स्वरः प्रणवोऽङ्गानि नाप्यन्यविधयस्तथा । स्त्रीणां तु शूद्रजातीनां मन्त्रमात्रोक्तिरिष्यते ॥ (१.१०२) इति । एवमेकादशीव्रतादयोऽपि सर्वसाधारणाः पुराणादिषु पठ्यन्ते । तथान्येऽपि वर्ज्यावर्ज्यनियमाः कतिकति धर्मशास्त्रादिषु कथ्यन्ते । यथा * कपिलाक्षीरपानेन ब्राह्मणीगमनेन च । शूद्रे वेदाक्षरेणैव निष्कृतिर्न विधीयते ॥ (ल. पा. १. ७४) *हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः (याज्ञ. आ. २१) *तेषां स एवाचमनकल्पः, अधिकमहरहः केशश्मश्रुलोमनखवापनम् (आप. २. १. ३. ५, ६) इत्यादि । तस्मात् * जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् । देवताराधनं चैव स्त्रीशूद्रपतनानि षट् ॥ (अत्रि. १३३) इत्यादिकं विहितव्यतिरिक्तवर्णत्रयशुश्रूषाविरुद्धविषयमिति योज्यम् । अपि च * न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः (विह. २४. १०) इत्यादिवचनात्, **जयाख्य**संहितादिषु भागवतानां चतुर्णां समत्ववचनाच्च भगवत्परिचर्यावशाद्वर्णत्रयपरिचर्यानिवृत्तिरपि संभवेत् । अतः कथं * शूद्रस्य तु कर्तव्यं वृत्तिश्च पूर्ववर्णत्रयपरिचर्यैवेति भाषितम्? अत्र ब्रूमः—यद्यपि विहितव्यतिरिक्तविषयाः सर्वनिषेधाः; विशिष्टसंस्कारगुणविशेषादिमतां च शूद्राणामपि धर्मविशेषा विहिताः, तथाऽपि ते सर्वे वर्णत्रयपरिचर्याख्यप्रधानधर्माविरोधेन तन्नियुक्तैश्शूद्रैः तत्परिचर्याभावनयैवानुष्ठेयाः । अत एव ह्यत्रोच्यते—* परिचर्यात्मकं कर्मेति । अन्यथा परिचर्येत्येव वक्तव्यम्; नच निष्प्रयोजनाधिकग्रहणं युक्तम्; आमनन्ति च **रहस्याम्नाय**विदः—* ज्ञानज्ञापनसंप्रेषणकर्मा ब्राह्मणः, ज्ञानपरित्राणकर्मा क्षत्रियः, ज्ञानबीजवर्धनकर्मा वैश्यः, ज्ञानपर्युत्थानकर्मा शूद्रः, कृतयुगस्यान्ते त्रेतायुगस्यादौ ब्राह्मणक्षत्रियवैश्यशूद्रा भिद्यन्ते, तेषां भिन्नानां दृष्टिः न तथा भवति, पथ्या रसना न तथा भवन्ति; पुष्पफलमोषधिवनस्पतयो न तथा दधते; तां दृष्ट्वा ब्राह्मणक्षत्रियवैश्यशूद्राणामसूया प्रादुर्बभूव; शूद्रः प्रथमजातिर्न वः पर्युत्थास्यामीति, वैश्यो द्वितीयजातिः न वो बीजानि वर्धयिष्यामीति, क्षत्रियस्तृतीयजातिर्न वः परित्रास्य इति; तान् ब्राह्मण इत्याह, आस्थिता यूयं न वो

वक्ष्यामीति । अत्र पर्युत्थानं परिचर्या । एवं * शूद्रस्साधुः (वि. ६. २. ६) इत्यादिप्रकरणान्तराणि च द्रष्टव्यानि । एतेन * न शूद्रा भगवद्भक्ताः (विह. २४. १०) इत्यादिस्तुतिवाक्येन वर्णत्रयपरिचर्यादिनिवृत्तिप्रसङ्गोऽपि प्रत्युक्तः, भगवदेकान्तशूद्रस्यैव पर्युत्थानविधेः । भगवद्भक्तिस्तुतिपरत्वादेव हि * सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने इति व्यतिरेकनिन्दा । किं तर्ह्यत्र स्तुतिनिन्दालम्बनम्? आन्तरस्सत्त्वादिगुणोन्मेषः; यदपेक्षया ब्राह्मणादेरेव ब्राह्मण्यादिकं श्रुत्यादिषु कीर्त्यते—* अमौनं च मौनं च निर्विद्याथ ब्राह्मणः (बृ. ५.५. १) इति । * विष्णुं क्रान्तं वासुदेवं विजानन् विप्रो विप्रत्वं गच्छते तत्त्वदर्शी (भा. आनु. १६. २) * चण्डालमपि वृत्तस्थं तं देवा ब्राह्मणं विदुः इत्यादि । यत्तु शारीरसत्त्वादिगुणतारतम्यनिबन्धनं जातिरूपं ब्राह्मण्यादिकं, तस्यान्तरसत्त्वोन्मेषादावप्यनुवृत्तेराशरीरपातं जातिनियमः स्थित एव । तदनुबन्धिनश्च धर्मास्तत एवावतिष्ठन्ते । अत एव हि विदितब्रह्मविद्योऽपि विदुरस्स्वस्य तद्वचनेऽनधिकारमाह—* शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे (भा. उ. ४१. ५) इति । शमादिगुणपौष्कल्ययोगिनि तु शूद्रादौ स्त्रीधर्मिण्यां जनन्यामिवावज्ञानादिनिवृत्तिमात्रविशेषापेक्षया जातिसामान्यवीक्षणप्रतिषेध इति । यथा स्मरन्ति—* एतैस्समेतश्शूद्रोऽपि वार्धके मानमर्हति (याज्ञ. आ. ११५) इति । अत एव *भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते । तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥ (गा. पू. २१९. ८) इत्यादिकमनुपप्लवपर्यन्ततयाऽपि निर्व्यूढम् । साम्योक्तिरपि सर्वोत्कर्षफलादिसाम्यविषया; अपशूद्रनयाद्यविरोधश्च । उक्तं चाचार्यैर्भागवतत्वेन शूद्रस्योत्कर्षे ब्राह्मणस्यापि तेनैवोत्कर्ष इति, पुनर्वैषम्यमिति सर्वं समञ्जसम् । अतस्सुष्ठूक्तं शूद्रस्य वृत्तिकर्तव्ययोरैक्यमिति ॥ ४४ ॥

स्वेस्वे कर्मण्यभिरतस्संसिद्धिं लभते नरः ।
स्वकर्मनिरतस्सिद्धिं यथा विन्दति तच्छृणु ॥ ४५

भा ॥ स्वेस्वे—यथोदिते कर्मण्यभिरतो नरः संसिद्धिं—परमपदप्राप्तिं लभते; स्वकर्मनिरतो यथा सिद्धिं विन्दति—परमपदं प्राप्नोति, तथा शृणु ॥ ४५ ॥

ता ॥ वर्णधर्मविभागो मोक्षशास्त्रे किमर्थ इत्यत्राह—**स्वेस्वे कर्मणीति** । संसिद्धिशब्दस्यात्र परमपदप्राप्तिविषयत्वं प्रकरणात्सिद्धम् । * शाश्वतं पदमव्ययम् (५६) इति हि वक्ष्यति । यद्वा सिद्धिशब्दो * नैष्कर्म्यसिद्धिम् इति वक्ष्यमाणविषयः । तत्पर्यवसानज्ञापनायात्र परमप्राप्यग्रहणम् । ननु स्वकर्मनिरतस्यापि शूद्रस्य कथं परमपदप्राप्तिः? तस्य हि मोक्षसाधनविद्यायामनधिकारश्शारीरके अपशूद्राधिकरणे शिक्षितः । सत्यं, भवान्तराधिकारद्वारा परंपरया परमपदप्राप्तेर्विवक्षितत्वान्न विरोधः । विदुरादिवज्जातिस्मरेषु जन्मान्तरप्रारब्धपरविद्याप्रतिसंधायिषु स्वकर्मणामकरणनिमित्तप्रत्यवायपरिहारार्थं साक्षात्संसिद्धियोग्यत्वं द्रष्टव्यम् । यथोक्तं भगवता शौनकेन—* धर्मव्याधादयोऽप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते । वर्णावरत्वे संप्राप्तास्संसिद्धिं श्रमणी [त]यथा ॥ (वि. ध. १०२. ३०) इति । ननु परिमितफलप्रदानसमर्थेन्द्राद्याराधनरूपाणां तत्तद्वर्णाश्रमकर्मणां कथं परमपदप्राप्तिहेतुत्वमित्यत्रोत्तरं—**स्वकर्मनिरत** इति । *यथेत्यस्य प्रतिनिर्देशत्वात्तच्छब्दः प्रकारपरामर्शीत्याह—**तथा शृण्विति** ॥ ४५ ॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६

भा ॥ यतो भूतानामुत्पत्त्यादिका प्रवृत्तिः, येन च सर्वमिदं ततम्, स्वकर्मणा तं—मामिन्द्राद्यन्तरात्मतयाऽवस्थितमभ्यर्च्य मत्प्रसादान्मत्प्राप्तिरूपां सिद्धिं विन्दति मानवः, मत्त एव सर्वमुत्पद्यते, मया च सर्वमिदं ततमिति पूर्वमेवोक्तम् * अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जय ॥ (७. ६) * मया ततमिदं सर्वं जगदव्यक्तमूर्तिना (९. ४) * मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् (९. १०) * अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते (१०. ८) इत्यादिषु ॥ ४६ ॥

ता ॥ सर्वकारणभूतस्सर्वान्तर्यामी परमात्मा स्वसृज्यस्वशरीरभूतेन्द्रादिवाचकैश्शब्दैराम्नायत इति तत्समाराधनत्वात्संसिद्धिसाधनत्वं वर्णाश्रमधर्माणामुपपन्नमित्युच्यते—* यतः प्रवृत्तिरिति श्लोकेन । प्रवृत्तिशब्दस्यात्र चेष्टामात्रपरत्वव्युदासायाह—**उत्पत्त्यादिके**ति । चेतनाचेतनवाचिभूतशब्दसमन्वितः प्रवृत्तिशब्दोऽत्र विशेषकाभावात्सर्वविधव्यापारसंग्राहक इति भावः । सर्वविधकारणत्वोपयुक्त आकार उच्यते—* येन सर्वमिदं ततमिति । **ततं** ; नियन्तृत्वेनेति हृदयम् । * तमिति परोक्षतया निर्दिष्टः कथं **मां**मिति व्याख्यायत इति शङ्कायां * यत इत्यनुवादस्य प्राप्तयर्थं पुरोवादं स्मारयति—**मत्त एवे**ति । कारणत्वसर्वाधिकत्वसर्वव्यापित्वसर्वनियन्तृत्वादिषु यथासंभवं वचनानि योज्यानि ॥ ४६ ॥

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।

भा ॥ एवं त्यक्तकर्तृत्वादिको मदाराधनरूपस्स्वधर्मः—स्वेनैवोपादातुं योग्यो धर्मः ; प्रकृतिसंसृष्टेन हि पुरुषेणेन्द्रियव्यापाररूपः कर्मयोगात्मको धर्मस्सुकरो भवति ; अतः कर्मयोगाख्यः स्वधर्मो विगुणोऽपि परधर्मात्—इन्द्रियजयनिपुणपुरुषधर्मात् ज्ञानयोगात् सकलेन्द्रियनियमनरूपतया सप्रमादात् कदाचित्स्वनुष्ठितात् श्रेयान् ॥ ४६ॅ ॥

ता ॥ एवं वर्णाश्रमधर्माणां स्वरूपेणापरित्याज्यत्वं परप्राप्तिसाधनत्वप्रकारश्च दर्शितः । अथ तेषामेव * दैवमेवापरे यज्ञम् (४. २५) इत्याद्युक्तप्रधानधर्मयोगेन नियमविशेषादियोगेन च कर्मयोगान्तर्भूतानां ज्ञानयोगाधिकारिणामप्यपरित्याज्यत्वं प्रागुक्तं प्रत्यभिज्ञाप्यते—* श्रेयान् स्वधर्मः इत्यादिभिः । अत्र स्वधर्मशब्दो न वर्णाश्रमनियतधर्मपरः, तथा सति परधर्मशब्देन वर्णान्तरादिधर्मोपादानप्रसङ्गात् ; नच तद्युक्तम्, तस्य निषिद्धत्वेनाधर्मतया स्वधर्मस्य तत्र प्रशस्यतमत्वलक्षणश्रेयस्त्ववचनायोगात् ; नहि पापात्पुण्यं श्रेय इति कथ्येत ; अत एव वेदबाह्यधर्माद्वैदिकस्य धर्मस्य श्रेयस्त्वमुच्यत इत्यपि न योज्यम् ; क्षत्रियस्यार्जुनस्य * श्रेयो भोक्तुं भैक्षम् (२. ५) इत्युक्तब्राह्मणधर्मभूतप्रव्रज्याप्रतिषेधोऽयमिति चेन्न, तत्प्राप्तौ निषेधायोगात्, अप्राप्तौ पापत्वादेव दत्तोत्तरत्वात् । आपत्स्वनन्तरा च वृत्तिर्दुस्त्यजा । अतोऽत्र स्वधर्मपरधर्मशब्दौ प्राग्वत्कर्मयोगज्ञानयोगविषयौ व्याख्यातौ । * एवमित्यारभ्य * स्वधर्मः इत्यन्तमेकं वाक्यम्, अन्यथोत्तरग्रन्थानन्वयप्रसङ्गात् । स्वशब्दस्य जातिविवक्षाव्युदासायाह—**स्वेनैवे**ति । * स्वभावनियतं कर्मेत्यनन्तरोक्त्यनुसारेण कर्मविषयस्स्वधर्मशब्दः प्रकरणान्निष्कामकर्मविषयः । तत्र—**स्वेनैवोपादातुं योग्य** इत्युक्तं विवृणोति—**प्रकृती**ति । विगुणशब्दस्य त्याज्यत्वशङ्कापरत्वमाह—**विगुणोऽपी**ति । गत्यन्ताभावादमुख्य [त्वकल्पेऽनुपपत्तेर] कल्पत्वेनानुमतोऽपीत्यर्थः । स्वशब्दनिर्दिष्टात्कर्मयोगार्हादन्योऽत्र परः ; स च ज्ञानयोगार्ह इत्यभिप्रायेणाह—**इन्द्रियजये**ति । सप्रमादस्य स्वनुष्ठितत्वं कथं स्यादित्यत्राह—**कदाचिदि**ति ॥ ४६ॅ ॥

भा ॥ तदेवोपपादयति—

स्वभावनियतं कर्म कुर्वन् नाप्नोति किल्बिषम् ॥ ४७

भा ॥ प्रकृतिसंसृष्टस्य इन्द्रियव्यापाररूपतया स्वभावत एव नियतत्वात्कर्मणः कर्म कुर्वन् किल्बिषं—संसारं न प्राप्नोति, अप्रमादत्वात्कर्मणः। ज्ञानयोगस्य सकलेन्द्रियनियमनसाध्यतया सप्रमादत्वात्तन्निष्ठस्तु प्रमादात्किल्बिषं प्रतिपद्येतापि ॥ ४७ ॥

ता ॥ स्वभावनियतमित्यत्र जातिनियतत्वशङ्काव्युदासायाह—**तदे**वेति। यथा विषतरुनिम्बतिन्त्रिण्यादिजातानां जन्तूनां स्वभावनियता आहारा इति भावः। किल्बिषशब्दोऽत्रानिष्टतमत्वद्योतनाय संसारशब्देन तत्फलपर्यन्ततया व्याख्यातः। ज्ञानयोगनिष्ठासंभावितनिषेधाय वा, विशेषनिषेधश्शेषाभ्यनुज्ञापर इत्यभिप्रायेण वाऽऽह—**ज्ञानयोगस्ये**ति ॥ ४७ ॥

भा ॥ अतः कर्मनिष्ठैव ज्यायसीति तृतीयाध्यायोक्तं स्मारयति—

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८

भा ॥ अतस्सहजत्वेन सुकरमप्रमादं च कर्म सदोषं—सदुःखमपि न त्यजेत्; ज्ञानयोगयोग्योऽपि कर्मयोगमेव कुर्वीतेत्यर्थः। सर्वारम्भाः,—कर्मारम्भाः ज्ञानारम्भाश्च हि दोषेण—दुःखेन धूमेनाग्निरिवावृताः। इयांस्तु विशेषः—कर्मयोगस्सुकरोऽप्रमादश्च, ज्ञानयोगस्तद्विपरीत इति ॥ ४८ ॥

ता ॥ अर्थान्तरपरत्वशङ्काव्युदासायादरातिशयविवक्षया, पुनरुक्तिपरिहाराय च **तृतीयाध्यायोक्तं स्मारयती**त्युक्तम्। **सहजत्वेन**—वासनानियतत्वादित्यर्थः। ततः कथं त्याज्यत्वाभाव इत्यत्राह—**सुकर**मिति। दोषशब्देन पापविवक्षा न युक्ता, विहिते तदयोगात्; तथा च *न त्यजेदिति न युक्तम्, पापांशस्य सर्वैः परित्याज्यत्वात्; अतः कायक्लेशादिमात्रगर्भत्वमिह सदोषत्वमित्युच्यते, तावन्मात्रेऽप्यलसानां त्याज्यताबुद्धिस्स्यादित्यभिप्रायेणाह—**सदुःख**मपीति। एतेन कापिलमतान्वारोहेण सदोषमपीत्यनुवाद इति व्याख्यान्तरं निरस्तम्; मुमुक्षोः कथं शास्त्रीये श्रेयस्त्वेन चोक्ते क्षुद्रक्लेशासहत्वेन त्याज्यताबुद्धिः? अतः प्रसङ्गाभावात्प्रतिषेधो न युक्त इत्यत्राह—**ज्ञानयोगयोग्योऽपी**ति। अपिशब्दोऽन्यस्य कैमुत्यज्ञापनार्थः। अक्लेशोपायदर्शने स्वाधिकारमप्रतिसंधाय तत्र प्रवृत्तिस्स्यादिति ततो नियम्यत इत्यर्थः। सदुःखत्वनिर्दुःखत्वलक्षणवैषम्यमन्वास्याप्रमादत्वादिभिर्नियम उक्तः; अथ सदुःखत्वमपि द्वयोस्समानमित्युच्यते—*सर्वारम्भा हीत्यर्धेन। **कर्मारम्भाः ज्ञानारम्भाश्चे**त्यनेन सर्वशब्दस्यात्र प्रकृतशास्त्रीयकात्स्न्यपरत्वमाह। दुःखसाम्ये सति किमन्यतरनियमेन? कथं च [न] तत्तस्य हेतुरित्यत्राह—**इया**निति। कर्मारम्भेषु कायक्लेशमात्रम्; ज्ञानारम्भेषु त्वत्यासन्नत्वेऽपि कफोणिगुडायमानप्रत्यग्विषयान्वेषणेन इन्द्रियमनोनियमनप्रयासो दुःखात्मक इति भावः ॥ ४८ ॥

असक्तबुद्धिस्सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९

भा ॥ सर्वत्र—फलादिष्वसक्तबुद्धिः, जितात्मा—जितमनाः, परमपुरुषकर्तृत्वानुसंधानेनात्मकर्तृत्वे विगतस्पृहः, एवं त्यागादनन्यत्वेन निर्णीतेन संन्यासेन युक्तः कर्म कुर्वन् परमां नैष्कर्म्यसिद्धिमधिगच्छति—परमां ध्याननिष्ठां ज्ञानयोगस्यापि फलभूतामधिगच्छतीत्यर्थः। वक्ष्यमाणध्यानयोगार्हां सर्वेन्द्रियकर्मोपरतिरूपामधिगच्छति ॥ ४९ ॥

ता ॥ * सर्वत्रासक्तबुद्धिः इत्युक्तेऽपि पुनः * विगतस्पृहः इत्येतत्फलसङ्गनिवृत्तिरूपत्यागसहपठितकर्तृत्वत्याग-विषयत्वौचित्यात् स्वप्रादिष्वपि स्वात्मनि कर्तृत्वानुसंधानप्रसङ्गनिवृत्तिरूपत्यागकाष्ठाविवक्षयेत्याह—**आत्मकर्तृत्वे विगत-स्पृह** इति । * संन्यासेनाधिगच्छतीति न ज्ञानयोगादिपरम्, कर्म न त्यजेदिति प्रकृतानन्वयात्, अध्यायारम्भोक्त-संन्यासविषयत्वौचित्याच्चेत्यभिप्रायेणाह—**एवं त्यागादनन्यत्वेन निर्णीतेने**ति । अत्र नैष्कर्म्यसिद्धिशब्दो न मोक्ष-विषयः, * सिद्धिं प्राप्त इत्यादिना पुनः कर्तव्यविधानात्; नापि ज्ञानयोगमात्रविषयः, * परमामिति विशेषणान्नैष्कर्म्य-शब्दमात्रेण च तद्विवक्षोपपत्तेः; अतोऽत्र ज्ञाननिष्ठाफलप्रारम्भो विवक्षित इत्यभिप्रायेणाह—**परमां ध्याननिष्ठामिति** । नैष्कर्म्यस्य सिद्धिमिति समासवशात्परमत्वविशेषणशक्त्या वा सिद्धं विवृणोति—**ज्ञानयोगस्यापि फलभूतामिति** । उक्तार्थ-परत्वमुत्तरग्रन्थानुगुण्येनाह—**वक्ष्यमाणध्यानयोगावाप्तिमित्यादिना** । निर्गतकर्मा निष्कर्मा, तस्य भावो नैष्कर्म्यमिति व्युत्पत्तिं व्यनक्ति—**सर्वेन्द्रियकर्मोपरतिरूपामिति** ॥ ४९ ॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५०

भा॥ सिद्धिं प्राप्तः—**आप्रयाणादहरहरनुष्ठीयमानकर्मयोगनिष्पाद्यध्यानसिद्धिं प्राप्तः, यथा—येन प्रकारेण वर्तमानो ब्रह्म प्राप्नोति, तथा समासेन मे निबोध। तदेव ब्रह्म विशेष्यते—निष्ठा ज्ञानस्य या परेति। ज्ञानस्य ध्यानात्मकस्य या परा निष्ठा—परमप्राप्यमित्यर्थः** ॥ ५० ॥

ता ॥ * सिद्धिं प्राप्तः इत्यस्योक्तानुवादतां सप्रकारहेतुनिर्देशेनाह—**आप्रयाणादिति** । सिद्धिं प्राप्तस्य **ब्रह्म-प्राप्त्यभिधानात्तद्व्यतिरिक्तविषयत्वज्ञापनाय—ध्यानसिद्धिमित्युक्तम्** । * यथेत्यस्यानन्तरग्रन्थानुसारेण पुरुषव्यापारोपादेय-प्रापकप्रकारपरतामाह—**येन प्रकारेण वर्तमान** इति । **मे निबोध**—मत्तो निश्चयेनावधारयेत्यर्थः । परमे फले ह्युपायो नितिष्ठति; अतस्तदेवोपायपर्यवसानभूमितया निष्ठेत्युच्यत इत्यभिप्रायेणाह—**तदेव ब्रह्म विशेष्यत** इति । ज्ञानशब्द-स्यात्रानन्तरोच्यमानध्यानविश्रान्तिमाह—**ध्यानात्मकस्ये**ति ॥ ५० ॥

बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च । शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते ॥ ५३

भा॥ **बुद्ध्या विशुद्धया—यथावस्थितात्मतत्त्वविषयया युक्तः, धृत्या आत्मानं नियम्य च—विषय-विमुखीकरणेन योगयोग्यं मनः कृत्वा, शब्दादीन् विषयांस्त्यक्त्वा—असन्निहितान् कृत्वा, तन्निमित्तौ च राग-द्वेषौ व्युदस्य, विविक्तसेवी—सर्वैर्ध्यानविरोधिभिर्विविक्ते देशे वर्तमानः, लघ्वाशी—अत्यशनानशनरहितः, यतवाक्कायमानसः—ध्यानाभिमुखीकृतकायवाङ्मनोवृत्तिः, ध्यानयोगपरो नित्यम्—एवंभूतस्सन् आप्रयाणा-दहरहर्ध्यानयोगपरः, वैराग्यं समुपाश्रितः—ध्येयतत्त्वव्यतिरिक्तविषयदोषावमर्शेन तत्रतत्र विरागतां वर्धयन्, अहंकारम्—अनात्मन्यात्माभिमानं, बलं—तद्बुद्धिहेतुभूतवासनाबलं, तन्निमित्तं दर्पं कामं क्रोधं परिग्रहं विमुच्य, निर्ममः—सर्वेष्वनात्मीयेष्वात्मीयबुद्धिरहितः, शान्तः—आत्मानुभवैकसुखः, एवंभूतो ध्यानयोगं कुर्वन् ब्रह्मभूयाय कल्पते—[ब्रह्मभावाय कल्पते;] सर्वबन्धविनिर्मुक्तो यथावस्थितमात्मानमनुभवतीत्यर्थः** ॥ ५१–५३ ॥

ता ॥ बुद्धिशब्दोऽत्र प्रस्तुतब्रह्मशब्दाभिप्रेतविषयबुद्धिगोचरः, तस्याश्शुद्धिश्चासमग्रविषयत्वसंशयविपर्ययरूपदोषराहित्यमित्याह—**यथावस्थितात्मतत्त्वविषयये**ति । * धृत्येति पूर्वोक्तसप्रकारसात्त्विकधृतिपरामर्शमाह—**विषयविमुखीकरणेने**ति । अत्र धृत्या मनोनियमनं कर्मोक्तम्; अपि च पूर्वमेव त्यक्तविषयस्य कोऽसौ तदानींतनस्त्याग इत्यत्राह—**असन्निहितान् कृत्वे**ति । विषयसन्निधिर्हि विजितेन्द्रियमपि क्षोभयेदिति भावः । * रागद्वेषौ व्युदस्येति वैषयिकरागद्वेषयोर्व्युदासस्यापि तादात्विकविषयत्वाय, * वैराग्यं समुपाश्रितः इत्यनेन पुनरुक्तिपरिहाराय चाह—**तन्निमित्तावि**ति । एतेन विषयासन्निधानफलं प्रदर्शितम् । यद्वा विप्रकृष्टेष्वपि सूक्ष्मसङ्गो निरोद्धव्य इति भावः । विविक्तत्वं रहितत्वम्; तत्प्रकृतोपयोगेन विशिनष्टि—**सर्वैर्ध्यानविरोधिभिर्विविक्ते देश** इति । * लघ्वाशी इत्यनेन पूर्वोक्तं * नात्यश्नतः (६.१६) इत्यादिकं स्मार्यत इत्याह—**अत्यशनानशनरहित** इति । * धृत्याऽऽत्मानं नियम्य चेत्यादिना * यतवाक्कायमानसः इत्यस्य पुनरुक्तिपरिहारायाह—**ध्यानाभिमुखीकृतकायवाङ्मनोवृत्तिरि**ति । कायस्याभिमुखीकरणं स्थिरासनादिपरिग्रहः; वाचस्तु प्रणवादिव्यतिरिक्तवर्जनम्; मनसस्तु शुभाश्रयालम्बनम् । उक्तानां ध्यानयोगशेषत्वमाह—**एवंभूतस्सन्नि**ति । नित्यशब्दविवक्षितमाह—**आप्रयाणादहरहरि**ति । * रागद्वेषौ व्युदस्येति वैषयिकरागद्वेषयोर्व्युदासोक्तेः, * वैराग्यं समुपाश्रित इत्येतदाभिमानिकविषयम्, तत्र सम्यगुपाश्रयणं पूर्वसिद्धस्यापि तस्य [द्रा]सम्यगवस्थापनमित्यभिप्रायेण—**विरागतां वर्धयन्नि**त्युक्तम् । एवमहंकारादिविमोचनेऽपि द्रष्टव्यम् । शरीरमनःप्राणादिग्लानां योगविरोधित्वाभावात् **वासनाबलमि**ति विशेषितम् । दर्पोऽत्राहंकारबलहेतुकोऽङ्गीकर्तव्यानङ्गीकारः । योगित्वशान्तत्वादिनिमित्तोऽपि दर्पस्त्याज्यः, * हृष्टो दृप्यति दृप्तो धर्ममतिक्रामति (आप. १. १३. ४) इति स्मरणात् । मनोवाक्कायव्यापारनिवृत्त्यादेरुक्तत्वाच्छान्तशब्दोऽत्र शमहेतुविशेषपर इत्याह—**आत्मानुभवैकसुख** इति । इन्द्रियव्यापारोपरतिः क्रोधादिनिवृत्तिश्च बाह्यसुखनिस्स्पृहत्वात्, तच्च प्रभूतात्मस्वसुखलाभादिति भावः । उक्तेषु सर्वेषु ध्यानयोगस्याङ्गित्वमाह—**एवंभूतो ध्यानयोगं कुर्वन्नि**ति । ध्यानमेवात्र योगः, ध्यानेन वा योगः । अनन्तरश्लोकार्थपरामर्शेन ब्रह्मशब्दस्यात्र शुद्धात्मविषयतामाह—**सर्वबन्धे**ति ॥ ५१–५३ ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४

भा ॥ ब्रह्मभूतः—आविर्भूतापरिच्छिन्नज्ञानैकाकारमच्छेषतैकस्वभावात्मस्वरूपः, * इतस्त्वन्यां प्रकृतिं विद्धि मे पराम् (७. ५) इति हि स्वशेषतोक्ता; प्रसन्नात्मा—क्लेशकर्मादिभिरकलुषस्वरूपो मद्व्यतिरिक्तं न किंचन भूतविशेषं प्रति शोचति; न किंचन काङ्क्षति; अपितु मद्व्यतिरिक्तेषु सर्वेषु भूतेषु अनादरणीयतायां समो निखिलं वस्तुजातं तृणवन्मन्यमानो मद्भक्तिं लभते परां—मयि सर्वेश्वरे निखिल[जगदुद्भवस्थितिप्रलयलीले] जगदुदयविभवलयलीले निरस्तसमस्तहेयगन्धेऽनवधिकातिशयासंख्येयकल्याणगुणगणैकताने लावण्यामृतसागरे श्रीमति पुण्डरीकनयने स्वस्वामिन्यत्यर्थप्रियानुभवरूपां परां भक्तिं लभते ॥ ५४ ॥

ता ॥ एवं कर्मयोगादिसाध्यप्रत्यगात्मानुभवस्य परभक्त्यधिकारापादकत्वमुच्यते—* ब्रह्मभूतः इति श्लोकेन । तत्रिमायेण परशेषतैकस्वभावत्वस्याप्याविर्भाव उक्तः । योगसाध्यं ब्रह्मात्यमिह ब्रह्मत्वमित्यभिप्रायेणापरिच्छिन्नज्ञानाविर्भावोक्तिः । शेषत्वस्य स्वरूपानुबन्धित्वं प्रागेवोक्तमित्याह—**इतस्त्वन्यामि**ति । * रागादिदूषिते चित्ते नास्पदी मधुसूदनः

(वि. ध. ९. १०) इत्याद्युक्तपरभक्त्यनर्हतानिवृत्तिः * प्रसन्नात्मेत्युच्यत इत्याह—**क्लेशकर्मादिभिरकल्मषस्वरूप** इति । आदिशब्देन विपाकाशययोर्ग्रहणं, तयोरपि कालुष्यरूपत्वात्, * क्लेशकर्मविपाकाशयैः (यो. सू. १. २४) इति सन्नियोगशिष्टत्वाच्च । अविद्यास्मितादयः पञ्च क्लेशाः; कर्म पुण्यपापरूपं, जात्यायुर्भोगाः विपाकाः, आशयाः संस्काराः । *यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते (६. २२) इति प्रागुक्तं *न शोचतीति परामृष्टम् । तथा * यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः (६. २२) इत्युक्तं *न काङ्क्षतीति स्मारितम् । अत्र न प्रहृष्यतीति पाठान्तरमप्रसिद्धत्वादनङ्गीकृतम् । तत्रात्मानुभवसुखेन बाह्यवैतृष्ण्यं तावज्जायते, परमात्मनस्तु प्रत्यगात्मनोऽप्यधिकसुखतया श्रुतत्वात्तदनुबुभूषा स्थायिनीत्यभिप्रायेण मद्व्यतिरिक्तशब्दः । शोककाङ्क्षानुदयहेतुः * सम इत्युच्यत इत्यभिप्रायेण—**अनादरणीयतायां सम इत्युक्तम्** । तुल्यानादर इत्यर्थः । परावरतत्त्वविवेकफलमन्यानादरसाम्यं व्यनक्ति—**निखिलमिति** । **वस्तुजातमित्यनेन** ब्रह्मादिस्तम्बपर्यन्तानामेव मेर्वपेक्षया माषसर्षपादीनामिवावान्तरोत्कर्षस्यानादरयोग्यत्वं सूचितम् । **तृणवदिति**—नहि रत्नपर्वतमारुरुक्षोः पलालकूटे सङ्गस्यादिति भावः । अत्र मच्छब्देन परभक्त्युत्पत्तिविवृद्ध्यर्थतया पूर्वत्र शास्त्रान्तरेषु च प्रपञ्चितानामुपासनदशायामनुसंधेयानां चाकाराणामभिप्रेतत्वमाह—**मयि सर्वेश्वर** इत्यादिभिः । **सर्वेश्वर** इति—ईशितव्यस्य बद्धस्य किं तथाभूतैः ईशितव्यान्तरैरिति भावः । **निखिलजगदुदयविभवलयलील** इति—* कारणं तु ध्येयः (अथर्व. ३) इति हि श्रुतिरिति भावः । यद्वा करणकलेवरप्रदानादिभिर्महोपकारके चतुर्विधभूतहेतुभूते तस्मिन् तिष्ठति सृष्टिसंहारकर्मतयैवावस्थितः कोऽन्यस्समाश्रयणीय इति भावः । **निरस्तसमस्तहेयगन्ध** इति—नह्यस्मिन्यथावत्प्रतीते वस्त्वन्तरेष्विवावज्ञाविमुख्यादिकारणमस्तीति भावः । **अनवधिके**त्यादि—एकैकगुणप्रकर्षोऽपि चित्ताकर्षकः; किमुतैवं संभूत इति भावः । यद्धि परं सुलभं च तदेव ह्याश्रयणीयमिति सौलभ्योपयुक्तगुणानामप्यत्र संग्रहः । **लावण्यामृतसागर** इति शुभाश्रयविग्रहगुणोपलक्षणम् । **श्रीमती**ति—श्रीर्हि सर्वेषामाश्रयणीया, साऽप्येनं नित्यमाश्रितेति हृदयम् । श्रीयते श्रयते चेति श्रीशब्दो निरुक्तः । मतुप् नित्ययोगे । श्रुतिश्च * ह्रीश्च ते लक्ष्मीश्च पत्न्यौ (ना) इत्यादिका । स्मर्यते च—* नित्यैवैषा जगन्माता विष्णोश्श्रीरनपायिनी (वि. १. ८. १७) इति । एतेनोपास्यत्वप्राप्यत्वादिकं सर्वं सपत्नीकस्येति ज्ञापितम् । आमनन्ति च रहस्याम्नायविद इममेवार्थं—* नित्यसन्निहितशक्तिरिति । **पुण्डरीकनयन** इत्यवयवसौन्दर्योपलक्षणम् * तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद (छा. १. ६. ७) इति सर्वपापविमोक्षकामस्योपासनार्थतया पुण्डरीकाक्षत्वमप्युपदिष्टम् । * चक्षुषा तव सौम्येन पूताऽस्मि (रा. आ. ७४. १३) * यं पश्येन्मधुसूधनः (भा. मो. ३४९. ७३) इत्यादिषु च तद्वीक्षणस्य पावनतमत्वमुच्यत इति भावः । भक्त्युत्पत्त्यादौ सर्वमिदमेकतः, स्वामित्वं चैकतः, न चासावेकोनसर्वस्वामीत्यभिप्रायेणाह—**स्वस्वामिनी**ति ॥ ५४ ॥

भा ॥ तत्फलमाह—

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५

भा ॥ स्वरूपतः स्वभावतश्च योऽहम्, गुणतो विभूतितोऽपि यावांश्चाहम्, तं मामेवंरूपया भक्त्या तत्त्वतोऽभिजानाति; मां तत्त्वतो ज्ञात्वा तदनन्तरम्—तत्त्वज्ञानानन्तरं ततो—भक्तितो मां विशते—प्रविशति ।

तत्त्वतस्स्वरूपस्वभावगुणविभूतिदर्शनोत्तरकालभाविन्या अनवधिकातिशयभक्त्या मां प्राप्नोतीत्यर्थः। अत्र तत इति प्राप्तिहेतुतया निर्दिष्टा भक्तिरेवाभिधीयते, * भक्त्या त्वनन्यया शक्यः (११. ५४) इति तस्या एव तत्त्वतः प्रवेशहेतुत्वाभिधानात् ॥ ५५ ॥

ता ॥ तत्फलमाहेति—अव्यवहितं व्यवहितं चेति शेषः । पूर्वग्रन्थोक्तजगत्कारणत्वलक्षितसर्वेश्वरास्यधर्म्यभिप्रायेण * य इत्यस्यार्थमाह—स्वरूपत इति । विधिनिषेधरूपशोधकवाक्यावसितसर्वविद्यानुसंधेयस्वरूपनिरूपकधर्मयोगः स्वभावत इति निर्दिष्टः । स्वरूपनिरूपकधर्माभावे अनिरूपिस्वरूपतया निःस्वभावमेव वस्तु स्यात् । स्वरूपशब्दस्स्वरूपनिरूपकधर्मपरः, स्वभावशब्दस्तु सौलभ्यपर इति केचित् । यावच्छब्दोहि प्रकर्षनिकर्षपरामर्शयोग्याकारविषयो युक्त इत्यभिप्रायेणाह—गुणतो विभूतितोऽपि यावांश्चाहमिति । गुणशब्दोऽत्र निरूपितस्वरूपविशेषकज्ञानशक्त्यादिसमस्तधर्मविषयः । * यावान्यश्चेत्यनयोर्व्युत्क्रमेण व्याख्यानं बुद्ध्यारोहक्रमप्रदर्शनार्थम् । * तत्त्वत इत्यस्य * यावान्यश्चेत्यत्रानपेक्षणात् *अभिजानातीत्यत्र संशयादिव्युदासाय तदपेक्षणाच्च तत्त्वतोऽभिजानातीति योजितम् । *मां तत्त्वतोऽभिजानातीत्युक्तस्यैव * मां तत्त्वतो ज्ञात्वेत्यनुभाषणमुपायभूतस्यापि स्वादुतमतया सुदुर्लभत्वेनादरातिशयार्थम् । * तत्त्वतो ज्ञात्वेत्यनेनैव आनन्तर्यसिद्ध्यर्थहेतुपौष्कल्यज्ञापकानुवादस्य सिद्धत्वात्, * तदनन्तरमित्यनेनैव प्रवेशस्यानन्तर्यकण्ठोक्तेः, * भक्त्या त्वनन्ययेत्यादौ प्रवेशेऽपि हेतुतया भक्तेरेव प्रागुक्तत्वाच्च ततो भक्तितो मां विशते इत्येवान्वयो दर्शितः । प्रवेष्टुमिति प्रागुक्तैकार्थ्यज्ञापनाय परस्मैपदसिद्धये च प्रविशतीत्युक्तम् । यथावज्ज्ञानमपि काष्ठाप्राप्तभक्तेः । अन्योन्याश्रयणं च भक्तेः पर्वभेदात्परिहृतम् । सैव तु तथाविधावस्था साक्षान्मोक्षसाधनमित्याह—तत्त्वत इत्यादिना । दर्शनशब्देनानुभाषणात् * तत्त्वतोऽभिजानातीत्यस्य साक्षात्कारपरत्वं व्यञ्जितम् । परभक्त्याऽपि तत्त्वज्ञानमेव साध्यं, तदेव तु साक्षान्मोक्षसाधनमिति कुदृष्टिमतमपाकरोति—अत्रेति । एवकारेण दर्शनव्यवच्छेदः । यद्यप्यत्र भक्तिशब्दो व्यवहितः, तत्त्वज्ञानं त्वव्यवहितं, तथाऽपि व्यवहितपरामर्श एव युक्तः ; अन्यथा * तत्त्वतो ज्ञात्वेत्यादिना पुनरुक्तिप्रसङ्गात् । अत्र दर्शनजनकभक्त्यनुवादे प्रयोजनाभावात्सैव तदुत्तरावस्था परामृश्यत इति भावः । प्रागुक्तं हेतुमाह—भक्त्या त्वनन्ययेति । अयमभिप्रायः—उपक्रमन्यायात्पूर्वं प्रबलं, स्पष्टास्पष्टयोश्च स्पष्टानुसारेणान्यद्वमयितव्यमिति ॥ ५५ ॥

भा ॥ एवं वर्णाश्रमोचितनित्यनैमित्तिककर्मणां परित्यक्तफलादिकानां परमपुरुषाराधनरूपाणामनुष्ठितानां विपाक उक्तः । इदानीं काम्यानामपि कर्मणामुक्तेनैव प्रकारेणानुष्ठितानां स एव विपाक इत्याह—

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६

भा ॥ न केवलं नित्यनैमित्तिकानि कर्माणि, अपितु सर्वाणि काम्यान्यपि कर्माणि, मद्व्यपाश्रयः—मयि सन्यस्तकर्तृत्वादिकः, कुर्वाणो मत्प्रसादाच्छाश्वतं पदमव्ययम्—अविकलं प्राप्नोति । पद्यत इति पदम् ; मां प्राप्नोतीत्यर्थः ॥ ५६ ॥

ता ॥ पूर्वत्र ज्ञाननिष्ठोक्ता, अनन्तरं कर्मनिष्ठोच्यत इति शङ्काव्युदासाय पूर्वत्रापि कर्मनिष्ठायामेवावान्तरविशेषविवक्षामनुवदन् संगतिमाह—एवमिति । विपाकोऽत्र पूर्वश्लोकद्वयोक्तपरभक्तिपरज्ञानपरमभक्तिपर्यन्तः । विहितकर्मणां पूर्वमुक्तत्वात् * सर्वकर्माण्यपीति निषिद्धानुष्ठानं भगवदनन्यतास्तुत्यर्थमुपक्षिप्यत इति स्वैराभिलाषिशङ्करा[शाशङ्का]दि-

मतमपाकरोति—**इदानीं काम्यानामपि कर्मणा**मिति। सर्वशब्दोऽत्र शास्त्रीयेष्वेवानुक्तसंग्रहणार्थ इति भावः। तदेव विवृणोति—**न केवल**मित्यादिना। पूर्वश्लोकस्थप्राप्यमेवात्रापि सविशेषणपदशब्देन निर्दिष्टमित्यभिप्रायेण निर्वक्ति—**पद्यत** इति ॥ ५६ ॥

भा ॥ यस्मादेवं, तस्मात्,

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तस्सततं भव ॥ ५७

भा ॥ चेतसा—आत्मनो मदीयत्वमन्नियाम्यत्वबुद्धया, उक्तं हि *मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा (३. ३०) इति ; सर्वकर्माणि सकर्तृकाणि साराध्यानि मयि संन्यस्य, मत्परः—अहमेव फलतया प्राप्य इत्यनुसंदधानः, कर्माणि कुर्वन्निममेव बुद्धियोगमुपाश्रित्य सततं मच्चित्तो भव ॥ ५७ ॥

ता ॥ उक्तं परमपुरुषार्थसाधनत्वमनन्तरोपायानुशासनहेतुरित्याह—**यस्मादेव**मिति। चेतश्शब्दसाफल्याय तदभिप्रेतं चेतसो भगवति कर्मसंन्यासकरणत्वं येन प्रकारेण, तमाह—**आत्मनो मदीयत्वमन्नियाम्यत्वबुद्ध्ये**ति। अत्र चेतश्शब्दस्यैवं तात्पर्यं प्राचीनसविशेषणनिर्देशेन स्थापयति—**उक्तं हीति**। अध्यात्मचेतसा—परशेषत्वादिविशेषितयथावस्थितात्मगोचरबुद्ध्येत्यर्थः। सर्वशब्देन स्वरूपकात्स्न्यवदनुबन्धिकात्स्न्यमपि प्रागुक्तप्रकारेणाभिप्रेतमित्याह—**सकर्तृकाणि साराध्यानी**ति। बुद्धियोगशब्देन मुमुक्षोरसाधारणमकर्तृत्वानुसंधानादिकं सर्वं प्रत्यभिज्ञाप्यत इत्याह—**इममेव बुद्धियोग**मिति ॥ ५७ ॥

मच्चित्तस्सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ ५८

भा ॥ एवं मच्चित्तस्सर्वकर्माणि कुर्वन् सर्वाणि सांसारिकाणि दुर्गाणि मत्प्रसादादेव तरिष्यसि। अथ त्वम्, अहंकारात्—अहमेव कृत्याकृत्यविषयं सर्वं जानामीति भावात्, मदुक्तं न श्रोष्यसि चेत्, विनङ्क्ष्यसि—विनष्टो भविष्यसि। नहि कश्चिन्मद्व्यतिरिक्तः कृत्स्नस्य प्राणिजातस्य कृत्याकृत्ययोर्ज्ञाता प्रशासिता वाऽस्ति ॥ ५८

ता ॥ *मच्चित्तस्सर्वदुर्गाणीत्यत्र मच्चित्तशब्देन पूर्वश्लोकोक्तस्यैवानुवादात्तत्र च बुद्धिविशेषविशिष्टकर्मविधिपरत्वादुत्तरेष्वपि ग्रन्थेषु युद्धाख्यस्वधर्मप्रोत्साहनस्यैव स्फुटत्वादिहापि तद्विवक्षामाह—**एवं मच्चित्तस्सर्वकर्माणि कुर्वन्निति**। मच्चित्तत्वमात्रस्य विधेयत्वे अनन्तरं युद्धनिवृत्त्यध्यवसायप्रतिक्षेपो न संगच्छत इति भावः। दुर्गशब्दस्य गिरिवनजलादिदुर्गेषु प्रसिद्धिप्रकर्षात्क्षत्रियस्य चार्जुनस्य युयुत्सोस्तन्निस्तारापेक्षासंभवात्तद्विषयत्वशङ्कामप्यपाकर्तुं पूर्वापरानुरोधेन **सांसारिकाणी**ति विशेषितम्। *मत्प्रसादादित्यनेन व्युत्पत्त्यनुशासनश्रुतिस्मृत्यादिविरुद्धापूर्वादिकल्पनाव्युदासः, स्वस्य फलप्रदाने प्रतिबन्धनिवृत्त्यादिमात्रसाकाङ्क्षत्वं च सूच्यत इत्यभिप्रायेणाह—**मत्प्रसादादेवे**ति। एवं नित्यनैमित्तिककाम्यरूपाणां कर्मणां बुद्धिविशेषनियमादियोगेन कर्मयोगशब्दितानां परम्परया परिपूर्णभगवत्प्राप्तिपर्यन्तं विपाकमुपपाद्य सर्वथा कर्मयोग एव ते कर्तव्य इति निगमितम्। अथ तदकरणे प्रत्यवायमाह—*अथचेदित्यर्धेन। हितवचनानादरस्य निमित्तभूतमहङ्कारविशेषमाह—**अहमेव कृत्याकृत्यविषयं सर्वं जानामीति भावादिति**। **न श्रोष्यसीति** श्रूयमाणेऽपि

श्रुतफलनिवृत्त्यभिप्रायम् । * विनङ्क्ष्यसीत्यनेनानादिकालमनुवृत्तस्यात्मनाशस्योत्तरकालेऽप्यनुवृत्तिर्विवक्षितेत्यभिप्रायेणाह—**नष्टो भविष्यसीति** । * बुद्धिनाशात्प्रणश्यति (२. ६३) इति प्रागुक्तप्रत्यभिज्ञापनमिति भावः । अश्रवणादिनिदानमाप्तान्तरादिसंभवमपाकुर्वन् *विनङ्क्ष्यसीत्यस्य शापवचनतुल्यताव्यावृत्त्यर्थं स्वस्यैवाप्ततमत्वकथनेन स्वोपदिष्टस्यार्थस्थितिरूपतायामभिप्रायमाह—**न हि कश्चिदिति** । अन्ये हि वक्तारो मया वाचिताः परिमितविषयं किंचिद्वदन्ति; अहं तु सर्वस्याधिकारिणस्सर्वविधहिताहितवेदी; यानि च परोक्तानि शास्त्राण्यनुक्तानि च छन्दांसि, तान्यपि मदाज्ञारूपतयैव प्रमाणभूतानीति भावः ॥ ५८ ॥

यद्यहङ्कारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९

भा ॥ **यद्यहंकारम्—आत्मनि हिताहितज्ञाने स्वातन्त्र्याभिमानम्, आश्रित्य मन्नियोगमनादृत्य न योत्स्य इति मन्यसे, एष ते स्वातन्त्र्यव्यवसायो मिथ्या भविष्यति; यतः प्रकृतिस्त्वां युद्धे नियोक्ष्यति—मत्स्वातन्त्र्योद्विग्नं त्वामपि प्रकृतिर्नियोक्ष्यति** ॥ ५९ ॥

ता ॥ एवमश्रवणफलभूतयुद्धनिवृत्तेर्विनाशहेतुत्वमुक्तम्; अथ युद्धनिवृत्तेरेवाशक्यत्वमुच्यते । किंच भवतु कर्मयोगो मया कर्तव्यः; युद्धव्यतिरिक्तं किमपि कर्मयोगान्तरमुपाददानस्य मे विनाशो न स्यादिति शङ्कामपाकरोति—* यद्यहङ्कारमिति श्लोकेन । अहंकारं युद्धनिवृत्त्यानुगुण्येन विशिनष्टि—**आत्मनि हिताहितेति** । अहंकाराश्रयणफलमाह—**मन्नियोगमनादृत्येति** । * न श्रोष्यसीत्यस्यैवायमर्थः । * एष इत्यनेन परामृष्टमाह—**स्वातन्त्र्यव्यवसाय इति** । स्वातन्त्र्याभिमानगर्भस्तन्मूलो वा व्यवसायः स्वातन्त्र्यव्यवसायः । तदुभयं * मन्यसे इत्यनेन * अहंकारमाश्रित्येत्यनेन च सूचितम् । प्रकृतिर्नियोक्ष्यतीत्ययुक्तम्, अचेतनत्वात्तस्याः, चेतनव्यापारत्वाच्च नियोगस्येति शङ्कामुपालम्भाभिप्रायायेण परिहरति—**मत्स्वातन्त्र्योद्विग्नं त्वामिति** । मदुक्तकरणे सर्वज्ञस्य मे सर्वं भरस्स्यात्; मन्नियोगातिक्रमे तु मय्युदासीने प्रकृतिपरतन्त्रस्त्वमहितेष्वेव प्रवर्त्स्यसीति भावः ॥ ५९ ॥

भा ॥ **तदुपपादयति—**

स्वभावजेन कौन्तेय निबद्धस्स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ ६०

भा ॥ **स्वभावजं हि क्षत्रियस्य कर्म शौर्यम्, स्वभावजेन शौर्याख्येन स्वेन कर्मणा निबद्धः, तत एवावशः, परैर्धर्षणमसहमानस्त्वमेव तद्युद्धं करिष्यसि, यदिदानीं मोहात्—अज्ञानात् कर्तुं नेच्छसि** ॥ ६० ॥

ता ॥ पुनरुक्तिपरिहारायाह—**तदुपपादयतीति** । प्रकृतेः प्रेरकत्वप्रकारमवान्तरव्यापारेण दर्शयतीत्यर्थः । * प्रकृतिरिति निर्दिष्ट एवायमर्थस्स्वभावशब्देनानूदितः । स्वभावशब्दश्च * स्वभावप्रभवैर्गुणैः (४१) इत्यत्र व्याख्यातः । प्रकृतिशब्दस्त्वत्र देहाद्याकारपरिणतप्रकृतिविषयत्वेऽपि स्वभावशब्दः पूर्वोक्तार्थ एव । * शौर्यं तेजः (४३) इत्यादिकं स्मारयति—**स्वभावजं हीति** । **स्वेन**—क्षत्रियासाधारणेनेत्यर्थः । शौर्यं—निर्भयप्रवेशसामर्थ्यं; तेन तन्मूलं कर्मात्र बन्धनाय्यप्रवृत्तिविषयतया बन्धकत्वेनोक्तम् । मदुक्तानादरे प्रकारान्तरेणापि करिष्यस्येवेत्यपिशब्दार्थः । तदभिप्राये-

णाह—त्वमेवेति। **परैर्धर्षणमसहमान** इति विशेषणम् अवशस्य कथं कर्मकर्तृत्वमिति शङ्कापरिहारार्थम्। अमर्षचिकीर्षादिस्पर्धकगुणपारवश्यं कर्तृत्वस्योपयुक्तमेवेति भावः। * कर्तुं नेच्छसि यन्मोहादिति वाक्यान्तर्वाक्यनिवेशो हास्यकरुणरसावेशेन। तद्विवृणोति—**यदिदानीमिति**। प्राप्तावसरे धर्मयुद्धानुष्ठानं परित्यज्यातिक्रान्तावसरे परपरिभवव्रीडितो गतजलसेतुबन्धं करिष्यसीति वर्तमानभविष्यद्व्यपदेशयोस्तात्पर्यमिति भावः। * न श्रोष्यसीतिवदुपदिष्टस्य चित्तानारोह इह मोहशब्देन विवक्षित इत्याह—**अज्ञानादिति** ॥ ६० ॥

भा ॥ सर्वं हि भूतजातं सर्वेश्वरेण मया पूर्वकर्मानुगुण्येन प्रकृत्यनुवर्तने नियमितं, तच्छृणु।

ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१

भा ॥ ईश्वरः—सर्वनियमनशीलो वासुदेवः सर्वभूतानां हृद्देशे—सकलप्रवृत्तिनिवृत्तिमूलज्ञानोदयप्रदेशे तिष्ठति। कथं किं कुर्वंस्तिष्ठति? यन्त्रारूढानि सर्वभूतानि मायया भ्रामयन्—स्वेनैव निर्मितं देहेन्द्रियावस्थं प्रकृत्याख्यं यन्त्रमारूढानि सर्वभूतानि स्वकीयया सत्त्वादिगुणमय्या मायया गुणानुगुणं प्रवर्तयंस्तिष्ठतीत्यर्थः। पूर्वमप्येतदुक्तं * सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च (१५. १५) इति : * मत्तस्सर्वं प्रवर्तते (१०. ८) इति च। * य आत्मनि तिष्ठन् (बृ. ५. ७. २२) इत्यादिका श्रुतिश्च ॥ ६१ ॥

ता ॥ उक्तार्थस्थापनाय त्वय्युदासीने कथमहं प्रवर्तेय; तथात्वे वा कथं तव सर्वहेतुत्वमिति चोद्यम् * ईश्वर इति श्लोकेन परिहियत इत्याह—**सर्वं हीति**। उक्तं स्वभावपारतन्त्र्यमपि मत्प्रयुक्तम्; मम च साधारणकारणत्वान्न कश्चिद्विरोध इति भावः। ईश्वरशब्दस्यात्रेन्द्रादिशब्दवदर्वाचीनेश्वरविषयरूढिशङ्कापरिहाराय यौगिकमर्थमन्वर्थसमाख्यया स्थापयति—**सर्वनियमनशीलो वासुदेव** इति। * सापेक्षनिरपेक्षयोर्निरपेक्षे संप्रत्ययः इति न्यायादीश्वरत्वस्य सर्वविषयत्वं सिद्धम्। तस्य च व्यापिमूलत्वं वासुदेवशब्देन दर्शितम्। वक्तृविषयत्वज्ञापनाय वासुदेवशब्दः। सर्वेश्वरेण * मयेति वधस्ताद्दर्शितम्। सर्वव्यापिनस्य हृद्देशे विशेषस्थितिवचनं किमर्थमित्यत आह—**सकलप्रवृत्तिनिवृत्तिमूलज्ञानोदयप्रदेश** इति। एतेन हृदयस्थितेः * भ्रामयन्नित्यत्रोपयोगो दर्शितः। **कथमित्युपकरणाभिप्रायम्**; * मायेति हि तदुत्तरम्। **किंकुर्वन्निति**—ईश्वरशब्देन नियन्तृतैकनिरूपणीयतया प्रतिपन्नोऽसौ कीदृशं नियमनं कुर्वन्नित्यर्थः। * यन्त्रेत्यादि * भ्रामयन्नित्यन्तमेकं वाक्यं प्रश्नवाक्यादाकृष्टेन तिष्ठतिनाऽन्वेतव्यम्। प्रागुक्तसर्वपरामर्शेन यन्त्रमायादिशब्दानामर्थं विवृणोति—**स्वेनैव निर्मितमित्यादिना**। भूतशब्देन, हृत्प्रदेशनिर्देशेन, पुरुषप्रवृत्तिविशेषानुगुण्यात्, अर्थस्वभावेन च यन्त्रशब्दोऽत्र देहेन्द्रियसंघातविशेषविषयः। * महतः परमव्यक्तमित्यव्यक्तशब्देन निर्दिष्टम्, तत्रैवच * शरीरं रथमेव तु (क. ३. ३, ११) इति रथाख्ययन्त्रत्वेन रूपितमिति ज्ञापनाय **देहेन्द्रियावस्थं प्रकृत्याख्यमित्युक्तम्**। तथा च श्रूयते—* सर्वाजीवे सर्वसंस्थे बृहन्ते तस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे....पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति (श्वे. १. ६) इति। एतेन * यन्त्रारूढानीव इतीवशब्दलोपेन व्याकुर्वन्तो निरस्ताः। **स्वकीयेति**—आदौ * गुणमयी मम माया (७. १४) इति **युक्तम्**; श्रुतिश्च * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः....मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् (श्वे. ४. ९) इति। जीवस्य कर्तृत्वादिभङ्गपरिहाराय **गुणानुगुणमित्युक्तम्**। नहि जीवमीश्वरो भूतावेशन्यायेन प्रवर्तयति; अपितु सत्त्वादिगुणमयान् भावान् पुरस्कृत्य पूर्वसिद्ध-

[illegible]विशेषजनितसङ्गद्वारेणेति न विरोधः । भ्रामयन्—भ्रमयन्नित्यर्थः । तत्र प्रवृत्तिहेतुतया मोहनमन्तर्नीतं, न तु शब्दमित्याह—प्रवर्तयन्निति । अत्र ईश्वरशब्देन परोक्षव्यपदेशेनापि वक्ता वासुदेवो निर्दिष्ट इतीममर्थं प्रागुक्तेन द्रढयितुमाह—पूर्वमपीति । * य आत्मनि तिष्ठन् (बृ. ५. ७. २२. मा) इत्यादिनिर्दिष्टोऽन्तर्यामी सौबालिक्यामुपनिषदि नारायण इति विशेषितः—* एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः इति ॥ ६१ ॥

भा ॥ एतन्मायानिवृत्तिहेतुमाह—

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२

भा ॥ यस्मादेवं, तस्मात्तमेव—सर्वस्य प्रशासितारमाश्रितवात्सल्येन त्वत्सारथ्येऽवस्थितम्, * इत्थं कुर्विति च शासितारं, सर्वभावेन—सर्वात्मना शरणं गच्छ—सर्वात्मनाऽनुवर्तस्व । अन्यथाऽपि तन्मायाप्रेरितेनाज्ञेन त्वया युद्धादिकरणमवर्जनीयम्; तथा सति नष्टो भविष्यसि; अतस्तदुक्तप्रकारेण युद्धादिकं कुर्वित्यर्थः । एवं कुर्वाणस्तत्प्रसादात् परां शान्तिं—सर्वकर्मबन्धोपशमं, शाश्वतं च स्थानं प्राप्स्यसि । यदभिधीयते श्रुतिशतैः—* तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः * ते ह नाकं महिमानस्सचन्ते, यत्र पूर्वे साध्यास्सन्ति देवाः (पु) * यत्र ऋषयः प्रथमजा ये पुराणाः (यजु. ४. ७. १३) * परेण नाकं निहितं गुहायां (ना) * यो अस्याध्यक्षः परमे व्योमन् (तै. ब्रा. २. ८. ९) * अथ यदतः परो दिवो ज्योतिर्दीप्यते (छा. ३. १३. ७) * सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् (क ३. ९) इत्यादिभिः ॥ ६२ ॥

ता ॥ स्वतन्त्रे स्वमायया प्रेरयति परतन्त्रस्तां कथं निस्तरेदित्यत्रोत्तरं * तमेव शरणमिति श्लोक इत्याह—**एतन्मायानिवृत्तिहेतुमाहे**ति । **यस्मादेवम्**—अन्यथाऽपि बुद्धया निवर्तयितुमशक्त्यत्वादित्यर्थः, सर्वस्येश्वराधीनत्वादिति वा । * **तमेवे**त्यनेन [तस्य] मायां कोऽन्यो निवर्तयितुं शक्नोतीति सूचितमित्याह—**सर्वस्य प्रशासितार**मिति । अत्यन्तस्वतन्त्रस्य एव हीदानीं रथिनस्तव सारथित्वेन परतन्त्रः प्रशास्तीत्यभिप्रायेण **आश्रितवात्सल्येने**त्यादिकमुक्तम् । एवमनुवर्तनीयत्वाय परत्वं सौलभ्यं च दर्शितम् । भावशब्दोऽत्र मनोवृत्तिपर इत्याह—**सर्वात्मने**ति । सर्वप्रकारेणेति वाऽर्थः । तेन *वासुदेवस्सर्वम् (७. १९) इत्युक्तप्रक्रिययाऽन्तर्यामित्वेनोपदेष्टृत्वेन प्राप्यत्वप्रापकत्वादिभिश्चैक एवावस्थित इत्यनुसन्धानं वा विवक्षितम् । अत्र शरणशब्द उपदेशादिमुखेन गोप्तृविषयः; तेनैव द्वारेणोपायपरो वा । यथोपदिष्टकरणमेवात्र शरणागतिरित्यभिप्रायेणाह—**सर्वात्मनाऽनुवर्तस्वे**ति । *न श्रोष्यसि, * न योत्स्ये इत्युक्तनिषेधपरत्वादनुवर्तनमेवात्र शरणागतिरिति दर्शयितुं प्रकृतेन विपर्यये प्रत्यवायेन योजयति—**अन्यथाऽपी**ति । प्रकृतोपयोगेनानुवृत्तिं विशिषन् विवक्षितमुपसंहरति—**अतस्तदुक्तप्रकारेणे**ति । स्ववर्णाश्रमानुरूपतदाज्ञानुवर्तनमेव हि तत्प्रीणनमिति भावः । उक्तानुवृत्तिं प्रसादहेतुतयोत्तरार्धेन योजयति—**एवं कुर्वाणस्तत्प्रसादा**दिति । * मत्प्रसादात् (५८) इत्युक्त एवार्थः * तत्प्रसादादित्यत्र निर्दिष्टः । तत्रोक्तं सर्वदुर्गतरणमिह परा शान्तिः । शान्तेश्चात्र परत्वं निवृत्तजातीयकारणसामान्याधिकरण्यविरहेणापुनरावृत्तित्वमित्यभिप्रायेणाह—**सर्वकर्मे**ति । सर्वकर्मबन्धोपशमपरशान्तिशब्देन अनिष्टनिवृत्तिरुक्ता । * **स्थानं प्राप्स्यसी**ति इष्टप्राप्तिरुच्यते । शाश्वतशब्देन ब्रह्मादिस्थानव्यवच्छेदः । मूलप्रकृतिस्सूक्ष्मावस्था, मुक्तप्राप्यस्थानमिति केचित्; सत्यलोकादिष्वेव वैष्णवस्थानानीति चापरे; तत्स्थानशब्दस्य मुख्यार्थस्वीकाराय, वादिक्षेपाय चाप्राकृतस्थानं

श्रुतिभिरुपबृंहयति—यदभिधीयत इति। अधीतवेदानां संमतिपत्त्यतिशयार्थं श्रुतिशतैरित्युक्तम्। एतेन कारणश्रुतीनाम् *एकमेवाद्वितीयम् (छा. ६. २. १) इत्यादीनां लक्ष्यमाणकार्यप्रपञ्चमात्रप्रलयपरत्वं बहुश्रुत्यविरोधाय दर्शितम्। *तद्विष्णोरिति वाक्यं प्रत्येकं सदापश्यदनेकसूरिविशिष्टविधिपरं, कृत्स्नस्याप्राप्तत्वात्। *विष्णोरिति वैयधिकरण्याच्च नात्र स्वरूपपरता युक्ता। *यत्र पूर्वे साध्यास्सन्तीत्यत्राप्यनवच्छेदान्नित्यं सन्तीति सिद्धम्। अत्र च *शाश्वतं स्थानमिति निर्दिष्टं परमात्मन एव स्थानमिति प्रकरणान्तरे व्यक्तम्। *रम्याणि कामचाराणि विमानानि सभास्तथा॥ आक्रीडा विविधा राजन् पद्मिन्यश्चामलोदकाः। एते वै निरयास्तात स्थानस्य परमात्मनः॥ (भा. मो. १९६.४) इति। आह च भगवान् पराशरः—*एकान्तिनस्सदा ब्रह्मध्यायिनो योगिनो हि ये। तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः॥ (वि. १. ६. ३९) इति॥ ६२॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३

भा॥ इति—एवं ते मुमुक्षुभिरधिगन्तव्यं ज्ञानं सर्वस्माद्गुह्याद्गुह्यतरं कर्मयोगविषयं ज्ञानयोगविषयं भक्तियोगविषयं च सर्वमाख्यातम्। एतदशेषेण विमृश्य स्वाधिकारानुरूपं यथेच्छसि तथा कुरु—कर्मयोगं ज्ञानयोगं भक्तियोगं वा यथेष्टमातिष्ठेत्यर्थः॥ ६३॥

ता॥ एवमर्जुनस्य युद्धे प्रोत्साहनव्याजेन सर्वाध्यात्मशास्त्रार्थजातमुपदिश्य सर्वासु निष्ठासु नित्यकर्मणो दुस्त्यजतयाऽन्तेऽपि युद्धकर्तव्यत्वमेव स्थापितम्। अथ *स हि धर्मस्सुपर्याप्तो ब्रह्मणः पदवेदने (भा. आश्व. १६. १२) इति प्रत्यभिज्ञापयिष्यमाणप्रकारेण श्रोतव्यान्तरामावज्ञापनाय प्रक्रान्तनिष्ठात्रयं पुष्कलोपदिष्टतया यथाधिकारमनुष्ठेयत्वेन निगम्यते—*इति ते ज्ञानमाख्यातमिति श्लोकेन। वाच्यवचनयोस्सम्यक्त्वं पौष्कल्यं च इतिकरणेन विवक्षितमित्यभिप्रायेणाह—इत्येवमिति। ते—*यच्छ्रेयस्स्यात् (२. ७) इत्यादिवादिने प्रपन्नाय शिष्यायेत्यर्थः। अत्र लौकिकप्रमाणप्रसिद्धविषयेभ्य आयुर्धनुर्गान्धर्ववेदार्थनीतिशास्त्रादिजन्येभ्यो ज्ञानेभ्यः प्रकृष्टातीन्द्रियपारलौकिकस्वर्गादिपुरुषार्थतदुपायविषयं वेदाख्यशास्त्रमूलं विविधज्ञानं गुह्यशब्देन विवक्षितम्। गुह्यतरशब्देन तु वेदान्तनिष्पाद्यं तदुपबृंहणभूतैतच्छास्त्रविशोधितं मुमुक्षुभिर्यथाधिकारमनुष्ठेयं व्यवहिताव्यवहितसमस्तमोक्षोपायज्ञानं प्रदर्श्यते। तत्र त्रिवर्गमात्रसक्तेभ्यो गोपनीयतया गुह्यतरत्वोक्तिरित्यभिप्रायेणाह—मुमुक्षुभिरधिगन्तव्यं ज्ञानं सर्वस्माद्गुह्याद्गुह्यतरमिति। नन्वेतच्छास्त्रोक्तेष्वेव गुह्यगुह्यतरविभागस्स्यात्; तत्राप्यन्तिमाध्यायोक्तमेव गुह्यतरत्वाऽत्र निगम्यत इति शङ्कामपाकरोति—कर्मयोगविषयं ज्ञानयोगविषयं भक्तियोगविषयं चेति। *विमृश्यैतदशेषेण यथेच्छसि तथा कुर्वित्यनन्तरवाक्यपरामर्शस्वारस्याद्गीताशास्त्रोक्तं कृत्स्नमिह गुह्यतरशब्देन विवक्षितमिति गम्यते। तदवान्तरतारतम्यं तु सर्वगुह्यतममित्यनन्तरश्लोके वक्ष्यत इति भावः। *आख्यातमित्यनेन वक्तव्यान्तराभावो व्यञ्जित इत्यभिप्रायेणाह—सर्वमाख्यातमिति। मया—स्वतस्सार्वज्ञ्यादिगुणयोगादाप्ततमेन हितैषिणा चेत्यर्थः। *अशेषेण विमृश्येत्यनेन विवक्षितमाह—स्वाधिकारानुरूपमिति। सहसैव पूर्वपूर्वपरित्यागो न युक्त इति भावः। *यथेच्छसि तथा कुर्वित्येतन्न युद्धकरणाकरणविषयम्, निष्ठात्रयेऽपि नित्यनैमित्तिकानां वर्णाश्रमानुबन्धिकर्मणामवश्यानुष्ठेयत्वोक्तेः, *यदहंकारमाश्रित्य (५९) इत्यादिश्लोकाभ्यामर्जुनेन युद्धस्य दुस्त्यजतां वदतो भगवतस्तन्निवृत्तिविषयानुपदेशात्। अतोऽत्र तत्तदधिकारानुरूपपुरुषार्थेषु ज्ञानार्थेषु बुद्धि-

मत्तस्त्वं कर्मज्ञानभक्तिष्वस्मिन्ममेदानीमधिकार इति परामृश्य तस्मिन् पर्वणि परिगृहीतस्ववर्णाश्रमधर्म एव कर्तव्येष्वुच्यत इत्यभिप्रायेणाह—**कर्मयोगं ज्ञानयोगं भक्तियोगं वा यथेष्टमातिष्ठेति**। एतेन * कर्मज्ञानयोगयोरिदं निगमनम्, * सर्वगुह्यतममित्यादिना भक्तियोगनिगमनमिति कैश्चिदुक्तो विभागो निरस्तः ॥ ६३ ॥

सर्वगुह्यतमं भूयश्शृणु मे परमं वचः।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्॥ ६४

भा॥ सर्वेष्वेतेषु गुह्येषु भक्तियोगस्य श्रेष्ठ्याद्गुह्यतम[म्] इति पूर्वमेवोक्तम्—* इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे (९. १) इत्यादौ। भूयोऽपि तद्विषयं परमं मे वचः शृणु। इष्टोऽसि मे दृढमिति ततस्ते हितं वक्ष्यामि ॥ ६४ ॥

ता॥ अविशेषेण त्रिविधेऽपि हि निगमिते त्रयाणामप्यन्यापेक्षया गुह्यतरत्वे चोक्ते त्रिष्वेतेषु व्यवहिताव्यवहितोपायविभागेन गुह्यतमाध्यवसायार्थं, पुनः प्राधान्यात्तत्रैव शास्त्रतात्पर्यातिशयद्योतनाय * सर्वगुह्यतममित्यादिश्लोकद्वयेन भक्तियोगरूपशास्त्रसारार्थः प्रतिसंधाप्यते। तदभिप्रायेण हि * शास्त्रसारार्थ उच्यते (सं. २२) इति संगृहीतम्। विवृतं चाध्यायादौ—* अत्र सारार्थशेषतया सारतमं प्रपदनं चरमश्लोकेन प्रतिपाद्यते इति। सोऽपि * शास्त्रसारार्थ इत्यनेनैव क्रोडीकृतः। * सर्वगुह्यतममित्यत्र योगविभागवता * सप्तमी शौण्डैः (अष्टा. २. १. ४०) इत्यनेन समासमभिप्रेत्य सर्वेष्वेतेष्विति सप्तमीनिर्देशः। गुह्यतमशब्दप्रत्यभिज्ञानाद्भूयश्शब्दस्वारस्यात् * मन्मना भवेति श्लोकस्य चास्पान्तरस्य पूर्वोक्तस्यैव पाठात्स एव भक्तियोग इह शास्त्रान्ते शास्त्रसारत्वज्ञापनायोद्धियते, नत्वर्थान्तरमित्यभिप्रायेणाह—**गुह्यतम[म्]** इति **पूर्वमेवोक्तमिति**। अत्र वाच्यस्य गुह्यतमत्वमेव वचस्युपचरितमित्याह—**भूयोऽपि तद्विषयमिति**। श्रवणमात्रावृत्तेः * शृण्वित्यनेनैव साध्यत्वाच्छ्रुतार्थविषयत्वपरोऽत्र भूयश्शब्दः। व्यवधाननैरपेक्ष्येण गुह्यतमनिष्कर्षार्थतया पुनर्वचनं सार्थमिति भावः। वचसः परमत्वोक्तिः नातःपरं वक्तव्यमस्तीति निगमनाभिप्राया। यद्वा वाच्यस्य परमत्वात्तद्वचसोऽपि तदुच्यते; * यस्माद्धर्मात्परो धर्मो विद्यते नेह कश्चन (भा. मो. २५६. १) इति भगवद्योगश्च सर्वेभ्यो यज्ञादिभ्यः परमः, परान्तररहितश्चोच्यते; तथा * इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्। अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्॥ (याज्ञ. आ. ८) इति। आत्मा चात्र सर्वान्तरात्मा। उपच्छन्दनस्तुत्यादिशङ्कापरिहाराय * इष्टोऽसीत्यादिकम्। इष्टः—प्रीतिविषय इत्यर्थः; * प्रियोऽसीत्यनन्तरवत्। दृढमिष्टः—अत्यर्थं प्रियः। * प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः (७. १७) इत्यादिभिः प्रागुक्तज्ञानिवदतिदृढमिष्टोऽसि; यथा गुह्यतमं प्रकाशनीयं, तथा प्रीतिविषयभूतोऽसीत्यर्थः। इष्ट इति यतः, ततस्ते हितं वक्ष्यामीति वा॥ ६४ ॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥ ६५

भा॥ वेदान्तेषु * वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात् § तमेवं विद्वानमृत इह भवति, नान्यः पन्था विद्यतेऽयनाय॥ (ना) इत्यादिषु विहितं वेदनध्यानोपासनादिशब्दवाच्यं दर्शनसमानाकारं

§ अत्र तात्पर्यचन्द्रिकायां * वेदाहमेतमित्यादिपुरुषसूक्तवाक्योपादानमिति पङ्क्तिदर्शनात् भाष्ये * आदित्यवर्णं तमसस्तु पारे इत्यादिना पाठेन भवितव्यमिति वदन्ति केचित्।

स्मृतिसंतानमत्यर्थप्रियमिह मन्मना भवेति विधीयते। मद्भक्तः—अत्यर्थमत्प्रियः; अत्यर्थमत्प्रियत्वेन निरतिशयप्रियां स्मृतिसंततिं कुरुष्वेत्यर्थः। मद्याजी—तत्रापि मद्भक्त इत्यनुषज्यते, यजनं पूजनं, अत्यर्थप्रियमदाराधनपरो भव। आराधनं हि परिपूर्णशेषवृत्तिः। मां नमस्कुरु—नमो नमनं, मय्यतिमात्रप्रह्वीभावमत्यर्थं कुर्वित्यर्थः। एवं वर्तमानो मामेवैष्यसि, एतत्सत्यं ते प्रतिजाने—तव प्रतिज्ञां करोमि; नोपच्छन्दनमात्रम्। यतस्त्वं प्रियोऽसि मे * प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः (७. १७) इति पूर्वमेवोक्तम्। यस्य मय्यतिमात्रा प्रीतिर्वर्तते, ममापि तस्मिन्नतिमात्रा प्रीतिर्भवतीति तद्वियोगमसहमानोऽहं तं मां प्रापयामि। अतस्त्वत्यमेव प्रतिजानं * मामेवैष्यसीति ॥ ६५ ॥

ता ॥ * मन्मना भवेत्यस्याव्यवहितफलसाधनतया गुह्यतमाद्गुह्यस्वरूपपरत्वं दर्शयितुं तत्स्वरूपं तावत्प्रमाणतश्शिक्षयति—**वेदान्तेष्विति**। * वेदाहमित्यादिपुरुषसूक्तवाक्योपादानमुपनिषदन्तराणां तदनुवर्तित्वज्ञापनार्थम्, * नान्यः पन्थाः इति हि तत्साध्योपायान्तरव्यवधानशङ्कानिरासार्थम्, अत्र च * अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः (१५.१८) इति वक्तुश्च वासुदेवस्य तत्प्रतिपाद्यत्वात् * मन्मना भवेति विहितस्य महापुरुषोपासनत्वज्ञापनार्थं च। वेदनं ह्यत्रोक्तम्, ननु भक्तिरित्यत्राह—**ध्यानोपासनादिशब्दवाच्यमिति**। आदिशब्देन तत्तत्स्मृत्युक्तभक्तिसेवादिशब्दग्रहणम्। समानप्रकरणस्थाभ्यां ध्यानोपासनशब्दाभ्यां वेदनं हि विशेष्यते। अन्यथा गुरुलघुविकल्पाद्यनुपपत्त्याध्यानादिविधिवैयर्थ्यप्रसङ्ग इति भावः। विद्युपास्योर्व्यतिकरेणोपक्रमोपसंहारदर्शनाच्च वेदनमुपासनमित्येव व्यक्तमुपपादितं **शारीरकभाष्यादिषु**। किंच * द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ. ४.४.५) इत्युक्त्वा तान्येव दर्शनादीन्यनुवदन्ती श्रुतिः विज्ञानशब्देन निदिध्यासनमनुवदति—* आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन (बृ. ४. ४. ५) इति। एवं * तस्मिन् दृष्टे परापरे (मु. २. २. ९) इति वाक्यैर्दर्शनं न साक्षात्प्रत्यक्षरूपं, गुरुलघुविकल्पाद्यनुपपत्तेरेव। नचाधिकारिभेदेन तत्संभवः, व्यवस्थापकाभावात्। नच द्वारिद्वारभावकल्पना शक्या, ध्रुवानुस्मृतेर्दर्शनस्य चाविशेषेणाव्यवहितसाधनत्वश्रुतेः। अत ऐकाग्र्येऽत्यवश्यंभाविन्यन्यतरस्यौपचारिकत्वमन्तरेण तदसंभवात्, निष्प्रयोजनस्योपचारस्यायोगात्, स्मृतिशब्देन च प्रत्यक्षस्योपचारेऽतिशयासिद्धेः, विपर्यये तु दर्शनसमानाकारत्वलक्षणवैशद्यविधानेन सप्रयोजनत्वाच्च, * स्वमधीगम्यम् (मनु. १२. १२२) इत्याद्युपबृंहणाभिप्रेतवैशद्यविशिष्टा स्मृतिरेव * तस्मिन् दृष्टे * निचाय्य तं (क. ३. १५) * द्रष्टव्यः इत्यादिभिर्विधीयत इत्यभिप्रायेणाह—**दर्शनसमानाकार**मिति। **स्मृतिसंतान**मिति—स्मृतिः संतन्यते यत्रेति वा, स्मृतेः संतानो यत्रेति वा व्युत्पत्त्या नपुंसकत्वमत्र नेतव्यम्। ततश्चैकाग्र्यं शब्दार्थः। तेन तन्मूलज्ञानलक्षणया तैलधारावदविच्छिन्नत्वं सूचितम्। वेदनं वा सामान्यरूपमत्रान्यपदार्थः। तत्र * वेदनमिति पाठे तदेव विशेष्यम्। वेदनध्यानोपासनादीति पाठे तु स्मृतिसंतानस्य विशेष्यत्वात्तस्यैव भक्तिरूपत्वायाह—**अत्यर्थप्रिय**मिति। इह—अव्यवहितमोक्षोपायोपदेशदशायामित्यर्थः। वेदान्तविहितस्यापि अर्जुनेनाविदितत्वात्तं प्रति * मन्मना भवेति विधिरेवेत्याह—**विधीयत** इति। मद्भक्तशब्दार्थमाह—**अत्यर्थमत्प्रिय** इति। अत्यर्थमहं प्रीतिविषयभूतो यस्य सोऽत्रात्यर्थमत्प्रियः। * प्रियो हि ज्ञानिनोऽत्यर्थमहम् (७.१७) इति ह्युक्तम्। विधेयस्य कर्तव्यस्य वैशिष्ट्याभिप्रायेण कर्तरि विशेषणमित्याह—**अत्यर्थमत्प्रियत्वेन निरतिशयप्रिया**मिति। * मद्याजी, मां नमस्कुरु इत्युभाभ्याम् अङ्गिकोटिनिवेशनार्हान्तरङ्गपरिकरयोग उपलक्ष्यत इति दर्शयितुमाह—**तत्रापी**ति। यजिनाऽत्राविवक्षितज्योतिष्टोमादिप्रतीतिव्युदासाय धात्वर्थकं स्मारयति—**यजनं पूजन**मिति। फलितमाह—**अत्यर्थप्रिये**ति। भक्त्यनुप्रवेशेन स्वरूपानुरूपत्वोक्त्या,

सारतमत्वसिद्धयै सारार्थग्राहकभगवच्छास्त्रादिचोदितां प्रक्रियां स्मारयति—**आराधानं हीति** । अन्तःकरणवृत्तिविशेष-पर्यवसानायाह—**नमो नमन**मिति । एतेन प्रणिपातमात्रपरत्वव्युदासः । त्रिविधा हि प्रणतिश्शास्त्रेषु शिष्यते । मद्भक्त-पदानुषङ्गविशेषितं तदभिप्रेतमाह—**मयी**ति । आत्मात्मीयं सर्वं भगवत एवेत्यनुसंधानादतिमात्रप्रह्वीभावः । **एवं वर्तमान** इति—एतेनात्यर्थप्रियत्वाद्यनुपच्छन्दनमात्रत्वं, तद्व्यतिक्रमे स्वात्माधारणं च दर्शितम् । अवधारणेनान्यव्यवधानं विवक्षितम् । *सत्यमिति प्रतिज्ञाविशेषणं, नतु प्रतिज्ञातस्योक्तिरित्याह—**एतदि**ति । * वास्तोष्पते प्रतिजानीह्यस्मान् (यजु. ३.४.१०) इत्यादिष्विवोपसर्गस्य गत्यभावविषयमविवक्षितार्थत्वं निराकरोति—**प्रतिज्ञां करोमी**ति । * द्यौः पतेत्पृथिवी शीर्येद्धिमवान्शकलीभवेत् । शुष्येत्तोयनिधिः कृष्णे न मे मोघं वचो भवेत् ॥ (भा. उ. ८१. ४८) इत्यादिभगव-द्वाक्यानुसारेणाभिप्रेतमाह—**नोपच्छन्दनमात्र**मिति । अत्र प्रियवचनेन प्ररोचनरूपार्थवादत्वं त्वया न शङ्कनीयमित्यर्थः । एवं वर्तमानस्य स्वप्राप्तौ स्वप्रीतिलक्षणद्वारमुपक्षिप्योपच्छन्दनशङ्काऽपाक्रियते *प्रियोऽसि म इत्यनेनेत्याह—**यतस्त्वमिति** । साध्यमपि ज्ञानित्वं सिद्धवत्कृत्वा * प्रियोऽसीति तत्फलोक्तिरित्यभिप्रायेण * प्रियो हि ज्ञानिनोऽत्यर्थमिति सामान्येन प्रागुक्तप्रयोज[न]कग्रहणम् । एतेन भूयश्शब्दस्योक्तार्थपरत्वमपि दर्शितम् । उक्तासंभवशङ्कापरिहाराय लोकदृष्टमीश्वरामि-प्रायं चानुसृत्योपात्तवचनार्थमाह—**यस्ये**ति । तत्फलितमाह—**इति तद्वियोग**मिति । हेतुवाक्यार्थं साध्येन संगमयति—**अतस्सत्य**मिति । **प्रतिज्ञात**मिति भावे निष्ठा ॥ ६५ ॥

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६

मा ॥ कर्मयोगज्ञानयोगभक्तियोगरूपान् सर्वान् धर्मान् परमनिश्श्रेयससाधनभूतान् मदाराधनत्वेन अतिमात्रप्रीत्या यथाधिकारं कुर्वाण एवोक्तरीत्या फलकर्मकर्तृत्वादिपरित्यागेन परित्यज्य मामेकमेव कर्तार-माराध्यं प्राप्यमुपायं चानुसंधत्स्व । एष एव सर्वधर्माणां शास्त्रीयपरित्याग इति—* निश्चयं शृणु मे तत्र त्यागे भरतसत्तम । त्यागो हि पुरुषव्याघ्र त्रिविधस्संप्रकीर्तितः ॥ (४) इत्यारभ्य * सङ्गं त्यक्त्वा फलं चैव स त्यागस्सात्त्विको मतः ॥....नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः । यस्तु कर्मफलत्यागी स त्यागीत्यभि-धीयते ॥ (११) इत्यध्यायादौ सुदृढमुपपादितम् । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि—एवं वर्तमानं त्वां मत्प्राप्तिविरोधिभ्योऽनादिकालसंचितानन्ताकृत्यकरणकृत्याकरणरूपेभ्यस्सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि । मा शुचः—शोकं मा कृथाः । अथवा, सर्वपापविनिर्मुक्तात्यर्थभगवत्प्रियपुरुषनिर्वर्त्यत्वाद्भक्तियोगस्य तदारम्भ-विरोधिपापानामानन्त्यात् तत्प्रायश्चित्तरूपैर्धर्मैः परिमितकालकृतैस्तेषां दुस्तरतया आत्मनो भक्तियोगारम्भा-नर्हतामालोच्य शोचतोऽर्जुनस्य शोकमपनुदन् श्रीभगवानुवाच—* सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति ॥ भक्तियोगारम्भविरोध्यनादिकालसंचितनानाविधानन्तपापानुगुणान् तत्तत्प्रायश्चित्तरूपान् कृच्छ्रचान्द्रायण-कूष्माण्डवैश्वानरव्रातपतिपवित्रेष्टित्रिवृदग्निष्टोमादिकान् नानाविधाननन्तांस्त्वया परिमितकालवर्तिना दुरनु-ष्ठानान् सर्वान् धर्मान् परित्यज्य भक्तियोगारम्भसिद्धये मामेकं परमकारुणिकमनालोचितविशेषाशेषलोक-शरण्यमाश्रितवात्सल्यजलधिं शरणं प्रपद्यस्व । अहं त्वा सर्वपापेभ्यो यथोदितस्वरूपभक्त्यारम्भविरोधि-भूतसर्वेभ्यः पापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

ता ॥ एवं विस्तरेण संग्रहेण चोक्तानां कर्मयोगादीनां त्रयाणां साधारणं सारतमानुसन्धानविशेषमुद्धृत्य तत एव * मामेवैष्यसीत्युक्तेष्टप्राप्तेः प्रतिबन्धकीभूतानिष्टानां निवृत्तिरुच्यते—* सर्वधर्मानिति श्लोकेन । तदाह—**कर्मयोगेत्यादिना** । सर्वशब्देन प्रकृतत्रिकमविशेषाद्गृह्यते । कर्मयोगादीनां धृतिसाधनत्वलक्षणधर्मशब्दवाच्यत्वमाह—**परमनिश्श्रेयससाधनभूतानि**ति । यथायोगं परम्परया साक्षाच्चेति शेषः । तत्साधकत्वप्रयोजकमाह—**मदाराधनत्वेने**ति । त्रिवर्गवैमुख्यहेतुमाह—**अतिमात्रप्रीत्ये**ति । * यथेच्छसि तथा कुर्विति पूर्वोक्तोपजीवनेनाह—**यथाधिकारं कुर्वाण इति** । क्रमात्सर्वं ह्यस्यानुष्ठेयं स्यादिति च भावः । **कुर्वाण एवे**त्यनेन स्वरूपत्यागादिपक्षास्तामसत्वादिभिर्निन्दिता इति स्मारितम् । परित्यागशब्दविवक्षितमाह—**उक्तरीत्ये**ति । अध्यायारम्भविशोधितप्रकारेणेत्यर्थः । **फलकर्मकर्तृत्वादिपरित्यागेने**ति । कर्मत्यागः—स्वकीयताभिमानत्यागः । भक्तियोगेऽपि ऐश्वर्यादिफलान्तरं त्याज्यमेव ; मोक्षाख्यफलस्यापि हि सर्वशेषिभगवच्छेषत्वधिया स्वशेषताधीः परिहार्या । आदिशब्देन कञ्चुकभूतेन्द्रादीनामाराध्यत्वाभिमानस्संगृहीतः । कर्मणि कर्तृत्वं स्वकीयतावुद्धिरादिशब्देन संगृह्यते । **परित्यागेन परित्यज्ये**ति विशेषेण सामान्यावच्छेदः । अन्यत्र स्वात्मनि कर्तृत्वं, ततोऽन्यस्मिन्निन्द्रादावुपास्यत्वं, तदुभयान्यस्मिन् स्वर्गादौ प्राप्यत्वं, तेभ्यो व्यतिरिक्ते कर्मणि उपायत्वं चाभिमत्य ह्यनधीतवेदान्ताः प्रवर्तन्ते ; न तथा त्वयाऽनुसंधेयम् ; एतत्सर्वमेकस्मिन्मय्यनुसंधत्स्वेति * मामेकं शरणं व्रजेत्यस्याभिप्रायः ; तदाह—**मामेकमे**वेत्यादिना । अत्र कर्तृत्वादिषु चतुर्षु प्रत्येकं समुदायतः एकोपाधिना शरणशब्दवाच्यत्वासंभवात्कर्तृत्वादिकं * मामेकमित्यनेनाभिप्रेतमनूदितम् । * उपायमिति तु शरणशब्दार्थोक्तिः । **कर्तारं**—कर्तुः प्रयोजकतयाऽन्तर्यामित्वेन, अनुमन्तृतया च अवस्थितमित्यर्थः । तदनुसंधानात्स्वकर्तृत्वाभिमानत्यागः । कर्मणां देवतान्तरशेषत्वस्वशेषत्वधीत्यागार्थमाह—**आराध्य**मिति । * अहं हि सर्वयज्ञानां भोक्ता च (९. २४) * स्वकर्मणा तमभ्यर्च्य (१८. ४६) इत्यादिकं ह्युक्तम् । **प्राप्यं** साक्षात्परंपरया चेति शेषः । ते स्वर्गादिफलत्यागः । त्रिविधत्यागार्थमनूदितमाकारत्रयमुक्तम् ; अत्र शरणशब्देन विधित्सितमाह—**उपाय**मिति । स हि सर्वेषु शास्त्रेषु प्रीतः फलं ददातीति प्रागेव निर्णीतम् । स्वसाध्यनश्वरयज्ञोपासनधात्वर्थेषु कालान्तरभाविफलसाधनत्वबुद्धिं परित्यज्य सिद्धे स्थायिनि सर्वज्ञे सत्यसङ्कल्पत्वमहोदारत्वादिगुणशालिनि सकलशास्त्रार्थसमाराध्ये फलप्रदत्वमनुसंधत्स्वेति स्वरूपत्यागादिपक्षे प्रकरणवैघट्यमाह—**एष एवे**ति । **सुदृढमुपपादित**मिति । अयमभिप्रायः—एतच्छ्लोकापातप्रतीत्या कूटयुक्तिभिश्च यथा वर्णाश्रमधर्मस्वरूपत्यागादिपक्षो नोदेति, तथोपपादितमिति । **अहम्**—उक्तप्रकारेणाराधितः फलप्रदानौपयिकसार्वज्ञ्यसर्वशक्तित्वपरमकारुणिकत्वादिगुणगणविशिष्ट इति भावः । अनुष्ठितोपायावस्थाविशेषविषयोऽत्र * त्वा इति निर्देश इत्याह—**एवं वर्तमान**मिति । अव्यवहितोपायस्यापि सर्वधर्मशब्देनोपादानात्, * मामेवैष्यसीत्यनन्तरोक्तत्वाच्च—**मत्प्राप्तिविरोधिभ्य इत्युक्तम्** । अत्र प्रतिबन्धनिवृत्तिरेवोपायसाध्या, भगवत्प्राप्तिस्तु स्वरूपाविर्भावलक्षणा स्वत एव स्यादित्यभिप्रायः । **अत्र सर्वशब्दविवक्षितमाह—अनादिकालेत्यादिना** । ननु त्रिष्वपि योगेषु निगदितेषु सर्वगुह्यतमे च शास्त्रसारार्थे पुनर्विविच्य प्रदर्शिते ततोऽप्युपरि त्रयाणां साधारणानुसंधानस्य प्राक्प्रपञ्चितस्यैवात्र पुनः प्रतिपादने किं प्रयोजनम्? नचायमर्थान्तरपरः श्लोकः ; अप्रतीतेः, संग्रहादिषु तथाऽनुक्तेश्च । शास्त्रादावप्युक्तम् । **भाष्येऽपि—*** तमुवाच (२.१०) इतिश्लोके * आत्मपरमात्मयाथात्म्यतत्प्राप्त्युपायभूतकर्मयोगज्ञानयोगभक्तियोगगोचरं * नत्वेवाहं जातु नासमित्यारभ्य * अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः इत्येतदन्तं वच उवाचेत्यर्थः इति । अपि चात्र * मा शुच इत्येतन्न प्रथमोत्पन्ना[illegible], तस्य पूर्वमेव निश्शेषशास्त्रितत्वात् ; अतो यथा * मा शुचस्संपदं दैवामभिजातोऽसि

(१६.५) इत्यत्राव्यवहितप्रस्तुतोपाधिकशोकापनोदनार्थत्वं, तथाऽत्रापीति युक्तम् । न च सूक्ष्मधियः क्षत्रियस्य धार्मिकाग्रेसरस्यार्जुनस्य सर्वज्ञप्रदर्शितेषूपायेष्वज्ञानादनर्हत्वात्प्रधानांशानिश्चयाद्वा शोकोऽयम् । फलसंशयोऽपि *मामेवैष्यसीत्यादिना निश्शेषनिर्मूलितः । अतः परिशेषाद्दीर्घकालनैरन्तर्यादरसेवनीयोपायदौष्कर्यात्फलविलम्बाद्वा शोकोऽयं संभवेदिति तथाविधशोकप्रशमनपरेणानेन श्लोकेन भवितव्यमित्युक्तार्थान्तरा[रोहे तदुचितं]रुचेरुचितं स्वारसिकत्यागशब्दार्थमर्थान्तरमाह—**अथवेति** । अत्र **सर्वपापविनिर्मुक्ते**त्युपायविरोधिसर्वविषयम् । पापनिर्मोक्षादत्यर्थभगवत्प्रियत्वम् । *नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते (ल. वि) इति ह्युच्यते । *विप्रायुतेन गोविन्दे नृणां भक्तिर्निवार्यते (वि. ध. ७४. ९४) इत्याद्यनुसंधानेनाह—**तदारम्भविरोधिपापानामानन्त्या**दिति । *जन्मान्तरसहस्रेषु (ल. वि.) इत्याद्यनुसारेण **परिमितकालकृतैरि**[त्यनेन]ति पाठे विलम्बाक्षमत्वं सूचितम् । **अपरिमितकालकृतै**रिति पाठे तु अपिशब्दोऽध्याहर्तव्यः । तेनोपायस्य दुस्संपादत्वं व्यञ्जितम् । **शोकमपनुदन्नि**ति—शोकापनोदनायेत्यर्थः ।

*मन्मना भव मद्भक्त इति पूर्वश्लोके भक्तियोगस्य प्रकृतत्वात्तदारम्भविरोधित्वेन शोकनिमित्तपापविषयोऽत्र सर्वपापशब्दः । तत्तन्निराकणायोक्तधर्मवर्गविषयस्सर्वधर्मशब्दः, यस्यैतत्संग्रहशासनं *धर्मेण पापमपनुदति (ना.) इति । बहुवचनेन सर्वशब्देन च वैविध्यमानन्त्यं च पापेषु धर्मेषु च व्यज्यते । तदिदमाह—**भक्तियोगारम्भविरोधी**त्यादिना । **कृच्छ्रचान्द्रायणे**त्यादिना संप्रतिपन्नपापनिबर्हणोदाहरणम् । अग्निष्टोमादयोऽपि विनियोगपृथक्त्वेन अनेकफलसाधका इति प्रागेवोक्तम् । आदिशब्देन कर्मयोगावान्तरभेदतया *दैवमेवापरे यज्ञम् (४. २५) इत्यादिभिः प्राक्प्रपञ्चितानामनुक्तानां च ग्रहणम् । एवं ज्ञानयोगोऽप्यादिशब्देन संगृहीतः, तस्यापि भक्तियोगारम्भविरोधिपापनिबर्हणत्वेन प्रागेव प्रपञ्चनात् । **परिमितकालवर्तिने**त्येकशरीराभिप्रायः । अतिदुष्करानुष्ठानमूलानेकजन्मसंसिद्धिसाध्यत्वनिश्चयादेव ह्यस्य शोकः । *सर्वधर्मान्परित्यज्येति स्वरूपत्याग एवास्यां योजनायाम् । नच तावता नित्यनैमित्तिकलोपप्रसङ्गः, दुरनुष्ठानप्रायश्चित्तादिविषयत्वोक्तेः । तुल्यन्यायतया तु नित्यनैमित्तिकेष्वपि यानि दुरनुष्ठानानि, तत्रैवं स्यात्, शक्तमधिकृत्यैव शास्त्रप्रवृत्तेः, अशक्तस्याकरणे दोषाभावात् । अनुकल्पमात्रशक्तौ च तस्यैवानुष्ठेयत्वात्, इह च मुख्याशक्तस्य सर्वप्रकारमुख्यानुकल्पतया एकस्यैव भगवत्प्रपदनस्य विधानाच्छक्ताशक्ताधिकारिभेदाच्च मुख्यानुकल्पयोस्तत्र फलविशेषोपपत्तेः । अत एव गुरुलघुविकल्पानुपपत्तिप्रसङ्गाभावः ; यथा *प्रणवं वा त्रिरभ्यसेत्स्मरेद्वा विष्णुमव्ययम् इति । यथा च *मान्त्रं भौमं तथाऽऽग्नेयं वायव्यं दिव्यमेव च । वारुणं मानसं चेति स्नानं सप्तविधं स्मृतम् ॥ (यो. या.) इति विष्णुचिन्तनमेवावगाहनादिष्वसमर्थस्यापि तत्फलसाधकतया विधीयते, तथेहापीति न कश्चिद्दोष इति । अत्र दुष्करतया चिरकालसाध्यतया चाल्पशक्तिना परिमितकालवर्तिना च दुरनुष्ठानानां धर्माणामर्थसिद्ध एव त्यागो भगवदेकोपायतावरणविधेरुपकारित्वेन विधिच्छायया ऽनूद्यते ; यथा निदिध्यासनोपकारितया रागप्राप्ते श्रवणमनने *श्रोतव्यो मन्तव्यः इति । तदेकोपायतावरणविधानं च तदन्योपायपरित्यागविशिष्टविषयम् ; तेन तत्फलसाधनत्वेन चोदितानामन्यदेवताविषयाणां भगवति च धर्मान्तराणां त्यागस्संगृह्यते । अर्थसिद्धे च देवतान्तरधर्मनिषेधे तत्सिध्यर्थं नात्र व्यधिकरणसमासस्समाश्रयणीय इत्यभिप्रायेण **सर्वान् धर्मा**निति दर्शितम् । ननु शक्तमधिकृत्य निषेधे शास्त्रवैयर्थ्यम्, अशक्तं प्रति तु न विध्यपेक्षेति चेन्न, शक्तं प्रत्येव ब्रह्मालम्बनादाविवोपायान्तरपरिग्रहस्य तद्विरोधित्वज्ञापनेनापेक्षितत्वात् । यद्वा यदर्थं शरणकृत्याऽनुष्ठिता, तदर्थोपायान्तरशक्तेः पश्चात्कृतश्चिद्धेतुवशात्संभवेऽपि तदर्थं तदुपादानस्याकर्तव्यताज्ञापनेन

सार्थम् । अत्र * अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः इति फलस्य भगवदेकाधीनतया तदेकप्रपदनमेकं फलतयाऽनुष्ठेयं शिष्टम्, सर्वधर्मपरित्यागस्य तु वाक्यात्तच्छेषत्वं सिद्धम्, फलवत्सन्निधौ चाफलं तदङ्गम् । तत्र पूर्वसिद्धाकारपरामर्शे अधिकारकोटौ निवेशः, अन्यथा तु लिङ्गात्तदेकशरणव्रज्योपयोगिरूपे विश्रान्तिः । तदेकोपायताध्यवसायो हि तदन्योपायपरिग्रहेण विरुद्धः । अतस्त्यागस्यावहन्तेऽशेष्यपेक्षिततण्डुलोपयोगिरूपे पर्यवसानवत्तदेकप्रपदनविरोधिधर्मत्यागे पर्यवसानादतत्फलार्थानामविरोधिनां नित्यादीनां त्यागोऽस्य नापेक्षित इति वर्णाश्रमानुबन्धिस्वतन्त्रविधिप्राप्ता-स्त्र[त्यै]द्वदेवावतिष्ठन्ते । न च तेऽपि प्रपदनस्याङ्गान्यङ्गिनो वा, तथा नियोगाभावात्, अशक्तं प्रति दुष्करकर्माङ्गकप्रपदनविधानासंभवात्, अतदङ्गस्यापि यज्ञादेरन्यार्थमाश्रमाद्यर्थं चानुष्ठानोपपत्तेः । सर्वशब्दनिर्दिष्टप्रत्यनीकतया वा * मामेकमित्येकशब्दः । ततश्च भगवत्प्रपदनमेकमेव सर्वप्रायश्चित्तं स्यादित्युक्तं भवति । शरणागतिस्वभावात्तु तदन्योपायपरित्यागः सिध्येत् । यथा लक्षयन्ति—* अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् । तदेकोपायतायाच्चा प्रपत्तिश्शरणागतिः ॥ (विष्व) इति । शरणशब्दोऽत्रोपायपर्यायः । यथोक्तं प्रपत्तिप्रकरणे—* उपाये गृहरक्षित्रोः शब्दश्शरणमित्ययम् । वर्तते सांप्रतं त्वेष उपायार्थैकवाचकः ॥ (अहि. ३६. ३३) इति । पठन्ति च—* शरणं गृहरक्षित्रोरुपाये च निगद्यते (नाम. ३. २०९) इति । उपायत्वं च कारुण्यादिगुणविशिष्टस्योपायस्थानेऽवस्थाय तत्कार्यकरणादित्यभिप्रायेण परमकारुणिकत्वादिगुणोक्तिः । * एकमिति नैरपेक्ष्यपरं वा । तत्सिद्ध्यर्थमपि * मामित्यनेनाभिप्रेततया कारुण्यादिग्रहणम् । **परमकारुणिक**मिति ; * वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् (रा. सु. ३८. ३४) इत्यादिभिः कृपायाः पारम्यम्, ततश्शरण्यत्वं च सिद्धम् । तस्यासङ्कोचमाह—**अनालोचितविशेषाशेषलोकशरण्य**मिति । * सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत् (श्वे. ३. १७) इति श्रुतिः । * सर्वलोकशरण्याय (रा. यु. १७. १४) इति रावणावरजवाक्यम् । स्ववाक्यं च *विभीषणो वा सुग्रीव यदि वा रावणस्स्वयम् (रा. यु. १८. ३६) इति । विशेषशब्दोऽत्र जातिवर्णविद्यावृत्तगुणसंस्कारभूतभाव्युपकारादिपरः । उक्तगुणाविनाभूतं गुणान्तरमाह—**आश्रितवात्सल्यजलधि**मिति । * विदितस्स हि धर्मज्ञश्शरणागतवत्सलः (रा. सु. २१. १९) इति ह्युक्तम् । *दोषो यद्यपि तस्य स्यात् (रा. सु. १८. ३) इत्यादिप्रक्रियया दोषानादराय वात्सल्योक्तिः । गत्यर्थानां बुद्ध्यर्थतया प्रयोगाद्व्रजतिधातुः पूर्वयोजनायामनुसंधानमात्रपरतया व्याख्यातः । इह तु *रक्षिष्यतीति (ल) महाविश्वासपूर्वकविशिष्टाध्यवसायलक्षणबुद्धिविशेषनिरूढपदेन व्याचष्टे—**प्रपद्यस्वे**ति । **अहं त्वे**ति—सर्वज्ञः सर्वशक्तिरहम् अल्पज्ञमल्पशक्तिं च त्वामित्यर्थः । **माशुचः**—एकेन सुकरेणाविलम्बेनाशेषपापनिवृत्तिसिद्धेरनन्तैर्दुष्करैर्विल[म्ब्य]म्बकारिभिः प्रत्येकपापनिबर्हणैरिदानीं भक्तियोगारम्भार्हतासंपादनस्याशक्यतानिमित्तशोकं मा कृथा इत्यर्थः । एवं सकलाभिमतसाधनतया भगवच्छास्त्रादिषु प्रसिद्धं भगवत्प्रपदनमिह प्रकृतभक्तियोगारम्भविरोधिपापनिबर्हणरूपोदाहरणविशेषे प्रदर्शितम् । **श्लो.**—सुदुष्करेण शोचेद्यो येनयेनेष्टहेतुना । ससतस्याहमेवेति चरमश्लोकसंग्रहः ॥ अतएवात्रत्य**भाष्य**ग्रन्थस्य **गद्यस्तुते**श्चाविरोध इति ।

यदिह **शाङ्करेणोक्तम्**—* मन्मना भवेति श्लोकेन सर्वकर्मयोगनिष्ठायाः परमरहस्यमीश्वरशरणतामुपसंहृत्याथेदानीं कर्मयोगनिष्ठाफलं सम्यग्दर्शनं सर्ववेदान्तसारं विहितं वक्तव्यमित्याह—सर्वधर्मानितीति ; अयमपि * सर्वार्थान्विपरीतांश्च (१८. ३२) इत्यस्योदाहरणविशेषः, कर्मयोगनिष्ठायाः पृथक्त्वेन भक्तियोगनिष्ठायाः प्रदर्शितत्वादत्रैव * शरणं व्रजेति कण्ठोक्तिदर्शनेन पूर्वत्र तदुपसंहारवाचोयुक्तेरसंगतत्वात् । यच्चात्र * मामेकं सर्वात्मानं समं सर्वभूतस्थमीश्वरमहमेवेत्येवमेकं शरणं व्रज ; न मत्तोऽन्यदस्तीत्यवधारयेत्युक्तम् ; अत्र तावत् शब्दस्यैवं शक्तिः, नच तदुपरोधेन लाक्षणिकार्थ-

स्वीकारे हेतुं पश्यामः ; प्रत्युत *अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामीत्यादिस्वारस्याद्राघवविभीषणादिवच्छरण्यशरणागत-योगोप्तृत्वरक्षितव्यत्वलक्षणो भेदः प्रतीयते । शास्त्रान्तराणि चैतदविरोधेन पूर्वमेव स्थापितानि । यच्चात्र *सर्वधर्मान् परित्यज्येत्यनेन सर्वकर्मस्वरूपसंन्यासविधिरिति, इदमप्यध्यायारम्भोक्ततामसत्यागस्वीकरणम् । एतन्निराकरणायैव सात्त्विकस्त्यागोऽत्र भाष्ये दर्शितः ॥

ननु कर्माधिकृतेष्वेवायं सात्त्विकराजसतामसरूपस्त्यागविकल्पः, सर्वकर्मसंन्यासिनां तत्त्वविदां मोहदुःखमूल-त्यागासंभवात् ; सात्त्विकत्यागोऽपि कर्मनिष्ठमधिकृत्यैवोच्यत इति तत्रैवास्माभिर्व्याख्यातमिति चेत् ; तदसत्, सामान्य-तस्त्यागसंन्यासरूपविषयत्वात्प्रश्नस्योत्तरस्यापि सामान्यविषयत्वं प्रतीयते, ज्ञाननिष्ठानामपि नित्यनैमित्तिककर्मस्वरूपपरित्या-गस्य प्रागेव दूषितत्वाच्च । यच्चानुगीतायामुच्यते—*नैव धर्मी नचाधर्मी न चापि हि शुभाशुभी । यस्यादेकासने लीनस्तूष्णीं किंचिदचिन्तयन् ॥ (भा. आश्व. २०. ७) इति, *ज्ञानं संन्यासलक्षणम् (,, ४३. २६) इत्यादि च ; यच्च श्रीमति भागवते पुराणे—*तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् । प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च । मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन मयास्यसि ह्यकुतोभयम् ॥ (११. १२. १४) इति ; यच्चान्यत्र *त्यज धर्ममधर्मं च त्यज सत्यानृते अपि । उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज ॥ (भा. मो. ३३०. ४०) इति । एवमीदृशानि वचनानि सात्त्विकत्यागोक्तप्रक्रिययैव नेतव्यानि । समाधिदशातत्परेषु तु वचनेषु न कश्चि-द्विरोधः । *त्यज धर्ममसंकल्पादधर्मं चाप्य[लिप्स]हिंसया । उभे सत्यानृते बुद्ध्या बुद्धिं परमनिश्चयात् ॥ (,,.४१) इत्यादिषु च सात्त्विक एव धर्मत्यागस्तत्तद्वचनोक्त इति सुव्यक्तम् । *मामेकमित्यत्र च निर्विशेषचिन्मात्रैक्यादिविवक्षां शृण्वन्तो बाला अपि परिहसेयुः । भाष्योक्तस्त्वेकशब्दार्थो वचनस्वारस्यपूर्वापरशास्त्रान्तरसङ्गतः । एकशब्दश्चात्यन्त-पृथग्भूतेष्वपि दृश्यते । *अपेत्याहमिमां हित्वा संश्रयिष्ये निरामयम् । क्षमं मम सहानेन नैकत्वमनया सह ॥ (भा. मो. ३०८.३८) इति । तथा *वानराणां नराणां च कथमासीत्समागमः (रा. सु. ३५. २) इति प्रश्ने *रामसुग्रीवयो-रैक्यं देव्येवं समजायत (५२) इत्यादिषु । या तु *सर्वधर्मान्परित्यज्येत्यत्र विरोधिधर्ममात्रत्यागविषयत्वेन यादव-प्रकाशादीनां योजना ; न तत्रार्थविवादः । सर्वधर्मानवश्यकरणीयानपि परित्यज्येति स्तुतिरूपयोजना तु अपिशब्दा-ध्याहारादिभिरयुक्ता । अनियतधर्मपरित्यागोऽत्र विवक्षित इति नारायणार्यव्याख्यायामपि नानुष्ठानविरोधः ।

अपिचात्रादितःप्रभृति संमृशामः—प्रथमे तावदध्यायेऽर्जुनस्यास्थानस्नेहकारुण्यादिभिश्शास्त्रोल्लङ्घनप्रसङ्गेप्सुनोप-क्षिप्तपूर्वपक्षबुद्धिप्रशमनाय द्वितीयेनाध्यात्मशास्त्रमवतारितमित्येतावति सर्वेषामविवादः । द्वितीयाध्यायोक्तस्य योगादेरपि भगवानेवाराध्य इत्यत्रापि न विप्रतिपत्तिः । व्रीह्यादिविषयैः प्रोक्षणावघातादिशास्त्रार्थैरपि हि स एवाराध्यते । स तु तत्र न साक्षाद्विषय इति प्रकरणादिबलात्, साक्षाद्भगवद्योगिनश्च—*योगिनामपि सर्वेषां मद्गतेनान्तरात्मना (६. ४७) इत्यादि प्रस्तुत्य प्रतिपादयिष्यमाणत्वाच्च समर्थितम् ।

तृतीये योगास्योपायांशभूतयोः क्रियायोगबुद्धियोगयोः विमर्श इत्येतदपि *ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् (३. ३) इत्यधिकारिभेदवर्णनेन निरस्तम् । नच *दूरेण ह्यवरं कर्म (२. ४९) इति प्रतिपादनात्तुल्यकक्ष्य-त्वमनुपपन्नमिति वाच्यं, तस्य तत्प्रकरणनिन्द्यकाम्यकर्मविषयत्वस्थापनात् । *यस्त्वात्मरतिरेव स्यात् (३. १७) इत्यादि-श्लोकद्वये दृष्टानुश्रविकविषयवितृष्णस्य परमात्मैकरतेः पुरुषस्य कृत्यानुष्ठाने प्रयोजनाभावोऽकृत्यकरणे प्रत्यवायाभावश्च

प्रतिपाद्यत इति यदुच्यते, तदप्ययुक्तं, *नाविरतो दुश्चरितात् (क. २. २४) इत्यादिविरोधोपपादनात्, तत एव *हत्वाऽपि स इमाल्लोकान् (१८.१७) इत्यादेरपि वक्ष्यमाणस्यात्रोदाहृतस्यान्यविषयत्वस्थापनात्। अथ चेत्समाधिदशायां कर्तव्यान्तराभावोऽस्मिन् श्लोकद्वये विवक्षित इत्यभिप्रायः, तदा तु मुक्तदशायामिव विरोधाभावादभ्यनुजानीमः। उक्तं च समाधिदशाविषयत्वं षष्ठे तैरेव। तथा हि—*यं संन्यास इति प्राहुर्योगं तं विद्धि पाण्डव (६.२) इति श्लोके *समाधिवेलायामेव कर्मसंन्यासः कार्यो नान्यदेति यावदित्युक्तम्। *आरुरुक्षोर्मुनेर्योगम् (६. ३) इत्यत्र चैवं व्यक्तितं—*यस्य वशिनो योगेन सकलकर्मकालो व्याप्तः, तस्य कर्मपरित्यागो युक्तः, नान्यस्येति। एतदेव तृतीयचतुर्थपञ्चमेष्वपि भगवता प्रतिपादितमित्यनुसंधातव्यम्। तृतीये तावत् *यस्त्वात्मरतिरेव स्यात् (१७) इत्यत्र। चतुर्थेऽपि *योगसंन्यस्तकर्माणम् (४१) इत्यत्र। पञ्चमे च *सर्वकर्माणि मनसा संन्यस्यास्ते (१३) इत्यत्र। तेनात्मरतीनां वशिनां योगारूढानामेव कर्मसंन्यासो युक्तः; तेषामपि लोकविख्यातानां सर्वलोकादर्शभूतानां विदुषामात्मानुग्रहाभावेऽपि लोकानुग्रहार्थं कर्मयोग एव युक्त इति भगवदभिप्रायो ग्राह्य इति निगमितम्। यत्पुनर्निषिद्धानुष्ठाने प्रत्यवायाभावात्तदकरणे प्रयोजनं नास्तीति, एतत्तु तस्यामवस्थायामप्रसक्तोपन्यासः। यत्तु *कर्मणैव हि संसिद्धिमास्थिता जनकादयः (३. २०) इत्यत्र राज्ञामुपन्यासस्तद्वृत्तान्तानामेव लोके प्रसिद्धत्वादिति, अत्रायमेव भाव उचितः। यत्त्वनन्तरं पक्षान्तरमुक्तम् *एवं परंपराप्राप्तमिमं राजर्षयो विदुः (४. २) इति लिङ्गाद्राज्ञामेवायं योगिनां कर्मापरित्यागोपदेशो नान्येषामिति, तन्मन्दम्, अन्येषामपि कर्मस्वरूपापरित्यागस्य सर्वत्र सुस्पष्टत्वात्; अत एव हि चतुर्थे स्वयमेवोक्तम्—इह केचित् *राजर्षयो विदुरित्यभिधानात्पूर्वस्मिन्नध्याये निदर्शनार्थं जनकोपन्यासात्, नवमेऽध्याये *राजविद्या राजगुह्यम् (२) इति वक्ष्यमाणत्वाच्च राज्ञामेवास्मिन् भगवदुपदिष्टे योगेऽधिकारः, नान्येषामिति मन्यन्ते; तदयुक्तं, नवमेऽध्याये *स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् (३२) इति सर्वाधिकारस्य वक्ष्यमाणत्वात्। तस्मात्प्रदर्शनार्थं राज्ञां प्रवृत्तिविशेषाद्युपन्यासो नान्यथेत्यभ्युपगन्तव्यमिति।

यत्तु पञ्चमे *संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ (२) इत्युक्तसंन्यासकर्मयोगाभ्यामनन्तरं *सांख्ययोगौ पृथग्बालाः (४) इत्याद्युक्तसांख्ययोगयोरर्थान्तरत्वोपपादनं, तदपि मन्दम्, *ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् (४) इति प्रागुक्तप्रत्यभिज्ञानात्। नच प्रसिद्धिविरोधः, अस्मिन् शास्त्रे तयोरेवमेव प्रसिद्धेः। नच *निश्श्रेयसकरावुभावित्युक्तेन पुनरुक्तिः, संग्रहविस्ररूपत्वादिना तत्परिहारात्, सर्वत्र चैवं सर्वैरभ्युपगमात्। यदपि *पण्डितास्समदर्शिनः (१८) इत्यत्र सर्वत्राहिंस्यताबुद्धिरनुग्राह्यताबुद्धिस्सर्वेषां भूतानामीश्वरानुग्राह्यताबुद्धिरीश्वरविभूतित्वबुद्धिश्च समदर्शनमभिप्रेतमिति, तावति न विवादः; यत्तु तत्रानन्तरमुक्तं *न पुनर्हिंसानुग्रहेषु फलसाम्यबुद्धिः ब्राह्मण्यादिविशेषतिरस्कारो वा; कुत एतत्? शास्त्रान्तरानुसारात्प्रमाणान्तरानुसाराच्चेति, अयमप्यात्मव्यतिरिक्तमिथ्यात्वादिवादिनां मतस्योपालम्भः, न पुनस्स्वतःपरस्परसमानानामात्मनामौपाधिकसत्यवैषम्यवादिमतस्य, विषमदेहादीनामपि स्वरूपसाम्यशास्त्रान्तरप्रमाणान्तरविरोधाभावात्, प्रत्युत तत्संवादाच्चेति। षष्ठोक्तयोगस्य विषयविशेषादिकं तत्रैव सुस्पष्टमुपपादितम्। दुरुपपादं च तैरपि योगिनां वैविध्यम्। अत एव हि *योगिनामपि सर्वेषाम् (४७) इति श्लोके व्याचख्युः—योगिनश्चित्तालम्बनवैचित्र्याद्बहुविधाः। तेषु मय्यर्पितचित्तो मामेव श्रद्धया भजते, स मे युक्ततमो मत इति चाहेति, योऽस्माभिरिह संक्षेपविस्ताराभ्यामुपन्यस्तो योगः, स सर्वेभ्यो योगेभ्यश्श्रेष्ठतमो मत इति च। *शब्दज्ञानातिवर्तते (४४) इत्येतदपि त्रिवर्गातिलङ्घनविषयमेवाभ्युपगन्तव्यम्। अत्र

संकोचादिर्महान् क्लेशः । भाष्योक्तप्रक्रिया तु शृङ्गग्राहिकया विवक्षितं वक्तीति विशेषः । *तपस्विभ्योऽधिको योगी (४६) इति श्लोके यदुक्तम्—*अत्र तपश्शब्देन वानप्रस्थधर्माणां परिग्रहः ; ज्ञानशब्देन ब्रह्मचारिधर्माणां, कर्मशब्देन गृहस्थधर्माणामिति, अयं विभागो निर्मूलः ; सर्वेष्वाश्रमेषु स्वाश्रमाविरोधिनां तपोज्ञानकर्मणां संभवाद्यथाश्रुतविरोधाभावाद्वानप्रस्थादिलक्षणायाः प्रयोजनाभावाच्च । सप्तमोक्तचेतनाचेतनरूपप्रकृतिद्वयस्यापि ब्रह्मस्वरूपादत्यन्तभेदोऽस्माभिस्तत्रतत्र समर्थितः । अपरप्रकृतेरष्टधाविभागश्च यथाश्रुत एवोपपन्न इति स्थापितम् । यच्च *रसोऽहमप्सु (८) इत्यादिसामानाधिकरण्यनिर्वाहायोक्तं *समस्तकल्याणगुणसमष्टिविग्रहोऽहम्, अतो मदंशास्सर्वे सर्वत्र कल्याणगुणा इत्यभिप्रायेणाहेति ; तत्र तावद्रसादिकल्याणगुणसमष्टिर्न भगवत्स्वरूपं, नचाप्राकृतस्य विग्रहस्य प्राकृतरसादिमयत्वम् ; अतः परिशेषाद्रसादीनामेव विग्रहत्वमुक्तं स्यात् ; तत्र समष्टिव्यष्टिभावेनांशत्वोक्तिर्निष्फला । तस्मात्तदुपपत्तितादधीन्यादिभिरेव सामानाधिकरण्यगमनिका समीचीना । भेदाभेदनयेन कल्याणगुणतादात्म्यविवक्षायामकल्याणैरपि सर्वात्मनस्तस्य तादात्म्यात् समस्तहेयास्पदत्वादिदोषप्रसङ्गः । एवमुत्तरेष्वपि सामानाधिकरण्येषु भाव्यम् ।

अष्टमे च *किं तद्ब्रह्म (१) इत्यादिप्रश्नानामेकाधिकारिवेद्यविषयत्वं तत्रैवास्माभिर्निराकृतम् । ब्रह्मायुर्दिवसकल्पना पौरुषाहोरात्रकल्पनामूलमहाकल्पप्रक्रियोपन्यासश्च स्मृत्यन्तरानुसारेणास्माभिरप्यभ्युपगमाद्धिरण्यगर्भदिवसावसाने महाप्रलयवादिनामयमुपालम्भः । *यं प्राप्य न निवर्तन्ते तद्धाम परमं मम (२१) इत्यस्य परमव्योमविषयतायां सिद्धान्तविरोधाभावेऽप्यत्र परिशुद्धात्मविषयत्वे युक्तयस्तत्रैवावस्थापिताः । यत्पुनः *अग्निर्ज्योतिः (२४) *धूमो रात्रिः (२५) इत्यत्राग्निधूमशब्दाभ्यामहोरात्रैकदेशभूतः कालविशेषो लक्ष्यत इति ; तदसत्, तत्तच्छब्दैरत्र देवयानपितृयानाख्यगतिद्वयप्रत्यभिज्ञानात्, *नैते सृती (२७) इति निगमनात्, *यत्र काले (२३) इत्युपक्रमस्थकालशब्दस्य कालाभिमानिदेवतातिवाहिकभूयस्त्वविवक्षया स्थापितत्वाच्च । अतः उदगयनपूर्वपक्षाहःपूर्वाह्णसन्निपाते ब्रह्मविद्भिर्योगिभिरपुनरावृत्तये प्रयातव्यमिति नियमनमशक्यम् । दक्षिणायनापरपक्षापराह्णरात्रिषु प्रयातानां योगिनां चान्द्रमसज्योतिः प्राप्य पुनरावृत्तिप्रतिपादनमुत्तरेण श्लोकेन कृतमित्यप्यसत्, *निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च (ब्र. ४. २. १८), *अतश्चायनेऽपि दक्षिणे (१९) इत्यधिकरणाभ्यां दक्षिणायनरात्रिमृतस्यापि योगिनस्तैत्तिरीयोक्तप्रक्रियया चन्द्रसायुज्यपूर्वकं परब्रह्मप्राप्त्यपुनरावृत्त्योस्समर्थितत्वेनास्य श्लोकस्य साक्षाद्योगिव्यतिरिक्तधूमादिमार्गोचिताधिकारिविषयत्वव्यवस्थापनात् । यच्च कथं पुनरग्निज्योतिर्धूमशब्दयोर्यथोक्तकालविशेषपरत्वमवगम्यत इति परिचोदनापूर्वकमुक्तं, श्रुतिषु च स्मृतिषु च समस्तासूदगयनपूर्वपक्षाहःपूर्वाह्णानां सामान्यतो दैवकर्माङ्गत्वोपदेशात्प्रयाणकालानुस्मरणस्यापि दैवत्वाविशेषाच्छास्त्रान्तरेष्वनयोर्दैवकर्मत्वेन दक्षिणायनादिषु वर्जनप्रसङ्गादिति,.....।

यत्पुनः, असमाहितचित्तानामपि सुकरं सुखावगमं क्षिप्रं फलं प्रति भगवत्प्रपत्तिप्रकारं वक्तुं भगवानुवाचेति नवमारम्भे व्याख्यातम्, तदपि पूर्वोक्तज्ञानिसाध्यानन्यभजनस्यैव प्रपद्यनपरत्वप्रतीतेरपाकृतम् । यच्च *ज्ञानयज्ञेन चाप्यन्ये (१५) इति श्लोके प्रकल्पितं *सांख्ययोगाभ्यां समुच्चिताभ्यामुपासनमेकत्वेनोपासनं, विकल्पिताभ्यामुपासनं पृथक्त्वेनोपासनं, बुद्धियोगो वात्र ज्ञानशब्देन विवक्षितः ; तत्राप्ययमर्थः—केचित्कर्मयोगबुद्धियोगाभ्यां समुच्चिताभ्यामुपासते ; केचित्केवलेन कर्मयोगेन ; अपरे केवलेन बुद्धियोगेनेत्येवं बहुधोपासते इति । अत्र सांख्ययोगादिप्रसङ्गकं न किंचिदृश्यते । *अहं क्रतुः (१६) इत्याद्यनन्तरविवरणग्रन्थानुसारेण एकत्वपृथक्त्वयोरुपास्यविषयत्वं सुस्पष्टम् ।

*अनन्याश्चिन्तयन्तो माम् (२२) इत्यादौ तु, नचावश्यंभाविने योगक्षेमायापि मद्भक्तैरेकान्तिभिर्देवतान्तराणि धर्मान्तराणि वाऽपेक्षणीयानीत्यादिकं सर्वमङ्गीकृतमस्माभिः। **दशमे** च *विस्तरेणात्मनो योगं विभूतिं च (१८) इत्यत्र योगशब्दस्य भगवत्कर्मयोगविषयतया व्याख्यानमयुक्तम्; *पश्य मे योगमैश्वरम् (११.८), *एतां विभूतिं योगं च (१०.७) इत्यादिप्रत्यभिज्ञाविरोधात्, अनन्तरमस्मिन्नध्याये तद्विस्तरादर्शनाच्च। *मत्कर्मकृदित्याद्येकादशाध्यायान्तिमश्लोकस्तदुत्तरमित्यपि दूरव्यवधानात्तत्रापि विस्तरादर्शनाच्च निरस्तम्। विभूतिविशेषाणां कृत्स्नस्य च जगतस्स्वरूपैकदेशत्वेनांशतया सामानाधिकरण्यवर्णनमपि प्रागुक्तसदोषत्वादिप्रसङ्गप्रक्रियया परास्तम्। एवं श्रीविश्वरूपविग्रहस्यावयवत्वेन विश्वस्य वर्णनमपि प्राकृताप्राकृतविभागादवधूतम्। **द्वादशोक्त**स्याक्षरोपासनस्य भगवदुपासनाद्भेदस्त्ववाक्यस्वारस्यपुरुषोत्तमत्वादिप्रकरणान्तरैकरस्यादिभिस्साधितः। यत्पुनः, भेदव्यपदेशास्तु कथंचिदवस्थाभेदमाश्रित्य नेतव्याः; अवस्थाभेदश्चात्र निर्विशेषनिखिलवस्तुमात्ररूपता, आविर्भूतसमस्तकल्याणगुणसमष्टिरूपता च विवक्षिता, इति; तदेतदनेकविषयव्याघातविसंस्थुलमाकुमारमपहास्यम्। अन्यत्र च दूषणप्रपञ्चनादिहोपरम्यते। **त्रयोदशे** क्षेत्रज्ञविषये वक्तव्यं सर्वं पूर्वमेवोक्तम्। *यतश्च तदिति (३) पाठोऽप्रसिद्धः। तथा पाठेऽपि ज्ञानपरामर्शोऽस्वरसः। क्षेत्रस्य नित्यत्वेनाहेतुकत्वाद्धेतुर्न निर्दिष्ट इत्युक्तमिति चेत्सत्यमुक्तं, दुरुक्तं तु तत्, *महाभूतान्यहंकारः (५) इत्यादिना वक्ष्यमाणस्य क्षेत्रस्याव्यक्तव्यतिरिक्तस्य समस्तस्यानित्यत्वसंप्रतिपत्तेः, *तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम (भा. मो. ३३५.३१) *अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये संप्रलीयते (,,.३४७.३१) इत्यादिभिर्नित्यस्याप्यव्यक्तस्य परब्रह्मण्येकीभावपृथग्भाववचनाच्च। यच्च *ब्रह्मसूत्रपदैश्चैव (४) इत्यत्रोक्तं—*क्षेत्रादितत्त्वव्यवस्थापनपराणि पञ्चशिखादिप्रणीतानि सूत्रपदानीति, तदप्यनादेशिकं, पञ्चशिखादिग्रन्थे ब्रह्मसूत्रप्रसिद्ध्यभावात्। यत्तु *मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते (१८) इति निगमनाद्भगवानेव *ज्ञेयं यत्तत् प्रवक्ष्यामि (१२) इत्यत्र ज्ञेयत्वेनोक्त इति; तन्न, *इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः (१८) इति निगमितानां त्रयाणामेतच्छब्देनानुवादात्, तत्र क्षेत्रज्ञानवत्कर्मवश्यक्षेत्रज्ञज्ञानस्यापि मोक्षोपयोगित्वोपपत्तेः, क्षेत्रादिज्ञानरूपस्यापि शास्त्रार्थस्य सर्वप्रशासितुर्भगवतस्समाराधनरूपत्वेन *मद्भक्त एतद्विज्ञाय (१८) इत्यनेन विरोधाभावाच्च।

यदपि **चतुर्दशे** *मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् (३) इत्यत्र परावरप्रकृत्योर्जीवाव्यक्तसंज्ञयोरंशो मिलितो गर्भ इत्युक्तं, तत्र ब्रह्मशब्देनाव्यक्तस्य निर्दिष्टत्वात्तत्र तदंशाधानवचनस्य प्रयोजनाभावात्, *क्षेत्रक्षेत्रज्ञसंयोगात् (१३.२६) इत्युक्तस्य चात्र प्रत्यभिज्ञानात्, गर्भशब्देन चेतनविवक्षैव युक्ता। *सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते। ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत॥ (११) इति श्लोके प्रकाशज्ञानशब्दयोः बाह्यान्तरेन्द्रियवृत्तिविषयतया व्यवस्थापनमशक्यं, विपरिवर्तेऽपि विरोधाभावाद्वक्ष्यमाणराजसतामसज्ञानव्यवच्छेदार्थं प्रकाशशब्दप्रयोगोपपत्तेश्च। रजःकार्यश्लोके लोभप्रवृत्तिर्लोभोद्भव इति समस्ततया व्याख्यानमयुक्तं, तथाऽनध्ययनात्, *अप्रकाशोऽप्रवृत्तिश्चेति तमःकार्यश्लोके सत्त्वकार्यप्रकाशनिषेधवद्रजःकार्यप्रवृत्तिनिषेधस्यापि पृथगुपन्यासात्तत्प्रतियोगितया प्रवृत्तेरिह पृथङ्निर्देशोपपत्तेः, *आरम्भः कर्मणामित्यस्य तु गोबलीवर्दन्यायेन निर्वाहात्। **पञ्चदशे**ऽपि *प्रपद्ये यतः प्रवृत्तिः (४) इति पाठोऽप्रसिद्धः। यदपि *ममैवांशो जीवलोके जीवभूतस्सनातनः (७) इत्यत्र संसारिव्यतिरिक्तस्सर्वेश्वरस्यैव कश्चिदंशो जीवशब्दार्थतया प्रथमं व्याख्यायि; तत्र यद्यपि अर्थविरोधो नास्ति, तथाऽपि विभूतिप्रकरणमध्यपाठात्, अन्तर्यामिणस्तु *सर्वस्य चाहं हृदि सन्निविष्टः (१५) इत्यनन्तरमेव वक्ष्यमाणत्वात्, परमात्मांशविशेषे च जीवशब्दस्य प्रसिद्धिप्रकर्षाभावात्, मानवादिशास्त्रान्तरप्रसिद्धेरपि *जीवभूतां महाबाहो (७.५) इति स्वशास्त्रप्रसिद्धेर्बलवत्त्वेन स्वीकर्तुमुचितत्वात्,

*विषयानुपसेक्ते (९) इत्यत्र च प्रतिकूलोदासीनभोगेभ्यस्संकोचस्य क्लिष्टत्वात्, उत्क्रमणाद्युक्तेः, हृदयव्यासेरन्तर्यामिणः स्वारस्यात्, इन्द्रियाधिष्ठानेश्वरशब्दादेश्च तत्तन्नियन्तरि संसारिण्यप्युपपत्तेः, * आत्मन्यवस्थितम् (११) इत्यत्र चात्मशब्दस्य नानार्थस्य प्रकरणोचितार्थपरिग्रहोपपत्तेः, भवदुक्ता द्वितीयैव योजना भाष्यकृदभिमता समीचीनेति मन्यामहे। * वेदैश्च सर्वैरहमेव वेद्यः (१५) इत्यादौ वेदवेदान्तशब्दयोर्वक्तव्यं प्रागेवोक्तम्। * कूटस्थोऽक्षरः (१६) इत्यस्य च जीवभूतपरप्रकृतिव्यतिरिक्ते मुक्ते वृत्तिश्च साधुतरा।

यत्तु **षोडशे** प्रोक्तम्—प्रकारान्तरेणाप्यर्जुनस्य शोकमपनेतुं देवप्रकृतीनां रूपं, तेषां परमकल्याणप्रत्यासत्तिः, अर्जुनस्य दैवप्रकृतित्वम्, आसुरप्रकृतीनां रूपं, तन्निमित्तता च सकलस्यानर्थजातस्योक्तमिति; तदयुक्तं, शास्त्रारम्भेऽर्जुनस्य स्वप्रकृत्यनिर्धारणमूलशोकप्रसङ्गाभावात्, अत्र तत्प्रसङ्गे तदपनोदनस्यापि प्रासङ्गिकस्य युक्तत्वात्; अतः * तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ इति निगमनानुसारेण भगवद्यामुनेयोक्तप्रक्रियया शास्त्रवश्यतैवाध्यायप्रधानार्थः। **सप्तदशे** श्रद्धात्रैविध्यं शास्त्रीयेतरविषयमित्ययुक्तम्; अनन्तरम् * अशास्त्रविहितम् (५) इति पृथगभिधानात्। नच तत्र श्रद्धात्रैविध्यमपि समुच्चेतुं शक्यं, तदनुक्तेस्तत्क्लृप्तयनुपपत्तेश्च। * ॐ तत्सदिति निर्देशः (२३) इत्यत्र मुमुक्षूणां यज्ञादिषु किंचिदङ्गं तेषां वीर्यातिशयार्थमुपदिश्यत इत्ययुक्तम्, अमुमुक्षूणामपि तदविरोधाद्विशेषकाभावाच्च। अतो *लक्षणं शास्त्रसिद्धस्य त्रिधा (गी. सं. २१) इत्ययमेवार्थ उचितः। **अष्टादशे** त्यागस्वरूपादिविवेके नातीव विरोधः, चरमश्लोके वक्तव्यं तु सर्वं सूक्तमस्माभिः। एवमन्येष्वपि भूतेषु भविष्यत्सु च श्रीमद्गीताभाष्येषु भगवद्यामुनाचार्यभाष्यकार[हृदया]मतानुसारेण दिङ्मोहः प्रशमयितव्यः; क्षुद्रस्खलितेष्वदूरविप्रकृष्टयोजनाभेदेषु चोदासितव्यमित्यलमतिप्रसङ्गेन।

पिशाचरन्तिदेवगुहशङ्करयादवप्रकाशभास्करनारायणार्ययज्ञस्वामिप्रभृतिभिः स्वंस्वं मतमास्थितैः परश्शतैर्भाष्यकृद्भिः असत्सिद्धान्ततीर्थकरैश्च भगवद्यामुनाचार्यभाष्यकारादिभिरविगीतपरिगृहीतोऽयमत्र सारार्थः—भगवानेव परं तत्त्वम्, अनन्यशरणैर्यथाधिकारं तदेकाश्रयणं परमधर्मः—इति ॥ ६६ ॥

इदं ते नातपस्काय नाभक्ताय कदाचन। नचाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७

भा ॥ इदं ते परमं गुह्यं शास्त्रं मयाऽऽख्यातम्, अतपस्काय—अतप्ततपसे त्वया न वाच्यम्; त्वयि वक्तरि मयि चाभक्ताय कदाचन न वाच्यम्, तप्ततपसे चाभक्ताय न वाच्यमित्यर्थः। न चाशुश्रूषवे—भक्तायाप्यशुश्रूषवे न वाच्यम्। नच मां योऽभ्यसूयति—मत्स्वरूपे मदैश्वर्ये मद्गुणेषु च कथितेषु यो दोषमाविष्करोति, न तस्मै वाच्यम्। असमानविभक्तिनिर्देशस्तस्यात्यन्तपरिहरणीयताज्ञापनाय ॥ ६७ ॥

ता ॥ एवं स्वोपदेशेन प्रतिष्ठिततत्त्वहितज्ञानस्यार्जुनस्य कर्तव्यविशेषोपदेशव्याजेन संप्रदायविधिसिद्ध्यर्थमस्मिन् शास्त्रेऽनधिकारिणस्तावद्व्यनक्ति—* इदं त इति श्लोकेन। * इदमिति सामान्येन निर्दिष्टं पूर्वापरग्रन्थसैः पदैर्विवृणोति—**इदं ते परमं गुह्यं शास्त्रं मयाऽऽख्यातमिति**। अत्र तेशब्दः * इति ते ज्ञानमाख्यातमिति श्लोकादाकृष्टः; श्लोकस्थस्य तु तेशब्दस्य **त्वयेति** व्याकिया। अतपस्कशब्देन तपःप्रारम्भमात्रे कृतेऽपि श्रवणानधिकारित्वं विवक्षितमित्याह—**अतप्ततपस इति**। * यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ (श्वे. ६. २३) इति श्रुत्यनुसारेणाह—**त्वयि वक्तरि मयि चाभक्तायेति**। अभक्तत्वे विशेषसंकोचकाभावात्, * मद्भक्तेष्वभिधास्यतीत्यनन्तरं भक्तावादरदर्शनाच्च, कदाचनेत्यनेन तपसि सम्यगनुष्ठितेऽपीति विवक्षितमित्याह—**तप्ततपसे चाभक्तायेति**। प्रत्येकपरिहरणीयत्वाय च नञ्प्रयोगावृत्तिः।

उत्तरोत्तरतीव्रत्वतात्पर्येण क्रमविशेष इत्यभिप्रायेणाह—**मक्तायाप्यशुश्रूषव** इति । अत्रापि संकोचहेत्वभा[वः]वात् पूर्ववत् । * ब्रूहि तं श्रद्दधानाय मह्यम् (क. १. १३) इति श्रुत्या च शुश्रूषाप्राधान्यमवगतम् । मामभ्यसूयति—मह्यमभ्यसूयतीत्यर्थः । * क्रुधद्रुहेर्ष्यासूयार्थानामित्यत्र, * यं प्रति कोपः (अष्टा. १. ४. ३७) इति कर्मत्वस्यापि सिद्धत्वात् द्वितीयाऽत्रानपोदिता । मां प्रत्यसूयतीत्युक्तं भवति । विषयतो लक्षणतश्च असूयां व्यनक्ति—**मत्स्वरूप** इत्यादिना । * मामिति सप्रकारपरामर्श इति भावः । प्रक्रमानुरोधेन * नचाभ्यसूयव इति वक्तव्ये प्रक्रमभङ्गेन विरूपवाक्यकरणं केनाभिप्रायेणेत्यत्राह—**असमाने**ति । * असूयकायानृजवे (भा. मो. २४६. १७), * असूयकाय मां मा दाः (मनु. २. ११४) इत्यादिभिरसूयामात्रवते प्रवचनं निषिद्धम् । भगवत्यभ्यसूयावते तु प्रवचनमत्यन्तपरिहरणीयमिति भावः । * नच....वाच्यम् इत्यनेनानधिकारिषु प्रवचने प्रत्यवायस्सूचितः । अत्र मेधाविने तपस्विने वेत्यनयोर्विकल्पोऽन्यत्र दृष्टः ; भक्तादेस्तु न तथा ; अतो भक्त्यादिरहिताय न मेधाविने नापि तपस्विने वाच्यम् ; सर्वगुणयोगेऽपि भगवत्यभ्यसूयावते न वाच्यमित्युक्तं भवति ॥ ६७ ॥

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति । भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८

भा ॥ इदं परमं गुह्यं मद्भक्तेषु योऽभिधास्यति—व्याख्यास्यति, सः मयि परमां भक्तिं कृत्वा मामेवैष्यति ; न तत्र संशयः ॥ ६८ ॥

ता ॥ अथाधिकारिविशेषेप्ववश्यवक्तव्यत्वं तेषु वचनस्यापवर्गाख्यफलपर्यवसानं चोच्यते—*य इदमिति श्लोकेन । * मद्भक्तेष्वित्यनेनैवातपस्कत्वादिदोषा दूरोत्सारिताः, सितमनसां तेषां तदसंभवात् । * श्रावयेच्चतुरो वर्णान् (भा. मो. ३३५. ४८) इत्येतावता सर्वेषु वक्तव्यम्, तेष्वेव मद्भक्ता एव श्रवणाधिकारिण इत्युक्तं भवति । अत्राभिधास्यतीत्यर्थश्रावणपर्यन्तमित्याह—**व्याख्यास्यती**ति । यद्वृत्तवशात् * स इत्यध्याहृतम् । योग्येषु व्याख्यानमपि कर्मयोगादिकोटौ, भक्तियोगाङ्कुरे वा निविष्टं परभक्तिं जनयतीति * भक्तिं मयि परां कृत्वेत्युच्यते । *मामेवेत्यवधारणेन मद्गीताव्याख्यायिनो न क्षुद्रफलेषु सङ्गं जनयामीत्यभिप्रेतम् । फलितमाह—**न तत्र संशय** इति । * असंशय इति संशय एव वा निषिध्यते ॥ ६८ ॥

नच तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः । भविता नच मे तस्मादन्यः प्रियतरो भुवि ॥ ६९

भा ॥ सर्वेषु मनुष्येष्वितःपूर्वं तस्मादन्यो मनुष्यो मे न कश्चित्प्रियकृत्तमोऽभूत् ; इत उत्तरं च न भविता । अयोग्यानां प्रथममुपादानं योग्यानामकथनादपि तत्कथनस्यानिष्टतमत्वात् ॥ ६९ ॥

ता ॥ स्वशास्त्रव्याख्यानस्य स्वप्राप्तिसाधनत्वे द्वारमुच्यते—* नच तस्मादिति श्लोकेन । प्रियकृत्तमत्वप्रियतरत्वयोर्हेतुकार्यभावेन *भवितेत्युपात्तक्रिययैवान्वये संभवत्यपि कालत्रयवर्तिनिषेधेऽर्थगौरवेण तात्पर्यसिद्ध्यर्थं—**मनुष्येष्वितः पूर्वमि**त्याद्युक्तम् । ननु शास्त्रस्याधिकारी अपेक्षितः, अतस्स तावद्वक्तव्यः ; अनधिकारी तु तत एवार्थाद्व्युदस्यते ; प्रधानतमादधिकारिणोऽनन्तरं वा व्यवच्छेद्यतया अनधिकारी वक्तव्यः ; इह तु तद्वैपरीत्ये किं निबन्धनमित्यत्राह—**अयोग्यानामि**ति । **तत्कथनस्य**—अयोग्यान्प्रति कथनस्येत्यर्थः । **अनिष्टतमत्वात्**—अनिष्टतमत्वज्ञापनार्थमित्यर्थः । **योग्यानामकथनस्यानिष्टत्वं** * प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् (मु. १. २. १३) इति ब्रह्मविद्याप्रवचनस्य वैधत्वाल्लभ्यते । **प्रोवाच—प्रब्रूयादित्यर्थः**, * छन्दसि लुङ्लङ् लिटः (अष्टा. ३. ४. ६) इति विधानात् । अन्यथा * स गुरुमेवाभिगच्छेदिति प्रथमेन वाक्येनानन्वयात् ॥ ६९ ॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः । ज्ञानयज्ञेन तेनाहमिष्टस्स्यामिति मे मतिः ॥ ७०

भा ॥ य इममावयोर्धर्म्यं संवादमध्येष्यते, तेन ज्ञानयज्ञेनाहमिष्टस्स्यामिति मे मतिः—अस्मिन् यो ज्ञानयज्ञोऽभिधीयते, तेनाहमेतदध्ययनमात्रेणेष्टस्स्यामित्यर्थः ॥ ७० ॥

ता ॥ एवमुपदेष्टुः फलमुक्तम्; अथ शब्दतोऽर्थतश्च गुरुसकाशादध्येतुः फलमुच्यते—* अध्येष्यत इत्यादिना श्लोकद्वयेन । * शृणुयादिति पौरेरधीयमानपाठश्रवणमात्रं वा । * अध्येष्यते इति—नहि सर्वज्ञस्य भगवतो भविष्यद्भारतनिबन्धावेक्षणेन स्वसंवादाध्ययनभावित्वोक्तिः; अपितु भूतावेक्षणेन । महाभारतं हि धृतराष्ट्राद्युत्पत्तेः प्रागेव भगवत्प्रसादलब्धदिव्यचक्षुषा भगवता व्यासेन निबद्धम्; अनुज्ञातं च शिष्येभ्यः; तैश्च * नारदोऽश्रावयद्देवानसितो देवलः पितॄन् । गन्धर्वयक्षरक्षांसि श्रावयामास वै शुकः ॥ (भा. आ. १. ११३) इति मानुषव्यतिरिक्तेषु लोकेषु प्रकाशितम् । मानुषे तु लोके जनमेजयपुरस्कारेण प्रकाशिष्यते । तदपेक्षयोक्तम्—* अध्येष्यत इति । उपनिषत्सारत्वादध्ययनोक्तिः । कथितं चाश्रमवर्णने कविभिः * अनवरताधीतभगवद्गीतम् (काद) इति । * श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप (४.३३) इति यः प्रथमषट्के ज्ञानयज्ञोऽभिहितः, नासावत्र विवक्षितः; अपितु भक्तियोगप्रकरणे *ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते (९. १५) इति यो भगवदनुसंधानविशेषरूपो ज्ञानयज्ञ उक्तः, स एवात्र शास्त्रसारभूतो विवक्षित इत्यभिप्रायेणाह—**अस्मिन् यो ज्ञानयज्ञ** इति । विधिजपोपांशुमानसानां ज्ञानयज्ञो मानसत्वाद्विशिष्टः । **एतदध्ययन मात्रेणेति**—अयमभिप्रायः—* योऽश्वमेधेन यजते, य उ चैनमेवं वेद (अश्व. २) * यंयं क्रतुमधीते तेनतेनास्येष्टं भवति (य. आ. २. १५) इत्यादिषु यथा तत्तत्क्रत्वध्ययनस्य तत्तुल्यफलता, तथा अत्रापि ज्ञानयज्ञवद्भगवत्प्रीतिजनकत्वं तद्गीताध्ययनस्य—इति ॥ ७० ॥

श्रद्धावाननसूयुश्च शृणुयादपि यो नरः । सोऽपि मुक्तश्शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१

भा ॥ श्रद्धावाननसूयुश्च यो नरश्शृणुयादपि, तेन श्रवणमात्रेण सोऽपि भक्तिविरोधिपापेभ्यो मुक्तः पुण्यकर्मणां मद्भक्तानां लोकान्—समूहान् प्राप्नुयात् ॥ ७१ ॥

ता ॥ *श्रद्धावाननसूयुश्चेति चकारादत्रानुषक्तानामपि प्रागुक्तानां प्रणिपातपरिप्रश्नसेवानां ग्रहणम् । *शृणुयादित्यनेन आचार्यसकाशादिति गम्यते । श्रूयते हि—* तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् (मु. १. २. १२) इति । * आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत् (छा. ४. ९. ३) इति च । एतेन स्वयं ग्रन्थनिरीक्षणमन्यायेनान्यस्माद्ग्रहणं च व्यवच्छिद्यते । सोऽपीति विलम्बस्मूच्यते । तेन **भक्तिविरोधिभ्यो मुक्त** इत्युक्तम् । अन्यथा विघ्यन्तरवैयर्थ्यादिप्रसङ्ग इति भावः । अर्थज्ञानादिमतश्च कैमुत्यमपिशब्देन व्यञ्जितम् । प्रवचनपठनयोर्मोक्षैकान्तफलस्य पूर्वमुक्तत्वात्सहभावेनाग्र्यप्रायन्यायाच्छ्रवणेऽपि तादृशफलं भगवदभिप्रेतं स्वीकर्तुमुचितम्; नतु नरककल्पस्वर्गादि, तत्प्राप्तेरनभिमतत्वात् । अतो मद्भक्तानां **लोकान्समूहानित्युक्तम्** । अत्र पाठश्रवणादिप्रीतो भगवान् स्वभक्तान् प्राप्स्यति । भगवद्भक्तानां प्राप्तिर्हि योगोपदेशादिद्वारा मोक्षाय स्यात् ॥ ७१ ॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा । कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनञ्जय ॥ ७२

भा ॥ मया कथितमेतत्पार्थ त्वयाऽवहितेन चेतसा कच्चिच्छ्रुतम्, तवाज्ञानसंमोहः कच्चित्प्रनष्टः, येनाज्ञानेन मूढो न योत्स्यामीत्युक्तवान् ॥ ७२ ॥

ता ॥ अथार्जुनस्य विदिताशयोऽपि भगवानादरेणाविस्मरणायोपदेशसाफल्यं जिज्ञासमान इव पृच्छति—**कच्चिदिति** । एतदित्यर्थपर्यन्तत्वात् श्रुतमिति अर्थधीपर्यन्तम् । मत्कथितमेतत्किं निरर्थकमित्यभिप्रायेणैतच्छब्द इत्याह—**मया कथितमेत**दिति । अज्ञानसंमोहः कचित्प्रनष्ट इति श्रुतफलानुयोगः । अज्ञानहेतुकं भ्रान्तिज्ञानमिहाज्ञानसंमोहः । येनाज्ञानेन मूढ इत्यस्याज्ञानसंमोह इति प्रतिनिर्देशे तेनाज्ञानेन जनितसंमोह इत्यन्वयो भाव्यः ॥ ७२ ॥

अर्जुन उवाच—

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत । स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३

भा ॥ मोहः—विपरीतज्ञानम्, त्वत्प्रसादान्मम तद्विनष्टम् । स्मृतिः—यथावस्थिततत्त्वज्ञानम्, त्वत्प्रसादादेव तच्च लब्धम् । अनात्मनि प्रकृतावात्माभिमानरूपो मोहः, परमपुरुषशरीरतया तदात्मकस्य कृत्स्नस्य चिदचिद्वस्तुनः अतदात्माभिमानरूपश्च, नित्यनैमित्तिकरूपस्य कर्मणः परमपुरुषाराधनतया तत्प्राप्त्युपायभूतस्य बन्धकत्वबुद्धिरूपश्च सर्वो विनष्टः । आत्मनः प्रकृतिविलक्षणत्वतत्स्वभावरहितताज्ञातृत्वैकस्वभावतापरमपुरुषशेषतातन्नियाम्यत्वैकस्वरूपताज्ञानम् , निखिलजगदुद्भवस्थितिप्रलयलीलाशेषदोषप्रत्यनीककल्याणैकस्वरूपस्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृतिसमस्तकल्याणगुणगणमहार्णवपरब्रह्मशब्दाभिधेय - परमपुरुषयाथात्म्यज्ञानं च; एवंरूपपरावरतत्त्वयाथात्म्यविज्ञानतदभ्यासपूर्वकाहरहरुपचीयमानपरमपुरुषप्रीत्येकफलनित्यनैमित्तिककर्मनिषिद्धपरिहारशमदमाद्यात्मगुणनिर्वर्त्यभक्तिरूपतापन्नपरमपुरुषोपासनैकलभ्यो वेदान्तवेद्यः परमपुरुषो वासुदेवस्त्वमिति ज्ञानं च लब्धम् । ततश्च बन्धुस्नेहकारुण्यप्रवृद्धविपरीतज्ञानमूलात्सर्वसादवसादाद्विमुक्तो गतसंदेहः स्वस्थः स्थितोऽस्मि । इदानीमेव युद्धादिकर्तव्यताविषयं तव वचनं करिष्ये; यथोक्तं युद्धादिकं करिष्य इत्यर्थः ॥ ७३ ॥

ता ॥ अथ कृतज्ञतांशं व्यञ्जयन्नर्जुनश्श्रुतफलसिद्ध्या प्रतिवक्ति * नष्टो मोह इति । अर्जुनेनास्यार्थस्येतःपूर्वमनवगमाद्वाक्येन प्रथमं स्मृतेरनुदयात्तन्मूलभूतशब्दजन्योऽनुभव इह स्मृतिशब्देन लक्ष्यत इत्याह—**स्मृतिर्यथावस्थिततत्त्वज्ञान**मिति । * स नो देवश्शुभया स्मृत्या संयुनक्तु (ना) इत्यस्य मन्त्रस्य * स नो बुद्ध्या शुभया संयुनक्तु (श्वे. ३. ४) इति शाखान्तरे पाठदर्शनात्स्मृतिबुद्धिशब्दावदूरविप्रकर्षेणैकार्थौ युक्ताविति भावः । निवर्त्यमोहस्वरूपं चोपदेशस्यामूलचूडपरामर्शेन व्यनक्ति—**अनात्मनी**त्यादिना । प्रकृतिविलक्षणत्वं स्वप्रकाशत्वादिभिः; विकाराद्यभावात्तत्स्वभावरहितता । स्वस्थः प्रकृतिस्थ इत्यर्थः । उपदेशवचनस्य स्वरूपेणाननुष्ठेयत्वात्तेन तत्प्रतिपाद्यं लक्ष्यत इत्याह—**यथोक्तं युद्धादिक**मिति । एवं चाभिप्रायः । आदिशब्देन भक्तियोगपर्यन्तग्रहणम् । अननुष्ठानं तु स्मृतिभ्रंशात्; स्मृतिभ्रंशादिति हि वक्ष्यति—* यत्तु तद्भवता प्रोक्तं पुरा केशव सौहृदात् । तत्सर्वं पुरुषव्याघ्र भ्रष्टं मे नष्टचेतसः ॥ (भा. आश्व. १७. ६) इति । प्रतिवक्ष्यति च भगवान्—* श्रावितस्त्वं मया गुह्यं ज्ञापितश्च सनातनम् । धर्मं स्वरूपिणं पार्थ सर्वलोकांश्च शाश्वतान् । अबुद्ध्या यन्नगृह्णीयास्तन्मे सुमहदप्रियम् ॥....सहि धर्मस्सुपर्याप्तो ब्रह्मणः [परि]पदवेदने । (१२) इतीति ॥ ७३ ॥

भा ॥ धृतराष्ट्राय स्वपुत्राः पाण्डवाश्च युद्धे किं करिष्यन्तीति पृच्छते

संजय उवाच—

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः । संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४

भा ॥ इति—एवं वासुदेवस्य—वसुदेवसूनोः, पार्थस्य च—तत्पितृष्वसुः पुत्रस्य च महात्मनो महाबुद्धेस्तत्पदद्वन्द्वमाश्रितस्येमं रोमहर्षणमद्भुतं संवादमहं यथोक्तमश्रौषम्—श्रुतवानहम् ॥ ७४ ॥

ता ॥ *मामकाः पाण्डवाश्चैव किमकुर्वत संजय (१.१) इति प्रश्ने कृत्स्नं संगमयतीत्याह—धृतराष्ट्रायेति । *महात्मनः इत्युक्तं व्यनक्ति—तत्पदद्वन्द्वमाश्रितस्येति । * कृष्णाश्रयाः कृष्णबलाः कृष्णनाथाश्च पाण्डवाः (भा. द्रो. १८३. २४) इति अन्यत्रोक्तम् । अत्रच * शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् (२. ७) इति । अद्भुतत्वातिशयाद्रोमहर्षणत्वम् । यथोक्तमश्रौषमिति । यथा ताभ्यामुक्तम्, तत्र ममाश्रुतांशो नास्तीत्यर्थः । एतेन यथार्थदर्शित्वं व्यञ्जितम् । यद्वा—यथा तव मयोक्तम्, एवमेव श्रुतवानस्मि, ततश्च यथादृष्टार्थवादित्वं व्यञ्जितं भवति । अहमश्रौषमिति योजना ॥ ७४ ॥

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् । योगं योगेश्वरात्कृष्णात्साक्षात्कथयतस्स्वयम् ॥ ७५

भा ॥ व्यासप्रसादात्—व्यासानुग्रहेण दिव्यचक्षुश्श्रोत्रलाभात् एतत्परं योगाख्यं गुह्यं योगेश्वरात्—ज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधेर्भगवतः कृष्णात् स्वयमेव कथयतः साक्षाच्छ्रुतवानहम् ॥ ७५ ॥

ता ॥ मन्दस्य मोहनकालुष्यनिवृत्तिलक्षणप्रसादस्यात्राभावात्—व्यासानुग्रहेणेत्युक्तम् । देवैरप्यदृश्यस्य श्रीविश्वरूपस्य दर्शनार्थं दूरस्थवाक्यश्रवणार्थंच अनुग्रहावान्तरव्यापारमाह—दिव्यचक्षुश्श्रोत्रलाभादिति । अतीन्द्रियादिग्रहणसामर्थ्यादिमात्रेणात्र दिव्यत्वम् । एतदिति नपुंसकनिष्पत्तये योगशब्दं विशेषणीकरोति—योगाख्यमिति । परं गुह्यमित्यश्रवणयोग्यताभिप्रायम् । तथाभूतमपि हि मया श्रुतमिति व्यासमाहात्म्यव्यञ्जनम् । * योगेश्वरादित्यत्र योगशब्दः कल्याणगुणयोगपरः, * एतां विभूतिं योगंच (१०. ७) इति प्रागुक्तवदित्याह—ज्ञानेति । स्वयमेव कथयतः, नतु परैर्वा [चितात्] चयत इत्यर्थः । तेन वक्तृवैलक्षण्योक्तिः । यथा * पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम् (भा. मो. ३५९. ६८) इति । साक्षाच्छ्रुतवानहमिति—न तु विवस्वदर्जुनादितच्छिष्यद्वारेत्यर्थः । यद्वा दूरस्थोऽपि प्रत्यक्षं श्रुतवानिति ॥ ७५ ॥

राजन् संस्मृत्यसंस्मृत्य संवादमिममद्भुतम् । केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६

भा ॥ केशवार्जुनयोरिमं पुण्यमद्भुतं संवादं साक्षाच्छ्रुतं स्मृत्वा मुहुर्मुहुर्हृष्यामि ॥ ७६ ॥

ता ॥ अद्भुततरत्वमाह—* राजन्नित्यादिना श्लोकद्वयेन । पुण्यं—श्रवणमात्रेणापि ज्ञानयज्ञादिवत्पावनम् । अद्भुतं—शब्दतोऽर्थतश्च आश्चर्यावहम् ॥ ७६ ॥

तच्च संस्मृत्यसंस्मृत्य रूपमत्यद्भुतं हरेः । विस्मयो मे महान् राजन् हृष्यामि च पुनःपुनः ॥ ७७

भा ॥ तच्चार्जुनाय प्रकाशितमैश्वरं हरेरत्यद्भुतं रूपं मया साक्षात्कृतं संस्मृत्यसंस्मृत्य हृष्यतो मे महान् विस्मयो जायते ; पुनःपुनश्च हृष्यामि ॥ ७७ ॥

ता ॥ तच्च रूपमित्येतत्सर्वजनप्रत्यक्षवसुदेवतनयरूपाद्व्यवच्छेदार्थमित्याह—अर्जुनाय प्रकाशितमैश्वरं रूपमिति । * संस्मृत्येत्यस्य समानकर्तृकत्वाय हृष्यामीति समभिव्याहारानुसारेण हृष्यत इत्युपात्तम् । दृष्टं च फलं महत्तरमित्यस्य श्लोकस्य भावः ॥ ७७ ॥

भा ॥ किमत्र बहुनोक्तेन—

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८

॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु **मोक्षसंन्यासयोगो** नाम अष्टादशोऽध्यायः ॥ १८ ॥

भा ॥ यत्र योगेश्वरः—कृत्स्नस्योच्चावचरूपेणावस्थितस्य चेतनस्याचेतनस्य च वस्तुनो येये स्वभावयोगाः, तेषां सर्वेषां योगानामीश्वरः, स्वसंकल्पायत्तस्वेतरसमस्तवस्तुस्वरूपस्थितिप्रवृत्तिभेदः कृष्णः वसुदेवसूनुः, यत्र च पार्थो धनुर्धरः तत्पितृष्वसुः पुत्रः तत्पदद्वन्द्वैकाश्रयः ; तत्र श्रीर्विजयो भूतिर्नीतिश्च ध्रुवा—निश्चला ; इति मतिर्ममेति ॥ ७८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये अष्टादशोऽध्यायः ॥ १८ ॥

ता ॥ सुयोधनविजयबुभुत्सया कृतस्य प्रश्नस्य सहसा साक्षादुत्तरं वक्तुमशक्नुवन् * अर्धोक्ताः कुरुपाञ्चालाः इति मत्वा गूढाभिसंधिस्संवादाद्भुतत्वादिकमुक्तवान् । तावताऽप्यजानतस्सर्वात्मनाऽन्यस्य साक्षादुत्तरमाहेत्याह—**किमत्र बहुनेति**। अनभिप्रायज्ञस्य ते भगवता अर्जुनायाध्यात्मोपदेशवैश्वरूप्यप्रकाशनादिभिः पाण्डवविजयसूचकैरलम् ; सूचितमेव स्पष्टं वदामीत्युच्यत इति भावः । यत्र—यस्मिन् पक्ष इत्यर्थः । योगेश्वरशब्दस्य * कथयतस्स्वयमित्यत्रासततमत्वाय प्रागुक्तादर्थादर्थान्तरकथनम्, अनेकार्थसंभवात्प्रकरणानुगुण्येन तत्तद्विशेषपरिग्रहोपपत्तेश्च । ईश्वरशब्दस्य नियन्तव्यसाकाङ्क्षतया योगशब्देन नियन्तव्यविशेषसमर्पणं च युक्तमम् ; अतो विवक्षितविजयाद्यनुगुणमर्थमाह—**कृत्स्नस्येत्यादिना**। तत्र फलितमाह—**स्वसंकल्पेति** । अवस्थान्तरेऽपि नामभूतः कृष्णशब्दोऽत्रावतारदशायामपि योगेश्वरत्वेनाजहत्स्वस्वभावत्वसूचनार्थ इत्यभिप्रायेणाह—**वसुदेवसूनुरिति** । पार्थसंबन्धविशेषोऽप्यनेन सूचितः । अत एवहि पार्थशब्द एवं व्याख्यायते—**तत्पितृष्वसुः पुत्र** इति । * *विसृज्य सशरं चापम्* (१. ४७) इति प्रागुक्तावस्थाव्यतिरेकपरोऽत्र धनुर्धरशब्दः भगवदनुशिष्टयथोक्तकरणार्थतया गाण्डीवास्त्रधनुर्ग्रहणद्योतनार्थः । तत्र विशिष्टोपकरणविशेषवीर्यादिविशेषोऽप्यन्तर्नीतः । * पार्थस्य च महात्मनः (१८. ७४) इति प्रागुक्तमहामतित्वं पार्थशब्देन सूचितमित्याह—**तत्पदद्वन्द्वैकाश्रय** इति । नह्यसौ त्वत्पुत्रवत्कृष्णमभ्यर्थ्य निस्सारान्परिकरत्वेन परिजग्राहेति भावः । * तत्रेति सामान्यनिर्देशः प्रत्यक्षपारुष्यपरिहारार्थः । श्रीः—राज्यादिभोग्यसमृद्धिरूपा । विजयः—शत्रुनिरासः । तत्र ध्रुवः इति विपरिणामः । भूतिः—ऐश्वर्यम्, * विभूतिर्भूतिरैश्वर्यम् (नाम. १. स्व) इति पर्यायपाठात् । तेनास्य पुरुषस्य प्रभुत्वादिशक्तियोगो विवक्षितः । उत्पन्नायास्समृद्धेरुत्तरोत्तराभिवृद्धिरूपभवनं वा भूतिः, नीतिः—अर्थशास्त्रजन्यकर्तव्यनिश्चयः ; चोदितधर्मविरुद्धा वा वृत्तिः । पटुप्रज्ञैरवहितैरपि युष्माभिश्चतुर्भिरप्युपायैरकम्पनीयो नयो ध्रुवशब्दाभिप्रेत इत्याह—**निश्चलेति** । *मतिर्ममेत्यस्यान्वयार्थमितिशब्दोऽध्याहृतः । ममैव मतिः—* [विद्या]शृणु राजन्न ते विद्या मम विद्या महीयते । विद्याहीनस्तमोध्वस्तो नाभिजानासि केशवम् ॥....मायां न सेवे भद्रं ते न वृथाधर्ममाचरे । शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् ॥ (भा. उ. ६८. २-५) इति । अतस्ते ध्रुवा नैवं मतिः, मम त्वेवं समीचीना मतिस्संजातेति भावः ॥ ७८ ॥

कृष्णस्तत्त्वं परं तत्परमपि च हितं तत्पदैकाश्रयत्वं शास्त्रार्थोऽयं च षट्कैस्त्रिभिरिह कथितस्तत्र पूर्वत्र षट्के ।
भक्त्यर्थस्वात्मदृष्टेः करयुगलदशा मध्यमे भक्त्युपायः स्वोक्तानुष्ठानवृत्तिं द्रढयितुमखिलं मोक्षमन्तेऽप्यशोधि ॥

अध्यायैश्शिष्यमोहस्तदुपशमविधिः कर्मयोगोऽस्य भेदास्तत्सौकर्यादियोगस्तदुचितमहिमा भूतिकामादिभेदः ।
भक्तिस्तन्मूलभूमा भजनसुलभता भक्तिशैथ्र्यादि जीवः त्रैगुण्यं शासिताज्ञा तदधिगमपरस्सारवर्गश्च गीताः ॥

....

$ इत्यादिस्सर्वयोगो भगवति परमैकान्त्यसंप्रीतियुक्तं .... ।

[ए]येषामन्योन्ययोगो भवति च कलया नित्यनैमित्तिकानां त्रिष्वप्येतेषु योगं परममितफलं वक्तुमन्यत्प्रसक्तम् ॥
शुद्धादेशवशंवदीकृतयतिक्षोणीशवाणीशता प्रज्ञातल्पपरिष्कृतश्रुतिशिरःप्रासादमासेदुषी ।
नित्यानन्दविभूतिसन्निधिसदासामोददामोदरद्वित्रालिङ्गनदौर्लभित्यललितोन्मेषा मनीषास्तु मे ॥
तत्त्वं यत्प्रणवे धनञ्जयरथेऽप्यग्रे दरीदृश्यते तच्चित्तो भुवि वेंकटेश्वरकविर्भक्तोऽनुकम्प्यस्सताम् ।
तत्तादृग्गुरुदृष्टिपातमहिमप्रस्तौनसा येन सा गीताविष्णुपदी यतीश्वरवचस्तीर्थैरवागाह्यत ॥

॥ इति श्रीमद्गीताभाष्यटीकायां तात्पर्यचन्द्रिकायां अष्टादशोऽध्यायः ॥ १८ ॥

इति श्रीमद्भगवद्गीतायां

॥ तृतीयषट्कं समाप्तम् ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु
॥ श्रीगीताभाष्यतात्पर्यचन्द्रिका समाप्ता ॥

$ इत्यादिस्सर्वयोगास्तदुचितभगवत्परमैकान्त्ययुक्तं । पाठान्तरम्

॥ संकेताक्षरविवरणम् ॥

अत्रि ; अ. स्मृ	अत्रिस्मृतिः,
अथ.	अथर्वशिखोपनिषत्
अथर्व.	अथर्वशिरउपनिषत्
अ. पु.	अग्निपुराणम्
अ. बि. उ.	अमृतबिन्दूपनिषत्
अश्व.	अश्वमेधः
अष्ट. ; य. अ.	यजुरष्टकम्
अष्टा.	अष्टाध्यायी
अष्टा. वा.	अष्टाध्यायी-वार्तिकम्
अष्टा. भा.	महाभाष्यम्
अष्टाङ्ग.	अष्टाङ्गहृदयम्
अहि.	अहिर्बुध्न्यसंहिता.
आ.	आनन्दवल्ली
आप. श्रौ ; आ. श्रौ.	आपस्तम्बश्रौतसूत्रम्
आप.	आपस्तम्बधर्मसूत्रम्
आ. सि.	आत्मसिद्धिः
इ. स. ; इति स.	इतिहाससमुच्चयः
ई. सं.	ईश्वरसंहिता
ऐ.	ऐतरेयोपनिषत्
ऐ. आ.	ऐतरेयारण्यकम्
ऐ. ब्रा.	ऐतरेयब्राह्मणम्
क. ; कठ.	कठोपनिषत्
काठ ; यजु. का.	काठकम्
काद.	कादम्बरी
काव्या.	काव्यादर्शः
काव्यानु.	काव्यानुशासनम्
कौ.	कौषीतक्युपनिषत्
ग.	गर्भोपनिषत्
गा. पू.	गारुडपुराणे
गी.	भगवद्गीता
गी. सं. ; सं.	गीतार्थसंग्रहः
गौ ; गौ. ध.	गौतमधर्मसूत्रम्
च.	चतुश्श्लोकी
छा.	छान्दोग्योपनिषत्
जि.	जितन्तेस्तोत्रम्
तत्त्व.	तत्त्वसारः
तव.	तवल्कारश्रुतिः
तै. ना. ; ना.	तैत्तिरीये नारायणानुवाकः
तै. ब्रा. ; या. ब्रा. ;	तैत्तिरीयब्राह्मणम्
यजु. ब्रा.	यजुर्ब्राह्मणम्
दश.	दशरूपकम्
द. स्मृ	दक्षस्मृतिः
द्र भा.	द्रमिडभाष्यम्
ध्यान.	ध्यानबिन्दूपनिषत्
ना. उ.	नारायणोपनिषत्
ना. प. ; ना. प. उ.	नारदपरिव्राजकोपनिषत्
ना. पु. ; नार.	नारसिंहपुराणम्
नार. पु.	नारदपुराणम्
नाम. ; ना. शा.	नामलिङ्गानुशासनम्
न्या. कु.	न्यायकुसुमाञ्जलिः
पा.	पाद्मसंहिता
पाञ्च. ; पञ्च.	पाञ्चरात्रम्
पा. पा.	पाद्मे पुराणे पातालखण्डः
पु.	पुरुषसूक्तम्
पू. मी.	पूर्वमीमांसासूत्राणि
पौ सं.	पौष्करसंहिता
प्र.	प्रश्नोपनिषत्
म.	मत्स्यपुराणम्
म. उ. ; महो.	महोपनिषत्
मनु.	मनुस्मृतिः
मालती.	मालतीमाधवम्
मु.	मुण्डकोपनिषत्

मुकुन्द.	मुकुन्दमाला
मै. उ.	मैत्रायणीयोपनिषत्
मैत्राव.	मैत्रावरुणीयोपनिषत्
मं. उ.	मन्त्रिकोपनिषत्
मं. प्र.	मन्त्रप्रश्नः
य. आ. ; यजु. आ.	यजुरारण्यकम्
यजु	यजुस्संहिता
य. स्मृ.	यमस्मृतिः
या. स्मृ. ; याज्ञ. स्मृ.	याज्ञवल्क्यस्मृतिः
या. स्मृ. आ.	,, आचारकाण्डः
यो. या.	योगयाज्ञवल्क्यस्मृतिः
यो. सू. ; पा. सू	पातञ्जलयोगसूत्रम्
बा. स्मृ. ; बार्ह स्मृ.	बार्हस्पत्यस्मृतिः
बृ.	बृहदारण्यकोपनिषत्
बोधा.	बोधायनवृत्तिः (ब्रह्मसूत्राणाम्)
बो. सू.	बोधायनसूत्रम्
ब्र. ; शा.	ब्रह्मसूत्राणि
ब्र. कै. प्र.	ब्रह्मकैवर्ते प्रकृतिखण्डः
ब्र. पु.	ब्रह्माण्डपुराणम्
बृ. हा.	बृहद्धारीतस्मृतिः
भर.	भरद्वाजस्मृतिः
भा.	महाभारतम्
भा. आ.	महाभारते आदिपर्व
भा. आनु.	,, आनुशासनिकपर्व
भा. आश्व.	,, आश्वमेधिकपर्व
भा. स.	,, सभापर्व
भा. व.	,, वनपर्व
भा. वि.	,, विराटपर्व
भा. उ.	,, उद्योगपर्व
भा. भी.	,, भीष्मपर्व
भा. द्रो.	,, द्रोणपर्व
भा. स्त्री.	,, स्त्रीपर्व
भा. शा.	,, शान्तिपर्व
भा. मो. ; मो. ध.	महाभारते शान्तिपर्वणि मोक्षधर्मपर्व
भा. रा.	,, शान्तिपर्वणि राजधर्मपर्व
भा. मौ.	,, मौसलपर्व
भाग.	भागवतम्
भृ.	भृगुवल्ली
र. ब्रा.	रहस्याम्नायब्राह्मणम्
रा.	श्रीरामायणम्
रा. बा.	श्रीरामायणे बालकाण्डम्
रा. अ.	,, अयोध्याकाण्डम्
रा. आ.	,, आरण्यकाण्डम्
रा. कि.	,, किष्किन्धाकाण्डम्
रा. सु.	,, सुन्दरकाण्डम्
रा. यु.	,, युद्धकाण्डम्
रा. उ.	,, उत्तरकाण्डम्
ल.	लक्ष्मीतन्त्रम्
ल. पा.	लघुपाराशरस्मृतिः
ल. वि.	लघुविष्णुस्मृतिः
लै. उ.	लैङ्गपुराणे उत्तरभागः
व. पु ; वरा.	वराहपुराणम्
वासिष्ठ.	वासिष्ठस्मृतिः
व. स्त.	वरदराजस्तवः
वायु.	वायुपुराणम्
वि.	विष्णुपुराणम्
वि. ध.	विष्णुधर्मः
वि. स.	विष्णुसहस्रनामस्तोत्रम्
वि. सं.	विष्वक्सेनसंहिता
विह. ; विह. सं	विहगेश्वरसंहिता
वृ. हा.	बृहद्धारीतस्मृतिः
वै. स्त.	श्रीवैकुण्ठस्तवः
व्या.	व्यासस्मृतिः
व्या. भा.	व्यासभाष्यम् (योगसूत्राणाम्)
शत. ; श. ब्रा.	शतपथब्राह्मणम्
,, माध्य	,, माध्यन्दिनपाठः
शा. भा.	शाबरभाष्यम्

शा. स्मृ.	शाण्डल्यस्मृतिः	सा. उ.	सामवेद उत्तरप्रपाठक
शी. ; शीक्षा.	शीक्षावल्ली	सार.	वेदान्तसारः
श्री.	श्रीसूक्तम्	सां. का.	सांख्यकारिका
श्रीगु.	श्रीगुणरत्नकोशः	सां. कौ.	सांख्यतत्त्वकौमुदी
श्वे.	श्वेताश्वतरोपनिषत्	सु.	सुबालोपनिषत्
स. भा.	सहस्रनामभाष्यम्	स्तो. ; स्तो. र.	स्तोत्ररत्नम्
सं. सि.	संवित्सिद्धिः	ह.	हरिवंशः
सा ; सा. सं.	सात्वतसंहिता	ह. वि.	हरिवंशे विष्णुपर्व
साम. ; सा. वे.	सामवेदः	हस्ति.	हस्तिगिरिमाहात्म्यम्

यद्यन्येऽप्युपलभ्येरन् वर्णास्साङ्केतिका इह । अनयैव दिशा तेषामर्था ज्ञेयो बुधोत्तमैः ॥
अन्ये तु कतिचिद्ग्रन्था नामग्रहणपूर्वकम् । उदाहृता देशिकेन्द्रैरिति ते नात्र सूचिताः ॥

॥ श्रीमद्भगवद्गीतापादानुक्रमणिका ॥

पा.—पादाद. अ.—अध्यायसंख्या. श्लो.—श्लोकसंख्या

पा.	अ.	श्लो.	पा.	अ.	श्लो.	पा.	अ.	श्लो.	पा.	अ.	श्लो.
अ			अच्छेद्योऽयम्	२	२४	अत्यन्तं	६	२८	अद्रोहो नाति	१६	३
अकर्तारं स	१३	२९	अजानता	११	४१	अत्येति तत्सर्वम्	८	२८	अद्वेष्टा सर्व	१२	१३
अकर्मणश्च	४	१७	अजो नित्यः	२	२०	अत्र शूरा	१	४	अधर्मं धर्ममिति	१८	३२
अकर्मणि	४	१८	अजोऽपि	४	६	अथ केन	३	३६	अधर्माभिभवात्	१	४१
अकीर्तिकर	२	२	अज्ञश्चाश्रद्द	४	४०	अथ चित्तं	१२	९	अधर्मोऽभि	१	४०
अकीर्तिं चापि	२	३४	अज्ञानं चाभि	१६	४	अथ चेत्त्वमहं	१८	५८	अधश्च मूलानि	१५	२
अक्लेद्यो	२	२४	अज्ञानं तमसः	१४	१६	अथ चेत्त्वमिमं	२	३३	अधश्चोर्ध्वं	१५	२
अक्षरं ब्रह्म	८	३	अज्ञानं यदतो	१३	११	अथ चैनं	२	२६	अधिदैवं	८	१
अक्षराणामका	१०	३३	अज्ञानां कर्म	३	२६	अथवा बहुना	१०	४२	अधिभूतं क्षरो	८	४
अक्षरादपि	१५	१८	अज्ञानेनावृतं	५	१५	अथवा योगिनाम्	६	४२	अधिभूतं च किं	८	१
अग्निर्ज्योति	८	२४	अणोरणीयांसम्	८	९	अथ व्यवस्थितान्	१	२०	अधियज्ञः कथं	८	२
अघायुरिन्द्रिया	३	१६	अत ऊर्ध्वं	१२	८	अथैतदप्य	१२	११	अधियज्ञोऽहम्	८	४
अचरं चरमेव	१३	१५	अतत्त्वार्थ	१८	२२	अदृष्टपूर्वं	११	४५	अधिष्ठानं तथा	१८	१४
अचलोऽयं	२	२४	अतीतो भवात	१४	२१	अदेशकाले	१७	२२	अधिष्ठाय मनः	१५	९
[illegible]	[illegible]		[illegible]	[illegible]		[illegible]	[illegible]		[illegible]	[illegible]	

अध्यात्मं कर्म ७ २९
अध्यात्मज्ञान १३ ११
अध्यात्मनित्या १५ ५
अध्यात्मविद्या १० ३२
अध्येष्यते च १८ ७०
अनन्तं विश्वतो ११ ११
अनन्त देवेश ११ ३७
अनन्तबाहुं ११ १९
अनन्तविजयं १ १६
अनन्तवीर्यामित ११ ४०
अनन्तश्चास्मि १० २९
अनन्यचेताः ८ १४
अनन्याश्चिन्त ९ २२
अनन्येनैव १२ ६
अनपेक्षः १२ १६
अनयोस्तत्त्व २ १६
अनवेक्ष्य च १८ २५
अनहंकार एव १३ ८
अनात्मनस्तु ६ ६
अनादित्वात् १३ ३१
अनादि मत्परं १३ १२
अनादिमध्यान्त ११ १९
अनार्यजुष्टम् २ २
अनाशिनो २ १८
अनाश्रितः कर्म ६ १
अनिकेतः स्थिर १२ ९
अनिच्छन्नपि ३ ३६
अनित्यमसुखं ९ ३३
अनिष्टमिष्टं मिश्रं १८ १२
अनुतिष्ठन्ति ३ ३१
अनुद्वेगकरं १७ १५
अनुबन्धं क्षयं १८ २५
अनेकचित्त १६ १६
अनेकजन्म ६ ४५
अनेकदिव्या ११ १०
अनेकबाहू ११ १६
अनेकवक्त्र ११ १०
अनेकाद्भुत ११ १०
अनेन प्रस ३ १०
अनेनैव ११ ८
अन्तकाले ८ ५
अन्तरं ज्ञान १३ ३४
अन्तवत्तु फलं ७ २३
अन्तवन्त इमे २ १८
अन्नाद्भवन्ति ३ १४
अन्यः प्रियतरो १८ ६९
अन्ययाऽऽवर्तते ८ २६
अन्यानि संयाति २ २२
अन्यायेनार्थ १६ १२
अन्ये च बहवः १ ९
अन्ये त्वेवम् १३ २५
अन्ये सांख्येन १३ २४
अपरस्पर १६ ८
अपरे नियता ४ ३०
अपरेयमितः ७ ५
अपर्याप्तं १ १०
अपश्यदेव ११ १३
अपात्रेभ्य १७ २२
अपाने जुह्वति ४ २९
अपि चेत्सु ९ ३०
अपिचेदसि ४ ३६
अपि त्रैलोक्य १ ३५
अप्रकाशो १४ १३
अप्रतिष्ठो ६ ३८
अप्राप्य मां ९ ३
अप्राप्य योग ६ ३७
अफलप्रेप्सुना १८ २३
अफलाकाङ्क्षिभि-
र्यज्ञो १७ ११
अफलाकाङ्क्षिभि-
र्युक्तैः १७ १७
अभयं सत्त्व १६ १
अभिजातस्य १६ ३
अभिजातोऽसि १६ ५
अभितो ब्रह्म ५ २६
अभिसंधाय १७ १२
अभ्यासयोग ८ ८
अभ्यासयोगेन १२ ९
अभ्यासाद्रमते १८ ३६
अभ्यासेन ६ ३५
अभ्यासेऽप्य १२ १०
अभ्युत्थान ४ ७
अमलान्प्रति १४ १४
अमानित्व १३ ७
अमी[च त्वा]सर्वे ११ २६
अमी हि त्वा ११ २१
अमृतं चैव ९ १९
अमृतस्याव्य १४ २७
अयतिः ६ ३७
अयथावत् १८ ३१
अयनेषु च १ ११
अयुक्तः काम ५ १२
अयुक्तः प्राकृतः १८ २८
अरतिर्जन १३ १०
अरागद्वेषतः १८ २३
अवजानन्ति ९ ११
अवरं भवतो ४ ४
अवशं प्रकृतेः ९ ८
अवाच्यवादांश्च २ ३६
अवाप्य भूमौ २ ८
अविकार्योऽयम् २ २५
अविनाशि तु २ १७
अविभक्तं च १३ १६
अविभक्तं वि १८ २०
अव्यक्तं पर्यु १२ ३
अव्यक्तं व्यक्ति ७ २४
अव्यक्तनिधना २ २८
अव्यक्तादीनि २ २८
अव्यक्ताव्यक्तयः ८ १८
अव्यक्तासक्त १२ ५
अव्यक्ता हि १२ ५
अव्यक्तोऽक्षर ८ २१
अव्यक्तोऽयं २ २५
अव्यक्तोऽव्य ८ २०
अशस्त्रं शस्त्र १ ४६
अशान्तस्य २ ६६
अशास्त्रविहितं १७ ५
अशोच्यानन्व २ ११
अश्नन् गच्छन् ५ ८
अश्नन्ति दिव्यान् ९ २०
अश्नामि प्रयता ९ २६
अश्रद्दधानाः ९ ३
अश्रद्धया हुतं १७ २८
अश्रुपूर्णाकुले २ १
अश्वत्थं प्राहु १५ १
अश्वत्थः सर्व १० २६
अश्वत्थमेनं १५ ३
अश्वत्थामा १ ८

अश्विनौ ११ ६
असंमूढः स १० ३
असंयतात्मना ६ ३६
असंशयं ६ ३५
असंशयं समग्रं ७ १
असक्तं तेषु ० ०
असक्तं सर्व १३ १४
असक्तः स ३ ७
असक्तबुद्धिः १८ ४९
असक्तिरनभि १३ ०
असक्तो ह्याचरन् ३ १९
असङ्गशस्त्रेण १५ ३
असत्कृत १७ २२
असत्यमप्रतिष्ठं १६ ८
असदित्युच्यते १७ २८
असितो देवलो १० १३
असौ मया १६ १४
अस्माकं तु १ ७
अस्मिन् रण १ २२
अस्याधिष्ठान ३ ४०
अहंकार इतीयं ७ ४
अहंकारं बलं १६ १८
अहंकारं बलं १८ ५३
अहंकारविमू ३ २७
अहं कृत्स्नस्य ७ ६
अहं क्रतुरहं ९ १६
अहं त्वा सर्व १८ ६६
अहं बीजप्रदः १४ ४
अहं वैश्वानरो १५ १४
अहं स च ७ १७
अहं सर्वस्य १० ८
अहं हि सर्व ९ २४
अहमग्निरहं ९ १६
अहमज्ञानजं १० ११
अहमात्मा १० २०
अहमादिर्हि १० २
अहमादिश्च १० २०
अहमेवंविधो ११ ५४
अहमेवाक्षयः १० ३३
अहर्यद्ब्रह्मणो ८ १७
अहिंसा क्षान्ति १३ ७
अहिंसा सत्य १६ २
अहिंसा समता १० ५
अहो बत १ ४५

आ

आकाशं नोप १३ ३२
आख्याहि मे ११ ३१
आगमापायिनो २ १४
आचरत्यात्मनः १६ २२
आचार्य महतीं १ ३
आचार्यमुप १ २
आचार्याः पितरः १ ३४
आचार्यान्मातुलान् १ २६
आचार्योपासनं १३ ७
आढ्योऽभिजन १६ १५
आतिष्ठोत्तिष्ठ ४ ४२
आत्मतृप्तश्च ३ १७
आत्मन्येव च ३ १७
आत्मन्येव वशं ६ २६
आत्मन्येवात्मना २ ५५
आत्मन्येवाव ६ १८
आत्मबुद्धिप्रसा १८ ३७
आत्मवन्तं न ४ ४१
आत्मवश्यैर्विधे २ ६४
आत्मसंभाविताः १६ १७
आत्मसंयम ४ २७
आत्मसंस्थं मनः ६ २५
आत्मानं केवलं १८ १६
आत्मानं परमे ११ ३
आत्मानं मत्परा ९ ३४
आत्मानं रहसि ६ १०
आत्मैव रिपु ६ ५
आत्मैव ह्यात्मनो ६ ५
आत्मौपम्येन ६ ३२
आदित्यवर्णं ८ ९
आदित्यानामहं १० २१
आदिदेवमजं १० १२
आद्यन्तवन्तः ५ २२
आपूर्यमाणम् २ ७०
आब्रह्मभुवना ८ १६
आयुःसत्त्व १७ ८
आयुधानामहं १० २८
आरुरुक्षोर्मुनेः ६ ३
आर्तो जिज्ञासु ७ १६
आवृतं ज्ञानमेतेन ३ ३९
आवृत्तिं चैव ८ २३
आशापाशशतैः १६ १२
आश्चर्यवच्चैनम् २ २९
आश्चर्यवत्पश्यति २ २९
आश्चर्यवद्वदति २ २९
आश्वासयामास ११ ५०
आसुरं पार्थ १६ ६
आसुरं भावम् ७ १५
आसुरीं योनिम् १६ २०
आसुरीष्वेव १६ १९
आस्थितः स हि ७ १८
आस्थिता जनका ३ २०
आस्थितो योग ८ १२
आहारस्त्वपि १७ ७
आहाराः सात्त्वि १७ ८
आहारा राजस १७ ९
आहुस्त्वाम् १० १३

इ

इच्छा द्वेषः १३ ६
इच्छाद्वेषसमु ७ २७
इच्छामि त्वां ११ ४६
इज्यते भरत १७ १२
इति क्षेत्रं १३ १८
इति गुह्यमतं १५ २०
इति ते ज्ञानम् १८ ६३
इति मत्वा न ३ २८
इति मत्वा भजन्ते १० ८
इति मां योऽभि ४ १४
इत्यज्ञानविमो १६ १५
इत्यर्जुनं वासु ११ ५०
इत्यहं वासु १८ ७४
इदं ज्ञानमुपा १४ २
इदं तु ते गुह्य ९ १
इदं ते नातप १८ ६७
इदं वक्ष्याम्यशे ७ २
इदं शरीरं १३ १
इदमद्य मया १६ १३
इदमस्तीद १६ १३
इदमाह महीपते १ २१
इदमुक्तं मया १५ २०
इदानीमस्मि ११ ५१
इन्द्रियस्येन्द्रिय ३ ३४
इन्द्रियाग्निषु ४ २६

इन्द्रियाणां मनः १० २२
इन्द्रियाणां हि २ ६७
इन्द्रियाणि दशैकं १३ ५
इन्द्रियाणि परा ३ ४२
इन्द्रियाणि प्रमा २ ६०
इन्द्रियाणि मनो ३ ४०
इन्द्रियाणीन्द्रिया २ ५८
इन्द्रियाणीन्द्रिया २ ६८
इन्द्रियाणीन्द्रियार्थेषु५ ९
इन्द्रियार्थान् ३ ६
इन्द्रियार्थेषु १३ ८
इन्द्रियेभ्यः ३ ४२
इमं प्राप्य ९ ३३
इमं प्राप्स्ये १६ १३
इमं राजर्षयो ४ २
इमं विवस्वते योगं ४ १
इमांस्त्वं व्याप्य १० १६
इषुभिः प्रतियो २ ४
इष्टः स्यामिति १८ ७०
इष्टानिष्टोपपत्तिषु १३ ९
इष्टान् भोगान् ३ १२
इष्टोऽसि मे १८ ६४
इहैकस्थं जगत् ११ ७
इहैव तैर्जितः ५ १९

ई

ईक्षते योग ६ २९
ईश्वरः सर्व १८ ६१
ईश्वरोऽहमहं १६ १४
ईहन्ते काम १६ १२

उ

उक्त्वा तूष्णीं २ ९
उच्चैःअक्सामधा १० २७
उच्छिष्टमपि १७ १०
उत्क्रामन्तं १५ १०
उत्तमः पुरुषः १५ १७
उत्तमौजाश्च १ ६
उत्सन्नकुलधर्माणाम् १ ४४
उत्साद्यन्ते जाति १ ४३
उत्सीदेयुरिमे ३ २४
उदाराः सर्व एवैते ७ १८
उदासीनवदासीनो १४ २३
उदासीनवदासीनं ९ ९
उदासीनो गत १२ १६
उद्धरेदात्मना ६ ५
उद्भवश्च भवि १० ३४
उन्मिषन्निमिषन्नपि ५ ९
उपदेक्ष्यन्ति ते ४ ३४
उपद्रष्टाऽनुमन्ता १३ २२
उपविश्यासने ६ १२
उपहन्यामिमाः ३ २४
उपैति शान्तरजसम् ६ २७
उभयोरपि दृष्टोऽन्तः २ १६
उभयोर्विन्दते ५ ४
उभे सुकृतदुष्कृते २ ५०
उभौ तौ न विजा २ १९
उवाच पार्थ १ २५
उवाच मधुसूदनः २ १
उषित्वा शाश्वतीः ६ ४१

ऊ

ऊर्ध्वं गच्छन्ति १४ १८
ऊर्ध्वमूलमधः १५ १

ऋ

ऋक्साम यजुरेव ९ १७
ऋतूनां कुसुमा १० ३५
ऋतेऽपि त्वा ११ ३२
ऋषयः क्षीण ५ २५
ऋषिभिर्बहुधा १३ ४
ऋषींश्च सर्वान् ११ १५

ए

एकं सांख्यं च ५ ५
एकत्वेन पृथक्त्वेन ९ १५
एकभक्तिर्विशिष्यते ७ १७
एकमप्यास्थितः ५ ४
एकया यात्यनावृत्तिं ८ २६
एकस्थमनुपश्यति १३ ३०
एकाकी यत ६ १०
एकांशेन स्थितो १० ४२
एकेह कुरुनन्दन २ ४१
एकोऽथवा ११ ४२
एतच्छ्रुत्वा वचनं ११ ३५
एतत्क्षेत्रं समासेन १३ ६
एतद्गुह्यमहं १८ ७५
एतज्ज्ञानमिति १३ ११
एतद्धि दुर्लभतरं ६ ४२
एतद्बुध्वा बुद्धि १५ २०
एतद्योनीनि भूतानि ७ ६
एतद्यो वेत्ति १३ १
एतं मे संशयं ६ ३९
एतस्याहं न पश्यामि ६ ३३
एतां दृष्टिमवष्टभ्य १६ ९
एतां विभूतिं १० ७
एतान्न हन्तु १ ३५
एतान्यपि तु १८ ६
एतावदिति १६ ११
एतैर्विमुक्तः १६ २२
एतैर्विमोहयत्येषः ३ ४०
एभिः सर्वमिदं ७ १३
एवं ज्ञात्वा कृतं ४ १५
एवं ज्ञात्वा विमो ४ ३२
एवं त्रयीधर्म ९ २१
एवं यास्यसि ४ ३५
एवं युञ्जन् ६ २८
एवं यो वेत्ति ४ ९
एवं रूपः शक्य ११ ४८
एवं सततयुक्ता १२ १
एवमुक्त्वा ततो ११ ९
एवमुक्त्वाऽर्जुनः १ ४७
एवमुक्त्वा हृषी २ ९
एवमुक्तो हृषी १ २४
एवमेतद्यथाऽऽत्थ ११ ३
एवं परम्पराप्राप्तं ४ २
एवं प्रवर्तितं चक्रं ३ १६
एवं बहुविधा यज्ञाः ४ ३२
एवं बुद्धेः परं ३ ४३
एष तूद्देशतः १० ४०
एष वोऽस्त्विष्ट ३ १०
एषा तेऽभिहिता २ ३९
एषा ब्राह्मी स्थितिः २ ७२

ऐ

ऐरावतं गजे १० २७
ऐश्वरं पुरुषोत्तम ११ ३

ओ

ओमित्येकाक्षरं ८ १३
ॐ तत्सदिति १७ २३

क

कं घातयति हन्ति २ २१
कश्चिदज्ञान १८ ७२

कच्चिदेत्तच्छ्रुत १८ ७२
कच्चिन्नोभय ६ ३८
कट्वम्ललवणा १७ ९
कथं न ज्ञेय १ ३९
कथं भीष्ममहं २ ४
कथं विद्यामहं १० १७
कथं स पुरुषः २ २१
कथमेतद्विजानीयां ४ ४
कथयन्तश्च मां १० ९
कथयिष्यन्ति २ ३४
करणं कर्म १८ १८
करणं च पृथ १८ १४
करिष्यस्यवशो १८ ६०
करिष्ये वचनं १८ ७३
कर्ण तथाऽन्या ११ ३४
कर्तव्यानीति मे १८ ६
कर्ता तामस १८ २८
कर्ता सात्त्विक १८ २६
कर्ताऽहमिति ३ २७
कर्तुं नेच्छसि १८ ६०
कर्तुं मद्योग १२ ११
कर्तुं व्यवसिता १ ४५
कर्म कर्तुमिहा १६ २४
कर्म कारण ६ ३
कर्म चैव तद १७ २७
कर्मजं बुद्धियुक्ता २ ५१
कर्मजान्विद्धि तान् ४ ३२
कर्म ज्यायो ३ ८
कर्मणः सुकृत १४ १६
कर्मणामशमः १४ १२
कर्मणैव हि संसिद्धिं ३ २०
कर्मणो नोपपद्यते १८ ७
कर्मणो ह्यपि ४ १७
कर्मण्यकर्म यः ४ १८
कर्मण्यभिप्रवृत्तो ४ २०
कर्मण्येवाधिकारः २ ४७
कर्म प्रारभते १८ १५
कर्म प्राहुर्मनी १८ ३
कर्मबन्धं प्रहास्य २ ३९
कर्म ब्रह्मोद्भवं ३ १५
कर्मभिर्न स ४ १४
कर्मयोगेन चापरे १३ २४
कर्मयोगेन ३ ३
कर्मयोगो विशि ५ २
कर्मसङ्गिषु १४ १५
कर्मसङ्गेन १४ ७
कर्माणि प्रवि १८ ४१
कर्मानुबन्धीनि १५ २
कर्मिभ्यश्चाधिको ६ ४६
कर्मेन्द्रियाणि ३ ६
कर्मेन्द्रियैः कर्म ३ ७
कर्शयन्तः शरीर १७ ६
कल्पक्षये पुन ९ ७
कल्पादौ विसृ ९ ७
कवयोऽप्यत्र ४ १६
कविं पुराणमनु ८ ९
कवीनामुशना १० ३७
कश्चिदर्थव्यपा ३ १८
कश्चिद्यतति ७ ३
कश्चिन्मां वेत्ति ७ ३
कश्चिन्मे प्रिय १८ ६९
कस्माच्च ते न ११ ३७
काङ्क्षन्तः कर्मणां ४ १२
कां गतिं कृष्ण ६ ३७
का प्रीतिः स्यात् १ ३६
काम एष क्रोध ३ ३७
कामं क्रोधं च १६ १८
कामं क्रोधं परि १८ ५३
कामः क्रोधस्तथा १६ २१
कामक्रोधपरा १६ १२
कामक्रोधवियुक्ता ५ २६
कामक्रोधोद्भवं ५ २३
काममाश्रित्य १६ १०
कामरागबला १७ ५
कामरागविव ७ ११
कामरूपं दुरास ३ ४३
कामरूपेण ३ ३९
कामसंकल्पवर्जि ४ १९
कामात्क्रोधो २ ६२
कामात्मानः स्वर्ग २ ४३
७ २०
कामोपभोग १६ ११
कामोऽस्मि भर ७ ११
काम्यानां कर्मणां १८ २
कायक्लेशभयात् १८ ८
कायेन मनसा ५ ११
कारणं गुणसं १३ २१
कारणानि निबोध १८ १३
कार्पण्यदोषोपहत २ ७
कार्यं कर्म करोति ६ १
कार्यं कर्म समा ३ १९
कार्यं चाकार्यं १८ ३१
कार्यकारण १३ २०
कार्यते ह्यवशः कर्म ३ ५
कार्यमित्येव १८ ९
कार्याकार्यव्य १६ २४
कार्याकार्ये भया १८ ३०
कार्ये सक्तमहेतु १८ २२
कालः कलयता १० ३०
कालेनात्मनि ४ ३८
कालोऽस्मि ११ ३२
काश्यश्च परमे १ १७
काशीराजश्च १ ५
किं ज्ञानेन १० ४२
किं कर्म किम ४ १६
किं कर्म पुरु ८ १
किंचिदस्ति ७ ७
किं तद्ब्रह्म किम ८ १
किं नो राज्येन १ ३२
किं पुनर्ब्राह्मणाः ९ ३३
किं भोगैर्जीवितेन १ ३२
किमकुर्वत संजय १ १
किमन्यत्काम १६ ८
किमाचारः कथं १४ २१
किमासीत व्रजेत २ ५४
किरीटिनं गदिनं ११ १७
,, ११ ४६
कीर्तिः श्रीर्वाक्च १० ३४
कुतस्त्वा कश्मल २ २
कुतोऽन्यः कुरु ४ ३१
कुन्तीपुत्रो १ १६
कुरु कर्मैव ४ १५
कुरुवृद्धः पितामहः १ १२
कुर्याद्विद्वांस्तथा ३ २५
कुर्वन्नपि न ५ ७
कुर्वन्सिद्धिम् १२ १०
कुर्वन्नाप्नोति ४ २१
,, १८ ४७

कुर्वाणो मद्व्यपा १८ ५६
कुलक्षयकृतं दोषं १ ३८
,, १ ३९
कुलक्षये प्रणश्यन्ति १ ४०
कुलघ्नानां कुलस्य १ ४२
कुलधर्माः सना १ ४०
कुलधर्माश्च १ ४३
कुले भवति ६ ४२
कुशले नानु १८ १०
कूटस्थमचलं १२ ३
कूटस्थोऽक्षर १५ १६
६ ८
कूर्मोऽङ्गानीव २ ५८
कृतकृत्यश्च १५ २०
कृताञ्जलिरभाषत ११ १४
कृताञ्जलिर्वेपमानः ११ ३५
कृत्वाऽपि न ४ २२
कृत्स्नं लोकमिमं १३ ३३
कृत्स्नविन्न ३ २९
कृपणाः फलहेतवः २ ४९
कृपया परया १ २८
कृपश्च समितिंजयः १ ८
कृषिगोरक्ष्य १८ ४४
केचिदात्मान १३ २४
केचिद्गीताः ११ २१
केचिद्विलग्ना ११ २७
केवलैरिन्द्रियैरपि ५ ११
केशवार्जुनयोः १८ ७६
केषुकेषु च १० १७
कैर्मया सह १ २२
कैर्लिङ्गैस्त्रीन्गुणान् १४ २१
कोऽन्योऽस्ति १६ १५
कौन्तेय प्रतिजा ९ ३१
कौमारं यौवनं २ १३
क्रियते तदिह १७ १८
क्रियते बहुला १८ २४
क्रियन्ते मोक्ष १७ २५
क्रियमाणानि १३ २९
क्रियाविशेष २ ४३
क्रोधः पारुष्य १६ ४
क्रोधाद्भवति २ ६३
क्लेशोऽधिकतर १२ ५
[क्लैब्यं मा स्म] २ ३
क्षत्रियस्य न २ ३१
क्षमा सत्यं दमः १० ४
क्षयाय जगतो १६ ९
क्षरश्चाक्षर एव १५ १६
क्षरः सर्वाणि १५ १६
क्षात्रं कर्म १८ ४३
क्षान्तिरार्जवमेव १८ ४२
क्षिपाम्यजस्रं १६ १९
क्षिप्रं भवति ९ ३१
क्षिप्रं हि मानुषे ४ १२
क्षीणे पुण्ये ९ २१
क्षुद्रं हृदयदौर्बल्यं २ ३
क्षेत्रक्षेत्रज्ञयोरेवं १३ ३४
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं १३ २
क्षेत्रक्षेत्रज्ञसं १३ २६
क्षेत्रज्ञ इति १३ १
क्षेत्रज्ञं चापि मां १३ २
क्षेत्रं क्षेत्री तथा १३ ३३
क्षेत्रमित्यभि १३ १

ख

खं मनो बुद्धि ७ ४

ग

गच्छन्त्यपुनरा ५ १७
गच्छन्त्यमूढाः १५ ५
गतसङ्गस्य मुक्तस्य ४ २३
गतागतं काम ९ २१
गतासूनगतासूंश्च २ ११
गतिर्भर्ता प्रभुः ९ १८
गन्धर्वयक्षासुर ११ २२
गन्धर्वाणां १० २६
गरीयसे ब्रह्मणो ११ ३७
गहना कर्मणो ४ १७
गाण्डीवं स्रंसते १ ३०
गामाविश्य च १५ १३
गायत्री छन्दसां १० ३५
गिरामस्म्येक १० २५
गुडाकेशः परंतपः २ ९
गुडाकेशेन भारत १ २४
गुणकर्मविभागयोः ३ २८
गुणकर्मविभागशः ४ १३
गुणतस्त्रिविधं १८ २९
गुणप्रवृद्धा १५ २
गुणाः प्रकृति १४ ५
गुणा गुणेषु ३ २८
गुणातीतः स १४ २५
गुणानेनानतीत्य १४ २०
गुणा वर्तन्त १४ २३
गुणेभ्यश्च परं १४ १९
गुणैर्यो न विचा १४ २३
गुणैः कर्माणि ३ २७
गुरुणाऽपि ६ २२
गुरूनहत्वा हि २ ५
गुह्यमध्यात्म ११ १
गुह्याद्गुह्यतरं १८ ६३
गृहीत्वैतानि १५ ८
ग्रसिष्णु प्रभ १३ १६
ग्लानिर्भवति ४ ७

घ

घृतोऽपि मधु १ ३५

च

चक्षुश्चैवान्तरे ५ २७
चञ्चलं हि मनः ६ ३४
चञ्चलत्वात्स्थितिं ६ ३३
चतुर्विधा भजन्ते ७ १६
चत्वारो मनवः १० ६
चातुर्वर्ण्यं ४ १३
चिकीर्षुर्लोक ३ २५
चिन्तामपरिमेयां १६ ११
चिन्त्योऽसि १० १७
चेतसा नान्य ८ ८
चेतसा सर्व १८ ५७
चेलाजिनकुशो ६ ११

छ

छन्दांसि यस्य १५ १
छन्दोभिर्विविधैः १३ ४
छित्त्वैनं संशयं ४ ४२
छिन्नद्वैधा यता ५ २५
छिन्नाभ्रमिव ६ ३८
छेत्ता न ह्युपपद्यते ६ ३९
छेत्तुमर्हस्यशेषतः ६ ३९

ज

जगतः शाश्वते ८ २६
जगत्प्रहृष्यत्यनु ११ ३६
जगदव्यक्त ९ ४

जगदाहुरनी १६ ८
जगद्धासयते १५ १२
जगद्धि परिवर्तते ९ १०
जघन्यगुण १४ १८
जना न विदुरा १६ ७
जनानां पुण्य ७ २८
जनाः सुकृतिनो ७ १६
जन्म कर्म च ४ ९
जन्मकर्मफलप्रदाम् २ ४३
जन्मबन्धविनि २ ५१
जन्ममृत्युजरादुः १४ २०
जन्ममृत्युजराव्या १३ ८
जन्मानि तव ४ ५
जयोऽस्मि व्यव १० ३६
जरामरणमोक्षाय ७ २९
जहि शत्रुं महा ३ ४३
जाग्रतो नैव ६ १६
जातस्य हि ध्रुवो २ २७
जातु कर्मण्यत ३ २३
जातु तिष्ठत्यकर्म ३ ५
जानाति पुरुषो १५ १९
जायते वर्णसंकरः १ ४१
जिज्ञासुरपि ६ ४४
जितात्मनः ६ ७
जितात्मा विगत १८ ४९
जित्वा वा २ ३७
जित्वा शत्रून् ११ ३३
जीवनं सर्वभूतेषु ७ ९
जीवभूतः सना १५ ७
जीवभूतां महाबाहो ७ ५
जुह्वति ज्ञानदीपिते ४ २७
जोषयेत्सर्वकर्माणि ३ २६

ज्ञातव्यमव ७ २
ज्ञातुं द्रष्टुं च ११ ५४
ज्ञात्वा भूतादि ९ १३
ज्ञात्वा मां शान्ति ५ २९
ज्ञात्वा शास्त्र १६ २४
ज्ञानं कर्म च १८ १९
ज्ञानं ज्ञानवता १० ३८
ज्ञानं ज्ञेयं ज्ञान १३ १७
ज्ञानं ज्ञेयं परि १८ १८
ज्ञानं तेऽहं ७ २
ज्ञानं यदा तदा १४ ११
ज्ञानं लब्ध्वा परां ४ ३९
ज्ञानं विज्ञानम् १८ ४२
ज्ञानं विज्ञानसहितं ९ १
ज्ञानदीपेन १० ११
ज्ञाननिर्धूत ५ १७
ज्ञानमावृत्य ३ ४०
ज्ञानमावृत्य तु १४ ९
ज्ञानयज्ञः परंतप ४ ३३
ज्ञानयज्ञेन चाप्यन्ये ९ १५
ज्ञानयज्ञेन तेनाहं १८ ७०
ज्ञानयोगव्यव १६ १
ज्ञानयोगेन ३ ३
ज्ञानवान्मां प्रपद्यते ७ १९
ज्ञानविज्ञानतृप्तात्मा ६ ८
ज्ञानविज्ञाननाशनम् ३ ४१
ज्ञानसङ्गेन चानघ १४ ६
ज्ञानसंछिन्नसंशयम् ४ ४१
ज्ञानाग्निदग्ध ४ १९
ज्ञानाग्निः सर्व ४ ३७
ज्ञानाद्ध्यानं १२ १२
ज्ञानानां ज्ञान १४ १

ज्ञानावस्थितचेतसः ४ २३
ज्ञानिनस्तत्त्व ४ ३४
ज्ञानिभ्योऽपि ६ ४६
ज्ञानिनो नित्य ३ ३९
ज्ञानी च भरतर्षभ ७ १६
ज्ञानी त्वात्मैव ७ १८
ज्ञानेन तु तद ५ १६
ज्ञाने परिसमाप्यते ४ ३३
ज्ञेयं चोक्तं १३ १८
ज्ञेयं यत्तत्प्रव १३ १२
ज्ञेयः स नित्य ५ ३
ज्ञेयोऽसि नियता ८ २
ज्यायसी चेत् ३ १
ज्योतिषां रवि १० २१
ज्योतिषामपि १३ १७

झ

झषाणां मकर १० ३१

त

त इमेऽवस्थिता १ ३३
तं तथा कृपया २ १
तंतं नियममास्थाय ७ २०
तंतमेवैति कौन्तेय ८ ६
तं यज्ञं विद्धि १७ १२
तं विद्याद्दुःख ६ २३
तच्च संस्मृत्यसंस्मृ १८ ७७
तज्ज्ञानं विद्धि रा १८ २१
तज्ज्ञानं विद्धि सा १८ २०
तत एव च विस्तारं १३ ३०
ततः कुरु यतात्म १२ ११
ततः पदं तत्परि १५ ४
ततः शङ्खाश्च १ १३
ततः श्वेतैर्हयैर्युक्ते १ १४

ततस्ततो नियम्यै ६ २६
ततः स विस्मया ११ १४
ततः स्वधर्मं कीर्तिं २ ३३
ततो दुःखतरं २ ३६
ततो भवति भारत १४ ३
ततो मां तत्त्वतो १८ ५५
ततो याति परां ६ ४५
,, १३ २८
,, १६ २२
ततो यान्त्यधमां १६ २०
ततो युद्धाय २ ३८
ततो वक्ष्यामि ते १८ ६४
तत्किं कर्मणि घोरे ३ १
तत्कुरुष्व मदर्प ९ २७
तत्क्षामये त्वाम् ११ ४२
तत्क्षेत्रं यच्च १३ ३
तत्तत्प्राप्य शुभा २ ५७
तत्तदेवावगच्छ १० ४१
तत्तदेवेतरो ३ २१
तत्तामसमुदा १७ १९
,, १७ २२
,, १८ २२
,, १८ ३९
तत्ते कर्म प्रव ४ १६
तत्तेजो विद्धि १५ १२
तत्ते पदं संग्रहेण ८ ११
तत्त्वज्ञानार्थ १३ ११
तत्त्वमिच्छामि १८ १
तत्त्ववित्तु महा ३ २८
तत्त्वेनातश्च्यवन्ति ९ २४
तत्परः संयते ४ ३९
तत्प्रसादात्परां १८ ६२

जगदाहुरनी १६ ८
जगद्धासयते १५ १२
जगद्धि परिवर्तते ९ १०
जघन्यगुण १४ १८
जना न विदुरा १६ ७
जनानां पुण्य ७ २८
जनाः सुकृतिनो ७ १६
जन्म कर्म च ४ ९
जन्मकर्मफलप्रदाम् २ ४३
जन्मबन्धविनि २ ५१
जन्ममृत्युजरादुः १४ २०
जन्ममृत्युजराव्या १३ ८
जन्मानि तव ४ ५
जयोऽस्मि व्यव १० ३६
जरामरणमोक्षाय ७ २९
जहि शत्रुं महा ३ ४३
जाग्रतो नैव ६ १६
जातस्य हि ध्रुवो २ २७
जातु कर्मण्यत ३ २३
जातु तिष्ठत्यकर्म ३ ५
जानाति पुरुषो १५ १९
जायते वर्णसंकरः १ ४१
जिज्ञासुरपि ६ ४४
जितात्मनः ६ ७
जितात्मा विगत १८ ४९
जित्वा वा २ ३७
जित्वा शत्रून् ११ ३३
जीवनं सर्वभूतेषु ७ ९
जीवभूतः सना १५ ७
जीवभूतां महाबाहो ७ ५
जुह्वति ज्ञानदीपिते ४ २७
जोष येत्सर्वकर्माणि ३ २६
ज्ञातव्यमव ७ २
ज्ञातुं द्रष्टुं च ११ ५४
ज्ञात्वा भूतादि ९ १३
ज्ञात्वा मां शान्ति ५ २९
ज्ञात्वा शास्त्र १६ २४
ज्ञानं कर्म च १८ १९
ज्ञानं ज्ञानवता १० ३८
ज्ञानं ज्ञेयं ज्ञान १३ १७
ज्ञानं ज्ञेयं परि १८ १८
ज्ञानं तेऽहं ७ २
ज्ञानं यदा तदा १४ ११
ज्ञानं लब्ध्वा परां ४ ३९
ज्ञानं विज्ञानम् १८ ४२
ज्ञानं विज्ञानसहितं ९ १
ज्ञानदीपेन १० ११
ज्ञाननिर्धूत ५ १७
ज्ञानमावृत्य ३ ४०
ज्ञानमावृत्य तु १४ ९
ज्ञानयज्ञः परंतप ४ ३३
ज्ञानयज्ञेन चाप्यन्ये ९ १५
ज्ञानयज्ञेन तेनाहं १८ ७०
ज्ञानयोगव्यव १६ १
ज्ञानयोगेन ३ ३
ज्ञानवान्मां प्रपद्यते ७ १९
ज्ञानविज्ञानतृप्तात्मा ६ ८
ज्ञानविज्ञाननाशनम् ३ ४१
ज्ञानसङ्गेन चानघ १४ ६
ज्ञानसंछिन्नसंशयम् ४ ४१
ज्ञानाग्निदग्ध ४ १९
ज्ञानाग्निः सर्व ४ ३७
ज्ञानाद्ध्यानं १२ १२
ज्ञानानां ज्ञान १४ १
ज्ञानावस्थितचेतसः ४ २३
ज्ञानिनस्तत्त्व ४ ३४
ज्ञानिभ्योऽपि ६ ४६
ज्ञानिनो नित्य ३ ३९
ज्ञानी च भरतर्षभ ७ १६
ज्ञानी त्वात्मैव ७ १८
ज्ञानेन तु तद ५ १६
ज्ञाने परिसमाप्यते ४ ३३
ज्ञेयं चोक्तं १३ १८
ज्ञेयं यत्तत्प्रव १३ १२
ज्ञेयः स नित्य ५ ३
ज्ञेयोऽसि नियता ८ २
ज्यायसी चेत् ३ १
ज्योतिषां रवि १० २१
ज्योतिषामपि १३ १७

ञ

ञषाणां मकर १० ३१

त

त इमेऽवस्थिता १ ३३
तं तथा कृपया २ १
तंतं नियममास्थाय ७ २०
तंतमेवैति कौन्तेय ८ ६
तं यज्ञं विद्धि १७ १२
तं विद्याद्दुःख ६ २३
तच्च संस्मृत्यसंस्मृ १८ ७७
तज्ज्ञानं विद्धि रा १८ २१
तज्ज्ञानं विद्धि सा १८ २०
तत एव च विस्तारं १३ ३०
ततः कुरु यतात्म १२ ११
ततः पदं तत्परि १५ ४
ततः शङ्खाश्च १ १३
ततः श्वेतैर्हयैर्युक्ते १ १४
ततस्ततो नियम्यै ६ २६
ततः स विस्मया ११ १४
ततः स्वधर्मं कीर्तिं २ ३३
ततो दुःखतरं २ ३६
ततो भवति भारत १४ ३
ततो मां तत्त्वतो १८ ५५
ततो याति परां ६ ४५
,, १३ २८
,, १६ २२
ततो यान्त्यधमां १६ २०
ततो युद्धाय २ ३८
ततो वक्ष्यामि ते १८ ६४
तत्किं कर्मणि घोरे ३ १
तत्कुरुष्व मदर्पं ९ २७
तत्क्षामये त्वाम् ११ ४२
तत्क्षेत्रं यच्च १३ ३
तत्तत्प्राप्य शुभा २ ५७
तत्तदेवावगच्छ १० ४१
तत्तदेवेतरो ३ २१
तत्तामसमुदा १७ १९
,, १७ २२
,, १८ २२
,, १८ ३९
तत्ते कर्म प्रव ४ १६
तत्तेजो विद्धि १५ १२
तत्ते पदं संग्रहेण ८ ११
तत्त्वज्ञानार्थं १३ ११
तत्त्वमिच्छामि १८ १
तत्त्ववित्तु महा ३ २८
तत्त्वेनातश्च्यवन्ति ९ २४
तत्परः संयते ४ ३९
तत्प्रसादात्परां १८ ६२

तत्र का परिदेवना २ २८
तत्र चान्द्रमसं ८ २५
तत्र तं बुद्धिसंयोगं ६ ४३
तत्र प्रयाता ८ २४
तत्र श्रीर्विजयो १८ ७८
तत्र सत्त्वं निर्मल १४ ६
तत्रापश्यत्स्थितान् १ २६
तत्रैकस्थं जगत् ११ १३
तत्रैकाग्रं मनः ६ १२
तत्रैवं सति कर्तारं १८ १६
तत्रैवाव्यक्तसंज्ञके ८ १८
तत्समासेन मे १३ ३
तत्सुखं राजसं १८ ३८
तत्सुखं सात्त्विकं १८ ३७
तत्स्वयं योग ४ ३८
तथा तवामी ११ २८
तथा तेनेदमावृतम् ३ ३८
तथाऽऽत्मा नोप १३ ३२
तथा देहान्तर २ १३
तथाऽपि त्वं महा २ २६
तथाऽऽप्नोति १८ ५०
तथा प्रलीनः १४ १५
तथाऽन्तर्ज्योति ५ २४
तथा मानावमानयोः ६ ७
,, १२ १८
तथा शरीराणि २ २२
तथा सर्वाणि ९ ६
तथैव च पितामहाः १ ३४
तथैव नाशाय ११ २९
तदर्थं कर्म ३ ९
तदस्य हरति २ ६७
तदहं भक्त्युपहृतं ९ २६
तदा गन्तासि २ ५२
तदाऽऽत्मानं ४ ७
तदा योगमवा २ ५३
तदित्यनभि १७ २५
तदेकं वद ३ २
तदेव मे दर्शय ११ ४५
तदेव मे रूप ११ ४९
तदोत्तमविदां १४ १४
तदानं सात्त्विकं १७ २०
तद्धाम परमं मम ८ २१
,, १५ ६
तद्बुद्धयस्तदा ५ १७
तद्भक्तयत्यल्प ७ २३
तद्योगैरपि गम्यते ५ ५
तद्राजसमुदा १७ २१
,, १८ २४
तद्वत्कामा यं २ ७०
तद्विद्धि प्रणिपा ४ ३४
तद्विद्धि भरतर्षभ १३ २६
तन्निबध्नाति १४ ७
तन्निबध्नाति भारत १४ ८
तन्निष्ठास्तत्परा ५ १७
तन्मे क्षेमतरं भवेत् १ ४६
तन्मे ब्रूहि ५ १
तपश्चास्मि तपस्विषु ७ ९
तपस्तत्त्रिविधं नरैः १७ १७
तपस्तप्तं कृतं १७ २८
तपस्विभ्योऽधिको ६ ४६
तपाम्यहमहं वर्षं ९ १९
तपो दम्भेन १७ १८
तपो दानं १० ५
तपो मानस १७ १६
तप्यन्ते ये तपो १७ ५
तमसः परमुच्यते १३ १७
तमस्त्वज्ञानजं १४ ८
तमस्येतानि १४ १३
तमस्सत्त्वं १४ १०
तमाहुः पण्डितं ४ १९
तमाहुः परमां ८ २१
तमुवाच हृषीकेशः २ १०
तमेव चाद्यं पुरुषं १५ ४
तमेव शरणं गच्छ १८ ६२
तमोद्वारैस्त्रिभिर्नरः १६ २२
तयाऽपहृत २ ४४
तयोर्न वशमा ३ ३४
तयोस्तु कर्म ५ २
तव शिष्येण १ ३
तव सौम्यं ११ ५१
तवापि वक्त्राणि ११ २९
तस्माच्छास्त्रं १६ २४
तस्मात्त्वमिन्द्रि ३ ४१
तस्मात्त्वमुत्तिष्ठ ११ ३३
तस्मात्प्रणम्य ११ ४४
तस्मात्सर्वगतं ब्रह्म ३ १५
तस्मात्सर्वाणि २ ३०
तस्मात्सर्वेषु कालेषु ८ ७
,, ८ २७
तस्मादज्ञानसंभूतं ४ ४२
तस्मादपरिहार्येऽर्थे २ २७
तस्मादसक्तः सततं ३ १९
तस्मादुत्तिष्ठ २ ३७
तस्मादेतत्त्रयं १६ २१
तस्मादेवं २ २५
तस्मादोमित्युदा १७ २४
तस्माद्ब्रह्मणि ते ५ १९
तस्माद्यस्य महा २ ६८
तस्माद्युध्यस्व २ १८
तस्माद्योगाय २ ५०
तस्माद्योगी ६ ४६
तस्मान्नार्हा वयं १ ३७
तस्मिन् गर्भं १४ ३
तस्य कर्तारमपि ४ १३
तस्य कार्यं न ३ १७
तस्यतस्याचलां ७ २१
तस्य प्रज्ञा प्रति २ ५७
,, २ ५८
,, २ ६१
,, २ ६८
तस्य संजनयन् १ १२
तस्यां जागर्ति २ ६९
तस्याराधनमीहते ७ २२
तस्याहं न प्रण ६ ३०
तस्याहं निग्रहं ६ ३४
तस्याहं सुलभः ८ १४
तांस्तथैव भजा ४ ११
तांस्तितिक्षस्व २ १४
तानकृत्स्नविदो ३ २९
तानहं द्विषतः १६ १९
तानि सर्वाणि २ ६१
तान्निबोध द्विजोत्तम १ ७
तान्यहं वेद ४ ५
तान्विद्ध्यासुर १७ ६
तान्समीक्ष्य स १ २७
तामसं परिचक्षते १७ १३
तामसः परि १८ ७
तामसी चेति तां १७ २

तामेव विदधा ७ २१
तावान्सर्वेषु वेदेषु २ ४६
तासां ब्रह्म १४ ४
तिष्ठन्तं परमेश्वरम् १३ २७
तीक्ष्णरूक्षविदा १७ ९
तुमुलो व्यनुनाद १ १९
तुल्यनिन्दात्म १४ २४
तुल्यनिन्दास्तुति १२ १९
तुल्यप्रियाप्रियो १४ २४
तुल्यो मित्रारि १४ २५
तुष्यन्ति च रमन्ति १० ९
तृष्णासङ्गसमु १४ ७
तेजश्चास्मि ७ ९
तेजस्तेजस्विनाम् ७ १०
,, १० ३६
तेजः क्षमा धृतिः १६ ३
तेजोभिरापूर्य ११ ३०
तेजोमयं विश्व ११ ४७
तेजोराशिं सर्वतो ११ १७
ते तं भुक्त्वा ९ २१
ते त्वघं भुञ्जते ३ १३
ते देवा भावयन्तु ३ ११
ते द्वन्द्वमोह ७ २८
तेन मुह्यन्ति ५ १५
तेनैव रूपेण ११ ४६
तेऽपि चाति १३ २५
तेऽपि मामेव ९ २३
तेऽपि यान्ति परां ९ ३२
ते पुण्यमासाद्य ९ २०
ते प्राप्नुवन्ति १२ ४
ते ब्रह्म तद्विदुः ७ २९
ते मे युक्ततमा १२ २
तेऽवस्थिताः २ ६
ते विदुर्युक्तचेतसः ७ ३०
तेषां के योग १२ १
तेषां ज्ञानी ७ १७
तेषां नित्याभियुक्ता ९ २२
तेषां निष्ठा तु १७ १
तेषां भेदमिमं १७ ७
तेषां सततयुक्तानां १० १०
तेषामहं समुद्धर्ता १२ ७
तेषामादित्यवज्ज्ञानं ५ १६
तेषामेवानुकम्पार्थं १० ११
तेऽहोरात्रविदो ८ १७
तैर्दत्तानप्रदायैभ्यो ३ १२
तौ ह्यस्य परिपन्थि ३ ३४
त्यक्तसर्वपरिग्रहः ४ २१
त्यक्तुं कर्माण्यशे १८ ११
त्यक्त्वा कर्मफला ४ २०
त्यक्त्वा देहं ४ ९
त्यक्त्वा सर्वानशेष ६ २४
त्यक्त्वोत्तिष्ठ २ ३
त्यजत्यन्ते कलेवरम् ८ ६
त्यागः शान्तिः १६ २
त्यागस्य च १८ १
त्यागाच्छान्तिः १२ १२
त्यागी सत्त्वसमा १८ १०
त्यागे भरतसत्तम १८ ४
त्यागो हि पुरुष १८ ४
त्याज्यं दोषवत् १८ ३
त्रायते महतो २ ४०
त्रिधैव गुणभेदतः १८ १९
त्रिभिर्गुणमयैर्भावैः ७ १३
त्रिविधं कर्मणः १८ १२
त्रिविधं नरकस्येदं १६ २१
त्रिविधः कर्मसंग्रह १८ १८
त्रिविधः संप्रकी १८ ४
त्रिविधा कर्म १८ १८
त्रिविधा भवति १७ २
त्रिविधो भवति १७ ७
त्रिषु लोकेषु ३ २२
त्रीन्गुणानतिवर्तते १४ २१
त्रैगुण्यविषया २ ४५
त्रैविद्या मां सामपाः ९ २०
त्वक्चैव परिदह्यते १ ३०
त्वत्तः कमलपत्राक्ष ११ २
त्वत्प्रसादान्मया १८ ७३
त्वदन्यः संशय ६ ३९
त्वमक्षरं परमं ११ १८
त्वमक्षरं सदसत् ११ ३७
त्वमव्ययः शाश्वत ११ १८
त्वमस्य पूज्यश्च ११ ४३
त्वमस्य विश्वस्य ११ १८
त्वमस्य विश्वस्य ११ ३८
त्वमादिदेवः ११ ३८
त्वमादौ प्रोक्तवान् ४ ४
त्वया ततं विश्व ११ ३८
त्वयैकाग्रेण चेतसा १८ ७२
त्वां सदा परिचिन्त १० १७

द

दंष्ट्राकरालानि च ११ २५
,, भया ११ २७
दण्डो दमयता १० ३८
ददामि बुद्धियोगं १० १०
दम्भमानमदान्वि १६ १०
दम्भार्थमपि चैव १७ १२
दम्भाहंकार १७ ५
दम्भेनाविधि १६ १७
दम्भो दर्पोऽति १६ ४
दया भूतेष्व १६ २
दर्शयात्मान ११ ४
दर्शयामास पार्थाय ११ ९
दातव्यमिति १७ २०
दानक्रियाश्च १७ २५
दानं दमश्च १६ १
दानमीश्वरभावश्च १८ ४३
दाने च यत्पुण्य ८ २८
दास्यन्ते यज्ञ ३ १२
दिवि देवेषु वा १८ ४०
दिवि सूर्यसह ११ १२
दिव्यगन्धानु ११ ११
दिव्यं ददामि ते ११ ८
दिव्यमाल्याम्बर ११ ११
दिव्यानेकोद्यता ११ १०
दिव्या ह्यात्मविभू १० १६
दिव्यौ शङ्खौ प्रद १ १४
दिशश्चानवलोक ६ १३
दिशो न जाने ११ २५
दीप्तानलार्कद्युति ११ १७
दीयते च परि १७ २१
दीयतेऽनुपकारि १७ २०
दुःखदोषानुदर्श १३ ८
दुःखमाप्तुमयो ५ ६
दुःखमित्येव १८ ८
दुःखयोनय एव ५ २२
दुःखशोकामय १७ ९
दुःखान्तं च १८ ३६
दुःखाल्यमशाश्व ८ १५

दुःखेष्वनुद्विग्म २ ५६
दुर्गतिं तात ६ ४०
दुष्पूरेणानलेन च ३ ३९
दुष्प्राप इति मे ६ ३६
दूरस्थं चान्तिके १३ १५
दूरेण ह्यवरं कर्म २ ४९
दृष्टवानसि मां ११ ५३
दृष्टवानसि यन्मम ११ ५२
दृष्ट्वा तु पाण्डवा १ २
दृष्ट्वाद्भुतं रूपमुग्रं ११ २०
दृष्ट्वा रूपं घोरमी ११ ४९
दृष्ट्वा लोकाः प्रव्य ११ २३
दृष्ट्वा हि त्वा ११ २४
दृष्ट्वेदं मानुषं रूपं ११ ५१
दृष्ट्वेमं स्वजनं १ २८
दृष्ट्वैव कालानलसं ११ २५
देवदत्तं धनंजयः १ १५
देवदेव जगत्पते १० १५
देवद्विजगुरुप्राज्ञ १७ १४
देवर्षिर्नारदस्तथा १० १३
देवर्षीणां च १० २६
देवा अप्यस्य ११ ५२
देवानामस्मि १० २२
देवान्देवयजो ७ २३
देवान्भावयतानेन ३ ११
देशे काले च पात्रे १७ २०
देहवद्भिरवाप्यते १२ ५
देहिनां सा स्वभा १७ २
देहिनोऽस्मिन्यथा २ १३
देही देहसमु १४ २०
देही नित्यमवध्यो २ ३०
देहे देहभृतां वर ८ ४
देहे देहिनमव्य १४ ५
देहे सर्वस्य भारत २ ३०
देहेऽस्मिन्पुरुषः १३ २२
देहेऽस्मिन्मधु ८ २
दैव आसुर एव च १६ ६
दैवं चैवात्र पञ्च १८ १४
दैवमेवापरे यज्ञं ४ २५
दैवीं प्रकृतिमाश्रि ९ १३
दैवी संपद्विमो १६ ५
दैवी ह्येषा गुण ७ १४
दैवो विस्तरशः १६ ६
दोषैरेतैः कुलघ्ना १ ४३
द्यावापृथिव्योरिद ११ २०
द्यूतं छलयतामस्मि १० ३६
द्रक्ष्यस्यात्मन्यथो ४ ३५
द्रव्ययज्ञास्तपो ४ २८
द्रष्टुं त्वदन्येन ११ ४८
द्रष्टुमिच्छामि ते ११ ३
द्रुपदश्च महारथः १ ४
द्रुपदो द्रौपदेयाश्च १ १८
द्रोणं च भीष्मं च ११ ३४
द्रोणं च मधुसूदन २ ४
द्वन्द्वः सामासि १० ३३
द्वन्द्वमोहेन भारत ७ २७
द्वन्द्वातीतो विम ४ २२
द्वन्द्वैर्विमुक्ताः १५ ५
द्वारं नाशनमा १६ २१
द्वाविमौ पुरुषौ १५ १६
द्वौ भूतसर्गौ १६ ६

ध

धनमानमदान्वि १६ १७
धनुरुद्यम्य पाण्डवः १ २०
धर्मक्षेत्रे कुरुक्षेत्रे १ १
धर्मसंस्थापनार्थाय ४ ८
धर्मस्यास्य परंतप २ ३
धर्माविरुद्धो भूतेषु ७ ११
धर्मे नष्टे कुलं १ ४०
धर्म्यं संवादमाव १८ ७०
धर्म्याद्धि युद्धाच्छ्रे २ ३१
धाताऽहं विश्वतो १० ३३
धारयन्नचलं स्थिरम् ६ १३
धारयाम्यहमोजसा १५ १३
धार्तराष्ट्रस्य दुर्बुद्धेः १ २३
धार्तराष्ट्रान्कपि १ २०
धार्तराष्ट्रान्सबान्ध १ ३७
धार्तराष्ट्रा रणे १ ४६
धीरस्तत्र न मुह्यति २ १३
धूमेनाग्निरिवा १८ ४८
धूमेनाव्रियते वह्निः ३ ३८
धूमो रात्रिस्तथा ८ २५
धृतिं न विन्दामि ११ २४
धृतिः सा पार्थ १८ ३५
,, १८ ३४
,, १८ ३३
धृत्याऽऽत्मानं १८ ५१
धृत्या धारयते १८ ३४
धृत्या यया धारय १८ ३३
धृत्युत्साहसमन्वि १८ २६
धृष्टकेतुश्चेकितानः १ ५
धृष्टद्युम्नो विराटश्च १ १७
धेनूनामस्मि काम १० २८
ध्यानयोगपरो १८ ५२
ध्यानात्कर्म १२ १२
ध्यानेनात्मनि १३ २४
ध्यायतो विषयान् २ ६२
ध्रुवं जन्म मृतस्य २ २७
ध्रुवा नीतिर्मति १८ ७८

न

न करोति न १३ ३१
न कर्तृत्वं न कर्मा ५ १४
न कर्मणामनारम्भा ३ ४
न कर्मफलसंयोगं ५ १४
न कर्मस्वनुषज्जते ६ ४
न कश्चित्कर्तुमर्ह २ १७
न काङ्क्षे विजयं १ ३२
न किंचिदपि ६ २५
न कुर्यां कर्म चेद ३ २४
नकुलः सहदेवश्च १ १६
नक्षत्राणामहं १० २१
न च क्रियाभिर्न ११ ४८
न च तत्प्रेत्य नो १७ २८
न च तस्मान्मनु १८ ६९
न च मत्स्थानि ९ ५
न च मां तानि ९ ९
न च मां योऽभ्य १८ ६७
न च राज्यं १ ३२
न च शक्नोम्यवस्था १ ३०
न च श्रेयोऽनु १ ३१
न च संन्यसनादेव ३ ४
न चातिस्वप्नशील ६ १६
न चाभावयतः २ ६६
न चायुक्तस्य २ ६६
न चाशुश्रूषवे १८ ६७
न चास्य सर्वभूते ३ १८
न चाहं तेष्वस्थि ९ ४
न चिरेणाधिगच्छ ५ ६

न चैकान्तमनश्नतः ६ १६
न चैतद्विद्मः कतर २ ६
न चैनं क्लेदयन्त्या २ २३
न चैव न भवि २ १२
न चैव सुकृतं विभुः ५ १५
न जायते म्रियते २ २०
न तदस्ति पृथिव्यां १८ ४०
न तदस्ति विना १० ३९
न तद्भासयते १५ ६
न तु मामभिजा ९ २४
न तु मां शक्ष्यसे ११ ८
न तु सन्यासिनां १८ १२
न तेषु रमते बुधः ५ २२
न त्याज्यं कार्यमेव १८ ५
न त्याज्यमिति १८ ३
न त्वं नेमे जनाधि २ १२
न त्वं वेत्थ परंतप ४ ५
न त्वं शोचितु २ २७
,, २ ३०
न त्वत्समोऽस्त्य ११ ४३
न त्वहं तेषु ते ७ १२
न त्वेवाहं जातु २ १२
न दानेन न ११ ५३
न द्वेष्टि संप्रवृ १४ २२
न द्वेष्ट्यकुशलं १८ १०
न निरग्निर्नचा ६ १
न निवृत्तानि १४ २२
न प्रसिध्येदकर्म ३ ८
न प्रहृष्येत्प्रियं ५ २०
न बुद्धिभेदं जन ३ २६
नभश्च पृथिवीं १ १९
नभस्स्पृशं दीप्तमने ११ २४
नमस्कृत्वा भूय ११ ३५
नमस्यन्तश्च मां ९ १४
नमः पुरस्तादथ ११ ४०
न मां कर्माणि ४ १४
न मां दुष्कृतिनो ७ १५
न मे कर्मफले ४ १४
न मे द्वेष्योऽस्ति ९ २९
न मे पार्थास्ति ३ २२
न मे भक्तः प्रण ९ ३१
न मे विदुः सुर १० २
नमो नमस्तेऽस्तु ११ ३९
नमोऽस्तु ते ११ ३१
नमोऽस्तु ते सर्वत ११ ४०
न योत्स्य इति १८ ५९
न योत्स्यामीति २ ९
नरके नियतं वासो १ ४४
नराणां च नराधि १० २७
न रूपमस्येह १५ ३
नवद्वारे पुरे देही ५ १३
नवानि गृह्णाति २ २२
न विकम्पितुमर्हसि २ ३१
न विमुञ्चति १८ ३५
न वेदयज्ञाध्ययनै ११ ४८
न शक्नोषि मयि १२ ९
न शशाङ्को न १५ ६
न शोचति न १२ १७
,, १८ ५४
न शोषयति २ २३
न शौचं नापि १६ ७
नश्यत्सु न विन ८ २०
न श्रोष्यसि १८ ५८
नष्टात्मानोऽल्प १६ ९
नष्टो मोहः १८ ७३
न सत्तन्नासदुच्य १३ १२
न सत्यं तेषु १६ ७
न स पश्यति १८ १६
न स भूयोऽभि १३ २३
न स सिद्धिमवा १६ २३
न सुखं न परां १६ २३
न सुखं संशया ४ ४०
न हन्ति न निब १८ १७
न हन्यते हन्य २ २०
न हि कल्याण ६ ४०
न हि कश्चित्क्षण ३ ५
न हि ज्ञानेन ४ ३८
न हि ते भगवन् १० १४
न हि देहभृता १८ ११
न हिनस्त्यात्मना १३ २८
न हि प्रजानामि ११ ३१
न हि प्रपश्यामि २ ८
न ह्यसंन्यस्तसंक ६ २
नाकृतेनेह कश्चन ३ १८
नात्मानमवसादये ६ ५
नात्यश्नतस्तु ६ १६
नात्युच्छ्रितं नाति ६ ११
नादत्ते कस्यचित् ५ १५
नानवाप्तमवाप्तव्यं ३ २२
नानाभावान्पृथग्वि १८ २१
नानावर्णाकृतीनि ११ ५
नानाविधानि ११ ५
नानाशस्त्रप्रहरणाः १ ९
नानुतिष्ठन्ति मे ३ ३२
नानुवर्तयतीह यः ३ १६
नानुशोचन्ति २ ११
नानुशोचितुमर्हसि २ २५
नान्तं न मध्यं ११ १६
नान्तो न चादिर्न १५ ३
नान्तोऽस्ति मम १० ४०
नान्यं गुणेभ्यः १४ १९
नान्यदस्तीति २ ४२
नाप्नुवन्ति महात्मा ८ १५
नाभक्ताय कदा १८ ६७
नाभावो विद्यते २ १६
नाभिनन्दति न २ ५७
नायका मम सैन्य १ ७
नायं लोकोऽस्ति ४ ४०
नायं लोकोऽस्त्यय ४ ३१
नायं हन्ति न २ १९
नायं भूत्वा भविता २ २०
नाशयाम्यात्म १० ११
नासतो विद्यते २ १६
नासाभ्यन्तरचारि ५ २७
नास्ति बुद्धिरयुक्त २ ६६
नास्त्यन्तो विस्तर १० १९
नाहं प्रकाशः ७ २५
नाहं वेदैर्न तपसा ११ ५३
निगृहीतानि २ ६८
निगृह्याग्युत्सृजामि ९ १९
निग्रहः किं करि ३ ३३
नित्यं च समचित्त १३ ९
नित्यं दर्शनकाङ्क्षि ११ ५२
नित्यं यज्ञे प्रतिष्ठि ३ १५
नित्यं वा मन्यसे २ २६
नित्यतृप्तो निराश्र ४ २०
नित्ययुक्तस्य योगि ८ १४
नित्ययुक्ता उपासते ९ १४

नित्ययुक्ता उपा १२ २
नित्यस्योक्ताः शरी २ १८
नित्यस्सर्वगत २ २४
निद्रालस्यप्रमादो १८ ३९
निधानं बीजमव्य ९ १८
निन्दन्तस्तव २ ३६
निबद्धः स्वेन १८ ६०
निबध्नन्ति धनंजय ४ ४१
,, ९ ९
निबध्नन्ति महा १४ ५
निबन्धायासुरी १६ ५
निमित्तमात्रं भव ११ ३३
निमित्तानि च १ ३१
नियतं कुरु कर्म ३ ८
नियतं क्रियते १८ ९
नियतं संगरहितं १८ २३
नियतस्य तु १८ ७
नियम्य भरतर्षभ ३ ४१
नियम्यारभतेऽर्जुन ३ ७
नियोजयसि केशव ३ १
निराशीरपरिग्रहः ६ १०
निराशीर्निर्ममो ३ ३०
निराशीर्यतचित्तात्मा ४ २१
निराहारस्य देहिनः २ ५९
निरुद्धं योगसेवया ६ २०
निर्गुणं गुणभोक्तृ १३ १४
निर्दोषं हि समं ५ १९
निर्द्वन्द्वो नित्यसत्त्व २ ४५
निर्द्वन्द्वो हि महा ५ ३
निर्ममो निरहंकारः २ ७१
,, १२ १३
निर्मानमोहा जित १५ ५
निर्योगक्षेम आत्म २ ४५
निर्वैरः सर्वभूतेषु ११ ५५
निवसिष्यसि १२ ८
निवासः शरणं ९ १८
निश्चयं शृणु मे १८ ४
निश्चितं मतमुत्त १८ ६
निःश्रेयसकरावुभौ ५ २
निष्ठा ज्ञानस्य या १८ ५०
निस्त्रैगुण्यो भवा २ ४५
निःस्पृहः सर्वकामे ६ १८
निहत्य धार्तराष्ट्रान्नः १ ३६
नीतिरस्मि जिगीष १० ३८
नेङ्गते सोपमा ६ १९
नेहाभिक्रमनाशो २ ४०
नैतत्त्वय्युपपद्यते २ ३
नैति मामेति ४ ९
नैते सृती पार्थ ८ २७
नैनं छिन्दन्ति २ २३
नैनं दहति पावकः २ २३
नैनं पश्यन्त्यचेत १५ ११
नैनां प्राप्य विमु २ ७२
नैवं पापमवाप्स्यसि २ ३८
नैवं शोचितुमर्हसि २ २६
नैव किंचित्करोति ४ २०
नैव किंचित्करोमीति५ ८
नैव कुर्वन्न कारयन् ५ १३
नैव तस्य कृतेनार्थो ३ १८
नैव त्यागफलं १८ ८
नैष्कर्म्यं पुरुषो ३ ४
नैष्कर्म्यसिद्धिं पर १८ ४९
नोद्विजेत्प्राप्य चामि ५ २०
न्याय्यं वा विपरी १८ १५
पचाम्यन्नं चतुर्वि १५ १४
पञ्च चेन्द्रियगोच १३ ५
पञ्चैतानि महा १८ १३
पञ्चैते तस्य हेतवः १८ १५
पणवानकगोमुखाः १ १३
पण्डिताः समदर्शि ५ १८
पतन्ति नरकेऽशु १६ १६
पतन्ति पितरो १ ४२
पत्रं पुष्पं फलं तोयं ९ २६
पदं गच्छन्त्यनाम २ ५१
पद्मपत्रमिवाम्भसा ५ १०
परं जन्म विवस्वतः ४ ४
परं दृष्ट्वा निवर्तते २ ५९
परं ब्रह्म परं धाम १० १२
परं भावमजानन्तो ७ २४
,, ९ ११
परं भूयः प्रव १४ १
परधर्मात्स्वनुष्ठितात् ३ ३५
,, १८ ४७
परधर्मो भयावहः ३ ३५
परमं पुरुषं दिव्यं ८ ८
परमं रूपमैश्वरम् ११ ९
परमात्माऽयम १३ ३१
परात्मा समाहितः ६ ७
परमात्मेति १३ २२
परमात्मेत्युदा १५ १७
परमाप्नोति पूरुषः ३ १९
परस्तस्मात्तु भावो ८ २०
परस्परं भावयन्तः ३ ११
परस्योत्सादनार्थं १७ १९
परां सिद्धिमितो १४ १
परिचर्यात्मकं कर्म १८ ४४
परिणामेऽमृतोप १८ ३७
परिणामे विषमिव १८ ३८
परित्राणाय साधूनां ४ ८
परिप्रश्नेन सेवया ४ ३४
पर्जन्यादन्नसंभवः ३ १४
पर्याप्तं त्विदमेतेषां १ १०
पवनः पवतामस्मि १० ३१
पवित्रमिदमुत्तमम् ९ २
पवित्रमिह विद्यते ४ ३८
पवित्रं परमं भवान् १० १२
पश्यत्यकृतबुद्धि १८ १६
पश्यन्ति ज्ञान १५ १०
पश्यन्त्यात्मन्यव १५ ११
पश्यन्नात्मनि ६ २०
पश्यञ्शृण्वन्स्पृशन् ५ ८
पश्य मे पार्थ ११ ५
पश्य मे योगमैश्वरम् ९ ५
,, ११ ८
पश्यादित्यान्वसून् ११ ६
पश्याद्य सचरा ११ ७
पश्यामि त्वा दीप्त ११ १९
पश्यामि त्वा दुर्नि ११ १७
पश्यामि त्वां सर्व ११ १६
पश्यामि देवांस्तव ११ १५
पश्यामि विश्वेश्वर ११ १६
पश्याश्चर्याणि ११ ६
पश्यैतां पाण्डुपुत्रा १ ३
पाञ्चजन्यं हृषीकेशो १ १५
पाण्डवानां धनं १० ३७
पापं चरति पूरुषः ३ ३६
पापमेवाश्रयेदस्मान् १ ३६

पापादस्मान्निवर्तितुं १ ३९
पाप्मानं प्रजहि ह्येनं ३ ४१
पार्थ नैवेह नामुत्र ६ ४०
पार्थ संपदमासुरीं १६ ४
पार्थस्य च महा १८ ७४
पावनानि मनी १८ ५
पिताऽसि लोकस्य ११ ४३
पिताऽहमस्य ९ १७
पितृणामर्यमा १० २९
पितृनथ पितामहान् १ २६
पितृन्यान्ति पितृ ९ २५
पितेव पुत्रस्य ११ ४४
पीडया क्रियते १७ १९
पुण्यो गन्धः पृथि ७ ९
पुत्रदारगृहादिषु १३ ९
पुत्रान्पौत्रान्सखीन् १ २६
पुनरावर्तिनोऽर्जुन ८ १६
पुनर्जन्म न विद्यते ८ १६
पुनर्योगं च शंससि ५ १
पुनश्च भूयोऽपि ११ ३९
पुमांश्चरति निःस्पृहः २ ७१
पुरा प्रोक्ता मया ३ ३
पुरुजित्कुन्तिभोजश्च १ ५
पुरुषं पुरुषर्षभ २ १५
पुरुषं शाश्वतं १० १२
पुरुषः प्रकृतिस्थो १३ २१
पुरुषम्य॥षदवतम् ८ ४
पुरुषस्य विपश्चितः २ ६०
पुरुषस्स परः पार्थ ८ २२
पुरुषस्सुखदुःखा १३ २०
पुरोधसां च मुख्यं १० २४
पुरोवाच प्रजापतिः ३ १०
पुष्णामि चौषधीः १५ १३
पूजनं शौचमार्ज १७ १४
पूजार्हावरिसूदन २ ४
पूता मद्भावमागताः ४ १०
पूति पर्युषितं च १७ १०
पूर्वाभ्यासेन तेनैव ६ ४४
पूर्वैः पूर्वतरं कृतम् ४ १५
पूर्वैरपि मुमुक्षुभिः ४ १५
पृच्छामि त्वा धर्म २ ७
पृथकेशिनिषूदन १८ १
पृथक्त्वेन तु १८ २१
पृथक्त्वेन धनं १८ २९
पौण्ड्रं दध्मौ महा १ १५
प्रकाश उपजायते १४ ११
प्रकाशकमनामयम् १४ ६
प्रकाशं च प्रवृत्तिं १४ २२
प्रकाशयति तत्परम् ५ १६
प्रकाशयति भारत १३ ३३
प्रकृतिं च गुणैः १३ २३
प्रकृतिं पुरुषं चैव १३ १९
प्रकृतिं मोहिनीं ९ १२
प्रकृतिं यान्ति भूतानि ३ ३३
प्रकृतिं यान्ति मामि ९ ७
प्रकृतिं विद्धि मे ७ ५
प्रकृतिं स्वामधिष्ठाय ४ ६
प्रकृतिं स्वामवष्टभ्य ९ ८
प्रकृतिस्त्वां नियो १८ ५९
प्रकृतिस्थानि १५ ७
प्रकृतेः क्रियमा ३ २७
प्रकृतेर्गुणसंमूढाः ३ २९
प्रकृतेर्ज्ञानवानपि ३ ३३
प्रकृत्या नियताः ७ २०
प्रकृत्यैव च १३ २९
प्रजनश्चास्मि १० २८
प्रजहाति यदा २ ५५
प्रजापतिस्त्वं प्रपि ११ ३९
प्रज्ञावादांश्च भाषसे २ ११
प्रणम्य शिरसा ११ १४
प्रणवः सर्ववेदेषु ७ ८
प्रतिजाने प्रियो १८ ६५
प्रत्यक्षावगमं धर्म्यं ९ २
प्रत्यवायो न विद्यते २ ४०
प्रथितः पुरुषोत्तमः १५ १८
प्रदुष्यन्ति कुल १ ४१
प्रद्विषन्तोऽभ्यसूय १६ १८
प्रनष्टस्ते धनंजय १८ ७२
प्रपद्यन्ते नराधमाः ७ १५
प्रपद्यन्तेऽन्यदेवता: ७ २०
प्रपश्यद्भिर्जनार्दन १ ३९
प्रभवं न महर्षयः १० २
प्रभवः प्रलयस्तथा ७ ६
प्रभवप्रलयस्थानं ९ १८
प्रभवत्यहरागमे ८ १९
प्रभवन्त्यहरागमे ८ १८
प्रभवन्त्युग्रकर्माणः १६ ९
प्रभाऽस्मि शशिसूर्य ७ ८
प्रमाथि बलवद्दृढम् ६ ३४
प्रमादमोहौ तमसो १४ १७
प्रमादालस्यनिद्रा १४ ८
प्रमादे संजयत्युत १४ ९
प्रमादो मोह एव १४ १३
प्रयत्नाद्यतमानस्तु ६ ४५
प्रयाणकाले च कथं ८ २
प्रयाणकालेऽपि च ७ ३०
प्रयाणकाले मनसा ८ १०
प्रयाता यान्ति तं ८ २३
प्रलपन्विसृजन्गृह्णन् ५ ९
प्रलयं याति देह १४ १४
प्रलयान्तामुपाश्रि १६ ११
प्रलये न व्यथन्ति १४ २
प्रवक्ष्याम्यनसूयवे ९ १
प्रवदन्ति न पण्डि ५ ४
प्रवदन्त्यविपश्चितः २ ४२
प्रवर्तन्ते विधानो १७ २४
प्रवर्तन्तेऽशुचिव्र १६ १०
प्रविभक्तमनेकधा ११ १३
प्रवृत्तिं च निवृत्तिं १६ ७
,, १८ ३०
प्रवृत्ते शस्त्रसंपाते १ २०
प्रवेष्टुं च परंतप ११ ५४
प्रशस्ते कर्मणि १७ २६
प्रशान्तमनसं ह्येनं ६ २७
प्रशान्तात्मा विगत ६ १४
प्रसक्ताः कामभो १६ १६
प्रसङ्गेन फलाका १८ ३४
प्रसन्नचेतसो ह्याशु २ ६५
प्रसादमधिगच्छति २ ६४
प्रसादये त्वामहमी ११ ४४
प्रसादे सर्वदुःखा २ ६५
प्रसीद देवेश जग ११ २५
,, ११ ४५
प्रहसन्निव भारत २ १०
प्रह्लादश्चास्मि १० ३०
प्राक्शरीरविमोक्ष ५ २३
प्राणकर्माणि चापरे ४ २७
प्राणांस्त्यक्त्वा १ ३३

प्राणान्प्राणेषु जुह्वति ४ ३०
प्राणापानगतीरुद्ध्वा ४ २९
प्राणापानसमा १५ १४
प्राणापानौ समौ ५ २७
प्राणायामपरायणाः ४ २९
प्राणिनां देहमा १५ १४
प्राणेऽपानं तथा ४ २९
प्राधान्यतः कुरु १० १९
प्राप्नुयात्पुण्यकर्म १८ ७१
प्राप्य पुण्यकृतां ६ ४१
प्राहुस्त्यागं विचक्ष १८ २
प्रियः प्रियायार्हसि ११ ४४
प्रियो हि ज्ञानिनोऽ ७ १७
प्रेतान्भूतगणां १७ ४
प्रोक्तवानहमव्ययम् ४ १
प्रोच्यते गुणसं १८ १९
प्रोच्यमानमशेषे १८ २९

फ

फलं त्यक्त्वा मनी २ ५१
फलं यज्ञतपःक्रि १७ २५
फलमुद्दिश्य वा १७ २१
फले सक्तो निब ५ १२

ब

बन्धं मोक्षं च या १८ ३०
बन्धुरात्माऽऽत्मन ६ ६
बलं बलवतामस्मि ७ ११
बलं भीमाभिरक्षि १ १०
बलं भीष्माभिरक्षि १ १०
बलादिव नियोजि ३ ३६
बहवो ज्ञानतपसा ४ १०
बहिरन्तश्च भूता १३ १५
ब्रह्मणः स्थितोऽस्य ९ १५
बहुशाखा ह्यनन्ता २ ४१
बहूदरं बहुदंष्ट्रा ११ २३
बहूनां जन्मना ७ १९
बहूनि मे व्यती ४ ५
बहून्यदृष्टपूर्वाणि ११ ६
बाह्यस्पर्शेष्वसक्ता ५ २१
बिभर्त्यव्यय १५ १७
बीजं तदहमर्जुन १० ३९
बीजं मां सर्वभूता ७ १०
बुधा भावसमन्वि १० ८
बुद्धयोऽव्यवसायि २ ४१
बुद्धिं मोहयसीव मे ३ २
: पर्यवतिष्ठते २ ६५
बुद्धिप्राह्यमतीन्द्रि ६ २१
बुद्धिनाशात्प्रणश्यति २ ६३
बुद्धियुक्तो जहाती २ ५०
बुद्धियोगमुपाश्रि १८ ५७
बुद्धियोगाद्धनञ्जय २ ४९
बुद्धिरव्यक्तमेव १३ ५
बुद्धिर्ज्ञानमसंमो १० ४
बुद्धिर्बुद्धिमतामस्मि ७ १०
बुद्धिर्यस्य न लिप्य १८ १७
बुद्धियोगे त्विमां २ ३९
बुद्धिर्व्यतितरिष्यति २ ५२
बुद्धिस्सा पार्थ ता १८ ३२
बुद्धिस्सा पार्थ रा १८ ३१
बुद्धिस्सा पार्थ सा १८ ३०
बुद्धेर्भेदं धृतेश्चैव १८ २९
बुद्धौ शरणमन्वि २ ४९
बुद्ध्या धृतिगृही ६ २५
बुद्ध्या युक्तो यया २ ३९
बुद्ध्या विशुद्धया १८ ५१
बृहत्साम तथा १० ३५
बोद्धव्यं च विकर्म ४ १७
बोधयन्तः परस्प १० ९
ब्रह्मकर्मसमाधिना ४ २४
ब्रह्मचर्यमहिंसा च १७ १४
ब्रह्मचारिव्रते ६ १४
ब्रह्मणस्त्रिविधः १७ २३
ब्रह्मणो हि प्रति १४ २७
ब्रह्मण्याधाय कर्मा ५ १०
ब्रह्मनिर्वाणमृच्छति २ ७२
ब्रह्म ब्रह्मविदो ८ २४
ब्रह्मभूतः प्रसन्ना १८ ५४
ब्रह्मभूतमकल्मषम् ६ २७
ब्रह्मभूतोऽधिगच्छ ५ २४
ब्रह्मभूयाय कल्पते १४ २६
,, १८ ५३
ब्रह्मविद्ब्रह्मणि ५ २०
ब्रह्म संपद्यते तदा १३ ३०
ब्रह्मसूत्रपदैश्चैव १३ ४
ब्रह्माक्षरसमुद्भवम् ३ १५
ब्रह्माग्नावपरे यज्ञं ४ २५
ब्रह्माग्नौ ब्रह्मणा ४ २४
ब्रह्माणमीशं कमला ११ १५
ब्रह्मार्पणं ब्रह्महविः ४ २४
ब्रह्मैव तेन गन्तव्यं ४ २४
ब्राह्मं कर्म स्वभाव १८ ४२
ब्राह्मणक्षत्रियविशां १८ ४१
ब्राह्मणस्य विजानतः २ ४६
ब्राह्मणास्तेन वेदा १७ २३
ब्राह्मणे गवि हस्तिनि ५ १८

भ

भक्त्या त्वनन्यया ९ २२
भक्तास्तेऽतीव मे १२ २०
भक्तास्त्वां पर्युपास १२ १
भक्तिं मयि परां १८ ६८
भक्तिमान्मे प्रियो १२ १९
भक्तिमान् यः स १२ १७
भक्तियोगेन सेव १४ २६
भक्तिरव्यभिचारि १३ १०
भक्तोऽसि मे सखा ४ ३
भक्त्या त्वनन्यया ११ ५४
भक्त्या मामभि १८ ५५
भक्त्या युक्तो योग ८ १०
भक्त्या लभ्यस्त्व ८ २२
भजतां प्रीतिपूर्वं १० १०
भजते मामनन्य ९ ३०
भजत्येकत्वमास्थितः ६ ३१
भजन्ते मां दृढव्र ७ २८
भजन्त्यनन्यमनसो ९ १३
भयं चाभयमेव च १० ४
भयाद्रणादुपरतम् २ ३५
भयेन च प्रव्य ११ ४५
भर्ता भोक्ता महे १३ २२
भवतीत्यनुशुश्रुम १ ४४
भवतोऽज्ञानमेव च १४ १७
भवत्यत्यागिनां १८ १२
भवन्तः सर्व एव हि १ ११
भवन्ति भावा १० ५
भवन्ति संपदं १६ ३
भवान्भीष्मश्च कर्ण १ ८
भवाप्ययौ हि ११ २
भवामि न चिरात् १२ ७
भविता न च मे १८ ६९
भविष्यति पुन १६ १३

भविष्याणि च ७ २६
भवेद्युगपदुत्थिता ११ १२
भस्मसात्कुरुते तथा ४ ३७
भस्मसात्कुरुतेऽर्जुन ४ ३७
भावमव्ययमीक्षते १८ २०
भावसंशुद्धिरित्येषा १७ १६
भासस्तवोग्राः प्रत ११ ३०
भासस्तस्य महात्म ११ १२
भिन्ना प्रकृतिरष्टधा ७ ४
भीमकर्मा वृकोदरः १ १५
भीमार्जुनसमा युधि १ ४
भीष्मद्रोणप्रमुखतः १ २५
भीष्ममेवाभिरक्षन्तु १ ११
भीष्मो द्रोणः सूत ११ २६
भुङ्क्ते प्रकृतिजान्१३ २१
भुञ्जानं वा गुणा १५ १०
भुञ्जीय भोगान् २ ५
भूतग्राममचेतसः १७ ६
भूतग्राममिमं कृत्स्नं ९ ८
भूतग्रामः स एवायं ८ १९
भूतप्रकृतिमोक्षं च १३ ३४
भूतभर्तृ च तज्ज्ञेयं १३ १६
भूतभावन भूतेश १० १५
भूतभावोद्भवकरो ८ ३
भूतभृन्न च भूतस्थो ९ ५
भूतानामन्त एव १० २०
भूतानामस्मि १० २२
भूतानामीश्वरोऽपि ४ ६
भूतानि यान्ति ९ २५
भूत्वा पुनः सौम्य ११ ५०
भूत्वाभूत्वा ८ १९
भूत्वा यास्यसि तत्र २ ३५
भूमिरापोऽनलो ७ ४
भूय एव महा १० १
भूयः कथय तृप्ति १० १८
भोक्ता च प्रभुरेव ९ २४
भोक्तारं यज्ञतपसां ५ २९
भोक्तृत्वे हेतुरुच्य १३ २०
भोगैश्वर्यगतिं प्रति २ ४३
भोगैश्वर्यप्रसक्तानां २ ४४
भोजनं तामसप्रियं १७ १०
भ्रमतीव च मे मनः १ ३०
भ्रामयन्सर्वभूतानि १८ ६१
भ्रुवोर्मध्ये प्राणमावे ८ १०

म

मंस्य(मन्य)न्ते त्वां २ ३५
मच्चित्तस्सततं १८ ५७
मच्चित्तस्सर्वदुर्गा १८ ५८
मच्चित्ता मद्गत १० ९
मता बुद्धिर्जनार्दन ३ १
मत्कर्मकृन्मत्परमो ११ ५५
मत्कर्मपरमो भव १२ १०
मत्त एव पृथग्वि १० ५
मत्त एवेति तान्वि ७ १२
मत्तः परतरं नान्यत् ७ ७
मत्तस्सर्वं प्रवर्तते १० ८
मत्तस्स्मृतिर्ज्ञान १५ १५
मत्प्रसादात्तरिष्य १८ ५८
मत्प्रसादादवाप्नो १८ ५६
मत्संस्थामधि ६ १५
मत्स्थानि सर्व ९ ४
मत्स्थानीत्युपधारय ९ ६
मदनुग्रहाय परमं ११ १
मदर्थमपि कर्माणि १२ १०
मदर्थे त्यक्तजीविताः १ ९
मद्गतेनान्तरात्मना ६ ४७
मद्भक्त एतद्विज्ञाय १३ १८
मद्भक्तस्सङ्गवर्जि ११ ५५
मद्भक्ता यान्ति ७ २३
मद्भक्तिं लभते १८ ५४
मद्भक्तेष्वभिधा १८ ६८
मद्भावं सोऽधि १४ १९
मद्भावा मानसा १० ६
मद्भावायोपपद्यते १३ १८
मद्याजी मां नम ९ ३४
,, १८ ६५
मध्यं चैवाहमर्जुन १० ३२
मध्यस्थद्वेष्यबन्धुषु ६ ९
मध्ये तिष्ठन्ति १४ १८
मनःप्रसादः १७ १६
मनःप्राणेन्द्रिय १८ ३३
मनश्चञ्चलमस्थिरम् ६ २६
मनष्षष्ठानीन्द्रि १५ ७
मनसस्तु परा बुद्धिः ३ ४२
मनसैवेन्द्रियग्रामं ६ २४
मनस्संयम्य मच्चित्तो ६ १४
मनुरिक्ष्वाकवेऽब्र ४ १
मनुष्याणां जनार्दन १ ४४
मनुष्याणां सहस्रेषु ७ ३
मनुष्याः पार्थ सर्वशः३ २३
,, ४ ११
मनो दुर्निग्रहं ६ ३५
मनो हृदि निरुध्य ८ १२
मन्त्रहीनमदक्षिणम् १७ १३
मन्त्रोऽहमहमेवाज्यं ९ १६
मन्मना भव मद्भक्तो ९ ३४
मन्मना भव १८ ६५
मन्मया मामुपाश्रिताः ४ १०
मन्यते तमसाऽऽवृ १८ ३२
मन्यते नाधिकं ६ २२
मन्यन्ते मामबुद्धयः७ २४
मन्यसे यदि तच्छ ११ ४
मम तेजोंशसंभ १० ४१
मम देहे गुडा ११ ७
मम भूतमहेश्वरम् ९ ११
मम माया दुरत्यया ७ १४
मम योनिर्महद्ब्रह्म १४ ३
मम यो वेत्ति १० ७
मम वर्त्मानुवर्तन्ते ३ २३
,, ४ ११
मम साधर्म्यमागताः१४ २
ममात्मा भूतभावनः९ ५
ममाव्ययमनुत्तमम् ७ २४
ममैवांशो जीव १५ ७
मया ततमिदं सर्वं ९ ४
मया द्रष्टुमिति प्रभो११ ४
मयाऽध्यक्षेण ९ १०
मया प्रसादात्प्रण ११ ४१
मया प्रसन्नेन ११ ४७
मया भूतं चरा ११ ३९
मया हतांस्त्वं ११ ३४
मयि चानन्ययो १३ १०
मयि ते तेषु ९ २९
मयि बुद्धिं निवे १२ ८
मयि संन्यस्य १८ ५७
,, १२ ६
मयि सर्वमिदं प्रोतं ७ ७
मयि सर्वाणि ३ ३०

मयैव विहितान्हि ७ २२
मय्यैवैते निहताः ११ ३३
मय्यर्पितमनोबुद्धिः ८ ७
,, १२ १४
मय्यावेशितचेत १२ ७
मय्यावेश्य मनो १२ २
मय्यासक्तमनाः ७ १
मय्येव मन १२ ८
मरणादतिरिच्यते २ ३४
मरीचिर्मरुतामस्मि १० २१
महति स्यन्दने १ १४
महर्षयः सप्त पूर्वे १० ६
महर्षीणां च सर्व १० २
महर्षीणां भृगुरहं १० २५
महात्मानस्तु मां ९ १३
महाबाहो बहुबाहू ११ २३
महाभूतान्यहंकारो १३ ५
महायोगेश्वरो हरिः११ ९
महाशनो महापाप्मा ३ ३७
मां च योऽव्यभि १४ २६
मां चैवान्तःशरीर १७ ६
मां तु वेद न ७ २६
मां ध्यायन्त उपा १२ ६
मां हि पार्थ व्यपा ९ ३२
मा कर्मफलहेतुर्भूः २ ४७
मा क्लैब्यं गच्छ २ ३
माता धाता पिता ९ १७
मातुलाः श्वशुराः १ ३४
मा ते व्यथा मा ११ ४९
मा ते सङ्गोऽस्त्व २ ४७
मात्रास्पर्शास्तु २ १४
मामकाः पाण्डवाश्चैव १ १४
मानावमानयोः १४ २५
मानुषीं तनुमाश्रितं ९ ११
मा फलेषु कदा २ ४७
मामकाः पाण्डवा १ १
मामनुस्मर युध्य च ८ ७
मामप्राप्यैव कौन्ते १६ २०
मामात्मपरदेहेषु १६ १८
मामाश्रित्य यतन्ति ७ २९
मामिच्छाप्तुं १२ ९
मामुपेत्य तु कौन्तेय ८ १६
मामुपेत्य पुनर्जन्म ८ १५
मामेकं शरणं व्रज १८ ६६
मामेभ्यः परमव्य ७ १३
मामेव ये प्रपद्यन्ते ७ १४
मामेवानुत्तमां ७ १८
मामैवैष्यत्यसंश १८ ६८
मामेवैष्यसि युक्त्वै ९ ३४
मामेवैष्यसि सत्यं १८ ६५
मामेवैष्यस्यसंशयः ८ ७
मायया ऽपहृतज्ञानाः ७ १५
मायामेतां तरन्ति ७ १४
मार्दवं ह्रीरचापलं १६ २
मा शुचः संपदं १६ ५
मासानां मार्गशी १० ३५
माहात्म्यमपि ११ २
मित्रद्रोहे च पातकं १ ३८
मिथ्याचारः स ३ ६
मिथ्यैष व्यवसा १८ ५९
मुक्तसङ्गः समाचर ३ ९
मुक्तसङ्गोऽनहं १८ २६
मुक्तो यः स च १२ १५
मुखं च परिशुष्यति १ २९
मुच्यन्ते तेऽपि ३ ३१
मुच्यन्ते सर्वकिल्बि ३१ ३
मुनिर्मोक्षपरायणः ५ २८
मुनीनामप्यहं १० ३७
मूढग्राहेणात्मनो १७ १९
मूढयोनिषु १४ १५
मूढा जन्मनि १६ २०
मूढोऽयं नाभिजा ७ २५
मूर्तयः संभवन्ति १४ ४
मूर्ध्न्याधायात्मनः ८ १२
मृगाणां च मृगे १० ३०
मृत्युं श्रुतिपरा १३ २५
मृत्युसंसारवर्त्मनि ९ ३
मृत्युसंसारसागरात्१२ ७
मृत्युस्सर्वहरश्चाहं १० ३४
मेधावी छिन्नसं १८ १०
मेरुः शिखरिणा १० २३
मैत्रः करुण एव च १२ १३
मोक्षयिष्यामि मा १८ ६६
मोक्ष्यसे कर्मबन्ध ९ २८
मोघं पार्थ स जीवति ३ १६
मोघज्ञाना विचेत ९ १२
मोघाशा मोघकर्मा ९ १२
मोहजालसमावृताः १६ १६
मोहनं सर्वदेहि १४ ८
मोहमेव च पाण्डव १४ २२
मोहात्तस्य परित्या १८ ७
मोहादारभ्यते १८ २५
मोहादृहीत्वाऽस १६ १०
मोहितं नाभिजाना ७ १३
मोहोऽयं विगतो ११ १
मौनं चैवास्मि १० ३८
मौनमात्मविनि १७ १६

य

य आस्ते मनसा ३ ६
य इदं परमं गुह्यं १८ ६८
य एतेऽत्र समा १ २३
य एनं वेत्ति हन्तारं २ १९
य एनमजमव्ययम् २ २१
य एवं वेत्ति पुरुषं १३ २३
यं प्राप्य न निवर्त ८ २१
यंयं वाऽपि स्मरन् ८ ६
यं लब्ध्वा चापरं ६ २२
यं संन्यास इति ६ २
यं हि न व्यथय २ १५
यः पश्यति तथा १३ २९
यः पश्यति स पश्य ५ ५
,, १३ २७
यः प्रयाति त्यजन् ८ १३
यः प्रयाति स मद्भा ८ ५
यक्षरक्षांसि राज १७ ४
यक्ष्ये दास्यामि १६ १५
यच्चन्द्रमसि १५ १२
यच्चान्यद्दुष्टुम् ११ ७
यच्चापहासार्थम् ११ ४२
यच्चापि सर्वभूता १० ३९
यच्चाप्युत्कामती १५ ८
यच्छोकमुच्छोषण २ ८
यच्छ्रेय एतयोरेकं ५ १
यच्छ्रेयः स्यान्निश्चि २ ७
यजन्त इह देवता: ४ १२
यजन्ते तामसा १७ ४
यजन्ते नामयज्ञै १६ १७
यजन्ते श्रद्धयाऽ १७ १

यजन्ते श्रद्धयाऽ ९ २३
यजन्ते सात्त्विका १७ ४
यजन्तो मामुपास ९ १५
यजन्त्यविधिपूर्वकं ९ २३
यज्जुहोषि ददासि ९ २७
यज्ञः कर्मसमुद्भवः ३ १४
यज्ञक्षपितकल्मषाः ४ ३०
यज्ञदानतपःकर्म १८ ३
,, १८ ५
यज्ञदानतपःक्रियाः१७ २४
यज्ञशिष्टामृतभुजो ४ ३१
यज्ञशिष्टाशिनः ३ १३
यज्ञस्तपस्तथा दानं १७ ७
यज्ज्ञात्वा न पुन ४ ३५
यज्ज्ञात्वा नेह ७ २
यज्ज्ञात्वा मुनयस्स १४ १
यज्ज्ञात्वाऽमृतम १३ १२
यज्ज्ञात्वा मोक्ष्यसे ४ १६
,, ९ १
यज्ञाद्भवति पर्जन्यः ३ १४
यज्ञानां जपयज्ञोऽ १० २५
यज्ञायाचरतः कर्म ४ २३
यज्ञार्थात्कर्मणोऽ ३ ९
यज्ञाश्च विहिताः १७ २३
यज्ञे तपसि दाने १७ २७
यज्ञेनैवोपजुह्वति ४ २५
यज्ञैरिष्ट्वा स्वर्गतिं ९ २०
यज्ञो दानं तपश्चै १८ ५
यतः प्रवृत्तिः प्रसृ १५ ४
यतः प्रवृत्तिर्भूता १८ ४६
यतचित्तेन्द्रियक्रियः ६ १२
यततामपि सिद्धानां ७ ३
यतते च ततो भूयः ६ ४३
यततो ह्यपि कौन्ते २ ६०
यतन्तश्च दृढव्रताः ९ १४
यतन्तोऽप्यकृता १५ ११
यतन्तो योगिनश्चै १५ ११
यतयः संशितव्रताः ४ २८
यतवाक्कायमानसः १८ ५२
यतात्मा दृढनिश्च १२ १४
यतीनां यतचेतसां ५ २६
यतेन्द्रियमनोबुद्धिः ५ २८
यतोयतो निश्चरति ६ २६
यत्करोषि यदश्ना ९ २७
यत्तज्ज्ञानं मतं १३ २
यत्तत्तामसमुच्य १८ २५
यत्तत्सात्त्विकमु १८ २३
यत्तदग्रेऽमृतोपमं १८ ३८
यत्तदग्रे विषमिव १८ ३७
यत्तपस्यसि कौन्ते ९ २७
यत्तु कामेप्सुना १८ २४
यत्तु कृत्स्नवदेक १८ २२
यत्तु प्रत्युपकारार्थं १७ २१
यत्तेऽहं प्रीयमाणा १० १
यत्त्वयोक्तं वचस्ते ११ १
यत्र काले त्वनावृ ८ २३
यत्र चैवात्मनाऽऽ ६ २०
यत्र पार्थो धनुर्धरः १८ ७८
यत्र योगेश्वरः १८ ७८
यत्रोपरमते चित्तं ६ २०
यत्सांख्यैः प्राप्यते ५ ५
यथाऽऽकाशस्थितो ९ ६
यथा न्ति भारत ३ २५
यथा ज्ञास्यसि ७ १
यथाऽऽदर्शो मलेन ३ ३८
यथा दीपो निवात ६ १९
यथा नदीनां बह ११ २८
यथा प्रकाशयत्ये १३ ३३
यथा प्रदीप्तं ज्वल ११ २९
यथाभागमवस्थिताः १ ११
यथाक्च्छृणु १८ १९
यथा विन्दति १८ ४५
यथा सर्वगतं १३ ३२
यथेच्छसि तथा १८ ६३
यथैधांसि समिद्धोऽ ४ ३७
यथोक्तं पर्युपासते १२ २०
यथोल्बेनावृतो गर्भः ३ ३८
यदक्षरं वेदविदो ८ ११
यदग्रे चानुबन्धे १८ ३९
यदा ते मोहकलि २ ५२
यदादित्यगतं १५ १२
यदा द्रष्टाऽनुपश्य १४ १९
यदा भूतपृथग्भा १३ ३०
यदायदा हि धर्म ४ ७
यदा विनियतं चित्तं ६ १८
यदा संहरते चायं २ ५८
यदा सत्त्वे प्रवृद्धे १४ १४
यदा हि नेन्द्रिया ६ ४
यदा स्थास्यति २ ५३
यदिच्छन्तो ब्रह्मच ८ ११
यदि भाः सदृशी ११ १२
यदि मामप्रतीकारं १ ४६
यदि ह्यहं न वर्तेयं ३ २३
यदृच्छया चोपपन्नं २ ३२
यदृच्छालाभसंतुष्टो ४ २२
यदेभिः स्यात्त्रिभि १८ ४०
यद्गत्वा न निवर्तं १५ ६
यद्यदाचरति श्रेष्ठः ३ २१
यद्यद्विभूतिमत्सत्त्वं १० ४१
यद्यप्येते न पश्य १ ३८
यद्यहंकारमाश्रित्य १८ ५९
यद्राज्यसुखलोभेन १ ४५
यद्वा जयेम यदि २ ६
यद्विकारि यतश्च १३ ३
यन्त्रारूढानि माय १८ ६१
यन्मनोऽनुविधीयते २ ६७
यन्मां वदसि केश १० १४
यन्मे त्वदन्येन न ११ ४७
यमस्संयमतामहं १० २९
यया तु धर्मकामा १८ ३४
यया धर्ममधर्मं च १८ ३१
यया स्वप्नं भयं १८ ३५
ययेदं धार्यते जगत् ७ ५
यश्चैनं मन्यते हतं २ १९
यश्शास्त्रविधि १६ २३
यष्टव्यमेवेति मनः १७ ११
यस्तं वेद स वेदवि १५ १
यस्तु कर्मफलत्या १८ ११
यस्त्वात्मरतिरेव ३ १७
यस्त्विन्द्रियाणि मन ३ ७
यस्मात्क्षरमतोतोऽ १५ १८
यस्मान्नोद्विजते १२ १५
यस्मिन्गता न निव १५ ४
यस्मिन्स्थितो न ६ २२
यस्यनाहकृतो १८ १७
यस्य सर्वे समार ४ १९
यस्यां जाग्रति २ ६९
यस्यान्तःस्थानि ८ २२

यस्सदा मुक्त एव ५ २८
यस्स मामेति ११ ५५
यस्सर्वत्रानभिस्नेहः २ ५७
यस्स सर्वेषु भूतेषु ८ २०
यातयामं गतरसं १७ १०
याति नास्त्यत्र ८ ५
याति पार्थानुचिन्त ८ ८
या निशा सर्वभूता २ ६९
यानेव हत्वा न २ ६
यान्ति देवव्रता ९ २५
यान्ति ब्रह्म सनात ४ ३१
यान्ति मद्याजिनोऽ ९ २५
यामिर्विभूतिभिर्लो १० १६
यामिमां पुष्पितां २ ४२
यावत्संजायते किं १३ २६
यावदेतान्निरीक्षेऽ १ २२
यावानर्थ उदपाने २ ४६
यावान्यश्चास्मि १८ ५५
युक्त आसीत मत्परः २ ६१
,, ६ १४
युक्त इत्युच्यते तदा ६ १८
युक्त इत्युच्यते यो ६ ८
युक्तः कर्मफलं ५ १२
युक्तचेष्टस्य कर्मसु ६ १७
युक्तस्वप्नावबोधस्य ६ १७
युक्ताहारविहारस्य ६ १७
युक्तो मन्येत तत्त्व ५ ८
युज्यते नात्र संश १० ७
युञ्जतो योगमात्म ६ १९
युञ्जन्नेवं सदाऽऽ ६ १५
युद्धाय कृतनिश्चयः २ ३७
युद्धे शास्त्रपलाय १८ ४३
युद्धे प्रियचिकीर्षवः १ २३
युधामन्युश्च विक्रा १ ६
युध्यस्व जेताऽसि ११ ३४
युध्यस्व विगतज्वरः ३ ३०
युयुत्सुं समुपस्थितम् १ २८
युयुधानो विराटश्च १ ४
ये चाप्यक्षरमव्यक्तं १२ १
ये चैव सात्त्विका ७ १२
ये जनाः पर्युपासते ९ २२
ये तु धर्म्यामृतमि १२ २०
ये तु सर्वाणि कर्मा १२ ६
ये त्वक्षरमनिर्दे १२ ३
ये त्वन्यदेवता ९ २३
ये त्वेतदभ्यसूयन्तो ३ ३२
येन भूतान्यशेषेण ४ ३५
येन मामुपयान्ति १० १०
येन श्रेयोऽहमाप्नु ३ २
येन सर्वमिदं ततम् २ १७
,, ८ २२
,, १८ ४६
येनात्मैवात्मना ६ ६
ये पचन्त्यात्मकार ३ १३
येऽपि स्युः पापयो ९ ३२
ये भजन्ति तु मां ९ २९
ये मे मतमिदं ३ ३१
ये यथा मां प्रपद्य ४ ११
येऽवस्थिताः प्रत्य ११ ३२
ये विदुर्यान्ति ते १३ ३४
ये शास्त्रविधिमुत्सृ १७ १
येषां च त्वं बहुम २ ३५
येषां त्वन्तगतं पापं ७ २८
येषां नास्तिकमात्म ५ १६
येषां लोक इमाः १० ६
येषां साम्ये स्थितं ५ १९
येषामर्थे काङ्क्षितं नो १ ३३
ये हि संस्पर्शजा ५ २२
योगं तं विद्धि पाण्ड ६ २
योगं युञ्जन्मदाश्रयः ७ १
योगं योगेश्वरात्कृ १८ ७५
योगः कर्मसु कौश २ ५०
योगः प्रोक्तः पुरात ४ ३
योगक्षेमं वहाम्यहम् ९ २२
योगभ्रष्टोऽभिजाय ६ ४१
योगमात्मविशुद्धये ६ १२
योगमायासमावृतः ७ २५
योगयज्ञास्तथाऽपरे ४ २८
योगयुक्तो भवार्जुन ८ २७
योगयुक्तो मुनिर्ब्रह्म ५ ६
योगयुक्तो विशुद्धा ५ ७
योगसंन्यस्तकर्माणं ४ ४१
योगस्थः कुरु कर्मा २ ४८
योगाच्चलितमानसः ६ ३७
योगारूढस्तदोच्यते ६ ४
योगारूढस्य तस्यैव ६ ३
योगिनं सुखमुत्तमं ६ २७
योगिनः कर्म कुर्व ५ ११
योगिनः पर्युपासते ४ २५
योगिनामपि सर्वेषां ६ ४७
योगिनो यतचित्त ६ १९
योगी नियतमानसः ६ १५
योगी परं स्थानमुपै ८ २८
योगी प्राप्य निवर्त ८ २५
योगी भवति कश्च ६ २
योगी मुच्यति कश्च ८ २७
योगी युञ्जीत सत ६ १०
योगी विगतकल्मषः ६ २८
योगी संशुद्धकिल्बि ६ ४५
योगेनाव्यभिचारि १८ ३३
योगेश्वर ततो मे ११ ४
योगो नष्टः परंतप ४ २
योगोऽनिर्विण्णचेत ६ २३
योगो भवति दुःख ६ १७
योत्स्यमानानवेक्षेऽहं १ २३
योद्धुकामानवस्थिता १ २२
यो न द्वेष्टि न काङ्क्ष ५ ३
यो न हृष्यति न १२ १७
योऽन्तःसुखोऽन्तरा ५ २४
यो बुद्धेः परतस्तु ३ ४२
यो भुङ्क्ते स्तेन ३ १२
यो मद्भक्तः स मे १२ १४
,, १२ १६
यो मां पश्यति ६ ३०
यो मां स्मरति ८ १४
यो मामजमनादिं १० ३
यो मामेवमसंमूढो १५ १९
यो मे भक्त्या प्रय ९ २६
योऽयं योगस्त्वया ६ ३३
यो यच्छ्रद्धस्स १७ ३
यो यो यां यां तनुं ७ २१
यो लोकत्रयमावि १५ १७
योऽवतिष्ठति नेङ्ग १४ २३

र

रक्षांसि भीतानि ११ ३६
रजसस्तु फलं १४ १६
रजसि प्रलयं गत्वा १४ १५
रजसो लोभ एव १४ १७

रजस्तमश्चाभिभूय १४ १०
रजस्येतानि जायन्ते १४ १२
रजः कर्मणि भारत १४ ९
रजस्सत्त्वं तमश्चै १४ १०
रजोगुणसमुद्भवः ३ ३७
रजो रागात्मकं १४ ७
रथं स्थापय मेऽच्यु १ २१
रथोपस्थ उपाविशत् १ ४७
रसनं घ्राणमेव च १५ ९
रसवर्जं रसोऽप्यस्य २ ५९
रसोऽहमप्सु कौन्ते ७ ८
रस्याः स्निग्धाः १७ ८
रहस्यं ह्येतदुत्तमम् ४ ३
राक्षसीमासुरीं चैव ९ १२
रागद्वेषवियुक्तैस्तु २ ६४
रागद्वेषौ व्यवस्थि ३ ३४
रागद्वेषौ व्युदस्य १८ ५१
रागी कर्मफलप्रेप्सुः १८ २७
राजन् संस्मृत्य १८ ७६
राजविद्या राजगुह्यं ९ २
राजसं चलमध्रुवम् १७ १८
राजसः परिकीर्तिं १८ २७
राजसास्तामसाश्च ७ १२
राजा वचनमब्रवीत् १ २
राज्यं भोगास्सुखानि १ ३३
राज्यं सुराणामपि २ ८
रात्रिं युगसहस्रान्तां ८ १७
रात्र्यागमे प्रलीय ८ १८
रात्र्यागमेऽवशः ८ १९
रामः शस्त्रभृतामहं १० ३१
रुद्राणां शंकरश्चा १० २३
रुद्रादित्या वसवो ११ २२
रूपं परं दर्शितमा ११ ४७
रूपं महत्ते बहुव ११ २३
रूपमत्यद्भुतं हरेः १८ ७७
रोमहर्षश्च जायते १ २९

ल

लभते च ततः ७ २२
लभते पौर्वदैहिकम् ६ ४३
लभन्ते ब्रह्मनिर्वाणं ५ २५
लभन्ते युद्धमीदृशं २ ३२
लाभालाभौ जयाज २ ३८
लिप्यते न स पापे ५ १०
लुप्तपिण्डोदकक्रियाः १ ४२
लुब्धो हिंसात्मको १८ २७
लेलिह्यसे ग्रसमानः ११ ३०
लोकत्रयं प्रव्यथि ११ २०
लोकत्रयेऽप्यप्रति ११ ४३
लोकसंग्रहमेवापि ३ २०
लोकस्तदनुवर्तते ३ २१
लोकस्य सृजति प्रभुः ५ १४
लोकान्नोद्विजते १२ १५
लोकान्समग्रान्वद ११ ३०
लोकान्समाहर्तुमिह ११ ३२
लोके जन्म यदी ६ ४२
लोकेऽस्मिन्द्विविधा ३ ३
लोको मामजमव्य ७ २५
लोकोऽयं कर्मबन्धन ३ ९
लोभः प्रवृत्तिरार १४ १२
लोभोपहतचेतसः १ ३८

व

वक्तुमर्हस्यशेषेण १० १६
वक्त्राणि ते त्वर ११ २७
वक्ष्यामि भरतर्षभ ८ २३
वक्ष्यामि हितका १० १
वदिष्यन्ति तवा २ ३६
वरुणो यादसामहं १० २९
वर्णसंकरकारकैः १ ४३
वर्त एव च कर्मणि ३ २२
वर्तते कामकारतः १६ २३
वर्तते विजितात्म ५ २६
वर्तन्त इति धारयन् ५ ९
वर्तमानानि चार्जुन ७ २६
वर्तेतात्मैव शत्रुवत् ६ ६
वशे हि यस्येन्द्रिया २ ६१
वश्यात्मना तु यत ६ ३६
वसूनां पावकश्चा १० २३
वाच्ययं तप उच्य १७ १५
वादः प्रवदतामहं १० ३२
वायुर्गन्धानिवाश १५ ८
वायुर्नावमिवाम्भसि २ ६७
वायुर्यमोऽग्निर्वरुण ११ ३९
वायुस्सर्वत्रगो ९ ६
वायोरिव सुदुष्करं ६ ३४
वासांसि जीर्णानि २ २२
वासुदेवः सर्वमिति ७ १९
विकारांश्च गुणां १३ १९
विगतेच्छाभयक्रो ५ २८
विजितात्मा जिते ५ ७
विज्ञातुमिच्छामि ११ ३१
वितता ब्रह्मणो मुखे ४ ३२
वित्तेशो यक्षरक्ष १० २३
विदुर्देवा न दान १० १४
विद्धि नष्टानचेतसः ३ ३२
विद्धि पार्थ बृहस्प १० २४
विद्धि पार्थ सनात ७ १०
विद्धि प्रकृतिसंभ १३ १९
विद्धि माममृतोद्भ १० २७
विद्धयकर्तारमव्य ४ १३
विद्धयनादी उभा १३ १९
विद्धयेनमिह वैरिणं ३ ३७
विद्याविनयसंपन्ने ५ १८
विद्वान्युक्तः समाच ३ २६
विधिदृष्टो य इज्य १७ ११
विधिहीनमसृष्टान्नं १७ १३
विनश्यत्स्वविनश्य १३ २७
विनाशमव्ययस्यास्य २ १७
विनाशस्तस्य विद्य ६ ४०
विनाशाय च दुष्कृ ४ ८
विनियम्य समन्ततः ६ २४
विन्दत्यात्मनि यस्तु ५ २१
विपरीतानि केशव १ ३१
विभक्तमिव च १३ १६
विभूतिं च जनार्द १० १८
विभूतीनां परंतप १० ४०
विभूतीरात्मनः १० १९
विभूतेर्विस्तरो १० ४०
विमुक्तो मामुपैष्य ९ २८
विमुक्तोऽमृतमश्नु १४ २०
विमुच्य निर्ममः १८ ५३
विमूढा नानुपश्य १५ १०
विमूढो ब्रह्मणः ६ ३८
विमृश्यैतदशेषेण १८ ६३
वियोगं योगसंज्ञितं ६ २३
विवस्वान्मनवे प्राह ४ १
विविक्तदेशसेवित्वं १३ १०
विविक्तसेवी लघ्वा १८ ५२
विविधा च पृथ १८ १४

विवृद्धं सत्त्वमित्युत १४ ११
विवृद्धे कुरुनन्दन १४ १३
विवृद्धे भरतर्षभ १४ १२
विशते तदनन्तरम् १८ ५५
विशन्ति नाशाय ११ २९
विशन्ति यद्यतयो ८ ११
विशन्ति वक्त्राण्य ११ २८
विश्वेऽश्विनौ मरुत ११ २२
विषमे समुपस्थितं २ २
विषयानिन्द्रियैश्चरन् २ ६४
विषयानुपसेवते १५ ९
विषया विनिवर्तन्ते २ ५९
विषयेन्द्रियसंयो १८ ३८
विषादं मदमेव च १८ ३५
विषादी दीर्घसूत्री १८ २८
विषीदन्तमिदं २ १
विषीदन्निदमब्रवीत् १ २८
विष्टभ्याहमिदं १० ४२
विसर्गः कर्मसंज्ञितः ८ ३
विसृजामि पुनः ९ ८
विसृज्य सशरं चापं १ ४७
विस्तरेणात्मनो १० १८
विस्मयो मे महान् १८ ७७
विहाय कामान्यः २ ७१
विहारशय्यासन ११ ४२
वीक्षन्ते त्वां विप्र ११ २२
वीतरागभयक्रोधः २ ५६
वीतरागभयक्रोधाः ४ १०
वृजिनं संतरिष्यसि ४ ३६
वृष्णीनां वासुदेवो १० ३७
वेत्ताऽसि वेद्यं च ११ ३८
वेत्ति चैनं नचैवायं ६ २१
वेत्ति लोकमहेश्वरं १० ३
वेत्ति सर्वेषु भूते १८ २१
वेत्थ त्वं पुरुषोत्तम १० १५
वेदवादरताः पार्थ २ ४२
वेदानां सामवेदो १० २२
वेदान्तकृद्वेदविदे १५ १५
वेदाविनाशिनं २ २१
वेदाहं समतीतानि ७ २६
वेदेषु यज्ञेषु तपस्सु ८ २८
वेदैश्च सर्वैरहमेव १५ १५
वेद्यं पवित्रमोंकारः ९ १७
वेपथुश्च शरीरे मे १ २९
वैनतेयश्च पक्षिणा १० ३०
वैराग्यं समुपाश्रितः १८ ५२
वैराग्येण च गृह्यते ६ ३५
वैश्यं कर्म स्वभाव १८ ४४
व्यक्तमध्यानि भार २ २८
व्यपेतभीः प्रीत ११ ४९
व्यवसायात्मिका २ ४१
व्यवसायात्मिका २ ४४
व्याक्षाननं दीप्त ११ २४
व्याप्तं त्वयैकेन ११ २०
व्यामिश्रेणैव वाक्ये ३ २
व्यासप्रसादाच्छ्रुत १८ ७५
व्याहरन्मामनुस्मरन् ८ १३
व्यूढं दुर्योधनस्तदा १ २
व्यूढां द्रुपदपुत्रेण १ ३

श

शक्नोतीहैव यः ५ २३
शक्य एवंविधो ११ ५३
शक्योऽवाप्तुमुपाय ६ ३६
शङ्खं दध्मौ प्रताप १ १२
शङ्खान्दध्मुः पृथक् १ १८
शठो नैकृतिकोऽ १८ २८
शतशोऽथ सहस्र ११ ५
शनैःशनैरुपरमेत् ६ २५
शब्दः खे पौरुषं ७ ८
शब्दब्रह्मातिवर्तते ६ ४४
शब्दादीन्विषयां १८ ५१
शब्दादोन्विषयान ४ २६
शमः कारणमुच्य ६ ३
शमो दमस्तपः १८ ४२
शरीरं यदवाप्नोति १५ ८
शरीरयात्राऽपि च ३ ८
शरीरवाङ्मनोभि १८ १५
शरीरस्थोऽपि १३ ३१
शरीरे पाण्डवस्तदा ११ १३
शश्वच्छान्तिं निग ९ ३१
शान्तिं निर्वाणपर ६ १५
शान्तिमाप्नोति ५ १२
शारीरं केवलं कर्म ४ २१
शारीरं तप उच्य १७ १४
शाश्वतं पदमव्ययं १८ ५६
शाश्वतस्य च धर्म १४ २७
शिखण्डी च महार १ १७
शिष्यस्तेऽहं शाधि २ ७
शीतोष्णसुखदुःख २ १४
शीतोष्णसुखदुःखेषु ६ ७
,, १२ १८
शुक्लकृष्णे गती ८ २६
शुचीनां श्रीमतां ६ ४१
शुचौ देशे प्रति ६ ११
शुनि चैव श्वपाके ५ १८
शुभाशुभपरित्यागी १२ १७
शुभाशुभफलैरेवं ९ २८
शूद्रस्यापि स्वभाव १८ ४४
शूद्राणां च परंतप १८ ४१
शृणु मे परमं १० १
,, १८ ६४
शृणु मे भरतर्षभ १८ ३६
शृण्वादपि यो नरः १८ ७१
शृण्वतो नास्ति १० १८
शैव्यश्च नरपुङ्गवः १ ५
शोकसंविग्नमानसः १ ४७
शौर्यं तेजो धृतिर्दा १८ ४३
श्रद्दधाना मत्परमा १२ २०
श्रद्धया परया तप्तं १७ १७
श्रद्धया परयोपेताः १२ २
श्रद्धयाऽर्चितुमिच्छ ७ २१
श्रद्धा भवति भार १७ ३
श्रद्धामयोऽयं १७ ३
श्रद्धावन्तोऽनसूय ३ ३१
श्रद्धावाननसूयश्च १८ ७१
श्रद्धावान्भजते यो ६ ४७
श्रद्धावाँल्लभते ज्ञानं ४ ३९
श्रद्धाविरहितं यज्ञं १७ १३
श्रीमदूर्जितमेव वा १० ४१
श्रुतिविप्रतिपन्ना ते २ ५३
श्रुतौ विस्तरशो ११ २
श्रुत्वाऽन्येभ्य उपा १३ २५
श्रुत्वाऽप्येनं वेद न २ २९
श्रेयः परमवाप्स्यथ ३ ११
श्रेयान्द्रव्यमयाद्य ४ ३३
श्रेयान्स्वधर्मो विगु ३ ३५
,, १८ ४७
श्रेयो मोक्षं मैक्षमपी २ ५

श्रेयो हि ज्ञानमभ्या१२ १२
श्रोतव्यस्य श्रुतस्य २ ५२
श्रोत्रं चक्षुः स्पर्शनं १५ ९
श्रोत्रादीनीन्द्रिया ४ २६
श्वशुरान्सुहृदश्चैव १ २७

ष

षण्मासा उत्तराय ८ २४
षण्मासा दक्षिणाय ८ २५

स

स एवायं मया तेऽद्य ४ ३
संकल्पप्रभवान्का ६ २४
संकरो नरकायैव १ ४२
संकरस्य च कर्ता ३ २४
संग्रामं न करिष्य २ ३३
संघातश्चेतना धृति १३ ६
संज्ञार्थं तान्ब्रवीमि १ ७
संतुष्टस्सततं १२ १४
संतुष्टो येन केन १२ १९
संदृश्यन्ते चूर्णि ११ २७
संनियम्येन्द्रियग्रा १२ ४
संन्यस्याध्यात्मचेत ३ ३०
संन्यस्यास्ते सुखं ५ १३
संन्यासं कर्मणां ५ १
संन्यासं कवयो १८ २
संन्यासः कर्मयोग ५ २
संन्यासयोगयुक्ता ९ २८
संन्यासस्तु महा ५ ६
संन्यासस्य महा १८ १
संन्यासेनाधिगच्छ १८ ४९
संपश्यन्कर्तुमर्हसि ३ २०
संप्रेक्ष्य नासिकाग्रं ६ १३
संभवः सर्वभूतानां १४ ३
संभवामि युगेयुगे ४ ८
संभवाम्यात्ममायया ४ ६
संभावितस्य चाकी २ ३४
संमोहात्स्मृतिविभ्र २ ६३
संयमाग्निषु जुह्वति ४ २६
संवादमिममद्भुतम् १८ ७६
संवादमिममश्रौषं १८ ७४
संशयात्मा विनश्य ४ ४०
संसारेषु नराधमा १६ १९
संसिद्धिं परमां गताः८ १५
संसिद्धिं लभते १८ ४५
संसिद्धौ कुरुनन्दन ६ ४३
संस्तभ्यात्मानमात्म ३ ४३
स कालेनेह महता ४ २
स कृत्वा राजसं १८ ८
सक्ताः कर्मण्यविद्वां ३ २५
सखेति मत्वा प्रस ११ ४१
सगद्गदं भीतभीतः ११ ३५
स गुणान्समतीत्यै १४ २६
स घोषो धार्तराष्ट्राणां १ १९
सङ्गं त्यक्त्वा करो ५ १०
सङ्गं त्यक्त्वाऽऽत्म ५ ११
सङ्गं त्यक्त्वा धनंज २ ४८
सङ्गं त्यक्त्वा फलं १८ ९
सङ्गं त्यक्त्वा फला १८ ६
सङ्गस्तेषूपजायते २ ६२
सङ्गात्संजायते कामः२ ६२
स च मे न प्रणश्य ६ ३०
स च यो यत्प्रभा १३ ३
सचेताः प्रकृतिं ११ ५१
सच्छब्दः पार्थ १७ २६
सज्जन्ते गुणकर्मसु ३ २९
स तं परं पुरुषमु ८ १०
सततं कीर्तयन्तो ९ १४
सततं ब्रह्मवादिनां १७ २४
स तया श्रद्धया ७ २२
सत्कारमानपूजार्थं १७ १८
सत्त्वं प्रकृतिजैर्गु १८ ४०
सत्त्वं भवति भार १४ १०
सत्त्वं रजस्तम इति १४ ५
सत्त्वं सत्त्वतामहं १० ३६
सत्त्वं सुखे संजय १४ ९
सत्त्वं स्थावरजङ्ग १३ २६
सत्त्वमाहो रजस्त १७ १
सत्त्वात्संजायते १४ १७
सत्त्वानुरूपा सर्व १७ ३
सत्यं प्रियहितं च १७ १५
स त्यागः सात्त्वि १८ ९
स त्यागीत्यभिधी १८ ११
सदसच्चाहमर्जुन ९ १९
सदसद्योनिजन्मसु १३ २१
सदा तद्भावभावितः ८ ६
सदित्येतत्प्रयुज्यते १७ २६
सदित्येवाभिधीय १७ २७
सदृशं चेष्टते स्वस्याः ३ ३३
सदोषमपि न त्यजे १८ ४८
सद्भावे साधुभावे १७ २६
सनातनस्त्वं पुरुषो ११ १८
स निश्चयेन योक्त ६ २३
स बुद्धिमान्मनुष्येषु ४ १८
स ब्रह्मयोगयुक्तात्मा ५ २१
समं कायशिरोग्रीवं ६ १३
समं पश्यति योऽर्जु ६ ३२
समं पश्यन्हि सर्व १३ २८
समं सर्वेषु भूतेषु १३ २७
समग्रं प्रविलीयते ४ २३
समत्वं योग उच्य २ ४८
समदुःखसुखं धीरं २ १५
समदुःखसुखः १२ १३
समदुःखसुखः स्व १४ २४
समबुद्धिर्विशिष्यते ६ ९
समलोष्टाश्मकाञ्चनः ६ ८
,, १४ २४
समवस्थितमीश्वरम् १३ २८
समवेतान्कुरूनिति १ २५
समवेता युयुत्सवः १ १
समश्शत्रौ च मित्रे १२ १८
समस्सङ्गविवर्जितः १२ १८
समस्सर्वेषु भूते १८ ५४
समस्सिद्धावसिद्धौ ४ २२
स महात्मा सुदुर्लभः ७ १९
समाधाय स सात्त्वि १७ ११
समाधावचला बुद्धिः२ ५३
समाधिस्थस्य केशव २ ५४
समाधौ न विधीयते २ ४४
समासेनैव कौन्ते १८ ५०
समुद्रमापः प्रविश २ ७०
समुद्रमेवाभिमुखा ११ २८
स मे युक्ततमो मतः ६ ४७
समोऽहं सर्वभूतेषु ९ २९
सम्यग्व्यवसितो हि ९ ३०
स यत्प्रमाणं कुरुते ३ २१
स याति परमां ८ १३
स युक्तः कृत्स्नकर्म ४ १८
स युक्तः स सुखी ५ २३
स योगी परमो मतः ६ १२

स योगी ब्रह्मनिर्वा ५ २४
स योगी मयि वर्तते ६ ३१
सरसामस्मि सागरः१० २४
सर्गाणामादिरन्त १० ३२
सर्गेऽपि नोपजाय १४ २
सर्गे यान्ति परंतप ७ २७
सर्पाणामस्मि वासु १० २८
सर्वं कर्माखिलं पार्थ ४ ३३
सर्वं च मयि पश्य ६ ३०
सर्वं ज्ञानप्लवेनैवं ४ ३६
सर्वं समाप्नोषि ११ ४०
सर्वः प्रकृतिजैर्गुणैः ३ ५
सर्व एव महारथाः १ ६
स फलत्याग १२ ११
,, १८ २
र्वकर्माणि मनसा ५ १३
र्वकर्माण्यपि १८ ५६
सर्वक्षेत्रेषु भारत १३ २
सर्वगुह्यतमं भूयः १८ ६४
सर्वज्ञानविमूढांस्ता ३ ३२
सर्वतः श्रुतिमल्लोके १३ १३
सर्वतः पाणिपादं १३ १३
सर्वतः पृथिवीपते १ १८
सर्वतः संप्लुतोदके २ ४६
सर्वतोऽक्षिशिरोमु १३ १३
सर्वत्रगमचिन्त्यं च १२ ३
सर्वत्र समदर्शनः ६ २९
सर्वत्र समबुद्धयः १२ ४
सर्वत्रावस्थितो देहे १३ ३२
सर्वद्वाराणि संयम्य ८ १२
सर्वद्वारेषु देहेऽ १४ ११
सर्वथा वर्तमानोऽपि ६ ३१
सर्वथा वर्तमानोऽपि१३ २३
सर्वधर्मान्परित्यज्य १८ ६६
सर्वपापैः प्रमुच्यते १० ३
,, १३ २३
सर्वभावेन भारत १५ १९
,, १८ ६२
सर्वभूतस्थमात्मानं ६ २९
सर्वभूतस्थितं यो ६ ३१
सर्वभूतहिते रताः ५ २५
,, १२ ४
सर्वभूतात्मभूतात्मा ५ ७
सर्वभूतानि कौन्ते ९ ७
सर्वभूतानि चात्मनि ६ २९
सर्वभूतानि संमोहं ७ २७
सर्वभूताशयस्थित १० २०
सर्वभूतेषु येनैकं १८ २०
सर्वमावृत्य तिष्ठति १३ १३
सर्वमेतदृतं मन्ये १० १४
सर्वयोनिषु कौन्ते १४ ४
सर्वलोकमहेश्वरम् ५ २९
सर्वसंकल्पसंन्यासी ६ ४
सर्वस्य चाहं हृदि १५ १५
सर्वस्य धातारमचि ८ ९
सर्वाणीत्युपधारय ७ ६
सर्वाणीन्द्रियकर्मा ४ २७
सर्वान्यार्थ मनोगतान्२ ५५
सर्वान्बन्धूनवस्थि १ २७
सर्वारम्भपरित्यागी १२ १६
,, १४ २५
सर्वारम्भा हि दोषे १८ ४८
सर्वार्थान्विपरीतां १८ ३२
सर्वाश्चर्यमयं देवं ११ ११
सर्वास्तथा भूतविशे ११ १५
सर्वे नमस्यन्ति च ११ ३६
सर्वेन्द्रियगुणाभासं १३ १४
सर्वेन्द्रियविवर्जितम् १३ १४
सर्वेऽप्येते यज्ञविदो ४ ३०
सर्वेभ्यः पापकृत्तमः ४ ३६
सर्वे युद्धविशारदाः १ ९
सर्वे वयमतः परम् २ १२
सर्वेषां च महीक्षि १ २५
सर्वैस्सहैवावनिपाल ११ २६
सविकारमुदाहृतम् १३ ६
स शब्दस्तुमुलोऽभ १ १३
स शान्तिमधिगच्छ २ ७१
स शान्तिमाप्नोति २ ७०
स सर्वविद्भजति १५ १९
स संन्यासी च योगी ६ १
सहजं कर्म कौन्ते १८ ४८
सह यज्ञैः प्रजाः ३ १०
सहसैवाभ्यहन्यन्त १ १३
सहस्रबाहो भव ११ ४६
सहस्रयुगपर्यन्तम् ८ १७
सहास्मदीयैरपि ११ २६
साक्षात्कथयतः १८ ७५
सात्त्विकं निर्मलं १४ १६
सात्त्विकं परिचक्ष १७ १७
सात्त्विकी राजसी १७ २
सात्यकिश्चापराजितः १ १७
साधिभूताधिदैवं ७ ३०
साधियज्ञं च ये ७ ३०
साधुरेव स मन्तव्यः ९ ३०
साधुष्वपि च पापेषु ६ ९
सा निशा पश्यतो २ ६९
साम्येन मधुसूदन ६ ३३
साहंकारेण वा १८ २४
सांख्ययोगौ पृथग्बा ५ ४
सांख्ये कृतान्ते १८ १३
सिंहनादं विनद्योच्चैः १ १२
सिद्धये सर्वकर्मणां १८ १३
सिद्धानां कपिलो १० २६
सिद्धिं प्राप्तो यथा १८ ५०
सिद्धिं विन्दति १८ ४६
सिद्धिं समधिगच्छ ३ ४
सिद्धिर्भवति कर्म ४ १२
सिद्धोऽहं बलवान्सु १६ १४
सिद्ध्यसिद्ध्योर्नि १८ २६
सिद्ध्यसिद्ध्योस्स २ ४८
सीदन्ति मम गात्रा १ २९
सीदमानमिदं वचः २ १०
सुखं त्विदानीं १८ ३६
सुखं दुःखं भवोऽ १० ४
सुखं बन्धात्प्रमुच्य ५ ३
सुखं मोहनमात्म १८ ३९
सुखं वा यदि वा ६ ३२
सुखदुःखे समे २ ३८
सुखप्रीतिविवर्धनाः१७ ८
सुखमक्षय्यमश्नुते ५ २१
सुखमात्यन्तिकं ६ २१
सुखसङ्गेन बध्नाति १४ ६
सुखस्यैकान्तिकस्य १४ २७
सुखिनः क्षत्रियाः २ ३२
सुखिनः स्याम १ ३७
सुखेन ब्रह्मसंस्पर्श ६ २८
गतस्पृहः २ ५६
सुघोषमणिपुष्पकौ १ १६

सुदुर्दर्शमिदं रूपं ११ ५२
सुसुखं कर्तुमव्ययम् ९ २
सुहृदं सर्वभूतानां ५ २९
सुहृन्मित्रार्युदासीन ६ ९
सूक्ष्मत्वात्तदविज्ञेयं १३ १५
सूत्रे मणिगणा इव ७ ७
सूयते सचराचरम् ९ १०
सेनयोरुभयोरपि १ २७
सेनयोरुभयोर्मध्ये १ २१
,, १ २४
,, २ १०
सेनानीनामहं १० २४
सोऽपि मुक्तः १८ ७१
सोऽमृतत्वाय २ १५
सोमो भूत्वा रसा १५ १३
सोऽविकम्प्येन १० ७
सौभद्रश्च महाबाहुः १ १८
सौभद्रो द्रौपदेयाश्च १ ६
सौमदत्तिस्तथैव च १ ८
स्तुवन्ति त्वां ११ २१
स्त्रियो वैश्यास्तथा ९ ३२
स्त्रीषु दुष्टासु वार्ष्णेय १ ४१
स्थानं प्राप्स्यसि १८ ६२
स्थाने हृषीकेश ११ ३६
स्थापयित्वा रथोत्त १ २४
स्थावराणां हिमा १० २५
स्थितधीः किं २ ५४
स्थितप्रज्ञस्तदोच्यते २ ५५
स्थितप्रज्ञस्य का २ ५४
स्थितश्चलति तत्त्वतः ६ २१
स्थितिस्सदिति १७ २७
स्थितोऽस्मि गतसं १८ ७३
स्थित्वाऽस्यामन्त २ ७२
स्थिरधीर्मुनिरुच्यते २ ५६
स्थिरबुद्धिरसंमूढो ५ २०
स्थिरमासनमात्मनः ६ ११
स्थैर्यमात्मविनिग्रहः १३ ७
स्पर्शान्कृत्वा बहिर्बा ५ २७
स्मरन्मुक्त्वा कलेबरं ८ ५
स्मृतिभ्रंशाद्बुद्धि २ ६३
स्मृतिर्मेधा धृतिः १० ३४
स्यालाः संबन्धि १ ३४
स्रोतसामस्मि १० ३१
स्वकर्मणा तमभ्य १८ ४६
स्वकर्मनिरतः १८ ४५
स्वकं रूपं दर्शया ११ ५०
स्वजनं हि कथं १ ३७
स्वतेजसा विश्व ११ १९
स्वधर्ममपि चावेक्ष्य २ ३१
स्वधर्मे निधनं श्रेयः ३ ३५
स्वधाऽहमह मौषधं ९ १६
स्वभावजेन १८ ६०
स्वभावनियतं कर्म १८ ४७
स्वभावप्रभवैर्गुणैः १८ ४१
स्वभावस्तु प्रवर्तते ५ १४
स्वभावोऽध्यात्म ८ ३
स्वयं चैव ब्रवीषि १० १३
स्वयमेवात्माना १० १५
स्वर्गद्वारमपावृतम् २ ३२
स्वल्पमप्यस्य २ ४०
स्वस्तीत्युक्त्वा मह ११ २१
स्वाध्यायज्ञानयज्ञाः ४ २८
स्वाध्यायस्तपआर्ज १६ १
स्वाध्यायाभ्यसनं १७ १५
स्वे स्वे कर्मण्य १८ ४५

ह

हतो वा प्राप्स्यसि २ ३७
हत्वाऽपि स इमाँ १८ १७
हत्वाऽर्थकामांस्तु २ ५
हत्वा स्वजनमाहवे १ ३१
हत्वैतानाततायिनः १ ३६
हनिष्ये चापरा १६ १४
हन्त ते कथयि १० १९
हन्तुं स्वजनमुद्यताः १ ४५
हरन्ति प्रसभं मनः २ ६०
हर्षशोकान्वितः १८ २७
हर्षामर्षभयोद्वेगैः १२ १५
हानिरस्योपजायते २ ६५
हित्वा पापमवा २ ३३
हृत्स्थं ज्ञानासिना ४ ४२
हृदयानि व्यदार १ १९
हृदि सर्वस्य विष्ठि १३ १७
हृद्देशेऽर्जुन १८ ६१
हृषीकेशं तदा १ २१
हृष्टरोमा धनंजयः ११ १४
हृष्यामि च पुनः १८ ७७
हृष्यामि च मुहु १८ ७६
हे कृष्ण हे यदवा ११ ४१
हेतुः प्रकृतिरुच्यते १३ २०
हेतुनाऽनेन ९ १०
हेतुमद्भिर्विनि १३ ४
हेतोः किंनु मही १ ३५
ह्रियते ह्यवशोऽपि ६ ४४

श्रीमद्वेदान्तदेशिकग्रन्थमालायां

व्याख्यानविभागे

॥ द्वितीयं संपुटं समाप्तम् ॥

किलर्टि प्रेस्, मद्रपुरी.

॥ पुस्तकसूची - श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

१.	स्तोत्रावलीविभागः । हयग्रीवस्तोत्रादि पादुकासहस्रान्त सकल-स्तोत्रजालसमलंकृतः ।	२	०	०
२.	वेदान्तविभाग——प्रथमसंपुटम् । अधिकरणसारावली, शतदूषणी च ।	३	०	०
३.	,, द्वितीयसंपुटम् । मीमांसापादुका, सेश्वरमीमांसा, न्याय-परिशुद्धिः, न्यायसिद्धाञ्जनं च ।	३	०	०
४.	,, तृतीयसंपुटम् । सर्वार्थसिद्धिसमेतः तत्त्वमुक्ताकलापः ।	४	०	०
५.	काव्यनाटकविभागः । हंससंदेशः, सुभाषितनीवी, यादवाभ्युदयः, संकल्पसूर्योदयश्च ।	३	०	०
६.	व्याख्यानविभाग——प्रथमसंपुटम् । ईशावास्योपनिषद्भाष्यम्, चतुःश्लोकी-भाष्यम्, स्तोत्ररत्नभाष्यम्, गद्यभाष्यं च ।	२	०	०
७.	,, द्वितीयसंपुटम् । गीतार्थसंग्रहरक्षा, गीताभाष्यतात्पर्य-चन्द्रिका च ।	५	०	०
८.	,, तृतीयसंपुटम् । तत्त्वटीका, निक्षेपरक्षा सच्चरित्ररक्षा पाञ्चरात्ररक्षादिकं च ।	३	०	०

శ్రీ విశిష్టాద్వైత సంప్రదాయగ్రన్థ సూచీ.

౧. శ్రీభగవద్రామానుజ గ్రన్థమాలా :— శ్రీభగవద్రామానుజ మునిభిరనుగృహీత శ్రీభాష్యాదిగ్రన్థసప్తక మేక సంపుటాత్మకమ్. మూల్యమ్. ... ౬-౦-౦

౨. శ్రీమద్వరవరమునీన్ద్ర గ్రన్థమాలా :— శ్రీమద్వరవరమునిభిరనుగృహీతమ్ శ్రీవచనభూషణవ్యాఖ్యానం తత్త్వత్రయవ్యాఖ్యానం ముముక్షుప్పడి వ్యాఖ్యానం ఆచార్యహృదయ వ్యాఖ్యానమిత్యేతత్ గ్రన్థచతుష్టయ మేకసంపుటాత్మకమ్. ... ౬-౦-౦

3. శ్రీమద్వేదాన్తదేశిక గ్రన్థమాలాయాం సంప్రదాయవిభాగః :— శ్రీమన్నిగమాన్తమహాదేశికైరనుగృహీతం సంప్రదాయ పరిశుద్ధ్యాది పరమతభఙ్గాన్త సకల రహస్యబృన్దమ్, దేశికప్రబన్ధ బృన్దం చ ఏకసంపుటాత్మకమ్. ... ౫-౦-౦

ప్రాప్తిస్థానమ్,
ప్రతివాదిభయఙ్కర అణ్ణఙ్గరాచార్యులవారు,
గ్రన్థమాలా ఆఫీస్, కాఞ్చీపురమ్.

प्राप्तिस्थानम्,
प्रतिवादिभयङ्कर अर्णङ्गराचार्यः
ग्रन्थमाला आफीस, कञ्चीपुरम्.

॥ श्रीरस्तु ॥

श्रीमद्वेदान्तदेशिकग्रन्थमालायां

[व्याख्यानविभागे तृतीयसंपुटम्]

तत्त्वटीका—निक्षेपरक्षा—सच्चरित्ररक्षा—श्रीपाञ्चरात्ररक्षा—सव्याख्यान भूगोलनिर्णयादिकम् ॥

पर्यवेक्षकः परिष्कारकश्च

॥ श्रीकाञ्ची प्रतिवादिभयङ्करः अण्णंगराचार्यः ॥

प्रकाशनादिसर्वाधिकारी :

विद्वान् अ. संपत्कुमाराचार्यः, M. A.,

पुस्तकप्राप्तिस्थानम् :

ग्रन्थमालाकार्यालयः

३९, सन्निधिवीथी, कञ्जीवरम्.

श्रीरङ्गक्षेत्रे श्रीविलासमुद्रालये सममुद्यत.

1941

Price [illegible]] ॥ मूल्यं रूप्यचतुष्टयमात्रम् ॥ [Postage Extra.

॥ पुस्तकसूची ॥

श्रीमद्वेदान्तदेशिकग्रन्थमालायाम्—

१.	स्तोत्रावलीविभागः । हयग्रीवस्तोत्रादि पादुकासहस्रान्त सकलस्तोत्रजालसमलंकृतः ।	१	०	०
२.	वेदान्तविभागे—प्रथमसंपुटम् । अधिकरणसारावली शतदूषणी च ।	३	०	०
३.	,, द्वितीयसंपुटम् । मीमांसापादुका, सेश्वरमीमांसा, न्यायपरिशुद्धिः, न्याय-सिद्धाञ्जनं च ।	३	०	०
४.	,, तृतीयसंपुटम् । सर्वार्थसिद्धिसमेतः तत्त्वमुक्ताकलापः ।	४	०	०
५.	काव्यनाटकविभागः । हंससंदेशः, सुभाषितनीवी, यादवाभ्युदयः. संकल्पसूर्योदयश्च ।	३	०	०
६.	व्याख्यानविभागे—प्रथमसंपुटम् । ईशावास्योपनिषद्भाष्यम्, चतुःश्लोकीभाष्यम्, स्तोत्ररत्न-भाष्यम्, गद्यभाष्यं च ।	१	०	०
७.	,, द्वितीयसंपुटम् । गीतार्थसंग्रहरक्षा, गीताभाष्यतात्पर्यचन्द्रिका च ।	५	०	०
८.	,, तृतीयसंपुटम् । तत्त्वटीका, निक्षेपरक्षा, सच्चरित्ररक्षा, पाञ्चरात्ररक्षादिकं च ।	४	०	०
	सर्वपूर्वाचार्यप्रणीतसकलस्तोत्रमपि	१	८	०

॥ विशेषतोऽवधेयम् ॥

श्रीमद्वेदान्तदेशिकप्रणीता द्वात्रिंशद्रहस्यग्रन्था द्राविडगाथाप्रबन्धाश्च संप्रदायविभागे अन्तर्गताः । ते च सुशोभनैरान्ध्राक्षरैस्सुष्ठु सम्मुद्रिताम्सन्ति । मूल्यम् ५ ० ०

आन्ध्राक्षरैरेव मुद्रितायाः श्रीभगवद्रामानुजग्रन्थमालायाः ६ ० ०

तादृश्याः श्रीमद्वरवरमुनीन्द्रग्रन्थमालायाः रहस्यत्रयसारविभागमात्रस्य ६ ० ०

प्राप्तिस्थानम् :—

'ग्रन्थमाला आफीस'

३९. सन्निधि वीथी,

कञ्जीवरम्.

॥ श्रीः ॥

॥ श्रीमद्वेदान्तदेशिकग्रन्थमालायाः ॥

॥ उपसंहारविज्ञप्तिः ॥

अयि भोस्सहृदयमहाभागाः !

श्रीमद्वेदान्तदेशिकग्रन्थमालाप्रकाशनात्मकेनानेन सुमहत्तरेण कैङ्कर्येण भगवान् भागवताः पण्डितपरिवृढाश्च समाराधनीया इति मितमतिः परिमितोपकरणश्चायं जनः स्वप्नेऽपि नाचकलत । अथापि सत्यमकाण्डे भगवदनुग्रहेण निरवग्रहेण परिपेचे । भागवतानां प्रबलेन प्रसादेन फलेग्रहिणा बभूवे । पण्डितप्रकाण्डानां शुभानुध्यानेन निस्समाभ्यधिकेनाभिववृधे ।

किं भूयसा ? श्रीवैष्णवमण्डलस्य कृत्स्नस्य ममैव वा सुकृतसर्वस्वेन सद्यस्सफलेन संबभूवे । अवाङ्मनसविषयेण प्रचुरेण प्रमोदेन समिन्धानमस्मदीयमन्तःकरणमखिलजगदन्तर्यामी स एक एव हि परमः पुमान् याथातथ्येन विज्ञातुमलम् । अर्धीनसाङ्गसशिरस्कवेदस्य द्विजन्मन इव, यथावदनुष्ठितनित्यनैमित्तिकाद्यशेषकर्मसमुच्चयस्य परमैकान्तिन इव, स्वपादपरिसरप्रणतितनिखिलमहीपतिनिवहस्य चक्रवर्तिन इव, श्रीमद्कुलाभरणमुनीन्द्रदिव्यब्रह्मसंहितापर्यन्तवसमधिगतपरतत्त्वयाथात्म्यस्य परमपवित्रचरित्रस्य महात्मन इव, निरन्तरचिन्त्यमानानन्तशयानन्तचिरन्तनोदन्तसन्तान साक्षात्कारहठात्कारसमुदञ्चितरोमाञ्चवितर्विलक्षणयागिप्रवरस्येव च ममापि मनः संप्रति सवाभ्यधिकरहितसंतोषसुभगं समुल्लसतीति नेयं प्रौढोक्तिः, यदहो प्रांशुलभ्ये फले लोभादुद्बाहोर्वामनस्येव मम प्रवृत्तिविशेषोऽयमपहास्यतामनुत्पादयन् गुणपक्षपातिभिर्महात्मभिरभिनन्दनीयतामेव समुदपादयदिति ।

कतिपयमासेभ्यः पुरस्तात् श्रीरङ्गदिव्यक्षेत्रनधिजग्मुषा दासेन तत्र श्रीमद्होबिलसंयमिसार्वभौमास्थानमलङ्कुर्वाणास्सुप्रसिद्धवैदुष्यवैभवाः सौशील्यनिधयः "श्री इञ्जिमेडुस्वामिपादा" इति सुप्रसिद्धा यतीन्द्रास्समसेविषत । तदात्वे श्रीस्वामिचरणैः परमकृपापेशलमनुगृहीतं दिव्यं वचः—"आयुष्मन्! एतादृशीं ग्रन्थमालां संमुद्रय प्रकाशयितुमहमध्यवस्यन्नवर्तिषि ; तवेयं प्रवृत्तिस्सत्यमसूयामेव मे समुदपादयत् ; दुष्परिहरमेव मे तदिदं दुःखम् ; आस्तां नाम ; आचार्यकटाक्षं त्वयि सहसा प्रसृतं का वा निरोद्धुं क्षमा ? यथाकथञ्चित् सुशोभनो लोकोपकारस्संपन्न एवेति सुबहु संतुष्यामि" इति ।

वस्तुतस्सुमहत्तरमिदं कैङ्कर्यं सुबहूनां महात्मनामुच्चावचैरुपकारविशेषैस्सुशोभनं संपन्नमिति तेषुतेषु सुचिरस्मरणीयनामसु महाभागेषु हार्दं कार्तज्ञ्यमाबिभ्राणोऽयं जनस्तेषां सतां छायाचित्राणि संपाद्य सांप्रतं प्रकाशयन्नधुनैव स्वात्मानमतीव धन्यं मन्यते । प्रकाशितेषु चैतेषु छायाचित्रेषु यः खलु परमपावनो दिव्यमङ्गलविग्रहः प्रथमतस्समुल्लसति, सत्यं स एक एव ग्रन्थमालामिमां निष्प्रत्यूहनिर्वृत्तमुद्रणामन्वगृह्णादिति तामेव दिव्यमूर्तिं क्रियासमभिहारतः प्रणतिकर्मकर्मीकुर्वन्नसौ दासस्सप्तजन्मानुबन्धिनीं कृतज्ञतां बिभर्ति । तेषामेव श्रीस्वामिचरणानां निरवग्रहमनुग्रहम् अकम्पांचानुकम्पामवलम्ब्य क्रमशस्सुबहून् ग्रन्थानेवमेवं प्रकाशयिष्यति दासजनोऽयमिति प्रेक्षन्तां प्राज्ञपुंगवाः ।

सिद्धित्रयम्, आगमप्रामाण्यम्, सहस्रनामभाष्यम्, सव्याख्यस्तत्त्वसारः, वेदान्तकौस्तुभः, अथर्वशिखाविलासः, परिकरविजयः, सद्विद्याविजयः, सव्याख्या अध्यात्मचिन्ता, श्रीवैष्णवाचार्यप्रणीतसकलस्तोत्रग्रन्थाः— इत्यमी प्रबन्धा अचिरात्संमुद्रय प्रकाशयितुमिष्टास्सन्ति । विश्वजनोपचिकीर्षया देवनागराक्षरैरेव मुद्रणं संपत्स्यते । "एतावतीं गमयितुः पदवीं दयालोः शेषाध्वलेशनयने क इवातिभार" इति दिव्यसूक्तिमनुध्यायतोऽस्य जनस्य सर्वथा नैर्भर्यमनपायमेवेत्यखिलमवदातम् ।

इति श्रीवैष्णवदासदासानुदासः

श्रीकाञ्ची. प्रतिवादिभयङ्कर - अण्णङ्गराचार्यः

(ग्रन्थमालासंपादकः ।)

श्लो. विक्रमवर्षे मेषे श्रोणायां जातमुद्रणारम्भा ।
सैषा मालाऽवसिता विष्वब्दनभस्यमासि हस्तर्क्षे ॥

INTRODUCTORY

Some two years ago, I had not the slightest idea that I would publish Sri Vedanta Desika Grantha Mala. The task is such a great one, that an ordinary person like my humble self can never dream of it. But, some how, by the grace of the Almighty Lord, blessings of elders, and encouragement of friends and well-wishers, I happened to undertake the publication of this great series and bring it to a successful conclusion within a year and half.

Many are the noble souls that have helped me in this great task and I find it really difficult to repay their kindness in anyway. I have procured their photos and appended them to this volume.

In conclusion, I cannot, but make a spacial mention of the kindness and boundry of His Holiness Sri Parakala Swamigal of Mysore, as that has been highly responsible for the speedy publication of this series. By his grace and kindness, I hope to publish many more valuable gems of our Sampradayic literature. It is my firm belief that the encouragement that I have recieved from one and all, for this publication will continue in future, also.

P. B. Annangaracharya,
Editor Granthamala,
CONJEEVERAM.

॥ श्रीर्जयतु ॥

श्रीमल्लक्ष्मणतार्किहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

[व्याख्यानविभागे तृतीयसंपुटम्]

॥ श्रीभगवद्रामानुजमुनिभिरनुगृहीतं श्रीभाष्यम् ॥

अखिलभुवनजन्मस्थेमभङ्गादिलीले विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्ताचार्यविरचिता

श्रीभाष्यव्याख्या

॥ तत्त्वटीका ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

स जयति यतिराजमुनिः करुणाजलधिः क्षमापरिष्कारः । करिशैलकृष्णमेघः काङ्क्षितवर्षी यदर्पितैस्तोयैः ॥ १
स्वतःसिद्धं शुद्धस्फटिकमणिभूभृत्प्रतिभटं सुधासध्रीचीभिर्द्युतिभिरवदातत्रिभुवनम् ।
अनन्तैस्त्रय्यन्तैरनुविहितहेषाहलहलं हताशेषावद्यं हयवदनमीडीमहि महः ॥ २ ॥
प्रणम्य वरदाचार्यवादिहंसाम्बुदावपि । त्रय्यन्तसूत्रभाष्यार्थतत्त्वटीका विधीयते ॥ ३ ॥
असाधनतिसङ्क्षेपादतिविस्तरवर्जनात् । सर्वन्यायानुकूलत्वाद्गृह्यतां सारवेदिभिः ॥ ४ ॥
शातितः शतदूषण्यां शङ्करादिमुधाग्रहः । शारीरकशरीरं तु व्यक्तमत्र प्रदर्श्यते ॥ ५ ॥
विश्वामित्रकुलीनेन वेदान्ताचार्यसूरिणा । शश्वद्विधीयते विश्वचैतण्डिकविभूषणम् ॥ ६ ॥
निखिलनिगमश्रेणीचूडापरिष्कृतिरूपिणी निपुणमनसामाशासौधस्थलीषु निबध्यते ।
यतिपतिगुरो भाष्यस्यासौ यथाश्रुत(ति)चिन्तितवचनविन्यासादर्शे जयध्वजपङ्क्तिका ॥ ७ ॥

तत्र तावत्—

अखिलेत्यादिभाष्यस्य दशार्थानभिदध्महे । विषयादित्रिकस्योक्तिः प्रथमं प्रतिपाद्यते ॥ ८ ॥
तस्यार्थस्य च सौत्रत्वात्तद्विस्तारात्मकं पुनः । अनवद्यमिदं पद्यं भाष्यलक्षणलक्षितम् ॥ ९ ॥

यद्यपि * अथातो ब्रह्मजिज्ञासेति सूत्रं ब्रह्म जिज्ञासोः तद्विचारस्य कर्तव्यत्वे प्रवृत्तम् ; तथापि शारीरकविषयादिष्वप्यर्थतो वर्तते, यथा धर्मजिज्ञासासूत्रम् । आहुश्च— * अथातो धर्मजिज्ञासासूत्रमाद्यमिदं कृतम् । धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ॥ इति । एवमत्रापि,

ब्रह्मेति तावद्विषयं प्राप्यत्वेन प्रयोजनम् । जिज्ञासाकर्मभावेन संबन्धमपि चाब्रवीत् ॥ १० ॥

निरतिशयबृहत्त्वं हि ब्रह्मशब्दार्थः ; बृहतिधातोः * बृहेरुच्च इति मनिन्प्रत्यये अमागमे च ब्रह्मेति व्युत्पत्तेः, * ब्रह्म परिबृढं सर्वतः इति यास्कोक्तेश्च । यत्तु आथर्वणिकी निरुक्तिः बृंहणत्वमप्याह— * बृहति बृंहयति तस्मादुच्यते परं ब्रह्मेति, पौराणिकी च प्रसिद्धिः, * बृहत्त्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयत इति, तद्बोबलीवर्दन्यायादिति न विरोधः । (बृंहणत्वस्य बृहत्त्वविशेषत्वाच्च । तदयमर्थः—स्वतो बृहत् बृंहणत्वेनापि बृहदिति । प्रयुक्तपदान्तरपौनरुक्त्यपरिहाराय सामान्यशब्दसङ्कोचो गोबलीवर्दन्याय इति लक्षणानुसारेण बृहच्छब्दो बृंहणत्वात्मकबृहत्त्वादन्यत्र वर्तते । यथा * विष्णुनामा स वेदेषु वेदान्तेषु च गीयते इति ।) तेनानवधिकातिशयबृहत्त्वमेव ब्रह्मशब्दार्थ इत्येके । अपरे तु बृहत्त्ववत् बृंहणत्वमपि अनवधिकातिशयं ब्रह्मशब्दार्थः * बृहति बृंहयति इति पृथगभिधानस्वारस्यात्, * बृहत्त्वाद्बृंहणत्वाच्च इति समुच्चयोपादानस्वारस्याच्चेत्याचक्षते । वयं तु ब्रूमः— उभयत्रापि विरोधाभावादुभयथाऽप्याचक्ष्महे इति । अयमत्र संग्रहः—

बृहत्त्वं ब्रह्मशब्दार्थो बृंहणत्वं तु तद्भिदा । यद्वाऽर्थो ब्रह्मशब्दस्य बृंहणत्वं बृहत्त्ववत् ॥ ११ ॥

अथवा बृहत्त्वबृंहणत्वसमुच्चयो वा । एतत्सर्वमभिप्रेत्योक्तं जन्माद्यधिकरणभाष्ये * उपलक्ष्यं ह्यनवधिकातिशयबृहत् बृंहणं च, बृहतेर्धातोस्तदर्थत्वात् इति । अनयोश्च सर्वातिशायित्वमपरिच्छेदात् यास्कनिरुक्तिसामर्थ्याच्च सिध्यति ।

अनुपाधिकनिर्देशे(शो) ह्यसंकोचो मनीषिभिः । सिद्धे शब्दार्थसंबन्ध इति न्यायेन कथ्यते ॥ १२ ॥

ईदृशं ब्रह्म अस्य शास्त्रस्य प्रधानविषयः; प्राप्यतया परमं च प्रयोजनम् ; निरुक्तिद्वयार्थस्य द्विकाभ्यां विवरणात् ।

प्राप्यत्वं ब्रह्मणः सिध्येद्बृंहणत्वस्य कीर्तनात् । स्वप्राप्तेः साधनत्वं हि बृंहणत्वमिहोच्यते ॥ १३ ॥

न च बृहतिधातौ बृंहयतीत्यभिधानस्य विरोध इति वाच्यम्, * बृह बृहि वृद्धाविति धातुद्वयसिद्धत्वान्निरुक्तिद्वयवाक्यस्य ।

अर्थमात्रे च तात्पर्यादन्यधातोश्च संग्रहः । तस्य धातोरिदित्त्वाच्च नुमागमसमन्वयः ॥ १४ ॥

प्रयोजनं चात्रावश्यं वक्तव्यम् । तदप्याहुः— * सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् । यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते ॥ इति । * मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रया । न शुश्रूषयितुं शक्या प्रागनुक्त्वा प्रयोजनम् ॥ इति च ।

संबन्धस्तु विषयभूतेन ब्रह्मणा निर्णायकत्वादिः, प्रयोजनभूतेन प्रापकत्वादिः, जिज्ञासापदविवक्षितविचारसाध्यविदीप्सितन्मूलविनष्टितत्साध्यरक्षारूपैस्तु प्रयोजनैः यथार्हं साक्षात्परम्परया वा हेतुत्वबोधकत्वे ।

शास्त्रारम्भेषु सर्वत्र संबन्धः कथ्यते बुधैः । असंबद्धप्रलापत्वे न प्रवर्तेत बुद्धिमान् ॥ १५ ॥

तदेवं सौत्रमेव विषयादित्रिकं श्रोतृबुद्धिसमाधानार्थमुपादित्सार्थं च विशेषतः स्यापयन् प्रारिप्सितप्रबन्धस्य अविघ्नेन परिपूर्त्यर्थं प्रचयार्थं च शङ्कितमत्यूहशान्त्यै शिष्टाचारादिसिद्धमिष्टदेवभक्तयाशीरूपं मङ्गलं स्वात्मनाऽनुष्ठितमपि शिष्यशिक्षार्थं स्वकृतानुकीर्तनेन तेषां महिष्ठमङ्गलार्थं चादौ निबध्नाति भगवान् भाष्यकारः— **अखिलेति ।**

गुरोराचारमाश्रित्य वर्तन्ते मङ्गलार्थिनः । यान्यस्माकमिति श्रुत्या तदेतदभिधीयते ॥ १६ ॥

नमस्क्रियावस्तुनिर्देशावप्यर्थसिद्धौ, सर्वोत्तुङ्गमङ्गलत्वमतत्त्वोक्तेः । उक्तं च— * नीचोच्चयोः स्वभावोऽयं नन्तृनन्तव्यतात्मकः इति । अत्र सप्तम्यन्तैः सिद्धविषयप्रयोजनोक्तिः; **श्रुतिशिरसीत्यवान्तरविषयसंग्रहः ॥**

यथा हि वेदवाक्यस्य विषयो ब्रह्म कथ्यते । तथैव सूत्रवाक्यस्य त्रय्यन्तः परिकीर्त्यते ॥ १७ ॥

विदीप्तिविनतरक्षाशब्दैः साध्यप्रयोजनत्रयकीर्तनम्, अत्र विशिष्टा दीप्तिः विदीप्तिः—निर्णयः । स तु विचारतः । यथाहुः— * धर्मे प्रमीयमाणे तु वेदेन करणात्मना । इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥ इति । उक्तं च **न्यायसुदर्शने**— * ज्ञायमाने तु वेदान्तैः करणैः परमात्मनि । इमामुत्तरमीमांसामितिकर्तव्यतां विदुः ॥ इति; * वेदस्य निरपेक्षत्वलक्षणप्रामाण्ये सत्यपि प्रतिपत्तृमतिमान्द्यापराधनिमित्तसंशयविपर्ययापनोदनमनया क्रियत इति च ।

प्रयोजनोक्तिरामत्वनिश्चये निश्चयं दिशेत् । तत्संदेहेऽप्युपादित्सां सिद्धां सन्धुक्षयेदसौ ॥ १८ ॥

तत्र सामान्यतः प्रयोजनवत्त्वनिश्चयेऽपि स्वापेक्षितप्रयोजनविशेषवत्त्वनिश्चयस्तु वक्तृवाक्याद्दते न सिध्यतीति प्रयोजनकथनमवश्यकर्तव्यमेव । तदिह संबन्धोऽपि सूचित एव, संबन्धाश्रयभूतशास्त्रप्रयोजनादीनामुपादाननान्तरीयकत्वात्संबन्धावगमस्य ।

विचारत्वं विचार्यत्वं निर्धार्यत्वं तथेतरत् । प्राप्यत्वं प्रापकत्वं च संबन्ध इति कथ्यते ॥ १९ ॥

तत्र तत्त्वत्रयमर्थपञ्चकमित्यादिकमध्यात्मविद्भिरित्यादरेण परिगृहीतमर्थजातं स्वयमेव सूरिभिः संप्रत्याय्यमिति न विविच्य लिख्यते ।

विषयादिप्रधानत्वमाद्यपद्ये समीरितम् । अधुना मङ्गलाचारप्राधान्यमनुवर्ण्यते ॥ २० ॥

स च मङ्गलाचारः केषुचिद्ग्रन्थेष्वदृष्टोऽपि निमित्तफलाभ्यामुन्नेयः । आहुश्च— * प्रारिप्सितं निमित्तं स्यादविघ्नेन समापनम् । प्रचयश्च फलं तस्मान्मङ्गलाचार इष्यते ॥ इति । अविघ्नसमाप्त्यादिसंवलितस्य प्रबन्धारम्भस्य तत्राधिकारिविशेषणत्वमित्यर्थः । उक्तं च विवरणकारैः— * संवलितमत्र विशेषणम्, जातेष्टिवत् । यथा जातेष्टौ पुत्रजन्मनो निमित्तत्वेऽप्यार्थवादिकानां पुत्रगतपूतत्वादीनां फलत्वकल्पनम् । न च गौरवम्, फलस्य विशेषणत्वे प्रवृत्तिसौकर्यात् । फलमात्रे तु गर्हानुपपत्तिः । न हि काम्याकरणे गर्हा इति । अथवा शबरशङ्करग्रन्थयोरनीश्वरप्रतिपादकत्वात् ईश्वरनमस्कारादिमङ्गलं न कृतमिति व्याचक्षते । न च पक्षिलादयः परमास्तिका निमित्ते सत्यपि मङ्गलं नाचरन्तीति सिद्धं भवति, अपि तु कृतस्यापि नमस्कारादेः मङ्गलस्य ग्रन्थनिवेशमेव न कृतमिति व्याकुर्वते । केचित्तु ईश्वरवाचकस्य प्रमाणशब्दस्य प्रथमोपादानात् कृतमङ्गलाचार एव पक्षिलमुनिरिति व्याचख्युः । अननुष्ठितमङ्गलत्वे वा कथं फलसिद्धिः ? अनुष्ठितमङ्गलानां तु फलव्यभिचारः कर्मकर्तृसाधनवैगुण्यमवलम्बते । नन्वारब्धसमाप्तिकामो मङ्गलमाचरेदिति विध्यभावादकर्तव्यत्वं मङ्गलाचारस्य । अथ खल्व-

नधिगतवेदानामश्रुतमीमांसानामारम्भः, अविगीतविद्वत्परिग्रहत्वेव मूलप्रमाणस्यत्वात्। तत्र एव [illegible]-सिद्धिः। न च मङ्गलाचारामावेऽपि फलं दृष्टमिति वाच्यम्, संसारस्यानिदंमयतया तस्यापि अवान्तरीयसुकृत-विशेषनिबन्धनत्वात्। न च किमनेन मङ्गलाचारेण! तदेव फलं ददातीति वाच्यम्। तत्सद्भावे निश्चयाभावात्, निमित्तानुबन्धिनो नैमित्तिकस्य शिष्टाचारप्राप्तत्वेनावश्यकत्वाच्च।

किंचिदारभमाणस्य बुद्धिस्थं पूरणादिकम्। त्यक्त्वाऽन्यफलकल्पित्तस्तु नीतिमद्भ्यो न रोचते॥ २१॥
भक्तिराशास्यमानाऽपि पूरणप्रचयावहि। नोपरुध्य प्रवर्तेत सा च तौ च तदाशिषा॥ २२॥
भक्तिर्हि मङ्गलतमा तद्बोधादेश्च कारणम्। तस्मात्सर्वप्रधानत्वाद्भक्तेराशासनं वरम्॥ २३॥
अथवा भक्तिभेदत्वान्नमस्कारार्चनादिकम्। सर्वमेव हि मङ्गल्यमाशास्यमिह मन्महे॥ २४॥

स्यादेतत्। अस्तु तावन्मङ्गलाचारः। मङ्गलनिबन्धस्तु तत्तद्ग्राप्येष्वदर्शनादयुक्त इति चेन्न, उपयोगादनिषेधात्।

शिष्याणां शिक्षणं तावत्तेषां स्वकृतकीर्तनात्। महिष्ठमङ्गलावाप्तिस्तत्फलं प्रागुदीरितम्॥ २५॥

द्रमिडभाष्यादिषु * नमः प्रवरगुणैकास्पदाय स्थिरत्रसकुलैकबीजकुम्भभूताय भुवनकोशस्य गोप्त्रे ब्रह्मणे, नमो जैमिनये वेदरहस्यसंपुटनिगूढविष्फारयित्रे न्यायप्रज्वलितचेतसे, नमोऽस्त्वाचार्येभ्यः इत्यादिभ्यः तदृष्टेश्चावश्यकर्तव्य एवायमाचारः। ईश्वरापह्नोतृणामाचारो नास्थेय इति प्रागेवोक्तम्। * स्मृत्याचारविरोधे तु स्मृतिरेव बलीयसीति न्यायाच्च सिद्धमेतत्। स्मर्यते च तत्र मङ्गलाचारः— * मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्। जपतां जुह्वतां चैव विनिपातो न विद्यते॥ इत्यादिभिः॥

करणत्रयसारूप्यात् कथ्यते मङ्गलक्रिया। तस्माद्ग्रन्थनिवेशोऽपि मङ्गलस्य प्रमाणवान्॥ २६॥
पूर्वे पुलस्त्यमुख्याश्च क्रियासममिहासतः। कार्यारम्भेषु सर्वेषु मङ्गलाशासनं विदुः॥ २७॥

मङ्गलाचारः पुराणारम्भे दृष्टश्च * प्रणिपत्याभिवाद्य चेति गुरुप्रणिपातादिरूपः। अत एव * युष्मदस्मदि-त्यादौ कुग्रन्थत्वमाशङ्क्य प्रत्यक्तत्त्वानुसन्धानेन मङ्गलत्वमाचख्युर्व्याख्यातारः। तच्च मन्दम्, युष्मदर्थानुसन्धा-नस्यैव तत्रापि प्राथम्यात्, मध्यलघुत्वेन वह्निदेवत्यस्य रगणस्य निवेशाच्च।

शम्भोमित्रादयो मन्त्राः शतं ते सूरिभिः स्मृताः। कर्मानुष्ठानकालेषु पठितव्या मनीषिभिः॥ २८॥

एवमिह पद्यनिबन्धनचोद्यमप्यपास्तम्। दृष्टं च केषुचित् * प्रणम्य हेतुमीश्वरमित्यादि।

अकारोपक्रमश्चास्मिन्मङ्गलत्वाभिसन्धितः। निःशेषत्वं तु सुगमं निखिलेत्यपि भाषिते॥ २९॥
अन्यार्थोऽप्यत्र वर्णोऽयं विष्णुनामस्वभावतः। यदृच्छाशब्दशब्दादिन्यायाद्भवति मङ्गलम्॥ ३०॥
आदौ च पाणिनीयादेस्तथाऽन्यैरनुवर्णितः। सूत्रे चाथादिरन्यार्थस्तदर्थोऽप्यत्र मन्यते॥ ३१॥
अतोऽप्यत्र शुभत्वं स्याद्वैकल्यप्रतिषेधतः। निषेध्यभेदतो ह्यस्य शुभाशुभविकल्पना॥ ३२॥
अपहन्तव्यदुःखोक्तिमप्यारम्भे शुभां विदुः। अपौष्कल्यनिषेधेऽस्मिन्नतः कैमुत्यमश्नुते॥ ३३॥
आदावखिलशब्देऽस्मिन्गणत्वनिवेशनम्। आयुःपूर्तिनिदानत्वादविघ्नायैव कल्पते॥ ३४॥
सर्वस्यापि गणस्यात्र नगणो हि विशिष्यते। तत्रादिमत्तुष्पदामष्टार्थानपरान् विदुः॥ ३५॥
विविक्तमङ्गलाचारप्रक्रियानान्तरीयकान्। व्याख्यास्यमाणसूत्रस्य मङ्गलस्य गणसंग्रहः॥ ३६॥

चतुरध्याय्यनुक्रान्तिसंक्षेपोद्धरणं द्विधा । परपक्षप्रतिक्षेपः पक्षस्थापनिकारणम् ॥ ३७ ॥
स्वेष्टारम्भविरुद्धानां निरासोद्धार इत्यपि । पौरस्त्येषु वाक्येषु प्रयोजनविशेषतः ।
प्रकृतानुगुणानेकविवक्षा श्राश्रिता बुधैः ॥ ३८ ॥

प्राहुः किल वार्तिककाराः * लोक इत्यादिभाष्यार्थविवरणे— * लोक इत्यादि भाष्यस्य षडर्थान् संप्रचक्षते। सर्वव्याख्यामुपालम्भं प्रत्याख्यानं तथापरे ॥ परिसङ्ख्यास्तुती केचिदथशब्दस्य दूषणम्। इति । * लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि सति संभवे तदर्थान्येव सूत्रेष्ववगन्तव्यानि । नाध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वा इति भाष्यम् । आपादचूडं सम्यग्व्याख्यानप्रक्रियायाः संग्रहेणोपवर्णनात् सर्वव्याख्या ; भवदासादिव्याख्यायामुक्तप्रकारवैपरीत्यख्यापनादुपालम्भः ; सूत्रस्य स्वरसार्थप्रतिपादनस्वाभाव्येन व्याख्यानानपेक्षत्वकथनेन सूत्रं न व्याख्यायते सूत्रेण श्रुतिरेव व्याख्यायत इति सूत्रव्याख्यानप्रतिक्षेपात्प्रत्याख्यानम् ; श्रुतिसूत्रविसंवादे सूत्रस्य स्वारसिकार्थप्रहाणेनाध्याहारादिभिः कथंचिन्नेयत्वेन यथाश्रुतपरिग्रहस्यापास्तत्वात्परिसंख्या ; जैमिनिसूत्राणां स्वरसार्थप्रतिपादकत्वस्वाभाव्येनोपवर्णनात्सूत्रकारस्तुतिः ; अथशब्दस्य प्रसिद्धार्थप्रतिपादकत्वावश्यंभावित्वेऽपि वृत्तादर्शनादिभिरानन्तर्यार्थत्वं न विद्यत इति पूर्वपक्षिणाक्षिप्यत इत्यथशब्ददूषणमिति भाष्यार्थविभागः ।

एकस्मिन्नेव भाष्ये तैः षडर्था यद्वदीरिताः । तद्वदेव दशाप्यर्थानत्राप्याचक्ष्महे वयम् ॥ ३९ ॥
सर्वव्याख्यादिकं तावदर्थषट्कं निदर्शनम् । तथा पश्चिलभाष्यादौ तत्तदर्थाः प्रदर्शिताः ॥ ४० ॥
संजिघृक्षितनानार्थैः सूत्रकारादिभिस्तथा । तन्त्रावृत्त्यनुनिष्पाद्याः कल्पितास्तद्वदेव नः ॥ ४१ ॥

दृश्यते हि * दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येकस्मिन्नेव सूत्रे प्रत्यभिज्ञाप्रामाण्यमात्मनित्यत्वमिन्द्रियनानात्वं विषयस्थैर्यं गुणगुणिभेद इत्यादयोऽर्थजातम्।

तदिह सूत्रार्थोक्तौ ब्रह्मशब्देन व्याख्येयसंग्रहः । तन्निरुक्तौ पादाभ्यां दर्शिते । श्रीनिवासत्वं तदुपपादकं लिङ्गम्। अथेत्युक्तमानन्तर्यं श्रुतिशिरसीतिव्याख्येयैकमान्मुख्यैकमतः स्याप्यते । अतश्शब्दोक्तो विशिष्टारम्भहेतुर्विदीप्त इत्यनेनोद्बृंहितः । ममेत्यर्थसिद्धजिज्ञासाधिकार्युद्बाहृतिः । शिष्टेन सर्वोत्कृष्टवस्तुगोचरतया स्वयं च स्वादुतया आशीर्विषयोपायविशेषोक्त्या तद्विषयब्रह्मविचारस्य सन्प्रत्ययसूचितरागप्राप्युत्तम्भनादर्थादनारभ्यत्वभ्रमापोहः ।

सूत्रार्थयोर्द्वयोरर्थः फलतः प्रतिपादितः । अत्र शब्दस्तु सूत्रार्थस्तस्माच्च पुनरुक्तता ॥ ४२ ॥
द्वितीयसूत्रभावस्यकृत्स्नलक्षणसंग्रहे । ब्रह्मेति लक्ष्यं शिष्टैस्तु तल्लक्षणसमाहृतिः ॥ ४३ ॥
नोद्देशमात्रात्प्रमितिः परीक्षा लक्षणाश्रया । प्राधान्याल्लक्षणस्यात्र प्रतिपत्तिर्हि युज्यते ॥ ४४ ॥

अत्र हि सर्वकार्यसृष्टृत्वादीनि मुमुक्षूपास्यत्वमोक्षप्रदत्वतत्प्यन्तप्रधानवेद्यत्वश्रीनिवासत्वपरमप्राप्यत्वानि च गृह्यन्ते, यैर्योगायोगाभ्यामपवर्गपरिपन्थ्यभक्त्युन्मूलनपारावर्यविवेकः ।

असाधारणधर्मो हि लक्षणत्वेन लक्ष्यते । बहुत्वं तस्य धर्मस्य बुद्धेरुन्मेषकारणम् ॥ ४५ ॥
न लक्षणानां भिन्नत्वे लक्ष्यभेदः प्रसज्यते । विरुद्धलक्षणानां हि भेदकत्वं विदुर्बुधाः ॥ ४६ ॥

चतुरध्याय्यर्थसंग्रहस्तु—* परस्मिन् ब्रह्मणीति काण्डान्तरवेद्यव्यावृत्तप्रधानार्थोक्तिः। पादाभ्यां सिद्धविषयरूपः साध्यविषयरूपश्च द्विकद्वयार्थः संगृह्यते । * श्रुतिशिरसि विदीप्ते इत्यनेन प्रमाणविशेषायोगतदन्ययोगव्यवच्छे-

देनोपोद्घातरूपचतुस्सूत्र्यर्थोद्गीहः, श्रुतिशिरस्येव विदीप्त इति सावधारणनिर्देशस्य विवक्षितत्वात् ।

अयोगः श्रुतिभिर्योगोऽप्यन्यमानेन वार्यते । सूत्रैश्चतुर्भिः किं ना(नो)त्र वक्तव्यमवधारणम् ॥ ४७ ॥

एकदेशिनस्तु आद्यसूत्रार्थोक्तिरिति व्याचख्युः ।

ननु कथमन्यप्रमाणव्यवच्छेदः ? स्मृत्यादिभिरपि तत्सिद्धेः ; मैवम्—तेषां तन्मूलतयैव प्रामाण्यस्य न्याय-सिद्धत्वात् । एतेन स्मृतिविरोधात् श्रुतिबाधशङ्का निरस्ता । श्रुतेः स्मृतिद्वारत्वमपि साधनबद्धाधनेऽपि समानम् । तत्र श्रुतिमूलत्वे वा श्रुतिरेव शरणम् । तदुक्तम्—* विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति । वक्ष्यति च • स्मृत्यनवकाश-दोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् इति । श्रीनिवासभक्तिरूपपदाभ्यां प्राप्यप्रापकयाथार्थ्यनिष्कर्षः । परत्वं चोक्तप्रकारेण चतुर्धा चतुर्लक्षणीवेद्यम् । • मम इत्युपायाधिकार्युदाहृतिरिति ।

अत्र भुवनमात्रोक्तौ सकलेति विशेषणोपादानेऽपि वा प्राथिकत्वं शङ्क्येत, अतोऽत्र अखिलेति निश्शेषत्वोक्ते-श्चतुर्मुखादिभ्यो व्यावृत्तिरिति ।

व्यतिरेकमुखेणोक्तावर्थादर्थं प्रतीयते । तस्मादिष्टार्थसिद्धिः स्यादनिष्टविनिवारणम् ॥ ४८ ॥

न हि चतुर्मुखादीनामखिलकारणत्वम् । न हि ते स्वेषां स्वपूर्वोत्तरेषामण्डान्तरस्थानां शुद्धसृष्ट्यादेर्वा हेतवः ; व्यष्टिसृष्ट्यादौ च नियताधिकाराः परप्रयोज्याश्च । कार्यसमुदायविशेषरूढोऽप्यत्र भुवनशब्द उपलक्षणात् भवतीति वा कार्यमात्रपरः, प्रकरणानुक्रान्तयोगस्य रूढितो बलीयस्त्वात् । जन्मादिषु बहुव्रीहिः तद्गुणसंविज्ञानः, * सर्वादीनि सर्वनामानीतिवत् ।

द्रव्यस्य नित्यसिद्धस्य यथादृष्ट्यवधारणे । जन्मस्थित्याद्यवस्थाः स्युः सामग्रीभेदशक्तितः ॥ ४९ ॥
आकाशत्वादिधर्माणामागन्तुत्वविवक्षया । तत्तद्द्रव्यस्य नित्यत्वेऽप्युत्पत्त्यादिरपि श्रुतः ॥ ५० ॥
यथा पाकेन रूपाद्याः परेषां नित्यवस्तुषु । तथा नस्त्रिगुणद्रव्ये परमंकल्पतो दशाः ॥ ५१ ॥

जन्माद्यवस्थाश्च नित्यनैमित्तिकादिभेदात् बहुधोक्ताः । प्रागसिद्धस्यात्मलाभ उत्पत्तिः जन्म । उत्पत्तिलब्धा-कृतेरर्थस्याप्रणाशसामग्र्याः स्थितिरिह स्थेमा । ननु कथं स्थेमशब्दः ? कथं च स्थित्यर्थः ? न ह्यसौ स्थानादिव-तिष्ठतेर्निष्पन्नः । न च * पृथ्वादिभ्य इमनिज्वा इत्यस्य विषयः । यद्यपि * प्रियस्थिरेत्यादिना स्थिरशब्दस्य स्थादेशः, तत्र च * तुरिष्ठेमेयस्सु इति प्रत्ययत्रयं प्रकृतम् ; तथाऽप्यत्र प्रियोरुगुरुबहुलघुदीर्घाणामेवादेशेष्विमनिज् भवति, नान्येषाम्, पृथ्वादिष्वपाठात् । न चासावाकृतिगणः, अतः कथमयं प्रयोगः ? अत्र ब्रूमः—

प्रयोगतः स्थितिः स्थेमा प्रत्ययाद्यूहशासनात् । अखण्डितो वा शब्दोऽयमधातूद्भवपक्षतः ॥ ५२ ॥

अस्ति हि न्यायतात्पर्यटीकायां तत्प्रयोगः— * स्थेमा च भावानामुपपादयिष्यते इत्यादि । तात्पर्यपरिशुद्धौ च संशयपरीक्षायां * बौद्धादेर्निश्चितक्षणिकत्वादेरपि झटिति विघटितसाधनस्य प्रतिवादिसाधनात् परितो निरस्तविभ्रमा-शङ्कात् संशयं विनैव स्थेमादिनिर्णयोत्पत्तेः इति । * निस्स्थेमानो दशाननकीर्तयः इत्यादयश्च महाकविप्रयोगाः । तदत्र प्रसिद्धबहुविद्वत्प्रयोगभूयस्तया साधुत्वं सिद्धम् । शक्या च व्युत्पत्तिः, यथोक्तम्—

* नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् । यत्र पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूहम् ॥

* मुद्रा प्रकृत्यादिविभागः, मतमेदेन अखण्डितप्रातिपदिकभाषणात् । * नाम च इत्यादिना तत्सूच्यते ।

ईदृशानां प्रयोगाणामबहिष्कारसिद्धये । बहुधा बहुलादीनामष्टाध्याय्यामुपक्रमः ॥ ५३ ॥
नानाव्याकरणाभिज्ञबहुविद्वत्परिग्रहे । शब्दासाधुत्वमाहुर्ये शाब्दिकांस्तान् मन्महे ॥ ५४ ॥
विशिष्टोक्त्यनुसारेण व्युत्पत्तिः स्मर्यते बुधैः । अविगीतप्रयोगेषु विगानं नैव सांप्रतम् ॥ ५५ ॥

भङ्गशब्दो नात्यन्तिकलयग्राही, रक्षाशब्देन तदुक्तेः; प्रयोजनस्यापि विषयवत्पृथग्वक्तव्यत्वाच्च । अतः * जगज्जन्मस्थितिध्वंसमहानन्दैकहेतवे इत्यादिष्विव ब्राह्मणपरिव्राज्नीत्यात्र प्रथगुक्तिः । विनतेत्यादौ इन्द्रादिशरीरकतया बन्धरूपकाम्यफलप्रदत्वमात्रं वदतामपि स्थेमशब्दे रक्षाशब्दे च सङ्कोचः स्यादेव । अत एवादिशब्दसमानाधिकरणजन्माद्यन्यपदार्थविशेषतयापि न मोक्षसंग्रह उचित इत्याहुराचार्याः, विशेषस्फौट्याभावात् । अतैव पुराणार्थोक्तौ * जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलीलमिति स्वोके सति परोक्तस्य विप्रकृष्टस्वोक्तस्य स्वप्रबन्धान्तरोक्तस्य वानुरोधायोगाज्जन्मादित्रयोपयुक्ततमतत्सहाम्नातानुप्रवेशादीनामपि तैः संग्रहणौचित्यात्तेषामार्थत्वादपि शाब्दत्वस्य परत्वाच्च । अस्वाधीनसहकारिनैरपेक्ष्यं चानेन भगवतः सिध्यति ।

स्वकार्यस्यास्य जन्मादेः स्वलीलात्वोक्तिशक्तितः । स्यामित्याद्युक्तरीत्यैवोपादानत्वं च सूचितम् ॥ ५६
नृत्यन्तं पश्यतां नृत्तं न लीला किंतु तद्दृशिः । देहद्वाराऽत्र तन्निष्ठं लीला जन्मादिकं भवेत् ॥ ५७ ॥
अवस्थान्तरयोगित्वमुपादानत्वमूचिरे । आगन्तुकापृथक्सिद्धधर्मोऽवस्थेति कीर्त्यते ॥ ५८ ॥
अचिज्जीवस्वधीद्वारा स्वरूपेण च सर्वगे । अवस्थाः सन्त्यदोषास्ते निर्विकारोक्तिरन्यतः ॥ ५९ ॥

एतदर्थं चात्रान्तःप्रवेशाद्युक्तिः । ततोऽन्यस्य तच्छरीरत्वव्यक्तेः प्रधानादिक्षेत्रज्ञशरीरकः स एव जन्मादिलील इत्युक्तं भवति ।

सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकम् । इति चैतदभिप्रायमाहुस्त्रय्यन्तपारगाः ॥ ६० ॥

न चात्र विवक्षितनिष्कर्षभुवनशब्दवृत्तिविरोधः, * स्वतन्त्रभूतचेष्टालीलः इत्यादिवदुपपत्तेः । * भुवनानि विष्णुरित्यादिवदनिष्कर्षेण विशेष्यपर्यन्तत्वेऽप्यविरोधः । तथा च विवरणम्— * भुवनशब्दः सजीवात्मकाचिदभिप्रायः, कारणवाक्येषु तथैव कारणत्वप्रतीतेः । ब्रह्म तु पृथङ् निर्दिश्यते । यद्वा विशिष्टं ब्रह्मशब्दार्थः, तत एव— इति । ये चान्येऽप्यर्थाः तात्पर्यतूलिकोक्ताः— * कार्यत्वाज्जन्मादिषु लीलाशब्दोपचारः । जन्मादिकार्यत्वाज्जन्मादिभूता लीला यस्येति वा, भुवनजन्मादिषु लीला यस्येति व्यधिकरणबहुव्रीहिर्वा, जन्मस्थेमभङ्गानामादिभूता लीला यस्येति तत्पुरुषगर्भबहुव्रीहिर्वा इति, ते तु प्रधानार्थे प्रोक्तेऽप्यविरुद्धतया वैभवादुक्ताः ।

एवं जन्मादिशब्देन तद्धेतुरुपलक्ष्यते । यद्वा जन्मादिका लीला यस्येत्यर्थद्वयं मतम् ॥ ६१ ॥
किंचिदिष्टमनुद्दिश्य न प्रवर्तेत चेतनः । तच्चात्रार्थस्य नेत्येतल्लीलोक्त्याऽत्र निवार्यते ॥ ६२ ॥
यद्यदेष्टं तदा तस्य सिद्धिरस्याप्तकामता । नातः क्षेप्यो यथालोकं साध्यलीलान्वितः श्रुतः ॥ ६३ ॥
यत्पूर्णमद इत्यादि तदप्युक्तं न बाधते । प्रत्युतानुगुणं तस्य स्वतोऽन्येन च पूर्णतः ॥ ६४ ॥

अस्यापि प्रयोजनान्तरनिरपेक्षस्वच्छन्दव्यापारव्यक्त्यै * बालः क्रीडनकैरिवेति दृष्टान्तः । तदभिप्रायं तु सूत्रम् ॐ लोकवत्तु लीला इत्यादि । हेतुत्वोक्त्याऽपि समन्वयलक्षणार्थः सिध्येत् । लीलाशब्दस्तु स्थालीपुलाकन्यायादविरोधलक्षणार्थोपलक्षणः । अनेन स्वबुद्धिपूर्वकस्वप्रीत्यर्थव्यापारवाचिना कर्तृत्वं चोपादानत्वाविरुद्धं व्यञ्जितम् । सूक्ष्मप्रकृति-

विशिष्टतयोपादानम्, संकल्पतः कर्ता च स्यात्। एवं सहकारिफलपाक्तर्यामित्या सहकारिफलपीति निर्वाह्यम्। विनताश्रयत्वव्यतिरिक्ताकारेण कार्वोपयुक्तं हि निमित्तम्; न तूपादानादभ्यदेव। उभयाभिप्रायेण हि कारणकार्ययोरेकाद्वितीयशब्दौ। * सोऽभिध्याय इत्यादिभिश्चैतदुपबृंहितम्। विनतादिव्रातान्तं साधनलक्षणार्थपरम्। ततोऽत्र गतिर्मार्गसी यथाविधि प्रहृता गुणोपसंहारपादोक्ततत्तद्विद्यारूपा। विशब्दस्तु नानार्थः, तद्वन्तो विनताः; पूर्वपादद्वयसिद्धवैराग्यादिवैशिष्ट्यपरो वा विशब्दः। विनतानां वैविध्यं विद्याङ्गपादोक्ताश्रमादिभेदात्; * तदुपर्यपीत्यादयुक्तदेवादिभेदोऽप्यत्र द्रष्टव्यः। भूतशब्दस्तापत्रयहतेः तन्निवृत्त्युपायपाटवस्य च हेतुना देहविशेषेण योगमभिप्रयत्नर्थित्वादिकं व्यनक्ति। धात्वंशश्च * सन्तमेनं ततो विदुरित्यादयुक्तां शुद्धधीवैशिष्ट्यरूपां सत्तामाचष्टे; * अत्र ब्रह्म समश्नुते इत्यधीतां ब्रह्मनिर्वेशालिकां वा। भूतसंबन्धी व्रातोऽत्र तानि तदीयानि च, षष्ठ्या संबन्धसामान्योक्तेः; अन्यथा व्रातशब्दनैरपेक्ष्यात्। न ह्यत्र सत्रवत्संहतानामेव प्रवृत्तिः फलावाप्तिर्वा। साकेतनिवासिवत्फल्लाभस्तु न सार्वत्रिकः। तदत्र * नास्यावरपुरुषाः क्षीयन्ते; * नास्याब्रह्मवित्कुले भवति; * पशुर्मनुष्यः पक्षी वा इत्यादि विस्पाष्टयम्। राजपरिषदित्यादौ हि राजा चान्ये च विवक्ष्यन्ते। विविधशब्देन पशुपुत्रान्नाद्यस्वर्गस्वाराज्यादितत्तत्फलकामकर्तृवैविध्यम्, व्रातोक्त्या तत्तदुपायनिष्ठव्यक्तिभूयस्त्वं विवक्षितमिति केचित्। अयं च वैभववाद इत्यनुमन्यामहे। आहुश्च—

* सर्वव्याख्याविकल्पानां त्रयमिष्टं प्रयोजनम्। पूर्वतापरितोषो वा विषयव्याप्तिरेव वा ॥ इति।

फलाध्यायक्रमेणात्र परप्राप्तिविरोधिनाम्। शमनं निग्रहादीनां रक्षाशब्देन गृह्यते ॥ ६५ ॥
प्रत्यूहात्यन्तभङ्गे तु स्वतः प्राप्तं सुखादिकम्। यावत्स्वरूपं तत्प्राप्तं तत्संसिद्धिरिहार्थतः ॥ ६६ ॥
यद्वाऽभीष्टार्थदानं च रक्षेति परिगृह्यते। तदलाभनिमित्ताद्धि विषादात्त्रायते यतः ॥ ६७ ॥
प्रयासानतिरेकेण फलाधिक्कृतिर्नीतितः। चतुर्विधानां भक्तानां रक्षोक्तिश्च न दुष्यति ॥ ६८ ॥

आनन्दयितृत्वश्रुतिसूत्रे चात्र भाष्ये। एकशब्द इह प्रधानार्थः। * अप्यहं जीवितं जह्यामित्यादिषु तद्विरोधे तद्विपरीतार्भीष्टतमकृत्यत्यागोक्तेः। अनन्येषु प्रमाद्यत्स्वपि निरयादिपापकनिग्रहनिवृत्त्यर्थो वा, तेषां यमविषयगमनादिनिषेधात्। दृश्यते हि— * न खलु भागवता यमविषयं गच्छन्तीति। * इहैवैषां केचिदुपद्रुत्वा भवन्ति इति शिक्षामात्रान्नानाच्च। दीक्षा दृढसंकल्पः, * न त्यजेयम् * एतद्व्रतं मम इत्याद्युक्तेः। दीक्षोक्त्या स्वार्थत्वं च सूचितम्। राजार्थे खलु रथतुरगगजादिसंरक्षणम्। रक्षायामेका दीक्षा यस्येति व्यधिकरणबहुव्रीहिः; रक्षायां वा दीक्षाकार्यत्वात्तदुपचारः। रक्षायामेकदीक्ष इति वा योज्यम्।

दृष्टमन्यापराधे हि दण्डनं खण्डनादिकम्। राजपुत्रापराधे हि दण्डनं लघु दृश्यते ॥ ६९ ॥

फलसाधनतया चोदितस्याप्यर्थं फलप्रदप्राधान्यं सिद्ध्यति।

राजानः फलदा राजपरिचर्याविधायिनाम्। फलप्रदस्य प्राधान्यं फलात्तद्वगम्यते ॥ ७० ॥

विनतारक्षोक्त्या तत्सहगीतदुष्कृतनिग्रहव्यञ्जनानिवर्त्यो बन्धहेतुः कर्मादिः स्थापितः; अत एव वैषम्यनैर्घृण्यपरिहारश्च। श्रुतिशब्दो निरपेक्षसंमतिपत्तिन्यायानित्यं श्रूयमाणे वेदे रूढः। * सिद्धे शब्दार्थसंबन्धे इत्यादौ चैवं प्राहुरित्युक्तम्। तेन वक्तृदोषाभावसिद्धिः। साधितं च सर्वाधपादे वेदानां प्रामाण्यम्, कारणदोषबाधकप्रत्ययोरभावेन कर्तुश्च तेषामनुमातुमशक्यत्वात्, कल्पादिष्वपि यथापूर्वं प्रादुष्करणात्, काठकादिसमाख्यानां कर्तृविशेषोपस्थापक-

त्वाभावाच्च । शिरः ब्रह्मप्रधानतयोत्तमो भागः । दीप्तिः स्फूर्तिः । सा पुनराद्याधिकरणोक्तसिद्धार्थव्युत्पत्तेः । विशब्दोक्तं वैशिष्ट्यं त्वन्यदेवतोक्तिराहित्यम् । * तदेवाग्निः इत्यादिनाग्न्यादिशब्दानां शरीरिणि पर्यवसानम्, जन्मादिसमन्वयसूत्रोक्तकारणत्वस्वतःपुरुषार्थत्वाभ्यां व्यावृत्तिश्चात्र विवक्ष्यते । मानविशेषोक्त्या विशेषनिषेधन्यायेन तृतीयसूत्रार्थः सिद्ध्यति । एवमिह न्यायसुदर्शने संग्रहः—

* व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्यमन्येन सिद्धत्वमथाफलत्वम् । एतानि वै सूत्रचतुष्टयेनानारम्भमूलानि निराकृतानि ॥ इति न्यायसंग्रहे च तथैव सेनेश्वराचार्याः—

*व्युत्पत्त्यभावात्प्रतिपत्तिदौस्थ्यादन्येन सिद्धेरफलत्वतश्च । अमात्वमाशङ्क्य निराचकार न्यायैश्चतुर्भिः प्रतिपाद्य तत्तत् ॥ इति ।

एतेन * को धर्मः इत्यादिवत् किं ब्रह्मेत्यादिविचारपर्यन्तफलरूपप्रमितिवैशिष्ट्यमुक्तम् । ननु यदि ब्रह्मशब्दोऽत्र सामान्यवाची, तदा श्रीनिवासशब्देन विशेष्येत । नैवमसौ, * तस्मादन्यत्र औपचारिकः इत्यत्रैव स्थापनात् ; जन्मादिसूत्रे * निरतिशयबृहद्बृंहणं च ब्रह्मेति निर्वचनोक्तेः ; कारणत्वाधिकरणे च— * ब्रह्मशब्दस्य परमात्मासाधारणत्वेऽपि प्रत्यगात्मन्यपि कदाचिदुपचरितप्रयोगदर्शनात् इत्यादि ; वियदधिकरणे च सूत्रम्— * स्याच्चैकस्य ब्रह्मशब्दवत् इति; तत्र च भाष्यम्— * यथा ब्रह्मशब्दः 'तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते' इत्यत्र प्रधाने गौणतया प्रयुक्तस्तस्मिन्नेव प्रकरणे 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते' इति ब्रह्मणि मुख्यतया प्रयुज्यते तद्वत् इति । * परं जैमिनिर्मुख्यत्वात् इत्यत्र चैवं भाष्यम्— * ब्रह्मशब्दस्य परस्मिन्नेव ब्रह्मणि मुख्यत्वात् इति । नापि परशब्दवदौपचारिकप्रयोगव्यवच्छेदार्थोऽत्र विशेषकः श्रीनिवासशब्दः, परस्मिन्नित्यनेनैव पर्याप्तेः । नाप्येकत्र रूढत्वेऽप्यप्रसिद्धतया पर्यायेण बोधनम्, तदयोगात् ; न ह्यत्र कोकिलः पिक इतिवदन्वयः, असामर्थ्याद्वाक्यभेदाच्च ; न च तद्युक्तम्, * संभवत्येकवाक्यत्वे वाक्यमेदस्तु नेष्यते इति न्यायात् । श्रीनिवास इति नाम, अन्यस्तु त्यक्तरूढियोगतो विशेषक इति चायुक्तम् ; अस्खिलेत्यादिना गतार्थत्वात् । अथ च सामान्यवाची ब्रह्मशब्दः क्वचित् भाति, समन्वयसूत्रे तावत्सद्ब्रह्मादिशब्दानामुत्तरोत्तरविशेषकत्वाभिप्रायेण समभिव्याहारः । आकाशाधिकरणेऽपि— * सदादिशब्दाः साधारणाकाराः इत्युक्तम् । आरम्भणाधिकरणेऽपि— * सद्ब्रह्मादिशब्दास्तुल्यप्रकरणस्थास्तत्तुल्यप्रकरणस्थेन नारायणशब्देन विशेषितास्तमेव गमयन्ति इति । पाशुपताधिकरणेऽपि— * सृष्टिवाक्यादितं स्रष्टारं नारायणमेव समानप्रकरणस्थाः सदेव सौम्येदमग्र आसीदित्यादिसद्ब्रह्मादिशब्दाः प्रतिपादयन्ति इति । अतः कथमेतत् ? इत्थं—प्रत्यक्षितग्रन्थस्थे परस्परविरोधे तात्पर्यतस्तावद्विरोधो निवार्यः । या ब्रह्मशब्दस्य परमात्मन्येव रूढिरादावेव स्थापिता सैव सर्वत्रेष्टा ; साधारण्यानुक्तिस्तु बहुश्रुत्यादिप्रयोगदृष्ट्या कुदृष्टिवादिविप्रतिपत्त्या चात्मादिशब्दवज्जातिशब्दत्वं योगमात्रमनेकरूढिं वा पश्यतामाभिमानिकं साधारण्यमन्वारुह्य तदिष्टान्यार्थत्वशङ्कानिरासाय स्यात् । तथा च— * ब्रह्मणि इति सामान्यशब्दः, * श्रीनिवासे इति विशेषशब्दः इति व्याख्यानेष्वप्येवं गतिः । तथाऽत्र साधारण्यान्वारोहेण श्रीनिवास इति विशेषनिष्कर्षः स्यात् । यद्वा— ब्रह्मशब्दस्यैकरूढिमनुरुध्यैव तदेव श्रीनिवासशब्देन विशेष्यते ; या सर्वैराश्रीयते सा च तदाश्रयेति । अत एवात्र छागपशुन्यायोऽभिप्रेतः । अन्यथा चतुर्भुजत्वादित्वमप्याशङ्क्येत । अत एव * ह्रीश्च ते लक्ष्मीश्च पत्न्यौ इति परतत्त्वासाधारणपुरुषशब्दार्थोऽपि श्रियः पतित्वेन विशेष्यते । तेन कारणत्वादिभिरिव परस्मिन्ब्रह्मशब्दरूढिः स्थापिता स्यात् । प्रसिद्धतमनामान्तरवाच्यत्व-

लक्षणान्वयः, श्रीनिवासशब्दार्थे ब्रह्मणीति । श्रीनिवासस्य वा परत्वसिद्धये प्रकृताकारबृहत्त्वनिमित्तब्रह्मशब्दवाच्यत्वं विशेषणीकार्यमिति । सत्यत्वादिस्वरूपनिरूपकधर्मपञ्चकनिरूपितमपि परं ब्रह्म श्रीनिवासत्वेन विशेषितमेव ब्रह्मविद्यावेद्यमित्युक्तं भवति । श्रीसंश्रयणं नित्यं स्वरूपवन्मूर्त्याऽपि, * श्रीवत्सवक्षा नित्यश्रीः इत्यभिधानात् । अत * शान्तानन्त इत्यादिकमनुसन्धेयम् । एतेन पर्यङ्कविद्यादिप्रसिद्धविभूत्यन्तरवत्त्वं च । भवत्वित्याशिषा प्राप्यान्तरेभ्यः स्वादुतमोऽयमुपाय इति व्यज्यते । यथोक्तम्—

* क नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् । क जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥ इति ।

मम • सोऽहं भगवः शोचामि इत्याद्युक्तावस्थस्येति भावः । **परस्मिन्** सर्वनियन्तृत्वनिरुपाधिकानन्दयितृत्वाभ्यां • सा काष्ठा सा परा गतिः इत्यानातवशीकार्यत्वप्राप्यत्वकाष्ठाभूते । प्राप्यत्वोक्त्या * रसैकेवायं इत्यादिसिद्धमुक्तावस्थाशोधनं च ; सृष्ट्याद्युपयुक्तसार्वज्ञ्यादिकृत्स्नोत्कर्षपरमसीमत्वं वा परत्वम् । एवं परत्वसौलभ्याभ्यामभिगम्यं सिद्धप्राप्यादिरूपं भजनीयं विशोधितम् ।

परत्वं सुलभत्वेन रहितं नोपकारकम् । सुलभत्वं तथा तेन रहितं नोपकारकम् ॥ ७१ ॥

साध्योपायशोधने तु—

भक्तेः पूजादिमात्रत्वं धियश्चिन्तादिरूपताम् । व्यवच्छेत्तुमिह न्यस्तं शेमुष्यादिपदद्वयम् ॥ ७२ ॥

वेदनादिशब्दानां पश्चादिनीत्या वक्ष्यमाणाया विशेषविश्रान्तेः संग्रहोऽयम्— **शेमुषीति** ; शमाधङ्किकां बुद्धिं दर्शयति, महनीयविषयप्रीतिः भक्तिः, प्रीतिश्च धीविशेषः ; यादृश्या धिया सा साध्या परेष्टा, तादृश्या एव तत्त्वं युक्तम् ; तदुक्तं भक्तिमेवाधिकृत्य वेदार्थसंग्रहे— * विषयविशेषेण विशेषितं ज्ञानं सुखस्य जनकमित्यभिमतम् ; तद्विषयं ज्ञानमेव सुखम् ; तदतिरेकि पदार्थान्तरं नोपलभ्यते । तेनैव सुखित्वव्यवहारोपपत्तेश्च इति । • स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते इति च ।

आपादचूडं शास्त्रार्थ इत्थमत्रानुवर्णितः । प्रसिद्धिरवधित्सायां यथास्थानं भविष्यसि ॥ ७३ ॥

एवं शास्त्रार्थोऽनुक्रान्तः । विशेषतश्चोभयलिङ्गपादगत्या ध्येयं शोध्यते— पूर्वद्विकसिद्धेऽपि ब्रह्मतत्त्वे पुनः तत्प्रभावविशेषस्थापनातिशयात्पादो ह्ययमुपयुक्ततमः, अनन्योपासिसिषातिशयहेतुत्वात् । अतत्यब्रह्मगुणविशेषाकारवादैरनन्तरपादे विद्यानान्त्वोक्तेश्च । तदिहाखिलेत्यादिना स्वप्नप्रपञ्चादेरपि जन्मादिहेतुत्वेन परत्वातिशयोक्त्या, सन्ध्याद्यधिकरणचतुष्टयाभिप्रेतं क्षेत्रिणां स्वप्नसुषुप्त्यादेः कारणं परस्याकुण्ठितविचित्रशक्तित्वं व्यञ्जितम् । * विदीसे श्रीनिवासे इति पदाभ्यां मिथोऽनुपमर्दव्यावृत्तिविधिरूपविशेषणवर्गोपलक्षणात् * न स्थानतोऽपि परस्य इत्युक्तपरशब्दोपादानाच्चोभयलिङ्गाधिकियार्थ उदाहृतः । चिदचिदनुप्रवेशादिसंग्राहकादिशब्दात् लीलाशब्दसामर्थ्याच्चांशतोऽपि स्वस्य स्वयमेवाज्ञत्वापादनशङ्काप्रतिक्षेपादहिकुण्डलाधिकरणोक्तं स्मारितम् । परस्मिन्निति कारणस्यैवात्र परत्वोक्त्या • परमतः इत्यधिकरणार्थोऽपि व्यापितः । विनतेत्यादिना • फलमतः इत्युक्तं दर्शितम् । शेषेणार्थसिद्धोपासिसिषासूचनमिति । प्रकारान्तरेणापि ध्येयमिह शोध्यते—

पूर्वं द्विलिङ्गपादस्य प्रक्रिया परिशोधिता । नारायणानुवाकादिनिर्णीतार्थस्त्विहोच्यते ॥ ७४ ॥

अत्र खखिलेत्यादिना सर्वकारणत्वम्, विनतेत्यादिना मोक्षार्थसर्वविद्यावेद्यत्वम्, * श्रुतिशिरसि विदीसे इत्यनेन

सर्वोपनिषदेकप्रतिपाद्यत्वं च परस्य ब्रह्मण उक्त्वा तस्य श्रीनिवासत्वं च वदतोऽयं भावः— * कारणं तु ध्येयः इत्यादिषु सर्वकारणमेव मुमुक्षोर्ध्येयं श्रुतम्; तदेव सद्ब्रह्मादिशब्दैरुक्तम्; ते च न भिन्नविषयाः; सर्वत्र जगत्कारणस्यैकत्वोक्त्या विकल्पसमुच्चयायोगात्, कृत्स्नवेदप्रामाण्ये निश्चिते सर्वेषामन्यतमस्य त्यागायोगाच्च; अन्यथा विबधघट-न्यायेन इतरप्रहाणायोगाच्च; अत एकविषयत्वे सिद्धे ब्रह्मेशानादिनिषेधयुक्तभूयिष्ठाबाधितार्थसात्त्विकबहूपबृंहणानुगुण-महोपनिषत्पठितानन्यसाधारणरूढ्यास्पदनारायणशब्दोक्तश्रीपतिरेव सदादिशब्दार्थः। कारणविषयपरविद्योपास्यनिर्धारणं च नारायणानुवाकविषयलिङ्गभूयस्त्वाधिकरणसिद्धम्; सर्वेषां च कारणवाक्यानां सर्ववेदपठितपुंसूक्तैकार्थ्यं युक्तम्; तत्प्रतिपाद्यश्च श्रीपतिरित्युत्तरानुवाकसिद्धम्; कारणविषयहिरण्यगर्भशब्दस्य * अग्र्यः संभूतो हिरण्यगर्भ इत्यष्टौ इति श्रुत्यैव श्रीपतिविषयत्वं दर्शितम्। एवं पुंसूक्तशब्दार्थसंज्ञया श्वेताश्वतरोपनिषदादयोऽपि व्याख्याताः। अतः * सर्वे वेदा यत्रैकं भवन्ति, * वेदैश्च सर्वैरहमेव वेद्यः इत्यादिसिद्धमिह स्थापितम्। अत एव पुरुषनारायणोत्तरनारायण-नारायणानुवाकानामैककण्ठ्येन श्रीनिवासे ब्रह्मणीति श्रीनिवास एव ब्रह्मशब्दार्थः।

परपक्षनिरासश्च कृतश्शास्त्रैकदेशतः। व्यज्यतेऽस्मिन्पदैस्तैस्तैः पद्ये शास्त्रार्थसंग्रहे ॥ ७५ ॥
व्यनक्त्यखिलशब्दोऽत्र चिदचिद्भेदसत्यताम्। एकस्मिन्नपि तद्व्यक्तिभागभेदव्यपेक्षया ॥ ७६ ॥
अर्थेन्द्रियगतैस्तद्वदुभयानुभयाश्रितैः। विना दोषैरिहाध्यक्षं बाध्यमिच्छन्स्वधीहतः ॥ ७७ ॥
भेदमत्यत्वपक्षस्य भेदमिथ्यात्वपक्षतः। विभागो यदि मिथ्या स्याद्व्याहतिः सर्वतोमुखी ॥ ७८ ॥
अनन्यपरवाक्योक्तविभूतिगुणविग्रहान्। अबाधित्वैव नेतव्या नेति नेत्यादयः प्रभौ ॥ ७९ ॥
श्रुतिस्तु नित्यनिर्दोषा स्वतःप्रामाण्यशालिनी। अलौकिकेऽर्थे न क्षेप्या स्वेष्टदूराद्भुतोक्तिवत् ॥ ८० ॥
मिथोऽशानां सशेषैश्च शेषस्यैक्यं निगृह्णती। अखिलोक्तिरनेकान्तवादानपि विलुम्पति ॥ ८१ ॥
विश्वमेतदनेकान्तं वदतो विहतित्यजः। न साध्यदृष्यसिद्धान्तरागद्वेषादिसंभवः ॥ ८२ ॥
नञ्प्रयोगश्च सार्थोऽसौ यथाव्युत्पत्तिबोधकः। अभावस्यानुपाख्यत्वं हन्ति निर्बाधबोधतः ॥ ८३ ॥
भावान्तरमभावोऽसौ पदार्थान्तरमेव वा। द्विधापि निःस्वभावत्वं तत्स्वभावे कथं भवेत् ॥ ८४ ॥
चतुर्विधाणुमनसामाकाशादेश्च नित्यताम्। अस्यत्यखिलजन्मोक्त्या नित्यमन्यत्तु शास्त्रतः ॥ ८५ ॥
सज्जायेतेति कण्ठोक्तकार्यसत्त्वापलापिनः। सत्तार्थधातुनिष्पन्नभुवनोक्त्या निराकृताः ॥ ८६ ॥
सदसत्कोटिनिर्मुक्तकल्पना हि निरर्थिका। सदसद्रूपपक्षोक्तविरोधस्यात्रिशेषतः ॥ ८७ ॥
भावाभावविकल्पे तु कोव्यन्तरमसंभवि। व्यक्त्यध्यासविसृष्ट्यादिं विकारेषु विवक्षताम्।
जन्मव्याहरणाद्बाधः कृतश्श्रुत्यादिदर्शितात् ॥ ८८ ॥ अभिव्यक्तेरनादित्वे कारकाणामनर्थता ॥ ८९ ॥
तदागन्तुकतामिच्छन् किं नान्यत्रैवमिच्छति। विसृष्टिः क्वचिदिष्टैव विकासोऽपि दशान्तरम् ॥ ९० ॥
विकासतद्वतोरैक्ये व्याघातस्सांख्यपक्षवत्। एक एव निमित्तं चोपादानं चेति सूचनात् ॥ ९१ ॥
योगवैशेषिकाद्युक्तं युक्त्याभासमभाषत। कर्ता स्वपरसंयोगे समवायी च विश्वकृत् ॥ ९२ ॥
न च कर्म्मसु संयोगं नित्यं भौतेषु भावयेत्। जनयन्त्वसुखादीनि दृष्टो जीवोऽपि तत्र च ॥ ९३ ॥
कर्तृत्वसमवायित्वे काणादैरपि दुस्त्यजे।

बहु स्यामिति मन्तुश्च विकारः परिकल्पितः । शरीरद्वारतस्सृष्टेस्सूचनात्प्रत्यरुध्यत ॥ ९४ ॥
क्रमाज्जन्मादि सर्वेषामेकतस्तदितीरणात् । क्षणभङ्गः प्रवाहेशपक्षश्चात्र पराकृतः ॥ ९५ ॥
स्थिरापेक्षा ह्यनुमितिस्स्थिराभावं न साधयेत् । न च प्रत्यक्षमक्षोत्थप्रत्यक्षान्तरबाधतः ॥ ९६ ॥
सर्गप्रलयवादानामान्यपर्यान्मृषार्थता । अर्धलोकायतारूढैरुक्ताप्यत्र बहिष्कृता ॥ ९७ ॥
अनुप्रवेशादि वदन्निराचक्रे यथाश्रुति । सामानाधिकरण्यस्य बाधैक्यादिप्रयुक्तताम् ॥ ९८ ॥
विशिष्टविषयानेकसामानाधिकरण्यतः । निर्भेदैकार्थतां तस्य वदन्त इह वारिताः ॥ ९९ ॥
चार्वाकादिमतं चात्र हेत्वाद्युक्त्या निवर्तितम् । निरानन्दोक्तिपक्षश्च सलीलत्वेन खण्डितः ॥ १०० ॥
निरीश्वरजगत्सर्गश्शब्दादेश्च तदुद्भवः । निर्व्यापारेशपक्षश्च तत एव न्यषिध्यत ॥ १०१ ॥
बहुश्रुत्यादिसिद्धत्वाद्बाधलेशविमुक्तया । लीलोक्त्यैवैक्यपक्षेषु स्रष्टृत्वायोग उच्यते ॥ १०२ ॥
सङ्कल्पाध्यसनं तावन्न विकल्पं सहेदिह । अचेतनतया नित्यमविद्यावृत्तिमात्रयोः ॥ १०३ ॥
व्यंशसद्ब्रह्मवादे च सुषुप्तस्येशितुस्तदा । अचिज्जीवसमानस्य न लीलोद्यमसंभवः(भ्रमः) ॥ १०४ ॥
नित्यसर्वज्ञताश्रुत्या सुषुप्तिश्चास्य बाधिता । कालाधीनप्रबोधादेरनैश्वर्यं च दुस्त्यजम् ॥ १०५ ॥
सुषुप्तिश्च प्रबोधश्च प्राक्सङ्कल्पादिति त्वसत् । अनन्तानुभवानन्दजिहासानुपपत्तितः ॥ १०६ ॥
नाचित्सङ्कल्पयेन्नापि जीवोऽसिद्धेन्द्रियादिकः । ईश्वरश्शान्तनिद्रोऽपि कुर्यान्नानर्थमात्मनः ॥ १०७ ॥
नित्यप्रबुद्ध ईशांशोऽप्यतो नेदञ्चिहारवान् । भोक्तृणां स्वात्मतादात्म्यं न वेत्ति न हि सर्ववित्॥१०८॥
विनतादिपदैरत्र जीवानामितरेतरम् । ईशित्रा च स्वरूपैक्यं तत्तन्मानैः परास्यते ॥ १०९ ॥
असर्वज्ञोऽहमित्यात्मा येनाध्यक्षेण गृह्यते । सर्वज्ञैक्यमतिस्तस्य न तच्छक्त्यापि संभवेत् ॥ ११० ॥
नानात्मानो व्यवस्थात इत्यन्यैरपि सूत्रितम् । विरुद्धधर्मसंसर्गं व्यनक्ति विविधोक्तितः ॥१११॥
वर्णाद्यैर्नन्वनैविध्यादलेपकमतं हतम् । यावज्जीवं मुमुक्षोश्च तद्धर्मो निश्चलीकृतः ॥ ११२ ॥
अत्याश्रमिण्य इत्येतत्प्रशस्ताश्रमयोगतः । अलेपश्च श्रुतः पापैः प्रमादात्तैरिति स्थितिः ॥ ११३ ॥
तदुपर्यादिसूत्रोक्ता सर्वदेवैकसेव्यता । व्यञ्जिता विविधोक्त्यैव तत्तत्पारम्यनुक्तये ॥ ११४ ॥
व्रातशब्देन जीवानामानन्त्यमपि सूचयन् । इतः प्राक्सर्वमुक्तिः स्यादिति चोद्यमवारयत् ॥ ११५ ॥
आत्मानन्त्यादमुक्तानां मुक्तानामप्यनन्तता । आनन्त्यतारतम्येन सद्द्रव्यादिनयाद्भवेत् ॥ ११६ ॥
एको जीव इतः पूर्वममुक्तो हेत्वनागमात् । इति पश्यन्ननेकेषु तथात्वं किं न पश्यति ॥ ११७ ॥
मुक्तेनेतिभवत्त्वोक्त्या नित्यमुक्तिर्निराकृता । स्वरूपस्य न मुक्तित्वं सिद्धसाध्यविरोधतः ॥ ११८ ॥
क्रियातच्छब्दतत्पूर्वाद्यैः स्वर्गादीति परोदितम् । नन्वरक्षणदीक्षोक्त्या निरस्तं निगमाशया ॥ ११९ ॥
विध्यपेक्षे तु वैधार्थद्वारे श्रुत्यैव दर्शिते । श्रुतहानादिरन्याय्यो रात्रिसत्रादिनीतितः ॥ १२० ॥
नतिरक्षादिजीवेशव्यापारप्रतिपादनात् । साक्षिमात्रत्वमनयोस्तच्चदुक्तमपास्यत ॥ १२१ ॥
वेदानित्यत्ववादश्च वेदोज्जीवितपथस्तथा । अनुमेयेशपक्षश्च श्रुत्याद्युक्त्या निवारितः ॥ १२२ ॥
: सगुणत्वेन भङ्गुरत्वादि साधयन् । धर्मिग्राहकवेदान्तविदीपिव्यस्तदृष्टिकः ॥ १२३ ॥

अवेद्यत्वमवाच्यत्वमपि प्रोक्तं कुदृष्टिभिः । निगमान्तविदीप्सितनिर्देशेन निवर्तितम् ॥ १२४ ॥
उपासनाद्यनर्हं यत्तद्ब्रह्म श्रुतमित्युशन् । परस्य विद्युपास्यादिविषयत्वोक्तितो हतः ॥ १२५ ॥
न विम्वस्तीति वदतां तत्तन्मानैः प्रणुत्तये । बृहत्त्वमपरिच्छेद्यं ब्रह्मशब्देन दर्शितम् ॥ १२६ ॥
भागभेदाद्ययोगेन विभुतत्त्वस्य निह्नवे । अणुष्वपि सुदुर्वारः सर्वासत्त्वे स्ववाग्घतिः ॥ १२७ ॥
व्यतिरेकग्रहायोगाद्विभु कारणमुज्झतः । अबाध्यश्रुतिसिद्धत्वैव तत्सिद्धिं समदर्शयत् ॥ १२८ ॥
कारणत्वादिधर्माणां प्रतियोगितामपि । अकल्पनिकतां प्राह तथा तन्मानबोधनात् ॥ १२९ ॥
स्वेष्टस्वपरनिर्वाहन्यायात्तसम्बन्ध आश्रितः । नानवस्थितये नातिप्रसक्त्यै चेति भाव्यताम् ॥ १३० ॥
श्रीनिवासपदेनात्र निर्विशङ्कार्थवाचिना । त्रिमूर्तिसाम्यतादात्म्यव्यक्त्यन्तरजुषः क्षताः ॥ १३१ ॥
अन्योक्तिः परविद्यासु निरुक्त्यादेः पराश्रया । तल्लिङ्गानन्यथासिद्धौ तद्विशिष्टावलम्बिनी ॥ १३२ ॥
बाह्यैः कुदृष्टिभिश्चोक्तास्त्रिमूर्त्युत्तीर्णवस्तयः । ब्रह्मणः श्रीनिवासस्य परत्वोक्त्या पराहताः ॥ १३३ ॥
आमोति परमित्येतत्सूचयन् परशब्दतः । स्वात्मप्राप्त्यादिमात्रस्य निराचक्रेऽपवर्गताम् ॥ १३४ ॥
परानुभूतेर्नाभावो न च हासो निरंहसः । अनिश्लेषितकर्मा तु मुक्त इत्युपचर्यताम् ॥ १३५ ॥
परत्वमनवच्छिन्नं मुक्तादिभ्योऽपि हि श्रुतम् । ततः सर्वगुणात्यन्तसाम्यवादोऽप्यपोदितः ॥ १३६ ॥
एकीभावश्रुतिश्चात्र प्रकारैक्यविवक्षया । शुद्धाशुद्धाम्बुयोगे हि तादृक्त्वं श्रुतिदर्शितम् ॥ १३७ ॥
त्रय्यन्तदीप्सितामुक्त्वा भक्तेराशासनात्पुनः । शब्दतोऽप्यक्षसंवित्तेरसंभव उदाहृतः ॥ १३८ ॥
आत्मनोऽनहमर्थत्वं वदतामपनुत्तये । ममेतीरितमात्मानमहमर्थं न्यदर्शयत् ॥ १३९ ॥
शेमुष्यादिपदाभ्यां तु कर्मधीतद्विकल्पयोः । वाक्यार्थैक्यमतेश्चात्रानुपायत्वं प्रदर्शितम् ॥ १४० ॥
बोद्धृबुद्धिभिदामत्र ममकारेण दर्शयन् । विषयाग्राहिणी बुद्धिरात्मेति मतमच्छिनत् ॥ १४१ ॥
मम स्वरूपमितिवद्भेदोक्तिरुपचारतः । इत्यसद्बाधविरहान्न चेद्देहेऽपि का गतिः ॥ १४२ ॥
बाधः स्वारसिको नास्ति संविदां बोद्धृबोध्ययोः । कुतर्कैर्यदि शेमुष्या प्रतिबन्दीमसूचयत् ॥ १४३ ॥
विषयेणाश्रयेणापि स्वधर्मेणापि शेमुषीम् । विशिंषंस्तन्निराकर्तृन्निरास्थदिति मन्महे ॥ १४४ ॥
एवं तु जीवपरयोः स्वरूपैक्याभिमानिनाम् । अत्र शारीरकारम्भस्त्रयाणामुपरुध्यते ॥ १४५ ॥
मिथ्याभूतस्य बन्धस्य तत्त्वबुद्ध्यैव बाधनात् । तत्प्रधानमिदं शास्त्रमारभ्यमिति दुर्भणम् ॥ १४६ ॥
प्रमितस्यास्य सत्यस्य परमकत्या विनाशनम् । प्रतिपादयतानेन परारम्भो निवारितः ॥ १४७ ॥
न जिज्ञासेत धीरत्र ज्ञातृत्वादिप्रहाणतः । ज्ञातृभूतोऽहमर्थश्चेन्नारभेत स्वनाशनम् ॥ १४८ ॥
स्वदुःखशान्तये कश्चित्स्वनाशं मूढ इच्छति । न तथात्र गतक्लेशस्वात्मस्थितिसमर्थनात् ॥ १४९ ॥
इत्थं ब्रह्मप्रतिच्छन्दजीवपक्षेऽपि दूषणम् । ईश्वरोऽपि न जिज्ञासुः सार्वज्ञ्याध्याससंमतेः ॥ १५० ॥
भावाभावात्मकाशेषविशेषोज्झितवर्ष्मणः । जिज्ञासाकर्मतापात्र विशिष्टोक्त्यैव बाधिता ॥ १५१ ॥
विषयत्वप्रहाणाच्च जिज्ञास्यत्वं विहन्यते । न शास्त्रोपहिते चिन्ता न च सा भ्रान्तिशान्तिकृत् ॥१५२॥
अवेद्ये हि न जिज्ञासा सा चेत्कथमवेक्षता । न च कोटिद्वयोन्मुक्तं किञ्चित्स्याद्वस्त्वहंतत्वतः ॥१५३॥

ज्ञेयत्वे चात्मता न स्याद्घटादिवदिति त्वसत् । सहदृष्टेर्द्वयोर्वह्नेर्वस्तुत्वोष्णत्वयोरिव ॥ १५४ ॥
कर्मकर्तृविरोधश्च स्वदृष्टौ भङ्गगुम्भितः । न हि दृष्टे विरुद्धत्वं न दृष्टिश्शक्यनिह्नवा ॥ १५५ ॥
अवेद्यमिति वेद्यत्वे वेद्यत्वं स्वीकृतं भवेत् । अवेद्यमित्यवेद्यत्वे वेद्यत्वमनपोदितम् ॥ १५६ ॥
अवाच्यमित्यवाच्यत्वे वाच्यत्वेऽपि च वस्तुनः । वाच्यतैव भवेत्तस्य वाच्यावाच्यत्वचोऽन्वयात् ॥१५७॥
प्रोवाचावचनेत्याद्या उक्तयश्च परात्मनः । अपरिच्छेद्यतार्थास्युर्न चेत्स्वोक्त्यादिभिः क्षतिः ॥ १५८ ॥
ज्ञानत्वाज्ज्ञेयता नास्ति ज्ञातृताप्यात्मनस्त्विति । दृष्टश्रुतिविनिर्धूतं ज्ञानत्वं तु स्वभासनात् ॥ १५९ ॥
किंच श्रुतिशिरस्येव विदीमिति वदता विभोः । परेषां व्यज्यतेऽर्थेषु त्रय्यन्तनिरपेक्षता ॥ १६० ॥
स्वप्रकाशा मतिर्धीत्वाद्दृश्यत्वाद्विमतं मृषा । इत्याद्यैरेव सिद्धेऽर्थे कृतं त्रय्यन्तचिन्तया ॥ १६१ ॥
सगुणोपासनादीनां सिद्ध्यै तच्चिन्तनं यदि । तच्चेद्द्वैतधीसिद्ध्यै तद्वृथा तद्विरोधतः ॥ १६२ ॥
फलान्तरार्थं तच्चिन्ता यदीष्येत तथा सति । मोक्षप्रधानशास्त्रत्वं गतं शारीरकस्य ते ॥ १६३ ॥
श्रुतिवाक्यप्रमुखता धीर्बाधिका नानुमानिकी । इति वक्तुं न ते शक्यमदृष्टस्यानपेक्षणात् ॥ १६४ ॥
अनुमानाच्च वाक्याच्च रज्जुसर्पादिविभ्रमे । अविशेषेण बाधो हि दृष्टस्तद्वदिहास्तु ते ॥ १६५ ॥
प्रत्यक्षं शब्दजन्यं च दुस्साधं निष्फलं च ते । परोक्षादपि शब्दार्थात् क्वचिद् बाधस्य सम्मतेः ॥१६६॥
न चानुमानाशक्तस्य वाक्यमित्यपि युज्यते । सर्वमानान्तरानर्हं शास्त्रमानत्वसाधनात् ॥ १६७ ॥
अनेकनियमोपेतवाक्यचिन्ताविधेर्वरम् । लोकदृष्ट्यनुसारेण श्रुतादेश्च क्षमानुमा ॥ १६८ ॥
ज्ञातेदृशानुमानानां भ्रान्तिर्न भ्रश्यतीति चेत् । ज्ञाततादृशवाक्यानां समं तत्संभ्रमादने ॥ १६९ ॥
द्वैताद्वैतमतेऽप्येवमारम्भोऽनुपपत्तिमान् । न हि सर्वविदश्चिन्त्यं जीवस्य न तदैक्यतः ॥ १७० ॥
उपाधितः स्वतो वात्र भेदे सत्यपि किं भवेत् । रामादिभेदाद्द्वैषम्यं सर्वज्ञैक्यसमत्वतः ॥ १७१ ॥
सर्वेषु चावतारेषु नित्यं सर्वार्थवेदिनः । सुषुप्तिभ्रमदुःस्थत्वं प्राहुश्शैलूषनीतितः ॥ १७२ ॥
इच्छया संसृतिश्चापि न शक्यमिति भाषितुम् । परेच्छा तत्र जीवेच्छा तन्मूलश्च भवो यतः ॥१७३॥
ज्ञातस्वजीवतादात्म्यः शक्तश्चेत्प्रसहेद्भवम् । अशक्तो यदि मोक्षार्थं जिज्ञासेत कथं परम् ॥ १७४ ॥
अतो जीवेशयोर्भेदमभेदस्पर्शवर्जितम् । बभाषे नन्त्वनन्तव्यरक्ष्यरक्षकतादिभिः ॥ १७५ ॥
इत्थं निवारितो भेदाभेदवादविधायिनोः । द्वयोरपि च शास्त्रस्य प्रारम्भः प्रातिकूल्यतः ॥ १७६ ॥
स्वमते तु स्वरक्षार्थविशिष्टविषयोत्थितेः । निश्शेषमिह निर्धूताः शास्त्रानारम्भहेतवः ॥ १७७ ॥
ज्ञातमज्ञातमपि वा न जिज्ञास्यमिति त्वसत् । विदिताविदिताकारभेदेनैवोपवर्णनात् ॥ १७८ ॥
सिद्धं धर्मिणमुद्दिश्य साध्यधर्मविधानतः । इत्थमेवानुमानेऽपि वादिनोऽप्यनुमेनिरे ॥ १७९ ॥
व्युत्पत्तिद्वारसिद्धेऽपि तद्विशेषेऽपि शास्त्रतः । अलौकिकेऽर्थे समभिव्याहारात्सा हि सम्मता ॥ १८० ॥

नेदं शास्त्रं निर्विषयम्, * श्रोतव्यो मन्तव्य इतिश्रुत्यनूदितविषयोक्तेः । नाप्यसौ भ्रान्त्या मानान्तरेण वा सिद्धः, निर्बाधे श्रुतिशिरस्येव विदीमत्वात् । न च निरूपितः, पूर्वकाण्डयोरान्यपर्यात् शास्त्रान्तरे तु प्रसङ्गाभावाद्विरुद्धोक्तेश्च । न च धात्वर्थवदन्तसंस्कारवन्निरूप्यः, स्वगृहमिनिशिसद्दृनिविसाम्यात् तदधीनबृंहणत्वस्वरूपरक्षोक्तेश्च ।

न च मुक्तिः सिद्धा, प्रत्यक्षादिविरोधात्। नाप्यन्येन साध्या, देहादिसृष्ट्या बन्धकस्यैव पुरुषस्य स्वनन्तृमुक्ति-हेतुत्वात्। नाप्यन्येन निरोध्या, एतस्य स्वायत्ताखिलसत्ताकतया निस्समाभ्यधिकत्वात्। न ततोऽपि सा दुष्प्रापा, तस्य तदेकदीक्षितत्वात्। न स्वर्गादिवत्पुनरावृत्त्यादिभिर्दुरन्ता, निःसहादेर्निःशेषनिवृत्तत्वात्। न च समव्यत्ययफला, सुखोपायेन निरवधिकसुखलब्धेः। नाप्यत्राधिकार्यभावः, यथाश्रुति * विनतविविधभूत इति सामान्यतः, * मम इति विशेषतश्च व्यञ्जनादिति।

प्रतितन्त्रविहीनत्वादनारभ्यत्वमित्यपि। असाधारणरूपेण भाषणेन निराकृतम्॥ १८१॥

श्रूयते हि सर्वशरीरत्वं सर्वान्तर्यामित्वमित्याद्यर्थजातमत्रैव। अथवा,

सर्वानिष्टमिहानुक्तं तावताऽपि किमागतम्। तस्मात्प्रामाणिकं चिन्त्यं परेष्टमथवान्यथा॥ १८२॥
आभिमानिकमानैश्च सिद्धान्ताः स्थापिताः परैः। साधारण्यं क्व वा न स्याद्वैपुल्यादेशकालयोः॥१८३॥
प्रतिपदमिह युक्तिं भाष्यकाराशयस्थां कथयितुमुत मन्तुं कः प्रभुस्तां प्रभूताम्।
तदपि कतिचिदस्मदर्शितं किंचिदेतच्छ्रुतफलमवयन्तः स्वादयिष्यन्ति सन्तः॥ १८४॥

अत्रैवं परगुरुस्तुत्यादिविशिष्टमङ्गलान्तर्णीतपरमविषयाद्युक्त्यास्य शास्त्रस्यानारभ्यत्वमप्यपास्तम्॥

पाराशर्यवचस्सुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीवनीम्।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतां तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम्॥

*अथ * नमस्कृत्य हृषीकेशम्, * नमो भगवते तस्मै व्यासाय इत्याद्याचारक्रमेणावरगुरुकीर्तनादिरूपमङ्गलगर्भा-वान्तरविषयाद्युक्त्या विधित्सितस्य स्वप्रबन्धस्यानारभ्यतां निरस्यति— **पाराशर्य** इत्यादिना **व्याख्यास्यन्ते** इत्यन्तेन।*

कुहकोक्तं भ्रमोक्तं वा निष्फलं निष्परिग्रहम्। स्पष्टं दुर्निर्वहं बोद्धृहीनमन्योज्ज्वलं न हि॥ १८५॥

*यद्येतच्छास्त्रं लोकायतादिवत्प्रतारकप्रोक्तं भ्रान्तिमूलं निष्प्रयोजनमपरिगृहीतं स्पष्टार्थं विवक्षिते नेतुमशक्य-मनधिकारिकमन्यतश्चरितार्थं वा स्यात्, न तर्हि व्याख्येयमिति शङ्कावं क्षिप्यते। पराशरः—परान्बाह्यकुदृष्टीन्प्रमाणतर्क-शरैराशृणातीति पराशरस्तस्यापत्यं पाराशर्यः; न तादृशापत्यमतादृक्स्यादिति व्यक्त्यै पाराशर्योक्तिः। श्रुतिश्च— *स होवाच व्यासः पाराशर्यः इति। अत्र स्वगुणः पितृगुणेन ख्याप्यते। नात्र सूत्रकृद्बादरायणनामान्य इति मन्तव्यम्, * द्वीपे बदरिकामिश्रे बादरायणमच्युतम्। पराशरात्सत्यवती पुत्रं लेभे परन्तपम्॥ इत्यादिप्रसिद्धेः।*

*तस्य च ब्रह्मसूत्रकृत्त्वं च स्कान्दोक्तम्— * अवतीर्णो महायोगी सत्यवत्यां पराशरात्। उत्सन्नान्भगवा-न्वेदानुज्जहार हरिः स्वयम्॥ चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः। शतधा चैकधा चैव तथैव च सहस्रधा॥ कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये। चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा॥ इति। * ब्रह्मसूत्रपदैश्चैव इति भाविदर्शिभगवद्वाक्यं सूत्रपथाद्भावि वा स्वयमेव भारते न्यबध्नात्। सूत्रविषयतया च तद्वाक्यरूपा प्राक्तनी भाविनी वा*

कृतिरुद्दाहृयत इति न पौर्वापर्यविरोधः ।

अथ वानादिसिद्धत्वात्स्मृतिसूत्रप्रवाहयोः । परस्परगृहीतिस्तु न विरोधाय कल्पते ॥ १८६ ॥

आह च परभाष्यव्याख्याता— * ब्रह्मसूत्रकृते वेदव्यासायापरवेधसे । ज्ञानशक्त्यवताराय नमो भगवतो(ते) हरेः ॥ इति ।

सुधाशब्देनास्यार्थस्य भोग्यत्वं दर्शयतीति विवरणम् । अत्र च— वचसः सुधेति विग्रहे सुधाशब्दस्य गौणी वृत्तिः । रूपकप्रकरणानुरूप्येण वा वचश्शब्दलक्षितस्तदर्थस्सुधात्वेन रूप्यते । यद्वा— सूत्रमेव वा सुधेति रूपितम् । उपनिषद्विमर्शोत्थन्यायरूपार्थद्वारा तूद्धृतत्वाद्युक्तिः ।

ननु श्लेषोपस्कृतविजाक्षरानीतत्वादिसामान्यप्रयोगे कथमिह * उपमितम् इत्यादिना समासः ; इत्थम्— समाससूच्यं स्वादुत्वसामान्यमिहाप्रयुक्तम् ; तदन्यस्य प्रयोगेऽपि न दोषः ; * भाष्याब्धिः क्रातिगम्भीरः इत्यादिवत् । वैधर्म्यरूपत्वं वा विशेषणेष्विह सर्वेषु योज्यम् । सुधा हि अमृताक्षरोपचरितैरन्यस्य छन्दसोऽक्षरैरानीता, इयं तु स्वाक्षरैरेव । सुधा किल केवलदुग्धाब्धिमध्योद्धृता, इयं तु उपनिषद्दुग्धाब्धिमध्योद्धृता । इत्थं शेषमपि योज्यम् ।

साधर्म्यात्स्वादुतासिद्धिस्तथा स्वादुतमत्वधीः । वैधर्म्यादिति वैधर्म्यं भाव्यमत्र मनीषिभिः ॥ १८७ ॥
यद् विवक्षितसामान्यं तत्प्रयोगो निषिध्यते । उक्तिस्तदन्यसामान्यविषया न निरुध्यते ॥ १८८ ॥
विवक्षितं तु सामान्यं स्वादुत्वादिकमिष्यते । तत्पुनर्नोच्यते साक्षात्समासस्तेन सिध्यति ॥ १८९ ॥
अविवक्षितसामान्यप्रयोगः काव्यशास्त्रयोः । दृश्यते बहुशस्तस्मान्न समासोऽत्र दुष्यति ॥ १९० ॥

*ओषधीभ्यो यथामृतम् इतिवच्छिरश्शब्दाभिप्रायव्यक्त्यर्थ उपनिषच्छब्दः । उप निषीदति अव्यवधानेन नित्यं समन्वेति इत्यनन्यपरांशोक्तिः । तथा च वाक्यम्— उपनिषण्णत्वाद्वा उपनिषद् इति । तत्र द्रमिडभाष्यम्— *गहने हीयं विद्या सन्निविष्टा इति । तस्य च वामनटीका— * गहने ब्रह्मणि उपनिषण्णा इति । भाष्यस्य सूत्राणि, तेषामुपनिषदः, तासां ब्रह्मेति विषयक्रमः । प्रयोजनानि च यथार्हाणि । *आरण्यकं च वेदेभ्यः इति श्रुतिधेनुसार-भूतस्वादुतमरसतया आनन्त्यगाम्भीर्यादिभिश्च दुग्धाब्धित्वोक्तिः । मध्यस्य अशेषपर्यन्तासत्तिसाम्यात्तदुक्त्या सर्वश्रुत्यानुगुण्यव्यक्तिः । उद्धृतत्वोक्त्यार्थस्याकल्पितत्वमामूलं ग्रहणं च स्थाप्यम् । संसारेत्यादिकमपेक्षिततमावान्तरप्रयोजनकथनम् , *अस्ति ब्रह्मेति चेद्वेद इत्यादिश्रुतेः वाक्यार्थनिर्धारणे च सूत्राणां विश्रमात् । अविच्छिन्नैकीकृत्य जन्मादिप्रवाह-प्राप्तिः संसारः । यद्वा संसरत्यनेनेति संसारः कर्म ; स तु स्वर्गादेरपि तापत्रयमयत्वादग्नितयोक्तः । दीपनं क्लेशकर्मा-दिज्वालोद्गतिः ; सा चापवर्गप्रतिकूलतया स्वसंसृष्टनाशकावस्था ; तद्वैविध्यमविद्यादिभेदात्पञ्चधा त्रिधा द्विधेत्यादि तत्र तत्र कथ्यते । अत्र शारीरादिविविधदुःखावहतया च वैशिष्ट्यं विशब्दार्थः । अत्र प्राणः प्राणिनां प्राणन-हेतुः परमात्मा, * न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ * प्राणस्य प्राणम् , * प्राणमेवाभिसंविशन्ति इत्यादिश्रुतेः । * प्राणस्तु प्रणवे जीवे जीविते परमात्मनि इति च पठ्यते । अपगतः अतिदूरस्थः शास्त्रेषु दर्शयत्स्वपि कूटयुक्त्यादिभिरथ यावदसद्ब्रह्मेति वेदयतां प्रायः । विशब्दः अन्यथान्यतमेनाप्यनाघ्रातत्वपरः । विशेषतो वापगतः— स्वयमवतीर्य स्वात्मानं दर्शयत्यपि व्यामृष्टतया दुर्दर्शः । अथ * ज्ञानो ज्ञानम् इति न्यायसुदर्शनम् । आत्मनां तद्गुणसारतया सदंशोक्तिः । तदा चेतनाचेतनशब्दोक्तः ।

व्यपगतप्राणानां सञ्जीवनं नाम बाह्यकुदृष्ट्यनपहार्यप्राणस्थापनम् ; तन्मुखेन रक्षोक्तिसंक्षिप्तपरमप्रयोजनविवरणं वैतत् । तदा तूपसर्गेण स्वात्मप्रापणादिमात्रव्युदासः । पूर्वाचार्याः बौद्धजैनगन्धिभ्योऽन्ये । औपदेशिकी रक्षा तदैव तत्रैव ; ग्रान्थिकी तु कालान्तराद्यनुच्छेदात् सुरक्षोक्ता ।

रक्षितत्वं तु रामार्यै(द्यै)स्त्रयन्तार्थे हि सूचितम् । आत्मसिद्ध्यादिभिः प्रोक्तं यामुनार्यनिबन्धनैः ॥

सुधासुरक्षितशब्दाभ्यां वक्तृस्तुतिरार्थी । सुधा तु सुरगुरुचक्रयन्त्रादिभिर्दृढगुप्ता । सुरक्षितत्वेऽपि त्यक्तसंपदार्थैः कुदृग्भिः क्षोभितत्वमाह—**बहु** इति । बह्वयः मिथो विरुद्धाः बहूनां वा मतयः, ताभिर्व्याघातः—विविधा अभिव्यासा पीडा ; स्वारसिकधीविरोध इत्यर्थः । तेन दूरस्थितां बोद्धॄणां रजस्तमस्तारतम्यादबोधासमग्रबोधान्यथाबोधार्हामित्यर्थः ।

अबोधश्चायथाबोधस्तत्त्वबोधविरोधिनौ । अनिश्चितावबोधेऽपि तथाबोधकता स्थिता ॥ १९२ ॥
सद्भिर्यदि विगीयेत न संगृह्येत पश्चिमैः । न तन्मतानुसारश्च सत्यः स्याद्व्याजिहीर्षतः ॥ १९३ ॥
कुदृष्टिभिश्च बाह्यैश्च यदि वाऽभ्युपगम्यते । कः स्वपक्षतया रक्ष्यः परपक्षश्च को भवेत् ॥ १९४ ॥
तदत्र चतुरध्याय्यां साधनाक्षेपभागयोः । निदानमभिसन्धाय निर्दिष्टं भेदतो द्वयम् ॥ १९५ ॥

सुधा तु विरुद्धमतिदैत्यादिव्याघातभयात् दूरस्थिता ; यद्वा कद्रूविजिताया: सुपर्ण्यास्तथा बहुमतिव्याघातदशायामात्मनिष्क्रयणार्थमाहर्तव्यतया दूरे तृतीयस्यां दिवि स्थिता । स्वव्याख्यानस्याप्यन्यैर्व्याघातादसामर्थ्यापरिहार इत्यत्राह—**आनीताम्** इति । बुद्ध्यासन्ने स्वार्थे स्थापिताम् । एतेन व्याख्यातद्वतोस्सम्बन्धः शोधितः । परेष्टव्यावहारिकसाधकव्यावृत्त्यै तद्व्यनक्ति— **निजाक्षरैः** इति । वचःप्रस्तावात्तदक्षराणि निजाक्षराणि, सूत्राक्षराणीति वक्ष्यमाणत्वात् । यथा विवरणम्— * सूत्राक्षराणि यमर्थं स्वरसतो बोधयन्ति स एव सांप्रदायिकः , वक्तुः स्वसमीहितार्थवाचकशब्दप्रयोगव्युत्पत्तेः, स्वरसतः परप्रत्यायनार्थत्वाच्छब्दप्रयोगस्य इति । बहूनां व्याख्यानानां मिथो व्याघाते व्याख्येयस्वारस्यं संप्रदायव्यवस्थापकमिति भावः । सुधा तु सोमाख्या सौपर्णाख्यानप्रसिद्धैर्गायत्रत्रयवयवैरमृताक्षरैः सहानीता । मदुक्तिभिरिति वार्थः । तन्त्रतः सुधासमाधिसिद्धयै तथानुक्तिः । सुधायाः सुमनसो देवा भोक्तारः । यद्वा गायत्रत्रयभिमानिसुपर्णानीतायास्सोमलतारूपेण परिणताया एकाहाद्युपयुक्ताया भौमास्सुमनसः प्रतिसमयं भोक्तारः । वचोरूपायास्तु * ब्राह्मणा विविदिषन्तीतिवत् चोदनानर्हव्यावृत्ताः * सारासारविवेकज्ञाः इत्यादिना स्वेनैवान्यत्रोक्ताः । एतेन ब्रह्मविद्यासंप्रदानमपि शिक्ष्यते । श्रुतं ह्येतच्छान्दोग्ये— * इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्रणाय्याय वान्तेवासिने । नान्यस्मै कस्मैचन । यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इति । प्रणाय्यः प्रश्रितत्वानसूयत्वऋजुत्वादिभिर्योग्यः । न हि भौमास्सुमनस इति भूसुरमात्रोक्तिर्युक्ता, अधीतवेदवर्णत्रयार्हत्वान्मीमांसायाः । स्वतो विदुषां स्वर्गादिभुवां प्रायो न सूत्रव्याख्यानापेक्षा, सत्यामपि तस्यां विशालधीयोग्यैर्वृत्त्यादिभिस्ते चरितार्थाः, अतो न वृथाऽत्र भौमत्वोक्तिः । **पिबन्तु** अयत्नं सुखमनुभवन्तु । यतो हि सुधायां मन्थनत आनयनतश्च । **अन्वहम्** अतिगम्भीरत्वादत्यन्तहृद्यत्वाच्च ।

सुधेयं सूत्रकारेण हरिणेव समुद्धृता । आनीता भाष्यकारेण द्विजेन्द्रेणेति चाशयः ॥ १९६ ॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुः ; तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ।

तथापि किमहर्दीपवदनुपकारकृतकरनिर्माणगौरवेण, अनुच्छिन्नाः शुद्धाः प्राचीनव्याख्याः प्रवर्त्यन्तां तत्राह— **भगवद्** इति । * उत्पत्तिं प्रलयं चैव इत्याद्युक्ताध्यात्मबोधातिशयपरोऽत्र भगवच्छब्दः ; तेन शबरशङ्करादिव्यावृत्तिः । विस्तीर्णत्वोक्तिरप्यतनैः दुस्तरत्वमभिप्रैति । अत्र पूर्वाचार्या ब्रह्मनन्द्यादयः । तन्निबन्धनानामतिसंक्षेपाद्गहनत्वं सूचयति— **संचिक्षिपुः** इति । सूत्रस्थापितार्थपरैः ग्रन्थैरित्याशयः । परोक्तेरनाससंप्रदायत्वं व्यञ्जयितुमाह— **तन्मतानुसारेण** इति । * अल्पाक्षरमनल्पार्थम्, * लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च । इति सूत्राणां बह्वर्थसूचकाल्पाक्षरतया व्याख्यापेक्षत्वायाह— **सूत्राक्षराणी**ति । प्रकृतिप्रत्ययोरकलेशमभिप्रेत्याक्षरशब्दः । तेन * सूत्राणि यथासंभवं द्रष्टव्यानीति परोक्तिरनास्थेया । उक्तं च भास्करैः— * सूत्राभिप्रायसंवृत्या स्वाभिप्रायनिवेशनात् । व्याख्यातं यैरिदं सूत्रं व्याख्येयं तन्निवृत्तये ॥ इति । अक्षरार्थमात्रं ब्रूमः, सूच्यं तु निश्शेषदुर्वचम् । अक्षरशक्त्यतिरिक्तः स्फोटो न कल्प्यः इत्यपि व्यङ्ग्यम् । व्याख्यास्यन्त इत्यत्रोपसर्गाभ्यां धातुना चाद्यतनबुद्ध्यनुगुणमनतिसंकोचविस्तरत्वं स्पष्टोक्तिश्च व्यज्यते । यद्वा वैशिष्ट्यं प्राबल्यं च निपातद्वयार्थः । * पदच्छेदः पदार्थोक्तिः इत्यादि च भाष्यम् । अखिलेत्यादेरेतदन्तस्य * सूत्रार्थो वर्ण्यते यत्र इत्याद्युक्तं भाष्यलक्षणं तदर्थसंग्रहात्तादर्थ्याच्च सिद्धम् ।

अथातो ब्रह्मजिज्ञासा ।

अत्रायमथशब्द आनन्तर्ये भवति । अतश्शब्दो वृत्तस्य हेतुभावे ।

व्याख्यापेक्षत्वव्यक्त्यै सूत्रमुद्गृह्णाति—**अथ** इति । नन्वत्र * अथातः इति पिण्डितं रूपमयुत्पत्तेः पृथगर्थसंभवादंशान्तरनैरर्थक्याच्च न युक्तम् ? क्लिष्टगतिस्तु न गतिसद्भावे । अथशब्दस्यानन्तर्ये प्रसिद्धिः प्रकृष्टापि मोपयोगासाधारणवृत्तविशेषादृष्ट्यापोदिता । अत एव न प्रकृतादर्थान्तरत्वं, कल्पद्वयादृष्टेश्च । प्रश्नस्त्वनर्थकोऽनुत्तरश्च । कात्स्न्र्यमनपेक्षितवचनम् ; एकदेशचिन्ता हि न शङ्कारूढा । तस्मादारम्भार्थकत्वं स्यात् । आरभते ह्यत्र सूत्रकारः । मङ्गलार्थकत्वं वा । स्मर्यते हि—• ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥ इति ।

तत्राह—**अत्र** इति । भवतिना अथशब्दस्य स्वारस्यानूक्तिः । अत्रायंपदाभ्यामपवादापोहः । **अत्र** वेदोत्तरांशविचार्यत्वार्थे सूत्रे । तेन यतः कुतश्चिद्वा भागान्तरसाधारणाद्वा कुतश्चिदानन्तर्योक्तिरानर्थक्यात् कर्मविचाररूपं वृत्तं विविनक्ति । **अयम्**—• अथातो धर्मजिज्ञासा • अथातः कृत्स्नपुरुषार्थजिज्ञासा इत्यादिप्विवातश्शब्दोपेतः । एतच्छब्दो हि प्रस्तुते स्वरसः ; विभक्तिश्चासौ हेतुत्वे । एवं सामान्यतः अत इत्यभिहिते ब्रह्मजिज्ञासया विशेषत आक्षिप्ते वृत्ते सत्यानन्तर्यस्वारस्यं नापोद्यते । • अथातः इति समुदितप्रयोगनिरपेक्षसामर्थ्यव्यक्त्यर्थः * अतश्शब्द इति केचित् । अत्रेत्यादिनैवार्थान्तराणामिहानन्वयः सूच्यते । तथाहि—मङ्गलार्थत्वं तावत्प्रतिक्षिपामः । तत् किमस्याविवक्षितार्थस्य सन्निधिमात्रेण, तद्वाचकतया वा ? नाद्यः—अबोधकस्य वाक्ये निबन्धायोगात् श्रुतिप्रयोजनमात्रस्य मङ्गलस्य पदान्तरार्थेऽनन्वयाच्च, विवक्षितार्थान्तरस्यापि सन्निधेरुपजीवनोपपत्तेश्च । न द्वितीयः—द्योतकमात्रत्वात् * अथ

शब्दानुशासनम् इत्यादावर्थे वदद्भिरप्यधिकृतमित्यादिपदमध्याहारेणोक्तम् ; न त्वथशब्दवाच्यत्वमभिसन्धाय ; वाच्यत्वेऽप्यत्र मङ्गलस्य वक्तव्या सङ्गतिः । मङ्गलाक्तेः प्रकृतौपयिकमङ्गलत्वेऽप्यनुनिष्पत्त्यैव तत्सिद्धिर्युक्तेत्युक्तम् ।

मृदङ्गध्वनिनीतिं तु वक्ति माङ्गलिकस्मृतिः । प्रयोक्तुश्श्रोतुरप्येतौ मङ्गलप्रापकाविति ॥ १९७ ॥

अन्यथा ब्रह्मशब्देनान्यपरत्वं, भिन्नत्वं वाक्यस्य, भवत्वित्यध्याहारश्च स्युः । अकृतकसर्वोत्तुङ्गमङ्गलतमतत्त्ववाचकत्वाद्ब्रह्मशब्दस्य । न चात्र हेतोस्साध्यस्य वा मङ्गलत्वमनूद्यते, विधीयते वा, नैरर्थक्यात् ; न ह्यत्र तद्विरुद्धत्वाशङ्का, अनिषेधात् । न्यायसूत्राणि संशयनिरासार्थानि ।

ननु मङ्गलत्वं विचारस्य ख्याप्यताम्, अत एव तद्विधिरिति तत्सार्थता। तदपि मन्दम्, अत इति हेतुनैव नैराकाङ्क्ष्यात्, अधिकोक्तेरनुपयोगाच्च । आरम्भार्थत्वमप्ययुक्तम्, नारभ्यत इति शङ्कानुत्थानात् साध्यतया बुद्धस्यारम्भस्य कथनानर्थक्याच्च ; न च जिज्ञासाया आरम्भयोग्यत्वमथशब्दो वक्ति, द्योतयति वा, अव्युत्पत्तेः आरब्धुमिति क्रियान्तरार्थक्रियानुपस्थानात्। अन्यथा समुच्चयादिद्योतकेष्वपि समुच्चेतुमित्यादिविवक्षया योग्यपदान्वयप्रसङ्गात्। आरब्धव्येत्येव च पदमध्याहार्यम् ; तदा किं तदर्थेनाथशब्देन ? न चाध्याहारार्थद्योतनम्, साकाङ्क्षतयैव तत्सिद्धेः प्रसिद्धप्रहाणेन विलष्टप्रहणायोगाच्च । योगशब्दानुशासनयोरानन्तर्यमगत्या त्यक्तम् । अत्र तु न शास्त्रारम्भार्थतापि । अन्यो हि विचारः, अन्यदनुशासनम् । न च तस्यात्रोपादानम् । ननु ज्ञाप्यतया ब्रह्माधिक्रियताम् ; मैवम्—उपसर्जनश्रवणविलम्बात् व्याख्यानानुशासनशब्दाभावादेव जिज्ञासाशब्दस्य मीमांसापर्यायत्वाभावेन ज्ञाप्यतानुपस्थापनाच्च । अत एव विचारः कर्तव्यत्वेन बोध्यतयाधिक्रियत इत्यपि न वाच्यम्, विचारारम्भणीयत्वस्थापनेनैव सिद्धे पदान्तरवैयर्थ्यात् अपेक्षिते सत्यनपेक्षितायोगात् उभयोक्त्या गौरवाच्च । तस्मात्सारसिकमनपोदितमानन्तर्यमेवात्र स्थापितम् । अतश्शब्दस्य प्रकृतिर्धर्म्यिे वर्तिष्यमाणेऽपि स्यात् ; प्रत्ययश्च सार्वविभक्तिकः । * अतोऽथ मौनम् इत्यादिष्वन्यार्थः । पञ्चम्यर्थोऽप्यनेकः । अतो नार्थविशेषसिद्धिरित्याह—**अतश्शब्द** इति । इहाप्यत्रायंभवतीनामनुषङ्गः, स्वारस्यात्, उत्तरपदसमभिव्याहारश्च प्राग्वत् । विचारितकर्मणां ब्रह्मविचारहेतुतया वक्ष्यमाणहेतुरनुपलम्भनिरस्तः । ब्रह्मविचारापेक्षया वर्तिष्यमाणस्य तु न तद्धेतुत्वम् । प्रयोजनमपि न स्वरूपेण हेतुः, मिथस्संश्रयात् । तदिच्छा तु वृत्तैव । प्रत्ययस्य च विभक्त्यन्तरार्थकत्वमपादानत्वादि च प्रकृतानुपयुक्तम् । अयमिति पदस्य स्वरूपमात्रमनुषज्यते । तेनाथशब्दयुक्तत्वमिह विवक्षितम् । न चैवं मिथस्संश्रयः; शब्दस्वारस्ययोः स्वतस्सिद्धतया स्वरूपसिद्धौ मिथोऽनपेक्षणात्, सहकारित्वमात्रस्यैव मिथोऽपेक्ष्यत्वाच्च । अयमिति पदं वा नानुषञ्जनीयम् ।

नन्वथातःपदयोरन्यतरेणालम् ; सूत्रं ह्येतत् ; मैवम्— प्रयोजनाधिक्यात् ; कर्मविचारव्यवधायकशास्त्रान्तरनैरपेक्ष्यद्योतनार्थत्वादथशब्दस्य । ब्रह्मविचार्यत्वहेतोरनन्यलभ्यप्रयोजनवत्त्वेनापातधीस्थस्य विशेषणविशेष्यांशासिद्धिव्युदासार्थत्वादतश्शब्दस्य ।

आनन्तर्येऽप्यहेतुत्वं हेतुत्वेऽपि विलम्बनम् । दृष्टमिष्टं च तत्सार्थं द्वयं काण्डान्तरे यथा ॥ १९८ ॥
एकं जिहासतस्त्वत्र द्वितीयं हेयमापतेत् । स्वाधिकारं स्वहेतुं च विचारः स्वयमाक्षिपेत् ॥ १९९ ॥
तस्मादारम्भसूत्रेऽस्मिन् धर्मचिन्तादिसूत्रवत् । प्रायुङ्क्त प्रातिलोम्येन प्रतिज्ञादित्रिकं पृथक् ॥२००॥

अधीतसाङ्गसशिरस्कवेदस्य अधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाक्षाभिलाषस्य अनन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी ।

अत्र कीदृग्वृत्तम्, यन्नियमेनापेक्ष्यम्; कीदृक्च वर्तिष्यमाणम्, येन वृत्तविशेषाक्षेपः; तयोश्च पौर्वापर्येऽपि कथं कार्यकारणभावः, तत्सिद्धौ च तृणारणिमणिन्यायः स्यात्। नियमेऽपि तत्त्वधीमुक्त्योरिव मा भूदानन्तर्यमित्यत्राह—अधीत इति। कर्मब्रह्मविचारौ वृत्तवर्तिष्यमाणौ। तयोरल्पास्थिरफलानन्तस्थिरफलशब्दाभ्यां संजातेत्यादिना च हेतुहेतुमद्भावव्यञ्जनम्। स्थिरास्थिरशब्दाविह नाशराहित्यतद्वत्त्वपरौ। कर्मज्ञानमिह निर्णयरूपम्। तस्याधिगतिः प्राप्तिः; * परीक्ष्य लोकानित्यादिभिरल्पास्थिरफलतयावगमो वा। अनुष्ठानद्वारा कर्मज्ञानस्य फलसम्बन्धः। अल्पास्थिरफलत्वं कर्मविशेषणं वा। मोक्षविश्रान्तविद्याङ्गकर्मव्यावृत्त्यै केवलशब्दः। अनन्तस्थिरफलशब्दः कर्मधारयवृत्त्या ब्रह्मविशेषणम्। बहुव्रीहितया वा परंपरया मोक्षहेतुभूतां जिज्ञासां विशिनष्टि। समित्युपसर्गेण हेतुनिरपेक्षमानन्तर्यं च सूच्यते। सांख्यादिशीलनजन्या दुःखदृष्टिमात्रजन्या वा मुमुक्षा हि समीचीं ब्रह्मचिन्तां न सूते। कर्ममात्रेऽनन्तफलदुराशायां निरस्तायां निवृत्ततत्प्रतिबन्धतया व्युत्पत्तिभूयस्त्वोपनिपतितधीवृद्धया च तीव्रतमे मोक्षाभिलाषे सामग्रीदशापन्ने ब्रह्मविचारविलम्बो न स्यादित्याशयः।

विमान्तरविहीने तु स्यादानन्तर्यमत्र नः। अतो नातिप्रसक्तिः स्यात्तथान्यैरपि सम्मतेः ॥२०१॥

अधीतेत्यादिना मुमुक्षोत्तम्भकप्रमाणान्तरशीलनावसरज्ञापनम्। जिज्ञासोत्पादकफलापातधीवृद्ध्यै वेदमात्रनियतव्युत्पत्तिविशेषसिद्ध्यै वा • निष्कारणः षडङ्गो वेदोऽध्येयः इत्यादिसिद्धसाङ्गत्वोक्तिः। * अङ्गग्रहणं विचारप्रयोजकस्य प्रयोजनालोचनस्य सिद्ध्यर्थम् इति तूलिका। फलाधिक्याद्विशेषं गृह्णता सशिरस्कशब्देनाध्ययनविधौ स्वाध्यायशब्दस्य नियतक्रमभागद्वयविषयत्वम्, तद्विचारार्थायाश्चिकाख्याया ऐकशास्त्र्यम्, क्रमश्च सूच्यते। न ह्यध्ययनविध्यनालीढं शिरः, येन न विचार्यं स्यादिति भावः। वेदशब्द इह पुरुषार्थतदुपायादिबोधनार्हत्वं व्यनक्ति। तत एव विचारेच्छाजनकापातधीसिद्धिः। षष्ठ्यन्तपदाभ्यामधिकारिनिष्कर्षः।

यदुक्तं कैश्चित् कर्मसूत्रव्याख्यारम्भे—• प्रसिद्धोऽप्यथशब्दादेः किं पदार्थोऽत्र वर्णितः। प्रदर्शनार्थमित्येके केचिन्नानार्थवादिनः॥ समुदायादवच्छिद्य भवदासेन कल्पितात्। शक्तितोऽन्वयवस्यैव वर्णयन्त्यष्टमादिवत् इति। तदिह नातीव पेशलम्; प्रसिद्ध्यपवादशङ्कायां पदद्वयव्याख्यानस्यावतारितत्वात्॥

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्मण इति कर्मणि षष्ठी, * कर्तृकर्मणोः कृतीति विशेषविधानात्। यद्यपि संबन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः; तथाप्याक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात्कर्मणि षष्ठी गृह्यते॥

तृतीयपदेऽपि वृत्तेरनेकधा सम्भवे विशेषव्यक्त्यै विगृह्णाति—ब्रह्मणो जिज्ञासा इति। अत्र हि व्यासस्तावत् न घटते, जिज्ञासानन्वयात्; अत एव न कर्मधारयः, सामानाधिकरण्याहत्वेऽपि विशेषणविशेष्यव्यत्ययात्, विवक्षितानुपयोगाच्च। द्वितीया तु ह्युपयोगापेक्षिता। ब्रह्मप्राप्तिहेतुतया तृतीयासमासासंभवेऽपि विषयतृप्तिर्वृत्तिविशेषा-

क्षेपश्च न स्यात्। तादर्थ्ये चतुर्थ्यास्तिह समासः प्रतिषिद्धः, * तादर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्तव्यम् इति कात्यायनोक्तेः। आहुश्च—* प्रकृत्या विकृतिर्यस्माच्चतुर्थ्यन्ता समस्यते। तादर्थ्ये यूपदार्वादौ तेनासिद्ध समासता॥ इति। तथा न संप्रदानत्वमपि, ब्रह्मणः संप्रदानत्वाभावात्। सप्तमीसमासेऽपि विषयत्वमात्रं सिध्येदिति भावः। तदिह पञ्चमीम् अर्थान्तरशङ्कां च वारयति—ब्रह्मण इति कर्मणि षष्ठी इति। उक्तं ह्याचार्यैः—* असूत्रत्वापि षष्ठीयं समासप्राप्तभावतः। विभक्त्यर्थस्य सान्निध्याद्व्याख्यातुमिह युज्यते॥ इति।

अपादानादिः पञ्चम्यर्थो वाक्यानन्वितः, अध्याहारसापेक्षश्च। प्राधान्येन कर्तृत्वानुपपत्तिः 'तद्विजिज्ञासस्व' इत्यादिकमनुसरता ब्रह्मण इत्यनेनैव सूचिता। न हि मुख्यं ब्रह्म स्वमन्यद्वा जिज्ञासेत, स्वतस्सर्वदर्शित्वात्। उक्तं च न्यायतत्त्वे— * यो वेति युगपत् सर्वं प्रत्यक्षेण सदा स्वतः। इति। किंचिज्ज्ञस्तु कर्ता न वक्तव्यः, अधीतवेदस्य तदर्थं निर्णिनीषोरादितः प्रभृत्यनुवृत्तेः। कर्मत्वोक्तावीप्सिततमतया प्राधान्येन विषयत्वं प्रयोजनत्वं च सिध्येत्। अतः सदपि स्वस्वामिभावादि अत्र न वक्तव्यमिति भावः। तथाऽप्यस्तु सामान्यतः प्राप्ता शैषिकी षष्ठी; विशेषस्त्वौचित्यलब्धेरवाच्य इत्यत आह— कर्तृकर्मणोः इति। संबन्धविशेषेऽपि षष्ठीविधौ सिद्धे, साकाङ्क्षसूत्रोक्तात् निराकाङ्क्षसूत्रोक्तं युक्तम्। तत्र विशेषयोर्विधिसाम्येऽपि कर्तुः सकर्मकाकर्मकसाधारण्यात्, इह च कर्तृर्थत्वाभावात् असाधारणाकाङ्क्षितत्तमकर्मोपस्थापनमुचितमिति भावः।

ननु किम् अर्थलभ्ये शब्दव्यापारेण? न चैवं प्रतिपदानुशासनवैयर्थ्यम्, तस्य कर्मादिविवक्षायामपि द्वितीयानिषेधेन षष्ठीसाधुत्वे तात्पर्यात्। अतो विशेषविधिर्न शैषिकषष्ठीमपवदेत्, तद्गृहे च व्यवहितसंबन्धस्यापि तदन्तःस्थितेर्ब्रह्मानुबन्धिनामुपायादीनामपि जिज्ञासासंबन्धात् तत्कर्मत्वस्य चार्थसिद्धेः कृत्स्नशारीरकार्थविचार्यत्वसूचनमधिकं प्रयोजनमित्यत आह— यद्यपीति। परिग्रहः—परितो ग्रहः, सानुबन्धग्रहणम्। उत्तरग्रन्थे तु गृह्यते इत्युक्त्या अनुबन्धिसंबन्धस्याशाब्दत्वमालमभिप्रेतम्। कर्मापेक्षत्वेन— सकर्मकतया प्रथमं कर्माकाङ्क्षाजननस्वाभाव्यात्। कर्मार्थत्वसिद्धिर्नाम कर्तृत्वव्युदासेन षष्ठ्याः कर्मास्त्यविशेषेऽर्थतः पर्यवसानम्। परप्रत्यायनार्थे प्रयोगे विलम्बितधीहेतुर्न ग्राह्य इत्यभिप्रायेणाह— तथापीति। न ह्यत्र अर्थलभ्ये शक्तिकल्पनिः, किं तु आक्षेप्याद्वरं कल्पनशक्तिकशब्दोक्तमित्युच्यते। ननु 'आक्षेपतः'—इत्युक्तमयुक्तम्; आकृत्यधिकरणनीत्या सामान्यशक्तेः विशेषपर्यन्तत्वस्य वक्ष्यमाणत्वात्। मैवम्— सा हि विशेषमात्रमुपादत्ते, न कर्मत्वादिकम्; न हि गोशब्दशक्तिर्विशेषतः खण्डत्वादि गृह्णाति। न चात्र आभिधानिकग्रहे(ऽपि) अनुबन्धित्याग इति भ्रमितव्यम्; सामान्यतो धीस्थानुबन्धिविषयत्वात् सर्वत्र जिज्ञासायाः। एवमपि आक्षेपः स्वीकृत इति चेत्, सत्यम्—अन्यतरकर्मत्वस्यापि शाब्दत्वमुभयकर्मत्वाक्षेपात् वरम्, किमुत प्रधानांशकर्मत्वस्याक्षेपात्। एवकारः शीघ्रधीहेतोर्बलीयस्त्वं व्यनक्ति। कथं ब्रह्मणः कर्मत्वं शाब्दम्, 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति ज्ञानस्यैव कर्मत्वात्; मैवम्—सन्नन्तत्वेऽपि प्रकृत्यनुसारेण सकर्मकत्वाकर्मकत्वविभागः। अत एव हि प्रकृत्यर्थकर्मापेक्षया 'कर्तृकर्मणोः' इत्यनुशिष्टिः; "धर्मो जिज्ञासितव्यः" इत्यादौ च धर्मादेरभिहितकर्मत्वम्।

ननु तथापि नाभिधानिकत्वम्, उपपदविभक्तेरर्थाभावात्; प्रयोगमात्रात् तस्याः सार्थत्वे गाव्यादावपि प्रसक्तिः न च तत्र शक्तिरस्ति।

न शब्दशक्तिर्गाण्यादौ गोपदं स्मार्यते ततः। बुद्धिस्थेनैव तेनाथ गोजातिः प्रतिबुध्यते ॥ २०२ ॥

आसप्रयोगस्तु अनर्थकत्वेऽपि साधुत्वात् स्यात्, अन्यत्रापि तथादृष्टेः, सम्मतेश्च। अनुशिष्टिश्च तावद्विशेषव्यक्त्यर्था। तत्तदर्थधियस्त्वन्यथा सिद्धेः, अन्यलभ्ये शक्तेरकल्प्यत्वात्, गत्यन्तराच्च बहुशक्तिकल्पनायोगात्, न शक्तिरौपयिकी; तन्न—यथा 'कर्तृकरणयोः' इत्यादिवशात् कारकविभक्तिः सार्था अनेकार्था च, तथा 'कर्तृकर्मणोः कृति' इत्यादिबलात् उपपदविभक्तिरपि; अन्यथातिप्रसङ्गात्। कारकविभक्तेरुपपदविभक्तिदौर्बल्यं तु पदान्तरविमर्शसापेक्षतामात्रात्। तथाऽपि न शक्तिभङ्गः। पदान्तरसंनिधिरत्र शक्तिं व्यनक्ति, न त्वाधत्ते; यथा नानार्थ गवादिशब्देषु। यद्वा अत्र अनाभिधानिकत्वेऽपि विशेषानुशासनानुमतवृत्तिविशेषवद्विभक्तिसिद्धम्य शाब्दसमत्वं व्यञ्जयितुम् आभिधानिकत्वोक्तिः। कर्मत्वस्य सूत्राभिधानसिद्धत्वमाभिधानिकशब्देन प्रतीयते; उपपदस्वरूपविमर्शस्य पदबोध्यविमर्शात् अविलम्बितत्वाच्च।

ननु न विग्रहवदिह समस्ते विभक्तिरस्ति, येनाभिदध्यालक्षयेद्वा। न चाप्रयुक्तापि स्मृताभिधत्ताम्, प्रयोगस्यापि तद्धीमात्रार्थत्वादिति वाच्यम्; समासतोऽर्थबुद्धौ विभक्तिस्मरणनियमे मानाभावात्, सर्वत्र च लक्षणाद्युच्छेदप्रसङ्गात्। षष्ठ्या चाभिधानमिति तद्विदा। तदेवमभिधायकाभावे कर्मत्वस्य कथमाभिधानिकत्वं तत्समत्वं वा?

मैवं संबन्धसामान्ये कर्मत्वे वा समीहिते। विभक्तिलोपात्सोढव्या प्रकृत्यैव हि लक्षणा ॥ २०३ ॥

अथानुशासनाधीननिरूढलक्षणाया अभिधानसमत्वाच्छाब्दत्वमिति मतम्, कर्मार्थत्वेऽपि समम्। एवं तु केचित्— व्यासे समासे च सविभक्तिकाविभक्तिकशब्दयोः दधिदध्यादिशब्दन्यायेन सैव शक्तिः; अतो लुप्तविभक्तिकस्यापि प्रकृत्या संबन्धो न लक्ष्यः, वाच्यसंबन्धिनि वस्त्वन्तरे वृत्तिर्हि लक्षणा, न च संबन्धस्संबन्धी। कर्मत्वादिश्च संबन्धरूपः। एवं स्वपरनिर्वाहकतया संबन्धफलसिद्धावपि तथा विवेकरहितानामप्यत्र प्रकृत्या विभक्त्यर्थधीर्दृष्टा; सत्यपि चाजानतः संबन्धो न लक्षणाहेतुः, अतिप्रसङ्गात्। अतः प्रयोगस्यानन्यथासिद्धेरन्यथासिद्धिशङ्कायाश्चानुशासनेनोपरोधाद्विभक्त्यर्थः समासेऽप्यभिधेयः। एवं विभक्तिव्यतिरिक्तलोपेष्वपि नीतिः। ननु निषादस्थपतिशब्दे विभक्त्यर्थलक्षणादोषापनुत्त्यै षष्ठीसमासस्त्यज्यते; तत्कथमाभिधानिकत्वम्। तन्मुख्यत्वे तु क्लृप्तकल्प्यविरोधे क्लृप्तस्यैव ग्राह्यत्वान्नान्यत्राधिकारक्लृप्तिः; मैवम्— * सामानाधिकरण्यस्य प्राग्वैयधिकरण्यतः। अविलम्बितधीयोगात् प्राबल्यं प्रतिपादितम्॥ इति न्यायेन शैघ्र्याच्छाब्दव्यवहारः। अथानुशासनस्वारस्यादर्थः; तर्हि यथानिर्णये तु नादरः, अर्थाविरोधादिति। उपपदविभक्तावुक्तमिदं समासेऽपि भाव्यम्।

सोऽयं वैभववादो वा परमार्थोक्तिरेव वा। आभिधानिकतोक्तिस्तु युक्ता धीशैघ्र्यबोधनात् ॥ २०४ ॥

न च * प्रतिपदविधाना च षष्ठी न समस्यते इति कर्मणि षष्ठ्याः समास-निषेधः शङ्कनीयः, * कृदयोगा च षष्ठी समस्यते इति प्रतिप्रसवसद्भावात्।

एवं कर्मणि षष्ठ्यामनौचित्यं निरस्तम्। तत्र समासनिषेधशङ्कामपि निरस्यति—न च इति। कर्मणि षष्ठ्या इत्यनेन साधारणः प्रतिपदविधानाशब्दस्सङ्कोचार्ह इति सूच्यते। * शोऽविदर्थस्य करणे इत्यनुशिष्टायामेव समासापवादः; अवेदनार्थस्य जानातेः कृद्योगः कचित्सत्यपि तत्र करणषष्ठ्या अनपेक्ष्यः; * सर्पिषो जानीते इत्युदाहरणात्।

निषेधस्य सङ्कोचमाह—**कृद्योगा** इति। प्रतिप्रसवोऽपवादनिरासः, तस्य सद्भावात्। न केवलं प्रयोगदृष्टयेति भावः। एवमैकपद्यहेतुस्समासः प्रथमं व्याख्यातः।

ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याण-गुणगणः पुरुषोत्तमोऽभिधीयते।

तत्राद्यप्रकृत्यंशस्य यौगिकार्थनिमित्तत्वश्रुतेः अन्यत्रापि यथादृष्टि मुख्यत्वशङ्काम्, निर्विशेषचिन्मात्रभोक्तृभोग्य-नियन्तृसमष्टितदंशिसन्मात्रादिपरेष्टार्थम्, स्वेष्टे चोपचारवृत्तिं क्षिपन् सर्वतः परिबृढत्वाय बृहत्त्वबृंहणत्वे चानवच्छिन्ने विवृणोति— **ब्रह्मशब्देन च** इति। चस्त्वर्थः शङ्कानिरासे। 'स्वभावतः' इत्यादिना परकल्पितैः सदोषत्वनिर्गुणत्वा-वाच्यत्वावेद्यत्वैरजिज्ञास्यत्वप्रसङ्गोऽपास्तः। निरस्तनिखिलदोषत्वं च बृंहणत्वोपयुक्तो बृहत्त्वविशेषः। गुणादिविधिनिषे-धयोरुत्सर्गापवादादिनीतिविषयत्वं विशेषणद्वयेन व्यञ्जितम्।

विशेषविधिबाधेन तदन्यार्थत्वकल्पनात्। सामान्यवृत्तिसङ्कोचं वरं नीतिविदो विदुः॥ २०५॥

परपक्षे तु मिथ्यात्वसत्यत्वविवादेऽपि निरस्यत्वेनाभिमतानां दोषाणामारोपतः उपाध्यवच्छेदतः स्वाभाविकांशतो वा परब्रह्माश्रयत्वात् तत एव सार्वज्ञ्यादिभङ्गाच्च जिज्ञास्यत्वायोगः श्रुत्यादिकोपश्च स्यादिति भावः। स्वरूपतो नामान्तर-भजनार्हावस्थावन्तोऽचित्पदार्थाः; तदभावेऽपि क्लेशादिमन्तो बद्धाः; कतिपयक्लेशादिरहिता मुमुक्षवः; तदत्यन्तो-च्छेदवन्तो मुक्ताः; तदत्यन्ताभाववत्त्वेऽपि पराधीनतथात्वा नित्याश्च बुद्ध्यवतारक्रमेण निरस्तनिखिलदोष इत्यादिमुखेन प्रथमे विशेषणे व्यवच्छेद्याः। तत्र स्वभावत इति पदेनानादित्वविवक्षायां मुक्ताः, अनन्याधीनत्वविवक्षायां नित्याश्च व्यावर्त्यन्ते। द्वितीयेऽपि ते सर्वे। अन्यासंभाव्यगुणविधेः नित्या एव वा। तेषां ज्ञानादेर्ब्रह्मसाम्येऽपि हि परा-धीनत्वं सिद्धम्, शक्तिस्तु ततो न्यूना। वक्ष्यति च सत्यादिवाक्ये अनन्तपदव्याख्याने— * सातिशयस्वरूप-गुणा नित्या व्यावृत्ताः इति। न हि ते विश्वव्यापिनः; नापि सर्वशरीरिणः। अतिशयशब्देन धातूक्ता बृद्धिरतिशायन-मिति व्यञ्जितम्। अनवधिकविशेषणेन शतगुणितोत्तरक्रमप्रदर्शितनिरतिशयदशाशिरस्कत्वोक्तिः, 'ईश्वरस्य ज्ञानानन्दा-दिगुणयोगः कादाचित्कः, तच्छक्तिस्तु नित्या' इति पक्षः स्वभावत इति पदानुषङ्गात् प्रतिक्षिप्तः। ज्ञानाद्येकैकगुण-वितितिरूपावान्तरगुणवर्गख्यापनाय गणशब्दः। उक्तं च **षाड्गुण्यविवेके**— * तवानन्तगुणस्यापि षडेव प्रथमे गुणाः। यैस्त्वयेव जगत्कुक्षावन्येऽप्यन्तर्निवेशिताः॥ इति।

अनवधिकातिशयशब्दोऽत्र गणं विशिषन् प्रत्येकमतिशयपरश्रुत्या 'विदुषी परिषद्' इति न्यायाच्चार्थतो गुणान् विशिनष्टि। अन्यथान्यपदार्थासिद्धिः। सत्यां गतौ व्यधिकरणबहुव्रीह्ययोगः। 'शैलजन्मा' इत्यादिषु अगत्या तत्स्वीकारः। एतत्सूत्रसंवादिन्या * परीक्ष्य इत्यादिश्रुत्या ब्रह्मपुरुषशब्दोक्तजिज्ञास्यनिष्कर्षम् सर्वोपनिषदां पुंसूक्तैका-र्थ्यम्, ईश्वरस्याध्यस्तब्रह्मांशत्वासम्भवम्, ईदृशस्य गीतानिरुक्त्या प्रकृत्यादेर्देवतान्तरेभ्योऽपि विशेषव्यक्तिं चाभिप्रेत्याह —**पुरुषोत्तम** इति। अवधारणमिह ग्राह्यम्।

यद्यप्यत्र समानाधिकरणसमासे पौर्वापर्यव्यत्ययः; निर्धारणे तु षष्ठ्या न समासः। तथापि * द्वाविमौ पुरुषौ लोके इत्यारभ्य * उत्तमः पुरुषस्त्वन्यः इत्यधमप्रतियोगित्वोक्त्या संबन्धिशब्दतया समासः स्यात्। * अक्षरादपि चोत्तमः

इत्यनेन पञ्चमीसमासो वा सूच्यते। योगविभागस्तु यथाप्रयोगमिष्टः। अत एव सप्तमी निर्धारणेऽपि समस्यते। नगोत्तमादिशब्दाश्चैवं शाब्दैः निर्व्यूढाः। * रूढ्या तु कामं पुरुषोत्तमोऽस्तु इति वदन् श्रुत्यादिबाध्यः, * अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः इति सर्वविदुक्तेः। अभिधीयते—मुख्यवृत्त्या विषयीक्रियते। एतेन तदेकनाम्नो ब्रह्मशब्दस्य तत्रैव लक्षणामिच्छन्तो निरस्ताः, रूढिविषये क्वचिल्लक्षणां वदन्तश्च निरस्ता।

सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः। बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थः। स च सर्वेश्वर एव। अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः। तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः, अनेकार्थकल्पनायोगात् भगवच्छब्दवत्।

ननु गवादिशब्दवज्जातिद्वारा, पाचकादिवत् क्रियाद्वारा, डित्थादिवद्यदृच्छया वान्यत्रापि मुख्यता स्यादित्यत्राह—**सर्वत्र** इति। प्रकृत्यादिष्विव ब्रह्मशब्दस्थलेष्वित्यर्थः। तेषु मिथो विषमेषु तदन्यव्यावृत्ता जातिः क्रिया वा न दृष्टा। बृंहणत्वं तु बृहत्त्वापेक्षम्; अतस्तन्निमित्तत्वे गौरवम्। बृहत्त्वं च किञ्चित्तत्र तत्र प्रकृतं विवक्षितं च। ब्रह्मशब्दवृत्तिद्वारा तन्निरुपाधिकवृद्धिरूपधात्वर्थप्रसिद्धिश्च नोपेक्ष्या; अतस्सम्भवद्वृत्यन्तरे न यदृच्छापीति भावः। हिः प्रसिद्धौ हेतौ वा। तर्हि बृहच्छब्दवदसौ बृहत्त्वमात्रनिमित्तः स्यात्, नेत्याह—**बृहत्त्वम्** इति। सर्वतः बृहत्त्वमसङ्कोचात् स्वरूपतो गुणतश्चेत्युच्यते। तेन परिच्छिन्नस्वरूपाणां गुणबृहत्त्वरहितस्य गुणादेश्च व्यवच्छेदः। अस्येत्यनेन बृहच्छब्दाद्व्यावृत्तिर्दर्शिता। न ह्यसौ 'इत इदं ब्रह्म' इत्यवधिनिर्देशं तरसमप्प्रयोगं सहते। * सर्वं खल्विदं ब्रह्म * सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्। * त्रयं यदा विन्दते ब्रह्ममेतत् इत्यादिष्वन्येषां तच्छरीरतया देवोऽहमित्यादिवत् सामानाधिकरण्यम्; न तु तत्तद्वस्तुषु ब्रह्मशब्दप्रयोगः। त्रैविध्योक्तिश्च प्रेरितृत्ववैशिष्ट्यं भोक्तृभोग्यवैशिष्ट्यं चापेक्ष्य। नारायण परं ब्रह्मेत्यत्र परमिति विशेषणं त्वौपचारिकव्यावृत्त्यर्थम्; अतो बृहत्त्वमात्रं नास्य निमित्तमिति भावः। प्रयोगनियत्या तत्र तत्र काष्ठाप्राप्तबृहत्त्वं स्यादित्यत्राह—**स च** इति। अपरिच्छिन्नबृहत्त्वाश्रय इति यावत्। सर्वेश्वर इति समाधिकदरिद्रत्वादिश्रुतिव्यञ्जनी समाख्या, * अजस्सर्वेश्वर इति तन्नामपाठात्। एकस्यैव सर्वनियमनादिरूपं निरतिशयबृहत्त्वं शास्त्रोक्तम्; तदन्येषां तु तादधीन्यात्तत्त्वं तादृक्त्वमपि नास्तीत्यवधारणाभिप्रायः। अन्यत्र निमित्तासम्भवान्नैमित्तिकासम्भवस्य फलितत्वमाह—**अत** इति। कथं तत्तद्वाचकत्वाभावे सम्बन्धगुणयोगयोश्च सर्वत्र सम्भवे क्वचित्प्रकृत्यादिषु नियतप्रयोग इत्याह—**तस्मात्** इति। अयं भावः—न ह्यत्र सम्बन्धमात्रलक्षणा; न च किञ्चित्साम्याद्गौणी वृत्तिः; किं तु तद्गुणो निरतिशयबृहत्त्वम्, तल्लेशोऽपि लोकोत्तरबृहत्त्वम्, तन्निबन्धनोपचारनियमान्नातिप्रसङ्गः। प्रयुञ्जते च यथेष्टं स्तुतिनिन्दाभिप्रायेण मुख्यासन्ने तद्गुणप्रकर्षयोगिनि च तच्छब्दं नामतयेति। ननु मुख्ये लभ्ये नोपचारः। न चावयवशक्तित्वाद्ब्रह्मशब्दस्यैकत्राप्यन्या शक्तिर्न कल्प्या, किमुतानेकत्रेति वाच्यम्; तादृशस्यापि प्रयोगनियत्यै रूढेः कल्प्यत्वात्। पङ्कजादिषु पद्मत्वादिवच्चैकं नियामकं न दृष्टम्। अतो यावत्प्रयोगं शक्तिर्भेद्येत्यत्राह—**अनेक** इति। क्लृप्तशक्तेरशब्दस्य प्रयोगविमर्शे हि प्रथमं मुख्यानुसारः। शक्तिपरीक्षायां त्वेकविषये शक्त्या प्रयोगान्तरान्यथासिद्धौ न शक्त्यन्तरं कल्प्यम्, गौरवात्। अन्यथोपचार एव लुप्येत। अस्ति चासाविति गौणमुख्याधिकरणे स्थापितम्। क्वचित्तु अगत्या अनेकशक्तिकल्पनेत्याशयः।

नैघण्टुकैस्त्वनादृत्य शब्दनिष्कर्षणं गिराम् । प्रयोगग्रौढिशिक्षार्थं पठ्यतेऽनेकनामता ॥ २०६ ॥

यदत्र नियामकतयोक्तं लोकोत्तरबृहत्त्वं, तेनैवैकेन निमित्तेनान्येष्वपि मुख्यत्वं स्यात्, अन्यथा विपरिवर्तः किं न स्यादित्यत्र दत्तोत्तरत्वमभिप्रयन्, * प्रत्यक्षेऽपि विसंवादो येषां कस्स्वयमुत्तरम् । तेभ्यो दद्यादिति ज्ञात्वा वृद्धानां मतमब्रवीत् ॥ इति न्यायात् पुराणोक्तीः निदर्शयति— **भगवच्छब्दवत्** इति । तत्र * शुद्धे महाविभूत्याख्ये इत्यादिना, * अन्यत्र ह्युपचारतः इत्यन्तेन भगवच्छब्दस्य यौगिकार्थपौष्कल्यवत्येव मुख्यत्वमुक्तम् ।

पुराणान्तरेऽपि— * भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च वर्तेते वासुदेवे सनातने ॥ इति ॥

दार्ष्टान्तिकमपि गारुडे स्थापितम्— * वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि । तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने इत्यारभ्य, * यस्मिन्प्रयुज्यमाने तु गुणयोगस्सुपुष्कलः । तत्रैव मुख्यवृत्तोऽयमन्यत्र ह्युपचारतः ॥ इति ॥

तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः । अतस्सर्वेश्वर एव जिज्ञासाकर्मभूतं ब्रह्म । ज्ञातुमिच्छा जिज्ञासा । इच्छाया इप्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधीयते ।

अस्त्वेकत्रैवास्य शक्तिः ; अस्मिन् सूत्रे भेदकाभावादमुख्यत्वं किं न स्यादित्यत्र, * नास्ति भेषजमन्यत्र नारायणरसायनात् , * वासुदेवं परित्यज्य योऽन्यं देवमुपासते । तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः ॥ इत्यादिप्रमाणगत्या प्रत्याह— **ताप** इति । न ह्यत्र मुख्यस्य बाधः, भगवतः स्वतन्त्रस्वामित्वात् । अस्वतन्त्रस्यान्यस्य चायम् अर्थः सिद्धः, * जुष्टं यदा पश्यत्यन्यमीशमित्यादिभिस्सोपबृंहणैः परोपास्तेरेव तापत्रयनिवर्तकत्वोक्तेः । स एव * मन्तव्योऽन्वेष्टव्य इति विचार्यत्वेन श्रुत इति भावः । ❀ अनेकार्थत्वेऽपि ब्रह्मशब्दस्यास्मिन् प्रयोगे असावेवार्थ इत्याह इति विवरणं त्वन्वारोहेऽपि विशेषदाढर्ढ्यपरम् । जातिगुणादिनिमित्तत्वबहुरूढत्वपक्षेष्वपि हि समभिव्याहृतपदान्तरादेरर्थविशेषसिध्येत् । यद्वा मुख्यामुख्ययोस्तन्त्रेणानेकार्थत्वानूक्तिः । अमृतशब्देनैवकारेण च * तमेवं विद्वानमृत इति, ❀ तमेवं विदित्वा इति च वाक्यद्वयसूचनात् द्वयोरविरोधः स्यापितः । ननु प्रत्यगात्मन्यपि * सोऽन्वेष्टव्य इत्यादिदर्शनात् , ❀ नात्मा श्रुतेः इत्यादौ तस्यापि निरूपयिष्यमाणत्वाच्च स एवेत्यवधारणमिहाशक्यम् । तदिदं निगमननुखेन व्युदस्यति— **अत** इति । शब्दशक्त्या प्रस्तुतार्थस्वाभाव्याच्चेत्यर्थः ॥ तदुभयं सर्वेश्वर इत्यादिपदद्वयाभिप्रेतम् । **जिज्ञासाकर्मभूतं** जिज्ञासया प्राप्तुमिष्टतममित्यर्थः । प्रधानतया ह्यत्र जिज्ञास्यः परः । तद्भक्त्यारोहायाहंग्रहोपास्तौ विशेषणतया बोद्धुं च स्वात्मापि चिन्त्यः । प्रजापतिवाक्यादिषु च प्रत्यगात्मज्ञानं प्रकृतपरविद्यार्थतयैवोच्यत इति वक्ष्यते ।

सन् इहानिच्छार्थः इच्छार्थो वा? नाद्यः— * गुप्तिजिकिद्भ्यस्सन् इत्यादावपाठात् । न द्वितीयः— विचारे विवक्षिते तदिच्छाभिधानविरोधात् सूत्रलक्षणविरोधात् उपचारायोगाच्च इत्यत्राद्यमनभ्युपगत्यान्त्यं समर्थयितुं विगृह्णाति— **ज्ञातुमिति** । ननु प्रत्ययार्थप्रधाने जिज्ञासापदे ज्ञानस्य निमित्तत्वान्न विधेयत्वम्, इच्छा तु न पुरुषतन्त्रा, न च सा स्वज्ञानजन्या, विषयानुकूल्यधीनिमित्ततया तदभावे तदनुपपत्तेरप्रतीयमाणत्वाच्चेत्यत्राह— **इच्छाया इति । स्वविषयसिद्ध्यर्थतया इच्छारूपक्रियायाः प्रोक्षणादेरिव स्वकर्मप्रधानत्वं सिद्धम् । * धातोः कर्मणः इत्यत्र च**

धात्वर्थस्य प्राधान्यमार्थं ग्राह्यम्। अप्राप्तमेव विधेयम्। अत इच्छावाचिना तत्संबन्धिविवक्षात्र न युक्तेति भावः। तर्हि ज्ञानमात्रं वाच्यम्, किमजागलस्तनकल्पेन प्रत्ययेनेत्यत्र * अधिकमधिकमर्थं सूचयतीति नीत्या प्रत्युक्तिः—**इष्यमाणमिति**। सन्दिग्धसप्रयोजनविषयतया रागप्राप्तं विचाररूपं ज्ञानं नोपासनादिवद्वैधमिति सूचनात्सार्थकः सन् इत्याशयः। ज्ञान शब्दश्चात्रौचित्यात् उक्तविशेषपरः। रागविषयफलरूपज्ञानमुखेन विचाराक्षेपकल्पस्तु न युक्ता, धीविलम्बात्, विवक्षितस्य च साक्षाद्वक्तुं शक्यत्वात्।

इह मीमांसाख्यशास्त्रोत्तरभागारम्भे। एवमेव हि * अथातो धर्मजिज्ञासा इत्यादिष्वपीति भावः। ननु रागप्राप्ते विचारे 'कथं विधीयते' इत्युक्तिः, नाप्यत्र गुर्वभिगमनादिनियमांशापेक्षया विध्युक्तिः; न्यायानुपयोगात्, तादृशनियमनिषेधेन पूर्वपक्षानुत्थानाच्च। मैवम्—रागप्राप्तस्याप्यनारभ्यत्वभ्रमे तन्निषेधपरत्वादत्र विधिशब्दस्य,

जातापि हि विचारेच्छा पूर्वपक्षोक्तयुक्तितः। सीदन्त्युत्तभ्यते युक्त्या सिद्धे व्युत्पत्तिपूर्वया॥ २०७॥

मीमांसापूर्वभागज्ञातस्य कर्मणः अल्पास्थिरफलत्वात्, उपरितनभागावसेयस्य ब्रह्मज्ञानस्यानन्ताक्षयफलत्वाच्च पूर्ववृत्तात्कर्मज्ञानादनन्तरं तत एव हेतोर्ब्रह्म ज्ञातव्यमित्युक्तं भवति। तदाह वृत्तिकारः— ❀ वृत्तात् कर्माधिगमादनन्तरं ब्रह्मविविदिषा इति। वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्र्यम्—❀ संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः इति।

अत्र 'तापत्रय' इति ग्रन्थे यादवप्रकाशोक्तं पूर्ववृत्तान्तरं साङ्ख्यादिविचारस्यानारभ्यतास्थापनं च विवक्षितमिव प्रतिभाति; तद्व्युदस्यन् वाक्यार्थमाह—**मीमांसा** इति। 'माङ् माने' इत्यत्र नात्वं निपात्य वा, 'मान पूजायाम्' इत्यत्र वा 'मान्बध' इत्यादिना अनिच्छासन्नन्तोऽयं शब्दः। "मानेर्जिज्ञासायाम्" इति वैयाकरणोक्तिस्त्वदूरविप्रकर्षात्; जिज्ञासाविशेषोत्थाप्ये हि पूजितविचारे तदनुबन्धिनि प्रशस्तन्याये वा वृद्धप्रयोगादस्य शक्तिनिष्कर्षः। आहुश्च— * मीमांसासंज्ञितस्तर्कस्सर्वो वेदसमुद्भवः इत्यादि। तादृशन्यायनिबन्धात्मनि तु शास्त्रे भाक्तो मीमांसाशब्दः।

अतः पूर्वापरभागविभागेन ज्ञातत्वावसेयत्वोक्तिरविरुद्धा। अत्र पूर्ववृत्तादित्यादिना वाक्ययोजना। शिष्टं तत्तत्यहेत्वंशसमर्थनम्।

विचारक्रमनिर्देशः सौत्रस्तद्व्यक्तये त्विह। शास्त्रैक्यतत्क्रमौ प्रोक्तौ सूत्रकाराभिसंहितौ॥ २०८॥

पूर्वभागोपरितनभागशब्दाभ्यां नियतक्रमव्याख्यानरूपप्रबन्धैक्यं व्यज्यते। तन्निदानं व्याख्येयस्य वेदस्य क्रमवत्त्वं पदयोजनायां सशिरस्कशब्देन दर्शितम्। पदवाक्यनिर्वाह्योत्तात्पर्यभेदादपुनरुक्तिः। **ज्ञातस्य** निर्णीतस्य। **अवसेयस्य** अबाधितापातधीस्थतया निर्णेतव्यस्य। **ब्रह्मज्ञानस्य** ब्रह्मोपासनस्य। ब्रह्मस्वरूपमात्रविवक्षायामत्र ज्ञानशब्दाधिक्यात्, 'ज्ञातस्य कर्मणः' इत्येतत्समशीर्षतया साध्यविशेषग्रहणौचित्यात्, विचाररूपस्य निर्णयरूपस्य वा ज्ञानस्य अवसेयत्वोक्त्ययोगात्, निर्दिश्यमानफलं प्रत्यचोदितत्वाच्च। तदिह समन्वयनीत्या स्वयमनन्ताक्षयफलत्वेन ज्ञातव्यमपि ब्रह्म स्वोपासनस्यानन्ताक्षयफलसाधनत्वेन तद्विषयतयापि ज्ञातव्यमिति तदुपसर्जनतयोक्तिरपि

सुसङ्गता । ब्रह्म ज्ञातव्यमित्यनेन तु तत्प्राधान्यं व्यज्यते । अत प्रयोजनवत्तयापातधीस्थत्वं विचार्यत्वे हेतुः । कर्मविचारात् पश्चाद्भावितस्य तु प्रतिबन्धशान्तौ तत्सापेक्षत्वमानन्तर्यस्य च तादृशापेक्षणीयान्तराभावः । अतः श्रुत्युक्तनिर्वेदपूर्तिपर्यन्तविचारविशेषाभिप्रायेण **तत एव** इत्युक्तम् । अवधारणमिह हेतुवैकल्प्यनिवृत्त्यर्थम्, सावधारणहेतुनिषेधायोगात् । केचित्तु * हेत्वन्तराद्ब्रह्मविचारेऽनावश्यकत्वशूद्राधिकारत्वयोः प्रसङ्गात् कर्मधीव्यतिरिक्तहेत्वनादरोपदेशोऽयम् इत्याहुः । अत्र प्रधानप्रतिज्ञा तद्धेतुः प्रतिज्ञान्तरहेतुश्च नोक्तः स्यादिति बहूनौचित्यम् । आकाङ्क्षितहेतुपूर्वकसाध्यविशेषायोगव्यवच्छित्त्यैवार्थतः हेत्वन्तरादिनिरासस्तु युक्तः । **ज्ञातव्यम्** विचार्यमित्यर्थः । 'विचारः कर्तव्यः' इति भाषिष्यते । अत्राहार्थे कृत्यप्रत्ययः । कर्मज्ञानादित्यत्रापि ज्ञानं विचारः ।

ब्रह्म ज्ञातव्यमित्युक्तं भवतीत्यनेन स्वारस्यं युक्तिं च सूचयता ब्रह्मैव ज्ञातव्यमिति वाक्यार्थं वदन्तः प्रत्युक्ताः । इदं हि सूत्रमविचार्यत्वनिरासार्थम् । ब्रह्मणो ज्ञातव्यत्वस्य इतः पूर्वमसिद्धतया तदेव ज्ञातव्यमिति नियमो नोदेति । कथं च शब्दानां सिद्धपरत्वसम्भवमसाधयित्वा सिद्धविशेषस्य विचार्यत्वोक्तिः ; समन्वयसूत्रात् तत्साधनम्, साकाङ्क्षयोजना च न युक्ता । अत्र चोदनासूत्रवच्छब्दतोऽर्थतश्चायोगान्ययोगव्यवच्छेदौ वाक्यभेदाभावश्चेत्यप्ययुक्तम्, अनुपयुक्तप्रतिज्ञामात्रानुपपत्तेः । ब्रह्मश्रद्धावर्धकतया अन्यनिषेधः प्रस्तुतोपयोगी इति च मन्दम् ; तत्प्रतिज्ञानेऽपि हेतुश्चात्रोह्यः ; तदूहे तु ईक्षित्यधिकरणाद्यैस्तर्कपादान्तैस्साधनप्राप्तैः कृतकरत्वं च स्यात् । किं च शारीरकेऽनुक्तांशस्य साङ्ग्ययोगावगम्यत्वं वदद्भिः कथमिह तन्निषेधः प्रतिज्ञायते ? वेदविरुद्धांशानादरणीयत्वं तु विरोधाधिकरणतः प्रागेव सिद्धम् । अतो ब्रह्म ज्ञातव्यमेवेति योजना युक्ता इति वृद्धाः । अनेन श्रोतव्यादिश्रुतिरनुस्मृता भवति । अत स्वोक्तौ पदार्थवाक्यार्थौ वृत्त्यापि द्रढयन् तन्मतानुसारे तत्कृतिसंवादं दर्शयति— **तदाह** इति । अनन्यथासिद्धपूर्वत्वविवक्षया कर्मविचारस्य हेतुत्वमपि वृत्त्यभिप्रेतम् । अधिगम्यतेऽनेनेति अधिगमोऽत्र विचारः । विविदिषोक्तिः जिज्ञासोक्तिवन्नेया ।

स्वोक्तसूत्रार्थसिद्ध्यै सूचितं शास्त्रैक्यमपि संवादयति— **वक्ष्यति** इति । व्याख्यास्यमानप्रदेशान्तरविषयतया भविष्यन्निर्देशः । ऐकशास्त्र्यमिह न केवलमेकविधास्थानत्वम् ; किं तु ऐकप्रबन्ध्यमपीत्यभिप्रायेण संहितत्वोक्तिः । अधीतकृत्स्नवेदार्थरूपविचार्यैक्यसिद्धौ कर्मब्रह्मकाण्डयोः प्रत्येकमपूर्णार्थत्वेन परस्परसाकाङ्क्षत्वात् नष्टाश्वदग्धरथन्यायेन सङ्घटितमित्यर्थः । इयं च वृत्तिः शास्त्रभेदभ्रमहेतून् तत्परिहारांश्च सूचयति—सर्वशरीरिगोचरत्वं दर्शयता शारीरकशब्देन विषयभेदज्ञापनात्, 'एतत्' इति प्रयोजनाधिकारिभेदयोरर्थविरोधस्फुरणस्य चाङ्गुल्यैव निर्देशात् । 'जैमिनीयेन' इति भेदशङ्काद्योतनम् । परिहारस्तु 'षोडशलक्षणेन' इति, द्वादशाध्यायीचतुरध्यायीरूपकाण्डद्वयेन । अत्र * कर्मदेवताब्रह्मगोचरा सा त्रिधोद्भवौ सूत्रकारतः । जैमिनेर्मुनेः काशकृत्स्नतो बादरायणादित्यतः क्रमात् ॥ इति तत्त्वरत्नाकरोक्तेश्च वृत्तेश्च क्वचिदुपचारेणाविरोधो ग्राह्यः । षोडशलक्षणेनेति प्रतिबन्दीमभिप्रयतावान्तरविषयादिभेदानां न प्रबन्ध्यैक्यविरोधित्वमिति दर्शितम् । 'जैमिनीयेन' इत्यनेनैवार्थविरोधशङ्का सूत्रतात्पर्यानभिज्ञतयेति सूच्यते । सूत्रयिष्यति हि शारीरकार्थेषु बहुषु जैमिनेस्संवादम् । व्यामोहशान्त्यै * धर्मं जैमिनिरत एव इत्यादिषु क्वचिद्विसंवादोक्तितन्निरासौ । 'परामर्शं जैमिनिः' इत्यादौ नैष्ठिकाद्याश्रमाभावो जैमिन्यसूत्रितोऽपि नूनं सकामानां गृहस्थधर्मवैमुख्यनिवारणार्थं कदाचिदुक्तोऽनुद्यापास्तः । अन्यथा * तद्भूतस्य तु नातद्भावो जैमिनेरपि इत्यादौ नैष्ठिकाद्याश्रमप्रच्युतिनिषेधस्य

जैमिनिसंवादोक्त्ययोगात् । * मध्वादिष्वसंभवादनधिकारं जैमिनिः, * भावं जैमिनिर्विकल्पामननादित्यादिष्वपि न शास्त्रैक्यविरुद्धानूक्तिः, स्वोक्तव्याख्याभेदवत्स्वस्यान्यथोक्तेस्तदविरोधात् । संहितत्वोक्त्या तु कर्तृभेदाभेदयोः यथादृष्टि प्रबन्धभेदाभेदानापादकत्वं ख्यापितम् । अर्थसङ्गतौ सत्यां ह्यन्यतरामिसन्धेरुभयाभिसन्धेर्वा सन्धायकत्वं युक्तम् ।

ब्रह्मसंवाददार्ढ्येन प्रधानार्थाविरोधतः । अप्रधानविरोधस्तु तात्पर्यादपनोद्यते ॥ २०९ ॥
परकल्पितसौधार्धविरुद्धांशव्यपोहतः । शेषपूरणवद्वात्र संहितत्वोक्तिसंभवः ॥ २१० ॥

अतः प्रतिपिपादयिषितार्थभेदेन षट्कभेदवदध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः । मीमांसाशास्त्रम् ❀ अथातो धर्मजिज्ञासेत्यारभ्य ❀ अनावृत्तिरशब्दादनावृत्तिरशब्दात् इत्येवमन्तं सङ्गतिविशेषेण विशिष्टक्रमम् ।

कुतस्तर्हि तद्भेदप्रथा, सति वा भेदे कथं च प्रबन्धैक्यम् इत्यनवहितानुयोगे द्वितीयवृत्त्यभिप्रेतं व्यनक्ति— अत इति । सयुक्तिकसंप्रदायादित्यर्थः । प्रतिपिपादयिषितत्वोक्त्या कर्मकाण्डदेवताधिकरणादेर्देवतातत्त्वनिश्चयरहितानामपि कर्मप्राशस्त्यादिप्रतिपादनपरत्वेन विग्रहादिनिराकरणादौ तात्पर्याभावस्सूच्यते । उक्तं ह्यागमप्रामाण्ये— * यथैव हि भगवतो जैमिनेः कर्मणः फलोपन्यासः कर्मश्रद्धासंवर्धनायेति । विवृतं चैतद्भेदार्थसङ्ग्रहे— * अश्रुतवेदान्तानां कर्मण्यश्रद्धा मा भूदिति देवताधिकरणेऽतिवादाः कृता इति । अतिवादा अन्यपरोक्तयः । तावताऽपि बाह्योक्तानित्यसंयोगादिनिमित्तश्रुत्यप्रामाण्यशङ्कानिरासात् तत एव स्वाभीष्टसिद्धेः इत्याशयः ।

अपि चैवं नवमाद्यपादे— * फलदेवतयोश्च, * न चोदनातो हि तादृण्यमिति प्रसक्तयोः फलदेवतयोर्मध्ये देवताविषयाणि * देवता वा प्रयोजयेदित्यादीनि सूत्राणि यानि, तानि व्याकुर्मः— देवतोद्देशेन देयं द्रव्यं देवता न प्रयोजयेत्; कुतः, कृप्यादिवत् फलसाधनभूतक्रियाया एव प्रयोजकत्वोपपत्तेः । तत्राह— * देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वादिति । वाशब्दश्शङ्कानिवर्तकः; हविरुद्देश्या देवता फलार्थिनं स्वाराधने प्रयोजयेत् । कुतः, भोजनस्य तदर्थत्वात्: भोजनस्य हविषः तत्समर्पणस्य च तदर्थत्वात् तच्छेषत्वात् । सम्प्रदानभूता हि देवता प्रधानतया स्वार्थं द्रव्यतत्समर्पणे प्रयुङ्क्ते ।

क्रियाप्रधानशास्त्रेषु न्यग्भूतापि हि देवता । तत्तन्मन्त्रादिसामर्थ्यादर्थप्राधान्यशालिनी ॥ २११ ॥

न च वाच्यं विग्रहादिपञ्चकायोगात् न प्रयोक्त्री देवतेति; स्मृत्युपचारान्यार्थदर्शनैरबाधितैस्तत्सिद्धेः । अतो यथा विग्रहादिमानधिराराध्यः स्वार्थं स्वाभीष्टमुपचरणं प्रयुङ्क्ते; तथा देवतापीति । * आर्थपत्याच्च— अर्थते प्राप्यत इत्यर्थः विभूतिः, अर्थ्यत इति वा । अतस्तदभावादनाराध्या अनीप्सितप्रदत्वादप्रयोजिकेति न शङ्कनीयम्; परा खलु देवता सर्वमेष्टे; तन्नियुक्ता चापरा यथाधिकारं तद्विभूतीनाम् । तथाऽपि निरपेक्षा देवता न कुतश्चित् प्रीयेत, न कञ्चन प्रीणाति; अतः कथं प्रयोजिकेत्यत्राह— * ततश्च तेन सम्बन्धः । ततः नैरपेक्ष्येऽपि नरदेवनीत्या दयौदार्यशालिन्याः परिचर्यमाणायाः प्रसेदुष्या देवताया एव हेतोः परिचरतां स्वाभीष्टफलेन सम्बन्धः स्मृत्युपचारादिभिर्न सिद्ध इति पूर्वः पक्षः । राद्धान्तस्तु— * अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्यात् । अत्र 'अपि वा' इति सार्धाङ्गीकारं पक्षव्यावर्तनम् । यद्यपि देवताया विग्रहादिपञ्चकं दुर्निषेधम्, द्रव्याद्यपेक्षया संप्रदानस्य प्राधान्यम्,

यजेश्च देवताराधनवाचितया यागस्य तादर्थ्यं, सिद्धपरवाक्येषु च परावरदेवतयोः स्वरूपादिकमनन्यार्थमामनामः; तथाऽपि कर्तव्योपदेशेषु यज्ञादिरूपं कर्म स्वर्गादिफलसाधनतया चोदितत्वात् प्रधानं सत् साध्यतया बुद्ध्यारोहेण पुरुषं प्रवर्तयति, कृत्स्नं च देवतादि क्रियाशेषभूतम्।

ननु फलप्रदाया देवताया आराध्यत्वेन प्राधान्यमनुशोश्रूयामहे, अत्राह— * गुणत्वे देवता श्रुतिः। हविष्प्रदानं प्रति गुणीभूतां हि देवतामनुशृणुमः; मन्त्रार्थवादोपस्थापितं देवतामीतिरूपमपूर्वं चोदितस्य कर्मणः क्षणिकस्य कालान्तरभाविफलद्वारतया उपादीयेत; अतो वास्तवप्राधान्यशालिन्यपि देवता फलकामप्रवर्तकशाब्दप्राधान्यवक्रियागुणीभूता न प्राधान्येन प्रयोजिकेति। अतिथेस्तर्हि कथं प्रयोजकत्वम् इत्थमित्याह— * अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्। आतिथ्यं प्रत्यतिथेः प्रधानत्वं प्राप्तम्; अन्यथा हि तदर्थे कर्मणि प्रयोजकाभावात् तदभावः स्यात्। तत्सपर्याविधिरेव तत्प्रयोजक इति चेत् तत्र प्रत्याह— * तस्य प्रतिविधानत्वात्। आतिथ्यकर्मणो हि अतिथ्यागमनप्रतिविधानतयैव चोदना।

क्रियाप्रयुक्तपुरुषमाहूता तु देवता। संनिधत्ते तदिष्टार्थं न ततस्तत्प्रयुक्तता॥ २१२॥
अतिथिस्तु स्वयं प्राप्तः स्वाभीष्टं च प्रयोजयेत्। तदिष्टानुविधानेन तत्सपर्यार्थचोदना॥ २१३॥

अतः प्राप्ताप्राप्तविवेकादतिथिप्राधान्योक्तिरिति। यथा चातिथेर्विग्रहादिमत्त्वे तदुपचरणानुष्ठानस्य न कदाचित् क्षतिः, प्रत्युत स्वरूपलाभ एव; एवं देवतायास्तद्वत्त्वेऽपि। न चात्र तत्प्रतिक्षेपसाफल्यं पश्यामः। गुणीभावसाधनेऽपि किं फलमिति चेत्, अनिर्धारितवास्तवप्राधान्यानामपि कर्मश्रद्धासंवर्धनमिति।

सूत्रेषु तावदेतेषु पूर्वपश्चिमपक्षयोः। देवताविग्राहदेर्न प्रतिक्षेप्यत्वमूचनम्॥ २१४॥
शाबरे पूर्वपक्षोक्तदेवताविग्रहादिषु। स्वतः प्रामाण्यवेदिभ्यः स्वदते न निराकृतिः॥ २१५॥
स्मृत्योपचारादन्यार्थदर्शनैश्च स्वभाषितम्। न वाङ्मात्रेण निह्नोतुं शक्यते नास्तिकेतरैः॥ २१६॥
अदर्शनकुतर्काभ्यां श्रुतार्थानामपह्नवे। चार्वाकादिमतापत्त्या सर्वोपप्लवसम्भवः॥ २१७॥
श्रुतानां विग्रहादीनां कल्प्यतोक्तिश्च मोहजा। श्रुतशक्त्याद्यभावस्य कल्पने गौरवं तु वः॥ २१८॥
क्षणिकस्य फलद्वारं किं भवेदिति चिन्तने। द्वारकल्पनेवैरं ह्यत्र श्रुतद्वारपरिग्रहः॥ २१९॥
देवतानां क्रियार्थत्वं कर्मणां च तदर्थता। मुखभेदेन सिद्धत्वान्न मिथो बाधमर्हतः॥ २२०॥
आदित्यादिमतीरङ्गे स्थापयन्बादरायणः। देवतानां प्रधानत्वमर्थसिद्धमसूत्रयत्॥ २२१॥
नासिद्धदेवतारूपदृष्टिश्चान्यत्र युज्यते। न च सर्वत्र निर्बाधे कल्प्यो दृष्टिविधिक्रमः॥ २२२॥
देवतानां तपश्चर्योक्तिश्च न विरुध्यते। स्वाधिकेश्वरतोपार्थप्रवृत्तेरुपपत्तितः॥ २२३॥
प्रशासितुश्च गृणया धर्मसंस्थापनार्थिनः। तत्तद्धर्मप्रवृत्तिस्स्यात्कर्मवश्यानुसारिणः॥ २२४॥
तिर्यक्स्थावरनिर्जीवतत्प्रतीकगुणक्रियाः। अभिमत्यनुबन्धेन देवतास्तदपि श्रुतम्॥ २२५॥
हविर्भेदानुसारेण फलभेदप्रदायिता। प्रतिषिद्धैः प्रकोपश्च राजादिन्यायतो भवेत्॥ २२६॥
यदि श्रुत्यनुसारेण स्वभावो हविरादिषु। तेनैव तत्तदाराध्यस्वभावस्वीक्रियोचिता॥ २२७॥
मन्त्रार्थवादसिद्धेऽपि यत्र बाधं न दृश्यते। तन्मूला स्मृतिरप्यत्र न बाधार्हा स्वमूलवत्॥ २२८॥

पर्याये च विशिष्टे च देवताभेदकल्पनम् । तत्तच्छब्दोपधानेन तदुद्देश्यत्वसिद्धये ॥ २२९ ॥
अविदित्वा स्वमन्दत्वं नास्तिकैरास्तिकेष्विह । यैरजल्प्यत मन्दत्वं शोच्यास्ते सूक्ष्मदर्शिभिः ॥२३०॥
द्रव्यदैवतसामान्ये बलीयो द्रव्यमित्यपि । प्रत्यक्षे च परोक्षे च प्रमाणप्रस्थितेर्वशात् ॥ २३१ ॥
द्रव्यस्याध्यक्षसिद्धस्य हविष्टुं शास्त्रगोचरः । देवतायास्स्वरूपं च धर्मत्वं चेति भेदतः ॥ २३२ ॥
प्रत्यक्षाद्युपजीवित्वाच्छास्त्रतो धीर्विलम्बिता । ततो हि परदौर्बल्यं श्रुतिलिङ्गादिकेष्वपि ॥ २३३ ॥
द्रव्यदैवतवैषम्यं न सत्यासत्यभावतः । दैवतं यदि मिथ्या स्यात्कथं भेदादिधर्मभाक् ॥ २३४ ॥
अर्थोपश्लिष्टशब्दात्मा शब्दमात्रात्मिकापि वा । यथाश्रुतगृहीता वा सत्यैव खलु देवता ॥ २३५ ॥
मणिमन्त्रौषधाद्यैश्च सिद्धिरुक्ताभ्युपेयते । जन्मसिद्धापि साधीता किं न देवेषु गृह्यते ॥ २३६ ॥
न वस्तुदेशान्तरयोर्देवदृष्टिविधानवत् । इह कल्पयितुं युक्तं स्वरूपविधिसौस्थ्यतः ॥ २३७ ॥
रात्रिसत्रादिनीत्या च विध्यपेक्षानुसारतः । फलदाः फलभूतत्वादपि सिध्यन्ति देवताः ॥ २३८ ॥
इत्थं प्राचीनया गत्या क्षिप्तं निर्दैवतं मतम् । शेषं तदुपरीत्यादिसूत्रभाष्ये भविष्यति ॥ २३९ ॥

द्रमिडभाष्यकारैरप्युक्तम्— * अज्ञसैव विश्वसृजो रूपमित्यारभ्य, * न ह्यरूपाया देवताया रूपमुपदिश्यते, यथाभूतवादि हि शास्त्रमिति । नन्वर्थवादानां विधिशेषत्वं पूर्वत्रोक्तम् ; समन्वयाधिकरणे त्वन्यथा ; तत्कथमविरोधः ? इत्थम्— उत्सर्गापवादतः प्रवृत्तेः । दृष्टं चैतच्छास्त्रान्तरे काण्डान्तरे च । एवमन्यत्रापि कुदृष्टिकल्पितो विरोधः शमयितव्यः । **षट्क्रमभेदवत्** इति कर्मकाण्डे प्रतिबन्दी, **अध्यायभेदवत्** इति तु काण्डत्रयेऽपि ; चकारोऽत्रानुक्तपादादिसमुच्चये । देवताकाण्डाच्छारीरकस्य पृथक्करणं च तत्पृथक्करणप्रतिबन्धा निरूढम् । अथ भिन्नक्रमत्वभिन्नप्रबन्धत्वव्युदासं वृत्तिसिद्धं व्यनक्ति— **मीमांसाशास्त्रम्** इति । **सङ्गतिविशेषेण** हेतुहेतुमद्भावादिना सम्बन्धेनेत्यर्थः । * स च विंशतिलक्षण्यामेकप्रयोजनसाधनत्वेनैकप्रयत्नसाध्यत्वमिति विवरणम् । इदं च ऐकप्रबन्ध्यव्यक्त्यर्थम् । **विशिष्टक्रमम्** = नियतक्रमम् ; न हि शास्त्रान्तरवदवसरमात्रादिह कापि क्रम इत्याशयः । तत्र विशेषः—

विचारात्पूर्वमेवात्र प्राप्तमध्ययनं विधेः । अतोऽनधीतवेदस्य विचारश्रुतिवारितः ॥ २४० ॥
क्रमो विंशतिलक्षण्या न वैधः किं तु यौक्तिकः । अतो व्युत्क्रमचिन्तायामनौचित्यं प्रकाश्यते ॥

'आरभ्य' इत्यनेन धर्मजिज्ञासासूत्रे कृत्स्नवेदार्थविचारप्रतिज्ञा सूच्यते, धर्मशब्देन सिद्धसाध्यपरावरकृत्स्नधृतिहेतुसंग्रहात् । कर्मभागमात्रप्रतिज्ञापि तत्रैव तन्त्रतः आवृत्त्या वा सिध्येत् । तावतैव सारे कर्मविचारार्थत्वोक्तिः। भागद्वयप्रतिज्ञाभ्यां सामान्यप्रतिज्ञा गम्या ; न्यायसूत्रे साधर्म्यवैधर्म्यसमोक्त्या प्रतिधर्मसमोक्तीतिवत् । तदेतत्सर्वं सङ्गतिमालायामुक्तम् । न च वाच्यम् आद्यप्रतिज्ञयैव कृत्स्नसिद्धौ किं भूयो विशेषप्रतिज्ञयेति ; शङ्काविशेषोद्धारादिप्रयोजनवशात् प्राचीनाध्यायेष्विवात्रापि तदुपपत्तेः । न चायम् * अथातो धर्मजिज्ञासा इत्यादिरप्रस्तुतार्थः ; यथान्यत्र सङ्गत्या क्रमनियतिस्तथात्रेति तात्पर्यात् । अत्र ह्यमानकत्वानिरूप्यतया प्रमाणलक्षणेन प्रथमेनाभावि । कात्स्न्र्येन वेदस्य प्रामाण्ये सिद्धे तदर्थेषु भेदाभावेऽङ्गत्वादेस्सर्वस्यायोगात् मानचिन्तानन्तरं शास्त्रार्थभेदचिन्ता प्रावर्तिष्ट ; शास्त्रभेदचिन्तेत्येके । तत्र शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयैः सिद्धे भेदे श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याभिः शेषलक्षणं प्रवृत्तम् । शेषाणामेव शेषिभिः प्रयोज्यत्वाय चतुर्थे कर्त्वर्थपुरुषार्थविचारा, विध्यपेक्षास्वरूपोपादानचिन्तेति केचित् ।

प्रयुक्तेषु श्रुत्यर्थपाठप्रवृत्तिमुख्यकाण्डैः पञ्चमे क्रमोऽनुक्रान्तः । सप्तमे शास्त्रार्थे स्थापिते तत्प्रयोक्ता षष्ठे प्रोक्तः । एवमुपदिष्टप्रकृतिनिश्चये विकृतावतिदेशस्सामान्यतः सप्तमे स्थापितः । अष्टमेऽपि तदनुबन्धिविशेषः । अतिदिष्टमन्त्रादीनां नवमे बहुविध ऊहः । अतिदेशप्राप्तेषु क्वचित्प्रयोजनाभावादन्यतो वा तल्लाभात्प्रतिषेधतो वा दशमे बाधः । उक्तेषु पृथक्प्रयुक्तिशक्तिमदुभयगोचरत्वे देशकालाद्यैक्ये चैकादशे तन्त्रम् । द्वादशेऽपि कस्मिंश्चित्प्रयोगमध्यपाति-न्यन्यस्मिंस्तत्प्रयोगोपजीविनि प्रसङ्ग इति । तदिदं सङ्ग्रहुः—* धर्मधीमानभेदाङ्गप्रयुक्तिक्रमकर्तृभिः । सातिदेश-विशेषोहबाधतन्त्रप्रसक्तिभिः ॥ इति । एवं तर्किते कर्मणि सङ्कर्षकाण्डे चतुर्लक्षण्या तत्तत्कर्माराध्यदेवतैव स्वरूप-भेदगुणप्रकर्षैः निरूप्यत। तत्समाप्तौ च * अन्ते हरौ तद्दर्शनात् * स विष्णुराह हि * तं ब्रह्मेत्याचक्षते तं ब्रह्मेत्याचक्षते इति विचारयिष्यमाणमुपचिक्षिपे इति तत्त्ववृद्धाः । ततोऽन्तिमे काण्डे सद्वारकमद्वारकं च यथार्हं द्वादशलक्षण्युक्तसर्वधर्म-समाराध्यमनन्तरचतुर्लक्षण्यवधारितसर्वदेवतशरीरकं परं दैवतं परीचिक्षिषितम् । तत्र सर्वेषां कारणवाक्यानामयोगान्य-योगव्यवच्छेदेन ब्रह्मणि समन्वयः प्रथमेऽध्याये प्रतिपाद्यते । तदुक्तं न्यायसुदर्शने— * व्युदस्ताविषयत्वान्यविषयत्वे समन्वयः । वाक्यानां ब्रह्मणि प्राच्याध्यायेनेह प्रदर्श्यते ॥ इति । तत्र शङ्कितविरोधोद्धूननं द्वितीयेऽध्याये । ताभ्यां स्थापिते ब्रह्मण्युत्पत्तिक्रमात्तृतीयचतुर्थाभ्यां साधनफलशोभनमिति विंशत्यध्याय्या विशिष्टक्रमत्वं दिङ्मात्रम् । हन्तैवमत्र कथं षोडशचतुष्कपौर्वापर्यम् ? व्युत्क्रमेऽपि हि न विरोधः, वेदप्रामाण्यादिकं तूपजीव्यमपि यथास्थानं शारीरके निब-न्धुं शक्यम् , तावन्मात्रं वा संश्रुत्य ब्रह्मचिन्ता स्यात् ; मैवम्—अस्ति ह्यनाद्यभ्यस्ते त्रिवर्गे कर्मकृत् प्रथममा दोष-दर्शनादभिनिविशत इत्यर्थक्रमः । उभयत्र परिमितापरिमितफलापातप्रतीत्यविशेषेऽपि * अल्पे चेन्मधु विन्देत इति न्यायात् कर्मसापेक्षविद्याप्रयासतो वरं तत्रैरपेक्ष्यनिर्धूतविकल्पतत्समफलकर्मचिन्ता प्रथममिति च । यज्ञादिपदार्थसापेक्षश्च तदङ्गवाक्यार्थबोधः । विद्याभेदेषु तत्र तत्र यज्ञतदवयवदृष्टिविधिविमर्शश्च दृष्टिविशेषणनिर्धारणापेक्षः । इष्टकचि-तादिदृष्टान्तधियश्च दार्ष्टान्तिकोपजीव्याः । कर्मब्रह्मप्रचुरस्वाध्यायभागस्यानादिसम्प्रदायनियताध्ययनसंस्कारक्रमेण तद्वि-चारक्रमोऽपि युक्तः । स चात्र मुख्यक्रम एव, कर्मोपासनारूपाङ्गाङ्ग्युत्पत्तिक्रमाच्च । तथा चोक्तं न्यायसुदर्शने— * कर्मविज्ञानयोर्हेतुहेतुमद्भावसम्मतेः । प्राग्भावः कर्मणः सिध्येत् पश्चाद्भावोऽपरस्य च ॥ * तयोश्च क्रमवत्त्वेन तद्विचारौ च तादृशौ । मुख्यक्रमनयादेव स्यातां सारस्वताङ्गवत् ॥ यथा 'सारस्वतौ भवत एतद्वै दैव्यं मिथुनम्' इत्यत्र युगलोत्पन्ने यागद्वये कन्याङ्गानां प्राथम्यमित्यनिर्णये सरस्वतीयागस्य याज्यानुवाक्याभ्यां प्राथम्ये सिद्धे तत्क्रमेण तदङ्गानामेव प्राथम्यमुक्तम्—'मुख्यक्रमेण वाङ्गानां तदर्थत्वादिति ।

पूर्वकाण्डप्रसिद्धानां न्यायानामिह संग्रहात् । ब्रह्मकाण्डो वृथेत्येतत्प्राच्याध्यायेष्वपि स्मर ॥ २४२ ॥
व्युत्पादनमपूर्वाणामाक्षिप्य स्थापनं तथा । अपवादः क्वचिच्चेति सार्थत्वमिह च स्थितम् ॥ २४३ ॥

ननु यदि * अनावृत्तिश्शब्दात् अनावृत्तिश्शब्दात् इत्यन्ता मीमांसा ; तदा शारीरकस्य विरक्ताधिकारत्व-स्वीकारात् , तत्र निर्दोषानन्तफलनिश्चयाच्च न स्वर्गादिफलसाधनानुष्ठाता कश्चित्सिध्येत् , ततश्च काम्यविधीनामननुष्ठान-लक्षणमप्रामाण्यं स्यात् ; मैवम्—मोहाद्विद्वान्वा यः कर्ममात्रं विचार्य विश्रान्तः, यश्च ख्यातिलाभपूजाप्रवचनादिमात्र-कामस्सन्न्यस्तार्थं चिन्तयेत् , यो वा पश्चान्नियतिवशान्निवृत्तवैराग्यः, ते श्रुतशारीरका अपि प्रवृत्तिधर्मे न जह्रुः ॥

पण्डितोऽप्यातुरः कश्चिदपथ्येषु प्रवर्तते । निषिद्धेष्वपि किं नैवं काम्यं प्राज्ञेऽपि सम्भवेत् ॥ २४४ ॥

कृष्यन्ते च महान्तोऽपि कामादुभयभागिनः । क्रमयुक्तिश्च केषांचित् तत एवाभिधीयते ॥ २४५ ॥

तथाहि—प्रथमं तावत् * स्वाध्यायोऽध्येतव्यः इत्यध्ययनेनैव स्वाध्यायशब्द-वाच्यवेदाख्याक्षरराशेर्ग्रहणं विधीयते ।

प्रकृतस्यैकशास्त्रस्य ब्रह्मचिन्तोद्यमस्य च । क्रमादेश्चोपपत्त्यर्थं तथाहीत्यादि भाष्यते ॥ २४६ ॥

अत्र कर्मविचारात्प्रागपि ब्रह्मविचारस्यादिति पश्यन् किमध्ययनादपि तस्य पूर्वत्वमिच्छति, उताधीतवेदस्य कर्मनिरूपणात् प्राच्यत्वमिति विकल्पं हृदि निधाय आद्यं निषेधति—**प्रथमम्** इति । * तावच्छब्दोऽध्ययनानन्तर्यस्य सर्वसम्मतिं दर्शयति इति विवरणम् । एतेन विचारस्याध्ययनानन्तरभावित्ववद्ग्राह्येयस्यैकविधिसिद्धाध्ययनसंस्कार-गोचरनियतक्रमैकप्रबन्धत्वम्, अध्ययनस्य विधिबलात्कृत्स्नस्वाध्यायविषयत्वम्, तत एव तद्विचारस्य तथात्वं च यथावत्कर्म-ब्रह्मचिन्तकैस्सर्वैः दुस्त्यजमिति व्यज्यते । अवधारणार्थो वा तावच्छब्दः । तेन चाष्टवर्षोपनीतस्यानन्तरं शौचा-चारशिक्षणपूर्वकेण नियतेनाध्ययनेन शास्त्रान्तरावसरनिरोधात् तन्मूलत्वेन सम्भावनीयसाधनचतुष्टयादिपूर्ववृत्तान्तरनिरासः । * **स्वाध्यायोऽध्येतव्यः** इति स्वविधिं गृह्णता तत्प्रयुक्तिरभिप्रेता । **अध्ययनेनाक्षरराशिग्रहणम्** इत्यनेन संस्कार-लाभस्सूचितः । एवकार इह नियमस्य फलितत्वं द्योतयति । यद्यप्यकरणे प्रत्यवायान्निमित्तादृष्टेश्च नित्योऽयमध्ययनविधिः, तथापि दृष्टस्य फलस्यापरित्याज्यतया तत्स्वीकारार्थादध्ययनादक्षरराशिग्रहणे सत्यन्यस्य ग्रहणहेतोर्नावकाशः । अध्य-यनस्य नियोगार्थत्वं वदतापि ह्यर्थात्पुस्तकपाठादि प्रतिषेध्यम्; अत एव हि लिखितपाठकनिन्दापि । **स्वाध्याय-शब्दवाच्य** इत्यादिभिस्त्रिभिः स्वशाखैकदेशमात्रं वा विचार्यो वेदार्थो वा न स्वाध्यायशब्दवाच्य इति व्यज्यते; यथा-क्रमाध्ययनं परम्पराप्राप्तं विध्यनुमतमिति च भावः । **ग्रहणं विधीयते** फलत्वेन बोध्यते, सम्भवदुपायान्तरं फलमिदमु-पायविशेषतो नियम्यत इत्यर्थः; यत एवकारस्ततोऽन्यत्र हि नियमः । यद्यप्यक्षरग्रहणस्यान्यतोऽपि शक्यत्वान्न स्व-रूपतो नियमः, तथापि जपाद्युपयोगोऽध्ययनगृहीतेनैवेति नियमोपपत्तिः । अर्थज्ञाने नियमं वदतामप्येवमेव निस्तारः ।

तच्चाध्ययनं किंरूपम्? कथं च कर्तव्यमित्यपेक्षायाम् * अष्टवर्षं ब्राह्मणमुप-नयीत तमध्यापयेत् इत्यनेन, * श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्त-श्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ॥ इत्यादिव्रतनियमविशेषोपदेशैश्चापेक्षि-तानि विधीयन्ते ।

नन्वध्ययनविधिना स्वाध्यायस्याध्येतव्यत्वमात्रं प्रतीयते । न तावता साधनचतुष्टयसंपत्त्यादिहेतुभूतशास्त्रान्तरा-वसरनिरोधः; ततः पश्चादप्यध्ययनोपपत्तेः । **निरङ्गं** वा सकृदधीत्य वा शास्त्रान्तरमभ्यस्यतामित्यत्राध्ययनस्वरूपकाला-धिकार्यादिकं व्यनक्ति— **तदिति;** सर्वसंमतनित्यविधिसिद्धमाद्याध्ययनमित्यर्थः । **किंरूपं**— किं जपादिवत्स्वत-न्त्रोच्चारणम्, उतानूच्चारणम्, किं वापन्यायमूलं गौडाध्ययनवत्, पारायणवचनावृत्तम्, उतावघातवचनावृत्तमि-त्यर्थः । * रूपशब्देन फलग्रहणम् इति तूल्किायां अपि यावद्ग्रहणमावृत्तरूपत्वे तात्पर्यम् । **कथम्** इति इति-कर्तव्यतापरम् । अध्यापनार्थशङ्काहेस्योपबृंहणीयस्य अध्ययनार्थतया सम्मतिपत्तानामुपबृंहणानां च विशेषमेकस्यावश्यं-भावं चाभिप्रेत्य * **अनेन उपदेशैश्च** इति विभज्य निर्देशः । 'उपाकृत्याधीयीत' इत्येतत्, 'उपनीतोऽधीयीत'

इति श्रुतितात्पर्यक्लृप्तेः स्थापकम्। उपनीतस्य ह्याध्ययनार्थतयोपकर्मादि निर्दिश्यते। **युक्तः**—अवहितः, व्रतादियुक्तो वा। अर्धं पञ्चमं येषां ते **अर्धपञ्चमाः**। आदिशब्देन * अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत्॥ इत्यादीनि प्रागुक्तसाङ्गाध्ययनानुगुणवचनानि गृह्यन्ते। **व्रतविशेषाः** सोपाकृतयः प्राजापत्यसौम्यादयः। **नियमविशेषाः** शुक्लकृष्णपक्षार्धपञ्चममासादिविमुक्ताङ्गा[ङ्गय]ध्ययनकालभेदविषयाः, शूद्रसमीपे नाध्येतव्यमित्याद्युक्तदेशादिविषयाश्च।

एवं सत्सन्तानप्रसूतसदाचारनिष्ठात्मगुणोपेतवेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्य आचार्योच्चारणानू च्चारणरूपमक्षरराशिग्रहणफलमध्ययनमित्यवगम्यते॥

ननु * उपनयीत तमध्यापयेत् इति श्रुत्या आचार्यकर्तव्यताश्रुतौ कथमध्ययनापेक्षितविधिः, कथं चालोपात्तश्रुत्यादेरपि शास्त्रान्तरावसरनिरोधादिसिद्धिरित्यत्राह— **एवम्** इति। प्रदर्शितश्रुतिस्मृतिसहकृतस्वविधिसिद्धसाङ्गाध्ययनविधानप्रकारेणेत्यर्थः। * अभिजनविद्यासमुदेतमित्यादिभिराचार्यगुणग्रहणान्नाध्यापनविधिपरत्वं शङ्क्यम्, ऋत्विग्गुणोक्तिन्यायादित्यभिप्रायेण **सत्सन्तानेत्याद्युक्तिः**। अत्र आचारात्मगुणौ समाहितशब्दाभिप्रेतौ। **वेदवित्** इति विद्यासमुदेतत्वविशदीकरणम्। निषिध्यते च अयोग्यादध्ययनम्; तद्गुणहानौ प्रतिसमाधीयते च। तथा च * तमसो वा एष तमः प्रविशतीत्यादिभिः शिष्यस्य हानिरुक्ता। * संस्कर्तारमीप्सेत्, तस्मिंश्चैव विद्याकर्मान्तमित्यादिना च तद्गुणानां माणवकार्थत्वं व्यक्तम्। यथा अध्यापनविधिवादिनामष्टवर्षत्वादिमाणवकविशेषणमाचार्यार्थम्, तद्वत् आचार्यविशेषणं माणवकार्थमिति प्रतिबन्दीसूचनाय **व्रतनियमविशेषयुक्तस्य** इत्याद्युदाहृतम्; षष्ठ्यन्तपदाभ्यामधिकारिस्वरूपेतिकर्तव्यतयोः सिद्धिः। तेन अध्ययनस्याङ्गाध्ययनसाहित्यं शास्त्रान्तरावसरनिरोधकत्वं च सिद्धम्; अङ्गाध्ययनस्यापि नियमविशेषत्वादष्टवर्षाद्युपनीतस्याध्ययनविध्यवरुद्धत्वाच्च। **आचार्योच्चारणानूच्चारणम्** इत्यनेन स्वतन्त्रोच्चारणं विचारस्याध्ययनशास्त्रार्थानुप्रवेशशङ्का चापास्यते। उपनयनस्य यथा अध्यापनानुगुणशिष्यासत्तिर्दृष्टफलतयोपकारिका मतान्तरे, तथा अनूच्चारणानुगुणप्रत्यासत्तिरस्मिन्मते स्यादिति च भावः। अस्मिन्प्रथमाध्ययने अवघातन्यायात्सकृदसकृद्वेत्यादिविशेषानादरेण यावत्फलमावृत्तेरर्थसिद्धिमभिप्रेत्याह— **अक्षरराशिग्रहणफलम्** इति। अनेन अक्षरग्रहणकामत्वमधिकारिविशेषणमित्यपि व्यञ्जितम्।

फलत्वेनाश्रितस्यापि तथात्वं वितुषत्ववत्। उपयोगश्च यागादौ ग्रहणस्यापि दुस्त्यजः॥ २४७॥
विधितोऽनुज्ञया वार्थज्ञानं फलमिहेच्छता। फलानुबन्धान्नित्यत्वं प्रहीयेतेति दुर्वचम्॥ २४८॥

ये तु पूर्वपक्षे नित्याध्ययनविधौ विश्वजिन्न्यायात्सर्वाविशिष्टं स्वर्गं फलमिति कल्पयन्ति, सिद्धान्ते चार्थज्ञानम्; तेऽप्यनेन प्रतिचिक्षिपिरे। अक्षरग्रहणस्य हि दृष्टस्य सुखादन्यस्याप्यर्थज्ञानादेरिव सुखादिपर्यवसानात्फलत्वं युक्तम्। तदेवम् * अनूच्चारणम्, * अक्षरराशिग्रहणफलम् इत्युभाभ्यां किंरूपमिति बुभुत्सितमाद्याध्ययनभावार्थस्वरूपं प्रदर्शितम्। तथा च विवरणम्— * एकफलावच्छिन्नक्रियाक्षणनिचये हि धातोर्वृत्तिः, यथा ओदनं पचतीति; इतरथा वर्तमाननिर्देशभङ्गप्रसङ्गात्। प्रारब्धोऽपरिसमाप्तो हि वर्तमानशब्दार्थः। क्षणभङ्गिन्यास्तु क्रियाया धात्वर्थत्वे शब्दप्रयोगात्पूर्वमेव [जा]ज्ञातस्य क्रियाक्षणस्य नष्टत्वादुत्तरस्य च भविष्यत्त्वात्समकालस्याजा[ज्ञा]ततया शब्दाविषयत्वाच्चाक्षुषत्वेऽपि

क्षणध्वंसादादिमध्यान्तानिरूपणाच्च न प्रारम्भापरिसमाप्त्योः सिद्धिरित्यतो ग्रहणफलावच्छिन्नक्रियाक्षणनिचयेऽध्ययनशब्दस्य वृत्तिरित्याहेति । अध्ययनस्याचार्योपनीतकर्तृकानूच्चारणत्वोक्तिः * उपनयीत, तमध्यापयेदित्युभाभ्यामाचार्यकर्तृकोपनयनादिपूर्वकत्वं विधीयत इति व्यनक्ति ।

ननु * अध्यापयेदिति वृत्त्युपायनियमार्थत्वं स्यात् । मैवम्— अनुपनेतुरपि तदर्थाध्यापनदृष्टेरुपनयनविधानवैयर्थ्यात् । नाप्युपनीतमेवाध्यापयेदिति क्रमनियमोऽपि, तथाऽष्टवर्षं ब्राह्मणमित्यादेरनपेक्षितवचनत्वप्रसङ्गात् । अन्यार्थमिह तदुपदेशस्त्वसङ्गत एव । न चात्र उपनीतौ नियमः शङ्क्यः, तत्प्रापकान्तरादृष्टेः । स्मृतिर्दृश्यत इति चेन्न, अष्टवर्षाद्युक्तेरनुपयोगादेव । न चात्र वृत्त्युपायद्वयोक्तिः ; उपनयनस्य तदुपायत्वेनापरिसंख्यानात् । तथात्वेऽपि प्रापकाभावेन नियमानुपपत्तिरुक्तैव ; दत्तोत्तरत्वाच्च । अतोऽध्ययनापेक्षितविधिरेवायम् । प्रयोजके चात्र विधिः * याजयेत् इतिवत्स्यात् । अध्यापनमपि हि याजनवद्वृत्त्यर्थतया प्राप्तत्वान्न विधेयम् । तदत्र अष्टवर्षो ब्राह्मणः स्वाध्यायग्रहणकाम उक्तप्रकाराचार्योपनीतस्तदुपगत्या यथोक्तव्रतनियमवानधीयीत इति सोपबृंहणाद्याध्ययनशास्त्रार्थस्थापना । अत एव अध्ययनविधौ नियोज्याश्रवणादन्यप्रयुक्तानुष्ठानत्वकल्पनेरयुक्ता ; अध्यापनविधावप्यश्रवणाच्च कल्पनेश्चोभयत्राविशेषात् । न चेह तत्कल्पनिः ; ब्राह्मणमित्यादेः प्रजाकामादिमद्विभक्तिविपरिणाममात्रेण तत्सिद्धेः * विप्रोधीयीतेति स्मृत्यनुग्रहाच्च । बालस्य स्वाधिकाराज्ञानान्न स्वविधिप्रयुक्तिरिति चेन्न, निषादस्थपतिन्यायादन्यैस्तदभिज्ञैरनुष्ठानोपपत्तेः । हितैषिण एव हि बालादीनामविदितस्वाधिकाराणां जातकर्मादिसंस्कारानपि स्वयंविदितोपयोगाः कुर्वन्ति । अध्ययने तु बालस्याप्यासन्नेरणादिभिः साफल्यानुमानात्प्रवृत्तिर्युक्ता ।

नित्यमध्ययनं काम्यप्रयुक्तमितिवादिनाम् । कथं तत्र नियोगस्य कृत्युद्दृश्यत्वलक्षणम् ॥ २४९ ॥
प्रबुद्धानां स्वविधिनाऽबुद्धानामन्यतस्त्विति । प्रयुक्तिभेदकल्पौ च स्यादर्थज्ञरतीयता ॥ २५० ॥

यच्च निर्मीणाध्ययनदुःखे माणवके विचारात्पूर्वमध्ययनविधेरधिकारपर्यवसानाय दृष्टमर्थज्ञानं विषयसाध्यप्रयोजनतया स्वीक्रियते इति; तदपि मन्दम् , अध्ययनस्यान्यतः सिद्धौ तदप्रयोजकेन सिध्यता कार्येण तस्य प्रयोजनान्तरकल्पनेरयोगात् ; नित्यान्तरवदस्यापि ते नियोगमात्रप्रयोजनत्वोपपत्तेः । दृष्टत्वादन्यदप्यनुज्ञातमिति चेन्न, आनुषङ्गिकस्य लाभपूजादेरप्यत्र विध्यनुज्ञातत्वेन स्वीकारप्रसङ्गात् । न च धर्मानुष्ठानोपयुक्ततयाऽर्थज्ञानमेव विधिरनुजानाति, नान्यदिति वाच्यम् ; धनादेरपि तदुपयुक्तत्वेन तस्याप्यनुमतिप्राप्तेः ।

सर्वविध्युपकारित्वमर्थज्ञानस्य संभवेत् । नैतावता विशेषेण दृष्टमन्यदुपेक्ष्यते ॥ २५१ ॥
धनादेरुपकर्तृत्वं स्वशक्त्यैवेति चेन्मतम् । अर्थज्ञानं च तद्वत्स्यान्न विधिश्रूवशंवदम् ॥ २५२ ॥
अर्थतस्तदनुज्ञातं शब्दशक्त्यैव भावितम् । सापेक्षैर्यागदानादिनियोगैरुपजीव्यताम् ॥ २५३ ॥
अपि चैकस्य वैरूप्यं विध्यनुज्ञात्मकत्वतः । प्रधानगुणकर्मत्वविषये च प्रसज्यते ॥ २५४ ॥

तस्मादध्ययनारम्भवेलायामेव माणवकस्य हितमाचार्यादयोऽभिसन्धाय परबुद्धैरुपदिश्य वा तत्र प्रवर्तका इति युष्मद्ग्रामेष्वपि वृत्तान्तः । न पुनरन्यस्याचार्यकं मया भावनीयमिति बुद्ध्या कश्चित्प्रवर्तमानो दृश्यते । शिक्षयन्तश्च हितैषिणो बालस्यैवागामि फलं व्यपदिशन्ति । छान्दोग्ये च—* ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तम् इति

जाबालो गौतममाह ; तेन च प्रत्युक्तम्—* समिधं सोम्याहर , उप त्वा नेष्ये इत्यादि । अतः शिष्यार्थमेवाचार्यः प्रवर्तते ; ततस्तु वरादिकं तेन प्राप्यमिति सिद्धम् । अत एव द्रव्यार्जनादिलुब्धाचार्यरागप्रयुक्तमध्ययनमिति यत्कैश्चिदुक्तम् ; तत्स्वविधिप्रयुक्तयसंभवेऽप्यध्यापनविधिप्रयुक्तिस्तावदयुक्तेति स्थापयितुम् । न हि माणवकस्य प्रयोजनमबोधयित्वा तत्प्रवर्तनतन्मूलद्रव्यार्जनादिसंभवः ; अन्यथा हठात्प्रवृत्तिराचार्यस्य स्यात् । अतः साङ्गाध्ययनविधौ कण्ठोक्तो विप्रादिः स्वहिताभिसन्धिरधिकर्तेति नान्यतः प्रयुक्तिः । एतेन आचार्यकरणविधिप्रयुक्तध्ययनङ्गीकारे क्रतुविधिप्रयुक्तेः अवश्याश्रयणीयतया तत्तत्फलकामशूद्रादेरप्यध्ययनाधिकारः स्यादिति कैश्चिदुक्तं निरस्तम् ; आधानवत्नियतकर्तृकेण स्वविधिनैव अध्ययनस्य प्रयुक्तेः । अध्ययनविधावधिकाराश्रवणचोद्यमपि वैतुष्यवदृष्टस्याक्षरग्रहणस्य फलत्वोक्त्या प्रत्युक्तम् । उपनीयेत्यादिस्मृतिरपि नाध्यापनं विधत्ते, नाप्याचार्यकं तत्फलत्वेनोपादत्ते ; अन्यतः प्राप्तविशिष्टाध्यापनानुवादेनाचार्यशब्दव्युत्पादनपरत्वात् उपाध्यायादिशब्दव्युत्पादनवत् ; न ह्यत्र तदतिरिक्ततात्पर्यकल्पसिहेतुः । न च आचार्यकमेकमन्यादृशम्, मानाभावात् । निमित्तान्तरादृष्ट्या तत्कल्पिरिति चेन्न ; सनियमकोपनयनाध्यापनात्यन्तायोगव्यवच्छेदमेलकस्य निमित्तस्य दृष्टेः । अत एव उपनयनादेरुत्तरकालेऽप्युपाध्यायादिनयादाचार्यशब्दप्रयोगोपपत्तिः । पूर्वं त्वनागतावेक्षणस्य दुश्शकतया निमित्त[ज्ञा]नसन्देहाभ्यामप्रयोगः । अपि च स्मृतेरत्र शब्दव्युत्पादनमात्रपरत्वे वृद्धव्यवहार एव मूलं द्रष्टम् ; आचार्यकरणविध्यर्थत्वे तु अलौकिकार्थश्रुतिमूलत्वं कल्प्यम् ; कल्पसकल्प्ययोश्च विरोधे कल्पसमेव ग्राह्यम् । क्त्वादिश्रुतिश्चात्र * दर्शपूर्णमासाभ्यामिष्ट्वेत्यादिवदनङ्गत्वेऽपि सूत्रोक्तसमानकर्तृकत्वादिसाधर्म्यमात्रेणघटते ।

ननु समानकर्तृकत्वस्यारभ्याधीकाभावाच्चैकप्रयोगतयाऽङ्गाङ्गित्वसिद्धिः स्यात् ; तन्न ;

क्त्वाश्रुतेः स्मृतिसंस्थत्वादनुवादतयाऽपि च । श्रुतिस्थं लिङ्गमेवात्र बलीयो ह्यविलम्बतः ॥ २५५ ॥

ब्राह्मणमिति माणवकैकसंस्कारतया श्रुतमुपनयनं प्रयोज्यप्रयोजकव्यापारतयाऽध्ययनाध्यापनयोर्द्वयोः फलवतोः सन्निधावपि कर्मस्थतया अन्तरङ्गलिङ्गादुपनीतगताध्ययनाङ्गमेव ; अन्यार्थत्वे तु प्रणाड्या स्यात् । एवं श्रौतलिङ्गतोऽध्ययने विनियुक्तस्याध्यापनाङ्गत्वकल्पौ विनियुक्तविनियोगविरोधः । न हि स्मृतिस्था क्त्वाश्रुतिः श्रौतं लिङ्गं बाधितुं क्षमा; स्मृतिः स्वनूलम्, अनूक्तिः पुरोक्तिमपेक्षत इति विलम्बद्वयेन प्रतिरोधात् ।

ननु * स्वरितेत्यादिविहितादात्मनेपदादुपनयनमुपनेतृगताध्यापनाङ्गं स्यात् । न स्यात्, सम्माननादिसूत्रविहितत्वात् । अकर्त्रभिप्रायार्थोऽयमारम्भ इति शाब्दाः । कर्तृस्थमेव फलान्वयः कर्त्रभिप्रायत्वम्, अकर्त्रभिप्रायत्वं तु नियमाभाव इति चेन्न ; * आदधीतेत्यत्र स्वरितेत्यादिसूत्रोक्तात्मनेपदेऽपि फलस्योभयान्वयात् । न च क्रियाफलस्य चेतनद्वयेऽनन्वयस्तत् ; * जायापती अग्निमादधीयातामित्यत्रापि तदृष्टेः । कर्तृव्यतिरिक्तचेतनेऽनन्वयस्तदित्यपि निरस्तम् । प्रामाणिकदृष्ट्या सर्वेषु शास्त्रार्थेषु अकर्तृयागाद्ये प्रीतिरूपफलश्रुतेराधानादिष्वात्मनेपदलोपप्रसङ्गात्, * अभिचरन्यजेतेत्यादौ भ्रातृव्येऽपि तदुचितफलसंमतेश्च । * ऋत्विजो वृणीत इत्यत्र च वरणीयेष्वपि फलं सिद्धम् । अव्यवहितफलस्य क्रियाफलशब्देन विवक्षितत्वात्तस्य कर्त्रन्वयः कर्त्रभिप्रायत्वम् । सम्माननादिसूत्रं तु व्यवहितफलस्य कर्त्रन्वयार्थं स्यादित्येतदपि दत्तोत्तरम्, * आदधीत इत्यादावेव व्यभिचारात् । अस्ति हि अत्राग्निसंस्कारव्यवहिताधातर्याहिताग्नित्वं फलम् । ननु आगामिनित्यकाम्यादियागोपजीव्यसंस्कृताग्निसिद्धिरेवाधातुः फलमिति न व्यवहित-

फलान्वयः । मैवम् ; अत्राप्युपनयनसंस्कृताध्येतृसिद्धिरेवोपनेतुः फलमिति सम्माननादिसूत्रवैयर्थ्यप्रसङ्गात् । अव्यवहितफलस्य कर्त्रभिमतत्वानभिमतत्वाभ्यां सूत्रद्वयसाफल्यमिति चेन्न; आचार्यकार्थिनोऽप्युपनेतुरुपनेयसंस्कारानभिमत्ययोगात् । अतः कर्त्रन्वयसि[द्ध्यर्थ]द्धमेवात्रात्मनेपदम् । एवमध्यापयेदित्यनेनापि न फलस्य कर्तृगामित्वम् । तदेवं न विध्यन्तरप्रयुक्तमध्ययनम् ।

विचारश्च किमध्ययनविधिना प्रयुज्यते, उत अध्यापनविधिना ? न प्रथमः, विषयफलानुज्ञाया निरस्तत्वात् । न द्वितीयः, यावच्छ्रुतानतिक्रमणात् ।

स्वाध्यायं ग्राहयित्वा हि गुरुणाऽपि विरम्यताम् । दयादिप्रेरितत्वे तु प्रागप्येवमिति स्थितिः ॥
अतो गुरुमते कृत्स्नमीमांसैव न सिध्यति । इति मत्वा विधूतं तत्प्रकृतस्थापनार्थिभिः ॥ २५७ ॥

अध्ययनं च स्वाध्यायसंस्कारः ; * स्वाध्यायोऽध्येतव्यः इति स्वाध्यायस्य कर्मत्वावगमात् ।

यद्यप्येवमक्षरग्रहणावधि शास्त्रान्तरावसरो निरुद्धः, तथाऽपि गृहीताक्षरस्यासौ स्यादिति शङ्कायामुत्तरत्रापि तन्निरोधार्थमध्ययनस्य नियोगविषयत्वपक्षप्रतिक्षेपेण प्राक्सूचितं स्वाध्यायसंस्कारत्वं व्यनक्ति— **अध्ययनम्** इति । चः शङ्कानिवृत्त्यर्थः ; यद्वा भिन्नक्रमः, असकृदनूच्चारणत्वादिना सह संस्काररूपत्वस्य समुच्चयार्थः ।

* संस्कारः पुंस एवेष्टो मन्त्रणप्रोक्षणादिभिरिति वदद्भिरध्ययनसंस्कारोऽपि कर्तुरेवेति स्वीकृतः । तेन विवक्षितासिद्धिरिति शङ्कां निवर्तयितुमाह— **स्वाध्याय** इति । उक्तं च बृहट्टीकायाम्— * संस्कारगणनायां च युक्तैवाक्षरसंस्क्रिया । *स्वाध्यायो हि स्फुटं कर्म साक्षात्संस्क्रियते हि सः ॥* इति ।

पुरुषातिशयाधानं प्रोक्षणाद्यैश्च ये विदुः । तेऽपि संस्कारकर्मत्वं तत्र तत्र न तत्यजुः ॥ २५८ ॥
तत्तत्कर्मक्रियाजन्यः संस्कारः पुरुषाश्रयः । तत्तत्प्रहकृतं कार्यं करोतीत्यवधारणात् ॥ २५९ ॥

अत्राध्ययनस्य स्वाध्यायसंस्कारत्वे कर्मत्वं हेतुरिति न वैयधिकरण्यम् । अयं भावः—अत्र हि तव्यप्रत्ययस्यार्थान्तरं न घटते; ततश्च द्वितीयाश्रुतेस्तव्यादेर्वा कर्मार्थत्वे विशेषाभावात्कारकाणां क्रियार्थत्वेऽपि द्रव्यनिष्ठस्य भावार्थस्य द्रव्यार्थत्वादवहन्त्यादिनयोऽत्र युक्त इति । सिद्धं चावहन्त्यादेः तत्तद्द्रव्य[स्य]संस्कारत्वं भेदलक्षणे * तानि द्वैधं गुणप्रधानभूतानि इति । **स्वाध्यायस्य** इत्यनेन निर्वर्त्यत्वाद्यनुपपत्तिः सूचिता; न खल्वसौ निर्वर्त्यः, अनादिसिद्धक्रमत्वात् ; यथापूर्वोच्चारणे वाक्यनिर्माणव्यवहाराभावाच्च । नापि विकार्यः, दुग्धदध्यादिवदन्यथाभावादृष्टेः । नापि प्राप्यत्वमात्ररूपः, उपयोगान्तरवत्त्वे तदयोगात् । अतः परिशेषसहकृतकर्मत्वावगतिः संस्कार्यत्वे हेतुरिति ।

संस्कारो हि नाम कार्यान्तरयोग्यताकरणम् । संस्कार्यत्वं च स्वाध्यायस्य युक्तम्, धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वात्, जपादिना स्वरूपेणापि तत्साधनत्वाच्च ॥

ननु कर्मत्वावगमेऽपि श्रुत्यादिभिरविनियुक्तस्याद्रव्यस्य स्वाध्यायस्य कथं संस्कार्यत्वमित्यत्राह—**संस्कार इति हिः** प्रसिद्धौ । **नामशब्दः** परसंमतिपर्यन्ते तत्प्रकर्षे । स्वाध्यायसंभावितभाव्युपयोगिसंस्काराभिप्रायेणात्र कार्यान्तर-

योग्यताकरणोक्तिः। यद्वा कस्यचित्सतोऽतिशयाधानं संस्कार इति लक्षणमत्र विवक्षितम्। ततश्च भूतोपयोगिन्यपि तदनुगुणोपयोगविवक्षया[अत्र]कार्यान्तरयोग्यताशब्दः कथंचिद्योज्यः। प्रहृता अपि परिधयः तेनैव रूपेण भूतोपकाररूपकार्यान्तरयोग्याः श्रूयन्ते। अयं भावः— न तावदविनियुक्तत्वादसंस्कार्यत्वम्; विनियोगाभावेऽप्युपयोगदृष्टयैव संस्कार्यत्वसंभवात्। अस्ति च * ऋग्वेदेन होता करोतीत्यादिभिः सामान्यतो विशेषतश्च विनियोगः। नाप्यद्रव्यत्वादसंस्कार्यत्वम्; यथोक्ताध्ययनगृहीतत्वे विरोधाभावात्। ग्रहणविषयत्वादेश्च गुणादावपि सर्वसम्मतेः। चोदितक्रियासाध्यस्येश्वरानुग्रहरूपस्यातिशयस्य स्वाध्यायाधारत्वाभावेऽप्यध्ययनप्राप्ततया आराध्यबुद्धिसंगृहीतेन तेनैव यथार्होत्तरक्रियायाः शास्त्रतो नियमान्नातिप्रसङ्गः। व्रीह्यादिष्वपि प्रोक्षणादिभिरतीन्द्रियातिशयो भवतु वा मा वा; उक्तन्यायः सार्वत्रिक इति। ननु, * सक्तूञ्जुहोति, * सुवर्णं भार्यमित्यादिषु निर्वर्त्यत्वादिरहितकर्मत्वावगमेऽपि भावार्थस्य न द्रव्यार्थता। तथा * स्वाध्यायोऽध्येतव्यः, * स्वाध्यायमधीयीतेत्यादिजपविधावपि कर्मत्वावगतिरविशिष्टा। अतस्तत्रानैकान्त्यम्; तत्रापि वा [अ]संस्कार्यत्वप्रसङ्ग इत्यत्राह— **संस्कार्यत्वम्** इति। अयं भावः— सत्त्वादीनां भूतभाव्युपयोगासंभवात्, जपादेश्च गृहीताक्षरविषयत्वावश्यंभावात्, अनेकसंस्कारकल्पौ गौरवात्, जपादिसंस्कारसाध्योपयोगान्तरादर्शनात्, फलश्रवणाच्च तत्र संस्कारपरित्यागः; न त्विह तथा स्यात्, तथाऽपि अवगतकर्मत्वस्य निर्बाधत्वादिति। अत्रैव **न्यायसुदर्शनम्**— * आद्याध्ययनमिच्छामः संस्कारं कर्मतामितेः। स्वाध्यायस्योपयोगित्वात् फलाश्रवणतोऽपि च॥ जपादेरपि संस्कारकर्मतेष्येत चेत्तदा। आद्यन्तु सर्वस्वाध्यायानुपयोगादसंस्कृतिः॥ सर्वत्र कर्मताबाधः स्वाध्यायस्य प्रसज्यते। तेन संस्कार आद्यं स्यादपरे त्वर्थकर्मणि॥ आर्थवादिकमेवात्र फलं स्याद्दार्लिसत्रवत्॥ अत्रानीप्सितकर्मत्वं स्वाध्यायस्येष्यते बुधैः। आद्ये त्वीप्सितकर्मत्वं तदर्था च क्रिया मता॥ जपादेरपि संस्कारकर्मत्वे सर्वसंस्कारसंस्कार्यस्य स्वाध्यायस्यार्थावबोध एव भाव्युपयोगः स्यात्। तस्य च अनधिकृतकर्मभागे हुमादिषु च वैयर्थ्यात्सर्वाण्यध्ययनान्यर्थकर्माणि स्युः; तदा स्वाध्यायस्य कर्मताभङ्गः स्यात्; तस्मादाद्याध्ययनमेकमेव संस्कारः इति।

ननु अत्राप्युपयोगादर्शनादयुक्तिः सिद्धा; संस्कार्यत्वादेवोपयोगकल्पावन्योन्याश्रयणात्। आहुश्च—* संस्कारविधिश्च न संस्कार्यं विनियुङ्क्ते; प्रमाणान्तरावमितोपयोगस्य संस्कारपर्यवसायी तु संस्कारविधिर्न संस्कार्यस्य कार्यं कल्पयतीति; तत्राह— **धर्मार्थं** इति। उपयोगादर्शनाद्धि सत्त्वादौ कर्मश्रुतिबाधः; स्वाध्यायस्य तु भाविदृष्टादृष्टविविधप्रयोजनदर्शनात्सत्त्वादिवत्तासंस्कार्यत्वं युक्तमिति भावः। अत्र पुरुषार्थचतुष्टयस्य वेदवेद्यत्ववचनं सर्वभागानुवृत्तप्रयोजनसामान्यदर्शनेन कृत्स्नस्य मीमांसितव्यत्वख्यापनार्थम्; बाह्यागमोक्तानां तेषामश्रद्धेयत्वार्थं च। अर्थकामतदुपायानां केषाञ्चिल्लोकसिद्धत्वेऽपि त्रैलोक्यविभवादिरूपयोरर्थकामयोस्तत्साधनानां च वेदवेद्यत्वं युक्तम्। लौकिकार्थकामयोरपि कारीर्यादिभूपायेषु शास्त्रव्यापारः सिद्धः। धर्मस्तु द्रव्याद्यात्मना प्रत्यक्षोऽपि धृतिसाधनत्वेन शास्त्रग्राह्यः। यथाहुः— * श्रेयस्साधनता ह्येषां नित्यं वेदात्प्रतीयते। ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः॥ इति।

मोक्षश्च नास्मदादिप्रत्यक्षः। आत्मा कदाचित्समस्तविशेषगुणशून्यः, अनित्यविशेषगुणवत्त्वाद्धटवदित्यादीनां तु विपक्षे बाधकाभावान्नानुमानत्वम्; मुक्तिपरशास्त्रोपजीवनेन विपक्षे बाधकोक्तौ च अनुमाननैष्फल्यम्। निरतिशयानन्दब्रह्मानुभवात्मनि तु मोक्षे हेतुमद्वृत्तेर्न प्रसङ्गः; तद्विपरीतसाधने त्वागमबाधः। अपि च, जीवः कदाचित्स-

मस्तविशेषगुणशून्यो न भवति; आत्मत्वादीश्वरवदित्यपि वक्तुं शक्यम्। अत्र अर्थस्येव धर्मस्यापि समीहितसाधनतया पुमर्थस्य सतो धर्मविशेषः साधनम्; अतः सोऽपि तत्साधनशब्दोक्तः। मन्त्रार्थवादयोरपि यथार्हं चतुर्वर्गबोधकत्वं तद्बोधकोपकारकत्वं च ग्राह्यम्।

श्येनेषु वज्रप्रभृतिष्वपि नानर्थचोदना। इष्टस्यारातिभङ्गादेरुपायांशोपदेशतः॥ २६०॥
घोरोपायान्तरेभ्यश्च लभ्येतात्र निवारणम्। लघुनिष्कृतिनिस्तार्यं ह्यभिचारं प्रचक्षते॥ २६१॥
किं चानभिचरन्षट्सु पतेदित्यपि शिष्यते। तेन धर्मोपयुक्तत्वमाततायिवधे विदुः॥ २६२॥

ननु अलौकिकपुरुषार्थादिबोधकत्वं स्मृत्यादावप्यस्ति, अतोऽन्यसाध्ये प्रयोजने किं वेदस्य संस्कारेण। अर्थबोधश्च हुमादौ नास्ति। पुरुषभेदेनानधिगताचिकीर्षितभागयोश्च सत्त्वप्यसावनुष्ठानपर्यन्तत्वाभावात्तोपयोगी स्यात्। तदिह स्वाध्यायस्यान्यलभ्योपयोगत्वादध्ययनस्य कृत्स्नस्वाध्यायसंस्कारत्वायोगादेकदेशसंस्कारस्याशाब्दत्वाच्च। * अध्येतव्यः इत्यस्य संस्कारविधित्वाभावे नियोगार्थत्वपक्ष एव प्राप्त इत्यत आह— **जपादिना** इति। आदिशब्देन धारणं गृह्यते। **स्वरूपेणापि**— न केवलमर्थज्ञानद्वारेणेत्यर्थः। यद्वा अध्यापनमादिशब्दग्राह्यम्। तदा स्वरूपेणापि— धृतस्वरूपमात्रेण चेति यावत्, * ऋग्वेदं धारयन्विप्रः इत्यादिस्मृतेः। अयं भावः— अध्ययनगृहीतस्वाध्यायसाध्यमेव ज्ञानं विधिभिरुपजीव्यम्; उपबृंहणानां तु न स्वातन्त्र्येण धर्मादिसाधनत्वम्; अस्ति च श्रुतिः। * वेदाभ्यासेन सततं सत्येन तपसैव च। अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम्॥ इत्यादिप्रसिद्धमनन्यसाध्यं जपादिप्रयोजनम्। तेनैवानर्थकानधिकृताचिकीर्षितभागेष्वपि संस्कार्यत्वोपपत्तिः। जपविधिश्च निरर्थकोच्चारणविषयोऽपि स्वाध्यायस्यार्थपरतां न बाधते, सर्वविधिबाधेन स्वव्याघातप्रसक्तेरिति। न च उभयार्थत्वे विनियुक्तविनियोगविरोधः, एकेनैव रूपेणानेकार्थत्वाभावात्। तथा च **न्यायसुदर्शनम्**— * स्वरूपेण जपाद्यर्थः स्वशक्त्याऽर्थावबोधकः। रूपभेदाद्विरोधो न यथाग्नेर्दाहभासयोः॥ इति। तदिहाध्ययनसंस्कृताद्वेदादनन्तप्रयोजनसंभवे तद्विचारमन्तरेणान्यत्र शास्त्राभ्या[भा]से कः प्रयत्नेदिति तात्पर्यम्।

एवमध्ययनविधिर्मन्त्रवन्नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यति।

ननु एवं विदितोपयोगेनाध्येत्रा अर्थज्ञानमपि विधिफलतया स्वीकार्यम्; अविदितोपयोगेन तु अक्षरग्रहणमपि न फलत्वेन प्रतिपत्तुं शक्यम्; अतोऽनुष्ठानं प्रत्यव्यवहितोपयुक्तमर्थज्ञानमपि ग्रहणवदध्ययनविधेर्दृष्टं फलमस्तिति शङ्कां प्रस्तुतोपसंहारव्याजेन प्रतिक्षिपति— **एवम्** इति। विधेयस्वरूपफलादिनिरूपणप्रकारेणेत्यर्थः। मन्त्रवत्त्वं नियमवत्त्वं च अनूच्चारणस्थं तत्फले गृहीतावुपचरितम्। **मन्त्राः**— काण्डव्रताद्यङ्गभूताः, अध्ययनदशाजप्याश्च ॐ शं नो मित्रः इत्याद्याः। **नियमाः**— प्रागुक्ताः। • मन्त्रवदित्येतत् दृष्टान्तोक्तिरित्येके— यथा मन्त्रे चोद्यमानमध्ययनमक्षरग्रहणमात्रपर्यवसायीति स्वीक्रियते, तथेहापीति। अपरे तु— यथोपनयनदशोच्चारणीयेषूपनीतमात्रस्य समिदाधानादिमन्त्रेषु च, तथेहापीति वेदितव्यमिति। हुमादिवदित्यन्ये, विषहरणादिमन्त्रविशेषवदिति च। मात्रेति च पर्यवसानशब्देन चाक्षरग्रहणात्पश्चात्पूर्वं च विधिविश्रान्तिर्निषिध्यते। अयं भावः— अध्ययनशब्दस्य न तावदर्थज्ञानवाचकत्वम्, अव्युत्पत्तेः, किञ्चिदधीत्य ब्राह्मण इत्यादौ च तस्यार्थपरत्वासंभवाच्च। विधिविषयमध्ययनं प्रत्यव्यवहितसाध्यमभिव्यास-

मवर्जनीयं च फलं दृश्यते । तदन्यस्यापि तत्फलत्वकल्पौ गौरवं स्यात्, व्यवहितसाध्यस्यापि फलत्वकल्पौ ज्ञानवत्तत्साध्यस्यानुष्ठानस्यापि तत्कल्पितप्रसङ्गः । उत्तरविध्यव्यवहितापेक्षितत्वमपि ग्रहणज्ञानयोः समम् । यदि चार्थज्ञानं कर्मविषयतयान्नातं, तदा तु अव्यापिनि व्यवहितेऽपि तस्मिन्संप्रत्ययः स्यात्, न त्वेतदस्ति । अतोऽर्थधिय उपयोगितयैव स्वीकार्या इति ।

ननु समन्वयाधिकरणन्यायादर्थज्ञानस्यैव स्वतः प्रयोजनतया फलत्वकल्पिर्युक्ता; मैवम्; निरतिशयानन्दब्रह्मप्रतिपादकभागमात्रे तदुक्तेः अत्र तु कृत्स्नाध्ययनफलविमर्शात् विरूपकल्प्ययोगाच्च । ननु 'वृद्धवाक्यानि शृणु' इत्यादौ वाक्यश्रवणविधेरर्थधीपर्यन्तत्वं लोकदृष्टमिति चेन्न, वृक्षादिवन्मार्गलक्षणभूतस्य कस्यचिद्वाक्यस्य श्रोतव्यत्वोपदेशे तात्पर्यात्तदभावस्यापि दृष्टेः । किं च क्वचिद्वाक्यश्रवणोपदेशस्यार्थपरत्वमगत्या; इह तु न तथा, यथाश्रुते बाधाभावात् । न च वाक्यश्रवणवत्तदनूच्चारणमर्थज्ञानार्थं युक्तम् । आहत्य स्वयंप्रयोगानुगुणाक्षरग्रहणार्थतैव लोके दृष्टा । ननु—* यो ह वा अविदितार्षेयच्छन्दोदैवतेन मन्त्रेण इत्यादिश्रुतिभिः, * अविदित्वा ऋषिं छन्दः * यदधीतमविज्ञातमित्यादिभिः स्मृतिभिश्च विधेये दोषोक्त्याऽर्थज्ञानमवश्यसम्पाद्यत्वेन स्थापितम्; तदभावेऽध्ययनस्य नैष्फल्यं तत्सद्भावे सर्वपुरुषार्थावाप्तिश्चोच्यते—* स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञ इत्सकलं भद्रमश्नुते [स] नाकमेति ज्ञानविधूतपाप्मा ॥ इति; तस्माद्वेदो वेदार्थविचारः । मैवम्; यथा रागप्राप्तस्य ऋतुगमनादेरकरणे दोषः, विधिवत्करणे सन्तत्यादिलाभश्च फलत्वेन स्मर्यते, एवमिहापि स्यात् । विधिवत्समाप्ताध्ययनानुवादेन चार्थज्ञानाभावे दोषं वदन्ति वाक्यानि नार्थधीपर्यन्तमध्ययनं विधातुं क्षमन्ते । * तस्मात् एतानि मन्त्रे मन्त्रे विद्यात् इत्येवन्तु प्रयोगकाले प्रतिमन्त्रं प्रज्ञातरूप्याद्यनुस्मरणपरम् । अत एव अविदितार्षेयत्वादिनिषेधश्च तावन्मात्रविषयः । अतः * यदधीतम् * स्थाणुरयम् * यश्च मीमांसतेऽध्वरम् इत्यादिभिरर्थज्ञानप्रशंसया स्वतः प्रवृत्तिरुत्तभ्यते । एतैश्च अर्थज्ञानस्यावश्यापेक्षितत्वेन विधावपि नाध्ययनविधेस्तत्पर्यन्तत्वं कल्प्यम्; नैरपेक्ष्यात्, अन्यतः प्राप्ते विधेरौदासीन्याच्च, तावत्पर्यन्तधावनेऽपि स्वतः पुरुषार्थापर्यवसानाच्च । यत्तु कैश्चित् प्रत्यवस्थीयते—अध्ययनविधेरर्थज्ञानपर्यन्तत्वात्, * आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधत् इत्यादिभिः श्रुतिभिः, * अधीत्य स्नायात् इत्यादिभिः स्मृतिभिश्च आत्मरूपार्थज्ञानस्यापि कर्मार्थतया तत्कर्तृसंस्कारत्वेन विनियोगात् * द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, * सोऽन्वेष्टव्यः स विजिज्ञासितव्यः इति जिज्ञास्यतयोक्तस्यात्मनोऽवहन्तव्यश्रीहिवत्स्वरसावगतसंस्कार्यत्वाद्यावेन कर्मशेषत्वसिद्धया * तत्त्वमसि * अयमात्मा ब्रह्म इत्यादिभिः कर्मवश्यस्यैव ब्रह्मत्वोक्तेः विश्वकर्तृत्वस्य च कर्मद्वारोपपत्तेः क्लृप्तकल्प्यविरोधे क्लृप्तगृहीतेर्न्याय्यत्वाज्जीवस्य कर्मसु कर्तृतया प्राप्तस्य तदर्थं संस्काराहत्वाच्च जीवपरे वेदान्ते सति तदतिरिक्तेश्वरविषयशास्त्रासम्भवात् कस्यैकशास्त्रत्वं क्रमश्च कल्प्यत इति । तदपि अक्षरग्रहणमात्रपर्यवसानभाषणात्प्रत्युक्तम् । सूत्रकारोऽपि एतदेव चोद्यम् * तद्वतो विधानात् इत्यनूद्य * अध्ययनमात्रवतः इति परिहरिष्यति । अध्ययनविधेरर्थज्ञानपर्यन्तत्वेऽपि * अधीत्य, * अभिसमावृत्य इत्यादिभिर्नार्थज्ञानस्य कर्मशेषत्वेन विनियोगः; क्त्वाश्रुतेः समानकर्तृत्वादिमात्रे विश्रमात् । तथा विनियोगेऽपि कर्मानुष्ठानोपयुक्तार्थज्ञानादन्यदेवोपासनात्मकं ज्ञानं वेदान्तवाक्यैर्विधित्सितम् । उपास्यश्चात्मा जीवातिरिक्तः श्रुत्यैव सिद्धः, न तु कल्प्यः । जीवब्रह्मसामानाधिकरण्यं च अचिद्ब्रह्मसामानाधिकरण्यवदैक्यविरोधादन्यार्थम् ।

तिष्ठतु च तथाविधज्ञानविधानम्, तथापि न विरोधः; कर्तुरिवाराध्यस्यापि कर्मार्थत्वेन विचार्यत्वात्तस्य च कर्मवश्यादन्यत्वेन श्रुतिसिद्धत्वात्तद्विचारार्थकाण्डान्तरादिसिद्धेः। यद्यपि अलाप्यर्थज्ञानस्यानुष्ठानशेषत्वेऽपि यथांशं परब्रह्मोपासनशेषत्वमपि स्यादित्युत्तरं प्राप्तम्। तथापि अर्थज्ञानपर्यन्ततामूले चोद्ये प्रथमपर्वस्थोद्घटापराधोपेक्षायोगादन्वारुह्यवादमनादृत्य मूलच्छेद एवात्र कर्तव्य इत्यभिप्रायेण सूत्रभाष्ययोर्मात्रशब्दः।

अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात्, गृहीतात्स्वाध्यायादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचाररूपमीमांसाश्रवणेऽधीतवेदः पुरुषः स्वयमेव प्रवर्तते। तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वा अध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतत्वरूपानन्तास्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्यविचाररूपशारीरकमीमांसायामधिकरोति।

ननु अध्ययनविधावक्षरग्रहणपर्यवसितेऽन्यार्थतयैवाधीतस्य स्वाध्यायस्य प्रतीतोऽप्यर्थस्तात्पर्यविषयत्वायोगादविचार्यः; ततो निरर्थको वेदः; अध्ययनविधिश्च न पुरुषार्थपर्यन्तः, निर्विषयतया * अधीत्य स्वाध्यायात् इति स्मृतिनिरुद्धावसरतया च मीमांसापि नारभ्येत; कुतस्तदैक्यादि स्यात् इति शङ्कामपनुदन्नेकविषयतया वेदाख्यैक्याख्येयव्याख्यानात्मकशास्त्रैक्यमपि दर्शयन्मीमांसारम्भसूत्रार्थं च सूचयति—**अध्ययन** इति। अत्र स्वाध्यायनिर्णयविचाररूपाधीतवेदशब्दैः मीमांसाया विषयफलस्वरूपाधिकार्यैक्यव्यञ्जनम्। * गृहीतस्य इत्यनेन विधिव्यापारस्य विश्रमोक्तिः। प्रयोजनवदर्थदर्शनोक्तिस्तु पुरुषार्थपर्यवसानज्ञापनार्था। **स्वभावत एव**—विधिव्यापारमनपेक्ष्येत्यर्थः; व्युत्पन्नपदपदार्थादेरिति शेषः। अयं भावः—

ग्रहणार्थमुपात्तोऽपि स्वाध्यायो वह्नित्स्वयम्। प्रकाशयति यत्तत्र स्वतो मानमबाधतः॥ २६३॥
जपाद[र्थ]ध्ययनं श्रौततत्तत्फलसमन्वितम्। न रुन्धे शब्दसामर्थ्यं ग्रहणार्थं तु किं पुनः॥ २६४॥
विनियोगविशेषेण वेदेऽर्थपरतां क्षिपन्। विनियोगार्थधीबाधात् स्वव्याघातेन बाधितः॥ २६५॥
विवक्षितार्थैव न वा स्यादध्ययनचोदना। आद्ये व्याहतिरन्त्ये तु पूर्वपक्षस्य नोत्थितिः॥ २६६॥
अर्थज्ञानफलत्वेन मानत्वं चात्र दुर्भणम्। तत्फलत्वे हि तन्मानं तन्मानत्वे च तत्त्विति॥ २६७॥
स्वीकरोत्यर्थपरतां नियोगार्थोऽपि चेद्विधिः। संस्कारार्थोऽपि तद्वत्स्यात् स्वसिद्ध्यौत्सुक्यसामवत्॥

वेदः निरपेक्षवेदकः; न तु पुंवाक्यवत् मू[ल]लीभूतमानान्तरमपेक्ष्येत्यर्थः। अत एव न मूलदोषविचारशङ्कया विचारस्तन्मननमिति भावः। प्रयोजनमत्र चतुर्वर्गः। तद्वन्तोऽर्थास्तदुपायाः कर्मोपासनारूपाः। **अवबोधित्वम् इह** निर्णयजननानुगुणत्वं दृष्टं दुरपह्नवम्। न च दृष्टे अनुपपन्नं नामेत्यभिप्रायेण **दर्शनात्** इत्युक्तम्।

स्वत एव बोधकत्वेऽपि साध्यामावान्न मीमांस्यमित्यत्राह—**गृहीतात्** इति। * अर्थानापाततोऽवगम्यमानान् **दृष्ट्वा** इति तत्कालविशेषणतयाऽन्वयः। आपातधीरिव दृष्टा; अतः संशयादिनिरासः साध्य इत्याशयः। पूर्वः प्रयोजन-

वदर्थशब्दः काकदन्तोक्तिव्यावृत्त्या श्रुतिप्रामाण्यार्थः । उत्तरस्त्वापातधियः स्वविषयविचाररागजननेन प्रेरकत्वज्ञापकः ।

प्रतीतमप्रतीतं वा न मीमांस्येत किञ्चन । इति चोद्यमपि क्षिप्तमापातज्ञाततोक्तितः ॥ २६९ ॥

ननु यदि शब्दस्वभावादापातधीः, तर्हि अव्युत्पन्नानामपि स्यात् ; न चात्र व्युत्पत्तिमतामेव तद्विधिरस्ति, [अतः]अङ्गेष्वप्यङ्गिवदक्षरग्रहणान्ते विधौ तदसंभवात् विध्यैक्यरूप्ये चाङ्गाध्ययनस्यार्थज्ञानपर्यन्तत्वे विशेषहेत्वभावात् । अत्र ब्रूमः-

यस्य संस्कृतभाषैव बाल्यात्प्रभृति शीलिता । तदा तु तस्य सा तत्र स्यादापातमतिस्त्रयम् ॥ २७० ॥
निरङ्गाध्ययनेऽप्येवं साङ्गाधीतौ तु किं पुनः । वेदार्थापातधीवृद्धिमङ्गार्थापातधीर्दिशेत् ॥ २७१ ॥
हितैषिशाक्यजातां च केचिदापातसंविदम् । प्राप्नुवन्तो विचारे हि प्रवर्तन्ते मनीषिणः ॥ २७२ ॥
केचित्त्वङ्गोपकारार्हरूपेणाङ्गाक्षरग्रहे । सार्थज्ञानत्वमाचख्युर्दृष्टार्थत्वं तु लब्धिति ॥ २७३ ॥

अस्त्वेवमापातधीः ; तदरिक्तमपि ज्ञानं विद्यास्थानान्तरैरेव साध्यतामित्यत्रोत्तरम्—**तत्स्वरूपेत्यादि** । पूर्वपक्षोक्तात् व्यावृत्तरूपावधारणमिहान्यैरसाध्यं फलमिति भावः । **वेदवाक्यविचाररूपेत्यनेन** विद्यास्थानान्तरव्यावृत्तमीमांसाशरीरव्यञ्जनम् । मीमांसाया विचाररूपत्वोक्तिस्तदभेदोपचारात् , विचारशब्दस्य करणव्युत्पत्त्या वा । विधिविषये कृत्यशेषं नास्तीत्यभिप्रायेणाधीतवेदत्वोक्तिः आपातधीमत्त्वादिति हेत्वभिप्राया च । **पुरुष** इति हेतुगर्भं प्रयोजनार्थित्वादिति । **स्वयमेव**—विधिनिरपेक्षस्वेच्छयेत्यर्थः ।

आपातस्त्वोपयुक्तार्थे भाते तन्निर्णयार्थिनः । तदुपाये प्रवृत्तस्य विधानं ह्यनपेक्षितम् ॥ २७४ ॥
स्वेष्टनिश्चयहेतुत्वमन्वयव्यतिरेकतः । सिद्धमेव विचारस्य तत्रापि ह्यफलो विधिः ॥ २७५ ॥
संप्रेक्ष्य निधिरत्नादींस्तद्यथार्थनिरूपणे । अपरप्रेरिता एव प्रवर्तन्ते तदर्थिनः ॥ २७६ ॥
अतो न विधिसिद्धोऽत्र विचारस्तत्क्रमोऽपि वा । अन्यथा दोषदृष्टैव द्वितीयस्योपपत्तितः ॥ २७७ ॥

स्वयं प्रवृत्तावप्याचार्यनैरपेक्ष्यव्युदासाय श्रवणतदाश्रयणे प्रवृत्तिः । अकरणे तर्ह्यदोषस्स्यात् ; तत्र— तदधीननिश्चयतत्सापेक्षहितप्रवृत्त्यादीनामभावस्यैव दोषत्वात् । तदभिप्रायेण ह्येतदप्युच्यते—

* अधीत्य वेदान्साङ्गांस्तु यो विचारमुपेक्षते । स्वप्रयासं च विस्मृत्य प्रभ्रष्टस्स्यात्प्रयोजनात् ॥ इति ।

नन्वेवं विचारस्य अवैधत्वे * अधीत्य स्नायादित्यादिविधिनिरुद्धावसरः कथं मीमांसताम् ; दुःस्वात्मकगुरुकुलवासान्निवृत्तेः स्वतः प्राप्तत्वात् आनन्तर्यमेव ह्यत्र विधेयम् । मैवम्, सनियमकसमावृत्तियुक्तस्नानरूपसंस्कार एव ह्यत्र विधीयते, अन्यथा निवृत्त्यानन्तर्यस्यापि स्वतः प्राप्तत्वादविधेयत्वं स्यात् । किञ्च विचारस्य वैधत्वेऽपि कथमवसरः । श्रुत्या स्मृतेर्बाधादिति चेन्न;; श्रुतावपि * अधीत्य, * अभिसमावृत्य इत्युक्तेः । तत्र समानकर्तृकत्वपूर्वकालत्वमात्रपरतयाऽऽनन्तर्ये तात्पर्यं नास्तीति चेत् , स्मृतावपि किं न तथा स्यात् । न च श्रुतावध्ययनशब्दोऽर्थज्ञानपर्यन्तः, । एव स्मृतावक्षरग्रहणपर्यन्त इति नियन्तुं शक्यम् । * यदधीतमित्यादिवत्स्यादिति चेन्न, विरोधाविरोधाभ्यां विशेषात् । अस्तु तर्हि श्रुतिस्मृत्योर्द्वयोरप्यर्थज्ञानपर्यन्ताध्ययनानुवादः, तथा सति स्नानविधिः वैधस्य विचारस्यावसरं न विरुन्ध्यादिति चेत् ; तर्हि रागप्राप्तस्यापि स्वोपयुक्तद्रव्यार्जनादेरिव श्रवणस्यावसरं न विरुन्ध्यादेव ।

ज्ञात्वाऽनुष्ठानमिच्छन्तः स्नानादिविधयः स्वतः । प्राचीमेव स्वविषयां मीमांसां परिगृह्णते ॥ २७८ ॥

किं चात्र मानभेदाङ्गक्रमकर्त्राद्यवेदिनः । न स्नानविधिमप्येकं यथावद्वेदितुं क्षमाः ॥ २७९ ॥
अगत्याऽध्ययनादौ प्रागविचार्य प्रवर्तते । स्नाने तु गतिसद्भावात् न स्यादगतिका गतिः ॥ २८० ॥
अनुज्ञातं च सर्वत्र न स्वाङ्गं व्यवधायकम् । अतो मीमांसया नात्र व्यवधानं विरोधकृत् ॥ २८१ ॥

यद्वा अध्ययनस्नानैरन्तर्येऽपि न विरोधः । अविचारितधर्माणामुत्तरानुष्ठानासिद्धिप्रसङ्गाद्विरोध इति चेन्न ; स्नातस्यापि यावद्विचारं हितकामैर्ब्रह्मचारिण इवानुष्ठापनोपपत्तेः । न च हितैषिवाक्यादनुष्ठानेऽपशूद्धनयविरोधः, तत्तदुचित-धर्मेषु हितैषिभिः प्रवर्तनात् • न चास्योपदिशेद्धर्ममित्यादिनिषेधदृष्टेश्च । अन्यथाऽप्यनुष्ठानसिद्धौ मीमांसाश्रवणं निरर्थकं स्यादिति चेत्, तत्र— वैपरीत्यशङ्कायां मूलजिज्ञासया परनैरपेक्ष्यप्रवचनस्यात्यादिश्रद्धया च तदुपपत्तेः । एवमेव पूर्वेषामुत्तरेषामपीत्यविच्छेदसिद्धिः । कश्चिदालस्यात्पित्तादीनेव सर्वथा प्रमाणयेदिति चेत्, ततः किम् ; अनलसैरन्यैश्शास्त्रश्रवणोपपत्तेः । स्नातस्य शृण्वतो गुर्वर्थव्यापारैः स्वधर्मोपरोधः स्यादिति चेत्, न ; अध्ययनविधिप्रयु-क्तानां तेषां निवृत्तेः । यथोक्तं **न्यायसुदर्शने**—

* अक्षरग्रहणोपायनियमार्थो ह्ययं विधिः । तद्ग्रहावधिका धर्मस्थितिरित्यब्रवीत् स्मृतिः ॥
अधीताद्वेदतः पश्चादर्थज्ञानं स्वतो भवेत् । तत्तु नाध्ययनं नापि धर्माणां च प्रयोजकम् ॥ इति ।

किमर्थं तर्हि मीमांसामाचार्यः श्रावयेत् ? लाभाद्यर्थं धर्मार्थं वा । गृहस्थधर्मोपरुद्धस्य कः श्रोतुमवसरः ? को वाचार्यस्य प्रवक्तुम् ? तस्य वृत्त्यर्थिनोऽस्ति द्रव्यार्जनकाल इति चेत्, तर्हि विध्यनुज्ञातदृष्टार्थप्रवृत्त्यन्तरवच्छ्रवणस्यापि स्यात् । इतिहासाद्यर्थतया च गृहिणोऽप्यस्ति कश्चिद्विचारकालः । तदा च वेदोपबृंहणैस्तैः स्वसाध्यानुगुण्येन मीमां-साऽप्युपादीयेत । वेदाभ्यासं चैवं विभजन्ते—

* वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः । तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥ इति ।

कुलक्रमागतधनादेर्दैवादागतधनादेः कस्यचित् तदार्जनकालोऽप्यपेक्षितश्रवणस्य कालः । गृहस्थादयश्चाविचा-रितवर्णादिधर्मास्तत्तद्धर्मश्रोतारः श्रुतिस्मृतिषु दृश्यन्ते । गृहस्थस्याप्यतिशयितविद्यार्थं प्रत्यब्दं द्वौ द्वौ मासौ गुरुकुलवासश्च कैनचिदनुज्ञातः । यथानूद्यते— * निवेशे वृत्ते संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्यकुले वसेद्ध्रुयश्रुतिः मिच्छन्निति श्वेतकेतुः * एतेन ह्यहं योगेन भूयः पूर्वस्मात् कालाच्छ्रुतमकुर्वि इति । नन्वत्र * तच्छास्त्रैर्विप्रतिषिद्धम् - निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते अग्निहोत्रमतिथयः इत्यादिनाऽऽपस्तम्बः स्वमतमाह ; सत्यम् ; तेनापि तदा मास-द्वयं निरन्तरगुरुकुलवासमात्रं निषिध्यते ; न तु प्रवक्तृवच्छ्रोतुस्सिध्यन् विचारावसरः क्षिप्यते ।

अस्त्वध्ययनानन्तरं विचारः, स च रागतः कृत्स्नविषयश्च ; तथाऽपि

अबैधत्वे विचारस्य क्रमस्य च यथारुचि । अप्रवृत्तेः प्रवृत्तेश्च प्राप्तौ तत्रेति भाष्यते ॥ २८२ ॥
दुस्त्यजत्वाद्विचारस्य यौगपद्यविरोधतः । व्युत्क्रमे दोषदृष्ट्या च क्रमस्सौत्रो ह्यसाविति ॥ २८३ ॥

तत्र वेदे मीमांसायां वा ; स्वेच्छातः प्रवृत्तौ सत्यामिति वाऽर्थः । कर्मविधिरिह काम्यकर्मचोदना काम्यानुष्ठानं वा ; अविशेषाद्वा नित्यादेरपि संग्रहः । स्वरूपशब्देन त्यक्तफलस्य परविद्याङ्गविनियोगो न चिन्तित इति सूच्यते । स हि साधनलक्षणे शोध्यः ; तन्निरूपणे हि अनन्तस्थिरफलपर्यन्तत्वं बुध्येत । यद्वा केवलकर्मणामल्पास्थिरफलत्वस्य कचिदमीमांसितत्वेऽपीति भावः । निरूपिते इत्यनेन कर्मनिरूपणस्य वृत्तत्वावश्यंभावोऽभिप्रेतः । प्रपञ्चितं चैतत्तात्पर्य-

तूलिकायाम्—

* तत्रेदं नियतं कर्म नैव शक्यमुपेक्षितुम् । तद्धि सर्वास्ववस्थासु पुमांसमनुवर्तते ॥
बुभुक्षुर्वा मुमुक्षुर्वा यो यो गृह्णेत पूरुषः । तस्य सर्वस्य बहुना कर्मणानुगमोऽस्ति हि ॥
नित्यं नैमित्तिकं कर्म प्रतिषिद्धं च सर्वदा । सर्वैरपि परीक्ष्यं हि प्रत्यवायजिहासया ॥
न ये बिभ्यति दुःखेभ्यस्ते मा कार्षुर्विचारणाम् । इतरेषामियत्कर्म विचार्यमिति तु स्फुटम् ॥
काम्यं तु कर्म भोगाय विनापि ब्रह्मणा क्षमम् । न कर्मणा विना ब्रह्म मोक्षसामर्थ्यमश्नुते ॥
सर्वापेक्षा च यज्ञादिश्रुतेरिति हि वक्ष्यते । वेदैकदेशचिन्तापि प्रोक्ता कृत्स्नप्रयोजिका ॥
तस्मादवश्यचिन्तत्वे कर्मैवाग्रे विचार्यते ॥ इति ।

कर्मणामल्पास्थिरफलत्वं दृष्ट्वा— तत्तद्वाक्यैरेवार्थतो विशदं निश्चित्येत्यर्थः । ज्योतिष्टोमाग्निहोत्रादिस्वरूपनिरूपणे हि यथोपायं गुरुलघुस्वर्गभेदकल्पिस्स्यात् । * ज्योतिष्टोमोऽग्निष्टोम इत्यनेन ज्योतिष्टोमस्याग्निष्टोमरूपत्वे निश्चिते च तत्साध्यस्य स्वर्गस्य * यावदग्निष्टोमेनोपाप्नोतीत्यादिना देशकालादिपरिच्छेदनिश्चयः । तत्रावृत्तिविधिरप्यनावृत्तस्य फलाल्पत्वे लिङ्गम् । नित्यकर्मणामपि कस्मिंश्चिदधिकारिणि * प्राजापत्यं ब्राह्मणानामित्यादिभिर्वर्णाश्रमभेदेन फलतारतम्यं स्मर्यते । वैश्वदेववरुणप्रघासादीनां चातुर्मास्यानां स्वरूपेऽवगते हि * एषा वै वैश्वदेवस्य मात्रा, एतद्वा एतेषामवमम्, अतोऽतो वा उत्तराणि श्रेयांसि भवन्तीति वैश्वदेवादेर्मितफलत्वदर्शनात्, * अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतमित्यत्र चिरोपभोग्यत्वमात्रे तात्पर्यग्रहः । यद्यप्यक्षयफलत्वमिदं विद्याङ्गत्वेन परंपरया नेतुं शक्यम्, तथाऽप्यत्र तद्विवक्षाविरहात्र तथा नीयते। एवं परिमितफलसोमहविष्कर्मस्वरूपनिश्चये सत्येव *अपाम सोममित्यादावमृतत्वस्य * आभूतसंप्लवं स्थानममृतत्वमित्यादिस्मृत्या नियमः । स्वर्गस्वाराज्यादिफलभेदसाधककर्मस्वरूपभेदसिद्धौ च तत्र स्वर्गशब्दोक्तस्याल्पत्वसिद्धिः । * यं यं क्रतुमधीत इत्यादिषु च फलतारतम्यकल्पिः गुरुलघुकर्मस्वरूपनिश्चयादेव । उत्पत्तिनाशवदाराध्यप्रीणनकर्मस्वरूपनिश्चयाच्च तत्साध्यस्य तत्सायुज्यादेरस्थिरत्वदृष्टिरिति ।

तदेवं निरस्तप्रतिबन्धब्रह्मविचारार्थस्य शारीरकस्य विद्यास्थानान्तरव्यावृत्तस्वरूपफलाभ्यां मीमांसैकदेशत्वव्यक्त्यर्थं निर्णेतव्यविशेषसिद्ध्यर्थं च पुनः * **अध्ययनेत्यादिकमुक्तम्** । अत्रामृतत्वशब्देन तद्व्यन्तप्रधानवेद्यफलोक्तिः; तेनार्वाचीनानामानुषङ्गिकान्नवत्त्वादीनां सङ्गत्यन्तरघटितदृष्टिविध्यादिफलानां च व्यवच्छेदः । कर्मभागोक्तममृतत्वमापेक्षिकं साधितम् । इदं तु बाधादर्शनात् निर्णीतांशसंवादिवेदान्तैकदेशोपष्टम्भाच्च न प्राच्यवदिति प्रत्यायितप्रायमित्यभिप्रायेण ॐ अनन्तस्थिरफलापातप्रतीतेरित्युक्तम् । न ह्यत्र फलत्वाद्यनुमानैः अल्पास्थिरत्वादिकल्पिः शक्या, अतिप्रसङ्गादिति। अनवच्छेदादिह सर्वशरीरः शारीरः, तमधिकृत्य प्रवृत्तं शास्त्रं **शारीरकम्** । वक्ष्यति हि आनन्दमयाधिकरणे— * स एव निरुपाधिकः शारीर आत्मा । अत एवेदं परं ब्रह्माधिकृत्य प्रवृत्तं शास्त्रं शारीरकमित्यभियुक्तैरभिधीयत इति । मैव मीमांसेति शारीरकमीमांसा; तस्याम् । **अधिकरोति** स्वार्थबुद्ध्या तत्रोद्युक्तो भवति, न तु पूर्ववृत्तान्तरादधिकरोतीत्यर्थः । ब्रह्मविचारानन्तर्ये युक्तिसिद्धे तद्विषयशास्त्रानन्तर्यमपि सिध्येदिति भावः ।

ग्रहणं च फलत्वं च सार्थता च स्वतः श्रुतेः । रागात्कृत्स्नविचारश्चेत्यपूर्वमिह भाषितम् ॥ २८४ ॥

तथा च वेदान्तवाक्यानि केवलकर्मफलस्य क्षयित्वं ब्रह्मज्ञानस्य चाक्षयफलत्वं

दर्शयन्ति । ❀ तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते । ❀ अन्तवदेवास्य तद्भवति । ❀ न ह्यध्रुवैः प्राप्यते । ❀ प्लवा ह्येते अदृढा यज्ञरूपाः । ❀ परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिश्श्रोत्रियं ब्रह्मनिष्ठम् । तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् । ❀ ब्रह्मविदाप्नोति परम् , ❀ न पुनर्मृत्यवे तदेकं पश्यति ❀ न पश्यो मृत्युं पश्यति, * स स्वराड् भवति, * तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते, * पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति इत्यादीनि ।

ननु कर्मफलाल्पत्वादौ लिङ्गमात्रं दृष्टम् ; यथाश्रुतविरुद्धप्रत्ययदार्ढ्याय प्राप्तिरपि वक्तव्या, कर्मस्वरूपनिरूपणं चात्र स्वयंप्रवृत्तेः प्रतिबन्धशान्त्यर्थम् ; हेतुस्त्वनन्तस्थिरफलापातप्रतीतिरेव, सा कुतस्त्येत्राह— **तथा** इति । उक्तप्रकारेणास्य सूत्रस्याप्येदमर्थं यथा स्यात्तथेत्यर्थः । **च**ः अवधारणे । अत्र क्षयित्वोक्तिरक्षयित्वोक्तिश्चाल्पत्वादेरुपलक्षिका । निश्चितसंवादेनानिश्चितेऽर्थान्तरेऽपि श्रद्धासंवृद्धयै पूर्वं * तद्यथेत्यादिवाक्योदाहृतिः । **लोको** लोक्यः, भोग्यः । देशपरत्वे त्विहामुत्रेत्याभ्यामनन्वयः । **कर्मचितः** लौकिककर्मलब्धः । **पुण्यचित** इत्यविशेषोक्त्या निवृत्तिधर्मसाध्यस्यापि क्षयित्वभ्रमं निवारयितुमाह — **अन्तवत्** इति । उपात्तवाक्यैकार्थ्यात् क्रियास्वरूपान्तवत्त्वस्यानपेक्षितवचनत्वाच्च फलद्वाराऽत्रान्तवत्त्वोक्तिः । * यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राणीति पूर्ववाक्यात् * यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपण इत्युत्तरवाक्याच्च ; अन्तवदित्यस्य ब्रह्मवेदनरहितकर्मविषयत्वसिद्धौ पुण्यचितः इत्यत्रोत्तरेषु च तद्विषयत्वं सुगमम् । ज्ञानरहितकर्मसु स्वर्गस्वाराज्यादिफलभेदवत् केषुचिन्नित्यफलभेदसंभवात् * सर्वेभ्यः कामेभ्यो ज्योतिष्टोम इति श्रवणाच्चात्रोपात्तं वाक्यं प्रायिकविषयं स्यादित्यत्राह— **न ह्यध्रुवैः** अध्रुवफलसाधनतया चोदितैरित्यर्थः । * ध्रुवं तदिति वाक्यखण्डान्वयात् नित्यफलार्थत्वाभावः ख्याप्यते । पुनरावृत्तिनियमवतः सर्वकर्मनिर्मूलनत्वायोगेन ध्रुवफलसाधनत्वाभावं द्रढयति— **प्लवा** इति । **अदृढाः** तमसः पारं गमयितुमक्षमाः । • अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येऽभिनन्दन्ति मूढाः जरामृत्यू ते पुनरेवापि यन्ति । इति ह्यत्र वाक्यशेषः ।

अथ सूत्रार्थानुगुणं कर्मणां नित्यफलसाधनत्वाभावनिश्चयस्य निर्वेदहेतुत्वं ब्रह्मज्ञानस्यानन्तफलत्वं च समुच्चित्य वदद्वाक्यमाह— **परीक्ष्येति** । इयं श्रुतिः सारे व्याख्याता— * **ब्राह्मणः**—वेदाभ्यासरतः, **कर्मचितान्**—कर्मणा संपादितान्, **लोकान्** आराध्यक्षयित्वेन क्षयस्वभावान्, कर्ममीमांसया **परीक्ष्य, अकृतः**— नित्यः परमपुरुषः, **कृतेन**—कर्मणा नास्ति न संपद्यत इति यो **निर्वेदमायात्**, स **तद्विज्ञानार्थं गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं**—वेदान्तवेदिनम्, **ब्रह्मनिष्ठं** साक्षात्कृतपरमपुरुषस्वरूपम् । स च गुरुः सम्यगुपसन्नाय **तस्मै**, **येन** विद्याविशेषेण तम-

क्षरं सत्यं परमपुरुषं विद्यात्, **तां ब्रह्मविद्याम् प्रोवाच**— प्रब्रूयादित्यर्थः। स गुरुमेवाभिगच्छेत् **तस्मै** स विद्वान् प्रोवाचेत्यनन्वयात्, अप्राप्तत्वाच्च। विधावपि लिटो विधानात्; * छन्दसि लुङ्लङ्लिट इति, इति। अत्र न्यायसिद्धानुवादांशे जातिवाचिनोऽपि ब्राह्मणशब्दस्य प्रकृतकर्मपरीक्षणौपयिकसाङ्गाध्येतृसमर्पणेनाजहल्लक्षणया त्रैवर्णिकविषयत्वार्थं * वेदाभ्यासरतः इत्युक्तम्। ब्रह्म अणतीत्यपि ब्राह्मणशब्दं निर्ब्रुवन्ति। आराध्यक्षयित्वेनेति सुकृतविनाशोपलक्षणम्। कर्ममीमांसयेत्यर्थलभ्योक्तिः। अकृतशब्दस्य पुंलिङ्गतानुरोधात् वाक्यशेषशक्त्या च परमपुरुषो विशेष्यो दर्शितः। अत्र नास्तिशब्देनाकृतस्य स्वरूपनिषेधायोगात् कर्मणा इत्यनेन चानन्वयात् उत्पत्तिनिषेधस्यानपेक्षितत्वात् न संपद्यत इत्युक्तम्। कृतशब्दस्य भावार्थव्यक्त्यै कर्मणेति प्रतिपदम्। तद्विज्ञानार्थम्—आपातधीस्थस्याकृतस्य तस्य विशदबोधायेत्यर्थः। समित्पाणित्वमिह ब्रह्मविद्याश्रवणार्थोपनयनान्तरङ्गनार्थमिति केचित्। उक्तं हि छान्दोग्ये जाबालं प्रति गौतमेन— * नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोप त्वानेष्य इति। अन्ये त्वाहुः — अनुपनीते जाबाले युक्तमुपनयनम्; अन्यत्र तु समित्पाणित्वोक्तिररिक्तपाणित्वोपलक्षणार्था; दृश्यते हि वैश्वानरविद्यायाम्— * ते ह समित्पाणयः पूर्वाह्णे च प्रतिचक्रमिरे तान् हानुपनीयैवैतदुवाच इति। प्रजापतिवाक्ये च एकस्यैवेन्द्रस्य बहुषु प्रश्नेषु * समित्पाणिः पुनरेयायेत्यावर्त्यते। न हि तत्र बहुवारमुपनयनं दृष्टमिष्टं वा। सूत्रकारश्च * संस्कारपरामर्शादित्येतावन्मात्रं वक्ष्यतीति। * एकां शाखामधीत्य श्रोत्रिय इत्युक्तस्याधीतस्वाध्यायमात्रस्य प्रकृतानुपकारकतया * वेदान्तवेदिनमिति श्रोत्रियशब्दस्यालाक्षामहतश्रोत्रियपरत्वं दर्शितम्। स्फुटप्रवचनक्षमत्वमदृष्टत उपकारकतमत्वं च ब्रह्मनिष्ठशब्दाभिप्रेतमित्याह— * साक्षात्कृतपरमपुरुषस्वरूपमिति। * प्रशान्तचित्तायेत्युक्तत्वाच्छमोऽत्र बाह्यकरणव्यापारान्तरनिवृत्तिः। शमदमाविह श्रवणौपयिकावधानार्थौ। * तस्मादेवंविच्छान्तो दान्त इत्यादौ तु श्रवणतो विदितार्थस्य विद्यार्थौ। येनेत्यत्र लिङ्व्यत्ययस्य क्लिष्टत्वात्सामान्योपक्रमत्वं द्योतयति— * विद्याविशेषणेति। तथा च प्रयुञ्जते * तत्र बाधकमभवत् क्षणभङ्गो वा बाह्यार्थभङ्गो वा इत्यादि। स्वरूपतः स्वभावतश्च विकारं निवर्तयद्व्यामक्षरसत्यपदाभ्यां प्रधानक्षेत्रज्ञव्यवच्छेद इत्यभिप्रायेणाह— परमपुरुषमिति। संशयविपर्ययार्हवचनम्, अपूर्णवचनं च क्षेमुं तत्त्वतः इति विशेषणम्; * आचार्योऽप्यनाचार्यो भवति श्रुतात्परिहरमाण इति स्मरन्ति। वृत्तार्थकथनश्रमनिरासायाह— *प्रब्रूयादिति। अभिगच्छेदित्युपक्रमप्रतीतविधिबाधेन व्यत्ययानुसरणं क्लिष्टम्; अतः प्रोवाचेत्यस्य भूतपरत्वेनानन्वय इत्यभिप्रायेणाह— स गुरुमेवेति। नियमविधित्वमवधारणेन व्यञ्जितम्। प्रोवाचेत्यस्य विधिपरत्वे हेत्वन्तरमाह— अप्राप्तत्वादिति। यद्यपि लाभाद्यपेक्षया कस्यचिद्रागतः प्रवृत्तिः; तथाऽपि तन्निरपेक्षस्य गुरोः सच्छिष्यविषये धर्मार्थमिदं विधीयत इति न विरोधः। लिटो लिङर्थत्वस्य विशेषतोऽनुशिष्टत्वमप्याह— विधावपीति।

ब्रह्मज्ञानस्य परशब्दनिर्दिष्टब्रह्मप्रापकतया प्राकरणिकनित्यनिरतिशयानन्दप्रापकत्वमभिप्रेत्याह— **ब्रह्मविदिति**। ब्रह्म प्राप्तस्यापि स्वर्गादिन्यायात् * इमान् लोकानित्यादिभिश्च पुनरावृत्त्यादिशङ्कां परिहर्तुमाह— **न पुनरिति**। मृत्युरिह मरणम्, * मोहो मृत्युस्समतो यः कवीनामित्याद्युक्तं वा। पाप्मनां निश्शेषक्षये मृत्यूपलक्षितं सर्वमनिष्टं न स्यात्, लोकानुसरणं चैच्छमिति भावः। तदेकदर्शनमिहोपायः, फलं वा। * न प्रेत्य संज्ञास्तीति विद्याप्रकरणस्थवाक्येन मुक्तस्य ज्ञानलोपशङ्कां निवर्तयन् मृत्युतत्कार्यनिवृत्तिं च व्यनक्ति— **न पश्य** इति। मुक्तस्य तदातनपरदुःखप्राक्तनस्वदुःखदर्शनेऽपि तयोः स्वाश्रितत्ववर्तमानत्वाभावान्न तं प्रति प्रतिकूलत्वम्। एवं हि बन्धदशायामपि

दृष्टम् । तत्र तु परदुःखदुःखित्वं, गतानुशोचनं च कर्मोपाधिकमेव; * न रोगं नोत दुःखतां सर्वं ह पश्यः पश्यतीत्यादिना विशेषेण दृश्यमानेष्वपि स्वप्रातिकूल्यदर्शनं नास्तीति हि स्थाप्यते । पश्योऽत्र * तदेकं पश्यतीति समानप्रकरणात् ब्रह्मदर्शी जीवः । पश्यतीति व्युत्पत्त्या परमात्मन्यपि, * पश्यः पश्यति पश्यन्तमित्यादिप्रयोगदृष्टेः । ब्रह्मात्मकतया सर्वस्य दर्शनात्तदेकदर्शनसर्वदर्शनयोः न विरोधः । न केवलं निर्व्यापारसार्वज्ञ्यमात्रम्, * अन्यराजानस्ते क्षय्यलोका भवन्तीत्यामातकर्ममूलानीश्वरपारतन्त्र्यनिवृत्त्या स्वच्छन्दवृत्तिश्च स्यादित्यभिप्रेत्याह— स स्वराडिति । अत एवेश्वरपारतन्त्र्यस्थितावपि * स्वराट् स्वतन्त्र इति नैघण्टुकोक्तिर्न विरुध्यते । अमृतत्व योपायान्तरनिषेधश्रुत्या कर्मसाध्यामृतत्वोक्तेरन्यपरत्वं द्रढयति— तमेवमिति । अत्र च गुणविभूतिविशिष्टमहापुरुषपरामर्शाज्जीवस्यैव निर्विशेषस्वरूपधिया पुरुषान्तरधिया वा मुक्तिः स्यादिति परेष्टं निरस्तम् । ऐक्यभेदाभेदबुद्धयोरमृतत्वहेतुत्वं श्रुत्यैव क्षिपमित्याह— पृथगिति । ततः—उपासनरूपात् पृथक्त्वमननादित्यर्थः । तेन जुष्टः—प्रेरकेण प्रीतिविषयीकृतः । अनेन स्थिरस्य परानुग्रहस्यैव फलद्वारतोक्तिः । * धातुः प्रसादादिति च श्रूयते । नन्वत्रात्मानं प्रेरितारं चेति समुच्चित्य मननमुक्तम्; अतोऽन्यज्ञानस्यापि मोक्षहेतुत्वं भाति; सत्यम्, न तावता प्रेरकप्राधान्यमपह्नियते । *कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छन्नित्यादावपि परविद्याङ्गजीवदर्शनपरम् । आदिशब्दः * भूयसां स्याद्बलीयस्त्वमिति न्यायेन वाक्यान्तरैरप्युक्तदृढीकरणार्थः ।

ननु च साङ्गवेदाध्ययनादेव कर्मणां स्वर्गादिफलत्वं स्वर्गादीनां च क्षायित्वं ब्रह्मोपासनस्यामृतत्वफलत्वं च ज्ञायत एव । अनन्तरं मुमुक्षुः ब्रह्मजिज्ञासायामेव प्रवर्तताम् । किमर्था धर्मविचारापेक्षा । एवं तर्हि शारीरकमीमांसायामपि न प्रवर्तताम्, साङ्गाध्ययनादेव कृत्स्नस्य ज्ञातत्वात् । सत्यम्; आपातप्रतीतिर्विद्यत एव, तथाऽपि न्यायानुगृहीतस्य वाक्यस्यार्थनिश्चायकत्वादापातप्रतीतोऽप्यर्थः संशयविपर्ययौ नातिवर्तते; अतस्तन्निर्णयाय वेदान्तवाक्यविचारः कर्तव्य इति चेत्, तथैव धर्मविचारोऽपि कर्तव्य इति पश्यतु भवान् ।

अथैभिरेव वाक्यैरपेक्षितज्ञप्तिं यथारुचि विचारप्रवृत्तिसंभवं च मन्वानः कश्चिद्ब्रह्मविचारस्य कर्मविचारानपेक्षत्वं चोदयति— नन्विति । चकार उद्दूर्न्यैरपि प्रत्युक्तिव्यञ्जितैः पूर्वचोद्यैः समुच्चयार्थः । आद्य एवकारो विचारनैरपेक्ष्यपरः । द्वितीयस्तु ज्ञानानुत्पत्तिनिरासार्थः । मुमुक्षुः—प्राग्भवीयपुण्यमहिमक्षीणकाम्यरुचिरित्याशयः । किमर्था—न दृष्टार्था, अन्यथाऽपि मुमुक्षुत्वस्य ब्रह्मविचारस्य च संभवात् । नाप्यदृष्टार्था, अवैधत्वादिति भावः । अत्र प्रतिबन्धा प्रतिवक्ति— एवं तर्हीति । धीमात्रतुष्ट्या त्यक्तकर्मविचारश्चेदित्यर्थः । एवं न प्रवर्ततामिति वाऽन्वयः । अपिशब्दाभिप्रेतं हेतुं विवृणोति—साङ्गेति । त्वदुक्तादेवेत्यवधारणाभिप्रायः । कृत्स्नस्य ब्रह्मतदुपास्त्यादेः । अत्रापातधीश्चेदिष्टप्रसङ्गः; न तया विचार्यत्वाभावः । निर्णयस्त्वमीमांसिते कथं स्यादिति मत्वा चोदकः पुनराह—सत्यम् इति । अङ्गीकृतमर्थं व्यनक्ति—आपातेति । तावताऽपि न्यायैरनिर्णीततया * अन्नमिति इत्यादिभिरल्पास्थिरफलधीर-

सकृदव्याकृताकाशप्राणादिकारणत्वसंशयः, * तान्येवानुविनश्यति इत्यादिभिरात्मनाशभ्रमश्च न निवर्तेतेत्यभिप्रायेणाह—**तथापि** इति। अनिस्तीर्णा प्रतिबन्दिरिति पश्यन् तत्फलत्वेनोत्तरमाह—**तथैवेति**। **भवान्**—कचिदप्यापातधीमात्रादतृप्तो वाक्यान्तराण्यपि निर्दिधारयिषुस्त्वमिति भावः। अत्र हि कर्मभागेऽपि * अनन्तं ह वा अपारमक्षय्यं लोकं जयति, योऽग्निं नाचिकेतं चिनुते इत्यादिभिरापाततोऽनन्तस्थिरफलधीरस्ति। ब्रह्मज्ञानफलं चानुविनाशादिश्रुत्या आत्यन्तिकप्रलय[त्व]स्मृत्या चानर्थरूपमिव भाति। अतः स्वरसवृत्त्या प्रथमातिक्रमे कारणाभावात्कर्मविचारनैरपेक्ष्यहेतुर्नास्ति। तदिदमभिप्रेत्योक्तं **सारे**—* अधीतवेदस्य हि पुरुषस्य कर्मप्रतिपादनोपक्रमत्वाद्वेदानां कर्मविचारः प्रथमं कर्तव्य इति * अथातो धर्मजिज्ञासा इत्युक्तमिति।

लघुपूर्वपक्षः।

ननु च ब्रह्मजिज्ञासा यदेव नियमेनापेक्षते तदेव पूर्ववृत्तं वक्तव्यम्। न धर्मविचारापेक्षा ब्रह्मजिज्ञासायाः, अधीतवेदान्तस्यानधिगतकर्मणोऽपि वेदान्तवाक्यार्थविचारोपपत्तेः। कर्माङ्गाश्रयाण्युद्गीथाद्युपासनानि अत्रैव चिन्त्यन्ते, तदनधिगतकर्मणो न शक्यं कर्तुमिति चेत्; अनभिज्ञो भवान् शारीरकशास्त्रविज्ञानस्य। अस्मिन् शास्त्रे अनाद्यविद्याकृतविविधभेददर्शननिमित्तजन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूलमिथ्याज्ञाननिबर्हणाय आत्मैकत्वविज्ञानं प्रतिपिपादयिषितम्। अस्य हि भेदावलम्बि कर्मज्ञानं कोपयुज्यते? प्रत्युत विरुद्धमेव। उद्गीथादिविचारस्तु कर्मशेषभूत एव ज्ञानरूपत्वाविशेषादिहैव क्रियते। स तु न साक्षात्सङ्गतः। अतो यत्प्रधानं शास्त्रम्, तदपेक्षितमेव पूर्ववृत्तं किमपि वक्तव्यम्।

अथ विद्यापेक्षितमेव तत्त्वविवेकादिकं विचारापेक्षितमिति भ्राम्यन् कर्मणश्च विद्याविरुद्धतया तद्विचारवृत्तत्वायोगं मत्वानो गूढाभिप्रायः परश्चोदयति—**ननु** इति। **यदेवेति** स्वाभिमतचतुष्कव्यतिरिक्तनैरपेक्ष्यपरम्। तस्य परंपरया उपयोगेऽपि विचारजन्मनि तन्नियमो नास्तीति व्यक्त्यै नियमशब्दः। नियतापेक्षितचतुष्कव्यतिरिक्तस्यापि न सूत्रसूच्यत्वमित्यभिप्रायेण **तदेवेत्युक्तम्**। तदिहानपेक्षितमेव त्वदुक्तमित्याह — **न धर्मेति**। स्वेष्टमपेक्षितांशं सूचयितुमाह—**अधीतवेदान्तस्येति**। अवयुत्याध्ययने मानाभावेऽपि आपदि वेदान्तमात्राध्यायिन इत्यर्थः। तस्य हि न कर्मण्यापातधीः, नतरां बुभुत्सा, नतमां विचार इति नियमभङ्गः। यद्वा कृत्स्नाध्येतुरपि स्वापेक्षितांशस्याप्यधीततया सुकृतविशेषमृदितकषायतया च ब्रह्मविचारस्य शक्यत्वादधीतत्वमात्रेण हानार्थमपि न कर्मणश्चिन्त्यत्वमपीति भावः। एतेन * धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः इति ब्रह्मज्ञानवादिभाष्योक्तमनूदितं मन्तव्यम्। सिद्धान्तिसम्मतां प्रधानयुक्तिमप्रधानीकृत्य तत्तद्दृष्टिविधीनां साक्षाद्ब्रह्मविद्यापेक्षितत्वं प्रकल्प्य वा कर्मविचारवृत्तत्वं शङ्कते—**कर्मेति**। **उद्गीथाद्युपासनानि** इति पक्षोक्तिः, अनधिगतकर्मणोऽशक्यचिन्तनत्वं साध्योऽर्थः, **कर्माङ्गाश्रयाणि** इति हेत्वंशपरम्। आश्रयशब्द इह विषयार्थः, प्रणयनाश्रयगोदोहनादिवदुद्गीथादिकमङ्गमात्रमित्य प्रविशत उपासनस्य फलान्त-

रार्थतया कर्मानङ्गत्वसूचनपरश्च। आदिशब्देन उद्गीथैकदेशभूतप्रणवस्य पञ्चविधसामादेश्च ग्रहणम्। **अत्रैव**—न तु कर्मकाण्डे चिन्तितानीति भावः। **अनधिगतकर्मेण** इत्यनेन कर्मतदङ्गरूपपदार्थानवगमे वाक्यार्थस्य दुर्ग्रहत्वं सूच्यते। ननु * अव्युत्पन्नपदोपेतवाक्यार्थप्रत्यभिज्ञानमुपमानमिति कैश्चिदुक्तम्। अन्यैरनङ्गीकाराच्चतथा न। अथापि प्रकृताविरोधं ब्रूमः—न हि ते गोसदृशो गवयः इत्यादिवाक्ये गवयत्वादिविशिष्टः पिण्डः पदार्थतया अन्वेतीत्याहुः; [किं तु] गोसादृश्यवान् गवयशब्दवाच्यः इत्येतावति तात्पर्यात्; गवयशब्दादयस्तु पदेन बोधितास्तत्तान्वीयेरन् इति। ननु च आद्यव्युत्पत्तिदशायामविदितपदवाक्यभेदस्य वाक्यार्थधीरस्ति। ततः किम्? तत्र हि प्रत्यक्षादिसिद्धे विशिष्टार्थेऽनुमानतो वाक्यस्य बोधकत्वग्रहः, न तु व्युत्पित्सोः तत्र वाक्यात् वाक्यार्थधीः। कर्मणि विचारिते तदन्तर्गतोद्गीथादिधीः, ततस्तद्विषयोपास्तिधीः स्यात्। न ह्यत्र कर्मानङ्गेषूद्गीथादिषूपास्तिर्विधीयते, गोदोहनादिवद्गुणफलाधिकारत्वादिति भावः। उक्तमशक्यत्वं दुष्परिहरं संछाद्य धाष्टर्यात् स्वकपोलकल्पितप्रकारेण समाधित्सुरुपालभते—**अनभिज्ञ** इति। शारीरकस्य खल्विदं शास्त्रम्; अत आत्मविज्ञानप्रधानमिति भावः। * शरीरमेव शरीरकं, तत्र निवासी शारीरको जीवात्मा इति हि वाचस्पतिः। तद्विज्ञानप्राधान्यं विवृणोति—**अस्मिन्** इति। शुद्धस्य अविद्यान्वये हेत्वनुयोगमुपरोद्धुमनादिशब्दः। मतभेदादविद्यायाः स्वरूपतः प्रवाहतो वाऽनादित्वम्। प्रवाहपक्षेऽनवस्था बीजाङ्कुरादिनयनिरूढा इत्याकूतम्। **भेदः**— अहमिदं जानामि इति ज्ञात्रादिरूपः। स प्रत्येकमवान्तरभेदैर्विविधः। तस्य मिथ्यात्वं व्यङ्क्तुमविद्याकृतत्वोक्तिः; तद्दर्शनं वा तत्कृतमित्युच्यते; तदध्यस्तमित्यर्थः। भेददर्शनं निमित्तं येषामिति विग्रहः। निर्विकारस्य जन्मादिकमात्मभ्रान्तिविषयदेहधर्मारोपात्। **आदि**शब्देन निरयादिग्रहः। तैर्दुःखम्, सांख्यवन्मृषावादिनां तादृशोऽन्तःकरणविकारः। मिथ्यात्वेऽपि प्रतिकूलतया जिहासितव्यत्वाय जन्मादिषु वा दुःखत्वोक्तिः। तद्भ्रान्तिप्रवाहाविच्छेदव्यक्त्यै **सांसारिक**शब्दः। अनात्मभिरात्मानमेकीकृत्य पौनःपुन्येन [सं]सरणं हि संसारः। मोघप्रयत्नत्वपरो निमग्नत्वोपचारः, उन्मिमङ्क्षार्थश्च। मिथ्याज्ञानमिहात्मनि भेदग्रहः, अनिर्वाच्यरूपमज्ञानं वा। अज्ञानतत्प्रतिभासयोः तत्कार्यप्रतिभासप्रवाहस्य च मिथ्यार्थत्वात्तत्त्वधीमात्रेण बाध्यत्वे किमत्र कर्मणेति भावः। चन्द्रद्वित्वादिधीर्हि तदैक्यधीबाध्या। तद्वदिहेत्यभिप्रायेणात्मैकत्वविज्ञानत्वोक्तिः।

अशुद्धस्य प्रसिद्धत्वाच्छुद्धस्यावाच्यभावतः। अज्ञातं त्वं तदोरैक्यं ख्याप्यमित्यत्र मन्यते ॥ २८५ ॥
स्वाध्यायस्य हि कात्स्न्र्येन मानत्वे सत्यपि स्वतः। नावाद्ये नानुवाद्ये च नापवाद्ये च मानता ॥

अविचारितबुद्ध्यादिव्युदासार्थो **विज्ञान**शब्दः। एवमिहाधिकारिप्रयोजनसाधनानि ज्ञापितानि। **प्रतिपिपादयिषितम्**—प्रदातुं प्रापयितुं वेष्टम्। शब्दजन्यज्ञानादेव ह्यपवर्गः। यद्वा आत्मैक्यज्ञानमवैधमपि मोक्षसाधनतया शारीरके प्रतिपाद्यम्। तस्य प्रधानतात्पर्यविषयत्वाय सन्न्ययोगः। ततः किं प्रकृतस्य? तत्राह— **अस्ये**ति। **हि**शब्दोऽनुपयोगस्यैवार्थः। **भेदावलम्बी**ति विरोधपरम्। **कर्मज्ञानम्** इह विचाररूपं तत्फलरूपं वा। क्वेत्येतत् स्वरूपोत्पत्तौ कार्ये वेति विवरिष्यते। तच्च तत्साधनानुग्राहकस्याप्युपलक्षणम्। द्वैतवासनाहेतुतयाऽत्यन्तहेयत्वाय वैपरीत्यं प्रथयति—**प्रत्युते**ति। अंशतो वा, फलसङ्गादिगुणतो वा, **निर्वैरत्वं** दुर्वचमित्यभिप्रायेणाह— **विरुद्धमे**वेति। उक्तं च **नैष्कर्म्यसिद्धौ**—

* अयथावस्तुविद्या स्याद्विद्या तस्या विरोधिनी। समुच्चयस्तयोरेवं रविशार्वरयोरिव ॥ इति,

* तमोऽङ्गत्वं यथा भानोरग्नेः शीताङ्गता यथा । वारिणश्चोष्णता यद्वत् ज्ञानस्यैवं क्रियाङ्गता ॥ इति च ॥

यदि कर्म विरुद्धम्, तर्हि तदङ्गाश्रयोपासनचिन्ताऽप्यत्र विरुद्धत्वान्न सङ्गच्छेत ; कर्मचिन्तायामेव तु निविशतामित्यत्राह— **उद्गीथादीति** । इहोद्गीथाद्युपासनं लक्ष्यते, तत्स्वरूपस्यात्र अमीमांस्यत्वात् । गुणफलसंबन्धमपेक्ष्य तद्विचारस्य कर्मशेषत्वोक्तिः, फलान्तरार्थत्वेऽपि न परविद्याङ्गत्वमिति च भावः । यद्वा शिष्यत इति **शेषः** । कर्मविचारैः परिशिष्ट इत्यर्थः । अत्र विचार्यमाणानाम् उद्गीथाद्युपासनानां ज्ञानरूपत्वं विवक्षितम्, न तु तद्विचारस्य, अतिप्रसङ्गात् । **इहैव**— विरुद्धशास्त्र एवेत्यर्थः । ननु साजात्याधीनप्रसक्त्याऽपि समुद्रध्यानवत् प्रधानस्यानुपयुक्तं विरुद्धं च न चिन्त्यम् । अतः परविद्याप्रकरणे पाठात् विचारणाच्चाश्रमादिवत् गत्यादिवच्च तदुपयुक्तत्वं कल्प्यमित्यत्राह— **म** इति । तुशब्दौ शङ्कानिवर्तकौ । यद्यपि साक्षात् प्रधानोपयुक्ततया वा न सङ्गतिः, तथाऽपि ज्ञानरूपत्वसाम्यात्तदन्वितस्य वीर्यवत्तरत्वोक्त्या चापरिच्छिन्नफलत्वशङ्कोदयमपाकृत्य धूमादिमार्गवज्जिहासादार्ढ्यमुत्पादयितुमिह तच्चिन्तेति भावः । तर्ह्येत्यन्तानुपयोगाभावात्तदुपयुक्तमपि पूर्ववृत्तमस्तु; तत्राह— **अत** इति । **यत्प्रधानम्**—यदुपपादनप्रधानम् । एवकारेण प्रासङ्गिकापेक्षितमपि प्रधानस्यानुपयुक्तं विरुद्धं च व्यावर्त्यते । प्रधानापेक्षितानुक्तिश्च न युक्ता । अप्रधानापेक्षितस्य च वृत्तत्वे वक्तव्ये दूष्यमतविचारादेरपि तथात्वप्रसङ्ग इति भावः । **किमपि**—त्वदुक्तात्कर्मविचाराद्विलक्षणम् ।

बाढम्— तदपेक्षितं च कर्मविज्ञानमेव; कर्मसमुच्चितात् ज्ञानादपवर्गश्रुतेः । वक्ष्यति च— * सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति । अपेक्षिते च कर्मण्यज्ञाते केन समुच्चयः, केन नेति विभागो न शक्यते ज्ञातुम् ; अतस्तदेव पूर्ववृत्तम् ।

अत्र भास्करादिमतस्थो वा सिद्धान्ती वा सर्वावमर्शी पार्श्वस्थो वा परोक्तेस्तात्पर्यविषयांशानङ्गीकारेण प्रतिवक्ति— **बाढमिति** । भास्करोक्तमत्र हेतुग्रन्थतः, साध्यतश्च प्रत्यभिज्ञायते । अनङ्गीकृतमर्थं विशिंषन् अनिष्टं च क्षिपति— **तदिति** । एवकारोऽन्यनैरपेक्ष्यं प्रासङ्गिकापेक्षितस्यैव प्राधान्येनाप्यपेक्षितत्वं विरोधाभावं च व्यनक्ति । प्रधानोत्पत्त्यादावनुपयुक्तस्य विचारः कथं तद्विचारापेक्षित इत्यत्राह— **कर्मेति** । अयं भावः— अत्कमधुलाभशङ्कामतिक्रम्य यथाविधि कर्मसमुच्चिते ज्ञाने प्रवृत्तिः केवलकर्मणामनन्तफलसाधनत्वाभावनिश्चयपूर्विकेति। एतेन * अधीतवेदान्तस्येत्यादि प्रागुक्तं प्रत्युक्तम् । इह भास्करपक्षे * तमेतं वेदानुवचनेनेत्यादिः श्रुतिः । समुच्चितत्वं चात्र * सहयुक्तेऽप्रधान इति तृतीयाश्रुत्या गुणप्रधानतया संबन्धः । गुणत्वं च प्रयाजादिवत् । प्रकृतानुपयोगात्तिरोधानेन समुच्चयोक्तिः । यादवप्रकाशमते * सर्वापेक्षेति सूत्रमङ्गाङ्गिभावपरम् । * सहकारित्वेन चेति सूत्रं तु समुच्चयार्थम् । तत्र तु * विद्यां चाविद्यां चेत्यादिका श्रुतिः । समुच्चितत्वं तु विशदज्ञानोत्पत्तेः पूर्वं तदु[प]त्पादकतया कर्मणां ज्ञानाङ्गत्वेन, पश्चात्तु मृत्युतरणब्रह्मप्राप्तिरूपफलभेदात्समत्वेन । सिद्धान्ते तु सन्निपत्योपकारित्वविवक्षया समुच्चयशब्दः । स्वरूपेण कर्मणोऽपेक्षितत्वे सूत्रकृत्संमतिमप्याह— **वक्ष्यतीति** । न ह्यस्मिन्सूत्रे साध्यत्वेन विविदिषोपात्ता, येन तदर्थेयमपेक्षोक्तिः स्यात् ; विद्या तु प्रकरणसिद्धा । अतः * विविदिषन्तीत्यत्र न विविदिषा विवक्षितेति भावः । चकारः क्वचिन्मते सिद्धान्ते च प्रतिपादकं समुच्चिनोति । मतान्तरे तु प्रतिपाद्यमप्रधानत्वं समत्वेन सह सङ्घटयति । अस्तु ज्ञानस्यानुष्ठाने यथामतं कर्मापेक्ष्यम् ; तद्विचारे तु किं कर्मविचारेणेत्यत्र दत्तोत्तरत्वेऽपि युक्तिवैभवादुत्तरान्तरमाह— **अपेक्षिते चेति** ।

यथामतं यथाधिकारमपेक्षितत्वम् । **केन समुच्चयः**—साधनलक्षणसमर्थयिष्यमाणस्वाधिकारानुगुणनित्यनैमित्तिकवर्गेण । **केन न**— निबन्धककाम्येन स्वाधिकारनिषिद्धेन चेत्यर्थः । अयं भावः—अनुष्ठानदशायां समुच्चेतव्यस्य तथा निर्णयाय विमर्शदशायामपि बुद्ध्यारोहः अवश्यंभावी । अतः पदार्थभूतकर्मविचारपूर्वकः तदन्वितविद्याविधिवाक्यार्थविचारः । ततश्च विषयविशेषावच्छिन्नब्रह्मोपासनचिन्तनस्य कर्मचिन्तासापेक्षतया कृत्स्नस्य शारीरकचतुरध्याय्यर्थविचारस्य कर्मविचारः प्राग्भावीति । तदिह कर्मनिरूपणस्य फलान्तरार्थकर्मपरिहारः फलं विद्यानुबन्धेन कर्मस्वरूपमात्रोपादानं चेति न मोघप्रवृत्तित्वम्, नापि विरोधः । यद्यपि विद्यापेक्षितो यज्ञादिपदार्थः साधनलक्षणे स्वयमिह सूत्रकृता चिन्तयितुं शक्यः; तथाऽपि कृत्स्नवेदार्थनिश्चायके मीमांसाशास्त्रे कामाधिकारस्यापि कचिच्चिन्त्यत्वादत्र प्राक् चिन्तिते कर्मस्वरूपे लाघवाद्विनियोगपृथक्त्वमात्रस्थापनं युक्तम् । तापत्रयपूर्ववृत्तत्वमतेऽपि विषमत्वेन समत्वेन च कर्मणः समुच्चेतव्यत्वार्थम् । ततः कर्मविचारपूर्ववृत्तत्वं दुस्त्यजमित्यभिप्रायेण मतचतुष्टयेऽपि फलितमाह—**अत** इति । कर्मपरामर्शी तच्छब्दस्तच्चिन्तनं लक्षयति; दूरस्थमपि कर्मविज्ञानं वा परामृशति । अवधारणं विरोधाभावद्योतकम् ।

नैतद्युक्तम् — सकलविशेषप्रत्यनीकचिन्मात्रब्रह्मविज्ञानादेवाविद्यानिवृत्तेः । अविद्यानिवृत्तिरेव हि मोक्षः । वर्णाश्रमविशेषसाध्यसाधनेतिकर्तव्यताद्यनन्तविकल्पास्पदं कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत् । श्रुतयश्च कर्मणामनित्यफलत्वेन मोक्षविरोधित्वम्, ज्ञानस्यैव मोक्षसाधनत्वं च दर्शयन्ति— ❀ अन्तवदेवास्य तद्भवति ❀ तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते ❀ ब्रह्मविदाप्नोति परम्, ❀ ब्रह्म वेद ब्रह्मैव भवति * तमेव विदित्वातिमृत्युमेतीत्याद्याः ।

अत्रात्यन्तनैष्कर्म्यवादी प्रतिवक्ति—**नैतद्युक्तमिति** । श्रुतिप्रतीतमप्ययुक्तं त्याज्यम्; अन्यथाऽतिप्रसङ्गादिति भावः । कुत इत्यत्र समुच्चयवादिकल्पितं साधनद्वित्वं तावन्निरस्यति— **सकलेति** । भास्करसिद्धान्तिपक्षयोरिह संमतिप्रदर्शनार्थं स्वकल्पितविकल्पकोटिनिष्कर्षणार्थं वा ब्रह्मेत्याद्युक्तम् । **विशेषाः**— भेदाः सजातीयविजातीयस्वगताः । स्वगतभेदो हि श्रुतोऽप्याविद्यैः उपासनविधिभिः कल्प्यत इत्यभिप्रायेण सकलशब्दः । **प्रत्यनीकत्वम्** इह शुक्त्यादिवदारोप्यात्यन्ताभावाश्रयत्वम्, तत्स्वरूपत्वं वा; स्वगोचरज्ञानेन स्वाध्यस्तनिवर्तकत्वं च ।

ईदृशस्य मानानर्हस्य शून्यत्वं परिहर्तुं चिच्छब्दः । चिद्रूपतया स्वप्रकाशस्य मानान्तरापेक्षया च द्वैतप्रसङ्गः । असद्व्यावृत्या च भ्रमाधिष्ठानत्वसिद्धिः । **मात्रचा** चिच्छब्दोत्थापितज्ञातृज्ञेयादिसंबन्धशङ्काव्युदासः । प्रत्यनीकत्वमप्यन्ततः कल्पितमनतिरिक्तं वेति च भावः । **ब्रह्मशब्देन** * ब्रह्म वेद इत्यादिसूचनम् । **विज्ञानात्**—श्रवणाद्यनुगृहीतवाक्यजन्यप्रत्यक्षात् । अवधारणेनाधिष्ठानयाथार्थ्यज्ञानस्य असत्यनिवर्तने कर्मनैरपेक्ष्यं व्यज्यते । * तमेव विदित्वेत्यादिभिः प्रतिबन्धकमृत्युतरणस्यापि ज्ञानैकसाध्यत्वोक्तेः * अविद्यया मृत्युं तीर्त्वा इत्येतन्न मोक्षस्य कर्मसाध्य-

त्वार्थमिति। अत्राविद्यया मृत्युं प्राप्य स्थित इति तु योजना। साधनद्वित्वनिदानतयेष्टं साध्यद्वित्वमप्यत्र नास्तीत्याह — **अविद्यानिवृत्तिरिति**। **एव**कारः कण्ठचामीकरनयात् प्राप्तप्राप्तेरसाध्यत्वं व्यनक्ति। हिशब्दस्तु मुक्तेर्ज्ञानमात्रसाध्यतया श्रुतिस्मृतिसूत्रप्रसिद्धत्वं मोक्षशब्दस्वारस्यं च बोधयति। ज्ञानकार्ये कर्मणोऽनुपयोगं सर्वथा विरोधं च प्रागुक्तं विवृणोति— **वर्णेति**। **आदि**शब्देन निमित्तगुणादेर्वर्णाद्यवान्तरभेदस्य च संग्रहः। **अनन्त**शब्दो व्यक्त्यानन्त्यं, बाहुल्यं वा विवक्षति। **विकल्पो** भेदः तद्भ्रमो वा। भ्रमपक्षे तु **आस्पद**शब्दो विषयार्थः। **निवृत्ते**रात्यन्तिकत्वव्यक्त्यै **सकल**शब्दः। कारणनिवृत्तेः कार्यनिवृत्त्यभेदोपचारेण तद्रूपत्वोक्तिः, तन्निरूप्यत्वाद्वा। अविद्यैव हि भेदधीः। अतस्तया तन्निवृत्त्या च तत्सदसद्भावौ निरूप्यौ। **कथमिव**— न कथंचित्। अत्यन्तासंभावितं कर्मणामविद्यानिवर्तकत्वम्, प्रत्युत तदनुवृत्त्या संसारप्रापकत्वमेव स्यादिति भावः।

ननु कथं वचनविरुद्धे न्यायस्स्यात्, युक्तिविरोधाद्धीतस्य च ते श्रुतिविरोधापत्तिरित्यत्राह — **श्रुतय** इति। युक्तेरनुग्राह्यमप्यस्तीति चकाराभिप्रायः। स्वरूपतो विरुद्धत्वं यौक्तिकं प्रागुक्तम्, फलतस्तु श्रौतमिहोच्यते—अनित्यमेव हि कर्मफलम्, नित्यस्तु मोक्ष इति। **ज्ञानस्यैव**। न तु कर्मभिस्समुच्चितस्य, विकल्पितस्य अनुगृहीतस्य चेत्यर्थः, युक्त्यनुगुणस्यैवेति वा, **दर्शयन्ती**त्युक्त्या स्पष्टस्य तर्केणानुसन्धानमप्यधिकम्, अस्फुटार्थश्रुत्यन्तरं च दुर्बलमिति सूच्यते। * अविदित्वेत्यस्य वाक्यस्य मोक्षसाधनवित्तिरहितो हि कर्म करोतीति तात्पर्यं मत्वाह — **अन्तवत्** इति। बहूनां चिरकालानुष्ठितानामपि कर्मणामनित्यफलसाधनत्वमित्यवधारणाभिप्रायः। **तद्यथे**त्यादौ पुण्यशब्दो न सङ्कोचार्ह इत्याकृतम्। **ब्रह्मविदाप्नोति** इति वाक्येऽप्येवंविधः, कर्मसमुच्चयश्च न श्रुत इति ज्ञानस्य नैरपेक्ष्यसिद्धिः। नन्वत्रापि वेद्यत्ववेदितृत्वप्राप्यत्वप्राप्तृत्वैर्भेदधीरस्तीत्यत्राह— **ब्रह्म वेद** इति। अनेन नित्यं ब्रह्मभूतस्य भ्रान्तिसिद्धाब्रह्मत्वनिवर्तके वाक्ये कर्मकर्तृव्यपदेशः काल्पनिक इति ख्याप्यते। न केवलं कर्मसमुच्चयस्याश्रुतत्वं, प्रतिबन्धनिवृत्तेर्ज्ञानमात्रनिवर्त्यत्वकण्ठोक्तेर्बाधश्चास्तीत्यभिप्रायेणाह— **तमेवे**ति। वेद्यावधारणमप्यत्र वेदनस्य नैरपेक्ष्यमभिप्रैति। सनत्सुजातवाक्यान्मृत्युरिहाविद्या। आदिशब्देन * किमर्था वयं यक्ष्यामहे * न कर्मणा न प्रजयेत्यादिसंग्रहः।

एतास्सयुक्तिका बह्व्यः स्फुटार्थाः प्रतिरुन्धते। अन्यामनुपपन्नार्थामव्यक्तविषयां श्रुतिम्॥ २८७॥

यदपि चेदमुक्तम्, यज्ञादिकर्मापेक्षा विद्येति। तत् वस्तुविरोधाच्छत्यक्षरपर्यालोचनया चान्तःकरणनैर्मल्यद्वारेण विविदिषोत्पत्तावुपयुज्यते, न फलोत्पत्तौ; * विविदिषन्तीति श्रवणात्। विविदिषायां जातायां ज्ञानोत्पत्तौ शमादीनामेवान्तरङ्गोपायतां श्रुतिरेवाह—* शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत् इति।

विषमसमसमुच्चयद्वये सिद्धान्ते च श्रुतिसूत्राभ्यामुक्तमपेक्षितत्वमनुवक्ति— **यदिति**। **अपि**रत्र गर्हार्थः, यथाभिमानं पक्षत्रयपरिग्रहप्रयुक्तप्राधान्यपरो वा। चः प्रतिक्षिप्तश्रुत्यन्तरोक्तसमुच्चये। स्वेष्टश्रुत्यादेर्दुर्वारत्वात् अत्र तात्पर्यान्तरकल्प्योत्तरमाह— **तदिति**। **यज्ञादिकर्मापेक्षा विद्येति** स्वरूपोत्पत्तौ फलोत्पत्तौ वा अपेक्षितत्वेन

यत्कर्मोक्तं तदित्यर्थः। उक्तिमात्रपरामर्शे तु न फलोत्पत्तौ कर्मोपयुज्यत इत्येवंप्रकारेण तत्परिहर्तव्यमिति योज्यम्। उक्तार्थगोचरश्रुतिसूत्रपरामर्शे तु * अविद्यया मृत्युं तीर्त्वेत्यादिवदर्थान्तरकल्पनानर्हमपीत्यपिशब्दार्थः। अध्याहारश्च प्राग्वत्। **वस्तुविरोधात्**— भेदवासनासंवर्धकतया अन्तवत्फलतया चाद्वैतज्ञानस्य तत्फलस्य च विरुद्धत्वादित्यर्थः। यद्वा द्वैताद्वैतवासनयोस्तत्फलभूतबन्धमोक्षयोश्च वस्तुनोर्मिथो मिथः प्रातिभट्यादिति। अधीतस्य सन्प्रत्ययस्य वैयर्थ्यमयुक्तमित्यभिप्रायेण **श्रुत्यक्षरपर्यालोचनयेत्युक्तम्**। **अन्तःकरणनैर्मल्यद्वारेणेति**। इदं तावत् सिद्धान्तिनोऽप्यभिमतम्। तथोत्तरत्राप्युपयुज्यतामित्यलाह— **न फलेति**। फलशब्द इह शास्त्रफलं ज्ञानं तत्साध्यमोक्षं च सामान्यतो ब्रूते। विद्याया अपि हि फलत्वं वदन्ति— * ब्रह्मावगतिर्हि पुरुषार्थः निश्शेषसंसारबीजाविद्याद्यनर्थनिबर्हणादिति। वित्तिमोक्षयोः कर्मोपयोगे श्रुत्यक्षरविरोधं व्यनक्ति— **विविदिषन्तीति**। न हि विदन्तीति श्रूयते, न चापवृज्यन्त इति। ननु यदि श्रुतत्वाद्विविदिषासाधनत्वम्, तर्हि * क्रियावानेष ब्रह्मविदां वरिष्ठः इत्यादिश्रुत्या विविदिषायाः पश्चात् वेदनसाधनत्वमपि स्यात्; तत्राह—**विविदिषाया**मिति। कर्मणां शमादीनां च विद्यार्थतया श्रुतत्वाविशेषेऽपि श्रुत्यैव व्यवहिताव्यवहितहेतुत्वेन व्यवस्थापनमित्यभिप्रायेण— **जातायाम**ित्युक्तम्। **शमादीनामेवेत्यवधारणेन** तेषां कर्मनिवृत्तिरूपतया कर्मसमुच्चयानर्हत्वं व्यज्यते। उत्पत्तिशिष्टशमदमादिगुणावरोधे हि न कर्मणां ज्ञाने विनियोगशक्यः; किं पुनः विरुद्धगुणावरोधे; * क्रियावानित्यादि वाक्यं तु कर्मणां स्तावकं न विनियोजकम्। यद्वा * यज्ञेनेत्यादौ च वेदनसहयोगलक्षणतृतीयाक्लृप्तिर्न समीचीना। अतः कर्मणां वित्त्यर्थविनियोगासिद्धौ न तादर्थ्येन सत्त्वशुद्धिलक्षणद्वारकल्पतिः। विविदिषायां तु विनियोगात्तत्कल्पतिर्युक्तेति भावः। कर्मण इव शमादेर्न द्वारसापेक्षत्वमित्यभिप्रायेण **अन्तरङ्गोपायतामि**त्युक्तिः। अतोऽपि शमादिभिः कर्मणः समुच्चयकल्पन्यनर्हतां श्रुतिरेवाह; न तु बहिष्ठयुक्त्या श्रुतेर्लिङ्गादिभिर्वा साध्यत इत्यर्थः। यद्वा श्रुत्या हि कर्मापेक्षत्वशङ्का, श्रुतिरेव तद्विरुद्धत्वं वक्ति; अविशिष्टं च श्रुतित्वमनयोः; युक्त्यनुग्रहात्तु बलीयस्त्वमस्याः। * विविदिषन्तीत्यत्र वेदनलक्षणा च पदान्तरविमर्शापेक्षिणी वाक्यकक्ष्यानिवेशाद्विप्रकृष्टा। श्रुतिस्तु प्रथमकक्ष्यायां स्थितेति भावः।

समुच्चयवदेवात्र विकल्पोऽपि न कर्मणः। शमाद्यैरव्यवहितैरसाम्यादिति मन्यते॥ २८८॥

भूत्वेति कत्वाश्रुतेरेषां साक्षादङ्गत्वमीयते। हित्वा विविदिषादीनां कल्प्यमन्यत्तु कर्मणः॥ २८९॥

दान्तः—विषयदोषदृष्ट्या काम्यादिषु निवृत्तबाह्याक्षः। * मनसो दमनं दम इति दान्तिः स्मर्यते। * मनसो विजयश्शमः, विजितस्य तस्य तत्त्वविषयनियोगयोग्यता दम इति वाचस्पतिः। **उपरतः**—देहयात्रायामपि यदृच्छालाभसन्तुष्ट्या नातिप्रवृत्तः। **तितिक्षुः**—दुर्निवाराणि द्वन्द्वानीति शेषः। **समाहितः**—ब्रह्मण्येकाग्रधीः। **आत्मनि**—शरीरे। अवधारणमासक्त्यतिशयपरम्। * राहोश्शिरः इतिवद्वा भेदकल्पन्या * आत्मन्येवात्मानमित्युच्यते। न हि वस्तुतः स्वस्मादन्योऽन्यत्र वा मृग्य इति भावः। **पश्येदिति**। अनेन प्रत्यक्षश्रमस्य तादृशमेव बाधकमिति सूच्यते।

तदेवं जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्ममृदितकषायस्य विविदिषोत्पत्तौ सत्याम् * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् * सत्यं ज्ञानमनन्तं ब्रह्म

*** निष्कलं निष्क्रियं शान्तम् * अयमात्मा ब्रह्म * तत्वमसीत्यादिवाक्यज[न्य]न्म-ज्ञानादविद्या निवर्तते ।**

यदि न कर्मणा धीः, केन तर्हि स्यात्; विद्योत्पत्तौ चानपेक्षितमपि कर्म * स खल्वेवं वर्तयन्नित्यादिश्रुति-बलाद्विद्यया विकल्पतः, समुच्चयतः, प्रधानतया, अनुग्राहकत्वेन वा मुक्तावपेक्ष्यतामित्यत्राह—**तदिति** । स्वरूपफल-विरोधादित्यर्थः । **एवम्**—यज्ञादीनां तृतीयाश्रुत्या विविदिषायां विनियुक्तानां विद्यासाधनत्वासंभवप्रकारेणेति यावत् ।

जन्मान्तरशतेत्यादि क्वचित्तादृशसंभवे । अस्मिन् जन्मनि धर्माणामनाद्याणाय भाषितम् ॥ २९० ॥
अतो विविदिषार्थत्वं नास्मिन् जन्मनि कर्मणः । विचारवृत्तता सूत्रे वक्तव्येत्यभिमन्यते ॥ २९१ ॥

ननु फलतो बन्धकं कर्म कथं विविदिषासाधनमपि स्यादित्यत्राह— **अनभिसंहितफलेति** ।

अनिष्टोऽपि भवेद्दण्डः प्रतिषिद्धेषु लोकवत् । काम्येषु तु फलं तत्तद्विनियोगानुसारतः ॥ २९२ ॥

चित्तशुद्ध्यादिव्यवच्छेदाय **विशेषशब्दः** * कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इत्यादिस्मृतिवाक्यं श्रौत-विनियोगबाधाद्बलवदवधानसहमित्यभिप्रायेणोक्तम्—**मृदितकषायस्य विविदिषोत्पत्तौ सत्यामिति** । **कषायः**—कल्मषम्, रागादिश्च । नात्र कर्मणामव्यवधानेन प्रमाजनकत्वम्, प्रमाणेष्वनन्तर्भावात् । अतो **निर्विशेषब्रह्मात्मैक्यधीस्तत्त्ववेदकवा-क्यजन्येत्यभिप्रायेण** तादृशवाक्योपादानम् । तत्र कारणत्वेन लक्ष्यत्वाद्ब्रह्मणः प्रथमं कारणवाक्यमाह—**सदेवेति** । **अवधार-णाभ्याम्** अद्वितीयपदेन च औचित्याद्विजातीयसजातीयस्वगतभेदनिरासः । षड्विधतात्पर्यलिङ्गोपेतसद्विद्याबलाद्बहुणोक्तिमत्का-रणवाक्यानि स्तुत्यादिपराणि वेति भावः । सद्विद्योक्तमीक्षणादिकमपि बाध्यमित्यभिप्रायेण शोधकैरपि **निर्विशेषत्वमाह**—**सत्यमिति** । अनृतजडपरिच्छिन्नत्वव्यावृत्तिरिहाभिप्रेता । सत्यादिवाक्यस्य व्यावृत्तिपरत्वव्यक्त्यै शाब्दं विशेषनिषेधमाह—**निष्कलमिति** । निरंशमिति यावत् । **निष्क्रियम्**—निस्पन्दम्, निर्व्यापारं वा । **शान्तम्**—वस्तुतः षड्भिः विकारैः ऊर्मिभिश्च त्यक्तम् । सर्वजीवोद्देशेन तद्व्यापकतया ब्रह्मैक्यविधिमाह—**अयमिति** । सद्विद्यायामप्याप्ततमेन पित्रा पुत्रं प्रति तात्पर्यसूत्रा तद्विधिं वक्ति—**तत्त्वमिति** । आदिशब्देन * आत्मा वा इदमेक एवाग्र आसीत्, * आनन्दो ब्रह्म, * यत्तदद्रेश्यमग्राह्यम्, * तद्योऽहं सोऽसावित्यादिग्रहः । वाक्यादेव जन्म यस्य तद्वाक्यजन्म, तस्मात् ज्ञानात्; प्रत्यक्षरूपादिति शेषः । तत एवाविद्या निवर्तते, राजत्वोपदेशेन व्याधत्वादिभ्रमनिवृत्तिवदिति भावः ।

ज्ञानादेवेति निर्धारः कर्मणो मुक्तिसाधने । समुच्चयविकल्पाङ्गप्रधानत्वापनुत्तये ॥ २९३ ॥

* स खल्वित्यादिकमन्यपरम् । ध्याननियोगजन्यज्ञानपक्षं तु दूषयिष्यति ।

वाक्यार्थज्ञानोपयोगीनि च श्रवणमननानिदिध्यासनानि । श्रवणं नाम वेदान्त-वाक्यानि आत्मैकत्वविद्याप्रतिपादकानीति तत्त्वदर्शिन आचार्यान्न्याययुक्तार्थग्रहणम् । एवमाचार्योपदिष्टस्यार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनं मननम् । एतद्वि-रोध्यनादिभेदवासनानिरसनायास्यैवार्थस्यानवरतभावना निदिध्यासनम् । श्रवणादिभिः निरस्तसमस्तभेदवासनस्य वाक्यार्थज्ञानमविद्यां निवर्तयतीत्येवंरूपस्य श्रवणस्यावश्या-

पेक्षितमेव पूर्ववृत्तं वक्तव्यम् । तच्च नित्यानित्यवस्तुविवेकः, शमदमादिसाधनसंपत्, इहामुत्र फलभोगविरागः, मुमुक्षुत्वं चेत्येतत् साधनचतुष्टयम्; अनेन विना जिज्ञासानुपपत्तेः । अर्थस्वभावादेवेदमेव पूर्ववृत्तामिति ज्ञायते ।

नन्वदृष्टस्य सर्वकार्यहेतुतया कर्मणो वाक्यसहकारित्वादविधेयज्ञानान्मुक्तिरिति पक्षे श्रवणमननपूर्वकध्यानविधेः, त्रयाणां वा विधीनां वैयर्थ्यं च स्यादित्यत्राह— **वाक्यार्थ** इति । अदृष्टं हि दृष्टोपनायकम् । तत्सिद्धैः श्रवणादिभिः शमादिभिश्च वाक्यं चरितार्थम् । ततो विध्वबाधकज्ञानोत्पत्तौ दृष्टोपकारितया श्रवणादित्रयसाफल्यमित्याशयः। ननु नित्यनिर्विशेषस्वप्रकाशो शास्त्रवैयर्थ्यम्; * ब्रह्मविदित्यादिषु कर्मकर्त्रादिभेदोक्तिविरोधः; ऐक्यतत्त्वदर्शी च न शिष्यं पश्येत्; भेदभ्रमोपेतश्च कथं वाक्यं श्रावयेदित्यत्राह— **श्रवणमिति** । अत्रेत्युपस्कार्यम् । **तत्त्वदर्शिन** इत्यपि स्वाभीष्टविशेषाभिप्रायम् । **प्रतिपादकानि**—प्रदायकानि, उत्पादकानीति वा । कर्ममीमांसा ह्यविद्वद्दर्था कर्तव्यस्थापिका । ब्रह्ममीमांसा तु तत्त्वबोधोत्पादनेन सर्वकर्तव्यनिवर्तिकेति विशेषः । आपातधीष्यावृत्त्या मीमांसाफलव्यञ्जनाय न्याययुक्तत्वोक्तिः । वस्तुतोऽत्र न्याययुक्तत्वं स्वरूपत एव ग्रहणमिति केचित् । भेदभ्रमनिवर्तकधीहेतुतया शास्त्रादेः सफलत्वम् । अविद्याभेदानुवादेन तन्निषेधे तात्पर्यादविरोधः । ऐक्यदर्शिनोऽपि बाधितानुवृत्तेराचार्यत्वाभिमानेन श्रावकत्वमिति भावः । न्याययुक्तग्रहणे किं पुनः मननेनेत्यत आह—**एवमिति** । **स्वात्मनि**—स्वचित्ते; **हेतुतः प्रतिष्ठापनम्**—संशयादेरपुनरङ्कुरत्वाय युक्तिसंस्कारपटिम्ना दृढावस्थापनमित्यर्थः । ननु ताभ्यामेव विपरीतः विलम्भो निवर्तेत, अन्यथा तद्वैफल्यात्; किमत्र ध्यानेनेत्यत्राह— **एतदिति** । एतदुपकृतवाक्यजन्याद्वैतसाक्षात्कारविरोधिनीनां भेदवासनानां निरासकतया ध्यानं सफलमिति भावः । श्रूयते च— * तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार इति । स्यादेतत्— ध्यानपर्यन्तोपकारेण शास्त्रे कृतकृत्ये योगबलान्निवर्तकधीः । अन्यथा चक्रकं स्यादित्यत्राह— **श्रवणादिभिरिति** । निवृत्ते हि प्रतिबन्धे हेतूनां यथावत्कार्यकरत्वम्, हेत्वन्तरान्वेषणे तु गौरवम्; अतो वाक्यत एव वैशद्यवती निर्वर्तकधीः; श्रवणात्पूर्वमिव श्रवणतोऽप्यविशदधीरेव; तदुपजीवनेन मननादिक्रमेण ज्ञानान्तरस्य साध्यत्वान्न चक्रकमिति भावः । **इतिर्हेतौ**; एतेषु पर्वसु कथंचिदपि कर्मनैरपेक्ष्यादित्यर्थः । **एवंरूपस्य**— कर्मनिरपेक्षनिवर्तकज्ञानमूलकारणस्येति यावत् । साधारणानियतानुपयुक्तानां व्यावृत्त्यै **श्रवणस्यावश्यापेक्षितमिति** पदत्रयम् । तादृशं त्वदिष्टं किमित्यत्र हार्दमुद्भिरति —**तदिति** । * नास्यकृतः कृतेन, * शान्तो दान्तः, * येनाहं नामृता स्यां किमहं तेन कुर्याम्, * तं मा भगवान् शोकस्य पारं तारयत्वित्यादिभिरेतच्चतुष्टयसिद्धिः । अस्यावश्यापेक्षितत्वं कुतः ? तत्राह— **अनेनेति** । अनित्यजिहासा, नित्योपादित्सा च तद्विवेकतः । तत्पूर्वको विचारस्तु स्वरूपफल्योः चित्तविक्षेपनिवर्तकशमाद्यपेक्षः । अन्यविरागश्च शमाद्यर्थः । एतेषां न कर्मविचारवद्व्यभिचारो व्यवधानं वा । एतदन्यतमवैकल्येऽपि त्याज्योपादेयजिहासोपादित्सयोरसिद्धेः उक्तप्रकारश्रवणं न सिध्येदिति भावः । कर्मविचारोऽपि विवेकोपयोगात् वृत्तत्वेन वक्तव्य इत्यत्राह— **अर्थेति** । शमादेः कर्मनिवृत्तिरूपत्वम्, कर्मणोऽनुपयुक्तविरुद्धत्वे, तत्त्वज्ञानस्याध्यस्तनिवर्तनेऽन्यनिरपेक्षत्वं च अर्थस्वभावः । ज्ञानस्यैवापेक्षितत्वे, तत्साधनचतुष्कस्य वृत्तत्वे च यो हेतुस्तमादेवेत्याद्यावधारणम् । एवं वाक्यद्वयेन चतुष्कस्यायोगान्ययोगव्यवच्छेदावुक्तौ ।

एतदुक्तं भवति—ब्रह्मस्वरूपाच्छादकाविद्यामूलमपारमार्थिकं भेददर्शनमेव बन्धमूलम्। बन्धश्चापारमार्थिकः। स च समूलोऽपारमार्थिकत्वादेव ज्ञानेनैव निवर्त्यते। निवर्तकं च ज्ञानं तत्त्वमस्यादिवाक्यजन्यम्। तस्यैतस्य वाक्यजन्य[स्य]ज्ञानस्य स्वरूपोत्पत्तौ कार्ये वा कर्मणां नोपयोगः। विविदिषायामेव तु कर्मणामुपयोगः। स च पापमूलरजस्तमोनिबर्हणद्वारेण सत्त्व[वि]वृद्धया भवतीति इममुपयोगमभिप्रेत्य * ब्राह्मणा विविदिषन्तीत्युक्तमिति। अतः कर्मज्ञानस्यानुपयोगादुक्तमेव साधनचतुष्टयं पूर्ववृत्तमिति वक्तव्यम्। इति लघुपूर्वपक्षः।

नन्वज्ञानादिप्रत्यनीकस्वमात्रप्रकाशे निर्विशेषे नित्यमुक्ते ब्रह्मणि कथमविद्यातिरोधानभेददर्शनबन्धतन्निवृत्तिनिवर्तकादीनां संभवः? कर्मकृतस्य बन्धस्य निष्कृतिन्यायात् कर्मविशेष एव निवर्तकः स्यात्। निवर्तकज्ञानं च * ततो ज्ञानं प्रवर्तत इति स्मरणात् कर्मसाध्यम्। कथं च बन्धकस्वभावस्य कर्मणः क्वचिन्मुमुक्षोपयोगः? अन्तःकरणस्य कुतः कीदृङ्मालिन्यम्? कुतश्च कीदृङ्नैर्मल्यम्? कर्मणश्च प्रमाणतन्त्रं ज्ञानं प्रतीव विषयानुकूल्यधीनिघ्नां विविदिषां प्रत्यपि कारणत्वं न दृष्टम्। निवृत्तिधर्मस्य मोक्षहेतुत्वाभावे तद्वाक्यवैयर्थ्यप्रसङ्गः, इत्यादिशङ्काशङ्कूनुद्धरन् कण्ठोक्तमाभिप्रायिकं च संकलय्य दर्शयति— **एतदिति**।

प्रपञ्चितस्य संक्षेपः संक्षिप्तस्य प्रपञ्चनम्। एतदुक्तंभवतिना समाधिर्व्याकुलस्य च ॥ २९४ ॥

आच्छादकत्वोक्तया भावरूपत्वं सूच्यते। तत एव तदुपहितस्योपादानत्वसंभवः। अविद्यया मनागिव छन्नत्वाद्ब्रह्मण्यध्यासाद्युपपत्तिः। स्वप्नदृष्टपुरुषान्तरादिभेददर्शनसाम्यसूचनाय **अपारमार्थिक**शब्दः। **भेददर्शनमेवेत्यत्र** देहात्मैक्यबुद्धावपि कर्तृत्वभोक्तृत्वदेवत्वमनुष्यत्वादिभेददर्शनमन्तर्णीयते। तेन देहातिरिक्तत्वज्ञानमेवालं, किमकर्तृत्वादिविशेषितब्रह्मज्ञानेनेति च शङ्का निरस्ता। कर्मणोऽपि न स्वयं बन्धकत्वम्, दृष्टोपनायकसाधारणनिमित्तत्वात्। अतो भेदभ्रमसिद्धस्य कर्मणोऽप्यपारमार्थिकत्वात् भेदभ्रमद्वारेणैव बन्धकत्वाच्चात्र ज्ञानेतरनिवर्त्यं सत्यं किमपि न बन्धकमस्तीत्यवधारणाभिप्रायः। नन्वसत्यात्सत्यसिद्धिस्त्वन्मतेऽस्तीत्यत्राह—— **बन्धश्चेति**। बन्धस्य अबाधितत्वे हि सत्यत्वासत्यत्वशङ्का, ब्रह्मणो नित्यमुक्तत्वविरोधश्चेति भावः। निष्कृतिन्यायपरिहारायाह—**स चेति**। सत्कर्मणा पापनिवृत्तिश्च भ्रान्तिसिद्धा। अतो मूलभूताविद्याप्रभृति बन्धपर्यन्तं कृत्स्नं मन्त्रनिरपेक्षरज्जुसर्पनयात् कर्मनिरपेक्षाद्वैतबुद्धयैव बाध्यमित्यभिप्रायेण **ज्ञानेनैवेत्युक्तम्**। मोक्षसाधनस्य कर्मसमुच्चयाभावेऽपि स्मृतिवशात्तदुत्पादकस्य स्यादित्यत्राह—— **निवर्तकमिति**। अयं भावः—विगीतं प्रमाणजन्यं निवर्तकज्ञानत्वात् अविगीतवत्; न कर्मजन्यमिति वा साध्यम्। स्मृतिस्त्वन्यपरा। परिशेषाद्वाक्यहेतुकत्वं स्वोक्तयुक्तिबलादिति। परोक्तः कर्मोपयोगः प्रमाणशून्य इत्यभिप्रायेणाह— **तस्यैतस्येति**। **तस्य**—अद्वैतगोचरस्य कर्मव्यतिरिक्तकरणतदनुग्राहकवतः। **एतस्य**——स्वविषयविरुद्धबाधे स्वयमेव समर्थस्य। अन्वयव्यतिरेकवतः कारणान्तरव्यपोहाय वाक्यजन्यत्वोक्तिः। * यज्ञेन विविदिषन्तीति श्रुतेर्यज्ञादीनां विनियोगपृथक्त्वेन पृथक्फलत्वोपपत्तिरिति स्थापयति—— **विविदिषायामिति**। यथाश्रुतायामित्यवधारणाभिप्रायः। तत्राप्यव्यवहितहेतुत्वं तुशब्देन व्यावर्त्यते। असिना जिघांसतीत्यादिवत् विलष्टगतिर्बाधसिद्धौ। अथ मनोभाक्ति-

न्यादिकं विवृणोति—स चेति। धर्मस्य पापनिवृत्त्यादि साध्यान्तरं विहितम्। श्रद्धायाः सत्त्वरूपसाध्यान्तरं च शास्त्रसिद्धम्। सत्त्वस्य ज्ञानसाधनत्वोक्तिश्च परंपरया स्यात्। पापमूलरजस्तमोविवृद्धिर्मनोमालिन्यम्। धर्मेण तदपनुत्त्या सत्त्वशुद्धिर्नैर्मल्यम्।

कर्मभिः शुद्धचित्तस्य तत्त्वे स्यादनुकूलधीः। निर्णिनीषा ततस्तस्मिन् कर्मजैवं भवेदिति ॥

अथ प्रथम इतिहेतौ; सोपबृंहणश्रुतिस्मारस्यानुगुणनिर्वाहादित्यर्थः। इमम्—विविदिषोत्पत्तावपि त्रिचतुरकक्ष्याव्यवहितमिति यावत्। अभिप्रेत्य—शाब्दत्वाभावेऽपि श्रुत्यन्तरेण स्मृत्या च स्वीकृत्य। ईदृशोपयोगान्निवृत्तिधर्मविधेश्च साफल्यमिति भावः। अत्रोपायशोधने वक्तव्यशेषं न किञ्चिदित्यभिप्रायेण निगमयति—अत इति। उपादातुं हातुं वा ज्ञानतद्विचाराभ्यां कर्मतद्विचारयोरनपेक्षणादित्यर्थः। अत्रायं संग्रहस्तूलिकास्थः—

* विरोधादप्रमाणत्वाच्चित्तशुद्ध्युपयोजनात्। ज्ञानमात्रस्य हेतु[त्वे]त्वश्रुतेः सामर्थ्यतोऽपि च ॥
शमाद्यङ्गकताम्नानान्न धीकर्मसमुच्चयः। श्रवणादिक्रमोन्निद्रवाक्यजा धीर्विमोचिका ॥ इति।

विरोधात्—स्वरूपतः फलतश्चेति शेषः। अप्रमाणत्वात्—कर्मणां ज्ञानतत्फल्योः साधनत्वे प्रमाणशून्यत्वात्। यद्वा प्रमाणत्वाभावात्। सामर्थ्यतः—मिथ्याभूतबाधे ज्ञानस्यैव पर्याप्तत्वात्। धीकर्मसमुच्चयः—मनलयोक्तप्रकारः। उन्निद्रत्वं प्रतिबन्धनिवृत्त्या पुष्कलत्वम्।

लघुसिद्धान्तः।

अत्रोच्यते—यदुक्तम्—अविद्यानिवृत्तिरेव मोक्षः; सा च ब्रह्मविज्ञानादेव भवतीति। तदभ्युपगम्यते। अविद्यानिवृत्तये वेदान्तवाक्यैर्विधित्सितं ज्ञानं किंरूपमिति विवेचनीयम्; किं वाक्याद्वाक्यार्थज्ञानमात्रम्, उत तन्मूलमुपासनात्मकं ज्ञानमिति। न तावत् वाक्यजन्यं ज्ञानम्, तस्य विधानमन्तरेणापि वाक्यादेव सिद्धेः, तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च।

अवरोधविहीनत्वात् ख्यातत्वादुपपन्नवत्। पक्षेऽस्मिन् दूषणं वाच्यमत्रोच्यत इतीर्यते ॥ २९६ ॥

इह तावत् साध्यसाधनद्वित्वनिरासं विरुद्धांशभङ्गाय * यदुक्तमित्यादिना सामान्यतोऽनुमन्यते। अविद्यातन्निवृत्तिब्रह्मतद्विज्ञानेषु तत्तत्प्रकारविशेषतो विप्रतिपत्तिरस्त्येव। स्वमते ह्यविद्यानिवृत्तिर्नाम स्वाभाविकधीप्रसरप्रतिबन्धकस्य कर्मणोऽत्यन्तोच्छेदः; स च भावान्तररूपः।

प्रतिबन्धनिवृत्त्यंशोऽनिष्टभङ्ग इहोदितः। धीविकासः स्वतः सिध्यन्निष्टप्राप्तिर्विवेचकैः ॥ २९७ ॥

अतो नावधारणविरोधः। ब्रह्मतद्विज्ञाने च परमार्थबह्वाकारे। न वयं तद्विज्ञानस्य कारणत्वाभावं, कर्मसमुच्चितत्वं, फले तत्सहकृतत्वं वाऽभ्युपगच्छाम इत्यभिप्रायेण **ब्रह्मविज्ञानादेवेत्युक्तम्**। अभ्युपगम्यते चेत् किं दूष्यमित्यत्र निवर्तकज्ञानप्रकारे तावद्विगानमाह—**अविद्येति**। **विधित्सितम्**—स्वमते साधनतया चोदयितुमिष्टं, परमते तूपायत्वेनेप्सितम्। एवं तन्त्रोक्तं विभजते—**किंरूपमिति**। किं कर्मनिरपेक्षतया त्वदुक्तम्, उत कर्मान्वितया

अस्मदुक्तमित्यर्थः। **विवेचनीयम्**— अन्यतरकोटिनिरासेन कोट्यन्तरतया परिशेषणीयमिति यावत्। सङ्कलितं विविङ्क्ते—**किमिति**। वाक्यार्थगोचरस्मृतिरूपविधेयव्यावृत्त्यै **वाक्यादि**त्युक्तिः। इन्द्रियसंबन्धाद्वाक्यतः तत्त्वरूपधीः स्यात्, पुत्राद्यनुमा च; तद्व्यवच्छित्त्यै वाक्यार्थग्रहणम्। ध्यानादिद्वारनैरपेक्ष्यं मालचोक्तम्। परस्य वाक्यार्थज्ञानं जीवपरयोरैक्यधीः; स्वस्य तु प्रकारप्रकारित्वबुद्धिः; अतः तन्मूलत्वोक्तिरविरुद्धा। मननादिव्यावृत्त्यर्थम् उपासनात्मकत्वोक्तिः। परेष्टं दूषयति—**न तावदि**ति। तिष्ठतु पक्षान्तरम्; इदं तु नैवेत्यर्थः। परकल्पितपश्चिमवाक्यार्थज्ञानस्यासंभवं वक्ष्यन् सर्वसंमतप्रथमवाक्यार्थज्ञानस्य उपायत्वे ॐ द्रष्टव्य इत्यादिविधिवैयर्थ्यप्रसङ्गं विधित्सितपदसूचितमुद्घाटयति—**तस्ये**ति। विधेः शब्दजन्यज्ञाने निर्व्यापारत्वं परैरेवोक्तम्; * प्रमाण[ज]ज्ञानं वस्तुतन्त्रं न पुरुषतन्त्रं कर्तुमकर्तुमन्यथाकर्तुं चाशक्यत्वादित्युक्तेरित्याशयः। **वाक्यात्**; स्वरूपपरवाक्यादिति यावत्। एवकारो विधिनैरपेक्ष्यं बाध्यवासनायाः प्रतिबन्धकत्वायोगं च व्यनक्ति। **सिद्धेः** उत्पत्तेः। न तावदिह वाक्यजन्यं ज्ञानं तत एव वाक्यात् बोध्यम्, संसर्गतया संसृष्टतया वा प्रवेशाभावात्। नापि * प्रज्ञां कुर्वीतेत्यादिवाक्यान्तरैः, सिद्धस्याविधेयत्वात्। साधनत्वेन बोधनं चानपेक्षितम्, अदृष्टार्थत्वानभ्युपगमात् कल्पितबाधे च सामर्थ्यतः साधनत्वावगतेः। अतो विधिवैयर्थ्यमित्याशयः। ननु विध्यनुसारित्वान्न [वैयर्थ्य] विधित्वमिति चेत्; तथापि तादृशाम्नानवैयर्थ्यं दुरतिक्रमम्। विधिवैयर्थ्योक्तिः आ[प्राय]प्रयाणानुष्ठेयविधेयाकारवर्गवादिनां ब्रह्मनाडीनिष्क्रमणदेवयानगत्यादिवादिनां च शास्त्राणां वैयर्थ्यमप्युपलक्षयति।

अत्र प्रत्यक्षविरोधमप्याह—**तावन्मात्रेणे**ति। न ह्युत्पन्नं ज्ञानमविद्यानिवर्तने अन्यदपेक्ष्य विलम्बेत, यतोऽनुपलब्धिरबाधिका स्यात्। सा च स्वपरयोः प्रत्यक्षानुमानसिद्धा। प्रत्यक्षविरुद्धं च न शास्त्रवेद्यम्; न च तादृशविज्ञानमात्रादविद्यानिवृत्तिः, अन्वयव्यतिरेकासिद्धेरिति भावः। अत्रैवमापस्तम्बेन शास्त्रविरोध उक्तः—* बुद्धे क्षेमप्रापणम्, तच्छास्त्रैर्विप्रतिषिद्धमिति। विशेषेण प्रतिषिद्धमित्यर्थः; न हि तुल्यबलविरोधोऽत्र घटते। प्रत्यक्षविरोधश्चोक्तः—* बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत, एतेन परं व्याख्यातमिति।

न च वाच्यं भेदवासनायामनिरस्तायां वाक्यम् अविद्याया निवर्तकं ज्ञानं न जनयति; जातेऽपि सर्वस्य सहसैव भेदज्ञानानिवृत्तिर्न दोषाय, चन्द्रैकत्वे ज्ञातेऽपि द्विचन्द्रज्ञानानिवृत्तिवत्; अनिवृत्तमपि छिन्नमूलत्वेन न बन्धाय भवतीति; सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः, सत्यामपि विपरीतवासनायामाप्तोपदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनात्।

श्रुतिप्रत्यक्षविरोधयोर्द्विधोत्तरमनूद्य निषेधति—**न चे**ति। न्यायोपेतश्रवणे पश्चादिव प्रागपि कथं ज्ञानानुत्पत्तिः इत्यत्रोक्तम्—**भेदवासनायामि**ति। प्रतिबन्धकवासनानिरासे विधीनामुपयोगः। दिग्भ्रमादयो हि उपदेशलिङ्गाभ्यामनिवृत्ताः कदाचित् कुतश्चिद्वासनाविच्छेदे निव[र्त]र्त्यन्ते; तद्वदिहेति भावः। दृश्यमानपरोक्षज्ञानव्यावृत्त्यर्थम् **अविद्याया निवर्तकमि**त्युक्तम्। **न जनयती**त्यनेनाविद्यानिवृत्त्यनुपलब्धिविरोधोऽपि परिहृतः।

अत्रैवमद्वैतंसंप्रदायरहस्यम्—आपातिकं [तु] ज्ञानमविद्यां न निवर्तयति, अनिश्चयात्मकत्वात्। विचारजन्या तु धीः परोक्षाध्यवसायरूपभेदसत्यत्वभ्रमजनकमविद्यांशं निवर्तयति। तथाऽप्यपरोक्षानादिभेदभ्रमोपचिता तद्वासना तादृशं भ्रममाधत्ते। तदवष्टंभोऽविद्यांशस्तु अद्वैतसाक्षात्कारेण निवर्तते। निवृत्तेऽपि तस्मिन् प्रारब्धकार्यकर्मावष्टंभः कश्चिदविद्यांशोऽनुवर्तते; तां दशां जीवन्मुक्तिमाहुः। सोऽप्यंशोऽन्तिमाद्भोगसंवेदनादात्मसंवेदनाद्वा निवर्तते। ईदृशाविद्यांशभेदाभिप्रायेण * इन्द्रो मायाभिः पुरुरूप ईयत इत्युच्यते। उक्तक्रमेण मायांशानां निवृत्तिमभिप्रेत्य * भूय श्चान्ते विश्वमायानिवृत्तिः * विमुक्तश्च विमुच्यत इति श्रुतिराहेति। तत्र द्वितीयांश इहाविद्याया इत्युक्तः। अथ परोक्षरूपस्यैव ज्ञानस्य निवर्तकत्वमन्वारुह्यापि प्रत्यक्षविरोधं परिहरति—**जातेऽपीति**। यद्वा सर्वविदां सनकादीनामनुत्पन्नसाक्षात्कारत्वमविद्यावत्त्वं च न युक्तम्; उत्पन्नसाक्षात्काराणां तु शिष्यादिप्रतिभासायोगादुपदेष्टृत्वादिकं न स्यात्। न हि परोक्षज्ञानमात्रवान् [अ]तत्रोपदेष्टा, * उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति विशेषणात्। अत उभयतस्पाशा रज्जुरित्यत्र तृतीयाविद्यांशस्थितिदशानुसारेण प्रतिवक्ति—**जातेऽपीति**। यस्यैकैव ब्रह्माविद्या, एक एव च जीवः; तस्यैकाविद्यानिवृत्तौ कापि जीवपदास्पदभेदभ्रमानुवृत्तिर्बन्धमुक्तिव्यवस्था च न स्यादिति चोद्यानुवादसूचनायान्तःकरणभेदोपाधिकाभिव्यक्तिविकल्पानुसारेण **सर्वस्येत्युक्तम्**। **सहसैवेत्येतन्निवृत्त्या** योज्यम। अविद्यांशान्तरावष्टब्धप्रवृत्तफलकर्मावसाने हि सर्वभेद[धी]भ्रमनिवृत्तिरिति भावः। **न दोषाय**— अविद्यानिवृत्तौ भ्रमोऽपि निवर्तेत, अकारणकार्ययोगात्। अतो रागादिदृष्ट्या भ्रमानुवृत्तेरविद्याऽपि न निवृत्तेति ज्ञानस्य निवर्तकत्वाभावप्रसक्त्यै न स्यात्, बाधितस्याप्यनुवृत्तिसंभवादित्यभिप्रायः। स्वेष्टं लोकदृष्ट्या प्रत्याययति— **चन्द्रेति**। अङ्गुल्युपष्टंभादिमतः चन्द्रैक्ये वाक्यतो ज्ञातेऽपीति भाव्यम्। इदं निदर्शनमन्वारुह्यवादे सुगमम्। अन्यत्र तु निवर्तकज्ञानस्य प्रत्यक्षत्वं निगु[गृ]ह्य नेतव्यम्; प्रत्यक्षतश्चन्द्रद्वित्वभ्रमे बाधिते पुनस्तदनुवृत्त्ययोगात्।

यद्वा प्राच्यादुपष्टंभाद्भ्रमे प्रत्यक्षबाधिते। पुनरङ्गुल्युपष्टंभाद्भ्रमावृत्तिर्न दृश्यते॥ २९८॥
अविद्याजनिता भ्रान्तिर्वाक्यजाध्यक्षबाधिता। युक्ता तदनुवृत्तिर्हि भूयस्संस्कारशेषतः॥ २९९॥

ननु तत्त्वदर्शनात्पागपि भेदज्ञानमेव बन्धमूलम्; पश्चादपि तदनुवृत्तौ रागाद्यनुवृत्त्या बन्धानिवृत्तिः स्यात्; न हि कारणनिवृत्त्या कार्यं स्वकार्याय घटते; मन्यसे चाविद्याशेषानुवृत्तिमित्यत्राह— **अनिवृत्तमिति**। अपिर्विरोधद्योतकः। मूलच्छेदात् खण्डितलतान्यायेन क्रमाद्विनश्येत्, न पुनः प्ररोहेत्। स्वविषयसत्यत्ववासनारूपितं हि भेदज्ञानं रागादिहेतुः, प्रतिमायोपिदादिषु तथाभावादित्यभिप्रायेण **छिन्नमूलत्वोक्तिः**। दग्धपटचक्रभ्रमादिन्यायोत्तामिप्रेतः। अत्र ज्ञानं न जनयतीत्युक्तं तावन्निरस्यति—**सत्यामिति**। व्युत्पन्नपदमाकाङ्क्षादिविमर्शोपेतं वाक्यमपेक्षणीयान्तररहितमित्यभिप्रायेण **सामग्रीशब्दः**; अन्यथाऽतिप्रसङ्ग इति भावः। नन्वप्रतिबन्धोऽपि सामग्रीति न्यायाद्भेदवासनैव स्वनिवृत्तिरूपकारणाभावात्मा सामग्रीवैकल्यं स्यात्। यद्वा पुष्कलाया अपि सामग्र्याः शक्त्यपहारेण प्रतिबन्धिकेत्यत्राह— **सत्यामपीति**। अयं भावः— यदि विपरीतवासनैव प्रतिबन्धः प्रतिबन्धिका वा स्यात्, तदा अनिरस्तसंस्कारे रज्जुसर्पादिभ्रमे कदाचिदपि बाधकधीर्नोदियात्; उदेति चासाविति प्रसङ्गतद्विपर्ययाभ्यां व्यतिरेकव्यभिचारदृष्टेः न विरुद्धवासनानिवृत्तिरत्र हेतुः। रज्जुसर्पवासनानुवृत्तावपि हि * नायं सर्पः इत्याप्तवाक्येन दण्डसङ्घट्टनादिनिरूपितेन निश्चेष्टत्वादिलिङ्गेन च परोक्षं बाधकज्ञानं जायते। चन्द्रभेदवासनानुस्यूतावपि अङ्गुल्युपष्टंभादि-

दोषापगमे चन्द्रैक्यप्रत्यक्षधीरपि भवति । न च वाक्यादपरोक्षबुद्ध्युत्पत्तौ विरुद्धवासनानिवृत्तिरपेक्षितेति वाच्यम् ; अविशिष्टशक्तेर्वाक्यस्य परोक्षधीजननेऽपि तदपेक्षाप्रसङ्गात् । अभेदवासनया भेदवासनानिवृत्तिं वदतः चक्रकं च स्यात्— अभेदाध्यवसाये तद्भावना, तया भेदवासनानिवृत्तिः, तत एवाभेदाध्यवसाय इति । अध्यवसाये वासनानिवृत्तिरनपेक्षितेति चेत् साक्षात्कारेऽपि नापेक्ष्येत, अविशेषात् । दशमान्वेषिणश्च दशमाभाववासनास्थितावपि • दशमस्त्वमसीत्युपदेशेन प्रत्यक्षधीजननं च त्वयैवोक्तम् । • तत्त्वमसि • दशमस्त्वमसीत्यनयोर्वाक्ययोः अपरोक्षात्मविषयत्वं च समानं त्वमेवात्थेति ।

सत्यपि वाक्यार्थज्ञाने अनादिवासनया मात्रया भेदज्ञानमनुवर्तत इति भवता न शक्यते वक्तुम् ; भेदज्ञानसामग्र्या अपि वासनाया मिथ्यारूपत्वेन ज्ञानोत्पत्त्यैव निवृत्तत्वात् । ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्तकान्तराभावात्कदाचिदपि नास्या वासनायाः निवृत्तिः । वासनाकार्यं भेदज्ञानं छिन्नमूलम्, अथ चानुवर्तत इति बालिशभाषितम् । द्विचन्द्रज्ञानादौ तु बाधकसन्निधावपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभावेनाविनष्टत्वान्मिथ्याज्ञानानिवृत्तिरविरुद्धा । प्रबलप्रमाणबाधितत्वेन भयादिकार्यं तु निवर्तते ।

अथ प्रत्यक्षविरोधं परिजिहीर्षतो बाधितानुवृत्तेरसंभवमभिप्रेत्याह— **सत्यपीति** । **मात्रया**— न तु कात्स्न्र्येन ; आत्मभेदसत्यत्वाध्यवसायादेर्निवृत्तत्वात्, बाह्येषु भेदधियः किंचिदिव स्थितत्वादिति भावः । **भवेत्यशक्यताहेतुगर्भम्** ; न हि ब्रह्मव्यतिरिक्तं किंचित्सत्यमिच्छसीति भावः । हेतुं विवृणोति— **भेदे**ति । **सामग्री**शब्द इह प्रारब्धकर्मावष्टंभपौष्कल्यसूचकः । अविद्याविनाशे कर्मवासना च कथं तिष्ठेत् ; न हि मृगतृष्णिकानिवृत्तौ तदीयतरङ्गाद्यनुवृत्तिः ; अत उपदेष्टृत्वाद्यनुपपत्तिश्च स्यादिति भावः । ननु मिथ्यात्वाविशेषेऽपि एकाधिष्ठानेषु भिन्नाधिष्ठानेषु च भ्रमेषु किंचिदेव केनचित् बाध्यते, तद्वत्स्यादित्यत्रोक्तम्—**ज्ञानोत्पत्त्यै**वेति । सद्व्यतिरिक्तं सर्वं मिथ्येति बाधकधीः; ईदृशज्ञानोत्पत्तौ वासनास्थितिस्ते विरुद्धा । न च वासनावान्तरभेदाद्वृतिः ; मिथ्यात्वानपायात् । न हि • रज्जुरित्यवगते सर्पाद्यन्यतमधीः अनुवर्तेत । किं च निरस्तायामेव भेदवासनायां बाधकज्ञानोत्पत्तिं वदतस्ते तदुत्पत्तौ कथं सा तिष्ठेत् ? स्थिता काचित् केन निवर्त्येत ? यदि ज्ञानान्तरेण ; तत्र, अविशेषात् ; अथ भोगक्षयात्, तर्हि ज्ञानबाध्यत्वाभावात् सत्या स्यात् ; एवं कर्मापि । अद्वैतसाक्षात्कारेऽपि वासनानुवृत्तावनिर्मोक्षप्रसङ्गमभिप्रेत्याह— **ज्ञानोत्पत्ताविति** । ज्ञानैकनिवर्त्यत्वाय **मिथ्यारूपत्वो**क्तिः ; **निवर्तकान्तराभावात्** सत्यत्वप्रसङ्गभीतैः ज्ञानेतरबाध्यत्वस्यानभ्युपगमात् स्वकल्पितान्तिमभोगसंवेदनादिज्ञानशतागमेऽपि तेषां पूर्वज्ञानवन्निवर्तकत्वायोगादिति भावः । **अस्याः** मूलाविद्याबाधकबलज्ञानेनापि दुर्बाधाया इत्यर्थः । अहेतुकविनाशस्तु न कापि नैगमिकैरिष्यते । तदभ्युपगमेऽपि तेषां पूर्वज्ञानवासनाविनाशादेः भ्रान्तिसिद्धत्वेन नित्यं भ्रमानुवृत्त्या पुनरपि वासनासन्ततेरनिवार्यत्वमभिप्रेत्य **कदाचिदपी**त्युक्तम् । न हि वासनानिवृत्तिः सतः स्वरूपम्, साध्यत्वात् । अतिरिक्ता च न सत्या, अद्वैतभङ्गात् ।

अभावसत्यत्वेऽपि सदद्वैतं सिद्धमिति चेन्न ; क्वचिद्भेदसत्यत्वे अन्यत्राप्यविशेषात् भावान्तरसत्यत्वेऽपि तद्वदेव ब्रह्माद्वैतानपायाच्चेति । अनिवृत्तमपीत्यादिनोक्तं स्वव्याघातेनोपालभते — **वासनेति** । स्वोक्तिविरोधानभिज्ञः किमन्यदिप्यतीत्यभिप्रायेण **बालिशत्वोक्तिः** । अयं भावः— छिन्नमूलमित्यत्र किं मूलशब्देनाविद्या विवक्षिता ? उत भेदवासना ? आद्ये मूलभूताविद्याच्छेदे तत्समानबाधकस्य संस्कारस्यापि बाधाद्भेदभ्रमो दुर्वच इत्युक्तम् । द्वितीये कथं वासनोच्छेदे तत्कार्यं सन्तन्येत । यदि हेत्वभावेऽपि क्वचित्कार्यं स्यात् , तदा स्वपरमतसाधारणैः स्वाभिमतैश्चाविद्यादिभिर्विनापि तानि तानि कार्याणि स्युः । अतो नेदं यौक्तिकवाक्यमिति । बाधितानुवृत्तौ परोक्तो दृष्टान्तः छिन्नमूलत्वाभावादसमञ्जस इत्याह— **द्विचन्द्र** इति । तिमिरादिदोषस्य सत्यतया बाधकधीशतैरप्यबाध्यत्वात्त्वया तस्य व्यावहारिकसत्यत्वेनाभ्युपगमात् असत्यत्वेऽपि चन्द्रैकत्वज्ञानस्य तदधिष्ठानगोचरत्वाभावेन तद्बाधकत्वायोगाच्चेति भावः । यथा तत्र दृष्टान्ते भयादिनिवृत्त्या बाधकसाफल्यं, न तथा त्वदिष्टे स्यादिति सूचयन् न बन्धायेत्युक्तं निरस्यति —**प्रबलेति** । प्रमितप्रामाण्यप्रमाणबाधितत्वादित्यर्थः । अत एवात्र कुहकोत्पादितभयादिव्यावृत्तिः । त्वत्पक्षे तु बाध्यबाधकधियोर्द्वयोरपि दोषोत्थत्वेन ज्ञातत्वान्न बाधफलसिद्धिः । लोके बाधितानुवृत्तेरन्यतरविलंभफलहीनस्य यथावन्निरूपणार्थप्रवृत्तिहेतुत्वं च बाधकस्य फलमित्याशयः । सर्पादिभ्रमापेक्षया भयादिकार्योक्तिः । आदिशब्देन विस्मयादिग्रहणम् । एवं भयाद्यनुत्पादकत्वमभिप्रेत्य न्यायतत्त्वे * बाधितानुवृत्तिदृशांज्ञानमकिंचित्करत्वादुदासीनमित्युक्तम् । तुशब्देन परोक्तद्वैषम्यं द्योत्यते— न ह्यत्र नाशकसामग्र्यां सत्यां नाश्यसद्भावः ; न च हेत्वभावे कार्योदय इति । ननु भयाद्यपि क्षणिकत्वाद्भ्रमवन्न बाधकविनाश्यम् ; उत्तरभयानुत्पत्तिश्च भ्रमान्तरानुत्पत्तिवत् प्राक् सिद्धैव ; तर्हि बाधतः कथं भयादिनिवृत्तिर्भाष्यते ? उच्यते— बाधके सति सामग्रीवैकल्याद्भयान्तरानुत्पत्त्यनुवृत्तिमपेक्ष्य भयादिनिवृत्तिभाषणमिति ।

अपि च, भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति, भेदवासनाया अनादिकालोपचितत्वेनापरिमितत्वात् , तद्विरोधिभावनायाश्चाल्पत्वादनया तन्निरसनानुपपत्तेः । अतो वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदान्तवाक्यैर्विधित्सितम् । तथा च श्रुतयः—❀ विज्ञाय प्रज्ञां कुर्वीत ❀ अनुविद्य विजानाति ❀ ओमित्येवात्मानं ध्यायथ, * निचाय्य तं मृत्युमुखात्प्रमुच्यते ❀ आत्मानमेव लोकमुपासीत ❀ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ❀ सोऽन्वेष्टव्यः स विजिज्ञासितव्यः इत्येवमाद्याः ।

जातेऽपीति पक्षस्य मन्दत्वव्यक्त्यै सिंहावलोकितेन बहुव्याख्यातृमंमतायां ज्ञानानुत्पत्तौ दूषणान्तरमाह— **अपि चेति । कदाचिदपि**—ध्यानात्प्रागिव पश्चादपीत्यर्थः ; कल्पकोटिसहस्रध्यानेऽपीति भावः । ननु यज्ञादिभिः परिमितैरेवानाद्युपचितापरिमितकल्मषनिबर्हणेन ज्ञानोत्पत्तिमिच्छतामिव श्रवणादिभिर्वासनानिरासेन ज्ञानोत्पत्तिस्स्यादित्यत आह— **भेदवासनाया इति । न ह्यत्र** * सकृत्स्मृतोऽपीत्यादिन्यायः, अदृष्टद्वारा निवर्तकत्वे निवर्त्यसत्यत्वप्रसङ्गात् । न

च मन्त्रनिवर्त्यवत् व्यावहारिकसत्यत्वाददृष्टनिवर्त्यत्वोपपत्तिः, तद्वदेव प्रपञ्चस्यापि तदुपपत्तौ बाधकधीगवेषणवैयर्थ्यात् स्वरूपत एव निवर्तकत्वे तु तादृशशक्तिवैचित्र्ये प्रमाणाभावेन भूयस्त्वादेर्बलाबलप्रयोजकत्वात्। न च भावना स्वरूपत एव वाक्यस्य सहकारिणी, परोक्षानुभव इवापरोक्षानुभवेऽपि तदन्वयव्यतिरेकादृष्टेः अदृष्टद्वारा सहकारित्वस्यानभ्युपगमात्। अभ्युपगमे तु वाक्यमनपेक्ष्य तस्यैव मनस्सहकारिणः साक्षात्कारजनकत्वोपपत्तेः। अतः कथंचिदपि न वाक्याद्बाधकप्रत्यक्षोदय इत्याशयः।

किमित्यादिना प्राग्विकल्पिते मतद्वये दूषितस्य दूषणान्तराण्यवधारणेन सूचयन्स्वमतपरिशेषं तावदाह— **अत** इति। वाक्यजन्यज्ञानस्य विधेयत्वनिवर्तकत्वादेः युक्तिप्रत्यक्षादिविरुद्धत्वादित्यर्थः। **वाक्यार्थज्ञानादन्यदेवेति**। अयं भावः—वाक्यार्थबोधमात्रस्योपायत्वविधाने स्वतस्तत्प्रवृत्तौ दुस्तरं चक्रकम्—न हि ब्रह्मस्वरूपं तज्ज्ञानं चाविदित्वा तज्ज्ञानकामना स्यात्। तद्रहितस्य च न तदर्थोपायविधिप्रवृत्ती स्तः। न चोपायानुष्ठानमन्तरेण ब्रह्मधीसिद्धिरिति। ननु स्वाध्यायाध्ययनवद्धितैषिप्रेरणया प्रवृत्तिरस्तु; मैवम्; हितैषिभिरपि निर्विशेषचिन्मात्रब्रह्मज्ञानं संपादयेत्युपदेष्टव्यम्; तदा ह्येवंविधब्रह्मधीसदसद्भावयोस्तदुपायानुष्ठानं न स्यात्। असत्पक्षे तु बह्वाकारविशिष्टे ब्रह्मण्यावृत्तिनैरन्तर्यादिविशिष्टकालान्तरभाव्यतिशयितज्ञानार्थप्रवृत्तौ यथालोकं न विरोधः। लोकसिद्धप्रक्रियानभ्युपगमे स्वप्रवृत्त्यादिविरोधः स्यात्। न च नित्यप्रत्यक्षनिर्विशेषवस्तुवादिनः तव वाक्यतोऽन्यतो वा तद्विषयातिशयितधीः शक्येति।

ननु मोक्षोपाये विधित्सितत्वोक्तिरयुक्ता, विधिशब्दानामिह पुरुषार्थभूतवाक्यजन्यज्ञानानुवादनिष्ठत्वात् ध्यानादेस्तु तदर्थतया चोदनात्। न चान्यानुपपत्तिमात्रात्तदन्यत्सर्वमुपपद्यते। विविधानि च ज्ञानानि स्मृतिदर्शनादिशब्दैर्व्यपदिश्यन्त इत्यत्राह— **तथा चेति**। यथा वाक्यजन्यज्ञानादन्यो मोक्षोपायः * द्रष्टव्य इत्यादिभिर्विधित्सितः, स च ध्यानाद्यनेकशब्दोपात्तोऽपि एकतया सिध्येत्तथैवेत्यर्थः। चः पारिशेष्येण सह समुच्चयार्थो वा। अत्र वेदनादिशब्दानां ध्यानादिशब्दोक्तविशेषपरताम्, उपसर्गभेदसन्निधिप्रत्ययसदसद्भावैरर्थभेदाभावं च व्यङ्क्तुमीदृशबहुवाक्योपादानम्। उपात्तवाक्यप्रकारवैचित्र्यपर **इति**शब्दः। तेषां विधिपरत्वसाम्यार्थ **एव**शब्दः। अनुपात्तेष्वपि न्यायसंचारार्थम् **आद्योक्तिः**।

अत्र * निदिध्यासितव्य इत्यादिनैकार्थ्यात् * अनुविद्य विजानाति * विज्ञाय प्रज्ञां कुर्वीतेत्येवमादिभिर्वाक्यार्थज्ञानं ध्यानोपकारकत्वात् * अनुविद्य, * विज्ञायेत्यनूद्य * प्रज्ञां कुर्वीत, * विजानाति इति ध्यानं विधीयते। * श्रोतव्यः इति चानुवादः; स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात् तन्निर्णयाय स्वयमेव श्रवणे प्रवर्तत इति श्रवणस्य प्राप्तत्वात्। श्रवणप्रतिष्ठार्थत्वान्मननस्य * मन्तव्यः इति चानुवादः। तस्मात् ध्यानमेव विधीयते। वक्ष्यति च— * आवृत्तिरसकृदुपदेशादिति।

* प्रज्ञां कुर्वीत, * विजानातीत्यादौ न वाक्यार्थज्ञानादन्यत्वं भातीत्यत * छागो वा मन्त्रवर्णादिति न्याय-

मभिप्रेत्याह— अत्रेति । श्रुतेषु तेषु वाक्येष्वित्यर्थः ; निर्धारणे सप्तमी । ऐकार्थ्यमिहैकप्रयोजनत्वम् , एकविषयत्वं वा । तच्चात्र शास्त्रान्तरनयपुरस्कारेण सामान्यविशेषन्यायसिद्धम् । प्रथमेन आदिशब्देन * ध्यायथेत्यादेः, द्वितीयेन * विजिज्ञासितव्य इत्यादेश्च ग्रहणम् । अनुवादे तात्पर्यसिद्ध्यर्थमनुवाद्यस्य विधेयान्वयार्थं च ध्यानोपकारकत्वोक्तिः । तच्च ध्येयोपस्थापकत्वम् । नन्वत्र * अनुविद्येत्यादौ * दध्नेत्यादिवद्गुणविधिरस्तु; सगुणकर्मश्रवणे हि वाक्यं गुणपरमिति नीतिविदः, विशिष्टविधौ गौरवात् कर्ममात्रविधौ गुणश्रुतिवैयर्थ्यात् ; कर्मपदं तु विधेयस्य गुणस्याश्र[यार्पणेन]यणार्पणे सार्थकं स्यादिति ; मैवम्— होमवदिह ज्ञानार्थस्य प्राप्तत्वे ह्यनूद्य गुणो विधीयेत ; तर्ह्यगत्या विशिष्टविधिरस्त्विति शङ्कानिरासार्थम् अनूद्येत्युक्तम् । अयं भावः— क्त्वान्तस्याख्यातान्तस्य चैकार्थ्ये पौर्वापर्यविरोधः । कस्य च केन वैशिष्ट्यम् ? सजातीयाभ्यासे तु ज्ञानमभ्यस्येदित्येवार्थम् । उपसर्गभेदश्च विफलस्स्यात् । भिन्नार्थत्वे * विजानातीत्यादेरप्राप्तविषयस्य ध्यानवत्पश्चात्पठितस्य पश्चाद्भाविनि विधेये ध्याने विश्रान्तिर्न्याय्या । वाक्यार्थधीस्तु प्राप्तत्वान्न विधेयो गुणः । तत एव न तदर्थं श्रवणादि, तत्प्रधानध्यानविधानस्य युक्ततमत्वाच्च । न चान्यत्किमपि ज्ञानमिह गुणत्वेन विधेयतया शङ्कनीयम् । यदि तु • विजानातीत्यादेर्वाक्यार्थज्ञाने विश्रमः, तदा * अनुविद्येत्यादेर्न विधेयमनुवाद्यं वा ज्ञानान्तरं दृश्यते । न च ध्यानं तद्गुणतया विधेयम् । परोक्षं प्रत्यक्षं वा वाक्यार्थज्ञानं प्रति तत्साधनत्वासंभवस्य दर्शितत्वादिति । स्थानैक्यादिधिप्रत्ययरहितेऽपि विधिपरत्वव्यक्त्यै बुद्धिस्थक्रमेण * प्रज्ञां कुर्वीतेत्यस्य पूर्वं पाठः । ध्यानस्य • निचाय्येत्याद्युक्तवैशद्यविशिष्टत्वादुपास्युक्तप्रकर्षविशिष्टत्वाच्चोपसर्गद्वयसाफल्यम् । अनुवादयोरप्युपसर्गद्वयमनुवाद्यस्याभ्यासं स्पष्टयं च व्यनक्ति । * [अविज्ञातं, विज्ञातमिति] अनुविद्य, विज्ञायेति विज्ञानशब्दस्य * निदिध्यासितव्य इत्यस्य स्थाने पाठाच्छ्रवणानन्तरभाविमननविषयान्वेषणशब्दानन्तरपाठाच्च * विजिज्ञासितव्य इत्येतन्निदिध्यासनस्थानापन्नम् । उपायविषयविज्ञानवेदनादिसामान्यशब्दानां तत्त्यप्रत्ययान्तोक्तश्रवणरूपज्ञानविशेषे विश्रमः किं न स्यादित्यत्राह—श्रोतव्य इति । कथमत्राहेतुकस्तव्यप्रत्ययबाध इत्यत्राह—स्वाध्यायस्येति । अयं भावः—श्रुतेरर्थपरत्वाभावाद्वा, विचारस्य प्रवर्तकाभावाद्वा, तदवसराभावाद्वा मीमांसा नारभ्येति शङ्का निरस्ता । श्रोतव्य इत्यस्य च गुर्वभिगमनादौ शब्दशक्तिर्नास्ति । अतो निर्णयार्थव्यापारपरत्वे प्राप्तार्थत्वमिति । नन्वस्मिन् विधेयमारंबणसंशीलनरूपं मननम् । तच्च • मन्तव्यः इति विवक्षितुं युक्तम् ; तत्र वेदनादीनां विश्रान्तिस्स्यादित्यत्राह—श्रवणेति । अप्रतिष्ठितस्य श्रवणस्य ध्यानानुपकारित्वात्तत्प्रतिष्ठापकतयाकाङ्क्षितं तदनन्तरपठितं यौक्तिकं मननम् । अतस्तदपि रागाद्यनुवृत्त्या प्राप्तत्वादनुवाद्यमेवेति भावः । एतेन श्रवणादित्रिकं दर्शनसाधनतया विधीयत इति कैश्चिदुक्तस्य युक्तिविरोधः [स्था]व्यापितः । ननु * श्रोतव्यो मन्तव्य इत्येताभ्यामुपदेशैकगम्यार्थश्रवणमात्रं विधेयमस्तु ; आहुश्च केचित्— * सांख्ययोगोपदेशश्रवणादिकमिति । अत्राह— तस्मादिति प्राप्ताप्राप्तविवेकात्तत्सिद्धाद्वा । परिशेषादित्यर्थः । एवकारः श्रवणमननयोः ज्ञानमात्रस्य सन्त्यत्ययवाच्येच्छायाश्च व्यवच्छेदार्थः । * द्रष्टव्य इत्यस्यापि ध्यानविशेषणवादितया पृथग्विधितात्पर्यव्युदासार्थो वा । अयं भावः— * श्रोतव्यो मन्तव्य इत्यनयोर्वैधप्रसिद्धोपकारकत्वसंभवे तद्विपरीतकल्पनेरयुक्तत्वात् • श्रोतव्यः इत्यादेश्श्रवणादिचतुष्टयविधिपरत्वे वाक्यभेदापत्तेः, अत्र विकल्पस्याष्टदोषदुष्टतया गुरुलघुविषयतया चात्यन्तासंभवात्क्रमस्यान्युपकारस्य श्रवणादेस्समाधिरूपाङ्गिना समुच्चयासंभवाद्विशिष्टविधेर्गत्यन्तराभावनियतत्वात् , ध्यानस्य दर्शनरूपतायाश्श्रुत्यन्तरानुसारेण साधयिष्यमाणत्वात् , अत एव निपूर्वस्यापि ध्यायतेरिह पदान्तरस्फुटोपाद-

दर्शनरूपतावैशिष्ट्योक्तावुदासीनत्वात्, * द्रष्टव्य इत्यस्यानुवादसमभिव्याहारेऽपि स्वरसावगतविधिपरत्वप्रहाणेन फलानुवादपरत्वकल्पनानुपपत्तेः, * श्रोतव्यः श्रुतिवाक्येभ्य इत्यादिश्लोकेऽपि श्रवणादित्रिकस्य क्रमाद्दर्शनहेतुत्वमात्रोक्तौ साध्यस्यापि विधेयत्वे विरोधाभावाच्च रागप्राप्तश्रवणादिपूर्वकं विधिपदान्तरोपात्तदर्शनाकारविशेषितध्यानमेवात्र विधेयमिति। एवं वेदनादिशब्दानां स्वोक्तविशेषविधिविश्रमानभ्युपगमे सूत्रविरोधमपि सूचयति— **वक्ष्यति चेति**। चिन्तनार्थो हि ध्यायतिरेकविषयमसकृदावृत्तं ज्ञानं वक्ति। अतो ध्यानविषये उपदिष्टं वेदनं ध्यानमेवेति प्रकृतसिद्धिः। तथोपास्तिरपि * तस्मिन्यदन्तस्तदुपासितव्यमित्यादिभिरुपात्तः। अतो यज्ञादिसापेक्षत्वानुगुणम् * उपदेशादित्यनेनैव संगृहीतम्।

तदिदमपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते, विद्युपास्योर्व्यतिक-रेणोपक्रमोपसंहारदर्शनात्— * मनो ब्रह्मेत्युपासीतेत्यत्र * भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद। * न स वेद, अकृत्स्नो ह्येष आत्मेत्येवोपासीत। * यस्तद्वेद यत्स वेद स मयैतदुक्तः इत्यत्र * अनु म एतां भगवो देवतां शाधि यां देवतामुपास्स इति। ध्यानं च तैलधारावदविच्छिन्नस्मृतिसन्तानरूपम्, * ध्रुवा स्मृतिः। स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात्।

प्राक् प्रतिज्ञातमुपासनाख्यविशेषे वेदनादिसामान्यशब्दानां विश्रममाह— **तदिति**। **तत्**— तदुक्तावनिर्धारितविशेषम्। **इदम्**— गुरुतरध्यानादिसाध्यसाधनतया विधानाद्विशेषदृष्टौ तदेकतापत्त्यर्हम्। तद्धेतुं व्यनक्ति— **अपवर्गोपायतया विधित्सितमिति**। **उपासनमित्यवगम्यत** इति। तुल्यप्रकरणस्थोपासिसमानविषयवेदनादिशब्दनिर्दिष्टत्वादिति भावः। * उपदेशादिति सूत्रितमेकप्रकरणस्थविशेषमन्यमपि हेतुमाह— **विद्युपास्योरिति**। * मन इत्यादावुपासिरादौ, विदिरन्ते। * यस्तदित्यत्र तु तद्विपरीतम्; * न स वेदेत्यत्र तूभयत उपास्तिः, * [अथ योऽन्यां देवतामुपास्ते] स योऽत एकैकमुपास्त इत्युपक्रमात्। एवं मिथस्थानाक्रान्तिरिह व्यतिकरः। नन्वत्र * मनो ब्रह्मेति दृष्टिविधिः; अन्यच्च वाक्यद्वयं विद्याविशेषस्थम्।

एकत्र शब्दवृत्तिर्या स्थिता साऽन्यत्र संचरेत्। तत्तुल्येऽपीत्यभिप्रेत्य दर्शनादिति भाष्यते॥ ३००॥

* य एवं वेदेति न शास्त्रार्थवेदनामात्रोक्तिः; विहितस्य आकाङ्क्षितं फलमनिर्दिश्याविहितान्यानुवादेन तत्फलोक्तेरयुक्तेः। ननु भूमविद्योपक्रमे * स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथाकामचारो भवतीति फलविशेष उक्तः। तेनैव नैराकाङ्क्ष्यं स्यात्: मैवम्— तृतीयप्रपाठकस्थस्यास्य उपासनप्रकरणभेदात्, पुनश्रुतिवैयर्थ्याच्च, विधेयान्तरत्वे सिद्धे सन्निहितफलेनैव समन्वयोपपत्तेः। अतोऽस्मिन्नर्थवादे विदिनोपासनमनूद्य तत्फलविधिर्युक्तः। रात्रिसत्रन्यायश्चात्राभिप्रेतः। दानादिजन्या प्रथा कीर्तिः। पराक्रमादिजन्या तु यशः। **कीर्त्या यशसा च भाति; ब्रह्मवर्चसेन तपतीति योज्यम्**। मध्यमवाक्येऽत्रेत्यनुक्तिरासन्नत्वात्। * यस्तदित्यादौ **यस्तत् ब्रह्म वेद**,

यच्च ब्रह्म स वेद स वेदिता रैक्वः तद्वेद्यमेतत् ब्रह्म चेति द्वितयं तवोक्तमित्यर्थः। * गामश्वं पुरुषं जगदित्यादिष्विव चकारानुक्तिः। नपुंसकसमभिव्याहारादुक्तमिति विपरिणमनीयम्। वेद्यं प्रति स वेदितृत्वेनोक्त इति वा नेयम्। अथ वा यत् स रैक्वो वेद, तदेवान्यो यो वेद, एनं सर्वं तदभिसमेति यत्किंचित्प्रजास्साधु कुर्वन्तीति पूर्वत्रान्वयः। * स मयैतदुक्त इत्यत्र एतदिति क्रियाविशेषणम्; स मयैवमुक्त इत्यर्थः। अस्यां व्याख्यायां प्रकरणानुगुण्यात् रैक्वशिष्येण भवितव्यमिति जानश्रुतेः सूच्यते। **अनुशाधि**—विविच्य ज्ञापयेति यावत्। एवं वेदनस्य प्रस्तुतध्यानोपासनशब्दवाच्यत्वमित्युक्तम्, न तु ध्यानस्योपासनत्वमिहोच्यते; * वेदनमुपासनमित्यवमम्यते * विद्युपास्योः इत्यादिभाषणात् * वेदनमुपासनं स्यात् इति प्रदर्शयिष्यमाणवाक्यसंवादाच्च। ध्यानोपासनशब्दयोरेकविषयत्वं ध्यानस्य प्रतिकूलध्यानाद्व्यावृत्तिश्चेह अर्थादेव सिध्यतः। यदि ध्यानमिहोपासनत्वेन शब्दतो विशेष्यते; तदा ध्यानस्य पुनराकारान्तरोक्तौ शृङ्खला भज्येत।

ननु ध्यानशब्दः चिन्तामात्रवाची व्यवहितस्मृतिसन्तानेऽपि स्यात्, स्मृतिमात्रे च क्वचित्प्रयुज्यते; सूत्रे च ध्यानोपासनशब्दाभ्यामसकृदावृत्तिमात्रमुक्तमित्यत्र तदभिप्रेतं श्रौतं नैरन्तर्यरूपविशेषमाह—**ध्यानं चेति**। यावज्जीवाग्निहोत्रनयाद्वा स्वरूपेण चिरकालस्थायितया वा ध्रुवत्वं स्यादिति शङ्कानिरासाय सदृष्टान्तः सन्तानशब्दः। एवं विच्छिन्नाविच्छिन्नवेदनसाधारणस्य ध्यानस्य विशेषे विश्रम उक्तः; अविच्छिन्नासाधारण्यं वा स्थापितम्। स्वस्थाने चैतत् सूत्रयिष्यति— * ध्यानाच्च, अचलत्वं चापेक्ष्येति। * उपासनशब्दस्याविच्छिन्नविषयत्ववत् ध्यानशब्दस्याप्यविच्छिन्नविषयत्वमिह स्थाप्यत इति **तूलिका**। उक्तं श्रुत्योपपादयति—ध्रुवेति। स्मृतेर्ध्रुवत्वं विसदृशबुद्धिव्यवधानरहितप्रवाहत्वम्, * तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्पृहा इत्यादिना तथोक्तेः। यद्यपि * नाना शब्दादिभेदादित्यत्र फलसंयोगैक्यमात्रान्न विद्यैक्यमिति वक्ष्यते; ध्यानत्वोपासनत्वध्रुवत्वादयश्च विशेषा विद्यान्तरपठिताः; तथाऽपि साधारणानां वेदनादिशब्दानां विशेषविषयत्वाभावे फले च तारतम्यरहिते गुरुलघूपायभेदविधिर्दौस्थ्यम्। गुरुलघुविकल्पायोगलक्षणं च वस्तुसामर्थ्यं प्रकरणाद्बलीयः, अतस्स्मृतेर्ध्रुवत्वम्। इदमेकत्र श्रुतमपि सर्वासु विद्यासु योज्यमित्यभिप्रायेण **अपवर्गोपायत्वश्रवणादि**त्युक्तम्। **स्मृतिलम्भे**—आहारशुद्ध्यादिक्रमेण प्रस्तुतध्रुवानुस्मृतिसिद्धौ इत्यर्थः। ग्रथ्यत एभिः क्षेत्रीति **ग्रन्थयः**—धर्माधर्मरागद्वेषमोहादयः कर्मोपनीताश्च त्रिगुणविकारभेदाः। ते च मायापाशग्रन्थितया आसागमोक्ताः। **विप्रमोक्षः**— विभज्यात्यन्तिकमोचनम्। ननु भ्रान्त्या बन्धः सर्वेष्टः, तस्य कथमप्रमा स्मृतिर्बाधिका; भ्रान्त्यधीनकर्मजन्यस्य स्वयं भ्रान्तिविषयत्वासिद्धेः। भ्रमोत्थस्यापि भयशङ्काविषजन्यज्वरादेरिव बन्धस्य सत्यतया युक्तोऽयमीदृशः प्रतीकारविधिः। मिथ्यात्वपक्षेऽपि प्रायश्चित्तादिन्यायो दुस्त्यजः। अतो निवर्त्यस्य सत्यमिथ्यात्वे, निवर्तकस्य मानामानत्वे अनादृत्य चोदितत्वात् स्वफलसाधनत्वं ग्राह्यम्। भेदवासनायाश्च ध्यानरूपा स्मृतिर्नाशनी त्वयैवोक्ता। तदत्र शुक्तिरजतवन्न बन्धस्य बाधः। नाशस्तु यथाविधि स्मृत्या प्रमित्या वा स्यात्। न चेयं स्मृतिरप्रमाऽप्ययथार्था, स्वहेतुप्रमित्यनन्यविषयत्वात्। उक्तं च सामान्यतः **श्रीमद्गीताभाष्ये**—* स्मृतिर्नाम पूर्वानुभूतविषयमनुभवसंस्कारमात्रजं ज्ञानमिति। पूर्वानुभूतविषयत्वं न लक्षणप्रविष्टम्; किं तु विषयसत्यत्वासत्यत्वयोः ज्ञान्यज्ञप्त्यर्थम्।

निवृत्ततद्वस्यस्य तदवस्थतया स्मृतौ। याथार्थ्यं न प्रतिक्षेप्यं भूतमाविप्रमाक्रमात्॥ ३०१॥

स्मृतिप्रमोषे चार्थस्य तादवस्थ्यं न भासते । अयाथार्थ्यं कथं तत्र तत्तेदन्ताविवर्जिते ॥ ३०२ ॥
अतो मूलानुसारेण यथादर्शनमिष्यताम् । यथार्था चायथार्था च स्मृतिरप्यनुभूतिवत् ॥ ३०३ ॥
अन्यदृष्टिस्तथाऽन्यत्र क्ष्वेलध्वंसादिकृन्मता । परविद्यास्वपि ह्येषा क्वचिदंशेषु गृह्यते ॥ ३०४ ॥
अतः श्रुतिस्मृतिशतैश्चोदिता स्मृतिरूपिणी । भाष्यते परविद्येयं भवारंभस्य निष्कृतिः ॥ ३०५ ॥

सा च स्मृतिर्दर्शनसमानाकारा ; * भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ इत्यनेनैकार्थ्यात् । एवं च सति * आत्मा वा अरे द्रष्टव्य इत्यनेन निदिध्यासनस्य दर्शन[समानाकारता]रूपता विधीयते । भवति च स्मृतेर्भावनाप्रकर्षात् दर्शनरूपता ।

ननु ध्यानमेवेत्याद्ययुक्तम् ; तदपि धारणावत्समाध्यर्थतयोक्तम् । समाधिरेव तु दर्शनात्मकः * आत्मानं पश्येदित्यादिभिर्मुक्तिहेतुरुक्तः । न च योगिप्रत्यक्षमनभ्युपगतम् , तस्य बहुषु प्रदेशेषु भाविष्यमाणत्वादित्याह— सा चेति । ध्रुवत्वविशेषितेत्यर्थः । आकारान्तरेणापि सूत्रसूचितया विशेष्यत इति व्यक्त्यै चकारः, एवार्थो वा । सैव हि स्मृतिर्वैशद्यातिशयात्समाध्याख्या ; न तु ध्यानफलमन्यदर्शनं * पश्येदित्यादिषु च विधेयमित्यर्थः । स्मृतेर्दर्शनत्वव्याघातशमनाय समानत्वोक्तिः ; परोक्षेऽप्यपरोक्षत्वोपचार इति भावः ।

परोक्षा चापरोक्षा च स्मृतिर्द्वेधा स्वमूलवत् । कृत्स्ना वा स्यात्परोक्षैव द्विधाऽप्यत्रापरोक्षता ॥ ३०६ ॥
विधौ च परशब्दार्थो गत्यभावेऽनुमन्यते । लक्षणेष्टा हि दर्शादौ गौणी श्येनादिनामसु ॥ ३०७ ॥
अर्धमन्तर्वहिर्वेदि मिनुयादिति च श्रुतौ । मध्यदेशस्य लक्ष्यत्वं सर्वत्रैवं यथायथम् ॥ ३०८ ॥

नन्वत्र स्ववाक्ये ध्रुवत्वं न दर्शनरूपत्वं विशेषणतयोपात्तम् ; यतः समाधेः पार्श्वक्यं परिहियेतेत्यत्राह— **भिद्यत** इति । अत्र **ग्रन्थि**शब्द उपात्तकर्मादिव्यतिरिक्तविषयः ; हृदयस्य मनसः सम्यक् प्रवृत्तिप्रतिबन्धकतया **ग्रन्थयो** रागाद्याः । यद्वा हृच्छब्दोक्तं स्थानमयतीति हृदयो जीवः ; तात्स्थ्याद्वा असौ तच्छब्देन लक्ष्यते ; तस्य **ग्रन्थिः** पूर्वोक्तस्त्रिगुणविकारवर्गः । हृदयं वा ग्रन्थिः ; उपलक्षणमिदम् । यत्तु निरुच्यते छान्दोग्ये—* स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमिति तस्माद्धृदयमहरहर्वा एवंवित्स्वर्गं लोकमेतीति ; तदुपास्यब्रह्मपरम् । न च तदेवात्र हृदयशब्दवाच्यमिति भ्रमितव्यम् ; ग्रन्थिसंशयादिविरुद्धधर्माध्यासात् । सर्वविषयास्संशयाः, सर्वे वा संशयाः; संशयशब्दोऽत्र विपर्ययस्याप्युपलक्षकः । ते **छिद्यन्ते** हेतूच्छेदात्र संतन्यन्त इत्यर्थः । **कर्माणि**— बन्धकसुकृतानि दुष्कृतानि च । प्राप्तिविरोधिक्षयस्यात्र विवक्षितत्वान्न विद्योत्पत्तिकर्मनिवृत्त्योरन्योन्याश्रयः । **परावरे**— परत्वं सर्वातिशायिता ; अवरत्वम्—सौलभ्यार्थेन्द्रानुजत्वाद्यैः । यद्वा * सद्ब्रह्म * ब्रह्मदाशा इत्याद्युक्तपरावरजन्तुशरीरके । **अपरावरे** वा निम्नोन्नतविध्वविलक्षणे । अथ वा परा एत्रावरा भूत्या यस्य स परावरः ।

इदमत्राकूतम्— * दृष्ट इत्यत्र दर्शनशब्दो न तावन्मुक्त्यवस्थाभाविदर्शनपरः, ध्रुवस्मृतिशब्दवत् ग्रन्थिमोक्षसाधनविषयत्वात् । न च साधनविषयत्वेऽपि स्मृतिदृष्ट्योरपवर्गं प्रति समुच्चयः, दर्शपूर्णमासादिवत् द्वन्द्वस्य

चकारस्य वाऽनुपलब्धेः । न चात्र समुच्चयशङ्क्यः, प्रक्रान्तयोगेन ब्रह्मणस्साक्षात्कर्तुमशक्यत्वात्, शक्यत्वेऽपि यौगपद्यस्यासंभवात्, क्रमस्य च व्यवस्थापकाभावात् । न च प्राचीनं ध्रुवस्मरणं पश्चिमं च योगिप्रत्यक्षं करणतया समुच्चीयेत, धारणावत्तादर्थ्योपपत्तौ समुच्चयकल्प्ययोगात्; अन्यथाऽतिप्रसङ्गात्, ध्रुवस्मृतेर्व्यवहितसाधनत्वकल्पनौ श्रुतहानादिप्रसङ्गाच्च । प्रमाणफलं च दर्शनं न स्वरूपेणोपादातुं शक्यम्; येन समुच्चित्य विधीयेत । ननु संस्कारोद्बोधफले स्मरणेऽपि समानमेतत्; अत आज्यावेक्षणन्यायात्तदुपायभूतशक्यव्यापारार्थो दर्शनविधिरिहास्त्विति चेत्, न, तथा सत्येकस्मिन्वाक्ये द्रष्टव्यनिदिध्यासितव्यपदयोः पुनरुक्तिप्रसङ्गात्, अन्ततो निदिध्यासनार्थचित्तप्रेरणस्यैव पुरुषतन्त्रस्य दर्शनोपायतया विधातव्यत्वात्, अन्यस्य चादृष्टेः । नन्वेक एव दर्शनोपायस्सामान्यतो विशेषतश्च पदद्वयोक्त इत्यपुनरुक्तिः स्यात्, हन्तैवं सति समुच्चयं त्यक्त्वा असत्पदवीमासीदसि; * द्रष्टव्यो निदिध्यासितव्य इत्युभाभ्यामेकस्यैव विधेयत्वात् । असदुक्ते तु ध्यानं वैशद्यतो विशेष्यत इति वैषम्यम् । न च दर्शनसमानाकारध्यानान्तरेण ध्रुवस्मृतेस्समुच्चयः; तादृशस्यान्यस्यादृष्टेः, तत्कल्पनौ च गौरवात्, ध्रुवस्मृतेर्निरपेक्षसाधनत्वश्रुतिभङ्गप्रसङ्गाच्च । न च मोक्षे साध्ये साक्षात्कारस्मृत्योरनेकदोषदुष्टो विकल्पस्स्वीकार्यः ।

विकल्पबुद्ध्यनुष्ठानापूर्वतत्फलबाधतः । कोटिभ्यामष्टदोषत्वं प्रयोगद्वितयेऽब्रुवन् ॥ ३०९ ॥
प्रामाण्यत्यागतोऽन्यस्य स्वीकृतेस्त्यक्तसंग्रहात् । स्वीकृतत्यागतश्चान्ये प्रयोगत्रितये विदुः ॥ ३१० ॥

गुरुलघुवैषम्याच्चात्र न तत्संभवः; अन्यथाऽतिप्रसङ्गात्, विषमफलेष्वेव तद्धेतुत्वदृष्टेः । न चात्र द्वारद्वारिता, मानाभावात् । न हि श्रवणमननयोर्ध्यानोपकारकत्ववत् ध्यानस्य दर्शनोपकारकत्वं दृष्टम् । परोक्तं भावनाबलजप्रत्यक्षं तु शास्त्रयोन्यधिकरणे निरसिष्यते । न चात्र श्रुतम्, एवं क्रमाद्यनुक्तेः । * ततस्तु तं पश्यते निष्कलं ध्यायमानः * ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवदित्यादिकमस्तीति चेत्, सत्यम्, ध्यानफलं ह्येतद्दर्शनमणिमादिवत्सिद्ध्यन्तरमस्तु, न साधनम्; तथाऽनुक्तेः । परविद्याप्रकरणे क्वचित्तदुक्तिस्तु तत्तत्प्रभावप्रदर्शनार्था * तमक्रतुं पश्यति वीतशोकः * पुरिशयं पुरुषमीक्षत इतिवत् ध्यानसाध्यतयोक्तं दर्शनं मुक्तस्यास्तु; ध्यानसाध्यतयोक्तं दर्शनं मुमुक्षोश्चेत् विशदध्यानरूपं स्यात्; तथा हि——दर्शनशब्दस्य श्रावणज्ञानादिष्वप्रयुज्यमानस्य चाक्षुषज्ञानमेव हि मुख्यम्; तत्तु * न चक्षुषा गृह्यते नापि वाचा, मनसा तु विशुद्धेनेत्यादिभिरिह प्रतिक्षिप्तम्; अतो मनोजन्यज्ञानविशेषे दर्शनत्वोपचार इति वाच्यम्; तथा सति वरं मोक्षसाधनतया कण्ठोक्तस्यैव ध्रुवानुस्मरणस्य तादृशवैशद्यविवक्षया तदुपचार इति ।

ननु दर्शनशब्दः स्मृतिं साक्षात्काररूपत्वेन विशिनष्टु; मैवम्, तस्य स्मृतावसंभवात्, मूलभेदानुसारेण संभवाभिमानिनामपि परोक्षानुभवसाध्यस्मृतौ तदसिद्धेः । * मनसा ध्याननिष्पाद्यं समाधिस्सोऽभिधीयत इति समाधेर्ध्याननिष्पाद्यत्वोक्तिश्च विशदाविशदवैषम्यात् । उक्तं च समाधाववस्थाद्वयं तस्यैव योगाङ्गत्वमङ्गित्वं च निर्वहद्भिः । अस्त्वेवमिह स्मृतिदर्शनवाक्ययोरैकार्थ्यम्; तथाऽपि स्मृतिशब्देन दर्शनमुपचर्यताम्; तत्र—मुख्यार्थबाधाबाधाभ्यां विपरिवर्तस्यैव स्थापितत्वात् । किं च स्मृतिर्हि वैशद्योक्त्या स्तूयेत, दृष्टिस्तु स्मृतित्वोक्त्या निन्दिता स्यात् । परोक्षज्ञाने च वैशद्यविवक्षया * तमसः पारं दर्शयतीत्युच्यते । लोके च पारदर्शी, दूरदर्शी इत्यादि । नन्वपरोक्षस्य संसारस्य दर्शनसमानयाऽपि परोक्षया स्मृत्या कथं बाधः; न कथंचित्, मिथ्यात्वासिद्धेः । अपरोक्षस्यापि ज्वालैक्यदेहात्म-

चन्द्रद्वित्वादेरनुमानादिना बाधो दृष्टः, सर्वैश्चाभ्युपगतः। अतः * तस्मिन् दृष्ट इत्यनेनापवर्गोपायविषयेण स्मृते-वैशद्यलाभात्तादृशी सैव समाधिरिति नाष्टमलोपप्रसङ्गश्चेति। तथाऽपि * द्रष्टव्य इत्यादौ ध्यानसामर्थ्यात्क्षिप्तश्रवणमननयोः ध्यानार्थत्ववत् अग्र्यप्रायन्यायेन ध्यानस्यापि दर्शनार्थबुद्ध्यन्तरत्वोपपत्तेर्न दर्शनशब्दस्तद्विषयः स्यादिति शङ्कायां * ध्यानमेवेत्यत्राभिप्रेतं विवृणोति—**एवं च सतीति**। ध्रुवस्मृतित्वेनेव दर्शनसाम्येनापि निदिध्यासनस्य विशेषि-तत्वे श्रुत्यन्तरसिद्धे सतीत्यर्थः। चः शङ्कानिवृत्त्यै, स्वतः प्राप्तविधिपरत्वयुक्त्या सह स्फुटार्थश्रुत्यन्तरानुगुण्यसमुच्चयार्थो वा। अयं भावः—ध्यानस्यापि श्रवणादिवदविधेयत्वे यज्ञादिभिरेवादृष्टद्वारेण दर्शनसिद्धिः कल्प्येत; तथा च मध्ये ध्यानं विफलं स्यात्, भावनाबलजप्रत्यक्षानुपपत्त्या तादृशादृष्टोपकारकाभावात्। विधेयत्वे त्वेकत्र निर्णीतश्शास्त्रार्थः सर्वत्र स्वतःप्राप्त इति न्यायात् ध्रुवानुस्मृतिवाक्यवदिहापि निदिध्यासनं दर्शनसमानतया विशेष्टव्यम्। * द्रष्टव्य इत्यत्र परोक्ते फलपरत्वे तु प्रत्ययवैधर्म्यम्। पूर्वापरवाक्येषु च * येनाहं नामृता स्याम्, * अमृतत्वस्य तु नाशास्ति वित्तेन * एतावदेव खल्वरे अमृतत्वमिति फलस्योक्तत्वात्तदुक्तिरत्रानपेक्षिता; वैशद्यं त्वन्यत्रोक्तमत्राप्याकाङ्क्षाबलायत्तम्। अत उपायपरतया * तस्मिन् दृष्ट इतिवद्विधेयविशेषकत्वे संभवति विकल्पसमुच्चयश्रुतहानादेरयोगादेकफलसिद्ध्यर्थ-विशिष्टैकसाधनविधितात्पर्यसंभवे पृथक् फलविधिभेदस्याप्राह्यत्वात् दध्नेतिवद्नुद्य विधाने विशिष्टविधेयैक्यसंभवाच्च वैशद्यविशेषितध्यानविधिपरमिदं * द्रष्टव्यः इत्यादिवाक्यमिति। अत एवास्य युगपदेकस्य विध्यनुवादशङ्काऽप्यपास्ता। स्वानन्दसाक्षात्काररूपस्यात्मदर्शनस्य स्वयमेवेप्सितस्य कथं विधेयत्वमिति चोद्यं विशदस्मृतिविधानोक्त्या प्रत्युक्तम्। एतेन ❀ निचाय्य तं मृत्युमुखात्प्रमुच्यते, * यदा पश्यः पश्यते रुक्मवर्णम्, * तद्विज्ञानेन परिपश्यन्ति धीरा आनन्द-रूपममृतं यद्विभातीत्यद्यापि यथार्हं निरूढम्।

नन्वेवं योगिप्रत्यक्षमेव लुप्येत, तत्तद्वाक्येषु दर्शनादिशब्दानां योगिप्रत्यक्षसद्भाववचनानामपि प्रत्यक्षसमानाकार-विषयतया नेतुं शक्यत्वात्। न च धर्मादयः कस्यचित्प्रत्यक्षाः प्रमेयत्वादित्यादिभिस्तत्सिद्धिः, ईश्वरप्रत्यक्षेणार्थान्तरा-पत्तेः। इन्द्रियग्राह्या इति साध्यप्रयोगेऽपि शास्त्रवेद्यस्यापि मनोविषयत्वेन सिद्धसाधनात्, इन्द्रियसाक्षात्कर्तव्या इत्यत्ता-प्यतीन्द्रियाणामपि अनुव्यवसायवेद्यत्ववादिनामर्थान्तरत्वेन दत्तोत्तरत्वात्, सुखादिवदाहृत्य साक्षात्कार्यत्वविवक्षायां विपक्षे बाधकासंभवेन प्रतिबन्धासिद्धेः; अन्यथा बौद्धवद्धर्मादीनां चाक्षुषत्वस्यापि साधनप्रसङ्गात्। शक्यं हि * विगीतं कस्यचित् चाक्षुषं प्रमेयत्वादित्यादि प्रयोक्तुम्। किं च • योगीन्द्रियं न धर्मादिप्रत्यक्षजनकम्, इन्द्रियत्वात्; अस्म-दादीन्द्रियवदिति प्रतिप्रयोगस्सुलभ इति; मैवम्—

मुक्त्युपाये हि कथिता दर्शनोक्तेरमुख्यता। अन्यत्र बाधकाभावाद्यथाश्रुतपरिग्रहः॥ ३११॥

संयमिनां ह्यतीतानागतातीन्द्रियादिवेदनं कण्ठोक्तम्। न च स्मरणमेतत्, अननुभूतविषयत्वात्। अत एव न तत्र वैशद्यमात्रेण प्रत्यक्षत्वोपचारसम्भवः। न च तलानुमानाद्यवकाशः, * तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यती-त्यादिभिस्तत्प्रतिक्षेपात्; * पाणावामलकं यथेत्यादि च निर्दिश्यते; धर्मोपचयभेदैरनधीतसूक्तकाण्डमन्त्रसाक्षात्कारश्च कीर्त्यते; • दिव्यं ददामि ते चक्षुरित्यादि च प्रसिद्धम्; अतो नासिद्धिः; योगिप्रत्यक्षस्य बाह्येन्द्रियाणां मनसश्च सुकृतविशेषैर्यथार्हं लोकोत्तरातिशयाधानात्। न चातिप्रसङ्गः; यथाश्रुतातिलङ्घने हेत्वभावात्, अनुमानस्य विपक्षे बाधकाभावाच्च। न चानुमानतः श्रुतभङ्गः, तस्यागमेनैव बाधात्; अन्यथाऽतिप्रसङ्गात्। ननु शास्त्रं शक्ये शक्तं

विनियुङ्क्ते ; स्मृतेस्तु दर्शनसाम्यं न पुरुषतन्त्रम् ; न च तदपि तस्याः संभवि ; दर्शनत्ववदेवासंभावितं च न विधिराप्तुमर्हति । न दृष्टाधिकारो विधिरसंभावितदृष्टफले सति भवतीत्यत्राह— **भवतीति** । **भावना**— अनुभवजन्यस्संस्कारश्चिन्तैव वा । सा च सादरं निरन्तरं च कर्तुं शक्या । ततः स्मृतिवैशद्यसिद्धिः । दर्शनस्य रूपमिव रूपं यस्यास्सा इत्युपमानबहुव्रीहिरत्र ग्राह्यः । भीतकामुकादिप्रतिभाश्च अत्र निदर्शयितव्याः । परैरप्युच्यते— * दृष्टं परोक्षमपि ध्यायमानं साक्षाद्भावमापन्नं कामाद्युपप्लव इति । * वृक्षे वृक्षे च पश्यामीत्यादिषु भ्रान्तिमिश्रत्वं दोषायत्तम् ; इह तु यथाश्रुतचिन्तनान्न दोषबाधाविति भावः ।

यदि स्याद्भावना मूला स्मृतेर्दर्शनतुल्यता । किमत्र कर्मणा मैवं मानसिद्धोभयग्रहात् ॥ ३१२ ॥

वाक्यकारेणैतत्सर्वं प्रपञ्चितम् — * वेदनमुपासनं स्यात्तद्विषये श्रवणादिति । सर्वासूपनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम् । * सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात्प्रयाजादिवदिति पूर्वपक्षं कृत्वा * सिद्धं तूपासनशब्दादिति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम् । * उपासनं स्यात् ध्रुवानुस्मृतिर्दर्शनान्निर्वचनाच्चेति तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितम्। सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता । दर्शनरूपता च प्रत्यक्षतापत्तिः ।

उक्तस्य न्यायवर्गस्य दार्ढ्याय सूत्रे शाब्दमार्थं च सर्वं मुखभेदेन तदभिप्रायविद्भिर्विमृश्य निर्धारितमित्याह— **वाक्यकारेणेति** । **तद्विषये श्रवणात्** ; उपासनशब्दस्थाने वेदनशब्दस्य एकत्र अन्यत्र च प्रकरणे प्रयोगादित्यर्थः । अत्रोक्तस्य प्रायिकत्वशङ्काव्युदासाय वाक्यं व्याचष्टे—**सर्वासिवति** । * मनो ब्रह्मेत्युपासीतेति दृष्टिविधावुक्तमपि न्यायसाम्यात्परविद्यास्वपि योज्यम् , किं पुनस्तास्वेवैकत्र दृष्टमिति व्यक्तयै **मोक्षसाधनतया विहितमित्युक्तम्**। एतेनापातधीश्रवणमननिर्णयादेर्व्यवच्छेदः । वेदनमुपासनमित्युक्तस्य उत्तरवाक्यामर्त्या मन्दानां पूर्वपक्षत्वशङ्कां स्पष्टोक्त्या निवर्तयितुमाह—**सकृदिति** । विधिर्हि स्वतः प्रवृत्त्युन्मुखं पुरुषं प्रेरयन् स्वसिद्धये प्रयाजादिशास्त्रेष्विवात्रापि सकृत् प्रवर्तयेत् ; विशेषवचने सति खलु आवृत्तिभारस्सोढव्य इत्यभिप्रायेणोक्तम्—**शब्दार्थस्य कृतत्वादिति**। विधिविषयस्य धात्वर्थस्य तावतैव पूर्णानुष्ठितत्वादित्यर्थः । उत्तरवाक्यस्थेन तुशब्देन सूचितमाह—**पूर्वपक्षं कृत्वेति**। तत्प्रतिक्षेपोक्तिं दर्शयति—**सिद्धमिति** । न्यायत उपासनं सिद्धमित्यर्थः । **सिद्धम्**— सिद्धान्त इति वा । **उपासनशब्दात्** । न हि सकृद्ध्रुवावुपासनशब्दस्य प्रत्यातिरिति भावः । एतद्वाक्यं व्याचष्टे— **वेदनमित्यादिना** । * उपासनशब्दादित्यनेन **वेदनमुपासनमिति** वाक्यस्यापि शब्दप्रत्यभिज्ञया सिद्धान्तपरत्वं दर्शितं भवति । ध्यानस्य ध्रुवत्वं सूत्रानुक्तमपि न्यायसाम्यात्सूचितं प्राक् स्वेन विवृतम् । वाक्ये तु ध्यानादभिन्नस्य उपासनस्यापि तदुक्तमुपादत्ते —**उपासनमिति**। **दर्शनम्**—स्वारसिकी लोकदृष्टिः । **निर्वचनम्**—निर्णायकतया प्रागुक्तं श्रुतिवाक्यम् । यद्वा **दर्शनम्**— प्रत्यक्षश्रुतिः । **निर्वचनम्**—निष्कृष्य वचनमुपबृंहणम् । **तस्यैव**—मुक्तिसाधनतया विहितस्यैव, न तु परेषस्य मुक्तिसाधनहेतोरित्यर्थः । सकृदावृत्तावुपासेः प्रयोगाभावात् **उपासनरूपस्यासकृदावृत्तस्येति** वाक्यस्थोपासनशब्दनिर्दिष्टत्वोक्तिः ।

ननु एतत्सर्वं प्रपञ्चितमिति पूर्वोक्तम्; तत्र दर्शनरूपत्वं न दृष्टमित्यत्र तस्यानुक्तस्यापि तदुक्ताभ्यामावृत्तिरूपत्वध्रुवत्वाभ्यां तुल्यन्यायत्वव्यक्त्यर्थम् अन्यविधानार्थं चानुभाषते— सेयमिति। ध्यानत्वोपासनत्वाभ्यामसकृदावृत्ता वाक्यान्तरेणोक्तध्रुवत्वविशिष्टा चेत्यर्थः। प्रतिपादिता— दर्शनरूपत्वमपि वाक्यकारेणार्थादुक्तमिति भावः। यद्वा—न्यायसाम्यादभिप्रेतमिदमस्माभिः प्रागुक्तमिति। ननु यद्यप्यन्यस्यान्यत्वं न विधातुं शक्यम्; स्मृतिदर्शनयोश्च सामग्रीनियमात् विरुद्धजातीययोरन्यत्रैक्यमसंभवि, तथाऽपि संस्कारमात्रजन्ये स्वप्नज्ञाने अदृष्टविशेषसहकारात्साक्षात्काररूपत्वमिवात्रापि चक्षुर्जन्यत्वासंभवेऽपि तदविनाभूतप्रत्यक्षत्वेऽपि ध्रुवानुस्मृतेर्धीत्वमात्रसाम्यात् दर्शनशब्दोपचारः कथं न स्यादित्यत्राह— दर्शनरूपेति। प्रत्यक्षतापत्तिः; न तु साक्षात्प्रत्यक्षत्वम्, असंभवात्। अयं भावः—स्वप्नधीरपि न तावन्मुख्यदर्शनम्, चक्षुर्व्यापाराभावात्। किं तु तत्र बाह्यकरणवृत्तिनिरोधे सति अनन्यसंचारिणा मनसा संस्कारपटिम्ना प्रागनुभूतेषु विशदस्मृतिराधीयते, तदतिरिक्तधीकल्पने अनन्यथासिद्धहेत्वभावात्। तत्र चक्षुराद्यजन्येऽपि तज्जन्यत्वधीः असंसृष्टे संसृष्टधीश्च दोषवशान्मानसभ्रान्तिः। सन्न्यायाधिकरणानुरोधे तु संस्कारमात्रजन्यत्वाभावादसङ्कीर्णं दर्शनत्वम्, अतो न स्वप्ननिदर्शनेन प्रस्तुते प्रत्यक्षत्वकल्पनिश्शक्या। धीत्वमात्रेण दर्शनसाम्यादुपचारश्च वाच्यासत्तमस्तुत्यनुगुणविशेषसिद्धौ न युक्त इति।

एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि— ❀ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामिति। अनेन केवलश्रवणमननानिदिध्यासनानामात्मप्राप्त्यनुपायत्वमुक्त्वा यमेवैष आत्मा वृणुते, तेनैव लभ्य इत्युक्तम्। प्रियतम एव हि वरणीयो भवति; यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति; यथाऽयं प्रियतम आत्मानं प्राप्नोति, तथा स्वयमेव भगवान् प्रयतत इति भगवतैवोक्तम्— ❀ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ इति, ❀ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः इति च। अतः साक्षात्काररूपा स्मृतिः स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रिया यस्य, स एव परेणात्मना वरणीयो भवतीति तेनैव लभ्यते पर आत्मेत्युक्तं भवति।

ननु * नायमात्मेत्यादौ श्रवणादित्रिकं प्रतिषिध्य अपर्यनुयोज्यस्वतन्त्रवरणमात्रेण तल्लाभ इत्युक्तम्। तस्मात् * दैवमेव वरं मन्ये पौरुषं तु निरर्थकमिति न्यायादुक्तं सर्वं वितथमित्यत्र सूत्रवाक्ययोर्ध्रुवत्वादिविशेषिताया: स्मृतेरुपासनशब्दार्थतयाऽभिप्रेतं भक्तिरूपत्वविशेषणमेव तत्र विवक्षितमित्याह— एवमिति। सामान्यशब्दानां सूत्रादुक्तेन विशेषविश्रमप्रकारेणेत्यर्थः। प्रत्यक्षतापन्नामित्येतत् वक्ष्यमाणस्य भक्त्यात्मकत्वस्य न्यायसाम्यसूचनार्थम्। अहेतुकवरणमयुक्तम्, तस्यादिमत्त्वे निर्हेतुकत्वायोगात्। अनादित्वे मुक्तेरप्यनादित्वापातात्, मुक्त्युपायविधेश्च वैयर्थ्यप्रसङ्गात्, जीवव्यापाररूपभेदविशेषनिषेधपरस्य वैषम्यनैर्घृण्यनिषेधकसूत्रादेः विरोधापत्तेश्चेत्यभिप्रायेण अपवर्गसाधनभूता-

त्वमित्युक्तम्। फलान्तरार्थोपात्तिपरत्वशङ्का चानेन निरस्ता। परो ह्यात्माऽत्र लभ्य इष्यते। **विशिनष्टि**—न तु प्रमाणप्राप्तं निवर्तयतीत्यर्थः। अन्यथा उपायान्तरविधानवैयर्थ्यम्, * मत्वा धीरो न शोचति, * प्रज्ञानेनैनमाप्नुयादिति पूर्वापरविरोधश्च स्यात्। **नायमात्मेत्यादौ** श्रुतशब्देन श्रवणमुपात्तम्। मेधाशब्दश्च ध्यानार्थः स्यात्; * मेधामनीषे मा विशतां समीची भूतस्य भव्यस्यावरुद्ध्यै इति श्रुत्यनुसारात्। • धीर्धारणावती मेधेति च निघण्टुः। परिशेष्यात्प्रवचनशब्दः श्रवणध्यानसहोक्तमननपरः; प्रोच्यतेऽनेनेति करणव्युत्पत्तेः। शिष्यमननार्थगुरुप्रवचनेन वा मननलक्षणा; प्रवचनहेतौ वा तत्कार्योपचारः। ननु स्वरूपनिषेधकस्य कथं तद्विधायकत्वम्; अत्र च क्वचिदङ्गाङ्गिप्रतिषेधाद्वैयर्थ्यम्, क्वचित्तु विहितप्रतिषेधाद्विरोध इति शङ्कायां श्रवणादिवैयर्थ्यप्रसङ्गं च परिहरन्वाक्यस्य ध्रुवानुस्मृतिविशेषकत्वं व्यनक्ति— **अनेनेति**। यथा * न पृथिव्यामग्निश्चेतव्यः इत्यत्र निषेधस्य हिरण्यवैकल्यपरिहारार्थतया हिरण्योपहितत्वविधौ तात्पर्यम्, तथाऽत्रापि पृथिव्या इव श्रवणादेर्यथार्हं प्रणाड्या साक्षात्त्वावश्यंभावित्वात्प्रीतिवैकल्यनिषेधमुखेन त्रिष्वपि प्रीतिविशेषविधौ तात्पर्यमित्यभिप्रायवान् **केवलशब्दः**। यद्वा * नान्तरिक्षे न दिवीत्यभागप्रतिषेधेन सह पठितः * न पृथिव्यामिति प्राप्तप्रतिषेधः यथा केवलपृथिव्या अन्तरिक्षादिवदधिकरणत्वव्युदासेन हिरण्योपधानत्ववैशिष्ट्यविधौ विश्राम्यति; तथाऽनुपायभूतश्रवणमननाभ्यां सहोपायभूतनिदिध्यासनस्य प्रतिषेधः केवलनिदिध्यासनस्य श्रवणादिवदनुपायत्वोक्तिमुखेन भक्त्यात्मकत्वविधौ पर्यवस्यतीति। अनियमेन यथेष्टं स्वतन्त्रवरणशङ्काव्युदासाय यद्वृत्तानूक्तिबलेन नियतविषयवरणव्यक्त्यर्थं **यमेवेत्युपादानम्**; वैषम्यादिदोषानाघ्रातसर्वसुहृद्वरणस्य नियतविषयत्वायोगात्। • यदाग्नेयः इति वाक्यस्थभवतिवत्, **वृणुत** इत्यस्य प्रयोजकव्यापारविधौ तात्पर्यं लप्स्यमानवरणप्रयोजकव्यापारवता भवितव्यमिति। ननु हिरण्योपधानस्य पृथिवीस्थत्वावश्यंभाववदेतद्वाक्यस्थयद्वृत्तव्यङ्ग्यवरणीयताहेतुगुणविशेषस्य ध्रुवानुस्मृतिसंबन्धनियमादृष्टेर्न तस्यास्तेन वैशिष्ट्यलाभ इत्यत्राह— **प्रियतम** इति। फलान्तरार्थभक्त्याभासव्यवच्छेदार्थं तमप्ययोगः। हिः शास्त्रतो लोकतश्च परावरपुरुषस्वभावप्रसिद्धौ। नन्वेतावताऽपि वरणीयस्य प्रियतमत्वापादकः कश्चिदन्यो व्यापारस्सिध्यतु; ध्रुवानुस्मृतेर्विशेषितत्वं तु न लब्धमित्यत्राह— **यस्येति**। **स एव**—न सुकृतान्तरवान्, न च केवलध्रुवानुस्मृतिमान्, नापि निर्व्याजप्रियः कश्चिदिति भावः। **अस्य**— * समोऽहं सर्वभूतेष्वित्यादिना स्वेनैवोक्तस्वभावस्येति यावत्। अयं भावः— अन्येषां स्वप्रीतिहेतुव्यापाराणां स्वलाभार्थवरणहेतुत्वाभावात् स्वविषयनियतात्यन्तिकप्रीतिमानेव परस्य प्रियतमो भवन् स्वप्रापणाय वरणीयस्स्यात्। इयं च निरतिशयप्रीतिरूपा बुद्ध्यवस्था मुक्तिसमुत्पादने विकल्पसमुच्चयविद्वेषिणी अनन्यगतिकप्रमाणवशान्मुक्तिसाधनतया स्थापितध्रुवानुस्मृतिमाश्रयन्ती तां विशिनष्टीति। ननु स्वशेषतया नित्योपात्तस्य किमत्र वरणम्; सर्वव्यापितया नित्यप्राप्तस्य किं वेदानीं लभ्यत्वम्; प्रियतम एवास्य वरणीय इति च कुतस्त्यमित्यत्र तत्सर्वमुपबृंहणेन स्पष्टयति— **यथेति**। **अयम्**— भगवति निरुपाधिकभोग्यताविर्भावेन निरतिशयप्रीतिमान्। अत एव **प्रियतम आत्मानं प्राप्नोति**— रमते स्वात्मनि। प्रसेदुषस्तस्यापवर्गाव्यवहितहेतुभूतबुद्धियोगादिप्रदानेऽन्येषामिव परसापेक्षत्वं नास्तीति व्यक्त्यै **स्वयमेवेत्युक्तम्**। उपासितुरचिन्त्यमेव हितमाचरतीति वा सूच्यम्। **भगवतैव**— • यमेवैष वृणुत इति वरणकर्तृतया श्रुतेनैव। एतेन स्वतस्सर्वज्ञतया परमाप्तत्वमपि व्यज्यते। **सततयुक्तानाम्**— सततयोगमाशंसमानानाम्; * आशंसायां भूतवच्चेति कः। सततयुक्तानां भजतामित्यनेनैवोपासकबुद्धेः प्रीतिरूपत्वस्य सिद्धत्वात् प्रीतिपूर्वकं ददामीत्यन्वयः।

उपचारापचाराभ्यां प्रीतिद्वेषौ परस्य न। निमित्तशक्तया तु फलं तयोरिति नयोज्झितः॥ ३१३
वरणं चोन्निनीषा चाधोनिनीषा च शासितुः। श्रुतत्वादनिषिद्धानि तत्तत्कर्मफलार्पणात्॥ ३१४॥

कस्यचिद्वरणीयतानिदाने प्रियतमत्वे श्रुत्यभिप्रेतः सततयुक्तशब्दोक्तश्च हेतुस्तत्रैव विवृत इत्याह—**प्रियो हीति**। अत्यर्थम्—अत्यभिधेयम्; मयाऽपि दुर्वचमिति भावः। अत्र वरणं मामयं प्राप्नुयादिति अमोघस्सङ्कल्पः। अत्र लभ्यत्वं चास्य * विवृणुते इत्यनेनाभिप्रेतम्; निवृत्तप्रतिबन्धनिरुपाधिकानुभवविषयत्वमित्यर्थादुक्तं भवति। अत्र सोपबृंहणयाऽपि श्रुत्या ध्रुवानुस्मृतेः प्रीत्यात्मकतया विशेषितत्वमनभिव्यक्तं व्यनक्ति—**अत** इति। लोकानुसारात्, उपात्तश्रुतिस्मृतितात्पर्यवृत्त्या चेत्यर्थः। **अत्यर्थप्रिया**—अतिमात्रानुकूल्यस्वभावतया स्वयमेव भासमाना अयुक्तदशायामपि * या प्रीतिरविवेकानामिति न्यायेन प्रीतिरूपज्ञानान्तरेण विषयीकृता। विषयविशेषायत्तं हि सर्वत्र विषयिणो ज्ञानस्य प्रीतिरूपत्वं प्रीतिविषयत्वं चेत्यभिप्रायेण स्मर्यमाणात्यर्थप्रियत्वोक्तिः। वरणविवरणयोः कर्तुः तत्कर्मणो वरणीयात् आर्थी प्राकरणिकी व्यावृत्तिः **परेणेति** दर्शिता।

एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते, उपासनपर्यायत्वाद्भक्तिशब्दस्य। अत एव श्रुतिस्मृतिभिरेवमभिधीयते—* तमेव विदित्वाति मृत्युमेति * तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। * नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥ भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन!। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप॥ * पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया। इति।

ननु * शेमुषी भक्तिरूपेति पुराणादिप्रसिद्धं भक्तेरुपायत्वं प्रक्रान्तम्। * ध्यानोपासनादिशब्दवाच्यमित्यत्र आदिशब्देन भक्तिशब्दोऽपि विवक्षितः, उपात्तासु श्रुतिषु तु न तद्धीरस्ति; अतः कथमविरोधस्तत्राह—**एवंरूपेति**। उक्तशृङ्खलाक्रमेण विशेषितेत्यर्थः। प्रतिज्ञामात्रमेतदित्यत्राह—**उपासनेति**। ध्रुवानुस्मृतेः प्रीतिरूपत्वेन उपासनशब्दवाच्यतया च विशेषणात्, * स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयत इति तल्लक्षणानुरोधात्, * सेवा भक्तिरुपास्तिरिति पर्यायपाठात् शब्दभेदेऽप्यैकार्थ्यसिद्धौ विधेयभेदाभावान्न विरोधप्रसङ्ग इति भावः। वेदनादिशब्दानां भक्तिपर्यवसायित्वमुपबृंहणोपबृंहणीययोः मिथः प्रतिक्षेपकत्वप्रसङ्गरूपयुक्त्यन्तरेण दृढीकृतमित्याह—**अत** इति। इदं फलरूपहेतुपरम्; वेदनोपासनादिशब्दैर्भक्तेरेवोक्तत्वादित्यर्थः। अन्यथा श्रुतीनामिव श्रुतिस्मृत्योरपि मिथो विरोधस्स्यादित्यभिप्रायवानेवकारः। **एवम्**—श्रुतौ वेदनव्यतिरिक्तः, स्मृतौ तु भक्तिव्यतिरिक्तश्चरमोपायो नास्तीत्युक्तप्रकारेणेति भावत्।

ननु, * तमेव विदित्वाति मृत्युमेतीति श्वेताश्वतरवाक्यं शिवादिशब्दसमभिव्याहाराद्रुद्रविषयम्; * तमेवं विद्वानिति तु महापुरुषविषयम्; तत्र चात्र च * नान्यः पन्था अयनायेत्यान्नातम्; अतो मिथो व्याघात इति मन्दशङ्कापनुत्त्यै तदुभयवाक्योपादानम्। अयं भावः—* वेदाहमेतं पुरुषं महान्तमित्याद्यैः पूर्ववाक्यैः * महान् प्रभुर्वै

पुरुषस्सत्त्वस्यैष प्रवर्तकः, * सहस्रशीर्षा पुरुषः इत्याद्यैरुत्तरवाक्यैश्च सत्त्वप्रवर्तकस्यानन्यपरपुरुषसूक्तोदितस्य महापुरुषस्य शब्दतोऽर्थतश्च प्रत्यभिज्ञया शिवमहेश्वरादिशब्दानां तत्परत्वावश्यंभावेन ऐन्द्रीन्यायेन रूढिपरित्यागस्य न्याय्यत्वात्, * सर्वदर्शवर्शिवः स्थाणुरिति भगवन्नामपाठात्, शिवशब्दस्य च मङ्गल्यादौ रूढत्वात्, प्रसिद्धिप्रकर्षस्यालोक्तरीत्या नैष्फल्यात्, अनन्यथासिद्धनारायणानुवाकसौबाल्महोपनिषदादिप्राबल्यात् * शाश्वतं शिवमच्युतमितिवन्महापुरुषविषयत्वावश्यंभावात्, * तस्मात्सर्वगतश्शिवः इत्यस्यारम्भे * सर्वाननशिरोग्रीवस्सर्वभूतगुहाशयः इति सहस्रशीर्षत्वादिप्रत्यभिज्ञानात्, * सर्वव्यापी च भगवानिति भगवच्छब्दस्य महापुरुषरूढत्वस्थापनात्, निगमनस्य प्रस्तुतशेषतया तदविरोधेन नेयत्वाच्च विगीतं पुरुषसूक्तोक्तविषयमेवेति। अत्र *नाहमित्यादेः वेदतपःप्रभृतीनां साक्षादुपायत्वाभावे तात्पर्यमिति न तद्विरोधः। * भक्त्या त्वनन्यया इत्यादेश्च पर्वभेदवतैव भक्तिरूपज्ञानेन ज्ञानान्तरादेः साध्यत्वे तात्पर्यान्नात्माश्रयादिप्रसङ्गः। * पुरुषः स परः इत्याद्युपादानस्य न पूर्वेण कृतकरत्वम्; तदप्रतिपन्नख्यापनात्। अयं खल्विहाभिप्रायः—* तमेवं विद्वानित्यत्र * आदित्यवर्णं तमसः परस्तादिति यत्पूर्ववाक्ये श्रुतं तदेव * अणोरणीयांसमनुस्मरेद्यः इत्यारभ्य अचिन्त्यरूपत्वादित्यवर्णत्वोक्तया प्रत्यभिज्ञापितम्। *धाता पुरस्तादित्युक्तं च * सर्वस्य धातारमिति दर्शितम्। तत्र श्रुतौ विदिनोक्तमिहानुस्मरतिना विवृतम्। * भक्त्या युक्त इति चानन्तरं विशेष्यते। अतो भक्तिरूपा ध्रुवानुस्मृतिः श्रुतौ विदिना विधीयत इति गम्यते। यद्यप्यत्र यद्वृत्तावृत्तिवशात् पुरुषार्थान्तरसाधनविषयत्वमेव युक्तम्; तथाऽपि समानन्यायतया मोक्षार्थविदेरपि भक्तिविश्रमसिद्धिस्वीकार्या। तत्रैव च * पुरुषस्स परः इत्यादिना मोक्षार्थश्रौतविदेरपि तद्विशेषपरत्वं व्यञ्जयति। * यमेवैष वृणुते तेन लभ्य इति श्रुतिसम्पुटनिगूढं चात्रोद्घाटितम्। अत्र हि ज्ञानिनां प्राप्यान्तरवत्प्रापकान्तरमपि सविशेषणोक्तया व्युदस्तम्। श्रुत्युक्तप्रत्यभिज्ञया प्राप्यैक्यवत् उपायैक्यमपि हि युक्तम्। अतो विदिस्थाने ध्यायत्युपासिवद्भजतिरप्यत्र विशेषकतया प्रयुक्तः।

पुंसूक्तभगवद्गीते प्रमाणतममंमते। न मिथो बाधमर्हेतां नैकार्थ्ये स्मृत्यनादरः॥ ३१५॥

ननु * भक्त्या मामभिजानातीत्यादौ भक्तिसाध्येन ज्ञानेन परप्राप्तिर्गीता; मैवम्, तत्रापि * ततो मां विशते इति भक्तेरेव प्राप्तिहेतुत्वेन परामर्शात्; अन्यथा * ततः इत्यस्य वैरस्यात्। अतो * भक्त्या प्रवेष्टुमित्युक्त्यैकार्थ्यम्॥

एवंरूपाया ध्रुवानुस्मृतेः साधनानि यज्ञादिकर्माणीति * यज्ञादिश्रुतेरश्ववदित्यभिधास्यते। यद्यपि * विविदिषन्तीति यज्ञादयो विविदिषोत्पत्तौ विनियुज्यन्ते; तथाऽपि तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्य आप्रयाणादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वात्तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि। वक्ष्यति च — * आप्रयाणात्तत्रापि हि दृष्टम्, * अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्, * सहकारित्वेन चेत्यादिषु।

ननु उपात्तश्रुतिस्मृतिसारस्यात् वेदानुवचनयज्ञादिनिरपेक्षा भक्तिरेव मुक्तिसाधनमस्तु; ततश्च न कर्मविचारकृत्यं सिध्येदित्यत्राह— एवंरूपाया इति। सुकृतसापेक्षध्यानादिभक्त्यन्तपर्वविशेषवत्या श्रुतिस्मृतिसूत्रवाक्यसिद्धया

इत्यर्थः । श्रुतिसूत्रयोः विविदिषाविषयत्वं प्रकरणतोऽर्थतश्च प्रत्यूढमित्यभिप्रायेण **ध्रुवानुस्मृतेः** इत्युक्तम् । **अभिधास्यते**—सूत्रकृता; अस्माभिश्च समर्थयिष्यत इति भावः । **विविदिषन्तीत्यस्य** सन्निधौ * मनसैवानुद्रष्टव्यमिति विशदवेदनं विहितम् ; * एतमेव विदित्वा मुनिर्भवतीति स्तुतम् । अतो विधिस्तुतिविषयस्यैव वेदनस्यात्र विध्यन्तराकाङ्क्षा ; न तु तदुभयरहिताया विविदिषायाः । विविदिषासाधनत्वेन विधानं च दुर्वचम् । न हि * यागेन स्वर्गं जिगमिषतीत्युक्ते यागस्य जिगमिषासाधनत्वं स्यात् ; इह च वेदनेच्छाविरहे विविदिषाकामत्वस्यासिद्धिः, तत्संभवे तदुपायानपेक्षणं, वेदनेच्छया च विविदिषाकामना, तया यज्ञाद्यनुष्ठानं, तेन विविदिषोत्पत्तिरिति चक्रकं स्यात् । अत्र पर्वसङ्कोचेन आत्माश्रयम् , अन्योन्याश्रयं च केचिदूचुः । न चात्राज्ञातमुकृतनीतिः ; सावधानकृच्छ्रसाध्यत्वाद्यज्ञादेः । अतः * असिना जिघांसतीत्यादिष्विवानुपपत्त्या नेच्छासाधनत्वेनान्वयः ।

साध्येच्छया विना क्वापि साधनेच्छा न सिध्यति । अतो विविदिषार्थत्वायोगाद्विधर्थता त्विह ॥३१६
अपवर्गाभिलाषात्तत्साधनेच्छाऽपि सिध्यति । अतो वेदनकामस्य युक्तं तत्साधने विधिः ॥ ३१७ ॥
भक्तिरत्र फलत्वेन प्रकृत्या परिमृश्यते । अधिकारतया रूप्याप्या तदिच्छा प्रत्ययेन तु ॥ ३१८ ॥

ननु अदृष्टस्य सांसारिकसर्वकार्यहेतुत्वमेवैष्टव्यम् ; अन्यथा विषममुखदुःखादिहेतुभूतविचित्रेच्छोत्पत्तेः कदाचित्तदनुत्पत्तेश्चायोगात् । अत इच्छामात्रस्य साध्यत्वे वेदनेच्छाया अपि तथात्वात्तत्खण्डनं सर्वतन्त्रविरुद्धं स्यात् । अत्रैवं प्रत्युक्तं **श्रुतप्रकाशिकायाम्**— * भोगादृष्टोद्बोधितपूर्ववासनासचिवात् विषयवैलक्षण्यज्ञानादिच्छोत्पत्त्युपपत्तेरिति ।

भोगार्थेन ह्यदृष्टेन पुंभिरप्रार्थितान्यपि । अन्तरस्थानि कार्याणि स्युः फलप्रदबुद्धितः ॥ ३१९ ॥

तदिह भक्तिरूपब्रह्मवेदनकामः शान्त्यादिसहितैः यज्ञादिभिः तद्भावयेदिति प्रयोगविधिः । ननु भक्त्यर्थोपायविधावपि त्वदुक्तचक्रकादिप्रसङ्गस्स्यात् । न स्यात्— भक्तेरुपचयम् अनुवृत्तिं चापेक्ष्य तद्विधानात् ; **एवं** वेदनसाधनविधावपि न विरोधः ; सामान्यतो विदितेऽपि विशेषतो बुभुत्सया प्रवृत्तेः । न च विशेषेऽपि विदिताविदितविकल्पानुपपत्तिरिति वाच्यम् ; तवापि बुभुत्साप्रभ्रादिघटिते वादादौ प्रवृत्तेः; अन्यथा पामरपरीक्षकविरोधात् । अथैवमुत्पन्नविविदिषस्य तदनुवृत्तिकामनया तदुपायविधिरित्युच्येत ; तत्रापि फलवैषम्याभावात् तदन्वारोहात् परोक्तवेदनस्य प्रागेव निरस्तत्वात् । स्वोक्तबह्वाकारविशिष्टवेदनेच्छानुवृत्त्यै यावज्जीवं कर्मणोऽनुष्ठेयत्वमाह— **यद्यपीति** । परोक्तविविदिषामात्रसाधनत्वे त्वन्वारोह इति पक्षे तु विविदिषानुवृत्त्या प्रत्युत्तरं कथंचिन्नेयम् । **तस्यैव**— विविदिषागोचरस्यैव । न ह्येतद्वेदनं यागादिवत् अपूर्वादिवद्वा सकृदुत्पन्नं सान्तरं वा साधनमित्यभिप्रायेण **ध्यानरूपत्वोक्तिः** । **अहरहरित्यादिकं** निरन्तरस्याप्येकाहसाध्यत्वं दर्शपूर्णमासादिवद्विसान्तरितसाध्यत्वं च व्यवच्छिनत्ति । आप्रयाणादनुवृत्तिवचनं संवत्सराद्यवधिकप्रतिदिनकर्तव्यत्वव्युदासार्थम् । **अभ्यासाधेयातिशयस्येत्यनेन** दृष्टोपकारश्चास्तीति व्यज्यते । **तदुत्पत्तये**— अनुवृत्तेरिष्टतया यज्ञादिसाध्यत्वेनाभिमतविविदिषोत्पत्तय इत्यर्थः । **सर्वाणीत्येतद्यथार्हं** विभाज्यम् । **यावज्जीवमित्यनेन** जन्मान्तरशतेत्यादेः प्रागुक्तस्योपालम्भः । विविदिषायां जातायामपि मध्ये कर्मणां त्यागो न युक्तः ; **विविदिषाविच्छेदे वेदनविच्छेदप्रसङ्गात्** । न हि सकृदुत्पन्नया विविदिषया वेदनानुवृत्तिः सिध्येत् ; सकृद्बुभुक्षयेव भोजनानुवृत्तिः । **प्राचीनसुकृतमूलाऽनुवृत्तिसंभवेऽपि पाक्षिकविघ्नशान्त्यै प्रवर्तितव्यमिति भावः । पूर्वं वेदनस्य ध्यानोपासनादिरूपत्वे सूत्रं**

दर्शितम्; अथ अहरहराप्रयाणादनुवर्तनीयत्वे तद्वदेव तदङ्गकर्मानुवृत्तौ च सूत्राणि सन्तीत्याह— वक्ष्यति चेति। सूत्रैरेव तत्तद्विषयवाक्यान्यपि सूच्यन्ते। एतेन स्वोक्तानभ्युपगमे सूत्रादिविरोधो दृढीकृतः। * आप्रयाणात्तत्रापि हि दृष्टमित्यनेनैव कर्मणो यावदायुरनुष्ठेयत्वं सिद्धम्; * स खल्वेवं वर्तयन् यावदायुषमिति वाक्यस्य दृष्टमित्यनेन विवक्षितत्वात् तत्र च * कुटुम्बे शुचौ देशे इत्याद्युक्तधर्मानुवृत्तेः • एवं वर्तयन्नित्यत्रानूदितत्वात्। * यावज्जीवमग्निहोत्रं जुहोतीति नियतस्यापि विद्याङ्गत्वज्ञापनाय • अग्निहोत्रादिसूत्रोपादानम्। * विहितत्वाच्चाश्रमकर्मापीत्याश्रमाङ्गतयोक्तस्य कथं विद्यार्थत्वमित्यत्र विनियोगपृथक्त्वव्यञ्जनाय * सहकारित्वेन चेति सूत्रग्रहणम्। आदिशब्देन • सर्वथाऽपि त एवोभयलिङ्गादिति कर्मणां विद्याश्रमाङ्गत्वे तन्त्रानुष्ठानसूचकसूत्रसंग्रहः।

वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह— * तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः संभवान्निर्वचनाच्चेति। विवेकादीनां स्वरूपं चाह— * जात्याश्रयनिमित्तादुष्टादन्नात् कायशुद्धिर्विवेक इति। अत्र निर्वचनम्— * आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरिति। * विमोकः कामानभिष्वङ्ग इति। * शान्त उपासीतेति निर्वचनम्। * आरंवणसंशीलनं पुनःपुनरभ्यास इति। निर्वचनं च स्मार्तमुदाहृतं भाष्यकारेण— * सदा तद्भावभावितः इति। * पञ्चमहायज्ञाद्यनुष्ठानं शक्तितः क्रियेति; निर्वचनम्— * क्रियावानेष ब्रह्मविदां वरिष्ठः, * तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति च। * सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानीति। निर्वचनम्— * सत्येन लभ्यः, • तेषामेवैष विरजो ब्रह्मलोक इत्यादि। देशकालवैगुण्यात् शोकवस्त्वाद्यनुस्मृतेश्च तज्जं दैन्यमभास्वरत्वं मनसोऽवसाद इति। • तद्विपर्ययोऽनवसादः। निर्वचनम्— • नायमात्मा बलहीनेन लभ्य इति। * तद्विपर्ययजा तुष्टिरुद्धर्ष इति। तद्विपर्ययोऽनुद्धर्षः; अनिमन्तोपश्च विरोधीत्यर्थः। निर्वचनमपि * शान्तो दान्त इति। एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनैव विद्यानिष्पत्तिरित्युक्तं भवति।

अथ * विरोधादप्रमाणत्वात् इत्यादि पूर्वपक्षहेतून् सूत्रकाराभिप्रायविदां वचसाऽपि परिहरति—वाक्येति। एवकारेण शमादेः यज्ञादेश्च विरोधाभावः स्वोक्तसंवादश्च ख्याप्यते। अथ वा न साधनचतुष्टयेन, न च विवेकादिष्वन्यतमेन, कर्ममात्रेण, शमादिमात्रेण चेत्यर्थः।

निषिद्धकाम्यव्यर्थेभ्यो निवृत्तस्य शमादिभिः। स्वाश्रमोचितविद्याङ्गप्रवृत्तिर्न विरुध्यते॥ ३२०॥

अविरोधेन संभूय साधनत्वव्यवस्थै वाक्यमुपादत्ते— तल्लब्धिरिति। अत्र तच्छब्दार्थो ध्रुवानुस्मृतेः इत्यनेन दर्शितः। * उपासनं स्यात् ध्रुवानुस्मृतिरिति तत्र प्रकृतं हि परामृश्यते। विवेकादीनां सप्तानामेकस्मिन्

कार्येऽन्योन्यसापेक्षत्वरूपेणेतरेतरयोगेन समप्रवृत्तिनिवृत्तिरूपाणामाश्रममेदेन व्यवस्था शक्येत्यपि कतिपयशङ्का च व्युदस्ता। **संभवात्**—एकत्र योग्यतया विरोधप्रसङ्गाभावात्। **निर्वचनात्**—अतीन्द्रियेऽर्थे निश्चायकमानतया निष्कृष्टाद्वचनात्, युक्तिसहितादागमादिति यावत्। इह विद्यायाः कर्मजन्यत्वमिद्ध्यर्थतयोक्तायाः के विवेकादयः कथं च तेषामविरोध इत्यत्र वाक्यकारेणैव व्याख्यातत्वमाह— **विवेकादीनामिति**। स्वरूपं च उद्दिष्टानां मिथो व्यावर्तकरूपं चेत्यर्थः। **जातिदुष्टम्**—लशुनादि। **आश्रयदुष्टम्**—शूद्रान्नादि। **निमित्तदुष्टम्**—केशाद्युपहतम्। तादृशदोषराहित्येनाशुद्धेभ्यो विभक्तादन्नात् सेन्द्रियस्य देहस्य रजस्तमोभिभवरहितसत्त्वोन्मेषापादनेन शुद्धितः पृथक्करणं विवेक इति प्रदर्शकं वाक्यमाह— **जातीति। अत्र निर्वचनमिति** भाष्योक्तिः। **आहारशुद्धौ सत्त्वशुद्धिरिति निर्वचने** सत्त्वमन्तःकरणं सत्त्वगुणो वा। तस्य शोधनीयसर्वोपलक्षणतया वाक्ये कायोक्तिः; साऽपि करणवर्गोपलक्षिका। * आयुस्सत्त्व इत्यादिभिः शुद्धाशुद्धाहारश्च गीतः। विमोकशब्दस्यात्र * कामः क्रोधस्तथा लोभ इत्याद्युक्तत्याज्यवर्गानुपश्लेषपरतया **कामानभिष्वङ्ग** इति मूलघातोक्तिरित्यभिप्रायः। कामोऽत्र तीव्रतमसङ्गजन्यः; * सङ्गात् संजायते काम इत्युक्तेः। तेनाभिष्वङ्गोऽनुवृत्तदृढग्रहणम्; तदभावे * कामात् क्रोधोऽभिजायत इत्याद्युक्तपरंपरानिवृत्तिः। * शान्त उपासीतेत्यत्र शान्तशब्दः करणव्यापारनिवृत्तिमुखेन कामादिराहित्यपरः। **आरंभणम्**—योगमारुरुक्षोः चित्तालम्बनं शुभाश्रयरूपम्। विवरणे तु * ज्ञानालंबनमुपास्यमित्युक्तम्। तस्य संशीलनम् अनुकूलतया शीलनम्। पुनः पुनरित्येतदङ्गप्रकरणात् * व्यापृतेनापि मनसेत्यादिस्मृत्या चोत्थानकाले योज्यम्। अत एव नात्माश्रयशङ्का। इदं च योगानुगुणवासनाप्रचयार्थं कषायापाकरणार्थं च। * बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरिति श्रौतनिर्वचनस्यास्पष्टार्थतया तदुपबृंहणं दर्शितमित्यभिप्रायेण स्मार्तोक्तिः। अत्र **भाष्यकारो** ब्रह्मनन्दिवाक्यव्याख्याता **द्रमिडाचार्यः**। तेनान्येषु श्रुतिरुदाहृता, अत्र तु स्मृतिः। अथ वाऽन्यत्र वाक्यकारेणैव श्रुतिरुदाहृता, अत्र तु भाष्यकारेणैव स्मृतिरिति। यद्यपि * यं यं वाऽपि स्मरन्निति प्रक्रमात् सदेत्यादिकं सामान्यम्; तथाऽपि * तस्मात्सर्वेषु कालेषु मामनुस्मर इत्युत्तरवाक्यानुसारेण प्रकृतार्थत्वात्तद्ग्रहः। पञ्चमहायज्ञोपादानं * गृहस्थोऽपि विमुच्यत इति स्मृतिसूचनार्थम्। आदिशब्देनाश्रमान्तरधर्माणामपि संग्रहः। यद्यपि काम्ये सकलाङ्गोपसंहारः प्रायः; तथाऽपि अत्र वचनाद्यथाशक्त्यनुष्ठानं पर्याप्तमित्यभिप्रायेण **शक्तित** इत्युक्तम्। * तद्धि कुर्वन् यथाशक्ति प्रामोति परमां गतिमिति हि स्मर्यते। * क्रियावानेष ब्रह्मविदां वरिष्ठ इत्यत्र सन्न्ययोगाभावेन कर्मणां विद्यान्वयस्फोट्यात् * विविदिषन्तीत्येतदपि नियमितम्। इदं च वाक्यं क्रियाया अङ्गत्वेन विद्यापौष्कल्यहेतुत्वपरम्; न तु निष्क्रियब्रह्मवित्सद्भावसूचकम्, यावज्जीवं क्रियानुवृत्तेरुक्तत्वात्। मत्वर्थीयस्य भूमपरतया विधुरादिब्रह्मविद्यावृत्तिपरं वा। तेषां हि वर्णधर्ममालयोगित्वादवरत्वम् * अतस्त्वितरज्यायो लिङ्गाच्चेति सूत्रसिद्धम्। अत्र * मन्त्रेषु कर्माणीत्यारभ्य * तान्याचरत नियतं सत्यकामा इति श्रुतिरप्यनुसन्धेया। क्रियाशब्दस्य चित्तसमाधानादिमात्रपरत्वव्यावृत्त्यै * तमेतमित्याद्युपात्तम्। **अनाशकेन**—अनशनेन। अत्र गोबलीवर्दनयात्तपशब्दसङ्कोचः। यद्वा नाशकादन्येनेति; यज्ञाद्यपि भोगार्थं चेत् संसारात्मकनाशप्रदमेव श्रुत्यादिसिद्धम्। भूतहितं यथार्थं च वाक्यं सत्यम्। आर्जवम्—करणत्रयस्यैकरूप्यम्। दया—स्वार्थनिरपेक्षा परदुःखनिराचिकीर्षा। दानम्—न्यायसिद्धद्रव्यस्य यथाविधि पात्रसात्करणम्। तेन लोभनिवृत्तिर्व्यज्यते। * दैप् शोधने इति धातौ स्वपक्षादिशोधनं वा। * दो अवखण्डने इत्यत्र पराहङ्कारखण्डनं वा, * निगृहीतबाह्यशक्ति दैवतानुग्र-

निन्दकानिति स्मृतेः * न विगृह्य कथां कुर्यादित्यस्य कामकारविषयत्वात्। अशास्त्रीयप्राणिपीडावर्जनमत्राहिंसा; * अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य इति स्थापनात्। अभिध्या—परप्रतिकूलचिन्ता; अभिचारादौ त्वभिः प्रातिकूल्यार्थः, परकृतद्रोहे निरन्तरस्मृतिर्वा, वितथाभिनिवेशो वा, परस्वे ग्राह्यत्वधीर्वा; तन्निवृत्तिरनभिध्या। एवं कतिपयोपादानमार्जवदयादिसहपठितानामन्येषामप्युपलक्षणम्। इत्यादीत्यनेन * अमानित्वमदम्भित्वं * दया सर्वेषु भूतेषु, क्षान्तिरनसूया इत्यादेः संग्रहः। अनवसादः अर्थात् सिध्येदिति कृत्वा सहेतुकं तत्प्रतियोगिस्वरूपविषयं वाक्यमुपादत्ते—देश इति। शोकनिमित्तं वस्तु शोकवस्तु; शोचत्यनेनेति करणव्युत्पत्त्या वा शोकशब्दः। आदिशब्दो भीतिहेतुपरः, भूतभाव्यनिष्ठगोचरधीरूपे दुःखे शोकभये। वैगुण्यात् अनुस्मृतेश्चेत्यनयोर्मनसोऽभास्वरत्वमित्यनेनान्वयः। अभास्वरत्वम्—भास्वरत्वाभावः तद्विरोधि वा। तज्जनितं तदभास्वरत्वम्। तत्स्वरूपाभिव्यक्त्यै तद्विवरणवाक्यस्याकाङ्क्षायां मध्ये * तज्जं दैन्यमिति वाक्यान्तरम्। तस्यां जातं तस्मिन्मनसि वा जातमभास्वरत्वं दैन्यम्, उपयुक्तप्रकाशनाशक्तत्वमित्यर्थः। यद्वा मनसो यदभास्वरत्वं, यच्च तज्जं दैन्यं तदुभयमवसाद इति योज्यम्। तजम्—तादृशदयाविशेषाज्जातमित्यर्थः। अस्ति हि पुंसां परदुःखदुःखित्वादि भास्वरत्वविरोधि मनसो दैन्यम्, तज्जं च शोकादिकमिति वा नेयम्। भास्वरत्वमिह प्रकाशकत्वम्; तदभावः। * तज्जं च दैन्यमवसाद इत्यत्र * तद्विपर्ययोऽनवसाद इति वाक्यशेषो भाष्योक्तः, वाक्ये तु शिष्याणामूहशक्तिसंपत्त्यै तदनुक्तिः। बलहीनेन— * समदुःखसुखं धीरमित्युक्तमनोबलरहितेनेत्यर्थः। तद्विपर्ययजा— देशादिगुणैर्भूतभाविसुखहेतुधिया बन्धुसुखेन च जातेत्यर्थः। उद्धर्षोक्तावपि पूर्ववत्तद्विपर्ययोऽनुद्धर्ष इति ऊह्यत्वाद्वाक्यानुक्तं भाष्ये दर्शितम्। * यदृच्छालाभसंतुष्टः, * संतुष्टः सततं योगी, * स्वाध्यायशौचसंतोष इत्यादिविरोधमाशङ्क्याह — अतिमन्तोष इति। असंतोषवदतिसंतोषोऽपि विषयान्तरेष्वपि प्रवर्तकतया विरोधीत्यर्थः। इदं चोद्धर्ष इत्युपसर्गेण सूचितम्। * ऐश्वर्यमदमत्तो हीत्यादिषु तत्तद्वृत्तान्तेषु चास्य विरोधित्वं प्रसिद्धम्। निर्वचनमपीत्यत्रापिशब्दस्संभवसमुच्चयार्थः पूर्वनिर्वचनेष्वपि भाव्यः। प्रकृतं कर्मणामुपयोगं निवृत्त्यंशेन तेषामविरोधेन निवेशनं च सूत्रवाक्याभिप्रेतन्यायसमाहारसिद्धं निगमयति—एवमिति। एवकारेण परानिष्टत्वं द्योत्यते। तत्त्वमस्यादिवाक्यानि वा व्यवच्छिद्यन्ते। तदिह कर्मणः अनुपयोगविरोधप्रमाणाभावा निरस्ताः।

तथा च श्रुत्यन्तरम्— * विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति। अत्राविद्याशब्दाभिहितं वर्णाश्रमविहितं कर्म। अविद्यया—कर्मणा, मृत्युं—ज्ञानोत्पत्तिविरोधि प्राचीनं कर्म, तीर्त्वा—अपोह्य, विद्यया—ज्ञानेन, अमृतं—ब्रह्म, अश्नुते—प्राप्नोतीत्यर्थः।

अथ मृषावादिना समुच्चयवादिभ्यां चान्यथा व्याख्याता श्रुतिरस्मदुक्तप्रकारमेव व्यनक्तीत्याह— तथेति। चोऽवधारणे। श्रुत्यन्तरं च तथेति वाऽन्वयः। अन्तरशब्दः सन्नित्ययरहितत्वेन स्फुटार्थत्वादज्ञानमज्ञिनिष्पादने द्वारप्रदर्शनात् कर्मणां विध्यन्तानां कण्ठोक्तवेदनकरणकफलभावनानिष्ठतया परमपुरुषार्थविश्रान्तिबोधनाच्च प्रागुक्तवाक्याद्विशेषं व्यनक्ति। विद्यां चेत्यादेः परविद्यां तदङ्गभूतां कर्मरूपाविद्यां चानुष्ठेयत्वेन शास्त्रतो यो वेदेत्यर्थः। चकारा-

वक्ष्योक्तसमुच्चयार्थौ । तयोरनुक्तद्योतकत्वे तु तत्तदितिकर्तव्यताविशेषयोरेव विद्याफलयोर्निवर्त्ययोश्च प्राप्त्युपायविरोधिनोर्ग्रहणम् । उभयं सहेत्यवाङ्मात्रितया तृतीयाध्याये साधयिष्यमाणयोरनुष्ठेययोर्बुद्ध्यारोहणे साहित्यमभिप्रेतम्; न तु समकालतयोपादेयत्वे । वेद्यत्वे हि सहभाव उच्यते; न तु सहिततया वेदनम् । न ह्युत्पत्तिदशायां विरोधिनिरासदशायां च विद्याकर्मणोः सहत्वसंभवः । अत्र * अन्धं तमः प्रविशन्तीत्यादिना * ततो भूय इव ते तमः इत्यादिना च प्रत्येकनिन्दापरत्वम् । चकारः सहशब्दश्च समसमुच्चयस्थापकाविति न भ्रमितव्यम्, तेषामन्यथासिद्धत्वात् । * य उ विद्यायाꣳ रता इति कर्मानादरेण विद्योत्पत्त्यर्थोत्साहवन्त इत्यर्थः । कर्मनिरतानां विद्यानिरपेक्षकर्मस्वरूपं तावद्विप्पद्यत एव; न तु तावन्मात्रेण मुक्तिः; विद्यानिरतानां हेत्वभावाद्विद्यैव न संभवति, कुतस्तरां मुक्तिरिति भूयश्शब्दाभिप्रायः । अविद्याशब्दस्यात्र कर्मविषयत्वं प्रकरणेन स्थापयति— अत्रेति । न तु सर्वत्र; * अविद्यायामन्तरे वर्तमानाः, * क्षरं त्वविद्या, * अनात्मन्यात्मबुद्धिर्यैत्यादिषु अर्थान्तरे प्रयोगात् । इह तु * आत्मन्येवानुपश्यति, * कुर्वन्नेवेह कर्माणीत्यादिना विद्या तदङ्गं कर्म च प्रकृतम्; तदेवात्राविद्याशब्देन विद्योपयोगज्ञापनार्थमनूदितम् । परव्याख्यायां व्याख्यातौ संशयविपर्ययौ छेत्तुं पदार्थवाक्यार्थौ स्पष्टयति— अविद्ययेति । पापस्यानर्थहेतुतया अवयवशक्त्या गौण्या वा मृत्युशब्दवाच्यत्वाय, यज्ञादेर्विविदिषोत्पत्तिविरोधिनिवर्तकत्वव्युदासाय, चोदितज्ञाननिवर्त्यतया श्रुतिस्मृतिशतसिद्धप्राप्तिविरोधिव्यावृत्त्यै च ज्ञानोत्पत्तिविरोधित्वोक्तिः । यादवप्रकाशीयनिर्वाहोऽप्येतेन निरस्तः । यद्यत्र मृत्युतरणं मुक्तिरेव, कथं विद्ययाऽन्यत्साध्यं स्यात् । कृत्वाश्रुतिश्च न घटते; स्वापेक्षया स्वस्य पूर्वत्वायोगात् ।

धीसङ्कोचनिवृत्तिश्चेदविद्याख्येन कर्मणा । धीविकासोऽपि मैवेति न साध्यान्तरसंभवः ॥ ३२१ ॥
प्रतिबन्धनिगमश्च साध्यते चेदविद्यया । अमृतावाप्तिः स्वतस्सिध्येन्नादृष्टान्तरकाङ्क्षिणी ॥ ३२२ ॥
स्वतः स्वानुभवाधानप्रवणः प्राणिनां प्रभुः । प्रशान्तप्रतिबन्धानां निरपेक्षं हि कारणम् ॥ ३२३ ॥

मृत्युशब्दस्य साधारण्यसंभवेऽपि * तमेव विदित्वाति मृत्युमेतीत्यादिस्पष्टार्थबहुश्रुतिस्मृतिबलेन विद्यानिवर्त्यप्राप्तिविरोधिविषयत्वासंभवात्, तत्र च * नान्यः पन्था इति साधनान्तरप्रतिषेधेन कर्मणो विमुक्तिसाधनत्वेन समुच्चेतव्यत्वायोगात्, कर्मणः श्रुत्यादिभिरेव विद्यासाधनत्वस्थापनादिहोपायविरोधिनि कर्मण्येव वृत्तिः । विद्याया इव कर्मणः उत्तराघविरोधित्वाभावात् प्राचीनग्रहणम् । तीर्त्वेत्यस्य स्वरसार्थं त्यक्त्वा प्राप्य स्थित इति परोक्तं क्लिष्टत्वादध्याहाराच्चायुक्तम् । यज्ञादिसत्कर्मणां विविदिषाविरोधितया मृत्युशब्दवाच्यं कर्म तीर्त्वेति गमनिकाऽपि विविदिषार्थविनियोगप्रतिषेधात्त्यक्ता । * एतं सेतुमित्यादिषु गत्यभावाच्चरतेः प्राप्तिवचनत्वमित्यभिप्रायेण अपोह्येत्युक्तम् । विद्याशब्दस्य शास्त्रादिष्वपि प्रयोगादिह प्रकृतब्रह्मवेदनविषयत्वं व्यनक्ति—ज्ञानेनेति । * एतदमृतम्, * एतदभयम्, * एतद्ब्रह्म, * ब्रह्मविदाप्नोति परमित्यादिश्रुत्यनुसारेणाह— अमृतं ब्रह्मेति । ननु पूर्वम् * अविद्यानिवृत्तिरेव मोक्षः सा च ब्रह्मविज्ञानादेव भवतीति परोक्तमभ्युपगतम्; इह तु * ब्रह्मविदाप्नोतीत्युक्त्या अस्यां श्रुतौ साध्यान्तरं स्वीकृतमिति भाति; मैवम्, अविद्यानिवृत्तिशब्देन ज्ञानसङ्कोचनिवृत्तेः विवक्षितत्वेन भावान्तराभावनयेन सैव ब्रह्मप्राप्तिरिति समानार्थत्वात् । मोक्षशब्दस्वारस्यानुरोधात् * अविद्या कर्मसंज्ञेत्युक्तबन्धककर्मनिवृत्तिविवक्षायां तु तावन्मात्रमेवोपासनसाध्यम् । धीसङ्कोचहेतुनिवृत्तौसेतुभङ्गस्रोतःप्रवृत्तिनीत्या तादृशेश्वरसंकल्पेन स्वतः प्राप्तो धीविकासः । अतः * विद्ययाऽमृतमश्नुत इत्यनेन प्रतिबन्धनिवृत्तौ विद्यातः सिद्धायां स्वतस्सेत्स्यन्ती ब्रह्मानुभूतिरुच्यत इति न पूर्वापरविरोधः । ब्रह्मप्राप्तेश्च परम-

पुरुषार्थतया काम्यमानत्वेऽपि तत्प्रतिबन्धकनिवृत्त्युपायस्य काम्यवर्गात्पृथगेव व्यपदेशः ।

प्राप्तितत्साधनानां हि प्रतिबन्धनिवर्तकाः । निवृत्तिधर्माः सर्वेऽपि नैमित्तिकपदे स्थिताः ॥ ३२४

अत्र करणविभक्त्यन्तकर्मज्ञानशब्दाभ्यां * कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः, * कषाये कर्ममिः पक्वे ततो ज्ञानं प्रवर्तत इति स्पष्टार्थोपबृंहणार्थः सूच्यते । तेन च मृत्युशब्दस्यात्रोपायविरोधिविषयत्वं वेदानुवचनादीनां * विविदिषन्तीत्यत्र प्रकृत्यर्थेनान्वयः समुच्चयवादनिरासश्च सिध्येत् । कषायस्य पापस्य तज्जन्यरागादेर्वा । पक्तिः, पच्यतेऽनेनेति पाकनिमित्तम् , गम्यतेऽनेनेति गतिः । ततो ज्ञानम्—न तु विविदिषा, नापि मुक्तिः । प्रवर्तते—उचितविषये प्रकृष्टवृत्तिमद्भवतीत्यर्थः ।

मृत्युतरणोपायतया प्रतीता अविद्या विद्येतरत् विहितं कर्मैव । यथोक्तम्—

* इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः । ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ॥ इति ।

आस्तां प्रकरणम् । अस्मिन्नेव वाक्ये कर्मणां विद्याङ्गत्वे साधारणानामविद्यादिशब्दानामस्मदुक्तपदार्थनियमे च निर्बाधः स्वारस्यप्राप्तो वस्तुसामर्थ्यरूपो हेतुर्लक्ष्य इत्यभिप्रायेणाह—**मृत्युतरणे**ति । **प्रतीते**ति हेतुगर्भम् । **विद्येतरदि**त्येतत् अत्रत्याविद्याशब्दनिरुक्तिः । अत्राह्मणादिशब्दनयात्तदन्यवृत्तौ प्रकरणस्थासन्नविषयत्वं युक्तमित्यभिप्रायेण **विहितं कर्मे**त्युक्तम् । न त्वविहितं कर्म, नापि ब्रह्मज्ञानादिकमिति पदद्वयान्वितावधारणाभिप्रायः । एतेन * कुर्वन्नेवेह कर्माणीत्यत्र कर्मशब्दः साधारणोऽपि उचितविषये नियमितः ; न हि काम्यादिकं यावज्जीवमनुष्ठेयम् । उक्तश्रुतेरुपबृंहणेन स्वोक्तौ पदार्थवाक्यार्थौ स्थिरीकृतावित्याह—**यथोक्तमि**ति । **ज्ञानव्यपाश्रयः**—आगमोत्थज्ञाने प्रतिष्ठितः । **ब्रह्मविद्यामधिष्ठाय**—विवेकादिजन्यां परविद्यां भक्तिरूपापन्नां निष्पाद्यत्वेनाभिसंधायेत्यर्थः । * आगमोत्थं विवेकाच्चेति प्रस्तुतं ज्ञानद्वयमेव ह्यत्र स्पष्टीकृतम् । अत एव मृत्युशब्दस्यात्र विविदिषाविरोधित्वं चायुक्तम् ; तस्याः साध्यत्वेनानुपादानात् । * ब्रह्मविद्यामधिष्ठायेत्यनेनैव विविदिषानिष्पत्तेरर्थसिद्धत्वाच्च । तर्तुं मृत्युमिति प्रयोजनवचनेन * तीर्त्वेत्यस्य प्राप्त्यर्थत्वशङ्का च निरस्ता । उपबृंहणीयश्रौतपदसूचकाविद्याशब्दोक्तमेव च यज्ञशब्देन व्यञ्जितम् । **यज्ञान् इयाज**—चकारेत्यर्थः ।

ज्ञानविरोधि च कर्म पुण्यपापरूपम् । ब्रह्मज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतयोभयोरपि पापशब्दाभिधेयत्वम् । अस्य च ज्ञानविरोधित्वं ज्ञानोत्पत्तिहेतुभूतशुद्धसत्त्वविरोधिरजस्तमोविवृद्धिद्वारेण । पापस्य च ज्ञानोदयविरोधित्वम् * एष एवासाधु कर्म कारयति तं यमधो निर्नीषतीति श्रुत्याऽवगम्यते । रजस्तमसोर्यथार्थज्ञानावरणत्वम् , सत्त्वस्य च यथार्थज्ञानहेतुत्वं भगवतैव प्रतिपादितम्— * सत्त्वात्संजायते ज्ञानमित्यादिना । अतश्च ज्ञानोत्पत्तये पापं कर्म निरसनीयम् । तन्निरसनं चानभिसंहितफलेनानुष्ठितेन कर्मणा । तथा च श्रुतिः— * धर्मेण पापमपनुदतीति ।

ननु धर्मेण पापस्यैवापनोद्यत्वं श्रुतम्, अत्रतु प्राचीनं कर्मेत्यविशेषेण पुण्यस्यापि तरणं कथं भाषितमित्यत्र वक्ष्यमाणश्रुतावपनोद्यतयोर्नं शोधयति—**ज्ञानेति**। पुण्यस्य कथं धर्मापनोद्यत्वं, पापशब्दवाच्यत्वं चेत्यत्राह—**ब्रह्मेति**। **उभयोरिति** विगीताविगीतसंवलितत्वोक्तिर्निदर्शनपरा। अत्र **अभिधेयत्वम्**— बोध्यत्वम्। * **लक्ष्येदिति** विवरणोक्तिर्वैभवात्। अयं भावः—* स एव धर्मस्सोऽधर्मस्तं तं प्रति नरं भवेदित्यादि स्मर्यते। अतः पुण्यामिसन्धिप्रसिद्धमपि मुमुक्षुदशायां पापायते।

मुमुक्षुत्वामुमुक्षुत्वदशाभेदेन कर्मिणः। कर्मैकं पापपुण्यत्वे साध्यैक्येऽपि समश्नुते ॥ ३२५ ॥
श्येनादेश्चोदितस्यैव द्वैरूप्यं द्विविधश्रुतेः। एकस्यैवैकदैवास्ति कालभेदे तु किं पुनः ॥ ३२६ ॥

प्रकृष्टसुखरूपस्वर्गैकसाधनं पुण्यमपि ह्यन्तरायनिरयशब्दनिन्दितस्वफलसङ्गार्थसिद्धयै निरुपाधिकसुखरूपब्रह्मज्ञानं प्रतिरुणद्धि; अतः प्रवृत्तिधर्मस्य निवृत्तिधर्मेणापनोद्यत्वं युज्यते। पापलक्षणं च कर्तुरनिष्टफलसाधनत्वेन शास्त्रवेद्यत्वम्; * नैतꣳ सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतम्। सर्वे पाप्मानोऽतो निवर्तन्त इति श्रुतौ च निगमनस्थस्य पाप्मशब्दस्य शोकादिषु लाक्षणिकत्वेऽपि सुकृतदुष्कृतयोर्निमित्तसंभवान्मुख्यत्वमेव ग्राह्यम्। छत्रिन्यायेन सर्वत्र लक्षणावृत्त्यैक्यपक्षेऽपि तारतम्यमस्ति। न च सुकृतदुष्कृतशब्दयोरिव दुष्कृतपाप्मशब्दयोरहि गोबलीवर्दन्यायात् पाप्मशब्दस्य दुष्कृतविशेषपरत्वं शङ्क्यम्; उभयोरपि व्याप्तित्वेन हयतुरङ्गशब्दयोरिव तदयोगात्; सर्वशब्दविशेषणवैयर्थ्यं च। * अपहतपाप्मा ह्येष ब्रह्मलोक इत्यनन्तरवाक्यं च प्रकृतसर्वहेयनिवृत्तिप्रख्यापने स्वरसम्। तदिह पूर्वापरपाप्मशब्दयोरसङ्कोचेन समानार्थत्वमेव युक्तम्। एवं सति पुण्यविशेषे पापशब्दः प्रवृत्तिनिमित्तैक्यात् घटत इति। ननु रजस्तमसोर्ज्ञानविरोधित्वमिष्टम्; तत् किं पापेन सह समुच्चयतः, विकल्पतः, कारणान्तरेण वेति नियामकाभावात्पापस्य ज्ञानविरोधित्वं दुरवधारणम्; अतो दुःखसाधनत्वमेव तस्येत्यत्राह—**अस्येति**। शुद्धसत्त्वमिहामिभूतरजस्तमस्कमुपयुक्तप्रकाशादिजनकं सत्त्वम्। ज्ञानोत्पत्तिदशायामपि पुंसां त्रैगुण्यानुवृत्त्या तदाननगुणान्तराभ्यां विशेषव्यर्थ्यं विवृद्धिशब्दः। * कर्मवश्या गुणा इत्यादिभिः गुणानां तद्द्वारत्वसिद्धिः, पापस्य दुःखसाधनत्वं च नान्यव्यवच्छेदेनेति भावः। द्वयोरपि ज्ञानविरोधित्वे मानाभावे कथं द्वारद्वारित्वकल्पनमित्यत्र द्वारिणस्तावद्विरोधित्वे मानमाह—**पापस्येति**। * एष एवेत्यादिश्रुतौ न तावत् ॐ अधो निनीषतीत्येतन्निरयादिनिनीषार्थम्; अत्रोन्निनीषायाः स्वर्गादिविषयत्वाभावात्। * यमेभ्यो लोकेभ्य उन्निनीषतीत्यत्र स्वर्गादिसर्वलोकेभ्यो ह्युन्नयनं स्वरसतः प्रतीयते। अतोऽपवर्गप्रापणप्रतिपक्षभूताधोनयनार्थमिहासाधुकर्म तत्साधनविरुद्धमेव स्यात्; तत्साधनं चात्र * मामुपास्वेत्यादिविहितम्। तस्य चोपक्रमे *यं त्वं मनुष्याय हिततमं मन्यस इति हिततमत्वमव्यवहितमोक्षोपायत्वं सिद्धम्। तदेवात्र सन्निधिबलात् साधारणेनापि साधुकर्मशब्देन गृह्यते। तत्कारयितृत्वं च * ददामि बुद्धियोगं तमित्यादिभिर्विशेषतोऽप्युक्तम्। * तस्य चोत्पत्तिप्रतिबन्धकत्वेन विरुद्धं कर्म भगवद्वैमुख्यापादनं कर्म; तत्सांमुख्येऽधोगतिप्रसङ्गाभावात्। असाधुकर्मणश्चाधोगतिनिदानत्वम् * तानहं द्विषतः क्रूरानित्यारभ्य * ततो यान्त्यधमां गतिमित्यन्तेन स्फुटीकृतम्। यद्वा साधुकर्मशब्द इह प्रस्तुतोपायाकाङ्क्षिताङ्गपरः। न चात्र कर्मण उन्नयनशब्दोदितमुक्त्युपायत्वम् अद्वारकम्; श्रुत्यादिभिस्तद्वारकत्वस्थापनात्। अतो विद्याङ्गकर्मप्रतिकोटिस्थमसाधुकर्मात्र विद्योत्पत्तिविरुद्धमेव। किं च साध्वसाधुकर्मकारयितृत्वमिह न प्राचीनजीवकर्मनिरपेक्षम्; वैषम्यनैर्घृण्यप्रसङ्गात्। न च मेघोदकादिवत्

मेरकत्वम्; शास्त्रवैयर्थ्यादिप्रसङ्गात्, बुद्धिप्रदानादिवचनविरोधाच्च। अतः * यमधो निनीषतीति यद्भूतेन कर्त्रभिदनुवादोऽधोनिनीषाहेतुभूतपापकारित्वं व्यनक्ति। पूर्वपापे चोत्तरपापारंभे ज्ञानलोपः तन्मूलविपरीतज्ञानं च द्वारम्। तथा चोपबृंहितम्— * यस्मै देवाः प्रयच्छन्ति, * पापं प्रज्ञां नाशयतीत्यादिभिः। सर्वदेवेषु सर्वपापेषु च सामान्योक्तमपि प्रकृतेऽप्यकुण्ठितम्। विशेषतश्च गीयते— * क्षिपाम्यजस्रमित्यादि। अतः पापस्य ज्ञानोदय-विरोधित्वं सिद्धम्। ननु श्रुतेन द्विविधेन पापेनैव ज्ञानं निरुध्यताम्, निवृत्तिधर्मेण चोत्पद्यताम्; अलमुभयत्र प्रकृति-गुणैर्द्वारीकृतैरित्यत्राह—रज इति। * सत्त्वस्येत्युपादानमिह रजस्तमसोर्व्यतिरेकव्याप्त्या च ज्ञानहेतुत्वनिश्चयार्थं साधु-कर्मद्वारप्रदर्शनार्थं ज्ञानोत्पत्तिहेतुभूतशुद्धसत्त्वेत्युक्तस्थापनार्थं च। श्रुतिस्मृतिप्रमितान्यतरत्यागस्य सति गत्यन्तरे विकल्पस्य चायोगात् द्वारद्वारित्वमेवात्र युक्तमिति भावः। ननु * रजसो लोभ इत्यनेनान्यथाधीहेतुत्वमपि सिद्धम्, आप्तविषयलोभस्य भ्रान्तिहेतुत्वात्; * यया धर्ममधर्मं चेत्यादिना तद्व्यक्तम्। ❀ नाभुक्तं क्षीयते कर्मेत्यादिस्मृत्या कर्मफलभोगावसाने ज्ञानं साध्यतां, धर्मस्य च धृतिशब्दार्थसुखसाधनत्वमेव प्राप्तमिति शङ्कापनुत्त्यै निष्कृतिशास्त्रविनि-योगपृथक्त्वाभ्यां सिद्धं निरास्यनिरासकस्वभावं निर्धारयन्नुक्तमर्थद्वयं निगमयति— अत इति। निरसनीयम्— अनन्तेषु पापेषु संतन्यमानेषु न कदाचिदपि भोगेन निश्शेषशान्त्यवसरः; अतश्शास्त्रोक्तनिष्कृत्यैव तन्निरासः कार्य इति भावः। तथाऽप्यपरिमितानां निष्कृतिरप्यशक्येत्यत्राह— तदिति। • स्वल्पमप्यस्य धर्मस्येत्यादिन्यायेन फलान्तरसङ्गरहितनिवृत्तिधर्ममाहात्म्यात्तन्निवर्तनं शक्यमित्याशयः। * य उ चैनमेवं वेदेत्यादिषु शास्त्रार्थवेदने फलश्रुतिः प्रशंसार्था, परंपरया वा स्यात्, अधिकारिभेदेन वा। अतः अनुष्ठानं प्रधानम्; तत्परित्यागिनां तु कारणाभावात्

इत्यभिप्रायेणोक्तम्— अनुष्ठितेनेति। उपात्तश्रुतिगतानामविद्यादिशब्दानां स्वेष्टार्थत्वं, पापस्य भोगेन विनाऽपि निवर्त्यत्वं च स्पष्टयन्ती श्रुतिमुदाहरति— तथेति। तत्र धर्मशब्दः प्रायश्चित्तमात्रविषयोऽप्यविशेषान्निवृत्ति-धर्ममपि गृह्णाति, * विज्ञानादानन्दो ब्रह्मयोनिरित्यादिना ब्रह्मविद्यासन्निधानात्। सहपठितदानादिषु प्रतीतानि द्विष-कारणफलान्तराण्यपि ब्रह्मविद्यानिष्पत्त्यनुगुणान्येव। अङ्गिफलं चात्र • भूयो न मृत्युमुपयाहि विद्वानिति प्रस्फुटम्। निवृत्तिधर्मेण सांसारिकपुण्यपापयोः द्वयोरपि पापशब्दोक्तयोर्निवर्त्यत्वं सिध्येदिति।

तदेवं ब्रह्मप्राप्तिसाध[नभूतं]नं ज्ञानं सर्वाश्रमकर्मापेक्षम्। अतोऽपेक्षितकर्मस्वरूपज्ञानं कवल[णामल्पास्थिरफलत्वज्ञानं च कर्ममीमांसावसेयमिति सैवापेक्षिता ब्रह्मजिज्ञासायाः पूर्ववृत्ता वक्तव्या।

एतावता किमायातमित्यत्र तन्मूलमुपासनात्मकं ज्ञानमित्यनेनाभिप्रेतं कर्मसापेक्षत्वं निरूढमित्याह— तदिति। तत्—उक्तश्रुतिस्मृतिसूत्रोपपत्तिसंप्रदायबलात्। एवम्— निष्कामकर्मणां ब्रह्मविद्याप्रतिबन्धनिरासकत्वप्रकारेण। अस्त्वेवं विचार्यस्योपासनस्य स्वाङ्गकर्मापेक्षा। तद्विचारस्य कृत्स्नकर्मविचारापेक्षा कथमित्यत्र स्थापितमर्थं निगमनेन स्थिर-यति—अत इति। मुक्तिसाधनविद्याया निवृत्तिधर्मनैरपेक्ष्यायोगात् इत्यर्थः। अपेक्षितकर्मस्वरूपज्ञानमित्यनेन मुख्यव्यवहारेण गीतादिवत्कर्ममीमांसया यज्ञादिपदार्थानां सेतिकर्तव्यताकानां विशेषतो वेदितव्यतया विधिविनियोज्य-तावच्छेदकेषु विनियोगे नागृहीतविशेषणन्यायतः स्वाङ्गसाध्यस्य फलसाधनतया तत्स्वरूपान्वितस्यैव बुभुत्सितत्वम्,

अचिन्तितेऽप्युपासने कर्मणश्चिन्तयितुं शक्यत्वं च सूच्यते। विद्यानङ्गकर्मनिन्दया विद्याप्ररोचनं च तादृशकर्मज्ञानापेक्षमित्यभिप्रायेण केवल इत्यादिकमुक्तम्। अवसेयम्——साध्यमिति यावत्। मीमांसा अत्र विचारः। त्याज्योपादेयसहितोपासनशास्त्रार्थं विचारयतामवश्यंभाविनस्तदुभयस्वरूपनिश्चयस्य कर्ममीमांसासाध्यतया अत्र अपेक्षिता त्वदनिष्टावृत्तत्वेन वक्तुं युक्तेत्यभिप्रायेण सैवेत्युक्तम्। अन्ततः कर्मपरीक्षासापेक्षा तापत्रयवृत्ततोक्तिश्चानेन निरस्ता। साधनचतुष्टयस्य वा व्युदास एवकारेणोपक्षिप्यते।

अपि च नित्यानित्यवस्तुविवेकादयश्च मीमांसाश्रवणमन्तरेण न संपत्स्यन्ते, फलकरणेतिकर्तव्यताधिकारिविशेषनिश्चयादृते कर्मस्वरूपतत्फलतत्स्थिरत्वास्थिरत्वात्मनित्यत्वादीनां दुरवबोधत्वात्। एषां साधनत्वं च विनियोगावसेयम्, विनियोगश्च श्रुतिलिङ्गादिभ्यः, स च तार्तीयः।

न केवलमस्मदुक्तस्य युक्तत्वमात्रम्; त्वदुक्तस्य दोषोऽप्यस्तीत्यभिप्रायेणाह—— **अपि चेति**। तत्रान्योन्याश्रयमुद्घाटयति—— **नित्येति**। चस्त्वर्थो वर्तिष्यमाणस्य वृत्तावैपरीत्यद्योतकः। **मीमांसाशब्दोऽत्र** भागद्वयार्थः; आत्मनित्यतामुपादानात्। **श्रवणशब्दश्च** विचारपर्यन्तः। अयं भावः—— किमत्र विवेकशब्देन निश्चयो विवक्षितः, आपातधीर्वा? नाद्यः, कृत्स्नमीमांसासाध्यस्य ब्रह्मविचारापेक्षया पूर्ववृत्तत्वायोगात्; आत्मनित्यत्वादिकं ब्रह्मकाण्डे हि निरूपयिष्यते। न द्वितीयः, तस्याः कर्मब्रह्मकाण्डसाधारणत्वेन विशेषतोऽत्र वक्तुमयुक्तत्वात् प्रथमातिक्रमे कारणाभावस्य चोक्तत्वात्। न च सा फलान्तरवैराग्यादेर्हेतुः; उभयत्राभृतत्वाद्यापातधीसिद्धेः। न च कपिलकणादादितन्त्रैर्विवेकः; अध्ययनादिक्रमेण तदवसरनिरोधोक्तेः तेषु च बहुधा निःश्रेयसतत्साधनादौ विवेकवैपरीत्यस्य त्वयाऽपि संमतत्वात्। अत एव हि निरसिष्यन्ते। * नित्यं हि नास्ति जगतीत्याद्युपबृंहणं तु श्रुतिमनुरुध्यैव विवेकार्थं स्यात्। न तु स्वातन्त्र्येण; अन्यथा किं शारीरकेण? ततोऽन्यत्र संशयादिसंभवादिति चेत्, तर्हि तत्र न विवेकसिद्धिः। यत्त्वत्र वाचस्पतिनोक्तम्—— * नित्यानित्ययोर्वस्तीति नित्यानित्यवस्तु तद्धर्माः, नित्यानित्ययोर्धर्मिणोस्तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेक इत्यारभ्य, * नित्यत्वं सत्यत्वं तद्यस्यास्ति तन्नित्यं सत्यं, तथा चास्थागोचरः। अनित्यत्वमसत्यत्वं, तद्यस्यास्ति तदनित्यमनृतम्; तथा चानास्थागोचर इति; यदृतं तन्नित्यं सुखं व्यवस्थाप्यते, तदास्थागोचरो भविष्यति, यत्त्वनित्यमनृतं भविष्यति, तापत्रयपरीतं तत्त्यक्ष्यत इति सोऽयं नित्यानित्यवस्तुविवेक इति च। एतदपि मन्दम्—— अनित्यस्याप्यबाधितत्वेन सत्यत्वस्य स्थापयिष्यमाणत्वात्। न च नित्यं सुखमनुपादेयमिति धिया कर्मिणां कर्मविचारादौ प्रवृत्तिः; किं तु तस्य कर्मसाध्यत्वभ्रमाद्वा दौर्लभ्यबुद्ध्या वा। किं च नित्यत्वादिमात्रं नास्थागोचरत्वादिनिदानम्। पुरुषार्थतत्साधनत्वाभ्यामेव साऽऽस्था, तद्वैपरीत्याच्चानास्था। ते च नित्यानित्ये च यथार्हे स्याताम्। निरूपकस्यापि ह्यनित्यसुखत्यागः * अशक्यानि दुरन्तानि समव्ययफलानि चेति न्यायात्, अधिकसुखलाभतृप्त्या वा स्यात्। तदभावे अत्यल्पमपि सुखमुपादीयते। नित्यमपि यदि दुःखात्मकमनुभयरूपं वा, कथमास्थार्हम्? प्रकृतस्य प्रकृष्टसुखत्वेन प्रतीतत्वादिति चेत्; तत्प्रतीतिस्तावत्र व्याप्त्या, अदृष्टेः। न च श्रुत्या, तन्मूलपातिव्यत्साधारण्यादिदौस्थ्यात् निश्चयस्य तु मिथस्संश्रयस्तत्वात् तन्त्रान्तरस्मृत्योश्चा-

साधकत्वस्य दर्शितत्वात् । नित्यसुखसंभवमूलोपादित्सा च साधारणी । तन्त्रान्तरे तदसंभवश्च मुख्यः । * आनन्दो ब्रह्मेत्यादिरमीमांसितकर्मब्रह्मभागैर्दुर्बोधः, प्रमाणाध्याये तर्कपादे च तन्निरासात् । तत एवाद्याधसूत्रेऽन्यत्र च नित्यफलासंभवः प्रकृतोपयोगात् प्रतिष्ठाप्यत इत्यपि दुर्वचम्, युष्माभिरेवं सूत्रवाक्यार्थानुक्तेश्च । अपि च नित्यसुखस्यात्र संभावनामात्रम् । स्वर्गादिसुखस्यानित्यत्वं च न शास्त्रान्तरेणानुमानेन वा सिध्येत्, ताभ्यामेव वैपरीत्यस्यापि सुवचत्वात्, स्वर्गसुखमनित्यं सुखत्वादित्यादेरमृतत्वादिश्रुतिबाधात् । तदान्यपर्यस्य तन्निरूपणसापेक्षत्वात्; अन्यथा मुक्तसुखमनित्यं सुखत्वादित्यादेरपि प्रसक्तेः । तदप्रसक्तिश्च त्रय्यन्तनिर्णयात्, स च तयेति मिथस्संश्रयः । अतः कर्मविचार एवात्रापेक्ष्यः । शमदमादीनां साधनत्वविवेकः तत्स्वरूपमात्रं वा वृत्तमित्युच्यते, न पूर्वः, तस्य * शमदमाद्युपेतः स्यादिति साधनलक्षणे निष्पाद्यत्वात् । नोत्तरः, तत्र श्रवणौपयिकावधानादिमात्ररूपाणां सर्वशास्त्रसाधारण्येन विशेषतोऽत्र वक्तुमयुक्तत्वात् । योगौपयिकानां तु बाह्यान्तःकरणनिरोधादिरूपाणां त्रय्यन्तार्थश्रवणात् पूर्वमयुक्तेः, * तस्मादेवंविच्छान्तो दान्त इति ब्रह्मधीपूर्वकत्वोक्तेश्च । किं च नित्यानित्यविवेकादयः किं हेतुसाध्यरूपेण स्थिताः, अन्यथा वा ? आद्ये कर्मविचारोऽपि * परीक्ष्य लोकानित्यादिप्रकारेण मुमुक्षायाः परंपरया हेतुहेतुमद्भावात्सह पाठ्यः; अन्यथा मुमुक्षुत्वमेकमेव हि पाठ्यम्; किं चतुष्कग्रहणेन ? द्वितीयेऽप्यभ्युगमविरोधात् * विवेकादैराग्यमित्यादिक्रमस्य परैर्व्याख्यातत्वादिति । अत मीमांसाश्रवणमन्तरेणेत्युक्तं विवृणोति— फलेति । कर्मभागे स्वर्गादिर्यागादिः प्रयाजादिः बुभुक्षुश्च फलादयः; ब्रह्मभागे तु मुक्त्युपास्तिशमादिमुमुक्षवः । एषां विशेषः पूर्वपक्षोक्ताद्वयावृत्तं रूपं मिथो भेदश्च । नात्र फलकरणादिनिश्चयेन कर्मस्वरूपादिबोधोक्तौ साध्याविशेषः; पदार्थवाक्यार्थनीत्या तेषु तेष्वधिकरणेषु तत्तदवान्तरवाक्यार्थनिश्चयेन पश्चान्मिथस्संसृष्टविशिष्टमहावाक्यार्थबोधोक्तेः वैराग्यादिमूलभूतस्य नित्यानित्यविवेकस्य फलकरणादिनिश्चयान्तर्गतबोधनपरत्वाच्च । कर्मग्रहणमिहोपास्तेरप्युपलक्षकम् क्रियत इति वोभयसंग्रहः । उपासनेऽपि कर्मशब्दस्सूत्रेऽप्युक्तः—* प्रकाशश्च कर्मण्यभ्यासादिति । तत्र च भाष्यम् * उपासनात्मके कर्मणीति । अन्यत्र च * यागादिकमुपासनात्मकं च कर्मेति । मानसकर्मोक्तिश्च स्मृत्यादिषु दृश्यते । कर्मशब्दस्यात्र ज्योतिष्टोमादिमात्रविषयत्वं मत्वा तत्स्थिरत्वास्थिरत्वेत्येतन्निरूपणप्रकारस्यानुकारः; न तु निश्चयप्रकारस्येति केचित् । अत्र वैघट्यव्यञ्जकेन व्यतिरेकेण भाष्यमाणस्यायं भावः— किं केन कथमित्याकाङ्क्षितफलाद्यंशत्रयनिश्चयमन्तरेण कथं व्यंशभावनात्मककर्मबोधः; कथं च जीवनादिविशेषिताधिकारान्वितस्वर्गादिपदार्थस्य देहान्तरदेशान्तरभोग्यत्वनिश्चयः ? तदभावे च कथं लोकायतसौगतगतिखण्डनगर्भपूर्वोत्तरदेहानुवृत्तात्माध्यवसायः ? आत्मनि च सुखतयोपलब्धेरन्यथासिद्ध्या वचनमन्तरेण कथं सुखत्वश्रुतिमुख्यत्वम् ? तादृशात्मनिश्चयाभावे देहमेवात्मानं मन्यमानस्य कथमैहिकफलविरक्तिः ? नित्यसुखरूपतया सिद्धस्याप्यधिकर्तुः प्रवृत्तिधर्मफलं कृत्स्नं परिमितविषयभोगरूपमनित्यं, निवृत्तिधर्मफलं परं नित्यमिति निश्चयालाभे कथं स्वर्गाद्यनित्यफलजिहासा, नैगमान्तिकनित्यफलधिया समाकर्षश्च ? अतस्साधनचतुष्कवृत्तवादे विवेकविशेषादेर्मूलतया भागद्वयविचार एष्टव्यः । ततश्च कर्मविचारसापेक्षत्वम् । परमन्योन्याश्रयस्त्वधिकः—इति । आदिशब्देन ज्ञानानन्दरूपत्वसंग्रहः । शमादिसाधनसंपत्तौ विशेषतश्च दोषमाह— एषामिति । * शान्तो दान्त इत्यादिविनियोजकवाक्योक्तानामित्यर्थः । विनियोगोऽङ्गाङ्गित्वबोधनम् । संबन्धः इति तु न्यायसुदर्शनम् । शमादेरङ्गत्वे बोधिते सति साधनत्वमनुक्तमप्यर्थात्सिध्येत् । ततः किमित्यत शेषलक्षणसिद्धगुण-

ब्रह्मणसापेक्षत्वमाह— **विनियोग इति**। एतैर्मानैर्ब्रह्मकाण्ड एव तद्विनियोगश्चिन्त्यतामित्यत्राह— **स इति**। **स च तार्तीयः**— प्रागुक्तसंगतिक्रमेण कर्मकाण्डतृतीयाध्यायोक्तः। इह पुनस्तृतीये लाघवानुसारात्पूर्वं व्युत्पादितैस्तैरेवाक्षेपसमाधानमात्रं करिष्यते। एवमेवाध्यायान्तरन्यायोपजीवनं चात्र द्रष्टव्यमिति भावः।

उद्गीथाद्युपासनानि कर्मसमृद्ध्यर्थान्यपि ब्रह्मदृष्टिरूपाणि ब्रह्मज्ञानापेक्षाणीतीहैव चिन्तनीयानि। तान्यपि कर्माण्यनभिसंहितफलानि ब्रह्मविद्योत्पाद[नसाधना]कानीति तत्साद्गुण्यापादकान्येतानि सुतरामिहैव संगतानि। तेषां च कर्मस्वरूपाधिगमापेक्षा सर्वसंमता॥

अथ युक्त्यन्तरं दर्शयन्नुद्गीथाद्युपासनविचारस्य स्थानान्तरानर्हतयाऽत्रैव मुख्यसंगत्या कर्मब्रह्मचिन्ताक्रमं स्थापयति— **उद्गीथेति**। **कर्मसमृद्ध्यर्थान्यपीत्यनेन** पूर्वत्रोपयोगः, इह नेति शङ्कोद्धाट्यते। **समृद्धः**— * तदेव वीर्यवत्तरमिति श्रुत्युक्तेः प्रबलकर्मभिरप्रतिबन्धो गुणफलरूपः। **ब्रह्मदृष्टिरूपाणीति** हेतुगर्भम्। **ब्रह्मज्ञानापेक्षाणि**— न ह्यारोप्यस्वरूपमन्यत्राजानतः क्वचिदपि तदारोपः; अनिर्वचनीयादिदृष्टेर्दूषयिष्यमाणत्वात्। इह च ब्रह्मज्ञानं प्रथमद्विकसाध्यमित्याशयः। **दृष्ट्युपासनानां** प्रधानानुपयोगं प्रणाड्योपयोगात् परिहरति—**तानीति**। उद्गीथाद्युपासनपरिहार्यप्रत्यूहानीति यावत्। **अपिरत्र** परारोपितविरोधद्योतकः। यद्वा पूर्वग्रन्थेऽनुपयोगमन्वारुह्य सजातीयप्रयोगमात्रात्संगतिरनन्यगतिकाकाङ्क्षोक्त्या परिहृता। अत्र तूपयोगश्चास्तीति व्यज्यते। **अनभिसंहितफलानि**— बन्धकफलसंकल्परहितत्वादित्यर्थः। ब्रह्मविद्याऽत्र स्वाभीष्टा। **साद्गुण्यम्**— पूर्वोक्तैव समृद्धिः; न तु वैकल्यनिवृत्तिः। तदापादकानि कर्मसमृद्ध्युत्पादकानि।

कर्मजात्कर्मसाद्गुण्यं विद्या साद्गुण्यतश्च सा। अतो विरोध इत्यल्पं व्यक्तिभेदाद्व्यवस्थितेः॥ ३२७॥

सुतराम्— स्वापेक्षया परविद्यापेक्षया चेति भावः। **इहैवेत्ययोगवदन्ययोगोऽपि व्यवच्छिद्यते**।

अब्रह्मदृष्ट्यादिषु तु प्रधानैकार्थता भवेत्। विद्यौपयिकदृष्ट्यादि हेतुन्यायादिहेष्यते॥ ३२८॥
नातिप्रसक्तिरेवं स्यादधीत्यासक्त्यनुद्रुतेः। कथंचित्संगतिश्चात्र परेष्टा न प्रणुद्यते॥ ३२९॥

अस्तु यथावदनवगतेऽधिष्ठाने मिथ्यादृष्टिः प्रसिद्धेत्यत्राह— **तेषामिति**। न ह्येतन्मिथ्यादृष्टिमात्रम्; अपि तु यथावदवगते वैधमारोपणम्। ततश्चाधिष्ठानभूतं कर्माङ्गं यथावदविजानता तत्रान्यदृष्टिविधिर्न चिन्तयितुं शक्यते। **सर्वसंमता**— विश्वापलापिनोऽपि निरूपकसन्निधौ दुरपह्नवा; आहत्य सन्मात्रे अवगतिविमतेरिति भावः। ननु काम्यकर्मणोऽप्यनङ्गैरपि स्वदीर्यवत्तरत्वापादकैरेतैरपेक्षाऽस्ति, तेषामपि विचारानुष्ठाने च कर्मज्ञानापेक्षा सिद्धा। अत उभयाकाङ्क्षया कर्मकाण्डे तच्चिन्ताऽस्तु; मैवम्; अविदितब्रह्मणस्तदयोगस्योक्तत्वात्। अत एव ह्युपनिषत्स्वेव तदधीतिः। यत्तु * अधीतवेदान्तस्येत्यादिना वेदान्तमात्राध्यायिनस्तावन्मात्रचिन्ता शक्येति पूर्वं चोदितम्; तदसत्; अध्ययनविधिर्हि यथाक्रमं कृत्स्नाध्ययनं प्रयुङ्क्ते। न च विध्यतिलङ्घनेन प्रवृत्तमापत्कृतं वा तत्र्यन्तमात्राध्ययनमपेक्ष्येदानीं तद्विचारस्य पूर्ववृत्तं मृग्यते। एतेन प्राचीनसुकृतविशेषनियतवैराग्यातिशयादेकदेशाध्ययनविचारौ स्यातामित्यपि निरस्तम्, तत्साध्ययनविध्यतिलङ्घनायोगात्। अनधिगतकर्मणः कर्माङ्गविद्याधिगतिरशक्यविचार इति चोक्तम्। अधिगतसि-

प्रणेन पश्चाच्छेषपूरणं च क्लिष्टम् । ब्रह्मचिन्तोपयुक्तस्य विषयवाक्यस्य प्रकरणेन शक्तिरस्तीति चेत्, तर्हि तेनैव न्यायेन ब्रह्मविचारोऽपि मा भूत् । तदिह यथाविधि कृत्स्नाध्यायिनः प्रागिव कृतावशिष्टे विचारपर्वणि वृत्तविशेषः स्याप्यत इति शुद्धः पन्थाः ॥

श्रुतिकिरीटशरीरविकृष्टिकृन्मलिनवृत्तिमलिम्लुचवृत्तिभिः ।
विषटितामिव विंशतिलक्षणीं यतिपतेरिति नीतिरजीघटत् ॥ ३३० ॥

॥ इति लघुसिद्धान्तः ॥

॥ महापूर्वपक्षः ॥

यदप्याहुः— अशेषविशेषप्रत्यनीकचिन्मात्रं ब्रह्मैव परमार्थः । तदतिरेकि नानाविधज्ञातृज्ञेयतत्कृतज्ञानभेदादि सर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतम् ।

एवं * विरोधादप्रमाणत्वादित्यादुक्तानां कर्मनैरपेक्ष्यहेतूनां साङ्गोपायविधिनिरूपणेन बाधासिद्धिसाधारण्यान्यथासिद्ध्यादिदोषाः प्रदर्शिताः । अथ साधनचतुष्टयस्य पूर्ववृत्तत्वे कर्मणो विरुद्धत्वे वाक्यार्थधियो मोक्षोपायत्वे च हेतुतया समाहारेण प्राक् प्रदर्शितं सामर्थ्यं प्राप्यनिवर्त्यगोचरश्रुतिसमीक्षया निराकर्तुं विस्तरेणानुभाषते— **यदप्याहुरित्यादिना आरभ्यन्त इत्यन्तेन ।**

साधितं त्विह निर्बाधं बाधितं निष्प्रतिक्रियम् । तथाऽपि पुनरारंभः शत्रुशेषविमर्दवत् ॥ ३३१ ॥
परपक्षप्रसिद्धत्वं गौरवं व्यक्तभाषणम् । बहूनामपि संवादो यदप्याहुरितीर्यते ॥ ३३२ ॥
अशेषेत्यादिना ब्रह्मपारमार्थ्यं प्रतिश्रुतम् । तदन्यमिथ्याभावस्तु तदित्यादिभिरुच्यते ॥ ३३३ ॥

यच्छब्दः परगोष्ठीप्रसिद्ध्यर्थः, **अपिः** दूषितादूषितसमुच्चयार्थः, परेष्टगौरवद्योतको वा । **आहुरित्यनेककण्ठोक्तिः ।** [तेन] बहुवचनं बहुव्याख्यातृसंमतिं तदुक्तकृत्स्नानुवादं च सूचयति । अशेषेत्यादिचिन्मात्रेत्यन्तं प्रागुक्तार्थम् ।

वाक्ययोः सत्यमिथ्यार्थप्रतिज्ञारूपयोरिह । यथार्हं हेतुसाध्यत्वं पदार्थेषु विभाव्यते ॥ ३३४ ॥

चिद्रूपतया सजातीयाद्यशेषभेदशून्यं परमार्थस्वप्रकाशं च, तत एव हि तुच्छव्यावृत्तिः । अवधारणेनान्यपरविधिवाक्यसिद्धस्य सगुणत्वस्य कल्पितत्वं मिथ्यात्वसाधकदृश्यत्वस्य व्यतिरेकव्याप्तिश्च व्यज्यते । प्रपंचोपलंभात् विरोधशान्त्यै धीमात्रनिवर्त्यत्वाय च अवधारणार्थ व्यनक्ति— **तदतिरेकीति ।** स्वतः सिद्धे तस्मिंस्तु प्रकृतैतावत्त्वसूत्रोक्तन्यायेन * अथात आदेशो नेति नेति, * असदेवेदमग्र आसीदित्यादिभिर्न बाधः स्यादिति तच्छब्दाभिप्रायः । ब्रह्मान्यत्वाद्भिन्नत्वाज्ज्ञातृत्वाज्ज्ञेयत्वादित्यादयस्तदन्यमिथ्यात्वहेतवः । उक्तेषु वीतावीतेषु शुक्तिरूप्यादिर्घटादिश्च दृष्टान्तः । **नानाविधशब्देन** * नेह नानेत्यादीनां विषयो दर्शितः । स्वरूपज्ञानव्यावृत्त्यै वृत्तिज्ञानसंगृहीत्यै चन्द्रनीतिव्यक्त्यै ज्ञातृत्वज्ञेयत्वज्ञानक्रियात्वतद्विशेषाणां करणभेदकृतस्मृतित्वानुभवत्वादीनां ब्रह्मण्यध्यस्तत्वसिद्ध्यै च तत्कृतशब्दः । कर्मकर्तृवच्छिन्नं हि ज्ञानमहङ्कारविकारः क्रियास्वरूपः; न त्वात्मस्वरूपम्; न च तद्धर्मः । अन्तःकरण-

तद्वृत्तिस्फुरितचैतन्यमेवास्तु जडचन्द्रभेदकल्प इति भावः। यो विशेषः पूर्ववाक्योक्तस्तत्र भेदशब्दो योज्यः। तत्र एषु नानाविधत्वमवान्तरविशेषैः। आदिशब्देन गोबलीवर्दनीत्या सुखदुःखतद्धेतुजन्ममजरादेः कर्मकर्त्रादिविकल्पान्तराणां च संग्रहः। एकस्मिन्नेव एकदैव मिथोविरुद्धानन्ताध्यासो गगनगन्धर्वनगरनीत्या युक्त इत्यभिप्रायेण * सर्वमात्मैवाभूदिति श्रुत्यनुसारात् सर्वं तस्मिन्नेवेत्युक्तम्। एतेन माध्यमिकयोगाचारोक्तमताभ्यां विशेषः ख्यापितः। एवकारेण निरधिष्ठानभ्रमायोगात्तुच्छव्यावृत्तस्य तस्यैवाधिष्ठानत्वं युक्तमिति व्यज्यते; निरधिष्ठानश्च भ्रमो न युक्तः। शुक्तिरजतादेरध्यस्तद्रव्यधर्माणां चान्ततस्तदेवाधिष्ठानमिति चात्र भावः। निष्कले ब्रह्मणि अविद्यादर्शितानन्तांशे कल्पनाव्याप्तिसूचनाय परिशब्दः; कल्पितम्— अविद्यमानत्वेऽप्यस्तीति प्रतीतम्; असत्यमित्यर्थः। स्वात्यन्ताभाववन्निष्ठतया प्रतिभातमिति यावत्। तत एव मिथ्याभूतम्— सर्वदैव सदसद्व्यावृत्तमिति यावत्। कल्पितत्वे मिथ्यात्वं हेतुतयोच्यत इति केचित्।

* सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, * अथ परा यया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः; * सत्यं ज्ञानमनन्तं ब्रह्म, * निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्, * यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्॥, ❀ न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथाः, ❀ आनन्दो ब्रह्म, ❀ इदं सर्वं यदयमात्मा, * नेह नानाऽस्ति किंचन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, ❀ यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति। यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्तत्केन कं विजानीयात्, ❀ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, ❀ यदा ह्येवैष एतस्मिन्नु दरमन्तरं कुरुते। अथ तस्य भयं भवति, * न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि, * मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्, ❀ प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम्। वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्॥ ❀ ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः। त[मे]देवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्॥ ❀ परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते। यदेतद्दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव। भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः॥ * ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः। अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे॥ ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत्।

ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥ * तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत्। विज्ञानं परमार्थो हि द्वैतिनोऽतथ्यदर्शिनः ॥ * यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम। तदैषोऽहमयं चान्यो वक्तुमेवमपीष्यते ॥ * वेणुरन्ध्रविभेदेन भेदष्षड्जादिसंज्ञितः। अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥ * सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम्। इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः ॥ * विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥ * अहमात्मा गुडाकेश सर्वभूताशयस्थितः, * क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥ * न तदस्ति विना यत्स्यान्मया भूतं चराचरम्, इत्यादिभिर्वस्तुस्वरूपोपदेशपरैः शास्त्रैर्निर्विशेषचिन्मात्रं ब्रह्मैव सत्यम्; अन्यत्सर्वमिथ्येत्यभिधानात्।

एवं युक्तिसूचके प्रतिज्ञाद्वये श्रुतिसूत्रस्मृतीः प्रमाणयति— **मदेवेत्यादिना अभिधानादित्यन्तेन**। * शाखाग्रे चन्द्र इतिवत्कारणत्वेन ब्रह्मण उपलक्ष्यत्वमभिप्रेत्य आदौ शङ्कितदोषनिवर्तकेभ्यः शोधकेभ्यः पूर्वं कारणवाक्योपादानम्। तत्रापि षड्विधतात्पर्यलिङ्गत्तया बलीयस्त्वात्प्रथमं सद्विद्योक्तिः। अत्र सत उत्पत्तिर्यस्य स्थाप्यते, तस्य सत्त्वेनानूदितस्यापि असत्यत्वसूचकाभ्यामग्र इत्युक्तेऽपि सर्वदा निषेधतत्पराभ्यामवधारणाभ्यामद्वितीयपदेन चाभिप्रेतेऽर्थे कण्ठोक्त्या शङ्कनीयविशेषनिषेधोपक्रमं कारणवाक्यान्तरमुपादत्ते— **अथेति**। **अद्रेश्यम्**— अदृश्यम्; ऐन्द्रियिकप्रत्यक्षानर्हमित्यर्थः। **अग्राह्यम्**—अनुमयाऽपि दुर्ग्रहम्। चक्षुश्श्रोत्रादेरगोचर इति वा पदद्वयार्थः। ज्ञानकर्मेन्द्रियानर्हत्वमिह विवक्षितमिति केचित्। **अगोत्रम्**— अव्यवधानेन देवादिनामभिरस्पृष्टम्; सद्ब्रह्मादिशब्दैरपि हि लक्षणयैव प्रदर्श्यते। **अवर्णम्**— सितरक्तादिशून्यम्, कुलं च ब्राह्मण्यादि च दूरापास्तम्। **अचक्षुःश्रोत्रं तदपाणिपादमिति**। इन्द्रियायत्तज्ञानक्रियारहितमिति भावः। **नित्यं विभुम्**— कालतो देशतश्चानवच्छिन्नम्; एतेन प्रतिज्ञास्थब्रह्मत्वप्रदर्शनम्। **सर्वगतम्**— स्वव्यतिरिक्तैः सर्वैरध्यस्तैरधिष्ठानतया श्रितम्; वस्त्वन्तराभावाद्वस्तुपरिच्छेदरहितमित्याशयः। **सुसूक्ष्मम्**— आकाशादिन्यायेन स्पर्शवत्सु प्रतिघातरहितम्, दृश्यत्वाद्यनुगुणस्थौल्यादिरहितमिति वा; तेन योग्यानुपलब्धिबाधशङ्कानिरासः। **तदव्ययम्**; तत्रैवं निरुक्तिः—

* सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ इति।

एतदेव शब्दे योजितं तद्वृत्तैः। **भूतयोनिम्**— अविद्याशबलितरूपेण भूतरूपविवर्तोपादानमित्यर्थः। अत * यथोर्णनाभिरित्यादिना तत्प्रपञ्चः। एवं तटस्थलक्षणलक्षितस्य चिन्मात्रप्रतिज्ञानिर्वाहाय प्रकृष्टप्रकाशश्चन्द्र इतिवत् अतद्व्यावृत्तितत्परेण स्वरूपलक्षणेन शोधनं व्यनक्ति— **सत्यमिति**। अत्र सामानाधिकरण्यादिबलादन्यव्यावृत्तिपरत्वं कल्प्यम्। विशेषतोऽन्यधर्मव्यावृत्तिकण्ठोक्तिमाह— **निष्कलमिति**। ब्रह्मणश्चिन्मात्रशब्दसूचितं ज्ञेयत्वनिषेधं

कस्यचित्स्तुत्या अन्यस्य निन्दया च स्थापयति—**यस्येति** । मननोपासनाद्यविषय इति भावः । **ज्ञातृत्वनिषेधमप्याह—न दृष्टेरिति** । दृष्ट्यादिशब्दोपलक्षितज्ञानव्यतिरिक्तज्ञाताऽपि नास्तीति भावः । परमेमास्पदत्वादानन्दरूपो जीवः, स्वप्रकाशत्वान्नित्यप्राप्तस्यापि प्राप्यत्वोपचारज्ञानशक्त्या स्वप्रकाशत्वात्सत्यः ; तेन ब्रह्मणः सद्वितीयत्वमिति शङ्कानिरासार्थं चासुखाद्व्यावृत्तिमाह— **आनन्देति** । जीवोऽपि ब्रह्मानतिरिक्ततयैवानन्दरूप इति भावः । न हि आनन्दस्यानन्दित्वम् ; अतश्च निर्गुणत्वसिद्धिः । * ब्रह्मण आनन्द इति श्रुतेश्चान्यपरत्वम् । सर्वं तस्मिन्नेव परिकल्पितमित्यत्र श्रुतिमाह—**इदं सर्वमिति** । इदंकारविषयं कृत्स्नमनूद्य तद्विरुद्धात्मत्वविधौ चोरः स्थाणुरितिवदनूदितं बाधार्थं सामानाधिकरण्यम् । * ब्रह्मैवेदं सर्वम् ; * आत्मैवेदं सर्वम्, * पुरुष एवेदं सर्वमित्यादिषु एतद्व्यक्तम् । अत्र बाधार्थत्वमन्यत्र कण्ठोक्त्या द्रढयति— **नेहेति** । इह—प्रपञ्चे, * यस्मिन्पञ्च पञ्चजना इति प्रस्तुते ब्रह्मणि वा ; यन्नानात्वेन भाति तन्न सत्यमित्यर्थः । भेदद्रष्टुः प्रत्यवायोक्त्या भेदनिषेधं द्रढयति— **मृत्योरिति** । * तमसो वा एष तमः प्रविशति इत्यादिवदविद्यागृहीतः पुनरविद्यां तत्फलं वा प्राप्नोतीत्यर्थः । यदि भेदो नास्ति, खपुष्पवन्न दृश्येत, नित्यमसतोऽपि भ्रान्त्या दृश्यत्वे खनैल्यवन्नित्यं किं न दृश्येतेत्यत्र स्वप्नजागरकल्पबद्धमुक्तदशया युक्तायुक्तावस्थया वा नियमोक्तिमाह— **यत्रेति** । कालानूक्तिरियम् । **नानेव, द्वैतमिव,** इति इवशब्दाभ्यां मिथ्यात्वस्य सिद्धवत्कारः । **तत्**— तदेत्यर्थः । इतरेणेति पूर्वस्मिन्वाक्येऽध्याहार्यम् ; परस्मिंस्तु कः इति । कर्तृकरणादिकल्पना निरस्ता । **पश्येत् विजानीयादिति** निषेध्यज्ञानावान्तरभेदपरम् । कार्यमिथ्यात्वं कारणसत्यत्वं च लोकदृष्ट्या निदर्शितमाह— **वाचेति** । अत्र दार्ष्टान्तिकमात्रे सत्यत्वस्थापनाय दृष्टान्ते व्यावहारिकसत्यत्वमात्रम् । अतो न विरोधः ।

अन्वयव्यतिरेकाभ्यां भेदबुद्धेर्भयहेतुत्वेन त्याज्यत्वं दर्शयितुमाह— **यदा हीति** । अभयहेतुरैक्यधीः पूर्ववाक्योक्ता । उ इत्यवधारणार्थम् । **उ दरमन्तरं कुरुते**— ईषद्भेदं मन्यते ईषदन्तरं भेदं कुरुते मन्यते । उदिति विभज्य उत्कुरुत इति केचित् ; उद्भवतीति चान्ये । **अरम्**—द्रुतम् । **अथ**—तदा; अनिरूप्येत्यर्थः । अस्य तु निर्विशेषत्वे सूत्रमादत्ते— **न स्थानत** इति । नोभयलिङ्गमित्यन्वयः । साकारत्वं साकारनिराकारत्वं च नास्ति ; किं तु निराकारत्वमेवेत्यर्थः । ब्रह्मान्यमिथ्यात्वे सूत्रमाह— **मायेति** । इदं सूत्रं स्वप्नविषयमपि तन्मुखेन दुर्निरूपत्वाविशेषाद्धीमात्रेतरकृत्स्नमिथ्यात्वपुरस्कारकमिति भावः । इदं पाराशर्योक्तमर्थद्वयं पराशरोक्तश्लोकाभ्यां संवादयति— **प्रत्यस्तमितभेदमिति** । सजातीयादिसर्वविशेषरहितमित्यर्थः । तर्हि शून्यं स्यात् ; नेत्याह— **सत्तामात्रमिति** । सर्वत्र निर्बाधानुवृत्तं सत्तामात्रं हि न शून्यं स्यात् । गोबलीवर्दनयेन स्वगतो भेदो वा मात्रया निषिध्यते । अथवा सत्ताशब्दस्य धर्मवाचितया धर्म्यपेक्षया भेदराहित्यं च धर्मे मात्रया व्युदस्यति ; स्वाध्यस्तापेक्षया धर्मत्वं धर्मित्वं च कल्पितमिति भावः । तथाऽपि सत्तादिशब्दवाच्यत्वं दुस्त्यजमित्यत्राह— **अगोचरं वचसामिति** । निमित्तभूतधर्माभावे गोत्ववन्निमित्तत्वाभावे च कथं शब्दप्रवृत्तिरिति भावः । अनुपाख्यत्वे तुच्छत्वं स्यादित्यत्र स्वप्रकाशत्वमाह— **आत्मसंवेद्यमिति** । हेतुं व्यनक्ति— **ज्ञानमिति** । **ब्रह्मसंज्ञितम्**— ब्रह्मत्वाद्यभावेऽपि ब्रह्मशब्देनोपचरितमित्यर्थः । तर्हि ब्रह्मास्मीति विशिष्टधीः कथमित्यत्रोपसंहारोक्तमेतदुपक्रमानुगुणमित्यभिप्रायेणैनौ घटयति— **ज्ञानस्वरूपं अजडत्वेन ज्ञेयत्वज्ञातृत्वरहितमिति** च भावः । **अत्यन्तनिर्मलम्**— नित्यास्पृष्टाविद्यादिसर्वदोषम् । **तत्रापि हेतुर्ज्ञानस्वरूपत्वम् । अर्थस्वरूपेण**— जडरूपदेवादिपिण्डात्मना कृत्स्नप्रपञ्चात्मना वा । अनेन अन्यमिथ्यात्वं सिद्धम् ।

परमार्थत इत्यादुपादानं तु पुराणमध्येऽपि सत्यैकत्वसाधकाभ्यासलिङ्गस्फूर्त्यर्थम् । **नान्योऽस्तीत्युक्तं विवृणोति—यदे-तदिति** । उक्तमेव **ज्ञानस्वरूपमित्यादिना** पुनरपि द्रढयति । **ये तु ज्ञानविदः** इत्यादिपि केषुचिद्बाधप्रदर्शनेन व्यतिरेकेण स्थिरीकरणं भ्रमनिवृत्तेर्धीमात्रसाध्यत्वस्यापकं च । कर्मशास्त्रनिरूढकर्तृनानात्वोपलम्भविरोधशान्त्यै तत्रैवा-त्माद्वैतमपि स्थापितमित्याह— **तस्येति** । **एकमयमिति** । मयडिह स्वार्थिकः । आत्मपरशब्दाभ्यां भेदशङ्कां परि-हर्तुं **यदीति** श्लोकः । **वेणुरन्ध्रेत्यादिना** दृष्टान्तमुखेनात्मभेदस्योपाधिकल्पितत्वोक्तिः । निदर्शितस्यैव निर्धार्योपदेशं दर्शयति— **सोऽहमिति** । उक्तमर्थमविसंवादिना यथोक्तकरणेन द्रढयति— **तत्याज भेदमिति** । भेदमोहमित्यर्थः । जीवानां मिथो भेदधीनिवृत्तिरुक्ता । अथ जीवब्रह्मभेदबुद्धेरज्ञानमूलत्वं तदनुवृत्तौ हेत्वभावात्तन्निवृत्तिं चाह—**विभेदेति** । स्पष्टार्थतया पुराणोक्तिः पूर्वमुदाहृता । ऐतिहासिकं वाक्यमात्मनां परस्परं ब्रह्मणा चैक्ये तदन्यमिथ्यात्वे च दर्शयति— **अहमात्मेति** । अत्र सर्वभूतशब्दस्य जीवविषयत्वशङ्का सर्वक्षेत्रशब्देन प्रशमिता । **न तदस्तीत्यादौ** मया विना यत्सत्तन्नास्ति ; मद्व्यतिरिक्तं न परमार्थसदित्यर्थः । **इत्यादिभिरिति** । भूयसां बलीयस्त्वार्थम् । उपासनविधिपरेषू-क्तानां गुणविग्रहादीनां कल्पितत्वव्यक्त्यै **वस्तुस्वरूपोपदेशपरैरित्युक्तम्** ।

मिथ्यात्वं नाम प्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वम् । यथा रज्ज्वाद्य-धिष्ठानकसर्पादेः । दोषवशाद्धि तत्र तत्कल्पनम् ; एवं चिन्मात्रवपुषि परे ब्रह्मणि दोषपरिकल्पितमिदं देवतिर्यङ्मनुष्यस्थावरादिभेदं सर्वं जगद्यथावस्थितब्रह्मस्वरूपावबोध-बाध्यं मिथ्यारूपम् । दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वच-नीया अनाद्यविद्या ।

ननु एतेषु मिथ्याशब्दो न दृष्टः । नानात्वनिषेधादितात्पर्यतस्तत्सिद्धावपि किमिदं मिथ्यात्वम् ? असत्त्वम्, अन्यथाधीगोचरत्वं, सदसदन्यत्वं, चतुष्कोटिमुक्तत्वं वा? आद्यान्त्यौ निवर्त्याभावे निवर्तकशास्त्रादिवैयर्थ्यप्रसङ्गान्निर्बाधा-स्तित्वबुद्ध्या च निरस्तौ, तव चानिष्टौ । अत एव न द्वितीयः, अधिष्ठानस्य मिथ्यात्वप्रसङ्गादारोप्यस्यान्यत्र सत्त्व-प्रसङ्गाच्च । न च तृतीयः, सदसद्बिध्योरिव व्याघातादप्रसिद्धेश्च । अन्यच्च न युक्तं पश्याम इत्यत्र प्रतिपन्नोपाधौ निषेधप्रतियोगित्वाभिप्रायेण प्रतिवक्ति— **मिथ्यात्वमिति** । नामशब्दः शुक्तिरूप्यादिषु तत्प्रसिद्धिपरः ।

ख्यातत्वादसदन्यत्वं बाध्यत्वेन सदन्यता । तेनानिर्वचनीयत्वं स्यादित्यत्राभिसंहितम् ॥ ३३५ ॥

प्रतीयमानत्वमिह प्रकाशमानत्वम् । तेन वृत्तिविषयत्वमपि । साक्षिणः प्रकाशमानायामविद्यायामपि अनु-वृत्तेस्तद्वितरविवक्षयोक्तिरिति तु मन्दम् । प्रतीयमानत्वपूर्वकतया बाधकधीप्रागभावादिव्यावृत्तिरिति केचित् । नियम-श्चात्र विवक्षितः ।

तत्त्वधीप्रागभावादिः प्रतिपन्नोऽन्यथाऽपि च । तत्त्वबुद्ध्या निव(र्ते)र्त्येत व्यावर्त्य इह तेन सः ॥३३६॥
असदत्र व्यवच्छेद्यं कैश्चिदिष्टं तदा पुनः । नास्तिधीगोचरत्वेन धीनिवर्त्यत्वकल्पनम् ॥ ३३७ ॥

भ्रान्तिनिवर्त्यसत्यसर्पादिव्यावृत्त्यै लोकदृष्टमनुसारेण यथावस्थितशब्दः । सत्यस्य हि निषेधकालस्थितत्वेऽपि

तदानीं नास्तीति बुद्धया आभिमानिकं निवर्त्यत्वं स्यादिति भावः ।

व्यवच्छेद्येषु सत्यत्वमन्वारुह्यात्र लक्षणम् । तन्मुखेन प्रबुद्धस्य तेषां बाधोऽपि सेत्स्यति ॥ ३३८ ॥
लक्ष्यमेव व्यवच्छेद्यं लक्षणस्थपदैर्यदि । विपक्ष एव पक्षः स्यादस्तु पर्यवसानतः ॥ ३३९ ॥

वस्तुज्ञाननिवर्त्यत्वमिति । अत्र मात्रशब्दो योज्यः ; याथार्थ्यबुद्धयैव निवर्त्यमित्यर्थः । तेन मन्त्रादिशक्ति-विशेषसहितधीनिवर्त्यविषादिव्युदासः । वेद्यगतविरुद्धाकारग्रहणाग्रहणयोर्बाधादिप्रयोजकत्वव्यक्त्यै सामानाधिकरण्यभ्रम-जन्यातिप्रसङ्गशान्त्यै च समासविशेषव्यक्त्यर्थो **वस्तु**शब्दः । दण्डादिनिवर्त्यव्यावृत्त्यै ज्ञानोक्तिः । नाशबाधयोरविशे-षाभिमानाद्वा निषेधबुद्धयर्हत्वसाम्याद्वा नाश्यबाध्ययोर्निवर्त्यशब्दानुवृत्तिः । **निवर्त्यत्वम्**— निवर्तनार्हत्वम् ; **तेन** भूरन्ध्रादिभ्रमनिवर्त्यरज्जुसर्पादिष्वव्याप्तिर्निरस्ता । न चात्र बाधकधीनिवर्त्यभयादावतिव्याप्तिः ; निवर्तमानदुःखस्य क्षणिकतया तन्निवृत्तौ बाधकधीवैफल्यात् , सामग्र्यभावादुत्तरदुःखानुत्पत्तेः । तदिह यन्निष्ठतया प्रतिपन्नं, तन्निष्ठा-त्यन्ताभावप्रतियोगितयाऽपि तत्त्वज्ञानेन विषयीकारार्हत्वमिति तु तात्पर्यविभ्रमः । उक्तस्य सर्वसंमत्यर्थमाह—**यथेति** । ननु सारूप्यतत्त्वाग्रहौ सर्वत्र भ्रान्तिनिदानम् , तौ च जडेष्वेव स्तो न ब्रह्मणि ; तस्य निर्विशेषत्वनित्यस्वप्रकाशत्वा-भ्युपगमादित्यत्राह— **दोषेति** । अनिर्वचनीयदृष्टान्तस्थापनम् [इति] । अत्र हिः प्रसिद्धौ । दुःखाद्यभावेषु सुखादि-भावारोपे सारूप्यतत्त्वाग्रहासंभवादिति च हेरभिप्रायः ; सारूप्यसद्भावेऽप्यतिरिक्तदोषाभावे भ्रान्त्यभावात्स एव न प्रयो-जक इति भावः ।

निदर्शितं दोषकल्पितत्वं तत्कल्पितमिथ्यात्वलक्षणं च पक्षेऽतिदिशति— **एवमिति** । जडत्वसविशेषत्वपरिच्छि-न्नत्वपरोक्षत्वादिकं नाध्यासाधिष्ठानत्वे प्रयोजकमित्यभिप्रायेण **चिन्मात्रत्वानुक्तिः** । तत्त्वाग्रहश्च ब्रह्मणि स्वरूपविषय-विशदवृत्तिज्ञानानुदयात्सिद्धः । स्वतो वा परतो वा प्रकाशमानत्वं चाध्यासापेक्षितं भ्रमविरुद्धत्वेन न शङ्कनीयम् । सर्वज्ञत्वमपि परब्रह्मण्यध्यस्तमिति ज्ञप्त्यै सर्वाध्यासयोग्यत्वाय च **परब्रह्म**शब्दः । अत्र कल्पितत्वमिदन्त्वं च बाध्यत्वे हेतुतयाऽभिप्रेते । अध्यसनीयत्वे साक्षादृश्यवैसादृश्यात्पत्वानन्तत्वादिकं न तन्त्रमिति ज्ञापनार्थं देवेत्यादिना कृत्स्नचिद-चिद्भेदोक्तिः । न ह्यत्र मिथ्यात्वे साध्ये व्यभिचारस्थलम् ; न च प्रत्यनुमानेन सत्यत्वे साध्ये बाधेषु दृष्टान्तः । ब्रह्मणि तु दृष्टान्तेऽनुवृत्तसत्यहेत्वसिद्धिः; कल्पितस्तु भासमानत्वादिः खपुष्पादावपि कथंचित्स्यादिति भावः ।

* यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

इत्यादिपरामर्शेन **यथावस्थिते**त्यादिकमुक्तम् । **बाध्यम्**— नास्तीति वेद्यमित्यर्थः । एवं मिथ्यालक्षणयोगात्— **मिथ्यारूपम्**— मिथ्याशब्दवाच्यमित्यर्थः । स्वाधिकरणधीविषयनिष्ठात्यन्ताभावप्रतियोगि वा । एवं भ्रान्तिबाधोक्त्या दोषतिरोधानयोः कल्प्यत्वादर्थापत्तिद्वयसिद्धं ज्ञानमिति सूच्यते ।

ननु अतिरोहिताकारे नाध्यासः, तिरोधौ स्वरूपतदतिरिक्तप्रकाशविकल्पेन स्वप्रकाशात्मस्वरूपनिवृत्तिः सविशेषत्वं वा स्यात् । अतस्तिरोधानार्थमविद्यान्तरं कल्प्यम् । सदसदादिविकल्पदुःस्था चासौ । तस्य च कल्पितत्वे दोषान्तरा-पेक्षया अनवस्था । अकल्पितस्तु ब्रह्मस्वरूपान्यत्वानन्यत्वादिविकल्पासहः । न च दोषत्वेन लोकवेददृष्टः कश्चिद्ब्रह्मणि संभाव्यते । एकश्च दोषो न सर्वाध्यासकृदित्याशङ्क्याह— **दोषश्चेति** । **स्वरूपतिरोधानेत्यादिभिः** क्रमाच्छङ्को-द्धारः । **अहंत्वेदंत्वादिभिस्तदवान्तरैश्च विक्षेपस्य विचित्रत्वम्** । **स्वरूपतः स्वभावतश्चेति केचित्** । आच्छा-

दिका विक्षेपिका चेति विभागश्चैकस्या एवाकारभेदादिति केचित्। **विक्षेपिका**—विशेषप्रतिभासिकेत्यर्थः। दुर्घटत्वभावाविद्यामाहात्म्यात्सर्वमिदं समाहितम्। युगपत्कोटिद्वयारोपात्मकसंशयविशेषहेतुदोषवत् विचित्राध्यासहेतुत्वोपपत्तिः। विरुद्धसमुच्चयभ्रमजनकानेकान्तवादवच्च तिरोधानमपि न वास्तवम्। परमार्थद्वित्वमर्थक्रियाविरहं च परिहर्तुं सदसद्वैलक्षण्योक्तिः।

* अनृतेन हि प्रत्यूढाः, * तेषां सत्यानां सतामनृतमपिधानम्, * नासदासीन्नो सदासीत्तदानीम्, तम आसीत्तमसा गूढमग्रे प्रकेतम्, * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, * इन्द्रो मायाभिः पुरुरूप ईयते, * मम माया दुरत्यया, * अनादिमायया सुप्तो यदा जीवः प्रबुध्यते इत्यादिभिर्निर्विशेषचिन्मात्रं ब्रह्मैवानाद्यविद्यया सदसदनिर्वाच्यया तिरोहितस्वरूपं स्वगतनानात्वं पश्यतीत्यवगम्यते।

तस्याः स्वरूपं परब्रह्मदोषत्वं तत्फलं च श्रुत्यैव स्थापयति— **अनृतेने**ति। **प्रत्यूढाः**— प्रतीपं प्रापिताः; प्रतिरुद्धा इत्यर्थः। तरङ्गचन्द्रवत्कल्पितजीवभेदविवक्षया बहुवचनम्, पाशवदविवक्षितार्थं वा। * एतं ब्रह्मलोकं न विन्दन्तीत्यत्र प्रत्यूढत्वं हेतुः। इदं पूर्ववाक्योक्तेन विवृणोति— **तेषामि**ति। * त इमे सत्याः कामाः अनृतापिधानाः इत्युक्तानां तत्तत्कामोपाधिप्रतियोगिभूतकल्पितार्थव्यावृत्तिरूपाणां ब्रह्मस्वभावानां तदभिन्नतया प्रामाणिकानां सतां मिथ्याभूतमज्ञानमाच्छादकमित्यर्थः। व्यावर्त्यभेदेन व्यावृत्तिभेदकल्पनयाऽत्र बहुत्वोक्तिः; पूर्ववत्पाशन्यायेन वेति केचित्। अविद्याया अनिर्वाच्यत्वं दर्शयति— **नासदासीदि**ति। नात्र निषेधमात्रे पर्यवसानम्; उभयनिषेधेन **तम आसीदि**ति विहितमुभयविलक्षणमेव हि स्यादिति भावः। केचिदाहुः— * बन्धमूलमज्ञानं कर्मरूपं; प्रवाहानादि; भ्रान्तिज्ञानमूलं त्वज्ञानमिन्द्रियादिदोषेऽधिष्ठानयाथात्म्यज्ञानप्रागभावश्च एतत्सर्वं तत्कार्याणि च सदसद्विलक्षणानि। सर्वमूलाविद्यातु [अर्ध]पञ्चमाकारा; तन्निवृत्तिर्हि पञ्चमप्रकारेति। तमश्शब्देन ज्ञानविरोधित्वं तिरोधायकत्वं च व्यज्यते। **तमसा गूढम्**—अज्ञानेनावृतम्। अत्र **प्रकेतमि**ति विशेष्यं ब्रह्म। ननु सुबालश्रुतौ तमश्शब्देनातिसूक्ष्मा मूलप्रकृतिरुच्यते, न त्वदिष्टाऽविद्येत्यत्र प्रकृतेर्मायात्वेन मिथ्यात्वमीश्वरस्यापि मायाकल्पितत्वं श्रुतमित्याह— **मायां त्वि**ति। प्रकृतिं मायां विद्यादिति विपर्यस्यान्वयः। एकस्य सतो मायामरीचिकावीचिकाभिर्विविधत्वेन भानमाह— **इन्द्रो मायाभि**रिति। अत्र इन्द्रः सर्वदृगीश्वरः; * रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणायेति पूर्ववाक्यस्वारस्यात् * स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति तस्मादिदन्द्रो नाम, इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषः तं वा एतमिन्धश्च सन्तमिन्द्र इत्याचक्षते परोक्षेणेत्युपनिषदैव तद्विषयत्वेन निरुक्तेश्चेति भावः। * ज्ञानवान्मां प्रपद्यते, वासुदेवः सर्वमिति—इत्युक्तैक्यज्ञानमन्तरेणास्या मायाया दुस्तरत्वं गीतमित्याह— **मम मायेति**। तदनादित्वं तया तिरोधानं कदाचित्तन्निवृत्तिश्च स्मर्यत इत्याह— **अनादी**ति। आदिशब्देन * अविद्यया मृत्युं तीर्त्वा, * भूयश्चान्ते विश्वमायानिवृत्तिः, * गुणमायासमावृतः, * यन्त्रारूढानि माययेत्यादिसंग्रहः। स्वरूपविधिवाक्यसिद्धशुद्धाकारानुरोधेन दोषविधिपरेषु महेश्वरादिशब्दा बहुवचनं च मायोपश्लिष्टविषयतया न [वि]त्रिविधभेदसत्यत्वं स्थापयितुं क्षमन्त इत्यभिप्रायेणानुदाहृतानेकवाक्यसंकलितार्थस्य निर्विशेषत्वादेरनुक्तिः। * तदैक्षत बहु स्याम्

* एकधा बहुधा चैव दृश्यते जलचन्द्रवत्— इत्यादि प्रमाणं सर्वार्थानां च सच्चिदनुवेधेन भानं चानुसरन् शुक्ति-रूप्यादिवद्भ्रमस्य विषयाश्रयभेदशङ्कां च व्युदस्यति — **स्वगतनानात्वमिति**। स्वाध्यस्तं चिदचिद्भेदं वृत्तिसंभेदेन स्मृतित्व अनुभवत्वादिधर्मभेदं चेत्यर्थः।

यथोक्तम्— ❀ ज्ञानस्वरूपो भगवान्यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः। ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि॥ यदा तु शुद्धं निजरूपि सर्वकर्मक्षये ज्ञानमपास्तदोषम्। तदा हि संकल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः॥ ❀ तस्मान्न विज्ञानमृतेऽस्ति किंचित्कचित् कदाचिद् द्विज वस्तुजातम्। विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाऽभ्युपेतम्॥ ज्ञानं विशुद्धं विमलं विशोक-मशेषलोभादिनिरस्तसङ्गम्। एकं सदैकं परमः परेशः स वासुदेवो न यतोऽन्य-दस्ति॥ सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्। एतत्तु यत्सं-व्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते॥ इति।

दोषविषयतयोदाहृतश्रुतीनां महेश्वरादिशब्दैरन्यपरत्वशङ्कां निवारयितुं श्रुतितदर्थापत्तिसिद्धमर्थं निर्विशेषवस्तु-दोषविषयोपबृंहणेन व्यनक्ति— **यथोक्तमिति**। निर्विशेषेऽपि **भगवानित्युपचारः**। **अशेषमूर्तिः**—सर्वत्वेन भ्रान्तिसिद्ध इत्याशयः। **न तु वस्तुभूतः** * पुमान्न देवो न नरो न पशुर्न च पादपः, * चतुर्विधोऽपि भेदोऽयं मिथ्याज्ञान-निबन्धनः इत्यादिवादान्न देवादिजडवस्तुरूपः। यद्वा—न वक्ष्यमाणशैलादिकृत्स्नजगद्वस्तुरूपः। अत्र स्वरूपसाक्षिवृत्ति-ज्ञानानां प्रपञ्चरूपविकृतयोगात् **विज्ञान**शब्दो विविधं ज्ञायतेऽनेनेत्यविद्याविषयः। **विजृम्भितानि**—अध्यस्तानीत्यर्थः। भेदस्य दोषकल्पितत्वं व्यतिरेकेण द्रढयति— **यदेति**। **शुद्धम्**—अविद्यामुक्तम्। **निजरूपि**—तन्मूलभेददृष्टिशून्यम्। तत एव **सर्वकर्मक्षयेऽपास्तदोषम्**— कर्मसाध्यक्लेशादिरहितम्। **संकल्प** इहाविद्या। * अविद्यातरुसंभूतिस्थानतो दर्शनात्, * विज्ञानविजृम्भितानीत्युक्तस्यैव चात्र परामर्शात् समन्ताद्ब्रह्मणैकीकृत्य वा कल्प्यन्तेऽनेन भेदा इति व्युत्पत्तिसंभवाच्च। **वस्तुषु वस्तुभेदाः**— वस्तुत्वेन पृथग्भूतेषु देवादिपिण्डेषु कल्पितेषु जीवेषु वा तद्बुद्धाता देवत्वादयो देवादिपिण्डाश्च न भवन्ति; देवादिप्रतिभासो न स्यादित्याशयः। उक्तप्रदर्शनमात्रार्थतया वस्त्वस्तीत्यादि-श्लोकद्वयमत्र नोपात्तम्। श्लोकचतुष्टयोक्तं विजातीयभेदाभावं निगमयति— **तस्मादिति**। ज्ञानमात्रात्मनि यथादर्शनं तत्तद्बुद्धादिभिरुक्तः सजातीयभेदोऽपि भ्रान्तिसिद्धतया मिथ्याभूत इत्याह—**विज्ञानमिति**। **विज्ञान**शब्दावेह स्वप्रकाशा-नन्दरूपविलक्षणज्ञानपरौ। तथाऽपि निरसनीयत्वेनाभिमताः स्वगता भेदा दुस्त्यजा इत्यत्राह—**ज्ञानमिति**। **विशुद्धम्**—अविद्योज्झितम्। अत एव **विमलम्**—भेददृष्टितन्मूलकर्मरहितम्। **विशोकम्**—कर्माभावादेव तत्फलभूतशोकमोहादि-शून्यम्। **एकमिति** पूर्वोक्तात्मानुवादः। **सदैकम्**—सर्वदानाघ्रातविकारषट्कम्। ईदृशस्योत्पत्त्यादिकमपि अन्तः-करणवृत्तिसंभेदादध्यस्तम्। मिथ्यात्वादेवात्र वृद्धिह्रासादिकं निषिध्यते। स्फटिकरागकल्पस्याविद्यादेरवस्तुत्वेऽपि स्वाप्न-सर्पादिनीत्या निराचिकीर्षादिकमपि न विरुद्धमिति भावः। **परमः परेश** इत्यादिना सामानाधिकरण्येन जीवेश्वरभेदस्यापि

कल्पितत्वोक्तिः। किमसौ दुरारोहः पूर्वपक्ष इत्यत्राह— **सद्भाव** इति। भेददृष्टेरविद्याजन्यत्वं सत्यत्वशङ्काया निःशेषोन्मूलनाय निगमयति— **एतदिति**। **एतत्**—ज्ञानमात्रस्वरूपं ब्रह्म स्वाभ्रप्रपंचकल्पेन भुवनेनाधिष्ठानतया आश्रितम्। **संव्यवहारभूतम्**—समन्तात् एकीकृत्य वा व्यवहारकर्मभूतमिति यावत्। तत्रापि कारणमविद्येति चोक्तमित्यर्थः। **चकारः**— ❀ सद्भाव उक्तः इत्यनेन भ्रमहेतूक्तेः समुच्चयार्थः। एवं वा योजना— संव्यवहारभूतं भुवनकोशादिकं तत्रापि एतदेवाध्यासतो भुवनाश्रितं * ज्योतींषि विष्णुरित्यादिना तथोक्तमिति। यद्वा एतत्तु भुवनगतं संव्यवहारभूतं संव्यवहारेण प्राप्तं व्यावहारिकं सत्यत्वं यत्, तत्राप्यध्यास एव कारणमुक्तमिति। तथा च परेष्टानुवादे भाषिष्यते— * तस्य भुवनादेः सत्यत्वं व्यावहारिकमिति तत्त्वं तवोपदिष्टमिति। **चः** त्वर्थः।

अस्याश्चाविद्याया निर्विशेषचिन्मात्रब्रह्मात्मैकत्वविज्ञानेन निवृत्तिं वदन्ति ❀ न पुनर्मृत्यवे तदेकं पश्यति, ❀ न पश्यो मृत्युं पश्यति, ❀ यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति, ❀ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥ ❀ ब्रह्म वेद ब्रह्मैव भवति, * तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः इत्यादयः श्रुतयः। अत्र मृत्युशब्देन अविद्याऽभिधीयते; यथा सनत्सुजातवचनम्— * प्रमादं वै मृत्युमहं ब्रवीमि सदाप्रमादममृतत्वं ब्रवीमीति।

एतावता प्रकृते किमायातमित्यत्र मुक्त्युपायस्य कर्मनैरपेक्ष्यं सिद्धपरवाक्यानुविधायिमोक्षोपायपरवाक्यशक्त्या व्यनक्ति— **अस्या** इति। अनिर्वाच्यत्वादिविशिष्टाया इत्यर्थः। तत एव ज्ञानमात्रनिवर्त्यत्वं ब्रह्मात्मैकत्वं महावाक्यार्थः, ऐक्यदर्शनमविद्यानिवर्तकमित्याह— **न पुनरिति**। एकं पश्यतीति यत् ततो न पुनर्मृत्यव इति योजना। य इति वाऽध्याहारः। **तदेकं पश्यतीत्यत्र** कर्तृकर्मभेदव्युदासोऽप्यभिप्रेतः। शब्दजन्यप्रत्यक्षाभिप्रायेण पश्यतीत्याद्युक्तिः। दृगधीनसिद्धेरविद्यायास्तत्कार्याणां च [रा]गादीनामदर्शनमत्र साध्यमित्याह—**न पश्य** इति। निर्विशेषात्मैक्यबुद्धिदार्ढ्यानन्तरमेव भयनिवृत्त्या तत्कारणाविद्यानिवृत्तिसूचनमाह— **यदा हीति**। **अदृश्ये**—दृक्कर्मत्वरहिते। **अनात्म्ये**—अशरीरे; आत्मना व्याप्यं हि शरीरमात्म्यम्। **अनिरुक्ते**—अशब्दगोचरे। **अनिलयने**—अनाधारे। यद्वा निलीयतेऽस्मिन्नध्यस्यैरिति निलयनमविद्या, तद्रहिते। **अभयमिति** प्रतिष्ठाविशेषणम्, लिङ्व्यत्ययश्छान्दसः; क्रियाविशेषणं वा, अव्ययीभावेन भयाभावायेति वा, **अथ सोऽभयं गतः** इति फलोक्तिसंवादात्। **प्रतिष्ठाम्**—ऐक्यबुद्ध्या स्थितिमित्यर्थः। बन्धकतया सिद्धान्तीष्टानां कर्मपर्यन्तानामपि धीनिवर्त्यत्वेन मिथ्यात्वं दर्शयति— **भिद्यत इति**। **हृदयग्रन्थिः**— अविद्या; संशयादि तत्कार्यमिति सकार्याविद्यानिवृत्तिरिहोक्ता। ननु * तादृगेव भवति, * निरञ्जनः परमं साम्यमुपैति, * सोऽश्नुते सर्वान्कामान्सह, ब्रह्मणा विपश्चितेत्यादिषु फलदशायां तादृक्त्वसाम्यभेदोक्तिस्वारस्यात् ❀ पृथगात्मानमित्युक्तेश्च भेदज्ञानमेव मुक्तिहेतुः स्यादित्यत्राह— **ब्रह्म वेदेति**। अत्राविद्याकृतभेदनिवृत्तिरवधारणद्योत्या। न चात्र तद्भूतस्यातद्भूतस्य वा तद्भावः साध्यः। **कर्मसमुच्चयादिनिरासार्थमैक्यज्ञानेनाविद्या-**

तरणव्यक्त्यर्थं चाह— **तमेवेति** । * वेदाहमेतं पुरुषं महान्तमिति सर्वलोकप्रत्यक्षसिद्धजीवैक्येन प्रकृतो ब्रह्म तमिति परामृश्यत इति भावः । इदं वाक्यद्वयं ज्ञानस्यैव साक्षान्मोक्षसाधनत्वाय प्रागुपात्तम् । इह त्वविद्यानिवृत्त्यतिरिक्त-साध्यनिरासार्थम् । * नान्यः पन्थाः इति कर्मनिषेधपरम् । **आदि**शब्देन * ज्ञात्वा तमेवं मनसा हृदा च मृत्यो न मृत्युमुपयाहि विद्वानित्यादिसंग्रहः । **श्रुतय** इति प्रकृत्या बहुवचनेन च श्रुतस्यैव ग्राह्यत्वं मिथस्संवादेन दार्ढ्यं च सूच्यते । उपात्तवाक्येष्वविद्यानिवृत्तिर्न भाति; मृत्युशब्दस्तु अर्थान्तरेऽपि स्यादित्यत्राह— **अत्रेति** । मोक्षोपाय-वाक्येषु ज्ञाननिवर्त्यविषयत्वौचित्यादस्याविद्यात्वमिति भावः । प्रसिद्धिविरोधिशङ्कां निरस्यति— **यथेति** । **प्रमादः**— अनवधानता; अज्ञानम् ; कार्येण वा कारणलक्षणा । **अप्रमादम्**— अविद्यानिवृत्तिम् । यद्वा—अत्र अमृतत्वसाधन-तयोक्तः अप्रमादस्तत्त्वज्ञानम् ; तत्प्रतिपक्षः प्रमादोऽप्यत्राज्ञानमेव । **अहं ब्रवीमीति** तत्त्ववित्सिद्धान्तख्यापनपरम् ।

*** सत्य ज्ञानमनन्तं ब्रह्म, * विज्ञानमानन्दं ब्रह्मेत्यादिशोधकवाक्यावसेयनिर्विशेष-स्वरूपब्रह्मात्मैकत्वविज्ञानं च * अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद, * अकृत्स्नो ह्येषः ❀ आत्मेत्येवोपासीत, ❀ तत्त्वमसि, * त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि [भगवो] देवते * तद्योऽहं सोऽसौ योऽसौ सोऽहमित्यादि-वाक्यसिद्धम् । वक्ष्यति चैतदेव— * आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति । तथा च वाक्यकारः—* आत्मेत्येव तु गृह्णीयात्सर्वस्य तन्निष्पत्तेरिति । अनेन च ब्रह्मात्मै-कत्वविज्ञानेन मिथ्यारूपस्य सकारणस्य बन्धस्य निवृत्तिर्यु[रु]क्ता ॥**

ब्रह्मणो निर्विशेषत्वं जीवतादात्म्यमैक्यज्ञानस्य मुक्तिहेतुत्वं च नैतेषु व्यक्तं भातीत्यत्र शोधकैर्निर्विशेषत्वमुपायपर वाक्यैस्तत्त्वनिर्देशैस्तदनुसन्धानपरैश्च वाक्यैर्जीवैक्यज्ञानसिद्धिं चाह— **सत्यमिति** । त्वं वेत्यादिना देवतां प्रति उक्तस्यैव तदर्थस्य, **तद्योऽहमित्यादिना** स्वस्मिन्ननुसन्धानं स्थापयति । उक्तस्य सूत्रकृदिष्टत्वमाह— **वक्ष्यतीति** । **एतदेव**—न त्वदिष्टमिति भावः । **आत्मेति**—स्वानन्यत्वेनेति यावत् । सूत्राभिप्रेतं तद्विदुक्त्या स्पष्टयति—**तथेति** । **सर्वस्य तन्निष्पत्तेः**— भातस्य सर्वस्य तस्मिन्नध्यस्तत्वादित्यर्थः ; बाधावस्थायामधिष्ठानभूतब्रह्मात्मतया परिशिष्टत्वादिति भावः । अद्वैतधीकरणस्य वाक्यस्य सूत्रवाक्याभ्यां सूचितमनुग्राहकं वचः * सन्मूलाः इत्यादिना प्रागुक्तमेव । चोद्यो-त्थापनायाह—**अनेनेति** । असत्यभेदबाधस्वरसेनेति भावः । **चः** पूर्ववदुभयार्थः । * द्वितीयाद्वै भयं भवतीत्यादिसूचनाय **ब्रह्मात्मैकत्वोक्तिः** । मिथ्याभूतस्य ज्ञानेतरकर्मनिवर्त्यत्वे सत्यत्वं स्यात्, तच्च मानविरुद्धम् ; न च रज्जुसर्पादिनिवृत्तौ मन्त्रौषधदण्डघाताद्यपेक्षेति भावः । अपुनरङ्कुरत्वाय **सकारणत्वोक्तिः** ॥

ननु च सकलभेदनिवृत्तिः प्रत्यक्षविरुद्धा कथमिव शास्त्रजन्यविज्ञानेन क्रियते ? कथं वा रज्जुरेषा न सर्प इति ज्ञानेन प्रत्यक्षविरुद्धा सर्पनिवृत्तिः क्रियते ? तत्र द्वयोः प्रत्यक्षयोर्विरोधः, इह तु प्रत्यक्षमूलस्य शास्त्रस्य प्रत्यक्षस्य चेति चेत् ; तुल्ययो-

विरोधे वा कथं बाध्यबाधकभावः ? पूर्वोत्तरयोर्दुष्टकारणजन्यत्वतदभावाभ्यामिति चेत् ; शास्त्रप्रत्यक्षयोरपि समानमेतत् । एतदुक्तं भवति— बाध्यबाधकभावे तुल्यत्वसापेक्षत्वनिरपेक्षत्वादि न कारणम् ; ज्वालाभेदानुमानेन प्रत्यक्षोपमर्दायोगात् । तत्र हि ज्वालैक्यं प्रत्यक्षेणावगम्यते । एवं च सति द्वयोः प्रमाणयोर्विरोधे यत्संभाव्यमानान्यथासिद्धि तद्बाध्यम् , अनन्यथासिद्धमनवकाशमितरद्बाधकमिति सर्वत्र बाध्यबाधकभावनिर्णय इति । तस्मादनादिनिधनाविच्छिन्नसंप्रदायासंभाव्यमानदोषगन्धानवकाशशास्त्रजन्यनिर्विशेषनित्यशुद्धबुद्धमुक्तस्वप्रकाशचिन्मात्रब्रह्मात्मभावावबोधेन संभाव्यमानदोषसावकाशप्रत्यक्षादिसिद्धविविधविकल्परूपबन्धनिवृत्तिर्युक्तैव । संभाव्यते च विविधविकल्पभेदप्रपंचग्राहिप्रत्यक्षस्यानादिभेदवासनादिरूपाविद्याख्यो दोषः ॥

आस्तामनुकूलस्तर्कः, प्रतिकूलस्तु सिद्ध इत्यभिप्रायेण चोदयति— **ननु चेति** । बाधकतयेष्टयोः शास्त्रानुमानयोः शब्दार्थस्वरूपतद्भूयुत्पत्तीनां व्याप्तिधर्मलिङ्गादीनां च सिद्ध्यर्थमुपजीव्यं प्रत्यक्षं न ताभ्यां बाध्येत । अन्यथा— आदित्यो यूपः, पावकोऽनुष्ण इत्यादेरपि प्रत्यक्षबाधकत्वं स्यात् । चन्द्रादिभेदबाधकस्य तु तन्नोपजीव्यमित्यभिप्रायेण **सकलशब्दः** । सकलभेदबाधे ह्युपजीव्यबाधोऽप्यन्तर्गतः । **कथमित्र**—न कथंचित् ; प्रत्यक्षविरुद्धं शास्त्रमेव बाधितमुख्यार्थं भाक्तं नेयमिति भावः ।

अत्र किं प्रत्यक्षत्वान्न बाध्यम् , उत परोक्षत्वान्मूलित्वाच्च न बाधकमिति शङ्काद्वये प्रथमं परिहरति— **कथं वेति** । प्रत्यक्षशब्द इहापरोक्षमात्रपरः ; बाधात्पूर्वमनाभासत्वाभिमानो बाधश्च प्रपञ्चरज्जुसर्पभ्रमयोः सम इति भावः । मूलित्वादिना न शास्त्रं बाधकमिति शङ्कते— **तत्रेति** । **प्रत्यक्षयोः**—अपरोक्षयोरित्यर्थः । इदं च मूलमूलित्वरहितयोः प्रत्यक्षपरोक्षयोरप्युपलक्षणम् । अत एवेह दृष्यं निष्कृष्यानुवक्ति— **इहेति** । सकलभेदनिवृत्ताविति्यर्थः । वैषम्यव्यक्त्यै **तुशब्दः** । प्रत्यक्षशब्दोऽत्र प्रत्यक्षप्रमाणविषयः । द्वयोः प्रत्यक्षयोरित्युक्तस्य तुल्यबलत्वस्य बाधं प्रत्यप्रयोजकत्वात् , अन्यथा प्रकरणसमेऽतिप्रसङ्गाद्विपरिवर्तप्रसङ्गाच्चान्यत्प्रयोजकं शिक्षयितुमाह— **तुल्ययोरिति** । चोद्यत्रयनिवृत्त्यै सिद्धान्तीष्टं प्रयोजकं शङ्कते— **पूर्वेति** । **पूर्वोत्तरयोरिति** क्रमो न नियतः । उक्तं प्रयोजकमपि प्रस्तुते तावदस्तीत्याह— **शास्त्रेति** । शास्त्रशब्द इह तज्जन्मधीलक्षकः । धीद्वयविवेकार्थं विशेषविवक्षया वा तत्कारणेऽन्वयोक्तिः । **एतत्**—वैषम्यमित्यर्थः । ननु दुष्टहेतुजत्वस्य बाध्यताहेतुत्वमुपजीव्यत्वाद्यभावेन तुल्यत्वे सति स्यात् , उपजीव्यबाधे चाधर्मत्वसाधकहिंसाद्यपि प्रमाणं स्यादित्यत्राह— **एतदुक्तमिति** । तुल्यत्वोक्तिर्दृष्टान्तार्था । तद्विशिष्टं वा दुष्टहेतुजन्यत्वादिकं विवक्षितम् । आदिशब्देनोपक्रमापच्छेदाधिकरणोक्तनियतानियतपौर्वापर्यादेः परोक्षत्वादेश्च संग्रहः । **अकारणम्**— अप्रयोजकम् ; अव्याप्तेरिति शेषः । उक्तमर्थमुदाहरणस्थेन तर्केण द्रढयति— **ज्वालेति** । **कारणं चेदित्यध्याहार्यम्** । **अयोगादिति** प्रसज्यमानोक्तिः । ननु प्रत्यक्षं वर्तमानग्राहित्या ज्वालास्वरूपं गृह्णाति ; भिन-

सन्ततावित्र सूक्ष्मदृशामेकसन्ततावपि ज्वालाभेदः प्रत्यक्षसिद्ध इत्यत्राह— **तत्रेति** । प्रत्यक्षशब्द इह प्रत्यभिज्ञाख्य-विशेषविषयः । सा चात्र भ्रान्तिरूपा पटुतरदृष्टीनामपि पूर्वापरकालवर्त्यैक्यविषयात्यन्तसादृश्यसादेश्या[न्यादृश्या]-दिभिर्जायत एव । अतो विरोधो बाधश्चात्र सिद्ध इति भावः । तर्हि प्रसिद्धस्याप्रयोजकत्वे प्रयोज्यं निष्कारणं स्यादि-त्यत्राह— **एवं च सतीति** । **चः** शङ्कानिवृत्त्यर्थः समुच्चयार्थो वा ; अव्याप्त्या च सह तर्कबाधे च सतीति यावत् । सजातीययोर्विजातीययोर्वेति न निर्बन्ध इत्यभिप्रायेण **द्वयोरित्युक्तम्** । **प्रमाणयोः** बलविमर्शात्पूर्वं मानत्वेन भातयो-रित्यर्थः । **विरोधे**—मिथो विषयापहाररूपे । **अन्यथासिद्धिः**—स्वविषयसत्यत्वमन्तरेणापि स्वरूपलाभः । तत्र हेतुत्वेन सावकाशत्वमाकृष्टव्यम् । तच्च द्विचन्द्रादिधीवदप्रमाणकोटिनिवेशार्हत्वाद्वा पदाहवनीयादिनयेन अविरुद्धविषयलाभाद्वा स्यात् । **अनन्यथासिद्धम्**—स्वविषयमिथ्यात्वेऽनुपपन्नस्वरूपं विरुद्धमबाधित्वोत्पत्तुम् अनर्हत्वाद्वा । तत्र हेतु**रनवरुद्ध-शत्वम्** ; तच्च पूर्वोक्तावकाशद्वयाभावसनुच्चयरूपम् । **इतरत्** । अनादृतसाजात्यादिविशेषमिति भावः । **सर्वत्र**—तुल्या-तुल्योदाहरणेषु तार्तीयबाधस्थलेषु चेत्यर्थः । **निर्णयः**—प्रमाणतर्कसिद्धोऽध्यवसायः । **इतिशब्दः** पूर्वो हेतौ, उत्तरः समाप्तौ । समानमेतदित्यत्राभिप्रेतं शास्त्रप्राबल्यं विवृण्वन् एतदुक्तमिति प्रक्रान्तं निगमयति— **तस्मादिति** । अस्म-दुक्तस्यैव प्रयोजकत्वादित्यर्थः । यद्यपि— अविद्यानिवृत्तौ वेदोऽपि न स्यात् ; तथाऽपि सर्गप्रलयकालेषूत्पत्तिनाशा-भावात् **अनादिनिधनत्वोक्तिः** । तद्विषयैव * अनादिनिधनाद्येषा वागुत्सृष्टा स्वयंभुवा इति स्मृतिरिति भावः । **अविच्छिन्नसंप्रदायत्वोक्त्या** मन्वन्तरादिष्वविच्छेदेन विप्लवासंभवः सूच्यते ।

* प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयत इत्येतदपि कालविशेषाद्यनुगुणशाखाविशेषप्रवर्तनपरम् ; अन्यथा * ब्रह्म स्वयंभ्वभ्यानर्षेदित्यादिभिर्विरोधात् ; स्मर्तव्यत्वे सत्यस्मर्यमाणकर्तृकत्वादित्यपौरुषेयत्वसाधकं चात्र सूचितम् । अत एव वक्तृदोषासंभवः । मन्वाद्यास्ववाक्यानां श्रुतिविरोधे क्वचिद्बाध इष्टः, न तथेत्यभिप्रायेण **गन्धशब्दः** । एवम-प्रमाणकोटिनिवेशोऽपास्तः । विरुद्धविषयोऽपि नास्तीति व्यक्त्यै **निर्विशेषत्वाद्युक्तिः** । **नित्यशब्दः** शुद्धत्वादौ सर्वत्र योज्यः, अबाधपरो वा । **शुद्धम्**— अविद्यासाक्षित्वावस्थायामपि वस्तुतस्तद्रहितम् । तेन **बुद्धम्**— अतिरोहितनित्य-प्रकाशम् । तत एव **मुक्तम्**— सर्वदा कर्मतत्फलवियुक्तम् । **स्वप्रकाशम्**— मिथ्यात्वप्रयोजकदृश्यत्वोज्झितम् । तत्र हेतुश्चिद्रूपत्वम् । अत्र निषेधकज्ञानाश्रयत्वस्यापि मिथ्यात्वव्यक्तये **मात्र**शब्दः । **ब्रह्मात्मभावः**— ब्रह्मण एव प्रत्यगात्मत्वम् । प्रत्यक्षस्य संभाव्यमानदोषत्वम् प्राचुर्येणाऽन्यत्र दोषदर्शनादन्यत्रापि दोषशङ्कार्हत्वम् । तत एवानु-मानादेरपि शङ्कितदोषत्वाय **आदि**शब्दः । देवादिभेदैस्तदवान्तरैश्च बन्धस्य विविधविकल्परूपत्वम् । विशेषतः कल्प्यत इति **विकल्पः** । **एव**कारः प्रतिकूलतर्कासंभवपरः । ननु काचाद्यभावान्निर्दोषत्वेन प्रसिद्धे प्रत्यक्षे दोषो दुर्वचः ; तज्जातीये दोषदृष्ट्याऽन्यत्रापि तत्कल्पौ वेदे वाक्यत्वादिभिस्तथा कल्पितिः स्यादित्यत्राह— **संभाव्यत इति** । **चः** शङ्कानिवृत्त्यर्थः, बाधकप्रत्ययेन सह कारणदोषनिश्चयस्य समुच्चयार्थो वा । **भेदप्रपञ्चः** निजकर्मभेदविभिन्नचित्तैरविद्या-कल्पितश्चिदचिद्विस्तारः । **प्रत्यक्षस्येति** भेदग्राहकमात्रस्योपलक्षणम् । **आदि**शब्देन मूलाविद्यां भेददृष्टिं च संगृह्णाति । एतेषु यथार्हमन्योन्याश्रयादिनिरासाय **अनादि**शब्दः । एतेषां दोषत्वम् * वासनारेणुकुण्ठितः, * अविद्यासंवृतं कर्मे-त्यादिभिस्सिद्धम् ।

ननु अनादिनिधनाविच्छिन्नसंप्रदायतया निर्दोषस्यापि शास्त्रस्य * ज्योतिष्टोमेन

स्वर्गकामो यजेतेत्येवमादेर्भेदावलम्बिनो बाध्यत्वं प्रसज्यते ; सत्यम्— पूर्वापरापच्छेदे पूर्वशास्त्रवन्मोक्षशास्त्रस्य निरवकाशत्वात्तेन बाध्यत एव । वेदान्तवाक्येष्वपि सगुण-ब्रह्मोपासनपराणां शास्त्राणामयमेव न्यायः ; निर्गुणत्वात्परस्य ब्रह्मणः । ननु च * यस्सर्वज्ञस्सर्ववित्, * पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, * सत्यकामस्सत्यसंकल्पः इत्यादिब्रह्मस्वरूपप्रतिपादनपराणां शास्त्राणां कथं बाध्यत्वम् ? निर्गुणवाक्यसामर्थ्यादिति ब्रूमः ।

भेदग्राहकप्रत्यक्षादीनामद्वैतश्रुतिविरोधाद्बाध्यत्वमुक्तम् ; तत्रातिप्रसक्त्या चोदयति— **नन्विति** । **अपिः** सदोष[निर्दोष]समुच्चयार्थः, विरोधार्थो वा । बाध्यत्वप्रयोजकभेदावलम्बित्वव्यक्त्यै **ज्योतिष्टोमाद्युक्तिः** । द्वैतीयभेदावलम्बिनी तृतीयादिदशाध्यायी । आदिशब्देन कर्मविध्यन्तरसंग्रहः । बाध्यत्वोक्त्या प्रमाणलक्षणविरोधोऽपि सूचितः । तत्र धर्मप्रमाणस्य साकल्येनांशतोऽपि वा पादेन वा त्रिपाद्या वा ह्यप्रामाण्यमपाकृतम् । इष्टप्रसङ्गोऽयमित्याह—**सत्यमिति** । यद्वा बाध्यत्वमस्ति ; तावता सदोषत्वमप्रामाण्यं च न स्यादित्यर्थाङ्गीकारः ; मिथ्यात्वेऽपि दृष्टिविधिनयात् साध्य-साधनभावे व्यावहारिकं प्रामाण्यमिति भावः । अङ्गीकृतं निर्दोषस्य बाध्यत्वांशं पौर्वापर्यरूपविशेषेऽपि स्वोक्तबाधप्रयोजक-व्याप्तिं च श्रौतदृष्टान्तेन विवृणोति— **पूर्व इति** । **मोक्षशास्त्रस्य**—बन्धरूपभेदनिवर्तकतत्त्वावेदकवाक्यस्येत्यर्थः । * पञ्च ऋत्विजः समन्वारब्धाः सर्पन्ति । अध्वर्यु प्रस्तोताऽन्वारभते प्रस्तोतारं प्रतिहर्ता प्रतिहर्तारमुद्गाता उद्गातारं ब्रह्मा ब्रह्माणं यजमानः इत्यस्मिन् प्रयोगे * यदि बर्हिष्पवमानं सर्पतां प्रस्तोताऽपच्छिद्येत इत्यादिनाऽपच्छेदप्रायश्चित्तविधौ * यदि प्रतिहर्ता पशुभिर्यजमानो व्यृध्येत सर्ववेदसं दद्यात्, यद्युद्गाता यज्ञेन यजमानो व्यृध्येतादक्षिणः स यज्ञः संस्थाप्यः इत्युक्तम् । तदिदं नैमित्तिकद्वयमेकस्मिन्नयोगे विरुद्धम् । तत्र युगपदपच्छेदे उद्गातुः प्रायश्चित्तं प्रतिहर्तुः सर्वप्रायश्चित्तं वा कार्यम् । पूर्वापरापच्छेदे यो जघन्योऽपच्छिद्येत तस्य प्रायश्चित्तमेवेति व्यवस्थापितम् । तदुक्तम्— * पूर्वापरापच्छेदे पूर्वदौर्बल्यं प्रकृतिवदिति । अत्रेदं पूर्वपक्षः— उपक्रमनयेनासंजातविरोधितयोदितत्वात्पूर्वस्य प्राबल्यम् । परस्य तूदितविपक्षसन्निधावेव प्रवृत्तेर्दौर्बल्यमिति । सिद्धान्तस्तु— परस्मिन्ननुत्पन्ने तदसन्निधानात्परम-बाधित्वा पूर्वस्योदयः । इतरस्य तु पूर्वोदितविरोध्यबाधेनोदयायोगान्निमित्तोदये नैमित्तिकशास्त्रोदयावश्यंभावाच्च पर-प्राबल्यम् । उपक्रमोपसंहारयोस्तु विरुद्धस्य परस्यानुदय एवेति । इह तु कर्मणां भुक्तौ पूर्वप्रावण्येनार्थक्रमात् तदनु-गुणपाठक्रमाच्चापच्छेदवत्पूर्ववृत्तकर्मशास्त्रोपमर्देन भोगनिवृत्तिरूपमुक्तिशास्त्रोदयः । ईदृशोदाहरणेष्वेव * पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यतीत्युच्यते । एवमुत्सर्गापवादाद्युदाहरणान्तरेष्वपि निर्दोषवाक्यसिद्धस्य निरवकाशेन बाधो निदर्शनीयः । ननु वेदान्तेष्वपि सगुणोपास्तिविधीनां भेदावलम्बित्वं सिद्धम् । न च तेषां निर्गुणवाक्यापेक्षया पूर्वत्व-नियमः ; अतस्तेषु नापच्छेदनीतिरित्यत्राह— **वेदान्तेति** । **सगुणब्रह्मोक्तिर्दृष्ट्यादेरुपलक्षणार्था** । **उपासन-पराणामित्यनेन** सिद्धे तात्पर्ये नास्तीति व्यज्यते । पौर्वापर्याभावेऽपि तत्फलभूतबाधस्य तात्पर्यलब्धत्वदर्शनात् **अयमेव न्यायः इत्युक्तम्** । * संकल्पादेवास्य पितरः समुत्तिष्ठन्ति, * जक्षत्क्रीडन्नित्यादिसांसारिकफलोक्त्या तादृश-

विधानां मोक्षशास्त्रापेक्षया कर्मशास्त्रवत् आर्थं पूर्वत्वं च सिद्धम् । यद्वा, निर्दोषत्वेऽपि निरवकाशवाक्येन बाधः स्यादित्युक्त एव न्याय इत्यर्थः । गुणविधिरेवात्रालम्भविधिन्यायान्निरवकाश इत्यत्राह— **निर्गुणत्वादिति** । निर्विशेषस्वरूपपरतया निरवकाशैः वाक्यैर्गुणबाधादिति भावः । विधिपदानन्वयेन सिद्धविषयाणां सगुणवाक्यानां पूर्वत्वान्यपर्ययोरयोगात् न बाध्यत्वं स्यादित्यभिप्रायेण चोदयति— **ननु चेति** । **कथमिति** प्रतिक्षेपवचनं प्रश्नवद्भावयन् पौर्वापर्यमभिसन्धाय प्रतिवक्ति— **निर्गुणेति** ।

एतदुक्तं भवति— * अस्थूलमनण्वह्रस्वमदीर्घम्, * सत्यं ज्ञानमनन्तं ब्रह्म, * निर्गुणम्, * निरञ्जनम् इत्यादीनि वाक्यानि निरस्तसमस्तविशेषकूटस्थनित्यचैतन्यं ब्रह्मेति प्रतिपादयन्ति, इतराणि च सगुणम् । उभयविधवाक्यानां विरोधे तेनैवापच्छेदन्यायेन निर्गुणवाक्यानां गुणापेक्षत्वेन परत्वाद्बलीयस्त्वमिति न किंचिदपह्नानम् ।

अनन्यपरसगुणवाक्यबाधसमर्थानि कानि वाक्यानि ? तेषां च तद्बाधे कीदृशं सामर्थ्यमित्यत्राह— **एतदुक्तमिति** । कूटस्थम्—विश्वविकाराध्यासे तन्निवृत्तौ च स्वयं कूटवत् अविकृतम् । कूटे अध्यसनीये स्वयं सत्यतया सर्वाधिष्ठानत्वेन स्थितम् । **इतराणि**—उपात्तानि, * यस्सर्वज्ञः इत्यादीनि तादृशान्यपि । चस्त्वर्थः, विरुद्धवर्गद्वयसमुच्चयपरो वा । **तेनैव** भुक्तिमुक्तिशास्त्रयोरिह प्रदर्शितेनैवेत्यर्थः । निषेध्यप्रसक्तकापेक्षया निषेधकस्य परत्वमर्थसिद्धमित्यभिप्रायेण **गुणापेक्षत्वेने**त्युक्तम् । सगुणवाक्यानां निर्दोषत्वेऽप्यार्थेन पूर्वत्वेन बाध्यत्वम्, उपास्तिविधिशेषत्वकल्प्त्या साफल्या त्कथंचित्सामान्यं च स्यादित्यभिप्रायेणाह— **न किंचिदिति** ।

ननु च— * सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र सत्यज्ञानादयो गुणाः प्रतीयन्ते । नेत्युच्यते ; सामानाधिकरण्येनैकार्थत्वप्रतीतेः । अनेकगुणविशिष्टाभिधानेऽप्येकार्थत्वमविरुद्धमिति चेत्— अनभिधानज्ञो देवानांप्रियः । एकार्थत्वं नाम सर्वपदानामर्थैक्यम् । विशिष्टपदार्थाभिधाने विशेषणभेदेन पदानामर्थभेदोऽवर्जनीयः । ततश्च एकार्थत्वं न सिध्यति । एवं तर्हि सर्वपदानां पर्यायता स्यात्, अविशिष्टार्थाभिधायित्वात् । एकार्थाभिधायित्वेऽप्यपर्यायत्वमवहितमनाः शृणु—एकत्वतात्पर्यनिश्चयादेकस्यैवार्थस्य तत्तत्पदार्थविरोधिप्रत्यनीकत्वपरत्वेन सर्वपदानामर्थवत्त्वमेकार्थत्वमपर्यायता च ।

अत्र सत्यत्वादिविशिष्टपरं वाक्यं कथं निर्गुणवाक्यतयोपात्तमिति चोदयति— **ननु चेति** । **सत्यज्ञानादयः** ; * द्व्येकयोः इतिवद्भावप्रधानोक्तिः । आनन्त्यमपि व्यापित्वरूपो गुण इति बुद्ध्या बहुवचनम् । अयं भावः— अत्र

गुणप्रतीतिर्नापह्नोतुं शक्या; तस्याश्च बाधाभावात् स्वतः प्रमात्वं सुस्थमिति। नेयं प्रमितिरिति युक्त्या स्थापयिष्यत इत्याह— **नेत्युच्यत** इति। एकार्थतात्पर्यार्हत्वरूपवृत्त्या गुणभेदधीर्बाध्येत्याह— **सामानाधिकरण्येने**ति। कारकभेदक्रियैकत्वबुद्ध्योरिव विशेषणभेदविशेष्यैक्यधियोरविरोधान्न बाध्यबाधकतेति चोदयति— **अनेके**ति। समानाधिकरणव्यधिकरणपदानां वृत्तिवैषम्यमेकार्थशब्देनान्ययोगव्यवच्छेदं च न जानासीत्युपालम्भमुखेन प्रतिवक्ति— **अनभिधाने**ति। **देवानांप्रिय** इति अज्ञातनाम्नामुपचारप्रयोगः; इह त्वप्रख्यात इत्यर्थः। छाग इत्येके; तदाऽप्यज्ञ इति यावत्। तदज्ञातं स्वाभिप्रेतं विवृणोति— **एकार्थत्वमि**ति। तेषा हि पदानामर्थैक्यम्— प्रकृतिप्रत्ययसमुदायबोध्यप्रातिस्विकविशेष्यैक्यम्, * अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादित्येतावता मिथोऽन्वितार्थपदजातबोध्यप्रधानैक्यम्, पदभेदेऽर्थभेदाभावश्चेति। तेष्वाद्यं पदमात्रे; द्वितीयं व्यधिकरणवाक्ये; [तत्र] तृतीयमिह मदुक्तम्। तच्च * भिन्नप्रवृत्तिनिमित्तानां शब्दानामित्यादिपतञ्जलिवाक्यप्रसिद्धमित्यभिप्रायेण **नाम**शब्दः। एवमप्यस्य प्रधानप्रतिपाद्यविशेष्यभेदाभावमात्रपरत्वे को विरोध इत्यत्राह— **विशिष्टे**ति। **विशेषणभेदेने**त्येतत् बहुधा योज्यम्— विशेषणानां मिथो विशेष्याच्च भेदेन, विशेषणभेदेनैव विशिष्टभेदाद्विशेष्यभेदप्रसङ्गेन चेति।

भेदकं हि स्वभावेन प्रत्यक्षाद्यनिराकृतम्। विशेषणान्तराधारात् स्वाधारं भेत्तुमर्हति ॥ ३४० ॥

श्यामो युवेत्यादौ दृष्टत्वादेव विशेषणानां भेदकत्वस्वभावोऽपोदितः। इह तु भेदकं विशेषणं भेद्यं विशेष्यमिति व्यवस्थाया नित्यानीन्द्रिये शब्दोपस्थाप्ये कः प्रतिरोद्धा? अनावृत्त एकवचनान्तो विशेष्यशब्द इति चेन्न; जात्यैक्यविवक्षयाऽपि तदुपपत्तेः, यथा—खण्डो मुण्डो गौरिति। प्रत्यक्षबलात्तत्र भेद इति चेन्न; अप्रत्यक्षेऽपि तथोक्तौ व्यक्तिभेदबुद्धेः, तद्वद्ब्रह्मणि। किंच तेनतेन पदेनोद्दिष्टे विशिष्टे पदान्तरार्थविधौ विशेषणानां मिथः समवायः स्यात्, उपादेयस्य यावदुद्देशव्याप्तित्वात्; तथा च तेषां विशेषणस्वरूपाद्भेदेन नानाविशिष्टापत्तिः। किंच,

विशिष्टार्थाभिधायित्वे भेदकेष्वपि भेद्यवत्। अन्योन्यसमवायैक्यप्रसङ्गौ चात्र तन्त्रितौ ॥ ३४१ ॥

तथा हि— विशेषणभेदेन विशेषणानां परस्परसमवायतादात्म्याभ्यामन्यथाभावेन पदानामव्युत्पन्नाप्रामाणिकार्थभेदः, विशिष्टविधावपि समानविभक्तिविशेष्यांशमिव विशेषणांशमप्येकीकुर्यात्; प्रकृत्युपस्थापितैक्यपरत्वात्। तदाऽपि स्वान्यैक्याद्विशेषणानां स्वस्माद्भेदः स्यादित्यादयः प्रसङ्गा इहाभिप्रेताः। एतैः फलितं प्रसङ्गान्तरमाह— **तत** इति। विशिष्टस्यैवमनभिधेयत्वे विशेषणमात्रोक्तिर्दूरापास्तेति मत्वा विशेष्यमात्रपक्षं चोदयति— **एवं तर्ही**ति। उक्तप्रकारेण विशेष्यमात्रपरत्वे सतीत्यर्थः। भिन्ननिमित्तानामनुपपत्त्या निमित्तत्यागे कथं पर्यायत्वमित्यत्राह— **अविशिष्टे**ति। एकपदोक्तमालाभिधायित्वादिति यावत्। अत एव पदान्तरवैयर्थ्यात्पर्यायत्वं सामानाधिकरण्यभङ्गश्च स्यात्। आहुश्च—

* नातत्तन्मन्यसे तावन्न तत्तदपि मंस्यसे। सामानाधिकरण्यं हि रूपभेदमपेक्षते ॥ इति।

विवक्षितस्य लोकोत्तीर्णत्वान्नैतत्त्वरमाणेन लभ्यमित्यवहितेन क्रमेणेदं बोद्धव्यमित्यभिप्रायेणाह— **एकार्थाभिधायित्वेऽपी**ति। उक्तप्रसञ्जकानुवादोऽयम्। तेन त्वदुक्तं न प्रसज्यत इत्याह— **एकत्वे**ति। अयं भावः—वाक्यतात्पर्यानुसारेण हि सर्वत्रोपचारः। अत्र च स्वरूपबुभुत्सया समानविभक्त्या चार्थैक्ये तात्पर्यं निश्चितम्। तेन विशे-

षणाभिधानं त्यक्तम् ; तत्फलभूतव्यावृत्तिपरत्वं तु स्थितम् । तदिह विरोधिव्यावृत्तिभेदैः प्रतिपदं प्रयोजनम् सामानाधिकरण्यलक्षणानुगुणमैकार्थ्यम् निमित्तभेदव्युत्पत्तिफलैः पर्यायत्वनिरासश्च स्यादिति । उक्तं च **सुरेश्वराचार्यैः**—

* प्रतिपद्य पदार्थं हि विरोधात्तद्विरोधिनः । पश्चादभावं जानाति वध्यघातकवत्पदात् ॥
शब्दात्प्रतीयते तावत्संगतिर्धर्मधर्मिणोः । मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः ॥
तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणम् । स्वार्थार्पणप्रणाडयैव परिशिष्टौ विशेषणम् ॥ इति ।

तद्विरोध्यभेदिनश्चाहुः— * व्यावर्त्याभाववत्त्वेव भाविकी हि विशेष्यता । इति ।

एतदुक्तं भवति— लक्षणतः प्रतिपत्तव्यं ब्रह्म सकलेतरपदार्थविरोधिरूपम् । तद्विरोधिरूपं सर्वमनेन पदत्रयेण फलतो व्युदस्यते । तत्र सत्यपदं विकारास्पदत्वेनासत्याद्वस्तुनो व्यावृत्तब्रह्मपरम् । ज्ञानपदं चान्याधीनप्रकाशजडरूपाद्वस्तुनो व्यावृत्तपरम् । अनन्तपदं च देशतः कालतो वस्तुतश्च परिच्छिन्नाद्व्यावृत्तपरम् । न च व्यावृत्तिर्भावरूपोऽभावरूपो वा धर्मः ; अपि तु सकलेतरविरोधि ब्रह्मैव । यथा शौक्ल्यादेः काष्ण्यादिव्यावृत्तिः तत्तत्पदार्थस्वरूपमेव, न धर्मान्तरम् । एवमेकस्यैव वस्तुनः सकलेतरविरोध्याकारतामवगमयदर्थवत्तरमेकार्थमपर्यायं च पदत्रयम् । तस्मादेकमेव ब्रह्म स्वयंज्योतिर्निर्धूतनिखिलविशेषमित्युक्तं भवति । एवं वाक्यार्थप्रतिपादने सत्येव * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् इत्यादिभिरैकार्थ्यम् । ❀ यतो वा इमानि भूतानि जायन्ते, ❀ सदेव सोम्येदमग्र आसीत्, ❀ आत्मा वा इदमेक एवाग्र आसीत् इत्यादिभिर्जगत्कारणतयोपलक्षितस्य ब्रह्मणः स्वरूपमिदमुच्यते— * सत्यं ज्ञानमनन्तं ब्रह्मेति । तत्र सर्वशाखाप्रत्ययन्यायेन कारणवाक्येषु सर्वेषु सजातीयविजातीयव्यावृत्तमद्वितीयं ब्रह्मावगतम् । जगत्कारणतयोपलक्षितस्य ब्रह्मणोऽद्वितीयस्य प्रतिपिपादयिषितं स्वरूपं तदविरोधेन वक्तव्यम् । अद्वितीयत्वश्रुतिर्गुणतोऽपि सद्वितीयतां न सहते ; अन्यथा * निरञ्जनम्, * निर्गुणम् इत्यादिभिश्च विरोधः । अतश्चैतल्लक्षणवाक्यमखण्डैकरसमेव प्रतिपादयति ॥

ननु एकत्वतात्पर्येऽपि तत्त्वमस्यादिवदुपलक्षणमुखेन स्वरूपैक्यपरत्वमस्तु; सर्वेभ्यश्च व्यावृत्तिर्विशेषतो दुर्वचा ; अप्रयोजकत्वेन संग्रहेऽप्येकेनालम् ; व्यावृत्तीनां धर्मत्वे ताभिः प्रतिपदोपस्थापितव्यावृत्तिभेदात्सविशेषणत्वम् ; तद्बहुत्वा-

दैकार्थ्यभङ्गो विशेष्यभेदप्रसङ्गश्च ; स्वरूपत्वे तु प्रयोजनभेदाभाव इत्याशङ्क्याह— **एतदुक्तमिति** । * **ब्रह्मविदाप्नोति परमिति** प्रस्तुतं ब्रह्म किमिति बुभुत्सिते कारणत्वस्य तटस्थतया स्वरूपलक्षणतो ह्यत्र तत्स्वरूपं शोध्यते । तत्र विशेषणोक्तिरान्ध्रप्रश्ने कोविदारप्रत्युक्तिवत्स्यात्, लक्षणं च सर्वत्र व्यावृत्त्यर्थमेवेत्यभिप्रायेणाह— **लक्षणत** इति । **रूपमिह** स्वरूपम् । निश्शेषव्यावृत्तिः प्रयोजकेन संग्रहात्सुवचेत्याह— **तद्विरोधीति** । अत्र रूपं स्वरूपं वाऽनृतत्वादिः, ब्रह्मेतरव्यावृत्तधर्मो वा । **अनेन**—प्रत्येकं कृत्स्नव्युदासक्षमेण । न हि पदान्तरमेवंविधमस्तीत्यभिप्रायेण **पदत्रयोक्तिः** । एकेन पर्याप्तेऽपि प्रयोजनकात्स्न्यार्थमेतावद्वक्तव्यम् । आनन्दपदस्य तृपलक्षणमेतत् । **फलतः** ; विरोधिव्युदासस्य फलत्वान्नात्र स्वरूपमात्रपरत्वं विरोध इति भावः । पदानां पृथक्प्रयोजनानि व्यनक्ति— **तत्रेति** ; तस्मिन्पदत्रय इत्यर्थः । प्राकरणिकेन कारणत्वेन तुच्छव्यावृत्तौ सिद्धायां शङ्कितं विकारित्वेनानृतत्वमत्र सत्यपदेन व्युदस्तम् । **वस्तुशब्दोऽत्र** व्यावहारिकसत्यार्थः । **अन्याधीनप्रकाशत्वं जडशब्दार्थः** । असङ्कोचात् **अनन्त**पदेन त्रिविधपरिच्छेदव्यावृत्तिरुक्ता । यदि व्यावृत्तयो भावरूपा धर्माः, तदा सत्यत्वादीन्येव स्युः; अभावरूपा अपि तत्तुल्यचोद्या इत्यत्राह— **न चेति** । तदाऽपि नैष्फल्यप्रसङ्गं परिजिहीर्षुराह— **अपि त्विति** । व्यावृत्तिर्हि यथा स्वत एव स्वेतरव्यावृत्तिः, तद्वद्ब्रह्मस्वरूपमेव सकलेतरविरोधित्वात्स्वयं सर्वव्यावृत्तिः; भावाद्वैतपक्षस्तु भीरुकल्पित इति भावः । भावस्याभावत्वमेकस्यानेकत्वं च कथमित्यत्र भावान्तराभावपक्षे तिष्ठन्निदर्शयति—**यथेति** । अवधारणेन धर्मान्तरानुपलम्भं व्यनक्ति । अन्यथाऽनवस्थामभिप्रेत्याह— **न धर्मेति** । एवमेकस्यैव सर्वव्यावृत्तिरूपत्वे व्यावृत्तेरपि पदबोध्यत्वे पदान्तरवैयर्थ्यं स्यादित्यत्र दृष्टान्तोक्तं दार्ष्टान्तिकेऽतिदिशति— **एकस्येति** । **शौक्ल्यं कार्ष्ण्य**मित्यादिप्रतिबन्दिरिहाभिप्रेता । तत्र अनन्तपदे तावद्व्यावृत्तिबोधकत्वं सिद्धम् ; पदान्तरयोरपि तथात्वे को विरोध इति भावः । प्रतिबन्दिवाक्यमिह प्रत्यक्षानुवादित्वान्मन्दफलम्, इदं तु न तथा ; गुणपरत्वे चात्र निमित्तमात्रलाभः, तत्परित्यागे तु तात्पर्यार्थः सिद्धः । अतः **अर्थवत्तरम्** इत्युक्तम् । व्युत्पत्तिभेदं प्रयोजनभेदं चाभिसन्धाय **अपर्यायत्वोक्तिः** । **पर्याय**शब्दोऽत्र भावप्रधानः । पर्यायत्वं यस्य नास्ति तदपर्यायमिति गतिः, यस्य पदत्रयस्य मिथः पदानि पर्याया न भवन्ति, तदपर्यायमिति वा । * अपर्यायत्वम् इति केचित्पठन्ति । नात्र किञ्चिद्बाधकमित्यभिप्रायेणाखण्डपरत्वं सहेतुकं निगमयति— **तस्मादिति** । तात्पर्यप्राबल्यात् शङ्कितचोद्यनिस्तारात्त्वेत्यर्थः । **एकमेव ब्रह्मेत्यनेन** विशेष्यभेदस्य प्रसङ्ग एवापास्त इत्यभिप्रेतम् । इदमपि वाक्यं नावुद्धबोधार्थम्, किं तु स्वतःसिद्धपरामर्शेन कल्पितविरोध्याकारनिषेधार्थमित्यभिप्रायेण **स्वयंज्योतिरित्याद्युक्तम्** । सत्यत्वादीनामनृतत्वादीनां तद्व्याप्यस्थूलत्वादीनां तद्व्यावृत्तीनां च **निखिल**शब्देन संग्रहः । उक्तानभ्युपगमे कारणवाक्यविरोधः स्यादित्याह—**एवमिति** । ननु * यो वेद इत्युपास्त्यन्वयेन सगुणपरत्वान्न भूदैकार्थ्यम् ; तत्राह— **यतो वेति** । कारणत्वानुवादितटस्थलक्षणवाक्यमिदम् । * सदेवेत्यादि तु तत्प्राप्त्यै लक्ष्यस्य निर्विशेषत्वव्यक्त्यै च पुनर्गृहीतम् । **जगत्कारणतयोपलक्षितस्य** ; शाखयेव चन्द्रस्य दूरे स्थित्वा दर्शितस्येत्यर्थः । कारणवाक्योक्तस्वरूपशोधकस्य तच्छेषतया तदेकार्थत्वं युक्तम् ; * यो वेदेत्येतच्च यच्छब्दान्वितवाक्यस्थतया नोपास्तिपरमिति भावः । * यः सर्वज्ञः सर्ववित्यारभ्य * तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते इति कारणवाक्यान्तरे गुणोक्त्या तदैकार्थ्यं स्यात् ; नेत्याह—**तत्रेति** । कारणशोधकवाक्ययोरैकार्थ्यं सिद्धम् ; मिथः कारणवाक्यानां किमुतेत्याशयः । कर्तव्ये दर्शितः शाखान्तरनयः सिद्धेऽपि समः । तेनैव सर्वेषु गुणपरत्वं किं न

स्यादित्यत्रोक्तं सजातीयेत्यादि । अपच्छेदनीत्या हि निषेधप्राबल्यं स्थापितम् ; * पराऽस्य शक्तिरिति वाक्यविशेषवद्गुणपरतैव किं न स्यात् ; मा भूत्तस्य शोधकवाक्यत्वमित्यत्राह— **जगदिति** । **अद्वितीयेत्यादि** हेतुपरम् ; पूर्ववाक्ये सामान्यतः प्रस्तुतस्य व्यावृत्ततया प्रतिपित्सितस्य * तदेषाम्युक्तेति प्रतिपिपादयिषितत्वात्तस्य चाद्वितीयत्वेन तदन्यस्य गुणस्यावक्तव्यत्वादिति कारणवाक्येषु निर्गुणत्वं न कण्ठोक्तम् ; अवधारणयोरन्यथाऽप्युपपत्तेः । अद्वितीयत्वोक्तिस्तु सम्राडद्वितीय इतिवत् समनिषेधार्थः स्यादित्यत्राह— **अद्वितीयेति** । अवधारणाभ्यां सजातीयादिनिरासौचित्यात्समनिषेधे सिद्धे परिशेषाद्बुभुत्साक्रमेणात्र गुणनिषेधः प्राप्त इति भावः । गुणपरत्वे शोधकान्तरं च विरुध्येतेत्याह— **अन्यथेति** । निर्गुणशब्दो हि स्थूलत्वादिवत्सत्यत्वादिकमपि निषेधेदिति भावः । ननु सर्वत्र लक्षणवाक्यं स्वार्थं समर्प्यैवान्यद्व्यावर्तयति ; तद्वदिहापि स्यादित्यत्राह— **अत** इति । **चः** समुच्चये ; सामानाधिकरण्यसामर्थ्यात्कारणवाक्यैकार्थ्यात् शोधकवाक्यान्तरैकार्थ्याच्चेत्यर्थः । **एतल्लक्षणवाक्यमिति** । अनेन धर्मसमर्पकलक्षणवाक्यान्तरेभ्यो व्यावृत्तिः सूच्यते । **अखण्डैकरसम्**— नित्यनिर्विशेषस्वप्रकाशस्वभावमित्यर्थः ।

ननु च सत्यज्ञानादिपदानां स्वार्थप्रहाणेन स्वार्थविरोधिव्यावृत्तवस्तुस्वरूपोपस्थापनपरत्वे लक्षणा स्यात् ; नैष दोषः, अभिधानवृत्तेरपि तात्पर्यवृत्तेर्बलीयस्त्वात् । सामानाधिकरण्यस्य हि ऐक्य एव तात्पर्यमिति सर्वसंमतम् । ननु च सर्वपदानां लक्षणा न दृष्टचरी; ततः किम् ? वाक्यतात्पर्याविरोधे सत्येकस्यापि न दृष्टा । समभिव्याहृतपदसमुदायस्यैतत्तात्पर्यमिति निश्चिते सति द्वयोस्त्रयाणां सर्वेषां वा तदविरोधायैकस्येव लक्षणा न दोषाय । तथा च शास्त्रस्थैरभ्युपगम्यते— कार्यवाक्यार्थवादिभिर्लौकिकवाक्येषु सर्वेषां पदानां लक्षणा समाश्रीयते । अपूर्वकार्य एव लिङादेर्मुख्यवृत्तत्वात् लिङादिभिः क्रियाकार्यं लक्षणया प्रतिपाद्यते । कार्यान्वितस्वार्थाभिधायिनां चेतरेषां पदानामपूर्वकार्यान्वित एव मुख्यार्थ इति क्रियाकार्यान्वितप्रतिपादनं [हि] लाक्षणिकमेव । अतो वाक्यतात्पर्याविरोधाय सर्वपदानां लक्षणाऽपि न दोषः । अत इदमेवार्थजातं प्रतिपादयन्तो वेदान्ताः प्रमाणम् ।

* ब्रह्मविदाप्नोति परम् इत्यनन्यथासिद्धफलकरणदर्शनकल्पितविधिशेषतया विशिष्टविधितात्पर्ये संभवति न लक्षणा न्याय्येत्यभिप्रायेण चोदयति— **ननु चेति** । यद्यपि वाच्ये विशेष्यांशो न त्यक्तः, तथाऽपि द्वारत्यागान्न तस्य शक्तिगोचरत्वमिति भावः । अत्र वाच्यबहिर्भूते वृत्तिस्तावत् नास्ति; वाच्यैकदेशे प्रधानभूते विशेष्ये वृत्तिस्तु न लक्षणा ; इह जहदजहल्लक्षणा वा स्यात् । सा चात्र न दोषः; प्रत्युत विध्यनर्हवाक्यार्थज्ञानानुवादितयाऽन्यथासिद्धे वाक्ये विधिकल्प्ययोगात्तदर्थमुख्यासंभवे लक्षणानुगुणैवेति दर्शयितुमाह— **नैष दोष इति** । तात्पर्यविषये शब्दस्य प्राधान्यतः

प्रामाण्यात्तद्विरोधे सर्वत्र मुख्यवृत्तिदौर्बल्यालक्षणाप्राबल्यमाह— **अभिधानेति** । स्वतस्सिद्धस्वरूपे कथं शब्दतात्पर्यम्; अतो गुणविवक्षा स्यादित्यत्र तद्विरुद्धं प्रागुक्तं तात्पर्यं व्यनक्ति— **सामानाधिकरण्यस्येति** । स्वप्रकाशस्यापि निमित्तभेदवदनेकपदपरामृष्टस्यापि विशेष्यस्यान्यसंसर्गासहमैक्यमिह समानविभक्तिवेद्यम्; तच्च कल्पितभेदनिवृत्त्यर्थम्; प्रकृतिभिस्तु कल्पितान्याकारनिवृत्तिः प्राग्दर्शितेत्युक्तम् । **सर्वसंमतम्**; त्वयाऽपि दुस्त्यजमिति यावत् । त्वदुक्तप्रक्रिययाऽत्र तात्पर्यस्थापकाभावालक्षणैव न स्यादित्यभिप्रायेण पुनश्चोदयति— **ननु चेति** । मुख्येन केनचिदंशेन क्वचित्तात्पर्यसिद्धावंशान्तरे ह्युपचारो दृष्ट इत्याशयः । अविरुद्धेऽन्यत्रादर्शनमकिंचित्करमित्यभिप्रायेण प्रतिबध्नाति— **ततः किमिति** । अभिप्रेतं विवृण्वन् प्रतिबन्दि च सूचयति— **वाक्येति** । एकपदलक्षणाया अप्यन्यत्रादर्शनमस्ति; अतस्तस्या अपि त्यागप्रसङ्ग इति भावः । तात्पर्यमुख्यार्थबाधयोरेव प्रयोजकत्वं पदैकत्वद्वित्वादेरप्रयोजकत्वं द्वित्रादिपदप्रतिबन्दि चाभिप्रेत्याह— **समभिव्याहृत** इति । एकद्व्यादिपदलक्षणावत्सर्वपदलक्षणाऽपि * विषं भुङ्क्ष्वेत्यत्र दृष्टेत्यभिप्रायेण **सर्वेषां वेत्युक्तम्** । इदं हि पदद्वयं निषिद्धभोज्यं तद्भुक्तेरकर्तव्यत्वं च लक्षयति । तत्र प्रत्यक्षितोक्तौ युक्तायुक्तविमर्शात्तात्पर्यनिश्चयः । इह तु समानविभक्तिसामर्थ्यादबुभुत्सितबोधनानुपपत्त्या चेति विशेषः । स्वोक्तं सर्वपरीक्षकसंमतमित्याह— **तथा चेति** । **चो**ऽवधारणे । यद्वा, ब्रह्मप्रतिपादनपद्धि[नाप्रवि]ष्टैरप्यभ्युपगतमित्युच्यते; तैरनुक्तमपि तदुक्तसामर्थ्यादभ्युपगमनीयमिति भावः । कैरियं कुत्राभ्युपगता? इत्यत्राह—**कार्येति** । अत्र तदुक्तं विवक्षितस्य द्वारं तावदाह— **अपूर्वेति** । वृद्धव्यवहारोपक्रान्ता वेदावसाना कार्यव्युत्पत्तिरेवंप्रकारेण तैः स्थापितेत्यर्थः । अपूर्वमेव कार्यमपूर्वकार्यम् । क्रियाकार्यमुखेनापूर्वकार्यव्युत्पत्तिः । एवं तदुक्तनयेन सर्वपदलक्षणायाः फलितत्वमाह— **कार्यान्विते**ति । अयं भावः— गङ्गायां घोष इत्यादौ लक्ष्यस्य प्राधान्याभावात्तदन्विताभिधायिनां न लक्षणा । एवं कमलानि निमीलन्तीत्यादिषु प्रधानेऽपि निमीलने सर्वशब्दानां तत्परत्वव्युत्पत्त्यभावात्पदान्तराणां तदनुसारो न युक्तः । यद्यपि गङ्गाद्यप्रधानपदलक्षणिकतया घोषादिपदेष्विव कमलानि निमीलन्तीत्यत्र निमीलन्तीत्यवान्तरप्रधानपदलक्षणयाऽपि पद्मादिपदेषु लक्षणा न स्यात्; तथाऽपि लोकोपक्रमवेदावसानकार्यप्रधानव्युत्पत्तिबलादन्यान्वितमात्रे, क्रियाकार्यान्विते, कार्यमात्रान्विते वा पदान्तराणां शक्तिकल्पनानभ्युपगमात्तेषामपूर्वकार्यान्वित एव शक्तेर्लौकिकवाक्येषु सर्वेषु तदभावात्सर्वपदलक्षणा स्वीकर्तव्येति । न च अन्यान्वितमात्रे पदान्तरशक्तिः, कार्यपरतयैव व्युत्पत्त्यङ्गीकारात् । नापि कार्यमात्रान्विते शक्तिः स्यात्, तथा सति लिङादेरपि कार्यमात्रे मुख्यत्वप्रसङ्गात् । न च तद्युक्तम्, अपूर्वाण्यविशेषे लिङादिशक्तेरसिद्धौ मानान्तराभावाच्च तस्याप्रामाणिकत्वापातात् । एवं कार्यमात्रान्विते शक्तानां पदान्तराणां वेदे कार्यविशेषान्वयोऽपि न सिध्येत् । स्वर्गकामपदसमभिव्याहारात्सिद्धावपूर्वमपि तथा सिध्येदिति न तद्वाच्यत्वादिक्लृप्तिः स्यात् । तस्मालौकिकवाक्येषु विशिष्टापूर्वस्थायिकार्यपरत्वाभावाल्लिङादेरमुख्यार्थत्वमित्युक्तोपपत्त्या सर्वपदलक्षणाया अदोषत्वं निर्बाधत्वाभिप्रायेण निगमयति— **अत** इति; युक्तिबलात्परीक्षकैरभ्युपगतत्वाच्चेत्यर्थः । एवं प्रत्यक्षस्य संभावितदोषत्वात् शास्त्रस्य निर्दोषत्वात्तद्विरुद्धार्थत्वाच्च परमप्रकृतं शास्त्रप्राबल्यमुपसंहरति— **अत** इति । **इदमेव** प्रत्यक्षादिविरुद्धमेवेत्यर्थः । भेदपरत्वेऽनुवादित्वं स्यादिति चाभिप्रेतम् । **इदमर्थजातम्**— प्रमाणागोचरस्वप्रकाशनिर्विशेषसत्यत्वतदन्यमिथ्यात्वानिर्वचनीयाविद्यास्वरूपतन्मूलतिरोधानाध्यासधीनिवर्त्यत्वादिकम् ।

प्रत्यक्षादिविरोधे च शास्त्रस्य बलीयस्त्वमुक्तम् । सति च विरोधे बलीयस्त्वं वक्तु-

व्यम्, विरोध एव न दृश्यते ; निर्विशेषसन्मात्रब्रह्मग्राहित्वात् प्रत्यक्षस्य ।

पक्षान्तरमथादित्सुः शास्त्रप्रावल्यमीरितम् । प्रत्यक्षस्य विरुद्धत्वमन्वारुह्येति भाषते ॥ ३४२ ॥

प्रत्यक्षादीति । **चो**ऽप्यर्थः । तत्त्वविद्ध्यो विषयविरोधाभावाद्बलीयस्त्वं न वक्तव्यमित्यभिप्रायेणाह—**सतीति** । **चो**ऽवधारणे । अत्र बलाबलविचारस्य मूलमेव छिन्नमित्याह— **विरोध** इति । विरोधादर्शनं द्वयोरपि स्वारसिक्या परस्परविरुद्धभेदविषयतया स्यादित्यत्राह— **निर्विशेष** इति । प्रत्यक्षसिद्धं सदेव निष्कृष्य शास्त्रे ब्रह्मोत्युच्यत इति भावः ।

ननु च घटोऽस्ति पटोऽस्तीति नानाकारवस्तुविषयं प्रत्यक्षं कथमिव सन्मात्रग्राहीत्युच्यते ? विलक्षणग्रहणाभावे सति सर्वेषां ज्ञानानामेकविषयत्वेन धारावाहिकविज्ञानवदेकव्यवहारहेतुतैव स्यात् । सत्यम् ; तथैवात्र विविच्यते ; कथम् ? घटोऽस्तीत्यत्रास्तित्वं तद्भेदश्च व्यवह्रियते । न च द्वयोरपि व्यवहारयोः प्रत्यक्षमूलत्वं संभवति, तयोर्भिन्नकालज्ञानफलत्वात्, प्रत्यक्षज्ञानस्य चैकक्षणवर्तित्वात् । तत्र स्वरूपं वा भेदो वा प्रत्यक्षस्य विषय इति विवेचनीयम् । भेदग्रहणस्य स्वरूपग्रहणतत्प्रतियोगिस्मरणसव्यपेक्षत्वादेव स्वरूपविषयत्वमवश्याश्रयणीयमिति न भेदः प्रत्यक्षेण गृह्यते । अतो भ्रान्तिमूल एव भेदव्यवहारः ।

असिद्धोऽयं हेतुः, सर्वलोकोपलम्भविरोधादिति शङ्कते— **ननु चे**ति । न हि क्वचिदपि अस्तिमात्रदर्शनमित्याशयः । **कथमि**व— दृष्टापह्नवमन्तरेण न कथंचिदित्यर्थः । **उच्यत** इति— अनेन घटादिविषयं प्रत्यक्षं सन्मात्रग्राहीति स्वोक्तिविरोधोऽपि सूचितः । विशिष्टविषयत्वं भ्रान्तिसिद्धमिति शङ्कां विपक्षे बाधकेन वारयति—**विलक्षणे**ति । लोकसिद्धं प्रसङ्गविपर्ययं भेदव्यवहारस्य प्रत्यक्षमूलत्वं चानिच्छन्प्रसक्तस्येष्टत्वमाह— **सत्यमि**ति । नानाव्यवहाराणां प्रत्यक्षमूलत्वं नापह्नोतव्यमित्यत्राह— **तथे**ति । यथा सत एकस्यैव व्यवहारः प्रत्यक्षमूलस्तथेति यावत् । **एव**कारस्त्वदुक्तमवधारणं स्थिरीकरोमीति सावष्टंभत्वं व्यनक्ति । **अत्र** व्यवहारद्वये, तद्भेतौ बुद्धिद्वये वा । **विविच्यते**— सर्वेषु भ्रमेषु अधिष्ठानारोप्यव्यवहारांशयोर्यथा विभागस्तथाऽत्रेति भावः । बाधिते दृष्टस्य विभागस्यान्यत्रोक्तावविषयवृत्तित्वं मत्वा चोदयति— **कथमि**ति । अत्र नभःस्थलमलिनत्वादिवत्प्रत्यक्षबाधाभावेऽपि युक्त्या बाधयितुं प्रथमं मानानुपपत्तिः प्रस्तूयते । एवमत्र विकल्पा हार्दाः—किमस्तित्वघटत्वरूपयोः स्वरूपभेदयोरैक्यम्, उत भेदः ? इति । भेदे च प्रत्यक्षमुभयम्, अन्यतरद्वा गृह्णातीति; आद्ये, युगपत्, क्रमाद्वेति; द्वितीये स्वरूपम्, भेदं वेति । तत्रैक्यं दूषयति—**घटोऽस्ती**ति । **तद्भेद**ः— तत्संबन्धितया ततोऽन्यत्वेनोल्लिख्यमानो भेदः । अयं भावः— अत्रोल्लिख्यमानभेदाभावे भिन्नशब्दः क्वापि न स्यात् ; स्वेन स्वस्य विशिष्टत्वायोगात् । अस्तिघटशब्दयोश्चार्थपर्यायतया व्युत्पत्तेस्तद्विषयौ भिन्नौ ; अन्यथा प्रतियोगिसापेक्षानपेक्षव्यवहारभेदविरोधात् तत्त्वतः सिद्धयोर्व्यवहारभेदयोर्मूलभेदः चिन्त्य इति । उभयग्राहित्वं

निषेधति— न चेति । व्यवहारद्वयस्यैकमूलत्वासंभवे युगपद्ग्रहणासंभवहेतुमाह— तयोरिति । अधिकरणप्रतियोगिधी-सापेक्षस्य भेदग्रहणस्य स्वरूपग्रहणपश्चाद्भावित्वादित्यर्थः । क्रमेणोभयग्रहणं दूषयति— प्रत्यक्षेति । चः क्रमयौगपद्या-योगसमुच्चयार्थः ; न हि क्षणिकं विरम्य व्याप्रियेतेति भावः । प्रत्यक्षशब्द इह अक्षजन्यत्वपरः । तेनात्मस्वरूपज्ञानात् साक्षिणश्च व्यवच्छेदः । पारिशेष्यादन्यतराग्राहित्वे तन्निर्धारणायार्थविकल्पं वक्ति— तत्रेति ; तथा सतीत्यर्थः, तयोर्मध्य इति वा । स्वेष्टं परिशेषयति— भेदेति । स्मरणशब्दः क्वचिद्ग्रहणस्याप्युपलक्षकः । एवकारः पूर्वमैक्ययौगपद्या-संभवोक्तौ प्रतियोगिसापेक्षत्वस्य गर्भितत्वं व्यनक्ति । शास्त्रविरोधासंभवमाह— न भेद इति । अयं भावः— एकेन प्रत्यक्षेण स्वरूपे गृहीते यदि प्रत्यक्षान्तरेण भेदग्रहणमित्युच्यते ; तदा निराधारभेदग्रहणायोगात्पूर्ववदुत्तरमपि स्वरूपं गृहीत्वा नश्येत् । अतो न कदाऽपि प्रत्यक्षजातीयेन भेदसिद्धिरिति । तदिदमनूदितं संवित्सिद्धौ—

* यौगपद्यक्रमायोगाद्व्यवच्छेदविधानयोः । ऐक्यायोगाच्च भेदो न प्रत्यक्ष इति यो भ्रमः ॥ इति ।

* व्यवच्छेदविधानयोः— भेदग्रहस्वरूपग्रहयोरित्यर्थः । तथाऽपि दुरपह्नवव्यवहारान्यथानुपपत्त्या कथंचित् प्रत्यक्षेण भेदग्रहः कल्प्य इत्यत्राह— अत इति । उक्तयुक्तिबलादर्थापत्तिरियमन्यथैवोपपाद्या ; अनुपपन्नतैकत्वेषायां भ्रान्तौ तु क्रमयौगपद्यादिविमर्शो न कार्य इति भावः ॥

किं च भेदो नाम कश्चित्पदार्थो न्यायविद्भिर्निरूपयितुं न शक्यते । भेदस्तावन्न वस्तुस्वरूपम्, वस्तुस्वरूपे गृहीते स्वरूपव्यवहारवत्सर्वस्माद्भेदव्यवहारप्रसक्तेः । न च वाच्यं स्वरूपे गृहीतेऽपि भिन्न इति व्यवहारस्य प्रतियोगिस्मरणसव्यपेक्षत्वात्तत्स्म-रणाभावेन तदानीमेव न भेदव्यवहार इति ; स्वरूपमात्रभेदवादिनो हि प्रतियोग्यपेक्षा च नोत्प्रेक्षितुं क्षमा, स्वरूपभेदयोः स्वरूपत्वाविशेषात् । यथा स्वरूपव्यवहारो न प्रतियोग्यपेक्षः, भेदव्यवहारोऽपि तथैव स्यात् । हस्तः करः इतिवत् घटो भिन्नः इति पर्यायत्वं च स्यात् । नापि धर्मः, धर्मत्वे सति तस्य स्वरूपाद्भेदोऽवश्याश्रयणीयः; अन्यथा स्वरूपमेव स्यात् । भेदे च तस्यापि भेदस्तद्धर्मस्तस्यापीत्यनवस्था । किं च जात्यादिधर्मविशिष्टवस्तुग्रहणे सति भेदग्रहणम् ; भेदग्रहणे सति जात्यादिधर्मविशिष्ट-वस्तुग्रहणमित्यन्योन्याश्रयणम् । अतो भेदस्य दुर्निरूपत्वात्सन्मात्रस्यैव प्रकाशकं प्रत्यक्षम् ।

मेयानुपपत्तिमाह— किं चेति । प्रसिद्धेऽपि बाधकन्यायान्यायविवक्षया न्यायविद्भिरित्युक्तम् । भेदः स्वरूपं धर्मो वा इति हार्दं विकल्पे पूर्वं निरस्यति— भेदस्तावदिति । संशयाद्यनुपपत्तिगर्भं हेतुमाह— वस्त्विति । स्वरूपस्य भेदत्वे तद्ग्रहे कथं भेदाग्रहः ? तदभावे कथंतरां संशयविपर्ययौ ? तयोरभावे च सर्वेभ्यो भेदव्यवहार एव

स्यात्; तथा च न बाधकसाध्यं किंचित्स्यादिति भावः। प्रसंजितविपर्ययस्यान्यप्रयुक्तत्वमाशङ्क्याह — **न चेति**। **स्वरूपे गृहीतेऽपि**; स्वरूपभूते भेदे गृहीतेऽपीत्यर्थः। **भिन्नेत्यादि**। यथा वाच्यस्वरूपे गृहीतेऽपि वाचकप्रयोगः संबन्धग्रहणापेक्षः, तथा भिन्न इति व्यवहारोऽपि प्रतियोगिधीसापेक्षः; तत एवात्रासौ तदभावप्रयुक्तः स्वाभाव इत्याशयः। **प्रतियोगिग्रापेक्षत्वादित्युक्तं** दूषयति— **स्वरूपमात्रेति**। चः अवधारणे, आश्रयापेक्षासमुच्चये वा। यथा स्वरूपग्रहणे प्रतियोगिग्रहणनैरपेक्ष्यम्, तथा तद्व्यवहार इत्यभिप्रायेण **नोत्प्रेक्षितुं क्षमा**— इत्युक्तम्। **स्वरूपमात्रभेदवादिन** इत्यनेन सूचितं हेतुं विवृणोति— **स्वरूपभेदयोरिति**। उक्तं प्रतिबन्दिगर्भं व्यनक्ति— **यथेति**। सहप्रयोगभङ्गमभिप्रयन् प्रसङ्गान्तरमाह—**हस्त इति**। स्वरूपभेदशब्दयोः पर्यायता स्यादिति वक्तव्ये **घटो भिन्नः** इत्युक्तेरयं भावः— भेदत्वेन प्रस्तुतस्य घटस्य स्वरूपत्वं परे मन्यन्ते; तस्य च स्वरूपमेव भेदश्चेत् यस्य भेदोऽस्ति, स भिन्नः; अतो घटभिन्नशब्दौ पर्यायौ स्याताम्। एवं घटभेदशब्दावपीति। **चकारोऽत्रानुक्तमपि** समुच्चिनोति। स्वरूपस्यानुवृत्तत्वे भेदत्वं न स्यात्, व्यावृत्तत्वेऽन्येषां निस्स्वरूपत्वनिर्भेदत्वापत्तिरित्यादि। भेदस्य धर्मत्वे तद्वति क्वचिदप्यभेदो न सिध्येत्। तथा सति अभिन्नस्य भिन्नस्य वाऽभावे सर्वापह्नवः स्यादित्यभिप्रायेणाह—**नापीति**। अनवस्थां वक्तुं धर्मभूतो भेदः स्वरूपेणाभिन्नः भिन्नो वेति विकल्प्याद्यं निरस्यति— **धर्मत्व इति**। भेदाभावे धर्मधर्मिभावो न स्यात्, स्वरूपपक्षोक्तदोषाश्च स्युरित्यभिप्रायेणाह— **अन्यथेति**। द्वितीये मूलोच्छेदमाह— **भेदे चेति**। **तद्धर्मः**—तस्य भेदस्य धर्मः। ग्रहणद्वाराऽपि दोषमाह— **किं चेति**। तज्जातीयत्वातज्जातीयत्वतद्गुणकत्वातद्गुणकत्वविशेषणत्वविशेष्यत्वधर्मत्वप्रतियोगित्वादावपि भेदग्रहेऽपि अन्योन्याश्रयमभिप्रेत्य जात्याद्युक्तिः॥

भेदकाग्रहणे भेदो न गृह्येत कथंचन। तस्य चाग्रहणे सोऽपि न गृह्येतेति संग्रहः॥ ३४३॥

एवं ग्राह्यानुपपत्त्या ग्राहकानुपपत्तिं पूर्वमुक्तां द्रढयति— **अत इति**।

किं च घटोऽस्ति, पटोऽस्ति, घटोऽनुभूयते, पटोऽनुभूयते इति सर्वे पदार्थाः सत्तानुभूतिघटिता एव दृश्यन्ते; अत्र सर्वासु प्रतिपत्तिषु सन्मात्रमनुवर्तमानं दृश्यत इति तदेव परमार्थः। विशेषास्तु व्यावर्तमानतया अपरमार्थाः, रज्जुसर्पादिवत्; यथा रज्जुरधिष्ठानतयाऽनुवर्तमाना परमार्थसती, व्यावर्तमानाः सर्पभूदलनाम्बुधारादयोऽपरमार्थाः। ननु च रज्जुसर्पादौ रज्जुरियं, न सर्पः इत्यादिरज्ज्वाद्यधिष्ठानयाथार्थ्यज्ञानेन बाधितत्वात्सर्पादेरपारमार्थ्यं, न व्यावर्तमानत्वात्; रज्ज्वादेरपि पारमार्थ्यं नानुवर्तमानतया किं त्वबाधितत्वात्; अत्र तु घटादीनामबाधितानां कथमपारमार्थ्यम्? उच्यते— घटादौ दृष्टा व्यावृत्तिः; सा किंरूपेति विवेचनीयम्; किं घटोऽस्तीत्यत्र पटाद्यभावः? सिद्धं तर्हि घटोऽस्तीत्यनेन पटादीनां बाधितत्वम्। अतो

बाधफलभूता विषयनिवृत्तिर्व्यावृत्तिः। सा व्यावर्तमानानामपारमार्थ्यं साधयति। रज्जुवत्सन्मात्रमबाधितमनुवर्तते। तस्मात्सन्मात्रातिरेकि सर्वमपरमार्थः। प्रयोगश्च भवति —सत् परमार्थः, अनुवर्तमानत्वात्, रज्जुसर्पादौ रज्ज्वादिवत्; घटादयोऽपरमार्थाः, व्यावर्तमानत्वात्, रज्ज्वाद्यधिष्ठानसर्पादिवदिति।

न केवलं प्रमाणाभावः, प्रमाणबाधोऽप्यस्तीत्याह— **किं चेति**। अत्र घटादिबाधे तत्सत्ताऽपि खपुष्पगन्धवत्त्वादिति शङ्कानिरासायानुवृत्तसत्त्वस्थापनम्। विवक्षितानुमानद्वयस्य पक्षसिद्धिं तावदाह— **घटोऽस्तीति**। अनुभूत्यनुवृत्तिप्रदर्शनं सदनुभूत्यैक्याधानार्थम्; न हि व्यावृत्तस्यानुवृत्ततादात्म्यं स्यात्। स्वरूपासिद्धिं व्याप्यत्वासिद्धिं च व्युदस्यति— **अत्रेति**। **रज्जुसर्पादीत्युदाहरणे** व्यासिद्वयार्थमादिशब्दः प्रत्येकं भाव्यः। व्यासिदृष्टान्तौ स्पष्टयति— **यथेति**। **परमार्थसती**— व्यावहारिकव्यवस्थयेति शेषः। सर्पाद्युदाहरणमिहैकाधिष्ठानाध्यस्तविषयम्। द्वयोरपि व्याप्त्योः उपाधिं शङ्कते— **ननु चेति**। अबाधितत्वोपाधिः पक्षव्यापक इति न वाच्यम्; माध्यमिकनयेन घटादितुल्यन्यायतया सतोऽपि बाधस्य सुवचत्वादिति भावः। बाधितत्वोपाधेः पक्षव्यावृत्तिमाह— **अत्र त्विति**। घटोऽस्ति इत्यादावित्यर्थः। द्वयोरपि साधनव्यापकत्वबुद्धया प्रतिवक्ति—**उच्यत** इति। बाधितत्वस्य तावदाह—**घटादाविति**। **किंरूपा**— किं सत्यसर्पनिवृत्तिवद्भ्रान्तिसिद्धा? उत रज्जुसर्पनिवृत्तिवत्प्रमाणबाधसाध्या? इति विकल्पः। तत्र आद्यो घटपटतादात्म्यादिप्रसङ्गादयुक्त इत्यभिप्रायेणाह— **किमिति**। घटोऽस्तीति प्रतीतेऽर्थे पटाभावो मिथ्या; अतः प्रमितयाऽन्यव्यावृत्त्याऽन्येषां बाधितत्वमर्थसिद्धमित्याह— **सिद्धमिति**। **घटोऽस्तीत्यनेन** न रजतमिति निषेधाभावेऽपि यथा शुक्तिरित्यनेन रजतबाधस्तथेति भावः। एवं पटादिविधौ घटस्यापि निवृत्तिः सिद्धा स्यात्। उक्तप्रकारेणोपाधेः साधनव्यापकत्वमाह— **अत** इति। **बाधफलभूता**; नास्तीति धीस्थाप्येत्यर्थः। **विषयनिवृत्तिः**—घटादिधीवेद्यानामभावः, तेषामिह वेद्यत्वाभावो वा। एवं निरुपाधिकतया व्यावर्तमानत्वस्य साधकत्वमाह— **सेति**। अनुवर्तमानत्वहेतावप्यबाधितत्वोपाधिर्व्यापक इत्याह— **रज्जुवदिति**। सतोऽपि माध्यमिकयुक्तया बाधोक्तिर्निरधिष्ठानभ्रमासंभवादयुक्ता। हेतुद्वयफलितमाह—**तस्मादिति**। मिथो विमर्देन सर्पादिनिवृत्तौ रज्ज्वनिवृत्तिवत् घटादिनिवृत्तौ * सदेवेति श्रुतं सत् परिशिष्येतेत्याशयः। भेदबाधकतर्काणामनुग्राह्यनिष्कर्षायाह— **प्रयोगश्चेति**। चकार उपाधिविधूननादिसमुच्चयार्थः।

एवं सत्यनुवर्तमानानुभूतिरेव परमार्थः; सैव सती। ननु च सन्मात्रमनुभूतेर्विषयतया ततो भिन्नम्; नैवम् — भेदो हि प्रत्यक्षाविषयत्वादुर्निरूपत्वाच्च पुरस्तादेव निरस्तः। अत एव सतोऽनुभूतिविषयभावोऽपि न प्रमाणपदवीमनुसरति। तस्मात् सत् अनुभूतिरेव। सा च स्वतस्सिद्धा, अनुभूतित्वात्; अन्यतस्सिद्धौ घटादिवदननुभूतित्वप्रसङ्गः। किं च अनुभवापेक्षा चानुभूतेर्न शक्या कल्पयितुम्;

सत्तयैव प्रकाशमानत्वात्। न ह्यनुभूतिर्वर्तमाना घटादिवदप्रकाशा दृश्यते; येन परायत्तप्रकाशाऽभ्युपगम्येत।

चिन्मात्रसत्यत्वमिच्छतां किं बाह्यस्य सतः सत्यतयेत्यत्राह— **एवं सतीति**। हेत्वोः निरुपाधिकत्वे सिद्धे सतीत्यर्थः। **एव**कारः पूर्वोक्तरीत्याऽनुभाव्यानां मिथ्यात्वं व्यनक्ति। सत्यद्वित्वम्, भेदसत्यत्वस्वीकारः, मिथो व्यावृत्त्या द्वयोरपि बाधश्च स्यादित्यत्राह— **सैव सतीति**। अनुभूतिरेव सच्छब्दार्थ इत्यर्थः। अवधारणमयुक्तम्; सतः प्रत्यक्षविषयत्वसाधनेन भेदोक्तेरित्यभिप्रायेण चोदयति— **ननु चेति**। मानतः स्वरूपतश्च भेदस्यानुपपन्नत्वोक्त्या धीसद्वैदोऽपि बाधित इति प्रतिवक्ति— **नैवमिति**। तर्हि स्वयमेव सामान्यतो विशेषतश्च विषयत्वादिभेदोक्त्या विरोध इत्यत्राह— **अत** इति। भ्रान्तिरूपलोकदृष्ट्या मयोक्तमित्यभिप्रायेण **प्रमाणपदवीनिषेधः**। एतेन दृग्दृश्यसंबन्धानुपपत्तिः सूचिता। यां ग्राह्यलक्षणो योगशब्द इति योगाचारा उपचरन्ति, सैवेत्यवधारितं निगमयति—**तस्मादिति**; विषयविषयित्वरूपस्यापि भेदस्य बाधादित्यर्थः। **सदनुभूतिरेव**—सदिति भातं वस्तु न तद्बुद्धेर्भिन्नम्।

सच्चिदात्मनो मेयत्वाभावे माध्यमिकोक्तसंवृत्तिसिद्धिवत्स्यादित्यत्राह—**सेति**। **स्वतस्सिद्धा**—स्वरूपमयुक्तस्वप्रकाशा; अवेद्यत्वे सति अपरोक्षव्यवहारार्हेत्यर्थः। अत्र,

* यानुभूतिरजानन्तामेयाद्यानन्दविग्रहा। महदादिजगन्मायाचित्रभित्तिं नमामि ताम्॥

इत्युक्तक्रमेण उपरितन उपन्यासः। * येति स्वतस्सिद्धतां सूचयतीति व्याख्यातम्। तत्रानुभूतिरिति हेतुगर्भमित्याह— **अनुभूतित्वादिति**; चित्त्वादित्यर्थः। असाधारणाभासत्वशङ्कां व्यतिरेकव्याप्त्या परिहरन् * अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गः इति तत्रोक्तमाह—**अन्यत** इति। अनुमानान्तरमप्यस्तीत्याह—**किं चेति**। **अनुभवेत्यादिः** प्रतिज्ञाग्रन्थः; अनुभूतिर्नानुभवान्तरसापेक्षप्रकाशेत्यर्थः। भासमानत्वादिभिर्वैद्येति प्रत्यनुमानं चानेन निरस्यते। अत एव चकारः **कल्पयितु**मिति पदं च सफलं स्यात्। प्रतिज्ञायां हेतुं वदन् प्रत्यनुमाने चोपाधिं व्यनक्ति—**सत्तयैवेति**। यावत्सत्तं प्रकाशमानत्वादिति यावत्। विद्यमानत्वेऽप्यविदितावस्थायोगित्वं घटादिषु वेद्यत्वस्योपाधिभूतम्; तन्नेति भावः। हेतोरसिद्धिमुपाधेस्साधनव्यापकत्वं च निरस्यति— **नहीति**।

अथैवं मनुषे – उत्पन्नायामप्यनुभूतौ विषयमात्रमवभासते घटोऽनुभूयते इति; न हि कश्चिद् घटोऽयमिति जानंस्तदानीमेवाविषयभूतामनिदंभावामनुभूतिमप्यनुभवति। तस्माद्घटादिप्रकाशनिष्पत्तौ चक्षुरादिकरणसंनिकर्षवदनुभूतेः सद्भाव एव हेतुः। तदनन्तरमर्थगतकादाचित्कप्रकाशातिशयलिङ्गेनानुभूतिरनुमीयते। एवं तर्हि अनुभूतेरजडाया अर्थवज्जडत्वमापद्यत इति चेत्; किमिदमजडत्वं नाम? न तावत्स्वसत्तायाः प्रकाशाव्यभिचारः, सुखादिष्वपि तत्संभवात्। न हि कदाचिदपि सुखादयः

सन्तो नोपलभ्यन्ते । अतोऽनुभूतिः स्वयमेव नानुभूयते, अर्थान्तरं स्पृशतोऽङ्गुल्यग्रस्य स्वात्मस्पर्शवदशक्यत्वादिति ।

तदुभयं भाट्टमतेन शङ्कते—**अथेति** । **विषयमात्रम्** घटादिमात्रम् ; न तु तद्धीरित्यर्थः । तदिदं व्यक्तमनूक्तं **संवित्सिद्धौ**—

* घटोऽयमिति विज्ञाने घटमात्रं प्रकाशते । न वित्तिरिति युष्माकं गोष्ठीषु ननु घुष्यते ॥ इति ॥

विषयमात्रभाने हेतुमाह—**घट** इति । घटस्यानुभूतिकर्मत्वात् धियः स्वकर्मत्वविरोधात्तदानीं न भानमिति भावः । यद्वा प्रतिषेधार्थोऽयमनुवादः । **घटोऽनुभूयत इति न ह्यनुभवतीत्युत्तरत्रान्वेति** ; घटोऽयमिति ज्ञानं यदा जायते, न तदानीं घटः अनुभूयते इत्यनुभवः । घटानुभूतेर्घटशब्देदंशब्दार्थान्यत्वादित्यर्थः । घटोक्तेः प्रदर्शनार्थत्वज्ञापनाय **अविषयभूतामित्युक्तम्** । **अनिदंभावाम्** । घटस्य देशविशेषसान्निध्यमिह इदंभावः; तद्रहितामिति यावत् । ननु आलोकलिङ्गादीनामज्ञातानां न भासकत्वं दृष्टम् , तथाऽत्रापि स्यात् । अन्यथा स्वपरवेद्ययोरनतिशयप्रसङ्गश्च । आह च **कीर्तिः**— * अप्रत्यक्षोपलंभस्य नार्थदृष्टिः प्रसिध्यति इति ; तत्राह— **तस्मादिति** ; हेतुतयोपाधिनिवृत्तितया च विवक्षितस्य यावत्सत्तं प्रकाशमानत्वस्य निरस्तत्वादित्यर्थः । ज्ञापकानां ज्ञातृत्वमिन्द्रियादिषु न दृष्टम् ; स्वस्य ज्ञानोत्पत्त्या स्वपरवेद्यवैषम्यमित्यवधारणाभिप्रायः । यदि वर्तमानदशायां धीः स्वयं नानुभूयेत, तदा अनुभूयत इति वर्तमानावभासः कथं स्यात् ? उत्तरक्षणे च निवृत्ता कथं गृह्येत ? ज्ञानग्राहकाभावे ज्ञेयस्यापि निष्प्रमाणकत्वात्सर्वासिद्धिरित्यत्राह—**तदनन्तरमिति** । अत्यन्तासन्नत्वादनुभूयत इति वर्तमानोक्तिः ; व्याप्तिस्मरणादिकं च संस्कारभूम्ना शीघ्रं भवति ; कालभेदाग्रहोऽपि पद्मपत्रशतवेधन्यायादविरुद्ध इति भावः । घटः प्रकाशते इति विषयसामानाधिकरण्यादर्थगतत्वोक्तिः । आत्मगता धीरितरविषयस्य प्रका[श इति]शिकेति शङ्का च तेन व्युदस्ता । वेद्यगतप्रकाशस्य **कादाचित्कत्वोक्तया** तत्कारणत्वेन धीरनुमेयेति बोध्यते । अर्थगतत्वे रूपादिवत्पुरुषविशेषविषयत्वं न स्यादिति शङ्कानिरासाय **प्रकाशशब्दः** । अर्थप्रकाशो हि पुरुषविशेषधीजन्यतया तत्प्रतियोगितयैव स्वतः परतो वा कुतश्चिद्धातत्वात्तद्गतज्ञानानुमापक इति भावः । अर्थगतप्रकाशो वायुरूपादिवत् योग्यानुपलब्धिनिरस्त इत्यत्र विषयस्वरूपात्तद्धर्मान्तरेभ्यश्च व्यावृत्ततयोपलब्धम् **अतिशयशब्देन** व्यनक्ति । अत्र अन्यतस्सिद्धौ इत्यादिभिः प्रागुक्तं स्मारयन्मृषावादी चोदयति—**एवं तर्हीति** ; स्वेतराधीनसिद्धित्वे सतीत्यर्थः । स्वमतेन श्रुत्यनुमाभ्यां सिद्धवत्कारात् **अजडायाः** इत्युक्तम् । प्रसङ्गदोषान्विवक्षुः **माकस्मिकत्वादिप्रसङ्गनीयविपर्ययं** विकल्पयति—**किमिदमिति** । किं हेतुत्वेन उपाधिविपर्ययत्वेन चोक्तं यावत्सत्तं भासमानत्वम् ? उत साध्यत्वेनोक्तं स्वतस्सिद्धत्वमिति विकल्पः । अत्राद्यं दूषयति— **न तावदिति** । वेद्यत्वे यावत्सत्तं प्रकाशमानत्वाभाव इति प्रसङ्गार्थः स्यात् ; सोऽस्मदिष्टः ; विपर्यये पर्यवसानं च न संभवतीति भावः । मूलशैथिल्यमप्याह—**सुखादिष्विति** । यद्यपि अस्माकं सुखादेरुत्पत्तिक्षणात्पश्चाज्ज्ञानान्तरेण ग्रहणम् ; सिद्धान्तिनस्तु धीविशेषत्वेन स्वतस्सिद्धत्वम् ; तथाऽपि त्वत्पक्षे चैतन्योपरञ्जितान्तःकरणविवर्ततयाऽध्यस्तत्वेन शुक्तिरूप्यवदप्रकाशमानक्षणकल्पनयोगात्सुखादौ व्याप्तिभ्रमः सिद्ध इत्यभिप्रायेण विवृणोति— **नहीति** । अन्तरतस्त्वन्मते प्रातिभासिकरजतादिः साक्षिचैतन्येन यावत्सत्तं प्रकाशमाना **अविवादयश्चादिशब्दार्थः** । बुद्धेर्यावत्सत्तं प्रकाशमानत्वमिच्छतः सुखादावपि तद्वत्स्वरसदृष्टया

तथा किं न स्यादिति कल्पयित्वा वा तदुक्तिः। द्वितीये त्ववेद्यत्वे स्वयंप्रकाशत्वाभावः स्यादिति प्रसङ्गार्थः। तथाऽपीष्टप्रसङ्गो विपर्ययापर्यवसानं चेत्याह—अत इति; आद्यकोटिनिरासादन्या शिष्यते; साऽपि नास्तीत्यर्थः; प्रकाशाव्यभिचारस्य हेतोरसिद्धेरनैकान्त्याच्चेति वा। अनुभूतित्वहेतुना तत्सिद्धिः स्यादित्यत्राप्रसिद्धसाध्यतया व्याप्तिग्रहणाभावे केवलव्यतिरेकिणोऽनुमानत्वमेव नास्तीत्यभिप्रायेण साध्यरूपे व्याहतिमाह— अर्थान्तरमिति। स्वयंप्रकाशत्वाभावः स्यादिति तर्केऽपि प्रतियोग्यसिद्धेस्तदभावप्रसङ्गोऽशक्यः।

स्वप्रकाशत्वविषयाः श्रुतयः स्मृतयश्च नः। स्वधर्मभूतबुद्ध्यैव पुंसो भानं प्रचक्षते ॥ ३४४ ॥

कर्मकर्तृविरोधादङ्गुल्यग्रस्य स्वात्मस्पर्शविरोधः, इह तु न तथेति चेत्; इहापि गमनगन्तव्यादिवत्क्रियाकर्मत्वविरोधः सिद्धः। **इतिः** शङ्कासमाप्तौ।

तदिदमनाकलितानुभवविभवस्य स्वमतिविजृम्भितम्, अनुभूतिव्यतिरेकिणो विषयधर्मस्य प्रकाशस्य रूपादिवदनुपलब्धेः; उभयाभ्युपेतानुभूत्यैवाशेषव्यवहारोपपत्तौ प्रकाशाख्यधर्मकल्पनानुपपत्तेश्च। अतो नानुभूतिरनुमीयते, नापि ज्ञानान्तरसिद्धा; अपि तु सर्वं साधयन्त्यनुभूतिः स्वयमेव सिध्यति। प्रयोगश्च— अनुभूतिरनन्याधीनस्वधर्मव्यवहारा, स्वसंबन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वात्। यः स्वसंबन्धादर्थान्तरे यद्धर्मव्यवहारहेतुः स तयोः स्वस्मिन्ननन्याधीनो दृष्टः; यथा रूपादिश्चाक्षुषत्वादौ; रूपादिर्हि पृथिव्यादौ स्वसंबन्धाच्चाक्षुषत्वादि जनयन् स्वस्मिन्न रूपादिसंबन्धाधीनश्चाक्षुषत्वादौ। अतोऽनुभूतिरात्मनः प्रकाशमानत्वे प्रकाशत इति व्यवहारे च स्वयमेव हेतुः।

अवेद्यत्ववादी प्राकट्यवादिनमुपालभते—तदिदमिति; बुद्धेः स्वप्रकाशत्वे सिद्धे निराकारप्रकाशायोगादाकारद्वयानुपलम्भाच्च ग्राह्यग्राहकयोर्ज्ञानाकारत्वं वदद्भ्यो भीतैः प्रकाशमानस्य नीलादेः अप्रकाशमानबुद्ध्याकारत्वायोगात्कल्पितमिदं दृष्टहानमदृष्टकल्पनं च सर्वं प्रत्यक्षविरुद्धमिति भावः। अनुभवस्य विभवालोकादिनीत्या परप्रकाशादिहेतोः स्वप्रकाशादौ सजातीयनैरपेक्ष्यम्। तत्र श्रुत्यानुमितिसूचनाय स्वमतिविजृम्भितमित्युक्तम्। किं प्राकट्यं रूपादिवद् दृष्टम्; उत गुरुत्वादिवत्कल्प्यम्? इति हार्दे विकल्पे पूर्वं दूषयति—अनुभूतिरिति। धीरेव विषयस्य प्रकाशः। सा चातन्निष्ठाऽपि भ्रान्त्या विषयस्थेव भाति। वस्तुतः प्रकाशस्य विषयधर्मत्वे यद्यसावप्रत्यक्षः; तदा हि लिङ्गानुपलम्भात् नानुमितिः। अतः प्रत्यक्षत्वेऽङ्गीकृते तदुपलम्भः पुरुषविशेषनियतो न स्यादित्यभिप्रायेण रूपादिवदित्युक्तम्। द्वित्वादिवद्बीजन्यतया तेनैव दृश्यत इति चेन्न; अपेक्षाबुद्धिवेद्याकारविशेषातिरिक्तद्वित्वादिकल्पौ गौरवात्। यादृश्या बुद्ध्या द्वित्वाद्युत्पत्तिं मन्यसे, तादृश्या तद्व्यवहारः स्यात्; स चातीतादिष्वप्यस्ति; न च तत्र द्वित्वाद्युत्पत्तिः; निराधारधर्मजननायोगात्। अतिरिक्तद्वित्वाद्युत्पत्तिपक्षेऽपि अनन्यथासिद्धप्रत्यक्षबलात्प्रकाशप्रतिनियमः। इह तु न तथा,

वेद्यगतस्य वित्त्यतिरिक्तस्यानुपलम्भादिति भावः । ये तु वर्तमानेष्वतीतादिषु च द्वित्वादिकमेकत्ववत्स्वत एव तत्तद्वस्तुनिष्ठमपेक्षाबुद्ध्या गृह्यते, न तु जन्यते । इदमेव प्रतिपुरुषमपेक्षाबुद्धिभिरनन्तद्वित्वादिकल्पनाद्वरमित्याहुः, तत्पक्षग्रहे च नेदं निदर्शनं शोभते । द्वितीयं निरस्यति—**उभयेति** । कल्पनागौरवभीतैः धियं त्यक्त्वा विषयस्वप्रकाश एव स्वीक्रियताम्, धीसामग्र्या च तत्सिद्धिः स्यादिति चोद्यं तु सर्वविरुद्धं चेत्यभिप्रायेण **उभयाभ्युपेतत्वोक्तिः** । **एव**कारेण कल्प्युपपत्तीनामन्यथासिद्धिर्गौरवं च व्यज्यते । **अशेष**शब्दः कल्पकत्वेन शङ्कितानां कात्स्न्र्यमाह । तत्र सर्वत्र प्राकट्यजनकतया स्वीकृतैव धीरेका हेतुरिति चावधारणाभिप्रायः ।

यदि कल्प्येत विषये प्राकट्यं व्यवहारतः । तद्धेतुत्वेन कल्प्या धीस्तत्फलार्थं प्रकल्प्यताम् ॥ ३४५ ॥
यथा तत्रैव तस्यैव प्राकट्यं ने धिया भवेत् । तथा भानादयोऽपि स्युः किमन्तर्गडुकल्पिताः ॥ ३४६ ॥
प्राकट्यं प्रकटं स्याद्वः परतः स्वत एव वा । आद्येऽनवस्थितिश्शेषे बुद्धिरेव तथा न किम् ॥ ३४७ ॥

ज्ञातः इत्यादिव्यवहारस्तु इष्टद्विष्टादिनयात्कर्मप्रत्ययाधीनः । तद्रहितोऽपि प्रकटो घट इत्यादिधीकर्मत्वविषयतया तद्व्युत्पत्तेः स्यात् । ज्ञानकर्मणो घटस्य * प्रकाशते इति कर्तृत्वेन व्यवहारोऽपि रोचते, स्वदते इत्यादिवद्भानुविशेषायत्तः । अतिरिक्तकल्पौ च गुणक्रियादिषु प्राकट्ये च प्रकटादिव्यवहारो दुर्निवहः । एवं भूतभाविषु च । तदुक्तं **संवित्सिद्धौ**—

* अतीतेऽनागते चार्थे कथं प्राकट्यसंभवः । न हि धर्मिण्यसत्येव धर्मस्संभवमृच्छति ॥ इति ।

अत्र परोक्तप्रतिबन्दिनिस्तारस्तु—

नश्यद्ज्ञत्कर्मयोगो नानाधारः प्रतीयते । प्रध्वंसस्तु निराधारोऽमदाधार इतीरितः ॥ ३४८ ॥

एतेन अतीतादौ विषयत्वमात्रं न कर्मत्वम्, यत्र तु कर्मत्वं तत्र क्रियाजन्यफलभागित्वमवश्यापेक्षितमिति निरस्तम्; गुणादौ कर्मत्वेऽपि तदसंभवात् । ज्ञानं स्वकर्मणि किञ्चित्करोति क्रियात्वादित्यनुमितौ च धात्वर्थमात्रत्वे हेतौ न व्याप्तिः । स्पन्दत्वे त्वसिद्धिः । आहुः न्यायनिष्ठाः

* अनैकान्त्यादसिद्धेर्वा न च लिङ्गमिह क्रिया । तद्वैशिष्ट्यप्रकाशत्वान्नाप्यक्षानुभवोऽधिके ॥ इति ।

ननु धीस्वरूपातिरिक्तं तद्विषयत्वमर्थे भाति; तदनभ्युपगमे विरोधः; तदेव प्राकट्यमिति शङ्कायां निगमनव्याजेनोत्तरमाह— **अत** इति; त्वदिष्टस्य लिङ्गस्य निष्प्रमाणत्वादित्यर्थः । विषयत्वं च विषयिणमन्तरेण न भायात; **तद्भाने तु अनुमेयं नावशिष्यत** इत्याशयः । मा भूदनुमेयत्वम्; मानसप्रत्यक्षत्वं तु स्यात् क्षणिकात्मविशेषगुणत्वात्सुखादिवदिति, **तत्राह— नार्पाति** । अनुपलब्धेः कल्पनायोगाच्चेत्युभयमनुपजीव्यनीयम् । न हि स्वस्मिन्वर्तमानं ज्ञानं ज्ञानान्तरसिद्धमिति प्रत्यक्षयामः; उक्तो हेतुरपि क्षणिकत्वात्मधर्मत्वगुणत्वानामस्माभिरनभ्युपगमान्निरस्तः । मानसप्रत्यक्षत्वे च सुखादिवदात्मगुणस्य मनोऽबुभुत्सितग्राह्यतया तद्ग्रहणस्यापि तथेत्यनवस्था स्यात् । अबुभुत्सितग्राह्यत्वे तु ज्ञाते बुभुत्सा, ततश्चापाततोऽपि तद्धीरित्यन्योन्याश्रयः । तत्रापि सुखादेरिव मानसप्रत्यक्षतयैव ज्ञानस्यापि ज्ञातत्वनियमे बुभुत्सातज्ज्ञानादिपरम्परानुच्छेदः । अनियमे तु क्षणिकात्मविशेषगुणत्वं मानसप्रत्यक्षत्वरहिते ज्ञाने वर्तत इत्यनैकान्त्यम् । तस्यापि पक्षीकारे बाधः । किं च ज्ञानगोचरज्ञानस्य प्रमितत्वे पूर्वज्ञानमपि निष्प्रमाणकं स्यात्; ज्ञानस्या-

संभवे च ज्ञातृज्ञेयासंभवः। एतेन अवश्यवेद्यत्वानभ्युपगमादिति नैयायिकोक्तं निरस्तम्। कस्यचिज्ज्ञानस्य स्वप्रकाशत्वे तु लाघवात्पूर्वस्यापि तथात्वं साध्यम्। कचित्सामान्यतः स्वपरनिर्वाहकत्वेऽस्मदुक्तं मोढव्यम्। एवं स्वज्ञानस्यानुमेयत्वमानसप्रत्यक्षत्वयोरयोगात् तदग्रहे च परस्मिन्नपि तथैवेति व्युत्पत्त्याद्यसंभवेनागमस्यापि निर्मूलत्वादन्ततो माध्यमिकवादप्रसङ्गमनिच्छतामस्मत्पक्षः शिष्यत इत्याह— अपि त्विति। सर्वं साधयन्तीति हेतुपरम्। नित्यस्य स्वप्रकाशस्य स्वजन्यत्वायोगादन्यनिरपेक्षप्रकाशत्वमेव प्रक्रान्तमिह स्पष्टीकृतम्। अयं भावः—

धियः स्वकर्मताभावान्न स्वेन स्वप्रकाशनम्। इत्यमन् स्वान्यनिर्वाहममाधेर्दुस्त्यजत्वतः ॥ ३४९ ॥
धीरस्तीति मतौ शब्दशब्दे लक्षणलक्षणे। इष्टः स्वपरनिर्वाहः सर्वमित्यादिधीष्वपि ॥ ३५० ॥
कर्मकर्तृविरोधोऽपि स्ववृद्ध्यादौ न दृश्यते। क्रियाकर्मविरोधश्च वारणीयः क्रियोक्तिवत् ॥ ३५१ ॥
अङ्गुल्यग्रादिदृष्टान्तमात्रमप्यत्र निष्फलम्। दृष्टयदृष्टिविशेषेण सर्ववस्तुव्यवस्थितेः ॥ ३५२ ॥
अस्पृष्टिस्वात्मनस्तत्र संयोगद्विष्टतावलात्। दृष्टान्तमात्रभक्तेन दीपादिः किं न दृश्यते ॥ ३५३ ॥
अन्तर्ज्योतिः स्वयंज्योतिरात्मज्योतिरिति श्रुतिः। स्वरसाद्वदति स्वान्यनिरपेक्षप्रकाशताम् ॥ ३५४ ॥
स्वान्यधीहेतवो दृष्टा मनोधर्मादयस्तथा। स्वयं भिद्यत इत्यादौ संमता कर्मकर्तृता ॥ ३५५ ॥
आत्मानं रक्षतीत्यादिष्वपि द्वैरूप्यमक्षतम्। प्रदीपादिनयव्याप्त्या न मुधा बाधमर्हति ॥ ३५६ ॥
यदा विषयमात्रस्य व्याहारस्तत्र वेदितुः। अनुभूयत इत्युक्तिरविवक्षानिवर्तिता ॥ ३५७ ॥
व्यवहारनिवृत्त्या च न प्रकाशनिवर्तनम्। दृष्टेऽप्यव्यवहारस्य प्राचुर्येणोपलम्भतः ॥ ३५८ ॥ इति।

अत्र सूचितं साधनद्वयं वैशद्याय प्रयुज्यत इत्याह—**प्रयोगश्चेति**। यद्वा— उक्तप्रकारेण स्वप्रकाशत्वमगत्या ग्राह्यम्; तत्रानुमानान्तरं चास्तीति भावः। ग्रन्थलाघवाय प्रयोगद्वयमिह तन्त्रितम्। पिशाचानां तद्बाधयैवोत्तरं देयमिति न्यायात् परमतान्वारोहेण बुद्धेरपि प्राकट्यकल्पनयाऽत्र **धर्म**शब्दः, अन्यथाऽसिद्धान्तात्; कल्पितधर्मान्तराभ्युपगमेन वा तदुक्तिः। इदं च हेतुद्वयं यदि परोक्तकर्मकर्तृविरोधशान्त्यै संभावनार्थं स्यात्, तदा नातीवात्र शोध्यमस्ति। साक्षादनुमानत्वमिच्छतां तु यथाश्रुतेऽनुभूतित्वादिभिः सिद्धसाध्यत्वात्तत्रतत्र कर्तृव्यभिचाराच्चाभिप्रायकल्पत्या पूर्वानुमितावेवं प्रयोगो द्रष्टव्यः— अनुभूतिः, परगतस्वजन्यधर्मात्यन्तसजातीयस्वावश्यम्भाविधर्मयोगे स्वात्यन्तसजातीयापेक्षानियमरहिता, स्वविजातीये स्वानन्तरकालोत्तरकालानुवृत्तिरहितधर्महेतुत्वादिति। स्वस्मिन्स्वजन्यधर्मासिद्धेः परगतत्वोक्तिः स्थानप्रदर्शनार्था; एकत्वादिभिः सिद्धसाध्यतां वारयितुं जन्यशब्दः अत्यन्तशब्दश्च। अनुभूत्या परत्र जन्यो धर्मः प्राकट्यमेव। तस्य स्वान्यमात्रनिष्ठस्य स्वधर्मत्वायोगात् सजातीयोक्तिः। बुद्धिव्यतिरिक्ते बोद्धरि बुद्धिजन्यसुखादिसजातीयानां बुद्धावभावेन बाधं स्वाश्रयस्य रूपित्वाद्यापादके रूपादौ रूपित्वाद्यभावात् दृष्टान्तस्य साध्यशून्यतां च परिहर्तुं स्वावश्यम्भावित्वोक्तिः। यद्यपि नित्येऽनुभूतिप्राकट्येऽन्यारूढेऽन्यनैरपेक्ष्यमात्रोक्तिः पर्याप्ता; तथाऽपि रूपादौ दृष्टान्ते चाक्षुषत्वस्य स्थूलनिष्ठत्वादिसापेक्षतया साध्यवैकल्यं स्यादिति तन्निरासाय स्वात्यन्तसजातीयापेक्षारहितेत्युक्तम्। * यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वाणि भूतानि इत्यादिश्रुत्या जीवतज्ज्ञानभेदकल्पनात व्यावहारिकव्यवस्थया परमतनयेनानुमानादिगम्ये गुर्वादिज्ञाने बाधपरिहाराय नियमशब्दः। तद्धि गुरुमते सिद्धान्ते

च वर्तमानकाले स्वेन स्वाश्रयाय भाति। यद्वा, परत्र छिन्नत्वाद्यापादके कुठारादौ द्वैधीभावस्य कदाचिदत्यन्त[वि]सजातीयापेक्षत्वेऽपि नियमाभावेनातिचारनिरास इति नियमोक्तिसाफल्यम्। अत्यन्तसाजात्यं चात्र निर्दिष्टाकारेण साम्यम्। हेतौ तु सजातीये द्रव्यान्तरे संयुक्तत्वहेतोर्द्रव्यस्य स्वगतसंयुक्तत्वे द्रव्यान्तरापेक्षानियमात्तद्व्यावृत्त्यै स्वविजातीयोक्तिः। स्वानन्तरेत्यादिना परस्मिन्पुत्रत्वादिहेतौ पितरि स्वपुत्रत्वे पितृसापेक्षत्वदर्शनात्तस्मिन्नैकान्त्यं निरस्तम्। पुत्रत्वादिकं हि पित्राद्यनन्तरकालादुत्तरकाल्याप्यनुवर्तते। एवं द्रव्यान्तरच्छिन्नत्वापादके द्रव्यान्तरेण छेद्येऽपि द्रव्ये न व्यभिचारः। द्वितीयानुमानेऽपि अनुभूतिरनन्याधीनव्यवहारा इत्युक्ते अन्यनिरपेक्षघटादिव्यवहारहेतुतया सिद्धसाध्यतां परिहर्तुं स्वशब्दः। तथापि विवक्षावागादिसापेक्षतया बाधो दृष्टान्ते च साध्यहानिः स्यात्; अतः स्वात्यन्तसजातीयानपेक्षत्वं विवक्षितम्। नियमग्रहणं च पूर्ववत्। तदिहानुभूतिः स्वात्यन्तसजातीयापेक्षानियमरहितस्वव्यवहारेति पक्षसाध्यस्थितिः, हेतुस्तु हेतुत्वादित्येवालम्; क्वचिदपि व्यभिचारादृष्टेः। **स्वसंबन्धात्**— इत्यादिविशेषणत्रयोक्तिस्तु तत्कृतविशेषवैशद्यार्था। एवं नामोक्तमात्मसिद्धौ—

* सजातीयस्वसाध्यार्थनिरपेक्षात्मसिद्धयः। सर्वे पदार्थास्तेनात्मा निरपेक्षात्मसिद्धिकः॥ इति।

अत्र सिद्धिः व्यवहारयोग्यतारूपः प्रकाशः; तदुक्तिर्व्यवहारमप्युपलक्षयति; उभयत्र पदार्थत्वादित्येव हेतुः। एवं पूर्वानुमानेऽपि पदार्थत्वाद्धेतुत्वादित्यादिमात्रमुपादाय * स्वात्यन्तसजातीयापेक्षानियमरहितस्वप्रकाशेति साध्यप्रयोगोऽप्यूह्यः। तच्च निगमने सूचितम्—**अनुभूतिरात्मनः प्रकाशमानत्वे** इत्यादिना। सजातीयेत्यादौ आत्मनः श्रुतिसिद्धं ज्ञानत्वमवष्टभ्यात्मरूपं ज्ञानं स्वात्यन्तसजातीयापेक्षारहितस्वसिद्धिकमित्युच्यते। स्वसाध्यनिरपेक्षत्वोक्तिस्तु प्रयोगान्तरार्था। साध्यम् व्यवहारानुगुणीकार्यम्; बोध्यमित्यर्थः। आत्मा स्वबोध्यापेक्षारहितस्वप्रकाशः पदार्थत्वादिति। एतेन स्वबोध्यमन्तरेणापि भातीत्युक्तं भवति। दृष्टान्तानां त्वचेतनतया बोध्याभावादेव तत्प्रकाशः स्वबोध्यापेक्षारहितः। **आस्तामेतत्**; प्रकृते तु सामान्यतो व्याप्तिमाह— य इति। यद्यपि रूपवतामेव चाक्षुषत्वमिति नियमो नास्ति; तथाऽपि नीरूपं द्रव्यं सर्वमचाक्षुषमिति; तेन दृष्टान्तमाह— यथेति। अत्र प्रथमेन आदिशब्देन स्पर्शो गृह्यते। द्वितीयेन स्पार्शनत्व व्यवहारविशेषश्च। रूपादेर्व्यवहारविशेषहेतुत्वं तन्निमित्तचाक्षुषत्वाद्यापादनेन। एवंविधसामान्यव्याप्तौ केवलव्यतिरेकिविश्रमं केचिदाहुः। एतद्वा पक्षधर्मतालब्धविशेषं वा सूचयन्निगमयति— अत इति। **स्वयमेव हेतुः**; बुद्ध्यन्तरनिरपेक्ष इत्यर्थः। अत्रापि तत्प्रयोगस्तु — अनुभूतिः अनन्याधीनस्वप्रकाशा, परप्रकाशासाधारणाभिव्यक्तिहेतुत्वात्; यत्रोक्तसाध्यं, तत्रोक्तहेतुकमिति। एत्र व्यवहारेऽप्यूह्यम्।

सयं स्वयंप्रकाशानुभूतिर्नित्या च, प्रागभावाद्यभावात्। तदभावश्च स्वतस्सिद्धत्वादेव। न ह्यनुभूतः स्वतस्सिद्धायाः प्रागभावः स्वतोऽन्यतो वाऽवगन्तुं शक्यते। अनुभूतिः स्वाभावमवगमयन्ती, सती तावन्नावगमयति; तस्याः सत्त्वे विरोधादेव तदभावो नास्तीति कथं सा स्वाभावमवगमयति? एवमसत्यपि नावगमयति; अनुभूतिः स्वयमसती स्वाभाव कथं प्रमाणं भवेत्? नाप्यन्यतोऽवगन्तुं शक्यते, अनुभूते-

रनन्यगोचरत्वात् । अस्याः प्रागभावं साधयत्प्रमाणम् अनुभूतिरियमिति विषयीकृत्य तदभावं साधयेत् । स्वतस्सिद्धत्वेन इयमिति विषयीकारानर्हत्वान्न तत्प्रागभावोऽन्यतः शक्यावगमः । अतोऽस्याः प्रागभावाभावादुत्पत्तिर्न शक्यते वक्तुमित्युत्पत्तिप्रति[सं]बद्धाश्चान्येऽपि भावविकारास्तस्या न सन्ति ।

ननु ब्रह्म नित्यं श्रुतम् ; धीस्तु अनित्या ; सा कथं तत्स्यात् ? योगाचारोक्ताच्च त्वदुक्तस्य को भेद इत्यत्राह— **सेयमिति** । शास्त्रप्रत्यक्षाभ्यां सच्चिद्रूपतयैव सिद्धेत्यर्थः । अत्र **स्वयंप्रकाश** इति नित्यत्वनिदानोक्तिः । सर्वदा सत्त्वमुभयान्तशून्यत्वं वा नित्यत्वम् ? तच्च * न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते इत्यादिश्रुतिसिद्धम् ; ज्ञानत्वं च ब्रह्मणः श्रुतम् ; अतस्तदविरोध इति भावः । श्रुत्या अपि प्रत्यक्षविरुद्धं दुर्वचमित्यत्र विरोधाभावाभिप्रायेण हेतुमाह—**प्रागिति** ; *संवित्प्रागभावप्रध्वंसयोर्भ्रान्तिसिद्धतया स्वरूपनस्तदभावस्य स्थाप्यमानत्वादित्याशयः* । अत एव न साध्याविशेषशङ्का । धीनित्यत्वश्रुतिरन्यपरा ; न चान्यदिह मानम् , इत्यत्राह— **तदिति** । एवकार इह प्रागेव सूचितत्वं नैरपेक्ष्यं वा व्यनक्ति । ननु स्वयंप्रकाशत्वमिह न लिङ्गम् ; सपक्षे सत्यपि तत्र क्वचिदप्यवृत्तेः । सन्ति हि प्रागभावरहितत्वे साध्ये प्रागभावाः सपक्षाः, प्रध्वंसरहितत्वे च प्रध्वंसाः, तदुभयराहित्ये च खपुष्पादिः । आहुश्च—

* यस्मिन्ननित्यता नास्ति कार्यतोऽपि न विद्यते । तस्मिन्यथा खपुष्पादाविति शक्यं हि भाषितुम् ॥ इति ।

तत्राह— **नहीति** । स्वप्रकाशत्वस्य लिङ्गत्वाभावेऽपि विकल्पानुपपत्तिद्वारा विवक्षितनिदानत्वं स्यादिति भावः । अत्र **प्रागभावोक्तिः** प्रध्वंसस्याप्युपलक्षिका । स्वतःपक्षेऽपि धीः सत्यसती वा स्वाभावग्राहिणीति विकल्पं मत्वा आद्यं निरस्यति—**अनुभूतिरिति** । ननु स्वयं सतीं भावमभावं वा विषयान्तरमिव स्वाभावमपि किं न गृह्णीयादित्यत्र विषयस्याभावात्तस्य दुर्ग्रहत्वमाह— **तस्या** इति । यद्यपि अन्योन्याभावादेः स्वप्रतियोगिसमकालत्वमस्ति ; तथाऽपि प्रागभावप्रध्वंसयोर्न तत् स्यादित्यभिप्रायेण **विरोधादेवेत्युक्तम्** । द्वितीयं विषयिणो ग्रहणस्यैवाभावादाक्षिपति—**एवमिति**; अन्यतराभावसाम्यप्रकारेणेत्यर्थः । विरोधं विवृणोति—**अनुभूतिरिति** । **स्वयमसती** वन्ध्यासुतधीवत्स्यादिति भावः । अन्यतःपक्षोऽपि विकल्पासह इत्याह— **नापीति** । अन्यत्प्रमाणमनुभूतिं विषयीकृत्य न वेति विकल्प्य पूर्वत्र प्राक् साधितेन विरोधमाह— **अनुभूतेरिति** । द्वितीये प्रतियोग्यग्रहे कथमभावग्रह इत्यभिप्रायेणाह—**अस्या इति** ; न हि धीग्राह्यस्य घटादेरभाव इह साध्य इत्याशयः । विषयीकारपक्षपरिशेषेण तद्विरोधं निगमयति—**स्वत इति** । परावेद्यत्वयोरभावात् इयमिति विषयीकारानर्हत्वम् । एवमभावस्याग्रहेऽपि भावस्योत्पत्त्यादेः स्वतोऽन्यतो वा ग्रहः स्यादित्यत्राह—**अत इति**; उक्तविकल्पानुपपत्तेस्तस्याश्चात्रापि संभवादित्याशयः । न हि स्वतः स्वविकारग्रहः, तस्याः स्वरूपमात्रग्राहित्वात् । न चान्यतः, अवेद्यत्वात् । तद्धर्मतया ग्रहणे हि तद्विषयत्वं दुस्त्यजमेव । **प्रागभावाभावादिति** । कारणं हि सर्वकार्याणां तत्तत्प्रागभावः । न च तद्रहितं खरशृङ्गमुत्पद्यत इति भावः । **उत्पत्तिप्रतिबद्धाः** ; तदव्याप्ता इत्यर्थः । **भावविकाराः** भावरूपा विकाराः, बाह्यानां भावानां संभवन्तो वा । धीर्निर्विकारा अनुत्पन्नत्वादिति व्यतिरेकी ।

अनुत्पन्नेयमनुभूतिरात्मनि नानात्वमपि न सहते, व्यापकविरुद्धोपलब्धेः। न ह्यनुत्पन्नं नानाभूतं दृष्टम्। भेदादीनामनुभाव्यत्वेन च रूपादेरिवानुभूतिधर्मत्वं न संभवति। अतोऽनुभूतेरनुभवस्वरूपत्वादेवान्योऽपि कश्चिदनुभाव्यो नास्या धर्मः। यतो निर्धूतनिखिलभेदा संवित्, अत एव नास्याः स्वरूपातिरिक्त आश्रयो ज्ञाता नाम कश्चिदस्तीति स्वप्रकाशरूपा सैवात्मा। अजडत्वाच्चानात्मत्वव्याप्तं जडत्वं संविदि व्यावर्तमानमनात्मत्वमपि हि संविदो व्यावर्तयति।

एतेनैव सजातीयमपि निरस्यति— **अनुत्पन्नेति**। इयमित्यनेन प्राग्वत्स्वतोऽन्यतश्च नानात्वेनापि दुर्ग्रहेति सूच्यते। **आत्मनि**; अनुभूतिशब्दोपात्ते स्वात्मनीत्यर्थः; तत्र धीप्रतियोगिकभेदो नास्ति; स तु जडेष्वेवेति भावः। अनुत्पन्नशब्देन विवक्षितस्य हेतोर्व्याप्तिपक्षधर्मत्वे व्यनक्ति—**व्यापकेति**; नानात्वव्यापकमुत्पन्नत्वम्; तद्विरुद्धस्यानुत्पन्नत्वस्य पक्षे प्रमितत्वादित्यर्थः। यन्नाना तदुत्पन्नमिति व्यभिचारानुपलम्भेन द्रढयति— **नहीति**। नानाभूतं न ह्यनुत्पन्नं दृष्टमित्यन्वयः। धीः सजातीयरहिता, अजत्वात्; यन्नैवं तन्नैवं यथा घट इति प्रयोगः। परमाण्वादिसंज्ञास्तु केचिदर्थाः सजातीयवन्तोऽप्यनुत्पन्ना इति परेष्टं मानशून्यमिति भावः। उक्तव्यतिरेकिसाध्ययोरन्वयिनमप्याह— **भेदादीनामिति**। आदिशब्देन विकारा गृह्यन्ते। भेदा विकाराश्च नानुभूतिधर्माः अनुभाव्यत्वाद्रूपादिवदिति। ननु अनुभूतेरसाधारणानि धीत्वस्वप्रकाशत्वनित्यत्वाजत्वनिर्विकारत्वनिर्भेदत्वानि त्वयैवाद्योक्तानि। अनृतादिव्यावृत्तयश्च प्रागुक्ताः। तत्पक्षीकारबहिष्कारयोर्बाधव्यभिचारौ स्यातामित्यत्राह— **अत इति**; भावाभावरूपाणां सर्वेषां धर्माणाम् **आदिशब्देन** संग्रहेण पक्षीकृतत्वादित्यर्थः। **एवकारः** साधकत्वव्यवच्छेदपरः। **अन्योऽपि**; क्वचिच्छ्रुतिसिद्धोऽस्मदुक्तोऽपीति यावत्। कल्पितैस्तु धर्मैरत्र हेतुसाध्यव्यवहारः—

ज्ञानभेदनिषेधे तु ज्ञानानामैक्यमत्र नः। जडाद्भेदनिषेधे तु तन्मिथ्यात्वान्न तद्भवेत्॥ ३५९॥

जडादिव्यावृत्तयश्च स्वरूपानतिरिक्ता इत्युक्तम्। धीः निर्धर्मा, अनुभवस्वरूपत्वादिति व्यतिरेकी; विगीताः नानुभूतिधर्माः, अनुभाव्यत्वादिति पूर्वोक्तौ वीतावीताविह पदद्वयेन स्मारितौ। उक्तं च **खण्डने**— * प्रकाशात्मतामात्रस्यैव स्वतःसिद्धत्वेन जडात्मनां केषांचिद्धर्माणां तदन्तर्भावानुपपत्तिरिति। अनुभूतेर्निर्विशेषत्वादिसाधनेऽपि जिज्ञासितस्यात्मनः किमायातम? स हि बहुभिः श्रुतिभिर्ज्ञानादिधर्माश्रयत्वेन भातीत्यत्राह— **यत्न इति**। प्रागुक्तप्रकारेण निर्धूतनिखिलभेदत्वादाश्रयाख्यो विजातीयभेदोऽपि कल्पितः; अतः स नात्मा, संविदन्यत्वात् घटवदिति भावः। स्वप्रकाशत्वनिर्गुणत्वे च आत्मस्वभावतया भाते संविदि स्थापिते। अनेन श्रुतिसिद्ध आत्मा धीरूपत्वेन प्रत्यभिज्ञाप्यत इत्याशयवतोक्तम्— **सैवात्मेति**। धीः आत्मा, निर्विशेषत्वाद्धीत्वाच्चेति व्यतिरेकिद्वयमिह विवक्षितम्। प्रकृतमजडत्वमपि तादृशं हेतुमाह— **अजडत्वाच्चेति**। व्यतिरेकव्याप्तिं पक्षधर्मतां च व्यञ्जयन् व्यापकनिवृत्त्या व्याप्यनिवृत्तिमाह— **अनात्मत्वव्याप्तमिति**; अनात्मत्वे व्याप्ये व्याप्तं व्यापकमित्यर्थः; कर्तरिक्तः। योऽनात्मा स जडः, यथा देहादिः, धीस्तु न तथा; तस्मादात्मा।

ननु च अहं जानामीति ज्ञातृता प्रतीतिसिद्धा; नैवम्—सा भ्रान्तिसिद्धा, रजततेव शुक्तिशकलस्य; अनुभूतेः स्वात्मनि कर्तृत्वायोगात्। अतो मनुष्योऽहमित्यन्तर्बहिर्भूतमनुष्यत्वादिविशिष्ट[देह]पिण्डात्माभिमानवज्ज्ञातृत्वमप्यध्यस्तम्। ज्ञातृत्वं हि ज्ञानक्रियाकर्तृत्वम्। तच्च विक्रियात्मकं जडं विकारिद्रव्याहङ्कारग्रन्थिस्थमविक्रिये साक्षिणि चिन्मात्रात्मनि कथमिव संभवति? दृश्यधीनसिद्धित्वादेव रूपादेरिव कर्तृत्वादेर्नात्मधर्मत्वम्।

अत्र ज्ञानाश्रयोऽहमर्थस्त्वात्मेति सर्वलोकस्वानुभवप्रत्यक्षेण बाध इति चोदयति— **ननु चेति**। यथाहुः निरालम्बनानुमाने— * सर्वलोकप्रसिद्धया च पक्षबाधोऽत्र ते ध्रुवमिति। स्वतःप्रमात्वमभिप्रेत्यात्र **प्रतीतिशब्दः**। स्वारसिकबाधाभावेऽपि यौक्तिकबाधात् स्वनैर्ल्यादिकल्पत्वं मत्वा प्रतिवक्ति—**नैवमिति**। आत्मनोऽपि ज्ञातृत्वं देहादिज्ञातृत्ववद्बाधितत्वाद्भ्रान्तिसिद्धमित्याह— **सेति**। हेतुत्वपरोऽयं परामर्शः— विमतं ज्ञातृत्वं भ्रान्तिसिद्धं, ज्ञातृत्वस्वरूपत्वात्संमतवदिति। देहादेर्ज्ञातृत्वमिच्छतामपि अविगानार्थमन्यत्राप्येकधीविषये बाध्याबाध्यांशविवेकं व्यनक्ति— **रजततेति**। अन्यथाम्ल्यात्यन्वारोहेणेदं निदर्शनम्। स्वपक्षे हि शुन्यवच्छिन्नमायांशकर्वुरस्य चैतन्यस्य रजतनया विवर्तः। शुक्तौ रजतत्वबाधेऽपि प्रमाणसिद्धे रजते रजततेव देहादौ बाधिताऽप्यात्मनि ज्ञातृता स्यादित्यत्र आत्मस्वरूपभूतज्ञानाश्रयत्वं वा कर्मकर्त्रनच्छिन्नवृत्तिज्ञानाश्रयत्वं वा ज्ञातृत्वमिति विकल्पं मत्वा, आद्येऽपि स्वरूपज्ञानाश्रयत्वमिदं स्वरूपस्यैव, अन्यस्य वेति विकल्पे स्वरूपस्येति पक्षमात्माश्रयेण निरस्यति— **अनुभूतेरिति**। कर्तृत्वमिहाश्रयत्वम्; जनकत्वविवक्षायामप्यात्माश्रयसिद्धः। कथं तस्यात्मनः प्रत्यक्षादिभिर्ज्ञातृत्वप्रतीतिरित्यत्र तत्संभवम्, अन्यस्य वेति विकल्पितपक्षस्यासंभवं च ज्ञापयितुमाह— **अत** इति; स्वस्य स्वाश्रयत्वायोगादित्यर्थः। अन्तरङ्गाहमर्थधर्माध्यासेनैक्यव्यञ्जनाय विशिष्टदेहपिण्डेत्यन्तम्। **ज्ञातृत्वमिति**; यथा आत्मनि मनुष्यत्वादिविशिष्टपिण्डत्वमध्यस्तम्; तथा ज्ञातृभूताहमर्थाभिमानो ज्ञातृत्वमित्यर्थः। तत्रानुभूतिबहिर्भूतत्वमपि हेतुः। स तु ज्ञातृत्वं हीत्युत्तरवाक्ये स्पष्टः। ज्ञातृत्वमध्यस्तमित्यनेनैवात्मनो वृत्तिज्ञानाश्रयत्वपक्षोऽपि व्युदस्तः; तदुपपादनाय प्रतिक्षेप्यस्वरूपं निष्कर्षति— **ज्ञातृत्वं हीति**। **हि**र्हेतौ; यतो ज्ञातृत्वं ज्ञानक्रियाकर्तृत्वम्, अतः इत्यर्थः। प्रस्तुते को विरोधः? इत्यत्राह— **तच्चेति**। **चो** हेतौ, उक्ताकारणाकारान्तरसमुच्चयार्थो वा। **विक्रियात्मकं जडमिति**। व्यवस्थाप्यम् आश्रयविशेषणं व्यनक्ति— **विकारिद्रव्याहङ्कारग्रन्थिस्थमिति**। स्वरूपानुबन्धित्वाभावादनात्मत्वव्यवस्थै देहादिवद्ग्रन्थिस्थत्वोक्तिः। ईदृशस्य औचित्योपलम्भमाह— **अविक्रिय** इति। परेषु व्याप्रियमाणेषु निर्व्यापारो हि साक्षी; अतः * साक्षाद्द्रष्टरि संज्ञायामित्यनुशिष्ट्या * साक्षी चेता केवलो निर्गुणश्चेति श्रुतिरपि द्रष्टृत्वपरेति न भ्रमितव्यम्, किं तु अविद्यागोचरानुभवस्वरूपपरेत्यभिप्रेत्याह— **साक्षिणीति**। अनेन सूचितः श्रुतिविरोधोऽपि। तन्निर्धर्मत्वविरोधमप्याह— **चिन्मात्रात्मनीति**। * अनुभाव्यत्वादिति प्रागुक्तहेतुनैव कर्तृत्वादेरप्यनात्मधर्मत्वं साधितमिति स्थापयति— **दृश्यधीनेति**। कर्तृत्वादिः नात्मधर्मः, **दृश्यधीनसिद्धित्वाद्रूपादिवदित्यनुमानमत्राभिप्रेतम्। कर्तृत्वादीत्यादिशब्देनाहंप्रत्ययगोचरत्वग्रहः**।

सुषुप्तिमूर्च्छादौ अहंप्रत्ययापायेऽप्यात्मानुभवदर्शनेन नात्मनोऽहंप्रत्ययगोचरत्वम्। कर्तृत्वेऽहंप्रत्ययगोचरत्वे चात्मनोऽभ्युपगम्यमाने देहस्येव जडत्वपरात्तत्वानात्मत्वादि-प्रसङ्गो दुष्परिहरः। अहंप्रत्ययगोचरात्कर्तृतया प्रसिद्धात् देहात्तत्क्रियाफलस्वर्गादे-र्भोक्तुरात्मनोऽन्यत्वं प्रामाणिकानां प्रसिद्धमेव। तथा अहमर्थाज्ज्ञातुरपि विलक्षणः साक्षी प्रत्यगात्मेति प्रतिपत्तव्यम्। एवमविक्रियानुभवस्वरूपस्यैवाभिव्यञ्जको जडोऽप्यहङ्कारः स्वाश्रयतया तमभिव्यनक्ति। आत्मस्थतयाऽभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः। दर्पणजलखण्डादिर्हि मुखचन्द्रबिम्बगोत्वादिकमात्मस्थतयाऽभिव्यनक्ति। तत्कृतोऽयं जानाम्यहमिति भ्रमः।

ननु * अहमेवाहं मां जुहोमीत्यादिश्रुतिशतैः प्रत्यक्षानुगुणैरहमर्थ आत्मेति सिद्धेऽहंत्वसामानाधिकरण्यबलाज्ज्ञातृत्वादिकमात्मधर्मः स्यादित्यत्राह— **सुषुप्तिमूर्च्छादौ** इति। आदिशब्देन मरणमोक्षसंग्रहः। स्वात्मप्रकाशोऽपि तदा नास्तीति जडात्मवादिमतव्युदासाय **आत्मानुभवोक्तिः**। तत्रापि दशासु स्वप्रकाशत्वस्य श्रुतिप्रसिद्धत्वादिति भावः। अहंबुद्धेरात्मविषयत्वे स्वरूपस्फुरणवत्सुषुप्तावपि साऽनुवर्तेत; प्रयोगश्च—अहं कर्ता इत्यादिधीः नात्मगोचरा, सुषुप्त्यादावविद्यमानत्वात्। तथा च * अहम्मानोद्भवं दुःखमित्यादि, * अविद्याहृन्निरिति च पठ्यते। अकर्तृत्वानहंत्वयोरुक्तस्य प्रमाणस्यानुग्राहकतर्कानाह—**कर्तृत्व** इति। प्रसङ्गविपर्यायाश्च अजडत्वादयः प्रकृतमाश्रद्धये व्यतिरेकिहेतवोऽभिप्रेताः। यदि जडस्याहंत्वं, तर्हि देहस्यैव तत्किं न स्यात्? बाधाच्चेत्तर्हि श्रुत्यादिसिद्धस्य बाधायोगादात्मनि तदस्तु, अनात्मनः कर्तृत्वे कामित्वकर्तृत्वसामानाधिकरण्यात्तन्मूलं भोक्तृत्वमप्यात्मनो न सिध्येत्; * शास्त्रफलं प्रयोक्तरीति नियमस्य जातेष्टयादौ अगत्या निवृत्तिः, अन्यत्र न तथा; संसाराभावान्मुक्तिशास्त्रं नारभ्यमित्यत्राह— **अहंप्रत्ययेति**। **कर्तृतया प्रसिद्धाद्देहादिति**। कथम्? इत्थम्—प्रचुराणां विष्णुक्रमणसर्पणादीनां वैधक्रियाणां साक्षाद्देहाश्रयत्वाद्ध्यानसत्र्यापाराणां देहसापेक्षत्वादिति। **प्रामाणिकानाम्**; श्रुत्यादिनुसारिणामित्यर्थः। तदिहाकर्तुर्भोक्तृतासंभवेन तेन बाधायोगश्चोक्तः परास्तम्। अहंत्वकर्तृत्वादौ बाधश्च पूर्वोक्तः सुषुप्त्यादिविषयश्रुतिप्रसिद्धः। आत्मा श्रुतः, तस्य तत्तत्क्रिया-नाश्रयत्वेऽपि आत्मन ऐहिकामुष्मिकतत्तत्फलभोक्तृत्वं प्रामाणिकैः सर्वैरङ्गीकृतम्। तथाऽनात्मनोऽहमर्थस्य कर्तृत्वेऽपि गतिः। स्मर्यते च—* कार्यकारणकर्तृत्वे इत्यादि। तर्हि भोक्तृत्वादेव ज्ञातृत्वादिकं स्यादित्यत्र दत्तोत्तरत्वं मत्वाऽऽह —**तयेति**। अयं भावः— कर्तृत्वभोक्तृत्वविशिष्टोऽहमर्थः। नात्मा, अहंधीवेद्यत्वाद्देहवत्। अभोक्तृत्वेऽप्यात्मनो भोक्तृत्वाध्यासात्तदुक्तिः। मुक्तिशास्त्रं च तावन्मात्रनिवृत्त्यर्थमिति। न हि कर्ता साक्षी स्यादित्यभिप्रायेण **साक्षित्वोक्तिः**। **प्रतिपत्तव्यम्**; उक्तैर्हेतुभिः * यस्य नाहंकृतो भावः इत्यादिशास्त्रैश्चेति शेषः। ननु अविद्याशबले चिद्रूपात्मनि अहमिति प्रथमोऽध्यासस्त्वदुक्तः; तथा च शुक्तिरजतवत् रूप्यवद्धीवत्ताऽहमर्थो भासेत; प्रत्युत तद्धर्मतया धीर्भाति। तथात्वे धियोऽहमर्थविकारत्वं जन्मादिविकाराश्रयत्वं च स्यादित्यत्राह—**एवमिति**। **अभिव्यञ्जक** इति हेतुगर्भम्। **जडोऽपीति** घटवदव्यञ्जकत्वासंभवशङ्काव्युदासार्थम्। अहङ्कारस्तथाभिव्यक्तिमात्रमेव; न तु वास्तवी तत्र वृत्तिः।

दर्पणप्रतिहतभान्यायेन तु तद्धर्मत्वोक्तिः ; अतो न तद्विकारित्वादिप्रसङ्गः । इन्द्रियवद्व्यञ्जकत्वमस्तु, किमिति स्वनिष्ठतया व्यनक्तीत्याह— आत्मस्थतयेति । यथादर्शनं स्वभावो दुरतिक्रमः इत्यभिप्रायेण स्वभावशब्दः । अभिव्यञ्जकानामीदृक्स्वभावत्वं बुद्धीनां प्रमात्ववदौत्सर्गिकं क्वचिदपवादेऽपि भूयोदृष्ट्या सिध्यतीत्याह— दर्पणेति । तत्तद्विशेषप्रयुक्तत्वयुदासाय बहूदाहृतिः । जातिव्यक्तयुदाहरणेन चक्षुष्प्रतिफलनोपाधिकत्वशङ्का चापास्ता । उक्तप्रकारेणाधिष्ठानवैपरित्यादिचोद्यस्यापास्तत्वमाह— तत्कृत इति ; व्यञ्जकसामान्यस्वभावसिद्ध इत्यर्थः ।

स्वप्रकाशाया अनुभूतेः कथमिव तदभिव्यङ्ग्यजडरूपाहङ्कारेणाभिव्यङ्ग्यत्वमिति मा वोचः ; रविकरनिकरभिव्यङ्ग्यकरतलस्य तदभिव्यञ्जकत्वदर्शनात् । जालकरन्ध्रनिष्क्रान्तद्युमणिकिरणानां तदभिव्यङ्ग्येनापि करतलेन स्फुटतरप्रकाशो हि दृष्टचरः । यतः अहं जानामीति ज्ञाताऽयमहमर्थश्चिन्मात्रात्मनो न पारमार्थिको धर्मः ; अत एव सुषुप्तिमुक्त्योर्नान्वेति । तत्र हि अहमर्थोल्लेखविगमेन स्वाभाविकानुभवमात्ररूपेणात्माऽवभासते । अत एव सुप्तोत्थितः कदाचित् मामप्यहं न ज्ञातवान् इति परामृशति । तस्मात्परमार्थतो निरस्तसमस्तभेदविकल्पनिर्विशेषचिन्मात्रैकरसकूटस्थनित्यसंविदेव भ्रान्त्या ज्ञातृज्ञेयज्ञानरूपविविधविचित्रभेदा विवर्तन्त इति तन्मूलभूताविद्यानिबर्हणाय नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति ।

ननु स्वप्रकाशस्य न व्यञ्जकापेक्षा, व्यञ्जकानां च न क्वचिदपि स्वव्यङ्ग्यैर्व्यञ्जनं दृष्टम् ; अनुभूतिश्च न व्यंङ्क्ष्यी ; अक्षरवज्जडत्वप्रसङ्गात् । अहंकारोऽपि न व्यङ्क्ता, व्यङ्क्तृबुद्ध्यधीनसिद्धित्वाभावेन परमार्थसत्त्वप्रसङ्गात् । न च स्वयं व्यक्तः, अनिष्टत्वात् । अतो मिथो व्यङ्क्तृव्यङ्ग्यत्वेऽन्योन्याश्रयः स्यादिति चोद्यमनूद्य क्षिपति— स्वप्रकाशाया इति । सजातीयनिरपेक्षतया स्वयंभातस्यापि परेण व्यङ्ग्यत्वं तदभिव्यञ्जकत्वं च निदर्शयति— रवीति । करतलस्य रविकरव्यञ्जकत्वमसिद्धमित्याह — जालेति । एतेन नित्यसिद्धायाः स्वरूपव्यक्तेरन्यैवाहंकारजन्याभिव्यक्तिरित्यपि सूच्यते । पूर्वमहंबुद्धेः सुषुप्त्यादावभावात्सिद्धान्तिसंमतस्वरूपधीत्वयोगेनान्यगोचरत्वमुक्तम् । अत्र प्रत्येतुः प्रत्येतव्यादव्यतिरेकोऽहंत्वम् ; तच्चात्मनः कादाचित्कमपि सत्यमिति मन्यमानं प्रत्याह— यत इति । व्यापकाभावे व्याप्यं नेति व्यतिरेकव्याप्त्या साध्यस्यात्र साधकसद्भावार्थतया तद्धेतुत्वोक्तिः, न तु तद्बोधकतया । अहंकारस्य धर्मतानिषेधोऽहंत्वधर्मतानिषेधार्थः । ज्ञातृत्वादिकं वा भावप्रधानम् ; ज्ञातृत्वादिसहितमहंत्वमित्यर्थः । एवकारोऽन्यथासिद्ध्यपोहार्थः । ज्ञातृत्वाहंत्वे मिथ्याभूते अनात्मधर्मौ च, सुषुप्त्यादावभातत्वात् मनुष्यत्वादिवदिति प्रयोगः । स्वरूपासिद्धोऽयं हेतुरिति वादिनं प्रत्याह— तत्रेति । हिहेतौ, शास्त्रप्रसिद्धौ वा । * नह खल्वित्यादिभिः सुषुप्तावहंधीनिवृत्तिसिद्धा ; मुक्तौ च * अहङ्कारं बलं दर्पमित्यादिभिः । न केवलं शास्त्रेण, प्रबुद्धस्य सुषुप्तावस्वात्मपरामर्शप्रकाराच्च तदानीमहंधीनिवृत्तिमाह— अत एवेति । अत्रापि अत इति साध्यपरम् । * यदप्याहुरित्यादिना प्रपंचि

वस्तुसामर्थ्यं परमप्रकृतकर्मनैरपेक्ष्यव्यक्त्यै निगमयति— **तस्मादिति** । प्रमाणैस्तदनुग्राहकैश्च स्थापनादित्यर्थः । अत्र **निर्विशेषं** प्राप्यम् । नित्यप्राप्ते तस्मिन्नोपासनादिसाध्या प्राप्तिः । निवर्त्यं मिथ्याभूतज्ञानम् ; तन्निरासे च ज्ञानातिरिक्तं नापेक्ष्यम् । निवर्तकं वाक्यजन्यमैक्यज्ञानम् ; तच्च स्वोत्पत्तौ स्वफले वा न कर्मापे[क्षित]क्षमिति वस्तुतत्त्वसामर्थ्यनिष्कर्षः । **निरस्तेत्यादिना** सजातीयविजातीयनिवृत्तिः । **भेदविकल्पः** ; तद्वैचित्र्यम् , तद्भ्रमो वा । **निर्विशेषेति** स्वगतव्युदासाय । **चिन्मात्रैकरसशब्दः** प्राग्वत् । ज्ञातृज्ञेयादयो **विवर्ताः** । **भ्रान्त्या विवर्तते** ; भ्रमगोचरमिथ्याभूतविकारवती भवतीत्यर्थः । **तच्छब्देन** भ्रान्तिः परामृश्यते । **शुद्धमुक्तशब्दौ** अविद्यातत्कार्यनिवृत्त्यर्थौ । **प्रतिपत्तये** ; प्राप्तय इत्यर्थः । **सर्वे वेदान्ताः** — कारणपराः, तच्छोधकाः, तदैक्यबोधकाश्च । तेषामारभ्यत्वमिह विचारद्वारा । **इतिः** प्रकारे । इति **यदप्याहुः** इत्यन्वयः । सकारणस्य संसारस्य सत्यत्वेन ज्ञानबाध्यत्वाभावात्र तदर्थं शास्त्रमारभ्यमित्यत्र तस्य मिथ्यात्वेन धीबाध्यत्वात्तत्प्रधानं शास्त्रमारभ्यमिति परोपन्यस्तवस्तुसामर्थ्यमिह स्पष्टीकृतम् ॥

तस्मादनुपयुक्तत्वाद्विरोधाच्चात्र कर्मणः । तच्चिन्तावृत्तता नेति वाक्यशेषो मनस्कृतः ॥

इति महापूर्वपक्षः ॥

महासिद्धान्तः ।

तदिदमौपनिषदपरमपुरुषवरणीयताहेतुगुणविशेषविरहिणाम् , अनादिपापवासनादूषिताशेषशेमुषीकाणाम् , अनधिगतपदवाक्यस्वरूपतदर्थयाथात्म्यप्रत्यक्षादिसकलप्रमाणवृत्ततदितिकर्तव्यतारूपमर्माचीनन्यायमार्गाणां विकल्पासहविविधकुतर्ककल्ककल्पितमिति न्यायानुगृहीतप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयम् ।

अथानूदितनानार्थदोषजालमहोदधेः । संक्षिप्तप्रतिपत्त्यर्थं तदित्यादि निबध्यते ॥ ३६१ ॥
प्रकाशयति तत्कारः परुरुक्तमनेकधा । अनेकग्रन्थमन्दर्भमाधितं तदुदीर्यते ॥ ३६२ ॥
दृष्यकात्स्न्यमिदं वक्ति प्रस्फुरद्दोषतामपि । आभासत्वमतो वक्ति मिदंशब्दः प्रयुज्यते ॥ ३६३ ॥
किं चासारमिदं सर्वं; सति सारे हि कुत्रचित् । सारासारौ विवेक्तव्यौ मल्लिकादिसमैरपि ॥ ३६४ ॥
यदि नोद्धियते न्यायैः श्रुतिशल्यमिदं मतम् । उपप्लूयेत सन्मार्गस्तदाहुर्बाह्यदूषणे ॥ ३६५ ॥

* प्रमाणत्वाप्रमाणत्वे पुण्यपापादि तत्फलम् । विध्यर्थवादमन्त्रार्थनामधेयादिकल्पना ॥
सर्वेषु लक्षणेष्वेव स्वप्रमाणगणैः स्थितिः । क्वचनव्यक्तिभेदेन पूर्वसिद्धान्तपक्षता ॥
कर्मस्थः फलसंबन्धः पारलौक्यैहलौकिकः । सर्वमित्याधयुक्तं स्यादर्थशून्यासु बुद्धिषु ॥
तस्माद्वर्णाश्रमिभिः पूर्वं प्रमाणैर्लोकसंमतैः । अर्थस्य सदसद्भावे यत्नः कार्यः क्रियां प्रति ॥ इति ।

अत्र व्यावहारिकव्यवस्थया समाधिस्तु सांवृतव्यवस्थावदुपकरिष्यते। अत्र तदिदं परोक्तमुपायादित्रयमनादरणीयमिति साध्यम्; औपनिषदेत्यादिना तद्धेतूक्तिः। स्वपक्षे च प्राप्यादयस्तत्र इह परमपुरुषतद्भक्तितदपराधाः सूच्यन्ते। औपनिषदशब्देन * तं त्वौपनिषदं पुरुषमित्यादि वाक्यं स्मारयता स्वपरपक्षयोः साधनदूषणोक्तिः। परेषां तु ब्रह्मणो वेद्यत्वानभ्युपगमात्तदिष्टविपरीतसगुणत्वादिश्रुत्या च बाधप्रदर्शनम्। परमपुरुषत्वोक्तिरीश्वरोत्तीर्णताव्युदासाय। अर्थान्निर्मूर्तिसाम्योत्तीर्णतादिपक्षापोहः। सम्यग्ज्ञानानुत्पत्त्यै भक्तिविरहाद्युक्तिः। भक्तिर्हि सम्यग्धीहेतुतया * यस्य देवे परा भक्तिः, * शुद्धभावं गतो भक्त्येत्यादिषु ख्याता। पापस्य वासना—तत्त्वज्ञाननिवृत्तिमिथ्याज्ञानादेः सजातीयारम्भस्योत्पादनशक्तिः। तस्यास्तत्त्वधीनाशकत्वं * पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनरित्यादिषु प्रसिद्धम्। बीजाङ्कुरन्यायसूचनाय अनादिशब्दः। अशेषशब्देन मानतर्कप्राप्योपायादिसर्वसंग्रहः। पापस्य भक्त्या निवर्त्यत्वं भक्त्यभावे यथार्हं हेतुसाध्यभावो भक्तिनिरोधद्वारं चात्र सूच्यम्। भक्त्यभावादिनोक्तार्थाभ्यां मानतदितिकर्तव्यतादौ सर्वत्र प्रमितिसामग्रीशैथिल्येन बहुविधामपि भ्रमादिसंभवमाह— अनधिगतेति। सम्यक् इत्युपस्कार्यम्। पदस्वरूपम्—प्रकृतिप्रत्ययसमुदायात्मकं, वाक्यस्वरूपं तु तादृशां संघातः। तदर्थः—मुख्यामुख्यरूपः पदार्थो वाक्यार्थश्च। तद्याथात्म्यम्— दुर्ज्ञेयभेदगर्भत्वं, वाक्यार्थस्य यथार्हतात्पर्यगोचरत्वं च। भेदभूयस्तया, विरोधे सति प्रबलतया परेष्टत्वाच्च, प्रत्यक्षादेः पूर्वं वाक्यस्योक्तिः। आदिशब्देन स्वपराभ्युपेतग्रहः। सकलशब्दः सावान्तरभेदपरः, परेष्टमानान्तरपरो वा। वृत्तम्— स्वरसतः स्वार्थसाधनमुपजीव्यानुविधानं च। तच्छब्देन प्रमाणपरामर्शः। न्यायः—तर्कः। समीचीनत्वम्— साङ्गपञ्चकत्वम्। मार्गः—तत्तत्प्रतिपादकविद्यास्थानम्। यद्वा, विरुद्धजिज्ञासावारणरूपोऽनुग्रहः। संबन्धसामान्ये षष्ठी। कुतस्तर्हि मानशून्यस्योत्थानम्? इत्यत्र बाह्यमतवदित्यभिप्रायेणाह— विकल्पेति। विकल्पासहत्वम्—विकल्पमात्रे स्पष्टदोषत्वम्। वेद्यत्वावेद्यत्वादिविरुद्धगोचरत्वाभिप्रायेण विविधशब्दः। तर्केषु सारो बाह्यैराप्तः; वेदप्रामाण्यानादरेणोत्थानात्। इदं तु तदजीर्णैः कल्पितम्। स्वमतस्य सत्तर्कान्वितमानसिद्धतां बोधायनटङ्कद्रमिडादिमहत्तरपरिग्रहप्राचुर्यं च सूचयति—न्यायेति। अनादरणीयम्— आदरानर्हम्; उन्मत्तजल्पितवत् उपेक्षणीयमित्यर्थः। एतेन दृष्टापह्नोतॄणां वादानधिकारः सूच्यते। उक्तं हि वेदार्थसंग्रहे— * सर्वशून्यवादिनो ब्रह्मव्यतिरिक्तवस्तुमिथ्यात्ववादिनश्च स्वपक्षसाधकप्रमाणपारमार्थ्यानभ्युपगमात् अभियुक्तैर्वादानधिकार एव प्रतिपादितः— * अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः इतीति। तत्प्रतिक्षेपस्तु अन्वारोहेण; शिक्षणीयान् शिष्यादीन् प्रति वा।

तथा हि—निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनि इदं प्रमाणमिति न शक्यते वक्तुम्; सविशेषवस्तुविषयत्वात्सर्वप्रमाणानाम्। यस्तु स्वानुभवसिद्ध[म्] इति स्वगोष्ठीनिष्ठः समयः, सोऽप्यात्मसाक्षिकसविशेषानुभवादेव निरस्तः; इदमहमदर्शमिति केनचिद्विशेषेण विशिष्टविषयत्वात्सर्वेषामनुभवानाम्। सविशेषोऽप्यनुभूयमानोऽनुभवः केनचिद्युक्त्याभासेन निर्विशेष इति निष्कृष्यमाणः सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैर्निष्कृष्टव्य इति निष्कर्षहेतुभूतैः सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैः

सविशेष एवावतिष्ठते । अतः कैश्चिद्विशेषैर्विशिष्टस्यैव वस्तुनोऽन्ये विशेषा निरस्यन्त इति न कचिन्निर्विशेषवस्तुसिद्धिः । धियो हि धीत्वम् स्वप्रकाशता च ज्ञातुर्विषय-प्रकाशनस्वभावतयोपलब्धेः ; स्वापमदमूर्च्छासु च सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्यामः । स्वाभ्युपगताश्च नित्यत्वादयो ह्यनेके विशेषास्सन्त्येव । ते च न वस्तुमात्रमिति शक्योपपादनाः ; वस्तुमात्राभ्युपगमे सत्यपि विधाभेदविवाददर्श-नात्, स्वाभिमततद्विधाभेदैश्च स्वमतोपपादनात् । अतः प्रामाणिकविशेषैर्विशिष्टमेव वस्त्विति वक्तव्यम् ।

संक्षिप्तं परनिरसनं प्रपञ्चयितुमुपक्रमते— **तथा हीति** । तत्र प्राप्यस्य निर्विशेषत्वं मानशून्यतया क्षिपति— **निर्विशेषेति** । **निर्विशेषे वस्तुनीति** विशेषणात्ववचनविरोधोऽप्यत्र सूच्यते । तस्मिन्मानमस्तीति सामान्योक्तिरयुक्ता । **अतो लोकतः** स्वमत्या वा सिद्धस्य विशेषतो वक्तव्यत्वाय **इदंशब्दः** । परैरुच्यमाने वक्तुं शक्यत्वं कथं क्षेप्यम् ? विशेषे च निर्विशेष इव त्वयाऽपि मानं वाच्यमित्यत्राह— **सविशेषेति** । कस्याप्यत्र प्रमाणीकर्तुं शक्यत्वं निक्षिप्यते; न तु तद्वचनमात्रम् । विशेषप्रमाणमपि न निर्विशेषविषयम् ; तत्तदाश्रयादिभिर्विशेषशब्दवाच्यत्वादिभिश्च तद्विशिष्टत्वात् । अस्ति हि कचिदाश्रितैः कचिदाश्रयादिभिश्च भिन्नधीः । गुणादिरूपे च विशेषे स्वपरनिर्वाहकत्वं वक्ष्यत इति नानवस्था । स्वतस्सिद्धे माननैरपेक्ष्यवादमनूद्य क्षिपति—**यस्त्विति** । **स्वानुभवमिद्ध[म्]ः** स्वप्रकाशप्रत्यक्षसिद्ध[म्] इत्यर्थः । **स्वगोष्ठी-निष्ठः**—लौकिकपरीक्षासंनिधौ दुर्वच इत्यर्थः । **समयः**—परिभाषाया इति भावः । सर्वहृदयाविसंवादाद्बाधानर्हत्वाभिप्रायेण **आत्मसाक्षित्वोक्तिः** । उक्तं व्यनक्ति— **इदमिति** । अत्र पदत्रयेण विषयाश्रयसम्बन्धविशेषप्रदर्शनम् । **केनचिदिति** तदवान्तरविशेषप्रदर्शनार्थम् । **विशिष्टविषयत्वात्**— विशिष्टस्वरूपप्रकाशरूपत्वात् । यद्वा, अनुभवपरामर्शरूपाणां ज्ञानानां विशिष्टपूर्वानुभवगोचरत्वादित्यर्थः । तथा च अदर्शमित्यपि स्वरसम् । **सर्वशब्दः** पुरुषान् अनुभवान्वा ब्रूते । **सर्वदृष्टेऽपि** युक्तिवार्थं क्षिपति—**सविशेष इति** । **अनुभूयमान इति** । अत्रापि प्रकाशमान इति वा परामृश्यमान इति वाऽर्थः । **केनचित्**—धीत्वादिना व्यतिरेकिणा । **युक्तिशब्द** इहानुमानार्थः । निश्चितदोषप्रत्यक्षसिद्धज्ञानैक्यबाधका-द्व्यावृत्त्यर्थं **स्वनिष्कर्षेणाभासतोक्ता** । **निष्कृष्यमाण** इत्यन्तोऽनुवादः । तदैव सविशेषत्वधीसूचनाय वर्तमाननिर्देशः । **यदि पक्षस्वरूपमेव हेतुः**, तदा दृष्टौ साध्यसंदेहः साधनाकाङ्क्षा च न स्यात् । न च स्वयं स्वधर्मः ; नापीदं स्वपरनिर्वाहस्थानम् ; तस्मादन्यत्वाभिप्रायेण **सत्तातिरेकित्वोक्तिः**, स्वरूपातिरिक्तं सत्तामात्रं भासमानत्वादिकं वा व्यभिचारान्न हेतुरिति भावः । अत एव **स्वासाधारणत्वमुक्तम्** । तेन स्वरूपासिद्धिव्यधिकरणासिद्धिविरोधानैकान्त्यानां श्रमसहत्वस्य साध्यसंदेहार्हधर्मिस्वरूपैक्यस्य च निरासः । सत्तातिरेकित्वादेः पक्षे युक्त्या स्थापनाय पुनर्ग्रहणम् । **निष्कर्षहेतुभूतैरिति** हि तत्स्थापनम् ; न हि धर्मिस्वरूपासाधारणं सत्तादिधर्ममात्रं वा सविशेषाद्यावृत्तं साधयेदिति भावः । साधनकाले हेतुस्तिष्ठति, साध्यकाले तु स्वयमपि गलतीति धर्मवादवादिना त्वया न वक्तुं युक्तम् । अनुभूति-स्वनिष्ठौ च [illegible]नुभूतिस्वादित्वमिप्रायेण **सविशेष एवावतिष्ठते इत्युक्तम्** ; अन्यथा स्वरूपासिद्धिस्वादि-

त्यभिप्रायेण **एवकारः**। **सर्वविशेषनिषेधको हेतुः स्वपरनिर्वाहकनीत्या कनकरजोवत्स्वात्मनोऽपि निवर्तकः स्यादित्याह— अत** इति। स्वस्मिन्निषिद्धे सविशेषत्वव्यापकाननुभूतित्वनिवृत्त्ययोगात्साधकाभावेन साध्यासिद्धिप्रसङ्गादित्यर्थः। **कैश्चित्**— हेतुतया प्रमितैः तत्समानयोगक्षेमैश्च। यद्येतद्धेतुराहित्यमेतद्धेतुमत्त्वेन साध्यते, तदा प्रतिज्ञाहेत्वोर्विरोधश्च स्यादिति भावः। **अन्ये**—प्रमितिसिद्धस्वधर्मव्यतिरिक्ताः। **न क्वचित्**; न हि स्वानुभवे स्वस्य निर्विशेषत्वं सिध्यति। एवं तत्परामर्शेऽनुमानादौ चेत्यर्थः। हेतुरूपस्वगतविशेषः स्थापितः; अथ इदमहमित्युक्तविषयाश्रयाम्यामपि वैशिष्ट्यं स्थापयति— **धिय** इति। **हिः** प्रसिद्धौ। **धीत्वम्** कस्यचित्प्रकाशात्मता; सैव स्वेनेति विशेषतः स्वप्रकाशता। * प्रकाशश्च कस्मैचिदिति वक्ष्यति। पूर्वं त्वदुक्तो हेतुस्तत्साध्यं चेत्यर्थः। निष्कृष्टा विषयधीरेव ब्रह्म इति वदन्तं प्रति अत्र **ज्ञातुरित्यादिकमुच्यते**। स हि स्वसंबन्धावादर्थान्तर इत्यादिकमप्याह। स्वमते त्वहमर्थस्यात्मनः प्रसिद्धधीव्यतिरिक्ततया विषयाश्रयावच्छिन्नप्रकाशत्वाभावेऽपि श्रुतिबलेन स्वप्रकाशत्वात्तद्गुणसारत्वाच्च ज्ञानत्वव्यपदेशः सूचितः। यथोपलम्भं वस्तुस्वभावः स्थाप्यः, अन्यथाऽतिप्रसङ्गादित्यभिप्रायेण **उपलब्धेरित्युक्तम्**। विषयरहितोऽप्युपलम्भः कदाचिदस्ति; अतो न तद्भासनस्वभावतेत्यवाह— **स्वापेति**। **अनुभवः**— आत्मभावनम्। **स्वावसरे**— तदुपपादनोचिते अहमर्थात्मत्वस्थापनकाले। **निपुणतरम्**— उपपन्नतरमित्यर्थः; परोक्तयुक्त्यैव साधनात्तैरपि संमन्तव्यमिति भावः। निर्विशेषत्वसाधकैर्विषयाश्रयाभ्यां च सविशेषत्वमुक्तम्। अथ परोक्तैः साध्यैश्च तदाह— **स्वाभ्युपगता** इति। तेषु मानसिद्धांशस्य स्वमतेऽपि सिद्धिद्योतनार्थ **एवकारः**। ते धियोऽनतिरिक्ता इत्यत्राह— **त** इति। संमतिविमतिभ्यां भेदमाह— **वस्त्विति**।

धीस्वरूपस्य सत्यत्वं बौद्धादेरपि संमतम्। अतो धीमात्रसाध्यत्वे दुस्त्यजा सिद्धसाध्यता ॥ ३६६ ॥

तद्धर्मसाधने तु स्यात् स्वसिद्धान्तविरुद्धता। स्वसाध्यानां मृषात्वोक्तिः वृषलोद्वाहमन्त्रवत् ॥ ३६७ ॥

विमतिमूलस्वेष्टसमर्थनेन च सिद्धात् साध्यानामन्यत्वमाह— **स्वाभिमतेति**। हेतुतया स्वाभिमतैः धीधर्मभेदैरित्यर्थः। तेन धीस्वरूपात्साध्येभ्यश्च व्यावृत्तैः साधकैरपि सविशेषत्वसिद्धिः। तेषां हेतूनां साध्यानां च कल्पितत्वपक्षोऽपि **स्वाभिमतशब्देन स्वमनोपपादनादित्यनेन** च निरस्तः। यदि क्षणिकत्वादिकमिव नित्यत्वादिकमपि कल्पितम्, कुतस्तदा ते क्वचित्पक्षपातः? तादृशनित्यत्वादिसाधने च न कथं परसिद्धसाध्यतां ब्रूयात्? रज्जुसर्पनयात्तद्विरुद्धं च सत्यं स्यात्। हेतूनां च तथात्वे बाष्पारोपितधूमवत् असाधकत्वम्। यदि ब्रूयात्—आरोपितधूमादेरसाधकत्वं न कल्पितत्वात्, किं तु व्याप्तिशून्यत्वात्; सत्यां तु तस्याम् असत्यस्यापि साधकत्वं दृष्टमिति। तदसत्, व्याप्तेरप्यत्र कल्पितत्वाङ्गीकारात्; तादृशी च बाष्पधूमे सिद्धेति। यथा च माध्यमिकोक्तबाधकप्रामाण्यमिथ्यात्वेन बाध्यस्य ब्रह्मणः सत्यत्वम्, एवं विशेषबाधकप्रामाण्यमिथ्यात्वेऽपि तत्सत्यत्वं दुस्त्यजम्।

अत्र सत्यमसत्यं वा साधनं दूषणं च वः। सत्यत्वे सद्वितीयत्वमसत्यत्वे त्वनर्थता ॥ ३६८ ॥

पारिशेष्याद्विशेषसत्यत्वपक्षमभ्युपगमयति— **अत** इति। वस्तुमात्रकल्पितत्वयोः दुर्वचत्वादित्यर्थः। **प्रामाणिकविशेषैः**— हेतुभिः साध्यैः सविशेषैर्विषयाश्रयैश्चेति यावत्। अन्यथा तुच्छत्वद्योतनार्थ **एवकारः**।

सामान्यतो हि धीस्वेऽर्थे विशेषस्याग्रहे सति। स्यादभ्यासस्त्वदिष्टे तु द्वयाभावाद्भ्रमेण सः ॥ ३६९ ॥

शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम्, पदवाक्यरूपेण प्रवृत्तेः। प्रकृतिप्रत्ययययोगेन हि पदत्वम्; प्रकृतिप्रत्ययययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीयम्। पदभेदश्चार्थभेदनिबन्धनः। पदसङ्घातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेन निर्विशेषवस्तुप्रतिपादनासामर्थ्यान्न निर्विशेषवस्तुनि शब्दः प्रमाणम्।

एवं स्वानुभवसिद्धिप्रसक्तानुप्रसक्तमुपसंहृत्य प्रागुक्तं सर्वप्रमाणानां सविशेषविषयत्वं विवृण्वन् प्रत्यक्षात् प्रबलतया पराभिमतं शब्दं तावद्विशिष्टपरमाह— शब्दस्येति। तुशब्दो विशिष्टविषयप्रत्यक्षानुपजीवित्वं परकल्पितशास्त्रप्राबल्यं वा द्योतयति। वाक्यात्मना सविशेषबोधनेन प्रत्यक्षात् समधिकत्वव्यञ्जनाय **विशेषेणेत्युक्तम्**। **एव**कारेण यत्किञ्चिन्निमित्ताभावे शब्दस्य प्रवृत्तिरेव न स्यादिति व्यज्यते।

सत्यनित्यत्ववेद्यत्ववाच्यत्वादौ तु साश्रये। तत्तच्छब्दप्रवृत्तिः स्यात् स्वान्यनिर्वाहकत्वतः॥ ३७०॥

अभिधानसामर्थ्यम्— कयाचिद्वृत्त्या बोधनार्हत्वमित्यर्थः। विशिष्टार्थत्वातिरेके निदानमाह— **पदे**ति। तत्र पदेऽपि वाचकांशभेदमाह— **प्रकृती**ति। **हि**शब्दः * सुप्तिङन्तं पदम्, * विभक्त्यन्ताः पदमित्यादिशास्त्रान्तरप्रसिद्धिहेतुम् अवधारणं वा व्यनक्ति। ततः किमित्यत्राह— **प्रकृतिप्रत्यययोरि**ति। यद्यपि स्वार्थे कचित्प्रत्यया विहिताः, तथाऽपि प्रत्ययान्तरेण संख्यादिवैशिष्ट्यं प्रायशस्तत्रापि स्यादिति भावः। एवं गोत्वादिपदेष्वपि द्रष्टव्यम्। **पदस्यैव**— वाक्यस्थस्य तदंशमात्रस्यापीत्यर्थः। **अवर्जनीयमि**त्यनेनाभिहितान्वयवादिभिरपि पदांशयोरन्वितार्थत्वं स्वीकृतमिति सूच्यते। वाक्यस्यापि सर्वविशिष्टपरत्वं वक्तुं तदुपयुक्तमाह — **पदभेद** इति। प्रमाणभूतैकवाक्यस्थ— विषयमिदम्। दीप्सादौ च तात्पर्यभेदादर्थभेदोऽस्त्येव। उक्तार्थेन वाक्ये फलितमाह — **पदसंघाते**ति। अभिहितान्वयमतेन संसर्गोक्तिः। **विशेष**शब्दः अपूर्वार्थः; मतान्तरे तु संसर्गविशिष्टे तात्पर्यम्। यद्यपि * अर्थैकत्वादेकं वाक्यमिति न्यायादेक एव वाक्यार्थः; तथाऽपि लिङ्गसंख्याकारकाद्यनेकांशगर्भोऽसौ; न तु कश्चिदपि निर्भूतनिखिलांशः किञ्चित् शब्दबोध्यम्। अखण्डवाक्यार्थादिकल्पमिस्तु निरस्यिष्यते। निर्विशेषशब्दोऽप्यामप्रयुक्तश्चेद्विशिष्टतया प्रमितमन्यपदार्थं विवक्षितविशेषरहितं लिङ्गसंख्यादियुक्तमेव ब्रूते। न चैकं पदं प्रमाणम्; अध्याहारादिना पदान्तरयोगे तु नगरं निर्विशेषं, तन्मात्राप्यविशेषाणीतिवत्तात्पर्यवशेन सङ्कुचितवृत्तिः स्यात्। भ्रान्तोक्तश्चेन्न प्रमितिहेतुत्वम्।

शब्दस्यातोऽनुमानत्वमप्रमाणत्वमेव वा। वदद्भिरपि दुर्वारं विशिष्टार्थावबोधनम्॥ ३७१॥
अविनाभावतोऽन्येन संबन्धेन विशिष्टधीः। शब्दान्त्याभानुमानत्वं ततोऽस्येत्यपि सुग्रहम्॥ ३७२॥
प्रत्यक्षवद्विशिष्टार्थे बुद्धेर्बाधाद्यभावतः। मानत्वादिह चार्वाकजल्पश्च वितथोद्यमः॥ ३७३॥
मनोजन्यतयाऽत्रापि प्रत्यक्षत्वे विवक्षिते। न नः काचित्क्षतिः तत्तु न प्रत्यक्षस्य लक्षणम्॥ ३७४॥
एतत्सर्वं मत्वोक्तम्— **न निर्विशेषवस्तुनि शब्दः प्रमाणमिति।**

प्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदभिन्नस्य न निर्विशेषवस्तुनि प्रमाणभावः।

सविकल्पकं जात्याद्यनेकपदार्थविशिष्टविषयत्वादेव सविशेषविषयम् ; निर्विकल्पकमपि सविशेषविषयमेव, सविकल्पके स्वस्मिन्ननुभूतपदार्थविशिष्टप्रतिसन्धानहेतुत्वात्। निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्य ग्रहणम् ; न सर्वविशेषरहितस्य। तथाभूतस्य कदाचिदपि ग्रहणादर्शनादनुपपत्तेश्च। केनचिद्विशेषेणेदमित्थमिति हि सर्वा प्रतीतिरुपजायते, त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपि पदार्थस्य ग्रहणायोगात्।

अथ प्रत्यक्षमन्यद्वा स्वेष्टमानं विवक्षितम्। भङ्गायाध्यक्षमखिलं विशिष्टार्थं समर्थ्यते ॥ ३७५ ॥

प्रत्यक्षस्येति— अपरोक्षबुद्धेरित्यर्थः। ग्रहणं ह्यनन्तरमुदाहियते। अविशिष्टप्रत्यक्षसद्भावकल्पनयाऽन्यतरप्रामाण्योक्तिरयुक्तेत्यभिप्रायेण **निर्विकल्पकसविकल्पकभेदभिन्नस्येत्युक्तम्**। एवं ह्याहुश्चार्वाकाः— * अज्ञातार्थपरिच्छित्तिः प्रमाणम्। तच्च प्रत्यक्षमेव। तत्रापि निर्विकल्पकमप्रमाणमनवधारणत्वादिति। अत्रानवधारणशब्देन संशयरूपत्वम् अविशिष्टविषयत्वं वा विवक्षितं चेदसिद्धिः। कतिपयविशेषग्रहात् संशयोत्थापकत्वं चेत्सविकल्पकेऽप्यस्ति, कचिदपि केनापि सर्वविशेषवैशिष्ट्यस्य अयोगिना दुर्ग्रहत्वात्। बौद्धास्तु * अविसंवादि विज्ञानं प्रमाणम्। तत्र—

* कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः ॥ इत्याहुः।

* तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः। व्यावृत्तमिव निस्तत्त्वं परीक्षानङ्गभावतः ॥ इति च।

तदप्यसत्, निर्दोषविकल्पानामपि संवादात् ; तद्विषयस्य तद्वदेवैतैः संबन्धानुपपत्त्यादिकुतर्कैर्बाधे तुल्यन्यायतया योगाचारमतेन बाह्यार्थलोपप्रसङ्गात्। विगीता धीः भ्रान्तिः विकल्पत्वादिति त्वयोक्ते धीत्वादिति सामान्यतो ब्रूयात्। तथा चानुभाष्यते — * स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात्तथा हि यः। प्रत्ययः स मृषा दृष्टः स्वप्नादिप्रत्ययो यथा ॥ इति।

वैषम्यं चात्र त्वया दुर्वचम्। किञ्च— अस्तु तत्प्रयोगस्थहेत्वादिविकल्पानां पक्षीकारे बहुविधासिद्धिबाधयोः प्रसङ्गः। अन्यथा तु हेतोर्विपक्षवृत्तित्वादिप्रसङ्गात्। शब्दाध्यासात्सविकल्पकं भ्रान्तिरिति चेन्न; तदसिद्धेः। यथाऽऽहुः—

* संज्ञा हि स्मर्यमाणाऽपि प्रत्यक्षत्वं न बाधते। संज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा ॥ इति।

अतः प्रामाणिकं प्रत्यक्षं द्विविधमपि प्रमाणम्, न तु निर्विशेषे। तत्र दृष्टान्तार्थं वक्ष्यमाणविशिष्टप्रतिसन्धानव्यक्त्यर्थं च दुरपह्नवांशं तावदाह— **सविकल्पकमिति**। **आदिशब्देन** गुणादिग्रहः— * यथा मनुष्यः शुक्लो वा दण्डी गच्छति निर्भयः इति। **शब्दविकल्पस्तु**—

* न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन [भासते] गृह्यते ॥ इति।

व्यापितया शाब्दैरुक्तोऽप्यव्युत्पन्नानां विकल्पेषु तदयोगात्संकोच्यः। **विशिष्टविषयत्वात्सविशेषविषयमित्यत्र सामान्योक्तस्य जात्यादुदाहरणैर्व्यञ्जनात्र साध्याविशेषः।**

* अस्ति बालोचनाज्ञानं प्रथमं निर्विकल्पकम् । बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥

इति परैरन्यथोक्तं प्रथमज्ञानमपि विशिष्टविषयं प्रतिजानीते— **निर्विकल्पकमिति** । **अपिः** समुच्चयार्थः, परेष्टविरोधद्योतको वा । **अवधारणमनुपलम्भादार्ढ्यपरम्** । धीत्वात् विशिष्टविषयमित्यनुमानं चात्र सूच्यम् । अविशिष्टविषयत्वस्य क्वचिदप्यभावेऽपि विशिष्टविषयत्वाभावस्य घटादौ दृष्टत्वात् व्यतिरेकसिद्धिः । विपक्षे बाधस्तु विशिष्टविषयत्वाभावे सविषयत्वादिकमपि न स्यादिति अविशेषात् । निर्विषया धीर्न दृष्टेति चेत्, सममेतत् । उपयोगात्कल्प्यत इति चेत्; हेत्वसिद्धेः । अनुपयुक्तस्य च कल्पने किं नाम न कल्प्यम्? प्रतिज्ञाते हेतुमाह— **सविकल्पक इति** । स्वगोचरजात्यादिविशिष्टप्रतिसन्धानरूपविकल्पहेतुत्वादित्यर्थः । संप्रतिपन्नप्रत्यभिज्ञाहेतुभूताभिज्ञावदित्युदाहर्तव्यम् ।

ननु प्रथमं जात्यादिग्रहणाभावादसिद्धो हेतुः—

* ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यया । बुद्ध्याऽवसीयते साऽपि प्रत्यक्षत्वेन संमता ॥ इति ।

अन्यथा निर्विकल्पकसमाख्याविरोधश्च स्यात् । तदाह— **निर्विकल्पकं नामेति** । अयं भावः—

अस्ति हीति प्रतिज्ञाने नास्ति हीत्युत्तरं क्षमम् । प्रवृत्तिभिर्विशिष्टार्था बालमूकादिधीरपि ॥ ३७६ ॥
शब्दोपस्कारमात्रं तु नात्र व्युत्पत्त्यभावतः । व्युत्पत्तिश्च विशिष्टार्थबोधाभावे कथं भवेत् ॥ ३७७ ॥
न चावयवशक्त्यैव नामधेयव्यवस्थितिः । अतिप्रसङ्गाद्बाधाच्च महावृक्षादिनीतितः ॥ ३७८ ॥
अतो निरीहादिपदन्यायाद्दृष्टानुवर्त्तिनः । निर्विकल्पे निषेधस्य सङ्कोचोऽत्र भवेदिति ॥ ३७९ ॥

तदिहाद्वैतिकल्पितस्य सर्वविशेषशून्यस्य द्वैताद्वैतिकथितस्य विद्यमानसर्वविशेषरहितस्य च ग्रहणं निषेधति— **न सर्वेति** । तादृशग्रहणं दृष्टं कल्पितं वेति विकल्पं मत्वा पूर्वं दूषयति— **तथेति** । प्रथममपि तथाभूतग्रहणं योग्यानुपलम्भनिरस्तमित्यर्थः । अपरं निषेधति—**अनुपपत्तेश्चेति** । उपपत्त्यभावादित्यर्थः । तत्कल्पकस्य अन्यथोपपत्तेरिति भावः । धीत्वप्रयुक्तव्याप्तिविरोधेनोपपत्तिविरुद्धत्वं चात्र बोध्यम् । अदर्शनं विवृण्वन् स्वमते दर्शनं च प्रमाणयति— **केनचिदिति** । पृथक्सिद्धेनापृथक्सिद्धेन वेत्यर्थः । गोत्वद्रव्यत्ववह्निष्ठत्वादिना गगनादेर्ग्रहीतुश्च व्यावृत्ता हि सर्वत्र सर्वाऽपि धीरिति भावः । उपपत्तिविरोधमुखेन उपपत्त्यभावमपि व्यनक्ति— **त्रिकोणेति** । **अयोग** इह विशिष्टोल्लेखित्वाभावेऽधीत्वादिप्रसङ्गात्सिद्धः । **संस्थानशब्दोऽत्र** तत्तदसाधारणाकारपरः । **कस्यचिदपीति**; निरवयवस्यापीत्यर्थः ।

सजातीयविजातीयव्यावृत्तस्वस्वभावतः । इत्थमित्येव गृह्यन्ते शब्दगन्धादयोऽपि हि ॥ ३८० ॥

एवं सविकल्पकनिर्विकल्पकयोर्विशिष्टबाह्यार्थविषयत्वोक्तया प्रत्यक्षस्य ज्ञानग्राहिताम् तदाकारवैचित्र्यकारणतया बाह्यार्थस्यानुमेयत्वं च वदन्सौत्रान्तिकोऽपि प्रत्युक्तः ।

अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम् । द्वितीयादिपिण्डग्रहणं सविकल्पकमित्युच्यते । तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते । द्वितीयादिपिण्डग्रहणेष्वेवानुवृत्तिप्रतीतिः । प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयमिति द्वितीयादि[पिण्ड]ग्रहणस्य सवि-

कल्पकत्वम् । सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे गृह्यत इति प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वम्, न पुनः संस्थानरूपजात्यादेरग्रहणात्; संस्थान-रूपजात्यादेरप्यैन्द्रियिकत्वाविशेषात्, संस्थानेन विना संस्थानिनः प्रतीत्यनुपपत्तेश्च, प्रथमपिण्डग्रहणेऽपि ससंस्थानमेव वस्त्वित्थमिति गृह्यते । अतो द्वितीयादिपिण्डग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता संस्थानिवत्संस्थानवच्च सर्वदैव गृह्यत इति तेषु सवि-कल्पकत्वमेव । अतः प्रत्यक्षस्य कदाचिदपि न निर्विशेषविषयत्वम् ।

द्वयोरपि विशिष्टविषयत्वे तद्विवेको दुश्शक इत्यत्र लक्षणतो विवेक्तुमुदाहरणं तावदाह— **अत इति** । विशिष्टगोचरत्वतदभावाभ्यां विभागोक्तेर्निरस्तत्वादित्यर्थः । किमियं प्रथमत्वादिना परिभाषा ? तथा सति विपरिक्तोऽपि स्यादित्यत्र व्यवहारव्यवस्थापकं विषयभेदमाह— **तत्रेति** । उक्तवैषम्याच्छब्दव्यवस्थां वाक्यद्वयेनाह— **प्रथमेति** । विकल्पोऽत्र प्रतिसन्धानगोचरस्य केनचिदधिकेन विशेषणेन वैशिष्ट्यम् । तद्योगायोगाभ्यामेव व्यवस्थाऽत्र विपश्चित्संमता । जातेः सविकल्पकाभावरूपत्वापोहत्वादिमतव्युदासाय संस्थानत्वं, तद्यत्तयै सास्नादिरूपत्वं चोक्तम् । परेष्टस्य निर्विकल्पकशब्दनिमित्ततां निरस्यति— **न पुनरिति** । अथ स्यात्, अनुवृत्तिरूपजातिस्तदग्रहे कथं गृह्येत ? गृह्यतां वा; तथाऽपि तद्विशिष्टतया प्रथमधीर्न युक्ता; विगीता धीर्विशेषणविशेष्यधीपूर्विका विशिष्टधीत्वात्सम्प्रतिपन्न-वदित्यनुमानात् । अतो विशेषणविशेष्याणां मिथः संबन्धबोधेकलभ्यात्तिविशिष्टधीः सिद्धेति; तत्राह— **संस्थानेति** । जातिशब्दस्यानुवृत्तिविशिष्टे व्युत्पन्नतया जातित्वेन बुद्धिरेवानुवृत्त्युल्लेखिनी । तत्स्वरूपं तु योग्यतया धर्मिवत्तत्संबन्धि-तयैव गृह्यते; तदर्थमिह **संस्थानरूपत्वोक्तिः** । अनुवृत्तिप्रकारस्तु वक्ष्यते । **ऐन्द्रियकत्वाविशेषात्**— आश्रयग्राह-केन्द्रियवेद्यत्वात्, दूरत्वाद्यभावाच्चेत्यर्थः । तेन गन्धादिव्युदासः । पिण्डग्रहणेऽपि गोत्वादेः ग्रहणदर्शनव्युदासश्च । **संस्थानेन विना**—अपृथक्सिद्धयत्किञ्चिद्धर्मेण विनेत्यर्थः । तेन दण्डादिव्यावृत्तिः; दूरादौ द्रव्यत्वादिमात्रेण सिद्धिश्च । विशिष्टधीत्वादिति हेतौ व्यवच्छेद्यस्याविशिष्टविषयज्ञानस्यासिद्धौ व्यर्थं विशेषणम् । अन्यतः सिद्धावनुमेयाभावः । अनेनैव तत्सिद्धावन्योन्याश्रयः; व्यवच्छेद्यसिद्धौ सविशेषणहेतूत्थानम्, तेनैव च तत्सिद्धिरिति । पृथग्धीपूर्वकत्वं तु विशिष्टबुद्धेर्भिन्नसामग्रीवेद्यविषयत्वोपाधिकम् । तच्च दण्डौदीनामसन्निधानव्यवधानादेः । सामग्रीसद्भावे तु प्रथममेव तद्विशिष्टधीश्च स्यादेव । तेषां संस्थानत्वाभावात्पुरुषग्रहणाभावेऽपि तद्ग्रहणम् । दण्डादीनां तु पृथक्सिद्धत्वेऽपि दण्डादेः स्वाश्रयग्राहकेण घ्राणरसनश्रोत्राणां गुणमात्रग्राहित्वं तदाश्रयग्रहणानर्हत्वात् । सर्वमिदं यथादृष्टि व्यवतिष्ठते ।

भिन्नाक्षग्राह्यगन्धादिविशिष्टप्रत्ययोदये । पृथग्गृहीतिनियमो यथादर्शनमिष्यते ॥ ३८१ ॥

एवं संबन्धस्य सामग्र्यन्तरवेद्यत्वेऽपि । ननु संस्कारस्यानुद्बोधे द्वितीयादिपिण्डग्रहणेऽपि गोत्वादेरनुवृत्ति वैशिष्ट्यं दुर्ग्रहम्; कथं तत्र सविकल्पकत्वनियम इत्यत्र संभवद्विषयतया प्रतिवक्ति— **अत इति** । संस्थानविशिष्टविषयवासना-जनकप्रथमपिण्डग्रहणसामर्थ्यादित्यर्थः । **द्वितीयादिपिण्डग्रहणेषु;** द्वितीयत्वादिविशिष्टतया तत्तत्पिण्डग्रहणेष्वित्यर्थः । **सर्वदैवेत्यनेन संस्कारपटिम्ना यत्किञ्चिद्धर्मानुवृत्तिग्रहणं नियतमित्युच्यते । यदा तज्जातीयग्रहणं स्यात्, तदा-**

सविकल्पकत्वमेवेत्युक्तम्; तदाऽसौ नियम इत्यभिप्रायः ।

द्वितीयादिषु पिण्डेषु निर्विकल्पकसंभवात् । अवधारणमत्र स्यात्प्राचुर्यादिति केचन ॥ ३८२ ॥

एतेन प्रत्यक्षज्ञानेषु संस्कारसहकृतेन्द्रियजन्यत्वतद्विरहाभ्यां सविकल्पकनिर्विकल्पकयोः भेदो लक्षणतः स्थापितो भवति । तेनैव प्रथमपिण्डेऽपि प्रबुद्धसंस्काराणां, द्वितीयादिग्रहणेषु सविकल्पकत्वं च स्यादेव ।

प्रत्यक्षं त्वीश्वरादीनां विशि[ष्टाशेष]ष्टोद्देशगोचरम् । अवसानोद्भवत्वेन निर्विकल्पकमस्तु नः ॥ ३८३ ॥

अनुवृत्तिग्रहात्तत्रं सविकल्पकताऽस्तु वा । न भज्येत विशिष्टार्थविषयत्वं द्विधाऽपि नः ॥ ३८४ ॥

अनादाविह संसारे तस्मिन्नपि च जन्मनि । भाष्योक्तं प्रथमत्वादि त्वपूर्वत्वादिवुद्धितः ॥ ३८५ ॥

एवं द्विविधस्यापि प्रत्यक्षस्य निर्विशेषविषयत्वाभावं निगमयति— अत इति । **कदाचिदपि** ; प्रथमाक्षसन्निपातेऽपीति यावत् ।

अत एव सर्वत्र भिन्नाभिन्नत्वममपि निरस्तम् । इदमित्थमिति प्रतीतावविदमित्थंभावयोरैक्यं कथमिव प्रत्येतुं शक्यते ? तत्रेत्थंभावः सास्नादिसंस्थानविशेषः ; तद्विशेष्यं द्रव्यमिदमंश इत्यनयोरैक्यं प्रतीतिपराहतमेव । तथा हि—प्रथममेव वस्तु प्रतीयमानं सकलेतरव्यावृत्तमेव प्रतीयते । व्यावृत्तिश्च गोत्वादिसंस्थानविशेषविशिष्टतयेत्थमिति प्रतीतेः । सर्वत्र विशेषणविशेष्यभावप्रतिपत्तौ तयोरत्यन्तभेदः प्रतीत्यैव सुव्यक्तः । तत्र दण्डकुण्डलादयः पृथक्संस्थानसंस्थिताः स्वनिष्ठाश्च कदाचित्क्वचित् द्रव्यान्तरविशेषणतयाऽवतिष्ठन्ते । गोत्वादयस्तु द्रव्यसंस्थानतयैव पदार्थभूताः सन्तो द्रव्यविशेषणतयाऽवस्थिताः । उभयत्र विशेषणविशेष्यभावः समानः । तत एव तयोर्भेदप्रतिपत्तिश्च । इयांस्तु विशेषः—पृथक्स्थितिप्रतिपत्तियोग्या दण्डादयः; गोत्वादयस्तु नियमेन तदनर्हा इति । अतो वस्तुविरोधः प्रतीतिपराहत इति प्रतीतिप्रकारनिह्नवादेवोच्यते । प्रतीतिप्रकारो हि इदमित्थमित्येव सर्वसंमतः । तदेतन्सूत्रकारेण ❀ **नैकस्मिन्नसंभवादिति सुव्यक्तमुपपादितम् ।**

अथोक्तार्थबलादेव वक्ति भङ्गं प्रसङ्गतः । भेदाभेदमतस्यापि शास्त्रारम्भादिबाधिनः ॥ ३८६ ॥

अत एवेति । निर्विकल्पकस्यापि विशिष्टार्थग्राहित्वादेवेत्यर्थः । एवकारः प्रच्छन्नजैनदूषणस्य प्रसक्तानुप्रसक्तिं हेतोरन्यनैरपेक्ष्यं वा व्यनक्ति । **सर्वत्र**; अयुतसिद्धयोः , तत एव परोक्तप्रक्रियया सजातीयेष्वपीति यावत् ।

दृष्ट्वादुपपत्तेर्वा भेदाभेदसमुच्चयः । इत्येतदिदमित्यादिग्रन्थाभ्यामेव दृश्यते ॥ ३८७ ॥

प्रथमपिण्डग्रहे परोक्ता जातिव्यक्त्योरभेदेन गृहीतिरसिद्धा। युक्त्या तत्कल्पितस्तु भेदग्रहेण बाधितेति भावः। द्वयमपि क्रमाद्विवृणोति—**तथा हीति**। **सकलेतरव्यावृत्तम्**। गृह्यमाणाकारानधिकरणात्सर्वस्माद्भिन्नतयेत्यर्थः। **सकल**-शब्देन गृह्यमाणोऽप्याकारः संगृहीतः। तेन तदानीं तदनन्यत्वबुद्धिरप्यस्तीति शङ्कानिरासार्थं **एवकारः**। सौगतमत-वत्स्वरूपत एव व्यावृत्तिधीः स्यादित्यत्राह— **व्यावृत्तिरिति**। **चः शङ्कानिवृत्तिपरः**। स्वत एव व्यावृत्तिबुद्धौ संशया-द्यभावप्रसङ्गः। गोत्वादेर्गोत्वादिविशिष्टत्वाभावात् धर्मधर्मिभेदश्चात्र सिद्धः। अस्तु भेदधीः, अभेदोऽपि युक्त्या तत्र सिध्येदित्यत्राह— **सर्वत्रेति**। पृथक्सिद्धेष्विवापृथक्सिद्धेष्वपीत्यर्थः। यदि जातिव्यक्तिष्वभेदः साध्यते, तर्हि दण्ड-दण्ड्यादिष्वपि साध्यः स्यादित्याशयः। **अत्यन्तभेदः**— ऐक्यप्रतिभटस्वभावः। **प्रतीत्यैव मुख्यक्तः**— प्रत्यक्षेणैव स्पष्टावगतः। अतो निर्बाधो दुरपह्नवश्चेति भावः। **तयोरत्यन्तभेदः** इत्यनेनैव एको गौरित्येकशब्दानु-विद्धप्रत्ययोऽप्येको दण्डीतिवत् विशेष्यद्वित्वादिनिवृत्तिविषय इति सूच्यते। **अनयोरैक्यमित्यादौपूर्वोक्तेऽप्येवमेव** तात्पर्यम्। नन्वत्यन्तभिन्नेषु दण्डादिषु सामानाधिकरण्यं मत्वर्थीयसापेक्षं दृष्टम्; गोत्वादिषु तदभावादभेदोऽपि स्यादित्यत्राह— **तत्रेति**। अयं भावः— पृथक्सिद्धत्वापृथक्सिद्धत्वाभ्यामेव लाघवान्मत्वर्थीयापेक्षातदभावौ स्याताम्; न तु अत्यन्तभिन्नत्वतदभावाभ्याम्, अपृथक्सिद्धत्वेऽपि क्वचिन्मत्वर्थीयस्तु निष्कर्षकशब्दत्वादिति। विशेषणत्वमन्तरेणाप्युपलब्धिसिद्धयै **पृथक्संस्थानसंस्थितत्वोक्तिः**। **स्वनिष्ठाः**— देवदत्तादीन्प्रत्यपृथक्सिद्धिरहिता इत्यर्थः। **कदाचित्** आगन्तुकसंबन्धकाले। तावताऽलम्, तथाऽपि **क्वचिच्छब्दो** देशभेदमुखेनाऽपि पृथक्सिद्धिर्दर्श-यितुं शक्येति ज्ञापनार्थः। व्यावृत्तिव्यक्त्यै **गोत्वादय** इत्याद्युक्तम्। अतत्निष्ठतया तत्सत्तैव नास्तीत्यवधारणाभिप्रायः। **अवस्थिताः**— यावत्सत्तमिति शेषः। ननु विशेषणत्वे समानेऽपि यदि अपृथक्सिद्धयादिवैषम्यम्; तर्हि तत एव तादात्म्यतदभावलक्षणमपि तत्स्यादित्यत्राह— **उभयत्रेति**। अभेदप्रतिकूलाकारः सः। ऐक्याभावव्याप्यो हि विशेषण-विशेष्यभावः। तस्मादैक्यकल्पनिर्न शक्या। न हि अवान्तरविशेषेण क्वचिदपि सामान्यव्यापकविरुद्धं सिध्येदिति भावः। एवमप्यभेदकल्पौ संप्रतिपन्नैक्यवस्तुनीव भेदधीस्तत्र न स्यादेवेत्यभिप्रायेणाह— **तत एवेति**। **तयोः**— पृथक्सिद्धा-पृथक्सिद्धयोरित्यर्थः; विशेषणविशेष्ययोरिति वा। **भेदप्रतिपत्तिश्चेत्यत्र** समानेति विपरिणतानुषङ्गः। ननु दण्डादिष्वदृष्टः सहधीनियमो गोत्वादिषु दृश्यते, तेनाभेदोऽस्तु; न चेदुभयत्र धीसाहित्यनियतिस्तदभावो वा स्यादित्यत्राह—**इयानिति**। अयं भावः—यथा भिन्नत्वाविशेषेऽपि क्वचिदेव तादात्म्यमिति ते स्वभावनियमः तथा तादृशेष्वपि केषुचिदेवापृथक्सिद्धिः। तेष्वपि न गुरुत्वगन्धादीनां धीसाहित्यनियमः; स तु गोत्वादीनाम्; दुस्त्यजस्वभावनिर्धूतादिप्रसक्तिर्नोभयसंमतभेद-विरुद्धं साधयितुं शक्नोति। न च अपृथक्सिद्धत्वमेव ऐक्यम्, अविवादात्। तदा हि भेद एवाभेद इत्यपि संकेत्येत।

तस्माद्भेदैकनियतः सहधीनियमस्त्वयम्। ऐक्यसिद्धिविरोध्येव भवेच्चातिप्रसङ्गकृत्॥ ३८८॥
इष्टः सिद्धयसभावादिः प्रतियोग्यादिभिस्सह। न चैक्यं युज्यते तत्र विशेषश्चात्र दुर्वचः॥ ३८९॥
किं च संप्रतिपन्नैक्ये पृथक्सिद्धेऽप्यसङ्गसौ। स्यादसाधारणाभासो हेतुः पूर्वश्च तादृशः॥ ३९०॥
व्यक्तव्याहतिदुस्थत्वाद्भिन्नाभिन्नत्वमप्यतः। दुःसाधमभ्युपेतेऽपि केवलव्यतिरेकिणि॥ ३९१॥
गर्दभागर्दभाभ्यां च गजत्वं विनिवृत्तिमत्। गर्दभागर्दभात्मत्वं गजस्य तव साधये॥ ३९२॥

धर्मधर्मिस्वरूपैक्ये स्याद्भान्यतरधीः क्वचित् । सहधीश्च क्वचिन्न स्यात्संमतैक्ये यथा घटे ॥ ३९३ ॥
अतः क्वापि द्वयोरैक्यं सहैवावगतौ न वा । दुःसाधमथवा भात्कं रामसुग्रीवयोरिव ॥ ३९४ ॥
तदिहाभिन्नधीर्भिन्ने भ्रान्तिर्ज्वालैक्यबुद्धिवत् । अभिन्ने भेदधीश्चैव स्याच्चन्द्रद्वित्वबुद्धिवत् ॥ ३९५ ॥
प्रातिस्विकमनेकेषु यदैक्यं सर्वसंमतम् । न ततः प्रस्तुतं सिध्येत्तदुक्तेः सिद्धसाध्यता ॥ ३९६ ॥
सामानाधिकरण्येऽपि यथार्हं प्रतिपाद्यते । अनेकान्वित एकोऽर्थो नानेकैरेकतां गतः ॥ ३९७ ॥
यच्च व्यष्टिसमष्ट्यादौ नानात्वैकत्वदर्शनम् । न विरुद्धान्वयस्तत्र परिषत्पुरुषादिवत् ॥ ३९८ ॥
भेदाग्रहादिकारित्वाद्धर्मत्वादेशसाम्यतः । परिमाणैक्यतश्चेत्याद्यसारं जैनकल्पितम् ॥ ३९९ ॥
बाधासिद्ध्यन्यथासिद्धिव्यभिचारादिविप्लुताः । हेतवस्तद्विदामेते जुगुप्सामात्रहेतवः ॥ ४०० ॥
यच्चान्यदपि मुग्धद्भिर्भाषितं भास्करादिभिः । तत्तदर्थप्रसङ्गेषु तद्भङ्गश्च भवेदिति ॥ ४०१ ॥

एवं धर्मधर्मितादात्म्यस्य दृष्टत्वे कल्प्यत्वे च निरस्ते, भेदाभेदवस्तुनोः विरोधः क्वचिदुपलम्भनिरस्त इति परोक्तं प्रतारणमात्रमित्युपालभते— अत इति । अत्र प्रतीतिपराहतिं वदत एव सा स्यादिति भावः । निह्नोतव्यानूक्त्या निह्नव-प्रकारं विवृणोति—प्रतीतिप्रकार इति । ननु प्रथमाक्षसंनिपातनिर्विकल्पकदशायामिदमित्थमिति प्रतीतिं परे नेच्छन्ति; तत्कथमिह सर्वसंमतत्वोक्तिः ? इत्थम्—न अत्र निष्कृष्टान्यतरधीसिद्धं प्रातिस्विकमैक्यं भातीति परैः साध्यते । किं तु धर्मधर्मिणोः । तथा सति इदमित्थंभावधीस्तत्र परैरपि संमन्तव्या । यद्वा सविकल्पकधीप्रकारस्य सर्वसंमतत्वोक्त्या तद्बलेन प्रथममपि तद्वदेव विरुद्धानुल्लेखः स्याप्यते । ननु—* तदनन्यत्वमारम्भणशब्दादिभ्यः,* अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके, * आत्मेति तूपगच्छन्ति ग्राहयन्ति च, * अविभागेन दृष्टत्वादित्यादिवादिनः सूत्रकृतोऽत्यन्तभेदोऽनिष्ट इत्यत्र तदभिप्रायव्यक्त्यै स्पष्टार्थमनेकान्तवादाक्षेपसूत्रं दर्शयति— तदेतदिति । प्रमाणादि-सिद्धविरुद्धसंभेददूषणमित्यर्थः ।

सुव्यक्तार्थेन सूत्रेण निश्चिते सूत्रकृन्मते । अव्यक्तार्थैस्तदुक्तेरपसिद्धान्तमाह च ॥ ४०२ ॥

अतः प्रत्यक्षस्य सविशेषविषयत्वेन प्रत्यक्षादिदृष्टसंबन्धविशिष्टविषयत्वादनुमानमपि सविशेषविषयमेव । प्रमाणसंख्याविवादेऽपि सर्वाभ्युपगतप्रमाणानामयमेव विषय इति न केनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः । वस्तुगतस्वभावविशेषैस्तदेव वस्तु निर्विशेष-मिति वदन् जननीवन्ध्यात्वप्रतिज्ञायामिव स्ववाग्विरोधमपि न जानाति ॥

अथ साक्षात्प्रकान्तस्य शेषं सिद्धेन साधयति— अत इति । सर्वविशेषरहितग्रहणासिद्धेरित्यर्थः । आदिशब्देन लौकिकवैदिकागमग्रहः । संभवति हि ततोऽपि व्याप्तिसिद्धा क्वचिदनुमा; यथा—स्वर्गमसौ यास्यति तत्क्रमनया सम्यगनु-ष्ठितज्योतिष्टोमत्वादिति । प्रत्यक्षादिना दृष्टलिङ्गसंबन्धं साध्यं तद्विशिष्टो धर्मिवदुक्तः । अतो न साध्यविशिष्टसविशेषविष-यत्वमिह हेतुः ; दुरपह्नवधर्मिसाध्यादिविशेषमूयस्त्वप्रदर्शने तात्पर्यात् ।

* विशेषेऽनुगमाभावात्सामान्ये सिद्धसाधनात् । तद्वतोऽनुपलम्भात्कथमनुमानकथा कुतः ॥

इत्यादि वदन् चार्वाकस्तु स्ववचनप्रवृत्त्यादिभिर्भ्रमः । देशान्तरादौ व्यभिचारसंभवेन भ्रान्त्या वाऽनुमानिकी प्रवृत्तिः । यदृच्छया तु संवाद इत्यूहस्तु प्रत्यक्षेऽपि स्यात् । यच्चानुमानस्य प्रामाण्ये सति कथंचित्प्रत्यक्षान्तर्भाव इति; तत्तथा अन्यथा[वा;] च विशिष्टविषयत्वं तावद्दुरपह्नवम् । व्याप्तिग्राहकप्रमाणानधिकविषयमनुमानमिति वदतामपि विशिष्टविषयतायामविवाद इत्यवधारणाभिप्रायः । यद्वा, प्रागनूदितनिर्विशेषत्वानुमानानामुत्थानशङ्काऽपि नास्तीति द्योत्यते । ननु अर्थापत्त्यादि मानान्तरमस्ति, ततोऽस्मदिष्टं स्यादित्यत्राह— **प्रमाणे**ति । **अयमेव**—सविशेष एवेत्यर्थः । प्रत्यक्षादित्रिकं प्रदर्श्य **प्रमाणमङ्ख्याविवादे**ऽपीत्युक्तया अन्यारूढवादोऽयमिति व्यक्तम् । तदुक्तं नूपनानमागमादावन्तर्भवति; अर्थापत्तिसंशयावनुमाने; अनुपलब्धिश्च प्रत्यक्षादौ; ऐतिह्यं तु प्रायिकप्रामाण्यम् । * स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् इति श्रुतौ तु स्मृत्युपादानं प्रत्यक्षाद्यनुविधायितया तदभिन्नार्थत्वपरम् । ऐतिह्यमिहागमः । उपबृंहितं च मनुना— * प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम् । त्रयं सुविदितं कार्यम्—इति । भारते त्वधिकोक्तिर्गोवलीवर्दनयादुदाहरणभेदव्यक्त्यर्था । न्यायसूत्रे तु उपमानबहिर्भावोक्तिरन्यपरतया भूषणेन निरूढा । एवं **सविशेषवस्तुविषयत्वादि**ति प्रागुक्तं हेतुसामर्थ्यम्, निर्विशेषप्रमाणस्य दुर्वचत्वं च निगमयति— **न केनापी**ति । संग्रहोक्ताविवाऽस्मिन् विस्तरेऽपि अगत्या परः स्वानुभवमेव पुनः शरणयेत् । तस्य विशिष्टविषयत्वे स्थापिते तत्प्रयुक्तैरेव निष्कर्षहेतुभिः सविशेषत्वं प्रागुक्तमिति कृत्वा अनुक्तस्ववाग्विरोधं मिहावलोकितकेनाह— **वस्त्वि**ति । सन्तु सविशेषविषयाण्येव प्रमाणानि, तानि निर्विशेषत्वयुक्तया बाध्येरन्नित्यत्र दत्तोत्तरत्वमजानतो जडीकारोऽयम् । **तदेव**—स्वेष्टहेत्वादिरूपानेकविशेषास्पदमेवेत्यर्थः

> यत्तु प्रत्यक्षं सन्मात्रग्राहित्वेन न भेदविषयम्, भेदश्च विकल्पासहत्वाद्दुर्निरूप इत्युक्तम्, तदपि जात्यादिविशिष्टस्यैव वस्तुनः प्रत्यक्षविषयत्वाज्जात्यादेरेव प्रतियोग्यपेक्षया वस्तुनः स्वस्य च भेदव्यवहारहेतुत्वाच्च दूरोत्सारितम् । संवेदनवद्रूपादिवच्च परत्र व्यवहारविशेषहेतोः स्वस्मिन्नपि तद्व्यवहारहेतुत्वं युष्माभिरभ्युपेतं भेदस्यापि संभवत्येव । अत एव च नानवस्था अन्योन्याश्रयणं च । एकक्षणवर्तित्वेऽपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूपतत्संस्थानरूपगोत्वादेर्गृहीतत्वात्क्षणान्तरग्राह्यं न किञ्चिदिह तिष्ठति ॥

अथानूदितमादौ यत्तद्दूषयितुमुद्यतः । आरोहादवरोहाद्वा किं न हन्ति तदुच्यते ॥ ४०३ ॥
निर्विशेषपरं शास्त्रं प्रत्यक्षं तेन बाध्यते । न वा बाध्यं तदैकार्थ्यादित्यनूक्ते परोदिते ॥ ४०४ ॥
प्रत्यक्षोदन्तमुद्धाट्य प्राध्वं प्रतिविवक्षता । क्षेपः स्कन्धत्रयस्यास्य क्रियते प्रातिलोम्यतः ॥ ४०५ ॥
अतः प्रथममक्षोभ्ये भेदे कुमतिकल्पिताम् । मानमेयप्रतिक्षिप्तिमनुवक्त्यत्र यत्त्विति ॥ ४०६ ॥
अनूक्तं द्वितयं चात्र तदपीत्यादिनास्यति । उक्तवक्तव्यनिर्धार्यहेतुद्वितयशक्तितः ॥ ४०७ ॥

जात्यादिविशिष्टस्यैव—न तु जात्यादिभिरभिन्नस्यानवगतसंबन्धस्य तच्छून्यस्य चेति यावत् । **जात्यादेरेव**—प्रतियोग्यमतीतावपि स्वरूपतः प्रत्येतुं शक्यस्यैवेत्यर्थः । **वस्तुनः**— जात्याद्यधिकरणस्य । **अत्राश्रयधर्म्यन्तरतद्धर्माः**

स्वधर्माश्च प्रतियोगिनः; स्वस्य तु स्वाश्रयधर्मान्तरादीति विभागस्त्विह प्रतियोग्यपेक्षया इति संक्षिप्तः। दूरोत्सारितम्— धर्मिग्रहण एव भेदरूपस्य यत्किञ्चिद्धर्मस्य गृहीततया मानमेयानुपपत्तिशङ्काऽपि न स्यादिति भावः। वस्तुनः स्वस्य चेत्युक्तं स्वपरनिर्वाहकत्वं परोक्तपक्षदृष्टान्तन्यायादङ्गीकारयति— संवेदनवदिति। उक्तेनैव परोक्तदूषणनिरासश्च फलित इत्याह— अत एवेति। तत्र जात्यादिधर्मस्यैव भेदतया धर्मिस्वरूपस्यास्माभिर्भेदत्वानभ्युपगमात् संशयाद्यनुपपत्तिश्चोद्यमपास्तम्। स्वपरनिर्वाहकत्वेनानवस्था निरस्ता। विशिष्टग्रहणस्यैव भेदग्रहणत्वादन्योन्याश्रयप्रसङ्ग एव नास्ति। एवमाश्रयप्रतियोगित्वादिग्रहेऽपि। अत्र ग्राहकानुपपत्तौ परिहर्तव्यायां धर्मरूपस्य भेदस्य तद्विशिष्टस्य च विधौ व्यवच्छेदविधानयोरैक्यं दर्शितम्। धर्म्यपेक्षया तु तयोर्भेदः स्थापितः। प्रत्यक्षस्य स्वरूपभेदयोरन्यतरग्राहित्वं क्रमेणोभयग्राहित्वं च त्यक्तम्। युगपद्ग्रहणमेव तु प्रतिष्ठितमित्याह— एकक्षणेति। ननु यद्यपि धर्मिस्वरूपस्य भेदत्वं नास्ति, तथाऽपि धर्मस्वरूपस्य भेदत्वे तत्र गोत्वादिशब्दानां भेदशब्दस्य च पर्यायत्वं स्यात्। प्रतियोग्यनपेक्षत्वसापेक्षत्वादिविरोधोऽपि न परिहृतः। मैवम्—

व्यावृत्तेषु स्वरूपेषु खण्डगोशब्दनीतितः। स्वरूपशब्दानुगतिर्निमित्तान्तरतो यथा ॥ ४०८ ॥
न व्यावृत्त्यनुवृत्त्यादिविकल्पश्चात्र बाधकः। व्यावृत्तेषु स्वरूपेषु स्वरूपत्वानुवृत्तितः ॥ ४०९ ॥
[अस्वरूपत्वमन्येषामपि न स्यादगोत्ववत्।]
निर्दिष्टे हि विशिष्टेऽर्थे निष्कृष्टाङ्गविशेष्यता। स्वरूपशब्दवृत्तेः स्यान्निमित्तं सर्ववस्तुषु ॥ ४१० ॥
विभक्तिभेदश्चैवं स्यात्समुदायांशभावतः। शिलापुत्रवपुर्न्यायो न चास्मिन्मुख्यसंभवे ॥ ४११ ॥
एवं गोत्वादिधर्मेषु भेदत्वाख्यनिमित्ततः। प्रवृत्तो भेदशब्दः स्यात् अपर्यायस्सहोक्तिमान् ॥ ४१२
प्रतियोग्यनपेक्षत्वप्रसङ्गोऽप्यत एव न। भाषिष्यते हि भेदस्य लक्षणं तदपेक्षया ॥ ४१३ ॥
यद्बुद्धौ यत्र यद्भान्तिर्न स्यात्सा तस्य तद्भिदा। अतः सप्रतियोगित्वं भेदोक्तेरपि सेत्स्यति ॥४१४॥
भिन्नशब्दः क्वचिद्भेदेष्वाश्रयादिविशेषतः। स्वतश्च धर्मभेदश्च फलाप्तेरौपचारिकः ॥ ४१५ ॥
अभेदेऽपि स्वरूपादिविकल्पानुपपत्तयः। भेदे यथा तथैव स्युः समाधिश्च समोऽत्र नः ॥ ४१६ ॥

अपि च, सन्मात्रग्राहित्वे घटोऽस्ति पटोऽस्तीति विशिष्टविषया प्रतीतिर्विरुध्यते; यदि च सन्मात्रातिरेकिवस्तुसंस्थानरूपजात्यादिलक्षणो भेदः प्रत्यक्षेण न गृहीतः; किमित्यश्वार्थी महिषदर्शनेन निवर्तते? सर्वासु प्रतिपत्तिषु सन्मात्रमेव विषयश्चेत्, तत्तत्प्रतिपत्तिविषयसहचारिणः सर्वे शब्दा एकैकप्रतिपत्तिषु किमिति न स्मर्यन्ते? किं च, अश्वे हस्तिनि च संवेदनयोरेकविषयत्वेन उपरितनस्य गृहीतग्राहित्वाद्विशेषाभावाच्च स्मृतिवैलक्षण्यं न स्यात्। प्रतिसंवेदनं विशेषाभ्युपगमे प्रत्यक्षस्य विशिष्टार्थविषयत्वमेवाभ्युपगतं भवति। सर्वेषां संवेदनानामेकविषयतायाम् एकेनैव संवेदनेनाशेषग्रहणादन्यबुद्धिराद्यभावश्च प्रसज्येत ॥

तदिह न तावद्भेदधीर्नास्तीति साधयितुं शक्यम्, सर्वलोकप्रसिद्धया स्ववागादिभिश्च व्याघातात्। तथा च का कथा शास्त्रारम्भादौ। न च तस्या निर्मूलत्वम्, अतत्त्वाभावतस्तदयोगात्। सिद्धस्य च मूलाभावे स्वरूपानादित्वप्रसक्तौ स्वेष्टभङ्गात्। न च तन्मूलस्य दुर्निरूपत्वम्, विशेषतो निरूपणाशक्यत्वेऽपि परिवेषादेरिव तादृशकार्योत्पादनानुगुणस्वरूपतया सामान्येन तन्निरूपणात्, विशेषतश्चान्वयव्यतिरेकनियतस्येन्द्रियादेरुक्तत्वात्, **न च चक्षुषेत्यादिना** स्थापयिष्यमाणत्वाच्च। न च निरूपितकारणाऽपि सा निर्विषया, स्वोक्त्यादिविरोधादेव; निर्विषयत्वसाधकधियोऽपि निर्विषयत्वे स्वेष्टासिद्धेः; सविषयत्वे स्वेष्टविरोधात्। निर्विषयस्त्यातिवादस्तु प्रतिक्षेप्स्यते। नापि द्विचन्द्रभेदधीवद्बाधितविषया; मानमेयानुपपत्तिपरिहारात्। अनुमानादिभिर्बाधस्त्वपाकरिष्यते। सत्सदित्यनुवृत्तेऽपि हि तद्व्यावृत्तिधीर्दुस्त्यजा। तस्मात्किं मुधाऽत्र चोद्यते। एवं स्थितेऽपि धाष्टर्यान्मिथ्याक्रियापूर्ववादन्यायेन [आयत्त]अयत्नत्वाच्चादिमं भेदबुद्ध्यपह्नवमेव परः शरणयेदिति कृत्वा तत्रापि दोषान्विवक्षुराह— **अपि चेति**। यद्वा प्रत्यक्षस्य भेदग्राहित्वाभावेऽपि भ्रान्त्या भेदव्यवहार इति यत्परेणोक्तं तत्र प्रत्यक्षवद्भ्रान्तावपि क्रमयौगपद्यादिविकल्पानुपपत्त्यवतारात्तन्निवर्तकस्य **वैषम्यस्य** दुर्वचत्वाच्च शास्त्रनिवर्त्यत्वाभिमतभेदधीरेव लुप्येतेति मत्वा तत्रानिष्टानि प्रस्तूयन्ते। त्रिभिरिह वाक्यैर्धीप्रवृत्तिव्यवहारविशेषभङ्गः प्रदर्श्यते। **सन्मात्रग्राहित्वे**—भेदग्राहित्वाभावे सतीत्यर्थः। अयमेव प्रसङ्गकांशो दूष्यश्चेति व्यक्त्यै लिप्यपि तदनुवादावृत्तिः। **जात्यादिलक्षणः**—जातिगुणादिस्वरूप इत्यर्थः। **किमिति**। अश्वाद्भेदस्य महिषत्वस्य दर्शनादेव हि ततो निवृत्तिरिति भावः। निवृत्त्युक्तिः प्रवृत्तेरप्युपलक्षिका। **तत्तत्प्रतिपत्तिविषयसहचारिण** इति लोकसंमतानुवादः। वाच्यविशेषो हि दृष्टो वाचकविशेषं स्मारयति। तेन च गृहीतसंबन्धः स एव व्यवह्रियते, सेयं व्यवस्था न स्यादित्यभिप्रायेण **सर्वे शब्दा** इत्याद्युक्तिः। अथ पूर्वोक्तेभ्यो विलक्षणं प्रतीतिस्वरूपेऽनिष्टं प्रसज्यत इति सूचयन्नाह—**किं चेति**। **संवेदनयोरेकविषयत्वेन**— सन्मात्रविषयत्वेनेति भावः। गृहीतग्राहित्वं प्रत्यभिज्ञादावप्यस्तीति तद्व्यावृत्त्यर्थमाह— **विशेषभावाच्चेति**। यद्यपि संस्कारजन्यत्वाभावेन स्मृतित्वं नास्ति; तथाऽपि पूर्वानतिरिक्तव्यवहारहेतुत्वेन स्मृतिवैलक्षण्यं न स्यादित्युक्तम्। दृष्टं व्यवहारवैचित्र्यं हेत्वन्तरस्याप्यसंभवेन लुप्येतेति भावः। अनधिगततया भूतार्थनिश्चायकं प्रमाणमिति मतमनुसरन्तं प्रति च प्रामाण्यभङ्गसंरम्भोऽयम्। विषयतो विशेषाभावेऽपि स्वरूपभेदत इव कालभेदतो वा वैषम्यं स्यादित्यत्राह— **प्रतिसंवेदनमिति**। स्वरूपकालभेदयोर्हि सद्भावमात्रं स्मृताविवाकिञ्चित्करम्; विषयभूतसत्पदार्थोपरञ्जकत्वे तु स्वारसिकं हस्त्यश्वत्वादिवैशिष्ट्यं दुस्त्यजमित्याशयः। एवं प्रतिपत्तिषु स्मृतिवैषम्याभावः प्रसञ्जितः। अथ प्रतिपत्तृष्वन्धानन्धादिवैषम्यं न स्यादित्याह— **सर्वेषामिति**। **संवेदनानाम्**— प्रत्यक्षधियामित्यर्थः। इन्द्रियविशेषवैकल्यादेव अन्धादित्वम्; इन्द्रियजातिभेदश्च विषयभेदादेव। अतस्तदभावे तत्तन्नियतेन्द्रियभेदासिद्धेरेकैकवैकल्येऽपि काणन्यायादन्धाद्यभावः स्यादित्याकूतम्। **अशेषग्रहणात्**— इन्द्रियान्तरग्राह्यानुपलम्भादित्यर्थः।

न च चक्षुषा सन्मात्रं गृह्यते, तस्य रूपिरूपैकार्थसमवेतपदार्थग्राहित्वात्। नापि त्वचा, स्पर्शवद्वस्तुविषयत्वात्। श्रोत्रादीन्यपि न सन्मात्रविषयाणि; किं तु शब्दरसगन्धलक्षणविशेषविषयाण्येव। अतः सन्मात्रस्य ग्राहकं न किञ्चिदिह दृश्यते। शेषसन्मात्रस्य प्रत्यक्षेणैव ग्रहणे तद्विषयागमस्य प्रामाण्यविषयत्वेनानुवादकत्वमेव

स्यात्, सन्मात्रब्रह्मणः प्रमेयभावश्च। ततो जडत्वनाशित्वादयस्त्वयैवोक्ताः। अतो वस्तुसंस्थानरूपजात्यादिलक्षणभेदविशिष्टविषयमेव प्रत्यक्षम्॥

उक्तसिद्धयर्थं विषयभेदेन इन्द्रियव्यवस्थां प्रागुक्तप्रतीतिविरोधं च व्यनक्ति— **न चेति**। **रूपकार्थसमवेताः** संयोगादयः। समवेतशब्द इह स्वतो विशेषणत्वपरः। रूपस्य पृथगनुक्तिस्तद्विशिष्टग्रहणोक्तेः। **स्पर्शवद्द्रव्यविषयत्वात्** इत्यत्रापि स्पर्शादयो ग्राह्या इति, निराधारा रूपस्पर्शादय एव इन्द्रियग्राह्या इति वदन् वैभाषिकोऽप्यत्र प्रत्युक्तः। अद्रव्यग्राहिषु कथं विशिष्टविषयत्वमित्यत्र त्वदिष्टं तावन्नेत्याह— **श्रोत्रेति**। **अपिर्विरोधशङ्काद्योतकः**, समुच्चयार्थो वा। ननु श्रोत्रादेः सद्विषयत्वाभावे शब्दादीनामसत्त्वप्रसङ्गः। तदतिरिक्तविषयत्वाभावनिषेधस्तु कथमित्यत्राह— **किंत्विति**। शब्दत्वरसत्वगन्धत्वादीनि मतभेदाज्जातिरूपाण्युपाधिरूपाणि वा सर्वेंदुरपहवानि लक्षणानि येषां ते **शब्दरसगन्धलक्षणाः**; त एव विशेषा अनुवृत्तसच्छब्दनिमित्तातिरिक्ता इत्यर्थः। अन्यथा श्रोत्रादिभेदासिद्धिः पूर्वोक्तप्रतीत्यादिविरोधश्च दुर्वार इत्यवधारणाभिप्रायः। एवं सर्वेन्द्रियाणां ग्राह्यतया त्वदुक्ते सन्मात्र एव ग्राहकानुपपत्तिरापतितेत्यभिप्रायेणाह— **अत इति**। **इह**—संप्रतिपन्नेषु ग्राहकेषु। अन्यतु निर्विशेषग्राहकं न कल्पयितुं शक्यमिति भावः। परकल्पितप्रत्यक्षवृत्तान्तेन तदभिमतब्रह्मविषयस्य शास्त्रस्यानुत्थानप्रसङ्गमाह— **निर्विशेषेति**। पूर्व एवकारः शास्त्रनैरपेक्ष्यार्थः, उत्तरस्तु विधेयान्तरानभ्युपगमादनुवादनैरर्थक्यपरः; अप्राप्ते हि शास्त्रमर्थवत्। सिद्धान्तविरोधमाह— **सन्मात्रेति**। न खल्विन्द्रियवेद्यसन्मात्रादन्यत्ते ब्रह्म। तस्यानन्याधीनसिद्धित्वेनाभ्युपगतस्य अवृत्तिरूपस्य अन्यधीगोचरत्वप्रसङ्ग इत्यर्थः। तावन्मात्राभ्युपगमे को दोष इत्यत्राह— **तत इति**। **आदि**शब्देन मिथ्यात्वादिसंग्रहः। **त्वयैवेति**। अनेन स्वोक्तमपि न जानासीति विरोधः सूच्यते। प्रत्यक्षस्य भेदग्राहित्वं तदुपन्यस्ताभिः कुतर्ककुहनाभिर्दुरपह्नवमित्यभिप्रायेण सावधारणं निगमयति— **अत इति**।

संस्थानातिरेकिणोऽनेकेष्वेकाकारबुद्धिबोध्यस्यादर्शनात् तावतैव गोत्वादिजातिव्यवहारोपपत्तेः, अतिरेकवादेऽपि संस्थानस्य संप्रतिपन्नत्वाच्च संस्थानमेव जातिः।

संस्थानस्य जातित्वं जात्यादेर्भेदत्वं च प्रसक्तम्। तत्राद्यं स्थापयति— **संस्थानेति**। ननु इह किमर्थं संस्थानजातिसाधनम्? प्रामाणिकतया।

* न याति न च तत्रासीदस्ति पश्चान्न चांशकत्। जहाति पुनराधारमहो व्यसनसन्ततिः॥

इति। सौगतोक्तवृत्तिविकल्पाद्यनवतारेण कथञ्चिदुपकारार्थत्वे गुणादिकमपि चिन्त्येत। मैवम्; व्यावृत्तानामेव निमित्तानां कुतश्चित्त्वमावादेकरूपबुद्ध्यादिहेतुत्वे सिद्धे, अस्ति सदित्यनुवृत्तसद्बुद्ध्यादेरपि तथैव निरूढेः घटादिधर्मतया लोकसिद्धसत्तायास्सर्वाधारब्रह्मरूपत्वं हि दूरापास्तं स्यात्, सत्ताश्रयस्य घटादेः घटत्वादेरिव च। अन्ये चैवमुपालेभिरे—

* महासामान्यमन्यैस्तु द्रव्यं सदिति चोच्यते इति। सत्ताश्रयस्य घटादेस्त्वनुगतत्वं परेणापि दुर्वचवित्यभिसन्धाय सोऽयमुद्यमः। तदिहातिरिक्तजातेर्दृष्टिः क्लप्तिश्चादर्शनादन्यथैवोपपत्त्या च दूष्यते। अयं भावः—यथा जातिव्यक्तिमुण्डदण्डिमूर्तिपाचकादिष्वनुवृत्तबुद्ध्यादेरुपाधिराश्रितः, तथेहापि स्यात्। उपाधिश्चात्र अतिरिक्तमवयविनं जातिं च वदद्भिरपि

गवाद्यसमवायिकारणत्वेन गोत्वादिव्यञ्जकतया स्वीकृतमवयवसंयोगविशेषात्मकं संस्थानम्। तस्यैव हि अन्त्यतन्तुसंयोग-जन्यावयविनिष्पत्तेः प्रागपि विद्यमानतया तदाऽपि पटधीव्यवहारो दृश्यते। तत्र भ्रान्तिकल्पैर्वरमुभयत्र संस्थानसारूप्ये-णैवोपलम्भेन निर्वाह इति । अत एव संस्थानसमाख्या जातिरेवोच्यत इति न भ्रमितव्यमित्यभिप्रायेण **तावतैवेत्यव-धारितम्**। जात्याश्रयघटादिहेतुतया तस्य ततो भेदेन तत्सम्मतेः, तस्मादतिरिक्तकल्पनौ गौरवं व्यनक्ति— **अतिरेक इति**। तर्हि जातिशब्दो निर्विषयः स्यात्। जातिगुणक्रियायदृच्छाशब्दव्यवस्था च भज्येतेत्यत्रोक्तम्— **संस्थानमेव जातिरिति**। उभयाभ्युपेतमेव जातिशब्दवाच्यमित्यर्थः ॥

अभापत च संस्थानजातिपक्षं पतञ्जलिः। जातिनित्यत्वपक्षोक्तिरन्वारब्धेति नीयताम् ॥ ४१७ ॥

ननु संस्थानमनुवृत्तम् व्यावृत्तं वा ? नाद्यः— नित्यत्वप्रसक्तावसाध्यत्वापातात्; तथा च आरम्भणनयविरोधः। न द्वितीयः— अनुवृत्तबुद्धिनिर्वाहकत्वयोगात्, अन्यथाऽतिप्रसङ्गात्। न च सादृश्यं व्यवस्थापकम्, गोगवयादिषु तदसिद्धेः। सौसादृश्यं तु विरूपेषु खण्डमुण्डादिषु दुर्वचम्; मैवम्—सास्नादिसादृश्यविशेषस्य निमित्ततयाऽतिप्रसङ्गा-प्रसङ्गयोरभावात्। ननु च सादृश्यविशेषेऽप्यनुवृत्तादिविकल्पस्तदवस्थः। सामान्यत्यागे च किं नाम सादृश्यम्, समानं सदृशमित्यादेः पर्यायत्वात्। आहुश्च—

* सामान्यान्येव भूयांसि गुणावयवकर्मणाम्। भिन्नप्रधानसामान्यवर्ति सादृश्यमुच्यते ॥ इति

तदपि न; जात्याद्युपलक्षकसंस्थानेऽपि व्यावृत्त्यादिविकल्पोत्थानात्। अतो यादृशं संस्थानं व्यावृत्तमपि साजात्य-व्यवस्थापकं मन्यसे तादृशमेव तत्। यथादृष्टि नियतप्रतियोगिकं मिथः सादृश्यम्। न तु परेष्टं सामान्यं पदार्थान्तरं वा। सास्नादिसंस्थानेऽपि सदृशव्यवहारस्तदवयवसंस्थानोपाधिकः। एवमनुपलब्धावयवद्रव्यपर्यन्तं गतौ परिमाणादिविशेषाव्यवस्था।

संस्थानं नाम स्वासाधारणं रूपमिति यथावस्तुसंस्थानमनुसन्धेयम्।

ननु तथाऽपि संस्थानं न तावद् द्रव्यस्वरूपम्, प्रत्यक्षस्य विशिष्टविषयत्वभङ्गप्रसङ्गात् सत्कार्यनीत्या च नित्यत्वागन्तुकत्वविरोधात् द्रव्यात्मनश्च व्यावृत्त्यनुवृत्तिविकल्पदौस्थ्यात् गुणादावनुवृत्तिधीनिमित्तत्वायोगाच्च। अत एव नावयवसंनिवेशविशेषः; आत्मादिषु तदयोगाच्च, अतोऽतिरिक्तसिद्धिरित्यत्राह— **संस्थानमिति**। **स्वशब्दोऽत्र** गवादिशब्दवाच्यतया धीस्थतत्तद्वर्गपरः। तदन्तर्गतसर्वसाधारणत्वेऽपि तदन्यतो व्यावृत्ततया अत्र **स्वासाधारण-त्वोक्तिः। रूपम्**— निरूपकमित्यर्थः। तदिह सावयवेषु निरवयवेषु चानन्तेष्वित्थमिति प्रकारतया **निर्देश्यं तदन्य-निष्ठाभावप्रतियोगि** च किञ्चिद् दृष्टमिष्टं च तदिति[तदनति]क्रमेण विविच्य बोद्धव्यमित्याह—**इति यथेति**। सावयवेषु हि गवादिषु संनिवेशविशेषा दृष्टा एव। निरवयवेष्वात्मादिषु चेतनत्वादिकमेव संस्थानमित्युच्यते। अद्रव्येष्वपि तत्त-ल्लक्षणमेव। तदपि तत्तज्जात्युपलक्षणतया परसंमतम्। यदि सावयवेषु सन्निवेशविशेषो जातिः, तर्हि ब्रह्मक्षत्रादिषु मनुष्यत्वातिरिक्तसंनिवेशविशेषादृष्टेरागमसिद्धावान्तरजातिव्यवस्था भज्येत। संकेतलिङ्गसंव्यवहारैस्तत्सिद्धिरतिप्रस-ञ्जिका; ब्राह्मणादिशब्दानां जातिशब्दत्वं च व्याकरणादिस्मृतिसिद्धम्। * ब्राह्मोऽजातावित्यनेन जातौ ब्राह्मणशब्द-स्थितेः। अत एव विशिष्टमातापितृजन्यत्वरूपोपाधिमात्रमेव ब्राह्मण्यादिकमिति कैश्चिदुक्तमयुक्तम्, अयोनिजब्राह्मणा-

तदयोगात् । अर्वाचीनेषु तु जात्युपलक्षणमात्रमेतत् । यत्तु वार्षैरुक्तम्—* विरुद्धजातीयाभ्यां प्रजोत्पत्त्ययोगान्मनुष्यत्वावान्तरजातिभेदः साङ्केतिक इति, तदसत्, अश्वगर्दभादिषु विजातीयसंयोगादपि तत्तत्प्रजोत्पत्तिदृष्टेः । तत्र सङ्कीर्णोत्पत्तिरिति चेत्, तथाऽत्रापि । अतः संनिवेशातिरिक्ता जातिर्ग्राह्या । सत्यम्; एतदर्थमपि स्वासाधारणं रूपमित्युक्तम् । आगमादिजनितानादिव्यवहारसिद्धेयं व्यवस्था संनिवेशमन्तरेणापि साधीयसी । इदं तु चिन्त्यम्— अधिकजातिवादेऽपि समानसंनिवेशानामवान्तरजात्यादिव्यञ्जकव्यक्तिविशेषनिष्पत्तिः कुत इति; अचिन्त्यविपाकादृष्टविशेषाधीनभूतपरिणतिविशेषादिति चेत्, एवं तर्हि तत् तच्छब्दनिमित्तं स्यात् । एतदेव * शमो दम इत्यादिषु क्रियाभेदाद्गुणभेदाद्वा वर्णादीन् व्यवस्थापयतामपि तात्पर्यम्, तावन्मात्रस्यातिप्रसक्तित्वात् । तदयं संग्रहः—

संनिवेशसमानत्वेऽप्यारणेयादिवह्निषु । क्षीरभेदादिकेऽप्यस्ति शक्तिभेदस्तथाऽस्ति नः ॥ ४१८ ॥
उपलक्षणतो यत्र जातिर्व्यङ्ग्यया तदेव सा । यत्राश्रयस्वभावात्तु तत्राप्यस्तु स एव सा ॥ ४१९ ॥
न चैवं सर्वधर्माणामपि शक्त्या निराकृतिः । आविर्भावतिरोभावप्रभृतेस्तद्विरोधतः ॥ ४२० ॥
अगृहीतो हि दूरादौ धर्मो भात्यन्तिकेऽधिकः । धर्मिग्रहेऽपि भेदस्य ह्यगृहीतौ भ्रमोदयः ॥ ४२१ ॥
दर्शनस्पर्शनाभ्यामप्येकार्थग्रहणं स्फुटम् । रूपस्पर्शौ च धर्मौ च भिन्नाः सिध्यन्त्यतो मिथः ॥ ४२२ ॥
भेदः स्वरूपं धर्मो वेत्येवमादि च जल्पताम् । विकल्पोऽपि कथं सिध्येद्धर्मधर्मिभिदात्यजाम्[ः] ॥४२३
संस्थानेष्वेव सामान्यसादृश्यादिगिरां पुनः । अन्यान्वयपुरस्कारात्प्रतिसंबन्ध्यपेक्षता ॥ ४२४ ॥
घटस्यैव घटाभावाभावोऽयमिति भाषणे । प्रतियोगी पुरस्कार्यस्सर्वेष्टस्तद्वदत्र नः ॥ ४२५ ॥
संस्थानेष्वनुवृत्तत्वव्याह[ह्व]तिश्च पुरोदिता । मिथः सादृश्यरूपत्वे तात्पर्यान्न विरुध्यते ॥ ४२६ ॥
सादृश्यादिस्वरूपत्वं यथादृष्टयत्र केषुचित् । स्वभावतो भवेद्यद्वन्मिथः संबन्धितादयः ॥ ४२७ ॥
कथ्यते यैस्तु सादृश्यं संस्थानादिविलक्षणम् । गुरुत्वं जातिगुप्तौ च धृतं तैर्जातिकल्पिवत् ॥४२८॥
संमतादतिरिक्तं वा सादृश्यं परिकल्प्यताम् । आश्रयप्रतियोग्यादिव्यवस्थानस्वभावतः ॥ ४२९ ॥

किं च, कर्मणां तावन्न स्वरूपतोऽनेकानुवृत्तिः, कालतः परिच्छेदात् । एवं कार्याणां गुणानामपि । संयोगादेरपि कतिपयानुवृत्तिमात्रम् । नित्यानां च ततो वैषम्यकल्पिरयुक्ता । अतस्तेषु कल्प्यमन्यसामान्यम् । तत्र किं गुणकर्मसु ? जातिरुपलक्षणैर्व्यवस्थाप्या, व्यावृत्तव्यक्तिस्वभावत एव वा ।

उपलक्षणतो यत्र जातिर्व्यङ्ग्यया तदेव सा । यत्राश्रयस्वभावात्तु तत्राप्यस्तु स एव सा ॥ ४३० ॥

अस्तु वा उपाध्यनुक्त्यैव यत्र कचित् काश्यपादिगणिना जातिः; तथाऽपि द्रव्यादिषु, चतुर्षु वाऽनुवृत्ता सत्ताजातिर्न कल्प्या; सत्तायास्तदभीष्टपदार्थान्तरेष्विव च सच्छब्दार्थे भावत्वप्रामाणिकत्वाद्युपाधितः संभवात् । अतो लोकदृष्टं सद्वा सत्ता वा शास्त्रवेद्यं सर्वाधारभूतं ब्रह्म न भवतीति सिद्धम् ॥

जातिग्रहणेनैव भिन्न इति व्यवहारसंभवात्, पदार्थान्तरादर्शनात्, अर्थान्तरवादिनाऽप्यभ्युपगतत्वाच्च गोत्वादिरेव भेदः ॥

एवं संस्थानजातिपक्षे अतिरिक्तपक्षेऽप्याद्यप्रत्यक्षस्य तद्विशिष्टविषयतया भेदग्राहित्वं द्रढयितुं प्रसक्तयोः साधितशेषम् * असद्व्यपदेशसूत्राभिप्रेतयुक्त्या साधयति—जातीति। जातिशब्द इह प्रदर्शनार्थः, प्राक् पश्चाच्चादिशब्दोपादानात्। अत्र चान्योन्याभावमतिरिक्तं कल्पयतामपि न जात्यदर्शने तद्धीः; अन्यथा कथमगृहीतगोत्वादेरश्वत्वादिभ्रमसन्देहौ। पृथक्त्वमपि न पृथक्कल्प्यम्, गुणादिष्वपि संभवतः पृथग्व्यवहारस्यान्योन्याभावेनैव चरितार्थत्वात्। अत एवात्यन्ताभावोऽपि नान्यः, गोत्वस्यैव गोरश्वाद्यन्योन्याभावतया, अश्वत्वाद्यत्यन्ताभावतया च तदन्यतदभावशब्दविषयत्वोपपत्तेः। तद्दिह भिन्न इति व्यवहारोऽन्यथासिद्ध इत्यवधारणाभिप्रायः। मा भूत्कल्पितिः; कथं दृष्टापह्नव इत्यत्राह— पदार्थान्तरादर्शनादिति। अन्यथा गौरवमप्याह— अर्थान्तरेति। एवं क्वचित्पृथक्त्वसंज्ञान्तरं विशेषाख्यपदार्थान्तरं च न कल्प्यमित्यभिप्रायेणाह— गोत्वादिरेव भेद इति। गौरवात् पृथग्व्यवहारस्य लक्षणरूपेणापि हेतुना व्यावृत्तिः साध्या इति वदन्तोऽप्यत्र लक्षणस्यैव भेदत्वोक्त्या निरस्ताः। कथं हि पक्षस्य व्यतिरेकदृष्टान्ताद्भेदाग्रहे केवलव्यतिरेकिप्रवृत्तिः? कथं च इतरेभ्यो भिद्यत इति साध्यप्रयोगः? व्युत्पत्तिस्तु वृद्धव्यवहारादिसाध्या; तत्र किं लक्षणेन? अन्यथा यथेष्टं यत्किञ्चिच्छब्दवाच्यत्वानुमित्यादिप्रसङ्गात्। इत इदं पृथक्, इत इदमन्यत्, इति व्यवहारयोरव्यतिरेकादर्थभेदो न कल्प्यः; अतः पृथक्त्वमपि गोत्वादिरेव। द्विपृथक्त्वादिकल्पितिस्तु दूरापास्ता। एवं नित्यद्रव्येषु विशेषोऽपि न कल्प्यः। मुक्तात्मादिषु गुणादिभिर्वैषम्यरहितेषु मिथोव्यावृत्तधीर्भेदकधर्ममन्तरेण कथं स्यादिति चेत्, प्रत्यक्षतोऽस्ति; शास्त्रादिनापि शुकत्वादिप्रसिद्धोपाधिभिरेव स्यात्। सा तावन्नासदीयादीनाम्। योगिप्रभृतीनामपि प्राचीनैरुपाधिभिरेव विचित्रैः प्रत्येकनिष्ठतया प्रत्यक्षितैर्भेददृष्टिः स्यादेव। अलं तदन्यकल्पनया। अस्ति च असन्मते प्रत्यात्मनियते मुक्तावस्थायामप्यात्मनां स्वतन्त्रेच्छाहेतुक इच्छादिभेदः श्रुतिसिद्धः। यत्तु पृथक्त्वैकजात्या समत्वाद्गुणादावपि समत्वाच्च पृथक्त्वं नैतेषु भेदकमित्याहुः; तदप्ययुक्तम्। अन्यत्रापि तस्याभेदकत्वप्रसङ्गात्। विशेषत्वोपाधिना समत्वेन कल्प्यानामप्यकिञ्चित्करत्वप्रसङ्गात्। वदन्ति हि विशेषलक्षणमनुवृत्तम्—जातिशून्यत्वे सत्येकवृत्तित्वमिति।

ननु च जात्यादिरेव भेदश्चेत्तस्मिन् गृहीते तद्व्यवहारवद्भेदव्यवहारोऽपि स्यात्। सत्यम्; भेदश्च व्यवह्रियत एव, गोत्वादिव्यवहारात्। गोत्वादिरेव हि सकलेतरव्यावृत्तिः, गोत्वादौ गृहीते सकलेतरसजातीयबुद्धिव्यवहारयोर्निवृत्तेः। भेदग्रहणेनैव हि अभेदनिवृत्तिः। अयमस्माद्भिन्न इति तु व्यवहारे प्रतियोगिनिर्देशस्य तदपेक्षत्वात्प्रतियोग्यपेक्षया भिन्न इति व्यवहार इत्युक्तम्॥

अथैवं जात्यादिधर्माणां भेदत्वेऽपि स्वरूपभेदपक्षे प्रागुक्तं चोद्यमवतारयति—ननु चेति। अत्र भेदव्यवहारशब्देन वस्तुतो भेदशब्दवाच्यस्य व्यवहारो वा भेदत्वेन व्यवहारो वेति विकल्पं मत्वा पूर्वकोटिमिष्टतयाऽङ्गीकरोति—सत्यमिति। तद्विवृणोति—भेद इति। वस्तुतः तत्तद्भेदरूपश्च जात्यादिर्व्यवह्रियत इत्यर्थः। कथमित्यत्राह—गोत्वादीति। ततोऽपि कथं तत्सिद्धिरित्यत्राह— गोत्वादिरेवेति। अत्र सकलेतरशब्दस्तत्तद्विरुद्धाकारविशिष्टपरः।

भेदलक्षणं गोत्वादौ दर्शयति— गोत्वादाविति । इतरैः सकलैर्विशेषतः सजातीयत्वबुद्ध्यादिनिवृत्तेरित्यर्थः । यदग्रहाद्यत्र यदध्यासः सर्वेषः, यदग्रहे चासौ न स्यात्, स हि तस्य तस्माद्भेदः ; तदेवाभेदनिवृत्तिः । तद्धीनिवृत्तिं व्यनक्ति— भेदग्रहणेनेति । एवकारो विरोधव्यञ्जकः । हिः प्रसिद्धौ । ननु भावस्यैवाभावत्वमनेकस्यैकाभावत्वमेकस्यानेकाभावत्वं च कथम् ? इत्थमेव— यथादृष्टि सर्वत्र विरोधाद्यभावात्, अभावाभावादौ परैरपि तथाऽङ्गीकाराच्च । एतेन निर्विशेषेऽपि अतद्व्यावृत्तिरूपधर्मसत्यत्वपक्षेऽपि तैरेवाभावरूपधर्मायमाणैस्तत्प्रतिबन्धा वा अभावरूपधर्मवत्त्वे सिद्धे द्वितीयकोटौ दत्तोत्तरत्वमाह— अयमिति । प्रतियोगिनिर्देशस्य— प्रतियोगिना निर्देशस्य । तदपेक्षत्वात्— प्रतियोगिधीसापेक्षत्वादित्यर्थः । तदपेक्ष्यत्वादिति पाठे तु प्रतियोगिनो निर्देशस्य भिन्न इति व्यवहारेणापेक्षणीयत्वादिति भाव्यम् । उक्तं भेददूषणनिस्तारोपक्रमे—

भेदसाधकवर्गस्य भेदसिद्ध्युपजीविनः । तत्साधकत्वायुक्तिश्च दुर्भणा स्वोक्तभङ्गतः ॥ ४३१ ॥
भेदोऽस्तीति विधानं तु भवेत्स्वपररक्षकम् । स नास्तीति निषेधस्तु मूलघ्नः स्वात्मघातकः ॥४३२॥इति ।

यत्पुनर्घटादीनां विशेषाणां व्यावर्तमानत्वेनापारमार्थ्यमुक्तम् ; तदनालोचितबाध्यबाधकभावव्यावृत्त्यनुवृत्तिविशेषस्य भ्रान्तिपरिकल्पितम् । द्वयोर्ज्ञानयोर्विरोधे हि बाध्यबाधकभावः, बाधितस्यैव व्यावृत्तिः । अत्र घटपटादिषु देशकालभेदेन विरोध एव नास्ति । यस्मिन्देशे यस्मिन्काले यस्य सद्भावः प्रतिपन्नः, तस्मिन्देशे तस्मिन्काले तस्याभावः प्रतिपन्नश्चेत्, तत्र विरोधाद्बलवतो बाधकत्वं बाधितस्य च निवृत्तिः । देशान्तरकालान्तरसंबन्धितयाऽनुभूतस्यान्यदेशकालयोरभावप्रतीतौ न विरोध इति कथमत्र बाध्यबाधकभावः ? अन्यत्र निवृत्तस्यान्यत्र निवृत्तिर्वा कथमुच्यते ? रज्जुसर्पादिषु तु तद्देशकालादिसंबन्धितयैवाभावप्रतीतेर्विरोधो बाधकत्वं व्यावृत्तिश्चेति देशकालान्तरदृष्टस्य देशकालान्तरव्यावर्तमानत्वं मिथ्यात्वव्याप्तं न दृष्टमिति न व्यावर्तमानत्वमात्रमपारमार्थ्यहेतुः ।

एवं भेदस्य मानाद्यनुपपत्तिर्निरस्ता । तथाऽनुमानबाधं दुर्दूषयिषुरनुवक्ति— यत्पुनरिति । हेतौ सोपाधिकत्वं विक्षुः प्रयोजकानभिज्ञमुपालभते—तदिति । बाध्यबाधकभावः सर्वत्र विरोधगर्भः; व्यावृत्तिविशेष एव मिथ्यात्वसाधकः; अनुवृत्तिविशेष एव सत्यत्वसाधकः इत्यनालोचनात्तत्सामान्ये बाधकत्वभ्रान्त्या तदुक्तिरित्यर्थः । कथमत्र बाध्यबाधकभावस्यानालोचितत्वमित्यत्राह— द्वयोरिति । ज्ञानयोर्विरोधोऽत्र विषयविरोधायत्तः । अत्र व्यावर्तमानत्वमात्रमप्रयोजकम्, तद्विशेषस्त्वसिद्ध इत्यभिप्रायेणाह— बाधितस्येति । व्यावृत्तिशब्देन प्रतिपन्नोपाधौ निषेधप्रतियोगित्वलक्षणव्यावृत्तिर्विवक्षिता, अन्यथा अवधारणायोगात् न व्यावर्तमानत्वमात्रमिति वक्ष्यमाणत्वाच्च । तद्धि

प्रयोजकस्यासिद्धत्वं सिद्धस्याप्रयोजकत्वं च हार्दम् । ननु सच्छब्दवाच्ये ब्रह्मणि घटादेः प्रतीतत्वात्तत्रैव निषेधाच्च शुक्तिरूप्यस्येव विधिनिषेधयोर्विरोधः सिद्ध इत्यत्राह— **अत्रेति** । घटादिषु अस्तिनास्तिबुद्ध्योरित्यर्थः । **एव**कारो बाधस्य मूलाभावेन कैमुत्यनिरस्तत्वार्थः । अयं भावः— ब्रह्मरूपं सत्तास्मदादेर्दृश्यम् ; दृष्टं तु सन्न घटादेराधारतया भाति तद्रूपत्वात् । तत्र च निषिद्धे तस्मिन्निति मध्ये तन्मिथ्यात्वायोगात् । घटत्वादिधर्मस्तु शुक्तौ रूप्यत्ववत् स्वाश्रयभूते घटादौ सच्छब्दोक्ते न निषिध्यन्ते । सत्ता च घटादिधर्मतया न तद्देशत्वशङ्कार्हा । संप्रतिपन्नौ घटादिविधिनिषेधदेशकालौ तु भिन्नाविति । बाधरूपस्योपाधेः साधनव्यापकत्वपरिहाराय देशकालैक्यतो विरोधबाधव्यावृत्तौ. शिक्षयति— **यस्मिन्निति** । देशकालग्रहणमुपलक्षणम्, **देशकालादीनि** वक्ष्यमाणत्वात् । तत्रादिशब्देन कालाद्यवच्छेदकः क्रियादिस्तत्तदधिष्ठानस्वरूपं च गृह्यते ।

देशकालौ विहायापि ह्यन्यत्वं क्वापि कल्प्यते ।
तदेव तत्राधिष्ठानं प्रतीतोपाधिशब्दभाक् । देशकालान्तरत्वं च कल्प्यते देशकालयोः ॥ ४३३ ॥

अव्यवस्थितिपरिहाराय **बलवत** इत्युक्तम् । चकारो विरोधबाधाभ्यां सह निवृत्तेः समुच्चयार्थः, बाधितस्यैवेत्यवधारणार्थो वा । पूर्वोक्तव्यावृत्तिविशेष एवात्र निवृत्तिशब्देनाप्युक्तः । पक्षीकृते विरोधादिरिक्तं नास्तीत्याह— **देशान्तरेति** । **अन्यत्र**शब्दो विरोध्यभावतत्सद्भावस्थापनपरौ । स्वदेशादौ निवृत्तिवचनमप्रयोजनत्ववत्स्यात् । ततोऽन्यत्र साधने तु सिद्धसाध्यता साध्याविशेषश्चेत्यभिप्रायेण **कथमुच्यते** इत्युक्तम् । **बाधफलभूता विषयनिवृत्तिर्व्यावृत्तिरिति** हि पूर्वपक्षोक्तम् । सपक्षे विरोधादीन् व्यनक्ति— **रज्जुसर्पादिष्विति** । देशकालविशेषसमुदायस्य प्रतिपन्नोपाधित्वात् तद्दृष्टप्रकारेण परोक्तहेतोर्व्याप्त्यभावं तत एवासाधकत्वं चाह— **इतीति** । पूर्व इतिः प्रकारे । उत्तरो हेतौ । मावत्वा बाधफलत्वव्युदासः । अत्रेदमाकूतम— व्यावर्तमानत्वं नाम किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वं वा, कुतश्चिदन्यत्वं वा, कस्याश्चिद्बुद्धेरविषयत्वं वा, प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा, अन्यद्वा किञ्चित् ? नाद्यः, उक्तस्य बाधितत्वस्योपाधित्वात् । असत्यस्य स्वनैर्ल्यादेर्बाधादर्शनान्न साध्यव्यापकत्वमितिचेत्, न; ईश्वरादिबुद्ध्या बाधसिद्धेः ; त्वया च कुतश्चिदसत्यत्वं तस्य गृहीत्वा चोद्यते । न च तस्योपाधेः साध्याविशिष्टत्वम् ; अपरमार्थशब्देन मिथ्यात्वस्य बाधार्हत्वसदसदन्यत्वादेर्वा विवक्षितत्वे तदयोगात् । पूर्वपक्षोक्तं मिथ्यात्वलक्षणमपि बाधार्हत्वमेव ; बाधितत्वस्यैव साध्यत्वे योग्यानुपलब्ध्या कालात्ययापदेशात् । सर्वदा सर्वेषामबाधितत्वं दुर्ज्ञानमिति चेत् ; ब्रह्मणि कः समाश्वासः ?

अनिर्वाच्येषु बाधश्च स्वकालासत्त्वमावहन् । जनिध्वंसाभ्युपगमात् दुर्वचो जनिबाधतः ॥ ४३४ ॥
पश्चादभावः कार्येषु न साध्यः सिद्धसाधनात् । नित्येषु तु विरुद्धत्वान्न चेद्ब्रह्मणि का गतिः ॥ ४३५ ॥
नित्यानित्यश्रुतिप्राप्तं ब्रह्मान्यत्कल्पना[ऽ]पदम् । ब्रह्मण्यपि तथात्वोक्तिरविशेषात्प्रमज्यते ॥ ४३६ ॥

ग्राहकाद्यनुपपत्त्या भेदबाधस्तु प्रागेवापास्तः । ब्रह्मणि च अनिर्वाच्यनिष्ठात्यन्ताभावप्रतियोगित्वेनानैकान्त्यम् । यदि तस्मिन्नयं धर्मो मिथ्या, तदा सत्यस्यानिर्वाच्यधर्मत्वप्रसक्तिः ; अन्ततः स्वनिष्ठात्यन्ताभावप्रतियोगित्वं च सिद्धम् । अन्यथा आत्माश्रयापातात् । आत्माधारत्वोक्तिस्त्वन्यपरा । न द्वितीयः ; ब्रह्मणि अनृतजडाद्यन्यत्वस्य त्वयैवोक्तेः । तस्मिथ्यात्वे च सत्यपरिशेषे व्यावर्त्यासिद्धेस्तत्प्रतियोगिकव्यावृत्तिविधिविरोधोऽद्वैतमतभङ्गश्च जायते । असत्यपरिशेषे

निरधिष्ठानभ्रमः । विरुद्धोभयैक्ये जैनादिमस्थितिः । व्यावर्तमानतादात्म्याच्च सतोऽपि तथात्वापत्तिः । मिथ्याभूतमेव च व्यावर्तमानत्वं घटादौ मिथ्यात्वसाधकं मन्यसे, ब्रह्मण्यपि स्यात् । न तृतीयः ; सतोऽप्यसद्बुद्धेः अनिर्वाच्यतद्विषयत्वे च तद्व्यावृत्तिसाधनायोगात् ; स्वप्रकाशस्य सर्वबुद्ध्यविषयत्वाद्वा । भ्रान्त्या तद्विषयत्वमपि स्यादिति चेत् ; तद्वत्पक्षीकृतेऽपि सर्वधीवेद्यत्वभ्रमः स्यादिति हेत्वसिद्धिः । त्रिष्वपि कल्पेषु सत्यानुमानदृष्टान्ततया त्वयैवोक्ते सर्पाद्यधिष्ठानरज्ज्वादौ हेतुवृत्तिर्दुर्वारा । कथं कस्यचित्सत्यत्वसाधनेऽन्वयदृष्टान्तस्य तदन्यासत्यत्वसाधने पक्षीकारः? व्यावहारिकव्यवस्थया दृष्टान्तत्वेऽपि तयैव तत्रासत्यत्वसाधनं बाध्येत । परमार्थसत्यत्वनिषेधे तु तद्दृष्टान्तेन ब्रह्मण्यपि व्यावहारिकसत्यत्वं वा सत्यत्वमात्रं वा निदर्शितं स्यात् ; तथा च न विवक्षितसिद्धिः । परमार्थसत्यमिति साधने कथञ्चिद् दृष्टान्तः सिध्येत् । चतुर्थस्तु देशान्तरेत्यादिना निरस्तः । पञ्चमोऽपि यदि सर्ववर्ति, तदाऽनैकान्त्यं स्थितम् । अथ न, तदा तस्यैव व्यावर्तमानतया मिथ्यात्वेन स्वरूपासिद्धेरसाधकत्वम् । असत्यात् सत्यसिद्धिस्तु दूषयिष्यते । साध्येऽपि सर्ववृत्तित्वकतिपयवृत्तित्वविकल्पेन ब्रह्ममिथ्यात्वादि स्यादेव ।

पक्षत्वे चास्य साध्यादेर्व्याघातो दुरतिक्रमः । अन्यथा सदसत्त्वादिविकल्पैरप्युपप्लवः ॥ ४३७ ॥

एवं ब्रह्मान्यत्वात्कल्पितत्वाद्धित्वादित्यादीनां प्रपञ्चमिथ्यात्वसाधकतया परोक्तानां सर्वेषामनुमानादीनां बाधोपाधिव्यभिचारव्याघातादयो दोषा यथायथं द्रष्टव्याः । यः प्रत्ययः स निरालम्बनः यथा स्वप्नादिप्रत्ययः, विमतं च तथेति योगाचारोक्ते तु, * वैधर्म्याच्च न स्वप्नादिवदिति सूत्रमुत्तरं भविष्यति । सर्वधियां च स्वेतरालंबनशून्यत्वं वदतः स्वेष्टं सन्तत्यन्तरं क्षणान्तरं च न सिध्येत् । माध्यमिकस्तु कार्याणां पूर्वापरकाल्योरसत्त्वेन मध्येऽप्यसत्त्वं साधयन् व्यावर्तमानत्वानुमानदूषणनयेन बाधादिभिर्निष्कास्यः । तन्मतं च * सर्वथाऽनुपपत्तेश्चेति प्रतिक्षेप्स्यति । यत्तु विगीतं मिथ्या दृश्यत्वात् शुक्तिरूप्यवदिति ब्रूथ; तत्र वेद्यत्वमात्रमेव हि हेतुः स्यात्, दृष्टिगोचरत्वादेर्भागासिद्धेः । ततश्च ब्रह्मजिज्ञासेत्यादि स्थापयद्भिर्विपक्षे ब्रह्मण्यपि हेतुवृत्तिरेष्टव्या । अत एव, आत्मा न दृश्यः आत्मत्वात्, यन्नैवं तन्नैवं यथा घट इत्यपि न वाच्यम् ; आत्मादिशब्दैर्मन्त्रैर्देशेन स्ववाग्विरोधात् । * आत्मा वा अरे द्रष्टव्यः, * दृश्यते त्वग्र्यया बुद्ध्या * तमक्रतुं पश्यति वीतशोकः इत्यादिभिर्बाधाच्च । * गूढोत्मा न प्रकाशते * अदृश्यमग्राह्यमित्यादिनिषेधस्तु तत्तद्वाक्यशेषैः * न चक्षुषा गृह्यते इत्यादिविशेषनिषेधकवाक्यान्तरैश्च संकोच्यः । अन्यथा कथमद्वैतम् ? कथं वा द्रष्टृदृश्यसंबन्धानुपपत्तिः ? किं च विधाय्यात्माधिष्ठानस्य यथादृष्टि तदेकधीविषयत्वं स्वीकार्यम् ; अन्यथा निरधिष्ठानभ्रमापातात् । ब्रह्मणो धीविषयत्वं भ्रान्तिसिद्धमिति चेत् ; अब्रह्मणोऽपि तथेति त्वमेव ब्रूषे । ब्रह्मणस्तु दृग्विषयत्वमात्रमिति चेन्न ; तस्याभिलप्यमानत्वात् । घटादिवदनित्यस्वप्रकाशस्य प्रकाशरूपं फलं न साध्यमिति चेत् ; कथं तर्हि ब्रह्मबुद्धेरध्यासनिवर्तकत्वम् ? स्वरूपत इति चेत् ; तद्बुद्धटादिष्वपि तदतिरिक्तव्यक्त्यभिव्यक्तिरूपफलकल्पनं स्यात् । प्राकट्यभङ्गन्यायाच्च । अतः साधारणे विषयत्वमात्रे हेतौ स्थितमनैकान्त्यम् । अपि च—

दृश्यत्वाद्यदि मिथ्यात्वं भासमानत्वतो न किम् । तत्र दोषांस्त्वदुक्तांश्च तुल्ययेत्तुल्यमागतः ॥ ४३८ ॥
असिद्ध्युपाधिव्याघातबाधादिरुभयोः समः । अनैकान्त्यमथलं तस्य नास्तीत्यतिशयो भवेत् ॥ ४३९ ॥
असत्यात्सत्यनिष्पत्तिप्रतिपत्तौ च दर्शयन् ।
असत्यादप्यधिष्ठानाद्ध्यासं किं न मन्यसे । विपक्षे बाधकादत्र वैषम्यमपि दुर्वचम् ॥ ४४० ॥

दृग्दृश्ययोर्हि योगाचारोक्तवद्युक्तौ न हेतुर्दृश्यं भवेत् । साध्यं च तत्र मिथ्यात्वं सत्यं न वा ? आद्येऽपि धीस्वरूपमेव, अन्यद्वा? पूर्वत्र तत्प्रकाशनित्यतया जगदध्यास एव न स्यात् । स्याच्चेत्, सर्वत्र सर्वदा अध्यासः स्यात् । अन्यथा बाधेऽपि । बाधितानुवृत्तिश्च त्वन्मते प्रागेव निरस्ता । अन्यत्वे सद्वितीयतापत्तिः । कथं चासत्यस्य सत्यो धर्मः, खपुष्पे कोमलपरिमलश्लैत्यादेस्तथाऽनुपलब्धेः ? द्वितीये तु प्रपञ्चसत्यत्वापत्तिः । सत्यरजतादेर्ब्रह्मणश्च सर्वत्र सर्वदाऽध्यासः स्यात्, मिथ्यात्वे मिथ्याभूते तत्सत्यत्ववत् । न चेयं नित्यसमा ; युक्ताद्धहान्यादेः स्वव्याघातस्य चाभावात् । न च सत्यत्वं सत्यमसत्यं वेत्यादिप्रतिबन्दिः । तस्यासत्यत्वानभ्युपगमात् । तत्सत्यत्वे च घटादिसत्यत्वाविरोधात् । मिथ्यात्वमिथ्यात्वे तु वैपरीत्यदृष्टेः । अत एव नेदं स्वपरनिर्वाहस्थानम् । सत्यत्वं तु तथा स्यात् ; उदाहृतस्वप्रकाशादिसमानयोगक्षेमत्वात् । अनवस्थाऽपि तद्वन्निवर्त्या ; अन्यथा कथं ब्रह्मणोऽपि सत्यत्वम् ? स्वतश्चेत्, सममेतत् । सत्यासत्यविवेकाभावे च सामान्यतो विशेषतश्च माध्यमिकेतरसर्वगद्धान्तव्यवस्थोच्छेदः ।

महीमिव च मर्यादामनधिष्ठाय शाश्वतीम् । पदन्यासो न चोराणां प्रच्छन्नप्रकटात्मनाम् ॥ ४४१ ॥
मर्यादास्थापनार्थं यौ मानतर्कौ ममुन्थितौ । सिंहारण्यवदन्योन्यं गुप्तौ तौ स्वान्यसाधकौ ॥ ४४२ ॥
परमर्यादया ब्रूमः परव्याहतिमित्यपि । स्वव्याघातादिभङ्गानां परानङ्गीकृतेरिति ॥ ४४३ ॥

यत्तु अनुवर्तमानत्वात्सत्परमार्थ इति, तत्सिद्धमेवेति न साधनमर्हति । अतो न सन्मात्रमेव वस्तु । अनुभूतिमद्विशेषयोश्च विषयविषयिभावेन भेदस्य प्रत्यक्षसिद्धत्वा-दबाधितत्वाच्च अनुभूतिरेव सतीत्येतदपि निरस्तम् ॥

अथ सत्पारमार्थ्यसाधने साध्यस्य सिद्धतया हेत्वंशो दृष्यः इत्यभिप्रयन् तत्पुरस्सरमनुवक्ति— यत्तु इति । तदेतन्माध्यमिकं प्रति दुर्वचम् ; दृष्टान्ताद्यसिद्धेः । अस्मान्प्रति त्वत्परिभाषया व्यावहारिकस्य वा प्रातीतिकस्य वा सतः पक्षीकारे सिद्धसाध्यता, प्रातीतिकसतोऽपि स्वदेशादौ सिद्धत्वात् ; तव तु प्रतिज्ञाविरोधः । परमार्थसतः पक्षीकारे तु सत्परमार्थ एवेति वा, सदेव परमार्थ इति वा विवक्षितम् ? पूर्वत्र सिद्धसाध्यता धर्मिसाध्यपदयोरैकार्थ्यं चेत्यभिप्रायेणाह— तदिति । उत्तरस्योत्तरमाह— अत इति । अयं भावः—साध्यस्यायोगव्यवच्छेदे तावत् तदन्यमिथ्यात्वं नोक्तं स्यात् । अन्ययोगव्यवच्छेदे अनुवर्तमानत्वादिति हेतुरपक्षस्थः । अन्यथाऽपि विरुद्धश्च । उभयसाधने तु अंशत उभयदोषापत्तिः । सन् स्वेतरपरमार्थशून्यमिति विवक्षायां रज्ज्वादिदृष्टान्तः साध्यविकलः, तदनारोपितपरमार्थसिद्धेः । अयं तु निगमनग्रन्थ इति केचित् । तदा सच्छब्दवाच्यांशवद्घटादिवाच्यांशोऽपि वस्त्वित्याशयः । अनुवर्तमानानुभूतिरेव परमार्थ इति प्रागुक्तमप्येतेन निरस्तं वेदितव्यम् ।

सत्सदित्यनुवृत्त्या च सतः सत्यत्वसाधने । नास्तित्वाद्यनुवृत्त्याऽपि तत्सत्यत्वं न किं भवेत् ॥४४४॥
घटो नास्तीति बोधेऽपि तन्नास्तित्वास्तिताऽस्ति चेत् । घटोऽस्तीति विधानेऽपि किं न नास्तित्वनास्तिता ॥
घटादिसत्ता सत्या चेद्घटादेः सत्यता न किम् । न त्वदिष्टानुवृत्तिः स्याद्यदि सा व्यावहारिकी ॥ ४४६
किं चानुमानसिद्धत्वं शास्त्रसिद्धयै निरस्यता । प्रत्यक्षातिप्रसिद्धत्वं शास्त्रेणैव निरस्यते ॥ ४४७ ॥

सैव सतीत्युक्तमपि भेदसाधकनिस्तारं पूर्वम् निरस्यति— **अनुभूतीति** । अनुभूतेरपि सद्रूपतया तत्र सदनुभूत्योर्भेदायोगात् तद्व्यावृत्तघटादिव्यञ्जनाय विशेषशब्दः । यदाऽनुभूतिरनुभूत्यन्तरेण विषयीक्रियते तदाऽपि घट-तद्वीन्यायात् विषयविषयिणोः सतोर्भेदसिद्धः । परेष्टानुवर्तमानत्वासिद्धिर्व्यञ्जनार्थो वा विशेषशब्दः इति केचित् ॥

यत्तु अनुभूतेः स्वयंप्रकाशत्वमुक्तम्, तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव; न तु सर्वेषां सर्वदा तथैवेति नियमोऽस्ति । परानुभवस्य हानोपादानादिलिङ्गकानुमान-ज्ञानविषयत्वात्, स्वानुभवस्याप्यतीतस्य अज्ञासिषमिति ज्ञानविषयत्वदर्शनाच्च । अतोऽनुभूतिश्चेत्स्वतःसिद्धेति वक्तुं न शक्यते ।

तुच्छत्वपरिहाराय परोक्तं स्वतःसिद्धत्वम् तथात्वग्राहकाभावे स्वाश्रयेण सह तुच्छत्वं स्यादिति वक्तुमनुवक्ति— **यत्तु इति** । तुशब्दोऽत्र युक्तायुक्तांशविशेषव्यावृत्त्यर्थः । स्वयंप्रकाशत्वोक्त्याऽन्यनिरपेक्षप्रकाशत्वमाश्रयतः कालत्रया-त्यन्तायोगव्यवच्छेदो वा, अन्याधीनप्रकाशत्वात्यन्ताभावो वाऽभिप्रेत इति विकल्पं मत्वा प्रथमे सिद्धसाध्यतामाह—**तदिति** । **ज्ञातुः**—स्वाश्रयस्येत्यर्थः । द्वितीयं दूषयति—**न त्विति** । तुशब्दोऽवधारणपरः, स्वानभ्युपगतांशविवेके वा । **सर्वेषां सर्वदेत्यनूदितस्य** नियमद्वयस्य बाधं ग्रन्थद्वयेनाह— **परानुभवस्येति** । आदिशब्देन प्रेक्षणभक्षण गुरुकादिसंग्रहः । **अतीतोदाहृतिरागाम्युपलक्षणार्था** । स्ववचनविरोधं सूचयन्नियमाभावं निगमयति— **अत इति** । **अनुभूतिश्चेदिति** । **अनेनाश्रयकालरूपविशेषणद्वयरहितस्वरूपानुवादः** ॥

अनुभूतेरनुभाव्यत्वेऽननुभूतित्वमित्यपि दुरुक्तम्; स्वगतातीतानुभवानां परगतानु-भवानां चानुभाव्यत्वेन अननुभूतित्वप्रसङ्गात् । परानुभवानुमानानभ्युपगमे च शब्दार्थसंबन्धग्रहणाभावेन समस्तशब्दव्यवहारोच्छेदप्रसङ्गः । आचार्यस्य ज्ञानवत्त्व-मनुमाय तदुपसत्तिश्च क्रियते । सा च नोपपद्यते । न च अन्यविषयत्वेऽननुभूति-त्वम् । अनुभूतित्वं नाम वर्तमानदशायां स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वं, स्व-सत्तयैव स्वविषयसाधनत्वं वा । ते चानुभवान्तरानुभाव्यत्वेऽपि स्वानुभवसिद्धे नाप-गच्छत इति नानुभूतित्वमपगच्छति । घटादेस्त्वननुभूतित्वमेतत्स्वभावविरहात्, नानुभाव्यत्वात् । तथाऽनुभूतेरननुभाव्यत्वेऽपि अननुभूतित्वप्रसङ्गो दुर्वारः; गगन-कुसुमादेरननुभाव्यस्याननुभूतित्वात् ।

ननु व्यतिरेकिकेवलाद्वेद्यत्वमवच्छेदकवृत्तिमात्रस्य, न तु साक्षादनुभूतेरित्यत्र हेतुदूषणाय तदनुग्राहकतर्कं दूषयितु-मनुवक्ति— **अनुभूतेरिति** । व्याप्तिरूपाङ्गवैकल्यमाह— **स्वगतेति** । अनुभूतिशब्दार्थो हि लोकतोऽवसेयः । अतो न घटादिज्ञानेष्वनुभूतित्वं त्यक्तुं शक्यम् । तत्र च वेद्यत्वमनुभूतित्वं च सह दृष्टम् । वृत्तिपक्षेऽपि तदुपहित-

संवित्स्वरूपग्रहणं सिद्धम् । अतोऽत्र तर्कस्यानुमानस्य च व्याप्तिर्दुर्ग्रहा । अवेद्यत्वसाधनं च कालात्ययापदिष्टम्, साध्यहेत्वादिपदनैरर्थक्यप्रसङ्गहतं च । धाष्टर्याद्दृष्टापह्नवे लौकिकवैदिकसर्वव्यवहारभङ्गमाह— **परेति** । अयं भावः— गामानयेत्यादौ वा, पुत्रस्ते जात इत्यादौ वा वक्ष्यमाणभाष्यप्रकारेण चेष्टासहचरिताम्बादिशब्दप्रयोगे वा व्युत्पद्यमानानां परबुद्ध्यनुमानसापेक्षत्वं सिद्धम् । तदभावे सर्वेषामन्युत्पन्नतया न मिथो भाषणम्, न च दृष्टादृष्टसर्वविद्यास्थानप्रवृत्तिः स्यादिति । अदृष्टार्थप्रवृत्तौ विशेषतश्चोदाहरति— **आचार्यस्येति** । तदनुमानाभावेऽनिष्टं प्रसञ्जयति— **सा चेति** । एवं वादिप्रतिवादिशिष्यादिबुद्ध्यनुमानं द्रष्टव्यम् । ननु वेद्यत्वप्रयुक्तमेवाननुभूतित्वं घटादौ दृष्टम्; इहापि तदभ्युपगमे तत्प्रसङ्गो दुर्वार इत्यत्राह— **न चेति** । वेद्यत्वं नाननुभूतित्वव्याप्यमित्यर्थः । अननुभूतित्वप्रसङ्गं परिहर्तुं तत्प्रतियोगिस्वरूपं लक्षणतः शिक्षयति— **अनुभूतित्वमिति** । अहमर्थात्मत्वस्य परेणानभ्युपगमादहमिदमर्थाभ्यामुपहितानुभूतित्वावेद्यत्वेन साध्यते । तस्याश्च कस्यचित्प्रकाशरूपत्वमनुभूतित्वम्; स्वगोचरज्ञानमनपेक्ष्य स्वाश्रयाय प्रकाशमानत्वं च तल्लक्षणम् । **वर्तमानदशा**—विषयग्रहणकालः । तदुक्तिः पूर्वोत्तरदशयोर्वेद्यत्वदृष्ट्या **स्वसत्तयैवेत्यवधारणव्युदासार्था** । वर्तमानदशायामप्यहमर्थान्तरेण वेद्यत्वदर्शनात् **स्वाश्रयं प्रतीति** विशेषितम् । तेनैव स्वप्रकाशात्मव्यावृत्तिश्च । स्वाश्रयं प्रति प्रकाशमानेभ्य आत्मधर्मान्तरेभ्यो व्यावृत्त्यर्थं **स्वसत्तयैवेत्युक्तम्** । परस्याप्यत्र काल्पनिक आश्रयाश्रयिभावः सिद्धः । स्वसत्तया च अनुभूतिः कल्पितस्वाश्रयाय प्रकाशते । उक्तं लक्षणम् अन्वयप्रकाशवादिभिर्नाङ्गीक्रियते । अतस्तैरपि स्मृतमनुभूतेर्लक्षणान्तरमाह—**स्वसत्तयेति** । कस्यचिदर्थस्य साक्षाद्व्यवहारानुगुण्यापादकमित्यर्थः । तेनेन्द्रियादिव्यवच्छेदः । अत्र हि अवधारणं निरपेक्ष्यपरम् ।

सापेक्षहेतुभिः सिद्धं कारणं सहकारिभिः । एवं सर्वत्र सापेक्षे तदन्यैरनपेक्षता ॥ ४४८ ॥

वर्तमानदशायां, स्वाश्रयं प्रति इत्युभयमिहापि योज्यम् । सिद्धान्ते त्वहमर्थस्यात्मनो ज्ञानरूपत्वे विषयाश्रयोपधानाभावात्ततो व्यावृत्तिः । उभयसाधारणं लक्षणमनुक्त्वा प्रकृतोपयुक्तं लक्षणमिहोक्तम् । अनयोर्लक्षणयोरत्र निरर्थकं वचनमिति शङ्कायां तयोः वेद्यत्वेन सहदृष्ट्या तदाश्रयेऽनुभूतित्वाभावस्य प्रसञ्जयितुमशक्यत्वमाह— **ते चेति** । **स्वानुभवसिद्धे** इति हेतुगर्भं द्विवचनान्तम् । समभ्यन्तत्वे तु अनुभवो विशेष्योऽध्याहार्यः । यदि वेद्यत्वेऽप्यनुभूतित्वं स्यात्, अन्यत्रापि किं न स्यादित्यत्राह— **घटादेरिति** । **तुः** स्वभाववैचित्र्यपरः, शङ्काव्युदासार्थो वा । **अननुभूतित्वं** कस्यचित्प्रकाशात्मत्वाभावः, अनुभूतिशब्दानभिलप्यत्वं वा । **एतत्स्वभावविरहात्**—उक्तलक्षणद्वयासंभवात् । घटादिष्वन्यप्रयुक्तेऽननुभूतित्वे वेद्यत्वस्य तद्व्याप्यत्वभावं व्यनक्ति— **नानुभाव्यत्वादिति** ॥ तर्कस्य व्याप्यत्वभावः स्थापितः; प्रतितर्कपरिहतिमप्याह— **तथेति** ।

गगनकुसुमादेरननुभूतित्वमसत्त्वप्रयुक्तम्, नाननुभाव्यत्वप्रयुक्तमिति चेत्; एवं तर्हि घटादेरप्यननुभूतित्वानिबन्धनमज्ञानाविरोधित्वमेव नानुभाव्यत्वमित्यास्थीयताम् । अनुभूतेरनुभाव्यत्वेऽज्ञानाविरोधित्वमपि तस्या घटादेरिव प्रसज्यत इति चेत्; अननुभाव्यत्वेऽपि गगनकुसुमादेरिवाज्ञानाविरोधित्वमपि प्रसज्यत एव । अतोऽनुभाव्यत्वेऽननुभूतित्वमित्युपहास्यम् ॥

घटादौ सर्वत्रानुभाव्यत्वाभावात् कुत्र व्याप्तिधीरित्यत्राह— गगनकुसुमादेरिति । तुच्छे कथं व्याप्तिग्रह इति चेत्, तदेतत् * नासत्त्वे ख्यातिबाधने इति वदन्तो यूयमेव प्रष्टव्याः । निषेधसाधने च पक्षत्वमप्यसतामिच्छतां * व्यवहारे भट्टनय इति वदद्भिर्युष्माभिरुपजीव्यश्चैवमाहुः—

* यस्मिन्ननित्यता नास्ति कार्यतोऽपि न विद्यते । तस्मिन्यथा खपुष्पादाविति शक्यं हि भाषितुम् ॥ इति ।

असत्यशुक्तिरजतं दृष्टान्तत्वेन कल्पयन् । खपुष्पस्य तथाभावं किं नाङ्गीकर्तुमर्हति ॥ ४४९ ॥
अयोग्यपदसंयोगात्कैश्चिद्दोषान्तरैरपि । अध्यासश्च खपुष्पादेर्दुस्त्यजः शुक्तिरूप्यवत् ॥ ४५० ॥
प्रत्यक्षेण प्रमित्या वा नासत् ख्यायेत किं ततः । घटादेः शुक्तिरूप्यस्याप्येवं तत्प्रतिपादनात् ॥४५१॥
एवं वेद्येऽप्यवेद्यत्वं परोक्तं परवर्त्मनः । अवेद्यत्वमधीत्वेन व्याप्तं भगवतोच्यते ॥ ४५२ ॥
सर्वथैवाप्रतीतं चेदसदित्यभिमन्यसे । कथं त्वया प्रतीतं तद्यत्त्वमेवं ब्रवीषि नः ॥ ४५३ ॥
शून्यं तुच्छमसच्चेति सदेवास्माभिरुच्यते । खरे शृङ्गं नरे गोत्वमित्यादेस्तादृशत्वतः ॥ ४५४ ॥
यत्र यन्न मितं मानैस्तत्तत्रासदिति स्थिते । अवेद्यमसदित्येषा व्याप्तिर्नस्तत्र सिध्यति ॥ ४५५ ॥
प्रतितर्काच्च तर्कस्य प्राबल्यमिह दुर्वचम् । युक्तो विपरिवर्तस्तु प्रत्यक्षाद्यनुसारतः ॥ ४५६ ॥
त्वदुक्तस्य प्रसङ्गस्य मिथ्यत्वेऽपि विपर्ययः । असाधकं त्वदिष्टस्य व्याप्तिभङ्गसमर्थनात् ॥ ४५७ ॥
प्रातिस्विकस्वभावाच्च सामान्यं यदि बाध्यते । सर्वस्यैवं घटत्वाद्यवेद्यत्वं न किं भवेत् ॥ ४५८ ॥
घटादेरपि वेद्यत्वे किं न स्यादघटादिता । सममेव समाधानं तत्र दोषप्रसञ्जने ॥ ४५९ ॥

एवं वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि, धर्मत्वादित्यत्र बहुधा विकल्प्य स्वबाधिरोधादि द्रष्टव्यम् । अधिकं तु खपुष्पादिभिरर्थान्तरत्वं, मनान्तरेण सिद्धसाधनत्वं वा । यदि खपुष्पादीनां वेद्यत्वाभावो न स्यात्, तदा प्रपञ्चस्य सत्त्वकोट्यां ख्यात्यनुपपत्तिं कथं वक्ष्यसि ? अपरोक्षधीविषयत्वाभावादिति चेन्न ; दोषविशेषैस्तत्संभवस्योक्तत्वात् । तेषु वेद्यत्वात्यन्ताभावाधिकरणत्वं निराश्रयत्वात् मिथ्याभूतम् ; सत्यं तु साध्यत इति चेन्न ; तादृशस्य ब्रह्मण्यपि त्वया वक्तुमयुक्तत्वात् । किञ्चिच्छब्दार्थोऽनुभूतिरेव न घटादिरिति नियन्तुं च न शक्यम् ; मुख्यश्च नियामको घटत्वादिरधीत्वहेतुः, वेद्यत्वस्य घटत्वादिनेवानुभूतित्वेन स्वप्रकाशत्वेन वा विरोधगन्धाभावादिति । ननु वेद्यत्वे स्वगोचरज्ञाननिरपेक्षव्यवहारानुगुण्यरूपं स्वयंप्रकाशत्वं कथं स्यात् ? इत्थम्— वर्तमानावर्तमानदशाभेदेन द्वयोर्व्यवस्थापनात् । स्वप्रकाशलक्षणे व्यवहारानुगुण्यं निवेशयता त्वयाऽपि व्यवहारार्हत्वबुद्धेर्व्यवजिहीर्षायाः तन्मूलव्यवहारजन्यधियश्च गोचरत्वमेष्टव्यम् । तथा सति का कथा विरोधस्य । एवं वेद्यत्वे नाशित्वादिप्रसङ्गो व्याप्यभावादिभिर्निर्धूतः । अथ प्रतितर्कस्योपाधिबलाद्दौर्बल्यं शङ्कते— गगनेति । असत्त्वभावत्वयोर्विरोधाद्भावविशेषरूपानुभूतित्वाभावस्तत्रासत्त्वप्रयुक्त इत्यर्थः । यद्यपि अननुभूतित्वस्यासत्त्वमव्यापकं घटादावदृष्टेः ; ततश्च न तस्योपाधिः ; तथाऽपि अनुभूतित्वस्य सत्त्वं व्यापकम् ; तावता च तस्य तदुपाधित्वं कैश्चित्संमतम् । अतः सत्त्वनिवृत्तिप्रयुक्तमननुभूतित्वमित्युच्यते । यद्वा शाकाहारपरिणतिन्यायेन इहाभिप्रेतः । न चासौ श्यामत्वव्यापिका । [अतस्तन्निबन्धनमतन्निवृत्तिः ;] अतो दोषविशेषनिष्ठस्यामत्वविशेषस्तन्निबन्धन इति वाच्यम् ; तद्वदिहापि खपुष्पनिष्ठमननुभूतित्वमसत्त्वप्रयुक्तमिति नियम्यते । तदिदम्

गगनकुसुमादेरननुभूतित्वमिति विशिष्टोक्त्या व्यज्यते । एवं सत्यनुभाव्यत्वनिबन्धनमननुभूतित्वमसत्त्वनिवृत्त्या न निवर्तते । परोक्तर्तकेऽप्युपाधिमाह—**एवमिति** । नात्र मतानुज्ञा, प्रतिबन्देर्दुस्तरत्वे तात्पर्यात् । **अज्ञानाविरोधित्वम्**—ज्ञानधर्मस्य स्ववेद्यविषयाज्ञाननिवर्तकत्वस्याभावः । अज्ञानस्य हि भावरूपस्याभावरूपस्य वा ज्ञानमेव निवर्तकम् ; उक्तस्योपाधेः प्रसङ्गहेतुव्यापकतया प्रतिबन्दिनिस्तारं शङ्कते— **अनुभूतेरिति** । * यत्रोभयोः समो दोषः इति न्यायेन अत्रापि प्रतिवक्ति—**अननुभाव्यत्वेऽपीति** । अवेद्यखपुष्पादिव्यावृत्तं ज्ञानस्याज्ञानविरोधित्वं वेद्यत्वं साधयेदिति भावः । ननु अस्य घटादिसपक्षसद्भावे पक्षमात्रस्थस्य कथं हेतुत्वम् ? कथं वा खपुष्पादिसपक्षसद्भावे तादृशस्य धीत्वस्येति पश्य । किमत्र प्रतितर्कस्यानुग्राह्यम् ? किं वा त्वदुक्तस्य ? श्रुत्यादिकमिति चेत्, तुल्यम् । यद्यप्यत्र प्रकृतानुरोधादसत्त्वमतिप्रसज्यत इति प्रतिवक्तव्यम् ; तथाऽपि शिष्याणामूहशक्तयर्थं तर्कवैभवात्प्रकारान्तरेण प्रत्युक्तम् । प्रसञ्जनीयमसत्त्वमत्र द्वितीयेन **अपि**शब्देन वा समुच्चीयते । अत एव खपुष्पादेः अज्ञानाविरोधित्वं चासत्त्वप्रयुक्तमित्याद्युक्तम् । असत्त्वस्य चाननुभूतित्वादिप्रयोजकत्वं स्वसद्भावे तत्सद्भावनियमाद्वा, स्वाभावे तदभावनियमाद्वा ? आद्ये धूमालोकनयादवेद्यत्वमपि तत्प्रसञ्जकमस्तु, तद्व्याप्यत्वात् । द्वितीये घटादेः कथमधीत्वादि ? तथा च तद्वदनुभूतावपि । असत्त्वाभावेऽप्यवेद्यत्वे श्रुत्यादिकमिति चेत्, तुल्यम् । अधीत्वादिप्रसङ्गः सुस्थः ।

खपुष्पादिगताधीत्वाद्यसत्त्वनियतं यदि । स्यादन्यत्राप्यधीत्वादिमात्रं श्यामत्वमात्रवत् ॥ ४६० ॥

तदिह **दुरुक्तमिति** प्रकान्तं दुस्तर्कोपलब्धिबलान्निगमयन्द्रढयति— **अत इति** ।

यावज्जीवमहं मौनी माता वन्ध्या ममेतिवत् । वित्तरवेद्यतोक्तिः स्यादिति हास्यत्वभाषणम् ॥ ४६१ ॥

यत्तु संविदः स्वतस्सिद्धायाः प्रागभावाद्यभावादुत्पत्तिर्निरस्यते, तदन्धस्य जात्यन्धेन यष्टिः प्रदीयते । प्रागभावस्य ग्राहकाभावादभावो न शक्यते वक्तुम् ; अनुभूत्यैव ग्रहणात् । कथमनुभूतिः सती तदानीमेव स्वाभावं विरुद्धमवगमयतीति चेत्, न ह्यनुभूतिः स्वसमकालवर्तिनमेव विषयीकरोतीत्यस्ति नियमः ; अतीतानागतयोरविषयत्वप्रसङ्गात् । अथ मन्यसे, अनुभूतिप्रागभावादेः सिध्यतस्तत्समकालभावनियमोऽस्तीति । किं त्वया क्वचिदेवं दृष्टम्, येन नियमं ब्रवीषि ? हन्त! तर्हि तत एव दर्शनात्प्रागभावादिः सिद्ध इति न तदपह्नवः । तत्प्रागभावं च तत्समकालवर्तिनमनुन्मत्तः को ब्रवीति ? इन्द्रियजन्मनः प्रत्यक्षस्य ह्येष स्वभावनियमः, यत्स्वसमकालवर्तिनः पदार्थस्य ग्राहकत्वम्, न सर्वेषां ज्ञानानां प्रमाणानां च ; स्मरणानुमानागमयोगिप्रत्यक्षादिषु कालान्तरवर्तिनोऽपि ग्रहणदर्शनात् । अत एव च प्रमाणस्य प्रमेयाविनाभावः । न हि प्रमाणस्य स्वसमकालवर्तिना अविनाभावोऽर्थसंबन्धः ; अपि तु

यद्देशकालादिसंबन्धितया योऽर्थोऽवभासते, तस्य तथाविधाकारमिथ्यात्वप्रत्यनीकता ।
अत इदमपि निरस्तम्— स्मृतिर्न बाह्यविषया, नष्टेऽप्यर्थे स्मृतिदर्शनादिति ॥

अवेद्यत्वं ज्ञानस्य निरस्तम् । अथ प्रागुपन्यस्तं बौद्धोक्तदोषम्यं दूषयितुमनुवक्ति— **यत्त्विति** । असिद्धमत्यन्तासिद्धेन दुस्साधमित्यभिप्रयन्नाह— **तदन्धस्येति** । **जात्यन्धेनेति** निदर्शितं विवृणोति— **प्रागभावस्येति** । **ग्राह्यकालमात्रे** ग्राहकाभावाद्ग्राह्यासत्त्वं न स्यादिति भावः । स्वतोऽन्यतो वा धियः प्रागभावग्रहणमिति प्रागुक्तविकल्पे स्वत इति पक्षं तावदाह— **अनुभूत्येति** । एवकारो विरोधशङ्कानिरासार्थः । सत्यसती वेति विकल्प्ये सतीति पक्षस्यैवाङ्गीकारात्तत्र पूर्वोक्तं विरोधं शङ्कते— **कथमिति** । अविद्यमानस्वाभावबोधने बुद्धेर्भ्रान्तित्वं स्यादिति भावः । स्वाभावस्य हि स्वकालवर्तित्वे विरोधः, तथाग्रहणेन च भ्रान्तित्वं स्यात्; इह तूभयमपि नास्तीत्यभिप्रायेण प्रत्याह— **न हीति** । समकालत्वनियमो हि संयोगादिसंबन्धे, अत्र न तथेति ज्ञापयितुं **विषयीकारोक्तिः** । तदेव स्थापयति— **अतीतेति** । यथा ग्राहकविशेषे प्रत्यक्षे * सन्संप्रयोगे इत्यादिना ग्राह्यसमकालत्वमुच्यते, तथा ग्राह्यविशेषधीप्रागभावे ग्राहकसमकालत्वमस्तीति सोपालम्भं शङ्कते— **अथेति** । किमयं नियमस्त्वदन्यैरिव त्वयाऽपि क्वचिदप्यदृष्ट एवोच्यते, उत दृष्ट इति विकल्पं मत्वा आद्यमाक्षिपति— **किमिति** । **दृष्टम्**— प्रमितमित्यर्थः । अदर्शने तदुक्तिर्युक्ता न स्यात् । यथादृष्टार्थवादित्वं च न स्यादिति भावः । दृष्टत्वाभ्युपगमे दोषमाह— **हन्तेति** । अनेन हर्षमनुकंपां वा द्योतयति । धीप्रागभावं निरूप्यता तत्रैव प्रमाणमुपन्यस्तमिति परस्य जल्पोऽयम् । स्वान्यप्रागभावसमकालत्वनयात्स्वप्रागभावसमकालत्वदृष्टिर्भ्रान्तिरेव; अतस्ते यथार्थदर्शित्वमपि न स्यादित्याह— **तत्प्रागभावमिति** । अनादिब्रह्मस्वरूपमेव आगामिनी मुक्तिरित्युन्मादोन्मेषमेवैवं वक्तुमर्हतीति किंशब्दाभिप्रायः । ननु अविद्यमानग्रहे सर्वं सर्वत्र सर्वदा गृह्येत; प्रत्यक्षेऽपि भिन्नकालं ग्राह्यमिति वदद्भिः सौत्रान्तिकैश्च किमपराद्धमित्यत्राह— **इन्द्रियेति** । अस्मदादीति विशेषणे तात्पर्यम्; योगिज्ञानस्यानन्तरोक्तेः । क्वचिल्लिङ्गभूतेन्द्रियजन्यज्ञानत्यवच्छेदाय प्रत्यक्षोक्तिः । दीपादीनामपि स्थितिक्षणेऽक्षसंप्रयोगात्तत्क्षणे जायमाना धीस्तद्विषयैवेति समकालत्वं सिद्धम् । नश्यत्क्षणसंबन्धस्तु धियं जनयतीत्यत्र न प्रमाणम्; तत्सद्भावेऽपि अगत्या नावन्मात्रे कालभेदः । तेन च भिन्नकालस्यापि ग्राह्यत्वं वदतामस्माकमभिमतसिद्धिः । यद्वा, वर्तमानस्येन्द्रियसंयोगस्यातीतानागतनिष्टत्यायोगात्कारणभूतस्य संयोगस्य स्वसमकालवर्तिग्राहकत्वं तत्कार्ये प्रत्यक्षज्ञाने लक्षणयोक्तम् । अतोऽत्र नातिप्रसङ्गः । न च भ्रान्तितुल्यत्वम्; यदा विषयः, तदा तथैव ग्रहणात् । ननु अनुमानागमजन्यज्ञानयोरपि क्वचित्त्वसमकालवर्तिविषयत्वं दृष्टम्; यथा नित्यविषयेषु स्मार्तानुमानादिषु च, तस्मान्नोक्तनियमः; ज्ञानत्वादिकमेव प्रयोजकं स्यादित्यत्राह— **न सर्वेषामिति** । अयं भावः— नित्यप्रभृतिषु ज्ञानस्य समकालत्वं न धीत्वादिप्रयुक्तम्; व्यभिचारात् । अस्मदादीन्द्रियजन्यप्रत्यक्षस्य तु नियतोऽयं स्वभाव इति । **ज्ञानानामिति** भ्रान्तिप्रमित्योः प्रत्यक्षपरोक्षयोश्च सामान्योपादानम् । **चकारात्प्रत्यक्षाणां च** । ज्ञानत्वादित्रिकस्याप्रयोजकत्वं व्यभिचारेण व्यनक्ति— **स्मरणेति** । भ्रान्तिरपि स्मरणेनोपलक्ष्यते । अबाधितस्मृतेः प्रमाणत्वमिच्छतां पक्षेऽपि प्रमाणत्वाप्रयोजकत्वोक्तिरेवोत्तरम् । स्मरणशब्दश्च यथार्थायथार्थसाधारणः । **आदिशब्देन** मुक्तादिप्रत्यक्षसंग्रहः । **ग्रहणदर्शनात्**—ग्रहणस्य प्रमितत्वादित्यर्थः । ननु प्रमेयव्याप्यं हि प्रमाणम्; अन्यथा क्वचिदर्थशून्यत्वेऽप्यविरोधात्, तस्मात्प्रमितेः कथं स्वविषयभिन्नकालत्वम्? तत्राह— **अत इति** । समकालत्वनियमं हित्वा यथादर्शनं व्यवस्थापनादिति

वावत् । एवकारः चोद्यनिरासस्यैव परिहारमन्यत्वार्थः । अयं भावः— यदि मानमेययोरविनाभावः समकालत्वेन, तदाऽतीतादिविषयप्रमितीनां प्रमात्वं न स्यात् । व्याप्तिश्च कार्यकारणादिभिः । तथाऽपि कारणाद्यनुमाने भिन्नकालत्वाऽपि दृष्टेति । भिन्नकालत्वं तत्रतत्र दृष्टम् । तथाऽनुभूतिप्रागभावप्रमाणस्यापि स्यात् । अन्यथा कथं बुद्धेरर्थसंबन्धः । न च दीपोऽतीतं प्रकाशयतीति । अत्रात एवेत्यभिप्रेतं निवृणोति— न हीति । प्रमाणस्य अर्थसंबन्धः न हि स्वकालवर्तिनाऽविनाभाव इत्यन्वयः । किं तर्ह्यत्र विना न भवतीति विवक्षितमित्यत्राह— अपि त्विति । तथाविधाकारः— तद्देशत्वादिसंबन्धित्वप्रकारः । मिथ्यात्वप्रत्यनीकता—अनारोपितत्वम् । भ्रान्तिशङ्कोद्धारक्रमसूचनाय व्यतिरेकोक्तिः । अत्र प्रसङ्गात्परोक्तमर्थान्तरमपि निरस्यति— अत इति । भिन्नकालस्यापि विषयत्वस्थापनादित्यर्थः । नष्टेऽपीति वर्तमानत्वसंग्रहः । नष्टविषयस्मृतिन्यायाद्वर्तमानविषयस्मृतावपि बाह्यविषयत्वं त्याज्यमिति मन्यते । अत्रैवमुत्तरम्— स्मृतेर्बाह्यविषयत्वाभावे निर्विषयत्वं वा, स्वमात्रविषयत्वं वा, कल्पितस्वाकारविषयत्वं वा, आन्तरवस्त्वन्तरविषयत्वं वा स्यात् ? नाद्यः, अयुक्तत्वादनिष्टत्वाच्च । न द्वितीयः, अत एव, योगाचारविजयप्रसङ्गात्, स्वरूपप्रकाशातिरिक्तस्मृत्यसिद्धिप्रसङ्गाच्च । न तृतीयः, तुल्यन्यायतया । नापि चतुर्थः, तादृग्वस्त्वन्तरे मानाभावात् । अनुभूतिविषयस्वरूपान्तःकरणवृत्तिरेव स्मृतेर्विषय इति चेन्न ; स्मृतिरूपायास्तदतिरिक्ताया वा निष्प्रमाणकतया दत्तोत्तरत्वादिति । एतेन स्मृत्युदाहरणेन प्रत्यक्षेतरमानेषु सर्वेष्वपि बाह्यतुल्यान्तःकरणविकृतिरेव बाह्यवत् भातीति पक्षोऽपि निरस्तः ॥

बाह्यत्वेन प्रतीतं चेत् यद्बाह्यं क्वापि कल्प्यते । अविशेषेण सर्वत्र तथा कल्पितिः प्रसज्यते ॥ ४६२ ॥

अथोच्येत— न तावत्संवित्प्रागभावः प्रत्यक्षावसेयः ; अवर्तमानत्वात् । न च प्रमाणान्तरावसेयः; लिङ्गाद्यभावात् । न हि संवित्प्रागभावव्याप्तमिह लिङ्गमुपलभ्यते । नानुपपत्तिरपि कस्यचित् दृश्यते । न चागमस्तद्विषयो दृष्टचरः । अतस्तत्प्रागभावः प्रमाणाभावादेव न सेत्स्यतीति । यद्येवं स्वतःसिद्धत्वविभवं परित्यज्य प्रमाणाभावेऽवरुद्धश्चेत्, योग्यानुपलब्ध्यैवाभावः समर्थित इत्युपशाम्यतु भवान् ॥

यदि तत्र स्वतः स्वप्रागभावं साधयता प्रत्यक्षविशेषे वर्तमानग्राहित्वनियमो नान्यत्रेति विभक्तम्, तत्र केन प्रमाणेन जनिता धीः स्वाभावग्राहिणीति विकल्पगर्भां प्रत्युक्तिं शङ्कते— अथेति । तत्र संप्रतिपन्नांशाभिप्रायेणाह— न तावदिति । न प्रत्यक्षावसेयः— प्रत्यक्षस्वरूपया स्वप्रतियोगिन्या धिया दुर्ग्रह इत्यर्थः । परोक्षग्राह्यत्वमपि निरस्यति— न चेति । लिङ्गाद्यभावं पृथग्व्यनक्ति— न हीति । अनुमानार्थापत्त्योरदूरविप्रकर्षात् अव्यवहितोक्तिः । स्वेष्टस्याप्यत्रोपमानस्यात्यन्तासंभवादनुक्तिः । फलितं स्वाभिमतषष्ठप्रमाणबाध्यत्वमाह—अत इति । प्रमाणाभावात्— प्रमाणपञ्चकनिवृत्तेरित्यर्थः । तथा च शाबरम्— * अभावोऽपि प्रमाणाभावो नास्तीत्यस्यार्थस्येति । कारिका च—

* प्रमाणपञ्चकं यत्र वस्तुरूपे निवर्तते । वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥ इति ।

परोक्तमनुपपन्नोक्तिं दूषयितुमाह— यद्येवमिति । प्रागस्मदुपक्षिप्तयैवेत्येवकाराभिप्रायः । ग्रहणाभावात् संवित्प्रागभा-

वस्याभावं वदतो निषेध्यवत्त्वव्याघातः स्यादित्यभिप्रायेणानूक्तमेव विवृणोति— स्वत इति । चेदित्येतत् केषुचित्कोशेषु न दृश्यते। तदा यदीत्यादिकं अवरूढ इत्यन्तमेकं वाक्यम् । यथा त्वया स्वतःसिद्धत्ववलं त्यक्तम्, तथाऽहमपि स्वतः स्वाभावग्रहणमादृत्य त्वदुपक्षिप्तं प्रतियोगिविषयप्रमाणाभावमेव संविदभावे प्रमाणयामीत्याह— योग्येति । प्रतिबन्दिमात्रशङ्काव्युदासाय समर्थितशब्दः । प्रत्यक्षसामग्रीप्रविष्टेन षष्ठप्रमाणेन ज्ञानस्याभावं साधयन् महाप्राज्ञोऽसीत्युपहासार्थ इह भवच्छब्दः ।

स्वज्ञानाभावदृष्ट्या हि ज्ञानिनस्त्वं प्रपद्यसे । अज्ञातं पृच्छ्यमानश्च न जानामीति भाषसे ॥ ४६३ ॥
परधीजननार्थं च त्वया वाक्यं प्रयुज्यते । शृणोषि च स्वधीसिद्ध्यै कथं नित्यां ब्रवीषि ताम् ॥४६४॥
प्रत्यक्षाद्यैः सुषुप्त्यादौ न हि धीः क्वापि गम्यते । ग्राह्यग्राहकधीस..... ॥ ४६५ ॥
पूर्वोत्तरसुषुप्तयादिग्राहिणी च स्वयं मतिः । स्वाभावमपि गृह्णाति तत्तन्मानसमुद्भवा ॥ ४६६ ॥
अतो यथोचितैर्मानैः स्वस्यान्येषां च संविदः । विषयादिविशिष्टायाः प्रागभावः प्रसाध्यते ॥ ४६७ ॥
[ज्ञानद्रव्यस्य नित्यत्वं युक्तिभिः स्थाप्यते न तु । तत्तत्प्रमृतिभेदानामुत्पत्त्यादीति भाष्यते ॥ ४६८ ॥]
तत्र यद्यपि नित्यत्वं ज्ञानद्रव्यस्य वक्ष्यते । तथाऽपि प्रसृताकारे प्रागभावादिभाषणम् ॥ ४६९ ॥
मृद्घटादिनयाद्बुद्धेः स्थिरागन्तुकवर्ष्मणः । नित्यानित्यत्ववादानां यथाभागं प्रमाणता ॥ ४७० ॥
परस्तु सविकारत्वं श्रुतं ज्ञानस्य नेच्छति । असत्पक्षसमानत्वमतस्तेनात्र दुर्वचम् ॥ ४७१ ॥

किं च, प्रत्यक्षज्ञानं स्वविषयं घटादिकं स्वसत्ताकाले सन्तं साधयत् तस्य न सर्वदा सत्तामवगमयत् दृश्यत इति घटादेः पूर्वोत्तरकालसत्ता न प्रतीयते । तदप्रतीतिश्च संवेदनस्य कालपरिच्छिन्नतया प्रतीतेः। घटादिविषयमेव संवेदनं स्वयं कालानवच्छिन्नं प्रतीतं चेत्, संवेदनविषयो घटादिरपि कालानवच्छिन्नः प्रतीयेतेति नित्यः स्यात् । नित्यं चेत्संवेदनं स्वतःसिद्धं नित्यमित्येव प्रतीयेत । न च तथा प्रतीयते ।

उक्तसंविदनित्यत्वग्राहकानुग्रहक्षमम् । प्रसङ्गत्रितयं वक्तुमथ किञ्चेति भा[ष्य]षते ॥ ४७२ ॥

किं सर्वलोकविदितं सविषयमेव ज्ञानं नित्यमिति त्वया साध्यते, उत निर्विषयमन्यदिति विकल्पं मत्वा प्रथमे बाधका उच्यन्ते । अत्रार्थापत्तिरेका, अस्या अनुग्राहकद्वयमिति केचित् । प्रत्यक्षज्ञानम्—असदादीन्द्रियजन्यधीरित्यर्थः, योगिप्रत्यक्षं हि त्रैकालिकविषयमिति । स्वशब्दावत्र धीविषयौ । साधयत् व्यवहारानुगुणीकुर्वत् । सर्वदा—यावत्स्वविषयकालम् । पूर्वोत्तरकालसत्ता—प्रागभावप्रध्वंसकालावच्छिन्नसत्ता । न प्रतीयते-न व्यवहारानुगुणीभवतीत्यर्थः। तेन ज्ञाननित्यत्वस्य को विरोध इत्यत्राह— तदिति । कालपरिच्छिन्नतया स्वविषयावच्छिन्नकालमध्ये अल्पतरकालवर्तितयेत्यर्थः । घटादेर्यावत्सत्तं प्रकाशमानत्वं प्रसज्यतम् ; न केवलं तावन्मात्रम्, नित्यत्वमपि प्रसक्तमित्याह— घटादीति । असदादीनां घटादिप्रत्यक्षमतीतानागतानालम्बनं यावत्स्वकालं स्वविषयसत्तां स्थापयतीति भावः ।

प्रत्यक्षज्ञानमित्यादि स्यादित्यन्तमेकतर्कविषयं वा । एवं वेद्यप्रकाशव्यवस्थया तदनित्यत्वाच्च विरोध उक्तः । वित्तिप्रकाशव्यवस्थयाऽप्याह— नित्यमिति । स्वतःसिद्धमिति हेतुगर्भम् । बुद्धेरनित्यत्वं बुद्ध्यन्तरं चानिच्छता त्वयाऽन्यतो धीनित्यत्वस्य वक्तुमयुक्तत्वादित्यर्थः । एवकारः संशयाद्यसंभवप्रसञ्जनार्थः ।

विषयान्तरेण [वित्तित्वेनैव] तु धियो नित्यत्वं यदि साध्यते । अभावप्रतियोगित्वमपि तद्वत् प्रसाध्यताम् ॥
विषयीकृत्यनर्हत्वात्प्रागभावादि निर्वदन् । अन्योन्याभावमप्येवं त्यक्त्वा मिथ्यैक्यमिच्छतु ॥ ४७४ ॥

एवमनुमानादिसंविदोऽपि कालानवच्छिन्नाः प्रतीताश्चेत्स्वविषयानपि कालानवच्छिन्नान् प्रकाशयन्तीति ते च सर्वे कालानवच्छिन्ना नित्याः स्युः ; संविदनुरूपस्वरूपत्वाद्विषयाणाम् । न च निर्विषया काचित्संविदस्ति; अनुपलब्धेः । विषयप्रकाशन[स्वभाव]तयैवोपलब्धेरेव हि संविदः स्वयंप्रकाशता समर्थिता । संविदो विषयप्रकाशतास्वभावविरहे सति स्वयंप्रकाशत्वासिद्धेः अनुभूतेरनुभवान्तराननुभाव्यत्वाच्च संविद्वस्तुच्छतैव स्यात् । न च स्वापमदमूर्च्छादिषु सर्वविषयशून्या केवलैव संवित् परिस्फुरतीति वाच्यम् ; योग्यानुपलब्धिपराहतत्वात् । तास्वपि दशास्वनुभूतिरनुभूता चेत् तस्याः प्रबोधसमयेऽनुसन्धानं स्यात् ; न च तदस्ति ॥

प्रत्यक्षधियो नित्यत्वं पुरस्कृत्योपलम्भविरोधो विषयनित्यत्वं च प्रसञ्जितम् ; परोक्षधियामपि नित्यत्वे तत्प्रसञ्जयति— एवमिति । प्रत्यक्षोक्तप्रकारसाम्यादित्यर्थः । संविद इति । ननु अनुमानादिधियां न स्वकालवर्तिप्रकाशननियमः । सत्यम्, अयंत्विह भावः— यत्र आसां वर्तमानप्रकाशकत्वं तत्र संविदवच्छिन्नकालवर्तित्वग्रहाद्विषयनित्यत्वप्रसक्तिः स्यादेव । अनागतादिप्रकाशनेऽपि धीनित्यत्वे तदवच्छिन्नकालप्रतियोगिकस्य विषयातीतत्वादेरसिद्धि. । यत्र लिङ्गस्य प्रत्यक्षत्वं तत्र तन्नित्यत्वं पूर्वोक्तप्रकारेण प्राप्तम् । तथा च तद्व्यापकस्यापि नित्यत्वप्रसक्तिरिति । ननु स्वयं नित्याऽपि घटादिसंवित्कदाचिदेव घटादीनुल्लिखतु ; मैवम्—

अर्थोल्लेखस्वभावा चेन्मितिस्तस्य विसर्जने । निःस्वभावा प्रसज्येत तथा वा परिणामिनी ॥ ४७५ ॥
अथ निर्विषयत्वं तत्स्वभावस्तादृशी कथम् । अर्थबोधस्वरूपा स्यादवस्थाद्वयवर्जनात् ॥ ४७६ ॥

कालानवच्छिन्नशब्देन कालादिसर्वानुगतनित्यशब्दनिमित्तोक्तिः । अतो न पुनरुक्तिः । यद्वा स्वन्मतेऽपि देहिनां कालावच्छिन्नतया भातानामपि श्रुत्यादैस्तद्विपरीतत्वं सिद्धम् ; तद्वत्संविदि तद्विषयेषु चापातप्रतीत्यविपरीतं नित्यत्वमनित्यत्वं च स्यादित्याह— संविदिति । संविदनुरूपत्वं तत्प्रकाशितप्रकारेणावस्थानम् । अयंत्विह भावः—संविदेव हि नीलपीतादिव्यवस्थायां शरणम् ; स्वतःप्रमाबाधे त्वन्यथा ; तव तु बाधकज्ञानस्याप्युक्तरीत्या स्वरूपतो विषयतश्च नित्यत्वप्रसक्तया अध्यासानुदयप्रसङ्गः । ततश्च बाधकासंभवाद्यथाप्रकाशं विषयनित्यत्वं सिध्येदिति । भवतु सविषयस्यान्तःकरणवृत्तिविशेषस्य तदवच्छिन्नचैतन्यस्य च उत्पत्त्याद्युपलब्धिः, विषयाश्रयशून्या तु संवित्तिरित्या

स्यादिति पूर्वोक्तविकल्पयोः कोट्यन्तरं निरस्यति— न निर्विषयेति। एतेन निराश्रयत्वमप्युपलक्ष्यते। यद्वा, विषिणोतीति विषयः, विशेषेण संबध्नातीत्यर्थः; तेन संविदवच्छेदकं वेद्यं वेदिता च संगृह्यते। किमत्र घटादिविषयसंविदोऽन्या काचिन्निर्विषयेत्युच्यते, उत वस्तुवृत्त्या सैवेति विकल्पे द्वयोरप्ययोगमभिप्रेत्याह— काचिदिति। तत्रैव दृष्टेस्तदभावे तदसिद्धिरित्युक्तम्। उभयत्र बाधकमाह— अनुपलब्धेरिति। योग्यत्वे सतीति विशेषणीयम्। पराभ्युपगतिविरोधमप्याह— विषयेति। प्रसिद्धायाः संविदो निर्विषयत्वं वा तादृशसंविदन्तरं वा युक्तिशास्त्राभ्यां साधयाम इत्यत्रानिष्टमाह—संविद इति। विषयप्रकाशतास्वभावशब्देन प्रागुक्तानुमानं सूच्यते। अयं भावः— विषयप्रकाशत्वं संविदः स्वरूपं धर्मो वा? आद्ये तन्निवृत्तिं वदतः कथं धर्मिसाध्ययोः सिद्धिस्तव? द्वितीये तस्य स्वप्रकाशत्वसमकालतयैव दृष्टेस्तदभावे तदसिद्धिरिति। स्वतः परतो वा अप्रकाशमानं तुच्छं मन्यसे; संविदि तु उभयासंभवात्तुच्छाद्यावृत्तिर्दुर्लभेत्यवधारणाभिप्रायः। यद्वा सत्त्वकोटिर्दूरनिरस्ता; अनिर्वचनीयकोटिरपि अलभ्येति भावः। अनुभूतित्वात्तत्सिद्धिरिति चेत्; अनुभूतित्वं नाम विषयप्रकाशत्वं चेत्, तदुदूषितमेव। स्वप्रकाशत्वं चेत् साध्यविशेष इति।

स्वावच्छेदकनिर्मुक्तसंविन्नित्यत्वमिच्छता। संयोगच्छेदनादौ च किं न तादृक्त्वमिष्यते ॥ ४७७ ॥
घटाकाशादिनीतिश्च त्वया संविदि दुर्भणा। तत्तत्संयोगविश्लेषतुल्यागन्तुगुणोज्झनात् ॥ ४७८ ॥

अनुपलब्धेरित्युक्तस्यावस्थान्तरेष्वसिद्धिशङ्कां परिहरति—न च स्वापेति। आदिशब्देन समाध्यवस्थासंग्रहः। केवला— अहङ्कारविगमान्निराश्रयेत्यर्थः। अत्र दत्तोत्तरत्वमभिप्रेत्याह— योग्येति। ननु स्वापादिदशावर्तिनी जागरवर्तिनी वा योग्यानुपलब्धिरिहोपलभ्यते? नाद्यः; तदानीमिदानीं वा तदित्यसत्. अन्यस्माश्रययोगादेरद्याप्यनुपपादनात्, तात्त्विकानुपलम्भस्यानुपलम्भात्। न द्वितीयः; कालान्तरसंविदः कालान्तरे प्रत्यक्षयोग्यत्वायोगात्; तत्तदधीनव्यतिरिक्तहेतुसाकल्यं हि योग्यत्वम्। अतो योग्यानुपलब्धिरगृहीतत्वादिति हेतुरसिद्धः; तत्राह— तास्विति। अयं भावः— स्वापादिषु संविदासीदिति अद्यतनोपलब्धिस्तावत् योग्यानुपलब्ध्या निरस्ता। तदानींतनसंविदः तदातनोपलब्धिश्च व्यापकानुपलब्ध्या बाधितेति। स्मर्तव्यस्य स्मरणमुपलम्भव्यापकम्; तदभावात्तदभाव इत्यभिप्रायेणाह— न च तदिति।

ननु अनुभूतस्य पदार्थस्य स्मरणनियमो न दृष्टचरः, अतः स्मरणाभावः कथमनुभवाभावं साधयेत्? उच्यते—निखिलसंस्कारतिरस्कृतिकरदेहविगमादिप्रबलहेतुविरहेऽप्यस्मरणनियमोऽनुभवाभावमेव साधयति। न केवलमस्मरणनियमादनुभवाभावः; सुप्तोत्थितस्य इयन्तं कालं न किञ्चिदहमज्ञासिषमिति प्रत्यवमर्शेनैव सिद्धेः। न च सत्यप्यनुभवे तदस्मरणनियमो विषयावच्छेदविरहादहङ्कारविगमाद्वेति शक्यते वक्तुम्; अर्थान्तराननुभवस्यार्थान्तरास्मरणहेतुत्वाभावात्। तास्वपि दशास्वहमर्थोऽनुवर्तत इति च वक्ष्यते ॥

दृष्टान्तानुपन्यासपक्षत्यागापादनस्य तदभावलिङ्गत्वं नास्तीति चोदयति— नन्विति। विशिष्टरूपेण व्याप्तिं स्थापयति— उच्यत इति। निरखिलशब्दः प्राचुर्याभिप्रायः; अन्यथा जातमात्रस्य स्तन्याभिलाषायोगात्। तिरस्कृतिः इह नाशः प्रतिबन्धो वा। * प्रायणान्तरकक्लेशात्मस्मृतिव्यसनादपीत्यादिषु प्रसिद्धमाह— देहविगमादीति। प्रभृतं सुखमपि आदिशब्देन संगृहीतम्। जातिस्मरादीनां तादृशप्रबलप्रतिबन्धकसद्भावेऽपि स्मृतिरदृष्टातिशयाद्भवति; तदभावादन्येषु देहविगमादेः प्रबलत्वम्; दुर्बलव्याक्षेपादेर्विरोधित्वनियमो न स्यादिति भावः। न हि अन्यदेहविगमादिभिरन्यथासिद्धिरित्यवधारणाभिप्रायः। नात्र साधकस्य स्मरणस्याभावमात्रम्; किं तु साक्षान्निषेधबुद्ध्या बाध एवेत्याह— न केवलमिति। ननु सुषुप्तिकालः तदवच्छिन्नं सर्वविषयज्ञानं च तदानीमननुभूतं कथमिदानीं परामृश्यते? इत्थम्— सुषुप्तिकालस्तावदनुमानादिसिद्धः; तदानीं यदि किञ्चिन्मयाऽनुभूतं तदद्य मया स्मर्येत, न च स्मर्यत इत्यस्मरणनियमाद्धि तदानीमनुभवाभावसिद्धिरिति। * सुखमहमस्वाप्समित्यतीतकालावच्छिन्नं स्वापं परोऽप्युदाहरति। अतास्मर्यमाणस्वान्यथासिद्धिमनूद्य निरस्यति— न चेति। सुषुप्तौ बाह्यार्थाः सन्तोऽपि नोपलभ्यन्ते; तच्छरीरस्थोऽहङ्कारोऽपि लीयते; अज्ञानं सुखरूप आत्मा च साक्षित्यक्षेण गृह्यत इति पराभिमतप्रकारेणायमनुवादः। यदि विषयाश्रयविरहेण स्मृत्यसंभवः; तदा अनुभवस्वरूपमपि तद्विरहे न स्यात्; सर्वत्र तद्वत्तयैव तस्यापि दृष्टेरित्यभिप्रायेण अशक्यत्वोक्तिः। ननु सुषुप्तावाश्रयाभावात् वृत्त्यसिद्धेस्तस्यास्मरणम्; साक्षिस्फुरणं तु न संस्कारजनकम्; अतोऽस्मरणमेव स्यात्। मैवम्, त्वदभिमतपरामर्शस्याप्यसिद्धिप्रसङ्गादित्यभिप्रायेण न शक्यते वक्तुमित्युक्तम्। अतिप्रसङ्गसूचकं हेतुमाह— अर्थान्तरेति। अत्राहङ्कारशब्देन त्रिगुणकार्यविवक्षायामाप्रलयात्तस्यावस्थानमस्ति; अहमर्थभूतप्रत्यगात्मविवक्षायां प्रलयेऽपि स्थायिनस्तस्य कथं सुषुप्तौ विच्छेद इत्यभिप्रायेणाह— तास्वपीति।

ननु स्वापादिदशास्वपि सविशेषोऽनुभवोऽस्तीति पूर्वमुक्तम् सत्यमुक्तम्, स तु आत्मानुभवः। स च सविशेष एवेति स्थापयिष्यते। इह तु सकलविषयविरहिणी निराश्रया च संविन्निषिध्यते। केवलैव संविदात्मानुभव इति चेन्न; सा च साश्रयेति हि उपपादयिष्यते। अतोऽनुभूतिः सती स्वयं स्वप्रागभावं न साधयतीति प्रागभावासिद्धिर्न शक्यते वक्तुम्। अनुभूतेरनुभाव्यत्वसंभवोपपादनेनान्यतोऽप्यसिद्धिर्निरस्ता। तस्मान्न प्रागभावाद्यसिद्ध्या संविदोऽनुत्पत्तिरुपपत्तिमती॥

सुषुप्तावनुभवाभावं वदतः प्राक्तनस्ववचनविरोधः स्यादिति चोदयति— नन्विति। पूर्वोक्ततात्पर्यं न जानासीति प्रतिवक्ति—सत्यमिति। विरोधव्युदासाय विवक्षितं विशेषं व्यनक्ति— स इति। तुशब्दोऽनुभूत्यनुभवव्यवच्छेदार्थः। आत्मानुभवः— स्वयंप्रकाशस्याहमर्थस्य।

यदप्यस्या अनुत्पत्त्या विकारान्तरनिरसनं, तदप्यनुपपन्नम्; प्रागभावे व्यभिचारात्। तस्य हि जन्माभावेऽपि विनाशो दृश्यते। भावेष्विति विशेषणे तर्ककुशलताऽऽविष्कृता

भवति। तथा च भवदभिमता अविद्या अनुत्पन्नैव विविधविकारास्पदं तत्त्वज्ञानोदया-दन्तवती चेति तस्यामनैकान्त्यम्। तद्विकाराः सर्वेऽपि मिथ्याभूता इति चेत्; किं भवतः परमार्थभूतोऽप्यस्ति विकारः? येनैतद्विशेषणमर्थवद्भवति, न ह्यसावभ्युपगम्यते॥

स्वधर्मप्रमाणक्षणवैधर्म्यमाह— किमिति। विशेषणसाफल्यार्थं कचित् सत्यविकाराभ्युपगमेऽपसिद्धान्तमभि-प्रेत्याह— न हीति। यत् सत्यविकारवत् तदुत्पन्नमिति व्यतिरेकव्याप्तिश्च त्वया दुर्वचा; घटादेः सत्यविकारराहित्ये साध्याभाववद्व्यावृत्ततया न व्यतिरेकदृष्टान्तत्वम्; केवलान्वयिदृष्टान्तत्वविवक्षायां हेतोः अस्माभीष्टं व्यावृत्तिसाधकत्वं भज्येत, व्यर्थं च भावत्वविशेषणम्; प्रागभावस्यापि त्वन्मते परमार्थविकाररहितत्वात्।

यदपि अनुभूतिरजत्वात् स्वास्मन् विभागं न सहत इति, तदपि नोपपद्यते; अजस्यैवात्मनो देहेन्द्रियादिभ्यो विभक्तत्वात्। अनादित्वेन चाभ्युपगताया अविद्याया आत्मनो व्यतिरेकस्यावश्याश्रयणीयत्वात्। स विभागो मिथ्यारूप इति चेत्, जन्म-प्रतिबद्धः परमार्थविभागः किं क्वचिद्दृष्टस्त्वया? अविद्याया आत्मनः परमार्थतो विभागाभावे स्वतुतो ह्यविद्यैव स्यादात्मा। अबाधितप्रतिपत्तिसिद्धदृश्यभेदसमर्थनेन दर्शनभेदोऽपि समर्थित एव; छेद्यभेदाच्छेदनभेदवत्॥

हेतुरयं साध्यान्तरेऽपि दुष्ट इति वक्तुमनुवक्ति— यदपीति। इहापि हेतोरसिद्धिविपक्षवृत्तिश्च समेत्य-भिप्रायेणाह— तदपीति। अत्र यतः कुतश्चिद्वा विजातीयाद्वा सजातीयाद्वा भेदो निषिध्यत इति विकल्पे, त्रिष्वपि प्रागभावे व्यभिचारः स्पष्टः। प्रथमद्वितीययोः प्रामाणिकमतेन विपक्षवृत्तित्वमाह— अजस्येति। * न जायते म्रियते वा विपश्चित्, * पिण्डः पृथग्यतः इत्यादिकमिह स्मर्तव्यम्। यद्वा, बाधोऽत्र प्रदर्श्यते; नव खलु अनुभूतिरेवात्मा; स चानुत्पन्नो देहादिविलक्षणश्च, त्वयाऽपि श्रुत्याऽपि स्थाप्यत इति। परमतेन विपक्षवृत्तित्वमाह— अनादित्वेनेति। आत्मा ह्यविद्याव्यतिरिक्तः; तस्यात्मन्यद्वैतश्च त्वयैव साध्यत इति भावः। प्राग्वत् साध्यविशेषणं शङ्कते— स इति विभाग इह भेदः। तथैव मिथ्यात्वविशेषणवैयर्थ्यव्याप्तिभङ्गादिकं च व्यनक्ति— जन्मेति। प्रतिबद्धः— व्याप्त इत्यर्थः। सर्वोपप्लवकमनिष्टान्तरमाह — अविद्याया इति। हिः प्रसङ्गस्य दुस्तरत्वप्रसिद्ध्यर्थः। एवकारः स्वपरप्रतिक्षिप्तचार्वाकादिमतोत्थानं व्यनक्ति।

किं च धीस्ते स्वपुष्पादेर्भिन्नाऽभिन्नाऽथ वा भवेत्। भेदेऽसौ बाधितो हेतुरभेदे तुच्छतादयः॥ ४७९॥

तृतीयमपि कल्पं निरस्यति— अबाधितेति। ननु दृश्यभेदेऽपि दर्शनैक्यं दृष्टमिष्टं च; छेद्यभेदात् इत्यादि चात्रासाधकमयुक्तं च; एकेन छेदनव्यापारेण अनेकेषु छिन्नत्वदर्शनात्। मैवम्; दृश्यभेदसमर्थनन्यायेना-बाधितप्रतिपत्तिसिद्धतया दर्शनभेदोऽपि सिध्यत्येवेति तात्पर्यात्; दृष्टान्तोक्तेश्च। घटाद्यवच्छिन्नाकाशैक्यदृष्टान्तवादिनां

विरुद्धदृष्टान्तसंभवख्यापनपरत्वादिति केचित्। न्यायसुदर्शनोक्तं तु ब्रूमः— * दृश्यभेदो दृशिकर्मत्वाकारेण भेदः; यदि सर्वत्र एकैव दृशिः तर्हि दृष्टादृष्टविभागो न स्यात्; सन्ति हि सर्वेतरदृशीनां प्रतिनियता दृश्यभेदाः। एवं छेद्यभेदोऽपि छिदिकर्मत्वाकारेण भेदः। एकेन छेदनेन यत्र छिन्नं तस्य पूर्वच्छिन्नाद्भिन्नत्वेन तद्विषयच्छेदनमपि पूर्वच्छेदनाद्भिन्नम्। तद्वदिहेति निदर्शनं ग्राह्यम्। प्रयोगश्च—विगीता दृशिः एतद्दृशिगोचरानालम्बिदृश्योऽन्या तद्गोचरानालम्बित्वात् घटवत्। व्यतिरेकतो वा यथा सैव दृशिरिति।

* अथ वाऽनुमितिर्मा भूत् प्रत्यक्षेणैव सिध्यति। दृष्टादृष्टतया सिद्धैर्विषयैर्भिन्नता धियाम्॥ [इति।]

यदपि नास्या दृशेर्दृशिस्वरूपाया दृश्यः कश्चिदपि धर्मोऽस्ति, दृश्यत्वादेव तेषां न दृशिधर्मत्वमिति च; तदपि स्वाभ्युपगतैः प्रमाणसिद्धैर्नित्यत्वस्वयंप्रकाशत्वादिधर्मैरुभयमनैकान्तिकम्। न च ते संवेदनमात्रम्; स्वरूपभेदात्। स्वसत्तयैव स्वाश्रयं प्रति कस्यचिद्विषयस्य प्रकाशनं हि संवेदनम्। स्वयंप्रकाशता तु स्वसत्तयैव स्वाश्रयाय प्रकाशमानता। प्रकाशश्च चिदचिदशेषपदार्थसाधारणं व्यवहारानुगुण्यम्। सर्वकालवर्तमानत्वं हि नित्यत्वम्। एकत्वमेकसङ्ख्यावच्छेद इति। तेषां जडत्वाद्यभावरूपतायामपि तथाभूतैरपि चैतन्यधर्मभूतैस्तैरनैकान्त्यमपरिहार्यम्। संविदि तु स्वरूपातिरेकेण जडत्वादिप्रत्यनीकत्वमित्यभावरूपो भावरूपो वा धर्मो नाभ्युपेतश्चेत् तत्तन्निषेधोक्त्या किमपि नोक्तं भवेत्॥

अथ स्वगतभेदनिरासाय पूर्वोक्तं केवलव्यतिरेकिणं केवलान्वयिनं च यदपीत्यादिनाऽनूद्य तदपीत्यादिना दूषयति। दृशिस्वरूपाया इति हेतुपरम्। नित्यत्वादिधर्मपरित्यागेऽपसिद्धान्तो बाधश्च स्यादित्यभिप्रायेण स्वाभ्युपगतैः प्रमाणसिद्धैरित्युक्तम्। अत्र व्यतिरेकिणोऽसाधारणानैकान्तिकत्वमन्वयिनस्साधारणानैकान्तिकत्वं च विभजनीयम्। नित्यत्वादिधर्माणां च धर्मान्तराभ्युपगमेऽनवस्था स्यात्। परिहारार्थं च क्वचित्तिर्धर्मकत्वे प्राप्ते वरं नित्यत्वादेरेव तत्तत्स्वीकरणम्।

मूलच्छेदोज्झितेऽप्यत्र सोढा चेदनवस्थितिः। सधर्मकत्वे सर्वेषां भातत्वाद्वीप्तिस्तथा न किम्॥ ४८०॥
निर्धर्मकत्वधर्मे च नित्यत्वादेर्विशेषणे। अनुभूतेः सधर्मत्वमयत्नादेव सेत्स्यति॥ ४८१॥

अतो नित्यत्वादावन्यत्र वा क्वचिदाश्रयविशेषसद्भावेऽपि धर्मानाश्रयतया सपक्षे दृशित्वादिति हेतुरवर्तमानोऽसाधारणोऽनैकान्तिकः। अत्र हेतुसाध्यधर्मसदसद्भावयोः स्ववचनविरोधबाधादिकमपि द्रष्टव्यम्। बाधितस्यापि व्याप्तिभङ्गादनैकान्तिकोक्किरिति केचित्। दृश्यत्वादित्यत्र तु, किं नित्यत्वादयो धर्माः पक्षीकृताः उत न? आद्ये स्वाभ्युपगमादिविरोधः। द्वितीये विपक्षेषु तेषु वृत्तिरिति। ननु संवित्स्वरूपमेव नित्यत्वादिशब्दैरभिलप्यते; अतो व्यतिरेकिणि सपक्षः अन्वयिनि विपक्षश्च नास्तीत्यत्राह— न चेति। अत्र विरोधगर्भं हेतुमाह— स्वरूपेति। धर्मिस्वरूपाद्धर्मान्तरस्वरूपाच्च

: ।

स्वरूपे संमते यत्र विवादी प्रतिवर्तते । स्वरूपादधिको धर्मस्तत्र सर्वत्र दुस्त्यजः ॥ ४८२ ॥

* वस्तुमात्राभ्युपगमे सत्यपि विधाभेदविवाददर्शनादिति प्रागुक्तमिह प्रतिसन्धेयम् । हेतुव्यावृत्तिसिद्धये धर्मिस्वरूपं तावदाह— स्वसत्तयेति । दीपादिवत्स्वजन्यज्ञानमनपेक्ष्येत्येवकारार्थः । धर्मेषु धर्मितादात्म्यशङ्कातिरेकात् स्वयंप्रकाशत्वम् पूर्वं विविक्ते—स्वयमिति । एवकारः स्वगोचरज्ञाननैरपेक्ष्यार्थः । अतिप्रसङ्गनिरासाय स्वाश्रयग्रहणम् । ननु प्राकट्यं पूर्वपक्षिणा निरस्तं, न वाऽस्माभिः कचित्प्रतिसमाहितम्, तदिह ग्रन्थद्वयोक्ते विषये विषयिणि च कः प्रकाशशब्दार्थः इत्यत्राह—प्रकाशेति । अप्रकाशमानस्य कस्यापि सत्त्वेव न सिध्येदित्यभिप्रायेण अशेषशब्दः । व्यवहारानुगुण्यम्—इह व्यवजिहीर्षातिरिक्तो व्यवहारहेतुविशेषः, उत्पन्ने हि ज्ञाने विषयस्य विषयिणश्च ज्ञानानुत्पत्तिरूपमपि व्यवहारानर्हत्वं निवर्तते । अनेनैव ग्रन्थेन परोक्तं प्राकट्यमङ्गीकृतमिति केचित् ; प्रमेयान्तरविरोधाभावात् । ज्ञानस्य तदनुमेयत्वानङ्गीकारस्तु विशेषः । कालव्यतिरिक्तानुगतं संविदि नित्यत्वमाह—सर्वेति । अशेषनित्यानुगतं कालानवच्छिन्नत्वं प्रागुक्तम् । एकं ब्रह्मेति साधयता परेण न हि मुख्यत्वान्यत्वादिकं साध्यते; अपि तु आत्मद्विस्वादिव्यावर्तकं किञ्चित् । तच्च मतभेदेन गुणपदार्थो वा अतिरिक्तपदार्थो वा, गुणैकत्वं नायनधीविशेषोपस्थाप्यतदितरसमुच्चयराहित्यं वा, अन्यद्वा किमपि स्वरूपातिरिक्तं नानात्वशङ्कानिरासकमेष्टव्यमित्यभिप्रायेणाह— एकत्वमिति । एकसंख्यावच्छेदः— एकसंख्यारूपो व्यावर्तकधर्म इत्यर्थः । एकमिति संख्याया द्व्यादिभ्यो व्यावृत्तिर्वा । प्रकारज्ञानत्वादिधर्मान्तरप्रदर्शनार्थ इतिशब्दः । इति स्वरूपभेदादित्यन्वयः । भावाद्वैतपक्षेणातद्व्यावृत्तिरूपधर्मत्वमातेषामिति । तथाभूतैरपीति । अभावरूपैरपीत्यर्थः । एतेन तेषां निर्धर्मकत्वं सूच्यते । ततश्च व्यतिरेकिणः । चैतन्यधर्मभूतैरिति अन्वयिनोऽनैकान्त्यार्थम् । सर्वधर्मशून्यत्वपक्षे दोषमाह—संविदीति । यथा शौक्ल्यादौ स्वरूपे काण्र्यादिसंशयानर्हतया ततो भेदः तथा संविदि दुर्वचमित्यभिप्रायवान् तुशब्दः । किमपि नोक्तं भवेत्— प्रतिबाधनमिमतं पदान्तरैरनुक्तं च किञ्चिन्नोक्तं स्यात् । ततश्च सिद्धसाधनत्वपौनरुक्त्यादिप्रसङ्ग इति भावः ।

अपि च संवित्सिध्यति वा न वा । सिध्यति चेत्, सधर्मता स्यात । न चेत् तुच्छता; गगनकुसुमादिवत् । सिद्धिरेव संविदिति चेत्, कस्य कं प्रतीति वक्तव्यम् । यदि न कस्यचित्कंचित्प्रति, सा तर्हि न सिद्धिः ; सिद्धिर्हि पुत्रत्वमिव कस्यचित्कंचित्प्रति भवति । आत्मन इति चेत्, कोऽयमात्मा । ननु संविदेवेत्युक्तम् ; सत्यमुक्तम् ; दुरुक्तं तु तत् । तथा हि— कस्यचित्पुरुषस्य किंचिदर्थजातं प्रति सिद्धिरूपतया तत्संबन्धिनी सा संवित् स्वयं कथमिवात्मभावमनुभवेत् ॥

सिद्धन्तु नित्यत्वस्वप्रकाशत्वादयः; स्वरूपप्रकाशमात्रेणापि सधर्मकत्वसिद्धिं वक्तुमाह— अपिचेति । स्वतः परतो वेति विचार [illegible] सिद्धिमात्रं विकल्पयति—संविदिति । सिध्यति—प्रकाशत इत्यर्थः । पूर्वमनुमानद्वयं

बाधितविषयमित्यभिप्रायेणाह— **सिध्यति चेदिति** । **सधर्मता**—सिद्धिरूपधर्मेण तत्साधकप्रमाणोपनीतैः प्रत्यक्षादि-भिरिति शेषः ।

घटो घटत्वाभिधर्मा दृश्यत्वात्तच्च तत्र न । इत्यादिवदिमौ हेतू हास्याविति च सूच्यते ॥ ४८३ ॥

उत्तरत्र व्यतिरेकिण आश्रयासिद्धिम् अन्वयिनः साध्यप्रतियोगिनिरूपणासिद्धिं चाभिप्रेत्याह— **न चेदिति** । स्वतोऽन्यतो वा भानाभावाद्धि स्वसूनादेस्तुच्छतां ब्रवीषीति निदर्शयति— **गगनेति** । अत्र गमनं गच्छति वा न वा, वचनं वक्ति वा न वेत्यादिवज्जात्युत्तरत्वं मन्वानेन सधर्मकत्वं तुच्छत्वं च परिजिहीर्षता परेणोक्तं शङ्कते **सिद्धिरिति** । **इवकारः** सिद्धेः किं सिद्ध्यन्तरेणेति द्योतनार्थः । तथाऽपि सविशेषत्वं दुस्त्यजमित्यभिप्रायेण पृच्छति— **कस्येति** । साश्रयत्वं सविषयत्वं च धर्मिग्राहकसिद्धं नास्तीति वक्तुं न शक्यमिति भावः । उभयपरित्यागेन प्रत्युक्तिं शङ्कते— **यदीति** । तत्र स्वरूपस्यापि त्यागं प्रसञ्जयति— **सेति** । उक्तं निदर्शनेन स्थापयति— **सिद्धिर्हीति** । यथाव्युत्पत्ति सिद्धिशब्दार्थः संग्राह्यः, अन्यथाऽतिप्रसङ्गादित्याशयः । प्रत्यगात्मनः प्रत्यगात्मानं प्रति सिद्धिरियमिति परोक्तमनु-वक्ति— **आत्मन इति** । आवृत्त्या षष्ठी चतुर्थी वाऽत्र योज्या ; षष्ठ्या एव वा सामान्यमुखेन संबन्धद्वयपरत्वम् । परपक्षे ब्रह्मणो बोद्धृत्वाभावात्संविन्मात्रस्य तस्य प्रकाशफलित्वाभावेन स्वस्मै भासमानत्वाभावाच्च **आत्मन इत्युक्ति-रयुक्तेत्याक्षिपति** — **क इति** । **अयंशब्देन** सिद्धिप्रतिसंबन्धितया प्रत्यग्रूपत्वं सूच्यते । ईदृशात्मलक्षणमहमर्थस्यैव न तु त्वदिष्टस्य चिन्मात्रस्येति भावः । अज्ञाताभिप्रायः प्रश्नभ्रान्त्या पूर्वपक्षोक्तमुद्भावति—**नन्विति** । **एवकारो** भेदमिथ्यात्वाभिमानादाश्रयाश्रयिभावव्युदासार्थः । संविदात्मत्वं निराचिकीर्षुः तदुक्तिभावमभ्युपगच्छति— **सत्यमिति** । तत्प्रतिपाद्ये तु अर्थाङ्गीकारोऽपि नेत्याह— **दुरुक्तमिति** । **तुः** वचनदोषमात्रव्युदासार्थः । **कस्य कं प्रतीति** प्राक्सूचितेन विशेषेण दुरुक्ततां विवृणोति— **तथाहीति** । निर्विशेषस्यैकस्यैव निर्विकल्पकेऽप्यसिद्धेस्तत्रापि विशिष्टा-नेकस्फुरणव्यञ्जनाय **जातशब्दः** । **तत्संबन्धिनी**—विषयाश्रयवतीत्यर्थः । अहमर्थस्वरूपसंविद्व्यवच्छेदार्थं **सा** इत्युक्तम् । स्वस्य स्वाश्रयत्वविरोधव्यक्तये **स्वयंशब्दः** ॥

एतदुक्तं भवति—अनुभूतिरिति स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादनस्वभावो ज्ञानावगतिसंविदाद्यपरनामा सकर्मकोऽनुभवितुरात्मनो धर्मविशेषः, घटमहं जानामि, इममर्थमवगच्छामि, पटमहं संवेद्मीति सर्वेषामात्म-साक्षिकः प्रसिद्धः । एतत्स्वभावतया हि तस्याः स्वयंप्रकाशता भवताऽप्युपपादिता । अस्य सकर्मकस्य कर्तृधर्मविशेषस्य कर्मत्ववत्कर्तृत्वमपि दुर्घटमिति । तथा हि— अस्य कर्तुः स्थिरत्वं कर्तृधर्मस्य संवेदनाख्यस्य सुखदुःखादेरिव उत्पत्तिस्थितिनिरो-धाश्च प्रत्यक्षमीक्ष्यन्ते । कर्तृस्थैर्यं तावत स एवायमर्थः पूर्वं मयाऽनुभूत इति प्रत्य-भिज्ञाप्रत्यक्षसिद्धम् । अहं जानामि, अहमज्ञासिषम्, ज्ञातुरेव ममेदानीं ज्ञानं वृत्ति-

मिति च संविदुत्पत्त्यादयः प्रत्यक्षसिद्धा इति कुतस्तदैक्यम्? एवं क्षणभङ्गिन्याः संविद आत्मत्वाभ्युपगमे पूर्वेद्युर्दृष्टमपरेद्युरिदमहमदर्शमिति प्रत्यभिज्ञा च न घटते; अन्येनानुभूतस्य न ह्यन्येन प्रत्यभिज्ञानसंभवः ॥

ननु आत्मनः स्वयंप्रकाशत्वमिच्छतां सर्वेषामात्मसंवित्त्वयोर्न विरोधः; **सिद्धिरूपतये**त्यत्र च उत्पत्तिरूपत्वविवक्षायामनन्वयः; ज्ञप्तिरूपत्वे विवक्षितेऽपि तस्याः किं विषयाश्रयसंबन्धनियमे प्रमाणम्? वृत्तिज्ञानस्य तन्नियमसद्भावेऽपि ततोऽन्यस्यां संविदि त्वदुक्तात्मस्वरूपवन्मा भूत्तद्योगः; आत्मधियोरैक्ये प्रतिक्षेप्ये विषयग्रहणं च व्यर्थमित्यत्राह— **एतदिति**। अयं भावः— असन्मते हि प्रसिद्धस्याहंशब्दार्थस्य प्रसिद्धज्ञानादन्यस्यैव स्वधर्मवत्त्वस्वापेक्षया प्रकाशत्वरूपं संवित्त्वं स्वयंज्योतिष्ट्वादिश्रुत्यनुसारात् स्वीकृतमिति न विरोधः। त्वया तु प्रसिद्धायाः संविदः प्रतीतिविरुद्धमात्मत्वं साध्यते।

* परागर्थप्रमेयेषु या फलत्वेन संमता। संवित्सैव हि नः सिद्धा वेदान्तोक्तिप्रमाणतः ॥

इति निष्कर्षात्। अत एवास्मन्मते धर्मधर्मिज्ञानभेदवत्त्वन्मते वृत्तिज्ञानस्वरूपसंविद्भेदक्लृप्तिश्चायुक्ता। लोके च ज्ञानसंविदादिशब्दाः पर्यायाः पठ्यन्ते। उपलम्भश्च तथैव। अतः सांख्यस्य पृथक्पाठोऽनादरणीयः। विषयवत्याः संविद आत्मधर्मत्वं च सर्वलोकप्रत्यक्षसिद्धम्। संविदः स्वयंप्रकाशत्वं च साधयता त्वयाऽपि विषयाश्रयसंबन्धिस्वभावतया हेतुरुक्तः। कर्मोपादानं च कर्त्रैक्यव्याहतेर्दृष्टान्तार्थं तन्मुखेन प्रतिबन्ध्यर्थं संबन्धिशब्दत्वव्यक्त्यै च सविषयत्वादेव निर्विषयादात्मस्वरूपाद्विवेकार्थं च। धर्मधर्मिभावसिद्ध्या संविदात्मनोरैक्यं दुर्घटमित्युक्तम्; तदेव धर्मान्तरैरपि व्यनक्ति— **तथा हीति**। आत्मत्वादिनित्यधर्मव्यवच्छेदाय **संवेदनाख्यस्ये**त्युक्तम्। न ह्यसौ समाख्या पारिभाषिकीति भावः। **सुखदुःखादेरिवेति**। अत्र स्वमते सुखादेर्धीविशेषतया प्रकाशरूपावस्थाया अस्थिरत्वे सुखाद्यवस्थादृष्टान्तः। परमते च अन्तःकरणधर्माः सुखदुःखादयः। उक्तयोः स्थिरत्वास्थिरत्वयोः प्रथमस्य वैनाशिकैतरसर्वसंमतव्यत्वमाह— **कर्तृस्थैर्यं तावदिति**। **स एवायमि**ति दृष्टान्तार्थम्। **पूर्वमि**त्यनेन सुषुप्तेः पूर्वमित्यपि भाव्यम्। वक्ष्यति च— * स एव तु कर्मानुस्मृतिशब्दविधिभ्यः इति। **मयाऽनुभूत** इति तु संवित्सन्ततेराधारत्वेन स्वात्मानुवृत्तिप्रत्यक्षोक्तिः। द्वितीयस्य च दुरूपपादत्वमुदाहरणैर्विवृणोति— **अहमिति**। **जानामी**त्यनेन संविदुत्पत्तिस्थित्योः प्रदर्शनम्; पूर्वमेतज्ज्ञानरहितोऽहमिदानीमेतज्ज्ञानवानिति तात्पर्यम्। सोऽयमिति बाह्यार्थवत्सोऽहमित्यान्तरार्थेऽपि प्रत्यभिज्ञायामिह ज्ञानरूपातीताकारविशेषप्रत्यक्षविशेषविषय एवेत्याह— **अहमज्ञासिषमिति**। साक्षादेव धीप्रध्वंसप्रत्यक्षमाह— **ज्ञातुरिति**। ज्ञानस्य पूर्वकाले संप्रतिपत्त्यर्थ **एव**कारः; विरुद्धधर्माध्यास इत्यर्थः।

आत्मा कर्ता च भोक्ता च स्थिरश्च स्थापयिष्यते। सुखादिवदनित्या तदन्या धीः स कथं भवेत् ॥ इति। कर्तृस्थैर्ये प्रत्यभिज्ञा प्रमाणीकृता; संविदस्तदैक्यं च दुर्घटमिति स्थापितम्। अथ संविदात्मत्वे नश्वरत्वानश्वरत्वविकल्पेन पूर्वत्र सौगतानामिव प्रत्यभिज्ञानविरोधमाह— **एवमिति**। यद्वा अर्थान्तरवत्प्रत्यभिज्ञाविषयत्वेन स्थैर्यमुक्तम्; अथ तदाधारतया चोच्यते। धीसन्ततेरात्मतायां बोध्ये बोद्धरि च भ्रान्तिरूपाऽपि प्रत्यभिज्ञा स्मृतिमात्रं च न स्यादिति

वक्ष्यामः। अत एव ज्वालाप्रत्यभिज्ञावदन्यथासिद्धिवचनमिहानर्थकमित्यभिप्रायेणाह— **दृष्टमिति**। अत्र प्रतीत्यध्याहार्यम्। पूर्वेद्युर्दृष्टमिदमपरेद्युरदर्शमिति वाऽन्वयः। व्याघातप्रसङ्गेन सह प्रसङ्गान्तरसमुच्चयार्थश्चकारः। अथ वा, मया पूर्वेद्युर्दृष्टमित्यत्र स्वप्रत्यभिज्ञार्थमेव पृथग्वाक्यम्। **न घटत** इत्युक्तम्; तदेव * अनुस्मृतेश्चेति सूत्रतात्पर्येण स्थापयति— **अन्येनेति** ॥

किं चानुभूतेरात्मत्वाभ्युपगमे तस्या नित्यत्वेऽपि प्रतिसन्धाना[भावः]संभवः तदवस्थः; प्रतिसन्धानं हि पूर्वापरकालस्थायिनमनुभवितारमुपस्थापयति, नानुभूतिमात्रम्; अहमवेदं पूर्वमप्यन्वभूवमिति। भवतोऽप्यनुभूतेर्न ह्यनुभवितृत्वमिष्टम्। अनुभूतिरनुभूतिमात्रमेव। संविन्नाम काचिन्निराश्रया निर्विषया वाऽत्यन्तानुपलब्धेर्न संभवतीत्युक्तम्। उभयाभ्युपेता संविदेवात्मेत्युपलब्धिपराहतम्। अनुभूतिमात्रमेव परमार्थ इति निष्कर्षकहेत्वाभासाश्च निराकृताः ॥

मा भूदनित्यस्य घटादिप्रकाशस्य नित्यात्मतादात्म्यम्; निर्धूतनिखिलावच्छेदा तु संवित् आत्मा स्यादित्यत्र प्रमाणाभावात् प्रागेव दत्तोत्तरत्वेऽपि, आसन्नतरोक्तप्रसङ्गेनापि दोषसाम्यं विवक्षुराह— **किञ्चेति**। प्रतिसन्धानमिह प्रत्यभिज्ञामात्रम्; पूर्वापरज्ञानानामेकाश्रयधीर्वा। अमंभवं विवृणोति— **प्रतिसन्धानमिति**। कालद्वयवृत्तेः प्रकाशस्य प्रतिसन्धातृत्वं युक्तमित्यत्राह— **नानुभूतिमात्रमिति**। ज्ञातृत्वाभावे प्रकाशस्यापि कालद्वयवृत्तिर्निष्फलेति भावः। ज्ञातुः स्थिरत्वसाधकं प्रतिसन्धानस्वरूपमाह— **अहमिति**। **एव**कार आश्रयभेदशङ्कानिरासार्थः। अविद्यावैभवाद्भ्रान्त्या प्रतिसन्धातृत्वं स्यादित्यत्राह— **भवत** इति। भ्रान्तिरपि ज्ञातुरेव स्यात्। यदि कश्चिदहमर्थं त्यक्त्वाऽनुभूतेरेवानुभवितृत्वमिच्छेत् तत्राप्याह— **अनुभूतिरिति**; न हि केनचित्स्वीकृतमित्येतावता सर्वलोकप्रत्यक्षविरुद्धं सिध्येदित्याकूतम्। एवं प्रसिद्धसंविदो विषयाश्रयशून्यतां तादृशसंविदन्तरं वा न स्वीकृत्य तत्र नित्ये निर्विशेषे ज्ञातृत्वकल्पनं निरस्तम्, तत्कल्पनाधिष्ठानं च निरस्तमित्याह— **संविदिति**। ननु त्वन्मते अहमर्थः आत्मा, स नित्यः स्वप्रकाशः, तद्धर्मभूता धीरपि तथा; ततो नित्यधीद्वयाङ्गीकारगौरवं स्यात्। अस्मदुक्ते हि लाघवमित्यत्राह— **उभयेति**। अयं भावः—क्लृप्तौ हि गौरवं दोषः; न तूपलम्भे; अन्यथा माध्यमिकमतेऽत्यन्तलाघवं स्यात्। संविद उपलब्धत्वादेव हि त्वयाऽपि तन्मततिरासः। अत्र च स्थिरस्य ज्ञातुरहमर्थस्यात्मत्वमुपलम्भादिसिद्धं दुस्त्यजम्; तद्धर्मभूताया धियश्च नित्यत्वं न क्लृप्तम्; श्रुत्यादिसिद्धं तु न त्यक्तम्। न चालोपलम्भविरोधः, स्वरूपतोऽवस्थाभेदैश्च नित्यत्वानित्यत्वव्यवस्थापनात्। तदिहानहमर्थभूतां संविदमात्मतया निष्कृष्याहमर्थत्याग उपलब्धिविरुद्ध इति। अस्त्वेवम्, अस्मन्मतेऽपि शुद्धायामेवानुभूतौ तत्त्वतो भ्रान्त्या च निर्विषयत्वसविषयत्वादिविरोधशान्तिः; उपलब्धमपि नभस्थलमलिनत्वादिवद्युक्तिविरुद्धं त्याज्यमित्यत्राह—**अनुभूतिमात्रमिति**। मात्रचा विषयाश्रयवर्गस्य अवधारणेन स्वगतविशेषाणां च व्युदासः। **निष्कर्षकहेत्वाभासाः** दृशित्वदृश्यत्वादयः। **निराकृता** इति। अत्र सामान्यतो विशेषतश्चेति भाव्यम्। अत्र परेण विषयेषु घटत्वादिरहितं सन्मात्रम्। विषयिणि च कर्मकर्तृक्रियात्वरहितं प्रकाशमात्रमात्मेति यत्प्रलपितं तत्प्रत्युक्तम् ॥

ननु चाहं जानामीत्यस्मत्प्रत्यये योऽनिदमंशः प्रकाशैकरसः चित्पदार्थः स आत्मा; तस्मिंस्तद्बलनिर्भासिततया युष्मदर्थलक्षणः अहं जानामीति सिध्यन्नहमर्थश्चिन्मात्रातिरेकी युष्मदर्थ एव। नैतदेवम्; अहं जानामीति धर्मधर्मितया प्रत्यक्षप्रतीतिविरोधादेव। किं च—

अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत्। अहंबुद्ध्या परागर्थात्प्रत्यगर्थो हि भिद्यते॥
निरस्ताखिलदुःखोऽहमनन्तानन्दभाक्स्वराट्। भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते॥
अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति। अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः॥
मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता। इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति॥
स्वसंबन्धितया ह्यस्याः सत्ता विज्ञप्तितादि च। स्वसंबन्धवियोगे तु ज्ञप्तिरेव न सिध्यति॥
छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत्। अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम्॥
*** विज्ञातारमरे केन * जानात्येवेति च श्रुतिः। * एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति च स्मृतिः॥**
*** नात्मा श्रुतेरित्यारभ्य सूत्रकारोऽपि वक्ष्यति। * ज्ञोऽत एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितम्॥**

अथ तु ज्ञातरि प्रत्यगर्थे अहंत्वादिकं त्यक्त्वा तत्रत्यं प्रकाशमात्रमात्मेति प्रत्यवतिष्ठते— **ननु चेति। अस्मत्प्रत्यये**—अस्मदर्थस्वरूपस्फुरणे। **अनिदमंशः**—प्रत्यग्रूप इत्यर्थः। तत्र स्वयंप्रकाशत्वं हेतुमाह— **प्रकाशैकरस** इति। तत्रापि धीत्वं हेतुरुच्यते—**चित्पदार्थ** इति। **स आत्मा**—प्रत्यक्त्वादात्मेत्यर्थः। एवं प्रकाशांशस्य आत्मत्वे परमसाध्ये क्रमाद्व्यतिरेकित्रयं प्रत्युक्तम्। ज्ञातुरनात्मत्वे तथाऽन्वयित्रयमाह— **तस्मिन्निति**। चिन्मात्रातिरेकित्वाद्धीबलनिर्भासितत्वम्; तदेव युष्मदर्थलक्षणोपेतत्वम्; तत एव युष्मदर्थः प्रत्यक्त्वरहित इत्यर्थः। ततः सोऽनात्मेति वा वाक्यशेषः; अहंतया प्रत्यक्त्वं न शङ्कनीयमित्यवधारणाभिप्रायः। एवं वा — **अहं जानामीत्यत्र अस्मत्प्रत्यये**—उत्तमपुरुषोपात्तज्ञातृविषयायां धातूपात्तायां ज्ञप्तावित्यर्थः। शेषं प्राग्वत्। उभयमपि निरस्यति— **नैतदिति**। अहमर्थस्यैव प्रत्यक्त्वमात्मत्वं च, तद्धर्मतया सिध्यतः प्रकाशस्य तु परस्मा एव भासमानत्वान्नोभयमिति विपरीतप्रकारव्यवच्छेदार्थ **एव**शब्दः। वैपरीत्यं विवृणोति— **जानामीति**। अहमर्थस्वरूपप्रकाशश्चेदात्मेत्युच्यते स तर्हि तद्धर्मः; धातूपात्तश्चेत्, इच्छाद्वेषादिधात्वन्तरार्थवदात्मस्वरूपादन्यः प्रसिद्धः। **एव**कारो दत्तोत्तरत्वद्योतकः। **उपलब्धिपरोहतमिति** ह्युक्तम्। अत्र धीत्वात्स्वप्रकाशत्वसाधने सिद्धसाध्यम्; आश्रयनियमादिविशेषस्तु प्रागेवोक्तः। स्वप्रकाशतया प्रत्यु[यु]क्तं साधनं बाधितम्: तत आत्मत्वं किं पुनः। अहमर्थे चित्पदार्थान्यत्वं सामान्यतश्चेदसिद्धमिति वक्ष्यते; विशेषतश्चेदप्रयोजकम्; चिदन्तरे चिद्विशेषान्यत्वात्। अतो जडत्व **परोक्षत्वे** चासिद्धे, साध्यरूपं च त्रयं बाधितम्;। संविद आत्मत्वं च प्रत्यक्त्वज्ञातृत्वप्रकाशत्वादिना विकल्प्य यथार्थं बाधापसिद्धान्तसिद्धसाधनत्वादीनि वाच्यानि। एवमहमर्थस्य अनात्मत्वेऽपि विकल्पानुपपत्तिरिति भावः।

आत्मनोऽहमर्थादन्यत्वेऽहमर्थादन्यस्यात्मत्वे च साध्येऽनिष्टान्तराणि विवक्षुराह—**किंचेति**। **अहमर्थः**—अहंशब्दवाच्यः, अहंत्वविशिष्टो वा। प्रतीपमञ्चन्प्रत्यङ्, तस्य भावः **प्रत्यक्त्वम्**; स्वतोऽन्यतो वा स्वस्मै भासमानत्वमित्यर्थः। योऽसौ अहमिति व्यवह्रियते, तस्य सामान्यतः स्वपरात्मसाधारणतया परस्मै भासमानेऽप्यहंशब्दानुवृत्तिः। **योऽसौ अहमिति व्यवह्रियते, स एव हि स्वस्मै भाति। तदन्यस्तु बोधोऽपि स्वयंप्रभोऽपि परस्मा एव भायादिति पराङेव; अतोऽहमर्थे पराक्त्वं तदन्यस्मिन्प्रत्यक्त्वं चासिद्धम्**। यत्र तु ते स्तः तत्रैव ताभ्यां तत्साध्यं सिध्येदिति त्वदिष्टविरुद्धमापन्नमिति भावः। रक्तारक्तादिवदहंत्वपराक्त्वयोः विरोधं धीभेदेन व्यनक्ति—**अहंबुद्ध्येति**। **परागर्थात्**—परस्मा एव भासमानादित्यर्थः। आत्मभेदमते तु प्रत्यगर्थान्तरादपि प्रतिस्विकाहंबुद्ध्या भेदसिद्धिः। बद्धमुक्तावस्थयोरात्मनोरहंशब्देनाम्नानादागमबाधश्चात्र सिद्ध इति भावः। मुमुक्षुप्रवृत्त्यन्यथानुपपत्त्या स्वेष्टबाधं चाह—**निरस्तेति**। विशेषणत्रयेण तत्तच्छास्त्रार्थस्मारणम्, दुःखनिवृत्तिः, आनन्दावाप्तिः, अकर्मवश्यावस्था च स्वार्थाः स्वीक्रियन्ते। मुक्तौ तु स्वनाशं विदुषः तदुद्देशप्रवृत्त्ययोगान्मोक्षशास्त्रस्याधिकारिविरहेणाप्रमाण्यं स्यादित्यभिप्रायेणाह—**अहमर्थेति**। अन्यथाऽपि प्रवृत्त्युपपत्तिमाशङ्क्याह—**मयीति**। खादेरिव स्वान्यस्य स्थितिर्हि स्वनाशार्थप्रवृत्तिहेतुर्न स्यात्। **स्वबधः कथम्? इत्थम्**—स हि धर्मबुद्ध्या चेत्, अनर्थराहमर्थभोगार्थः। अविवेकिनां तु संसारमोचकानामहमर्थस्यैवासद्बुःखनिवृत्तिमात्रार्थः। न चेह तथा; अहम आत्मत्वानभ्युपगमात्; आत्मानमधिकृत्यैव मोक्षोपदेशादिप्रवृत्तेः। यत्तु प्रागुक्तं कर्तुर्देहाद्वोत्क्रुरात्मनोऽन्यत्वं प्रामाणिकानां प्रसिद्धमिति, तदयुक्तम्; देहस्य क्रियावत्त्वेऽपि स्वधीपूर्वं प्रवृत्तिलक्षणमिति कर्तृत्वायोगात् तदपेक्षया * शास्त्रफलं प्रयोक्तरीति स्थापनात्। इह त्वहङ्कारस्य कर्तृत्वे संसारोऽपि तस्यैव स्यात्, भोक्तृत्वं चात्मनस्त्वमेव प्रतिक्षिपसीत्यात्मनो बन्धमोक्षौ न स्याताम्; तथा च वृथा मुक्तिशास्त्रारम्भः। मुक्तावहमर्थनाशे धीस्थितिमन्यारुह्योक्तम्; मैव न स्यादित्याह—**स्वसंबन्धीति**। ननु धर्मो धीश्चेतनैकान्तत्वम्, एकायुष्कत्वं वा; अतः परमते जातिवत् घटादिसंयोगरूपधर्मनाशे खादिवच्च स्वाश्रयाहमर्थनाशे तिष्ठेदित्यत्राह—**छेत्तुरिति**। आस्तामन्यत्; सकर्मकस्य धात्वर्थस्य कर्मकर्तृविरहे कथं सत्तेति भावः। छेत्तुरित्यादि प्रदर्शनार्थम्। **आदि**शब्देन हि सकर्मककियान्तरे व्याप्तिः प्रदर्श्यते। न ह्यत्र धर्म्यभावे धर्मसत्तायां किञ्चित्प्रमाणम्; ज्ञातुरभावे च कस्मै स्वात्मानमन्यद्वा प्रकाशयेत्? तदिहोक्तैः प्रमाणतर्कैः सिद्धं निगमनेन द्रढयति—**अतोऽहमिति**। एतदेव मिथोऽनुगुणश्रुतिस्मृतिसूत्रस्वारस्येन संवादयति **विज्ञातारमित्यादिना** श्लोकद्वयेन। **जानात्येवेत्यवधारणेन** मुक्तावपि ज्ञातृत्वं सूच्यते; अयोगव्यवच्छेदो ह्यत्र स्वरसः अन्यप्रकरणत्वशङ्कानिरासार्थमात्मस्वरूपानुबन्धित्वेन मुक्तावप्यनुवृत्तिसंभवार्थं च **नात्मे**त्यादिकमुपात्तम्। **अपिः** सूत्रोक्तातिक्रमेऽपसिद्धान्तं सूचयति। अहमर्थस्यात्मत्वं निगमितम्; ज्ञेरनात्मत्वं तु निगम्यते—**अत** इति; प्रत्यक्षागमयुक्तिबलादित्यर्थः। ज्ञानिर्नात्मा, परस्मा एव भातत्वात् अनहंत्वात्, घटादिवत् इत्यादिप्रयोगाः प्रसङ्गाश्च द्रष्टव्याः॥

अहंप्रत्ययसिद्धो ह्यस्मदर्थः, युष्मत्प्रत्ययविषयो युष्मदर्थः। तत्राहं जानामीति सिद्धो ज्ञाता युष्मदर्थ इति वचनं जननी मे वन्ध्येतिवद्व्याहतार्थं च। न चासौ ज्ञाताऽहमर्थोऽन्याधीनप्रकाशः; स्वयंप्रकाशत्वात्। चैतन्यस्वभावता हि स्वयंप्रकाशता।

यः प्रकाशस्वभावः सोऽनन्याधी[स्व]नप्रकाशः, दीपवत् । न हि दीपादेः स्वप्रभाबल-निर्भासितत्वेन अप्रकाशत्वमन्याधीनप्रकाशत्वं च । किं तर्हि ? दीपः प्रकाशस्वभावः स्वयमेव प्रकाशते, अन्यानपि प्रकाशयति स्वप्रभया ॥

यद्यपि स्वमते अस्मदर्थस्यैव युष्मदर्थत्वमात्मव्यक्तिभेदात्स्यात् ; परमते च अहङ्कारभेदादहमर्थ एव त्वमर्थोऽपि; तथाऽपि घटादिवत्प्रत्यक्त्वसामान्याभावलक्षणं युष्मदर्थत्वमिह व्याहतमित्यभिप्रायेण स्ववचनविरोधमाह— **अहंप्रत्ययेत्यादिना** वाक्यत्वयेन । अस्याप्रयोजकत्वं प्रत्येतुः प्रत्येतव्यादव्यतिरेकेण प्रत्यक्त्वं च नैयायिकादयः प्राहुः । बाधितत्वं चात्र दर्शितम् ।

किं च युष्मत्त्वमस्मत्त्वमप्यनात्मादिगोचरम् । परो बभाषे भग्नं तन्मानतः स्वमतादपि ॥ ४८४ ॥
प्रतियोगिविशेषाद्धि युष्मदस्मत्पदार्थता । चेतनस्यैव विख्याता न जन्यज्ञप्तिमात्रयोः ॥ ४८५ ॥
उन्मादादिव यद्युक्ता युष्मदुक्तिरचेतने । क्वचित्तत्तदधिष्ठातृपुंविशेषविवक्षया ॥ ४८६ ॥
ब्रह्मोपलक्षणत्वं च युष्मदर्थेऽपि मेनिरे । नातो विषयनिर्देशेऽप्यस्मदर्थविशेषवान् ॥ ४८७ ॥

अथाहमर्थपरात्त्वसाधकतयोक्तस्यान्यत एव भातत्वस्यासिद्धिरप्यस्तीति साधयति— **न चेति** । न हि वेद्यत्वमात्रादनात्मत्वं सुवचम् ; वित्तावपि प्रसङ्गात् । धर्मभूतज्ञाने दृष्टव्याप्तिकं हेतुमाह— **स्वयमिति** । स्वधर्मवत्स्वयमपि प्रकाशरूपत्वादित्यर्थः । यद्वा स्वयंज्योतिष्ट्वेन श्रुतत्वादिति यावत् । ज्ञानत्वे सिद्धे अनन्याधीनस्वप्रकाशत्वं नियतमित्याह—**चैतन्येति** । अत्र धूमवत्त्वमेव ह्यग्निमत्त्वमितिवत्संबन्धदार्ढ्यादुपचारः । यद्वा अनन्याधीनस्वप्रकाशत्वे स्वयंप्रकाशत्वहेतुः साध्याविशिष्ट इति शङ्कायां स्वयंप्रकाशत्वशब्देन ज्ञानत्वं विवक्षितमित्युच्यते । ज्ञानत्वस्वप्रकाशत्वयोर्व्याप्तिं व्यनक्ति— **य** इति । धर्मभूतज्ञानवदिति दृष्टान्तोऽभिप्रेतः । अत्र दीपादुदाहरणं लोकबुद्ध्यनुसारेण संभावनामात्रस्थापनार्थम् । यद्वा, **स्वयंप्रकाशत्वात्**—स्वतस्सिद्धप्रकाशधर्मत्वात् । अत्र विशेष्यमेव हेतुः । हेत्वंशं पक्षस्थविशेषणं विवृणोति—**चैतन्येति** । नन्वेवं ज्ञातृत्वादित्येव हेतुरुक्तः स्यात् । तथा सत्यसाधारणानैकान्त्यम् । मैवम् ; व्यतिरेकिणोऽनभिसंहितत्वात् । अन्वयी[त्वेवं भाव्यः]त्येव भाव्यम्—आत्मा स्वधर्मभूतज्ञाननिरपेक्षप्रकाशः स्वप्रकाशे स्वात्यन्तसजातीयनिरपेक्षवस्तुधर्मत्वादिति । अत्र व्याप्तिदृष्टान्तावाह— **य** इति । दीपोऽपि घटवत्प्रभातमोऽन्यत्वे सति प्रमानुग्राह्यचक्षुर्ग्राह्यत्वात् प्रभाधीनप्रकाशः स्यादित्यत्राह—**नहीति** । घटवद्दीपस्य यद्यभास्वररूपत्वं स्यात्, ततो भास्वरद्रव्यसंबन्धाधीनप्रकाशः स्यात् । न तदस्ति; अतो नोक्तशङ्केति भावः । ननु प्रभाश्रयस्यापि मण्यादेः प्रभाधीनप्रकाशत्ववद्दीपादेरप्यस्तित्वमित्यभिप्रायेण कथं प्रकाशत इत्याकाङ्क्षां दर्शयति— **किं तर्हीति** । घटादेर्मण्यादिपार्थिवांशस्य च स्वयमभास्वरतया प्रभासापेक्षप्रकाशत्वम् ; उद्भूतानभिभूतभास्वररूपस्य तु स्वभावात्तन्नैरपेक्ष्यं युक्तमित्याह— **दीप इति** । ननु भास्वरत्वं प्रभानैरपेक्ष्ये न प्रयोजकम् : किं तु प्रभात्वमेव । मैवम् ; व्यभिचारादर्शनेऽप्यत्र व्याप्तिसङ्कोचेऽतिप्रसङ्गात् , प्रभात्वाभावेऽपि तमसि प्रभानैरपेक्ष्यदृष्टेश्च । ज्योतिष्ट्वाभावेऽपि तत्र तद्दृष्टिरस्तीति चेत् , सत्यम् ; न हि वयं ज्योतिष्ट्वं व्यापकं ब्रूमः । प्रभात्वमप्येवमिति चेत् , तर्हि लिङ्गं भवतु । न तु स्वनिवृत्त्या प्रभानैरपेक्ष्यं

निवर्तते । न च दीपादेः प्रभाधीनप्रकाशत्वं दृष्टम् ; येन प्रभातमोन्यतरनिष्ठतया व्याप्तिः संकोच्येत । तर्हि स्वप्रभावद्दीपोऽपि घटादीन्स्वयमेव प्रकाशयेदित्यत्राह—**अन्यानिति** । असंबद्धं कथं प्रकाशयेत् ? यथादर्शनं व्यवस्थायां धर्मद्वारा संबन्धः प्रकाशनं चेति भावः ॥

एतदुक्तं भवति— यथा एकमेव तेजोद्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते । यद्यपि प्रभा प्रभावद्द्रव्यगुणभूता, तथाऽपि तेजोद्रव्यमेव; न शौक्ल्यादिवद्गुणः, स्वाश्रयादन्यत्रापि वर्तमानत्वात् रूपवत्त्वाच्च शौक्ल्यादिवैधर्म्यात्, प्रकाशवत्त्वाच्च तेजोद्रव्यमेव नार्थान्तरम् । प्रकाशवत्त्वं च स्वस्वरूपस्यान्येषां च प्रकाशकत्वात् । अस्यास्तु गुणत्वव्यवहारो नित्यतदाश्रयत्वतच्छेषत्वनिबन्धनः । न चाश्रयावयवा एव विशीर्णाः प्रचरन्तः प्रभेत्युच्यन्ते। मणिद्युमणिप्रभृतीनां विनाशप्रसङ्गात्। दीपेऽप्यवयविप्रतिपत्तिः कदाचिदपि न स्यात् । न हि विशरणस्वभावावयवा दीपाश्चतुरङ्गुलमात्रं नियमेन पिण्डीभूता ऊर्ध्वमुद्गम्य ततः पश्चाद्युगपदेव तिर्यगूर्ध्वमधश्च एकरूपा विशीर्णाः प्रचरन्तीति शक्यं वक्तुम् । अतः सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना विनश्यन्तीति पुष्कलकारणक्रमोपनिपातात् तद्विनाशे विनाशाच्चावगम्यते । प्रभायाः स्वाश्रयसमीपे प्रकाशाधिक्यमौष्ण्याधिक्यमित्यादि उपलब्धिव्यवस्थाप्यम्, अग्न्यादीनामौष्ण्यादिवत् । एवमात्मा चिद्रूप एव चैतन्यगुणक इति । चिद्रूपता हि स्वयंप्रकाशता ॥

ननु आत्मनस्तद्धर्मस्य च सत्तावान्तरजात्या सजातीयत्वे कथं धर्मधर्मित्वम् ? न च दीपप्रभा निदर्शनम् ; विशीर्णपूर्वदीपावयवरूपायाः प्रभाया उत्तरदीपधर्मत्वप्रसङ्गाभावात् ; अवयवविशरणाभावे च दीपादेराशुतरविनाशित्वं न सिध्येत् ; रजःपटलादिन्यायेन मूलमध्याग्रवैषम्यं च विशीर्णावयवत्वलिङ्गमित्याह— **एतदिति** । **यथा** इत्यस्योत्तरत्र **एवमिति** प्रतिनिर्देशः । अवान्तरवैषम्येऽपि तेजस्त्वेन सजातीयत्वं स्थितमित्यभिप्रायेण **एकमेवेत्युक्तम्** । ननु प्रभाप्रभावतोर्धर्मधर्मिभावो भ्रान्तः; यदि प्रभाया दीपादिगुणत्वम् , तर्हि द्रव्यत्वं साजात्यं च न स्यादित्यत्राह—**यद्यपीति** । द्रव्यत्वे कथं गुणत्वमित्यत्राह— **शौक्ल्यादिवदिति** । अद्रव्यत्वलक्षणं गुणत्वं मा भूत् ; आश्रितस्वभावत्वं तदस्तीति भावः । तद्द्रव्यत्वे किं प्रमाणमित्यत्राह— **स्वेति** । द्रव्याणां दण्डादीनां केशनखादीनां च संयोगत आश्रितानां तावत् , स्वाश्रयरहितप्रदेशेऽपि वृत्तिर्दृष्टा । प्रभायास्त्वयुतसिद्धाया अपि धर्मिदेशातिवृत्तिर्दृश्यते ; अद्रव्याणां तु न तथा । तदत्रायुतसिद्ध्या दण्डादिभ्यः, धर्मिदेशादिवृत्त्या शौक्ल्यादिभ्यश्च, विशेष इति भावः ॥

तथाऽप्यौष्ण्यवत्तेजोधर्मस्य द्रव्यत्वतेजस्त्वे न स्यातामित्यत्राह— **प्रकाशवत्त्वादिति**; तिमिरनिरासकस्वभावादित्यर्थः । प्रकाशौपाधिकभास्वररूपत्वादिति च हार्दो हेतुः । भ्रान्तिशङ्काव्युदासार्थमवधारणं विवृणोति— **नार्थान्तर-**

मिति । न हि प्रभाया मण्यादेरिवौपाधिकी भास्वरत्वधीरिति भावः । दीपधर्मस्य गुणान्तरस्येव प्रकाशवत्त्वं न स्यादित्याह— **प्रकाशवत्त्वमिति** । प्रकाशवत्त्वमिह तमोनिरासद्वारा मनुष्यादिचक्षुस्सहकारित्वम् । न चैतल्लिङ्गम् ; दृश्यमानस्तु स्वभावविशेषः प्रदर्श्यते । उक्तं च **पञ्चपादिकाविवरणकृता** * ज्ञानप्रकाश्यत्वादज्ञानविरोधिनोऽन्यदेवालोकप्रकाश्यत्वं तमोविरोधित्वसिद्धमिति । अद्रव्यनियतो गुणव्यपदेशः कथमिह स्यादित्यत्राह— **अस्या** इति । चोदितनिमित्तव्यावृत्त्यर्थस्तुशब्दः । अयं भावः— गुणशब्दो हि दासादिष्वपि प्रयुज्यते ; कर्मणि क्रियान्तरशेषभूते, सन्धिविग्रहादिष्वपि विवक्षान्तरेण ; तद्वदिहापि द्रव्यत्वाविरुद्धनिमित्तविवक्षया गुणोक्तिरविरुद्धेति । विशरणपक्षं प्रतिक्षिपति— **न चेति** । तथाऽनुपलम्भादिति भावः । कल्पने निर्बाधलोकदृष्ट्याऽनिष्टप्रसङ्गमाह— **मणीति** । दीपादिवत् प्रतिक्षणविनाशप्रसङ्गादित्यर्थः । स्थिरत्वेन सर्वलोकविदितानां पुष्कलकारणकमाद्यनुपलम्भेऽपि क्षणिकत्वकल्पनावतिप्रसङ्ग इति भावः । मण्यादौ प्रत्यभिज्ञाविरोधः उक्तः ; दीपे त्वभिज्ञाऽपि न स्यादित्याह—**दीप** इति । **अपिः** पूर्वत्रात्र च प्रत्यक्षविरोधसाम्यद्योतकः । **अवयवि**शब्दः परमतेन ; स्वमते तु सङ्घातविशेषपरः । **कदाचिदपि**—पूर्वोत्तरकाल्योरिव मध्येऽपीत्यर्थः । योग्यस्य सत्यां सामग्र्यां कथमप्रतिपत्तिरित्यत्राह— **न हीति** । संहतस्वभावत्वे विशरणस्य विशेषकारणमभिघातादिकं दृष्टम् ; तदन्यक्लृप्तिश्च गुर्वी । विशरणस्य स्वभावत्वे तु पिण्डीभावादिहेतुरदृष्टः कल्प्यः । * अग्नेरूर्ध्वज्वलनमित्यादिभिरूर्ध्वगमनशीलतया प्रसिद्धानामेवाविशेषेण विष्वग्विशरणादिकल्पनिश्च गुरुतरेति भावः । तर्हि दीपस्य क्षणिकत्वे प्रमाणं न स्यादित्यत आह— **अत** इति । पक्षान्तरस्य गौरवहतत्वादित्यर्थः । पद्मकेसरादिविशिष्टवर्त्यादिसृष्टिप्रकारसाम्याभिप्रायेण **सप्रभाका एवेत्युक्तम्** । प्रतिक्षणमुत्पन्नाश्चेद्युगपदनेकदीपोपलम्भः स्यादित्यत्राह— **विनश्यन्तीति** । अत्रापि प्रतिक्षणमिति योज्यम् । प्रतिक्षणोत्पत्तौ हेतुमाह— **पुष्कलेति** । उत्तरोत्तरक्षणेष्वपि दीपसामग्रीसम्पत्तेरित्यर्थः । विगीतः समुदायः दीपजनकः, विशिष्टवह्निवर्त्यादिसमुदायत्वात् आद्यवदिति प्रयोगः । प्रतिक्षणविनाशे लिङ्गमाह— **तद्विनाशे विनाशादिति** । नात्र साध्याविशेषः; अयं त्वत्र प्रयोगः— आद्यादिस्नेहवर्तिध्वंसः तज्जन्यदीपध्वंसशिरस्कः , विशिष्टस्नेहवर्तिध्वंसत्वात् ; अन्तिमवत् इति । एवं दीपभेदानभ्युपगमे स्नेहनाशसन्तुक्षणादिभिः परिमाणभेदोऽपि दुरुपकनिर्वाहः , धारावाहिकधीभेदश्च । ध्वंसश्चात्र दीपतत्प्रभयोरनभिव्यक्तावस्थाविशेषः ; सत्कार्यस्य द्रव्यस्य नित्यानुवृत्तेः । सा चावस्था अन्तिमदीपसामग्रीनाशपूर्विका दृष्टा; अतोऽभिघातादिव्यतिरिक्तविशरणहेतुकल्पनाविव नात्र गौरवम् । तत्समीकारं परिहरति— **प्रभाया** इति । आदिशब्देन बहुलत्वादिकं दूरे प्रकाशादिमत्त्वं च गृह्यते । उपलब्धानादरे अतिप्रसङ्गः ; अथादृष्टासङ्कुचितप्रभोत्पत्तिः, एतदपि चोद्यमादिशब्दसङ्गृहीतम् **उपलब्धिव्यवस्थाप्यमित्यनेनैव** प्रत्युक्तम् । अथ वा **स्वयंप्रकाशत्वादित्यादे**र्भाष्यस्य प्रयासबहुलानुमानपरत्वादपि वरं श्रुत्यर्थोपक्षेपपरत्वम् । दृष्टान्तादिभिर्लोकदृष्ट्या तत्संभावनाप्रदर्शने च । तथा च प्रदीपिकानुमितिपरत्वादपि श्रुत्यनुग्राहकपरत्वं युक्तमिति । न ह्युत्तरत्रानुमानवच्छ्रुतिरपि तथा चेत्युदाह्रियते ; किं तु **तथा हीति** । अतः पूर्वोपक्षिप्तं श्रौतमेवार्थं लोकदृष्टिप्रदर्शितसंभावनयोपसंहरति— **एवमिति** । ननु संविदात्मनोर्भेदः पूर्वमुक्तः ; तत्कथमिहात्मनः चिद्रूपत्वोक्तिरित्यत्राह— **चिद्रूपनेति** । न स्वधर्मतादात्म्यमिहोच्यते ; किं तु तत्सजातीयत्वमिति ॥

तथा हि श्रुतयः—* स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव । एवं वा

अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव, ❀ विज्ञानघन एव, * अत्रायं पुरुषः स्वयंज्योतिर्भवति, ❀ न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, * अथ यो वेदेदं जिघ्राणीति स आत्मा, ❀ कतम आत्मा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः, ❀ एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः, ❀ विज्ञातारमरे केन विजानीयात्, * जानात्येवायं पुरुषः, * न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्, ❀ स उत्तमः पुरुषः, ❀ नोपजनं स्मरन्निदं शरीरम्, ❀ एवमेवास्य परिद्रष्टुरिमाष्षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति, ❀ तस्माद्वा एतस्मान्मनोमयात्, अन्योऽन्तर आत्मा विज्ञानमयः इत्याद्याः। वक्ष्यति च— * ज्ञोऽत एवेति ॥

चिच्छब्दस्यात्मनि स्वप्रकाशत्वनिबन्धनत्वमात्मनो ज्ञानत्वं ज्ञातृत्वं च जडत्वनिर्गुणवादनिरासाय श्रुतिमिराह— **तथेति**। शब्दप्रमाणकोऽर्थो यथाशब्दं व्यवस्थाप्य इत्यभिप्रायेण **श्रुतिशब्दः**। ततश्च विमतं न ज्ञानाश्रय, ज्ञानत्वात् धर्मभूतज्ञानवदित्यत्र व्याप्तिसिद्धौ तद्ग्राहकश्रुत्यादिबाधः; अन्यथा त्वनुमितेरुत्थानम्। **प्रज्ञानघनः**। शास्त्रसिद्धेन सुखत्वप्रकर्षेण स्वरूपज्ञानस्य प्रकृष्टत्वम्। अतः प्रकृष्टसुखात्मकज्ञानैकरूप इत्यर्थः। सामान्योक्तेः मानोपनीतविशेषविश्रमादपेक्षितसंभवेऽनपेक्षितविधिर्दौर्बल्याच्च।

अत्र सैन्धवदृष्टान्तस्सर्वांशेष्वैकरस्यतः। जडांशरहितत्वं तु बोध्यमात्मनि निष्कले ॥ ४८८ ॥

अस्तु वा सैन्धवन्यायाद्गुणवत्त्वोक्तिरात्मनः। वाक्यान्तरेण लभ्येत ज्ञानत्वमपि तादृशम् ॥ ४८९ ॥

देहादिविशिष्टावस्थायामपि तद्विलक्षणत्वव्यक्त्यर्थौ विज्ञानघनवाक्योपादानम्; विविधज्ञानवैशिष्ट्यार्थं वा। स्वयंप्रकाशत्वस्फौट्यायाह— **अत्रेति**। न हि पुरुषशब्दोऽन्तःकरणदेहादिपरः; न च ज्योतिःशब्दो भूततृतीयविषय इति भावः। आत्मनो ज्ञातृत्वं धर्मभूतज्ञानस्य नित्यत्वं च वदन्तीं श्रुतिमाह— **न विज्ञातुरिति**। ज्ञातुरनात्मत्वशङ्काव्युदासायाह— **अथ य** इति। आत्मन एव विज्ञानत्वस्वयंप्रकाशत्वे सहोक्ते इत्याह—**कतम** इति। शङ्कास्पदेषु क इत्यर्थः। **प्राणेष्विति** सप्तमी निर्धारणार्था; कयाचिद्वृत्त्या प्राणशब्दगोचरसमुदायाद्विज्ञानमयत्वेन कथञ्चित्पृथक्कृत्य तस्यात्मत्वमुच्यते। अथ वा प्राणेषु हृदीत्युभयमपि स्थानविशेषव्यक्त्यर्थम्; **अन्तर्ज्योतिः**—स्वप्रकाशः; आत्मज्योतिरित्यपि हि श्रूयते। ज्ञातृत्वकर्तृत्वज्ञानत्वादेरात्मनि सहोक्तिं दर्शयति—**एष** हीति। ज्ञातुरेव प्रत्यगात्मनोऽपि मुमुक्षुवेद्यत्वं सूचयति— **विज्ञातारमिति**। मुक्तावपि ज्ञातृत्वसिद्धयै ज्ञातृत्वायोगव्यवच्छेदपरां श्रुतिमाह—**जानात्येवेति**। विनाशश्रुतेः संज्ञानिषेधाद्युक्तेश्चान्यविषयत्वं स्थापयितुमाह—**न पश्य** इति। * सर्वं ह पश्यः पश्यतीति तत्रैवोक्तम्। * स उत्तमः पुरुष इत्यत्र वाक्यशेषान्मुक्तस्य जक्षणादिबुद्धिपूर्वव्यापारवत्त्वसिद्धिः। मुक्तस्य संस्कारजन्यधीनिषेधात् स्वतस्सिद्धसाक्षात्कारवत्त्वं व्यञ्जयति— **नोपजनमिति**। संस्कारो नौपाधिकत्वात्तदानीं निवर्तते; तत एव न स्मृतिः; स्वर्गनरकादिगतस्तु

प्रतिकूलमनुकूलं च प्राग्भुक्तं स्मरेत् ; न तथा मुक्त इति भावः । तथाऽपि द्रष्टुरवस्थानं कारणादिमात्रनिवृत्तिं च श्रुत्यैव स्थापयति— **एवमिति** । **षोडशकलाः**— भूतेन्द्रियाणि ; औपाधिकसमुदायैकदेशत्वात् **कलात्वोक्तिः** । **पुरुषः** अत्र परमात्मा ; तत्प्राप्तिदशायामिन्द्रियादयो न जीवमनुबध्नन्तीत्यर्थः । देहादेरीश्वराच्च व्यावृत्तस्य जीवस्य ज्ञातृत्वे श्रुतिमाह— **तस्माद्वा** इति । यथाश्रुति सूत्रकृता निर्णीतत्वमाह— **वक्ष्यति चेति** । पूर्वं श्लोकतः संक्षिप्तमिह प्रपञ्चितमित्यपुनरुक्तिः । स्वपदवर्णनं च भाष्यकृत्यं पठन्ति ॥

अतः स्वयंप्रकाशोऽयमात्मा ज्ञातैव , न प्रकाशमात्रम् । प्रकाशत्वादेव कस्यचिदेव भवेत्प्रकाशः, दीपादिप्रकाशवत् ; तस्मान्नात्मा भवितुमर्हति संवित् । संविदनुभूतिज्ञानादिशब्दाः संबन्धिशब्दा इति च शब्दार्थविदः । न हि लोकवेदयोर्ज्ञानात्यादेः अकर्मकस्याकर्तृकस्य च प्रयोगो दृष्टचरः ॥

एवं श्रुत्यादिभिर्ज्ञातुरनात्मत्वं निरस्तमिति निगमयति— **अत** इति ; अन्याधीनप्रकाशत्वस्याभावादित्यर्थः ।

आत्मनोहंऽत्वकर्तृत्वज्ञातृत्वादिविधूनने । वैफल्यं सर्वशास्त्राणां व्यञ्जयत्येवकारतः ॥ ४९० ॥

ननु प्रज्ञानघन एवेत्यवधारणादन्ययोगव्यवच्छेदेन प्रकाशमात्रत्वं स्यादित्यत्राह— **नेति** । अयं भावः— यथा **रसघन एवेत्यत्र** रूपादेरनिषेधः , तथाऽत्रापि मानसिद्धस्य ज्ञातृत्वादेः । अतो जडत्वगन्धाभाव एवात्रावधारणस्याप्य इति । ज्ञातृत्वनिषेधे तदपेक्षं प्रकाशत्वमपि न स्यादित्यभिप्रायेणाह— **प्रकाशत्वादिति** ; व्यवहारानुगुण्यप्रयोजकत्वादित्यर्थः । उक्तमर्थं परम्परया व्यवहारानुगुण्यापादके निदर्शयति— **दीपादीति** । न हि पुरुषमनपेक्ष्य दीपस्यार्थप्रकाशकत्वमिति भावः । संविद आत्मधर्मत्वं वदन्त्या श्रुत्यैव तस्या आत्मत्वं निषिद्धमित्यभिप्रायेणाह— **तस्मादिति** । तस्या विषयाश्रयवत्त्वे निरूपकसंमतिमाह— **संविदिति** । व्युत्पत्तेस्तथात्वेऽपि प्रयोगतोऽन्यथा व्यवस्था स्यादित्यत्राह— **न हीति** । न चात्र दारादिशब्देष्विव शब्दप्रतिपन्नमपि बाध्यम् ; बाधकाभावस्योक्तत्वात् । आत्मस्वरूपविषयस्य ज्ञानशब्दस्य युष्मन्मते कथं संबन्धिशब्दत्वमिति चेत् , तन्न ; धर्मभूतज्ञाने संबन्धिशब्दस्य सार्थत्वात् ; स्वप्रकाशत्वेन निमित्तेन धर्मधर्मिणोश्शब्दानुवृत्तेः । तव तु दृश्यमानविषयाश्रयसंबन्धापह्नवात् संबन्धिशब्दोपदेशवैफल्यमेव । ननु यथा **गच्छतीति** व्युत्पत्तावपि गोशब्दो जातिविशेषार्थः तद्वदत्रापि भ्रान्तिसिद्धकर्मकर्तृविशिष्टव्युत्पत्तावपि तद्रहितस्वरूपे शक्तिरिति चेत् , न ; गतेरव्याप्तयतिव्याप्तिभ्यां गोशब्दे गोत्वं निमित्तीकृतम् ; इह तु न तथा । यद्यपि अव्याप्तिरात्मनि त्वयोक्ता , तथाऽपि ज्ञातारमात्मानमन्यम् अवस्थाद्वयं च सत्यमनादर्तुस्ते दृष्टातिक्रमनिमित्तं नास्ति ; निर्विषयनिराश्रयसंवित्साधनं चाद्याप्याशामोदकमात्रमिति भावः ॥

यच्चोक्तम् अजडत्वात्संविदेव आत्मेति, तत्रेदं प्रष्टव्यम् । अजडत्वमिति किमभिप्रेतम् ? स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत्, तथा सति दीपादिष्वनैकान्त्यं संविदतिरिक्तप्रकाशधर्मानभ्युपगमेन असिद्धिर्विरोधश्च । अव्यभिचरितप्रकाशसत्ताकत्वमपि

सुखादिषु व्यभिचारान्निरस्तम्। यद्युच्येत सुखादिरव्यभिचरितप्रकाशोऽप्यन्यस्मै प्रकाशमानतया घटादिरिव जडत्वेनानात्मेति ; ज्ञानं वा किं स्वस्मै प्रकाशते? तदपि ह्यन्यस्यैवाहमर्थस्य ज्ञातुरवभासते, अहं सुखीतिवत् जानाम्यहमिति। अतः स्वस्मै प्रकाशमानत्वरूपमजडत्वं संविद्य सिद्धम्। तस्मात् स्वात्मानं प्रति स्वसत्तयैव सिध्यन्नजडोऽहमर्थ एवात्मा। ज्ञानस्यापि प्रकाशता तत्संबन्धायत्ता। तत्कृतमेव हि ज्ञानस्य सुखादेरिव स्वाश्रयचेतनं प्रति प्रकटत्वम्, इतरं प्रत्यप्रकटत्वं च। अतो न ज्ञप्तिमात्रमात्मा ; अपि तु ज्ञातैवाहमर्थः ॥

अथ संविदात्मत्वानुमानं दूषयितुमनुवक्ति—**यच्चेति**। **एव**कारो विरोधं परमते लाघवाभावं च व्यनक्ति। उक्तहेतौ विकल्पमुपक्षिपति— **तत्रे**ति। निराचिकीर्षितकोटिचतुष्कमभिसन्धाय पृच्छति—**अजडत्वमि**ति। स्वप्रकाशे स्वसद्भावस्य प्रयोजकत्वमिति शङ्कते— **स्वमत्ते**ति। अत्र स्वसत्तामात्रप्रयुक्तप्रकाशत्वस्यासिद्धत्वात्स्वसत्तायाः स्वप्रकाशसामग्र्येकदेशत्वं वाच्यम् ; तस्या अनात्मन्यपि वृत्तेः सपक्षवृत्त्यभावाच्च विरुद्धहेत्वाभासत्वमभिप्रेत्याह— **तथे**ति। स्वमते ज्ञातुरात्मतया तस्मिन्सपक्षे हेतुवृत्तेः साधारणानैकान्तिकत्वमिहोच्यत इति केचित्। न चानुभूतेः सत्ताख्यो धर्मः ; सत्ताशब्देन स्वरूपविवक्षायामपि तत्प्रयुक्तप्रकाशधर्मानभ्युपगमात्। हेतोः स्वरूपासिद्धिं तदभ्युपगमे सिद्धान्तविरोधं चाभिप्रेत्याह— **संविदि**ति। उत्तरकोटिष्वपि दूषणद्वयमिदं द्रष्टव्यम्। यावत्सत्तं प्रकाशमानत्वं हेतुरित्याशङ्क्याह— **अव्यभिचरिते**ति। यद्यपि अस्मन्मते सुखादेर्ज्ञानविशेषत्वात्स्वप्रकाशत्वम् ; यद्यपि च काश्यपादिमते तेषामस्मदादिमानसप्रत्यक्षविषयत्वं विषयोत्पत्तिसापेक्षतया तदनन्तरभावि; तथाऽपि त्वन्मते अध्यस्तान्तःकरणधर्मभूतेषु सुखादिषु विपक्षेषु हेतुवृत्तिः सिद्धा। तव्यतिरिक्तत्वे सतीति विशेषणेऽपि न निस्तारः।

प्रकाशाव्यभिचारो हि घटादिष्वपि ते समः। भ्रान्तिसिद्धत्वसिद्धान्तान्न तेष्वात्मत्वमिच्छसि ॥ ४९१ ॥
अज्ञातत्वदशाऽस्तीति घटादिषु यदि भ्रमः। संविद्यपि तथाऽस्त्येव तज्जाड्यं हि परे विदुः ॥४९२॥
अज्ञातमपि ते पक्षे साक्षिणा ज्ञायते तथा। अतो ज्ञातवदज्ञातं ज्ञातमित्यभिमन्यसे ॥ ४९३ ॥

आदिशब्देन परमते घटादेरपि सुखादितुल्यत्वं भाषितमेव। ननु सुखादिषु पुरुषभेदेन यावत्सत्त्वं प्रकाशमानत्वाभावान्न तत्रातिचार इति चेन्न; संविदोऽपि तथात्वात्। एकैव संवित्सर्वेषां प्रकाशत इति चेत् ; ए(व)कमेव सुखं सर्वेषामिति किं न स्यात्। भेदकबलादिति चेत् सममेतत्। अजडत्वं नाम स्वस्मै प्रकाशमानत्वमिति कोट्यन्तरे प्रस्तुतदोषातिक्रमशङ्कामनुवक्ति— **यदी**ति। तत्रापि स्वरूपासिद्धिमाह— **ज्ञानमि**ति। **वा**कारश्चार्थः। **किं** क्षेपे। तद्विवृणोति— **तदपी**ति। तदभावशङ्कामुपलम्भेन परिहरति— **अहमि**ति। दृढधीबलादसिद्धिं निगमयति— **अत** इति।

परेणैव घटाद्यर्थः परस्मा एव भासते। स्वान्याभ्यां पुरुषः स्वस्मै परस्मै परधर्मतः ॥ ४९४ ॥
धीः स्वान्याभ्यां स्वाश्रयाय तदन्यस्मै तु तद्धिया। परस्मा एव भातत्वात्परार्थी सा घटादिवत् ॥

उक्तस्य कोटित्रयस्य संविदसिद्धयादिदुष्टत्वादहमर्थे संभवाच्च तस्यात्मत्वं दुस्त्यजमित्याह— **तस्मादिति** । कोट्यन्तरनिरासात्स्वयंप्रकाशत्वमवशिष्यते । तच्च स्वगोचरज्ञाननिरपेक्षप्रकाशत्वम् । तस्य ज्ञातरि स्थापितत्वात्तस्याप्यात्मत्वं स्यादित्यपि सूच्यते ।

अनिष्टे ज्ञातुरात्मत्वे तत्स्थो हेतुरसौ कथम् । इष्टे तु कथमात्मत्वं तद्धर्मस्य प्रसाध्यते ॥ ४५६ ॥

किं च, अन्यनिरपेक्षत्वमात्रं वा ज्ञानमात्रनिरपेक्षत्वं वा हेतुश्चेत्, तयोः संविदसिद्धिमाह—**ज्ञानस्येति** । यद्वा ज्ञातृपरित्यागे ज्ञानस्य स्वयंप्रकाशत्वं न सिध्येदिति स्वरूपासिद्धिसूचनमिदम् । **प्रकाशता**—व्यवहारानुगुण्यापादकता । तत्संबन्धाभावे प्रकाशमानत्वमपि तस्या न सिध्येदित्यभिप्रायेणाह— **तत्कृतमिति** । **प्रकटत्वम्**—स्वयमपि स्वव्यवहारानुगुण्यापादकत्वमिति यावत् । परोक्तनिरसनं स्वोक्तस्थापनं च निगमयति— **अत इति** ॥

अथ यदुक्तम्—अनुभूतिः परमार्थतो निर्विषया निराश्रया च सती भ्रान्त्या ज्ञातृतयाऽवभासते रजततयेव शुक्तिः निरधिष्ठानभ्रमानुपपत्तेरिति, तदयुक्तम्; तथा सति अनुभवसामानाधिकरण्येन अनुभविताऽहमर्थः प्रतीयेत, अनुभूतिरहमिति, पुरोऽवस्थितभास्वरद्रव्याकारतया रजतादिरिव । अत्र तु पृथगवभासमानैवेयमनुभूतिरर्थान्तरमहमर्थं विशिनष्टि दण्ड इव देवदत्तम् । तथा हि अनुभवाम्यहमिति प्रतीतिः । तदेवमस्मदर्थमनुभूतिविशिष्टं प्रकाशयन् अनुभवाम्यहमिति प्रत्ययो दण्डमात्रे दण्डी देवदत्त इति प्रत्ययवद्विशेषणभूतानुभूतिमात्रावलम्बनः कथमिव प्रतिज्ञायेत ॥

अथ वक्ष्यमाणच्छायापत्तिसंसर्गव्यञ्जनस्वपक्षाणां साधारणं ज्ञातृत्वाध्यासं दूषयितुमनुवक्ति—**अथेति** । सविषये वृत्तिज्ञाने ज्ञात्रपेक्षेत्यभिप्रायेण **निर्विषयेत्युक्तम्** । अविद्यायामेव ज्ञातुरप्यध्यासः स्यात्; किमनुभूत्येत्यत्राह— **निरधिष्ठानेति** । अविद्याऽपि ह्यसत्यत्वादधिष्ठानसापेक्षेति भावः । निर्विशेषायां ज्ञातृत्वाध्यासः तस्य त्वयाऽधिष्ठानापेक्षा च दुर्वचेत्यभिप्रायेणाह— **तदयुक्तमिति** । मिथ्यादोषादध्यासं वदतां मिथ्याधिष्ठानादपि स्यादिति भावः । परोक्तेऽनिष्टं प्रसञ्जयति— **तथेति** । यद्यपि रजतत्वमारोप्यम्, तथाऽपि तद्विशिष्टवाचिना रजतशब्देनाधिष्ठानवाचिन इदंशब्दस्य सामानाधिकरण्यं दृश्यते इदं रजतम् इति; तद्वदिहापि अधिष्ठानाध्यस्तयोस्सामानाधिकरण्येन प्रकाशः प्रसज्येतेत्यर्थः । तत्प्रकाशं दर्शयति— **अनुभूतिरहमितीति** । भ्रान्तावपि शुक्तिरेव रजतमिति सामानाधिकरण्यं न दृष्टमित्यत्राह— **पुर इति** । अयं भावः— शुक्तिरजतादिभ्रमे प्रकाशमानेन सामान्याकारेण तत्सिद्धम्, शुक्तित्वाद्याकारस्तु न प्रकाशते; इह तु प्रकाशमानानुभूत्यतिरिक्ताकारानभ्युपगमादनुभूतित्वरूपशुक्तित्वसाम्येऽध्यासानुपपत्तेः । इदंत्वभास्वरत्वादिसमत्वे तेनैव रूपेण सामानाधिकरण्यप्रकाशो दुस्त्यज इति । इष्टप्रसङ्गोऽयमित्यत्र विपर्ययं दर्शयति— **अत्रेति** । **तुः** भ्रमान्तरविषयाद्विशेषद्योतकः, शङ्कानिवृत्त्यर्थो वा । **पृथक्**, आरोप्यात्; अहंत्वविशिष्टवैयधिकरण्येनेत्यर्थः; न ह्यताधिष्ठानप्रकाशो दृष्ट इति भावः । अतद्रूपतया विशेषणतया च भानं विवृणोति— **तथा हीति** । उक्तं विशिष्ट-

प्रतीतिविरोधं प्रसिद्धोदाहरणेन निदर्शयति— तदेवमिति । न हि स्वाध्यस्तदेवदत्तविशेषणतया भातीति भावः ॥

यदप्युक्तं स्थूलोऽहमित्यादिदेहात्माभिमानवत एव ज्ञातृत्वप्रतिभासनाज्ज्ञातृत्वमपि मिथ्येति, तदयुक्तम्; आत्मतयाऽभिमताया अनुभूतेरपि मिथ्यात्वं स्यात्; तद्वत एव प्रतीतेः । सकलेतरोपमर्दितत्त्वज्ञानाबाधितत्वेनानुभूतेर्न मिथ्यात्वमिति चेत्; हन्तैवं सति तदबाधादेव ज्ञातृत्वमपि न मिथ्या ॥

देहत्वादिवत् बोद्धृत्वादिकमपि भ्रान्तेरेव प्रतिपन्नत्वादध्यस्तम्; ततश्च मिथ्येति प्रागुक्तमनुवक्ति— यदपीति । अयं हेतुरतिप्रसञ्जक इति दर्शयितुमाह— तदिति । तत्र विश्वाध्यासाधिष्ठानस्य वैषम्यं शङ्कते— सकलेति । परोक्तहेतोः स्वेष्टेऽपि वृत्तेरविशेषमाह— हन्तेति । हर्षाद्यर्थको वा हन्तकारः ॥

यदप्युक्तम्— अविक्रियस्यात्मनो ज्ञानक्रियाकर्तृत्वरूपं ज्ञातृत्वं न संभवति, अतो ज्ञातृत्वं विक्रियात्मकं जडं विकारास्पदाव्यक्तपरिणामाहंकारग्रन्थिस्थमिति न ज्ञातृत्वमात्मनः; अपि त्वन्तःकरणरूपस्याहङ्कारस्य । कर्तृत्वादिर्हि रूपादिवद्दृश्यधर्मः; कर्तृत्वे अहंप्रत्ययगोचरत्वे चात्मनोऽभ्युपगम्यमाने देहस्येवानात्मत्वपराक्त्वजडत्वादि-प्रसङ्गश्चेति । नैतदुपपद्यते; देहस्येवाचेतनत्वप्रकृतिपरिणामत्वदृश्यत्वपराक्त्वपरार्थत्वादि-योगादन्तःकरणरूपस्याहङ्कारस्य, चेतनासाधारणस्वभावत्वाच्च ज्ञातृत्वस्य ॥

कर्तृत्वादेर्निर्विकारत्वादिभिर्विरोधं दृश्यत्वानात्मधर्मत्वमात्मनोऽकर्तृत्वादिहेतुतर्कवर्गे च दूषयितुमनुवदति— यदपीति । कर्तृत्वादिरिति; आदिशब्देन विकारित्वभोक्तृत्वयोः जडत्वादीति आदिशब्देन परिच्छिन्नत्वादेश्च संग्रहः । अत्र विरोधचोद्यमेव विरोधहतमित्यभिप्रायेणाह— नैतदिति । आत्मन्यकर्तृत्वादिसाधकानामन्तःकरणे कर्तृत्वादि-साधकानां च प्रमाणविरोधमभिसन्धायाह— देहस्येति । ननु अचेतनत्वहेतुर्ज्ञातृत्वनिषेधे साध्याविशिष्टः; मैवम् क्षेत्रवर्गान्तर्भूतत्वेन शास्त्रसिद्धत्वे तात्पर्यात् । दृश्यत्वमिह स्वगोचरबुद्ध्यैव प्रकाश्यत्वम् । यद्वा, द्रष्टुरन्यतया तदुपकरण-त्वेन दृशिविषयत्वम् । आदिशब्देन परिणामित्वविनाशित्वसंग्रहः ॥

एतदुक्तं भवति — यथा देहादिर्दृश्यत्वपराक्त्वादिहेतुभिस्तत्प्रत्यनीकद्रष्टृत्व-प्रत्यक्त्वादेर्विविच्यत, एवमन्तःकरणरूपाहङ्कारोऽपि तद्व्यत्वादेव तैरेव हेतुभिस्त-स्माद्विविच्यत इति । अतो विरोधादेव न ज्ञातृत्वमहङ्कारस्य दृशित्ववत् । यथा दृशित्वं तत्कर्मणोऽहङ्कारस्य नाभ्युपगम्यते, तथा ज्ञातृत्वमपि न तत्कर्मणोऽभ्युप-गन्तव्यम् । न च ज्ञातृत्वं विक्रियात्मकम्; ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वम्; ज्ञानं चास्य

नित्यस्य स्वाभाविकधर्मत्वेन नित्यम् ; नित्यत्वं चात्मनः * नात्मा श्रुतेरित्यादिषु वक्ष्यति। * ज्ञोऽत एवेत्यत्र ज्ञ इति व्यपदेशेन ज्ञानाश्रयत्वं च स्वाभाविकमिति वक्ष्यति। अस्य ज्ञानस्वरूपस्यैव मणिप्रभृतीनां प्रभाश्रयत्वमिव ज्ञानाश्रयत्वमप्यविरुद्धमित्युक्तम्। स्वयमपरिच्छिन्नमेव ज्ञानं सङ्कोचविकासार्हमित्युपपादयिष्यामः। अतः क्षेत्रज्ञावस्थायां कर्मणा सङ्कुचितस्वरूपं तत्तत्कर्मानुगुणतरतमभावेन वर्तते। तच्चेन्द्रियद्वारा व्यवस्थितम् ; तमिममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेशः प्रवर्तते। ज्ञानप्रसरे तु कर्तृत्वमस्त्येव; तच्च न स्वाभाविकम् ; अपि तु कर्मकृतमित्यविक्रियस्वरूप एवात्मा। एवंरूपविक्रियात्मकं ज्ञातृत्वं ज्ञानस्वरूपस्यात्मन एवेति न कदाचिदपि जडस्याहङ्कारस्य ज्ञातृत्वसंभवः ॥

ननु प्राक्कृतत्वेऽपि यथा कचिदेवेन्द्रियत्वतदाश्रयत्वादिकं तद्विकारशक्त्या अध्यासशक्त्या वा तथा कचिदेव ज्ञातृत्वं स्यात्। यत्तु **चेतनासाधारणस्वभावत्वाच्च ज्ञातृत्वस्येति**, एतदपि तद्विवक्षितं न साधयेत् ; अन्तःकरणस्यैवास्मिश्चेतनत्वाङ्गीकारादित्यत्राह— **एतदुक्तमिति**। अयं भावः— * पृथिव्यापस्तेजो वायुरिति तत्त्वानि ; तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदिति बृहस्पत्युक्तं प्रतिवदता त्वयाऽपि यैः स्वभावैर्देहादिर्द्रष्टृत्वप्रत्यक्त्वभोक्तृत्वादिरहितो निष्कृष्टः, तैरेवाहङ्कारद्रव्यमपि तद्रहितं स्याप्यत इति। कर्तृत्वादिस्वीकारे जडत्वादिप्रसङ्गस्तु श्रुत्या शिथिलमूलः। देहेऽहंप्रत्ययस्य भ्रान्तित्वात्तत्रानात्मत्वम्। न च जडत्वादिकमहंधीयुक्तम्, उपहिते ब्रह्मणि तद्विषयत्वेऽपि त्वयैव जडत्वादिस्वीकारात्। आत्मनि वा अहंत्वादिकं प्रत्यक्षादिसिद्धं निर्बाधम्। **चेतनासाधारणस्वभावत्वोक्तिश्चान्तःकरणातिरिक्तात्मस्वभावतया प्रमाणसिद्धत्वप्रकाशनार्था**। अत्र शक्तिविशेषचोद्यं परिहरति— **अत इति**। यद्यात्मत्वमन्तःकरणस्य विरोधात्त्यज्यते, तथैव द्रष्टृत्वादिकमपि त्याज्यम् ; अन्यथा देहस्यैव तत् दुस्त्यजमिति भावः। अविक्रियात्मकत्वहेतोरात्मनि साक्षादन्वयविवक्षायामसिद्धिमप्याह— **न चेति**। व्यवहितसंबन्धं व्यञ्जयितुमाह— **ज्ञातृत्वमिति**। अपृथक्सिद्धविशेषणाभिप्रायेणात्र गुणशब्दः। ननु आगन्तुकज्ञानगुणाश्रयत्वे साक्षाद्विकारित्वं स्यादित्यत्राह— **ज्ञानमिति**। **चः** शङ्कानिवृत्त्यर्थः। धर्मिनाशाद्विरोधिगुणाद्वा गुणस्य नाशं परे वदन्ति ; अत्र तु नोभयमित्यभिप्रायेण **नित्यस्य स्वाभाविकधर्मत्वेनेत्युक्तम्**। द्वयोरपि नित्यत्वस्य श्रुतिसिद्धत्वेऽप्याप्रलयस्थायित्वादिपक्षाणामपसिद्धान्तत्वं दर्शयितुं श्रुतिस्वारस्यपुरस्कारकं सूत्रद्वयमाह— **नित्यत्वमित्यादिना** वाक्यद्वयेन। आत्मस्वरूपस्य ज्ञानत्वं वदद्विर्वाक्यैस्तस्य ज्ञानाश्रयत्वमर्थान्निषिद्धं स्यादित्यत्राह— **अस्येति**। ननु मणिः पार्थिवः, प्रभा तैजसी ; अतो मणिप्रभयोः पर्वतोत्सङ्गप्रकारेण संबन्धः। मणिद्युमणिप्रभृतीनां विनाशप्रसङ्गादिति प्रागुक्तमपि चिन्त्यम् ; अतिकठिनस्य पार्थिवांशस्य विशरणानभ्युपगमात्, मणिस्थस्य तेजोंशस्य नाशप्रसक्तेरिष्टत्वाच्च। तस्माद्विषमो दृष्टान्तः। **मैवम्** ; मणिर्हि नः **ज्ञानसूतमयः पिण्डः**, तत्र पिण्डमध्यस्थस्य तेजोंशस्य स्वप्रभाकत्वात्तद्विशरणे च प्रतिक्षणमनुलब्धसद्भावशैथिल्यकल्पौ

गौरवप्रसङ्गे तात्पर्यान्नेति । नन्ववयवविवादपरित्यागिनां, प्रभाप्रभावद्रूपस्य ज्ञानतदाधाररूपस्य वा मिथोऽत्यन्तभिन्नस्य द्रव्यद्वयस्य कथमपृथक्सिद्धिः? द्रव्याद्रव्ययोरपि वा कथम्? यथादर्शनं स्वभावनियमादिति चेत्तुल्यम्। अत एवेश्वरं प्रत्यपि चिदचिद्द्रव्याणामपृथक्सिद्धिरनपाया। यद्यात्मनां ज्ञानमीश्वरस्येव स्वाभाविकमनश्वरं च, तर्हि सर्वे सर्वदा सर्वज्ञाः स्युरित्यत्राह—**स्वयमिति** ; स्वभावत इत्यर्थः। एवं सति मुक्तावपि धीसङ्कोचः प्रलयमोक्षयोरिवेदानीमपि धीतारतम्यविरहः स्यादित्यत्राह—**अत** इति। करिष्यमाणोपपादनप्रकारादित्यर्थः। मुक्तौ कर्माभावादद्य कर्मतारतम्याच्च शङ्काद्वयनिरासः। ननु धियः स्वाभाविकत्वे कर्मणैव तस्यास्तारतम्ये च किमर्थेन्द्रियसृष्टिः? अतोऽपर्यनुयोज्याविद्यातारतम्याद्धीतारतम्याध्यासः इन्द्रियादिसृष्टिश्चेत्यत्राह—**तदिति**। तरतमभावेन वर्तमानमित्यर्थः। **व्यवस्थितम्**—सद्वारकतयैव स्वतन्त्रेच्छासिद्धमिति यावत्। ज्ञानस्योत्पत्तिनाशौ प्राक् समर्थितौ ; अत्र तु तन्नित्यत्वोक्तिः कथमित्यत्राह—**तदिति**। श्रुतिप्रसिद्धं कर्मतारतम्यं चेत्यर्थः। **प्रसरशब्द** इह संकोचमभिप्रैति। तथाऽपि जानात्यादिः पुरुषकर्तृक एव। अतः सविकारत्वं दुस्त्यजम् ; ज्ञाननित्यत्वश्रुत्याऽपि अद्यतनसंकुचितप्रसर एव नित्यः स्यात् ; तारतम्यं च केशलोमकपालादिवैचित्र्यवत् स्वभावात् स्यादिति चोद्यत्रये **ज्ञानप्रसर** इत्यादिवाक्यत्रयं प्रत्युक्तिः। अत्र देहविकारवत् व्यवहितविकारो नानिष्टः। श्रुतिश्च ज्ञानस्वरूपमात्रनित्यत्वमेव वक्ति। अनस्तारतम्यस्य न स्वाभाविकत्वम्। धीतारतम्यस्य कर्मतारतम्यहेतुकत्वं च * अविद्या कर्मसंज्ञेत्यादिशास्त्रसिद्धम्। तदनादरे लोकायतोत्थानप्रसङ्ग इति भावः। आत्मा स्वरूपतस्तावन्न मृदादिवद्विक्रियते ; धर्मतोऽपि दोषरूपो विकार औपाधिक इत्यभिप्रायेण **अविक्रियस्वरूप एवेत्युक्तम्**। तथाऽपि निर्विकारश्रुत्या व्यवहितविकारस्यापि निषेधे प्राप्ते ज्ञातृत्वमौचित्यादन्तःकरणस्येत्यत्राह—**एवंरूपेति**। **रूपशब्दोऽत्र** निरूपकधर्मपरः। यस्य ज्ञानवत्त्वं प्रमितं, तस्यैव हि तद्द्वारकविकारः संजायते ; अतो निर्विकारश्रुतिरत्र सङ्कोच्येति भावः। यद्वा, त्वदुक्तयुक्त्यैवान्तःकरणस्य घटवदेवात्मत्ववत् ज्ञातृत्वमपि न स्यादिति ॥

जडस्वरूपस्याप्यहङ्कारस्य चित्सन्निधानेन तच्छायापत्त्या तत्संभव इति चेत् ; केयं चिच्छायापत्तिः ? किमहङ्कारच्छायापत्तिः संविदः ? उत संविच्छायापत्तिरहङ्कारस्य ? न तावत्संविदः, संविदि ज्ञातृत्वानभ्युपगमात्। नाप्यहङ्कारस्य , उक्तरीत्या तस्य जडस्य ज्ञातृत्वायोगात् , द्वयोरप्यचाक्षुषत्वाच्च । न ह्यचाक्षुषाणां छाया दृष्टा ॥

अथ जलादिषु मणिप्रभावेधन्यायेन चान्द्रादिच्छायापत्तिन्यायेन वा ज्ञातृत्वाध्यासं शङ्कते—**जडेति**। तत्र संविदहङ्कारयोर्मध्ये किमीया छाया कुलापन्नेति विकल्पासहत्वमभिप्रेत्याह—**केयमिति**। प्रकृतिपुरुषयोरनयोरितरेतरस्वभावाध्यासो हि साङ्ख्यैरुक्तः; तदनुसारोऽत्र परस्य संभवतीति मत्वा **तच्छायापत्त्या** इत्यत्र विवक्षाभेदबुद्ध्या विकल्पयति—**किमिति**। किमहङ्कारे संविदश्छायापत्तिः, उत स्वाधिष्ठानभूतायां संविदि तदध्यासितस्यैवाहङ्कारस्येत्यर्थः। आद्यं परसंमतप्रकारेणैव दूषयति— **न तावदिति**। द्वितीये युक्तिविरोधमाह— **नापीति**। **उक्तरीत्या** प्रकृतिपरिणामित्वादिनेत्यर्थः। यद्यपि अजडस्य ज्ञातृत्वमव्यापकम् , तथाऽपि जडस्याज्ञत्वं व्यापकमित्यभिप्रायेण तस्य ज्ञातृत्वायोग उक्तः। अत्र विकल्पकोटयोर्युक्तमेणोत्तरं दत्तमिति केचित्। तदा तु षष्ठीनिर्दिष्टयोर्दर्पणस्थानीयत्वम्। तत्र किमिह तद्धर्माध्यासमात्रं तच्छायापत्तिः, उत तत्प्रतिबिम्बापत्तिरिति विकल्पे प्रथमस्य दत्तोत्तरत्वं मत्वा द्वितीयेऽपि तेनैव

दूषिते दूषणान्तरमप्यस्तीत्याह— **द्वयोरिति**। **अपिशब्द** एकैकाचाक्षुषत्वेऽपि प्रतिबिम्बासंभवात् अत्र कैमुत्यार्थः। व्याप्तिं व्यनक्ति— **न हीति**। **अचाक्षुषाणामिति** अधिष्ठानानामारोप्याणां च तन्त्रोक्तिः॥

अथाग्निसंपर्कादयःपिण्डौष्ण्यवच्चित्संपर्काज्ज्ञातृत्वोपलब्धिरिति[चेत्]; नैतत्। संविदि वास्तवज्ञातृत्वानभ्युपगमादेव तत्संपर्कादहङ्कारे न ज्ञातृत्वं तदुपलब्धिर्वा। अहङ्कारस्य स्वचेतनस्य ज्ञातृत्वासंभवादेव सुतरां न तत्संपर्कात्संविदि ज्ञातृत्वं तदुपलब्धिर्वा॥

* अयःपिण्डे यथा वह्निर्भिन्नस्तिष्ठत्यभिन्नवत्। तथा विश्वमिदं देवो व्यावृत्य परितिष्ठति॥

इत्यादिवाक्यानुसारी पक्षान्तरं शङ्कते— **अथेति**। किमत्र रुमाक्षिप्तपार्थिवान्तरवत्संसर्गस्वभावोत्पत्त्या तदुपलब्धिः, उत मञ्जिष्ठादिवत्तत्तदारोपादिति विकल्पं मत्वा द्विधाऽप्यसंभवमभिप्रेत्याह— **नैतदिति**। तत्र संविदोऽहङ्कारस्य वा रुमास्थानीयत्वमिति विकल्पे पूर्वं निरस्यति— **संविदीति**। आरोपितज्ञातृत्वेऽन्योन्याश्रयसूचनाय **वास्तवशब्दः**। परमपि प्रागुक्तयुक्त्यैव निरस्तमित्याह— **अहङ्कारस्येति**। **तुशब्दोऽत्र** चूर्णहरिद्रादिन्यायतोऽपि ज्ञातृत्वाभ्युपगमे स्वेष्टविरोधं द्योतयति। अत्र **अचेतनस्येति** प्रकृतिपरिणामित्वादिपरम्। असंभवसाम्येऽपि संविद्यजडत्ववैषम्यं, तत्संपृक्ताहङ्कारे तद्विशिष्टभ्रमश्शङ्क्येतापि; अहङ्कारसंपृक्तायां तु संविदि तावदज्ञत्वजडत्वादिभ्रम एव स्यादित्यभिप्रायेण **सुतरामित्युक्तम्**॥

यदप्युक्तमुभयत्र न वस्तुतो ज्ञातृत्वमास्ति; अहङ्कारस्त्वनुभूतेरभिव्यञ्जकः स्वात्मस्थामेवानुभूतिमभिव्यनक्ति आदर्शादिवदिति। तदयुक्तम्, आत्मनः स्वयंज्योतिषो जडस्वरूपाहङ्काराभिव्यङ्ग्यत्वायोगात्। तदुक्तम्— * शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः। स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमत्॥ इति। स्वयं प्रकाशानुभवाधीनसिद्धयो हि सर्वे पदार्थाः। तत्र तदायत्तप्रकाशोऽचिदहङ्कारोऽनुदितानस्तमितस्वरूपप्रकाशमशेषार्थसिद्धिहेतुभूतमनुभवमभिव्यनक्तीत्यात्मविदः परिहसन्ति॥

पक्षद्वयोक्तदोषातिक्रमाय * जलाधारेप्विवांशुमान् इत्याद्यनुगृहीतं प्रागुक्तव्यञ्जकस्वभावमनुवक्ति— **यदपीति**। न हि युक्तिविरुद्धं दृष्टान्तमात्रेण सिध्येदित्यभिप्रायेणाह— **तदिति**। अयुक्तिं विवृणोति— **आत्मन इति**। स्वयंज्योतिषः नित्यस्वयंप्रकाशे स्वरूपे व्यञ्जकान्तरनिरपेक्षस्येत्यर्थः। संवित्तेरिव साक्षाद्व्यञ्जकत्वं न संभवतीत्यभिप्रायेण जडस्वरूपत्वेनोक्तिः। उक्तवैशिष्ट्यार्थमेतत्प्रकरणोक्तानां परमाचार्यसंप्रदायसिद्धत्वमाह—**तदुक्तमिति**। श्लोकविवृतिमाह— **स्वयमिति**। न ह्यविद्यातद्विकारेषु किञ्चित्त्वयाऽपि स्वप्रकाशतया स्वीकृतमिति भावः। अचिच्छब्दश्चिदायत्त[स्वरूपत्वे] प्रकाशत्वे हेतुपरः। नित्ये न कारणापेक्षेति दर्शयितुम् **अनुदितत्वादिकथनम्**॥

किं च, अहङ्कारानुभवयोः स्वभावविरोधात् अनुभूतेरननुभूतित्वप्रसङ्गाच्च न व्यङ्क्त्यङ्ग्यभावः। यथोक्तम्— * व्यङ्क्त्यङ्ग्यत्वमन्योन्यं न च स्यात्प्राति-

कूल्यतः। व्यङ्ग्यत्वेऽननुभूतित्वमात्मनि स्याद्यथा घटे॥ इति। न च रविकरनिकराणां स्वाभिव्यङ्ग्यकरतलाभिव्यङ्ग्यत्ववत् संविदभिव्यङ्ग्याहङ्काराभिव्यङ्ग्यत्वं संविदः साधीयः। तत्रापि रविकरनिकराणां करतलाभिव्यङ्ग्यत्वाभावात्। करतलप्रतिहतगतयो हि रश्मयो बहुलाः स्वयमेव स्फुटतरमुपलभ्यन्त इति तद्बाहुल्यमात्रहेतुत्वात्करतलस्य नाभिव्यञ्जकत्वम्॥

तदायत्तप्रकाशेत्यनेन सूचितं विरोधं व्यञ्जयितुमाह— **किञ्चेति**। स्वभावविरोधात्पूर्वोक्ताव्यञ्जकत्वायोगाच्चेत्येके। तात्पर्यान्तरमपि ब्रूमः— यथा कार्यस्य स्वकारणकारणत्वे स्वप्रागभावकालवृत्तित्वप्रसङ्गाद्विरोधः, तथाऽत्रापीति। न ह्यहङ्कारः स्वयमव्यक्तो व्यञ्ज्यात्; संविन्निरपेक्षसत्ताकत्वेन स्वरूपसत्यत्वप्रसङ्गात्। अत एव न स्वयं व्यक्तः; तस्मात्संविदधीनसिद्धिव्यक्तिः; तदिदम् **अशेषार्थसिद्धिहेतुभूत**मित्यनेन सूचितम्। संविच्च नाव्यक्ता व्यञ्जयेत्; जडत्वप्रसङ्गात्। तदसौ स्वव्यक्तिसापेक्षाहङ्कारायत्तस्वव्यक्तिरित्यन्योन्याश्रय इति। एतदप्यात्मसिद्धौ श्लोकान्तरेण स्पष्टयति— **यथोक्तमिति**। प्रातिकूल्यमिह स्वभावविरोधशब्दोक्तम्। मिथो व्यङ्ग्यत्वसंभवे प्रागुक्तं दृष्टान्तं दूषयति— **न चेति**। पक्षवद्दृष्टान्तेऽपि व्यञ्जकत्वासंभवमाह— **तत्रापीति**। ननु स्फुटतरप्रकाशः करतलायत्तः प्राग्दर्शितः; तत्राह— **करेति**। बाहुल्यद्वारा व्यञ्जकत्वे कारणानां सर्वेषां व्यञ्जकत्वप्रसक्तिर्मालिचा सूच्यते। न चाहङ्कारः संवित्स्रोतःप्रतिघाती; न च सा बहुलीकरणार्हा, यत इह करादिदृष्टान्तः स्यादिति च भावः॥

किंच, अस्य संविद्रूपस्यात्मनोऽहङ्कारनिर्वर्त्याभिव्यक्तिः किंरूपा? न तावदुत्पत्तिः, स्वतस्सिद्धतयाऽनन्योत्पाद्यत्वाभ्युपगमात्। नापि तत्प्रकाशनम्, तस्य अनुभवान्तराननुभाव्यत्वात्। तत एव च न तदनुभवसाधनानुग्रहः। स हि द्विधा— ज्ञेयस्येन्द्रियसंबन्धहेतुत्वेन वा, यथा जातिनिजमुखादिग्रहणे व्यक्तिदर्पणादीनां नयनादीन्द्रियसंबन्धहेतुत्वेन; बोद्धृगतकल्मषापनयनेन वा, यथा परतत्त्वावबोधने साधनस्य शास्त्रस्य शमदमादिना। यथोक्तम्— * करणानामभूमित्वान्न तत्संबन्धहेतुतेति॥

व्यक्तिस्वरूपं निर्धार्य मिथो व्यञ्जकत्वं वाच्यम्; सैवात्र दुर्वचेति विवक्षुराह— **किंचेति**। **अस्येत्यनेन** स्वयंप्रकाशतया स्थापितत्वं सूच्यते। तत्र हेतुः संविद्रूपत्वम्; वक्ष्यमाणकोटीनां यथायोगं मानविरोधमभ्युपगमविरोधं च व्यञ्जयितुम् **आत्मन** इत्युक्तम्। **किंरूपा**— न किञ्चिद्रूपेत्यर्थः। विकल्पकोटीः हृदि निधाय क्रमाद्दूषयति— **न तावदिति**। उत्पत्तिरेवाभिव्यक्तिरिति साङ्ख्यैरुच्यते; परस्य चानिर्वचनीयोत्पत्तिर्बुद्धित एव सिध्यति; स्वमते च प्रत्यक्षधीहेतुभूतविषयोत्पादकमुत्पादनद्वारा व्यञ्जकतयैवोपचर्येत। उत्पत्तिकोटिरिहाशङ्क्य निरस्ता। **स्वतस्सिद्धतया-**

अनादितयेत्यर्थः। **अनन्योत्पाद्यत्वाभ्युपगमात्**— सौगतवदुत्पाद्यत्वस्यानङ्गीकारादिति यावत्। तदिष्टं कोट्यन्तरवन्निषेधति— **नापीति**। **तत्प्रकाशनम्**— आत्मगोचरप्रकाशजननम्। इदं च ज्ञापकत्वेन कारणत्वेन वा भाव्यम्। **अननुभाव्यत्वात्**। स्थापितं ह्येतत्त्वयैवेति भावः। कोट्यन्तरेऽप्युक्तदोषानतिवृत्तिमाह— **तत एवेति**। **चोऽत्र** भिन्नक्रमः। अस्मिन्पक्षे दत्तोत्तरत्वमप्युत्तरं व्यञ्जयितुं विकल्पयति— **स हि द्विधेति**। अत्र पूर्वः कल्पो दृष्टोपकररूपकरणानुग्रहमुपलक्षयति, उत्तरस्त्वदृष्टमुखेन कर्तृसंस्कारद्वारकः। तत्र करणसंभाव्यानुग्रहान्तरं शङ्कते— **यथेति**। ग्राह्य इति शेषः। संयुक्तसमवायेन जातिग्रहणे व्यक्तिसंयोगोऽपेक्षित इत्येतावता व्यक्तिनिदर्शनम्। दर्पणादीनां तु नयनरश्मिपरिस्रोतःप्रवर्तनद्वारा; व्यक्तिदर्पणादीनां तु व्यञ्जकत्वमेव नास्तीति वक्ष्यति। **कल्मषशब्द** इह **कषायशब्दोक्तं** कृत्स्नमभिप्रैति। अनयोराद्यस्यात्मसिद्धौ दूषणमुक्तमित्याह— **यथोक्तमिति**। **अभूमित्वात्**— अविषयत्वादित्यर्थः। द्वितीये तु, शब्देन प्रत्यक्षे जनयितव्ये शमादिरनुग्राहक इति। निष्प्रमाणकारणकल्पनामिद्धेर्दूषणस्य दुष्टत्वात्तदुक्तिरिह नादृता। * अहमर्थस्य बोद्धृत्वान्न स तेनैव शोध्यत इत्युत्तरार्धेन दूषणम्। अहमर्थस्येति काकाक्षिवत्। अहङ्कारातिरिक्तस्य बोद्धुरनभ्युपगमात्तस्य च स्वरूपेण स्वकल्मषविरोधित्वे कल्मषनिबर्हणार्थे कर्तव्यविधयो निरर्थकाः स्युरिति भावः॥

किंच, अनुभूतेरनुभाव्यत्वाभ्युपगमेऽप्यहमर्थेन न तदनुभवसाधनानुग्रहः सुवचः। स ह्यनुभाव्यानुभवोत्पत्तिप्रतिबन्धनिरसनेन भवेत्, यथा रूपादिग्रहणोत्पत्तिनिरोधिसन्तमसनिरसनेन चक्षुषो दीपादिना। न चेह तथाविधं निरसनीयं संभाव्यते। न तावत्संविदात्मगतं तज्ज्ञानोत्पत्तिनिरोधि किंचिदप्यहङ्कारापनेयमस्ति। अस्ति ह्यज्ञानमिति चेन्न, अज्ञानस्याहङ्कारापनोद्यत्वानभ्युपगमात्। ज्ञानमेव हि अज्ञानस्य निवर्तकम्। न च संविदाश्रयत्वमज्ञानस्य संभवति; ज्ञानसमानाश्रयत्वात्तत्समानविषयत्वाच्च ज्ञातृभावविषयभावविरहिते ज्ञानमात्रे साक्षिणि नाज्ञानं भवितुमर्हति। यथा ज्ञानाश्रयत्वप्रसक्तिशून्यत्वेन घटादेर्नाज्ञानाश्रयत्वम्, तथा ज्ञानमात्रेऽपि ज्ञानाश्रयत्वाभावेन नाज्ञानाश्रयत्वं स्यात्। संविदोऽज्ञानाश्रयत्वाभ्युपगमेऽपि आत्मतयाऽभ्युपगतायास्तस्या ज्ञानविषयत्वाभावेन ज्ञानेन न तद्गताज्ञाननिवृत्तिः। ज्ञानं हि स्वविषय एवाज्ञानं निवर्तयति, यथा रज्ज्वादौ। अतो न केनापि कदाचित्संविदाश्रयमज्ञानमुच्छिद्येत। अस्य च सदसदनिर्वचनीयस्याज्ञानस्य स्वरूपमेव दुर्निरूपमित्युपरिष्टाद्वक्ष्यते। ज्ञानप्रागभावरूपस्य चाज्ञानस्य ज्ञानोत्पत्तिविरोधित्वाभावेन न तन्निरसनेन तज्ज्ञानसाधनानुग्रहः। अतो न केनापि प्रकारेणाहङ्कारेणानुभूतेरभिव्यक्तिः॥

अनुभूतिस्वभावात्तदनुग्रहप्रकारस्वभावाच्चाहङ्कारस्य व्यञ्जकत्वं निरस्तम्। अथानुभूतेरनुभाव्यत्वान्नारोहेऽप्यहङ्कारस्वभावात्तस्य करणानुग्राहकत्वं दुर्वचमिति वक्तुमाह— **किं चेति**। अत्र कोट्यन्तराणां दूषितत्वात्परबुद्ध्यनुसारेण संभावितमनूद्य दूषयति—**स हीत्यादिभिस्त्रिभिः**। प्रतिबन्ध इह विवक्षितकार्योपयुक्तस्वनिवृत्तिपदार्थः। ततश्च तथाभूतं द्रव्यमिति परैरेवाङ्गीकृतम्। अत्र निरसनीयस्य संविद्गतत्वं, तत्तिरोधायकत्वम्, अहङ्कारापनोद्यत्वं च दूष्यतयोपक्षिपन्नुद्भटदोषं चरमं दूषयति— **न तावदिति**। गतशब्दोऽत्र मणौ मालिन्यवदा[धेयतया]च्छादकतया प्राप्तं वक्ति। **किञ्चिदपि**— रजस्तमःकलुषादिकमित्यर्थः। परमतप्रसिद्ध्या शङ्कते— **अस्ति हीति**। तत्र स्वमतविरोधं प्रमाणविरोधं चाभिप्रेत्याह—**नेति**। प्रथमं विवृणोति—**अज्ञानस्येति**। द्वितीयं विवृणोति—**ज्ञानमिति**। अज्ञानस्याहङ्कारेण **निवृत्तौ** किं पश्चान्निष्फलेन ज्ञानेन तदर्थप्रवृत्त्या चेति भावः। भावरूपे चाज्ञाने सममिदं दूषणम्। अथ संविदात्मगतमित्युक्तं दूषयति— **न चेति**। संवित् आश्रयो यस्य तत्संविदाश्रयम्। आश्रयशब्दः इह विषयतया, आधारतया च संबन्धित्वमाह। **ज्ञानसमानेत्यादिना** तदुभयनिषेधहेतुद्वयोक्तेः; विषयेऽप्याश्रयशब्दः * चेतसो ये व्यपाश्रयः, * आश्रयश्चेतसो ब्रह्म इति प्रयुज्यते। शुक्तिकाद्यज्ञानं हि यदाश्रितं यद्विषयं च तदाश्रितेन तद्विषयेण च बाधकज्ञानेनापोह्यते। इह चाज्ञानाश्रयत्वे तद्विषयत्वे च ज्ञातृत्वज्ञेयत्वे प्रसज्येयातामिति भावः। उक्तस्यासंभवस्य व्यापकाभावफलितत्वमाह— **ज्ञात्रिति**। स्वरूपतो धर्मतोऽपि, तिरोधेयत्वासंभवाय ज्ञानमात्रत्वोक्तिः। साक्षित्वोक्तिश्च स्वस्य परस्य वा तिरोधाने स्वपरसाक्षित्वं न स्यादिति सूचनार्था। अत्राज्ञानाधारत्वांशस्यासंभवं निदर्शनेन निर्धारयति— **यथेति**। यद्यपि ज्ञानात्यन्ताभावरूपमज्ञानं घटादौ ज्ञानमात्रे चास्ति, तथाऽपि तस्य तत्स्वरूपानुबन्धितया निवर्त्यत्वाभावादिह परेष्टाज्ञानाधारत्वासंभव उच्यते। भ्रान्त्या तत्संभवाभ्युपगमेऽनिर्मोक्षप्रसङ्गमाह— **संविद इति**। ज्ञानविषयत्वे तु जडत्वादिप्रसङ्गस्त्वयैवोक्त इति भावः। अज्ञानस्य स्वविरोधिनाऽनिवर्त्यत्वे किं संविदोऽवेद्यत्वेनेत्यत्राह— **ज्ञानमिति**। स्वविषये स्वविषयस्य छादकमेवेत्यर्थः। तन्निदर्शनेन व्यनक्ति— **यथेति**। मिथ्याभूतं रज्जुसर्पादिकं स्वविषय एव हि पूर्वभावं निवर्तयतीत्यव्याहतम्। एवं विषयतया आश्रयतया च अज्ञानसंबन्धित्वे मुक्त्यसंभवं निगमयति— **अत इति**। अत्र परेष्टभावरूपधर्मसिद्धौ हि तद्धर्मतयोक्तानां संभवासंभवौ चिन्त्यौ; साऽपि नास्तीत्याह— **अस्य चेति**। तिष्ठतु मदिष्टं भावरूपमज्ञानम्; ज्ञानप्रागभावरूपाज्ञाननिरासेनाहङ्कारः तज्ज्ञानसाधनमनुगृह्णात्वित्यत्र **ज्ञानमेव ह्यज्ञानस्य निवर्तक**मित्यनेन दत्तोत्तरत्वेऽपि दूषणान्तरं दर्शयितुमाह— **ज्ञानेति**। प्रागभावस्य प्रतियोगिना समानकालत्वमेव हि विरुद्धम्; प्रतियोगिनं प्रति तु नियतपूर्वतया हेतुतैवेति भावः। अहङ्कारस्य व्यञ्जकत्वायुक्तिं विकल्पकोट्यन्तरासंभवव्यक्त्यै निगमयति—**अत इति**। व्यङ्क्तृव्यङ्ग्यव्यक्त्यादिस्वभावसमीक्षया दर्शितानां दोषाणां दुस्तरत्वादित्यर्थः। **केनापि**— उत्पादनद्वारा ज्ञापकतया तत्कारणतया तदनुग्राहकतया चेत्यर्थः॥

न च स्वाश्रयतया अभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः; प्रदीपादिष्वदर्शनात्; यथावस्थितपदार्थप्रतीत्यनुगुणस्वाभाव्याच्च ज्ञानतत्साधनयोरनुग्राहकस्य च। तच्च स्वतःप्रामाण्यन्यायसिद्धम्। न च दर्पणादिर्मुखादेरभिव्यञ्जकः। अपि तु चाक्षुषतेजःप्रतिफलनरूपदोषहेतुः। तद्दोषकृतश्च तत्रान्यथाऽवभासः। अभिव्यञ्जक-

स्त्वालोकादिरेव। न चेह तथाऽहङ्कारेण संविदि स्वप्रकाशायां तादृशदोषापादनं संभवति। व्यक्तेस्तु जातिराकार इति तदाश्रयतया प्रतीतिः; न तु व्यक्तिव्यङ्ग्यत्वात्। अतोऽन्तःकरणभूताहङ्कारस्थतया संविदुपलब्धेर्वस्तुतो दोषतो वा न किञ्चिदिह कारणमिति नाहङ्कारस्य ज्ञातृत्वं तथोपलब्धिर्वा। तस्मात्स्वत एव ज्ञातृतया सिध्यन्नहमर्थ एव प्रत्यगात्मा, न ज्ञप्तिमात्रम्। अहंभावविगमे तु ज्ञप्तेरपि न प्रत्यक्त्वमिद्धिरित्युक्तम् ॥

स्वाश्रयतया अभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभाव इति यत्पागुक्तम्, तत् प्रामाण्यं स्वत इति वदद्भ्योऽबाह्येभ्यो न रोचेतेत्यभिप्रायेण दूषयति— न चेति। स्वभावकल्पितिरियं व्यभिचारादयुक्तेत्याह— प्रदीपादिष्विति। आदिशब्दः इन्द्रियलिङ्गागमसंस्काराणां तदनुग्राहकाणां च सङ्ग्रहार्थः। संशयादिषु व्यभिचारेऽपि यथा धियां प्रमात्वं स्वभावः प्राचुर्याद्गृह्यते, तथेहापि स्यादिति शङ्कानिरासाय बहुवचनम्। स्वभावनिष्कर्षश्चात्र विपरीत इत्याह— यथावस्थितेति। प्रतीतिशब्द इह व्यवहारयोग्यतापादनपरः। स्वाभाव्यं स्वभाव एव। अयं भावः—

मुक्तनित्येश्वरधियां प्रमात्वं ह्यनुपाधिकम्। क्षेत्रज्ञधीपरिच्छेदभ्रमत्वादि च दोषजम् ॥ ४९७ ॥
भ्रान्तावपि यथार्थत्वमधिष्ठानादिषु स्थितम्। अनुप्रविष्टबौद्धैरप्यवशादिदमीरितम् ॥ ४९८ ॥
अनुपप्लवभूतार्थस्वभावस्य विपर्ययैः। न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपातवतः ॥ ४९९ ॥ इति।

उक्तस्यार्थस्य जैमिन्यादिसंमतत्वेन मीमांसानिष्ठैः दुस्त्यजत्वं सूचयति— तच्चेति ॥

मानत्वामानत्वे स्वत इति साङ्ख्याः कणाशानाः परतः। पूर्वं परतो बौद्धाः परं तु मीमांसका द्वयं केचित् ॥
सौगताश्चापि चार्वाकाः साङ्ख्यकाणादवर्त्मगाः। प्रामाण्यज्ञप्तिरप्येवं बहुधाऽऽदिवादिभिः ॥ ५०१ ॥

अत्र दृष्टान्तैकदेशे व्यञ्जकत्वमेव मृग्यम्; कुतः स्वनिष्ठतया व्यञ्जनमित्यभिप्रायेणाह— न चेति। कुतस्तर्हि सर्वैस्तेषु व्यञ्जकतोक्तिरित्यत्राह— अपि त्विति। दृष्टावभासकरणभूतदृष्टिप्रसरहेतुतामात्रेण व्यञ्जकत्वोपचार इति भावः। अगृहीतग्रहणोपायस्य तदीयदोषत्वं व्यनक्ति— तद्दोषेति।

प्रतिबिम्बेऽल्पतादीनामाभिमुख्यस्थितेरतः।
यथार्हं वासनानाञ्च दोषतैवं व्यवस्थिता। सव्यासव्यविपर्यासप्रभृतेरपि संभवः ॥ ५०२ ॥

* * * *

एवं तर्हि * * दोषदर्पणादेरपि धीहेतवोऽन्यथा स्युः।
धीहेतवो यथा दोषाश्चक्षुरागादित्यसत्। अन्वयव्यतिरेकाभ्यां हेतुस्स इति निश्चयात् ॥ ५०३ ॥
तत्त्वधीरोधसङ्कोचे दोषास्स्युर्भ्रान्तिहेतवः। अन्वयव्यतिरेकाभ्यां दोषादिर्हि विविच्यते ॥ ५०४ ॥

इत्याशयः। तत एव दर्पणादेरपि व्यञ्जकत्वं स्यादित्यत्राह— अभिमुख्यञ्जक इति। आलोकादिरेवेति। आलोकादि-

सहितं प्रतिफलितं चाक्षुषं तेज इत्यर्थः। शुक्तिरज्ज्वादिवदधिष्ठानमात्रेण व्यञ्जकत्वं न शक्यमित्यवधारणाभिप्रायः। अस्त्वविद्यादोषार्थस्य दोषान्तरकन्दस्याहङ्कारस्य आदर्शवद्दोषहेतुत्वमिति शङ्कां निरस्यति— **न चेहेति**। स्वरूपप्रकाशे तत्प्रकाशान्तरकरणे वा विकृत्यापादनमिह दुर्वचमिति भावः। दृष्टान्तान्तरेऽप्यन्यथासिद्धिमाह— **व्यक्तेरिति**। **तु**-शब्दो दोषापादकाद्वैषम्यार्थः। **आकारः**— तदाश्रितस्वभाव इति यावत्। **तदाश्रयतया प्रतीतिरित्यनेन** याथार्थ्यं व्यज्यते। ननु यथा दीपादयः स्वधर्मानपि प्रकाशयन्ति तथा व्यक्तिरपि जातिमित्यत्राह— **नत्विति**। व्यक्तिजात्यो-रत्रैकसामग्रीवेद्यत्वमेव; इन्द्रियसंबन्धस्तु व्यक्तिद्वा[रि]रैवेत्येतावताऽपि न सा व्यञ्जिका; व्यक्तिशब्दोऽत्र न व्यञ्जकत्वार्थ-इत्याशयः। अहङ्कारस्य स्वाश्रयतया संविद्व्यञ्जकत्वानुपपत्तिमुपसंहरति— **अत इति**। उपलम्भयुक्त्यागमैर्विरोधद्योतनाय **अन्तःकरणभूतत्वोक्तिः**। साङ्ख्यमृषावादिनोर्मतभेदं जातिमुखादेरिव धर्मत्वप्रतिफलनरूपहेतुद्वयं चाभिप्रेत्य **वस्तुतो दोषतो वेत्युक्तम्**। **ज्ञातृत्वं तथोपलब्धिरिति** च तत्फलितव्यञ्जनम्। ज्ञातुरहमर्थस्यात्मत्वं ज्ञानमात्रस्यानात्मत्वं च निगमयति— **तस्मादिति**। ननु सुषुप्तयादावहंबुद्धिविरहेऽप्यात्मस्वरूपसत्त्वं वाद्यन्तरैरुक्तम्। एवमात्मतया अस्मदुक्तायां ज्ञप्तावपि स्यादित्यत्र * अहमर्थो न चेदात्मेत्यादिना दत्तोत्तरत्वमाह— **अहंभावेति**। **ज्ञप्तेरपीति**। स्वप्रकाशत्वे सत्यपीति भावः॥

तमोगुणाभिभवात्परागर्थानुभवाभावाच्चाहमर्थस्य विविक्तस्फुटप्रतिभासाभावेऽप्या-प्रबोधादहमित्येकाकारेणात्मनस्स्फुरणात्सुषुप्तावपि नाहंभावविगमः। भवदभिमतायाअनुभूतेरपि तथैव प्रथेति वक्तव्यम्। न हि सुप्तोत्थितः कश्चिदहंभाव-वियुक्तार्थान्तरप्रत्यनीकाकारा ज्ञप्तिरहम् अज्ञानसाक्षितयाऽवतिष्ठ इत्येवंविधां स्वापसम-कालामनुभूतिं परामृशति। एवं हि सुप्तोत्थितस्य परामर्शः सुखमहमस्वाप्समिति। अनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च ज्ञायते। न च वाच्यं यथेदानीं सुखं भवति तथा तदानीमस्वाप्सामित्येषा प्रतिपत्तिरिति; अतद्रूपत्वात्प्रतिपत्तेः॥

ननु सुषुप्तावस्थायामहमर्थप्रकाशे जागरस्वप्नयोरिव तथा व्यवहारार्हत्वं स्यात्; न च तदस्तीत्यतो न तदा तत्प्रकाशः। तत्राह— **तमोगुणाभिभवादिति**। स्वकर्मोपात्तत्रिगुणद्रव्यस्थेन तमोगुणेन सविकल्पादिरूपमनोवृत्तिनिरोधादित्यर्थः। तत्फलितमाह— **परागर्थानुभवाभावादिति**। परागर्थाः परस्मा एव भासमानाः; ते चात्मधर्माः देहेन्द्रियविषयाश्च; तेषामान्तरबाह्यवर्गाणामननुभवात्। तत्तद्व्यावृत्ततया तत्तद्विशिष्टतया च स्फुरणाभावोऽपि **विविक्तेत्यादिनाऽनूद्यते**। एतेन अयमहमित्यादि वदन्त्याश्रुतेरभिप्रायो विवृतः। स्वप्नजागरयोर्नानाकारविशिष्टदृष्ट्या तदविरोधार्थम् **आप्रबोधादित्युक्तम्**। विविक्तस्फुटावभासविरहे निर्विशेषभानं स्वीकृतं स्यादित्यत्रोक्तम्— **अहमित्येकाकारेणेति**। सुखित्वदुःखित्वादिभिर्दैवतमनुष्यत्वादिभिश्च विशेषणैर्विशिष्टस्फुरणविरहेऽपि अनुकूलप्रत्यक्षस्वरूपत्वेन भानाद्विशिष्टस्फुरणसिद्धिरिति भावः। औपनिषदमानुमानिकं वा स्वप्रकाशत्वमात्मन इच्छद्भिः सर्वैः सुषुप्तयादिषु

अवभासनात्स्वात्मस्फुरणमङ्गीकृतम् । अतोऽहंभावशब्देनाऽहमर्थः प्रकाशश्चाभिप्रेतौ । नन्वेवमविशदस्फुरणं तदानीमिदानीं वा नोपलभ्यत इत्यत्र प्रतिबन्धोत्तरमाह— **भवदभिमतायां** इति । त्वदभिमतायां प्रमाणानुमतिर्नास्तीति च भावः । एवमविशिष्टार्थविषयनिर्विकल्पवादिनामपि प्रतिबन्दिर्वक्तव्या । **तथैव**— अस्पष्टतयेत्यर्थः । परोक्तेऽपि स्पाष्ट्याभावं मानाभावं च व्यनक्ति—**न हीति** । ननु **ज्ञप्तिरहमित्यनुवादो** न युक्तः । परमते तथात्वाभावात्, **अहंभाववियुक्ते**-त्येतद्वाक्यस्थपदविरोधाच्च । मैवम्; प्रत्यगात्मनः प्रकाशाभ्युपगमेऽहंत्वेन स्फुरणं दुस्त्यजमिति सूचने तात्पर्यात् । **अवतिष्ठ** इति वर्तमानोक्तिस्तत्सामीप्यात् । ननु परामर्शः प्रमाणान्तरेण सेत्स्यतीत्यत्र विरुद्धपरामर्शबलात्तदसंभवं, **स्वावसरे निपुणतरमिति** प्रागुपक्षिप्ते स्वपक्षे मानं च दर्शयति— **एवमिति** । **हिः** प्रसिद्धिं परैरप्युदाहृतत्वं च द्योतयति । प्रकाशरूपस्य प्रदीपस्य तथैव स्वप्रकाशत्वं श्रुत्यभीष्टम् इत्यभिप्रायेण **सुखमहमित्युक्तम्** । तदेव विवृणोति— **अनेने**ति । नात्र विषयानुभवसुखं धर्मभूतधीप्रसरत्वं च विवक्षितम्, सुषुप्तिव्याघातात्, * पुंस्त्वादिवदिति सूत्र-विरोधात्, पूर्वापरभाष्यैः प्रतिक्षिप्तत्वाच्च । अतः स्वस्यैवानुकूलतया स्वेनैव प्रकाशमानत्वे तात्पर्यम् । यद्धि यस्यानुकूलतया भाति स तेन सुखीति व्यवह्रियते । यस्य येन यद्भाति स तेन तस्य ज्ञातेति च । सुषुप्तावहमर्थस्याहंबुद्धेर्वा विनाशमिच्छतां चोद्यमनूद्य क्षिपति— **न चेति** । मन्दमगच्छम्, * तत्र ते न्यवसन् सुखमित्यादिवत्क्रियाविशेषणस्य तात्कालिकत्वे स्वारस्यं प्रत्य[क्सुख]क्स्वरूपानादिसाक्षिप्रकाशे परसंमतिं चाभिप्रयन्हेतुमाह—**अतद्रूपत्वादिति** । तदानीं सुखमस्वाप्सम्, इदानीं दुःख्यामीत्यपि क्वचित्परामृश्यत इति भावः । ननु सुखमहमस्वाप्समित्यंशत्रये स्वापांशस्य तदानीमनुभवे सुषुप्ति-विरोधात् प्रातर्गजाभावादिति न्यायेन स्मर्तव्यस्य स्मरणाभावात्प्रबोधाभावकल्प्या तथा व्यवहार इत्यास्थेयम् । तद्वदंशान्तरयोरपि गतिः स्यात् । मैवम् ।

अयुक्तिर्यस्य तत्रैव स्वारस्यदमनं क्षमम् । भवेदविषये वृत्तिरन्यथाऽतिप्रसङ्गकृत् ॥ ५०५ ॥

न चाहमर्थस्यात्मनोऽस्थिरत्वेन तदानीमहमर्थस्य सुखत्वानुसन्धानानुपपत्तिः । यतः सुषुप्तिदशायाः प्रागनुभूतं वस्तु सुप्तोत्थितो मयेदं कृतम्, मयेदमनुभूतम्, अहमेतदवोचमिति परामृशति । एतावन्तं कालं न किञ्चिदहमज्ञासिषामिति च परामृशतीति चेत्, ततः किम्? न किञ्चिदिति कृत्स्नप्रतिषेध इति चेन्न; नाहमवेदिषमिति वेदितुरहमर्थस्यैवानुवृत्तेः; वेद्यविषयो हि स प्रतिषेधः । न किञ्चिदिति निषेधस्य कृत्स्नविषयत्वे भवदभिमतानुभूतिरपि प्रतिषिद्धा स्यात् । सुषुप्तिसमये त्वनुसन्धीयमानमहमर्थमात्मानं ज्ञातारमहमिति परामृश्य न किञ्चिदवोदिषमिति वेदने तस्य प्रतिषिध्यमाने तस्मिन्काले निषिध्यमानाया वित्तेः सिद्धिमनुवर्तमानस्य ज्ञातुरहमर्थस्य चासिद्धिमनेनैव न किञ्चिदहमवेदिषमिति परामर्शेन साधयंस्तमिमर्थं देवानामेव साधयतु । मामप्यहं न ज्ञातवानिति अहमर्थस्यापि तदानीमननुसन्धानं प्रतीयत

इति चेत्, स्वानुभवस्ववचनयोर्विरोधमपि न जानन्ति भवन्तः। अहं मां न ज्ञातवानिति ह्यनुभववचने। मामिति किं निषिध्यत इति चेत्; साधु पृष्टं भवता; तदुच्यते– अहमर्थस्य ज्ञातुरनुवृत्तेः न स्वरूपं निषिध्यते; अपि तु प्रबोधसमयेऽनुसन्धीयमानस्याहमर्थस्य वर्णाश्रमादिविशिष्टता। अहं मां न ज्ञातवानित्युक्ते विषयो विवेचनीयः। जागरितावस्थानुसंहितजात्यादिविशिष्टोऽस्मदर्थो मामित्यंशस्य विषयः; स्वाप्ययावस्थाप्रसिद्धाविशदस्वानुभवैकतानश्चाहमर्थोऽहमित्यंशस्य विषयः। अत्र सुप्तोऽहमीदृशोऽहमिति च मामपि न ज्ञातवानहमित्येव खल्वनुभवप्रकारः॥

अन्यत्राप्ययुक्तिस्समा, अहमर्थस्य तत्प्रकाशस्य वा सुषुप्तौ नाशादित्यत्राद्यमनूद्य क्षिपति— न चेति। अहमर्थस्य ज्ञातृत्वं स्थापितम्। अतोऽस्य न ध्वंस इति व्यञ्जनार्थ इह आत्मशब्दः। प्राच्यजागरस्थात्मीयकरणत्रयवृत्तिपरामर्शद्रढिम्ना परिहरति— यत इति। युक्तिरूप्यवदध्यस्तस्याहमर्थस्य प्रकाशध्वंसतोऽपि स्वरूपध्वंसं शङ्कते— एतावन्तमिति। स्वेष्टविरुद्धं वदसीत्युपालम्भाभिप्रायेण पृच्छति— ततः किमिति। अज्ञातोपालम्भः पुनः शङ्कते— न किञ्चिदिति। अहमर्थप्रकाशस्यापि निषेधात्तत्स्वरूपनिषेधोऽपि फलित इति भावः। उक्तनिषेधार्थो नकारोऽर्थात्मतीयत इति कृत्वा स्वाभिप्रेतं विवृणोति— नाहमिति। अहं नावेदिषमित्यत्र वेदनाभावाधिकरणभूतस्वात्मनिषेधस्तावदशक्यः; तत्प्रकाशनिषेधश्च स्वयंज्योतिष्ट्वश्रुतिविरुद्धः; बाह्यविषयेऽपि न स्वरूपं निषेध्यम्; सुषुप्तौ विश्वप्रलय्यस्यासंभवादसंमतेश्च। अतः स्वान्यप्रकाशनिषेध एव विवक्षित इत्यभिप्रायेण वेद्यविषयो हीत्युक्तम्। परेष्टार्थेऽनिष्टमाह— न किञ्चिदिति। निषेधस्येति। त्वत्पक्षेऽनुभूतेः प्रकाशनिषेध एव स्वरूपनिषेधोऽपि स्यादिति भावः। वेदननिषेधस्याकृत्स्नविषयत्वे स्वीकृते धीव्यतिरिक्तवेदननिषेधविवक्षया अस्मदिष्टं स्यादित्यत्राह— सुषुप्तीति। अहमर्थस्वरूपनिषेधः परामर्शबलविरुद्धः; अत एव तद्भाननिषेधस्त्वत्पक्षेऽप्ययुक्तः; इदमर्थवदहमर्थस्यापि प्रकाशाधीनस्वरूपत्वात्। सर्वत्र चाधेयनिषेधोक्तिर्हास्येति भावः।

अभानं व्यवहार्यस्य सुषुप्तावहमः कथम्। इति चोद्यं समं वित्तौ श्रुतिश्चात्रोत्तरप्रदा॥ ५०६॥
अहंभानस्य संस्कारमनुत्पादयतोऽपि नः। त्वदिष्टधीभाननयात्स्यात्परामर्शहेतुता॥ ५०७॥
सुषुप्तौ भानसङ्गे तु धीरेव तत्र लुप्यते। उपलब्धिपराहत्या न स्वरूपविपर्ययः॥ ५०८॥

एवशब्दो वैपरीत्यं विवृणोति। जानामीत्यहमर्थम्वरूपप्रकाशश्चेदात्मेत्युच्यते, स तर्हि तद्धर्मः। धातूपात्तश्चेत् इच्छाद्वेषादिधात्वन्तरार्थवदात्मस्वरूपादन्यः प्रसिद्धः। एवकारो दत्तोत्तरत्वद्योतकः। देवानामेवेत्यनेन सर्वज्ञा हि त्वदुक्तिप्रतिपत्त्यर्हा इत्युपालभते। अप्रतिवादिनामिति वा तात्पर्यम्। ननु * विनाशमेवापीतो भवतीति श्रुत्यैवोच्यते विनाशः। मैवम्; प्रकरणाभिप्रेतपुरुषार्थविरहेणासत्कल्पत्वे तात्पर्यात्। अन्यथा, * न ह खल्वयमित्यादि पूर्ववाक्यविरोधात्।

* स एवत्विति सूत्रे च सुषुप्तप्रतिबुद्धयोः। स्वयमेव च तादात्म्यं सूत्रकृत्स्थापयिष्यति॥ ५०९॥

ततश्च स्वप्रकाशत्वजडत्वविमतावपि। सुषुप्तावहमर्थस्य ध्वंसो नास्तीति सुस्थितत्॥ ५१०॥

पुनरपि तदानीमहमर्थवेदनस्यापि विशेषतो निषेधात्तत्स्वरूपनिषेधमपि शङ्कते— **माममेति**। अहमर्थनिषेधं वदता स्ववाक्येन स्वपरामर्शेन चाभीष्टविरोधमाह— **स्वानुभवेति**। उभाभ्यामहमर्थनिषेधस्याशक्यत्वं व्यनक्ति— **अहमिति**। **हिशब्दोऽत्र अनुभववचने** इति शब्दस्य सप्तमीत्वेनोत्तरवान्वये ह्यनपेक्षितः स्यात्। स्वरूपप्रकाशनिषेधमुखेन स्वरूपस्यापि निषेधमन्तरेण का गतिरिति पृच्छति— **मामिति**। सोपालम्भं प्रतिवक्ति— **साध्विति**। असमीचीनत्यागेन प्रमेऽवतारात् सानुकम्पं वा। **तदुच्यते**—तस्मादुत्तरमुच्यत इत्यर्थः। यद्वा, किमिति पृष्टनिषेध्यमुच्यत इत्यर्थः। स्वरूपतत्प्रकाशयोर्निषेधो न शक्य इत्यभिप्रायेणाह— **अहमर्थस्येति**। * सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाध इति न्यायात्, * अयमहमस्मीति श्रुतौ अयंशब्दाभिप्रेतविशेषमाह— **अपि त्विति**। **वर्णाश्रमादिविशिष्टता**— तदभिमान इत्यर्थः। ज्ञेयत्वेनेति वोपस्कार्यम्। आदिशब्द आन्तरं जडपण्डितत्वाद्यपि संगृह्णाति। ननु * नो एव इमानि भूतानीत्यत्र यथा बाह्यार्थानां स्वरूपवेदननिषेधपर इदंशब्दोऽपि स्वरूपमात्रपरः, तथा * अयमहमित्यत्रापि स्यादिति शङ्कां निरस्यति— **अहं माममिति**। अयं भावः— अहमर्थस्वरूपतत्प्रकाशनिषेधयोरशक्यत्वं ह्युक्तम्। **अतः** प्रकारभूतवर्णाश्रमादिवैशिष्ट्यमिह निषेध्यम्। तथा च श्रुत्यन्तरे तद्वैशिष्ट्यमपि निषिध्यते * तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति। सुषुप्तौ तत्तद्वैशिष्ट्येऽपि तत्तद्वेदनवैधुर्यप्रतिसन्धानस्य श्रुतेश्चानुगुणं विषयविवेकं विवृणोति— **जागरितेत्यादिना** ग्रन्थद्वयेन। निषेधवचनतात्पर्यव्यञ्जकमनुभवप्रकारं निर्धारयति— **अत्रेति**। व्यवहारस्य वैवक्षिकत्वादीदृशोक्त्यभावेऽप्यनुभवो दुर्निषेध इत्यवधारणाभिप्रायः॥

किञ्च—सुषुप्तावात्मा अज्ञानसाक्षित्वेनास्त इति हि भवदीया प्रक्रिया। साक्षित्वं च साक्षाज्ज्ञातृत्वमेव। न ह्यजानतः साक्षित्वम्। ज्ञातैव हि लोकवेदयोः साक्षीति व्यपदिश्यते, न ज्ञानमात्रम्। स्मरति च भगवान्पाणिनिः ❀साक्षाद्द्रष्टरि संज्ञायामिति साक्षाज्ज्ञातर्येव साक्षिशब्दम्। स चायं साक्षी जानामीति प्रतीयमानोऽस्मदर्थ एवेति कुतस्तदानीमहमर्थो न प्रतीयेत। आत्मने स्वयमवभासमानोऽहमित्येवावभासत इति स्वापाद्यवस्थास्वप्यात्मा प्रकाशमानोऽहमित्येवावभासत इति सिद्धम्॥

सुषुप्तौ ज्ञातुरविनष्टत्वं परोक्तप्रक्रियया ऽप्यभ्युपगमयति— **किञ्चेति**। अस्त्वज्ञानसाक्षित्वम्, तत्तु तत्प्रकाशात्मत्वमेवेत्यत्राह— **साक्षित्वमिति**। ननु किमत्र ज्ञातृत्वेन; साक्षात्काररूपत्वमेव साक्षित्वमस्त्वित्यत्राह— **न हीति**। उक्तमर्थं लौकिकवैदिकसर्वशब्दार्थनिर्णयनिदानभूतेनानन्यथासिद्धेन व्यवहारेण स्थापयति— **ज्ञातैवेति**। साक्षिशब्दस्यास्तु ज्ञानविशेषे शक्तिः, तदाश्रये तु लक्षणेत्यत्राह— **न ज्ञानमात्रमिति**। अयं भावः— न हि सर्वत्र विशिष्टगोचरे विशेषणमात्रे शक्तिस्त्वयाऽपि स्वीक्रियते। तथा सति विशिष्टवाचिषु सत्यादिपदेषु जहदजहल्लक्षणोक्तिरपि विरुध्येतेति। **अन्यथा** शब्दानुशासनविरोधमप्याह— **स्मरतीति**। अस्तु सुषुप्तौ साक्षिप्रकाशः; ततोऽपि अहमर्थ-

प्रकाशः कथमित्यत्राह—**स चायमिति**। व्यवहारव्याकरणाभ्यां ज्ञातृत्वेन प्रसिद्ध इत्यर्थः। अज्ञानसाक्षिणस्तथैव स्वप्रकाशत्वाभ्युपगमात् **जानामीति प्रतीयमानत्वोक्तिः**। ज्ञातुः स्वग्रहणं हि जानामीत्येव; तत्र * अस्मद्युत्तम इत्यनुशिष्टमित्यभिप्रायेण **अस्मदर्थ एवेत्युक्तम्**। उक्तानभ्युपगमे स्वेष्टं स्वस्मै भासमानत्वमपि न स्यादित्यभिप्रायेणाह— **आत्मन इति**। तत्र व्याप्तिपूर्वकं साध्यवचनेऽपि प्रसङ्गे तात्पर्यादुत्तरत्रानुमानोक्तेरपुनरुक्तिः। पूर्व **इतिहेतौ**। उत्तरस्तु प्रकारे॥

यत्तु मोक्षदशायामहमर्थो नानुवर्तत इति, तदपेशलम्; तथा सत्यात्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात्। न चाहमर्थो धर्ममात्रम्, येन तद्विगमेऽप्यविद्यानिवृत्ताविव स्वरूपमवतिष्ठेत। प्रत्युत स्वरूपमेवाहमर्थ आत्मनः; ज्ञानं तु तस्य धर्मः। अहं जानामि, ज्ञानं मे जातमिति चाहमर्थधर्मतया ज्ञानप्रतीतेरेव॥

सुषुप्तिमुक्त्योर्नान्वेतीति पूर्वपक्षोक्ते दूषितावशिष्टं **यत्त्वित्यादिनाऽनूद्य दूषयति— तदपेशलमिति**; असुन्दरम्, अयुक्तमित्यर्थः। अयुक्तिं विवृणोति— **तथा सतीति**। **प्रतिज्ञातः स्यादित्येतत्** परोक्तयैव सिद्धवत्करणं ज्ञातव्यशेषाभावप्रसङ्गार्थम्। * आत्मभूतधीसन्ततिविनाशो मोक्ष इति वदन्तस्सन्ति केचित्सौगताः; तन्मते त्वदुक्तो दोषस्तवाप्यागत इति सूचयितुं **प्रकारान्तरेणेत्युक्तम्**। नन्वविद्या देहादिधर्मोऽप्यात्मनः उपाधिरेव; अतस्तन्निवृत्तौ कथमात्मनाश इत्यत्राह— **न चेति**। त्वदुक्तविपरीतं हि सिद्धमित्यभिप्रायेण **प्रत्युतेत्यादिवाक्यत्रयम्**। **एवकारेण प्रागेव** स्थापितत्वं द्योत्यते॥

अपि च यः परमार्थतो भ्रान्त्या वा आध्यात्मिकादिदुःखैः दुःखितया [स्वा]आत्मानमनुसन्धत्तेऽहं दुःखीति, सर्वमेतद्दुःखजातमपुनर्भवमपोह्य कथमहमनाकुलस्स्वस्थो भवेयमित्युत्पन्नमोक्षरागः स एव तत्साधने प्रवर्तते। स साधनानुष्ठानेन यद्यहमेव न भविष्यामीत्यवगच्छेत्, अपसर्पेदेवासौ मोक्षकथाप्रस्तावात्। ततश्चाधिकारिविरहादेव सर्वं मोक्षशास्त्रमप्रमाणं स्यात्। अहमुपलक्षितं प्रकाशमात्रमपवर्गेऽवतिष्ठत इति चेत्, किमनेन? मयि नष्टेऽपि किमपि प्रकाशमात्रमपवर्गेऽवतिष्ठत इति मत्वा न हि कश्चिद्बुद्धिपूर्वकारी प्रयतते। अतोऽहमर्थस्यैव ज्ञातृतया सिध्यतः प्रत्यगात्मत्वम्। स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते, स्वस्मै प्रकाशमानत्वात्; यो यः स्वस्मै प्रकाशते, स सर्वोऽहमित्येव प्रकाशते, यथा तथाऽवभासमानत्वेनोभयवादिसंमतः संसार्यात्मा; यः पुनरहमिति न चकास्ति नासौ स्वस्मै प्रकाशते, यथा घटादिः। स्वस्मै प्रकाशते चायं मुक्तात्मा। स तस्मादहमित्येव प्रकाशते। न चाहं-

मिति प्रकाशमानत्वेन तस्याज्ञत्वसंसारित्वादिप्रसङ्गः; मोक्षविरोधात्, अज्ञत्वाद्यहेतुत्वाच्चाहं-प्रत्ययस्य । अज्ञानं नाम स्वरूपाज्ञानमन्यथाज्ञानं विपरीतज्ञानं वा । अहमित्येवात्मनः स्वरूपमिति स्वरूपज्ञानरूपोऽहंप्रत्ययो नाज्ञत्वमापादयति; कुतः संसारित्वम् ? अपि तु तद्विरोधित्वान्नाशयत्येव ॥

पूर्वं ज्ञातुरेवात्मत्वे परमसाध्ये सङ्गहेणोक्तां युक्तिं तस्य मुक्तिदशानुवृत्तिरूपावान्तरसाध्येऽपि हेतुतया विस्तृणीते— **अपि** चेति । स्वमतपरमतभेदेन **परमार्थतो भ्रान्त्या** वेत्युक्तम् । उत्तरत्र तद्वतस्य दुःखकारणस्य भ्रमकारणस्य वा निवृत्तिरित्यु[च्यते]च्येत, न तु दुःखभ्रमाश्रयस्वरूपस्येति भावः । अत्र **य** इत्यादिना **प्रवर्तत** इत्यन्तेन प्रागुक्तमेव विवृतमित्यपुनरुक्तिः ।

अर्थादामोक्षस्थायिपक्षनिरासश्च सिद्धः । उक्तयुक्तेः परमसाध्यपर्यन्ततां व्यनक्ति—**अत** इति । अवान्तरसाध्येऽपि प्राक्प्रसङ्गसूचितमनुमानं मूढबोधनाय, अन्वयव्यतिरेकिण एवानुमानत्वमिति वदतः सन्तोषाय च व्याप्तिद्वयोपेतं प्रयुङ्क्ते— **स** चेति । नात्र साध्याविशेषः; अहमिति व्यवहारविषयतया प्रकाशस्य साध्यत्वात् । नापि हेत्वसिद्धिः; अभानस्य, परस्मा एव भानस्य वा त्वयाऽनभ्युपगमात्; अकस्मैचिद्भासमानत्वस्य दुर्वचत्वाच्च । नापि पक्षस्य दृष्टान्ताविशेषः; एकस्मिन्नेव सम्मतविमतदशाभेदेन तद्विभागात् । तथा च लोकेऽपि दृष्टतया परीक्षकैः अनुमन्तव्यत्वाच्च । विपक्षे [बाधस्तु] दण्डस्तु प्रत्य[क्षा]क्त्वाभावप्रसङ्गः [इति] प्रागुक्त इह प्रतिसन्धेयः । अत्र पञ्चावयववाक्यप्रयोगात्कैश्चिन्मीमांसकैरुक्तःव्यवयवनिर्बन्ध उपेक्षितः । क्वचित् व्यवयवं च प्रयुङ्क्ते; अतः प्रतियोगिधीसिद्ध्यै यथाकामं त्रयो वा पञ्च वा प्रयोक्तव्याः । * पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषविदिति भारतोक्तिस्तु संभावितविषयतया नान्यनिषेधार्थेति भावः । विशेषविरोधप्रसङ्गमनूद्य निषेधति— **न** चेति । **संसारित्वम्**— कर्मकृतदेहादिसन्ततिमत्त्वम् । **आदि**शब्देन पुनरावृत्त्यादिग्रहणम् । मुक्त्यवस्थाविषयैः * सर्वं ह पश्यः पश्यति, * अहमन्नमित्यादिभिर्विहत्या तर्कस्य मूलशैथिल्यमाह— **मोक्षविरोधादि**ति । अन्यथा प्रसञ्जनीयमेवोत्तरं प्रयुक्तं स्यात् । अज्ञत्वादेरुपाधित्वशङ्काऽप्यनेन निरस्ता । प्रसङ्गस्य सोपाधित्वमभिप्रेत्याह—**अज्ञत्वे**ति । अयं भावः—कर्मोपाधिकमज्ञानादिकं सर्वकर्मक्षये न स्यात् ।

पश्चात्साध्यमुपाधिर्हि स्वनिवृत्त्या निवर्तयेत् । स्वसाहचर्यादध्यस्तां व्याप्यतामपि साधनात् ॥ ५११ ॥

तदिह तर्के व्याप्तिस्तावदुस्साधा; साहचर्यमात्रं त्वप्रयोजकमतिप्रसञ्जकं च । त्वत्पक्षेऽप्यनुभूतिमात्रस्यात्मनः प्रकाशमानत्वे बद्धदशायामिव सर्वे दोषाः स्युः; न च ते तदा सन्ति; अतो मुक्तौ प्रकाशमानत्वभङ्गात्स्वरूपोच्छेदप्रसङ्ग इति । अज्ञत्वादेरुपाधित्वव्यक्त्यै विकल्पव्याजेन स्वोक्तं विवृणोति— **अज्ञानमिति** । **स्वरूपाज्ञानं**— कर्मणा तिरोधानात्स्वरूपगोचरज्ञानप्रसराभावः; **अन्यथाज्ञानं विपरीतज्ञानं च** रजस्तमःकार्यतया गीतम् । तयोरज्ञानशब्दार्थतया विकल्पस्तु सम्यग्ज्ञानान्यतया, तद्विरुद्धतया वा । उदाहरणं तु स्वनिष्ठात्मभ्रमाद्येव । आत्मभ्रमादिषु त्रिष्वपि कल्पेष्वहंप्रत्ययस्य प्रयोजकत्वं नेत्याह— **अहमिति** । **इतिहेतौ** । अयं भावः— न तावदहंप्रत्यय एवाज्ञानादिस्वरूपम्, तत्त्वधीरूपत्वात् । न तद्धेतुः, कर्मविरहे तदयोगात् । न च तेषां व्याप्यः; यतस्तेन तत्प्रसङ्गः स्यादिति । एवम-

ज्ञानप्रसङ्गाभावे तत्फलप्रसङ्गो दूरापास्त इत्याह— कुत इति । आत्मतत्त्वज्ञानं ब्रह्मत्वादिनिर्वर्तकतया शास्त्रप्रसिद्धम् । अतोऽत्र प्रसञ्जकप्रसञ्जनीययोर्व्याघात इत्यभिप्रायेणाह— अपि त्विति ॥

ब्रह्मात्मभावापरोक्ष्यनिर्धूतानिरवशेषाविद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च । श्रूयते हि— ❀ तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति, ❀ अहमेकः प्रथममासं च वर्तामि भविष्यामीत्यादि । सकलेतराज्ञानविरोधिनः सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणो व्यवहारोऽप्येवमेव ❀हन्ताहमिमास्तिस्रो देवताः, ❀बहु स्यां प्रजायेय, ❀ स ईक्षत लोकान्नु सृजा इति । तथा, *यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ ❀ अहमात्मा गुडाकेश, ❀ न त्वेवाहं जातु नासम्, * अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा, ❀ अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते, * तेषामहं समुद्धर्ता मृत्युसंसारसागरात्, * अहं बीजप्रदः पिता, * वेदाहं समतीतानीत्यादिषु ॥

तत्त्वविदात्मापरोक्ष्येऽहमर्थप्रकाशं वदन्त्या श्रुत्या, तस्याज्ञत्वाद्यनापादकत्वमाह— ब्रह्मात्मेत्यादि । दर्शनादित्युक्तं विवृणोति— श्रूयत इति । ब्रह्मापरोक्ष्यमविद्यानाशस्य कारको ज्ञापकश्च हेतुः । आदिशब्देन प्रह्लादभरतादिग्रहः । तद्धैतत्पश्यन्—जगत्कारणं ब्रह्म स्वान्तरात्मत्वेन पश्यन्नित्यर्थः । अत एवात्राहमर्थसामानाधिकरण्यं स्वविशेष्यस्य सर्वात्मकत्वप्रकाशकम् । तदेतत्, * शास्त्रदृष्ट्या तूपदेशो वामदेववत् इति सूत्रे व्यक्तीभविष्यति । अथवशिरसोऽप्येवमेव निर्वाहो वेदार्थसङ्ग्रहे स्थापितः । आदिशब्देन * स एवाहमवस्थितः, * अहं त्वं च तथान्ये चेत्युपबृंहणानि गृह्यन्ते । स्वतः सर्वज्ञतया स्वयमज्ञानप्रसङ्गरहितस्य स्वाश्रिताज्ञानादिनिरासकतया स्वयमेव गीतस्य परब्रह्मणः स्वात्मन्यहंशब्दप्रयोगाच्चाज्ञत्वाद्यापादकत्वं निरस्यति— सकलेति । सच्छब्दप्रत्ययमात्रभाजः— सच्छब्दमात्रजन्यधीविषयस्येत्यर्थः । अहङ्कारसृष्टेः प्रागेव सच्छब्दवाच्यं ब्रह्म बहु स्यामिति सङ्कल्पयतीति भावः । शास्त्रान्तरेऽपि प्रसिद्धिमाह— स ईक्षतेति । हन्ताहमित्यत्राहंशब्दः कण्ठोक्तः; * बहु स्यां प्रजायेय, सृजै इत्यादिषूत्तमपुरुषाक्षिप्तः । * पूर्वमेवाहमिहासम् इत्यादयश्च ग्राह्याः । स्मृतावप्यहंत्वेन व्यवहारमाह— तथेति । क्षरान्तर्भूतस्याहङ्कारस्य क्षराक्षरान्यत्वम्, अचेतनस्य चिदचिदन्तरात्मत्वम्, उत्पत्तिनाशभाजस्तद्राहित्यं, महदादिजन्यस्य सर्वकारणत्वम्, स्वाश्रितबन्धकस्य तन्मोचकत्वम्, अचिद्विकारस्य स्वसंकल्पेन सर्वत्र बीजाधानकर्तृत्वं, त्रैकालिकसर्ववस्तुवेदितृत्वादिकं च, विरुद्धमित्यभिप्रायेण तत्तद्वाक्योपादानम् । न चैतेष्वहंशब्देन चिन्मात्रलक्षणेति वाच्यम् । मुख्यसंभवे तदयोगात् । आदिशब्देन * अहमज्ञानजं तमः * अहं त्वा सर्वपापेभ्यः इत्यादिसङ्ग्रहः ॥

यद्यहमित्येवात्मनः स्वरूपम्, कथं तर्ह्यहङ्कारस्य क्षेत्रान्तर्भावो भगवतोपदिश्यते ❀ महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव चेति ? उच्यते—स्वरूपोपदेशेषु सर्वेष्वहमित्ये-

वोपदेशात्तथैवात्मस्वरूपप्रतिपत्तेश्च अहमित्येव प्रत्यगात्मनः स्वरूपम् । अव्यक्तपरिणाम-भेदस्याहङ्कारस्य क्षेत्रान्तर्भावो भगवतैवोपदिश्यते । स त्वनात्मनि देहेऽहंभावकरण-हेतुत्वेन अहङ्कार इत्युच्यते । अस्य तु अहङ्कारशब्दस्य अभूततद्भावे च्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या । अयमेव त्वहङ्कारः उत्कृष्टजनावमानहेतुर्गर्वापरनामा शास्त्रेषु हेयतया प्रतिपाद्यते । तस्माद्बाधकापेताऽहंबुद्धिः साक्षादात्मगोचरैव । शरीरगोचरा त्वहंबुद्धि-रविद्यैव । यथोक्तं भगवता पराशरेण— * श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन । अनात्मन्यात्मबुद्धिर्यौति । यदि ज्ञप्तिमात्रमेवात्मा, तदा अनात्मन्यात्माभिमाने शरीरे ज्ञप्तिमात्रप्रतिभासः स्यात्, न ज्ञातृप्रतिभासः । तस्माज्ज्ञाताऽहमर्थ एवात्मा । तदुक्तम्— * अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात् । अविद्यायोगतश्चात्मा ज्ञाताऽहमिति भासते ॥ इति । तथा च * देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः । नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी ॥ इति । अनन्यसाधनः—स्वप्रकाशः । व्यापी—अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः ॥

उपात्तकृत्स्नवचनबाधेच्छया गीतायामेवोक्तमिति शङ्कते—यदीति। अत्र **कथं**शब्दस्य प्रतिषेधपरत्वायोगात्प्रश्न-वत्कारेण प्रतिवक्ति— **उच्यत** इति । पृष्टस्य साक्षादुत्तरं दित्सुः तदर्थं स्वपक्षे भूयसां बलीयस्त्वं प्रत्यक्षानुगुण्यं च प्रथममाह— **स्वरूपेति** । रूढिविशेषानुसारेण गीताभिप्रेतमाह— **अव्यक्तेति** । न ह्यहङ्कारशब्दोऽहंशब्दपर्याय इति भावः । नन्वहंशब्द एवाहङ्कारशब्दावयवतया प्रत्यभिज्ञातः; न चोभयत्र शक्तिभेदकल्पनिर्न्याय्येत्यत्र यौगिक-मप्याह—**स त्विति**। अहंभावोऽत्राहमित्यभिमानः । ननु भूमविद्यायां * अथातोऽहङ्कारादेश इति अहंबुद्धिकारणमेवा-हङ्कार इत्युच्यते । तत्प्रत्यभिज्ञयाऽत्र स एवार्थः किं न स्यादित्यत्र * अनात्मनीत्यभिप्रेतया व्युत्पत्त्या वैषम्यमाह— **अस्य त्विति** । अनहमर्थस्याहमर्थभ्रमहेतुत्वमिह विवक्षितम् । भूमविद्यायां तु भूमविशिष्टस्य यथार्थमहङ्ग्रहोपसनमिति भावः । ननु * अहङ्कारं बलं दर्पमित्यादिभिस्त्याज्यतयोक्तस्य कथं मोक्षार्थविद्यायां, ❀ अथात आदेश इतिवदुपादेयतोप-देश इत्यत्राह— **अयमिति** । अनात्मनि देहेऽहंभाव इति निर्दिष्ट इत्यर्थः । अन्यथा **गर्वापरनामेत्यनन्वयात्** । यद्वा, कार्ये गर्वे कारणभूताहङ्कारोपचारः । **एव**कारोऽहंग्रहोपास्तिव्यवच्छेदार्थः । **उत्कृष्टे**त्यादिना हेयत्वनिदानोक्तिः । ननु * अविद्याऽहंमतिरिति पठ्यते; तत्कथमहंग्रहोपास्तिर्यथार्था विधीयत इत्यत्र विद्याविद्यात्मिकेऽस्मती विभजन्निगम-यति— **तस्मादिति** । **साक्षा**च्छब्द उपहितरूपव्यवच्छेदार्थः । अविद्यानिष्कर्षे पुराणोक्त्या संवादयति—**यथोक्त-मिति** । **एत**च्चानन्याधीनत्वादिप्रमाणोपलक्षणम् । एवमविद्यादिरूपतया प्रसिद्धां देहाहंबुद्धिमपि परेष्टसङ्गिकामाह— **यदीति** । **स्वेष्टे**ऽपि तामेव प्रमाणयन्परमप्रक्रान्तमुपसंहरति— **तस्मादिति** । **आत्मनो**ऽहंज्ञातृत्वादिसाधकवर्गस्य

संकलितबोधार्थमात्मसिद्धौ निगमितं दर्शयति— **तदुक्तमिति** । * **अविद्यायोगत इत्येतत्परेष्टेऽनुपपत्तिं स्वेष्टे चोपपत्तिं तन्त्रत आवृत्त्या वा वक्ति** । आत्मनो विषयग्राहिधियोऽन्यत्वे स्वप्रकाशत्वादौ च तत्प्रकरणारम्भे संगृहीतमाह— **तथा चेति** । अत्र साधनशब्दस्योत्पादनपरत्वे नित्यत्वोक्त्या पुनरुक्तिः स्यात् । तद्व्युदासाय **स्वप्रकाश** इत्युक्तम् । **व्यापि**शब्देन विभुत्वविवक्षायां * उत्क्रान्त्यादिसूत्रविरोधात् अर्थान्तरमाह— **अतिसूक्ष्मतयेति** । एतत्पदद्वयार्थः तत्रत्यविस्तरे व्यक्तः ॥

यदुक्तं दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदावलम्बिप्रत्यक्षस्य शास्त्रबाध्यत्वमिति ; कोऽयं दोष इति वक्तव्यम् यन्मूलतया प्रत्यक्षस्यान्यथासिद्धिः । अनादिभेदवासनैव हि दोष इति चेत्, भेदवासनायास्तिमिरादिवद्यथावस्थितवस्तुविपरीतज्ञानहेतुत्वं किमन्यत्र ज्ञातपूर्वम् ? अनेनैव शास्त्रविरोधेन ज्ञास्यत इति चेन्न ; अन्योन्याश्रयणात्—शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चये सति भेदवासनायाः दोषत्वनिश्चयः ; भेदवासनाया दोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चय इति ॥

एवं प्रत्यक्षवैघट्यं नास्तीत्युक्तं न्यषिध्यत । ततश्शास्त्रबलीयस्त्वं यदित्यन्वाह बाधितुम् ॥ ५१२ ॥

कोऽयमित्यादि । यदुक्तं दोषरूपं मूलं, तत्र कोऽयं दोष इति पृष्टे विशेषतः प्रतिवक्तव्यमित्यर्थः । न हि कश्चिद्दोषोऽस्तीति सामान्योक्त्याऽन्यथासिद्धिः सुवचा ; त्वन्मतेऽपि प्रसङ्गात् ; विशेषतश्चात्र दोषो दुर्वचः । काचादेरव्यापित्वात् तावतैवान्यत्र शङ्कायामविषयवृत्तेश्चेति भावः । प्रागेव दोषविशेष उक्त इति शङ्कते—**अनादीति** । दोषत्वमस्या दुर्वचमित्याह— **भेदेति** । यदि द्विचन्द्रभ्रमादौ भेदवासनाया दोषत्वं दृष्टमित्युच्येत, तदा भिन्नेष्वभिन्नत्वबुद्धौ अभेदवासनाऽपि दोषत्वेन दृष्टा ; ततश्चैक्यधीरपि दुर्बला न बाधिका स्यात् । अन्यत्रादृष्टमपि अद्वैतश्रुत्यन्यथाऽनुपपत्त्या कल्प्यमिति शङ्कते— **अनेनेति** । कल्पकासंभवमभिप्रेत्याह— **नेति** ; **अन्योन्याश्रयणादित्यनेनान्वयः**। भेदवासनामात्रस्य दोषत्वं निर्विशेषाद्वैतशास्त्रविरोधात्कल्प्यम् ; सिद्धे च प्रत्यक्षमात्रस्य तादृशदोषमूलत्वे यूपादित्यैक्यन्यायातिक्रमेण शास्त्रस्य निर्विशेषपरत्वमिति मिथः संशयात्कृत्स्नप्रत्यक्षदौर्बल्यं दुर्वचमिति भावः । ज्वालैक्यप्रत्यक्षे हि,

व्युत्पत्तिव्याप्तिपूर्वेषु प्रत्यक्षमुपजीवतोः । कृत्स्नप्रत्यक्षवैरं न क्षमं शास्त्रानुमानयोः ॥ ५१३ ॥
अस्तु ते बाह्यतुल्यत्व.... ....नोच.... .... हुत्वमपि ॥ ५१४ ॥

किञ्च, यदि भेदवासनामूलत्वेन प्रत्यक्षस्य विपरीतार्थत्वम् शास्त्रमपि तन्मूलत्वेन तथैव स्यात् । अथोच्येत—दोषमूलत्वेऽपि शास्त्रस्य प्रत्यक्षावगतसकलभेदनिरसनज्ञानहेतुत्वेन परत्वात् तत् प्रत्यक्षस्य बाधकमिति, तन्न; दोषमूलत्वे ज्ञाते सति परत्व-

मकिञ्चित्करम्; रज्जुसर्पज्ञाननिमित्तभये सति भ्रान्तोऽयमिति परिज्ञातेन केनचिन्नायं सर्पो मा भैषीरित्युक्तेऽपि भयानिवृत्तिदर्शनात्। शास्त्रस्य च दोषमूलत्वं श्रवणवेलायामेव ज्ञातम्; श्रवणावगतनिखिलभेदोपमर्दिब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः। अपि च, इदं शास्त्रम्; एतच्चासंभाव्यमानदोषम्; प्रत्यक्षं तु संभाव्यमानदोषमिति केनावगतं त्वया? न तावत्स्वतःसिद्धा निर्धूतनिखिलविशेषाऽनुभूतिरिममर्थमवगमयति। तस्याः सर्वविषयविरक्तत्वात्, शास्त्रपक्षपातविरहाच्च। नाप्यैन्द्रियिकं प्रत्यक्षम्; दोषमूलत्वेन विपरीतार्थत्वात्। तन्मूलत्वादेव नान्यान्यपि प्रमाणानि। अतः स्वपक्षसाधनप्रमाणानभ्युपगमान्न स्वाभिमतार्थसिद्धिः।

ज्वालाभेदानुमानाद्वैषम्यमाह—**किञ्चेति**। न हि ज्वालाभेदधीस्तदैक्यधीजनकदोषजन्येति भावः। ....दीपसादृश्यं तद्वर्तिकासाम्यं चाचिरनिर्वापितारोपितदीपैक्यभ्रमे दोषत्वेन निर्णीतम्। अतस्तत्र नान्योन्याश्रयः। न च तत्र भेदानुमानं स्वोपजीव्यप्रत्यक्षव्यक्तिविरोधीति भावः।

नान्यपर्यादमानत्वं न च वाच्यं तदेव तत्। यूपादित्येतिवाक्यादौ बाधादेव समानता ॥ ५१५ ॥

अतोऽनन्यपरस्यापि बुद्धिर्निगमवद्भवेत्। त्रय्यन्तस्याप्रमाणत्वं दोषे बाधे च दुस्त्यजम् ॥ ५१६ ॥

यथा निर्दोषत्वसाम्येऽपि पूर्वापरापच्छेदयोः परो बलीयान्, तथा सदोषत्वसाम्येऽपि परत्वादागम. प्रमाणमिति शङ्कते—**अथेति**। तत्र रज्जौ सर्पभूरन्ध्रबुद्ध्योरिव पौर्वापर्यमकिञ्चित्करमित्यभिप्रायेणाह— **तत्रेति**। तदेवोदाहरणेन व्यनक्ति—**रज्ज्विति**। तद्वदुत्तरस्य दोषमूलत्वं न ज्ञातमित्यत्राह— **शास्त्रस्येति**। अन्यथा मननादिकारणोच्छेदात्कार्यासिद्धिं सूचयति— **श्रवणेति**। निखिलशब्दः प्रमातृप्रमेयप्रमाणशास्त्रस्वरूपपदवाक्यतदर्थविकल्पादिसंग्रहार्थः। अथ परोक्ते तत्प्रक्रिययैव प्रमाण[ा]भावमभ्युपगम्य परमतस्य निर्मूलत्वं वक्तुमाह— **अपि चेति**। **इदं शास्त्रम्**—अबोधकात्, प्रत्यक्षादेश्च, व्यावृत्तमित्याशयः। **असंभाव्यमानदोषम्**— प्रमाणाभासवर्गाद्विलक्षणमिति यावत्। बाह्यागमवैषम्यमप्यत्र दुर्वचमिति भावः।

कल्पितं हि प्रमाणत्वं वेदे बाह्यागमेऽपि च। अव्यवस्था ततो बाधस्तादस्थ्याच्छुद्धसंविदः ॥ ५१७ ॥

केन— न केनापि प्रमाणेनेत्यर्थः। तत्र परेष्टशुद्धसंवित्स्वरूपं, तदन्यद्वा मानमिति विकल्पं मत्वा आद्यं निरस्यति—**न तावदिति**। न हि तस्याः कतिपयवैराग्यं त्वयाऽनुशिष्टमित्यभिप्रायेणाह— **तस्या इति**। एतादृशी तस्यास्सहसा विरक्तिर्जातेत्यत्राह— **शास्त्रेति**। अवच्छेदकं दुर्लभमिति भावः। **नान्यान्यपीति**। स्वरूपातिरिक्तज्ञानं तु भ्रान्तिरूपत्वान्नार्थव्यवस्थापकम्, अन्यथाऽतिप्रसङ्ग इति भावः। अत्र प्रत्यक्षस्य तन्मूलानुमानादेश्च निरासः। बहुवचनं त्विह वृद्धादिमतानुसारेण। एवं साधकाभावादमितं शास्त्रप्रामाण्यं न सिध्यतीत्याह— **अत इति**॥

ज्वालाभेदानुमाने तु धर्मिलिङ्गादिबुद्धयः। न दोषमानबाध्याश्च नात्मनस्तद्विदर्शनम् ॥ ५१८ ॥

स्वपक्षस्यापक्षदेव स्वव्याघातादिदोषतः । निर्मूलमखिलं शास्त्रमित्युक्तं भवति त्विह ॥५१९॥

ननु व्यावहारिकप्रमाणप्रमेयव्यवहारोऽस्माकमप्यस्त्येव । कोऽयं व्यावहारिको नाम ? आपातप्रतीतिसिद्धो युक्तिभिर्निरूपितो न तथाऽवस्थित इति चेत्, किं तेन प्रयोजनम् ? प्रमाणतया प्रतिपन्नेऽपि यौक्तिकबाधादेव प्रमाणकार्याभावात् । अथोच्येत—शास्त्रप्रत्यक्षयोः [द्वयोरपि]अविद्यामूलत्वेऽपि प्रत्यक्षविषयस्य शास्त्रेण बाधो दृश्यते; शास्त्रविषयस्य सदद्वितीयब्रह्मणः पश्चात्तनबाधादर्शनेन निर्विशेषानुभूतिमात्रं ब्रह्मैव परमार्थ इति । तदयुक्तम् ; अबाधितस्यापि दोषमूलस्यापारमार्थ्यनिश्चयात् । एतदुक्तं भवति—यथा सकलेतरकाचादिदोषरहितपुरुषान्तरागोचरगिरिगुहासु वसतस्तैमिरिकजनस्याज्ञातस्वतिमिरस्य सर्वस्य तिमिरदोषाविशेषेण द्विचन्द्रज्ञानमविशिष्टं जायते । न नत्र बाधकप्रत्ययोऽस्तीति न तन्मिथ्या न भवतीति तद्विषयभूतं द्विचन्द्रत्वमपि मिथ्यैव । दोषो ह्ययथार्थज्ञानहेतुः । तथा ब्रह्मज्ञानमविद्यामूलत्वेन बाधकज्ञानरहितमपि स्वविषयेण ब्रह्मणा सह मिथ्यैवेति । भवन्ति चात्र प्रयोगाः— विवादाध्यासितं ब्रह्म मिथ्या, अविद्यावत उत्पन्नज्ञानविषयत्वात् , प्रपञ्चवत् । ब्रह्म मिथ्या, ज्ञानविषयत्वात् प्रपञ्चवत् । ब्रह्म मिथ्या, असत्यहेतुजन्यज्ञानविषयत्वात् प्रपञ्चवदेव ॥

अथ सौगतसर्वस्वे संवृत्त्याख्ये प्रलम्भने । परः शब्दान्तरं न्यस्यन्समाधित्सति नन्विति ॥ ५२० ॥

अत्र व्यवहारसंबन्धादिमात्रमतिप्रसङ्गकमित्यभिप्रायेण प्रतिक्षिपति— कोऽयमिति । बहुधा विकल्पितेषु त्वदिष्टानुगुणो न कश्चित्कल्प इत्याशयः । परेष्टं कोट्यन्तरं शङ्कते— आपातेति । एतत्स्वोक्त्यादिविरुद्धमिति सूचयति— किं तेनेति । लिङ्गविभ्रमबाधागमन्यायमुद्घाटयति— प्रमाणतयेति । प्रमाणकार्याभावात्—स्वपक्षसत्यत्वादेरलाभादिति भावः । शास्त्रस्य प्रत्यक्षं बाधित्वोदयात्तस्य बाधकान्तरानुदयाच्च प्रत्यक्षाद्बलीयस्त्वं, शास्त्रस्य स्वार्थसाधकत्वं च शङ्कते— अथेति । बाधकान्तरानुदयमन्यारूढ्य प्रतिवक्ति— तदिति । अप्रामाण्यशङ्कौ बाधकवत्कारणदोषस्यापि पृथगेव हेतुत्वं प्रसिद्धमित्यभिप्रायेणाह— अबाधितस्यापीति ।

* दुष्टकारणबोधे तु सिद्धेऽपि विषयान्तरे । अर्थात्तुल्यार्थतां प्राप्य बाधो गोदोहनादिवत् ॥

इति चाहुः । अनुत्पन्नबाधकज्ञानस्यानवगतकारणदोषस्य कस्यचित् स्वज्ञाने कथं मिथ्यात्वसिद्धिरित्यत्राह— एतदुक्तमिति । संभावनया कल्पितेनापि परसंमन्तव्येन निदर्शनेन बोधयति— यथेति । बाधानुदयार्थं सकलेतरेत्यादिकमुपात्तम् ; अविशिष्टं जायत इति च । अविदितदोषस्य कथमप्रामाण्यसिद्धिरित्यत्राह— दोष इति ।

अप्रामाण्यस्वरूपस्य दोषस्वरूपं हेतुः, तद्दोषस्य च तद्दोष इति विभागोऽभिप्रेतः । एवं भ्रान्त्यतो दोषधीबाधयोरभावेऽपि तद्बुद्धेर्भ्रमत्वादिकं परीक्षकस्याप्य पक्षे योजयति— तथेति ।

त्वदुक्तदोषसद्भावादप्रामाण्यसमुद्भवः । तज्ज्ञप्तेरप्रमाणत्वज्ञप्तिरप्यत्र सिध्यति ॥ ५२१ ॥

ऐन्द्रियबोधावबोधमभिप्रेत्य बाधकज्ञानरहितमपीत्युक्तम् । तद्व्याप्तिप्रसङ्गपरान्प्रयोगानाह— भवन्तीति । सगुणब्रह्ममिथ्यात्वस्य परसंमतेस्तद्व्यवच्छेदाय विवादाध्यासितमिति । यद्यप्यत्र परेष्टव्याप्त्या ज्ञानविषयत्वे मिथ्यात्वं स्यादित्येक एव प्रयोगः साधीयान्, तथाऽपि प्रथमतृतीयौ सविशेषणप्रयोगौ प्रसङ्गहेतोस्साधकत्वव्यत्ययार्थौ । यद्वा, यथा प्रपञ्चस्य मिथ्यात्वं ज्ञानविषयत्वमात्रेण तद्विशेषविषयत्वेन वा त्वया साध्यते, तथैव ब्रह्मणोऽपि साधयित्वा माध्यमिकयूथमध्यमध्यास्स्व ; ततश्चासत्प्रयोगानिमान्मत्त्वा आत्माश्रयासिद्धिविशेषणवैयर्थ्यव्याप्तिभङ्गादिदोषान् मोज्जीघट इति भावः । अथवा त्वत्सयूथ्यस्य तुर्यबौद्धस्य प्रयोगास्त्वया दुर्वाराः स्युरित्याशयः ॥

न च वाच्यं स्वाप्नस्य हस्त्यादिविज्ञानस्यासत्यस्य परमार्थशुभाशुभप्रतिपत्तिहेतुभावदविद्यामूलत्वेनासत्यस्यापि शास्त्रस्य परमार्थभूतब्रह्मविषयप्रतिपत्तिहेतुभावो न विरुद्ध इति । स्वाप्नज्ञानस्यासत्यत्वाभावात् । तत्र हि विषयाणामेव मिथ्यात्वम्, तेषामेव हि बाधो दृश्यते ; न ज्ञानस्य । न हि मया स्वप्नवेलायामनुभूतं ज्ञानमपि न विद्यत इति कस्यचिदपि प्रत्ययो जायते । दर्शनं तु विद्यते; अर्था न सन्तीति हि बाधकप्रत्ययः । मायाविनो मन्त्रौषधादिप्रभवं मायामयं ज्ञानं सत्यमेव प्रीतेर्भयस्य च हेतुः ; तत्रापि ज्ञानस्याबाधितत्वात् । विषयेन्द्रियादिदोषजन्यं रज्ज्वादौ सर्पादिविज्ञानं सत्यमेव भयादिहेतुः । सत्यैवादृष्टेऽपि स्वात्मनि सर्पसन्निधानादृष्टबुद्धिः । सत्यैव शङ्खाविषबुद्धिर्मरणहेतुभूता । वस्तुभूत एव जलादौ मुखादिप्रतिभासो वस्तुभूतमुखगतविशेषनिश्चयहेतुः । एषां संवेदनानामुत्पत्तिमत्त्वादर्थक्रियाकारित्वाच्च सत्यत्वमवसीयते । हस्त्यादीनामभावे[ऽपि] कथं तद्बुद्धयः सत्या भवन्तीति चेत् ; नैतत् ; बुद्धीनां सालम्बनत्वमात्रनियमात् । अर्थस्य प्रतिभासमानत्वमेव ह्यालम्बनत्वेऽपेक्षितम् । प्रतिभासमानता चास्त्येव दोषवशात् । स तु बाधितोऽसत्य इत्यवसीयते । अबाधिता हि बुद्धिः सत्यैवेत्युक्तम् ॥

एतावता तूष्णींभावे प्राप्तेऽपि प्रत्यक्षाच्छास्त्रप्राबल्यमसत्यात्सत्यसिद्धिनिदर्शनैः सिषाधयिषन्तं प्रत्याह —न चेति । दृष्टान्तं दूषयति— स्वाप्नज्ञानस्येति । अनेन दोषरूपसत्यहेतुजन्यत्वमपि सूच्यते । तर्हि तत्कार्यं मिथ्याज्ञान-

मित्यत्राह— तत्रेति । ज्ञाने मिथ्यात्वोक्तिर्लक्षणिकीति भावः । अत्रापि सन्ध्याधिकरणे स्वप्नप्रपञ्चसत्यत्वे स्थापयिष्यमाणेऽपि परमतान्वारोहेणान्यथाख्यातिपक्षेण विषयबाधोक्तिः । ननु स्वप्नशुक्तिवत्कर्ममिथ्यात्वे सिद्धे ज्ञानक्रियाऽपि मिथ्यैव स्यात्; नेत्याह— तेषामिति । अन्ततो यथादर्शनं सर्वत्र व्यवस्थेत्याशयः । अत्र विषयविषयिणोर्बाधाबाधौ विवृणोति— न हीति । सर्वत्र.....

ज्ञानस्यलिङ्ग[ङ्ग]भावेऽपि विषयोऽ[र्थो]त्र न बोधकृत् । अतीतागामिविषयैर्ज्ञानैरप्यनुमोदयात् ॥

एवं स्वाप्नादिभिरेवासत्यैर्लिङ्गैरसत्यात्सत्योत्पत्तिरपि दृष्टा, किमुत ज्ञप्तिरिति मन्यमानस्यान्यदप्युदाहरणमन्यथयति— मायेति । मायामयं आश्चर्यभूतं मिथ्यार्थगोचरमिति यावत् ।

नासत्यः कस्यचिद्धेतुर्नतरां ज्ञप्तिकारणम् । नतमां सत्यधीहेतुरित्युत्पत्तिरुदाहृता ॥ ५२३ ॥

परप्रलापैरीदृग्भिर्मा भूद्बालप्रतारणम् । इत्यभिन्नसमाधानबहूदाहृतिखण्डनम् ॥ ५२४ ॥

सत्यहेतूद्भवस्सत्यो धीहेतुस्तत्र तत्र नः । हेतुरित्यपि च ज्ञप्त्यै बहुभ्रान्तिनिवारणम् ॥ ५२५ ॥

यद्यपि धीमात्रस्य कार्यविशेषहेतुत्वेऽतिप्रसङ्गः । तथाऽपि विशेषणैरुपलक्षणैर्वा मिथ्याविषयैरवच्छेदे तु यथार्हमसत्यात्सत्योत्पत्तिज्ञप्ती दुस्त्यजे । अथाऽप्यपरोक्षसामग्रीशक्तिसिद्धैः स्वभावविशेषैरेव भयविस्मयादिप्रतिनियतव्यवहारकार्यसिद्धेः स्वप्रकाशवादे वादान्तरे च विषयविषयिणोः युगपदेकप्रकाशस्सिद्ध्यन् प्रत्ययान्तरेषु न विषयायत्तः । ईश्वरादीनां बुद्धिषु च व्यवहारानुगुण्यमनुपाधिकम् । क्षेत्रिणां तु तत्तद्विषयविशेषोल्लेखस्तत्तत्कर्मोपनीतहेतुभेदायत्तः प्रागेव स्थापितः ॥

अतो नः सत्यधीस्सत्यात् तत्रासत्यादसत्यधीः । सत्यादसत्यधीर्वेति त्वसत्यात्सत्यधीर्न च ॥ ५२६ ॥

व्यावहारिकसत्यस्य त्वसत्यात्सिद्धिरित्यसत् । बुद्धीनामयथार्थत्वे व्यावहारिकसत्यता ॥ ५२७ ॥

असत्यात्सत्यबुद्धिश्च यथादृष्टि यथेष्यते । तथैव ब्रह्मणोऽपि स्यात्सत्यत्वं व्यावहारिकम् ॥ ५२८ ॥

अत्र संस्कारमन्त्रौषधादिविशेषैस्सत्याः स्वप्नादिधियः सिद्धाः । ताभिश्च सत्याभिरेव तत्तत्सत्यसिद्धिर्दर्शिता । * दृष्टबुद्धेरित्यत्रापि मरणहेतुभूतेति योज्यम् । शङ्काविषोदाहरणं तु निर्विषसर्पदष्टादौ छन्नकण्टकवेधादौ च भाव्यम् । जलादिर्मुखादिप्रतिभासहेतुरित्यस्य प्रागुक्तत्वादिह नोक्तिः । पूर्वं बाधकाभावाद्बुद्धीनां सत्यत्वं साधितम् । हेत्वन्तरतोऽपि तदाह—एषामिति । व्यावहारिकवादिनाऽपि बुद्धीनां कारणा[नाम]न्वयव्यतिरेकाभ्यामुत्पत्तिमत्त्वं, कार्याणां तदन्वयव्यतिरेका(भ्याम)र्थक्रियाकारित्वं च दुरपह्नवम् । न चेदमुभयं रज्जुसर्पादौ दृष्टमिति भावः । गत्यभावात्स्वमतं प्रस्मृत्य बुद्धीनां सत्यालम्बनत्वं व्यापकं मन्वानः तन्निवृत्या तन्निवृत्तिं चोदयति— हस्त्यादीनामिति । आशामोदकभक्षणन्यायेन वा विषयमिथ्यात्वात् विषयिमिथ्यात्वं साधयत एव धियां सत्यालम्बनत्वनियमः प्रमाणतर्कविरुद्ध इत्यभिप्रायेण प्रत्याह— नैतदिति । तद्व्यनक्ति— बुद्धीनामिति । मात्रचा विषयसत्यत्वमनियतमिति व्यज्यते । अर्थाभावे कथमालम्बनत्वमित्यत्राह—अर्थस्येति । एवकारो विधमानस्यैवालम्बनत्वमिति व्यवच्छेदार्थः । खपुष्पस्येवालम्बनत्वम् असतः कथमित्यत्राह— प्रतिभासमानतेति । अवधारणेन दुरपह्नवत्वं द्योत्यते । .... एवालम्बनमर्थसत्यत्वञ्च न भासमानत्वे.....त्यक्तेन्द्रियस्य...बन्ध...कारण...भावः । दोषवशादिति । वध....तर्हि कारणवि-

विशेषवैशि....दित्यत्राह— स त्विति। स इत्यर्थपरामर्शः। मिथ्याविषयिणोऽपि मिथ्यात्वशङ्कां निरस्यति— अबाधितेति॥

रेखया वर्णप्रतिपत्तावपि नासत्यात्सत्यबुद्धिः, रेखायाः सत्यत्वात्। ननु वर्णात्मना प्रतिपन्ना रेखा वर्णबुद्धिहेतुः; वर्णात्मता त्वसत्या। नैवं; वर्णात्मताया असत्याया उपायत्वायोगात्। असतो निरुपाख्यस्य ह्युपायत्वं न दृष्टमनुपपन्नं च। अथ तस्यां वर्णबुद्धेरुपायत्वम्। एवं तर्ह्यसत्यात्सत्यबुद्धिर्न स्यात्, बुद्धेः सत्यत्वादेव। उपायोपेययोरेकत्वप्रसङ्गश्च, उभयोर्वर्णबुद्धित्वाविशेषात्। रेखाया अविद्यमानवर्णात्मनोपायत्वे ह्येकस्यामेव रेखायामविद्यमानसर्ववर्णात्मकत्वस्य सुलभत्वादेकरेखादर्शनात्सर्ववर्णप्रतिपत्तिः स्यात्। अथ पिण्डविशेषे देवदत्तादिशब्दसङ्केतवच्चक्षुर्ग्राह्यरेखाविशेषे श्रोत्रग्राह्यवर्णविशेषसङ्केतवशाद्रेखाविशेषो वर्णविशेषबुद्धिहेतुरिति। हन्त तर्हि सत्यादेव सत्यप्रतिपत्तिः, रेखायाः सङ्केतस्य च सत्यत्वात्। रेखागवयादपि सत्यगवयबुद्धिः सादृश्यनिबन्धना। सादृश्यं च सत्यमेव॥

एवं सत्यसिद्धिहेतुतयोक्तानां धियामसत्यत्वमपास्तम्; अथासत्यात्सत्यसिद्धयुदाहरणानि निरस्यन्ते। तत्र रेखानिदर्शने बह्वीर्विकल्पकोटीः हृदि निधाय रेखाया वर्णमात्रत्वपक्षेऽनिष्टमाह— रेखयेति। रेखायामेव कार्योपयुक्तकल्पितरूपस्य [सत्य....कल्पितस्य] हेतुत्वं नेत्याह— नैवमिति। असत्या वर्णात्मता वर्णधीहेतुत्वेन दुस्साधेत्याह— वर्णात्मताया इति। दोषवशात्तस्याः प्रतीतत्ववदुपायत्वमपि किं न स्यादित्यत्राह— असत इति। रेखायां हि वर्णात्मता नास्ति। .... करे च ग्रहम्। अतः संप्रतिपन्नतुच्छवदस्यापि हेतुत्वमयुक्तम्। किञ्च निरुपाख्यशब्देन प्रमाणशून्यत्वं विवक्षितम्; तेनासत्त्वे हेतूक्तिः। किञ्च असत्त्वादेव प्रख्याविषयत्वासंभवादुपाख्याविषयत्वमपि न स्यात्; ततस्तत्रोपायतोक्तिर्न क्रमेत। एतेन नियतपूर्वभावित्वरूपहेतुलक्षणाभावोऽपि दर्शितः।

* पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ। हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा॥

इति खण्डनोक्तिस्तु खपुष्पस्यापि हेतुत्वप्रसङ्गान्निरस्ता। ख्यातितदभावादिवैषम्यं चात्र दुर्वचमिति भावः। न दृष्टम्— न प्रत्यक्षम्। अनुपपन्नं च—कल्पयितुमप्यशक्यमित्यर्थः। रेखायां वर्णधीर्मिथ्याविषयत्वान्मिथ्यार्था, सा हेतुरिति कोट्यन्तरमनुवक्ति— अथेति। तत्र दत्तोत्तरत्वमाह— एवं तर्हीति। एतेन वर्णधीविशिष्टरेखापक्षोऽपि निरस्तः। अधिकमपि दूषणमाह— उपायेति। ननु रेखायां वर्णधीरुपायः, पाठ्यवर्णधीस्साध्या, कथमनयोरैक्यं? तत्राह— उभयोरिति। अयं भावः— अभ्यस्तलिपिदर्शनोद्बुद्धसंस्कारजनितवर्णस्मृतिपूर्विका हि रेखायां वर्णधीः; तथा च न साध्यमवशिष्यत इति॥

अथ रेखावर्णात्मतयोः सत्यानृतयोः संभेदात्सत्यवर्णधीसिद्धिरिति कोट्यन्तरस्य दत्तोत्तरत्वेऽपि दार्ढ्यायाति-

प्रसङ्गमाह— रेखाया इति । संकेतसहकृतरेखाहेतुत्वपक्षमनुवक्ति— अथेति । चक्षुर्ग्राह्यत्वादिकथनं रेखावर्णयो-रैक्यभ्रमनिरासार्थम् । विशेषशब्दस्त्वतिप्रसङ्गनिवारकः । अत्रापि दत्तोत्तरत्वमाह— हन्तेति । एतेन सङ्केतमात्र-पक्षोऽपि निरस्तः । रेखायामेव सङ्केतनिरपेक्षोदाहरणं दूषयति— रेखागवयादिति । सादृश्यं चेति । चकारेण रेखा-सत्यत्वं पूर्वोक्तमिति व्यज्यते । एवकारो जातिरूपं पदार्थान्तररूपं वा दृष्टं सादृश्यं दुरपह्नवमिति द्योतयति ॥

न चैकरूपस्य शब्दस्य नादविशेषेणार्थभेदबुद्धिहेतुत्वेऽप्यसत्यात्सत्यप्रतिपत्तिः, नानानादाभिव्यक्तस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यङ्ग्यस्वरूपेणार्थविशेषैः सह संबन्ध-ग्रहणवशादर्थभेदबुद्ध्युत्पत्तिहेतुत्वात् । शब्दस्यैकरूपत्वमपि न साधीयः, गकारादेर्बोध-कस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात् । अतोऽसत्याच्छास्त्रात्सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा ॥

अथैवं दृष्टेष्वगत्या वैयाकरणोक्तपुरस्कारिणं प्रत्याह— न चेति । एकरूपस्य— कत्वखत्वादिभिरुदात्तादि-क्रमेण चोज्जृम्भितस्येत्यर्थः । शब्दस्य— स्फोटाख्यस्य । नादविशेषेण— स्वरव्यञ्जनरूपवर्णभेदेनेति यावत् । अपि-रत्रारोहद्योतकः । अत्र व्यङ्ग्यव्यञ्जकतयोक्तयोर्नादस्फोटयोस्तदर्थसंबन्धस्य तद्ग्रहणस्य चासत्यत्वं दुर्वचम् । नादधर्माणां कत्वादीनां शब्देऽध्यासश्च नास्ति । तदभावेऽपि तादृशनादाभिव्यक्ततयैव तत्तद्बोधक(त्व)सिद्धेरित्यभिप्रायेण प्रतिवक्ति —नानेति । वृत्तिकारोपज्ञं स्वमत[पद]माह— शब्दस्येति । अपिर्दूषणसमुच्चयार्थः । अत्र शाबरम् * गौरित्यत्र कश्शब्दः गकारौकारविसर्जनीया इति भगवानुपवर्ष इति । वृत्तिकारस्य बोधायनस्यैव ह्युपवर्ष इति स्यान्नाम । तदिह पातञ्जलादिप्रोक्तं प्रामाणिकमिति न भ्रमितव्यम् ; तेषां बाह्यप्रतिक्षेपार्थं वैभवोक्ते[क्ति]रपि स्यात् । युक्तिविरोधाच्च । स्फोटवादस्यानपेक्ष्य(क्ष)त्वमाह—गकारादेरिति । अयं भावः— किमत्र वर्णातिरिक्तमेकरूपं वाचकं दृष्टत्वाद्भ्रियते, बोध-कान्यथाऽनुपपत्या वा, शब्दश्शब्द इत्यनुवृत्तव्यवहारसिद्ध्यर्थं वा, शास्त्राद्वा ? नाद्यः, वर्णानामेव श्रोत्रेण गृह्यमाण-त्वात् । अतिरिक्तमपि श्रवणेन गृह्यत इति धाष्टर्यादलीकवादः । शब्दादर्थे प्रतीम इत्येकवचनोक्तिस्तु वर्णसमुदायेऽपि स्यात् । न द्वितीयः, यादृशां वर्णानां प्रतिनियतस्फोटव्यञ्जकत्वमिष्यते तादृग्भिरेव तैर्नियतार्थधीसिद्धेः किमन्तर्गडुना स्फोटेन । क्रमयौगपद्यविकल्पानुपपत्तिश्च स्वेष्टेऽपि स्यात् । न तृतीयः, श्रोत्रग्राह्यत्वोपाधिना वर्णावर्णात्मकेषु सर्वेषु शब्दव्यवहारोपपत्तेः । न चतुर्थः, * स्फोटस्त्वं वर्णसंश्रय इत्यत्र स्फुटीकरणशक्तौ तात्पर्यादिति । एवं छायादैः श्येनानुमानेऽपि न त्वदिष्टसिद्धिरित्यभिप्रायेण निगमयति— अत इति ॥

ननु न शास्त्रस्य गगनकुसुमवदसत्यत्वम्, प्रागद्वैतज्ञानात्सद्बुद्धिबोध्यत्वात् । उत्पन्ने तत्त्वज्ञाने ह्यसत्यत्वं शास्त्रस्य । न तदा शास्त्रं निरस्तनिखिलभेदचिन्मात्र-ब्रह्मज्ञानोपायः । यदोपायस्तदाऽस्त्येव शास्त्रम्, अस्तीति बुद्धेः । नैवम् ; असति शास्त्रे अस्ति शास्त्रमिति बुद्धेर्मिथ्यात्वात् । किं ततः ? इदं ततः— मिथ्याभूतशास्त्र-जन्यज्ञानस्य मिथ्यात्वेन तद्विषयस्यापि ब्रह्मणो मिथ्यात्वम् । यथा धूमबुद्ध्या गृहीत-

चाप्यजन्याभिज्ञानस्य मिथ्यात्वेन तद्विषयस्याग्नेरपि मिथ्यात्वम् । चासङ्गम् , शून्यमेव तत्त्वा वाक्येन तस्यापि बाधदर्शनात् । तत्तु भ्रान्तिमूल-मिति चेत् , एतदपि भ्रान्तिमूलमिति त्वयैवोक्तम् । पश्चात्तबाधादर्शनं तु तस्यैवे-त्यलम्प्रतिष्ठितकुतर्कपरिहसनेन ॥

अथ खपुष्पवन्नित्याप्रतीतत्वलक्षणमसत्यत्वं शास्त्रे नास्ति, अतस्सत्यधीहेतुत्वं स्यादिति शङ्कते— **नन्विति** । कादाचित्कधीविषयतया तुच्छधीव्यावृत्तिं व्यनक्ति— **प्रागिति** । असत्यस्य कथं सद्बुद्धिबोध्यत्वम्? तत्सत्यत्वे वा कथं सदद्वैतमित्यत्राह— **उत्पन्न** इति । पूर्वं सद्बुद्धया सत्यत्वं, पश्चाद्बाधकादसत्यत्वं चेत्यविरोध इति भावः । तर्ह्यसत्यस्य कथं धीहेतुत्वमित्यत्र उत्तरावस्थायामिष्टप्रसङ्गत्वं तावदाह— **न तदेति** । पूर्वावस्थायां तु प्रसञ्जकासिद्धिमाह— **यदेति** । अत्रास्त्येवेत्युक्तौ स्वमतविरोधमाह— **नैवमिति** । अयं भावः—

यदि पूर्वं सतः पश्चादसत्त्वमभिसंहितम् । अनि(स)त्यत्वमिहोक्तं स्यान्न मिथ्यात्वादिसंभवः ॥ ५२९ ॥
पूर्वधीमात्रतस्सत्त्वमसत्त्वं बाधकं हि चेत् । बाधात्पश्चादिव प्रागप्यसत्त्वात्कार्यकृन्न तत् ॥ ५३० ॥
कस्यचिद्बाधितं वस्तु यदान्येषामबाधितम् । सत्त्वासत्त्वविरोधोऽपि तदा ते संप्तेदिति ॥ ५३१ ॥

लिङ्गविभ्रमादिन्यायेनोपपादयति— **असतीति** । बुद्धेर्मिथ्यात्वमिह स्वमते विषयतः, परमते स्वरूपतोऽपि । इष्टो-पन्यासोऽयमित्यभिप्रायेण चोदयति— **किं तत इति** । अनिष्टमेव प्रसञ्जितमित्याह— **इदमिति** । तदिष्टप्रक्रियया विवृणोति— **मिथ्येति** । लोकदृष्ट्याऽपि स्थापयति— **यथेति** । सन्मात्रस्य बाधादर्शनमन्वारुह्य प्रागुक्तम् । अथ तदपि नेत्याह— **पश्चात्तनेति** । असिद्धिं माध्यमिकोक्त्या व्यनक्ति— **शून्यमिति** । नन्विदं भ्रान्तिमूलं बुद्धवाक्यं नित्यनिर्दोषानन्यपरवेदोक्तस्य कथं बाधकमिति शङ्कते— **तत्त्विति** । त्वदुक्तयैव वेदान्तोऽपि न कस्यचित्साधको बाधको वा स्यादिति प्रतिबन्ध्यभिप्रायेणाह— **एतदपीति** ।

भ्रान्तिमूलेन वाक्येन धीसत्यत्वं यदीष्यते । तन्मिथ्यात्वादिकं तद्वदिष्यतामिति चाशयः ॥ ५३२ ॥

एवकारस्तु वक्तव्यनैरपेक्ष्यार्थः । अन्येऽप्याहुः—

वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम् ।
बोद्धानृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंसदः ॥

इति । त्वदुक्त्या न केवलं बाह्यसमीकारः, तस्याधिक्यमेव फलतीत्याह— **पश्चात्येति** । सर्वं नास्तीत्येतदपि न सुवच-मिति चेत्, तदा धीव्यतिरिक्तं नास्तीत्येतदपि नेति वक्तुं शक्यम् । अज्ञानवस्थयाऽपि परमतमात्रस्य बाधकप्रयो-जकत्ववद.....मेवो.....मूल्येत्युपात्तेन चुलकमात्रेण दोग्धी.....ब्दितं दर्शित इत्यभिप्रायेण विरमति— **इत्यलमिति** । स्ववचनविरोधादिभिरप्रतिष्ठितत्वम् , उपजीव्यविरोधात्कुतर्कत्वम् ॥

यदुक्तम्— वेदान्तवाक्यानि निर्विशेषवस्तुमात्रप्रतिपादनपराणि

*सदेव सोम्येदमग्र आसीत् इत्येवमादीनीति। तदयुक्तम्, एकविज्ञानेन सर्वविज्ञान-प्रतिज्ञोपपादनमुखेन सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगदुपादानत्वं जगन्निमित्तत्वं सर्वज्ञता सर्वशक्तियोगः सत्यसंकल्पत्वं सर्वान्तरत्वं सर्वाधारत्वं सर्वनियमन-मित्याद्यनेककल्याणगुणविशिष्टतां कृत्स्नस्य जगतस्तदात्मकतां च प्रतिपाद्य, एवंभूत-ब्रह्मात्मकस्त्वमसीति श्वेतकेतुं प्रत्युपदेशाय प्रवृत्तत्वात् प्रकरणस्य। प्रपञ्चितश्चायमर्थो वेदार्थसङ्ग्रहे। अत्राप्यारम्भणाधिकरणे निपुणतरमुपपादयिष्यते॥

विशिष्टविषयैरित्थं प्रत्यक्षाद्यैर्विरुद्धता। तद्विरोधे च शास्त्रस्य दौर्बल्यमपि दर्शितम्॥ ५३३॥
अथागमानां प्रत्येकमर्दपर्यसमीक्षया। प्रत्यक्षाद्यविरुद्धार्थे प्रामाण्यं प्रविवक्षति॥ ५३४॥
साधकं बाधकं वाऽपि यत्र नास्ति प्रमान्तरम्। तस्मिन्नेव हि तात्पर्यं शास्त्रस्येति प्रचक्षते॥ ५३५॥
अर्थवैशिष्ट्यमधिकं शब्दमात्रेऽपि दर्शितम्। विशेषवत्त्वा(तश्चा?)रम्भस्तु तद्व्यक्त्यै वाक्यतर्कतः॥५३६॥

यदिह दूष्यं कारणशोधकवाक्ययोः परोक्तं [दूषणम्] निर्विशेषपरत्वं तदनुवक्ति— **यदुक्तमिति**। अत्र **वस्तुमात्र**शब्देन सगुणवाक्यानां दृष्टिविधिवदन्यपरत्वं व्यज्यते। उपात्तवाक्यस्य परेष्टविरुद्धत्वद्योतकः **पर**शब्दः। **एवं** शब्द ईदृशसर्वप्रकारसंग्रहार्थः। अत्र प्रत्यक्षादेः उपक्रमादेः श्रुतिलिङ्गादेश्च विरोधमभिप्रेत्याह— **तदयुक्तमिति**। सद्विद्यायां परोक्तैः तात्पर्यलिङ्गैरेव तदिष्टभङ्गं व्यनक्ति— **एकेति**। एकस्य कारणस्य विज्ञानेन तत्कार्यस्य सर्वस्य ज्ञानं सिध्यतीति प्रतिज्ञा। सा च * उत तमादेशमप्राक्ष्यः येनाश्रुतमित्यादिना बोध्यते। आदेशशब्दश्चात्र न क्रिया-वचनः, मृदादिदृष्टान्तैः एवं सोम्य स आदेश इत्यादेशेन च करणपरत्वव्यक्तेः। नाप्युपदेश्यपरः, तदनुक्तावपि तत्सिद्धेस्तदुक्तिनैष्फल्यात् आङ्पूर्वस्य दिशेरुपदेशवाचित्वाभावाच्च आदेशोपदेशयोः पृथगाम्नानात् मुख्ये सम्भवत्युपचारायोगात्। .....व्यः अप्राक्ष्य इत्यनेनार्थतः उपादानस्यैव निमित्तत्वोपयुक्तप्रतिज्ञासिद्ध्यर्थतया प्रेरण.....उपदेश्यत्वं सर्वप्रष्टव्यसाधारणम्। अपवर्गोपदेश्यकत्वं चोपास्यादावप्यस्ति। न चात्र **तमिति** विशेषणादसाधारण्यमिति वाच्यम्। ..... .गात्। अपेक्षितासाधारण्यविधेरनपेक्षितसाधारण्यविधिदौर्बल्याच्च। तस्मात् * एतस्य वाक्षरस्य प्रशासने गार्गीत्यादिप्रसिद्धविश्वप्रशासितृत्वविषयोऽत्रादेशशब्दः। नन्वादेशशब्दे तावन्न कर्तरि पचाद्यच्प्रत्ययश्शङ्क्यः, इगुपधेति कस्यापवादत्वात्। न चात्र कप्रत्ययः, क्ङिति च इति गुणनिषेधात्। नापि घञ्, * अकर्तरि च कारके संज्ञायामिति नियमात्। न च सर्वशासितुः शास्तिकर्मत्वम्। उपदेशकर्मत्वं तु युक्तमिति। मैवम्; विवक्षातः कारकप्रवृत्त्या कर्तुरेव करणत्वविवक्षया घञो व्युत्पत्त्युपपत्तेः। अकर्तरीति नियमस्तु करणत्वादिविवक्षाविरहे कर्तर्यसाधुत्वार्थः। अर्थतोऽपि हि प्रत्यय [मात्र] नियमनं वरम्। अतः तमादेशमित्यादौ सर्व-तत्त्वाधिष्ठातृत्वगुणविशिष्टं किं श्रुतवानसीति प्रश्नार्थः। * येनाश्रुतमित्यादौ यथा सोम्यैकेनेत्यादिदृष्टान्तवाक्येषु च, ज्ञातेनेति विशेषणीयम्, तत्सत्तामात्रेण तत्कार्याणां ज्ञातत्वायोगात्। तो.....सर्वं विदितम्। अत एव विज्ञातेने-त्युक्तम्। तथा च मुण्डकोपनिषदि * कस्मिन्नु भगवो विज्ञाते इदं सर्वं विज्ञातं भवतीति। बृहदारण्यके च * आत्मनि

स्वस्वरे श्रुते मते विज्ञाते इदं सर्वं विदितं भवतीति च। अत्र घटकुडयादिना विज्ञातेन तदन्यस्य ज्ञातत्वमयुक्तमित्यभिप्रायेण * कथन्नु भगवस्स आदेश इति चोक्तम्। तत्रोत्तरं, यथा सोम्येत्यादि। बहुदृष्टान्तोक्तिस्संभवद्रढिमार्था। मृदादिकारणात्मकं[हि]सर्वं मृन्मयम्। तत्तन्मृत्पिण्डदृष्टान्तेऽप्यसत्कार्यापादनचोद्यं निरस्यति— वाचेति। अत्र वाचालम्बनमिति व्याख्यायां श्रुत्यक्षरविप्लवः स्यात्। कार्यमि.....त्यो.....क्तञ्चाप्रसिद्धं नोदाहर्तव्यम्। त्वदिष्टे हि रज्जुसर्पादि दृष्टान्तयितव्यम्। * विज्ञातं स्यादित्यत्र च सत्यज्ञानेन मिथ्याभूतस्य ज्ञातत्वोक्तिर्विरुद्धा। ज्ञातं भवतीति किं तदा वाच्यम्? सति गत्यन्तरे मिथ्यात्वेन ज्ञातं भवतीत्यध्याहारश्च न युक्तः। मृत्तिकेत्यादिप्वितिकरणं च निरर्थकम्। मृत्तिकेत्येव प्रमाणसिद्धमिति प्रति[त्यभि]ज्ञा.....प्रति सात्वेति सार्थकं.....तदिह घटेनोदकमाहरेत्यादिवाक्पूर्वकप्रवृत्तिनिवृत्तिरूपप्रयोजनाख्येन हेतुना, आरम्भणम्। विकारो नामधेयमित्युभयं मृदादिद्रव्येण। आरम्भणं आलम्भनं स्पर्शः। कृत्यल्युटो बहुलम् इति कर्मणि ल्युट्। रल्योरभेदः पक्षद्वयेऽपि समान। वकारस्थाने भकारस्तु न काप्यस्ति। वर्णवैषम्यानादरेणारम्भणीयत्वविवक्षायामप्यसत्पक्षे न दोषः।

असत्यं तव सिद्धान्ते घटादि च मृदादि च। लोकदृष्ट्योभयं सत्यं विभज्योदाहृतिः कथम्? ॥ ५३७ ॥
यदि वर्गद्वयस्यास्य मृषात्वं साधयिष्यते। यथेति सिद्धवत्कारस्समतोक्तिश्च भज्यते ॥ ५३८ ॥
किञ्चात्र कार्यसत्यत्वं सजातीय..... ॥

अपि चैवं..... * एवं सोम्य स आदेश इत्युपदेश्यत्वाभ्युपगमात् * भगवांस्त्वेव मे तद्ब्रवीतु इति पूर्वमविदितस्य शुश्रूषितत्वात् पश्चादुपदेशात् * आचार्यवान्पुरुषो वेदेति निगमनाच्च शब्दगोचरत्वं ज्ञानगोचरत्वं च स्पष्टमुक्तम्। तदाऽपि त्वदिष्टविरुद्धमुपलक्षितं..... क्षन्यायेन बुद्धीनां शब्दानां च ब्रह्मणि कुण्ठीभाव इति तु डिम्भप्रलम्बनं, प्रलपनं वा। सत्कार्यवादादिसंभवेऽपि विचित्रकार्याणां यथादृष्टि विचित्रकारणापेक्षणादेकविज्ञानेन सर्वविज्ञानं कथमिति चात्र प्रश्नाभिप्रायः। तत्रोत्तरम् — सदेवेत्यादि। तत्राग्र आसीदिति काल..... विशेषण द्वयञ्च सिद्धम्। .....विशिष्टं तदृश्यते। अग्रेशब्दस्य निरर्थकत्वञ्च। अवाच्यस्य कथमुपदेश्यत्वमित्यभिप्रायेणोक्तम्— सच्छब्दवाच्यस्येति। गुणविशिष्टोक्तिः कल्पिताकारविषयेति शङ्काव्युदसनायाह— परस्य ब्रह्मण इति। अनेन सच्छब्दस्य शाखान्तरोक्तशब्दैरैकार्थ्यं सूचयता सत्तामात्रपरत्वञ्च निरस्तम्। निरूप्यमाणदशापरत्वञ्चायुक्तम्, वक्ष्यमाणापेक्षया कारणनिर्देशार्थत्वात्। न हि तदानीमित्यादिश्रुत्यन्तरनिर्देशसामरस्याच्च प्रलयकालपरत्वं युक्तम्। किं तदासीदित्यत्र * ऋषयो वाव तेऽग्रे सदासीदिति..... अत्र निर्दिश्यते। अतस्तत्काले त्रिविधभेदनिषेधपरत्वमिह न वाच्यम्, सृष्टिकालेऽपि वस्तुतस्तच्छून्यत्वात् प्रलयकालेऽपि वैषम्यनैर्घृण्याकृताभ्यागमकृतविप्रणाशपरिहाराय सूक्ष्माचिज्जीवादिभेदस्य त्वयाऽपि स्वीकृतत्वाच्च। अतो नाग्रशब्दस्य वैयर्थ्यं, विरोधो वा। दुस्त्यजस्वगतविशेषोऽपि तदानीं सत्त्वैकत्वाद्वितीयत्वैस्त्वयैवोक्तः। तदिह प्रलयकालावच्छिन्नसत्ताविशिष्टं चिदचिच्छरीरकं ब्रह्म सदित्युक्तम्। सच्छब्दस्य ब्रह्मात्मादिशब्दवद्विशेष्यविषयत्वेऽपि स्वरूपविकारादिनिषेधाच्छ्रुत्यन्तरोपबृंहणप्रसिद्धिसामरस्याच्च प्रकृतिपुरुषकालाद्यपेक्षितविशेषणसिद्धिः। तदन्यत्वे निर्विकारस्य स(स्व)तः कारणत्वमेव न सिद्धयेत्। ततश्च शाखान्तरनयेन कारणवाक्यान्तराणामपि निर्विशेष-

परतया ब्रह्मकारणवादस्यक्तस्यात् । अध्यासोऽपि ह्यविद्यापेक्षस्त्वयैवोक्तः । * सदेवेत्यस्यासत्त्वनिषेधपरत्वं च दृष्टान्तानुगुणम् । * तद्वैक आहुरसदेवेदमित्यादिना मतान्तरोपन्यासनिरासाभ्यां च तद्व्यक्तम् । अत्र * एकमेवा-

न त्वदुक्त्यंशोक्तिः । सिद्धानुस्मरणमात्रार्थत्वात् तच्छब्दोऽत्र पक्षान्तरोपक्रमार्थः । तदिदमिति वाऽन्वयः अत्र च कार्यं द्रव्यं प्रागसदिति वैशेषिकाद्युक्तिनिरासे प्रतिज्ञानुगुण्यं स्यात् । शून्यवादनिरासपरत्वे त्वप्रशब्दस्य वैयर्थ्यम् । क्षणभङ्गनिरासस्तु द्रव्यानुवृत्तिसाधनेनैव सेत्स्यति ।

अतुच्छत्वे स्थिरत्वे तु प्रतिज्ञा नैव सेत्स्यति । कार्यकारणयोर्यावदनन्यत्वं न साध्यते ॥ ९३९ ॥

कुतस्त्वित्यादि प्रमाणतर्काभावपरम् । कथमित्यादि तदुभयविरोधपरम् । विद्यमानस्य हि द्रव्यस्यावस्थान्तरापत्तिस्तत्तदवस्थावत उत्पत्तिरिति प्रमाणसिद्धम् । तथा च द्रव्यस्य पूर्वमसत्त्वे तस्य सत्तावाच्यघटत्वाद्यवस्था उत्पत्तिरिति स्यात् । तदेतत्प्रमाणैस्तदनुग्राहकैश्च निर्द्धूतमिति भावः । अथ यथोक्तं निगम्यते— * सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति । इदमग्रे एकमद्वितीयं सदेवासीदित्येकमेवेदं वाक्यम्, संभवत्यैक्ये तद्भेदायोगात् । यत्तु भिन्नवाक्यवत्कचित्कचिद्भाष्यते, तदपि तात्पर्यव्यक्त्यर्थम् । अन्यथा वाक्यत्रयवद्वाक्यद्वयवच्च व्यपदेशो व्याहन्येत । तदिह सदासीदित्यवस्थाद्वयसाधारणाकारोक्तिः । एकमिति तु प्रतिज्ञाघटनार्थमविभक्तनामरूपावस्थोच्यते । अवधारणमिह जगदन्तर्भूतस्य वियदादेर्वैशेषिकाद्यभिमतनित्यत्वशङ्कानिरासार्थम् । अत्राभिप्रेतमाह— **जगदुपादानत्वमिति** ।

* तद्धेदं तर्ह्यव्याकृतमासीदित्यादिश्रुत्यन्तरानुगुण्यात्, * बहु स्यामित्युत्तरवाक्यादिभिश्चायमेवार्थ इति भावः । उदाहृतानां मृदाद्युपादानानां कुलालादिप्रेर्यत्वदर्शनादिहापि तथाऽन्यस्मिन्कर्तरि च आदेशशब्दार्थत्वेन ज्ञानात्तत्कार्यविश्वविज्ञानं न स्यात् । तत्सिद्ध्यर्थमद्वितीयपदेनाधिष्ठात्रन्तरं निरस्यते; तदिदमाह— **जगन्निमित्तत्वमिति** । * तत्तेजोऽसृजत तदात्मानं स्वयमकुरुतेत्यादिभिरेतद्दृष्टम् । * तदैक्षतेत्यादिसिद्धमाह—**सर्वज्ञतेति** । * यस्सर्वज्ञ इति कारणवाक्यान्तरे चैतत्कण्ठोक्तम् । स्यामिति सङ्कल्पयतो निमित्तत्वानुगुणम् । एतदुभयानुगुणमाह— **सर्वशक्तियोग इति** । सर्वोपादानत्वसर्वनिमित्तत्वशक्त्येकाश्रयमित्यर्थः । अत्र असृजतेत्यादि फलितम्, अन्यत्र ब्रह्माध्यतिष्ठत् कर्तारमीशमित्यादिभिः कण्ठोक्तमाह— **सत्यसङ्कल्पत्वमिति** । हन्ताहमिमा इत्यादौ चिदचिदन्तरात्मत्वं व्यक्तम्; विशेषतोऽप्यनुप्रवेशनिबन्धनं सामानाधिकरण्यमिति * तदनुप्रविश्य सच्च त्यच्चाभवदित्यादिभिः सिद्धम् । अत्र * सिंहेन भूत्वा बहवो मयात्ताः इतिवत् अनेन जीवेनेति विवक्षितं व्यनक्ति— **सर्वान्तरात्मत्वमिति** । सर्वाधारता सदायतनत्वोक्तिसिद्धा । सर्वनियमनं तु आत्मत्वोक्तिलब्धम् । अत्राधेयत्वविधेयत्वादिनियमैर्जगतश्शरीरत्वं सिद्धम्, शरीरवाचिनां शरीरिपर्यन्तत्वप्रतिज्ञाघटनाय प्रकाशितम् । आदिशब्दश्च खण्डान्तरोक्तांश्च कारणत्वानुपयुक्तान्विशेषान्संगृह्णाति । ऐतदात्म्यमित्यादेरर्थमाह— **कृत्स्नस्येति** । तत्सत्यमित्यत्र सर्वकारणस्य सतो ब्रह्मणः, इदं सर्वमित्युक्तस्य जगतो वा सत्यत्वमिह न विधेयम्, कृतकरत्वात् । अतो * मृत्तिकेत्येव सत्यमितिवत्कार्यस्य जगतः स्वनिष्ठत्वादिभ्रमनिवारणाय तदात्मकत्वं प्रामाणिकमित्युच्यते । * स आत्मेत्येतदप्यस्यैवार्थस्य तात्पर्यभूम्ना निर्देशवैषम्येण दृढीकरणं स त आत्मा अन्तर्याम्यमृत इतिवत् । अत्रापि सर्वान्तरात्मत्वेन प्रस्तुतश्रोतर्यपि विशेषत उक्तिरियमिति केचित् । अत एव तत्त्वमसीत्यप्यनुसन्धातुर्युपसंहारमात्रम् । जीवस्य परेण स्वरूपैक्ये भेदे वा[बाधेऽपि पक्षे] पूर्वोक्तसर्वाकारविशिष्टपरामर्शितच्छब्दो विरोधी स्यादित्यभिप्रायेणाह— **एवंभूतब्रह्मात्मक इति** । अत्रोद्देश्येपादेयचिन्ता पश्चाद्वक्ष्यति ।

श्वेतकेतुं प्रतीत्यनेन स्वेष्टसाधकार्थवादलिङ्गसूचनम्। आत्माद्वैतपक्षे प्रबुद्धस्य गुरोर्भ्रान्तिसिद्धं शिष्यं प्रत्युपदेशानुपपत्तिं सूचयति— **उपदेशाय प्रवृत्तत्वादिति**।

यत्त्वष्टविधतात्पर्यलिङ्गत्वत्वमिहोदितम्। तत्त्वस्मिन्पक्ष एवेति प्राह प्रकरणोक्तितः ॥ ५४० ॥

अत्र ह्युपक्रमप्रभृति तत्त्वमसीत्युपसंहारपर्यन्तं निरुपाधिकं प्रशासनादिकं दर्शितम्। तच्च मानान्तरागोचरत्वादपूर्वम्। अभ्यस्तञ्च बहुशः। फलं च तस्य तावदित्यादिना जीवस्य परप्राप्त्यनुरूपम्। आख्या..... तं * तन्निष्ठस्य मोक्षोपदेशादिति ॥ कृ..... चार्थवादसिद्धः। असत्कार्यवादनिरासेन विवर्तवादविरुद्धैर्दृष्टान्तैस्त्रिवृत्करणप्रदर्शनादिभिश्चोपपत्तिः स्थापिता। तत्तेजो सृजत..... सोपबृंहणैः श्रुत्यन्तरसङ्गतैरध्यासशङ्काऽप्यत्र प्रशमिता।

तथा च त्वत्पक्षं क्षिपति परिणामादिति वदन्विवर्तादध्यासादिति च नवदन्सूत्रकृदिह।
तदन्याभावं न स्पृशति तदनन्यत्वफणितिर्न मायामात्रोक्त्याऽप्यनृतगतिराश्चर्यपरया ॥ ५४१ ॥

अत्र किं प्रतिज्ञावाक्यं, कानि च तदुपपादकानि, कथं च तेषामेव तात्पर्यमित्यत्राह— **प्रपञ्चित** इति। ननु बुद्धिशब्दान्तरादिकं रज्जुसर्पादिष्वध्यासाद्ध्यादिषु द्रव्यान्तरसंयोगाच्च दृष्टम्। मृत्पिण्डघटादिष्वपि तथाभावाभावे कथं द्रव्यैक्योपपादनमित्यत्राह— **अत्रापीति**। **निपुणतरम्**— परोक्तप्रतीतिबलानुसारेण। अहिकुण्डलवदास्ते..... त.....धित इत्यादिवच्च कार्यस्य सत्यत्वे..... ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु

श्रीभाष्यव्याख्या **तत्त्वटीका** समाप्ता ॥

(एतावत्येव उपलभ्यते)

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

॥ निक्षेपरक्षा ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

संसाराध्वगतागतश्रमहरः सर्वावगाह्यः स्वयं श्रीसंश्लेषसमुल्लसद्भनरसः शीतस्तटाको महान् ।
नेदिष्ठेन महापथेन सुगमो येषां प्रसादादभूत्तीर्थं तत्र शुभं प्रकाशयतु नस्तेभ्यो गुरुभ्यो नमः ॥

प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् । हस्तः श्रीरङ्गभर्तुर्मामव्यादभयमुद्रितः ॥

स्थितं तावत्—देहबाह्याभ्यन्तरकरणप्राणधिषणाविलक्षणः, पारलौकिकसुखदुःखोपभोगयोग्यः, परमपुरुषनित्येच्छातन्त्रितस्वातन्त्र्यः, परतन्त्रः, अनादिकर्मप्रवाहहेतुकचतुर्विधदेहप्रवेशजनिततत्तदात्माभिमानसंतन्यमानावर्जनीयदुःसहदुःखसंततिसहस्रसंततः, सांसिद्धिकसम्यग्ध्यक्षयुगपदध्यक्षितसमस्तवस्तुवास्तवेनापि स्वच्छन्दपञ्चकृत्यनित्यशक्तिसंपदाऽपि सर्वजननिरुपाधिकपरमसुहृदाऽपि अनुकम्पनीयानुकम्पावात्सल्यसौशील्यादिगुणगणप्रशमितपितृत्वोष्मणाऽपि यथावस्थितगुणविभूतिमण्डलपरिमण्डितस्वात्मविश्राणनमहावदान्येनापि पुरुषोत्तमेन परब्रह्मणा भगवता नारायणेन अनादिकर्मप्रवाहभेदविषमितविविधसंसारिमण्डलसमसमयसमुद्धरणप्रतिबन्धकप्रतिबद्ध[साम्यगुण]सम्यग्गुणगणसंरक्षणसंधुक्षितरणरणकेन अपुरुषार्थप्रदायित्वपरिजिहीर्षयाऽर्थतोऽनर्थमप्यर्थितं दिशता संसारतन्त्रवाहिनाऽप्यवसरप्रतीक्षेण श्रीमता पुण्डरीकाक्षेण समीक्ष्यमाणः, कदाचिदहेतुकसर्वेसमभगवदनुकम्पावसरापदेशभूतेन अपर्यनुयोज्यानादिसामग्रीचक्रसामर्थ्यसमुद्भवेन सर्वसैद्धान्तिकसमालम्बनीयेन केनापि सुकृतविशेषेण संसारतरुसमूलोन्मूलनानुकूलजन्मविद्यावृत्तवैराग्यादिकमनुप्रपन्नः, तत्त्वोपदेशदेशिकमहत्तरजनचरणपरिचरणसमासादितप्रकृतिपुरुषेश्वरतत्त्वयाथात्म्यावबोधः, अनन्तशाखनिगमतरुशाखाविशेषसंभवासु विद्यात्मिकासु छायासु विश्राम्यन्, परमशेषिपरमपुरुषचरणारविन्दयुगलनिर्गलिताशेषमनोरथः, महता मनोरथगोचरेणार्चिरादिपथेन परमपदमधिरुह्य स्वेन रूपेणाभिनिष्पन्नः, भगवन्तमनुभवति प्रत्यगात्मेति । तत्र च ज्ञानकर्मसमुच्चयवाक्यार्थज्ञानादिपरपक्षप्रतिक्षेपेण कर्मज्ञानानुगृहीतः, वेदनध्यानोपासनादिशब्दवाच्यः, दर्शनसमानाकृतिः, निरतिशयप्रीतिरूपतया भक्तिशब्दाभिलप्यः असकृदावृत्तः, आप्रयाणानुवृत्तो निरन्तरस्मृतिसंतान एव निःश्रेयसनिःश्रेणिकेति निरणायि ॥

इदं त्वत्र चिन्त्यते—किं तथाभूतादुपासनवर्गात् [व्यतिरिक्तो] विमुक्तो मुक्त्युपायोऽस्ति, न वेति । नास्तीति पूर्वः पक्षः, अस्तीति राद्धान्तः ॥

नन्वेतच्चिन्तनमनर्थकम्, तदनिश्चयेऽपि भक्त्यैव मुक्तिसिद्धेरिति चेन्न, तन्निश्चयाभावे तदनुष्ठानरूपस्य प्रयोजनस्यासिद्धेः। तत्फलस्यान्यतः सिद्धौ तदनुष्ठानस्य प्रयोजनत्वमेव न सिध्यतीति चेन्न; अनेकविद्याविलयप्रसङ्गात्। सर्वासामेकफलसाधनत्वेऽपि विकल्पतो यथारुचि यथावगमं वा तत्तदनुष्ठानं सप्रयोजनमिति चेत्, तुल्यम्। यथाधिकारमिति विशेषो वक्ष्यते। तत एव विद्यान्तरविशेषचिन्तनादेतच्चिन्तनस्य महत्तरं प्रयोजनमिति स्थितम्॥ **इत्युपोद्घातः॥**

॥ अथ पूर्वपक्षः ॥

अत्रैवं पूर्वपक्षी मन्यते—नास्ति भक्त्यतिरिक्तं मोक्षसाधनमिति। कुतः?

श्लो. स्वरूपलक्ष्मानुष्ठानविध्यदृष्टैर्निषेधतः। ऐक्यादशक्तेरल्याते: संप्रदायविरोधतः॥ १॥

स्वरूपानुपपत्तिसमर्थनम्॥ तथा हि—

* सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

इत्येतावन्मात्रबलेन हि सुप्रतिष्ठितसमस्तशास्त्रार्थसंक्षोभः सिषाधयिषितः। अस्य चायमर्थस्त्वन्मतरहस्यवेदिभिरादिश्यते—सर्वधर्मपरित्यागपूर्वकं तमेकमेव शरणं गतस्य स एव भगवान्मोक्षसाधनमिति। तत्र किमियं शरणागतिः सिद्धरूपा प्रतिपिपादयिषिता, उत साध्यरूपा वा? न तावत्सिद्धरूपा, अविधेयत्वप्रसङ्गात्। कर्तृव्यापारसाध्यमेव हि विधीयते। इष्टप्रसङ्गोऽयमिति चेन्न, अविहितत्वेनाशास्त्रीयत्वप्रसङ्गात्। [तत्तच्छा]शास्त्रोपात्तत्वमात्रेण शास्त्रीयत्वमिति चेन्न, निष्प्रयोजनोपादानस्यैवासंभवात्। ब्रह्म तु सिद्धमपि स्वतः प्रयोजनरूपत्वात्परंपरया प्रयोजनपर्यवसानाच्चोपादीयते। अधिकारिविशेषणतया तदुपादानमपि सप्रयोजनमङ्गीक्रियत इति चेन्न,

श्लो.—फलादिभ्यो विभिन्नत्वात्प्रपत्तिर्विध्यनन्वयात्। विधेयान्तरहानेश्च नाधिकारिविशेषणम्॥ २॥

अधिकारिविशेषणता हि फलकामनारूपतया, फलतया, निमित्ततामात्रेण वा स्यात्? न पूर्वः, असिद्धेः। न द्वितीयः, फलस्य स्वरूपेणाधिकारिविशेषणत्वाभावात्। यथोक्तमागमप्रामाण्ये—

* सिद्धमेव हि सर्वत्र नियोज्यस्य विशेषणम्। जीवनादि तथैवेह कामनैव विशेषणम्॥ इति।

काम्यमानतया विशेषणत्वेऽपि तदर्थसाधनविधानादर्शनात्, स्वर्गादिवत्स्वतो वा पश्वादिवत्फलान्तरसाधनतया वा फलत्वस्यासिद्धेश्च। न तृतीयः, हिंसादिवन्निमित्तत्वे निषिद्धानुष्ठानतया परिहरणीयत्वप्रसङ्गात्। जीवनपुत्रजन्मादिवत्केवलनिमित्तत्वकल्पने विधिप्रत्ययायोगः परिपन्थी, विधेयान्तरासिद्धिश्च। तद्विशिष्टस्य ब्रह्मस्वरूपं मोक्षसाधनतया विधीयत इति चेत्, कोऽयं विधिः? किं कर्तव्यतया बोधनम्, उताज्ञातज्ञापनमात्रम्? नाद्यः, नित्यस्य ब्रह्मणः कृतिसाध्यत्वासिद्धेः। प्रसन्नत्वरूपेण साध्यत्वमस्तीति चेत्, तर्हि विशिष्टोपादानस्यात्र विशेषणार्थत्वात्प्रसाद एव साध्य इत्यायातम्। तथा सति स एव विधेयः स्यात्, न ब्रह्म। अस्त्विति चेन्न, कर्तृव्यापाररूपत्वाभावेन साक्षात्कृतिसाध्यत्वेन विधेयत्वासिद्धेः, देहादिव्यापाररूपत्वाभावेन पारंपर्येण साध्यत्वेऽप्यौचित्यात्स्वर्गादिवत्फलत्वस्य तद्धेतुभूतावान्तरव्यापारत्वस्य वा प्रसङ्गात्। न चेह तद्युक्तम्, नैमित्तिकतया कामनाधिकारत्वासिद्धेः, संवलिताधिकारत्वे ज्ञापकाभावात्, तदर्थविधेयान्तराभावे साध्यत्वस्यैवासिद्धिप्रसङ्गाच्च। नापि द्वितीयः, * अमृतस्यैष सेतुरित्यादिभिस्तदविशिष्टस्यापि तज्ज्ञानदर्शनेन तद्विशिष्टस्यैव तदधिकारित्वासिद्धेः? न च यथावस्थितशास्त्रश्रवणवेलायामेव प्रपन्नः श्रोता, प्रपत्तेः शास्त्राधिगम्यत्वेन श्रवणप्रपदनयोरन्योन्याश्रयात्। हितकारिवचनात्प्रपदनसंभवेऽपि निरर्थकं पुनरिदमज्ञातज्ञापनम्। यदि हि प्रपन्नस्य ब्रह्म मोक्षसाधनम्,

किमस्य पुनस्तथात्वज्ञानेन ? तदन्तरेणापि फलसिद्धेः । सिद्धप्रपदनेनैव साधनतया ज्ञायमानं ब्रह्मैव साधनमिति चेत्, तर्हि साधनतया ज्ञानमेव विधेयतया साधनमिति स्यात्; ततश्च गतं ब्रह्मणः साधनत्वम् । एवं चासाधने ब्रह्मणि साधनत्वदृष्टिरेवेति मिथ्याज्ञानान्मोक्षप्रसङ्गः । फलप्रदत्वाकारेण ब्रह्मणोऽपि साधनत्वमस्त्येवेति चेन्न, तावन्मात्रज्ञानस्य श्रवणमात्रसंपाद्यत्वेन विधिव्यापारविषयत्वायोगात्, अविधेयज्ञानस्यापि मोक्षसाधनत्वे कुदृष्टिमतोत्थानप्रसङ्गात् । समर्पण-पर्यन्तसाधनत्वबुद्धिविशेषस्यैव प्रपत्तित्वाभ्युपगमादधिकारिविशेषणविधेययोरैक्यप्रसङ्गश्च । तच्चायुक्तम्; सिद्धत्वसाध्यत्व-रूपविरुद्धधर्माध्यासात्, तत्सिद्धयैव तत्सिद्धिरित्यात्माश्रयप्रसङ्गाच्च । रक्षापेक्षा प्रपत्तिरिति नैक्यमिति चेत्, तथा सत्यन्योन्याश्रयणम्, रक्षकत्वबुद्धिपूर्वकत्वाद्रक्षापेक्षायाः रक्षापेक्षाविशिष्टमधिकारिणं प्रति रक्षकत्वोपदेशात् । रक्षकत्वाति-रिक्तं साधनत्वमुपदिश्यत इति चेत्, किमत्र साधनशब्देन कर्तृनदितरसाधारणं हेतुमात्रं विवक्षितम्, उत कर्तृव्यतिरिक्तं किमपि कारक[न्तर]मिति ? पूर्वत्र स्थितमेवान्योन्याश्रयणादिकम्, विशेषप्रतिपत्तेः सामान्यप्रतिपत्तिमन्तरेणासिद्धेः । उत्तरत्र कर्तरि ब्रह्मणि कारकान्तरत्वोपचारमात्रं वा स्यात्, पूर्ववन्मिथ्याप्रत्ययादपवर्गप्रसङ्गो वा । स्वतन्त्रतयोत्कृष्टे कर्तरि ब्रह्मणि अस्वतन्त्रतया अपकृष्टकारकान्तरदृष्टेर्महापराधरूपत्वम् । ततो दृष्टिविधिनयस्याप्यत्रानवकाशः । कर्तरि ब्रह्मणि करणत्वादिबुद्धौ करणत्वादेश्च कर्तृनिरूपितस्वरूपत्वेन कर्त्रपेक्षायां परिशेषादौचित्याच्चाधिकार्येव कर्तेति प्रतीयेत । ततश्च आकर्मयोगमनुवर्तमानस्यात्मन्यकर्तृत्वानुसंधानस्य प्रपदनदशायां परित्याग इति सम्यक् संप्रदायः परिरक्षितः । अत्यन्त-पारतन्त्र्यानुसंधाननिष्ठां हि प्रपत्तिनिष्ठामातिष्ठन्ते । कर्त्रर्थेव ब्रह्मणि सहकारिनैरपेक्ष्यमात्रं साधनशब्देन विवक्षितमिति चेन्न, तस्यापि शास्त्रश्रवणवेलायामेव ज्ञाततया तज्ज्ञानविधानानुपपत्तेः, निरपेक्षरक्षकत्वबुद्धिपूर्वकत्वाच्चात्र रक्षापेक्षायाः प्रागुक्तदोषानतिलङ्घनात् । प्रपत्तेरधिकारिविशेषणत्वे च *तेनतेनाप्यते तत्तन्न्यासेनैव महामुने इत्यादिमूलस्य प्रपत्तेः साधनत्वव्यपदेशस्यामुख्यत्वप्रसङ्गश्च । **अतो नास्याः सिद्धरूपता विवक्षिता** ॥

साध्यरूपत्वेऽपि, न प्रागुक्तनयेन फलरूपता । करणादिरूपायास्तु वाक्कायव्यापाररूपत्वे, स्तुत्यादिवदेव ज्ञानात्मकत्वाभावेन भक्त्यङ्गत्वादिप्रसङ्गः, ज्ञानादेव मोक्ष इति परित्यागप्रसङ्गो वा । अत एव भक्तिज्ञानव्यतिरिक्तं किमपि कर्मैतदिति कैश्चिदुक्तं निरस्तम् । मनोव्यापाररूपत्वेऽपि, दृष्टिवत्सा भ्रान्तिरूपा, तत्त्वज्ञानरूपा वा ? पूर्वत्र अपवर्गसाधन-त्वासिद्धिः । उत्तरत्र, किं शास्त्रमात्रजन्या, हेत्वन्तरजन्या वा ? आद्ये कुमतिमोपनिपातादिप्रसङ्गः । हेत्वन्तरजन्यत्वे तु, स हेतुः किं योगाभ्यासादिरूपः, तदन्यो वा ? प्राच्ये गुरुनरभक्तितुल्यतया तद्वदेव सौकर्यासिद्धिः । पश्चिम-स्त्वनुपलम्भनिरस्तः, इन्द्रियलिङ्गादेस्तथाविधज्ञानोत्पादकत्वादर्शनात् ॥

सा किं शास्त्रजन्यज्ञानादधिकविषया, अनधिकविषया वा ? न तावदधिकविषया; अधिकप्रकाशकस्य योगादे-रभावात्, भावे वा भक्त्यविशेषत्वस्योक्तत्वात् । नाप्यनधिकविषया, शास्त्रजन्यज्ञानाविशेषेण स्वारसिकसकृत्स्मरणमात्रानति-रिक्तायास्तद्वदेवाविधेयत्वप्रसङ्गात् । तस्यैवावृत्तिवेषेण विधेयत्वापत्तिरिति चेन्न, ध्यानसमानरूपतया भक्त्यतिरेकासिद्धेः ॥

सा किमितिकर्तव्यतावती, न वा ? इतिकर्तव्यतावत्त्वे निरपेक्षोपायत्वविरोधः । इतिकर्तव्यतारहितत्वे कार्यकरत्व-हानिः । तदुक्तमभियुक्तैः—

*न हि तत्करणं लोके वेदे वा किंचिदीदृशम् । इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता ॥ इति ।

इतिकर्तव्यताविशेषवदेव इतिकर्तव्यतानैरपेक्ष्यमिति चेन्न, तत्रापि कथंताकाङ्क्षाया गत्यभावादेवोपशमात्, क्वचित् क्लिष्टगतिस्वीकारे सर्वत्र तथेति नि[यामका]यमाभावात् । सर्वधर्मपरित्याग एव इतिकर्तव्यतेति नैरपेक्ष्यवाचोयुक्तिः, करणत्वोपपत्तिश्चेति चेन्न, विध्यनुवादविकल्पानुपपत्तेः । सर्वधर्मपरित्यागो ह्यत्र किं विधेयः, उतानुवाद्यः? न प्रथमः, सर्वस्य धर्मस्य परित्यक्तुमशक्यत्वेन सागरतरणोपदेशवदप्रमाणत्वप्रसङ्गात् । यदृच्छयाऽपि हि क्रियमाणानि कानिचित्कर्माणि धर्म एव भवन्ति । अत एव ह्यज्ञातसुकृतमवकाशं लभते । बुद्धिपूर्वकरणाभावोऽत्र विवक्षित इति चेन्न, नियामकाभावात् । तथा च सत्याचार्योपसदनभगवत्सेवादेरपि परित्याज्यत्वप्रसङ्गः; तदनुष्ठानेऽङ्गवैकल्येन प्रपत्तिवैकल्यप्रसङ्गात् । नात्र धर्मबुद्ध्या तदनुष्ठानमिति चेत्, कुतस्तर्हि? प्रपन्नेतरलोकसंग्रहार्थमिति चेत्, किं स्वाधिकारविरुद्धानुष्ठानेन लोकसंग्रहः, तथा सत्यूर्ध्वरेतसामपि गृहस्थाश्रमधर्मानुष्ठानप्रसङ्गात् । लोकसंग्रहणमपि किं धर्मबुद्ध्या, केवलदृष्टार्थं वा? आद्ये व्याघातः, तस्यैव बुद्धिपूर्वधर्मानुष्ठानात्मकत्वात् । द्वितीये लोकायतिकरहस्यावतारः, धर्मानुष्ठानस्य परवञ्चनामात्रप्रयोजनत्वात् । धर्मबुद्ध्यभावेऽपि दृष्टप्रयोजनविरहेऽपि कारुण्यपरतन्त्रतया धर्मलोपमूलपरानर्थपरिजिहीर्षया तत्संग्राहकधर्मानुष्ठानमिति चेन्न, प्रपत्तिधर्मविपरीतानुष्ठानेन तन्निष्ठाकृत्स्नवैदिकवर्गसंग्रहासिद्ध्या संग्राह्यतमपरानर्थपरत्वेन परमनैर्घृण्यप्रसङ्गात् । स्वरूपतः पुरुषार्थतया रागवशात्तदनुष्ठानमिति चेन्न, तथाविधरागसंभवे भक्त्यधिकारितया * न भक्तिमांस्त्वच्चरणारविन्दे इत्युक्ताधिकारविरोधप्रसङ्गात्, अल्पशो रागप्राप्तस्यापि निषिद्धस्यानुष्ठानायोगाच्च । ननु धर्मो हि धृतिसाधनम्–श्रेयःसाधनमित्यर्थः । ततश्च धर्माणां त्यागोऽत्र श्रेयःसाधनत्वत्याग इति चेन्न, अन्यस्वभावस्यान्येन त्यक्तुमशक्यत्वात्, नित्यत्यक्तत्वेन वा त्यागविध्यनुपपत्तेः । तद्बुद्धित्यागोऽत्राभिमत इति चेन्न, लक्षणाप्रसङ्गात् । * न विधौ परः शब्दार्थः इति न्यायविदः । यथावस्थितवस्तुवेदिनस्तद्बुद्धेरपि परित्यक्तुमशक्यत्वाच्च । स्वापेक्षया श्रेयःसाधनत्वबुद्धित्यागोऽत्र विवक्षित इति चेत्, किमसौ क्रियमाणेषु धर्मेषु, उत अक्रियमाणेषु? पूर्वत्र, सर्वप्रकारश्रेयःसाधनत्वबुद्धिनिषेधे भ्रान्तत्वप्रसङ्गः, तेषामेव धर्माणां स्वरूपेणानुष्ठेयत्वस्यावर्जनीयत्वेन यत्रकुत्रचित् श्रेयसि पर्यवसानात् तद्बुद्ध्यभावे चाननुष्ठेयत्वप्रसङ्गात् । आहुश्च– * प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति । ईश्वरप्रीत्यै तत्पारतन्त्र्यादिमात्रचिन्तने तु कर्मयोगाद्यनतिरेकः । उत्तरत्र, स्वरूपेऽपि परित्यक्ते प्रसङ्गाभावेन निष्प्रयोजनस्तदुपायतावुद्धिनिषेधः स्यात् ॥

किंच, अत्र त्यागः प्रपदनं चेति द्वयविधानाद्वाक्यभेदः स्यात् । न चासौ युक्तः, * संभवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यते इति न्यायात् । विशिष्टविधिरस्त्विति चेन्न, तस्यापि गत्यभावविषयत्वात्, अकिंचनतयाऽभिमतेऽधिकारिणि त्यागविधिवैयर्थ्याच्च । न ह्यशक्तं प्रति निषेधापेक्षा । शक्तं प्रति[तु]निषेधे धर्माणामधर्मत्वप्रसङ्गः । नचाश्रमभेदेन तत्तद्धर्मनिषेधवदिति वाच्यम्, तत्रान्यस्य निषिद्धानामन्यैरनुष्ठानसंभवात्; इह तु मोक्षोपायानां मुमुक्षोरेव निषेधे अधिकार्यन्तरासिद्धेः । नच मुमुक्षुविशेषमधिकृत्य निषेधः, तद्विशेषादृष्टेः । न च प्रपदनप्रतिपत्तिमात्रं विशेषः, तथा सति * विकल्पोऽविशिष्टफलत्वादिति न्यायेनैव विद्यान्तरत्यागसिद्धौ तद्विधिनैरपेक्ष्यात् । न च स्वरूपयाथात्म्यज्ञानवत्त्वं विशेषः, परोक्षस्य तस्य कर्मयोगादिनिष्ठेष्वपि सिद्धत्वात्, अपरोक्षस्य प्रपत्तावप्यसिद्धेः; सिद्धावपि वा * नचात्मवेदीत्यादिकथितकार्पण्यविशेषणवैकल्यप्रसङ्गात् ॥

अनुवादपक्षेऽपि प्रागुक्तनयेन निःशेषपरित्यागानुवादो न शक्यः । कतिपयविवक्षायां तु नियामकनिर्मुक्तः सर्वशब्दः परिपन्थी । परित्यागोऽनूद्यमानश्चात्र गत्यन्तरासंभवात् लशुनभक्षणादिवन्निमित्ततां गाहेत, न पुनरङ्गताम् ।

तथा सति प्रपत्तेर्धर्मपरित्यागरूपपापपायश्चित्तत्वमात्रसिद्धेर्मोक्षसाधनत्वासिद्धिः । नात्र त्यागमात्रमनूद्यते, अपि त्वशक्तिः । ततश्चावगाहनाद्यशक्तस्याम्भेयादिस्नानविधिवद्भक्तियोगाद्यशक्तस्य प्रपदनविधानमिति चेन्न, अशक्तेरशाब्दत्वेन लाक्षणिकत्वप्रसङ्गात्, अशक्तिलक्षणालिङ्गासिद्धेश्च । तथा च प्रपत्तेरमुख्योपायत्वप्रसङ्गः । त्यागश्च इतिकर्तव्यता न स्यात् ॥

किंच, विधिपक्षे अनुवादपक्षेऽप्यभावरूपाणां केषांचिद्धर्माणां परित्यागस्यावश्यंभावात्, तत्त्यागस्य च प्रतियोगिभावानुष्ठानात्मकत्वेन निषिद्धानुष्ठानप्रसङ्गो दुष्परिहरः । अभावरूपाणामहिंसादीनां न धर्मत्वम्, अपि तु पापाभावमात्रत्वमिति चेन्न, तेषामेव नियमसहकृतानां धर्मत्वात् । अतो विहिताननुष्ठानं निषिद्धानुष्ठानं चावश्यंभावीति स्वैरदोषो दुष्परिहरः । ये पुनः सर्वशब्दधर्मशब्दयोः संकोचमनुमत्य धर्मशब्दः प्रस्तुतमोक्षोपायमात्रपर इति वर्णयन्ति, तन्मतेऽपि स्वैरदोषो दुष्परिहर एव, अङ्गपरित्यागे अङ्गानुष्ठानस्य प्रयोजनाभावात् । स्वतन्त्राधिकारात्तदनुष्ठानमिति चेन्न, मोक्षाभिलाषिणि फलान्तरसाधनत्ववैषेण स्वातन्त्र्यासिद्धेः, नित्यनैमित्तिकत्वमात्रेण स्वातन्त्र्यसंभवेऽपि कर्मान्तराधिकारापादकत्वमात्रेण परित्यक्तधर्मान्तरस्य तदनुपयोगात्, प्रपत्तिस्वरूपस्य तु धर्मस्य सकृदेव निष्पन्नत्वेन तदुत्तरभाविनां तादर्थ्यायोगात् । न चारादुपकारकत्वम्, अनभ्युपगमात् । अभ्युपगमे च प्रपदनानन्तरं मुच्यमानशरीरस्य पुरुषस्य उपायवैकल्यप्रसङ्गात् । न च जीवति तत्सापेक्षम्, अन्यत्र नेति नियामकमस्ति । अत एव न प्रतिबन्धकनिवर्तकत्वम्, प्रपत्तिरूपपरमधर्मस्य सर्वप्रतिबन्धकनिवर्तकत्वेनाभिमतस्य प्रतिबन्धान्तरासंभवाच्च । एतेन प्रत्यवायपरिहारार्थत्वमपि गतम् । न च प्रपत्त्यङ्गभूतानुकूल्यसंकल्पप्रातिकूल्यवर्जनविधिबलात् स्वैरपरित्यागः, * आनुकूल्यमिति प्रोक्तं सर्वभूतानुकूलता इत्यादिना तत्रैव तयोरर्थान्तरतया व्याख्यानात् । न च स्वेच्छामात्रेण नित्याद्यनुष्ठानम्, अव्यवस्थितिप्रसङ्गात् । नापि वासनावशात्, काम्यनिषिद्धयोरपि प्रसङ्गात् । न च ईश्वराज्ञानुवर्तनव्यसनेन, त्याज्यतयोक्ते तदाज्ञाया एवासिद्धेः ॥

अस्तु स्वैरप्रसङ्गः । तथाऽपि प्रामाणिकानां यथाश्रुतस्वीकारे सर्वधर्मपरित्यागपूर्वकप्रपदनविधिरपरिहार्यः । कति कति दृश्यन्ते कर्मब्रह्मकाण्डयोः अन्यत्रात्यन्तनिषिद्धानामप्यनुप्रवेशमनुमन्यमानाः शास्त्रार्थभेदा इति चेन्न, तद्वदङ्गत्वेन विधानाभावात्, * सर्वधर्मान्परित्यज्येत्यस्याद्यापि संदिग्धार्थकतया सर्वोपप्लावकार्थपरत्वनिर्णयसाहसायोगात्, सर्वाविरुद्धस्य चार्थस्य वक्ष्यमाणत्वात् । * अपि चेत्सुदुराचारः इत्यादिकमप्यस्तीति चेन्न, अनन्यभजनप्राशस्त्यपरत्वात्, * क्षिप्रं भवति धर्मात्मा इत्यनन्तरमेवाभिहितत्वाच्च ।

* दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा । समाश्रयेदादिदेवं श्रद्धया शरणं यदि ॥
निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मनः ॥

इति स्मर्यत इति चेन्न, पुराकृतविषयत्वकण्ठोक्तेः । राजकुमारापराधवत्, वानरगणमधुवनभङ्गवत्, तपनसुततारामोगादिवच्च प्रपन्नापराधानां क्षन्तव्यत्वमिति चेन्न; प्रतिदृष्टान्तसमजातित्वप्रसङ्गात्, हेतुसद्भावाभिमानेऽपि वचनविरोधे न्यायानवतारात् । श्रूयते च—* नाविरतो दुश्चरितादित्यादि । इदं च शतदूषण्यामलेपकभङ्गे प्रपञ्चितमस्माभिः । उपासनविषयतया इयं श्रुतिर्व्यवस्थाप्येति चेन्न, * प्रज्ञानेनैनमाप्नुयादिति प्राप्तिहेतुभूतज्ञानमात्रस्य प्रज्ञानशब्देनोपादानात् । न च *नाशान्तो नासमाहितः इति शमादिसमभिव्याहाराद्विशेषविषयता, शमादिरहितस्य मोक्षोपायस्याद्याप्यसिद्धेः । उक्तं च यामुनसन्धौ संजयेन—*अप्राप्यः केशवो राजन्निन्द्रियैरजितैर्नृभिरिति । एतेन उत्पन्नज्ञानस्य किं ज्ञानार्थैः शमादिभिरित्यपि निरस्तम् । अत एव * तेषां तेजोविशेषेण प्रत्यवायो न विद्यते इति न्यायस्यात्रानवतारः । * दृष्टो धर्मव्यतिक्रमः,

साहसं च पूर्वेषाम्, तेषां तेजोविशेषेण प्रत्यवायो न विद्यते; तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः—इति तत्रैवोच्यते। अतस्त्वदभिमतयोजनायां धर्मशब्दस्य धर्मसामान्यविषयत्वे भक्तियोगादिविशेषविषयत्वेऽपि स्वैरदोषो दुष्परिहरः ॥

किंच, प्रपदनरूपं ज्ञानं स्मृतिरूपम्, अनुभवरूपं वा? नाद्यः, सकृदसकृद्विकल्पानुपपत्तेः। सातिशयश्रवणमनन-समाहितसंस्कारसमुन्मेषसंभावितत्वेन सकृत्स्मृतेरविधेयत्वप्रसङ्गात्। अत एव न सारस्वतस्रोतःसमानच्छिदुरस्मृतिसंततेरपि विधेयत्वम्। तैलधारावदविच्छिन्नस्मृतिसंततिरूपत्वे तु ध्यानरूपतया भजनसीमानतिलङ्घनप्रसङ्गः। नापि द्वितीयः, अलौकिकार्थविषयत्वेनार्वाचीनप्रत्यक्षादिफलत्वायोगात्, शास्त्रफलत्वे तु अविधेयज्ञानवादप्रसङ्गात्, योगपरिकर्मितस्वान्त-जन्यत्वे भक्तिकुक्षिनिक्षेपात्, करणनिरपेक्षस्य त्वात्मस्वरूपमात्रातिरिक्तप्रकाशस्य संसारदशायामसिद्धेः ॥

अपि च, गुरुलघुविकल्पानुपपत्तेर्नात्र लघूपायसंभवः। यदि लघुतरेणोपायेनापवर्गः समासाद्येत, कः खलु दीर्घ-कालनैरन्तर्यादरसेवनीये निरन्तरान्तरायसंतते नितरां दुर्व्यसनशालिनि प्रवृत्तिलक्षणे धर्मे नयनाञ्चलं चालयेत्? ज्योतिष्टो-माग्निहोत्रादिषु गुरुलघुषु स्वर्गाद्येकफलसाधनेष्वपि साध्यस्वर्गाद्यवान्तरभेदोऽस्त्येव। लौकिककृषिवाणिज्यादिधनसाधन-विकल्पोऽपि लोकसिद्धाधिका[रि]रभेदनियतः। अत्रापि लघूपायस्य अज्ञातत्वात्, तत्परिज्ञानेऽप्यविश्वासात्, विश्वासेऽपि दुर्निर्वहनिर्वहणगर्वेण वा गुरूपायपरिग्रह इति चेन्न; अङ्गतयाऽपि प्रपत्तिमभ्यस्यतां श्रुतसकलशास्त्राणामुपासकानां शास्त्र-काराणां च व्यासादीनां तदज्ञत्वासंभवात्। न च ज्ञातेऽपि तेषामविश्वासः संभवति, शास्त्रप्रामाण्यस्य सुदृढनिरूढत्वात्; अन्यथा भजनादावप्यनाश्वासप्रसङ्गात्। निर्णीतशास्त्रप्रामाण्यस्याप्यर्थविशेषेषु संशयो दृष्ट इति चेत्, सत्यम्; स तु यदा निर्णयपर्यन्तो भवति, तदा निरर्थकमेव गुरूपायविधानं स्यात्। निर्णयासमर्थं प्रत्यस्तु भजनशास्त्रमिति चेन्न, बहुतराङ्गोपाङ्गनिबिडभजनशास्त्रनिरूपणसमर्थस्य कियदिदं प्रादेशमात्रपरिमितैकवाक्यनिरूपणम्। यदि चोपासकः प्रपत्तावनाश्वस्तः, स कथमङ्गप्रपत्तिमाददीत? स्वातन्त्र्यमात्रे तस्यानाश्वास इति चेन्न, तत्प्रभावस्याङ्गतावस्थायामेव विदितत्वात् सर्वधर्मस्थाननिवेशेन समस्ताभिमतसाधनत्वे निश्चिते विषयव्यासेरविरोधात्। गुरूपायनैरर्थक्यप्रसङ्गादेव लघुतरे तस्मिन्न विस्रम्भ इति चेत्, हन्त तर्हि त्वमेवास्मदभिमतं ब्रवीषि। एवं सर्वेषामप्यविस्रम्भ एवेति न स्वतन्त्र-प्रपत्तिसिद्धिः। तत्सिद्धौ वा गुरूपायान्तरविध्यनुपपत्तिरिति। न च तद्विश्वासेऽपि दुर्निर्वहनिर्वहणगर्वः शमदमादि-शालिनां मुमुक्षूणां संभवति। स्वरूपानुरूपत्ववेदिनां प्रपत्तिः, इतरेषां भजनमिति व्यवस्थेति चेन्न, व्यासादीनां तद-ज्ञानासंभवस्योक्तत्वात्, इतरेषां तदज्ञानेऽपि लघुत्वमात्रेण शीघ्रं तदेकपरिग्रहस्य दुर्वारत्वात् ॥

श्लो. प्रतिबुद्धस्वरूपस्य विरुद्धा भक्तिरित्यपि। व्यासादिगुरुविद्विष्टं श्रोतुं न वयमीशमहे ॥ ३ ॥
अधिकारविरोधाच्चेत्स्यात्स्वरूपविरुद्धता। तुल्यं भक्तिप्रपत्त्योस्तद्वैशिष्ट्यादधिकारयोः ॥ ४ ॥

अतो न भक्तेः स्वरूपानुरूपत्वाभावः; स्वरूपप्राप्तिहेतुतयैव तद्विधानात्, समस्तोपाधिविनिर्मोक्षदशायामपि स्वरूपवत्तदनु-वृत्तेः। तथा च पठ्यते काश्मीरपुरनिवासिभिः—

* मोक्षोपायस्य किं रूपं भक्तिरित्यक्षरद्वयम्। अथ मोक्षस्य किं रूपं भक्तिरित्यक्षरद्वयम् ॥ इति।

इतरथा प्रपत्त्या नित्यकैंकर्यप्रार्थनस्याप्ययोगात्। स्तनंधयवत्सलान्यायेन संबन्धादेव रक्षति भगवति स्तन्यार्थभृतिप्रदानवत् स्वरूपानुचितमुपायान्तरमिति चेन्न; प्रपत्त्यन्तर्गतगोप्तृत्ववरणादेरप्यनुचितत्वप्रसङ्गात्। संबन्धज्ञानरक्षकत्वविश्वासाति-रिक्तं तत्राप्यनुचितत्वादुपेक्षणीयमिति चेन्न,

श्लो. संबन्धादेव गोप्ता चेत्तज्ज्ञानाद्यनपेक्षणम् । तच्चेच्छास्त्रादपेक्ष्येत तुल्यं तत्प्रार्थनादिषु ॥ ५ ॥

अकर्तुः कर्तृत्वाभ्युपगमो विरुद्ध इति चेन्न, कैंकर्यकर्तृत्वस्याप्यभिमतस्य स्वरूपविरुद्धत्वप्रसङ्गात् । न च ईश्वरपरतन्त्रस्याप्यात्मनः सांख्यवदकर्तृत्वं स्वभावमिच्छामः, * कर्ता शास्त्रार्थवत्त्वादित्यादिभिस्सूत्रैस्तत्प्रतिक्षेपात् । भगवद्गीतायामपि चरमाध्याय एव शोधितमकर्तृत्वानुसंधानस्य स्वरूपम् * पञ्चैतानीत्यादिभिः श्लोकैः । अत्यन्ताकर्तृत्वाभ्युपगमे तु प्रपदनेऽपि कर्तृत्वं न स्यादिति तस्यापि स्वरूपविरुद्धत्वप्रसङ्गः । एतेन तत्त्वज्ञानवतोऽप्यवसायमात्रेण विशेषितस्य नित्यदयाविशिष्टो भगवानुपाय इति कर्तृत्वापह्नवप्रत्याशा निरस्ता, तत्रापि तत्त्वज्ञानाध्यवसायकर्तृत्वस्य दुर्वारत्वादिति ॥ तदयं संग्रहः—**श्लो.** संबन्धज्ञानविश्वासकैंकर्यादिषु कर्तृता । स्वरूपस्याविरुद्धा चेद्भक्त्यादौ कोऽयमाग्रहः ॥ ६ ॥ इति ॥

अस्तु तर्हि शक्ताशक्ताधिकारभेदेन विषयव्यवस्था, अवगाहनस्नानाशक्तस्याप्लवनस्नानादिवदिति चेन्न, अमुख्यत्वप्रसङ्गस्य प्रागेवोक्तत्वात् । कीदृशीं चाशक्तिमालम्ब्येयं व्यवस्था, किमुपासनस्वरूपासामर्थ्यात्मिकाम्, उत साक्षात्परंपरया वा तन्निर्वर्तककर्मादिसामर्थ्यात्मिका[मि]मपीति ? नाद्यः, कर्मयोगादिमरुकान्तारपान्थताप्रहाणप्रसङ्गात् । न द्वितीयः, तादृशाशक्तेस्तिर्यक्स्थावरादिव्यतिरिक्तेषु सर्वेष्वपि पुरुषेष्वसंभावितत्वात् । सन्ति हि स्मृतिसंकीर्तनप्रणामादयो बहवः परमीषत्कराः सुकरतमाः परंपरया तद्धेतवः । यथाह भगवान्**पराशरः**—* आयासः स्मरणे कोऽस्येति । तथाह **शौनकः**—* कोऽतिभारो हरेर्नाम्नि इति । * अञ्जलिः परमा मुद्रा इत्यादिकं द्रष्टव्यम् । अन्यथा प्रपदनेऽप्यनधिकारापातः; अविशेषात्, तस्यापि * मामेव ये प्रपद्यन्ते इत्यादिना परंपरया तन्निर्वर्तकत्वस्यावश्याभ्युपगम्यत्वाच्च ।

प्रारब्धभोगोन्मुखो भक्तावधिकारी, तद्विमुखः प्रपत्ताविति चेन्न, प्रारब्धभोगौन्मुख्यस्य प्रपन्नानामपि संभवात्, अविरोधाच्च । प्रारब्धभोगेऽपि दुःखभावनया तत्रापि विमुखानां प्रपदनाधिकार इति चेन्न, प्रारब्धबलादेवात्यन्तवैमुख्यस्यासंभावितत्वात्, ईषद्वैमुख्यस्य उपासकेष्वपि विद्यमानत्वात् । अत एव प्रारब्धनिवृत्तिकाङ्क्षिणां प्रपत्त्यधिकार इत्यपि निरस्तम् । अन्यथा सर्वस्वारादिवत् सर्वेषां प्रपन्नानां तत्क्षणविनिपातप्रसङ्गात् । शरीरान्तरोत्पत्तिमनिच्छतां तदधिकार इति चेत्; किं तत्र दुःखैकरूपत्वनिर्णयात्, उत तत्संदेहेऽपि ? नाद्यः, प्रमाणाभावात् । न द्वितीयः, वर्तमानशरीरानुवृत्तावप्यनिच्छाप्रसङ्गात् । अस्ति साऽपि केषांचिदार्तानामिति चेन्न, सर्वेषां प्रसङ्गात् । वर्तमानशरीरे दुःखैकान्त्यानिर्णयात् भ्रमाद्वा तदनुवृत्तिक्षमत्वमिति चेन्न, वर्तिष्यमाणेऽपि तत्संभवात् । अत एवार्तदृप्तविभागोऽपि प्रत्युक्तः । कर्मवैचित्र्यात्सर्वमप्युपपद्यत इति चेत्, किमिदमविचारितचित्रं कर्मवैचित्र्यम् ? तथा सति किमपराद्धम् * दुर्घटत्वमविद्याया[म्] भूषणं न तु दूषणमित्यादिवादिभिः समन्तभद्रसमयसामन्तैः ?

अस्तु तर्हि गौरवलाघवसाम्यात् तुल्यविकल्प इति चेन्न, प्रपदने ज्ञानकर्माङ्गकत्ववृत्तिरूपत्वाप्रयाणानुवर्तनीयत्वादिगौरवे भक्त्यनतिरेकात्, भक्तौ च तदभावलक्षणे लाघवे त्वदभिमतप्रपत्त्यनतिरेकात्, [द्वा]ताभ्यां तु साम्ये विरुद्धधर्माध्यासेन द्वयोरपि स्वरूपोच्छेदप्रसङ्गात् । मुखभेदेन उभयमप्यविरुद्धमिति चेत्, कथम् ? विश्वासातिरेकात्प्रपदने गौरवम्, आयासाभावात्तु लाघवम्; भक्तौ तु आयासभूयस्तया गौरवम्, विश्वासमान्द्यात्तु लाघवमिति चेन्न, उक्तोत्तरत्वात् । न हि निर्णीततत्त्वानामविश्वासः ॥

श्लो. विश्वासायासभूम्ना च विकल्पं तुल्यमिच्छताम् । व्यवस्थितविकल्पोऽयं भवेत्सूक्ष्मनिरूपणे ॥ ७ ॥

स च दूषितः । अतो व्यवस्थितत्वेनाव्यवस्थितत्वेन वा विकल्पासंभवान्नैकफलसाधनत्वम् । त्वदुक्तप्रपत्तौ प्रारब्धस्यापि

भङ्गात्फलभ्रंशाधिकमिति च सा कथमेकस्मिन्नधिकारिणि प्रारब्धनिवर्तनाक्षमभजनसमानतया विकल्प्येत ? ननु प्रारब्धनिवर्तनेन देहान्तरविघातित्वं भक्तियोगेऽप्यस्ति ; यथा—

* जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥

इति विहितावतारस्य रहस्यचिन्तनवत इति चेन्न, क्रतुवीर्यवत्तरत्वलक्षणफलान्तरसाधनोद्गीथोपासनवत्पृथगधिकारत्वादवतार-रहस्यचिन्तनस्य ; अन्यथाऽङ्गत्वेन नियतत्वे सर्वेषामुपासकानां पुनर्भवाभावेन विलम्बिताविलम्बितफलत्वलक्षणवैषम्यं भक्ति-प्रपत्त्योर्न स्यात् । अस्तु तर्हि प्रपत्तावपि न प्रारब्धभङ्गः । ततश्च फलानतिरेकाद्विकल्पसंभवः । अत एव * विक-ल्पोऽविशिष्टफलत्वादिति सूत्रमुपासनावान्तरभेदवन्न्यासोपासनभेदमपि विषयीकरोतीति चेत्, अस्त्वेवं फलवैषम्याभावः । तथाऽपि स्वरूपे तस्यानिवार्यत्वाद्विकल्पासंभव एव । तदेवं स्वरूपानुपपत्तेर्नास्ति भक्तिव्यतिरिक्तो मोक्षोपाय इति ॥

लक्षणानुपपत्तिसमर्थनम् ॥ लक्षणानुपपत्तेश्च । तथा हि—* अनन्यसाध्ये इत्यादिना प्रपत्तिः शरणागतिरित्यनर्थान्तरमिष्यते । तथा च पठ्यते—

* निक्षेपापरपर्यायो न्यासः षड्भिरङ्गसंयुतः । संन्यासस्त्याग इत्युक्तः शरणागतिरित्यपि ॥ इति ।

ततश्च प्रपत्तिलक्षणं शरणागतिशब्दप्रयोगविषयसर्वोदाहरणनिष्ठमनितरनिष्ठं च प्रतिष्ठाप्यम् । तथा च दृश्यते—

* अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् । तदेकोपायतायाच्या प्रपत्तिः शरणागतिः ॥

इति सामान्यलक्षणमिति चेन्न, अव्याप्तेः, कपोतोपाख्याने तदभावात् । * श्रूयते हि कपोतेन शत्रुः शरणमागतः इत्यादिभिः शरणशब्दवाच्यगृहोपलक्षितसमीपागमनमात्रमेव प्रतीयते । न तत्र मुख्या शरणागतिरिति चेन्न, शरणागत-संरक्षणनिदर्शनतया शरण्यादिभिर्निर्दिश्यमानप्रसिद्धोदाहरणस्याप्यमुख्यत्वे मुख्यस्यैवासिद्धिप्रसङ्गात् । गृहागतो न परि-त्याज्य इति स्फुटोक्तिनिदर्शनाच्छरणागतिस्तत्रापि कल्प्यत इति चेन्न, तत्र तथाविधलिङ्गाभावात् । समीपागतस्य परिक्लि-ष्टस्य परिक्लेशादेव रक्षोपायसाकाङ्क्षत्वं कल्प्यत इति चेत्, किं रक्षणेच्छामात्रं शरणागतिः ? हन्त तर्हि तापत्रयाभिहताः संसारिणस्तन्निवृत्तिसाकाङ्क्षाः संनिहिताश्च रक्षितुर्व्यासस्य सर्वेश्वरस्येति सर्वेऽपि जन्तवः शरणागता इति सर्वेषां सर्वदुःखो-च्छेदप्रसङ्गः । महाविश्वासोपायत्वप्रार्थनादिनैरर्थक्यप्रसङ्गश्च । कपोतं प्रत्यश्रुताऽपि बाधकाभावात्किरातस्याप्यपेक्षा-पर्यायया च कल्प्यत इति चेन्न, तिर्यङ्मात्रतया प्रतिपन्ने कपोतेऽनुन्मत्तस्य तथाविधप्रतिकूलतमस्वरक्षणज्ञानशक्तीच्छा-संभावनासंभवेन प्रार्थनारूपबुद्धिविशेषकल्पनस्य बाधितत्वात् ।

एवं गोप्तृत्ववरणेऽप्यव्याप्तिः—* राघवं शरणं गतः इत्यादिषु गोप्तृत्ववरणमेव औचित्यादवसीयते—

* अभियाचाम वैदेहीमेतद्धि मम रोचते । अलमेषा परित्रातुं राक्षस्यो महतो भयात् ॥

इत्यादिभिश्चेदमवगम्यते । तदर्थतत्त्ववेदिभिश्चोक्तम्—* मातर्मैथिलि राक्षसीस्त्वयि तथैवार्द्रापराधास्त्वया रक्षन्त्या इत्यादि । दूरगतद्रौपदीप्रपदनमपि * रक्ष मां शरणागतामित्येवंरूपमेव प्रसिद्धम् ।

अस्तु तर्हि गोप्तृत्ववरणमेवोपायतायाच्ञाशब्देन विवक्षितमिति चेन्न,

* उपाये गृहरक्षित्रोः शब्दः शरणमित्ययम् । वर्तते साम्प्रतं त्वेष उपायार्थैकवाचकः ॥

इति वचनविरोधात् । तर्हि तदविरोधाय सर्वत्रोपायार्थकत्वमात्रं निष्कृष्यत इति चेन्न,

* आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ॥
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥

इति स्फुटप्रतिपन्नरक्षितृत्ववरणस्य दुरपह्नवत्वात् । यदि च विरोधभयादैकार्थ्यं कल्प्यते, तदा विशदार्थगोप्तृत्ववचनविरोधाद्भगवति च गोप्तृत्वातिरिक्तोपायत्वस्य दुर्निरूपत्वादुपायप्रार्थनाशब्दोऽपि रक्षापेक्षापरपर्याय एव कल्पयितुं युक्तः। अस्त्वेवमिति चेन्न, रक्षितृत्वयुदासेन * सांप्रतं त्वेष उपायार्थैकवाचकः इति निष्कर्षविरोधादेव । अत्यन्तव्याहतावन्यतरपरित्यागेनार्थव्यवस्थाऽस्त्विति चेन्न; किं परित्याज्यम्, किं वा परिग्राह्यमिति नियामकाभावेनोभयपरित्यागप्रसङ्गात् । तथा च सति कृतं व्यसनेन ॥

नन्वनिष्टनिवर्तकत्वापेक्षया गोप्तृत्ववरणम्, इष्टप्रापकत्वापेक्षयोपायत्ववाचोयुक्तिः । उभयसाधारणं तु स्वरूपमपेक्षितप्रदातृत्वमात्रम्, इष्टप्राप्तेरनिष्टनिवृत्तेश्चापेक्षितत्वाविशेषात् । तथा च शिष्यानुयुक्तस्य भगवतो भाष्यकारस्यानुशासनमिति संप्रदाया[नु]गतम्—* प्रपत्तिः—विश्वासः, सकृत्प्रार्थनामात्रेणापेक्षितं दास्यतीति विश्वासपूर्वकं प्रार्थनमिति यावदिति । तथा च स्तुतिव्याजेनानुसंदधे—* नित्यदास्यं दास्यतीति विश्वासपूर्वकं भगवन्तं नित्यकिंकरतां प्रार्थये इति; अतो न विरोध इति; तदपि न, *सांप्रतं त्वेष उपायार्थैकवाचकः इति प्रागुक्तविरोधादेव । इष्टप्रापकत्वलक्षणोदाहरणविशेषापेक्षयेदं वचनमिति चेन्न; मोक्षार्थप्रकरणादनिष्टनिवृत्तेरपि तत्रावश्यंभावित्वात् * उपायार्थैकवाचकः इति निष्कर्षायुक्तेः ॥

किं च, * आनुकूल्यस्य संकल्पः इत्यादिकं किं प्रपत्तिविभागोद्देशपरम्, उत लक्षणपरम्, यद्वा प्रकारमात्रप्रतिपादनपरमिति ? न प्रथमः, षण्णां साधारणस्य लक्षणस्यादृष्टेः । न द्वितीयः, एकानेकविकल्पानुपपत्तेः । न ह्येतदेकं लक्षणम्, प्रतिपदं व्यवच्छेद्यासिद्धेः; अन्यथा * अनन्यसाध्ये इत्यादेरपूर्णत्वप्रसङ्गात् । अस्त्विदमपूर्ण[त्व]मिति चेन्न; तस्मिन् प्रकरणे—

* अहमस्म्यपराधानामालयोऽकिंचनोऽगतिः । त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः ॥
शरणागतिरित्युक्ता सा देवेऽस्मिन्प्रयुज्यताम् ॥

इति तस्यै[क]व लक्षणत्वेन निर्देशात् । तदप्येकदेशतयाऽशेषोपलक्षणमिति चेन्न; नियामकाभावात् । प्रत्युत विशेषणान्तरव्यवच्छेद्यासिद्धिश्च प्रागेवोक्ता । नाप्यनेकं लक्षणम्, सर्वेषां यथायथमव्याप्त्यादिदोषात् । नापि तृतीयः, तथा हि—किमिदं प्रकारप्रतिपादनं प्रयाजादिवदङ्गतया व्यापकत्वेन, यद्वा आग्नेयादिषट्कवत्करणभूतसमुदायैकदेशनिष्कर्षात्मना, उत व्यापकत्वपरस्परव्यभिचारित्वाभ्यां संभावनामात्रेणेति ? आद्ये नैरपेक्ष्यवादविरोधः, प्रातिकूल्यवर्जनादिना भक्तेरिव दुष्करत्वम्, षडतिरिक्ताङ्ग्यसिद्धिश्च । अङ्गपञ्चकेन अङ्गिना च षाड्विध्यमिदमिति चेत्, किमत्र प्रमाणम् ? उक्तानुपपत्तिरिति चेन्न; कस्याङ्गित्वम्, केषामङ्गत्वमिति विवेचकाभावात् ॥

* निक्षेपापरपर्यायो न्यासः पञ्चाङ्गसंयुतः । संन्यासस्त्याग इत्युक्तः शरणागतिरित्यपि ॥

इति वचनमेवास्तीति चेन्न, प्रार्थनायाः शरणागतित्वं वदद्भिरनेकैर्विरोधात् । अङ्गभूतायामपि तस्यामङ्गित्वव्यपदेश औपचारिक एवेति चेन्न, न्यासेऽपि तथा प्रसङ्गात् । अन्यतरस्य तर्हि अङ्गित्वमस्त्विति चेत्, तत्किमेकस्यात्यन्तप्रतिक्षेपेण, उत * उदिते जुहोति, * अनुदिते जुहोती[तिवत् व्यवस्थितविकल्पा]ति व्यवस्थितविकल्पवदुभयोर्व्यवस्थापनया ? यद्वा * व्रीहिभिर्यजेत, *यवैर्वा यजेतेतिवद्यथारुचि प्राधान्यकल्पनेनेति ? नाद्यः, कस्य प्रतिक्षेप इति नियामकाभावेनानिर्णयात् ।

न द्वितीयः, व्यवस्थापकाभावात् । न तृतीयः, वाक्याद्यभावे गत्यन्तरे च सति प्रयोगद्वयफलितप्रतिपत्त्यनुष्ठानापूर्वफलबाधयुगलेन वा, प्रयोगत्रयफलितप्रामाण्यत्यागाप्रामाण्यस्वीकारत्यक्तप्रामाण्यस्वीकारस्वीकृताप्रामाण्यपरित्यागयुगलेन वा प्रसिद्धाष्टदोषविकल्पस्वीकारानुपपत्तेः । समुदायैकदेशनिष्कर्षपक्षस्त्वङ्गाङ्गिभाववचनान्तरविरुद्धः । यस्तु संभावनामात्रपक्षः, सोऽपि निष्प्रयोजनोपदेशतयाऽतिमन्दः; * षड्विधा शरणागतिः, * न्यासः पञ्चाङ्गसंयुतः इति वचनाक्षरवैषम्याच्च । तदयं संग्रहः—श्लो. अतिप्रसङ्गादङ्गाङ्गिनियमात्षड्विधोक्तितः । संभावितत्वं नैतेषां तर्कमात्रान्व्यवस्थितेः ॥ ८ ॥

ननु किमनेन लक्षणक्षो[देन]भेण ? श्रुतिस्मृतिलोकेषु बहुशः प्रयुज्यमानः प्रपत्तिशब्दस्तावन्न निरर्थको भवितुमर्हतीति चेत्, सत्यम्, वक्ष्यमाणप्रकारेणानन्यभजनमात्रेण चरितार्थोऽसौ न त्वदभिमतार्थपर इत्येतावदेवाभिदध्महे ॥

तदेवं त्वदुक्तप्रपत्तेर्लक्षणाभावेन प्रतिपत्तुमशक्यत्वात्, अप्रतिपन्नस्य दुरनुष्ठानत्वाच्च न तद्विधेरपि संभवः ॥

अनुष्ठानानुपपत्तिः ॥ अनुष्ठानदर्शनाभावाच्च । तथा हि—यद्यपि ये केचिदर्वाचीना विमन्यमानमप्यनुतिष्ठन्तो दृश्यन्ते, तथाऽपि प्राचीनेषु महत्तरजनेषु न कश्चित्प्रपत्तिमात्रेण मुक्त इति श्रुतिस्मृतीतिहासादिषु श्रूयते । भक्तियोगादिभिस्तु लब्धसिद्धयः कतिकति कथ्यन्ते । सन्ति हि विभीषणद्रौपदीप्रभृतय इति चेन्न, तेषामपि सांसारिकफलविशेषमात्रसिद्धेः ।

* धर्मव्याधादयोऽप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते । वर्णावरत्वे संप्राप्ताः संसिद्धिं श्रमणी यथा ॥

इति भक्तियोगानधिकारिणामपि मुक्तिः श्रूयत इति चेन्न ; * पूर्वाभ्यासादिति तेषामप्युपासकत्वश्रवणात् । क्षत्रबन्धुमुचुकुन्दादिषु का वार्तेति चेत्, भक्तियोगाधिरूढेषु तत्प्रकरणपठितार्तिविशेषशरणागतिशब्दादयो भक्तिनिष्ठत्वेऽपि न विरुध्यन्ते । भक्तिनिष्ठत्वानुक्त्या तदभावसिद्धिरिति चेन्न, तदभावानुक्त्या तत्सिद्धेरेव प्रसङ्गात् । तथाऽपि किमनन्तेषु शास्त्रार्थेषु प्रतिशास्त्रार्थमनुष्ठातारः कथ्यन्त इति चेन्न, प्रभूतफलोपायेषु प्रायशो दर्शनात् । किमत्र प्रायिकानुष्ठानदर्शनाग्रहेण, विधेरेवानुष्ठेयत्वे प्रमाणत्वादिति चेन्न, शिष्टानुष्ठानबहिष्कृतेषु शास्त्रार्थेषु तेष्वनाश्वासदर्शनात् । स्मरन्ति च—*अस्वर्म्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु, इति ॥

विध्यनुपपत्तिः ॥ विध्यदृष्टेश्च । न हि प्रपद्येतेति [का]काऽपि चोदना दरीदृश्यते । प्रपत्तिस्वरूपं तु प्रति[दैवतं]वेदं शतशः श्रुतमिति चेत्, तथाऽपि विध्यभावस्यापरिहृतत्वात् । *यो ब्रह्माणमित्यारभ्य * शरणमहं प्रपद्ये इत्यन्तेन मोक्षसाधनतया प्रपत्तिः प्रतीयत इति चेन्न, तत्रापि विध्यभावादेव । ततो विधिकल्पनमस्त्विति चेन्न, मन्त्राणां विधिपरत्वे प्रमाणाभावात् । एतेन गर्भोपनिषदादिवाक्यान्यपि निरस्तानि । * तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्तीति विधिपरमेवेदं वाक्यमिति चेन्न, पात्रीवतक्रियाविशेषादिप्रतिपादनपरत्वात् । * विधिस्तु धारणेऽपूर्वत्वादिति न्यायेनात्रापि विधिरङ्गीकार्य इति चेन्न; तथाऽप्यत्र विधेः प्रपदनविषयत्वासिद्धेः; अपि तु प्रपन्नं न परित्यजेदिति प्रपन्नपरित्यागनिषेध एव सिध्यति । तत एवार्थात्प्रपत्तेरिष्टसाधनत्वसिद्धिरिति चेन्न; अतिथिं नावमन्येतेत्युक्तेऽप्यतिथित्वस्येष्टसाधनत्वनियमाभाववदत्रापि तन्नियमाभावात् । अनियमश्च, निषिद्धकारिषु प्रयुक्तायास्तस्यास्तदभावात् । ईश्वरस्तु रागद्वेषादिरहितत्वान्निषिद्धं न करोतीति चेन्न; ईश्वरत्वादेवास्य निषेधविधिकिंकरत्वाभावात्, सर्वेषां विधिनिषेधशास्त्राणां तदाज्ञारूपत्वात्, स्वस्य च स्वाज्ञावशंवदत्वायुक्तेः । शास्त्रवश्यत्वे च स्वस्ति सर्वेश्वरत्वाय । * ओमित्यात्मानं युञ्जीतेति साक्षाद्विधीयत इति

चेन्न; * युज समाधौ इति, * युजिर् योगे इति वा धातोर्निष्पन्नस्य युञ्जीतेत्यस्य पदस्य प्रपत्तिविधायकत्वासंभवात्। प्रकरणवशाद्विधेयस्य भावार्थस्य न्यासरूपत्वं सिद्धमिति चेत्, किमतः प्रस्तुतस्यायातम्?

* निक्षेपापरपर्यायो न्यासः पञ्चाङ्गसंयुतः। संन्यासस्त्याग इत्युक्तः शरणागतिरित्यपि ॥

इति न्यासनिक्षेपसंन्यासत्यागशरणागतिशब्दाः पर्याया अहिर्बुध्न्यादिभिः स्मर्यन्त इति चेन्न; तत्रत्यपरिभाषयाऽप्येतत्प्रकरणस्थन्यासशब्दस्य प्रपदनवाचित्वे नियामकभावात्। न ह्ययमेकान्ततस्तद्विषयः शब्दः,

* काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः। सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥

इत्यादिष्वर्थान्तरेष्वपि प्रयोगदर्शनात्। तथाऽपि युञ्जीतेति विहितयोगार्थवादरूपसमनन्तरानुवाकतात्पर्यावसितनैरपेक्ष्यापुनर्भवाभ्यां न्यासस्य प्रपदनरूपत्वं सिद्धमिति चेन्न, तथाविधं प्रपदनमित्यत्रैवार्थे प्रमाणाभावात्, भक्तावप्यवताररहस्यचिन्तनादिसहकारिवशादपुनर्भवदृष्टेः, समनन्तरानुवाकस्य च पुरुषविद्यापरत्वमात्रं स्वीकृत्यैव छान्दोग्यपुरुषविद्यातो विद्यामेदस्य सूत्रितत्वात् * पुरुषविद्यायामपि चेतरेषामनाम्नानादिति। तत्र प्रस्तुतब्रह्मविद्याङ्गभूतपुरुषविद्यापरत्वं हि भाष्येऽप्युक्तम्। * वसुरण्यः इत्यादिको मन्त्रविशेषश्च तत्रत्यन्यासकरणतयोच्यते। गतिविशेषश्च चिन्तनार्थस्तत्रोपदिश्यते। तेनापि चात्र न्यासस्य साङ्गता। ततश्च अनङ्गतयाऽभ्युपेतात्प्रपदनात्साङ्गोऽयं न्यासापरनामधेयो योगोऽर्थान्तरमिति प्रकरणमेव परिकरतयोपात्तं प्रत्यनीकमायुष्मतः। अनङ्गतां तर्हि परित्यजाम इति चेत्, किं तर्हि न परित्यक्तम्? उपासनव्यतिरिक्तस्य न्यासस्य फलप्रदत्वमिति चेन्न, व्यतिरेकस्याद्यापि मनोरथमात्रप्रमाणकत्वात्; न तत्र द्वैरथं बध्नीमः। अस्तु तर्हि।

* सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥

इति सर्वलोकशरण्यस्य भगवत एव वाक्यात्प्रपदनविधानसिद्धिरिति चेन्न, तत्रापि विधेरनुपलम्भात्—अभयप्राप्तिकामो मां प्रपद्येतेति। वाक्यतात्पर्यावसितमिदमिति चेन्न, रामगुणविशेषप्रतिपादनमात्रपरत्वाद्वाक्यस्य। तस्य तात्पर्यार्थभूतगुणविशेषपरत्वे तदुक्तेश्च श्रोतृणां कर्तव्यविशेषोपदेशार्थत्वे श्रुतार्थापत्त्या प्रपत्तिसंपत्तिरिति चेन्न; तथाऽपि प्रपन्नो रामेण न परित्याज्यः, अतस्तद्वद्वर्तितव्यमित्येतावत एव सिद्धत्वेन प्रपदनस्य धर्मतया कर्तव्यत्वे प्रमाणाभावात्। प्रपन्नमसौ न परित्यजतीत्यपि सिद्धेरर्थात्सिद्धैव तत्प्रपत्तिकर्तव्यतेति चेत्, एवमपि परिगृहीतमानुषसंस्थानस्य क्षत्रधर्माभिनयव्यसनिनो भगवतस्तथाविधस्वभावनिर्णये तदातनानां तदीश्वरत्वमविदुषां तत्प्रपदनं सिध्येत्। ईश्वरयाथात्म्यविदां तु मुमुक्षूणामपवर्गाव्यवहितसाधनतया तत्प्रपदनकर्तव्यत्वे न किंचित्प्रमाणं सिद्धम्। तर्हि रामाद्यवतारेषु याथात्म्यवेदनरहितानामिदानीमपि समीहितसिद्धये तत्प्रपदनं स्यादिति चेन्न; मानुषभावनायामिदानीं तत्प्रपदनासंभवात्, यथाकथंचिद्देवत्वभावनायामप्युक्तदोषानतिलङ्घनात्।

* स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥
स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः। अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥

इति गुणवत्तरत्वोपपादकतया भगवदवतारत्ववर्णनादीश्वरत्वाकारे[णा]ऽपि तथाविधगुणस्य परमार्थत्वात्तत्सिद्धिरिति चेत्, अस्त्वेवम्, दुर्बलस्य प्रबलावष्टम्भवदयमर्थः सिध्येत्, न च तावता भक्तिनिरपेक्षः सिध्यति, तद्द्वाराऽपि मोक्षप्रदाने भगवद्गुणनामक्षतत्वात्।

* मामेव ये प्रपद्यन्ते इत्याद्युक्तमायातरणार्थप्रपदनमपि भक्त्यर्थतयैव भाष्यकारैर्निर्णीतम्; अनुज्ञातं च भवद्भिः। अत एव * सर्वधर्मान् परित्यज्येत्यादिकमपि दत्तोत्तरम्। विध्यनुवादविकल्पानुपपत्त्यादयश्च प्रागेवोक्ताः। इदं च वाक्यं सात्त्विकराजसतामसभेदेन त्यागस्वरूपविवेचकाध्यायोपक्रमानुसारे [तु] कर्मयोगाद्यङ्गभूतबुद्धिविशेषविधिपरम्। * सर्वपापेभ्यो मोक्षयिष्यामीत्येतत्स्वारस्यानुसारे तु तत्तत्प्रतिपदोक्तप्रायश्चित्तप्रत्याम्नायतया तदशक्तानां प्रायश्चित्तविशेषविधिपरमिति भाष्यस्थयोजनाद्वयविदः। एवं हि तत्र भाष्यम्—* कर्मयोगज्ञानयोगभक्तियोगरूपान् सर्वान् धर्मान् परमनिःश्रेयससाधनभूतान्मदाराधनत्वेनातिमात्रप्रीत्या यथाधिकारं कुर्वाण एवोक्तरीत्या फलकर्मकर्तृत्वादिपरित्यागेन परित्यज्य, मामेकमेव कर्तारमाराध्यं प्राप्यमुपायं चानुसंधत्स्व। एष एव धर्माणां शास्त्रीयः परित्याग इति,

* निश्चयं शृणु मे तत्र त्यागे भरतसत्तम। त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः॥ इत्यारभ्य,

* सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥

इत्यध्यायादौ सुदृढमुपपादितम्। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि—एवं वर्तमानं त्वां मत्प्राप्तिविरोधिभ्योऽनादिकालसंचितानन्ताकृत्यकरणकृत्याकरणरूपेभ्यः सर्वपापेभ्यो मोक्षयिष्यामि। मा शुचः—शोकं मा कृथाः। अथवा, सर्वपापविनिर्मुक्तात्यन्तभगवत्प्रियपुरुषनिर्वर्त्यत्वाद्भक्तियोगस्य, तदारम्भविरोधिपापानामानन्त्यात्तत्तत्प्रायश्चित्तरूपैर्धर्मैः परिमितकालकृतैस्तेषां दुस्तरतया आत्मनो भक्तियोगारम्भानर्हतामालोच्य शोचतोऽर्जुनस्य शोकमपनुदन् भगवानुवाच—* सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति। भक्तियोगारम्भविरोध्यनादिकालसंचितनानाविधानन्तपापानुगुणान् तत्प्रायश्चित्तरूपान् कृच्छ्रचान्द्रायणकूश्माण्डवैश्वानरव्रातपतिपवित्रेष्टित्रिवृदग्निष्टोमादिकान्नानाविधाननन्तांस्त्वया परिमितकालवर्तिना दुरनुष्ठानानान्सर्वान्धर्मान्परित्यज्य, भक्तियोगारम्भसिद्धये मामेकं परमकारुणिकमनालोचितविशेषाशेषलोकशरण्यमाश्रितवात्सल्यजलधिं शरणं प्रपद्यस्व। अहं त्वा सर्वपापेभ्यो यथोदितस्वरूपभक्त्यारम्भविरोधिभ्यः सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि, मा शुचः। इति॥

एवमनेनैव भाष्येण शंकरादिकुमतिबालिशभाषितान्यपि निरस्तानि, निपीडितसकलशब्दार्थत्वादाकुमारमभिलक्ष्यदोषाणि चेति न तत्रेदानीं प्रयस्यामः। ननु कर्मज्ञानभक्तीर्गुह्याद्गुह्यतरगुह्यतमरूपाः प्रपञ्चेनोपदिश्य, अन्ते * इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मयेति तदखिलमुपसंहृत्य, * सर्वगुह्यतमं भूयः शृणु मे परमं वचः इत्यादिनोपक्रम्य विधीयमानं सर्वगुह्यतममुपायान्तरमेव भवितुमर्हतीति चेन्न; भूयःशब्दास्वारस्यात्, अनन्तरम् * मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु इति नवमाध्यायोक्तसंदर्भेण तस्यैव भक्तियोगस्य विधीयमानत्वाच्च। यदि * सर्वगुह्यतमं भूयः इत्यादिश्लोकस्य समनन्तरमेव * सर्वधर्मान्परित्यज्य इत्यादिकमुक्तं स्यात्, तदा आशङ्क्येताप्युपायान्तरत्वम्। अत्र तु भक्तियोगमुपदिश्यैवानन्तरं प्रपत्तेरुपदेशात् [प्राक्प्रायश्चित्ततया]प्राक्प्रपन्नता तदङ्गभूतेयं प्रपत्तिस्तदुपसंहारानन्तरमुपसंहियत इति प्रतीयते। निष्प्रयोजनादुपसंहारादपूर्वविधायकत्वमुचितमिति चेत्, तर्हि * मन्मना भवेत्यादिनापि उपायान्तरविधानं किं न स्यात्? प्रत्यभिज्ञावलादिति चेत्, तुल्यम्। भूयःशब्दस्वारस्यादिति चेत्, तदपि तुल्यम्। न हि तदेकश्लोकावधिकमित्यत्र नियामकं पश्यामः।

ननु * मन्मना भवेत्यादिरूपो भक्तिविधिः; * सर्वधर्मान्परित्यज्येति त[त्र]न्निषेधः। अतो विरोधादेव अर्थान्तरपरत्वम्। भूयःशब्दस्य चैकश्लोकार्थावधिकत्वं सिद्धमिति चेन्न; विरोधादेव उत्सर्गापवादनयेन निषेधस्यान्य-

विषयतया व्यवस्थापयितुं युक्तत्वात्, सामान्यविशेषशब्दरूपतया तस्य शक्यत्वात्, भाष्योक्तच्छायया च त्यागस्यान्यार्थत्वस्थापनात्, त्याज्ये चैवमभिसंरम्भस्यायुक्तत्वाच्च ।

तर्हि वक्ष्यमाणप्रपत्त्यङ्गतयैव भक्तिरपि * मन्मना भवेत्यादिना विधीयत इति चेन्न ; नियामकाभावात् । वैपरीत्यस्य तु नियामकमस्ति, भूयःशब्दबलात्, * मन्मना भवेत्यादिनवमाध्यायोक्तप्रत्यभिज्ञानात्, क्लृप्तकल्प्यविरोधे क्लृप्तपरिग्रहस्यैव युक्तत्वात्, त्वदभिमतपरित्यागस्याप्यसिद्धिप्रसङ्गात्, त्याज्यान्तरविवक्षायामस्मदिष्टस्यैव युक्तत्वात्, प्रथमप्रतीतिप्राबल्यात्, फलत्वादेऽप्यनिष्टनिवृत्तेरिष्टप्राप्तिशेषत्वस्थितावितरप्राप्तिसाधनतया निर्दिष्टस्यैव प्राधान्योपपत्तेश्च ।

एतेन * यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ इति न्यायेन प्रपत्त्यर्थमाचार्योपसदनम् * मन्मना भवेत्यादिना विधीयत इत्यपि निरस्तम्, मच्छब्दस्योपदेष्टृविवक्षालिङ्गाभावात् ; अन्यथा प्रागुक्तसमस्तस्वात्मभजनस्यापि गुरुभजनत्वक्लृप्तिप्रसङ्गात्, * मद्याजी मामेवैष्यसीत्यनयोरस्वारस्याच्च । * पादमूलं गमिष्यामि यानहं पर्यचारिषमिति न्यायेन गुरुपरिचरणतत्प्राप्त्योरिहोक्तिरविरुद्धेति चेन्न, दत्तोत्तरत्वात् । न हि तद्वदत्र गुरुविषयत्वे प्रमाणमस्ति । न चास्वारस्यं परिहृतम् । एवं प्रपत्त्यन्तर्भूतमात्मसमर्पणं प्रथमश्लोके विधीयत इत्यपि निरस्तम्, * मद्याजी इत्यादेरनपेक्षणाच्च । ततश्चास्मदुक्तमेव श्लोकयोरैकरस्यमुचितम् ॥

अस्तु तर्हि * सर्वधर्मान्परित्यज्येति त्यागविध्यर्थोऽयम् * मन्मना भवेत्यादिरनुवाद इति चेन्न, भूयःशब्दास्वारस्यादिदोषादेव । न चैवं त्यागविध्यर्थानुवादेऽत्यादरो युक्तः, * सर्वधर्मानित्येतावतैव चरितार्थत्वात् । न च * मन्मना भवेत्यत्रानुवादलिङ्गं किमपि दृश्यते ; प्रत्युत अत्यादरलब्धप्रतिष्ठोऽङ्गिस्वरूपनिष्कर्षात्मा विधिरेव प्रतीयते । ततश्च तदर्थैव प्रागुक्ता प्रपत्तिरत्राप्यङ्गेषु सारनिष्कर्षार्थमुपसंहारात्मना विधीयत इति सिद्धम् । न च * सर्वधर्मान्परित्यज्येत्यत्र प्रस्तुतकर्मज्ञानभक्तिपरित्यागविधानात् तदङ्गत्वमनुपपन्नमिति वाच्यम् ; उदाहृतभाष्यातिलङ्घनेनार्थान्तरगवेषणेऽपि सर्वधर्मशब्दस्य समानाधिकरणवृत्त्या व्यधिकरणवृत्त्या वा देवतान्तरभजनरूपधर्माणामेव प्राङ्निन्दितानामत्रापि परित्यागवचनोपपत्तेः । तथा च सति मामेकमित्याद्युक्तं तदेकप्रपदनं प्रति दृष्टोपकारालिङ्गानुसारः । ततश्च कर्मयोगज्ञानयोगभक्तियोगरूपाणां त्रयाणामपि साधारणं भगवदैकान्त्यमेव * मामेकं शरणं व्रजेति संगृहीतं भवति । अत एव **युक्तं भगवद्यामुनाचार्यपादैः**—* ऐकान्त्यं भगवत्येषां समानमधिकारिणामिति । अधिकारिशब्देन तत्रैश्वर्यकैवल्यभगवदर्थिभक्तियोगनिष्ठविवक्षायामपि तुल्यन्यायतया कर्मज्ञाननिष्ठयोरप्यैकान्त्यं दर्शितमेव । एतेनैतदपि व्याख्यातम्—

* तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् । प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च ॥
मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यास्यसि ह्यकुतोभयम् ॥ इति ।

यत्तु, * शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः । तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम् ॥ इति ब्राह्मवचनम्, तदपि शरणागत्यर्थवादमात्रपरमिति अपिशब्दादिलिङ्गैरवसीयते । न च क्रमेण मृत्युतरणादावप्यस्य वाक्यस्य विरोधः । यथा—

* अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते । तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ इत्यादिषु ; अन्यथा तादृशेषु बहुष्वव्यवहितसाधनत्वप्रसङ्गात् । यत्पुनः,

* त्यज धर्ममधर्मं च त्यज सत्यानृते अपि । उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज ॥

इति महाभारतवचनम्, तत्र न तावदापाततः प्रपत्तिप्रतीतिः । निपुणनिरूपणे तु तत्रैव तदर्थव्याख्यानान्न वक्तव्यमस्ति ।

तथा हि—* त्यज धर्ममसंकल्पादधर्मं चाप्यहिंसया । उभे सत्यानृते बुद्ध्या बुद्धिं परमनिश्चयात् ॥ इति ।

न चात्र प्रपदनविधिसंभवः । एवमीदृशानि वाक्यान्तराण्यपि नेतव्यानीति ।

निषेधसमर्थनम् ॥ निषेधतश्च । तथा हि—* तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते इति भक्तिव्यतिरिक्तमोक्षोपायप्रतिषेधो हि दृश्यते । भक्तिप्रपत्तिव्यतिरिक्त इति तु स्यात्, वेदनशब्दस्योभयविषयत्वाविरोधादिति चेन्न; एवं विद्वानिति प्रकृताखिलाकारविशिष्टब्रह्मगोचरवेदनस्य प्रतीतेः, प्रपत्तेश्च स्वापेक्षितज्ञानशक्तिकरुणादिगुणविशिष्टमात्रगोचरत्वस्वीकारात् । साऽपि तत्रत्यसमस्ताकारविशिष्टगोचरा अस्तु; तथा च **गद्ये** स्वरूपरूपगुणविभवचेष्टितादिसमस्ताकारविशिष्टमनुसंधाय प्रापद्यत भगवान् भाष्यकार इति चेन्न; अन्योन्याश्रयणात्, तस्यास्तथाविधाकारविशिष्टगोचरत्वसिद्धौ वेदनशब्दस्य उभयविषयत्वसिद्धिः, तत्सिद्धौ च तस्यास्तत्सिद्धिरिति । तर्हि विद्यान्तरेष्वपि का वार्ता ? विधिरेव । हन्त तर्हि विधिनिषेधाभ्यां व्याघात इति चेन्न; विधिबलादेव हिंसानिषेधवद्विहितव्यतिरिक्तविषयत्वान्निषेधस्य । अत्रापि तथाऽस्त्विति चेन्न, विधेरेव निरस्तत्वात् । किं च,

* नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वाऽपि प्रज्ञानेनैनमाप्नुयात् ॥

इति समाधिरहितस्य ब्रह्मप्राप्तिर्निषिध्यते । न च समाधिः प्रपन्नानामिष्यते; तदभ्युपगमे च भक्त्यनतिरेकः । न च प्रज्ञानशब्दस्तत्र भक्तिमात्रविषयोऽस्त्विति वाच्यम्, संकोचकाभावात् । विधिस्तु निरस्त एवेति न ततस्तत्संकोचः । यच्चात्र दुश्चरितविरतिबाह्यान्तरकरणोपरमरहितस्य ब्रह्मप्राप्तिर्नास्तीत्युच्यते, तदप्यशक्ताधिकारतयाऽभिमतस्य प्रपदनमात्रस्य मोक्षोपायतां प्रतिरुणद्धि । यो हि दुश्चरितेभ्य उपरतः, उपशान्तनिखिलकरणग्रामश्च स्यात्; का तस्याशक्तिर्भजने ?

किं च, * नाहं वेदैरित्यारभ्य * प्रवेष्टुं च परंतपेत्यन्तेन हेत्वन्तरनिषेधपूर्वकमनन्यया भक्त्या प्राप्तिरुच्यते । न चाधिकारिविशेषमाश्रित्यैते निषेधा इति वक्तुं शक्यम्; अधिकारिनियमस्य प्रागेव दूषितत्वात्, तथा च सति कर्मयोगादेरप्यधिकारिविशेषमाश्रित्य पृथगुपायत्वप्रसङ्गाच्च । न चैवमस्त्विति वाच्यम्, भक्तियोगाङ्गभूतात्मावलोकनफलकत्वेन तयोर्भाष्ये निर्णीतत्वात् । एवम्,

* पत्रेषु पुष्पेषु फलेषु तोयेष्वकृतलभ्येषु सदैव सत्सु । भक्त्येकलभ्ये पुरुषे पुराणे मुक्त्यै किमर्थं क्रियते न यत्नः ॥

इत्यादिकमपि द्रष्टव्यम् । भगवत्पराशरशौनकादिभिश्च मोक्षोपदेशप्रकरणेषु स्पष्टमेवोच्यते । यथा सस्मार भगवान्पराशरः स्वाण्डिक्यं प्रति केशिध्वजवचनम्—* क्लेशानां च क्षयकरं योगादान्यन्न विद्यते इति । तत्र च योगशब्दोऽष्टाङ्गयोगविषय इति प्रकरणवशात्, तत्रत्ययोगशब्दार्थविवरणवशाच्च सिद्धम् । तथा हि—तत्रैवानन्तरं स्वाण्डिक्येन योगस्वरूपमनुयुक्तः केशिध्वजः प्रतिवक्ति—

* योगस्वरूपं स्वाण्डिक्य श्रूयतां गदतो मम । यत्र स्थितो न च्यवते प्राप्य ब्रह्मफलं मुनिः ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मुक्त्यै निर्विषयं मनः ॥
विषयेभ्यः समाहृत्य विज्ञानं मानसं मुने । चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥
आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुने । विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः । तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥
एवमत्यन्तवैशिष्ट्ययुक्तधर्मोपलक्षणः । यस्य योगः स वै योगी मुमुक्षुरभिधीयते ॥
योगयुक्प्रथमं योगी युञ्जमानोऽभिधीयते । विनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धिमान् ॥
यद्यन्तरायदोषेण दूष्यते चास्य मानसम् । जन्मान्तरैरभ्यसतो मुक्तिः पूर्वस्य जायते ॥
विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि । प्राप्नोति योगनिर्दग्धपूर्वकर्मचयोऽचिरात् ॥ इति ।

ततश्च—* ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहानित्यारभ्य अष्टाङ्गयोगः प्रपञ्चितः । श्रीविष्णुधर्मे च—

* तदाचक्ष्व महाभाग प्रसादसुमुखो यदि । संक्षयो येन भवति मूलोद्धर्तेन कर्मणाम् ॥

इति शतानीकेन पृष्टो भगवान् शौनकः प्राह—

* न कर्मणां क्षयो भूप जन्मनामयुतैरपि । ऋते योगात्कर्मकक्षं योगाग्निः क्षपयेत्परम् ॥

इति । स च पुनः परमनिःश्रेयसार्थिभिर्देवादिभिरनुयुक्तस्य महर्षेः कपिलस्य वाक्यमुदाजहार—

* इत्युक्ते ऋषिभिः सर्वैर्देवैर्देवर्षिभिस्तथा । नास्ति योगात्परं श्रेयः किंचिदित्युक्तवान्पुरा ॥

इति । तमिमं योगं साधिकारि[विशेषं]विषयं पुनः प्रपञ्चयन्, स्त्रीशूद्राणां जन्मान्तरप्रक्रान्तयोगप्रतिसंधानमात्रेण योगनिष्ठामुदाहृत्य निगमयति स्म—

* तस्माद्योगः परं श्रेयो विमुक्तिफलदो हि सः । विमुक्तौ सुखमत्यन्तं संमोहस्त्वितरत्सुखम् ॥
एतत्ते सर्वमाख्यातं मया मनुजकुञ्जर । श्रेयः परतरं योगात्किंचिदन्यन्न विद्यते ॥ इति ।

मनुश्च—* प्रशासितारं सर्वेषामणीयांसमणीयसाम् । रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ॥

इति । अत्र स्वप्नधीगम्यमिति पदम्, विशदतमप्रत्यक्षतापन्नानुध्यानैकलभ्यमित्यर्थ इति भाष्यकारैर्व्याख्यातम् । एवमन्येषामपि महर्षीणामध्यात्मशास्त्रेषु योगातिरिक्तमोक्षोपायनिषेधो ग्राह्यः ॥

ऐक्यसमर्थनम् ॥ ऐक्याच्च । अपवर्गसाधनविधायिनां शास्त्राणां सर्वेषां भक्तिरूपैकोपायपर्यवसायित्वेनैक्यात्, प्रपत्तिविधायिनां च शास्त्राणामङ्गविषयतयाऽङ्गिविधायकभक्तिशास्त्रैक्यात्, क्वचित्तु भक्तिप्रपत्तिशब्दयोरर्थैक्याच्चैक्यम् । तथा हि—यदि प्रपदनाभिधानं सकृत्कृतं ज्ञानं मोक्षसाधनं स्यात्, तदा *ब्रह्म वेदेत्यादिविहितवेदनस्यासकृदावृत्तोपासनात्मकत्वमन्याय्यम्, * वेदेत्यत्रावृत्तेरश्रुतत्वात्, सकृत्कृतस्यैव च सर्वत्र शास्त्रार्थत्वात्, सामान्यवेदनशब्दस्य सकृत्कर्तव्यप्रपत्तिरूपज्ञानविशेषपर्यवसायित्वेनोपसंहारन्यायस्यापरित्यागाच्च । न चैवमस्त्विति वक्तव्यम्, * सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात्प्रयाजादिवदिति पूर्वपक्षं कृत्वा, * सिद्धं तूपासनशब्दादिति त्रय्यन्तधुरंधरब्रह्मनन्दिवाक्यविरोधात् । तथा च * वेदनमुपासनं स्यात्तद्विषये श्रवणादिति, *उपासनं स्याद्ध्रुवानुस्मृतिर्दर्शनान्निर्वचनाच्चेति (वाक्यकारः) । * आवृत्तिरसकृदुपदेशादिति भाष्ये च महता प्रयासेन कुदृष्टिनिरसनाय वेदनादिशब्दानामपि भक्तिविषयत्वमेव स्थापितम् । यद्यपि च प्रपत्तेरपि प्रीतिरूपतया भक्तिशब्दाभिलप्यत्वं संभवति, तथापि ध्यानरूपत्वाद्यभावात्तत्तदाकारैर्विशेषणं विरुद्धमेव । अत एव भगवत्पराशरादयो निखिलनिगमान्तोपबृंहणप्रवृत्ता निःश्रेयससाधनतया योगमेव विदधिरे, दधिरे च । न च प्रपदनस्य वेदनरूपत्वाभावात्तत्पर्यवसानाभाव इति वक्तुं शक्यम्, प्रार्थनात्मकन्यासादेर्मनावृत्तिरूपत्वस्यैव व्यवस्थितत्वात् । अतः सिद्धं मोक्षशास्त्राणां सर्वेषामुपासनरूपैकार्थपरतयैक्यम् । तथा,

* त्रयाणां क्षत्रियादीनां प्रपन्नानां च तत्त्वतः । अमन्त्रमधिकारस्तु चतुर्व्यूहक्रियाक्रमे ॥

इति प्रपन्नमधिकृत्य भक्तियोगाङ्गुरभगवदर्चाविधिर्भगवच्छास्त्रसंहिताप्रधानभूते श्रीसात्त्वते दृश्यते । एवमन्यत्रात्र च पूर्वं दर्शनादङ्गभूतप्रपदनविधायिनामङ्गिशास्त्रेणापृथग्भावः सिद्धः ॥

किंच, यस्य यदङ्गत्वं क्वचिन्निर्णीतम्, तस्य तत्समानफलतया तेन सह विकल्पो न दृष्टचरः । यत्र दृश्यते, तत्रापि गुणान्तरसंबन्धेनैव स्वातन्त्र्यम्, मात्रया च फलतारतम्यमस्ति । अत्र त्वङ्गतायां स्वतन्त्रतायां च न कश्चिद्गुणभेद इति अङ्गिना सह विकल्पासंभवाद्वयोरपि प्रयोगविधिना एकस्मिन्ननुष्ठातर्युपसंह्रियमाणयोरैक्यमेव । न च प्रपत्तेः स्वातन्त्र्यमिच्छद्भिरप्यङ्गत्वं परित्यक्तम् । त्यज्यतामिदानीमिति चेन्न, प्रपत्तेः सकलाभिमतसाधनत्वस्वीकारात् । ततश्च भक्तिनिष्पत्तिरपि फलं तस्या भवितुमर्हति । उक्तं **चाहिर्बुध्न्येन**—

* यद्येन कामकामेन न साध्यं साधनान्तरैः । मुमुक्षुणा यत्सांख्येन योगेन न च भक्तितः ॥
प्राप्यते परमं धाम यतो नावर्तते [यतिः] पुनः । तेन तेनाप्यते तत्तन्न्यासेनैव महामुने ॥ इति ।

अत एव तर्हि समीहितसिद्धिरिति चेन्न, पारंपर्येणापि तदुपपत्तेः प्रागेवोक्तत्वात् । अङ्गाङ्गिभावेन गत्यन्तरे च संभवति, अष्टदोषदुष्टो विकल्पो न न्याय्यः । एवमङ्गाङ्गिभावकृतपरस्परसौहार्दवशेन भजनप्रपदनशब्दौ स्थानतः समानार्थौ क्वचित्क्वचित्प्रयुज्येते—* चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन इत्यादेः प्रतिनिर्देशरूपेण

* न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥

इत्यत्र भजनशब्देन प्रक्रान्तं प्रपदनशब्देनाभ्यस्तम् । * कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः इत्यत्र प्रपदनम्, * योयो यांयां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति इत्यादिना भजनमिति दर्शितम् । एवमेव सर्वत्र द्रष्टव्यम् । * आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिमिति भक्तिनिष्ठमेव प्रपन्नमङ्गीकृत्य **नारायणार्यैरेवं** व्याख्यातम्—* भगवान्वासुदेवः परमप्राप्यः प्रापकश्च । नान्यत् फलं प्राप्यमस्ति । न चान्यस्तत्प्रापकः । तेन भगवानेव मे सकलः पुरुषार्थवर्ग इत्येवमास्थितः प्रपन्नः इति । * आनुकूल्यस्य संकल्पः इत्यादयश्च श्लोकाः * तमेव चाद्यं पुरुषं प्रपद्येत्यत्र तैरुदाहृताः । एवं बहुप्रकारैक्यक्रोडीकृता प्रपत्तिर्न स्वतन्त्रतामनुभवितुमर्हति ॥

अशक्तिसमर्थनम् ॥ अशक्तेश्च । अशक्यरूपत्वादित्यर्थः । तथा हि—* भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिनिवृत्तिः प्रपत्तिरिति **श्रीरामामिश्रवाक्य**[म]मित्यनुस्मरन्ति भवन्तः । तत्र कथं प्राकृतशरीरसंबन्धिसत्त्वरजस्तमोगुणवश्यः पुरुष उपरतसर्वव्यापारः स्यात् ? अतः समुद्रमध्यपतितस्य प्रबलतरसमीरणवेगोल्लसदनन्तकल्लोलोल्लसस्य निष्पन्दभावोपदेशवदशक्यविधानरूपत्वादप्रामाण्यं त्वदभिमतप्रपत्तिशास्त्रस्य स्यात् । यद्यपि मात्रया शक्य[त्वात्प्रामाण्यम्]त्वम्, तथाऽपि कर्मयोगादिवत्प्रवृत्तिरूपाद्भक्तियोगान्निवृत्तिरूपस्य प्रपदनस्य ज्ञानयोगस्येव दुष्करतमत्वादशक्तं प्रत्यशक्यतमोपदेश इति निरर्थकं प्रपत्तिशास्त्रमिति ॥

अख्यातिसमर्थनम् ॥ अख्यातेश्च । अप्रसिद्धेरित्यर्थः । न हि अष्टादशस्वपि विद्यास्थानेषु सांख्ययोगादिषु वा चतुर्षु तन्त्रेषु शिल्पशास्त्रेषु क[ल्प]लाग्रन्थेषु वा केषु चित्प्रपदनमिति कमप्युपायं पृथक्परिगण्यमानमुपलभामहे । न चैतेषु सर्वेषु प्रतिपक्षेषु केनचित् श्लोकशकलादिना प्रत्यवस्थातुं शक्यम् । अतः कथंभूतं प्रपदनमिति शङ्का तावद्दुर्निवारा । अत एव च महाविश्वासासिद्धेस्तत्स्वरूपासिद्धिरिति ॥

संप्रदायविरोधसमर्थनम् ॥ संप्रदायविरोधतश्च । तीर्थकरसंप्रदायसहकृतयैव श्रुपपत्त्याऽर्वाचीनानामकृत्स्नवेदिनामर्थनिर्णयः, सिद्धान्तापसिद्धान्तव्यवस्था च । न च प्रपदनस्य पृथगुपायतायां प्राक्तनाचार्यसंप्रदायो दृश्यते; प्रत्युत अङ्गतयैव शारीरकभाष्ये श्रीमद्गीताभाष्ये च भाषितम् । यानि चान्यानि भगवद्भाष्यकाराणां रहस्यस्तुतिनिबन्धनानि, तानि प्रपदनपराण्यपि तन्मूलापादनपराण्यपि तन्मूलमायातरणापराधसहनज्ञानभक्तिप्राप्त्याद्यपेक्षाशिरस्कत्वादिलिङ्गैरङ्गपराण्येव निश्चीयन्ते । अत एव हि * भगवदाराधनप्रयोगं वक्ष्ये इत्युपक्रम्य, *तमेव शरणमुपगच्छेत् अखिलहेयेत्यादिना, इति प्रपत्तिपरा गद्यस्तुतिस्समाराधनाङ्गतया विनियुक्ता । तथा च श्रीमद्गीताभाष्यमपि संगच्छते; अन्यथैकस्मिन्नेव सिद्धान्ते कथमेकेनैव महात्मना एकस्यैव ग्रन्थस्यात्यन्तविरुद्धा व्याक्रियेति । ये च, उक्तिमात्रेणापि रक्षति भगवानिति तत्रतत्र वादाः, त एव तावदतिवादरूपतया कैमुत्येन पारंपर्यमावेदयन्ति । स्तुतिषु चाङ्गप्रधानासु तथा निर्देशो न दोषः, प्रत्युत गुण एव । एतेन भगवद्यामुनाचार्यप्रणीतस्तोत्रादयः, वकुलधरमहर्षिदृष्टविश्वजनीनोपनिषत्प्रभृतयश्च ग्रन्था व्याख्याताः । तत्रापि हि * अकिञ्चनोऽनन्यगतिः शरण्य त्वत्पादमूलं शरणं प्रपद्ये इत्यादिकमुक्त्वा, पुनरप्युपरि * भगवन् भक्तिमपि प्रयच्छ मे इत्यादि ।

ततश्चान्यपरेषु वाक्येष्वपरिप्लवमानोऽयमद्यतनानामशिक्षितसिद्धान्तानामापातार्थः संप्रदायः । अतः सिद्धं प्रपत्त्यादिक्रमपरिणता भक्तिरेवैको मोक्षोपाय इति ॥

इति निक्षेपरक्षायां पूर्वः पक्षः ॥

॥ अथ सिद्धान्तः ॥

स्वरूपसमर्थनम् ॥ तत्र राद्धान्ती प्रक्रमते—

श्लो. अत्रानभिमतांशस्य दूषणं किं नु दूषणम् । तथाऽभ्युपगतांशस्य दूषणं किं नु दूषणम् ॥ ९ ॥

तथा हि—यत्तावच्छास्त्रमात्रजन्यत्वावधि दूषणम्, तन्निपुणानभ्युपगतविषयमिति नास्माभिः परिहरणीयम् । यत्तु तथाविधज्ञानोत्पादकमिन्द्रियलिङ्गादिकं न दृश्यत इति; तत्र पृच्छामः—आनुकूल्यसंकल्पाद्यात्मकज्ञानसमुदाये कस्यांशस्य त्वया हेतुर्न दृश्यते? न तावदानुकूल्यसंकल्पस्य, तस्य संकल्पान्तरवदेव सहकारिविशेषसहकृतमनःकरणकत्वोपपत्तेः । प्रातिकूल्यवर्जनमपि संकल्पपर्यवसितं चेत्, तदेकयोगक्षेमम् । अभिसंधिविराममात्ररूपत्वेऽपि निषेधशास्त्रवशंवदं तदेव करणम्, यथा राजविद्विष्टव्यवसायनिवृत्त्यादिषु । रक्षिष्यतीति विश्वासः शास्त्रप्रामाण्यव्यवसायवतां प्रथमं तद्धेतुकः, पश्चात्तु तदनुस्मरणमात्रं संस्कारसहकृतमनःकरणकम् । तत्र [तु] क्रियाविशेषान्तर्गतसमन्त्रकदेवतास्मरणादिवत्तन्नियमे विधिव्यापार इति न वैयर्थ्यादिदोषः; अनध्यवसितशास्त्रप्रामाण्यानां तु नास्त्येवेति किं तत्करणगवेषणया । गोप्तृत्ववरणमपि रक्षणाभ्यर्थनरूपम्, यतःकुतश्चिद्भिभ्यतो दुर्बलस्य गुणवत्प्रबलदर्शने संभवल्लोकेऽपि दृष्टमिति तद्वदेवात्रापि सुगमो हेतुः । आत्मनिक्षेपोऽपि,

* तेन संरक्ष्यमाणस्य फले स्वाम्यवियुक्तता । केशवार्पणपर्यन्ता ह्यात्मनिक्षेप उच्यते ॥

इति वचनात्तेन संरक्ष्यमाणस्य तदेकशेषभूतस्य स्वरक्षणनैर्भर्यतत्फलस्वाम्यवियुक्ततादिरूपः । स च लोके दास्याभ्युपगमात्मा, गत्यन्तरशून्यस्य स्वेच्छाहेतुकः । भगवति तु, यथाचोदनं हविरन्तरसमर्पणसमानयोगक्षेमः सेतिकर्तव्यताङ्ग-

प्रामाणिकार्थपरिग्रहमात्ररूपः, तत्प्रत्याख्यानविनिवृत्तिरूपो वेति तत्रापि किमन्यत्करणं गवेषणीयम् ? इदं चात्र समर्पणतत्त्वम्—

श्लो. स्वनिर्भरत्वपर्यन्तरक्षकैकार्थ्यभावनम् । त्यक्तरक्षाफलस्वाम्यं रक्ष्यस्यात्मसमर्पणम् ॥ १० ॥ इति ।

कार्पण्यं तु यदि कृपाजनककृपणवृत्तिनिरतत्वम्, तत्रापि यथालोकं सुगमो हेतुः । अथ कथंचिदपि गत्यन्तराभावरूपम्; तदपि गत्यन्तरप्रागभावरूपं चेत्, न हेतुसाध्यम्, अनादित्वात् । भावान्तराभाववादेऽपि तत्तदवस्थाप्रवाहे सामग्रीप्रवाहोऽनादिः । प्रध्वंसरूपं चेत्, तत्तदन्वयव्यतिरेकशास्त्रादवगता बहवो हेतवः सन्ति । गत्यन्तराभावानुसंधानमपि तत्तद्गत्यन्तरग्राहकप्रमाणाभावहेतुकम् । स च प्रमाणाभावो योग्यानुपलम्भात्मा प्रत्यक्षसहकारी वा प्रमाणान्तरात्मा वेति यथाभिमानं परिगृह्यताम् । यत्तूक्तम्—शास्त्रजन्यज्ञानादधिकविषया, अनधिकविषया वेति; तत्राधिकविषयेति ब्रूमः; विषयविशेषविशिष्टबुद्धिर्हि प्रपत्तिः, तस्या एव निःश्रेयससाधनतया कर्तव्यत्वं शास्त्रवेद्यमिति विषयभे[दः]दात् । यद्यपि विषयविशेषविशिष्टं ज्ञानं विधीयत इति विषयविशेषोऽपि विधिवाक्यवेद्यः; तथाऽपि स विषयस्तद्विषयतयैव शास्त्रवेद्य इति न साक्षाद्विधिवाक्यार्थः, उपासनाविषयवत्, यागादिशब्दाभिलप्यद्रव्यत्यागात्मकबुद्धिविषयवच्च । नन्वेवमपि नाधिकविषयम्, अपि तु न्यूनविषयम्; अतः शास्त्रश्रवणवेलायामेव बुद्धिविशेषरूपं प्रपदनं सकृत्कृतमेव स्यादिति चेन्न; न हि यागरूपबुद्धिविशेषविषयविधिवाक्यार्थश्रवणमात्रेण यागः कृतः स्यात् । प्रपदनमपि ह्यत्र प्रार्थनापूर्वकं परस्यै देवतायै प्रत्यगात्मरूपस्य हविषस्त्यागः, इन्द्रायेदं न ममेत्यादिवत् भगवत एवाहमस्मि न ममेति ।

यत्तु *इतिकर्तव्यतावत्त्वे निरपेक्षोपायत्वविरोध* इति, तन्न, [*प्रमाणासिद्धस्वेतिकर्तव्यतानैरपेक्ष्यस्य विवक्षितत्वात्*;] प्रमाणसिद्धस्वेतिकर्तव्यताभिरपि नैरपेक्ष्यस्याविवक्षितत्वात्; भक्तियोगादित्रयेतिकर्तव्यताभूतगुरुनरकर्मनैरपेक्ष्यमात्रं ह्यत्र विवक्षितम्, न पुनः स्वप्रकरणसिद्धस्वेतिकर्तव्यतानैरपेक्ष्यमपीति । अत एव सर्वधर्मशब्दोऽपि न तद्विषयः । यच्चात्र दृष्टान्ततो ब्रह्मास्त्रबन्धः, सोऽपि न स्वेतिकर्तव्यतानिरपेक्षः, अपि तु * अस्त्रबन्धः स चान्यं हि न बन्धमनुवर्तते इत्यन्यबन्धासहत्वमात्रमेव हि स्मर्यते । यत्पुनः, इतिकर्तव्यतारहितत्वे कार्यकरत्वहानिरिति, तदपि न, चरमेतिकर्तव्यतायां व्यभिचारात् । यद्यपि तत्र गत्यभावात्कथंताकाङ्क्षोपशमः, तथाऽपि प्रस्तुतेऽपि यदि इतिकर्तव्यताविधिर्न स्यात्, तदा गत्यभावादेवेतिकर्तव्यतानैरपेक्ष्यं कक्षीकार्यम् । तद्विधिसंभवे तु न शङ्काऽपीति । यत्तु सर्वधर्मपरित्यागे विध्यनुवादविकल्पानुपपत्तिरिति, तदप्यसत्; तत्र हि किमस्य वाक्यस्याप्रामाण्यमभिमतम्, अन्यपरत्वं वा? नाद्यः, अतिसाहसत्वात् । प्रत्यक्षश्रुत्याद्यनुसारान्न दोष इति चेन्न, तदविरोधेन नेतुं शक्यत्वात् । न च प्रपन्नस्य निःशेषधर्मलोपो निपुणैरभ्युपगतः, येन विरोधः स्यात् । नापि द्वितीयः, तत्रापि लक्षणासंकोचादेरवश्याभ्युपगन्तव्यत्वात् । तथा च सति अस्मदभिमतेऽपि न कश्चिद्विरोधः, सर्वधर्मशब्देन प्रस्तुतमोक्षोपायान्तराणां विवक्षितत्वात् । तेषां च नानात्वं तद्विधायकैरेव सिद्धम्, यथाधिकारं नानाप्रकारकर्मज्ञानभक्त्युपदेशात्, * नानाशब्दादिभेदादिति विद्याभेदस्य सूत्रितत्वाच्च । ततश्च सर्वशब्दोपपत्तिः, सर्वनामशब्दानां संनिहितग्राहित्वात् । अत एव सागरतरणवत् अशक्योपदेशचोद्यमप्यपास्तम्, यादृच्छिकानां केषांचिद्धर्मत्वे सत्यपि मोक्षोपायत्वासिद्धेः । पारंपर्येण तदुपकारसामर्थ्येऽपि तन्निरपेक्षसाधनान्तरसद्भावेन *इतरस्याप्येवमसंश्लेषः पाते तु इति न्यायेन तस्यासंश्लेषविषयत्वात् । यत्पुनः आचार्योपसदनभगवत्सेवादेरपि परित्याज्यत्वप्रसङ्गः, तदनुष्ठाने वा प्रपत्तेरङ्गवैकल्यमिति ; तत्र तन्निष्ठस्य वक्ष्यमाणसेतिकर्तव्यताकविधिबलादेवावश्यंभाविना तद्वैकल्यमिति

महदिदमुपपादनम् । अत्र च तथाविधधर्मविषयत्वं सर्वशब्दस्य नास्तीति भावय । लोकसंग्रहाद्युक्तिरपि अवश्यकर्तव्यताभिप्रायैव ; अन्यथा तदसंग्रहेऽप्यदोषत्वप्रसङ्गात् । यत्तु, क्रियमाणेषु श्रेयस्साधनत्वबुद्धित्यागस्येश्वरपारतन्त्र्यादिमात्रानुसंधानरूपत्वे[न] कर्मयोगादिसमानयोगक्षेमत्वमिति, तन्न, प्रपन्नावश्यंभाविभ्यः शक्त्यनुरूपनित्यनैमित्तिकेभ्यश्चातिरिक्तदुष्करतपःप्रभृतिक्लेशाभावेन वैषम्यात् ; प्रपन्नधर्मेऽपि असमर्थं प्रति प्रपत्तेरनुपदेशात् । त्यागविषया अशक्तिस्तु परिहरिष्यते । विशिष्टविधिस्वीकारे च न वाक्यभेददोषः । यद्यपि चासौ गत्यभावविषयः ; तथाऽपि अत्रापि यदि गत्यन्तराभावः स्यात् तदाऽसौ स्वीकार्य एव, भक्तियोगशेषत्वपक्षेऽपि तथैव निर्वाह्यत्वात् । यत्तु शक्तं मुमुक्षुं प्रत्येव मोक्षोपायान्तराणां निषिद्धत्वादधिकारिविशेषासिद्धेश्चाधर्मत्वप्रसङ्ग इति, तदप्ययुक्तम्, एतस्मिन्नेवोपाये विचिकी[अवतिती]र्षतामेव तन्निषेधात् । * विकल्पोऽविशिष्टफलत्वादिति न्यायेन गतार्थत्वान्निरर्थकस्तन्निषेध इति चेत्, सत्यम् ; न्यायप्राप्तविकल्पसिद्धमर्थं ज्ञापयितुमेवायं निषेधः । तर्हि विद्यान्तरेष्विव अत्रापि न्यायसिद्धे तदितरविद्यात्यागे विधिरनपेक्षित इति चेन्न ; विद्यान्तरेषु तदितरविद्यात्यागो नैरपेक्ष्यात्, इह तु विरुद्धत्वादिति ज्ञापनेन सप्रयोजनत्वात् । तदेकशरणव्रज्या हि तदितरोपायपरिग्रहेण विरुध्येत । एवं च सर्वपापमोक्षणफलत्वात्याः शरणव्रज्यायाः संनिधावफलतया तदङ्गभूतस्य त्यागस्य दृष्टोपकारे संभवत्यदृष्टपरिग्रहायोगालिङ्गानुसारोऽपि न बाधितः । इह च महताम् * अस्रबन्धः स चान्यं हि न बन्धमनुवर्तते इति ब्रह्मास्त्रबन्धोदाहरणमपि एतदभिप्रायेणैव । यद्वा प्रपदनाङ्गभूताकिञ्चन्यपुरस्कारविरुद्धोपायान्तराशाप्रहाणमेवात्र त्याग इति न विरोधः । संकोचोपचारादिरवर्जनीय इत्युक्तम् ; भवदभिमतपक्षेऽपि कथंचित्तदनुप्रवेशात् । दर्शितं च **सात्यकितन्त्रे** प्रपत्त्यध्याये प्रपित्सोरुपायान्तरनैराश्यं प्रश्नप्रतिवचनाभ्याम् । तथा हि—

* ब्रह्मोवाच—भगवन् हितमाख्यातमात्मनां पततामधः । त्वत्प्रापकं महत्कर्म कारुण्यविवशात्मना ॥
अधीता बहवो मन्त्राः श्रीमदष्टाक्षरादिकाः । एभिः कर्मभिरीजानस्तान्मन्त्रान् सततं जपन् ॥
त्वामाप्नोत्येव पुरुषः पुरुषं पुरुषोत्तमम् ॥
एतान्यालोच्यमानानि कर्माणि करुणाकर । दुर्विज्ञेयस्वरूपाणि दुष्कराणि विभागशः ॥
मन्त्रांश्चैकैककशस्तावज्जपमानस्य माधव । उक्तेनैव च मार्गेण गच्छत्यायुरपक्षयम् ॥
तस्मात्सकृत्कृतेनैव कर्मणा येन मानवः । सकृज्जप्तेन मन्त्रेण कृतकृत्यः सुखी भवेत् ॥
तद्ब्रूहि कर्म तन्मन्त्रं दयार्द्रहृदयो ह्यसि ॥

श्रीभगवानुवाच—सत्यमुक्तमशक्यानि कर्माणि कमलासन । मन्त्राणां च यथाशास्त्रमनुष्ठानं न शक्यते ॥
इज्यते येन तत्कर्म कृतमात्रेण कर्मणा । मामाप्नोति नरो ब्रह्मन् ममात्मा च भविष्यति ॥ इति ॥

एवं जितन्तास्तोत्रेऽपि स्पष्टमुपायान्तरनैराश्यम् । किंच,

श्लो. प्रपत्तौ भक्तिवन्नास्ति तत्तद्धर्मान्तरङ्गता । इति बोधयितुं तत्तत्त्यागोक्तिरिह युज्यते ॥ ११ ॥
न चान्यानङ्गतामात्रादननुष्ठानसंभवः । स्वतन्त्रविधिसिद्धत्वादन्यथाऽतिप्रसङ्गतः ॥ १२ ॥

अतः सर्वशब्दासंकोचेऽप्यविरोधः, वेदनचोदनालिङ्गकातिदेशप्राप्ताङ्गविशेषमात्रप्रतिषेधैकपरत्वात् त्यागोक्तेरिति ।

यत्तु अनुवादपक्षे अनुवाद्यार्थविशेषानिश्चय इति, तदपि न, अभिमतफलविशेषलाभे दुष्करसाधनान्तरनैराश्यनिमित्तशोकाविष्टस्यानूद्यमानत्वात् । एतच्च * सर्वधर्मान् परित्यज्य, * मा शुचः इत्यनयोः सामर्थ्यादवसीयते । संभवति

च दुष्करतरेषु चिरकालसाध्येषु प्रतिबन्धकशतनिरन्तरेषु अभिमतोपायेषु परिमितशक्तेर्विलम्बाक्षमस्य च तीव्रः शोकवेगः; तद्विशिष्टश्चात्राधिकारीति न किंचिदपहीनम्। सर्वशब्दोऽप्यत्र *सर्वत्वमाधिकारिकमिति न्यायेन संनिहितफलविशेषसाधनतयाऽभिमतप्रस्तुतधर्मसामस्त्यपरः। अत एव सङ्कोचोऽप्यत्र न दोषः। न च पश्चाच्छक्तिसंभवे सर्वधर्मशब्दार्थस्य पुनरनुष्ठानप्रसङ्गः, परिगृहीतेनोपायान्तरेण फलसिद्धौ पुनरितरानुष्ठानस्य निरर्थकत्वात्; अन्यथाऽन्यत्राप्यनुष्ठितानुकल्पस्यापि संजातशक्तेर्मुख्यकल्पानुष्ठानप्रसङ्गात्। न चात्र फलभूयस्त्वापेक्षया समुच्चयः संभवति, *विकल्पोऽविशिष्टफलत्वादिति सूत्रितत्वात्।

यच्च अशक्तिलिङ्गासिद्धिरिति, तदपि न, *मा शुच इत्यनेनैव द्योत्यमानत्वात्। नच वाच्यमुपक्रमावगतबन्धुवधनिमित्तशोक एवात्र *मा शुचः इत्युपसंहारेऽपि निवार्यत इति; तस्यैव शोकस्य सर्वत्रानुवृत्तेर्नियामकाभावात्। अन्यथा

*दैवी संपद्विमोक्षाय निबन्धायासुरी मता। मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव॥

इत्यत्रापि तस्यैव शोकस्य प्रसङ्गात्। न च तद्युक्तम्; तत्र तत्प्रस्तावाभावात्, *संपदं दैवीमभिजातोऽसीत्यनेन तत्परिहारासंभवाच्च। *निबन्धायासुरी मतेति शोकहेतोरन्यस्य प्रस्तावेन तन्मूलशोकापनोदनं ह्यत्र क्रियते। तद्वदत्रापि *सर्वधर्मान् परित्यज्येति निर्दिष्टनिमित्तान्तरप्रभव इति युक्तम्। यत्तु अशक्ताधिकारत्वे प्रपत्तेरमुख्योपायत्वप्रसङ्ग इति; तत्र किं फलफल्गुत्वाभिप्रायेणामुख्यत्वोक्तिः, अकिंचनाधिकारत्वमात्रेण वा? नाद्यः, असिद्धेः। नापि द्वितीयः, इष्टप्रसङ्गरूपत्वात्। यत्तु अनुवादपक्षे त्यागस्येतिकर्तव्यतात्वासिद्धिरिति, तत् तस्मिन् पक्षे गुण एवेति नानिष्टप्रसङ्गावकाशः। इतिकर्तव्यतान्तरं तु यथाप्रमाणं स्यादेव। यत्पुनरुक्तम्, विधिपक्षे अनुवादपक्षे चाभावरूपधर्मपरित्यागावश्यंभावात्तद्विरोधिभावानुष्ठाने स्वैरदोष इति, तदपि मन्दम्, तत्तदभावमात्रस्य पापाभावमात्ररूपत्वात्। यद्यपि नियमसहकृतस्य तत्तदभावस्य धर्मत्वमपि, तथाऽपि तेनाकारेणानुवादो विधिर्वेति नियममात्रपरित्याग एव स्यात्। निषिद्धवर्जनं तु निषेधशास्त्रसिद्धं तावता नापैति। भवतु च निषिद्धाकरणमपि धर्मः। तथाऽपि सर्वधर्मशब्दस्य संनिहितमोक्षोपायविषयत्वान्न नित्यनैमित्तिकत्यागनिषिद्धानुष्ठानयोः प्रसङ्गः। अङ्गपरित्यागेऽङ्गानुष्ठानस्य प्रयोजनाभाव उक्त इति चेत्सत्यमुक्तम्, दुरुक्तं तु तत्, *विहितत्वाच्चाश्रमकर्मापि, *सहकारित्वेन च, इति सूत्रकारेणैव कर्मणां विनियोगपृथक्त्वेनाश्रमाङ्गत्वविद्यासहकारित्वयोः पृथक्समर्थितत्वात्। ततो यद्यपि विद्याङ्गत्वेन नित्यनैमित्तिककर्माणि नोपादीयन्ते, तथाऽपि केवलाश्रमिणामिव वर्णाश्रमादिमात्रप्रयुक्तत्ववेषेणोपादेयान्येव। यद्यपि कर्मान्तराधिकारापादकत्वमेव तेषाम्, तथाऽपि शक्तस्याकरणे प्रत्यवायः श्रूयमाणो न परित्याज्यः। अतः शक्तस्य कर्मान्तराभावेऽपि यथार्हं प्रत्यवायपरिहारार्थं कैङ्कर्यरूपकर्मसद्भावेन शौचादिवद्योग्यतासिद्ध्यर्थं च यथाशक्त्यवश्यानुष्ठेयान्येव। अशक्ताधिकारत्वं तर्हि कथमिति चेत्, फलपर्यन्तमोक्षोपायान्तरासामर्थ्यादिति भाव्यताम्। सकलाङ्गोपसंहारे हि काम्यं कर्म फलति। यथाशक्त्यनुष्ठानमात्रेणापि नित्यनैमित्तिकशास्त्रं चरितार्थं भवति। प्रपत्तिबलादेव सर्वप्रत्यवायपरिहारे किमन्येनेति चेन्न; प्रपन्नस्यापि पुनर्मर्यादालङ्घनायोगस्य *दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा इत्यनेनैव समर्थितत्वात्। पूर्वाघस्येवोत्तराघस्यापि प्रपत्त्यन्तरमेव प्रायश्चित्तं भवतीति चेत्; किं कृतस्योत्तरस्य, करिष्यमाणस्य वा? आद्ये तु प्रायश्चित्तसाकाङ्क्षतया मर्यादालङ्घनं परित्याज्यमेवेति सिद्धम्। प्रायश्चित्तविशेषं तु यथाशास्त्रमङ्गीकुर्मः। द्वितीये तु निमित्तानुदयादेव प्रायश्चित्तानवकाशः। क्षुद्रितमक्ष्यनिमित्तापेक्षया भवतु प्रायश्चित्तमिति चेन्न, एष्यन्महापातकादिशङ्कया तत्तत्प्रायश्चित्तानामेव नित्य-

मनुष्ठानप्रसङ्गात् । अतो निमित्तोदये सत्येव नैमित्तिकशास्त्रोदयः । भविष्यत्पापारम्भकपापान्तरप्रायश्चित्तं तु संभवत्येव; अन्यथा *कृतान् क्रियमाणान् करिष्यमाणांश्च सर्वानशेषतः क्षमस्व, *वर्तिष्यमाणं च सर्वं क्षमस्वेति भगवद्भाष्यकारोक्तिः कथमिति चेत्, इत्थमेव—अबुद्धिपूर्वपापादिमात्रविषयतयाऽपि तदुपपत्तेः, तदारम्भकपापलक्षणया वा तन्निर्वाहात् । अन्यथा *नाविरतो दुश्चरितादिति शास्त्रविरोधादेव । तदुक्तं लक्ष्मीतन्त्रेऽपि प्रपत्त्यध्याये—*मनीषी वैदिकाचारं मनसाऽपि न लङ्घयेदिति । अतः सर्वधर्मशब्दस्यासंकोचेऽपि न स्वैरदोषप्रसक्तिः । आनुकूल्यादिमति च प्रपत्तिरिति कुतः स्वैरावकाशः । यद्यपि च *आनुकूल्यमिति प्रोक्तं सर्वभूतानुकूलता इति तत्रैव व्याख्यातम्; अथापि तदेव सर्वभूतानुकूल्यं शिष्टतया व्यपदेश्यानां स्वैरदोषमुन्मूलयति । अन्यथा *यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः इति लोकक्षोभप्रसङ्गात् । ततः सर्वभूतप्रातिकूल्यमेव हि कृतं भवति । अत एव हि *आनुकूल्येतराभ्यां तु विनिवृत्तिरपायतः इत्यनन्तरमेवाह । एतत्प्रकरणोपक्रमे चानन्यगतिकजनसंरक्षणोत्सुकया देव्या संचोदितो भगवानाह—

*उपायाश्चाप्यपायाश्च शास्त्रीया निर्मिता मया । विहिता य उपायास्ते निषिद्धाश्चेतरे मताः ॥
अधो नयन्त्यपायास्तं य एनाननुवर्तते । ऊर्ध्वं नयन्त्युपायास्तं य एनाननुवर्तते ॥
उपायापायसंत्यागी मध्यमां वृत्तिमास्थितः । मामेकं शरणं प्राप्य मामेवान्ते समश्नुते ॥
षडङ्गं तमुपायं च शृणु मे पद्मसंभवे । आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम् ॥
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा । आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥
एवं मां शरणं प्राप्य वीतशोकभयक्रमः । निरारम्भो निराशीश्च निर्ममो निरहंकृतिः ॥
मामेव शरणं प्राप्य तरेत्संसारसागरम् । सत्कर्मनिरताः शुद्धाः सांख्ययोगविदस्तथा ॥
नार्हन्ति शरणस्थस्य कलां कोटितमीमपि ॥ इति ।

आनुकूल्यादिस्वरूपं च शक्रेणानुयुक्ता देवी स्वयमेव व्याचकार—

*आनुकूल्यमिति प्रोक्तं सर्वभूतानुकूलता । अन्तः स्थिताऽहं सर्वेषां भावानामिति निश्चयात् ॥
मयीव सर्वभूतेषु ह्यानुकूल्यं समाचरेत् । तथैव प्रातिकूल्यं च भूतेषु परिवर्जयेत् ॥
त्यागो गर्वस्य कार्पण्यं श्रुतशीलादिजन्मनः । अङ्गसामग्र्यसंपत्तेरशक्तेश्चापि कर्मणाम् ॥
अधिकारस्य चासिद्धेर्देशकालगुणक्षयात् । उपाया नैव सिध्यन्ति ह्यपायबहुलास्तथा ॥
इति या गर्वहानिस्तद्दैन्यं कार्पण्यमुच्यते । शक्तेः सूपसदत्वाच्च कृपायोगाच्च शार्ङ्गिणः ॥
ईशेशितव्यसंबन्धादनिदंप्रथमादपि । रक्षिष्यत्यनुकूलान्न इति या सुदृढा मतिः ॥
स विश्वासो भवेच्छक्र सर्वदुष्कृतनाशनः । करुणावानपि व्यक्तं शक्तः स्वाम्यपि देहिनाम् ॥
अप्रार्थितो न गोपायेदिति तत्प्रार्थनामतिः । गोपायिता भवेत्येवं गोप्तृत्ववरणं स्मृतम् ॥
तेन संरक्ष्यमाणस्य फले स्वाम्यवियुक्तता । केशवार्पणपर्यन्ता ह्यात्मनिक्षेप उच्यते ॥
निक्षेपापरपर्यायो न्यासः षड्भाङ्गसंयुतः । स न्यासस्त्याग इत्युक्तः शरणागतिरित्यपि ॥
उपायश्च चतुर्थस्ते प्रोक्तः शीघ्रफलप्रदः । अस्मिन्हि वर्तमानानां विधौ विप्रनिषेविते ॥
पूर्वे त्रय उपायास्ते भवेयुरमनोहराः । आनुकूल्येतराभ्यां तु विनिवृत्तिरपायतः ॥

कार्पण्येनाप्यपायानां विनिवृत्तिरिहोदिता । रक्षिष्यतीति विश्वासादभीष्टोपायकल्पनम् ॥
गोप्तृत्ववरणं नाम स्वाभिप्रायनिवेदनम् । सर्वज्ञोऽपि हि विश्वेशः सदा कारुणिकोऽपि सन् ॥
संसारतन्त्रवाहित्वाद्रक्षापेक्षां प्रतीक्षते । आत्मात्मीयभरन्यासो ह्यात्मनिक्षेप उच्यते ॥
हिंसास्तेयादयः शास्त्रैरपायत्वेन दर्शिताः । अपायोपायसंत्यागी मध्यमां वृत्तिमास्थितः ॥
रक्षिष्यतीति निश्चित्य निक्षिप्तस्वस्वगोचरः । बुध्येत देवदेवं तं गोप्तारं पुरुषोत्तमम् ॥ इति ।

एवमुक्तो मध्यमस्थितिस्वरूपं पप्रच्छ—

* उपायापाययोर्मध्ये कीदृशी स्थितिरम्बिके । अपायोपायतामेव क्रिया सर्वाऽवलम्बते ॥
स्वीकारे व्यतिरेके वा निषेधविधिशास्त्रयोः । दृश्यते कर्मणो व्यक्तमपायोपायरूपता ॥ इति ।

तत्र पुनः प्रत्युक्तम्—

* त्रिविधां पश्य देवेश कर्मणो गहनां गतिम् । निषेधविधिशास्त्रेभ्यस्तां विधां च निबोध मे ॥
अनर्थसाधनं किंचित्किंचिच्चाप्यर्थसाधनम् । अनर्थपरिहाराय किंचित्कर्मोपदिश्यते ॥
त्रैराश्यं कर्मणामेवं विज्ञेयं शास्त्रचक्षुषा । अपायोपायसंज्ञौ तु पूर्वौ राशी परित्यजेत् ॥
तृतीयो द्विविधो राशिरनर्थपरिहारकः । प्रायश्चित्तात्मकः कश्चिदुत्पन्नानर्थनाशनः ॥
तमंशं नैव कुर्वीत मनीषी पूर्वराशिवत् । क्रियमाणं न कस्मैचिद्यदर्थाय प्रकल्पते ॥
अक्रियावदनर्थाय कर्म तत्तु समाचरेत् । एषा सा वैदिकी निष्ठा ह्युपायापायमध्यमा ॥
अस्यां स्थितो जगन्नाथं प्रपद्येत जनार्दनम् । सकृदेव हि शास्त्रार्थः कृतोऽयं तारयेन्नरम् ॥
उपायापायसंयोगे निष्ठया हीयतेऽनया । अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् ॥
प्रायश्चित्तिरियं साऽत्र यत्पुनः शरणं व्रजेत् । उपायानामुपायत्वस्वीकारेऽप्येतदेव हि ॥
अविप्लवाय धर्माणां पालनाय कुलस्य च । संग्रहाय च लोकस्य मर्यादास्थापनाय च ॥
प्रियाय मम विष्णोश्च देवदेवस्य शार्ङ्गिणः । मनीषी वैदिकाचारं मनसाऽपि न लङ्घयेत् ॥
यथा हि वल्लभो राज्ञो नर्दीं राज्ञा प्रवर्तिताम् । लोकोपयोगिनीं रम्यां बहुसस्यविवर्धिनीम् ॥
लङ्घयन् शूलमारोहेदनपेक्षोऽपि तां प्रति । एवं विलङ्घयन्मर्त्यो मर्यादां वेदनिर्मिताम् ॥
प्रियोऽपि न प्रियोऽसौ मे मदाज्ञाव्यतिवर्तनात् । उपायत्वग्रहं तत्र वर्जयेन्मनसा सुधीः ॥
चतुर्थमाश्रयन्नेवमुपायं चरणाश्रयम् । अतीत्य सकलं क्लेशं संविशत्यमलं पदम् ॥
उपायापायनिर्मुक्ता मध्यमां स्थितिमास्थिता । शरणागतिरम्यैषा संसारार्णवतारिणी ॥
इदं शरणमज्ञानामिदमेव विजानताम् । इदं तितीर्षतां पारमिदमानन्त्यमिच्छताम् ॥
प्रायश्चित्तप्रसङ्गे तु सर्वपापसमुद्भवे । मामेकां देवदेवस्य महिषीं शरणं व्रजेत् ॥
अपायाद्विरतः श्रध्दन्मां चैव शरणं व्रजन् । तनूकृत्याखिलं पापं मां प्राप्नोति नरः शनैः ॥
अथोपायप्रसक्तोऽपि भुक्त्वा भोगाननामयान् । अन्ते विरक्तिमासाद्य विशते वैष्णवं पदम् ॥
उपायः सुकरः सोऽयं दुष्करश्च मतो मम । शिष्टैर्निषेव्यते सोऽयमकामहतचेतनैः ॥ इति ।

एवमध्यायान्तरेऽपि प्रपन्नस्यानुसंधानमधिकृत्योक्तम्—

* प्रातिकूल्यं परित्यक्तमानुकूल्यं च संश्रितम् । अपायेभ्यो निवृत्तोऽस्मि पातकेभ्यो भवोदधौ ॥
तथाऽप्यत्र प्रवृत्तिर्या त्वत्स्मृतेः सा विनश्यतु । अलसस्याल्पशक्तेश्च यथावच्चाविजानतः ॥
उपायाश्चोदिताः शास्त्रैर्न मे स्युस्तारकास्त्रयः । तथाऽप्यत्र प्रवृत्तिर्या त्वदाज्ञापालनं तु तत् ॥
अतोऽहमनुपायत्वात्कृपणोऽकिञ्चनोऽगतिः । छायामाश्रित्य वर्तेय त्वदीयां तापहारिणीम् ॥

इत्यादि ॥ अनन्तरं चोक्तम्—

* सकृदेवं प्रपन्नस्य कृत्यं नैवान्यदिष्यते । उपायापायमुक्तस्य वर्तमानस्य मध्यतः ॥
नरस्य बुद्धिदौर्बल्यादुपायान्तरमिष्यते इति ॥

तथाऽन्यत्राध्याये—* प्रपत्तिं तां प्रयुञ्जीत स्वाङ्गैः पञ्चभिरावृताम् इत्युपक्रम्य * प्रातिकूल्यमित्यादि पूर्ववत् । समाप्तौ चोक्तमत्रिणा—

* भूयस्त्वं शृणु संक्षेपमनसूयेऽनसूयया । श्रुत्वा च कुरु[ते चित्ते] यत्नेन रक्षा चाप्यप्रमादिनी ॥
लक्ष्मीनारायणाकारा भवित्री ते मनस्थितिः । अपायान्संपरित्यज्य स्वीकृत्याप्यनुकूलताम् ॥
लक्ष्मीनारायणौ विश्वमिति भावे कृतस्थितिः । अपायान्संपरित्यज्य पातकान्भवसागरे ॥
दैवाद्वा यदि वा मोहादपायस्य परिप्लवे । भजमानाऽथ तावेव लक्ष्मीनारायणावुभौ ॥
शश्वच्चासुकरान्सर्वानुपायान् जहती स्वयम् । अलिप्ता करणे तेषां लोकसंग्रहचेतसा ॥
आकिञ्चन्यं समालम्ब्य बुद्ध्यैव दृढया स्वयम् । सर्वथा सर्वदेशेषु सर्वावस्थासु सर्वदा ॥
रक्षिष्यति हरिः श्रीमानाश्रितानिति निश्चयात् । आत्मात्मीयभरं सर्वं निक्षिप्य श्रीपतेः पदे ॥
उपायं वृणु लक्ष्मीशं तमुपेयं विचिन्त्य च । इति ते सकलं भद्रे शास्त्रशास्त्रार्थतत्फलम् ॥
दर्शितं परमे तत्त्वं गोपाय स्वेन तेजसा ॥ इति ।

अहिर्बुध्न्येन नमश्शब्दव्याख्यानव्याजेनायमेव शास्त्रार्थः प्रपञ्चितः । तथा हि—

* प्रेक्षावतः प्रवृत्तिर्या प्रह्वीभावात्मिका स्वतः । उत्कृष्टं परमुद्दिश्य तन्नमः परिगीयते ॥
लोके चेतनवर्गस्तु द्विधैव परिकीर्त्यते । ज्यायांश्चैव तथाऽज्यायान्नैवाभ्यां विद्यते परः ॥
कालतो गुणतश्चैव प्रकर्षो यत्र तिष्ठति । शब्दस्तं मुख्यया वृत्त्या ज्यायानित्यवलम्बते ॥
अतश्चेतनवर्गोऽन्यः स्मृतः प्रत्यवरो बुधैः । अज्यायांश्चानयोर्योगः शेषशेषितयेष्यते ॥
अज्यायांसोऽपरे सर्वे ज्यायानेको मतः परः । नन्तृनन्तव्यभावेन तेषां तेन समन्वयः ॥
नन्तव्यः परमश्शेषी शेषा नन्तार ईरिताः । नन्तृनन्तव्यभावोऽयं न प्रयोजनपूर्वकः ॥
नीचोच्चयोः स्वभावोऽयं नन्तृनन्तव्यतात्मकः । उपाधिरहितेनायं येन भावेन चेतनः ॥
नमति ज्यायसे तस्मै तद्वा नमनमुच्यते । भवान् मे हि परो नित्यमहं प्रत्यवरः सदा ॥
इति भावो नमः प्रोक्तो नमसः कारणं हि सः । नामयत्यपि वा देवं प्रह्वीभावयति ध्रुवम् ॥
प्रह्वीभवति नीचे हि परो नैच्यं विलोकयन् । अतो वा नम उद्दिष्टं यत्तन्नामयति स्वयम् ॥

वाचा नम इति प्रोच्य मनसा वपुषा च यत् । तन्नमः पूर्णमुद्दिष्टमतोऽन्यन्न्यूनमुच्यते ॥
इयं करणपूर्तिः स्यादङ्गपूर्तिमिमां शृणु । शाश्वती मम संसिद्धिरियं प्रह्वीभवामि यत् ॥
पुरुषं परमुद्दिश्य न मे सिद्धिरितोऽन्यथा । इत्यङ्गमुदितं श्रेष्ठं फलेप्सा तद्विरोधिनी ॥
अनादिवासनारोहादनैश्वर्यात्स्वभावजात् । मलावकुण्ठितत्वाच्च दक्क्रियाविहतिर्हि या ॥
तत्कार्पण्यं तदुद्बोधो द्वितीयं ह्यङ्गमीदृशम् । स्वस्वातन्त्र्यावबोधश्च तद्विरोध उदीर्यते ॥
परत्वे सति देवोऽयं भूतानामनुकम्पनः । अनुग्रहैकधीर्नित्यमित्येतत्तु तृतीयकम् ॥
उपेक्षको यथाकर्म फलदायीति या मतिः । विश्वासात्मकमेतत्तु तृतीयं हन्ति वै सदा ॥
एवंभूतोऽपि शक्तः सन्मत्राणं भवितुं क्षमः । इति बुद्ध्याऽस्य देवस्य गोप्तृशक्तिनिरूपणम् ॥
चतुर्थमङ्गमुद्दिष्टममुष्य व्याहतिः स्वतः । उदासीनो गुणाभावादित्युत्प्रेक्षानिमित्तजा ॥
स्वस्य स्वामिनि वृत्तिर्या प्रातिकूल्यविवर्जनम् । तदङ्गं पञ्चमं प्रोक्तमाज्ञाव्याघातवर्जनम् ॥
अशास्त्रीयोपसेवा तु तव्याघात उदीर्यते । चराचराणि भूतानि सर्वाणि भगवद्वपुः ॥
अतस्तदानुकूल्यं मे कार्यमित्येव निश्चयः । षष्ठमङ्गं समुद्दिष्टं तद्विघातो निराकृतिः ॥
पूर्णमङ्गैरुपाङ्गैश्च नमनं ते प्रकीर्तितम् । स्थूलोऽयं नमसश्चार्थः सूक्ष्ममन्यं निशामय ॥
चेतनस्य यदा मय्यं स्वस्मिन्स्वीये च वस्तुनि । नम इत्यक्षरद्वन्द्वं तदा मय्यस्य वारकम् ॥
अनादिवासनारूढमिथ्याज्ञाननिबन्धना । आत्मात्मीयपदार्थस्था या स्वातन्त्र्यस्वतामतिः ॥
मे नेत्येवं समीचीनबुद्ध्या साऽत्र निवार्यते । नाहं मम स्वतन्त्रोऽहं नास्मीत्यस्यार्थ उच्यते ॥
न मे देहादिकं वस्तु स शेषः परमात्मनः । इति बुद्ध्या निवर्तन्ते तास्ताः स्वीया मनीषिकाः ॥
अनादिवासनाजातैर्बोधैस्तैस्तैर्विकल्पितैः । रूषितं यद्दृढं तत्तत्स्वातन्त्र्यस्वत्वधीमयम् ॥
तत्तद्वैष्णवसार्वात्म्यप्रतिबोधसमुत्थया । नम इत्यनया वाचा नम्रा स्वस्मादपोह्यते ॥
इति ते सूक्ष्म उद्दिष्टः परमन्यं निशामय । पन्था नकार उद्दिष्टो मः प्रधान उदीर्यते ॥
विसर्गः परमेशस्तु तत्रार्थोऽयं निरुच्यते । अनादिः परमेशो यः शक्तिमान्पुरुषोत्तमः ॥
तत्प्राप्तये प्रधानोऽयं पन्था नमननामवान् । इति ते त्रिविधः प्रोक्तो नमश्शब्दार्थ ईदृशः ॥ इति ।

अन्यत्राप्येवमनुसंधेयम् । एवं नानाविधेषु शास्त्रेषु प्रपञ्चितस्य शास्त्रार्थविशेषस्य संक्षेपोऽयम्—*सर्वधर्मान्परित्यज्येति । इत्थंभूतप्रपत्तिनिष्ठस्य न क्वचिदप्युपप्लवावकाश इति यथोक्त एव त्यागशब्दार्थः । किं च, सर्वो हि शास्त्रार्थः शिष्टानुष्ठानेनैवान्ततो व्यवस्थाप्यते । यथा स्मरन्ति—* अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति । ततश्च प्रपत्तिधर्मप्रतिष्ठापकानां प्राचामाचार्याणां च चर्यामविचार्येदमुपप्लवचोद्यम् । तथा हि—

\$ श्लो. आत्यन्तिकी तथा भक्तिर्यथा देवे तथा गुरौ । तदुक्तिमन्त्रता तेन नित्यं स्वव्यपदेशनम् ॥ १३ ॥

\$ अत्र नृसिंहराजीयव्याख्या—तथाहीत्यारभ्य रहस्यार्थसमर्पणमित्यन्तं प्राक्तनानां सतां कारिकाः ; इति शुश्रुमेत्यारभ्य सच्छिष्याचार्यलक्षणमित्यन्तं ग्रन्थकृद्वाक्यम् ; त्रिषु वर्णेष्वित्यादि तन्त्रवचनम् । अन्ये तु तथाहीत्यारभ्य सच्छिष्याचार्यलक्षणमित्यन्तं ग्रन्थकृद्वचनम् ; समर्पणमित्यन्तं प्राक्तनानां सांप्रदायिकार्थानुवादः ; श्लोकरचना तु ग्रन्थकृत्कर्तृकेत्याहुः । सांप्रदायिकास्तु तथाहीत्यारभ्य शिष्य इत्यभिधीयत इत्यन्तं प्राक्तनानां वचनम् ; तत्तद्वचनमपि पातितमिति वदन्ति ॥

भक्त्या तद्वस्तुतद्वास्तुप्रभृतिष्वपि मानना । गुरुवद्गुरुवर्गस्य नित्यमेवानुदर्शनम् ॥ १४ ॥
आरभ्य स्वगुरोरा च भगवत्तो यथागमम् । तत्तदाचार्यवंशस्यासावसाविति चिन्तनम् ॥ १५ ॥
अर्थस्वभावानुष्ठानलोकदृष्टिगुरूक्तिभिः । श्रुत्या स्मृत्या च संसिद्धं घटकार्थावलम्बनम् ॥ १६ ॥
विशेषेणाविशेषेणाप्याकारत्रयशालिना । विशिष्टस्य परस्यैवोपायत्वेन परिग्रहः ॥ १७ ॥
निरुपाधिकशेषित्वतदभिव्यासभेदकैः । आजीवतत्त्वतद्दासत्रिविधात्माधिकत्वधीः ॥ १८ ॥
यदिच्छयैव यत्प्रीत्यै शासनं निग्रहादि च । तत्र निग्राह्यजातीयविसजातीयतामतिः ॥ १९ ॥
एकेतरसमस्तानां स्वनिष्ठैकार्थतास्थितेः । द्विष्ठे तदन्यशेषित्वे द्वैराज्यादिभयोज्झितिः ॥ २० ॥
प्रभादित्यप्रकारेण मिथोऽतिशयदायिनोः । तदन्यवस्त्वसंभाव्यस्वतोऽतिशयदर्शनम् ॥ २१ ॥
अनन्यदेवतानन्योपायतानन्यसाध्यता । शुद्धतत्परिवारेषु सपर्या भर्तृभृत्यवत् ॥ २२ ॥
आगुरोरन्यदेवत्वे वर्जनं निष्क्रियावधि । कृतप्रेषणनिर्देशन्यायेन फलचिन्तनम् ॥ २३ ॥
फलकोटिनिवेशेन परोपात्यप्रतिष्ठितैः । निजकर्मादि भक्त्यन्तं पराज्ञापरिपालनम् ॥ २४ ॥
न्यासविद्यानुरूपेस्तु व्यापकैर्यदि वेतरैः । यदि वा स्तुतिगीताद्यैर्यथेष्टं चित्तरञ्जनम् ॥ २५ ॥
परप्रसादमात्रात्तत्साक्षात्कारादिसंभवे । प्राचीनोपायनिष्ठायामशैथिल्यं फलावधि ॥ २६ ॥
शुद्धेषु यद्वा मिश्रेषु संस्काराचारवर्त्मसु । अधिकारोपदेशादेरानुरूप्येण वर्तनम् ॥ २७ ॥
अन्तिमश्वासकालेऽपि शक्तितः सावधानता । अनुपप्लवपर्यन्तज्ञा[नि]नप्राधान्यसंग्रहः ॥ २८ ॥
अशेषजन्तुसौहार्दमात्ममाहात्म्यगोपनम् । अमानित्वादिसंपत्तिर्मानस्याप्यवधूननम् ॥ २९ ॥
चिरं शोधितपात्रेषु दीपवत्कृपया स्वया । आरुरुक्षुभिरध्वानं रहस्यार्थसमर्पणम् ॥ ३० ॥
इति शुश्रुम पूर्वेषां प्रपन्नानां महीयसाम् । अद्यापि क्वापि केषांचिदवन्ध्यं कालयापनम् ॥ ३१ ॥
तदेवमेतान्सत्त्वस्थानन्यानप्यनुपप्लवान् । प्रपन्नान्प्रतिसंधाय श्रद्धत्स्वोपायमीदृशम् ॥ ३२ ॥
त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः । विभीषणोऽपि नन्वेवं तदाज्ञामन्ववर्तत ॥ ३३ ॥
त्रिवर्गकांक्षिणश्चान्ये स्वाभीष्टे साधनान्तरम् । त्यक्त्वा प्रपेदिरे नित्यं न तु वेलामलङ्घयन् ॥ ३४ ॥
तथा सात्यकितन्त्रे च प्रोक्तं भगवता स्वयम् । प्रपत्तिमधिकृत्यैव सच्छिष्याचार्यलक्षणम् ॥ ३५ ॥
त्रिषु वर्णेषु संभूतो मामेव शरणं गतः । नित्यनैमित्तिकपरो मदीयाराधने रतः ॥ ३६ ॥
आत्मीयपरकीयेषु समो देशिक उच्यते । आस्तिको धर्मशीलश्च शीलवान्वैष्णवार्चकः ॥ ३७ ॥
गंभीरश्चतुरो धीरश्शिष्य इत्यभिधीयते ॥ इति ।

यत्तु स्मृतिरूपमनुभवरूपं वेति विकल्प्य दूषितम्, तत्रापि वदामः—प्रार्थनात्मिका बुद्धिस्तद्विधिश्च लोके दृश्यमानौ तावद्दुरपह्नवौ । इमं महावदान्यं राजानमिष्टं प्रार्थयस्वेति हितकारिणो नियुञ्जते, तद्विधेयाश्च तथाऽनुतिष्ठन्ति, लभन्ते चाभिमतं फलम् । तद्वदिहापि मोक्षाख्यं फलमुद्दिश्य प्रार्थनादिरूपा बुद्धिस्तावद्विधीयत इति तदनुष्ठानं सुस्थितम् । अनुष्ठानानुपयुक्तं स्मृत्यादिचिन्तनं तु गुणत्वद्रव्यत्वादिचिन्तनवदनादरणीयम् । तथाऽपि वदामः—तत्र हि स्मृतिपक्षे यद्यपि स्मृतिस्वरूपमात्रं स्वतः संभवं न विधेयम्; अविच्छिन्नसंततिरूपत्वे तूपासनसमाधिः; तथाऽप्यात्म-

समर्पणादिविशेषिता स्मृतिर्न स्वतः संभवतीति विधेयत्वमुपपद्यते । समर्पणादिकमपि शास्त्रावगतं स्मृतिमधिरोहेदिति चेत् ; सत्यम् , न तु तत्कृतं भवति । यथा यागशब्दाभिलप्ये देवतोद्देशेन द्रव्यत्यागात्मके बुद्धिविशेषे कर्तव्यतया शास्त्रावगते स्मर्यमाणेऽपि न स बुद्धिविशेषः कृतो भवति ; तथाऽत्रापीति न संकटं किंचित् । अत एवानुभवपक्षेऽपि न दोषः । यद्यपि साध्यसाधनभावांशस्यालौकिकत्वेन नास्मदादिप्रत्यक्षविषयत्वम् , तथाऽपि साधनस्वरूपस्य पुरोडाशादिवच्चास्मदादिकरणगोचरत्वेन तन्निष्पाद्यत्वं नानुपपन्नम् । असमर्थस्य समर्थमुद्दिश्य स्वाभिमतफलस्य तत्साध्यतयेष्टप्रकाशनं प्रार्थनमिति संक्षेपः । यत्पुनरुक्तम् गुरुलघुविकल्पानुपपत्तेश्चेति, तत्र व्यवस्थितविषयतया तदुपपत्तिरेव । अशक्ताधिकारत्वे त्वमुख्यत्वप्रसङ्ग इत्यपि प्रागेव दूषितम् । अशक्तिस्तु कीदृशीति विविच्य श्रूयताम्—इच्छावैचित्र्यं तावत् अन्ततः कर्मवैचित्र्यहेतुकमिति सार्वभौमोऽयं प्रवादः । ततश्च केनापि सुकृतवशेन मोक्षं तावदिच्छन्ति केचित् । तेऽपि तस्य फलस्य स्वरूपेणोपादानुमशक्यत्वात्तदुपायेषु शास्त्रचोदितेषु सदक्षरदहरादिविद्याविशेषेषु यदि शक्तिरसेत्स्यत् , ततस्तत्रैव प्रावर्तिष्यन्त । यदि पुनर्न सा समस्ति, तदा कश्चिदपरिस्खलितधैर्यैः परंपरयोपकारिषु दीर्घकालनैरन्तर्यादरसेवनीयशास्त्रार्थस्रोतस्तीर्थेषु कर्मयोगादिषु यथाधिकारमवतरति । कश्चित्तु तन्द्रालुप्रकृतिः शोकेनैव महता सर्वप्रकारेण गृह्यते । लौकिकफलविशेषाभिलाषिषु चायं प्रकारो दृश्यते । स च तादृशमवसादमापन्नोऽपि फलेच्छातो न निवर्तते । तदवस्थस्य तस्य स्वावस्थाप्रकाशनपूर्वं वदान्यः समर्थः कश्चित् स्वाभिलषितमुपनाथनीय इति विदधाति शास्त्रमिति व्यवस्थितोऽयमधिकारो रोचते तत्तद्रुचिभ्यः । ईदृशस्य च प्रपन्नस्यैष्यति प्रारब्धकर्मफलसंसारखण्डे यावदनिष्टम् तावदपैति, शेषमनुवर्तते, पुरुषार्थमात्रप्रदायित्वात्पुरुषोत्तमस्य । ततश्च यावत्प्रारब्धं वा, यावत्तद्देहं वा, यावत्तत्क्षणं वा, इति प्रपन्नानां मोक्षावधिनियमे तदिच्छातीव्रत्वतारतम्यमेव सर्वज्ञसाक्षिकं प्रमाणमिति । अत एव आर्तदृप्तविभागोऽपि सिद्ध इति नानुपपन्नम् । प्रश्रयभयादिसदसद्भावाभ्यां वा आर्तदृप्तविभागः, प्रपत्तव्येन सर्वलोकशरण्येन दृप्तानामपि [फलाविनाभावाय] फलदायिना भयाभावायावश्यरक्षितव्यत्वाय च प्रपञ्चितः । देशकालावस्थाधिकार्यादिभेदेन गुरुलघुनोरेवाविशिष्टफलत्वं भगवत्पराशरादिभिरपि प्रपञ्च्यते । यथा—* शूद्रस्साधुः कलिः साधुः स्त्रियः साधुरित्यारभ्य

* ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥

इति । स्मरन्ति च गुरुतरद्वादशवार्षिकव्रततुल्यफलतां लघुतरस्याश्वमेधावभृथस्नानस्य । सम्राजो धर्मपुत्रस्य रत्नदानात् सक्तुप्रस्थस्य सक्तुदानमेव श्रेष्ठमिति होचुः । एवं लोकेऽपि दर्शनीयम् ॥

यत्तुल्यविकल्पपक्षे हेतुभूतगौरवसाम्यापादकविश्वासातिरेके प्रत्युक्तम् , तदयुक्तम् ; निर्णीतशास्त्रप्रामाण्यस्य प्रत्यक्षितसमस्ततदर्थस्यापि क्वचिदर्थे वस्तुवैचित्र्यवशादघटितवदवभासमाने शास्त्रार्थान्यथाभावसंभावनायाः वासनाप्रवाहे मुहुर्मुहुः परिप्लवमानायाः संभवात् , केषाञ्चिदेवातिशयितपुण्यानां तदुच्छेदः, न तु सर्वेषाम् , तथैवान्यत्रापि दर्शनात् । एकोनसहस्रन्यायविदो हि पूर्वपक्षित्वं कक्षीकुर्वन्ति मीमांसकाः । निर्णयपर्यन्तत्वे निरर्थकत्वं गुरोः प्रसज्यत इत्युक्तमिति चेत् ; सत्यम् ; तथाऽपि विस्रम्भविशेषसदसद्भावावुपाधीकृत्यैव निर्णयः, *यस्य यावांश्च विश्वासस्तस्य सिद्धिश्च तावतो इति नारदीयोक्तन्यायात् । एतदुक्तं भवति—येषां यावज्जीवं बृहस्पतिप्रभृतिभिरपि प्रतिवादिभिः [अ]संक्षोभ्यमाणानां प्रपत्तिशास्त्रार्थे शङ्काशङ्कुनाङ्कुरति, तेषां तदधिकारः । ईदृशस्य हि प्रपत्त्यधिकारिणो दुर्लभतमत्वमुक्तं **सात्यकितन्त्रे**—

* किं नु तस्य च मन्त्रस्य कर्मणः कमलासन । न लभ्यतेऽधिकारी वा श्रोतुकामोऽपि वा पुनः ॥ इति ।

ये पुनरुपायलाघवम्, तत एवानादिकालसंचितानन्तसमस्तदुःखहेतुजालोन्मूलनम्, क्षोदीयसामपि स्वात्मनां विधिशिवसनकादिदुरधिगमपदाधिरोहादिकं चानुचिन्त्य सततं संदिहते, तेषां तच्छङ्कादविष्ठगरिष्ठोपायानुप्रवेश इति। अतो यथाध्यवसायमधिकार इत्ययमप्यन्ततो व्यवस्थितविकल्पभेद एव। व्यासादीनां तु तथाविधशङ्काप्रसङ्गाभावादुपायान्तरशक्त्यशक्तिभ्यां विलम्बक्षमत्वविलम्बाक्षमत्वाभ्यामेव वा अधिकारव्यवस्थेति निर्बाधमेतत्। अतोऽविशिष्टफलत्वमप्युपपन्नम् ॥

यत्पुनरुक्तम्, प्रपत्तौ प्रारब्धस्यापि भङ्गाभ्युपगमात्फलाधिक्येन विकल्पासंभव इति, तदप्ययुक्तम्, तन्नियमाभावस्योक्तत्वात्। अस्तु वा प्रारब्धभङ्गोऽपि। मोक्षास्यैकफलसाधनत्वे मिथो नैरपेक्ष्यात् विकल्पवाचोयुक्तिः। न ह्येकमेव फलं प्रति क्षिप्रकारिणो विलम्ब्यकारिणश्च समुच्चयः संभवति। निरपेक्षक्षिप्रकारिणि सिद्धे किं विलम्ब्यकारिणा। अतः परिगृहीतक्षिप्रकारिणः पश्चाद्विलम्ब्यकारिपरित्याग एव। एवं गृहीतविलम्ब्यकारिणोऽपि तच्छक्तस्य बुद्धिपूर्वोपक्रान्तपरित्यागायोगात् क्षिप्रकारी न परिग्रहयोग्यः। विलम्ब्यकारिण एव सहकारितया वचनबलात् कथंचिदुपादीयेतापि, उच्चावचसर्वाभीष्टसाधनतया तद्विधेः। क्षिप्रकारिणस्तु विलम्ब्यकारी न सहकारितयाऽप्युपादानमर्हति, नैरपेक्ष्यात्, ब्रह्मास्त्रबन्धन्यायात्, [मान]वचनविरोधाच्च। ईदृशविकल्पाधीननैरपेक्ष्यमपेक्ष्य सर्वधर्मपरित्यागोक्तिरिति ह्येके। तदेवं प्रपत्तिस्वरूपे न काचिदनुपपत्तिरिति सिद्धम् ॥

लक्षणसमर्थनम् ॥ यच्चान्यदुक्तं लक्षणानुपपत्तेश्चेति, तदपि बालिशभाषितम्; नहि लक्षणस्य दुर्वचतामात्रेण लक्ष्यमपह्नोतुं शक्यम्। तथा सति इक्षुक्षीरगुडादिमाधुर्यभेदस्य महदन्तरस्यापि दुर्वच[लक्षण]तामात्रेणापह्नवप्रसङ्गात्। न ह्येवंविधाः प्रतिवस्तुनियता विशेषास्त्वयाऽपि वक्तुं शक्यन्ते। तदुक्तं **दण्डिना**—

* इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्। तथाऽपि न तदाख्यातुं सरस्वत्याऽपि शक्यते ॥ इति।

सर्वलोकप्रसिद्ध्या तत्सिद्धिरिति चेत्तुल्यम्। भक्तिसाधारणानन्यतामात्रेणात्र प्रसिद्धेः पृथक्सिद्धिर्नास्तीति चेन्न; * यद्येन कामकामेनेत्यादिषु भक्तेः पृथगुपायत्वेनैव न्यासोपादानात्। ऐक्यप्रसङ्गपरिहारादौ चैतत् स्पष्टं भविष्यति। तथाऽपि लक्षणमन्तरेण लक्ष्यव्यवहारसिद्धिर्न स्यादिति चेन्न; व्युत्पत्तिवशादेव तदुपपत्तेः, बालादिव्यवहारवत्। व्युत्पत्तिरेव लक्षणमन्तरेणात्र न स्यात्, प्रत्यक्षादिमूलस्फुटप्रतीत्यभावादिति चेन्न; यत्किञ्चिदुपलक्षणमात्रेणापि प्रतीत्युपपत्तेः, नायसादिना देवदत्तगृहादिपरिज्ञानवत्। तच्च यद्यव्याप्तम्, इदमपि तच्छब्दार्थ इत्युदाहरणान्तरमपि पृथक् व्युत्पाद्यम्। यदि पुनरतिव्याप्तम्, इदं तु न तथेति स्वरूपतः प्रतिक्षेप्यम्, * वृद्धप्रयोगगम्याश्च शब्दार्थाः सर्व एव नः इति न्यायात्। अपिचाहुः—

* सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम् ॥ इति।

अतो यत्रयत्रानन्यथासिद्धः प्रयोगः, तत्रतत्र मुख्यता; तत्रानुवृत्तनिमित्तसंभवे त्वेकार्थता, अन्यथाऽनेकार्थतेति विभागः। अनेकार्थेष्वपि एकशब्दसंग्रहवशाद्विधिनिषेधव्यवस्थासिद्धिः,

* शर्करां पादजिह्वाभ्यामक्षिरोगी विवर्जयेत्। स्नेहमाहारदारादौ प्रमेही परिवर्जयेत् ॥

इत्यादिवत्, तकारपूर्वे तकारोत्तरे च तपरसंकेतवच्च। इदं च तत्रतत्र तात्पर्यवशादवसीयते। ततश्च काककपोत-

वृत्तान्ताविरोधः, एकस्मिन्नेव वाचिकमानसिककायिकत्वाद्यविरोधश्च । नमस्कारेऽपि हि तथा त्रैविध्यं प्रसिद्धमेव । अत्र सौहार्दे त्वव्याप्त्यादिरहितं लक्षणं वदामः—अनन्यसाध्यस्वाभीष्टसाधनसमर्थवशीकरणं शरणागतिरिति ॥

यत्पुनर्गोप्तृत्वोपायत्वयोः क्षोदः, तत्र प्रपत्तव्येश्वरगतं गोप्तृत्वम् *रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथेत्यादिभिः प्रतिपाद्यते । *इदं शरणमज्ञानामित्यादिषु प्रपत्तिविषयश्च शरणशब्दः *उपायार्थैकवाचकः इति निष्कृष्यत इत्येके । प्रपत्तव्येश्वरविषय एवायं शरणशब्दो व्याक्रियते, तत्र गोप्तृत्वसमानार्थ एव, गोप्तृत्वबहिष्ठोपायत्वस्य भगवति दुर्निरूपत्वात् । कथं तर्हि रक्षितृत्वव्युदासेन *सांप्रतं त्वेष उपायार्थैकवाचकः इति निष्कर्ष इति चेत्, श्रूयतामवधानेन—उपायान्तरशून्यस्य हि प्रपदनाधिकारः । भगवतश्च रक्षितृत्वमुपायान्तरवति तद्रहिते च समानम् । प्रपद्यमानेन च स्वस्य निरुपायत्वं पुरस्कार्यम् । तदभिप्रायेण हि

*अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिः । त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः ॥

इत्यादिकमुच्यते । तदेवं गोप्तर्येव भगवति प्रपित्सोरुपायान्तरनिवृत्तिमभिसंधाय उपायत्ववाचोयुक्तिः । तेन निरपेक्षरक्षकत्वमनुसंहितं भवति । अतः *उपायार्थैकवाचकः इति च तत्परमेव । ततश्चाङ्गिप्रपत्तौ उपायभूताया भक्तेः स्थाने निवेश्य भगवानुपदिश्यते । भक्त्याऽपि हि भगवत्कृपैवोत्तभ्यते । सा चेदकिञ्चने प्रपन्ने स्वयमेवोत्तिष्ठेत, अतो भक्तिसाध्यां तामीश्वरस्वभाव एव निर्वर्तयतीति अनुपायानां स एवोपायः ॥

यत्तु *आनुकूल्यस्य संकल्पः इत्यादौ विकल्पितम्, तत्र विभागपरत्वं लक्षणपरत्वं च नाभ्युपगच्छामः । प्रकारप्रतिपादनपरत्वेऽङ्गतायां यदुक्तं नैरपेक्ष्यवादविरोध इति, तत् प्रागेव परिहृतप्रायम् । कर्मान्तराङ्गकत्वमात्रं हि प्रतिक्षिप्यते, न पुनः स्वाङ्गैरपि निराकाङ्क्षत्वमिष्यते । यत्तु प्रातिकूल्यवर्जनादिना भक्तेरपि दुष्करतमत्वमिति, किं तावता श्रूयमाण उपायः परित्यक्तुं शक्यः ? तथा सति अतिप्रसङ्गात् । तर्ह्यशक्ताधिकारत्वमस्य न स्यादिति चेन्न ; अन्यत्राशक्तस्यात्राधिकारात् । न पुनरस्मिन्नेवाशक्तस्याधिकार उच्यते । न ह्यनुकल्पेऽग्नेयादिस्थानेष्वप्यशक्तस्य तद्विधिः । *अवगाहनाद्यशक्तस्त्वाग्नेयादि समाचरेदिति हि स्मरन्ति ॥

यत्तु षडतिरिक्ताङ्गश्रयसिद्धिरिति ; तत्तथैव, षट्स्वन्यतमस्य निक्षेपस्याङ्गित्वव्यपदेशात्, अङ्गश्रयान्तरानुपलम्भाच्च । प्रार्थनायां शरणागतित्ववादस्तु प्रधानाङ्गभूतायामात्मस्वाश्शरणागत्यन्तर्भावमात्रादप्युपपद्यते । न हि तत्राङ्गित्वादिविभागोक्तिरस्ति । *न्यासः पञ्चाङ्गसंयुत इत्यत्र तु विभागः स्फुटतया नान्यथाकार्यः । सात्यकितन्त्रे च *कथं त्वां शरणं गच्छेत्कीदृशी शरणागतिरिति ब्रह्मणा पृष्टो भगवान् सकृज्जप्तव्यमन्त्रविशेषोपदेशपूर्वकं निक्षेपस्य प्राधान्यमदर्शयत्—*अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेदिति । अतो न न्यासेऽङ्गित्वव्यपदेश औपचारिक इति वक्तुं शक्यम् । तर्हि *अनन्यसाध्य इत्यादिलक्षणवाक्यं कथं संगच्छेतेति चेन्न; उपलक्षणपरतयाऽपि तदुपपत्तेः, पृथिवीत्वाद्युपलक्षणगन्धवत्त्वादिवत् । अभेदोपचारस्त्वन्तरङ्गतयाऽप्युपपद्यते । अन्यथा *षड्विधा शरणागतिरित्यनेनैवाङ्गान्तराणामपि पृथक् प्रपत्तित्वप्रसङ्गात् । अङ्गिनो न्यासस्य स्वरूपं तावदुज्ज्ञानमिति चेन्न, तत्स्वरूपव्याख्यानेनैव तद्व्यक्तेः ; यथा—

*तेन संरक्ष्यमाणस्य फले स्वाम्यवियुक्तता । केशवार्पणपर्यन्ता ह्यात्मनिक्षेप उच्यते ॥ इति ।

अयं तु मुमुक्षोरनुष्ठेयो निक्षेपः ; तत एव सामान्यस्वरूपं च प्रतिपन्नमिति न कश्चिद्दोषः । भवतु वा वचनान्तरवशात् प्रार्थनाया एवाङ्गित्वमन्येषां वा ; तन्निर्णयाभावेऽपि पण्णामनुष्ठानादेव शास्त्रार्थपौष्कल्यसिद्धिः । अत एव समुदा-

यस्य करणत्वेऽपि न दोषः । संभावितस्वभावपक्षे विभागवचनविरोधरूपभवदभिमतदोषवशादतिप्रसङ्गाच्च तन्नाद्रियामहे । तदेवं प्रपत्तेर्लक्षणतः प्रतिपत्तिसिद्धेरनुष्ठानसंभवान्न विधेयत्वहानिः ।

अनुष्ठानसमर्थनम् ।। यत्तूक्तमनुष्ठानदर्शनाभावादिति, तत्र किं प्रपत्तिमात्रस्यानुष्ठानं न दृश्यते ? उत मोक्षार्थ-प्रपत्तेः ? यद्वा साक्षान्मोक्षसाधनभूताया इति ? न प्रथमः, विभीषणादिवृत्तान्तदर्शनात् । न द्वितीयः, क्षत्रबन्धुमुचुकुन्दादि-कथाप्रसिद्धेः ; * त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः इत्यादिसामान्यनिर्देशसामर्थ्यात् । न तृतीयः, संकीर्तनविशेष-निष्ठस्य क्षत्रबन्धोरनन्तरजन्मनि जातिस्मरत्वेऽपि भक्तियोगप्रकारप्रतिपादनादर्शनात् ; प्रपदनस्य तु कण्ठोक्तेर्व्यवधान-कल्पनस्य गुरुत्वात्, तद्विध्यनुसाराच्च । विधौ च सत्यनुष्ठानदर्शनाकाङ्क्षणमतिमन्दमेव । धर्मोऽपि लोकविद्विष्टश्चेत् परि-हर्तव्यः ; न चात्र कश्चिदपि लोकविद्वेष इत्यनुष्ठानदर्शननिरपेक्षो विधिरेवानुष्ठापयन् केन प्रतिबध्येतेति ।।

विधिसमर्थनम् ।। यच्चोक्तं विधिरेव न दृश्यत इति, तत्किं विधिप्रत्ययाश्रवणात् ? उत विधिपरत्वाभावात् ? नाद्यः, अर्थवादादपि विधिकल्पनाभावप्रसङ्गात् । न द्वितीयः, * यो ब्रह्माणमित्यस्य विधिपरत्वात् । यत्तूक्तं मन्त्राणां विधिपरत्वे प्रमाणं नास्तीति ; तदसत्, यच्छब्दाद्यनुपहतविधिशक्तीनां मन्त्राणामपि विधिपरत्वस्य स्थापनात् । प्रपञ्चितं चैतदस्माभिस्सच्चरित्ररक्षायां सुदर्शनादिधारणाधिकारे । यच्च * तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्तीत्यत्र प्रपत्ति-विधिर्न दृश्यत इति ; तत्रापि तात्पर्यतः प्रपन्नसंरक्षणं कारुणिकानां स्वभाव इत्येतत् सिध्यति । तावति सिद्धे कैमुतिक-न्यायेन लब्धमपारकारुण्यजलधेरीश्वरस्य प्रपन्नसंरक्षणम् ; ततश्च प्रपदनविधिवाक्यान्तरमप्यनुसृत्य तत्प्रपदनं रक्षणायैव भवति [इत्युक्तम्] ।।

यत्तूक्तम् * ओमित्यात्मानं युञ्जीतेत्यत्र युजेः प्रकरणगतन्यासार्थत्वेऽपि न्यासशब्दस्य प्रपदनैकान्त्याभावात् प्राकरणिकानां गतिचिन्तनाद्यङ्गानां तत्रासंभवाच्च न प्रपदनपरत्वनिर्णय इति ; तदप्यसत् ; * तेषां तु तपसां न्यासमति-रिक्तं तपः श्रुतम्, * इदं महोपनिषदं देवानां गुह्यमुत्तमम् इत्यादिवचनैः न्यासविद्यागतत्तच्छब्दार्थशालिभिस्तामेव प्रत्यभिज्ञाप्य भगवच्छास्त्रसंहितासु स्पष्टतरमुपबृंहणात् ।

ननु **अहिर्बुध्न्यसंहितायां** सर्वाधिकारतान्त्रिकमन्त्रान्तरविधानात् न्यासाङ्गतया श्रुतपुरुषाश्रययज्ञकल्पनस्य सुदर्शनात्मकभगवदाश्रयतया विपरिणामाच्च भेदसिद्धेः प्रत्यभिज्ञाभङ्गान्न तदुपबृंहकत्वमिति चेन्न ; मन्त्रादिभेदेऽपि प्रपदनरूपत्वमात्रप्रत्यभिज्ञाभङ्गाभावेन तावन्मात्रोपबृंहणस्याविरोधात्, तत्तद्गुणविग्रहविभूत्यादिपरिकर्मितभगवदाकारानुरूप-प्रपदनमन्त्रभेदस्याप्युपपत्तेः । विवाहोपनयनसीमन्तचौलादयोऽपि मात्रया भिन्नमन्त्रक्रियादयः कल्पसूत्रभेदेन दृश्यन्ते । नच तावता विवाहादिसंस्कारविशेषरूपत्वमपहाय कर्मान्तराणि भवन्ति । नचाधिकारिवैचित्र्यादन्यथा, यथा अर्चनादि तान्त्रिकसंज्ञिकविभवादिमन्त्रान्तरप्रभवं सर्वाधिकारं, तथा न्यासोऽप्यहिर्बुध्न्यसात्यकितन्त्रादिपठित[:]तान्त्रिकमन्त्रान्तर-करणकस्तद्योग्यस्सर्वाधिकार इत्यत्रापि न विरोधः । * वसुरण्यादिप्रणवपर्यन्तमन्त्रानुबन्धी तु न्यासो निषादस्थपत्यादिव-द्विशेषवचनाभावादधीतवेदानां त्रैवर्णिकानामेवेति नापशूद्राधिकरणविरोधोऽपि । एवं वैदिकतान्त्रिकमन्त्रेष्वपि यथा-विधानमधिकारात् तैरपि कैश्चित् स्वाधिकारानुरूपो न्यासो युक्तः । अमन्त्रकविधानेऽपि क्वचित्तथैव [तत्र] तन्त्रशास्त्रार्थ इति । अत एव हि प्रपत्तिशास्त्रस्य वर्णचतुष्टयसाधारण्यमुक्तम् **श्रीसात्त्वततन्त्रे**—

*** त्रयाणां क्षत्रियादीनां प्रपन्नानां च तत्त्वतः । अमन्त्रमधिकारस्तु चतुर्व्यूहक्रियाक्रमे ।। इति ।**

नच वचनविरोधे न्यायः । तथाऽपि प्रत्यक्षश्रुतिसिद्धन्यासविपरीताकारन्यासोपदेशो बाधित एव स्यादिति चेन्न; तच्छायानुकारिणो न्यासान्तरस्य विधानोपपत्तेः तद्बाधायोगात् । श्रुतिशिरःशेखरेण स्वतः सर्वज्ञेन भगवता निखिलजगदुद्धरणाय प्रणीते विप्रकीर्णानन्तशाखनिगमसंग्रहात्मके पञ्चरात्रशास्त्रे प्रणीतानां श्रुतिद्वयविरोधवत् विकल्पतः स्थापनीयत्वात् । अत एव अङ्गभूतपुरुषविद्यायां यज्ञावयवादिकल्पनभेदोऽपि निर्व्यूढः । भाष्ये ब्रह्मविद्याङ्गभूतपुरुषविद्योक्तिरप्यविरुद्धा, प्रपदनस्यापि ब्रह्मविद्यात्वाविशेषात् । यदा तु *तस्यैवं विदुषो यज्ञस्येत्यादिकं न्यस्तात्मनो नैरपेक्ष्यप्रतिपादनार्थवादरूपमभिमतम्; तदा तु भगवत्सुदर्शनाश्रययज्ञादिकल्पनमपि नैरपेक्ष्यपरमिति फलतः समानार्थमेव । तथा च *पुरुषविद्यासूत्रस्य शाखान्तरगतपुरुषविद्यातस्तैत्तिरीयपुरुषविद्याया भेदमात्रे तात्पर्यम्, भाष्येऽप्यङ्गशब्दो विध्यङ्गार्थवादपरत्वेऽपि अविरुद्ध इति भाव्यम् । अत्यन्तानङ्गत्वाभ्युपगमादेव मन्त्रविशेषविधिश्चिन्तनीयगतिविशेषविधिश्चोपपन्न एव । तदावृत्त्यनावृत्ती तु तदङ्गकेन न्यासेन समानयोगक्षेमतया तन्निष्कर्षादेव निष्कर्षणीये । *सकृदेव प्रपन्नायेत्यत्रापि प्रपदनविध्यभावेऽपि, अभयप्राप्तिकामो मां प्रपद्येतेति वाक्यतात्पर्यस्य सिद्धत्वात्, रामगुणविशेषप्रतिपादनपरत्वेऽपि वाक्यस्य गुणविशेषश्रुत्यर्थापत्त्यैव प्रपदनीयत्वसिद्ध्या प्रपत्तिसिद्धेः, तस्यैव गुणस्य शास्त्रान्तरैः,

*स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः । अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥

इत्यादितत्रत्यवचनबलाच्च परव्यूहविभवादिसर्वावस्थासाधारणत्वात्, सर्वदा सर्वैः प्रपदनीयत्वस्यापि सिद्धौ सिद्धं भगवत्प्रपदनविधावेव *सकृदेवेत्यादिवाक्यतात्पर्यम् । आह च शरणागतपरित्राणस्य महापुरुषमात्रसाधारण्यम्—

*श्रूयते हि कपोतेन शत्रुरशरणमागतः । अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥
स हि तं प्रतिजग्राह भार्याहर्तारमागतम् । कपोतो वानरश्रेष्ठ किं पुनर्मद्विधो जनः ॥ इति ।

एवं च *वेदोपबृंहणार्थाय तावग्राहयत प्रभुरिति वेदोपबृंहणतया प्रवृत्ते **श्रीरामायणे** वेदसारभूतोऽयमर्थश्चोपबृंहितो भवति । अत एव ब्राहुः भगवन्तं प्रति **यामुनाचार्याः**—

*ननु प्रपन्नस्सकृदेव नाथ तवाहमस्मीति च याचमानः । तवानुकम्प्यः स्मरतः प्रतिज्ञामिति ।

ततश्च स्वातन्त्र्येण वा फलप्रदत्वं, धर्मान्तरानुबन्धेन वेत्येतावदवशिष्टम्; तत्र वक्तव्यमुक्तप्रायम् । वक्ष्यते चास्य श्लोकस्यायमर्थः—सकृदेवेत्यावृत्तिनैरपेक्ष्यमुच्यते । प्रपन्नायेति प्रार्थनांशो विवक्षितः । तवास्मीत्यात्मनिक्षेपः । यद्वा प्रपन्नायेत्यनेनैव साङ्गशास्त्रार्थस्संगृहीतः । तवास्मीत्यनेन त्वौचित्यात्तवाहं स्यामिति फलप्रार्थनमभिप्रेतम् । उपलक्षणं चैतदभिमतस्य फलान्तरस्य । अथवा प्रपन्नायेति मानसं, याचत इति वाचिकं प्रपदनमुच्यते । *अभयं सर्वभूतेभ्यो ददामि—सर्वभूतनिमित्तस्य भयस्य निवृत्तिं ददामीत्यर्थः ॥ *सर्वपापेभ्यो मोक्षयिष्यामीतिवत् ॥

केचित्तु सर्वभूतनिमित्तभयाभावं सकृदेव ददामीत्यन्वयमिच्छन्ति । तत्रावधारणसामञ्जस्येऽपि व्यवहितान्वयत्वमयुक्तम् । पक्षान्तरे चावधारणं प्रगुणमेव, *सकृदेव प्रपन्नस्येत्यादिशास्त्रप्रपन्नितप्रपदनावृत्तिप्रतिषेधज्ञापनेन अधिकोपकारात् । सकृदेवाभयं ददामीत्युक्ते तु सहसा समस्तभयनिवृत्तिरुक्ता स्यात्; तच्च सर्वभूतेभ्योऽभयं ददामीत्येतावति निर्दिष्टेऽपि फलतीति मन्दप्रयोजनं तदभिधानम् । प्रस्तुतायां विभीषणकृतायास्सकृत्प्रपत्तेः फलाविनाभावप्रतिपादनं चोचितम् । *ननु प्रपन्नस्सकृदेवेति भगवद्यामुनाचार्यवाक्ये च सकृदेवानुकम्प्य इत्यन्वयः प्रसज्येत; तच्चात्यन्तास्वरसम्; न चान्यथा

तैरनूदितमिति वक्तुं वाग्देवताऽपि क्षमते । अतो यथास्थानमेवान्वय इति अन्तर्वर्ती संवित् । *अभयं सर्वभूतेभ्य इत्यत्र प्रकृतानुपयोगमुपसर्जनान्वयमुपपदविभक्तिं च कारकविभक्तिसंभावनायाममृष्यमाणाः कतिचन सर्वभूतेभ्य इति चतुर्थीं व्याचक्षते । तत्र च पक्षे प्रपत्तेस्सर्वाधिकारत्वं फलिष्यति । वाक्यभेदस्तु विवरणकारप्रपञ्चितप्रक्रियया पञ्चमीपक्षेऽपि भवन् प्रकृतोपकारभूयस्त्वादिबलाच्चतुर्थीपक्षे सोढव्यः ; एकवचनबहुवचनयोस्सामानाधिकरण्यासंभवात् । संभवत्यां गतौ [अगत्या] वाक्यभेदाश्रयणं चायुक्तम् । नच सर्वभूतेभ्य इति गोवलीवर्दन्यायात् प्रपन्नेतरविषयम्, येनैकवाक्यता स्यात् ; प्रपन्नेतरेषामभयप्रदानं च प्रकृतानुपकारकं प्रमाणविरुद्धं च । अतो न विषयव्यवस्था शक्या । अतः प्रपन्नायाभयं ददामि, तच्च सर्वभूतेभ्य इति वाक्यभेद एव । प्रपन्नायाभयप्रदानं सिद्धं कृत्वा वा तदनुवादेन सर्वभूतेभ्य इति विधिः । यत् सकृदेव प्रपन्नाय तवास्मीति च याचते अभयं ददामीति, तत् सर्वभूतेभ्यः, न केवलमनपकारिभ्यः सुग्रीव-विभीषणादिभ्यः, अपि त्वाद्रापराधेभ्यो रावणवायसादिभ्योऽपीत्युक्तं भवति । तथाच स्वयमेवाह—

* विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् । आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया ॥ इति ।

भवतु वाऽत्र श्लोके या काचिद्योजना ; प्रपत्तिसंज्ञकः शीघ्रलाभहेतुर्निष्प्रमादः स्वाभिमतफलोपायस्तावदिह सिद्ध इत्यलमतिक्षोदेन ॥

* सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज,
* मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यास्यसि ह्यकुतोभयम् ॥

इत्यनयोस्तावद्विध्यभावचोद्यं बाधिर्यकृत्यम् ; प्रथमपुरुषवन्मध्यमपुरुषेऽपि विधिशक्तेरनपायात्, अर्जुनाद्युद्देशेन प्रपत्ता-वप्यर्थतस्सर्वसाधारण्यात् । अन्यथा एवंविधेषु सर्वेष्वप्यनाश्वासप्रसङ्गात् । परित्यागांशे तु विध्यनुवादविकल्पानुपपत्त्यादयः परिहृता एव । अङ्गप्रपत्तिविधिरित्यादि तु परिहरिष्यते—* सर्वगुह्यतममित्यादिना । पूर्वप्रस्तुतशास्त्रसारार्थविषयेण कथ-मस्य संगतिरिति चेत्तदवहितमनाः शृणु—

* इति ते ज्ञानमाख्यातं गुह्माद्गुह्यतमं मया । विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥

इत्युक्तेऽर्जुनस्य विषादमालोक्य स भगवान् वासुदेवश्चिरकालसाध्यदुष्करापवर्गोपायश्रवणेन शोचतोऽस्याविलम्बितफलप्राप्ति-सापेक्षतत्साधनसमर्थपुरुषविषयमुपायान्तरम् * सर्वगुह्यतममित्यादिनोपदिशति । तत्र भूयश्शब्दः श्रवणावृत्तिमात्रपरः, तावत्येव तदुपपत्तेः, प्रयुक्तेश्च । अत एव नात्रास्वारस्यम् । * मन्मना भवेत्यादिना तु वक्ष्यमाणप्रपत्तिनिष्ठस्य मध्यमां वृत्तिमनुतिष्ठतः बुद्धिविशेष उच्यते । यावज्जीवमनुष्ठेयेषु सर्वेषु नित्यादिकर्मसु मन्मना भव—भगवानेव स्वशेषभूतेन मया स्वात्मानं प्रीतं कारयतीत्यनुसंधत्स्व । मद्भक्तः—सर्वशेषिणः सर्वभूतसुहृदः समाराधनमिदमिति प्रीतिपूर्वकमनुतिष्ठ । मद्याजी—नित्यकर्मस्वनुप्रविष्टान् देवानृषीन् पितॄन्मदात्मकान्यथावत्पश्यंस्तद्यजनेऽप्यनन्ययाजी भव । मां नमस्कुरु—मां प्रति वाङ्मनःकायैः प्रह्वीभव । एवंभूतो वक्ष्यमाणप्रपत्तिनिष्ठस्त्वं सर्वपापेभ्यो मया मोचितो मामेवैष्यसीति । एवं च नवमा-ध्यायोक्त एव शब्दः प्रकृतोपयुक्तं प्रमाणान्तरसिद्धमर्थं प्रतिपादयतीति न प्रत्यभिज्ञाविरोधः । स्पष्टश्चैवं प्रकृतोपयोगः ॥

यद्वा, *यथेच्छसि तथा कुर्वित्यस्यानन्तरमर्जुनस्य विषादमवलोकयन् स भगवान् पूर्वोक्तेष्वर्थेष्वेतदेव हिततमम्, अत इदमेव त्वया कर्तव्यमित्यनिर्धारणाद्वा प्रागुक्तानां दुष्करत्वादेर्वा शोकोऽस्य संवृत्त इति विवेक्तुं प्रथमं प्रागुक्तेष्वर्थेषु सारमंशं निष्कृष्य * सर्वगुह्यतममित्यादिना श्लोकद्वयेनाह । तावताऽप्यनुपशान्तशोकमर्जुनमाशुकारिसर्वाधिकारसर्वेष्ट-

साधनसर्वानिष्टनिवर्तनक्षमत्रह्मास्त्रतुल्यसकृत्कर्तव्यसुकरनिष्प्रतिबन्धोपायोपदेशेन * मा शुच इति पर्यवस्थापयतीति किं नोपपद्यते ? एवं सत्युपदिष्टे प्रपत्तिशास्त्रार्थेऽर्जुनस्य निष्ठा कथं न जायत इति चेत् ; किं श्रुतं सर्वं श्रोतारोऽनुतिष्ठन्ति, प्रतिसंदधते वा ? विस्मृतार्थस्य ह्यर्जुनस्य पुनः प्रतिबोधनाय अनुगीतावतारः । तर्हि * स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तवेत्यादिकं कथं सङ्गच्छते ? इत्थम्—कर्मयोगज्ञानयोगभक्तियोगप्रपदनाख्येषु चतुर्ष्वपि पर्वसु वर्णाश्रमधर्माणामपरित्याज्यत्वं हि स्थापितम् । ततश्च युद्धाख्यस्य क्षत्रियधर्मस्यार्जुनाय सर्वावस्थायामवश्यानुष्ठेयत्वमुपदिष्टम् । तच्चैवं विजानताऽर्जुनेनाधिकारानुरूपे यत्र क्वचिन्मोक्षोपायपर्वणि स्थास्या[मः]मि, सर्वावस्थानुवृत्तः स्वधर्मस्तावत्परिपालनीय इति मन्वानेन युद्धे प्रोत्साहयन्तं भगवन्तं प्रति * करिष्ये वचनं तवेति स्वस्य युद्धायोद्योग आवेदित इति सर्वं पूर्वापरं सुसङ्गतम् । अतः स्वतन्त्रप्रपत्तिविधिपरोऽयं श्लोकः । भाष्यानुगुण्येनाप्यस्य योजनान्तरं वक्ष्यामः । अयमत्र सर्वविधिपरामर्शसिद्धोऽनुष्ठेयार्थः । अविलम्बिताभिमतफलसिद्धौ स्वस्योपायान्तरशून्यतामालोच्य महता शोकेनावसीदन् पुरुषस्तत्फलसिद्ध्यर्थमल्पशक्तेः स्वस्य दुष्कराण्युपायान्तराणि परित्यज्य तत्फलप्रदानोचितगुणगणविशिष्टे परस्मिन् सकृत्प्रार्थनामात्रेणापेक्षितं दास्यतीति संबन्धशालसहकारिविशेषादिपरामर्शातिशयेन महान्तं तावत् फललाभमाश्वरेणाप्यक्षोभणीयं विश्वासमुपजनय्यानुकूल्यसंकल्पप्रातिकूल्यवर्जनाभ्यामपायजाते विरताभिसन्धिः आकिञ्चन्यानन्यगतित्वप्रकाशनपूर्वकं गोप्तारमेवोपाय[न्तर]स्थाने निवेशयन्निष्टप्राप्तिपर्यन्तानिष्टनिवृत्तिलक्षणामात्मरक्षां सकृदपेक्ष्य स्वात्मानं द्रव्यान्तरवन्निरशङ्कं निक्षिप्य मद्रक्षणे गुणादिप्रेरितस्समर्थो रक्षकः स्वावद्यनिवृत्त्याद्यर्थं स्वयमेव प्रवर्तत इति विस्रब्धः, स्वयं निर्भरस्सन् अन्तःपुरपुरन्ध्रीन्यायेनानन्यो वर्तेत । सचायं न्यायः श्रीमत्सुन्दरकाण्डहृदयवेदिनां सहृदयानां सुस्पष्टः ।

श्लो. अप्राप्तिनः परिहरन् स्वपरैः स्वरक्षां तादर्थ्यधीपरिहृतस्वपरार्थभावः ।
अन्योपभोगविरहादनघः प्रपन्नः भुंक्ते स्वभोगमखिलं पतिभोगशेषम् ॥ ३८ ॥ इति ।

यत्तु * शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिनाः । तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम् ॥ इत्यत्र शरणागत्यर्थवादमात्रत्वमिति ; तत्तथाऽस्तु मा वा ; तथाऽपि फलकरणदर्शनात्तेनैव तद्विधिसिद्धिः । अन्यथा तदर्थवादस्यैवात्र निष्प्रयोजनत्वप्रसङ्गः । अविहिते शास्त्रार्थेऽर्थवादनैरपेक्ष्यात् वाक्यान्तरविहितप्रपत्त्यनुवादेन रात्रिसत्रार्थवादवत्फलविधिरयम् । नच * पर्णमय्यादिवत् फलवादमात्रम्, उपासनप्रयोगबहिर्भावस्य वक्ष्यमाणत्वात् । फलसिद्धेर्व्यवधानसहत्वं चात्र परिहरिष्यते । अत एव * तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणा इत्यादिप्रतिबन्दीनिस्तारसिद्धिः । **सात्यकितन्त्रे** प्रपत्त्यध्याये स्फुट एव सकृत्कर्तव्यसमन्त्रकनिक्षेपविधिः—

* अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् । मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्यति ॥ इति । तन्मूलश्रुतौ चान्यनिरपेक्षस्स्पष्ट एव विधिः—

* ग्रसेत् संहारसमये जगच्च वदराण्डवत् । लीलया यस्तु भगवान् तं गच्छ शरणं हरिम् ॥ इति ।

निषेधभङ्गः ॥ तदेवमीदृशैश्चनशतैः स्फुटन्यवसितस्य प्राक्तनैर्विशिष्टाधिकारिभिरनुष्ठितचरस्य प्रत्यक्षिताभिमतफलस्य अद्ययावदतिप्रसिद्धधर्ममभावानुष्ठानस्य निषेधोऽपि न संभवति । यश्चासौ निषेध उक्तः * नान्यः पन्था इति ; सोऽप्युत्सर्गापवादनयेन विहितव्यतिरिक्तविषयत्वात्, विधेश्च अनुपदमेव समर्थितत्वात्, प्रकृतविद्या(न्य)व्यतिरिक्तविषादिकन्यासविद्यामपि न निषेद्धुमलम् ॥

यद्वा, * तमेवं विद्वानमृत इह भवतीत्येतदपि सर्वविद्यापूर्वरङ्गतत्त्वज्ञानमात्रपरत्वाभावेऽपि सर्वविद्यास्वरूपमेव ब्रह्मवेदनात्मत्वेनाविशेषादभिधायोत्तरपूर्वाघाश्लेषविनाशलक्षणमिहामृतत्वं वदतीति न कश्चिद्दोषः । एवंशब्दश्च प्रकृतमाहात्म्येन सह तत्तद्विद्यावेद्याकारं सर्वमुपस्थापयति । किंच * नान्यः पन्था इत्यत्र प्रकृतमपि वेदनमन्यत्वस्य प्रतियोगित्वेन नान्वेति; अपितु तमिति प्रकृतः परमपुरुष एव; तस्मात्परमपुरुषादन्यः पन्था न विद्यते, स एव तु पन्था इति वाक्यार्थस्तु प्रपत्तेरत्यन्तान्तरङ्गभूतः । श्वेताश्वतरास्तु * महान् प्रभुर्वै पुरुषस्सत्त्वस्यैष प्रवर्तक इति तमेव महापुरुषमधीयानास्तस्यैवान्यत्वप्रतियोगित्वमवधारणनिर्देशेन स्पष्टमामनन्ति—* वेदाहमित्यारभ्य * तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनायेति । तस्मात् * अमृतस्यैष सेतुरिति न्यायेन परमपुरुषस्यैवामृतत्वोपायत्वमिह प्रतिपाद्यते । वेदनेतरनिषेधभाष्यं तु फलिताभिप्रायेणेति **अधिकरणदर्पणे** दर्शितमस्माभिः । अतो नैवंविधेषु विद्यान्तराणामिव प्रपदनस्यापि निषेधप्रसङ्गः ॥

यत्तु * नाविरतो दुश्चरितादित्यादिना समाधिरहित[स्य]साधननिषेधसिद्धिरिति; तदपि न, प्रज्ञान शब्देन मोक्षोपायतया तत्तत्प्रकरणोदितसमस्तविद्यासंग्रहात् । ततश्च तत्तदनुरूपचित्तसमाधानादेरत्र विवक्षिततया प्रपदनविरोधाभावात् । प्रपदनमपि स्वसिद्ध्यनुरूपं स्वविषयगोचरं चित्तसमाधानविशेषमपेक्षते, तत्सिद्ध्यनुरूपां च बाह्यान्तरकरणोपरतिम् । अन्यथा कारणाभावे कार्याभाव इति स्यात् । दुश्चरितविरतिस्तु भगवदाज्ञानुवर्तिषु सर्वेषु सामान्यतः प्राप्ता; प्रपन्ने तु सर्वपापपरिहाराशक्तिनिमित्तशोकाविष्टे परमैकान्तिनि कैमुतिकन्यायसिद्धा । अत एव प्रपन्नमधिकृत्यैवमादिष्टम्—* मनीषी वैदिकाचारं मनसाऽपि न लङ्घयेदिति । देशकालादिदोषसंभवं तु दुश्चरितमुषस्तावित्र चाक्रायणे सप्तर्षिविश्वामित्रादिष्विव च सर्वेष्वपि धार्मिकेषु संभवतीति न प्रपन्नस्य कश्चिद्विशेषः । अतोऽनया श्रुत्या न प्रपदननिषेधः फलति ॥

यत्तु * नाहं वेदैरित्यादिना समस्तहेत्वन्तरनिषेधपूर्वकमनन्यया भक्त्यैव प्राप्तिरुच्यत इति; तत्रापि न तावत् वेदनतपोदानेज्यावत् प्रपदनमपि कण्ठोक्त्या प्रतिक्षिप्तम् । नचानन्ययेत्यनेन सामान्यतस्तस्यापि निषेधः, विधिबलादेव तत्संकोचस्योक्तत्वात् । अपिच नात्रानन्ययेत्युपायान्तरं व्यवच्छिद्यते; प्रयोजनान्तरादिनैरपेक्ष्यस्य विवक्षितत्वात्, * पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया, इत्यादिवत् । नच तत्रापि तथैवेति वाच्यम् । ऐश्वर्याद्यर्थिभक्तेरेव व्यवच्छेद्यत्वेन प्रकरणादिसिद्धत्वात् । तथाऽपि च तत्र भाष्यम्—* अनन्यचेतास्सततमित्यनन्यया भक्त्या लभ्य इति । एतेन * नायमात्मा प्रवचनेन लभ्य इत्यादिश्रुतिरपि निर्व्यूढा । * भक्त्येकलभ्य इत्यादिषु तूपायान्तरमेव साक्षान्निषिध्यत इति चेत्; सत्यं तथाऽपि संकोचः पूर्वोक्तः । अपि चात्र प्रीतिमात्रलभ्यो भगवानिति तत्सौलभ्ये तात्पर्यम् । तच्च प्रपदनस्यापि साहाय्यमाचरति । एवं हि तत्रतत्रोच्यते—

* पत्रेषु पुष्पेषु फलेषु तोयेष्वकृतलभ्येषु सदैव सत्सु ।
भक्त्येकलभ्ये पुरुषे पुराणे मुक्त्यै किमर्थं क्रियते न यत्नः ॥ इति ।

किंच फलार्थित्वमन्तरेण[ापि] न सर्वत्रोपायाधिकारः, फलं चात्र परं ब्रह्मैवेति प्रपन्न[स्यैव]स्यापि परमात्मनि रागावश्यंभावात्, तावत एव भक्तिशब्दप्रवृत्तिनिमित्तत्वात्, समाधिरहितोऽपि प्रपन्नो भक्त एवेति को विरोधः? अतो न क्वचिदपि श्रुत्यादिसिद्धस्य न्यासाख्योपायस्य निषेधसं[भवा]भावनावकाश इति ॥

ऐक्यभङ्गः ॥ ऐक्यान्यप्युक्तानि सात्यकितन्त्राहिर्बुध्न्यसंहितालक्ष्मीतन्त्रादिषु पृथक्त्वेन प्रपञ्चनेन निरस्तानि। किंच मोक्षोपायविधिवाक्यावगतवेदनं, प्रपदनोपासनरूपं सर्वं परविद्यावर्गं संग्रहीतुमलम्, तत्रान्यतरपरित्यागे हेतुं न पश्यामः। अनावृत्तविशेषे संभवति गौरवादावृत्तं विशेषं परित्यजेत्; अथ गौरवमनुमत्य तत्र न पर्यवस्येत्, तदा तद्वैयर्थ्यप्रसङ्गादनावृत्तं नासीदेदिति चेत्; तन्न, अधिकारिविशेषप्रतीतिनियमेन गुरुलघुव्यवस्थायाः स्थापितत्वात्। यथा स्नानादिसामान्यशब्दास्तत्तदधिकारिविशेषोचितं तंतं स्नानादिविशेषं गुरुं लघुं च संगृह्णन्ति, तथाऽत्रापि। यथा *वसन्तेवसन्ते ज्योतिषा यजेत, *ज्योतिष्टोमेन स्वर्गकामो यजेतेति विनियोगपृथक्त्वेनावृत्तानावृत्तज्योतिष्टोमयोः ज्योतिष्टोमशब्दः, तथाऽत्राप्यावृत्तानावृत्तयोः प्रपदनोपासनरूपयोः ब्रह्मविद्ययोः वेदनादिशब्दपर्यवसाने को विरोधः? अधिकारिभेदश्चात्रापि दर्शितः। ननु वेदनशब्दस्य तस्यामेव विद्यायां विहितैः विशेषैः विशेषितत्वात् न न्यासावलम्बनसामर्थ्यमस्तीति चेत्, तर्हि सिद्धं नस्समीहितम्। तत्र वचसां तदुपासनपर्यवसानान्न्यासस्य च विद्यान्तरवत् स्वशब्देनैव साङ्गस्य विधानात्। तथाच सति शब्दार्थपर्यालोचनादेव न्यासस्यापि वेदनरूपत्वं सिद्धमिति न कश्चिद्दोषः। एवं च सति *नाना शब्दादिभेदादिति सूत्रमत्रैव निरङ्कुशप्रसरम्। अतो नात्र सूत्रभाष्यादिविरोधः। नच कुमतिमतावतारः; सकृत्करणेऽपि वाक्यार्थज्ञानादतिरिक्तत्वात्, ईशेशितव्यादिविशेषजालगर्भत्वात्, कर्माद्यङ्गत्वाभावेऽपि नित्यनैमित्तिकाद्यनुपरोधस्य दर्शितत्वात्, अधिकार्यन्तरसद्भावेनासकृदावृत्तानुसंधानप्रतिक्षेपाभावाच्च ॥

यत्तु भगवत्पराशरादयो योगमेव विदधिरे दधिरे चेति; तदपि तच्छक्तिमधिकृत्योक्तेः, स्वयमपि तच्छक्तत्वाच्चाविरुद्धम्। न चात्यन्तं भगवत्पराशरादिभिरपि प्रपत्तेरनुक्तिः; *परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम्, *कमलनयन वासुदेव विष्णो धरणिधराच्युत शङ्खचक्रपाणे। भव शरणमितीरयन्ति ये वै त्यज भट दूरतरेण तानपापान् ॥ *सोऽहं त्वां शरणमपारमप्रमेयमित्यादिषु प्रपत्तेरपि तैः बहुलमभिधानात्। अङ्गाङ्गिविषयतया भक्तिशास्त्रार्थैक्यं भक्त्यविशिष्टार्थत्वं वा तत्रतत्रास्त्विति चेन्न; सर्वत्र तथेति नियन्तुमशक्यत्वात्। अङ्गाङ्गिभावबलादेव एतत्सिद्धिरिति चेन्न, विनियोगपृथक्त्वेनाङ्गत्वस्वतन्त्रत्वयोर्यथाधिकारमुपपत्तेः। अतोऽङ्गस्याप्यधिकारिविशेषविषयतयाऽङ्गितुल्यफलत्वेन विकल्पोऽपि युक्त एव। यदि तत्र गुणान्तरमपेक्षितमिति मन्यसे, तच्चात्रापि भूयिष्ठमस्त्येव—विलम्बाक्षमत्वम्, उपायान्तरभीरुत्वं, भगवद्गुणवत्ताप्रकर्षानुसंधाननिमग्नत्वमित्यादि। अतः फलतारतम्यमत्राप्रयोजकमेव। अथवा तदप्यत्र विद्यते, प्रपत्तेरविलम्बितप्रापकत्वेन फलातिशयात्। अथ लघोयसः फलन्यूनत्वमपेक्षितमिति, तदप्यसत्; दयालोस्सार्वभौमस्य चिरसेवारहितेष्वपि आर्तेष्विवाकिंचनेष्वनन्यगतिषु प्रपन्नेषु भगवतोऽपि दयालोर्दयनीयत्वातिशयसंभवेन अविलम्बितफलत्वोपपत्तेः। यः स्वल्वीश्वरमेव तादृशमौपनिषदमभ्युपेयात्, स कथमस्मिन्नर्थे सहृदयो विमन्येत। तथा च स्मर्यते—

*सर्वज्ञोऽपि हि विश्वेशस्सदा कारुणिकोऽपि सन्। संसारतन्त्रवाहित्वाद्रक्षापेक्षां प्रतीक्षते ॥ इति।

*यद्येन कामकामेनेत्यादि च प्रतिसंधानीयम्। यत्पुनरुक्तम्, अङ्गाङ्गिभावे संभवत्यष्टदोषदुष्टो विकल्पो न न्याय्य इति, तदपि बालिशजल्पितम्, विनियोगपृथक्त्वस्य स्थापितत्वात्। अन्यथा विद्यान्तराणामपि परस्परमङ्गाङ्गिभावप्रसङ्गात् न क्वचिदङ्गमिति, सर्वत्र तथाऽतिप्रसङ्गात्। सूत्रितं च तेषामाश्रमकर्मणामङ्गत्वं स्वतन्त्रत्वं च—*विहितत्वाच्चाश्रमकर्मापि, *सहकारित्वेन चेति।

यत्तूक्तं भजनप्रपदनशब्दौ स्थानतस्समानार्थतया क्वचित् प्रयुज्यमानौ दृश्येते इति, तदसिद्धम् ; प्रपदनशब्दस्य लक्षणतो भिन्नार्थस्याप्यङ्गिनाऽनतिदूरविप्रकर्षात् अजहल्लक्षणया तत्स्थाने प्रयोगोपपत्तेः । यथा राजकुलं गच्छति, राजानमभिगच्छति, राजानं सेवते, राज्ञि वर्तत इति । अत एवाश्वमेधिके श्रीवैष्णवधर्मशास्त्रे सहप्रयोगाद्भिन्नार्थत्वमवगम्यते—

* तस्माद्धि त्वां प्रपन्नस्य त्वद्भक्तस्य च भावतः । युष्मदीयान् परान् धर्मान् पुण्यान् कथय मेऽच्युत ॥

इति । यदि च स्थानबलादैक्यमवश्यमभ्युपगन्तव्यम्, तथाऽपि सुदृढनिरूढशब्दार्थभेदाबाधेन जहल्लक्षणयाऽप्युपचार एवाङ्गीकार्यः । अन्यथा क्वचिदपि उपचारवृत्तिर्न स्यात् । न क्वचिदङ्गाङ्गिभावेनोपचारवृत्त्या समानार्थत्वाश्रयणमात्रेण सर्वत्र तथेति नियमः, अतिप्रसङ्गात् । अतो नैक्यैरप्युक्तरूपैः स्वतन्त्रप्रपत्तिप्रतिक्षेप इति ॥

अशक्तिभङ्गः ॥ यत्तु सर्वव्यापारोपरमापेक्षणादशक्यरूपत्वमुक्तम्, तदसत् ; तथाविधोपरमस्यानभ्युपगमात् । नहि यः कश्चिदपि प्रपन्नोऽत्यन्तनिर्व्यापारो दृष्टः श्रुतो वा । * सर्वधर्मान् परित्यज्येत्यादिकं तु प्रागेव निर्व्यूढम् । प्राच्योऽपि भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिनिवृत्तिः प्रपत्तिरित्याहुः ; ननु सर्वप्रवृत्तिनिवृत्तिरिति । भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिश्च स्वरक्षणार्थं स्वातन्त्र्येण स्वव्यापारो वा, पुरुषान्तराश्रयणं वा, दुस्सहब्रह्मविदपचारादि वेति तदखिलं परित्याज्यमेव, ब्रह्मास्त्रबन्धराजसेवाराजान्तरङ्गविरोधादिन्यायात् । यानि पुनः स्वभावप्राप्तानि निमीलनोन्मीलनादीनि, शरीरधारणमात्रहेतुकानि विहिताप्रतिषिद्धानि यानि लौकिकानि कर्माणि, यानि च यावच्छरीरं यथाशक्ति भगवत्समाराधनत्वबुद्ध्या तत्प्रीत्यर्थं सर्वैरप्यवश्यमनुष्ठेयानि नित्यनैमित्तिककर्माणि, न तेभ्योऽप्युपरमोऽपेक्षित इति नाशक्योपदेशत्वमवगच्छामः । निवृत्तिसापेक्षतयाऽत्र प्रपन्ने निवृत्त्युपचारः ॥

यत्पुनः प्रवृत्तिरूपात् भक्तियोगान्निवृत्तिरूपस्य प्रपदनस्य दुष्कर[तम]त्वादशक्तं प्रत्यशक्यतमोपदेशेन प्रपत्तिशास्त्रनैरर्थक्यमुक्तम्, तदप्यविशेषज्ञतामभिव्यनक्ति, लोकसिद्धत्वात् तत्सौकर्यस्य । तथा हि—सार्वभौमेन राज्ञा जिघांसितः कश्चिदपराधी कण्ठावसक्तकर्पटखण्डो दैन्यमभिव्यञ्जयन् भयचकितस्सगद्गदं रक्षापेक्षी स्वात्मानं पादयोः समर्पयति । कश्चित्तु प्रभूतप्राभृताद्युपकरणस्तुतिनतिसेवाङ्गनादिभिरात्मानमनन्ययन्नाराधयति । तत्रोभयोरपि राज्ञः क्षमा निर्विशेषा दृश्यते ; प्राक्तने वा समधिका । तद्वदत्रापि न्यासोपासनयोस्सौकर्यदौष्कर्ये भावयन् समाश्वसिहि । कथं तर्हि * उपायस्सुकरश्चायं दुष्करश्च मतो ममेत्यादि वचनमिति चेच्छ्रूयतामवधानेन—अनन्तापराधसन्ततो हि जन्तुरतिलघीयसा सकृत्कृतेन केनचिन्मानसेन कायिकेन वाचिकेन समुचितेन वा व्यापारेण कथमवधूतनिखिलापराधो विधिशिवसनकादीनामपि मनोरथपथातिलङ्घि पदमविलम्बितमधिरोक्ष्यामीति प्रवृद्धबुद्धिर्दौर्बल्यः सुदूरमपसृत्य गुरुतरोपायं मृगयमाणो विद्यते । कश्चित्तु महीयसा भागधेयेन भगवति कमलापतौ पुण्डरीकाक्षे सर्वातिशायिसौशील्यवात्सल्यादिगुणगणमनुसंदधानः किरातकपोतसुमुखक्षत्रबन्धुमुचुकुन्दत्वष्टृशुनश्शेफद्रौपदीविभीषणवायससुग्रीवराक्षसीप्रभृतिशरणागतवृत्तान्तशीलनशिक्षितान्तःकरणो निश्शङ्कमभिजिगमिषति । अतस्तथाविधगुणाध्यवसायादेर्दुर्लभत्वात् तत्प्रशंसाद्यर्थमेवोक्तम् * उपायस्सुकरश्चायं दुष्करश्च मतो ममेत्यादिकम् । अत एव ह्युच्यते—

* सकृदेव हि शास्त्रार्थः कृतस्संसारतारकः । नरस्य बुद्धिदौर्बल्यादुपायान्तरमिष्यते ॥ इति ।

अतः किंचित्प्रति दुष्करत्वोक्तिः, किंचित्प्रति च सुकरत्वोक्तिः ; अतो नाशक्योपदेश इति संक्षेपः ॥

अख्यातिभङ्गः ॥ यत्पुनरख्यातिवशेन शङ्कासंभवान्महाविश्वासासिद्धेः प्रपत्तिस्वरूपासिद्धिरित्युक्तम्, तदपि तवैवाख्यातिमापादयति । तथा हि—किमख्यातिशब्देन प्रपदनस्वरूपस्यैवा[प्र]सिद्धिर्विवक्षिता ? उत पृथगुपायत्वस्य ? न प्रथमः, प्रागेव प्रतिक्षेपात् । न द्वितीयः, अहिर्बुध्न्यसंहितादिषु पृथक्त्वेनैव स्पष्टमुपदेशस्योक्तत्वात् । न चात्र भूयसां न्यायावतारः ; भूयोभिरनुपदिष्टत्वमात्रेण कतिपयोपदिष्टप्रतिक्षेपायोगात्, अन्यथा अतिप्रसङ्गात् ; प्रपत्तेः पृथगुपायत्वं नास्तीति तु भूयोभिरनुपदेशात् । इदं च विध्यभावचोद्यपरिहारेण दत्तोत्तरमिति किमत्र प्रयासेन ॥

यत्तु सांख्ययोगादिष्वस्यानुपादानम्, किं तेन, सर्वैः सर्वस्यानुपादानात् ? न हि कापिले कर्मयोगः, पातञ्जले वा ज्ञानयोग उपादीयते । नच तावता तयोः प्रतिक्षेपः । नचात्यन्तं वयं सांख्यादीननुवर्तामहे । ये तावदीश्वरमेवापह्नुवते, इच्छन्तोऽपि प्रतिफलनसमानं तस्यैश्वर्यमभिमन्यन्ते, कथं तान् यथावस्थितेश्वरप्रपदने प्रमाणीकुर्मः ? प्राचेतसपराशरपाराशर्यशुकशौनकादयस्तु परमर्षयो निबध्नन्त्येव भूयसा प्रबन्धेषु प्रपत्तिमिति किमन्यैः कार्तान्तिकप्रायैः मितंपचैर्मुनिभिः ? उक्तं च **श्रीविष्णुचित्तैः** श्येनकपोतीयकपोतोपाख्यानकाकविभीषणक्षत्रबन्धुमुचुकुन्दगजेन्द्रद्रौपदीतक्षकशतमखादिषु मोक्षार्थतया क्षणकालनिर्वर्त्यप्रपदनार्थदर्शनात् अवधिराणां तत्र मुख्यत्वमिति । ततश्चात्रातिर्यगतिप्रसिद्धमेव प्रपत्तिरूपमुपायमप्रसिद्धमभिमन्यमानः धर्ममेव नूनमपह्नोतुमीहते । आह च भगवान् व्यासः धर्माधर्मप्रसिद्धेर्दुरपह्नवताम्—

* इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये । आचण्डलं मनुष्याणामलं शास्त्रप्रयोजनम् ॥ इति ।

संप्रदायविरोधभङ्गः ॥ यत्तु संप्रदायविरोधत इति, तदपि गुरुजनवरिवस्यादवीयसे देवानांप्रियाय रोचते । प्रपदनस्य पृथगुपायत्वसंप्रदायो नास्तीति वदतां किं तत्र उपदेशानुष्ठानपारंपर्यं नास्तीति मतम्, उत निबन्धपारंपर्यं नास्तीति ? नाद्यः, असिद्धेः ; श्रुतिस्मृत्याद्यनुसारेण यथोक्तार्थोपदेशानुष्ठानयोर्महात्मसु तथाविधैः परिदृश्यमानत्वात् । न द्वितीयः, निबन्धनाभावेऽप्युपदेशादिपारंपर्येणापि धर्मसंप्रदायस्यान्यत्रापि सिद्धेः ; अन्यथा विशिष्टाचारविलोपप्रसङ्गात् । अविरोधात् परिग्रहाच्च तदङ्गीकार इति चेत् ; तुल्यमत्रापि, तयोरुभयोरपि पूर्वमेव समर्थितत्वात् । विपरीतनिबन्धनात् विरोध उक्त इति चेन्न, वैपरीत्यासिद्धेः । तथा हि—न तावत् भाष्यादिष्वङ्गप्रपत्तिवचनमात्राद्वैपरीत्यम्, उभयाकारयोगित्वेन प्रकरणोपयुक्तान्यतराभिधानोपपत्तेः । नच स्वातन्त्र्यं नास्तीति क्वचिदुक्तम् ॥ **श्रीमद्गीताभाष्ये** तु * सर्वधर्मान् परित्यज्येत्यस्यानेकार्थाभिधानात् अन्यतरानादरस्सूच्यते । अर्थस्वभावाच्च योजनाद्वयपरामर्शिनाम् अतिरहस्यतया गोपितं प्रपत्तिस्वातन्त्र्यं स्वयमेवोन्मज्जतीत्याचार्यमुखादधिगच्छामः । द्वितीयायां तु योजनायां भक्तिसाधनैर्गुरुतरैर्मिथस्तारतम्यवद्भिः अनन्तैर्विकल्प्यमाना प्रपत्तिः कण्ठोक्तसमानन्यायतया मुक्तिसाधनभूतया भक्त्याऽपि विकल्प्येतेति अर्थतो गभीरमभाष्यत । सर्वपापेभ्य इति ह्युपायविरोधिवत् प्राप्तिविरोधिपापवर्गमपि संग्रहीतुमलम् । सर्वधर्मानित्यपि च साधनसाधनवत् साक्षात्साधनमपि संगृह्णीयादिति च । यच्च * तमुवाचेति श्लोके भाष्यम्—*आत्मपरमात्मयाथात्म्यतत्प्राप्त्युपायभूतकर्मयोगज्ञानयोगभक्तियोगगोचरम्, *न त्वेवाहं जातु नासमित्यारभ्य *अहं त्वा सर्वपापेभ्य इत्येवमन्तं वच उवाचेति ; एतदपि चरमश्लोकस्य सामान्यतः स्वतन्त्रपरतन्त्रप्रपत्तिसाधारण्यादिति मन्तव्यम् ॥ * कृत्स्नस्य गीताशास्त्रस्य सारार्थो भक्तियोग इत्येते अर्थाः प्रतिपाद्यन्त इत्यष्टादशाध्यायप्रारंभभाष्यमङ्गाधिकारे प्रपत्तिं प्रत्यपि भक्तेः प्राधान्यात् स्वतन्त्रप्रपत्तिशास्त्रार्थेऽपि मुख्यार्थामुख्यार्थभेदेन वैषम्याच्चेति न विरुद्धम् । अपिच वचनान्तरेषूपात्तेषु नान्यथासिद्धिरुद्भावितुं शक्यते, अधिकारिविशेषविवेकपूर्वकमव्यवहितोपायत्वस्य व्यक्तमुक्तत्वात् । अतो यद्यपि भाष्यादिषु यथाधिकारं

गुरूपायप्रवर्तनाधिकृतेषु *न बुद्धिमेदं जनयेदिति न्यायेन न प्रपत्तिः स्वतन्त्रतयोक्ता; तथाऽपि गद्यरूपायां स्तुतौ *शरीरपातसमये तु केवलं मदीययैव दयया ऽतिप्रबुद्ध इत्यादिना व्यक्तमेव तस्याः पृथगुपायत्वमुक्तम्। तत्र गुणवश्यता-परिहरणरूपमायातरणपरभक्त्यादिप्रार्थनं तु फलोपायसाधारण्यान्नान्यतरपक्षपाति। एतेन *भक्तिमपि प्रयच्छ मे इत्यादिक-मपि निर्व्यूढम्॥ भक्तेश्चात्र फलत्वं स्वरूपतस्सुखरूपत्वात्; तच्च विषयवैशिष्ट्यात्। नचोपायकोटिनिविष्टभक्तिरूपफलान्तर-प्रार्थनायामुपायान्तरफलान्तरत्यागलक्षणप्रपत्तिनिष्ठाविरोधः; प्रपन्नगताया भक्तेः प्रपत्त्यविच्छेदहेतुत्वेन तदनुप्रवेशात्। नच सकृत्कृतस्योपायत्वे किमविच्छेदेनेति वाच्यम्। तस्य स्वकार्यकरणे बाधाभावस्यापेक्षितत्वात्। बाधितज्ञानस्यापि संस्कारकरणवत् प्रतीकोपासनानामारोपगर्भाणां तेनाकारेण बाध्यानामपि फलप्रदानवच्च किं न स्यादिति चेन्न; *महा-विश्वासपूर्वकमिति विशेषविधानात्। तादात्विकमहाविश्वासेनापि तच्चरितार्थमिति चेत्सत्यम्; तदेव तु विश्वासविशेषणं महत्त्वं यावज्जीवं विमर्शकाले बाधाभावे पर्यवस्यतीत्यनुश्रूयते। तच्च महत्त्वं यद्यपि स्वरूपत उपादातुं न शक्यते; तथाऽप्यादावेव यथावस्थितप्रपत्तिशास्त्रार्थनिश्चयसंस्कारद्रढिमसंपादनद्वारा तत्कार्यस्य विश्वासमहत्त्वस्यापि विधिविषयता युज्यते। तर्हि तदर्थं भक्त्यपेक्षणमपि निरर्थकमिति चेन्न; तस्यापि तस्या इव तत्फलत्वात्; संस्कारदार्ढ्यसंदेहाद्वा तदविच्छेदाय तत्प्रार्थनोपपत्तिः। ज्ञानपूर्त्या ह्यनन्योपायत्वं भक्तिपूर्त्या चानन्यप्रयोजनत्वं स्थिरीभवति। अस्तु वा तदनुपयोगः, तथाऽपि न भक्तिप्रार्थनस्यानन्यताविरोधित्वम्, भगवदानुकूल्याभयादिप्रार्थनात्मकत्वात्, गद्योक्तस्यैव च काष्ठाप्राप्तस्य निःश्रेयसरूपत्वेन तदनुप्रवेशात्; निवृत्तसमस्तारिष्टस्य निरतिशयानन्दब्रह्मानुभव एव हि मोक्षः। यद्वा महापराधवर्गः प्रपत्तिमपि प्रतिबद्धुमलम्। स च परिपूर्णे ज्ञाने भक्तौ च सत्यां ब्रह्मविद्वेषादेरसंभवाद्दूरोत्सारितो भवतीति, तदर्थं तत्प्रार्थनम्। बुद्धिपूर्वोत्तराघस्य भगवत्प्रीतिप्रतिबन्धकत्वमुपासनवत् न्यासेऽपि समानमेव। अत एव प्रपन्नस्याचारलङ्घनमधिकृत्योच्यते—*प्रियोऽपि न प्रियोऽसौ मे मदाज्ञाव्यतिवर्तनादिति। तथा निषिद्धकाम्यपरिग्रहे च निष्ठाहानिरुच्यते—

*एषा सा वैदिकी निष्ठा ह्युपायापायमध्यमा। उपायापायसंयोगे निष्ठया हीयतेऽनया॥ इति।

नच तर्हि सकृत्कृतस्य फले व्यभिचारशङ्का स्यादिति वाच्यम्; उपायापायसंप्लवरहितेषु निश्चितफलत्वात्, अन्येष्वपि प्रायश्चित्तस्य तत्रैव प्रतिपादनात्—

*अपायसंभवे सद्यः प्रायश्चित्तं समाचरेत्। प्रायश्चित्तिरियं साऽत्र यत्पुनश्शरणं व्रजेत्॥
उपायानामुपायत्वस्वीकारेऽप्येतदेव हि॥
प्रायश्चित्तप्रसङ्गे तु सर्वपापसमुद्भवे। मामेकां देवदेवस्य महिषीं शरणं व्रजेत्॥ इति।

यथोक्तं श्रीरामायणेऽपि—

*कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम्। अन्तरेणाञ्जलिं बध्वा लक्ष्मणस्य प्रसादनात्॥ इति।
तथा *विदितस्स हि धर्मज्ञश्शरणागतवत्सलः। तेन मैत्री भवतु ते यदि जीवितुमिच्छसि॥ इति।
तथा *प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा। अभियाचाम वैदेहीमेतद्धि मम रोचते॥ इति।

उक्तं च श्रीसात्वते विभवमूर्तिपरिच्छेदे लक्ष्मीपतिध्याने लक्ष्मीपुरस्करणमनाया सशीघ्रसंसारतरणकारणमिति—

यामालम्ब्य सुखेनेमं दुस्तरं हि गुणोदधिम् । निस्तरन्त्यचिरेणैव व्यक्तं ध्यानपरायणाः ॥ इति । ऐतिह्यासिकश्चायमर्थः । यथोक्तं भगवता शौनकेन— वाचः पंर प्रार्थयिता प्रपद्येन्नियतः श्रियमिति एवमन्यदप्यनुसंधेयम् । तर्हि प्रतिसमाधाने विद्यमाने किं भक्त्येति चेन्न ; * प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात् । नच वाच्यम् * शरीरपातसमये तु केवलं मदीययैव दयया ऽतिप्रबुद्ध इत्यादिकमुपायभूतभक्तियोगपर्यवसानमन्तिमप्रत्ययमुदाहरतीति, पूर्वस्मिन् वाक्ये हि * आध्यात्मिकाधिदैविकाधिभौतिकदुःखगन्धरहितस्त्वं द्वयमर्थानुसंधानेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्स्वेति यावच्छरीरपातं प्रपत्तिप्रतिसंधानपारंपर्यस्यैव प्रतिपादितत्वात्, अत्रापि च * केवलं मदीययैव दययेत्युपायान्तरनिषेधव्यक्तेश्च । उक्तं च गद्यान्तरेऽपि—* एवमवस्थितस्याप्यर्थित्वमात्रेण परमकारुणिको भगवान् स्वानुभवप्रीत्योपनतैकान्तिकात्यन्तिकनित्यकैंकर्यरतिरूपनित्यदास्यं दास्यतीति विश्वासपूर्वकं भगवन्तं नित्यकिङ्करतां प्रार्थय इति । नचैवमाशङ्कनीयम्, यावच्छरीरपातं भगवत्साक्षात्काररहितस्य तदानीमेव झटिति कथं तत्संभव इति ; ईश्वरस्वभावस्यापर्यनुयोज्यत्वात् । श्रीसात्वते च सप्तमपरिच्छेदे व्रतिनां स्वयंव्यक्तसैद्धवैष्णवरूपभगवत्क्षेत्रवासमधिकृत्योक्तम्—

* दुष्टेन्द्रियवशाच्चित्तं नृणां यत्कल्मषैर्वृतम् । तदन्तकाले संशुद्धिं याति नारायणालये ॥ इति ।

तर्हि, * स्थिते मनसि सुस्वस्थे शरीरे सति यो नरः । धातुसाम्ये स्थिते स्मर्ता विश्वरूपं च मामजम् ॥
ततस्तं म्रियमाणं तु काष्ठपाषाणसन्निभम् । अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥

इत्यादि कथमिति चेत्, इत्थम्—* वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामित्यादिन्यायेन मुमुक्षूणां योगिनामितरेषामपि करणग्रामविलयदशायां क्षणमात्रं सुषुप्तिवत् काष्ठपाषाणसन्निभत्वस्योत्क्रान्तिपादे समर्थितत्वात् । यद्वा प्रपन्नस्य शास्त्रार्थतया स्वप्रयत्नसाध्यान्तिमप्रत्ययनैरपेक्ष्यं काष्ठपाषाणसन्निभमित्यनेनोच्यते । हार्दं परमात्मनि सुषुप्तवद्विश्रान्तस्य तदनन्तरं * तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकयेत्युक्तरीत्या अतिप्रबुद्धत्वादिकथनम् । अथवा शरीरपातसमये त्वित्यत्रान्तिमक्षणेऽपि विस्रम्भशैथिल्याभावः, फलान्तरश्रद्धागन्धराहित्यं चाभिप्रेतमिति मन्तव्यम् । यच्चेदमुक्तं भाष्यकारैरेव भगवदाराधनप्रयोगं प्रक्रम्य प्रपत्तिपरा गद्यस्तुतिस्समाराधनाङ्गतया विनियुक्तेति, तावता न प्रपत्तेः स्वातन्त्र्यमपैति । यथा प्रणवादीनां कचित्कर्माङ्गतया विनियुक्तानां विनियोगपृथक्त्वेनापवर्गादिसाधनत्वम् ; तद्वदिहापि, विरोधाभावात् । नचैवं मोक्षार्थप्रपत्तेरावृत्तिप्रसङ्गः, समाराधनप्रयोगमध्यपातिन्याः प्रपत्तेः पत्रपुष्पफलतोयादिवत् भगवदिज्यार्थतया पुरुषार्थत्वाभावात् । ननु प्रपत्त्यैव चेत् सकृत्कृतयाऽपवर्गो लप्स्यते, किं बहुवित्तव्ययायासमनस्समाधानादिसाध्येन प्रपत्त्यङ्गकेन प्रतिदिवसमाप्रयाणादनुवर्तनीयेन भगवदाराधनप्रयोगनिर्बन्धेनेति चेत् ; हन्त ! प्रपन्नाः किमपवर्गार्थं भगवन्तमाराधयन्ति ? अपि तु अनन्तगरुडविष्वक्सेनादय इव भगवच्छेषतैकरसाः शास्त्राविरुद्धेन स्वरूपानुरूपेण भगवदाराधनेन कालं क्षिपन्ति । पञ्चमहायज्ञादिवच्च देवतार्चनं नित्यम् । तच्च ब्रह्मचर्यप्रभृति ; यथोक्तं मन्वादिभिः—

* स्नात्वा नित्यं शुचिः कुर्याद्देवर्षिपितृतर्पणम् । देवताभ्यर्चनं चैव समिदाधानमेव च ॥ इति ।

भगवदर्चनमेव त्वनन्यात्मनाम् । तच्च

* गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः । य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः ॥

इत्यादिना महाभारतादिसिद्धम् ॥ अनन्ययजनमेव हि ज्ञानिनां भगवद्गीतामोक्षधर्मादिषु प्रपञ्चितम् । उक्तं च श्रीमद्भागवते पुराणे—* नान्यं देवं नमस्कुर्याद्विष्णुपादाब्जसंश्रयः इति । इदं च नित्यं भगवदर्चनं शौनकबोधायनाद्युक्तम् तावन्मात्राधिकारिणाम् । विशिष्टाधिकारिणां तु अनन्यभगवच्छास्त्रसिद्धं, तच्च प्रपत्तिगर्भमिति, तदिह *परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्य इत्यारभ्योक्तम् । तत्र च स्वतन्त्राङ्गप्रपत्त्योर्वाचकविशेषाभावात् * अखिलेत्यादिकं सम्प्रकारानुसन्धानं मनोवृत्त्युपसंहारार्थतया विनियुक्तम् । एवं हि तत्राह—* यथावस्थितस्वरूपरूपगुणविभूतिलीलोपकरणविस्तारमनुसंधाय तमेव शरणमुपगच्छेत् * अखिलेत्यादिनेति । अनन्तरमप्याह * एवं शरणमुपगम्य तत्प्रसादोपबृंहितमनोवृत्तिरिति । यद्यप्यविशिष्टफलसाधनगुरुलघुविकल्पोऽनुपपन्नः ; तथाऽप्यविशिष्ट एवोपाये गुरुलघुभेददर्शास्त्रीयः, तत्फलसंकल्पास्त्यसहकारिभेदमाश्रित्य तदुपपत्तेः । एकैकस्यैव हि कर्मणः स्वरूपत एकरूपस्यैव विनियोगपृथक्त्वेन संकल्पभेदाद्विद्याङ्गत्वाश्रमाङ्गत्वस्वर्गाद्यर्थत्वादिकं मीमांसामहे । एवं भक्तियोगेऽपि द्रष्टव्यम् । महावदान्यश्च हि पुरुषोत्तमो यद्यदपेक्षितं तत्सर्वम् अपरीक्षितपात्रदेयोपायतारतम्यस्सकृत्प्रार्थनामात्रेण कल्पद्रुम इव कौपीनं कनकराशिं च विशृंखलं विश्राणयतीत्यानुश्रविकोऽयमर्थः ॥ आह च भगवान् शौनकः—

* रत्नपर्वतमारुह्य यथा रत्नं नरो मुने । सत्त्वानुरूपमादत्ते तद्वत्कृष्णान्मनोरथान् ॥ इति ।

अतः प्रपत्तेरपि स्वरूपतो विशेषाभावेऽपि फलापेक्षाभेदेन सर्वफलसाधनत्वान्मोक्षार्थतया समाराधनाद्यर्थतया च विनियोगो न विरुध्यते ।

अतिसूक्ष्मो विशेषो यथासंप्रदायमनुसंधेयः, यमेनमधिकृत्य शरण्यश्शरणागतपरित्राणाय तद्विरोधिनिरसनोन्मुखस्सापराधशरणागतसहोदरपरित्यागिनं शकतनयं प्रत्याह * सूक्ष्मः परमदुर्ज्ञेयस्सतां धर्मः प्लवङ्गमेति । इदं च सूक्ष्मत्वं नानाविधेषु धर्मेषु एकस्मिन्नपि वा विनियोगपृथक्त्वेन च समानम् । अतः प्रपत्तिस्वातन्त्र्ये न कचिद्भाष्यकारोक्तिविरोधः । उक्तेनैव न्यायेनान्येषामप्याचार्याणां प्रबन्धाः पूर्वापरपरामर्शेन प्रकृताविरुद्धतया प्रतिसन्धेया इति न कश्चित्संप्रदायविरोध इति ॥

उपसंहारः ॥ तदेवं स्वरूपाद्यनुपपत्त्यभावात् न्यासोपासनशास्त्रार्थभेदस्सिद्धः । अङ्गाङ्गिभावोऽप्यधिकारिविशेषविषयः । अदूरविप्रकर्षात् भक्तिप्रपत्त्योर्व्यतिकरितप्रयोगः । कर्माद्यनङ्गत्वात् श्रीमतो नारायणस्य गुणगणमनुसंदधतां व्यवसायविशेषादेः स्वरसतया च लघूपायत्वसिद्धिः । आसंसारं प्रसिद्धेः श्रुत्यादिबलाच्च नातिशङ्कावकाशः । संप्रदायश्च योगसंप्रदायबदुपदेशानुष्ठानप्रबन्धैरधिकारिष्वघत यावदनुवर्तत इति स्थिते, केषुचिदधिकारिषु प्रपत्तिः भक्तिसाधनान्तरैर्विकल्प्यमानाभक्तिद्वारा मोक्षं साधयति ; केषुचिद्गुणविशेषवत्सु स्वयमेव । यथा कर्मयोगः केषांचित् ज्ञानयोगद्वारा आत्मावलोकनसाधनम् ; अन्येषां तु सुकरोपायसक्तानां विशिष्टतया व्यपदेश्यानां ज्ञानयोगव्यवधानमन्तरेण, तथेहापि । धर्मानधिकारिस्त्रीशूद्रादिकमुद्दिश्य मोक्षोपायतया शरणागतिविधानमिति वदन्तस्तु प्रागेव निरस्तप्रायाः ; त्यागविधिपक्षे तेषां प्राप्त्यभावेन प्रतिषेधायोगात् ; अर्जुनोद्देशेन वचनप्रवृत्तेरसङ्गतत्वात् । नासावर्जुनः स्त्री, शूद्रादिर्वा । ततः एतेषु त्यागानुवादपक्षोऽपि निरस्तः ; नचार्जुनस्य सर्वधर्मानधिकारित्वं सिद्धम् । एतेन * भुक्त्वा चान्द्रायणं चरेदित्यादिवद्विहितकर्मपरित्यागप्रायश्चित्तार्थमात्रं शरणागतिविधिरिति वादोऽपि प्रत्युक्तः ; धर्मप्रवणेऽर्जुने सर्वधर्मपरित्यागरूपनिमित्तानुदयेन नैमित्तिकशास्त्रासङ्गतेः, तदाभिमुख्येन प्रवृत्तस्य वचनस्य तदन्यविषयत्वकल्पनायोगात्, * मा शुच

इत्येतच्छोकापनोदनासङ्गतेश्च । सर्वधर्मान् परित्यज्यापि मदेकशरणागतिं कुर्यादिति शरणागतिप्रशंसामात्रतात्पर्यमिति पक्षोऽपि मा शुच इत्येतदसङ्गतेर्निरस्तः ; निराकाङ्क्षे वाक्ये अपिशब्दाध्याहारायोगाच्च । एतेन नित्यनैमित्तिकानपि धर्मान् परित्यज्य मद्यजनैकशेषमदेकध्यानादिपरो भवेति यादवप्रकाशोक्तोऽपि निरस्तः ; भावार्थान्तरस्फौट्येन पूर्व-श्लोकार्थप्रत्यभिज्ञाविरहात्, समाख्यादिभेदाच्च भेदसिद्धेः, प्रशंसामात्रस्य प्रयोजनमान्द्यात्, अधिकस्य चानुपदेशात् । अतस्समस्ताभिमतसाधनस्वतन्त्रप्रपत्तिविषय एवायं श्लोकः ॥

सुदुष्करेण शोचेद्यो येनयेनेष्टहेतुना । सस तस्याहमेवेति चरमश्लोकसंग्रहः ॥ इति ।

अङ्कूरत्परभक्तिकुङ्कुमलताकाश्मीरकेदारिकां जीवातुं जरदन्धपङ्गुबधिरप्रायात्मनां प्राणिनाम् ।
निष्प्रत्यूहषडङ्गयोगनिगमप्रासादनिःश्रेणिकां नित्यं चेतसि धारयन्तु सुधियो निक्षेपरक्षामिमाम् ॥

विवृतमिह रहस्यं यन्मया गोपनीयं स्खलितमपि यदीषद् भूयसा वा तदेतत् ।
निजमहिमविशेषप्रेममात्रेण नाथाः क्षमत इति विचिन्त्य क्षन्तुमर्हन्ति सन्तः ॥
गुरुचरणसपर्यास्वादवैदेशिकानां प्रलपितमवधूय प्राक्तनेनाध्वनैव ।
व्यवृणुत परमार्थं वेङ्कटेशः प्रजानां निगमगिरिनिगूढं न्यासविद्यानिधानम् ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु

॥ निक्षेपरक्षा समाप्ता ॥

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ॥

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ।

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्तदेशिकविरचिता

॥ सच्चरित्ररक्षा ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

॥ सुदर्शनपाञ्चजन्यधारणविधिर्नाम प्रथमोऽधिकारः ॥

चक्रादिलाञ्छनभृतस्सुधृतोर्ध्वपुण्ड्रान् न्यस्तात्मनो भगवतश्चरणारविन्दे ।
तद्भक्तभोगरसिकांस्त्रिदशेन्द्रवन्द्यान् पुंसः प्रमाणशरणान् शिरसोद्वहामः ॥
यतिपतिचरणाम्भोरुहरजःप्रभावेन सन्निवृत्तरजाः । विदधाति वेङ्कटेशः स्थिरामिमां सच्चरितरक्षाम् ॥
सद्भिर्धृतेषु सततं विमतिं दधुर्ये पत्युस्समस्तजगतां परमायुधेषु ।
तैरेव तान्निगमशाणनिघर्षदीप्तैस्तर्कात्मना परिणतैः प्रहरामि मूर्खान् ॥

इह कतिचिदतिचिरसमुचितविविधदुरितावलीमलीमसमनसः परमपुरुषचरणारविन्दवैमुख्यमुषितदर्शनास्सुदर्शनादिधारणे विमन्यन्ते ; मन्यन्ते च—* चोदनालक्षणोऽर्थो धर्मः ; न चासौ प्रत्यक्षादिवेद्य इति प्रत्यक्षसूत्रे स्थितम् । द्रव्यादीनां स्वरूपतः प्रत्यक्षाणामपि धर्मत्ववेषेणाप्रत्यक्षत्वाच्चोदनैकसमधिगम्यत्वं न विरुध्यते । यथाऽऽहुः—

* द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते । तेषामैन्द्रियकत्वेऽपि न तादूप्येण धर्मता ॥
श्रेयस्साधनता ह्येषां नित्यं वेदात्प्र[मी]तीयते । तादूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥ इति ।

ततश्च श्रुतिभिस्तदनुरोधिभिस्स्मृतीतिहासाद्यैस्तदविरोध्याचारैश्च धर्मत्वमवसेयम् ।

तत्र न तावच्चक्रादिधारणविधायिनीरनन्यपराः श्रुतीरधीमहे । अखिलेषु च पठितेषु वाक्येषु न विश्वसिमः । न च कल्पसूत्रेष्वपि सामान्यतो वा प्रतिनियताधिकारिविषयतया वा तद्विधिरस्ति । न च स्मरन्ति मन्वादयः ; प्रत्युत निषेधन्त्येव स्वशरीरेऽन्यशरीरे वा व्रणकरणादिकम् । तत्करणे च प्रायश्चित्तान्यनुशिष्यन्ते । यद्यपि [अत्र] * अकिणिन इति किणित्वनिषेधो ज्याघातास्फोटनद्यूतासिलतादिजन्यकिणविषयतया भवस्वामिप्रभृतिभिर्व्याख्यातः ; तथाऽपि सामान्यतो व्रणकरणाङ्कनादिनिषेधो बाधकाभावे सत्यसङ्कुचितोऽवतिष्ठते । ततश्च यद्यपि कानिचिदैतिह्यसिकानि पौराणिकानि तान्त्रिकाणि च वचांसि लब्धानि ; तथाऽपि तानि भगवदसाधारणपरतया अतिवादरूपाणीति वा, स्मृत्यपेक्षया दुर्बलतया

भ्रान्त्यादिहेतुकानीति वा, प्राक्षेपिकाणीति वा, न तद्धारणप्रमाणतयोपादेयानि । अत एवाचारोऽपि दूरोत्सारितः, आम्नायाविरुद्धानामेव देशजातिकुलधर्माणां प्रमाणत्वात् । तदुक्तम्—* देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाणमिति । अत्राम्नायग्रहणं स्मृत्यविरोधस्याप्युपलक्षणार्थम् । यत्पुनराहुः—

* लक्ष्मत्वादात्मभर्तुः प्रकृतिपरिणतिग्रन्थिदाहात्मकत्वात्कर्माङ्गत्वाद्धितत्वात्तनुतनुशयिनोस्संस्कृतित्वात्प्रियत्वात् ।
हेतुत्वात्सदूहीतेरितरपरिहृतेर्द्रावणात्किङ्करादेर्धार्यं चक्रादिचिह्नं कृतिभिरकृतिभिश्श्रेयसे मुक्तये च ॥

इति; तत्र तावद्भर्तृशब्देन किं भार्याप्रतियोगिकं भर्तृत्वं विवक्षितम्? उत धारकत्वम्? अथ पोषकत्वम्? यद्वा स्वामित्वमिति? न प्रथमः, असिद्धेः । न द्वितीयतृतीयौ, अनैकान्त्यात् । अत एव न चतुर्थोऽपि, असिद्धेश्च । अनाधेयातिशयस्य शेषित्वमेव नास्ति; कुतः स्वामित्वम्? अतिशयाधायको हि शेषः, आधेयातिशयश्च शेषी । आह च भगवान् जैमिनिः—* शेषः परार्थत्वादिति । तस्य शेषित्वाभावात्स्वामित्वाभावः; पूर्वस्य चेतनाचेतनसाधारण्यात् । अतः शेषित्वाभाववत्तु स्वामित्वाभावः स्वयमेवासीदति । न चावश्यं स्वाम्यादिचिह्नं दासादिभिर्धार्यमिति प्रमाणमस्ति । उक्तं चाचार्यैः—

* असिद्धमाद्यं द्वे चान्ये अनैकान्त्येन दूषिते । अनैकान्त्यादसिद्धेश्च न चतुर्थमपीष्यते ॥ इति ।

यच्च * प्रकृतिपरिणतिग्रन्थिदाहात्मकत्वादिति, तत्रापि दाहात्मकत्वमात्रविवक्षायामतिप्रसङ्गः । द्रव्यविशेषेण स्थानविशेषे दाहरूपचिकित्सारूपत्वविवक्षायामप्यायुर्वेदवच्छुतिस्मृत्यादिकमेव शरणम्; तच्च नास्तीत्युक्तम् । अत एव * कर्माङ्गत्वाद्धितत्वादिति हेतुद्वयमपि दत्तोत्तरम् । हितत्वं च न दृष्टापेक्षया, दुःखमात्रतयैवोपलब्धेः । नाप्यदृष्टापेक्षया, अविहितत्वादेव । अनेनैव विकल्पेन * तनुतनुशयिनोस्संस्कृतित्वादित्यपि निरस्तम् । संस्कारो नाम कार्यान्तरयोग्यताकरणम्; तत्तु प्रमाणमूलं चेत्स्वीकुर्महे, अन्यथा निराकुर्महे । * प्रियत्वादिति हेतुः प्रायशोऽसिद्धोऽनैकान्तिकश्च ।

* श्रुतिः स्मृतिस्सदाचारस्स्वस्य च प्रियमात्मनः । सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥
* वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

इति स्मरणादात्मप्रियमपि धर्मत्वेनोपादेयमिति चेन्न; तादृग्वचनानाम् *गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनमित्यादिविहितवैकल्पिकधर्मादिविषयत्वेन व्यास्यातृभिर्व्यवस्थापितत्वात् । अन्यथा रागप्राप्तस्य सर्वस्य धर्मत्वप्रसङ्गेन सर्वस्यापि निषेधशास्त्रस्यानुदयप्रसङ्गात् । न ह्यरागप्राप्ते निषेधापेक्षा । आत्महननादिप्रवृत्तिरपि तादात्विकरागत एव । विधिस्पृष्टे तु निषेधोऽवस्थाप्यः । कथमन्यथा श्येनाग्नीषोमीयविभागः? तत्र हि श्येनफलभूताया रागप्राप्तत्वात् * न हिंस्यादिति निषेधविषयत्वम् । अग्नीषोमीयपश्वालम्भनस्य विधिप्राप्तत्वान्न निषेधः । यच्च * हेतुत्वात्सदूहीतेरितरपरिहृतेरिति, तत्र किं सदसद्विवेकमात्रौपयिकत्वं विवक्षितम्? उत आदरादिहेतुत्वम्? नाद्यः, अवश्यधार्यत्वं प्रत्यप्रयोजकत्वात्; साङ्केतिकस्य यस्य कस्यापि धार्यत्वप्रसङ्गात्; दुष्टशूद्रादिभिर्ब्रह्मसूत्रादिवद्धृश्चकैरपि तद्धारणसंभवेन विवेकानुपयोगाच्च । पारम्पर्यशीलादिपरिज्ञानेनैव हि सदसद्विवेकः, न पुनर्वेषेण । न द्वितीयः, केवलदृष्टार्थत्वप्रसङ्गात्; अविहितकारित्वेन तस्याप्यसिद्धेश्च । आर्याः खलु विहितकारिणमेवाद्रियन्ते; यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः इति स्मृतेः । यच्च *ब्राह्मणात्किङ्करादेरिति, तच्च प्रत्यक्षश्रुत्याद्यभावादितिहासादेर्दत्तोत्तरत्वान्निरस्तमिति केवलभक्तिप्रकर्षमूलं वा, लौकिकदासविशेषदर्शनजनितभ्रममूलं वा केषाञ्चिदास्तिकानां चक्रादिधारणमिति ॥

तदेतत्प्रशिथिलपठितकतिपयनिगमवचसामश्रुतसमीचीनन्यायनिबन्धनानां *पतिं विश्वस्य, *दासभूतास्त्वतस्तेषां इत्यादिप्रमाणविशेषावगतस्वाभाविकभगवद्दास्यभयपलायमानमनसामन्तिमयुगतत्त्वचिन्तकानां कूपोदरसंभवकूर्मसमानानामभिमानविजृम्भितम् । तथा हि—सत्यम् चोदनालक्षणोऽर्थो धर्मः । विद्यते च चक्रादिधारणे चोदना, तत्कल्पश्च—

श्लो. श्रुत्या स्मृत्या पुराणेन सेतिहासेन गम्यते । पञ्चरात्रेण विप्राणां तप्तचक्रादिधारणम् ॥

यथाऽऽथर्वणमहोपनिषदि ब्रह्मसूक्ते—

*दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् । सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः ॥ इति ।

यजुषि कठशाखायाम्—* धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥ इति ।

ऋचि बाष्कलसंहितायाम्—* प्रते विष्णो अब्जचक्रे पवित्रे जन्माम्भोधिं तर्तवे चर्षणीन्द्राः ।
मूले बाह्वोर्दधतेऽन्ये पुराणाः लिङ्गान्यङ्के तावकान्यर्पयन्ति ॥ इति ।

यजुषि, बृहदारण्यकभेदे अथर्वणि, सुदर्शनोपनिषदि च—

*निचिक्षेप सुपर्णं भिद्यमानं मध्ये बाहुमदधत्सुदर्शनम् ।
विष्णोरिदं भूरिदं भूरितेजः प्रधर्षति दिवा नक्तं बिभृयुस्तज्जनासः ॥ इति ।

ऋचि, साम्नि च *चमूषच्छ्येनश्शकुनो बिभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
अपासूर्मिं सचमानस्समुद्रं तुरीयं धाम महिषो विवक्ति ॥ इति ।

अथर्वणि *एभिर्वयमुरुक्रमस्य चिह्नैरङ्किता लोके सुभगा भवेम ।
तद्विष्णोः परमं पदं ये गच्छन्तीह लाञ्छिताः ॥ इति ।

ऋग्वेदखिले— *चक्रं बिभर्ति वपुषाऽभितप्तं बलं देवानाम[मि]मृतस्य विष्णोः ।
स एति नाकं दुरिता विधूय प्रयान्ति यद्यतयो वीतरागाः ॥ इति ।

साम्नि च *पवित्रमित्यग्निरग्निर्वै सहस्रारः सहस्रारो नेमिर्नेमिना तप्ततनुर्ब्रह्मणस्सायुज्यं सलोकतामाप्नोतीत्युपनिषदिति ।

त्रिष्वपि वेदेषु— पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामोऽश्नुते श्रृतास इद्वहन्तस्तत्समासते ॥ इति ।

यजुषि काठके— *चरणं पवित्रं विततं पुराणम् इत्यारभ्य *सुधितां दधातु इत्यन्तम् । एवमन्यदपि द्रष्टव्यम् ।

नन्वत्र खिलानामनाश्वसनीयत्वादाम्नातानामन्यत्र विनियोगेनान्यपरत्वात्स्मार्तविनियोगस्य सतोऽपि श्रौतविनियोगानुरोधेन नेयत्वाद्विनियुक्तमन्त्राणां विधिपरत्वायोगादविनियुक्तस्य खिलस्याखिलस्य च त्वयैवानभ्युपगमाच्चाभिमतासिद्धिरिति चेत् ; अतिमन्दमेतत् । तथा हि—खिलानां तावत्किं खिलत्वमात्रादनाश्वसनीयत्वम् ? अथ तद्विशेषत्वात् ? नाद्यः, यज्ञोपवीतादिमन्त्राणामप्यनाश्वासपदत्वप्रसङ्गात् । न द्वितीयः, वैषम्यासिद्धेः । न ह्यत्र प्रत्यक्षश्रुतिविरोधतदभावलक्षणं वैषम्यमस्ति, ब्राह्मणादिभिश्चक्रादिकं न धार्यमिति प्रतिपादयन्त्याः श्रुतेरदर्शनात् । तद्दर्शनेऽपि प्रत्यक्षबहुश्रुत्यन्तरतत्सदृशभगवच्छास्त्रमहाभारतादिविरोधे सत्यन्यपरतया निर्वाह्यत्वात् । न चात्र निषेधसंभवः, चक्रादिधारणस्य

दुःखैकरूपतयोपलभ्यमानस्य रागप्राप्तत्वायोगेन निषेधाविषयत्वात् । विधिप्राप्तत्वे तु विधिरेव परिपन्थी ; न चात्र विकल्पोऽपि संभवति, एकस्मिन्नेवाधिकारिणि दुःखतदभावरूपयोस्तदयोगात्, व्यवस्थापकस्यापि कल्पनौ गौरवादतिप्रसङ्गाच्च । स्मृतिविरोधतदभावाभ्यां वैषम्यमिति चेत् ; स्मृत्यन्तरसंगृहीतश्रुतिविरुद्धायाः स्मृतेरेवानुदयात् ; उदितायाश्च यथाकथञ्चिदविरोधेन नेयत्वात् ; अत्यन्तविरोधे तु विरोधाधिकरणन्यायेन परित्याज्यत्वात् । न चात्यन्तविरोधः, सामान्यतो व्रणकरणादिनिषेधस्योत्सर्गापवादन्यायेन समर्थयिष्यमाणैः श्रुतिस्मृतीतिहासपञ्चरात्रैरेककण्ठ्येन प्रतिपादितार्थव्यतिरिक्तविषयत्वात् । अन्यथाऽग्नीषोमीयहिंसादेरपि * न हिंस्यादित्यादिना निषिद्धत्वेनाधर्मत्वप्रसङ्गात् । प्रसिद्धितदभावाभ्यां वैषम्यमिति चेत् ; केयं प्रसिद्धिः ? किमधीतत्वमेव ? उत संप्रतिपन्नत्वम् ? किं वा खिलत्वेन श्रवणपरम्परागतत्वम् ? यद्वा सूत्रकारादिभिरुपात्तत्वम् ? नाद्यः, खिलत्वविरोधात् । न द्वितीयः, धाष्टर्यात् । त्वामिव विप्रतिपद्यमानं प्रति तदसिद्धेः । इतः पूर्वं तत्र विप्रतिपत्तिर्नास्तीति चेन्न, अत्रापि पूर्वैः[र्वोत्तरै]षु सत्त्वोत्तरेषु कालेषु विप्रतिपत्तिसद्भावे प्रमाणाभावात् ; इदानीमपि सात्त्विकानां विशिष्टदेशादिभाजामपि प्रतिपन्नत्वात् । ये नुनः * हरिबाह्यास्तु बाह्लीकाः न स्मरन्ति हरिं क्वचित्, * बाह्लीकांस्तु निरोक्ष्य वै इत्यादिमहाभारतादिवचनप्रतिपन्नतामसदेशविशेषवासिनः, येऽपि सात्त्विकेष्वपि देशेषु कलिबलविलसिततमःप्राया हरिबाह्याः, तेषां विप्रतिपत्तिर्न दोषाय ; अन्यथा विप्रतिपत्तिमात्रेण किञ्चित्करत्वे संप्रति नानासमयसङ्कीर्णसङ्कुचितनिगमधर्माश्रयदेशात्समधिकचतुर्दशगुणसुगतमतसाम्राज्यदेशवासिपुरुषविमतिविहतत्वेन वेदमात्रस्यैव कण्ठगतजीवितत्वप्रसङ्गात् ; इतः पूर्वं विप्रतिपत्त्यभावाच्च । यदङ्गीकृतमायुष्मता तदपि नूनमिदं प्रथमकल्पितविमतिवशगतानुगतिकत्वदधिककुमतिशतपरम्पराभिस्त्वत्पुत्रपौत्रेषु त्वमिव जलाञ्जलिं प्राप्स्यति । न च तृतीयः, अननुष्ठातॄणामनु[ष्ठानेऽपि]तिष्ठतामपि परप्रत्ययशरणानां च तच्छ्रवणपारम्पर्यनैरपेक्ष्येण तेषु तदभावस्याकिञ्चित्करत्वात् । अनुतिष्ठतां तु स्वयं बुभुत्सूनां तत्पारम्पर्यसिद्धेरवैषम्यात् । चतुर्थस्तु परिशिष्यते । तत्र किं सूत्रकारादिभिर्देवानांप्रियेण रुचिमात्रपरिगृहीतैः पुरुषविशेषैरुपादानं विवक्षितम् ? उताविशेषेणापौरुषेयत्वेनापौरुषेयैरुपादानम् ? न प्रथमः, अप्रयोजकत्वात् । सजातीयजनान्तररुचिपरिगृहीतपुरुषान्तरानुपात्तत्वेन त्वदभिमतस्यापि विलयप्रसङ्गात् । न द्वितीयः, अस्मदभिमतेऽपि तत्सद्भावेन वैषम्यासिद्धेः । चक्रादिधारणविषयस्खलानां कैरापौरुषेयैरुपादानमिति चेत्, आप्ततमपुरुषोत्तमदयोदञ्चितपञ्चरात्रसंहितामेदकथकैर्महर्षिभिः । तस्य च शास्त्रस्य वेदाविरुद्धतत्त्वानुष्ठानप्रतिपादकत्वात्, क्वाचित्कानुष्ठानविरोधस्य प्रत्यक्षैकायनश्रुतिसंवादेन तत्तच्छास्त्रान्तरप्रतिनियतधर्मान्तरवद्विकल्पतः परिहरणीयत्वात्, जीवोत्पत्त्यादिवादस्य जीवाद्यभिमानिसङ्कर्षणाद्यवतारविषयत्वेन तत्रैव सिद्धत्वात्, तस्मिन्नेव शास्त्रे—

* व्यासिरूपेण संबन्धस्तस्याश्च पुरुषस्य च । स चानादिरनन्तश्च परमार्थेन निश्चितः ॥

इत्यादिना जीवनित्यत्वस्यैव स्थापनात्, * साङ्गेषु वेदेषु निष्ठामलभमानश्शाण्डिल्यः पञ्चरात्रशास्त्रमधीतवान् इत्यादेः * न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तर्हि निन्दितादितरत्प्रशंसितुमिति न्यायेनानुदितहोमनिन्दावद्वाऽर्थानभिव्यक्तितात्पर्येण वा मूमक्षोपक्रमगततदितरसमस्तभेदाद्ययनात्मवेदनहेतुत्वाभाववचनवन्निर्वाहात्, * अकामे वेदमन्त्राणां पञ्चरात्रोदितेन वा इति स्मृतिकारानुमतत्वात्, महाभारते परश्शतेषु प्रदेशेषु तत्प्रामाण्यस्यात्यादरेण प्रपञ्चितत्वाच्च प्रामाण्यं दुरपह्नवम् । सूत्रितं च तेनैव निखिलनिगमव्यसनव्यसनिना मतिमन्थानानिर्मथितनिगमसिन्धुसमुदितमहाभारतचन्द्रचन्द्रिकानिकराशेषमुषितभुवनभवनोदरतिमिरेण नारायणेन भगवता बादरायणेन—* उत्पत्त्यसंभवात्,

*न च कर्तुः करणमिति सूत्रद्वयेन पूर्वपक्षमुपक्षिप्य *विज्ञानादिभावे वा तदप्रतिषेधः, *विप्रतिषेधाच्चेति सिद्धान्तकरणात्। **भाष्यादिषु** च विस्तरेणेदमनुसन्धेयम्। तत्र च शास्त्रे **पारमेश्वरसंहितायां** प्रतिष्ठाध्याये चक्रप्रतिष्ठायाम्—

*तत्तत्स्थापनकाले तु तत्तत्संज्ञान्मनून् जपेत्। विद्याङ्गतामित्याद्यं यत् पाठयेत्तद्विदो जनान्॥ इति।
*चमूषच्छ्येन इति च *प्रते विष्णो इति तृचौ। पाठयेद् बह्वृचान्पश्चाच्छाकुनं सूक्तमेव च॥
*धृतोर्ध्वपुण्ड्रः कृतचक्रेति मन्त्रं ततः परम्। *पवित्रं ते विततमित्येतन्मन्त्रं यजुर्मयान्॥
*क्षुरोहरेति सामज्ञान् *पवित्रमित्यग्निरित्यपि। *एभिर्वयमुरुक्रमस्य इत्यार्थर्वणान् द्विजान्॥
एवं संस्थाप्य विधिवन्नवभिः कलशैस्ततः। स्नापयेद्ब्रह्मसूक्तस्थैर्मन्त्रैरष्टाभिरेव च॥ इति।

अत्रादावेव *तत्तत्स्थापनकाले तु तत्तत्संज्ञान्मनून् जपेदिति वचनादेषां मुख्यतया संज्ञान्वयेन सुदर्शनपरत्वं ज्ञापितम्। तत्रैव स्नापयेदित्यनुवृत्तौ—

*धृतोर्ध्वपुण्ड्र इति च यातुधानीगतेन वै। *दक्षिणे तु भुजे विप्र इति पश्चिमगेन वै॥
*विष्णुनात्तमश्नन्तीति वायोर्दिक्संस्थितेन तु॥ इति।

अत्र *धृतोर्ध्वपुण्ड्रः *विष्णुनात्तमश्नन्ति इत्युभाभ्यामूर्ध्वपुण्ड्रधारणभगवन्निवेदितान्नपानाद्युपयोगश्च सिद्धः। तत्तत्प्रकरणे च प्रपञ्चयिष्यामः। तत्रैव स्नापनाध्याये सहस्रकलशस्नपने—

*पौरुषेण तु सूक्तेन समस्तेन शनैश्शनैः। स्नापयेद्देवदेवेशं मध्यस्थनवकेन तु॥
यद्वा *सर्वस्य वशिनमित्याद्यैर्मनुभिः क्रमात्। महोपनिषदन्तस्थैर्दिक्स्थितैः कलशाष्टकैः॥
*एक एव नारायणः इति मध्यगतेन तु॥ इति।

अत्र ब्रह्मसूक्तमिति महोपनिषन्मध्यगताः *सहस्रशीर्षेत्याद्या एकोनविंशतिमन्त्राः; [तत उ]त्तरोपरितनाष्टौ मन्त्राः *सर्वस्य वशिनमित्याद्याः। तत्र *दक्षिणे तु भुजे विप्रः इति पञ्चमो मन्त्रः। *एक एव नारायणः इति महोपनिषदाद्यो मन्त्रः। अत्र नारायणपराणामपि पुरुषसूक्तमहोपनिषदादीनां सौदर्शनेष्वपि कर्मसु विनियोगः सुदर्शनस्यापि सङ्कर्षणादिवद्वासुदेवात्मकत्वस्य तस्मिन्नेव शास्त्रे अहिर्बुध्न्यसंहितायामैदम्पर्येण प्रतिपादनादुपपन्नः। **वासिष्ठसंहितायां** चोक्तम्—*न हेतिर्नाङ्गकमयं परमात्मेति नः श्रुतमित्यादि। तन्त्रान्तरानुसारिभिश्चोक्तम् *चक्राभिधानो हरिरिति। एवं स्थिते *परमव्योमनिलयो भगवन्नित्यकिङ्करः इत्यादीनामहिर्बुध्न्यसंहितादिगतानामेव विरोधपरिहाराय क्वचित्सुदर्शनादिशब्दानां भगवच्छरीरभूतजीवविशेषक्रोडीकारेण भगवति वृत्तिरङ्गीक्रियते। यथा प्रतर्दनविद्यायां प्रसिद्धेन्द्रलिङ्गभूतत्वाष्टूवधासाधारणविशेषणोपादानवशेन प्रसिद्धेन्द्रशरीरकः परमात्मोपास्य इति निर्णीयते, तद्वदत्रापि। एवं च सति विशेष्याभिप्रायेण, विशिष्टोपास्याभिप्रायेण वा *न हेतिर्नाङ्गकमयमित्यादिकमुक्तम्; विशेषणांशमात्राभिप्रायेण प्रकरणान्तरे *भगवन्नित्यकिङ्करः इत्यादिकमुक्तमित्यलमतिप्रसङ्गेन। तत्रैव **पारमेश्वरसंहितायामुत्सवाध्याये** दमनकोत्सवस्नपने *धृतो वै इति। तत्रैव रक्षार्थं चूर्णस्नपने—

*दक्षिणे तु भुजे विप्रः इति प्राक्संस्थितेन तु। *निचिक्षेप सुषणमिति वह्निगतेन तु॥
*प्रते विष्णो अज्जचक्रे इति याम्यगतेन तु। *एभिर्वयमुरुक्रमस्येति यातुधानगतेन तु॥
*धृतोर्ध्वपुण्ड्रः कृतचक्रेति पश्चिमगतेन तु। *पवित्रमित्यग्निरिति ततो वायुगतेन तु॥

* चरणं पवित्रं विततमिति सोमगतेन तु । * लोकस्य द्वारमर्चिमदिति रुद्रगतेन तु ॥
मन्त्रैरेतैस्तु चाष्टाभिरन्यैस्सौदर्शनैस्तथा । संस्थाप्य मध्यकुम्भेन शुद्धोदैरभिषिच्य च ॥ इति ।

एवमेकस्यामेव संहितायामनेकेष्वध्यायेषु सौदर्शनतया विनियोगो दृष्टः । तथा बह्वीष्वपि संहितासु तेषां विनियोगो दृश्यते । तथा हि—**विष्णुतत्त्वे** चर्यापादे षष्ठे पटले—

* दिव्यान्तरिक्षभौमानामुत्पातानां प्रशान्तये । प्रत्यृचं जुहुयादाज्यं पुंसूक्तेन शतं शतम् ॥
* सर्वस्य वशिनेत्याद्यैश्चतुर्भिश्च शतं दधि । * दक्षिणे तु भुजेत्याद्यैश्चतुर्भिश्चापि तण्डुलैः ॥ इति ।

कालोत्तरसंहितायां सुदर्शनसमाराधनाध्याये—

* एवं प्रासादशिखरे चक्रं संस्थापयेद्बुधः । द्वादशारमथाष्टारं षडरं वा महामते ॥
संस्थाप्य विधिवत् [प्राग्वत्]पश्चात्कुम्भैर्द्वादशभिः क्रमात् । *दक्षिणे तु भुजे विप्र इति क्षीरेण सेचयेत् ॥
* निचिक्षेप सुषणमिति दध्ना स्नापयेत्ततः । * प्रते विष्णो इत्यनेन घृतेन स्नाभिषेचयेत् ॥
* एभिर्वयमुरुक्रमस्य मधुना स्नापयेद्बुधः * धृतोर्ध्वपुण्ड्रः कृतचक्रेत्यैक्षवेण रसेन तु ॥
* पवित्रमित्यग्निरिति पञ्चगव्येन सेचयेत् ॥ इति ।

श्रीविष्णुमन्दिरे—

* प्रत्यङ्गिरं शिखाशीर्षं ब्रह्मसूक्तं तथैव च । वैष्णवं पौरुषं चैवमन्यान्मङ्गलवाचकान् ॥ इति ।

तथा— * सूक्तं तु परमात्मास्यं वैष्णवं सूक्तमेव च । अध्यापयेत्पौरुषं च *ध्रुवा द्यौरिति वाचयेत् ॥ इति । अत्रापि ब्रह्मसूक्तपरमात्मसूक्तशब्दाभ्यां महोपनिषत्पठितमेकोनविंशतिमन्त्रात्मकं ब्रह्मसूक्तमेव परिगृहीतम्, शब्दतोऽर्थतश्च प्रत्यभिज्ञानात् । **आनन्दारण्यसंहितायां** प्रतिष्ठाध्याये—

* मत्षडक्षरमन्त्रेण गोघृतेनैव देशिकः । पुरुषाध्यात्मसूक्तैश्च महोपनिषदं तथा ॥
श्रीसूक्तं तु जपंस्तत्र रात्रिशेषं नयेद्बुधः । इति ।

अत्र श्रीसूक्तस्य जपविधिर्मङ्गलतमत्वात्, [भगवत्]पत्नीत्वेन भगवत्सहधर्मचारिणीविषयत्वात्, परमात्मदेवताकत्वस्य कैश्चिदनुस्मृतत्वाच्च । तथा **श्रीविष्णुतन्त्रे** चतुःपञ्चाशत्तमेऽध्याये—*पुरुषाध्यात्मसूक्तं च महोपनिषदं तथा इति । एवमाप्तप्रणीतभगवच्छास्त्रविनियोगात् कल्पकारविनियुक्तयज्ञोपवीतादिमन्त्राणामिव खिलानामपि श्रुतित्वमसंदिग्धम् ।

एतेन महोपनिषदः कैश्चिदनुदाहृतत्वचोद्यमपास्तम् । कति कति दृश्यन्ते भाष्यकारादिभिरनुपात्ता उपनिषदः । न केवलं भगवद्रामानुजमुनिभिरेव महोपनिषदुपात्ता, अपि तु तत्परमाचार्यैर्भगवद्यामुनमुनिभिरपि **पुरुषनिर्णये** समुपात्ता । न चैकमेकसिद्धान्तनिष्ठैरेव [अभियुक्तैः] तदुपादानम्, अपि तु तद्विरुद्धसन्मात्रब्रह्मभेदाभेदनिष्णातैर्यादवप्रकाशैरपि **भगवद्गीताभाष्येऽष्टमेऽध्याये**; तथा तन्मतानुसारिभिर्नारायणाचार्यैरपि **तत्त्वनिर्णये** श्रुतितात्पर्यनिर्णयाधिकारे सोपबृंहणनानाविधश्रुतिशिखरनिकरोदाहरणावसरे महोपनिषदाद्यान् * एक एव नारायणः इत्यादिकांश्चतुरो मन्त्रानुदाहृत्य, एषा चोपनिषत्

* एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादर्शितपन्थानौ सृष्टिसंहारकारकौ ॥

इत्यादिभिरितिहासैः, * तत्क्रोधसंभवो रुद्रः प्रसादाच्च पितामहः, * यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभवः इत्यादिभिः पुराणैश्चोपबृंहितेत्युक्तम् । एवं खिलानामनाश्वसनीयत्वादिति जल्पितं प्रत्युक्तम् ।

यत्त्वाम्नातानां * पवित्रं ते इत्यादीनामन्यत्र विनियोगेनान्यपरत्वादभिमतासिद्धिरिति, तदपि मन्दम्; यथाऽन्यत्र विनियोगात्त[त्त]दर्थपरत्वमङ्गीक्रियते, तथा भगवच्छास्त्रे * तत्तत्स्थापनकाले तु तत्तत्संज्ञान्मनून् जपेदित्युपक्रमेण सौदर्शनत्वेनाभिधानात्, सौदर्शने प्रतिष्ठास्नपनादौ विनियोगाच्छ्रूयमाणार्थानुगुण्याच्च तदर्थपरत्वमपि किं नेष्यते? यद्येकार्थपरत्वादेव तदन्यार्थपरत्वं निषिध्यते, तर्हि सौदर्शनविनियोगाधीनतदर्थपरत्वादेव तदन्यार्थपरत्वमेव किं न निषिध्यते?

* श्रौतस्मार्तविनियोगयोः परस्परविरोधे श्रौतविनियोगानुसारेणार्थनिर्णयः इत्युक्तमिति चेत्; कुतोऽयं निष्कर्षः? श्रुतिमूलायाः स्मृतेस्तद्विरोधेनोदेतुमशक्यत्वादिति चेत्; तर्हि स्मृत्या तेषां मन्त्राणां गौणोऽपि विनियोगो न स्यात्; अर्थान्तरपरत्वाविशेषेण विरोधस्यावर्जनीयत्वात् । न ह्यभिधावृत्त्यैवार्थान्तरपरत्वे विरोधः, वृत्त्यन्तरेणार्थान्तरपरत्वे न विरोध इति नियामकमस्ति । अतः श्रुत्या स्मृत्या च यत्रयत्र विनियोगः, तत्रापि यत्र शब्दशक्त्यनुसाराद्बाधकाभावाच्च मुख्यतया निर्वाहःशक्यः, तत्रैकस्मिन्ननेकस्मिन्वा मुख्यत्वमेवेति निर्वोढव्यम् । कश्चात्र विरोधः? एकस्यैव तत्परत्वातत्परत्वलक्षण इति चेन्न, गौणतया स्मार्तविनियोगासिद्धिप्रसङ्गस्योक्तत्वात् । श्रुतावपि * ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति रूढिपरित्यागेन निर्वचनमात्रानुसारिणो विनियोगस्य लोपप्रसङ्गात् । तदभिधायित्वातदभिधायित्वलक्षणो विरोध इति चेत्, किमयमेकस्मिन्नेव प्रयोगे? उत प्रयोगभेदेऽपि? नाद्यः, अनभ्युपगमात् । न द्वितीयः, प्रयोगभेदादेव विरोधपरिहारात्; नानाशक्तिशालिनः शब्दस्य समभिव्याहृततत्तत्पदान्तरार्थानुसारेण तत्तदुचितार्थाभिधायित्वात्; अन्यथा अनेकार्थशब्दानां सर्वेषामपि परित्यागप्रसङ्गात् ।

अस्तु वा विरोधः । अस्तु च श्रुतिमूलायाः स्मृतेः श्रुत्यनुसरिता । तथाऽपि स्वाभाविकसमस्तार्थसाक्षात्कारिणा निरतिशयकारुण्यादिगुणगणेन श्रुतिशिरश्शेखरेण भगवता पुरुषोत्तमेन विप्रकीर्णानन्तदुरवगाहनिखिलनिगमान्ततत्त्वार्थविशदीकरणाय प्रणीतपञ्चरात्रशास्त्रविनियोगानुसारेण श्रुतिरपि नेतव्या । न हि श्रौतो विनियोगः सर्वो रूढ्यैव मुख्यतयैवेति नियन्तुं शक्यम्; ऐन्द्रीन्यायादिविलोपप्रसङ्गात् । यश्चायमर्थो विनियोगानुसारादक्षरानुगुण्याच्चास्माभिरुपवर्ण्यते स न केवलमुन्नयनमात्रप्रभवः, अपि तु वक्ष्यमाणस्फुटतरेतिहासपुराणादिवचनसंवादादिति सर्वथा समूलत्वमेव । अतस्सिद्धमन्यत्र विनियुक्तानामपि सौदर्शनविनियोगात्तदर्थपरत्वम् ।

यत्तु खिलानामखिलानां वा सर्वेषां सौदर्शने कर्मणि ततोऽन्यत्र च विनियोगस्याभ्युपगतत्वाद्विनियुक्तानां च मन्त्राणां विधिपरत्वायोगादभिमतासिद्धिरिति, तदपि विचारणीयम् । किं मन्त्रत्वादेव विधिपरत्वासिद्धिः? उत विनियुक्तत्वात्? यद्वा विनियुक्तत्वे सति मन्त्रत्वात्? न प्रथमः, यच्छब्दाद्यनुपहतविधिशक्तीनां मन्त्राणां विधिपरत्वस्य मीमांसकैरेव स्वीकृतत्वात् । * वसन्ताय कपिञ्जलानालभते इत्यादिषु [मन्त्रत्वप्रसिद्ध्या] मन्त्रत्वं विधिपरत्वं च वर्णितं मीमांसकाचार्यैः । न द्वितीयः, * यंयं क्रतुमधीते तेनतेनास्येष्टं भवतीति तत्तत्क्रतुफलतुल्यफलप्राप्त्यर्थे जपाध्ययने विनियुक्तत्वापि ब्राह्मणभागस्य तत्तद्विधिपरत्वानपायात् । अन्यथा क्रतूनामेव निर्मूलत्वप्रसङ्गात् । न च तृतीयः, विनियुक्तत्वमन्त्रत्वयोर्द्वयोरपि विधिशक्तिविरोधित्वाभावे समुचितयोरपि तयोस्तद्विरोधित्वे प्रमाणाभावात् । विनियुक्तानां

मन्त्राणां विधिपरत्वं न दृष्टमिति चेन्न, * वसन्ताय कपिञ्जलानालभते इत्यस्यैव कृत्स्नवेदजपाद्यनुप्रवेशेन विनियुक्तस्य मन्त्रस्यापि विधिपरत्वस्वीकारात् । उक्तं च भगवता शौनकेन—

*शौनकोऽहं प्रवक्ष्यामि नित्यं विष्ण्वर्चनं परम् । प्रवः [पान्थ]प्रान्तमन्धसोऽधीत्यर्धर्चविधानतः ॥ इति ।

* प्रवः[पान्थ]प्रान्तमन्धसोऽधीयाय ते महेश्वराय विष्णवेऽर्चते इत्ययमर्धर्चो ह्यच्छावाकशस्त्रतया द्वादशाहे विनियुक्तः । येषु तु मन्त्रेषु विधिपरत्वं न दृश्यते तेष्वपि न विनियुक्तत्वेन मन्त्रत्वेन तत्समुदायेन वा विधिपरत्व मपक्रान्तम्, अपि त्वनुवादलिङ्गप्राप्तार्थत्वादिभिः । न ह्येष्वपि मन्त्रेषु तैरेव विधिपरत्वाभावस्स्यात्, सर्वानुवादलिङ्ग-भङ्गकस्याप्राप्तार्थत्वस्य विद्यमानत्वात्—* यदाग्नेयोऽष्टाकपालः * उपरि हि देवेभ्यो धारयति इत्यादिषु । असूत्रयच्च भगवान् जैमिनिः—* वचनानि त्वपूर्वत्वादिति, * विधिस्तु धारणेऽपूर्वत्वादिति च । आह च भगवान् बादरायणः—* विधिर्वा धारणवदिति ।

* दक्षिणे तु भुजे विप्रः इत्यत्र बिभृयादिति विधिरेव प्रतीयते । अयमस्यार्थः—यो विप्रः—ब्राह्मणः, स भगव-च्चिह्नभूतं सुदर्शनं शङ्खं च बिभृयात् । तथा सति हि विप्रत्वानुरूपं कृतं भवतीति भावः । * विष्णुं क्रान्तं वासुदेवं विजानन् विप्रो विप्रत्वं गच्छते तत्त्वदर्शी इति वचनात्तस्य तत्त्वदर्शित्वं हि सिद्धम् । ततश्च सर्वान्तरात्मत्वेन सर्वशेषिणं वासुदेवं विशेषतो यथावस्थितं जानन् ब्राह्मणः स्वात्मनः शेषत्वानुरूपं शेषिणो वासुदेवस्य लाञ्छनं चक्रं शङ्खं च बिभृयादिति वेदवित्सिद्धान्तः, इति । ब्रह्मशब्देन परब्रह्मविवक्षायामपि फलितोऽयमेवार्थः । अस्य चैवमकामो[पनिबन्ध]-पाधिनिबद्धविधिप्राप्तत्वान्नित्यत्वं सिद्धम्, विप्र इति निर्देशेनैव नियोज्याकाङ्क्षाशान्तेः नियोज्यान्तरकल्पनानवकाशात् । यद्यपि चास्योपासनाङ्गत्वं श्रुत्यन्तरे प्रतीतम् ; तथाऽपि ज्योतिष्टोमादीनामिव नित्यत्वमपि न विरुध्यते, विनियोगभेदात् । उपवीतादिवदिति हि स्मरन्ति । भगवच्छास्त्रोक्तकालविशेषादिकमपि न नित्यत्वविरुद्धम्, वसन्ताष्टवर्षादिवत् । *ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः इत्यपि वचनं न ब्राह्मणमात्रस्यावश्यकर्तव्यत्वादितरप्रतिषेधपरम्, अपि त्वकरणे प्रत्यवाय-लाघवपरम् । सामान्यतोऽसत्यवचननिषेधेऽप्याहिताग्नौ * तस्मादाहिताग्निर्नानृतं वदेदिति निषेधवचनमाहिताग्नेरसत्य-वचने प्रत्यवायभूयस्त्वमन्यस्यासत्यवचने प्रत्यवायाल्पत्वं च ज्ञापयति, न पुनरन्यस्यासत्यवचनमनुमन्यते ; तद्वदत्रापि ।

न च वाच्यं धारणे फलविशेषस्योदाहरिष्यमाणानेकश्रुतिसिद्धत्वाद्विध्यपेक्षितस्य च रात्रिसत्रन्यायेन वाक्यशेष-श्रुत्यन्तराधवगतस्य हानायोगेन विश्वजिन्न्यायानवतारात्कामाधिकारत्वे च प्रवृत्तिशैथ्यहेतौ संभवति नित्यत्वकल्पनायोगात् * दक्षिणे तु भुजे विप्रः इति फलनिर्देशरहितविधिवाक्येऽपि श्रुत्यन्तरसिद्धमेव फलमिति ; उक्तोत्तरत्वात्, निराकाङ्क्षस्य नित्यत्वेन स्मृतस्य फलान्तरापेक्षानियमाभावात् । विनियोगभेदात्तु मोक्षाधिकारे नित्यकर्मान्वयस्येव निःश्रेयससाधन-सहकारित्वमप्युपपद्यत एव । अस्तु वोपासनाङ्गत्वेनास्य तदेकफलत्वम् । तथाऽपि मुमुक्षुणा तावदुपासकेनावश्यं कर्तव्यमिति सिद्धम्, अङ्गाननुष्ठानेऽङ्गिनो वैकल्यात् । अत्रापि विप्रवचनं न क्षत्रियादिव्यवच्छेदार्थम् ; तेषामपि वचनान्तरेण विहितत्वात् । यथा—* अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेत्, * युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्ध-पञ्चमानित्यादिषु ब्राह्मणविप्रशब्दौ न क्षत्रियाद्यध्ययननिवारणाय प्रयुक्तौ, क्षत्रियवैश्ययोरप्युपनीतयोरध्ययनस्य सिद्ध-त्वात् । तस्य प्रकृष्टाधिकारित्वमात्रादकरणे प्रत्यवायभूयस्त्वाच्चात्र विशेषनिर्देशः । तुशब्दोऽवधारणार्थः ; दक्षिण एव

सुदर्शनं सव्य एव शङ्खमित्यर्थः। यद्वा दक्षिणसव्यशब्दप्रयोगनैष्फल्यायोगादेव नियमसिद्धेः *मूले बाह्वोः इत्यादि-वाक्यान्तरप्रतिपन्नभुजांशविशेषद्योतनार्थस्तुशब्दः। वैशब्देन प्रसिद्धतासंप्रतिपत्तिरेव सिद्धा।

*ब्रह्मविदो विदुरित्यपि परब्रह्मभूतपरमपुरुषप्रतिपादकवेदविसिद्धान्तप्रसिद्धिपरमेवेति। तथा **कठशाखायाम्** *ध्रुतोर्ध्वपुण्ड्रः इत्यादि। अत्रोर्ध्वपुण्ड्रादिवच्चक्रादिधारणस्यापि ध्यानाङ्गत्वं स्पष्टम्। अत्र चक्रशब्दो वचनान्तरविहित-शङ्खादेरप्युपलक्षणार्थः। व्यापनशीलत्वाद्विष्णुः; तेनाप्यन्तर्यामित्वे तात्पर्याच्छेषित्वं सूचितम्। *परं परात्परमित्यु-भाभ्यामशुद्धेभ्यस्संसारिभ्यश्शुद्धेभ्योऽसंसारिभ्यश्च व्यावृत्तिः। यद्वा परमिति केवलपर्यायः। विष्णुं केवलं ध्यायी-तेत्यर्थः। महतो महान्तं—स्वरूपतो गुणतो वा ये पदार्था उत्कर्षवन्तस्तेभ्यस्सर्वेभ्योऽप्यतिशयितोत्कर्षवन्तमित्यर्थः। यद्वा सर्वेभ्यः पृथुभ्यः पृथुतरमित्यर्थः। सदा हृदि स्थितं परात्परं यदिति पृथग्वाक्यम्, ततश्च यच्छब्दस्सामान्यतो वस्तुमात्र-त्वेनानुवदति; अन्यथा लिङ्गविरोधात्। तमेवंभूतं विष्णुं तत्प्रतिपादकेन स्वरेण—स्वरप्रधानतया स्वरशब्दनिर्दिष्टेन प्रणवाख्येन मन्त्रेण यो महात्मा ध्यायति स भगवत्प्राप्तिविरोधिभ्यः [सर्वेभ्यः] पापेभ्यो मुच्यत इति वाक्यशेषार्थः। स्वरप्रधानतया स्वरत्वं चाम्नातं प्रणवस्य—* स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः इति। **एकायनब्राह्मणे च**— *ओङ्कारः स्वरः मकारो व्यञ्जनं यः स्वरस्सा प्रकृतिः इति स्वरप्राधान्यमेवोक्तम्।

अयमत्र विध्यर्थः—सर्वपापप्रमोक्षकामः ऊर्ध्वपुण्ड्रचक्रादिधारी प्रणवेन प्रतिपादकेन विष्णुं ध्यायेदिति। यो महात्मा स ध्यायेदित्यनध्याहारेण वा योजना; यो ध्यायति स महात्मा भवेदिति वा वचनव्यक्तिः।

तथा ऋचि—*प्रते विष्णो अञ्जजक्रे इत्यादि। स्तवप्रियं स्तव्यं भगवन्तं तुष्टूषन्नभिमुखयति—विष्णो इति। त इति निर्देशेनानिष्टनिवर्तकत्वेष्टप्रापकत्वाद्यपेक्षितसकलाकारयोगित्वमभिप्रेतम्। अनिष्टनिवृत्त्याद्यर्थं हि कस्यचिल्लाञ्छन-धारणम्। अत्राञ्जशब्देन शङ्ख उच्यते; भगवच्चिह्नत्वेन प्रसिद्धेः, श्रुत्यन्तरैकाध्यानुसारादञ्जजलजादिशब्दानां शङ्खेऽपि रूढत्वाच्च। पद्मपरत्वेऽपि न दोषः, चक्रादिवत्पद्मस्यापि तच्चिह्नत्वेन धार्यत्वानुशासनात्। तच्च—*भवेयु-स्सर्वदा तस्माच्छङ्खचक्रगदाम्बुजैरित्यादिषु वक्ष्यते। पवित्रे इत्यनेन धर्मान्तरवदस्यापि ध्यानविरोधिरजस्तमोवृद्धिहेतुभूत-पापनिबर्हणद्वारोपकारकत्वमिति ज्ञापितम्। निरुक्तश्चायं पवित्रशब्दः एकायनीये *पवित्रमिति पुनः कस्य वक्ता, पुनाति च त्रायते चेत्यतः पवित्रमिति। उपपद्यते च भगवत इव तत्संबन्धिनोरपि तयोः पवित्रत्वम्। ध्यानाङ्गत्वेन श्रुत्यन्तरसिद्धे तस्मिन् ध्यानफलभूतसंसारतारणाख्यफलनिर्देशश्च नानुपपन्नः। तर्तवे—तर्तुमित्यर्थः। चर्षणीन्द्राः—ज्ञानवन्तः प्रकाशवन्तो वा विचक्षणाग्रेसरा योगिवर्या इत्यर्थः। प्रशब्दस्य दधत इत्यनेन वा तर्तव इत्यनेन वाऽन्वयः, *व्यवहिताश्चेत्यनु-शासनात्। धारणे प्रकर्षश्च लाञ्छनत्वेन शरीराविमुक्तत्वेन सार्वकालिकत्वम्। प्रकर्षेण तरणं चापुनरावृत्तिलक्षणमात्यन्ति-कत्वम्। एवं शङ्खचक्रे केचिद्धारयन्ति। अन्ये पुनः परिपूर्णानुष्ठायिनो धर्मप्रवर्तकाः पुरातनाः परमर्षयः पञ्चाप्यायुध-रूपाणि तावकानि लिङ्गानि पञ्चस्वपि भुजशिखरयुगललाटमूर्धहृदास्येषु स्वावयवेषु धारयन्तीत्याह—अन्ये पुराणा इति। स्मृतेश्चायमर्थो व्यक्तीभविष्यति। एवं शिष्टाचारप्रदर्शनद्वाराऽवश्यकर्तव्यत्वविधावस्य मन्त्रस्य तात्पर्यम्। जन्माम्भोधि-तरणकामो विष्णुलिङ्गानि चक्रादीनि भुजमूलादिषु स्थानेषु बिभृयादिति विध्यर्थः।

तथा यजुषि—*निचिक्षेप सुषणमित्यादि। अस्यायमर्थः—मध्येबाहुं—बाह्वोर्मध्ये। *पारे मध्ये षष्ठ्या वेति समासः। तत्र छान्दसो बाहुमितिनिर्देशः। बाहुमिति व्यस्तं पदं वा; षष्ठ्यर्थे द्वितीया; सुसिकादेश्छन्दसि

अत्र श्रुत्यन्तरसिद्धभुजशिखरमध्यविवक्षैवेत्येके ; अन्ये तु वक्षस्येव बाहुमध्यत्वप्रसिद्धिप्रकर्षात्तदर्थपरत्वे च द्वयोरपि विकल्पतस्समुच्चयतो वा सुदर्शनधारणस्थानत्वे विरोधाभावात्, तथा च कैश्चिन्महात्मभिरनुष्ठानदर्शनात्, बाहुमध्यशब्देन वक्ष एव व्यपदिश्यत इत्याहुः। यः प्राचीनोऽनुष्ठाता बाहुमध्ये विष्णोरिदं–विष्णोरसाधारणचिह्नमिदं भूरितेजः–प्रभूततेजोविशिष्टं सुदर्शनमदधत्–दधार। * दध धारणे इति धातौ लङन्तं पदम्। स हि प्राक्तनोऽनुष्ठाता भिद्यमानं सुषणं निचिक्षेप–सु[संभक्तं]व्यक्तं बाधमानं पापादिकं निरस्तवानित्यर्थः। अथवा यो बाहुमध्ये दधाति स हि निक्षिपेदिति वाक्यार्थः ; *छन्दसि लुङ्लङ्लिटः इति लिङर्थेऽपि लुङादिविधानात्। अथवा प्राचीनोऽनुष्ठाता परायुधैर्भिद्यमान सुषणं–सुसहनीयमायुधविशेषं निचिक्षेप–परित्यक्तवान्; तैरप्रतिहन्यमानं सुदर्शनं बाहुमध्येऽदधत्–परिगृहीतवानित्यर्थः। रक्षणासमर्थं परित्यज्य रक्षणसमर्थं गृहीतवानित्युक्तं भवति। किं च स एव सुदर्शनधारी, धृतं वा सुदर्शनं दिवानक्तं प्रधर्षति। प्रधर्षणधात्वर्थसामर्थ्यात्प्रतिभटान्बाह्याभ्यन्तरानित्यध्याहरणीयम्। यद्वा यद्दिवानक्तं भूरितेजस्त्वात्परान्प्रधर्षति तत्सुदर्शनमित्यन्वयः। तेजस्त्वमनन्यापेक्षता वा पराभिभवनसामर्थ्यं वा ; यद्वा विग्रहगतं तेजो वा विवक्षितम्। ततश्च सुदर्शनत्वबहुदर्शनत्वं चास्यास्तीति ज्ञापितम्। उक्तं च **श्रीपौष्करे** चक्राब्जाध्याये चक्रस्वरूपकथने भगवतैव– * ब्रह्मरुद्रेन्द्रदेवानामस्य रश्मिचयश्च यः। अपह्लोचनानां वै सुदूराच्च निरीक्षणात्॥

तेनेदं भुवि विख्यातं नाम्ना दुर्दर्शनं द्विज। प्रणतानां च भक्तानां यस्माच्च सुलभं सदा॥
ददाति दर्शनं तेषां स्मृतं तस्मात्सुदर्शनम्। इति।

उक्तं चाहिर्बुध्न्येन–

* स्वतेजसा जगत्सर्वं पूरयन्तं महाबलम्। उद्यत्प्रद्योतनशतप्रभाविख्यातपौरुषम्॥ इत्यादि।

एवं **श्रीविष्णुधर्मे**–* सहस्रमिव सूर्याणामित्यादिकमपि भाव्यम्। एवं सुदर्शनधारणस्य विरोधिनिरसनौपयिकत्वात्तदपेक्षिणस्तद्धारयेयुः ; अन्ये तु जननभागिनस्संसरन्तीत्यभिप्रायेणाह–* बिभृयुस्तज्जनासः इति। जनासः–जनाः, *आज्जसेरसुक् इति छान्दसोऽसुक्। दिवानक्तं बिभृयुरिति वाऽन्वयः। अङ्कनरूपत्वादविभक्तं सदा वहेयुरित्युक्तं भवति।

* स्वमुद्रालङ्कृतश्चापि यस्सदा चक्रधृग्वरेत्। स देशिको निबोद्धव्यः सर्वैस्सामयिकादिकैः॥

इति **श्रीसात्त्वत**वचनमप्येतद्विषयम्। तत्तदिष्टप्राप्तितत्तदनिष्टनिवृत्तिकामस्सदा सुदर्शनं बिभृयादित्यर्थः।

तथा ऋक्सामपठितं वाक्यम्–* चमूषच्छ्येनः इत्यादि। अस्यार्थः–द्रप्सः–भगवद्विभूत्येकदेशभूतः, श्येनः–श्येनजातीयः, शकुनः–पक्षी वैनतेय इत्यर्थः। वैनतेयस्य कर्माधीनपदलाभत्वकथनं कर्मवश्यत्वाभिनयकृतम्। यद्वा अन्योऽत्र श्येनजातीयः पक्षी विवक्षितः। गां विन्दतीति गोविन्दः, गोशब्देन महीवाक्प्रभृतयो विवक्षिताः ; * गवादिषु विन्देस्संज्ञायामिति शः। छान्दसत्वात्तृज्वद्भावः ; ऋदन्तता वा। तस्यायुधानि बिभृत्वा अङ्कनरूपेण सार्वकालिकत्वलक्षणविशेषेण धारयित्वा। अत्र वक्ष्यमाणेषु केषुचित्स्वरो बाहुलकेन प्राह्यः। बिभृत्वेति कन्नन्तं वेदं पदम् ; चमूषदभूत्–भगवत्सेनाधुरन्धरोऽभूदित्यर्थः। यद्वा चमूशब्देन नित्यसूरिपरिषद्विवक्षिता, तत्र सीदति निषीदतीति चमूषत्, नित्यसूरिपरिषन्मध्यवर्तीत्यर्थः। क्रियापेक्षायामभूदिति योग्यक्रियाध्याहारः। अत्रायुधानीति बहुत्वे प्रतीते कपिञ्जलन्यायेन नित्यपरिग्रहौचित्येऽपि पञ्चानामायुधानामविशेषेण प्रसिद्धिप्रकर्षादुपबृंहणानुग्रहाच्च पञ्चेति व्यवस्थाप्यते। इदं च सङ्ख्याविशेषस्थापनम् * [illegible] इति पूर्वोदाहृतेऽपि भाव्यम्। एवम्, अपामूर्मिं समुद्रं सचमानः अन्योऽपि कश्चिद्भगव-

च्छरीरतया तद्भूप्सः तदंशभूतो जीवस्संसारोत्तितीर्षया भगवदीयानि पञ्चायुधानि बिभ्रत् तत एव महिषः तुरीयं धाम महिषो विवक्तीत्यन्वयः । अप्छब्दोऽन्यभूतस्याप्युपलक्षणम् । * पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति, * अप एव ससर्जादौ इत्यादिवच्छरीररूपेण परिणताश्चिद्व्यस्येत्यर्थः । संबन्धसामान्ये षष्ठी । अपामूर्मिम्—अचिद्व्यसंबन्धिनमूर्मिम्, ऊर्मिशब्दाभिलक्ष्यमशनायादिषट्कम्, जन्मादिविकारजातं वा । एकवचनं समुदायाभिप्रायम् । समुद्रं—समुद्रिक्तमित्यर्थः । यद्वा [अपामूर्मिं] समुद्रं—सागरम् । ऊर्मिमत्त्वादूर्मिरिति लक्षणयोच्यते । अचिद्व्यसंबन्धिनमूर्मिमन्तं संसारसागरमित्यर्थः । अथवा समुद्रमपामूर्मि—समुद्रिक्तं गर्भोदकानां पुञ्जमित्यर्थः । सचमानः ; * षच समवाये इति धातुः, अनुप्रविशन्, तन्मध्ये निमज्जन्नित्यर्थः । एतेन दुःखमयसंसारसागरनिमग्नत्वात्तदुत्तितीर्षायोगित्वमप्यस्तीति फलितम् । महिषः—मह पूजायामिति धातोः * अविमद्योष्टिषजिति टिषच् ; पूजित इत्यर्थः । यथा राजचिह्नधारी राज्ञा जगता च पूज्यते तद्वदयमपि भगवता देवमनुष्यादिभिः नित्यसूरिभिश्च पूज्यत इति भावः । महत्पर्यायश्च महिषशब्दः पठितः । तुरीयं—चतुर्थं, धाम—तेजः ; व्यूहत्रयाज्जाग्रदादिपदत्रयात् परं वासुदेवसंज्ञं तेज इत्यर्थः । यद्वा धामशब्दः स्थानपरः ; तेन मुक्तप्राप्यं परमपदं विवक्षितम् । तुर्यं कर्मवश्यानां प्राप्यात्स्थानत्रयाद्विलक्षणत्वेन सर्वस्मात्परमित्यर्थः । सर्वमपि सांसारिकं भोगस्थानमुदाहृत्य * एते वै निरयास्तात स्थानस्य परमात्मनः इति **मोक्षधर्मे**ऽभिहितम् । विवक्ति—स्तुत्या सेवते । धातूनामनेकार्थत्वादत्र योग्यार्थे तात्पर्यं ग्राह्यम् । यद्वा गोविन्दस्यायुधानि बिभ्रत्तत एव चमूषदादिपदसप्तकैर्निरुक्तविशेषावसितैर्गुणैर्विशिष्टस्तुरीयं धाम प्राप्नोतीत्येकवाक्यता । संसारनिवृत्तिपूर्वकतुरीयधामप्राप्तिकामो गोविन्दस्यायुधानि बिभृयादिति विध्यर्थः ।

एवमपि सर्वत्र धारणमात्रं प्रतीयते न त्वङ्कनमिति चेन्न ;

* एभिर्वयमुरुक्रमस्य चिह्नैरङ्किता लोके सुभगा भवेम । तद्विष्णोः परमं पदं ये गच्छन्तीह लाञ्छिताः ॥

इत्यथर्ववेदे व्यक्तमभिधानात् । उरुः प्रभूतः क्रमोऽधिष्ठानं यस्य स तथोक्तः ; विश्वान्तर्यामीत्यर्थः । यद्वा त्रिविक्रमावतारकृतः पदविक्षेप एव क्रमशब्देन विवक्षितः । पद्यत इति पदं प्राप्यं स्थानमिह विवक्षितम् । नास्य स्वरूपार्थत्वं, वैयधिकरण्यसिद्धभेदे बाधकाभावात्, स्थानविशेषस्यापि प्राप्यत्वे बहुश्रुतिसद्भावाच्च । परो मा अस्मादिति परमम् । तदिति स्वरूपविभवादिभिः प्रसिद्धवैलक्षण्याभिप्रायम् । तदयमन्वयार्थः—ये यादृशास्तादृशा अपि उरुक्रमस्य चिह्नैर्लाञ्छितास्ते तद्विष्णोः परमं पदं गच्छन्ति । अतो वयमप्युरुक्रमस्य [चक्रादि]चिह्नैरङ्कितास्तस्मिन्परमपदशब्दाभिधेये भगवल्लोके भगवतोऽन्तरङ्गकिङ्करतया सुभगाः—वल्लभा भवेमेति । मुमुक्षूणामिदमनुसन्धानम् । लोकशब्दस्यैतल्लोकविषयत्वं वा ; अस्मिँल्लोके सद्भिरभिनन्दनीया भवेमेत्यर्थः । यद्वा सुभगाः—भगवत्समाश्रयणौपयिकभाग्यविशेषभाज इत्यर्थः । तदेवमङ्कनलाञ्छनशब्दाभ्यां विशेषतो निर्देशात् भरणादिशब्दस्तत्र पर्यवसितः ; सामान्यशब्दस्य समानप्रकरणोक्तविशेषपर्यवसानस्य न्याय्यत्वात् । परमपदप्राप्तिसौभाग्यविशेषकाम उरुक्रमस्य भगवतश्चिह्नैरङ्कितो भवेदिति विध्यर्थः ।

नन्वत्रापि तप्तैश्चिह्नैरङ्कनं न प्रतीयते, मृत्तिकाचन्दनाद्यालिप्तैरङ्कनोपपत्तेः, तथा च कैश्चिदनुष्ठीयमानत्वादिति चेन्न ; * चक्रं बिभर्ति वपुषाऽभितप्तमित्याद्यृग्वेदखिलवचनवैरस्यात् । देवानां बलं—रक्षकमित्यर्थः । [अमितस्य—सर्वत्र परिपूर्णस्य ।] विष्णोश्चक्रमित्यन्वयः । नाकम्—अकं—दुःखं, तद्रहितं परमपदम् । दुरिता विधूय—दुरितान्यवधूयेत्यर्थः ।

अत्र दुरितशब्देन सांसारिकपुण्यमपि संगृहीतम् । * न सुकृतं न दुष्कृतमित्युक्त्वा * सर्वे पाप्मानोऽतो निवर्तन्ते इति पाप्मशब्देनोपसंहारात्, मुक्तस्य च * सुकृतदुष्कृते धूनुते, * पुण्यपापे विधूय इति द्वयोरपि निवृत्तिश्रुतेः; अत्र * प्रयान्ति यद्यतयो वीतरागाः इति मुक्तप्राप्यस्यैव प्रतीतेः । अत्र विधिस्तु सुगमः ।

नन्वेतदपि तप्तकाञ्चनादिनिर्मितसुदर्शनादिधारणे चरितार्थम् । यथोक्तं ज्यौतिषे बार्हस्पत्ये **मुहूर्तविधाने**—

* जातस्य तु कुमारस्य धारयेत्पञ्चमे दिने । चक्रं कृत्वा सुवर्णेन षडरं मन्त्रसंयुतम् ॥ इति ।

संग्रहश्च— * जातस्य पञ्चमदिने शुभदे मुहूर्ते पञ्चायुधाभरणधारणमिष्टमाहुः ।
नाभिप्रदेशपरिलम्बिसुवर्णसूत्रप्रोतं शिशोर्ग्रहनिवारणकैश्च युक्तम् ॥ इति ।

* कृतचक्रधारीति वचनान्तरमपि तथा सत्यनुगुणमिति चेन्न; * नेमिना तप्ततनुर्ब्रह्मणस्सायुज्यं सलोकतामाप्नोतीति सामोपनिषदैकार्थ्यात् * कृतचक्रधारीत्यत्रापि णिनेरवश्यंभावार्थत्वात् सदा धारणं प्रतीयते । तच्चाङ्कनरूपत्वेऽनुगुणम्; काञ्चनादिनिर्मितस्याभरणान्तरवदेव सदातनत्वाभावप्रसङ्गात् । ततश्च कृतशब्देन स्मृतिसिद्धप्रतिष्ठार्चनादिसंस्कृतत्वं विवक्षितम् । ब्रह्मणस्सायुज्यमिति; सायुज्यं समानभोगादियुक्तत्वम्, * परमं साम्यमुपैतीति श्रुतेः, * मम साधर्म्यमागताः, सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चेति स्मृतेश्च । सूत्रं च—* भोगमात्रसाम्यलिङ्गाच्चेति । सालोक्यादित्रयस्यापि ब्रह्मसायुज्यान्तर्भूतत्वज्ञापनायात्र सालोक्याभिधानम्; देवतान्तरप्राप्तौ हि सालोक्यादिभेदावाप्तिः । यद्वा भगवत्प्राप्तावपि श्रीविष्णुलोकादिषु द्वार[पाला]कादिष्विव तथाविधभेदोऽस्तीति तदपेक्षिणां प्राप्तिभेदद्योतनाय पृथङ्निर्देशः । यथाहुः—

* लोकेषु विष्णोर्निवसन्ति केचित्समीपमृच्छन्ति च केचिदन्ये ।
अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्तः ॥

इति । यथाभिलषितं ब्रह्मसायुज्यादिप्राप्तिकामः चक्रेण तप्ततनुर्भवेदित्युक्तं भवति । नेमिना तप्ततनुरित्यत्र चक्रधारणं न प्रतीयते इति चेन्न; नेमिशब्देन नेम्यवयव[कस्य]चक्रस्य लक्ष्यमाणत्वात् । * पवित्रमित्यग्निः अग्निर्वै सहस्रारः सहस्रारो नेमिः इति तत्पूर्ववाक्यानुरोधाच्च । चक्रपर्यायश्च नेमिशब्दो माधवार्येण **नामानुक्रमण्यामुक्तः**—* चक्रं चारिः पविर्नेमिः पृथक्चक्रस्य वाचकाः इति । एवं पविशब्दस्यात्र चक्रपर्यायत्वेन पठनात् * रथचक्रस्य धारायां वज्रे च पविरीरितः इति वेदनिघण्टुन्तरपठितः पविशब्दश्शब्दान्तरम्; लाक्षणिको वा क्वचित्प्रयोगः । उपक्रमगतोऽर्थान्तरप्रसिद्धोऽग्निशब्दस्तत्र कथमिति चेत्; सौदर्शनस्य धाम्नः * सोमसूर्यदहनप्रभोज्ज्वलं चक्रमेतदुदितं महामुने इत्यादिबह्वृच्यवचनैस्तेजस्त्रयीमयत्वश्रवणात् । यद्वा * साक्षादप्यविरोधं जैमिनिः इति शारीरकसूत्रे प्रतिपादितेनाग्नेयनयेन तस्याग्नित्वम्; एवं च नेतृवाचिनेमिशब्दोऽप्यनुगुणः । अथवा * नेमिना तप्ततनुरिति विधीयमानाङ्कनदशायामग्नितप्तत्वज्ञापनायाग्निशब्दः । अत्राग्निशब्दस्य प्रसिद्धाग्निमात्रपरत्वे * अग्निर्वै सहस्रारः सहस्रारो नेमिरिति क्रमेणाग्निशब्दार्थविवरणं न घटते ।

एवं पवित्रशब्दस्य सुदर्शनपरत्वश्रुतेः * पवित्रं ते विततम्, * चरणं पवित्रम्, * लोकस्य द्वारमर्चिमत् इत्यादिष्वपि सुदर्शनपरत्वं व्याचख्युः । * पवित्रं ते विततमित्यत्र पवित्रशब्दः निखिललोकरक्षादीक्षितस्य भगवतस्सुदर्शनस्य संज्ञा विज्ञायते । श्रुतिरेव हि पवित्रसंज्ञा सुदर्शनस्य नामेति स्वयमेव स्पष्टीकरोति । तथा—* पवित्रमित्यग्निरित्यादि ।

पावयितृत्वात्पातृत्वाच्च पवित्रमिति । पवित्रशब्दश्च रथनेमिविषयतया यास्केन नैगमे काण्डे निरुक्तः ; यथा—* पविः रथनेमिर्भवति पुनाति भूमिमिति । तत्र श्रुतिश्च तेनैवोदाहृता—* उत पवियां रथानामर्ष्टिं भिन्दन्नोजसा इति ।

एकायनब्राह्मणनिरुक्तिश्च पूर्वं प्रदर्शिता । तदयमस्यार्थः—ब्रह्मणस्पते इत्यनेन समानत्वात्पवित्रं विततमित्युभयमपि संबुद्ध्यन्तम् । ते इति तृतीयार्थे षष्ठी । विततं पवित्रं ब्रह्मणस्पते, त्वयाऽतप्तननूरिति संबन्धः ; प्रभुरिति षष्ठ्यर्थे प्रथमा । प्रभोः सर्वेश्वरस्य गात्राणि विश्वतः—विश्वानि, पर्येषि—परिवारयसीत्युक्तं भवति । यद्वा प्रभुस्त्वं विश्वेषामाश्रितानां गात्राणि पर्येषीत्यर्थः । एवं सुदर्शनसंबोधनेन कैश्चिद्व्याख्यातम् । व्याख्यानान्तरमपि—चक्रशरीरिणं केवलं वा भगवन्तं नारायणं वेदवैदिकानां गोप्तारं ब्रह्मणस्पते इति संबोधयन्नाह—* पवित्रं ते विततमिति । तवायुधत्वलाञ्छनत्वाभरणत्वैः शेषभूतं परमपावनं सुदर्शनं विततमित्यर्थः । विततं—विस्तृतं, प्रमाणेषु प्रमातृषु भुवनेषु वा । विश्वतः—* सार्वविभक्तिकस्तसिः ; विश्वस्येत्यर्थः । विश्वस्य प्रभुस्त्वं तव गात्रभूतानि चेतनाचेतनात्मकानि सर्वाणि तत्त्वानि पर्येषि—परितो गच्छसि, व्याप्नोषीत्यर्थः । विश्वतः इति विश्वानिति वाऽर्थः । गात्रशब्देनोपासकानां वा गात्राणि विवक्षितानि । ततश्च प्रभुस्त्वं शेषभूतानामस्माकं गात्राणि तेन विततेन लाञ्छनभूतेन शरीरभूतेन च पवित्रेण पर्येषि, लाञ्छितानि कृत्वा स्वीकरोषीत्युक्तं भवति । तेन पवित्रेणाग्नितप्तेन अतप्ततनूः—अदग्धगात्र इत्यर्थः । तत एव अयमामः—अपक्वकषाय इत्यर्थः । तदिति ब्रह्मोच्यते ; * यत्तत्पदमनुत्तमम्, * तदिति वा तस्य महतो भूतस्य नाम भवति इत्यादिदर्शनात् । ऋग्वेदे—* तत् आमः इति पदभेदाध्ययनादन्यत्रापि तथैवाङ्गीकर्तुमुचितम् । यो भवतश्चक्रेणालाञ्छितः स त्वां न प्राप्नोतीत्युक्तं भवति । ये पुनः श्रुतासः—श्रिताः, पक्वा इत्यर्थः । तेन

* कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः । कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते ॥

इत्याद्युक्तं विवक्षितम् । इदित्यवधारणे । ये सुदर्शनं वहन्तः परिपक्वज्ञानाः, त एव तत्समासत—परब्रह्मभूतं त्वां संप्राप्नुयुरित्यर्थः ।

पवित्रशब्दस्य सुदर्शनपर्यायत्वं न केवलं श्रुतिसिद्धम् ; अपि तु नैघण्टुकैरप्युक्तम् । तथा हि पञ्चायुधानां प्रस्तावे

* सुदर्शनमरं चक्रं पवित्रं चरणं हरेः । शङ्खो जन्यो भवः पाण्डुः पाञ्चजन्यः परावरः ॥ इति ।

काठके— * चरणं पवित्रं विततं पुराणं....दधातु इति । अस्यार्थः—* चरणं प्राङ्गणे चक्रे इति नैघण्टुकाः । श्रीशास्त्रे च—* पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनम् । पर्यायवाचका ह्येते चक्रस्य परमात्मनः ॥ इति ।
एवं पवित्रचरणशब्दयोश्चक्रवाचकत्वेऽपि तत्तन्निर्वचनसिद्धार्थप्रतिपादनपरत्वादत्र न पौनरुक्त्यशङ्का । पवित्रशब्दार्थः प्रागेवोक्तः । चरणशब्दश्चात्र रथचरणाकारत्वात्परगतिसाधनत्वाद्वा । पुराणं—पुरातनम्, अनादीत्यर्थः । पुरातनत्वेऽपि नवमिति च काचिन्निरुक्तिः । विश्वकर्मादिभिश्चक्रवत्पर्वतादिषु तन्निर्माणमिदानीन्तनशिल्पिभिश्चक्रादिनिर्माणवत् । तत्रापि तत्तच्छक्त्यनुप्रवेशात्तत्तत्कार्यकरत्वोपपत्तिरिदानीन्तनचक्रयन्त्रादिवत् । येन पूतः—यदङ्कनेन संस्कृत इत्यर्थः, पूर्वोक्तयैकार्थ्यात् । तरति दुष्कृतानि—भगवत्समाराधनानर्हताहेतुभूतपापान्यतिलङ्घयतीत्यर्थः । यद्वा परम्परया सांसारिकं सर्वमपि कर्मातिक्रामतीत्यर्थः । एतत्सर्वसाधारणमुक्तम् ; तत्स्वस्मिन्नाशास्ते, तेनेति । शुद्धेन—नित्यास्पृष्टदोषेणेत्यर्थः । पूता इत्यादिकं पूर्ववत् । अतितरेमेत्यन्वयः । लोकस्य द्वारं—भगवल्लोकप्राप्त्युपायभूतमित्यर्थः । यद्वा लोकस्य—जनस्य पुरुषार्थप्राप्त्युपायभूतमित्यर्थः । अर्चिर्ज्योतिर्महःशब्दैर्ज्वालाकिरणप्रकाशादिभेदस्य विवक्षितत्वान्न पौनरुक्त्यम् । भ्राजमानं—शोभमानम् ;

तेन सुदर्शनत्वादिकं विवक्षितम् । * अमृतस्य धारा बहुधा दोहमानमिति; समस्तजरामरणसन्तानोच्छेदकस्य नित्यस्य परमपुरुषार्थस्यानुभवप्रकारादीन् पङ्क्तेरुपरि गङ्गानिपातवत्स्वयमेवायत्नलभ्यान्संपादयतीत्यर्थः । लोके—प्राप्तिदशायां भगवल्लोके; यद्वा, अस्मिँल्लोके उपासनदशायाम् । सुधितान्—सुखितानित्यर्थः । सुप्रतिष्ठितान् दधात्विति तदपेक्षिताशासनं वा । विनियोगान्तरानुरूपमर्थान्तरमर्थान्तराविरुद्धमिति प्रागेवोक्तम् । एवं वाक्यान्तराण्यपि भाव्यानि ।

तदेवं प्रत्यक्षैः प्रत्यक्षवत्पठ्यमानैश्च श्रुतिवाक्यैर्विशदं प्रतिपन्नस्यार्थस्य विद्यमानैरप्युपबृंहणैर्नैवापेक्षा । अतः कल्पसूत्रकारैर्मन्वादिभिश्चास्मर्यमाणत्वचोद्यमपास्तम् । न च सर्वे सर्वैः स्मर्यते, तथा सत्यन्यनैरपेक्ष्यप्रसङ्गात् । कतिकति कल्पसूत्रकारैर्मन्वादिभिश्चानुपात्ता इतिहासपुराणायुर्वेदधनुर्वेदगन्धर्ववेदार्थशास्त्ररत्नशास्त्रशिल्पशास्त्रादिषु संगृह्यन्ते । अस्ति च शाण्डिल्यस्मृतिः—

* पशुपुत्रादिकं सर्वं गृहोपकरणानि च । अङ्कयेच्छङ्खचक्राभ्यां नाम कुर्याच्च वैष्णवम् ॥
कारयित्वा सुवर्णेन पञ्चायुधगणं हरेः । बध्नीयात्कण्ठदेशे तु बालानां सूतिकागृहे ॥
न मुद्रयेदासनानि शयनानि महीतलम् । स्थापयेत्क्षेत्रमध्ये तु शिलां चक्रादिमुद्रिताम् ॥
मुक्तामणिसुवर्णाद्यैः कृत्वा चक्रादिभूषणम् । यथार्हं बिभृयुस्सर्वे पुमांसस्स्त्रीजनोऽपि च ॥

इत्यादिका । [तथा च वसिष्ठस्मृतिः—

* अष्टमात् षोऽशाद्वाऽहाद्वार्थे चक्रादिभूषणम् । प्रतप्तैरङ्कनं पश्चात्सदा वा भूषणं स्त्रियः ।
जातकर्मणि वा कुर्याच्चौलोपनयनेऽपि वा । वेदाध्ययनकाले वा चक्रचिह्नं विधानतः ॥ इत्यादिका ।]

सन्ति चेतिहासाः । यथा श्रीविष्णुधर्मे द्व्यशीतितमेऽध्याये यमकिङ्करसंवादे—

* भक्तां भ्रमतामत्र विष्णुसंश्रयमुद्रया । विनाऽऽज्ञाभङ्गकृन्नैव भविष्यति नरः क्वचित् ॥ इत्यादि ।

एतेन, * वसति मनसि यस्य सोऽव्ययात्मा पुरुषवरस्य न तस्य दृष्टिपाते ।
तव गतिरथवा ममास्ति चक्रप्रतिहतवीर्यबलस्य सोऽन्यलोक्यः ॥

इति श्रीविष्णुपुराणगतयमकिङ्करसंवादवचनमपि गतिसामान्यन्यायेन व्याख्यातम्; * परिहर मधुसूदनप्रपन्नानिति प्रपन्नप्रकरणौचित्याद्वाचिकमानसिकशुद्धिवत्कायिकशुद्धेरपि वक्तव्यत्वात्स्ववाक्यौचित्यादध्याहारादिनिरपेक्षत्वाच्च । अयमेवार्थो मात्स्येऽन्यत्र च यमकृष्णार्जुनसंवादेऽपि स्पष्टः—

* मच्चक्राङ्कितदेहो यो मद्भक्तो भुवि दुर्लभः । नैवाप्नोति वशं मृत्योरप्याज्ञाभङ्गकृन्नरः ॥
नान्यं देवं नमस्कुर्यान्नान्यं देवं निरीक्षयेत् । नान्यप्रासादमारोहेन्नान्यदायतनं विशेत् ॥
चक्राङ्कितस्सदा तिष्ठेन्मद्भक्तः पाण्डुनन्दन ॥ इति ।

एवं चक्रादिधारणान्मृत्युवशत्वाभावः श्रीविष्णुतत्त्वेऽपि नरकप्रस्तावे प्रोक्तः—

* चक्रादिधारणं पुंसां परसंबन्धवेदनम् । पतिव्रतानिमित्तं हि वलयादिविभूषणम् ॥
वैष्णवेभ्यो हि बिभ्यन्ति देवा नरकरक्षकाः । अवमानक्रिया तेषां संहरत्यखिलं जगत् ॥
कालेनैतावता तेषु नरकेषु तु कश्चन । न दृश्यते महावीर्य प्रभावात्परमेष्ठिनः ॥ इति ।

एवं भारतेतिहाससारतया सर्वशिष्टपरिगृहीतेतिहाससमुच्चये द्वात्रिंशेऽध्याये श्रीपुण्डरीकाख्याने—

* केचिच्चकाङ्क्षितास्तत्र प्राणिनः पुण्यदर्शनाः । विचरन्ति यथाकामं पुण्यतीर्थप्रशंसिनः ॥ इत्यादि ।

न चैतत्तत्र प्रतिक्षेप्यपक्षानुप्रविष्टम्; अङ्गिनो नारायणोपासनस्यैवानन्तरं विधीयमानत्वात्, पूर्वोत्तरगतनानागम-नानापक्षविकल्पानुप्रविष्टत्वाभावात्, सालग्रामक्षेत्रप्रशंसारूपत्वाच्चास्य वाक्यस्य । तथा—

* नारदोऽहमनुप्राप्तस्त्वद्दर्शनकुतूहलात् । प्रभवो भगवद्भक्ता मादृशां सततं द्विज ॥
स्मृतस्संभाषितो वाऽपि पूजितो वा द्विजोत्तम । पुनाति भगवद्भक्तश्श्वपाकोऽपि यदृच्छया ॥

इति भगवद्भक्तप्रशंसातात्पर्यदर्शनाच्च । तिष्ठतु चान्यत्सर्वं, स्पष्टमुक्तं हि भगवता व्यासेनैव पञ्चमे वेदे भीष्मपर्वणि चतुर्थेऽह्नि देवगुह्ये—

* ब्राह्मणैः क्षत्रियैर्वैश्यैश्शूद्रैश्च कृतलक्षणैः । अर्चनीयश्च सेव्यश्च नित्ययुक्तैस्स्वकर्मसु ॥
सात्त्वतं विधिमास्थाय गीतः संकर्षणेन यः ॥ इति ।

लाञ्छनं लक्ष्म लक्षणमिति पर्यायः । न चैतदासत्त्या शूद्रमात्रविषयमिति वक्तुं युक्तम्, चतुर्णामपि समुचितानाम-विशेषेण तदन्वयप्रतीतेः । ये तु * कृतलक्षणैरित्येतत्कृतचीर्णाचारैरिति व्याचख्युः, तेषां नूनमाग्रहग्रहेण पदार्थज्ञान-मपि मुषितम्; लक्षणशब्दस्याचारवाचकत्वेन प्रसिद्ध्यभावात्प्रसिद्धार्थे बाधकाभावेनोपचारस्याप्रसिद्धयोगस्य वाऽङ्गीकारा-योगात् । आचारबोधकत्वानुरूपस्य च योगोपचारयोर्निमित्तस्य निर्वचनसादृश्यसंबन्धादेः स्फुटस्यादर्शनात्; यथा-कथञ्चिदन्यथाकरणेऽतिप्रसङ्गात् । ये तु कृतयज्ञोपवीतादिलक्षणैरिति व्याचख्युस्तेऽपि तेनैवाग्रहग्रहेण शूद्रैश्चेति पदस्य तदन्वयस्य वा विस्मारिताः । न चान्यत्किञ्चिदस्ति शूद्रचिह्नं येनादिशब्देन तत्संग्रहस्स्यात् ।

ननु शूद्राणामपि—* कृतयज्ञोपवीतादिलक्षणैरित्यादौ कृतयुगे यज्ञोपवीतादिधारणमितिहासादिषु श्रुतमिति चेत्, अहो महत्त्वमैतिहासिकत्वस्य, यद्ग्रन्थानां तात्पर्यार्थवदाभिधानिकार्थमपि तिरोधत्ते । आदिकृतयुगे शूद्राणामभाव एव हि महाभारतादिषु प्रपञ्चितः । ततश्च तत्र काले सर्वेषां यज्ञोपवीतधारणवचनमपि पश्चाद्वृत्तिभेदेन शूद्रीभविष्यतां तदातन-ब्राह्मणविशेषाणां तद्धारणेन चरितार्थम् । अस्तु वा तदानीं वचनबलाच्छूद्राणामपि तद्धारणम्; तथाऽपि नात्र श्लोके तद्विवक्षा शक्या, तेषामाद्यत्रेतायुगात्प्रभृति तत्प्रसङ्गा[त्; अत्र च]भावात्; ततश्च कालविशेषस्यानन्तरश्लोकेऽभिहितत्वात्—

* सात्त्वतं विधिमास्थाय गीतस्संकर्षणेन यः । द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ॥ इति ।

इदं च कालविशेषविधानं न कालान्तरनिषेधपरम्, सार्वकालिकत्वेन वचनान्तरशतैर्विहितत्वात् । अत एव गीतिकाल-विशेषपरत्वेऽपि न दोषः । किं च भगवत्समाराधनविधायके वाक्ये तदसाधारणं किञ्चिदङ्गत्वेन विधातुं युक्तम् । यद्यपि च वर्णाश्रमाचारपरित्यागशङ्कानिवृत्त्यर्थं यज्ञोपवीतादिविधानमपि युक्तम्; तथाऽपि—*सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु,

* ब्रह्मसूत्रपरित्यागाद्ब्रह्मचारी गृही वनी । परिव्राट् चापि पतितस्तस्मात्तन्न परित्यजेत् ॥

इत्यादिस्मृतिशतसुप्रतिष्ठितत्वादस्यार्थस्यात्र न तद्विधानापेक्षानिबन्धः । तदेवमाचारयज्ञोपवीतादेस्सर्वदेकार्चनसाधारणत्वान्नात्र विशेषविध्यपेक्षेति युक्तमनुसंधत्स्व । किंच * सात्त्वतं विधिमास्थाय गीतस्संकर्षणेन यः इति भगवच्छास्त्रपुरस्कारेण समाराधनविधानात् कृतलक्षणपदस्यापि तदनुसारेण व्याख्या युक्ता । तत्र हि ब्राह्मणादीनां भगवदर्चनप्रवृत्तानां चकादेरवश्यधार्यत्वम् कृतलक्षणशब्दस्य च तद्विषयत्वं सुस्पष्टम् । यथा श्रीविष्णुमन्दिरे प्रतिष्ठाध्याये—

* प्रतिष्ठादिवसं ज्ञात्वा ऋत्विग्भिर्द्विजसत्तमैः । एकान्तिमुनिमुख्यैस्तु कृतचक्रादिलक्षणैः ॥
यजमानः प्रकुर्वीत वेद्यादिस्थापनं पुरा ॥ इति ।

तथा पारमेश्वरे च प्रतिष्ठाध्याये–

* येषु व्यक्तेषु चिह्नानि नाभिव्यक्तानि सत्तम । तान्यपि स्वानि चिह्नानि ललाटे चांसपट्टयोः ॥
पृष्ठे वाऽप्यङ्गपट्टे वा पाणिपादतलेषु वा । मूर्ध्नि वा दधते तस्मात्तत्र तत्र निरीक्षयेत् ॥
यस्मादलक्षणा व्यक्तिर्विद्यते न कदाचन । एवं तदीया विप्राश्च क्षत्रिया वैश्यजातयः ॥
मौद्गल्याद्यास्तथाऽन्ये च न तच्चिह्नविवर्जिताः । भवेयुस्सर्ववेदा तस्माच्छङ्खचक्रगदाम्बुजैः ॥
लोहैरनलसन्तप्तैस्तत्तन्मन्त्राधिवासितैः । पूजितैरर्घ्यगन्धाद्यैरङ्कितव्याः क्षणेन तु ॥
त्रय्यन्तज्ञानसंपन्ना यथोक्ताचारनिष्ठिताः । विप्राद्यास्ते च शूद्राश्च यदैवं कृतलक्षणाः ॥
तदा तु योग्या विज्ञेयाः समयश्रवणादिषु । शास्त्रोदितासु सर्वासु सामग्रीषु महामते ॥
यागोपकरणान्येवमर्घ्यपाद्यादिकान्यपि । सँल्लाञ्छयानि यथायोगं शङ्खचक्रादिलक्षणैः ॥
तथा यानासनादीनि विभोस्सर्वाणि यत्नतः । स्वात्मोपकरणं सर्वमासनादिविवर्जितम् ॥
अङ्गुलीयकपर्यन्तं भूषणं कटकादिकम् । उत्तमाङ्गसमुद्धार्यं सर्वमुष्णीषपूर्वकम् ॥
चक्रादिलाञ्छितं कुर्यात्तदीयाश्च गवादयः । विप्रादिवल्लाञ्छितव्यास्तदीया भूरुहादयः ॥
लाञ्छितव्या यथायोगं चक्रशङ्खादिलक्षणैः । आराधकाद्याः कर्मण्या एवं चक्रादिलाञ्छिताः ॥
देवतान्तरचिह्नैस्तु अकर्मण्याश्च लाञ्छिताः । यत्र वा भगवन्मूर्तौ लाञ्छनं न प्रदृश्यते ॥
तत्र वै लक्षणन्यासं न कुर्यात्स्वेच्छया द्विजः । यथास्थितैव सा व्यक्तिः पूज्या व्यापकमन्त्रतः ॥
तदन्ये लाञ्छितव्यास्स्युस्सर्वे पूर्वमलाञ्छिताः ॥ इति ।

श्रीविष्णुतत्त्वे तृतीयपादे प्रथमे पटले–

* एवं विज्ञाप्ताश्शिष्याश्चक्रलिङ्गसमन्विताः । देवा एव भवन्त्येते नान्येषां कर्मकारकाः ॥ इति ।

द्वितीये पटले–* इति तेनाभ्यनुज्ञातश्चक्रलिङ्गधरो भवेत् । इति ।

नवमे पटले– * संस्कारव्यञ्जितात्मानः प्रतिचिन्हेन लाञ्छिताः । देवाभिधानवन्तश्च त्यक्तास्पदपरिग्रहाः ॥
तमेव सर्वभावेन संप्रयान्तु महामुने । इति ।

अत्रान्तिमे पटले–* चक्रादिधारणं पुंसामित्यादि प्रागेवोक्तम् । तत्रोपरितने चतुर्थे पटले–

* ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः । एते चाश्रमिणः प्रोक्ताश्चत्वारः क्रमयोगतः ॥

इत्यारभ्य * चक्रलिङ्गधरास्सर्वे समयव्रतनिष्ठिताः इति । भवेयुरिति शेषः । **पराशरसंहितायां** गृहार्चाप्रतिष्ठायाम्–

* श्रोत्रियो विष्णुभक्तस्तु गृहस्थश्शास्त्रवित्तमः । चक्रलिङ्गधरो विप्रः प्रतिष्ठां कर्तुमर्हति ॥
तेन प्रतिष्ठि[ते]तस्तत्र सन्निधत्ते सदा हरिः । देवतान्तरभक्तो वा समबुद्धिरथापि वा ॥
नास्तिको वेदहीनो वा न प्रतिष्ठां समाचरेत् ॥ इति ।

नारदीयपद्धतौ च—

* गृहस्थः श्रोत्रियो विप्रो नित्यकर्मरतश्शुचिः । शान्तश्चक्रधरो दान्तस्सद्भक्तो दोषवर्जितः ॥
शास्त्रज्ञः कर्मदक्षश्च प्रतिष्ठां कर्तुमर्हति ॥ इति ।

सर्वसंहितासारभूते **श्रीसात्त्वते** च विभवमूर्तिपरिच्छेदे—

* नाम्नैर्वलैर्ध्वजैर्येषां व्यक्तिर्व्यक्ता जगत्त्रये । तेऽपि लाञ्छनवृन्दं तु धारयन्त्यङ्गिगोचरे ॥
ललाटे वांसपट्टे वा पृष्ठे पाणितलद्वये । तनूरुहचये मूर्ध्नि कर्मिणां प्रतिपत्तये ॥
अपि संसारिणो जन्तोस्स्वभावाद्वैष्णवस्य च । न जहात्याच्युतं लिङ्गं किं पुनर्विभवाकृतेः ॥ इति ।

न च वाच्यम् * असूयत शुभाचारं वासुदेवपरायणम् । शुभलक्षणसंपन्नं चक्राङ्कितमनुत्तमम् ॥ इति लैङ्गवच[नात्]नवत् इदमपि सहजचिह्नपरमिति ; तस्मिन्नपि लैङ्गवचने सहजचिह्नपरत्वे नियामकाभावात्, *शुभलक्षणसंपन्नमित्यनेन गतार्थत्वात्, शुभाचारमितिवत्पाश्चात्यार्थवर्णनोपपत्तेश्च । अस्तु वा तत्र शुभलक्षणशब्दस्य गोबलीवर्दन्यायात्सङ्कोचः, अत्र तु संहितान्तरश्रुत्याद्यनुसारादङ्कनविषय[मेवेति]मिति मन्तव्यम् । एवं **सनत्कुमारसंहितादिष्वपि**—

* सर्वपापविनाशार्हं रथाङ्गस्य तु धारणम् । सर्वकल्याणदमिह पश्चात्संसारनाशनम् ॥
सुवर्णरूप्यताम्राद्यैर्लोहेन च तथैव वा । तथा रथाङ्गमष्टारं सुनाभिं च सुवृत्तकम् ॥
ज्वालाचतुष्कसंयुक्तं कृत्वा चैवं विधानतः । अग्नौ प्रताप्य विधिवद्धारयेद्भक्तिसंयुतः ॥ इत्यादि द्रष्टव्यम् ।

तदेवं भगवच्छास्त्रे समाराधकादीनां सर्वेषामपि चक्रादिलाञ्छनधारणस्यावश्यकर्तव्यतयाऽभिहितत्वात् प्रमाणान्तरगवेषणं चापवरकनिहितहिरण्यनिधेः पुरुषस्य कोद्रवाद्यर्थं कृपणजनयाचनमिति परिहसन्ति सन्तः । तेनाहितलक्षणपर्यायतया कृतलक्षणशब्दस्याप्रसिद्धरूढिविशेषाश्रयणमपि निरस्तम् । अतः—* ब्राह्मणैः क्षत्रियैर्वैश्यैश्शूद्रैश्च कृतलक्षणैरिति चक्रादिविषयमेव ।

एतेन यदुक्तं **हरिवंशे** सप्तचत्वारिंशच्छततमेऽध्याये यात्रारम्भे—

* चक्राङ्किताः प्रवेष्टव्या यावदागमनं मम । नामुद्रिताः प्रवेष्टव्या यावदागमनं मम ॥ इति,

तदपि यथोपलम्भं सामान्यतस्सर्वजनविषयमेवेति निर्व्यूढम् । यद्यपि तत्र नगररक्षाभिधाने तात्पर्यम् ; तथाऽपि भगवदसाधारणचिह्नमिदमित्यपि सिद्धं भवति, * वैष्णवानां विशेषतः इत्यादिवचनान्तरानुसाराच्च । न च नगररक्षौपयिकभटादिमात्रविषयमिदमिति वक्तुं शक्यम्, तावन्तं कालं ब्राह्मणादेस्तत्र संचारनिरोधे प्रमाणाभावात्, ब्राह्मणादेश्चक्राङ्कितत्वाभावे प्रमाणाभावाच्च, प्रत्युत श्रुतिस्मृत्यादिविहितत्वेन तद्वत्त्वादेव । नन्वचक्राङ्कितस्यापि ब्राह्मणादेर्निवारणमत्रानुपयुक्तमिति चेन्न, अभागवतानां ब्राह्मणानामप्यसितमनसामाशयपरिज्ञानायोगेन तन्निवारणस्यापि नगररक्षणौपयिकत्वात् । अतो ये चक्राङ्कितास्ते प्रवेष्टव्या एव न तु निवारणीयाः ; ये तु न चक्राङ्कितास्ते न प्रवेष्टव्या इति वचनव्यक्तावनुवादांशस्य पुरोवादसापेक्षत्वेन श्रुत्याद्युपस्थापितब्राह्मणादिसर्ववर्णसंभवभगवदसाधारणजनविषयोऽयं ये चक्राङ्किता इत्यनुवादः ; तद्व्यतिरिक्तविषयश्च निषेधः । ये प्रवेष्टव्यास्ते चक्राङ्किता एव स्युरिति वचनव्यक्त्या लोहितोष्णीषन्यायेन विशेषणविधानतात्पर्येऽपि नगरप्रवेशस्य प्रतिनियतजातिविषयत्वाभावेन साधारण्येनानुवादात्तत्तज्जातीयेषु चक्राङ्किता एव प्रवेष्टव्या नामुद्रिताः इति वाक्यार्थस्स्यात्, तथाऽपि ब्राह्मणादेस्तद्वत्त्वं सिद्धम् ।

पौराणिकानि च परश्शतानि वचांसि ।

पाद्मे— * धारयेद्विष्णुभक्तस्तु चक्रं बाहौ तु दक्षिणे । वामे तु शङ्खराजानं धारयेद्विष्णुमाप्नुयात् ॥
चक्रेणैवाङ्कितो विद्वान्वासुदेवं समाश्रयेत् । भावभक्तिं समास्थाय ब्रह्मलोकं प्रयास्यति ॥ इति ।

श्रीभागवते— चक्राङ्कितस्य सान्निध्ये तपः कुर्यात्प्रयत्नतः । स्नानं दानं जपं होमं तत्सर्वं चाक्षयं भवेत् ॥
संवत्सरेण यत्पापं मनसा कर्मणा कृतम् । तत्सर्वं नश्यते तेषां सकृच्चक्राङ्कदर्शनात् ॥
ज्वरदाहभयं चैव चोराग्निजभयं तथा । तत्सर्वं प्रशमं याति यत्र चक्राङ्कितो वसेत् ॥ इति ।

आग्नेये— * पञ्चायुधानि धार्याणि भक्तिश्रद्धोपबृंहितैः । ललाटे मूर्द्धि हृद्बाहोरेकत्रैकं पृथक्पृथक् ॥
ललाटे तु गदा धार्या मूर्ध्नि चापस्ततः परम् । नन्दकं चैव हृन्मध्ये शङ्खचक्रे भुजद्वये ॥
[य]तथा च विधिवत्कृत्वा पञ्चायुधविधानतः । तत्तन्मन्त्रेण मन्त्रज्ञः प्रतिष्ठाप्य पृथक्पृथक् ॥
वह्निमध्ये समारोप्य विधिवत्पूजयेत्पुनः । अङ्कयेद्विधिवद्भक्तप्रमत्तस्समाहितः ॥
वर्णाश्रमेषु निष्ठानामन्येषां च विधानतः । कर्तव्यं भगवद्भक्तैस्सिद्धैर्मुक्तैश्च योगिभिः ॥
चक्रादिधारणाद्ब्रह्मन्विष्णुलोके महीयते । इति ।

सिद्धैः—सिद्धिकामैः ; मुक्तैः—मुमुक्षुभिरित्यर्थः । आदिकर्मणि क्तः, आशंसायां वा । **भविष्यत्पुराणे**—
* चक्राङ्कितभुजं दृष्ट्वा यस्तु तं नाभिवादयेत् । तिर्यग्योनिशतं प्राप्य विष्ठायां जायते क्रिमिः ॥ इति

ब्रह्मवैवर्ते— * चक्राङ्कितभुजं मर्त्यं यो निन्दयति सर्वदा । स याति नरकं घोरं यावदाभूतसंप्लवम् ॥ इति ।

लैङ्गे— * अष्टाक्षरविदस्सर्वे विष्णुचक्राङ्कितास्तथा । श्रावका वासुदेवस्य तथैव नटनर्तकाः ॥
अन्ये च वैष्णवास्तत्र सर्वे चक्रेण लाञ्छिताः । इति ।

श्रीवाराहे— *वासुदेवाङ्कनं कुर्यादात्मनो बाहुमूलयोः । सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते ॥ इति ।

तत्रैव क्षेत्रमाहात्म्ये—
* मच्चक्राङ्कितदेहो यो मद्भक्तो भुवि दुर्लभः । मामेवैष्यति धर्मात्मा मदेकान्तेन चेतसा ॥
चक्राङ्कितभुजाः केचिद्यत्र कुत्र वसन्ति वै । योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे ॥
ये केचिद्यत्र पुरुषा विष्णुचक्राङ्कमुद्रिताः । तेषां दर्शनमात्रेण महापातकनाशनम् ॥
भूतप्रेतपिशाचाश्च डाकिन्यश्च वसुन्धरे । तत्सर्वं प्रशमं याति यत्र चक्राङ्कितो वसेत् ॥ इत्यादयः ।

स्कान्दे यमवचनम्—
* येषां चक्राङ्कितं गात्रं शूद्रेष्वपि च दृश्यते । ते वै स्वर्गस्य नेतारो ब्राह्मणा भुवि देवताः ॥ इति

* शूद्रेष्वपि च दृश्यते इत्यस्य स्थाने * लोकेषु परिदृश्यते इति **वरदराजीयस्मृतिसंग्रहे** यमस्मृतिपाठस्संगृहीतः

वामनेऽपि—* लीलयाऽपि लिखेद्यस्तु बाहुमूले सुदर्शनम् । कुलकोटिं समुद्धृत्य स गच्छेत्परमं पदम् ॥ इति ।

मात्स्ये— * चक्राङ्कितभुजाः केचिच्छङ्खाङ्कितभुजास्तथा । शङ्खचक्रधराः केचित्कुले विष्णुपरिग्रहे ॥
शङ्खचक्राङ्कनं कुर्यादात्मनो बाहुमूलयोः । कलत्रापत्यभृत्येषु पश्वादिषु च मुक्तये ॥
मच्चक्राङ्कितदेहो यो मद्भक्तो भुवि दुर्लभः । नैवाप्नोति वशं मृत्योरप्याज्ञाभङ्गकुञ्जरः ॥ इति ।

श्रीगारुडे— * विष्वक्सेनस्स्वयं चक्रमादायात्मविभूषणम् । प्रयच्छति महातेजा हरिभक्तानुकम्पया ॥
विष्णुचक्राङ्कितं गात्रं पवित्रमिति वै श्रुतिः । चक्राङ्किताय दातव्यं हव्यं कव्यं द्विजोत्तमैः ॥
अचक्रधारिणं विप्रं यश्श्राद्धे भोजयिष्यति । रेतोमूत्रपुरीषादीन् स पितृभ्यः प्रयच्छति ॥ इत्यादि ।

तथा— * अग्निनैव तु संतप्तं चक्रमादाय वैष्णवम् । दाहयेत्सर्ववर्णानां हरिसालोक्यसिद्धये ॥

तथा ब्रह्माण्डे श्रीविष्णुरहस्ये त्रयस्त्रिंशेऽध्याये—

* श्रावका वासुदेवस्य तथैव नटनर्तकाः । अन्ये च वैष्णवास्तत्र सर्वे चक्रेण लाञ्छिताः ॥ इति ।

तत्रैव प्रथमेऽध्याये—

* वैष्णवा मुनयः [पूज्याः]पुण्या विष्णुलक्षणलक्षिताः । ध्यायिनो योगनिरताः सदा विष्णुपरायणाः ॥

इति । **तत्रैव** मोक्षधर्मे उमामहेश्वरसंवादे श्रीवैष्णवमाहात्म्ये—

* शङ्खचक्राङ्कितान् भक्त्या यः पूजयति मानवः । स साक्षाद्विष्णुसामीप्यं लभते नात्र संशयः ॥

इत्यारभ्य महता ग्रन्थेनायमर्थः प्रपञ्चितः । उपपुराणेषु ब्रह्माण्डसंहिताभेदरूपे **वायव्ये**—

* उपवीतादिवद्धार्याः शङ्खचक्रादयस्तथा । ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥
विद्या विभूषणं पुंसस्तस्या वृत्तं विभूषणम् । विष्णुभक्तिर्विभूषाऽस्य सा चक्राद्यङ्कभूषणा ॥ इत्यादि ।

आदित्यपुराणे—

* चक्रादि धारयेद्विप्रो ललाटे मस्तके भुजे । पातकादिविशुद्ध्यर्थं भवक्लेशविनाशिनम् ॥
विहगेशेशनामाङ्काः शङ्खचक्राङ्किता नराः । निश्शङ्काश्च निरातङ्कास्ते सङ्कर्षणकिङ्कराः ॥
[शङ्खचक्रोर्ध्वपुण्ड्रादिरहितो ब्राह्मणाधमः । सजीवन्नेव चण्डालस्सर्वकर्मबहिष्कृतः ॥
स्वर्णस्तेयं सुरापानं गुरुतल्पायुतानि च । सर्वं दहति निश्शेषं सकृच्चक्राङ्कदर्शनम् ॥

इत्यादीनि परश्शतानि प्रमाणानि विद्यन्ते । ग्रन्थगौरववशादत्र न लिख्यन्ते ।]

यद्यप्येते श्रुतिस्मृत्यादयो न दृश्येरन्; तथाऽपि नेदमनुष्ठानं हेयम्, होलकाधिकरणन्यायात्सर्वदेशवर्तिनोऽप्याचाराः प्रत्यक्षश्रुत्याद्यविरुद्धाः सर्वेषामप्युपादेया इति निरणैषुः; दृश्यते च सर्वेष्वपि च देशेषु भगवत्पराणां सुदर्शनादिधारणम् । तत्राप्यङ्कनविधिमनुस्मरन्ति प्रायशो विद्वांसः । केचित्तु नूनमुष्णालवो यथाकथञ्चिदपि धारणमुपादेयमिति प्रशस्तया मृत्तिक्या लाञ्छयन्त्यङ्गानि । तुलसीकाञ्चनलोहताम्रादिनिर्मितां वा मुद्रां धारयन्ति । किंच * आत्मदास्यं हरेस्स्वाम्यं स्वभावं च सदा स्मरेत्यादिभिस्स्वतस्सिद्धं भगवद्दास्यमनुवर्तेतेति सामान्यतो विहिते तदुचितमनुष्ठीयमानमनिवार्यं पद्मकरणनामधारणवत् । न चाङ्गुलिविच्छेदस्यापि प्रसङ्गः, तस्याननुष्ठाननिरस्तत्वात् । सर्वदेशवर्तिभिरननुष्ठानं दुर्निश्चयमिति चेन्न, यथादृष्टि निरूपणमात्रस्यैव [कर्तृ]वक्तव्यत्वात्; अन्यथाऽतिप्रसङ्गात्, व्याप्त्यादेश्चानुदयप्रसङ्गात् । यद्यपि तस्याप्यनुष्ठानं क्वचित्स्यात्, ततस्तस्यापि न्यायबलादुपादेयत्वमेव स्यात्, न तु तत्प्रसङ्गेन ततोऽन्यस्य निषेधः । एतेन देवतान्तरचिह्नधारणप्रसङ्गोऽपि परिहृतः, तस्य स्वसैद्धान्तिकैरन्यैश्च निषिद्धत्वेनाधर्मत्वाच्च । नन्वयमप्याचारो विप्रतिपन्नत्वाद्धेयः स्यादिति चेत्, तत्किं विप्रतिपत्तिमात्रेण ? उत प्रमाणादर्शनात् ? अथ प्रमाणविरोधादिति ? नाद्यः, अतिप्रसङ्गादेः प्रागेव स्खलनिरूपणे प्रतिपादितत्वात्; धारणप्रतिकोटित्वेनाधारणस्यापि विप्रति-

पन्नतया हेयत्वप्रसङ्गाच्च । न द्वितीयः, प्रमाणप्रदर्शनात् । नापि तृतीयः, विषयव्यवस्थया विरोधस्य प्रशमितत्वात् । न च कैश्चिदननुष्ठानात्त्याज्यत्वम्, अतिप्रसङ्गादेव । न च शिष्टाननुष्ठानात्, तत्र सर्वशिष्टाननुष्ठानासिद्धेः ; कतिपय-शिष्टाननुष्ठानस्यातिप्रसङ्गित्वात् ।

* वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् । यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ॥

इति मनुविहितेषु यष्ट्यादिषु यज्ञोपवीतातिरिक्तानां कतिपयशिष्टैरधारणदर्शनाच्च । न च सुदर्शनादिधारिणस्सर्वेऽप्यशिष्टा इति वक्तुं शक्यम् ; तदन्येषां सर्वेषामशिष्टत्वप्रसङ्गस्यापि दुर्निवारत्वात् । श्रुत्यादिविधिनिषेधशास्त्रानुविधानात्तेषां शिष्टत्वमिति चेन्न, प्रस्तुतविषये विप्रतिपन्नत्वात् ; अर्थान्तरविषयानुष्ठानस्योभयत्र समत्वात् । तैरपि तेषां संबन्धादिषु परिग्रहाद्वैशिष्ट्यमभ्युपगतमिति चेत्तुल्यम्, तत एवैतेषामपि तैस्तदभ्युपगमात् । वर्जयन्ति केचित्तानिति चेत् ; एतेऽपि केचिदन्यान्वर्जयन्त्येव ; यथाप्रमाणमितरेषु तेषामनादरणमाग्रहमूलमिति विशेषः । अतो मध्यस्थबुद्धीनां प्रत्यक्षश्रुत्यादि-चोदितेष्वपि केचिदाचाराः सार्वत्रिकाः, केचित्तु न ; तत्र क्वचित्केचित्कांश्चिदाचरन्ति, अन्यत्रान्ये त्वन्यान् सर्वेऽपि सर्वं संभ्रमादिभिर्नाचरन्तीति दुर्निवारोऽयं घण्टापथः ।

एवं * लक्ष्मत्वादात्मभर्तुरित्यादिना पूर्वोक्तास्सर्वे हेतवो निर्व्यूढाः । * लक्ष्मत्वादात्मभर्तुरित्यस्य स्वाभाविक-दास्यानुवर्तनविधिसिद्धसमुचितविशेषानुष्ठानपरत्वेनानैकान्त्यानवतारात् । * प्रकृतिपरिणतिग्रन्थिदाहात्मकत्वादित्यस्य * अतसततनूरित्यादिना सिद्धत्वात् । *कृतचक्रधारी विष्णुं परं ध्यायतीत्यादिभिः कर्माङ्गत्वादीनां स्थितत्वात् । *प्रियत्वा-दित्यस्य संदिह्यमानार्थे साधूनामन्तःकरणप्रवृत्तिः प्रमाणमित्यस्मिन्नर्थे तात्पर्यात् । उक्तं च महाकविभिरिति मीमांसा-चार्यैरप्युपात्तम्—* सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः इति । * हेतुत्वात् सद्गृहीतेरित्यादिकस्यापि शास्त्रानुसारेण सदसद्विवेकौपयिकत्वतात्पर्येणातिप्रसंगाभावात् । * द्रावणात्किङ्करादेरित्यादिकस्यापि प्राक्प्रदर्शितयम-किङ्करसंवादादिसिद्धत्वात् । अतस्सिद्धं ब्राह्मणादिभिस्सुदर्शनादिकमवश्यं धार्यम्, मुमुक्षुभिस्तु विशेषत इति ॥

श्रीमद्वेङ्कटनाथेन सम्यगेतत्समर्थितम् । श्रुतिस्मृतीतिहासादिसिद्धं चक्रादिधारणम् ॥

अयमनवमसूक्तैरादिभक्तैर्यथावद्विदितनिजसुतत्त्वो विश्वमव्यादभव्यात् ।
रथचरणनिरूढव्यञ्जनानां जनानां दुरितमथनहेलादोहलीदेहलीशः ॥

इति सच्चरित्ररक्षायां सुदर्शनपाञ्चजन्यधारणविधिर्नाम

प्रथमोऽधिकारः ।

॥ ऊर्ध्वपुण्ड्रधारणविधिर्नाम द्वितीयोऽधिकारः ॥

अधोर्ध्वगतिकामानामूर्ध्वपुण्ड्रस्य धारणम् । तिर्यक्पुण्ड्रादिहानं च शास्त्रैस्समभिदध्महे ॥

सन्त्यत्र बहूनि श्रुतिस्मृतीतिहासादिवचांसि । तत्र तावन्महोपनिषदि—

* धृतोर्ध्वपुण्ड्रः परमेश्वितारं नारायणं साङ्गययोगाधिगम्यम् ।
ज्ञात्वा विमुच्येत नरस्समस्तैस्संसारपाशैरिह चैव विष्णुम् ॥ इति ।

धृतोर्ध्वपुण्ड्रो ज्ञात्वेत्यन्वयः । मुमुक्षुर्नरः धृतोर्ध्वपुण्ड्रो ध्यायेदिति विध्यर्थः । साङ्गयोगाधिगम्यं—ज्ञानयोग-कर्मयोगाभ्यां भक्तिद्वाराऽधिगम्यमित्यर्थः । नारायणविष्णुशब्दयोरन्यतरस्य संज्ञात्वमितरस्य निर्वचनविवक्षया विशेषण-परत्वं चात्र बोध्यम् । समस्तैस्संसारपाशैरिति बन्धहेतुभूतैः पुण्यपापरूपैः कर्मभिस्तन्मूलैश्च रागादिभिरित्यर्थः । इह चैव मुच्येतेत्येतत् *तमेवं विद्वानमृत इह भवतीत्यादिवत् । तच्चोत्तरपूर्वाघाश्लेषविनाशादिपरमिति सूत्रकारैरेव निर्णीतम्—* समाना चासृत्युपक्रमादमृतत्वं चानुपोष्येत्यादिभिः । यद्वा

*यः करोत्यूर्ध्वपुण्ड्रं तु सन्ध्यावन्दनकर्मसु । तेनाहं सुलभो ब्रह्मन्नेकस्मिन्नेव जन्मनि ॥
यावज्जीवमिदं पुण्यमूर्ध्वपुण्ड्रं दधाति यः । जन्मन्यनन्तरे मुक्तिं सद्यः प्राप्नोति दुर्लभाम् ॥

इत्याद्युपबृंहणभूतब्रह्माण्डवचनानुसारेणै[त]कस्मिन्नेव जन्मनि मोक्षे तात्पर्यम् । यथा

*जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥

इति श्रीमदवताररहस्यतत्त्वविज्ञानस्य शीघ्रं समस्तप्रतिबन्धकनिवर्तकत्वेन संपूर्णविद्यानिष्पत्तेरेकस्मिन्नेव जन्मनि मोक्षहेतुत्वं, तद्वद्वक्ष्यमाणमन्त्रध्यानादिविशिष्टोर्ध्वपुण्ड्रधारणनियमस्यापीति भाव्यमिति ।

या पुनरिदानीं ब्रह्माण्डादिग्रन्थेष्वतिविततविप्रकीर्णत्वादिना केषाञ्चिदतिशङ्का वर्तते; साऽत्र न कर्तव्या, संप्रतिपन्नश्रुतिस्मृत्यादिविरोधाभावात्, अविरोधिनामनाप्तत्वकल्पने गौरवादतिप्रसङ्गाच्च । तथा कठशाखायाम्—

*धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥ इति ।

अस्यार्थः श्रीमत्सुदर्शनधारणाधिकारे सर्वो व्याख्यातः । तथा नारदीयसंहितायां चतुस्सप्ततितमेऽध्याये—* अर्चनाङ्गं ब्रवीत्यन्या ऊर्ध्वपुण्ड्रं तथा श्रुतिः इत्युक्ता समुपात्ता काचित्काठकश्रुतिः ।

*धृतोर्ध्वपुण्ड्रः परमेशितारं नारायणं पूजयति स्म भक्त्या ।
अर्घ्यादिभिः पौरुषसूक्तमन्त्रैस्संप्राप्नुयाद्विष्णुपदं महात्मा ॥

इत्यादीनि च वाक्यानि श्रूयन्ते । तत्र यः पूजयति स्म स विष्णुपदं संप्राप्नुयादिति यत्तच्छब्दाध्याहारेण योजना । अन्यत्सुगमम् । तस्यामेव संहितायामेकोनसप्ततितमाध्यायप्रभृतिभिष्षड्भिरध्यायैरयमर्थः प्रपञ्चितः; स्वावसरे चोपा-दास्यामहे । तथा भल्लशाखायाम्—* अर्चनादौ यज्ञमूर्तेरूर्ध्वपुण्ड्रमित्यारभ्य *कुलं तारयते सप्त स गच्छेद्वैष्णवं पदमिति । तत्रैव देवतान्तरभक्तस्याप्यूर्ध्वपुण्ड्रधारणमभ्युदयावहमिति व्यक्तमुक्तम्—

*अन्यदेवेषु ये भक्ता जपहोमपरायणाः । ऊर्ध्वपुण्ड्रं धारयन्ते इत्यादिना । तथाऽऽथर्वणे—*हरेः पादाकृति-मात्मनो हिताय मध्ये च्छिद्रमूर्ध्वपुण्ड्रं यो धारयति स परस्य प्रियो भवति स पुण्यवान्भवति स मुक्तिभाग्भवति—इति । अनेन संस्थानविशेषस्य विहितत्वात्सर्वशाखाप्रत्ययन्यायेन श्रुत्यन्तरेष्वप्येतदेव संस्थानमभिहितमिति गम्यते । इदं चोर्ध्व-पुण्ड्रधारणं सर्वजातिसाधारणम् । क्षत्रियादिष्वर्धचन्द्रादिभेदः; तत्रापि वैष्णवानामूर्ध्वपुण्ड्रधारणमेव कार्यम्; अवैष्ण-वानामपि विप्रमात्राणामेतदेवेति व्यक्तं स्मरन्ति; यथा अग्निवैश्यगृह्ये—

*त्रिपुण्ड्रं ब्राह्मणो विद्वाँल्लीलयाऽपि न धारयेत् । धारयेत्प्रयतस्सम्यगूर्ध्वपुण्ड्रं प्रयत्नतः ॥ इति ।

उक्तं च बोधायनेन—

* होमपूजादिसमये सायं प्रातस्समाहितः । ऊर्ध्वपुण्ड्रधरो विप्रो भवेच्छुद्धो न चान्यथा ॥ इति ।

अन्यथेत्यनेन त्रिपुण्ड्रादेर्धारणमूर्ध्वपुण्ड्रादेरधारणं च निषिध्यते । आह च **वृद्धजाबालिः**—

* शस्त्रधार्य[स्त्र]सिधारी च धनुर्धारी धनापहः । तिर्यक्पुण्ड्रधरो विप्रः स चण्डालसमो भवेत् ॥ इति ।

आतातपश्च—

* त्रिपुण्ड्रं ब्राह्मणो विद्वाँल्लीलयाऽपि न धारयेत् । त्रिपुण्ड्रधारणाद्विप्रः पतत्येव न संशयः ॥
यच्छरीरं मनुष्याणामूर्ध्वपुण्ड्रं विना भवेत् । द्रष्टव्यो नैव तद्देहः श्मशानसदृशो हि सः ॥ इति ।

पुराणेषु च मात्स्ये—* न त्रिपुण्ड्रं द्विजः कुर्यान्न तत्पूजां तथैव च इति । तत्रैव—

* त्रिपुण्ड्रं ब्राह्मणो विद्वाँल्लीलयाऽपि न धारयेत् । धारयेत्प्रयतस्सम्यगूर्ध्वपुण्ड्रं तु नित्यशः ॥ इति ।

श्रीनारदीये च पद्मपुष्पाकारादिकानग्निशिखाकारपर्यन्तानूर्ध्वपुण्ड्रसंस्थानभेदानभिधाय

* उक्तानि लक्षणान्येवं ब्राह्मणस्येति तत्स्मृतम् । त्रिपुण्ड्रं शूद्रकल्पानां शूद्राणां च विधीयते ॥

इत्यन्तेन वर्णानुरूपसंस्थानं विधायानन्तरमुच्यते—

* सर्वजातिषु यो मर्त्यो विष्णुभक्तो भवेन्मुने । तस्योर्ध्वपुण्ड्रकरणे अधिकारो बुधैस्स्मृतः ॥ इति ।

तथा पारमेष्ठ्यसंहितायां शारीरभगवत्क्षेत्रवर्णनाध्याये—

* श्वेतमृत्तिकया वाऽपि श्यामया पीतयाऽपि वा । ऊर्ध्वपुण्ड्रं द्विजैः कार्यं वैष्णवैश्च विशेषतः ॥
ध्यानहोमजपाश्चैव सर्वाः पुण्याः क्रियास्तथा । विफलिष्यन्ति विप्राणामूर्ध्वपुण्ड्रं विना कृताः ॥
चन्दनागरुभिश्चैव कर्तव्यं क्षत्रियैर्बुधैः । वैश्यैश्च बिल्वमूलेन शूद्रैर्भूत्या सतोयया ॥
सर्वैः श्वेतमृदा कार्यमूर्ध्वपुण्ड्रं यथाविधि । ऋजूनि सान्तरालानि अङ्गेषु द्वादशस्वपि ॥ इति ।

चन्दनागरुभिरित्यादिकं सामान्यक्षत्रियादिविषयम् । **सर्वैरित्यादि** तु विशेषविषयम् । तथा **ब्रह्मरात्रे**—

* ब्राह्मणस्योर्ध्वपुण्ड्रं स्यात्क्षत्रियस्यार्धचन्द्रकम् । वैश्यस्य वर्तुलाकारं शूद्रस्यैव त्रिपुण्ड्रकम् ॥
त्रिपुण्ड्रं ब्राह्मणो विद्वाँल्लीलयाऽपि न धारयेत् । धारयेत्प्रयतस्सम्यगूर्ध्वपुण्ड्रं प्रयत्नतः ॥
ब्राह्मणस्य न कर्तव्यं तिर्यक्पुण्ड्रस्य धारणम् । स शूद्र इति मन्तव्यस्तिर्यक्पुण्ड्रस्य धारणात् ॥
ममार्चने विशेषेण ऊर्ध्वपुण्ड्रधरो द्विजः । कुलं तारयते सप्त स गच्छेत्समतां मम ॥
उपवीतं शिखाबन्धमूर्ध्वपुण्ड्रं विना कृतम् । अपवित्रकरं कर्म विप्रस्य विफलं भवेत् ॥ इति ।

तत्रैवाध्याये पद्मादपि चतुर्णां वर्णानामूर्ध्वपुण्ड्र एव विशेष उक्तः—

* ब्राह्मणस्य गदाकारं चक्राकारं नृपस्य तु । वैश्यस्य पद्मपत्राभं शूद्राणां शङ्खसन्निभम् ॥
पद्मपत्रायतं शस्तं सर्वेषां भोगसिद्धये । एवं वैष्णवचिह्नैस्तु सततं चिह्नितो भवेत् ॥
पिशाचभूतवेतालकूष्माण्डाद्या महागणाः । अस्यान्तिके न तिष्ठन्ति वैष्णवस्य महात्मनः ॥
प्रणवेनैव मन्त्रेण मृदा वै मामनुस्मरन् । ललाटे धारयेन्नित्यं मत्सायुज्यमवाप्नुयात् ॥ इति ।

ब्रह्माण्डे— * सर्ववर्णेषु मद्भक्ताः कुर्वीरन्नूर्ध्वपुण्ड्रकम् । ब्राह्मणाश्च विशेषेण जपहोमपरायणाः ॥
किमत्रोक्तेन बहुना धारयेदूर्ध्वपुण्ड्रकम् । यो न धारयते मर्त्यो मामकं चिह्नमीदृशम् ॥
तं त्यजामि दुरात्मानं मदीयाज्ञातिलङ्घिनम् । तस्मान्मां प्राप्तुमिच्छद्भिर्वैष्णवैर्विमलाशयैः ॥
ऊर्ध्वपुण्ड्रमिदं धार्यं सद्यः संसारमोचनम् । यमश्चोद्विजते नित्यमूर्ध्वपुण्ड्रधरान्नरात् ॥
नैनमन्तिमकाले तु बाधन्ते यमकिङ्कराः ॥ इति ।

तदेवं सर्वेषां विप्राणामन्येषामपि वैष्णवानामूर्ध्वपुण्ड्रधारणमेव कार्यम् । अर्धचन्द्रवृत्तादिविधिस्तु ब्राह्मणव्यतिरिक्तजातिष्वप्यवैष्णवविषय इति सिद्धम् ।

अस्य चोर्ध्वपुण्ड्रधारणस्य नित्यनैमित्तिकादिसर्वकर्माङ्गत्वपवित्रत्वमङ्गलत्वफलातिशयहेतुत्वादिभिस्स्वतः पुरुषार्थसाधनत्वं च प्रपञ्चयन्ति । तथा हि **श्रीविष्णुस्मृतौ**—

* उपवीतं शिखाबन्धमूर्ध्वपुण्ड्रं विना कृतम् । अपवित्रकरं कर्म विप्रस्य विफलं भवेत् ॥ इति ।

आह च बोधायनः—

* होमपूजादिसमये सायं प्रातः समाहितः । ऊर्ध्वपुण्ड्रधरो विप्रो भवेच्छुद्धो न चान्यथा ॥ इति ।

स्मृत्यन्तरेषु च—

* स्वाध्याये भोजने चैव होमे मङ्गलकर्मणि । ऊर्ध्वपुण्ड्रधरो नित्यं रक्षसां चापनुत्तये ॥ इति ।

दक्षः— * स्नात्वा ललाटे तिलकं मृदा कुर्यादतन्द्रितः । पाषण्डपतितादीनां दर्शनस्यापनुत्तये ॥ इति ।

अत्र तिलकशब्दोऽपि सामान्येनोर्ध्वपुण्ड्रमभिधत्ते ; श्रुतिस्मृत्यन्तरानुरोधात् ; अभियुक्तप्रयोगतश्च ;—

* उद्धरत्युपरि भक्तजनानित्यूर्ध्वताश्रयणसूचितशक्तिम् ।
ऊर्ध्वपुण्ड्रतिलकं बहुमानात्किं बिभर्षि वरद स्वललाटे ॥ इति ।

वामने— * रक्षार्थमघनाशार्थं मङ्गलार्थं च भामिनि । धारयेदूर्ध्वपुण्ड्रं तु शिरसाऽहर्निशं सदा ॥ इत्यादि ।

तथा पाराशर्यसंहितायाम्—

* निरूर्ध्वपुण्ड्रस्तु भवेन्न कदाचिदपि द्विजः । वैष्णवश्चेद्विशेषेण सर्वकर्माणि नार्हति ॥ इति ।

आह च भार्गवः—

* यज्ञो दानं तपो होमो भोजनं पितृतर्पणम् । सर्वे भवन्ति विफला ऊर्ध्वपुण्ड्रं विना कृताः ॥
द्रष्टव्यं नास्य कायं तच्छ्मशानसदृशं स्मृतम् ॥ इति ।

ब्रह्माण्डे च—* मदाराधनकाले च सदा यज्ञादिकर्मणि । अवश्यं धारयेदेतदूर्ध्वपुण्ड्रं द्विजोत्तमः ॥
यज्ञदानतपोहोमजपस्वाध्यायकर्मसु । तत्फलप्राप्तयेऽवश्यं धारयेदूर्ध्वपुण्ड्रकम् ॥
श्रौतस्मार्तक्रियाः सर्वा ऊर्ध्वपुण्ड्रमकुर्वताम् । जायन्ते निष्फला ब्रह्मन् बाधिताश्च भवन्ति ताः ॥
मत्प्रियार्थं शुभार्थं वा रक्षार्थं चतुरानन । मद्भक्तो धारयेन्नित्यमूर्ध्वपुण्ड्रमतन्द्रितः ॥
ऊर्ध्वपुण्ड्रं ऋजुः सौम्यो ललाटे यस्य दृश्यते । चण्डालोऽपि विशुद्धात्मा पूज्य एव न संशयः ॥

अशुचिश्चाप्यनाचारो मनसा पापमाचरन् । सद्यश्शुद्धो भवेत्तात ऊर्ध्वपुण्ड्रधरो नरः ॥
ऊर्ध्वपुण्ड्रधरो विप्रो मृतो वा यत्रकुत्रचित् । श्वपचोऽपि विमानस्थो मम लोके महीयते ॥ इति ।

तत्रैवाध्यायान्तरेऽपि—* मद्प्रियार्थमित्यादयः श्लोका एव किञ्चिद्भिन्नाः कृताः । तथोत्तरत्र—

* पाषण्डदर्शनस्पर्शसंभाषणपरोऽपि यः । सोऽपि पूतो भवेद्ब्रह्मन्नूर्ध्वपुण्ड्रस्य धारणात् ॥
ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः । अवश्यं धारयेत्पुण्यमूर्ध्वपुण्ड्रं सुशोभनम् ॥
यो मासमात्रं सततं धारयेदूर्ध्वपुण्ड्रकम् । चित्तप्रसादं शान्तिं च मद्भक्तिं लभते च सः ॥
यावज्जीवमिदं पुण्यमूर्ध्वपुण्ड्रं दधाति यः । जन्मन्यनन्तरे मुक्तिं सद्यः प्राप्नोति दुर्लभाम् ॥
विद्याविनयसंपन्ना ब्राह्मणा वेदपारगाः । मयि भक्तिं न कुर्वन्ति चण्डालसदृशा हि ते ॥
ऊर्ध्वपुण्ड्रं मृदा धार्यं विप्रेण ब्रह्मवादिना । * उद्धृताऽसीति मन्त्रेण वैष्णवेन विशेषतः ॥ इति ।

पारमेष्ठ्यसंहितायाम्—

* धृतोर्ध्वपुण्ड्रो विधिवन्नामानि द्वादश न्यसेत् । नमोन्तान्यञ्जलिं कुर्यान्नामान्युक्त्वा यथाक्रमम् ॥
जपं होमं तर्पणं वा दानमाराधनं हरेः । अन्यानि शुभकर्माणि पश्चात्कुर्याद्द्विजोत्तमः ॥
द्विजराजन्यवणिजां शूद्राणामन्त्यजन्मनाम् । एतत्सामान्यतः प्रोक्तं पितृदेवार्चनादिषु ॥
शिखोपवीतवद्धार्यमूर्ध्वपुण्ड्रं द्विजन्मनाम् । विना कृताश्चेद्विफलाः क्रियाः सर्वा महामते ॥
तस्मात्सर्वेषु कार्येषु धार्यं विप्रस्य धीमतः । भूतप्रेतपिशाचादिकूष्माण्डब्रह्मरक्षसाम् ॥
रेवतीपूतनामातृडाकिनीगुह्यकादिनाम् । रक्षाकारं दुर्ग्रहाणां संसारग्रहनाशनम् ॥
ऊर्ध्वपुण्ड्रात्परं नान्यद्दृष्टं ज्ञातं श्रुतं मया । इति ।

तथा ब्रह्मरात्रे—पूजाकाले च होमे च सायं प्रातः समाहितः । सावित्रीजपकाले च वेदाध्ययन एव च ॥
याने च भोजने चैव शयने च विशेषतः । मन्त्रानुच्चार्य विधिना धारयेदूर्ध्वपुण्ड्रकान् ॥
रक्षार्थं वंशवृद्ध्यर्थं मङ्गलार्थं तु पद्मज । आभिरङ्गुलिभिः पुण्ड्रान्धारयन्ननघो भवेत् ॥
दृष्ट्वा प्रयाणकाले तु ऊर्ध्वपुण्ड्राङ्कितं नरम् । मृत्युरभ्यर्चनं कुर्याद्धुसं वैष्णवतेजसा ॥
सर्वपापविनिर्मुक्तः सायुज्यमधिगच्छति ।

तत्रैवाध्याये—* शयने होमकाले च सायं प्रातः समाहितः । मन्त्रमुच्चार्य विधिना धारयेदूर्ध्वपुण्ड्रकम् ॥
एवं यः कुरुते नित्यं मत्सायुज्यमवाप्नुयात् । इत्यादि ।

तत्रैव— * मद्भक्तो धारयेन्नित्यमूर्ध्वपुण्ड्रमतन्द्रितः । जितेन्द्रियो जितक्रोधः फलमेष्यति कर्मणाम् ॥
दैवे च मानुषे पित्र्ये कर्मण्येव विशेषतः । रक्षार्थं पापनाशार्थं वर्धनार्थं ममात्मज ॥
एताभिरङ्गुलीभिश्च कारयेन्न स्पृशेन्नखैः ।
ऊर्ध्वपुण्ड्रं ऋजुः सौम्यो ललाटे यत्र दृश्यते । चण्डालोऽपि विशुद्धात्मा पूज्य एव न संशयः ॥
अशुचिश्चाप्यनाचारो मनसा पापमाचरन् । शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्रधरो नरः ॥
ऊर्ध्वपुण्ड्रधरो नित्यं मम लोके महीयते । श्वपाको वाऽथ गोघ्नो वा मामेवैष्यत्यसंशयम् ॥

ऊर्ध्वपुण्ड्रमृजुं कुर्यान्मम पादमनुस्मरन् । सर्वापद्भ्यो विनिर्मुक्तस्सायुज्यं मोक्षमृच्छति ॥ इति ।

श्रीनारदप्रोक्तायां **श्रीमदष्टाक्षरब्रह्मविद्यायाम्**—

* असङ्ख्याताच्च सङ्ख्यातः सहस्रगुण उच्यते । सङ्ख्यातादपि साहस्र ऊर्ध्वपुण्ड्रतनोर्जपः ॥ इति ।

श्रीनारदीये त्रिसप्ततितमेऽध्याये—

* ऊर्ध्वपुण्ड्राङ्कितो मर्त्यो यत्कुर्यात्कर्म वैदिकम् । तत्सर्वं सफलं तस्य भवत्येव न संशयः ॥
नित्यं नैमित्तिकं चैव लौकिकं कर्म वैदिकम् । ऊर्ध्वपुण्ड्राङ्कितः कुर्यात्तत्तत्फलमवाप्नुयात् ॥
ऊर्ध्वपुण्ड्राङ्कितं गात्रं चण्डालस्यापि दृष्टवान् । पुरुषो हर्षयुक्तश्च भवत्येव महामुने ॥
सर्पं दृष्ट्वा यथा लोके दर्दुरा भयसंयुताः । ऊर्ध्वपुण्ड्राङ्कितं तद्वत्कम्पन्ते यमकिङ्कराः ॥
ऊर्ध्वपुण्ड्रेण संयुक्तो म्रियते यस्तु मानवः । चण्डालोऽपि विशुद्धात्मा विष्णुलोके महीयते ॥
यो विना चोर्ध्वपुण्ड्रेण यत्कुर्यात्कर्म वैदिकम् । निष्फलं तस्य तत्कर्म भस्मनीव हुतं हविः ॥
तस्मात्कर्मादिषु श्रेष्ठमूर्ध्वपुण्ड्रं विचक्षणः । धारयेत्प्रयतः सम्यक् तत्कर्मफलसिद्धये ॥
ऊर्ध्वपुण्ड्रं विना यस्य शरीरं भवति द्विज । तं दृष्ट्वा गगने सूर्यो निरीक्ष्यः साधुभिस्सदा ॥
ऊर्ध्वपुण्ड्रेण संयुक्तो विष्णुभक्तश्च यो नरः । तस्य लोकस्य सिद्धिः स्याद्विष्णोरमिततेजसः ॥
केवलस्योर्ध्वपुण्ड्रस्य धारणादपि मानवः । देहजैः पापसङ्घातैर्मुच्यते नात्र संशयः ॥
श्वपचोऽपि द्विजश्रेष्ठ ऊर्ध्वपुण्ड्रेण संयुतः । विष्णुभक्तस्तु भवति विष्णुलोकं स गच्छति ॥
ऊर्ध्वगत्यां हि यस्येच्छा तस्योर्ध्वं पुण्ड्रमुच्यते । ऊर्ध्वगत्या तु देवत्वं प्राप्नोतीह न संशयः ॥
ऊर्ध्वं नयति यत्पुण्ड्रं प्राणिनः पापकारिणः । तस्यास्या ह्यूर्ध्वपुण्ड्रेति तस्मात्तद्धारयेद्बुधः ॥ इति ।

अतस्सिद्धं कर्माङ्गत्वादिभिरूर्ध्वपुण्ड्रस्य अवश्यधार्यत्वम् ।

अस्य च निर्माणे मृदेव प्रशस्ततमा ; द्रव्यान्तराणि तु अधिकारिविशेषप्रतिनियतान्येव ।

ननु, भस्मनोऽपि शुद्धतमद्रव्यत्वादूर्ध्वपुण्ड्रधारणे मुख्यत्वमेष्टव्यमिति चेन्न ; भस्मनः स्वतः शुद्धत्वासिद्धेः । भस्माद्यधिष्ठितदेशस्य हि चण्डालाद्यधिष्ठितदेशवत्तत्तदनुगुणशोधनानि द्रव्यशुद्धिप्रकरणेषु विधीयन्ते । न हि शुद्धद्रव्य-संस्पृष्टप्रदेशस्य क्वचिच्छोधनमुपदिश्यते । आह च **शङ्खः**—

* दीपाग्निर्दीपतैलं च भस्म चास्थि रजस्वला । एतानि ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत् ॥ इति ।

तथा निषिध्यमानतुषलोष्टाद्यशुद्धद्रव्यसमभिव्याहारबलात्स्वतोऽशुद्धत्वमेव हि भस्मनः प्रतीतम् । यथोक्तं **गौतमेन**—* न भस्मकेशतुषकपालमेध्यान्यधितिष्ठेदिति । उक्तं **चापस्तम्बेन**—* भस्मतुषाधिष्ठानं पदा पादस्य प्रक्षालनमधिष्ठानं च वर्जयेदिति । एवमन्यत्रापि । ननु * भस्मकरीषच्छायासु मूत्रं न विसृजेदिति प्रशस्तसहपाठोऽपि दृश्यत इति चेन्न । करीषस्य प्रशस्तत्वेऽपि छायायाः प्राशस्त्यनियमाभावात् ; अप्रशस्ता एव हि स्नुहिकरञ्जादिच्छायाः । तस्मादशुद्धमेव स्वतो भस्म । कथं तर्हि * आग्नेयं भस्मना स्नानं वायव्यं गोरजस्स्मृतमिति स्नानकरणतया तस्य विधिरिति चेत्, इत्थम्—न हि तत्र भस्मनः स्वतः शुद्धत्वमभिधीयते । अपि त्ववगाहनाद्यशक्तविषयामुख्यस्नानविधानपरतया तस्य तदानीं शुद्ध्यापादकत्वमात्रम् । न च क्वचिच्छुद्धिहेतोस्सर्वत्र शुद्धत्वमिति नियमः ; सुरापशोधकाग्निस्पृष्टसुराया अवकीर्णि-पशुभूतगर्दभादेश्च स्वतश्शुद्धत्वप्रसङ्गात् । एतेन—

* मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्याश्च कृत्वा ।
भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥

इति । शातातपवचनमपि निर्व्यूढम् ; अस्यापि प्रायश्चित्तव्रतविशेषविधिपरत्वादिति । यत्पुनरथर्वशिरसि * अग्निरिति भस्मेत्यादिना * विमृज्याङ्गानि संस्पृशेदित्यन्तेन समन्त्रकं भस्मग्रहणं विहितम् ; तदपि * व्रतमेतत्पाशुपतमिति तत्र विधीयमानपाशुपतव्रताङ्गमिति न सार्वत्रिकं भवितुमर्हति । उक्तं चैतद्धरदगुरुभिस्तत्त्वसारे–

* प्रस्तुत्य रुद्रवपुषः पुरुषोत्तमस्य विद्यामथर्वशिरसीरितमङ्गमस्याः ।
भस्मप्रसक्तिरितरत्र न चास्ति यद्वत्सौत्रामणीप्रकरणोक्तसुराग्रहस्य ॥ इति ।

अग्निहोत्रभस्मग्रहणं तु कल्पसूत्रकाराद्यननुशिष्टत्वात्, न क्रियाङ्गम् ; भस्मापेक्षायां तु शुद्धस्थलात्तदुपादानमुचितमिति तत्र तद्गूहः । एतदभिप्रायेण ह्युक्तं ब्रह्माण्डे–

* अथ द्रव्यं प्रवक्ष्येऽहमूर्ध्वपुण्ड्रस्य पद्मज । मृच्चन्दनजलान्याहुस्तथा भस्माग्निहोत्रजम् ॥ इत्यादिकम् ।

अस्तु वा शुद्धत्वं भस्मनोऽपि, वचनबलात्तु ब्राह्मणमात्रस्यापि मृदेव प्रशस्ततमा । वैष्णवैस्तु भस्म परित्याज्यमेव । न हि वचनविरोधे न्यायप्रसरो मीमांसकैरनुमतः । सन्ति च बहूनि वचांसि । तथा हि–

मार्कण्डेये– * ऊर्ध्वपुण्ड्रं मृदा धार्यं विप्रेण ब्रह्मवादिना । * उद्धृताऽसीति मन्त्रेण वैष्णवेन विशेषतः ॥ इति ।

पारमेष्ठ्यसंहितायाम्–

* श्वेतमृत्तिकया वाऽपि श्यामया पीतयाऽपि वा । ऊर्ध्वपुण्ड्रं द्विजैः कार्यं वैष्णवैश्च विशेषतः ॥ इत्यादि ।

तथा **कुण्ठिनप्रोक्ते श्रीकृष्णमन्त्रकल्पे**–

* स्नात्वा विधानतः पूर्वमूर्ध्वपुण्ड्रं तु धारयेत् । मृदैव वैष्णवः कुर्यादलाभे चन्दनेन वा ॥
न भस्मना कदाचिच्च ऊर्ध्वपुण्ड्रं समाचरेत् ॥ इति ।

ब्रह्मरात्रे–* चन्दनं पञ्चगव्यं च बिल्वं पञ्चाङ्गमृत्तिका । न प्राण्यङ्गसुगन्धानि श्रीपत्रं भस्म तोयकम् ॥
वैष्णवेन विशेषेण धार्या पञ्चाङ्गमृत्तिका । चन्दनं पञ्चगव्यं च ब्राह्मणेन विशेषतः ॥ इति ।

एतद्ब्राह्मणस्य भस्मादिनिषेधपरम्, न तु चन्दनादेः मृद्वत्प्रशस्ततमत्वपरमिति स्वप्रकरणसमानप्रकरणाभ्यां व्यक्तम् । अतोऽत्र [प्रशस्त]मृदलाभदशायां ब्राह्मणस्य चन्दनपञ्चगव्ययोरनुमतिमात्रम्–

* श्रीकामो धारयेद्बिल्वं श्रीपत्रं चन्दनं तु वा । राजा प्राणिसुगन्धानि चन्दनं चागुरुं तथा ॥
भस्म विट्शूद्रयोः क्लृप्तं पञ्चगव्यं विशोऽपि वा । शूद्रेणैव सदा धार्यं भस्म तोयकमेव च ॥ इत्यादि ।

तथा– मृदैव वैष्णवः कुर्यादलाभे चन्दनेन वा । न भस्मना कदाचिच्च द्रव्येणान्यतमेन वा ॥
चन्दनं प्राणिगन्धं च श्रीपत्रमगुरुं तथा । राजसद्रव्यमेवैतद्वदन्ति ब्रह्मवादिनः ॥
पञ्चगव्यं च बिल्वं च श्रीपत्रं भस्म तोयकम् । तामसद्रव्यमेवैतत्सात्त्विको पञ्च मृत्तिका ॥ इति ।

तथा किञ्चिदनन्तरमतिक्रम्योक्तम्–

* सौभाग्यैश्वर्यविज्ञानं चन्दनं समुदाहृतम् । आयुष्यमगुरुश्चैव श्रीपत्रं शान्तिदं स्मृतम् ॥ इत्युपक्रम्य,

* मुक्तिदा पञ्चमृच्चैव श्रीकरो बिल्व एव च । सर्वगन्धानि वश्यानि पुण्या केदारमृत्तिका ॥ इति ।

श्रीनारदीये च मृच्चन्दनादिविकल्पो व्यवस्थितविषयः ; मृदलाभदशायां चेतरद्रव्यग्रहणमिणि निर्णीतम् । तथा हि—

* मृद्द्रव्यं प्रथमं श्रेष्ठं तत्र कारणमुच्यते इत्युक्त्वा, * उद्धृताऽसीत्यादिकां, * प्रतिष्ठितमित्यन्तां श्रुतिमुपादाय,

* तस्मात्तु मृत्तिका ग्राह्या सर्वद्रव्येषु नित्यशः । मृत्तिकायाः प्रधानत्वं वक्ति तत्रापरा श्रुतिः ॥

इत्युक्त्वा, * अश्वक्रान्तेति मन्त्रमुपादाय * प्रत्यक्षा श्रुतिरित्याह तस्माच्छ्रेष्ठतमा तु मृदित्युक्तम् । अनन्तरं च,

* ब्राह्मणस्य तु मृत्प्रोक्ता क्षत्रियाणां च चन्दनम् । वैश्यस्य बिल्वमूलं तु शूद्राणां भस्म चोच्यते ॥

इति वर्णव्यवस्थया द्रव्याणि विभज्यालाभदशायां प्रतिनियतानुकल्पफलविशेषादि मूलाधिकारिविशेषाभिप्रायेणोक्तम्—

* सर्वेषां वा यथायोगं मृत्तिका वाऽथ चन्दनम् । बिल्वमूलं तथा भस्म निर्दिष्टानि पुरातनैः ॥

तस्मादन्यतमं तेषां मृदित्वा मन्त्रसंयुतम् । ऊर्ध्वपुण्ड्रं नरः कुर्याद्रक्षसां चापनुत्तये ॥ इति ।

एवमन्यान्यपि तथाविधानि वचनानि मृदलाभदशापेक्षया प्रवृत्तानीति मन्तव्यम् । तथा **नारदीयसंहितायां** चतुर्विंशाध्याये

* ऊर्ध्वपुण्ड्रं मृदा शुक्लं यो धत्ते नित्यमात्मवान् । तस्य प्रसादं कुरुते विष्णुर्लोकनमस्कृतः ॥ इति ।

स्मृतिषु **वृद्धवसिष्ठस्मृतौ**—

ऊर्ध्वपुण्ड्रं मृदा कार्यं यतीनां च विशेषतः । भस्मचन्दनगन्धादीन्वर्जयेद्यावदायुषम् ॥ इति ।

इदं च यतितुल्यभगवदसाधारण्याद्वचनान्तरानुरोधाच्चान्येषामपि वैष्णवानां ग्राह्यम् । एवं **श्रीपाद्मसंहितायाम्**—

* प्रशस्ते पर्वताग्रादौ जातया श्वेतमृत्स्नया । उच्चार्य केशवादीनि नामान्यङ्के यथाक्रमम् ॥

इत्यादि । तत्रैव समाराधनमधिकृत्य—

* पूजकोऽलङ्कृतः स्रग्वी शुक्लाम्बरधरः शुचिः । शुक्लोत्तरीयवान् रम्यचन्दनाद्यनुलेपनः ॥

चन्दनश्वेतमृत्स्नाम्बुकल्पिताभ्योर्ध्वपुण्ड्रकः ॥ इति ।

पारमेश्वरे कुमुदादीनां ध्यानोपदेशे तेषामूर्ध्वपुण्ड्रधारणोक्त्यनन्तरमुक्तम्—

* एवं तदीया विप्राश्च क्षत्रिया वैश्यजातयः । मृदैव वा चन्दनेन कल्पितैरूर्ध्वपुण्ड्रकैः ॥

द्वादशैकचतुर्भिर्वा भूषितास्स्युस्सदा द्विजेति ।

मृदैव वा चन्दनेनेति—मृदैव, तदलाभे चन्दनेन वेत्यर्थः । **आदित्यपुराणे गौतमशापः**—

* त्रिपुण्ड्रधारिणो नित्यं भस्मोद्धूलनतत्पराः । भविष्यथ त्रयीबाह्या मिथ्याज्ञानप्रलापिनः ॥ इति ।

* अन्ये भस्मजटोपेता यथोक्तं गौतमात्पुरा इति च ।

एवं **वाराहेऽपि**—* गोवध्याकरणं मह्यं यावत्यश्यति योगवित् । ऋषीणां मायया सर्वमिति संचिन्त्य तत्र वै ॥

शशाप ताञ्जटाभस्ममिथ्याव्रतधरांस्तथा ॥ इति ।

तत्रैव **क्षेत्रमाहात्म्याभिधानभागे**—

* कुलीनो ब्राह्मणो विद्वान्भस्मधारी भवेद्यदि । वर्जयेत्तादृशं देवि मद्योच्छिष्टघटं यथा ॥ इति ।

मार्कण्डेये—* ऊर्ध्वपुण्ड्रं मृदा धार्यं विप्रेण ब्रह्मवादिना । * उद्धृताऽसीति मन्त्रेण वैष्णवेन विशेषतः ॥ इति ।

ननु भागवतासाधारणे श्रीसात्त्वते—

* जलनिर्मथितेनैव ऊर्ध्वपुण्ड्रचतुष्टयम् । हृद्यंसयोर्ललाटे च कुर्याद्दीपशिखाकृति ॥

इति विधानात् भस्मापि वैष्णवैर्ग्राह्यमिति चेत्, किं विहितत्वमात्रेण तैस्तद्ग्राह्यम् ? उत तान्प्रति विहितत्वेन ? नाद्यः, अतिप्रसङ्गात्; तान्प्रति तन्निषेधशतस्योक्तत्वात् । अत एव न द्वितीयोऽपि, तान्प्रति विहितत्वासिद्धेश्च । ननु भगवत्समाराधनाधिकृतः * नाविष्णुर्विष्णुमर्चयेदित्यादिभिः विष्णुभूतः किमवैष्णवः इति चेत्, शान्तं पापम्, केनैवमुक्तम् ? तान्प्रति विहिते वैष्णवान्प्रति विहितत्वं नास्तीति वदता त्वयैवेति चेत्, हन्त अभिप्रायानभिज्ञोऽसि; तत्र हि पूर्वमेव धृतोर्ध्वपुण्ड्रस्य समाराधितवासुदेवस्याग्निकार्यसमनन्तरमिदं विधीयमानं तत्रत्याग्निकार्यानुप्रविष्टं मन्तव्यमायुष्मता; न पुनर्वैष्णवमात्रप्रयुक्तोऽयं विधिः; नापि समाराधनस्यापि सार्वत्रिकः । न हि कचित्कर्मणि विहितं सार्वत्रिकं भवितुमर्हति, अतिप्रसङ्गादिति । एतेन विखनस्सूत्राद्युक्तमपि तत्कर्ममात्राङ्गत्वेन निर्व्यूढम् । एवं च यान्यपि कल्पेषु—

* अन्नाद्यकामो जुहुयादेवमेव समाहितः । तद्भस्म धारयेन्नित्यं भवेदन्नाद्यवान्भुवि ॥

इत्यादीनि वचनानि, तान्यपि तत्तत्कामानधिकृत्य प्रवृत्तानीति न पूर्वोक्तेन निषेधेन विरुद्धानि ॥

ननु समस्तभागवतसार्थसंगृहीतवकुलधरमहर्षिदृष्टे द्रमिडनिगमे \$ कथं भगवत्किङ्करलाञ्छनतया भस्मोर्ध्वपुण्ड्रप्रतिपादनम् ? इत्थम्—सादृश्यमूलभ्रान्तिप्रतिपादनपरत्वात्तस्य वाक्यस्य । यद्वा, न तत्र भस्मासाधारणः शब्दः प्रयुक्तः, तत्र हि प्रयुक्तः शब्दो भगवद्भक्तपादरजसि तेनैव प्रयुक्तः; अतो दिव्यचूर्णविषयतयाऽपि तच्छक्यं निर्वोढुम् । नन्वस्तु तत्र तथा; धवलचूर्णपरामर्शेन भगवत्कामुकनायिकोन्मादप्रशमनाभिधानं कथमिति चेन्न, पूर्ववाक्यपरामर्शाद्धवलचूर्णपरामर्शेन तच्छान्तिरिति वाक्यार्थपरत्वात् । अनन्तरगाथायां भगवद्भक्तपादरजसा तच्छान्तिस्सिद्धान्तिता । धवलशब्दस्यापि *सितमनसमितिवत् विशुद्धमात्रपरतयोत्तरैकार्थ्यं वा । एतेन भगवत एव वलक्षचूर्णधारणवचनमपि निर्व्यूढम् । चक्षुषि च तद्धारणं तत्र विहितमिति अञ्जनपरत्वमाहुराचार्याः । वलक्षशब्दोऽपि पूर्ववत् । न हि तत्र वलक्षशब्दोऽपभ्रंशप्रयुक्तः, अपि त्वञ्जनार्थतयैव द्रमिडादिभाषारूढं शब्दान्तरमेवेति तद्भाषाविदः । वकुलधरमहर्षेश्च श्रुतिस्मृत्याद्युपबृंहणप्रवृत्तत्वान्न तद्विरोधेन निर्वाहः शक्यः । अतो मृदेवोर्ध्वपुण्ड्रे प्रशस्ततमा । सैव च वैष्णवैरुपादेयेति सिद्धम् ।

इयं च भगवत्क्षेत्रत्वविशेषितेष्वेव पर्वताग्रादिषु मृत्तिका ग्राह्या । तथा हि **पारमेष्ठ्यसंहितायां** मध्यमखण्डे शारीरभगवत्क्षेत्रवर्णने—

* गिरौ नदीतटे वाऽथ वल्मीके जलधेस्तटे । श्रीमत्तुलसिकामूले विष्णुक्षेत्रे यदि द्विज ॥
सर्वतः सन्ति सरितो वल्मीकाः सन्ति भूतले । पर्वताः सन्ति बहवः समुद्राः सर्वतो वृताः ॥
तत्रतत्र च न ग्राह्या मृत्तिका मुनिसत्तम । ग्राह्या भगवतः क्षेत्रे तद्वर्णानां फलं शृणु ॥ इति ।

ब्रह्माण्डे च—* सिन्धुतीरेऽथ वल्मीके बिल्वमूले जलाशये । पर्वताग्रे नदीतीरे मम क्षेत्रे विशेषतः ॥
अन्येष्वपि च तीर्थेषु नलिनीमूलकेषु च । स्थानेष्वेतेषु गृह्णीयात्कुर्यान्नान्यत्र मानवः ॥ इति ।

तत्रैवाध्यायान्तरे—* पर्वताग्रे नदीतीरे मम क्षेत्रे विशेषतः । सिन्धुतीरेऽथ वल्मीके तुलसीमूलमाश्रिते ॥
मृद एताश्च संग्राह्या वर्ज्याश्चान्यत्र मृत्तिकाः ॥ इति ।

\$ नीरु सेम्बे इडम्बाणिङ् (४. ४. ७) इति गाथाऽत्रानुसन्धेया ।

अत्र *मम क्षेत्रे विशेषत इत्येतत्सर्वत्रान्वेतव्यम्, विशेषत इत्येतदाज्ञस्याद्वचनान्तरानुरोधाच्च । यत्तु तत्र त्रिचतुरवचनव्यवधानेन पृथगेवोक्तम्—

*मूले कृष्णतुलस्या यत्तन्मेऽतीव प्रियं भवेत् । मत्सायुज्यं च सारूप्यं सालोक्यं वा लभेत सः ॥

इति, तद्भगवत्क्षेत्रत्वप्रसिद्ध्यभावेऽपि कृष्णतुलसीसंबन्धमात्रेण भागवतत्वं सिद्धमिति ज्ञापनार्थम्; तुलसीमात्रात्कृष्णतुलस्या वैशिष्ट्यज्ञापनार्थं वा । तथा **ब्रह्मरात्रे**—

*तस्मात्सर्वप्रयत्नेन संग्राह्याः पञ्च मृत्तिकाः । पर्वताग्रे नदीतीरे मम क्षेत्रे विशेषतः ॥
सिन्धुतीरेऽथ वल्मीके तुलसीमूलमाश्रिते । मृद एतास्तु संग्राह्या वर्जयेदन्यमृत्तिकाः ॥ इति ।

अत्र पर्वताग्रनदीतीरसिन्धुतीरवल्मीकतुलसीमूलानि पञ्चापि विशेष्यन्ते, मम क्षेत्रे विशेषत इति ।

तथा **भरद्वाजसंहितायाम्**—

*प्रशस्ते पर्वताग्रादौ यत्रास्ते मधुसूदनः । तत्रोद्धृतमृदा कार्यमूर्ध्वपुण्ड्रं विधानतः ॥ इति ।

तथा **नारदीये** सप्ततितमेऽध्याये—

*श्वेता प्रधानतो ग्राह्या ऊर्ध्वपुण्ड्रस्य धारणे । सा च स्थानविशेषेण विशेषफलदा भवेत् ॥

इत्युपक्रम्य श्रीमद्वेङ्कटाद्रिश्रीमुष्णवृषभाद्रिश्रीरङ्गादिभगवदसाधारणस्थानगतपुष्करणीषु मृत्तिकाया ग्राह्यत्वमुक्तम् । गङ्गातीरमृत्तिकाया अपि विष्णुपादसंबन्धपुरस्कारेण ग्राह्यत्वं प्रदर्शितम् । तथा हि—

*विष्णुपादाब्जसंभूता गङ्गा नाम महानदी । तस्यास्तोरे समुद्भूतां मृदं मूर्ध्ना तु धारयेत् ॥ इति ।

यच्च तत्र सामान्येनोक्तम्—

*महानदीनां पुण्यानां तीरे मृच्चापि साधिनी । गिरीणामग्रसंभूता पुण्यानां मृत्तिका शुभा ॥
साधनं चोर्ध्वपुण्ड्रस्य आश्रमेषूत्तमेषु च ॥ इति,

तदप्यत्र पूर्वानुपात्तभगवत्संबन्धिस्थलविशेषान्तरपरम् । पूर्वापरपरामर्शादत्रापि पुण्यत्वमुत्तमत्वं च भगवत्संबन्धाधीनमेव विवक्षितमिति गम्यते । उपसंहारे चैतदुक्तम्—

अन्यानि क्षेत्रजातानि पुण्यानि हरिमेधसः । तेषामपि मृदा कार्यमूर्ध्वपुण्ड्रं हितेच्छुभिः ॥ इति ।

अतस्सिद्धं भगवत्क्षेत्रत्वविशेषितेष्वेव पर्वताग्रादिषु भगवदसाधारणतुलसीमूलादिषु वा संग्राह्येयमूर्ध्वपुण्ड्रमृत्तिकेति ।

श्वेतैव चेयं मृत्तिका मुमुक्षुभिर्धार्या । तथा हि **श्रीनारदीये** सप्ततितमेऽध्याये—

*श्वेता प्रधानतो ग्राह्या ऊर्ध्वपुण्ड्रस्य धारणे । सा च स्थानविशेषेण विशेषफलदा भवेत् ॥ इति ।

तथा **पारमेष्ठ्यसंहितायाम्**—

*श्यामं शान्तिकरं पीतं पुष्टिदं रक्तमुत्तथा । वश्यं श्वेतं तथा पुण्यं मोक्षदं मुनिसत्तम ॥ इति ।

यत्तत्रानन्तरमुक्तम्—

*श्वेतमृत्तिकया वाऽपि श्यामया पीतयाऽपि वा । ऊर्ध्वपुण्ड्रं द्विजैः कार्यं वैष्णवैश्च विशेषतः ॥

इति, तदपि प्रथमोदितव्यवस्थानुसारेण तत्तत्फलकामविषयतया भाव्यम् । किंचास्य वचनस्य वैष्णवानां भस्मादिवर्जने

त्रिपुण्ड्रादिवर्जने च तात्पर्यं स्फुटमित्यन्यपरैतद्वचनानुसारेण न पूर्वमन्यथा कार्यम् । नापि तुल्यविकल्पश्शक्यः । अत्रापि प्राधान्येन श्वेतमृत्तिकैव प्रथममुपात्ता, अनन्तरं श्यामादिवर्णनमपि भस्मादिभ्यः श्यामादिवर्णविशिष्टाया अपि मृत्तिकायाः प्राशस्त्यपरम् । किंचात्र मृत्प्राधान्यादौ तात्पर्यम् अनन्तरश्लोकैर्व्यक्तम्–

* ध्यानहोमजपाश्चैव सर्वाः पुण्याः क्रियास्तथा । विफलिष्यन्ति विप्राणामूर्ध्वपुण्ड्रं विना कृताः ॥
चन्दनागुरुभिश्चैव कर्तव्यं क्षत्रियैर्बुधैः । वैश्यैश्च बिल्वमूलेन शूद्रैर्भूत्या सतोयया ॥
सर्वैः श्वेतमृदा कार्यमूर्ध्वपुण्ड्रं यथाविधि । ऋजूनि सान्तरालानि अङ्गेषु द्वादशस्वपि ॥ इति ।

सर्वैरित्यादिकं वैष्णवविषयम्; पूर्वं तु सर्वसामान्यमिति स्थलान्तरेऽप्युक्तम् ।

तथा **ब्रह्माण्डे**–* द्रव्याणां तु गृहीतानां वर्णतः फलमुच्यते । श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं तथा ॥
श्रीकरं पीतमित्याहुः वैष्णवं श्वेतमुच्यते ॥ इति ।

तत्रैवाध्यायान्तरे–* द्रव्याणामेव सर्वेषां फलमेवं विधीयते । श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं भवेत् ॥
श्रीकरं पीतमित्याहुः मुक्तिदं श्वेतमुच्यते ॥ इति ।

ब्रह्मरात्रे–* श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं भवेत् । श्रीकरं पीतमित्येव मुक्तिदं श्वेतमुच्यते ॥ इति ।

भरद्वाजसंहितायाम्–

* असङ्कलितया स्निग्धश्वेतया श्लक्ष्णया मृदा । ऊर्ध्वपुण्ड्राणि सौम्यानि कुर्यात्सुरभिगन्धया ॥
न पीतया नासितया नातिगौर्या न रक्तया । न धूम्रवर्णया नापि रूक्षया नासुगन्धया ॥ इति ।

अयं वर्णान्तरनिषेधो मुमुक्षुविषयः । सुरभित्वविधिरविशेषात्सर्ववर्णसाधारणः । एकस्मिन्नपि वर्णविशेषे वचनभेदेन फलान्तरं विहितमविरोधात् समुच्चेयम्, तत्तत्कामिनां तत्तत्सिद्धिरिति । अतश्चैतैव मृत्तिका प्रशस्ततमा; वर्णान्तरविशिष्टास्तु तत्तत्फलविशेषाभिलाषिणां विहिता इति न वर्णविशेषस्य सर्वपुरुषेषु विकल्प इति ।

एवमङ्गुल्योऽपि तत्तत्पुरुषार्थभेदेन व्यवस्थाप्यन्ते । तथा हि **पारमेष्ठ्यसंहितायाम्**–

* अनामिका कामदा स्यान्मुक्तिदा च प्रदेशिनी । कनिष्ठाऽऽयुष्यदा प्रोक्ता अङ्गुष्ठः पुष्टिदो भवेत् ॥
निषिद्धा मध्यमा प्रोक्ता चोर्ध्वपुण्ड्रविधौ मुने ॥ इति ।

श्रीनारदीये–* दक्षिणस्य तु हस्तस्य अङ्गुल्यस्संप्रकीर्तिताः । आयुष्कामेन मर्त्येन ग्राह्या तत्र कनिष्ठिका ॥
अपत्यकामो यो मर्त्यो अङ्गुल्याऽनामिकास्यया । ऊर्ध्वपुण्ड्रस्य करणे निषिद्धा मध्यमाऽङ्गुलिः ॥
निष्फलं चोर्ध्वपुण्ड्रं स्यात्तया केवलया कृतम् । मुक्तिः सिद्धा प्रदेशिन्या कृतेन मुनिसत्तम ॥
तस्मात्तया कृतं पुण्यं पापं हरति तन्नृणाम् । अङ्गुष्ठेनार्थकामस्तु नित्यं कुर्यादतन्द्रितः ॥
सर्वाभिरङ्गुलीभिर्वा नित्यं कुर्यात्समाहितः । चतुर्भिर्वा ततः कुर्यात्कृतं तत्र प्रशस्यते ॥
येनोर्ध्वपुण्ड्रं सौम्यं स्यादार्जवं च कृतं भवेत् । तेन कुर्यात्प्रकारेण तादृशं फलवद् भवेत् ॥ इति ।

तथा **ब्रह्माण्डे**–* अङ्गुष्ठं मोक्षदं प्रोक्तं मध्यमाऽऽयुष्करी भवेत् । अनामिका नित्यवश्या तर्जनी पापनाशिनी ॥ इति ।

तत्रैवाध्यायान्तरे–

* अङ्गुष्ठं[म]मुक्तिदं प्रोक्तं मध्यमाऽऽयुष्करी तथा । अनामिका कामदोक्ता मुक्तिदा च प्रदेशिनी ॥ इति ।

ब्रह्मरात्रे— * अङ्गुष्ठं [पुष्टि]मुक्तिदं प्रोक्तं मध्यमाऽऽयुष्करी तथा । अनामी कामदा प्रोक्ता मुक्तिदा तर्जनी स्मृता ॥
कनिष्ठिका कदाचिच्च न योग्या भवति ध्रुवम् । ब्राह्मणस्य विशेषेण कल्पिताऽनामिका स्मृता ॥
अङ्गुष्ठमेव राज्ञश्च तर्जनी विश एव च । शूद्रस्य मध्यमा प्रोक्ता सर्वेषां वाऽप्यनामिका ॥
तर्जनी भिक्षुकस्यैव वनस्थस्य तु मध्यमा । अनामिका गृहस्थस्य अङ्गुष्ठाग्रमथापि वा ॥
अङ्गुष्ठेन ब्रह्मचारी सर्वेषां स्यादनामिका । इति ।

तस्मिन्नेवाध्याये—* नाचरेद्वामहस्तेन न नखैरपि कारयेत् । आत्मनैवात्मनोऽङ्गेषु नेतरेण तु कारयेत् ॥ इति ।

अयं वामहस्तनिषेधो दक्षिणाशक्तविषयः, शक्त्यनुसारेण शास्त्रप्रवृत्तेः । तथा **भरद्वाजसंहितायाम्**—

* ऊर्ध्वपुण्ड्रविधौ मोक्षमङ्गुष्ठं तर्जनी श्रियम् । मध्यमा पशुपुत्रादि मोक्षैश्वर्यमनामिका ॥
वश्यं कनिष्ठिका कुर्यान्न चान्येन विधीयते । यथाकामं तु सर्वाभिर्न नखैरिति केचन ॥ इति ।

अत्र मध्यमाकनिष्ठिकयोर्निषेधः ; क्वचिच्च तयोरेव फलान्तरसाधनतया विधिश्च दृश्यते ; तत्कथमुपपद्यते ? उच्यते—विशेषविधाने सति सामान्यनिषेधो विहितव्यतिरिक्तविषयतया व्यवस्थाप्यः । अतो विधायकवाक्यावगतफलविशेषनिरपेक्षान्प्रति तन्निषेधः । यद्वा तत्तद्वाक्यप्रकृतफलविशेषापेक्षया निषेध इत्यासत्तेर्व्यवस्थापनीयम्—या चात्र वर्णाश्रमविषयतयाऽङ्गुलिव्यवस्था सा तत्तत्फलविशेषनिरपेक्षणात्ततत्कर्माङ्गत्वादिमात्रेणोर्ध्वपुण्ड्रकरणदशायामिति मन्तव्यमिति ।

क्रियमाणस्य चोर्ध्वपुण्ड्रस्य हरिपादसंस्थानत्वं सान्तरालत्वं च * हरेः पादाकृतिमित्यादिकया श्रुत्या प्रागुपात्तया प्रदर्शितम् । सन्ति च पुराणादिष्वपि तथात्वे वचांसि । तथा हि **श्रीवाराहे**—

* एकान्तिनो महाभागा मत्स्वरूपविदोऽमलाः । सान्तरालान्प्रकुर्वीरन्पुण्ड्रान्मम पदाकृतीन् ॥
रक्षार्थं मङ्गलार्थं च पवित्रार्थं वरानने । मन्त्रमुच्चार्य विधिवद्धारयेदूर्ध्वपुण्ड्रकान् ॥ इति ।

स्कान्दे— * ऊर्ध्वपुण्ड्रं द्विजः कुर्याद्दण्डाकारं सुशोभनम् । मध्यच्छिद्रं वैष्णवस्तु नमोऽन्तैः केशवादिभिः ॥ इति ।

ब्रह्माण्डेऽपि—* अथ कर्म प्रवक्ष्येऽहमूर्ध्वपुण्ड्रस्य तत्त्वतः । ऋजुं सुपार्श्वमूर्ध्वाग्रमूर्ध्वपुण्ड्रं मतं मम ॥
सान्तरालमृजुं सौम्यं सुपार्श्वं सुमनोहरम् । यः करोत्यूर्ध्वपुण्ड्रं स ममातीव प्रियो भवेत् ॥
मत्सायुज्यं च सारूप्यं सालोक्यं वा लभेत सः । यश्चिन्तयन्मां सततं धारयेदूर्ध्वपुण्ड्रकम् ॥
विमलान्यूर्ध्वपुण्ड्राणि सान्तरालानि यो नरः । करोति विपुलं तत्र मन्दिरं मे करोति सः ॥
ऊर्ध्वपुण्ड्रस्य मध्ये तु विशालेऽतिमनोहरे । लक्ष्म्या सार्धं समासीनो रमेऽहं तत्र निर्वृतः ॥
निरन्तरालं यः कुर्यादूर्ध्वपुण्ड्रं द्विजाधमः । स हि तत्र स्थितं विष्णुं श्रियं चैव व्यपोहति ॥ इत्यादि ।

आह च **मरीचिः**—चतुरङ्गुलमूर्ध्वाग्रं द्व्यङ्गुलं विस्तृतं मृदा । द्विजः पुण्ड्रमृजुं सौम्यं सान्तरालं तु कारयेत् ॥
अच्छिद्रमूर्ध्वपुण्ड्रं तुः य करोति विमूढधीः । स पर्यायेण तान्याति नरकानेकविंशतिम् ॥
विमलान्यूर्ध्वपुण्ड्राणि सान्तरालानि यो नरः । करोति विपुलं तत्र मन्दिरं मे करोति सः ॥

तथा **पारमेष्ठ्यसंहितायाम्**—* ऋजूनि सान्तरालानि अङ्गेषु द्वादशस्वपीति ।

तथा **ब्रह्मरात्रे**—* ऊर्ध्वपुण्ड्रं द्विजः कुर्याद्दण्डाकारं सुशोभनम् । मध्ये च्छिद्रं विजानीयाद्वैष्णवानां विशेषतः ॥

मद्भक्तोऽपि विशुद्धात्मा मृद्धारी चेन्मम प्रियः । निरन्तरालं यः कुर्यादूर्ध्वपुण्ड्रं विमोहितः ॥
स हि तत्र स्थितं विष्णुं श्रियं च पिदधाति हि । बहुना किं प्रलापेन हृद्यं सौम्यं सुदर्शनम् ॥
ऋजुं सुपार्श्वमूर्ध्वाग्रं कुर्यादत्यच्छमध्यमम् । पार्श्वयोर्घनविन्यासमूर्ध्वपुण्ड्रमिहोच्यते ॥ इति ।

अत्यच्छमध्यमिमित्यन्तरालविधिपरमेव, तत्प्रसङ्गात्, न पुनरत्यच्छमृद्विन्यासपरम् । एवम् * मध्येऽच्छान्पार्श्वतस्थिता-निति वचनान्तरमपीति । यद्वा अत्यच्छमृद्विन्यासेऽपि अन्तरालाविरोधात्तावन्मात्रस्यातिमात्र[वर्जन]निर्बन्धो न कार्य इति तात्पर्यम् । तदेवं हरिपादसंस्थानत्वं सान्तरालत्वं च सोपबृंहणश्रुतिसिद्धम्, भगवदसाधारण्यातिशयलिङ्गं चेति, तदेव भागवतैरङ्गीकार्यम्; निरन्तरालं तु निषिद्धमेवेत्यनादरणीयम्; संस्थानान्तराणि त्वमुख्यानीति विभागः ।

ननु दीपशिखादण्डाकारादिसंस्थानस्य कथं वैष्णवैर्हेयत्वम्? तदपि प्रमाणभूतशास्त्रविहितमेव । यथा **ईश्वर-संहितायाम्**—* लक्ष्म दीपशिखाकारं ललाटे तु मृदा चरेदिति । भगवच्छास्त्ररत्नभूते **श्रीसात्त्वते** च—

* जलनिर्मथितेनैव ऊर्ध्वपुण्ड्रचतुष्टयम् । हृद्यंसयोर्ललाटे च कुर्याद्दीपशिखाकृति ॥ इति ।

ब्रह्माण्डे— * ऊर्ध्वपुण्ड्रप्रमाणानि द्रव्यवर्णानि कर्म च । स्थानमन्त्राङ्गुलीश्चैव प्रवक्ष्यामि फलानि च ॥
वर्तिदीपाकृतिं चैव वेणुपत्राकृतिं तथा । कुर्यात्स्वाङ्गेषु मनसा चिन्तयन्मां सदा नरः ॥ इति ।

तत्रैवाध्यायान्तरे—

* वर्तिदीपाकृतिं चैव वेणु[शङ्ख]पत्राकृतिं तथा । पद्मस्य मुकुलाकारं कुमुदस्योत्पलस्य वा ॥
मत्स्यकूर्माकृतिं चैव शङ्खाकारमथापि वा । ऋजुं संभाव्यमूर्ध्वाग्रमूर्ध्वपुण्ड्रमिहोच्यते ॥ इति ।

पारमेष्ठ्यसाहतायाम्—

* शृणु वत्स यथान्यायमङ्गानि गदतो मम । लक्षणानि च सर्वेषां मृत्पुण्ड्राणां यथाविधि ॥
वेणुपत्राकृतिं चैव दीपाकारं तथैव च । अञ्जकुड्मलसङ्काशं शङ्खाकारं तथैव च ॥
मत्स्याकृतिं तथा प्रोक्तं कूर्माकारं तथैव च । एवं सलक्षणं प्रोक्तं द्विजानां मुनिसत्तम ॥
बालेन्दुवत्क्षत्रियाणां वैश्यानां वर्तुलाकृति । त्रिपुण्ड्रं शूद्रजातीनां विधिरेष सनातनः ॥
ऊर्ध्वपुण्ड्रधरा ये वै ते तु भागवताः स्मृताः । क्षत्रिया वाऽथ वैश्या वा शूद्रा वा मुनिसत्तम ॥
ब्राह्मणानां च सर्वेषामुत्तमौ मत्स्यकूर्मकौ । सर्वे ह्यूर्ध्वमुखाः प्रोक्ता मुने मत्स्याकृतिं विना ॥
अधोमुखं त्वेककोणं न्यूनमन्यत्ततोऽधिकम् । मध्यं किंचित्तु वक्रं स्यादूर्ध्वभागविशालकम् ॥
सान्तरालमृजुं मध्ये मात्स्यमेतत्कृतो विधिः । समकोणमधोभागमूर्ध्वभागं [वि]सकोणकम् ॥
नीरन्ध्रमेव तत्प्रोक्तं लक्षणं कमठाकृतेः ॥ इति ।

तथा ब्रह्मरात्रे—

* दीपाकारं ततश्चापि वेणुपत्रसमाकृति । पद्मस्य मुकुलाकारं कुमुदस्योत्पलस्य वा ॥
मत्स्याकारं तथा वाऽपि कूर्माकारं तथाऽपि वा । शङ्खाकारमथाऽपि स्यान्मम पादाकृतिं तथा ॥
शूर्पाकारमिति प्राहुरेकचक्राकृतिं तथा । मोहिनीपुष्पसंकाशं चक्राकारमिदं बुधाः ॥
ऊर्ध्वपुण्ड्रं द्विजः कुर्याद्दण्डाकारं सुशोभनम् । इत्यादि ।

श्रीनारदीये एकोनसप्ततितमेऽध्याये—

* यदृष्ट्वा वैष्णवश्रेति निस्संशयमभून्मुने । तादृशं लक्षणं वक्ष्ये वैष्णवानां प्रधानतः ॥
वैष्णवौ द्वौ सदा सम्यक्सङ्गतौ तु परस्परम् । प्रणामं कुरुतस्तत्र तयोर्मध्ये स्थितो हरिः ॥
तस्मादवश्यं कर्तव्यं वैष्णवस्य तु लक्षणम् । ललाटमध्ये तिलकमूर्ध्वरूपं समाहितः ॥
यः कुर्यान्मन्त्रसंयुक्तमूर्ध्वपुण्ड्रमिति स्मृतम् । कर्तव्यं प्रथमं पद्मपुष्पाकारं सुपूजितम् ॥
कूर्माकारं ततः कुर्याच्छङ्खाकारं ततः परम् । अश्वत्थपत्रसदृशं कुर्यात्सर्वत्र पूजितम् ॥
अहमश्वत्थरूपेण पालयामि जगत्त्रयम् । इत्याह भगवान्विष्णुः स्वयमेव ततःपरम् ॥
अश्वत्थश्चास्मि वृक्षाणामित्याह परमेश्वरः । वेणुपत्रसमाकारं पूजितं ब्रह्मणा पुरा ॥
दीपाकारं ततःश्रेष्ठमूर्ध्वपुण्ड्रस्य नित्यशः । मालतीपुष्पसङ्काशं श्रेष्ठं सर्वत्र पूजितम् ॥
तिन्त्रिणीपत्रसदृशं कुर्यादग्निशिखोपमम् । उक्तानि लक्षणान्येवं ब्राह्मणस्येति तत्स्मृतम् ॥

इत्यादि । एवं च विकल्पितेषु मत्स्यकूर्मसंस्थानयोरेवोत्तमत्वं प्रतीतम्; न तु हरिपादसंस्थानस्य । अतोऽस्य सर्वातिशायित्वे किं प्रमाणम्? इति चेत्; दत्तोत्तरमिदम् । तथा हि—सोपबृंहणश्रुतिसिद्धस्य भगवदसाधारण्यातिशयलिङ्गत्वौचित्यात्तदेव हि भगवच्छेषत्वज्ञानपौष्कल्यवद्भिर्विचक्षणैरुपादेयम् । मत्स्यकूर्मपद्माश्वत्थपत्रादिसंस्थानेष्वपि हि प्राशस्त्यवादो भगवद्विग्रहविशेषसाधर्म्यभगवच्चिह्नत्वभगवदनुप्रवेशविशेषादिनिबन्धन इति तत्रतत्रैव व्यक्तम् । अस्ति च—* एकान्तिनो महाभागा इत्यादिविशेषविधिः । ततश्च बहुधा विकल्पितेष्वपि संस्थानेषु तात्पर्यपर्यालोचनयाऽस्यैव प्रधानत्वमवसितम् । यच्च कमठसंस्थानस्योर्ध्वपुण्ड्रस्य नीरन्ध्रत्वं विहितम्, तदपि तावन्मात्रनिष्ठमेव वचनबलात्स्वीक्रियते । अन्यत्र तु सान्तरालत्वविधेर्निरन्तरालत्वनिषेधस्य च सङ्कोचकाभावात्सान्तरालत्वमेव ग्राह्यम् । यच्च दीपाकारविधिपरं श्रीसात्त्वतवचनं तदपि विशेषविषयमिति प्रागेव निर्णीतम् । एवमन्यदपि भाव्यम् । न च संस्थानान्तरस्य वैष्णवैरत्यन्ताननुष्ठाने वचनविरोधः; एकान्तित्वरहितवैष्णवमात्रविषयतयाऽपि वचनस्य चरितार्थत्वात् ।

ननु भगवदर्चावतारेषु दीपशिखाकारोर्ध्वपुण्ड्रस्य दर्शनात् * यच्छीलस्स्वामीति न्यायेन भागवतैरपि तथैवानुष्ठेयमिति चेन्न, वचनविरोधे न्यायस्यानवतारात् । अन्यथा भगवदनुष्ठितगोपकन्योन्मादनस्वकुलविनाशनबुद्धसमयप्रवर्तनादेरपि प्रसङ्गात् । अतो न स्वामिकृतं सर्वं भृत्येनाप्याचरणीयम् । लोके चैतदेवं द्रष्टव्यम् । न च दीपशिखाकारमेवार्चावतारेषूर्ध्वपुण्ड्रं कुर्वीतिति विधिरस्ति, येन संस्थानान्तराणि परित्यजेरन् । यदि च वचनं दृष्टं, तदपि तन्मात्रविषयमिति नास्माभिरनुष्ठेयम् । किं च अलङ्करणरूपतया हि भगवत्तत्तद्धारणम्; तत्र शोभैव प्रधानभूतेति यथा शोभाभिमानस्तथैव कुर्वन्तीति किं विरुध्यते? अतः श्रुत्यादिविहितहरिपादादिसंस्थानमेव भागवतैरुपादेयमिति स्थितम् ।

अथ पुण्ड्रसङ्ख्यां विचारयामः । बहुधा च विकल्पतः पुण्ड्रसङ्ख्या प्रोक्ता । तथा हि—

ब्रह्मरात्रे— * ललाटे कण्ठदेशे तु स्कन्धयोश्च त्रिके तथा । चतुरङ्गुलमानानि पञ्च पुण्ड्राणि धारयेत् ॥
हृदये चोदरे चैव पार्श्वयोः पृष्ठ एव च । बाह्वोर्मध्ये च सप्त स्युः पुण्ड्राण्यष्टाङ्गुलानि वै ॥
व्यूहं तु विद्यात्प्रथमं चतुरङ्गुलसंमितम् । अष्टाङ्गुलं द्वितीयं तु द्विविधं व्यूहसंज्ञितम् ॥
एवं यः कुरुते नित्यं मत्सायुज्यमवाप्नुयात् ॥ इति ।

वसिष्ठसंहितायाम्—* व्यङ्गुलं विस्तृतं रम्यं चतुरङ्गुलमायतम् । प्रथमव्यूह एव स्यात्पञ्चपुण्ड्रस्य लक्षणम् ॥
व्यङ्गुलं विस्तृतं ह्यूर्ध्वमङ्गुलाष्टकमायतम् । द्वितीयं व्यूह एवं स्यात् सप्तपुण्ड्रस्य लक्षणम् ॥
इत्यूर्ध्वपुण्ड्रं यः कुर्यान्न मृत्योर्वशमाप्नुयात् । केशवादिनमोऽन्तं वै जप्त्वा द्वादशनामभिः ॥
तं स्मृत्वा देवदेवेशमूर्ध्वपुण्ड्रं समाचरेत् ॥ इति ।

तत्रैवाध्याये पश्चादपि—

* आदौ तु लक्षणोपेतां सुगन्धां सात्त्विकीं शुभाम् । वामेऽस्त्रशोधिते हस्ते वाग्यतः प्रणवेन तु ॥
निधाय जलमादाय *गन्धद्वारेति सेचयेत् । अस्त्रमन्त्रेण रक्षां च कृत्वा दशसु दिक्ष्वपि ॥
तारमन्त्रेण संमिश्रं मूलमन्त्रेण मन्त्रयेत् । नृसिंहबीजं च लिखेद्रक्षार्थं दोषशान्तये ॥
* शतधारेण मन्त्रेण तीर्थतोयं च निक्षिपेत् । तामेकीकृत्य तर्जन्या स्मृत्वा मम पदद्वयम् ॥
* विष्णोर्नुकेन मन्त्रेण मन्त्रयित्वा यथाक्रमम् । पञ्चोपनिषदैर्मन्त्रैर्मूलमन्त्रेण मन्त्रयेत् ॥
द्वादशाक्षरमुच्चार्य प्रार्थयेदिष्टसिद्धये । सप्तभिर्वैष्णवैर्मन्त्रैर्मन्त्रयेन्मोक्षसिद्धये ॥
मृदं प्राक् तारमन्त्रेण तर्जन्या मूर्ध्नि विन्यसेत् । चतुश्चक्रधरं मां तु स्मृत्वा जाम्बूनदप्रभम् ॥
ललाटे केशवायेति धारयेदूर्ध्वपुण्ड्रकम् । चतुश्शङ्खधरं देवं नीलजीमूतसन्निभम् ॥
कुक्षौ नारायणायेति मन्त्रमुच्चार्य धारयेत् । इन्द्रनीलनिभश्यामं चतुर्हस्तैर्गदाधरम् ॥
हृदये माधवायेति धारयेदङ्गुलाष्टकम् । चतुर्भुजं धनुष्मन्तं चन्द्रभासदृशद्युतिम् ॥
गोविन्दायेति मन्त्रेण कण्ठे च चतुरङ्गुलम् । चतुर्हलधरं देवं पद्मकिञ्जल्कसन्निभम् ॥
विष्णवेऽष्टाङ्गुलमिदं धारयेद्दक्षिणोदरे । मुसलास्त्रं महाविष्णुमरविन्दाभमेव च ॥
मधुसूदनमन्त्रेण धारयेद्दक्षिणे भुजे । खड्गपाणिं चतुर्हस्तमग्निसन्निभतेजसम् ॥
त्रिविक्रमायमन्त्रेण धारयेद्दक्षिणे गले । चतुर्वज्रधरं देवं तरुणादित्यसन्निभम् ॥
वामनाय नमोऽन्तेन वामे कुक्षौ तु धारयेत् । पट्टिशायुधहस्तं च पुण्डरीकाभमेव च ॥
श्रीधरायेति मन्त्रेण भुजे वामे तु धारयेत् । चतुर्भिर्मुद्गरधरं भुजैर्विद्युत्समप्रभम् ॥
हृषीकेशेति मन्त्रेण धारयेद्वामके गले । पञ्चायुधधरं मां च सहस्रांशुसमप्रभम् ॥
पद्मनाभायमन्त्रेण पृष्ठे वै धारयेत्क्रमात् । पाशहस्तधरं देवं बालार्कशतसंनिभम् ॥
दामोदरायमन्त्रेण धारयेत्पश्चिमे गले । द्वादशाक्षरमुच्चार्य शेषं मूर्धनि विन्यसेत् ॥ इति ।

तथा किञ्चिदतिलङ्घ्य—

भोगार्थी भोगसिद्ध्यर्थं कनिष्ठोपगया क्रमात् । अष्टाक्षरेण मन्त्रेण प्रत्यक्षरमनुस्मरन् ॥
ललाटे हृदि बाह्वोश्च कुक्षिमध्ये च पार्श्वयोः । पृष्ठेऽपि चाक्षरैर्मन्त्रैर्विष्णुगायत्रियाऽन्वितैः ॥
ऊर्ध्वपुण्ड्राणि वै कुर्यान्मृदा वा चन्दनेन वा । मोक्षार्थी च विशेषेण द्वादशाक्षरविद्यया ॥
द्वादशैतानि पुण्ड्राणि कुर्याद्वादशनामभिः । षडक्षरेण मन्त्रेण भोगार्थी चन्दनेन च ॥
ललाटे हृदि कण्ठे च कुक्षौ बाह्वोर्यथाक्रमम् ॥ इति ।

श्रीनारदीये चतुस्सप्ततितमाध्याये—

* स्थानानि संप्रवक्ष्यामि ऊर्ध्वपुण्ड्रस्य धारणे । केचित्त्वयोदशेत्याहुर्वैष्णवानां द्विजर्षभ ॥
तत्पक्षे संप्रवक्ष्यामि स्थानामि मुनिसत्तम ॥ ललाटे प्रथमं विद्यात्,

इत्युपक्रम्य * त्रयोदशमथो मूर्ध्नि धारयेदूर्ध्वपुण्ड्रकम् । स्थानानि द्वादशाष्टौ वेत्याहुः केचिन्मनीषिणः ॥
द्वादशेति च यः पक्षः तस्मिञ्छिरसि वर्जयेत् । अष्टौ वेति च यः पक्षः शिरआदीनि वर्जयेत् ॥
तत्र मन्त्रं प्रवक्ष्यामि ऊर्ध्वपुण्ड्रस्य धारणे ।

इत्यादिना द्वादश नामान्युक्त्वा—

* द्वादशाक्षरमन्त्रेण मूर्ध्नि दद्यान्मृदं ततः । पक्षे तु द्वादशे कुर्याच्छिरोमात्रं विना पुनः ॥
अस्मिन्पक्षेऽपि वा कुर्यान्मन्त्रमेदेन मानवः । द्वादशाक्षरमन्त्रस्य प्रथमाद्यक्षरैस्सह ॥
पुनः क्रमेण तत्कुर्यादूर्ध्वपुण्ड्रं स वैष्णवः । अष्टौ चेति च यः पक्षस्तस्य मन्त्रं वदाम्यहम् ॥
अष्टाक्षरस्य मन्त्रस्य प्रथमाद्यक्षरैस्सह । वर्जयित्वा गलस्थानि चत्वारि मुनिसत्तम ॥

इति प्रतिपादितम् । तत्तद्ध्यानस्य चावश्यंभावित्वमुक्तम्—

* ध्यानं तत्संप्रवक्ष्यामि ऊर्ध्वपुण्ड्रस्य धारणे । येन नाम्ना च यत्कुर्यात्तन्नामार्थं विचिन्तयेत् ॥
विनाकृतं तु ध्यानेन ऊर्ध्वपुण्ड्रं तु निष्फलम् ॥ इति ।

अत्र च पुण्ड्रसङ्ख्यानिरूपकमन्त्रविशेषनिर्देशदर्शनात् ब्रह्मरात्रोक्तं प्रणवेन ललाटे धारणं ब्रह्माण्डोक्तम् * ऊर्द्धृताऽसीति मन्त्रेण धारणं चैकसङ्ख्याविषयमिति मन्तव्यम् । तथाऽन्यत्र—

* वामहस्ते शुचिष्वप्सु निर्घृष्य मृदमुत्तमाम् । प्रदक्षिणं समुद्धाथ मूलमन्त्रेण योजयेत् ॥
ऊर्ध्वपुण्ड्राणि कुर्वीत केशवाद्यैर्यथाक्रमम् । ऋजूनि स्फुटपार्श्वानि स्थानव्यापीन्यतन्द्रितः ॥
नासिकामूलमारभ्य ललाटे प्रथमं न्यसेत् । द्वितीयमुदरे नाभेरूर्ध्वं हृदि ततः परम् ॥
वक्षोऽन्ते तत्परं पश्चात्कुक्षौ दक्षिणपार्श्वतः । भुजे षष्ठं ततः स्कन्धे तथा सव्ये त्रयं भवेत् ॥
एकादशं द्वादशं च पृष्ठेऽधस्तात्तथोपरि । इति कुर्याद्यथाचारमूर्ध्वपुण्ड्राणि यत्नतः ॥ इति ।

ब्रह्माण्डे— * ललाटे केशवं ध्यायेन्नारायणमथोदरे । माधवं हृदये चैव गोविन्दं कण्ठकूबरे ॥
उदरे दक्षिणे पार्श्वे विष्णुं व्यापं विचिन्तयेत् । तत्पार्श्वे बाहुमध्ये तु चिन्तयेन्मधुसूदनम् ॥
त्रिविक्रमं च तत्स्कन्धे वामपार्श्वे तु वामनम् । श्रीधरं बाहुके वामे हृषीकेशं तु स्कन्धके ॥
अपरे पद्मनाभं च त्रिके दामोदरं स्मरन् । तत्प्रक्षालनतोयेन वासुदेवेति मूर्धनि ॥
एवं हि धारयेन्नित्यं मद्भक्तस्तूर्ध्वपुण्ड्रकम् । धारयित्वा ततो मन्त्रैः केशवाद्यैश्च नामभिः ॥
अङ्गुलीभिः स्पृशेत्पुण्यमूर्ध्वपुण्ड्रं मनोहरम् ॥ इति ।

तत्रैवाध्यायान्तरे कतिपयपदावापोद्वापमेदेनेमानेव श्लोकानुक्त्वा अन्यदप्युक्तम्—

* श्रीवत्सं दक्षिणे भागे विन्यसेत्पद्ममेव वा । मत्पूजाजपकालेषु सायं प्रातस्समाहितः ॥
एवं मन्त्रविधानेन धारयेदूर्ध्वपुण्ड्रकम् ॥ इत्यादि ।

तथा **पारमेष्ठ्यसंहितायां** शारीरभागवत्क्षेत्रवर्णने—

* विस्तारं व्यङ्गुलं प्रोक्तं व्यङ्गुलं वा ललाटके । तत्केशवाभिधानस्य विष्णोः स्थानमनुत्तमम् ॥
तु नाभेरूर्ध्वं च द्वादशाङ्गुलमायतम् । तत्रापि व्यङ्गुलं प्रोक्तं विस्तरं मुनिसत्तम ॥
नारायणाभिधानस्य विष्णोः स्थानमनुत्तमम् । स्थानान्तरेऽपि च तथा कुर्यात्प्रादेशमायतम् ॥
प्रोक्तं तत्र च देवर्षे विस्तारं चतुरङ्गुलम् । स्थानं लक्ष्मीसहायस्य माधवस्य शुभं मतम् ॥
कण्ठकूपेऽपि च तथा व्यङ्गुलायतविस्तृतम् । तद्गोविन्दाभिधानस्य विष्णोस्स्थानमनुत्तमम् ॥
दक्षिणे कुक्षिपार्श्वे तु आयतं द्वादशाङ्गुलम् । विस्तारं व्यङ्गुलं तत्र तद्विष्णोः परमं पदम् ॥
दक्षिणे तु भुजे कुर्यादायतं च दशाङ्गुलम् । यथापूर्वं तु विस्तारं मधुसूदनकेतनम् ॥
जत्रौ व्यङ्गुलमायामं विस्तारं तु तथैव च । त्रिविक्रमाभिधानस्य केतनं तदिहोच्यते ॥
वामे च कुक्षिपार्श्वे तु द्वादशाङ्गुलमायतम् ॥ विस्तृतं व्यङ्गुलं तच्च वामनायतनं महत् ॥
वामे भुजे च जत्रौ च कुर्याद्दक्षिणपार्श्ववत् । स्थानं च श्रीधरस्यापि हृषीकेशस्य वै क्रमात् ॥
भागेऽपरे तथा कुर्यादधस्ताज्जघनोपरि । वंशे व्यङ्गुलमायामं विस्तारं तु तथैव च ॥
स्थानं तत्पद्मनाभस्य ऋषे स्थानमनुत्तमम् । तत्स्थानं पद्मनाभस्य स्थानमित्यन्वयः क्रमात् ॥
कक्कुदे च तथा कुर्यात्त्र्यङ्गुलायामविस्तरम् । स्थानं दामोदरास्यस्य विष्णोरुक्तं महामुने ॥
एतानि द्वादशाङ्गानि तवोक्तानि महामुने । ऊर्ध्वपुण्ड्रविधानं च लक्षणं च तथैव च ॥
दैक्तं च तथा प्रोक्तं यथाऽऽह भगवानृषिः । धृतोर्ध्वपुण्ड्रो विधिवन्न्यस्य नामानि द्वादश ॥
नमोऽन्तान्यञ्जलिं कुर्यान्नामान्युक्त्वा यथाक्रमम् । इति ।

पारमेश्वरे च—

* एवं तदीया विप्राश्च क्षत्रिया वैश्यजातयः । मृदैव वा चन्दनेन कल्पितैरूर्ध्वपुण्ड्रकैः ॥
द्वादशैकचतुर्भिर्वा भूषिताः स्युस्सदा द्विज । इति ।

ब्रह्माण्डे तु एषामायामप्रमाणमुत्तममध्यमादिरूपेण बहुधा प्रतिपादितम् । यथा—

* दशाङ्गुलप्रमाणं तु उत्तमोत्तममुच्यते । नवाङ्गुलं मध्यमं स्यादष्टाङ्गुलमथाधमम् ॥
सप्तषट्पञ्चभिः पुण्ड्रं मध्यमं त्रिविधं भवेत् । चतुस्त्रयं द्वयं कुर्यादधमं त्रिविधं भवेत् ॥ इति ।

शेषं च स्मृतिचन्द्रिकादिषु द्रष्टव्यम् । एवं बहुप्रकारसंख्याप्रधाने का सङ्ख्या प्रधानभूतेति चेदुच्यते—गुरुलघुविकल्पस्यैकस्मिन्नसंभवाद्गुरोरेव तावत् मुख्यत्वं सिद्धम् ; यत्र तु कर्मविशेषाङ्गतया वा फलविशेषमुद्दिश्य वा न्यूनसङ्ख्याविधानं, तत्र विशेषवचनबलान्न्यूनतयैव तत्परिग्रहः । अन्यत्र त्वधिकपरिग्रह एव मुख्यः । द्रव्यालाभासामर्थ्यादिदशासु तु गत्यन्तराभावान्न्यूनपरिग्रहः, अत्यन्ताकरणाद्यथाशक्तिकरणस्यापि नित्येषु शास्त्रीयत्वात् ; काम्येष्वपि केषुचिद्यथाशक्त्यनुष्ठानेऽपि तत्तत्फलानुरूपफलप्राप्तेः प्रतिपादितत्वात्, यथा दानादिषु । उक्तं **चाहिर्बुध्न्यसंहितायाम्**—

* अस्मिन्समाधिविरहो ललितक्रियोऽपि यत्नोचितं लभत एव फलं मनुष्यः । इति । तदयं संग्रहः—

त्याज्यं विप्रैस्त्रिपुण्ड्रादिकमिति विहितं विष्णुभक्तैस्तथाऽन्यैः कर्माङ्गत्वादिनोर्ध्वग्रहणमिह सदा मृत्प्रशस्तेतरेभ्यः ।
विष्णुक्षेत्रोद्भवा सा सितरुचिरुचिराऽनामिकादेर्विकल्पः सच्छिद्रं कच्छपान्यद्धरिपदसदृशं मुख्यमन्यूनता च ॥

श्रीमद्वेङ्कटनाथेन श्रुतिस्मृतिशतैरिति । विधानमूर्ध्वपुण्ड्रस्य विस्तरेण निरूपितम् ॥

इति सच्चरित्ररक्षायां ऊर्ध्वपुण्ड्रधारणविधिनांम द्वितीयोऽधिकारः ॥

॥ अथ भगवन्निवेदितोपयोगविधिर्नाम तृतीयोऽधिकारः ॥

अथ चक्षुष्मतां शास्त्रैश्चतुर्वर्गाभिलाषिणाम् । विष्णोर्निवेदितस्यैव भोज्यत्वं प्रतिपाद्यते ॥

समर्थितं चैतत्संग्रहेणागमप्रामाण्ये **भगवद्यामुनाचार्यपादैः** । प्रपञ्चितं च **वरदराजपण्डितैः सन्मार्गदीपिकायाम्** । तदनुसारेणास्माभिरपि नातिसंक्षेपविस्तरमुपपाद्यते ।

तत्रैवं पूर्वपक्षी प्रत्यवतिष्ठते—भगवन्निवेदितं भोज्यमित्यत्र किं भोज्यद्रव्यत्वमात्रं विवक्षितम्? उत भोक्तुः प्रत्यवायानाधायकत्वम्? यद्वा भोक्तुर्हितत्वमिति? नाद्यः, अविवादात् । न द्वितीयतृतीयौ, दृष्टप्रत्यवायनिवृत्तौ दृष्टरूपहितत्वे च अविवादादेव; अलौकिकस्य तु प्रत्यवायस्य प्रायश्चित्तादिशास्त्रावगतत्वेन तन्निषेधस्याशक्यत्वात्; विध्यभावेनालौकिकहितत्वासिद्धेश्च । स्मर्यते हि—* निर्माल्यं च निवेद्यं च भुक्त्वा चान्द्रायणं चरेदिति । तथा च **मनुना** चाभक्ष्यप्रकरणे पठितम्—

* वृथा कृसरसंयावपायसापूपमेव च । अनुपाकृतमांसं च देवान्नानि हवींषि च ॥ इति ।

उच्छिष्टमात्रनिषेधाच्च निवेदितभक्षणमपि निषिद्धमेव । न च सामान्यतः प्रवृत्तस्य निषेधस्यामीषोमीयहिंसासोमोच्छिष्टादिविधानवदत्रापवादो दृश्यते । न च वाच्यं पितृगुरुभर्तृस्वामिनामुच्छिष्टं पुत्रशिष्यभार्याभृत्यैर्भोज्यमितिधर्मज्ञसंमतत्वाज्जगदपेक्षया च भगवतः पितृत्वादेः * भगवतः अहं पुत्रः प्रेष्यः शिष्यश्चेति शास्त्रशतसिद्धत्वात्तदुच्छिष्टं सर्वेषां भोज्यत्वेन संमतमिति; उच्छिष्टभक्षणानुमतिहेतुभूतपितृत्वादेरत्रासिद्धेः, सिद्धस्य जगन्निमित्तत्वादिमात्ररूपस्य तदप्रयोजकत्वात्; प्रयोजकत्वे चातिप्रसङ्गात् । अस्ति हि कथंचित्तथाविधं पितृत्वादिकं हिरण्यगर्भरुद्रादेरपि, कतिपयविषयेऽपि कारणत्वशास्त्रप्रवर्तकत्वपतित्वादिभिस्तत्सिद्धेः; अस्मदपेक्षया तेषां साक्षात्पितृत्वादिकं नास्तीति चेत्, न, प्रकृतेऽपि समानत्वात्; पित्रादिभूततत्तत्पुरुषशरीरकत्वेन वा स्वशरीरात्मजासर्गकरणमात्रेण वा भगवतोऽपि हि पितृत्वम्; न पुनस्समर्चनकर्मभूतवासुदेवादिदिव्यमङ्गलविग्रहविशिष्टत्वेन । पित्रादिशरीरकत्वमपि हिरण्यगर्भादेर्नास्तीति विशेष इति चेत्सत्यम्, तथाऽपि पित्रादिशरीरकेण भगवता भुक्तोज्झितमेव भोक्तव्यत्वेनानुमतमिति मन्तव्यम्; न तु शरीरान्तरविशिष्टभुक्तोज्झितमपि । अन्यथा ब्रह्मरुद्रेन्द्रादिशरीरकभगवद्भुक्तोज्झितस्यापि भोक्तव्यत्वप्रसङ्गात् । पित्रादिभिरव्यवधानेन भुक्तोच्छिष्टं भोक्तव्यमिति नातिप्रसङ्ग इति चेन्न, वासुदेवादिविग्रहार्चने विग्रहद्वारेणैव भगवतोऽपि भोक्तृत्वाद्विग्रहमात्रव्यवधानस्यादोषत्वे सर्वेषामपि तद्विग्रहत्वस्य शास्त्रसिद्धत्वेनातिप्रसङ्गस्य दुष्परिहरत्वात् । अतो लोकसिद्धमेव पितृत्वादिकं तत्र विवक्षितम्, तच्च भगवतोऽप्यवतारेषु यदपेक्षया विद्यते त एव तदुच्छिष्टं भुञ्जीरन् न त्वन्य इति नियमः । यदि च पित्रादिभूता भगवानिति तदुच्छिष्टं भोक्तव्यं स्यात्ततस्तज्ज्येष्ठपुत्रत्वेन श्रुत्यादिसिद्धस्य हिरण्यगर्भस्योच्छिष्टमपि भोक्तव्यमित्यायातम्, ज्येष्ठभ्रातुरपि पितृसमत्वं तदुच्छिष्टभोजनं च शास्त्रीयमेव । अत्र निषेधात्तत्परित्याग इति चेन्न, अत्रापि सामान्य-

निषेधपर्यवसानस्य दर्शितत्वात्। किं च भगवतः पितृत्वादिवन्मातृत्वादेरपि * माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायणः इत्यादिवाक्यसहस्रसिद्धत्वान्मात्राद्युच्छिष्टभक्षणस्याननुमतत्वाद्भगवद्भुक्तोज्झितमप्यननुमतमेव किं न स्यात्? ननु किं पितृत्वादिनिर्बन्धेन, वचनत एव तत्सिद्धेः सामान्यनिषेधस्यापि सङ्कोचनीयत्वात्? श्रूयते च **महोपनिषदि**– * विष्णुनाऽत्तमश्नन्ति विष्णुना पीतं पिबन्ति विष्णुना घ्रातं जिघ्रन्ति विष्णुरसितं रसयन्ति तस्माद्विद्वांसो विष्णूपहृतं भक्षयेयुः इति। **रहस्याम्नायब्राह्मणे** च परिव्राजकप्रकरणे–* अथ यदि कारिणं नासादयेत्स्वयमन्नेन कुर्वीतेति। भोजनरूपं भगवत्समाराधनमिति शेषः। एतदेव वाक्यं ब्रह्मचारिवानप्रस्थप्रकरणयोरप्यान्नातम्। कौटुम्बप्रकरणेऽपि * अथ यदि कारिणोऽप्यसन्निहिता स्युः स्वयमन्नेन कुर्वीतेति। पूर्वमनिवेदितानां भोजनसमयसमागतानां द्रव्याणां मनसा निवेदैव हि भोजनमाम्नायते * अथ यदि पश्चाद्भुक्तस्य गुणाः प्रादुःष्युः येनेष्टं स्यादिति भगवन्निवेदितप्राशनरूपमनुयागं प्रस्तुत्य, * अत्रत एव ॐ नमो भगवते वासुदेवायेति कृत्वा प्रकुर्वीत अथ यदि पश्चाद्भुक्तस्य गुणाः प्रादुःष्युः येनेष्टं स्यादभ्युदिता अप्यासा मनसा समीक्षितव्या भवन्ति अस्मान्न ह्यस्तीति मनस उपघातः अन्तरेण मल्यद्वाससं सूतिकां शवस्पृष्टकं च–इति। सन्ति भगवच्छास्त्रेषु वचनानि परश्शतानि। यथा **श्रीसात्त्वतसंहितायां** सप्तमे परिच्छेदे–

* दत्तशिष्टम[तृप्तं]शेषं च दैवीयान्नेन भावितम्। हविश्शेषेण संयुक्तं व्रतिनां भोजनं हितम्॥ इति।

दत्तशिष्टं–कार्यसंप्रदानावशिष्टम्, दैवीयान्नेन–पाकपात्रावशिष्टेन हविःशेषेण–चरुशेषेण व्रतिनां–भगवद्व्रतनिष्ठानां सर्वेषां हितम्–अनिष्टनिवर्तकत्वादिष्टप्रापकत्वाच्चावश्यं भोक्तव्यमित्यर्थः। अत्र भोजनमिति कर्मणि ल्युडन्तम्। अत्रैव **श्रीनारसिंहकल्पपरिच्छेदे**–

* निष्कामः पावनार्थं तु स्तोकमुद्धृत्य वै पुरा। सन्धार्यं मन्त्रपूतं प्राक् तमश्नीयाच्च मौनवान्॥ इति।

भरद्वाजे होमाधिकारे भगवन्निवेदितमित्यनुवृत्तौ–

* प्राप्तानुज्ञस्तथा तस्मान्नैवेद्यं प्रतिपाद्य च। द्विजेन्द्राणां हि योग्यानां बन्धूनां शान्तचेतसाम्॥
निष्कामस्स्वयमश्नीयाद्भार्यासुतसमन्वितः। संप्रदानावशिष्टं यत्सकामः पुनरेव तत्॥ इति।

श्रीपौष्करे शयनाध्याये–

* कृतोपवासा येऽश्नन्ति प्रापणं पारमेश्वरम्। संप्रदानावशिष्टं च पूतदेहा नरास्तु ते॥
वन्दनीयामराणां च मान्या वै सिद्धसन्ततेः। इति।

पारमेश्वरं–परमेश्वराय भगवते निवेदितमित्यर्थः। **पारमेश्वरे** समाराधनाध्याये–

* ततस्तु भगवद्भुक्तं प्राश्नीयान्नियतस्स्वयम्। क्षयाय सर्वपापानां कोष्ठसंसिद्धयेऽपि च॥ इति।

नारदीये समाराधनाध्याये–

* ततस्तु भगवद्भक्तान्दीक्षितान्पाञ्चरात्रिणः। समभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात्॥
तेभ्यो दद्याच्च नैवेद्यं मधुपर्कपुरस्सरम्। किञ्चित्संस्थाप्य पूजार्थं विष्वक्सेनस्य पूर्वतः॥ इति।

प्रदानं विधाय प्रायश्चित्तप्रकरणे भुक्तम्–

* दत्तं भागवतश्रेष्ठैर्विष्णवे प्रभविष्णवे। तत्पवित्रं पवित्राणां पावनानां च पावनम्॥

दातव्यं तु द्विजातीनां भक्तानां पावनाय च । इति ।

तथा— * ब्राह्मणैः क्षत्रियैर्वैश्यैर्वैष्णवैर्भक्तिसंयुतैः । भोज्यं निवेदितं यत्तत् इत्यादि ।

तथा— * स्वयं चापि तदश्नीयात्सर्वपापविशुद्धये । तस्य संस्पर्शनात्पानाद्भोजनाद्धारणात्सदा ॥
शुचिर्भवति विप्रेन्द्र सर्वकर्मसु संमतः । इति ।

तथा **पाद्मे** चर्यापादे दशमेऽध्याये परित्याज्यपरिग्राह्यविभागप्रदर्शनपूर्वकमुक्तम्—

* ब्रह्मेशानादिदेवानां नैव भोज्यं निवेदितम् । न स्पृश्यं लङ्घनीयं नो चण्डादीनां तथैव च ॥
देवीनां तु श्रियादीनां विनतानन्दनस्य च । चक्रादीनामायुधानां वस्तु यद्यन्निवेदितम् ॥
भोक्तव्यमेव सर्वेषां विप्रादीनामशङ्कितम् । विष्णोर्निवेदितं सर्वं पावनानां च पावनम् ॥
प्रापणं दुर्लभं भोज्यं न त्याज्यं स्यात्कदाचन । भुञ्जानानामेधते श्रीस्त्यजतां परिहीयते ॥
व्रतोपवासतुल्यितमशनं तस्य पावनम् ॥ इति ।

श्रीविष्णुतत्त्वे योगपादे पञ्चमे पटले—* तद्भुक्तशेषभोगा स्याज्जिह्वा गन्धस्तथाविधः । इति । अन्तिमे पटले—

* शेषभुक्तिं प्रशंसन्ति मुनयस्तत्त्वदर्शिनः । युवानः खलु वाञ्छन्ति ताम्बूलं तरुणीमुखात् ॥ इति ।

अत्र तत्त्वदर्शिनो मुनयः प्रशंसन्तीत्यनेन पावनतमत्वं सिद्धम् । तथा **महाभारते** ज्ञानकाण्डे तृतीयाध्याये—

* पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः । प्रापणं भगवद्भुक्तं भुञ्जते चाग्र्यभोजनम् ॥ इति ।

अत्र भुञ्जत इत्येव भोजनस्याभिधानेऽपि पुनरग्र्यभोजनमिति वचनं तस्यापि समन्त्रकसमाराधनरूपत्वं प्रशस्ततमत्वं च प्रतिपादयितुमिति । तथा कर्मकाण्डे च—

* हृदि ध्यायन्हरिं तस्मै निवेद्यान्नं समाहितः । मध्यमानामिकाङ्गुष्ठैर्गृहीत्वाऽन्नं समाहितः ॥
प्राणाय चेत्यपानाय व्यानाय च ततः परम् । उदानाय समानाय स्वाहेति जुहुयात्क्रमात् ॥ इति ।

बोधायनीये विष्णुकल्पे च—

* इदं विष्णुर्विचक्रमे इत्येतया चरुं प्राश्नीयात्—इति । तथा तत्रैव—* अहं वैष्णवोऽस्मीति यः प्रतिब्रूयात्तस्मै शेषं प्रदद्यात्—इत्येतैरेव मन्त्रैः प्राश्नीयादिति । **श्रीमद्रामायणे** च—

* गते पुरोहिते रामः स्नात्वा नियतमानसः । सह पत्न्या विशालाक्ष्या नारायणमुपागमत् ॥
प्रगृह्य शिरसा पात्रं हविषो विधिवत्ततः । महते दैवतायाज्यं जुहाव ज्वलितेऽनले ॥
शेषं च हविषस्तस्य प्राश्याशास्यात्मनः प्रियम् । ध्यायन्नारायणं देवं स्वास्तीर्णे कुशसंस्तरे ॥
वाग्यतः सह वैदेह्या भूत्वा नियतमानसः । श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ॥ इति ।

सन्ति तावदेतानि वचांसि ; न पुनरत्र निवेदितभक्षणं सिध्यति । तथा हि—* विष्णुनाऽत्तमश्नन्तीत्यादेर्वर्तमानापदेशरूपत्वेन विधिपरत्वे प्रमाणाभावात् । रहस्याम्नायभगवच्छास्त्रोक्तं त्वधिकारिविशेषप्रतिनियतधर्मान्तरवन्न विध्यसनीयम् । यद्यपि च सर्वेषामपि च धर्माणां परमार्थतो भगवत्समाराधनरूपत्वेन सर्वेषां तत्समाराधकत्वम् ; तथाऽप्यभिगमनादिपूर्वकाद्यजनाभावात्तदनुप्रविष्टं निवेदितान्नभक्षणं तेषां न प्राप्नोति । किंच यस्मिन्नाम्नाये अनादरो भक्तानामपि दृश्यते तदेव च प्रमाणमिदानीमुपस्थाप्यत इत्ययमपि महान् क्लेशः । रहस्याम्नायस्य प्रमाणत्वाभ्युपगमेऽपि सर्वहिताद्युक्त-

मनाहृतमेव । ततश्चास्तु भगवन्निवेदितं रहस्याम्नायभगवच्छास्त्रनिष्ठैर्भोक्तव्यम् ; तथाऽपि न केवलं त्रयीधर्मरूपभगवत्समाराधननिष्ठैर्भोक्तव्यत्वे प्रमाणम् । तेभ्यस्तत्प्रदानविधानात्तत्सिद्धिरिति चेन्नैवम् । न हि प्रदानं विहितमिति प्रतिग्रहीतुरपि धर्मता स्यात्, श्राद्धादिवत् । किंच यदिदमिह शेषभोजनं विधीयते, तदपीष्टशिष्टभक्षणन्यायेन निवेदितावशिष्टविषयमिति निर्वोढव्यम् । न हि निवेदितस्य शेषशब्दार्थता संभवति । न च तस्य भगवद्भुक्तशिष्टत्वम् ; तत्र कस्यचिदप्यंशस्य भगवता ग्रहणादर्शनात् । अतश्च शिष्टशब्दो निवेदितावशिष्टपरः । निवेदितस्य तु कृत्स्नस्य विष्वक्सेनादिनिवेदनपरम्परया त्याग एव विहित इति ग्राह्यम् । किंच निवेदितस्याभोज्यत्वं भगवच्छास्त्रसंहितास्वेव प्रतीयते ; यथा सनत्कुमारसंहितायाम्—

* निवेदितं तु यद्द्रव्यं पुष्पं फलमथापि वा । तन्निर्माल्यमिति प्रोक्तं तत्प्रयत्नेन वर्जयेत् ॥ इति ।

प्रदेशान्तरे च—* निर्माल्यं भक्षयित्वैवमुच्छिष्टमगुरोरपि । मासं पयोव्रती भूत्वा जपन्नष्टाक्षरं सदा ॥
ब्रह्मकूर्चं ततः पीत्वा पूतो भवति मानवः ॥ इति ।

तत्रैवेन्द्ररात्रे—*न चोपजीवेद्देवेशं निर्माल्यादि न भक्षयेदिति । तथा, *न चोपयोगयोग्यानि निर्माल्यानि कदाचनेति च ।
तथा संहितान्तरे—* निर्माल्यानि च नाश्नीयान्न जिघ्रेन्न च लङ्घयेदिति ।
नच वाच्यम्, * दशनाब्ध्यधिकं पूतं स्थापयेत्तु विचक्षणः । कालयोगस्स उद्दिष्टो रात्रावहनि चैव च ॥
कालयोगातिरिक्तं तु निर्माल्यं परिचक्षते । ततस्तदप्सु चैवाग्नौ क्षिपेद्भूमौ खनेत्तु वा ॥

इतीन्द्ररात्रवचनानुसारेण निषेधवचनानां दशनाब्ध्यधिकविषयत्वमिति ; तत्र हि सामान्येन निवेदितस्य पुष्पौदनादेः कृतकार्यतया निर्माल्यत्वेनापनये प्राप्ते दशनाब्ध्यधिकपूर्णपूजाङ्गतया स्थापनं विधीयते ; ततो नाडिकादशकादर्वागपि तस्योपयोगान्नाडिकादशकातिरिक्तविषयो निषेध इति मन्दं वचः । न चात्रास्य रुद्रादिनिर्माल्यविषयत्वम् ; दीक्षितादीक्षितसाधारणतया सुरादिवदत्यन्तनिषिद्धस्य दीक्षितं प्रति समयोपदेशसमये भगवद्यागदीक्षितं प्रति प्रसङ्गाभावेन निषेधप्रयोजनाभावात्, भगवन्निवेद्यादेश्च प्रसङ्गस्य संभवात् । एवं च सति केरलादिदेशगतशिष्टानुसारश्च । यत्तु * प्राप्तं भगवद्भुक्तमित्यादि महाभारतवचनं तदप्युक्तरीत्या पञ्चरात्रार्थनिर्णये सति तदनुसारित्वाद्भगवद्भुक्तावशिष्टविषयमेव भवितुमर्हति । यत्तु बोधायनीये विष्णुकल्पे च भगवत्समाराधनमुक्त्वा तदन्ते भगवद्भुक्तोज्झितस्य प्राशनीयत्वमुक्तमिति, तदपि न, भुक्तोज्झितप्राशनस्य तत्राविहितत्वात्, * इदं विष्णुर्विचक्रमे इत्येतया चरुं प्राश्नीयादित्यत्रावशिष्टचरुप्राशनमात्रेण चरितार्थत्वात्, * अहं वैष्णवोऽस्मीति यः प्रतिब्रूयात्तस्मै शेषं दद्यादिति एतैरेव मन्त्रैः प्राश्नीयादित्यत्रापि निवेदितमेव प्राशनीयमिति प्रतीयते । तत्प्रतीतावपि न समाराधकस्य तत्प्राशनसिद्धिः, तस्मात्प्रतिग्रहीतुस्तदभिधानात् । यत्तु श्रीमति रामायणे लिङ्गदर्शनं तत्रापि शेषशब्दस्य निवेदितावशिष्टविषयत्वेऽपि न विरोधः । अतो नैतदपि निवेदितभोजनस्यैकान्तिकं लिङ्गम् । एवं च सतोष्टशिष्टभक्षणनयोऽप्यनुसृतो भवति । यत्तु * हृदि ध्यायन्हरिं तस्मै निवेद्यान्नं समाहित इत्यादि कर्मकाण्डवचनं, तदपि पूर्वमनिवेदितत्वस्य लिङ्गम् । अन्यथा निवेदितनिवेदनादिदोषप्रसक्तेः । वैश्वदेवप्राणाहुत्योश्च देवतान्तरनिवेदनरूपयोर्भगवन्निवेदितेनानुपपत्तेः । अन्यथाऽतिप्रसङ्गात् । न च द्रव्यान्तरेण [illegible]पत्तिः । भोक्तव्यत्वेनोपस्थितान्नविषयत्वात्तयोः । अतो भगवत्सर्वोत्तरत्वेऽपि तन्निवेदितनिर्माल्यादेरभोज्यो न शास्त्रीय इति ॥

तत्रोच्यते—यद्भगवन्निवेदितादेरभोक्तव्यत्वमुक्तं तत्सतां दूरपरिहरणीयैस्त्वादृशैरेवेति शास्त्राण्याचक्षते । तथा हि—**रहस्यान्नायब्राह्मणे**—*अथ यदि वक्ता तृतीयलक्षणो भवेदुदासीनश्च द्वितीयलक्षणस्स्यात्, उदासीन एव नियोज्यो भवति अस्मात्सर्वा हि वृत्तिर्निवर्तते तृतीयलक्षणात्तथा चतुर्थलक्षणादिति । निवेदितस्य च स्वाचार्यप्रभृतियोग्यतमेभ्यः प्रदेयत्वमुक्त्वा तदलाभे यथालाभं ज्ञातेभ्यो योग्येभ्यः प्रदेयत्वमभिधायानन्तरमुच्यते—*अथ यदि कश्चित्सुप्रक्षालित-पाणिपादोऽभिमुखो भवेत्, । न च ज्ञायेत, प्रष्टव्यो भवति किं भवान्प्राप्तेनान्नेन करिष्यतीति, स यदि ब्रूयाद्यो यथा-ज्ञानं भगवन्तं यक्ष्यामीति तस्मा अन्नं देयं भवति, अथ यदि ब्रूयात् भो न खल्वहं जानाम्येवं भगवन्तं यष्टुमिति किं तर्ह्ययमहोपायोऽन्नलाभायेत्यभिगतोऽस्मीति तदन्नं प्रतिष्ठाप्यान्तर्हित्वा वा इत्यादि । उक्तं च **पाद्मे चर्यापादे** द्वादशाध्याये—*शुनामिव पुरोडाशो न नीचेषु तदिष्यते इति । तथा **ईश्वरसंहितायाम्**—

*दुर्लभो भगवद्भक्तो लोकेऽस्मिन्पुरुषस्सुत । तत्रापि दुर्लभतरो भावो वै यस्य तत्त्वतः ॥
पादोदकं प्रति शुभः सिद्धान्ने च निवेदिते । स्रगादिके चोपभुक्ते द्युपभोगार्थमेव च ॥
अतश्च भावहीनानामभक्तानां च षण्मुख । निषिद्धं भगवन्मन्त्रदृक्पूतमखिलं च यत् ॥ इति ।

श्रीपौष्करे शयनाध्याये तादृशेभ्यः प्रदातुरपि पातित्यमुक्तम्—

*अपात्राणामभक्तानां नास्तिकानां दुरात्मनाम् । वर्जनीयं प्रयत्नेन स्वानुष्ठानपरेण तु ॥
स्त्रीशूद्राणां शिशूनां च भृतकानां विशेषतः । सकामो वाऽथ निष्कामो मन्त्रज्ञस्सद्व्रतस्थितः ॥
मन्त्रपूतं च नैवेद्यं निषिद्धानां ददाति यः । सिद्धोऽपि याति पातित्यमारुरुक्षुस्तु किं पुनः ॥ इति ।

ईश्वरसंहितायां प्रायश्चित्तित्वमप्युक्तम्—

*रक्षणीयमभक्तेभ्यस्तदन्नं विष्णुयाजकैः । प्रायश्चित्ती भवेद्दाता अपात्रे प्रतिपादनात् ॥ इति ।

तत्रैव— *प्राणवद्रक्षणीयं च मन्त्रपूतं महामुने । नैवेद्यं श्वसृगालेभ्यो मार्जारेभ्यो विशेषतः ॥
पक्षिभ्यो मर्कटेभ्यश्च मूषिकेभ्यस्सदैव हि ॥ इति च ।

नारदीये प्रायश्चित्तविशेषोऽप्युक्तः—

*ब्राह्मणैः क्षत्रियैर्वैश्यैर्वैष्णवैर्भक्तिसंयुतैः । भोज्यं निवेदितं यत्तदन्यैर्भुक्ते निवेदिते ॥
जपेदष्टोत्तरशतं मूलमन्त्रं समाहितः ॥ इति ।

किंच भवादृशेभ्यो दाने सत्यन्ननाश एव **रहस्याम्नाये** ब्रह्मचर्याश्रमप्रकरणे श्रुतः—*यद्येवमतिरिक्तं स्यादतिरिक्तमिति पुनः कस्य वार्ता ? इत्यादिना *तदतिरिक्तमित्यन्तेन अतिरिक्तं प्रतिपाद्य, *तदुपादानवते दद्यादित्यादिना रहस्याम्नाय-निष्ठेभ्यः, तदभावे त्रयीधर्मरूपभगवत्समाराधननिष्ठेभ्यः, तदभावेऽन्नस्यादनीयताप्रवृत्तिनिमित्तकान्नशब्दवाच्यत्वेन यस्मै-कस्मैचिदवश्यदेयत्वे भगवत्कर्मयोग्येभ्यो गवादिभ्यः, तदभावे तादृग्भ्यो हस्त्यादिभ्यः, तदभावे भगवद्यज्ञार्हौषधादि-स्थावरेभ्यश्च मूले दानमुक्त्वाऽनन्तरमुक्तम्—*न स्वेवान्नं नाश्यं भवति, कोऽन्ननाशः ? उज्झनं निखननमप्सु प्रक्षेपं काकेभ्यः श्वसूकरेभ्यो वा यत्किञ्चिन्न कर्मण्यं स्थावरजङ्गमं वा तत्र दानमित्येषोऽन्ननाशः इति । तदेतदखिलमनु-सन्दधानस्तत्तन्मागमप्रामाण्य—

* ये हि युष्मद्विधा मूर्खास्तेषामेव निषेधगीः । सेव्यमानं हि तत्सर्वं वैष्णवैरधिकारिभिः ॥
अघौघध्वंसनायालं सोमपानमिवाध्वरे । अन्येषां हि तदस्पृश्यं पुरोडाशः शुनामिव ॥ इति ।

यत्तु *विष्णुनाऽत्तमश्नन्तीत्यादौ वर्तमानापदेशरूपत्वाद्विधिपरत्वं न प्रतीयत इत्युक्तम्, तन्मीमांसागोष्ठीबहिष्ठितानां निष्ठ्यूतम् । अप्राप्तार्थत्वेनैव हि विधिव्यवस्थापनम्; अन्यथा तत्रतत्र यजतिजुहोत्यवहन्तिप्रोक्षतीत्यादिष्वपि वर्तमानापदेशरूपेषु विधिपरत्वपरित्यागप्रसङ्गात् । अत्र विधिरेव साक्षादनन्तरं प्रतीयते *तस्माद्विद्वांसो विष्णूपहृतं भक्षयेयुरिति । ननु यदि * विष्णुनाऽत्तमश्नन्तीत्यादौ विधिपरत्वस्वीकारः, तर्हि तत एव प्राप्तार्थत्वाद्भक्षयेयुरित्यस्य विधिपरत्वं न स्यादिति चेत्, कस्तर्ह्यस्यार्थः ? प्रागुक्तानुवादमात्ररूपमिति चेत्तथाऽपि तेनैवाश्नन्तीत्यादेर्विधित्वं दृढीकृतम् । न चासिद्धमनूद्यत इत्यत्रोपपत्तिं पश्यामः । न चानुवादो निष्प्रयोजनो भवितुमर्हति । न चैतदनुवादेनान्यद्विधेयं दृश्यते । अतः प्रयोजनालोचनायां प्रागुक्तविधित्वस्थिरीकरणमेव प्रयोजनमिति सिद्धम् । यद्वा—विधिप्रत्ययश्रवणादेष एव विध्युद्देशः, अश्नन्तीत्यादिकं त्वेतदभिप्रेतविशेष[ण]व्यञ्जन [रूपेणावयुत्तया] रूपत्वोक्त्याऽनुवादादेतस्यैवोपकारकमिति, तथाऽपि विधावेव पर्यवसानमिति सिद्धम् । एवं श्रुत्यैव स्मृत्यादीनामनुविधेयतया सिद्धस्यार्थस्य न स्मृत्या बाधशङ्कनीयः, अपि तु तद्विरुद्धाः स्मृत्यादय एव बाध्येरन्निति विरोधाधिकरणे स्थापितम् । एवं च सति, यद्यपि * निर्माल्यं च निवेद्यं चेत्यादिवचनमात्रकोटौ निविष्टं स्यात्; तथाऽपि सामान्यरूपत्वेन सावकाशत्वात् श्रुतिविहितविशेषव्यतिरिक्तविषयमिति उत्सर्गापवादन्यायतस्सिद्धम्, विशेषोपसंहारन्यायाच्च । तथा हि; रुद्रादिदेवतान्तरनिवेद्यादेरनुपभोग्यत्वं तत्तच्छास्त्रैरेव सिद्धमिति सर्वैरङ्गीकृतत्वान्न तत्र तावद्विवादः । अत एव हि रुद्रपरत्वप्रतिपादनाग्रहगृहीतैरपि तैस्तदुच्छिष्टपरित्यागेन तन्निकर्षमाशङ्क्य *त्वं ब्रह्मण इत्यादिना तदुच्छिष्टपरित्यागस्यान्यथासिद्धत्वेन अपकर्षलिङ्गत्वं निराकृतम् । एवं च सति सामान्यरूपनिर्माल्यनिवेद्यशब्दयोर्विशेषाकाङ्क्षायामाकाङ्क्षितविशेषसमर्पणक्षमनिषिध्यमानविशेषसमधिगमे तस्मिन्नेव पर्यवसानं नान्यत्रेति स्वीकार्यम् । यथा पशुशब्दस्य छागशब्दोक्तविशेषपर्यवसानं तथेहापीति न सङ्कटं किञ्चित् । अयमर्थो न्यायनिरपेक्षमेव वचनैः प्रतीयते । यथा ब्राह्मे पुराणे—

* विष्णोर्निवेदितं शुद्धं मुनिभिर्भोज्यमुच्यते । अन्य[वेद्यं तु]न्निवेद्यं निर्माल्यं भुक्त्वा चान्द्रायणं चरेत् ॥ इति ।

यत्तु पितृत्वादिविकल्पदूषणैर्वल्गितं, तत्तदा शोभेत यदि वयं तेषु हेतुत्वम[भि]नुसंदधीमहि; यदि चोच्छिष्टानुमतिवाक्यविषय[त्वेनोपक्षिपेम ।]त्वं नापेक्षेमहि । सिद्धे तु विशेषविधाने तत्प्ररोचनप्रवृत्तवचनोपस्थापितपरमार्थभूततत्तदाकारवर्णनं तु क्रियमाणं नोपालम्भपदम् । न चातिप्रसङ्गः, स्वयमसाधकत्वात् । साधकानुग्राहकं तु साधकसन्निधौ वर्तमानमपि हि न स्वयं कार्यं साधयेत्, अन्यथा सामग्रीमनपेक्ष्य हेतूनां सर्वेषां प्रत्येकं कार्यकरणप्रसङ्गे यस्य कस्यापि देशकालेश्वरादेः हेतोस्सर्वत्र सन्निहितत्वेन सर्वं कार्यं सर्वदा सं[प्रति]पद्येत । ततः प्रेक्षावतां तदर्थोद्योगभङ्गो विधिनिषेधादिवैयर्थ्यं च स्यात्, अयत्नत एव सर्वफलावाप्तेः, दुःखानां च दुष्परिहरत्वात् ।

यद्वा, * निर्माल्यं च निवेद्यं चेत्यस्यायमर्थः—निर्माल्यं—रुद्रादिनिवेदितम्; प्रसिद्ध्यादिवशात्तत्रावस्थितम् । भगवन्निवेदितं हि निर्माल्यशब्दप्रयोगोऽपि निषिध्यते, यथेश्वरसंहितायाम्—* निर्माल्यबुद्ध्या दैवीयमित्यादि । निवेद्यं—निवेदनयोग्यं, निवेदनार्थं परिकल्पितमित्यर्थः । निवेदनार्थं परिकल्पितस्य भोजनेऽपि दोषमाहुः । यथा श्रीपौष्करे विष्वक्सेनाध्याये—

* प्राक्साधितं च यागार्थं देवतानां प्रयत्नतः । तत्समर्पणपर्यन्तं याक्देवान्नमुच्यते ॥
अन्यथा भक्षणं तस्य यदि मोहात्कृतं द्विज । प्रायश्चित्तशतैश्चीर्णैश्शुचिर्भवति मानवः ॥
तत्र[मन्त्र]संतर्पणादन्ते याजिनां याजिनां वर । गर्ववुद्धिविमुक्तानां भक्षणं सर्वशुद्धिकृत् ॥
पावनं पुण्यदं शश्वद्भूरिभूत्यभिवृद्धिदम् । इति ।

एतेन, * वृथाकृसरसंयावपायसापूपमेव च । अनुपाकृतमांसं च देवान्नानि हवींषि च ॥
इति मनुवचनमपि निर्व्यूढम् । निवेदनार्थं परिकल्पिते देवान्नमिति संज्ञात्वेन प्रयोगात्तदैकार्थ्ये च संभवति तद्विरुद्धार्थकल्पनायोगात् । मन्वादिधर्मशास्त्रस्यापि चित्रशिखण्डिप्रणीतभगवच्छास्त्रमूलकत्वस्य **महाभारते** प्रतिपादितत्वेन मूलविरोधप्रसङ्गाच्च । तथा ह्युक्तमुपरिचराख्याने—

* तस्मात्प्रवक्ष्यते धर्मान्मनुस्स्वायंभुवः स्वयम् । उशना बृहस्पतिश्चैव यदोत्पन्नौ भविष्यतः ॥
प्रवक्ष्यतस्तदा शास्त्रं युष्मन्मतसमुद्धृतम् । इति ; * एतद्धि सर्वशास्त्राणां शास्त्रमुत्तमसंज्ञितम् । इति च ।
* मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते इति स्मृत्यन्तरवचनेनैव मानवस्मृत्यपेक्षया स्मृत्यन्तराणां दुर्बलत्वात् मानवस्मृत्युपजीव्यभगवच्छास्त्रविरोधे तेषां बाध्यत्वमेव ।

यद्वा, * निर्माल्यं च निवेद्यं चेत्युभयमपि रौद्रविषयमेव । तथा हि ; तैरेव षड्विधनिर्माल्यनिरूपणे—* निर्माल्यं च निवेद्यं चेत्यवान्तरविधाद्वयमुक्तम् । [तथा हि—]यथा तेषां सिद्धान्तसारपद्धतौ प्रायश्चित्ते—* निर्माल्यभक्षणे त्वकामाद्ब्रह्मपञ्चकं सार्धसहस्रमावर्तयेत् । कामतोऽनन्तयागे पादाध्वरदीक्षया शुध्यति । निर्माल्यभेदाः कथ्यन्ते—देवस्वं देवद्रव्यं नैवेद्यं निवेदितं चण्डद्रव्यं निर्माल्यं चेति । देवसंबन्धि ग्रामादि देवस्वम् । वस्त्राद्यलङ्कारादि देवद्रव्यम् । निवेदनार्थं परिकल्पितं नैवेद्यम् । तदेवोत्सृष्टं निवेदितम् । चण्डाय दत्तं चण्डद्रव्यम् । बहिर्निक्षिप्तं निर्माल्यम् । विसर्जितेऽपि देवे पिण्डिकास्थं यन्त्रिकाद्यन्निर्माल्यं[अन्न]भवति, षड्विधमपि निर्माल्यं न जिघ्रेन्न च लङ्घयेन्न दद्यान्न क्रीणीयाद्दत्त्वा क्रव्यादो भवति भुक्त्वा मातङ्गः लङ्घने सिद्धिहानिः आघ्राणे वृकः स्पर्शने स्त्रीत्वम् अथादाने चण्डालः विक्रये शबरः इति । उक्तं च भगवच्छास्त्रेऽपीश्वरसंहितायां समाराधनाध्याये—

* स्कन्दः— त्वया निषेध आख्यातो मन्त्रदत्तस्य वस्तुनः । सर्वत्र पत्रपुष्पान्नपूर्वस्य परमेश्वर ॥
तस्येदानीं प्रदानं तु प्राशनं च प्रशंससि । किमेतदत्र मे जातः संशयः परमेश्वर ॥
ईश्वरः— प्रदानं प्राशनं पुत्र उपभोग्यत्वमेव च । शैवपाशुपते दुष्टमचिरादेव पापकृत् ॥
तत्पुनर्वैष्णवे मार्गे वर्तते व्यत्ययेन तु । अनन्तफलदं दानात्प्राशनात्कोष्ठशुद्धिकृत् ॥
क्षयं नयति पापानि पुण्यवृद्धिं करोति च । दानैर्धर्मैः कृतैः पुण्यैस्तपोभिश्च न तत्फलम् ॥
यत्फलं भगवद्भुक्तिप्रदानप्रापणादनात् ॥ इति ।

तत्रैवाध्याये सोमपानादपि पावनतरत्वमस्य प्रपञ्चितम् । तथा हि—

* क्लेशेन महता चैव प्राप्तं पशुवधादिना । यज्ञान्ते सोमपानं तु संस्कृतं पशुकर्मणि ॥
तस्य तद्वैष्णवैस्सूक्तैर्जाता कर्मण्यता यथा । तथा पुनाति तत्पुत्र द्विजानां यज्ञयाजिनाम् ॥
किं पुनस्तत्प्रभावाद्वै दिव्यैर्मन्त्रैस्तु वाग्यतैः । संस्कृत्य साधितं यद्वै सर्वं संशोधितं पुनः ॥

मुद्रामन्त्रसमेतेन सध्यानेन षडानन । जगद्गुरौ मन्त्रमूर्तौ तन्मन्त्रेण निवेदितम् ॥
दत्तं मन्त्रवरेणैव मन्त्रज्ञस्य महात्मनः । अनादिभगवच्छास्त्रवचनैर्विहितक्रियम् ॥
प्रदानाद्वीक्षणात्तस्य चोत्तारयति तत्सुत । आदिसर्गपवित्रं तदमरैरभिवन्दितम् ॥
पूजितं सिद्धगन्धर्वैर्वन्दितं भगवन्मयैः । दत्तं ब्रह्ममयैर्नित्यमात्मज्ञैर्गृहितं पुनः ॥
रक्षितं कर्मनिष्ठैस्तु शंसितं यज्ञयाजकैः ॥ इति ।

तत्रैव दशमेऽध्याये समयोपदेशो महादेवेन भगवन्निवेदितस्य सर्वस्य प्रतिपत्तिं विना संभूतैस्साधारणैः केवलादिशब्दैरभिधाने निर्माल्यबुद्धया दूषणे च महादोष उपपादितः—

* उपभुक्तस्य सर्वस्य गन्धपुष्पादिकस्य च । स्नानादावुपयुक्तस्य दधिक्षीरादिकस्य च ॥
दूषणं न प्रयोक्तव्यं शब्दैरप्रतिपत्तिजैः । निर्माल्यबुद्धया दैवीयं पावनं दूषयन्ति ये ॥
ते यान्ति नरकं मूढास्तत्प्रभावापलापिनः । प्रत्यक्षेण प्रमाणेन लोकदृष्टेन हेतुना ॥
शिष्टैरनुष्ठिता चैव वैष्णवस्य पवित्रता । सिद्धा पादोदकान्तस्य महत्ता देवपूजिता ॥ इति ।

अत्र गन्धपुष्पादीत्यादिशब्देन तुलसीपत्रादिग्रहणम्; दधिक्षीरादीत्यादिशब्देन दिव्यचूर्णादिग्रहणम् । सर्वस्य गन्धपुष्पादिकस्य पादोदकान्तस्येति भगवदुपभुक्तस्य सर्वस्यापि संग्रहः प्रतीयते । यथा ईश्वरसंहितायामेव—

* कुङ्कुमं चन्दनं चैव कर्पूरं चानुलेपनम् । विष्णुदेहपरामृष्टं तद्धि पावनपावनम् ॥ इति ।

तथा पाद्मोद्भवे—* विष्णुदेहपरामृष्टं यश्चूर्णं शिरसा वहेत् । सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते ॥ इति ।

तथाऽन्यत्र— * विष्णुगात्रच्युतं चूर्णं ललाटे धारयेद्द्विजः । अपोह्य पातकान्याशु मोदते दिवि देववत् ॥ इति ।

एतेन भगवत्पादोदकदिव्यचूर्णमालादीनामपि न निर्माल्यशब्दाभिलप्यत्वमिति सिद्धम् । अन्यत्रापि तेषां विधिः प्रतीयते । यथा ब्राह्मे पुराणे—

* विष्णोर्नैवेद्यकं शुद्धं मुनिभिर्भोज्यमुच्यते । अन्यवेद्यं तु निर्माल्यं भुक्त्वा चान्द्रायणं चरेत् ॥
विष्णुदेहपरामृष्टं माल्यं पापहरं शुभम् । यो नरश्शिरसा धत्ते स याति परमां गतिम् ॥ इति ।

श्रीवैखानसेऽप्यत्रिसंहितायाम्—

* मन्त्रेण पादे यद्दत्तं माधवं पाद्यमुच्यते । तत्पाद्यतीर्थमादाय भक्त्या देवमनुस्मरन् ॥
आत्मानं प्रोक्षयेच्चैव सर्वपापैः प्रमुच्यते ॥ इति ।

ब्रह्माण्डे— * पृथिव्यां यानि तीर्थानि तेषु स्नानेन यत्फलम् । विष्णोः पादोदकं मूर्ध्ना धारयेत्सर्वमाप्नुयात् ॥
मानवो यस्तु गङ्गायां स्नानं पानं समाचरेत् । तस्य यादृग्भवेत्पुण्यं तादृक्पादाम्बुधारणात् ॥
त्रिषु लोकेषु यत्तीर्थं प्रयागं पुष्करादिकम् । तत्पादयुग्मे कृष्णस्य तत्र तिष्ठति नित्यशः ॥

श्रीभागवते—* पादोदकस्य माहात्म्यं जानात्येव हि शङ्करः । विष्णुपादोद्भवां गङ्गां शिरसाऽधारयद्धि सः ॥
प्रायश्चित्तमनुप्रासं कृच्छ्रं वाऽप्यघमर्षणम् । विष्णुपादोदकं पीत्वा शुद्धिमाप्नोति तत्क्षणात् ॥
हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः । पादोदकं च निर्माल्यं यस्य मूर्ध्नि स वैष्णवः ॥ इति ।

ईदृशेषु निर्माल्यशब्दो भुक्तोज्झितत्वमात्रविवक्षया, न तु निन्दाभिप्रायेण ।

श्रीनारसिंहे—*गङ्गाप्रयागगयनैमिशपुष्कराणि पुण्यानि यानि कुरुजाङ्गलयामुनानि ।
कालेन तीर्थसलिलानि पुनन्ति पापं पादोदकं भगवतस्तु पुनाति सद्यः ॥ इति ।

आह च भगवान् शौनकः—* नैवेद्यं स्वयमश्नीयादित्यादि । तथाऽन्यत्र—

* भक्तपादच्युतेनापि मत्स्नापितजलेन वा । नरः पापात्प्रमुच्येत स्नानपानादिकर्मभिः ॥

तथा— * विष्णोः पाद्यं समादाय तीर्थं भक्त्या च संस्मरन् । आत्मानं प्रोक्षयेद्यस्तु मालां वा मूर्ध्नि धारयेत् ॥
भक्तियुक्तस्य विप्रस्य महापातकनाशनम् । इति ।

तथा— *मालां यो धारयेन्नित्यं वैष्णवीं भक्तिमाश्रितः । सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ इति ।

श्रीभागवते—* त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तव मायां तरेमहि ॥ इति ।

तथाऽन्यत्र— * मुकुन्दाशनशेषं तु यो भुनक्ति दिनेदिने । सिक्थेसिक्थे महासेन चान्द्रायणशताधिकम् ॥ इति ।

पुराणादिषु श्रीसालग्रामादिप्रसङ्गे च—

* वैष्णवं तु रजोजुष्टं नैवेद्यस्य च भक्षणम् । निर्माल्यधारणं मूर्ध्नि महापातकनाशनम् ॥
स्नानपानोदकं देवि पिबन् शिरसि धारयेत् । पुण्यपापविनिर्मुक्तो वैष्णवीं सिद्धिमाप्नुयात् ॥
विष्णुगात्रेण संस्पृष्टं पत्रं वा पुष्पमेव वा । शिरसा धारयेद्यो वै स याति हरिमञ्जसा ॥
हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः । पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥
पादोदकं पिबेन्नित्यं चक्राङ्कितशिलाहरेः । प्रक्षालयति यत्तोयं ब्रह्महत्यादिपातकम् ॥
बहुचक्रसमायुक्तं द्वारकापुरवासिनम् । स्नापयित्वा तु तत्तोयं पिबन् ज्ञानमवाप्नुयात् ॥ इति ।
* भक्त्या भुञ्जंस्तु नैवेद्यं सालग्रामशिलार्पितम् । फलं यज्ञसहस्राणां पराकाणां शतं लभेत् ॥ इत्यादि ।
* अग्निष्टोमसहस्रस्य वाजपेयशतस्य च । यत्पुण्यं तल्लभेद्देवि विष्णोर्नैवेद्यभक्षणात् ॥
ब्रह्मचारिगृहस्थैश्च वनस्थैर्यतिभिस्सदा । विष्णोर्निवेद्यं भोक्तव्यं नात्र कार्या विचारणा ॥ इत्यादि च ।

एवमेतादृशवचनशतवशात् * निर्माल्यं च निवेद्यं चेत्यत्र निर्माल्यादिशब्दो रुद्रादिनिर्माल्यविषय इति सिद्धम् । सामान्यतो निषिद्धानामीदृशानां भागवते पुनर्निषेधो दोषाधिक्यादिविवक्षया ।

किंच भगवदनिवेदितमेव शास्त्रैर्निषिद्धम् । तथा हि **श्रीसात्त्वते** एकविंशतितमे परिच्छेदे—

* सुगन्धफलपुष्पाद्यमपूर्वमुचितं च यत् । अभोज्यं गुरुदेवादिनिवेदनविवर्जितम् ॥ इति ।

जयाख्यसंहितायां षोडशे पटले समयोपदेशे—* नानिवेद्य हरेः किंचिद्भोक्तव्यं वा गुरोस्तथेति । **भारद्वाजेऽष्टमेऽधिकारे**—* नानिवेद्य हरेः किंचित्समश्नीयाच्च पावनमिति । तत्रैव भोजनमध्ये दधिक्षीरोदकादेः पूर्वमनिवेदितस्य अकस्मात्समागतस्यापि मनसा निवेद्यैव भोक्तव्यत्वमुक्तम्—* तदकस्मात्प्रवृत्तं च भोजने मनसाऽपि चेति । अश्नीयादिति शेषः । **तथेश्वरसंहितायाम्**—

* भोजनाक्षरे प्राप्ते मध्ये प्रागवसानतः । यत्किंचिदुपभोगार्थमकस्मात्समुपागतम् ॥

तद्गुरौ भगवत्यादौ कल्पयित्वाऽऽहरेत्ततः । भक्तस्य समयज्ञस्य अन्यथा व्यत्ययो भवेत् ॥
तस्मान्निवेद्य वै पूर्वमपूर्वमुचितं च यत् । भक्त्या भगवतो विष्णोर्देशिकस्य महात्मनः ॥ इति ।

न चात्र गुरुसमभिव्याहारात् भगवत्यपि कल्पनं विज्ञापनमात्रमिति शङ्क्यम्; गुरुभुक्तस्य भोक्तुमशक्यत्वाद्धि तत्र तथा स्वीकारः । अत्र तु योग्यत्वात्कल्पनशब्दाभिहितं निवेदनं यजनमेव । एवं च सति प्रागुक्तश्रुत्यैकार्थ्यमपि सिद्धं भवति । अतो भगवदनिवेदितमेव निषिद्धमिति सिद्धं भवति ।

यत्पुनरधिकारिविशेषविषयं न सर्वैर्ग्राह्यमिति, तन्न; *न चैकं प्रति शिष्यत इति न्यायस्यात्रानपवादादन्येषामप्यधिकारिणां भगवत्समाराधनस्य भगवच्छास्त्रेषु प्रतिपादनात् । **महोपनिषदि** च सामान्यतः—*विष्णुनाऽत्तमश्नन्तीत्यादिविधानेन त्रयीधर्मनिष्ठैरपि तदनुवर्तनस्यापरिहार्यत्वात् । न च शाखाविशेषेऽनादरः, तत्प्रामाण्यस्य **महाभारते भगवच्छास्त्रे** च बहुषु प्रदेशेषु सिद्धस्य दुरपह्नवत्वात् । तदर्थविशेषाननुष्ठानस्य शाखाभेदप्रतिनियतधर्मान्तरवदेवोपपत्तेः । नच भगवत्समाराधनं तथा प्रतिनियतमिति वक्तुं शक्यम्; तत्साधारण्यस्योक्तत्वात् । यत्तु शेषशब्दो निवेदितावशिष्टविषय इति, तन्न; निवेदितेनैव संप्रदानानुयागादेरुपात्तसुव्यक्तवचनशतसिद्धत्वात्; निषेधस्य च परिहृतत्वात्; भगवता सूक्ष्मांशग्रहणस्य वक्ष्यमाणानेकवचनसिद्धत्वेन निवेदिते शेषशब्दस्याप्युपपत्तेः, तरुणीमुखगतताम्बूलदृष्टान्तवचनाच्च । तथा भगवन्निवेदितशेषभोजिनि विष्वक्सेने *यजेच्छेषाशनं देवम्, *शेषाशनाभिधानस्य गणेशस्यार्चनाय वै इत्यादिभिश्शेषाशनशब्दप्रयोगात् । उक्तं च **स्तोत्रेऽपि**—*त्वदीयभुक्तोज्झितशेषभोजिनेत्यादि । न चेष्टशिष्टभक्षणन्यायविरोधः; विधिबलेन यथाविधिशिष्टत्वस्वीकारात् । केरलादिदेशे भगवन्निवेदितपरित्यागस्तु सुदर्शनादिधारणाधिकारोक्तन्यायेन दूष्यः । एवं च भगवच्छास्त्रानुसारिणि महाभारतवचने प्रतीयमानं भगवद्भुक्तप्राशनमितीदमपि न बाधितं भवति । विष्वक्सेनसंविभागप्रकारैश्च शेषशब्दस्य निवेदितविषयत्वं सुव्यक्तम् । तथाहि **पारमेश्वरेऽपि**—

*अर्घ्यलेपनपुष्पैश्च धूपेनाभ्यर्च्य वै ततः । मुख्याधिकारिणो विप्रान्द्वादशाध्यात्मचिन्तकान् ॥
बलादिमन्त्रनिरतानष्टौ वा चतुरो द्विज । दीक्षितान्गुरुपूर्वांश्च ह्यनुकल्पाधिकारिणः ॥
बीजपिण्डपदाद्येषु मन्त्रेषु निरतान्सदा । त्रयीधर्मरतांश्चापि आमूलाद्भगवन्मयान् ॥
त्रय्यन्तज्ञानसंपन्नान्यथोक्ताचारनिष्ठितान् । समाहूयार्घ्यगन्धाद्यैस्समभ्यर्च्य यथाक्रमम् ॥
भगवच्छेषमादाय न्यस्तमाहृत्य मन्त्रतः । प्राङ्निवेदनकाले तु चतुर्धा संविभज्य तम् ॥
प्रापणं मधुपर्काद्यमन्यच्चाभ्यवहारिकम् । तेभ्यो दद्यादेकभागमर्घ्योदकपुरस्सरम् ॥
मात्रां चतुर्विधां चापि आचार्याय प्रदाय च । स्वप्राशनार्थमेकांशं स्थापयित्वा निरीक्षितम् ॥
शेषाशनाभिधानस्य गणेशस्यार्चनाय वै । भागमेकं तु संस्थाप्य भागेनान्येन तोषयेत् ॥
ब्राह्मणादीन्छुभाचारान्भक्तान्भागादिवासिनः । इति ।

श्रीपौष्करे विष्वक्सेनाध्याये—*विष्वक्सेनोऽथ यष्टव्यः इत्यनुवृत्तौ,

*नैवेद्यैर्मधुपर्कार्घैर्मुख्यमूर्तेर्निवेदितैः । द्विजप्राशनशिष्टैश्च स्वयं प्राशनवर्जितैः ॥ इति ।

तथा तत्रैव भगवानुवाच—

*कालत्रयामरास्या वा मूर्तिस्तस्यात्मनो विभोः । स एष द्विजदेवास्यो विष्वक्सेनः प्रकीर्तितः ॥

स्थित आहवनीयादिभेदेन मखयाजिनाम् । ऋक्पूतं हुतमादाय तर्पयत्यखिलं जगत् ॥
एवं मन्त्रमयाद्यागात्सात्त्विकाद्ब्रह्मभावितात् । संप्राप्यं गुरुमूर्तेर्वै प्राप्तं मन्त्रसत्कृतम् ॥
अनाहूतामराणां च सर्वलोकनिवासिनाम् । स्वयं तु संविभज्याथ तदनुग्रहकाम्यया ॥ इति ।

तथेश्वरसंहितायां समाराधनाध्याये—

* दत्तशिष्टमथादाय संविभज्य द्विधा च तत् । पूजितस्यार्घ्यपुष्पाद्यैर्विष्वक्सेनस्य वै विभोः ॥
प्रतिपाद्यामराणां च तृप्तये विघ्नशान्तये । द्वितीयमनुयागादौ प्राशनं बान्धवैस्सह ॥
तन्निश्शेषं च भोक्तव्यं हृन्मन्त्रं संस्मरन्हृदि । ज्वलत्पावकसङ्काशं ज्वालागणशतावृतम् ॥ इति ।

अनुयागादौ प्राशनमिति समन्त्रकाहुतिरुच्यते । हृन्मन्त्रं संस्मरन् हृदीति—हृन्मन्त्रं हृदयमन्त्रप्रतिपाद्यं, हृद्रूपेणावस्थितं भगवन्तं भोक्तृत्वेनानुसन्दधान इत्यर्थः । सङ्कर्षणादिव्यूह इव जपज्ञानाद्यैकैकगुणविशिष्टहृदादिरूपेण भगवान्स्वयमेवावस्थित इति * नेत्राख्यं भगवत्तत्त्वमित्यादिना श्रीपौष्करे स्पष्टम् । एवं संविभागप्रपञ्चनात् भगवन्निवेदितस्य कृत्स्नस्य विष्वक्सेनादिनिवेदनपरम्परया त्याग इति मन्दं वचः । भगवच्छास्त्रेषु निर्माल्यनिषेधपराणां वचसामागमप्रामाण्ये निर्वाहः कृतः । एवं हि तत्रोक्तम्—* यानि पुनर्दीक्षितमेवाधिकृत्य समयानुशासनसमये निर्माल्योपयोगनिषेधपराणि वचनानि तानि पार्षदेशोपयोगोत्तरकालाभिप्रायेण द्रष्टव्यानि ।

* यतो भगवदर्थेन त्यक्तं स्रक्चन्दनादिकम् । पश्चादभोग्यतां याति विष्वक्सेनपरिग्रहात् ॥
अत एव निवेद्यं तत्ततोऽर्वागेव सात्त्वतैः । सेव्यते तेन तत्तेषामुत्कर्षस्यैव कारणम् ॥ इति ।

विष्वक्सेननिवेदिते च विकल्पभेदास्तत्तत्संहितानुसारेण प्रयोगपद्धतिरत्नावल्यादिषु भोजराजादिभिः स्थापिता द्रष्टव्याः ।

एवं च प्रमाणशतनिर्धारितस्यार्थस्य विरुद्धं भगवन्निवेदितत्यजनं यत्केरलादिदेशेषु कैश्चिदनुष्ठीयते, तदहिच्छत्रब्राह्मणीसुरापानादिवदपन्यायमूलत्वादनादरणीयम् । न चार्यावर्तादिवासिन इव केरलादयोऽप्यनुविधेयाचाराः कचित्सिद्धाः । न च सर्वे प्रामाणिकमेव केरलादयोऽनुतिष्ठन्तो दृश्यन्ते, मातुलकन्यापरिणयनरजस्वलापरिणयनादेरद्याप्यविगानं कचित्कचिदनुष्ठीयमानत्वादिति ।

एवं बोधायनीये विष्णुकल्पे च शेषशब्दो रहस्याम्नायभगवच्छास्त्रमहाभारताद्यैकरस्यान्निवेदितविषय एव । यत्तु प्रतिग्रहीतुरेव तत्र तत्प्राशनं विहितमिति, तत्सत्यम्; तथाऽपि वैष्णवस्य भगवन्निवेदितप्रतिग्रहस्तत्प्राशनं तत्रापि भगवदसाधारणमन्त्रचतुष्टयेन च प्राशनं प्राप्तं प्रतीयमानमबाधितं धर्मपक्षे निक्षेपमर्हति; अन्यथा प्रागुक्तप्रबलशास्त्रान्तरविरोधाच्च । तदैकरस्यं चात्रापि पायसपाकवेदिगन्धोशीरमयवृत्तिस्थाननिवेदितान्नविनियोगप्रकारस्वाध्यायशब्दवाच्यद्वादशाक्षरजपादिलिङ्गैरावाहनोद्वासनादिहोमनमस्कारादिषु चातुरात्म्यसमाराधनप्रतीतेः तत्तन्मन्त्रगतानां शब्दानां चातुरात्म्यपरत्वस्य तत्तच्छास्त्रपर्यालोचनावसितत्वात्सिद्धम् । अतस्तदनुसारेण निवेदितभोजनमेव समन्त्रकमत्रापि प्रतीयत इति ।

श्रीमद्रामायणे च तैस्तैर्लिङ्गैरेव रहस्याम्नायभगवच्छास्त्रोक्तप्रक्रियाप्रत्यभिज्ञानात्, मूलापेक्षायाश्च स्मृतेस्संभवदधीयमानमूलपरित्यागेन मूलान्तरानुमानायोगात्, ब्राह्मणादीनां सर्वेषामपि भगवत्समाराधनस्य सात्वतविध्यास्थानपूर्वकत्वस्य * ब्राह्मणैः क्षत्रियैर्वैश्यैरित्यादिना महाभारते स्पष्टमुक्तत्वेन तदैकार्थ्यात्, उपरिचरादिभिश्चानुष्ठितत्वात्,

अत्र च *विधिवदित्यनेन मूलभूतविध्यन्तरस्मरणात्, इक्ष्वाकुप्रभृतीनां सर्वेषामपि पुष्करोक्तप्रकारेण भगवत्समाराधनस्य भगवच्छास्त्रप्रसिद्धत्वात्,

* ततश्चैतत्क्रमाल्लेभे देवस्सर्वेश्वरस्स्वयम् । रामो राजीवनयनो भ्रातृभेदैस्त्रिभिस्सह ॥

इत्यारभ्य, * सोऽप्येवमर्चयेदेवं पौष्करोक्तविधानतः इति रामाभिधानस्य भगवत एव स्वयं श्रीरङ्गविमाने पौष्करोक्तविधानेन भगवत्समाराधनस्य पारमेश्वरे स्वयंव्यक्तस्थाननिर्णयाध्याये प्रदर्शितत्वाच्च भगवच्छास्त्रोक्तप्रकारेणैवेदं समाराधनमिति अव[गते सति]गम्यते । एवं सति भोक्तव्यविषयः शेषशब्दोऽपि तच्छास्त्रप्रसिद्धनिवेदितविषय इति निश्चीयते । तथा चात्र—* अथातो भोगानुपार्ज्य सुस्नातस्सुप्रक्षालितपाणिपादः स्वाचान्तः इत्यारभ्य * अभिगमनेनाभिगच्छेद्भगवन्तम् इत्यानुपूर्वीकवचनेन—

* अन्तःकरणयागादि यावदात्मनिवेदनम् । तदाद्यमङ्गं यागस्य नाम्नाऽभिगमनं महत् ॥

इति जयाख्यसंहितावचनेन च प्राप्तमभिगमनाख्यमाद्यमङ्गं * नारायणमुपागमदित्यनेन सूचितम् । हविषः पात्रं शिरसा विधिवत्प्रतिगृह्येत्यनेनान्नयज्ञाख्यं प्रधानमङ्गं सूचितम् । हविषश्शिरसा ग्रहणं निवेदनार्थमेव, * ततोऽन्नमभ्युद्यम्योत्तानतलाभ्यां पाणिभ्यामवनतमुखमनभ्युच्छ्वसन्प्रापणेन संविभागेन चार्चयेद्भगवन्तम् इत्यानुपूर्वीवचनात्, * द्विधा निवेदनं तेषां शिरसाऽवनतेन यदित्यादिपौष्करादिवचनात्,

* प्रयतस्तु शुचिर्मूर्ध्ना सर्वमेव निवेदयेत् । तन्मनास्सुमना भूत्वा त्वराक्रोधविवर्जितः ॥

इति श्रीविष्णुस्मृतेश्च । एतेन हविश्शब्देन होतव्याज्यपरिग्रह इति अत्र कुदृष्टिदृष्टं निरस्तम् । होम्यस्याज्यस्य शिरसा ग्रहणास्यसंस्काराश्रवणादन्नस्य तच्छ्रवणाच्च । * जुहाव ज्वलितेऽनले इति च होमाख्यमङ्गं सूचितम् । अत्र काष्ठादिषु

* प्राक्कुङ्कुमादिना लिप्तां काष्ठसंज्ञां तु होमयेत् । स्रग्धूपमधुपर्कं च बीजान्याज्यं यथाक्रमम् ॥

इति श्रीसात्त्वतवचनादिसिद्धासु सप्तसु समित्सु सतीष्वपि केवलस्याज्यस्योपादानं तत्प्राधान्यादिभिः; संस्कृताज्यस्य विप्रुड्भिस्संस्पृशेदिन्धनादिकम् । निश्शेषदोषशान्त्यर्थम् इति हि तत्रोच्यते । पूर्णाहुतौ चाज्यमेव विनियुज्यते । यथा श्रीपौष्करे शयनाध्याये—* दद्यात्पूर्णाहुतिं ततः इत्यारभ्य * स्रुवमभ्यर्च्य पुष्पाद्यैराज्यपूर्णं स्रुवं ततः इत्यादि । तत्रैव कुण्डलक्षणाध्याये—* आचतुस्सप्तनिष्ठेनेत्यारभ्य * भिन्नमन्त्रगणं सर्वमाज्यदोहैर्मुदं नयेदित्यन्तम् । पारमेश्वरे चितरसमिदभावे घृतेनैव तत्पूर्तिः कीर्तिता—* काष्ठादीनामभावे तत्सर्वमाज्येन होमयेदित्यादिभिः । यजुषि च भगवद्देवताकत्वेनाज्यस्यायातयामत्वमाम्नातम्—* ब्रह्मवादिनो वदन्ति कस्मात्सत्याद्यातयामान्यन्यानि हवींष्ययातयाममाज्यमिति प्राजापत्यमिति ब्रूयादयातयामा हि देवानां प्रजापतिः इति । अत्र प्रजापतिर्भगवानेव; तस्यैव नित्ययुक्तत्वेनायातयामत्वात् । प्रजापतिशब्दश्च भगवत्येव बहुषु प्रदेशेषु श्रूयते * तेन प्रजापतिरश्राम्यत् इत्युपक्रम्य * स वराहो रूपं कृत्वा इति वचनात्; * श्यामा एकरूपा भवन्ति । एवमिव हि प्रजापतिस्समृद्ध्या इत्यत्र प्राजापत्यानां पशूनां श्यामत्वार्थं प्रजापतेरपि श्यामत्वप्रतिपादनात् । * आश्रावयेत्यादिना चोक्तस्य सप्तदशस्य प्रजापतेर्विष्णुत्वं महाभारते प्रोक्तम्—

* चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदतु ॥ इति ।

* प्रजापतेस्सभां वेश्म प्रपद्ये इति मुक्तप्राप्यदेशवर्तित्वादिभिः * आज्यस्य दैवतं विष्णुः इति नारदीयादिवचनैश्चाज्यदेवताभूतः प्रजापतिर्भगवानेव । तदेवमाज्यप्राधान्यादिभिराज्योपादानं समिदन्तरोपलक्षणार्थम् । अन्यत्र * गृहीते

दैवतायेति महादेवः प्रतीयते । मैवम् । समस्तस्यैव तथा रूढत्वात् । व्यस्तस्य नामधेयतयाऽहिर्बुध्न्यविश्वेदेवादिवत्संज्ञायामलुक्त्वेन वा प्रसिद्ध्यभावात् । तदभावेऽपि तत्प्रत्यभिज्ञया तत्प्रतीतिर्जायत इति चेन्न ; व्यस्तत्वेनैव संज्ञात्वे अप्राकृतनिरुपाधिकमहत्त्वदेवतात्वयोः * वेदाहमेतं पुरुषं महान्तम्, * तेजः परस्यां देवतायामित्यादिप्रतिपन्नपरमात्मपरमपुरुषविषयत्वौचित्यादेवात्र रूढ्यास्पदमहादेवप्रत्यभिज्ञाप्रतिरोधात् । * नारायणमुपागमत्, * ध्यायन्नारायणं देवम्, * श्रीमत्यायतने विष्णोः इत्यादिपूर्वापरविरोधाच्च । बोधायनीयादिषु महादेवशब्दस्य व्यस्तोऽपि रुद्रे प्रयोगस्संप्रतिपन्नो दृश्यत इति चेत्सत्यम्, प्रकरणादिवशात्तु तथा तत्र निर्णयः, अत्र तद्विपरीतमेव । किं च * महते दैवतायेति दैवतशब्दोऽत्र प्रयुज्यते न तु देवशब्दः । न हि महादैवतमिति रुद्रस्य नाम, अपि तु महादेव इति । अतोऽत्र भगवच्छास्त्रादिप्रसिद्धमग्निमध्यगतस्य भगवतस्समाराधनमेवोच्यते ; * ज्वलितेऽनले इति अग्नेरासनवदाधारत्वप्रतीतेः । अग्निमध्ये चासनकल्पनापूर्वकं भगवत्समाराधनं बहुसंहितासिद्धम् । यथा **जयाख्यसंहितायाम्**—* वह्निं तु व्योमवद्ध्यात्वा तन्मध्ये पूजयेत्प्रभुमिति । **ईश्वरसंहितायाम्** * अथ ज्वालाजटाधारी वह्नौ वै कुण्डमध्यतः इत्यारभ्य * ततोऽवतार्य तन्मध्ये हृदयात्परमेश्वरमिति । **भारद्वाजीये**—

* एवं संस्कारसंशुद्धं कृत्वा प्राग्जातवेदसम् । तन्मध्ये स्वेच्छया कार्या प्रागुक्तासनकल्पना ॥

तत्रावतार्य हृदयात् इत्यादि ।

अतोऽत्र * शेषं च हविषस्तस्येत्यनुयाग उच्यते । अत्र चशब्दात्पाकपात्रावशिष्टहुताज्यशेषचरुशेषाणां समुच्चयः प्रमाणानुरोधेन प्राह्यः । अत्राभिषेकार्थाधिवासभूतव्रतसमाराधनत्वादप्ययमेवार्थो युक्तः । उक्तं हि **श्रीसात्त्वते**—

* दत्तशिष्टमतृप्तं च दैवीयान्नेन भावितम् । हविश्शेषेण संयुक्तं व्रतिनां भोजनं हितम् ॥ इति ।

श्रीपौष्करेऽपि—* अप्वात्मतत्त्वं विज्ञेयं विहितं तस्य सर्वदा । आत्मनैवात्मसिद्ध्यर्थं यागमन्नेन तेन च ॥

सह यज्ञावशिष्टेन हुतशेषेण वै सह ॥ इति ।

नन्वन्तरात्मनिवेदनमन्तरा न भोक्तव्यम् । तत्र बहिर्वृत्त्यादिवृत्तिस्थानावस्थितस्य भगवतो निवेदितमन्तरात्मतया हृदयावस्थितस्य तस्यैव निवेदनीयं चेन्निवेदितनिवेदनाख्यो दोषस्स्यात् । एकस्मिन्समाराधने निवेदितानां सर्वेषामपि भोगानामविशेषेण समाराधनान्तरेऽपि निवेदनप्रसङ्गः । यदपि **श्रीसात्त्वते** चतुर्दशे परिच्छेदे पवित्रमधिकृत्योक्तम्—

* अपरेऽहनि सन्न्यासमाचरेद्विधिपूर्वकम् । अपनीय च माल्यादीन्प्रदद्याद्वै दिने दिने ॥

नो यान्ति म्लानतां यावच्चतुर्थेऽहनि वा त्यजेत् । विशेषपूर्वयागं तु कारिभ्योऽवसरे स्वके ॥ इति ।

तेनापि हि पवित्रारोपणनिवेदितानां पवित्राख्यभूषणानामेव पुनर्निवेदनमुक्तम् । तच्च नियतावधिकम् ; न पुनस्सर्वविषयम् ; समाराधनानुवृत्तं च । **श्रीपौष्करे च** स्थिराणामेव समाराधनान्तरे अनुवृत्तिरस्थिराणां तु परित्याग एवेति स्पष्टमुक्तम् । तथा हि श्राद्धाध्याये तिलदर्भोदकादीनां द्रव्याणां प्रतिकर्मणि—

* जायते उपविष्टानामुपशान्तिश्च तैजसी । अत एवोपयुक्तानां भोगानां कमलोद्भव ॥

विरुद्धस्संग्रहो भूयस्त्वन्यस्मिन् हि क्रियान्तरे । गौणी व्यक्तिर्यतस्तेषामामूलाच्चिदधिष्ठिता ॥

वर्तते परमाश्रित्य तत्कर्तुः फलसिद्धये । चित्सामान्यविनिर्मुक्ता ह्ययोग्यास्ते शरीरवत् ॥

मन्त्राणां स्थायिनो भोगा यान्ति वै योग्यतां पुनः । कदाचिन्मन्त्रसामर्थ्याज्ज्ञानभावनयाऽब्जज ॥ इति ।

तस्मादस्थिराणां प्रापणमधुपर्कादीनां हृदयावस्थितस्य पुनर्निवेदनमयुक्तमिति ; नैवम् ; स्वपने निवेदितानामेषामक्षकोदकादीनां जलमयादीनां सर्वेषां भोगानामेकदेशैरेकपात्रस्थैः [संवन्द]स्ववदनाख्यभोगनिवेदनस्योक्तत्वात् । तथा हि ईश्वरसंहितायां सप्तमे पटले—

विभोः [संवन्दने प्राप्ते]स्वचन्दनघटास्ततस्तैःस्वापयेत्प्रभुम् । निरन्तरैस्सावशेषैस्समुत्तीर्याथ पश्चिमम् ॥
क्रमशो दत्तशेषेण सर्वकुम्भस्थितेन च । इत्यादि ।

यदि पुनरस्थिरस्यापि विधिबलात्क्वचिदभ्युपगमस्तदन्यत्रापि तुल्यम् । अस्ति च विधिः ; यथा रहस्याम्नाये कर्मावर्तप्रकरणे ओदनपचने—* शुच्यन्नं श्रपयित्वा वेद्यां भगवते नयति वेद्यां भगवन्तमिष्ट्वा तत्कारिभ्यः प्रयच्छति कारिणः प्राप्तेनान्नेन वेद्यां भगवन्तमिष्ट्वा तद्धात्र उपनयन्ति उपनीतेन धाता स्वयं च कुरुते शिष्टेन च भृत्यान्यान्बिभर्ति किं हि भो भवान्धाता भृत्यवान्भवति तत्के न्वस्य भृत्याः समूहकर्मकालव्यक्तिशब्दस्पर्शरूपरसगन्धाः इति । अत्र धातृशब्दोऽन्तरात्मतयाऽवस्थितभगवत्परः । तथा तत्र चतुःश्लोकप्रकरणे श्रूयते—* अयमिहाध्यक्षो भगवान्धाता हृदये सत्यसन्धस्स एवास्य संविदं ददाति यदा कालं मन्यते तस्य हि विज्ञानद्वयमैन्द्रियिकं स्वाभाविकमस्य तद्यदि तदानीमितरत्परतस्तद्भवत्यक्षतः अयमेतावदस्यान्तरात्मा सर्वतः प्रकाशते इति । अध्यक्षत्वं च तत्राध्यात्मप्रकरणे विशदीकृतम्—

* पुरमेकादशद्वारमजस्यावक्रचेतिषः । अत्रस्थः प्रेक्ष्यतेऽध्यक्षः सर्वमत्र कृताकृतम् ॥ इति ।

उपनयन्ति—निवेदयेयुरित्यर्थः । कुरुते—अशनं कुरुत इत्यर्थः । उक्तं च श्रीसात्त्वते समाराधनपरिच्छेदे—

* पश्चाच्छरीरयात्रार्थमभ्यर्थ्य परमेश्वरम् । लब्धानुज्ञस्तथा कुर्यादात्मयागं यथाविधि ॥
भोज्यं नैवेद्यपूर्वं तु सर्वमादाय पात्रगम् । विनिवेद्य च देवाय पवित्रीकृत्य चाम्भसा ॥
सत्यरूपस्य लक्ष्म्याश्चाप्यन्नदोषक्षयङ्करी ॥ इत्यादि ।

अत्रायोग्यजननिरीक्षितत्वयातयामत्वादिदोषसंभावनया तन्निवृत्त्यर्थं पवित्रीकरणोक्तिः ; भगवन्निवेदितभोजनस्य हिततमत्वेन तत्रैव प्रतिपादितत्वात्, अन्यथाऽनुयागस्य द्रव्यान्तरेण विधानप्रसङ्गाच्च, * प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात् । किंच—

* कपित्थस्य फलं चैव यथा कुञ्जरभक्षितम् । तस्य सारं च गृह्णीयात्तथा हविरसं प्रभुः ॥

इत्यादिभिर्निवेदनदशायां तस्य सूक्ष्मांशं गृहीत्वा गुर्वादिमुखेन तस्यैव प्रत्यक्षयोग्यं स्थूलांशमपि भगवानेव गृह्णातीति प्रतीयते । तथा हि श्रीपौष्करे भोगनिर्णयाध्याये प्रापणनिवेदनप्रकारमुक्त्वा—

* यस्मात्प्रागात्मसात्कुर्याद्भोगशक्तिमनश्वरीम् । व्यक्तां गुर्वादिवक्त्रैस्तु भुनक्ति तदनन्तरम् ॥
भोगत्वमुपचारस्य भोजनाद्धितं ततः । इति ।

भुञ्जानादिति पाठे घञन्तत्वादयमेवार्थः । अत्रायमाशयः—भुज्यते इति भोग इति घञन्तव्युत्पत्त्या हि भोगशब्दोऽत्र प्रसिद्धः, न केवलं रूढः । रहस्याम्नाये च भगवद्भागत एव भोगो भवतीत्याम्नायते । * तत्राष्टाष्टकसंख्यैस्तु क्रमशो नरनाथवदित्यादिषु बहुषु प्रदेशेषु राजवद्भगवत्सम्बन्धोपचारग्रहणमुच्यते । तथा—* या परा प्रकृतिर्मान्त्री, इत्युपक्रम्य—

* देहस्थमात्मतत्त्वं तु भोगं विषयवं यथा । भुनक्ति तद्वदादत्ते पूर्णब्रह्मगतः प्रभुः ॥

इति चोच्यते । तच्चौपचारिकसांस्पर्शिकभोगेषु संभवति; आभ्यवहारिकेषु तु प्रत्यक्षविरुद्धमिति शङ्कापाकरणाय सूक्ष्म-स्थूलांशविभागेन क्रमशस्तद्भोगान्न प्रत्यक्षविरोधः, स्थूलग्रहणपर्यन्तश्च भगवतो भोगस्वीकार इति तेनैव समाराधनपरि-पूर्तिरप्युच्यत इति । किं च तत्र शयनाध्याये निवेदितान्नेन सह पाकपात्रावशिष्टेन साम्बुफलादिना यो यागः क्रियते सोऽनुयागः । अ[णु]नुभूतजीवात्मसिद्ध्यर्थत्वाच्चायम[णु]नुयाग इत्यपि ग्राह्यः । तस्मिंश्च यागे हार्दानलशरीरको भगवानेव भोक्ता तच्छक्त्यनुग्रहाच्चायमणुभूतोऽहंस्वभावः पुमान् भोगापवर्गरूपपुरुषार्थप्राप्त्यनुरूपपुंस्त्ववान्भवतीति स्पष्टमुच्यते—

* अण्वात्मतत्त्वं विज्ञेयं विहितं तस्य सर्वदा । आत्मनैवात्मसिद्ध्यर्थं यागमन्नेन तेन च ॥
सह यज्ञावशिष्टेन साम्बुना च फलादिना । अनुयागं च तं विद्धि आत्मनाऽऽत्मनि यत्कृतम् ॥
कुर्वन्ति भोजनात्पूर्वं प्रत्यहं प्राशनं तु ये । तच्छक्तिग्रहणाग्राणैः प्रयोजनवशात्तु वा ॥
भाव[श]भक्तिसमायुक्तास्सन्मार्गस्था दृढव्रताः । अप्रयत्नेन ते यान्ति देहान्ते पदमच्युतम् ॥ इत्यादि ।

तथा— * हार्दानलात्मना भुङ्क्ते ह्यध्यक्षः परमेश्वरः । तच्छक्त्यनुगृहीतत्वात्सोऽहंप्रकृतिकः पुमान् ॥ इति ।

तथा **नारदीयसंग्रहे**—

* तच्च कारिमुखो भुङ्क्ते भगवान्भक्तवत्सलः । यथा चाग्निमुखा देवास्तथा कारिमुखो हरिः ॥ इति ।

ननु वैश्वदेवावशिष्टमेव भोक्तव्यम्, तच्च देवतान्तरविषयम्; ततः कथं भगवन्निवेदितेन देवतान्तरयजनम्, तथा सत्यतिप्रसङ्गात् । यद्यपि श्रुतिस्मृतीतिहासादिशतैस्तेषां भगवत्पुत्रत्वदासत्वभृत्यत्वशिष्यत्वोपासकत्वप्रभृतिप्रतिपादना-तैस्तद्भुक्तोज्झितं प्राशनीयम्; तथाऽपि नास्माभिस्तन्निवेदितं तेभ्यो देयम् । न हि लोके पुत्रशिष्यादीन्भोजयन्तः पित्रा-चार्यादीन्भोजयित्वा तदुच्छिष्टेन भोजयन्ति । अतो भगवन्निवेदितस्य वैश्वदेवविनियोगायोगेन तदवशिष्टत्वासंभवान्न भोक्तव्यत्वमिति । मैवम्; भगवन्निवेदितेनैव देवतान्तरयागस्य तत्तृप्तेश्च विहितत्वात् । तथा हि **पाद्मे** चर्यापादे द्वादशाध्याये—

* विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम् । पितृभ्यश्चापि तद्देयं तच्चानन्त्याय कल्पते ॥ इति ।

पारमेश्वरे समाराधनाध्याये—

* ये यजन्ति पितॄन्देवान्गुरूनपि तथैव च । स्थापितस्यानुयागार्थं प्रापणांशः पुरा तु यः ॥
तस्मात्किंचित्समादाय संविभागं समाचरेत् । पितॄणां चैव बन्धूनामाश्रितानां तथैव च ॥
संविभागावशिष्टेन स्वानुयागं समाचरेत् । यद्वा स्थाल्यवशिष्टात्तु किंचिदादाय पात्रगम् ॥
प्राग्वन्निवेद्य देवाय तेन पित्र्यं समाचरेत् । ये वश्वदेवनिरता विप्राद्या वैष्णवास्तु ते ॥
यल्लब्धं भगवद्भुक्तं तस्मादादाय चांशकम् । तेन कृत्वा वैश्वदेवमवशिष्टांशकेन तु ॥
कुर्यात्प्राणादियात्रां तु विधानेन द्विजोत्तम ॥ इति ।

श्रीसात्वते समाराधनपरिच्छेदे—* संविभागः पितॄणां च यथाकार्यस्तथोच्यते । इत्यारभ्य,

* क्रमेण भाग्नयेत्तत्र पितॄनथ पितामहान् । तृप्तये ह्यथ सर्वेषां देवाय विनिवेद्य च ॥
प्रोक्षितान्यन्नपात्राणि चत्वारि कवलानि च । [तथात्वेसंवि]तन्मध्ये तु निधायाथ संपूज्यार्घ्यादिना ततः ॥

इत्यादि । **ईश्वरसंहितायाम्**—

* आस्तां सु संस्कृतं तावदन्नं सुव्यञ्जनान्वितम् । प्रदाने भगवन्मन्त्रपूतान्यारण्यकानि च ॥

शाकमूलफलादीनि यथाकालोद्भवानि च । कर्मण्यानि विचित्राणि स्वल्पानि सुबहूनि वा ॥
विभोर्निवेद्य दत्तानि यान्ति तान्यमृतात्मताम् । पितॄणां पितृलोकेषु देवानां सदनेष्वपि ॥ इति ।

तथा **महाभारते** ज्ञानकाण्डे तृतीयाध्याये—* राजोपरिचरो नामेति प्रक्रम्य,

* सात्त्वतं विधिमास्थाय नारायणमुखोद्भवम् । पूजयमास देवेशं तच्छेषेण पितामहान् ॥
पितॄनृषींश्च विप्रांश्च संविभज्याश्रितांस्ततः ॥ इति ।

अत्रापि शेषशब्दः प्रापणविषयः ; * सात्त्वतं विधिमास्थायेत्युपक्रमात्,

* पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः । प्रापणं भगवद्भुक्तं भुञ्जते चाग्र्यभोजनम् ॥

इत्युपसंहाराच्च । पञ्चरात्रतन्मूलवेदयोश्शेषशब्दो निवेदितविषयतया प्रसिद्ध इति ह्यन्यत्र स्थापितम् । किंच,

* यश्श्राद्धकाले हरिभुक्तशेषं ददाति भक्त्या पितृदेवतानाम् । तेनैव पिण्डं च तिलैर्विमिश्रमाकल्पकोटीः पितरस्सुतृप्ताः ॥

इत्यादीनि वचनानि तत्र तत्र द्रष्टव्यानि । अतो निवेदितेनैव वैश्वदेवकरणसंभवात् वैश्वदेवदेवतानामपि भगवन्निवेदितस्य भोज्यत्वमनपोदितमिति ।

एतेन प्राणाहुतिकरणमपि भगवन्निवेदितेनैव कार्यमिति सिद्धम् ; अनिवेदितभक्षणनिषेधाच्च । उक्तं च **जयाख्य-संहितायाम्**—* प्राणाग्निहवनं नाम्ना त्वनुयागं तदष्टममिति । अनुयागस्य प्राणाग्निहवनत्वोक्तेस्तस्य च निवेदितैकसाध्यत्वाच्च । नच वाच्यं तत्र प्राणाहुतेः प्रसङ्गाभावात्संज्ञामात्रमिदमिति ; पूर्वमेव बहुविधवैष्णवलक्षणे—

* नानात्वेनात्मसिद्ध्यर्थं विश्वात्मानं यजन्ति ये । मोक्षार्थमपि विप्रेन्द्र स्मृतास्तेऽञ्जलिकारिणः ॥

इति इन्द्रादिदेवतान्तरशरीरकपरमात्मयाजिनामपि वैष्णवत्वेन कथनात्तेषामपि प्रतिष्ठादिषु विनियोगस्य पूर्वमुक्तत्वात्तेषां च प्राणाहुतिमत्त्वात्तान्सर्वानधिकृत्य भगवत्समाराधनाष्टमाङ्गप्रकारचिन्तने प्राणाहुतेरपि प्रसङ्गोऽस्त्येव । एवं **श्रीपौष्करे** शयनाध्याये—* प्राणयात्रां ततः कुर्यान्नैवेद्यप्राशनादिकमिति । आदिशब्देनाबादिसंग्रहः । * अनुयागं ततः कुर्यादित्येव यथागमप्रसिद्धि निर्देष्टव्यत्वे प्राणयात्राशब्देनाभिधानं प्राणाद्याहुतिरूपेण प्राप्तायाः प्राणयात्राया अपि तदन्तरात्मभगवदाहुतिरूपेणानुयागत्वख्यापनार्थम् । तथा **पारमेश्वरेऽनुयागविधौ**—* ततस्तु शेषमादायेत्युपक्रम्य,

* त्रयीधर्मेण संयुक्ता आमूलाद्भगवन्मयाः । येन येन तु मन्त्रेण बहिराराधनक्रमे ॥
वेद्यादिस्थस्य देवस्य प्रापणं विनिवेदितम् । तेन तेन तु मन्त्रेण जुहुयुर्वक्त्रकुण्डके ॥
चतुः पञ्च त्रिधा वाऽपि प्राणपूर्वैर्द्विजोत्तम । केवला भक्तिपूतास्तु त्रयीधर्मरता द्विजाः ॥
प्राणापानादिभिर्मन्त्रैर्जुहुयुः पञ्चधा क्रमात् । हृदयस्थाय देवाय विष्णवे सर्वजिष्णवे ॥
एवं तु भगवद्भुक्तप्राशनं कुर्वते तु ये । तेषां पुण्यफलावाप्तिं कश्शक्नोत्यभिवर्णितुम् ॥ इति ।

येषां तु भगवदसाधारणमन्त्रेण वक्त्रकुण्डे विहितो होमः, न तेषु वैदिकमर्यादाविरोधश्शङ्कनीयः ; कल्पसूत्रप्रतिनियतधर्मान्तरवत्तदुपपत्तेः । उक्तं च भगवता **बोधायनेन** * तस्मै शेषं दद्यादेतैरेव मन्त्रैः प्राश्नीयादिति भगवदसाधारणमन्त्रैरेव प्राशनं वैष्णवस्य । यथा च **वैष्णव्यां स्मृतौ** वैश्वदेवप्रकरणे—* वासुदेवाय सङ्कर्षणाय प्रद्युम्नायानिरुद्धाय पुरुषाय सत्यायाच्युताय वासुदेवायेति भगवदसाधारणमन्त्रविधिस्तद्वदत्रापि । तादृशधर्माणां शाखाविशेषमूलत्वं च भगवच्छास्त्रेषु बहुषु प्रदेशेषु श्रुतम् ; अतो न कश्चिद्विरोधः । तथाऽप्यन्तरेण प्राणाग्निहोत्रं कृत्वा निवेदित-

भोजनेऽपि न विरोधः ; भोजनान्तरं वा नैवेद्याय प्रयुज्यतामिति चेन्नैवम्, न तावत्तथा विधिर्दृश्यते, न च तत्कल्पकं किञ्चित्, निवेदितनिवेदनाद्यनुपपत्तेर्वचनबलेनैव निरस्तत्वात् । प्राणाहुतेश्च भोक्तव्यतया रागतः प्राप्तान्नमेवोपजीव्यमित्यतोऽपि ना[न्तर]न्नविभागः । भोजनान्तरं तु * नान्तरा भोजनं कुर्यादिति निषेधान्न कल्पयितुं युक्तम् । किंच महाभारते—* हृदि ध्यायन्हरिमित्यादिना निवेदितेनैव प्राणाहुतिकरणं स्फुटमुक्तम् । यथा च हृदयावस्थितभगवद्भोक्तृत्वानुसन्धानेन निवेदितस्यैव भोजनमपि समाराधनम्, तद्वद्बहिर्निवेदितेन प्राणादिशरीरकपरमात्मभोक्तृत्वानुसन्धानेन प्राणाहुतिरपि भगवत्समाराधनमेव ; * आमनन्ति चैनमस्मिन्निति शारीरकसूत्रे त्रैलोक्यशरीरकस्य वैश्वानराभिधानस्य परमात्मन एव प्राणाहुत्याधारत्वाय उपासकशरीरेऽप्यनुसन्धानं निर्णीतमिति न सङ्कटं किञ्चिदिति । एवं चोद्यपूर्वकमुक्तमागमप्रामाण्ये—

* ननु प्राणाग्निहोत्रस्य निवेद्यं साधनं कथम् । निरिष्टकं न शिष्टानामिष्टं होमादिसाधनम् ॥
न च द्रव्यान्तराक्षेपो होमायेत्यवकल्पते । रागतः प्राप्तमेवान्नं यतस्तेनोपजीव्यते ॥
नापि भुक्त्यन्तराक्षेपो नैवेद्यायोपपद्यते । सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् ॥
नान्तरा भोजनं कुर्यादिति तत्प्रतिषेधनात् । नैष दोषो यतः प्राणप्रभृतिर्देवतागणः ॥
गुणभूतः श्रुतो विष्णोर्विष्णुपारिषदेशवत् ।

यथैव हि भगवन्निवेदितमपि पुष्पौदनादि विष्वक्सेनाय दीयमानं नानौचित्यमावहति ।

यथा वा होतुरुच्छिष्ट एव सोमरसोऽध्वरे । अध्वर्यादेर्विशुद्ध्यै स्यादेवमत्र भविष्यति ॥

अपि च— भोज्याभोज्यव्यवस्थायाः शास्त्रमेव निबन्धनम् । तच्चेद्भोज्यमिदं ब्रूते किं वयं विदधीमहि ॥
यथाऽनुष्ठानतन्त्रत्वं नित्यकाम्याग्निहोत्रयोः । एवं प्राणाग्निहोत्रेऽपि नैवेद्याशनतन्त्रता ॥ इति ।

ततः सिद्धम् भगवन्निवेदितेनैव पावनतमेनानादिकालसञ्चितानन्तस्वान्तध्वान्तविध्वंसिना विश्वेषां वैदिकानां वैश्वदेवप्राणाग्निहवनपूर्वकं वैश्वानरमूर्तेर्भगवतस्समाराधनमनुयागापराभिधानमनुदिनमनुविधेयमिति ॥

श्रीमद्वेङ्कटनाथेन सतामित्थं समर्पितम् । पावनं भगवद्भुक्तप्रापणादिनिषेवणम् ॥

शमितभवभयानां शङ्खचक्रादिचिह्नैर्दिविषदधिकभूम्नां दीप्यतामूर्ध्वपुण्ड्रैः ।
प्रथितगुणगणानां प्रापणप्राशनाद्यैरयमहमनघानामस्मि पात्रं दयायाः ॥

इति सच्चरित्ररक्षायां भगवन्निवेदितोपयोगविधिर्नाम तृतीयोऽधिकारः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
॥ सच्चरित्ररक्षा समाप्ता ॥

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ॥

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्तदेशिकविरचिता

॥ श्रीपाञ्चरात्ररक्षा ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि

॥ सिद्धान्तव्यवस्थापनाख्यः प्रथमोऽधिकारः ॥

चातुर्व्यूहं परं ब्रह्म षाड्गुण्यपरिकर्मितम् । पञ्चरात्रस्य कृत्स्नस्य प्रसूतिं पर्युपास्महे ॥

अनन्यदेवतास्थायिन्यायते महिते वयम् । पञ्चरात्रमहाम्भोधिपारदृश्वनि सज्जने ॥

आरोहन्त्वनवद्यतर्कपदवीसीमादृशां मादृशां पक्षे कार्तयुगे निवेशितपदान् पक्षे पतज्द्यः परान् ।

सर्वानुश्रवसप्रदर्शिसशिरःकम्पद्विजिह्वाशनक्रीडाकुण्डलमौलिरत्नघृणिभिस्सारात्रिकास्सूक्तयः ॥

अत्र तावत् प्रत्यक्षितसमस्तवेदार्थतत्त्वस्थितिभिः पाराशर्यप्रभृतिभिर्महाभारतादिषु भगवच्छास्त्रस्य सार्वभौमं प्रामाण्यं प्रत्यपादि । शारीरके च कपिलकणभक्षभिक्षुक्षपणकपशुपतिसमयप्रतिक्षेपसमनन्तरं तन्त्रान्तरसहपाठादिसंभवन्मन्दमतिव्यामोहशमनाय * उत्पत्त्यसंभवात् * न च कर्तुः करणम् इतिसूत्राभ्यां पूर्वपक्षमुपक्षिप्य * विज्ञानादिभावे वा तदप्रतिषेधः * विप्रतिषेधाच्च इतिसूत्रद्वयेन जीवोत्पत्त्याद्यनुपपत्तितत्प्रतिषेधप्रतिपादनद्वारेण सिद्धान्तस्समर्थितः ॥

भगवद्यामुनमुनिभिर्भाष्यकारैश्च—

* इदं महोपनिषदं चतुर्वेदसमन्वितम् । साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम् ॥

वेदान्तेषु यथासारं संगृह्य भगवान् हरिः । भक्तानुकम्पया विद्वान् सञ्चिक्षेप यथासुखम् ॥

इत्यादिप्रमाणगणप्रतिपादितप्रक्रियया अतिविततगहनगम्भीरनिगमशतशिखरगतपरमपुरुषार्थतदुपायतदितिकर्तव्यतासंग्रहरूपस्य भगवन्मुखोद्गतस्य शास्त्रस्य कारणदोषाद्यभावेन क्वचिदप्यप्रामाण्यं न शङ्कनीयमिति निरणायि ॥

कर्मकाण्डेऽपि प्रमाणलक्षणे—संभवद्वेदविरोधानां व्यासाद्यपरिगृहीतानामेव स्मृतीनामप्रामाण्यमसूच्यत । ये पुनश्चरमयुगमीमांसकास्तन्त्रान्तरैस्समानयोगक्षेमं सात्त्वतं शास्त्रमभिमन्यन्ते, तेषां विकत्थनान्यागमप्रामाण्ये निराचक्रिरे । उक्तं च * तथेदेतच्छ्रुतिपथपरिभ्रष्टतन्त्रैस्समानं पात्रत्वेन प्रसजति तदा सोमपास्ते सुरापाः इति । शूद्रार्चनादिप्रसङ्गे त्वेवं प्रतिबन्दी श्रीकृष्णमुनिभिरुक्ता—

* हविष्कृतो यथा शूद्रे यथा वा बहुयाजिनः । निर्वाहः क्रियते तद्वच्छास्त्रस्यास्यापि नान्यथा ॥ इति ।

अयमर्थः,—यथा * हविष्कृदाधावेति शूद्रस्य बहुयाजिनोऽगाराच्छूद्रवर्जनमित्यादिवाक्येषु कर्मविशेषाधिकारमुपचारविशेषं वा समालम्ब्य निर्वाहस्तद्वदिहापीति ॥

भट्टारकैश्च तन्त्रान्तरेभ्य इदं सार्वत्रिकेन प्रामाण्येन व्यभज्यत—* तस्मात्साङ्ख्यं सयोगं सपशुपतिमतं कुत्रचित्पञ्चरात्रं सर्वत्रैव प्रमाणं तदिदमवगतं पञ्चमादेव वेदात् इति । तदेतत् * महतो वेदवृक्षस्य मूलभूतो महानयम् इत्याद्युक्तानन्तशाखाश्रयऋगादिस्कन्धभिदुरनिगमतरुमूलभागोपबृंहणरूपं स्वमूलनिगमभागभेदात् ऋगादिवदेव चतुर्धा अवतिष्ठते—आगमसिद्धान्तो मन्त्रसिद्धान्तस्तन्त्रसिद्धान्तस्तान्त्रान्तरसिद्धान्त इति । चत्वारश्चैते सिद्धान्ता ऋगादिवदेव शाखाभेदैरवान्तरतन्त्रैर्भिद्यन्ते । तत्र यथा ऋगादयो वेदभेदास्तत्तच्छाखाभेदाश्च पूर्वपूर्वपरिग्रहानुसारेण व्यवतिष्ठन्ते पुत्रादिभिश्च परिगृह्यन्ते, तथा सिद्धान्तभेदास्तदवान्तरभेदाश्च प्रथमपरिग्रहानुसारेण व्यवतिष्ठन्ते । यथा च वाचनिकातिरिक्ते वेदान्तरशाखान्तरसूत्रान्तरसङ्करदोषः, तथेह सिद्धान्तसङ्करे तन्त्रसङ्करे प्रत्येकतन्त्रान्तःपातिनियतवैकल्पिकधर्मादिसङ्करे चासङ्कीर्णा चेयं व्यवस्था प्रमाणान्तरसहकृतपारम्पर्यपर्यालोचनया व्यवस्थाप्या । इदं च गर्भाधानादिदाहान्तसंस्कारान्तरसेवनाद्भागवतानामब्राह्मण्यं पूर्वपक्षिणा प्रसञ्जितं परिहरद्भिर्भगवद्यामुनमुनिभिरर्थतस्समर्थितम्—* य एते वंशपरम्परया वाजसनेयशाखामधीयानाः कात्यायनगृह्योक्तमार्गेण गर्भाधानादिसंस्कारान् कुर्वते, ये पुनस्सावित्र्यनुवचनप्रभृति त्रयीधर्मत्यागेनैव एकायनश्रुतिविहितानेव संस्काराननुतिष्ठन्ति, तेऽपि स्वशाखागृह्योक्तं यथावदनुतिष्ठमाना न शाखान्तरीयकर्मानुष्ठानाद्ब्राह्मण्यात्प्रच्यवन्ते । अन्येषामपि पर[स्पर]शाखाविहितकर्माननुष्ठाननिमित्ताब्राह्मण्यप्रसङ्गात्; सर्वत्र हि जातिचरणगोत्राधिकारादिव्यवस्थिता एव समाचारा उपलभ्यन्ते । यद्यपि सर्वशाखाप्रत्ययमेकं कर्म, तथाऽपि न परस्परविलक्षणाधिकारिसंबद्धा धर्माः कचित्समुच्चीयन्ते । विलक्षणा[श्च] हि त्रयीविहितस्वर्गपुत्रादिविषयोपभोगसाधनेन्द्राग्नेयादिकर्माधिकारिभ्यो द्विजेभ्यस्तय्यन्तैकायनश्रुतिविहितविज्ञानाभिगमनोपादानेज्याप्रभृतिभगवत्प्राप्त्यैकोपायकर्माधिकारिणो मुमुक्षवो ब्राह्मणा इति नोभयेषामप्यन्योन्यशाखाविहितकर्माननुष्ठानमब्राह्मण्यमापादयति । यथा चैकायनशाखाया अपौरुषेयत्वं, तथा काश्मीरागमप्रामाण्य एव प्रपञ्चितमिति नेह प्रस्तूयते । प्रकृतानां तु भागवतानां सावित्र्यनुवचनादित्रयी[धर्म]संबन्धस्य स्फुटतरमुपलब्ध्यैनं तत्त्यागनिमित्तव्रात्यत्वादिसन्देहं सहत इति । अत्र विज्ञानशब्देन **संवित्सिद्ध्यादिषु** स्वयमेव स्थापितं विशिष्टं ज्ञानं विवक्षितम् ॥ आह हि—

* यथा चोक्तृपस्सब्राडद्वितीयोऽस्ति भूतले । इति तत्तुल्यनृपतिनिवारणपरं वचः ॥
न तु तत्पुत्रतद्भृत्यकलत्रादिनिवारणम् । तथा सुरासुरनरब्रह्माण्डशतकोटयः ॥
क्लेशकर्मविपाकाद्यैरस्पृष्टस्याखिलेशितुः । ज्ञानादिषाड्गुण्यनिधेरचिन्त्यविभवस्य ताः ॥
विष्णोर्विभूतिमहिमसमुद्र[जल]द्रप्सविप्रुषः ॥ इति ।

इदं च वेदमेदं भोजराजबलदेवाचार्यादयश्च विविच्यते—

* यो वेदवृक्षं बहुमूलशाखं नानाफलार्थिद्विजसङ्गसेव्यम् । पूर्वश्रवानुश्रवभेदभिन्नमारोपयत्तं पुरुषं प्रपद्ये ॥

इत्यादिभिः । एवं च सर्वत्रासङ्करस्संमहेण प्रदर्शितः श्रीसात्वते—

* न शास्त्रार्थस्य शास्त्राणां बुद्धिपूर्व उपप्लवः । आचर्तव्य इहाज्ञानात्पारम्पर्यक्रमं विना ॥ इति ।

अस्खलितपारम्पर्यमत्यभिज्ञानेषु स्थानेषु परिदृश्यमानप्रमाणमूलान्याचारपरम्पराग्रहीतानि च कर्माणि न मात्रयाऽपि परि-

[भाव्या]हाप्यानि ; नच तद्विरुद्धान्युपादेयानीत्युक्तं भवति । श्रीपौष्करे चाधिकारिनिरूपणाध्याये प्रतिनियताधिकारि-विषयत्वाभिप्रायेणैव सिद्धान्तभेदस्तदवान्तरभेदश्च दर्शितः । यथा–

* कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते । क्रमागतैस्त्वसंज्ञाभिर्ब्राह्मणैरागमं तु तत् ॥
विद्धि सिद्धान्तसंज्ञं च तत्पूर्वमथ पौष्कर । नानाव्यूहसमेतं च मूर्तिद्वादशकं हि तत् ॥
तथा मूर्त्यन्तरयुतं प्रादुर्भावगणं हि यत् । प्रादुर्भावान्तरयुतं धृतं हृत्पद्मपूर्वके ॥
लक्ष्म्यादिशङ्खचक्रास्त्यगारुत्म्यसदिगीश्वरैः । सगणैरस्त्रनिष्ठैश्च तद्विद्धि कमलोद्भव ॥
मन्त्रसिद्धान्तसंज्ञं च शास्त्रं सर्वफलप्रदम् । विना मूर्तिचतुष्केण यत्रान्यदुपचर्यते ॥
मन्त्रेण भगवद्रूपं केवलं वाऽङ्गसंवृतम् । युक्तं श्रियादिकेनैव कान्ताव्यूहेन पौष्कर ॥
भिन्नैराभरणैरस्त्रैरावृतं च सविग्रहैः । तन्त्रसंज्ञं हि तच्छास्त्रं परिज्ञेयं हि चाब्जज ॥
मुख्यानुवृत्तिभेदेन यत्र सिंहादयस्तु वै । चतुस्त्रिंश्यादिकेनैव योगेनाभ्यर्थितेन तु ॥
संवृताः परिवारेण स्वेन स्वेनोत्थितास्तु वा । यच्छक्त्याराधितं सर्वं विद्धि तन्त्रान्तरं तु तत् ॥
एवं नानागमानां च सामान्यं विद्धि सर्वदा । नामद्वयं वा सिद्धान्तपञ्चरात्रेति पौष्कर ॥
एकैकं बहुभिर्भेदैरामूलादेव संस्थितम् । नानाशयवशेनैव सिद्धाद्यैः प्रकटीकृतम् ॥
सङ्क्षिप्तं सप्रपञ्चं च तृतीयमुभयात्मकम् । सेतिहासपुराणैस्तु वेदवेदान्तसंयुतैः ॥
ये जन्मकोटिभिस्सिद्धास्तेषामन्तेऽत्र संस्थितिः ॥ इति ।

अत्रैकैकस्य सिद्धान्तस्यामूलादेव बहुभिर्भेदैस्संस्थितत्ववचनाच्चतुर्णां सिद्धान्तानां तदवान्तरतन्त्रभेदानाञ्च सिद्धान्तान्तर-तन्त्रान्तरसङ्करपरिहारेणैव सर्वदाऽवस्थानं सूचितम् । अत्र च सिद्धान्तसंज्ञितानामेषां चतुर्णामपि मोक्षप्रदत्व-मनन्तरमवोचत्–

* यस्मात्सम्यक् परं ब्रह्म वासुदेवाख्यमव्ययम् । एतस्मात्प्राप्यते शास्त्राज्ज्ञानपूर्वेण कर्मणा ॥
सिद्धान्तसंज्ञा विप्रास्य सार्थका अत एव हि ॥ इति ।

अत्र सार्थका इति बहुवचनान्तसामानाधिकरण्यात् सिद्धान्तसंज्ञाशब्दोऽपि बहुवचनान्तस्सन्नागमादिविशेषणयोगेन चतुर्धा संज्ञावस्थानमभिप्रैति । पञ्चरात्रशब्दवत् सिद्धान्तशब्दोपि चतुर्णां साधारण इति चात्रैव पूर्वमुक्तम् । पाद्मे च * सदागमादिसिद्धान्तचतुष्के सत्पदप्रदे इति चतुर्णां सत्पदशब्दवाच्यभगवत्पदप्राप्तिसाधनत्वमुक्तम् । हयग्रीव-संहितायामपि कस्यचिन्मोक्षैकान्त्यमन्येषामपि फलान्तरेण सह मोक्षप्रदत्वमुक्तम्–

* आगमाख्यं हि सिद्धान्तं सन्मोक्षैकफलप्रदम् । मन्त्रसंज्ञं हि सिद्धान्तं सिद्धिमोक्षप्रदं नृणाम् ॥
तन्त्रसंज्ञं हि सिद्धान्तं चतुर्वर्गफलप्रदम् । तन्त्रान्तरं तु सिद्धान्तं वाञ्छितार्थफलप्रदम् ॥ इति ।

अत्र वाञ्छितार्थशब्देनाविशेषात् त्रिवर्गवदपवर्गोऽपि संगृह्यते ; अत एषां चतुर्णामपि परब्रह्मभूतवासुदेवप्रापकत्वादपवर्गा-र्थिभिर्मोक्षोपायोपदेशमद्देशेषु * विकल्पोऽविशिष्टफलत्वात् इतिन्यायेन सदक्षरदहरमधुभूमवैश्वानरशाण्डिल्यनाचिकेतोप-कोसलप्रवर्ग्यसंवर्गान्तरादित्यानन्दमयविद्यादिष्विव वैकल्पिकः परिग्रहः । ब्रह्मस्वरूपनिरूपकधर्मव्यतिरिक्तानां तत्त-द्विद्याप्रतिनियतगुणानां यथा विद्यासु परस्परमनुप्रसंहारः, तथाऽत्रापीति, प्रत्येकं प्रतिनियतानां प्रक्रियाणां परस्परासङ्करेण

प्रयोगसिद्धः । यत्र तु मधुविद्यादौ वसुपदप्राप्त्यादिपूर्वकब्रह्मप्राप्तिवत्परम्परया वासुदेवप्राप्तिरभिधीयते, तत्रापि तत्तदर्वाचीनपर्वव्यवहितपरप्राप्तिकामानामधिकार इति व्यवस्था; तदभिप्रायेण चोक्तं भाष्ये—*तद्धि वासुदेवाख्यं परं ब्रह्म संपूर्णषाड्गुण्यवपुस्सूक्ष्मव्यूहविभवभेदभिन्नं यथाधिकारं भक्तैर्ज्ञानपूर्वेण कर्मणाऽभ्यर्चितं सम्यक् प्राप्यते, विभवार्चनात् व्यूहं प्राप्य व्यूहार्चनात्परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यते इति वदन्तीति । अतश्चतुर्णामप्यपवर्गे तात्पर्यम् । फलान्तरसाधनवचनस्यान्यार्थत्वं स्वयमेवोक्तम्—* प्रत्ययार्थं च मोक्षस्य सिद्धयस्संप्रकीर्तिताः इति । एवं चतुर्णामपि मोक्षप्रदत्वे हि त्रय्यन्तसारोपबृंहणरूपत्वमपि समञ्जसं भवति । पाद्मे चर्यापादे चतुर्णामेतेषां परस्परविभागस्सिद्धान्तसङ्करे तन्त्रसङ्करे च दोषः प्रपञ्चितः—

* तच्चतुर्धा स्थितं शास्त्रमृगादिवदनेकधा । एकैकं भिद्यते तन्त्रं शाखाभेदेन भूयसा ॥
प्रथमं मन्त्रसिद्धान्तं द्वितीयं चागमाह्वयम् । तृतीयं तन्त्रसिद्धान्तं तुर्यं तन्त्रान्तरं भवेत् ॥ इति ।

अत्र आगममन्त्रसिद्धान्तयोः पौष्करोक्तक्रमाद्व्युत्क्रमेणोपादानं सिद्धिमोक्षप्रदमन्त्रसिद्धान्तप्राशस्त्ये तात्पर्यात् । अत्रापि आगमसिद्धान्तस्य केवलमोक्षप्रदत्वलक्षणः * कर्मणामपि सन्न्यासः कथ्यते यत्र चागमे इति प्रदर्शित एव । अत्र काम्यकर्मणां स्वरूपतस्सन्न्यासः, स्ववर्णाश्रमनियतानां भगवद्गीताष्टादशाध्यायनिर्णीतप्रकारेण सात्त्विकत्यागः, स्वशास्त्रागृह्योक्तमर्यादया च सर्वत्र नित्यनैमित्तिकादिपरिग्रहः; अत आगमसिद्धान्ते सर्वकर्मस्वरूपत्याग इति न भ्रमितव्यम्, कर्मविशेषभूयस्त्वात्; अत एव हि तन्निष्ठानधिकृत्योक्तम्—

* त्रयोदशविधं कर्म कामादिपरिवर्जितम् । गुणैस्सांयमिकैर्युक्तमनुतिष्ठन्ति साधवः ॥ इति ।

अत्रैवोद्दिष्टक्रमेण चत्वारस्सिद्धान्ता लक्ष्यन्ते—

* एकैव मूर्तिराराध्या प्राधान्येनेतराः पुनः । देव्यः श्रियादयश्चापि संपूज्याः परिवारवत् ॥
आयुधैश्शङ्खचक्राद्यैः श्रीवत्साद्यैश्च भूषणैः । मूर्तिमद्भिः परिवृता केवला वाऽम्बुजासन ॥
कथ्यते यत्र तत्प्रोक्तं मन्त्रसिद्धान्तमग्रिमम् । वासुदेवादयो व्यूहाश्चत्वारस्साधकैरपि ॥
क्रमागतैस्तुल्यकक्ष्याः पूज्यास्तु प्रभवाप्यये । कर्मणामपि सन्न्यासः कथ्यते यत्र चागमे ॥
तन्त्रमागमसिद्धान्तं तदुक्तं कमलासन । नवानामपि मूर्तीनां प्राधान्यं यत्र कथ्यते ॥
मूर्तयो द्वादशाङ्गानि तेषामेव तथाऽपरे । प्रादुर्भावगणाश्चापि मूर्त्यन्तरगणा अपि ॥
प्रादुर्भावान्तरयुतास्सदिग्देवैस्सहायुधैः । मूर्तिमद्भिश्च देवीभिर्लक्ष्म्यादिभिरपि स्फुटम् ॥
तत्तन्त्रसिद्धान्ताह्वानं चतुर्थं परमं पुनः । सौम्यसिंहादिभूयिष्ठवक्त्रभेदैश्चतुर्मुख ॥
द्वित्र्यादिमुखभेदा वा मूर्तिरेकैव पूज्यते । संवृता परिवारैः स्वैर्विना वा सर्वकामदा ॥
यत्तु तन्त्रान्तरं तत्स्याच्चतुर्थं चतुरानन । येन सिद्धान्तमार्गेण कर्षणादिक्रिया कृता ॥
आदौ तेनैव सकला नान्यसिद्धान्तवर्त्मना । तन्त्रेणापि तथा येन कर्षणादिक्रिया कृता ॥
तेनैव सकला कार्या न तन्त्रान्तरवर्त्मना । तन्त्रान्तरेऽपि कथितमनुक्तं ग्राह्यमेव हि ॥
सिद्धान्तसङ्करस्तस्मात्तन्त्रसङ्कर एव च । दोषाय कल्पते राजराष्ट्रधामक्षयात्मने ॥
सिद्धान्तसङ्करे जाते प्रमादात्तस्य शान्तये । कृत्वा संमोक्षणं पूर्वं सहस्रकलशाप्लवः ॥

कर्तव्यं स्नपनं कुर्यात्तन्त्रसङ्करसंभवे । अन्ते महोत्सवं कुर्याद्ध्वजारोहणपूर्वकम् ॥ इति ।

अत्र पाद्मोक्तं तन्त्रतन्त्रान्तरलक्षणं पौष्करोक्ताविरोधेन नेतव्यम् । यदि द्वयोर्ग्रन्थयोरैकार्थ्यं संभवति तदा न विरोधः, इतरतन्त्रेषु अभ्युपगमसिद्धान्ततन्त्रतन्त्रान्तरलक्षणं द्विप्रकारमनुसन्धेयम् । यथा न्यायविस्तरे सर्वतन्त्रप्रतितन्त्राभ्युपगमाधारसिद्धान्तेष्वभ्युपगमसिद्धान्तस्य द्वेधा लक्षणमक्षपादाभिप्रेतं वर्णयन्ति—

* साधितः परतन्त्रे यः स्वतन्त्रे च समाश्रितः । स ह्यभ्युपगमो न्यायो मनसोऽनुमतिर्यथा ॥
तद्विशेषपरीक्षा वा सद्भावेऽन्यत्र साधिते । यथाऽन्यत्र मनस्सिद्धं तस्याक्षत्वपरीक्षणम् ॥ इति ।

पारमेश्वरोक्तं तन्त्रतन्त्रान्तरलक्षणं तु पौष्करोक्तेन समानमेव । तथा हि, प्रायश्चित्ताध्याये सङ्करादिदोषपरिहारार्थं विभज्यमानेषु सिद्धान्तेष्वागममन्त्रसिद्धान्तप्रपञ्चनानन्तरमुच्यते—

* परव्यूहाहिदिमेदेन विनैकैकेन मूर्तिना । साङ्गेन केवलेनाथ कान्ताव्यूहेन भूषणैः ॥
तथाऽस्त्रैर्विग्रहोपेतैरावृतं तन्त्रसंज्ञितम् । नृसिंहकपिलक्रोडहंसवागीश्वरादयः ॥
मुख्यानुवृत्तिभेदेन केवला वाऽपि संयुताः । चक्राद्यस्त्रवरैश्चाथ भूषणैर्मकुटादिभिः ॥
कान्तागणैश्च लक्ष्म्याद्यैः परिवारैः खगादिभिः । पूजिता विधिना यत्र तत्तन्त्रान्तरमीरितम् ॥ इति ।

तदेवं व्यवस्थितेषु सिद्धान्तेषु सङ्करपरिहारः पाद्मे स्पष्टः । तस्मिन्नेव चाध्याये क्वचित्सिद्धान्ते तदवान्तरतन्त्रभेदे वा दीक्षितस्य सिद्धान्तान्तरोक्तासु तन्त्रान्तरोक्तासु च क्रियास्वनधिकार उक्तः—

* एकत्र दीक्षितस्तन्त्रे सिद्धान्ते वा द्विजोत्तमः । क्रियां न कुर्यादन्यत्र कर्षणादींश्चतुर्मुख ॥
आचार्यकमथार्त्विज्यं पूजाद्यं मधुविद्विषः । तन्त्रभेदे च सिद्धान्तभेदे चापि न युज्यते ॥ इति ।
* तन्त्रान्तरे तथा तन्त्रे मन्त्रसिद्धान्तवर्त्मना । दीक्षितानां क्रमेणैव ह्युपर्युपरि योगतः ॥
अन्येषामधिकारस्यात्तत्तत्संस्कारपूर्वकम् ॥

इत्युक्त्वा पुनरप्युपर्युपरितन्त्राधिकाराणामबोधस्तन्त्राधिकारित्वं प्रदर्शितम्—

* कारणागमसिद्धान्तनिष्ठेनान्यैस्त्रिभिः सदा । अर्चनीयमथान्याभ्यां मन्त्रसिद्धान्तिना तथा ॥
पूजनीयमथान्येन तन्त्रसिद्धान्तिनाऽनिशम् । स्वेन तन्त्रान्तरेणैव पूजनीयं स्वके गृहे ॥ इति ।

अत्राप्युत्कृष्टसिद्धान्तस्थितेनाप्यपकृष्टसिद्धान्तस्थानेषु तत्तत्सिद्धान्तप्रकारेणैव पूजनीयत्वमुक्तम्, उत्कृष्टसिद्धान्तस्थितस्य स्वस्थानेऽपकृष्टसिद्धान्तप्रसङ्गाभावात् ; अत एव ह्यनन्तरमेवोच्यते—

* मुख्याधिकारिणस्सन्ति यदि गौणाधिकारिणः । स्वतन्त्रेण प्रवेष्टव्याः प्रासादे च स्वतन्त्रके ॥ इति ।

स्वतन्त्रेण—स्वकीयेन प्राक्प्रवृत्तशास्त्रेणेत्यर्थः । विशेषतश्च एकायनविधानस्यान्यत्र प्रवेशे प्रत्यवायातिशयश्च तत्रैवोक्तः—

* तत्सिद्धान्तान्यमार्गेण स्थापितं बिम्बमालये । अज्ञानादथवा मोहादेकायनविधानतः ॥
इदं सर्वमाप्नोतीह परत्र च ॥ इति ।

एवमेकैकसिद्धान्तस्थितानां सिद्धान्तान्तरक्रियासु यथोक्तप्रक्रियया ऽनधिकारे समर्थिते सिद्धान्तान्तरप्रतिष्ठितेषु भगवद्बाल्येषु तद्भन्यसिद्धान्तस्थितानां प्रदक्षिणप्रणाममालाकरणदीपारोपणसम्मार्जनसेचनोपलेपनालङ्करणरक्षणसंवर्धनहविरादिसमर्पणस्तोत्रादीनां साधारणधर्माणामपि प्रतिषेधप्रसङ्गमाशङ्क्य परिजहार—

* प्रदक्षिणप्रणामादि राद्धान्तेऽन्यत्र केवलम् । विहितं नार्चनं कुर्याद्राजराष्ट्रभयावहम् ॥ इति ।

तत्रैकोनविंशेऽध्याये सिद्धान्तसङ्करे प्रत्यवायं विस्तरेण प्रतिपाद्यासङ्कीर्णसिद्धान्तधर्माणामेवाधिकारिणामन्योन्यसंबन्धादि-योग्यत्वमितरेषां तु बाह्यानामिव वर्जनीयत्वमपि प्रतिपादितम्—

* सिद्धान्तानां चतुर्णां तु साङ्कर्यं व्यसनावहम् । सिद्धान्तेषु चतुर्ष्वेकं पूर्वैर्नृभिरनुष्ठितम् ॥
त्यक्त्वा समाश्रयेदन्यं नरो भवति किल्विषी । तस्माज्जन्मप्रभृत्येकराद्धान्तनियतो भवेत् ॥
अन्यथा कुलमात्मानं सर्वं नाशयति स्वयम् । मन्त्रमण्डलकुण्डादिक्रियामुद्रोपचारकैः ॥
योगं नयति यो मोहात्स्वसिद्धान्तोक्तवर्त्मनि । सोऽपि स्वकुलजान् सर्वान् परमात्मानमव्रजन् ॥
नयेन्निरयमत्युग्रं पुरुषान् पुरुषाधमः । निष्फला च क्रिया तस्य प्रत्युतानर्थकारिणी ॥
अकर्मणोऽस्य तत्कोपो राजराष्ट्रभयावहः । कर्ता कारयिता चोभौ सान्वयं विनशिष्यतः ॥
न सन्निधानं च हरेर्धाम्नि हानिश्च सम्पदाम् । राद्धान्तसङ्करः कार्यो नान्यसिद्धान्तकर्मणा ॥
मन्त्रसिद्धान्तमुख्येषु चतुर्ष्वपि यथापुरम् । अनुतिष्ठन्ति ये कर्म समाराधनमुच्यते ॥
असङ्करेण तेऽन्योन्यं संबद्धा हि नरोत्तमाः ॥ इति ।

असङ्करेणानुतिष्ठन्तीत्यन्वयः । तत्रैव जीर्णोद्धाराध्याये—

* या मूर्तिर्येन तन्त्रेण यादृशेनाधिकारिणा । प्रथमे कल्पने सैव द्वितीये कल्पने भवेत् ॥
मूर्तिस्तदेव तन्त्रं च स एव स्थापकः पुनः । तन्त्राधिकारिमूर्तीनां व्यत्यये कल्पिते सति ॥
नृणां नरपतेश्चापि राष्ट्रस्य च भवेत् क्षयः ॥ इति ।

तस्मिन्नेवोत्तरत्र प्रायश्चित्ताध्याये—

* जनने मरणे चैव श्वसृगालमृगादिभिः । स्पृष्टे च बिम्बे तन्त्राणां सङ्करे समुपस्थिते ॥
एवमादिषु चान्येषु संप्रोक्षणविधिर्भवेत् ॥ इति ।

नारदीयेऽपि—* व्यत्यये परिवाराणां भोगादीनां च गौतम । पूर्ववत्कल्पनं कृत्वा शान्तिहोमं समाचरेत् ॥ इति ।

अत्र आदिशब्देन सिद्धान्तव्यत्ययतन्त्रव्यत्ययादिसंग्रहः, अपेक्षितत्वादविशेषाच्च ; अत एव ह्यत्रैवोक्तम्—

* तन्त्रेणैकेन कर्तव्यं कर्षणादिषु नारद । यत्तन्त्रेण समारब्धं तत्तन्त्रेणैव कारयेत् ॥
अनुक्ताश्चान्यतन्त्रेषु निरीक्ष्यात्र नियोजयेत् । विशेषाश्च मुनिश्रेष्ठ त्वन्यथा राष्ट्रनाशकृत् ॥ इति ।

पारमेश्वरे च प्रतिष्ठाध्याये—

* विशेषेण स्वयंव्यक्ते दिव्ये सैद्धेऽपि चार्षके । स्थाने तु कर्मबिम्बानां व्यत्ययं न समाचरेत् ॥
द्वाराङ्गावृतिदेवानां पूजाया हवनस्य च । इत्यारभ्य,
* न लक्षणान्तरं कुर्यान्न प्रमाणान्तरं तथा । न तु द्रव्यान्तरं चैव न च कुर्यात्क्रियान्तरम् ॥
मन्त्रान्तरं न कुर्वीत सर्वं कुर्याद्यथापुरम् । कुर्याच्चेदेवमादीनां विपर्यासं महामते ॥
राज्ञो राष्ट्रस्य नाशस्स्यात् सर्वस्यापि स्वसन्ततेः ॥ इति ।

तत्रैव— * भोगानां च विपर्यासं मन्त्राणां च महामते । ध्यानानां चैव मुद्राणां देवतानां तथैव च ॥
अन्येषां चैवमादीनां व्यत्यासं न समाचरेत् ॥ इति ।

तथोत्तरत्र प्रायश्चित्ताध्याये—

* प्रासादश्च तथा बिम्बं येन शास्त्रेण निर्मितौ । प्रतिष्ठाप्य च तेनैव नित्यादौ पूजयेद्धरिम् ॥
योऽर्चयेदन्यमार्गेण तथा चार्चापकस्तु यः । तावुभौ कलुषात्मानौ राज्ञो राष्ट्रस्य वै गुरोः ॥
कुलं च व्याधितं चैव विप्लवं दुःखमञ्जसा । वित्तहानिं विशेषेण कुर्यातामालयस्य च ॥
न कुर्यात्तन्त्रसाङ्कर्यं पञ्चरात्रपरायणः । पुनः प्रतिष्ठा कर्तव्या कृतश्चेत्तन्त्रसङ्करः ॥ इति ।

तत्रैव सिद्धान्तमेदान् विस्तरेण प्रतिपाद्यानन्तरमुच्यते—

* शास्त्रमन्त्रक्रियादीनां मूर्तीनां भवनस्य च । देशिकस्याभिजातस्य यथापूर्वं परिग्रहः ॥
तथैव यावत्कालं तु आचर्तव्यं नचान्यथा । विपरीते कृते चात्र राजराष्ट्राद्यनर्थकृत् ॥
ततस्समाचरेद्यत्नात्प्रतिष्ठां प्राक्प्रकारतः । ततस्सिद्धान्तसाङ्कर्यं नाचर्तव्यं कृतात्मभिः ॥
यद्यदिष्टतमं लोके पूर्वसिद्धाविरोधि तत् । प्रतिग्राह्यमथान्योन्यविरुद्धं संत्यजेद्बुधः ॥ इति ।

एवं **कालोत्तरे** चतुर्विधपूजानिर्णयाध्याये—

* वैदिकैस्तान्त्रिकैर्वाऽपि श्रौतैर्वा द्विजसत्तम । स्वयंव्यक्ते तु भवने मिश्रैर्वा देवमर्चयेत् ॥
ऋष्यादिपूजिते स्थाने पारम्पर्यक्रमं विना । विशेषं नाचरेत्किञ्चिद्राजराष्ट्रसमृद्धये ॥ इति ।

अस्मिन्नेवोत्तरत्र प्रायश्चित्ताध्यायेऽप्येतावेव श्लोकौ पठितौ ।

तत्रैव— * यद्बिम्बं येन शास्त्रेण समारब्धं पुरा द्विज । प्रासादं वा तत्तेन शास्त्रेणैव तदर्चयेत् ॥
तच्छास्त्रमन्तरेणैव यो यजेदन्यवर्त्मना । राज्ञो राष्ट्रस्य कर्तुश्च विनाशं कर्तुमिच्छति ॥
न कदाचिदपि प्राज्ञः प्रकुर्याच्छास्त्रसङ्करम् । शास्त्रसङ्करदोषेण महान् दोषो भवेद्ध्रुवम् ॥ इति ।

यद्यपि वैखानसपञ्चरात्रसङ्करपरिहारस्याप्यत्रैव [शास्त्रे] प्रतिपादनात्तत्परिहारार्थमिदं वचनमिति वक्तुं शक्यम्, तथाऽपि येन शास्त्रेणेति सामान्यवचनात्सर्वविषयमेव । यत्तत्रोक्तम्—

* महोत्सवेषु सर्वेषु देशिकेन्द्रानुसारतः । ऊहापोहविधानेन करणीयं समर्चनम् ॥

इति, इदमपि देशकालद्रव्यबलाद्यनुसारेण तत्तदुचितवैदिकादिसङ्कोचविस्तारादिमात्रविषयम्; अत एव अत्र * वैदिकैस्तान्त्रिकैः इत्यादि पुनः पठित्वा

* ऋष्यादिपूजिते स्थाने पारम्पर्यक्रमं विना । विशेषं नाचरेत्किञ्चिद्राजराष्ट्रसमृद्धये ॥

इति च निगद्यते । एवं पञ्चरात्राख्यैकशास्त्रावान्तरसंहितासङ्करस्यात्यन्तगर्हितत्वे वैखानसपञ्चरात्रसंकरः कैमुतिकन्यायसिद्धः, परस्परं च द्वयोरपि स्पष्टं प्रतिषिध्यते । पञ्चरात्रस्य तु वैखानसैरपि क्वचित्क्वचिदुपजीव्य[त्व]मस्ति ।

तथा हि—. * ब्राह्मणैः क्षत्रियैर्वैश्यैश्शूद्रैश्च कृतलक्षणैः । अर्चनीयश्च सेव्यश्च नित्ययुक्तैस्स्वकर्मसु ॥
सात्त्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः ॥

इत्यादिभिरविशेषेण सर्वेषां ब्राह्मणादीनां श्रीपञ्चरात्रोक्तमार्गेण भगवदर्चनादिकं कर्तव्यमिति **महाभारतादिष्वभिधीयते** । नहि क्वचिदपि सूत्रविशेषादिनियमः कृतः, प्रत्युत सर्वसूत्रनिष्ठानां तदन्वयस्तस्मिन्नेव शास्त्रे प्रतिपाद्यते—

* निषेकादींश्च संस्कारान् सूत्रोक्तांश्च समाचरेत् । पञ्चरात्रोदितान् वाऽपि ये स्वकंश्यैरनुष्ठिताः ॥ इति । नच बोधायनविखनश्शौनकाद्युक्तेषु भगवत्प्रतिष्ठार्चनादिषु सत्सु किमन्येनेति वाच्यम्; तदुक्तिरहितसूत्रनिष्ठानामन्यापेक्षायां साधारणशास्त्रपरिग्रहोपपत्तेः । न च क्वचित् पूर्णोपदेशस्संभवतीति तच्छक्तस्य पूर्णमुपादानं युक्तम्; अत एव हि हौत्रं होतृशाखोक्तमध्वर्यवोऽपि परिगृह्णन्ति । अतो येषु सूत्रेषु भगवदर्चनादिकं प्रत्यपादि तन्निष्ठानामपि भगवच्छास्त्रोक्तप्रक्रियया समाराधनादिकं प्रशस्ततमम् । तथा च शिष्टैरनुष्ठीयते । ननु च वैखानससूत्रानुसारिषु काश्यपमरीचिभार्गवात्रेयेषु शास्त्रेषु तदनुबन्धिषु चाधिकारग्रन्थेषु संग्रहविस्तररूपेषु भगवत्प्रतिष्ठार्चनादिकं पूर्णमुपदिशत्सु किं पञ्चरात्रेण ? मैवम्; तत्सूत्रनिष्ठान् प्रत्येव तत्प्रक्रियोपदेशात् । तर्हि तन्निष्ठानां पञ्चरात्रप्रक्रियाया अनुपादेयत्वे तस्याः सर्वसूत्रनिष्ठसाधारण्यं भज्येतेति चेत् । तन्न; दत्तोत्तरत्वात् । काश्यपीयादीन्यपि हि शास्त्राणि काञ्चित्प्रक्रियामुपदिशन्ति तेषु तेष्वर्थेषु शास्त्रान्तरोपजीवीन्येव; एवं पञ्चरात्रोक्तमपि क्वचित्क्वचिदुपजीवन्ति । यथोक्तं भृगुप्रोक्ते क्रियाधिकारे—

* गुरूपदेशसंसिद्धैः कल्पमन्त्रैरथापि वा । आसनाद्युपचारैस्तु पूजयेदिति केचन ॥ इति ।

अत्र कल्पमन्त्रशब्देन भगवच्छास्त्रोक्तमन्त्राणामेव ग्रहणम्; अत एव ह्यधीतवेदान् वैखानसान् प्रति गुरूपदेशसंसिद्धैरिति विशेष्यते । नच तत्तत्तन्त्रमन्त्रकल्पाः पञ्चरात्रतन्त्रेभ्यः पृथग्भूताः, चतुर्धा व्यूढे हि तस्मिंच्छास्त्रे प्रत्येकं च संहितामेदभेदिनि सर्वेऽपि भगवन्मन्त्रकल्पास्तदङ्गमन्त्रकल्पाश्च यथायथं समाविशन्ति; अत एव हि तांस्तान् भगवन्मन्त्रकल्पानार्षपञ्चरात्रमित्यभियुक्ता वर्णयन्ति, तन्निष्ठांश्च कल्पभागवतशब्देन व्यपदिशन्ति । एवं भार्गवादिष्वपि—

* वैखानसेन सूत्रेण निषेकादिक्रियान्वितान् । विप्रान् वेदविदश्शुद्धान् मन्त्रकल्पविचक्षणान् ॥

इत्यादिषु मन्त्रकल्पवेदनोक्तिस्तत्रतत्रापेक्षितग्रहणार्था । तथा भार्गवे क्रियाधिकारे सारस्वतप्रतिष्ठादिकं प्रक्रम्योच्यते—

* अनेन विधिना स्थाप्य कल्पमन्त्रेण पूजयेत् इति । न चात्र कल्पमन्त्रस्वरूपतदङ्गादिकमुपदिष्टम्; अतः कल्पोक्तप्रक्रियैवात्रानुसरणीया । एवं तत्र सुदर्शनरूपस्य भगवतः प्रतिष्ठार्चनादौ प्रक्रान्ते फलभेदापेक्षया प्रक्रियान्तरमुपक्षिप्यते—

* एतद्वैदिकमुद्दिष्टं भुक्तिमुक्तिफलप्रदम् । केवलं भुक्तिकामश्चेत्स्मरन् मन्त्रं षडक्षरम् ॥ इति ।

नचात्र षडक्षरमन्त्रप्रक्रियाप्रपञ्चनम् । ततश्च वासिष्ठगार्ग्यविहगेन्द्राहिर्बुध्न्यादिसंहितोक्तप्रक्रियैव शरणम् । एवं द्विभुजप्रभृति षोडशभुजपर्यन्तरूपोपदेशेऽप्यनुक्तमपेक्षितमन्यतो ग्राह्यम्; अत एव हि * कृष्णरूपाण्यनन्तानि इत्यादिभिः कृष्णनरसिंहादिरूपाणामसङ्ख्येयत्वेन वक्तुमशक्यतया विरम्यते । तेषु च कानिचिच्छास्त्रान्तरोक्तानि संग्राह्याण्येव; अत इदं * वेदान्तेषु यथा सारं संगृह्य भगवान् हरिरित्युक्तप्रक्रियया सर्ववेदान्तसारोद्धारेण सर्वजनहितैषिणा भगवता स्वयमेव प्रणीतं श्रीमत्पञ्चरात्रशास्त्रं सर्वसूत्रनिष्ठानामुपजीव्यमिति सिद्धम् ॥

यत्तु श्रीवैखानसे—* आग्नेयं पञ्चरात्रं तु दीक्षायुक्तं च तान्त्रिकम् । अवैदिकत्वात्तत्तन्त्रं तथा वैखानसेन तु ॥
सौम्येन वैदिकेनैव देवदेवं समर्चयेत् ॥ इत्यादि ;

यच्चोक्तं श्रीपञ्चरात्रे तन्त्रसारसमुच्चये—* अश्रोकरमसौम्यं च वैखानसमसात्त्विकम् इत्यारभ्य * तद्विधानं परित्यज्य पञ्चरात्रेण पूजयेत् इत्यादि, यानि च पाद्मपारमेश्वरादिष्वतिवादवचनानि, तानि नूनमिक्षुभक्षकतृचिकीर्षुभिः प्रक्षिप्तानि परस्परस्खानाक्रमणलोलुपैः बहुभिर्वा पूजकाधमैर्निवेशितानि ।

* अविरोधोपयोगाभ्यामुभयोरपि शास्त्रयोः । मध्यस्थैर्हि कृतं धर्मविद्यास्थाननिवेशनम् ॥ इति ।

अन्यथा प्रसिद्धप्रामाण्ययोः परिग्रहप्राचुर्यवतोः प्रसिद्धतरेषु श्रीरङ्गश्रीमद्वेङ्कटाद्रिश्रीहस्तिशैलवृषगिरिप्रभृतिषु पारम्पर्येण प्रवृत्तयोः व्यासादिनिबद्धश्रीवैष्णवधर्मशास्त्रकाण्डादिषु—

* कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते । वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः ॥

श्रीभगवानुवाच—शृणु पाण्डव तत्सर्वमर्चनाक्रममात्मनः । स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् ॥

अष्टाक्षरविधानेनाप्यथवा द्वादशाक्षरैः । वैदिकैरथवा मन्त्रैर्मम सूक्तेन वा पुनः ॥
स्थापितं मां ततस्तस्मिन्नर्चयित्वा विचक्षणः । पुरुषं च ततस्सत्यमच्युतं च युधिष्ठिर ॥
अनिरुद्धं च मां प्राहुर्वैखानसविदो जनाः । अन्ये त्वेवं विजानन्ति मां राजन् पाञ्चरात्रिकाः ॥
वासुदेवं च राजेन्द्र सङ्कर्षणमथापि वा । प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तिं प्रचक्षते ॥
एताश्चान्याश्च राजेन्द्र संज्ञाभेदेन मूर्तयः । विद्वज्जनार्थान्तरायैव मामेवं चार्चयेद्बुधः ॥

इत्यादिभिर्वैष्णवशास्त्रभेदत्वेन समपरिपठितयोर्वेदाविरुद्धयोर्भगवद्यामुनमुनिवासुदेवस्वामिप्रभृतिभिः स्थापितप्रामाण्ययोरविशेषवैष्णवसमयपरिग्रहयोः श्रीमत्पञ्चरात्रवैखानसशास्त्रयोर्द्वयोरप्यप्रामाण्यप्रसङ्गात् । अथैतानि परस्परापकर्षवचनान्यसङ्कीर्णबहुकोशपाठावलोकनादासभाषितानीति मन्येमहि, तथाऽपि * प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम् इत्यादिषूदितहोमप्रशंसार्थमनुदितहोमनिन्दावत्प्रक्रान्तशास्त्रप्राशस्त्य[प्रतिपादक]मात्रपरत्वेन नेतव्यानि । * नहि निन्दा निन्द्यं निन्दितुं प्रवर्तते अपि तु निन्द्यादितरत्प्रशंसितुमिति न्यायविदः । एवमेव * साङ्गेषु वेदेषु निष्ठामलभमानश्शाण्डिल्यः पञ्चरात्रशास्त्रमधीतवान् इत्यादौ वेदनिन्दाप्रसङ्गेन वेदविरोधमाशङ्क्य स्वशास्त्रप्रशंसादिपरत्वेन पर्यहारि । भाष्यकारैर्न्यदर्शि च—* ऋग्वेदं भगवोऽध्येमि इत्यारभ्य, * सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित् इति भूमविद्योपक्रमगतस्य तदितरसमस्तवेदाध्ययनादात्मवेदनालाभवचनस्य भूमविद्याप्रशंसामात्रे तात्पर्यम् ।

अपि च— * चत्वार एकतो वेदा भारतं चैकमेकतः । समागतैस्सुरर्षिभिस्तुलामारोपितं पुरा ॥
महत्त्वे च गुरुत्वे च ध्रियमाणे ततोऽधिकम् । महत्त्वाच्च गुरुत्वाच्च महाभारतमीरितम् ॥

इत्यादीनि वचनानि वेदेभ्योऽपि महाभारतस्याधिक्यं ब्रुवाणानि वेदार्थोपबृंहणरूपातिशयशालिमहाभारतप्रशंसार्थानि, न पुनर्वेदानामपकर्षगन्धमभिदधते ॥

किञ्च, बह्वृचाम्नाये * ऋग्गाथाभ्यां वाक्तनितं यजुर्निगमो वृथावाक् । तदमितं सामाधेयकञ्च गेयः इति यजुरादिनिन्दा ऋग्वेदस्तुत्यर्थैव; एवमिहापि श्रीवैखानसपञ्चरात्रयोः परस्परापकर्षवचनानामाप्तत्वेऽपि स्वाभिमतस्तुत्यर्थतयैव निर्वोढव्यम्; अन्यथा सर्वोपप्लवप्रसङ्गात् । अविलम्भणीयवचनानां यथाश्रुतस्वीकारेऽतिप्रसङ्गाच्च । एवमेव हि शैवागमे कारणतन्त्रे जल्प्यते—

* शैवस्सर्वाधिकारी स्यात् स्वकीये च परत्र च । शैवास्सर्वं प्रकुर्वन्ति ये गृहस्था द्विजोत्तमाः ॥
यामले मातृतन्त्रे च कापाले पञ्चरात्रके । बौद्धे वाऽप्यार्हते चैव लागुडे वैदिकेऽपि च ॥
अन्येष्वपि च मार्गेषु तत्तच्छास्त्रानुसारतः । शैवास्सर्वं प्रकुर्वन्ति तल्लिङ्गस्थापनादिकम् ॥
मुख्यत्वादिह शैवस्य मुख्यमाहात्म्यतोऽपि च । अधिकारोऽस्ति शैवस्य नान्येषां शिवदर्शने ॥ इति ।

ननु पाशुपताधिकरणे *पत्युरसामञ्जस्यात् इति पशुपतिप्रणीतानां शैवादीनां सर्वेषां तन्त्राणामप्रामाण्यसमर्थनादेतस्मिन्नपि वचने *जैनालयं प्रविष्टस्तु सवासा जलमाविशेत् इत्यादिभिर्दर्शनस्पर्शनाद्ययोग्य[विषय]जैनयामलबौद्धादिबाह्यमततन्त्रैस्सह वैदिकस्य समभिव्याहाराद्वैदिकानर्हेषु बाह्येषु च शैवस्याधिकारोक्तेः,

*शैवान् पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान् । विकर्मस्थान् द्विजान् शूद्रान् सचेलो जलमाविशेत् ॥

इति विज्ञानेश्वरसंगृहीतधर्मशास्त्रवचनेन स्पर्शादिषु परिहरणीयत्वेन प्रसिद्धस्य शैवस्य वैदिकदेवताप्रतिष्ठादिषु मुख्याधिकारित्वजल्पनाल्लोके च शै[वै:]वे कचिदपि भगवत्प्रतिष्ठाद्यनुमत्यभावात्तत्स्पर्शादिष्वपि—

*स्थापिते पञ्चरात्रेण देवे षड्भिरथाध्वभिः । प्रतिष्ठादौ कृते मोहाद्दोषस्सर्वेक्षयात्मकः ॥
शान्तिश्च तस्य भूयोऽपि पञ्चरात्रोक्तवर्त्मना । प्रतिष्ठाप्य सहस्रेण कलशैः स्नपनं हरेः ॥
महोत्सवश्च कर्तव्यो ध्वजारोहणपूर्वकः ।

इति पाद्मादिप्रतिपादितप्रायश्चित्तविशेषानुष्ठानदर्शनाच्च । शैवस्तुतिवचनस्यास्य—

*त्वं हि रुद्र महाबाहो मोहशास्त्राणि कारय । दर्शयित्वाऽल्पमायासं फलं शीघ्रं प्रदर्शय ॥

इत्यादिप्रकारेणाप्रामाण्यमनीश्वरप्रक्षिप्तत्वमतिवादरूपतया स्वीयतन्त्राधिकारिशैवस्तुतिमात्ररूपत्वं वा कल्पनीयमिति चेत्, हन्त तर्ह्यनयोरपि श्रीवैष्णवमार्गभेदयोरन्यतरस्येतरतन्त्रप्रविष्टैरप्रवेशनात्, परस्परसङ्करप्रसङ्गे च तत्तत्तन्त्रोक्तप्रायश्चित्तानुष्ठानदर्शनाच्च परस्परापकर्षपरस्परमर्यादाप्रवेशनवचनानि प्रक्षिप्तत्वादप्रमाणान्यतिवादरूपतया स्वतन्त्रस्तुतिपराणीति वा निर्वाहकत्वात्परम्परागतमर्यादापरित्यागेन परस्परप्रवेशो न क्षम इति मध्यस्थदृष्ट्या संपश्यध्वम् । तत्र पक्षे पतन्तस्तु पतन्त्येव पर[म]धर्ममर्यादोपप्लवात् । अतो वैखानसपञ्चरात्रयोः पञ्चरात्रावान्तरभेदचतुष्कस्य तत्तदवान्तरतन्त्रभेदानां च परस्परमसङ्करेणैव सर्वदा स्थितिरिति सिद्धम् । तत्रेदन्तु किञ्चिद्विमर्शनीयम्—यत्तत्पारमेश्वरकालोत्तरयोः प्रमाणभूतानामेव भगवच्छास्त्रसिद्धान्तानामाकारान्तरेणोत्कर्षापकर्षयोगात्प्राक्प्रवृत्तापकृष्टसिद्धान्तपरित्यागेनाप्युत्कृष्टसिद्धान्तप्रवेशनं न दोषाय प्रत्युत गुणायैव; उत्कृष्टतन्त्रपरित्यागेन निकृष्टतन्त्रप्रवेशने समानतन्त्रसङ्करे च दोष इत्युक्तम् । इदमपि दत्तोत्तरप्रायम्, तथा हि; श्रीसात्त्वते द्वाविंशे परिच्छेदे समयिपुत्रकसाधकलक्षणोक्त्यनन्तरमाचार्यलक्षणे *साङ्गर्यमागमानां च वेत्ति वाक्यवशात्तु यः इत्युक्ता शास्त्रसङ्करशोधनार्थमनन्तरमुच्यते—

*तत्र वै त्रिविधं वाक्यं दिव्यं च मुनिभाषितम् । पौरुषं चारविन्दाक्ष तद्भेदमवधारय ॥
यदर्थाढ्यमसंदिग्धं स्वच्छमल्पाक्षरं स्थिरम् । यत्पारमेश्वरं वाक्यमाज्ञासिद्धं हि मोक्षदम् ॥
प्रशंसकं वै सिद्धीनां संप्रकर्तनमप्यथ । सर्वेषां रञ्जकं गूढं निश्चयीकरणक्षमम् ॥
मुनिवाक्यं च तद्विद्धि चतुर्वर्गफलप्रदम् । अनर्थकमसंबद्धम[पा]ल्पार्थं शब्दडम्बरम् ॥
अनिर्वाहकमाद्योक्तेर्वाक्यं तत्पौरुषं स्मृतम् । हेयं चानर्थसिद्धीनामाकरं नरकावहम् ॥
प्रसिद्धार्थानुवादं यत् सङ्गतार्थं विलक्षणम् । अपि चेत्पौरुषं वाक्यं ग्राह्यं तन्मुनिवाक्यवत् ॥ इति ।

अत्र *अनिर्वाहकमाद्योक्तेः इति दिव्यमुनिभाषितयोर्विरुद्धार्थत्वमुच्यते । असंबद्धमिति पूर्वापरविरुद्धत्वम् । तदिदमुभयमपि निकृष्टसंहितात्यागेनोत्कृष्टसंहितापरिग्रहवचने श्रीसात्त्वतपौष्करनादीयपाद्मादिविरोधात् सामान्येन

सर्वसङ्करनिषेधपरस्परपूर्वापरग्रन्थविरोधमवधारयन्तो धृष्टबुद्धयः कतिचन तन्त्रतन्त्रान्तरमर्यादामवृत्तस्थानाक्रमणलुब्धागम-मन्त्रसिद्धान्ताभिमानिपुरुषकृतप्रक्षेपोऽयमिति मन्यन्ते ॥

अन्ये तु—प्रागुक्तन्यायेन मन्त्रसिद्धान्तादिस्तुतिपरतामातिष्ठन्ते । न स्वल्वेतावता कालेन कल्पारम्भकृतयुगा-दिभृति संतन्यमानेषु सात्वतशास्त्रसंहितास्रोतोभेदेषु अपकृष्टसंहितां परित्यज्योत्कृष्टसंहितां कश्चित्परिजग्राहेति महाभारते श्रीमद्वाराहादिषु वा परश्शतेषु पञ्चरात्रप्रस्तावेषु महर्षयस्सूचयन्ति, नचार्वाचीनैरप्याचार्यैरितःपूर्वं तथाकृतमिति संप्रदाय-विदश्शिष्टा विदामासुः । अतश्शिष्टानुष्ठानबलादेव स्तुतिपरत्वमध्यवस्यामः । यदि चैवं शास्त्रार्थस्स्यात्, एतावता कालेन तन्त्रतन्त्रान्तरस्थानानि सर्वाणि मन्त्रसिद्धान्तादिना व्याप्येरन् । इतःपूर्वमनुवृत्तावपि परस्तादेतद्बलावलम्बनेन तन्त्रतन्त्रान्तर-सिद्धान्तयोस्सर्वत्रोच्छेदः प्रसज्येत । अथ चेदैहिकभोगादिप्राचुर्यात्पुरुषाणां च त्रिवर्गप्रावण्यातिशयात्तन्त्रतन्त्रान्तरयो-स्सर्वत्रानुवृत्तिस्संभवतीति मन्वीथाः, तर्हि राजराष्ट्रसमृद्ध्यर्थेषु स्थानेष्वैहिकफलप्रचुरयोरेव तन्त्रतन्त्रान्तरयोर्यथापूर्वमवस्थान-मुचितम्, नहि राजसु वा राष्ट्रेषु वा सुलभाः केवलमुमुक्षवः । **श्रीकरसंहितायां** च प्रागुक्तस्यैव सिद्धान्तचतुष्टयस्य वेद-सिद्धान्तो दिव्यसिद्धान्तस्तन्त्रसिद्धान्तः पुराणसिद्धान्त इति प्रागुक्तांदूरविप्रकृष्टैर्नामभेदैर्विभागमुक्त्वा पुराणसिद्धान्तसंज्ञितस्य तन्त्रान्तरसिद्धान्तस्य मोक्षप्रदस्यापि विशेषतः श्रीकरत्वमुक्तम्—

* एतत्पुराणसिद्धान्तं श्रीकरं च विशेषतः । इदं श्रीकरसंज्ञाख्यं भोगमोक्षफलप्रदम् ॥ इति ।

अस्य च पूर्वापरं सर्वं **सन्मार्गदीपिकायां** विस्तरेण द्रष्टव्यम् । भोगमोक्षफलप्रदमित्यस्य श्रीकरसंज्ञसंहिता-विशेषान्वितत्वेऽपि तस्यास्संहितायाः पुराणसिद्धान्तान्तःपातित्वाद्विशेष इति नियमाच्चकारेणानुक्तसमुच्चयाच्च कृत्स्नस्यापि तन्त्रान्तरसिद्धान्तस्य विशेषतः श्रीकरत्वं मोक्षप्रदत्वं च सिद्धम् । श्रीकामाश्च प्रायशो राजानो राष्ट्रवर्तिनश्चेति तत्समृ-द्ध्यर्थेषु साधारणस्थानेषु तन्त्रान्तरसिद्धान्तस्यौचित्यमधिकम । निस्सङ्गास्तु स्वगृहादिष्वागमसिद्धान्तादिमर्यादामनुतिष्ठन्तु नाम ; अतस्तन्त्रतन्त्रान्तरस्थानेष्वन्यसिद्धान्तावतरणवचनमपवर्गप्रत्यासत्त्यतिशयनिबन्धनप्राशस्त्याधिक्यपरमिति मन्तव्यम्। तदपेक्षयैवेदमुक्तं **कालोत्तरे**—* स्वयं व्यक्तं तथा दिव्यमुत्कृष्टफलदं यतः इति ॥

अपरे त्वाहुः—व्यवस्थितस्थानविषयमेवेदमपकृष्टसंहितात्यागेनोत्कृष्टसंहितापरिग्रहवचनमिति । तथा हि ; यदुक्तं **कालोत्तरे**—* अनेकभेदभिन्नं च पञ्चरात्रास्त्यमागमम् । पूर्वमागमसिद्धान्तं मन्त्राख्यं तदनन्तरम् ॥

तन्त्रं तन्त्रान्तरं चेति चतुर्धा परिकीर्तितम् ॥

इति चतुर्धा विभागं सामान्येन प्रतिपाद्य, * नारायणीयमौदध्यमग्निकाश्यपसंज्ञितम् इत्यादिना * शास्त्राण्येतानि सुव्रत इत्यन्तेनागमादिसिद्धान्तेषु चतुर्षु कतिपयसंहितानां निदर्शनमनुक्तानामपि संहितानामुपलक्षणतयोदाहृत्य * एतद्वै पञ्चरात्रास्त्यं शास्त्रं सर्वोत्तमोत्तमम् इति चतुर्विधमपि पञ्चरात्रशास्त्रं सर्वोत्तमोत्तमत्वेन निगम्य—

* चतुर्धा भेदभिन्नं च स्वयंव्यक्तादिभेदतः । स्वयंव्यक्तं हि सिद्धान्तमागमास्त्यं पुरोदितम् ॥
मन्त्रसिद्धान्तसंज्ञं यत्तद्दिव्यं परिकीर्तितम् । तन्त्रसंज्ञं हि यच्छास्त्रं तत्सैद्धं समुदाहृतम् ॥
तन्त्रान्तरं तु यत्प्रोक्तमार्षं तु तदुदाहृतम् ॥

इति प्रागुक्तानामेवागमादिसिद्धान्तानां स्वयंव्यक्तदिव्यसैद्धार्षरूपेण वक्ष्यमाणोपयोगिसंज्ञान्तराणि निर्दिश्य,

* स्वयंव्यक्तेन दिव्येन पूज्यमाने तु कौतुकात् । तन्त्रतन्त्रान्तराभ्यां तु न कुर्याद्देवपूजनम् ॥

पूज्यते यदि संमोहात्स्थाननाशो भवेद्ध्रुवम् । राज्ञो राष्ट्रस्य कर्तुश्च मरणं जायते ध्रुवम् ॥
तस्मात्पूजा न कर्तव्या तन्त्रतन्त्रान्तराध्वना । अनुक्तं यत्स्वयंव्यक्ते दिव्यशास्त्रे द्विजोत्तम ॥
यत्किञ्चित्तत्तदादेयं तन्त्रतन्त्रान्तरे तथा । तन्त्रतन्त्रान्तरोक्तेन पूज्यमानेऽपि देशिकैः ॥
तद्विधानं परित्यज्य स्वयंव्यक्तोक्तवर्त्मना । दिव्योक्तविधिना कार्यं पूजनं प्रतिमासु च ॥
स्वयंव्यक्तं तथा दिव्यमुत्कृष्टफलदं यतः । तस्मादुत्कृष्टशास्त्रोक्तमार्गेणैव प्रपूजयेत् ॥

इति तन्त्रतन्त्रान्ताभ्यां पूज्यमानेऽपि तद्विधानं परित्यज्योत्कृष्टफलदत्वेनोत्कृष्टेन स्वयंव्यक्तेन दिव्येन च शास्त्रेण पूजनं युक्तमिति ; तदिदं सर्वस्थानविषयम्, प्रतिनियतस्थानविषयं वा ? इति विचारणीयम् ; यदि सर्वस्थानविषयं तदा परिगृहीततमसात्त्वताद्यनेकसंहिताग्रन्थसङ्कोचः प्रसज्येत । अपि चासिन्नेवोत्तरत्र स्वयंव्यक्तादिस्थानलक्षणनिरूपणाध्याये तत्तत्स्थानलक्षणमुक्त्वा पश्चाच्चतुर्विधपूजानिर्णयाध्याये चतुर्विधपूजनस्य यथाक्रमं * वैदिकं तान्त्रिकं श्रौतं मिश्रं चेति चतुर्विधम् इति प्रक्रम्य मूलश्रुतिदिव्यमन्त्रप्रवृत्तश्रुतितत्संभेदनिमित्तनामधेयानि प्रतिपाद्यानन्तरमुच्यते—

* वैदिकैस्तान्त्रिकैर्वाऽपि श्रौतैर्वा द्विजसत्तम । स्वयंव्यक्ते तु भवने मिश्रैर्वा देवमर्चयेत् ॥
ऋष्यादिपूजिते स्थाने पारम्पर्यक्रमं विना । विशेषं नाचरेत्किञ्चिद्राजराष्ट्रसमृद्धये ॥ इति ।

अत्र स्वयंव्यक्तस्थाने चतुर्णां पूजाविशेषाणां यथारुचि विकल्पेन परिग्रहं प्रतिपाद्य ऋष्यादिपूजितेषु स्थानान्तरेषु पारम्पर्यक्रममन्तरेण मात्रयाऽपि विशेषं नाचरेदित्युक्तत्वात् स्वयंव्यक्ते विकल्पेन कर्मणां प्रवृत्तिस्संभवतीति तत्रैवापकृष्टफलशास्त्रपरित्यागेनोत्कृष्टफलशास्त्रपरिग्रहवचनं लिङ्गवशान्नेतव्यम् । * पवित्रं दक्षिणे कर्णे इतिलिङ्गात् * दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्रः इत्यस्य स्थाननियमवत्प्रतिनियतस्वयंव्यक्तेषु स्थानेष्विति व्यक्तमवसीयते । अस्मिन्नेवोत्तरत्र प्रायश्चित्ताध्यायेऽपि * वैदिकैस्तान्त्रिकैर्वेत्यादिश्लोकद्वयं पुनः पठितम् ; * मानुषे भवने देवं तन्त्रमार्गेण पूजयेदिति चोक्तम् ।

पुनश्च— * यद्विम्ब येन शास्त्रेण समारब्धं पुरा द्विज । प्रासादं वा ततस्तेन शास्त्रेणैव तदर्चयेत् ॥
तच्छास्त्रमन्तरेणैव यो यजेदन्यवर्त्मना । राज्ञो राष्ट्रस्य कर्तुश्च स नाशं कर्तुमिच्छति ॥
न कदाचिदपि प्राज्ञः प्रकुर्याच्छास्त्रसङ्करम् । शास्त्रसङ्करदोषेण महान् दोषो भवेद्ध्रुवम् ॥ इत्युक्तम् ;

अतोऽप्यत्रापकृष्टशास्त्रपरित्यागेनोत्कृष्टशास्त्रपरिग्रहवचनं स्वेनैव नानाशास्त्रार्थविकल्पयोग्यत्वेन प्रतिपादिते स्वयंव्यक्ते स्थाने न स्थापनीयमिति सिद्धम् । यदपि चात्र स्थानविशेषमधिकृत्य शास्त्राधिकारिणोर्नियमः क्रियते—

* स्वयंव्यक्ते तथा दिव्ये दिव्यशास्त्रोक्तवर्त्मना । मूलागमसमेतेन मुख्यैर्भागवतैस्सदा ॥
पूजनं प्रयतैः कार्यं पञ्चकालपरायणैः । वैष्णवायतने कार्यं केवलैः पाञ्चरात्रिकैः ॥
सान्तानिकैः प्रविष्टैर्वा मुनिवाक्योक्तवर्त्मना । अनुक्तान्यर्थजालानि सिद्धान्तेष्वागमादिषु ॥
अन्योन्यापेक्षया प्राह्यं शास्त्रेष्वन्यन्न चाहरेत् ॥ इति,

एतदपि प्रकृष्टस्थाने प्रकृष्टाधिकारिणां प्रकृष्टशास्त्रादिपरिग्रहौचित्यमप्रकृष्टस्थानेऽप्रकृष्टाधिकारिणामपकृष्टशास्त्रादियोग्यत्वं च स्थापयति, अन्यथा वैष्णवायतने कचिदपि दिव्यशास्त्रानवतारप्रसङ्गात् । मानुषेऽपि भवने मुख्याधिकारिभिः प्रतिष्ठिते दिव्यशास्त्रेण पूजनादिकर्तव्यत्वस्य पारमेश्वरनिरूपणे दर्शयिष्यमाणत्वाच्च । अत्रापि सिद्धान्तसङ्करपरिहार एव * अनुक्तान्यर्थजालानि इत्यादिना स्थापितः । यत्पुनः पारमेश्वरे स्वयंव्यक्तनिर्णयाध्याये—

* स्वयंव्यक्तं तथा सिद्धविबुधैश्च प्रतिष्ठितम् । मुनिमुख्यैस्तु गन्धर्वैर्यक्षैर्विद्याधरैरपि ॥
रक्षोभिरघमैर्मुख्यैः स्थापितं मन्त्रविग्रहम् । दिव्यशास्त्रोक्तविधिना पूजयेच्छास्त्रकोविदः ॥ इति,

इदमपि दिव्यशास्त्रस्य सर्वस्थानेषु [सद्भा]संभवं दर्शयति, नतु शास्त्रान्तरपरित्यागेन दिव्यप्रवेशम् ।

यच्चानन्तरमुक्तम्—* स्थापितं मनुजैर्देवं मुनिवाक्येन यत्र तु । पूजयेद्विज तत्रापि ज्ञानिभिस्तत्त्वदर्शिभिः ॥
वासुदेवैकनिष्ठैस्तु देवतान्तरवर्जितैः ॥ इति,

इदञ्च व्यामिश्रमुनिवाक्यस्थापिते स्थाने व्यामिश्रयागमुक्तैर्वासुदेवैकनिष्ठैः पूजनमात्रं प्रशस्तमित्याह, न पुनर्मुनिवाक्यपरित्यागेनास्याधिकारानुगुणोत्कृष्टशास्त्रेण पूजनं विदधाति, प्राक्प्रवृत्तशास्त्रानुसारेण तैरपि तत्र पूजनस्य युक्तत्वात् । उत्कृष्टशास्त्रनिष्ठानामप्यपकृष्टशास्त्रधर्मेषु लोकानुग्रहार्थं प्रवृत्तेः संहितान्तरादिसिद्धत्वस्य प्रागेव दर्शितत्वात् । यच्चेदमनन्तरमभिधीयते—* व्यामिश्रयागमुक्तैस्तु तीव्रभक्तिसमन्वितैः । स्थापितं मनुजेन्द्रैस्तु निषद्वाकादिकोविदैः ॥
अर्चयेद्देवदेवेशं दिव्यशास्त्रोक्तवर्त्मना ॥ इति,

इदमपि दिव्यशास्त्रेण स्थापितस्थानविषयमनुसन्धेयम् । इदं त्ववशिष्यते ; यदुक्तम्—

* मुनिवाक्योक्तमार्गेण पूजनं यत्र वर्तते । तत्रापि दिव्यमार्गाच्चेत्पूजनं कर्तुमिच्छति ॥
मुनिवाक्यं परित्यज्य दिव्यमार्गेण पूजयेत् । भवेत्सन्निधिमाहात्म्यं कालं कल्पशतावधि ॥
दिव्यमार्गेण पूजाद्यं वर्तते यत्र नित्यशः । तत्र दिव्यं परित्यज्य कदाचिच्च महामते ॥
मुनिवाक्योक्तमार्गेण न कुर्यात्पूजनादिकम् । कुर्याद्वा यदि वा मोहात् विप्रस्संमूढचेतनः ॥
स वृथार्थश्चिरात्तस्य भक्तिबीजेन वै सह । समन्त्रकर्मतन्त्रं च सिद्धयश्च पराङ्मुखाः ॥
इहैव शीघ्रं विप्रेन्द्र देहान्ते शतसन्ततिः । घोरं प्रयाति नरकं राजा राष्ट्रं च नश्यति ॥
तस्मात्सर्वप्रयत्नेन दिव्यमार्गं तु न त्यजेत् ॥ इति,

अस्यापि प्रागुक्तन्यायेन दिव्यमार्गप्रशंसापरत्वं सुव्यक्तम् । तत्रापीत्यपिशब्दादिलिङ्गात् * दिव्यमार्गं तु न त्यजेत् इति निगमनेन तत्रैव तात्पर्यविश्रमाच्च । यद्वा कालोत्तरोक्तन्यायेन विकल्पतश्चतुर्विधपूजायोग्यं स्वयंव्यक्तस्थानं * मुनिवाक्योक्तमार्गेण पूजनं यत्र वर्तते इत्यनूद्य, तत्रापि दिव्यमार्गेण पूजनेच्छायां मुनिवाक्यपरित्यागेन दिव्यमार्गेण पूजनमविरुद्धमित्युच्यते ; नत्वत्र मुनिवाक्यस्थापितस्थाने दिव्यमार्गप्रवेशः क्वचिदपि प्रस्तूयते, अपि तु मुनिवाक्यपूजित एव । सा च मुनिवाक्येन पूजा स्वयंव्यक्तेऽपि पूर्वं यदि कर्तेत, तत्र कुतश्चित्प्रमाणात्स्वयंव्यक्तक्षेत्रत्वेऽवसिते सति मुनिवाक्यपरित्यागेनापि दिव्यशास्त्रोक्तविधिना दिव्यशास्त्राधिकारी पूजयेदित्युक्तं भवति ।

एतेन दिव्याद्यायतननिर्णयाध्यायोक्तः प्रपञ्चोऽपि प्रत्युक्तः । तथा हि ;

* दिव्याद्यायतनानां च पूजाद्यं यत्त्वयोदितम् । शास्त्रं दिव्यादिभेदेन यथावद्वक्तुमर्हसि ॥

इति पृष्टस्सनकः * वासुदेवेन यत्प्रोक्तं शास्त्रं भगवता स्वयमित्यादिना साक्षाद्भगवत्प्रणीतं ब्रह्मरुद्रेन्द्रप्रमुखैः प्रवर्तितं शास्त्रं दिव्यमित्युक्त्वा,

* ब्रह्मरुद्रमुखैर्देवैर्ऋषिभिश्च तपोधनैः । स्वयं प्रणीतं यच्छास्त्रं तद्विद्धि मुनिभाषितम् ॥

इति विभज्य, * एतत्तु त्रिविधं विद्धि सात्त्विकादिविभेदतः इति मुनिभाषितस्य त्रैविध्यं प्रस्तुत्य, साक्षाद्भगवतः श्रुतार्थमात्रनिबन्धनरूपं शास्त्रं सात्त्विकम्, भगवतः श्रुतमेकदेशं स्वयोगमहिमसिद्धं चाशेषं सङ्कलय्य ब्रह्मादिभिस्तच्छिष्यैश्च स्वयं प्रणीतं शास्त्रं राजसम्, केवलसत्त्वयोगविकल्पोत्थैरर्थैः कृतं शास्त्रं तामसमिति मुनिभाषितस्य त्रैविध्यमुक्त्वा, * केवलं मनुजैर्यत्तु कृतं तत्पौरुषं भवेत् इति दिव्यान्मुनिभाषिताच्च व्यक्तीभवतः प्रामाण्यम् (?) अयोगिभिर्मनुजमात्रैः प्रणीतं पौरुषं वाक्यं प्रतिपाद्य, पुनर्दिव्यसात्त्विकराजसतामससंज्ञितानि प्रमाणभूतान्येव शास्त्राणि संहिताविशेषनियमेनापि विभज्य, सात्त्वतपौष्करजयाख्यादीनि शास्त्राणि दिव्यानि; ईश्वरभारद्वाजसौमन्तवपारमेश्वरवैहायसचित्रशिखण्डिसंहिताजयोत्तरादीनि सात्त्विकानि, सनत्कुमारपद्मोद्भवशातातपतेजोद्रविणमायावैभविकादीनि राजसानि, पञ्चप्रश्नशुकप्रश्नतत्त्वसागरादीनि तामसानि इति संहिताविभागनिर्देशानन्तरमुच्यते—

* तामसेन तु मार्गेण पूजाद्यं यत्र वर्तते । तत्रापि राजसेनैव पूजाद्यं सिद्धिदं भवेत् ॥
राजसेन तु पूजाद्यं वर्तते यत्र नित्यशः । तत्रापि सात्त्विकेनैव पूजाद्यं शुभदं सदा ॥
सात्त्विकेन तु पूजाद्यं वर्तते यत्र नित्यशः । तत्र राजसमार्गेण न कुर्यात्पूजनादिकम् ॥
यत्र राजसमार्गेण प्रवृत्तं त्वर्चनादिकम् । तत्र तामसमार्गेण न कुर्यादर्चनादिकम् ॥
विविधानां राजसानामन्योन्यं स्यान्न सङ्करः ॥

इति मुनिभाषितेषु त्रिषु शास्त्रेषूत्कृष्टमध्यमाधमसंज्ञानिर्दिष्टेषु अपकृष्टगुणसंज्ञितशास्त्रप्रवृत्तिस्थाने तत्परित्यागेनाप्युत्कृष्टगुणसंज्ञितशास्त्रेण पूजाद्यं सिद्धिदम्, उत्कृष्टगुणसंज्ञितशास्त्रप्रवृत्तिस्थाने तद्विपरीतेन शास्त्रेण पूजादिकं न कर्तव्यम्, न तु सार्वत्रिकत्वम् । ननु गुणसंज्ञितानां चान्योन्यं न सङ्करः कार्यमित्युक्तम् । इहापि यत्रेति सामान्यनिर्दिष्टेऽपि प्रागुक्तन्यायेन प्रभूतानुभावितया सर्वंसहस्वयंव्यक्तक्षेत्रविशेषविषयत्वं मन्तव्यम् । यद्वा चिरकालराष्ट्रक्षोभादिना विच्छिन्नपारम्पर्यप्रत्यभिज्ञानेषु किङ्कर्तव्यतामूढान् प्रति पूर्वमपकृष्टशास्त्रप्रवृत्तावपि तदज्ञानदशायामुपप्लवाभिसन्ध्यभावात्सर्वाधिकारिणां मुख्यानामुत्कृष्टशास्त्रपरिग्रहौचित्यमिहोच्यते । तत्र पुनः कुतश्चित्प्रमाणात् प्राक्प्रवृत्तशास्त्रज्ञानेन दिव्यस्यापरित्याज्यत्वं च; इदं च तत्रापीत्यतिवादलिङ्गादपिशब्दात् । अप्पिशब्दस्यातिवादलिङ्गत्वं * चण्डालमपि वृत्तस्थं तं देवा ब्राह्मणं विदुः इत्यादिप्रयोगेषु प्रसिद्धम् । अत एव चात्रैव पुनस्सङ्करपरिहारे संरम्भः क्रियते—

* भवेद्दिव्यादिकं सम्यग् ज्ञात्वा सर्वं समाचरेत् । यो न ज्ञात्वा तु साङ्कर्यात्पूजाद्यमनुतिष्ठति ॥
स हि सर्वस्य जगतस्साङ्कर्यं कुरुते सदा । विशेषात्स्वस्य वंशस्य तस्मादापद्यपि द्विजः ॥
न कुर्याच्छास्त्रसाङ्कर्यं हितैषी शास्त्रकोविदः ॥ इति ।

अतो यथोक्त एवार्थः ॥

केचित्तु—* मुनिवाक्योक्तमार्गेण पूजनं यत्र वर्तते । तत्रापि दिव्यमार्गाच्चेत्पूजनं कर्तुमिच्छति ॥
मुनिवाक्यं परित्यज्य दिव्यमार्गेण पूजयेत् ।

इत्यादीनां वचनानामधिकारिविशेषविषयतया व्यवस्थामिच्छन्ति; * व्यामिश्रयागमुक्तैस्तु तीव्रभक्तिसमन्वितैः इति प्रकमादैहिकामुष्मिकसांसारिकफलविरक्तानामपवर्गासक्ततमशास्त्रपरिग्रहस्य युक्तत्वाच्च । तत्तन्त्रोक्तसांसारिकफलासक्तानां तु यथापूर्वं परिग्रह इति । न चात्र राजसतामससंज्ञितेषु शास्त्रेषु अकुतोभयमाप्यमाशङ्कनीयम्—

* स्याच्चागरद्राविडवेसरं च क्रमेण । सत्त्वरजस्तमांसि ।
महीसुरोर्वीपतिवैश्यकास्ते हरिर्विधाता हर आदिदेवः ॥

इति विमानक्रियादिविषयोत्तममध्यमत्वादिविवक्षया तद्गुणोक्तेः, प्रमाणभूतशास्त्रविषयेष्वेव सात्त्विकराजसतामसविभागस्य * यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः इत्यादिभिर्भगवद्गीतायामपि प्रतिपादितत्वात् । अप्रामाण्यस्य पौरुषस्य वाक्यस्य * केवलं मनुजैर्यत्तु कृतं तत्पौरुषं भवेत् इति पृथङ्निर्देशात् ।

* सर्वत्र पौरुषे वाक्ये तद्वाक्यमविरोधि यत् । केवलं तद्विधानेन न कुर्यात्स्थाणुवादिकम् ॥

इति हि पौरुषसंज्ञिते हि वाक्ये [विरुद्धा]विरुद्धांशसद्भावोऽत्र दर्शितः, अतस्सात्विकराजसतामससंज्ञानिवेशोऽत्र सत्त्वरजस्तमःप्रचुरतत्तत्फलसिद्धिविशेषतारतम्याभिप्रायेणेति मन्तव्यम् । कात्स्न्र्येन हि भगवच्छास्त्रस्य प्रामाण्यं प्रागेव प्रतिपादितम् । न चात्र भगवद्व्यतिरिक्तब्रह्मादिपुरुषकृतांशेषु कारणदोषस्संभवति—* पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् इति स्ववक्तृके शास्त्रे भगवतैव तेषामृषीणां तत्तत्पुण्यविशेषानुसारेण नित्येऽपि वेदे सूत्रकाण्डमन्त्रकृत्त्वकर्तृसंहिताकर्तृत्वस्याधिकारतया समर्पितत्वात् । यथा च व्यासोक्ते महाभारते वैशम्पायनसंहितादिभेदः, एवमत्रापीति न सङ्कटं किञ्चित् ; अतः कृत्स्नं पञ्चरात्रं प्रमाणम् । तस्यावान्तरसंहितामेदम् ऋगादिवच्चतुर्धा स्थितम्, तद्वदेव यथाधिकारं व्यवस्थितानुष्ठानतया सिद्धान्तादिसङ्करपरिहारेणैव सर्वदाऽनुवर्तनीयम् । तथाऽनु[वर्तने]वर्तमानानां यथाधिकारं साक्षात्परम्परया वा सद्भावासुदेवाख्यपरमपुरुषार्थप्राप्तिसाधनमिति सिद्धम् ॥

पञ्चकालव्यवस्थित्यै वेङ्कटेशविपश्चिता । श्रीपाञ्चरात्रसिद्धान्तव्यवस्थेयं समर्थिता ॥

अहितविहितदक्षैर्बाहुभिर्व्यूहभेदैर्निजनिगमशतैश्च व्यक्तभूमा चतुर्भिः ।
प्रथमयुगसमग्रं धर्ममभ्यस्यमानान् प्रशमितकलुषान्नः पातु वैकुण्ठनाथः ॥

इति श्रीपाञ्चरात्ररक्षायां सिद्धान्तव्यवस्थापनाख्यः प्रथमोऽधिकारः ॥

॥ अथ नित्यानुष्ठानस्थापनाख्यो द्वितीयोऽधिकारः ॥

अथादौ समुपक्षिप्तमच्छिद्रं स्थाप्यतेऽधुना । स्वयंप्रयोजनं नित्यं स्वामिसेवनमञ्जसा ॥
ससामान्यविशेषात्मा चर्येयं हृदयङ्गमा । ससूत्रसुमनस्तोमा मालेवामोदिनी विभोः ॥

इह तावदेकैकस्मिन्नहोरात्रे कालपञ्चकविभागेनाभिगमनोपादानेज्यास्वाध्याययोगरूपभगवत्सेवनं स्ववर्णाश्रमजातिगुणनिमित्तादिनियतधर्मसचिवं भगवद्धर्मनिष्ठानां सर्वेषां समानम्, तच्च संहितामेदेषु चोदनाख्याविशेषेऽपि सूत्रभेदेषु समानचोदनाख्यचत्वारिंशत्संस्कारादिवल्लेशतो भिन्नरूपं प्रतिपाद्यते । तत्र रहस्यत्रायविदामेवायं धर्म इत्यविदितसास्वतधर्माणामाकस्मिको भ्रमः, ते तु स्वशास्त्रोक्तप्रकारेण पाञ्चकालिकधर्ममनुतिष्ठन्ति ; इतरे च यथास्वं तत्संहितोक्तप्रक्रिययेति व्यवस्था । वर्गद्वयेऽपि अधिकारिविशेषमात्रेणैव हि भेदोऽनुशिष्यते । यथोक्तं पाद्मे—

* ब्रह्मोवाच—कर्मणादिप्रतिष्ठान्तं कर्म यस्य प्रसिद्धये । तं समाराधनविधिं श्रोतुमिच्छामि साम्प्रतम् ॥
आराधनविधिः कोदृगधिकारी च कीदृशः । भगवंस्तदशेषेण ब्रूहि मे भक्तवत्सल ॥

भगवानुवाच—श्रूयतामभिधास्यामि पृष्टं निरवशेषतः । चतुर्णां ब्राह्मणादीनां वर्णानां कमलासन ॥
अधिकारोऽनुलोमानामपि नान्यस्य कस्यचित् । पूजाविधौ भगवतस्तेऽनुकल्पाधिकारिणः ॥
प्रतिलोमभुवां सूतः प्रथमं तत्र शस्यते । आद्यमेकायनं वेदं सद्ब्रह्मप्रतिपादकम् ॥
तेनैव संस्कृता विप्रा मुख्यकल्पाधिकारिणः । त्रयाणां क्षत्रियादीनामनुलोमभुवामपि ॥
सूतस्य च विशेषेण दीक्षा चात्मपराऽनिशम् । परार्थयजनं कुर्युर्विप्रा मुख्यानुकल्पयोः ॥
नैवाधिकारिणो गौणा दीक्षासंस्कारवर्जिताः । यथैव दीक्षणीयेष्ट्या जायन्ते ब्राह्मणादयः ॥
तथैव दीक्षाविधिना जायमाना यथोदिताः । पूजाविधौ भगवतः प्रकल्पन्तेऽधिकारिणः ॥ इत्यादि ।

एवं संहितान्तरेष्वपि द्राह्यम् । तदिह तत्तत्सिद्धान्तोक्तवर्त्मना चतुर्विधपञ्चरात्राणां साधारणमभिगमनादिपञ्चकम् । मन्त्रसिद्धान्तादिष्वपि हि कालपञ्चकविभागोऽयमुपदिश्यते । यथोक्तं साक्षाद्भगवन्मुखोद्गततया रत्नत्रयमितिप्रसिद्धेषु **जयाख्यसात्त्वतपौष्करेषु, जयाख्य**संहितायाम्—

नारदः— *एको हि श्रूयते देव कालो लोके न चापरः । पञ्च कालास्त्वयोद्दिष्टाः किमेतन्मेऽत्र संशयः ॥

श्रीभगवानुवाच—एकस्यैव हि कालस्य वासरीयस्य नारद । आप्रभातादानिशान्तं पञ्चधा परिकल्पना ॥
पृथक्कर्मवशात्कार्या न काला बहवस्स्मृताः ॥

नारदः— एककालाश्रितानां च कर्मणां लक्षणं वद । परिज्ञातैस्तु यैस्सद्यः कृतकृत्यो भवाम्यहम् ॥

श्रीभगवानुवाच—ब्राह्मान्मुहूर्तादारभ्य प्रागंशं विप्र वासरे । जपध्यानार्चनस्तोत्रैः कर्मवाक्चित्तसंयुतैः ॥
अभिगच्छेज्जगद्योनिं तच्चाभिगमनं स्मृतम् । ततः पुष्पफलादीनामुत्थायार्जनमाचरेत् ॥
भगवद्यागनिष्पत्तिकारणं प्रहरः परम् । तदुपादानसंज्ञं वै कर्मकालपदाश्रितम् ॥
ततोऽष्टाङ्गेन यागेन पूजयेत्परमेश्वरम् । साधिकं प्रहरं विप्र इज्याकालस्तु संस्मृतः ॥
श्रवणं चिन्तनं व्याख्या तपःपाठसमन्विता । स्वाध्यायसंज्ञं तद्विद्धि कालांशं मुनिसत्तम ॥
दिनावसाने संप्राप्ते पूजां कृत्वा समभ्यसेत् । योगं निशावसाने च विश्रमैरन्तरीकृतम् ॥
पञ्चमो योगसंज्ञोऽसौ कालांशो ब्रह्मसिद्धिदः ।

नारदः— श्रुतो मयाऽखिलः पूर्वं भगवद्याग उत्तरः । तस्याङ्गानि विभागेन ज्ञातुमिच्छाम्यहं पुनः ॥

श्रीभगवानुवाच—अन्तःकरणयागादि यावदात्मनिवेदनम् । तदाद्यमङ्गं यागस्य तच्चाभिगमनं भवेत् ॥
पूजनं चार्घ्यपुष्पाद्यैर्भोगैर्यदखिलं मुने । बाह्योपचारैस्तद्विद्धि भोगसंज्ञं तु नारद ॥
मध्वाज्यान्नेन दध्ना वै पूजा च पशुना सह । तत्तृतीयं हि यागाङ्गं तुर्यमन्नेन पूजनम् ॥
निवेदितस्य यद्दानं पूर्वोक्तविधिना मुने । संप्रदानं तु तन्नाम यागाङ्गं पञ्चमं स्मृतम् ॥
बहिस्सन्तर्पणं षष्ठं पितृयागं तु सप्तमम् । प्राणाग्निहवनं नाम्ना त्वनुयागं तदष्टमम् ॥
इत्येतत्कथितं सर्वं यत्त्वया परिचोदितम् । प्रददाम्यचिराद्यद्वै तन्निष्ठानां परं पदम् ॥ इति ।

अचिरादित्यनेनास्य कर्मणः कर्मान्तरेभ्यस्स्वभावतः प्राशस्त्यमुच्यते । स्मरन्ति च व्यासादयः—

*न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम् । सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधिः ॥ इति ।

प्रयाससाम्यवैषम्यानादरेण स्वरूपतः प्राशस्त्यं द्रव्यादिष्वपि विद्यते । यथोक्तमाश्वमेधिके श्रीवैष्णवधर्मशास्त्रे–

* सर्वेषामेव पुष्पाणां सहस्रगुणमुत्पलम् । तस्मात्पद्मं तथा राजन् पद्मात्तु शतपत्रकम् ॥
तस्मात्सहस्रपत्रं तु पुण्डरीकमतः परम् । पुण्डरीकसहस्रात्तु तुलसी गुणतोऽधिका ॥
बकपुष्पं ततस्तु स्यात्सौवर्णं तु ततोऽधिकम् । सौवर्णाच्च प्रसूनात्तु मत्प्रियं नास्ति पाण्डव ॥ इति ।

एवं जपहोमदानादिष्वपि प्रसिद्धम् । **पाद्मेऽप्येवं** प्रसिद्धतमं पञ्चकालसेवनमुक्तम्–

* ब्रह्मोवाच–पञ्चकालविशुद्धानां प्राशस्त्यं भगवन्निह । कथितं पञ्च के कालाः विधयश्चापि पञ्च के ॥
मह्यं जिज्ञासमानाय कथयस्व यथातथम् । न चेद्रहस्यमत्यन्तं यदहं पृष्टवानिदम् ॥

श्रीभगवानुवाच–आद्यं कर्माभिगमनमुपादानं ततःपरम् । इज्या च पश्चात्स्वाध्यायस्ततो योगस्ततः परम् ॥
पञ्च ते विधयस्तेषां कालाः पञ्चैव ते क्रमात् । कल्याणाचरणान्तं यत्कर्मजातं चतुर्मुख ॥
उत्थानादिक्रमादेतदभियानमुदीरितम् । ब्राह्मे मुहूर्ते बुध्येत ध्यायन्नारायणं परम् ॥
उत्थायासीत शयने कीर्तयन्नाम वैष्णवम् ।

इत्यादिरध्यायः कृत्स्नोऽपि पाठ्यः । एवं संहितान्तरेष्वपि तत्र तत्र संग्रहेण विस्तरेण च पञ्चकालविधिर्द्रष्टव्यः ।

किंच– * नमस्ते पञ्चकालज्ञ पञ्चकालपरायण । पञ्चकालैकमनसां त्वमेव गतिरव्यय ॥

इत्यादिषु पाञ्चकालिकधर्मस्य भगवदेकवेद्यत्वं भगवत्प्रियतरत्वं तन्निष्ठानामप्यव्यवधानेन भगवत्प्राप्तिश्च प्रतिपाद्यते ॥

यत्तूक्तम् **भोजराजेन प्रयोगपद्धतिरत्नावल्यां**–* तत्र सङ्गवादयः कालाः अहरहः प्रवर्तन्ते, * सङ्गवस्समो विष्णुप्रियो धर्मो विराग इति पञ्चकाला अध्यात्मविद्भिरुपदिष्टाः, उदयात्पञ्च नाड्यस्सङ्गव उक्तः, तस्माद्विगुणमात्रात्सम उपदिश्यते, तावता विष्णुप्रिय इत्यादि । तत्र पुष्पविशेषाराध्यविशेषनिर्णयार्थोऽयं कालविभागः, न त्वभिगमनादि-पञ्चककर्तव्यार्थः । तथा हि पूर्वमुक्तम् तत्र सङ्गवे वैकुण्ठस्य प्रीतिः, समेऽनिरुद्धस्य, विष्णुप्रिये शिंशुमारस्य, धर्मे वडवामुखाग्नेः, विरागे कपिलस्येत्येवं पञ्चानां पञ्चप्रीतिकालविशेषाः इति; अतो जयाख्यसंहितोक्तप्रकारेणैवाभिगमनादि-पञ्चकव्यवस्था नित्या, अन्यत्काम्यादिकम्; एवं दिनचर्यामर्यादायां स्थितायां केषाञ्चित् त्रैकाल्यार्चनादिविधानानि विषुवायनोपरागजन्मत्रयद्वादशीपर्वश्रवणादिवैशेषिकार्चनान्यपि यथाबलं तदन्तःपातेन नेतव्यानि । अशक्तमधिकृत्यैव समाहृत्यानुष्ठानं क्वचिद्विधीयते । सच्छिद्रपञ्चकालता च तावन्मात्रयोग्यस्यैव, अन्यार्थकर्मान्तरितत्वं सच्छिद्रत्वम् ।

* द्वादशाक्षरतत्त्वज्ञश्चतुर्व्यूहविभागवित् । अच्छिद्रपञ्चकालज्ञस्स तु भागवतः स्मृतः ॥

इति तु पूर्णस्य मुख्याधिकारिणः स्तुतिः, ननु तस्यैव पाञ्चकालिकभागवतत्वप्रतिपादनपरम् ।

* चतुर्व्यूहविभागज्ञः पञ्चकालपरायणः । द्वादशाक्षरनिष्ठो यस्स वै भागवतोत्तमः ॥

इति शाण्डिल्यवचनमपि तथैव । एवं द्वादशाक्षरोपादानमपि व्यापकान्तरोपलक्षणम् । स्वसंहितोक्तनिष्ठामात्रेण यथार्हं सर्वेषां पञ्चकालधर्मप्राप्तेः, अत एव हि भाष्यकाराणां शिष्याः प्रशिष्याश्च श्रीमदष्टाक्षरेण समाराधनं प्रपद्यन्तः पञ्चकालकल्पनयैव दिनचर्यासूपदिदिशुः । तथा हि । भाष्यकाराव्यवहितशिष्यैर्वङ्किपुरंशोधरैः श्रीरङ्गनारायणाचार्यैः ब्राह्ममुहूर्तप्रभृति दिनचर्यां प्रपञ्चयद्भिरिसहीर्तनसंसारनिर्वेदसात्त्विकधृत्यालम्बनसमनन्तरकालविहिताध्यवसायपर्यन्तमुक्ता अनन्तरमुच्यते–

* इत ऊर्ध्वमहं तावद्यावज्जीवं श्रियः श्रियः । पदयोरर्चनं कर्तुं यतमानस्समाहितः ॥
अभिगच्छन् हरिं प्रातः पश्चाद्द्रव्याणि चार्जयन् । अर्चयंश्च ततो देवं ततो मन्त्रान् जपन्नपि ॥
ध्यायन्नपि परं देवं कालेषूक्तेषु पञ्चसु । वर्तमानस्सदा चैवं पाञ्चकालिकवर्त्मना ॥
स्वार्जितैर्गन्धपुष्पाद्यैश्शुभैश्शक्त्यनुरूपतः । आराधयन् हरिं भक्त्या गमयिष्यामि वासरान् ॥ इति ।

श्रीपराशरभट्टारकैश्च—

* गर्भजन्मजरादुःखमिश्रसंसारसागरात् । उत्तीर्य भगवत्प्राप्तिं लिप्सेत पुरुषो यदि ॥
प्रातरुत्थाय संस्मृत्य हरिं तच्चरणोत्थिताम् । गङ्गां विभाव्य तीर्थाम्भस्ततस्तदवगाह्य च ॥
श्रुतिस्मृत्युदितं कर्म यावच्छक्ति परात्मनः । आराधनत्वेनापाद्य सोर्ध्वपुण्ड्रश्च तर्पयेत् ॥
मन्त्रैराधारशक्त्यादिपारिषद्यान्तसंस्थितैः ।

इति पूर्वाचार्योक्तं संग्रहेण प्रदर्श्य * हरिं प्रणम्य चायम्य प्राणान् प्रणिपतन् गुरून् इत्यारभ्य श्रीमदष्टाक्षरमन्त्रस्य ऋषिच्छन्दोदेवताबीजशक्तीः प्रकाश्य भाष्यकारानुक्तो मन्त्रन्यासस्तच्छिष्याद्युक्तप्रकारेणोपादेय इति ज्ञापनाय * मन्त्रन्यासं ततः कृत्वा मन्त्रार्थमपि चिन्तयेत् इति संग्रहेणाभिधाय * एवं संचिन्त्य मन्त्रार्थं ततस्तं पुरुषम् इत्यादिना पूर्वैरुक्तं ध्यानं सङ्क्षिप्य तदनुक्तं पादादिकेशान्तध्यानं प्रपञ्च्य षोडशोपचारक्रमेण समाराधनं च विहितम् । उपचारान्तराणामपि सर्वेषामेते षोडश प्रधानतमाः, तदनुबन्धेनैवान्यत्सर्वमनुष्ठीयते, देशकालावस्थानुसारेण संक्षेपविस्तारस्वीकारश्च शास्त्रीयः, अतः पूर्वैरेककण्ठ्यमिहाप्यनुसन्धेयम् ; अत एव हि तदुभयानुसारिभिर्नारायणमुनिभिरपि पञ्चकालकल्पनया तत्तत्कालानुष्ठेयानि यथाक्रमं प्रपञ्चितानि । तथा हि—

* भगवच्चरणाम्भोजपरिचर्याविधिक्रमम् । एकान्तिभिरनुष्ठेयं नित्यं समभिदध्महे ॥
ब्राह्मे मुहूर्ते सत्त्वस्थो हरिर्हरिरिति ब्रुवन् । उत्थाय तत्र शयने समासीनस्समाहितः ॥ इत्यारभ्य,
* द्वयेन तद्विवरणैः प्रपद्य प्रभुमीश्वरम् । निक्षिप्य चिरमात्मानं तत्पादाब्जे कृती भवेत् ॥
यो नारायणदासीयो माधवाराधनक्रमः । तत्राभिगमनं नाम प्रथमः पटलो ह्ययम् ॥

इत्यन्तेन अभिगमनं परिसमाप्य—

* अह्नो द्वितीयभागेन कृष्णाराधनतत्परः । द्रव्याण्याराधनार्थानि शास्त्रीयाणि समार्जयेत् ॥

इत्यादिभिः पटलैस्तत्तत्कालांशसाधनीयमुपादानादिकमपि यथाक्रमं प्रपञ्चितम् ।

तदेवं चतुर्विधपञ्चरात्रनिष्ठानां तत्रापि यत्किञ्चिद्व्यापकमन्त्रप्रधानानां सर्वेषामपि भगवदेकान्तिनां यथायथं प्राचीनपरिगृहीतवैकल्पिकमर्यादाभेदैः पाञ्चकालिकधर्मः प्राप्तः । तत्र ये स्वाधिकारानुरूपं प्रपत्तिमेव केवलमव्यवहितमपवर्गसाधनमवलम्बन्ते, तैरयं पञ्चकालक्रमः परित्याज्यः परिग्राह्यो वेति विचार्यते । प्रपत्तिप्रकरणेषु तदङ्गत्वेन तदुपदेशाभावाद्विलम्बाक्षमस्याधिकारिणश्शातवार्षिकव्रतपूरणावधि कालक्षेपाक्षमत्वात्, तदेकदेशभूतयोगशक्तौ च तस्यैवोपायत्वस्वीकारप्राप्तेः, यथाशक्ति वर्णाश्रमधर्मानुष्ठानरूपस्य भगवत्प्रीणनस्य तदाज्ञानुपालनस्य कर्तव्यत्वेऽपि व्यासदक्षादिधर्मशास्त्रोपदिष्टकालविभागपूर्वकदिनचर्यामर्यादयाऽपि सिद्धेः, अन्यथा कर्मणां परस्परोपरोधप्रसङ्गाच्च परित्याज्य इति पूर्वः पक्षः । राद्धान्तस्तु परिग्राह्य एवायमिति । तिष्ठतु तावदिह प्रमाणोपपत्तिपरामर्शः, भाष्यकाराद्युपदेशसंप्रदाय-

स्तावत्परामृश्यताम् ; * अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्ये इत्यारभ्य शौनकव्यासबोधायनादिधर्मशास्त्रानुक्तेन भगवच्छास्त्रोक्तेन वर्त्मना स्नानविशेषादिपूर्वकविलक्षणसमाराधनप्रक्रियाप्रतिपादनं कथंभूतमधिकारिणमधिकृत्य भाष्यकारैः कृतमिति कर्णे तवागतम् ? भवतु तच्छास्त्रमधिकार्यन्तरं प्रतीति चेन्न ; प्रपत्त्येकनिष्ठैस्तच्छिष्यप्रशिष्यादिभिश्च योग्यैरद्य यावद्यथाशक्ति तदनुष्ठानदर्शनात्साधनबुद्ध्या च तदनुष्ठानाभावस्य भगवत्कैङ्कर्यैकरतिः परमैकान्ती भूत्वेत्यादिभिस्तत्रैवोपदेशात् । अनन्योपायेऽनन्यप्रयोजने चाधिकारिणि परमैकान्तिशब्दसाम्राज्यात् * अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्ये इत्यस्य पूर्ववृत्तापेक्षायां, * तमेव शरणमुपगच्छेत्—अखिलेत्यादिना, शरणागतिप्रकारश्च पूर्वोक्तः इति तत्प्रबन्धस्थवाक्यद्वयेन परिपूर्णशरणागतिविषयगद्यग्रन्थस्य पूर्ववृत्तत्वप्रतीतेः । एतच्च समर्थयिष्यते । अतस्तथाविधप्रपन्न एवात्र परमैकान्ती, तमधिकृत्यैव किञ्चित्सिद्धान्तस्थां काञ्चित्संहितां प्रधानीकृत्य समाराधनप्रयोगोऽत्र संगृह्यत इति यथासंप्रदायमकामेनापि स्वीकरणीयम् । तच्च समाराधनमर्घ्यादिपात्रप्रक्षेपतत्तदासनभोगानुपूर्वीसमर्पणीयौपचारिकसांस्पर्शिकाभ्यवहारिकादिभेदभिन्नगन्धपुष्पादिपरश्शतद्रव्यसापेक्षं दृश्यते । तदपि न्यायतस्स्वयमेवार्जितं मुख्यम्, अशक्तस्य तु पुत्रशिष्यादिमुखेन तत्प्रेरणरूपार्जनव्यापारः, पूर्वसिद्धद्रव्यस्यापि * तत्काले तदर्थोपादानम् इति समाराधनात्पूर्वमेव नान्तरीयकं सम्यग्द्रव्योपादानम् ; अत इज्योपदेशेनैवार्थादपेक्षितोपादानमपि स्वकालप्राप्तमुपदिष्टं भवति । ततोऽपि पूर्वमभिगमनमपि तद्विधायकतत्तच्छास्त्रतत्तन्मन्त्रविशेषादिपरामर्शादन्ततः प्रपत्तिरूपतयैव परिणतमिति प्रागेव तदुपदेशेनार्थादभिगमनमप्युपदिष्टं भवति ; अत एव हि तदभिप्रायविद्भिर्नारायणमुनिभिः—

* द्वयेन तद्विवरणैः प्रपद्य प्रभुमीश्वरम् । निक्षिप्य चिरमात्मानं तत्पादाब्जे कृती भवेत् ॥

इत्यभिगमनं निगमितम्, तद्विवरणं च गद्यादिकमेव । अनुयागपर्यन्तसमाराधनसमनन्तरभाविस्वाध्यायश्च श्रुतिस्मृतीतिहासपुराणमन्त्रजपसत्संवादाध्यात्मशास्त्रश्रवणप्रवचनाद्यात्मा यथासंभवं भगवच्छास्त्रधर्मशास्त्रादिषु अनन्तरभावियोगोपकारकज्ञानसन्धुक्षणप्रयोजनः प्रतिपाद्यत इति तत्कालनित्यः ; सोऽपि *द्वयमर्थानुसन्धानेन सह सदैवं वक्ता इति गद्योक्तस्य द्वयवचनस्य शास्त्रीयकर्मान्तरानुपरोधेन यथावसरमुपनिपातादुपदिष्ट एवेति ज्ञायते । सदावचनं हि न निद्राकाले, अशक्यत्वात् ; न मौनकाले, तद्विरोधात् ; न मन्त्रान्तरादिसाध्यसमाराधनादिकाले, तेनैव तदुपरोधात् ; अतो यथावसरं तत्प्राप्तिः । एवं योगो द्वयार्थानुसन्धानैकाभ्यरूपसर्वव्यापारोपरतिसुभगनिद्रापूर्वापरकाल्योस्तत्पूर्वापररात्रेषु * युञ्जानः इत्याद्युक्तावसरयन्नलभ्यः । श्रीवैकुण्ठगद्ये च स्वतन्त्रप्रपत्तिनिष्ठामेव विधाय * ततश्च प्रत्यहमात्मोज्जीवनायैवमनुस्मरेत् इत्यारभ्य परमपदपर्यङ्कनिलयस्य भगवतः परिपूर्णध्यानयोगमुक्ताऽनुसन्धानविशेषांश्चोपदिश्य * श्रीमत्पादारविन्दयुगलं शिरसि कृत्वा ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवस्सुखमासीत इत्यनेनानन्यप्रयोजनो विचित्रयोगः प्रतिदिनकर्तव्यत्वेन विहितः ; तदधिकारे च विस्तरेण दर्शयिष्यामः । नित्ये च * एवं शरणमुपगम्य तत्प्रसादोपबृंहितमनोवृत्तिस्तमेव भगवन्तं सर्वेश्वरेश्वरमात्मनस्स्वामित्वेनानुसन्धायात्यर्थप्रियाविरतविशदतमप्रत्यक्षतापन्नानुध्यानेन ध्यायन्नासीत इति समाराधनाम्नोक्तानुध्यानस्य स्वादुतमस्य समाराधनवदेवानन्यप्रयोजनकैङ्कर्यरूपतयाऽवसरे प्राप्तिर्युक्ता । तस्मादन्यप्रयोजनप्रधानतया परिपूर्णसमाराधनविशेषोपदेशिभिर्भाष्यकारैरर्थतश्शास्त्रान्तरैश्च सिद्धमन्यदपि सर्वमनुज्ञातमिति विज्ञायते । अत एव हि तच्छिष्यप्रशिष्यादयः पञ्चकालविभागेनैव भगवत्सेवां प्रत्यपीपदन् । प्रपत्त्यावृत्तिप्रसङ्गादिचोद्यानि तु निक्षेपरक्षान्ते परिहृतानि । अत्र यदुक्तं प्रपत्त्यङ्गत्वेनोपदेशाभावात्परित्याज्य इति, तदसत् ; भाष्यकारोक्तनित्यसमाराधनस्यापि तत एव

परित्याज्यत्वप्रसङ्गात्, तच्चेद्भगवत्प्रीत्येकप्रयोजनतयाऽनुष्ठेयमित्यनुज्ञायेत तर्हि तदनुबन्धि सर्वमपि तद्वदनुज्ञायताम्। प्रपत्त्यङ्गसर्वधर्मस्वरूपत्यागविधिवादिनोऽपि हि स्वामिनि भगवति दासभूतस्य प्रपन्नस्य स्वरूपप्राप्तां किङ्करवृत्तिमनुजानन्ति। यत्तु शातवार्षिकव्रतावधि विलम्बाक्षमत्वमुक्तं तत्तथैव, नश्वरस्य निष्पन्नोपायस्य शातवार्षिकव्रतमनुष्ठेयं ब्रूमः। यथा हि नदीतरणाय नौकागमनं प्रतीक्षमाणाः पुरुषाः केचिल्लीलाद्यूतेन कालं यापयन्ति, केचित्पणबन्धद्यूतेन; द्यूतमर्यादानुपालनं चोभयेषां समानम्; तत्रानियतकालभाविनौकागमनसमये वैहारिका विहारद्यूतविच्छेदेनापि नदीं तरन्ति। बद्धपणास्तु यावद्द्यूतसमाप्ति विलम्बन्ते, तद्वदिहापीति तत्त्वविदां संप्रदायः॥

यच्चान्यदुक्तम् योगशक्तौ तस्यैवोपायत्वस्वीकारः प्राप्नोतीति, तदपि मन्दम्; स्वयोगमहिमप्रत्यक्षिततत्त्वत्रयाणां नाथमुनिकुरुकेश्वरप्रभृतीनां प्राक्परिगृहीतप्रपत्त्युपायैकनिष्ठानामेव पश्चादपि भगवत्प्रसादलब्धयौगिकभगवदानन्दास्वादस्य प्रसिद्धत्वात्। अन्यथा तथाविधानुसन्धानपूर्वकभाष्यकारोक्तसमाराधनादिशक्तौ तस्याप्युपायत्वप्रसङ्गात्। तच्चेत्स्वामिकैङ्कर्यरूपमिति स्वयंप्रयोजनत्वेनोपादीयेत, समाधावप्ययं समाधिकदरिद्रमुखसन्दोहात्मनि समस्समाधिः। प्रपन्नानुगुणं च यौगिकमनुसन्धानं **शाण्डिल्यस्मृतौ**ऽप्युच्यते—

* ईदृशः परमात्माऽयं प्रत्यगात्माऽयमीदृशः। तत्संबन्धानुसन्धानमिति योगः प्रकीर्तितः॥
योगो नामेन्द्रियैर्वश्यैर्बुद्धेर्ब्रह्मणि संस्थितिः। प्रयुक्तैरप्रयुक्तैर्वा भगवत्कर्मविस्तरैः॥ इति।

एतदनुसन्धानमेव द्वयार्थानुसन्धानम्, एतद्विरुद्धं तु राहुमीमांसकानां कबन्धमीमांसकानां चानुसन्धानं वेदबाह्यमिति **श्रीकृष्णमुनिभि**रुक्तम्—

* चेतनस्त्वेक एवेति मतिर्या केवला क्रिया। फलतीति मतिस्ते द्वे वेदाप्रामाण्यबुद्धिजे॥
स एनं प्रीतः प्रीणाति ब्राह्मणस्यानुगेन ते॥ इति।

यत्त्वपरमुक्तम् व्यासदशाद्युपदिष्टवर्त्मनाऽपि स्ववर्णाश्रमोचितभगवदाज्ञानुपालनरूपदिनचर्यासिद्धिः, अतश्चोभयसंमेदे कर्मणां परस्परोपरोधप्रसङ्गश्चेति; तत्र तावदविदितश्रौतस्मार्तवृत्तान्तानां परस्परोपरोधचोद्यावतारः। एवं चात्र परिहृतं **श्रीकृष्णमुनिभिः**—* पञ्चिष्टिदर्वीहोमानां ससोमानां समुच्चयः। यथा बहूनामेकस्मिन् तथैवास्यापि कर्मणः॥ इति। न चात्र तावानप्युपरोधः। अपि च तत्रापीदमभिगमनादिपञ्चकमनुभविष्टं दृश्यते। व्यासस्तावत्

* ब्राह्मे मुहूर्त उत्थाय धर्ममर्थं च चिन्तयेत्। कायक्लेशं तदुद्भूतं ध्यायीत मनसेश्वरम्॥

इत्यारभ्य प्राभातिकस्नानसन्ध्योपासनप्रकारमुपदिश्य, * अथागत्य गृहं विप्रः समाचम्य यथाविधि। प्रज्वाल्य वह्निं विधिवत् इत्यादिना प्रातर्होमं च विधाय, अनन्तरमाह—

* देवादीनां नमस्कुर्यादुपहारं निवेदयेत्। दद्यात्पुष्पादिकं तेषां वृद्धांश्चैवाभिवादयेत्॥
गुरूंश्चैवाप्युपासीत हितं चास्य समाचरेत्। वेदाभ्यासं ततः कुर्यात्प्रयत्नाच्छक्तितो द्विजः॥
जपेदध्यापयेच्छिष्यान् धारयेच्च विचारयेत्। अवेक्षेत च शास्त्राणि धर्मादीनि द्विजोत्तमः॥
वैदिकांश्चैव निगमान् वेदाङ्गानि विशेषतः॥ इति।

अत्र दक्षोक्तप्रक्रियया द्वितीयार्धयामसाध्यवेदाभ्यासादिष्वदृष्टार्थांशो जपस्तोत्रशब्दाभ्यां जयाख्यसंहितायामुपलक्ष्यते। वृत्तिकर्शितस्य कस्यचिद्दृष्टांशोऽस्ति चेदभिगमनकालसङ्कोचेन परस्मिन्नुपादाने समन्वेति। अत्र देवनमस्कारोपहार-

निवेदनपुष्पादिप्रदानवचनादभिगमनं सिद्धम्। देवनमस्कारश्चात्र विष्णुनमस्कार एव स्वरसतः प्राप्तः, निरुपाधिक-देवत्वस्य देवान्तरनमस्कारस्यापि तत्रैव विश्रमात्। अत एवादौ *ध्यायीत मनसेश्वरम् इति ध्येयतयोक्त ईश्वरोऽपि जयादिष्विव सर्वेश्वरो विष्णुरेव; *ईश्वरो विक्रमी धन्वी इति नामसु पठ्यते। अत्र एवोत्तरत्र—*न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम् इति स्वयमेवाभिधानाच्च। इदमेव विष्णुनमस्कारादिरूपमभिगमनं तत्परशास्त्रेष्वपि नानाप्रकारमुप-दिश्यते। देवादीनामित्यादिशब्देन पित्रादिसंग्रहः। एवं प्रथमकालकर्तव्यमुक्त्वा द्वितीयकालसाध्यं समाराधनोपकरण-संपादनरूपमुपादानमाह—

*उपेयादीश्वरं चापि योगक्षेमार्थसिद्धये। साधयेद्विविधानर्थान् कुटुम्बार्थे ततो द्विजः॥ इति।

एतच्च लौकिकेश्वराभिगमनं गत्यन्तरहीनस्यापद्विषयम्; स्मरन्ति हि—*नगरप्रवेशनानि वर्जयेत् इति। उक्तं च शाण्डिल्यस्मृतौ—

*बुद्धरुद्रादिवसतिं श्मशानं शवमेव च। अटवीं राजधानीं च दूरतः परिवर्जयेत्॥ इति।

कालप्राप्तकृत्यं तत्र प्रपञ्चितं यथायोग्यं सर्वैर्ग्राह्यम्। इदमेव चोपादानं भगवदर्थत्वेन भगवच्छास्त्रेषु विधीयते। अत्रापि *कुटुम्बार्थ इति न केवलं तादर्थ्यं विवक्षितम्, तद्बुद्धेस्सर्वत्र प्रतिषेधात्। गीयते च स्वयं भगवता—

*यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचर॥ इति।

अतो भगवदाराधनरूपयज्ञशिष्टेन कुटुम्बभरणमपि भगवदाज्ञानुपालनरूपमेवेति तद्विवक्षया महर्षिणा *कुटुम्बार्थ इत्यु-क्तम्। *धर्ममर्थं च चिन्तयेत् इत्यारम्भोक्तार्थचिन्तनमपि धर्मशेषतया, कायक्लेशचिन्तनं तु क्लेशरहितोपायगवेषणा-र्थम्; स्मरन्ति हि मन्वादयः—

*अक्लेशेन शरीरस्य कुर्वीत धनसञ्चयम्। अप्रयत्नागतास्सेव्या गृहस्थैर्विषयास्सदा॥ इत्यादि।

अथ तृतीयकालकृत्यमाह—*ततो मध्याह्नसमये स्नानार्थं मृदमाहरेदित्यादिना। स्नानेन चैवं भगवदनुसन्धानमाह—

*अभिमन्त्र्य जलं मन्त्रैरब्लिङ्गैर्वारुणैश्शुभैः। भावपूतं तदव्यग्रं ध्यायन्वै विष्णुमव्ययम्॥
आपो नारायणोद्भूतास्ता एवास्यायनं पुनः। तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः॥ इति।

तथा— *त्रिपदां वाऽत्र सावित्रीं तद्विष्णोः परमं पदम्। आवर्तयेद्वा प्रणवं देवं वा संस्मरेद्धरिम्॥ इति च।

तर्पणे— *आदावोङ्कारमुच्चार्य नामान्ते तर्पयामि च। देवान् ब्रह्मऋषीश्चैव तर्पयेदक्षतोदकैः॥
तिलोदकैः पितॄन् भक्त्या स्वसूत्रोक्तविधानतः॥ इति।

अत्र प्रणवपूर्वकत्वेन भगवदात्मकत्वानुसन्धानं विहितम्। एतदेव च नित्ये भाष्यकारैरपि दर्शितम्—*देवानृषीन् पितॄन् भगवदात्मकान् ध्यात्वा संतर्प्य इति। तृतीयकालसाध्यं साक्षादिज्यारूपं समाराधनमेवाह—

*न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम्। तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम्॥
तद्विष्णोरितिमन्त्रेण सूक्तेन पुरुषेण च। नैवाभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि॥
निवेदयीत स्वात्मानं विष्णावमलतेजसि। तदात्मा तन्मनाश्शान्तस्तद्विष्णोरितिमन्त्रतः॥

इत्यत्र तद्विष्णोरित्यादेस्तुतिर्न याज्ञवल्क्यादिविहितप्रणवाद्यपकर्षपरा, एवं विष्ण्वाराधनस्य सर्वोत्तरत्वकण्ठोक्तेः। पूर्वापर-

अन्येषु सामान्यतो विशेषतश्च देवतान्तरार्चनवचनमन्तवत्परिमितफलार्थिप्रतिबुद्धेतरालपमेधपुरुषानधिकृत्येति मन्तव्यम्। गीयते च * अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् इति। उत्तरत्र च महाभारते—

* ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः। प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम्॥ इति।

आह च भगवान् बादरायणः—* नान्यं देवं नमस्कुर्याद्विष्णुपादाब्जसंश्रयः। इति।

* कर्मणां परिपाकत्वादाविरिञ्चादमङ्गलम्। इति मत्वा विरक्तस्य वासुदेवः परा गतिः॥ इति च।

इदंच विष्ण्वाराधनं भगवच्छास्त्रेषु तैस्तैर्व्यापकमन्त्रप्रभृतिभिस्तत्तदधिकारानुरूपं प्रपञ्च्यते। अधिकृतशास्त्रप्रतिपादितस्य पूर्णोपदिष्टस्यैव मुख्यत्वं होतृशास्त्रोक्तहोत्रपरिग्रहन्यायेन सिद्धम्। एतेन * अलाभे वेदमन्त्राणां पञ्चरात्रोदितेन वा इति स्मृतिरपि प्रणवाष्टाक्षरद्वादशाक्षरादिमन्त्राणामाथर्वणरहस्याम्नायाद्यधीततया वेदमन्त्रशब्देन संग्रहात् * पञ्चरात्रोदितेन वा इत्ययमंशस्तान्त्रिकसंज्ञितप्रत्यक्षेतरश्रुतिमूलमन्त्रान्तरविषयतया योज्यः। नित्यं चैतद्वैश्वदेवादिवद्भगवत्समाराधनम्, * नित्यमाराधयेद्धरिमिति वचनात्।

* शौनकोऽहं प्रवक्ष्यामि नित्यं विष्ण्वर्चनं परम्। प्रवःपान्तमन्धसोधि इत्यर्धर्चविधानतः॥

इति सूत्रान्तरानुसारात्।

* स्नात्वा नित्यं शुचिः कुर्याद्देवर्षिपितृतर्पणम्। देवताभ्यर्चनं चैव समिधादानमेव च॥

इति सामान्यतो मनूक्तेश्च। उक्तं चानुशासनिके श्रीपुण्डरीकनारदसंवादे—

* ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः। केशवाराधनं हित्वा नैव याति परां गतिम्॥ इति॥

एवं योगयाज्ञवल्क्यादिष्वपि—

* विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः। तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्दनात्॥

इत्यादिकमुच्यते। एवंविधदेवतार्चनाकरणे च प्रत्यवायं व्यास एवाह—

* यो मोहादथवाऽऽलस्यादकृत्वा देवनार्चनम्। भुङ्क्ते स याति नरकान् सूकरेष्वपि जायते॥ इति।

भगवदर्चावताररहितगृहस्य पुरुषस्याभोज्यान्नत्वमप्यन्यत्रोच्यते—

* केशवार्चा गृहे यस्य न तिष्ठति महीपते। तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं हि तत्॥ इति।

अनन्तरं च पञ्चमहायज्ञपूर्वकं प्राणाग्निहोत्रं प्रपञ्चयन्नेवमाह—

* स्वाहाप्रणवसंयुक्तं प्राणायान्नाहुतिं ततः। अपानाय ततो हुत्वा व्यानाय तदनन्तरम्॥
उदानाय ततः कुर्यात्समानायेति पञ्चमम्। विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः॥
शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम्। ध्यात्वा तु मनसा देवमात्मानं वै प्रजापतिम्॥ इति।

अत्रापि देवप्रजापतिशब्दौ पूर्वोक्तनयेन विष्णुपरौ मन्तव्यौ; * हृदि ध्यायन्हरिं तस्मै निवेद्यान्नं समाहित इत्यादि-भगवद्याग्नेयोपात्तकर्मकाण्डस्थप्राणाग्निहोत्रविषयव्यासवचनानुसाराच्च। अस्मिन्नपि व्यासवचने देवध्यानं तदेव हृदयस्थहरिध्यानमिति गम्यते। ईदृशं च भोजनमेवानुयागसमाख्ययाऽन्यत्र व्यपदिश्यते। अथान्यदपि भोजनेऽपेक्षितं सर्वमुपदिश्य

* भुक्त्वैवं सुखमासीनाय तदन्नं परिणामे

निवेदनपुष्पादिप्रदानवचनादभिगमनं सिद्धम्। देवनमस्कारश्चात्र विष्णुनमस्कार एव स्वरसतः प्राप्तः, निरुपाधिकदेवस्य देवान्तरनमस्कारस्यापि तत्रैव विश्रमात्। अत एवादौ *ध्यायीत मनसेश्वरम् इति ध्येयतयोक्त ईश्वरोऽपि जयादिष्विव सर्वेश्वरो विष्णुरेव; *ईश्वरो विक्रमी धन्वी इति नामसु पठ्यते। अत्र एवोत्तरत्र—*न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम् इति स्वयमेवाभिधानाच्च। इदमेव विष्णुनमस्कारादिरूपमभिगमनं तत्परशास्त्रेष्वपि नानाप्रकारमुपदिश्यते। देवादीनामित्यादिशब्देन पित्रादिसंग्रहः। एवं प्रथमकालकर्तव्यमुक्त्वा द्वितीयकालसाध्यं समाराधनोपकरणसंपादनरूपमुपादानमाह—

*उपेयादीश्वरं चापि योगक्षेमार्थसिद्धये। साधयेद्विविधानर्थान् कुटुम्बार्थे ततो द्विजः॥ इति।

एतच्च लौकिकेश्वराभिगमनं गत्यन्तरहीनस्यापद्विषयम्; स्मरन्ति हि—*नगरप्रवेशनानि वर्जयेत् इति। उक्तं च शाण्डिल्यस्मृतौ—

*बुद्धरुद्रादिवसतिं श्मशानं शवमेव च। अटवीं राजधानीं च दूरतः परिवर्जयेत्॥ इति।

कालत्रयकृत्यं तत्र प्रपञ्चितं यथायोग्यं सर्वैर्ग्राह्यम्। इदमेव चोपादानं भगवदर्थत्वेन भगवच्छास्त्रेषु विधीयते। अत्रापि *कुटुम्बार्थ इति न केवलं तादर्थ्यं विवक्षितम्, तद्बुद्धेस्सर्वत्र प्रतिषेधात्। गीयते च स्वयं भगवता—

*यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचर॥ इति।

अतो भगवदाराधनरूपयज्ञशिष्टेन कुटुम्बभरणमपि भगवदाज्ञानुपालनरूपमेवेति तद्विवक्षया महर्षिणा *कुटुम्बार्थ इत्युक्तम्। *धर्ममर्थं च चिन्तयेत् इत्यारभ्योक्तार्थचिन्तनमपि धर्मशेषतया, कायक्लेशचिन्तनं तु क्लेशरहितोपायगवेषणार्थम्; स्मरन्ति हि मन्वादयः—

*अक्लेशेन शरीरस्य कुर्वीत धनसञ्चयम्। अप्रयत्नागतास्सेव्या गृहस्थैर्विषयास्सदा॥ इत्यादि।

अथ तृतीयकालकृत्यमाह—*ततो मध्याह्नसमये स्नानार्थं मृदमाहरेदित्यादिना। स्नानेन चैवं भगवदनुसन्धानमाह—

*अभिमन्त्र्य जलं मन्त्रैरब्लिङ्गैर्वारुणैरशुभैः। भावपूतं तदव्यग्रं ध्यायन्वै विष्णुमव्ययम्॥
आपो नारायणोद्भूतास्ता एवास्यायनं पुनः। तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः॥ इति।

तथा—*त्रिपदां वाऽत्र सावित्रीं तद्विष्णोः परमं पदम्। आवर्तयेद्वा प्रणवं देवं वा संस्मरेद्धरिम्॥ इति च।

तर्पणे—*आदावोङ्कारमुच्चार्य नामान्ते तर्पयामि च। देवान् ब्रह्मऋषीश्चैव तर्पयेदक्षतोदकैः॥
तिलोदकैः पितॄन् भक्त्या स्वसूत्रोक्तविधानतः॥ इति।

अत्र प्रणवपूर्वकत्वेन भगवदात्मकत्वानुसन्धानं विहितम्। एतदेव च नित्ये भाष्यकारैरपि दर्शितम्—*देवानृषीन् पितॄन् भगवदात्मकान् ध्यात्वा संतर्प्य इति। तृतीयकालसाध्यं साक्षादिज्यारूपं समाराधनमेवाह—

*न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम्। तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम्॥
तद्विष्णोरितिमन्त्रेण सूक्तेन पुरुषेण च। नैवाभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि॥
निवेदयीत स्वात्मानं विष्णावमलतेजसि। तदात्मा तन्मनाश्शान्तस्तद्विष्णोरितिमन्त्रतः॥

इत्यत्र तद्विष्णोरित्यादेस्स्तुतिर्न याज्ञवल्क्यादिविहितप्रणवाद्यपकर्षपरा, एवं विष्ण्वाराधनस्य सर्वोत्तरत्वकण्ठोक्तेः। पूर्वापर-

ग्रन्थेषु सामान्यतो विशेषतश्च देवतान्तरार्चनवचनमन्तवत्परिमितफलार्थिप्रतिबुद्धेतरालपमेधपुरुषानधिकृत्येति मन्तव्यम्। गीयते च * अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् इति। उत्तरत्र च **महाभारते**—

* ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः। प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम्॥ इति।

आह च भगवान् **बादरायणः**—* नान्यं देवं नमस्कुर्याद्विष्णुपादाब्जसंश्रयः। इति।

* कर्मणां परिपाकत्वादाविरिञ्चादमङ्गलम्। इति मत्वा विरक्तस्य वासुदेवः परा गतिः॥ इति च।

इदंच विष्ण्वाराधनं भगवच्छास्त्रेषु तैस्तैर्व्यापकमन्त्रप्रभृतिभिस्तत्तदधिकारानुरूपं प्रपञ्च्यते। अधिकृतशास्त्रप्रतिपादितस्य पूर्णोपदिष्टस्यैव मुख्यत्वं होतृशाखोक्तहोत्रपरिग्रहन्यायेन सिद्धम्। एतेन * अलाभे वेदमन्त्राणां पञ्चरात्रोदितेन वा इति स्मृतिरपि प्रणवाष्टाक्षरद्वादशाक्षरादिमन्त्राणामाथर्वणरहस्यान्नायाद्यधीततया वेदमन्त्रशब्देन संग्रहात् * पञ्चरात्रोदितेन वा इत्ययमंशस्तान्त्रिकसंज्ञितप्रत्यक्षेतरश्रुतिमूलमन्त्रान्तरविषयतया योज्यः। नित्यं चैतद्वैश्वदेवादिवद्भगवत्समाराधनम्, * नित्यमाराधयेद्धरिमिति वचनात्।

* शौनकोऽहं प्रवक्ष्यामि नित्यं विष्ण्वर्चनं परम्। प्रवःपान्तमन्थसोधि इत्यर्धर्चविधानतः॥

इति सूत्रान्तरानुसारात्।

* स्नात्वा नित्यं शुचिः कुर्यादेवर्षिपितृतर्पणम्। देवताभ्यर्चनं चैव समिधादानमेव च॥

इति सामान्यतो **मनूक्तेश्च**। उक्तं चानुशासनिके श्रीपुण्डरीकनारदसंवादे—

* ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः। केशवाराधनं हित्वा नैव याति परां गतिम्॥ इति॥

एवं **योगयाज्ञवल्क्या**दिष्वपि—

* विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः। तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्दनात्॥

इत्यादिकमुच्यते। एवंविधदेवतार्चनाकरणे च प्रत्यवायं **व्यास** एवाह—

* यो मोहादथवाऽऽलस्यादकृत्वा देवतार्चनम्। भुङ्क्ते स याति नरकान् सूकरेष्वपि जायते॥ इति।

भगवदर्चावताररहितगृहस्थ पुरुषस्याभोज्यान्नत्वमप्यन्यत्रोच्यते—

* केशवार्चा गृहे यस्य न तिष्ठति महीपते। तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं हि तत्॥ इति।

अनन्तरं च पञ्चमहायज्ञपूर्वकं प्राणाग्निहोत्रं प्रपञ्चयन्नेवमाह—

* स्वाहाप्रणवसंयुक्तं प्राणायान्नाहुतिं ततः। अपानाय ततो हुत्वा व्यानाय तदनन्तरम्॥
उदानाय ततः कुर्यात्समानायेति पञ्चमम्। विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः॥
शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम्। ध्यात्वा तु मनसा देवमात्मानं वै प्रजापतिम्॥ इति।

अत्रापि देवप्रजापतिशब्दौ पूर्वोक्तनयेन विष्णुपरौ मन्तव्यौ; * हृदि ध्यायन्हरिं तस्मै निवेद्यान्नं समाहित इत्यादि-भगवद्याम्नायोपात्तकर्मकाण्डस्थप्राणाग्निहोत्रविषयव्यासवचनानुसाराच्च। अस्मिन्नपि व्यासवचने देवध्यानं तदेव हृदयस्थहरिध्यानमिति गम्यते। ईदृशं च भोजनमेवानुयागसमाख्ययाऽन्यत्र व्यपदिश्यते। अथान्यदपि भोजनेऽपेक्षितं सर्वमुपदिश्य

* भुक्त्वैवं सुखमास्थाय तदन्नं परिणामयेत्। इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्॥ इति चतुर्थकालसाध्यं

स्वाध्यायमाह । एवमन्येऽपि स्मरन्ति—* भुक्तोपस्थाय चादित्यं पुराणानि सदा पठेत् इत्यादि । अत्र परिपूर्णज्ञानस्योपबृंहणनिरपेक्षस्याधिकारिविशेषस्य द्विषडष्टषडक्षरद्वयादिजप एव स्वाध्याय इति तत्रतत्र तद्विधिः । अत एव रहस्याम्नाये वेदान्तरनिषेधेन द्विषट्कमात्रस्वाध्यायविधानं निर्व्यूढम् ॥

यत्पुनरनन्तरं पञ्चकालकृत्यमुक्तं * ततस्सन्ध्यामुपासीत इत्युपक्रम्य—

* हुत्वाऽग्निं विधिवन्मन्त्रैर्भुक्त्वा चान्नमभीष्टकम् । सभृत्यबान्धवजनः स्वपेच्छुष्कपदो निशि ॥

इत्यादि, अत्र रात्रिभोजनवचनेन तदनन्तरं योगोऽपि दिवाभोजनानन्तरोक्तः स्वयमेवागच्छतीति तदनुक्तिः । तथा हि ; पूर्वं दिवा भोजनानन्तरमेवमाह—

* हुतानुमन्त्रणं कुर्य्याच्छूद्रायामिति मन्त्रतः । तथाऽक्षरेण स्वात्मानं योजयेद्ब्रह्मणीति हि ॥
सर्वेषामेव योगानामात्मयोगः परः स्मृतः । योऽनेन विधिना कुर्यात्स याति पदमक्षयम् ॥ इति ।

एवं च निगमयामास—* इत्येतदखिलेनोक्तमहन्यहनि यन्मया । ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम् ॥
नास्तिक्यादथवाऽऽलस्याद्ब्राह्मणो न करोति यः । स याति नरकान् घोरान् काकयोनौ च जायते ॥
नान्यो विमुक्तये पन्था मुक्त्वाऽऽश्रमविधिं सुखम् । तस्मात्कर्माणि कुर्वीत तुष्टये परमेष्ठिनः ॥ इति ।

अत्र परमेष्ठी सर्वकर्मसमाराध्यो विष्णुरेव । विष्णोरेव सर्वकर्मसमाराध्यत्वम्—

* भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्, * अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च,
* यज्ञैस्त्वमिज्यसे नित्यं सर्वभूतमयाच्युत । हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् ॥

इत्यादिषु प्रसिद्धम् । अयं चात्र परमेष्ठी विहितकर्मतोप्यत्वेनोच्यते । परमे पदे तिष्ठतीति परमेष्ठी, स च * तमसः परस्तात्, * तद्विष्णोः परमं पदम् इत्युक्ते शुद्धसत्त्वमये वैकुण्ठसंज्ञिते लोके वर्तमानः पुरुषोत्तम एव । एवं वैयासके धर्मशास्त्रे भगवतः पञ्चसु कालेषु भजनं भगवन्नित्यकर्मानुप्रवेशेनैव विहितमिति न कस्यचित्तत्परित्याग उपपद्यते ॥

यत्तु दक्षेणोक्तं कालाष्टकविभागेन दिनकृत्यम्, तदपि प्रकृतानुगुणमेव ; तथा हि—

* प्रातरुत्थाय कर्तव्यं यद्विजेन दिनेदिने । तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम् ॥
उदयास्तमयं यावन्न विप्रः क्षणिको भवेत् । नित्यनैमित्तिकैर्युक्तैः काम्यैश्चान्यैरगर्हितैः ॥
स्वकं कर्म परित्यज्य यदन्यत्कुरुते द्विजः । अज्ञानादथवा लोभात् [स तेन]त्यागेन पतितो भवेत् ॥

इति नित्यनैमित्तककर्मणां तदुपकारिकाम्यकर्मणां च यथाकालमनुष्ठानमविच्छेदेन कर्तव्यमिति प्रतिपाद्य,

* दिवसस्याद्यभागेन कृत्यं तस्योपदिश्यते । द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा ॥
षष्ठे च सप्तमे चैव अष्टमे च पृथक्पृथक् । भागेष्वेतेषु यत्कृत्यं तत्प्रवक्ष्याम्यशेषतः ॥

इति कालाष्टकविभागेन कृत्यविभागं सामान्यतः प्रस्तुत्य,

* उषःकाले तु संप्राप्ते शौचं कृत्वा यथार्हवत् । ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम् ॥ इत्यादिना,
* सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलमाप्नुयात् ॥

इत्यन्तेन स्नानाचमनसन्ध्यावन्दनादीनि यथाक्रमं प्रतिपाद्य,

* सन्ध्याकर्मावसाने तु स्वयंहोमो विधीयते । स्वयंहोमफलं यत्तु न तदन्येन जायते ॥
ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एतैरेव हुतं यत्तु तद्धुतं स्वयमेव हि ॥

इति प्राभातिकं होमं चोक्ताऽनन्तरमाह—

* देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणम् । देवकार्यस्य सर्वस्य पूर्वाह्णे तु विशिष्यते ॥
देवकार्याणि पूर्वाह्णे मनुष्याणां तु मध्यमे । पितृणामपराह्णे तु कार्याण्येतानि यत्नतः ॥ इति ।

अत्र प्रातर्होमानन्तरं देवकार्यविधानात्तत्कालचोदितं भगवदभिगमनमपि सामान्यत उपदिष्टं भवति । यत्त्वनन्तरमुक्तम्

* द्वितीये तु तथा भागे वेदाभ्यासो विधीयते । वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ॥
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥

इति, तदप्यनुगुणम् ; उक्तानि हि **जयाख्यसंहितायां** जपध्यानार्चनस्तोत्राणि प्रथमप्रहरपर्यन्ते अभिगमने । उपादानं चानन्तरमेवाह—

* समित्पुष्पकुशादीनां स कालस्समुदाहृतः । तृतीये तु तथा भागे पोष्यवर्गार्थसाधनम् ॥ इति ।

इदञ्चोक्तं **जयाख्यसंहितायाम्** * ततः पुष्पफलादीनाम् इत्यादिना । अत्र * पोष्यवर्गार्थसाधनमित्येतत्प्रागुक्तन्यायेन भगवत्प्रीणनतयैवेति ग्राह्यम् ; आह चात्र प्रातस्स्नानादीन् प्रक्रम्य पूर्वमेव सर्वेषु कर्मसु भगवदनुसन्धानम्—

* ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु । ब्रह्मलोकमवाप्नोति न चेहाजायते पुनः ॥ इति च ।

असूत्रयच्च भगवान् शौनकः * हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेषु च इति । अत्र कर्मशब्देनानवच्छेदादृष्टादृष्टसर्वकर्मसंग्रहः । अन्यदैवत्यकर्मण्यपि तदन्तरात्मभूतो हरिरनुसन्धेय इत्येवकाराभिप्रायः । नित्यमित्यनेन काम्यत्वनैमित्तिकत्वशङ्काव्युदासः । स्वतः प्राप्तं कर्मकाले स्मरणं चकारेण संगृह्यते । एवं शास्त्रीयेषु सर्वेषु कर्मसु भगवदनुसन्धानं नित्यमिति सिद्धम् । एतदेव रागप्राप्तेष्वप्यवर्जनीयमिति **जयाख्यसंहितायां** नियमेषु पठ्यते—

* शयनासनयानादावासक्तश्चापि भोजने । हृद्गतं न त्यजेद्ध्यानमानन्दफलदं हि यत् ॥ इति ।

सर्वसंग्रहेण तूच्यते—

* आलोड्य सर्वशास्त्राणि विचार्य च पुनःपुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥ इति ।

एतच्च नित्यत्वात्स्वरूपानुरूपानन्दफलत्वेन स्वयंप्रयोजनत्वाच्च स्वतन्त्रप्रपत्तिशास्त्रनिष्ठैरपि दुस्त्यजम् । उक्तं चैवं स्वयंप्रयोजनत्वं **नारायणमुनिभिः**—

* वृत्तिः स्वामिनि दासस्य स्वरूपानुगुणा शुभा । भक्तिश्रद्धासमायुक्ता तत्समाराधनं विदुः ॥
किं किं न साध्यं भगवदाराधनपरैर्नरैः । वैष्णवानां विशेषेण स्वयमेतत्प्रयोजनम् ॥ इति ।

भगवदनुसन्धानविच्छेदोऽपि हि पुरुषार्थहानित्वेन स्मर्यते—

* यन्मुहूर्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते । सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया ॥ इति ।

पुरुषार्थहानिः कामक्रोधाद्यरीणामवकाशः, अनात्मादिषु आत्मबुद्धिहेतुरस्वाभाविकसुखदुःखकारणं चेत्यर्थः ।

* एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते । दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम् ॥ इति ।

विष्णुचित्तीनामन्यपराणामपि—

* व्याप्तेनापि मनसा विष्णुस्सेव्योऽन्तरान्तरा । मेथीबद्धो भ्राम्यमाणो घासग्रासं करोति गौः ॥

इत्यादिभिर्यथावसरं क्षुच्छान्तिकरकर्मसमाधिना तावन्मात्रप्रयोजनत्वेन भगवत्सेवनं स्मर्यते । तदिह सिद्धोपायस्योपायं साधयतश्च भगवत्कैङ्कर्यमरोगस्यारोग्यार्थिनश्च क्षीरास्वादवत् स्वयं प्रयोजनमेव ।

यत्तु * चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् इत्यादिना स्नानभेदानप्युपदिश्य–

* पञ्चमे तु तथा भागे संविभागो यथार्हतः । पितृदेवमनुष्याणां कीटानां चोपदिश्यते ॥ इत्यादिना

* संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् । भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत् ॥

इत्यन्तेन संग्रहेण देवार्चनं भोजनपर्यन्तमुक्तम्, तत्राप्यवान्तरपर्वभेदेन द्विधा विभक्तोऽयं काल एवेज्याकाल इत्येकीकृत्य निर्दिश्यत इति न विरोधः । अत्र देवसंविभागशब्दनिर्दिष्टमर्थमुत्तरत्र देवार्चनशब्देन विशेषयामास । * सन्ध्या स्नानं जपो होमस्स्वाध्यायो देवतार्चनम् इति । एवम् *इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेत् इत्युक्तकालद्वयं स्वाध्यायकाल इत्येकीकृतम् । अत्र मात्रया कालत्रयवैषम्यं मतभेदादुपपद्यते । * अष्टमे लोकयात्रां तु बहिस्सन्ध्यां ततःपुनः इत्युक्तलोकयात्राकालविभागस्तु लोकपराङ्मुखे भगवदेकान्तिनि नातीवापेक्षित इति तदनुक्तिः । यथोक्तं पूर्वश्रवे–

* गुरोर्गुरौ संनिहिते वृत्तिः कार्या यथा गुरौ । विद्यागुरुष्वनन्येष्वप्यनुवृत्तिस्स्वयोनिषु ॥ इति ।

उक्तं च ब्रह्मविद्भिः–

* अद्यप्रभृति हे लोका यूयं यूयं वयं वयम् । अर्थकामपरा यूयं नारायणपरा वयम् ॥

नास्ति सङ्गतिरस्माकं युष्माकं च परस्परम् । वयं तु किङ्करा विष्णोर्यूयमिन्द्रियकिङ्कराः ॥ इति ?

* अहेरिव गणाद्भीतः इत्यादिषु च भिन्नशीलगुणपरिहार उपदिश्यते । संन्यासप्रकरणे * समानशीलैस्सहवासो न दोषाय इति कपिलानुशिष्टस्य कैमुत्येन गृहस्थादिष्वपि मोक्षार्थिषु तुल्यप्रसरत्वात् । आमनन्ति बह्वृचाः * नेदंविदनिदंविदा समुदद्दिशेन्न सह भुञ्जीत न सधर्मा स्यात् इति; तस्येदमुपबृंहणम्–

* अवैद्यः प्राकृतः प्रोक्तो वैद्यो वैष्णव उच्यते । अवैद्येन न केनापि वैद्यः किञ्चित्समाचरेत् ॥ इति ।

* अहन्यहनि धर्मस्य योनिस्साधुसमागमः । मोहजालस्य हेतुर्हि धूर्तैरेव समागमः ॥ इति ।

तथा– * मनीषिणो हि ये केचिद्यतयो मोक्षकाङ्क्षिणः । तेषां वै छिन्नतृष्णानां योगक्षेमवहो हरिः ॥

* अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

* शरीरारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान् । ददाति ध्यायिनां नित्यमपवर्गप्रदो हरिः ॥

* वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसम् ॥

इत्यादिभिर्ब्रह्मविदां लोकनैरपेक्ष्यं सिद्धम्; अत एव हि लौकिकेश्वराभिगमनमप्यापद्विषयमिति ॥

यत्तु पश्चादुक्तम्

* प्रदोषपश्चिमौ यामौ वेदाभ्यासेन यापयेत् । यामद्वयं शयानो हि ब्रह्मभूयाय कल्पते ॥ इति,

अत्र योगासमर्थस्य तच्छेषभूतः स्वाध्यायः, समर्थस्य तु योग एवेति न समानकालतदुभयविधायकशास्त्रद्वयविरोधः । विस्तरेण चाह योगमन्ते दक्षः; तत्र चैष सारः प्रोक्तः–

* सर्वोपाधिविनिर्मुक्तं क्षेत्रज्ञं ब्रह्मणि न्यसेत् । एतद्ध्यानं च योगश्च शेषोऽन्यो ग्रन्थविस्तरः ॥ इति ।

याज्ञवल्क्यश्च * वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं ब्रह्मणि न्यसेत् इति । वृत्तिहीनम्—बाह्यवृत्तिरहितमित्यर्थः । अतः स्वाध्याययोगयोरेकैकस्मिन् प्रदोषादिकाले तदंशभेदेन क्रमात्प्रयोगभेदेऽपि न विरोधः, * यत्रैकाग्रता तत्राविशेषादिति शारीरकसमर्थितप्रकारेणैकाग्रतानुगुणकालान्तरेऽपि स्वगुणभूतस्वाध्यायादिनिरोधेनापि योगोऽनुष्ठातुं युक्तः, यामयामार्धविभागे स्वाध्यायादिषु नातिदूरपूर्वापरन्यूनाधिकनाडिकाविभागादयस्तु मतभेदतया निर्वाह्या इति । एवं स्मृत्यन्तराण्यपि सम्पादनीयानि ।

अतः पञ्चसु कालेषु तैस्तैः कर्मभिर्भगवत्सेवनस्य नित्यत्वेन विधानात् व्यासदक्षाद्युक्तमर्यादया भगवदाज्ञानुपालनेऽपि नीरन्ध्रभगवदुपासनसिद्धेरधिकृतशास्त्रोक्तप्रशस्ततमपूर्णशास्त्रार्थपरिग्रहौचित्यस्य प्रागेव दर्शितत्वात्, **भाष्यकारान्तेवासिप्रभृतिभिश्च** प्रपत्त्येकनिष्ठैस्तदनुसारेण भगवद्भजनस्योक्तत्वात्तद्योग्यैश्चाद्ययावत्तदनुष्ठानस्य यथाशक्ति परिग्रहात्, यच्छीलस्वामी तच्छीला प्रकृतिरितिन्यायेन

* नाहङ्कारान्न संरम्भान्नामर्षान्नार्थकारणात् । न भेदवादाल्लोभाद्वा धर्मं जह्यात्कथञ्चन ॥

इति वदता भगवता वासुदेवनन्दनेन स्वामिना तद्दासैस्समर्शालैर्भावितत्वात्, स्वामिसंप्रीणनस्वरूपानुगुणरूपवृत्तेश्च सर्वाभिमतत्वात्तत्प्रीणनस्य नित्यानां मुक्तानामिव च मुमुक्षुभिः प्रत्यक्षेणावगन्तुमशक्यत्वात् * श्रुतिः स्मृतिर्ममैवाज्ञा इति तदुक्त्यनुसारेण शास्त्रादेव तत्प्रीणननिश्चयात्, * येनास्य पितरो याताः, * पञ्चरात्रोदितान्वाऽपि ये स्वयंश्चैरनुष्ठिताः इत्यादिप्रतिपादितप्रकारेण तत्तत्संहितामेदभिदुरेषु परमात्मसंप्रीणनप्रस्थानभेदेषु काञ्चिन्मर्यादामवलम्ब्य स्वतन्त्रप्रपत्तिनिष्ठैरपि स्वाधिकारोपदेशाद्यनुरूपम्

* कुसीदमेके विहरन्ति सर्वे य आशीर्वदन्तो ददत्यत्र किञ्चित् ।
पर्यन्तलोकास्त्विह ते भवन्ति अनाशिषस्तु विजयायानन्ताय ॥

* यस्य सर्वे समारम्भा अनाशीर्बन्धनास्त्विह । त्यागे यस्य हुतं सर्वं स त्यागी स च पण्डितः ॥

*अयि भो भगवन्तं याचेत न भो इत्याह आश्रयितव्यो भगवान् भवति न त्वेव याच्यः इति **रहस्याम्नायादिचोदित**प्रकारेण प्रयोजनान्तरप्रार्थनारहितैः स्वयंप्रयोजनत्वात्पञ्चस्वपि कालेष्वविच्छेदेन भगवत्प्रीणनरूपशास्त्रीयकैङ्कर्यव्यापारेण यावन्न्यासविद्यास्ययागावभृथमागामिनिश्श्रेयसकालनिर्विशेषमवन्ध्यः कालो यापनीय इति सिद्धम् ।

अयमत्र सारः—

मङ्गल्यसूत्रवस्त्रादीन् संरक्षति यथा वधूः । तथा प्रपन्नश्शास्त्रीयपतिकैङ्कर्यपद्धतिम् ॥
यद्वन्मङ्गलसूत्रादेस्त्यागे संरक्षणेऽपि वा । रक्षेन्निरोधैर्भोगैर्वा पतिस्तद्वदिहापि नः ॥ इति ।

अनुपुरमुपरुन्धन्नान्तरध्वान्तराशिं न च पुरत उदेता नास्तमेता च पश्चात् ।
स्वविषयनिजधर्माँच्छुद्धसत्त्वान् ससत्त्वानवतु भवतुषारादक्षरव्योमसूर्यः ॥

कालं सर्वमिहाभ्युपेत्य भगवत्कैङ्कर्यमादेशिकं तत्पर्वकमपञ्चके किमु वयं मान्ये विमन्येमहि ॥
त्यक्त्वा विंशतिपञ्चकं शतमिव प्राप्तुं मुधा मुह्यतामस्माकं सदसद्विवेकिषु मतं हासास्पदं मा स्म भूत् ॥

इति श्रीपाञ्चरात्ररक्षायां नित्यानुष्ठानस्थापनाख्यो द्वितीयोऽधिकारः ॥

॥ अथ नित्यव्याख्यानाख्यः तृतीयोऽधिकारः ॥

अथोपक्रम्यते नित्यकर्तव्यक्रमसं[चयः]क्रमः । नाथयामुनपूर्णादिसंप्रदायसरित्पथे ॥

अत्र यदुक्तं भगवद्यामुनाचार्यैः श्रीमद्गीतार्थसंग्रहे—

* ज्ञानी तु परमैकान्ती तदायत्तात्मजीवनः । तत्संश्लेषवियोगैकसुखदुःखस्तदेकधीः ॥
भगवद्ध्यानयोगोक्तिवन्दनस्तुतिकीर्तनैः । लब्धात्मा तद्गतप्राणमनोबुद्धीन्द्रियक्रियः ॥
निजकर्मादि भक्त्यन्तं कुर्यात्प्रीत्यैव कारितः । उपायतां परित्यज्य न्यस्येद्देवे तु तामभीः ॥ इति,

इदं तावदाप्रभातादानिशान्तमनुष्ठीयमानेषु सर्वेषु कर्मसु न विस्मर्तव्यम् । समयाचारनियमाध्यायश्रीवैष्णवधर्मशास्त्रादिकथितं परमैकान्तिनां विशेषकर्तव्यं च सर्वं यथावदनुगन्तव्यम् । सर्वेषु च कर्मारम्भेषु भगवच्छास्त्राद्युक्तस्तत्तन्मन्त्रः, * भगवानेव इत्यादिकं भाष्यकारनित्योक्तं च वाक्यं पठितव्यम् । अन्ते च * सर्वं स्वनियाम्येत्यादिक्रमेण समन्त्रकं भगवति समर्पणीयम् । न चैतदखिलमुपासनोपायाधिकार्यन्तरमात्रविषयमिति भ्रमितव्यम्, तथासति तत्सहपठितगुरुभजननिर्माल्यभक्षणनिषेधादेरपि तावन्मात्रविषयत्वप्रसङ्गेनालेपकवादावतारप्रसङ्गात् । प्रपञ्चितं चैतत्पूर्वस्मिन्नधिकारे **निक्षेपरक्षादिषु** च । तत्र **भाष्यकारोक्त**नित्यानुष्ठाननिष्ठस्य ब्राह्ममुहूर्तादिप्राप्तौ यत्कर्तव्यं तत्तावत्तच्छिष्यप्रशिष्यग्रन्थतन्मूलभूत**संहिता**ऽनुसारेण संगृह्यते—पूर्वमेव यथाकालं विश्रान्त्यै निद्रां निर्विश्य प्राप्ते यामिन्याः पश्चिमे यामे सावधानेन निद्रा परित्याज्या ; * यामद्वयं शयानस्तु, * युक्तस्वभावबोधस्य इत्यादिस्मरणात् । येषु च योगग्रन्थेषु कृत्स्नायां रात्रौ निश्छिद्रयोगार्थं स्वप्नसमयसंभावितेन्द्रियक्षोभादिपरिहाराय च जागरः प्रतिपाद्यते, स तु विश्रमनिरपेक्षयोगदशापन्नपूर्णारोग्यपुरुषविशेषविषयः । तत्तत्पुरुषशक्त्यनुसारेणैव हि नित्यनैमित्तिककाम्यविषयाणां सर्वेषां शास्त्राणां प्रवृत्तिः, अत एव हि धर्मसाधनेषु प्रधानतमं शरीरं रक्षितुं प्रवृत्ते * ब्रह्मा स्मृत्वाऽऽयुषो वेदमुपवेदमथर्वणाम् इत्यथर्वणवेदोपवेदभूतायुर्वेदे

* ब्राह्मे मुहूर्त उत्तिष्ठेज्जीर्णाजीर्णे निरूपयन् । अजीर्णे पुनरासन्ध्यागमात्स्वापो विधीयते ॥

ईदृशसर्वैक्योडीकारेण हि * युक्तस्वभावबोधस्य इति गीतम् ; तस्मात्सर्वेषु मानवेषु प्रायिकतयौत्सर्गिकौ निद्राप्रबोधकालौ * यामद्वयं शयानः इत्यादिभिरुपदिश्यत इति विषयव्यवस्था । एवं प्राप्तकालमपनीतनिद्रातमस्कत्वेन सत्त्वस्थः प्रसन्नधीश्च भवति । तेन पूर्वयामानुसंहितमन्तःकरणचित्रभित्तिगतं विचित्रशुभाश्रयविशिष्टं ध्येयं निद्रातमोन्तरितमपि तत्कालसमुन्मिषितसत्त्वसन्धुक्षितसात्त्विकज्ञानरूपप्रदीपप्रकाशेन सम्यगवलोक्यते ; तत एवापररात्रयोगो निष्पद्यते, य एष सात्त्वतादिषु ब्राह्ममुहूर्तात्पूर्वमेव कर्तव्यत्वेन प्रपञ्च्यते—

* समुत्थायार्धरात्रेऽथ जितनिद्रो जितश्रमः । कमण्डलुस्थितेनैव [द्विरा]समाचम्य तु वारिणा ॥
गुरून् देवान् नमस्कृत्य कुपविश्याजिनासने ॥

इत्यादिना । एतत्संहितानिष्ठानामेष कालनियमः । निश्शब्दे सर्वसुषुप्तिकाले च ऐकाग्र्यातिशयसंभावनया च तद्विधिः । तत्तत्पुरुषशक्त्यानुसाराच्च तत्तत्कालविधेरविरोध इत्युक्तम् ।

अत्र— * वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् । यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ॥

इत्यादिभिर्मन्त्रादिपदिष्टसोदककमण्डलुधारणादिकं भगवद्योगिनोऽप्यनपोदितमिति ज्ञापनाय * कमण्डलुस्थितेनैवेत्युक्तम्। निद्रा[न्त]निमित्ततयोत्तरकर्माङ्गतया चात्र तन्त्रेणाचमनम्, तुशब्देन स्वशास्त्रोक्तविशेषः तोयाभावदशायां दक्षिणश्रवणस्पर्शश्च व्यज्यते। स्मरन्ति हि—

* सम्यगाचमनाशक्तावभावे सलिलस्य च। पूर्वोक्तेषु निमित्तेषु दक्षिणं श्रवणं स्पृशेत्॥ इति।

अत्र मन्त्रचतुष्कादिव्यतिरिक्तं सर्वं संहितान्तरनिष्ठानामपि साधारणम्। अजिनासन इति * चेलाजिनकुशोत्तरम् इति गीते प्रधानांशग्रहणम्। * ततस्त्वभिमतेनैव तिष्ठेत्पद्मासनादिना इति जितासनगतत्वं विधीयते।

यच्च— * समं कायशिरोग्रीवं सन्धाय सह वक्षसा। दृङ्नासाग्रगता कार्या विनिमीलितलक्षणा॥
जिह्वा तालुतलस्था च सान्तरे दशनावली। ईषदोष्ठपुटौ लग्नौ धार्यौ द्वौ बाहुकूर्परौ॥
ऊरुमध्यप्रदेशे तु हस्तौ नाभेरधो न्यसेत्। अधरोत्तरयोगेन वामदक्षिणतः क्रमात्॥
अचलं योगपट्टेन त्वेवं सन्धार्य विग्रहम्। सङ्कोच्यापानदेशात्तु ह्युपरिष्टात्तमेव हि॥
विकास्य वर्णहीनेन हार्देनालक्ष्यमूर्तिना। विषयान्तर्निविष्टं तु क्रमाच्चित्तं समाहरेत्॥
कुर्याद्वै बुद्धिलीनं तु तां च कुर्यात्स्वगोचरे। समाधायात्मनाऽऽत्मानं सहमन्त्रैः स्वतः क्रमात्॥ इति।

यत्पुनरिह योगदशायां तादात्म्यभावनमुपदिश्यते—

* ततो जाग्रत्पदस्थं चाप्यनिरुद्धं च मन्त्रपम्। परावर्त्य शतं बुद्ध्या तदभिन्नेन चेतसा॥
तन्मन्त्रजपसामर्थ्यात्तादात्म्यस्थितिबन्धनात्। महिमा तु स विज्ञानस्तदीयस्तस्य जायते॥
अभ्यासाद्वत्सरान्ते तु तदद्वैतसमन्वितः। अथ प्रद्युम्नमन्त्रं तु परावर्त्य शतद्वयम्॥
योऽ[हं]यं सोऽहमनेनैवाप्यद्वैतेन सदैव हि। एवमेव समभ्यासान्मतिमान् छिन्नसंशयः॥
तत्प्रभावाच्च तेनैव तथा कालेन जायते। अनेन क्रमयोगेन जपध्यानान्वितेन तु॥
निखिलं [चा]व्याप्यधीकुर्यान्मन्त्रवृन्दं पुरोदितम्। यावदाभाति भगवान् स्थाने पूर्वोक्तलक्षणे॥
प्रलीनमूर्तिरमलोऽप्यनन्तस्तेजसां निधिः। चिदानन्दघनश्शान्तोऽप्यनौपम्यो ह्यनाकुलः॥
समाधायात्मनाऽऽत्मानं तत्र त्यक्त्वा जपक्रियाम्। ध्यातृध्येयाविभागेन यावत्तन्मयतां व्रजेत्॥
यदा संवेद्य निर्मुक्ते समाधौ लभते स्थितिम्। अभ्यासाद्भगवद्योगी ब्रह्म संपद्यते तदा॥ इति।

अत्र न स्वरूपैक्यादिकं विवक्षितम्; शरीरशरीरिणोर्जीवात्मपरमात्मनोश्शारीरकसमर्थितप्रकारेणाविरुद्धस्यास्पष्टलक्षणादोषस्याशेषशास्त्रानुगुणस्यानुकूलर्तकशालिनः, * तत्स्थत्वादनुपश्यन्ति हेक एवेति साधवः इत्युपबृंहणशतसुस्थितस्य, * अवस्थितेरिति काशकृत्स्नः इतिसूत्रितस्य, पूर्वापरग्रन्थसंहितान्तरानुगुणस्य, विशिष्टाद्वैतस्य विवक्षितत्वात्। * ध्यातृध्येयाविभागेन, इत्यादिना च निर्विकल्पकसमाध्यवस्था उच्यते। * ब्रह्म सम्पद्यते तदा इति च परमसाम्यरूपफलप्रतिपादनम्। उक्तं च * ब्रह्मैव भवति इत्यादिवाक्यान्यधिकृत्य भाष्यकारैः * प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव, यथा सेयं गौरितीति। अन्यथा * निरञ्जनः परमं साम्यमुपैति, * मम साधर्म्यमागताः इत्यादिश्रुतिस्मृतिभ्यां विरोधः। तथा च श्रुत्यन्तरम्—

* यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति। एवं मुनेर्विजानत आत्मा भवति गौतम॥ इति।

साम्ये च स एवेतिव्यपदेशः श्रुतावेव दृश्यते *वैष्णवं वामनमालमेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभिजयति इति। एवं च सति *महिमा तु स विज्ञानस्तदीयस्तस्य जायते इत्यादिप्राकरणिकग्रन्थसामञ्जस्यं भवति। शारीरके च फलपादे मुक्तस्याविर्भूतस्वरूपस्य गुणाष्टकविशिष्टस्य जगद्व्यापारव्यतिरिक्तं भोगमात्रसाम्यं च सूत्रितम्—*जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च, भोगमात्रसाम्यलिङ्गाच्च इति। अत उपायदशायां फलदशायां च विशिष्टैक्यानुसन्धानमेवात्र विवक्षितम्। एतेन लाञ्छनन्यासादनन्तरं *मुद्रां बद्ध्वा स्मरेद्ध्यानं देवोऽहमिति भावयेत् इत्यादिसंहितान्तरग्रन्थाश्चात्र तुल्यन्यायाः। अत्र *मनो ब्रह्मेत्युपासीत इत्यादिष्विवेतिकरणादिवशाद्दृष्टिविधित्वं सुस्पष्टम्; अत एव हि तथाविध-भावनयाऽप्यनन्तरं योग्यतापादनमात्रमुक्तम्—

*न्यासेन देवमन्त्राणां देवतादात्म्यभावनात्। अप्राकृताङ्गकरणात्पूजामर्हति साधकः॥ इति।

अन्यथा— *देवतारूपमात्मानमर्चयेदर्घ्यधूपकैः। धूपावसानिकैर्भोगैर्घ्यात्वा नारायणं हृदि॥

इति समनन्तरकर्तव्यं कथं सङ्गच्छते? नहि स्वरूपैक्यभावनायां हृदि पुनर्नारायणध्यानमिति किञ्चित्स्यात्। नच शेषवृत्तौ प्रवर्तमानस्य स्वरूपैक्यभावनं जाघटीति। अतो दृष्टिविधिपक्षोऽत्र स्वीकार्यः। यद्वा गत्यन्तरे संभवति दृष्टिविधिविवक्षा च न युक्ता; अतस्तच्छरीरतया तादधीन्यादिभिस्सर्वानुवृत्तस्तद्व्यपदेशः; तदभिप्रायेण च *स्वनियाम्येत्यादिकं वक्ष्यति भाष्यकारः। योगे च भिन्नलक्षणयोः परमात्मप्रत्यगात्मनोः संबन्धानुसन्धानमेवेति शाण्डिल्यस्मृतिवाक्येन स्थापितं पूर्वाधिकारे। उक्तं च विप्रकीर्णे सात्त्व[ते]तन्त्रे संगृह्यान्ते श्रीकृष्णमुनिभिस्स्वरूपैक्यादिबुद्धेरवैदिकत्वम्—

*चेतनस्त्वेक एवेति मतिर्या केवला क्रिया। फलतीति मतिस्ते द्वे वेदाप्रामाण्यबुद्धिजे।
स एनं प्रीतः प्रीणाति ब्राह्मणस्यानुगे न ते॥ इति।

एवं यथावदनुष्ठितयोगस्य श्रान्तिसम्भावनायां ब्राह्ममुहूर्तात्पुनर्विश्रामोऽनुज्ञाप्यते—

*ततः श्रमजयं कुर्यात्त्यक्त्वा ध्यानासने क्रमात्। समासीत शयानश्च कालं रात्रिक्षयावधि॥

अत्र ब्राह्ममुहूर्तप्रभृति विशेषकर्तव्ये दिङ्मात्रं प्रदर्शितम्—

*ब्राह्मे मुहूर्ते संप्राप्ते उत्थाय शयनात्ततः। स्नात्वाऽभ्यर्च्य जगन्नाथं समिदाधानमाचरेत्॥

इत्यादिना। तदिदं संहितान्तरेषु विस्तृतम्। अत्र हरिर्हरिर्हरिरिति मुहुस्सङ्कीर्तयन् हरिमेव चिन्तयन्नुत्तिष्ठेत्। अत्र हरिशब्दसङ्कीर्तनं सप्तकृत्व इति श्रीमद्भ्रुशरोमुनिभिर्नित्यकर्मसंग्रहे निबद्धम्। उत्तिष्ठतश्च हरिशब्दपूर्वकभगवदनु-स्मरणं श्रीविष्णुधर्मे भगवता शौनकेनोक्तम्—

*उत्तिष्ठंश्चिन्तय हरिं व्रजंश्चिन्तय केशवम्। भुञ्जंश्चिन्तय गोविन्दं स्वपंश्चिन्तय माधवम्॥ इति।

सर्वकर्मारम्भावसानेषु च हरिसंस्मरणं तेनैव स्वकीयसूत्रेऽप्युक्तम्—*हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेषु च इति। स च निद्रानन्तरमनुस्मर्तव्यो हरिः *नरो नारायणश्चैव हरिः कृष्णस्तथैव च इति धर्मदेवतात्मजत्वेन स्मर्यमाणेषु भगवदव-तारेषु तृतीय इति संप्रदायः। गजेन्द्रमोक्षकश्चैव—

*ग्राहग्रस्ते गजेन्द्रे त्वरति सरभसं तार्क्ष्यमारुह्य धावन् व्याघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः।
चक्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः॥

स खलु तमोमयग्राहग्रस्तस्वाश्रितगजेन्द्रमोचकः सुषुप्तिरूपस्वेतरदुर्निवारतमोग्राहग्रस्तजन्तुजालमोचकत्वेनानुसन्धीयते।

तमधिकृत्यैव पौराणिकोपजप्यं * प्रातः स्मरामि इत्यादिश्लोकत्रयं प्रभाते सर्वैः पठ्यते । तत्फलश्रुतौ च हरिरित्येव भगवान्निर्दिष्टः—* श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत् । लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥ इति । पापं तद्विपाकरूपं सर्वमनिष्टं हरतीत्यत्र हरिशब्दः ।

* ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च । प्रसह्य हरते यस्मात्तस्माद्धरिरितीर्यते ॥

इत्यादिभिस्तस्यैव निखिलजगदुदयविभवलयलीलस्य निरङ्कुशस्वातन्त्र्यं चानुसन्धेयम् । एवमुत्थाय निद्रान्ताचमनं मुख्यम्, दक्षिणश्रवणस्पर्शनरूपं वा तदानीं शक्यं विधाय तस्मिन्नेव शयने समासीनः प्रतिसं[ह्]हितयोगो योगशास्त्रोक्ते यतमानव्यतिरेकैकेन्द्रियवशीकरणाख्ये क्रमभाविनि संज्ञाचतुष्टये द्वितीयावस्थारूपव्यतिरेकसंज्ञान्यायेन भूतभाविदशाविशेषपरामर्शाय कृताकृतप्रत्यवेक्षणाय च नियतेन्द्रियस्समाहितोऽतिक्रान्तमनन्तं कालं निरर्थकमवलोक्य निर्वेदं परं गच्छेत् । निर्वेदप्रकाराश्च विविधाः तत्तत्संहिताविशेषेष्वनुसंधेयाः । तदिदं संगृहीतं **नारायण**मुनिभिः—

* ब्राह्मे मुहूर्ते सत्त्वस्थो हरिर्हरिरिति ब्रुवन् । उत्थाय शयने तत्र समासीनस्समाहितः ॥
व्यर्थं वीक्ष्य गतं कालं निर्विद्याहमितः परम् ॥ इति ।

विस्तरेणोद्धृतं चैतद्भक्तिवंशेश्वरैः—

* ब्राह्मे मुहूर्ते संप्राप्ते निद्रां त्यक्त्वा प्रसन्नधीः । हरिर्हरिर्हरिरिति व्याहरेद्वैष्णवः पुमान् ॥
उत्थाय शयने तस्मिन्नासीनो नियतेन्द्रियः । त्रस्तनिर्विण्णहृदयो व्यर्थं वीक्ष्य गतं वयः ॥

इत्यादिभिः, * दुस्तरां मद्दशामेतां कथयिष्यामि कस्य वा इत्यन्तैरधिकविंशैः श्लोकैः । यद्यपि मुमुक्षोः * परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ; तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् इति प्राथमिकगुरूपसत्तिकालात्पूर्वमेव तृणीकृतहिरण्यगर्भादिभोगः परिपूर्णनिर्वेदस्संवृत्तः, तथाऽपि विषमविपाकविशेषगुणत्रयाश्रयभूतप्रकृतिसंबद्धतया संभावितविषयसङ्गादिदोषपरिहाराय तथाविध एव निर्वेदोऽनुवर्तनीयः । अगीयत चास्य नित्यानुवर्तनीयत्वम् अमानित्वादिगुणगणमध्ये—* जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् इति । अतस्सिद्धोपायस्यापि पराङ्कुशपरकालादीनामिव भगवदनुभवविच्छेदकतया हेयतमरजस्तमोमयनिद्रादिप्रतिकूलवर्गप्रवाहानुवृत्तिदर्शनेन संसारवैराग्योपचयार्थमहरहस्तदुचितावसरेषु निर्वेदः कर्तव्य एव । एवं सति विवेकविमोकादिसप्तकान्यतमभूतानवसादविरुद्धावसादवशादुत्तरकैङ्कर्यप्रवृत्तेरनिष्पत्तिस्स्यादिति तत्परिहारायानन्तरमुच्यते—

* इति निर्विद्य तदनु धृतिमालम्ब्य सात्त्विकीम् । विधूय चेमं निर्वेदं सर्वकार्यावसादकम् ॥

इत्यादिना गतजलसेतुबन्धनाभिलाषतुल्यानुतापप्रशमनपूर्वकं सात्त्विकधृत्यालम्बनात्मकागामिकालशक्यकैङ्कर्यनिश्चयः । सात्त्विकधृतिस्वरूपं चेदं भगवता गीतम्—

* धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिस्सा पार्थ सात्त्विकी ॥ इति ।

सच निश्चयप्रकारः एवं तत्कालोचितकर्तव्यविभागेन संगृहीतः—

* इत ऊर्ध्वमहं तावद्यावज्जीवं श्रियः श्रियः । पदयोरर्चनं कर्तुं यतमानस्समाहितः ॥
अभिगच्छन् हरिं प्रातः पञ्चाङ्गान्याहरन् । अर्चयंश्च ततो देवं ततो मन्त्रान् जपन्नपि ॥

ध्यायन्नपि परं देवं कालेषूक्तेषु पञ्चसु । वर्तमानस्सदा चैवं पाञ्चकालिकवर्त्मना ॥
स्वार्जितैर्गन्धपुष्पाद्यैः शुभैश्शक्त्यनुरूपतः । आराधयन् हरिं भक्त्या गमयिष्यामि वासरान् ॥ इति ।

अत्र इत ऊर्ध्वं यावज्जीवं सदेत्यादयः शब्दाः कैङ्कर्यप्रारम्भदिवसे तावत्स्वरसवाहिन उत्तरोत्तरदिवसेष्वपि निरुपाधिककैङ्कर्योपचयसिद्ध्यर्थं निर्वेदविषयतयाऽनुवर्तमानानां भगवदासक्तिविरोधिनामान्तराणामष्टादशचण्डालषड्वृषलादिशब्दव्यपदेश्यानां दोषविशेषाणां निश्शेषनिवृत्तिलक्षणवैशिष्ट्यलाभार्थं प्राज्ञप्रज्ञापहारकविषयेन्द्रियादिमूलसंभावितपाक्षिककैङ्कर्यविच्छेदपरिहारार्थं चेदं प्रथमप्रवर्तनेनैवं मनोरथानुवर्तनं कार्यमेव । अत एव **नारायणमुनिभिरपि**–

* भगवच्चरणाम्भोजपरिचर्याविधिक्रमम् । एकान्तिभिरनुष्ठेयं नित्यं समभिदध्महे ॥

इति नित्यकर्तव्यं प्रक्रम्योक्तम्–

* व्यर्थं वीक्ष्य गतं कालं निर्विद्याहमितःपरम् । आराधयेयं ध्यायेयं भजेयं पुरुषोत्तमम् ॥
कीर्तयेयं नमस्येयं चिन्तयेयमनारतम् । व्रजेयं शरणं चेति निश्चित्य मनसा स्वयम् ॥ इति ।

तत्र * गमयिष्यामि वासरान् इत्यनेन प्रकृतस्य परमैकान्तिनः प्रकारान्तरेण कालयापनमशक्यमित्यच्छिद्रकैङ्कर्यस्य स्वयं प्रयोजनत्वं व्यज्यते । तदेव कण्ठोक्तं **नारायणमुनिभिः**–

* किं किं न साध्यं भगवदाराधनपरैर्नरैः । वैष्णवानां विशेषेण स्वयमेतत्प्रयोजनम् ॥ इति ।

यदत्र धर्मार्थचिन्तनं तदुपायभूतकायक्लेशचिन्तनं च स्मर्यते, तत्र कैङ्कर्यरूपो धर्मः, तच्छेषभूतोऽर्थः, तयोर्गुरुलघूपायविवेकार्थं कायक्लेशचिन्तनम् । तत्र न पूर्वाह्णमध्यन्दिनापराह्णानफल्गून् कुर्यात् यथाशक्ति धर्मार्थकामेभ्यस्तेषु च धर्मोत्तरस्यादित्यादिभिर्गौतमाद्युक्तकामोपाधिकप्रवृत्त्यंशोऽपि * धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ इत्युक्तसत्सन्तानोत्पादनादिमात्रार्थशास्त्रीयकामविषयतया गृहस्थस्य कैङ्कर्यपक्षे निक्षिप्यते । तदयमपवर्गाङ्कुरभूतस्वयंप्रयोजनस्वामिकैङ्कर्यमहानन्दलाभः * विघ्नायुतेन गोविन्दे नृणां भक्तिर्निवार्यत इति कथं भविष्यतीति भयादनन्तरं प्रतिबन्धकनिवृत्तिः कथ्यते–

* एतत्क्रियाविरोधीनि प्राचीनान्यशुभानि मे । कर्माण्यनन्तान्यच्छेद्यान्यनादीन्यशुचीन्यपि ॥
स्वयैव कृपया देवो विनाश्यास्मन्मनोरथान् । पूरयत्विति संप्रार्थ्य मन्त्रमेतमुदीरयेत् ॥ इति ।

स च प्रार्थनामन्त्रः * त्वय्याराधनकामोऽयम् इत्यादिको यथान्यायं देशिकसकाशादधीत्यात्रान्वहं प्रयोक्तव्यः । एवमेव हि सर्वेषां मन्त्राणां समाधिः, विपर्यये हि नैष्फल्यं दृष्टादृष्टप्रत्यवायश्च तेषु तेषु शास्त्रेषु पठ्यते–

* यदृच्छया श्रुतो मन्त्रश्छलेनाथ छलेन वा । पत्रेक्षितो वा व्यर्थस्स्यात्स्युतानर्थदो भवेत् ॥ इति ।

अस्यैव श्लोकस्यान्यत्र * तं जपेद्यदनर्थकृत् इति चतुर्थपादस्य पाठः । एवंविधनिर्विघ्नकैङ्कर्यसिद्धिरपि–

* सङ्कल्पादेव भगवांस्तत्त्वतो भावितात्मनाम् । वृत्तान्तमखिलं कालं सेचयत्यमृतेन तु ॥

इति श्रीसात्त्वतादिकथितप्रकारेण भगवत्प्रसादादेव भविष्यतीति तत्सिद्ध्यर्थमपि प्रथमं हरेरेव ध्यानमुच्यते–* इति संप्रार्थ्य तत्सिद्ध्यै संस्मरेत्प्रथमं हरिम् इत्यादिना । अत्र गुरुपरम्पराप्रपत्तिपूर्वकमिदं ध्यानं विवक्षितम् , * गुरून् प्रपद्य प्रथमं तदुरूंश्च ततो हरिम् इति तस्मिन्नवसरे नित्यान्तरोक्तेः । उक्तं च श्रीसात्त्वतेऽपरात्रयोगारम्भे * गुरून् देवं नमस्कृत्य कृपविस्यात्मनासने इत्यादि । सर्वत्र शास्त्रीयकर्मारम्भे भगवत्पर्यन्तगुरुसंक्रमपदनं निश्शेषस्य भवति । उक्तं च

रहस्यान्नायब्राह्मणे * स चाचार्यवंशो ज्ञेयो भवति आचार्याणामसावसावित्याभगवत्त इति । देवगुरुभक्तिरेव सर्वतत्त्व-प्रकाशकारणमिति **कठवल्ल्यां** श्रूयते—

* यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति ।

उक्तं चापस्तम्बादिभिः * देवमिवाचार्यमुपासीत इत्यादि । एवं मनोरथसिद्ध्यै गुरूपसत्तिपूर्वकं भगवन्तं प्रपद्य भगवच्छास्त्रतदुपबृंहणनित्यग्रन्थस्तोत्रादिषु विप्रकीर्णोक्तध्यानं यथावगमं समाहृत्यानुतिष्ठेत् । गुणोपसंहारपादोक्तन्यायेन ध्येयरूपादिषु साधारणमसाधारणं च सर्वं तत्तत्संहितादिविशेषानुसारेणावगन्तव्यम् ; एवं परिपूर्णं भगवन्तमनुसन्धाय ततो वासुदेवादिव्यूह[नाम]चतुष्टयं केशवादिव्यूहान्तरनामानि मत्स्यादिदशावतारनामान्यन्यान्यप्यधिगतानि पृथग्भूतानि स्तोत्रनिबद्धानि देव्यादिनामानि च प्रहर्षजनकेनोच्चैश्शब्देन सङ्कीर्तयेत् ; तत्कालचोदितं समुचितभगवन्मन्त्रजपं वेदाभ्यासं च यथाबलमाचरेत् । तत्र वासुदेवादिकल्किपर्यन्तसङ्कीर्तनं प्रणवपूर्वकं मन्त्रात्मकं **पारमेश्वरे** प्रोक्तम्—

* संप्रबुद्धः प्रभाते तु उत्थाय शयने स्थितः । नाम्नां सङ्कीर्तनं कुर्यात्षोडशानां प्रयत्नतः ॥
ओं नमो वासुदेवाय नमस्सङ्कर्षणाय ते । प्रद्युम्नाय नमस्तेऽस्तु अनिरुद्धाय ते नमः ॥
क्रमशः केशवादीनां यावद्दामोदरं द्विजः । नमो नमः केशवाय नमो नारायणाय च ॥
माधवाय नमश्चैव गोविन्दाय नमस्ततः । विष्णवेऽथ नमस्कुर्यान्नमस्ते मधुसूदन ॥
नमस्त्रिविक्रमायाथ वामनाय नमस्ततः । नमोऽस्तु श्रीधरायाथ हृषीकेशाय ते नमः ॥
नमस्ते पद्मनाभाय नमो दामोदराय च । दिव्यानामवताराणां दशानामथ कीर्तनम् ॥
एकशृङ्गादिकानां तु विहितः क्रमशः प्रभोः । नमस्ते मीनरूपाय कमठाय नमस्ततः ॥
नमोऽस्त्वादिवराहाय नारसिंहाय ते नमः । नमो वामनरूपाय नमो रामत्रयाय च ॥
कुठारज्याहलास्त्राय नमः कृष्णाय वेधसे । कल्किन् विष्णो नमस्तेऽस्तु सर्वं सप्रणवं द्विजः ॥
यथास्थितक्रमेणैव मेदांस्त्वेतान् हरेर्विभोः । नमस्कुर्यात्प्रभाते तु योगान्ते तु दिनक्षये ॥
शब्देनोच्चतरेणैव संहृष्टिजनकेन तु । स्तोत्राणि चाथ मन्त्राणि उदीर्यान्यानि वै ततः ॥ इति ।

एवञ्च संगृहीतं वह्निवंशेश्वरैः—

* चिकीर्षन्नोत्सितं कर्म तन्नामान्यनुकीर्तयेत् । चतुर्भिर्वासुदेवाद्यैर्नामभिस्सह संयतः ॥
जपेद्दशनामानि केशवादीनि चादरात् । दशावतारनामानि मत्स्यकूर्मादिकान्यपि ॥
जपन्नुत्थाय शयनादर्चयिष्यन् सदा हरिम् ॥ इति ।

एवमुच्चैस्तरेण शृण्वतामपि सकलदुरितहारिणा हरिसङ्कीर्तनेन संहृष्टमानसः सन्ध्यायामासन्नायां सन्धातृत्वेन सर्वेषां सन्ध्येति परिकीर्तितं भगवन्तमुपासितुं जिगमिषुर्हरिं ब्रुवन् तल्पादुत्थाय * नमः क्षितिधरायोक्त्वा वामं पादं महामते इति **पारमेश्वरादि**पठितेन नमःपूर्वेण क्षितिधरलिङ्गेन मन्त्रेण महावराहं क्षितिधरमनुध्यायन् वामपादं भूमौ विन्यसेत् । * ततो भूधरमन्त्रेण वामपादं भुवीत्यपि स एव मन्त्र उच्यते । तत्र क्षितिधारणसाम्यात्कूर्मादिरूपान्तरशङ्काव्युदासाय * श्रीमद्वराहमन्त्रेण न्यसेद्वामपदं भुवि इति विशेषशब्देन व्याचख्युः । महावराहमहिष्या भुवः प्रपदनं चात्र **महाभारतादिषु** समन्त्रकमुपदिश्यते—* नमोऽस्तु प्रियदत्तायै तुभ्यं देवि वसुन्धरे इति । पृथिव्याः प्रियदत्तेति कीर्तनं च विष्णोः **ब्रह्मण्यदेवकीर्तनवदनवसादहेतुत्वेन** स्मर्यते—

* पृथिवीं प्रियदत्तेति गायन् सर्वंसहेति वै । विष्णुं ब्रह्मण्यदेवेति कीर्तयन्नावसोदति ॥ इति ।

ततः पदक्रमान् कुर्वन् विष्णुक्रमणमन्त्रेण पादेन्द्रियाधिदैवतं त्रिविक्रमं विष्णुं ध्यायेत्, * क्रान्ते विष्णुं बले हरिम् इति पदविक्षेपे विष्णोरनुध्येयतोक्तेः, तदनुसन्धानस्य च तत्तदुचितशास्त्रीयप्रकाशसापेक्षत्वात् । इति सन्ध्यापूर्वकालकर्तव्यक्रमः ।

ततः स्नानीयदर्भतिलस्नादिकं दृष्टादृष्टार्थस्नानोपकरणं सर्वं समाहृत्य तमस्तिरोहितदुष्टजन्तुपलायनार्थं निर्गममार्गं सञ्चालयेत् । यथोक्तं **पारमेश्वरे**--* बहिर्निर्गममार्गं तु सञ्चाल्य इत्यादि । ततो गृहान्निर्गच्छन् केशवमनुध्यायेत् * व्रजन् चिन्तय केशवम् इतिस्मरणात्; केशवशब्देन * अंशवो ये प्रकाशन्ते * यदादित्यगतं तेजः इत्याद्युक्ता अंशव उच्यन्ते, तद्वत्त्वात् केशवः, गच्छतो मार्गादिप्रकाशनार्थं दिव्यौहाद्यान्तरतमोनिरासार्थम्,

* क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् । आवां तवाङ्गे सम्भूतौ तस्मात्केशवनामवान् ॥

इति ब्रह्मरुद्रोपलक्षितविश्वसृष्टिरक्षाहेतुत्वात्, केशिवधोपलक्षितसर्वदुष्टदमनस्वभावत्वाच्चासहायदशासाहाय्यार्थं तदा तच्चिन्तनम् । ततः स्वाश्रमग्रामादिभ्यो बहिः नैर्ऋत्यां दिशि द्वित्रेषुपातप्रमितां भुवमतिक्रम्य शुद्धे देशे निक्षिप्तस्नानोपकरणो यथोक्तनियमैर्विण्मूत्रविसर्जनं कृत्वा स्ववर्णाश्रमावस्थाद्यनुगुणादृष्टार्थमृत्सङ्ख्यावर्णपरिमाणादिनियमवद्गन्धलेपक्षयकरमर्शःपीडादिरहितं शौचं कुर्यात् । अत्र मूत्रपुरीषयोरेकस्य प्रवृत्तौ तस्यैव शुद्धिः, क्रमेणोभयप्रवृत्तौ यथाक्रमम्, युगपत्प्रवृत्तौ पुरीषशुद्धिः प्रथममिति निष्कर्षः । तत्रैव **पाद्मे** * उपवीतं कर्णदेशे निधाय च तृणादिना इत्यादिना विण्मूत्रविसर्जनप्रकारमुक्ताऽनन्तरमेव शौचविधिरुक्तः--

* दक्षिणेतरहस्तेन गृहीत्वा मेहनं ततः । दक्षिणे मृत्तिकां हस्ते समुत्थाय जलाशयम् ॥ इति ।
प्रागुदीच्यामुदीच्यां वा गत्वा शौचं समाचरेत् । मृत्तिकाभिर्द्वादशभिर्गुदं षड्भिश्च मेहनम् ॥
अन्तरा चान्तरा वामं करं प्रक्षाल्य वारिभिः । तन्मात्राभिस्तदन्ते द्वौ करौ द्वादशसङ्ख्यया ॥
संशोध्य च करौ जङ्घे कटिं चोरुं च वारिभिः । प्रत्येकं मृत्तिकामात्रचतुष्केन विशोधयेत् ॥

पितामहस्तु सनत्कुमारायैवमाह--

* ततः पूर्वं समुत्थाय प्राचीमेवोपनिष्क्रमेत् । उदीचीं प्रागुदीचीं वा शौचाचारक्षमां दिशम् ॥
यत्रोदकं प्रभूतं तु तद्गत्वा शौचमाचरेत् ॥ इति ।

स्मरन्ति देशादिभिन्नं शौचम्--

* देशं कालं तथा ज्ञानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेत् ॥ इति ।

दिक्सादिभेदेनापि शौचतारतम्यं स्मर्यते--

* अहि यच्छौचमुद्दिष्टं निश्यर्द्धे तु ततो भवेत् । पथि पादस्ततः प्रोक्तो यथाशक्त्यातुरस्य तु ॥ इति ।

पारमेश्वरे प्रावृडादिकालभेदेनापि मृत्सङ्ख्याभेदादिकमुक्तम्--

* अस्पृष्टतीर्थस्नौचार्थं मृद्भिरभ्युद्धृतैर्जलैः । गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ॥
तिस्रो लिङ्गे मृदो देया एकैकान्तरमृत्तिकाः । पञ्च वामकरे देयास्तिस्रः पाण्योर्विशुद्धये ॥
मूत्रोत्सर्गे शुद्धिरेषा पुरीषस्याप्यनन्तरम् । अर्धप्रसृतिमात्रं तु प्रथमा मृत्तिका स्मृता ॥
द्वितीया च तृतीया च तदर्धा परिकीर्तिता । बिडालपदमात्रं तु तदूर्ध्वं परिकीर्तिता ॥

पञ्चापाने मृत्तिकाः स्युस्तथैवान्तरमृत्तिकाः । दश वामकरे देयास्सप्त तूभयहस्तयोः ॥
पादाभ्यां तिसृभिश्शुद्धिर्जङ्घाशुद्धिश्च पञ्चभिः । नियोजयेत्ततो विप्रः कट्यां वै सप्तमृत्तिकाः ॥
स्वदेहस्वेददोषघ्ना बाह्यकर्दमशान्तये । भक्तानां श्रोत्रियाणां च वर्णास्त्वेवं निरूपितम् ॥
प्रावृडुक्तात्तु वै तस्मादेकमृद्द्वयपनोदनम् । शरद्ग्रीष्मवसन्तेषु नित्यं कार्यं क्रियापरैः ॥
एकस्मादपि चैकैका परिपाल्या तु मृत्तिका । हेमन्ते शिशिरे विप्रैः श्रोत्रियैस्संयमस्थितैः ॥
पथि शौचं प्रकर्तव्यं देशकालानुरूपतः । गन्धलेपमपास्यैव मनश्शुद्ध्या विशुद्ध्यति ॥
विहिताः पादशौचे तु बिडालपदसम्मिताः । मृदश्चतुर्द्विजेन्द्राणां त्रिर्द्विरेका क्रमात्ततः ॥
वर्णानां शूद्रनिष्ठनां कटिशौचे तथैव हि । सप्तसप्त उभाभ्यां तु कराभ्यां त्रितयं पुनः ॥
सर्वेषामेव सामान्यं पाणिशौचमुदाहृतम् । अन्तर्जानुगतं कृत्वा भुजयुग्मं द्विजोत्तमः ॥
चतुर्धा मणिबन्धस्थं तोयं कृत्वा सुनिर्मलम् । बुद्बुदाद्यैर्विनिर्मुक्तं पिबेद्विप्रो हृदा ततः ॥
एकैकां ह्रासयेन्मात्रां वर्णक्रममनुक्रमात् । पाणिना क्षालितेनैव पुनराचमयेद्बुधः ॥ इति ।

आचमनप्रकाराश्च बहुधा धर्मशास्त्रेषु भगवच्छास्त्रेषु च प्रतिपादिताः । तत्र स्वसूत्रोक्तमन्यद्वा यथाधिगममाचमनं कुर्यात् । आचमनोक्त्यनन्तरं च दन्तधावनमुखशोधनप्रकारः **पारमेश्वरे** उक्तः—

* एवं प्रक्षाल्य विधिवदाचम्य प्रयतः शुचिः । प्राङ्मुखोदङ्मुखो वाऽपि उपविश्यासनं ततः ॥
अर्कादिभिरपामार्गैः कारयेद्दन्तधावनम् । प्रातर्हुत्वाऽऽचमन्नग्रं कषायकटुतिक्तकम् ॥
भक्षयेद्दन्तकाष्ठं च दन्तमांसान्यबाधयन् । द्वादशाङ्गुलमात्रं तु वक्रग्रन्थिविवर्जितम् ॥
पयोभिस्सह तर्जन्या ब्रह्मन् द्वादशसङ्ख्यया । काष्ठालाभे तु रोगे वा कर्तव्यं दन्तधावनम् ॥
षोडशाङ्गुलदीर्घैस्तु वक्रग्रन्थिविवर्जितैः । हेमादिनिर्मितैर्वाऽपि कुशदर्भादिभिस्तथा ॥
जिह्वानिर्लेहनं चैव गण्डूषमुखधावनम् । कुर्यादाचमनं विप्रश्शुचिना सलिलेन च ॥ इति ।

अत्रार्कादिभिरित्युक्तं तत्रैव विवृतम्—

* अर्कन्यग्रोधखदिरकरञ्जककुभादिकम् । शारजोदुम्बराश्वत्थप्लक्षदर्भांश्च वैणवान् ॥
आम्राङ्कुरमपामार्गमर्जुनं धातकी शमी । अन्यानि च पवित्राणि तेषु संपन्नमाहरेत् ॥ इति ।

अत्राभक्षणीयस्यापि काष्ठस्य भक्षणोक्तिर्भक्षणवदाद्यन्ताचमनादिप्राप्त्यर्था । **पाद्मे**ऽप्येवं दन्तधावनमुक्तम्—

* आचम्य प्राङ्मुखो भूत्वा दन्तधावनमाचरेत् । न्यग्रोधोदुम्बराश्वत्थप्लक्षाम्रार्जुनधातकी ॥
पलाशवेणुखदिरशमीदारूणि धावने । दन्तानामुदितान्येकादश चाम्भोरुहासन ॥
दन्तधावनकाष्ठं च द्वादशाङ्गुलमायतम् । दशाङ्गुलं तथा मानमष्टाङ्गुलमथायतम् ॥
ब्राह्मणक्षत्रियविशां क्रमेणैतदुदाहृतम् ॥ इति ।

अत्र सर्वत्र प्रतिषिद्धानां वर्जनं सर्वत्र विहितानामुपादानं च कचिद्विहितानां कचिच्च प्रतिषिद्धानां गत्यभावे ग्रहणमिति निष्कर्षः ; एवं सर्वत्र भाव्यम् । यथोक्तलक्षणं दन्तकाष्ठं समन्त्रकं गृहीत्वा * आयुर्बलम् इत्यादिस्मार्तमन्त्रपूर्वकं प्रादक्षि-

ण्येन प्रथममधरतो दन्तधावनं कुर्यात्। काष्ठालाभादिदशासु तत्तत्तरुपर्णैस्तृणैर्वा तेषामप्यभावे द्वादशगण्डूषैर्मुखशुद्धिः। उक्तं चैवं नारायणमुनिभिः—

* तीर्थे संशोध्य संक्षाल्य पादावाचम्य वाग्यतः। तृणैर्वा शास्त्रसंसिद्धैर्वेटार्कखदिरादिभिः॥
दन्तान् संशोध्य निर्लिख्य जिह्वां गण्डूषयेन्मुहुः॥ इति।

स्मरन्ति च—* अलाभे दन्तकाष्ठानां प्रतिषिद्धदिनेष्वपि। अपां द्वादशगण्डूषैर्मुखशुद्धिर्भविष्यति॥ इति।

अत्र— * प्रतिपत्पर्वषष्ठीषु चतुर्दश्यष्टमीषु च। दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम्॥
अष्टम्यां च चतुर्दश्यां पञ्चदश्यां त्रिजन्मसु। तैलं मांसं व्यवायं च दन्तकाष्ठं च वर्जयेत्॥

इत्यादिभिः प्रतिषिद्धदिनानि त्याज्यानि। दन्तशुद्ध्यनन्तरं दन्तकाष्ठं क्षालयित्वा भङ्क्त्वा शुद्धस्थले निक्षिपेत्। तत्र यच्छुद्धेः पूर्वं जलाशयगमनमुक्तं तत्र भागवतं भागवताश्रितं च तीर्थं विवक्षितम्; यथाऽऽहुः—* तीर्थं भागवतं शुद्धमुपगच्छेन्मनोहरम् इति, * ततस्तीर्थे समाश्रित्य शुद्धं भागवताश्रितम् इति। स्मरन्ति च—

* जलं शुद्धमशुद्धं वा विष्णुवास्तुसमीपतः। विष्णुगन्धासमं तीर्थं महापातकनाशनम्॥
भवद्विधा भागवतास्तीर्थभूताः स्वयं प्रभो। तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता॥
ये भजन्ति जगद्योनिं वासुदेवमनीश्वरम्। न तेभ्यो विद्यते तीर्थमधिकं राजसत्तम॥
यत्र भागवताः स्नानं कुर्वन्ति विमलाशयाः। तत्तीर्थमधिकं विद्धि सर्वपापप्रणाशनम्॥ इति।

एवं गृहीतस्नानोपकरणस्तीर्थमासाद्य मुखशोधनपर्यन्तं कृत्वा वक्ष्यमाणक्रमेण तीर्थावगाहनादिपूर्वकं सर्वक्रियामूलभूतं स्नानमाचरेत्। प्रातस्स्नानस्य नित्यत्वं प्रभावश्च तत्रतत्र द्रष्टव्यः। तत्र तत्र वर्णभेदेन स्माननियमं स्मरन्ति **पितामहादयः**—

* आपोऽवगाहनं स्नानं विहितं सार्ववर्णिकम्। मन्त्रवत्प्रोक्षणं चापि द्विजातीनां विशिष्यते॥ इति।

तत्रशक्तस्य वारुणमेव स्नानम्, तदशक्तस्य तु—

* न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि। न चान्यवस्त्रमाच्छाद्य नाविज्ञाते जलाशये॥

इत्यादिभिस्तत्तत्प्रतिषेधात् स्नानान्तराणि भवन्ति। तेषु च वारुणानन्तरमाकण्ठस्नानमशक्तौ आशिरस्कं वेति स्मरणात् तत्राप्यशक्तस्य कापिलं तस्मिन्नप्यशक्तस्य तत्तच्छास्त्रचोदितेषु पार्थिववायव्यमन्त्रमानसात्मध्यानपञ्चाङ्गपुरुषान्तरकृतस्पर्शपूर्वकावगाहनरूपेषु स्नानान्तरेषु तत्कालसंभावितं तत्रापि स्वशक्त्या कुर्यात्। आह चैवं **क्रतुः**—

* प्राक् शौचं स्नानमादेयं ब्राह्मं वा स्नानमिष्यते। वृद्धातुराणामुष्णाद्भिर्योगाद्वैर्वा यमादिभिः॥ इति।

अत्र यथाधिकारमिति विवक्षा। एवं चोक्तं **पारमेश्वरे**—

* विना विविधसंपर्कैः पञ्चाङ्गं स्नानमाचरेत्। मुखं करद्वयोपेतं पादौ कटितटावधि॥
शीतस्नानोपघातेषु स्नानं कुर्याद्यथाविधि॥ इति।

शीतोदकस्नानासमर्थस्योष्णोदकस्नानं, तच्चानुपहतस्याप्रतिषिद्धदिवसेष्वेव। एवं शक्त्याद्यनुगुणं स्नानं कुर्यात्। बलानुरूपस्नानं प्रत्येकं समुदितं वा संजगृहुः—

* दिव्याप्यमान्त्रवायव्यभौमतैजसमानसैः। एतैस्सप्तभिर्न्यस्तैर्वा कृतशुद्धिर्यथाबलम्॥ इति।

अन्यथा स्वकर्मभ्रष्टो भवति, * स्नानमूलाः क्रियास्सर्वाः इति विधानात्। अत्रैव स्नानजपहोमदानानां नित्यत्वमाह—

* अस्नाताशी मलं भुङ्क्ते अजपः पूयशोणितम् । अहुताग्निः क्रिमिं भुङ्क्ते अदाता कीटमश्नुते ॥ इति ।

एवं स्नातः कृतोर्ध्वपुण्ड्रः स्नानाङ्गं भगवदात्मकदेवर्षिपितृतर्पणं कृत्वा आचम्य मन्त्रप्रोक्षणमन्त्राचमनपुनःप्रोक्षणस्वात्मपरिषेचनानि स्वसूत्रसंहितोक्तप्रकारेण कृत्वा गायत्र्याऽभिमन्त्रितजलमादित्यान्तस्थिताय परमात्मनेऽर्घ्यरूपं दद्यात् । अत्र जलाञ्जलिप्रक्षेपस्त्रिरिति सनत्कुमाराय **पितामहः** प्राह—

* उभाभ्यां तोयमादाय हस्ताभ्यां सुसमाहितः । गायत्र्या चाभिमन्त्र्यापस्तारव्याहृतिपूर्वया ॥
रवेरभिमुखस्तिष्ठन्नूर्ध्वं त्रिस्सन्ध्ययोः क्षिपेत् ॥ इति ।

ततो वज्रीभूततज्जलनिहतमन्देहाख्यरक्षोनिरसनपाप्मावधूननार्थं प्रदक्षिणं परिक्रम्य मार्गशीर्षादिमासेशान् तत्तन्मन्त्रेण तर्पयित्वा,

* सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिःपठेदायतप्राणः प्राणायामस्स उच्यते ॥

इत्युक्तप्रकारेण प्राणायामत्रयं कृत्वा गायत्रीमावाद्याष्टोत्तरसहस्रमष्टोत्तरशतं यथाशक्ति [दशावरां] गायत्रीं जपेत् ।

* न च क्रमन्न च हसन्न पार्श्वमलोकयन् । न पदा पादमाक्रम्य न चैव हि तथा करौ ॥

इत्यादयश्च जपकालनियमाः ।

* मद्भक्ता ये नरश्रेष्ठ मद्गता मत्परायणाः । मद्याजिनो मन्नियमास्तान् प्रयत्नेन पूजयेत् ॥
तेषां तु पावनायाहं नित्यमेव युधिष्ठिर । उभे सन्ध्येऽधितिष्ठामि ह्यस्कन्नं तद्व्रतं मम ॥
तस्मादष्टाक्षरं मन्त्रं मद्भक्तैर्वीतकल्मषैः । सन्ध्याकालेषु जप्तव्यं सततं चात्मशुद्धये ॥

इति श्रीवैष्णवधर्मशास्त्रोक्तश्रीमदष्टाक्षरजपोऽपि यथाशक्ति सन्ध्यायामवसरे कार्यः । प्राणायामेन शतकृत्वः प्रणवव्याहृतिसंभेदविशेषेण दशकृत्वः गायत्रीजपं सहस्रतुल्यं बोधायनादयः स्मरन्ति । एवमेकपादस्थित्यासनविशेषस्वगृहतटाकाश्वत्थमूलदेवतायतनादिस्थानभेदेषु च फलतारतम्यं स्मर्यते ; तत्रैषा काष्ठा *अनन्तं विष्णुसन्निधौ इति । गणनायां च कराक्षसूत्रयोर्यथाशक्ति विकल्पतः करणत्वम् । उक्तं च **जयाख्यसंहितायाम्**—*जपं तु द्विविधं कुर्यादक्षसूत्रकरार्पितम् इति । अक्षसूत्रार्पितं वा करार्पितं वेत्यर्थः । तदेव विशेषितं **श्रीसात्त्वते** * स्फाटिकेनाक्षसूत्रेण स्वकैर्वा करपर्वभिः इति । अत्र स्फाटिकेनेत्यक्षमालावर्गोदाहरणं शास्त्रान्तरेषु पद्माक्षमालादीनामाधिक्यस्मरणात् । फलविशेषार्थं तु मणिमुक्तामयाद्यक्षमालाभेदाः प्रतिष्ठाविशेषादिनियमाश्च तत्रतत्र प्रपञ्च्यन्ते ; करेऽपि शङ्खपद्ममुद्रादिभेदाश्च । तत्रैष सारः—

* कनिष्ठामूलामारभ्य प्रादक्षिण्यक्रमेण तु । अनामिकान्तं देवेश जपेत्कोटिसहस्रकम् ॥ इति ।

बोधायनीये तु श्रीमदाष्टाक्षरविधावेवमुक्तम्—

* क्रियायागादृशगुणो जपयज्ञः प्रकीर्तितः । उच्चाच्छतगुणो ज्ञेय उपांशुश्चेत्स्मृतस्तदा ॥
उपांशोर्मानसः प्रोक्तस्सहस्रगुणतोऽधिकः ॥ इति ।

अन्यदपि तत्रोक्तम्—

* जपमध्ये गुरुर्वाऽपि वैष्णवो यः समागतः । संभाषणादिपूजां तु तस्य कृत्वाऽनुमान्य च ॥
अनुज्ञाप्य ततः कृत्वा जपशेषं समाहितः । सर्वस्य प्रभवो यस्माद्विष्णुपादाश्रया नराः ॥
तन्मूलतः क्रियास्सर्वास्सफलास्तु भवन्ति हि ॥ इति ।

नारदीयश्रीमदष्टाक्षरब्रह्मविद्यायाम्—

* सर्वेस्सप्रणवो जप्यो जपादप्रणवादपि । सहस्र इति विज्ञेयः प्रणवो ह्यक्षरं परम् ॥
असङ्ख्याताच्च सङ्ख्यातस्सहस्रगुण उच्यते । सङ्ख्यातादपि साहस्रस्सोर्ध्वपुण्ड्रतनोर्जपः ॥ इत्युक्तम् ।

एवं * विधियज्ञाज्जपो यज्ञो विशिष्टो दशभिर्गुणैः । उपांशुस्स्याच्छतगुणस्सहस्रो मानसः स्मृतः ॥
उच्चैर्जपादुपांशुस्स्याद्विशिष्टो दशभिर्गुणैः । जिह्वाजपश्शतगुणस्सहस्रो मानसः स्मृतः ॥

इत्यादिकमपि द्रष्टव्यम् । एवमासूर्योदयात् * पूर्वोत्तराशाभिमुखस्त्वपरोत्तरदिङ्मुखः इत्यादिस्मृत्यनुसारेण प्राङ्मुखः प्रागुदङ्मुखो वा तिष्ठन् गायत्रीमावर्त्य पूर्ववत्कृतप्राणायामत्रयस्सन्ध्योपस्थानसङ्कल्पपूर्वकम् * उत्तमे शिखरे इतिमन्त्रेण गायत्रीमनुज्ञाप्य स्वसूत्रोक्तैर्मन्त्रैरादित्यमण्डलान्तस्स्थितं भगवन्तमुपस्थाय सप्रदक्षिणं भगवदात्मकसन्ध्यादि[पञ्चक]नमस्कारं कृत्वा * स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः इत्यधीतं हृदयान्तस्स्थितं परमात्मानमभिवाद्य प्रणम्य, दिगादिनमस्काराणामपि स्वपूर्वपूर्वोपदेशानुष्ठानपारम्पर्यमस्ति चेत् तत्राऽपि भगवदात्मकत्वध्यानपूर्वं प्रणमेत् । एवं तूपस्थानप्रकारं **पितामहः सनत्कुमाराय**ाह—

* एताभिः प्राञ्जलिर्नित्यं विस्पष्टोदितमण्डलम् । सहस्ररश्मिं भगं तमुपतिष्ठेद्दिवाकरम् ॥
ततस्तस्मै नमस्कृत्वा सन्ध्याद्याः पञ्च देवताः । प्रदक्षिणनमस्कारैर्दिशश्चैवोपतिष्ठते ॥
परमात्मानमात्मानं भावयित्वा द्विजोत्तम ॥ इति ।

तत आधारशक्त्यादिपारिषदान्तान् देवर्षिपितॄंश्च भगवदात्मकान् ध्यात्वा प्रणवपूर्वकैस्तत्तन्नामभिस्सन्तर्प्य शुचौ स्थले स्नानक्लं निष्पीड्याचम्यावाहिततीर्थमन्त्रांश्चात्मनि समाहरेत् । अत्र यद्यप्यार्षो वैष्णवी प्राजापत्येति त्रिविधाः सन्ध्योपास्तिविशेषास्तत्तत्संहितासूच्यन्ते ; तथाऽपि तासां संहितानां लुप्तप्रायत्वेन तत्तत्प्रकाराणां दुर्ज्ञानत्वात्, **पारमेश्वरपरमसंहिता**दिषु परिदृश्यमानसन्ध्योपासनप्रकारभेदानामपि यथावदुपदेशानुष्ठानपारम्पर्यासिद्धेः, भगवच्छास्त्रसंहितास्वेव स्वसूत्रोक्तसंस्काराचाराभ्यनुज्ञानात्, प्रथमपरिगृहीतपरित्यागे निर्बन्धाभावात्, यथासूत्रमनुष्ठानेऽपि भगवत्समाराधनरूपत्वसिद्धेस्स्वसूत्रविहितमेव सन्ध्योपास्त्यादिकं कर्तुमुचितम् । उक्तं हि **नारदीये**—* स्वसूत्रविहितान्वाऽपि निषेकादीन् समाचरेत् इत्यादि । **पाद्मे** च शौचाचमनदन्तधावनस्नानानि यथाक्रमं विधायानन्तरमेवं सन्ध्योपासनमुक्तम्—

* आचम्य प्रोक्षयेद्देहं वारिभिर्मन्त्रवत्तनुम् । ओंपूर्वया च गायत्र्या वारिभिश्चाभिमन्त्रितैः ॥
आत्मानं परिषिच्योर्ध्वमुत्क्षिपेत्सलिलाञ्जलिम् । योद्धुकामानि रक्षांसि सन्ध्ययोरुभयोरपि ॥
शाम्यन्ति तैर्वज्रभूतैर्हतानि प्रेरितैर्जलैः । प्रायश्चित्तं तु हिंसायाः परिक्रम्य प्रदक्षिणम् ॥
तर्पयेदुपविश्याथ तत्तन्मन्त्रानुदीरयन् । देवादीन् सलिले तिष्ठन् सावित्रीं प्राङ्मुखो जपेत् ॥
यावत्सूर्योदयं दृष्ट्वा प्राञ्जलिस्तिमिरापहम् । उपस्थाय स्वशाखोक्तैर्मन्त्रैर्ध्येयं हृदि स्थितम् ॥
अभिवाद्य गुरून् वृद्धांस्तथा भागवतान् क्रमात् ॥ इति ।

अत एव हि **श्रीमद्भट्टारकै**रुक्तम्—

* प्रातरुत्थाय संस्मृत्य हरिं तच्चरणोत्थिताम् । गङ्गां विभाव्य तीर्थाम्भस्ततस्तदवगाह्य च ॥
श्रुतिस्मृत्युदितं कर्म यावच्छक्ति परात्मनः । आराधनत्वेनाधाय सोर्ध्वपुण्ड्रश्च तर्पयेत् ॥ इति ।

तद्गुरुभिः **श्रीवत्साङ्कमिश्रैरपि** वदुकपूर्णाभ्यर्थनया **अभिगमनसारमुपदिशद्भिरादावुक्तम्**—*प्रातरुत्थाय स्वगुरोश्चरणारविन्दे आत्मानं समर्प्य कृतार्थं निर्भरं स्वात्मानमनुसन्धाय स्नानादिकं स्वकर्म कृत्वा शुचौ देशे आसीनः इत्यादि । **वङ्गिवंशेश्वरैश्च**—

* धृतोर्ध्वपुण्ड्रो देवर्षिपितॄन् सन्तर्प्य मन्त्रतः । प्रयतः परया भक्त्या स्वकर्माराध्यमच्युतम् ॥
आदित्यमण्डलान्तस्थं प्रणम्य मनसा स्मरन् । संधातृत्वेन सर्वेषां सन्ध्येति परिकीर्तितम् ॥
श्रुतिस्मृत्युदितं कर्म स्ववर्णस्वाश्रमोचितम् । फलाभिसन्धिरहितं परब्रह्मार्चनात्मकम् ॥
न्यस्य कर्तृत्वभोक्तृत्वे स्वामित्वं च परात्मनि । नित्यनैमित्तिकैः काम्यैः कर्मभिश्च समन्वितः ॥
गायत्रीजपपर्यन्तं मन्त्राचमनपूर्वकम् । सान्ध्यं कर्माखिलं साधु समाप्य च यथाविधि ॥
ततः स्वकर्मभोक्तारमादित्यान्तरवस्थितम् । उपस्थाय स्वकैर्मन्त्रैर्नारायणमतन्द्रितः ॥ इत्यादि ।

अत्र गायत्र्यभिमन्त्रितजलाञ्जलिप्रक्षेपे भगवदर्घ्यत्वरूपत्वमपि भावनीयतया संगृहीतं **नारायणमुनिभिः**—

* आपो हीत्यादिभिर्मन्त्रैर्वाचकैः परमात्मनः । संप्रोक्ष्य मन्त्राचमनं मन्त्रैस्तत्प्रतिपादकैः ॥
आदित्यान्तस्थितस्यार्घ्यं वितीर्य परमात्मनः । प्रतिपादिकया विष्णोस्सावित्र्या तं जपेद्धरिम् ॥
ध्यायन् जप्त्वोपतिष्ठेत तमेव पुरुषोत्तमम् । नारायणात्मकान्देवान्ऋषीन् संतर्प्येत्पितॄन् ॥
तत आधारशक्त्यादीन् सर्वान्पारिषदान्तकान् । संपीड्य तीरे तद्वस्त्रं पुनराचम्य वाग्यतः ॥
पाषण्डादिभिरालापदर्शनादीनि वर्जयेत् ॥ इति ।

यथोपदिष्टसन्ध्यानादरे च दोषं स्मरन्ति—

* अनागतां तु ये पूर्वामनतीतां तु पश्चिमाम् । सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः ॥
सायं प्रातस्सदा सन्ध्यां ये न विप्रा उपासते । कामं तान् धार्मिको राजा हीनकर्मसु योजयेत् ॥ इति ।

स एष सन्ध्याकर्मक्रमः ॥

अथ ब्रह्मयज्ञं प्रत्यक्षतैत्तिरीयश्रुत्याद्यनुसारेण उदित आदित्ये कुर्यात्, माध्यन्दिनानन्तरमेव वा, भोजनात्पूर्वं वा, यत्र क्वचिदवसरे वा । तीर्थस्नानसमनन्तरं **महाभारतोक्तप्रकारेण** तीर्थासन्नविष्ण्वायतनं च नमस्कुर्यात् । भगवन्मन्दिरप्रवेशदशायां कर्त[व्यं]व्यस्य दिङ्मात्रं प्रदर्शितं **श्रीसात्त्वते**—

* प्रासादं देवदेवीयमाचार्यं पाञ्चरात्रिकम् । अश्वत्थं च वटं धेनुं सत्समूहं गुरोर्गृहम् ॥
दूरात्प्रदक्षिणीकुर्यान्निकटात्प्रतिमां विभोः । दण्डवत्प्रणिपातैस्तु नमस्कुर्याच्चतुर्दिशम् ॥
न यानपादुकारूढो न सोपानत्कपादभृत् । न विक्षिप्तमना भूत्वा संविशेद्भगवद्गृहम् ॥ इति ।

तत्र च प्रदक्षिणप्रणामांश्च युग्मानेव कुर्यात्,

* द्विधा प्रदक्षिणं कुर्यात्प्रणामं च तथाविधम् । यतस्समो हि भगवान् देवस्सर्वस्य वै हरिः ॥

इति परमेश्वरेण * एकत्रिपञ्चसप्तादिगणना विषमं हि यदिति विषमप्रतिषेधात् । * प्रवेशे निर्गमे चैव विष्वक्सेननतिं चरेत् इति विधानात् विष्वक्सेनं तत्तद्द्वारपालांश्च प्रणम्यानुज्ञाप्य तत्रतत्र प्रविशेत् ।

* चक्रवद्भ्रामयेन्नाङ्गं पृष्ठभागं न दर्शयेत् । पश्चाद्भागेन निर्गच्छेद्देवतासन्निधौ सुधीः ॥ इति ।

प्रविष्टश्चाष्टाङ्गेन तत्तद्देशकालशक्त्येन मस्तिष्कसम्पुटप्रह्वाङ्गपञ्चाङ्गदण्डाङ्गादिष्वन्यतमेन वा प्रणमेत् । तत्राष्टाङ्गप्रणामं

* मनोबुद्ध्यभिमानेन सह न्यस्य धरातले । कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥

इति सात्त्वतोक्तमुदाहरिष्यति **भाष्यकारः** । मस्तिष्कादिपञ्चकं तु **श्रीवैखानसशास्त्रे** पठितम्–

* स मस्तिष्कप्रणामस्स्यादञ्जलिं मस्तके न्यसेत् । प्रणामस्सम्पुटस्स स्याद्धृदयेऽञ्जलिमर्पयेत् ॥
प्रह्वाङ्गस्सम्पुटं कुर्यात्सा प्रह्वाङ्गनमस्क्रिया । पादाङ्गुलिभ्यां जानुभ्यां शिरसा चावनिं स्पृशन् ॥
बद्धाञ्जलिर्नमस्कुर्यात्स पञ्चाङ्ग उदीर्यते । पादौ हस्तौ प्रसार्यैव शेते भूमौ च दण्डवत् ॥
स दण्डाङ्गप्रणामस्स्यात्प्रणामानेवमाचरेत् ॥ इति ।

सङ्कर्षणसंहितायां सुकृतप्रणामप्रकरणे त्वेवं प्रणाम उक्तः–

* ललाटोदरजान्वङ्घ्रियुगाग्रानूर्ध्वगौ करौ । भूमौ संधाय मनसा वासुदेवमनुस्मरन् ॥ इति ।

एवं चाष्टाङ्गप्रणामः स्मर्यते–

* उरसा शिरसा वाचा मनसा च कपोलतः । पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥ इति ।

रहस्यात्रायब्राह्मणे च नमस्कारप्रकरणे *जानुभ्यां पाणिभ्यां शिरसा च नन्तव्यं भवतीत्यादिना पूर्णनमस्कारस्वरूपादिकमुपदिश्य तत्फलं चोक्तम् * सर्वैः करणैर्नमन् समग्रो नमति समग्रो नमन्नाप्तकारी भवति आप्तकारी भगवन्तमाप्नोति इति । एवं द्वादशाङ्गप्रणामादिकं च तत्रतत्र द्रष्टव्यम् । एकहस्तेन नमनं तु **श्रीभागवते** प्रतिषिद्धम्–

* एकेन पाणिना यस्तु प्रणमेत्पुरुषोत्तमम् । न्याय्यस्तस्य करच्छेद इति धर्मविदो विदुः ॥ इति ।

अञ्जलित्वमपि ह्यस्य नास्ति * तौ युनावञ्जलिः पुमान् इति नैघण्टुकपाठात् । चामरग्राहिणीप्रभृतीनां तु व्याप्तान्यहस्ततया एकहस्तनमनाभ्यनुज्ञा । अतोऽवज्ञादिमूलैककरनमने करच्छेददण्डानुशासनमिति * यथा तथा वाऽपि सकृत्कृतोऽञ्जलिः इत्यादोनामविरोधः । योग्यतायां सत्यां द्वाभ्यां पाणिभ्यां प्रणमतोऽप्यूनत्वमामनन्ति * यदा ह्ययं केवलपाणिभ्यामेव नमति न जानुभ्यां न शिरसा एकेन ज्ञानेन नमति स्पर्शविशेषज्ञानेन हीयते इतराणि ज्ञानानि कर्मणः एकेन नमन्नूनो नमति ऊनो नमन्ननाप्तकारो भवति अनाप्तकारी न भगवन्तमाप्नोति इति । आचार्य[दर्शने]कीर्तने भगवन्नामग्रहणे चाञ्जलिबन्धादिकं तत्रतत्र ग्राह्यम् । दर्शितश्चायमाचारः **संभवपर्वणि** व्यासप्रस्तावे * महर्षेः कीर्तनात्तस्य भीष्मः प्राञ्जलिरब्रवीत् इति । एवं यथार्हं प्रणम्योत्थितश्च भगवतः पुरस्ताद्दक्षिणतोऽवस्थाय गुरुपरम्परया भगवन्तं शरणमुपगम्य पावनमनोहरतद्दर्शनानन्दबृंहितसर्वाङ्गः प्रीतिपरीवाहरूपाणि स्तव्यस्तवप्रियवशीकरणानि स्तोत्राणि पठेत् । भगवदर्चकतारदर्शनमाहात्म्यं चैवमुक्तं **श्रीपौष्करे**–

* संदर्शनादकस्माच्च पुंसां संमूढचेतसाम् । कुवासना कुबुद्धिश्च कुतर्कनिचयश्च यः ॥
कुहेतुश्च कुभावश्च नास्तिकत्वं लयं व्रजेत् ॥ इति ।

अन्यत्र तु महतामपि पातकानां प्रायश्चित्ततया विधीयते * अहरेकं हरेर्बिम्बमापीठादवलोकयेत् इति ;

* आपीठान्मौलिपर्यन्तं पश्यतः पुरुषोत्तमम् । पातकान्याशु नश्यन्ति किंपुनस्तूपपातकम् ॥ इत्यादि च ।

स्तुतिसङ्कीर्तनादेश्च प्रभावः

* एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः । यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरस्सदा ॥

*कलौ सङ्कीर्त्य केशवम् ,

*कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः । कीर्तनादेव कृष्णस्य मुक्तबन्धः पदं व्रजेत् ॥

इत्यादिषु ग्राह्यः । अत्र भगवत्प्रसादलब्धं तुलसीपादोदकादिकं यत्किञ्चिदपि प्रणिपातपुरस्सरं हर्षोत्फुल्लकपोलश्शिस्सा संभाव्य यथार्हमुपयुञ्जीत । अत्र *प्रतापभूपरचितस्तथाऽऽचमननिर्णय इत्यादौ शिष्टाः पठन्ति—

*आम्रेक्षुदण्डताम्बूलचर्वणे सोमपानके । विष्वङ्घ्रितोयपाने च नाद्यन्ताचमनं स्मृतम् ॥ इति ।

तन्मूलभूता चाथर्वणश्रुतिर्नारायणमुनिभिस्संगृहीता—*भगवान् पवित्रं वासुदेवः पवित्रं तत्पादौ पवित्रं तत्पादोदकं पवित्रं न तत्पान आचमनं यथा हि सोमपान इति । एवं भगवत्सेवयाऽऽत्मानं कृतार्थं मन्यमानो भगवदनुज्ञया क्वचिन्निभृतमुपविश्य जपादिभिरुपासीत । भगवन्मन्दिरे च तत्तच्छास्त्रोक्तानपचारान्परिहरेत् ; एवं तु श्रीवराहपुराणे द्वात्रिंशदपचाराःपठिताः—

*श्रीधरण्युवाच—देवदेव जगन्नाथ श्रुतं त्वत्तो मयाऽखिलम् । यान् कृत्वाऽयोग्यतां यान्ति तव वेश्मप्रवेशने ॥
तान् ब्रूहि देवदेवेश भक्तवत्सल माधव ॥

श्रीभगवानुवाच—अपचारानहं वक्ष्ये तच्छृणुष्व वसुन्धरे ॥

गीतवादित्रनृत्तादिपुण्याख्यानकथाश्च ये । लोपयन्त्यथ पारुष्यैर्मम वेश्मसु मानवाः ॥
ते यान्ति वसुधे पापा नरकानेकविंशतिम् । ततस्तेऽपि महाभागे गार्दभीं योनिमाश्रिताः ॥
वर्तन्ते तत्र वै देवि सप्तजन्मानि सौकरीम् । वस्त्रेणाच्छाद्य देहं तु यो नरः प्रणमेत्तु माम् ॥
श्वित्री च जायते मूर्खस्त्रीणि जन्मानि भामिनि । कृष्णकम्बलसंवीतो यो नरः प्रणमेत्तु माम् ॥
चण्डालयोनितां याति जन्मानि नव पञ्च च । तैलेनाभ्यक्तसर्वाङ्ग उपानद्गूढपादकः ॥
यो नरः प्रविशेद्गेहं मम भूतधरे शुभे । स याति गृहपालानां योनौ जन्मत्रयं शुभे ॥
नखरोमाणि यश्चैव केशास्थीनि तथैव च । यः क्षिपेन्मम गेहेषु तस्य पापफलं शृणु ॥
माक्षिकीं योनिमाविश्य नखरोमचितस्तथा । सप्त जन्मानि तत्रैव नरकानेकविंशतिम् ॥
ताम्बूलचर्वितं यस्तु प्रक्षिपेन्मम मन्दिरे । स याति नरकं घोरं यावदाभूतसम्प्लवम् ॥
ततो मुक्तो महाभागे शुनकोऽपरजन्मनि । संस्थितस्त्रीणि जन्मानि वसत्येव न संशयः ॥
निष्ठीवनकरो यस्तु मन्दिरे मम सुन्दरि । कृमिभक्ष्ये पतेद्घोरे नरके पापकृन्नरः ।
श्लेष्मातकतरुर्भूत्वा जायते जन्मपञ्चकम् । श्मशानमध्ये गत्वा तु यो नरो मामथार्चयेत् ॥
सप्तजन्मकृतात्पुण्यात्तत्क्षणान्मुच्यते नरः । सार्गालीं योनिमाश्रित्य वसेज्जन्मत्रयं शुभे ।
मूत्रयेन्मन्दिरे यस्तु मम देवि शुभानने । स मूत्रगर्तनरके पतत्येव ह्यवाक्छिराः ॥
तस्मान्मुक्तस्तु रक्तादिनिम्बकद्रुममास्थितः । जनिष्यति वरारोहे सप्त जन्मानि सौकरीम् ॥
पुरीषं वा प्रकुर्वीत यो नरो मम मन्दिरे । स याति नरकान् घोरान् पर्यायेणैकविंशतिम् ॥
ततो मुक्तो महाभागे विष्ठायां जायते क्रिमिः । अनुगम्य तथा प्रेतमिच्छया यस्तु मानवः ॥
आराधितुमथेच्छेन्मां स व्रजत्यधमां गतिम् । बलिभुग्योनितां याति जन्मानि भुवि भूधरे ॥
भरणं तु तथा कृत्वा मृतकस्य वसुन्धरे । मन्दिरं न प्रवेष्टव्यं प्रविष्टस्य फलं शृणु ॥

चाण्डालीं योनिमाश्रित्य जन्मानि नव पञ्च च । भविष्यति वरारोहे व्याधः क्रूरोऽतिनिष्ठुरः ॥
भुक्त्वा श्राद्धं महाभागे मनुजो मामथार्चयेत् । चटकत्वमनुप्राप्य ततो गोधावपुर्गतः ॥
छायामाक्रम्य यो मोहाद्विमानस्य वसुन्धरे । प्रदक्षिणमकुर्वंस्तु यस्तिष्ठेन्मतिपूर्वकम् ॥
तिष्ठेत्स कानने शून्ये कण्टकैर्बहुभिर्वृतः । फलपुष्पविहीनश्च अरण्ये शून्यवृक्षताम् ॥
समीपे मन्दिरस्यापि शकृन्मूत्रं करोति यः । स तिष्ठेद्दौरवे घोरे वर्षाणामयुतं शुभे ॥
ततोऽपि मनुजो मुक्तो ग्रामसूकरजातिताम् । ग्रामे जन्मशतं सुभ्रु विष्ठाभुक् सूकरस्तथा ॥
अनिबद्धप्रलापान् ये कुर्वते मम सन्निधौ । तेऽपि तित्तिरितां भूत्वा जायन्ते जन्मपञ्चकम् ॥
आरोपितं प्रदीपं ये नयन्त्यन्यत्र मन्दिरात् । अन्धास्तेऽपि भविष्यन्ति जन्मानि नव पञ्च च ॥
कथायां कथ्यमानायां मन्दिरे मे वरानने । अनादृत्य च ये यान्ति तेषां पापफलं शृणु ॥
तोयहीनेऽतिरौद्रे च वने वै शून्यवृक्षताम् । जायन्ते सप्तजन्मनि ततश्चण्डालतां ययुः ॥
बधिरास्ते भविष्यन्ति मूका वै जन्मपञ्चकम् । पादौ प्रसार्य मद्गेहे शेरते ये नराधमाः ॥
लालां विसृज्य चोच्छिष्टां तेषां पापफलं शृणु । तोयहीनेऽतिरौद्रे च वने वै शून्यवृक्षताम् ॥
जायन्ते सप्त जन्मानि ततश्चण्डालतां ययुः । दरिद्राश्चैव मूर्खाश्च भविष्यन्ति त्रिजन्मकम् ॥
अन्यदेवार्थसंदिष्टैः पुष्पैर्यो मामथार्चयेत् । ममैव तु महागेहे मण्डूकत्वं व्रजन्ति ते ॥
जन्मद्वयं तु वै मूढाः शूद्रतां यान्ति ते नराः । अन्यदेवगृहं गत्वा ह्यक्षात्वा यो व्रजेद्गृहम् ॥
ममैव वसुधे तस्य फलं पापस्य मे शृणु । गृहाद्गृहमथो गत्वा भिक्षार्थी क्षुधितः स्वयम् ॥
भिक्षामलब्ध्वा तत्रापि दरिद्रो जायते नरः । चत्वारि चैव जन्मानि तेषामन्ते च योऽबुधः ॥
चण्डाल्योनिमाप्नोति जन्मानि दश पञ्च च । अन्यदेवसमं यस्तु मन्यते मां तु सोऽधमः ॥
चण्डाल्योनितां याति जन्मानि दश पञ्च च । कुसुमानां निवेद्यानां गन्धमाघ्राति यो नरः ॥
स पूतिगन्धसंयुक्तः कुष्ठी चैव धरे शुभे । भवति त्रीणि जन्मानि भवत्येव न संशयः ॥
विष्णुस्थानसमीपस्थान् विष्णुसेवार्थमागतान् । श्वपचान् पतितान्वाऽपि स्पृष्ट्वा न स्नानमाचरेत् ॥
उत्सवे वासुदेवस्य यः स्नाति स्पर्शशङ्कया । स्वर्गस्थाः पितरस्तस्य पतन्ति नरके क्षणात् ॥
पिबेत्पादोदकं विष्णोर्वैष्णवानां विशेषतः । तत्र नाचमनं कुर्याद्यथा सोमे द्विजोत्तमः ॥

इति श्रीवराहपुराणे धरणीप्रश्ने द्वात्रिंशदपचारोनाम पञ्चचत्वारिंशोऽध्यायः ॥

अन्ये तु द्वात्रिंशदपचाराः प्रकारान्तरेण पठ्यन्ते; तत्र चात्र चोक्तानुक्तसमुच्चयः कार्यः । तत्रेयमेका प्रक्रिया—

* अपचारास्तथा विष्णोर्द्वात्रिंशत्परिकीर्तिताः । यानैर्वा पादुकैर्वाऽपि गमनं भगवद्गृहे ॥
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः । एकहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणम् ॥
उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम् । पादप्रसारणं चाग्रे तथा पर्यङ्कबन्धनम् ॥
शयनं भोजनं चैव मिथ्याभाषणमेव च । उच्चैर्भाषा वृथाजल्पो रोदनार्थं च विग्रहः ॥
निग्रहानुग्रहौ चैव स्त्रीषु साकूतभाषणम् । अश्लीलकथनं चैवाप्यधोवायुविमोक्षणम् ॥

कम्बलावरणं चैव परनिन्दा परस्तुतिः । शक्तौ गौणोपचारश्चाप्यनिवेदितभक्षणम् ॥
तत्तत्कालोद्भवानां च फलादीनामनर्पणम् । विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिषु ॥
पृष्ठीकृत्यासनं चैव परेषामभिवादनम् । गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ॥ इति ।

एवं प्रक्रियान्तराण्यपि तत्रतत्र ग्राह्याणि । तथा—

* प्रमादादपि कालालं यः स्पृशेद्वैष्णवो नरः । उपचारशतेनापि न क्षमामि वसुन्धरे ॥
स्वाधीनशयनं जल्पं स्वाध्यायं च विशेषतः । आसनारोहणं चैव न कुर्यात्केशवालये ॥
यो विष्णोः प्रतिमाकारे लोहभावं करोति च । यो गुरौ मानुषं भावमुभौ नरकपातिनौ ॥

इत्याद्युक्तान्यपचारान्तराण्यपि द्रष्टव्यानि। एवं भगवन्मन्दिरे सावधानः परिहृतापचारः पूर्ववत्प्रणम्य विष्वक्सेनादीननुज्ञाप्य निर्गच्छेत् । ततः स्वदेवाधिष्ठितमाश्रमगृहादिकमागत्य सुप्रक्षालितपाणिपादः स्वाचान्तः स्वर्णरजताताम्रादिपात्रैः स्वयं पूर्वाहृतेन मणिकस्थेन वा गृहं संप्रोक्ष्य स्वसूत्रविधिना भगवदात्मकं स्वाग्निं हुत्वा देवगृहमागत्य दूरात्प्रणमेत् । अत्र चैवमभिगमनं **वङ्गिर्वंशेश्वरैर्दर्शितम्**—

* ततः कुम्भं समादाय शुचिनाऽऽपूर्य वारिणा । हरेराराधनार्थाय मौनी नियतमानसः ॥
पाषण्डावेक्षणादीनि वर्जयन् यत्नतः पथि । ध्यायन्नारायणं देवं यागभूमिं समाश्रयेत् ॥
ततः प्रक्षाल्य चरणौ स्वाचान्तस्सुसमाहितः । ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा मुनिः ॥
स्ववर्णस्वाश्रमार्हेण विधिना श्रद्धयाऽन्वितः । समिदाज्यादिभिर्द्रव्यैर्मन्त्रैरपि यथोदितैः ॥
हुत्वाऽग्नीनग्निहोत्रादावुक्तं कालमविक्षिपन् । पराराधनरूपेण कृतेनैव स्वकर्मणा ॥
कृते निष्कल्मषे शुद्धे स्वस्मिन्मनसि सुस्थिते । लब्धाधिकारो देवस्य ध्यानार्चनजपादिषु ॥
विनिष्क्रम्याग्निशालाया गत्वा यागगृह स्वकम् । अर्चयित्वा परात्मानं देशकालाद्यपेक्षया ॥
पत्रैः पुष्पैः फलैर्वाऽपि पूजाकालोक्तवर्त्मना । केवलाञ्जलिना वाऽपि विहितेन यथा तथा ॥ इति ।

अत्र पराराधनरूपेण कर्मणा परिशुद्धान्तःकरणस्य ध्यानार्चनादिष्वधिकारविधानात् केषाञ्चित्कुदृष्टीनां मतं निरस्तम् । उक्तं च कुदृष्टिमतोपन्यासमध्ये **परकालसूरिभिः**—

* स्तुतिजपनिजबिम्बालोकनध्यानसेवास्मृतिकथनसमर्चाकर्मभिः श्रौतदूरैः ।
वृषभशिखरिनाथ त्वामभीप्सन्ति केचिच्छ्रुतिपथपरिनिष्ठप्रापणीयाङ्घ्रिपद्मम् ॥ इति ।

एवं च संगृहीतं **नारायणमुनिभिः**—

* पाषण्डादिभिरालापदर्शनादीनि वर्जयेत् । गृहानागत्य संक्षाल्य पादावाचम्य वाग्यतः ॥
द्वारपालाननुज्ञाप्य प्रविश्य सदनं हरेः । अभिगम्य च देवेशं निभृतः परया मुदा ॥
मनोबुद्ध्यभिमानेन सह न्यस्य धरातले । कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥
अष्टाङ्गेन प्रणामेन दिव्यशास्त्रोदितेन च । प्रणमेत्पुण्डरीकाक्षं भक्तिभारावनामितः ॥
द्वयेन तद्विवरणैः प्रपद्य प्रभुमीश्वरम् । निक्षिप्य चिरमात्मानं तत्पादाब्जे कृती भवेत् ॥ इति ।

इह च— * ब्राह्मे मुहूर्ते संप्राप्ते उत्थाय शयनात्ततः । स्नात्वाऽभ्यर्च्य जगन्नाथं समाराधनमाचरेत् ॥

इत्येतावत्सात्त्वतोक्तं [सर्वेषां] समानम्, शेषं तु तावत् तत्तत्संहितानिष्ठानामेव। एवं संहितान्तरेषु कालान्तरकर्मस्वपि ग्राह्यम्। **जयाख्यसंहितायां** तु सर्वसंहितोक्ताभिगमनं संग्रहेणोक्तम्—

* ब्राह्मान्मुहूर्तादारभ्य प्रागंशं विप्र वासरे। जपध्यानार्चनस्तोत्रैः कर्मवाक्चित्तसंयुतैः॥
अभिगच्छेज्जगद्योनिं तच्चाभिगमनं स्मृतम्॥ इति।

पाद्मे च आद्यन्तकर्मावच्छेदेन दर्शितम्—

* कल्याणाचरणान्तं यत्कर्मजातं चतुर्मुख। उत्थानादिक्रमादेतदभियानमुदीरितम्॥ इति।

सन्ध्योपासनानन्तरकृत्यं चैवं विवृतम्—

* अभिवाद्य गुरून् वृद्धांस्तथा भागवतान् क्रमात्। प्रविश्य स्वाश्रमं देवमभिगम्य यथाविधि॥
अर्चयेज्जपहोमान्तं दद्याद्ग्रासं गवामपि। अञ्जनालेपनैः स्रग्भिर्वासोभिर्भूषणैस्तथा॥
अलक्तकरसाद्यैश्च ताम्बूलमुखशोधनैः। उपेतो मङ्गलैरन्यैर्नयेदभिगमक्रियाम्॥ इति।

एतेन * देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणम् इति स्मृत्यभिप्रेतमपि विवृतम्। अत्र च * उपेतो मङ्गलैरन्यैर्नयेदभिगमक्रियाम् इति वचनं तत्तदाश्रमाविरुद्धमङ्गलदेवतावलभदेवगुरुपूजास्तुतिनमस्कारादिकमपि संगृह्णाति। * ग्रासं गवामपि इत्येतच्च परगोविषयम्, * ग्रासमुष्टिं परगवे दद्याच्चैव न लोपयेत् इति। श्रीवैष्णवधर्मशास्त्रोक्तेः। कृष्णमन्त्रकल्पेऽप्युक्तम्—* दद्याद्ग्रासमित्यारभ्य, * गोषु चैवं प्रसन्नासु गोपालोऽपि प्रसीदति इति। गवादिषु चान्तस्थितो भगवान् भाव्य इति **जयाख्यसंहितायामुक्तम्**—

* सोमसूर्यान्तरस्थं च गवाश्वत्थाग्निमध्यगम्। भावयेद्भगवद्विष्णुं गुरुविप्रशरीरगम्॥ इति।

अतस्तत्रतत्र प्रयुक्तेष्वपि कर्मसु न देवतान्तरभजनरूपत्वप्रसङ्गः। एवं व्यासाद्युक्तदेवादिनमस्कारोपहारनिवेदनपुष्पादिप्रदानवृद्धाभिवादनगुरूपसेवनतद्धिताचरणवेदाभ्यासजपाध्ययनधारणतदर्थविचारणधर्मादिशास्त्र[वैदिक]निगमवेदाङ्गावेक्षणप्रभृतीनि प्रथमकालकर्तव्यानि पूर्वाधिकारविशोधितप्रक्रियया प्रतिसन्धेयानि॥ **इति व्याख्यातमभिगमनम्॥**

उपादानविधिः॥ अथोपादानं व्याख्यास्यामः—तच्चैवं संगृहीतं **वङ्गिर्वंशेश्वरैः**—

* प्राप्तेऽथाह्नो द्वितीयांशे शास्त्रधर्मेण धर्मतः। आर्जयित्वाऽर्चनाद्रव्यमशेषं च यथोदितम्॥ इति।

तदेतद्व्याख्यातं **नारायणमुनिभिः**—

* अह्नो द्वितीयभागेन कृष्णाराधनतत्परः। द्रव्याण्याराधनार्थानि शास्त्रीयाणि समार्जयेत्॥
प्रभूतानि विशुद्धानि शुद्धदेशोद्भवानि च। अरौद्राण्यनिषिद्धानि संगृहीतानि वैष्णवैः॥
सुगन्धीनि मनोज्ञानि पुष्पाण्यभिमुखानि च। वासांसि धनधान्यानि चन्दनाद्यनुलेपनम्॥
अन्यानि हविरर्थानि तानि मूलफलानि च। संक्षालितानि बहुशो देवभोग्यानि यानि च॥
दधिक्षीराज्यमुख्यानि द्रव्याणि च विशेषतः। उत्तमानुपदंशांश्च मुद्गमाषादिकान्यपि॥
ताम्बूलादीनि चान्यानि सर्वाण्यादाय सादरम्। यथार्हं तानि संस्कृत्य प्रक्रमेतार्चनं ततः॥ इति।

यदुक्तं श्रीसात्त्वते—

* प्रातरुत्थाय चिन्वीयात्स्वारामात्स्वयमेव हि। पूजार्थमस्त्रमन्त्रेण पुष्पादीन्यत्नतस्सदा॥

यायादरण्यमथवा निर्बाधं हि तदार्जयेत् । अकण्टकद्रुमोत्थाश्च कण्टकद्रुमजा अपि ॥
ह्यास्सुगन्धाः कर्मण्या ग्राह्यास्सर्वे सितादयः । उग्रगन्धास्त्वकर्मण्यास्त्वप्रसिद्धास्तथैव च ॥
चतुष्पथशिवावासश्मशानावनिमध्यजाः । क्षता अशनि[वा]पातायैः क्रिमिकीटसमावृताः ॥
वर्जनीयाः प्रयत्नेन पत्रपुष्पलादयः । अम्बुजानि सुगन्धीनि सितरक्तानि कानिचित् ॥
योक्तव्यानि पवित्राणि नित्यमाराधने तु वै । साङ्कुराणि च पत्राणि भृगतान्येवमेव हि ॥
विहितान्यर्चने नित्यं यथर्तुप्रभवानि च । न गृहे करवीरोत्थैः कुसुमैरर्चनं हितम् ॥
विशेषतस्सकामस्य सिद्धिभूतियुतस्य च । अतोऽन्यथा न दोषोऽस्ति दोष उन्मत्तकादिभिः ॥
सद्यो हृतानां विहितं त्वम्लानानां यथाक्रमम् । प्रदानमम्बुसिक्तानां तेषां कार्यं न चान्यथा ॥
निर्दोषतां प्रयान्त्याशु मन्त्रिणामवलोकनात् । भवन्ति भक्तिपूतानि ह्यन्मन्त्रनिरतात्मनाम् ॥ इति ।

तदिदं नियमपरिच्छेदानुशिष्टत्वाद्विपर्ययानर्हमवधातव्यम् । शक्तमधिकृत्य चात्र स्वारसिकं स्वयंप्रवृत्त्यादिकमुपदिश्यते, पक्षान्तरस्याप्यन्यत्रानुज्ञानात् । अत्र वैशेषिकार्चनादिषु कदाचित्प्रातश्शब्दस्य मुख्यार्थता, अन्यथा त्वभिगमनविधिना प्रातःकालोपरोधात्, अन्येषु च सर्वेषु शास्त्रेषु द्वितीयकाल एव द्रव्यार्जनविधानात् । प्रातश्शब्देन सन्निकर्षवशात्त्वरातिशयसिद्ध्यर्थं तदुचितकालो लक्ष्यते, *सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् इतिवत् । अत एवात्रत्यमुत्थानं च न स्वापानन्तरभावि, अपि तु *ततः पुष्पफलादीनामुत्थायार्जनमाचरेत् इति जयाख्यसंहितोक्तमभिगमनानन्तरं देवसन्निधेरुत्थानम् । इह च श्रीवैष्णवधर्मशास्त्रोक्तपुष्पनियमः पूर्वाधिकारे प्रसङ्गाद्दर्शितः । पाद्मे त्वेवं विचित्रद्रव्योपार्जनमुक्तम्—

*उपादद्याद्यथापूर्वं साधनानि यथातथम् । पुष्पाणि फलमूलानि विविधान्योषधीरपि ॥
दध्यादि च हविर्योग्यतण्डुलानि गुडानि च । स्नानीयान्यपि वस्त्राणि स्वादूनि सलिलानि च ॥
दर्भान् पत्राणि समिधो यथाशक्ति यथावसु । आहृत्य याच्ञया तैर्वा पूजास्थाने निवेशयेत् ॥
नीत्वोपादानसमयमित्थं तदनु पूजयेत् ॥ इति ।

अस्यां संहितायां संहितान्तरेषु पुष्पप्रकरणहविष्पाकप्रकरणादिषु च हेयोपादेयसमस्तद्रव्यविभागो द्रष्टव्यः । अत्र याच्ञयेत्युक्तोऽयमधमाधमपक्षः ;

*स्वप्रयत्नकृतं शस्तं मध्यमं वन्यमुच्यते । अधमं तु क्रयक्रीतं[याचितं] पारक्यं त्वधमाधमम् ॥

इति पुष्पप्रकरणोक्तस्य सर्वेषु द्रव्येष्वविशेषेण सञ्चरणात् । भोजराजस्त्वेवं पुष्पेषु राजसतामसादिविभागं पुष्पाङ्कुरपत्रमूलधूपदीपवस्त्राभरणेषु वर्ज्यावर्ज्यविभागं संजग्राह—*अथ पुष्पाणि त्रिविधानि, सात्त्विकानि राजसानि तामसानीति । शुक्लानि सात्त्विकानि, रक्तानि राजसानि, कृष्णानि तामसानीति । शुक्लानि द्विविधानि, शुक्लवर्णं वलक्षमिति । शुक्लं शङ्खकुन्देन्द्वादिवर्णम्, वलक्षं स्फटिकवर्णादि । रक्तं द्विविधम्, रक्तमरुणमिति । रक्तं जपाकुसुमादिवर्णम्, अरुणं किंशुकादिवर्णम् । पीतं द्विविधम्, पीतं हरितमिति । कृष्णं द्विविधम्, नीलं श्याममिति ; श्यामं विष्णुक्रान्तादि । फलमेषां भिद्यते, सात्त्विकादर्धफलानि राजसानि, राजसादर्धफलानि तामसानीति । एतानि स्वारामोत्पादितानि, आरण्यानि, क्रीतानि, प्रतिग्रहाल्लब्धानि, अयाचितानि च ग्राह्याणि पञ्चविधानि पुष्पाणि । तत्र स्वारामजमुत्तमम्, आरण्यं मध्यमम्, क्रीतमधमम्, अयाचितमधमाधमम्, प्रतिग्रहपुष्पे दातुरेव फलं कर्तुः किञ्चिद्भवेन्न वा ; तस्मात्प्रतिग्रहलब्धैः पुष्पैर्नार्चयेत्।

नार्चयेत्। करवीरौ पद्मौ केतकी जातिमल्लिकोत्पलानि तिन्त्रिणीतकरचम्पकश्वेतार्ककुटजवकुलकदलीतुलसीतमालवनमाल-मरुवकशमीसिन्दुवारपलाशसहदेवीफणिज्जकपुन्नागवंशपुंनागक्षुद्रपुन्नागमालतीश्वेतकुमुदकन्दलपद्ममहापुष्पनागसदामद्रा - प्रियङ्गुबिल्ववनमल्लिकालक्ष्म्यगस्त्यद्वयवैष्णवीकर्णिकाराशोककुटजिस्तथा कारण्डनन्द्यावर्तद्वयक्षुद्रकेतक्यः इत्यादीनि पुष्पाणि। एतानि तिथिभेदेन ग्रहणायनसंक्रान्तिव्यतीपातविषुवादिभेदात्सङ्गवादिकालविशेषाच्च समग्रफलानि फलन्ति। तत्र तिथिपुष्पाणि वैष्णव्ये—कदलीपद्मलक्ष्मीसिन्दुवारद्रोणप्रियङ्गुमालतीपाटलकेतकीजातिमल्लिकामहाजातिपलाशाश्वत्थ-पत्राणि तिथीनामानुपूर्व्येण पुष्पाणि गृह्णीयात्। नन्द्यावर्तकैस्संक्रान्त्यां भगवन्तं पूजयेत्, उपनन्द्यावर्तकैरयने, विषुवे तुलसीभिर्व्यतीपाते फणिज्जकैर्ग्रहणे मरन्दैः पूजयेत्। सङ्गवे तत्ततिथिचोदितं पुष्पं गृह्णीयात्, समे पद्मैः, धर्मे कुमुदैः, करवीरैः विष्णुप्रिये, बिल्वपत्रैः विरागे भगवन्तं पूजयेत्। अत्र सङ्गवादयः काला अहरहः प्रवर्तन्ते, सङ्गवस्समो विष्णुप्रियो धर्मो विराग इति पञ्च काला अध्यात्मविद्भिरुपदिष्टाः। उदयात्पञ्च नाड्यस्सङ्गव उक्तः, तस्माद्विगुणमात्रस्सम उपदिश्यते, तावता विष्णुप्रियः, तावता धर्मः, तावता विराग इति। तत्र पूर्वापरौ भूत्वा नाडिद्वयतस्सङ्गवादयो मुहूर्ता उक्ताः। तत्र सङ्गवे वैकुण्ठस्य प्रीतिः, समे अनिरुद्धस्य, विष्णुप्रिये शिंशुमारस्य, धर्मे बडबामुखाग्नेः, विरागे कपिलस्य—इत्येवं पञ्चानां पञ्च प्रीतिकालविशेषाः। दिवापुष्पैर्दिवापूजा मुख्या, रात्रिपुष्पैर्निशि। विहितेष्वपि छिद्रं मुकुलं जीर्णं पर्युषितं भुक्तशेषमाघ्रातं परिम्लानमस्पृश्यस्पृष्टं जन्तुभिर्भक्षितं जन्तुभिरधिष्ठितमशुभदेशे पुष्पितमापद्यपि न गृह्णीयात्। पाणी प्रक्षाल्य पात्रे पुष्पाणि गृह्णीयात्। पिधाय स्थापयेत् [पात्रम्] अप्रतापे प्रदेशे यथा न परिम्लायेत। केवलपुष्प-निवेदनान्माला वरा, मालायाः स्रग्वरा; एकगुणा माला, बहुगुणा स्रक्। तत्र सूत्रैः पुष्पाणि न ग्रथ्नीयात्, यदि ग्रथ्नीयात् निर्माल्यसमानानि भवन्तीति, देवोद्दिष्टानां निन्दां न कुर्यात्, प्रशंसामेव सर्वदा कुर्यात्, देवोद्दिष्टं मनुष्यो न गृह्णीयात् देवस्वं भवतीति, यत्किञ्चित्पीतवर्णं पुष्पं जलजं स्थलजं वा तदापदि संग्राह्यम्, अनुक्तमप्यन्यत्र। तत्रापि वर्जनीयानि विशेषेण वर्जयेत्। कारण्डं कृष्णवर्णं कपित्थं गिरिकर्णिकाम्रविभीतकशिरीषमदयन्तिनिर्गुण्डीसिन्दुवार-किंशुकशाल्मलीजपार्ककनकोन्मत्तकारञ्जविषपादपवन्धूकमाधवीनीपार्जुनपाटलिचिञ्चाकोशातक्यलाबुशिग्रुः इत्येतानि वृक्ष-वल्लीषु वर्जयेत्, यवमुद्गप्रियङ्गुनिष्पावशणदूर्वाभूतृणमाषाणामेवाङ्कुराणि गृह्णीयात्, अन्येषामङ्कुराणि निर्माल्यसमानानि भवन्ति इति, अपामार्गसहभद्रातुलसीबिल्वाश्वत्थपलाशधातकीतमालग्नन्धपूर्णकृष्णाब्राह्मीशमीवृक्षाणामेव पर्णानि गृह्णीयात्। उत्पलानामेव मुकुलं गृह्णीयात्। पद्मोत्पलादीनां जलजानां दिनद्वयादूर्ध्वं पर्युषितत्वम्, सर्वेषां मूलानामुशीरमूलमेव विशिष्टम्। देवदारुकृतं धूपं चन्दनागरुमिश्रितं विधूमाङ्गारसंभवं शस्तम्; सालसर्जरसं कृष्णागरुमिश्रितं प्राप्यङ्गवर्जित-मन्यं वा धूपं निवेदयेत्। पात्रे गव्येन सर्पिषा दिव्येन तैलेनापि कृतं सूत्रवर्तियुतं मुखानिलदीप्तिदीपितं दीपं भवेत्। दुकूलं क्षौमं नेत्रं सूत्रं वा कार्पासिकं सुगन्धधूपितं नवं वस्त्रं भवेत्। हेमरत्नमयमाभरणं दद्यात्। दोषयुतं मनुष्यैर्भुक्तपूर्वं वा नाभरणं भवेत्। तदेतन्नानासंहितापरामर्शसमुद्धृतं सारम्। अन्यदपि सर्वं तत्तत्संहितासु विस्तरेण द्रष्टव्यम्। श्रीशाण्डिल्यस्मृतौ च काष्ठपर्यन्तवर्ज्यावर्ज्यद्रव्यविभागः कृतः। श्रीविष्णुस्मृत्यादिषु प्राप्यङ्गसुगन्धेषु कस्तूरीमृग-मदयोरङ्गरागतया परिग्रहो गृहार्चायां शुक्लाम्बरसमर्पणपद्मकह्लारेतररक्तपुष्पवर्जनमित्याद्यपि ग्राह्यम्। योगक्षेमार्थैश्वराभि-गमनादिस्वरूपशोधनं च पूर्वाधिकारसिद्धं न विस्मर्तव्यम्। एवं द्रव्याण्यार्जयतः प्रतिग्रहनियमश्च तत्र तत्र सङ्क्षिप्तः। यथोक्तं श्रीशाण्डिल्यस्मृतौ—

* कुलटाषण्डपतितवैरिभ्यः काकणीमपि । उद्यतामपि गृह्णीयान्नापद्यपि कदाचन ॥ इति ।

उक्तं च श्रीसात्त्वते—

* तस्करात्पतितात्षण्डाद्रुम्भलोभमदान्वितात् । मात्राचित्तं न गृह्णीयादभक्तादपचारतः ॥ इति ।

स्मर्यते च— * केशवार्चा गृहे यस्य न तिष्ठति महीपते । तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं हि तत् ॥ इति ।

तत्र पक्वमन्नमपक्वं वा केशवार्चनरूपनित्य[ध]कर्मरहिते गृहे न प्रतिग्राह्यम्, उभयत्रान्नशब्दप्रयोगात्, अन्यथा पक्वान्नमिति विशेषेण प्रयोगानुपपत्तेः । प्रतिग्रहगुणदोषविस्तरश्च धर्मशास्त्रेषु पठितव्यः, सर्वेषु चापदनापद्दशाभाविषु **प्रतिग्रहेषु यमोपदिष्टं** मन्त्रविशेषं भगवान् **शौनकः** स्मरति—

* दानं ददद्भिर्यैरुक्तमच्युतः प्रियतामिति । प्रतिग्रहीतृभिश्चैवं न ते मद्विषयोपगाः ॥ इति ।

तथा बलादिमन्त्रान्तरैरपि तत्तन्निष्ठानां प्रतिग्रहादिः । यद्यप्यस्त्रमन्त्रेण सामान्यतस्सर्वपुष्पादिग्रहणमुक्तं, तथाऽपि तुलस्या मन्त्रविशेषास्तत्तत्कल्पेषूपदिश्यन्ते—* तुलस्यमृतजन्मासि इत्यादयः । एवं वृत्त्यर्थतयाऽनुज्ञातैरध्यापनयाजनादिभिरपि यथाशास्त्रं प्रयुक्तैस्समुचितानि समाराधनोपकरणानि सम्पादयेत् । पूर्वनिष्पन्नद्रव्यस्तु न प्रतिग्रहादिषु प्रवर्तेत । * आपत्स्वनन्तरा वृत्तिः इत्यनुज्ञातेष्वपि * वृत्तिं प्राप्य विरमेत् इति स्मरणान्न नित्यं प्रवर्तेत । कृषिवाणिज्ये च स्वयं कृते कुसीदं चैवमाद्यमपि गत्यन्तरासम्भवे । * सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः इत्याद्युक्तनन्दनवनकरणादियतनमपि पुष्पफलादिपूजोपकरणार्थतयोपादानकोटौ निविशते । अत्र परिव्राजकानां न स्वयं पुष्पापचयादि कर्तव्यम्, यथोक्तं **यतिधर्मसमुच्चये**—* फलपुष्पोत्पाटने प्रायश्चित्तविधानादद्भिः कर्तव्यमन्याहृतैर्वा इति । एषा च **वृद्धवसिष्ठस्मृतिः** तत्रोपात्ता—* जले मत्स्यादीनां स्थले पशुमृगसरीसृपादीनां सर्वप्राणिनामभयं दत्त्वा पुष्पमूलफलोपादान[च्छेदन]चन्दनमधुमांसानृतवचनादीनि वर्जयेत् इति । इतरेषां तु स्वयं परतो वा अन्यारामादिसम्भूतानाम् [अदत्तानां] ग्रहणे तस्करत्वमपि स्यात् इति तत्रतत्र द्रष्टव्यम् । स्मर्यते च द्रव्यगृहारामादिनियमो **मन्वादिभिः**—

* यानशय्यासनान्यस्य कूपारामगृहाणि च । अदत्तान्युपभुञ्जान एनसस्यात्तुरीयभाक् ॥

अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥ इत्यादिना ।

तदिह साक्षाद्वा परम्परया वा समाराधनोपकरणभूतशास्त्रीयसमस्तद्रव्योपायेषु स्वशक्येषु ध्यानादिविरोधिकायक्लेशकरबह्वायासरहितेषु न्यायतः प्रवर्तेतेत्युपादानसंग्रहः । प्रभूतायासवर्जनमपि हि मुमुक्षूणामवश्यंभावित्वेन परिगणितेष्वष्टसु गुणेषु गौतमः पठति—*दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति *यस्यैते चत्वारिंशत्संस्कारा नचाष्टावात्मगुणाः न स ब्रह्मणस्सायुज्यं सालोक्यं च गच्छतीति* । एवं च सति बाह्यद्रव्यार्जनवत्संप्रीणनेषु *प्रधानतमा*मानित्वादिगुणानां सदाचार्यसेवासत्संभाषणादिभिर्ज्ञानवृद्धिहेतुभिर्न्यायतः प्रवृत्तैस्सम्यगुपार्जनमपि पूर्वसिद्धपरिपूर्णबाह्यपूजोपकरणस्योपादान[कोटौ]काले निवेशनीयम् । बाह्यद्रव्याभाव इव गुणाभावेऽपि महाभारताद्युक्ताष्टादशचण्डालषड्वृषलसंज्ञितहेयगुणयोगेनानन्तरभावीज्यानर्हत्वप्रसङ्गात् । अत एव श्रुतिनिबन्धः क्रियते—* श्रुतादन्यत्र सन्तुष्टस्तत्रैव च कुतूहली इति ; तस्मात्समाराधनोपकरणं बाह्यमान्तरं च सर्वं यथार्हमुपादद्यात् ॥ **इति व्याख्यातमुपादानम्** ॥

इज्याविधिः ॥ सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणं कुञ्चयित्वा जानुन्याधाय सव्येतरमितरभुजं नागभोगे निधाय ।

पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयञ् शङ्खचक्रे देवीभूषादिजुष्टो नवजलदनिभः पातु दिव्यः परो नः ॥

अथेदानीं मन्त्रसिद्धान्तोपास्यपररूपविषयां भोगार्चनमयीमिज्यां **भाष्यकार**प्रणीतनित्यग्रन्थविवरणमुखेन व्याख्यास्यामः । मन्त्रसिद्धान्ते परिवारभेदस्तु गुणीभूतमूर्त्यन्तरयोर्वैकल्पिकः । तत्र प्रथममधिकारिविशेषे वृत्तवर्तिष्यमाणयोस्सङ्गतिं दर्शयन्

* कर्मारम्भेण मन्त्रेण प्राप्तं कालमनुस्मरेत् । इज्यामेवाभिसन्दध्यात्सा योनिस्सर्वकर्मणाम् ॥

इति प्रशंसितं चिकीर्षितग्रन्थविषयीभूतमहोरात्रकृत्ये प्रधानांशं दर्शयति—*अथपरमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्ये इति । अथशब्दस्य प्रसिद्धिप्रकर्षसिद्धानन्तर्ये संभवत्यर्थान्तरतात्पर्यपरिग्रहोऽनुपपन्न इति भाष्यादिषु स्थापितम् । अथ गद्यैर्यथावस्थितिप्रतिपादनानन्तरं तत एव तन्निष्ठाधिकारिविशेषसिद्धिसमनन्तरं [वा] *यथावस्थितस्वरूपरूपगुणविभूतिलीलोपकरणविस्तारमनुसन्धाय तमेव शरणमुपगच्छेदखिलेत्यादिना इति वक्ष्यमाणानुसाराच्चात्र तथाविधशरणागतिविषयगद्यग्रन्थस्य पूर्ववृत्तत्वं विवक्षितमिति ज्ञायते । नच तत्र *अखिलजगदाधार इत्यादिवक्ष्यमाणमन्त्रपङ्क्तिर्विवक्षिता, तस्याः प्रपत्तिकरणत्वादर्शनात्, यथावस्थितस्वरूपरूपगुणविभूत्यादीनां च गद्य एव प्रपञ्चनात्, * अनन्यशरणस्त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये इति च तत्र कण्ठोक्तेः । तस्माद्यथोक्त एवत्राथशब्दार्थः । परमश्चासौ एकान्तश्चेति परमैकान्तः, सोऽस्यास्तीति परमैकान्ती ; एकत्र अन्तो निश्चयः प्राप्यतया प्रापकतया च तदुभयं संभूय परमकान्तः, परमश्चासौ एकान्ती च इति वा समासः । तत्राप्यनन्योपायत्वानन्यप्रयोजनत्वयोस्समुच्चयात्परम्यम्, अनन्योपायत्वं चानन्यदेवताकत्वपर्यन्तम् । **यथोक्तम्**— * चतुर्विधा मम जना भक्ता एव हि ते [म]श्रुताः । तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवताः ॥ इति । अनन्यप्रयोजनत्वं च आत्मानुभवानन्दनैरपेक्ष्यपर्यन्तम् ; तदप्युक्तम्—

* ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः । सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥ इति ।

एतेन तुल्यन्यायतया भगवदनुभवानन्देऽपि फलित्वाभिप्रायो निरस्तः, मुक्तानन्दस्यापि सार्वभौमान्तःपुरशुकक्षीरास्वादनसुखवत्स्वतन्त्रेण परेणैव स्वप्रीत्यर्थमुपपादितत्वात् । एवंविधश्च परमैकान्तित्वं मन्त्रसिद्धान्तादिनिष्ठेष्वपि संभवतीति पूर्वाधिकारे स्थापितम् । दृश्यते च सदाचार्यसकाशाद्यथावस्थितगद्यत्रयादिश्राविणामिदानीमपि तत्संभवः । तत्र हि यथावत्पारार्थ्यनिश्चयादन्यभक्त्युन्मूलनेनानन्यदेवताकत्वादिकञ्च सिध्यति । ताञ्चावस्थां स्वयमेवाह भगवान्—

* अनन्यदेवताभक्ता ये मद्भक्तजनप्रियाः । मामेव शरणं प्राप्तास्ते मद्भक्ताः प्रकीर्तिताः ॥ इति ।

निरतिशयभोग्यभगवत्स्वरूपादिनिश्चयेन विषयान्तरवैमुख्यादनन्यप्रयोजनत्वमपि तत्रैव सिध्यति, यस्यां दशायां भगवान्त्यन्तासन्नस्सुहृदादिवत्स्वच्छन्दाराधनयोग्यो भवति ; यथोक्तं भगवता **शौनकेन**—

* पराङ्मुखानां गोविन्दे विषयासक्तचेतसाम् । तेषां तत्परमं ब्रह्म दूराद्दूरतरे स्थितम् ॥
तन्मयत्वेन गोविन्दे ये नरा न्यस्तचेतसः । विषयत्यागिनस्तेषां विज्ञेयं च तदन्तिके ॥ इति ।

एवं परिमितविषयत्यागिनां परिमितफलप्रददेवतान्तरत्यागो नियतो भवति,

* काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥

* ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ॥

इति परिमितफलसङ्गतदभावाभ्यां देवतान्तरसंबन्धासंबन्धप्रतिपादनात् । अतो यथा—

* परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि । सर्वैषणाविनिर्मुक्तस्स मैक्षं भोक्तुमर्हति ॥

इति प्रतिपादितस्य परमात्मेतरसर्वविषयविरक्तस्य प्रव्रजिताधिकारिणो देवतान्तरवर्जनं तथा त्रिष्वप्याश्रमान्तरेषु प्रतिबुद्धाधिकारिणः। स्मर्यते च प्रव्रजितानां देवतान्तरार्चनत्यागः—

अत्रिः—* त्रैकाल्यमर्चनं विष्णोर्देवानां च तदात्मनाम्। नमस्कारार्चनादीनि कुर्यान्नान्यस्य कस्यचित् ॥ इति।

क्रतुः— * ईश्वरो भगवान्विष्णुः परमात्मा महानजः। शास्ता चराचरस्यैको यतीनां परमा गतिः ॥ इति।

पुनस्स एवाह—* ध्यायतेऽर्च्यते योऽन्यं विष्णुलिङ्गमुपाश्रितः। कल्पकोटिशतैश्चापि गतिस्तस्य न विद्यते ॥ इति।

एवं प्रतिबुद्धानां सर्वेषां देवतान्तरवर्जनं प्रागेव दर्शितम्।

एतेन, * देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदण्डिनम्। नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति ॥

इत्यादिकमपि प्रतिबुद्धेतरविषयं मन्तव्यम्, प्रतिबुद्धस्यापि स्वनमस्कारयोग्यभगवत्तत्परिवारादिप्रतिमासु लब्धावकाशमेतत्। एवं परमैकान्तिशब्देनाधिकारिविशेष उक्तः; तस्य च

* परदाररतश्चैव परद्रव्यापहारकः। न स्पृशेन्मामनादृत्य स्पृष्ट्वा च पतितो भवेत् ॥

इत्यादिभिरनर्हतापादकानि [सर्वाणि] तत्रतत्र द्रष्टव्यानि। संगृहीतञ्च समाराधनोपयुक्तसर्वद्रव्यमाधारण्येन **वङ्गिवंशोद्भवैः**—

* निषेधाविषयीभावादृते नैवापरो गुणः। प्रीतिहेतुः परेशस्य स्वार्चनाङ्गेषु वस्तुषु ॥ इति।

आराधकस्याप्यर्चनाङ्गवस्तुत्वमविशिष्टम्। यथा च प्रशस्तजातिष्वेव तुलस्यादिपत्रपद्मादिपुष्परम्भादिफलगङ्गादितोयादिषु तैस्तैरुपहतिनिमित्तैर्निषेधविषयता, एवमाराधकेऽपि यतः कुतश्चिदुपघा[ता]तकादाप्रायश्चित्तमनर्हतया निषेधविषयत्वं भवति; अन्यथा * नाविरतो दुश्चरितात् इत्यादिश्रुतिव्याकोपप्रसङ्गात्, उपहतिविषयस्पृष्टबिम्बादिषु च प्रायश्चित्तविधानात्। ब्रह्मविदोऽपि ह्युत्तराघश्लेषवचनं प्रामादिक[दि]विषयमिति स्थापितं भाष्यादिषु। *सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् इत्यादिभिश्च सूत्रैरयमर्थस्सिद्धः। अपि च राजवदुपचारो ह्यत्र विधीयते, राजोपचारवृत्तिश्चापचारपरिहारप्रधाना, तद्वदिहापि। यथा च गुणवति राजनि सेवकानां सापराधानामपि क्षामणमात्रेण निरपराधता, तथेहापीति तल्लाभः। इदमपि संगृहीतम्—

* अज्ञानादथवा ज्ञानादपराधेषु सत्स्वपि। प्रायश्चित्तं क्षमस्वेति प्रार्थनैकैव केवलम् ॥ इति।

यत्त्वत्रानन्तरमुक्तम्—

* अर्चनादिष्वनर्हत्वान्न कश्चिन्नापराध्यति। अतोऽनङ्गीकृताशेषकर्तृदोषविमर्शया ॥
कृपयैवास्य देवस्य सर्वोऽप्यर्हति तत्क्रियाम् ॥ इति,

एतदपि क्षामणयोग्यतास्थापकम्, अन्यथा क्षमस्वेति प्रार्थना[विधाना]नुपपत्तेः। नचैतावता कृतापराधेन [निर्भयेन] भक्तिव्यम्, * प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् इतिन्यायात्। अत्र चाकर्मण्यताहेतूनपराधानेवमाह भगवान्—

* शृणु सुन्दरि तत्त्वेन आहारस्य विनिर्णयम्।
आहारो यस्त्वनाहारस्तच्छृणुष्व वसुन्धरे। भोजनं यस्तु भुञ्जीत मम योगाय माधवि ॥
अशुभं कर्म कृत्वाऽपि पुरुषोऽधर्मसंश्रितम्। आहारं चैव कर्मण्यमुपयुञ्जीत नित्यशः ॥
सर्वेषां च ततः कर्मप्रवृत्तेः प्राणधारणम्। अकर्मण्यानि वक्ष्यामि यैर्न तुष्यामि संप्रति ॥
राजान्नं च न भोक्तव्यं मम भक्तैः कदाचन। राजान्नेन तु भुक्तेन त्वपराधो महान् भवेत् ॥

द्वात्रिंशदपराधांस्तु न सेवेत मम प्रिये । भोज्यान्नपानाहारेषु ये मया परिकीर्तिताः ॥
दन्तकाष्ठमखादित्वा यस्तु मामुपसर्पति । द्वितीयमपराधं तु धर्मविन्न प्रवर्तते ॥
गत्वा मैथुनसङ्गं तु यस्तु मां स्पृशते नरः । तृतीयमपराधं तु कल्पयामि वसुन्धरे ॥
दृष्ट्वा तु मृतकं देवि यस्तु मामुपसर्पति । चतुर्थमपराधं तु न क्षमामि वसुन्धरे ॥
स्पृष्ट्वा रजस्वलां नारीं यस्तु मामुपसर्पति । पञ्चमं त्वपराधं च दृष्ट्वा वै न क्षमाम्यहम् ॥
स्पृष्ट्वा तु मृतकं चैव संस्कारं मृतकस्य वै । अपराधमिमं षष्ठं न क्षमामि वसुन्धरे ॥
ममार्चनविधौ काले वातं मुञ्चति निर्घृणः । सप्तमश्चापराधोऽयं मम देवि न रोचते ॥
ममैवार्चनकाले तु पुरीषं यस्तु मुञ्चति । अष्टमश्चापराधोऽयं ममात्र तु न रोचते ॥
मदीयार्चनकाले तु यो हि वाचा प्रभाषते । नवमं चापराधं तु न क्षमामि वसुन्धरे ॥
यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपश्यति । दशमश्चापराधोऽयं मम देवि न रोचते ॥
परिधायैकवस्त्रं च यस्तु वै मां प्रपद्यते । एकादशोऽपराधस्तु मम विप्रियकारणम् ॥
क्रुद्धस्तु यस्तु कर्माणि कुरुते कर्मकारकः । द्वादशं चापराधं तु कल्पयामि वसुन्धरे ॥
अकर्मण्यानि पुष्पाणि यस्तु मामुपकल्पयेत् । त्रयोदशापराधं तु न क्षमामि वसुन्धरे ॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनाधिगच्छति । चतुर्दशापराधं तं कल्पयामि वसुन्धरे ॥
अन्धकारे तु मां देवि यः स्पृशेत कदाचन । पञ्चदशापराधं तु कल्पयामि वसुन्धरे ॥
यस्तु कृष्णेन वस्त्रेण मम कर्माणि कारयेत् । षोडशं चापराधं तु कल्पयामि न संशयः ॥
स्ववासमवधून्वन्वै यस्तु मय्युपकल्पयेत् । सप्तदशापराधं तं कल्पयामि वसुन्धरे ॥
श्वानं स्पृष्ट्वा ममान्यद्वा यो दद्यान्मम माधवि । अष्टादशापराधं तं कल्पयामि न संशयः ॥
वाराहं यस्तु मांसं वै भक्षयित्वा प्रपद्यते । एकोनविंशापराधं प्रतिजानामि माधवि ॥
जालपादं समश्नन्वै यस्तु मामुपसर्पति । अपराधं विंशतितमं कल्पयामि वसुन्धरे ॥
स्पृष्ट्वा वै दीपकं यस्तु यो मां स्पृशति माधवि । एकविंशापराधं तं कल्पयामि वसुन्धरे ॥
श्मशानं यस्तु वै गत्वा मम चैवाभिगच्छति । द्वाविंशमपराधं तु तमहं चोपकल्पये ॥
पिण्याकं भक्षयित्वा तु मम चैवोपचक्रमेत् । त्रयोविंशापराधं तं नरो मम च कल्पयेत् ॥
मज्जनानवजानन्यो मां तु पश्यति माधवि । चतुर्विंशापराधं तं कल्पयामि वसुन्धरे ॥
एकहस्तप्रणामं च यः करोति च भामिनि । पञ्चविंशापराधं तं न क्षमामि वसुन्धरे ॥
परप्रापणकेनैव यस्तु मामभिगच्छति । सप्तविंशापराधं तं न क्षमामि वसुन्धरे ॥
न चाग्रं ये तु व्रीहीणामदत्वाऽपीह भुञ्जते । अष्टविंशापराधं तं कल्पयामि वसुन्धरे ॥
अदत्वा सुमनो यो वै धूपं मे दातुमिच्छति । एकोनत्रिंशापराधं कल्पयामि वसुन्धरे ॥
सोपानत्कस्तु यो मर्त्यो मामेवमुपसर्पति । अपराधमिमं त्रिंशं कल्पयामि वसुन्धरे ॥
भेरीमताडयित्वा तु यस्तु मां प्रतिबोधति । एकत्रिंशापराधं तु कल्पयामि वसुन्धरे ॥
अजीर्णरसमाविष्टो यस्तु मामुपसर्पति । महापराधं तं विद्याद्द्वात्रिंशमिह चोत्तमम् ॥ इति ।

एवमेतान्यन्यानि चानर्हतानिमित्तानि परिहरतस्तत्संभवे च सानुतापं यथोचितप्रायश्चित्तमनुतिष्ठत इह समाराधनाधिकारित्वम् । एवं जात्यादिनिबन्धनाधिकारिविशेषोऽपि शास्त्रेषु श्रूयते । यथोक्तं **श्रीसात्त्वते**—

* अष्टाङ्गयोगसिद्धानां हृद्यागनिरतात्मनाम् । योगिनामधिकारस्स्यादेकस्मिन् हृदयेशये ॥
व्यामिश्रयागमुक्तानां विप्राणां वेदवेदिनाम् । समन्त्रे तु चतुर्व्यूहे त्वधिकारो न चान्यथा ॥
त्रयाणां क्षत्रियादीनां प्रपन्नानां च तत्त्वतः । अमन्त्रमधिकारस्तु चातुर्व्यूहक्रियाक्रमे ॥
सक्रिये मन्त्रचक्रे तु वैभवेऽपि विवेकिनाम् । ममतासन्निरस्तानां स्वकर्मनिरतात्मनाम् ॥
कर्मवाङ्मानसैस्सम्यग्भक्तानां परमेश्वरे । चतुर्णामधिकारो वै प्राप्ते दीक्षाक्रमे सति ॥
एवं संप्रतिपन्नानां मन्त्रपूर्वं यथास्थितम् । विधानमेकमूर्तीयं समाकर्णय सांप्रतम् ॥ इति ।

जयादिषु चासादिभेदो द्रष्टव्यः । सर्वेषामन्ततो गत्वा भगवत्प्राप्तिस्समाना, विकलानामपि भागवतानाम् ॥

स्वाध्यायविधिः ॥ अथ स्वाध्यायं व्याख्यास्यामः—चतुर्थे काले संप्राप्ते स्वावगतवेदवाक्यार्थव्यक्तीकरणाय विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्करनपरावरतत्त्वयाथार्थ्यानां मनुपराशरपाराशर्यशुकशौनकादीनां **महर्षीणां** प्रबन्धान् [वेदोपबृंहणानि] श्रवणमननजपादिभिरभ्यसेत् । तदिदमुक्तं **व्यासेन** तत्कालकृत्यम् *इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् इति । **दक्षेण** तु * इतिहासपुराणाभ्यां षष्ठं सप्तममभ्यसेत् इति । एवं *भुक्तोपस्थाय चादित्यं पुराणानि सदा पठेत् इत्यादिकं च द्रष्टव्यम् । उपबृंहणनिरपेक्षस्योपबृंहणीयवेदभागजप एव युक्तः, तत्रापि साक्षाद्भगवत्प्रतिपादक एव भागो जप्य इति श्रीशाण्डिल्यस्मृत्यादिषूक्तम् । संग्रहरुचीनां महामन्त्रमक्तानां च सर्वसारभूतव्यापकमन्त्रजपोपदेशः । जपादिकालेऽपि गुर्वादिषु मौनवर्जनं सर्वत्रोक्तम् । आह चैवं **बोधायनः**—

* जपमध्ये गुरुर्वाऽपि वैष्णवो यस्समागतः । संभाषणादिपूजां तु तस्य कृत्वाऽनुमान्य च ॥
अनुज्ञाप्य ततः कुर्याज्जपशेषं समाहितः । सर्वस्य प्रभवो यस्माद्विष्णुपादाश्रया नराः ॥
तन्मूलतः क्रियास्सर्वास्सफलास्तु भवन्ति हि ॥ इति ।

तत्र मौनमन्त्रार्थचिन्तनादिनियमास्तत्रतत्र ग्राह्याः । शिष्यगुरुस्सब्रह्मचारि[शिष्ट]श्रेयोर्थिभिरनसूयुभिर्वीतरागैस्सह वादः । * बोधयन्तः परस्परमित्युक्तसंवादोऽपि तत्त्वनिर्णयफलत्वाविशेषादितिहासपुराणादिवत्स्वाध्यायकाल एव प्रवर्तनीयः । स्मरन्ति चाभिगमनान्तःपातिनि पूर्वयामस्वाध्याये * जपेदध्यापयेच्छिष्यान् धारयेच्च विचारयेत् इति, * विचारोऽभ्यसनं जपः इति च । उक्तं चानुयागविधानानन्तरं **श्रीसात्त्वते** * समाचम्य पुनर्यायात्प्रयतो भगवद्गृहम् इत्युक्त्वा * मनोबुद्ध्यभिमानेन सह न्यस्य धरातले इत्यादिना अष्टाङ्गप्रणामं च विधाय,

* अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतो हरेः । आगमाध्ययनं कुर्यात्तद्वाक्यार्थविचारणम् ॥ इति ।

तदिह भगवत्प्रीणनस्वचित्तरञ्जकेतिहासपुराणस्तोत्रनिगमान्तद्वयव्यापकमन्त्रादीनां श्रवणमननप्रवचनजपादयो वादसंवादादयश्च यौगिकज्ञानप्रदीपस्नेहायमानाः,

* पारुष्यमनृतं चैव पैशुन्यं चैव सर्वतः । अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥

इत्यादिना दर्शितविविधवाचिकपापोदयप्रतिबन्धिनश्च सर्वे व्यापारा यथासंभवं संभूय वा पृथग्भूय वा स्वाध्यायो भवन्ति । शमाद्युपयुक्तशब्दशीलनं कुर्यादिति स्वाध्यायसारः । उक्तं हि **महाभारते**—

* यच्छ्रुतं न विरागाय न धर्माय न शान्तये । सुबद्धमपि शब्देन काकवाशितमेव तत् ॥ इति ।

* न शब्दशास्त्राभिरतस्य मोक्षः इत्यादि च । अथ लोहितायति भास्करे यथासूत्रं सायंसन्ध्योपासनं, सायंहोमः, पुनर्यथाशक्ति भगवदभिगमनं, हविर्निवेदनपूर्वकं भोजनम्, केनचिन्निमित्तेन विलुप्ते भोजने प्राणाग्निहोत्रमन्त्रजपः, ततश्च रात्रियोग्यस्वाध्यायो योगश्चेति क्रमः । तत्र प्रमाणानि * उभे सन्ध्ये भगवानभिगन्तव्यः, * नानिवेद्य हरेः किञ्चित्समश्नीयात्तु पावनम्,

* सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् । नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥

* प्राणाग्निहोत्रमन्त्रांश्च विलुप्ते भोजने जपेत् । प्रदोषपश्चिमौ यामौ वेदाभ्यासेन यापयेत् ॥

* तत्पूर्वापररात्रेषु युञ्जानः इत्यादीनि । अनन्यप्रयोजनाधिकारिकर्तव्यपूर्वयामस्वाध्यायश्च त्रयोदश्यां प्रदोषाख्यकाले वर्जनीयः । यथा संगृहीतं **कालविधाने**—

* विषुवायनद्वितयपञ्चदशीप्रथमाष्टमीषु कलानाथतिथौ । रजनीमुखे च मदनाधिपतेर्विधिराह नाध्ययनकर्म नृणाम् ॥ इति । **स्मृत्यर्णवे** चैतदुपात्तम्—

* मितसन्ध्यस्त्रयोदश्यामस्मरन्नात्मनो हितम् । अह्नोऽष्टमांशसंयुक्तं रात्र्यर्धं मौनमाचरेत् ॥ इति ।

एवं तत्कालनियतसावित्रीजपहोमादिव्यतिरिक्तदशायां प्रदोषाख्यकाले मौनविधानान्मन्त्रजपादिकमपि वर्जनीयम् । यथोक्तं **कृष्णमन्त्रकल्पे** * जपेन्न सन्ध्याकालेषु प्रदोषेष्वशुभेषु च इति । विषुवायनादिषु तु स्वाध्यायमात्रं निषिध्यते, मन्त्रजपादिकं तु विधीयते । उक्तञ्चाष्टाक्षरजपस्य नित्यत्वं **बोधायनेन**—

* एवं गुरोस्समारभ्य मन्त्रानुष्ठानमाचरेत् । अष्टाक्षरं जपेद्विद्वान्नित्यमष्टसहस्रकम् ॥
अजप्त्वाऽष्टाक्षरं मन्त्रं नाहमश्नामि किञ्चन । यावज्जीवं जपामीति पश्चादहरहर्जपेत् ॥
अष्टाक्षरजपो यस्य नित्यो नैमित्तिकोऽपि वा । काम्यो वाऽपि भवेत्तस्य नित्या देवार्चना स्मृता ॥ इति ।

नचात्र मौनविधिकाले भगवद्धर्मविच्छेदः, तदानीं यथाविहितमौनानुष्ठानस्यैव भगवत्सेवारूपत्वात् । प्रवृत्तिविषया निवृत्तिविषया वा भगवदाज्ञैव सर्वदा अनुवर्तनीयेत्यच्छिद्रानुष्ठानसिद्धिः ।

यद्यपि चातत्क्रियस्य प्रदोषे हरिदर्शनादिकं प्रतिषिध्यते, तच्चानुपालितं परमैकान्तिभिर्भाष्यकारादिभिः ; तथाऽपि स्वगृहार्चायास्तत्क्रियात्वात्तदनुज्ञा । उक्तं चैवं बोधायनीये **पुराणसारसमुच्चये**—

* आस्थानस्थस्सदा सेव्यो विमानस्थस्तु कालतः । स्वगृहे सर्वदा सेव्यो मध्यरात्रं विना प्रभुः ॥ इति ।

मध्यरात्रेऽप्युपरागादिनिमित्तविशेषसंभवे स्नानादिपूर्वकभगवत्सेवाजपादिकमवश्यकर्तव्यतया विधीयत इति न विरोधः । एतौ च स्वाध्याययोगौ आह्निकानुयागात्पूर्वमेव केषुचित्संहिताविशेषेषु समाहृत्योपदिश्यते, यथा संगृहीतं **नारायणमुनिभिः**—

* पुनः प्रणम्य देवेशमह्नो भागे तुरीयके । द्विषडष्टषडर्णादिमन्त्रेषु स्वानुसंहितम् ॥
विशेषेण जपेन्मन्त्रमष्टोत्तरसहस्रकम् । अष्टोत्तरशतं वाऽपि यथाशक्ति दशावरम् ॥
गुर्वादींश्च नमस्कृत्य बीजशक्त्यादिकं तथा । मन्त्रनाथं प्रणम्येशमापादादवलोकयन् ॥
जप्त्वा च सुचिरं योगमास्थाय प्रणमेद्धरिम् । स्वधामनीत्या देवेशं प्रह्वस्सपरिवारकम् ॥

तत्राद्यादिभिरभ्यर्च्य रक्षां कृत्वाऽस्त्रनायकैः । पुनःपुनः प्रणम्याथ होमाद्यं संविधाय च ॥
अनुयागं ततः कृत्वा कृतकृत्यो भवेन्नरः ॥ इति ।

अयमेव क्रमो विस्तरेणोक्तस्तद्गुरुभिर्वह्निवंशेश्वरैः । तथा हि—

* प्राप्तमन्त्रश्चतुर्थांशं स्वाध्यायार्थमुदीरितम् । विज्ञाप्य विष्णवे तस्मै लब्धानुज्ञस्ततोऽपि च ॥
वाह्यार्थादखिलाच्चेतस्समाहृत्येन्द्रियैस्सह । जपन्नष्टाक्षरं मन्त्रं प्राणायामपुरस्सरम् ॥
प्रयतः परया भक्त्या पूर्वमेव समाहितः । कराङ्गुलिशरीरेषु न्यासान् कृत्वा यथोदितान् ॥
गुरुं मन्त्रमृषिं छन्दो देवताश्च यथाक्रमम् । शक्तिं बीजं च शिरसा प्रणमेद्देवमादितः ॥
इदं गुरुभ्यः पूर्वेभ्यः क्रियते शिरसा नमः । मन्त्रज्ञानप्रदातृभ्यस्तद्गुरुभ्योऽपि सांप्रतम् ॥
नमस्ते मन्त्रराजाय नमस्तेऽष्टाक्षरात्मने । नमस्ते चेतनाधार परब्रह्माभिधायिने ॥
स्थित्वाऽन्तर्हृदये सर्वानात्मनस्सन्नियच्छते । ऋषयेऽष्टाक्षरस्यान्तर्यामिणे हरये नमः ॥
अष्टाक्षरमहामन्त्रवर्णसङ्ख्याभिधायिनीम् । छन्दश्च देवीं गायत्रीं शिरसा प्रणमाम्यहम् ॥
मन्त्रस्य देवतां चापि परमात्मानमव्ययम् । नारायणं परं ब्रह्म नतोऽस्मि शिरसा हरिम् ॥
मन्त्रशक्तिस्थिता यस्मिन्नाश्रितेष्टार्थदायिनी । पदं नारायणायेति शक्तिं तां प्रणतोऽस्म्यहम् ॥
अकारादुत्थितं बी[जात्]जं वासुदेवाभिधायिनः । तद्बीजमस्य प्रभवं प्रणवं प्रणतोऽस्म्यहम् ॥
प्रणम्य चैवं गुर्वादीन् गन्धाद्यैरभिपूज्य च । अनिशं भगवद्बिम्बमापीठादवलोकयन् ॥
जपेदष्टाक्षरं मन्त्रं तदर्थमनुचिन्तयन् । अष्टोत्तरसहस्रं वा शतं वा दश वोत्सुकः ॥
जपान्ते मनसा ध्यात्वा यथोक्ताकृतिमच्युतम् । सपत्नीकं सानुयात्रं सद्वारपगणेश्वरम् ॥
कृत्वैवं मनसा योगं सुचिरं हृष्टमानसः । उत्थाय च ततो योगाद्दण्डवत्प्रणिपत्य च ॥
स्तुत्वा च बहुभिः स्तोत्रैः कृत्वा चापि प्रदक्षिणम् । स्थित्वाऽग्रे देवदेवस्य कृत्वा मूर्ध्नि स्वमञ्जलिम् ॥
जितं त इति मन्त्रेण तं देवं शरणं व्रजेत् ॥
ततस्तस्मै प्रपन्नाय दत्ते तेनाभये सति । निर्भयस्सर्वभूतेभ्यो भवेन्निर्वृतमानसः ॥
कर्मण्यवसिते तस्मिन्दुर्लभे दुष्करेऽपि च । अर्घ्यं दत्त्वा यथापूर्वं स्वं चात्मानं निवेद्य च ॥
स्वनिवेदनमन्त्रेण दासशिष्यात्मजात्मनः । सोदकं स्वेन शिरसा भक्तिनिष्ठः परात्मने ॥
निदध्यात्स्वं च कर्तृत्वं तस्मिन्नेव परात्मनि । क्षामयेच्चापराधान्स्वाञ्ज्ञानाज्ञानोपपादितान् ॥
असज्ज्ञानविषक्तांश्च क्रियमाणानहर्निशम् । अज्ञानतोऽप्यशक्त्या वाऽप्यालस्याद्दुष्टभावतः ॥
कृतापराधं कृपया क्षन्तुमर्हसि मां विभो । अज्ञानादथवा ज्ञानादशुभं यत्कृतं मया ॥
क्षन्तव्यं तदशेषेण दास्येन च गृहाण माम् । उपचारापदेशेन कृतानहरहर्मया ॥
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम । शिरसा प्रार्थितेनैवं प्रसन्नेन परात्मना ॥
क्षान्तसर्वापचारेण करुणामृतवर्षिणा । वात्सल्यौदार्यसौशील्याद्यनन्तगुणशालिना ॥
अशरण्यशरण्येन कृपया परया स्वया । सस्मितालोकमधुरमाहूयाद्भुतया गिरा ॥
दत्तं तत्पदयोर्युग्मं स्वयमेव स्वमूर्धनि । बह्मसाधारणस्पर्शनिहताशेषकल्मषः ॥

आसीत सुचिरं तस्य पुरतः परया मुदा । समुत्थाय ततस्तस्मै भूयोभूयः प्रणम्य च ॥
स्मारयित्वा स्वकं धाम तद्यानाय प्रणम्य च । दत्वाऽथ पादुकायुग्मं तत्र देवं समानयेत् ॥
सपत्नीकं सानुयात्रं सद्वारपगणेश्वरम् । ततस्तदर्हविन्यासं सूपधानं स्वलङ्कृतम् ॥
अनन्तभोगशयनमधिरूढे परात्मनि । आसीनयोस्तदा देव्योर्देवपार्श्वे यथातथम् ॥
आसीनेषु यथाभागं सेनान्यादिषु सर्वतः । अथार्घ्यपाद्याचमनताम्बूलादि यथोचितम् ॥
देवाय देवीयुक्ताय सानुगाय निवेद्य च । प्रणम्य दण्डवद्भूम्यां भूयोभूयः पुरो हरेः ॥
अनुयागादिकं चाथ चिकीर्षन्नाह्निकं विधिम् । दत्तानुज्ञः परेणापि गमनायात्मनो बहिः ॥
निर्गन्तुकामो निक्षिप्य देवं दौवारिकादिषु । सभयस्सानुतापश्च चण्डादीन् द्वारपालकान् ॥
कुमुदादीन् गणेशांश्च चक्रादीन्यायुधानि च । गरुडं च विशेषेण शेषं शेषाशनं तथा ॥
प्रणम्य स्मारयेद्देवं सस्नेहादरसाध्वसः । निक्षिपन् जीवितमिव न्यस्यन्निव महानिधिम् ॥
निधित्सन्निव चक्षुस्त्वमर्पयन्निव कल्पकम् । सर्वे भवन्तस्सगणास्सन्नद्धास्सर्वदिक्ष्वपि ॥
सावधानाश्च तिष्ठन्तु निक्षिपामि भवत्स्वहम् । मम नाथं मम गुरुं पितरं मातरं च मे ॥
हरिं श्रियं भुवं चापि तान् पालयत सर्वतः । यथा निक्षिपरूपं मे सन्दर्शयत सर्वदा ॥
भक्तश्शरणं लब्ध्वा व्रजामि गतसाध्वसः । इति विज्ञाप्य तान् पश्चात्प्रार्थयेत हरिं गिरा ॥
ननु देव त्वमेवैकस्सस्थावरचरं जगत् । ब्रह्मादि स्थावरान्तं च परिपासि बिभर्षि च ॥
संहरिष्यसि चाप्यन्ते रूपैस्तैस्तैर्यथेप्सितैः । केन त्वं पाल्यसे देव केन वा त्वं विहन्यसे ॥
अतस्त्वमेव त्वां देव्यौ चण्डादीन् पालकानपि । मां च मामकमप्येतत्सर्वं गृहमशेषतः ॥
पालयित्वा स्वसङ्कल्पमात्रेण मधुसूदन । त्वां मया त्वयि निक्षिप्तं विश्वस्तेनार्थिकल्पक ॥
आगताय यथाकालं सर्वं मे दातुमर्हसि । इति विज्ञाप्य पुरतो दण्डवत्प्रणिपत्य च ॥
होमं पितृक्रियां पश्चादनुयागादिकं च यत् । सर्वमावेद्य तेनैव नियुक्तस्तच्चिकीर्षया ॥
वीक्षमाणस्तमेवैनं चक्षुषा स्निग्धपक्ष्मणा । मूर्ध्नि न्यस्ताञ्जलिपुटो विनिष्क्रम्य शनैश्शनैः ॥
बध्वा कवाटयुगलं रक्षां कृत्वा प्रणम्य च । होमाद्यमनुयागान्तं वैधं कर्म समाचरेत् ॥ इति ।

एवमष्टाङ्गयजनमध्य एव स्वाध्याययोगयोस्समाहृत्योपदेशात्तत्तद्देशकालावस्थामेदेन यथाक्रमानुष्ठानाशक्तौ विध्यादेरपि यथोचितकालान्तरे समाहरणं रहस्यान्नायादिषु प्रपञ्चितमिहाविरुद्धमिति सूचितम् । स्वाध्याययोगयोश्च यथावसरं मात्रया सर्वत्रानुप्रवेशः प्रागेव दर्शितः ॥ इति व्याख्यातः स्वाध्यायः ॥

योगविधिः ॥ अथ योगं व्याख्यास्यामः—तत्रानन्यप्रयोजनाधिकर्तव्यो योगविशेषः, * ईदृशः परमात्माऽयम् इत्यादिना श्रीशाण्डिल्यस्मृत्युक्तः प्रागेव दर्शितः । श्रीसात्त्वतादुपदिष्टयोगप्रकाराणामविरोधश्च सम्यक् समर्थितः । तत्र परात्मतत्त्वमाह भगवान्—

* आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः । तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥

इत्यमेव तदनन्यप्रयोजनस्य योगः, क्षुद्रयोगान्तराणि तु सिद्धयन्तरार्थान्येव योगशास्त्रेषु पठ्यन्ते । यद्यप्यनन्यप्रयो-

जनस्यापि तत्रतत्रोक्तन्यासविद्याभेदात्स्वनिष्ठाविषयतत्तत्संहितोक्तप्रक्रियाभेदाच्चानुसन्धेयरूपगुणविभूत्यादिकं नाना भवति, तथाऽपि स्वरूपनिरूपकानन्दत्वादिपञ्चकनिरूपितस्वरूपे सर्वशेषिणि परस्मिन् ब्रह्मणि श्रीमति पुरुषोत्तमे तत्तद्विद्योदित-रूपादिविशेषविशिष्टे मनोवृत्तिनैरन्तर्यरूपत्वं योगस्याविशिष्टम् । अत एव—

* पृथग्भूतेषु दृष्टेषु चतुर्ष्वाश्रमकर्मसु । समाधौ योगमेवैकं शाण्डिल्यस्समनुक्तवान् ॥

इति महाभारतवचनं सुसङ्गतं भवति । अत्र तु भाष्यकाराद्युक्तनित्यगद्यस्तोत्रादिषु यथानुसन्धानमुक्तम्, तथैव तत्सं-प्रदायनिष्ठैरनुसन्धेयम् । श्रीवैकुण्ठगद्ये अनन्यगतेः प्रपत्तिमेवापवर्गोपायं विधाय तस्यैव क्षुधितस्यारोगस्य क्षीरान्नभोजन-वत्स्वयंप्रयोजनतयैव ध्यानयोगविशेषस्तदनुबन्ध्यनुसन्धानविशेषाश्च प्रपञ्चिताः । तथा हि—* स्वाधीनत्रिविधचेतनाचेतन-स्वरूपस्थितिप्रवृत्तिभेदम् इत्यारभ्य * स्वामित्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य इत्यन्तेन प्राप्यप्रापकभूतशरण्या-ध्यवसायमुक्त्वा अनन्तरम् * ऐकान्तिकात्यन्तिकपरिचर्यैकमनोरथः इति पुरुषार्थविशेषलिप्साया अनन्यप्रयोजनतां प्रति-पाद्य * तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति मन्वानः इत्यनन्योपायतानु-सन्धानमभिधाय *तस्यैव भगवतः इत्यादिना *महाविभूतेः श्रीमतः इत्यन्तेन शरण्यत्वाद्युपयुक्ताकारानभिधाय *चरणार-विन्दयुगलमनन्यात्मसञ्जीवनेन तद्गतसर्वभावेन शरणमनुव्रजेत् इति शरणवरणमेव मोक्षोपायत्वेन विधाय * ततश्च प्रत्यहमात्मोज्जीवनायैवमनुस्मरेत् इति स्वतन्त्रप्रपत्तिनिष्ठस्यैव प्रत्यहं प्राणरक्षणार्थं भोजनादिन्यायेन आत्मोज्जीवनार्थ-मनुस्मरणविशेषं विधाय विस्तरेण प्राप्यान्तर्गतं परमपदं वर्णयित्वा * महति दिव्ययोगपर्यङ्केऽनन्तभोगिनि श्रीमद्वैकुण्ठै-श्वर्यादिदिव्यलोकमात्मकान्त्या विश्वमाप्याययन्त्या शेषशेषाशनादि सर्वं परिजनं भगवतस्तत्तदवस्थोचितपरिचर्यायामाज्ञाप-यन्त्या शीलरूपगुणविलासादिभिरात्मानुरूपया श्रिया सहासीनम् इत्यादिना * भगवन्तं नारायणं ध्यानयोगेन दृष्ट्वा इत्यन्तेन परिपूर्णध्यानमुक्त्वा पुनः * भगवत इत्यारभ्य * भगवत्परिचर्यायामाशां वर्धयित्वा इत्यन्तेन * मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत्, * कदा द्रक्ष्यति मां पतिः इत्यादिवत् पुरुषार्थप्राप्तिमनोरथप्रकारान् प्रतिपाद्य * तयैवाशया तत्प्रसादोपबृंहितया भगवदभिगमनं दूरात्सपरिवारस्य भगवतो नारायणस्य * समस्तपरिवाराय इत्यादिना मन्त्रेण प्रणाम-मुत्थाय पुनःपुनः प्रणामं चाभिधायानन्तरमेवमनुसन्धानमुक्तम् *अत्यन्तसाध्वसविनयावनतो भूत्वा भगवत्पार्षदगणनायकैः द्वारपालकैः कृपया स्नेहगर्भया दृशाऽवलोकितस्सम्यगभिवन्दितैस्तैरेवानुमतो भगवन्तमुपेत्य श्रीमता मूलमन्त्रेण मामै-कान्तिकात्यन्तिकपरिचर्याकरणाय परिगृह्णीष्वेति याचमानः प्रणम्यात्मानं भगवते निवेदयेत्, ततो भगवताऽमर्यादशील-वताऽतिप्रेमान्वितेनावलोकनेन सर्वदेशसर्वकालसर्वावस्थोचितात्यन्तशेषभावाय स्वीकृतोऽनुज्ञातश्चात्यन्तसाध्वसविनयावनतः किङ्कुर्वाणः कृताञ्जलिपुटो भगवन्तमुपासीत, ततश्चानुभूयमानभावविशेषो निरतिशयप्रीत्यात्मीत्याऽन्यत्किञ्चित्कर्तुं द्रष्टुं स्मर्तुमशक्तः पुनरपि शेषभावमेव याचमानो भगवन्तमेवाविच्छिन्नस्नेहोरूपेणावलोकनेनावलोकयन्नासीत, ततो भगवता स्वयमेवात्मसञ्जीवनेनावलोकनेनावलोक्य सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहमात्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवस्सुखमासीत इति । अपिचात्र द्वयव्याख्यानरूपे गद्यत्रये निर्वेद-भूयस्तया कैङ्कर्यत्वरातिशयाच्च प्राभातिकेऽभिगमने मितगद्यानुसन्धानमुचितम् । बृहद्गद्यं तु समाराधनकाले विशेषतो-ऽनुसन्धेयानां स्वरूपरूपगुणविभूतिदेवीभूषणायुधपरिजनपरिच्छददद्वारपालपार्षदादीनां यथावदनुसन्धानहेतुतया यथाव-

स्थितस्वरूपरूपगुणविभूतिलीलोपकरणविस्तारमनुसन्धाय तमेव शरणमुपगच्छेदखिलेत्यादिनेति समाराधनादावन्ते च भाष्यकारैरेव विनियुक्तम् । श्रीवैकुण्ठगद्ये तु–

* यामुनार्यसुधाम्बोधिमवगाह्य यथामति । आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम् ॥

इति प्रारम्भात्पश्चादपि * ध्यानयोगेन दृष्ट्वा इत्यभिधानात् फलरूपविलक्षणानुसन्धानभेदानां विधानात् *अविच्छिन्नस्रोतो रूपेणावलोकनेनावलोकयन्नासीत इति कण्ठोक्तेश्च योगार्थसङ्कल्पिते काले विशेषतोऽनुसन्धेयमिति भाष्यकाराशयः प्रतीयते । न च * भक्तियोगाख्यं रत्नमिति प्रारम्भादुपायभूतभक्तिविषयोऽयं प्रबन्ध इति भ्रमितव्यम् । अनन्यगतिकस्य प्रपत्तेरेवात्रोपायत्वेनोपदेशादुपायभूते फलभूते चानुसन्धानविशेषभक्तियोगशब्दप्रवृत्त्यविरोधाच्च । ततस्सिद्धोपायैरप्ययं योगस्त्वकाले निवेशनीयः । योगकालानियमादैकाग्र्यानुरूपकालान्तरेऽपि कदाचिद्भवति । यामिन्यां भगवद्ध्यानस्य तु पावनत्वातिशयः स्मर्यते–

* उपपातकयुक्तोऽपि महापातकवानपि । यामिन्याः पादमेकं तु ब्रह्मध्यानं समाचरेत् ॥ इति ।

ततश्च–* परसिन्व्यूहाख्ये विभवनिवहेऽर्चावतरणे तथाऽप्यन्तर्यन्तर्यजहृदधिकारादिनियमाः ।
निरुध्य स्वं चित्तं निरवधिमहानन्दजलधौ निरस्तान्यापेक्षानियतसफलं कालमखिलम् ॥

एषु च परव्यूहप्रभृतिषु चित्तालम्बनेषु प्रपत्त्येकनिष्ठा नाथयामुनप्रभृतयः । सुलभतमत्वेन परिपूर्णत्वाविशेषाच्च समाहितचित्तानामप्यनुसन्धेयमर्चावतारमेव चेतसश्शुभाश्रयमालम्बनम् । तत्र यद्यपि शीघ्रसाक्षात्कारहेतुभूतो मन्त्रविशेष उच्छिन्नसंप्रदाय इति वृद्धा विदामासुः, तथाऽपि स्वावगतैर्मन्त्रविशेषैरमन्त्रकं वा यथासंभवं यथासंप्रदायं तदनुसन्धानमप्यवर्जनीयमेव । * सर्वातिशायि षाड्गुण्यं संस्थितं मन्त्रबिम्बयोः इत्यादिना तस्यैव पूर्णत्वं सिद्धम् । श्रीवैखानसेऽपि तदनुसन्धानस्यैव मुख्यत्वं प्रतिपादितम्, यथोक्तं क्रियाधिकारे *मानसी होमपूजा च बेरपूजेति सा त्रिधा इत्युपक्रम्य–

* यथोपयोगशक्यत्वात्कर्तुं पुष्पादिपूजनम् । चक्षुषः प्रीतिकरणान्मनसो हृदयस्य च ॥
प्रीत्या संजायते भक्तिर्भक्तस्य सुलभो हरिः । तस्मात्त्रयाणामेतेषां बेरपूजा विशिष्यते ॥ इति ।

आह च भगवान् शौनकः–

* सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम् । कृत्वाऽऽत्मनः प्रीतिकरीं सुवर्णरजतादिभिः ॥
तामर्चयेत्तां प्रणमेत्तां यजेत्तां विचिन्तयेत् । विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम् ॥ इति ।

अतो यत्र क्वचिद्भगवद्रूपे यथाशक्ति निरन्तरानुसन्धानं नाथमुनिप्रभृतिवत्सिद्धोपायैरपि निवेशनीयम् । एवं तु सात्त्वतोक्तसन्ध्यादिनिद्रान्तकर्मसंग्रहः–

* प्राप्तेऽथ सन्ध्यासमये स्नात्वा वा जघनावधि । क्षालयित्वा ततः कुर्याद्वाससां परिवर्तनम् ॥
अर्चयित्वाऽर्घ्यपुष्पाद्यैर्देवमग्निं यजेत्तथा । यथाशक्ति जपं कुर्यादासाद्य शयनं ततः ॥
समाधाय बहिर्देवं निरालम्बपदे स्थितम् । अप्रमत्तेन वैतावदनिरुद्धेन चेतसा ।
सह तेनैव वै निद्रा यावदभ्येति साम्प्रतम् ॥ इति ।

अन्ते त्वेवमुक्तम्–

* ततः पश्चिमसन्ध्यायां प्राप्तायां तत्र चोदितम् । जपहोमादिकं सर्वं कृत्वा परमपूरुषम् ॥

अर्चयित्वा यथान्यायं यथापूर्वमशेषतः । भुक्त्वा संविश्य शयने समुत्थाय महानिशि ॥
आचम्य प्रयतो भूत्वा ध्यात्वा परमपूरुषम् । योगासने समासीनो युञ्जीतात्मानमात्मनि ॥
यथोक्तेन प्रकारेण यथाशक्ति चतुर्मुख । संहारक्रममाश्रित्य तत्त्वान्यात्मनि संहरेत् ॥
आत्मानं चापि हृत्पद्मे परमात्मनि विष्ठिते । संहरेदुत्थितो योगात्स्वापं क्लेशापहं व्रजेत् ॥
इत्येष कथितो ब्रह्मन् योगकालश्च पञ्चमः ॥ इति ।

नचैतन्निरन्तरभगवदनुसन्धानं सनकादिसाध्यमस्मदादिभिर्दुश्शकमिति मत्वोदासितव्यम् । यथारोग्यं भोजनवद्यथाशक्ति तदास्वादस्यापरित्याज्यत्वात्; उक्तं च श्रीमत्प्रह्लादेन—

* आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम् । पापक्षयश्च भवति स्मरतां तमहर्निशम् ॥ इत्यादि ।

अतो यथा वा—

* द्रष्टुमिच्छामि ते रूपमैश्वरं परमेश्वर । मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ॥
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥

इत्येतावद्वादिनोऽर्जुनस्य भगवान्विश्वरूपं स्वात्मानं दर्शयामास, एवमत्रापि स्वानुभवसापेक्षान् यथामनोरथं परमोदारो भगवानेव स्वात्मानमनुभावयति । अतो निर्व्यलम्बेन भगवदनुभवानन्दसन्दोहेन कृतार्थोऽस्मीति मन्यमानः करण-कलेबरानुगुण्यावधि सुखमासीनो विविधव्यापारायत्तस्य करिष्यमाणयोगोपकरणभूतस्य करणवर्गस्य विश्रान्तये स्वयमुपनमन्तीं निद्रां न निवारयेत्; * युक्तस्वप्नावबोधस्य इति स्मरणात् । निद्रैव तदा कैङ्कर्यं सुषुप्तौ च, * तदभावो नाडीषु तच्छ्रुतेरात्मनि च इति शारीरकसूत्रोक्तेन प्रासादस्वट्टार्पयङ्कन्यायेन नाडीपुरीतद्ब्रह्मसु स्वात्मनश्शयनमनुसन्धाय लक्ष्मी-परिष्वङ्गव्यञ्जकेन माधवशब्देन भगवन्तं सङ्कीर्तयन् * यथा प्रियया सम्परिष्वक्तः इत्यारभ्य * प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् इत्याम्नातप्रक्रियया परमात्मनि परिष्वङ्गविशेषं च परामृश्य * यत्करोषि इत्यादि प्रस्थानेन निद्रामपि समाराधनत्वेन मन्यमानस्संशुद्धशुष्कपादश्शास्त्रोक्तप्रकारेण समुचिते स्थाने शास्त्रीये शयनीये चोदितदिक्शिराश्शुद्धत्वानमादिनियमयुक्तः श्रीशाण्डिल्यस्मृत्याद्युक्तप्रकारेण स्वाराध्यस्य भगवतश्चरणारविन्दयोर्विन्यस्तशिरस्कः * शयनासनयानादौ इत्यादिविधानात्तमेव माधवं हृदये ध्यायन् तमेव कीर्तयन् सुखं शयीत । यदा यदा निद्राविच्छेदस्तदातदा तमेव ध्यायेत् सङ्कीर्तयेच्च तानि नामानि पुनरानिद्रागमात्; सोऽयं प्रदोषप्रभृति ब्राह्ममुहूर्तावधि सारस्वत-स्रोतस इव विश्रमान्तरितस्य योगस्यावसरः, अवसरान्तरेऽप्यैकाग्र्यसंभवे कर्मान्तरसङ्कोचेन स्वीकार्य इति प्रागेवोक्तम् । एवं वर्तमानस्य सर्वः कालोऽप्यवन्ध्यो भवति, सर्वे व्यापाराः कैङ्कर्यरूपा भवन्ति, सर्वोऽप्यानुषङ्गिको भोगः क्षीराखादन्यायेन स्वामिभोगशेषभूतो भवतीति भगवत्कैङ्कर्यरतेः परमैकान्तिनोऽनादिमायानिशावसाने अनन्तमोक्षवासर-प्रारम्भे च प्रीतिपूर्वदास्थितोऽयमायुश्शेषकाल इति । स चायमौत्सर्गिकः क्रम उक्तः, अपवादे तु व्युत्क्रमविलोपादिप्रवृत्तिः, यथा द्युप्वासदिवसेषु एकादश्यादिषु अनुयागस्य लोपो भवति । सप्ताङ्गमेव च तदानीं यजनम्, अत एव चानुयागस्यानियतत्वव्यञ्जनाय भाष्यकाराणां तदनुक्तिः, तदर्थः कालश्च तस्मिन् दिवसे स्वाध्याययोगादिष्वन्यतमेन यथोचितं यापनीयः । कदाचिद्वादश्यादिषु प्रभाते पारणं भवति । तदर्थं पूर्वं यजने कृते स्वकालप्राप्तं माध्यन्दिनयजनं सप्ताङ्गं तिष्ठति, वैशेषिकार्चनेषु बहुष्वेकदिवसे क्रमात्संभवत्सु अङ्गगुणविरोधे च तादर्थ्यादितिन्यायेन उपादानादिप्रवृत्तिर्लक्षितः

प्रतिषिद्धयते, तत्र पूर्वदिवसार्जितैर्द्रव्यैः परोपनीतैर्वा तत्तत्क्रियानिष्पत्तिः, यजनं च सर्वस्मिन् काले ह्यभ्यनुज्ञातम्, खिन्नवृत्तेरन्यपरस्यातुरस्य कलह्याद्युपद्रुतस्य च भोजनात्पूर्वं यदा कदाचिल्लब्धावसरे भवति, अत्यन्ताशक्तौ तु ऋत्विक् पुत्रशिष्यादिभिस्त्वसमैरन्यैः कार्यते, तत्र त्वयमपवादः स्मर्यते—

* विधुरो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः । परार्थं कर्म कुर्वाणाः पातयन्ति पतन्ति च ॥ इति ।

ईषच्छक्तौ तु सङ्कुचितयजनम्, एकोपचारमारभ्य तत्तच्छक्त्याद्यनुसारेण सहस्रोपचारान्तविधानात् * विषुवायनद्वितय-पञ्चदशी इत्यादिना प्रतिषिद्धेष्ववसरेषु वेदाभ्यासरूपस्वाध्यायो लुप्यते तदा तत्कालमप्यनन्यपरस्य प्रधानतमो योगस्स-मास्कन्दति, त्रयोदशीनिशामुखे च तस्याप्यपवादं केचिदिच्छन्ति, तदाऽपि सर्वक्रियान्तरनिरोधपूर्वकं मौनव्रतमनुष्ठीयमानं सात्त्विकत्यागप्रक्रियया स्वकीयेन मया स्वप्रीत्यर्थं भगवतैव कार्यत इत्यनुसन्धेयम् । तस्मात् * आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः इत्यारभ्य * ध्येयो नारायणस्सदा इत्यादिभिरुक्तम् भगवदनुस्मरणं सर्वत्रैव सावकाशम्, अविच्छिन्नस्मृतिसन्ततिरूपत्वादिकं तु मात्रया भज्यते । एवं मृतकसूतकाद्यप्रायत्यकालेष्वपि प्रयतकर्तव्यशास्त्रीयसर्वकर्म-विलोपः, तदानीं तु मौनावसरव्यतिरिक्तः कालस्सङ्कीर्तनेन स्मरणेन च यापनीयः । * सततं कीर्तयन्तो माम्, * तस्मा-त्सर्वेषु कालेषु मामनुस्मर इत्यादेस्तदानीं निरपवादत्वात्; प्रत्युत—

* चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत् । नाशौचं कीर्तने तस्य पवित्रं भगवान् हरिः ॥
नाशौचं कीर्तने तस्य स्मरणे वाऽपि विद्यते । अशुचिश्चाप्यनाचारस्सर्वावस्थां गतोऽपि वा ॥
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

इत्यादिभिः कीर्तनस्मरणयोश्चाशौचकालेऽप्यनुष्ठेयत्वोक्तेः ।

किञ्च— * सङ्कीर्तयेज्जगन्नाथं वेदं वाऽपि समीरयेत् । ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥

इत्यादिभिर्देशकालावस्थाधिकार्याद्यविशेषेण [विहितम्] वेदाभ्यासध्यानयजनार्चनस्थाने तुल्यफलतया सङ्कीर्तनस्य विहित-त्वात् । प्रपन्नाभिमतभगवत्प्रीतेश्च तावतैव सुलभत्वाच्च सर्वदेशसर्वकालाधिका[र्य]र्याद्यनुगुणं सङ्कीर्तनमेव कर्मान्तरलोपकाले समुचितम्, विशेषतः कालधर्मत्वाच्च कलौ युगे प्रयतस्याप्यन्याशक्तस्य तदेव युक्तम् । यथाऽऽह भगवान् शौनकः— * कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् इति । अत एवाभिगमनस्य न कदाचिदपि लोपः । अप्रयतस्यापि दूरावस्थि-तस्य सङ्कीर्तनप्रणामाञ्जलिबन्धभाषास्तोत्रलौकिकवाक्यमात्रपूर्वकप्रपदनैरपि तत्स्वरूपनिष्पत्तेः । ननु भागवतस्य सदाचार्य-सकाशात्समधिगतवेदान्तस्य ब्रह्मवित्त्वेन सद्यश्शौचविधानादनुवृत्ताशौचासिद्धेः कथं कर्मविलोपः ? मैवम्; रहस्याम्नाय-निष्ठानामेव तच्छास्त्रागृह्योक्तप्रक्रियया तदभावात्, मन्त्रसिद्धान्तादिनिष्ठानां तु दीक्षितानामपि प्रक्रान्तमहोत्सवाधि-कारिष्वेव तन्निषेधः । यद्यपि ब्रह्मवित्त्वं तेषामप्यविशिष्टम्, तथाऽपि कृतादिषु त्रिषु युगेषु तेषामपि सद्यश्शौचम् । * वृत्तस्वाध्यायसंपन्नस्याघसङ्कोचनं तथा इति घटिकाव्यवस्थावचनेन कलियुगे वृत्तादिनिमित्ताघसङ्कोचप्रतिषेधात् । न च वाच्यम्—

* एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः । त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैः ॥

इत्यादिपूर्वस्याग्निवेदादिनिमित्ताघसङ्कोचस्यायं प्रतिषेधः, नतु ब्रह्मवित्त्वनिमित्तस्येति; न च ब्रह्मविच्छब्देन प्रव्रजित-

ग्रहणम्, ब्रह्मविदां प्रव्रजितानां च सद्यश्शौचानर्हत्वेन पृथगुपादानात्; मैवम्, यथोक्तं ब्रह्मविदामपि वृत्तगुणशब्देन ग्रहणसंभवे सङ्कोचकाभावात्, तर्हि * सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा इति सहपठितानां सत्रिप्रभृतीनामपि सत्रव्रत-ब्रह्मचर्यदानादिगुणनिमित्तमघसङ्कोचनमिति तेषामप्येतदन्तिमयुगे न स्यादिति चेन्न; अनुष्ठानतस्तद्व्यवस्थापनात् अद्यापि हि सद्यश्शौचं व्रतादिषु शिष्टैरनुष्ठीयते, न शारीराधिगमसिद्धब्रह्मवेदनवतामपि गृहस्थानां क्वचित्तदनुष्ठानं दृश्यते, अनन्त-बाह्यकुदृष्टिसिद्धान्तव्याकुलतत्त्वाध्यवसाये रागादिदोषान्धकारबहुले बहुलनिशीथद्योतकल्पगुणलवे कलिविलुप्तस्वधर्मवर्गे-ऽस्मिन् काले ब्रह्मविदामसंभवादेव तथाऽनुष्ठानादर्शनमिति चेत्तर्हि कस्येदानीं ब्रह्मविदस्सद्यश्शौचेन कर्मलोपं परिजिहीर्षसि?

* कलौ कृतयुगं तस्य कलिस्तस्य कृते युगे। यस्य चेतसि गोविन्दो हृदये यस्य नाच्युतः॥

इतिन्यायेन यः कश्चिद्यत्रकुत्रचिद्ब्रह्मविदपि संभवतीति चेत्, सत्यम्; स तावद्व्यासागस्त्यभृगुपतिविभीषणप्रभृतिभिस्त्वया-ऽप्यदृष्टे क्वचित्प्रदेशे वर्तमानस्स्वान्तरात्मसाक्षिकं तथाऽनुतिष्ठतु नाम, तदन्येषां तु भागवतमर्यादाप्रविष्टानां परिपूर्णब्रह्म-वित्त्वाभावेऽपि ह्युपनीतावस्थत्वमात्रेण द्विजत्ववत्संस्कारविशेषादियोगमात्रेण भागवतत्वमात्रं सिद्धमिति। तावन्मात्रशालिनां तन्निबन्धनाघसङ्कोचे प्रमाणं क्वचिन्न पश्यामः; अत एव हि तेषामपि पौष्करादिष्वाशौचमनुमतम्। यत्तु तत्रत्यसंस्कार-विशेषतः कस्यचिदाशौचकालेऽपि मानसयागमात्रमनुमन्यते, तद्गायत्रीस्मरणपूर्वकजलाञ्जलिप्रक्षेपन्यायेन नेतव्यम्। विष्ण्वर्चनमपि हि प्रत्यक्षश्रुतिसिद्धं नित्यं चेति प्रागेवोक्तम्; मानसयागमात्राभ्यनुज्ञानेन शेषनिषेधश्च तत्रापि सिद्ध इति; तदेवं स्वतःप्राप्तिमपवादप्रकारं च यथावदधिगम्यायं धर्मोऽनुष्ठेयः।

* एकं यदि भवेच्छास्त्रं ज्ञानं निस्संशयं भवेत्। बहुत्वादिह शास्त्राणां ज्ञानतत्त्वं सुदुर्लभम्॥

इत्यादिभिर्यथात्म्येनातिविततगहनगम्भीरविविधविकल्पबहुतरशास्त्रसंक्षोभजनितदिङ्मोहशान्तये सर्वैस्सङ्कलनमात्रमिह कृतम्। अनेनैव प्रस्थानेन प्रशमितदिङ्मोहैस्समर्थैराप्रभातादनुष्ठेयानि सर्वाणि कर्माणि प्रत्येकं बहुतरेतिकर्तव्यतामुख्यानुकल्प-विकल्पापवादादिविधायकतत्तच्छास्त्रेषु यथावदधिगम्यानुष्ठेयानि।

हन्त तर्हि दुर्ज्ञानेऽतिदुष्करे अस्मिन् प्रस्थाने को नामाधिकारी स्यादिति चेन्मैवं भेतव्यम्—

* न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम्। सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधिः॥

* नित्यं विष्ण्वर्चनं परम् इत्यादिभिस्सर्वोत्तरत्वेन नित्यत्वेन च श्रुतेऽस्मिन् धर्मे अष्टवर्षस्य ब्रह्मचर्यधर्म इव यथाकथञ्चि-दनुप्रवेशस्य युक्तत्वात्।

* स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्। नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति॥

* जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते। इत्यादिन्यायेन भगवतैवाश्रितवत्सलेन शेषपूरणात्॥

स्मरन्ति च—* सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्। बद्धः परिकरस्तेन मोक्षाय गमनं प्रति॥

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा। वैकुण्ठनामग्रहणमशेषाघविनाशनम्॥

सकृत्स्मृतोऽपि गोविन्दो नृणां जन्मशतैश्चितम्। पापराशिं दहत्याशु तूलराशिमिवानलः॥

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः॥

दुर्गसंसारकान्तारमपारमभिधावताम्। एकः कृष्णनमस्कारो मुक्तितीरस्य देशिकः॥

एकोऽपि कृष्णे सुकृतप्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामो न पुनर्भवाय ॥

उपोषितः पोषितो वा दुष्टो वा प्रणतोऽपि वा । प्रसह्य हरते पापं को न सेवेद्धरिं ततः ॥
कोऽतिभारो हरेर्नाम्नः जिह्वायाः परिकीर्तने । आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम् ॥
पापक्षयश्च भवति स्मरतां तमहर्निशम् । किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥
उदकेनाप्यलाभे तु द्रव्याणां पूजितः प्रभुः । अन्यत्पूर्णादपां कुम्भादन्यत्पादावनेजनात् ॥
अन्यत्कुशलसंप्रश्नान्न चेच्छति जनार्दनः ।

पत्रेषु पुष्पेषु फलेषु तोयेष्वकृतलभ्येषु सदैव सत्सु ।
भक्त्येकलभ्ये पुरुषे पुराणे मुक्त्यै किमर्थं क्रियते न यत्नः ॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तमहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥
अप्वप्युपहृतं भक्तैर्मम तोषाय कल्पते ॥ इत्यादि ।

उक्तं च नारदीये श्रीमदष्टाक्षरब्रह्मविद्यायां षोडशोपचारोक्त्यनन्तरम्—

* एवमष्टाक्षरेणैव सर्वत्रार्चनकर्मणि । उपचारानिमान्कुर्वन् भक्तियुक्तेन चेतसा ॥
तुलसीपद्मपालाशसुवर्णकुसुमैश्शुभैः । पूजयित्वा जगन्नाथं फलमानन्त्यमश्नुते ॥
गन्धैः पुष्पैः फलैर्मूलैः पत्रैर्वारिभिरेव वा । नित्यं भगवतः पूजां यथासंभवमाचरेत् ॥
समस्तलोकनाथस्य देवदेवस्य शार्ङ्गिणः । साक्षाद्भगवतो विष्णोः पूजनं जन्मनः फलम् ॥ इति ।

एतेन भगवत्पूजनस्य नित्यत्वं सुकरत्वं स्वयंप्रयोजनत्वं च व्यक्तमुक्तम् । यत्पुनरिदं विकल्पसमाराधनादौ प्रत्यवायादिकमुच्यते—

* सर्पं दृष्ट्वा यथा कायं कम्पते च मुहुर्मुहुः । अमन्त्रमर्चकं दृष्ट्वा तथा भीतो जनार्दनः ॥
* गन्धहीने भयोत्पत्तिः पुष्पहीने तु सङ्कुलम् । निवेद्यहीने दुर्भिक्षं मरणं मन्त्रहीनके ॥
अमन्त्रमविधिं चैवमकाले चैव पूजनम् । नित्यं राष्ट्रभयं कुर्यात्तद्ग्रामं तु विनश्यति ॥
अमन्त्रेणैव यत्पूज्यं पिशाचासुरवर्धनम् । व्याधितम्करदोषाश्च अनावृष्टिर्महद्भयम् ॥ इत्यादि ।

तदेतत्सर्वं राजराष्ट्रादिसमृद्ध्यर्थं काम्याराधनेष्वन्येष्वपि संपूर्णानुष्ठानशक्तस्य संपूर्णद्रव्यस्य लोभादिभिस्तत्तद्धानौ मुख्यकल्पसमर्थस्यानुकल्पेन प्रवृत्तौ च दोषमाह, नतु नित्ये कर्मणि निष्कामस्य यथाशक्तिकरणे । स्मरन्ति च मन्वादयः—

* वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः । तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् ॥ इत्यादि ।

अस्ति चान्यो भगवद्धर्मस्य विशेषः, यमधिकृत्यायं सात्वतसंग्रहः—

* सकृत् ह्यहं च सप्ताहं पक्षं मासमथापि वा । यो यजेद्विधिनाऽनेन भक्तिश्रद्धासमन्वितः ॥
सोऽपि यात्यत्परं स्थानं किंपुनर्योगसंस्थितः । यावज्जीवावधिं कालं बद्धकक्ष्यो महामतिः ॥ इति ।

*—

पि भीतो यः कुर्यान्मतिमान्नरः । सुकृती किंपुनर्यावज्जीवमेवं समाचरेत् ॥ इति ।

उक्तं चाहिर्बुध्न्येन—

* समाराधयतस्त्वेवमेकाहमपि नारद । मुक्तिः करस्थिता तस्य सर्वे कामाश्च किंपुनः ॥ इति ।

तदिदं फलार्थिविषयम् ; अन्येषां तु स्वयंप्रयोजनत्वं प्रागेवं स्थापितम् ; तदभिप्रायेणोक्तं वङ्गिर्वंशेश्वरैः—

* एवमेकदिनं वाऽथ द्विदिनं त्रिदिनं तु वा । मासं वा वत्सरं वाऽपि यावज्जीवितमेव वा ॥
वर्तेत भक्त्या परया वैष्णवस्सुचिरं सुखम् । प्रारब्धे मध्यतो विघ्नैर्विच्छिन्नेऽप्यत्र कर्मणि ॥
नानर्थो न च नैष्फल्यं न कृतांशस्य संक्षयः । प्रारब्धेष्वसमाप्तेषु विच्छिन्नेष्वन्यकर्मसु ॥
भवत्येवैतदखिलं वैदिकेष्वितरेष्वपि । कृतस्वल्पांशकोऽप्यस्य स्थित्वा सुचिरमक्षयम् ॥
त्रायेतैव स्वकर्तारं स्वशक्त्या भवभीतितः । श्रद्धावानधिकार्यस्मिन्नुक्ते कर्मणि वैष्णवे ॥
नापरः कुलवृत्तादिगुणः कर्तृविशेषतः । येनकेनचिदेषित्रा भाव्यमस्मिंस्तु कर्मणि ॥
तस्मिन्सुदुर्लभे लब्धे कृपैवानन्तरक्रिया । ज्ञानकर्मतपोयोगयुक्तानप्यधिकारिणः ॥
श्रद्धाहानिः परो दोषश्च्यावयेदधिकारतः । स्वोक्तासूपनिषत्स्वेवमुक्तवानुत्तमः पुमान् ॥
श्रद्धाश्रद्धे समुद्दिश्य तस्माच्छ्रद्धा परो गुणः । नेह कालक्रियाकर्तृद्रव्यदिग्देशसंश्रिताः ॥
ऐषितारं तदिच्छां वा विहायास्ति नियन्त्रणा । निषेधाविषयीभावादृते नैवापरो गुणः ॥
प्रीतिहेतुः परेशस्य स्वार्चनाङ्गेषु वस्तुषु । अत एवार्चनाङ्गानि द्रव्याणि गणयन् स्वयम् ॥
प्राह पत्रादिमात्राणि जातिवर्णादिभिर्विना । अहो हरिं ब्रुवन्नेवं मुक्तिमेत्यप्यहो अहो ॥
अहो अहो सुलभता कृपा चेयमहो अहो । अस्त्येव निर्मलं तोयमयत्नसुलभं भुवि ॥
दृश्यन्ते च शुभा दूर्वास्सुलभास्सर्वदिक्ष्वपि । अस्ति जिह्वा हरिं स्तोतुमात्मीयैवास्य मध्यगा ॥
स्वकरावापि कर्मण्यौ ध्यातुमस्त्येव मानसम् । अतो न हानिर्मन्त्राणां यागविघ्नकरी हरेः ॥
मासम्प्रैषा हि संपूर्णा पत्राद्येकैकमेव तु । अज्ञानादथवा ज्ञानादपराधेषु सत्स्वपि ॥
प्रायश्चित्तं क्षमस्वेति प्रार्थनैकैव केवलम् । सत्यसङ्कल्पसंयुक्ते सर्वज्ञे सर्वशक्तिके ॥
नित्यनिर्दोषनिस्सीममहाविभवयोगिनि । स्वाधीनत्रिविधाशेषचिदचिद्वस्तुशेषिणि ॥
निर्मलानन्दविज्ञाननिधावुदधिशायिनि । स्वसङ्कल्पकृताशेषजगज्जन्मलयस्थितौ ॥
अर्चनादिष्वनर्हत्वान्न कश्चिन्नापराध्यति । अतोऽनङ्गीकृताशेषकर्तृदोषविमर्शया ॥
कृपयैवास्य देवस्य सर्वोऽप्यर्हति तत्क्रियाम् ॥ इति ।

अत्र तत्क्रियामिति सामान्यनिर्देशाद्यथाधिकारं साक्षात्समाराधनं परैस्तत्प्रवर्तनं समाराधनापेक्षितप्रदानेन शुश्रूषणमित्यादिकं सर्वं संगृहीतम् । उक्तन्यायेन न्यूनाधिकोपचारादिकमपि सर्वमुपपादितं मन्तव्यम् । अपि च अप्रयत्नलभ्यैरान्तरपुष्पादिभिरपि भगवदुपासनं स्मर्यते—

* अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः । सर्वभूतदया पुष्पं क्षमा पुष्पं विशेषतः ॥
ज्ञानं पुष्पं तपः पुष्पं ध्यानं पुष्पं तु सप्तमम् । सत्यमेवाष्टमं पुष्पं तेन तुष्यति केशवः ॥ इति ।

आह च भगवान् शौनकः—

* रागाद्यपेतं हृदयं वागदुष्टाऽनृतादिना । हिंसादिरहितः कायः केशवाराधनं त्रयम् ॥ इति ।

प्रत्येकं संपूर्णसमाराधनमित्यर्थः । अतो यथाधिकारं यथाशक्यमत्र श्रद्दधानैर्दयार्द्रहृदयदेशिकोपदेशपूर्वकमनुप्रविश्य देशकालदशाद्यानुगुण्येनाच्छिद्रं यथाक्रमं समाहृत्य वा अनुतिष्ठद्भिरनन्यप्रयोजनैः परमैकान्तिभिरनवधिकपरमपुरुषचरण-परिचर्यारूपमपवर्गैश्वर्यं यथारोग्यं यथायोग्यं चात्रैव भोक्तव्यमिति सिद्धम् ॥

सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणं कुञ्चयित्वा जानुन्याधाय सव्येतरमितरभुजं नागभोगे निधाय ।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शङ्खचक्रे देवोभूषादिजुष्टो जनयतु जगतां शर्म वैकुण्ठनाथः ॥

विदितनिगमसीम्ना वेङ्कटेशेन तत्तद्बहुसमयसमक्षं बद्धजैत्रध्वजेन ।
प्रतिपदमवधानं पुष्यतां सा[त्वता]त्त्विकानां परिषदि विहितेयं पञ्चकालस्य रक्षा ॥

कण्डूलाः कलिकज्जलाविलधियः केचिज्जडा निष्फलं विक्रोशन्तु वियच्चरैस्सह बलिव्यत्यासवित्रासिभिः ।
मोघाशाऽपि तथाविधेष्वितथेष्वार्तेष्वमोघा भृशं मुक्तैश्वर्यमहाफलोद्गमधियां चर्येयमाचर्यताम् ॥

त्यक्तं शाल्मलेपकप्रभृतिभिः किं तेन तस्यागतं प्रद्विष्टं जगदेकचक्षुषि दिवाभीतैस्ततस्तस्य किम् ।
दुग्धं पित्तहतैर्जुगुप्सितमतस्तस्यापि किं दुर्जनैस्त्यक्तं चेदपि मत्कृतं सुरुचिरं किं देशिकैस्त्यज्यते ॥

इति श्रीपाञ्चरात्ररक्षायां नित्यव्याख्यानाख्यस्तृतीयोऽधिकारः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
॥ श्रीपाञ्चरात्ररक्षा समाप्ता ॥

** रक्षात्रयमिदं मन्त्रसाङ्घट्टाप्रहारिभिः । कवितार्किकसिंहाख्यगोविन्दार्यैरुपाहृतम् ।
श्रीकोशमवलम्ब्यैव पर्यशोधि यथामति । शोधनीयेष्वथांशेषु प्रमाणं पण्डितोत्तमाः ॥

श्रीरस्तु ।

श्रीमते रामानुजाय नमः ॥

[इत उपरितना लघीयांसः प्रबन्धा न देशिकचरणकृतय इति भूयसां बहुविदां प्रवादः । तृप्तिकराश्च पाठा नोपलभ्यन्ते । उच्चावचा अशुद्धयश्च हृदयं व्यथयन्ति । अथापि गृहीतग्राहिणां केषाञ्चिदुपच्छन्दनाय एतेऽत्र प्रकाश्यन्ते । निर्धारणे प्रामाणिकाः प्रमाणम् ।]

॥ यज्ञोपवीतप्रतिष्ठा ॥

काले स्वाध्याययोग्ये शुभकृति दिवसे श्रीपतेर्मन्दिरादौ कृत्वा स्नानाद्यनुष्ठां शुचिचरणकरो द्विस्तथाऽऽचम्य हृष्टः ।
दर्भेषु प्रागुदग्वोपविशतु शुचिभिर्निर्मितं यज्ञसूत्रं तारेणामन्त्र्य चापस्त्विति तु तदभिपिञ्चेज्जपेत्सप्ततारम् ॥ १ ॥
भूरादिव्याहृतीभिस्त्रिगुणितमथ तत् स्वेन मानेन तारव्याहृद्भिः प्रोक्ष्य कूर्चोपरि निहितमधो मार्जयेद्दर्भपुञ्जैः ।
आपोहिष्ठादिमन्त्रैरथ च तदनुवर्त्योर्ध्वदक्षं कराभ्यां तारेण व्याहृतीभिस्त्रिगुणितमथ साक्तिमन्त्रेण भूयः ॥ २ ॥
प्राणानां ग्रन्थिमन्त्रग्रथितमुपरि यद्वामहस्तं कराभ्यां मूर्ध्नि भूर्भुवस्स्वस्त्विति च तदनुवर्त्योत्सृजेद्दर्भवृष्टम् ।
दर्भास्तीर्णे प्रदेशे तदुपरि च कुशौ प्रास्य हस्ताग्रतालं त्रिः कृत्वा नावपश्येद्भममथ च तरौ याज्ञिये तं निबध्य ॥ ३ ॥
उक्त्वा मन्त्रं पितृभ्यो नम इति कुटिलं तारतो व्याहृतीभिः चर्जूकृत्य स्वहस्ते त्रिगुणितमथ चावेष्टय मध्यं शिखाभ्याम् ।
ताभ्यामावेष्टय सूत्रत्रयमपि कलयेद्ग्रन्थिकं ग्रन्थिमन्त्रात् अध्वर्योः शुक्तशाखाविनिहितमथ तत् स्थण्डिले व्रीहियुक्ते ॥४॥
न्यस्ते ताम्रादिपात्रे शुभजलभरिते सूत्रसंवेष्टिते सत्कूर्चे तारादिमन्त्रैर्निहितमुपचितं गन्धपुष्पाक्षतार्घैः ।
आयम्यामून् करिष्ये सकलशुभकृते यज्ञसूत्रप्रतिष्ठां संकल्प्येत्थं स्पृशंस्तत्कलयतु सुमना व्याहृतीभिः प्रतिष्ठाम् ॥ ५ ॥
व्यस्ताभिस्संहताभिस्तदनु तदनुगावर्तिताभिः क्रमाद्भूरग्निं पर्यायभेदैरभिजपतु पुनः पञ्चभूतासुकाद्यान् ।
यद्वा तारान्निनागाशशिपितृविधयो वायुसूर्यादिशेषाः तन्तूनां देवतास्युर्विधिहरिगिरिशा ग्रन्थिदेवाः क्रमेण ॥ ६ ॥
श्रीशो यज्ञोपवीतस्य च खलु तदिमानाह्वयेत्तत्र कुम्भे गन्धाद्यैरर्घ्यपाद्यादिभिरपि कलयेदर्चनं वीटिकान्तैः ।
सत्कारैरर्चयित्वा सुविहितमथ तदर्शयित्वा सवित्रे त्वासत्येनेति चर्म्मिश्चतस्रमिरथ तन्निक्षिपेत्पूर्णकुम्भे ॥ ७ ॥
तत्स्पृष्ट्वाऽष्टोत्तरं वै शतमनुकलयेत्सूर्यगायत्रजापं तत्स्वाचान्तस्समन्त्रं हरिदिगभिमुखो धारयेत्सामुयामः ।
पादौ प्रक्षाल्य पाणी शुचिचरणकरो द्विस्तथाऽऽचम्य दर्भेष्वासीनोऽमूस्त्रियम्य स्पृशतु जपतु च त्र्यम्बकं यज्ञसूत्रम् ॥ ८ ॥
सर्षिच्छन्दोऽधिदैवं मनुमथ सुजपन् धारयेद्यज्ञसूत्रं प्रत्येकं मन्त्र आचान्तिरथ बहुषु चेन्नाशुचिर्नावतिष्ठेत् ।
वेदान्ताचार्य इत्थं विविधमुनिमतां यज्ञसूत्रप्रतिष्ठां व्यातानीद्वैदिकाध्वस्थितिविहितमतिः वैधनिष्ठां गरिष्ठाम् । ९ ॥

॥ इति यज्ञोपवीतप्रतिष्ठा समाप्ता ॥